THE

HOWKHAMBA SÂNSKRIT SERIES

A

OLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

न्यायसुधा ।

तन्त्रवार्तिक टीका भट्टसोमेश्वरविरचिता ।

NYÂYASUDHÂ,

A COMMENTARY ON TANTRAVÂRTIKA,

BY

PANDIT SÔMESHWARA BHATTA.

EDITED BY

PANDIT MUKUNDA SHÂSTRI,

of the Government Sanskrit-College, Benares.

FASCICULUS I.

BLISHED AND SOLD BY THE SECRETARY,

CHOWKHAMBÂ SANSKRIT BOOK-DEPOT:

BENARES.

AGENT:—OTTO HARRASSOWITZ, LEIPZIG:

Printed By Hari Das Gupta Proprietor

AT THE VIDYA VILASA PRESS.

BENARES.

1901.

THE

CHOWKHAMBÂ SANSKṚIT SERIE

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WO

Nos. 45. 46. 47. 49. 50. 52. 53. 55. 56. 57. 60
71. 73, 107. 121. & 133.

न्यायसुधा ।

तन्त्रवार्तिक टीका भट्टसोमेश्वरविरचिता ।

NYÂYASUDHÂ,

A COMMENTARY ON TANTRAVÂRTIKA

BY

PAṆḌIT SOMEŚWARA BHAṬṬA,

EDITED BY

PAṆḌIT MUKUNDA SÂSTRÎ,

Professor, Deccan College, Poona.

PUBLISHED AND SOLD BY THE SECRETA

CHOWKHAMBÂ SANSKṚIT BOOK-DEPÔT:

BENARES:

AGENTS:—OTTO HARRASSOWITZ, LEIPZIG:

PAṆḌITA JYESHṬHARÂMA MUKUNDAJÎ, BOMBAY.

PROBSTHAIN & CO., BOOKSELLERS, LONDON,

Printed by Harikrishna Dâs, Proprietor,

AT THE VIDYÂ-VILÂS PRESS.

BENARES.

1909.

भूमिका ।

—:o:—

अलौकिकार्थज्ञापकमेव शास्त्रम् । लोकावगतार्थकथने हि
स्यानुवादकत्वमेव स्यात् । अलौकिकश्चार्थ आत्मैव । तस्य प्रत्यक्ष
माणैः कथमप्यग्राह्यत्वात् । प्रत्यक्षादिप्रमाणानामभावेऽपि सुषु
स्वतः प्रकाशमानेन आत्मनैव प्रकाशितानां तेषां तत्प्रकाशनेऽस्व
त् । तत्त्वमस्यादिमहावाक्यं तु तत्प्रकाशितमपि गुरुमुखाच्छ्रु
धर्मताऽनापन्ननिरपेक्षकैवल्यरूपेणार्थं जीवस्य ग्राहयत् तद्
नं स्वस्य बोधकतां च निवर्तयति । अतो वस्तुतस्तस्य तद्बोधक
जीवाज्ञाननिवर्तकत्वात्तद्बोधकत्वं व्यवह्रियत इत्यतिरोहितं गुरु
एवं च अलौकिकात्मार्थज्ञापकत्वात् साक्षात् शास्त्रत्वं महावा
वेति सिद्धम् । अन्येषां पुनः परम्परया शास्त्रत्वम् । तथाहि ।
क्येन आत्मैक्यज्ञानं शुद्धान्तः करणस्यैव । तथा च श्रीमद्भा

> यर्ह्यब्जनाभचरणैषणयोरुभक्त्या
> चेतोमलानि विधमेद् गुणकर्मजानि ।
> तस्मिन् विशुद्ध उपलभ्यत आत्मतत्त्वं
> साक्षाद्यथाऽमलदृशोः सवितृप्रकाशः ॥ इति ।

संक्षेपशारीरके च,

> पुरुषापराधमलिना धिषणा
> निरवद्यचक्षुरुदयापि यथा ।
> न फलाय भद्रविषया भवति
> श्रुतिसम्भवाऽपि तु तथाऽऽत्मनि धीः ॥ इति ।

अन्तःकरणशुद्धिश्च निष्कामस्वस्ववर्णाश्रमधर्मानुष्ठा
तथा च भगवान् शङ्कराचार्यः अपरोक्षानुभूतौ ।

> स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् ।
> साधनं प्रभवेत् पुंसां वैराग्यादिचतुष्टयम् ॥ इति

फलोद्देशेन विहितानामपि कर्मणां यज्ञेनेत्यादिवाक्यात्
पायां विनियोगोऽस्त्येवेति अन्तःकरणशुद्ध्यर्थत्वं सूपपादम् ।
श्रमधर्माणां यथावद् ज्ञानं च पूर्वमीमांसां विना न सम्भवत

नि तस्या अपि आत्मैक्यज्ञानसाधनान्तःकरणशुद्धिसाधनभूतानां
र्णाश्रमधर्माणां ज्ञापकत्वेन शास्त्रत्वम् । एवमन्यत्राप्यूह्यम् ।

अस्य च जैमिनिप्रोक्तस्य शास्त्रस्यार्थज्ञानं व्याख्यां विना र
मतीनां न भवितुमर्हतीति भगवान् शाबरस्वामी तद्भाष्यं चक
ततस्ततोऽप्यल्पबुद्धीनां तात्पर्यार्थानवगममालोच्य भट्टकुमारि
प्रथमपादं श्लोकरूपेण, ततस्तृतीयाध्यायान्तं सविस्तरं, ततः सम
पर्यन्तं संक्षेपेण व्याचख्यौ । तत्र तत्र पूर्वमीमांसाशास्त्रे प्रवि
बौद्धादीनामाक्षेपांश्च निरास्यत् । स्थलविशेषेषु च भाष्यतो म
च प्रादर्शयत् । द्वयोरपि ग्रन्थयोर्गूढाभिप्रायतामवलोक्य भट्टस
श्वरः राणकेति प्रसिद्धां न्यायसुधां नाम टीकां व्यरचयत् । सा
टीका इदानीं दिदृक्षूणां दुर्लभतामापद्योति महतोद्योगेन त
मठात् बाबूगोविन्ददासमहाशयपुस्तकालयात् अन्यतश्च पुस्त
आहृत्य महता श्रमेण शोधनादिपरिष्कारपूर्वकं बाबूहरिदास
मुद्रिता । तथापि तृतीयाध्यायस्य तृतीयपादे द्वितीयादीनि च
अधिकरणानि न कस्मिंश्चिदपि पुस्तके उपलब्धानीति तावान्
खण्डित एवाभवत् । तृतीयाध्यायस्य चतुर्थः पादः निर्वीतपा
प्रसिद्धः, एतत्पर्यन्तव्याख्यानस्यैव तन्त्रवार्तिकमिति प्रसिद्धि
भिप्रायेण न्यायसुधायां निवीतपादव्याख्यानसमाप्तौ ग्रन्थसमा
तकाः श्लोका उपलभ्यन्ते । टुपटीकाव्याख्यानत्वेन प्रसिद्धं त
च चतुर्थाध्यायत एव प्रवृत्तमित्यतः तृतीयाध्यायान्तं तन्त्रव
मिति गम्यते । राणककारस्तु निवीतपादान्तभागस्यैव विस्तृ
त्तावद्भागस्यैव तन्त्रवार्तिकमिति संज्ञामभिप्रेतवान् अत एव
समाप्तिद्योतकान् श्लोकान् व्यरचयत् । तृतीयाध्यायस्य सप्त
पादयोर्व्याख्यानं च भट्टसोमेश्वरकृतमुपलब्धमिति टुप्टीकाव्य
नेनापि भट्टसोमेश्वरकृतेन भवितव्यम् । श्लोकवार्तिकव्याख्यानं
ट्टसोमेश्वरकृतमस्ति नवेति शास्त्ररसिकैरन्वेषणीयम् । तन्त्रवा
का काचित मैथिलपरितोषमिश्रकृता न्यायसुधातः ऽ
ऽस्तीति श्रूयते । राणकपञ्चिकाव्याख्यानामिका अज्ञभट्टकृता
च किञ्चिदुपलब्धा न पूर्णतयेति ग्रन्थप्रकाशनरसिकैः एतदु
अनुगृह्य प्रकाशनीयम् । १४४० संवत्सरीयप्राचीनपुस्तकाप

नः प्रागेव भट्टसोमेश्वरस्यैतद्ग्रन्थकृतिरित्यवगम्यते । भट्ट-
ोमेश्वरश्च कं देशं स्वजन्मनाऽलंकृतवानिति न निश्चीयते,
रम् अस्य पाण्डित्यं लोकोत्तरमिति तदीयग्रन्थदर्शनाद् व्यक्तं
ीमांसकानाम् । संकर्षकाण्डं च चतुरध्यायीरूपं द्वादशाध्यायीतो-
तिरिक्तं भाट्टचन्द्रिकाव्याख्योपेतमुपलभ्यते । शबरस्वामिकृतं
ाष्यं च तस्यास्तीति भाट्टचन्द्रिकालेखादेवावगतं नास्माभिरद्यापि
द् उपलब्धम् । संकर्षकाण्डस्योल्लेखश्च उत्तरमीमांसायां तृतीया-
ायस्य तृतीयपादे त्रिचत्वारिंशत्तमे सूत्रे श्रीमद्भगवत्पूज्यपादैः
ंकरस्वामिभिः कृतः । अतोऽस्य वार्तिकादिव्याख्यानानुपलब्ध्या
प्रामाणिकत्वं नाशङ्कनीयम् इत्यास्तां प्रासङ्गिकम् । एतत्पुस्तकशोधने
अहं हरिदासगुप्तेन प्रार्थितः यथामति अशोधयम् । तत्र यदि
मात्प्रमादाद्वा संजाता दोषा उपलभ्येरन् तान् संशोध्य अपूर्वग्रन्था-
रसमनुभवन्तु गुणग्राहिणो विद्वांस इति प्रार्थयते—

पूनाडेक्कनकालेजस्थसंस्कृतप्रधानाध्यापकः
आडकरोपाह्वमुकुन्दशास्त्री ।

॥ श्रीगणेशायनमः ॥

॥ तन्त्रवार्त्तिकव्याख्या ॥

॥ न्यायसुधाख्या ॥

॥ श्रीमद्भट्टसोमेश्वरविरचिता ॥

आनन्दात्मनि विश्ववैभवभवाविर्भावसम्भावितः ।
स्वेच्छाधीसचिवः पुरन्दरपुरीशानः स्वयं खेलति ॥
तत्कारुण्यकटाक्षकुड्मलकलाकान्तोदयाघूर्णितः ।
स्वात्मानन्दसुधाम्बुधिर्विजयते धीमन्महेन्द्रात्मजः ॥ १ ॥
यद्यप्यूषरमुसमेत्य गुरुणा बीजम्महेन्द्रात्मजम् ।
क्षेत्रश्चित्रमनेकधोरु फलति प्राप्यात्मनोऽनर्घ्यताम् ॥
यन्मेघस्तुतवाङ्निरन्तरसुधासारैः समासिञ्चितम् ।
सोऽयं सर्वसुहृज्जनार्दनजगज्जीयाज्जगन्मण्डनम् ॥ २ ॥[1]
उमानन्दनमाराध्य शारदामीश्वरं गुरुम् ॥
कृत्स्नशास्त्रप्रसादेन व्याख्यास्ये तन्त्रवार्त्तिकम् ॥ ३ ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतद-
र्थानां तस्मादनित्यमुच्यते ॥ १ ॥

अत्र भाष्यकारेणार्थवादानुदाहृत्य किं कंचिद्धर्मं प्रमिर
उत नेति विचारितम् । तदयुक्तम् । प्रथमपादएव सर्वाप्रामाण्यक
णनिरासेन सर्वात्मकवेदप्रामाण्यस्य सुस्थापितत्वात् । अथ
ध्यसाधनेतिकर्त्तव्यतान्वितभावनाप्रतिपादकपदसमुदायमात्रेण
साधनरूपधर्मप्रमितिसिद्धेस्तदतिरिक्तानां वायुर्क्षेपिष्ठादिपदानां
र्मप्रमितावनुपयोगमाशङ्क्य उपयोगोऽत्रोच्यते । ततो विधिमन्त्र

---

१ द्वमौ श्लौकौ २ पु० न भवतः ।

मधेयान्यप्युदाह्रियेरन् । धर्मप्रमित्यनुत्पादकत्वेन चानुपयोगित्वे अर्थवादादेर्दोषाभावे ऽपि प्रामाण्यायोगादयमेव विचारः प्राग्भावि स्यात् । चोदनासूत्रप्रतिज्ञातप्रामाण्यस्य विधिभागस्य प्रसिद्धधर्मसंयोगस्य परतः प्रामाण्यनिरासेन प्राक् प्रामाण्योक्तावर्थवादादिविचारो ऽप्रतिज्ञातविषयत्वादसङ्गतः स्यादित्याशङ्काचतुष्टयं निराकर्तुमाह (१ पृ०) * सिद्धप्रमाणभावस्येति * तत्रार्थवादार्पितप्राशस्त्यमन्त्रस्मारितनामधेयावच्छिन्नधात्वर्थानुरक्तभावनाविषयप्रवर्त्तकपरत्वेन चोदनाशब्दस्य मन्त्रार्थवादाद्युपेतमहावाक्यविषयत्वाज्जिज्ञासासूत्रेण चाध्ययनविधिदृष्टार्थताप्रतिपादनेन सकलवेदप्रामाण्योपक्षेपादौत्पत्तिकत्वादियुक्तिसाधारण्याच्च वेदमात्रप्रामाण्यस्य प्रतिज्ञापरत्वे ऽपि यागेन स्वर्गमित्यादिसाध्यसाधनभावप्रतिपादकशब्दाभावेन धर्मप्रमित्यशक्तत्वादसम्भवदर्थविषयत्वमाशङ्क्य धर्मप्रमितिशक्तिप्रदर्शनार्थत्वेन चोदनात्वसङ्कीर्त्तनोपपत्तेरुपदेशो हि भवतीति चोदनाख्योपदेशत्वस्य हेतुत्वेन भाष्यकृता व्याख्यातत्वाद्वेदवाक्यानि धर्मे प्रमाणं चोदनात्वादिति प्रतिज्ञासूत्रार्थावधारणादर्थवादादिप्रामाण्यविचारस्य प्रतिज्ञासङ्गतिनिरूपणार्थं वेदग्रहणं, सिद्धे ऽपि सामान्यतो वेदप्रामाण्ये तद्विशेषस्यार्थवादादेस्तदसंभवाशङ्कानिरासार्थत्वेनास्य विचारस्यापौनरुक्त्यनिरूपणार्थं विवेककीर्त्तनम् । सिद्धग्रहणेन चैतद्दर्शयति । प्रमाकरणत्वं प्रमाणत्वम् । न च प्रथमे पादे धर्मप्रमोत्पत्तिसिद्ध्यङ्गीकारेण तत्र वेदस्य करणत्वमुच्यते । प्रत्यक्षादेस्तत्करणत्वनिषेधाच्छब्दस्य च प्रमाणान्तरादृष्टे ऽर्थे करणत्वासिद्धेः तस्मात्कारणाभावेन धर्मप्रमानुत्पत्तिमाशङ्क्य कारणान्तराभावे ऽप्याकाङ्क्षासन्निधियोग्यतासध्रीचीनपदार्थप्रतिपादनद्वारेणापौरुषेयत्वात्प्रमाणान्तरानपेक्षस्यात एव निरस्तदोषाशङ्कस्य वेदस्य कारणत्वोपपत्तेर्धर्मप्रमाख्यकार्यसद्भावस्तत्र प्रतिपादितः, इह त्वर्थवादादिरूपस्य वेदभागस्य तत्राकरणत्वमाशङ्क्य करणत्वं प्रतिपाद्यत इति स्पष्टमेवापौनरुक्त्यं करणनिरूपणार्थे तु प्रथमपादे सत्युप्रमाणभावस्येत्यवक्ष्यत् । धर्मप्रमाया वेदकार्यत्वप्रतिपादनेन त्वर्थात्सद्धदपि वेदस्य करणत्वं संमुग्धरूपेणैव सिध्येत्तत्रार्थवादादिविषरूपेणेति प्रतिपादयितुं सर्वेश इत्युक्तम् । अर्थवादादिप्रामाण्याद्धौ सर्वात्मकवेदप्रामाण्यासिद्धेः संमुग्धाभिप्रायः सर्वशब्दो व्याख्येयः । परतः प्रामाण्यादिद्वारा अप्रामाण्ये सकलस्य वेदस्य निरस्ते त्वर्थवादादीनामबोधकत्वेनाप्रामाण्यमाशङ्क्य धर्मबोधोपयोगित्वमिह प्रतिपाद्यमित्युपयोगशब्देनोक्तम् । अर्थवादोदाहरणं त्वामर्थ-

कथमतदर्थानामित्यविशेषश्रवणात् प्रदर्शनार्थं द्वारप्रविशेषप्रतिप
ने चार्थवादमात्रस्य द्वारविशेषोऽत्राधिकरणे प्रतिपाद्यतइति द
यितुम्। सामान्यतस्तुत्युपयोगित्वासिद्धौ लाक्षणिकस्तुत्यादिद्व
विशेषस्याशक्यकल्पनत्वात्पूर्वं सामान्योपयोगे विचार्ये। सर्वेषा
वोदाहरणत्वमिति विध्यर्थवादमन्त्राणामित्यनेनोक्तम्। सिद्धे
धर्मप्रमाख्ये कार्ये कियतो वेदभागस्य तत्र कारणतेति वि
रावसरो भवतीत्यधुनेत्यनेनोक्तम्। तस्मात्सर्वमदुष्टं श्लोकं व
चष्टे * सामान्येत इति * यद्वा प्रतिपादितमपि सकलवेदप्रामाण्य
मर्थवादादिष्वसम्भवादाक्षिप्येह समाधीयते इति। अन्यथा श्लो
कं व्याचष्टे * अवधृतप्रामाण्यस्येति * अस्मिन्व्याख्याने साम
सर्वशब्दार्थः। विध्यर्थवादमन्त्राणामिति तस्यैव विवरणम्। वि
ध्यादिग्रहणस्योपलक्षणत्वाद्व्याख्याने नामधेयग्रहणम्। इह
द्विपर्वा विचारः। पूर्वं तावदेषामक्रियार्थत्वेनानुपयोगमाशङ्क्याध्य
यनविधिबलाद्विधिना त्वेकवाक्यत्वादिति सूत्रावयवेन तत्तुल्यं
साम्प्रदायिकमित्यनेन च सूत्रेण निराकृतं द्वारासंभवात् पुनरुज्जी
व्यार्थवादानां तावत् द्वारविशेषोऽस्मिन्नधिकरणे चिन्त्यते। त
स्मादनेन सूत्रेण सामान्यविशेषरूपेण पूर्वपक्षद्वयं तन्त्रेणोच्यते
आम्नायस्य तद्भूतानां क्रियार्थेन समाम्नाय इत्यनेन न्यायं
न क्रियार्थत्वावधारणादर्थवादादीनां तदसम्भवादानर्थक्यम्
अथाप्यध्ययनविधिबलादेषां कथं चित्क्रियार्थत्वं कल्पयितुमारभ्य
तथाप्यर्थवादानां तावद् द्वारासम्भवाद् दुःपरिहरमानर्थक्यमिति
भाष्यमप्येवमेव योज्यं सामान्योपयोगप्रतिपादनं विना विशेषोप
योगप्रतिपादनासम्भवस्यातो यावच्छेद एव पुरुषार्थतया सकलमा
म्नानं न प्रतिपादयति तावदप्रमाणमित्यस्य वक्ष्यमाणत्वात्। तद
भिधीयतइत्यादिपूर्वपक्षभाष्यं व्याचष्टे * तत्रेत्यादिना प्रसिद्धमे
वातदर्थत्वमित्यन्तेन * विध्युपयोगस्यापि पूर्वपक्षिणोऽनिष्टत्वात्सा
ध्यसाधनेतिकर्त्तव्यतान्वितभावनाप्रतिपादकपदसमूहपरो विधिश
ब्दः। चोदनोपदेशशब्दावपि तत्परौ पूर्वपक्षी मन्यते। तद्वैतद्ग्र
न्थपर्यालोचनयार्थवादादीनामेवेहोपयोगश्चिन्त्यते। पूर्वं तु विधिग्र
हणं न केवलं विधेरेवोपयोगः किं त्वर्थवादादीनामपीत्येवं ज्ञेयम्
धर्माधर्मोपयोगिविचारोपक्रमाद्धर्माधर्मविषयमेव प्रामाण्यमभिप्रेत
विधिनिषेधयोरेव चोदनोपदेशशब्दाभ्यां धर्माधर्मप्रामाण्याभिधाना
दतद्रूपस्यार्थवादादेर्न तत्र प्रामाण्यं नाप्यन्यत्र तद्भूतानां क्रियार्थेन
समाम्नाय इति सर्वस्य समाम्नायस्य क्रियार्थत्वावधारणेन भूतान्वा

ख्यानपरत्वानभ्युपगमादित्यर्थः । न चैतत्प्रक्रियामात्रं किं तु
ख्यमेवेति यथाक्रमं फक्किकाद्वयेनोक्तम् * उक्तमेवेति * अर्थे
पलब्धे इत्यत्रेत्यर्थः । तदनेन क्रियेत्यादिः समामनन्तीत्यन्तोभाष्
वयवो व्याख्यातः तद्यानीत्यादिभाष्यं व्याख्यातुमतश्चेत्याद्युक्त
कं धर्मं प्रमिमीरन्निति काक्वा सूचितो ऽर्थो यथाश्रुतेत्यादिना
काशितः । एवं सर्वेषामनुपयोगित्वे पूर्वपक्षिते अध्ययनविधिस
र्थोपबृंहितसिद्धान्तसूत्रगततुशब्दोपक्षिप्तं तुल्यं साम्प्रदायिकसूत्रं
पादितपुरुषार्थानुबन्धित्वनिर्वाहाय अध्याहारादिनापि क्रियार्थं
यथासम्भवं कल्प्यमिति पूर्वविचारसिद्धान्तनिरूपणार्थमथोच्ये
त्यादिभाष्यं तद्व्याचष्टे*अथ कया चिदिति* द्वारविशेषानिर्द्धारं
पुनः प्रत्यवस्थानार्थं स कल्प्यमान इत्यादिभाष्यं तद्व्याचष्टे एव
पीत्यादिना ऽनर्थक्यमित्यन्तेन कः कल्प्येतेत्यनेनोक्तमनवधार
दर्शयितुमुद्भाव्यः प्रतिषेधाध्याहारोपन्यासः चिरवृत्तेष्टवियोगद
नादिना रोदनादिशक्यताशङ्कापरिहाराय शास्त्रविरोधोपन्या
रोदनवपोत्खननादिङ्मोहेषु यथाक्रमं मङ्गलाचारात्मरक्षणप्राङ्
खभोजनशास्त्रविरोधः । अश्रुणश्च रजतपरिणामविरुद्धसद्यःशो
दर्शनाद् दृष्टविरोधः पुरास्य सम्वत्सराद् गृहे रोदनं भवतीत्यत्र
लाभावमादिशब्देनाह । धर्माधर्मपरत्वाभावे ऽपि सिद्धार्थकथने
नर्थक्योपसंहारानुपपत्तिमाशङ्क्योक्तम् * यत्तु भूतान्वाख्यानमा
मिति * क्रियतइत्यस्मिन्नर्थे प्रत्ययेन विवक्षिते तदनुग्रहार्थे पा
पचतीतिवत् प्रतिपाद्यतइतिधातुप्रयोगः । वायुक्षेपिष्ठादिवाक्या
स्वार्थसत्यत्वे ऽपि अनुवादमात्रत्वाद् धूमादिवाक्यानां च स्वरू
ऽप्यसत्यत्वादानर्थक्यम् । एवमपि प्राशस्त्यादिलक्षणया क्रियार्थत
सम्भवादानर्थक्योपसंहारो न युक्त इति सिद्धान्तिमतमाशङ्क्याह
* विध्येकवाक्यत्ववशेन चेति * तत्र निरासहेतुमाह * न चेति
लक्षणयैकवाक्यत्वकल्पने अन्योन्याश्रयापत्तेरितिभावः । श्रौत
र्थाभिधानं तु भिन्नवाक्यत्वे ऽप्युपपन्नमित्याह * भिन्नैरपीति * न
निष्प्रयोजनत्वप्रसङ्गभयेन प्रतीयमानविषयत्यागेन विषयान्तरक
ल्पनोचिता प्रत्यक्षादावदर्शनादित्याह * न चेति * ननु अस्तु
माणान्तरे तथाशब्दे तु प्रयोजनवत्त्वाय श्रौतार्थत्यागेनार्थान्तरकल्प
ना युक्ता बहुक्षीरादिवाक्ये तथा दर्शनादित्याशङ्क्याह * सर्वाण्
वेति * सर्वमेव वस्तु स्वविषयएव व्याप्रियते न ह्यूर्णनाभः क
श्चित्पदसूत्रं करोति । लौकिकवाक्ये तु प्रमाणं प्रत्यक्षादेरन्यथात्वक
ल्पनम् । तदभावे तत्रापि श्रौतार्थानतिक्रमादिति भावः । तार्किक

स्थितिपर्यालोचनयापि न प्रयोजनानुसारेण विषयकल्पनं
* तेनैवेति * प्रयोजनवत एव प्रमेयत्वे तस्य हानोपेक्षानुप
णानां वैफल्यं न स्यादित्यर्थः । अप्रतीयमानस्य च प्रयो
ज्ञातुमशक्यत्वात्तद्विषयत्वमशक्यनिरूपणमित्याह * अपि
प्रयोजनानुसारेण प्रमाणविषयकल्पनं निराकृतमुपसंहरति
दिति * प्रमातॄणां प्रयोजनवत्प्रमित्सायामपि प्रमाणशक्
त्प्रमेयानियम इत्याह * न हीति * पुरुषाधीने ऽपि च
व्यापारे प्रमेयानियमात्स्वतन्त्रे वेदे का वार्त्तेत्याह * यत्र
प्रमाणान्तरस्य प्रयोजनवद्विषयत्वानियमे ऽपि वेदस्य
हितोपदेशित्वात् प्रयोजनवद्विषयत्वनियमेन भाव्यमित्य
* न चेति * कुतः प्रथममित्यपेक्षिते परीक्षात इति दर
* अयमेव हीति * शास्त्रत्वस्यैव प्रागसिद्धेरिति भावः ।
दस्य निष्प्रयोजनार्थाभिधायित्वं तथाभूतस्य चादरणीयत्वं
ज्यामित्याह * तच्चेति * उभयत्र यथाक्रमं कारणमाह *
उत्तरकालतामुपपादयति * न हीति * परीक्षणेन[१] हि पु
प्रामाण्यापत्तेर्नाध्येत्रा ऽऽदरमात्रेण प्रयोजनवत्त्वनिश्चय इत
श्चादिति * यथा दर्शपूर्णमासप्रकरणाधीतानामपि पुरु
न्त्रणमन्त्राणां न तादर्थ्यनिश्चय इति दृष्टान्तार्थः । न चा
दिवाक्येषु प्रयोजनवद्विषयत्वदर्शनाद्वेदवाक्यत्वेन वायुक्षेपि
क्येष्वपि तथानुमानं युक्तम् । प्रतीतिविरोधादित्यभिप्राये
रति * तस्मादिति * इह च यानि त्वतिरिक्तार्थान्यर्थवाद
ध्येयानुपातीनीति सर्वेषां पूर्वनिर्दिष्टानां विध्येकवाक्यत्ववश
षामित्यादिभिर्निर्दिष्टप्रतिनिर्दिष्टकैः सर्वनामभिः परामर्शाद्
ग्नोर्देवेत्यादीनामपीत्यत्राप्यादिशब्दस्योपक्रमवशेन सर्वि
त्सदृशविषयत्वे चार्थवादानामपि सर्वेषामपरामर्शापत्तेस्
त्वेन चैतावता ग्रन्थेन सर्वानुपयोगप्रतिपादनपरतयैतद्वा
ख्यातमिति गम्यते । मन्त्रेष्वपि[२]च प्रयोगविध्येकवाक्य

१ अध्ययनोत्तरकालीनपरीक्षणेन अध्येत्रादरमात्रेण वा न प्रयोजनवत्त्वनि
परीक्षणेन हीति प्रथमपक्षे हेतुमाह पुरुषाधीनप्रामाण्यापत्तेरिति द्वितीयपक्षे
तेव दृष्टान्त उक्तः यथा पूषाद्यनुमन्त्राणां दर्शपूर्णमासप्रकरणपाठे सत्यपि न तद
ध्यादरमात्रेण न प्रकरणेन न च लिङ्गनिश्चयादित्यर्थः ।

२ लक्षणया विध्येकवाक्यत्वशङ्कया अर्थवादमात्रपरत्वम्भविष्यतीत्याशङ्क्याह
ति अर्थवादानामिव समभिव्याहारलक्षणैकवाक्यत्वाबाधेऽपि प्रयोगविध्येकवाक्यत्व
चाह प्रयोगेति लिङ्गसमवायाद्विधिमन्त्रनामधेययोः--व्रीहीनवहन्तीत्यादौ अवि
तिहेतोः तुल्यत्वादितिभावः ।

पूर्वसाधनरूपलक्षणा सिद्धान्तिनोऽभिप्रेतैवेति न तद्दर्शनाप्यर्थवादमात्रपरत्वनिश्चयः । व्याख्यातॄणां त्वर्थवादमात्रपरत्वेनेमं ग्रन्थं व्याचक्षाणानामभिप्रायं न विद्मः । इदानीमेतदेव भाष्यमर्थवादमात्रानुपयोगप्रतिपादनपरतया व्याचष्टे * योऽपि चेति * सर्वानुपयोगसाधारणोपपत्त्यनुकर्षणार्थश्चशब्दः । क्लेशेनेत्यप्रतीयमानैकवाक्यताकल्पनेनेत्यर्थः कल्प्येतेत्यनेनैतद्दर्शयति न तावत्स्तुतिनिन्दे एव निरूप्येते गुणदोषवत्त्वप्रतिपादनं हि स्तुतिनिन्दाशब्दाभ्यामभिप्रेतम् । तत्र यदीष्टानिष्टफलत्वं विधिप्रतिषेधविषयत्वं वा विशिष्टेतिकर्त्तव्यताकत्वं[1] वा गुणदोषवत्त्वं तदन्यतः सिद्धत्वान्नार्थवादापेक्षं न च वायुक्षेपिष्ठत्वादेर्गुणदोषवत्त्वं सर्वार्थवादाननुवृत्तेः श्रौतत्वाच्च तस्य लाक्षणिकस्तुतिनिन्दार्थत्वासिद्धान्तभङ्गापत्तेः । न चान्यौ गुणदोषौ निरूप्येते । प्ररोचना[2]द्वेषजनकत्वेन च स्तुतिनिन्दयोरर्थवत्त्वं प्रयोजनवत्त्वमिष्यते तत्र न तावदिच्छानिच्छे तच्छब्दवाच्ये विधिनिषेधावगतेष्टानिष्टफलत्वादेव तत्सिद्धेः । प्रवृत्तिनिवृत्तिप्रतिबन्धकविपरीतत्वेनालस्योत्साहभङ्गोऽपि[3] न । प्रवृत्तिनिवृत्तिहेतुभूतविधिनिषेधसिद्धत्वात्तस्मान्न स्तुतिनिन्दाख्यः कश्चिदर्थः । न ह्यसावर्थवादगम्यो नापि तत्प्रयोजनमिति । एवं सिद्धान्त्यभिमतविधिनिषेधापेक्षितप्ररोचनाद्वेषजनकस्तुतिनिन्दासमर्पकत्वेन विधिनिषेधाभ्यां ग्रहणे निराकृते यदि भावनान्तर्गतिः स्यात् ततस्तद्द्वारेण विधिनिषेधग्रहणात् पुरुषार्थानुबन्धित्वं भवेत्तच्च नाशङ्क्यमेवेति भावः । अगम्यमानैकवाक्यत्वेष्वर्थवादेषु लाक्षणिकस्तुतिनिन्दार्थत्वकल्पने दुःपरिहरमितरेतराश्रयत्वमित्याह * अपि चेति * एतच्च पूर्वं सर्वानर्थक्याय योजितमपीदानीमर्थवादानर्थक्याय प्रकटितमित्यपौनरुक्त्यम् । अर्थवादानर्थक्यमेवोपसंहरति * तस्मादिति * तस्मादनित्यमुच्यते इत्येतत्सूत्रावयवव्याख्यानपरं तस्मादित्यादिभाष्यं स्पष्टत्वान्न व्याख्यातम् । वृत्तिकारान्तरैरेतत्सूत्रमर्थवादाप्रामाण्येन तदेकवाक्यतया साकाङ्क्षत्वाद्विध्युद्देशस्याप्यप्रामाण्यापत्तेः । प्राभाकरैरपि सकलवेदाप्रामाण्यपरतया व्याख्यातं तन्निराकरणार्थं स एष इत्यादिभाष्यम् । तत्र पूर्वपक्षेऽर्थवादानां भिन्नार्थत्वेनैकवाक्यत्वायोगादेकदे-

१ एकत्र प्रयाजादि परत्र खड्गोद्यमादि ।

२ नापि स्तुतिनिन्दयोः प्रयोजनमित्याह प्ररोचनेति ।

३ न गुणदोषवत्त्वमित्यनुषङ्गः ।

शशब्दो न युक्त इत्याशङ्क्याह * स एष इति * व्याख्यानान्तरमाह * अथ वेति * एतच्च विभवार्थे न निर्द्धारणइति षष्ठीसमासनिषेधात्सम्बन्धमात्रषष्ठ्यां च मध्यशब्दानुपपत्तेः। कर्मधारये ऽप्येकदेशशब्दस्योपसर्ज्जनत्वेन पूर्वनिपातापातादवयववाचित्वेन च कतिपयार्थत्वाभावात् । नन्वित्यादिवृत्तिकारान्तराभिप्रायविवरणार्थं भाष्यं तस्योत्तरं नैवमित्यादि तस्यार्थः न तावत्सर्वो विध्युद्देशो ऽर्थवादापेक्षः शुद्धस्यापि वसन्ताय कपिञ्जलानालभतइत्यादेर्दर्शनात्कश्चिदेव तु वायव्यं श्वेतमालभेतेत्यादिस्तदपेक्षस्तस्यापि विधिविधेयसम्बन्धरूपावान्तरवाक्यार्थे ऽर्थवादपदनिरपेक्षस्य स्तुतिस्तुत्यसम्बन्धात्मके महावाक्यार्थरूपे ऽर्थान्तरएव तदपेक्षा ततश्चैकदेशाक्षेपरूप एव तेषामाक्षेपः । अर्थवादाप्रामाण्येन महावाक्यार्थविवक्षायामप्यवान्तरवाक्यार्थविवक्षा दुर्निवारेतिभावः । तत्र कश्चिदिति काक्का सूचितमर्थं दर्शयति * तत्रेति * भाष्यार्थं व्याचष्टे * यान्यपीति * विधिप्रत्ययशून्येषु तर्हि समस्ताक्षेपः स्यादित्याशङ्क्य सिद्धसाध्यतामाह * यानि त्विति * यद्वा ऽनेनावृत्त्या खण्डशो भाष्यं व्याख्यायते कश्चित्पदसमूहो नैवं भवति नाप्रमाणत्वेन शङ्क्यो भवतीत्यर्थः । कश्चित्त्वर्थवादपदैः संयुज्यार्थान्तरे वर्त्तते तत्र तान्यर्थवादपदानि केवलान्याक्षिप्यन्ते । पुनस्तानीत्यादि शुद्धार्थवादविषयत्वेनैव व्याख्यातं यानि केवलान्यर्थवादपदानि तच्छब्दनिर्द्दिष्टानि तानि समस्तान्याक्षिप्यन्तइति ।

शास्त्रदृष्टविरोधाच्च २

अत्र भाष्यकारेण स्तेनं मन इत्याद्युदाहृत्य एवं जातीयकानां धर्मं प्रति अप्रामाण्यं भूतानुवादादित्युक्तम् । तदेवं जातीयकानि कं धर्मं प्रमिमीरन्नित्यनेन गतार्थत्वात्पुनरुक्तमित्याशङ्क्य व्याचष्टे * वाङ्मनसयोरिति* अनेनैवं भाष्यं व्याख्यातं भूतशब्दः परमार्थवाची यादृशं परमार्थतः प्रच्छन्नरूपत्वादौपचारिकं मनसस्तेनत्वं प्रायिकं च वाचो ऽनृतवादित्वं तादृशानुवादसालोच्य धर्मं प्रत्यप्राण्यम्[१] अतथाभूतमुख्य[२] रूपस्तेनानृतवादित्वकीर्त्तने तु स्वार्थे ऽप्यप्रामाण्यमिति भूतानुवादादिति विशेषणोपादानसामर्थ्यात् सूचितम् । ततश्च पूर्वोदाहरणेष्वतीतार्थकीर्त्तनेन योग्यानुपलब्ध्यभा-

१ पूर्वोक्तविपरीतमितिभावः

२ मुखकपदं २ पु. पा.

३चातुर्मास्ये साकमेधाख्ये पर्वणि महापितृयज्ञेष्वित्यर्थः

वात्स्वार्थासत्यत्वानिश्चये ऽपि धर्मे प्रत्यप्रामाण्यमुक्तम् । इह स्वार्थे ऽप्यसत्यत्वमित्यधिकार्थत्वादपौनरुक्त्यमिति । अनेन चेहोदाहरणे पूर्वसूत्रमेवं योजितम् । मनसस्तेनशब्दवाच्यपरस्वापहारित्वाभावाद्वाचश्चानृतवदनकर्तृत्वाभावान्मुख्यरूपस्तेनानृतवादित्वकीर्त्तने स्वार्थासत्यत्वादानर्थक्यमभिधेयशून्यत्वं यथादृष्टार्थावादे ऽप्यक्रियार्थत्वादानर्थक्यं निष्प्रयोजनत्वमिति । अध्याहारादिभिस्तु क्रियार्थत्वकल्पने प्रतिषेधशास्त्रविरोधापत्तेरानर्थक्यमेयुक्तमिति शास्त्रविरोधसूत्रव्याख्यानार्थं विपरीणामादिभिरित्यादिभाष्यं तद्व्याचष्टे * अथ त्विति * न चेत्यादिभाष्यमाशङ्कापूर्वं व्याचष्टे * तत्रेति * अत्राशङ्कते * ननु चेति * पितृयज्ञे ऽतिदेशप्राप्तस्य होतृवरणस्य न होतारं वृणीतइति निषेधः श्रूयते दर्शपूर्णमासयोश्चानारभ्य विधिप्राप्तस्य ये यजामहस्य नानुयाजेषु येयजामहं करोतीति । तत्रानयोर्नित्यं बाधो विकल्पेन वेति निरूपणाय नञ् अयं प्रतिषेधार्थः पर्युदासार्थो वेति चिन्तायां पूर्वपक्षयिष्यते श्रुत्या नञः प्रधानभूतविधायकान्वयेन निषेधार्थत्वं प्रतीतमपि नेक्षेतेत्यत्र व्रतशब्दसामानाधिकरण्यादनङ्गीकृत्योपसर्जनीभूतधात्वर्थान्वयेन पर्युदासो ऽङ्गीकृतः न त्विह तथा विकल्पपर्युदासे ऽप्यपरिहार्यः तस्यापि पर्युदसनीयप्राप्तिसापेक्षत्वात् । अन्यथा न सौरो ऽध्वर इत्यस्यापि पर्युदासत्वापत्तेः । किं चान्यत एव तदन्येषु प्राप्तेस्तदन्यमात्रसङ्कोचार्थत्वे च पर्युदासोपसंहारयोरभेदापत्तेर्न पर्युदासाख्यविध्यन्तरोपपत्तिः, तस्मात्प्रतिषेध एवायं ततश्च विहितप्रतिषिद्धत्वाद्विकल्प इति तत्र प्राप्तिसापेक्षस्यापि सुरापानादिनिषेधवद्विशेषनिष्ठत्वाद् बलीयस्त्वं स्यादित्याशङ्क्य विशेषनिष्ठेनापि निषेधेनात्मलाभायोगापत्तेः सामान्यरूपस्यापि विधेः स्वविषयादपनेतु मशक्यत्वादनपनीतस्य च शास्त्रस्यात्यन्तबाधायोगाद्विकल्पो दुःपरिहर इत्युक्तम् । न तुल्यहेतुत्वादुभयं शब्दलक्षणमिति सिद्धान्तकर्तव्यत्वप्रतिपादनात्मकविधिविरोधित्वेनाकर्त्तव्यत्वप्रतिपादनात्मकनिषेधे जाग्रति विकल्पापत्तेस्तत्परिहाराय पर्युदासो ऽत्राङ्गीक्रियते तस्य विषयसमर्पणेनानुकूलतया विकल्पानासञ्जकत्वात्तन्मात्रसङ्कोचनार्थोपसंहारात्तदन्यमात्रसङ्कोचार्थस्य पर्युदासस्य स्पष्टं वैलक्षण्यमित्यनवद्यं परिहरति * सत्यमिति * दृष्टविरोधादीन्वक्ष्

---

१ अन्यत एव पर्युदासशब्दादेव पर्युदसनीयान्येषु पर्युदसनीयान्यमात्रं यत् यागाय। साधारणस्तस्यसङ्कोचः यागमात्रस्तत् विशेषवाक्येन आज्यभागौ यजतीत्यादिना क्रियतइत्य

भाणान्सर्वान्हेतूनभिधेयशून्यरूपानर्थक्यप्रतिपादनपरतया सामान्य
तो व्याचष्टे * अतः परामिति * अत्र भाष्यकारेण धूम एवाग्नेर्दिव
ददृशे नार्चिरित्यादिदृष्टविरोधोदाहरणं दर्शयित्वा तस्मान्नैषावधा
रणा सिध्यतीत्युक्तम् । तद्धूम एवार्चिरेवेत्यवधारणानुपपत्त्युपसंहा
रार्थत्वेन तावद्व्याचष्टे * रात्रिं दिवामिति * यद्वैतदवधारणद्वया
नुपपत्त्युपसंहारस्य तस्मात् दृष्टविरुद्धमित्यनेनैव सिद्धत्वात्तदुपपा
द्यस्य दिवाग्निरादित्यं गतो रात्रावादित्यस्तामित्यवधारणद्वयस्या
सिद्धिप्रतिपादनार्थमेतद्भाष्यमित्याह * अथ वेति * स्वरूपपरत्वस्य
वा सिद्धान्तिनो ऽनिष्टत्वात्तत्रासत्यत्वे ऽपि न कापि क्षतिरित्याश
ङ्क्य स्वार्थासत्यत्वे निरालम्बनस्तुत्यनुपपत्तिं तदनुपपत्त्या वा त
त्कल्प्यमन्त्रविध्यनुपपत्तिमेकदेशाप्रामाण्ये वा समस्तवेदप्रामाण्या
वधारणानुपपत्तिं प्रतिपादयितुमेतदित्याह * ततश्चेति * एतच्च
स्वार्थासत्यत्वप्रतिपादनस्य पूर्वपक्ष्यभिप्रेतधर्माप्रामाण्योपयोगित्व
प्रदर्शनार्थं व्याख्यानत्रयं न त्वनन्तरानिर्दिष्टस्य स्तुत्यादिरेवेति
सर्वनाम्ना निर्देशो युज्यते । एकैकोदाहरणे चोभयाविरोधव्याख्या-
सिद्धेरुदाहरणद्वयमनर्थकम् । अथ परिहारवैलक्षण्यादुदाहरण-
द्वयम् । तथापि शास्त्रविरोधोदाहरणद्वयमुक्त्वा दृष्टविरोधोदाहरणं
वाच्यं व्युत्क्रमे किं कारणमित्याशङ्क्याह * शास्त्रेति * प्रायादि-
त्यनेनानृतवादिनीत्वालम्बने बाहुल्ये ऽभिहिते धूम एवेत्यवधारणे
ऽपि भूयस्त्वाख्यस्य बाहुल्यस्यालम्बनत्वेन बुद्धिस्थत्वादनृतवादि-
नीत्वोदाहरणपरिहारानन्तरं धूमोदाहरणपरिहारे ऽपि भूयस्त्वशब्दे-
नोक्तेनार्चिरित्यदर्शनोक्त्यालम्बने च समीपगमनक्लेशनिबन्धने दुर्ज्ञे-
यत्वे दूरशब्देनोक्ते ब्राह्मणयाज्ञानोक्तावपि स्वपराधनिबन्धनस्य दु-
र्ज्ञेयत्वस्यालम्बनत्वेन बुद्धिस्थत्वात्तदनन्तरं परिहार इति परिहारक्र-
मकारणम् । परिहाराणां सूत्रक्रमेण भेदेन चेति विग्रहः । उदा-
हरणानेकत्वकारणत्वेन परिहारभेदोक्तिः । न चैतद्विद्म इत्यत्राक्रि-
यार्थत्वादप्रमाणमिति भाष्यकारेणोक्तं तत्सिद्धान्त्यभिमतस्तुत्यर्थत्व-
निराकरणपरतया व्याचष्टे * न चैतदिति * आर्षेयप्रवरणशब्देनात्र
प्रवरे प्रव्रियमाणे देवाः पितर इति ब्रूयादित्यार्षेयवरणानुमन्त्रणावि-
धिरभिप्रेतः तेन चेहोदाहरणे ऽनुमन्त्रणक्रियास्तुत्यप्रतीतेरानर्थक्य-
मित्याद्यं सूत्रं योजितम् । तदेवोपपादयति * न हीति केन चिदंशे-
नेति * विधेयस्तुत्यंशेनान्यानिन्दांशेन वेत्यर्थः । यद्वा दृष्टविरोधि-
त्वेनैव क्रियास्तुत्यर्थत्वासम्भवादानर्थक्यमनेनोक्तमित्येतदेव भाष्य-
मन्यथा व्याचष्टे * न चेति * अथायमर्थ इत्यनेनानर्थक्यएव दृष्टवि-

रोधो हेतुरुक्तः तद्व्याचष्टे * न चेति * चोदयति * कथं
ति । शास्त्रेणैवेति * सवर्णायां स्वभार्यायामुत्पादितः
एवासवर्णायां मूर्द्धावसिक्तादिः । परभार्यायां जीवत्पा
मृगडो विधवायां गोलकः । पुनश्चोत्कर्षापकर्षाभ्यामन्यतर
त्तिरित्यादिशास्त्रैकगोचरत्वान्न प्रत्यक्षगम्यमित्यर्थः । पा
* नायमिति * एतदेवाशङ्कापूर्वकं विवृणोति * कथं पुन
आशङ्किता स्वाभिप्रायमाविष्करोति * कस्मात्पुनरिति *
न्द्रियव्यापारे प्रतीत्यभावान्न ब्राह्मणत्वादेः प्रत्यक्षत्वं युज्यते
च्चोत्पादकजातिज्ञानस्य सहकारित्वं सम्भवत्यात्माश्रयदोषापत्ते
गुत्पादकजातिज्ञानादाप्तवाक्यजनितं ज्ञानं न प्रत्यक्षत्वेनाश
त्यनाख्यातग्रहणेनोक्तम् । यद्वानेन ग्रन्थेन ब्राह्मण्यादिजाति
यते । सपिण्डानुवर्त्ती विजातीयेभ्यो व्यावृत्त आकारो जा
क्षत्रियादिभ्यो व्यावृत्तो ब्राह्मणेष्वनुवृत्तः कश्चिदाकारविशेषो
तापितृसम्बन्धज्ञेनापि प्रतीयते । तस्माद् ब्राह्मणादिशब्दव्यप
मातापितृसन्तानजन्यत्वौपाधिको ब्राह्मणादिशब्दो न जातिव
सन्तानस्य चानेकविप्रकृष्टकालपुरुषव्यासङ्गिनः प्रत्यक्षेण ग्रही
क्यत्वान्न तदुपाधिकस्य ब्राह्मण्यादेः प्रत्यक्षत्वं सम्भवतीति ।
ङ्काभिप्रायं परिहर्त्ता दूषयति * शब्दाभावादिति * अयमाशय
तापितृसम्बन्धज्ञस्यापत्ये ब्राह्मण्यादिप्रत्ययस्तावत्सन्देहबाधरा
स्वसंवेद्यः न च निर्विषयः प्रत्ययो ऽस्तीत्युक्तम् । न चास्य
नविशेषजन्यत्वं विषयः । निरालम्बनशब्दप्रयोगायोगेन जा
तिरिक्तस्य सन्तानान्तरव्यावृत्तस्य विशेषस्यासम्भवात् । न
द्व्याद्यद्वित्रिसन्तानमात्रे सन्तानः समाप्यते । येन सम्बन्धि
णात्र सम्बन्धः सन्तानिविशेषेण सन्तानो विशेष्टुं शक्यते ।
चैकदेशावस्थिता वृक्षा एव वनशब्देनोच्यन्ते । तथोत्पाद्योत्पाद
मेणावस्थिताः पुरुषा एव सन्तानशब्दवाच्याः न सन्ताना
चिद्वस्त्वस्ति । तस्मात्सर्वेषु ब्राह्मणेष्वनुस्यूतं प्रत्येकसमवेतं
णप्रत्ययविषयभूतं किं चिदवश्यमेष्टव्यम् । यच्चाकारविशेषो
तीयतइत्युक्तम् । तत्र यद्याकारशब्देन संस्थानं मुद्रापरनाम
भिप्रेतं ततस्तस्य जातित्वानङ्गीकाराददोषः । ब्राह्मणप्रत्ययवे
धर्मविशेषो ऽनुभवसिद्धत्वान्नापह्नवमर्हति । वृक्षत्वाद्यप्यनुभवा
पातिरेकेण निरूपयितुमशक्यम् । शाखादिमद्रूपस्य संस्थानात्मव
जातित्वाभावात्संस्थानविशेषस्य हि प्रतिव्यक्तिविलक्षणत्वात्सं
मात्रस्य त्वन्यजातीयेष्वपि समानत्वादवान्तरविशेषस्य चानिरूप

वविन्यासविशेषात्मकस्य संस्थानस्य निरवयवेष्वसंभवाच्च संस्थान-
ाकारमुद्रापरनामधेयं जातिरिष्यते । तस्मात्समानाकारेष्वपि पि-
ण्डेषु विलक्षणब्राह्मणप्रत्ययवेद्यब्राह्मण्यादिजातिर्नापह्नोतुं शक्यते ।
चासौ शास्त्रस्य विषयः । प्रमाणान्तरागृहीतायां जातौ अग्रहीत-
म्बन्धत्वेन ब्राह्मण्यादिपदार्थाज्ञानात् । ब्राह्मणाद् ब्राह्मण्यां यो जा-
ते स ब्राह्मण इतिवाक्यार्थानवधारणात्सम्बन्धाग्रहणादेव नानुमे-
त्वं सदृशानुपपद्यमानार्थाभावादुपमानार्थापत्त्यसम्भवात्पारिशेष्या-
त्यक्षत्वम् । उत्पादकजातिज्ञानात्तु प्रागप्रतीतेस्तस्य सहकारित्वं
ल्प्यते जात्यभेदे ऽपि व्यक्तिभेदेन जातिव्यक्तिसम्बन्धभेदादुत्पाद-
व्यक्तिसम्बन्धितया जातिज्ञानमुत्पाद्य व्यक्तिसम्बन्धितया जाति-
ने कारणमित्यात्माश्रयत्वाप्रसङ्गः । सहकार्यपेक्षत्वे ऽप्यैन्द्रिय-
त्वाव्याघाते दृष्टान्तमाह * यथेति * शब्दोल्लेखप्रतीतौ १ चायं
ान्तः । आशङ्किता तु वृक्षत्वस्य स्वरूपग्रहणे सहकार्यनपेक्षणाद्वैष-
ह * नैतदिति * शब्दोल्लेखप्रतीतावपि २ शब्दातिरिक्तसहका-
पेक्षणादपरं वैधर्म्यमाह * अपि चेति * निमित्तान्तरग्रहणेनैत-
ीयति । प्रतीत्यन्यथानुपपत्त्या कल्प्यमानमपि शब्दातिरिक्तस-
ारिग्राह्यात् ब्राह्मणत्वादन्यत्कल्प्यम् । न चोत्पादकगतं ब्राह्म-
वमुत्पाद्यगतात् ब्राह्मणत्वादन्यदित्येकस्य कर्मकरणत्वायोगाच्च
य सहकारित्वं युक्तमिति । उपवीतादीनां तु व्यभिचारात्सहका-
त्वमनाशङ्क्यमेवेत्याह * नचेति * अध्यापनादीनां ब्राह्मणस्यैव
धानाद्व्यभिचारमाशङ्क्याह * अध्यापनाद्यपीति * क्षत्रियवैश्यौ
ियुज्यतइति क्षत्रियवैश्यप्रतियोगिक्षत्रियवैश्यौ वा प्रतियोगिनौ
संबन्धिनौ यस्येत्यर्थः । नन्वध्यापनादिकारिणि लोके निर्विचिकि-
ब्राह्मणप्रत्ययदर्शनात् न क्वचिद्व्यभिचारमात्रेणाप्रामाण्याशङ्का
त्याशङ्क्याह * यस्त्विति * अध्यापनादीनां व्यभिचारित्वेन
र्विचिकित्सप्रत्ययोत्पादकत्वं न युक्तमितिभावः । परिहर्त्तो तूष्णी-
तनेत्रस्य ब्राह्मणो ऽयमित्यसन्दिग्धाबाधितापरोक्षप्रत्ययोत्पत्तेर्ब्रा-
यप्रत्यक्षत्वापह्नवायोगादन्वयव्यतिरेकबलेनोत्पादकजातिज्ञानस्यो-
ाकारेण परिहृतात्माश्रयदोषस्य सहकारित्वकल्पनैवोचितेत्यभि-
ाणाह * नैष दोष इति * वृक्षे त्ववैधर्म्यलक्षणो ऽध्यापनादिनि-
त्वासम्भवलक्षणो वा न दोष इत्यर्थः । यदि चान्यजातिग्रहणे

---

१ नन्वगृहीतसङ्गतिनापि समनस्केन्द्रियसन्निकर्षे वृक्षत्वं गृह्यतएव तत्त्वेन परं न गृ-
त्यत आह शब्दोल्लेखेति । वृक्षो ऽयमितिशब्दोल्लेखप्रतीतिरित्यर्थः

२ वृक्षत्वज्ञाने शब्दातिरिक्तं सहकारि नापेक्ष्यते ब्राह्मण्ये त्वपेक्ष्यतइति वैधर्म्यमित्यर्थः

सर्वत्रैकरूपं सहकारि स्यात्ततो ऽत्र तद्वैषम्यस्य दोषत्वं शङ्क्येताऽपि न त्वेतदस्ति आकृतिवादे तस्योपलक्षणं वापि क्वचित् केन चिदिष्यत इत्यादिना जातिविशेषेषु यथा दर्शनविलक्षणसहकार्यभिधानादित्याह * क्वचिदिति * रूपादेर्गुणविशेषस्यैव सुवर्णत्वादिजातिग्रहणे सहकारित्वदर्शनान्न जातेः सहकारित्वं कल्पयितुं युक्तमित्याशङ्क्यान्यत्रादृष्टमपीहैव प्रतीतिबलादवश्यं कल्पनीयमिति दर्शयन्नुपसंहरति * तेनेति * प्रतीतिबलादेव यथासम्भवं प्रत्यक्षानुमानाद्यवगताया सहकारित्वकल्पनं नायुक्तमित्याह * अयं चेति * न च प्रत्यक्षावगतमेव प्रत्यक्षज्ञाने कारणमिति नियमो युज्यते चक्षुरादौ व्यभिचारादित्याह * न चेति * न च जातिस्मरणव्यवधानमात्रेण चक्षुषोऽकारणत्वं वाच्यं प्रत्यक्षसूत्रे तत्र शब्दार्थसंबन्धामित्यादिना १ स्मरणव्यवधाने ऽप्यपरोक्षप्रतीतेः प्रत्यक्षत्वाभिधानादित्याह * आन्तरालिकेति * न च मातापितृसंबन्धानभिज्ञाप्रत्यक्षत्वमात्रेण तदभिज्ञाप्रत्यक्षत्वं विमनस्का यदा केचिदित्यादिना २ निराकृतत्वादित्या * न चेति * ननु स्त्रीव्यभिचारशङ्कया मातापितृसंबधानिश्चयान्नपत्ये ब्राह्मण्यानिश्चयः कस्य चिदपि सम्भवतीत्याशङ्क्याह * स्वयपराधात्विति * स्त्रीणां स्वातन्त्र्यनिषेधाद्भर्त्रादिभिः प्रयत्नेन रक्षणयोग्यानुपलब्ध्या व्यभिचारशङ्कायाः परिहर्त्तुं शक्यत्वाद् दुर्ज्ञानत्वमात्रं मातापितृसंबन्धानभिज्ञस्य भवेन्न तु सर्वात्मना ज्ञानाभाव इत्यर्थः । एतच्च दुर्ज्ञानत्वादज्ञानवचनं गौणमिति स्वयपराधेनेत्यत्र भाष्यकारो वक्ष्यतीत्याह * इति स्वयमेवेति * न च दुर्ज्ञानत्वमात्रेण प्रत्यक्षत्वं शङ्क्यं, गिरिशृङ्गारोहणजन्यस्यापि दूरस्थपदार्थज्ञानस्य प्रत्यक्षत्वसिद्धेरित्याह * न चेति * ननु स्त्रीणां प्रायेण चञ्चलत्वदर्शनान्न वै स्त्रैणानि सख्यानि सन्ति शालावृकाणां हृदयान्येता स्त्रियअशास्यं मन इति च वेदे ऽनुवादात्सुरूपं वा कुरूपं वा पुमानित्येभुञ्जत इत्यादिस्मृतेश्च। व्यभिचारस्वभावत्वावधारणाददृष्टव्यभिचारास्वपि स्त्रीत्वेन व्यभिचारो ऽनुमास्यते पलाशत्वेनेव वृक्षत्वमित्याशङ्क्याह * न चेति * स्त्रीत्वस्य व्यभिचाराप्रयोजकत्वसूचनार्थो ऽनुमकल्पनाशब्दः । न च निर्मूलकत्वेन लोकस्याप्रामाण्यं प्रयत्नेन रक्षयोग्यानुपलब्धेर्मूलत्वसम्भवादिति दर्शयितुमाह * विशिष्टेन हीति महाकुलीनानां पुरुषाणां स्त्रीरक्षणमेवात्मरक्षणं जायायां रक्ष्यमाणायामात्मा भवति रक्षित इतिस्मरणात् । यद्वा दुष्कुलप्रसूतत्वं

१ सार्थेते शब्दसंबन्धौ माभूत्प्रत्यक्षता तयोः । तदप्रत्यक्षभावेन न त्वर्थस्यापि वार्थते

२ तत्र शब्दार्थसंबन्धप्रमातुः स्मरतो ऽपि वा । बुद्धिः पूर्वं गृहीतार्थसन्धानादुपजायते

भिचारशीलत्वे प्रयोजकं न स्त्रीत्वमिति दर्शयितुं महाकुलीनत्वं स्त्रीणामुक्तम् । व्यभिचाराभावनिश्चयमेवाभियुक्तवृद्धव्यवहारेण द्रढयति * अनेनैवेति * व्यभिचाराभावानिश्चये हि निर्मूलत्वात् पितृपितामहादिपरम्परालेखनात्मकसमूहलेख्यं व्यर्थं स्यादितिभावः । कुलपरीक्षापूर्वकेदानींतनपुरुषगतविवाहादिव्यवहारेणापि तमेव द्रढयति * तथा चेति * एतावत्प्रयत्नान्वेषणे योग्यानुपलब्धिपूर्विकया लोकप्रसिद्ध्या व्यभिचाराभावनिश्चयान्न स्त्रीत्वमात्रेणादृष्टव्यभिचारासु व्यभिचारानुमानं युक्तमित्युक्तम् । इदानीमनुमीयमानो ऽपि व्यभिचारो ऽनैकान्ततो वर्णसङ्करमापादयतीत्याह * न चेति * न च व्यभिचारोत्पन्नत्वाभावे ऽपि मातृव्यभिचारमात्रेणापत्ये वर्णसङ्करः शङ्क्यः । सावर्ण्योत्पत्तिकारणस्योत्पादकसवर्णत्वस्याविघातादित्याह * तदपराधनिमित्तस्त्विति * व्यभिचारोत्पन्नस्यापि वर्णान्तरव्यभिचारानिश्चये वर्णसङ्करानिश्चय इत्याह * न चेति * ननु विन्नास्वेव विधिः स्मृत इत्यादिवचनाद्भर्तृव्यतिरिक्तसवर्णोत्पन्नस्यापि वर्णान्तरापत्तिः स्यादित्याशङ्क्याह * सवर्णेन चेति* गवादावुत्पादकसजातीयापत्योत्पादकत्वदर्शनेनेहापि तथानुमानान्न वर्णान्तरापत्तिः सम्भवतीति ब्राह्मणादिविहितकर्म्मानधिकारप्रतिपादनपरं विन्नास्विति वचनं व्याख्येयं कुण्डगोलकवचनमपि सत्येव ब्राह्मण्ये ऽवान्तरसंज्ञाविशेषप्रतिपादनपरमिति उत्पादकासावर्ण्ये ऽपि क चिदन्यतरसवर्णोत्पत्तिस्मरणान्नात्यन्तं तदुच्छेदः किमुत तत्सावर्ण्यइत्यतिशयार्थमाह * सङ्करजातानामपि चेति * एवं हि स्मर्यते ।

जात्युत्कर्षो युगे ज्ञेयस्सप्तमे पञ्चमे ऽपि वा ।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरमिति ॥

अस्यार्थः क्षत्रियायां ब्राह्मणादुत्पन्ना कन्या मूर्द्धावसिक्ता ब्राह्मणाय दीयमाना मूर्द्धावसिक्तजातेरुत्कृष्टां[1] कन्यां जनयति सापि ब्राह्मणाय दीयमाना कन्यान्तरमेवेत्येवं पञ्चमे युगे पुरुषान्तरे ब्राह्मण्योत्पत्त्या जात्युत्कर्षः एवं वाशब्दात् षष्ठे वैश्यायां सप्तमे शूद्रायामिति । मूर्द्धावसिक्तादिपुत्रपरम्परायास्तु क्षत्रियादिस्त्रीणां तथैव पञ्चमादिषु क्षत्रियादिजातीयापत्योत्पत्तेरपकर्ष इति पूर्ववच्चाधरोत्तरमित्युत्तरत्रातिदेशात्सूचितं, न न्वस्यार्थस्य प्रत्यक्षेण विवेक्तुमशक्यत्वाद् ब्राह्मण्यादेश्च शास्त्रविषयत्वानङ्गीकारेण निर्मूलमेतत्स्मरणं स्यादत आह * तत्र त्विति *

१ ब्राह्मणजातितोऽपकृष्टामित्यधिकं २ पु० ।

क चित्प्रत्यक्षावगतायां जातौ सम्बन्धग्रहणसम्भवात्. अ
केन शास्त्रेणान्यत्र तत्प्रतिपादनं युक्तमिति मात्रशब्देन स्
क्षावगतिसम्भवादन्यत्र शास्त्रव्यापारो नाङ्गीकृतः, इह इ
वाच्छास्त्रविषयत्वं नायुक्तमित्याह * न हीति * नन्वा
क चिदपि ब्राह्मण्यादिविवेकस्य प्रत्यक्षेणावगत्यसम्भवा
गम्यत्वमेवाङ्गीकार्यमित्याशङ्कां निराकुर्वन्नुपसंहरति *
केन चिन्निमित्तेनेति * स्वरविशेषादिनेत्यर्थः । स्मर
न्त्र्येण प्रामाण्यायोगात्तन्मूलप्रदर्शनार्थं दर्शनग्रहणं ता
कजातिस्मरणनिरपेक्षेन्द्रियजन्यत्वायोगात्पूर्वोत्पादकजा
त्सहकारीति निदर्शयितुं पारम्पर्यग्रहणं प्रत्यक्षत्वोप
पसंहरति * इति भवतीति * ननु

शमो दमस्तपः शौचं सत्यमार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म प्रचक्षते ॥

इत्यादिस्मृतिपर्यालोचनया तपःप्रभृत्याचारयोगनिमित्त
णशब्दप्रवृत्तेस्तस्य प्रत्यक्षत्वेन दृष्टविरोधसम्भवात्किमिति
जातिः साध्यते अत आह * येषामिति * प्रमाणाभावमुप
* सिद्धानां हीति * अनवस्थितत्वापत्तेरप्याचारनिमित्त
त्कमित्याह * स एवेति * कारणान्तरमाह * ता
तपःप्रभृत्याचारयोगिनि लोके ब्राह्मणशब्दप्रयोगदर्शन
न्निमित्तत्वनिरासो ऽत आह * एताभिरिति * ब्राह्मण
द्योतकत्वमात्रं तपःप्रभृतीनां न तु ब्राह्मणशब्दप्रवृत्ति
त्यर्थः यद्वा का तर्ह्यस्याः स्मृतेर्गतिरित्याशङ्क्यैतदुक्तम्
त्वमात्रं स्मृत्या प्रतिपाद्यते न तु तपआदीनां समुद
स्मृत्या प्रतिपाद्यतइत्यर्थः । यदा तु पूर्वोक्तार्थोपसंहार
विकका व्याख्यायते तदा नैताभिस्तपःप्रभृतिभिरुपप
ह्मणः प्रतिपाद्यते द्योत्यतइति योज्यम् । किं त्वेताभिर्वि
सङ्गादिभिरुपपत्तिभिरयमर्थः प्रतिपाद्यते । तदुच्यते
समुदायो ब्राह्मण्यमिति । ननु तपःप्रभृतीनां आचारा
रित्वेन प्रत्येकं ब्राह्मणशब्दप्रवृत्तिनिमित्तत्वायोगात् ः
भावेन च समुदायाभावान्माभून्निमित्तत्वं तज्जनितस्य
भविष्यत्यत आह * नेति * माभूच्छब्दप्रवृत्तिनिमित्त
व्यञ्जकत्वं भविष्यत्यत आह * नेति * उभयत्र पूर्वो
त्रयमतिदेष्टव्यम् । एवं तर्हि व्यञ्जकाभावेनाप्रत्यक्षत्व
निराकरणार्थं पूर्वोक्तमभिव्यञ्जकं स्मारयति * किं

नन्वाचारनिमित्तत्वाभावे मासेन शूद्रो भवति ब्राह्मणः क्षीरविक्रयादिति वचनमनर्थकं स्यादित्यतआह * तस्मादिति * न तु सत्यपि प्रत्यक्षविरोधे विकल्पेन प्रामाण्योपपत्तेः प्रत्यक्षविरुद्धं वचनमप्रमाणमिति भाष्यमयुक्तमित्याशङ्क्याह * पूर्ववच्चेति * विकल्पविषय एवायं न भवतीत्याह*अपि चेति * को हि तद्वेदेति*शास्त्रदृष्टविरोधोदाहरणे भाष्यकारेण पूर्वं तावदाद्यं सूत्रं योजितं * यदि प्रश्नइति * तद्व्याचष्टे * पूर्ववदेवेति * शास्त्रदृष्टविरोधप्रतिपादनार्थं यद्यनवक्लृप्तिरित्यादिभाष्यं तद्व्याचष्टे * निश्चितेति *

तथा फलाभावात् ॥ २ ॥

अत्र भाष्यकारेण शोभते ऽस्य मुखमित्याद्युदाहृत्य आद्यन्तावत्सूत्रं योजितं यदि भूतानुवादो ऽनर्थक इति तद्व्याचष्टे * यदि तावदिति * गर्गात्रिरात्रब्राह्मणोपक्रमोपन्यासस्य य एवं वेदेत्येवं शब्दव्याख्यानार्थत्वं गर्गात्रिरात्रब्राह्मणग्रहणेनोक्तम् । उदाहरणान्तरगतैवंशब्दस्य व्याख्यानार्थं वेदानुमन्त्रणग्रहणम् । विद्यमानयोरेवेत्यनेन यथादृष्टवचनत्वं भूतशब्दस्य दर्शितम् । सम्भवति च गर्गात्रिरात्राहीनविशेषविधायिब्राह्मणस्य परिहारसूत्रवक्ष्यमाणप्रकारेण मुखशोभावेदानुमन्त्रणस्य तु वाजिनमिति मन्त्रलिङ्गादपि गम्यते । प्रकृतसूत्रयोजनार्थम् । अथाध्ययनफलानुवाद इति भाष्यं तद्व्याचष्टे * अथ त्विति * मुख्यरूपयोर्मुखशोभावाजिजन्मनोर्योग्यानुपलब्धिर्बाधितत्वादिति भावः । कालान्तरफलत्वेन योग्यानुपलब्धिविरोधपरिहारशङ्कानिराकरणार्थत्वेन सौत्रतथाशब्दव्याख्यानार्थं कालान्तरइत्यादिभाष्यं तद्व्याचष्टे * वर्त्तमानापदेशाच्चेति * तदनेन यथाभूतं मुखशोभाद्यनन्तरफलत्वेन कीर्त्यते तथाभूतस्याभावादानर्थक्यमितिसूत्रं योजितम् । फलविधित्वेन कालान्तरभावित्वावगमात् वर्त्तमानापदेशो ऽयं न भवतीत्याशङ्क्य द्रव्यसंस्कारकर्म्मस्वित्यत्र निराकरिष्यमाणत्वान्नायं फलविधिरिति भाष्यकृतोक्तम् तत्र विद्याया द्रव्यादिबाह्यत्वात्तदधिकरणाविषयत्वमाशङ्क्य संस्कारान्तर्गतिं दर्शयितुमाह * कर्म्मानुष्ठानेति * तत्र हि यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति । तीर्थे स्नाति तीर्थमेव समानानां भवति । वर्म्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजा इज्यन्ते वर्म्म यजमानस्य भ्रातृव्याभिभूत्याइत्यादीनि द्रव्यादिविषयाणि वाक्यान्युदाहृत्य किमेते फलविधयः फलार्थवादा वेति विचारयिष्यते । तत्र पर्णतादेरप्राप्तत्वेनावश्यविधेयस्य फलाकाङ्क्षायां साक्षात्पुरुषार्थरूपश्रु

फलसम्भवे पारम्पर्यपुरुषार्थरूपक्रतूपकाराख्यफलकल्पनायोगा-
त्फलविधित्वेन पूर्वपक्षयित्वा यथा कथंचित्पुरुषार्थरूपफलत्वेन वि-
ानुपपत्तिपरिहाराद्रात्रिसत्रादिवद्विपरिणामकल्पनानुपपत्तेर्यथाश्रु-
वर्त्तमानफलत्वसङ्कीर्त्तनस्य चानुपलब्धिविरोधान्न फलविधित्वमि-
सिद्धान्तयिष्यते चिन्तयिष्यत्येतदित्यादिभाष्यं पौनरुक्त्याश-
ानिराकरणार्थत्वेन व्याचष्टे ※ न पौनरुक्त्यादिति ※ एवं तर्हि
द्धान्त्यभिमतं स्तुत्यर्थत्वमेव पूर्वपक्षिणा निराकार्यमित्याशङ्क्य
र्थमेव स्वार्थासत्यत्वनिरूपणमित्याह ※ स्तुत्यर्थतेति ※

अन्यानर्थक्यात् ॥ ४ ॥

अत्र भाष्यकारेण पूर्णाहुत्याद्युदाहरणेषु यदि भूतानुवादमा-
मनर्थकमित्यनेनाद्यं सूत्रं योजयित्वाऽथाफलाविधिरन्येषामानर्थक्य-
त्यनेनान्यानर्थक्यसूत्रं योजितम् । तत्र फलाभावसूत्रमपि योज-
तुं शक्यत्वात् किमिति न योजितमित्याशङ्क्यानन्तरेणैव निर्ज्ञात-
रार्थ्येषु फलविधित्वनिराकरणान्यायेनात्रापि फलाभावस्य सुज्ञान-
ादित्याह ※ अनन्तरेणैवेति ※ कथमेषां तदधिकरणविषयत्वमि-
ाशङ्क्याह ※ पूर्णाहुतेरिति ※ यदीत्यादिभाष्यं व्याचष्टे ※ यदि पु-
रेति ※ न ह्यक्तत्वेत्यादि नान्यानर्थक्योपपादनार्थं पौर्वापर्यमुपन्य-
म् । तत्र समानफलकर्माल्पत्वमहत्वमात्रेणान्यानर्थक्योपपत्तेः
र्वापर्योपन्यासो व्यर्थ इत्याशङ्क्याह ※ समानफलान्यपीति ※ अ-
शब्देनाल्पत्वमहत्वमुपक्षिप्तमज्ञातस्यानुष्ठातुमशक्यत्वाद्युक्तमश्वमेध-
नस्य तदनुष्ठानात्प्राग्भावित्वं पूर्णाहुतिपशुबन्धयोस्तु कथमत
ह ※ पूर्णाहुतीति ※ अग्निहोत्राद्यङ्गभूताग्न्युत्पादकाधानाङ्ग-
ात्पूर्णाहुतेः प्राग्भावः स एष औपवसथ्ये ऽहनि द्विदेवत्यः पशु-
लभ्यतइत्यनेन वचनेनाग्नीषोमीयस्येति भावः ※ प्रथमं वा निय-
तेति ※ वसन्ताय कपिञ्जलानालभेत इत्याद्युदाहृत्य किं त्र्यादयः
ार्द्धपर्यन्ता विकल्पेनालब्धव्या उत त्रय एवेत्येकादशे चिन्तयि-
ते । तत्र बहुवचनेन द्वित्वातिरिक्तसङ्ख्यासामान्यरूपबहुत्वा-
धायिनां तद्विशेषाकाङ्क्षायां परार्द्धातिरिक्तसङ्ख्याविशेषाभावा-
त्पर्यन्तत्र्यादिसंख्याविशेषाक्षेपात्समुच्चये संख्यान्तरोपजननेन स-
वनाशापत्तेर्विकल्पेन विनियोग इति । बहुवचनेन सर्वप्राप्तेर्विकल्पः
ादित्यनेन पूर्वपक्षयित्वा प्रथमं वा नियम्येत कारणादतिक्रमः
ादित्यनेन त्रिसंख्योपादानं विना चतुराद्युपादानाशक्तेरवश्योपादे-
त्रित्वमात्रेण बहुवचनोपपत्तेरतिरिक्ताक्षेपे प्रमाणाभावात् त्रित्व-

नियम इति सिद्धान्तयिष्यते । दृष्टान्ते पौर्वापर्य्यादरार्थमेव तेनैव पथेत्युक्तमित्याह * तथा चेति * भवत्वन्यानर्थक्यमत आह * तस्मादिति * फलविशेषार्थत्वेन तर्ह्यन्येषामर्थवत्त्वं भविष्यतीत्यत आह * न चेति * नन्वेवमपि सिद्धान्त्यभिमतस्तुत्यर्थत्वानिराकरणात्पूर्वपक्षो न सिद्धो ऽत आह * न चेति *

अभागिप्रतिषेधात् ॥ ५ ॥

अत्र भाष्यकृता न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवी-
यप्रतिषेधभागिनमर्थं प्रतिषेधन्तीति बहुवचनं प्रयुक्तम् । तदयुक्तम् । पृथिवीचयनस्य प्राप्तेः प्रतिषेधभागित्वादित्याशङ्क्याह * श्री-
यपीति * विज्ञायत एवेति भाष्यं व्याचष्टे * अन्तरिक्ष इति *
स्तु तर्हि पर्युदासो ऽत आह * अतश्चेति * प्रतिषेधग्रहणं पर्युदा-
स्याप्युपलक्षणार्थमिति भावः । उभयत्र सिद्धान्त्यभिमतं नित्या-
नुवादत्वं निराकर्तुमाद्यं सूत्रं योजयति * अथापीति * पृथिवीचय-
स्याप्रतिषेधभागित्वप्रदर्शनार्थं पृथिवीचयनप्रतिषेधार्थं च यद्वाक्यं
वेत् चयननिषेधार्थमेव तदितिभाष्यं तदुपपादयति * पृथिवीति *
स्तु तद्बाधो ऽत आह * बाधे चेति * विकल्पेन चयनविधेर-
र्थवत्त्वं भविष्यत्यत आह * विकल्पे ऽपीति * पाक्षिकबाधार्थमेवायं
तिषेधो भविष्यति नातिरात्रे षोडशिनं गृह्णातीतिवदत आह * का-
संयोगाच्चेति * पशुकाममग्निन्वीत प्रजाकाममग्निन्वीतेत्यादिभिर्वा-
यैः काम्यत्वावगमाद्विनापि प्रतिषेधं पाक्षिकत्वासिद्धेः प्रतिषेधान-
र्थक्यमिति भावः । न च कामाभावे पाक्षिकत्वं प्रतिषेधवशाद्भ-
विष्यतीति शक्यं वक्तुं काम्यस्य कामनाभावे प्राप्त्यभावेन प्रतिषेधा-
योगात् विशेषणोपादाने च तत्परतयावगतस्यास्य प्रतिषेधस्य क्रि-
यां कल्प्यत्वेन दौर्बल्याच्च पाक्षिकत्वापादने सामर्थ्यमस्तीत्याह
दुर्बलश्चेति * ननु दुर्बलेनापि प्रतिषेधेनागत्या पाक्षिकचयनावि-
बाधो नातीव दोषमावहतीत्याशङ्क्य अथाप्रमाणं नैष विरोधो भ-
वतीत्यनेन भाष्येण प्रतिषेधाप्रामाण्येनागतिपरिहारः कृतस्तदतिस्प-
ष्टत्वान्न वार्त्तिककृता व्याख्यातम् । ननु बहुतरफलमग्निहोत्रादि-
विधिविरोधेनैकस्य कल्प्यस्य पूर्णाहुत्यादिविधेरप्रामाण्यं युक्तं इह
तयोः प्रत्यक्षत्वेनाविशेषात्कथमेकान्ततः प्रतिषेधस्यैवाप्रामाण्यामि-
शङ्कानिराकरणार्थं भाष्यम् * कथं तत्प्रमाणमित्यादि * तत्र

---

१ अगत्येति इष्टकाभिरग्निं चिन्वीतेतिवचनात्सामर्थ्यात्पृथिव्यामेव चयनं प्राप्तं तत्र न
व्याप्तमिति यथाश्रुते ऽर्थे ऽभ्युपेतव्ये विधिरनर्थकः प्रत्यगतिः ।

स्वयमाकुलत्वमुपपादयति * एतदेवेति * अप्राप्तस्य चयनस्थ
थिव्याधारत्वनिषेधायोगात्प्राप्तिस्तावदङ्गीकार्या पुनश्चानाधारच
नायोगात्तन्निषेधोऽपीत्येतदेवेत्यनेन परामृष्टम् । किं तद्विध्यन
मित्यपेक्षायामाह * विध्यन्तरं चेति * अस्य गुणपरत्वाच्चयनो
त्तिवाक्योपलक्षणार्थत्वं दर्शयितुमिष्टकावाक्योपन्यासः स्तुत्यर्थ
च्चानाशङ्क्यमेवेत्याह * प्ररोचनाबुद्धिस्त्विति *

अनित्यसंयोगात् ॥ ६ ॥

नन्वतः परं स्वार्थेनैवानर्थक्यं प्रतिपादयतीति वार्त्तिकवृ
चनात्स्वार्थासत्यत्वरूपानर्थक्यप्रतिज्ञायामयं हेतुर्गम्यते तच्च विरु
म् । अनित्यो ह्यत्र प्रवाहणापत्यं बबरः स्वार्थः प्रतीयते तत्रासत्
सति अनित्यसंयोग एव न स्यात् न[1] चानित्यसंयोगेनानित्यसंयो
भावः साध्यो भवितुमर्हति * उच्यते[2] * अनित्यसंयोगप्रसङ्गो
हेतुर्विवक्षितः ततश्च स्वार्थसत्यत्वेऽनित्यसंयोगप्रसङ्गात्तत्परिहार
स्वार्थासत्यत्वं बबरः प्रावाहणिरित्यादीनामेष्टव्यमितिसूत्रार्थो भव
अनित्यसंयोगान्मन्त्रानर्थक्यमित्यत्राप्यर्थप्रकाशनपक्षे यस्य यो
स एव तेन प्रकाशयितव्यः क्व चिच्चानित्यैरकर्म्माङ्गभूतैः स्वार्थैरर्थ
न्तो मन्त्रा लक्ष्यन्तइत्युपक्रमवार्त्तिकाद्यद्येतद्विवक्षितं तथा सत्या
मदर्थाभिधानाद्वेदस्य कृत्रिमत्वेनाप्रामाण्यं प्रसज्येतेति चोपसंह
वार्तिकादनित्यसंयोगः खल्वपि भवेन्मन्त्रेष्वभिधानार्थेष्वितिभाष
च्चायमेवार्थः प्रतीयते । अन्यानर्थक्याभागिप्रतिषेधयोरप्येवम
तत्रापि स्वार्थासत्यत्वे तयोरभावात्सूत्रव्याख्यानार्थमनित्यसंय
श्चेति भाष्यं तत्सोपस्कारमेव द्रष्टव्यम् । अनित्यसंयोगः स्वार्थ
त्वे प्रसज्येत तस्मादानर्थक्यमेव युक्तमिति तत्रानित्यसंयोगप्रस
न्माभूत्स्वार्थस्य सत्यत्वं स्तुत्यर्थत्वं तु सिद्धान्त्यभिमतं निराकर्त्तु
शक्यमित्याशङ्क्याह * सर्वोपाख्यानेष्विति * अयमाशयः अन्यप
त्वं ह्युच्यमानं कार्यपरत्वं वा स्यात् स्तुतिपरत्वं वा तच्चोभयम
प्रतीत्यनारूढत्वान्न युज्यते तेन पारिशेष्यादर्थवत्त्वमङ्गीकुर्वता स्वा
परत्वमेव वाच्यं तत्र चानित्यसंयोगः प्रसज्येत इति । ननु पर

---

१ यदा स्वार्थासत्यत्वरूपानर्थक्यप्रतिज्ञा तदा बबरादीनामनित्यानामर्थानामभाव
मिप्रायेणाह नचेति ।

२ बबरादिवाक्यानि प्रतीयमानबाधितार्थकानि सत्यत्वे ऽनित्यसंयोगप्रसङ्गात् ।

३ साध्यं तदेव सत्यार्थत्वे ऽन्यानर्थक्यप्रसङ्गात् यथार्थत्वे प्रसज्यमानाप्रतिषेधभाग्य
तिषेधकत्वादिति ।

ासामान्यमात्रमित्यत्र बबरादिशब्दानां नित्यसिद्धवाय्वाद्यर्थाभि-
येत्वस्योक्तत्वात्स्वार्थपरत्वेऽपि नानित्यसंयोगप्रसङ्ग इत्याशङ्का-
ाकरणार्थं वेदप्रामाण्ये सतीति भाष्यं तद्व्याचष्टे * स चेति *
माशयः। अनित्यार्थाभिधायित्वे कृत्रिमत्वेन वेदस्याप्रामाण्या-
त्तत्परिहारार्थं कथं चिन्नित्यसिद्धवाय्वाद्यर्थवचनत्वं कल्पितं
तु कथं चित्प्रामाण्यं न सम्भवति तदा यथाश्रुतार्थपरित्यागका-
भावान्न क्लेशेन बबरादिशब्दानां वाय्वादिवचनत्वकल्पनं युक्त-
। नन्वेवमप्रामाण्ये सति यथाश्रुतार्थपरित्यागकारणाभावा-
त्यार्थाभिधायित्वमनित्यार्थाभिधायित्वे बबरादिवाक्यानां कृत-
नाप्रामाण्यमितीतरेतराश्रयमाशङ्क्योतरैकदेशवदित्युक्तम् * त-
ः * यथेतरेषामनित्यसंयोगरहितानामापो वै शान्ता इत्यादीना-
देशानामक्रियार्थत्वादप्रामाण्यं तथैतेषामनित्यार्थानामप्यक्रिया-
नैवाप्रामाण्यसिद्धेर्न इतरेतराश्रयत्वमिति। नन्वध्ययनविधि
त्सर्वस्य वेदस्य पुरुषार्थौपयिकत्वावगतेः कथमर्थवादानर्थक्य-
। अत आह * तस्मादिति * अदृष्टार्थत्वेऽपि पुरुषार्थौपयि-
ोपपत्तेर्नैकान्ततोऽर्थपरत्वमध्यापनविधिराक्षिपतीति भावः।
ादीनामित्यनेनैतद्दर्शयति प्रथमसूत्रव्युत्पादितमध्ययनविधेर्दृष्टा-
मर्थवादेष्वेवासम्भवादाक्षिप्य तेन सर्वत्र विधेर्हि प्रयोजनाका-
ां दृष्टे सम्भवत्यदृष्टं न कल्प्यमिति तत्रोक्तम्। न च सर्वत्रै-
ष्येण भाव्यमिति नियमो युक्तः। स्तोभादिष्वर्थपरत्वासम्भ-
। अथ तत्रापि नियतकालसामभागपूरणाद्यर्थत्वादर्थज्ञाना-
ाभावेऽपि दृष्टार्थत्वमात्रेणैकरूप्यमुच्यते। ततोऽत्रापि य-
भवति तत्प्रयोजनमित्यनेन रूपेणैकरूप्यं मत्वा सन्तोष्टव्य-
। यद्वा अध्ययनसंस्कृतैरक्षरैर्यच्छक्यते पुरुषार्थरूपं तत् कुर्या-
ाध्ययनविधिना वेदाध्ययनस्य शक्यफलसाधनत्वावगमादर्थवा-
रैः कस्य चित्पुरुषार्थरूपस्य कर्तुमशक्यत्वान्निष्प्रयोजनत्वमे-
ोकृतमित्याह * अथ वेति * प्रत्यक्षशब्देनापरोक्षाकारवाचिना
ग्रपर्यन्तमध्यापनमभिप्रेतं तस्योपेक्षाफलत्वमुपपादयितुं हेतुतया-
दजनितस्य ज्ञानस्य हेयोपादेयार्थविषयत्वेन तद्वाक्यानामुपेक्षा-
त्वं दृष्टान्तमिषेणोक्तं द्रष्टव्यम्। अर्थपरत्वाभावेऽपि कर्मानुष्ठा-

१ ग्रहणपर्यन्ततायां प्रत्यक्षत्वं सतीतिभावः।

२ तस्य ग्रहणपर्यन्तताध्ययनस्योपेक्षाफलत्वमुपपादयितुमर्थवादवाक्यानामुपेक्षाफलत्वं
ामिषेण हेतुतयोक्तमिति संबन्धः।

३ अर्थवादवाक्यानामुपेक्षाफलत्वमुपपादयितुमाह अर्थेति।

नकाले उच्चारणार्थत्वसम्भवादर्थवादाध्ययनस्यादृष्टार्थत्वं निष्प्रयोजनत्वं वा पूर्वपक्षिणापि नाङ्गीकार्य्यमित्याशङ्कते * अथेति * परिहरति * प्रयोगेति * अव्यापाररूपत्वेन मन्त्राणां व्यापारग्राहिणा करणेन[1] साक्षाद्ग्रहणायोगादुच्चारणद्वारा तद्ग्रहणं तद्ग्रहणाच्चोच्चारणार्थतेत्यन्योन्याश्रयापत्तेर्न प्रकरणपाठमात्रेण विनियोगो युक्तः सामर्थ्यात्त्वभिधानक्रियार्थत्वावगमे तद्द्वारा प्रकरणग्रहणोपपत्तेरनुच्चारितस्याभिधानाशक्तेः कर्म्मकालोच्चारणसिद्धिरिति भावः। मन्त्राधिकरणपूर्वपक्षन्यायेन चार्थवादानामर्थपरत्वाभावे ऽपि कर्म्मकालोच्चारणमत्रत्यःपूर्वपक्षी मन्यतइत्यनभिमतमपि प्रौढ्यानुजानाति * अथ वेति * अस्मिन्पक्षे सूत्रविरोधमाशङ्क्याह * यत्त्विति *

विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधिनां स्युः ॥७॥

पूर्वपक्षसिद्धान्तयोर्भिन्नविषयत्वापत्तेरपूर्वोदाहरणानुपपत्तिमाशङ्कते * पूर्वपक्षेति * नातिप्रयत्निनां परिहारमाह * केचिदिति * भाष्यकारस्यानिपुणत्वापत्तेरिमं परिहारं दूषयति * यद्यपीति * स्वमतेन परिहरति * तदभिधीयतइति * अत्र भाष्यकारेण वायुर्वैक्षेपिष्ठा देवतेति यद्यपि क्रिया नावगम्यते क्रियासम्बद्धं वा तथापि विध्युद्देशेनैकवाक्यत्वात्प्रमाणमित्युक्त्वा कथमेकवाक्यभाव इति पृष्टे पदानां साकाङ्क्षत्वाद्विधेस्तुतेश्चैकवाक्यत्वमित्यभिधानादेकवाक्यत्वं प्रामाण्यकारणं[2] स्तुत्यर्थत्वं त्वेकवाक्यत्वकारणमुक्तमिति प्रतिभाति । तच्चायुक्तं, विध्येकवाक्यत्वं विना लाक्षणिकस्तुत्यर्थत्वायोगादितरेतराश्रयापत्तेरित्याशङ्क्य व्याचष्टे * तत्रेति * स्तुत्यर्थत्वोपपादनद्वारेणैकवाक्यत्वस्योपयोगरूपप्रामाण्यकारणत्वमभिप्रेतं न साक्षात् विधिस्तुतिपदसाकाङ्क्षत्वं तु समभिव्याहारावगतैकवाक्यत्वनिर्वाहायोक्तमित्यदोषः। तदेतद्भाष्यमाक्षिपति * एतावत्त्विति * सामान्यतःपुरुषार्थानुबन्धित्वासिद्धौ तदधीनलाक्षणिकस्तुत्यादिद्वारविशेषनिरूपणाशक्तेस्तदेवादौ साध्यमिति प्रथमशब्देनोक्तम् । स्वारसिकैकवाक्यत्वावगमे[3] श्रौतार्थत्यागस्य गङ्गायां घोष इत्यादौ दर्शनात्तद्व्युदासार्थं बलादित्युक्तम् । स्वरसतो प्रतीयमानाप्येकवाक्यता

---

१ प्रयोगसमवेतार्थप्रकाशनसामर्थ्यादित्यर्थः ।

२ धर्मप्रमाजनकत्वरूपप्रामाण्यकारणं तद्बाधितं ततो धर्मप्रमानुत्पत्तेः ।

३ ननु समभिव्याहारलक्षणैकवाक्यताप्रकृते स्वारसिकीसम्भवतीति चेत् विभज्यमानसाकाङ्क्षत्वे सत्येकार्थप्रतिपादकत्वं स्वारसिकमेकवाक्यत्वं विवक्षितं प्रकृते त्वर्थवादानां निराकाङ्क्षत्वेन तदभावात् ।

रुषार्थानुबन्धित्वलाभाय स्तुत्यर्थत्वावधारणात्तद्वशेन कल्प्यमाना
ातरेतराश्रयापादिकेत्याशङ्कां निराकर्त्तुं पुरुषार्थत्वं वेत्युक्तम्। पुरु-
ार्थानुबन्धित्वस्याप्यप्रमाणकत्वादितिभावः । बहुक्षीरादिवाक्येषु
रूपभङ्गेनापि पुरुषार्थपर्य्यवसायित्वदर्शनाद्वेदे ऽपि तथानुमानं स्या-
इत्याशङ्कते * लौकिकवाक्येष्विति * आक्षेप्ता पुरुषार्थपर्य्यवसा-
यित्वे साध्ये वाक्यत्वस्य हेतोरप्रयोजकत्वं दूषणमाह * तत्रेति *
तदेवोपपादयति* लोके ऽपीति * समाधानान्तरमाशङ्कते * तत्रे-
ते * कथं तेन सूत्रेण पुरुषार्थपर्य्यवसायित्वसिद्धिरत आह * न
ीति * आदरणान्यथानुपपत्तिः पुरुषार्थपर्यवसायित्वे प्रमाणं तेन
सूत्रेण वक्ष्यतइति भावः । न च व्यामोहादादरोपपत्तिरित्याह *
अपीति * एतदेवोपसंहरति * तस्मादिति * एतदप्याक्षेप्ता दूषय-
ते * न त्वेतदिति * नन्वाप्तवाक्यवत्पुरुषाधीनप्रामाण्याङ्गीकरण-
ापि न दोषाय स्यादत आह * यदि हीति * अयमाशयः किमत्र
स्वादरान्यथानुपपत्त्या प्रयोजनवत्त्वकल्पनं स्यात् पुरुषान्तरादरान्य-
थानुपपत्त्या वा । तत्राद्ये पक्षे स्वादरात्प्रयोजनवत्त्वावगमः प्रयोजन-
त्त्वावगमाच्च स्वादर इत्यन्योन्याश्रयः स्यादित्यनेनोक्तम्। द्वितीये
तु मूलप्रमाणाभावेनान्धपरम्परेत्याह * अथेति * तदेव दर्शयति *
सर्वत्र हीति * नन्वादरान्यथानुपपत्त्याध्येतृषु प्रयोजनवत्त्वज्ञाने क-
ल्पिते तत्कारणीभूतं किं चिन्मूलप्रमाणं कल्पयिष्यामो ऽत आह
* तेनेति * कस्य चिन्मूलप्रमाणस्यासम्भवाद् भ्रान्तिमूलत्वं प्रसज्ये-
ति भावः। कथमसम्भवो ऽत आह * अतो यावदिति * एव-
माक्षिप्याध्ययनविधिरेव सर्वस्य पुरुषार्थपर्यवसायित्वे प्रमाणमिति
स्वमतेन समाधातुमुपक्रमते * तदुच्यतइति * विध्यादिसाधार-
ण्यप्रदर्शनार्थं सकलग्रहणं पूर्वं तावत्सर्वोपयोगः प्रतिपाद्यते पश्चा-
दर्थवादानां द्वारविशेष इति तावच्छब्देनोक्तम् । निष्प्रयोजनाक्षरमा-
त्राध्ययने ऽपि बुद्धिपूर्वकारिणां पुंसां प्रवर्त्तयितुमशक्यत्वान्नैक-
स्याप्यक्षरस्य निष्प्रयोजनत्वमध्ययनविधिरनुमन्यते । न चैकदेशे दृ-
ष्टार्थस्यादृष्टार्थत्वमेकदेशान्तरे युक्तम्। एकत्र नियमविधिरपरत्राप्राप्त-
विधिरिति वैरूप्यस्यापरिहार्यत्वात् तस्मात्सकलस्यैव वेदस्य प्रयोज-
नवदर्थपर्यवसायित्वमध्ययनविधिबलादवसीयतइति भावः । ननु
क चिदध्ययनविधेः पुरुषार्थपर्यवसायित्वे सिद्धे सत्यवैरूप्याय सर्व-
त्र तथाङ्गीकरणं युक्तं तदेव तु निष्प्रमाणकं समानपदोपात्तस्याध्य-
यनस्यैव भाव्यत्वोपपत्तेरित्याशङ्क्य प्रथमसूत्रोक्तं दृष्टार्थत्वे दर्शयि-

१ अर्थवादवाक्यं पुरुषार्थपर्यवसायि वाक्यत्वात् बहुक्षीरादिवाक्यवत्।

तुमाह * तत्रेति * कस्मिन्नंशे तर्हि तस्य निवेशो ऽत आह *
श्चेति * साध्यांशानिवेशकारणस्य विधिविरोधस्याबाभावमा
थादित्यनेन दर्शयति । नामार्थस्य करणांशे निराकर्त्तुं सन्निधे
क्तम् । तेनात्र भाव्याकाङ्क्षायां श्रुतभाव्याभावादश्रुतादृष्टकल्प
तस्य स्वरूपं तज्जन्यत्वं तत्र चाध्ययनस्य शक्तिः कल्प्येतेत्यनः
ष्टकल्पनागौरवापत्तेर्दृष्टस्य जन्यत्वमात्रं कल्पनीयमित्याह * ते
एवं तदनन्तरदृष्टाक्षरग्रहणमात्रेण नैराकाङ्क्ष्याच्चाभिमतं वा
र्थज्ञानपर्यन्तत्वं सिद्ध्येदित्याशङ्क्य प्राक् पुरुषार्थसिद्धेर्नैराकाङ्क्ष
यं दर्शयति * तस्यापीत्यादिना । निराकाङ्क्षी भवतीत्यन्तेन । अ
नादिविधीनामपुरुषार्थरूपाहवनीयादिमात्रे नैराकाङ्क्ष्यदर्शनाद्वि
तथा स्यादित्याशङ्क्याह * एवमिति * एवं तर्हि न साक्षात्पुरुषा
वसान्येव सर्वत्र फलमस्त्वत आह * न चेति * पारम्पर्यपुर
फलत्वेनापि विध्युपपत्तेर्न नियोगतः साक्षात्पुरुषार्थफलत्वे वि
त्प्रमाणमस्तीति भावः । एवमपि कथमत्र दृष्टफलत्वनिश्चय
आह * योग्यतया हीति * लाघवमनेन निश्चयकारणमुक्तम्
तर्हि होमादावप्याहवनीयप्राप्त्यादिदृष्टकार्यसम्भवाददृष्टकल्प
स्यात् वक्तव्यो वा विशेषो ऽत आह * तत्रेत्यादिना अदृष्टकल
न्तेन * पारम्पर्येणापि तस्य पुरुषार्थानुबन्धाभावात्फलत्वं न
वतीति भावः । नन्वेवमपि पारम्पर्यपुरुषार्थानुबन्ध्यक्षरग्रह
न्तरदृष्टत्वात्फलं स्यात्साक्षात्पुरुषार्थरूपं वा स्वर्गादिवाक्यार्थ
तूभयरूपरहितत्वात्फलत्वाङ्गीकरणमयुक्तमित्याशङ्क्य तत्प्राति
योगितया सामान्यन्यायं तावद्वक्तुमारभते * सर्वत्र चेति
हिते ऽवघातादावफलात्मकवैतुष्यादिदृष्टकार्यपरम्परायामान्त
यत्पुरोडाशादि क्रतवे यागादि वा पुरुषार्थाय चोद्यते तदेव तस
पुरुषार्थस्य वा साधनम् । पूर्वस्य त्ववघातादिविधेः पुरोड
यागाद्युपकारार्थत्वमात्रं न पुरुषार्थपर्यन्ततेत्यर्थः । पेष
तर्हि कथमन्वयो ऽत आह * यानि त्विति * पेषणादि
कार्याण्यनुष्ठेयानि पेषणादीनि तानि पूर्वविहितस्यावघातादेः
पारमात्रतया द्वारमात्रतयान्वीयन्ते नान्तरीयकत्वात्तैर्विना
तादिना पुरोडाशादेः कर्तुमशक्यत्वात् । किमिति पेषणा
तादिसाध्यत्वं पुरोडाशसाधनत्वं वा नेष्यत इत्याशङ्क्योक्तम
साध्यसाधनभावेनाचोदितत्वादिति * यदि[2] ह्यवघातवि

१ अनुष्ठानापेक्षयेत्यर्थः ।
२ किमपेक्षया प्रागत आह ।

षणादेः पुरोडाशसाधनत्वमवगतं स्यात्तत्प्रयोजनवत्त्वेन योग्यत्वा-
वघातसाध्यत्वं युज्येत पुरोडाशप्रकृतिभूतव्रीह्युद्देशेन विधानाच्चा-
घातस्यैव पूर्वं पुरोडाशसाधनतां प्रतीमः । यदि च पेषणादिविधेः
प्राक् पेषणादेरवघातसाध्यत्वावगमः स्यात् ततो द्वारमात्रत्वं न यु-
ज्येत न त्वेतदस्ति पुरोडाशस्यैवोक्तन्यायेनावघातसाध्यत्वावगमादि-
त्यर्थः यद्वोत्तराविधिशब्देन पुरोडाशाविधिमभिप्रेत्य तस्मात्प्राग्यानि
कार्याणीति योज्यम्[1] । नन्वेवं तर्ह्यदाहानुमित[2]विधिबलेन भस्मसा-
द्भावस्यापि फलसाधनत्वावगमादश्रुतफलस्य होमस्य तत्साधनत्वा-
पपत्तेर्न दृष्टफलकल्पना स्यादित्याशङ्क्याह * यत्र त्विति । अयमाश-
यः[3] * विध्यभावे ऽप्यदग्धस्य क्रत्वर्थस्य कदाचिदुपघाते सति क्र-
तुवैगुण्यापत्तेस्तत्परिहाराय दाहादरोपपत्तेर्नैकान्ततो विध्यनुमानं
विध्यनुमाने ऽपि द्वारमात्रतयापि विध्युपपत्तेर्न फलसाधनत्वकल्प-
ना युक्तेति । एवं सामान्यन्यायमुक्त्वा तदनुसारेण यथाध्ययनविधे-
र्वाक्यार्थज्ञानपर्यन्तत्वं भवति तथा प्रपञ्चयन्नाह । तत्रेति । श्रुत-
फलेषु क्लृप्तः पुरुषार्थो ऽश्रुतफलेषु कल्पयिष्यमाण इति सर्वाणि
प्रधानवाक्यानि अनेन परामृष्टानि । तत्प्रतिपादनं यावदित्यनेनाक्ष-
रग्रहणादीनां पेषणादिन्यायेनावान्तरव्यापारमात्रत्वादध्ययनफलत्वं
निराकृतं फलवद्व्यवहाराङ्गभूतार्थप्रत्ययाङ्गतानिष्फलत्वेन शब्दस्य
योग्यत्वादवधार्यतइत्यनेन न्यायेन वाक्यार्थज्ञानार्थं स्वाध्यायोद्देशेन
विहितस्याध्ययनस्य पुरोडाशार्थावघातवद्वाक्यार्थज्ञानार्थत्वावधार-
णात्तदन्तरालवर्त्तिनामक्षरग्रहणादीनां पेषणादिन्यायेनावान्तरव्या-
पारत्वमात्रं युक्तमिति भावः। ननु पुरोडाशस्य विध्यन्तरेण क्रत्वर्थतय
फलत्वज्ञानाद्युक्तमवघातसाध्यत्वं वाक्यार्थज्ञानस्य तु कथमत
आह * परतस्त्विति * वाक्यार्थज्ञानस्य सामर्थ्येन यदेव विद्यय
करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीतिवाक्येन वा कर्म्मा
नुष्ठानार्थत्वावधारणात्कर्म्मणां च विध्यन्तरैः पुरुषार्थफलत्वावधार
णात् न तत्पर्य्यन्तमध्ययनविधिरायास्यति इत्यर्थः । ननु च भवतु प्र
धानवाक्यानां स्वार्थप्रतिपादनमात्रेण पर्य्यवसानमङ्गवाक्यानां त्वर्थ
द्वारेण स्वरूपस्यापि मन्त्रवत्प्रधानैर्ग्रहणात्कर्म्मकालप्रयोज्यत्वावगते

---

१ यदा तूत्तरविधेरितिपञ्चमी तदोत्तरविधिः पुरोडाशविधिः प्रागितिच कार्यपदे सम्बध्यतइत्याह यद्वेति ।

२ तर्ह्यदरानुमितेति २ पु० पु०

३ नन्वादरानुमितविधिविहितत्वं भस्मसाद्भावस्य विद्यतएवकथम् च्यते न किंचिद्विधी यतइत्यत आह अयमाशयइति ।

नार्थप्रतिपादनमात्रेण पर्य्यवसानमित्याशङ्क्याह * यानि त्विति * अयमाशयः । न मन्त्राणामङ्गभूतार्थप्रतिपादनमात्रेण स्वरूपग्रहणं जातं किं तु विधिवशात्।न चाङ्गवाक्यानां विधिरस्ति प्रकरणपाठेन च कल्प्यत्वं शङ्क्यमानमनारभ्याधीतानां तावन्न शक्यते शङ्कितुं प्रकरणाधीतानामपि प्रयाजादिवाक्यानां प्रमाणाभावान्न सम्भवतीति।एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * अदृष्टार्थत्वेन क्रतोरदृष्टोपकारापेक्षत्वान्न दृष्टार्थाङ्गवाक्यग्राहकत्वमित्यर्थः[2] प्रयोजनशब्देनोपकारमाह न च साक्षात्क्रतुसम्बन्धायापि प्रयोज्यत्वकल्पनं[3] पारम्पर्येणापि पुरुषार्थानुबन्धलाभादित्यर्थान्तरन्यासेनाह * अत इति * अङ्गानां प्रधानवाक्यवदेकान्तरितपुरुषार्थान्वयित्वाद् बाह्यत्वम् । तद्वाक्यानां तु द्व्यन्तरितत्वात्प्रधानाद् बाह्यतरत्वं एतच्च द्व्यन्तरितत्वं प्रकरणाधीनारादुपकारकाङ्गवाक्यविषयं सामवायिकाङ्गवाक्यानां त्वादिशब्दोपात्तोपनयनादिवद् बहुव्यवधानमित्याह * एवमिति[4] * स्वमते पुरोडाशस्यैव साक्षात्प्रधानभूतयागसाधनत्वाद्भाष्यकाराभिप्रायेण द्व्यवदानग्रहणं व्यवहिततरत्वप्रदर्शनार्थं कृतं आदिशब्दो व्रीह्यादीत्यादिशब्दोपात्ताज्यादिविषयः चतुर्गृहीताद्यभिप्रायो द्रष्टव्यः एतामेव सन्निधिव्यवधिव्यवस्थामनारभ्याधीताङ्गवाक्येष्वतिदिशति * एवमेवेति * कथं तर्ह्यनारभ्याधीतानां प्रकरणाधीतेभ्यो दौर्बल्यमत आह * तत्र त्विति * असम्बद्धवाक्यान्तरव्यवायेन तेषु प्राकरणिकाङ्गवाक्यवत्प्रधानवाक्यैकवाक्यत्वायोगादिति भावः अनङ्गवाक्यानां त्वतिदूरव्यवधानमित्याह * यानि त्विति * ननूक्तेः द्वारेण पुरुषार्थानुबन्धिकर्म्मानुष्ठानोपयोगिवाक्यार्थज्ञानं सर्वविधिवाक्येषु सम्भवदपि सकलवेदाव्यापित्वान्नाध्ययनविधिप्रयोजनं भवितुमर्हतीत्याशङ्क्य सूत्रभाष्यकारानुक्तत्वादुपनिषद्वाक्यानां तावदुपयोगमाह * एतेनेति * उपनिषदामपि[5] आधानादिवाक्यन्यायेन द्व्यर्थेनैव क्रतुफलेन नैराकाङ्क्ष्यमित्यर्थः । कथमित्यपेक्षिते क्रत्वर्थकर्तृप्रतिपादनद्वारेणेत्युक्तम् । परलोकफलेषु कर्मसु विनाशिदेहादिव्यतिरिक्तनित्यकर्तृभोक्तृरूपात्मज्ञानं विना प्रवृत्त्यनुपपत्तेरहंप्रत्ययेन च देहे ऽपि दृष्टेन स्फुटतया तद्व्यतिरेकस्य ज्ञातुमशक्यत्व

१ वाक्यार्थप्रतिपादनं दृष्टोऽर्थः ।

२ ननु ज्ञानानामफलत्वात् कथं प्रयोजनद्वारेणेत्युक्तमत आह प्रयोजनेति ।

३ प्रयोगकालेपाठकल्पनमित्यर्थः ।

४ ननु द्व्यवदानस्याचार्यमते प्रतिपत्तित्वात् कथं यागसाधनत्वमुक्तमत आह स्वमत इति

५ यथाधानादिवाक्यानां क्रत्वङ्गभूताग्निसंस्कारप्रतिपादनद्वारेण पुरुषार्थत्वं तथेत्यर्थः

तु शास्त्रीयमात्मज्ञानं क्रतुविधिभिरपेक्षितं तस्य चानारभ्य
स्यापि सामर्थ्येन पूर्वोदाहृतेन वाक्येनोपनिषदाममन्त्रत्वेन
प्रयोज्यत्वाभावादुपनिषज्जनितस्यात्मज्ञानस्य फलातिशयलक्ष
र्थ्यवत्तरत्वहेतुत्वाभिधानपरेण क्रत्वङ्गत्वावधारणात् तद्द्वारे
रुषार्थानुबन्धित्वम् । ज्ञानस्य चाव्यापाररूपत्वेन स्वरूपेणा
त्वे ऽप्युपासनापरनामधेयं ध्यानमेवात्मा ज्ञातव्य इत्यादिभि
यते । अप्रतिपन्नस्वरूपस्य च ध्यातुमशक्तेरात्मस्वरूपप्रति
मविनाशी वा अरे ऽयमात्मेत्यादिभिः क्रियमाणं विध्य
त्वाज्ञार्थवादेष्विवानादरमर्हतीति तद्द्वारेणोपनिषदां पुरुषा
वसानामिति भावः । एतच्च संसारिरूपात्मप्रतिपादनाभि
असंसारिरूपसगुणनिर्गुणात्मज्ञानस्याभ्युदयनिःश्रेयसार्थतया
शब्दाधिकरणे वक्ष्यमाणत्वात्सिद्धार्थप्रतिपादनपराणामप्युप
मुपासनाविधिशेषतया चोदनाशब्देनोपादानसम्भवाच्चोदन
तिज्ञातप्रामाण्यसाधनं सङ्गतम् । पुरुषार्थौपयिकत्वेन चात्म
प्रतिपादनेनैराकाङ्क्ष्यसम्भवात् पदैकवाक्यत्वाभावेनार्थवा
ण्यमिति सर्वमनवद्यम् । मन्त्रनाम्नोः केन द्वारेण नैराका
त आह * मन्त्रेति * योज्यते संबध्यते भावनया सहानेने
त्पत्त्या योजनाशब्देन द्वारमुक्तम्। ननु साध्यसाधनेतिकर्तव्य
धायित्वेनाक्रियार्थत्वान्मन्त्रादीनामानर्थक्यमाशङ्कितं तत्कथं
र्थत्वमव्युत्पाद्यैवार्थवत्त्वं व्युत्पाद्यते तत्राह * तेनेति *
वनासंबन्ध्यर्थप्रतिपादनेनैवार्थवत्त्वं वक्ष्यते तेन भावनान्तर्ग
द्वेवेत्यर्थः अर्थवादोपयोगद्वारानभिधाने ऽप्यध्ययनविधिवः
मान्यतः सर्वोपयोगस्य साधितत्वात्सर्वेषामित्युक्तम् । एतः
मान्यतः सर्वोपयोगप्रतिपादनं, सूत्रेष्वेव हि तत्सर्वं यद्वृत्त
वार्त्तिकइति न्यायाद्विधिना त्वेकवाक्यत्वादिति सूत्रावयवा
ख्यं, तत्र तुशब्देनानर्थक्यनिराकरणार्थेनार्थवत्त्वं सामान्यत
षां प्रतिज्ञातं श्रुतिवृत्त्या क्रियार्थत्वानवगमे ऽपि क्रियावि
क्यत्ववशेन लक्षणया तदपेक्षितार्थप्रतिपादनाक्रियार्थः
दयितुं विधिनैकवाक्यत्वादित्युक्तमिति योज्यं,

१ चोदनेति ननु चोदनाशब्दस्य मन्त्रार्थवादनामधेयोपेतमहावाक्यत्वा
चोपनिषदामनन्तर्भावात्पुरुषार्थौपयिकत्वेन चैत्यर्थिसभक्रियार्थवादेभ्यः पृथक्
चोदनाशब्देनोपादानं कथं वा तत्सूत्रप्रतिज्ञातप्रामाण्यसाधनमिति चेत् सत्यं
विनिकर्तव्यतात्वेन सर्वत्र भावनान्तर्गतिरुक्तदोषाभावादित्यर्थः ।

२ सूत्रेति तत्रत्यावृत्त्या सामान्यविशेषसमाधानपरतया सूत्रं योजनीयमिति

। यद्यपीत्यादिप्रमाणमित्यन्तमेतत्सूत्रावयवव्याख्यानपरमेव यो-
ग्यम् । यद्यप्यर्थवादादिभ्यः श्रुत्या क्रिया तत्सम्बद्धं वा नावग-
यते तथापि तत्रैव प्रमाणं विध्युद्देशैकवाक्यत्ववशेन लक्षणया
त्या तत्परत्वसम्भवादिति । एवं सामान्यतः सर्वेषां क्रियार्थत्वमु-
पाद्येदानीमर्थवादानां क्रियार्थत्वनिर्वाहाय द्वारविशेषं प्रतिपाद-
तुं यो ऽपि चेत्यादिनोक्तं पूर्वपक्षन्तावदनुभाषते * यस्त्विति *
्याप्रतिपादकत्वं हि क्रियार्थत्वं न चार्थवादैराख्यातवत्स्वरूपेणा-
ो प्रतिपाद्यते नापि फलादिपदवत्तदंशः कश्चित्साध्यादिः तस्मात्त-
र्थस्य भावनांशत्रयानन्तःपातान्न तत्प्रतिपादकत्वं विनार्थवादानां
ावनया ग्रहणमित्यर्थः । एवमनुभाष्य निराकर्त्तुमाह * तत्रेति *
द्यप्यर्थवादानां विधिवदनुष्ठापकत्वेन न क्रियार्थत्वं क्रियाभिधाय-
त्वं वा तथापि प्राशस्त्यज्ञापनेनैवानुष्ठापकत्वात्स्वरसतश्च प्राश-
याज्ञानादध्ययनविधिबलाल्लक्षणया तादर्थ्यमङ्गीकार्यम् । न च प्रा-
स्त्यज्ञानस्य कर्त्तव्यत्वासिद्धावध्ययनफलत्वं युक्तं रागतो विधितो
कर्त्तव्यत्वेनानवगतस्य कस्य चित्फलत्वायोगात् । कर्त्तव्यत्वं च
ावनान्तर्गत्या विना न सिध्यतीत्यर्थवादाध्ययनफलत्वोपपत्तये प्रा-
स्त्यज्ञानस्य कर्तव्यत्वसिद्ध्यर्थं भावनान्तर्गतिव्युत्पादयितुमारभते
सत्यमिति * ननु न तावदर्थभावनान्तर्गतिः प्राशस्त्यज्ञानस्य कै-
ादिष्यते । न च ततो ऽन्या शब्दभावना नाम का चिदुपपत्ति स-
ो शब्दश्रवणानन्तरभाविन्यां हि प्रवृत्तौ हेतुः प्रवृत्त्युत्पादकत्वात्
दभावनाशब्देनाभिप्रेतः । न चासौ कश्चित्सम्भवति । तथा हि

प्रवर्त्तको लिङादिर्वा तत्क्रिया वा विलक्षणा ।
अभिधा वाथ वाज्ञादिः कार्यं वाथेष्टहेतुता ॥ १ ॥
तत्र शब्दः स्वरूपेण वायुवच्चेत्प्रवर्त्तकः ।
प्रमाणत्वं विहन्येत नियमाच्च प्रवर्त्तयेत् ॥ २ ॥
न च स्वरूपसम्बन्धज्ञानापेक्षो भवेन्न च ।
प्रकृत्यान्वयमाकाङ्क्षेन्न च स्यात्फलकल्पकः ॥ ३ ॥
अथ प्रवृत्ति हेत्वर्थस्वव्यापाराभिधानतः ।
प्रवर्त्तकत्वाच्छब्दस्य सर्वदोषनिवारणम् ॥ ४ ॥
तत्र प्रवृत्तिसामर्थ्यापादनात्मास्य या क्रिया ।
कारीर्य्यादिषु दृष्टा सावनुक्तैव प्रवर्त्तिका ॥ ५ ॥
तेनाभिधानवैयर्थ्यात्पूर्वदोषानिवारणम् ।
अलौकिकी प्रेरणा तु सम्बन्धानुभवादृते ॥ ६ ॥
अभिधातुमशक्यत्वान्न प्रवर्त्तयितुं क्षमा ।

राजादिवच्च शब्दस्य फलादातृत्वतः स्वतः ॥ ७ ॥
तद्व्यापाराभिधाने ऽपि न प्रवर्त्तेत कश्चन ।
पुरुषार्थोपयोगित्वं न लिङादेश्च गम्यते ॥ ८ ॥
येनास्यानुविधेयत्वात्फलकल्पकता भवेत् ।
तस्याप्यानुविधेयत्वे शब्दस्य न तदीयताम् ॥ ९ ॥
अज्ञात्वा व्यापृतेः कश्चित्प्रवर्त्तेताभिधावपि ।
न च शब्दमनुक्तैतद्व्यापारत्वं निरूप्यते ॥ १० ॥
स्वरूपवाच्चिताता ऽस्मिन्पक्षे ऽनिष्ठा लिङां भवेत् ।
अस्तु तर्ह्यभिधानाख्यो व्यापारो ऽस्य प्रवर्त्तकः ॥ ११ ॥
तस्य ह्यर्थप्रतीत्याख्यकार्यक्लृप्तस्य केवलम् ।
कल्प्यं प्रवृत्तिहेतुत्वं लिङ्वाच्यस्येति लाघवम् ॥ १२ ॥
शब्दान्तरगतार्थे ऽस्मिन्नभिधा स्यात्प्रवर्त्तिका ।
पक्षे ऽर्थतो विशेषश्चेत्स एव स्यात्प्रवर्त्तकः ॥ १३ ॥
न चास्या अभिधेयत्वाद्विशेषः कार्यतो गतेः ।
न युक्तं ह्यभिधेयत्वं सर्वासां हि प्रसज्यते ॥ १४ ॥
अथ प्रवर्त्तनात्वेन कार्यादनवबोधतः ।
तद्रूपेणाभिधेयत्वं तच्चान्यासु न विद्यते ॥ १५ ॥
तन्नास्या ह्यभिधानात्प्राक् चेत्प्रवर्त्तकरूपता ।
स्याद्व्यर्थमभिधेयत्वं नास्ति चेत्स्यादसत्यता ॥ १६ ॥
आज्ञादिस्तु न वेदार्थः पुंधर्मत्वेन युज्यते ।
अथ मानान्तराऽगम्यान्नियोगापरनामकम् ॥ १७ ॥
कार्यं लिङादिवाच्यं सत्स्वतन्त्रं स्यात्प्रवर्त्तकम् ।
तदप्ययुक्तमज्ञातसम्बन्धत्वाल्लिङर्थता ॥ १८ ॥
मानान्तराप्रमेयत्वे कार्यस्य हि कथं भवेत् ।
अथ स्वस्थस्वतन्त्रस्य पुंसो लिङ्श्रवणे सति ॥ १९ ॥
प्रवृत्तेरात्मदृष्टान्तात्कार्यधीहेतुतां शिशुः ।
अनुमाय लिङस्तत्र वाचकत्वं प्रकल्पयेत् ॥ २० ॥
कार्यं च वेदे षष्ठाद्यसिद्धान्तात्कामिनाऽन्वितम् ।
नियोज्येनात्मनः कार्यतया ज्ञातमिति स्थितम् ॥ २१ ॥
नियोज्यश्च स्वसंबन्धिकार्यबोधो ऽभिधीयते ।
काम्यमानाभ्युपायं च बुध्यते कार्यमात्मनः ॥ २२ ॥
कामी न च क्रिया तत्र क्षणिकोपायतां व्रजेत् ।
क्रियातो ऽन्यदतः कार्यं वेदे वाच्यमलौकिकम् ॥ २३ ॥
तत्रापूर्वस्य कार्यत्वं कृत्युद्देश्यत्वलक्षणम् ।

अयुक्तमपुमर्थत्वादव्यापारतया न च ॥ २४ ॥
अनुष्ठेयत्वरूपं न व्यापारत्वे स्वतन्त्रता ।
अव्यापारतया चास्मिन्नियोगो नावकल्पते ॥ २५ ॥
तेनात्मनि नियोक्तृत्वान्नियोग इति वाङ् मृषा ।
किं च नित्यनिषेधाधिकारेषु फलवर्ज्जनात् ॥ २६ ॥
क्रियातिरिक्तकार्यस्य कथं सिद्धिर्भवेत्तव ।
कृत्युद्देश्यत्वरूपं च कार्यत्वं चेत्प्रवर्तकम् ॥ २७ ॥
तद्रूपत्वात्फलस्यैव प्रसज्येत प्रयोक्तृता ।
तच्च कामपदोक्तत्वान्न लिङादिभिरुच्यते ॥ २८ ॥
लिङर्थस्य प्रयोक्तृत्वं ततश्चेष्टं न सिध्यति ।
नन्विच्छाजननेनान्यत्सर्वैरिष्टं प्रवर्त्तकम् ॥ २९ ॥
साक्षात्प्रवृत्तिहेतुत्वादतः सैव लिङोच्यते ।
तद्द्वारेण लिङर्थत्वात्फलं तेन प्रवर्त्तकम् ॥ ३० ॥
नैतद्युक्तं फलेच्छायाः पुंव्यापारतया पुमान् ।
अस्मिन्पक्षे प्रयोक्ता स्यात् प्रवर्त्यत्वात्स नेष्यते ॥ ३१ ॥
फलस्य प्रीतिरूपत्वं लिङुक्तं चेत्प्रवर्त्तना ।
फल एव प्रवर्त्तेत नान्यत्रातिप्रसङ्गतः ॥ ३२ ॥
अथाव्यापाररूपत्वात्प्रवृत्त्यविषयत्वतः ।
फलस्य साधने ऽङ्गावतारन्यायात्प्रवर्त्तते ॥ ३३ ॥
ततः साधनबोधात्प्रागप्रवृत्तेः प्रवर्त्तना ।
वरं साधनतैवास्तु न क्लेशात्प्रातिरूपता ॥ ३४ ॥
तस्याश्च कर्म्मधर्मत्वात्कर्मैव स्यात्प्रवर्त्तकम् ।
प्रवृत्तिविषयत्वाच्च न तद्युक्तं प्रवर्त्तकम् ॥ ३५ ॥
साध्यता फलधर्मो ऽथ लिङुक्तः सन्प्रवर्त्तना ।
नासौ पूर्वमसिद्धत्वात्प्रवर्त्तयितुमर्हति ॥ ३६ ॥
अथानुष्ठेयतारूपं कार्यत्वं स्यात्प्रवर्त्तकम् ।
ततो ऽर्थभावनैव स्यात्तद्रूपत्वात्प्रवर्त्तिका ।
सा चाख्यातान्तरे भावात्प्रवृत्तिव्यभिचारिणी ॥ ३७ ॥
कालसंबन्धतो ऽर्थानुष्ठेयत्वप्रतिबन्धनात् ।
तत्राप्रवृत्तिरित्येतत्किं स्यादिति निरूप्यताम् ॥ ३८ ॥
कृत्यात्मभावना या हि न कृतिव्याप्यतां विना ।
जन्यत्वं प्रागसिद्धत्वात्फलस्येवाप्रवर्त्तकम् ॥ ३९ ॥
अथानिष्पन्नरूपत्वं तदभावे ऽपि विद्यते ।
तस्मात्क्रियात्मकं कार्यमथ वा तत्फलात्मकम् ॥ ४० ॥

न ताभ्यामतिरिक्तं वा पूर्वमस्ति प्रवर्त्तकम् ।
अत एवेष्टहेतुत्वं न तदेकार्थसङ्गतम् ॥ ४१ ॥
प्रवर्त्तकं नापि शुद्धं चन्द्रादौ व्यभिचारतः ।
शुद्धस्य च लिङर्थत्वे कर्त्तव्यत्वात् प्रतीतितः ॥ ४२ ॥
भवेन्नाकरणे दोषो निष्कामेष्वपि कर्म्मसु ।
न च द्रव्यगुणादीनां क चित्स्यादिष्टहेतुता ॥ ४३ ॥
प्रत्ययेन प्रकृत्यर्थान्वयिस्वार्थाभिधानतः ।
कर्त्तव्यत्वविशिष्टस्य वाच्यत्वं तु न युज्यते ॥ ४४ ॥
कर्त्तव्यत्वाविनाभावात्तत्प्रतीत्युपपत्तितः ।
नन्विष्टहेतुतामात्रं लिङा तावन्निरूप्यते ॥ ४५ ॥
कस्येष्टमित्यपेक्षायामेकप्रत्ययवाच्यया ।
कर्त्तुर्भावनयाक्षिप्तस्येत्येवं गमयिष्यते ॥ ४६ ॥
क्रियायां चाप्रवृत्तस्य कर्त्तृत्वानुपपत्तितः ।
प्रवृत्तिविषयत्वाख्यं कर्त्तव्यत्वं प्रतीयते ॥ ४७ ॥
एवं तु वर्त्तमानापदेशे ऽप्येतत्प्रतीतितः ।
कर्त्रिष्टसाधनत्वस्य तद्बलेनैव कल्पनात् ॥ ४८ ॥
लिङाद्यवाच्यतापत्तेरप्रामाण्यं विधेर्भवेत् ।
प्रवृत्तिविषयत्वं च नेच्छा विषयतां विना ॥ ४९ ॥
युक्तमिच्छाप्रवृत्त्योर्हि परशुच्छिदयोरिव ।
भिन्नगोचरता न्याय्या न हेतुफलभावतः ॥ ५० ॥
अत एवेष्टहेतूनां स्वबुद्ध्या यो ऽयमिच्छति ।
प्रवर्त्तते स तत्रैव नानिष्टे ऽपीष्टसाधने ॥ ५१ ॥
तेनेष्टसाधनत्वस्य सद्भावे ऽप्यप्रवृत्तितः ।
प्रवृत्तिव्यभिचारित्वान्न प्रवर्त्तकतोचिता ॥ ५२ ॥
इच्छात्वव्यभिचारित्वाद्भवेत्पुंसां प्रवर्त्तिका ।
स्वरूपसत्तामात्रेण न तु ज्ञानमपेक्षते ॥ ५३ ॥
अथापि ज्ञायमानासौ कारणं स्यात्तथापि तु ।
स्वप्रत्यक्षैकगम्यत्वान्नाभिधानमपेक्षते ॥ ५४ ॥
एतत्सर्वं पूर्वपक्षी मनस्याधाय पृच्छति ॥ ५५ ॥

कथमिति । उत्तरमाह * इह हीति * अयमाशयः । स्वतन्त्रपुरुषप्रवृत्तिर्द्विधा लोके दृश्यते । क चित्स्वेच्छयार्थेषु स्वार्थः प्रवर्त्तते क्वचिदन्यप्रेरितः आचार्यप्रेरितो ऽहं गामानयामि न स्वेच्छयेत्यादिव्यवहारदर्शनात् । यद्यप्याचार्यादिरप्यनिच्छन्तं न शक्नोति प्रवर्त्तयितुं तथापि स्वारसिकेच्छारहितमपि शिष्यादिकं स्वप्रवर्त्तनाबले-

मेच्छामुत्पाद्य प्रवर्त्तयतीति सर्वसाक्षिकं, तस्माच्छब्दश्रवणानन्तर-भाविन्यां प्रवृत्तावाचार्यादेः प्रवर्त्तनाज्ञापनेन[1] प्रवर्त्तकत्वमवसीयते का पुनः प्रवर्त्तना प्रवृत्तिहेतुभूतः प्रवर्त्तयितुर्धर्मः[2] कश्चिदिति ब्रूमः । स्वातन्त्र्ये देवदत्त एव मां प्रवर्त्तयति न यज्ञदत्त इति व्यवस्थानुपपत्तेः प्रवर्त्तनाज्ञापनमात्रेण प्रवर्त्तकत्वे देवदत्तस्त्वां प्रवर्त्तयतीति प्रवर्त्तनाद्यज्ञदत्तस्यापि प्रवर्त्तकत्वप्रसङ्गः।सर्वत्र लोके पुरुषस्याचार्यादेः प्रवर्त्तयितुर्द्धर्म्मो ऽहमेनं प्रवर्त्तयामीति प्रवर्त्तयितुर्म्मानसप्रत्यक्षवेद्यः प्रैषादिरूपो नापह्नोतुं शक्यते। वेदे तु पुरुषाभावेन लिङादेरेव प्रवर्त्तकत्वात्तद्धर्म्मो भविष्यति कथमज्ञातपूर्वेण प्रवर्त्तयितुर्द्धर्म्मेणाव्युत्पन्नो बालः प्रथमं लिङादेः संबन्धं गृह्णातीति चेत् । पश्य यदा बुभुक्षितस्य बालस्य रोदनेन स्तनदानप्रवर्त्तनां ज्ञात्वा स्तनदाने माता प्रवर्त्तते तदासौ तस्या मातुः प्रवृत्तेः कारणं जिज्ञासमानः कारणान्तरानुपलब्ध्या स्वप्रवर्त्तनायां कारणत्वं प्रकल्प्य गामानयेत्यादिवाक्यश्रवणानन्तरं प्रयोज्यवृद्धप्रवृत्तिं दृष्ट्वा मातृप्रवृत्तिदृष्टान्तेन तस्यामपि प्रवर्त्तनाज्ञानकारणकत्वमनुमाय तत्कारणजिज्ञासायां लिङादिशब्दश्रवणानन्तर्यात्तस्यैवान्वयव्यतिरेकाभ्यां प्रवर्त्तनाभिधानशक्तिं कल्पयन् केन वार्यते । तत्र च प्रैषादीनां विशेषाणां व्यभिचारित्वेनावाच्यत्वात्सर्वानुयायिनः प्रवर्त्तनासामान्यस्य वाच्यत्वे ऽवगते तद्विशेषाकाङ्क्षायां प्रैषादीनां पुरुषधर्म्माणां वेदे ऽनुपपत्तेस्तद्विलक्षणं विशेषान्तरमभिधेयेन सामान्येन विधिप्रेरणानियोगाख्यं लक्ष्यते अतो गृहीतसंबन्धतया लिङादिवाच्येन प्रवर्त्तनासामान्येन तद्विशेषस्य प्रेरणाख्यस्य लक्षणयावगतिसम्भवात् संबन्धाग्रहणमदोषः । तस्य च प्रवर्त्तनासामान्यविशेषत्वेन हेतुना प्रैषादिदृष्टान्तेन प्रवर्त्तयितृधर्म्मत्वानुमानाद्वेदे च पुरुषाभावात् भावनादेश्च[3] प्रवृत्तिविषयत्वेन तदानीमसत्त्वात् प्रवर्त्तकत्वानुपपत्तेः। पारिशेष्याल्लिङादेरेव प्रवर्त्तकत्वावधारणात्तदीयत्वसिद्धेर्न लिङादिशब्दस्वरूपाभिधानापत्तिः । प्रवृत्तिविषयत्वस्य च श्रेयःसाधनत्वाक्षेपकत्वेन लिङादेः पुरुषार्थौपयिकत्वेनानुविधेयत्वात्प्रवर्त्तकत्वाव्याहतिः : कथं श्रेयःसाधनत्वाक्षेपकत्वमिति चेत् । पश्य प्रवर्त्तना तावत् प्रयत्नरूपभावनाविषया सर्वत्रावधार्यते । गामानयेत्युक्ते गवानयने प्रयतमानस्य कुतश्चित्कारणाद्गवानयनासिद्धावपि मदाज्ञामयं कृतवानित्याज्ञप्तुर्व्यवहारदर्शनात्

---

१ स्वप्रवर्तनाज्ञापनेनेत्यर्थः ।

२ प्रवर्तयितुर्धर्म इति २ पु० पा०

३ वृत्तेरर्थौपाधिकात्प्रवृत्तिविषयत्वस्वीकारादित्यर्थः ।

तो ऽपसरेतिचोक्ते स्वयमप्रयतमानस्य बलात्केनचिदपसारितस्य जा-
। ऽप्यपसरणे नायं मदीयामाज्ञाकृतवानित्याज्ञप्तुर्व्यवहारदर्शनात् ।
यत्नप्रवर्त्तकत्वाच्च प्रवर्त्तनायास्तस्य च प्रयत्नमन्तरेणान्यत्राप्रवृत्तेः
यत्नविषयत्वसिद्धिः । प्रयत्नश्चेच्छाकारणकत्वात् तां विना नोप-
द्यते सा च स्वरसतः पुरुषार्थ एव स्वर्गपुत्रपश्वादौ भवन्ती सा-
नमन्तरेण तदसिद्धेस्तत्सिद्ध्यर्थं तत्साधने संक्रामेत् । तेन स्वय-
पुरुषार्थस्य यागादेः पुरुषार्थसाधनत्वं विनेच्छाविषयत्वानुपपत्तेः
वृत्तिविषयत्वासम्भवेन तत्र लिङादेः प्रवर्त्तकत्वायोगात्तन्निर्वाहार्थं
पुरुषार्थसाधनत्वाक्षेपकत्वसिद्धिः । न चैवं[2] पुरुषार्थसाधनत्वावग-
ताविच्छात एव प्रवृत्तिसिद्धेः कारणकारणत्वेनान्वयव्यतिरेकयोर-
न्यथासिद्धत्वाल्लिङादीनामप्रवर्त्तकत्वं प्रसज्येतेति शङ्कनीयम् ।
न हि यत्सिद्ध्यर्थं यत्कल्प्यते तेनैव तद्बाधोचिता कल्पकाभावेना-
त्मोपमर्द्दप्रसङ्गात् । यथैव च श्रेयःसाधनत्वाकल्पने प्रवर्त्तकत्वानि-
र्वाहात् तन्निर्वाहाय श्रेयःसाधनत्वं कल्प्यते तथैवं[3] स्वरूपेण या-
गादेः श्रेयःसाधनत्वे सति इच्छयैव प्रवृत्तिसिद्धेर्लिङादीनां प्रवर्त्त-
कत्वानिर्वाहाद्विहितस्वरूपेण श्रेयःसाधनत्वं कल्पयिष्यते । तथा च
लोके ऽपि स्वाम्याज्ञामन्तरेण स्वेच्छया गवानयनादौ कृते ऽपि न
तत्फलं वेतनं लभ्यते तस्मात्प्रवर्त्तकान्तरासम्भवे ऽपि प्रेरणाज्ञापनेन
लिङादेर्वेदे प्रवर्त्तकत्वं सिद्धम् । सा च प्रेरणाप्रवृत्त्युत्पादकव्या-
पारत्वाद्भावनाशब्देन गीयते । भाव्योत्पादानुकूलस्य व्यापारस्य
भावनात्वप्रसिद्धेः व्यापारत्वं च तस्याः सिद्धरूपत्वे निर्व्यापारा-
याः प्रवृत्त्युत्पादकत्वासम्भवेन ज्ञानस्य च ज्ञेयव्यापारत्वायोगा-
द्व्यापारान्तरकल्पनापत्तेर्गौरवपरिहारार्थं कल्प्यते प्रेषणाध्येषणा-
दीनामपि पुरुषाशयविशेषाणामनेनैव न्यायेन व्यापारत्वाध्यवसानं
द्रष्टव्यं व्यापारस्य च व्यापारवतो ऽत्यन्तभेदाभावाच्छब्दात्मिकेत्यु-
क्तम् । एतामेव शब्दात्मिकां शब्दस्यात्मनो व्यापारं भावार्थाधिक-
रणे तत्रार्थात्मिकायां लिङादिशब्दानां यः पुरुषं प्रति प्रयोजकव्यापा-
रः सा द्वितीया शब्दधर्म्मो ऽभिधात्मिका भावना विधिरित्युच्यत इत्य-

---

१ तदिति २ पु० ना० ।

२ इष्टसाधनताज्ञानस्येच्छाजनकत्वात् तद्द्वारैव वृत्तिरित्यर्थः ।

३ यथा श्रेयःसाधनव्यतिरेकेण विधिना पुरुषो यागे प्रवर्तयितुं न शक्यते इति प्रवर्त-
कतानिर्वाहाय तत्कल्प्यते तथा प्रवर्तकत्वनिर्वाहाय विहितरूपेण श्रेयःसाधनत्वं कल्पयि
ष्यते अन्यथास्वरूपे सति श्रेयःसाधने इच्छयैव प्रवृत्तेः प्रवर्त्यस्य फलाभावात् विधेः प्रवर्तकत्व
न स्यादित्यर्थः ।

ष्टान्तेनात्रापि कथम्भावाकाङ्क्षा स्यात् । तथापि विधिसम्बन्धज्ञानयोरेव कारणेतिकर्त्तव्यतात्वसम्भवात्प्राशस्त्यज्ञानस्याज्ञातशक्तिकस्येतिकर्त्तव्यतात्वाभिधानमयुक्तमित्यभिप्रायद्वयेन पृच्छति * कुत एतदिति * एतत्कथमित्यपेक्षणं प्राशस्त्यज्ञानस्य चानुग्राहकत्वं कुत इत्यर्थः । उत्तरम् * बुद्धिपूर्वेति * विध्यन्यथानुपपत्त्ये इष्टसाधनत्वावगमात् प्रवृत्तिहेत्विच्छोत्पत्तावपि द्रव्यव्ययायासदर्शनेनापि अनिष्टसाधनत्वावगमात्प्रवृत्तिप्रतिबन्धकालस्य हेतुद्वेषसम्भवे प्रवृत्त्यभावप्रसङ्गात्तदपनायकापेक्षायां प्राशस्त्यज्ञानस्य लोके तदपनयशक्तत्वेन दर्शनाद्युज्यते ऽनुग्राहकत्वमित्यभिप्रायः । उत्तम्नातीत्यनेन प्रतिबन्धकापनायकत्वं दर्शितम् । ननु प्रवृत्तिकारणेच्छाविरोधिद्वेषनाशाय प्राशस्त्यज्ञानापेक्षणे फलांशे ऽपि तदपेक्षोपपत्तेः स्वर्गस्वरूपप्रतिपादकानामपि वाक्यशेषाणां प्राशस्त्यपरत्वेन स्वरूपपरत्वाभावप्रसङ्गात् न लौकिकसुखातिरिक्तस्वर्गसिद्धिः स्यादित्याशङ्क्याह *तच्चेति* अयमभिप्रायः अङ्गप्रधानयोरेव[2] विषयत्वात्प्रेरणाविषयएव प्राशस्त्यज्ञानस्य कार्यत्वावगतेः फलांशे च स्वारसिकेच्छात एव प्रवृत्तिसिद्धेरानर्थक्यप्रसङ्गात्, प्रेरणानुपपत्तेः प्राशस्त्यज्ञानस्य कार्यत्वाभावात्, साधनानपेक्षत्वेनार्थवादाग्रहणात्स्वर्गसाधनतो विध्यपेक्षितस्वर्गस्वरूपप्रतिपादनार्थानां वाक्यशेषाणां प्राशस्त्यपरत्वाभावात्स्वरूपे प्रमाण्यं न विरोत्स्यत इति । क्व तर्हि प्राशस्त्यज्ञानस्य साधनापेक्षेत्यत आह * साधनेति * साधनेतिकर्त्तव्यताविषये प्राशस्त्यज्ञानस्य साधनभूतशास्त्राकाङ्क्षायामपि फलपदादिभिरेव तत्सिद्धिसम्भवात्कथमर्थवादानां तादर्थ्येन शब्दभावनया ग्रहणमित्याशङ्क्य यथासम्भवं साधनान्तराणि निराकर्त्तुमुपन्यस्यति * तत्पुनरिति * तत्प्राशस्त्यप्रतिपादनं केन शास्त्रेण क्रियेतेत्यर्थः । निराकरोति * तत्रेति * दूषणगुणोपन्यासार्थस्तत्र शब्दः । ननु यद्यन्यार्थत्वे प्राशस्त्यार्थत्वं न युज्यते प्राशस्त्यार्थत्वमेव केवलमस्त्वत आह * विध्युत्तरेति * पूर्वापेक्षितार्थत्यागो न युक्त इत्यभिप्रायः[4] कारणान्तरमाह * लक्षणया चेति * फलाभावापत्तेरपि प्राशस्त्यार्थत्वं न युक्तमि-

---

१ इच्छोत्पादनद्वारा प्रवर्तकत्वम् इच्छा चेष्टसाधनत्वज्ञानं विना न संभवतीति अनुपपत्तिशब्दार्थः ।

२ अङ्गप्रधानयोरेव विधिविषयत्वान्न फलांशस्य विषयत्वमित्यर्थः ।

३ आदिग्रहणाद्देवताधिग्रहः यस्मादेतत्फलकमेतद्देवताकं तस्मात्प्रशस्तमित्यर्थः ।

४ साध्यसाधनेतिकर्तव्यताविशिष्टायां भावनायां सिद्धायामेवोद्देश्यत्वन्ततश्च पूर्वमेव फलत्वेनान्वय इत्यर्थः ।

त्याह * युगपच्चेति * ननूभयपरत्वायोगात् फलादिषु तात्पर्याभावे ऽपि प्रतीयमानत्वात्फलादीनां सिद्धिः स्यादत आह * न हीति * वक्ष्यतइत्यपापश्लोकश्रवणादीनां प्रशंसार्थत्वेनोपात्तानां फलत्वाभावः पर्णमय्यधिकरणे जर्तिलयवाग्वा वा जुहुयादित्यादौ लिङो विधित्वाभावो जर्तिलयवाग्वादेश्चेतिकर्त्तव्यत्वाभावो दशमे वक्ष्यमाण परामृष्टः। यत एवोक्तप्रकारेण प्राशस्त्यपरत्वे फलाद्यभावः प्रसज्यते अत एवानन्यलभ्यफलादिपरत्वावधारणान्नार्थात्प्रतीयमाने ऽपि प्राशस्त्ये फलपदादीनां तात्पर्यमित्याह * अत एवेति * एतदेव दृष्टान्तद्वारेणोपपादयितुमाह * न हीति * धावनक्रियैवानिष्पन्नरूपत्वात्कार्यशब्देनोक्ता न तेनान्वीयन्तइत्यर्थः दार्ष्टान्तिके योजयति * तद्वदिति * इच्छाविरोधिद्वेषनाशवाचिना प्ररोचनाशब्देन तद्धेतुभूतगुणातिशयवत्त्वलक्षणं प्राशस्त्यं लक्षणया व्युत्पत्त्या चोक्तम् ननु यथा प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्तीत्यादीनां प्राशस्त्यपराणामप्याकाङ्क्षितफलसमर्थकत्वमङ्गीकृतं तथा भूतिकामादिशब्दानां फलादिपराणामप्याकाङ्क्षितप्राशस्त्यसमर्थकत्वमपि कस्मान्न स्यादित्याशङ्क्याह * अन्यथानुपपत्त्या चेति * प्रकारान्तरेण फलप्रतीत्ययोगादगत्या तत्र तथाङ्गीकृतम्। न चेहागतिरस्तीत्यभिप्रायः। नन्वर्थवादानां स्वरसतः प्राशस्त्यप्रतिपादनशक्त्यभावात्· इहापि सर्वप्रमाणप्रत्यस्तमयादगतिः समानेत्याशङ्क्याह * प्रमाणाभावश्चेति * स्वरसतो ऽशक्तावपि लक्षणया तत्प्रतिपादनशक्तिसम्भवान्न प्रमाणाभावनिश्चय इति भाव नन्वेवं तर्हि वसन्ताय कपिञ्जलानालभतइत्यादावपि अर्थवादाकाङ्क्षा प्रसज्येतेत्याशङ्क्याह * तद्यद्यीति * अतिदेशग्रहणं तस्योत्तबन्धुस्तस्योक्तं ब्राह्मणमित्यादिवाचनिकातिदेशविषयं द्रष्टव्यम्। [1] श्रुतविध्यन्यथानुपपत्त्यैव प्राशस्त्यकल्पनोपपत्तावसन्निहितार्थवादातिदेशकल्पने प्रमाणाभावात्कल्पने वा वसन्तादिवाक्येष्वपि अग्नीषोमीयप्रकृतित्वेन तदीयार्थवादातिदेशसम्भवाद्विध्युद्देशस्य शक्तिद्वःकल्पनं निरवकाशमेव स्यात् * दर्विहोमन्यायेनेति * यथा दर्विहोमेषु भिन्ने जुहोतीत्यादिजुहोतिचोदनविहितेष्वविहितेतिकर्त्तव्यताकेष्वपि प्रकृतिविशेषानिर्द्धारणान्नियतविध्यन्तातिदेशानुपपत्ते

१ ननु कथं चित्तौदनलिङ्गानुमितवचनादेवार्थवादातिदेशकल्पना भविष्यत्यत प्रमाणाभावादिति अयं भावः काल्पनिकातिदेशस्यार्थभावनेतिकर्तव्यतानिर्देशकल्पकत्वे अर्थवादानां च प्राशस्त्यप्रतिपादनेन शब्दभावनेतिकर्तव्यताङ्गत्वेन तदंशाप्रतिपादकत्वा ति प्रत्यक्षवचनस्य निर्विषयत्वं च स्यादित्यपि बोद्धव्यम्।

[illegible] विवरिष्यति । लौकिकानां प्रवर्त्तनाविशेषाणां पुरुषध[illegible]ण शब्दात्मकत्वायोगात् वेदविषयत्वं शब्दभावनाया दर्शयितु[illegible]म् । प्रवर्त्तनाविशेषशब्दभावनाविषयभूतायाः प्रयत्नरूप[illegible]फलप्रवृत्तिविषयत्वसिद्ध्यर्थं श्रेयोहेतुत्वाक्षेपकत्वायार्थ[illegible]यितृचेतनधर्मार्थनापरपर्यायेच्छायोनित्वसूचनार्थम[illegible]कत्वाभिधानमिति सर्वं मनोहरम् । ननु सत्यपि भावनाङ्गे [illegible]र्थवादानां ग्रहणमत आह * तत्रेति * अनेन च ग्रन्थेनार्थवा[illegible]मर्थभावनांशाप्रतिपादकत्वे ऽपि तदनुष्ठापकशब्दभावनाङ्गत्वे [illegible]भावनाख्यक्रियार्थत्वं दर्शितम् । कथं तया ग्रहणमत आह * स[illegible]ति * सा शब्दभावना यस्मादेवं वक्ष्यमाणेन प्रकारेण प्रवर्त्तते [illegible]ध्ययनविधिवशात्कार्यत्वेन प्रतीयते तस्मात्तदङ्गभूतस्य प्राशस्त्य[illegible] तद्द्वारेण कार्यत्वावगमात् साधनापेक्षायामर्थवादानां त[illegible]नयाध्ययनविधिनैव विनियोगाद्दर्शपूर्णमासभावनयेव प्रया[illegible]भूतद्रव्यदेवतादेः शब्दभावनया ग्रहणं युक्तमित्यर्थः । शब्द[illegible]नायास्तु कार्यत्वाप्रतीतौ तद्द्वारेण प्राशस्त्यज्ञानस्य कार्यत्वान[illegible]साधनानपेक्षत्वेन स्वरसतो ऽसमर्थानामर्थवादानां लाक्षणि[illegible]प्राशस्त्यज्ञानार्थत्वायोगात् तादर्थ्येन तया सहग्रहणं न स्यादिति [illegible] प्रकारं दर्शयति * स्वाध्यायाध्ययनविधिनेति * अध्यय[illegible]विधिना हि अधीतैरक्षरैर्यथाशक्ति पुरुषस्योपकर्त्तव्यमिति शब्द[illegible]द्वारेणाक्षराणि विनियुञ्जानेन लिङादीनि सामर्थ्यात्प्रवर्त्तने वि[illegible]युज्यन्ते तत्र चैषां प्रवर्त्तयितृपुरुषाभावेन स्वातन्त्र्यात्कर्तृत्वमव[illegible]यते स्वतन्त्रकर्त्तुश्चानियुक्तस्य वैधाविनियोगान्नियोज्यत्वं लिङा[illegible]नां कल्प्यते । नन्वस्तु नाम विधायकान्तराणामध्ययनविधिनियो[illegible] तस्य चात्मनि नियोगायोगेनात्मना नियोज्यत्वासम्भवात् [illegible]विधायकान्तराभावाच्च तद्व्यापाररूपायाः शब्दभावनायाः [illegible]र्थत्वाभावात्प्रेरणाज्ञानजननमात्रेण कृतार्थतया प्रवृत्त्याग्राहकत्वा[illegible]सति तद्विषयभूतस्य वेदाध्ययनस्य पुरुषार्थानुबन्धित्वाक्षेपप्रमा[illegible]भावाद्वेदस्यानर्थक्यं स्यादित्याशङ्कामपाकर्तुम् * स्वाध्यायपदोपा[illegible]त्तमे * त्युक्तम् अयमभिप्रायः न तावदचेतनानां लिङादीनां [illegible]प्रेरणावोद्धृत्वलक्षणं नियोज्यत्वं मुख्यं युज्यते प्रवृत्त्या[illegible]कत्वं तु तेषां पुरुषार्थानुबन्धित्वायाध्ययनविधिना शब्दालोच[illegible] पुरुषो ज्ञाप्यते स्वारसिकेच्छारहितस्य चादरापरपर्यायग्रह[illegible]कत्वं नियोज्यस्यैव दृष्टमित्यौपचारिकमिह नियोज्यत्वम् । अर्थ[illegible]न्वयाय शब्दभावनाया विधेयत्वसिद्ध्यर्थं विवक्षितं तच्चाध्यय-

वपि समानं तस्य च स्वरूपेण नियोक्तृत्वं स्वाध्यायपदोपा-
पेण विधायकान्तरसाधारण्येन नियोज्यत्वमित्यौपचारिक-
यणात् न विरुद्धमिति। भावयेदिति च विधिः प्रेर्यान्वयात्
यान्वयपक्षे लिङादिप्रेर्यान्वयवशेन व्यापारविशेषानवगमा-
न्यविवक्षयोक्तम्। अत्र भाव्याकाङ्क्षायां यच्छक्यते तदित्यव-
ात् शक्तिप्रदर्शनपूर्वकं पुरुषप्रवृत्तेर्भाव्यत्वं दर्शयति * तत्रेति *
ङादीनां प्रवर्त्तकत्वे शक्तिः पुरुषस्य च प्रवर्त्यत्वे तेन कारणेन
ाया भाव्याकाङ्क्षायां पुरुषप्रवर्त्तनं भाव्यत्वेन संबन्ध्यतइत्यर्थः।
प्रयोज्यव्यापाररूपत्वात्प्रयोज्यान्वयं विना भाव्यत्वासम्भ-
तनं प्रवर्त्तकत्वेन श्रेयस्साधनत्वाक्षेपपर्यन्तत्वसूचनार्थं पुरुष-
णां प्रेर्यान्वयपूर्वकविषयान्वयपक्षे तु प्रवर्त्तनाख्ये व्यापा-
षे एव लिङादेः शक्त्यवधारणात्तत्रैव नियोगकल्पनायां
ापेक्षां पुरुष एव पूरयिष्यतीत्याह * अथ त्विति *
दिविषया क्रिया प्रवर्त्तयेदित्येवं विशेषरूपेणोच्यते विधेयत-
तिपाद्यतइत्येव योज्यं, नन्वचेतनत्वाल्लिङादीनां नियोज्यावगम-
प्रयोजककर्तृत्वानुपपत्तेः कथं तद्वशेन पुरुषप्रवर्त्तनस्य भाव्य-
ाधानमित्याशङ्क्याह * यद्यपि चेति * अध्ययनविधिना लि-
ध्ययने नियुज्यमानस्य पुरुषस्य कतमं ममोपकारं करिष्यन्तीत्य-
ां प्रवर्त्तनाज्ञापनद्वारेण पुरुषार्थसाधनबोधरूपमिति सामर्थ्या-
तेनावगतौ सत्यां प्रवर्त्तनाज्ञापनमात्रपर्यवसाने पुरुषार्थसाधन-
पायोगादनुपकारकत्वोपपत्तेर्मातापित्रादिवदाप्तैरिष्टसाधनेषु
षु प्रवर्त्तयिष्यन्तीति प्रवृत्त्या ग्राहकत्वावगतिर्भवति, तेन लिङा-
रवश्यं प्रवर्त्तनीय इति लिङादिविषयनियोगावगतिर्या पुरुषस्य
ं तां लिङादिषु उपचर्य प्रयोजकत्वव्यवहारोऽयमित्यर्थः। न
स्वोत्प्रेक्षामात्रेणास्माभिर्लिङादीनां प्रयोजकत्वमुच्यते किं तु क-
चेद्बहुलप्रयोगादन्यैरपि अभियुक्तैरङ्गीकृतमित्यवसीयतइत्याह
दि चेति * करणाकाङ्क्षायां शक्त्यालोचनेन प्रेरणाज्ञानस्यान्वयं
ति * अथेति * विधेरलौकिकत्वेन लिङादिप्रतिपाद्यत्वासम्भ-
ाङ्क्य प्रवर्त्तनासामान्येन पूर्वोक्तरीत्या सम्बन्धग्रहणसम्भवात्
ाद्याभिहितेन लक्षणया तत्प्रतिपादनसम्भवप्रदर्शनार्थं पूर्वसम्ब-
ुभवापेक्षेत्युक्तम्। इतिकर्त्तव्यताकाङ्क्षायां प्राशस्त्यज्ञानस्या-
दर्शयति * कथमिति * ननु विधिज्ञानमात्रेण प्रवृत्तिसिद्धेर-
ापेक्षत्वात्कथमित्यपेक्षाप्रदर्शनमयुक्तम्। अथापि भावनान्तरङ्ग-

विधिज्ञानं संबन्धज्ञानं तयोरित्यर्थः।

थान्तेनात्रापि कथम्भावाकाङ्क्षा स्यात् । तथापि विधिसम्बन्
योरेव कारणेतिकर्त्तव्यतात्वसम्भवात्प्राशस्त्यज्ञानस्याज्ञातशक्ति
तिकर्त्तव्यतात्वाभिधानमयुक्तमित्यभिप्रायद्वयेन पृच्छति * कुत
दिति * एतत्कथमित्यपेक्षणं प्राशस्त्यज्ञानस्य चानुग्राहकत्वं
इत्यर्थः । उत्तरम् * बुद्धिपूर्वेति * विध्यन्यथानुपपत्त्ये इष्टसाधन
गमात् प्रवृत्तिहेत्विच्छोत्पत्तावपि द्रव्यव्ययायासदर्शनेनापि अ
साधनत्वावगमात्प्रवृत्तिप्रतिबन्धकालस्य हेतुद्वेषसम्भवे प्रवृत्त्य
प्रसङ्गात्तदपनायकापेक्षायां प्राशस्त्यज्ञानस्य लोके तदपनयश
दर्शनाद्युज्यते ऽनुग्राहकत्वमित्यभिप्रायः । उत्तम्भातीत्यनेन प्र
न्धकापनायकत्वं दर्शितम् । ननु प्रवृत्तिकारणेच्छाविरोधिद्वेष
य प्राशस्त्यज्ञानापेक्षणे फलांशे ऽपि तदपेक्षोपपत्तेः स्वर्गस्वरू
पादकानामपि वाक्यशेषाणां प्राशस्त्यपरत्वेन स्वरूपपरत्वाभाव
ङ्गात् न लौकिकसुखातिरिक्तस्वर्गसिद्धिः स्यादित्याशङ्क्याह *तद
अयमभिप्रायः अङ्गप्रधानयोरेव[2] विषयत्वात्प्रेरणाविषयएव
शस्त्यज्ञानस्य कार्यत्वावगतेः फलांशे च स्वारसिकेच्छात एव
त्तिसिद्धेरानर्थक्यप्रसङ्गात्, प्रेरणानुपपत्तेः प्राशस्त्यज्ञानस्य का
भावात्, साधनानपेक्षत्वेनार्थवादाग्रहणात्स्वर्गसाधनतो विध्यपे
स्वर्गस्वरूपप्रतिपादनार्थानां वाक्यशेषाणां प्राशस्त्यपरत्वाभाव
रूपे प्रमाण्यं न विरोत्स्यत इति । क तर्हि प्राशस्त्यज्ञानस्य सा
पेक्षेत्यत आह * साधनेति * साधनेतिकर्त्तव्यताविषये प्राशस
नस्य साधनभूतशास्त्राकाङ्क्षायामपि फलपदादिभिरेव[3] तत्सिं
म्भवात्कथमर्थवादानां तादर्थ्येन शब्दभावनया ग्रहणमित्या
यथासम्भवं साधनान्तराणि निराकर्त्तुमुपन्यस्यति * तत्पुनरि
तत्प्राशस्त्यप्रतिपादनं केन शास्त्रेण क्रियेतेत्यर्थः । निराकरोति
श्रेति * दूषणगुणोपन्यासार्थस्तत्र शब्दः । ननु यद्यन्यार्थत्वे
स्त्यार्थत्वं न युज्यते प्राशस्त्यार्थत्वमेव केवलमस्त्वत आह * नि
त्तरेति * पूर्वापेक्षितार्थत्यागो न युक्त इत्यभिप्रायः[4] कारणान्तः
* लक्षणया चेति * फलाभावापत्तेरपि प्राशस्त्यार्थत्वं न युः

---

१ इच्छोत्पादनद्वारा प्रवर्तकत्वम् इच्छा चेष्टसाधनत्वज्ञानं विना न संभवतीति
पपत्तिशब्दार्थः ।

२ अङ्गप्रधानयोरेव विधिविषयत्वान्न फलांशस्य विषयत्वमित्यर्थः ।

३ आदिग्रहणाद्देवतापरिग्रहः यस्मादेतत्फलकामेतद्देवताकं तस्मात्प्रशस्तमित्यर्थः

४ साध्यसाधनेतिकर्तव्यताविशिष्टायां भावनायां सिद्धायामेवोद्देश्यत्वस्तत्र पूर्वं
क्षत्वेनान्वय इत्यर्थः ।

ाह * युगपच्चेति * ननूभयपरत्वायोगात् फलादिषु तात्पर्याभावे
पि प्रतीयमानत्वात्फलादीनां सिद्धिः स्यादत आह * न हीति *
क्ष्यतइत्यपापश्लोकश्रवणादीनां प्रशंसार्थत्वेनोपात्तानां फलत्वाभा-
ः पर्णमय्यधिकरणे जर्तिलयवाग्वा वा जुहुयादित्यादौ लिङो वि-
त्वाभावो जर्तिलयवाग्वादेश्चेतिकर्त्तव्यत्वाभावो दशमे वक्ष्यमाणः
रामृष्टः । यत एवोक्तप्रकारेण प्राशस्त्यपरत्वे फलाद्यभावः प्रसज्य-
अत एवानन्यलभ्यफलादिपरत्वावधारणान्नार्थात्प्रतीयमाने ऽपि
ाशस्त्ये फलपदादीनां तात्पर्यमित्याह * अत एवेति * एतदेव दृष्टा-
द्वारेणोपपादयितुमाह * न हीति * धावनक्रियैवानिष्पन्नरूप-
ात्कार्यशब्देनोक्ता न तेनान्वीयन्तइत्यर्थः दार्ष्टान्तिके योजयति
तद्वदिति * इच्छाविरोधिद्वेषनाशवाचिना प्ररोचनाशब्देन तद्धे-
भूतगुणातिशयवत्त्वलक्षणं प्राशस्त्यं लक्षणया व्युत्पत्त्या वोक्तम् ।
नु यथा प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्तीत्यादीनां प्राश-
यपराणामप्याकाङ्क्षितफलसमर्थकत्वमङ्गीकृतं तथा भूतिकामादि-
ब्दानां फलादिपराणामप्याकाङ्क्षितप्राशस्त्यसमर्थकत्वमपि क-
ान्न स्यादित्याशङ्क्याह * अन्यथानुपपत्त्या चेति * प्रका-
न्तरेण फलप्रतीत्ययोगादगत्या तत्र तथाङ्गीकृतम् । न चे-
ागतिरस्तीत्यभिप्रायः । नन्वर्थवादानां स्वरसतः प्राशस्त्य-
तिपादनशक्त्यभावात् इहापि सर्वप्रमाणप्रत्यस्तमयादगतिः स-
ानेत्याशङ्क्याह * प्रमाणाभावश्चेति * स्वरसतो ऽशक्तावपि ल-
णया तत्प्रतिपादनशक्तिसम्भवान्न प्रमाणाभावनिश्चय इति भावः।
ेवं तर्हि वसन्ताय कपिञ्जलानालभतइत्यादावपि अर्थवादाका-
क्षा प्रसज्येतेत्याशङ्क्याह * तद्यदीति * अतिदेशग्रहणं तस्योक्तो
धुस्तस्योक्तं ब्राह्मणमित्यादिवाचनिकातिदेशविषयं द्रष्टव्यम् । श्रु-
विध्यन्यथानुपपत्त्यैव प्राशस्त्यकल्पनोपपत्तावसन्निहितार्थवादा-
देशकल्पने[1] प्रमाणाभावात्कल्पने वा वसन्तादिवाक्येष्वपि अग्नी-
मीयप्रकृतित्वेन तदीयार्थवादतिदेशसम्भवाद्विध्युद्देशस्य शक्तिद्वय-
ल्पनं निरवकाशमेव स्यात् * दर्विहोमन्यायेनेति * यथा दर्वि-
मेषु भिन्ने जुहोतीत्यादिजुहोतिचोदनाविहितेष्वविहितेतिकर्त्तव्य-
केष्वपि प्रकृतिविशेषानिर्द्धारणान्नियतविध्यन्तातिदेशानुपपत्तेर-

१ ननु कथं विधिचोदनलिङ्गानुमितवचनादेवार्थवादातिदेशकल्पना भविष्यत्यत आह
ाणाभावादिति अयं भावः काल्पनिकातिदेशस्यार्थभावनेतिकर्तव्यतानिदेशकल्पकत्वात्
वादानां च प्राशस्त्यप्रतिपादनेन शब्दभावनेतिकर्तव्यताङ्गत्वेन तदंशाप्रतिपादकत्वादि-
प्रत्यक्षवचनस्य निर्विषयत्वं च स्यादित्यपि बोद्धव्यम् ।

नियमसर्वातिदेशयोश्चाष्टमाद्ये निराकृतत्वादपूर्वत्वेनाष्टमान्ते वक्ष्यमाणेषु यावच्छ्रुतस्य द्रव्यदेवतादेरितिकर्त्तव्यताजातस्य सन्निपत्योपकारित्वेन नियमापूर्वद्वारा करणपूर्वोत्पत्तिमात्रे पर्यवसायितयाऽन्यत्रावधारितस्याप्यगत्याऽऽरादुपकारकाङ्गसाध्यकरणानुग्रहसाधनत्वमपि कल्पितम्। तथा वसन्तादिवाक्येष्वपि विधायकस्यैव करणभूतविधेयज्ञानोत्पत्तिमात्रपर्यवसायितयान्यत्रावधारितस्याप्यगत्याङ्गभूतप्राशस्त्यज्ञाने ऽपि व्यापारः कल्पयिष्यतइत्यर्थः। लक्षणाया प्रेरणापरनामधेयस्य विधेः प्रतिपादनात्प्राशस्त्यस्य चान्यथानुपपत्याक्षेपाच्छक्तिशब्दो व्यापाराभिप्रायो व्याख्येयः। अर्थवादाभावेऽपि विधेरेव स्वानुग्राहकप्राशस्त्याक्षेपकत्वं युक्तं न तु फलेतिकर्त्तव्यतापदानां कथं चिदित्येवकारेण सूचितम्। योजना त्वेवं यस्मात्सर्वप्रकारं प्रयतमानस्य यः प्रमाणाभावस्स प्रमाणं तस्माद्यदि केन चिदन्येन प्ररोचनां न लप्स्यामहइति। कथं चित्त्वन्यतः प्ररोचनालाभसम्भवेऽन्यत्रोपयुक्तस्य विधायकस्य तदाक्षेपकत्वायोगाद्वायव्यादिवाक्येषु प्राशस्त्यज्ञानस्य साधनापेक्षा युक्तेत्याह * अथ त्विति * केन चिल्लक्षणयापि प्रतिपादकेन दूरस्थेनातिदेशिकेनापि यदि प्ररोचना सेत्स्यतीत्यर्थः। नन्वेवं प्राशस्त्यप्रतिपादनस्य साधनभूतप्राशस्त्यशास्त्रापेक्षायामप्यर्थवादानां तत्र शक्त्यनवधारणात्कथं तादर्थ्येन शब्दभावनया ग्रहणमित्याशङ्क्याध्ययनविध्यालोचनेनैवेषां प्राशस्त्यंपरत्वं दर्शयितुमाह * तथेति * यथालभेतेतिविधिः स्वविषयप्राशस्त्यप्रतिपादकं प्रति साकाङ्क्षस्तथावायुर्वै क्षेपिष्ठा देवतेत्याद्यपि प्रतिपाद्यमर्थं प्रति साकाङ्क्षमेवेति यस्तेन भूतान्वाख्यानरूपेण वाक्यार्थेन लक्ष्यमाणः प्राशस्त्यरूपोऽर्थः सोऽर्थवादप्रतिपाद्यत्वेन स्वाध्यायाध्ययनविधिना परिगृह्यतइत्यन्वयः। प्राशस्त्यस्यार्थवादप्रयोजनत्वे योग्यतां दर्शयितुमनन्तरप्रवृत्तेत्याद्युक्तम्। विधिसंबन्धद्वारा चेत्प्राशस्त्यस्य पुरुषार्थानुबन्धित्वं तर्ह्यर्थवादानां विधिनैव साक्षात्प्रतिपादकलक्षणः संबन्धोऽस्तु किमन्तरा प्राशस्त्येनेत्याशङ्क्य यच्छक्यत इत्याद्युक्तम्। न तावल्लिङादिवत्तस्य विध्यभिधाने शक्तिरस्ति, न च प्राशस्त्यलक्षणया श्रुतविध्यैकवाक्यत्वसंभवे वाक्यभेदापादकप्राशस्त्यं विना विध्यनिर्वाहात् प्राशस्त्यलक्षणावश्यंभावेन गौरवापादकमश्रुतविध्यन्तरकल्पनं युक्तमित्याशयः शक्त्यभावाच्चेह साक्षाद्विधिना संबन्धस्ततोऽक्षरग्रहणएव साक्षा-

१ ननु केवलार्थवादानां वाक्यत्वाभावाद्वाक्यार्थेनेत्ययुक्तम्। सत्यं वाक्यार्थेनेत्यस्यायमर्थः अर्थवादस्थानै यैः पदार्थैर्लक्ष्यतइति।

क्तेः पर्यवसानप्रसङ्गाद्वाक्यार्थपर्यन्तमगमनात् कथं तेन प्राश-
स्त्यलक्षणा स्यादित्याशङ्क्यापुरुषार्थत्वेन वेत्याद्युक्तम् । अक्षराणामा-
देरादानं ग्रहणमक्षरादिशब्देनोक्तम् । तत्रैव तर्हि श्रौततात्पर्याव-
ानमस्त्वित्याशङ्क्योक्तम् * तत्रापि त्विति * साधनानुरूपेत्यादिना
लक्षणाप्रकारो दर्शितः । अयं चोभयाकाङ्क्षालक्षणत्वात्प्राशस्त्या-
वादयोः प्रतिपाद्यप्रतिपादकत्वसंबन्धः समञ्जस एवेत्याह * सो
यमिति * एवं चास्मिन्सन्निकृष्टे संबन्धे संभवति विधायकार्थ-
ादयोः प्राशस्त्यविध्याकाङ्क्षित्वे ऽपि प्राशस्त्यविध्योरर्थवादविधा-
कप्रतिपादितत्वेन प्रतिपादकानाकाङ्क्षत्वादन्यतराकाङ्क्षालक्ष-
त्वेन च विप्रकृष्टः प्राशस्त्याविधायकयोर्विध्यर्थवादयोर्वा प्रतिपाद्य-
तिपादकसंबन्धो न युक्त इत्याह * एवं चेति * विधायकोपयोगं
सङ्गाद्वक्तुं न चार्थवादैरित्याद्युक्तम् । दृष्टान्ततया वा । नन्वेव-
प्यन्यतरेणोभयकार्यसिद्धेरुभयाम्नानानर्थक्यमत आह * आम्ना-
ति * उभयोरित्यर्थवादैरेव प्ररोचितं विधायकैरेव विहितं सदु-
ष्ठितं फलं साधयतीति अध्ययनविधिरेव कल्पयिष्यतीत्यभिप्रायः
भयोरित्यर्थवादप्ररोचनयोरित्यर्थः । एतमेव न्यायं निन्दार्थवादे-
तिदिशति * एतेनेति * तत्रापि निषेधान्यथानुपपत्त्यानिष्टसाध-
त्वबोधान्निवृत्तिकारणाप्रीतिसम्भवे ऽपि तादात्विके[2] ष्टसाधनत्वाव-
मान्निवृत्तिप्रतिबन्धकोत्साहकारणेच्छाप्रसङ्गे निवृत्त्यभावापत्तेरप्री-
ाविरुद्धेच्छानाशाख्यप्रद्वेषोत्पादनशक्तत्वेन दोषातिशयत्वलक्षण
ाशस्त्यज्ञानस्य लोके ऽपि दर्शनान्निवृत्तिफलाया नञ्लिङादियुक्त-
ब्दभावनाया निवारणापरनामधेयनिषेधज्ञानात्मककरणानुग्राहक-
ं तावदवसीयते तत्र च साधनापेक्षायां पूर्वोक्तेनैव प्रकारेण सो
ोदीदित्येवमादीनामध्ययनविधिबलात्साधनत्वावगतेस्तादर्थ्येन शा-
भावनया ग्रहणमनुसन्धेयम् । अप्रशस्तप्रत्ययाधीनोत्पत्तिरस्येति
ग्रहः प्रशस्तग्रहणं दृष्टान्तार्थम् । तस्मादध्ययनविधिबलेनार्थवा-
नां पुरुषार्थानुबन्धित्वाय लाक्षणिकस्तुतिनिन्दापरत्वावधारणाद-
नङ्गैकवाक्यतासिद्धेति पूर्वाक्षिप्तैकवाक्यतासमर्थनोपयोगित्वं, त-
च्यते इत्यारभ्याध्ययनविधिव्यापारचर्चात्मकस्य वार्त्तिकखण्डक-
दर्शयति * अतश्चेति * समभिव्याहारवशात्पूर्वमेवावगतस्यैक-

१ अन्यतरेति विधायकस्य प्राशस्त्याकाङ्क्षायामपि प्राशस्त्यस्य तदनाकाङ्क्षत्वात्तस्यार्थ-
ैरेव प्रतिपादितत्वात् । एवमर्थवादानां विध्याकाङ्क्षासत्त्वे ऽपि न विधेस्तदाकाङ्क्षा
ायकेनैव विधिप्रतिपादनादित्यर्थः ।

२ तदात्वे भवं तादात्विकं तात्कालिकमित्यर्थः ।

वाक्यत्वस्य परस्परानिरपेक्षत्वेनानुपपत्तिप्रतिभासे ऽध्ययनविधिसामर्थ्यावधारितस्तुतिनिन्दापरत्वेनार्थवादानां विधिनिषेधग्रहणान्निर्वाहः क्रियतइति * सिद्धिग्रहणेनोक्तम् * नन्वध्ययनविध्यवधारितपुरुषार्थपर्यवसायित्वात्तेनैव स्तुतिनिन्दापरत्वावसायात्किमिति महता प्रयासेनैकवाक्यत्वं साध्यते ऽत आह * नित्यं चेति * विधिनिषेधापेक्षावशाल्लक्षणाया स्तुतिनिन्दापरत्वं स्वरसतो ऽप्रतीयमानमपि कल्प्यते तदभावे तु प्राशस्त्याप्राशस्त्यलक्षणाकारणाभावात्सिद्धवत् कीर्त्तनान्यथानुपपत्त्या ताभ्यामेव तमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छदित्यादिवद्विधिकल्पनेनैव पुरुषार्थपर्यवसानसिद्धेरित्याशयः । वाक्यशेषग्रहणेन स्वातन्त्र्ये सति स्तुतिनिन्दानिर्णयहेतुत्वाभावं दर्शयति तत्र कारणमाह * न हीति * अव्यवस्थामुपपादयति * निन्दारूपास्विति * अविधेयनिन्दात्वेनाभासमानासु परमार्थता निन्दाविपर्ययविधेयस्तुतित्वदर्शनाद्विधेयनिन्दात्वेनाविधेयस्तुतित्वेन चाभासमानानां परमार्थतस्ताद्विपर्ययकेवलविधेयस्तुतित्वदर्शनादित्यर्थः । यथाक्रममुदाहरणद्वयमाह * यथेति * प्रातः प्रातरनृतं ते वदन्ति पुरोदयात् जुह्वति ये ऽग्निहोत्रमित्यनुदिते होमनिन्दात्वेनाभासमानापि तस्मादुदिते होतव्यमिति विध्येकवाक्यत्वात् स्तुतिरेवेति शाखान्तराधिकरणे भाष्यकारो वक्ष्यति। दशमे च त्रैयम्बकान्पुरोडाशान्प्रकृत्य पठितमभिघार्यास्त्र्यम्बका नाभिघार्या इति मीमांसते यदभिघारयेद्रुद्रायास्ये पशूनिदध्याद्यन्नाभिघारयेन्न रुद्रायास्ये पशूनिदध्यान्न सूक्ष्ममभिघार्या एव न ह्यनभिघृतं हविरस्तीति वाक्यमुदाहृत्य चिन्तयिष्यते । किमभिघार्यानभिघार्या इति विधिप्रतिषेधार्थता उत नेति। तत्र हिंस्ररुद्रास्ये पशुनिधानापादकत्वेनाभिघारणस्य निन्दितत्वादनभिघारणस्य च तदनापादकत्वेन स्तुतत्वान्निषेधावगतेर्न ह्यनभिघृतं हविरस्तीति च हविः सम्पादकत्वेनाभिघारणस्य स्तुतत्वाद्विध्यवगतेर्विकल्पे प्राप्ते ऽभिधास्यते मीमांसासमभिव्याहारेण विधिनिषेधशक्तिप्रतिबन्धादभिघारणाभिघारणनिन्दास्तुत्योश्चाभिघार्या एवेति विध्येकवाक्यत्ववशेनाभिघारणस्तुतिपर्यवसायित्वावधारणान्न वाक्यभेदापादकं विधिप्रतिषेधार्थत्वं युक्तमिति। तत्र कथमभिघारणस्तुतिरित्यपेक्षिते वक्ष्यते इत्थमभिघारणं प्रशस्ततरं यत्त्रैयम्बकानां दर्विहोमत्वेनापूर्वत्वादतिदेशतो ऽप्राप्ते मीमांस्यमाने दोषो ऽप्येवं विधौ ऽनभिघारणस्य च गुणो न गण्यते हविः सम्पादकत्वेन गुणवत्तरत्वादिति । न केवलं स्वातन्त्र्ये ऽन्यथाप्र-

तिभानादव्यवस्था किं तु सन्देहादपीत्याह * सन्दिग्धेति * तत्रा-
प्युदाहरणमाह * यथेत * यथोक्तं नवमे यदृचा स्तुवते तदसुरा
अन्ववायन्यत्साम्ना स्तुवते तदसुरा नान्ववायन्य एवं विद्वात्साम्ना
स्तुवीतेत्युदाहृत्य किमृचा स्तुवत इति च विधानार्थमुत साम्ना स्तु-
वीतेत्येतद्विहितसामस्तुत्यर्थमिति चिन्तायिष्यते । तत्र य एवं वि-
द्वान्साम्ना स्तुवीतेत्यस्य कर्तृप्रवृत्त्यनुवादियच्छब्दयोगेन य एवं वि-
द्वान्पौर्णमासीं यजतइत्यादिवद्विधिशक्तिप्रतिबन्धादितरयोस्तु क्रि-
यास्वरूपमात्रानुवादियच्छब्दयोगेन यदाग्नेयो ऽष्टाकपाल इत्यादिव-
द्विधिशक्त्यप्रतिबन्धादुभयविधिवशाद्विकल्प इति पूर्वपक्षिते कथम-
सुरागमननिमित्तत्वेन निन्दिताया ऋचो विधिः इत्याशङ्क्य भाष्यका-
रो वक्ष्यति । न वयं निन्दितानानन्दितान्वासुरान्विद्म इति भाष्यका-
रोक्तं सन्देहमुपपादयति * कदा चिदिति * सिद्धान्ते विध्येकवा-
क्यतावशेनैव निर्णय इत्याह * तत्रेति * स्तुवीतेतिप्रत्यक्षस्य विधे-
र्यच्छब्दयोगे ऽपि प्राप्त्यभावेन य एवं विद्वान्सोमेन यजेतेतिवद्वि-
धिशक्त्यप्रतिबन्धादितरयोस्तु वर्त्तमानापदेशत्वेन विध्यशक्तेरेकवा-
क्यत्वसम्भवे वानेकादृष्टानुबन्धिवाक्यभेदापादकविधिद्वयकल्पना-
योगात्सामविध्येकवाक्यत्ववशेन सामस्तुत्यर्थमृचां निन्देति सिद्धा-
न्ते निर्णय इत्यर्थः । ननु वायुमेव स्वेन भागधेयेनोपधावति स
एवैनं भूतिङ्गमयतीत्यादीनां यो बर्हिषि रजतं दद्यात्पुरास्य संवत्स-
राद् गृहे रोदनं भवतीत्यादीनां च पदानां स्वरसतो भूतान्वाख्याना-
र्थानामपि लाक्षणिकस्तुतिनिन्दार्थत्वसम्भवेन विधिनिषेधैकवाक्य-
तावसायात्तात्पर्यनिर्णयो भवतु परिशिष्टानां वायुर्वै क्षेपिष्ठा देवते-
त्यादीनां सो ऽरोदीत्येवमादीनां च लक्षणयापि स्तुतिनिन्दार्थत्वा-
ऽप्रतीतेर्विधिनिषेधैकवाक्यत्वासम्भवात्कथं तद्वशेन स्तुतिनिन्दापर-
त्वनिर्णयो ऽत आह * सर्व्वत्र चेति * तेषामपि स्तावकनिन्दकपदै-
कवाक्यत्वेन स्तुतिनिन्दार्थत्वसम्भवात्तद्द्वारेण विधिनिषेधैकवा-
क्यत्वोपपत्तेः स्तुतिनिन्दापरत्वनिर्णय इत्यर्थः । यत्र तर्हि न किं
चिदपि पदं स्तावकं निन्दकं वोपलभ्यते आपो वै शान्ता इत्यादिषु
तत्र पारम्पर्येणापि विधिनिषेधैकवाक्यत्वासम्भवात्कथं स्तुतिनि-
न्दापरत्वनिर्णयो ऽत आह * यत्रापीति * तत्रापि वेतसशाखयाव-
काभिश्चाग्निं विकर्षतीत्यादिविधिसन्निधिवशेन लक्षणया तद्विधेयवे-
तसावकास्तुतिप्रतीतेर्लक्षितलक्षणया वा विकर्षणस्तुतिप्रतीतेर्विध्येक-
वाक्यत्वात्तात्पर्यनिर्णय इत्यर्थः । यद्वैतदृक्फक्किकाद्वयमेकवाक्य-
ताभिधानोपयोगप्रतिपादनपरतयैव व्याख्येयं विधिनिषेधैकवाक्य-

ताभावे केषु चित्पदेषु कथं चित्स्तुतिनिन्दाप्रतीतावस्यानर्थक्येनोप-
नानपेक्षत्वात्परिशिष्टानां पृथग्वाक्यत्वेन स्वरूपमात्रेण पर्यव-
नं स्यात्तादृक् पदाभावे च स्तुतिर्वा निन्दा वा शङ्क्यैव न केवले-
न स्यादिति । ननु विधिनिषेधयोः स्तुतिनिन्दापेक्षायां तदभावे
न्नादिवाक्येषु साकाङ्क्षत्वादप्रामाण्यं स्यादत आह *विधीति *
विधिनिषेधयोर्मध्ये ऽन्यतरदर्शनेन स्तुतिनिन्दयोर्मध्ये ऽन्यतरदनु-
मेयमित्यर्थः। एवं वैदिकार्थवादोपयोगं व्युत्पाद्य स्मृत्यधिकरणवक्ष्य-
माणप्रामाण्यविद्यास्थानान्तरगतेष्वर्थवादेषु तमेव न्यायमतिदिशति
एवं चेति * इतिहासपुराणयोरर्थवादबहुत्वाद्भारतादीत्युक्तं, न-
न्वध्ययनविधिबोधितपुरुषार्थानुबन्धित्वबलेन वैदिकार्थवादानां श्रौ-
तार्थानिक्रमेण लाक्षणिकस्तुतिनिन्दापरत्वमवधारितमत्र तु कथमि-
त्याशङ्क्य भारताध्ययनविधिस्थानीयं विधिं दर्शयति * तेषामपि
ति * एतया निषादस्थपतिं याजयेदित्यादिवत् प्रयोज्यव्यापारत्व-
मस्य श्रावणविध्युपन्यासः धर्मादीनां साध्यानां साधनप्रतिप-
त्तीनि विग्रहः धर्मादिचतुष्टयसाधनप्रतिपत्तिरूपादानाङ्गभूताऽध-
र्मादिचतुष्टयसाधनप्रतिपत्तिः परित्यागाङ्गभूतेति योज्यं भारतो-
क्तम् ।

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ।

इति जनमेजयस्य भारतश्रवणप्रवृत्तिसिद्ध्यर्थं धर्मादिचतु-
ष्पुरुषार्थतत्प्रतियोगिचशब्दसूचिताधर्मादिसाध्यसाधनप्रतिपाद-
कत्वाभिधानात्सर्वत्र यथासम्भवं तत्परत्वमुन्नेयमिति भावः । ननु
विधिनिषेधशून्यानां बहुशो भारतादिषु दर्शनात्कथं पुरुषार्थपर्य-
वसानकल्पनमित्याशङ्क्य यथासम्भवं विभज्योपयोगं दर्शयितुमाह
तत्रापि त्विति * शङ्कानिरासार्थस्तु शब्दः । दानराजमोक्षाणां
इति द्वन्द्वगर्भः षष्ठीसमासः दानस्येतिकर्त्तव्यताभूतो धर्मो
ऽनुष्ठेयः मोक्षस्य साधनमादिशब्देन तपो ब्राह्मणाभ्युदयादिसं-
बन्धधर्मोपादानम् । अनेन च ग्रन्थेन तत्सन्निधिपठितानामुपाख्या-
नां तत्तद्विधिशेषत्वेनोपयोगो दर्शितः । विध्यश्रवणे ऽप्येकानेक-
कर्तृकचरित्रकथनात्मकपरकृतिपुराकल्परूपेण यस्मात्पूर्वैर्महा-
त्मभिरेवं कृतं तस्मादन्यैरपि कर्त्तव्यमिति विध्यनुमानात्तच्छेषत्वेना-
र्थवादतयोपयोगो भविष्यतीत्याह * केचित्पुनरिति * किमित्येवं

१ आनर्थक्येनेति विध्येकवाक्यत्वाभावेन स्तुतेन स्वोपपादकार्थवादपदान्तरानपेक्षत्वात्
परिशिष्टानां पदानां पृथग्वाक्यत्वम् ।

क्लेशाङ्गीकरणमत आह * सर्वोपाख्यानेषु चेति * अन्यपरत्वादेव स्वार्थसत्यत्वमनाशङ्क्यमित्याह * तत्परत्वाच्चेति * ननु वेदस्यापौरुषेयत्वेनापर्यनुयोज्यत्वाद्यथाम्नातस्य न्यायबलेन तात्पर्यकल्पनं युक्तं भारतादौ त्वसत्योपाख्यानप्रणेतॄणां मूढत्वं विप्रलम्भकत्वं वा प्रसज्येतेत्याशङ्क्याविवक्षितोपाख्यानविस्तरप्रणयने कारणमाह * वेदप्रस्थानेति * एवमपि प्रक्रियामात्रत्वादबुद्धिपूर्वकारिता स्यादत आह * प्रतिपाद्यानां चेति * विचित्रबुद्धित्वमेव दर्शयति * इहेति * नन्वेवमपि केषां चित्प्रतिपत्तिसिद्धौ शास्त्रप्रणयनार्थवत्त्वोपपत्तेरलं महता प्रबन्धेनात आह * सर्वेषां चेति * न चासत्योपाख्याप्रणेतृत्वेन व्यासादीनामप्रत्यायितत्वाशङ्का धर्म्मादिविषयाणां विधिप्रतिषेधानां केषां चिच्छ्रुतिमूलत्वदर्शनेनार्थादिविषयाणां च प्रमाणान्तरमूलत्वेनाप्तत्वावधारणादित्याह *तत्रेति * आदिशब्देनानर्थदुःखोपादानं न चोपाख्यानेष्वपि तेषामसत्यवादित्वं बहूनां वेदलोकमूलत्वात्स्वोत्प्रेक्षितानामपि काव्यवत् लोकरञ्जनार्थत्वेन विप्रलिप्साभावादित्याह * तथेति * ननु धर्म्मादिविषयाणां स्मृतीनां वेदैकशरणत्वात् प्रामाण्यं स्यात्तद्गतानामवेदमूलानामर्थवादानां विध्येकवाक्यत्वाभावेन स्तुत्यर्थत्वायोगादप्रामाण्यं स्यादित्याशङ्क्याह * सर्वे चेति * अर्थवादशून्ययोर्विधिप्रतिषेधयोः श्रुतार्थापत्त्यार्थवादकल्पकत्वस्य विधिप्रतिषेधयोश्च स्तुतिनिन्दाभ्यामविनाभावादन्यतरदर्शनेनान्यतरदनुमाय वाक्यं पूरयितव्यमित्यत्रोक्तत्वाद्वेदक[1]ल्पितार्थवादानां व्यासादिभिर्लोकानुसारेण स्वोत्प्रेक्षया वा प्रणीतत्वात्सम्भवत्येवैकवाक्यत्वमिति भावः। ननु भवतु विधिप्रतिषेधसन्निधिपठितानां प्रत्यक्षमूलभूतवैदिकार्थवादाभावे[2] ऽप्युक्तेन न्यायेन काल्पनिकविधिप्रतिषेधैकवाक्यभूतार्थवादमूलत्वेन तदेकवाक्यत्वात्स्तुतिनिन्दार्थत्वम्। तत्सन्निधिरहितानां तु स्तुतिनिन्दार्थत्वायोगादानर्थक्यं स्यादत आह * ये त्विति * स्वयंशब्देन स्वातन्त्र्यमुक्तम्। प्रीतिं जनयन्तीति कामोपयोगितोक्ता पार्थिवानामुपयुज्यन्त इत्यर्थोपयोगिता ऽदृष्टशब्देन धर्मोपयोगिता देवतादीत्यादिशब्देनार्षादिग्रहणम्। यत्र तर्हि न किं चिदपि श्रूयते किं तु स्वरूपमात्रं कीर्त्यते यथा सृष्टिप्रलयादिवाक्येषु कथं तेषामुपयोगो ऽत आह * इत्येषा दिगिति * युक्तोपयोगोपाख्यानमार्गेण सृष्टिप्रलयादिवाक्या-

१ वेदे यत्रार्थवादा न श्रूयते तत्र कल्पिता ये ऽर्थवादास्त एव लोकानुसारेण स्वोत्प्रेक्षया वा तत्र प्रणीता इति भवत्येवैकवाक्यत्वमिति भावः।

२ प्रत्यक्षश्चासौ मूलभूतश्चासौ वैदिकार्थवादश्चेति विग्रहः।

नामपि यथासम्भवं धर्मानुपयोगितोक्तेया सा च स्तुत्यर्थ
च्यते अर्थवादोपयोगमात्रस्यैवात्र विवक्षितत्वादिति भावः
सिद्धान्तस्वरूपं व्युत्पाद्य भाष्यमिदानीं व्याख्यातुमुपन्यस्यति
न्युद्देशेनेति ॥ कैश्चिदेतत्सकलं भाष्यं सार्थवादवाक्येष्वर्थव
दनुगिनिभिर्विधिप्रत्ययपरित्यागपरत्वेन व्याख्यातं तेषां व्य
मुपन्यस्यति ॥ केचिदाहुरिति । अयमर्थः ॥ अर्थव
मध्ययनविधिबलेनैव पुरुषार्थपर्यवसायित्वाद्यथासम्भवं
निन्दार्थत्वावसायात्तद्द्वारा कथं रोचेतेति भाष्योक्तरीत्या प्र
व्यं निवर्त्तितव्यमित्येवंरूपप्रवृत्तिनिवृत्तिहेतुभूतार्थप्रतिपादक
ङादीनामपि तदभिधायकत्वात्तुल्यार्थतया समुच्चयायोगे के
व्यवस्थायामर्थवत्त्वे ऽप्युभयसम्भवे ऽन्यतरेण सिद्धेरवश्यं त्याज्ये
नर्थक्यभूयो ऽर्थवादपदानुसारेणैकस्य लिङादेस्त्यागो युक्त
त्यनुग्रहार्थं च कस्मिंश्चित्प्रत्यये प्रयोज्ये स्तुत्योत्पादि
कर्तव्यानुवादिनी लिङ् प्रयुज्यते, इति इष्टं लिङो ऽन्यत
कर्तव्यतानुवादिनीत्वमिति परमतेन दृष्टान्तितम् ॥ यथेति
त्यज्यते किं तर्हि विवक्षितमित्यपेक्षिते ॥ तस्मादित्यु
सोपपत्तिकं भाष्याभिप्रायमुक्त्वाक्षरयोजनमाह ॥ स एवे
तालम्भ एव भाष्ये विद्ध्युद्देशशब्देनोक्त इत्यर्थः
भूतिकामान्तस्य विध्युद्देशत्वं वदता विधिप्रत्ययो ऽपि गृहीत
च्यते । अन्यथा स्तुत्यन्वयात्प्राक् कर्त्तव्यत्वाप्रतीतेः फलानपे
भूतिकामान्तवचनानर्थक्यं स्यादत आह ॥ फलादीति ॥ अ
स्यानुष्ठानसिद्ध्यर्थं स्तुत्यपेक्षणात्फलाद्यन्वयं च विनानु
योग्यत्वाद्विध्यविवक्षायामर्थवद्भूतिकामान्तवचनमिति भावः । व
इदं व्याख्यायते ऽत आह ॥ अन्यथेति ॥ ननूद्देशग्रहणे ऽप्यनु
विधिनैकवाक्यत्वप्रतीतेः कथमालम्भोपादानमत आह ॥
नेन न्यायेनेति ॥ उद्देशग्रहणस्योक्तेन न्यायेन विवक्षितार्थत्वाद्वि
त्वस्य च पदान्तरान्वयायोगात्षष्ठीसमासस्य कर्म्मधारयस्य च
विधेरुद्देशो ऽविवक्षास्मिन्निति कण्ठेकालादिवद्व्यधिकर
श्रयणात्कर्म्मणि वोद्देशशब्दं व्युत्पाद्य सामानाधिकरण्य
विध्यालम्भोपादानमित्यर्थः । स्फुटीकृतं चैतद्भाष्यकृते
॥ तथा चाहेति ॥ कथमनेनैतद्व्याख्यानं स्फुटीकृतमत आह ॥

१ यथा यागयज्ञे सति अवभृथानन्तरं पृष्ठशमनीयसंज्ञकाहः क्रियते तत्र समा
कालीन: पूर्वकाल इति विधानेन उत्तरक्रियाकर्तव्यतायाः क्त्वाप्रत्ययविधानात् तदर्थ
कर्तव्यतामात्रमिति तत्र लिङोऽनुवादिनीत्वं तथेति भावः ।

धीति * स्तुतिस्तुत्यसम्बन्धविवक्षा केनोक्तेत्यपेक्षिते पठति * यत इति * ये अनेन भाष्यावयवेन स एवैनं भूतिं गमयतीत्यादिस्तुत्यन्वयं दर्शयता स्तुतिस्तुत्यसम्बन्धं विवक्षितं वदन्तीति पूर्वेणान्वयः प्रत्ययासहिष्णुतया लभेतेत्याद्यपदत्यागेन भाष्ये शेषपाठः कृतः । ननु विधित्यागे शब्दभावनायाः कथम्भावाभावेन स्तुत्यनाकाङ्क्षणात्कथं स्तुतिस्तुत्यसम्बन्धविवक्षात आह * सैव चेति * वायव्यश्वेतालम्भस्य भूतिसाधनत्वे ऽभिहिते कस्माद्धेतोस्तस्य भूतिसाधनत्वमित्यपेक्षायां हेतुवन्निगदार्थवादवदन्वयो भविष्यतीति तेषामाशय इत्यर्थः । अस्मिन्नर्थे फक्किकैवं योज्या । विधेयस्यालम्भस्य विधिसम्बन्धे सति यार्थवादयोजना पूर्वमुक्ता योज्यते सम्बन्ध्यते ऽनेनेत्युभयाकाङ्क्षालक्षणो ऽन्वयप्रकारो योजनाशब्देनाभिप्रेतः सा विधिविधेयसम्बन्धनिषेधे ऽपि शुद्धस्यैवालम्भस्य भविष्यति * निमित्तत्वेनोक्तत्वादिति * आलम्भस्यार्थवादानाकाङ्क्षत्वे ऽप्यर्थवादस्य पुरुषार्थानुबन्धित्वाय साकाङ्क्षत्वादन्यतराकाङ्क्षयापि सम्बन्धो ऽपि भविष्यतीति च शब्देन सूचितम् । एवं वानेन भाष्ये व्याख्यातमालभेतेतिमध्यप्रतीकेन समस्तविध्युद्देशनिर्देशात्तदर्थो भूतिसाधनत्वमालम्भस्योक्तम् । कस्मादित्यपेक्षिते पूर्वभाष्यनिर्दिष्टं वायुं तच्छब्देन परामृश्य यस्माद्वायुर्भूतिं साधयतीति स्तुत्यन्वयप्रदर्शनमिति । कस्माद्भूतिकामेनालब्धव्यामित्यभिसम्बन्धो न विवक्षित इत्याशङ्क्याविवक्षाकारणमुक्तम् * भिन्नाविमावर्थाविति * तदेकस्यैव सम्बन्धस्यानिराकार्यतयोपन्यस्तत्वादयुक्तमित्याशङ्क्य व्याचष्टे * भिन्नाविति * भूयो ऽर्थवादानुग्रहायावश्यविवक्षणीये स्तुतिस्तुत्यसम्बन्धे सतीतरसम्बन्धविवक्षां वदतोभयविवक्षाङ्गीकारात् तत्र च वाक्यभेदापत्तिरित्यर्थः । किमर्था स्तुतिरिति प्रश्नभाष्यं स्तुतेरिच्छोत्पादनेन प्रवर्त्तकत्वस्य स्फुटत्वादयुक्तमाशङ्क्याभिप्रायद्वयमाह * किमर्थेति * कथं चेतेत्युत्तरभाष्यं यथाक्रममभिप्रायद्वयनिरासार्थत्वेन व्याचष्टे * आचार्यस्त्विति * ननु प्रागित्याशङ्काभाष्यं द्वितीयप्रश्नाभिप्राये पुनरुक्तमाशङ्क्य विवरणपरत्वेन व्याचष्टे * इतरेति * न हि यदेत्यादिपरिहारभाष्यं तत्र नञ्द्वययोगेन सन्निधानमेवोक्तं स्यान्न च तदा विधिविधेयसम्बन्धाविवक्षाङ्गीक्रियते विरोधश्चोत्तरभाष्येण स्यादित्याशङ्क्य न हीति द्विरुक्त्यानर्थक्यनिरासार्थत्वेन व्याचष्टे * न हीति * कथं नानर्थक्यमित्यपेक्षिते केवलश्रवणावधारितसामर्थ्यस्यापि विध्युद्देशस्यार्थवादसन्निधौ विधायकत्वाभावादिति कारणम् * यदेत्यादिनोक्तम् । यथेत्यादिना * दृष्टान्तद्वा-

रोपपादितं तत्प्रपञ्चयति * सर्वत्रेति * दृष्टान्तएव किं व्यवस्थाक
रणमित्यपेक्षायामाह * योग्येति * आकाङ्क्षणीयाऽलाभनिमि
त्ताकाङ्क्षानिवृत्तिर्नान्यथेत्यर्थः। ननु यथाप्राकृतपदार्थलाभान्निवृत्त
काङ्क्षायाम्। अपि विकृतेः सन्निधिपठितपदार्थाकाङ्क्षावशादाका
ङ्क्षोत्थापनं तथेहापि पदार्थान्तराकाङ्क्षावशादाकाङ्क्षोत्थाप
ऽपि स्वतो निराकाङ्क्षत्वात् प्रकरणगतानां प्रयाजादिवाक्यान
मिव कस्मात्प्रामाण्यं न स्यादत आह * इतरथेति * इतरेण प्रकारे
ण योग्यपदान्तरानुच्चारणमनालोच्य स्वरूपमात्रालोचने सर्वत्राका
ङ्क्षा भवत्येव श्रुतपदातिरेकेणापि दर्शनादित्यर्थः। स्वाभाविकीमा
काङ्क्षामुपपादयति * तथा चेति * एवं यदेत्यादिभाष्यं पूर्वे
पुनरुक्तमाशङ्क्योपसंहारार्थतया व्याचष्टे * तदिहेति * नन्वेवं स
तीत्याशङ्काभाष्यं महावाक्ये ऽवान्तरवाक्याप्रामाण्यस्योक्तत्वादयुक्त
माशङ्क्य व्याचष्टे * नन्वेवमिति * सत्यं विनापीति परिहारभाष्या
भिप्रायमाह * सत्यमिति * गवादिप्रचारार्थं ग्रामस्य समन्ताद्
भूः कर्षकैः परिह्रियते सा परिहारशब्देनोच्यते । धनुः शतं परिहार
ग्रामस्य स्यात्समन्ततइति स्मृतेः। तस्य पन्थाः परिहारपथस्तेन ग्राम
गमनवदिति दृष्टान्तार्थः। ननु सत्स्वपीत्याशङ्काभाष्यं वेदस्यापर्यनुयो
ज्यत्वेनोक्तत्वादयुक्तमाशङ्क्य व्याचष्टे * नन्विति * आहेति परिहा
रभाष्यं व्याचष्टे * तत्र उत्तरमिति * भवन्त्वित्याशङ्काभाष्यं व्या
चष्टे * भवन्त्विति * नेत्यादिपरिहारभाष्यं व्याचष्टे * नोक्तेनेति
प्रतीतिमात्रेणार्थस्य विवक्षितत्वमतिप्रसङ्गादयुक्तमाशङ्क्य यो ऽसावि
त्यादिनोपपादितं तद्व्याचष्टे * द्वयसम्भवं हीति * अर्थवादानुग्रहे
युक्त इत्यनेनातो ऽस्मादितिभाष्यमेव व्याख्यातं, यतः प्रत्यक्षो वाक्य
शेषभावे ऽतः कारणादस्मात्सार्थवादकाद्विधेः सकाशाच्छ्रुतिमिः
प्रवर्त्तकत्वेन विवक्षितामवगच्छामो न विधिं भूयो ऽल्पविरोधे भूय
ऽनुग्रहस्य न्याय्यत्वादिति। ननु निरपेक्षादपीतीत्याशङ्काभाष्यमन्यत्रा
वधारितविधिशक्तेर्विध्युद्देशस्यात्रापि प्रत्यभिज्ञानात्स्तुतिसम्बन्धा
विवक्षाप्रतिपादकत्वेनाभासमानं ननु सत्स्वपीत्यनेन पौनरुक्त्येनाक्षि
पति * नन्विति * सत्यपि समस्तस्य स्तुतिस्तुत्यसम्बन्धरूपे ऽर्थे
पूर्वस्य विधिविधेयसम्बन्धरूपार्थापह्नवनिरासार्थतया समाधत्ते * त
दुच्यतइति * अथास्येत्यनेन भाष्योपक्षिप्तं कारणमुक्तम् । भवत्वि

१ प्रकरणगतानामपि प्रयाजादिवाक्यानां स्वतो निराकाङ्क्षत्वात् प्रमाणनकत्वं भा
वनया कथं भावेनापेक्षणात् विध्येकवाक्यत्वं तद्विधेः स्वार्थप्रतिपादकत्वं पदार्थान्तराका
ङ्क्षावशादेकवाक्यत्वमित्यर्थः ।

तिपरिहारभाष्यं व्याचष्टे * तदभिधीयतइति * अनेनैवं व्याख्यातं भवतु निरपेक्षादर्थवादरहिताद्वसन्तादिवाक्येषु विध्यवगतिः न हि निरपेक्षे सत्यर्थद्वयासम्भवलक्षणो विरोधो ऽस्ति न चात्र शक्त्यभावाद्विध्यर्थत्वासम्भवः येनास्यैव क्व चिच्छक्तिः क्व चिदशक्तिरिति विरोधः स्यात् । बाधाबाधौ तु बाधकसदसद्भावाभ्यां न विरुध्येते इति काका सूचितम् । इह तु स्तुत्यर्थत्वस्योक्तन्यायेनावश्याङ्गीकार्यत्वद्वाक्यभेदप्रसङ्गेनाशक्यो विध्यर्थ इति । द्वौ चेदितिवाक्यभेदभाष्यं भिन्नाविमावर्थावित्यनेन पुनरुक्तमाशङ्क्य पूर्वव्युत्पादितस्यैव वाक्यभेदस्य स्तुतिसम्बन्धे सत्यशक्यो विध्यर्थ इत्युक्ते कुतो ऽशक्य इत्यापन्नहेतुप्रश्नोत्तरत्वेन पुनरुपन्यास इति परिहरति * प्रश्नोत्तरत्वेनेति * ननु यदि स्तुत्यसम्बन्ध एवात्र विवक्षितो न विधिविधेयसम्बन्धः ततो ऽनुष्ठानाप्रतिपादकत्वेनाक्रियार्थत्वाद्धर्मप्रामाण्यानुपपत्तेर्विध्युद्देशेनैकवाक्यत्वात् प्रमाणमित्युपक्रमानुपपत्तिः स्यादत आह * तस्मादिति * यस्मादन्यथा वाक्यभेदः प्रसज्येत तस्मात्प्ररोचनयैवात्र विधिः तथा सत्यैकार्थ्यादित्यर्थः अनेन चाथ यदुक्तमित्यनूदिता शङ्का निरासार्थत्वेन भाष्यकारावतारितस्तुत्यर्थेन विधीनां स्युरिति सूत्रावयवमेवं व्याख्यातं स्तुतेरर्थः प्रयोजनं प्ररोचना तद्द्वारेण कर्मव्युत्पन्नविधिशब्दोक्तानां क्रियाणामुपकारिणो ऽर्थवादा इति एतत्सूत्रावयवव्याख्यानार्थं स्तुतिशब्दा इति भाष्यम् । तत्रानुष्ठातॄणामिति षष्ठीमाक्षिपति * प्ररोचयमाना इति * तन्विकस्तिपौ धातुनिर्देशइति धातुभूतरुचियोगे सम्प्रदानसंज्ञा विहिता न च तत्प्रयोगे पूर्वप्रकृतेर्धातुत्वमस्ति तथा सति धातुद्वयप्रसङ्गेन धातोरिति विवक्षितैकत्वधातूपरिविहितप्रत्ययानुपपत्तिप्रसङ्गादित्याशङ्कते * प्ररोचयतेरिति * परिहरति * अयमाशयः * सनाद्यन्ता धातव इत्यन्तग्रहणसामर्थ्यात्केवलस्य सनादेर्धातुत्वाभावेन धातुद्वयाप्रसक्तेर्न पूर्वप्रकृतेर्भूवादयो धातव इति विहिता धातुसञ्ज्ञा नापह्नवमर्हतीति संबन्ध्यविशेषाविवक्षया चतुर्थ्यप्रसङ्गमाशङ्कते * अथेति * परिहरति * सापीति रुचिसंबन्धाविवक्षायां तद्व्यतिरेकषष्ठ्यनुपपत्तेः प्रातिपदिकार्थव्यतिरेके प्रथमैव स्यात् । रुचिसंबन्धाविवक्षायां तु तस्य चतुर्थी निमित्तत्वेन विशेषरूपत्वात्सामान्याविवक्षा कुतो न तस्येतिभावः । पदान्तरसंबन्धमङ्गीकृत्य षष्ठीमुपपादयति * तस्मादिति * एवं तु व्यवहितान्वयापत्तेरुपकरिष्यन्तीत्यनेनान्वयमाह * अथ वेति * अस्मिन्पक्षे क्रियाया इत्यस्य विच्छिन्नस्यार्थमाह * क्रियाया इति * क्रियाशब्देन

न्निश्चयत्वाद्विधिरभिप्रेतः तदेतत् दूषयति * इदं त्विति * किं स
र्वप्रत्ययार्थाविवक्षया प्रत्ययत्यागो विधिमात्राविवक्षया वा तत्राद्
कल्पे तावत् दूषणान्याह * यदि हीति * ननु भूतिकाम आलभेत
कस्माद्यतो वायुः क्षेपिष्ठा देवतेति हेत्वाकाङ्क्षायामर्थवादान्वयस्
भाष्यकृतोक्तत्वाच्छब्दभावनाकथम्भावासम्भवे ऽपि न कश्चिद्दोष
इत्याशङ्क्याह * यापीति * वेदावगतस्यार्थस्य हेत्वनपेक्षत्वान्न त
द्वारेणार्थवादान्वयः सम्भवतीति कल्पेतेति काका द्योतितं, यापि
भाष्यकृता कस्मादित्यपेक्षा दर्शिता सापि कस्मात्कारणान्मया प्रव-
र्त्तितव्यमिति प्रवृत्तिसिद्ध्यर्थं प्राशस्त्यरूपकारणविषयत्वाद्विध्यभावे
न युक्तेत्यर्थः । नन्वितिकर्त्तव्यताविषयत्वे कथमित्येवाकाङ्क्षा किमि-
ति न दर्शिता ऽत आह * शब्दान्तरेति * विधायकस्याध्ययनवि-
धिना पुरुषप्रवर्त्तनेतियुज्यमानस्य कथं मया पुरुषः प्रवर्त्तयितव्य
इत्यर्थवादान्वयासिद्ध्यर्थमचेतनस्यापि पुरुषगतचैतन्यारोपेणाकाङ्-
क्षोपचर्यते भाष्यकृता तु पारमार्थिकी पुरुषस्याकाङ्क्षा तद्विषयैव
दर्शिता न त्वनयोर्भिन्नविषयतेत्यर्थः । अथापि हेतुविषया कस्मादि-
त्यपेक्षा तथापि यागादिस्वरूपस्य द्रव्यदेवतामात्रेण सिद्धेः फलसा
धनत्वस्य च स्वसामर्थ्यमात्रेण सिद्धेः कर्त्तव्यत्वाभिधानं विना न यु
क्तेत्याह * सापि चेति * ननु क्रियानपेक्षितमपि प्राशस्त्यमर्थवा-
दोक्तं सत्कर्त्तव्यताङ्गमयिष्यतीत्यत आह * तदनपेक्षितं चेति *
प्राशस्त्यस्य श्रौतत्वाभावान्न स्वरसतो ऽर्थवादप्रतिपाद्यत्वं सम्भव-
तीत्यर्थः । प्रतिपादितस्यापि कथं चित्प्राशस्त्यस्य न तावद्धात्वर्थेन
सम्बन्धो ऽनपेक्षत्वादित्याह * न चेति * न केवलं प्राशस्त्यस्यासं-
बन्धः किं तु फलादेरपीति * कस्य चिदिति * काक्वोक्तम् । भाव-
नया सह तर्हि संबन्धो भवत्वत आह * भावना त्विति । किमपे-
क्षेति * न किं चिदित्यर्थः । अनपेक्षायां वा सर्वाभावः स्यादि-
त्याह * तस्मादिति * अथापि कथं चित्प्राशस्त्यमभिधीयते संब-
ध्यते च तथापि न कर्त्तव्यतामालम्भस्य गमयतीत्याह * उक्ते ऽपि
ति * माभूत्तर्हि कर्त्तव्यबुद्धिः प्राशस्त्यप्रतिपादनमात्रेणार्थवादप-
र्यवसानं भविष्यतीत्यत आह * अकल्पिते त्विति * आनर्थक्यप-
रिहारार्थमेव तर्हि कर्त्तव्यता कल्पयिष्यते ऽत आह * प्रत्यक्षं चेति *
क्लृप्तस्य कल्पना ऽनुचितेति भावः । न केवलमनुचिता किं त्वश-
क्यापीत्याह * न चेति * अशक्यत्वे कारणमाह * अनुक्तो हि
चेति * एवं तावत्कर्त्तव्यतायाः क्लृप्तत्वान्नार्थवादकल्प्यत्वमित्यु-
क्तम् । अर्थवादानामपि तत्कल्पकत्वं सम्भवति प्ररोचनामात्रपर्यव-

नादित्याह * तथेति * ननु तर्हि नार्थवादैः प्ररोचनोच्यतां कर्त्तव्यताप्रतिपादनेनैव पुरुषार्थानुबन्धित्वासिद्धेरत आह * अवश्यकर्त्तव्या चेति * तया विना प्रवृत्त्यसिद्धेरिति भावः। ननु माभूदर्थवादानां कर्त्तव्यताप्रतिपादनपर्यन्तं व्यापारः तत्प्रतिपादितप्राशस्त्यान्यथानुपपत्त्या सा कल्पयिष्यते अत आह * सर्व्वत्र चेति * यच्च तुल्यार्थत्वं समुच्चयासम्भवकारणमुक्तं तदसिद्धमित्याह * तुल्यार्थश्चेति * न चात्राल्पभूयोविरोधिन्यायो ऽस्ति प्रत्ययत्यागे भूयसां र्थानां बाधापत्तेरित्याह * यदि चेति * परस्मैपदात्मनेपदरूपग्रहविशेषः। आदिशब्देन विधिभावनयोरुपादानम्। एतत्सर्वं षपरिहारार्थं कल्पान्तरं शङ्कते * स्यादेतदिति * एतदपि निराष्टे * एतच्चेति * अशक्यत्वे कारणमाह * यत इति * उदितप्यविवक्षितं भविष्यत्यत आह * प्रतीतस्य चेति * ग्रहैकत्वं ह्याप्तत्वान्नानुवदितुं शक्यते सम्मार्गभावनया गुणत्वेन प्रधानत्वेन न्वयायोगान्न विधिना स्पृश्यते। इन्द्रियकामहोमस्त्वाश्रयमन्तरेण णस्य फलसाधनत्वायोगाद्विधिमन्तरेण च प्रकरणावगतस्यापि होस्याश्रयत्वे प्रमाणाभावात्प्रकरणावगतं स्वरूपमनूद्य गुणफलसंबन्धविध्यन्यथानुपपत्तिप्रसूतेन विधिना आश्रयत्वेन विधीयतएवेति तेन विधिना वाक्यभेदप्रसङ्गेनापरिग्रहादविवक्षितत्वमिति ननु ध्यसंस्पर्शादेव विधिरविवक्षितो भविष्यत्यत आह * न तावदि * विधिव्यतिरिक्तस्य विध्यसंस्पर्शित्वं विधिविवक्षाकारणं युम्। विधेस्त्वविधिरहितत्वं विध्यसंस्पर्शाख्येनाविवक्षाकारणं सविधीनामविवक्षाप्रसङ्गादित्यर्थः। अनुवादो ऽपि विधेरयुक्त इत्याह नापीति * कारणमाह * तस्यामिति। अयमाशयः * न तावद्य लम्भः स प्रशस्त इत्यालम्भमात्रोद्देशेन प्राशस्त्ये ऽभिहिते ऽपि कर्त्तव्यबुद्धिः सम्भवति येन प्ररोचनालब्धविधित्वानुवादो घटेत्। तच्चोक्ते ऽपि च प्राशस्त्यइत्यादिनोपपादितम्। यदि तु यो ऽयं वायश्वेतालम्भः कर्त्तव्यः स प्रशस्त इतिकर्त्तव्यतारूपस्य विधेरनुवाद व्यते। स तर्हि न सम्भवति। अनुवादावस्थायामप्राप्तत्वादिति। ननु त्पक्षे वायव्यश्वेतालम्भः कर्त्तव्य इति विध्यर्थो भवेत् तस्य चाम्भः प्रशस्त इत्यर्थवादार्थेन नान्वयः स्यादित्याशङ्क्याह * भवति वमिति * दृष्टान्तो ऽपि साध्यविकल इत्याह * यस्त्विति * दशमे सत्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन्त्युदाहृत्य किं तत्र सहितानां कर्तृत्वमेकैकशो वेति सन्दिह्य बहुचनस्य श्रवणात् साहित्ये प्राप्ते त्का श्रुत्यैवोदवसानसमानकर्तृकत्वप्र-

तीतेरवगतसङ्ख्यत्वेन च बहुवचनस्यानपेक्षितसङ्ख्याविधायित्वार्थे
गादपेक्षितधात्वर्थविशेषविधायिन्याख्यातो यथाप्राप्तप्रचयशिष्टस
ङ्ख्यानुवादिबहुवचनप्रयोगोपपत्तेर्न प्राकृतैककर्तृकत्वबाधो युक्त इ
सिद्धान्तो वक्ष्यते क्त्वाश्रुत्या ह्यनन्तरक्रियामात्रमाक्षेप्तुं न च नियोग
तः कर्त्तव्यता । न मांसं भुक्त्वाऽधीयीतेति प्रतिषेधोऽपि भुक्त्व
व्रजतीति च वर्त्तमानापदेशेऽपि क्त्वाश्रुतिदर्शनादित्यर्थः । न च वे
वलं कारणाभावाद्विध्यविवक्षानुचिता किं त्वतिव्याप्तेरपीत्याह
यदि चेति * स्वमतेन व्याख्यातुमुपक्रमते * तस्मादिति * अत्रै
भाष्यानुमतिमाह * तथा चेति * विधिविषयाभिप्रायेषु भाष्य
कारीयविध्युद्देशशब्दे फलपदस्य विधिविषयसमर्थकत्वाभावादुप
न्यासो न युक्त इत्याह * अन्यथेति * विध्यभावे च धात्वर्थस्य तद्विष
यत्वायोगात्तदभिप्रायो विध्युद्देशशब्दो न युक्त इत्याह * न चा
स्येति * कस्तर्हि विध्युद्देशशब्दस्यार्थोऽत आह * तस्मादिति *
विधेरुद्देशकः प्रतिपादक इति कर्तृव्युत्पन्नं करणव्युत्पन्नं वोद्देशशब्दम
ङ्गीकृत्य षष्ठीसमासाश्रयणेन लिङादिरेव विध्युद्देशशब्देनोक्त इत्यर्थ
किमर्थं तर्ह्युद्देशग्रहणमत आह * विध्यर्थेन त्विति * विधिशब्दस्य
लिङादिशब्दे तदर्थे चोभयत्र प्रयोगदर्शनादिह शब्दपरतयापि व्या
ख्यानेन सूत्रनाश इति चोद्यमिति । नन्वस्मिन्पक्षे प्रत्ययो विध्युद्दे
श इत्येवं वक्तव्यं न भूतिकाम इत्येवमन्त इत्यत आह * भूतिकाम
इति * ननु यदि फलादिसङ्गत्युत्तरकालं तद्विशिष्टायां भावनायां
पुरुषं नियुञ्जाने विधावनुग्रहार्थं स्तुत्यर्थावसरः तदभावे तर्ह्याका-
ङ्क्षाभावादर्थवादान्वयो न स्यादित्याशङ्कते * नन्विति * परिहर-
ति * एवमेवैतदिति * का तर्ह्यर्थवादानां तत्र गतिरत आह * तथे-
ति * यद्यपि विध्यभावेनार्थवादाः सम्बन्ध्यन्ते तथापि नानर्थक्या-
पत्तिः प्रयोगवचनेन पञ्चमलकारेण वा, कल्पितविधित्वेऽर्थवादस-
ङ्गतिसम्भवादिति वक्ष्यमाणानुषङ्गेण योज्यम् । आग्नेयोऽष्टाकपालो
भवतीत्यादौ भवति परस्य पञ्चमलकारस्य प्रयोजकव्यापारविधाना-
शक्तेः प्रयोगवचनेन वानुत्पन्नस्य प्रयोगासम्भवादुत्पत्तिरप्याक्षिप्यते
उपांशुयाजमन्तरा यजतीत्यादौ पञ्चमलकारेण अव्यवस्था लिङर्थे-
ऽडिति पञ्चमलकारस्य विधौ स्मरणेऽपि वर्त्तमानापदेशसन्दिग्ध-
त्वात्पञ्चमलकारनिर्णयव्याक्षेपाद्विधित्वस्य कल्पितत्वमभिप्रेतम् । इदं
तु प्रयोगवचनोत्पत्तिकल्पनं दुरुपपादम् । अनुत्पन्नस्य प्रयोगविधि-
विषयत्वायोगादुत्पत्तौ कल्पितायां प्रयोगविधिविषयत्वं प्रयोगवि-
धिविषयत्वाच्चोत्पत्तिकल्पनमितीतरेतराश्रयापत्तेः । पञ्चमलकार-

वन्हाभावे न तन्निर्णयः स्यादित्यपरितोषादन्यथाविधित्वकल्पनमा-
* अथ वेति * ननूक्तेन प्रकारेणाग्नेयो ऽष्टाकपालो भवतीत्यादौ
धिं प्रकल्प्य तच्छेषत्वेनाङ्गिरसो वा इत उत्तमाः स्वर्गलोकमाय-
न्नित्यादेरर्थवादस्यान्वयो भवतु नाम ताभ्यामेतमग्नीषोमीयमेकाद-
ाकपालं पूर्णमासे प्रायच्छदित्यादौ त्वर्थवादमात्रकल्पविधिदर्श-
ाद्विधेः प्राक् स्तुत्यनवसरत्वप्रतिपादनमयुक्तमित्याशङ्क्याह * यथा-
ोति * तत्रापि पूर्वचरितकीर्त्तनान्यथानुपपत्तिमात्रेण कर्त्तव्यतां
ल्पयित्वा शेषपदानां स्तुत्यर्थत्वेनान्वयः । ननु प्रागेव कस्य चि-
स्तुतिः प्रतीयतइत्यर्थः सिद्धरूपार्थकीर्त्तनाभिप्रायो ऽर्थवादशब्दो
स्तुत्यभिप्राय इति भ्रमितव्यम् । नन्वेवमपि सिद्धरूपार्थकीर्त्तनमा-
ण कर्त्तव्यतायाः प्रतीतिसिद्धेः प्रत्ययानर्थक्यं तदवस्थमित्याश-
ङ्क्याह * सम्भवत्यां त्विति * ननु श्रौतार्थद्वयाश्रयणे वाक्यभेदा-
त्तेः प्रत्ययश्रवणे ऽपि भूयो ऽर्थवादपदानुग्रहाय स्तुत्यैव कर्त्तव्य-
ाकल्पनमगत्याङ्गीकार्यमित्युक्तमत आह * यस्त्विति * प्राशस्त्य-
र्त्तव्यतयोर्विशेषणविशेष्यभावात्प्राशस्त्यविशिष्टकर्त्तव्यतात्वरूपै-
ार्थप्रतिपादनादेकव्यापारोपपत्तेर्नार्थभेदनिबन्धनवाक्यभेदापत्तिरि-
र्थः । नन्वर्थभेदाभावे ऽप्यप्राप्तस्य विधिसम्बन्धात्प्राप्तस्य च विशेष-
भूतप्राशस्त्यसम्बन्धाद्वैरूप्यलक्षणो वाक्यभेदः प्रसज्येत अत आह
विधीयमानस्यैव हीति * प्राशस्त्यं विना विध्यपर्यवसानादप्राप्ता-
स्यैवालम्भस्य विधिनेव प्राशस्त्येनापि सम्बन्धादवैरूप्यमित्यर्थः ।
न्वेवमपि विशिष्टार्थप्रतिपादनाद्गौरवापत्तिरत आह * यदि
ति * का तर्हि नायमभिसम्बन्धो विवक्षित इत्यादेर्भाष्यस्य गति-
त आह * तस्मादिति * अनेन ग्रन्थेनैवमेतद्भाष्यं व्याख्यातम् ।
तिकाम आलभेत कस्माद्यतो वायुः क्षेपिष्ठेत्यनेन यः सार्थवादक-
विध्युद्देशस्य विधिस्तुतिसम्बन्धरूपो विशिष्टो ऽर्थो दर्शितः । नायं
ध्युद्देशमात्रेण विवक्षितः । किं तु सार्थवादकेनेति तत्रालभेतेति-
ध्यप्रतीकेन विध्युद्देशोपलक्षणं ततो भूतिरिति पूर्वप्रकृतवायुपराम-
तच्छब्दयोगिना भूतिपदेन स एवैनं भूतिं गमयतीत्यन्तार्थवादोप-
क्षणं विशेषणविशेष्यरूपार्थद्वयस्य विशेष्यप्रतिपादकविध्युद्देशमा-
णाभिधाने गौरवलक्षणवाक्यभेदापत्तेरिति विधित्वादीत्यादिशब्देन
लेतिकर्त्तव्यताग्रहणं किमर्थेत्याशङ्काभाष्यं विधिविवक्षायां तदि-
कर्त्तव्यताभूतस्तुत्याकाङ्क्षानिराकरणायोगादयुक्तमाशङ्क्य व्याचष्टे
किमर्थेति * अयमाशयः प्रवृत्तिप्रतिबन्धकालस्यादिभङ्गरूपा

१ भूतिकामात्तविध्युद्देशप्रदर्शनमित्यर्थः ।

प्ररोचनाविधेरितिकर्त्तव्यता । न स्तुतिः । स्वार्थं तु तया स्त
ङ्क्ष्यते विध्यवगतश्रेयःसाधनत्वादेव तु प्रवृत्तिहेत्विच्छाउ
द्विरोध्यालस्यादिनिराकरणसिद्धेरनर्थिका स्तुतिरिति भा
व्याख्येयं, यद्य ऽपि विधिस्तुतिरूपार्थद्वयप्रतिपादनं विध्युद्दे
न क्रियते तथाप्यर्थवादानर्थक्यं विधित एव प्ररोचनार्थि
थ्येन स्तुत्यनाकाङ्क्षणादिति, कथं रोचेतेत्युत्तरभाष्याभि
* कथमिति * श्रेयःसाधनत्वाधिगमे ऽपि बहुव्ययाया
त्द्वेषोत्पत्तेः स्तुतिमन्तरेणानिराकरणात् दुर्वारा स्तुत्याक
भावः । ननु प्रागित्याशङ्काभाष्यं किमर्था स्तुतिरित्यनेन पु
भासमानं तदभिप्रायविवरणार्थतया व्याचष्टे * नन्विति *
त्यादिपरिहारभाष्यं तस्यायमर्थः न तावत्प्राशस्त्यं विना
सम्भवतीत्युक्तम् । कथं रोचेतेत्यनेन । यदि तु विध्युद्देशेनैव प्र
क्षेपस्य वसन्तादिवाक्येषु दर्शनादिहापि तत एव प्राशस्त्याक्षे
स्तुतिपदानर्थक्यमुच्येत तन्निराकरणार्थं यदेत्याद्युक्तं तद्व्य
हीति * न हीत्यादिनैतदाहेत्यन्वयः । शक्तिद्वयनिराकरणास्य
स्य ग्रन्थस्य दर्शयितुं विधीयते इत्येतत्समाप्तिपरत्वेन न तद्
व्याख्यातम् । अनेन च तदा पूर्वेण विधिरित्यत्रापि समाप्यत
हारो दर्शित इत्यवगन्तव्यम् । प्ररोचनया च विधिसमाप्तेः
शक्तिः समाप्त्युक्त्या दर्शिता, भवतीति न भाष्याऽवाचकत
म्भः । दृष्टान्तभाष्यं पूर्ववदेव व्याख्येयमित्याह * यथेति
स्माभिः प्रत्ययार्थवादयोः पुनरत्यन्तभिन्नानुग्राह्यानुग्राहक
त्समुच्चय इति प्रागुक्तं तदनेन दार्ष्टान्तिकयोजनाभाष्येण
कृतमित्याह * विधिशब्देनेति * नन्वेवं सतीत्याशङ्काभाष्य
धायकपदप्ररोचकत्वाभिप्रायं व्याख्यातुमाह * नन्विति
मित्यादिपरिहारभाष्यं प्रतीकेन गृहीत्वा तस्मिन्विद्यमानइत्
च्यशेषं तस्मादित्यध्याहारपूर्वकं सावधारणत्वेन व्याचष्टे *
मिति * अविद्यमाने हि स्तुतिवचने विध्युद्देशमात्रस्य प्राश
शिष्टविधिरूपो ऽर्थो भवेदिह तु स्तुतिवचनस्य विद्यमानत्
ऽर्थो न्याय्यो भवति सो ऽङ्गीकार्य इत्यर्थः । स्तुतिः प्रयोजनार्
च्यावयवमवतारयितुम् *, कश्चासावित्युक्तम् * अर्थवा
स्तुतिप्रयोजनत्वाद्विवचनानुपपत्तिमाशङ्क्य * न तस्यैवेत्याह
अर्थवादाभावे त्वित्यनेन तस्मिन्नसतीति भाष्यावयवो व्याख्य
सत्स्वपीत्यादिप्रत्यक्षश्च वाक्यशेषभाव इत्यन्तं भाष्यं पूर्ववद्
ख्येयमित्याह * नन्विति * अत्राप्युपात्ते लघूपाये गुरूपाय

नुपपत्तिमाशङ्क्यानर्थक्यपरिहारायोपात्ते ऽपि लघौ गुरोराश्र
स्येतावतार्थतुल्यत्वमिति अतो ऽस्मादित्युपसंहारभाष्यं वि
पञ्चम्या विधेः स्तुत्यवगतिप्रतिपादनादभिप्रेतविरुद्धमाशङ्क्य
*अतो ऽस्मादिति * किं सम्बन्धनिबन्धनेयं षष्ठीत्यपेक्षिते आह
क्येति * पूर्वप्रकृतेर्वाक्यशेषो ऽस्मादिति सर्वनाम्ना परामृष्ट
रिति षष्ठ्या सम्बध्यतइत्यर्थः । एवं सत्येष भाष्यार्थो भव
* इत एवेति * अस्य विधेः सम्बन्धिन इतो वाक्यशेषादे
तिमवगच्छामो न स्वतो विधिमात्रादित्यर्थः । ननु निरपेक्षाद
शङ्काभाष्याभिप्रायमाह * नन्विति * भवत्विति परिहारभ
शङ्कानुज्ञानादयुक्तमाभासमानं सोपहासत्वेन व्याचष्टे * उ
स्त्विति * एवमर्थविरोधाशक्यत्वयोः परस्परव्याघातात्तत्पा
र्थे व्यवस्था यत्रासावित्यादिना दर्शिता सर्वे ऽमी विधि
सप्ररोचनाविधिपरा व्याख्येयाः अशक्यत्वोपपादनार्थं पूर्वोक्त
लक्षणवाक्यभेदस्मारकं वाक्यं हीत्यादिभाष्यं व्याचष्टे
क्यं हीति । एकमेकस्यैवेति * वाक्यसंबन्धपदगतयोरेकवचः
वक्षितसङ्ख्यत्वं दर्शितं तच्चात्र विध्युद्देशरूपमभिप्रेतमिति
द्देश एवेत्यनेन दर्शितम् । संबन्धशब्देन चात्र कर्म्मव्युत्पत्त्या वि
विशेष्यरूपौ संबन्धिनावभिप्रेतौ * एष हि गुणो भवती *
वादप्राशस्त्यप्रदर्शनम् । यतस्ततोभूतिरितिवदिति कस्य वि
स्यात्तद्व्युदासार्थं * विध्युद्देशोत्थापितानामेकेत्याद्युक्तं * ना
संबन्धो विवक्षित इत्यादिना यत्प्रबन्धेन विध्युद्देशस्य प्राशस
कत्वं निराकृतं तस्य प्रकृतैकवाक्यतासिद्धिप्रयोजनतां दर्श
भिप्रेतं सूत्रार्थमुपसंहरति * तस्मादिति * अनेनैवं सूत्रं व्य
विधेयभावनांशाप्रतिपादकत्वे ऽपि तदनुष्ठापकानां विधीनाम
वादा स्युः केनोपकारेणेत्याक्षिप्ते स्तुत्यर्थेनेत्युक्तम् । विधिः
नसिद्ध्यर्थे स्तुतेरुपकारकत्वे ऽभिहिते विधिमात्रेणानुष्ठानसि
स्तुत्येत्याशङ्कानिराकरणार्थमर्थावादानां धर्म्मप्रमोपयोगित्व
वतिक्लिष्टलाक्षणिकस्तुत्यर्थत्वाङ्गीकारकारणं विधिनैकवाक्य
त्वेनेनोक्तमिति ।

तुल्यं च सांप्रदायिकम् ॥ ८ ॥

सामान्योपयोगप्रतिपादनं विनार्थवादानां द्वारविशे
गप्रतिपादनाशक्तेः सामान्योपयोगप्रतिपादनार्थमेतत्सूत्रं पूर्वं
पि प्रथमसूत्रव्युत्पादिताध्ययनविधिदृष्टार्थत्वबलेन सामान्य

स्य सिद्धस्य विशेषोपयोगमन्तरेणानिर्वाहात्तत्सम्भवप्रदर्शनोत्तर
लं कृतम् । तत्र भाष्यकारीयपरिचोदनोपन्यासस्य प्रयोजनम
* चशब्देति * तुल्यासांप्रदायिकत्वस्यादृष्टार्थत्वे ऽप्युपपत्तेः पूर्व
तिज्ञातस्तुत्यर्थत्वासाधकत्वाद्विध्येकवाक्यत्वलक्षणस्तुत्यर्थत्वसा
कहेतुसमुच्चयार्थे चशब्दायोगात्प्रमादपाठत्वशङ्कानिराकरणार्था
वत्त्वावगमलक्षणहेत्वन्तरसमुच्चयार्थत्वेन चशब्दो भाष्यकृता व
ख्यात इत्यर्थः । परिचोदनार्थं व्याचष्टे * आनर्थक्यमेवेति * ।
राकरणभाष्यं व्याचष्टे * तत्रैवमिति * एवं त्वर्थावगमप्रकारा
क्तेः साकाङ्क्षत्वप्रसङ्गादपरितोषेणान्यथा छेदं करोति * अथ वेति
अनेन च विधिना त्वेकवाक्यत्वादित्येतदेव सूत्रं प्रमादपाठत्वशङ्का
निराकरणे ऽपि योजितम् । विध्येकवाक्यत्वेन स्तुत्यर्थतया ऽर्थवत्त्व
वगमाद्प्रमादपाठत्वनिराकरणएव हेत्वन्तरसमुच्चयार्थे तुल्यं स
प्रदायिकत्वं योजयति * किं चेति * सांप्रदायिकशब्दव्याख्यान
र्थमनध्यायादिधर्म्माणां वेदाध्ययनाख्यसम्प्रदायप्रयोजनत्वं भाष्य
कृतोक्तमुपपादयति * सम्प्रदायेति । तादर्थ्यस्मरणादिति[1] *

तपोविशेषैर्विविधैर्व्रतैश्च श्रुतिचोदितैः ।
वेदः कृत्स्नो ऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥

इत्यादिना धर्म्मजातस्य सम्प्रदायार्थत्वस्मरणादित्यर्थः । पुरुष
र्थत्वं तु निष्प्रमाणकमित्याह * स्वर्गादीति * नन्वध्ययनस्वरूपे तत्व
र्थे च ग्रहणे धर्म्मजातस्यानुपयोगात्तत्पूर्व्वकज्योतिष्टोमादिकर्म्माङ्ग
भविष्यत्यत आह * न चास्येति * एतच्च द्वादशाधिकरणसिद्धमु
तत्र ह्यध्यायानध्यायादिधर्म्मजातस्याध्ययनप्रकरणपठितस्यापि त
स्वरूपे कार्ये चानुपयोगादध्ययनेनैव फलवत्कर्म्मावबोधं भावयो
स्यध्ययननियमस्यानारभ्य विहितस्याप्यध्ययनजनितज्ञानोपस्थापित
यकर्म्माङ्गतया सामर्थ्योपबृंहितेन सन्निधिनावधारणात्तद्द्वारा
र्माङ्गत्वावगतेरमावास्यादौ कर्म्माङ्गभूतयाज्यानुवाक्यादिमन्त्रोच्च
रणं न कार्यमिति । मन्त्राणां कर्मसंयोगे स्वधर्म्मेण प्रयोगः स्या
धर्म्मस्य तन्निमित्तत्वादितिसूत्रेण पूर्वपक्षयित्वा प्रकरणेनाध्ययना
तया ऽऽवधारितस्यान्यार्थत्वे प्रमाणाभावादविघ्नपरिसमाप्त्यर्थत्वेन
नुपयोगासम्भवात्कर्माङ्गत्वाभावेन कर्म्मकाले ऽध्यायानध्यायादि
र्म्मानादरेणामावास्यादावपि कर्म्माङ्गमन्त्रोच्चारणं कार्यमिति वि
प्रतिविधानाद्वा सर्वकालं प्रयोगः स्यात् कर्म्मार्थत्वात्प्रयोगस्येति
त्रेण सिद्धान्तयिष्यते । केनोपकारेणाध्ययनाङ्गत्वं कर्म्मजातस्ये

१ तरसंबन्धस्मरणादिति २ पु० पा० अयमेव समीचीनः प्रतिभाति ।

पेक्षायामविघ्नार्थत्वं भाष्यकृतोक्तमुपपादयति * सम्प्रदायाङ्गत्वे ऽपि चेति * विघ्ने सत्यध्ययनेनाक्षरग्रहणस्य कर्त्तुमशक्यत्वात् तत्सिध्यर्थमविघ्नमेवापेक्षितं * तादर्थ्यस्मरणाच्चेति *

अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी ।
ब्रह्माष्टमीपौर्णमास्यौ तस्मात्ताः परिवर्जयेत् ॥

इत्यादिना धर्म्मजातस्याविघ्नार्थत्वस्मरणादित्यर्थः।प्रकरणावगताध्ययनाङ्गत्वान्यथानुपपत्त्याध्यविघ्नो ऽर्थतो ऽवसीयतइत्याह * न हीति * एतदेव प्रपञ्चयति * यदि तावदिति * नन्वध्ययनजनितज्ञानसाध्यकर्म्मानुष्ठानजन्यापूर्वार्थत्वे ऽपि धर्म्मजातस्य व्रीहिसाध्ययागापूर्वत्वे ऽपि प्रोक्षणस्य व्रीह्यर्थत्वाविघातवद्ध्ययनाङ्गत्वाविघातः स्यादत आह * अथ पुनरिति * व्रीहीणां यागापूर्वार्थत्वात्तदुत्पत्त्युपयोगिप्रोक्षणादिधर्म्मग्राहकत्वं युक्तम् । अध्ययनस्य क्रत्वनङ्गत्वान्न तत्साम्यमिति भावः।कः पुनरध्ययनस्याविघ्नेनोपकारो जन्यतइत्यपेक्षायामक्षरग्रहणाख्यकार्ययोग्यतालक्षणमुपकारं दर्शयितुमाह * तस्मादिति * तुल्यसाम्प्रदायिकत्वस्य प्रकृतानर्थक्यनिराकरणोपयोगितां दर्शयति * न चेति * न चाध्ययनादिधर्मनियमस्मृतेर्निर्मूलत्वेनाप्रामाण्यं शङ्क्यं स्मृत्यधिकरणे स्मृतीनां वेदमूलत्वस्य वक्ष्यमाणत्वादित्याह * नियमस्मृतेश्चेति * तुल्यसाम्प्रदायिकत्वसाधितसामान्योपयोगोपसंहारपूर्वकं तस्य पूर्वसूत्रोक्तस्तुत्यर्थत्वलक्षणविशेषोपयोगसिद्ध्युपयोगितामाह * स चेति * अत्रैवार्थे स्मरणं च दृढमित्यादिभाष्यं योजयति * स्मरणं चेति * इतिकरणः प्रभृत्यर्थः तत्र स्मरणं च दृढमिति वेदशब्दत्वाभिधाने योजितम् । अतो न प्रमादपाठ इति सामान्योपयोगोपसंहारे इतिकरणस्तस्य विशेषोपयोगित्वे यस्मान्न प्रमादपाठः अतः कारणात्प्रयोजनविशेषापेक्षायां सामर्थ्यात्स्तुत्यर्थतार्थवादानां सिध्यतीतिकरणो हेत्वर्थे व्याख्येय इत्यर्थः। साम्प्रदायिकशब्दो वा धारणाध्ययनपरतयानेन भाष्येण व्याख्यायतइत्याह * अत वेति * यत्त्वस्मिन्व्याख्याने पुरुषाधीनप्रामाण्यप्रसङ्गादित्यादिना दूषणं पूर्वसूत्रव्याख्योपक्रमे ऽभिहितं तत्परिहरति * सम्भाव्यते चेति * पूर्वोक्तमध्ययनविधिप्रमाणकं सर्वस्य वेदस्य प्रयोजनवदर्थपर्यवसायित्वमेतत्सूत्रारूढं कर्त्तुमध्ययनविधिपरतया साम्प्रदायिकशब्दं स्वयं व्याचष्टे * तुल्यं चेति * अनयोरपि व्याख्ययोरेतत्सूत्रोक्तस्य सामान्योपयोगस्य पूर्वसूत्रोक्तविशेषोपयोगसिद्ध्यर्थत्वप्रतिपादनार्थमतो नेत्यादिभाष्यमिति दर्शयितुं ग्रन्थशेषः ॥

अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधः स्याच्छब्दार्थस्त्वप्रयोगभूतः तस्मादुपपद्येत ॥ ९

सूत्रद्वयेनैव सिद्धान्तसिद्धेरुत्तरसूत्रानर्थक्यमाशङ्क्य पूर्व क्षनिराकरणपरतया सामान्यतो व्याचष्टे * उक्तेति * अप्राप्ताम पपत्तिमिति द्वितीयान्तं पदद्वयं साकाङ्क्षत्वादध्याहारेण व्याच * शास्त्रेति * ह्रस्वपाठे अन्यथाध्याहारमाह * अथ चेति * प्रये हीति सूत्रावयवव्याख्या भाष्ये स्तेयादीनामित्यादिशब्देन, पूर्वोपन स्तस्य रोदनादेरपि ग्रहणमिति व्याचष्टे * प्रयोगे हीति * सूत्रे व्याचष्टे * अस्माकं पुनरिति * श्रौतार्थाभिप्रायोऽर्थे शब्दः प्रयुज ते ऽनेनेति व्युत्पत्त्या प्रयोजनवचनः प्रयोगशब्दः अविवक्षितश्चा प्रयोजनं न भवतीत्यप्रयोगशब्देनाविवक्षितत्वमुक्तम् । नन्वनुष्ठा विवक्षायां विरोधापत्तेस्तत्परिहारार्थं तस्यैवाविवक्षा वाच्या न श्रौ तार्थाविवक्षात आह * न चेति * अतः शब्दार्थे चशब्दः निपात नामनेकार्थत्वात् । विवक्षितत्वे हि श्रौतस्यार्थस्य। प्रयोजनवत्त्वसि द्धये ऽध्याहारादिनानुष्ठानकल्पना स्यात् यतस्त्वसौ न विवक्षि अतः कल्पकाभावान्नाध्याहारादिभिर्विधिकल्पनेत्यर्थः अनेन च नुष्ठानाविवक्षार्थे श्रौतार्थाविवक्षेत्युक्तम् । किं तर्हि विवक्षितमित्य क्षायामुत्तरसूत्रवक्ष्यमाणं स्तुत्यर्थत्वमाकाङ्क्षानिवृत्तये ऽभिहितम् ननु स्तुतेरपि श्रौतार्थकल्प्यत्वादविवक्षितस्य चासत्यत्वेन कल्प त्वायोगात्सद्विवक्षापत्तेरपरिहार्यो विरोधो ऽत आह * न चेति अस्त्येनापि स्तुत्युपपत्तेर्वक्ष्यमाणत्वान्नास्मत्पक्षे श्रौतार्थविवक्ष पत्तिरिति भावः । स्तुत्यर्थत्वमेव वाशब्दार्थास्त्वित्यनेनोच्यत इत न्यथा व्याचष्टे * अथ वेति * तदानुष्ठानवचनएव प्रयोगशब प्राप्तशब्दार्थे च भूतशब्द इति न स्वार्थानुष्ठानेनेत्यादिनोक्तम् । ननु भ ष्यकारेणाप्राप्ता चाऽऽनुपपत्तिरिति प्रथमान्तमेव पदद्वयं पठितं क भवतान्यदेव पाठद्वयं व्याख्यातमत आह * अयो ऽत्रेति * पाठत्र विवेकार्थं पूर्वोक्तवाक्यशेषस्मरणायोत्तरो ग्रन्थः ।

गुणवादस्तु ॥ १० ॥

यदा शब्दार्थस्त्वप्रयोगभूत इत्यनेन श्रौतार्थाविवक्षोक्ता तदा गुण वाद इति षष्ठीसमासाश्रयणादन्येन स्तुत्यर्थत्वं सिद्धान्तसूत्रो पूर्वसूत्रनैराकाङ्क्ष्याय स्मार्यते स्वार्थासत्यत्वे वा कथं स्तुतिरित्य क्षायां गुणाद्वाद इति पञ्चमीसमासाश्रयणेन स्वार्थसत्यत्वानाद

भिधीयते । यदा तु स्तुत्यर्थत्वमेव शब्दार्थस्त्वित्यनेनोक्तं तदा वि-
त्रस्तुत्योर्भिन्नविषयत्वे कथं विधायकानुग्रहार्थत्वमर्थवादस्येत्या-
ाङ्कानिराकरणार्थमेतत्सूत्रमिति भाष्यकारेण व्याख्यातम् । तत्र भि-
ाविषयत्वे स्तुत्यर्थत्वासम्भवपरिचोदनादेकविषयत्वे स्तुतित्वं पूर्व-
क्षिणो ऽभिमतमिति कस्य चिच्छङ्का स्यात्तश्च सो ऽरोदीदित्यादि-
म्भवचोद्यानुपपत्तिरित्याशङ्क्याभ्युपेत्य वादमात्रेणेतरत्राङ्गीकृत्य
नन्नविषयत्वे तावत्परिचोदनेति व्याचष्टे *यत्र तावदिति * गौण
ति तद्धितं पञ्चमीसमासप्रदर्शनपरतया व्याचष्टे * गुणादिति *
पचारश्चात्र गुणशब्देनाभिप्रेतः यत्सम्बन्धिनीति सम्बन्धिशब्दः
क्रयापेक्षः प्रकृत्यपेक्षो वेति द्वेधा व्याचष्टे * यत्क्रियाया इति *
ाभिजनसंस्तवेन चेत्यादिभाष्यार्थमाह * यत्रेति * अभिजायते अ-
मादितिव्युत्पत्त्योत्पत्तिस्थानमभिजनशब्देनोच्यते। अश्मकशब्दो ज-
पदविशेषवाची । कीदृशी स्तुतिरित्यपेक्षामाह * एतस्यास्त्विति *
तसशाखया ऽवकाभिश्चाग्निं विकर्षत्यापो वै शान्ताः शान्ताभिरे-
ास्य शुचं शमयतीति श्रूयते । तत्र वेतसावकयोर्विधेयत्वेन स्तु-
र्हत्वात्तदर्थं वापां स्तुतिप्रतीतेः शान्ताभिरिति सहयोगे तृतीया-
ायणेनाद्भिः सहचरितः सम्बन्धो वेतसावकीरूपो विकारः प्रकृति-
णयोगेन शान्तत्वादस्येति सर्वनामोपात्तस्य यजमानस्य कष्टापरप-
र्यां शुचं शमयतीति वेतसावकयोरनेन प्रकारेण स्तुतिरित्यर्थः
ादनाद्युदाहरणत्रये केवलमेव गुणवादसूत्रं स्तुत्यसम्भवपरिहारा-
तया भाष्यकृता व्याख्यातम् । तस्य गुणवादप्रकारशेषानिरूपणेना-
ामर्थ्यमाशङ्क्याह * गुणवादेति * रोदननिमित्तस्य शब्दस्य दर्श-
ादित्यादिनोक्तस्तत्सिद्धिकरत्वादिः प्रकारविशेषो यावत्तत्सिद्धिसूत्रे
क्ष्यमाणतया नालोच्यते तावच्छुद्धेनैवेति तावच्छब्दस्यार्थः ते-
ाद्युदाहरणेष्वपि तर्हि सूत्रान्तरानर्थक्यं स्यादत आह * शेषेति *
तु तत्सिद्धिसूत्रेण गुणवादप्रकारविशेषनिरूपणे स्तेनाद्युदाहरणे-
ापि शुद्धस्य गुणवादसूत्रस्य स्तुत्यसम्भवपरिहारसामर्थ्यादनिरूपणे
। रोदनाद्युदाहरणेष्वप्यसामर्थ्यात्किं कृतेयं व्यवस्थात आह * त-
ति * यद्यपि तत्सिद्ध्यादीनां षण्णामेव गौणवृत्तिप्रकारत्वात्सर्व-
कारविशेषनिरूपणं तत्र करिष्यते तथाप्यस्मिन्नुदाहरणे ऽयं
कार इति स्तुत्युदाहरणनिष्ठतया सूत्रेणानिरूपणात्किं चि-
नारूप्याद्युदाहृतानां स्तेनं मन इत्यादीनां सम्बन्धितयैवोच्यते
ाप्राधान्येन तु तत्र सर्वं गौणतानिमित्तं वक्ष्यतइति प्राधान्यवाचि-
। परशब्देनोक्तं गौणवृत्तिलक्षणकथनमात्रपरत्वात्तत्सिद्धिसूत्रस्येति

भावः । रोदनार्थवादे च गुणवादसूत्रयोजनार्थं विध्येकवाक्य
विनार्थवादान्वयायोगात्पूर्वं विध्येकवाक्यत्वमेव साकाङ्क्षत्वे भ
स्नो ऽरोदीदित्यादिना प्रश्नपूर्वकं भाष्यकृतोपपादितं तद्व्याचष्टे *
ऽरोदीदिति * यद्यपि निन्दानिषेधयोरत्रैकवाक्यत्वं तथापि स
दाहरणगतानामाकाङ्क्षाहेतुकविध्येकवाक्यत्वप्रतिपादकभाष्या
साधारणो ऽयं व्याख्याग्रन्थ इति सूचयितुमुपलक्षणार्थं विधिस्तु
रित्युक्तं, प्रत्ययवयमित्यनेन पदानामिति बहुवचनार्थो दर्शितः अ
था हि पुरास्य संवत्सराद्गृहे रोदनं भवतीत्यनेनैव निन्दासिद्धेः
षपदानामानर्थक्यं स्यात् । अवान्तरपदवर्गाभिप्रायश्चात्र पद
ब्दः । एतदर्थवादोपक्रमस्य देवासुराः सम्यत्ताआसन्ते देवा विज
मुपयन्तो ऽग्नौ वामं वसुसन्यदधतेदमुतो भविष्यति यदि नोजे
न्तीति तदग्निर्न्यकामयत तेनापाक्रामत्ते देवा विजित्यावरुरुत्समाना
न्वायन् तदस्य सहसा दित्सन्तेत्यस्याप्येकवाक्यत्वसिद्ध्यर्थं रो
दित्यादिभाष्यं व्याचष्टे * स इतीति * स इत्युक्ते तस्य प्रकृतः
प्रत्ययादित्यर्थः। यद्वा स इत्यस्य सर्वनामत्वपाठात्कथं प्रकृतापेक्ष
मित्याशङ्क्य सर्वनामतच्छब्दादेशेन स इत्यनेन स्थानिनस्तच्छब्द
प्रत्ययादित्यन्यथा व्याचष्टे * अथ वेति * तद्रजतमित्यस्य भा
कारेणानुपन्यासात्स्वयं तत्संबन्धं दर्शयति * एवमिति * उपप
श्चेति भाष्यं व्याचष्टे * सर्वा चेति * उपरितनस्येत्युक्ते ऽप्युपरि
नग्रन्थोपन्यासस्य प्रयोजनमाह * को ऽसाविति * हेतुत्वेनो
भाष्यं व्याख्यातुमाशङ्कते * केनेति * रजतदानस्य रोदनोत्पा
कत्वे को हेतुरित्यर्थः। उत्तरत्वेन भाष्यं व्याचष्टे * तदुपपाद्यतइति
भाष्ये ऽयमिति पूर्वोक्तरोदनप्रभवत्वरूपार्थपरामर्शः । पूर्वोपन्यस्त
निषेधस्य पुनरुपन्यासे प्रयोजनमाह * तस्मादिति * कथं वि
रूपकुर्वन्तीति पृष्ट्वा गुणवादेनेत्यादिनोक्तत्वेन गुणवादसूत्रं भा
कृता योजितं तद्व्याचष्टे * निन्दयेति * दोषसङ्कीर्त्तनात्मकत्व
न्निन्दाया गुणशब्दानुपपत्तिमाशङ्क्य तत्प्रतिषेधस्येत्यादिभाष्यकृत
क्तं कथं पुनरित्यादिना निरालम्बनस्तुत्यनुपपत्तिमाशङ्क्यालम्बन
भिधानपरतया पुनरेतदेव सूत्रं योजितं तद्व्याचष्टे * गुणवादश्च
ति * अरोदीदित्यस्यालम्बनप्रतिपादनार्थं रुद्र इत्यादिभाष्यं व्या
ष्टे * रुद्रशब्देति * रोदिते रोदनार्थत्वाद्रक्प्रत्ययस्य च कर्त्रर्थत्व
द्रोदनकर्तृवाची रुद्रशब्दो व्याकरणादवगम्यते तस्य च त्वमग्ने रु
असुरो महो दिव इत्यादावग्नौ प्रयोगदर्शनाद्रुद्रो वा एष यदग्नि
ति चार्थवाददर्शनाद्रुद्रमग्निं द्विजाः प्राहुरिति * चारण्यकपर्वा

कुमारसम्भवोपाख्यानदर्शनात् * प्रस्तरे यजमानकार्यकर्तृत्ववत्त-
कार्यकारित्वेन रोदनकर्तृत्वकल्पनेत्यर्थः तैत्तिरीयकशाखागतार्थ-
ाददर्शनादग्नौ रुद्रशब्दो ऽस्माभिर्व्याख्यातः। अन्येषां तु कपर्दिनीमं
द्रशब्दं व्याचक्षाणानामभिप्रायं न विद्मः। अश्रुप्रभवत्वाभिधानाल-
बनप्रतिपादनार्थं वर्णसारूप्यादितिभाष्यं व्याचष्टे * अश्रुणश्चेति*
ादि नामेत्यनेन द्रवत्वमात्रेण वैलक्षण्यमित्युक्तम् । अनेन चान्यत्र
कृतिविकारयोः सादृश्यदर्शनादिहापि सादृश्येन प्रकृतिविकारभा-
ोत्प्रेक्षा दर्शिता । रोदनं भवतीत्यस्यालम्बनाभिधानार्थं निन्दन्त्वेति
ाष्यं व्याचष्टे * धनत्यागेनेति * नन्वेवमपि मुख्यस्यार्थस्यासत्य-
ात्तल्लक्षिता निन्दाप्यसत्या स्यादत आह * एवमिति * नावि-
ाभावेनोपाख्यानादेर्मुख्यस्यार्थस्य स्तुतिनिन्दालक्षकत्वं किं तु वि-
ाननिषेधापेक्षितस्तुतिनिन्दारूपार्थप्रतिपादनोपायमात्रत्वेनोपाख्या-
ाद्यर्थवादैः प्रतिपाद्यते। न चोपायमात्रत्वेनःकल्पितस्यासत्त्वं तद्द्वा-
ार्थप्रतिपत्तेरसत्यत्वं प्रतिपादयति। किंबादेरसत्यत्वे ऽपि तद्द्वारस्य
ब्दान्वाख्यानस्य सत्यत्वदर्शनादिति भावः । वपोत्खननार्थवादस्य
ाध्येकवाक्यत्वप्रतिपादनार्थं तथेत्यादिभाष्यं व्याचष्टे * एवमिति*
थं गुणवाद इत्यनेन कीदृशी स्तुतिरिति पृष्टेवेत्थं नामेत्यादिना
तुतिस्वरूपं भाष्यकृता दर्शितं तद्व्याचष्टे * आत्मेति * ईदृश्यपि
तुतिर्भवतीति दर्शयितुं दृष्टान्तमाह * यथेति * कथं पुनरित्यनेना-
दवृत्तान्तान्वाख्यानानुपपत्तिमाशङ्क्योच्यतइत्यादिना किमसतार्थेन
त्यसम्भवाभिप्रायेयमाशङ्का निरालम्बनान्वाख्यानासम्भवाभि-
या वेति विकल्प्याद्ये कल्पे तावदपारमार्थिकस्याप्युपायत्वं किंबा-
वत्सम्भवतीत्युक्तं तदुपपादयति * वृत्तान्तेति * अनेन चोपा-
ानानामसत्यत्वे ऽपि तत्रार्थवादानामतात्पर्यात्तात्पर्यगोचरीभूते
प्राशस्त्याप्राशस्त्यरूपे ऽर्थे सत्यत्वान्न तावदप्रामाण्यापत्तिरित्यु-
म् । कथं पुनरसत्यस्य पारमार्थिकस्तुतिनिन्दोपायत्वमित्याशङ्क्या-
* शब्दभावनाङ्गं वेति * अयमाशयः धूमादेर्ज्ञानापेक्षत्वे ऽपि
रूपेण कारणत्वात्तस्य चार्थाभावे ऽपि तद्विषयत्वरूपेण सत्यत्वा-
ज्जुसर्पज्ञानस्येव भयकारणत्वं युक्तमेवोपायत्वमिति । अर्थसत्त्वा-
क्षत्वप्रदर्शनायैव सा चेत्याद्युक्तम् * प्रवर्ते ऽहमिति * विज्ञानोत्पा-
यः शब्दस्य व्यापारः स एव शब्दभावनाशब्देनोच्यते । एवं विध-
ज्ञानोत्पादकत्वमेव शब्दस्य प्रवर्तकत्वं न तु वाद्यादिवदौदासीन्य-
यावकत्वम् । यथोक्तम् ।

प्रवर्ते ऽहमिति ज्ञानं येन शब्देन जन्यते ।

स चोदनोच्यते यद्वा प्रवर्त्तनफला मतिः ॥

इति तदेवात्र प्रवृत्तिविज्ञानशब्देनोक्तम् । तन्मा
शब्दभावनोपयुज्यते प्रवर्त्ते ऽहमिति विज्ञानं यावता
स्यैस्योत्पाद्यते तावन्मात्रेण पर्यवस्यति नातिरिक्तमपेक्षत
र्थः । तच्चार्थसत्तानपेक्षात्प्राशस्त्यज्ञानमात्रात्सिद्ध्यतीति द
यितुं नार्थेनेत्युक्तम् । केचित्तु प्रकृतोपयोगानुसारेणैवं व्य
क्षते तत्प्रवृत्त्यङ्गभूतप्राशस्त्यविज्ञानमात्रेण सोपयुज्यते । प्रवृत्त्युत
दे समर्थो भवतीति । नन्वेवं सत्युपाख्यानवत्स्वर्गयागादिसाध्य
धनभावसङ्कीर्त्तनस्यापि प्रवर्त्तनोपायमात्रत्वापत्तेरसत्यता स्यादत अ
* अर्थात्मिकायां त्विति * उपाख्यानानामपुरुषार्थौपयिकत्वेन
स्य तत्राव्यापारात्प्रमाणान्तरानुपलब्धेश्चासत्यत्वं ज्ञातं । साध्यसा
नभावे तु वेदस्य व्यापाराभावे निष्फलत्वापत्तेरतुल्यत्वम् । वेदप्र
तस्यापि तु प्रत्यक्षविरोधे ऽसत्यता स्यान्न त्वसावस्तीत्यविसंवाद
णेनोक्तं शब्दभावनायामपीतिकर्त्तव्यताभूतप्राशस्त्यज्ञानोपाय
कस्मिंश्चिद्विसंवादो न तु पुरुषप्रवृत्तिविधिज्ञानप्राशस्त्यज्ञानरूपे
ध्यसाधनेतिकर्त्तव्यतांशे अर्थभावनायां त्वितिकर्त्तव्यतोपाये
द्रव्यदेवतादौ न विसंवाद इति सर्वत्रेत्यनेनोक्तम् । एतदेव प्रश्न
कं विवृण्वन्नाह * अथेति * उत्तरमाह * सुतरामिति * स्वार्थ
त्यत्वेन तात्पर्यशङ्कायां स्तुतिपरत्वानिश्चयादितिभावः । एतदेवं
पादयति * काममिति * इति ब्रवीतीतिकरणो ऽर्थवादगताभिध
प्रकारनिर्देशार्थः । अनेन वपोत्खननादिना प्रकारेण गुणवन्त
ब्रवीतीत्यर्थः । नन्वर्थसत्तानपेक्षप्राशस्त्यज्ञानमात्रात् । प्रवृत्तावना
क्तेनापि प्रवृत्तिः स्यात् अत आह * ततश्चेति * नन्विष्टानिष्टप्रा
परिहारहेतुत्वाद्राजादेरनतिक्रमणीयत्वं स्यात्[1] वेदस्य तत्कथ
आह * वेदश्चेति * इष्टानिष्टसाधनबोधकत्वाद्वेदो ऽप्यनतिक्रम
य इति भावः । ततः किमिति चेदत आह * तेनेति * येन कार
न वेदः प्रमाणं तेन कारणेन तदनुरूपं व्यवहर्त्तव्यमित्यर्थः । प्रा
स्त्याप्राशस्त्यज्ञानयोरसत्योपायकत्वेनासत्यत्वादनादरमाशङ्क्योप
यासत्यत्वे ऽपि वेदकृतत्वेनानयोः सत्यत्वं दर्शयितुम् * प्रवृ
त्त्याद्युक्तम् * ये इह विधेयनिषेध्यार्थविषये प्राशस्त्याप्राशस्त्यज्ञाने
वलस्ते वेदेनोत्पादिते यस्मात्तस्मात्तदनुरूपमिति यस्माच्छब्दाध्या
रेण योऽयं ज्ञानोत्पत्तौ विप्रतिपत्तिं निराकर्त्तुम् * स्वसंवेद्यत्व
क्तम् * वेदादरणीयत्वाय प्रवृत्तिनिवृत्त्यनुग्राहकत्वाभिधानम

१ राजानतिक्रमणीयः स्यादिति २ पु० पा०

अनुग्राहकत्वोपपादनाय पुंग्रहणं न चैतदलौकिकमित्याह * लोकेऽपीति * प्रवर्त्त्याभिप्रेतसौभाग्याद्यपेक्षया वचाभक्षणादिक्रियाफलस्य मेधादेः फलान्तरत्वाभिधानम् । तदित्यव्ययं पञ्चम्यर्थो नियोगं परामृशति तस्मान्नियोगात्प्रवृत्तः क्रियाश्रयंतन्निमित्तं मेधादिफलं प्राप्नोतीत्यर्थः । ननु सौभाग्यादेरपारमार्थिकत्वं यो न जानाति स एव प्रवर्त्ततां यस्तु प्ररोच्यमानः स्वाभिप्रेतफलासत्यत्वं जानाति स कथं तदुद्देशेन प्रवर्त्ततइति तदाह * यद्यपि चेति * तदसत्यत्वे ऽपि आप्ताभिप्रेतफलानुमानेन प्रवर्त्ततइत्यर्थः तत्प्रकृते योजयति * एवमिति * ननु यदि प्ररोचनावगतफलानुसारेण न प्रवृत्तिः किमुद्दिश्य तर्हि प्रवृत्तीति तत्राह * यत्त्विति * परस्तादनुष्ठानोत्तरकालं यत्फलं भविष्यति तत्तु विधेरुपगतमिति[1] विध्याश्रयं तत्प्रमाणकमित्यर्थः उपसंहरति * तस्मादिति * प्रमाणान्तरेष्वपेक्षितार्थलाभेनोपायासत्यत्वं व्यवहारं दर्शयतीत्याह * न हीति * शुक्तिकायामदृष्टं सत्यं पारमार्थिकं रजतं येन स तथोक्तः विफलारम्भताभिसन्धानम् । अथालम्बनसद्भावात्तत्र व्यवहारसिद्धिस्तदत्रापि समानमित्याह * शुक्तिकावत्त्विति * कथं पुनरनुखिन्नायामित्यस्यैव चोद्यस्येह निरालम्बनान्वाख्यानासम्भवाभिप्रायकत्वं कथं पुनर्निरालम्बनमन्वाख्यायतइत्यनेनाशङ्क्य नित्यः कश्चिदित्यादिना भाष्येण त्रिविधालम्बनाभिधानेन निराकृतं तद्व्याचष्टे * यथेहेति * यथेत्यनेनासत्तुवृत्तान्तान्वाख्यानं स्तुत्यर्थेनेत्यादेः परिहारस्य सर्वसदन्वाख्यानाविषयत्वं सूचितम् । अत एव पूर्वफक्किकायां सर्वत्रेत्युक्तम् । वृष्ट्यादीनां वपात्वं मध्यवर्त्तिसारत्वलक्षणगुणयोगेनोपपादयति * वाय्वादीनामिति * वृष्ट्युत्पत्त्यवसानयोर्वाय्वायतत्वात्तन्मध्यवर्त्तित्वं सनेम्यश्वं शकलो जुनन्तीत्यादौ च वृष्टिहेतुत्वेन वायुस्तुतौ तत्सारत्वं वृष्टेः । अवकाशाभावे वायोरवृत्तेस्तन्मध्यवर्त्तित्वं वायुरहितस्य चापवरकाद्याकाशस्योष्मदुःखोत्पादकत्वात् तत्सारत्वं रश्मेरादित्यावयवत्वात् । तन्मध्यवृत्तित्वं रश्म्यायत्तत्वाच्च प्रकाशकत्वस्य तत्सारत्वम् । ताममप्राविल्यादिभाष्यं व्याचष्टे * ताममप्राविति * वैद्युतस्याबिन्धनत्वप्रसिद्धेस्तत्र वृष्टेर्निक्षेपकल्पना । ऋजीषशब्दस्य शरीरवाचित्वात्तदन्तर्वर्त्त्यग्निरार्जीषो ऽभिधीयते तस्मिन्वायोर्निक्षेपकल्पनायामालम्बनमन्तश्चरत्वसामान्यमादित्यो वा ऽस्तं यन्नग्निमनुप्रविशतीत्यादिदर्शनात् स्वरूपेण स्वर्गस्थस्यादित्यस्य भूमिष्ठाग्निप्रवेशायोगाद्रश्मि-

१ कपरीति २ पु० पा०

प्रवेशकल्पना । बीजादिष्वजशब्दप्रयोगे निमित्तमाह * ततो इति * व्रीह्यादेरन्नस्योष्मणा विना प्ररोहादर्शनात्तस्य च तेजोगुणात्वा-दग्नेरपो जायन्त इति च लिङ्गादग्न्युदकसंयोगजत्वावगतेस्तत्सा-मान्यात् पृथिव्युतसंयोगस्य कारणत्वाभिधानम् । जाठराग्निपा-कवशादन्नस्य व्यानाख्येन वायुविशेषेणाबीजभूतेभ्यो विण्मूत्रा-भ्यो विविक्तीकृतस्य चरमधातुरूपेण परिणामाद्वायोर्बीजकारणत्वा-भिधानं वीरुधादेर्व्रीह्यादिवदेव भौमाग्निजन्यत्वान्निदाघकाले च शोषदर्शनेनादित्यरश्मिजन्यत्वावगमाद्रश्म्यग्निसंयोगजन्यत्वं ...प्राप्तौ स्मरणात् । तदर्थतयोपयुज्येति पदं व्याचष्टे * तमालभ्येति ...आज्यादिसेवनस्य प्रजापशूत्पत्तिकारणत्वाभिधानालम्बनमाह * ...यैप्रजानामिति * एतच्च व्याख्यानत्रयं वैकल्पिकं युगपद्दर्शितं ...दूषयति * एतस्मिंस्त्विति * प्रक्रमो रीतिर्व्याख्यानप्रकार इ...यावत् । एवशब्देन स्तुतिसिद्ध्यर्थसालम्बनत्वानुरोधेन प्रधानभू...स्तुतिबाधो ऽङ्गिगुणविरोधन्यायादयुक्त इति सूचितम् । स्वमते व्याख्यातुं प्रतिजानीते * अत इति * सृष्ट्यादिविषयमेतदुपाख्या...व्याख्यानं तदनङ्गीकारादनुपपत्तिमाशङ्क्याह * मन्त्रेति * वस्तु...त्या सृष्टिप्रलयाभावे ऽपि मन्त्रादिव्याख्यालम्बनत्वेनोपायमात्रत...या तदङ्गीकरणमिति भावः । व्याख्यानमाह * तत्रेति * आत्मनः पशु...रूपनिर्माणशक्तिद्योतनार्थं योगिग्रहणं पुण्यकर्मणामेव मन्वादीनां सृष्ट्यादावुद्भवः पुराणादिष्वभ्युपगम्यते । यद्वा पुण्यस्यैव कर्मण...फलदानायोद्भवः ।

अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
चतुष्पात्सकलो धर्मः सत्यं चैव कृतेयुगे ॥

इति स्मरणात् । ततो ऽजस्तूपर उदगादित्यत्र तत इति पश्चा-दानन्तर्यप्रदर्शनार्थेति व्याचष्टे * तत इति * वपापुरोडाशाङ्ग-प्रचारात्मकत्वात्पशुयागस्य वपाप्रचारमात्रेणासमाप्तिः । आनन्त-र्याभिधानस्य स्तुत्युपयोगमाह * ईदृशमिति * वपोत्खननाभिधान-स्योपयोगमाह * एवं चेति * सालम्बनत्वाभिप्रायः सत्यशब्दः प्रसङ्गाद्वृत्तान्तान्वाख्याने ऽपीत्याद्यधस्तनभाष्यं दूषयति * प्रतिसृष्टि चेति * दिङ्मोहोदाहरणे देवशब्दालम्बनमाह * कर्मास्त्विति * के त इत्यपेक्षायामृत्विजस्तइत्युक्तम् । दिङ्मोहशब्दालम्बनाभिधा-नार्थमप्राकृतस्येति भाष्यं व्याचष्टे * देवयजनेति * देवयजन यज्ञ-भूमिः दृष्टश्च लोके व्याकुलीभावे दिग्भ्रमव्यपदेश इत्याह * तथा चेति * अदितेर्ज्ञापकत्वाभिधानस्यालम्बनप्रतिपादनार्थमवधारणेति

भाष्यं व्याचष्टे * तत्रेति * कथमादितियागेनावधारणास्यावकाशो दृश्यते अत आह * यावद्धीति * दर्शपूर्णमासाविष्ट्वा सोमेन यजेतेतिदर्शपूर्णमासानन्तरं सोमयागस्तस्य चापूर्वत्वाद्दर्शपूर्णमासयोरनभ्यस्तस्याङ्गजातस्योपस्थापनाद्व्यामोहमात्रं प्रायणीयेष्ट्यापनीयते सा हि सोमस्याङ्गं दर्शपूर्णमासयोश्च विकार इति पूर्वाभ्यस्तदर्शपूर्णमासिकेकर्तव्यतानुष्ठानेन कारिष्यमाणेषु कर्मस्ववधानं भवतीति भावः रथ्यां स्वस्तिमयजत्प्राचीमेव तया दिशं प्राजानन्नग्निना दक्षिणां सोमेन प्रतीचीं सवित्रोदीचीमदित्योर्ध्वामिति मोहापनयेन स्तुतिः।

रूपात्प्रायात् ॥ ११ ॥

अत्र भाष्यकारेण स्तेनानृतवादाद्यर्थवादस्य हिरण्यहस्तधारणापूर्वकग्रहणविधिशेषत्वमुक्त्वा निन्दाया विधिशेषत्वानुपपत्तिमाशङ्क्य निन्दावचनमित्याद्युक्तं तदुपपादयति * इहेति * ननु निन्दया निषेध एव कल्प्यतां किमित्यसावन्यस्तुतिपर्यन्तं नीयते ऽत आह * या निन्देति * निषेधैकवाक्यत्वं विना निन्दात्वानवधारणान्न दुर्बलेन निषेधकल्पनं युक्तम् । न चैवमानर्थक्यापत्तिः निन्दामात्रपर्यवसानाभावादिति भावः । कथमस्या विधिशेषतेत्याशङ्क्याह * तदुपपादनस्येति * वक्ष्यते च दशमे विधिसन्निधौ श्रुताया निन्दाया निषेधाकल्पनेन विधेयस्तुत्यर्थत्वमित्याह * यथेति * तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा जुहुयान्न ग्राम्यान्पशून् हिनस्ति नारण्यानथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च पयसा ऽग्निहोत्रं जुहुयादिति विधेः अनाहुतिरिति च निन्दया निषेधानुमानाद्विधिनिषेधाविति प्राप्ते सिद्धान्तयिष्यते । न चेदन्य प्रकल्पयेत् प्रक्लृप्तावर्थवादः स्यादानर्थक्यात्परसामर्थ्याच्चेति । शिष्ट्वा प्रतिषेधः स्यात् इति पूर्वाधिकरणसूत्रानुषङ्गेणेदं योज्यम् । न चेद् विधिं प्रकल्पयेद्यद्यत्र प्रत्यक्षो विधिः सन्निहितो न स्यात्ततः षोडशिग्रहणवाक्यवदेकेन शिष्ट्वा परेण प्रतिषेधः स्यात् इह तु पयसा ऽग्निहोत्रं जुहुयादिति विध्यन्तरस्य प्रक्लृप्तत्वात्तच्छेषभूतो ऽयमर्थवादः स्यात्, अन्यथा निषेधैकवाक्यत्वं विना निन्दात्वानवधारणेनानाहुतित्वकीर्त्तनस्य निषेधकल्पकत्वासम्भवादानर्थक्यापत्तेः । कथं चित्कल्पितस्यापि वा निषेधस्य षोडशिग्रहणनिषेधवद्विकल्पार्थत्वात्तस्य चात्र पयःप्रभृतिद्रव्यान्तरविधानादेव सिद्धेरानर्थक्यापरिहारात् यवागूस्तुतिनिन्दयोः कथं पयःस्तुत्यर्थत्वमित्याश-

१ श्रयं पा० २ पु० ना०

परसामर्थ्याच्चेत्युक्तं ग्राम्यारण्यपशुहिंसानापादकत्वेन प्रशस्ता-
पि जर्त्तिलगवीधुकानां पयःप्रयोगापेक्षया दुष्टत्वात्पयः प्रशस्तत-
ति परेषा पयोविधिनान्वये सामर्थ्यादित्यर्थः । एवं चैकवाक्यत्वे
वत्यनेकाङ्कद्यानुबन्धिवाक्यभेदापादकाविधित्वाङ्गीकरणायोगात्
गादिति लिङ्गो ऽपि स्तुत्यर्थत्वसिद्धिः ॥

दूरभूयस्त्वात् ॥ १२ ॥

धूमार्थवादस्य भाष्यकृता मिश्रलिङ्गमन्त्रविधिशेषत्वमुक्तम् ।
पादयति * तस्मादिति * उदाहृतयोर्मिश्रलिङ्गत्वं दूषयति
थं पुनरिति * परमतेन समाधत्ते * केचिदाहुरिति * तद् दू-
ते * तदयुक्तमिति * न केवलं प्रमाणाभावात् ज्योतिः
स्याग्निसूत्रशब्दपर्यायत्वाभावः किं तु बाधकसद्भावाद-
ाह * अन्यतरेति * भाष्यानादरेण स्वयं मिश्रलिङ्गम-
विधिशेषत्वमाह * तस्मादिति * अत्रैवार्थे भाष्यं योजयति
स्मिन्नपि त्विति * अनेन च प्रातरितीतिकरणः काकुत्वेनैवं
ख्यातः सत्यप्यस्मिन्प्रक्रमे यदग्नये च प्रजापतये च सायं जुहो-
यत् सूर्याय च प्रजापतये च प्रातर्जुहोतीत्यग्निसूर्ययोः केवल-
वतात्वेन विहितत्वात्केवलदेवत्यमन्त्रयोर्लिङ्गतो ऽपि प्राप्तिस-
मिश्रलिङ्गमन्त्रविधिपर्युदस्तप्रतिप्रसवमात्रार्थत्वेन केवलदेवत्य
विधानस्य स्तुत्यनाकाङ्क्षत्वान्नास्य तच्छेषतेति तत्पर्युदासेन मि-
ङ्गयोरपूर्वस्य विधानस्याकाङ्क्षितत्वात्तच्छेष इति । एवं भाष्यका-
न ब्राह्मणान्यग्निसूर्यविधिमङ्गीकृत्य केवललिङ्गमन्त्रविधेस्त-
शास्त्रतादोषपरिहाराय प्रतिप्रसवमात्रार्थत्वात् स्तुत्यनाकाङ्क्ष-
। इदानीमाधाराग्निहोत्राधिकरणे वाक्यभेदभयाद् ब्राह्मणे चा-
सूर्यविधेर्निराकरिष्यमाणत्वाल्लिङ्गतः प्राप्त्यभावात् तदर्थशास्त्र-
ावेनापूर्वविधित्वात् स्तुत्याकाङ्क्षोपपत्तेरस्यैवायं शेष आह
थ वेति * यद्यप्यनयोर्विध्योर्मध्ये पठितस्तथापि मिश्रलिङ्गवि-
ग्नये सायं जुहुयादासूर्याय वृश्चेत् यत्सूर्याय प्रातर्जुहुयादासू-
वृश्चेत देवताभ्यः सम । दन्दध्यादग्निर्ज्योतिर्ज्योतिः सूर्यः स्वा-
सायं होतव्यं सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातस्तयोरु-
यां प्रातर्न देवताभ्यः सम दन्दधातीति देवताद्रोहापादकत्वेन
लदेवत्यनिन्दापूर्वकस्य देवताद्रोहानापादकत्वलक्षणप्रशंसान्तर-
ावेन निराकाङ्क्षत्वात्केवलदेवत्यविध्योरेवायं प्रशंसेत्यर्थः ।
यं चैवमस्मिन्नर्थे योऽयं, मिश्रलिङ्गयोरित्यनादरे षष्ठी सप्तमी वेयं

तोरपि सन्निधौ मिश्रलिङ्गयोर्मन्त्रयोर्विहितयोः प्रशंसान्तरसङ्क्रा-
न तयोः स्तुत्यनाकाङ्क्षत्वादुदाहृतकेवलालिङ्गमन्त्रविधानस्यैवेय-
काङ्क्षितत्वाच्छेष इति । अस्मिन्पक्षे स्तुतिस्वरूपं दर्शयति * य-
ाद्दिवेति * व्यवस्थितशब्देनोभयोरित्यादिभाष्यं नक्तमग्नेर्दिवा च
र्यस्य सन्निधाने व्यवस्थया होम इत्येवं व्याख्यातम् । जुहोतिचोदि-
याप्युद्देशांशे भागरूपे देवतान्वयमभिप्रेत्य यष्टव्याविल्युक्तम् । पूर्वे
ाख्याने तूभयशब्दो मिश्रवचनः । दूरभूयस्त्वादित्यदर्शनाभिधा-
लम्बनप्रतिपादनार्थं भाष्यं प्रश्नपूर्वं व्याचष्टे * कथं त्विति *
स्यस्य भूयस्त्वेन यद्दर्शनं नाम दर्शनगतो ऽतिशयो द्रष्टिना ल-
तः स नञा निषिध्यते पशुशब्दलक्षितमिव प्राशस्त्यमपशुशब्देन
शवो वा अन्ये गोअश्वेभ्य इत्यनेन नञेति भावः * केन चिदि-
* दूरभूयस्त्वांशेनादर्शनं स्तुतेरालम्बनमित्यर्थः ।

स्त्र्यपराधात्कर्तुश्च पुत्रदर्शनम् ॥ १३ ॥

न चैतद्विद्म इत्यस्य प्रवरं प्रव्रियमाणे ब्रूयादित्येतद्विधिशे-
भाष्यकृतोक्तम् । तत्र विध्यंशपूरणपूर्वकं स्तुत्युपयोगित्वमुप-
याति * प्रवरइति * अज्ञानवचनालम्बनाभिधानार्थं दुर्ज्ञान-
दितिभाष्यं व्याचष्टे * ज्ञायमाने त्विति * दुर्ज्ञाने कथम-
शब्दप्रवृत्तिरित्यपेक्षायामाह * यत्सुखेनेति * पूर्ववदत्रा
ानगतसौकर्यलक्षणो गुणो विदितो विदिलक्षितो नञा निषिध्य-
र्थः । स्त्र्यपराधेनेति दुर्ज्ञानत्वोपपादनार्थत्वेन व्याचष्टे * तच्चे-
* ननु स्त्र्यपराधे ऽपि बीजाधोनिर्बलीयसीत्यनेन न्यायेन मा-
ह्मण्यमात्रेण क्षत्रिब्राह्मण्येन वा पुत्रे ब्राह्मण्यसिद्धेः कथं दुर्ज्ञा-
ाशङ्कानिराकरणार्थतया कर्तुश्च पुत्रदर्शनेनेति भाष्यं व्याचष्टे
त्यपि चेति * किं तत्कर्तुः पुत्रदर्शनमित्यपेक्षयां माता भस्त्रा
पुत्रो येन जातः स एव सः इत्याद्युदाहृतम् । जनकब्राह्मण्य-
त्ते ऽपि पुत्रब्राह्मण्ये कथं दुर्ज्ञानत्वमत आह * जनयितुश्चे-
* साक्षात्कर्तृपुत्रदर्शनं स्वयमुदाहृत्य भाष्यकारीयमुदाहरणं
त्वेन योजयति * वेदे ऽपि चेति * उपपादितं स्तुत्युपयोग-
हरति * तेनेति * दुर्ज्ञानत्वेनाब्राह्मण्यशङ्कासम्भवादब्राह्म-
पि प्रवरानुमन्त्रणाद् ब्राह्मण्यं भवतीत्येवंरूपा प्रशंसा युक्तेत्य-
ननु ब्राह्मण्यस्य मातापितृसंबन्धनिमित्तत्वात्प्रवरानुमन्त्रण-
वाभिधानं किमालम्बनमत आह * निरूढेति * निरूढं प्र-
ब्राह्मण्यं येषां प्रवराणां प्रव्रियमाणानां सङ्कीर्त्यमानानां तेषां

सङ्कीर्त्तनादित्यर्थः ।

आकालिकेप्सा ॥ १४ ॥

सूत्रं व्याचष्टे * यत्तदानीमेवेति * ईप्सापदव्याख्यानार्थं स्वेत्युक्तम् । न यच्चिरभावीत्यनेनाकालिकस्यैवाप्तुमिच्छेति साधरणत्वं दर्शितम् । अनेन चानवक्लृप्तिवचनमनभिमतत्वेनामुष्मिनिन्दितुमित्युक्तं भवति । आमुष्मिकानिन्दाया विधेः स्तुतिपर्यवसनप्रतिपादनार्थं प्रत्यक्षफलत्वेन स्तुतिरितिभाष्यं व्याचष्टे * तस्मदिति * चिरभाव्यनभिमतत्वादित्यर्थः । अतीकाशाः छिद्राणि प्राग्वंशः पत्नीशाला स्तुतिस्वरूपमाह * तद्धीति * अनवक्लृप्तिवचनालम्बनाभिधानार्थमनवक्लृप्तिवचनमिति भाष्यं व्याचष्टे * तदपेक्षया चेति * अत्रापि यदमुष्मिन् लोकइत्यामुष्मिकफलपरामर्शिना यच्छब्देन तद्गतमभिमतत्वं लक्षयित्वा तस्यानवक्लृप्तिः वचेदेत्यनेनोच्यते । भाष्ये च गौणग्रहणेन रूपात्प्रायादिति पञ्चम्युपात्तगुणवादनिमित्तत्वमनुकृष्याकालिकेप्सा गुणवादनिमित्तमित्येसूत्रं योजितम् । कामिनः काम्यमानफलाभिमतेरपि प्रत्यक्षत्वादनवक्लृप्तिवचनानुपपत्तिमाशङ्क्य तदपेक्षयेत्युक्तम् । यथा प्रत्यक्षफलं सर्वाभिमतं नैतत्तथेत्यर्थः । समानकालावाद्यन्तावस्येत्यर्थविवक्षायामन्वाख्यानादाकालिकपदात्तदानीमुत्पत्त्याख्यार्थालाभमाशङ्क्य विशिष्टे ऽर्थे त्वाख्यातमपीदं पदमेककालक्षणाया प्रत्यासत्त्योत्पत्त्याख्यैककालत्ववाचीति दर्शयितुमाह * पाठे त्विति * आद्यन्तवचनइतीतिकरणेनोपक्रमोक्ताकालिकपदार्थपरामर्शाद्दीर्घपाठे तदानीमेवोत्पाद्यमानमनेन सूत्रेणाकालिकमन्वाख्यातमित्यर्थः । पाठान्तरमिति क चिद्वार्त्तिकपाठः । तत्र भाष्योपन्यस्तस्यापि दीर्घपाठस्यानभिमतत्वसूचनार्थं पाठान्तरोक्तिः । पूर्वविवक्षितार्थलाभोपपादनाय ह्रस्वपाठव्युत्पत्तिं दर्शयितुमाह * अकालिकामिति चेति * ठस्येकादेशात्कालिकपदासिद्धिः ।

विद्याप्रशंसा ॥ १५ ॥

अनेन सूत्रेण यासौ गर्गत्रिरात्रवेदानुमन्त्रणविद्या मुखशोभावाजिजन्महेतुत्वेनोक्ता सा गर्गत्रिरात्रवेदानुमन्त्रणयोः प्रशंसेत्युच्यत इति गर्गत्रिरात्रविधेरित्यादिना भाष्येणोक्तम् । तत्र विद्यायाः केन चित्पारार्थ्यानवगमात्तद्विषयफलश्रुतेः कथं प्रशंसार्थतेत्याशङ्कानिराकरणपूर्वकं फलाभावसूत्रोक्तमनुपलब्धिविरोधं निराकरोति

अध्ययनेनेति * अध्ययनविधिना ज्ञानस्याध्ययनफलत्वं वदता
ष्प्रयोजनस्य फलत्वायोगात् कैमर्थ्यापेक्षायां सामर्थ्यात्कर्म्मानुष्ठा-
योग्यपुरुषकरणार्थत्वेन तच्छेषावगमादित्यर्थः । स्वयं मुख्यया
त्या मुखशोभावाजिमत्त्वानुवादमुपपाद्याधुना भाष्योक्तं गौणत्व-
नुसरति * अथापीति * स्तुतिपरत्वादित्यनेन सूत्रोक्तस्य प्रशंसा-
त्वस्यानुपलब्धिविरोधपरिहारार्थत्वं दर्शितम् । घृतवन्तं कुलायिनं
ायस्पोषं सहस्रिणं वेदो ददातु वाजिनमित्याह । प्रसहस्रं पशूनां
ाप्नोत्यस्य प्रजा जायां वाजी जायते य एवं वेदेत्यत्र यज्ञपतिप्रथमव-
मन्त्राभिधानस्यार्थवादालम्बनत्वसम्भवे ऽपि मन्त्राभिधाने ऽप्या-
म्बनाकाङ्क्षानिवृत्त्यर्थं कुले सन्तताध्ययनश्रवणादित्युक्तम् ।

सर्वत्वमाधिकारिकम् ॥ १६ ॥

फलवचनं स्तुतिरिति भाष्येण पूर्णाहुतिपशुबन्धयोः सर्वका-
लोकफलत्ववचनमश्वमेधविद्यायाञ्च मृत्युतरणादिफलत्ववचनं
शंसार्थत्वान्नानुपलब्धिविरुद्धमिति पूर्वसूत्रानुषङ्गेण सर्वत्वमिति
त्रावयवो व्याख्यातः । तत्सिद्ध्यर्थं पूर्वोक्तमप्यर्थवादविषयत्वं
मारयति * संस्कारेति * पूर्णाहुतिविद्ययोः संस्कारत्वात्पशुबन्ध-
य चारादुपकारककर्म्मत्वादित्यर्थः । सर्वकामफलस्येति भाष्येण स-
त्वमित्यवयवावृत्त्या सर्वकामावाप्तिवचनालम्बनाभिधानार्थत्वेनैत-
सूत्रं व्याख्यातं तद्व्याचष्टे * स्तुतिस्त्विति * उक्ते ऽर्थे सूत्रं योजय-
ते * सूत्रे चेति * असर्वेष्विति भाष्येण सर्वत्वानुपपत्तिपरिहारा-
र्थत्वेन पुनरेतत्सूत्रं व्याख्यातं तदाशङ्कापूर्वं विवृणोति * ननु
चेति * एकस्मै वा अन्ये यज्ञक्रतवः कामायाह्रियन्ते सर्वेभ्यो ज्यो-
तिष्टोम इत्यधिकृतस्य ज्योतिष्टोमस्य सर्वकामसाधनत्वात्तदङ्गभूतस्य
पशुबन्धस्य तद्द्वारा सर्वलोकसाधनत्वं स्तुत्यर्थमुपचारादुक्तमित्येवं
सूत्रं योज्यं, विद्योदाहरणे तु पूर्वसूत्रागतविद्याशब्दानुषङ्गेण विद्या-
प्याधिकारिकीति विपरिणामेनाधिकृताश्वमेधफलं मृत्युतरणादि
तदुपकारिण्यां विद्यायामश्वमेधस्तुत्यर्थमुपचारेणोक्तमिति योज्यम् ।

फलस्य कर्म्मनिष्पत्तेस्तेषां लोकवत्परिमाण-
तः फलविशेषः स्यात् ॥ १७ ॥

अन्वारुह्य वचनस्य प्रयोजनमाह * तच्चैतदिति * दक्षिणा-
परिमाणसाम्ये ऽपि फलाधिक्यमन्तरेणासारद्रव्यदानेनापि क्रतु-
सिद्धौ सारद्रव्यदाने प्रवृत्त्ययोगात्सूत्रातिरेकेण भाष्ये सारग्रहणम् ।

विशेषमुपपादयति * साधनेति * अत्राशङ्कते * इतिस्थित इति * परिहरति * तदभिधीयतेति * स्थानादपीयं व्यवस्था सिद्ध्यतीत्याह किं चेति श्लोकं व्याचष्टे * यथैवेति * कर्मगोचर इत्यादिना समुदायाभिप्रायः स्वगोचरशब्दः निर्द्धारणे च सप्तमी व्यवस्थावचनश्च विभागशब्द इति व्याख्यातः ।

ब्रह्महत्याश्वमेधाभ्यां न परं पुण्यपापयोः ।
आभूतसंप्लवान्तं च फलमिष्टं तयोर्द्विज ॥

इत्यादिस्मरणादपि व्यवस्थावसीयतइत्याह * स्मरणादपीति * यदग्निहोत्रं जुहोति अथ दशगृहमेधिन आप्नोत्येकया रात्र्या यदा दश संवत्सरानग्निहोत्रं जुहोत्यथ दर्शपूर्णमासयाजिनामाप्नोति यदा दश संवत्सरान् दर्शपूर्णमासाभ्यां यजते ऽथाग्निष्टोमयाजिनामाप्नोतीत्याद्यन्यार्थदर्शनादपि व्यवस्थासिद्धिरित्याह * चातुर्मास्यसोमेषु चेति * चातुर्मास्यवत्सोमे ऽपीत्यर्थः ।

अन्त्ययोर्यथोक्तम् ॥ १८ ॥

अभागिप्रतिषेधपरिहारे स्तेयानृतवादार्थवादन्यायातिदेशार्थत्वेन यथोक्तपदव्याख्यानार्थं पृथिव्यादीनामिति भाष्यम् । तत्र हिरण्यं निधायेत्यनेन पृथिव्याधारस्यैव हिरण्यस्य विधेः पृथिवीनिन्दानुपपत्तिमाशङ्क्य व्याचष्टे * यथैवेति * एवमपि शुद्धपृथिवीनिन्दामात्रेण हिरण्यस्तुतिसिद्धेरितरनिन्दानर्थक्यादादिशब्दानुपपत्तिमाशङ्क्याह * नान्तरिक्षइति * एतदेव विवृणोति * यथेति * अनित्यसंयोगपरिहारार्थत्वेन यथोक्तपदव्याख्यानार्थं यश्चेति भाष्यं व्याचष्टे * अनित्यसंयोग इति * प्रकर्षेण वहतीति कर्त्तरि प्रावाहणिशब्दव्युत्पत्तिसम्भवात् बबरशब्दस्य च शब्दानुकृतित्वेन नित्यवायुपरत्वोपपत्तेर्नाप्रसिद्धप्रवाहणाख्यपुरुषकल्पनेन तदपत्यपरता नित्यानित्यसंयोगविरोधापादिका कल्पनीयेति भावः । ननु विध्युद्देशप्रामाण्यमात्रेणांशत्रयोपेतभावनानुष्ठानसिद्धेरनर्थवादप्रामाण्यचिन्ता निष्प्रयोजनेत्याशङ्क्याह * प्रयोजनमिति * एतच्चोपलक्षणार्थम् । अक्ताः शर्करा इत्यत्र सन्दिग्धनिर्णयस्याश्वप्रतिग्रहेष्ट्या व्यवधारणकल्पनस्य वमनेष्ट्यां च वैदिकसोमवमननिमित्तकत्वस्याद्याभृति गृह्णातीत्यत्र चतुष्टयकल्पनस्य जोतिष्टोमशब्दस्य सोमयागपरत्वस्य धाय्यानां च समिध्यमानवती समिद्धवत्यन्तरालनिवेशस्य सोमं विद्या प्रजानां चावश्यकत्वस्य द्वयोः प्रणयन्तीत्यस्य च

१ आह्नेनि पु० २ मा०

व्यमपर्वेद्वयविषयत्वस्यार्थवादप्रामाण्याधीनत्वात् ।

विधिर्वा स्यादपर्वत्वाद्वादमात्रं ह्यनर्थकम् ॥ १९ ॥

विषयविवेकार्थमिहेतिभाष्यं व्याख्यातुमाह * एवमिति * ानर्थक्यमुपाख्यानम्। आदिशब्दोपात्तं चादृष्टार्थत्वं प्रतियोगिविरोधि र्णां तेष्वित्यर्थः । एतच्च पूर्वेणाध्यायषट्केण प्रत्यक्षविदितधर्मकेषु ापूर्णमासादिषु व्याख्यातेषु इदानीमविहितेतिकर्त्तव्यताकेष्वैन्द्रा-ादिषु चिन्तयितुमिष्यतइति सप्तमाद्यभाष्यवत्सर्वेष्वर्थवादेष्वान-क्यादिप्रतियोगित्वेन व्याख्यातेषु यथासम्भवं केषु चिद्विधिप्रति-ागितेदानीं विचार्यतइति विशेषकपरं[1] व्याख्येयम् । पूर्णाहुत्या-र्थवादानां विद्विवन्निगदार्थवादानामपि व्याख्यातत्वात्किमस्येति न्देहभाष्यं पूर्वपक्षासम्भवेनाक्षिपति * कुत इति * सन्देहसमर्थ तुद्धा पूर्वपक्षं सम्भावयति * पूर्वत्र हीति * श्रौतत्वमनेन विधि-ाङ्गीकरणे कारणमुक्तम् । अनन्यलभ्यत्वाच्च विधिरित्याह विध्यंशश्चेति । इत्युक्तामिति * विध्युद्देशस्यैव द्वे शक्ती कल्पयि-ाम इत्यत्रेत्यर्थः।प्रधानत्वादपि विधिरित्याह *अपि चेति* विशे-गशब्देनाङ्गमुक्तम् । प्रधाने विशेषणे च यत्सम्भवति तस्येत्यर्थः । ाथम्यादपीत्याह * समाप्ते चेति * फलरूपश्चात्र भावनांशो विधे-ा ऽभिप्रेतः तस्य च सर्वादौ निवेशः प्रथमाकाङ्क्षणादितरयोस्तु ता-र्थ्येन तस्यैव प्राधान्यादित्याह * विशेषेण त्विति * आसामुपप-ानां सूत्रकाराभिमतत्वं दर्शयितुमाह *इत्यादीति* श्रौतस्यार्थान्त-पूर्वत्वाभावादनन्यलभ्यस्य चानन्यकारणकत्वात्प्रधानस्य विधेया-ारापेक्षाभावादपूर्वशब्दे न लक्षणा, प्राथम्यं तु न विद्यते ऽस्मात्पूर्वमि-ा बहुव्रीहिणा बोध्यते । आदिशब्देन त्वर्थान्तरपूर्वत्वाभाव एवो-यते । ननु स्तुतेरपि पूर्वाधिकरणे अर्थवत्त्वोपपादनादानर्थक्या-भिधानमयुक्तमत आह * तदपेक्षयेति * पौनरुक्त्यमाशङ्कते * ननु ाति * एकस्यार्थस्याद्विरुक्त्यानर्थक्ये ऽप्यस्य प्राथम्यादपुनरुक्तते-ाकेषां समाधानमाह * तत्रेति * अस्याधिकरणस्य पौनरुक्त्या-ावे ऽप्यानर्थक्यापरिहारे ऽप्याकुलीभावेन श्रोतॄणामर्थानवधारणा-त्तेर्विलम्बो ऽनुचित इत्येतत्समाधानं दूषयति * सत्यमेवमिति * ोतृचित्तसमाधानायापौनरुक्त्ये परिहार्ये प्राप्ते चतुरः प्रकारानुपन्यस्य ापयति *तत्र* इत्यादिना पूर्वाधिकरणेनैवेत्यनेन फलविधिसरूपा-ाामपि पूर्वाधिकरणविषयत्वं दर्शितम् *तथा च* इत्यनेनैतदेवं पूर्वा-

---

१ विशेषणपरमिति २ पु० पा०

धिकरणोदाहृतफलविधिसरूपार्थवादनिदर्शनेन स्फारितं पूर्वोक्तस्याप्यर्थवादत्वस्य विसम्वादेनेहासम्भवादानर्थक्यपरिहाराय पर्णमय्यधिकरणनिराकृतस्य फलविधित्वस्य प्रतिप्रसवशङ्कां निराकर्त्तुमेतदधिकरणमिति प्रकारान्तरमुपन्यस्य निराचष्टे * के चिदिति * शरीरस्येन्द्रियाधिष्ठानत्वेन प्राधान्यादुपचारात्प्राधान्येनाधिकरणप्रतिपाद्यं शरीरशब्देनोक्तम् । तत्र पर्णमय्यधिकरणशरीरादभिन्नमित्यर्थः। अभ्युच्चयहेतुत्वे कारणं *विसम्वादोऽपि च* इत्यनेनोक्तम् । सर्वविधिसरूपविषयत्वादस्य फलविधिसरूपमात्रविषयेण पर्णमय्यधिकरणेनापौनरुक्त्यम् । इति प्रकारान्तरमाशङ्कते * तस्मादिति * निरस्यतीहापीति । फलविधिसरूपांशेनास्यापि तेन गतार्थत्वमपरिहार्यमिति तावच्छब्देन सूचितम्। एतद्दोषपरिहारार्थं फलविधिसरूपव्यतिरिक्तानामेवात्रोदाहरणत्वमिति प्रकारान्तरमाशङ्कते * इति व्यवस्थयेति * हेताविति करणत्वं निरस्यति * अत्र वदाम इति * ननूदाहरणभेदस्याधिकरणभेदाक्षेपकत्वादारभ्यमेवाधिकरणद्वयमित्यत आह * न हीति * किं तर्ह्यधिकरणभेदाक्षेपकमत आह * न्यायेति * न चास्य फलविधिसरूपव्यतिरिक्तसर्वविधिसरूपाविषयतास्तीत्याह * द्रव्यादिविधयोऽपीति * कुत्र विचारिता इत्यपेक्षायामाह * के चिदिति * एवं पौनरुक्त्येनाधिकरणारम्भे दूषिते पौनरुक्त्यं परिहर्त्तुमशक्नुवतां मतेनारम्भं तावत्समाधत्ते * अतश्चेति * यथैव चतुर्थे सह शाखया प्रस्तरं प्रहरतीति शाखाप्रहरणस्य प्रतिपत्त्यर्थकर्मत्वसन्देहे तृतीयया अर्थकर्मत्वे प्राप्ते सहयोगनिमित्तत्वात्तृतीयायां द्वितीयावगतप्राधान्यप्रस्तरसाहचर्याच्छाखाया अपि प्राधान्यावगतेः प्रतिपत्तित्वे सिद्धान्तिते द्वितीयायाः प्राधान्यव्यभिचारशङ्कापरिहारार्थयोरर्थेऽपीति चेन्न । तस्यानधिकारात् । फलस्याधिकृतत्वादिति सूत्रयोः सक्त्वधिकरणगताभ्यां सूत्राभ्यां द्रव्योपदेश इति चेन्न । तदर्थत्वाल्लोकवत्तस्य च शेषभूतत्वादिति सूत्राभ्यां पौनरुक्त्यमाशङ्क्य नातीव पुनरुक्तता महान् दोषो बहुकृत्वोऽपि पथ्यं वदितव्यमिति परिहारं भाष्यकारो वक्ष्यति तथैवात्रापि वक्तव्यमित्यर्थः। स्वयमिदानीं चतुरः पौनरुक्त्यपरिहारप्रकारानाह *अथ वेति* एकस्यैव साध्यसाधनसम्बन्धाभावप्रतिपादनन्यायस्यात्र साधनांशस्तत्र साध्यांशः साध्यत इत्यर्थः । द्वितीयं प्रकारमाह * स्पष्टं चेति * सर्वविधिसरूपाणामिति फलविधिसरूपाणां पर्णौदुम्बराद्यर्थवादानां यजमानः प्रस्तर इत्यादीनां च द्रव्यविधिसरूपाणां विदग्धादीनां च गुणविधिसरूपाणां माषपाकादिविषयाणां च क्रिया-

धिसरूपाणाम् । आग्नेयो वै ब्राह्मण इत्यादीनां देवताविधिरूपाणां
लार्थवादनिरपेक्षविधिनिराकरणेनेत्यर्थः । फलादिसम्बन्धोत्तर-
लमर्थवादान्वयात्पर्णौदुम्बरतादावार्थवादिकफलकल्पनमशक्यं
पक्षयितुमित्याशङ्क्यार्थवादकल्पिते विधावित्युक्तं क्लृप्सामर्थ्य
धातोर्घञन्तात्कृपो रो ल इति लादेशे कृते तत्करोति तदाचष्ट-
समर्थं करोतीत्यस्मिन्नर्थे णिचमुत्पाद्य निष्ठायां कल्पित इति
तेनार्थवादेनाङ्गभूतेन विधौ प्रवृत्त्युत्पादनसमर्थे कृते विधिसा-
र्थेनार्थवादान्वयात्प्रागेवाक्षिप्तस्य फलस्यानिर्द्धारितविशेषस्य विशे-
काङ्क्षावेलायामित्यर्थः । यथाध्ययनभावनायां फलाश्रवणे ऽपि
धिसामर्थ्यात्किं चित्समीहितं फलं भावयेदित्यनिर्द्धारितविशेष-
ान्वये ऽवधारिते वेदाध्ययनरूपकरणान्वयोत्तरकालं योग्यतया-
ानरूपफलविशेषनिर्द्धारणमविरुद्धं तथात्रापीति भावः * अन्या-
त * विहितपर्णौदुम्बरतास्तुत्यर्थमित्यर्थः । फलविधित्वमपीत्य-
ाब्देनौदुम्बराधिकरणसिद्धार्थवादत्वाङ्गीकरणेन तदाक्षिप्तफल-
धिप्रतिपादनाद्विध्यर्थवादसमुच्चयेन पर्णमय्यधिकरणपूर्वपक्षइ-
क्तम् * अर्थवादत्वमेवेति * केवलार्थवादत्वेन सिद्धान्तो दर्शि-
। निवीताद्यर्थवादानामपि सिद्धवत्कीर्त्तनान्यथानुपपत्त्या विध्या-
कत्वात्समुच्चयेन पूर्वपक्षं कृत्वा विक्षेपे प्रकरणादुत्कर्षापत्तेः ।
र च केवलार्थवादत्वेन प्रकरणानिवेशसम्भवोपपत्तेः । केवलार्थ-
दत्वेन सिद्धान्तो निवीताद्यधिकरणेषु करिष्यतइत्याह * एतेने-
* कृत्वा चिन्तात्वेन वा तेषां पुनरारम्भ इत्याह * अथ वेति *
कृतिपुराकल्पाधिकरणमपि कृत्वा चिन्तेत्याह * तथेति * इति
माहबटुकुर्वार्ष्णिमाषान्मे पचत न ह वा एतेषाऽ हविर्गृह्णन्तीत्येक-
र्तृकमुपाख्यानं परकृत्याख्यम् । उल्मुकैर्हस्मपूर्वे समाजग्मुस्तानसु-
रक्षाऽसि निर्जघ्नुरितिचानेककर्तृकमुपाख्यानं पुराकल्पाख्यमु-
दृत्य किमिमौ माषपाकोल्मुकसंयोगविधी उतारण्याशनगृहपत्य-
ानिर्वापस्तुत्यर्थौ निन्दार्थवादाविति सन्दिग्धार्थवत्त्वाद्विधीति पूर्व-
मङ्गीकृत्य परकृत्युदाहरणे किं सर्वेषामेव दर्शपूर्णमासयाजिना-
पवसथ्याहे माषभोजनं विधीयते वृष्णिगोत्राणामेव वेति चिन्त-
ष्यते । तत्र वार्ष्णिशब्देन वृष्णिगोत्रविशेषसम्बन्धितया भोजनार्थं
षपाककीर्त्तनात्तदन्यथानुपपत्त्या विधिः कल्प्यमानो न सर्वविष-
कल्पयितुं शक्यतइति पञ्चावत्तवद्व्यवस्थेति प्राप्ते विशिष्टपुरुषा-
रेतत्वेन माषस्तुत्यर्थतया वार्ष्णिसम्बन्धकीर्त्तनोपपत्तेर्विशेषवि-
त्सायां वार्ष्णिबट्व्यतिरिक्तानां वृष्णिगोत्राणामपि विधानापत्तेः

दर्शपूर्णमासयाजिनामारण्यभोजनादिना सह वैकल्पिकं
विधीयतइति पक्षान्तरमुक्त्वा तस्मादारण्यमेवाश्नीया-
तरैकवाक्यत्वेनारण्यान्नस्य प्रशस्ततरत्वद्योतनार्थं जर्त्ति-
वन्निन्द्यानामपि माषाणां स्तुतिरिति सिद्धान्तयिष्यते।
हरणे ऽपि गृहपतेरेवाग्निषु निर्मन्थ्य निर्वपेरन्निति वि-
श्चयत्वेन निर्म्मन्थिताग्निसंसर्गस्तुत्यर्थमुल्मुकसंसर्गे नि-
निन्दाकल्पनिषेधबलेन प्रापकाविधिकल्पनं पूर्वमहर्ष्यो-
वा पृथग्विधिकल्पनं युक्तमिति सिद्धान्तः करिष्यते ।
ा श्रेष्ठस्तत्तदेवेतरो जन इति न्यायात् । पूर्वाचरितोपन्या-
कल्पनमित्येवंविधपूर्वपक्षसाम्यमात्रेणानयोरुदाहरणयोः
तु पुराकल्पोदाहरणे कृत्वा चिन्ता का चिदस्ति तस्मा-
ाकल्पयोर्मध्ये एकस्मिन्परकृत्युदाहरणे कृत्वा चिन्तेति
ाप्तमी व्याख्येया । अर्थैकत्वजर्तिलाधिकरणयोः कथं निवे-
हु * एवमिति * सापि कृत्वा चिन्तेत्यर्थः । चिन्तान्तरस्य
; कृत्वा चिन्तानुपपत्तिमाशङ्क्याहबाधप्रसङ्गेनेत्युक्तम् । य-
चेन्तान्तरं न कृतं तथापि सा मोहोपोद्घातप्रसक्तानुप्र-
चा स्तुवतइति विधिरर्थवादो वेति चिन्तायाः करिष्यमा-
योगितया विधिपक्षे किमतिदेशप्राप्तस्तुतिसाधनसामा-
धेनैकर्गाधारत्वं विधीयते उताप्रगीतर्गेकत्वम् । तत्र पूर्व-
युत्पन्नस्य साम्न उत्तरयोरगानादूहाप्राप्तेरितरस्मिन् पक्षे
ाश्रितत्वाबाधादूहोपपत्तेरिति चिन्तान्तरं कल्प्यं जर्त्तिल-
र बाधप्रसङ्गेन करिष्यमाणत्वादथो खल्वाहुरनाहुतिर्वै
गवीधुकाश्चेति अस्य निषेधार्थत्वे ऽपि किं जर्त्तिलगवीधुका-
ात्वद्योतनार्थो ऽयं निषेधो विकल्पार्थो वेति चिन्तान्तरम् ।
ञपक्षे बाधानापादकत्वाद्विकल्पपक्षो तदापादकत्वात्क-
भावः । कृत्वा चिन्तात्वाभावे ऽपि चौदुम्बराधिकरणस्यु-
यर्थवादत्वमुदाहरणविशेषेष्वाक्षिप्य समाधानाय सा चि-
ःथो व्याख्येयः । अस्मिन् व्याख्याने षाष्ठस्यापि पुराकल्पो-
ाषयस्य विचारस्यानेनैव न्यायेन कृत्वा चिन्तात्वाभावे ऽपि
परिहृतं भवति । एवं शब्दश्च यथाधिकारप्रसङ्गेन षष्ठ-
ना एवमेषापीत्येवज्ञेया ।। तत्सिद्धिसूत्रस्याप्यपौनरुक्त्यमाह ।
सूत्रे त्विति मीमांसाप्रक्रियामात्रेण विध्यर्थवादाचिन्तेति भा-
वेधिसरूपाणामौन्दुबराधिकरणेनैवार्थवादत्वसिद्धो पुराक-
हरणेषु कृत्वाचिन्तानुपन्यासादाक्षेपहेतुत्वाभावाच्च पौनरु-

स्या परिहारेण परिहारितोषात्प्रकारान्तरमाह *अथ वेति * पृथक्
फलपदसद्भावे ऽपि फलविधौ निराकृते तदभावे फलविध्याशङ्काय
दूरनिरस्तत्वेनात्रापि अपरितोषाच्चतुर्थं प्रकारमाह * अथ वेति *
परार्थनिर्ज्ञाने कारणमाह * अत्र हीति * स्वातन्त्र्येणेति जुहूसबन्ध
नैरपेक्ष्येणेत्यर्थः। एतदेवोपपादयितुं सामान्यन्यायान्तावदाह * स
र्वत्र हीति * प्रकृते योजयति * तदिहेति * किं सम्बध्यतामित्यनार
भ्याधीतत्वेन पर्णमयीत्वस्य प्रकृताश्रयालाभादिति भावः। वाक्येना
श्रयदानमाशङ्क्य निरस्यति * जुह्वारिति * अभ्युपगम्यापि जुहूसंब
न्धं नैराकाङ्क्ष्यन्नास्तीत्याह * सापि चेति * अतः फले पर्णमयी
त्वविध्ययोगाज्जुह्वर्थत्वेन सिद्धो विधिरित्युपसंहरति * तस्मादि
ति * पर्णमयीत्वेन जुहूं भावयेदिति वचनव्यक्तिरितरशब्देनोक्ता
जुह्वनुवादेन पर्णमयीत्वस्य विधौ सिद्धे यथापारार्थ्यनिर्ज्ञातं भवि
तथा दर्शयति। तत्र चेति। एवं निर्ज्ञातपारार्थ्यस्यापि पर्णमयी
त्वस्यापापश्लोकश्रवणात्मकफलश्रुतेः फलार्थतापि दध्यादिवदस्त्वि
पर्णमय्यधिकरणे पूर्वपक्षं कृत्वा सकृच्छ्रुताया पर्णत्वजातेर्जुह्वङ्गत्वे
निराकाङ्क्षी कृताया द्व्यर्थत्वायोगात्फलश्रुतिरर्थवादमात्रमिति सि
द्धान्तः करिष्यतइत्याह * ततश्चेति * औदुम्बरत्वस्य तु सोम
पौष्णं त्रैतमालभेत पशुकाम इति विकृतपशुप्रकरणे श्रुतस्यातिदेश
प्राप्तनिर्ज्ञातजातिविशेषयूपार्थत्वेन विध्ययोगात्पारार्थ्यानवगतेः पर्ण
मय्यधिकरणविषयत्वन्नास्तीत्याह * इह पुनरिति * एतदेव
अपूर्वकमुपपादयति * कथमिति * नन्वाश्रयालाभात्कथमस्य फ
लविधिराशङ्क्यते ऽत आह * यापि चेति * प्रकृतावग्नीषोमी
पशुनियोजनाख्यकर्मसंबन्धितया विहितस्य यूपस्यात्र चोदकप्राप्त
स्यौदुम्बरजात्याश्रयत्वेन ग्रहणादित्यर्थः। कर्मसंबन्धाभिधानत्वम
श्रययोग्यताप्रदर्शनार्थमतः सिद्धं पर्णमय्यधिकरणेनापौनरुक्त्यमौ
म्बराधिकरणस्येत्याह * तेनेति * कः पुनरेतेषां चतुर्णां पौनरुक्त
परिहारप्रकाराणां मध्ये अभिमत इत्यपेक्षिते प्रथमोपन्यस्तस्यैकस्
न्यायस्य क्व चित्काश्चिदंशः शोध्यतइत्यस्यैवाभिमतत्वमाह * इदा
ति * न विद्यते परमुत्कृष्टमस्मादित्यर्थः। उदुम्बरत्वजातेरपि
कृताश्रयत्वालाभाच्चोदकप्राप्तस्य निर्ज्ञातसाधनत्वेन नैराकाङ्क्ष्याल
र्थविहितसाधनान्तराग्राहकत्वाद् गुणफलसंबन्धायोगेनौदुम्बरत्वं
यूपं भावयेदितिवचनव्यक्त्याश्रयणात्पारार्थ्यावगतेः पर्णमयीन्या
विषयत्वाच्चतुर्थो ऽपि प्रकारो न युक्त इति भावः। किं तदित्य
क्षिते विवेचयितुमारभते * औदुम्बरवाक्यमिति * उदाहरणा

कथमपौनरुक्त्यमित्यपेक्षिते प्रश्नपूर्वकं परिहरति * कथमिति *
नु साध्यसाधनांशयोरन्योन्याविनाभावादेकसिद्ध्यैवेतरासिद्धेरंशद्व-
विचारो ऽनर्थको ऽत आह * साध्येति * अस्यार्थस्य सार्वत्रिक-
त्वसूचनार्थस्तावच्छब्दः सर्वत्रैव तावदेवमित्यर्थः कः पुनरंशः क्व
वेचार्यतइत्यपेक्षायामाह * तत्रेति * ननु यदि द्वयोर्योग्यपदोपादानं
वेना साध्यसाधनसंबन्धो न युज्यते तर्ह्येकनिराकरणेनैवेतरानिरा-
करणासिद्धेरंशद्वयनिराकरणमनर्थकमत आह * यत्रेति * अनि-
राकृतो ऽशो ऽप्रतिषिद्धमनुमतं भवतीत्यनेन न्यायेनाङ्गीकृतः स्यादिति
भवतिशब्देनोक्तं, तेनायमर्थः यत्साध्यं साधनं वा यदात्मना साध्य-
त्वेन साधनत्वेन वा निराकरणाभावात्प्रतिपादितं भवति तत्पदान्त-
रणादिशब्दोपात्तेन सामर्थ्येन वोपात्तेन प्रतियोगिविशेषेण साधनेन
साध्येन वा संबध्यतइति । एतदेव विभज्य कथयति * तत्रेति *
औदुम्बराधिकरणे हि ऊर्गवरोधापापश्लोकश्रवणाद्यनिराकृतत्वा-
साध्यमित्यवधृते तत्सन्निधौ श्रुतमौदुम्बरपर्णतादिश्रुतशब्दाङ्गयो-
यत्वे ऽपि अर्थापत्त्या योग्यशब्दान्तरकल्पनया साधनं गम्यते एवं
पर्णमय्यधिकरणे निराकरणाभावादुदुम्बरपर्णतादिसाधनावधारणे
पि तत्साध्यं गम्यत इति शेषः । एतदेवोपसंहरति * इति द्वाव-
िति * साधनस्य विधिविषयत्वं स्वरूपं साध्यस्य च कर्मिपदोपा-
त्तत्वमिति द्वयोरपि साध्यसाधनांशयोः स्वरूपन्निरूपयितव्यमित्य-
ः । नन्वस्याधिकरणस्य साधनांशमात्रनिराकरणार्थत्वे विधौ वा-
क्यभेदः स्यादिति साध्यांशनिराकरणं पर्णमय्यधिकरणस्य च सा-
ध्यांशमात्रनिराकरणार्थत्वे सत्युत्पत्तेश्चातत्प्रधानत्वादिति साधनां-
शनिराकरणमयुक्तं स्यादत आह * तदिहेति * भिन्नांशविषयत्वेन
ौनरुक्त्ये परिहृते प्रकरणसङ्गतिमाक्षिपति * नन्विति * हेत्वधि-
करणे ऽर्थवादविचारादसमाप्तमर्थवादाधिकरणं, न चास्य विचारस्य
विध्यभावे श्रेयः साधनत्वबोधः सम्भवति उत नेत्येवं रूपत्वात्तेन
सङ्गतिर्युक्तेत्यर्थः । अर्थवादाधिकरणेनेत्यधिकरणशब्देनाधिकारः
प्रस्तावः प्रकरणमुक्तं विधिशेषत्वेनार्थवादानां धर्मप्रमोपयोगे प्रति-
पादिते विध्यभावे ऽपि श्रेयः साधनत्वबोधसम्भवाद्विधेरेव धर्मोप-
योगित्वाभावात्कथं तद्द्वारेणार्थवादायामुपयोगितेत्यर्थवादाधिकर-
णसिद्धान्ताक्षेपेणैतदधिकरणपूर्वपक्षोत्थानाद्विध्युद्देशचिन्तात्वे ऽपि
तत्सङ्गत्युपपत्तिः । यद्वार्थवादानां धर्मप्रयोगे प्रतिपादिते को ऽर्थ-
वादः को वा नेति कोष्ठशोधानिकार्थत्वेनाधिकरणद्वयस्यार्थवादाधि-

१ अर्थवादाधिकरणेन सङ्गतिर्नयुक्तेत्यन्वयः ।

करणशेषत्वाभ्युपगमाद्विध्युद्देशाचिन्तात्वे ऽपि तदसम्भवाशङ्केयम्। अधिकरणद्वयेन सर्वार्थवादाव्याप्तेः कथं कोष्ठशोधनिकेति चेदुच्यते आद्ये विध्येकवाक्यत्वेन स्तुत्यर्थत्वे ऽभिहिते सिद्धैकान्तिकाविध्येकवाक्यत्वानामपि येषां साध्यसाधनांशाभिधानाद्विध्युद्देशान्तर्गतिराभाति तेषां तन्निराकरणेन स्तुत्यर्थतेह स्थाप्यते, हेत्वधिकरणे ऽपि अन्वयवाक्यकल्पनेन दर्व्यादिसाधनांशाभिधानाद्विध्युद्देशान्तर्गत्याशङ्कैव निराक्रियते पृथग्विधित्वाशङ्कानिराकरणमधिकरणान्तरेषु भविष्यति तस्मादधिकरणान्तरानिराकृतपृथग्विधित्वाशङ्कानां सम्भवद्विध्येकवाक्यत्वानामसम्भवद्विध्युद्देशान्तर्गतानां सर्वेषामर्थवादत्वमिहैव स्थापितं भवति प्रकृतार्थवादत्वासिद्ध्यर्थत्वाद्विध्युद्देशाचिन्ताप्यत्र नासङ्गतेति परिहरति * नैष इति * विध्युद्देशाचिन्तावशेन प्रकृतार्थवादत्वरूपार्थपरिच्छेदादित्यर्थः। एतदेव विवृणोति * यदि हीति * साधनांशो विचार्यमाणइत्यत्र प्रकृतः साधनांशोऽसाविति सर्वनाम्ना परामृश्यते एतदधिकरणपूर्वपक्षे च विध्युपयोगानभ्युपगमात् अज्ञातज्ञापनाभिप्रायं विधीयमानतयेति व्याख्येयं तेन यद्यसौ साधनांशोऽज्ञातज्ञाप्यतयाऽपूर्वेण साधनांशप्रतिपादकेनौदुम्बरो यूपो भवतीत्यनेन वाक्यभागेनावगतस्ततोऽपेक्षावशेनोर्जोऽवरुध्याइत्यस्य फलसमर्पकत्वान्नार्थवादत्वमित्यर्थः। पूर्वपक्षमाह * तत्रेति * नन्वूर्जोऽवरुध्याइति तादर्थ्यचतुर्थ्या साध्यावगमे ऽप्यपापश्लोकश्रवणादेः साध्यत्वावगमाभावादूर्जोऽवरुध्याइत्यस्यापि च तैत्तिरीयादिशाखास्वश्रवणात्कथं साध्यसन्निधानइत्युक्तम्। उच्यते औदुम्बरत्वादेः प्राप्तचभावाद्विध्येकवाक्यत्वं च विनार्थवादत्वायोगादर्थवादाच्च विधिकल्पने ऽन्योन्याश्रयत्वापत्तेरवश्याविधेयत्वाद्विधेश्च भावनैकगोचरत्वाद्यूपादेश्चौदुम्बरत्वादिभवनस्य पुंव्यापाराधीनत्वात्पुंव्यापाराधीनकर्त्तव्यत्वप्रतिपादकपदकल्पनेन भवतिशब्दस्यैव वान्तर्नीतप्रयोजकव्यापारवचनस्य पञ्चमलकारकल्पनेन भावनाविधिप्रतीतेः। भावनायाश्च भाव्यनिष्ठत्वाद्योग्यत्वेनोर्गवरोधापापश्लोकश्रवणादेः साध्यत्वावगतेः साध्यसन्निधानाभिधानं विध्यभावाभिधानं[3] चौदुम्बरत्वाद्युत्पत्तिविधानार्थं कल्पितस्य प्रत्ययस्यान्यत्र व्यापारासम्भवेन साधनत्वबोधकारणत्वाभावाभिप्रायं, ननु तृतीयां विना ऽपि योगस्य विधिसामर्थ्यात्साधनत्वं युक्तम्। इह तु

१ एकान्तविध्येकेति २ पु० पा०

२ उत्पत्तिविध्युपयोगानभ्युपगमादित्यर्थः।

३ तादूप्येणानुपात्तमित्यर्थाद्विध्यभावाभिधानम्।

दश्रवणात् उत्पत्तिसिद्ध्यर्थश्च कल्पितस्य विधेरन्यत्राव्यापारात्कथं
ाधनत्वावगतिरत आह * तत्रेति * समभिव्याहारमात्रेण सा-
ासाधनसंबन्धावगतिसम्भवान्न विधिना कश्चिदुपयोग इति भावः
मभिव्याहारमात्रात्साधनत्वावगमे ऽपि पुरुषप्रवृत्तिसिद्ध्यर्थं वि-
पेक्षा भविष्यतीत्याशङ्कते * पुरुषमिति * साधनत्वावगतौ स-
मिच्छयैव प्रवृत्तिसिद्धेस्तदर्थमपि न विध्यपेक्षेति परिहरति * स
ते * यद्वा यूपानुवादेन विधीयमानस्यौदुम्बरत्वस्य यूपद्वारेण
वर्थत्वावगमात्तत्प्रयोगवचनेनैवानुष्ठानसिद्धेर्न तदर्थमिह विध्य-
ात्याह * अथ वेति * क्रत्वर्थस्यापि समभिव्याहारावगतं फला-
त्रमपि दध्यादिवदविरुद्धमिति भावः । उत्पत्तिविधिरेव वागत्या
ष्ठापको भविष्यतीत्याह * पञ्चमी वेति * अर्थवादाद्वा प्रवृत्ति-
द्धेर्न तदर्थं विध्यपेक्षेत्याह * अर्थवादेति * ऊर्जो ऽवरुद्ध्याइ-
प्र पूर्वपक्षे विध्युद्देशान्तर्गत्यभ्युपगमात्सिद्धान्ताभिप्रायेणैकदेश-
णं विधिनिरपेक्षस्यार्थवादस्य प्रवर्त्तकत्वानुपपत्तिमाशङ्क्य प्रत्य-
ातिवादिमतेनैतदुक्तमिति दर्शयितुमुक्तमेवेत्युक्तं सूत्रं व्याख्याय
त्रेवन्निगदेष्वित्यादिभाष्यं तात्पर्यतो व्याचष्टे * तस्मादिति *
ाद्विध्यभावे ऽपि समभिव्याहारमात्रेण साध्यसाधनसंबन्धबो-
त्सम्भवति तस्मात्तस्मिन् फले औदुम्बरतायाः साधनतया विधि-
त्ज्ञापनमित्यर्थः । प्रायेणैवङ्कामशब्देन फलसमर्पणादपि चेत्यादि-
ोक्तं चतुर्थ्या फलसमर्पणमयुक्तमाशङ्क्योर्जो ऽवरुध्याइत्याद्युक्तं
वधिरित्यत्र विधिशब्दस्य शौण्डादिष्वपाठात्सप्तमीसमासानु-
: षष्ठीसमास एवायं स्यादित्याशङ्क्याह * नन्विति * विवक्षि-
ठाभावान्यथापि कल्पनं युक्तमिति भावः । भावार्थाधिकरणे फ-
यानिषेधात् भावस्य भावनाख्यस्यार्थः प्रयोजनं फलं विधेयं न
त्र चिन्त्यते लिप्सासूत्रस्याद्यवर्णकतद्भावार्थाधिकरणमिहो-
। नन्वस्य फलपरत्वे स्तुत्यभावाद्विधिरवसीदेदत आह * ऊ-
ार इति * पूर्वाधिकरणे लाक्षणिकस्तुत्युपयोगाभिधानादि-
क्याभिधानमयुक्तमाशङ्क्याह * तस्मादिति * साध्यसाध-
प्रतिपादनस्य प्रवृत्तिविशेषकरत्वेनार्थवत्तरत्वात्तदपेक्षया स्तु-
ाक्यमिति भावः । यस्मादुक्तप्रकारेणौदुम्बरतायाः फले वि-
म्भवति तस्मादित्यर्थः । अनेन च वादमात्रं ह्यनर्थकमित्यस्य
ादस्य निष्प्रयोजनत्वाभिधानप्रतिपादनपरत्वप्रतिपादनार्थमि-
ा भाष्यं मुख्यार्थरहितत्वप्रतिपादनार्थं च न चेति भाष्यं त-
याख्यातम् ।

लोकवदिति चेत् ॥ २० ॥

लौकिकस्यापि स्तुतिमात्रस्यानर्थक्यात्साध्यविकलत्वमाशङ्क्याह * लोके तावदिति * क्रेतव्येति भाष्यं व्याचष्टे * तत्र चेति * अस्यापि फलपरत्वाद्दृष्टान्तत्वमाशङ्क्याह * न चेति * तद्वदिति भाष्यं व्याचष्टे *एवमिति* लक्षणादोषं परिहरति *श्रुतीति*

न पर्वत्वात् ॥ २१ ॥

* नैतदेवेति * भाष्यं व्याचष्टे * नायमिति * लोके इति भाष्यं व्याचष्टे * स्तुतेरिति * अविदित इति भाष्यं द्वेधा व्याचष्टे * वेदे त्विति * पूर्ववचनाद्विवेति भाष्यं पूर्ववदेव द्वेधा व्याचष्टे * पूर्वेति * विदितत्वादेवेति भाष्यं व्याचष्टे * न चेति * वैदिकेष्विति भाष्यं जाताशङ्कत्वं द्विधोपपादयन् व्याचष्टे * वेदे त्विति * । लौकिकी स्तुतिर्विरुद्धा प्रमाणान्तरेणास्याविदितपूर्वत्वादिति वैदिक्याः स्तुतेः दार्ष्टान्तिकत्वनिराकरणपरतया सूत्रव्याख्यानार्थमपि गति भाष्यं व्याचष्टे * अपि चेति * अधर्मशब्दवद्विरुद्धवचनेनाविवादशब्देन विसंवादो ऽभिप्रेतः । विसंवादोपपादनार्थमूर्जो ऽवरुद्ध्या इति भाष्यं व्याचष्टे * वर्त्तमानेनेति * स्तुतौ स्वार्थसत्यत्वानादरत्वस्योक्तत्वाद्विसंवादे ऽपि स्तुतिनिर्वाहमाशङ्क्य विदितत्वादित्येद्भाष्योक्तलौकिकस्तुतिविषयस्वार्थसत्यत्वादरन्यायेनात्रापि पूर्वप। स्थित्वा तदादरमाह * तत्रेति * ऊर्गुदुम्बर इति भाष्यं व्याचष्टे * स्वरूपत इति * ऊर्क्शब्दाभिधेयमन्त्रत्वं भवत्पक्षे पक्षधर्मत्वेनासिद्धम् । तस्य चाप्रसिद्ध्या यूपप्रकृतित्वेनौदुम्बरो यूपो भवतीत्यसिद्धम् । अन्वयाप्रसिद्धिमेवोपपादयति * न हीति * पक्षधर्मत्वचितहेतुत्वान्यथानुपपत्तिकल्पितं यद्यदन्नं स स यूप इत्यन्वयक्यमङ्गीकृत्यैतदुक्तं हेतुत्वाप्रसिद्ध्या साध्याप्रसिद्धिप्रतिपादनार्थं तस्मादिति भाष्यमूर्गुदुम्बर इत्यनृतवचनादन्यदप्यस्य यत्साध्यं यस्मागुदुम्बरस्तस्मात्तन्मयो यूपः कर्त्तव्य इति तदप्यमृतमिति सुयोजन्न व्याख्यातं।विसंवादाभिधानस्य प्रकृतोपयोगमाह*तस्मादिति*

उक्तं तु वाक्यशेषत्वम् ॥ २२ ॥

अत्र भाष्यकृता वाक्यशेषत्वे विध्येकवाक्यत्वं हेतुमनुवदता शब्दः स्तुतिद्वाराङ्गत्वाभिप्रायो व्याख्यातस्तत्रोर्जं पशूनाप्नोतीतदन्तेन स्तुतिसिद्धेरूर्ज्जो ऽवरुद्ध्या इत्यस्य फलपरत्वमविरुद्धमित्याशङ्क्याह * ऊर्गुदुम्बर इति * उभयसम्भवे तर्हि फलपरतैव क-

स्मान्नेष्यते ऽत आह * तत्रेति * यद्यप्यौदुम्बरो यूपो भ
लिङ्गादिः स्यात्तथाप्यूर्गुदुम्बर इत्यादि कृत्स्नवाक्यशेषमर्थवाद
गृह्णीयान्न फलपरतयेति सावधारणं द्रष्टव्यं लिङ्गादेर्विधायक
र्थवादापेक्षत्वात्सुतरामित्युक्तं फलाकाङ्क्षानिवृत्तिस्तु प्रकरणात
त्वर्थत्वावगतेः सेत्स्यतीति वक्ष्यमाणो ऽभिप्रायः । भवतीति तु
मानापदेशो न फलपरतया वाक्यशेषं ग्रहीतुं शक्त इत्याह *
तेति * विपूर्वस्य दधातेः करोत्यर्थवाचित्वादुत्पादनं विधिश
भिप्रेतं तेनायमर्थः । न तावद्यावच्छ्रुतस्य भवतीतिवर्त्तमाना
स्य फलाकाङ्क्षा तदन्यथानुपपत्त्या कल्पिते भावनाविधौ सत
फलाकाङ्क्षायामौदुम्बरत्वस्वरूपोत्पादनार्थं कल्पितस्य लिङ्गादे
न्मात्रोपरमान्न साधनत्वबोधे व्यापारो ऽस्तीति । नन्वौदुम्बरत्व
व्यतार्थं कल्पितस्य विधेः फलपर्यन्तत्वानभ्युपगमे फलाभाव
साद: स्यादत आह * प्रकरणाच्चेति * वैकृतस्याप्यौन्दुम्बरत्वस्
कृतयूपाख्याङ्गसम्बन्धित्वेनोत्पत्तेः पृषदाज्यादिवत्प्रकरणाग्रहण
रोधः, विधिरहितस्य समभिव्याहारमात्रस्य फलप्रतिपादकत्व
ङ्क्षावाचकादित्युक्तम् । अवाचकमितिपाठे नास्तिवाचकं यस्योर्ग
धादिनः फलस्य तदिति बहुव्रीहिः । समभिव्याहारात्मना वा
फलार्थत्वावगमात् प्रकरणबाधमाशङ्कते * प्रकरणमिति * स
व्याहारावगतस्य फलार्थत्वस्य वक्ष्यमाणनिराकरणाभिप्रायेण प
राति * नेति * अबाधमेवोपसंहरति * तस्मादिति * कृत्स्न
वाक्यशेषस्य फलपरत्वे विध्युद्देशस्यैव शक्तिद्वयकल्पनापत्ते
स्यादित्यर्थान्तरन्यासेमाह * प्ररोचनापि चेति * न च तत्क
विना विधिपर्यवसानमित्याह * अन्यत्रेति * अत्र तु प्ररोचनाव
नमप्यतिक्लेशेन निर्वोढव्यं विधेरपि कल्प्यत्वादित्याह * इह त्वि
विध्युद्देशातिगौरवपरिहारार्थं तर्हि प्ररोचनापि वाक्यशेषादेव
विष्यतीत्याशङ्क्य तन्निराकरणार्थं पर्णमय्यधिकरणन्यायमुपन्य
* न चेति * अस्तिप्रयोजनसिद्धिरित्यनेन पारार्थ्यं दर्शितं का
शेषपरिच्छेदकत्वेन चौदुम्बरजातेर्लिङ्गादपि पारार्थ्यमवसीय
त्याह * जातिविशेषस्येति * ऐकान्तिककाष्ठाङ्गतया ऽक्रियारूप
फलार्थत्वयोग्यता निराकृता सत्यपि काष्ठाङ्गत्वे यूपाङ्गत्वं कथं सि
तीत्यपेक्षायां यूपशब्दो ऽपि चेत्याद्युक्तं पारार्थ्यसाधनस्योपयोग
* अतश्चेति * यत्तु पौनरुक्त्यपरिहारावसरे पारार्थ्याभावार्थं प्राकृत
दिरादित्वालाभान्नैराकाङ्क्ष्यमुक्तं तदनुभाष्य दूषयति * यत्त्विति *
श्येने यस्य शरमयं बर्हिरिति प्रत्यक्षोपदिष्टैः शरैरतिदेशप्राप्तानां कुश

बाधस्तद्वदत्रापीत्यर्थः । बाधप्रसङ्ग एव तर्हि दोषो ऽत आह
* न चेति * वरं क्रत्वर्थत्वे समानविषयत्वाद् बाधो युक्ततर इत्याह
* एतावांस्त्विति * प्रकृताश्रयालाभादप्यत्र गुणफलसम्बन्धो न
युक्त इत्याह * न चात्रेति * तमेवोपपादयति * यो हीति * पशु-
विशेषणयागस्य सौमा पौष्णं त्रैतमालभतेति त्रिवर्णपशुद्रव्यकत्वेनौ-
दुम्बरवृक्षद्रव्यसाध्यत्वायोग्यतोपपादनार्थम् । न चाप्रकृतस्यापि नि-
योजनस्यातिदेशप्राप्तस्याश्रयत्वं शङ्कनीयं, प्रकृतौ हि प्रत्यक्षोपदिष्टस्य
होमप्रणयनादेः पश्वाशाधनापेक्षायां पयश्चमसादिवत्फलार्थस्यापि
दधिगोदोहनादेराश्रयभूतसाध्यापेक्षादर्शनादुभयाकाङ्क्षावशात्साध-
त्वमवसीयते । न चैतावताङ्गत्वप्रसङ्गः तादर्थ्येन विधानाभावात्
एत एव गुणकामप्रयोगे प्रासङ्गिकोपकारिणा गोदोहनादिना सि-
द्धौ चमसादेरनङ्गत्वेन तदभावे वैगुण्याभावादनादरः विकृतौ
वखण्डकरणोपकारमुखेन क्लृप्तोपकारप्राकृतखादिरत्वादिविशिष्ट-
यैव नियोजनस्यातिदेशात्साधनानाकाङ्क्षस्य परार्थे विहितसाध-
ान्तरग्राहकत्वञ्च युक्तम् । अन्यतराकाङ्क्षाहेतुकस्य संबन्धस्ये-
तराकाङ्क्षोत्थापनपूर्वकत्वाद्विधिमन्तरेणाकाङ्क्षोत्थापनायोगात् ।
नु प्रकृतः पशुयागः साक्षादयोग्यो ऽप्यङ्गभूतयूपद्वारेणाश्रयो भ-
विष्यत्यत आह * न चेति * एवं कल्प्यतइति प्रधानादवतीर्य
दङ्गाश्रयत्वेन कल्प्यतइत्यर्थः । वचनव्यक्त्यन्तरमित्यौदुम्बरत्वे-
ोर्गवरोधं भावयेदितिवचनव्यक्त्यपेक्षयौदुम्बरत्वेन यूपं भावयेदि-
ाभिप्रेतम् । न चावतरणमित्यचोदकाश्च संस्कारा इति वस्तुशब्दार्थे
ाशब्दः न त्ववतरणं सम्भवतीत्यर्थः । यद्वा तेनाभ्युपगम्यावतरणं
ामसाधनत्वेन साक्षादङ्गभूतायां जुह्वां सम्भवाद्यूपे न सम्भवती-
ाुच्यते । अस्मिन्व्याख्याने सम्मतं यूपे यदवतरणं तन्न सम्भवति
सिध्यतीति सम्मतवचनः सम्भवशब्दः । अनेकार्थत्वान्निपात-
ोपसर्गाणां सम्यगर्थस्य वा संशब्दस्य लक्षणयात्र सम्मतवचनत्व-
ष्टव्यं यूपानवतरणे च यूपशब्दानर्थक्यप्रसङ्गो दोषः । ननु प्रकृता-
यालाभे ऽपि वाक्येनाश्रयलाभो भविष्यत्यत आह * न चानेनै-
ति * न केवलमनेकार्थविधिलक्षणो वाक्यभेदः किं तु वैरूप्यल-
णो ऽपीत्याह * युगपच्चेति * यूपस्याश्रयभूतस्यौदुम्बरतोपका-
त्वेन गुणभूततयोपादेयत्वात्तं प्रत्युदुम्बरताया उद्देश्यत्वादिति
ावः । नन्वाश्रयस्यापि साध्यत्वेन प्रधानतयोद्देश्यत्वाद्वैरूप्यं स्या-
त आह * अथेति * एवं सत्युद्देश्ययोः फलयूपयोर्गुणभूतौदुम्ब-
ावशीकाराभावेनान्योन्यनियमायोगादाश्रयालाभस्तदवस्थ एवेति

भावः । प्रत्युद्देश्यं वाक्यसमाप्तेर्वाक्यभेदो ऽपि च
एवं पर्णमयीन्यायेन स्तुत्युपयुक्तस्य परावृत्त्य फलपर
म्बर इत्यादेः फलपरत्वे प्ररोचनार्थत्वाभावाद्विध्युद्देशा
हार्यमिति प्रकृतोपयोगः। ननु समभिव्याहारादेव फल
तौ सत्यां विधिमन्तरेणेच्छयैव प्रवृत्तेर्न प्ररोचनया
* यत्त्विति * साधनत्वप्रतिपत्तौ विधिव्यापारानभ्यु
या भाव्यापेक्षायामप्यौदुम्बरो भवतीत्यादुम्बरत्वस्यैव
सन्निधावुपात्तस्य साध्यांशे निवेशापत्तेरूर्जो ऽवरुध्या इ
वधावुपात्तस्याप्यूर्गवरोधस्य तदवरुद्धायां भावनायां
यूपविशेषणत्वापत्तेरपुरुषार्थौपयिकत्वान्नौदुम्बरत्वभा
पूर्वकारी कश्चित्प्रवर्त्ततेत्यर्थः । नन्वौदुम्बरो यूपो भ
विधेः फलसाधनत्वबोधे व्यापाराभावादप्रवर्त्तकत्वे
चनात्प्रवृत्तिः सेत्स्यतीत्युक्तमत आह * यत्त्विति *
भावात्पुरुषार्थत्वे सति क्रत्वर्थत्वायोगादिति भावः। प
स्य चाडागमादिचिह्नाभावेनानिश्चयात्कल्प्यस्योत्पत्तिवि
त्प्रयोगे ऽपि व्यापारो न युक्त इत्याह * पश्वमेति *
स्यालम्बनं दर्शयन् सिद्धान्तमुपसंहरति * तस्मादिति
करणव्युत्पाद्यं विधिरहितस्य श्रेयःसाधनत्वबोधास
च्छब्देन परामृष्टं फलाभावसूत्रोक्तानुपलब्धिविरोधो
भिधायित्वादित्यनेन । चतुर्थे चेति प्रस्तुतसाधनांश
तुत्वेन साध्यांशनिराकरणं वक्ष्यमाणमुक्तं सर्वेभ्यो
वित्यादौ चतुर्थ्या फलसमर्पकत्वाभ्युपगमात्समभिव्याह
लसमर्पकत्वनिराकरणपरमेवं कामशब्दरहितस्येति
प्रधानफलमेवेदमित्यनेन फलकीर्त्तनालम्बनं दर्शितम् ।
त्रैतमालभेत पशुकाम इति पशूनामदनीयत्वेनोक्तशब्दवा
प्रधानफलत्वादङ्गे पूर्णाहुतिवदुपचारः । न पूर्वत्वादिति
यवर्णकोक्तस्य विसम्वादस्यानुभाषणं पूर्वं निराकरणा
त्यादिभाष्यं व्याचष्टे * सर्वत्र चेति । गुणवादेनेति *
फलसङ्कीर्त्तने सम्वादाभिधाने तावदङ्गे प्रधानगामिनि
चारो ऽभिमतः सम्पूर्णाहुतिन्यायेनोक्तप्रायत्वान्नेह भा
पक्षधर्म्मतान्वयकीर्त्तनसम्वादाभिधाने त्वग्निमाणवकव
णशब्देनाभिप्रेतम् । तत्र किं सादृश्यमित्यादिप्रश्नपूर्वकं
तिपादनार्थं भाष्यं व्याचष्टे * साधनत्वे ऽपि चेति *
हेतुत्वमुक्तम् । अन्नगतेन प्रीतिसाधनत्वेन तद्विशेषतृ

था गुणेनोदुम्बरेऽन्नशब्दाभिधेयत्वसम्भवात्साधने ऽपि सम्वाद इत्यर्थः। प्रीतिसाधनत्वमप्यौदुम्बरवृक्षस्याभक्ष्यत्वान्नास्तीत्याशङ्क्य प्रीतिसाधनौदुम्बरफलोत्पादनशक्तियुक्तं वृक्षं प्रशंसितुमुपचारात्प्रशंसावाचिना प्रीतिसाधनशब्देनोच्यते इत्युक्तम्। अनेन च नात्र यद्यदन्नं स स यूप इत्यन्वयवाक्यं कल्प्यते किं तु यद्यदन्नं तत्तत्प्रशस्तमित्येवं तच्च प्रसिद्धमेवेति सूचितम्।

विधिश्चानर्थकः क्व चित्तस्मात्स्तुतिः प्रतीयेत तत्सामान्यादितरेषु तथात्वम् ॥ २३ ॥

अत्र भाष्यकृताप्सु योनिर्वा अश्व इत्यादीनामानर्थक्यापत्तेर्विधित्वं न सम्भवतीत्युक्तम्। तदयुक्तम्। फलविधिसरूपाणामेव पूर्वपक्षिणा विधित्वस्योक्तत्वादित्याशङ्क्याह * यदि चेति * विध्यन्तरैकवाक्यभूतानामपि विधिपरत्वाङ्गीकारे तुल्यन्यायात्सर्वत्राप्यापाद्य दूषणमुच्यतइत्यर्थः। सर्वग्रहणं वायुक्षेपिष्ठादीनामपि तर्हि कस्मान्न विधित्वमापद्यत इत्याशङ्कानिवृत्त्यर्थं क्व चिद्ग्रहणं तर्हि सूत्रे किमत आह * तत्रेति। के चिदिति * निवीतं मनुष्याणामित्यादय इत्यर्थः। शमयित्रीभिरित्यादिभाष्यं स्तुतिस्वरूपप्रदर्शनार्थत्वेन व्याचष्टे * कीदृशीति * आक्षिपति * तत्रेति * अग्रन्थः प्रतिभातीति मत्वा समर्थयन्तइत्यर्थः। अग्रन्थत्वमेव वा समर्थयन्तइति। स्वयं समर्थयते * तत्र त्वियमिति * पूर्वव्याख्यायां व्याख्यातॄणां समर्थनं दर्शयतीत्यवतारणीयं तत्रावकाशमयित्रीत्वानुपन्यासं तावत्प्रत्याचष्टे * वेतसेति * अश्वावकयोः सम्बन्धस्य तु भाष्यकारेणाकथितत्वादनुपन्यासो न दोषायेत्याह * न चायमिति * इह च वैतसे कटे अश्वं चिनोति अप्सु योनिर्वा अश्वो ऽप्सुजो वेतसः यं वैनं योनौ प्रतिष्ठापयतीत्यत्रावकानामद्भिः सम्बन्धाश्रवणे ऽपि वेतसशाखयावकाभिश्चाग्निं विकर्षत्यापो वै शान्ताः शान्ताभिरेवास्य शुचं शमयतीत्यत्र वेतसवत्तासामप्यद्भिः सम्बन्धस्य स्तुतिसिद्ध्यर्थं वाच्यत्वादप्सुजो वेतस इति अप्सुजत्वाभिधानम्मवकानामप्सुजार्थसाहचर्यादुपलक्षणमित्यभिप्रेत्यावकाग्रहणम्। ननु वेतसग्रहणेनोपलक्षितत्वादवकानामग्निविकर्षणसाधनत्वेन विहितानां स्तुत्यर्थं भवतु नाम भाष्ये ऽद्भिः सम्बन्धकथनं शमयित्रीत्वविशेषणत्वमपां किमर्थमत आह *तावता त्विति* यद्यपि स एवैनं योनौ प्रतिष्ठापयतीत्यप्सुजे वेतसे ऽश्वचयने कृते प्रकृतिविकारयोरभेदोपचारेण वे-

तसप्रकृतिभूतास्वप्सु चयनात्स्वयोनौ प्रतिष्ठापनं कृतं भवतीति स्तु
प्रतीयते, तथापि स्वयोनिप्रतिष्ठापनमात्रेण प्ररोचनाऽनुपपत्तेर्वै
सशाखयावकाभिश्चाग्निं विकर्षत्यापो वै शान्ताः शान्ताभिरेवास्य शु
शमयतीति वाक्यान्तरगतार्थवादाभिहितमपां शमयित्रीत्वं यजमा
ष्टशमनसाधनत्वोपपादनार्थं भाष्यकृतोक्तम् । अवकानां त्वप्सु
वेतस इत्यनेन सहचरणलक्षणयाद्भिः सम्बन्धानभिधानेऽपि अ
विधानादनपेक्षितस्तुत्यप्रतीतेर्वाक्यान्तरगतार्थवादेनापां शमयि
त्वेऽभिहितेऽप्यग्निविकर्षणसाधनत्वेन विहितयोर्वेतसावक
स्तुत्यप्रतितेस्तत्प्रशंसोपपादनार्थमद्भिः संबन्धो भाष्यकृता कथि
अर्थवादान्तरापेक्षाप्रवृत्तानामित्यश्वविषये ऽर्थवादान्तरस्यापेक्ष
प्रवृत्तानामिति षष्ठीसमासगर्भस्तृतीयासमासः । अवकावि
त्वर्थवादान्तरेणेति तृतीयासमासगर्भः । अर्थवादान्तरमुदाह
* आप इति * कथमस्यार्थवादान्तरस्याप्सुयोनिर्वा अश्व इत्यने
पेक्षा कथञ्चानेनार्थवादान्तरेणाप्सुजो वेतस इत्यस्यापेक्षा इत्या
ङ्क्याह * अनेन हीति * अश्ववेतसाभिजनभूतानामपां शमयित्रीत
प्राशस्त्याभिधानेन तदभिजातयोरश्ववेतसयोः प्राशस्त्यावगमात्
दर्थमपेक्षेत्यश्वविषये अर्थः अवकाविषये त्वविधेयानामपां शम
त्रीत्वेन प्राशस्त्यमुच्यते न विधेययोर्वेतसावकयोरिति तत्प्राशस्
वगमायाप्सुजत्वाभिधानापेक्षेति व्याख्येयं, कीदृशीं स्तुतिं दर्शय
त्यपेक्षायामाह * तत्रेति * कस्य चित्प्रसिद्धाप्संबन्धस्य वेत
वकस्याप्सुजो वेतस इत्यप्संबन्धमात्रकीर्त्तनादेवापो वै शान्ता इ
र्थवादप्रतिपाद्या स्तुतिः सिद्ध्यति । अन्येषां त्वप्रसिद्धाप्संब
नामश्वादीनां वस्तुतोऽसन्नप्यप्संबन्धः प्राशस्त्यज्ञानार्थं कीर्त्यं
कीदृशं प्राशस्त्यमित्यपेक्षिते प्रसिद्धेत्याद्युक्तम् । प्रसिद्धः शान्त
सह संबन्धो यासामपां तास्तथोक्ता इति व्याख्येयम् । भाष्य
योज्यम् । अश्वस्यावकानां चेति चकारेण वेतसग्रहणम् । त
श्वविषये अश्वस्य वेतसस्य च शमयित्रीभिरद्भिश्शान्ताभिरेवा
शुचं शमयतीति सहयोगतृतीयान्तपदनिर्दिष्टाभिः सहसंबन्धो
शब्दनिर्दिष्टस्य यजमानस्य शुक्शब्दवाच्यं कष्टं शमयतीत्यर्थः ।
वकाविषयत्वेऽवकानां वेतसस्य चाद्भिः संबन्ध इत्यर्थः । स्वयमुद
तेष्वर्थवादान्तरेषु स्तुतिस्वरूपमाह * एवमिति * तत्सामान्या
ति सूत्रावयवव्याख्यानार्थं तथेतिभाष्यं व्याचष्टे * इति स्तुत
इति * अनेन यावत्स्वर्थवादेषु अप्सु योन्याद्यर्थवादसमानप्रका
तावत्सु स्तुतित्वमिति व्याख्यातम् ।

प्रकरणे च सम्भवन्नपकर्षो न कल्प्येत विध्यानर्थक्यं हि तं प्रति ॥ २४ ॥

सूत्रतात्पर्यमाह * विधिपक्षे चेति * स्वयं यथाश्रुतवचन-
यक्तिपक्षे सूत्रं योजयति * यदीति * अपकर्षणं स्यादित्यर्थकथन-
ात्रं व्युत्पत्तिस्तु यथाभाष्यं कर्मण्येव । यद्वेयमन्यां देवतामुत्पत्ति-
शिष्टामपकर्षतीति कर्त्तृव्युत्पन्नो ऽपकर्षशब्द इत्याह * इयं वेति *
नु विदाहादेर्निमित्तकत्वेन निर्ऋत्यादेर्देवतान्तरस्य नित्याग्न्यादिदे-
ताबाधकत्वं युक्तमेवेत्याशङ्कानिराकरणार्थत्वेन प्रकरणे च सम्भव-
न्नति सूत्रावयवं व्याचष्टे *तत्रेति । अभ्युदितेष्टिवदिति * यदामा-
ास्याभ्रान्त्या चतुर्दश्यामन्वाधानं क्रियते तदामावास्यायामुषसि
न्त्रप्रक्रमविधानात्प्रक्रान्ते तन्त्रे चन्द्रोदये सति यस्य हविर्निरुप्तं
ुरस्ताच्चन्द्रमा अभ्युदेति स त्रेधा तण्डुलान्विभजेद्ये मध्यमास्तान-
नये दात्रे पुरोडाशमष्टाकपालन्निर्वपेद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे
ध्निश्चरुं ये ऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमिति तण्डु-
ग्रहणोपलक्षितानां सर्वेषामोषधिदधिपयसां प्राकृतानां हविषां
ाकृताभ्यो देवताभ्यो विभजेदित्यनेनापनये विहिते तस्मिन्नेव प्र-
ान्ते ऽसमाप्ते कर्मणि मध्यमादिवाक्यैर्दात्रादिदेवतान्तरविधिरिति
ष्ठे वक्ष्यते साभ्युदयेष्टिः । अभ्युदितश्चन्द्रमा यस्यामिष्टौ साभ्यु-
देतेष्टिरिति व्युत्पाद्या ऽमावास्येष्टिरेवोच्यते । यद्यपि विभजेदित्यपन-
ानविधिना तत्र प्रकृतिगताग्न्यादिदेवताबाधो न देवतान्तरविधिना
थापि नित्यदेवतादिबाधेन नैमित्तिकदेवतान्तरविधिसाम्यात् दृष्टा-
तता । भाष्यकृतातु यत्न नैर्ऋतस्तत्र विदग्धता नीयेतेति वदता यत्त-
ोर्व्यत्ययः कृतस्तत्स्वाभिप्रायं व्याचष्टे * अथेति * विध्यानर्थक्यं
ीति सूत्रावयवव्याख्यानार्थं दर्शपूर्णमासकर्मेतिभाष्यं स्पष्टत्वान्न
्याख्यातम् । सूत्रं चैवं पूर्वसूत्राद्विधिः क चिदिति पदद्वयमनुकृ-
्य यथाभाष्यं योज्यं विधिः सन् क चिद्विदग्धादावप्रकृष्टः कल्प्येत।
ा चैतद्युक्तं कस्मान्न युक्तमित्यपेक्षिते प्रकरणे च सम्भवन्निति हेतुग-
र्भं विशेषणम् । विध्यानर्थक्यं हि तं कर्मशेषं प्रतीत्यपकर्षकारणमु-
क्तम् । यथा वार्त्तिकं तु कर्तृव्युत्पत्तिपक्षे क चिन्नैर्ऋतादावपकर्षः
कल्प्येत विध्यानर्थक्यं हि तमाग्नेयादिपुरोडाशं प्रतीत्येतावान्विशे-
षः । कर्मव्युत्पत्तौ त्वग्न्यादिरुत्पत्तिशिष्टे ऽपकृष्टः कल्प्येत निर्ऋ-

१ अपकृष्येति १ पु० पा०

त्यादिविध्यानर्थक्यं हि तमनपकृष्टः स्वदेवताकं पुरोडाशं प्रतीति

विधौ च वाक्यभेदः स्यात् ॥ २५ ॥

औदुम्बर इत्यादिभाष्यादौदुम्बरो यूपो भवतीत्यस्यापि प्राः स्त्यपरत्वं प्रतिभाति । तच्चायुक्तम् । विध्येकवाक्यत्वं विनार्थवाः त्वायोगात् । सोमापौष्णविध्येकवाक्यत्वाभ्युपगमे त्वौदुम्बरो यू प्रशस्त इतिभाष्यानुपपत्तिप्रसङ्गादित्याशङ्क्याह * स्तुतित्वेनेति न स्तुत्यर्थत्वेनेदमुपन्यस्तं किं तु स्तुत्यन्वयवशेनास्मिन्वर्त्तमानापः शसन्दिग्धे पञ्चमलकारत्वनिश्चयात् विधावाश्रीयमाण इति स्तुि निश्चयेन विधित्वप्रतिपादनार्थमिति भावः * उपजनय्येति * निश्च य्येत्यर्थः ।

हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्याम् ॥ २६ ॥

अधिकरणविषयप्रदर्शनार्थमथेति भाष्यं व्याचष्टे * इहेति पूर्वप्रकृतापेक्षित्ववाच्यथशब्दप्रतिपादितपूर्वाधिकरणसङ्गतिसूचनाः हिशब्दादिभिरित्युक्तम् । पूर्वत्र श्रेयःसाधनत्वप्रतिपादकविधिः ब्दाभावेनौदुम्बरो यूपो भवतीत्यादीनां विधित्वे निराकृते तेन ह्य क्रियतइति हेतुत्वप्रतिपादकहिशब्दसद्भावेन हेतुत्वं भविष्यतीति र्वाधिकरणसिद्धान्तहेतुप्रत्युदाहरणरूपेणात्र पूर्वपक्षोत्थानात्सः तिः । न च परमार्थहेतव इत्यनेन हेतुवदिति वर्तव्यावर्त्यं दर्शि चतुर्गृहीतान्याज्यानि भवन्ति न ह्यत्रानुयाजान् यक्ष्यन्भवतीत्यादः परमार्थहेतवः । आतिथ्येष्टावनुयाजाभावे ऽपि अष्टावुपभृति ग ह्लातीति प्रकृतौ विहितस्योपभृत्यष्टगृहीतस्य चोदकप्राप्तस्य निवृत्त्य चतुर्गृहीतत्वे विधीयमाने ऽनुयाजाभावस्य हेतुत्वाभिधानात् य यत्रानुयाजाभावस्तत्र तत्राष्टगृहीताभाव इति ज्ञायते । प्रकृतौ चाः ग्रहस्य चतुष्टवद्द्वयलक्षणार्थत्वद्योतनात्प्रयाजार्थे जुह्वां समानय नियोगतो ऽर्द्धमेव समानेतव्यमिति ज्ञायते हेतुः स्यादिति पूर्वपक्ष भाष्यं हेतुविध्यभिप्रायमनुवादाभिप्रायं वेति विकल्प्य विधिप तावदौदुम्बराधिकरणनिरस्तत्वादयुक्तमित्याक्षिपति * तत्रेति यथा तत्र यदिह फलवचनं तदौदुम्बरस्य यूपस्येत्यादिना प्रत्यक्ष विधेरभावात्कल्प्यस्य च कार्यविशेषसम्बन्धित्वेनैव कल्पयितुं शक्यः तया कार्यान्तरं प्रत्यभावात्फलपरत्वे स्वरूपविधानाशक्तिप्रसक्तेः फ लवचनानर्थक्यमुक्तं तथेहापि प्रत्यक्षविध्यभावात्कल्प्यस्य च हेतुत्वे ऽन्नकरणमात्रस्य होमसाधनत्वविध्यनुमानेन शूर्पस्यापि प्राप्तिर म्भवाच्छूर्पहोमसम्बन्धविधानानुपपत्तेस्तत्र हेतुविध्यानर्थक्यम्

अन्नकरणमात्रस्य तु होमसम्बन्धं प्रति हेतुविधानमितरेतराश्रयापत्तेरनाशङ्क्यमेवेति शूर्पहोमसम्बन्धं प्रतीति काका द्योतितम्। अनुवादपक्षे त्वानर्थक्येन पूर्वपक्षः प्रसज्येत। तत्त्वर्थवादाधिकरणे निरस्तमित्याह * अथेति * ततश्च पूर्वपक्षासम्भावनयाऽधिकरणारम्भो न युक्त इत्याह * इतीति * समाधत्ते * उच्यतइति * अस्यार्थः नानेन शूर्पस्य होमसाधनत्वमुद्दिश्य तत्रान्नकरणत्वस्य हेतुत्वाविधिराशङ्क्यते यः पूर्वन्यायेन निरस्येत यत्त्वन्नकरणहेतुकन्द्रव्यादेर्होमसाधनत्वं विधेयमाशङ्क्यते तन्न याच्छ्रुतेन विधीयते येन गौरवापत्त्या निरस्येतेत्यनेनैवेत्येवकारेण सूचितम्। एतच्च केवलहेतुत्वेन पूर्वपक्षमङ्गीकृत्योच्यते। यदा तु शूर्पेण जुहोतीति विधिमङ्गीकृत्य तेन ह्यन्नं क्रियतइत्यस्य तच्छेषत्वेनार्थवादत्वमभ्युपगम्य तदालम्बासिद्ध्यर्थं हेतुविधिरपि द्रव्यादिप्राप्तिफलको भविष्यतीति हेत्वर्थवादसमुच्चयेन पूर्वपक्षः क्रियते तदा पूर्वन्यायनिरस्तत्वाशङ्कैव नास्तीति तावच्छब्देन सूचितम्। न चेत्यानर्थक्यपरिहारायोक्तम्। किं तर्ह्यस्य प्रयोजनमिति पृष्टे सिद्धवदुपदिष्टस्य हेतुत्वस्य यावत्यन्वयांशे प्रसिद्ध्या शङ्का तत्रांशे अर्थापत्तिलभ्याद्वचनात्सिद्धिरित्युक्तं हेतोरन्वयकल्पकत्वोपपादनाय प्रसिद्धिपूर्वकत्वादित्युक्तम्। न चात्र सिद्धवच्छब्दप्रयोगमात्रेण हेत्वनुवादाशङ्का। अप्राप्तानुवादायोगादुपदिष्टस्येति यस्य ते हेतुविधिरित्येतद्भाष्यव्याख्यायां च तव हेतुविधिर्वादित्वादित्यभ्युपेत्य वादे च यद्यपि हेतुविधानमिति स्पष्टं विधेयत्वाभिधानात्साधुशब्दाधिकरणे च व्याकरणस्यासन्देहप्रयोजनत्वनिराकरणावसरे तथा हेतुविधिर्हेत्वर्थवादो वेति हेत्वधिकरणविचार्यं स्वयमेव दर्शयिष्यति। अज्ञातज्ञाप्यत्वरूपस्य चात्र विधेयत्वस्यानुष्ठाप्यरूपाविधेयत्वाभावप्रतिपादनार्थेन सिद्धवच्छब्देनाभिप्रेतत्वान्मानव्यापारत्वे हेतुत्वस्याविधेयत्वं वाच्यम्। गौरवं तु कल्पपदसाहितैः श्रुतैः पदैर्हेतुविधिपूर्वकं तदन्यथानुपपत्त्या ऽन्वयकल्पनाभिधानात्परिहृतम्। ननु सर्वस्य विधिपरत्वे ऽर्थवादाभावाद्विधिरवसीदेदत आह * यापि चेति * कस्मादेतत्कर्त्तव्यमित्याशङ्कायामर्थवादाः संबन्ध्यते साचात्र हेतुनैव पूरितेति भावः। यद्यपि कथं भावापेक्षयार्थवादाः संबन्ध्यते तथापि कर्त्तव्यमित्युक्ते कस्मादिति या पुरुषस्यापेक्षा जायते सेह हेतुपूरणार्थत्वाय दर्शिता। यद्यपि चेयं प्राशस्त्यविषयापेक्षा तथापि सादृश्यादुभयाविषयत्वभ्रमः पूर्वपक्षिण इति मन्यतइत्यनेन सूचितम्। यद्वा हेत्वर्थवादसमुच्चयेनायं पूर्वपक्षो न केवलहेतुत्वेनेत्याह * अथापीति *

तदर्थवादत्वमन्तर्निर्णीतं हेतुत्वमस्मिन्नित्यर्थः । भवतु तर्हि तेन
मित्यर्थवादस्तदुन्मीलितः शूर्पेण जुहोतीति विधिस्तथापि तेने
वादानुसाराद्दर्व्यादीनामपि शूर्पतुल्यता न तु व्यावृत्तिः अत
शूर्पशब्देन लक्षणयान्नकरणेन जुहोतीति विधीयते । अस्मि
वादे सालम्बनत्वाय हेतुत्वेनाप्युपयोग इति हेतुरपीत्यपिशब्देन
मुच्चयो दर्शितः । होमस्याविधेयत्वेन हेत्वनाकाङ्क्षत्वात्तं प्रति
विधानमयुक्तमाशङ्क्य होमशब्दस्य संबन्धलक्षणार्थत्वमाह *
न्धस्य चेति * नन्विति भाष्यस्य परेषां व्याख्यानं दूषयितुमुप
स्यति * नन्विति * अन्यत्राप्येवमेवोक्त्या भाष्यकृत्सम्मतिं प्र
यति * तथा चेति * यद्धि यस्य कारणभूतं दृष्टं सिद्धे तच्चेत्स
ऽपि[1] कारणभूतमवगतं भवेत् तत्तस्य साधनमिति भाष्ये वक्ष्यते
षयति * तन्विति * स्वयं त्रेधा व्याचष्टे * अत इति * क्रिया
मान्यवाचिना करोतिना ज्ञानाख्यक्रियाविशेषो लक्ष्यत इतिभ
शङ्कते * नन्विति * अङ्गभूतनियमरूपसंबन्धोपलक्षणत्वेनायम्
न्यस्तो नाङ्गत्वेनेति परिहरति * सत्यमिति * अनुमाने व्यव
यते * अनेनेति * नियमो ऽनुमानव्यवहारशब्देनोक्तः । एवं तु
क्षितलक्षणाप्रसङ्गाद्गम्यगमकलक्षणार्थाभ्यां कार्यकारणशब्दाभ्यां
रेण भावप्रत्ययेन कृत्तद्धितसमासेषु भावप्रत्ययेन संबन्धाभिधान
तिस्मरणात्, गम्यगमकसंबन्धाभिधानाद्गम्यगमकयोश्च नियमल
णस्य संबन्धस्य शक्तिरूपत्वात्तत्प्रतिपादनायैतदुक्तमिति पूर्वापरि
षाद्व्याख्यानान्तरमाह * यद्वेति * ननु शक्तिनिरपेक्षस्य हे
व्याप्तिमात्रेण गमकत्वात्तत्प्रतिपादनं व्यर्थमत आह * ययो
हीति * ययोरेव सा शक्तिरवधृता तत्रैव तयोरेव मध्ये एकस्ये
रत्प्रतिहेतुता तत्रेति निर्द्धारणे सप्तमीद्विवचनं गमकस्य चाधार
गम्यस्य च विषयत्वं गम्यविषयागमकाधारेत्यर्थः । कीदृशी शक्ति
रित्यपेक्षिते गम्यगमकसामर्थ्यात्मनेत्युक्तं तृतीयेत्थं भूतलक्षणे ग
म्यगमकसामर्थ्यरूपेत्यर्थः । तस्याः प्रतिपत्त्युत्तर[2]कालत्वेनानङ्गत्वम
शङ्क्य * व्याप्तिग्रहणकाल * इत्युक्तं कार्यावसेयत्वाच्छक्तेः क
ततः प्रागवधारणमित्याशङ्क्य कार्यकारणभावित्वेनेत्युक्तम् । अ
यमाशयः नियमलक्षणः संबन्धो ऽनुमानाङ्गम् । न चासाववि
नाभावमात्रेण भवति सत्यप्यविनाभावे हिंसात्वाधर्मसाधनत्वयो
र्नियम्यनियामकत्वाभावात् किं त्वाक्षेप्याक्षेपकभावेन यद्यस्मिन्स

१ यद्धि वह्न्यादिः यस्य धूमादेः सिद्धे महानसे साधे ऽपि पक्षे ऽपीत्यर्थः ।
२ प्रतीत्युत्तरेति २ पु० पा०

नावश्यं भवितव्यमिति यदाक्षेपकशक्तत्वेनावसीयते तदेव तेन
न्तुं शक्यते स्वरूपप्रयुक्तं हि साहित्यं नियमः प्रयोजकत्वं चाक्षे-
त्वम् । एतच्च विस्तरेणाचार्यैरनुमानवादे ऽभिहितम् ।

व्याप्तेश्च दृश्यमानायाः कश्चिद्धर्म्मः प्रयोजकः ।
अस्मिन्सत्यमुना भाव्यमिति शक्त्या निरूप्यते ॥
तस्माद्य एव यस्यार्थो नियतो ऽदृष्टशक्तितः ।
स एव गमकस्तस्य न प्रसङ्गान्वितो ऽपि यः ॥
साध्यहेतुत्वमर्थानां व्याप्तिशक्त्यनुरोधतः । इतिच ।

सा चाक्षेपशक्तिर्व्याप्तिग्रहणकालएवावधार्यते * तथा हि*धूम-
ग्निसाहित्यं नित्यं दृश्यते तस्य धूमस्वरूपप्रयुक्तत्वाभावे नित्यत्वा-
ादर्थापत्त्या धूमस्वरूपस्य प्रयोजकत्वं कल्प्यते तत्र धूमत्वश्यामत्वो-
त्याद्यनेकसम्पाते धूमत्वमेवप्रयोजकं नान्यादिति व्यवस्था शक्त्या
ानुपपद्यमाना शक्तिं कल्पयति अतो ऽनुमानाङ्गभूतनियमलक्षण-
ध्यसिद्ध्यर्थेयं शक्तिर्न गम्यगमकभावसिद्ध्यर्था येन तदुत्तरकाला-
ग स्यात् सत्यां तु शक्तौ नियमवच्च तेन गम्यगमकभावो भवि-
ोति भाविनीं गम्यगमकतामालोच्य गम्यगमकशक्तिरित्युच्यते ।
कार्यकारणभावित्वेनेति भविष्यत्कालवाचिगम्यादिपठितभा-
ब्दप्रयोगेण दर्शितं कार्यकारणशब्दौ गम्यगमकपरौ व्याख्यातौ ।
न्सामर्थ्ये सति नियामकमग्न्यादिगम्यं भविष्यति नियम्यं च
दिगमकं तत्कार्यकारणभाविसामर्थ्यं तस्य भावः कार्यकारणा-
त्वं तेनेतीयमपि तृतीयेत्थं भूतलक्षणार्थैव । अनेन च भाष्य-
भावशब्दो भवतेर्णिजन्तादेराजित्यच्प्रत्ययमुत्पाद्य भावनार्थो
यातः । भावनं चोत्पादनं तच्च शक्त्यधीनमिति कार्यकारणभा-
देन गम्यगमकभावापादिका शक्तिरुक्ता भवति । एवमपि का-
णशब्दयोर्लक्षणावृत्त्यपरिहाराद्भावशब्दस्य शक्तावप्रयुक्तत्वाद्-
ोषात्स्वमतेनान्यथा व्याचष्टे * अथ वेति * काणादा ह्यस्येदं
कारणं संयोगिसमवायि एकार्थसमवायिविरोधि चेति लैङ्गिक-
तुमानाङ्गभूताविनाभावोपाधित्वेन कार्यकारणाभावादिच्छन्ति
ऽपि त्वेवमेव दृश्यते । इह चान्नकरणत्वेन द्रव्यादेर्होमसाध-
विधीयमानमन्त्रकरणत्वकारणकमेव भवति । भाष्यगतहोम-
च्चात्रत्यो ऽपि संबन्धलक्षणार्थः । आक्षेपभाष्यमुपसंहरति
मादिति * हेतुव्यपदेशशब्देनैतदुक्तं हेतुर्हि प्रमाणान्तरप्राप्ति-
व्यपदेश्यः सिद्धवत्कीर्त्तनीयो भवति न चायं तथेति न हे-
ुक्तमिति । सत्यमिति समाधानभाष्यं व्याचष्टे * सत्यमिति *

अनेन च विधायिष्यते कार्यकारणभावो दृष्टान्तवचनेन कल्पये
व्याख्यातम् । दृष्टान्तशब्देन दृष्टश्चासावन्तश्चेति समीपवचना
शब्दाङ्गीकारेण सह दृष्टिरूपाख्या व्याप्तिरुक्ता कल्पिताया अपि व
नेरशाब्द्याः शाब्देन हेतुना ऽनन्वयमाशङ्क्यान्वयसिद्ध्यर्थं वचने
ल्पनमुक्तम् । सप्तमे ऽपि वचनं पुनर्द्विविधं प्रत्यक्षमानुमानिकं चे
वदता भाष्यकारेण श्रुतार्थापत्तेः शब्दकल्पकत्वमेव प्रकटितम् । श
कल्पकत्वानङ्गीकारे चाग्नये जुष्टन्निर्वपामीत्यादेर्मन्त्रस्य विकृताव
न्निहिताग्न्यादिपदनिवृत्त्या साकाङ्क्षस्यापि सूर्यादिनार्थेन नैराव
ङ्क्यसिद्धेर्न सूर्यादिपदप्रक्षेपेणोहः सिद्ध्येत् सूत्रकृताप्यर्थाद्वा कल्प
कदेशत्वादिति स्रुवेणावद्यतीत्यादिश्रुतवाक्यैकदेशादश्रुत इव द्रव
मित्यादिपदकल्पनैवोक्ता । चतुर्थे ऽप्यश्रुतफलेष्वेकाहकाण्डपठि
विश्वजिदादिषु चोदनायां फलाश्रुतेः कर्ममात्रं विधीयते न ह्यश
विधीयतइति फलप्रतिपादकशब्दाभावान्निष्फलत्वं पूर्वपक्षयित्वा
चाम्नानसामर्थ्याच्चोदनार्थेन गम्येत अर्थानां ह्यर्थवत्त्वेन वचना
प्रतीयन्ते अर्थतो ह्यसमर्थानामानन्तर्ये ऽपि असम्बन्धः तस्म
च्छ्रुत्येकदेशः स इति श्रुतवाक्यैकदेशभूतस्वर्गकामादिपदकल्प
मेव वक्ष्यते । अर्थस्य शब्दैकदेशत्वायोगाच्छ्रुतार्थापत्तिमाहुर्ये
ब्दस्याकल्पिकामतः सूत्रभाष्यन्यायतन्त्रविरोधात्ते निराकृताः । क
दृशं दृष्टान्तवचनमित्यपेक्षिते दर्शयति * यद्यदिति * शूर्पेण हो
इति भाष्यं हेतुः स्यादित्यनेन पुनरुक्तमाशङ्क्य उपसंहारार्थत्वेन व्य
चष्टे * तेन चेति * शूर्पेण होम कर्त्तव्ये इति द्वितीयपूर्वपक्षाभि
प्रायेणोक्तं प्रथमपूर्वपक्षे तु समस्तस्य वाक्यस्य केवलहेतुपरत्वात्त
र्थानुपपत्तिकल्पितसर्वान्नकरणसाधनत्वविधिप्राप्तत्वेन शूर्पस्य त
च्छ्रुतेरवयुत्यानुवादत्वादुपलक्षणार्थं शूर्पग्रहणम् । शूर्पेणान्ये
वा होमः कर्त्तव्य इत्यर्थः । किं प्रयोजनमिति प्रश्नभाष्यं व्याप्तिवचनक
ल्पनेन प्रयोजनस्योक्तत्वादयुक्तमाशङ्क्य व्याचष्टे * किं प्रयोजन
मिति * द्वितीये पूर्वपक्षे चैतदुक्तं तदा हि शूर्पेण जुहोतीति वि
धेस्तेन ह्यन्नं क्रियतइत्यर्थवादनिराकाङ्क्षत्वे सत्यपि शूर्पासम्भवे
ऽनुकल्पभूतदर्व्यादिप्राप्त्यर्थं तेन ह्यन्नं क्रियतइत्यस्यापि परावृत्त्य हे
तुपरतेष्यते । तत्र शूर्पगतान्नकरणत्वहेतुत्वमुच्यमानं न दर्व्यादेर्हो
मसाधनत्वमापादयितुं शक्नोतीति व्यर्था परावृत्तिकल्पनेति प्रश्ना
भिप्रायः । प्रथमपूर्वपक्षे तु शूर्पश्रुतेरुपलक्षणार्थत्वात्तेन ह्यन्नं क्रि
यतइत्यविशेषेणान्नकरणत्वमात्रस्य हेतुत्वप्रतिपादनान्न हेतुपरत्वे
व्यवस्था लभ्यत इति श्रुतविधित्यागेनाश्रुतविधिकल्पनस्य किं प्रयो

ज्ञानमिति प्रश्नाभिप्रायो व्याख्येयः । द्विविधमपि प्रश्नाभिप्रायन्निरा-
कर्त्तुमन्यदपीत्युत्तरभाष्यं व्याचष्टे * अपरस्त्वाहेति * शास्त्रस्य म-
ाविषयत्वं पुरुषस्य चानुष्ठानसौकर्यमश्रुतविधिकल्पनस्य अनेन प्रयो-
जनमुक्तम् । अन्नकरणत्वाविशेषात्सर्वेषां होमसाधनत्वे ऽभिहिते
कुत इति प्रश्नभाष्यन्निरभिप्रायमाशङ्क्याह * कुत इति तेनेति * शू-
परामर्शितत्प्रातिपदिकात्परया तृतीयया शूर्पगतस्यैवान्नकरण-
स्य हेतुत्वाभिधानात् कुतो दर्व्यादिप्राप्तिरिति यः सिद्धान्ताभिप्रायः
दि च हेतुरित्यत्र सूत्रे वक्ष्यते स एवात्र प्रश्ने ज्ञेय इत्यर्थः । अभि-
ायान्तरमाह * अथ वेति * अभिप्रायद्वयनिराकरणार्थत्वेन सौत्रा-
वत्त्वपदव्याख्यानार्थं तस्यापीति भाष्यं व्याचष्टे * इतरस्त्वाहेति *
तीयोपात्तस्य करणत्वस्य हिशब्दोपात्तहेतुत्वविधावुद्देश्यत्वात्प्रा-
तिपदिकान्वयलाभेन सूर्प्यगतत्वेन विशेष्टुमशक्यत्वात् अन्नकरणमा-
स्य हेतुत्वाद्दर्व्यादिप्राप्तिसिद्धिरित्याद्यभिप्रायार्थः । करणत्वं चार्थ-
त्वशब्देनाभिप्रेतं द्वितीये रूपयोगित्वं[1] दर्व्यादेः पाकाद्यपेक्षया वि-
कर्षे ऽपि यदन्नक्रियायामुपयोगित्वं तदेवात्यन्तविप्रकृष्टलाङ्गला-
पेक्षया साधकतमत्वेन विवक्ष्यतइत्यर्थः । शक्यते चेति भाष्यं सौ-
पपत्तिशब्दव्याख्यानार्थतया व्याचष्टे * शक्यते चेति * पौनरु-
क्त्यमाशङ्कते * पूर्वेण त्विति * परिहरति * तेनेति । कर्त्तुमिति *
रोतिना अन्नक्रियाविषयाविवक्षा लक्ष्यते तेनान्नं क्रियतइति विवक्षि-
शक्यतइत्यर्थः वेदे वक्तृभावाद्विवक्षानुपपत्तेर्व्याचिख्यासात्र
वक्षाशब्देनाभिप्रेता । एतदेव व्याचष्टे * यदेव हीति * एवंचार्थ-
वपदोक्तोपयोगित्वे सत्यपि साधकतमत्वाभावात्करणत्वानुपप-
ाशङ्कानिराकरणार्थत्वेनोपपत्तिपदस्य पौनरुक्त्यं परिहृतम् । पदा-
त्वशब्देन करणत्वनिर्देशालम्बनत्वमुक्तम् । उपपत्तिशब्देन तु क्रि-
इति वर्त्तमानान्नक्रियत्वनिर्देशालम्बनमिति स्पष्टमेवापौनरुक्त्य-
याह * अथ वेति * होमं प्रति साधनत्वानुपपत्तिमाशङ्क्यासौ-
ोपपत्तिशब्देनोपपत्तिं भाष्यकृद्वदति * शक्यते चेति * ग्रन्थेने-
ैः । तत्र शक्यइत्यनेन करोतेः शक्तिलक्षणार्थत्वमुक्तम् । लटो
भूतभविष्यत्काललक्षणार्थत्वं चशब्देन सूचितम् । एतद्धीति
र्यं साध्याहारं व्याचष्टे * तत्रेति * कथं चाकारि करिष्यते
भिधीयतइति अत्राप्यध्याहार्य्यं न हीत्युत्तरभाष्यं व्याचष्टे *
मानेति * वर्त्तमानान्नक्रियस्य होमसाधनत्वासम्भवात्करोतिना

१ रूपयोगित्वमिति २ पु० ना०
१ यदार्थवत्त्वप्रहणेनेति २ पु० पा०

घा शक्तिर्लक्ष्यते लटो वा भूतभविष्यत्कालत्वमित्यर्थः । भाष्य
यस्मान्न वर्त्तमानान्नक्रियाकालः कश्चिद्धोमसाधनमस्ति तस्माल्लक्ष
क्षयणमिति योज्यम् । एतदेवोत्तरभाष्यमेकग्रन्थत्वेन व्याचष्टे *
इति * लक्षणापत्तेरुभयपक्षसाम्येनादोषत्वप्रतिपादनार्थस्य
स्तुतिरन्याय्येति चेदिति वक्ष्यमाणसूत्रस्य सर्वपूर्वपक्षोपपत्तिसङ्क
नाय व्याख्यानार्थं यदि चेति भाष्यं व्याचष्टे * यदि चेति *
यावर्त्तमानत्वयोरेकपदोपादानादन्योन्यनिरपेक्षयोश्चानुपपत्त्यभा
दैक्यमङ्गीकृत्योभयोरित्युक्तं वर्त्तमानत्वशब्देन च क्रियावर्त्तमानत्व
भिप्रेतं चोद्यसामान्यमात्रेण दोषत्वानपायात्सूत्रभाष्यापेक्षितपरि
रसाम्यमपि दर्शयति * तेनेति * हेताविति भाष्यं कथन्तर्ह्यपेक्षित
आह * हेताविति * भाष्यकृतान्वर्थवत्वपदस्यैव श्रौतार्थवत्वपरत
व्याख्यातत्वात् सूत्रान्तरव्याख्यानार्थं यदि चेत्यस्मात्प्राक् पठिताभि
दोषः । तदिदानीं व्याचष्टे * स्तुताविति * न ह्यन्नकरणत्वाविशे
दर्व्यादिवच्छूर्प्पस्य प्राप्तिः शूर्प्पेण जुहोतीत्यनर्थकं स्यादत आह *
र्प्पेणेति * भाष्यकृद्व्याख्याने हेतुत्वप्रतिज्ञायां हेत्वनभिधानाद
थत्त्वोपपत्तिहेत्वोश्च साध्यानभिधानात्सूत्रस्य न्यूनत्वापत्तेः । स्वयं व्य
ख्यानान्तरमाह * इत्थं वेति * विधिर्वा स्यादपूर्वादितिपूर्वाधि
रणपूर्वपक्षहेतोरत्राप्यनुषङ्गेण पूर्वपक्षप्रतिज्ञायां हेत्वपेक्षापूरण
स्याच्छब्देन चान्वयवाक्यकल्पनया हेतुत्वायोगशङ्कापरिहारं मत्व
न्वयव्याक्यस्य दर्व्यादिप्राप्तिफलत्वोपपादनार्थत्वेनार्थवत्त्वोपपत्त्यं
साध्यकाङ्क्षापूरणात्सूत्रस्यान्यूनत्वं भाष्यकृतो ऽभिप्रेतम् ।

स्तुतिस्तु शब्दपर्वत्वादचोदना च तस्य ॥ २७ ॥

अत्र भाष्यकृता ऽन्नकरणताया हेतुत्वस्य प्रमाणान्तरानवसे
यत्वेन शब्दैकसमधिगम्यत्वाच्छब्देन च शूर्प्पेण होमकर्त्तव्ये ऽन्नकर
णत्वस्य हेतुत्वाभिधानात्तस्य च शूर्प्पेण जुहोतीति विधिसिद्धत्वे
हेत्वनपेक्षतया स्तुतिमात्रार्थत्वावगतेः शूर्प्पस्यैव शब्दविहितत्वात्तद
वरुद्धे होमे दर्व्यादेरचोदनेत्येवं सूत्रं व्याख्यातं तद्विवृणोति * शू
र्प्पेणेति * विरोधसिद्ध्यर्थं द्वारैक्यप्रदर्शनार्थं करणग्रहणं समर्थ
पदविधिरिति पदमात्रविधौ सामर्थ्यापेक्षास्मरणाच्छूर्प्पस्य दर्व्यादि
सापेक्षत्वे शूर्प्पप्रातिपदिकस्य विभक्त्यनन्वयप्रसङ्गान्निरपेक्षत्वं विभ
क्तिग्रहणेनोक्तम् । समुच्चयनिरासार्थं चैतद् द्वयम् । श्रुतिग्रहणं
बलीयस्त्वाद् बाधविकल्पनिराकरणायोक्तम् । न केवलं विभक्त्य-

१ द्वारैक्ये सतिविरोधः विरोधे सति करणयोः समुच्चयासम्भवः ।

न्वयान्यथानुपपत्त्या शूर्पस्य दर्व्याद्यनपेक्षत्वं स्यात्किं त्वसामर्थ्याद-
पीत्याह * होमश्चेति * ननु हेत्वपदेशान्यथानुपपत्त्यान्वयविधा-
यिश्रुत्यनुमानावश्यंभावाद् बलाबलविशेषे ऽपि मुख्यानुकल्पव्यवस्थ-
या विरोधपरिहारो भविष्यतीत्यत आह * अनुत्थितायामिति *
अत्रैवाचोदना च तस्येति सूत्रावयवं योजयति * तेनेति * हेत्वप-
देशान्यथा ऽनुपपत्तिनिराकरणार्थतया स्तुतिग्रहणं व्याचष्टे * हेत्व-
पदेशश्चेति * आद्यं पूर्वपक्षं निरस्यति * शूर्पश्रुतिश्चेति * किमा-
लम्बनस्तर्हि हेतुनिर्देशो ऽत आह * तस्मादिति * वक्ष्यमाणपक्षा-
पेक्षया यद्वाशब्दस्तेन विध्युद्देशेनानन्तरमाकाङ्क्षितमर्थेन विधिसा-
मर्थ्येनोपप्लुतं हेत्वपेक्षं यत्प्राशस्त्यं तस्य हेतुरिति विग्रहः । न के-
वलं हेतुपरत्वासम्भवात् प्राशस्त्यपरत्वं किं त्वश्रुतान्वयवाक्यक-
ल्पनानापादकत्वादपीत्याह * कल्पनेति * एतदेव सूत्रमन्नस्वरू-
पस्य होमसाधनतया कल्प्येन शब्देन चोद्यमानतयेष्टत्वाद्दर्व्यादेरकर-
णत्वादचोदनेत्यन्त्यप्रतीकेनावतात्पर्या ऽन्यथा व्याचष्टे * अचोदना
चेति * भाष्यमप्यस्यां व्याख्यायामेवं योज्यं शब्दश्चान्नकरणहेतुरि-
त्याह * तच्च शूर्पहोमेति * शूर्पेण जुहोतीत्येतद्वाक्यविधेयाङ्गी-
क्रियमाणे ऽस्य स्तुत्यर्थत्वात्प्रमाणान्तरानुसारेण गौणत्वाद्युज्यते द-
र्व्यादिहोमे ऽनुकल्पेन वाक्येन विधये ऽङ्गीक्रियमाणे तस्य करणत्वा-
भावान्न युज्यतइति । व्याख्यानान्तरस्य प्रयोजनमाह *एवं चेति*

व्यर्थे स्तुतिरन्याय्येति चेत् ॥ २८ ॥

एतत्सूत्रार्थस्य पूर्वमुक्तत्वादनुभाष्यतार्थतयैतत्सूत्रमिति पुन-
र्वैदुक्तमिति वदता भाष्यकृता व्याख्यातं तद्व्याचष्टे *यत्पुनरिति*

अर्थस्तु विधिशेषत्वाद्यथा लोके ॥२९॥

अर्थशब्दव्याख्यानार्थमस्मत्पक्षइति भाष्यं व्याचष्टे* अस्मत्प
क्षइति * विधिशेषत्वादितिसूत्रावयवव्याख्यानार्थं वाक्येति भाष्य
व्याचष्टे * वाक्येति * सत्यपि विधिशेषत्वे कथमर्थसत्तेत्याशङ्का
निराकरणार्थं सम्वादश्चेति भाष्यं व्याचष्टे * तदा चेति * वर्त्तमा
नान्नक्रियत्वाभिधानोपपादनार्थं तदा चेति भाष्यं व्याचष्टे * अने
नेति * करोतेरपि शक्तिलक्षणार्थत्वमनेन भाष्येण वर्त्तमानमिती
तिकरणेन अक्रियं वा स्तोतुं सत् क्रियामित्युपदिशन्तीत्यपि सूचना
दर्शितं भवतीति व्याख्यातुमाह * अथ चेति * अनेन चैवं भाष
व्याख्यातं कृतं करिष्यमाणं वा स्तोतुं क्रियतइति वर्त्तमानशक्तिः

या स्तोतुं क्रियतइत्युपदिशतीति । अर्थस्तु विधिशेषत्वादित्यर
तिरेकप्रदर्शनार्थं त्वत्पक्षइति भाष्यं व्याचष्टे * तव त्विति *
मानशब्देन क्रियामप्युपलक्षयेति दोषापादनार्थं विधौ हीति
प्रश्नपूर्वकं व्याचष्टे * किं कारणमिति * परशब्दार्थः प्रतीय
नेन वाच्यतया प्रतीतिरुक्तेति कथं चिद् भ्रान्तिः स्यात्तच्च जह
र्थतापत्तेरयुक्तमिति प्रयोजनपदप्रक्षेपेणोक्तार्थं योजयति *प्रती
प्रयोजनपदप्रक्षेपे कारणमाह * परेति * न तु वाच्यं इति
कस्य शब्दस्यार्थे कः शब्दोऽत्र कल्प्यतइत्यपेक्षायामाह *तदि
भूतवाचिनोऽकारीति लुङो भविष्यद्वाचिनो वा करिष्यतइति
र्थे वर्त्तमानवाची शब्दः क्रियते इति लट् प्रत्ययः कल्पनीयः
वर्त्तमानभावाचिनो वा शक्यत इति शक्नोति स्वार्थे क्रियावाची
क्रियत इति करोति धातुः कल्पनीय इत्यर्थः । न चेति भाष्यं श
बंकं व्याचष्टे * अथेति * सक्रियमित्यप्यत्र द्रष्टव्यम् । अश
र्थस्यमेव दर्शयति * न हीति * तव तु विधिवादित्वादित्य
द्वितीयपूर्वपक्षदूषणमुक्तं तदुपसंहरति * तस्मादिति । उभयथं
त्वाक्षणिकत्वे मुख्यत्वे च विधिवादिनः क्रियत इति विप्रतिपत्तिः
त्यर्थः । दृष्टान्तव्याख्यानार्थमस्मत्पक्षइति भाष्यं व्याचष्टे* अस्म
त्यादि * सत्यप्यन्यस्मिन्प्रकृष्टबले देवदत्तस्यापि बलसद्भावा
गौणतेत्याशङ्क्य भूम्न्यतिशायने वे युक्तम् * स्मरन्ति हि *

संयोगेऽस्तिविवक्षायां नित्ययोगेऽतिशायने ।
भूमनिन्दाप्रशंसासु भवन्ति मतुबादयः ॥

इति इह च यज्ञदत्तादीन्प्रसहतइति वाक्यशेषाद् भू
तिशायने चेति ज्ञायते दृष्टान्तदार्ष्टान्तिकयोरापेक्षिकातिश
द्भावान्मुख्यत्वं शङ्कते * नन्वेवमिति * नानेन भाष्येण
कृष्टमात्रापेक्षया प्रयोगे गौणत्वमुक्तं किं तु सर्वापेक्षयोगे
कृष्टमात्रापेक्षया प्रयोगविषयस्य मुख्यस्यातिशयस्योपचारश्च
स्यात्म इति परिहरति * सत्यमिति * मुख्यत्वं चात्र सम
भावेनोच्यते न प्रकृतोपयोगितया परशब्दार्थग्रहणमित्युपक्रमात्
र्त्तमानक्रियत्वस्य गौणत्वे देवदत्तः पचति योऽधुना भुङ्क्ते
दृष्टान्तो दातव्यः विधिपक्षे ऽपि तर्ह्यापेक्षिकं मुख्यमेव साधक
भविष्यतीत्याशङ्क्याह * भवतस्त्विति * वर्त्तमानक्रियत्वस
त्ययोर्दृष्टान्तत्वेनात्रोपादानं यथा वर्त्तमानक्रियत्वोपादानवत्स्व
स्साधकतमत्वस्य क्रियां प्रत्युपादानात्तस्य च यथा वर्त्तमान
त्वस्य गौणत्वे निमित्तं नास्ति तथा साधकतमस्य न्यूनापेक्षायां

मित्ते नास्तीत्यर्थः ।

यदि च हेतुरवतिष्ठेत निर्देशात्सामान्यादिति चेदव्यवस्था विधीनां स्यात् ॥ ३० ॥

यद्यपि च भवेदित्यनुज्ञादर्शनाद्विधिपक्षो ऽपि सम्मत इति कस्य चिद् भ्रान्तिः स्यात्तन्निवृत्त्यर्थमाह * अभ्युपेत्येति * अस्य च प्रयोजनं चतुर्गृहीतान्याज्यानि भवन्ति न ह्यत्रानुयाजानिति बहुवचनात्सर्वानुयाजाभावस्य हेतुत्वावगतेरवभृथे बर्हिरनुयाजमात्राभावे ऽतिप्रसङ्गनिवृत्तिः तद्भाष्यं व्याचष्टे * यद्यपीति * अत्यन्तसाधकतमत्वाभावे ऽप्यापेक्षिकसाधकतमत्वप्रदर्शनाय भाष्ये दर्विपिठरप्रकाराणामित्युक्तं निर्देशादित्येतत्सूत्रावयवव्याख्यानार्थं शब्दादित्यादिभाष्यं व्यवस्थाहेतुप्रश्नपूर्वकं व्याचष्टे * कुत इति * सत्यपि हेतोः शब्दोक्तत्वे कथं व्यवस्थेत्याशङ्क्य शब्दश्चेति भाष्येण शूर्पगतस्यैवान्नकरणत्वस्य हेतुत्वाभिधानादिति परिहृतं तदुपपादयितुमाह * सो ऽपि चेति * शूर्पगतस्यैवान्नकरणत्वस्य हेतुत्वं शब्देनोक्तम् । इत्येतदेव कथमवगम्यत इत्याशङ्क्य तद्धि निर्दिश्यतइत्यादिभाष्यकृतोक्तं तस्याभिप्रायमाह * शूर्पे चेति * अनेन च निर्दिश्यतइति प्रतिज्ञाभिप्रायं व्याख्यातम् । प्रकृतशूर्पनिर्देशकसर्वनामपरया तृतीयया तद्गतस्यैवान्नकरणत्वस्याभिधानात्तस्यैवं हिशब्देन हेतुत्वमुच्यते इत्येवं च तद्भाष्यं व्याख्येयमिति दर्शयितुमाह * सन्निधेश्चेति * एकपदोपादानलक्षणा श्रुतिः सन्निधिशब्देनाभिप्रेता । ननु लोके व्याप्त्यविरोधेन सामान्यरूपस्यैव धूमादेर्हेतुत्वावगमात्तदृष्टान्तेनात्रापि तथात्वापत्तेः साध्यधर्मिणा विशेषणमयुक्तमित्याशङ्क्याह *लोके ऽपि चेति* वेदे तु हेत्वन्यथानुपपत्तिकल्प्यस्य दृष्टान्तवाक्यस्य सामान्यव्याप्तिविषयत्वायोगान्न तदनुरोधेन हेतोः सामान्यरूपतापत्तिरित्याह * वेदेति * कीदृशं तर्हि अत्र दृष्टान्तवाक्यं कल्प्यते इत्यत आह *तस्मादिति* शूर्पत्वैकार्थसमवायिनो ऽन्नकरणत्वस्यैव हेतुत्वविधायकविधिवचनद्वारान्नकरणत्वावान्तरसामान्योपलक्षणार्थं शूर्पग्रहणं विशेषदृष्टसंज्ञकं चैतदनुमानं लोके ऽपि प्रसिद्धमित्याह * तदेतदिति * शब्दे ऽपि ज्ञाने गमेर्डोरिति गोशब्दव्युत्पत्तिनिमित्तत्वेनोपात्तस्य गमनस्य प्रतिपाद्येन सास्नादिमता विशेषणदर्शनात्तदृष्टान्तेनेहापि व्यवस्थासिद्धिरित्याह * यथा चेति * नन्वेवं तर्हि शूर्पेण जुहोतीत्येतावतैव सिद्धेर्हेत्वभिधानानर्थक्यं स्यादत

आह * तत्रेति । यथेति * दृष्टान्तभाष्यं व्याचष्टे * यथेति *
संहरति * तस्मादिति * प्रत्ययश्रुतिबलेन पदश्रुतिबाधात्सा
मात्रस्य हेतुत्वाभिधानाय सामान्यादिति चेदिति सूत्रावयवव्य
नार्थमथेति भाष्यं व्याचष्टे * यदि पुनरिति * आनर्थक्याप
त्ययश्रुतिबाधायामव्यवस्था विधीनां स्यादिति सूत्रावयवव्याख्या
म्मव्यवस्थेति भाष्यं व्याचष्टे * तत इति * हेत्वनभिधानेऽपि
शब्दानर्थक्यापत्तिशङ्कानिराकरणार्थम्मस्मत्पक्षे पुनरिति भाष्यं
त्वान्न व्याख्यातं तस्मादित्युपसंहारभाष्यम्मसमर्थशूर्पव्यावृत्त
त्वभिधानोपपत्तेरयुक्तमाशङ्क्य व्याचष्टे * तस्मादिति * अ
वादमात्रमेतत् वस्तुगत्या शूर्पत्यापि मुख्यान्नकरणत्वाभावा
च्च लक्षणायोगाद्धेतुत्वानुपपत्तिरितिभावः ।

तदर्थशास्त्रवाक्यनियमबुद्धशास्त्राविद्यमानव-
चनाचेतनार्थबन्धनार्थविप्रतिषेधस्वाध्यायवद-
वचनाविज्ञेयानित्यसंयोगान्मन्त्रानर्थक्यम् ॥ ३१ ॥

अन्यथान्तरेष्वदर्श्यैकं सूत्रं तत्सिद्धिसूत्रवत् व्याख्यायै
ऽपाठि भाष्यकारादिभिस्त्विदं किमर्थवन्तो मन्त्रा उतानर्थका इति
न्तरकारोपन्यस्तसन्देहत्यागेन भाष्यकारीयस्य सन्देहान्तरोपन्य
कारणं परोपन्यस्तसन्देहस्य दुष्टत्वं वक्तुमुपन्यासं तावत् व
* इहेति * मन्त्रानर्थक्यमित्यानर्थक्यश्रवणं भ्रान्तिकारणमु
षयति * तत्त्विति * समुद्रो वा महासत्वइतिवदिवार्थे वा
श्लोकं व्याचष्टे * सर्वत्र हीति * उत्तरानानुगुण्यादप्यनार्थक
र्थपक्षो न युक्त इत्याह * न चेति * अविशिष्टस्तु वाक्या
सिद्धान्तसूत्रेणाप्यर्थवत्त्वं सिद्धवद्वक्ष्यते तच्चार्थाभिधानानाद
पक्षीकृते तन्निराकरणे च उभयपक्षसम्प्रतिपन्नं हेतुत्वेन वक्तुं
ते आनर्थक्ये तु पूर्वपक्षीकृते अर्थवत्त्वमुत्तरं परं प्रति साध्यं स्य
प्रतिज्ञामात्रेण साधयितुं शक्यमित्यर्थः । प्रतिज्ञामात्रेण साध्य
रमेषामिति विग्रहः अतः पूर्वपक्षासम्भवेन परोपन्यस्तसन्देह
क्तत्वात्तत्परित्यागेनान्यथोपन्यासो भाष्यकारस्येत्याह *तस्मा
वचनमर्थाभिधानं तत्किं कर्मकाले मन्त्रविधिना परिगृहीतम
र्थः । एतदेवोत्तरभाष्येण विवृतं सतो ऽर्थस्याविवक्षाकारणम
न्निहापि विचारे पूर्वपक्षासम्भवमाशङ्कते * नन्विति *
त्र्प्यर्थस्योच्चारणेदमर्थ्याभावेनाविवक्षाया दर्शनात्पूर्वपक्षसम्भ

आह * नैष इति * ननूच्चारणस्यार्थपरत्वाभावे ऽर्थो ऽनभिधेय एव स्यादित्याशङ्क्य नान्तरीयकत्वेनार्थाभिधानमुपपादयति * उच्चारणेति * उच्चारणनान्तरीयकत्वं यदेकस्मादपूर्वं तदेतरत्तदर्थमित्यनेन न्यायेन दृष्टान्ततयोक्तं भाष्यकारीयसन्देहसमर्थनमुपसंहरति * इत्यस्तीति * भाष्यकृता ऽस्य विचारस्य प्रयोजनद्वारेण प्रमाणलक्षणासङ्गतिन्दर्शयितुं यद्युच्चारणमात्रेणेत्यादिना विचारप्रयोजनमुक्तं तदाक्षिपति * कः पुनरिति * विचारस्वरूपवत्प्रयोजनस्यापि शेषलक्षणासङ्गतत्वान्नास्य विचारस्य प्रमाणलक्षणसङ्गतिरित्यर्थः। समाधत्ते * पूर्वमेवेति * आम्नायसूत्रोक्तमक्रियार्थत्वेनाप्रामाण्यमेव मन्त्रेष्वपि यथापूर्वपक्षस्तथापूर्वमेवार्थवादाधिकरणोपक्रमएव यानि त्वतिरिक्तान्यर्थवादमन्त्रनामधेयानुपात्तानि सो ऽरोदीदिषेत्वोर्जेत्वोद्भिदेत्येवमादीनीत्यादिनोक्तमित्यर्थः। अनेनोच्चारणमात्रेणोपकारकत्वे बर्हिर्लवने बर्हिर्देवसदनं दामीतिमन्त्रस्याप्रामाण्यमभिधानेनोपकारकत्वे सामर्थ्यालोचनेन प्रामाण्यमिति प्रामाण्याप्रामाण्यप्रयोजनत्वेन लक्षणसङ्गतिर्भाष्यकृता दर्शिता धर्मप्रमाणभूतविध्येकवाक्यत्वेनार्थवादप्रामाण्ये ऽभिहिते तदभावान्मन्त्राणामप्रामाण्यमित्यर्थवादप्रामाण्यहेतुप्रत्युदाहरणरूपेण पूर्वपक्षवादिनः प्रत्यवस्थानादर्थवादविचारसङ्गतिरथेदानीमिति वदता भाष्यकृतोक्ता को ऽर्थवादः को वा नेति कोष्ठशाधनेनाधिकरणद्वयस्यार्थवादाधिकरणशेषत्वादव्यवधायकत्वमिदानीं शब्देनोक्तं प्रकरणान्तरत्वेनानन्तराधिकरणसङ्गत्यभावो न दोषः। ननु यद्यक्रियार्थत्वेनाप्रामाण्यमत्र पूर्वपक्षस्ततो नोच्चारणं पूर्वपक्षे ऽङ्गीकार्यम्। अर्थानभिधाने ऽपि कर्मकालोच्चारणस्यापि प्रयाजादिवदारादुपकारकत्वेन क्रियार्थत्वोपपत्तेरित्याशङ्क्याह * तदुत्तरेणैवेति * तस्याक्रियार्थत्वेनाप्रामाण्यस्य यदुत्तरं तुल्यसाम्प्रदायिकत्वं चकाराद्ध्ययनविधिदृष्टार्थत्वं च तेनैव मन्त्रेष्वक्रियार्थत्वशङ्कानिवृत्तेर्न पुनराक्रियार्थत्वमभिहितमित्यर्थः नैराकाङ्क्ष्यमुपपादयति * एवं हीति * क्रिया तत्संबन्धानभिधायिनां तत्कालाप्रयोज्यानामपि चार्थवादानां यत्र क्रिया संबन्धापादनं तत्र मन्त्रेषु क्रियाकालप्रयोज्येषु तत्संबन्धे कः सन्देह इत्यर्थ अतो ऽक्रियार्थत्वस्यात्र शङ्कितुमशक्यत्वात्किमुच्चारणमात्रेण क्रियार्थत्वमभिधानेन वेति तद्विशेषविचारो भाष्यकारीयो युक्त इत्याह * तस्मादिति * नन्वेवमपि लिङ्गादिवद्विधायकत्वेनार्थवादवद्स्तावकत्वेन क्रियार्थत्वसम्भवात्किमित्युच्चारणेनाक्रियार्थत्वाङ्गीकरणमित्याशङ्क्याह * तत्रेति * स्वयमेव भाष्यकारो ऽपि वा प्रयोग

सामर्थ्यान्मन्त्रो ऽभिधानवाची स्यादित्यत्र निराकरिष्यतीत्यर्थः । म मन्त्रत्वाविशेषात्साम्नायमपीहोदाहरणत्वप्रतीतेस्तेषां चावाचकत्व दर्थपरत्वानुपपत्तेरव्यापकः सिद्धान्तः स्यादत आह * साममु ति ति * अर्थपरत्वाक्षराभिव्यक्तिपरत्वे साम्नामपि तद्द्वारार्थपरत्व सम्भवात् किं तेषामात्मप्रयोगमात्रपरत्वमुताक्षरव्यक्तिपरत्वमित्ये तद्विषयः सन्देहो भाष्यकृतोक्त इत्यर्थः । नन्वेवमपि श्रुत्यसंयुक्तान बर्हिर्देवसदनं दामीत्यादीनामर्थपरत्वाभावे लैङ्गिकविनियोगासम्भ वेन कर्मकालोच्चारणे प्रमाणाभावादव्यापकः पूर्वपक्षः स्यादि शङ्कते * कथं पुनरिति * परमतेन परिहरति * के चिदिति का तर्हि सन्देहविवरणभाष्यस्य गतिरत आह * अत इति * अत नैवैतद्ग्रसेत्यन्वयः । प्रयोजनभाष्यमपि गमयति * यद्पीति * एवं त्वानर्थक्यापत्तेस्तस्य च सामान्योपयोगाभिधानेन प्रागेव निरा कृतत्वाद्भाष्यानार्जवापत्तेश्चापरितोषान्मतान्तरमाह * अथ वेति दर्शनं सम्प्रदायः समाचारः प्रसिद्धिरित्यनर्थान्तरं, ननु प्रसिद्धे स्मृतिरूपत्वेन निर्मूलायाः प्रामाण्यायोगात्सदसन्मूलत्वेन तामवि चार्य सिद्धवद्विशेषविचारो न युक्त इति शङ्कते * किमर्थमिति स्मृत्यधिकरणवक्ष्यमाणप्रामाण्यायाः सदाचाररूपायाः याज्ञिकप्र सिद्धेरसन्मूलत्वाशङ्का न युक्तेति परिहरति * तत्रेति * स्मृतिन्या येन शिष्टत्रैवर्णिकदृढपरिग्रहेणैषां मन्त्राणां प्रयोगित्वं दृढमवस्थित तस्य चानेन विचारेण मूलविशेषनिरूपणमित्यर्थः । याज्ञिकप्रसि द्धिबलेन कर्म्मकाले मन्त्रोच्चारणाभ्युपगमे पूर्वपक्षे ऽपि बर्हिर्लव नादावेव बर्हिर्देवेत्यादीनामुच्चारणापत्तेर्न नियोगतो बर्हिर्देवसदनं दामीत्येष बर्हिषां लवने विनियुज्यतेति भाष्यमयुक्तं स्यादित्यपरितो षात्स्वमतेनार्थपरत्वाभावे ऽपि कर्मकाले मन्त्रोच्चारणमुपपादयन्पूर्व पक्षमारभते * अथ वेति * नन्वदृष्टार्थत्वेनाप्यध्ययनविधिविहित स्याध्ययनस्य पुरुषार्थानुबन्धित्वोपपत्तेः कथं कर्म्मकाले मन्त्रोच्चार णाध्यवसानमत आह * तथा हीति * प्राकृताङ्गनिराकाङ्क्षाया विकृतेरुभयाकाङ्क्षालक्षणप्रकरणायोगात्तद्विषयं क्रमग्रहणं सर्वा ङ्गसाधारणनामस्य न्यायस्य दर्शयितुं यावच्छब्दः अङ्गत्वप्रतिपत्त्यु त्तरकालीनः फलेनोपकारत्वेन स्वीकारो ऽभिहितः । ननु श्रुत्ययु क्तानां मन्त्राणां क्रमप्रकरणपठितानां विध्यभावेन कैमर्थ्यमपेक्ष णादध्ययनविधौ च कर्मासन्निधानाद्विश्वजिन्न्यायेन स्वर्गार्थत्वाव सायात् गोदोहनादिवत्क्रमप्रकरणसंस्पर्शे ऽप्यङ्गत्वेन स्वीकारो न युक्त इत्याशङ्क्याह * मन्त्रेति * स्वीक्रियतइत्यनुषङ्गः वि-

र्थवादाध्ययनवदस्याप्यवैरूप्याय दृष्टार्थत्वाध्यवसानात्कर्मका-
लोच्चारणमात्रार्थत्वे ऽपि तदनपायात्साकाङ्क्षत्वेन क्रमि-
प्रकरणिभ्यां स्वीकारो युक्त इति भावः। ननु मन्त्रस्व-
रूपवत्प्रयाजादिवाक्यस्य स्वरूपस्यापि क्रमप्रकरणसंस्पर्शात्कर्मका-
लोच्चारणापत्तिरत आह * तत्रेति * कर्माङ्गभूतार्थाभिधानेन नैरा-
काङ्क्ष्यान्न तत्स्वरूपस्य क्रमप्रकरणसंस्पर्शे ऽप्यङ्गत्वेन स्वीकार इति
भावः। मन्त्राणां तु प्रयाजादिवाक्यवत्कर्माङ्गभूतार्थानभिधायक-
त्वात्प्रधानवाक्यवच्च कर्मविधायकत्वस्य तच्छेषवद्वा स्तावकत्वस्य
च द्वितीये निराकरिष्यमाणत्वात् अनुतिष्ठासितार्थस्मृतेश्च ध्याना-
दिना सिद्धेः साकाङ्क्षत्वेन क्रमप्रकरणाभ्यां स्वरूपस्यैवाङ्गत्वाव-
सायाद्ग्रहणमित्याह * मन्त्राः पुनरिति * एवं तावन्मन्त्रस्वरूपस्य
क्रमप्रकरणाभ्यामङ्गत्वावसायात्तस्य च निर्व्यापारस्याङ्गत्वायोगाद-
वश्यकल्पोच्चारणव्यापाराङ्गीकरणात्कर्मकालोच्चारणसिद्धिस्ताव-
न्मन्त्रे पर्यवसानं चोक्तम्। इदानीमध्ययनविधिनापि क्रमप्रकरण-
पाठार्थवत्त्वाय कर्माङ्गत्वमाक्षिपतोच्चारणं विना तदयोगात्कर्मका-
लोच्चारणमात्रं कल्प्यते। तावन्मात्रत्वेन ग्रहणसंस्कार्यत्वोपपत्ते-
र्नार्थाभिधानपर्यन्तत्वं कल्पयितुं शक्यमित्याह * स्वाध्यायेति *
प्रयाजादिवाक्यानां तु कर्माङ्गभूतपदार्थविधानार्थत्वात्तस्य च शा-
स्त्रार्थावधारणकालीनत्वेन कर्मकालोच्चारणानपेक्षत्वाददृष्टार्थोच्चार-
णकल्पनं न युक्तमित्याह * प्रयाजादीति * रूपग्रहणमेव प्रसक्त-
मित्यापातप्रतिभानमात्रेणोक्तं मन्त्राणां तु कर्मकालोच्चारणनिर-
पेक्षार्थानभिधायकत्वादवश्यम्भाविकर्मकालोच्चारणमित्याह * न
त्विहेति * ननु कर्मकालप्रयोज्यानां मन्त्राणामर्थाभिधानार्थता प्रती-
यमाना नापह्नोतुं शक्येत्याशङ्क्याह * शब्दे चेति * ध्यानादिनाप्य-
नुतिष्ठासितार्थस्मृतिसिद्धेरभिधानार्थत्वे कल्पनापत्त्यविशेषादुच्चा-
रणाभिधानयोः किं विवक्षितमिति सन्देहप्राथम्यावश्यकत्वाभ्यामु-
च्चारणविवक्षैव न्याय्येति भावः। पूर्वपक्षमुपसंहरति * तस्मा-
दिति * ननु भाष्यकृता तदेतदवगच्छाम उच्चारणमात्रेणोपकुर्व-
न्तीति पूर्वपक्षं प्रतिज्ञाय कुत इति प्रश्नपूर्वकं तदर्थशास्त्रादीनि का-
रणानि उक्तानि कस्मात्तत्परित्यागेन प्राथम्यावश्यकत्वादिकारणा-
न्तरं भवतोक्तमत आह * तथा चेति * पूर्वोक्तन्यायेनाविवक्षिता-
र्थत्वं सिद्धे तदर्थशास्त्रादीनि सूत्रभाष्यकाराभ्यां करणत्वेनोच्यन्ते
लिङ्गमात्रत्वात्तेषां तस्य च न्यायप्राप्तार्थद्योतकत्वादिति भावः। परि-
हारसूत्रक्रमानुसारात्पश्चादुदाहार्यस्यादावुदाहरणमयुक्तमाशङ्क्य

ह * परिहारेति * यथा साक्षइति भाष्ये साक्षत्वमवास्तवमेव प्र
तीतिमात्रेणोक्तमिति व्याचष्टे * यथेति * नन्वर्थवादार्थमिति भा
ष्यं विधिशेषत्वं विनार्थवादत्वायोगादयुक्तमाशङ्क्य व्याचष्टे * न
न्विति * न हि येनेतिभाष्यमभिमतविपरीतार्थत्वादयुक्तमाशङ्क्य
छित्वा व्याचष्टे * न हीति * न चेति भाष्यं व्याचष्टे * प्रदेशान्त-
रस्थस्य त्विति * तथेत्युदाहरणभाष्यं व्याचष्टे * तथेति * देव-
स्यत्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां गायत्रेण च्छ-
न्दसाददे ऽङ्गिरस्वदभ्रिरसि नारिरसि पृथिव्याः सधस्थादग्निं पुरीष्य-
मङ्गिरस्वदाभर त्रैष्टुभेन च्छन्दसाददे ऽङ्गिरस्वदभ्रिरसि नारिरसि त्व-
या वयं सधस्थे ऽग्निं शकेम खनितुं पुरीष्यं जागतेन त्वा च्छन्दसा ऽऽददे
ऽङ्गिरस्वत् हस्तआधाय सविता बिभ्रदभ्रिं हिरण्ययी तपाज्योतिरजस-
मिदमग्निं स्वान्वीनआभर आनुष्टुभेन त्वा च्छन्दसा ऽददे ऽङ्गिरस्वादित्ये-
षां चतुर्णामपि मन्त्राणामाददइत्यभिधानसामर्थ्यादेवादाने प्राप्तत्वा-
दित्यर्थः । भाष्यकृता चतुः संख्यालक्षणगुणविधानार्थं पुनः श्रवण-
माशङ्क्यान्तरेणापि वचनं तेषु चतुःसंख्येत्युक्तं तदा दानाङ्गतया
चतुःसंख्याविधानाभ्युपगमात्ताद्रूप्येणा चाप्राप्तेरयुक्तमाशङ्क्य व्या-
चष्टे * चतुःसंख्यापीति * अयमाशयः संख्या विधीयमाना योग्य-
त्वात्परिच्छेदकतया विधीयते मन्त्रपरिच्छेदिका चेहासौ प्रतीयते न
क्रिया परिच्छेदिकेति कारणमाह * न हीति * आश्रितवचनो गु-
णशब्दः परिच्छेदार्थश्च गमिः नान्याश्रितो ऽन्यपरिच्छेदको भवती-
त्यर्थः । क्रियाङ्गत्वमपि न सम्भवतीत्याह *न चेति* मन्त्राविधानात्रा-
णैकहायनीन्यायः सम्भवतीति भावः । अतः क्रियाङ्गत्वासम्भवात्
सम्भवतश्च मन्त्रपरिच्छेदकत्वस्य पाठादेव प्राप्तेर्वचनानर्थक्यमित्युप-
हरति * तेनेति * भाष्यकृता लिङ्गाद्विकल्पप्राप्तौ समुच्चयार्थं
वचनमित्याशङ्क्य समुच्चयशब्दस्याभावादित्युक्तं तत्समुच्चयवाचि-
शब्दाद्यभावे ऽप्यरुणैकहायनीवन्मन्त्रसंख्ययोः परस्परनियमात्स-
मुच्चयासिद्धेरयुक्तमाशङ्क्य व्याचष्टे * क्रियेति * ननु विकल्पे म-
न्त्राणां प्रत्येकमेकत्वाच्चतुःशब्दानुपपत्तिः स्यादित्याशङ्क्य पूर्वपक्षे
कल्पाप्रसक्तेर्नैष दोष इत्याह * अस्मत्पक्षे पुनरिति * अश्वा-
भिधान्युदाहरणे भाष्यकृता रशनादाने प्राप्तत्वान्मन्त्रस्य विधानान-
र्थक्यमुक्तं तदादानविधानेनार्थवत्त्वोपपत्तेरयुक्तमाशङ्क्य व्याचष्टे *
द्वयोरिति * नन्विति भाष्येण परिसंख्यार्थत्वमाशङ्कितं तदुभय-
भावेकविधेः परिसंख्याशब्दवाच्यत्वाद् गर्दभरशनायाश्चात्राविधे-
रादयुक्तमाशङ्क्य व्याचष्टे * परिसंख्येति *

प्रवर्त्ते ऽहमिति ज्ञानं येन शब्देन जन्यते ।
स चोदनोच्यते यद्वा प्रवर्त्तनफला मतिः ॥

इति संख्याशब्दव्याख्याया बुद्धेरपि प्रवर्त्तनफलाया विधि-
ाभ्युपगमात्परेश्च वर्जनार्थत्वात् गर्दभरशनां वर्जनीयतया बोधय-
त्युक्तं भवतीति भावः । न शक्नोतीति परिहारभाष्यं व्याख्यातु-
ाह * सापीति * अश्वाभिधानीमादत्त इति वचनव्यक्तौ आदाने
र्दभरशनायाः परिसङ्ख्या इत्यश्वाभिधानीमितिवचनव्यक्तौ मन्त्रे
ान्मन्त्रमर्थादादानमित्यर्थः । ननु परिसङ्ख्यानङ्गीकरणे वाक्यस्य
ा गतिरित्याशङ्क्याप्राप्तविधित्वात्पूर्वपक्षे न दोषः इत्याह * अदृ-
र्थत्वे त्विति * ननु परिसंङ्ख्याया अपि वस्तुतो प्राप्तविधित्वान्न
ष इत्याशङ्क्याह * यदि चेति * अश्वाभिधानीत्येकः शब्द इतीति
ापरः तयोः सम्बन्ध इति द्वन्द्वगर्भः षष्ठीसमासः मन्त्राश्वाभि-
नीसम्बन्धे सति दोषपरिहारः स्यान्न त्वसौ युक्त इति भावः ।
ो प्राप्तविधित्वे ऽप्यादानवच्च मन्त्रविध्यापत्तेस्तस्य चोद्देश्यत्वे-
श्वाभिधान्या विशेष्टुमशक्यत्वालिलङ्गप्राप्त्यवैलक्षण्याद्परिहार्य्य-
नर्थक्यमित्याशङ्क्याह * तेनेति * आदानव्यक्तिभेदे ऽप्यश्वाभिधा-
ा विशेषणायोगादेकेत्युक्तम् । ऐकरूप्ये ऽपि प्रकरणासंयोगभेदे
ण्डापितृयज्ञे बर्हिर्वन्न धर्मान्वयः स्यात् प्रकरणासंयोगाविशेषे ऽपि
भिन्नापूर्वसंयोगे सति आज्यौषधसान्नाय्यवन्न धर्म्मसाङ्कर्य्यं
त् न त्वेतदुभयमप्यस्ति प्रकृताग्न्यपूर्वसंयोगाविशेषादिति प्रकर-
युक्तम् । अतो न प्रमाणमिति भाष्यं यदुच्चारणमात्रेणेत्यनेन
रुक्तमाशङ्क्य तस्योपक्रमगतत्वेन सङ्गत्यर्थत्वावधारणादस्य चोप-
ारगतत्वेन प्रयोजनकथनार्थत्वात्परिहरति * प्रयोजनमिति *
च प्रमाणशब्दप्रयोगान्मन्त्रप्रमेयार्थान्तरसिद्धिरपि पूर्वपक्षे
चेता तथा हि ।

प्रयाजादिस्मृतिलिङ्गत्वमन्त्राणां वक्ष्यते ऽत्र यत् ।
देवताकल्पनं यच्च मान्त्रं तस्माद्यजिश्च यः ॥
मन्त्रवर्णाश्च यद्धोतुः पूर्वपानं वदिष्यते ।
मे देहीत्यात्मवादित्वान्मन्त्राणां याजमानता ॥
करणानामार्त्विजत्वे ऽप्यङ्गसाध्यफलस्य यत् ।
स्वामिगत्वं क्रियार्थस्य कर्तृगत्वं च वक्ष्यते ॥
मन्त्रक्रमानुरोधाच्च ब्राह्मणक्रमबाधनम् ।
छागस्य नियमो यश्च पशावूहश्च मन्त्रगः ॥
तदर्थपरतायां स्यात्सर्वं नैवान्यथा भवेत् ।

सर्वसाधारणत्वेन विचारस्य प्रयोजनम् ॥
कर्मकाले नुसन्धेयो मन्त्रार्थो ऽर्थपरत्वतः ।
इषेत्वादिषु चोच्चार्यं च्छिनदूमीत्यादिपूर्तये ॥
असावित्यादिशब्दस्य स्थाने यज्ञादि नाम च ।
सिद्धान्ते मन्त्रलोपश्च प्रकाश्याभाव इष्यते ॥
यथाम्नानं प्रयोगस्तु केवलो ऽर्थाविवक्षणे ।
यदि त्वर्थपरत्वे ऽपि नैतावत् स्यात्प्रयोजनम् ॥
ततो धर्मप्रमाणत्वं मन्त्राणान्नैव सिद्ध्यति ।
लवनादिस्वरूपस्य प्रकाश्यत्वे हि धर्मता ॥
समीहिताङ्गताभावान्न कथं चित्प्रतीयते ।
अपूर्वसाधनत्वेन यद्यप्येतत्प्रकाश्यते ॥
विधिप्राप्तानुवादत्वान्न तथापि प्रमाणता ।
अपूर्वसाधनत्वाच्च लवनादौ समीहिते ॥
आत्मनो ऽङ्गत्वबोधेन मन्त्रः प्रामाण्यमश्नुते ।
अश्रुतद्रव्ययागादिकल्पनाच्च प्रमाणता ॥
स्फुटैवार्थपरत्वे स्यादिति सर्वमसूसुचन् ॥

नन्वर्थपरत्वाभावे विनियोजकप्रमाणाभावेनानङ्गत्वादप्रयो-
एव स्यात्सद्भावे वा तद्वशात् तद्व्यवस्थापत्तेर्विनियो-
ीकरणाद् बर्हिलवनसम्बन्धापह्नवो न युक्त इत्याशङ्क्याह
तदा हीति * लैङ्गिकविनियोगाभावेनाङ्गसंम्बन्धाभावे
प्राकरणिकप्रधानविनियोगात्तत्प्रयोगाबहिर्भाववर्त्तित्वमात्रव-
यतइति भावः । कीदृशं तर्हि पूर्वपक्षे मन्त्रोच्चारणा-
ानं स्यादित्यपेक्षयामाह * पाठेति * श्रुत्यसंयुक्तमन्त्राभिप्रायं
त् इषेत्वादीनां छेदनादिषु विनियोगेनाङ्गकर्मानादरायोगात्सर्व-
ो ऽप्येवमेव व्याख्येयः । सकृच्छब्देन लवनाद्यावृत्तावप्यनावृ-
त्त्या पठित्वेति च मुखं व्यादाय स्वपितीतिवत्पूर्वकालत्वानादरेण
ानकर्तृकत्वमात्राभिप्रायेणोक्तम् । सिद्धान्तासम्भवे हेतुत्वेन वा-
नियमं व्याख्यातुं नियतेत्यादिभाष्यं व्याचष्टे * अग्निरिति *
ष्षसाधनत्वेनैतमेव हेतुं व्याख्यातुमथेति भाष्यं व्याचष्टे * य-
त्येति * नन्वर्थपत्वे ऽपि नियमादृष्टसिद्ध्यर्थं पदक्रमनियमो
ान्भविष्यत्यत आह * अथेति * प्रत्यायनक्रमनियमस्योच्चार-
मनियमाधीनत्वात्प्राथम्यावश्यकत्वाभ्यां तस्मादेवादृष्टं युक्तमि-
भावः । नन्वित्यादिभाष्येणार्थपरेष्वपि क्रमनियमदर्शनान्न तेना-
वक्षा साधयितुं शक्यतइत्याशङ्क्य विपर्यये ऽर्थप्रत्ययाभावात्

क्रमादर इत्युक्तम् । तदिन्द्राग्निपदे विपर्यये ऽप्यर्थप्रत्ययदर्शनाद्द
क्रमाशङ्कोपलक्षणपरत्वेन व्याचष्टे *यस्त्विति* तुल्यन्यायत्वाद्ध
ष्यानुपन्यस्तप्रकृतिप्रत्ययोपन्यासः । अथशब्दप्रसङ्गं विवृणोति *अज
दीति* इन्द्रशब्दस्याजाद्यदन्तत्वनिमित्तः पूर्वनिपातो ऽजाद्यन्तमिं
स्मर्यते नीलशब्दस्य विशेषणत्वाद्विशेषणं विशेष्येण बहुलमिति पूर्व
निपातः राजशब्दस्य च षष्ठ्यन्तत्वात्षष्ठीति प्रथमानिर्दिष्टं समासउप
सर्जनमित्युपसर्जनं पूर्वमितिपूर्वनिपातः । चित्रशब्दस्य विशेषणत्वा
त्सप्तमीविशेषणे बहुव्रीहाविति पूर्वनिपातः । निःशब्दस्य निरादय
क्रान्ताद्यर्थे पञ्चम्येति प्रथमानिर्दिष्टत्वेनोपसर्जनत्वात्पूर्वनिपातः । आ
दिशब्द उदाहरणान्तरस्यापि घिसंज्ञानिमित्तपूर्वनिपातप्रदर्शनार्थः अ
तो भवति विपर्यये प्रत्येकं पदसाधुत्वे ऽपि समासस्यापशब्दत्वमि·
त्याह * तेनेति * इतिकरणः प्रभृत्यर्थः राजशब्दादेरप्युपसर्जनत्वा-
दिनिमित्तपूर्वनिपातस्मरणात् । नीलोत्पलराजपुरुषचित्रगुशब्दानां
क्रमविपर्यये विशेषणविशेष्यभावान्यथात्वापत्तेरर्थान्यत्वमपि स्यादि-
त्याह * पुरुषेति * इतिकरणप्रकारवचनः निष्कौशाम्बिशब्दस्य
क्रमविपर्यये निष्क्रान्तः कौशाम्ब्या इत्यस्यार्थस्याप्रतीतेरर्थान्तरे च स-
मासास्मरणादसाधुत्वमानर्थक्यं च स्यादित्याह * कौशाम्बिनिरि-
ते * कथं तर्हि क्व चिदग्नीन्द्राविंतिप्रयोगो ऽत आह * यस्त्विति *
ननु प्रकृतिप्रत्ययादिष्वपशब्दत्वापत्तेर्विपर्ययानाश्रयणादत्राप्यमन्त्र-
त्वापत्तेस्तदनाश्रयणं भविष्यतीत्याशङ्कते * नन्विति *अर्थपरत्वाभावे
वयवार्थासम्भवात्समुदायप्रसिद्ध्या विशिष्टक्रमकपदसमहात्मकवा
क्यविशेषस्य मन्त्रत्वावधारणाद्विपर्यये युक्तममन्त्रत्वं सति त्वर्थपरत्वे
ानार्थान्मन्यतेर्मनोतेर्वा गुपूविपतिवचियमिमनितनिसन्दिच्छदि-
यस्त्रन्नित्यौणादिके त्रन् प्रत्यये कृते मन्त्रशब्दव्युत्पत्तेर्विपर्यये ऽप्यर्थज्ञा-
कत्वानपायान्मन्त्रत्वन्न नश्यतीति परिहरति * तदेवेति * एतमेव
रिहारं सूत्रारूढं करोति *तेनेति* येन कारणेनार्थपरत्वे विपर्यये
पेमन्त्रत्वं न हीयते तेन मन्त्रत्वप्रसिद्धौ प्रयोजनभूतायां विशिष्टपद-
मसमूहात्मकं वाक्यनियमादित्यपि सूत्रं योज्यमित्यर्थः । सूत्रैकदेशे
ःमादावर्त्तते सूत्रमितिवत्सूत्रशब्दप्रयोगो ग्रामैकदेशे ग्राम आयात
ते प्रयोगदर्शनात् । यद्वाध्याहारानौचित्यमाशङ्क्य सूत्रत्वाददोष
ने हेतुत्वेनोक्तम् । प्रसङ्गादपरं व्याख्यानत्रयमाह * अथ वेति *
द्रशास्त्रव्याख्यानार्थं बुद्धेः खल्वपीत्यादिभाष्यं अविरुद्धहग्विषयप्रे-
ऽर्थवत्त्वसम्भवादयुक्तमाशङ्क्याह * न हीति * ज्ञाते च वाचनं
ह्यविद्वान्विहितो ऽस्तीति तृतीयाधिकरणवक्ष्यमाणन्यायेनाविदुषो

मानवदार्त्विज्ये ऽप्यनधिकारादित्यर्थः । नन्वित्याशङ्काभाष्यं चष्टे * अथेति एवमिति * परिहारभाष्यं स्मृतिहेतुसंस्कारोत्पादकाभिधानार्थत्वेन दृष्टार्थत्वस्योक्तत्वात्पूर्वपक्षानापत्तेरयुक्तत्वादानभिमतमपि वचनशब्दस्योच्चारणार्थत्वे संस्कारशब्दस्यापूर्वत्वमापाद्यैतदुक्तमिति व्याचष्टे * तदपीति * नन्वपूर्वात्मको संस्कारो ऽर्थाभिधानाद्भविष्यतीति मन्त्रस्य दृष्टार्थत्वानपायात् पूर्वापक्षापत्तिरत आह * यदि हीति * अविद्यमानवचनव्याख्यानार्थं यज्ञ इत्यादिभाष्यं व्याचष्टे * चतुःशृङ्गादीति * ननु गौण्या वृत्त्या चतुश्शृङ्गादिरूपस्य यागादेर्विद्यमानत्वात्कथमविद्यमानत्वमत आह * यद्यपि चेति * तस्य गौणरूपस्यानुष्ठानाभावात्प्रतिपादनमदृष्टार्थं स्यादित्यर्थः। यज्ञप्रकाशने च तस्य विततत्वेन विशेषानवधारणात्पाठक्रमानुरोधेनोच्चारणापत्तेः पूर्वपक्षसिद्धिः स्यादित्याह * न चेति * मामा हिंसीरित्यस्याचेतनवेदिविषयत्वेनाचेतनार्थबन्धनोदाहरणत्वं युक्तं न त्वविद्यमानवचनोदाहरणं हिंसनस्य विद्यमानत्वादीत्याशङ्क्याह * मामेति * प्रसक्त्यभावात्तदपेक्षस्य प्रतिषेधस्याविद्यमानतेत्यर्थः । अचेतनार्थबन्धव्याख्यानार्थमचेतने खल्वपीत्यादिभाष्यमर्थशब्देन संबोधनं प्रेषणं वेत्तामिति प्रतिपादयेयुरिति वदन्नाहेति व्याचष्टे *औषध इति* प्रतिषेधव्याख्यानार्थमर्थैत्यादिभाष्यं व्याचष्टे * द्युत्वामिति * देवतात्वात्तद्विपरीतमेकैकमपि रूपं विप्रतिषिद्धमितिस्वयमव्याचष्टे * कथं वेति * ननु स्तुत्यर्थमविद्यमानस्यापि गुणोपचारेणाभिधानोपपत्तेरेकस्यानेकरूपत्वं देवतायाश्च देवतान्तरमिति हेतुद्वयं परिहरिष्यत्यत आह * न चेति * स्वाध्यायवाच्यानि मन्त्राक्षराणि यथाध्ययनकाले ऽभ्यस्यन्ते नैवमर्थार्थमिति स्वाध्यायवदवचनव्याख्यानार्थं स्वाध्यायकालइत्यादिना ऽभ्यासमात्रेणाविवक्षावगमस्याशक्यत्वादयुक्तमाशङ्क्य व्या- * स्वाध्यायेति * अभिधेयार्थासन्निधिनिमित्ताभिधानानादरस्यानिराकरणार्थं पूर्णिका ऽवहन्ति करोतीति भाष्यकृतोक्तम् । इत्यादिभाष्यमर्थविशेषानभिधायित्वेन मन्त्राणामविज्ञेयत्वप्रतिपादनार्थमम्यक्सात इत्यादिष्विन्द्रस्तुतिरूपवाक्यार्थज्ञानादयुक्तमित्यत आह * के चिदिति * सामान्यतो वाक्यार्थज्ञाने ऽप्यम्यगादिपदार्थाज्ञानात्सकलस्य मन्त्रस्यार्थवत्त्वं न सिद्ध्यतीति भावः । सृण्यादीनां तु वाक्यार्थो ऽपि न ज्ञायतइत्याह * केषां चिदिति * ननु श्रोतुरप्रतिपत्तावपि मन्त्रस्याभिधायकत्वन्न विरुद्ध्यते

अन्धस्येव रूपाप्रतिपत्तावपि प्रदीपस्य प्रकाशकत्वादत आह *
न चेति * यदेकान्तेन कर्तुं शक्यमुच्चारणं तदेव मन्त्राणां कार
मित्यर्थः । क चित्तु यदेकान्तेन कार्यमुच्चारणं तदेव शक्यमिति
पाठः तत्र यदेकान्तेन पक्षद्वये ऽप्यनुष्ठेयमुच्चारणं तदेव मन्त्राण
कार्यमवधार्यते शक्यमिति कृत्वेति योज्यम् । अनित्यसंयोगव्या
ख्यानार्थमनित्यसंयोगः खल्वपीत्यादिभाष्यं कुसीदवृत्त्यादिनित्यार्थ
सम्भवादयुक्तमाशङ्क्याह * अर्थेति * यस्य मन्त्रस्य यो ऽर्थः स्व
रसतः प्रतीयते स एव तेन कर्मकाले प्रकाशनीयो नोत्प्रेक्षामात्रक
ल्पित इत्यर्थः । अतो भवत्यर्थपरत्वे केषु चिन्मन्त्रेष्वनित्यसंयोग
इत्याह * केचिच्चेति * अनित्यस्यार्थस्याकर्माङ्गत्वेन प्रकाशनानर्हत्वा
नित्संयोगस्यार्थाविवक्षाहेतुत्वोपपादनाय कर्माङ्गभूतैरित्युक्तम् । अ
नित्यसंयोगोदाहरणं व्याख्यातुमाह * यथेति * ना शिरं दुह्रे
यन्ति धर्मआनोभर प्रमगन्दस्य वेदो नैचाशाखं मघवन् रन्धयान
इति मन्त्रशेषः ऋषिप्रत्ययाधीनत्वादर्थतश्च निर्णयस्यार्षकथनम् ।
परिहारसामर्थ्यद्योतनार्थं त्रैलोक्यैश्वर्यवचनं किं कृतेनेति वदन्त
इति कीकटशब्दनिर्वचनम् । तप्ते घृते पयोनिक्षेपेण निस्यन्दिते य-
दुच्छिष्टं तद्धर्मशब्देनोच्यते । भृञ्भरणइति भौवादिकस्य भृञो
प्रत्यन्तरेणार्थकथनं व्याख्यानार्थम् । डुभृञ्धारणपोषणयोरिति
जौहोत्यादिकस्य भृञो रूपं बिभृहीति दर्शितं यदीत्यानित्यसंयोगोप-
रिहारभाष्यं व्याचष्टे * यद्येतदिति * नत्वनित्यसंयोगपरिहारायाा-
र्थान्तरमस्य मन्त्रस्य वक्ष्यामो ऽत आह * न चेति * अर्थाविवक्ष-
याप्यनित्यसंयोगपरिहारसम्भवान्नाप्रतीयमानार्थकथनं युक्तमित्या-
शयः । मन्त्रानर्थक्यप्रतिज्ञाव्याख्यानार्थं तदेतैरिति भाष्यं व्याचष्टे
* अत इति *

अविशिष्टस्तु वाक्यार्थः ॥ ४० ॥

सिद्धान्तसूत्रव्याख्यानार्थमविशिष्टस्त्विति भाष्यं प्रतीतिमा-
त्रेण विवक्षानुपपत्तेरयुक्तमाशङ्क्योपपादयति * मन्त्रेति । अयमा-
शयः * मन्त्रोच्चारणस्य कर्म्माङ्गत्वं प्रयाजादिवत्साक्षाद्वाभ्युपग-
म्यते प्रोक्षणादिवद्वा मन्त्रद्वारेण साक्षादप्यङ्गत्वं प्रकरणेन वा
स्वाध्ययनविधिसामर्थ्येन वा न तावत्प्रकरणेन कर्म्मप्रकरणे मन्त्रो-
च्चारणस्याविधानात् स्वाध्यायाध्ययनविधिना यथाम्नानवेदाध्यय-
नविधानात्कर्मप्रकरणपठितानां तत्रैवाध्ययनं विदधता कर्मप्रकरणा-

१ प्रोक्षणादीनामवघातादिद्वारा यथा परम्परया कर्माङ्गता तद्वदिति।

ध्ययननियमार्थवत्त्वाय तदङ्गत्वमाक्षिपतोच्चारणं विनाङ्गत्वायोगा त्कर्मकालोच्चारणविधिकल्पने कृते कैमर्थ्यापेक्षायामुच्चारणस्य क र्माङ्गत्वमाक्षिप्यतइति चेत् न । मन्त्राङ्गत्वनिर्वाहाय कल्पितस्योच्चा रणस्य मन्त्राक्षराभिव्यक्तिमात्रेण निराकाङ्क्षस्य साक्षात्कर्माङ्गत्वा योगात्। नापि मन्त्रद्वारेणोच्चारणस्य कर्माङ्गत्वं मन्त्राक्षराणाम क्रियारूपत्वेन प्रकरणाग्राह्यत्वात् यथोक्तम्।

नावान्तरक्रियायोगादृते वाक्योपकल्पितात्।
गुणाद्रव्ये कथम्भावैर्गृह्णन्ति प्रकृताः क्रियाः ॥

इति अध्ययनविध्याक्षिप्तस्याप्यङ्गत्वस्य स्वव्यापारं विनानुपपत्तेरु च्चारणस्य पुंव्यापारत्वेनाभिधानमन्तरेणानिर्वाहात्। अत एव श्रुतिवि नियुक्तानामपीषेत्वादीनामभिधानं विनाङ्गत्वानुपपत्तिः। न च पदार्था भिधानव्यापारमात्रेणाङ्गत्वं कर्मानुष्ठानानौपयिकत्वेन तस्य वाक्यार्थ मात्रप्रतिपादनमात्रे पर्यवसानात्। अतः प्रकरणावधारिताङ्गभावानां म न्त्राणां कर्मानुष्ठानौपयिकवाक्यार्थप्रतिपादनव्यापारेणाङ्गत्वावसाय त्कर्मकाले मन्त्रोच्चारणार्थस्यार्थाभिधानपर्यवसानासिद्धिरिति कर्म समवेतानुष्ठास्यमानार्थस्मृतिफलत्वेनेति करणामन्त्राभिप्रायं क्रियम णानुवादिनामनुष्ठीयमानार्थस्मृतिफलत्वात् । अनुमन्त्रणादीनां कृताकृतप्रत्यवेक्षणायानुष्ठितार्थस्मृतिफलत्वात्प्रोत्साहनार्थानां चाग न्मस्वः संज्योतिषा भूमेत्यादीनां यदेव श्रद्धया करोति तदेव वीर्यव त्तरं भवतीति वाक्यावधारितकर्माङ्गभूतश्रद्धाजननार्थमनुष्ठेयकर्म स्मृतिफलत्वात्स्तोत्रशस्त्रमन्त्राणां चारादुपकारकत्वं स्तुत्यर्थत्वेन क मसमवेतार्थप्रकाशनानियमात्। एवं च कर्मौपयिकार्थाभिधानार्थत्वे प्रकरणपाठार्थत्वोपपत्तेर्नादृष्टकल्पना युक्तेत्याह * अतश्चेति * न प्रकारान्तरेणाप्यनुष्ठेयार्थस्मृतिसिद्धेर्मन्त्रनियमस्यादृष्टार्थत्वं त्वत्प ऽपि कल्प्यमत आह * यद्यपि चेति * लिङ्गाच्च दृष्टार्थतावगते दुर्बलप्रमाणवशेनादृष्टार्थत्वं कल्पयितुं शक्यमित्याह *अवश्यं चेति ननु प्रकरणबाधे सामान्यसंबन्धाभावात्तत्सापेक्षत्वेन लिङ्गस्यावि नियोजकत्वं स्यादत आह * न चेति * नात्र प्रकरणावगम्यक्रतु संबन्धाख्यसामान्यसंबन्धो बाध्यते विरोधाभावाद् द्वारविशेषसंब न्धे तु विरोधः तत्र च प्रकरणस्य शक्तिरूपलिङ्गसापेक्षत्वात्तद्बाध्य त्वं युक्तमेवेत्याशयः । दृष्टार्थत्वेनाविरोधान्न कस्य चिद् बाध इत्या * तस्मादिति * अभिधानार्थत्वाभावे च निर्व्यापाराणां मन्त्राणां

१ उच्चारणेनाभिव्यक्तानामित्यर्थः ।

२ मन्त्रव्यापारत्वाभावात् अतो ऽर्थाभिधानलक्षण एव मन्त्रव्यापारः ।

णाग्रहणायोगादुच्चारणं व्यापारद्वारेण प्रकरणग्रहणे तस्यानुष्ठा-
पयिकत्वेनाभिधानवत्कर्मविधिनानाक्षेपादविधानाच्चोच्चारण-
ण प्रकरणग्रहणं प्रकरणग्रहणाच्चोच्चारणमितीतरेतराश्रया-
रुच्चारणविधिकल्पनं विना कर्मकालोच्चारणकर्त्तव्यतायां प्र-
ाभावाद्याज्ञिकाचारदर्शनेनोच्चारणविधिकल्पने क्लेशः स्यादित्य-
तरन्यासेनाह * एवं चेति * उपसंहरति * अत इति * नैव-
याशङ्काभाष्यं व्याचष्टे नैवमित्याभिधानार्थत्वे ऽप्यसमवेतार्थप्रका-
स्यादृष्टार्थत्वापरिहारात्तत्पर्यन्तत्वकल्पनं न युक्तमित्याशयः। त-
यतइति परिहारभाष्यं व्याचष्टे * तत्रेति * ततश्च वचनान्नैषा-
रार्थं प्रयुज्येतेत्यसमवेतस्यापि समवेतविशेषणत्वेनाभिधानस्य न-
वक्ष्यमाणत्वाद्विशिष्टरूपप्रकाशनस्यादृष्टार्थत्वापरिहारात्तात्पर्य-
कमनुष्ठितमभ्युदयकारि भवतीति नियमादृष्टकल्पनेन च्चाभिधा-
र्थवत्त्वोपपत्तेः काममित्युक्तं तस्मादस्तीत्युपसंहारभाष्यं व्याचष्टे
तस्मादिति * नन्वस्तु श्रुत्यविनियुक्तानामुक्तेन न्यायेनार्थप्राधा-
श्रुतिविनियुक्तानां त्वर्थप्राधान्ये ऽभ्यादानादिमन्त्राणां लिङ्गा-
। विनियोगासिद्धेस्तदर्थशास्त्रानर्थक्यं स्यादत आह * तां चतु-
रिति * इतिकरणो ऽत्र मन्त्रविनियोजकश्रुतिमात्रपरिग्रहार्थः।
तुर्भिरितितृतीयया मन्त्राणां करणत्वे ऽभिहिते स्वव्यापारं विना
प्रयोगात् उच्चारणस्याप्तद्व्यापारत्वात्कर्मोत्पत्त्यनुपयोगित्वाच्च
व्यापारकर्मोत्पत्त्युपयोग्यभिधानव्यापारेण करणत्वाध्यवसायाच्च-
र्भिरभ्यादानमभिदध्यादिति वाक्यार्थावगमे ऽइति करणविनियु-
ानामर्थक्रियारूपत्वेन कथम्भावाग्राह्यत्वात् द्रव्यदेवतावक्रियो-
त्युपयोगित्वावगतेः कारकत्वावसायात्करणव्यतिरिक्तकारकत्वा-
पपत्तेः करणत्वानिश्चये सति पूर्ववदभिधानार्थत्वासिद्धेः स्तोत्रशा-
स्त्रमन्त्राणां च स्तौतिशंसतिभ्यामेवाभिधानार्थत्वावसायात्तां चतु-
र्भिरादत्तइत्यादिश्रुतिविनियोज्येष्वभ्यादानादिमन्त्रेषु तदर्थशास्त्रान-
र्थक्यप्रसङ्गायोगेनाप्यर्थप्राधान्यमविहतमित्यर्थः। अनेन च नन्वि-
त्याशङ्काभाष्यस्य काममित्युत्तरभाष्यं व्याख्यातं अथेत्याशङ्कानिरा-
करणार्थत्वेन।

गुणार्थेन पुनः श्रुतिरिति ॥ ४१ ॥

सूत्रमवतारयितुं न हीति भाष्यं व्याचष्टे * वदामइति *

१ उत्पत्त्यपूर्वानुपयोगित्वात् द्रव्यदेवताप्रकाशकस्यैव कर्मोत्पत्त्यनुपयोगित्वमन्यस्य तु फ-
लापूर्वोपकारित्वम्।

नन्विति प्रोक्तामाशङ्कामनुभाष्य चतुःसंख्याविशिष्टमितिभा
रिहृतं तदादानस्यापीष्टकामृच्चयनार्थमर्थात्प्राप्तेगुणार्थेनेति
विरोधादयुक्तमित्याशङ्क्य व्याचष्टे * यद्यपीति * अर्थप्र
दाने संख्याविधौ भवत्यादानसंख्याविशिष्टतेत्यर्थः । विशिष्ट
ध्यभावादरुणैकहायनीन्यायानुपपत्तेः अर्थप्राप्तस्य चादान
द्यत्वेनैकविधावितरेण विशेष्टुमशक्यत्वाल्लिङ्गतश्चैकैकस्यैव
प्राप्तेः । संख्यानाकाङ्क्षत्वात्समुच्चयासिद्धेरपरितोषात् प
ग्णार्थत्वप्रतिपादनपरत्वेनान्यथा व्याचष्टे * अथवेति *

परिसंख्या ॥ ४२ ॥

अत्र भाष्यकृता परिसङ्ख्याक्षारो चेति पूर्वोक्तदो
भाष्य लिङ्गाप्राप्तमन्त्रादानसम्बन्धविधानानर्थक्यापत्तेः ।
स्यात् तदप्राप्तमन्त्राश्वाभिधानासम्बन्धविधानात्तु नैव
क्तिरिति नैवमित्यादिना स्वार्थहानिं परिहृत्य लिङ्गादित्यादि
परिच्छिन्ने ऽर्थे लिङ्गस्याविनियोजकत्वाद्गर्दभरशनासम्बन्धा
प्तबाधः प्राप्त्यभावादेव च गर्दभरशनान्नेति प्रतिषेधायोग
कल्पनाभाव इति दोषत्रयं परिहृतम् । तत्र प्राप्तबाधपरि
तावदृजुत्वाद्व्याख्यातुमाह * यावद्धीति * नन्वप्राप्तमार
नाम रशनामात्रे मन्त्रविनियोजकश्रुतिः कल्प्यतां लिङ्गादेः
नियोगस्सेत्स्यत्यत आह * नचेति * उक्ते ऽर्थे भाष्ये यो
तदेतदाहेति * श्रुत्यभिप्रायो भाष्ये वाक्यशब्दः स्वार्थहा
भाष्यमिदानीं व्याचष्टे * यदपीति * गर्हार्थेनापिशब्देन ।
स्य भाष्यस्य सूचितं सामान्येनेत्यभिप्राय इति शाकपार्थिव
ध्यमपदलोपी समासः सामान्यशब्देन निर्विशेषणत्वमुक्तं
दाने मन्त्रस्य सम्बन्धो विधीयते येन लैङ्गिकप्राप्तिः । सम्ब
शास्त्रानर्थक्यप्रसक्तेः स्वार्थहानं स्यादित्यर्थः । किमित्येवं
यते इत्यपेक्षायां यतः क्रिययैव मन्त्रस्य सम्बन्धो युक्तः इ
रेण योज्यम् । तदेव कुत इत्यपेक्षायां कारकाणां साक्षात्स
म्बन्धाभावादित्युक्तं तेनादानसम्बन्धनिराकरणभाष्यस्याय
तीत्याह * तस्मादिति * का तर्हीत्यश्वाभिधानीमिति
म्बन्धप्रतिपादकस्य भाष्यस्य गतिरत आह * किं तर्हीति * छि
कर्मशक्त्याक्षिप्तविशिष्टक्रियासम्बन्धविवक्षयेदमुक्तमिति भ
व्याख्यायमाने विशिष्टानुवाददोषापत्तेरपरितोषादश्वाभिध

१ क्लिष्टत्वञ्च मन्त्राश्वाभिधान्योः कारकयोः संबन्धप्रतिपादनात् ।

न्त्रविशिष्टादानविध्युत्तरकालं परस्परनियमलभ्यकारकसम्बन्धा-
प्रायेणान्यथा व्याचष्टे * अथ वेति * नन्वश्वाभिधानीविशिष्टेऽप्यादा-
रशनादानत्वाविशेषेण लैङ्गिकमन्त्रप्राप्तिसम्भवात्तदर्थशास्त्रत्वम-
रेहतं स्यादत आह * सर्वथेति * परिसंख्याफलत्वेनायं दोषः परिहार्य
याशयः। नन्वश्वाभिधान्यां मन्त्रविशिष्टादानविधौ वर्जनबोधकत्वा-
वान्न परिसंख्यात्वं स्यादित्याशङ्कते * नन्वेवमिति * परिहरति
फलेनेति * न चैवमौपचारिकत्वापत्तिः फलत एव परिसंख्या-
पदेशादित्याह * सर्वत्र हीति * प्रसङ्गान्नियमव्यपदेशो ऽपि
ळेनैवेति दर्शयितुं नियमग्रहणं परिसंख्या वर्जनबुद्धिस्तदर्थो नञा-
: परिसंख्याशब्दः तस्माद्वा ब्राह्मणो न हन्तव्यो नेक्षेतोद्यन्तमादि-
मित्यादीनामेव श्रुत्या परिसंख्यात्वं निषेधपर्युदासव्यपदेशविशे-
त्तु व्यवहारासिद्धेः न परिसंख्याव्यपदेशः सत्यमेव वदितव्यमि-
दीनामेवकाराच्छ्रुत्या नियमत्वम् । अन्यत्र तु फलेनैव नियमप-
संख्याव्यपदेशः । ननु प्रोक्षणादावप्यौदासीन्यनिवृत्तिकर्त्तव्यता-
यमदर्शनादवघातादौ चाप्राप्तप्रापणाद्दलनादिनिवृत्तिदर्शनादिमा-
गृह्णन्नित्यादावपि चाप्राप्तप्रापणकर्त्तव्यतानियमदर्शनात् फलतो
पदेश तत्सङ्करात् विध्यादीनां सङ्करप्रसङ्ग इत्यभिप्रायेण पृच्छति
कस्तर्हीति * फलासङ्कराभिप्रायेणोत्तरमाह * उच्यतइति *
ोक्तं व्याचष्टे * विधिरेव हीति * को ऽसौ विशेष इत्यपेक्षाया-
ह * तत्रेति * विधेयस्वरूपप्राप्तेरेवात्र फलत्वसम्भवान्न तत्र नि-
ौदासीन्यनिवृत्त्योर्विप्रकृष्टयोः फलत्वं युक्तमिति भावः। अवघाता-
तु नियमताफलत्वान्नियमव्यपदेशमाह * यत्र त्विति * ननु
ाप्यर्थाक्षेपात् प्रागेव प्रत्यक्षेण विधिनावघातादेरप्राप्तस्यैव विधेः
रूपप्राप्तिरेव फलं स्यादत आह * तण्डुलेति * नन्वर्थतः प्राप्तिस-
वान्माभूत्प्राप्तिमात्रस्य फलत्वम् । अप्राप्तांशपूरणवत्त्वन्यनिवृत्तेरपि
ीयमानायाः कस्मान्न फलत्वं स्यादत इत्याह * तदप्राप्तीति । अ-
ाशयः * अप्राप्तांशपूरणात्प्रागुपायान्तराक्षेपस्य निराकर्त्तुमश-
त्वात्तन्निवृत्त्यनुपपत्तेः उत्तरकालं चानुनिष्पादितत्वेन सिद्धेर्न प्र-
जनापरपर्यायमन्यनिवृत्तेः फलत्वं युक्तमिति । प्रसिद्धनियमव्य-
शहान्यापत्तेरपि नास्याः फलत्वमित्याह * न चेति * अविधेय-
त्वेन च विप्रकृष्टत्वान्नान्यनिवृत्तिः फलमित्याह * प्रत्यासन्नं वे-
* नन्वन्यनिवृत्तेः फलत्वाभावे विध्यनिवारितत्वादुपायान्तरा-
मप्याक्षेपः प्रसज्येतेत्यत आह * तत्प्रसक्तीति * अन्यनिवृत्तिं वि-
नियमानुपपत्तेर्नान्तरीयकान्यानिवृत्त्यवगतेरुपायान्तराक्षेपवारण-

मित्याशयः । यदि चाक्षिप्तेषूपायान्तरेष्वयं विधिः प्रवर्त्तेत ततः शास्त्रमन्तरेण प्राप्तोपायान्तरनिवृत्त्ययोगाच्छास्त्रस्यैवान्यनिवृत्तावपि तात्पर्यकल्पना स्यान्न त्वेतदस्ति श्रुतिकल्पनं विनार्थाक्षेपस्याप्राप्तत्वेन मन्थरत्वाच्छीघ्रप्रवृत्तेन प्रत्यक्षेण विधिनैवैकोपायनियमे नैराकाङ्क्षेणार्थाक्षेपानुपपत्तेः। प्रापकाभावादेवोपायान्तरनिवृत्तिसिद्धेर्न शास्त्रस्य तत्पर्यन्तं व्यापारः कल्प्यतइत्यभिप्रायेणाह * न चेति * उपसंहरति * सा चेति * उभयोस्तु नित्यप्राप्तौ पुनर्वचनस्य स्वरूपप्राप्तिनियमफलत्वायोगेनान्यनिवृत्तिफलत्वात्परिसंख्याव्यपदेश्यत्वमित्याह * यत्पुनरिति * प्राप्तइति सप्तम्यास्तत्र चान्यत्र चाति सप्तमीभ्यां वैयधिकरण्येनान्वये तत्र चान्यत्र च प्राप्नुयादित्यर्थो भवति सामानाधिकरण्ये तु तच्चान्यच्चेति । यथासंख्येनोभयत्रोदाहरणमाह * यथेति * चातुर्मास्येषु साकमेधपर्वणि पूर्वेद्युर्गृहमेधीयेष्टिं विधाय श्रुतमाज्यभागौ यजति यज्ञताया इत्युदाहृत्य दशमेऽष्टधा चिन्तयिष्यते तत्रातिदेशप्राप्तयोराज्यभागयोरनुवादमात्रमेतदित्याद्यः पक्षः, द्वितीयस्त्वानर्थक्यपरिहारायोभयत्र विहितयोराज्यभागयोरिहाभ्युदयकारित्वकल्पनया प्रकृतिवदित्थं कर्त्तव्यमित्युपदेशातिदेशाभ्यां संहृत्य विधिरिति तृतीयस्तूभाभ्यां विधानस्यादृष्टार्थत्वापत्तेर्यज्ञताया इति च स्तुतिदर्शनात् प्रकृतगृहमेधीयस्तुत्यर्थमिति चतुर्थस्तु गृहमेधीयविध्येकवाक्यत्वाभावेन तत्प्रशंसार्थत्वायोगात् यज्ञताया इत्याज्यभागस्तुतिप्रतीतेरनन्यपरं पुनः श्रवणमाज्यभागधर्मककर्मान्तरविधानार्थमिति। पञ्चमस्त्वाज्यभागशब्दस्य धर्मलक्षणार्थत्वापत्तेः कर्मान्तरविध्ययोगादतिदेशेनाज्यभागयोः प्रयाजादिषु च प्राप्तेष्वाज्यभागपुनःश्रवणमन्यपरिसंख्यार्थमिति सोऽयमिह दर्शितः। षष्ठस्तु चोदकप्राप्तेः प्राथम्यात्फलतः परिसंख्यानुपपत्तेस्त्रिदोषत्वापरिहारादुपदिष्टाज्यभागवर्जमतिदेश इति सप्तमस्त्वखण्डकरणोपकारातिदेशद्वारेण युगपत्सर्वपदार्थप्राप्तेस्तद्वर्जनपक्षस्य तृतीये चोदनार्थकार्त्स्न्यात्तु मुख्यविप्रतिषेधात्प्रकृत्यर्थमित्यत्र निराकृतत्वादाज्यभागयोरेवातिदेशापसंहार इति । इममपि पक्षमतिदेशस्य क्रत्वर्थपदार्थविशेषगोचरत्वेन सामान्यविधिरस्पष्टः संक्षियेत विशेषत इत्युपसंहारायोग्यत्वान्निराकृत्य क्लृप्तोपकारप्राकृताज्यभागनिराकाङ्क्षत्वेनातिदेशाभावाद् गृहमेधीयस्यापूर्वत्वज्ञापनार्थमिदं वचनमिति सिद्धान्तो वक्ष्यते। नन्वन्यनिवृत्तिफलत्वे परिस-

१ लिङ्गरूपसामर्थ्येनाक्षेपः ।

२ विधेः फलम् । नियमविधिफलम् ।

नेवृत्तेः प्राप्तिपूर्वकत्वात्प्राप्तमन्त्रविषयत्वापत्तेः त्रिदोषत्वं-
र्रे स्यादत आह * अत्रापि चेति * नन्वेवं सत्यानुमानिक-
तेबन्धकफलत्वेनार्थवत्त्वोपपत्तेर्न गर्दभरशनानिवृत्तिफलत्वं
ाह * सर्वस्येति * अप्राप्तविधित्वे ऽपि फलतः परिसं-
विस्तरेणोक्तम् । सुखग्रहणार्थं सफलयति * तेनेति *
ानिरूपणस्य तदर्थशास्त्रतापरिहारोपयोगितामाह * इत्य-
ादिति *

र्थवादो वा ॥ ४३ ॥

नन्विति * भाष्येण ब्राह्मणाम्नातस्य वाक्यस्य मन्त्रप्रदेशा-
विशेषलिङ्गप्रकरणानुमितविधिशेषत्वाभावादर्थवादत्वं न
प्रागुक्तां शङ्कामनुभाष्य नायमित्यादिना मन्त्रस्तुत्यसम्भवे
स्तुतिर्भविष्यतीति परिहृतं तद्व्याचष्टे *यद्यपीति* प्रथ-
प्तत्वेनाविधेयत्वात् । स्तुतिरयुक्तेति शङ्कते * ननु चेति *
* नैतदिति * आनर्थक्यात्तर्ह्यविधेयं प्रथममत आह *
वेति * अस्तु वा नियोगतः प्राप्तिस्तथाप्यर्थाक्षेपात्प्रागध्व-
प्रसिद्ध्यर्थं विधिरर्थवान् भविष्यतीत्याह * एवं चेति *
ति * तस्मादिति * मन्त्रः पुनरिति भाष्यमवतारयितुमा-
एवमपीति * एतदाशङ्कानिराकरणार्थत्वेन व्याचष्टे
* कथं मन्त्रोपादानेन प्रथनस्तुतिरित्यपेक्षायां स्तुति-
नार्थमित्थमिति भाष्यं व्याचष्टे * प्रथनमिति * प्रसङ्गाद्य-
ानं पुरोडाशप्रथनस्य फलत्वेन कीर्त्यते स्तुत्यर्थं चेति जिज्ञा
मेतदिति पृष्टं तद्व्याचष्टे * किमिति * फलत्वेन मन्त्रार्थ-
न्धानमनेकयजमानकेषु च विकारेषु यजमानशब्दवद्यज्ञप-
हि इति जिज्ञासाप्रयोजनम् । नेति ब्रूम इत्युत्तरभाष्यम-
प्रायेण तावत् व्याचष्टे * नेत्याहेति * एवं तु मान्त्रवर्णि-
ल्पनसम्भवेन यज्ञपतिप्रथनस्य फलत्वानपायात्पर्णमय्याधि-
नेराकृतत्वेन च जिज्ञासानुपपत्तेरपरितोषान्मन्त्राभिप्रायेण
* मन्त्रो ऽपि त्विति * [1]करणविभक्तिनिर्देशाभावे ऽपि
र्चो विहवेष्वास्त्वितिपूर्वमग्निं गृह्णातीत्यादिषु तृतीये किमृ-
तया वर्चःप्रभृतिफलमाशास्य यजमानगामितया वेति वि-
नेन फलकल्पनाभ्युपगमादिति करणावगतक्रियासंबन्धा-

---

[1] ऽत्रापि करणविभक्त्यैव विनियोगः नतु उरु प्रथस्वेति अयमपि करणमन्त्रः न
।

न्यथानुपपत्तिकल्पितकरणातान्वयसिद्ध्यर्थं श्रुतार्थापत्त्या करणविभक्तिकल्पनमभिप्रेत्य करणविभक्तिविनियुक्तानामित्युक्तम् । कथमित्यादिना भाष्यमाक्षिपति * कथमिति * कस्येति कर्मणि षष्ठी किंविषये इत्यर्थः । समाधानं प्रतिजानीते * उभयथा ऽपि त्विति * पुरोडाशप्रथनविषयत्वमङ्गीकृत्य प्रश्नं तावदुपपादयति * अस्तु तावदिति * सो ऽयं याज्ञिकमतानुसारीत्यर्थः * स्वसिद्धान्तेनेति* निष्प्रमाणकत्वं सूचितम् । उत्तरमुपपादयति * तत्रेति * यस्त्वयमध्वर्युकर्तृकः पुरोडाशविषयः प्रयोजकव्यापारात्मकः प्रथनरूपो ऽर्थो नास्तीत्युक्तः स यद्यपि पूर्वमेव कृतत्वादिदानीं नास्त्येव न वर्त्तते तथापि यथा सत्ता वर्त्तमानता भवति तथा मन्त्रेणोच्यतइत्यर्थः इत्थम्भूतलक्षणे सत्तयेति तृतीया । ननु पुरोडाशकर्त्तृकः प्रयोज्यव्यापारो मन्त्रेणानुष्ठेयतयोच्यते नाध्वर्युकर्त्तृकः प्रयोज्यव्यापारं वर्त्तमानतयेत्याशङ्क्योपपन्नः शब्दार्थ इत्युक्तम् । अनुष्ठातृरूपप्रयोजकव्यापारानभिधाने ऽपि प्रेषणात्मकप्रयोजकव्यापाराभिधानादुपपन्नः प्रथयतिशब्दार्थ इति भावः । अनेन च यश्चेत्यादिभाष्यं व्याख्यातं लिङ्गान्मन्त्रस्य प्रथनाङ्गत्वावगतेरभिमर्शनकाले प्रयोज्यत्वानुपपत्तेरपरितोषात्पुरोडाशप्रथनविषयएवान्यथाभाष्यं व्याचष्टे *अथवेति * अस्मिन्पक्षे कथमसत्यनुक्ते पुरोडाशकर्त्तृके प्रयोज्यव्यापारूपे प्रथने प्रयोजकव्यापारवाची प्रथयतीतिशब्द इति प्रश्नभाष्यार्थः । उत्तरभाष्यं व्याचष्टे * तदुपपादयतीति * प्रतीकेनैकदेशेन गृहीतो यो मन्त्रस्तेनोपात्तः प्रयोज्यव्यापारो यस्मिन्ब्राह्मणे तत्प्रथयतीति प्रयोजकव्यापारं विधत्तइत्यर्थः । यश्चेति भाष्यं प्रथस्वेति प्रेषणरूपे प्रयोजकव्यापाराभिधानेन प्रयोज्यव्यापाराभिधानानुपादानादस्मिन्पक्षे ऽनुपपन्नमाशङ्क्य प्रयोज्यव्यापारोपादानपरतया व्याचष्टे * यश्चेति * नन्वेतयान्नाद्यकामं याजयेदित्यादिषु प्रयोज्यव्यापारानुपादाने ऽपि प्रयोजकव्यापारोपादानदर्शनात्तत्पूर्वकत्वनियमो नास्तीत्युत्तरं कस्मान्नोक्तमत आह * यद्यपि चेति * अर्थक्रमानुसारिशब्दक्रमनियमादर्शनेनास्याभिप्रायस्यातितुच्छत्वात्प्रश्नोत्तरभाष्ययोश्चोभयोरप्यनार्जवापत्तेरपरितोषात्स्वमतेनार्थवादगतयज्ञपतिप्रथनप्रश्नविषयतया व्याचष्टे * अथ वेति * अत्रैवोत्तरभाष्यं व्याचष्टे * तदभिधीयतइति * नन्वस्मिन्पक्षे मन्त्रेणेत्यादिभाष्यं पुरोडाशप्रथनाभिधायित्वादयुक्तं स्यादत आह * मन्त्रेणेति * नन्वेवं तर्ह्युरु ते यज्ञपतिः प्रथतामिति ब्रवीति यश्चोरु ते यज्ञपतिः प्रथतामिति ब्रूत इति च वक्तव्यमत आह * प्रथस्वेत्ययमिति * त

एवं भाष्यार्था भवतीत्याह * यश्चैवमिति * यश्चोरु ते यज्ञपतिः
थतामिति शब्दोच्चारणेन यज्ञपतिं प्रथयतीत्यर्थः। कथं शब्दोच्चा-
णमात्रेण प्रथनकर्तृत्वं स्यादत आह * गुणवादादिति * प्रेषण-
पप्रयोजकव्यापारकर्तृत्वमुत्पादनरूपप्रयोजकव्यापारकर्तृत्वेनोपच-
तइत्यर्थः। यद्वा तत्करोति तदाचष्ट इत्याख्याने ऽपि णिजुत्पत्ति-
मरणान्मुख्यवृत्तित्वेन प्रथनाख्यानात्प्रथयतिशब्दोपपतिरित्याह
* अथ वेति * एवं व्याख्याने यज्ञपतिप्रथनस्य फलत्वाभावे निरा-
म्बना स्तुतिर्न युक्तेत्याशङ्कोत्थानात्पूर्वग्रन्थसङ्गतिः समञ्जसेत्येत-
व व्याख्यानमभिप्रेतम्।

अविरुद्धं परम् ॥ ४४ ॥

यदुक्तमिति भाष्येणार्थपरत्वे विशिष्टपदक्रमसमूहात्मकवा-
यनियमार्थक्याशङ्कानुभाषणार्थत्वेन परमिति सूत्रावयवं व्याख्याय
ाममित्यादिना परिहारार्थत्वेनाविरुद्धमिति सूत्रावयवो व्याख्या-
स्तस्य तात्पर्यमाह * दृष्टार्थेति * क्रमान्यत्वे ऽप्युच्चारणाविशेषा-
गमाददृष्टान्तरं विनोच्चारणक्रमनियमानर्थक्यापत्तेरदृष्टद्वयकल्प-
ात्पूर्वपक्षे गौरवमित्याशयः। वाक्यनियमहेतोर्व्याख्यानान्तरेष्व-
ेतदेव सूत्रं परिहारार्थत्वेन योजयति * एतेनेति * एतेन नियम-
ादृष्टकल्पनायामपि दृष्टार्थस्याविरोधेनादृष्टार्थहेतुत्वेन मन्त्रत्वादि-
ियमो निराकृत इत्यर्थः। एतदेव विवृणोति * सत्स्वपीति *

सम्प्रैषे कर्मगर्हानुपालम्भः संस्कारत्वात् ॥ ४५ ॥

अथेति भाष्येण बुद्धशास्त्रानर्थक्याशङ्कानुभाषणार्थत्वेन सम्प्रै-
कर्मगर्हेति सूत्रावयवं व्याख्याय तन्नेत्यनेन च परिहारप्रतिज्ञार्थ-
ेनानुपालम्भ इति सूत्रावयवं व्याख्याय कर्त्तव्यमित्यनेन च हेतुप्र-
ेपादनार्थत्वेन संस्कारत्वादिति सूत्रावयवं व्याख्याय पुनरुपाया-
तरेणापि सा प्राप्नोतीत्यन्यथापि स्मृतिसिद्धेरानर्थक्यमाशङ्क्याने
ोपायेनेत्यनेन भाष्येणादृष्टसंस्कारत्वादित्यावृत्त्या स एव व्याख्या-
ास्तत्सर्वं तात्पर्यतो व्याचष्टे * येयमिति * संस्कारत्वादिति सूत्रा-
ायवं स्वयमन्यथा व्याचष्टे * अथ वेति *

अभिधाने ऽर्थवादः ॥ ४६ ॥

चत्वारीत्यादिभाष्येणाविद्यमानवचनपरिहारार्थत्वेन तावदे-
त्सूत्रं व्याख्यातम्। तत्र कस्य स्तुतिः किमर्था वेत्यपेक्षायामाह

* चत्वारीति * अस्मिंस्तु व्याख्याने प्रदेशविशेषापरिज्ञानान्मन्त्र
स्यादृष्टार्थत्वापत्तेरपरितोषाद्विनियोगानुसारेण स्वयमन्यथा व्याच
* हौत्रे त्विति * हौत्रं प्रवचनमृग्वेदः तद्विहितानां मन्त्राणां नं
त्साहकरत्वं यजुर्वेदविहितानामेव केषां चित्तथात्वदर्शनादिति वच
हौत्रग्रहणं विषुवन्नामैकाहविशेषः तत्रातिदेशतश्च चत्वार्याज्यसं
कानि शस्त्राणि होतृमैत्रावरुणब्राह्मणाच्छंस्यच्छावाकप्रयोज्या
प्राप्तानि । तत्रान्येषामनाग्नेयत्वाद्धौतृविशेषणम् । ततः किमि
चेदत आह * तस्येति * आग्नेयं होताज्यं शंसतीति श्रुतिर्होतुर
ज्यस्याग्नेयत्वं सूर्यदेवत्यं ह्येतदहरिति श्रुतेर्विषुवत्संज्ञकस्याह्न आ
त्यदेवतत्वमातिदेशप्राप्तानेकैन्द्रवाय्वादिदेवतात्वान्न वस्तुवृत्त्याऽऽ
त्यदेवतत्वमस्तीतिं कृत्वा संस्तवादित्युक्तं तेजस्त्वादिसामान्यं च
दित्यधर्माणामग्नावुपचारस्यालम्बनं स्तोत्रशस्त्राणामदृष्टार्थत्वात्क
समवेतदेवतानादरेणाव्यक्तलिङ्गत्वादस्य मन्त्रस्यास्येति च सर्वना
युक्तत्वात्सन्निहिताग्निस्तुत्यर्थत्वावधारणं यज्ञसमृद्धयइत्यादि
ष्येण एतदेव सूत्रमचेतनार्थबन्धनपरिहारार्थत्वेनाप्यौषध्यादावचे
नचैतन्याभिधानेनार्थवादत्वं परिहार इत्यावृत्त्या व्याख्यातम् । तत
रणमन्त्राणामदृष्टसाधनस्तुत्यर्थत्वानुपपत्तेरयुक्तमाशङ्क्याह * ए
मिति * अविद्यमानवचने यथा स्तुतित्वं परिहारः एवमचेतना
बन्धने ऽप्यनेन स्तुतित्वमात्रेण कर्मसाधनस्मृतिपरिहार इत्यर्थ
कर्मसाधनस्मृत्यर्थस्यापि मन्त्रस्य विशेषणांशे स्तुत्यर्थत्वोक्ति
भावः । सकलस्य तर्हि मन्त्रस्य कारणत्वं न सिद्ध्येदित्याशङ्क्या
तावदित्युक्तम् । करणमन्त्रोच्चारणे कर्मसाधनस्मृतिस्तावद्भवति
तत्राकर्मसमवेतार्थाभिधायिनामपि पदानां समवेतार्थपदशेषत
स्मृत्यर्थत्वोपपत्तेः सकलस्य मन्त्रस्य करणत्वसिद्धिरित्याशयः ।

गुणादविप्रतिषेधः स्यात् ॥ ४७ ॥

यस्त्वर्थविप्रतिषेधः शङ्कितः स गौणत्वात्परिहर्त्तव्य इ
सूत्रं व्याख्यातुमदितिरित्यादिभाष्यं व्याचष्टे * अदितिरिति
स्तुतिविषयत्वाद्गौणत्वस्य स्तुतित्वस्य चार्थवादाधिकरणव्युत्पा
स्याप्यौदुम्बराधिकरणाविधित्वशङ्कानिराकरणेन प्रतिष्ठानादौदु
राधिकरणवदित्युक्तम् ।

विद्यावचनमसंयोगात् ॥ ४८ ॥

यदित्यादिना भाष्येण विद्याकाले सन्निहितस्याप्यर्थस्य
वचनमनभिधानं तत्तस्य कर्मानङ्गत्वाद्युक्तमिति सूत्रं व्याख्यात

गनुपन्यासादयुक्तमाशङ्क्याह * यद्यपीति * व्याचष्टे *
* नन्वित्यादिना प्रागुपन्यस्ताभिधानानभ्यासाशङ्का ऽनु-
ं परिहृता तद्व्याचष्टे * तदनभ्यासस्त्विति *

तः परमविज्ञानम् ॥ ४९ ॥

व्याख्यानार्थं विद्यमाने ऽपीति भाष्यं व्याचष्टे * यस्त्विव-
काप्रयुक्तपदार्थस्य केनापि ज्ञातुमशक्यत्वात्कथं सत्त्वाव-
ाङ्क्य निगमेत्यादिभाष्यकृतोक्तं तद्व्याचष्टे * तत्र चेति *
र्थे पदान्तरसामानाधिकरण्यादियोग्यता प्रकरणं प्रक्रमः
त्र लोकवेदयोरर्थज्ञानोपायत्वं प्रसिद्धम् । सूक्तं देवताज्ञा-
ठङ्क्यायामृचि देवताज्ञानहेतुत्वेनार्थज्ञानोपायः । आर्षज्ञान-
भवं सूर्यश्चेत्यादावस्मदर्थज्ञानहेतुत्वेनार्थज्ञानोपायत्वं नि-
प्रसिद्धमेवार्थज्ञानोपायत्वम् । सूक्तदेवतादिस्मरणाद-
मर्थज्ञानोपायत्वं विदुषामभिमतमिति निश्चीयतइत्याह
ति * ननु स्वार्थज्ञानस्योपायत्वे भूतांशो नाम ऋषिर्जराम-
ायाश्विनौ तुष्टावेत्येवमार्षस्योपाख्यानादनित्यसंयोगे नित्य-
पद्येतात आह * यथैवेति * ननु लोपविकारादीनामु-
वेनापारमार्थिकत्वात्पदानित्यत्वापादकत्वन्न जातमार्षे तु
शङ्क्यार्षस्याप्युपायत्वेनाङ्गीकारेण तत्परिहारमाह * तत्रे-
रमार्थिकत्वे ऽपि वा मन्त्राणामृषिकृतत्वाभावात्प्रयोगस्य
रूपेण सर्वदा सद्भावान्न वेदानित्यत्वापादकत्वमित्याह
ति * ननु वृद्धव्यवहारावगतपदार्थानुसारेणैव मन्त्रार्था-
भवान्नास्मदादीनां ऋषिप्रत्ययबलेन मन्त्रार्थप्रतिपतिरित्या-
प्रत्ययेति * आर्षस्मरणादेरदर्शनात् ऋषिसम्प्रदायानुसा-
त्रार्थतत्त्वावधारणं भवति नान्यथेति भावः।सृण्येव जर्भरी तु-
ौ शेव तुर्फरीपर्फरीका उदन्यजेव जेमना मदेरूता मेजरा स्वज-
त्ति मन्त्रार्थतत्त्वावधारणायार्षोपाख्यानं दर्शयति *तत्रेति*
चः सूक्तादित्वाभावात् उभा उ नूनं तद्विदर्शयेथे इत्यादिनैका-
सूक्तेन सृण्येवेत्यादिनोपमानरूपेणाश्विनौ स्तुतवानिति व्या-
भाष्यकारेण च द्विवचनान्तत्वादश्विनोरभिधानानीत्युक्त्वा
णादिष्वपि द्विवचनोपपत्तेः कथमश्विपरत्वनिर्णय इत्या-
करणायाश्विनोः काममित्युक्तं तद्व्याचष्टे * भूतांश इति*
ख्यापरतया देवताभिधानानि चेत्यादिभाष्यं व्याख्यातुमाह
। * चत्वारः पादा द्वौ दन्तौ शुण्डा च पुच्छं चेत्यष्टावङ्गा-

नि कस्य चिज्जन्तोः पिपासायामनुत्पत्तेस्तत्र जातावित्युक्तम
ङ्क्य चातकयोः पिपासाकालः प्रावृडिह लक्ष्यतइति प्रावृषि ज
वित्युक्तं कथं जेमनशब्देनोदकवत्त्वमुच्यतइत्याशङ्क्योदकवाचिनो
मशब्दस्य पामादिषु पाठाल्लोमादिपामादिपिच्छादिभ्यः शने
इति यथासंख्यन्यायेन पामादिभ्यः परो विहितो नप्रत्ययो जेम
ब्दात्परो भवतीत्युक्तम् । मे इतिषष्ठ्याः शरीरसम्बन्धजनितत्वं
र्शयितुं मे शरीरमित्युक्तम् । पदार्थान्व्याख्याय वाक्यार्थं व्याच
तेनेति * एवं सर्वत्रेति भाष्येणोत्तरयोरपि मन्त्रयोः सूचितां व
ख्यां वक्तुमभ्यक्सात इन्द्रऋषिरस्मे सनेभ्यश्वं मरुतो जुनन्ति
ग्निश्चिद्धिष्मा ऽतसे शुशुक्वा नापो नद्वीर्यं ददति प्रयान्सीत्येत
ऋच्यार्षोपाख्यानं तावद्दर्शयति * अभ्यगिति * मरुत्वत्गुणक
द्रस्य देवतात्वं वक्तुं विनियोगं दर्शयति * इयं चेति * छन्दोम
ज्ञाकानां त्रयाणामह्नां मध्ये द्वितीये ऽह्नि मरुत्वतीयसंज्ञके शस्त्रे
सि त्वमिन्द्र· यत एतानीति सूक्तमिति श्रुत्या विनियुक्तेत्यर्थ
पदार्थास्तावद्व्याचष्टे * तत्रेति * अकारस्य छान्दसवर्णव्यत्य
कारादभ्यगिति रूपसिद्धिः चिच्छब्दस्येवार्थे प्रयोगादुपमाना
हिस्मेतिपदयोः पदपूरणार्थत्वादर्थाकथनम् ।नकारस्येवार्थत्वकथ
याप इवेत्युक्तम् । द्वीपं पुलिनम् । वाक्यार्थं व्याख्यातुमाह *
क्यार्थे त्विति * द्वीपमन्नाद्यानि चेति चकारो ऽत्र कल्पः । ए
प्रतिधापि वत्साकं सरांसि त्रिंशतं इन्द्रः सोमस्य काणुकेत्यृचं
चष्टे * एकयेति * कान्तं प्रियं कमुदकं सोमं रसात्मकं येषु त
कान्तकानि । सर्वत्र शब्दसूचितां मन्त्रान्तरव्याख्यां दर्शयि
भाष्यं व्याचष्टे * तदेवमिति *

उक्तश्चानित्यसंयोगः ॥ ५० ॥

यस्त्वनित्यसंयोगः शङ्कितः स परं तु श्रुतिसामान्यमि
सूत्रे प्रत्युक्त इति । सूत्रव्याख्यानार्थं परं त्विति भाष्यं व्याचष्टे *
रमिति * श्रुतिसामान्यमात्रतां दर्शयति * यजमानस्तावदिति
प्रमगन्दनैचाशाखशब्दयो राजनगरविशेषसंज्ञत्वे सत्यनित्यसंयोग
त्तेरन्यथा व्याख्यानम् ॥

लिङ्गोपदेशश्च तदर्थवत् ॥ ५१ ॥

तदर्थशास्त्रादीनि पूर्वपक्षलिङ्गानि परिहृत्य सिद्धान्ते लि
त्रयं दर्शयितुं सूत्रत्रयम् । तत्र तेषां मन्त्राणामर्थो यथा ऽस्ति त
लिङ्गोपदेशो भवतीति सूत्रव्याख्यानार्थमाग्नेय्येति भाष्यं व्याच

आग्नेय्येति * लिङ्गशब्दस्य सामर्थ्ये मीमांसकानां प्रसिद्धत्वात्त-
तप्रतिपादिताग्निदेवत्यत्वकल्पितं देवताभिधानसामर्थ्यं लिङ्गश-
न विवक्षितमिति व्याख्यानान्तरं लिङ्गशब्दस्योक्तं तृतीया चेत्थं-
तलक्षणार्था। नन्वविवक्षितार्थत्वे ऽप्यभिधानमात्रेणाग्निलिङ्गत्व-
पपत्स्यते ऽत आह * देवतेति * ननु देवतात्वमप्यभिधानमात्रेण
त्स्यत्यत आह * यं चेति * एकदेवत्ये मन्त्रे त्वां हिमं द्रत मम-
शोकैरित्यादावनेकेन्द्रवाय्वादिदेवतान्तरपदप्रयोगे सत्यप्यनेक-
त्यव्यपदेशाभावादित्यर्थः। नन्वस्तु नामात्राग्नेः प्राधान्येनाभि-
नं तात्पर्यं तु नास्तीत्याशङ्क्याह * प्राधान्येति *

ऊहः ॥ ५२ ॥

भाष्यकारेणोहश्च तदर्थवदिति पूर्वसूत्रगतपदद्वयानुषङ्गेणेदं
त्रमूहदर्शनं चेत्यनेन व्याख्याय वेदे क्व चिदूहः कार्य इत्यश्रवणा-
त्कमूहदर्शनमिति पृष्टे न माता वर्द्धते न पितेत्यूहप्रतिषेधस्यैवाप्रा-
प्रतिषेधायोगेनोहप्रापकत्वात् मात्रादिविशेषोपादानसामर्थ्येन वा
ब्दान्तरोहप्रतीतेरूहदर्शनमित्युत्तरे दत्ते मात्राद्यर्थस्येह वृद्धिप्रतिषे-
त्कथं शब्दोहप्रापकत्वमित्याशङ्कानिराकरणार्थं वृद्धेः प्रत्यक्षत्वेन
तिषेद्धुमशक्यत्वाच्छब्दवृद्धिप्रतिषेध इति प्रत्यक्षमिति भाष्येणोक्तं
द्व्याचष्टे * ऊहदर्शनमिति * शब्दवृद्धेरपि वर्णान्तरोपजननादि-
पपत्तेः। तस्यार्थपरत्वे ऽपि वचनमन्तरेणाप्राप्तेर्न सिद्धान्तिलिङ्गत्व-
ति प्रतिपादनार्थं का पुनरिति भाष्येण पृष्ट्वा यदू द्विवचनबहुवच-
संयोग इत्युक्तं तद्व्याचष्टे * तत्रापीति * वर्णान्तरोपजनने पदा-
त्वापत्तेरपदत्वापत्तेर्वा तत्पदवृद्ध्यसम्भवात्स्थौल्यादेश्च नादध-
त्वेन वर्णेष्वसम्भवाद् द्विवचनबहुवचनान्तत्वेनाधिकार्थद्वारा
दवृद्धिरूहात्मिकेह प्रतिषिद्ध्यतइत्यर्थः। ऊहदर्शनस्य सिद्धान्त-
ङ्गत्वं भाष्योक्तमुपपादयति * स चेति प्रसक्तत्वादिति भावः।
त्रादिशब्दोहदर्शनस्य सिद्धान्तलिङ्गत्वमुपपाद्य शब्दान्तरोहदर्श-
योपपादयति * या चेति * अर्थपरत्वे च कल्प्यते इत्यनुषङ्गः।
न्वेडानिगदगतयज्ञपतिशब्दवन्मात्रादीनां पारार्थ्ये[1] पारार्थ्ये ऽपि
कैकमात्रादिसंबन्धे पशुभेदो ऽपि मात्रादिशब्दोहस्यानाशङ्क्यत्वा-
त्रादिभेदे ऽप्येकपशुसंबन्धाभावात् संबन्धिभेदेनैव भेदसिद्धेः
यादेवानूहावगतेः प्रतिषेधायोगात्कथं तद्बलेनोहप्राप्तिरत आह

१ तस्यं ङासुत्वर्थलात्पारार्थ्यम्।
२ पश्वर्थलादित्यर्थः।

* यद्यपीति * न्यायसिद्धानुवादस्यापि प्रयोजनापेक्षायां न्यायरहि तेषूहप्राप्तिरेव प्रयोजनमवसीयतइति भावः । अविवक्षितार्थत्वेः सिध्येदित्याह * अन्यथेति * ऊहदर्शने स्वयमुदाहरणान्तरमाः * तथेति * त्वं ह्यग्ने प्रथमो मनोतेति मनोता सूक्तस्य वायव्ये प शावतिदेशप्राप्तस्योहः प्रसक्तो ऽनेन वचनेन वार्यते । उदाहरणा न्तरमाह * एवमिति * गवादिपशुके अतिदेशप्राप्तस्य छागस्य व पाया मेदसो ऽनुब्रूहीति मन्त्रस्योहप्रसक्तौ उस्रादिपदयुक्तस्यार्थपरत्वे छागपदस्थाने ऽस्य प्रयोगपाठः अपर्यायान्तरनिवृत्त्यर्थः । अर्थवान् भविष्यतीत्यर्थः । नन्वर्थपरत्वे ऽप्युस्रादिपदनियमस्यादृष्टार्थपरिहारा त् केन विशेषेणाविवक्षितार्थता निराक्रियते इत्याशङ्क्याविवक्षितार्थे कल्पनागौरवमाह * इतरथेति *

विधिशब्दश्च ॥ ५३ ॥

भाष्यकारेण विधिशब्दश्च तदर्थवदिति पूर्वसूत्रगतपदानुष ङ्गेण सूत्रं व्याख्याय शतं हिमा इति मन्त्रगतहिमाशब्दव्याख्यानार्थं शतं वर्षाणीत्यर्थवाद उदाहृतः । तत्र विधिशब्दानुपपत्तिमाशङ्क्याह * विधिरेवेति * सिद्धान्तमुपसंहरति * तस्मादिति *

इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजिमाधवभट्टात्मजभट्टसोमेश्वरविरचितायां सर्वानवद्यकारिण्यां न्यायसुधाख्यायां तन्त्रवार्तिकटीकायां प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तः ॥

॥ न्यायसुधायाम् ॥

प्रथमाध्यायस्य तृतीयपादः

॥ अथ स्मृतिप्रामाण्याधिकरणम् ॥ १ ॥

धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात् ॥ १ ॥

अत्र भाष्यकारेण सङ्गतिप्रदर्शनार्थमेवं तावदिति वृत्तमनुकीर्त्तितं तच्च नामधेयप्रामाण्यस्यानुक्तत्वादयुक्तमाशङ्क्य व्याचष्टे * एवं तावदिति * अयमाशयः नामधेयानां विध्युद्देशान्तर्भावाद्ध्यंश एव वेदः कृत्स्नश्चासावर्थवादाद्यनुपयोगनिराकरणेन प्रमाणतया साधितः । नामधेयाधिकरणे तु विधिस्तुतिस्मृतिवन्नामधेयत्वमपि प्रामाण्यद्वारं भवति वा न वेति चिन्तयिष्यते । नामधेयस्य धर्मप्रयोगाभावात्त्वानर्थक्येन पूर्वपक्षकरणं नामधेयं रूपाभिप्रायम् गुणविधित्वेनापि उद्भिदादिपदानां दध्यादिपदवत्प्रामाण्योपपत्तेः स्वरूपेणाप्रामाण्यं शङ्कितुं युक्तम् । न चैवमुभयथापि प्रामाण्यसिद्धेः प्रमाणलक्षणासङ्गतिः शङ्कनीया । को धर्मः कथं लक्षण इत्येकेनैव सूत्रेण व्याख्यातं चोदनालक्षणो ऽर्थो धर्म इत्यत्र कथमिति प्रकारवचने थाल्प्रत्ययप्रयोगेण प्रामाण्यप्रकारविशेषनिरूपणस्यापि प्रतिज्ञासूत्रार्थत्वेनोक्तत्वात् । अन्यथा हि किंलक्षण एवावक्ष्यत् अत एव स्मृतिविचारस्यापि सङ्गतिः । अनवगतस्वरूपस्य हि वेदस्य प्रामाण्यायोगात्स्वरूपावगतिः प्रामाण्यप्रकारः । तत्र किं प्रत्यक्षावगतिरेव प्रकारो ऽथ स्मृत्याचारद्वारेणाप्यवगतिरिति प्रामाण्यप्रकारविशेषनिरूपणरूपत्वात्स्मृतिविचारस्यापि सङ्गतिः सिद्धा अतः स्मृत्याचारद्वाराया अपि चावगतेः सत्याः प्रामाण्यप्रकारत्वस्य निराकर्त्तुमशक्यत्वात्सैव सम्भवति न वेति इह चिन्त्यते । यद्वा स्मृत्याचारावगतानामपि कर्मणां परिग्रहदार्ढ्यात् धर्मत्वावगतेश्चोदनैवेत्यवधारणाक्षेपेण सङ्गतिः तत्समाधानार्थमेव चेह चोदनामूलत्वमस्ति न वेति चिन्त्यते । चोदनाशब्दस्य वा प्रत्यक्षाप्रत्यक्षचोदनासाधारण्यादप्रत्यक्षचोदनानां च स्मृत्या चारोपस्थापनं विना

प्रामाण्यायोगात् स्मृत्याचारप्रामाण्यमपि प्रतिज्ञातं भव
तिः। जिज्ञासासूत्रेण वा सकलधर्मप्रमाणजिज्ञासा
धानाच्चोदनासूत्रप्रतिज्ञातवेदप्रामाण्यप्रतिपादने पर्यव
दार्थप्रसिद्धादीनामपि प्रसिद्धं(प्रामाण्यं ययोः स्मृत्याच
द्धप्रामाण्ययोः स्मृत्याचारयोरपि) प्रामाण्यमिह चिन्त
तत्तावच्छब्देन सूचितम्। वेदस्य तावदुपयोगः सा
ऽन्यस्यापि साधयितव्य इति प्रतीतेः परतः प्रामाण्या
माण्यस्य प्रथमपाद एव निराकृतत्वे ऽपि प्रामाण्यप्रकारा
माण्यमाशङ्क्य प्रकारविशेषनिरूपणं द्वितीयपादेन कृत
शब्देनोक्तम्। अथेदानीमिति भाष्येण वर्त्तिष्यमाणसङ्गि
वेदमूलकत्वनिबन्धनत्वात्स्मृतिप्रामाण्यस्य वेदप्रामाण्या
स्मृतिप्रामाण्यविचारसङ्गतिरथशब्देनोक्ता। प्रत्यक्षवेदग
विचारात्पूर्वं स्मृतिविचारानौचित्यमाशङ्क्य कस्याश्चित्
यमूलत्वाभावेन तदनपेक्षत्वान्महोक्षं वा महाजं वा श्रो
त्पयेदित्यादिस्मृतेस्तु तद्यथैवादौ मनुष्यराजआगते ऽ
त्युक्षाणं वा वेहतं वा क्षदन्त इत्याद्यर्थवादमूल
दन्नमात्मन इत्यादिस्मृतेश्च केवलाद्यो भवति केवल
न्त्रमूलत्वात्तत्प्रामाण्ये प्रतिपादिते नामधेयविचारात्पू
माण्यं वक्तुमुचितमिति सूचयितुमिदानीमित्युक्तम्।
र्शनपरतया तावद्व्याचष्टे * इदानीमिति * पौरुषेयीषि
माण्यहेत्वभावो दर्शितः। स्मर्यमाणो ऽर्थो ऽवधिर्मे
नार्थमतिक्रम्य तस्य प्रमाणमपि विषयीकुर्वन्तीत्यस्मर
स्मर्यमाणार्थविधिष्वित्यनेनोक्तम्। एतच्चाप्रामाण्योप
णद्वयम्। अस्मर्यमाणार्थावधिष्विति पाठे त्वितः प्रभृत
प्रवृत्तेत्यस्मर्यमाणो ऽर्थस्यावधिर्यासामिति षष्ठीतत्पुरुषग
सिद्धान्तोपयोगिविशेषणं मन्वादिप्रणीतो ग्रन्थो निबन्
मिति शिष्टप्रणीतत्वं मन्वादिप्रणीतनिबन्धनास्वित्यनेन
योगिविशेषणमुक्तम्। आचारग्रहणेनाशब्दत्वपूर्वपक्ष
मान्यसिद्धान्तहेतुसाम्यादाचाराणामप्यधिकरणविषयत्व
ननु यत्रेत्यादिभाष्येणैव विषयावगतिसिद्धेः तत्स्वरूपगत
शेषस्यात्राविचार्यत्वादष्टकादिस्वरूपोदाहरणं व्यर्थमित्या
तत्रेति * स्वरूपगतविशेषाविचारे ऽप्युदाहरणविशेषं वि
ष्व्यभावादष्टकाद्युदाहरणमिति भावः। मन्वादिस्थानां स

१ अयं पा० २ पु० ना०।

न्येन ज्ञातुमशक्यत्वात्कथं विचाराविषयत्वमित्याशङ्क्य तद्ग्रन्थसमर्पितानीत्युक्तम्। विषयप्रदर्शनार्थतया भाष्यं व्याख्याय सन्देहहेतुश्चानेन भाष्येणाभिधीयतइत्याह * सन्देहेति * कथमित्यपेक्षिते पूर्वपक्षप्रतिभानार्थत्वेन यत्रेति भाष्यं व्याचष्टे * पारतन्त्र्यादिति * सिद्धान्तप्रतिभानार्थत्वेनाथ वेति भाष्यं व्याचष्टे * अप्रामाण्येति * श्लोकं विवृणोति * मन्वादीति * (शब्दानामर्थपरत्वे स्वतः प्रामाण्ये च सत्यपि वक्तृज्ञानानुमानं विनार्थाभावव्युदासरूपपरिच्छेदाख्यविज्ञानानुत्पादकत्वाद् ज्ञानमात्रस्य च प्रामाण्याभावाद्वक्तृज्ञानानुमानद्वारा विज्ञानोत्पादकत्वावगतेर्मन्वादिवचनस्य स्मृत्यपेक्षतोक्ता भाष्यकृता। आचाराणामप्युदाहरणत्वसिद्ध्यै वाक्यानुदाहरणे ऽपि पूर्वोत्तरपक्षहेतुसाम्यात्तेषामप्युदाहरणत्वोपपत्तिसूचनार्थं वचनोक्तिः[1])। तदुच्यतइति पूर्वपक्षभाष्यं व्याचष्टे * तत्रेति * पूर्वविज्ञानं मूलप्रमाणं तस्य यो विषयस्स एवास्येति पूर्वविज्ञानविषयविषयमत्येको ऽत्र विषयशब्दो लुप्तो द्रष्टव्यः। श्लोकं विवृणोति * सर्वेति * ननु शब्द एवात्र मूलप्रमाणं भविष्यत्यत आह * शब्दो ऽपीति * ननु प्रत्यक्षानुपलब्धो ऽपि कल्पयिष्यत[2] आह * प्रत्यक्षेति * प्रमाणशब्देन भावव्युत्पत्त्या कल्पनमभिहितम्। तदेव तावन्निष्प्रमाणकत्वात्कल्पाद्धर्मास्तित्वाद्विप्रकृष्टं दूरे तत्स्पृशतीत्यर्थः योग्यानुपलब्ध्यभावाद्धर्मास्तित्वकल्पनापेक्षया सन्निकृष्टं धर्मास्तित्वं[3] शब्दास्तित्वस्य योग्यप्रत्यक्षानुदयेनाभावनिश्चयात्तत्कल्पना विप्रकृष्टतरा। श्लोकं व्याचष्टे * शब्दस्य तावदिति * अभ्युपगतमित्यनेन कल्पनार्थत्वेन प्रमाणशब्दो व्याख्यातः। न्वनुमानादिनापि शब्दावगतिसम्भवात्प्रत्यक्षमेव प्रमाणमित्ययुक्तमत आह * न चेति * श्लोकं व्याचष्टे * यथैवेति * आगमं निराकरोति * न चेति * कृतके नास्ति विश्रम्भ इत्येतद्व्याचष्टे * यपीति * दुष्टैः प्रतारकैः पुरुषैराकुलितं भ्रामितं चेतो येषामस्मदादीनामित्यर्थः। नित्यो नैवोपपद्यतइत्येतद्व्याचष्टे * नित्यस्य त्विति * नु धन्वन्निव प्रपेत्यादिमन्त्रलिङ्गानां प्रपादिस्मृतिमूलत्वदर्शनाद्वेदमूलत्वाभिधायिनां मन्वादीनां तद्दृष्टान्तेन सत्यवादित्वावगतेः कृतके नास्ति विश्रम्भ इत्ययुक्तमत आह * न चेति * एवं तर्हि मूलान्तरसूचकत्वान्नित्यो नैवोपपद्यतइत्ययुक्तमत आह * न चेति * कर्त्त-

[1] अर्थ पा० २ पु० ना०।

[2] कल्पयितव्य इ० २ पु० पा०।

[3] धर्मास्तित्वमिति १ पु० ना०।

व्यतानुवादे विधिसूचनं स्यात्स्वरूपमात्रानुवादस्तु यदृच्छासिद्ध पादिविषयत्वेनोपपन्नो न विध्याक्षेपायालमित्याशयः । मन्त्रलिङ्गा च स्मृतिमूलसूचकत्वनिराकरणेन नित्यानुमेयश्रुतिमूलत्वमपि नि राकृतं भवति । अन्धपरम्परान्यायापत्त्या स्मरणेन नित्यानुमे श्रुतिकल्पनस्य निराकरिष्यमाणत्वात् प्रत्यक्षश्रुतिमूलत्वे त्वैकरूप्य त्तस्यास्तन्मूलानां स्मृतीनामप्यैकरूप्यं स्यान्न त्वेतदस्ति ।

यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः ।
न तन्मम मतं यस्मात्तत्रात्मा जायते स्वयम् ॥

इत्यादिविगानदर्शनादित्याह * न चेति * ननूपलब्धश्रुति मूलत्वे ऽपि विगीतानेकश्रुतिमूलत्वात् स्मृतिविगानमविरुद्धम
१२ आह * न चेति * श्लोकं व्याचष्टे * यदि हीति * विधिरूपं वाक्य मन्वादिभिर्निरूपितमुपलब्धमिति यदि विज्ञायेत ततः क्वापि विगी तानेकश्रुतिमूलत्वादिकल्पना स्यात् अर्थवादपरेष्वपि त्वग्रत्वे ऽपि य यदि हवा अपि मृषा वदति सत्यं हैवास्योदितं भवति य एवमेतत्स त्यस्य सत्यत्वं वेदेत्यादिषु मृषोद्याभ्यनुज्ञाभ्रान्तिदर्शनेन मन्वादिष्वपि भ्रान्तिशङ्काया निराकर्त्तुमशक्यत्वादेकश्रुतिमूलत्वे ऽपि भ्रान्त्यवसि तानेकतात्पर्यविगाननिमित्तस्मृतिविगानोपपत्तेर्नानेकश्रुतिमूलत्वक ल्पनोचितेति भावः । प्रलीनशाखामूलत्वं तर्ह्यस्त्वत आह * स्मृते ति * प्रासङ्गिकं परिसमाप्य प्रकृतमुपसंहरति * तस्मादिति * उपमानं निराकरोति * उपमानं त्विति * अर्थापत्तिं निराकरोति * अर्थापत्त्यापीति * श्लोकं व्याचष्टे * यदि हीति * सामान्यतो दृष्टग्रहणं दृष्टान्तार्थमतो निर्मूलत्वादित्युपसंहारभाष्यं निर्मूलस्मृ त्यसम्भवेन कस्य चिद् भ्रान्त्यादेरवश्यकल्प्यत्वादयुक्तमाशङ्क्य व्या चष्टे * तस्मादिति * नन्विति भाष्यमर्वाचीनाभिप्रायेण तावद् ग्रन्थ योजयति * नन्विति * अर्वाचीनानां कर्त्तव्यत्वाज्ञानाद्ये विदुरि त्ययुक्तमित्याशङ्कते * नन्विति * वदनानुमेयत्वात्परिज्ञानस्य वद न्तीत्युक्तं तेषामपि मन्वादिवाक्यश्रवणाद्भवति कर्त्तव्यत्वज्ञानमिति परिहरति * कथमिति * एवं कर्त्तव्यज्ञानात्कर्त्तव्यत्वाभिधानयोर्वि- प्रतिषेधप्रतिपादनपरत्वेन व्याख्याय न विदुषामुपदेशो नावकल्पत- इत्यनेन न्यायेनोपदेशान्यथानुपपत्त्या मन्वादेः पूर्वज्ञानकल्पनाशङ्का- र्थमेतद्भाष्यमित्यन्यथाचष्टे * अथ वेति * ये कर्तव्य इति न विदुः कथमिव ते वदिष्यन्तीत्थमसौ पदार्थः कर्त्तव्य इति व्यत्ययेनास्मि- न्व्याख्याने भाष्यं योज्यम् । निषेधाभावेन त्वकर्त्तव्यत्वस्यानाश- ङ्क्यत्वात्कर्त्तव्यत्वाज्ञानमेवाकर्त्तव्यत्वज्ञानमुखेनाकर्त्तव्यो यस्मिन्नि-

तोक्तम्। विवक्षितार्थलाभाय च व्यत्ययाङ्गीकरणमदोषः।
णानुपपत्त्येति भाष्यमर्वाचीनानां स्मरणानुपपत्त्येत्येव केश्चि-
ख्यातं तन्मन्वादिवाक्यश्रवणजनितस्यार्वाचीनानामष्टकादिक-
ताज्ञानस्याकर्त्तव्यत्वाभिधानविरोधित्वेनोपन्यस्तस्य स्मृतित्वे-
ङ्कितत्वादयुक्तमित्यभिप्रायेण दूषयति * स्मरणेति * तदर्वा-
नामष्टकादिकर्त्तव्यत्वज्ञानमाशङ्कावादिनैव तावन्न स्मृतित्वेने-
स्तस्य स्मृतित्वनिराकरणमयुक्तमिति तावच्छब्दस्यार्थः। ननु
दीनामपि स्मरणं निराकर्त्तुमशक्यं तदभावे ग्रन्थरचनानुपप-
याशङ्क्याह * मन्वादीनामपीति * तस्माद्व्याख्यानद्वये ऽपि ७२
चभिप्रायेणैवैतत्परिहारभाष्यं योज्यमिति भावः। तत्रार्वाची-
प्रायशङ्काव्याख्याने मन्वादिवाक्योत्पन्नकर्त्तव्यत्वज्ञाना अप्य-
मन्वादीनां स्मरणानुपपत्तिमालोच्याकर्त्तव्यत्वं वदन्तीति
म्। द्वितीयव्याख्याने तूपदेशकल्प्यस्मरणस्य पूर्वविज्ञानकार-
विनानुपपत्त्या नोपदेशस्य तत्कल्पकत्वं सम्भवतीत्यसम्भवतो
त्त्या कल्पयितुमशक्यत्वादिति भावः। विदितपूर्वस्याप्यस्मृतस्यो-
मशक्तेः स्मरणद्वारेणोपदेशस्य ज्ञानकल्पकत्वात्स्मरणनिराक-
ज्ञानमेव निराकृतम्। वन्ध्यादौहित्रोदाहरणस्य प्रश्न-
भिप्रायमाह * कस्मात्पुनरिति * कारणाभावेन कार्याभावो
ष्टान्तो वाच्य इति दौहित्रस्य कारणभूतदुहित्रभावेनाभावो
नीयः। दुहितुस्तु वन्ध्याकारणमस्तीति न कारणाभाव इत्या-
। उपदेशान्यथानुपपत्त्या मन्वादिस्मरणे ऽवश्यकल्पे सम्यक्-
त्रमिह निषेध्यमिति सूचयितुं दृष्टान्तभाष्ये सम्यग्ग्रहणम्।
रीत्याशङ्काभाष्यं पूर्वविज्ञानकारणाभावे स्मृतिप्रामाण्यानुपप-
क्तमाशङ्क्य पूर्वविज्ञानकारणभूतवेदवाक्यानुमानाभिप्रायत्वेन
ष्टे * यथैवेति * एवं तर्हि नैतदेवमिति परिहारभाष्यं पूर्ववि-
ारणाभावे हेत्वप्रदर्शनादयुक्तं स्यादित्याशङ्क्यागृहीताभिप्रा-
व्याचष्टे * इतरस्त्विति * एतदेव भाष्यमवयवशो व्याचि-
र्वेदत्वस्मृतिप्रामाण्योपपत्तिप्रतिपादकं तावत् प्रत्यक्षेणेतिभा-
एवं व्याचष्टे * वेदः पुनरिति * ननु वर्णस्वरूपस्य प्रत्यक्षत्वे
ास्य वेदावेदसाधारण्याद्वेदत्वस्मृतिर्निर्मूलैव स्यादत आह *
ते * वेदशब्दवाच्यत्वमात्रमेव तत्राप्रत्यक्षं तदपि तु वृद्धव्यव-
ागम्यत्वान्न निष्प्रमाणकं ग्रन्थान्तरविलक्षणमेतत्स्वरूपं प्रत्य-
ति भावः। एतदेवोपपादयति * प्रागपि हीति * वेदशब्द-
लक्षणत्वात् ऋग्वेदादिविशेषमन्त्रब्राह्मणोपन्यासः। ननु वेदशब्दा-

त्प्रागपि वेदादिस्वरूपप्रतीतौ वेदादिसंज्ञानां डित्थादिवत्पौरुषेय
त्विप्रमाणकत्वं स्यादित्याशङ्क्याह * सर्वेषां चेति * नन्वेवमपि
दादिशब्दोल्लेखावगतेर्वृद्धव्यवहाराधीनशब्दार्थसम्बन्धप्रतीत्युत्त
लीनत्वात् प्रत्यक्षत्वं न स्यादत आह * इतीति * शब्दोल्लेख
तिनिर्देशार्थे इतिकरणः । संज्ञाद्वारेण तदुल्लेखेनोत्तरकाल
गम्यमानानां प्रत्यक्षसूत्रे तत्र शब्दार्थसम्बन्धप्रमातुरित्यत्र प्र
त्वं साधितमित्यर्थः । दार्ष्टान्तिके वैषम्यप्रतिपादनार्थमष्टका
त्विति भाष्यावयवं व्याचष्टे * नन्विति * कुम्भकारक्रियास्वि
वैधर्म्यदृष्टान्तः । एतदेवोपपादयति * यदीति * अन्धपरम्परा
येनेति व्याख्येयतयोपक्षिप्तस्यान्धपरम्परानिदर्शनस्य प्रयोजनं त
दाह * सर्वस्येति * वेदत्वस्मृतिवदष्टकादिस्मृतावप्यनादित्वा
माण्यप्रसिद्ध्यभिमानं निवर्त्तयितुमन्धपरम्परानिदर्शनमित्यर्थः । द
मनेन निदर्शनेन प्रामाण्यप्रसिद्ध्यभिमाननिवृत्तिरित्यपेक्षिते ऽस्मि
दर्शनेऽनादित्वस्याप्रामाण्यापादकत्वदर्शनादित्याह * वेदे हीति
९३।१ एतदेव प्रश्नपूर्वमुपपादयन्निदर्शनभाष्यं व्याचष्टे * कथमिति *
ष्टान्तिके योजयति * तादृशं चेति * ननूभयविधदृष्टान्तोपलब्धौ
थमष्टकादिस्मरणस्यान्धरूपस्मृतितुल्यत्वं न तु वेदत्वस्मृतितुल्य
निर्णय इत्याशङ्क्य पूर्वविज्ञानकारणाभावादिति भाष्योक्तहेतुव्या
नार्थं पूर्वोक्तमेव चोदनामूलत्वनिराकरणं स्मारयति * न चो
मूलसद्भावे प्रमाणं नास्तीत्युक्ता तदभाव एव तु स्मर्त्तव्यास्मरण
माणमस्तीत्याह * यदि चेति * अनेन चाप्तोक्तिनिबन्धनेषु व
हारेषु प्रामाण्यहेतुभूतस्य मूलस्य स्मरणेन व्याप्तत्वाद्व्यापकस्मर
भावेन व्याप्यमूलाभावानुमानमुपन्यस्तमर्थापत्तिर्वा व्यवहारा
व्यवहारहेतुमूलविस्मरणानुपपत्तेर्दृश्यादर्शनवद्वा स्मर्त्तव्यास्मर
स्याप्यनवगतपूर्वार्तिताभावज्ञानकरणतायाः स्वरूपमात्रं दृष्टं च प
त्किञ्चित्स्मरन्नपि तत्रान्येनास्मितां[1] पृष्टस्तदेव प्रतिपद्यत इति वदद्भि
चार्यैरिष्टत्वादभावाख्यमेव प्रमाणमनेनोपन्यस्तम् । नन्वविच्छिन्न
म्पर्यदृढस्मरणमात्रेण व्यवहारसिद्धिरवश्यस्मर्त्तव्यत्वविशेषणा
वादस्मरणमात्रस्य च चिरवृत्तेषु सत्स्वपि पदार्थेषूपलब्धेरभावात्स
कत्वान्नास्मरणेन मूलाभावसिद्धिरित्याशङ्कते * स्यादेतदिति *
मूलस्य स्मरणस्याप्रामाण्येन व्यवहारासाधकत्वान्मूलस्यावश्यस्म
र्त्तव्यत्वं साधयति * तदयुक्तमिति * अवश्यसमर्पणीयास्मर्प
दपि स्मृतिमूलभूतानां चोदनानामभावो ऽवसीयतइत्याह * :

१ तवत्यनास्मितामिति २ पु० पा०

ते * ननु स्वयंदृष्टस्य मूलस्यावश्यसमर्पणीयत्वं भवेत् मन्वादि-
स्तु स्मृतिमूलभूतानां चोदनानां स्वयमदृष्टत्वादशक्यं समर्पणमि-
राङ्क्याह * यदि हीति * एवमपि मन्वादिभ्यः पूर्वैराचार्यैः
दृष्टत्वे समर्पणीयत्वापत्तेरदृष्टत्वे वा नित्यानुमेयत्वापत्तेस्तस्य च
प्राकरिष्यमाणत्वान्निर्मूलत्वमेव बलादापद्यतेति भावः । ननु पू-
र्वार्यैः समर्पितमपि स्मृतेर्मूलं प्रलीनत्वेन मन्वादिभिः स्वयमदृष्ट-
न समर्प्यते ऽत आह * यदि त्विति * ननु मन्वादिभिः स्वयं
नामपि मूलानामन्यैरपि स्वयं दृष्टत्वादसमर्पणमित्याशङ्क्यास्मि-
ते स्मृतिप्रणयनवैयर्थ्यमाह * अथेति * इतश्च वैयर्थ्यमित्याह
युक्ततरा चेति * किं चान्यैः स्वयंदृष्टानामपि वेदवाक्यानां ता-
ज्ञानेनेदमस्याः स्मृतेर्मूलमिति निर्णेतुमशक्यत्वात्तात्पर्यज्ञाप-
ं मन्वादिभिरवश्यं समर्पणं कर्त्तव्यमित्याह * न चेति * प्र-
शून्यो मूलविशेषनिर्णयो ऽशक्य इत्यन्यथैव दृष्टान्तमाह
श्येति * ननु

यः कश्चित्कस्य चिद्धर्मो मनुना परिकीर्त्तितः ।
स सर्वो ऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥

इति मन्वादिभिः सामान्येन स्वस्मृतीनां वेदमूलत्वाभिधा-
द्विशेषासमर्पणो ऽपि स्मृत्यनुरूपमूलविशेषनिर्णयो भविष्यत्यत
* न चेति * अतो ऽनादर्त्तव्यमित्युपसंहारभाष्यं व्याचष्टे । ७
णादिति ।

अपि वा कर्तृसामान्यात्प्रमाणमनुमानं स्यात् ॥२॥

अत्र भाष्यकारेण प्रमाणं स्मृतिरिति सौत्रं प्रमाणशब्दं सि-
न्तप्रतिज्ञानार्थत्वेन व्याख्याय विज्ञानं हि तत्किमित्यन्यथा भावि-
ीति करणव्युत्पन्नेन विज्ञानशब्देन विज्ञानोत्पादकत्वं हेतुत्वेनो-
तद्व्याचष्टे * सर्वथेति * पक्षद्वये ऽपि विज्ञानोत्पादकत्वं ता-
विप्रतिपन्नमिति हेतुत्वोपपत्त्यर्थं दर्शयितुं * सर्वथेत्युक्तम् * म-
दिस्थानां स्मरणानां पुरुषान्तरं प्रति ज्ञानोत्पादकत्वाभावमाश-
निबन्धनद्वारेण ज्ञानोत्पादकत्वं सूचयितुं * सन्निबन्धना इत्यु-
* विद्यमाननिबन्धना इत्यर्थः । शोभनार्थेन वा सच्छब्देन सा-
बन्धनत्वाभिधानादसाधुशब्दभूयिष्ठनिबन्धनत्वेन शाक्यादिव-
न्धुर्मन्वादेरप्रत्यायितत्वानुमानं प्रत्युक्तम् । स्मृतिशब्दस्य धर्म-
न्थेष्वेव प्रसिद्धत्वात्पुराणादीनां प्रामाण्यमिह न प्रतिपाद्यतइति
चिच्छङ्का स्यात्तन्निवृत्त्यर्थं वेदातिरिक्तसमस्तविद्यास्थानविषयत्वं

दर्शयितुं * शेषाणि च विद्यास्थानानि * इत्युक्तं भाष्यकारेण पूर्व-
विज्ञानमस्य नास्ति कारणाभावादिति कारणाभावेन स्मृतिमूलभूत-
वेज्ञानाभावमप्रामाण्यहेतुं पूर्वपक्षोक्तमनुभाष्य तन्निराकारणार्थत्वे-
ानुमानं स्यादिति सूत्रावयवो ऽस्या एव स्मृतेरित्यादिना ग्रन्थस्त्व-
मीक्षतइत्यन्तेन व्याख्यातस्तदुपपादयितुमाह * मन्वादीनां चेति *
त्यक्षत्वे मन्वादीनां तत्स्मृतिमूलविज्ञानमूलस्य द्रष्टुं शक्यत्वाददृष्ट-
ल्पनानुपपत्तेरप्रत्यक्षत्वादित्युक्तम् । ननु कल्पना नामादृष्टं विज्ञा-
कारणं तत्तु चोदनाख्यमेवेति कथमध्यवसीयते ऽत आह * तत्रे-
ि * श्लोकं व्याचष्टे * सर्वत्रैवेति * भ्रान्तेस्तावद् दृष्टानुगुण्येनासा-
त्वमाह * तत्रेति * सम्यङ्निबद्धाच्छास्त्राद्यष्टकादीनां धर्मत्व-
र्शनं तद्विरोधापत्तिरित्यर्थः । मन्वादीनामिति कर्त्तरिषष्ठी । स्मृ-
ग्रन्थग्राहिणः पुरुषात्प्रति स्वज्ञानस्य भ्रान्तस्यापि भ्रान्तत्वपरिहा-
पन्यासो मन्वादिकर्तृकः कल्प्यतइति शेषः । अनुभवस्याह * अ-
भवे ऽपीति * पुंवाक्यस्याह * पुरुषेति * विप्रलम्भनस्याह *त-
ति * अनुवृत्तिहेतोर्भ्रान्तत्वपरिहारोपन्यासस्यादिशब्देनोपादानं
प्रलम्भे न केवलमनेकादृष्टकल्पनाप्रसङ्गः किं तु दृष्टप्रामाण्यविरोधो
त्याह * उत्पन्नस्य चेति * चोदनायास्तु दृष्टानुगुण्येन साध्य-
ज्ज्यायसी कल्पनेत्याह * तस्मादिति * ननु चोदनाकल्पने दृ-
नुगुण्यसाध्यत्वस्य हेतुत्वे कर्त्तृसामान्यादिति सौत्रं हेत्वभिधानम-
र्कं स्यादित्याशङ्क्य सम्भावनामात्रे ऽसौ हेतुर्न निर्णायक इति सूच-
तुं मन्वादीनां विज्ञानस्य चोदनामूलत्वसम्भावनामाह * सम्भा-
ते चेति * एतमेवार्थं वक्ष्यमाणभाष्यारूढं करोति * तदर्थमेवा-
ि * नन्वेवमध्ययनेनैव हेतुना चोदनामूलनिर्णये सिद्धे किम-
र्थकेन सम्भावनामात्रहेतुनेत्याशङ्क्य म्लेच्छस्मृतिवैषम्यप्रदर्शना-
सम्भावनाहेतूपन्यास इति सूचयितुं म्लेच्छार्यस्मृत्योर्वैषम्यमाह
ानि पुनरिति * अनुभवपुंवाक्यपरम्परयोर्मिथ्यात्वहेतुतामापाद्य
ष्टयोक्तिः । प्रत्यक्षानुपलब्धे चेति श्लोकोक्तं योग्यानुपलम्भविरोधं
हेतुमनुभाषते * यत्त्विति * परेषां परिहारं दूषयितुमुपन्यस्यति
त्रेति* अनुच्चरितानामज्ञातत्वेनाबोधकत्वान्मूलत्वानुपपत्तिमाशङ्क-
कथमिति मन्वादिभिरप्यस्मदादिवत्पूर्वाचार्यस्मरणान्यथानु-
त्यानुच्चरितानामपि ज्ञातुं शक्यत्वान्मूलत्वोपपत्तिरिति परिहरति
ेष इति * पूर्वाचार्याणामपि चोदनोपलम्भं विना कुतः स्मरण-
शङ्क्य पारम्पर्येणेत्युक्तम् । एवं सत्यनवस्थापत्तिमाशङ्क्य पा-
रेच्छेदवादित्युक्तम् । एकपुरुषपाठस्याविश्रम्भणीयत्वेन चोद-

नायाथात्म्यनिश्चायकत्वायोगात्पारम्पर्याविच्छेदेनैव निश्चायकत्वमङ्गीकार्यमनादित्वाच्चानवस्थादोषाभावः तद्वदत्रापीत्याशयः। एतदेव विवृणोति * यथैव हीति * प्रतिस्मर्तृपूर्वपूर्वाचार्यस्मरणान्यथानुपपत्त्या श्रुतिज्ञानं प्रतिज्ञातयेत्यर्थः। इमं परिहारं दूषयति * तत्त्विति * अयमाशयः यद्यप्यष्टकादिकर्त्तव्यत्वस्मरणस्य पूर्वविज्ञानायत्तत्वात्तस्य च श्रुतिज्ञानं विनानुपपत्तेर्मन्वादीनां श्रुतिज्ञानं कल्प्यते तथाप्यनुच्चरितानां प्रत्यक्षत्वायोगाद्व्याप्त्याद्यभावेन चानुमानाद्यप्रवृत्तेर्मूलप्रमाणासम्भवात्स्वप्नादिमूलापत्तेर्न श्रुत्यस्तित्वनिश्चयोपपत्तिरिति। दृष्टान्तवैषम्यमाह * लिङ्गादीनां त्विति * स्मृतेरनित्यत्वेन पूर्वज्ञानापेक्षत्वात्तस्य चानुच्चरितश्रुतिज्ञानासम्भवेनानुपपत्तेः पारिशेष्याद् भ्रान्त्यादिमूलत्वापत्तिसूचनार्थं लिङ्गादीनां नित्यत्वाभिधानम्। परिहारान्तरमाह * तेनेति * नित्यत्वव्याघातापत्तेरत्राप्यपरितोषसूचनार्थं वरमित्युक्तम्। अध्येतृपरम्पराविच्छेदाभावात्प्रलयानुपपत्तिमाशङ्क्याह * न चेति * अन्यत्रासक्तिः प्रमादस्तत्रानासक्तिरालस्यमादिशब्देन विघ्नयोगादिभिरध्यापकपुरुषक्षयाच्च स्वल्पो वेदाध्येतॄणां विषयो दृश्यतइत्यर्थः। सबीजत्वायास्य पक्षस्य पूर्वोक्तं दोषं परिहरति * न चेति * स्वमतमाह * यद्वेति * अस्मिन्मते ऽनुपलब्धिविरोधं परिहर्त्तुमनुभाषते * कथमिति * परिहरति * उच्यतइति * नानादेशपठ्यमानानां शाखानां प्रमादिभिः पुरुषैस्तद्देशागमनाच्छ्रोतुमशक्तेस्तद्गतश्रुत्यनुपलब्धिसंभवः एकशाखागतानामपि श्रुतीनां नानाप्रकरणस्थानां तत्तत्कर्तृधर्मत्वबाधेन पुरुषधर्मत्वस्य प्रमादिभिर्निर्णेतुमशक्तेः स्मृतिमूलत्वनिरूपणानुपलब्धिसम्भव इत्यर्थः। स्मर्त्तव्यास्मरणस्याभावसाधनत्वेनोपन्यस्तस्य विस्मरणमप्युपपद्यतइति भाष्ये निराकरिष्यमाणत्वात्तदुपेक्ष्य समर्पणीयासमर्पणमभावसाधनत्वेनोपन्यस्तं निराकर्त्तुमनुभाषते * यत्त्विति * निराकरोतिः * सम्प्रदायेति * समर्पणैः सम्प्रदायविनाशापत्तिमुपपादयति * विशिष्टेति * यस्य व्रत्येहनि पत्न्यनालम्भुका स्यात्तामवरुध्य यजेतेत्यवरोधवचनाद्दर्शपूर्णमासयोरुदक्या संवादाप्रसक्तेर्न मलवद्वाससा सह संवदेदिति प्रतिषेधः प्रकरणादुत्कृष्यते ब्राह्मणावगोरणप्रतिषेधस्य क्रत्विगानमनार्थं प्रसक्तावपि (देवा वै यज्ञस्य स्वगाकर्तारं नाविन्दन् तेशंयुं बार्हस्पत्यमब्रुवन्निमन्नो यज्ञं स्वगाकुर्विति सो ऽब्रवीद्वरं वृणै येदेवा ब्राह्मणोक्तो अश्रद्धानो यजातै सनियज्ञस्याशीरसदिति तस्माद् ब्राह्मणोक्तो श्रद्धानो यजते

१ विघ्नयोगः तैरिति २ पु० पा०।

शंयुमेव बार्हस्पत्यं यज्ञस्याशीर्गच्छत्वेतन्ममेत्यब्रवीत्किं मे
या इति यो ऽवगुराति तं शतेन यातयाद्यो निहनत्तत्सहस्रेण या
लोहितं करवद्यावतः प्रस्कद्य पा॰ सून् संगृह्णात्तावतः संव
पितृलोकं न प्रजानादिति तस्माद् ब्राह्मणो नावगुरेत्तेन निंह
लोहितं कुर्यादेतावता हैनसा भवति[2]) इत्याद्यर्थवादात्सर्वेभ्यो
नावगतेरवगोरणप्रतिषेधस्य ब्राह्मणमात्रविषयत्वावसायात्प्र
मुत्कर्षः *कर्मौपयिकमात्रं चेति* येन यत्कर्मानुतिष्ठासितं स
पयिकमात्रमधीयीतेत्यर्थः । स्वयमपठितत्वादप्यसमर्पणमुप
त्याह * न चेति * स्वयमपठितायाः श्रुतेः कथं मूलत्वमि
ङ्क्याह * ते हीति * यत्त्वसमर्पणं मूलविशेषस्य निर्णेतुमशक्य
वश्यं समर्पणीयत्वमुक्तं तन्निराकरोति * न चेति * असिद्ध
समर्पणं सामान्येन वेदमूलत्वस्य समर्पितत्वादित्याह *
चेति* आत्मा वेदमूलाभिधायितया बध्वा नियम्य समर्पित इ
यत्तु वेदमूलत्वाभिधानस्य लोकवञ्चनार्थत्वशङ्कया मूलस
सामर्थ्यमुक्तं तन्निराकरोति * तच्चैतदिति * यथैव शिष्टत्रै
दृढपरिग्रहान्यथानुपपत्त्या मन्वादीनां श्रुतिदर्शनं कल्प्यते त
त्कालीनानां तद्ग्रन्थपरिग्रहीतॄणामपि तत्कल्प्यमित्याशयः
द्धान्तमुपसंहरति * अत इति * एवं स्वमतेन दृष्टानुसाराद्
ल्पनालाघवं तर्कोपबृंहितशिष्टत्रैवर्णिकदृढपरिग्रहान्यथानुप
सवयार्थापत्त्या वेदमूलत्वकल्पनेन स्मृतिप्रामाण्यं साधितं भ
मान्यं तु चोदनामूलत्वसम्भावनहेतुत्वेन व्याख्यातम् । अन्यैस्तु
ख्यातृभिः साक्षात् प्रामाण्यानुमाने वेदमूलत्वानुमाने वा लि
कर्तृसामान्यं व्याख्यातं मन्वादिस्मृतिप्रमाणम् । वेदार्थानुष्ठा
नुष्ठीयमानार्थत्वात् वेदवत्, वेदमूला वा वेदवादिस्मृतित्वात्
वेदार्थस्मृतिवत् स्मृत्यर्थो वा श्रेयोहेतुर्वेदमूलो वा वेदार्थानु
भिरनुष्ठीयमानत्वात् । प्रत्यक्षवेदार्थवदिति दूषयितुमुपन्यस्य
यस्त्विति * स्वतन्त्रशब्देन सम्भावनानैरपेक्ष्यमुक्तम् । दू
७७।१ * तस्येति * अनुमानस्य स्मृत्याचारयोस्तुल्यत्वादाचारग्रहणेन
तिमप्युपलक्षयति पठ्यमानस्य तावद्वेदवाक्यस्य श्रूयमाणस्यैव
तॄन्प्रति प्रमाजनकत्वमश्रोतुः प्रमानुपपत्तेर्लिङ्गादिकल्प्यस्यापि
माणमन्त्रादिश्रुत्यधीनमेव प्रामाण्यं दृष्टमित्यव्यभिचारान्मन
स्मृतेरपि श्रूयमाणश्रुत्यधीनमेवास्मदादीन्प्रति प्रामाण्यं प्र
तेति साध्यधर्मविशेषविपरीतसाधनाद्विरुद्धत्वम् । न च मन

१ श्रयं पा॰ २ पु॰ ना॰ किं तु किं मे प्रजाया इति पा॰ १ ।

न्तः श्रूयमाणत्वात्सिद्धसाध्यताशङ्का तान्प्रति स्मृतेः प्रामाण्याभावा-
: प्रत्यक्षवेदार्थस्मृतौ चैवमेव, वेदवादिस्मृतित्वस्य श्रूयमाणश्रु-
तमूलत्वलक्षणेन श्रुत्यधीनत्वेन सह व्याप्त्युपलब्धेर्धर्मविशेषविपरी-
साधनत्वम्। तदा च श्रूयमाणश्रुत्यधीनत्वापत्तेर्विरुद्धतेति यो-
यम्। कथं तर्हि सूत्रभाष्ययोरनुमानशब्दोऽत आह * तस्मादि-
ति * एवमस्या एवेत्यादिभाष्योक्तं चोदनाकल्पनमुपपाद्यैतदेव भा-
ष्यमवयवशो व्याचष्टे * अस्या एवेति * द्रढिम्न इति पञ्चमी ष-
ष्ठीत्यर्थः। कारणविशेषाकाङ्क्षायामनुपपत्तिमनुभवस्य कारणमु-
क्त्वा न हीत्यादिभाष्येणानुपपत्तिरुपपादिता तत्र मनुष्यग्रहणस्य क-
फलसंबन्धानुसन्धानासम्भवकारणमरणधर्मकत्वप्रदर्शनमस्मिंश्च
जन्मनि विश्वजिन्न्यायावगतां विमिश्रसुखात्मकस्वर्गाख्याष्टकादिफ-
लोपभोगस्य मनुष्यशरीरेणासम्भवप्रदर्शनं प्रयोजनमिति च दर्शयितुं
व्याचष्टे * न हीति * जन्मान्तरीयस्य कस्य चिदर्थस्यास्मरणान्निः
शेषस्मृतिबीजसंस्कारनाशकत्वं मरणस्यावसीयते। जातमात्रस्य
स्तन्यपाने प्रवृत्तिर्यादृच्छिकी प्रथमस्त्रीभोगप्रवृत्तिवत्। किं तर्हि
कारणमनुमीयते इत्यपेक्षिते ग्रन्थस्त्वनुमीयतइत्युक्त्वा सौत्रहेतु-
व्याख्यानार्थकर्तृसामान्यात्स्मृतिवैदिकपदार्थयोरिति भाष्यकृतोक्तं
वेदानुमाने कर्तृसामान्यस्य हेतुत्वं दर्शयतीति भ्रान्तिं व्यावर्त्तयि-
माह * स्मृतीति * मन्वादीनां वेदसंयोगोपपत्त्यर्थं त्रैवर्णिकत्वं
विशेषणत्वेनोपात्तमुपपादयितुं (स्मृतिवैदिकपदार्थयोः कर्तृसामान्या-
दित्युक्तम्। पदार्थशब्दः स्मृतिशब्देन स्मृतेः पदार्थे इति वैयधिक-
रण्येन संबद्ध्यते वैदिकशब्देन सामानाधिकरण्येन) वैदिकपदार्थकर्तृ-
भिस्त्रैवर्णिकैः स्मार्त्तानां पदार्थानां क्रियमाणत्वात्तेषां चात्रैवर्णि-
कपदार्थाननुष्ठातृत्वस्वभावदर्शनात्स्मृतिप्रणेतॄणां त्रैवर्णिकत्वं
गम्यतइत्यर्थः। यद्वा स्मृतिकर्तॄणां मन्वादीनां वैदिकपदार्थकर्तॄणां
इदानीन्तनानां शिष्टानां त्रैवर्णिकत्वेन समानत्वादिदानीन्तनवन्म-
न्वादीनामप्युपपन्नो वेदसंयोग इत्यर्थः। सम्भवद्वेदसंयोगत्वप्रति-
पन्नप्रयोजनं च चोदनाख्यस्य मूलस्य सम्भावनापदलाभ इति
चोदनेत्यनेनोक्तम् * नन्विति भाष्येणानुपलब्ध्याविरोधाच्चोदनाक-
ल्पनानुपपत्तिमाशङ्क्यानुपलभ्यमानोऽपीत्यनेन विप्रकीर्णशाखानेकप्रक-
रणस्थत्वेनोपलब्ध्ययोग्यत्वापनुपलब्धिमात्रस्य चाभावासाधनत्वा-
द्विरोधमुक्त्वा विस्मरणमप्युपपद्यतइत्युक्तं तत्प्रलीनत्वनिमित्तानु-
पलम्भप्रतिपादनपरत्वेन तावत्सोपपत्तिकं व्याचष्टे * विस्मरण-

१ अयं पा० २ पु० ना०।

मपीति * नित्यत्वव्याघातापत्तेस्त्वेतत् पक्षापरितोषाद्विध
नशाखामूलत्वपक्षएव स्मर्त्तव्यास्मरणात्तदभावमाशङ्क्य सा
न्यतो वेदमूलत्वस्याभियुक्तैः स्मरणाद्विशेषस्य त्वनौपयिक
नावश्यस्मर्त्तव्यत्वाभावादस्मरणमात्रस्य चाभावासाधकत्वादवि
धप्रतिपादनपरतया स्वमतेन व्याचष्टे * यदा त्विति * त
पपन्नत्वादित्युपसंहारभाष्यं मन्वादीनां त्रैवर्णिकत्वेन सम्भवद्वेद
योगतया पूर्वविज्ञानोपपत्तेरिदानीन्तनानां च त्रैवर्णिकानां स्मृ
मूलविशेषास्मरणस्यानुपलम्भस्य चोपपन्नत्वेनाभावासाधकत्वा
न्थानुमानाविरोधोपसंहारार्थतया स्पष्टत्वान्न व्याख्यातं स्मृतिप्राम
ण्ये लिङ्गदर्शनान्युपन्यस्याष्टकालिङ्गो मन्त्रो भाष्यकृतोदाहृतः

यां जनाः प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम् ।
संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली ॥

अष्टका यैस्तु राधसे स्वाहेति तस्याष्टकादेवताराधि
प्रकाशकत्वादेषा वै संवत्सरस्य पत्नी यदष्टकेति संवत्सरपत्नी
त्वसंस्तुताष्टकाप्रकाशकत्वाच्चाष्टकालिङ्गत्वं स्पष्टमेवेति तदपि
व्याख्यातम् । तथेति भाष्यं व्याचष्टे * तथेति * आक्षिपति * यत
दिति * श्लोकं व्याचष्टे * न हीति * ननु धर्माप्रामाण्यमेवानेन प्रक
रेणोक्तमिति शङ्कते * स्यादेतदिति * निराकरोति * तथा सतीति
वेदमूलत्वानिराकरणार्थस्तर्हि दृष्टार्थत्वोपन्यासो भविष्यतीत्यत आ
* न चेति * वैदिकेष्वपि च सर्वत्र दृष्टार्थत्वस्योत्प्रेक्षितुम् शक्यत्वा
तेनावैदिकत्वसिद्धिरित्याह * सर्वत्र चेति * लोकपंक्तिर्लोकोपसं
ग्रहस्तदुत्पादकत्वरूपादनादेर्दृष्टार्थताध्यापनादेः शिष्यादिसहायोपा
दानोत्पादकत्वरूपा सवनस्थक्षत्रियवैश्यवधे ब्रह्महत्येति यागस्यात्म
रक्षणोत्पादकत्वरूपा कुटुम्बभरणस्य प्रीत्युत्पादकत्वरूपेत्यर्थः
पारमार्थिक्यपि दृष्टार्थता नावैदिकत्वसाधिकेत्याह * न चेति *
दृष्टार्थत्वस्य वेदमूलत्वाविरोधित्वमुक्तमुपसंहरति * तस्मादिति *
भवत्ववघातादीनां नियमाददृष्टार्थाद्वेदमूलत्वं गुर्वनुगमनादीनां तु क
थमित्याशङ्क्याह * अतश्चेति * निष्पन्नाविधेरप्यनुष्ठीयमानस्य
गुर्वनुगमनादेर्दृष्टार्थत्वायोगादवश्यकर्त्तव्यतान्यथानुपपत्तेरकरणनि
मित्तप्रत्यवायपरिहार्यत्वावसायात्तस्य चानन्यप्रमाणकत्वाद्वेदमूलत्व
सिद्धिरित्याशयः । यत्तु दृष्टार्थत्वं भाष्यकृतोक्तं तदानुषङ्गिकमि
त्याह * दृष्टं चेति * निष्पद्यतइत्यनेनानुषङ्गिकत्वं दर्शितं दृष्टार्थ
त्वे ऽपि वा नियमस्याऽदृष्टार्थत्वाद्वेदमूलत्वं सेत्स्यतीत्यभिप्रायेणाह
* नियमाच्चेति * षष्ठे च सकृदसकृदनुष्ठानविचारात्सूत्रकारस्यापि

केवलदृष्टार्थत्वाभिप्रायो लक्ष्यतइत्याह * एवं चेति * गुरुगमनावृ-त्तौ तदनुगमनमावर्त्तनीयं न वेति सन्दिह्य गुरुगमनस्य निमित्तत्वाभावे ऽपि तदभावे ऽनुगमनस्यासम्भवात् तत्काले ऽनुष्ठेयत्वोपपत्ते-र्निमित्तत्वे प्रमाणाभावात्सकृदनुष्ठानेन शास्त्रार्थसिद्धेरनावृत्तिप्राप्तौ वक्ष्यते आचारानुमितस्य विधेरधिकारिविशेषणापेक्षायामावश्यक-त्वोपपत्तये गुरुगमनस्य निमित्तत्वेनाधिकारविशेषणत्वावसायाद्भेदेन होमादिवन्नैमित्तिकत्वाद् गुर्वनुगमनस्याप्यावृत्तिः सिद्धा कथं तर्हि दृष्टार्थत्वादेवेत्येवकारो ऽत आह * यत्त्विति * तथा चेति गुर्वनु-गमनलिङ्गदर्शनभाष्यं तावदतिक्रम्य प्रपा इति भाष्यं न धर्मायेत्यदृष्टा-र्थत्वनिषेधेन प्रपादेर्गुर्वनुगमनादिवत् केवलदृष्टार्थत्वप्रतिपादकत्वेन बुद्धिस्थत्वाद्व्याचष्टे * सभेति * प्रपादिष्वपि स्मृत्यनुरूपानेकश्रु-तिकल्पनौचित्यात् पूर्वभाष्यपदस्याप्यतिशयार्थत्वसूचनार्थं * यद्य-पीत्युक्तम् * परोपकारश्रुतेः सर्वसाधारण्यप्रदर्शनार्थं समस्तग्रह-णम् । अतिक्रान्तलिङ्गदर्शनं व्याचष्टे * तस्मादिति * प्रपालिङ्ग-मपि स्तुतिपरं मन्त्रावयवं व्याचष्टे * यथेति * स्थलयोदकम्परिगृ-ह्णन्तीति जानपदकुण्डगोणस्थलेत्यादिसूत्रेणाकृत्रिमे स्थले ङीष्प्रत्यय-विधानात्कृत्रिमे टाप्प्रत्ययानपवादप्रतीतेः स्थलाद्राष्ट्रस्य कृत्रिमतीर-प्रायत्वात्तडागलिङ्गं स्पष्टत्वान्न व्याख्यातम् । शिखाकर्मणो दृ-ष्टार्थत्वप्रतिपादकं गोत्रचिह्नमित्यपि भाष्यमतिशयार्थमेवेति व्याचष्टे * गोत्रेति * चतुरवत्तस्य सामान्येन विहितस्य पञ्चावत्तं भृगूणामि-त्यपवादाच्चतुरवत्तपञ्चावत्तविभागं कर्माङ्गं वसिष्ठशुनकात्रिवा-ध्र्यश्वानां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषामिति द्वितीय-प्रयाजविभागस्ताभिर्यथर्ष्याप्राणीयादित्याप्रासूक्तविभागश्चादिशब्दो-क्तः । तदुपयोगित्वादौपचारिकी गोत्रस्य कर्माङ्गभूततोक्ता त-थाऽऽर्षसंख्याशिखाविधानाच्छिखाकल्पस्त्रिशिखपञ्चशिखत्वादिरू-पश्चिह्नमिति दर्शनं चेति भाष्यं कुमारा विशिखा इवेति नानाशिख-द्योतकशिखाकर्मलिङ्गदर्शनप्रतिपादनार्थतया स्पष्टत्वान्न व्याख्यातं तेनेत्युपसंहारभाष्यस्य तात्पर्यं व्याचष्टे * तेनेति * यद्यप्यत्र वेद-मूलतया स्मृतीनां धर्मप्रामाण्यं प्रतिपाद्यं तथाप्यर्थकामविषयासु प्रमाणान्तरमूलत्वेन प्रामाण्योपपत्तेस्तत्प्रणेतॄणामाप्तत्वावधारणाद-दृष्टविषयासु वेदमूलत्वं सुकल्प्यमिति दर्शयितुं सामान्यतः प्रयोज-नत्वाभिधानम् । अदृष्टार्थस्मृतिप्रामाण्यं प्राधान्येनेह प्रतिपाद्य-त इति सूचयितुं व्युत्क्रमेण विवेककथनम् । धर्मविशेषस्यापि मोक्षस्य ब्राह्मणपरिव्राजकवद्भेदेनोपादानम् । भाष्ये तु कर्मव्युत्पत्त्या पदार्थ-

प्रामाण्याभिधानम् । अनेन च भाष्येण वेदातिरिक्तसकलवि
स्थानप्रतिपाद्यानां पदार्थानां दृष्टादृष्टप्रयोजनभेदेन मूलविवेककथनं
तमिति दर्शयितुं पुराणेतिहासगतेषु दृष्टादृष्टोपदेशवाक्येषु तावद्
शास्त्रोक्तं विवेकमतिदिशति * तथैवेति * ननूपाख्यानासत्यत्वे
तिहासपुराणप्रणेतॄणामनाप्तत्वावसायात्कथमत्रोपदेशवाक्यानां
६ लप्रमाणकल्पनमित्याशङ्क्याह * उपाख्यानानि त्विति * तेषामप्य
वादन्यायेन प्रयोजनत्वं प्रामाण्यं चोक्तमित्यर्थः । पृथिवी विभाग
थनस्य कथं प्रयोजनत्वप्रामाण्ययोः सिद्धिरित्यपेक्षायामाह * यदि
ति * धर्माधर्मसाधनप्रदेशो जम्बूद्वीपस्य भारतवर्षं तत्कथनं द
नपूर्वकं तदतिरिक्तफलोपभोगप्रदेशकथनं भारतवर्षस्य च धर्मा
र्मसाधनत्वं वेदमूलम् । वंशानुक्रमणस्य प्रयोजनं मूलं चाह *वंशेति

तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयः ।
प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुला ॥
हस्तो वितस्तिद्वितयं दण्डो हस्तचतुष्टयम् ।
तत्सहस्रद्वयं क्रोशो योजनं तच्चतुष्टयम् ॥

इति देशपरिमाणं निमेषकाष्ठाकलामुहूर्त्ताहोरात्रमासवर्षभेदे
च कालपरिमाणं लोकव्यवहारसिद्ध्यर्थं ज्योतिःशास्त्रव्यवहारसि
द्ध्यर्थं च दर्शनपूर्वकम् । चन्द्रसूर्यान्तरालादिदेशपरिमाणं युगादि
कालपरिमाणं च ज्योतिःशास्त्रव्यवहारसिद्ध्यर्थं गणितविषयसम
द्धायोत्थानुमानपूर्वकमित्याह * देशेति * कलावधर्मभूयिष्ठाः स
भविष्यन्त्यल्पीयसापि धर्मेण भूयानभ्युदयो भविष्यतीत्यादिभविष्य
त्कथनस्य प्रयोजनं युगस्वभावनिबन्धनस्य धर्माधर्मानुष्ठानवैचित्र्य
फलपाकवैचित्र्यस्य च ज्ञानं तत्कारणत्वेन वा धातागच्छान् उपब
र्हिवृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् इत्युत्तरार्द्धेचः (आ
ता गच्छान् उत्तरा युगानि इति पदानि घ निश्चितम् । घा इति दीर्घश्छान्द
सः । तानि उत्तराणि युगानि आगच्छान् आगमिष्यन्ति । यत्र जाम
बालिशाः अजामि अतिरिक्तानि शास्त्रविरुद्धानि कर्माणि कृण्व
करिष्यन्तीति नियमोक्तिः । अत्रेदं निरुक्तम् । आगमिष्यन्ति त
न्युत्तराणि युगानि यत्र जामयः करिष्यन्त्यजामि कर्माणि जाम्यति
कनामबालिशस्य वा समानजातीयस्य वोपजनउपधेहिवृषभाय बाहु
न्यमिच्छस्व सुभगे पतिं मदिति व्याख्याते)मित्यादिर्वेदोमूलमित्याह
भविष्यत्कथनमपीति * नित्यवेदविषयत्वाविरोधायानादिकालप्र

१ यथंपा २ पु० ना० । धातागच्छानुत्तरायुगानियत्र जामयः कृणवन्नजामीत्यादि
दोमूलमिति २ पु० पा० ।

युगस्वभावस्योक्तम् । अङ्गानां मूलप्रयोजने विवेचयिष्यंस्ता-
तस्तावद्यथासम्भवं क्रत्वर्थप्रतिपादनं पुरुषार्थप्रतिपादनं च प्र-
लोको वेदश्च मूलमित्याह * अङ्गेति * शिक्षायां वर्णादिख-
थनं लोकमूलं तद्विज्ञानपूर्वकस्य तूच्चारणस्य क्रत्वर्थपुरुषा-
थनं वेदमूलमित्याह * तत्रेति * अकारादयो वर्णाः संवृता-
करणान्युदात्तादयः स्वराः ह्रस्वादयः कालाः। कण्ठादिस्थाना-
शब्देनोक्तानि । कल्पेषु सूत्रेषु च क्रत्वर्थपुरुषार्थाङ्गप्रधानप्रति-
प्रयोजनं वेदश्च मूलमित्याह * कल्पेति * अर्थवादमन्त्र
णां विधीनामुपसंहारो विविक्तीकरणं शाखान्तरविप्रकीर्णाना-
त्र सन्निवेशो न्यायलक्ष्याणां तात्पर्यनिर्णयस्तत्तद्विधिरूपमि-
ये तु कल्पसूत्रेष्वृत्विगादीनां को यज्ञ इति प्रश्नोत्तरादिव्य-
स्तेषामनुष्ठानसौकर्यादिमुखं प्रयोजनं दक्षिणा प्रश्नोत्तरादि-
राणां चार्थः प्रयोजनं लोकश्चाभयत्र मूलमित्याह * लोके-
व्याकरणे शब्दान्वाख्यानं लोकमूलं साध्वसाधुप्रयोगयोस्त्व-
हेतुत्वकथनं वेदमूलमित्याह * व्याकरणेऽपीति * निग-
क्तयोर्लोकमूलपदार्थज्ञानप्रयोजनत्वस्य स्पष्टत्वादनुपन्यासः ।
श्चित्याङ्गायत्र्यादिविवेककथनं लोकवेदमूलं तद्विज्ञानपूर्वकस्य
पुरुषार्थत्वकथनं वेदमूलमित्याह * छन्दोविचित्यामपीति *
चासौ श्रुतिरित्याह * तथा चेति * ज्योतिःशास्त्रे तिथ्या- ८०॥१
नं गणितानुमेयत्वाल्लोकमूलं ग्रहसौस्थ्यादिनिमित्तेष्टानिष्टफ-
लसूचनं तु वेदमूलमित्याह * ज्योतिःशास्त्रेऽपीति * क-
कनक्षत्रे स्थिताश्चन्द्रादयः ततः प्रभृत्यात्मनो गतिविशेषेण
न्दत्वरूपेणान्यान्यन्यानि नक्षत्राण्युपसंक्रामन्ति तेषां च नक्ष-
सञ्चरतां शीघ्रमन्दत्वविशेषेण गतिपर्यायवैलक्षण्यं भवति
दित्यगतिविशेषावच्छिन्नस्य च कालस्य तिथिनक्षत्रव्यपदेशव-
दादित्यगतिविभागज्ञानेन तिथिनक्षत्रज्ञानं भवति एतावन्त
दित्ययोर्गतिपर्याया एकस्मिन्युगे भवन्तीत्यवगतेषु तद्भागेषु
रादिष्विहेदानीं चन्द्रमा इहेदानीमादित्य इत्येवं चन्द्रादित्या-
विभागज्ञानस्य तिथ्यादिज्ञानोपयोगित्वम् । एतावद्भिर्युगपर्या-
वन्तश्चन्द्रादित्यगतिपर्याया इति च युगपरिवर्त्तपरिमाणज्ञा-
न्द्रादित्यादिगतिविभागो ज्ञायते एतावन्तो युगपरिवर्त्ता जाता
ते ऽस्य युगस्यैतावन्त्यहोरात्राण्यस्यैतावन्तीति समस्तातीता-
ख्यानात्मकमहर्गणं कृत्वा ऽस्य ग्रहस्येदानीमीदृशी गतिवर्त्तते
ति ज्ञानं भवतीति युगपरिवर्त्तपरिमाणज्ञानस्य चन्द्रादित्यादि-

गतिविभागज्ञानोपयोगित्वं यथा दिवसस्याष्टमो ऽयं मुहूर्त्तस्तेनास्मि न्मुहूर्त्ते नभोमध्ये सूर्य इति मुहूर्त्तसंख्यानेनादित्यस्य गतिविशेष ज्ञानं भवतीत्यर्थः । यथा च प्रकृतिप्रत्ययादिप्रक्रिया साधुशब्दावधा रणे लिङ्गं तथात्र गणितं तस्य चास्मिन् गणिते सत्यस्मिन्देशे च न्द्रादयो भवन्तीति प्रत्यक्षेणैव केन चिदभियुक्तेन व्याप्तिं गृहीत्वा ऽन्यस्मै गणितलिङ्गोपदेशे कृते तस्याप्याप्तोपदेशे कृते तस्याप्याप्तो पदेशावगतान्वयस्यानुमाने जाते ऽप्रतिपत्तिवत्परस्यापि प्रतिपत्ति कर्त्तुमुपदेश इति सम्प्रदायाविच्छेदान्न निर्मूलत्वाशङ्केति दर्शयितुम विच्छिन्नेत्युक्तं,ग्रहसौस्थित्यनिमित्तपूर्वकृतस्य शुभकर्मणः फलविपा कः ग्रहदौस्थित्यनिमित्तो ऽशुभस्य तद्गतशब्देन सौस्थित्यदौःस्थित्यवि षयतोक्ता, ज्योतिःशास्त्रे ग्रहदौःस्थित्ये शान्तिविधानात्सौस्थित्ये च्चो पनयनादिविधानात्तस्य च वेदमूलत्वात्कर्मफलविपाकसूचनं वेद मूलमित्यर्थः। ज्योतिःशास्त्रन्यायं साधुमुद्रादिष्वतिदिशति * एतेने ति * पूर्वं शान्त्यादिविधानद्वारेण वेदमूलत्वमुक्तम् । यद्वा साक्षा देव तत्प्रतिपादका विधयो ऽनुमातव्या इत्याह * ईदृशा वेति * गृ हसन्निवेशो वास्तुविद्याविषयः । शरीरसन्निवेशः सामुद्रविषयः आदिशब्दोपात्तानां ग्रहाणां सौस्थित्यदौःस्थित्यरूपः सन्नि वेशो ज्योतिःशास्त्रविषयः मीमांसाया धर्मज्ञानप्रयोजनत्वस्य प्रथमसूत्रेणैवोक्तत्वात्तदुपेक्ष्य लोको मूलमित्याह * मीमां सात्विति * कथं लोकात्प्रवृत्तेत्यपेक्षिते प्रत्यक्षानुमानादि भिरित्युक्तम् प्रत्यक्षादिसिद्धत्वे शास्त्रानर्थक्यमाशङ्क्याविच्छिन्नसम्प्रदायानां पण्डितानां व्यवहारो यैरित्युक्तम् । सम्प्रदायविच्छेदस्य प्रयोजनमाह * न हीति * मीमांसामूलप्रयोजने न्यायविस्तरे ऽतिदिशति * एतेनेति * ननु प्रत्यक्षादिलक्षणपरस्य न्यायविस्तरस्य कथं धर्मज्ञानप्रयोजनत्वमित्याशङ्क्य वाक्यार्थधर्मप्रतिपत्त्युपायभूतपदार्थविवेकहेतुप्रत्यक्षादिविवेचनेनेति श्लोकद्वयेनाह * विषय इति * वेदस्वरूपावधारणद्वारेणार्थस्य धर्मज्ञानोपयोगित्वमाह * वेदो ऽपीति * प्रत्यक्षमात्रेण वेदावधारणसिद्धेरादिशब्दानर्थक्यमाशङ्क्य विप्रकीर्णात्मकेत्युक्तम् प्रतीकग्रहणेन मन्त्रशेषत्वानुमेयत्वात्स्वयमश्रुतस्यापि कस्य चिद्वेदभागस्याप्तवाक्यावसेयत्वाद्विश्वजिदादौ च ज्योतिष्टोमवदित्यादिवाक्यशेषस्योपमानाधीनावगतित्वात्स्वर्गकाम इत्यस्य चार्थापत्तिगम्यत्वाद्विचित्रप्रमाणगम्य इत्यर्थः । न्यायविस्तरस्य धर्मज्ञानोपयोगित्वं मनुनाप्युक्तमित्याह * तथा चेति * त्रयमित्युपलक्षणार्थमुक्तम् । ननु तर्कस्य धर्मज्ञानो-

पयोगित्वे बौद्धादितर्काणामपि धर्मज्ञानोपयोगित्वं प्रसज्येतेत्याश ङ्क्य तेषामपि पूर्वपक्षप्रतिपादनार्थत्वेनोपयोगादानिष्टापत्त्यभावं द र्शयितुमाह * प्रायेण चेति * कुमार्गप्रवृत्तावधर्मवासितान्तःकर णत्वं हेतुः। निश्चितचन्द्रैक्यस्य दोषवशाद् द्विचन्द्रभ्रमोत्पादेऽपि द्वित्वानध्यवसायाद्धर्मतत्त्वज्ञस्याधर्मवासनादोषात् कुमार्गप्रवृत्ताव पि तत्राध्यवसायानुपपत्तिमाशङ्क्य * तत्त्वज्ञानप्रतिबद्धत्वमुक्तम् * स्वोत्प्रेक्षितत्वनिरासार्थं लोकादिमूलोपन्यासः। सर्वासां विरुद्धाना प्रतिपत्तीनां यानि मुखानि विषयास्तेषां प्रदर्शनं क्रियतइति शेषः तेषां च मुखानामुपपत्तयः कथ्यन्तइति वक्ष्यमाणमाख्यातं विपरि णमय्यानुषज्यते। तासां चोपपत्तीनां बलाबलसम्प्रधारणपूर्वक तत्त्वनिश्चयस्य द्वारनियमे चोपपत्तिरिति कथ्यतइत्यर्थः। ननु स्वो त्प्रेक्षितेनापि तर्केण तत्त्वनिश्चयोपपत्तेः किं लोकादिप्रसूतैस्तर्कशा स्त्रैरित्याशङ्क्याह * अन्यथा पुनरिति * भ्रान्त्युत्पादनशक्तिहेतुत्वे नोक्तं बहुजनवचनसम्मतत्वमुपपादयितु *मज्ञानबोधनादित्युक्तम्* न्यायविस्तरानभिज्ञत्वेनोपपत्तिबलाबलज्ञानरहितानां पुंसां बोधो त्पादनादित्यर्थः। ननु न्यायविस्तरस्योपदेशशास्त्रत्वाभावात्कथं तेन बलाबलावधारणमित्याशङ्क्याह * सर्वासु त्विति * स्वातन्त्र्येणेति* प्रत्यक्षादिप्रमाणानुसारेणेत्यर्थः। ननु धर्मप्रमाणनिरूपणार्थस्य तर्क स्योक्तेन प्रकारेणास्तु धर्मज्ञानोपयोगित्वं यस्तु सर्वं जगन्नित्यमेवेति सांख्यानां नित्यत्वैकान्तप्रतिपादनं बौद्धानां च सर्वं जगदनित्यमेव सर्वात्मना पृथग्भूतं चेत्यनित्यत्वपृथक्त्वैकान्तप्रतिपादनमद्वैतवादि नां च सर्वेषामेकत्वैकान्तप्रतिपादनं सामान्यविशेषयोश्च व्यतिरेकै कान्तप्रतिपादनमौलुक्यानामादिशब्दोपात्तं वा व्यतिरेकैकान्तप्रति पादनं सांख्यानां तस्य कथं धर्मज्ञानोपयोगितेत्याशङ्क्य निष्कृष्टैकैक पदार्थांशनिरूपणार्थत्वेनोपयोगमाह * यदपि चेति * ननु संमु खेनापि वस्तुना वाहनदोहनादिव्यवहारसिद्धेः किमंशनिष्कर्षेणे त्याशङ्क्य वाक्यार्थप्रतिपत्तेः पदार्थप्रतिपत्तिहेतुकत्वात्पदार्थानां च वस्त्वंशविषयत्वात्तन्निष्कर्षोऽवश्यकार्य इत्याह * अवश्यं चेति * तदेव व्यतिरेकमुखेनोपपादयति * अन्यथेति * मन्त्रार्थवादी यः स्तुतिनिन्दालम्बननिरूपणार्थमप्येकान्तप्रतिपादनमवश्यकार्यमित्याह *मन्त्रेति * ननु येषा सुखदुःखमोहात्मकसत्त्वरजस्तमोरूपं प्रधा जगत्कारणमिति प्रक्रिया स्थितिसिद्धान्तापरपर्याया सांख्यैः पुरुष ति ब्रह्मविद्भिरीश्वर इति पातञ्जलीयैः परमाणव इत्यौलुक्यैरादि ब्दात्तत्तत्कार्यं जगदिति यथाक्रमं सांख्यादिभिः प्रतीताः प्रतिग

ताः प्रतिज्ञाताङ्गीकृताः किमासां सर्वासां मूलमित्याशङ्क्याह * य
ता इति * सृष्टिप्रलयादिरूपेणेति प्राधानादिभ्यो जगतः सृष्टिप्रल
दिरूपेणेति प्रधानादिभ्यो जगतः सृष्टिरुत्पत्तिस्तेष्वेव च प्रलय इ
पादानकारणत्वमुक्तमादिशब्देनेश्वरस्य निमित्तकारणत्वमुक्तं तृ
येत्थम्भूतलक्षणार्था सूक्ष्माद्वटबीजात् स्थूलवृक्षोत्पत्तिदर्शनात्प्र
नादेः सूक्ष्मात् स्थूलं जगदुत्पद्यतइत्यनुमानमित्यर्थः । प्रयोजने
त्यपि वेदप्रामाण्ये स्वर्गयागादीनां साध्यसाधकत्वावबोधे कथं
क्ष्मादपूर्वात्स्वर्गादेः स्थूलस्योत्पत्तिः सम्भवतीति हेतुकानां विचि
त्सानिवृत्तिरित्याह * प्रयोजनतेति * सृष्टिप्रलयाङ्गीकरणस्य
योजनमाह * सर्गेति * यस्मात्सत्यसति वा पुरुषकारे तद्बले
दैवबलेन कार्यं प्रवर्त्तते दैवोपरमे चोपरमति, सृष्ट्यादौ तु पुरुषक
राभावे ऽपि दैवमात्राज्जगदुत्पत्तेः प्रलयकाले च सत्यपि पुरुषक
रे दैवोपरमे जगदुपरमते तस्माद्दैवस्याधिकः पुरुषकारात्प्रभावः स
मर्थ्यमिति मत्वा श्रौतस्मार्त्तकर्मानुष्ठाने यतितव्यमिति सृष्टिप्रलय
विषयस्यापि तर्कस्य धर्मोपयोगितेति भावः । विज्ञानमात्रादिप्रक्रि
याणां मूलप्रयोजनं चाह * विज्ञानमात्रेति * निवर्त्तयितुं वादाना
मित्यन्वयः एवं बाह्यतर्काणामपि कथं चिद्धर्मज्ञानोपयोगसम्भवा
ज्ञानिष्टापत्तिरित्युक्त्वा प्रकृतं सकलं वेदातिरिक्तविद्यास्थानप्रामा
ण्यमुपसंहरति * इत्युपपन्नमिति * अतश्चोपसंहारभाष्ये दृष्टादृ
ष्टप्रयोजनभेदेन मूलविवेककथनं सर्वविषयमेव योजनीयमित्याह
[1] * सर्वत्र चेति * वृश्चिकविद्याग्रहणेनायुर्वेदोपलक्षणादादिशब्देन
च नीतिशास्त्राद्युपसंग्रहात्त्रैवर्णिकपरिगृहीतानामर्थकामोपयोगिना-
मपि विद्यास्थानानां प्रामाण्यं सूचितं त्रैवर्णिकापरिगृहीतानां बौद्धा-
दिग्रन्थानां प्रामाण्याभ्यनुज्ञानाशङ्कया निषेत्स्यमानत्वात् ।

॥ अथ श्रुतिप्राबल्याधिकरणम् ॥ २ ॥

विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् ॥ ३ ॥

सङ्गतिमाह * स्मृतीति * कथमपोद्यतइत्यपेक्षिते सूत्रारूढं तत्स्वरूपमाह * विरोधे त्विति * कस्मिन्नसतीत्यपेक्षिते विरोधे वेदवाक्येनेत्युक्तं विरोधे ऽपि वैपरीत्यपरिच्छेदात्प्रागनुपसञ्जातविरोधित्वाच्छ्रुत्यनुमानसम्भवाच्च प्रत्यक्षश्रुतितः प्रागनुमानं प्रवर्त्तते मन्थरत्वादित्युक्तं तेन चार्थेनाधिष्ठिते इति वेदवाक्येन स्मृत्यर्थे वैपरीत्येनापरिच्छिन्ने परिच्छेदात्प्रागित्यर्थः । सङ्गतिमुक्त्वा विषयप्र-

१ प्रतिमतादृति २ पु० ना० ।

दर्शनपूर्वकं सन्देहमाह * यावतीति * सम्प्रधार्यतइत्यनेन यत्र
श्रुतिविरोधस्तत्र कथमिति भाष्यगतः कथं शब्दः सन्देहप्रदर्शन
र्थत्वेन व्याख्यातः। अकथिते च विषये सन्देहस्य वक्तुमशक्यत्वा
देतदेव भाष्यं विषयकथनार्थमपीति वक्ष्यमाणोदाहरणभाष्यानादरा
योदाहृत्येत्यनेन सूचितम्। यावन्तीत्यादिना चानादरकारणमुक्तम्
पर्युदस्यतइत्यनेनापवादत्वं दर्शितम्। निषेधस्य विकल्पापादकत्वेना
पवादत्वायोगात्। प्रश्नपूर्वकं सन्देहहेतुमाह * कुत इति * ननु कथ
प्रतीयमानस्य विरोधस्य परिहारः कथं वा तस्मिन्सति बाधमन्तरेण
गतिरित्याशङ्क्य सामान्यन्यायप्रदर्शनपूर्वकमुभयमुपपादयति * ए-
कविषयेति * विचाराविषयत्वापत्तेर्विरोधपरिहारेण पूर्वपक्षो न युक्त
इत्याशङ्कित विरोधयोरपीत्युक्तम्। * केन चित्प्रकारेणेति * वेष्टन-
स्मृतेर्लिङ्गयकुलव्यतिरिक्तविषयत्वात्स्पर्शश्रुतेश्च तन्मात्रविषयत्वा-
द्राजक्रयाग्नीषोमीयावध्योश्चापद्विषयत्वादष्टाचत्वारिंशद्वर्षब्रह्मचर्य-
स्मृतिकृष्णकेशाधानश्रुत्योश्च गार्हस्थ्यायोग्यायोग्यविषयत्वादित्यर्थः।
वैधेयप्रतिषेध्ययोर्वेत्यनेन सत्यप्येकविषयत्वे विरुद्धार्थोपसंहारि-
त्राभावादपि विरोधपरिहारः * सम्भवतीत्युक्तम् * राजक्रयादू-
र्ध्वं विधेयस्याभोजनसङ्कल्पस्य प्रतिषेध्यस्य च राजक्रयात्प्राग्भोजनस्य
विरोधाभावेनैकस्मिन्नपि दीक्षितान्नरूपे विषये समुच्चयसम्भवादि-
त्यर्थः। स्पर्शवेष्टनयोः कृष्णकेशाधानाष्टाचत्वारिंशद्वर्षब्रह्मचर्ययो-
र्येकविधानेनार्थादितरप्रतिषेधमभिप्रेत्य वेष्टिताया अपि स्पर्शस-
म्भवात् कृष्णकेशत्वस्य चानवस्थितवयोवस्थां कालविशेषत्वेनाष्टाच-
त्वारिंशद्वर्षब्रह्मचर्योत्तरकालमपि कस्मिंश्चित्पुरुषे सम्भवाद्विरोधप-
रिहारो वक्तुं शक्यते सति वा तुल्यमूल इत्येतद्व्याख्यातुम् * एक-
प्रयोगेत्याद्युक्तम् * विकल्पाश्रयणे ऽप्युभयप्रामाण्यमुपपत्स्यतइत्यु-
क्तविरोधिनोः समावेशायोगात्कथमुभयप्रामाण्यमित्याशङ्क्य * अत्य-
न्तविरोधाभावादित्युक्तम् * कथं विरोधाभाव इत्याशङ्क्योभयोः प्रा-
माण्याङ्गीकरणेनेत्युक्तम्। प्रामाण्यशब्देनात्रानुष्ठानलक्षणफलानप-
हारो ऽभिप्रेतः समुच्चय एव तर्हि कस्मान्नेष्यतइत्याशङ्क्यैकप्रयो-
गत्वासम्भवादित्युक्तम्। कथं तर्हि फलानपहार इत्याशङ्क्य
प्रयोगान्तरे चोभयानुग्रहः स्यादित्युक्तम् * प्रत्यक्षानुमेयश्रुत्यो-
स्तुल्यबलत्वाद्विकल्पासम्भवमाशङ्क्य * प्रक्षस्येत्याद्युक्तम् * सम-
न्विककायोजनं त्वेवं यथाशङ्कितविरोधयोरपि भिन्नविषयत्वेन
व्यवस्था सिद्धेद्यदि वैकस्मिन्नपि विषये विधेयप्रतिषेध्ययोर्विरो-
धाभावेन समुच्चयासम्भवादुभयप्रामाण्यमुपपत्स्यते एकप्रयोगग-

तत्वासम्भवाद्विकल्पाश्रयणे ऽपि यद्युभयप्रामाण्यमुपप
विरोधविषये ऽपि स्मृतिप्रामाण्यमादर्त्तव्यमिति सिद्धा
भिधानार्थं * बाधो वा तद्धि पर्यायादिति यदुक्तम् * तद्धि
८३।१ * अथ त्विति * महान् बलाबलविशेष इति महच्छब्देन
तिविरुद्धाया श्रुतेरनुमानमेव नास्तीति सूचितम्। लौकिक
मानवदिति दृष्टान्तेन चैतदेव प्रकटितं प्रत्यक्षाविरोधे त्वनुम
त्तिरेव प्रतिबध्यते यथोक्तं मूले तस्य ह्यनुत्पन्नपूर्वेण वि
इति । पूर्वपक्षमारभते * किं तावदिति * अन्यथा ह्यविरो
प्रामाण्यप्रसङ्गे सत्यप्रामाण्येन विरोधमर्यादातिक्रमात्पूर्वा
सिद्धान्तः प्रत्युद्ध्रियेतेत्यर्थः : एतदेवोपपादयति * अनाश
अतिप्रसक्तिप्रदर्शनार्थं हेतुदर्शनाद्युपन्यासः । आदिशब्दे
भवपारतन्त्र्यमभिप्रेतम् । खिलानि परिशिष्टानि । शाखा
लानि प्रकरणानि वा आदिशब्दोक्तानि काण्डानि तेषां
भेदास्तैर्भिन्ने त्विति विग्रहः लिङ्गादीत्यादिशब्देन समस्त
प्रामाण्याभिधानं नामादीत्यादिशब्देनातिदेशकवचनाभिध
तिलिङ्गाद्यात्मकश्चोपदेशो नामादिद्वारश्चातिदेशस्तदात्मक
चित्राः प्रमाणभागा येषां वेदानामिति विग्रहः । ननु वि
ङ्गानिराकरणेनान्यत्र प्रामाण्यस्याध्यवसातुं शक्यत्वात्कथं
प्रामाण्यप्रतिघातापातिरित्याशङ्क्याह *तथा हीति* ननु त्वत्प
भ्रान्त्यादिमूलत्ववारणमत आह *एकेनेति* एवं तावत् (सि
पेक्षणे एकमूलव्यवस्थोपेक्षणे अप्रामाण्यनिवृत्त्यर्थं मूलान्तरक
या न शक्येत्यन्वयः।सिद्धान्तिमते स्मृत्यधिकरणसिद्धान्तः[1])
द्धान्तहानिभयाद्विरोधे ऽपि वेदमूलत्वं न निराकार्यमित्युक्त
विरोधो मूलभूतवेदनिराकरणं कर्त्तुमपि न शक्नोत्यनैकान्तिक
८४।२ त्याह * किं चेति * श्लोकं व्याचष्टे * यदा त्विति * क
स्यापि वचनस्य शाखान्तरीयत्वेनानादरशङ्का निराकर्त्तुं स
खाप्रत्ययकर्मव्यवहारिणामिति । यदुक्तं तद्व्याचष्टे * न चो
न च प्रमाणाभावेनाकल्पनामिति यद्धृ दृढस्मरणोपस्थापितशब्दे
तदुपपादयति * अध्ययनवच्चेति * न शोभतइत्यनेनोभयोर
श्चस्योरन्वयः । एतदेवोपसंहरति * तस्मादिति * अर्द्धवै
पत्तेरपि नेह श्रुतिमूलत्वं निराकार्यमित्याह * किं चेति * ए
धर्मसंहितायामर्द्धमस्यार्थान्तरेण वैशसं विरोध इत्यर्थः ।
क्रियालक्षणश्चास्मिन्पक्षे दोषः स्यादित्याह * मूलान्तरमिति

१ अयं पा० २ पु० ना०

चेतां क्रियामतिक्रम्य क्रिया ऽतिक्रिया का पुनरुचिता क्रियेत्य-
ायामाह * तेनेति * एकस्मिंश्च धर्मशास्त्रे क चित्प्रामाण्यसि-
र्थं भ्रान्त्यादिमूलानामसम्भवः क चिच्च बाधसिद्ध्यर्थं स-
वो ऽङ्गीकार्य इति विरुद्धसम्भवासम्भवापादकत्वादपि स्मृति-
यो न युक्त इत्याह * किं चेति * विरोधपक्षे बाधो बाधपक्षः पक्षे
बाधो न युज्यते किन्तर्हि युज्यते ऽत आह * तेनेति * केन चित्पा-
तेन सर्वजरत्या योषितो ऽनुपभोग्यत्वात्सर्वतरुण्याश्च वृद्धे ऽप्यरु-
सङ्गादर्द्धजरत्यानयने दूतः प्रेषित इति लोकप्रवादो ऽर्द्धजरतीयशब्दे
ोपमानत्वेनोक्तः । अस्तु तर्ह्यैकरूप्याय सर्वासामप्रामाण्यमत आह
रुद्धत्वं चेति * विशिष्टपुरुषप्रणीतत्वं प्रामाण्यकारणत्वेनोक्तं वि
ऽपि निराकर्त्तुमशक्यमित्याशयः । यच्चात्र हेतुदर्शनं स्मृत्यप्रामा-
कारणमुच्यते तदपि स्थितसिद्धान्तहान्यापादकत्वादयुक्तमित्याह
ह्यमाणेति * उत्प्रेक्षणीयो हेतुर्यस्य धर्मशास्त्रस्य तत्तथोक्तो लो-
ः सर्ववेष्टनादिस्मृतिहेतुत्वं न केन चित्प्रमाणेनावगतं किं तूत्प्रे-
ात्रेणोच्यते सा चाष्टकादावपि शक्या कर्त्तुमित्याशयः । एत-
प्रपञ्चयति * रागेति * रागः प्रीतिर्द्वेषो ऽप्रीतिः मदो गर्वः उ-
ो ग्रहावेशः प्रमादालस्ये त्वन्यासक्तचनासक्तचर्थे व्याख्याते लु-
ा लिप्सातिशयः प्रत्युत प्रामाण्यहेतुकल्पनमेव सुलभमित्याह
दुष्टे न हीति * जिज्ञासुचित्तेन मन्वादिष्वदुष्टेन निराशङ्केन-
ः । यदि चोत्प्रेक्षामात्रकल्पितेन हेतुना प्रत्यक्षश्रुतिविरोधेन वा
ाण्यमपह्नूयते ततो वेदस्यापि सर्वस्याप्रामाण्यं प्रसज्येतेत्याह
ा चेति * न चेयमुत्प्रेक्षास्माभिरेव श्रूयते किंत्वन्यैरेव सर्वा-
ाण्यवादिभिः कृतेत्याह * लोकायतिकेति * उत्प्रेक्षाभिनिवे-
षां मूर्खत्वं मुग्धत्वं भ्रान्तत्वाख्यं कारणत्वेनोक्तम् । कर्मव्य-
ः कस्मादन्यदपेक्षिते यावत्किं चिदित्यादिना सार्द्धश्लोकेन
र्तितम् ।

अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् ।
बुद्धिपौरुषहीनानां जीविकेयं बृहस्पतिः ॥

इत्यग्निहोत्रादीनां दृष्टार्थत्वं नास्तिकैरुक्तम् । अग्नीषोमीयादि-
विधेश्च न हिंस्यात्सर्वाभूतानीति निषेधेन विरोधो योजितः ।
ेवंस्वभावानां लौकायतिकानामवकाशदानमशेषमेव धर्ममार्ग
दित्याह * तेभ्यश्चेह इति * ईषदर्थे नामशब्दः । एतदेव दृ-
ष्टत्वेनोपपादयति * प्रसरमिति * ननु विरोधहेतुदर्शनकारण-
ामाण्यमुच्यमानं तदभावे कथं चार्वाकैरापाद्यते ऽत आह * क

चिदिति * धाम स्थानं तस्मात्तेभ्यो ऽवकाशो न क्व चिद्देय इत्याह *तस्मादिति* लोकायतं नास्तिकशास्त्रं तत्र तिष्ठन्तीति लोकायतस्थाश्चार्वाकाः धर्मो नाश्यते येन युक्तिजालेन तत्संपन्नाः ।

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥

इति च निषिद्धत्वात्स्मृतिप्रामाण्ये विचिकित्सा न कार्येत्याह *यद्वादाविति* राजाद्याज्ञाया यत्कार्यत्वेन सिद्धं निश्चितं तद्वदे विचारितमाज्ञासिद्धमुच्यते आज्ञासिद्धं प्रमाणत्वं यस्य पुराणादेश्चतुष्टयस्य तत्तथोक्तं कथमविचारितसिद्धतेत्यपेक्षायामादौ न्यायनिरूपणात्प्रागनादिकालमहाजनपरिग्रहदार्ढ्यप्रसवया श्रद्धया पुराणादिचतुष्टयमाज्ञासिद्धप्रमाणत्वरूपेण सिद्धमित्युक्तम् । न चैतावता न्यायशून्यत्वं शङ्कनीयमिति दर्शयितुं* पुनर्न्यायेन साधितमित्युक्तम् * विचिकित्सायां को दोषः स्यादित्यपेक्षायामाह * सर्वमिति * पराभवभयादपि नान्तरा श्लथयितव्यमित्याह *पक्षइति* एवं तावदुत्प्रेक्षामात्रकल्पितं दृष्टार्थत्वं न वेदमूलत्वनिराकरणायालमित्युक्तमिदानीं वास्तवमपि दृष्टार्थत्वं विरोधवदनैकान्तिकत्वान्न तन्निराकरणायालमित्याह * वेदश्चेति * श्रूयमाणविरोधि वेतीवार्थे समुद्रो वा महासत्त्वैत्वइति यद्वा शब्दः । अनैकान्तिकत्वं दर्शयति * यद्वा त्विति * ननु पुरुषार्थसाधनत्वलक्षणं दृष्टार्थत्वमिह हेतुः न चावघातादीनां तदस्ति क्रत्वर्थपुरोडाशनिष्पत्त्यर्थं तण्डुलीभावादिसाधनत्वादित्याशङ्क्योदाहरणान्तरमाह * ऋत्विग्भ्य इति * ऋत्विगभिमतदक्षिणालाभहेतुत्वेन दानस्य पुरुषार्थतापि वक्तुं शक्यतेति सूचयितुम् * ऋत्विग्भ्य इत्युक्तम् * तानूनप्त्रं परस्परमृत्विजां यजमानस्य चाव्यभिचारार्थं कर्मारम्भे शपथकर्म अतश्च सिद्धमनैकान्तिकत्वाद् दृष्टार्थत्वस्यासाधकत्वमित्याह * यदा चेति * तस्माद्विरोधहेतुदर्शनाभ्यां न वेदमूलत्वं निराकर्त्तुं शक्यमित्युपसंहरति * तेनेति * वेदमूलत्वानिराकरणाच्च न प्रामाण्यं निराकर्त्तुं शक्यमित्याह * तस्मादिति * पूर्वपक्षमुपसंहरति * अविशेष्टमिति * ईदृशं मूलश्रुत्यनुमानद्वारमविशिष्टं सामान्यतः सर्वासां स्मृतीनां यत्पूर्वन्यायेन प्रमाणत्वं प्राप्तं तदधुना विरुद्धश्रुत्यन्तःपर्यालोचनकाले सत्यपि विरोधे युक्तमित्यर्थः । साध्याहारं सूत्रं योजयत्सिद्धान्तमारभते * एवमिति * निर्मूलस्मृत्ययोगाद्वेदमूलत्वाभावे किमन्यमूलं स्यादित्याशङ्क्याह * यात्विति * स्पष्टग्रहणानान्यपरश्रुतिमूलत्वे ऽप्यप्रामाण्योपपत्तेस्तात्पर्यमात्रापवादो ऽय-

मेति दर्शितम् । न च सत्यपि वेदमूलत्वे स्वातन्त्र्येण प्रामाण्यं भविष्यत्यत आह * स्वातन्त्र्येणेति * अस्तु तर्हि वेदस्यैवानुमानमत आह * वेदेति * ननु सत्यपि प्रत्यक्षश्रुतिविरोधे किमिति नानुमीयते ऽत आह * वेदेति * तस्यानुमेयस्य वेदवाक्यस्य यो ऽर्थ औदुम्बर्यादिस्तद्विषयं प्रत्यक्षं वेदवाक्यं यावन्नोपलभ्यतइत्यर्थः । अनुमानस्यासन्निकृष्टार्थविषयत्वात्सन्निकृष्टस्य च ताद्रूप्यतद्विपर्ययपरिच्छेदयोस्तुल्यत्वाद्विपर्ययपरिच्छिन्नस्याननुमेयत्वे ताद्रूप्यपरिच्छिन्नं दृष्टान्तयति * न हीति * एतदेव विवृणोति * स्मृतीनामिति * निवारणे कारणमाह * तावदेवेति * ननु प्रत्यक्षेणानुमानस्योत्पत्तिप्रतिबन्धलक्षणो बाधो भवति स्मार्त्ते तु सर्ववेष्टनादिकर्त्तव्यताज्ञाने विरोधे ऽप्युत्पद्यमानं कथं बाध्यते न ह्युत्पन्नस्य ज्ञानस्य मिथ्यात्वलक्षणो बाधः सम्भवतीत्याशङ्क्याह * कृत्तमूला इति * मूलप्रमाणापक्षत्वात्स्मृतिप्रामाण्यं तदभावे इदं न सम्भवतीत्याशयः । एतदेवोपपादयति * न हीति * यतो वेदाख्यान्मूलात्स्मृतिप्रामाण्यं स्यात्तद्वेदाख्यं मूलं न विद्यतइत्यर्थः । किमिति न विद्यतइत्यपेक्षिते पूर्वोक्तमेव प्रत्यक्षशास्त्रेण मूलश्रुत्यनुमानप्रतिबन्धमुपपादयितुं स्मारयति * प्रत्यक्षेति * उपपादयति * नैराकाङ्क्ष्यादिति * अयमाशयः गृहीतव्याप्तिकस्याप्यजिज्ञासोर्धूमादिदर्शने ऽप्यग्न्यादिज्ञानानुपलम्भात्परोक्षार्थविषयज्ञाने जिज्ञासापि सहकारिकारणमवसीयते । स्पर्शश्रुत्या चावेष्टितत्वरूपेणौदुम्बर्याः परिच्छिन्नत्वात्कीदृगौदुम्बर्यङ्गमिति जिज्ञासा नास्तीति जिज्ञासैवात्राकाङ्क्षाशब्देनोक्ता । कथं नैराकाङ्क्ष्यमित्याशङ्क्याह * प्रमेयमिति * यत्पर्वतादिप्रमेयं न चिदग्निमत्त्वादिरूपेण परिच्छेद्यं भवेत्तस्य पर्वतादेस्तेन रूपेण परिच्छेदात्सावकाशप्रमाणता स्यादित्यन्वयः । अवकाशः प्रमाणस्य प्रमेये प्रवर्त्तितुं मार्गो जिज्ञासोपलक्षणो ऽभिप्रेतः । प्रमाणं तस्मिन्प्रमेये सावकाशं स्यादिति समासार्थः । नन्वसत्यामपि जिज्ञासायां किमित्यनुमानं न प्रवर्त्तते व्याप्यज्ञानं हि व्यापकज्ञाने कारणम् । अस्तु क्व चिद्व्याप्यज्ञाने ऽपि व्यापकाज्ञानं तद्व्याप्त्यस्मरणादप्युपपद्यते । द्रव्यत्वस्य चानौष्ण्यव्याप्तिस्मरणे ऽपि तेजस्यनौष्ण्यानुमानानुपपत्तिः प्रत्यक्षेणौष्ण्यावगतौ तेजसो विपक्षत्वे सति तद्वृत्तेर्द्रव्यत्वस्य व्याप्तिभङ्गादुपपत्स्यते इह तु स्पर्शश्रुत्या वेष्टनाभावावगमे ऽपि सर्ववेष्टनस्मरणस्य श्रुतिकल्पकस्य सद्भावाद्विरुद्धश्रुतिदर्शनस्य चानैकान्तिकत्वेन सर्ववेष्टनश्रुत्यभावानुमापकत्वायोगात्कथं श्रुत्य-

१ शास्त्रीयस्य ज्ञानस्येति २ पु० पा० ।

नुमानानुपपत्तिरित्याशङ्क्याह * ताद्रूप्येणेति * प्रत्यक्षावगते ऽग्नौ व्याप्तिस्मरणे सत्यपि धूमज्ञानस्याग्निज्ञानजनकत्वादर्शनादजिज्ञासैः तत्रानुमानानुत्पत्तिकारणमवसीयतइति भावः । नन्वेवमपि स्मृत्य परिच्छिन्ने श्रुतेरप्रवृत्तिरिति विपरीतं कस्मान्न स्यादित्याशङ्क्या * भिन्नेति * भिन्नयोः सन्निकृष्टविप्रकृष्टत्वरूपेण विलक्षणयोः कक्ष्ययोः प्रकोष्ठयोः स्थिते प्रमाणे तत्रैकस्मिन्प्रमेये धावतइत्यर्थः । ननु प्रत्यक्षशास्त्रस्यापि पदपदार्थपर्यालोचनादिसापेक्षत्वेनार्थपरिच्छेदविक्षेपात्तद्विरोधात्पूर्वं मन्थरस्याप्यारब्धव्यापारत्वात्कथमप्रवृत्तिरित्या
१ शङ्क्याह * तद्धीति * एकमपीत्यपिशब्दो यद्यपि शब्दार्थे व्याख्येयः । यद्यपि तन्मन्थरं प्रमाणं दूरमपि प्राप्तं बहूनपि व्यापारान् कुर्वत् एकमेवार्थपरिच्छेदाख्यं पदमगतमर्थपरिच्छेदमात्रं न कृतवदित्येवकाराध्याहारेण व्याख्येयम् । तथापीतरेणादौ गतेनार्थपरिच्छेदं कृतवता जीयतइति तथापि योत्वौशब्दो ऽत्राध्याहार्यः । मन्थरत्वाविशेषात्तर्ह्यविरोधे ऽप्यप्रामाण्यापत्तेर्मर्यादातिक्रमः स्यादित्याशङ्क्याह * यत्रेति * नन्वेवं सत्यर्द्धवैशसादिदोषपरिहारार्थं विरोधे ऽपि प्रामाण्यमिष्यतामित्याशङ्क्यार्द्धवैशसं परिहर्त्तुमारभते *न हीति * यस्मादेवमैकरूप्यनियमो नास्ति तस्माच्छीघ्रप्रमाणभावाभावयोर्मन्थरप्रमाणप्रवृत्त्यप्रवृत्तिव्यवस्था न विरुद्धेति हिशब्दयोजना । एतदेवोपपादयितुं सामान्यन्यायं तावद्व्युत्पादयति * सर्वमिति * मूलमेव निकृत्यते मुखं वा विरुध्यतइति च पूर्वश्लोकोक्तस्य विरोधस्यैव द्वैविध्यमुक्तम् । श्रुत्या हि लिङ्गादीनां मूलं विनियोगहेतुः श्रुतिरेव छिद्यते नास्तित्वेन बोध्यते लिङ्गादिभिस्तु वाक्यादीनां मुखं विनियोजकश्रुत्यनुमानस्य द्वारं लिङ्गादि प्रतिबध्यते श्रुत्यननुमापकत्वेन ज्ञाप्यते । न च रोधारोधव्यवस्थैव न युक्तेति वाच्यमित्याह * न चेति * अवाच्यत्वे कारणमाह * उत्सर्गश्चेति * कथं तर्ह्युत्सर्गापवादयोर्व्यवस्थेत्याशङ्क्याह * विषयाविषयाविति * उत्सर्गस्य विषयमपवादस्याविषयं ज्ञात्वा बाधाभावः । अपवादस्य विषयमुत्सर्गस्याविषयं ज्ञात्वा बाध इति विवेक इत्यर्थः । व्यवस्थानभ्युपगमे तु व्यवहारविरोधः स्यादित्याह * यो हीति * यस्तु कश्चिद्वैयात्यादेवमपि व्यवहर्त्तुमारभते तस्य लोकविरोधमाह * तावदेव हीति * अनुमानस्य च प्रत्यक्षविरोधाविरोधयोर्बाधाबाधव्यवस्था लोकप्रसिद्धैवेत्याह * अनुमानमिति * सामान्यन्यायमुक्त्वा प्रकृते योजयति * एवमिति * न्यायलभ्यव्यवस्थाप्रतिपादनस्यार्द्धवैशसादिदोषपरिहारोपयोगितामाह * अत इति * अर्द्धवैशस-

मातिक्रयार्द्धजरतीयत्वयोरप्युपलक्षणार्थम् । कथं न्यायतो
र्त्यपेक्षायामुक्तामेव व्यवस्थां सुग्रहणार्थमनुसन्दधाति * प्र-
वाप्रमाणत्वइति * अतश्चैकरूप्यमेवायुक्तमित्याह * तस्मा-
* सिद्धान्तमुपसंहरति * तेनेति * ननु मृगतृष्णानुमानादेः
स्तुविषयत्वेन वैकल्पिकतया विरोधपरिहारासम्भवाद्बाधो
स्मृतेस्तु कार्यविषयतया विकल्पेनोभयानुग्रहसम्भवादत्यन्त-
न युक्त इत्याशङ्कते * विकल्प इति * परिहरति * उच्यत
: पूर्वार्द्धेनात्यन्तबाधादपि विकल्पः पापीयानित्युक्तमुत्तरार्द्धेन
कृते ऽपि विकल्पे स्मृतेरत्यन्तबाधो ऽपरिहार्य इत्युक्तमिति वि-
। विकल्पस्य सुखाभ्युपगम्यत्वाभावोक्त्या तुल्यबलयोरगत्या
करणमिह तु स्मृतेरत्यन्तबाधेन गत्यन्तरसम्भवाद्विकल्पाङ्गी-
त्यन्तमन्याय्यमिति सूचितं तत्तावद्व्याचष्टे * तुल्यबलेति *
यां विलक्षणाभ्यामन्तरितेन विलक्षणीकृतेन श्रुतिस्मृत्योः प्रा-
न विषमत्वेन शिष्टयोरवगतयोः श्रुतिस्मृत्योर्विकल्प इति वि-
किमुतेत्यनेनोक्तमतुल्यबलाविकल्पस्यात्यन्तान्याय्यत्वमुक्तमु-
ति * तथा हीति * न च स्मृतिरपि निरपेक्षा येन तुल्य-
ादित्याह * स्मृतेरिति * ननु सापेक्षत्वे ऽप्यनुमीयमानायाः
त्यक्षया सह तुल्यबलत्वाद्विकल्पो भविष्यत्यत आह * परा-
* यदि विरोधे ऽपि श्रुतिरनुमीयेत ततः पराधीनप्रमाण- १०।१
त्या बाधितापि पुनरुज्जीवितुं क्षमा स्यान्न त्वेतदस्तीत्युक्तम्
माणपदे स्थितेति * श्रुत्याख्यं प्रमाणं पद्यते गम्यते ऽनेनेति
ानं प्रमाणपदं तत्त्वमस्थिता अननुमितश्रुतिकेत्यर्थः । विकल्प-
त्वमुपपादयितुमारभते * तुल्यकक्ष्येति * तुल्या समाना
यो्स्ते तुल्यकक्षे तयोर्विकल्प इति विग्रहः व्रीहियव-
नियमार्थत्वेनान्यनिवृत्तिपर्यन्तत्वाद्व्रीहिशास्त्रप्रामाण्ये य-
ुपपत्तेर्यवशास्त्रप्रामाण्ये च व्रीहिप्रयोगानुपपत्तेरितरे-
ाण्यकल्पनं विना विकल्पो न युक्त इत्यर्थः । ततः
चेदत आह * प्रमाणस्येति * कीदृशं दोषद्वयमित्यपेक्ष-
* प्रमाणत्वमिति * प्रतीतप्रमाणत्वापह्नवः प्रतीतिविरोधा-
इत्यर्थः । अप्रतीताप्रामाण्यकल्पनं च द्वितीयो दोष इत्याह *
: सन्देहविपर्ययर्योर्दोषजन्यत्वाद्वेदे च तदभावात्प्रामाण्या-
वाप्रामाण्यं वाच्यं तस्मिंश्च प्रामाण्योपलम्भाभावः प्रमा-
तच्छब्देन दर्शितम् । तस्य प्रमाणस्याप्रमाणत्वमित्यर्थः । कथं
योपलम्भस्याभाव इत्यपेक्षिते * प्रामाण्योपलम्भस्य भावे

सतीत्युक्तम् * यत्परिकल्पत इति यच्छब्दस्य क्रियाविशेषणत्व
ऽस्यप्रमाणत्वकल्पनरूपो दोषः स्यादित्यनेनान्वयः । प्रमेयवचनो
शब्दः । प्रमाणप्रमेययोः प्रामाण्योपलम्भाभावात् प्रमाणत्वयोः
स्परं विपर्ययाद्विरोधाद्वित्यर्थः । कल्पिताप्रामाण्यस्य च शास्त्र
रस्य प्रामाण्योपजीवनं विना तदर्थानुष्ठानायोगात्तदर्थानुष्ठान
तस्मिन्नेव शास्त्रान्तरे परं दोषद्वयं स्यादित्याह * अङ्गीकृत्यापीति
कीदृशमित्यपेक्षिते कल्पिताप्रामाण्यत्यागं तावद्दोषमाह * यदप्र
प्रमाणत्वमिति * प्रामाण्योपलम्भाभावः प्रमाणं यस्याप्रमाणत
तत्तथोक्तमेतस्याप्रमाणत्वस्येत्यर्थः । निराकृतप्रामाण्योपजीवनं च
तीयो दोष इत्याह * प्रत्यक्षमिति * शास्त्रान्तरवर्जनाश्रयणयोः
पादितं दोषचतुष्टयमुपसंहरति * एवमिति * वाक्यान्तरे ऽप
दोषचतुष्टयं योज्यमित्याह * एत एवेति * द्वितीये ऽपि वाक्ये प्रत
प्रामाण्यापह्नवे ऽनुपलब्धे चाप्रामाण्ये कल्पितस्य चाप्रामाण्यस्य त्य
निराकृतस्य च प्रामाण्यस्योपजीवने प्रकल्पितइत्यर्थः । यद्यप्येद
विकल्पः कस्माद् व्रीहियवादिष्वाश्रीयते ऽत आह * एवमिति
गत्यन्तराभावमेवोपपादयति * व्रीहीति * ततः किमितिचे
आह * द्वाभ्यामिति * अश्वमुखीभ्यां किंनरीभ्यामिवेत्यर्थः । ए
स्मिन् श्रुत्यर्थे बुद्धिमुपसंहर्तुमपश्यन्तं श्रोतारं प्रत्युभयोः श्रुत्ये
प्रामाण्यं प्रसज्येतेत्यर्थः । अस्तु तर्ह्युभयाप्रामाण्यमेवात आह *
१२ त्रेति * किमत्र गत्यन्तरमित्यपेक्षायामाह * एकस्य चेति एका
माण्यमात्राद्गतिसम्भवे न द्वयोरप्रमाणता युक्तेति साध्याहारं योज्य
कस्मान्न युक्तेत्याशङ्क्याह * सिद्ध इति * एकं विनाशयितुं शी
एषां चानेकस्तेषाम्मध्ये सर्वनाशे समुत्पन्ने ह्यर्धं त्यजति पण्डि
इति अयं लोकप्रवादः प्रसिद्ध इत्यन्वयः । भवति च प्रस्तुतो ऽ
ऽस्य प्रवादस्य विषय इत्याह * सचायमिति * उभयोः श्रुत्योर्या
र्थौ तयोरपरिग्रहादित्यर्थः । ननु मिश्रैर्यागादुभयोरनुग्रहो भा
व्यत्यत आह * मिश्रैर्वेति * अप्यर्थे वाशब्दः मिश्रैरपि यागं कुर्व
णस्योभयोः श्रुत्योर्नाश इत्यनुषङ्गः । ननु विधिस्त्वेकश्रुतित्वादि
नेन न्यायेन सर्वाङ्गोपसंहारिणा प्रयोगवचनेन व्रीहियवयोः सम
च्चयावगमात्कथं मिश्रविधेरदर्शनमत आह * नियमार्थे हीति * अ
प्राप्तविधिगोचरप्रयाजादिविषयो ऽसौ न्यायः । व्रीहियवयोस्तु नि
मविधिगोचरत्वात्समुच्चयो न युक्त इत्याशयः । ननु समुच्चये ऽ
नियमफलस्य नित्यत्वस्य सिद्धेरविरोध इत्याशङ्क्याह * प्राप्ते चेति
पुरोडाशाक्षेपादेव प्राप्तेषु व्रीह्यादिषु द्रव्यान्तरप्रसक्तिनिमित्तानिय

त्वनिवृत्त्यर्थनियतत्वफलस्य नियमस्य समुच्चयानुपपत्तिरित्याशयः ननु श्रुतव्रीहियवातिरिक्तगोधूमादिनिवृत्त्यापि नियमोपपत्तेर्न व्रीहयवयोरितरेतरनिवर्त्तकत्वमित्याशङ्क्याह * व्रीहय इति * समर्थः पदविधिरिति पदमात्रविधेः सामर्थ्यापेक्षत्वाद् व्रीह्यादिप्रातिपदिकस्य च यवादिसापेक्षत्वेन व्याघातापत्तेर्विभक्त्यन्वयायोगान्निरपेक्षाणामेव व्रीहियवानां तृतीयया करणत्वप्रतीतेर्मिश्रत्वं न युक्तमिति भावः । किं चादृष्टार्थत्वे सत्यनिर्ज्ञातोपायपरिमाणत्वेन प्रधानस्यैकाङ्गविधानेन नैराकाङ्क्ष्याप्रतीतेः समुच्चयः स्यात् व्रीह्यादेस्तु प्रदेयप्रकृतित्वेन दृष्टार्थत्वादेकविधानेन नैराकाङ्क्ष्यावगतेः समुच्चयो न युक्त इत्यभिप्रायेणाह * नैवेति * यथाश्रुतैर्निरपेक्षतया प्रदेयप्रकृतित्वेन श्रुतेरित्यर्थः । तस्मादुभयार्थापरिग्रहवन्मिश्रयागे ऽप्युभयनाशः स्यादित्युपसंहरति * एवमिति * अप्रतिपत्तिरपरिग्रहः एकस्याप्रमाणत्वमित्यादिना पर्यायेणैकैकाप्रामाण्याश्रयणं नाम यद्वस्त्यन्तमुपपादितं तदुपसंहरति * तेनेति * एतच्चैकैकाप्रामाण्यमसम्भवात् क्व चिदङ्गीक्रियते न तु दोष एव न भवतीति शङ्कनीयमित्याह * सेयमिति * येयमेकैकाप्रमाणता द्वयोरप्यनवस्थिता सात्यन्तमन्याय्येत्यर्थः । कथमन्याय्येत्यपेक्षायामाह * अव्यवस्थेति * अयुक्तत्वे हेतुमाह * सर्वत्रैव हीति * एवं तर्ह्यप्रतीयमानमपि गत्यन्तरं क्व चित् व्रीहियववाक्ययोरपि मृग्यतां न त्वत्यन्तान्याय्यविकल्पाङ्गीकरणं युक्तमित्याशङ्क्याह * तदेतदिति * श्रुतिस्मृत्योस्त्वेकरूपत्वे व्यवस्थितं चिह्नमस्तीत्याह * श्रुतीति * किं तदित्यपेक्षायामाह * स्वरूपेणेति * ततः स्वरूपादित्यर्थः । अन्यशब्दस्य नित्यसापेक्षत्वात् समासाविघातः । कथमनयोर्व्यवस्थाकारणत्वमित्याशङ्क्याह * यो स्येति * न च श्रुतेः स्वरूपाश्रयस्य प्रामाण्यरूपस्य धर्मस्य बलवत्कारणान्तरं बाधकमस्तीत्याह * न चेति * ततश्च स्मृतेः स्वरूपाश्रयस्याप्रामाण्यरूपस्य धर्मस्य बाधकं मूलश्रुत्यनुमानं प्रत्यक्षश्रुतिविरोधान्नास्तीत्यर्थादुक्तं भवति । अन्यापेक्षस्य तु स्मृतेः प्रामाण्यरूपस्य श्रुतिरेव बाधिकास्तीत्याह * स्मार्त्तस्येति * ततश्च श्रुतेरन्यापेक्षस्याप्रामाण्यरूपस्य धर्मस्य कारणाभाव एव बाधको ऽस्तीत्येतदप्यर्थादुक्तं भवति । कथं श्रौतप्रत्ययस्य स्मार्त्तप्रत्ययाद् बलवत्त्वमित्याशङ्क्याह * प्रत्यक्षे चेति * सन्निकृष्टविप्रकृष्टार्थत्वादपि श्रुतिस्मृत्योर्बलाबलव्यवस्था प्रतीयतइत्याह * श्रुतिलिङ्गेति * ननु श्रौतप्रत्ययस्य समकालमेव स्मार्त्तप्रत्ययोदयात्कथं सन्निकर्षविप्रकर्षावित्याशङ्क्याह * स्मृत्येति * प्रतीतिमात्रं स्मृत्या तदा क्रियते न श्रुतिवत्प्रमि-

तिरित्यर्थः । क्व चिद्विपरीतपाठस्तत्र । प्रमीयतइति भावे लकार
यावत् स्मृत्या श्रुत्यनुमानेन प्रमाणीभूयते भवितुमारभ्यते तावत्स्
त्यार्थ एव प्रतीयतइत्यर्थः । नन्वर्थपरिच्छेदाय प्रवृत्ता स्मृतिः प
दपि तावदर्थपरिच्छेदं करिष्यतीति किमिति विकल्पो न स्यादित
शङ्कापवादसिद्ध्यर्थं जिज्ञासाविरहेणैकप्रमाणपरिच्छिन्ने ऽर्थे
माणान्तराप्रवृत्तिं पूर्वोक्तामेव विकल्पनिरासार्थं स्मारयति * वि
च्छेति * प्रमेयाकाङ्क्षानिराकरणेन प्रमात्रा आकाङ्क्षैवं निराकृता ता
थ्यपरिच्छिन्ने ऽपि मन्थरं न प्रवर्तते किमुत वैपरीत्यपरिच्छिन्नइत्य
ह * न चेति * ननु श्रुत्यर्थपरिच्छेदकाले यद्यपि स्मृत्यार्थो न
रिच्छिद्यते तथापि श्रुतिस्तावदनुमीयते ततश्चानुमितायाः श्रुतेः प्र
क्षया सहाविशेषात्किमिति विकल्पो न स्यादित्याशङ्क्याह * स्मृ
श्चेति * स्मार्त्तार्थपरामर्शमात्रं तदोत्पद्यते न श्रुत्यनुमानमित्यर्थ
नन्वन्यतः परिच्छिन्नो ऽप्यर्थो सत्यामपि जिज्ञासायां स्वसामर्थ्
स्मृत्यापि पश्चाच्छेत्स्यते ऽत आह * किं कर्त्तव्यमिति * यदि चै
मभविष्यत्ततः सन्निकर्षविप्रकर्षविशेषाभावाद् बलाबलव्यवस्था न
भविष्यदित्याह * युगपदिति * यदि च श्रुत्यर्थपरिच्छेदसमकाल
मेव स्मृत्या स्वमूलं स्मृतिरनुमीयेत ततो ऽर्थविप्रकर्षे ऽपि श्रुत्यव
।१ म्भात् बलाबलव्यवस्था न स्यान्न त्वेतदस्तीत्याह * यद्वेति * तस्मि
न्नेव क्षणे मूलं यदि कल्पयेदिति यदिशब्दो ऽध्याहार्यः यद्वेति
यच्छब्द एव यदिशब्दार्थे व्याख्येयः यतस्तु स्मृत्या गृहीते ऽप्य
मूलान्तरनिषेधयुक्तिपर्यालोचनापेक्षत्वाच्चिरेण श्रुतिकल्पनेति तु श
ब्दाध्याहारेण व्याख्येयः । ननु श्रुत्यनुमानासम्भवे ऽपि स्वतन्त्रे
स्मृतिः प्रतिष्ठास्यतीति विकल्पो ऽपरिहार्य इत्याशङ्क्याह * स्मृ
तिरिति * अतो ऽस्ति श्रुतिस्मृत्योरेकरूपत्वे व्यवस्थितं चिह्नमित्युप
संहरति * तदपेक्षेति * ततश्चेत्यस्मिन्नर्थे पुनः शब्दः । एवं विक
ल्पस्याष्टदोषत्वान्न तावत्स्वाभ्युपेयतेति पूर्वार्द्धं व्याख्याय पाक्षिक
चाप्रमाणत्वे स्मृतयः सुनिराकरा इत्युत्तरार्धं व्याख्यास्यन्विवेकार्थं
पूर्वार्द्धोक्तं बाधप्रकारमुपसंहरति * एष तावदिति * उत्तरार्द्धं
व्याचष्टे * द्वितीयेनेति * विकल्पपदवीं गतायाः स्मृतेरत्यन्त
बाध इति द्वितीयः प्रकार इत्यर्थः । कथमित्यपेक्षायामापन्नापाक्षिक
बाधमित्युक्तम् । अत्रैवार्थे ऽनारब्धव्याख्यानमपि भाष्यं प्रसङ्गाद्वि
वक्तुं योजयति * तद्दर्शयतीति * नास्ति व्यामोहविज्ञानइत्यादि भा
ष्येणैको बाधप्रकार उक्तः । विकल्पं त्वित्यादिना द्वितीय इति वि
वेकः । पाक्षिकबाधापत्तावपि कथमात्यन्तिको बाध त्याशङ्क्याह

* तदा चेति * भाष्योक्तः श्रुतिप्रमाणपक्षस्तदाशब्देन परामृष्टः । किं तु तदानीं स्मृत्यप्रामाण्यकल्पनावेलायां सा स्मृतिरश्रुतिमूलावधार्यते यतस्तस्याः प्रमाणत्वं श्रुतिमूलत्वकारितमित्यन्वयः । ननु श्रुतिमूलत्वाभावे ऽपि स्वातन्त्र्येण प्रामाण्यसम्भवात्कथमत्यन्तबाध इत्याशङ्क्याह * श्रुतीति * विप्रलम्भादेर्निराकृतत्वात्कथमापत्तिरित्याशङ्क्य निराकृतेत्युक्तम् । स्वातन्त्र्यनिरासायाविगानेत्युक्तम् । नियत्वद्वारेत्यनेन नित्यत्वं विना स्वातन्त्र्यं न सम्भवतीत्युक्तम् । नन्वेवमपि प्रमाणान्तरमूलतया प्रामाण्यं भविष्यतीत्यत आह * श्रुतेमिति * स्मृतेरतीन्द्रियार्थविषयत्वात्प्रमाणान्तरं मूलं न सम्भवतीत्याशयः । श्रुतेरिवेति पूर्वोपन्यस्तं वैधर्म्यदृष्टान्तं विवृणोति * व्रीहीति * अयमाशयः सन्देहविपर्ययोस्तावद्दोषजन्यत्वाद्वेदे च दभावादसम्भवः। विज्ञानानुत्पत्तिलक्षणमप्रामाण्यं संवेदनविरोधायुक्तं, न च यथा सामान्यशास्त्रादेरापाततो विशेषशास्त्राद्यवरुद्धे ऽपि विषये प्रवृत्तिप्रतीतावपि विरोधपरिहारार्थापत्त्या विशेषशास्त्राद्यनवरुद्धे ऽर्थे तात्पर्यावसायात्तात्पर्यावधारणसहकृतेन सामान्यशास्त्रादिना तत्रैव विषये परिच्छेदफलात्मकाविशिष्टज्ञानाख्यं विज्ञानमुत्पाद्यतइति विशेषशास्त्राद्यवरुद्धे ऽर्थे विज्ञानमुत्पत्तिलक्षणमप्रामाण्यं जातं तथात्रापि यवशास्त्रस्य यवव्यतिरिक्तद्रव्यमात्रनिवृत्त्यर्थत्वप्रतीतावपि व्रीहिशास्त्रपर्यालोचनया व्रीहिव्यतिरिक्तद्रव्यान्तरनिवृत्तौ तात्पर्यावसायात्तदवधारणसहकृतस्य यवशास्त्रस्य तत्रैव विज्ञानोत्पादकत्वाद् व्रीहिनिवृत्त्यंशे विज्ञानानुत्पत्तिलक्षणमप्रामाण्यं भविष्यतीति वाच्यम् । तथा सति मिश्रत्वस्य निराकर्त्तुमशक्यत्वात् । किञ्च व्रीहियवशास्त्रयोर्निरपेक्षव्रीहियवविधानत्वे ऽपि प्रयोगभेदेनोभयोर्निरपेक्षसाधनत्वोपपत्तेर्विनियोगावस्थायां विरोधाभावात्कस्याप्यप्रामाण्यं कल्प्यं प्रयोगावस्थायां त्वेकोपादानेनैव कार्यसिद्धेरितरोपादानानर्थक्याद्विरोधः स्यात् । न चानयोर्विनियोगविध्योः प्रयोगविधानार्थत्वमस्तीति विरोधाभावाद्वस्तुतो नास्त्येवाप्रामाण्यम् । प्रयोगविधेस्तु समस्ताङ्गप्रधानशास्त्रपर्यालोचनपूर्वकत्वेन व्रीहियवशास्त्रालोचनया व्रीहयो वा यवा वा प्रयोगभेदेनोपादेया इत्येवं रूपस्यैव कल्प्यत्वान्नाप्रामाण्यशङ्का तस्माद् व्रीहियवशास्त्रयोः प्रयोगविधानार्थत्वाभावे ऽपि स्वविषयानुष्ठापकत्वस्य सर्वविधिसाधारणस्य स्वरसतः प्रतीयमानस्य निराकर्त्तुमशक्यत्वान्निरपेक्षव्रीहियवानुष्ठापकत्वस्य चैकस्मिन्प्रयोगे विरोधादवश्यमेकस्यानुष्ठापकत्वे शास्त्रान्तरस्याननुष्ठापकत्वमङ्गीकार्यं दृष्टं चैकस्यापि विधेः सामर्थ्या-

द्यपेक्षया देशकालपुरुषविशेषापेक्षमनुष्ठापकत्वमननुष्ठापकत्वं
न कश्चिद्विरोधः अतश्चानुष्ठापकयोरपि व्रीहियवशास्त्रयोरेकप्र
काले शास्त्रान्तरस्यौदासीन्ये ऽनुष्ठानाख्यफलापहारादारोपि
व प्रामाण्याभावरूपमप्रामाण्यमिति प्रयोगान्तरकाले वा
वनोज्जीवितेन तत्प्रामाण्येन बाधो युक्त इति । ननु
तिप्रामाण्यस्यापि प्रयोगान्तरवेलायामुज्जीवनसम्भवात्कथमत्य
३।३ प्रतीघात इत्याशङ्क्याह * नन्विति * ननु प्रयोगान्तरकाले
स्याः स्मृतेः श्रुतिमूलत्वं कल्पयिष्यते ऽत आह * न हीति *
प्रथमप्रयोगकाले स्मृतेर्भ्रान्त्यादिमूलकल्पने माभूत्प्रयोगान्तर
प्रामाण्योज्जीवनं प्रागगृहीतविरुद्धश्रुतिकेन तु श्रुतिमूलत्वकल्प
स्मृत्यनुसारात्प्रथमप्रयोगे कृते प्रयोगान्तरकाले विरुद्धश्रुतिग्र
ऽप्यनुमितायाः श्रुतेः प्रत्यक्षया सहाविशेषाद्विकल्पो दुर्वार इत्य
ङ्कते * आहेति । एतस्येति * सर्वदा प्रतिघातस्येत्यर्थः। यदि
सर्वैः श्रुतिरेव प्रथमं ग्रहीतव्या न स्मृतिरिति नियमः स्यात्तथ
पौर्वापर्यनिबन्धनः सर्वान्प्रति बलाबले विशेषः स्यान्न त्वेतदस्तीत
ह * न चेति * नन्वस्तु तर्हि प्रथमश्रुतिग्राहिपुरुषापेक्षो ऽयं
तिप्रामाण्यापवाद इत्याशङ्क्य पौर्वापर्यस्य बलाबलकारणत्वाभ
दृष्टान्तमाह * आद्यइति * तत्प्रथतीति पाठे येन पुरुषजाते
वक्तव्यं स्वपरशाखाविहितानां च सत्यपि पौर्वापर्ये कल्पसूत्रकारै
प्रातरूपोदयं व्युषित उदिते वेत्यादिवद्भिर्विकल्पाङ्गीकरणात्पौ
पर्यस्य बलाबलकारणत्वं नास्तीत्याह * स्वशाखेति * जैमिनेरपि
चैकं प्रतिशिष्यतइति सर्वशाखोपसंहाराभिधानात्पौर्वापर्यस्य ब
बलकारणत्वमनभिमतमित्यागमविरोधो भवत्पक्षे स्यादित्याह *
१३ वेति * पौर्वापर्यस्य बलाबलकारणत्वाभावमुपसंहरति * तस्म
दिति * मातापितृप्रणीतोपदेशवत्पौर्वापर्यश्रवणमनाश्रित्य सर्वा
र्वश्राविणः पश्चाच्छ्राविणश्च पुरुषान्प्रति निर्विचिकित्समेव प्रामाण
म्नान चैकं प्रतिशिष्यतइत्यनेन न्यायेन जिज्ञासुभिरभ्युपगन्तव्यमित
न्वयः । पौर्वापर्यश्रवणानाश्रयणहेतुत्वेन बलाबलापर्यालोचनात्व
बलाबलहेतुत्वे हि सति पौर्वापर्यश्रवणमाद्रियेत तस्य तुनित्या
स्थितासु शाखासु वस्तुतः पौर्वापर्यरहितास्वात्मीयाशक्तिमात्रका
तत्वाद् बलाबलहेतुत्वं नास्तीत्यर्थः । आत्मीयाशक्तिमात्रकारित
पौर्वापर्यस्य बलाबलहेतुत्वाभावे दृष्टान्तत्वेनैकवाक्यगतपूर्वोत्तरव
र्वादित्युक्ते वर्णानां प्रत्येकमप्रत्यायकत्वेनार्थप्रतीत्यर्थतया तत्पौर्वाप
स्याशक्तिमात्रकारितत्वाभावेनादृष्टान्तत्वात्पदवदिति दृष्टान्तान्तर

क्तं, वेदवाक्यगतपदपौर्वापर्यस्य वेदो वा प्रायदर्शनादित्यत्र बलाबलहेतुत्वाभिधानाल्लौकिकवाक्यगतपदपौर्वापर्यमत्र दृष्टान्तः । वर्णपौर्वापर्यमपि बलाबलहेतुर्न भवतीत्येतावता दृष्टान्तितम् । पौर्वापर्यस्य च बलाबलहेतुत्वे तस्यानवस्थितत्वेन बलाबलस्यानवस्थितत्वेन प्रामाण्यानवस्थानं स्यादित्याह * अन्यथा हीति * पौर्वापर्यस्य च बलाबलकारणत्वाभावे स्वोत्प्रेक्षामात्रेण विकल्पभ्रान्त्यादिमूलत्वकल्पनया स्मृत्यप्रामाण्यमङ्गीक्रियमाणमर्द्धवैशसपरिहारार्थमविरोधे ऽप्यापादयेदित्याह * इत्थं चेति * ऐकरूप्यमेवोत्प्रेक्षितुं युक्तमित्याह * सर्वे वेति * प्रथमं स्मृतिग्रहणे ऽपि पश्चाद्विरुद्धश्रुतिदर्शनेन पूर्वोत्पन्नमूलश्रुत्यनुमानबाधाद्विकल्पे सर्वदा प्रामाण्यं प्रतिहन्येतेति परिहरति * उच्यतइति * अत्रैव दृष्टान्तमाह * यो हीति * द्वात्रिंशत्कृष्णलरजतपरिमाणः कार्षापणः कूटाकूटविलक्षणविवेकज्ञानेन जनिता व्युत्पत्तिः कूटत्वनिश्चयो यस्य स तथोक्तः । ननु श्रुत्यर्थपरिग्रहकाले मूलश्रुत्यनुमानबाधो ऽपि पूर्वं स्मृत्यर्थपरिग्रहकाले बाधाभावाद्विकल्पो भविष्यत्यत आह * न चास्येति * ननु द्वितीयप्रयोगे विरुद्धश्रुतिदर्शने ऽपि पूर्वोत्पन्नस्य मूलश्रुत्यनुमानस्य प्रतिबन्धायोगादनुमितायाश्च श्रुतेरत्यन्तबाधानुत्पत्तेर्दुर्वारो विकल्पः स्यादित्याशङ्कते * ननु चेति * अप्रमितस्यार्थस्यानुष्ठातुमशक्यत्वादेकप्रयोगकालोत्पन्नायाश्च प्रमितेः प्रयोगान्तरकाले विनष्टत्वात्तन्मूलस्य स्मरणस्यानुवृत्तावपि मूलप्रमाणालोचनं विना निश्चायकत्वायोगात्प्रतिप्रयोगमनुष्ठेयपदार्थविषयप्रमाणालोचनापेक्षणाद्वेष्टितौदुम्बर्यङ्गमिति प्रथमप्रयोगवेलायां स्मृतिमूलस्मृत्यनुमानान्निश्चिते ऽपि पुनः प्रयोगान्तरवेलायां कीदृश्यौदुम्बर्यङ्गमित्याकाङ्क्षायां स्मृत्या श्रुतिमनुमिमानो विरुद्धश्रुतिदर्शनान्निवार्यतइत्यननुमितमूलायाः स्मृतेरत्यन्तबाधो विकल्पाङ्गीकरणे प्रसज्येतेति परिहरति * नैतदेवमिति * एतदेव याज्ञिकाचारेण दृढयति *यदि हीति* ननु सङ्कर्षे व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत यवेभ्यो यवैरिष्ट्वा यवैरेव यजेताव्रीहिभ्य इति वाक्यमुदाहृत्य किमनेनाग्रयणाभ्यासो विधीयते दर्शपूर्णमासयोर्वा द्रव्यनियम इति सन्देहाग्रयणप्रकरणे पाठाद्यजेस्तद्विषयत्वप्रतीतेर्व्रीह्याग्रयणेनेष्ट्वा पुनर्व्रीह्याग्रयणेन यजेतेत्याग्रयणाभ्यासविधिरयमिति व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत यवेभ्य इत्याग्रयणाभ्यासः प्रकरणादित्यनेन सूत्रेण पूर्वपक्षयित्वाभ्यासविधौ प्राप्ते कर्मण्यभ्यासद्रव्यरूपानेकगुणविधानेन वाक्यभेदापत्तेः कर्मान्तरविधौ च गौरवापत्तेः । प्रकृताग्र-

यणप्रकृतित्वेनोपस्थापिते दर्शपूर्णमासाख्ये कर्मणि व्रीहियवयोर्वि
ल्पेन प्राप्तयोर्यवव्रीह्याग्रयणावधिव्यवस्थाविधानार्थमेतद्वाक्यमि
दर्शपूर्णमासयोर्वान्तरालसंयोगान्न ह्यन्यत् प्रत्यक्षं विद्यतइति सू
सिद्धान्तयिष्यमाणत्वात्कथं * यावज्जीवं तैरेव यजेतेत्युक्तम् *
च्यते । अग्निहोत्री वै नानादयिता तस्याः पयसा जुहुयादित्याग्रय
ष्टिस्थाने अग्निहोत्रस्थाने अग्निहोत्रविशेषविधानात्तत्पक्षाश्रयणे
उक्तमित्यदोषः अव्यवस्थितविकल्पो ऽपि व्रीहियवयोरकृताग्रय
विषयतयैव व्याख्येयः । एतदेवोपसंहरति * नेति * यद्यपि स
स्ताङ्गोपेतप्रधानविषयप्रयोगशास्त्रालोचनेनानुष्ठानं प्रवर्तते तथा
तस्य प्रत्येकपदार्थावधारणपूर्वकत्वात्तस्य च विनियोगशास्त्राधीनत्
त्तदालोचनमिहोक्तम् । प्रयोगशास्त्रस्य त्वनुष्ठानमात्रफलत्वेनाङ्गी
भावे प्रमाणत्वाभावात्तदभिप्रायः प्रमाणशब्दो न युज्यते । यच्चात
न्ताप्रामाण्यवादिमते पौर्वापर्यानवस्थानात्प्रामाण्यानवस्थानमुक्तं त
स्मिन्नपि विकल्पवादिमते प्रथमश्रुतिग्रहणे ऽत्यन्तस्मृत्यप्रामाण
ङ्गीकरणेन पर्यनुयोगसाम्याद्विकल्पवादिना वा पौर्वापर्यानादरेऽ
न्ताप्रामाण्यवादिनापि तदनादरेण परिहारसाम्यादवाच्यमित्य
* यच्चेति * पर्यनुयोगसाम्यमुपपादयति * यदा हीति *
पर्यनुयोगसाम्ये ऽपि प्रथमं स्मृतिग्रहणे विरोधादर्शनेन मूलश्रुते
वश्यकल्प्यत्वात्क्लृप्तायाश्च श्रुतेरत्यन्तबाधायोगात्पौर्वापर्यानादरेऽ
न्ताप्रामाण्यसिद्धेः परिहारसाम्यं नास्तीत्याशङ्क्याह * कालान
ऽपीति * क्लृप्ताया अपि श्रुतेर्विरुद्धश्रुतिदर्शने सत्यभावावधारणस
क्तत्वादत्यन्ताप्रामाण्यवादिमते ऽपि पौर्वापर्यमकारणं तदनङ्गीकृ
मेव तु पौर्वापर्यस्य बलाबलहेतुत्वमापाद्य विकल्पवादिना निरा
मित्याशयः । किं च प्रथमं स्मृतिग्रहणे ऽपि पुरुषान्तरदृष्ट
श्रुत्या तदानीमपि मूलश्रुत्यनुमानबाधाद्विकल्पो न युक्त इत्य
पूर्वेति ननु पुरुषान्तरस्य विरुद्धश्रुतिदर्शने ऽपि स्वयमदर्शनात्
थं बाधो ऽत आह * पुरुषान्तरेति * एवं तर्हि व्रीहियवश्रुत्योर
पुरुषान्तरबाधेनाङ्गीकृतप्रामाण्यमपि पुरुषं प्रत्यप्रामाण्यापत्तेः ।
वन्प्रत्यप्रामाण्यं प्रसज्येतेति शङ्कते * यवेति * श्रुतेरननुष्ठाप
त्वमात्रमप्रामाण्यं, न च पुरुषान्तराननुष्ठापकत्वेन पुरुषान्तरं प्रत्य
ष्ठापकत्वं बाध्यते । न चैवं पुरुषव्यवस्थया विकल्पानापत्तिः श
नीया पठ्यमानत्वाविशेषेण प्रमाणीकृतयवश्रुतिकमपि पुरुषं प्र
।२ कालान्तरे यवश्रुतेः प्रामाण्याभ्युपगमादिति परिहरति * उच्य
इति * प्रतियोगित्वेन व्रीहिश्रुतेरपि बुद्धिस्थत्वात्तयोरिति द्विव

नम् । ननु स्मृत्यनुमितायाः अपि श्रुतेः पुरुषान्तरगतविरुद्धश्रुतिद
र्शनेनानुष्ठापकत्वरूपं निमज्जनमात्रं करिष्यते नाभावावधारणमि
त्याशङ्क्याह * स्मृतिस्त्विति * सर्वेषां प्रथमस्मृतिग्रहणे निष्प्रति
द्वन्द्वानुमानसिद्धः पश्चाद्विरुद्धश्रुतिदर्शने सति निमज्जनमात्रकल्प
भवेदपि केषां चित्तु प्रथमश्रुतिग्राहिणां स्मृतिमूलश्रुत्यभावावधार
सत्येकस्याः श्रुतेः सदसत्त्वविरोधात्पुरुषान्तरगतमपि श्रुत्यनुमा
मिथ्येति निश्चीयतइत्याशयः । सर्वदा तावतां पुंसामभावात्
स्मृतिरप्रामाण्येन मुच्यतइत्याकारप्रश्लेषेणान्वयः । कर्त्तरीयन्तृ
तीया । अप्रामाण्यं स्मृतिमात्मनः सकाशान्न मुञ्चतीत्यर्थः । प्राम
ण्येनेति तु पाठे यदि सर्वदा तावतां भावः स्यात्ततो न प्रामाण्ये
मुच्यते न त्वेतदस्ति । प्रथमश्रुतिग्राहिणामपि केषां चिद्भावादि
व्यवधारणाकल्पनया योज्यम् । अभ्युपगमवादमात्रं चैतत्परमार्थ
तस्तु सर्वेषामपि प्रथमश्रुतिग्रहणे पश्चात्तेन विरुद्धश्रुतिदर्शनेन प
र्वोत्पन्नस्मृतिमूलश्रुत्यनुमानमिथ्यात्वनिश्चयाद्विकल्पो न युक्त इत्या
* अप्रामाण्यपदं चेति * पारतन्त्र्यमप्रामाण्यपदम् । ननु सत्यपि वि
रुद्धश्रुतिदर्शने विकल्पेनोभयप्रामाण्यसम्भवात्किमिति स्मृत्यनुमि
तायाः श्रुतेरभावोऽङ्गीक्रियतइत्याशङ्क्याह * अध्यारोप्येतेति *
गत्यन्तरसम्भवेऽष्टदोषदुष्टविकल्पापादकश्रुत्यनुमानस्यायुक्तत्वात्
स्मृत्यप्रामाण्यकल्पनमेव न्याय्यमित्याशयः । एतदेव विवृणोति
विरुद्धयोर्हीति * एवं च सति श्रुतिविरोधेऽत्यन्तदुष्टविकल्पपरिह
रार्थं भ्रान्त्यादिमूलत्वकल्पनया स्मृत्यप्रामाण्याङ्गीकरणस्य न्याय्य
त्वेनार्द्धवैशसानापादकत्वाच्च तत्परिहारार्थमविरोधेऽप्यप्रामाण्यम
पादनीयमित्याह * नन्विति * यत्तु सर्वत्रैकरूप्योत्प्रेक्षैव युक्तेत्यु
तद्विरोधाविरोधाभ्यां सर्वत्र व्यवस्थादर्शनादयुक्तमित्याह * र
थेति * नास्त्येकरूपतेत्यतः शब्दाध्याहारेणोपसंहारः । अधिकरण
र्थं व्याख्याय भाष्यमनुसन्दधानस्तत्र यथेत्युदाहरणभाष्यं पूर्वाधि
करणप्रतिपादितश्रुत्यनुमानद्वारस्मृतिप्रामाण्यापवादार्थेऽस्मिन्नधि
रणे प्रत्यक्षश्रुत्यर्थोपसंहारपरकल्पसूत्रकारवचनस्यानुदाहार्यत्वाद
युक्तमित्याशङ्क्य समर्थयते * यद्यपीति * कल्पसूत्राधिकरणे स्व
तन्त्र्यस्य निषेत्स्यमानत्वात्पौरुषेयत्वेन च वस्तुतोऽप्यनुपपत्तेः कल
सूत्रमूलभूतानामपि श्रुतीनां शाखान्तराधीतानामनुमेयत्वाविशेष
त्प्रत्यक्षश्रुत्यर्थोपसंहारपरत्वलक्षणस्य वैलक्षण्यात्मकस्यान्तरस्याव्या
कत्वेनाल्पत्वाद्युक्तमुदाहरणत्वमित्याशयः । सर्ववेष्टनस्मृतेर्जैमिनि

१ कस्मीति २ पु० ना० ।

ष्टराख्यायनिब्राह्मणागतश्रुतिमूलत्वे ऽप्यस्मदादीनां मूलादर्श
स्यूदाहरणत्वं क्रीतराजकभोज्यान्नत्वस्मृतिमूलस्य तु तस्माद्दी
स्य विज्ञातस्य क्रीतराजकस्य भोज्यं भवतीत्यथर्ववेदे पठ्यमा
स्मदादिप्रत्यक्षत्वेन निराकर्त्तुमशक्यत्वात् क्रीतराजको भो
इत्युदाहरणभाष्यमयुक्तमाशङ्क्य समर्थयते * क्रीतेति * बाध
सम्भवशङ्कानिराससाम्याद्व्युत्क्रमो न दोषः । तथापि स्मृतिप
ध्यत्वे निक्षेपादुदाह्रियतइत्यन्वयः । अग्नीषोमीयसंस्थावधिभ
प्रतिषेधविरोधादिति बोध्यत्वे हेतुः विरोधे ऽपि कथं बाध इ
ङ्क्य * अधिकृतानधिकृतेत्युक्तम् * अधिकृतानधिकृतविवेका
स्यन्यायुक्तं कथमधिकृतानधिकृतयोर्बलाबलविशेष इत्याशङ्क्य
रणविशेषादिति प्रकरणाधीतसामिधेनीपाञ्चदश्यानारभ्याधी
मत्रद्दयबलन्यायोदाहरणं दीक्षितान्नभोजनस्यायज्ञाङ्गत्वेन यज्ञा
धरन्यायाविषयत्वात्स्वासंमतिसूचनार्थम् * भाष्यकारेणेत्युर
भाष्यकृतश्चायो ऽभिप्रायः त्रयीप्रतिपादितस्य दीक्षितान्नभोजन
धस्यावध्यपेक्षायामथर्ववेदप्रतिपादितस्यावधेर्दूरस्थत्वेन विल
त्वादथर्ववेदप्रतिपादितस्य तु तस्माद्दीक्षितस्याविज्ञातस्याक्री
कस्याभोज्यं भवतीति प्रतिषेधस्य निर्ज्ञातावधित्वेनावध्यनपेक्ष
र्बल्यमिति अष्टाचत्वारिंशद्वर्षब्रह्मचर्योदाहरणमयुक्तम् । कृ
शत्वस्यानवस्थितवयोवस्थाविशेषत्वेनानवस्थितवर्षसंख्यारूपका
पत्वेन चोत्तरकालमपि सम्भवात् । न च जातपुत्रो ऽग्नीन
तेत्युत्तरकालं पुत्रजन्मप्रतीक्षणाद् बहुकालातिक्रमे सति कृष्ण
स्यापनयः शङ्कनीयः । जातपुत्रस्य पक्षान्तरत्वसम्भवेन स
यस्य संदिग्धत्वादित्याशङ्क्य समर्थयते * कृष्णकेशत्वं चेति *
ऽपि व्यक्त एव विरोधो दृश्यतइत्यन्वयः । कथमित्यपेक्षिते स्म
काशितस्यार्थस्य यौवनावस्थारूपस्य जातपुत्रत्वकृष्णकेशत्वाभ्य
व्यवार्द्धकव्यवच्छेदेन परिग्रहादुपलक्षणादित्युक्तम् । कृष्ण
त्वजातपुत्रत्वयोः प्रत्येकमाधानाधिकारिविशेषणत्वे ऽष्टदोषवि
पत्तेर्विशेषणविशेष्यभावाप्रतीतेश्च समुच्चयायोगाद्दारपरिग्रह
काले च कृष्णकेशस्य नियमेनाधानप्राप्तेः पलितकेशव्यावृत्त्य
कृष्णकेशत्वविशेषणत्वविशेषणस्य परिसंख्यार्थत्वापत्तेरजातपु
ऽपि च हरिश्चन्द्रादेः पुत्रार्थयागोपाख्यानेनाहिताग्नित्वदर्शनेन
पुत्रत्वस्य स्वरूपेण विशेषणत्वानुपपत्तेः । स्मृत्यनुसाराद्यौव
वनावस्थोपलक्षणार्थत्वमवसीयतइति भावः । ननु यौवनाव
किं विच्छेदे ऽपि स्मृत्यनुसारोपपत्तेर्विरोधः स्यादित्याशङ्क्य *

तो वेत्युक्तम् * शतायुर्वै पुरुष इति श्रुतेः पञ्चाशद्वर्षस्यार्द्धं व भवति तावता यौवनावस्थासमाप्तिरित्याशयः। तथापि कथं विरो इत्याशङ्क्य * अष्टाचत्वारिंशद्वर्षेत्याद्युक्तम् * पञ्चवर्षोपनयनप सातिरेकाणि द्विपञ्चाशद्वर्षाणि गर्भाष्टमपक्षे सातिरेकाणि चतुः ञ्चाशदिति। तत्प्रमाणमशक्यत्वादिति पूर्वपक्षसिद्धान्तभाष्ये स्प ष्टत्वान्न व्याख्याते। वस्त्रान्तरितौदुम्बरीस्पर्शेऽप्यौदुम्बरीं स्पृ ति बुद्ध्यनपायात् स्पर्शनसर्ववेष्टनयोरविरोध इति कथमशक्यतेत्य विरोधाशङ्काभाष्याभिप्रायं व्याचष्टे * ननु चेति * नौपचारिक शब्दप्रयोगमात्रेणानुपलब्धिविरोधात् वस्त्रान्तरितौदुम्बरीस्पर्शानुः वकल्पना युक्तेति स्पर्शनविधानादित्यादिपरिहारभाष्याभिप्रा व्याचष्टे * कथमिति * ननु व्यक्तिद्वारेणेव जातेर्वस्त्रद्वारेणौदुम्बय स्पर्शो भविष्यतीत्याशङ्कां निराकर्त्तुमाह * न चेति * जात्योर्व्य क्त्योः स्पर्शयोश्चेति विग्रहः। औपचारिकस्पर्शाङ्गीकरणे तु विध्य नर्थक्यमित्याह * अथेति * अविरोधवादी स्वाभिप्रायं विवृणोति * नन्विति * बुद्ध्यवैलक्षण्यमेव व्यवहारेण द्रढयति * तथा हि ति * परिहर्त्ता व्यवहारमन्यथोपपादयति * सत्यमिति * किं चण्डालस्पृष्टवस्त्रस्पर्शकारितामित्यर्थः। तद्वस्त्रं स्पृश्यमानमित्य ध्याहारः। कथं तस्याशुद्धिकारणत्वमित्याशङ्क्याह * तथा चेति नन्वशुचिस्पर्शो निषिद्धत्वादशुद्धिकारणं वस्त्रस्य च चाण्डालादि वत् स्वतोऽशुचित्वाभावान्मनुष्यवच्च निषेधाधिकाराभावेन नि षिद्धाचरणनिमित्ताशुचित्वाभावात्तत्स्पर्शस्याशुद्धिकारणत्वानुप पत्तेः पतितचण्डालसूतिकोदक्याशवस्पृष्टिवत्तत्स्पृष्टस्पर्शने सचैल जलमाविशेदित्यस्य च मनुष्यमात्रविषयत्वोपपत्तेर्न चण्डालस्पृष्टव स्त्रस्पर्शे दोष कल्पनं युक्तमित्याशङ्कते * कथं पुनरिति * न सूत्यादिवदनिषिद्धोऽपि वस्त्रस्याशुचिस्पर्शो शुचित्वमापाद यिष्यतीत्याशङ्क्यानिष्टापादनेन प्रत्याचष्टे * कथं वेति * तत्स्पृष्टे स्पृश्यमानेष्विति विग्रहः। अनिष्टापत्तिं तावत्परिहरति * तद् च्यतइति * काष्ठादीनां चण्डालादिस्पर्शोपादितस्याप्यशुचित्वस्य

अष्टाङ्गुलं भवेत्काष्ठं तृणमुष्टिर्यदा भवेत्।
मारुतेनैव शुद्धिः स्यादूर्ध्वं स्पृष्टिर्न दूष्यति॥

इति स्मृतेरादिशब्दोक्तानां च रथ्याकर्दमादीनां

रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः।
मारुतेनैव शुद्ध्यन्ति पक्केष्टकाचितानिति॥

स्मृतेर्वायुस्पर्शेनापनयात्तत्स्पर्शस्य च दोषकारणत्वं

जातमशुचित्वानापादनादित्याशयः । ननु निर्वातस्थस
ष्ठादेश्चण्डालादिस्पृष्टस्यापि शुद्ध्यन्तरास्मरणेन मारुतः
तेरशुचित्वानापत्तिप्रतिपादनपरत्वावसायाच्च तावत्त
न वस्त्रस्याशुचित्वापत्तिर्वक्तुं शक्यते न च प्रक्ष
द्धिस्मृतेर्वस्त्रस्याशुचित्वापत्तिर्वक्तुं शक्यते तस्याः गन्धलेपा
शौचममेध्यस्येति लेपापकर्षणोपदेशाल्लिप्तविषयत्वप्रतीतेरि
नन्विति प्राक्तनलेपापकर्षणविषयत्वेनापि विध्युपपत्तेर्ना
प्तविषयत्वकल्पनं युक्तमिति परिहरति * नेति * तुशब्दः श
स्यर्थः । यद्यपि केन चिदमेध्येन लिप्तस्येति लिप्तपदं प्रक्षिप्य
ते तथाप्यभियुक्तबहुजनापठितत्वान्नासावार्षः पाठ इति चिर
हणेन सूचितम् । एवं तर्हि वस्त्रस्यामेध्यत्वाभावान्नानेन शुद्धि
स्यादित्याशङ्क्याह * चण्डालेति * आशङ्कावादी स्वाभिप्रायं
यति*ननु चेति * गवाश्वादितुल्यत्वावधारणहेतुः स्वाभाविका
त्वनिषेधाधिकाराभावलक्षणः प्रागेवास्माभिरुक्तः । स्वाभावि
चित्वनिषेधाधिकारयोरभावे ऽपि प्रक्षालनविधिसामर्थ्याच्चण
दिस्पर्शेन वस्त्रस्याशुचित्वापत्तिरवसीयतइति परिहारवादी स
प्रायं प्रकटयति * उच्यतइति * चण्डालस्पृष्टवस्त्रस्पर्शनिमि
०।२ षप्रतिपादनस्य प्रकृतौदुम्बरीस्पृष्टवस्त्रस्पर्शनिमित्तौदुम्बरीस
द्धयभावोपयोगितामाह * अतश्चेति * शाखान्तरे चौदुम्बर्य
स्पृष्टव्य इति विधानात्तस्याश्चाचेतनत्वेन स्पर्शसंवेदनलक्षणस
योगात्प्राप्तिमात्रवचनत्वेन स्पर्शश्रुतेः प्राप्तेश्च व्यवधाने ऽनुप
विरोधाशङ्कैव नास्तीत्याह * यदा त्विति * ननु कस्यां चिच्छा
यामौदुम्बर्याश्रयत्वमात्रविधानाद्वस्त्रान्तारितायाः अपि चौदुम
पतनप्रतिबन्धकत्वेनाश्रयत्वोपपत्तेराविरोधो भविष्यतीत्याशङ्क्या
अपाश्रयणेति * अस्पृष्टायाः संयोगाभावेनाश्रयत्वायोगादपाश्र
हस्तसंयोगाद्यनेकोपायसाध्ये च स्पर्शे ऽपाश्रयणनियमार्थत्वेनापा
णविधेरपाश्रयणेनैवोदुम्बरीं स्पृष्ट्वेत्येकवाक्यत्वावसायादस्त्येव
रोध इत्याशयः । ननु संयुक्तस्यापि वस्त्रस्य पतनप्रतिबन्धकत्वाय
त्संयुक्तसंयोगो नास्पृष्टाप्यौदुम्बर्येवाश्रयो भविष्यतीत्याशङ्क्याह
परेति* संयुक्तसंयोगमात्रेणाश्रयत्वाङ्गीकरणे विन्ध्यसंयुक्ताकाश
युक्तस्य हिमवतो ऽपि विन्ध्याश्रयत्वापत्तेर्वस्त्रस्यैवोदुम्बरीसंय
लब्धस्थैर्यस्य पतनप्रतिबन्धकत्वं प्रसज्येतेत्यपाश्रयणस्पर्शयोर्वि
ऽस्तीत्याशयः । ननु सत्यपि विरोधे सर्वशब्दस्य कतिपयवेष्टने
न्तबाधानापत्तेः । स्पर्शश्रुतेश्चौदुम्बरीसम्बद्धयस्तुस्पर्शे ऽप्यौपच

वेनोत्पत्तेः कथं चिद् बाधमात्रेण चानुपपत्तिपरिहारसम्भवे ऽत्य-
बाधायोगान्न सर्ववेष्टनस्मृतेर्व्यामोहत्वं युक्तमित्याशङ्क्य कथं चि-
बाधो ऽपि श्रुतेः कारणाभावादयुक्त इति तामुद्धाटयतीतिभाष्येणो-
ः सर्वेत्यनेन स्मृतेर्बाधकारणत्वमाशङ्क्य नन्वित्यनेन निर्मूलत्वा-
राकृत्य वैदिकामित्यनेन श्रुतिमूलत्वमाशङ्क्य भवेदित्यादिना प्र-
क्षश्रुतिविरोधान्मूलश्रुतिकल्पनासम्भवमुक्त्वा कथं न हीत्यनेन किं
ई मूलमिति पृष्ट्वा व्यामोहादित्युत्तरे दत्ते कथमित्यनेन व्यामोहमू-
वे किं प्रमाणमिति पृष्ट्वा श्रौतेत्यनेन विरुद्धश्रुत्यवगता यथार्थत्वान्य-
नुपपत्तिः प्रमाणमित्युक्तं, तत्सर्वं संक्षेपेण तात्पर्यतो व्याचष्टे *इति
कमिति * पूर्वोक्तबलाबलहेतुपरामर्शार्थो ऽयमिति करणः अथे-
शङ्काभाष्यं श्रुतिमूलत्वस्य निराकृतत्वात्स्वातन्त्र्येण चाप्रामा-
ादविधित्वाच्चायुक्तमाशङ्क्य विकल्पाङ्गीकरणेन विरोधपरिहार-
ःभवाच्छ्रुतिकल्पनोपपत्तिमङ्गीकृत्यैतदुक्तमिति व्याचष्टे * अथे-
* नासतीत्यादितुल्यकारणत्वादित्यन्तं भाष्यं तात्पर्यतस्ताव-
ाचष्टे * नासतीति * (हसे हसने मृङ् प्राणत्यागे गॄ निगरणे
गतौ वा गतिगन्धनयोः अम गतौ दम उपशमे लूञ् छेदने पूञ्
ने धुर्वी हिंसायाम् हस्तः करनक्षत्रयोः । मर्तः भूलोकः । गर्तः
ः । एतः कर्बुरः । वातो वायुरोगश्च । अन्तः अन्ते ऽन्तिके च ।
ः दशनम् । लोतः अश्रुवह्न्योः । पोतः बालवहित्रयोः । धूर्तः
ः[1])। औणादिके तप्रत्यये कृते गम्यते ऽसावित्यस्मिन्नर्थे ऽयमन्तश-
। एकेनाम्यते गम्यते प्राप्यते यो ऽसावैकान्तव्यामोहश्चासावैका-
धेति तृतीयासमासगर्भः कर्मधारयः। विकल्पे ऽङ्गीक्रियमाणे पूर्वो-
ाव तुल्यकक्षविकल्पो ऽपीत्यादिना मार्गेण व्यामोहस्यैकविज्ञानगत-
कल्पनामवश्यमापन्नां पूर्वोक्तेनैव द्वितीयेन प्रकारेणेत्यादिना मार्गे-
स्मृतावेव नियच्छतीति प्रथमपादावृत्त्या योज्यम् एतदेव भाष्य-
यवशो व्याचिख्यासुर्व्यामोहविज्ञानसमासं द्वेधा विगृह्णाति *
्यामोहेति * विकल्पं त्विति भाष्ये न पाक्षिकीत्यपाक्षिकत्वाभि-
ामेकास्मिन्प्रयोगे ऽङ्गीकृतप्रामाण्याया अपि स्पर्शश्रुतेः प्रयोगान्त-
रीह्यादिश्रुतिवदप्रामाण्याङ्गीकरणोपपत्तेरयुक्तमाशङ्क्योपपादयति
वकल्पं त्विति * अपाक्षिकं चेति पाठे सर्ववेष्टनस्मरणं चेति
रक्रमश्चाकारः । पक्षे तावदित्यादिपाक्षिकत्वोपपादनार्थमिति
चष्टे * एवमिति * यथाश्रुतिरपाक्षिकी तथा स्मरणमपीत्येवं

---

१ अयंपा० २ पु० ना० २ हसिमृग्रिण्वामिदमितमिलूपूसूधुर्विभ्यस्तन्नित्यमेगंत्यर्थस्य-
पु० पा० दृश्यते तात्पर्यं त्विकमेव प्रतिभाति ।

शब्देनाभिधानाद्भिन्नक्रमत्वं सूचितं पाक्षिकं चेति तु पा
ऽङ्गीक्रियमाणे पाक्षिकत्वमेवात्यन्ताप्रामाण्यहेतुरिति व्य
पाक्षिकं चेति * ततश्चाव्यामोहे तस्मिन्स्पर्शनविज्ञाने
ऽपीत्यध्याहृत्य भाष्यं योज्यम् । ननु पक्षान्तरे स्पर्श
मोहत्वात्स्मृतिमूलश्रुतिकल्पनं भविष्यतीत्याशङ्कानिवृत्त्यर्थं
सावितिभाष्यं व्याचष्टे * एकदापि चेति * यदेव ही
ष्यं श्रुत्यपाक्षिकत्वोपपादनार्थतया व्याचष्टे * इति समर्थ
१०।१। ति * तस्याव्यामोहत्वस्य निरपेक्षप्रमाजनकत्वं मूलं त
त्वात्तद्वशेनैव च स्मृतिव्यामोहत्वस्यापाक्षिकत्वात्सर्वदा
कित्सश्रुतिप्रामाण्यसिद्धिरिति भाष्यार्थः । ननु पक्षान्तरे
ठत्वान्निरपेक्षप्रमाजनकत्वं न सम्भवतीत्याशङ्कानिरासार्थं
ति भाष्यं व्याचष्टे * न हीति * स्मृतेः श्रुत्यादिमूलत्वं वै
न्तत्वेनोक्तम् । तेनेति भाष्यं श्रुत्यपाक्षिकं चोपसंहारार्थत
द्व्याचष्टे * तेनेति * व्यामोहादिति हेतौ पञ्चमीत्यर्थः
र्यायान्तरशब्दयोगानिमित्तपञ्चम्यङ्गीकरणेन वा तेन श्रुति
रिहारासम्भवेन नैतत्स्मार्त्तविज्ञानं व्यामोहपक्षात्प्रामाण्यरू
न्तरं संक्रान्तं किं तु दुःश्रुतादिविज्ञानं सर्वदा तस्य मूलमि
भाष्यं योज्यमित्याह * यद्वेति * दुःश्रुतस्वप्नादिमूलत्वे
कृतेन सर्वदापन्नेन हेतुना पक्षान्तरं न संक्रान्तमित्यर्थः । न
विरोधे शिष्टत्रैवर्णिकदृढपरिग्रहस्य श्रुतिकल्पनहेतोर्भावा
श्रुतिर्न कल्प्यतइत्याशङ्क्य प्रमित्सानिरपेक्षपरोक्षार्थविषय
त्पत्तेर्न विरोधे श्रुतिकल्पनं युक्तमिति प्रतिपादनार्थं न ही
किं कर्त्तव्यमिदानीं चेत्यनेन पूर्वमेव व्याख्यातप्रायत्वान्न
तम् । तस्मादित्युपसंहारभाष्ये तुल्यकारणत्वं व्याचष्टे
ति * विषमशिष्टत्वादपि विकल्पो न युक्त इति प्रतिपाद
चेति भाष्यं प्रमाणायां स्मृतावित्यत्रोभयं प्रामाण्याविरोधा
र्शनादयुक्तमाशङ्क्य विरोधप्रतिपादनपरतयैव तावद्व्याचष्टे
चेति * इतरस्मृतिप्रामाण्यं श्रुतिप्रमाण्यं चेतरच्छ्रुति
स्मृतिप्रामाण्यं वा नाश्रयतीति नञ्समासो नन्वयमकारो
त्याशयः । अन्यतो बलाबलपरिच्छेदाभावे तुल्यबलत्वाव
कल्पः स्यात्सति तु तस्मिन्नष्टदोषविकल्पाङ्गीकरणं न युक्त
ष्याभिप्रायः । क्व पुनरितरेतराश्रयविरोधे ऽन्यतः परिच्छे
इत्याशङ्क्याह * परस्परेति *

प्रतिज्ञा यत्र बाध्येत पूर्वोक्तैर्यस्य बाधकैः ।

तत्पराश्रयतः कार्यो निर्णयो बाधवर्जनात् ॥

इत्यत्रोक्तो विरुद्धाद्व्यभिचारिणो विरोधे ऽन्यतः परिच्छेदो
ान्तितः । प्रमाणशब्दमाक्षिपति * प्रमाणशब्दस्येति * प्रमा-
ाब्दस्य स्मृतिसामानाधिकरण्यप्रयोगेण ज्ञानसामानाधिकरण्या-
ात् स्मृतेश्चाप्रमितित्वेन भावोत्पन्नल्युडन्तत्वायोगाज्ज्ञानेन का-
द्व्येन नपुंसकलिङ्गत्वसिद्धिरित्याशङ्क्य प्रमाणशब्दस्य वेदाः प्र-
ामित्यादिप्रयोगेण लोके नियतलिङ्गत्वावधारणात्, क्षरणसाध-
ा ऽपि ज्ञानशब्दवत्सामान्यविवक्षया नपुंसकलिङ्गत्वात् भावे
् चेति ल्युट्प्रत्ययस्मरणात्तदाश्रयणेन नपुंसकलिङ्गत्वसमर्थनार्थं
ः प्रमाणमिति निर्देशं ज्ञानसामानाधिकरण्येनेति च तस्य ज्ञान-
ेश इति करणव्युत्पन्नस्यापि ज्ञानशब्दस्य नपुंसकलिङ्गत्वदर्शना-
व ज्ञानशब्दस्याधिकरणमभिधेयं नपुंसकलिङ्गं तदेवास्यापीति
व्येयं ज्ञानशब्दस्य च विषयाव्यभिचारिबुद्धिविशेषवाचित्वादव-
र्थप्रत्यभिज्ञानेन च रूढित्वायोगाद् बुद्धिबोधादिसामानाधिकर-
विशेषेण चानेकलिङ्गतापत्तेरव्युत्पन्नस्यैव प्रमाणशब्दस्य ज्ञानश-
र्यायत्वाभिप्रायं सामानाधिकरण्यव्याख्यानं कथं निर्वहतीति न
ः।भावव्युत्पत्तौ तु स्मृतिजन्यसर्ववेष्टनज्ञानलक्षणया स्मृतिशब्द-
माणशब्दसामानाधिकरण्यं द्रष्टव्यम् । करणविशेषविवक्षा-
ाति विशेषशब्देन पूर्वं सामान्यविवक्षा द्योतिता समर्थनं प्रति-
ाते * तमिममिति * समर्थयते * प्रमाणमिति * मूलप्रमा-
तायाः स्मृतेः श्रुत्या सह स्पर्द्धा भवति न स्वतन्त्राया इति प्र-
दयितुं प्रमाणशब्दात्परात्रायगतावित्येष धातुर्भाष्यकृता प्रयुक्तो
द्धः प्रमाणशब्दः ततश्च प्रमाणमयनायां गच्छन्त्यां प्रमाणायां
ो स्पर्शनं व्यामोहो न तन्निरपेक्षायामिति भाष्यार्थो भवतीत्या-
। योजना चैवम् । यतः स्मृतिः प्रमाणमयते तस्मात्प्रमाणो-
धात्वन्तरेण यतिधात्वर्थव्याख्यानार्थम् * यातीत्युक्तम् *
ात्प्रमाणमित्यपेक्षिते * मूलभूतां श्रुतिमित्युक्तम् * नन्वयतेर्य-
न्तरत्वात्कथं प्रमाणेति रूपसिद्धिरित्याशङ्क्य क्विपो वलादि-
लोपोव्योर्वलीति यकारलोपे सत्येतद्रूपसिद्धिरिति सूचनार्थं
क्विबन्तादयतेरित्युक्तम् * ननु कृताकृतप्रसङ्गितया नित्यत्वेन
लोपस्य प्राथम्यात् वलः परभूतस्याभावे सति कथं यकार-
स्यादित्याशङ्क्य वलप्रत्ययपरत्वनिमित्तयकारलोपाभ्युपगमे-
तावत्परिहरति * तत्रेति * प्रत्ययलोपे प्रत्ययलक्षणमिति-
ात्प्रथमं क्विपो लोपे ऽपि तत्कार्यसिद्धिरिति भावः । नन्विदं

वल्ग्रहणं वर्णविषयं तथा सति गोधाया अपत्यमित्यस्मिन्नर्थे
या ढ्गिति विहितढ्क्प्रत्ययादिभूतढकारस्यायनेयीनियियः
च्छघां प्रत्ययादीनामित्ययादेशे कृते लोपोव्योर्वलीति यलोप
इति रूपं सिद्ध्यति प्रत्ययविषयत्वे तु प्रत्ययमध्यगतस्य
रेफमात्रस्य प्रत्ययत्वाभावात्प्रत्ययमध्यगतयकारलोपानिमित्त
०२।१ वेन रूपसिद्धिः स्यादित्याशङ्क्याह * न चेति *
हणस्य वर्णविषयत्वेन प्रत्ययविषयत्वेन च द्वेधा वै
धैव्याख्यानादिह लक्ष्यानुसारेण प्रत्ययविषयत्वाभ्युपगमे
लादिप्रत्ययनिमित्तो ऽत्र यलोपः प्रत्ययलोपलक्षणेन युत्त
भावः । माभूद्वा वल्प्रत्ययपरत्वनिमित्तो यकारलोपः
पि यदि वा कानि चिदन्यान्यपि वर्णाश्रयाणि कार्याणि
लोपलक्षणेन भवन्ति तद्वदिदमपि भविष्यतीत्युक्त्वा ऽथ वैवं
मि लोपोव्योर्वलि ततः वेर्व्यन्तस्य व्योर्लोपो भवतीति भाष्ये
लिना वेरपृक्तस्येति योगविभागाभिधानाद्विभक्तस्य वेरिति
येनविधिस्तदन्तस्येति स्मरणेन व्यन्तस्येत्यर्थावगतेः कृताकृ
ङ्गित्वेन च नित्यत्वे ऽपि विलोपस्य प्रथमकरणे व्यन्तशब्द
वेरिति सूत्रस्यानवकाशापत्तेः सावकाशनिरवकाशयोर्निरव
विधिर्बलवानिति विलोपप्राथम्यबाधेनास्य व्यन्तत्वानपाय
व्योरिति पूर्वसूत्रगतपदद्वयानुवृत्त्या व्यन्तस्य वकारयकार
इति सूत्रार्थनिष्पत्तेर्व्यन्तत्वनिमित्तो यकारलोपो भविष्यतीति
हारान्तरमाह * यद्वेति * वेरितीतिकरणाध्याहारेणैव योज्यं
तिं योगविभागेन लोपो भविष्यतीत्युक्ते कथमित्यपेक्षायां व
वकारश्च यकारश्च लुप्यत इत्येवमर्थावगमादिति न केवलं
त्वनिमित्त एव वकारयकारयोर्लोपः किं तु व्यन्तत्वनिमित्तो
चकारार्थः । ननु यकारलोपे ऽप्यकारस्य ह्रस्वस्य पिति कृति
तुगागमापत्तेरनित्यमागमशासनमिति स्मरणाद्वा तदकर
शुद्धस्याकारस्यादन्तत्वाभावात्प्रमाणपदसंहितायां वा दीर्घत
टाप्प्रत्ययाभावेन याडाप इति तन्निमित्तयाडागमाभावात्कथ
णायामिति रूपसिद्धिरित्याशङ्क्याह * यलोपे चेति * शुद्ध
तुगागमदीर्घत्वापादके निराकृते शुद्धस्याप्याद्यन्तवदेकस्मिन्
वत्कार्यसिद्ध्या टाप्प्रत्ययोत्पत्तिसमर्थनार्थम् * तदन्तावधिक
त्वम् * यः शुद्धः परिशिष्टाकारः स एवान्तरूपो विधिः स्वा
त्ययः । तस्मादन्तरूपावधिभूतादतः पश्चात् स्त्रियां विष
क्रियतइत्यर्थः । ननूपपदाकारसंहितायाः प्रथमातिक्रमकारण

वैकार्यत्वाद्दीर्घत्वापत्तेष्टाप्प्रत्ययानुत्पत्तिः स्यात् पूर्वाकरणे वा अ-
वसरत्वेन पश्चादप्यकार्यत्वात्प्रमाणेतिरूपं न सिद्ध्येदित्याशङ्क्याह
अक इति * एकपदाकारसंहितायाः पदान्तरसंहितातः शीघ्र-
तीतेर्दीर्घादीर्घयोश्चाधातुप्रत्ययाकारयोर्दीर्घादेशस्यान्तरतमत्वातिश-
द्धातूह्स्वाकारद्वयदीर्घादेशाच्छीघ्रप्रतीतेः परयोर्धातुप्रत्ययगतयो-
काराकारयोरकः सवर्णदीर्घत्वं पूर्वं कृत्वा ततः पूर्वेणाप्युपपद्ग-
रेण अकः सवर्णदीर्घत्वं कृत्वा प्रमाणेत्यनुगम्यतइति योज्यम् ।
दितरेतराश्रयमित्युपसंहारभाष्यमपीतरेतरविरोधपरतया पूर्वव-
चाख्यातं भवतीत्याह * तदेतदिति * उपक्रमोपसंहारानुरोधेन
। विवरणभाष्यमेवेतरेतराश्रयपरमध्याहारेण व्याख्येयमित्याह *
द्वेति * प्रमाणायामित्यत्र स्पर्शने व्यामोहे स्मृतिः प्रमाणमित्य
ाहारः स्पर्शनइत्यत्र स्मृतौ व्यामोहे स्पर्शनं प्रमाणमिति । (प्रमा-
त्याद्यमध्याहृतं भाष्यमिष्यमाणार्थत्वेन व्याख्यायते रुदित्युपसं-
रभाष्यं श्रुतावारोप्यमाणाप्रामाण्यपरतया व्याख्यातम् । एवं त-
त्यादिना संहारभाष्यमावृत्त्या स्मृत्यप्रामाण्यसमानार्थत्वेन व्या-
यायेत्यध्याहृतं स्पर्शने प्रमाणे इत्यादिभाष्यं श्रुतिप्रामाण्यासमर्थ-
र्थत्वे व्याख्यातम् । एतच्छ्रुतिप्रामाण्यपक्षे ऽप्यन्योन्याश्रयस्य सुप-
हरत्वं स्मृतिप्रामाण्यपक्षे ऽन्योन्याश्रयस्य दुःपरिहरत्वं वक्ष्यमाण-
भिप्रत्योक्तम्[1]) । तत्राद्यश्लोकेनेष्यमाणार्थतयाध्याहृतं भाष्यं व्या-
यायारोप्यमाणार्थतया पठितं व्याख्यातम् । द्वितीयेन समर्थ्यमाना-
तया पठितं व्याख्याय निश्चीयमानार्थतयाध्याहृतं भाष्यं व्याख्यातं,
नु श्रुतिप्रामाण्यगतमितरेतराश्रयं सिद्धान्तवादिनो ऽपि समानत्वा-
द्भावनीयमित्याशङ्क्याह * तदिदमिति * तस्यैकत्रैवेतरेतराश्रयं तच्च
परिहरामिति भावः। अन्यतः परिच्छेदप्रदर्शनार्थं तत्रेति भाष्यं तत्प्रद-
नासमर्थत्वेनाक्षिपति * तत्रेति * तत्रेतरेतराश्रये ऽन्यतः परिच्छेदस्य
तिज्ञातत्वात् स्फुटमत्यन्तव्यतिरिक्तं हेत्वन्तरं वाच्यम् । भाष्यका-
त्त्वेवमुक्त्वा तयोरेव श्रुतिस्मृत्योर्धर्ममेकं श्रुतिप्रामाण्यपरिच्छेदे
लृप्तमूलत्वं स्मृत्यप्रामाण्यपरिच्छेदे चैकं कल्प्यमूलत्वं हेतुमिह
न प्रमाणं किमप्रमाणमिति परिच्छेदवेलायामुक्तवानित्यर्थः । (श्रुतेः
लृप्तमूलं स्मृतेः कल्प्यमूलत्वं धर्ममुक्तवान् न च सधर्मिणो ऽन्यो
मधर्मिणोरभेदात् तेन नान्यतः परिच्छेदो ऽयमित्याशयः[2]) द्वितीय-
याख्याने तु श्रुतिप्रामाण्यगतेतरेतराश्रयस्य सुपरिहरत्वपरिच्छेदे

१ अयं पा० २ पु० ना० ।
२ अयं पा० २ पु० ना० ।

हेतु कल्प्तमूलत्वं स्मृतिप्रामाण्यगतेतरेतराश्रयस्य दुःपरिहरत्व
च्छेदे कल्प्यमूलत्वमिह किं सुपरिहरं किं दुःपरिहरमिति परि
च्छेद्यामित्यर्थः । समाधत्ते * नैवेति * श्रुतिस्मृत्योर्विपर्य
यकृतमितरेतरविरोधित्वमितरेतराश्रयत्वं तु श्रुतिस्मृतिप्राम
प्रामाण्ययोः स्वरूपकृतं समाहितं भाष्यं व्याचष्टे * स्वत
स्मृतिप्रामाण्यगतेतरेतराश्रयस्य दुःपरिहरत्वपरिच्छेदे कल्प
त्वस्य हेतुत्वमुपपादयति * ततश्चेति * नन्वात्मलाभाय स
स्वप्रमाणापेक्षत्वे ऽन्यर्थप्रतिपादने निरपेक्षतया पुरुषवाक्यव
प्रमाणत्वेन श्रुत्यप्रामाण्यानपेक्षत्वात्तत्परिग्रहपक्षे वैकल्पिकत
स्मरणकश्रुत्यप्रामाण्याध्याहारोपे ऽपीतरेतराश्रयानापत्तिरि
कुर्यात् * न चेति * न तुल्यबलयोर्विकल्पः सम्भवतीत्याश
शाम्नेनैतदेवोपपादयति * बलवन्तमिति * स्मृतिप्रामाण्यग
तराश्रयस्य दुःपरिहरत्वमुपसंहरति * एवं तावदिति * श्रु
प्रामाण्यगतेतरेतराश्रयस्य सुपरिहरत्वपरिच्छेदे कल्प्तमूलत्वस्य
त्वमुपपादयति * यदा त्विति * तदा पूर्वसिद्धस्मृत्यप्रामाण
प्रमाणं पूर्वानुभवपारतन्त्र्यलक्षणस्मृतिस्वरूपाश्रयमप्रमाणत्व
तः सिद्धमेव प्राप्य श्रुतिः प्रामाण्यमश्नुत इत्यन्वयः । श्रुतेः
प्रामाण्यात्स्मृत्यप्रामाण्यलिप्सानुपपत्तिमाशङ्क्य तत्रापि श्रुत
निरपवादप्रामाण्यावधारणसिद्धेः * पराधीनत्वादित्युक्तम् *
मन्यथामित्यपेक्षिते * प्रतिपक्षेत्याद्युक्तम् * पर्यालोचनापेक्षानि
र्थे प्रमाणमप्रमाणमपीत्युक्तम् उपसंहरति * तेनेति * अननुमिता
थामित्यनेनार्थे पदक इति व्याख्यातम् । कल्प्तकल्प्यमूलस्यान्यतः
च्छेदे हेतुत्वप्रतिपादनार्थत्वेन सो ऽसाविति भाष्यं व्याचष्टे *
ति * सर्वमेव वा सतश्चेत्याद्येतद्भाष्यव्याख्यानार्थं ततः कल्
कल्प्यमूलत्वादुक्तेन प्रकारेणान्यतः परिच्छेद इत्यर्थः । उक्तमेव प्र
कल्प्यमूलत्वादित्यादिभाष्यारूढं कर्त्तुं संक्षिप्य यथाक्रमं दर्श
* तेनेति * उक्तेन प्रकारेणैकत्र स्मृतिप्रामाण्यगतेतरेतराश्रये
तराश्रयस्य स्वतः सिद्धस्य प्रामाण्यस्यापवादासम्भवेनापेक्षितश्रुत
प्रामाण्यालाभाद् दुःपरिहरत्वावसानं परिच्छेदो भवति अवसीयत
भावे ल्यकारः । अन्यत्र श्रुतिप्रामाण्यगतेतरेतराश्रये स्मृत्यप्र
माण्यस्यापेक्षितस्य लाभात्सुपरिहरत्वस्यावसानमित्यर्थः । नन्वेवं
स्यापेक्षितस्मृत्यप्रामाण्यलाभमात्रेण श्रुतिप्रामाण्यगतेतरेतराश्र
सुपरिहरत्वपरिच्छेदसिद्धेः किमर्थं भाष्यकृता ऽनुपूर्वी दर्शितेत्य
शङ्क्याह * कृत्वेति * अपेक्षितलाभालाभोपपादनार्थमुभयत्राप्यानु

ानीयेत्याशयः। श्रुतिप्रामाण्यगतेतरेतराश्रयपरिहारायापेक्षितो यः त्यप्रामाण्यरूपो ऽर्थस्तमाद्ये क्षणे दृढसिद्धत्वेनावधिं कृत्वा विरोधे त्यप्रामाण्याच्छ्रुत्यबाधः श्रुत्यबाधाच्च तद्विरोधे स्मृतिमूलश्रु- कल्पनानुपपत्तिर्यावत्तावद्गच्छेत्तावताह्यपरश्रुतिप्रामाण्यगतेतरेत- ाश्रयपरिहारसाध्यः श्रुतिप्रामाण्यरूपो ऽर्थः सिद्ध्यति। तथा स्मृ- ामाण्यगतेतरेतराश्रयस्यापरिहार्यत्वायापेक्षितो यः श्रुतिप्रा- रूपो ऽर्थस्तमाद्ये क्षणे दृढसिद्धत्वेनावधिं कृत्वा विरोधे श्रुति- ाण्यात् स्मृतिमूलश्रुत्यकल्पनं तदकल्पनाच्च स्मृतेर्भ्रान्त्यादिमूल- कल्पनं यावत्तावद्गच्छेत् तावता ह्यपरः स्मृतिप्रामाण्यगतेतरेतरा- ापरिहार्यत्वसाध्यः स्मृत्यप्रामाण्यरूपो ऽर्थः सिद्ध्यतीत्यर्थः। ; भाष्यकृतैकविधानुपूर्वीकथनादानुपूर्वीद्वयाभिधानं भाष्यव्या- नानुपयोगित्वादनर्थकं स्यादित्याशङ्क्याह * तदेकेनेति * उपल- ार्थमेकानुपूर्वीकथनमित्याशयः। कीदृशी तर्हि द्वितीयानुपूर्वी द- येत्यपेक्षायामाह * द्वितीयेति * स्वयं पूर्वोक्तस्याप्यस्य मार्गस्य योक्तापेक्षया द्वितीयत्वम्। नन्वित्याशङ्कापूर्वकं तुल्यबलविक- पपत्तिप्रतिपादनार्थं भाष्यं व्याचष्टे * व्रीहीति * तस्माद्युक्तमि- सूत्रार्थोपसंहारभाष्यं व्याचष्टे * अत इति *

॥ अथ दृष्टमूलकस्मृत्यप्रामाण्याधिकरणम् ॥ ३ ॥

हेतुदर्शनाच्च ॥ ४ ॥ १८

व्याख्यानार्थं लोभादित्यादिभाष्यं सर्ववेष्टनादिस्मृतीनां लोभ- पुंसकत्वप्रच्छादनप्रयोजनमूलत्वे प्रमाणाभावादयुक्तमाशङ्क्य तिरिक्तसम्भवे मूलमात्रोपलक्षणार्थतया व्याचष्टे * इतश्चेति* ोधो व्यभिचारशब्देनोक्तः। श्लोकं व्याचष्टे * श्रुतीति * ननु पि विरोधे भ्रान्त्यादिमूलत्वं विना बाध्यत्वायोगाद् बाध्यत्वेनैव न्त्यादिमूलकल्पनायामितरेतराश्रयं स्यात् इत्याशङ्क्याह * स्मृ- ति * विरोधपरिहारायावश्याङ्गीकार्ये ऽन्यतरस्य बाध्यत्वे स्मृते- भ्रान्त्यादिमूलत्वसम्भवेन बाध्यत्वोपपत्तेर्बाध्यत्वनिश्चयेन भ्रा- ादिमूलत्वानिश्चयापत्तेरितरेतराश्रयपत्तिरित्याशयः। उपपन्नतरं ादिति वक्ष्यमाणवर्णकभाष्यमिहापियोज्यमिति सूचयितुमाशङ्को- त्वेन व्याचष्टे * यथैवेति * भाष्यकृतास्यैव सूत्रस्याधिकरणा- विषयत्वेन वर्णकान्तरं कृतं तत्पूर्वापरितोषविषयव्याप्तिव्यतिरे- क चिद्वर्णकान्तरस्य प्रयोजनान्तरा दर्शनात्तयोश्चापरितोषका- विषयान्तरादर्शनेनासम्भवादयुक्तमित्याक्षिपति * सर्वेति * न

च तयोर्मध्ये ऽन्यतरदप्यत्रास्तीति शेषः । समाधातुमपरितोषक
तावन्मन्दप्रयोजनत्वमाह * अपरितोषस्तावदिति * विषयव्या
प्यत्राविरुद्धस्मृतिविषयत्वादस्तीत्याह * विरोधेन चेति * स
प्यस्याविरुद्धस्मृतिविषयत्वे कारणान्तरेणापि केन चिदपवादान्
पपत्तेः कथं विषयव्याप्तिरित्याशङ्क्य कारणान्तरासम्भवान्नाप
दा * न्तरोद्भव इत्युक्तम् * वैसर्जनहोमीयमित्यादिविषयप्रदर्श
र्थं भाष्यं व्याचष्टे * वैसर्जनहोमीयमिति * श्रुत्यविरुद्धाना
स्मृतीनां लोभादिमूलत्वसम्भवेनाप्रामाण्याङ्गीकरणे दायधर्मादि
तीनामप्यप्रामाण्यं स्यादित्याशङ्क्य मन्वादिमहर्षिनिबन्धनस्य वेद
लत्वकल्पना हेतोरविरोधे कल्पकत्वप्रतिबन्धाभावान्मूलान्तरक
नानुपपत्तावप्यविरुद्धानामाचारानुमितानामर्वाचीनमनुष्यस्मृति
दृष्टमूलासम्भवेनैव वेदमूलत्वस्यापि वा कारणाग्रहप्रयुक्तानि प्र
येरास्त्वत्यत्र वक्ष्यमाणत्वात्तत्सम्भवे ऽपवादविषयत्वोपपादनार्थं
कर्ममेवैतदित्युक्तम् तत्कर्तृसामान्यादिति पूर्वपक्षसिद्धा
भाष्यद्वयमेकहेलया व्याचष्टे * तत्रापीति * इदानीं धर्मबुद्ध्यानुष्ठ
ऽपि पूर्वप्रवृत्तिकाले लोभादिमूलत्वसम्भवप्रदर्शनार्थं पूर्वग्रहणम्
लोभस्य मूलत्वसम्भवः पूर्वं कालान्तरे यस्मिन्कर्तृसामान्ये तस्म
दिति हेतुगर्भं विशेषणम् । लोभमूलत्वसम्भवमुपपादयति * त्र
त्विजो हीति * आशङ्काशब्देन लोभमूलत्वानिश्चये ऽपि वेदमू
त्वनिश्चयस्तावन्नास्तीति सूचितं, ननु वेदमूलत्वस्यापि सम्भवात्व
र्ममप्रामाण्यानिश्चय इत्याशङ्क्य निराकरणार्थमुपपन्नतरं चेदिति भाष
व्याचष्टे * पूर्ववच्चेति * ननु वेदमूलत्वाभावनिश्चयाभिधानप
त्वे ऽस्य भाष्यस्य पूर्वलोभमूलत्वनिश्चयाभिधानपरत्वेन योजनमयु
स्यादित्याशङ्क्याह * इदं चेति * दृष्टे सम्भवत्यदृष्टकल्पनमयुक्त
मिति न्यायस्य वेदमूलत्वाभावान्यमूलत्वयोर्निश्चयकारणस्य तुल्य
त्वादुभयत्रापि योजितमित्यर्थः । यथाभाष्यमधिकरणद्वयं व्याख्या
दूषयितुं प्रतिजानीते * एतावत्त्विति * सर्ववेष्टनस्मरणस्य लोभ
मूलत्वनिराकरणेन तुल्यन्यायतया यूपहस्तिदानादिस्मरणस्यालोभ
मूलत्वनिराकरणाद्धर्मबुद्ध्या चेदानीमनुष्ठीयमानानां दृष्टमूलत्वक
ल्पनासम्भवात् * अधिकरणद्वये ऽपीत्युक्तम् * प्रत्यक्षश्रुतिविरो
धे हि स्मृतिमूलश्रुत्यभावः साधकाभावाद्वा स्याद् बाधकसद्भावाद्वा
तत्र त्रैवर्णिकदृढपरिग्रहादरस्य स्मृतिमूलश्रुतिसाधकस्य विरोधे
ऽप्यनपायात्साधकाभावस्तावन्नास्तीत्याह * स्मृतीनामिति * यत्तु
जिज्ञासां विना प्रमाणाप्रवृत्तेः साधकाभाव इत्युक्तं तदेवं परिहर्त्तव्यं

पि परिच्छिन्ने प्रमेये तत्परिच्छेदार्थं श्रुत्यनुमानं न प्रवर्त्तते तथा- किमियं स्मृतिः प्रमाणमप्रमाणं वेति जिज्ञासायां तत्परिच्छेदार्थं यनुमानप्रवृत्तिर्न वारयितुं शक्यते । प्रमाणान्तरपरिच्छिन्ने ऽपि ङ्गशौक्लये शङ्कितपित्तोपघातस्य किं मे चक्षुर्दुष्टमदुष्टं वेति जि- सया चक्षुर्विस्फुरणदर्शनात्परमाणवादौ च कदा चिदनुपलब्ध- द्व्यवहारानुपयोगित्वाच्च जिज्ञासिते ऽप्युपलब्धस्थूलादिकार्यो- पत्तिपरिहारार्थं प्रमाणप्रवृत्तिदर्शनाच्च जिज्ञासादरः। किं च स्मृ- लप्रमाणोपस्थापनमात्रेण कृतार्थत्वान्नौदुम्बरी प्रमेया तत्प्रमेया- : श्रुतेः प्रत्यक्षश्रुत्यविषयत्वेन तया परिच्छेत्तुमशक्यत्वान्नानुमान- बन्धो युक्त इति । बाधकं तु स्मृतिमूलश्रुत्यभावव्याप्तं लिङ्गं द्धश्रुतिदर्शनस्यानैकान्तिकत्वप्रतिपादनेन पूर्वपक्षवेलायामेव नि- म् । अनुपलब्धिस्त्वस्मदादीनां विप्रकीर्णशाखान्तरगतश्रुत्यु- म्भाशक्तेः स्मर्तृप्रत्यक्षस्य च स्मृत्यधिकरणसाधितत्वेनेदानींत- रुषान्तरप्रत्यक्षत्वस्य चोपनयादिस्मृतिमूलश्रुतिदृष्टान्तेनानुमानो- त्तेः। सर्वान्प्रत्यसिद्धत्वान्नाभावसाधनायालमित्याह * शाखान्त- । * न च स्मर्तृपुरुषाधीनप्रत्ययत्वमात्रेणानुमेयश्रुतिष्वनाश्वा- अध्यापकपुरुषाधीनप्रत्यक्षत्वेनेतरास्वप्यनाश्वासापत्तेरित्याह तत्रेति * नन्वग्निहोत्रादिश्रुतीनां प्रत्यक्षत्वान्न तास्वनाश्वासाप- रित्याशङ्क्य वर्णस्वरूपस्य प्रत्यक्षत्वे ऽप्यनादिसम्प्रदायागतत्वस्य षाधीनत्वात्तुल्यतामाह * वेदो हीति * न च स्मरणार्थत्वेन १ दृष्टघटादिवन्नित्यत्वानवधारणं शङ्कनीयमग्निहोत्रादिश्रुतिष्वप्य- शेषादित्याह * अनुच्चारणकालेति * उपसंहरति *तेनेति* वेदविरोधेन स्मर्त्तुरनाप्तत्वान्न मूलश्रुत्यनुमानं सम्भवतीत्याश- प्रत्यक्षवेदमूलोपनयनादिस्मृतिप्रणेतृत्वेनावधारितत्वाप्तभावस्य वादे रेकदेशविरोधे ऽप्यनाप्तत्वकल्पनं न युक्तमित्याह * स्मृती- * किं च नित्यानुमेयायाः श्रुतेर्न्यायेन बाधो युज्येतापि शाखा- रपठितश्रुतिबाधे तु प्रत्यक्षविरोधाशङ्का दुःपरिहरेत्याह * बाधि- चेति * उपरिष्टात्त इति शब्ददर्शनात्त्वया न्यायविदा भूत्वेत्य- हारेण योज्यम् । न चिरादित्यव्ययान्वये ऽपि नञो विभाषा- कारे नञ्समासस्मरणान्न होतारं वृणीतइतिवदसमासाच्चलो- भावो न दोषः । प्रत्यक्षविरोधाशङ्कया च त्वदुक्तस्य न्यायस्य यकत्वानवधारणान्न्यायाभासेन मूलश्रुत्यनुमानबाधाङ्गीकरणे दातिक्रमादिसर्वं पूर्वोक्तमपरिहार्यं स्यादित्याह*बाधेति* न्यायं

१ अवधारितत्वाप्तस्य मन्वादेरिति २ पु० पा० ।

दूषयित्वोदाहरणानि दूषयन्नाद्यं तावदुदाहरणं तामूर्ध्वे
ससा परिवेष्टयन्तीति प्रत्यक्षश्रुतिमूलत्वात् दूषयति * यच्चै
एतच्छान्दोग्यानुपपदे जैमिनिकृते सूत्रग्रन्थे जैमिनिनैवौदु
रणे चेत्यादिना दर्शयतीत्यन्तेन स्वग्रन्थेन शाट्यायनिब्राह्मण
मूलत्वेनान्वाख्यातमित्यन्वयः। शाट्यायनिनां शाखिनामौदु
रणे तामूर्ध्वदशेनेति श्रुतिरुभयत्र विष्टुत्यामौदुम्बर्यां च वा
र्शयतीति जैमिनिग्रन्थस्यार्थः । उभयत्र शब्दः किं विषय इ
वेष्टनइत्याद्युक्तं स्तोत्रीयपरिगणनार्थानामौदुम्बरीणां प्रादे
कुशानां विष्टुतिशब्दवाच्यानां स्थापनार्थं वासो वेष्टुतमुच
स्मिन् श्रीर्वै वासः श्रीः सामेत्यर्थवादपुरःसरं प्रत्यक्षश्रु
दर्शिते तत्प्रसङ्गेनौदुम्बरीवेष्टनवाससाऽपि प्रकाशश्रुतिमू
न्वाख्यातं तामूर्ध्वदशेनेति प्रकृतौदुम्बरीपरामर्शिप्रतीकोपन
१०७।२ र्थः । उपसंहरति * ततश्चेति * अविरोधादपीदं नोदा
र्त्तमित्याह * विरुद्धत्वे चेति * औदुम्बरी परिवेष्टयित
न्मात्रं सूत्रकारेणोक्तं न सर्वेति तत्र यथोपनेष्यमाणमहतेन
छादयन्तीति चक्षुर्मुखानाच्छादनेऽपि शास्त्रार्थसम्पत्ति
तथात्रापि भवतीत्याशयः। ननु सर्वशब्दाभावेऽपि परिशब्दे
वेशब्दार्थसम्पत्तेर्विरोध इत्याशङ्क्याह * यदीति * औ
त्तरदेशे पृष्टेन तां स्पृशतोदङ्मुखेनोपविष्टेनोद्गातव्यं तेन
रीमध्यस्योत्तरभागे द्वित्राङ्गुलमात्रं स्पृश्यते तदनुरोधेन
गतो मध्ये द्वित्राङ्गुलं विमुच्यते सर्ववेष्टनेऽपि परिशब्दार्थ
विरोध इत्यर्थः । एतदेव श्लोकद्वयं यथाक्रमं श्लोकद्वयेन
* सर्वेति * भाष्यकारेण गौरवात्कस्मिंश्चित्सूत्रे कल्पे
ब्दो भविष्यतीति कल्पनां निराकर्त्तुं * न हीत्युक्तम् *
वचने हि कर्णयोर्वेष्टनं कृत्वा वंशो निधेयो मूलं च वेष्टयित
तव्यं स्यान्न चैवं याज्ञिकाः कुर्वन्ति परिशब्दस्तु समन्ता
देशवेष्टनं ब्रूते । न कृत्स्नाया इत्यौदुम्बरीमध्योत्तरभागा द्वि
र्जितसर्वौदुम्बरी वेष्टनेऽप्यर्थवानित्यर्थः । हेतुदर्शनोदा
प्यस्य न सम्भवतीत्याह * लोभमूलं चेति * यदि तर्हि
र्यत्तदित्यव्यये मूलाग्रयोश्च वंशाधारयोः कर्णयोः परि
दीर्घवासोलाभाल्लोभमूले तदनुष्ठाने याज्ञिकाचारविरोधः
अयं चापरोऽचारविरोधो लोभमूलत्वे प्रसज्येतेत्याह * अन
पूर्वापरकाययोरन्तरस्य मध्यस्य परिधानार्थमधोवासो नान
शस्य कल्पयित्वान्तरीयतामाचामेदिति प्रयोगदर्शनादन्तर

तें।अधरीयोत्तरीये हीत्यपि पाठे तदेवोक्तम्। कौशेयस्य गुणाभावा-
र्पासस्य गुणराहित्यम्। लोभमूलत्वे च कुशवेष्टनपूर्वकत्वोर्ध्वदेश-
नियमौ न स्यातामित्याह *प्राक्चेति* उदाहरणान्तरमपि दूषय-
* किं चेति * अष्टाचत्वारिंशद्वर्षब्रह्मचर्यस्य चाष्टाचत्वरिंशद्वर्षं
ं वेद ब्रह्मचर्यमित्यादि अथ सर्ववैदिकविहितत्वादनुदाहरणता
कारसूचिता पूर्वोक्तबलाबलविशेषं निराकरोति * यदीति * किं
र्थान्तरमित्यपेक्षयामाह * शान्तीति * न चास्यानारभ्याधीत-
येन दौर्बल्यम् । तस्य कल्प्यक्रतुसम्बन्धमनारभ्याधीतं क्लृप्त-
तुसम्बन्धात्प्रकरणाधीताद् दुर्बलं· क्रतुसम्बन्धविप्रकर्षादित्येवंरू-
य क्रत्वङ्गविषयत्वादस्य च क्रत्वङ्गविषयत्वाभावादित्याह * न
ति * एतदेवोपपादयति * न हीति * विरोधपरिहारस्तर्हि कथ- १
त्यपेक्षयामाह * वाक्यान्तरैरिति *

दशाहं शावमाशौचं सपिण्डेषु विधीयते ।
अर्वाक्सञ्चयनादस्थ्नां त्र्यहमेकाहमेव च ॥

इत्याशौचच्छेदकालानां यथा व्यवस्थितो विकल्पस्तथेहापि
विष्यतीति व्यवस्थितविकल्पसूचनाय दृष्टान्ताभिधानं परत्वाशौ-
कालानाम् ।

एकाहाच्छुद्ध्यते विप्रो यो ऽग्निवेदसमन्वितः ।
त्र्यहात्केवलवेदस्तु·द्विहीनो दशभिर्दिनैः ॥

इति वचनान्तरेण (दन्तजातपदेन वर्द्धमानोपलक्षकः कुमारा-
नुजातपदेन वध्वोपलक्षकः कृतचूडपदेन वर्षत्रयोपलक्षकः । [1])

दन्तजाते ऽनुजाते च कृतचूडे च संस्थिते ।
अशुद्धा बान्धवाः सर्वे सूतके च तथोच्यते ॥

इत्युपक्रमानुसारेण वा व्यवस्थावगमान्न तद्दृष्टान्तेने-
विकल्पाङ्गीकरणे युक्तमित्यगृहीताभिप्रायः शङ्कते * ननु
ति * अग्निवेदसमन्वितस्य दशाहाशौचानुवृत्तावुभयसाध्य-
ग्निजपादिलोपाद्भूयसी धर्मपीडा स्यात्केवलवेदस्य तन्मात्रसा-
जपादिलोपादल्पा द्विहीनस्याल्पतरेति धर्मपीडाल्पत्वमहत्वा-
क्षया आदिशब्दाज्जातदन्ताद्यपेक्षया चाशौचकालो ऽपि व्यव-
स्थितविषय इत्यध्याहारेण योज्यम् । उभयत्र समविकल्पाना-
यणे कारणं पक्षयोरसाम्यं तावदाह * यस्य हीति * यस्तु वि-
धं चापरं विकल्पानाश्रयणे कारणं दृष्टान्ते तावदाह * एकरात्र-
ति * दार्ष्टान्तिके ऽप्याह * एवमिति * ननु यो ऽल्पेन कालेनाहं

१ अयं पा० २ पु० ना० ।

शुद्धः स्यामिति सङ्कल्पयति तस्याल्पेन कालेन शुद्धिः बहुका
तु बहुनेति परिग्रहव्यवस्थया ऽशौचकालानामविरोधः । यश्च
तराजकस्य दीक्षितस्यान्नं न भोक्ष्यइति सङ्कल्पयति तं प्रति ता
मभोज्यान्नता पशुसंस्थावधिसङ्कल्पे तावत्कालमित्युभयत्रा
विरोधपरिहारमाशङ्कते * स्यादेतदिति * यथा यः प्रागुद
दयोत्तरकाले ऽग्निहोत्रं होष्यामीति सङ्कल्पयति तं प्रत्युदयो
ऽग्निहोत्राङ्गं यस्तूर्ध्वोदये सूर्योदयात्प्राक्काले होष्यामीति
यति तं प्रत्यसाविति परिग्रहाद्व्यवस्थाया प्रागूर्ध्वोदययोः
विरोधस्तथेहापीत्यर्थः । प्रागूर्ध्वं चोदयो याभ्यामिति विग्रह
ष्वपि वैकल्पिकेषु व्रीहियवादिषु परिग्रहव्यवस्थायै वावि
समविकल्पत्वाविघातः । आशङ्किता विकल्पे इमं परिहारं
* युक्तमिति * परिग्रहव्यवस्थया वस्तुविरोधपरिहारो
ऽनुष्ठानविरोधपरिहारो वा तत्र वस्तुस्वरूपस्य पुरुषेच्छा
तद्वशेन वस्तुविरोधपरिहारः सम्भवति उदितानुदितहोम
ष्ठानात्मकत्वाद्वस्तुविरोधो नास्त्यनेन श्लोकेनोक्तम् । अथ
विरोधपरिहारः परिग्रहव्यवस्थयानेन दृष्टान्तेनोच्यते त
पक्षद्वयस्य हि साम्ये सति,पुरुषेच्छावशाद्विकल्पेनोभयानुष्ठा
न दृष्टान्ते च पक्षद्वयसाम्यात्तद्युक्तमित्याह * न चेति
शरीरायासः क्षयो न्यूनद्रव्यत्वं व्ययो ऽत्यन्तनाशः । आ
तत्कालीनलौकिककार्यान्तरबाधः । दार्ष्टान्तिके तु सिद्धे
सदसत्त्वविरोधस्यापरिहार्यत्वाद्विकल्पो * न सम्भवतीत्यु
न च दीर्घकालस्य परिग्रहः सम्भवत्याशौचाहवृद्धेर्निषिद्धत्व
१०१।२ * इह त्विति * न केवलं सदसत्त्वविरोधान्निवार्यते किं
मनुवचनेनेत्यपिशब्दार्थः । ननु दीक्षितान्नभोज्यत्वस्य दीर्घ
निषेधाभावात्परिग्रहव्यवस्थयानुष्ठानविरोधपरिहारो भवि
शङ्कोभयत्राप्यल्पकालनिरोधेन कृतार्थस्य बहुकालनिरोधे
म्भवाद्दीर्घकालवाक्ययोरानर्थक्यमेवापद्येतेत्याह * कुशेति
भयत्रापि समविकल्पासम्भवमुपसंहरति * तेनेति * व
धात्पक्षयोश्चासाम्याद्विषयान्यत्वमेव विरोधपरिहाराय वा
विकल्पो युक्त इत्यर्थः । स चान्यो विषयो दृष्टान्ते दर्शित
* स चेति * ननु यस्यापि धर्मपीडा नास्ति तस्याप्याशौ
निषिद्धत्वान्नेयं विषयव्यवस्था युक्तेत्याशङ्क्य निषेधो ऽपि
पद्येत्याह * तत्र चेति * धर्मपीडाद्यपेक्षयेत्यादिशब्दसूचि
चकालानां व्यवस्थान्तरमाह * दन्तेति * आहिताग्न्या

ज्जातशब्दस्य परनिपातः । मानवीयानुदात्तपदस्यानुपश्चाज्जातमपल यस्मादिति व्याख्यानार्थो ऽन्यशब्दप्रक्षेपः । चितिक्रियाशब्दश्चतुर होपलक्षणार्थः चितिक्रियात्र्यहैकाहा ये विहितास्ते दन्तजातादिवि षया इत्यर्थः । पारिशेष्याद्दशाहं कृतचूडे चेति चकारसूचितोपनी तविषयो ज्ञायते । कथमेषा व्यवस्था प्रतीयतइत्यपेक्षायां * क्रमा दित्युक्तम् * दन्तजातादिषु संस्थितेष्वशुद्धा बान्धवा इत्युक्ते कस्मि न्संस्थिते कियन्तं कालमशुद्धतेत्यपेक्षायां दशाहादीनामुक्तत्वात्स्मृत्य न्तरपर्यालोचनया प्रातिलोम्यक्रमेणेयं व्यवस्था प्रतीयतइत्यर्थः । अ स्मिंश्च पक्षे वृद्धिनिषेधो ऽप्येकशास्त्रगतत्वादेतद्विषय एवेत्या * तच्च चेति * नन्वस्तु प्रातिलोम्यक्रमेणैकाहादीनां दन्तजातादि विषयत्वं धर्मपीडाल्पत्वाविषयत्वे तु किं कारणं दक्षवचनाच्चाग्निवे दसमन्विताादिमात्रविषयत्वं प्रतीयते, न चाग्निवेदसमन्वितत्वं धर्मा यिष्ठत्वेन नियतं दाम्भिकादौ व्यभिचारदर्शनादित्याशङ्क्य दक्षव चनस्य धर्मपीडाविषयत्वद्योतनार्थं गौतमवचनमुदाहरति *तथेति कार्यशब्दस्य धर्मविषयत्वात्तत्साहचर्येण च स्वाध्यायशब्दस्या स्वाध्यायसाध्यजपादिधर्मविषयत्वप्रतीतेस्तद्विघातार्थे सद्यः शौ विदधताल्पाशौचस्य धर्मपीडापरिहारार्थत्वद्योतनान्महत्यामाप ग्निवेदसाध्यकर्मानुष्ठानं विना प्रतीकारासम्भवे ऽनुष्ठात्रन्तराभ वा तत्प्रतीकारार्थकर्मानुष्ठानमात्रविषयाशौचाभावप्रतिपादनपरः काहाच्छुद्ध्यते विप्र इति दक्षवचनं व्याख्येयमिति भावः। यथ स्माभिर्दक्षवचनस्य धर्मपीडापरिहारार्थत्वाङ्गीकरणेनाल्पाशौचक लानां * तद्विषयत्वमुक्तम् * गौतमेनापि तथोक्तं द्योतितमित्यर्थ नन्वेवं सति तत्कालमात्राशौचाभावप्रतिपादनपरत्वेनोत्तरकाला वृत्तेरनुज्ञातत्वाज्जातदन्तादिविषयाणां चाशौचकालानां भिन्नविष त्वेन वृद्धेरप्रसक्तत्वान्निषेधो न युक्त इत्याशङ्क्य विषयान्तरम * अथ वेति *

अन्तर्दशाहात्स्यातां चेत्पुनर्मरणजन्मनी ।
तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशम् ॥

इति पूर्वाशौचासमाप्तावाशौचान्तरनिमित्तसन्निपाते पू शौचकालशेषेण मनुना शुद्धिमुक्त्वा निमित्तावृत्तौ नैमित्तिकाशौ नावृत्तिरन्याय्येत्याशङ्कानिराकरणार्थं पूर्वाशौचपरिच्छेदार्थप्रवृ दशाहादिना प्रसङ्गेनान्तः पतितस्याशौचान्तरस्यापि परिच्छेतुं शव त्वादाशौचानावृत्तेर्न्याय्यत्वं न वर्द्धयेदघाहानीत्यनेनोक्तमिति भा एतदेव विवृणोति *न वर्द्धयेदिति* प्रसङ्गन्यायमात्रं योजयति *

वृत्त इति * नन्वसमाप्तेनापि दशरात्राद्यवधिना शौचान्तरस
देशवर्त्तिनः कथं व्याप्तिरित्याशङ्क्याह * वितत्येति * नात्राह्न
शौचपरिच्छेदकत्वं किं तु संख्यायाः तस्याश्च व्यासज्यवृत्तित्वे
न्त्ये ऽह्न्युपजायमानायास्तत्कालवर्त्तित्वाविशेषात्पूर्वापरीभूताने
शौचापरिच्छेदकत्वमविरुद्धमित्याशयः । नन्वेवं तर्हि पूर्वाशौच
लशेषेण तदन्तःपात्याशौचान्तरनिवृत्तेर्न्यायसिद्धत्वाद्वचनान
नर्थक्यं स्यादित्यशङ्क्याह * शुद्धीति * अयमाशयः । शब्दैका
धिगम्यो ऽर्थो न स न्यायस्य विषयः तथा सत्यपेक्षाबुद्धिहेतुव
नैकत्वातिरिक्तसंख्यायाः संख्येयाहर्विशेषसमूहापेक्षत्वात्तस्य
जातमृतबन्धुभेदेन जन्ममरणावधिभेदेन भेदाज्जन्ममरणसाम
विवक्षायां शावेन सूतिशुद्धेरसम्भवादाशौचनिमित्तसामान्यवि
क्षायां वा सूत्यापि शावशुद्ध्यापत्तेः । यत्तु न वर्द्धयेदघाहानीत्य
शेषाहः शुद्धेर्न्यायमूलत्वदर्शनं तच्छुद्धिप्रतीक्षि जातोष्टिमासिकादि
त्वविषयशेषशुद्ध्यभिधानशङ्कानिवृत्त्यर्थमिति । नन्वेवं तर्ह्याशौच
लवद्दीक्षितान्नकालयोरपि व्यवस्थैवास्तु व्यवस्थितः कल्पो विक
इति तु व्युत्पत्त्या व्यवस्थामेव विकल्पशब्देनाभिप्रेत्याशौचचं
कालवदित्युक्तमित्याशङ्क्याह * नन्वेवमिति * अस्मिन्विषये
यमवधिरिति विषयव्यवस्थितो ऽवधिर्विषयावधिरिति मध्यम
लोपीसमासः तस्य कारणं विषयविशेषावधिव्यवस्थापकं का
भोजनान्वये ऽप्यवधेर्नित्यमवधिसापेक्षत्वात्कारणशब्दसमासावि
तः। तस्माद्दार्ष्टान्तिके विकल्पव्यवस्थयोर्द्वयोरप्यसम्भवाद्विरोधप
हाराशक्तेर्दीर्घावधेश्चाल्पावधिबाधं विनात्मलाभायोगादल्पावधे
इत्याशङ्किता स्वाभिप्रेतसिद्धिमुपसंहरति * तत्रेति * एवमाशं
विरोधपरिहारवादी स्वाभिप्रायं प्रकटयति * तस्मादिति * यव
दल्पावधेरपि वैदिकत्वात् बाधो न युक्तः तस्मादशौचच्छेदका
दिहापि भोजनावधिद्वये वैषम्यस्य व्यवस्थाया हेतुर्विषयभेदो वा
न तु कस्य चिद् बाध इत्यर्थः । कीदृशो विषयभेद इत्यपेक्षाया
ह * अत्रापीति * अनापद्यपि वा दीक्षितनियुक्तपुरुषान्तरदत्त
स्य राजक्रयोत्तरकालं भोज्यत्वमिति परिहारान्तरम् * दीक्षिते
त्युक्तम् * अत्र सत्रिणो ह्यन्यैः प्रदापयेदन्नं भोज्यं तद्द्विजसत्त
रिति स्मृतिपर्यालोचनया सूतकादिसन्निपातभयान्मासादिपः
ब्राह्मणभोजनार्थमन्नमुपकल्प्यान्यमन्नं दानाय नियुञ्जते अग्नीषो
योत्तरकालं तु दीक्षितदत्तान्नभोजनमप्यदुष्टमित्याशयः । एतच्च प
रिहारान्तरं दीक्षितो ददातीति निषेधेन अग्नीषोमीयोत्तरकालमपि

क्षेतस्यान्नदानायोगादापातप्रतिभानमात्रेणापारमार्थिकमेवोक्तमित्य-
पेशब्देन सूचितम्। नन्वन्नान्तरासम्भवे ऽपि निषिद्धान्नभोजनं न
कार्यमित्याशङ्क्याह * आपद्धर्मइति * ननु करिष्यमाणप्रायश्चित्तब-
ऽनापत्काले ऽप्यनुष्ठितस्य निषिद्धस्य निर्दोषत्वाभावादनुज्ञाशास्त्रम-
प्रमाणमित्याशङ्कते * हन्तैवमिति * आपद्यपि निषिद्धानुष्ठानस्य दो-
त्वोपपादनायेतिहासमुदाहरति * जग्धवानिति * स च दोषं
प्राप्तवानितिशेषः। श्वमांसभक्षणास्याननुज्ञानात्सदोषत्वं क्रीतराजका-
भोजनस्य त्वनुज्ञानान्निर्दोषत्वमिति परिहरति * उच्यतइति *
वेशेषरूपेणानुज्ञानस्यात्यन्तनिर्दोषत्वसूचनार्थम् * महानित्युक्तम्।
न्वापत्काले निषिद्धान्नभोजनस्य।

जीवनात्ययमापन्नो यो ऽन्नमत्ति यतस्ततः।
आकाश इव पङ्केन न स पापेन लिप्यते॥

इति सामान्येन मनुनानुज्ञातत्वाद्विशेषानुज्ञानर्थिकेत्याशङ्क्या-
* सामान्येनेति * अनुज्ञासाफल्यप्रदर्शनार्थः स्तोकशब्दः। सा-
न्यानुज्ञातानुष्ठानस्य अल्पदोषत्वं कथमवगम्यतइत्यपेक्षायामाह
तथा चेति * विशेषानुज्ञातादन्येषां निषिद्धानां पापत्वे ऽपि
नि शेषाण्यल्पानीति अल्पवाची शेषशब्दः अन्ते शौचं भविष्य-
त्यापद्धर्मगतं प्रत्युक्तमितीतिकारणाध्याहारेण योज्यम्। मनुव-
नमुदाहरति * कर्मणेति * ननु कथं धर्ममाचरेदित्यस्य शौचवि-
नार्थतावसीयतइत्यपेक्षायामाह * धर्मश्चेति * फलार्थस्य धर्मस्य
क्यान्तरविहितत्वेन विध्यानर्थक्यादापत्कालीनस्य वा कार्यकर-
स्य निर्दोषत्वे धर्माधिकारनिवर्त्तकत्वायोगात्प्रतिप्रसवार्थमपि वि-
नुपपत्तेः सदोषत्वे वा प्रायश्चित्तं विना धर्माधिकाराभावात्प्राय-
श्चित्तविधानार्थमेवेदं वचनमिति भावः। अतो विशेषानुज्ञानस्या-
न्तनिर्दोषत्वज्ञापनार्थत्वान्नानर्थक्यमित्युपसंहरति * यत्त्विति *
नु क्रीतराजकान्नभोजनस्यात्यन्तनिर्दोषत्वे द्वितीयो ऽवधिरनर्थकः
ादित्याशङ्क्यानापदि सदोषत्वात्तद्विषयो ऽसाविति दर्शयितुमाह
तत्रापि त्विति * एवमाशौचच्छेदकालवदापदनापद्विषयत्वेना-
धिद्वयस्य व्यवस्थामुपपाद्याशौचकालानां जातदन्तादिविषयत्वपक्षे
त्साम्यार्थमन्यथा व्यवस्थामाह * यदि वेति * कालवैषम्यात्सम-
कल्पत्वाभावे ऽप्यविरोधो ऽवधार्यतइत्यपि शब्दाध्याहारेण यो-
यम्। कथमित्यपेक्षायाम् *अर्थभेदव्यवस्थानादित्युक्तम्* तस्मा-
क्षितस्याविज्ञातस्य क्रीतराजकस्याभोज्यं भवतीत्याथर्ववैदिकस्य
क्षितान्नभोजननिषेधो ऽर्थस्तस्य तस्माद्दीक्षितस्य विज्ञातस्य क्रीत-

राजकस्य भोज्यं भवतीत्याथर्ववेदिको ऽवधिर्न दीक्षितस्याश्नीयादिति त्रयीगतस्याभोजनसङ्कल्पविधिरर्थः । तस्य त्रयीगतोऽवधिरिति त्र्यथ र्ववेदगतयोर्वाक्ययोरर्थभेदेन तद्विषयतया विधिद्वयस्य व्यवस्थानादविरोध इत्यर्थः अर्थभेदं दर्शयति * दीक्षितान्नमिति * नित्यत्वप्रदर्शनार्थम् * ध्रुवमित्युक्तम् * न भोक्ष्यइति भोजनविषये मनोव्यापारः सङ्कल्पो विधीयतइत्यर्थः नन्वभोजननियमस्यापि भोजननिषेधार्थत्वात्तत्करणे दोषापत्तेः क्रीतराजकस्याप्यभोज्यान्नत्वस्यादित्याशङ्क्य फलार्थं वर्ज्जनीयस्यानुष्ठानं न दोषापादकमिति दर्शयितुं दृष्टान्तद्वयमाह * यथैवेति * श्राद्धभोजनमांसभक्षणयोरपि निषिद्धत्वेन दोषवत्त्वात्साध्यविकलत्वाशङ्कानिराकरणार्थं न * सर्वत्र निषिध्यतइत्युक्तम् * क्व निषिद्धता क्व वा नेति विवेकापेक्षायामाह * श्राद्धमिति * सदेति सपिण्डीकरणात्प्रागूर्ध्वं चेत्यर्थः सपिण्डीकरणोत्तरकालमप्येकोद्दिष्टमप्यन्येषां स्मर्तॄणां मतेनानिषिद्धमिति द्योतना * यैकेषामित्युक्तम् * प्रेतत्वनिवृत्त्या पितृत्वप्राप्त्यर्थात्सपिण्डीकरणात्प्राक् पार्वणस्याविधानेन सपिण्डीकरणानन्तरभाविपार्वणश्राद्धस्येत्यादिप्रेतश्राद्धस्याभावात्पिञ्यशब्देनाभिधानम् । मांसभक्षणे ऽपि विवेकमाह * तथेति * एतदेव मनुवचनेन द्रढयति * यथाहेति * श्राद्धभोजनमांसभक्षणाभ्यां दीक्षितान्नभोजनस्य वैषम्यमाशङ्कते * ननु चेति * निःश्रेयसेन कारणेन प्रयोजनेनेति चतुर्थ्यर्थे तृतीया निःश्रेयसार्थं नियमयतीत्यर्थः । न दीक्षितस्याश्नीयादित्यस्याथर्ववेदिकवच्छ्रुतशब्दसामानाधिकरण्यविकल्पप्रसक्तिरूपपर्युदासकारणाभावान्निषेधार्थत्वप्रतीत्यविशेषेण स्वरूपभेदे ऽप्यर्थैकत्वमभिप्रेत्य वाक्यैकत्वाभिधानम्।अन्यत्राव्युत्पादितमप्यवधिद्वयान्यथानुपपत्तेः पर्युदासकारणत्वं न्यायोपेतत्वादिहाङ्गीकार्यमित्यभिप्रायेण परिहरति * स्यादिति * प्रत्यक्षस्यापि वाक्यद्वयस्याभिन्नार्थत्वं न्यायकल्पमभिप्रेत्य * कल्पितमित्युक्तम् * कथमवधिद्वयेन भिन्नार्थत्वकल्पनेत्यपेक्षायामाह * यः पूर्वइति * यः प्रतिषेधः स क्रीतराजके स्थितो निवृत्तः कथं निवृत्ततावसीयत इत्यपेक्षिते * पूर्वइत्युक्तम् * अक्रीतराजकस्येति क्रयप्रागभावावगमात्प्रतिषेधस्योत्तरकालं व्यापाराभाव इत्यर्थः। ततश्च तस्य केवलप्राग्भावित्वेनैकरूपत्वाद्द्वितीयो ऽवधिर्नावकल्पतइत्येकत्वादित्यनेनोक्तम्। यदि ह्यसौ प्रतिषेधो राजक्रयात्प्रागुत्तरकालं च व्याप्रियेत ततस्तस्यैवापदनापद्विषयत्वेनावधिद्वयमवकल्पेत । अतो ऽन्यथानुपप

१ तत्सर्वत्रेत्युक्तमिति २ पु० पा० ।

थर्ववैदिकादन्यस्य त्रयीगतस्य पर्युदासार्थत्वं कल्पनीयमित्याह द्वितीयेति*नन्वभोजनविधित्वेऽपि तत्र कालविशेषाश्रवणात् क्रीते भोजनं नामेति निष्प्रमाणमित्याशङ्क्य * अथान्तरालिकइत्युक्तम् * धेनैव प्राग्वर्जनसिद्धेः पर्युदासानर्थक्याद्राजक्रयाग्नीषोमीयान्तकालविशेषवत्त्वमपि निश्चीयतइति भावः। दृष्टान्तं विवृणोति यथेति * देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति निर्वापमन्त्रे सवित्रश्विपूषशब्दासमवेतदेवताप्रकाशनार्थत्वायोगादन्यदेवत्यायां विकृतावनूहे तेपादिते किमर्थस्तर्हि सवित्रादिशब्दप्रयोग इत्याशङ्क्य सवित्राब्दानां यजमानपरत्वात्प्रसवशब्दस्य चानुज्ञार्थत्वाद्यजमानानुज्ञाप्रानार्थत्वेऽभिहिते यजमानबहुत्वे तदूहो भविष्यतीत्याशङ्क्य पूर्वातत्वेनेदानीं तत्प्रकाशनानर्थक्यान्निर्वापस्तुत्यर्थत्वेन तत्प्रकाशनस्य र्थ्याद्यज्ञपतिशब्दवदनूह इति निगमसिद्धो दृष्टान्तः। ननु निर्वाले ऽपि यजमानहविर्निर्वप्स्यामीत्यध्वर्युणानुज्ञायां पृष्टायामों निति यजमानेनानुज्ञानात्तदनुसन्धानार्थं निर्वापमन्त्रे प्रकाशनं भव्यतीत्याशङ्कानिरासार्थं * तदानीन्तनेत्युक्तम् * पूर्वमेवानुज्ञात्वान्न निर्वापस्तुत्यर्थमिति भावः। दार्ष्टान्तिके योजयति * तथेहे- ११
* उभयथापि सम्भवे तर्हि कथं पर्युदासत्वावधारणेत्याशङ्क्य न ारं वृणीतइति तद्विकल्पप्रसक्त्यैव पर्युदासत्वावधारणमाह *प्रषेद्धेति * क्रयोत्तरकालमर्थप्राप्तदीक्षितान्नभोजनप्रतिषेधे पूर्वषेधगतस्याक्रीतराजकस्येति विशेषणस्यानर्थक्यापत्तेः शास्त्रानुज्ञातिषेधस्याभ्युपगमनीयत्वाद्विकल्पप्रसक्तिरित्यर्थः। उपसंहरति दीक्षितान्नेति * ननु माभूदनुज्ञाग्नीषोमीयोत्तरकालं दीक्षिताोजनस्य विधिरयं भविष्यतीत्याशङ्क्य दृष्टार्थस्यादृष्टार्थत्वायोगाशिष्टविधौ च गौरवापत्तेः फलाश्रवणात्प्रकृताश्रयालाभादनेकोपादानाच्च फले गुणविध्ययोगाद्विधित्वं युक्तमित्याह * अदृति * न दीक्षितस्याश्नीयादित्यस्य त्वदृष्टार्थतोभयसाधारण्यादणम्। द्वितीयानुपपत्त्या च पर्युदासत्वं न्याय्यमेवेति भावः। ऽनयोः पक्षयोर्मध्ये सम्मत इत्यपेक्षायामापाद्विषयत्वेऽनुकल्पत्वेन स्सावगततुल्यकल्पत्वबाधापत्तेरथर्ववैदिकस्य च निषेधस्यावध्यक्षत्वेन तस्माद्दीक्षितस्य विज्ञातस्य क्रीतराजकस्य भोज्यं भवतीयावधिसमर्थकत्वायोगाच्छ्रेयोऽर्थमयं यजते न प्रायश्चित्तार्थमिं विज्ञातस्य क्रीतराजकस्यान्नमदुष्टमेवेत्यवध्यन्तरदर्शनजनितदोाङ्कानिराकरणार्थत्वप्रतीतेर्द्वितीयस्य पक्षस्य सम्मतत्वं दर्शयितु-

माह * एवमिति * ऐतरेयब्राह्मणगतस्य स्वशितव्यं वपायां हु तायामित्यस्याग्नीषोमीयसंस्थावधिवाक्यवत्पर्युदस्तदीक्षितान्नभोजन नुज्ञानार्थत्वे ऽपि बह्वल्पफलगुरुलघुकल्पत्वेनावधिद्वयव्यवस्थानाद विरोध इत्येवंशब्देन सूचितम् । पर्युदस्तानुज्ञानार्थत्वसाम्येन चैत द्वयधिद्वयमेकीकृत्यावधिद्वयोपन्यासः अष्टाचत्वारिंशद्वर्षब्रह्मचर्य स्मृत्युदाहरणमपि दूषयति * अष्टेति * स्मार्त्तत्वेन तुल्यत्वाद्वि कल्पेनाविरोधं वक्तुं * स्मृतावेवेत्युक्तम् * स्मार्त्तत्वाविशेषे ऽपि पक्षाणामसाम्याद्विकल्पानुपपत्तेरपारितोषाद्विषयव्यवस्थां वक्तुमाश्र यान्तरेत्युक्तमिति विवेकः । कीदृशानि पक्षान्तराणीत्यपेक्षिते मनु वचनं तावदुदाहरति * तथा हीति * अविप्लुतब्रह्मचर्यो गृहस्था श्रममावसेदित्युत्तरार्द्धं तत्र द्वेधा विषयव्यवस्थामाह * सामर्थ्ये ति * यो ऽल्पेन कालेन बहून्वेदानध्येतुं समर्थस्तं प्रति बहुवेदपक्षे ऽसमर्थं प्रत्यल्पवेदपक्ष इति सामर्थ्यमङ्गीकृत्यःगार्हस्थ्याश्रमायोग्यं प्र ति बहुवेदपक्षस्तद्योग्यं प्रत्यल्पवेदपक्ष इत्याश्रमयोग्यत्वमङ्गीकृत्यापे क्ष्यैतन्मनुनोच्यतइत्यर्थः ।

इह षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् ।
तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥

इति मनुनैवोक्तत्वात् ग्रहणान्तिकपक्षे सामर्थ्यापेक्षावर्षसंख्यापक्षे त्वाश्रमयोग्यत्वापेक्षेति विवेको ऽवसीयते ।अष्टाचत्वारिंशद्वर्षब्रह्मचर्य स्मर्त्रा गौतमेनापि पक्षान्तरमुक्तमित्याह*गौतमेनापीति*तत्राप्यष्टा चत्वारिंशत्पक्षो गार्हस्थ्याश्रमायोग्यविषय इत्याह * तत्रैवमिति * नन्वाश्रमान्तरं तान्प्रति कस्मान्न विधीयतइत्याशङ्क्य तेषां बहुक्लेश त्वादविरक्तानधिकाराच्चाल्पक्लेशबहुफलोपकुर्वाणकत्वेनैव बहुक्ला लक्षपणायैतद्विधानमित्याह * नैष्ठिकेति * उपकुर्वाणको ऽध्ययनाः गुरुकुलवासी ब्रह्मचारिविशेषः । गमिष्यतीत्येतदुच्यतइत्यन्वयः स्वाध्यायमात्रेणेष्टगतिप्राप्त्युपपादनार्थं द्वैपायनवचनमुदाहरति * द्वैपायनादयश्चाहुरिति * ब्रह्मयज्ञफलातिशयोपयोगितापि स्वाध्या यतदर्थज्ञानभूयस्त्वस्यास्तीत्याह * यानि चेति * प्रतिदिनं प्र तिदिनं प्रयुज्यमानैर्ऋगादिभिर्यो ब्रह्मयज्ञः तन्निमित्तानि यानि यं ३ क्रतुमधीयित तस्य तस्याप्नुयात्फलमिति क्रतुसाध्यानि फलानि क्र त्वधिकृतेभ्यो गृहस्थवानप्रस्थेभ्यो निवृत्तत्वादनधिकृतविषयत्वेनाव तिष्ठन्तइत्यर्थः । ब्रह्मयज्ञस्याग्निहोत्रादिवन्नित्यकाम्योभयरूपत्वाद्य थायोगं व्यवस्था न विरुद्धेत्याशयः । द्वादशवर्षपक्षो ऽपि गौतमी येनैव शीघ्रवेदग्रहणसमर्थविषयेण ग्रहणान्तं वेति पक्षान्तरस्मरणोः

स्वविषयाद्व्यावर्त्तितत्वाच्च सर्वगृह्यस्वविषय इत्याह * यो वेति * वाशब्दो ऽष्टाचत्वारिंशत्पक्षविषयः पूर्वपक्षीकृतौ स्वविषयाद्व्यावर्त्तितावित्यर्थः उपसंहरति * इतीति * भाष्यभङ्गमुपसंहरति *तेनेति * स्वयं द्वेधा सूत्रद्वयं व्याचष्टे * तेनात्रेति * ननु न्यायनिष्ठत्वान्मीमांसायाः प्रयोगनिरूपणमयुक्तमित्याशङ्क्य प्रयोगार्थत्वाश्रयस्य तत्साम्ये ऽपि यत्र प्रयोगवैषम्यं तत्र तन्निरूपणीयमित्याह * एतद्धीति * किं प्रतिपाद्यतइत्यपेक्षायामाह * यावदिति * ननूभयोः प्रामाण्ये कथं नियमेनैकार्थानुष्ठानमित्याशङ्क्याह * व्रीहीति * व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत यवेभ्यो यवैरिष्ट्वा यवैरेव यजेत व्रीहिभ्य इत्याग्रयणे ऽवधिव्यवस्थया व्रीहियवव्यवस्थाविधानादग्निहोत्री वै नानादयित्वास्तस्याः पयसा जुहुयादित्येतत्पक्षाश्रयणाविषयो ऽत्रत्यो यावज्जीवशब्द इति प्रागेवोपपादितं श्रुत्या सह तुल्या कक्षा यस्याः सा तथोक्ता अनुष्ठाननियमे कारणमाह * यानीति * वेदवचनस्य विश्रम्भणीयत्वं वदता स्मृतेर्यथाश्रुतमूलानिश्चयेनाविश्रम्भणीयतार्थादुक्ता । कथमस्मिन्नर्थे सूत्रं योज्यमित्याशङ्क्याह * सूत्रार्थो ऽपि चेति * यकाररहितः पूर्वपाठः तत्सहितो द्वितीयः तावच्छब्दाध्याहारे कारणमाह * तदानीन्तनेति * तावत्कालीनव्यवहारप्रतिपादनार्थत्वाङ्गीकरणे प्रयोजनमाह * ततश्चेति * आशङ्काशब्दो यथाश्रुतमूलानिश्चयाभिप्रायः मात्रशब्दव्यावर्त्यमाह * यदा त्विति * ननु प्रामाण्यस्य तुल्यत्वे ऽपि केन चिद्विशेषेणैकार्थादरे भिन्नशाखागतयोरुदितादिश्रुत्योरपि पठितत्वविशेषेणैकार्थादरापत्तेरेवं प्रातरूपोदयं व्युषिते उदिते चेत्याश्वलायनस्य समविकल्पाभिधानं विरुद्ध्येतेत्याशङ्कते * नन्विति * स्मृतेर्विध्याक्षेपकमन्त्रार्थवादमूलत्वस्यापि सम्भवान्नैकस्यै बहवः सह पतय इत्यर्थवादाक्षिप्तस्य च निषेधविधेर्नैका बह्वीन्पतीन्विन्देतेति श्रुतिनिषेधविध्यनुसारेणाविवक्षितसाहित्यानेकपतिमात्रनिषेधपरतया व्याख्यानदर्शनादुच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सहते सूर्येणेति मन्त्राक्षिप्तस्य चाश्वदानफलविधेर्न केसरिणो ददातीति श्रुतनिषेधानुसारेण साक्षाद्विहिताश्वदानाविषयत्वेन व्याख्यानदर्शनात्तन्मूलानां स्मृतीनां प्रत्यक्षश्रुत्यनुसारेणान्यथाव्याख्यानसम्भवात्प्रत्यक्षमूलादर्शने यथाश्रुतमूलानिश्चयादनादरो न वैलक्षण्यमात्रमित्यभिप्रायेण परिहरति * सत्यमिति * अभिप्रायं विवृणोति * अतश्चेति * विप्रलम्भमूलत्वाभावान्नात्यन्तबाध्यत्वं यथाश्रुतमूलानिश्चिताच्च नात्यन्ततुल्यतेत्यर्थः । एवं च वदता यथाश्रुतमूलानिश्चया-

भिप्रायेणासति ह्यनुमानमिति सूत्रावयवस्य हेतुदर्शनसू
च यथाश्रुतमूलत्वानिश्चयानिश्चयरूपविशेषस्यात्यन्तातुल्यत्वहेतं
र्शनादित्येवं व्याख्या सूचिता । भाष्यं च यथाश्रुतार्थ
मात्याभावाभिप्रायत्वेन समाहितम् । उदाहरणभाष्यमप्य
मूलावस्थास्मृतिविषयत्वेन नेतव्यमिति सर्वमवुष्टम्। द्वितीयव्याख
नं प्रपञ्चयति * यद्वेति * यान्येतानि सांख्यादिपरिगृहीतानि तै
परीतगृहीतयोर्द्धर्माधर्मयोर्निबन्धनानि यानि च बाह्यान्तराणि
च्छाचारस्य बहुसमाहृतैकदेशमिश्रान्नभोजनाचरणस्य निबन्धना
तेषामेवैतदनपेक्षणीयत्वं प्रतिपाद्यतइत्यन्वयः । न च तदप्रामाण्
ङ्गीकरणे पूर्वोक्तमर्यादातिक्रमादिदोषापत्तिः शिष्टत्रैवर्णिकपरि
हादरस्य स्मृतिप्रामाण्यहेतोस्तेष्वसम्भवादिति त्रयीविद्भिर्न परिगृह
तानित्यनेनोक्तम् । त्रयीवित्परिग्रहाभावे ऽप्यहिंसासत्यवचना
वाक्येषु वेदमूलत्वदर्शनेन वाक्यान्तरेष्वपि वेदमूलत्वानुमानसम्
वात्कथमप्रामाण्यमित्याशङ्क्य किं चित्त्रयीमिश्रस्य धर्मकञ्चुक
च्छायायां पतितानीत्युक्तम् । यथा नर्त्तकी स्वाङ्गवैकृत्यं कञ्चुके
च्छादयति तथा लोकवचनार्थं चैत्यवन्दनादिवाक्यानां मिथ्या
च्छादयितुं कचिद्वेदमूलार्थाभिधानं न सर्वत्र तथात्वानुमानायलमित्य
शयः। किं तेषां लोकवचनं प्रयोजनमित्यपेक्षायां लोकोपसंग्रहा
प्रयोजनपरत्वमुक्तम्। कस्मात्पुनः कचिद्वेदमूलत्वदर्शनेनान्यत्र
थात्वानुमानं न सम्भवतीत्याशङ्कानिराकरणार्थम् * त्रयीत्युक्तम्
प्रय्यप्रामाण्यापादकत्वात्तद्विपरीतेनात एवातन्मूलत्वात्तदसम्बद्धे
दृष्टशोभाभिप्रायेण तत्प्रधानेन तत्मूलेनोपनिबद्धानीत्यर्थः । प्रत्य
क्षादिमूलत्वस्य प्रागेव निरस्तत्वात्प्रत्यक्षाद्याभासेष्वेव पराभिमान
त्प्रत्यक्षादिशब्दप्रयोगः। एवं तर्हि प्रामाण्याशङ्कानुपपत्तेस्तन्निराक
णमयुक्तमित्याशङ्क्य * विषचिकित्सेति * पूर्वपक्षबीजमुक्तम्
विषचिकित्सादिसमर्थानां कतिपयमन्त्रौषधीनां या कादाचित्का
सिद्धिस्तत्सिद्दर्शनबलेन जीविकाप्रधानस्यार्थान्तरस्योपदेशकानीत्य
र्थः। ननु विषचित्सादिदृष्टान्तेन प्रामाण्याध्यवसाने जीविकाप्राध
न्याच्चानुष्ठानादरे सत्यपि धर्मत्वाध्यवसाने किं कारणमित्याशङ्क्
अहिंसादिस्लोकार्थगन्धवासितत्वमुक्तम् ननु प्रत्यक्षादीनां धर्म
प्रामाण्यनिराकरणेन प्रत्यक्षसूत्रएव तन्मूलानां बाह्यस्मृतीनां प्रा
माण्यस्य निराकृतत्वात्पुनरुक्तमेतत्स्यादित्याशङ्क्याह * न चै
द्विति * वेदमूलत्वं पूर्वमनिराकृतमिह निराकार्यमित्याशयः
ननु वेदमूलत्वस्य परैरनङ्गीकृतत्वेन तन्निराकरणमतिप्रासिद्धत्वा

र्यमित्याशङ्क्याह * न चेति * मीमांसकातिरिक्तैः सामवायिकार्थ-
ोत्यभ्युगमेन कस्मिंश्चिच्छब्दे वाचकत्वानङ्गीकरणाद्गाव्यादिश-
ाचकत्वस्य परैरनङ्गीकृतस्यापि निराकरणं लोके वाचकविवेक-
प्रसिद्धत्वाद्यथायुक्तं नैवं बाह्यस्मृतीनां वेदमूलत्वानिराकरणं यु-
मतिप्रसिद्धत्वादिति वैधर्म्यदृष्टान्तः। यद्वा यथा गाव्यादिशब्दाना-
ाचकत्वे प्रामाण्यस्यातिप्रसिद्धत्वादनादरे लौकिकानां वाचका-
वकेषु समदृष्टित्वापत्तेस्तत्कथनं साधुशब्दाधिकरणे करिष्यते
ा बाह्यत्वधर्माधर्मनिबन्धनाप्रामाण्यस्याप्यतिप्रसिद्धत्वादनादरे-
कथने लौकिकानां मन्वादिनिबन्धनेषु बाह्येषु च समदृष्टित्वाप-
तत्कथनीयमित्युत्तरशेषः साधर्म्यदृष्टान्तः । यद्वा शोभादिविशे-
शेन कलिकालवशेन वा ऽधर्मप्राबल्याद् बाह्येष्वेव श्रद्धाविशेषाप-
श्रौतस्मार्त्तार्थस्यैव त्यागः प्रसज्येतेत्याह * शोभेति * सन्तु
लौकिकाः परीक्षकाणामपि सम्भवद्वेदसंयोगत्रैवर्णिकप्रणीतत्वा-
शेषात्समदृष्टित्वापत्तिरित्याह * ब्राह्मणेति * बाह्यस्मृत्यप्रामा-
स्यावश्यप्रतिपाद्यतामुपसंहरति * तेनेति * पूर्वपक्षमाह * म-
न्नेति * (आदिपदेनानुपलब्धिविरोधपरिहाराय मूलश्रुतेरपि
पान्तरवर्तित्वमुपादीयते[1])ननु विरोधे का गतिरित्याशङ्क्याह * त-
ते * विरोधे ऽप्युक्तेन न्यायेन मूलश्रुत्यनुमानाविघाताद्व्यवस्था
कल्पो वा भविष्यतीत्याशयः । मूलानुमानस्य चानुपलब्धिविरोधः
क्षश्रुतिमूलत्वपक्षे तु विरोधशङ्कैव नास्तीत्याह * यैश्चेति *
ऽस्मन्पक्षे यस्मै यद्वोच्यते तत्प्रमाणीकुर्यादिति पूर्वोक्तं दूषणं परि-
न्नुपसंहरति * ततश्चेति * सूत्रेण सिद्धान्तमाह * अत आ- ११
ते * ननु पारतन्त्र्ये सति विरोधे मूलानुमानासम्भवेनानपेक्षत्वं
द्वेदवत्तु स्वातन्त्र्यसम्भवे मूलानुमानासम्भवे ऽपि न किंचिद्
यतीत्याशङ्क्याह * पारतन्त्र्यं तावदिति * अतो वेदमूलत्वमात्रं
ाकार्यं तच्चापसिद्धान्तापत्तेर्बौद्धादिभिर्वक्तुं न शक्यतइत्याह
वेदमूलत्वं पुनरिति * यदि तु तावदेकदेशी कश्चिदभ्युपगच्छेत्तं
नेन सूत्रेण निराकरोति * अन्यश्चेति * वेदविरुद्धस्यापि म-
ादिवाक्यस्य वेदमूलत्वाभ्युपगमान्न तेन वेदमूलत्वं निराकर्त्तुं श-
ामित्याशङ्क्य समस्तविद्यास्थानविरुद्धत्वमुक्तम् । ग्रन्थकाराणां वा-
। सूत्रेण वेदविरोधो ऽभिधीयतइत्याह * त्रयीमार्गेति * वेद-
रुद्धाचरणानां तन्मूलोपदेशानुपपत्त्या वेदमूलानुमानस्य बाध
ाशयः । वेदाविरोधिभ्यश्च समर्पणं वेदाविरोधिनां वेदमूलोप-

---

[1] अयं पा० २ पु० ना०

देशपरिग्रहानुपपत्तेर्वेदमूलानुमानस्य बाधकमित्याह *त्रयी
भ्यश्चेति * चतुर्थवर्णः शूद्रः । निरवसितो वर्णाश्रमाचारर
परिग्रहीतॄणामपि वेदविरोधो वेदमूलानुमानस्य बाधको ऽ
न्थेनोक्तो भवति । आत्मविरुद्धाचरितृत्वेन च शाक्यादे
हितैषित्वस्य दूरनिरस्तत्वात्तदुपदेशस्य प्रमाणमूलत्वानुमानं
कमित्याह * स्वधर्मेति * एतदेवाभियुक्तवचनेन द्रढयति *
चेति * मनोस्तु क्षत्रियस्यापि प्रवर्तकत्वे यद्वै किं चिन्मनुर
द्भेषजमिति वेदानुज्ञातत्वादविरुद्धमित्याशयः । स्वधर्मातिक्र
वालङ्काराभिमानादत्यन्तमूढत्वं प्रतीयतइत्याह *बुद्धादेः पुन
तद्ग्रन्थपरिग्रहीतॄणामपि न शूद्राय मतिं दद्यादित्यादिप्रतिषेध
मसामर्थ्येन ब्राह्मणनिन्दां तत्कारित्वेन च शाक्यस्तुतिं कुर्वत
न्तमूढत्वमाह * स किलेति * तद्ग्रन्थविहिताचरितॄणां च वे
रोधो वेदमूलत्वस्य बाधक इत्याह * तदनुशिष्टेति * षट्स्व
११७।२ सूत्रं योजयति * तेनेति * बाह्यग्रन्थजातं वेदविरोधादनपेक्ष
प्रथमव्याख्याने ऽर्थः। ग्रन्थकारिणां वेदविरोधात्तत्कृतं ग्रन्थजा
पेक्ष्यमिति द्वितीये परिग्रहीतॄणां वेदविरोधात्तेभ्यः समर्पकाए
न्थकारिणां सम्बन्धिग्रन्थजातमपेक्ष्यमिति तृतीये परिग्रहीतॄणां
विरोधात्तत्परिगृहीतं ग्रन्थजातमनपेक्ष्यमित्यर्थोक्ते चतुर्थे ग्रन्थ
णामात्मविरुद्धाचारितृत्वात्तत्कृतं ग्रन्थजातमनपेक्ष्यमिति पञ्च
आचरितॄणां वेदविरोधात्तदनुस्मृतं ग्रन्थजातमनपेक्ष्यमिति ष
दविरोधाभावे ऽप्यनुपलब्धिविरोधेन पठितश्रुत्यनुमानायोगा
त्वबाधापत्तेश्च प्रलीनशाखागतश्रुत्यनुमानायोगाद् बाह्यग्रन्थ
श्रयबाधमित्याह * न चेति * ननु मन्वादिस्मृतिवद्विप्रकीर्णश
गतश्रुतिमूलत्वेनानुपलब्धिविरोधपरिहारो भविष्यतीत्याशङ्क्य
क चित्सम्वाददर्शनात् तद्दृष्टान्तेनान्यत्रापि वेदमूलत्वानुमा
कमिति इह तु क चिदपि सम्वादाभावाद्वैषम्यमित्याह *न ही
अहिंसादिवचनस्यापि विषयविशेषानवच्छिन्नस्य विहितव्यति
विषयहिंसादिनिषेधश्रुत्या सम्वादो नास्तीत्याशयः । ननु श्रु
लत्वासम्भवे ऽपि प्रमाणान्तरमूलत्वेन प्रामाण्योपपत्तेर्ग्रन्थप्रा
बाधनं न युक्तमित्याशङ्क्याह * मूलान्तरेति * अत्रैव हेतुद
श्चेतिसूत्रं योजयति * लोभादीति * किं चात्रोत्प्रेक्षणीयलोभ
विषयतया हेतुशब्दव्याख्यानेन युक्त एव हेतुशब्दाभिधेया धर्मा
पदेशमूलत्वेन तैरुपन्यस्ताः प्रत्यक्षं दृश्यन्ते इत्याह * शाक्याद
ति * ननु याज्ञवल्क्यादिभिरपि ।

यदुच्यते द्विजातीनां शूद्राद्यरोपसंग्रहः ।
न तन्मम मतं यस्मात्तत्रात्मा जायते स्वयम् ॥

तेन पुनरित्यादिहेतुदर्शनपूर्वकं धर्माधर्मोपदेशनान्न तन्मात्रेण वेदमूलत्वनिराकरणं युक्तमित्याशङ्क्य वेद एव द्विजातीनां निःश्रेयसकरः परः इत्यादिना तैः प्राधान्येन वेदमूलत्वादिभिधानात्तेन ह्यक्रियतइतिवदर्थवादार्थं हेत्वभिधानं विज्ञायते । ननु शाक्यादिभिर्वेदमूलत्वं क्व चिदुक्तमित्याह * न चेति * हेतुमूलत्वेनैव तर्हि प्रामाण्यं भविष्यत्यत आह * हेतवश्चेति * हेत्वाभासास्तेन सम्यग्घेतव इति भावः । हैतुकत्वेन वा शाक्यादीनामनपेक्ष्यत्वप्रतिपादनार्थैतत्सूत्रमित्यर्थान्तरन्यासेनाह * एत एव चेति *

पाषण्डिनो विकर्मस्थान्वैडालव्रतिकाश्छठान् ।
हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥

इति स्मरणाद्वाङ्मात्रेणापि येषामर्चनं न कार्यन्ते शाक्यादय एवेत्यर्थः । पाखण्डित्वं विकर्मस्थत्वं च प्रसङ्गादुक्तम् । हेतुदर्शनाच्चेति चकारसूचितं वा । अस्यैव सूत्रस्यानपेक्षत्वहेतोर्वेदबाह्यत्वस्य कुदृष्टित्वस्य च दर्शनादिति चतुर्थं व्याख्यानमाह * एतदीयेति * स्वाभिप्रेतं सिद्धान्तमुपसंहरति * तस्मादिति *

॥ अथ पदार्थप्राबल्याधिकरणम् ॥ ४ ॥

शिष्टाकोपे ऽविरुद्धमिति चेत् ॥ ५ ॥

अत्र भाष्यकारेणाचमनादीन्युदाहृत्य किमेतानि श्रुतिविरुद्धानि न कर्त्तव्यान्युताविरुद्धानि कार्याणीति विचाररूपं दर्शितं, तच्छ्रुतिविरुद्धस्मृत्यर्थाकर्त्तव्यत्वस्य पूर्वाधिकरणे सिद्धत्वादविरुद्धार्थकार्यत्वस्य चाद्याधिकरणसिद्धत्वादनर्थकं भोजनादिनिमित्तस्य चाचमनस्य शुद्ध्यर्थत्वेन पुरुषार्थस्य यज्ञोपवीतस्य च हिरण्यादिवत्पुरुषार्थरूपेण नित्यधार्यतया विहितस्य दक्षिणाचारत्वस्य च भोजनादौ पुरुषार्थतया विहितस्यानाशङ्क्य विरोधत्वेन पूर्वपक्षासम्भवादयुक्तमाशङ्क्य व्याचष्टे * एवं तावदिति * उक्तेन न्यायद्वयेन यद्यपि सर्वासां पुरुषार्थानां क्रत्वर्थानां च स्मृतीनामविरोधाविरोधयो प्रामाण्याप्रामाण्ये निरूपिते, यद्यपि च तावन्मात्रेण पुरुषार्थानामाचमनादिस्मृतीनामनाशङ्क्य विरोधत्वेन पर्यवसितं निरूपणं तथापि सम्प्रति क्रत्वर्थानां यज्ञोपवीतादिस्मृतीनां विरोधाविरोधमात्रमेव विचार्यतइत्यर्थः । ननु क्रत्वर्थस्मार्त्तपदार्थानुष्ठानस्य श्रौतपदार्थपरिमाणविरोधाविरोधशङ्कास्तु नाम न तु किं चिन्मात्राधिक्येन पूर्वाह्ण

द्विकालविरोधशङ्का । न च सर्वादावनुष्ठीयमानस्य क्रम
शङ्क्याशङ्क्य बहुश्रुत्यर्थेत्युक्तम् । श्रौतपदार्थानां बहुत्वेन सव
र्थादिव्याप्तत्वात्किंचिदाधिक्ये ऽपि कालातिक्रमापत्तिस्तन्मध्ये
र्तपदार्थानुष्ठानक्रमबाधापत्तिरित्याशयः । ननु विरोधाविरोध
विचार्यत्वे कार्याकार्यशब्दावनर्थकौ स्यातामित्याशङ्क्य विच
ज्ञनप्रतिपादनार्थत्वेन तयोः साफल्यमाह * तन्निर्णये त्विति *
चमनादीनां निषेधाश्रवणे विरोधोऽनास्ति श्रवणे विरोध इति
ग्रहानुपपत्तिमाशङ्कते * कथं पुनरिति * नात्र निषेधश्रवणाश्रव
सन्देहः किन्तु स्मार्त्तपदार्थानुष्ठाने श्रुत्यर्थवैगुण्यापत्त्यनापा
दादिति परिहरति * श्रुत्यर्थेति * एतदेव विवृणोति * य
प्रकृतिमनुप्रवेश्यमानानि प्रयोगवचनेन निराक्रियन्ते तन्निरा
च सामिधेनीसाप्तदश्यवद्विकृतिमनुप्रवेश्यमानानि प्राकृता
काङ्क्षत्वाच्चोदकेन न परिगृह्यन्तइत्यर्थः । यद्वा नात्र विरोधा
मात्रं विचार्यते किं तु सत्यपि विरोधे किमाचमनादीनां ध
बलीयस्त्वादबाधः प्रमाणदौर्बल्याद् बाध इति विरोधाधिकर
दार्थे विचार्यतइत्यन्यथा सन्देहभाष्यं व्याख्यातुमाह * अन्या
सन्देहः किं कर्त्तव्यान्युताकार्याणीत्येवं रूप इति शेषः । अ
क्ते सिद्धान्तवचनव्यक्तिप्रतिपादकमुताविरुद्धानि कार्याणि
धर्मविरुद्धानि विरुद्धान्यपि वा धर्मितया बलीयस्त्वेनाबाधि
त्कार्याणीति द्विविधसिद्धान्तप्रतिपादकतया व्याख्येयम्
श्रौतैः क्रमकालपरिमाणैर्विरोधे ऽपि तदीयैः पदार्थैराविरुद्धत
र्याणीत्येकरूपसिद्धान्तप्रतिपादकतयेति । यद्यपि शाखान्तरा
णसमाप्तावपि वा क्रमसंयोगाद्विधिपृथक्त्वमेकस्यां व्यवतिष्ठेते
त्रेण क्रमकालपरिमाणविरोधाच्छाखान्तरीयपदार्थानुपसंहा
ङ्क्य विरोधेनार्थसंयोगादैकधर्म्ये तत्संयोगाद्विधीनां सर्वप्रत्य
सूत्रेण पदार्थानां क्रमादिबाधकत्वं वक्ष्यते तथापि स्मार्त्तानां
र्थानां प्रमाणदौर्बल्याद् बाध्यत्वाशङ्का न विरुध्यते तत्रत्यस्यैव
यबलाबलस्य प्रमाणबलाबलबाधायात्रोपन्यासात्तस्यापि नाने
रुक्तं शङ्कनीयम् । यद्यपि च पिकनेमाधिकरणे स्वरूपबला
श्रयबलाबलस्य बाध्यत्वं वक्ष्यते तथाप्यनादित्वेन लब्धात्म
त्समुदायप्रसिद्धेराश्रयदौर्बल्ये ऽपि क्लृप्तत्वेन स्वरूपबलीय
लब्धात्मकावयवप्रसिद्धिबाधकत्वे ऽपि प्रमाणदौर्बल्ये प्रमेय
लाभायोगादलब्धात्मकस्मर्तृप्रमेयबाधकत्वं युक्तमित्याशङ्कात्र
रुद्ध्यते । आश्रयदौर्बल्येन त्वात्मलाभायोगाशङ्का तत्र निरा

ने विवेकः । प्रत्यक्षश्रुतिविरोधे तु स्मृतिमूलश्रुत्यनुमाने
तैपदार्थानामात्मलाभायोगाद्विरोधे ऽपि श्रुत्यनुमानमङ्गीकृत्य
श्रुतमूलानिश्चयात्प्रत्यक्षश्रुत्यनुरोधवृत्तित्वप्रतिपादनपरतया ना-
मेव बाध्यत्वं, न चाप्यत्यन्ततुल्यतेत्यनेन यत्पूर्वाधिकरणस्य
ख्यानं कृतं तदभिप्रायेण पूर्वाधिकरणोक्तस्य श्रुत्यनुरोधवृत्ति-
पवादार्थमेतदधिकरणमिति योजयितुम् * अन्यदर्शनमित्युक्त-
: एतदेव विवृणोति * तथा हीति * कथं धर्मिणां बलवत्ते-
क्षायां द्वादशाधिकरणन्यायमुदाहरति * वक्ष्यति हीति * यथा
ष्ट्या पशुना सोमेन वा यजेत सो ऽमावास्यायां पौर्णमास्यां
दक्षिणीयेष्ट्यादीनामङ्गानां प्रधानस्य च सोमस्य बहुदिनव्यव-
नोभयोः पर्वकालत्वसम्पादनाशक्तेः किं पर्वणि सोमो पर्वणि
विपरीतं वेति सन्दिग्धे प्राथम्यात् दीक्षायाः पर्वकालत्वे प्राप्ते
नसादृगुण्यार्थत्वादङ्गानुष्ठानस्य प्रधानस्यैव पर्वकालतेति वक्ष्यते
पि प्रधानस्याचमनादेर्यथाश्रुतस्यानुष्ठानक्रमादेस्तनुरोधेनान्य-
रणं प्रतीयतइत्यर्थः । सूत्रं च मुख्यं वा पूर्वचोदनाल्लोकवदिति-
धिकरणसूत्रात्प्राथम्यार्थे मुख्यशब्दं प्राधान्यार्थत्वेनानुषज्य वि-
षेद्धधर्मसमवाये भूयसां स्यात् स्वधर्मत्वमिति तत्पूर्वसूत्राद्ध
र्मत्वशब्दं मुख्यशब्दान्वयाय भावप्रत्ययलोपेनानुषज्य प्रधानगु-
ङ्गगुणेन सह विरोधे मुख्यं प्रधानं स्वधर्मकं कार्यं प्रधानार्थ-
ङ्गगुणस्येति योज्यं, नन्वस्तु क्रमपरिमाणयोर्द्धर्मरूपत्वाद्दौर्बल्यं
स्य स्वतन्त्रद्रव्यत्वेन धर्मिरूपत्वात्कथं दौर्बल्यमित्याशङ्क्याह
न चेति * अनुष्ठेयपदार्थावच्छेदकत्वेन कालस्यापि वि-
वात्स्वतन्त्रविधेयत्वस्य धर्मित्वेन विवक्षितस्याभावात्क्रमपरि-
वद्धर्मत्वनिश्चय इत्याशयः । नन्वस्तु प्रमाणाप्रमेयबलाबलयो-
म्वादः कथं त्वाचमनादीनामकर्त्तव्यत्वं कथं वा कार्यतेत्यपेक्षा-
ाह * तत्रेति * सिद्धान्तोपक्रमार्थत्वेन सूत्रं व्याख्यातुमिति
ति भाष्यं व्याचष्टे * किं युक्तमिति * द्वितीयविचारे ऽपि ११०
ान्तद्वैविध्ये क्रमादिविरोधे ऽपि वा पदार्थैः सहाविरोधाद्विरो-
ावाभिधानमविरुद्धम् । नन्वविरोधे ऽपि शीघ्रप्राप्तैः श्रौतैरे-
र्निराकाङ्क्षत्वेन मन्थराणां स्मार्त्तानामङ्गानां क्रत्वपूर्वैरग्रहणा-
ष्ठानं सिद्ध्यतीत्याशङ्क्य क्रत्वपूर्वाणामनिर्ज्ञातोपायपरिमाणतया
ाङ्गमात्रेण नैराकाङ्क्ष्याभावाल्लिङ्गादिगम्याङ्गवत्स्मृत्याचारप्रापि-
ानामपि ग्रहणमित्याह * यथैवेति * भावनाभिर्भाव्यैरपूर्वै-
षिकथम्भावेन प्रार्थिताः सन्तस्ते सर्वे ऽनारभ्यवादाधीतैः सह य-

थेच्छंभावेन गृह्यन्ते तथैव स्मृत्याचारार्पिता अपि गृ
यः । स्मृत्याचारार्पितानामवैदिकत्वेनापूर्वग्राह्यत्वाश
णार्थम् * साधनांशवदित्युक्तम् * यथाष्टकादयः साध
त्याचारार्पिता अप्यपूर्वैर्गृह्यन्ते तथेतिकर्त्तव्यतांशा अपीत
देव विवृणोति * कथम्भावेति * उपसंहरति * तस्मा

न शास्त्रपरिमाणत्वादिति ॥ ६ ॥

पूर्वपक्षसूत्रमवतारणपूर्वकं व्याचष्टे * इतीति *
दिपदार्थः कर्त्तव्यो भवेदिति नञर्थव्याख्या । अभ्यधिक
ति शास्त्रपरिमाणत्वादित्यस्य विरोधोपपादनार्थत्वेन व्या
सत्यपि विरोधे प्रमेयबलाबलानुसारेणाचमनाद्यनुष्ठानं
त्याशङ्क्य प्रमाणाधीनत्वात्प्रमेयसिद्धेः प्रमाणबलाबलस्य त
लीयस्त्वाभिधानार्थं शास्त्रशब्दं व्याचष्टे * शास्त्रितामिति *
प्रकृता परिमाणशब्देनेयत्ताबाधापत्तेरुक्तत्वात् शास्त्रपरिच्छि
त्यादिक्रमकालबाधापत्त्यभिधानभाष्यमयुक्तमित्याशङ्क्य नेय
परिमाणशब्दः किं तु परिच्छेदश्चात्रैतत्क्रमका एवैतत्संख्याक
त्काला एवेति त्रिविधावधारणरूपान्तराचमनाद्यनुष्ठाने बाध
शास्त्रेण हीति आशुनिर्माणशब्देन प्रधानप्रत्यासत्तिः पूर्वा
तिक्रमः प्रयोगशैघ्र्यं चेति त्रिविधा कालावच्छिन्नतोक्ता ।
श्चात्र शास्त्रेण परिमाणं येषां पदार्थानामिति बहुव्रीहिरभिम
शास्त्रेण क्रमेयत्ता कालावगतिः । किं च तेषां बाधकमित्यपेक्षा
* द्वाभ्यामिति * प्रयोगविधिश्रुत्याङ्गप्रधानविशिष्टभावनावि
युगपदनुष्ठानाक्षेपादत्यन्तयौगपद्याशक्तेश्च प्रधानप्रत्यासत्ति
प्रयोगप्राशुभावलक्षणश्च कालो ऽवगम्यते । पूर्वाह्णादिकालः
ह्णादिश्रुत्याङ्गान्तरविनियोजकैः श्रुतिलिङ्गादिभिः प्रचयशिष्ट
ख्यावगम्यते । क्रमनियामकैः श्रुत्यर्थादिभिः क्रमस्तेषां श्रौत
र्थेषु प्रविशन्तः स्मृत्याचारप्राप्ताः पदार्था बाधका इत्यर्थः । प्रयो
चनावगतस्य प्रधानप्रत्यासत्तिलक्षणस्य च शेषरूपप्रत्यासत्ति
णस्य च कालस्य पूर्वाह्णादिविनियोजकश्रुत्यवगतस्य च पूर्वाह्ण
कालस्य स्मृत्याचारप्राप्तपदार्थानुष्ठाने बाधापत्तिं विवृणोति *
हीति * अनेन च भाष्यकारीयस्य दक्षिणाचारप्रधानकालयोर्वि
धोपन्यासस्योपलक्षणार्थत्वं दर्शितम् । प्रयोगवचनावगम्यस्य
त्यासत्तिलक्षणस्य च कालस्योपपाद्यत्वेनाभ्यर्हितत्वात्पूर्वं तदुबा
प्रसङ्गापादकभाष्यव्याख्येति व्युत्क्रमदोषाभावः । क्रमबाधप्रस

ये प्रकृतोदाहरणविषयं श्रुतिग्रहणं क्रमप्रमाणमात्रोपलक्षणार्थं-
मनग्रहणं च प्रयोगमध्यपातियज्ञोपवीतकरणोपलक्षणार्थमिति
चष्टे * क्रमश्चेति * ननु वेदवेद्यन्तरालाचमनविध्यभावात्सर्वा-
च क्रियमाणस्य क्रमविरोधाभावात्कथमन्यथात्वप्रतिपत्तिरित्या-
ग्र *क्षुतादिनिमित्तेत्युक्तम् * ननु क्षुतादिनिमित्ताचमनप्रस- १२
तावदाश्रयः क्रमो भविष्यतीत्याशङ्क्य * विज्ञातेत्युक्तम् * य-
श्रयणां प्रमाणानां च परिमाणमेतावत्त्वं विज्ञातं स तथोक्तः की-
माश्रयपरिमाणमित्यपेक्षिते यावन्तो वैदिकाः पदार्थास्तावन्त एवे-
*वैदिकेत्यनेनोक्तम् * प्रमाणपरिमाणं तु श्रुत्याद्यनुक्रमणेन ज्ञा-
वान्तराले यज्ञोपवीतस्य नैमित्तिकस्याप्यप्राप्तेः कथं क्रमान्यथा-
पादकत्वमित्याशङ्क्या * यासेत्युक्तम् * नन्वन्तराले स्मृत्या-
प्रमाणकपदार्थप्राप्त्यभावे वैदिकमात्राश्रयत्वे ऽपि तत्प्राप्तावधि-
ग्रयत्वं भविष्यतीत्याशङ्क्याह * यो हीति * प्रमाणान्तरं तर्हि
पयिष्यते ऽत आह * उक्तेति * अङ्गपरिमाणप्रमाणस्येति पाठे
चुगतिपूजनयोरिति गत्यर्थादञ्चतेरकर्त्तरि च कारके संज्ञाया-
ते को भवता दायो दत्त इत्यादिषु संज्ञाव्यभिचारित्वाच्च कारक-
संज्ञायामपि कर्मणि घञमुत्पाद्य चजोः कुघिण्यतोरिति कुत्वेन
शब्दार्थे गमिति रूपानुसारेणावगतपरिमाणस्येत्यर्थः । नन्विय-
याः केन चिच्छास्त्रेणाविधानात्तद्बाधे ऽपि न शिष्टकोपापत्ति-
गशङ्क्य तस्या अपी शास्त्रीयतामाह * तथेति * किं कश्चित्पदा-
विस्मृतः कृतं वा सर्वमिति सन्देहस्यानुष्ठेयपदार्थसंख्यासम्प-
र्यालोचनं विना निराकर्त्तुमशक्यत्वात्प्रयोगवचनेनेयत्तावधार-
प्यर्थादाक्षिप्यते । अज्ञातस्य परिमाणस्यानुष्ठानकाले ऽवधारणा-
भवमाशङ्क्य श्रुत्याद्यवगतानां पदार्थानां प्रचयशिष्टमित्युक्तम् ।
विस्मरणे ऽपि सकलवैदिकपदार्थानुष्ठाने कृते सम्पूर्णफलप्राप्ते-
कश्चिद्दोष इत्याशङ्क्याह * ततश्चेति * यतश्च पदार्थपरिमाणम-
ारणीयं ततश्च स्मार्त्तपदार्थानुष्ठानेन न्यूनफललाभप्रसङ्ग इत्यन्व-
। अपूर्वदौर्बल्येनेति न्यूनत्वकरणम् । अपूर्वदौर्बल्ये किं कार-
मेत्यपेक्षायामनिवृत्ते वैगुण्याशङ्क्स्येति हेतुगर्भं विशेषणं किं कृतं
वा नेति कृताकृतनिश्चयो वैगुण्याशङ्काकारणम् । कृताकृतनि-
यकारणं पूर्वावधारणभ्रंशः । कथं तस्यानिश्चयकारणत्वमित्यपे-
ते सम्यक्कृतत्वदार्ढ्यनिमित्तसंस्कारपाटवाभावादित्युक्तम् ।
यग्घ्यैतत्कृतमिति स्मृतिदार्ढ्यस्य यन्निमित्तं संस्कारपाटवं तस्या-

प्रचयशिष्टज्ञातमिति २ पु० पा० ।

भावादित्यर्थः । अनुष्ठानात्पूर्वं ह्येतावन्तो ऽनुष्ठेया इत्यवधारि
धन्तो ऽनुष्ठेयास्तावतामनुष्ठानोत्तरकाले ऽनुष्ठितत्वावधारणात्त
तत्संस्कारपाटवेन सम्यक्कृतत्वस्मृतिदार्ढ्यात्कृताकृतसन्देहो
र्त्तेत नान्यथा । ननु सहेयत्तायाः पूर्वमवधारणात्कथं स्मार्त
र्धानुष्ठाने पूर्वावधारणभ्रंश इत्याशङ्क्य प्रथमेत्युक्तम् । प्रयोगवः
श्रुत्याद्यवगतपदार्थमात्रपर्यवसायित्वेन स्मार्त्तेष्वव्यापारात्प्रथ
योगवचनव्यापारवेलायामियत्ताश्रयत्वेनापरिकल्पितस्य पः
ह्व्यापारपर्यवसानोत्तरकालं स्मृतिवशादागतस्य प्राप्तस्य पदा
नुष्ठानेन पूर्वस्य प्रयोगविधिव्यापारकालीनस्येयत्तावधारणस्य
दित्यर्थः । वैदिकस्य स्रुभेदेन होमादेर्नैमित्तिकस्यापि प्रयोग
व्यापारवेलायामेवानुष्ठेयत्वावधारणान्न तदनुष्ठाने पूर्वावधाः
शापत्तिः वैगुण्याशङ्कायां चापूर्वातिशयहेतुश्रद्धाविरहादपूर्व
लयमात्रं भवति न तु सर्वथानुपपत्तिः । तदुत्पादकसमस्ताङ्ग
नानुष्ठानस्य निष्पन्नत्वाच्छ्रद्धायाश्चापूर्वातिशयहेतुत्वं यदेव वि
करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीत्यतिशयवा
प्रत्ययुक्तया श्रुत्या ।

श्रद्धयेष्टं च पूर्तं च नित्यं कुर्यादतन्द्रितः ।
श्रद्धाकृते ह्यक्षये ते भवतः स्वागतैर्धनैः ॥

इति स्मृत्या चाक्षयहेतुत्वं श्रद्धाया वदन्त्यार्थान्तरभावे ।
त्वप्रतिपादनादवसीयते । ननु किं चित्फललाभे ऽपि विधेरर्थव
शिष्टकोपापत्तिरित्याशङ्क्याह * तच्चेति * विधिसिद्धप्रवर्त्तना
यार्थेनार्थवादेन प्रवर्त्तनातिशयावसेयफलातिशयवसायात्तत्फ
वं समग्रमतिशयवच्चार्थवादसहिताद्विधेरवगतमिति कृत्वा
त्वासहिष्णुतया फलातिशयहेतुश्रद्धाविरहवैगुण्याशङ्कापादव
र्थान्तरविधायकत्वेन विरुद्धामाचमनादिस्मृतिं बाधतइत्यर्थः
स्ताविरोधएव सूत्रं योजयति * परिमितेति * अङ्गशास्त्राण
त्परिमाणं तदेवाङ्गजानामित्यर्थः । क्रमकालेयत्तासाधारणापू
त्यानापेक्षो वा शब्दः प्रयोगविधिप्रमितप्रधानप्रत्यासत्त्याक्षिप्तप्र
शैघ्र्यविरोधं प्रधानप्रत्यासत्तिविरोधाभिधानेनार्थादुक्तमपीदानं
योगविधिना साक्षादपि प्रयोगशैघ्र्यावगमात्पदार्थान्तरानुष्ठा
विरोध इति प्रकारान्तरेणाह *संहेति* उपसंहरति *तस्मा

अपि वा कारणाग्रहे प्रयुक्तानि प्रतीयेरन्निति ।

सूत्रमवधिद्वयेन पूर्वपक्षनिराकरणार्थतयावतारयति *

तइति* पूर्वपक्षोक्तविरोधाङ्गीकरणेन प्रमाणबलाबलात् प्रमेयब-
लबलीयस्त्वमात्रेण सिद्धान्ते पूर्वो ऽवधिः पूर्वा समाप्तिः विरो-
भावसिद्धान्ते द्वितीयेति व्यवस्थार्थो वाशब्दः। ननु भाष्यकृता-
त्तरसूत्रावयवत्वेन पठितत्वात्कथमेतत्सूत्रशेषत्वमित्याशङ्क्याह
अनन्तरेति * विप्रतिपत्तिशब्दोपात्तस्य विरोधस्यैतदवगताया १२
ावोक्तेर्विरुद्धत्वेनानन्तरसूत्रे ऽनुपयुज्यमानत्वाद्विरोधाभावसि-
न्तपक्षे चेह सूत्रे पूर्वपक्षसूत्रोक्तविरोधाभावस्यावश्यवचनीयत्वा-
यर्थः। ननूत्तरसूत्रे ऽपि यवादिशब्दानां साधारणत्वे प्रियङ्ग्वादि-
प्रकार्ये विकृतावनूहितयवादिशब्दप्रयोगाविरोधप्रतिपादनार्थत्वे-
ायोगो भविष्यतीत्याशङ्क्याह * उपयोगेति * सकृत्पठितस्यापि
ख्यानवेलायामुच्चारणानुकृतिरनुषङ्गः। सकृदुच्चरितस्यैवोभयशे-
या व्याख्याने तन्त्रत्वम्। आद्यावधिना विरोधे ऽपि प्रमेयबला-
बलीयस्त्वेन सिद्धान्तप्रतिपादनार्थमपि चेत्यादिभाष्यं व्याचष्टे
अपि चेति * प्रयुक्तानि प्रतीयेरन्निति सूत्रावयवस्य शिष्टैरनुष्ठि-
ाचमनादीनाद्रियेरन्नित्येवं व्याख्यानार्थं प्रमाणपदमुत्तरार्द्धेन
ख्यातम्। विरुद्धताशब्देन बाध्यतोक्ता। श्लोकं व्याचष्टे * वि-
ति * प्रमाणबलाबलबलीयस्त्वाभिप्रायं नन्वित्यादिशङ्काभाष्यं
चष्टे * इयत्तेति * प्रमेयबलाबलबलीयस्त्वाभिप्रायं नैष दोष
। सिद्धान्तभाष्यं व्याचष्टे * पदार्थेति * पूर्वपक्षाभिप्रायं विवृ-
ते * उच्यतइति * श्लोकं व्याचष्टे * प्रमेयेति * नन्वापाततः
ीयमानमपि प्रमेयबलाबलं प्रमाणाधीनत्वात्प्रमेयसिद्धेः पश्चादा-
च्यमानेन प्रमाणबलाबलेन बाधिष्यतइत्याशङ्क्याह * येषामिति* १२
श्रुतिविरोधिन्याः स्मृतेर्भ्रान्त्यादिमूलत्वेनाप्रामाण्यादाचमनादे-
प्रमेयत्वानुपपत्तेः कथं बलीयस्त्वमित्याशङ्क्याह * नित्यमेवे-
* विरोधे ऽपि श्रुत्यनुमानप्रतिबन्धाभावेन भ्रान्त्यादिमूलत्वायो-
द् बलवद्विरोधापेक्षमुपक्रमविरुद्धोपसंहारवत्तदनुरोधवृत्तित्वेना-
ाश्रुतत्वमात्रं स्मृतेरप्रामाण्यं, न चाचमनादिस्मृतेर्बलवद्विरोधो
त बलवत्प्रमेयावष्टम्भेन स्मृतेर्दौर्बल्याभावादित्याशयः। इममेवा-
प्रायं विवृणोति *न चेति* हिशब्दार्थे चशब्दः। ननु श्रुतिप्रमेय-
ादिबाधे श्रुतिबाधापत्तेः तस्याश्चाप्रमादपाठत्वेन बाधायोगादग-
स्मृतिरेव बाधनीया स्यादित्याशङ्क्याह *न चेति * अबाधे का-
माह * तावतेति * न हि प्रमेयबलीयस्त्वमात्रेण स्मृतिः।
तं बाधितुं शक्नोति श्रुतिकल्पनव्याक्षेपेण गततेजस्त्वादित्यर्थः।
ेयबलीयस्त्वस्य तर्हि क उपयोग इत्यपेक्षायामाह * एतदेवेति *

प्रमेयबलीयस्त्वेन स्मृतेरबाध्यत्वमात्रं भवति न तु श्रुतिबा
मित्यर्थः । द्वितीयावधिना विरोधाभावसिद्धान्तप्रतिपादना
चेत्यादिभाष्यं तात्पर्यतस्तावद्व्याचष्टे * युगपदिति * नन्व
त्प्राप्तानामपि श्रुतिलिङ्गादिविनियोज्यानां पदार्थानां विरोध
नाम्न युगपत्प्राप्तिरेव विरोधे हेतुरित्याशङ्क्य तुल्यकार्ययोरित्यु
इह तु करणोपकारसाधनपदार्थप्रयोगावच्छेदकत्वेन क्रमादी
दार्थगुणत्वाभिधानेनैव तुल्यकार्यत्वं निरस्तं, युगपत्प्राप्तिरप्यत्र
न सम्भवतीति द्वयमपि *नास्तीत्युक्तम्* ननु वैदिकपदार्थप्रा
रकालीनानामपि क्रमादीनामाचमनादिभिः स्मार्तैः पदार्थैः
यौगपद्याद्विरोधो भविष्यतीत्याशङ्क्याह * कालेति * प्रयोगा
यां क्रमाद्यपेक्षा स च सकलपदार्थप्राप्त्युत्तरकालभावीत्याश
इदानीमवयवशो भाष्यं व्याचिख्यासुः क्रमविरोधनिरासभाष
वद्व्याचष्टे * प्राप्तेषु हीति * इयत्तावधारणस्याविहितत्वेनो
न्तरेणाविस्मरणसिद्धावनादरणीयत्वात्तद्बाधे वेदविरोधशङ्का
त्वाद्भाष्यकृतोपेक्षितेति स्वयंशब्देन सूचयन्नयमियत्ताविरो
रिहरति * परिमाणमिति * इयत्तायाः क्रमवत्पदार्थाश्रितत्व
नार्थस्तदनन्तरं विरोधपरिहारः । कालस्य तु स्वतन्त्रत्वात्पदा
गावच्छेदकत्वमात्रेण पदार्थधर्मत्वाभिधानं श्लोकं व्याचष्टे
केन चिदिति * यदिशब्देन ध्यानाद्युपायान्तरसम्भवः स
१२३।४ तथेति कालविरोधपरिहारभाष्यं व्याचष्टे * कालो ऽपि चे
ननु यद्यपि प्रधानसाहित्यं शैघ्र्यं च स्मार्तैः सह यादृशं सम
तादृशाङ्गीकरणादविरोधस्तथापि पूर्वाह्णादिकालातिक्रमो भूयि
नुष्ठाने दुर्वार एवेत्याशङ्क्याह * कालो हीति * प्रधानस्यैव
द्विहितः कालः स च प्रयोगाङ्गत्वात्प्रयोगस्य च साङ्गप्रधाना
त्वात् प्रधानद्वाराङ्गेषु प्राप्नोतीति प्रधानस्य स्वकालसम्पा
न्याङ्गेषु यथासम्भवं सम्पाद्यमानो न विरुद्ध्यतइत्याशयः । स
सम्पत्तिं विवृणोति * अङ्गैरिति * आशुत्वमपि सर्वाङ्गस
स्यैवेति तुल्यन्यायत्वादुक्तं भवति । उपसंहरति * तस्मादि
विरोधनिरासे तेष्विति सूत्रावयवं द्वेधा योजयति * इतीति
मादीनामाचमनाद्यनपेक्षत्वे ऽप्याचमनादेः स्वतन्त्रपदार्थत्व
नाद्यवधायकत्वात्तद्विरोधाभावप्रतिपादनार्थमपि चेति भाष्य
चष्टे * अपि चेति * आचान्तेन कर्त्तव्यमित्यादिकर्त्तव्यमात्रं
विधानात्सर्वस्याचमनादेरङ्गप्रधानार्थतेत्याशयः । न चाङ्गस्य
धायकत्वमस्त्यतुल्यकक्षत्वादित्याह * अतदङ्गेन हीति * इ

ानमेव दर्शयति * वेदमिति * कृत्वेत्यनेन।

क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने।
कर्मस्थ एषु नाचामेद्दक्षिणं श्रवणं स्पृशेत्॥

इति स्मृतिपर्यालोचनया पदार्थमध्येऽनाचमनं सूचितं कथ-
चमने कृते वेदिः कृता भवतीत्याशङ्क्याह * वेदिरेवेति * नन्व-
प्रधानार्थस्याप्याचमनस्य हस्तावनेजनादिवत्सर्वार्थे सकृत्कृतस्य
र्थोपकारकत्वात्कथमन्तरानाचमने वैगुण्यमित्याशङ्कानिरासार्थं-
न भाष्यगतं शौचशब्दं व्याख्यातुं शुद्ध्येत्युक्तं शुचिना कर्त्तव्यमि-
शुद्धेरपि कर्म्माङ्गत्वेन विधानात् क्षुताद्यापादिताशुद्ध्यनिवृत्तौ
ुण्यं स्यादिति भावः। नन्वल्पकालत्वेनाप्यव्यवधायकत्वोपपत्तेः
ानार्थत्वमात्रेण निराकाङ्क्षस्याङ्गार्थतापि किमित्यङ्गीकृतेत्याशङ्क्य
ल्पकालत्वमात्रेणाव्यवधायकत्वं भवतीत्यभिप्रायेण परिहरति
इममेवेति * तस्मादित्युपसंहारभाष्यमविरोधसिद्धान्ताभिप्रा-
ा व्याचष्टे * तस्मादिति * एवं यथाभाष्यमधिकरणं व्याख्या-
दाहरणानि प्रत्यक्षश्रुतिदर्शनेन दूषयति * नन्विहेति * आदि-
ेा दर्शपूर्णमासविकृतिष्वस्य विधेरतिदेशतः प्राप्त्यर्थः। नन्वस्या-
ीयवासोविन्यासविशेषविधानार्थत्वात् त्रिसूत्रनवतन्तुकत्रिवृद्ब्र-
यज्ञोपवीतविधायकत्वं नास्तीत्याशङ्क्य वाक्यान्तरं दर्शयति
तथेति * सर्वकर्मार्थत्वायानारभ्यविधिरवोपन्यासः। आचम- १२१
ाधिं दर्शयति * तथेति * नन्वस्य ब्रह्मयज्ञप्रकरणपाठाद्दर्शपू-
ासादिष्वाचमनविधायकत्वं न सम्भवतीत्याशङ्क्याह * यद्य-
ते * ब्रह्मयज्ञे पूर्वगृहीतस्वाध्यायाध्ययनस्य कल्पसूत्राधिकरणे
ाभ्यासानुसन्धानं विध्यर्थश्चानुगम्यतइत्यत्र प्रयोगप्राशुभावोपयो-
र्मानुसन्धानप्रयोजनकत्वस्य वक्ष्यमाणत्वेन तदनुसन्धानस्य च
ावगतशक्त्यनुसारेणाध्ययनसंस्कृतैरक्षरैः क्रियमाणस्यादृष्टार्था-
नाद्यनपेक्षत्वादाचमनस्य नापूर्वलक्षणार्थं प्रकरणापेक्षास्तीति प्र-
णानादरेण वाक्यात्स्वाध्यायाध्ययनमात्राङ्गत्वप्रतीतेः। सर्वयज्ञेषु
मन्त्ररूपस्वाध्यायाध्ययनसद्भावात्तद्द्वारेणाचमनस्य सर्वयज्ञाङ्ग-
वसीयते अध्ययनस्य त्वदृष्टार्थत्वेऽपि तत्संस्कार्याणामक्षराणां
पेक्षितनियमाद् दृष्टोपयोगिवेदत्वसम्पत्त्यर्थक्रमस्वरादिविशेषवदा-
नाद्यपेक्षा न विरुध्यते यथैव प्रत्यक्षस्यापि यूपादेरदृष्टोपयोगिरूपं
णान्तरागोचरत्वात्तदर्थविहिततक्षणादिसकलसंस्कारसमुदाय-
त्वेनावसीयमानमेकसंस्कारवैकल्येऽपि नोत्पद्यते तथा वेदस्या-
ृष्टोपयोगिरूपम्।

तपोविशेषैर्विविधैर्व्रतैश्च श्रुतिचोदितैः ।

वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥

इत्यादिवाक्यपर्यालोचनया तदर्थविहितसकलधर्म्मसम्पा
मवसीयते ऽतो ऽलौकिकरूपानभ्युपगमे च वेदवाक्यानामपि लौ
कत्वानपायाल्लौकिकवैदिकव्यपदेशभेदो निरालम्बनः स्यात् तस्म
दाचमनस्य वेदत्वसम्पादनार्थत्वाद्वाक्येन प्रकरणं बाधित्वा सर्वस्मि
न्वेदकार्ये प्राप्तिरिति श्रौतत्वान्न स्मार्तोदाहरणत्वमिति भावः । त
वत्कलेन च दर्शपूर्णमासप्रकरणे पठितः स वै व्रतमुपैष्यन्नन्तरा
वनीयं च गार्हपत्यं चोपविश्याप आचामतीत्याचमनविधिः क्रत
ङ्गाचमनविधानार्थः सूचितः । नन्वस्तु नामेदं सर्वयज्ञाङ्गमाद्यम
चमनं प्रयोगान्तःपाति तु नैमित्तिकमिह क्रमविरोधित्वेनोदाहर्त्त
तच्च प्रत्यक्षश्रुतिविहितं नास्तीत्याशङ्क्य प्रयोगान्तः पातिनैमित्ति
काचमनप्रापकं लिङ्गं दर्शयति * तथा चेति * दक्षिणाचारत्वप्र
पकस्यापि वैदिकस्य लिङ्गस्य दर्शनात्तदपि नेहोदाहर्त्तव्यमित्य
* दक्षिणेति * साक्षाद्विधिना यत्र विषये सव्यस्याञ्जलेर्वा चोद
तस्मादेव विषयाद्दक्षिणाचारत्वं निवर्त्तेत अन्यत्र तु विषये तद्दक्षि
णाचारत्वस्य निवर्त्तनं नाशङ्क्यते ऽपीत्यर्थः किमिति नाशङ्क्यते इत
पेक्षिते मनसि कृतं लिङ्गमुद्भावयति * यथा वा इति * प्रागुदक्
वणं देवयजनं प्रत्यक् दक्षिणाप्रवणं स्मशानकरणं यथा वै दक्षिण
पाणिरेव देवयजनं यथा वै सव्यस्तथा स्मशानकरणमिति देवयज
स्य यज्ञभूमेः प्रागुदक्प्रवणत्वं विहितमौचित्येन स्तोतुं दक्षिणः पाणि
रुपमानं कृतं तदेव यजनवद्दक्षिणस्य पाणेर्यज्ञाङ्गत्वे सत्यवकल्प
नान्यथेत्यर्थः । नन्वनारभ्य विहितस्यापि यज्ञोपवीतस्यायज्ञरूपे
दर्विहोमादिषु प्राप्तेस्तेष्वपि वा कथं चिद्यज्ञत्वेन मन्त्रोच्चारणवत्त्वे
वा प्राप्तिसम्भवे ऽप्यानुषङ्गिकप्रयोगप्राग्भावोपयोगिकर्मानुसन्धान
प्रयोजनत्वे ऽपि ब्रह्मयज्ञस्याहरहःस्वाध्यायमधीयीतेति नित्यत्वश्रुते
रकरणे च प्रायश्चित्तस्मरणाददृष्टार्थत्वावधारणेनादृष्टार्थोपायापे
क्षित्वात्तत्प्रकरणपठितस्याचमनस्यान्यत्राप्राप्ते वाक्येन कथं चित्प्रा
प्तावपि प्रयोगारम्भे कृतस्य तत्प्रयोगान्तवर्त्तिसमस्तमन्त्रोच्चारणोप
कारकत्वेन प्रतिमन्त्रमनावृत्तेरन्तराले प्राप्त्यभावेन क्रमादिविरोधि
त्वान्न सोमनोच्छिष्टा भवन्तीत्यस्य च स्मृतिप्राप्ताचमनप्रतिषेधार्थ
त्वेनाप्युपपत्तेर्यथा वै दक्षिणः पाणिरित्यस्य च यज्ञाङ्गभूतदक्षिणह
स्तविध्याक्षेपकत्वे यथा सव्यस्तथाश्मशानकरणमित्यस्यापि प्रेतकर्मा
ङ्गभूतसव्यहस्तविध्याक्षेपकत्वापत्तेराचारविरोधप्रसङ्गात्स्मृत्याचार

ादक्षिणहस्तोपमार्थत्वोपपत्तेर्विध्याक्षेपकत्वाभावात् क्रमादिवि-
। प्रत्यक्षाचमनादिविध्यभावान्नोदाहरणदूषणं युक्तमित्याशङ्क्याह
तेनेति * क्रमादेः प्रयोगाङ्गत्वात्प्रयोगस्य चाचारपर्यन्तप्रमाणप्रा-
ापदार्थविषयत्वात्सकलपदार्थप्राप्त्युत्तरकालभावित्वेन विरोध-
पक्षायोगात्स्मृतेश्च यथाश्रुतमूलानिश्चये प्रामाण्याभावेनाचमना-
त्प्रमेयत्वायोगान्निश्चये वा प्रमाणदौर्बल्यानुपपत्तेः प्रमेयबलाब-
प्रमाणबलाबलबाधसिद्धान्तायोगादनुदाहरणतेत्याशयः। नन्वे-
ाह्यग्रवन्ति प्रागग्राण्युदगग्राणि वापवर्गवन्ति प्रागपवर्गाण्युदग-
र्गाणि वेत्याद्युदाहरणं भविष्यतीत्याशङ्क्य तत्राप्युक्तदोषसाम्यादू
ग्रेधस्यापि विचारस्यानुपपत्तेरधिकरणान्तरमेवेदं न भवतीत्याह
ास्मादिति * का तर्हि सूत्राणां गतिरित्यपेक्षायामाह * सूत्राणि
ति * बाह्यस्मृतिविषयस्य विरोधाधिकरणस्याक्षेपपरिहारार्थं सू-
यं तृतीयं तु स्मृत्यधिकरणोक्ताचारप्रामाण्याक्षेपपरिहारार्थमि-
विवेकः। आद्यं सूत्रं विरोधाधिकरणाक्षेपे योजयति यत्तर्ही-
द्वितीयं परिहारे पठित्वा योजयति * परिमितान्येव हीति * १२

पुराणन्यायमीमांसाधर्म्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्म्मस्य च चतुर्दश॥

इति स्मृत्यैव चतुर्द्दशानां धर्म्मप्रमाणत्वमुपपादितं च स्मृ-
प्रकरणे अथ।

आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थं च विद्याह्यष्टादशैव तु॥

इति स्मृत्या पूर्वैः सह संख्यानेनायुर्वेदादीनामपि क्रत्वर्था-
ग्रेक्षणादिसिद्ध्यर्थचिकित्सादिग्विजयार्थं शास्त्रविद्यागानौपयिक-
ादिद्रव्यार्जनोपयोगिनीति द्वारेण धर्म्मप्रमाणत्वं तथापि बौ-
द्ग्रन्थानां तन्मध्यपाताभावान्न धर्म्मप्रामाण्यमित्यर्थः। आयुर्वे-
र्वेदगन्धर्ववेदास्त्रय उपवेदाः मीमांसान्यायविस्तरौ द्वे तूपाङ्गे
ारणीविशेषविषया च द्विविधा शिक्षा तत्र साधारण्याद्वेदाङ्ग-
धर्म्मप्रामाण्ये ऽपि कात्यायनादिप्रणीताया विशेषविषयायाः प्र-
ाक्यं प्रतिपदं चोच्चारणं नियच्छन्त्या धर्मप्रमाणत्वाभावशङ्का-
ाकरणार्थं पृथगुपादाने ऽपि शिक्षात्वेनैक्यान्नातिरेकापत्तिः।
ीतिरर्थशास्त्रम्। ननु परिमिते विद्यास्थानबाह्यत्वे ऽपि तत्सं-
नां बौद्धादिग्रन्थानां कस्मान्न धर्म्मप्रामाण्यमित्याशङ्क्याध्ययन-
ेवशाद्वेदादेवावगम्यानुष्ठितं कर्म्म श्रेयः साधयतीति नियमप्रती-
द्धादिग्रन्थादवगम्यानुष्ठितस्यापि वेदार्थस्य श्रेयःसाधनत्वाभा-

च्छेदादिपूर्वशास्त्रार्थस्य गोचरस्य बुद्धादिकृतस्य वाक्यस्य
प्रामाण्यं नास्तीत्याह * प्रतीति * एतदेव व्यवहारेण द्रढय
तथा चेति * नन्वेवं सति मन्वादिग्रन्थानामप्यप्रामाण्यं स्या
शङ्क्याह * वेदेनैवेति * मन्वादीनां धर्मप्रवक्तृत्वस्य वेदानुज्ञ
यति * तथा चेति * नन्वनादेर्वेदस्यादिमन्मन्वादिपुरुषविशे
धायित्वायोगाच्छ्रुतिसामान्यमात्रेण मन्यते ज्ञायते तेनेति व्यु
मनुशब्देन वेदाभिधानान्नानेन वाक्यशेषेण मनोः प्रवक्तृता
यतइत्याशङ्क्याह * न चैतदिति * ननु मनोः प्रवाहनित्यत्वे
तत्स्मृतेरनित्यत्वान्न वेदेन प्रामाण्यानुज्ञानं सम्भवतीत्याशङ्क्य
प्रतीति * ननु कल्पान्तरे मनूनामभावात्तद्वाक्यप्रामाण्यपरत्वे
दस्यानित्यत्वं स्यादित्याशङ्क्याह * स्थिताश्चेति * दृष्टान्तं वि
ति * प्रतियज्ञमिति * मन्वादेः प्रवाहनित्यता कथमवगम्यतइ
१६।२ क्षिते मनुवचनमुदाहरति * उक्तं चेति * दृष्टान्तान्तरमाह *
हासेति * उपसंहरति * तेनेति * कथं पुनर्वेदातिरिक्ताना
तन्मूलानां ग्रन्थानां धर्मप्रमाङ्गत्वमतन्मूलानां च तत्संवादिनाम
नङ्गत्वमित्यवगम्यतइत्यपेक्षायामुभयद्योतकं लिङ्गं दर्शयति *
चेति * वेदमूलानां धर्मप्रमाङ्गत्वद्योतकत्वमस्योपपादयति * अ
था हीति * बाह्यानां धर्मप्रमानङ्गत्वद्योतकमुपपादयति *
चेति * वेदमूलग्रन्थनिबन्धनानां धर्मप्रामाण्यं न बाह्याना
यदि नाश्रीयते तथा सति बाह्यानां विज्ञातप्रत्यक्षातिमूलत्वान्नैवा
ज्ञातमूलं किंचिदित्यर्थः । अतः साक्षात्परम्परया वा वेदाद
स्यानुष्ठितो ऽर्थः श्रेयःसाधनमिति शास्त्रार्थावधारणाद्वेदार्थस्य
बाह्यस्मृत्यवगतस्य श्रेयःसाधनत्वं नास्तीत्यप्रामाण्याभिधानाभि
प्रकटयति * तस्मादिति * एतदेव दृष्टान्तद्वारेण विवृणोति
यथैवेति* अतिक्रान्तं वेदोक्तं यथा मर्यादया तया व्यवहारिणामि
विग्रहः धर्मविप्लावकत्वाच्च शाक्यादीनामश्रद्धेयवचनत्वमित्य
१७।२ * स्मर्यते चेति * ननु विसंवादिशाक्यादिवाक्यानामग्राह्यत्वे
संवादिनामहिंसादिवाक्यानां ग्राह्यत्वं भविष्यतीत्याशङ्क्याह * य
ति * परपीडात्मकात्कर्मणस्तदनुरूपमात्मनः पीडात्मकं फलम्भ
तीति कर्मानुरूप्योपमानं वैदिक्यपि हिंसा लौकिकीवदधर्म इ
सामान्यतो दृष्टदुःखोपभोगस्य पापफलत्वान्नतादुःखोपभोगात
पक्षयो भवतीत्यर्थापत्तिः तद्बलाच्छाक्याद्यभिप्रायकल्पितानां
र्माभासानां मध्ये पतितमित्यर्थः । संवादोत्तरकाले तर्हि ग्रहीष्यतइत्य
शङ्क्याह * यदेति * सिद्धान्तमुपसंहरति *तस्मादिति * तृती

सूत्रं स्मृत्यधिकरणोक्ताचारप्रामाण्याक्षेपपरिहारे योजयितुमुपक्रमते * यत्त्वेतदिति * धर्मजिज्ञासाधिकारे ऽप्यर्थकामाचाराणामपि दृष्टप्रमाणमूलत्वेन प्रसङ्गात्प्रामाण्यसिद्धिमभिप्रेत्य त्रिवर्गग्रहणं स्मृतिन्यायसिद्धस्याचारप्रामाण्यस्याक्षेपानुपपत्तिमाशङ्क्य तत्समर्थनार्थं सन्देहहेतुप्रदर्शनपूर्वकं पूर्वपक्षमाह * तद्विपरीतेति * त्रिवर्गविपरीतैरधर्मानर्थदुःखसाधनैरात्महननादिभिराचारैः सङ्कीर्णो व्यवहारो येषामिति विग्रहः वैद्यश्चासावातुरश्चेति कर्मधारयं कृत्वा पूर्वपदेन कर्मधारयः कार्यः अत्यन्तविलक्षणानन्ताचारमूलभूतैकश्रुत्ययोगात्प्रत्याचारं च मूलकल्पने ऽनन्तश्रुतिकल्पनापत्तेर्नाचारमूलश्रुतिकल्पनं सम्भवतीति वक्ष्यमाणप्रकारेणाचाराणां श्रुतिकल्पकत्वासम्भवमभिप्रेत्याशब्दत्वोक्तिः विरोधं दर्शयति * सदाचारेषु हीति * लोभाद्यभिभवात्सन्निहितानर्थादर्शनेनाधर्माचरणं धर्मव्यतिक्रमः । दृष्टस्याप्यनर्थस्य बलदर्पेणानादरादधर्माचरणं साहसं वहता व्यतिक्रमं साहसं च यथासम्भवं दर्शयति * प्रजापतेस्तावदिति * इन्द्रस्यापि गौतमभार्यागमनेनागम्यागमनरूपादधर्माचरणाद्धर्मव्यतिक्रम इत्यनुषङ्गेण योज्यम् । इन्द्रे ब्रह्महत्याभयादपक्रान्ते नहुषः स्ववीर्येणेन्द्रपदमाधिष्ठाय तद्भार्यां शचीमभिगन्तुं यत्नं चकार वसिष्ठपुत्रे शक्तौ राक्षसैर्भक्षिते तच्छोकान्मर्त्तुकामो जलं प्रवेष्टुमारेभे विश्वामित्रः क्षत्रियमपि त्रिशङ्कुं ब्राह्मणकन्याहरणकुपितस्य पितुः शापाच्चाण्डालत्वमापन्नं याजयामास । उर्वशीवियोगशोकात्पुरुरवा मर्त्तुमियेष विचित्रवीर्ये ऽनपत्यएव मृते तद्भार्यायामम्बिकायां धृतराष्ट्रमम्बालिकायां पाण्डुमम्बिकाप्रेषितायां दास्यां विदुरं कृष्णद्वैपायनो जनयामास विधवानियोगो ऽपि ब्रह्मचारिणो ऽनुचित इति गृहीतेत्यनेन सूचितं, नियोगविधेरप्येकापत्यविषयत्वादनेकोत्पादनानौचित्यं प्रसङ्गशब्देन सूचितम् । भीष्मस्यानाश्रमित्वमपत्नीकस्य च स एष भीष्मः कुरुवंशकेतुर्येनाहुतास्त्रिशतो वाजिमेधाः क्रतुप्रयोग इति धर्मव्यतिक्रमद्वयम्, रामवदित्यनेन तस्यापि पत्नीत्यागेनैकाकिनः क्रतुप्रयोगाद्धर्मव्यतिक्रमः सूचितः धृतराष्ट्रस्यान्धत्वेनानधिकृतस्य यागकरणाद्धर्मव्यतिक्रमः । अन्धस्य निरंशत्वेन धनाभावाद्यागासम्भवमाशङ्क्य ।

तस्य वीरस्य विक्रान्तैः सहस्रशतदक्षिणैः ।
अश्वमेधशतैरीजे धृतराष्ट्रो महामखैः ॥

इति दर्शनात्पाण्डवर्जितैर्धनैरित्युक्तम् । सुहृदश्चापि धर्मात्मा धनेन समतर्पयदिति च पाण्डुना धृतराष्ट्रादिभ्यः स्वार्जितधन

[illegible]व्यवहारः शङ्कनीयः । पाण्डववर्जितधनोपजीवनं
[illegible]मनुचितमिति व्यतिक्रमान्तरं चानेनोक्तम् ।

[illegible] धनुः कृत्वा सज्जेनानेन सायकैः ।
[illegible] लक्ष्यं यो वेद्धा स लभेत सुतामिमाम् ॥

[illegible] द्रुपदेनोद्घोषिते तथाकृतवते ऽर्ज्जुनाय द्रौपदी
[illegible] य विद्ध्येत य इमं लक्ष्यं तं वृणीष्व वरानने इति
[illegible]र्थस्यानन्तरमेवार्ज्जुनो वृत इत्यपरिणयने ऽपि व
[illegible]मादन्यस्य विशेषतो भ्रातुःकनीयसश्च जायायाः प
[illegible] युधिष्ठिरस्य धर्मव्यतिक्रमः तथा द्रोणो ब्राह्मणो युधि
[illegible] धनुर्वेदाचार्यो त्यक्तशस्त्रो न हन्तुं शक्यो ऽश्वत्थामन्
[illegible] त्यक्ष्यतीति मत्वा वध्यत्वाय शस्त्रं त्याजयितुमश्व
[illegible] युधिष्ठिरेणोक्तमित्यपरः वासुदेवेन मातुलदुहि
[illegible]भिन्या ऽर्ज्जुनेन सुभद्रेत्येकस्तयोर्द्धर्मव्यतिक्रमः
[illegible] हर्षात् केशवार्ज्जुनाविति च सुरापानादपरः
[illegible]क्रमं दर्शयति * अद्यत्वे ऽपीति * अश्वादय
[illegible] ददाति निषेधविषयत्वार्थं केसरित्वाविशेष
[illegible]नीति निषेधविषयत्वायोभयदन्तं विक्रयस्तु
[illegible] नचैकन्नडुहश्चैक इत्यश्वस्य गौतमेन निषिद्धः ।
[illegible] दृष्टेन व्यवहार इति सर्वेषां न केवलं श्रुति
[illegible] आनीयकालामाचाराणामनपेक्षणीयत्वं किं तु प
[illegible]विरोधाद्धेतुदर्शनाच्चेत्याह * सर्वत्रेति * इत
[illegible] नाचाराणां धर्मप्रामाण्यमित्याह * किं चेति *
[illegible]श्रुतिप्रामाण्यस्य साधितत्वाच्चैश्च वेदो ऽखिलो *
[illegible] च तद्विदामाचारश्चैव साधूनामिति श्रुतिस्मृतिव
[illegible]प्यपि स्मृतत्वात्तन्निराकरणमयुक्तमित्याशङ्कते *
[illegible]प्रसङ्गादनेनैतद् दूषयति * आत्मतुष्टिरिति
[illegible] प्रमाणमित्याशङ्क्याह * धर्म इति * यद्यस्
[illegible]: स्यात्ततो भवेत्प्रमाणं नन्वेतदस्तीत्याशयः ।
[illegible]यति * यथाऽभ्यासं हीति * वैचित्र्यं प्रप
[illegible] * अत्यन्तकारुणयाच्छाक्यानां पशुहिंसादर्शं
[illegible] आत्मतुष्टेः प्रामाण्यस्मरणाच्छाक्यादीनां च
[illegible]नुष्टचन्यथात्वेन किं चिद् दुष्यतीत्याशङ्क्य
[illegible] वेदबाह्यानामथात्मतुष्टेर्वैचित्र्यमाह * तथेति
[illegible]स्यापि तन्मातुलसुताप्रापणं न कुर्वत इत्यपिशब्दाद

ा व्याख्येयम् । का तर्ह्युभयप्रामाण्यस्मृतेर्गतिरित्याशङ्क्याह *स-
श्चेति * श्रुतिस्मृतिसम्बाधाचारात्मतुष्टिविषया स्मृतिरित्याशयः ।
न चाचारमूलभूता श्रुतिर्मन्वादिभिर्दृष्टा न वा तत्र तैरदर्शनैवारचो-
नां दर्शनस्यासम्भवनीयत्वान्निर्मूलत्वापत्तेराचारप्रमाणस्मृतेर-
प्रपरतैवाङ्गीकार्येत्याह * स्वयमिति * श्रुत्यभावे च स्मृतिपार-
म्पर्याच्छिष्टानां तदाचारप्रामाण्याभिधानं स्मृतिकाराणां न शोभ-
इत्याह * स्मृतीति * आचारमूलश्रुतिदर्शनं तु मन्वादेर्न कल्प-
येतुं शक्यं तदर्थानिबन्धनादित्याह * न चेति * यदि ह्याचारमू-
भूता श्रुतिर्मन्वादिभिर्दृष्टा स्यात्ततः परोक्षापि स्वरूपेणासमर्पिता-
युपनयनादिश्रुतिवदर्थद्वारेण समर्थेत तदर्थो निनिबध्येतेत्यर्थः । पू-
पक्षमुपसंहरति * तस्मादिति * सिद्धान्ते सूत्रं पठित्वा योज-
ति * इति प्राप्तइति * दृष्टं फलमनुष्ठानकारणत्वेनाचारेषूपि-
श्रितं येषु कर्मसु तानि दृष्टकारणहीनानि धर्मबुद्ध्या यानि क्रियन्ते
त्यर्थः विशेषणस्य व्यावर्त्यमाह * शरीरेति * अस्मिन्सूत्रे हेत्व- १
भिधानात्स्मृत्यधिकरणसिद्धान्तसूत्रोक्तं हेतुं योजयितुमाह * ध-
त्वेनेति * तान्युदाहरति * प्रदानानीति * शक्रध्वजमहः श-
ध्वजोत्सवः महेति पाठे शक्रध्वजे महायात्रेति सप्तमीसमासः दे-
तायतनेष्वित्यत्र महायात्रेत्यनुषङ्गः । सर्ववर्णसाधारण्यार्थे *स-
र्वेषामित्युक्तम् * उदाहरणान्तराण्यपि दर्शयत्कारणाग्रह-
मुपपादयति * प्रदीपेति * प्रदीपानां कार्त्तिकशुक्ल-
प्रतिपदि दानं मोदकादिश्चतुर्भिर्द्रव्यैः तत्साध्यानि दानभक्षणादी-
ने लक्ष्यन्ते । माघसप्तमीपौर्णमासीभ्यां तत्कालानुष्ठेयं कर्म लक्ष्य-
ते । फाल्गुनीपौर्णमास्यनन्तरायां प्रतिपदि वसन्तनिमित्त उत्सवः ।
स्मृतितो ऽपि सदाचारप्रामाण्यमवसीयतइत्यतिप्रसङ्गदोषाभावं व-
क्ष्यमाणमभिप्रेत्याह * स्मृतिकाराश्चेति * सर्वाचारसाधारण्यप्रद-
र्शनार्थः सामान्यशब्दः उत्सवात्मकस्याचारस्य चोक्तं स्मृत्यन्तर-
मुदाहरति * तथेति * वैदिकमप्युत्सवलिङ्गमुदाहरति * वेदे ऽपि
चेति * सिद्धान्तमुपपाद्य धर्मस्य शब्दमूलत्वादिति पूर्वपक्षहेतुं सा-
भिप्रायविवरणमनुभाष्य निराकरोति * यच्चेति * इहाचारेष्वन-
न्तेषु परिमितशास्त्रमूलत्वासम्भवादशब्दत्वेनानपेक्षत्वं यदुक्तं तदु ।

भ्रान्तेरनुभवाच्चापि पुंवाक्याद्विप्रलम्भनात् ।
दृष्टानुगुण्यसाध्यत्वाच्चोदनैव लघीयसी ॥

इति पूर्वोक्तेन प्रकारेण वेदमूलत्वानुमानात्प्रत्याख्येयमि-
त्यर्थः । आचारप्रामाण्यप्रतिपादिकायाश्च स्मृतेर्निर्मूलत्वयोगा-

दाचारमूलश्रुतिकल्पनमवश्यं भावीत्याह * न चे
चारमूलभूतानां श्रुतीनामानन्त्यात्पठितुमशक्तेरप
चारयोगाद्विर्मूलत्वमपरिहार्यमित्याशङ्क्याह * विस
नानां संक्षेपवचनमूलत्वमित्याशङ्क्याह * शङ्कां
नुरूपाश्रुतिः कल्प्या कल्प्यमाना साध्वाचर
र्थत्वप्रतिपादिका कल्प्येत तत्र शास्त्रव्यापार
शास्त्रानर्थक्यमसिद्धौ वा शास्त्रादाचरणं तदुपल
प्रवृत्तिरितीतरेतराश्रयं स्यादित्याशङ्क्याह * तथ
१।३।१ विवृणोति * न हीति * ननु व्यापाररूपत्वात्प्रद
तत् स्वरूपेणापि शास्त्रगम्येन भवितव्यमित्याश
व्यपि चेति * पूर्वसिद्धत्वादेव च नेतरेतराश्र
इति * ननु यदि शास्त्रप्रवृत्तिमनुपलभ्यैव शिष्टप्रवृ
नानुष्ठितप्रदानादेर्भोजनादिवत्फलसाधनत्वसिद्धेः
परिहृतं स्यादित्याशङ्कानिराकरणार्थम् * क्वाचि
शिष्टप्रवृत्त्युत्तरकालं तर्हि शास्त्रस्य प्रवृत्तेरादिमत्
* सर्वकालं त्वित्युक्तम् * ननु शिष्टाचारस्यापि
शादिषु विगानदर्शनात्कथमुपलक्षणत्वमित्याशङ्क्या

यस्मिन्देशे य आचारः पारम्पर्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते

इति मनुना सदाचारशब्दार्थस्य निर्णीतत्वाद्वि
सन्ताच्च श्रुतिरपि विशिष्टविषयैव कल्प्येत्याह *
सरस्वत्या विनशनं तिरोभावः । सारस्वतसत्रारम्
नस्या एव प्लक्षात्प्रस्रवणं सारस्वतसत्रोत्थानदेश
चारस्वरूपावधारणे यत्पूर्वमितरेतराश्रयत्वमुक्तं त
न्यस्योपलक्षणत्वे योजयन्परिहारायानुभाषते * नि
इति * श्लोकं विवृणोति * प्रत्यक्षेति * ननु साक्षा
निबन्धनस्यापि शिष्टत्वस्य वेदाधीनत्वाद्वैदिके विधौ
रोपलक्षणत्वं सम्भवतीत्याशङ्क्य वैदिकत्वाभेदो ऽपि
सदाचारमाश्रयापत्तिरिति दृष्टान्तेनोपपादयति * त
ध्ययनविध्याक्षिप्तत्वाद्वेदाङ्गमीमांसाव्याकरणादि
नयोरध्यापनविधिविहितत्वाच्चाध्यापनस्य शुश्रुवा
वैदिकी वेदविहितश्रवणज्ञानप्रवचननिमित्तत्वाद्वेदा
एवं विद्वान्स्वाध्यायमधीयीत तत्र यो वै गतश्रियः
मणी राजन्य इति गतश्रियं लक्षयित्वा गतश्रीरज

त्कामं यो ऽनूचानः श्रोत्रियः स्यात्तस्य प्रवृञ्ज्यादिति वेदविहितेष्व-
ध्ययनादिषु तेनैव तल्लक्षितस्तेन शुश्रुवत्त्वादिना कृत्वा लक्षित
इति तथापि शब्दार्थे पुनः शब्दमङ्गीकृत्य व्याख्येयम् । नन्वेवमपि
वेदप्रवृत्तौ सत्यां साक्षाद्विहितकारित्वलक्षणं शिष्टत्वं तस्मिंश्च सति
शिष्टप्रयोज्यत्वोपलक्षिताचारप्रामाण्यप्रतिपादकवेदप्रवृत्तिरितीतरे-
तराश्रयं स्यादित्याशङ्क्याह * तेनेति * यत्तु स्वयमज्ञातमूलाश्चेत्या-
दिना मन्वादिभिराचारमूलश्रुत्यदर्शने ऽन्येषां दर्शनस्य दूरोत्सारित-
त्वादभाव एव प्रसज्येत दर्शने चोपनयनादिश्रुत्यर्थवदाचारमूलश्रु-
त्यर्थो ऽपि निबन्धनीयः स्यादित्युक्तं तन्मन्वादीनामपि सर्वशाखा-
ध्यायित्वनियमाभावात्तददर्शनमात्रेणाभावकल्पनानुपपत्तेर्दर्शनेऽपि-
च सदाचारः प्रमाणमिति सामान्याभ्यनुज्ञानमात्रेण सिद्धेर्ग्रन्थगौर-
वभयाद्विशेषरूपेणानिबन्धनोपपत्तेर्भविष्योत्तरादौ च होलाकाद्या-
चाराणां निबद्धत्वात्परिहृतमित्याह * स्मृतिरपीति * वेदविहित-
कारिणां धर्मबुद्ध्याचरणस्य वेदमूलत्वं विनानुपपत्तेराचाराद्वेद-
मनुमायापि स्मर्तृप्रणयनमुपपन्नमित्यभिप्रेत्या * चारमित्युक्तम् *
ननु विस्तरवचनानामपीत्यनेन प्रत्येकमाचारामूलश्रुतिकल्पनमुक्तं
कैमुत संक्षेपवचनस्येत्यनेन स्मृत्यनुरूपसामान्यश्रुतिकल्पनं तत्को
ऽनयोः पक्षयोः सम्मत इत्यपेक्षायामुभयथापि दोषाभावप्रतिपाद-
नार्थं पक्षद्वयोपन्यासः । परमार्थतस्त्वश्लीरातनूर्भवति रुशती
पापयामुया पतिर्यद्वध्वो वाससा स्वमङ्गमभिधित्सतइत्याद्यानां
श्रीवासोपरिधानाद्याचारमूलभूतानां बह्वीनां श्रुतीनां दर्शनात्प्र-
त्येकश्रुतिकल्पनपक्ष एव ज्यायानिति सूचयितुमाह * इत्यदोष
इति * हेतुदर्शनमनुभाष्य परिहरति * यत्त्विति * एतदेव विवृणो-
ति * वेदे ऽपि हीति * ननु दृष्टार्थत्वसम्भवे ऽपि वेदमूलत्वक- १
ल्पने धर्माचारस्यार्थकामाचाराभ्यां विवेको न स्यादित्याशङ्क्याह
* यानि त्विति * ननु म्लेच्छादिसाधारण्यात्कृष्यादेर्धर्मत्वानभ्यु-
पगमे देवपूजादेरपि धर्मत्वाभावापत्तेर्दानन्दयादमः क्षान्तिः सर्वेषां
धर्मलक्षणमित्यादिस्मृतिविरोधः स्यादित्याशङ्क्याह * किं त्विति *
ननु सर्वसाधारणस्य कथमसाधारण्येन शिष्टाचारगतत्वमुच्यते इ-
त्याशङ्क्य शूद्रादिभिरपि शिष्टत्वायैव धर्मबुद्ध्याचरणादसाधारण्य-
सिद्धिरिति परिहरति * लोके हीति * अतो ऽस्ति विवेक इत्युप-
संहरति * तत्रेति * यत्त्वात्मतुष्टेरपि प्रामाण्यापत्तेर्न स्मृतेराचा-
रप्रामाण्यप्रतिपादनपरतेत्युक्तं तदात्मतुष्टेरपि प्रामाण्योपपादनेन दू-
षयति * एतेनेति * वेदविहितकार्याचारस्य वेदमूलत्वं विनानु-

षपत्तेर्वेदमूलतयाचारप्रामाण्यप्रतिपादनेन वेद
स्कृतान्तःकरणानामात्मतुष्टेरपि वेदमूलत्वं सि
धर्माधर्मनिर्णयार्थत्वेन प्रामाण्यं वेदएव प्रसिद्धमि
निर्णयो ऽभिहितः । श्लोकं विवृणोति * तथैव
नस्याव्यवस्थितत्वनिराकरणार्थं तथैवेत्युक्तम् ।
भिल्याभिल्योच्यतइति वेदवाक्यगतार्षशब्दस्य ।
सम्भवतीत्युक्तम् । एतदेव दृष्टान्तेनोपपादयति *
न्दिग्धार्थनिर्णायकत्वमात्मतुष्टेर्द्रढयितुमभियुक्त
चेति * प्रसिद्ध्युपपादनायविद्वद्ध * चनादि
दर्शयितुं कालिदासवाक्यमुदाहरति * सतां
शकुन्तलेयं मम परिणेतुमुचिता न वेति सन्दि
हक्षमा यदार्यमस्यामभिलाषि मे मन इत्यात्मतु
कथमात्मतुष्टिमात्रेण निश्चय इत्याशङ्क्य सतां हि
वाक्यस्याभिप्रायमाह * बहुदिनेति *एवं तावच्छि
मार्गानुसारित्वात्स्मृत्याचारवद्धर्मप्रतिज्ञापकहेतुः
त्मतुष्ट्या स्वविषयस्य कस्य चिच्छ्रुत्याद्यविरुद्ध
साधनशक्तिरूपं धर्मत्वमुत्पाद्यत इति कारकहेतुत्व
वचनाद्वेत्यात्मनस्तुष्टिरेवेत्यत्रानुषज्यमानस्य धर्मो
त्पादकत्ववाचित्वमभिप्रेत्योक्तम् * धर्मेति * आ
चारात्मतुष्ट्यादिधर्ममिति तस्मै हितमित्युपकारार्थे
द्धर्मोपकारिता धर्महेतुतेत्यर्थः । स्वभावभिन्नाना
देकशक्त्याविर्भावः सम्भवतीति दृष्टान्तेनोपपादितं ।
देवदत्तादीनामेकपुण्यक्रियायोगाद्ध्यायमानानां श्रे
था भिन्नानामपि कर्मणामेकशिष्टात्मतुष्टियोगात्
त्यर्थः । तस्माच्छब्देन पुण्यकृद्ध्यानस्याश्रयः साधन
ध्यात्वा पुण्यकृतो ऽध्यापयेति वचनं परामृष्टम् । आ
हारमतिदिशति * आचारेष्वपीति * आचारश्चैव व
पि श्रुतिस्मृत्यविरुद्धं यत् किं चिच्छिष्टैः क्रियते त
नमित्युच्यतइत्यर्थः । अत्रैव दृष्टान्तान्तरमप्याह *
भिन्नानामपि मन्त्राणामुच्चारयितृयोगादोषधीनां
द्रुवां पुण्यकृद्योगाद्येकशक्त्याविर्भावो यथेत्यर्थः
योजयन्नुपसंहरति * तथेति * धर्मव्यतिक्रममनुभा
यस्त्विति * प्रजापतौ तावच्छ्रुतिसामान्यं विवृणोति

१ तदिति २ पु० ना०

ावदिति * इन्द्रे विवृणोति * एवमिति * नहुषे श्रुतिसा- १
ान्यमात्रान्नेति वाशब्दसूचितं सदाचारत्वाभावं विवृणोति * न-
ाण पुनरिति * सदाचारस्य प्रमाणत्वेनाभ्युपगतस्य व्यभिचा-
परिहर्त्तव्यः नहुषाचारस्य त्वनन्तरमेवाजगरत्वप्राप्त्या सदाचा-
ाभावनिश्चयाद्व्यतिक्रमे ऽपि धर्मबुद्ध्या क्रियमाणस्याचारस्य
ातिक्रमाभावान्न दोष इत्याशयः । परदाराभियोगोक्त्याभियुज्यमा-
यां शच्यामपि शङ्कितं व्यतिक्रमं निराकर्त्तुमाह * शच्याश्चेति *
शिष्टाचारस्यापि पुत्रशोकजनितव्यामोहनिमित्तत्वाख्यानाद्धर्मबु-
द्ध्या क्रियमाणत्वाभावात्सदाचारत्वाभावनिश्चय इत्याह * व-
ष्ठस्यापीति * श्लोकं व्याचष्टे * यो हीति * विश्वामित्रे
जोबलवशेनेति परिहारं विवृणोति * तेनेति * स हि व्यामो-
भावे ऽप्यापदि मत्कुटुम्बं भृतवतस्त्रिशङ्कोः प्रत्युपकर्त्तव्यं मयेति
ुपकर्त्तव्यं मयेति प्रत्युपकारेच्छया चण्डालमपि वा सशरीरं
ार्गं नयामीति स्वप्रभावख्यापनेच्छया त्रिशङ्कद्वेष्टरि वशिष्ठे द्वे-
ाच्च तपोबलेन पापं नाशयामीत्यध्यवसाय चण्डालं याजयामा-
। येन कारणेन कामादिहेतुकस्याचारस्य धर्मादर्शनं नास्ति तेन
ारणेन विश्वामित्रचरितमपि न धर्मादर्शत्वं प्रतिपद्यतइत्येवं तेन
ब्दो योज्यः सर्वं बलवतः पथ्यमित्येतमेव न्यायं प्रकृते योजयितु
ाह * महान्ति चेति*द्वैपायने गर्हानिरासार्थं यथा वा न विरुद्धत्व-
ाति परिहारमुपक्रम्यापरितोषात्तेजोबलवशेन चेत्येतमेव परिहारं
ायति * द्वैपायनस्यापीति * कथं पराशरपुत्रस्य द्वैपायनस्य शन्त-
पुत्रो विचित्रवीर्यो भ्रातेत्याशङ्क्य मातृसम्बन्धवचनम् । सत्यव-
ामनूढायां पराशराद् द्वैपायनो जातः शन्तनुना पश्चादूढायां वि-
ात्रवीर्यः । एवमपि ।

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥

इति नियोगस्य वाग्दत्ताविषयत्वादम्बिकाम्बालिकयोश्च वि-
ात्रवीर्येण परिणीतत्वाद्दास्याश्च भ्रातृजायात्वाभावाद् ब्रह्मचारिणा-
ा मैथुनस्य निषिद्धत्वादपरितोषेण प्राक्कृतेत्युक्तम् । रामभीष्म-
ार्यथा वा न विरुद्धत्वमिति परिहारं विवृणोति * रामेति * र-
ापुत्रार्थत्वनिरासाय मातृशब्दः * नन्वेवं सति *

ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ।
तस्या रजसि तं मासं पितरस्तस्य शेरते ॥

इति विहितातिक्रमात्प्रत्यवायः स्यादित्याशङ्क्य स्नेहपितृ

* [illegible]वशादित्युक्तम् * रामेण सीतास्नेहा[illegible]
[illegible]भीष्मेण च शन्तनवे सत्यवतीं तत्पितरं [illegible]
[illegible] राज्याभिलाषुके तिष्ठत्येतस्याः पुत्राणां राज्[illegible]
[illegible] तत्पित्रा प्रत्याख्यातेन राज्यं नाहं करिष्या[illegible]
[illegible]ष्यपि त्वत्सन्ततिभयान्नैतस्याः सन्तती
[illegible] तत्पित्रा पुनः प्रत्याख्यातेन ।

अपत्यहेतोरपि च करोम्येतद्विनिश्चयम् ।
अद्य प्रभृति मे दाश ब्रह्मचर्यं भविष्यति ॥

इति पितृभक्त्या ब्रह्मचर्यव्रतग्रहणान्नैमि[illegible]
[illegible]कालगमनस्य बाधाद्धर्ममात्रार्थमहं
[illegible] परिभाष्य परिणीतायामगमने
[illegible] । एवमप्यनपत्यत्वेन पितॄणाम
[illegible]त्याशङ्क्य * साक्षादित्युक्तम् * साक्षाद[illegible]
[illegible]ऽनृण्यो रामः व्यवहितैर्विचित्रवी[illegible]
[illegible] कृतपित्रानृण्यो भीष्मः । ननु रामस्य धर्म[illegible]
[illegible] प्रकुर्वन् सीतां पत्नीं हिरण्मयीमिति [illegible]
[illegible] स्यादित्याशङ्क्याह * हिरण्मयीति *
[illegible] सीता तद्गतं तद्विषयं यदानृशंस्यमनैष्ठुर्यं
[illegible]मित्यर्थः । रावणापहारदूषितां सीतां रामो
[illegible]त्रेणासौ त्यक्ता न सीताया दुष्टत्वात्
[illegible]दिति द्योतयितुं लोकापवादभीतिं प्र
[illegible]दर्शनाय त्यक्तशब्दस्य सीताशब्देन सह
[illegible] । कथं व्यवहितापत्यकृतपित्रानृण्यता भी[illegible]
[illegible] भीष्मश्चेति * ननु तयोर्द्धर्ममात्रार्थदारसद्भाव
[illegible]रनुक्तः केवलप्रमाणेनावगम्येतेत्या
[illegible] * अपिशब्देनापत्यहेतोरद्य प्रभृतीति च विशे
[illegible] इति सूचितं, ननु मोहादप्यनुष्ठानोपप
[illegible]वतीत्याशङ्क्य ।

[illegible]काले मम पितुर्मया पिण्डः समुद्यतः
[illegible] पिता मम हस्तेन भित्त्वा भूमिमयाचत ॥
[illegible] कल्पविधिर्दृष्ट इति निश्चित्य चाप्यहम्
कुशेष्वेव तदा पिण्डं दत्तवानविचारयन् ॥

इति भीष्मस्यात्यन्तनैपुण्यान्मोहासम्भवं द[illegible]
[illegible]राष्ट्रे ऽप्येतमेव परिहारं दर्शयति * धृतराष्ट्रे

पुत्रेषु शोकार्तेन धृतराष्ट्रेण सकृत्पुत्रदर्शनं प्रार्थितं व्यासेन योगबलात्सम्पादितमित्याश्चर्यपर्वणि कथापरिहारवैभवाय प्रकारान्तरेणाविरोधमाह * यद्वेति * नन्वेवं सत्यश्वमेधशतैरीजे धृतराष्ट्रो महामखैरित्यश्वमेधशब्दानुपपत्तिमाशङ्क्यौपचारिकत्वेनोपपादयति *क्रतुफलेति * युधिष्ठिरग्रहणेन पञ्चानामप्येकपत्नीत्वलक्षणस्य धर्मव्यतिक्रमस्य सूचितत्वात्तत्र मनुष्यप्रतिषेधाद्वेति परिहारं दर्शयितुमाह * या चेति * प्रतिकूलतयापादितागमिता निराकृतेत्यर्थः । द्वैपायनीयमुपपादनप्रकारमाह * यौवनेति *

कुमारी चैव तन्वङ्गी वेदिमध्यात्समुत्थिता ।
श्यामा पद्मपलाशाक्षी पीनोन्नतपयोधरा ॥ १ ॥
द्रौपद्येषा हि सा जज्ञे सुता ते देवरूपिणी ।
पञ्चानां विहिता पत्नी कृष्णा पार्वत्यनिन्दिता ॥ २ ॥
स्वर्गस्त्रीपाण्डवार्थाय समुत्पन्ना महामखे

इत्यादिबहुप्रकारममनुष्यत्वोपपादनादविरोध इत्याशयः।नन्वमनुष्यत्वात्तस्या निषेधाभावे ऽपि पाण्डवानां मनुष्यकुन्तीमाद्रीयोनिजत्वेन मनुष्यत्वान्निषेधो भविष्यतीत्याशङ्क्याह * सा चेति * लक्ष्मीश्चैषा पूर्वमेवोपदिष्टा भार्या चैषां द्रौपदी दिव्यरूपा कथं हि स्त्री कर्मणो ऽन्ते महीतलात्समुत्तिष्ठेदन्यथा दैवयोगादिति द्वैपायनेनैव तस्याः स्त्रीत्वव्युत्पादनाच्छ्रिया सर्वसेव्यत्वादनिषेध इत्यर्थः । द्वैपायनीयस्य वेदिमध्योद्भवत्वाद्यभिधानस्यानिषिद्धत्वायामनुष्यत्वोपपादनार्थतामभियुक्तवचनेन द्रढयितुमाह * अत एव चेति *

यदि मे पतयः पञ्च वरमिच्छामि याचितुम् ।
कौमारमेव तत्सर्वं सङ्गमे सङ्गमे भवेत् ॥

इति पूर्वजन्मनि तया च पञ्चकृत्वः पतिं मे देहीति याचितेनेश्वरेण पञ्च ते पतयो भविष्यन्तीत्युक्ते पुरुषसंयोगजयोनिक्षताभावरूपं कौमारं प्रार्थितमित्यभिधानात्प्रत्यहमक्षतयोनित्वरूपं कन्यात्वं तस्याः सूचितमिति मत्वा जगाद विप्रर्षिः कृष्णद्वैपायन इत्युक्तम् । कृष्णेनापि कर्णं भेदयितुं पाण्डवास्त्वामेव मातृसम्बन्धाज्ज्येष्ठं भ्रातरं मत्वा राज्ये ऽभिषेक्ष्यन्तीत्यादिप्रलोभयित्वा षष्ठे च त्वामहनि द्रौपद्यागमिष्यतीत्यभिधानादमनुष्यत्वेनानिषिद्धत्वं तस्याः सूचितमित्याह * अत एव चेति * यस्त्वश्रद्दधानतयेममागमिकमपि परिहारं नानुमन्यते तं प्रत्येकपत्नीत्वमेव पञ्चानामसिद्धमिति दर्शयन्नन्यथा परिहारद्वयमाह * अथ वेति * निश्छद्रत्वायापारमार्थिको ऽपि साधारण्यव्यवहारः पाण्डवानां नीतिशा-

न्नानुसारात्सम्भवन्तीति दृष्टान्तेनोपपादयन्नाह * यथेति *
स्त्राया: स्वयं सभागमनस्यात्यन्तमसम्भवाद् दुःशासनस्य च
न्धाकूतराष्ट्र एव मामानयतीति ख्यापयितुं रजस्वलावेषं कृ
त्यर्थ: । आनायनख्यापनप्रयोजनं सपुत्रकस्येत्युक्तं दुःशासन
नुस्नख्यापनेनायशो ऽतिशयोत्पादनं चशब्देन सूचितम् ।
न्यमानमिति पाठे दुःशासनो मां प्रत्यन्याय्यं करोतीत्यि
ऽन्याय्यप्रातिपदिकात्तत्करोति तदाचष्टइति णिचमुत्पाद्यात
त्यकारलोपे कृते कर्मणि लडादेशे शानचि परे सार्वधातुके
यकि कृते णेरनिटीति णिलोपाद्रूपसिद्धिः स्वापमानख्यापनप्र
स्य पाण्डवानां कोपातिशयोत्पादनं भीत्वदर्शनप्रयोजनं श्री
रायणस्यवांशा वयमिति शत्रून्प्रति ख्यापनं परिहारवैभवमात्र
परिहारद्वयस्य सूचयितुमादिशब्देनानवक्लृप्त्यभिधानं दुराच
भ्युपगमेन धर्मबुद्ध्यानाचरणादसङ्कर इति परिहारवैभवार्थमे
गेति परिहारान्तरं दत्तम् । युधिष्ठिरस्याचार्यब्राह्मणवधार्थान
वचे रागादिकृतत्वमेव परिहार इति प्रायश्चित्तकरणेन द
* तथा चेति * ननु कामतो ब्राह्मणवधे निष्कृतिर्न विधीय
स्मृतेः कामकृते प्रायश्चित्तं नास्तीत्याशङ्क्य कामकृते ऽप्येत
स्मृतिरुदाहृता । अन्ते ऽपीत्यपिशब्देनास्य दुराचारत्वेनापि यु
प्रायश्चित्तकरणान्नातिगर्हणीयो युधिष्ठिर इत्युक्तम् । कृष्णार
मद्यपानमातुलदुहितृपरिणयने यथा वा न विरुद्धत्वमित्येतं
त्नाह * यत्त्विति * ननु सर्वा न पेया ब्रह्मवादिभिरिति
त्ययनयोर्गात्रैवर्णिकमात्रस्य त्रिविधसुरानिषेधावधारणेन ब्राह्
जन्यो वैश्यश्च न सुरां पिबेदिति सामान्यशब्दस्यापि त्रि
र्णविषयत्वनिश्चयान्न सुरा वै मलमन्नानामिति वाक्यशेषान्
पैष्टीमात्रविषयत्वं युक्तमित्याशङ्क्याह * मधुसीध्वोस्त्विति *
गुर्णौडी । त्रिविधसुराव्यतिरिक्ततालादिप्रभवमद्यमात्रनिषेधं
नीय यथा केवलब्राह्मणविषय: तथा मानवीयो ऽपि त्रिविध
निषेधो ब्रह्मवादिशब्दस्य ब्राह्मणमात्रविषयत्वात्केवलब्राह्मण
इत्यर्थ: । को ऽसौ मानवीयो निषेध: केवलब्राह्मणविषय इत्यपे
माह * यदपीति * एतदपि मनुवचनं गौतमवचनवत्केवल
णविषयमिति विपरिणमतानुषक्तेन पूर्वेण समापनीयं कथम
३७१ वलब्राह्मणविषयत्वेत्यपेक्षायामाह * ब्रह्मेति * ननु ब्रह्मवचन
न्यादेरपि त्रिष्वपि वर्णेषूपपत्तेस्तन्निमित्तत्वे ऽपि कथं ब्राह्मणम
षयतेत्याशङ्क्याह * प्रवचनेति * वदतेरुच्चारणमात्रार्थत्वे

ामपि तच्छीलत्वादिसम्भवात्ताच्छील्यादिवचनस्य णिनेरविशेषकत्वेनानर्थक्यापत्तेः। शूद्रानिवृत्तेश्च कर्तृमात्रवचनतृजादिप्रत्ययप्रयोगमात्रेण सिद्धेः प्रवचनार्थे वदत्याश्रयणेन यस्यैव प्रवचनमध्यापनमस्ति स एवाध्यापनरूपब्रह्मवदनप्रवृत्तिस्वभावत्वात् ब्रह्मवदनशीलस्तस्यैवाध्यापनं स्वधर्म इति ब्रह्मवदनधर्मा स एवाऽभ्यासवशेनास्खलिताध्यापनशक्तत्वाद् ब्रह्मवदनसाधुकारी वा ब्रह्मवादिशब्देन विवक्षितो भवतीत्यर्थः। कथं वदतेः प्रवचनार्थतेत्याशङ्क्य ब्रूञ्वदत्योरे * कार्थत्वादित्युक्तम् * प्रवचनमपि वर्णत्रयसाधारणं कस्मान्न भवतीत्याशङ्क्य प्रब्रूयाद् ब्राह्मणस्तेषां नेतराविति निश्चय इति स्मृतिरुपन्यस्ता उपसंहरति * तस्मादिति * केवलब्राह्मणविषयत्वमेवास्य वचनान्तरे ब्राह्मणग्रहणेन द्रढयति * तथा चेति * न तु पैष्टीनिषेधस्य वर्णत्रयविषयत्वाऽभ्युपगमाद्यथैवैका तथा सर्वेति सुरामात्रनिषेधस्य वर्णत्रयविषयत्वप्रतीतेर्न केवलब्राह्मणविषयत्वं युक्तमित्याशङ्क्यैतद्वचनं ब्राह्मणविषयत्वे योजयति * तस्मादिति * ननु मद्यान्तरनिषेधवत्सुरान्तरनिषेधस्यापि ब्राह्मणमात्रविषयत्वशङ्कानिवृत्त्यर्थं पदद्वयमप्यर्थवद्भविष्यतीत्याशङ्क्य पूर्वोदाहृतेन मानवीयेनैव श्लोकेनैतच्छङ्कानिवृत्तेरानर्थक्यं समर्थयते * श्लोकान्तरेति * नन्वेवमपि कृष्णार्जुनयोः क्षत्रियत्वात्पैष्टीपानं विरुद्धमेवेत्याशङ्क्य तयोर्माध्वीपानस्मरणान्न पैष्टीपानशङ्कास्तीति परिहरति * तेनेति * केशवार्जुनयोर्मध्वासवपानस्याविरुद्धत्वमेव द्रढयितुं वेदवाक्यमुपन्यस्यति * तथा चेति * क्षत्रियस्य मधुसीधुनिषेधाभावेनाऽप्यनुज्ञानर्थक्यादन्यार्थदर्शनमेवेदम् अथापि केन चित्सामान्यवचनेन क्षत्रियेऽपि निषेधः प्रसज्येत तथाप्यनेनानुज्ञातत्वाददोष इति वाशब्देन सूचितम्। सत्यपि तु निषेधे प्रतिषिद्धाऽप्यनुज्ञायाः विकल्पापादकत्वेन दुष्टत्वान्नायं पक्षविकल्पार्थो वाशब्दः। ननु नैव सुरा पीता हिनस्तीति सामान्याभिधानात्पैष्टीपानमपि क्षत्रियस्याविरुद्धं स्यादित्याशङ्क्याह * मध्विति * सुरा वै मलमन्नानामिति मनुना पैष्ट्या वर्णत्रये निषेधादस्याश्च श्रुतेरन्यार्थदर्शनमात्रत्वादित्याशयः। मातुलदुहितृपरिणयने विरोधाभावमनुभाषणपूर्वकं दर्शयति * यत्त्विति। अयमाशयः * नार्जुनमातुलस्य वसुदेवस्यात्मजा सुभद्रेति कचिदाख्यायते किं त्वनुजा वासुदेवस्य सुभद्रा वरवर्णिनीत्यादिव्यवहारदर्शनात्कल्प्यं स त्वन्यथाप्युपपत्तेर्नैकान्ततः सुभद्राया वसुदेवात्मजात्वं कल्पयितुं शक्नोतीति। एतदेव विवृणोति * यद्यपीति * ननु बलदेवस्य रोहिणीसुतत्वाद्वासुदेवस्य च देव

कीसुतत्वादेकानंशायाश्च यशोदाकन्यात्वात्त्रयाणामपि ि
स्तीत्याशङ्क्योत्पत्तावित्युक्तम् ।

सप्तमो देवकीगर्भो यो ऽशः सो ऽन्यो ममाग्रजः ।
स संक्रामयितव्यस्ते प्रथमे मासि रोहिणीम् ॥

इति देवकीगर्भसम्भूतस्यैव बलदेवस्य रोहिणी
णे निद्राया विष्णुना प्रेरितत्वात्तया च तथाकृतत्वादेकान

अष्टमे मयि गर्भस्थे कंसो यत्नं करिष्यति ।
या तु सा नन्दगोपस्य दयिता कंसगोपतेः ॥
यशोदा नाम भद्रं ते भार्या गोपकुलोद्वहा ।
तस्यास्त्वं नवमो ऽस्माकं कुले गर्भो भविष्यसि ॥

इति यशोदागर्भसम्भूताया अप्येकानंशाख्याया नि
संख्यापूरणेन विष्णुनैव निजत्वान्वाख्यानाद्देवक्या ऽपि द
जातेति कंसं प्रोवाच देवकीति स्वगर्भसम्भूतत्वान्वाख्या
मित्याशयः । सुभद्रा तु यद्यपि रोहिणीदुहितृत्वेनान्वाख्
पि वसुदेवात्मजातत्वे तद्भागिनेयस्यार्ज्जुनस्य परिणयन
सुदेवस्य सापत्नमातू रोहिण्याः स्वसुः सुभद्रा दुहिता रे
वा पितृष्वस्रीयाया लाटादिषु भगिनीशब्दाभिलप्यत्वे
या दुहिता तत्सपत्नीसुतस्य वासुदेवस्य भगिनीति व्यप
यथासम्भवं व्यवधानं कल्पनीयमित्यर्थः । न त्वर्ज्जुनम
वसुदेवभगिन्याः पित्रा शूरेण कुन्ति भोजाय दुहितृत्वे
त्पिण्डगोत्रे जनयितुर्न भजेद्द्वित्रिमः क्वचिदितिवचन
निवृत्तेर्वसुदेवाङ्गजाताया अपि सुभद्रायाः पृथात्मजस्या
रिणयनविरोधपरिहारसम्भवाद्व्यवधानकल्पनमनर्थकमि
ह * वसुदेवेति * कुन्तिभोजदुहितृत्वनिमित्तः पृथायां
देशः यद्यप्यर्जुनः कुन्तीभोजदत्तायाः पुत्रस्तथापि ऊर्ध्
तृबन्धुभ्यो बीजिनश्चेति निषेधाद्वसुदेवाङ्गजातस्यापरिणे
ननु विरुद्धो ऽप्ययमाचारो वासुदेवेनार्ज्जुनप्रीत्या प्रव
परिहारोपपत्तेरनुक्तव्यवधानकल्पना न युक्तेत्याशङ्क्य
१३८।१ हीति * एतमेव विरोधपरिहारन्यायं रुक्मिणीपरिणयने
शति * एतेनेति * अद्यतनाचाराणामपि श्रुतिस्मृति
धाभ्यां प्रामाण्याप्रामाण्यव्यवस्थासिद्धेरसङ्कर इति प
मनुभाषणं तावत्करोति * यत्त्विति * परमतेन परिहार
स्य दूषयितुमाह * तत्रेति * विरुद्धानामप्याचाराणां
या प्रामाण्यमिति परिहारान्तरमुपन्यस्यति * अन्ये

पस्तम्बवचनं प्रपञ्चयति * येषामिति * (एतदेव परिहारं मनुव-
ान द्रढयन्नाह *तथेति*[1]) एतमपि परिहारं देशाचारकुलधर्माश्चा-
ायैरविरुद्धाः प्रमाणमिति गौतमवचनबलेन निराकरोति * ननु
ते * एतत् परिहारवादी स्वाभिप्रायमाशङ्कते * आहेति *
ाकरोति * न त्विति * प्रयोगं दर्शयति * स्मार्त्तेति * एतदेव १३
ाचष्टे * ग्रन्थेति * मन्वादयो ये ग्रन्थकारास्तद्गतायाः स्मृतेर्मूला-
मन्वादिकृतो ग्रन्थ आम्नायशब्दवाच्यः स स्मृतिग्रन्थाध्यायिनां
या एव मन्वादिगताया एव स्मृतेर्ग्रन्थमूलत्वेनानुमेयाया धारणा-
त्वेनोक्त इत्यर्थः । अनेन च य आम्नायः स स्मृतिधारक इति
ङ्कलिखितवाक्यस्य वचनव्यक्तिर्दर्शिता ततश्चार्थाद्यः स्मृतिधारको
न्थः स आम्नाय इत्युक्तं भवति। यद्वा यः स्मृतिधारकः स आम्ना
इति वचनव्यक्त्या स्मृतिधारणार्थत्वेन य आम्नायः स किं गता-
ाः स्मृतेः किं रूपः केषां चेत्यपेक्षिते * ग्रन्थकारेत्याद्युक्तम् * अ-
ाभक्तिकाम्नायशब्दपाठे त्वाम्नायेन स्मृतिधारको ग्रन्थ इत्युक्ते
क गतायाः स्मृतेः को ग्रन्थः केषां चेत्याकाङ्क्षानिवृत्त्यर्थत्वेनैतद्व्या-
येयं स्मार्त्तधर्माधिकारादल्पाच्तरत्वेन द्व्यन्तत्वेन च स्मृतिशब्द-
् पूर्वनिपातोपपत्तेर्न द्वन्द्वसमासाशङ्का । स्वमतमुपसंहरति *
ातश्चेति * नन्वापस्तम्बवचनस्य तर्हि का गतिरित्याशङ्क्याह * आ-
ास्तम्बेति * पञ्चधा विप्रतिपत्तिर्दक्षिणतोऽनुपनीतेन भार्यया च
ाह भोजनं पर्युषितभोजनमुच्छिष्टभोजनं पितृष्वसृमातुलदुहितृप-
ारिणयनमिति तथोत्तरतः पञ्चधा ऊर्णाविक्रयः सीधुपानमुभयतो
ाद्भिर्व्यवहार आयुधीयकं समुद्रयानमितीति बौधायनेन स्मृतिविरु-
द्धदृष्टाचारोदाहरणानि दत्वेतर इतरस्मिन्कुर्वन्दुष्यति नेतरस्मिन्दे-
ाप्रामाण्यव्यवस्थया प्रामाण्यमापस्तम्बनेनोपन्यस्यति * मिथ्यैतदि-
ति* गौतम उभयन्त्वेतन्नाद्रियते शिष्टस्मृतिविरोधादिति निराकृत-
ाद्वापस्तम्बस्यापि मन्वादिवद्धर्मशास्त्रप्रवक्तृतया याज्ञवल्क्येन स्म-
ाणात्तद्वचनस्य मिथ्यात्वायोगेऽपि गर्हानिराकरणमात्रपरतया त-
द्व्याख्येयमित्याशयः। मनुवचनं तु तेन यायात्सतां मार्गमिति विशे-
षणादविरुद्धकुलधर्मविषयत्वेनाविरुद्धं, ननु विरुद्धाचाराणामापस्त-
म्बवचनस्य वा श्रुतिमूलत्वं विना कथं प्रवृत्तिरित्याशङ्क्याह * दृष्टे-
ति * ननूपादेयगतत्वेन सुरापाननिषेधे पुंस्त्वस्य विवक्षितत्वान्न
ब्राह्मणानां सुरापानं निषिद्धमित्याशङ्कते * आहेति * अनुवाद्यगत-
त्वेनाविवक्षामभिप्रेत्य परिहरति * उच्यतइति * आशङ्किता स्वा-

१ अयं पा० २ पु० ना० ।

भिप्रायमाह * नन्विति * पार्श्वस्थो हननप्रतिषेधे ऽपि भूत
योगित्वाभावेनासंस्कार्यत्वाद् ब्राह्मणस्यानुपादेयपशुकत्वाति
नानुद्देश्यत्वमसिद्धेरित्यतिप्रसङ्गद्वयमापादयति * उच्यतइति
त्वाविवक्षाप्रसङ्गे को दोष इत्यपेक्षायामाह * आह त्वेति *
ब्देन निषेधानतिक्रमलक्षणाकृतार्थतोक्ता । आशङ्किता द्वित
सङ्गतं दोषं तावत्परिहरति * आहेति * यद्यपि जातेर्वधपा
त्वेन ब्राह्मणशब्दस्य व्यक्तिपरत्वात्तद्गतमेकत्वमत्रोच्यते त
कस्या एव व्यक्तेर्वधपानप्रसक्तेर्बहुवधपाने ऽपि प्रत्येकमेकत्वा
न्निषेधातिक्रमापरिहारान्निषेधानतिक्रमलक्षणकृतार्थत्वदोषो
त्वत्पक्षे तूपादेयार्थत्वेन ब्राह्मणशब्दस्य प्रकृतव्यक्तिविशेषा
तिपरत्वात्तस्यां चैकत्वसंख्यासम्बन्धे लक्षणाकारणाभावाद्
पाने ऽप्येकत्वानपायात्कृतार्थत्वलक्षणो दोषः परिहार्य एवेत्य
वधपाने ऽपि प्रत्येकं व्यक्तेरेकत्वसम्बन्धाज्जातैकत्वसम्बन्ध
विवक्षागतं यदनेकवधपाने निषेधानतिक्रमापत्तिलक्षणं दूष
तच्च दूषणमिति योज्यम् ।एतदेव विवृणोति * एकैकस्या ए
व्यक्तिविशेषणत्वेन विवक्षितुमारभ्यमाणमप्येकत्वं नित्यप्रा
प्यमानत्वापत्तेः प्रतिषेध्यायां वधपानक्रियायामव्यभिचा
णत्वासम्भवेन प्रतिषेधे ऽपि विशेषणत्वासम्भवान्निष्फलत्वाप
क्ष्यते जातौ तु व्यावर्त्यसंख्यान्तराभावात्तद्विशेषकत्वेन विव
नास्तीत्यर्थः । प्रथममतिप्रसङ्गं वैषम्योपपादनेन परिहरति
हेति * पुंस्त्वविवक्षातिप्रसङ्गे ऽपि स एव शङ्कितः परिहा
हशब्दो योज्यः । वधनिषेधे ब्राह्मणस्यानुपादेयपशुकत्वातिरे
व्यद्वितीयाभ्यां कर्मत्वनिर्देशाच्छब्दवृत्तेर्नोद्देश्यत्वमुपपादयि
भूतस्येत्युक्तम् * सुरापाननिषेधे च ब्राह्मणस्य प्रत्यवायव्याप्
ह्यत्वात् स्वर्गकामादिवदुद्देश्यत्वे ऽपि निषेध्ये सुरापाने प्रथ
१४०।१ भ्यां कर्तृत्वनिर्देशेनोपादेयत्वं वक्तुं * सुरापाने चेत्युक्तम् * स्व
कामस्य यागविधौ उद्देश्यत्वाल्लिङ्गाविवक्षौदुम्बरीसम्माने
स्योपादेयत्वाद्विवक्षा तथेहापीत्यर्थः । वधनिषेधे ब्राह्मणस्
नाविवक्षितलिङ्गत्वं प्रकटयति * तथा हीति * यस्माद्
द्दिश्य हननस्य प्रतिषेधस्तस्माद् ब्राह्मणे लिङ्गं न विधीयते श
र्थान्तरत्वेनावृत्तिप्रसङ्गादित्याशयः । यस्माद् ब्राह्मणहनन
परिशिष्टाद् वधोद्देश्यस्यापि वक्ष्यमाणत्वात्तस्मिन्पक्षे यस्माद्ध
नस्य प्रतिषेधस्तस्माद्धनने कर्मव्युत्पन्नेन प्रतिषेधशब्देनोक्ते
विधीयतइति योज्यम् । हननमितिपाठे हननं प्रतिषेधतो

लिङ्गं विधेयमित्यर्थः यद्वा यो ब्राह्मण इति यच्छब्दं नपुंसकलिङ्गे-
न विपरिणतमनुषज्य यद्धननमित्युक्ते तत्प्रतिषेधतो वाक्यस्येति
ज्यम्। ये तु प्रवर्त्तनावाचित्वेन क्लृप्तशक्तिकस्य लिङो नञ-
भाववाचित्वेन क्लृप्तशक्तिकस्य निवर्त्तनावाचित्वायोगान्निषेधा-
कारे ऽपि नञर्थस्य प्रागभावरूपस्य सिद्धत्वे ऽपि रागाद्युपजनने
नाशोत्पत्तौ तत्परिपालनस्य प्रयत्नापाद्यत्वेन विधेयत्वोपपत्तेः
वर्त्तनैव लिङर्थ इत्येतन्मताभिप्रायमेतत् श्लोकं व्याचक्षते तन्मते
वं योज्यं यो ब्रह्मण इति ब्राह्मणमुद्दिश्य पूर्ववच्च ब्राह्मणोद्देशाभि-
नस्योपलक्षणार्थत्वाद् वधं चोद्दिश्य यो ब्राह्मणहननाभावस्तं कु-
दिति च वचनव्यक्त्यन्तरस्यापि सम्भवाद् ब्राह्मणवधाभावं चो-
श्य हननस्य प्रतिषेधादभावादन्यलिङ्गं ब्राह्मणे प्रतिषेधशब्दवा-
ये वा ऽभावे वा शब्दाद् वधे वा न विधीयतइति हननमिति पाठे प्र-
षेधत इति प्रथमार्थे तमङ्गीकृत्य यो ब्राह्मणो यद्धननं यः प्रतिषेध
त्युक्ते ब्राह्मणतद्वधतदभावानामुद्देश्यत्वात्तद्विशेषणं लिङ्गमन्यत्वाप-
र्न विधीयतइति योज्यम्। परिपालनीयत्वरूपेण च विधेयस्या-
भावस्य स्वरूपेणोद्देश्यत्वमविरुद्धम्। ननु वधोद्देश्यपक्षे ब्राह्म-
स्याप्युद्देश्यविशेषणाविवक्षायामविवक्षा प्रसज्येतेत्याशङ्कां निरा-
र्वन् श्लोकं व्याचष्टे * प्रतिषेधेति * नान्तरिक्षे न दिवीत्यादिव-
षेधानुवादाशङ्कानिराकरणार्थो विधिशब्दः निर्विषयवधाप्रसक्तेर्मृ-
यामहे हविषा विशेषणमित्यनेन न्यायेनोद्देश्यान्तर्गत्यङ्गीकारेण ब्रा-
ण्यविवक्षायुक्तेत्याशयः। सकृच्छ्रुतप्रत्ययस्यानेकार्थविधिपरत्वा-
गान्निर्विषयस्य च लिङ्गस्य विधातुमशक्यत्वाद्यो ब्राह्मणस्तं न ह-
यात्तं च ब्राह्मणयुग्मं स मेति ब्राह्मणलिङ्गविधौ ब्राह्मणपदप्रत्यययो-
वृत्तिः यद्ब्राह्मणहननं तन्न कुर्यात्तं च पुंसो हननमिति वधलिङ्ग-
वधौ हन्तिप्रत्यययोरावृत्तिरिति विवेकः। प्रतिषेधशब्दो ऽपि कर्मव्यु-
पत्त्या वधपर एव प्रतिषेधे वध इत्यर्थः। अविभक्तिकवधशब्दपाठे
धश्चासौ प्रतिषेधश्चेति कर्मधारयावृत्तिग्रहणमुपलक्षणार्थम्। द्वि-
तीयव्याख्याने तु प्रतिषेधविधिपरो हि प्रतिषेधशब्देनाभावो ऽभिप्रे-
तः। शुद्धवधासम्भवात्तद्विशेषणब्राह्मण्यविवक्षाप्रतियोगिनिरूप-
णाधीनत्वेन शुद्धस्याभावाख्यस्य प्रतिषेधस्यासम्भवात्तद्विशेषणव-
अविवक्षाप्रतिषेधे वेति यो ब्राह्मणहननाभावस्तं कुर्यात्तं च पुंसोभा-
वमित्यभावलिङ्गविधौ नञ्प्रत्यययोरावृत्तिरुक्ता एवं तावन्नञुपहि-
तस्य लिङो निषेधकत्वे प्रवर्त्तनाप्रतीत्यभावेन तदाक्षिप्तसाध्याभा-
वाद् ब्राह्मणस्यानुपयोगित्वेनासंस्कार्यत्वादनुपादेयपञ्चकव्यतिरेकेण

चास्तवोद्देश्यत्वाभावे ऽपि शब्दवृत्तेनोद्देश्यत्वादविव
क्षा । यदा तु नञ्मात्रेण निषेधसिद्धेर्द्धेषाद्यर्थप्राप्तप्र
र्थत्वं लिङो ऽङ्गीक्रियते तदा प्रवर्त्तनाक्षिप्तवैराग्निर्यात
द्युपयोगिहननसंस्कार्थत्वोपपत्तेर्वस्तुतो ऽप्युद्देश्यत्व
ङ्गाविवक्षेत्याह ॐ येषां त्विति ॐ प्रवर्त्तनात्मकनिषे
स्भवप्रतिपादनार्थं ॐ अत्यन्तभिन्नावित्युक्तम् ॐ वा
विषयत्वेन विधिवन्निषेधस्यापि सर्वपदार्थान्प्रतिप्राधा
नञो ऽपि प्रत्ययानुग्राह्यत्वोपपादनायोपचारा ॐ द्वा
क्तम् ॐ नानाख्यातार्थस्यापि प्राधान्ये वाक्यार्था
दित्याशङ्क्य भावनैव सर्वपदार्थानुरञ्जनसहत्वात्सर्वं
क्यार्थस्तद्विषयत्वेन तूपचाराद्विधिनिषेधयोर्वाक्यार्थत्व
स्य भावनाविषयत्वास्तीति सूचयितुं ॐ द्वावेवेत्युक्तं
श्रूयमाणमपि लिङ्गं प्रतिषेधं प्रत्यनुपयुज्यमानत्वात्ते
त्वादविवक्षितमित्यन्वयः तदुपपादनार्थं ॐ नञित्याद्यु
मतापेक्षयास्मिन्मते विध्यर्थनिषेधाधिकयाल्लिङ्गनिषेधे र
द्योतनार्थो विध्यर्थमपीत्यपि शब्दः ब्राह्मणविशिष्टेन हन
विध्यर्थं प्रतिषिध्य चरितार्थत्वान्न लिङ्गं ब्राह्मणं वधे वि
ध्यतारूपे नञि निषेद्धुं शक्नोति यद्ब्राह्मणं हन्यात्तं च
मांसं नेति नञ्ब्राह्मणपदयोरावृत्त्यापत्तेः ब्राह्मणं न हन्
ब्राह्मणहननं न कुर्यादित्येव विगृह्यार्थप्रतीतेस्तच्च पुंसा
वधे लिङ्गनिषेधेन नञ्हन्त्योरावृत्त्यापत्तेः । विधौ च
तच्च पुंसः कर्त्तव्यं नेति नञ्प्रत्यययोरावृत्त्यापत्तेरित्
विशिष्टविधिवद्विशिष्टनिषेधेनापि विशेषणानामर्थाक्षेपे
रणावृत्त्यापत्तिरित्याशङ्क्य ॐ नूदितमित्युक्तम् ॐ विधे
देरन्यतो सिद्धस्यापि विधितः स्वरूपावधारणसम्भवेन
वादानपेक्षत्वात्पश्वेकत्वाधिकरणन्यायेन विशेषणाविवक्षा
षेध्यस्य त्वन्यतो सिद्धौ निर्विषयनिषेधायोगेनानुवाद
सम्भवाद्ग्रहाधिकरणन्यायेन विशेषणाविवक्षेति भावः । न
ब्राह्मणहननयोरप्यविवक्षा स्यादित्याशङ्क्य ॐ पूर्वोक्तेत्युक्त
र्वव्यवहारनिरोधापादकत्वे कर्त्तव्यमात्रस्य निषेध्यत्वायो
च निर्विषयस्याप्रसक्तेः प्रतिषेध्यत्वासम्भवस्य पूर्वमेवोक्त
णविशिष्टस्यैव विध्यर्थस्योद्देश्यत्वेनोभयोरपि ब्राह्मण
श्यान्तर्भावात्(यस्योभयं हविरार्त्तिमार्च्छेदित्यत्र यस्य क
सत्यां निर्विषयकनिमित्तकयागस्याप्राप्तेः हविःशब्दस

द्विशेषणीभूतोभयशब्दस्य प्रमाणानुवादकत्वात्तद्विधाने वाक्यभेदापत्तेस्तस्मादुभयशब्दस्याविवक्षेति हविरार्त्यधिकरणराद्धान्तः) तद्विवक्षायुक्तेत्याशयः । विध्यभावाद् वधकर्तव्यत्वस्याप्रतीतेरनुवादाऽसंभवमाशङ्क्य * कृपादिष्वित्युक्तम् * तन्वास्थानयोर्निषेधवाक्यञो नास्तीत्यादिवद् भावमात्रवाचित्वान्नियतेर्नार्थेन न युक्तमित्याशङ्क्य * प्रत्ययेनेत्युक्तम् * य एवं लिङ्गादेर्नार्थो वक्तव्यश्चार्थवादार्थेनापि योजना न्यासाताधिकरणन्यायेन पौर्णमास्यादिशब्दस्य याकालिकत्ववदनुवादार्थेनापि प्रत्ययेन सम्बन्धाद् नञो ऽर्थान्तरस्याभिधानानुपपन्नमिति सूचयितुं प्रत्ययग्रहणम् । यदा तु तदनुरोधेन वाक्येषु नञो विषयसमर्पकत्वात्प्रवर्तनार्थं एव लिङादिरित्यभिमताश्रयणेन पूर्वग्रन्थो व्याख्यायते । तदा तेषां निषेधे प्रत्ययस्य निराकरणार्थत्वाद्वाक्यभेदकत्वं निराकृतम् । विधिवच्च निषेधस्यापि वाक्यार्थरूपा भावना विषय एव न तु धात्वर्थस्तेन विपर्ययोऽस्तीति * वाक्यार्थशब्देनोक्तम् * अत्यन्तभिन्नविषयत्वेनैकत्वनिराकरणार्थं विपरीतस्वभावतोक्ता तथा हि ।

फलबुद्धिप्रमेयाधिकारिबोधकभेदतः ।
षड्भिश्चात्यन्तभिन्नत्वाद्भेदो विधिनिषेधयोः ॥
विधिरिष्टफलोऽनिष्टपरिहारफलो परः ।[1]
प्रेरितोऽस्मीति धीः पूर्वे वारितोऽस्मीति चापरे ॥
विधेयस्येष्टहेतुत्वं विधिना च प्रतीयते ।
निषेधेन निषेध्यस्य प्रत्यवायनिमित्तता ॥
विधिस्त्वधिकरोत्यन्यकारणेनाप्रवर्तिनम् ।
रागादिना प्रवृत्तं तु निषेधस्तद्विलक्षणम् ॥
नञ्वर्जितो लिङादिश्च विधिबोधस्य कारणम् ।
लिङाद्यनुगृहीतस्तु नञ् निषेधस्य बोधकः ॥
एतदेवाभिप्रेत्य बृहट्टीकायामुक्तम् ।
अन्तरं यादृशं लोके ब्रह्महत्याश्वमेधयोः ।
दृश्यते तादृगेवेदं विधानप्रतिषेधयोः ॥

इति । शेषं समानम् । अस्मिन्नेव पक्षे स्पष्टीकरणार्थं वचनव्यक्तिमाह * एवा हीति * तव्ययुक्तवाक्यान्तराभिप्रायो वचनव्यक्त्यन्तरोपन्यासः । पूर्वस्मिन्पक्षे कीदृशी वचनव्यक्तिरित्यपेक्षायामाह * विध्येकत्वे पुनरिति * विधिशब्दस्य लिङादेरनुवादार्थत्वासाम्यान्नञा सहैकीकृतस्य तत्सहितस्य निषेधपरत्वं युक्तं, द्वितीये व्या-

१ भयं पा० २ पु० पा०

ख्याने तु विधिरेवैकः सर्वत्र न क चि
एकपदोपात्तयोर्धातुप्रत्ययार्थयोरुद्देश्योपा
अशक्यत्वे ऽप्यर्थमात्रविवक्षया वधस्याप्य
यद्ब्राह्मणहननमित्युक्तम् शब्दव्यापारप
शः। विधिशब्दो न पृथिव्यामग्निश्चेतव्य
निराकरणार्थः। द्वितीयव्याख्याने प्रतिषे
न कुर्यादिति व्याख्यातयोगिनो नञो ऽ
त्यर्थः न हन्यादित्युक्ते प्रधानभूतेनाख्य
हननव्यतिरिक्तं वा प्रागभावपरिपालनं कि
भावत्वं कुर्यात्पालयेदित्यपि वचनव्यक्तय
व्यक्तिभेदप्रपञ्चस्य प्रयोजनमुपसंहरति *
श्चयमाह * ब्राह्मण इति * व्यतिरेकोपपादना
वैश्यश्च न सुरां पिबेदित्यत्राख्यातप्रत्ययो
क्षीयमानस्य संख्याया परिच्छेद्यत्वयोग्यस
गुणत्वेनोपादानाच्च पेया ब्रह्मवादिभिरित्य
भानत्वप्रतीतेरित्यर्थः। श्रुतावपीमं न्यायमा
पार्श्वस्थापादितमतिप्रसङ्गद्वयं परिहृत्य
१४।१४ धाभावशङ्कामुपसंहरति * अतश्चेति *
श्यत्वे ऽप्यनुवाद्यत्वाद्विशेषणाविवक्षेति
नन्वनुवाद्यत्वे ऽप्युपादेयत्वाद्विशेषणविव
* नोपादेयत्वमिति * उद्देश्यविशेषणाविव
त्वपरिहारार्थत्वान्नोपादेयत्वस्य विवक्षाकार
णस्य विधिना स्प्रष्टुमशक्यत्वाद्विधेयत्वमेव
शुक्लान्वारम्भणादौ प्रकरणप्राप्तस्यापि यज
नाद्विशेषणविवक्षा युक्तेति भावः। नन्व
क्रियाविशेषणत्वाभ्युपगमाच्छूद्रब्राह्मणविशि
शेषणविशिष्टब्राह्मणविशिष्टक्रियानुवादे ऽपि
पिबेदित्येकप्रसरोपपत्तेरावृत्तिलक्षणवाक्यभे
कारेण व्रारूणीकहायनीवरपरस्परानियमोप
परिसमाप्तिलक्षणस्यापि वाक्यभेदस्याभाव
वक्षेत्याशङ्क्याह * अनूद्यमान इति न केवल
प्राप्त्यपेक्षत्वं किं त्वनुवाद्यविशेषणत्वेनाप्यनू
सूचितं, तत्रानुवादस्य प्राप्त्यपेक्षत्वे सत्यनू
पुंस्कर्तृत्वेन प्रागेव प्रतीतेर्लिङ्गविशेषण

र्तृकपानाप्रसक्तेरनुवाद्यपानविशेषणत्वेनाज्ञातज्ञाप्येभ्यो ब्रा-
दिभ्यो ऽन्यल्लिङ्गं न विधीयते नानुवाद्यविशेषणत्वेनाज्ञातं ज्ञा-
इत्यर्थः । नन्वप्राप्तनिषेधायोगान्निषेध्यप्राप्त्यर्थं ब्राह्मणः सुरां
देत्यवान्तरवाक्यार्थपर्यवसानवेलायां विधेयविशेषणत्वेन लि-
विवक्षा प्रसक्ता पश्चान्निषेधान्वये ऽपि न केन चिद् बाध्यत इ-
ङ्क्ते तावत् * यदि हीति * तत्र किमप्राप्तस्य पानस्य निषे-
गादन्यतश्चाप्राप्तेरर्थाद्विधेयत्वं कल्प्यते किं वा वाक्यस्वरसा-
विधिपरत्वं प्रतीयते इति विकल्प्याद्यं तावत्पक्षं दूषयति * यत-
ति * द्वितीयं दूषयति * प्रतिषेधेति * यदा च पानं न वि-
ते तदा तत्र ब्राह्मणादेः सत्यपि गुणवादे ऽनुवाद्यत्वात्प्रतिषेधे
केयात्मनि गुणत्वायोगात् प्रत्युत प्रत्यवायव्यावृत्त्यानुग्राह्यत्वेन
न्याद्विधानं न सम्भवतीत्याह * तेनेति * मेदथादिमते नाथ-
नव्यक्तौ पानस्य कर्त्तव्यत्वेनानूदितस्य प्रतिषेधः । विध्येकत्व-
ईमतेन द्वितीयवचनव्यक्तौ पानं स्वरूपेणानूद्य प्रतिषेधेन विधी-
नेनेति कर्मव्युत्पन्नस्य विधिशब्दस्य प्रतिषेधशब्देन सह कर्म-
यः द्वितीयव्याख्याने प्रतिषेधस्याभावस्य विधिनेत्यर्थः । एवं
पि यदि स्त्रीकर्तृकं पानं लोके न प्राप्नुयात्ततस्तन्न निषेध्येत न
दस्तीत्याह * लोके चेति * एवमनूद्यमानः सर्वो हीति पूर्वो-
क्तमर्थं प्रकृते योजयित्वा तत्रानाकाङ्क्षितमित्युत्तरार्द्धार्थं योजयति
न चेति * नन्वेवं तर्हि यो ब्राह्मणः पिबेत्स पुमानिति बाह्मप- १४८
ाप्तनिषेधपरित्यागेनानुवादपदान्तर्गतसन्निकृष्टब्राह्मणपदोपात्त-
ङ्गसम्बन्ध एव केवलो विधीयतामत आह * न चास्येति * लि-
ङ्गश्रुतिवैयर्थ्यापत्तेरिति भावः । उपसंहरति * ततश्चेति * प्रा-
ङ्क्ताशङ्काशेषनिराकरणावतारायो * भयत्रापीत्युक्तम् * ननु
निषेधे लिङ्गाविवक्षायां ब्राह्मणवधे ऽपि ब्रह्महत्यापत्तेर्महापातक-
मित्तकर्महान्यादिप्रसङ्गः स्यादित्याशङ्काशेषमाह * नन्विति *
त्र कुशावस्था अस्तीत्यात्रेयी गर्भिणी । अभ्युपगमेनैव परिहरति
ब्राह्मणेति * न च महापातकत्वे प्रायश्चित्तालपत्वं विरुद्ध्यते पुं-
ह्मणवधे ऽपि रहस्ये प्रायश्चित्तालपत्वदर्शनादित्याह * न चेति *
पसंहरति * तस्मादिति * सुरापानस्य तु स्त्रीकर्तृकस्यापि प्राय-
श्चित्तान्तराणामाम्नानान्नि: सन्दिग्धं महापातकमित्याहिञ्च ब्राह्मणी-
ुरापानस्य स्मृतिविरोधो दुःपरिहर इत्याह * सुरापाने पुनरिति *
न्वापस्तम्बेन देशव्यवस्थया विरुद्धाचारप्रामाण्याभिधानाद्देशान्त-
निवासिब्राह्मणीविषया सुरापाननिषेधस्मृतिः कल्पयिष्यत इत्या-

शङ्कामाह * यापि चेति * स्मृतिविरोधे ऽप्यतनाचारा
न्तरेणोपपाद्योपसंहरति * इतीति * एवमुक्तसूत्रं पू
सदाचारप्रामाण्यप्रतिपादनपरतया ऽपि चेति सूत्रं व्य
सूत्रारूढं पूर्वपक्षं कर्तुं न शास्त्रपरिमाणत्वादिति पूर्वा
द्धान्तसूत्रमाचाराधिकरणपूर्वपक्षे ऽप्यावृत्त्या योजा
* अथ चेति * पूर्ववर्णके दुराचारसङ्करेण पूर्वपक्षाि
देशनिवासिशिष्टाचारोदाहरणात्तद्व्यावृत्त्यर्थमार्यावर्त्त
ष्टाचाराणामेवोदाहरणत्वमाह * इहेति * अर्थकामाच
धर्माचाराणामेवोदाहरणत्वं दर्शयन्सन्देहमाह * ध
दुराचारसङ्करस्याप्रामाण्यहेतोरार्यावर्तनिवासिधर्माचा
त् सन्देहहेतुं प्रश्नपूर्वकमाह * कुत इति * नन्विदं
कर्त्तव्यमिति सदाचाराणां विशेषरूपेणानिबन्धने ऽपि
१४३।१ प्रमाणमिति सामान्यतो निबन्धनमस्तीत्याशङ्कते * न
स्मृत्यधिकरणसाधितात्स्मृतिप्रामाण्यादेवाचारप्रामाण्यं
त्यर्थः । अष्टकादिस्मृतीनां मूलश्रुत्यदर्शने ऽपि तदभा
नादविरुद्धं श्रुत्यनुमानम् । आचारप्रामाण्यस्मृतौ तु
वसाधनस्य हेतोराचारमूलत्वलक्षणस्य स्मृत्यन्तरेऽप्यो
त्स्मृत्यन्तरन्यायेनाचारप्रामाण्यस्मृतिप्रामाण्यासिद्धेर्न
दाचारप्रामाण्यासिद्धिरिति परिहरति * नेति * एतद
* शाखान्तरेति * आचारदर्शनमात्रप्रवृत्तमेवोपपादयि
नीते * यथैव चेति * उपपादयति * यदि हीति *
मूलत्वात्स्मृतेर्न्यायसाध्वसाधुतैव विचार्येत्याह * इतीि
हमुपपाद्य पूर्वपक्षसूत्रगतनञर्थव्याख्यानार्थं सिद्धान्तेनो
ष्टेति * विरोधाधिकरणे विरुद्धस्मृतिप्रामाण्यापवादेन
तिप्रामाण्यं निरपवादमुक्तमिति मत्वा द्व्यबलेनेत्युक्तं प्र
क्रमः घञन्तात्करोतेः कारशब्दं व्यापारवचनं व्युत्पाद
स्तीति मत्वर्थीयेनिप्रत्ययान्तस्य कारिशब्दस्य कर्तृवचनत्वा
रैस्तुल्याः कर्त्तार एषामिति विग्रहः कार्यः । मन्वादिभि
श्रुतिदर्शने ऽपि तदर्थस्य शिष्टव्यवहारादेव सुज्ञानत्वेन
पपत्तेः स्मृतितो ऽप्याचारप्रामाण्यं सिध्यतीत्याह * स्मृ
ऽपक्रान्तसिद्धान्तनिराकरणार्थत्वेन पूर्वपक्षसूत्रमवतार्य
मध्याहारेण पूरयति * तदिति * व्याचष्टे * शास्त्रे
यासमासाभिप्रायं कर्मव्युत्पत्तिप्रदर्शनं बहुव्रीहौ तु भाव
षष्ठीसमासेन चाविद्याख्यानातिरिक्तत्वेन शाक्यादिभ्रस्

प्यनेनाप्रामाण्यमुच्यतइत्यन्यथा व्याचष्टे * परिमितानि चेति * १४
; शब्दात्मकानामेव शास्त्राणामियत्तानियमादशब्दात्मकस्यापि स-
वारस्य पुरुषहितबोधकत्वाच्छास्त्रत्वं भविष्यतीत्याशङ्क्य स्वरसे-
त्वेषां धर्मबोधकत्वमाचारश्चैव साधूनामिति स्मृत्यनुसाराद्वेति
कल्प्याद्ये पक्षे स्वरूपेण तावदाचारस्य क्रियारूपस्याबोधकत्वाच्छा-
त्वमनाशङ्क्यमेवेत्याह * न चेति * ननु स्वरूपेणाबोधकत्वे ऽपि
ष्टानुष्ठानदर्शनादस्मदादीनां धर्मबुद्ध्युत्पत्तेस्तद्द्वारेण शास्त्रत्वं
वेष्यतीत्याशङ्क्याह * नापीति * शिष्टानुष्ठानान्यथानुपपत्त्या-
ृयस्योत्सवादेर्धर्मत्वं कल्प्यं भ्रान्त्यादिनापि त्वनुष्ठानोपपत्तेर्नैका-
तः शिष्टैरनुष्ठीयमानस्याचारस्यास्मदादिभिर्दर्शनं शिष्टाचारानु-
नं वा धर्मत्वं कल्पयितुं शक्यं विशेषतश्च दर्शनस्यानुष्ठानमात्रा-
वेधायित्वेनात्यन्तपरायतत्वादनुष्ठानस्य च प्रमेयत्वादबोधकत्वा-
त्यर्थः। द्वितीयपक्षे दूषणमाह * स्मृतेस्त्विति * तृतीयप्रका-
। व्याख्यातुं विकल्पयति * किं चेति * एकश्रुत्यनुमानासम्भवं
वदुपपादयति * न तावदिति * अनेकश्रुत्यनुमानासम्भवमप-
मितानां पाठाशक्तेरपठितानां च मूलत्वासम्भवेनोपपादयति
यावदाचारं हीति * तुशब्दार्थे हिशब्दः। ननु सर्वाचाराणामे-
श्रुतिमूलत्वासम्भवे ऽप्येकदेशादिगतानां भिन्नानामप्येकमूलत्वो-
त्तेरनेकश्रुत्यनुमाने ऽप्यल्पत्वाद्व वेदसम्मितिश्रुतिकल्पनापत्ति-
त्याशङ्क्याह * एकस्य त्विति * एकदेशादिगतानामप्यनेकेषामे-
पलक्षणाभावान्नैकमूलत्वोपपत्तिरिति भावः। अभ्युपगम्याप्य-
त्वेन शक्यपाठत्वमनिबन्धनान्मूलदर्शनाभावो ऽवसीयतइत्याह
न चेति * ननु प्रत्यक्षोपलम्भाभावे ऽप्याचारदर्शनादेव तत्तदा-
रमूलभूताः श्रुतीरनुमायान्येषामपि तथैव श्रुत्यनुमानसिद्ध्यर्थं
ामान्यमात्रेणाचारप्रामाण्यमुपनिबद्धमित्याशङ्क्याह * न चेति *
लत्वेनाचारस्य बलवत्त्वोपपत्तेर्मूलित्वेन च स्मृतेर्दौर्बल्यापत्तेर्वे-
रमाणं स्मृतिबलीयस्त्वं विरुध्येतेत्याशयः। मूलमूलिभावस्य ब-
ाबलभावस्य च विपर्ययप्रसङ्गादिति वा योज्यम्। अस्मिन्नेवार्थे
ास्त्रस्य परिमितस्य स्तोकस्यैवानुमातुं शक्यत्वादितिसूत्रं योजयति
अत इति * ननु बहूनामप्याचाराणामेकैव स्मृतिः सरूपाश्रुतिर्मू-
भूतानुमास्यते ऽत आह * न चेति * न केवलमाचाराणां श्रुतिमू-
त्वाभावप्रसङ्गः किं तु श्रुतेरेवाचारपूर्वकत्वापत्तेर्विपर्ययो ऽपि प्र-
ज्येतेत्यर्थः। एतदेवोपपादयति * शिष्टाचार इति * एतमेवा-
ामर्थान्तरन्यासेन दर्शयितुं शास्त्रशब्दे शास्त्रीयमर्थं लक्षयित्वा तस्य

(४५)१ परिमितत्वादल्पत्वादिति चतुर्थं व्याख्याप्रकारमाह * शास्त्रे
यद्वा शास्त्रीयस्यार्थस्य परिमितत्वात्कतिपयत्वान्मानान्तरागोच
दिति वदतानेन सूत्रेण परिमिते मानान्तरागोचर एवार्थे शा
त्वेते सदाचाराणां तु शिष्टव्यवहारादेव सिद्धत्वेन मानान्तर
त्वान्न शास्त्रविषयत्वं सम्भवतीत्युक्तमिति पञ्चमं व्याख्य
माह * परिमितेति * एतमेवार्थमुपपादयितुं गृहस्थादि
मशास्त्रीयत्वप्रतिपादनार्थस्याशास्त्रा रूपसम्प्राप्तिः शास्त्रं र
त्पकं तस्मादर्थेन गम्येताप्राप्ते शास्त्रमर्थवदित्यस्य षष्ठाध्य
सूत्रस्यैकदेशं पठति * अप्राप्ते इति * मानान्तरगोचर
सुखाङ्गत्वेन द्रढयति * दृश्यमानेति * अर्थसुखाङ्गानां धर्मे
दृष्टान्तमाह * वैश्यानामिति * पूर्वपक्षमुपसंहरति *
ति * शीलात्मतुष्टिग्रहणेन तयोरपि तुल्यन्यायत्वाद्विचार
दर्शितं स्वभावरचितं शीलं निषेधस्याश्रौतत्वे नञो सामञ्ज
परितोषात् सिद्धान्तोपक्रममपि सूत्रारूढं कर्तुमुपक्रमते *
अस्मिंश्च पक्षे शिष्टाकोपसूत्रमप्यावृत्त्या वेदाविरुद्धशाक्य
विषये पूर्वपक्षसूत्रत्वेन शिष्टाचारविषये च सिद्धान्तोपक्र
योज्यं द्वितीयवर्णकवदत्राप्यार्यावर्तनिवासिशिष्टाचारण
रणत्वमनिबन्धनत्वकर्तृसामान्यरूपधर्मद्वयदर्शनं च सन्देह
प्रयोजनामात्रमतिरिक्तमिति दर्शयन् सिद्धान्तोपक्रमं सू
रोति * इहेति * शिष्टाकोपाविरुद्धशब्दयोः पौनरुक्त्या
नाविरोधो ऽभिहितो द्वितीयेन प्रामाण्यमिति स्वरूपतस्त
* तथा हीति * नन्वविरोधे ऽप्याचाराणां विद्यास्थाना
च्छाक्यादिग्रन्थवदप्रामाण्यं भविष्यतीत्याशङ्क्य स्मृतिका
तिरेकस्यादोषत्वं दर्शयितुं विरोधे सत्येवाप्रामाण्यं स्या
परतया व्याचष्टे * यदीदि *

॥ शास्त्रप्रसिद्धपदार्थप्रामाण्याधिकरणम् ॥ ५

समा विप्रतिपत्तिः स्यात् ॥ ८ ॥

शिष्टाकोपाधिकरणे पूर्वपक्षोक्तं विरोधमभ्युपेत
बलीयस्त्वमात्रेण सिद्धान्ते विरोधादर्शनस्यावक्तव्यत्व
दिति सूत्रावयवस्य पूर्वशेषत्वानुपपत्तेरुत्तरसूत्रशेषत्वं
ऽङ्गीकार्यमित्याह * तेष्विति * अत्र भाष्यकृता सौत्रा
द्व्याख्यार्थं यवमयश्चरुरित्यादिवाक्यगतान्येव वराहवे

१ तेषु‌दर्शनाविरोधस्येति उपक्रमं सूत्रं वेति वार्त्तिकम् ।

त्य वाच्यविषयप्रयोगे विप्रतिपत्तिरुक्ता तत्रास्य विप्रतिपत्त्यभि-
स्य किं प्रयोजनं का च विचारसङ्गतिरित्यपेक्षिते साधितप्रामा-
शिष्टाचारबलाबलविचारात्मकत्वेन सङ्गतिं सूचयन्विचारविष-
दर्शनप्रयोजनमाह * शब्देति * शब्दस्यार्थविषयः प्रयोगः
वासौ शिष्टाचारश्च तस्मिन् विप्रतिपत्ताविति विग्रहः भाष्यकृ-
ाख्याने ऽपि स्मृत्यधिकरणएवाचारप्रामाण्यस्यापि व्युत्पादि
ाद्विरोधाधिकरणे तस्यापि स्मृतिवद्वेदविरोधविषये प्रामाण्ये
दिते शिष्टाकोपाधिकरणे च क्रत्वङ्गपदार्थविषयाचाराणां क्रमा-
रोधाद्विरोधे ऽपि वा प्रमेयबलीयस्त्वादनपवादे ऽभिहिते सम्प्र-
चारयोरेव परस्परविरोधे किं बलाबलविरोधो ऽस्तु न वेति
न्तासङ्गतैवेत्याचारशब्देन सूचितम् । व्युत्पादितप्रामाण्यस्य शि-
चारस्यैव बलाबलचिन्ता युक्ता नाव्युत्पादितप्रामाण्यस्य म्लेच्छाचा-
ति मत्वोद्भाष्यमपि शिष्टाचारविषयत्वं चिन्तायाः शिष्टशब्देन
चितं कीदृशः सन्देह इत्यपेक्षायामाह * एकशब्दमिति * एकः
दो ऽस्मिन्ननेकार्थो ऽस्मिन्निति द्वावपि बहुव्रीही । आचर्यतइति
ोत्पन्नलकारान्तेनाचरणं क्रियतइत्युक्तम् । आचरणमन्यपदा-
। अक्षादिशब्दवैलक्षण्यप्रतिपादनार्थविप्रतिपत्तिशब्दव्याख्याना-
् * विगानेनेत्युक्तम् * को ऽर्थ इति किं द्वावप्युतैक एवेत्यर्थः ।
शास्त्रानुसारिशिष्टव्यवहारावगतस्यैव वाच्यत्वनिर्णयात्सन्देहो न
क इत्याशङ्क्याह * यवेति * अविद्यमानप्रयोगारोपसूचनार्थः १४
लशब्दः वाच्यवाचकसम्बन्धे शास्त्रस्याव्यापारसूचनाय * अनिरू-
तेत्याद्युक्तम् * समेति पूर्वपक्षप्रतिपादनार्थसूत्रावयवव्याख्यानार्थं
ेति भाष्यं व्याचष्टे * तत्राहेति * भाष्ये च विकल्पशब्देन
तेज्ञानार्थत्वमुभयथेत्यनेनास्यैवावृत्त्या हेत्वर्थत्वं व्याख्यातमिति सू-
यितुम् * तुल्यत्वादित्युक्तम् * सर्वलोकस्थानां प्रयोगिणा-
त्यर्थः । तुल्यत्वमेवोपपादयति * यवेति * नन्वेवमपि देश-
वस्थया वाच्यव्यवस्थोपपत्तेः समविकल्पो न युक्त इत्याश-
ाह * तस्याश्चेति * तस्मिन्सर्वगामित्वे न्यायो युक्तिर्यस्याः
केरस्ति सा सन्न्याया तद्भावस्तन्न्यायत्वम् । कीदृशो न्याय इत्यपे-
यामाह * नैकेषामिति * एकस्यैव वस्तुनः सदसत्त्वविरोधादि-
ाशयः । एवं तर्हि सर्वान्प्रत्यसत्त्वमेवास्त्वित्याशङ्क्य सत्त्वे कस्य
ग्रहदर्शनानुपपत्तेर्निराकरोति * केषां च्चिद्धेति * सर्वेषामपि पुंसां
वाचकशक्तिर्न विद्यतइत्येतदपि नास्तीत्यर्थः । ननु सदसत्त्ववदेकस्य
ाताज्ञातत्वविरोधो ऽपि स्यादित्याशङ्क्य ज्ञानव्याप्यत्वाव्याप्यत्वोपा-

धिकत्वादज्ञाताज्ञातत्वयोर्ज्ञानस्य च पुरुषाश्रितत्वेन तद्भेदे
त्वाविरोधान्निराकरोति ॥ ज्ञातेति ॥ शक्तेः सर्वगामित्वमु
मुपसंहरति ॥ तस्मादिति ॥ नन्वष्टदोषविकल्पापादकमने
कल्पनमन्याय्यमेवागृह्यमाणविशेषत्वेनागत्या क्व चिद
इह तु प्रयोक्तुरल्पत्वबहुत्वविशेषग्रहणान्नानेकशक्तिकल्पनं
त्याशङ्क्याह ॥ न चेति ॥ दृष्टान्तं व्याचष्टे ॥ बिभीतक
एकदेशप्रयुक्तानामपि शब्दानां सर्वगामित्वं निरुक्तकृद्वचनेन
॥ तथा चेति ॥ प्रकृतय एवैकेषु जनपदेषु प्रयुज्यन्ते विकृत
केष्वित्युपक्रम्य निरुक्तकृता शवतिर्गतिकर्मा कम्बोजेष्वेव
विकारमस्यार्या भाषन्ते शवतीत्युक्तं तदर्थतः पठितं कम्ब
जनपदविशेषेषु शवतिर्धातुर्गतिवाची दृष्टः गच्छतीत्यस्मिन्न
तीति प्रयोगात् । आर्यास्तु जनपदविशेषाः ऋदोरबित्यप्प्र
त्वेन विकारापन्नं शवतिधातुं न गतौ युञ्जते । शवशब्देन
भिधानादित्यर्थः । महाभाष्यकृता तु विकारापन्नमार्या ॥
तिं पाठान्तरमुदाहृतम् । तत्र मृतावस्था विकारशब्देनोक्ता ।
शवतिरेव देशविशेषे व्यवस्थितः किं त्वन्ये ऽपि बहवो
नामशब्दाश्च व्यवस्थिता एव प्रयुज्यन्ते ॥ इत्यादीति ॥
हि जनपदेषु दातिर्धातुर्लवनार्थो दृश्यते लुनातीत्यस्मिन्नर्थे
प्रयोगात्तमेव दात्रमिति ष्ट्रन्प्रत्ययान्तत्वेन विकारापन्नम्
प्रयुञ्जते ।

> प्राच्येषु गच्छतीत्यर्थे मध्यमेषु वरं हति ।
> हन्ततिश्च सुराष्ट्रेषु गमिस्त्वार्येषु भाष्यते ॥
> महाभाष्यकृतैते ऽन्ये प्रतिदेशे व्यवस्थिताः ।
> उदाहृता धातवो ऽतो आदिशब्दस्तदाशयः ॥

पूर्वपक्षमुपसंहरति ॥ तस्मादिति ॥ तेष्वदर्शनादित
सूत्रं समेत्यस्य प्रतिज्ञामात्रार्थत्वादुभयशब्दार्थावगम इत्य
ष्विति सूत्रावयवो हेत्वर्थेन योजितः तद्व्याचष्टे ॥ एवं च
प्रकृतिवदिति हि चोदकेनार्षे समाम्नायावगतमेव मन्त्ररूपमि
ते कार्यप्राधान्यात् तदसम्भवे व्रीह्यादिशब्दस्थाने नीवारादि
हेनान्यथात्वं कल्प्येत साधारणशब्दे च न तत्कल्पनापत्तिरि
किमिति विकृतिविषयत्वेनायं सूत्रावयवो व्याख्यात इत्यपेक्षि
तौ विप्रतिपत्तिदर्शनेनाविरोधायोगादिति कारणमाह ॥ तेषि
एतदुपक्रमत्वस्यानभिमतत्वद्योतनार्थं पूर्वपक्षाभिप्रायेण
त्यस्यैवावृत्त्या हेत्वर्थत्वं दर्शयन्नुपसंहरति ॥ तस्मादिति

स्था वा तन्निमित्तत्वादिति सिद्धान्तसूत्रं स्वयं तावदवतारणपूर्वकं
ाचष्टे * इतीति * वाशब्देन साम्यं निराकृत्य पूर्वसूत्रगतस्याच्छ-
ानुषङ्गेण शास्त्रस्था स्यादित्युक्ते तस्या एव बलीयस्त्वमर्थादुक्तं
ततीति मत्वा * बलीयसीत्युक्तम् * शास्त्रानुसारावगतशब्दा- ११
गतगुणयोगनिमित्तत्वेनाप्यर्थान्तरप्रतीत्युपपत्तेर्नोभयत्र शक्तिः
हप्येत्येवमर्थत्वेन तन्निमित्तत्वादिति सूत्रावयवं व्याख्यातुम् *
ाक्तिकीत्युक्तम् * एतदेव विवृणोति * नानेति * भाष्यकृता त्वे-
स्यापि वाच्यत्वे तत्सादृश्येनेतरप्रतीत्युपपत्तेर्नोभयोः साम्यं क-
यमिति वाशब्दं व्याख्याय कः पुनरित्यादिना शास्त्रस्थेति तिष्ठत्या-
्या शिष्टपरत्वेन शास्त्रस्थशब्दो व्याख्यातः तन्निमित्तत्वादिति च
षां शिष्टानां श्रुतिधारणवच्छब्दार्थस्मृतिधारणवच्छब्दार्थस्मृतिधा-
णनिमित्तत्वादित्येवं तेषामित्यादिना व्याख्याय शास्त्रनिमित्तत्वा-
छष्टगतायाः प्रतिपत्तेरिति तस्यैवावृत्त्या[1] ते चैवमित्यादिना व्याख्या-
ानन्तरं तत्र शास्त्रस्थशब्दव्याख्यानार्थं तावद्भाष्यं व्याचष्टे * शास्त्र-
ाद्वति * तेषामित्यादिभाष्यं व्याचष्टे * सप्रत्ययेति * सप्रत्ययत-
ं तेषामुपपादयति * शास्त्रार्थेष्विति * शिष्टानां प्रत्ययिततर-
ोपपादनस्य प्रकृतोपयोगमाह * तस्मादिति * ननु शिष्टप्रतिपत्ते-
लीयस्त्वे ऽप्यविरोधादर्थान्तरस्यापि वाच्यत्वे भविष्यतीत्याशङ्का-
राकरणार्थत्वं द्योतयितुं यवशब्द इत्यादि वाशब्दव्याख्या भा-
ाभिप्रायमिदानीं व्याचष्टे * अनवस्थितेति * ते चैवमित्यादिभा-
ं व्याचष्टे * अविप्लुतश्चेति * ननु वाक्यशेषकृतस्य निर्णयस्य
वमयश्चरुरित्यादिषु वाक्यशेषरहितेष्वसम्भवात्प्रस्तुतोदाहरणग-
शब्दार्थनिर्णयो न सम्भवतीत्याशङ्क्याभिधेयनिर्णयस्यैकत्र कृत-
ाविशेषात्सर्वत्र निर्णायकत्वं वक्ष्यमाणमभिप्रेत्य परिहरति * त-
ति * भाष्यकारीयस्य करम्भविधिशेषत्वाभिधानस्य विध्यन्त-
शेषत्वव्यावृत्त्यर्थत्वशङ्कानिराकरणार्थं विध्यन्तरं दर्शयति * यव-
तीभिरिति * दीर्घशूककानिति भाष्यमुपपादयति *फाल्गुन इति*
स्माद्वराहमित्यादिवराहवेतसशब्दार्थनिर्णयार्थं वाक्यशेषान्तरो-
न्यासभाष्यं व्याचष्टे * एवमिति * त्रिवृदादिशब्दाभिप्रायं बहु- ६
ाचनम् । व्युत्पादितप्रामाण्यस्य शिष्टाचारस्यैव परस्परविरो-
ा साम्यवैषम्यचिन्ता युक्ता । नाव्युत्पादितप्रामाण्यस्य म्लेच्छा-
ाारस्य न क चित् शिष्टदेशे यवादिशब्दः प्रियङ्ग्वादिषु
ायुज्यत इति मत्वोदाहरणानि दूषयति * नन्वेतानीति *

---

१ तस्यैवावृत्त्येति २ पु० ना०

न्यायस्य फल
नन्वेतदुदाहरणासम्भवे ऽप्युदाहरणान्तरेषु न्यायस्य फल
पक्षेऽस्योदाहरणदूषणमयुक्तमित्याशङ्क्याह * अध्यारोप्येति
दाहरणान्तरसम्भवे तदेवोदाहार्यं न त्वसदध्यारोपो युक्त
ः । न चोदाहरणान्तरे ऽप्ययं न्यायो व्युत्पाद्योऽन्यत्र व्युत्पा
भावान्वयादित्याह * सन्दिग्धेषु चेति * न केवलं यवाद्
णानि न कार्याणि किं तु विचारणापि न कार्येत्यपि शब्दो
यवोदाहरणाभावात्तावन्न कार्या पौनरुक्त्यादपीति । ननु
नानिर्णयाद्वाक्यशेषबलाच्चैकत्वं घृतोपादाननिर्णये ऽन्यत्र
शेषाभावे ऽपि तदेवोपादेयमिति नियमाभावादिह त्वभिधेय
इकत्र चाभिधेयत्वेन निर्णीतस्यान्यत्रापि तद्रूपत्यागायोगात्
भिधेयत्वनिर्णयः इत्यपौनरुक्त्यमाशङ्क्य न्यायफलवैषम्ये ऽपि
न्यायैकविषयत्वनियमात्स्तुत्यस्यैव विधेयत्वमिति व्युत्पाद्य
स्वरूपैक्यादपरिहार्यं पौनरुक्त्यमित्याह * यद्यपीति * ननु न
ङ्गुकादीनां यवादिशब्दवाच्यत्वसन्देहो निराक्रियते किं तु
काद्यर्थत्वप्रयङ्ग्वादीनामपि प्रतीतिप्रयोगान्यथानुपपत्त्या प्रस
ल्पना गौणत्वेनापि प्रतीतिप्रयोगोपपादनेन निराक्रियते नास
निराकृतेत्याशङ्क्याह * तत्सिद्धिसूत्रे चेति * गौणत्वसम्भ
प्रतीतिप्रयोगमात्रेण प्रसिद्धार्थत्यागेनाप्रसिद्धार्थकल्पने जहत
भिधायित्वं स्यात्तस्य च तत्सिद्धिसूत्रे निराकरिष्यमाणत्वात्त
पौनरुक्त्यं स्यादित्याशयः । एवं शिष्टाचारयोरेव परस्परविरो
क्यशेषानुसारिणः शब्दार्थविषयप्रयोगरूपस्य शिष्टाचारस्य प्रा
मितरस्य गौणत्वेनाप्युपपत्तेरप्रामाण्यमिति भाष्यार्थं मत्वोदा
भावात्पौनरुक्त्यापत्तेश्च दूषयित्वेदानीमार्यम्लेच्छाचारयोरिह
वैषम्यचिन्ता वाक्यशेषनैरपेक्ष्येण च निर्णय इत्यभिप्रेत्य स
* तस्मादिति * वाक्यशेषनैरपेक्ष्यद्योतनार्थमन्यग्रहणं न तु
विरोधोदाहरणनिराकरणार्थम् । अनन्तदेशाग्रहणेन सर्वदे
गागावस्य केनापि निश्चेतुमशक्यत्वाद्भाष्यकृदुच्चनाच्चार्यदेशप्र
भावे ऽपि म्लेच्छदेशे क्वापि प्रयोगो ऽस्तीति निश्चयोपपत्तेः ।
कृतार्थितप्रामाण्यस्यापि म्लेच्छाचारस्यानन्तराधिकरणे शब्द
येन व्युत्पादयिष्यमाणप्रामाण्यस्य वक्ष्यमाणालोचनेन विचारो
ऽस्मिन्कृतापि शास्त्रस्थशब्दं शिष्टाभिप्रायं व्याचक्षाणेनार्थम्लेच्छ
योर्वेदाच्च साम्यवैषम्यचिन्तेति सूचितमित्यविरोधः । वाक्
यन्वारस्त्वतिशयार्थः । तत्सिद्धिसूत्रस्य च गौणवृत्तिलक्षणा
त्वान्न तेनापि पौनरुक्त्याशङ्केत्यनवद्यम् । ननु म्लेच्छाचार

ाग्रथाभावान्न साम्येन पूर्वपक्षः सम्भवतीत्याशङ्क्यादृष्टार्थव्यवहारे-
ार्यम्लेच्छयोर्विशेषाभावान्निराकुर्वन्पूर्वपक्षयति * समेति * प- १।
देव विवृणोति * आर्यास्तावदिति * आर्यम्लेच्छानां प्रयोगिणा-
ाति विग्रहः । तुल्यत्वोपपादनायोत्तराधिकरणसिद्धं शब्दार्थवि-
ये म्लेच्छाचारस्यापि प्रामाण्यं दर्शयति * सर्वो हीति * आर्य-
ुक्तवत् म्लेच्छप्रयुक्तस्यापि शब्दस्यार्थप्रत्ययाङ्गत्वप्रदर्शनार्थः सर्व-
दः । ननु गाव्यादिशब्दस्यावाचकस्याप्यर्थप्रत्यायकत्वदर्शनान्न त-
ात्रेण म्लेच्छप्रसिद्धेरर्थान्तरे यवादिशब्दानां वाचकत्वशक्तिः क-
यितुं शक्येत्याशङ्क्याह * तत्रेति * शक्तेः कारणाश्रितत्वाद्-
ात्ययकारणस्य च गाव्यादिशब्दस्यादिमत्त्वेनानादिशक्त्याश्रयत्वा-
गाद्वाचकत्वं युक्तं यवादिशब्दस्य तु यादृशस्यार्यैः प्रयोगस्तादृश-
ा म्लेच्छैरित्यविशिष्टत्वेनानादित्वावधारणेनानादिशक्त्याश्रयत्वो-
त्तेर्नाविद्यमानशक्त्यारोपकल्पनाक्लेशो युक्त इत्यविशिष्टशब्देन सू-
तम् । नन्वनादित्वे ऽपि यवादिशब्दार्थसम्बन्धानवस्थितत्वादिदो-
ात्तेरेकस्थाने ऽनेकशक्तिकल्पनायोगान्न म्लेच्छप्रसिद्धे ऽर्थे ऽनादि-
ग्रथ्यकल्पनमित्याशङ्क्याह * यथैव हीति * अगृह्यमाणविशे-
ाादक्षादिशब्दवदगत्याऽप्यनेकशक्तिकल्पनं युक्तमित्याशयः ।
ाशिष्टत्वमेवोपपादयति * नेति * ततश्च प्रयोगाव्यवदर्शनादा-
ेच्छप्रसिद्धार्थविषययोः शब्दशक्त्योरनादित्वात्कथं विशेषो ऽवग-
ामित्यर्थः । न च म्लेच्छसम्बन्धमात्रं शक्त्यभावे कारणमिति
न्तेनोपपादयति * यथैवेति * म्लेच्छैः स्वार्थे प्रयोगात्तस्मि-
र्थे शब्दो वाचकः परीक्षकाणामिष्ट इति योज्यं मुख्यत्वेनैव प्रयो-
ोणत्वशङ्कानिवृत्त्यर्थः स्वशब्दः पूर्वपक्षमुपसंहरति *तस्मादिति*
ग्रशेषनैरपेक्ष्यप्रदर्शनार्थमुदाहरणान्तरं, ननु यवाद्युदाहरणव्या-
र्थमित्युपपादितमेव । उत्तरसूत्रेण सिद्धान्तमाह * इतीति *
ास्याः पुरुषार्थेवेति भाष्यानुसारिव्याख्याभिप्रायः पूर्ववच्छब्दः ॥
ाशेषस्त्वतिशयार्थं भाष्यकृतोक्तो न निर्णायकत्वेनेत्यविरोधः श-
भ्रंशवच्चार्थापभ्रंशस्याप्युपपत्तेर्न प्रतीतिप्रयोगमात्रेणैकान्ततः स-
ार्थानामेकस्माच्छब्दात्प्रतीयमानानां वाच्यत्वनिर्णयः सम्भव-
कल्पनालाघवादेकस्यैव वाच्यत्वे निर्णीते कस्यैकस्येत्यपेक्षायां
ग्रानामभिधेयाभियोगाविशेषात्तत्प्रयोगवशेन वाच्यत्वावधारणा-
व्याख्यान्तरमाह * चेति* यथा गाव्यादिषूत्तमवृद्धेन प्र-
ाशक्त्या वोच्चारितेषु साध्वनुरूपत्वात्तदनुमानेन साधु-
मर्थं मध्यमवृद्धस्य प्रतिपादयत्सु व्युत्पित्सोर्वाचकत्वभ्रा-

न्निर्जीयते तथा म्लेच्छैर्गौण्यावृत्त्या भ्रान्त्या वा
र्थे पील्वादिशब्देन प्रतिपादिते व्युत्पित्सोर्वाच्यत्व
यतइत्यर्थः । एतदेव विवृणोति ॥ शब्देति ॥ उपसंहरति
१५०।१ ति ॥ अस्यां च व्याख्यायामार्यप्रयोगयोरपि परस्परवि
युक्ततरबलीयस्त्वं सिद्ध्यतीत्यादि ॥ एतेनेति ॥ इदानीं
स्य स्मृत्याचारयोर्विरोधे किं द्वयोस्तुल्यत्वमाचारो
न्स्मृतिर्वेति द्वेधा सन्दिह्य साम्यपक्षे समा विप्रतिपत्तिः
तावत्सूत्रं योजयति ॥ स्मृतीति ॥ पक्षद्वयोद्देशार्थो वे
तेष्वदर्शनादित्युपक्रममाचारबलीयस्त्वे योजयति ॥यद्वे
माशयः । शिष्टपरिग्रहदार्ढ्येनोभयोर्भ्रान्त्यादिमूलत्वा
थ्यात्वलक्षणस्तावद्बाधो न युज्यते किं तु यथा प्रत्यक्ष
थावदेकं श्रुतौ कर्मेत्यादिना स्मृतेरनुष्ठानाख्यफलापहार
बाधो मूलश्रुतिदर्शनं यावदुक्तस्तथात्रापि वाच्यः । न चा
कस्याचारस्यासौ सम्भवतीति । नन्वाचारस्यापि स्मृतिव
मानेनैव प्रामाण्यं न स्वातन्त्र्येण । न च स्मृत्याचारानुमि
त्योर्बलाबलविशेषो ऽस्तीत्याशङ्क्याह ॥ श्रुतिरिति ॥ स्व
त्मकत्वेनानेकरूपार्थप्रतिभाने प्रत्यक्षश्रुत्यविरुद्धार्थप्रतिप
त्तिकल्पनेन यथाश्रुतार्थत्यागलक्षणो बाधो युक्तः आचा
क्यात्मकत्वेनान्यथात्वकल्पनायोगाद्यथाशिष्टैरनुमीयते
थमित्यनुष्ठानाख्यफलनिष्ठैव श्रुतिः कल्प्यतइत्याशयः ।
वृणोति ॥ यावद्धीति ॥ अस्मिन्पक्षे तेष्वाचारेषु स्मृति
नुमानात्प्राग्विरोधादर्शनात्प्रतिष्ठितेषु बाधासम्भवाद् बल
तावद्युक्तं तदनङ्गीकरणे वरं साम्यमस्तु न त्वाचारस्य
ति सूत्रं योज्यं, द्विविधमपि पूर्वपक्षमुपसंहरति ॥तेनेति॥
वेति सूत्रेण सिद्धान्तमाह ॥ स्मृतीनां वेति ॥ स्मृत्यभि
स्त्रशब्द इत्याशयः । तन्निमित्तत्वादिति शास्त्रत्वसामान्येन
द्रेदाख्यं शास्त्रं तच्छब्देन परामृश्य श्रुतिमूलत्वं हेतुरुच्यते
यो: स्मृत्यधिकरणे प्राप्तं विरोधे पुनरुच्यमानमाचाराणां
त्वपरिसंख्यार्थं तत्रोभयोः श्रुत्यनुमापकत्वाविशेषे वि
स्मृतेरेव श्रुतिमूलत्वं नाचारस्येति कथमवसीयतइत्यपे
॥ उभयोरिति ॥ असाम्यमुपपादयति ॥ सप्रत्ययेति ॥
ब्देन ज्ञानं विश्वासो वा ऽभिधीयते ऋषित्वाच्च मन्वादेः
तधर्माण ऋषय इति स्मृतेः सकलधर्मतत्त्वज्ञानसम्पन्नत्व
दाचार्यवचः प्रमाणमिति च श्रुतेर्धर्मप्रवक्तृत्वेनावधारिता

न्वादेः सत्यवादित्वावगमादप्रतारकत्वेन विश्वास्यत्वात्तत्प्रणीतायाः
मृतेर्वेदविरोधेऽपि श्रुतिमूलत्ववारणाशक्यत्वस्योपपादितत्वादा-
ारविरोधे का कथेत्याशयः । अर्वाचीनानां तु सकलधर्मतत्त्वज्ञा-
ाभावात्प्रमादादिसम्भवाच्च तदाचारस्य श्रुतिमूलत्वकल्पने श्रुति-
मृतिविरोधो विघ्नकारीत्यर्थादुक्तं लिङ्गवाक्यवच्च सन्निकर्षविप्रक-
विशेषादपि स्मृत्याचारयोर्बलाबलविशेषोऽवसीयतइत्याह * आ-
ारास्त्विति * च शब्दार्थे तुशब्दस्मृतेर्वा साक्षाच्छ्रुतिकल्पनत्वद्यो-
नार्थः । ननु स्मृतिवदाचारस्यापि साक्षाच्छ्रुतिमूलत्वोपपत्तेः
कमन्तरा स्मृतिकल्पनयेत्याशङ्क्याह * न हीति * अयमाशयः तदा-
न्तनानां मन्वादिवत्सकलवेदार्थतत्त्वज्ञानमस्ति यतस्तदाचारस्य
ाक्षाच्छ्रुतिमूलत्वं सम्भाव्यतएवं सत्यपि यद्येकैव का
चेच्छ्रुतिः सर्वाचाराणां मूलभूता स्यात्ततस्तस्याः कथं चित्ता-
पर्यावधारणासम्भवात्साक्षादिदानीन्तनपुरुषाचारमूलत्वं सम्भा-
व्येत न त्वसौ * सम्भवतीत्युक्तम् * यद्यपि सदाचारः प्रमाणमि-
ते स्मृत्यनुरूपैका श्रुतिः कल्प्येत तथापि तस्याः सिद्धाचारानुवा-
देन प्रामाण्यप्रतिपादनमात्रपरत्वेनाचारप्रवर्त्तकत्वाभावान्मूलत्वं न
सम्भवतीति दर्शयितुम् * प्रवर्त्तिकेत्युक्तम् * यत्तु यद्याशिष्टात्मतु-
ष्टीनामित्यादिनाशिष्टानुष्ठानमात्रेणाचारादीनां श्रेयःसाधनत्वाद्वि
वेधायकश्रुत्यपेक्षेत्युक्तं तच्छ्रुतिस्मृतिविहितो धर्मस्तदलाभे शिष्टा-
चारः प्रमाणमिति वशिष्ठवचनपर्यालोचनया मानवीयस्यापि वेदो
ऽखिलो धर्ममूलमिति स्मृत्याचारादिष्वनुषक्तस्य धर्ममूलशब्दस्य ।

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥

इति लक्षणशब्दस्य च प्रमाणपरत्वावसायात्प्रौढिमात्रमित्य-
वगम्यते । भिन्नानामप्याचारमूलभूतानां श्रुतीनां मिलितानामेकत्र
पाठे तात्पर्यावधारणं सम्भाव्यते तासां तु नानाप्रकरणस्थानां वि-
ध्यन्तरशेषत्वेन पठितानां पुरुषधर्माचारविधिपरत्वस्याल्पप्रज्ञैरि-
दानीन्तनैर्निर्णेतुमशक्यत्वाच्छिष्टाचारपारम्पर्यस्मृत्यैव कस्य चिद् ब-
हुवेदविदः प्रज्ञातिशयसम्पन्नस्याचारमूलश्रुतितात्पर्यावधारणमासी-
दिति कल्पयित्वेदानीन्तनशिष्टप्रवृत्तिर्भवति स्मृत्या व्यवायः श्रुतिक-
ल्पनस्येति विप्रकीर्णत्वमुपपादयति * नेति * विध्यन्तरशेषत्वेन
स्तुतिमात्रत्वेनावभासमानस्यापि सिद्धवत्सङ्कीर्तनान्यथानुपपत्तिप्रा-
पकविध्याक्षेपकत्वकल्पनाक्लेशः कथं चिच्छब्देनोक्तः । आचारमूल-
श्रुतीनां तात्पर्यावधारणक्लेशप्रदर्शनायैवोदाहरणानि दर्शयन्पाञ्च

धारणपूर्वकभोजनाचारमूलभूतां तावच्छ्रुतिमुदाहरति *
नि * क्रत्वर्थत्वशङ्कासूचनार्थः प्रकरणोपन्यासः स्तुतिमा
त्रार्थं विध्यन्तरशेषत्वोपन्यासः । एकेन परिगृह्येतरेणात्ती
र्थः । कथं तर्ह्याचारपरविधिपरत्वनिर्णय इत्याशङ्क्य *
त्याशुक्तम् * नन्वन्नस्कन्दनशङ्कापरिहारार्थत्वेन पात्रधा
प्राप्तस्यानुवादोपपत्तेर्नात्र विधिः कल्पनीयोऽत आह *
दिति स्वस्यकृपात्रप्रतिष्ठापनेनाप्यन्नस्कन्दनशङ्कापरिहारोप
मार्थो विधिः सम्भवतीत्याशयः । स्वभावात्प्रयोजनवश
नियता प्राप्तिः स्यान्न त्वेतदुभयमप्यत्रास्तीति दर्शयितुं वैपरी
त्यम् । दक्षिणहस्तभोजनाचारमूलभूतां श्रुतिमुदाहरति
मिति * स्त्रीणां पूर्वं सव्याक्षयं जनाचारमूलमुदाहरति *
शेषिभूतविध्यन्तरोपन्यासस्य प्रयोजनमुक्तम् । स्त्रीणां पत्यन्त
चारस्य मूलमुदाहरति * तथेति * रजस्वलाचारमुदाहरति
र्थेति * विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीदिति
तस्य वज्रमादाय शीर्षाण्यच्छिनदितीन्द्रस्य त्वाष्ट्रवधनिमि
त्याप्राप्तिमुक्त्वा स पृथिवीमुपासीदस्यै ब्रह्महत्यायै तृतीयं
गृह्णात्यादिपृथिव्यादीनां ब्रह्महत्याविभागमुपक्रम्य स स्त्रीः
पासीदस्यै ब्रह्महत्यायै तृतीयं प्रतिगृह्णातीन्द्रप्रार्थिताः
तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्निति ब्रह्महत्यायास्तृतीयस्य
प्रतिग्रहं तन्निमित्तं च मलवद्वासस्त्वमुक्त्वा न मलवद्वास
संवदेन्नास्या अन्नमद्यादिति तदुपगमनं निषिध्य यां मलवद्व
सम्भवति यतस्ततो जायते सोऽभिशस्तो यामरण्ये तस्यै तस्यै
पराचीं तस्यै ह्रीतस्य मुख्यप्रगल्भा इत्युपगमननिषेधशेषभूतां
मुक्त्वा तत्प्रस्तावेनागतानां रजस्वलाव्रतानां या स्नाति तस्याः
ऽङ्का याभ्यङ्क्ते तस्यै दुश्चर्मा याप्रलिखते तस्यै खलतिरपमा
तस्यै काणो या दतो धावते तस्यै श्यावदन्ता या नखानि
ते तस्यै कुनखी या कृणत्ति तस्यै क्लीबो या रज्जुं सृजति
उद्बन्धुको या खर्वेण पिबति तस्यै खर्वस्तिस्रो रात्रीर्व्रतं च
स्नानादिनिन्दाद्वारेणोक्तानामग्नीषोमीयपुरोडाशयागविधिशे
प्रणीयमानानां प्रकरणातिक्रमेण स्त्रीधर्मत्वावधारणमाचा
रास्मृत्या विना न शक्यमित्याशयः । अतो नानाप्रकरण
पुरुषधर्मविधिपरत्वकल्पनविक्षेपलक्षणाद्विप्रकीर्णत्वाच्छिष्टा
रूपपर्यस्मृत्या विनैकार्थे तात्पर्योपसंहारो न सम्भवतीत्युपसं
एवं चेति * ततश्चाचारप्रामाण्यस्य सिद्धान्तस्मृत्यन्तरितत

ह * तेनेति * सिद्धान्तमुपसंहरति * तस्मादिति * लोकवेदगतयोर्वाशब्दार्थप्रसिद्ध्योर्विरोधे साम्यवैषम्यविचारार्थं तेष्वदर्शनादित्यादिसूत्रद्वयमिति वर्णकान्तरमाह * त्रिवृदिति * एकस्यापि वाच्यत्वे सादृश्येनेतरत्र प्रतीतेः प्रयोगोपपत्तिशङ्कानिराकरणार्थम् * विलक्षणइत्युक्तम् * एकेति लौकिक्येव वैदिक्येव वेति पक्षद्वयमुक्तम् । त्रिवृच्छब्दे विप्रतिपत्तिं दर्शयति * लोके तावदिति * स्तोत्रीयागतनवको विवक्षितः । कथं वेदे स्तोत्रीयानवकार्थत्वप्रसिद्धिरित्यपेक्षायामाह * त्रिवृदिति * उपास्मै गायता नरो दिवि द्युतत्या रुचा पवमानस्य ते कव इति तृचत्रयानुक्रमणान्नवभिः स्तुवन्तीति स्तुत्यन्तरदर्शनात्स्तोत्रियां नवकविषयत्वं त्रिवृच्छब्दस्यावसीयतइत्यर्थः । चरुशब्दे विप्रतिपत्तिं दर्शयति * तथेति * याज्ञिकप्रसिद्धिं दर्शयति * अनवस्रावितेति * भक्तव्यावृत्त्यर्थमनवस्रावितविशेषणं वैषम्यानपेक्षपाकमात्रनिमित्तत्वदर्शनार्थमन्तरूष्मपक्वग्रहणं वेदे प्रसिद्धिं दर्शयति * तथेति * आदित्यं चरुं विधायाज्यस्यैनं चरुमभिपूर्य चतुराज्यभागान्यजति पथ्यां स्वस्तिमिष्ट्वाऽग्नीषोमौ यजति अग्नीषोमाविष्ट्वा सवितारं यजत्यादितिमोदनेनेति क्रमपरे वाक्ये सिद्धवदनुवादादोदनवाचिता चरुशब्दस्य ज्ञायते । आश्वलावशब्दे विप्रतिपत्तिं दर्शयति * एवमिति * वेदप्रसिद्धिं दर्शयति * एवं हीति * ऐक्षवीशब्दे ऽव्यादिशब्दोपात्तां विप्रतिपत्तिं दर्शयति * ऐक्षव्याविति * विषयं दर्शयित्वा साम्यपक्षे तावत्सूत्रं योजयति * एवमादिष्विति * आदिशब्दः स्तोमशब्दाभिप्रायः । भाष्यकृद्व्याख्याने कः पुनरत्र निश्चय इति सिद्धान्तवेलायां प्रश्नदर्शनाद्विप्रतिपत्तिशब्दस्य सन्देहार्थत्वप्रतीतेस्तद्व्यावृत्त्यर्थं विपर्ययार्थत्वे विप्रतिपत्तिशब्दं व्याख्यातुम् * प्रतिपत्तिविपर्ययइत्युक्तम् * हिशब्दः पादपूरणार्थः । तेष्विति सूत्रावयवव्याख्यातुमाशङ्कते *ननु चेति * सूत्रावयवेनाशङ्कां निराकरोति *नैतदिति* अनेन च तेषु पदार्थेषु वाक्यार्थवदतीन्द्रियत्वाभावेन लोकविषयत्वविरोधस्यादर्शनादिति सूत्रावयवो व्याख्यातः । साम्यपक्षमुपसंहरति * तस्मादिति * लौकिकप्रसिद्धिबलीयस्त्वपूर्वपक्षमप्य नेनैव सूत्रेणाह * यदि चेति * लौकिकप्रसिद्धिबलीयस्त्वहेतुतया तेष्विति सूत्रावयवेनोक्तमनुपसञ्जातविरोधित्वं साधयितु * पूर्वभावित्वादित्युक्तम् * पूर्वभावित्वमुपपादयति * वेदेति * नन्वेवं सति वेदस्य पदार्थावधारणोपायत्वाभावेन क्वचिदपि वैदिकप्रसिद्ध्यभावाद्विचार एवायं नोपपद्यतेत्याशङ्क्याह * तत्रेति

अत्रैव सूत्रं योजयति * तेष्विति * तेष्वदर्शनाद्विरोधस्ये
त्ययस्य नेष्वेवादर्शनाद्विरोधस्येत्यभिप्राय इत्यन्वयः । उ
शेषस्याम्नायापत्तिशङ्कानिवृत्त्यर्थमवधारणम् । किमस्मिन्व
शब्देन परामृष्टमित्यपेक्षिते तेष्विति व्याख्यातम् । पू
च्याविरोधकारणं पूर्वोक्तमभिप्रेतमर्थवादानां चेत्यादिना व
मुक्तम् । अर्थवादानां न पदार्थप्रतीत्यङ्गत्वसम्भवस्तीयतइ
त्यपेक्षायां संज्ञासंज्ञिसम्बन्धस्य कारणे व्युत्पादने च व्य
यादित्युक्तम् । तद्धेतुत्वेनान्यपरत्वे ऽभिहिते किं परते
प्ररोचनार्थत्वमुक्तम् । कथं प्ररोचनेत्यपेक्षिते गुणेत्युक्त
गुणेष्विष्टादौ श्रुतिप्रवृत्तिसम्भवात्प्रायग्रहणम् । आदित्यो
प्रमाणः प्रस्तरः स्वर्ग आहवनीय इति वचनत्रयं दृष्टान्तः ।
पदार्थ प्रत्यौदासीन्येन वाक्यशेषेष्वपि विरोधादर्शनादवधा
कथमित्याशङ्क्य पदार्थप्रतिपादनपरत्वाश्रयणे विरोधाप
धारणमुपपादयति * तदाश्रयणे चेति * विरोधस्यैवेत्य
वा शास्त्रस्य प्रसिद्ध्यानुगुण्यमेवानेन सूत्रावयवेनोच्यत इत
र्थेति * रक्षारम्भकेषु तन्तुषु नवसंख्यासद्भावे ऽप्युपवीता
यारम्भार्थेगुणत्रयविधानार्थं त्रिवृच्छब्दः । अस्मिन्पूर्वपक्षे स
नुपपत्तिमाशङ्क्य काका योजयति * तस्मादिति * वैदिक
शब्दीयस्त्वे सिद्धान्तसूत्रं योजयति * इतीति * न केवलं
धनात्मकं धर्मस्वरूपमेव शास्त्रं प्रमाणकं किं त्वङ्गमपि फलं
गादीति वक्तुम् * साधनेत्युक्तम् * यत्त्वर्थवादानामन्यप
दार्थप्रतीत्यनङ्गत्वमुक्तं तत्रान्यपरत्वे ऽपि विधिस्तुत्योरेका
नियमात्स्तुतिविषयस्यार्थस्यान्यथानुपपत्त्या विधिविषयत्वप्र
योपसंहारगतस्यापि विध्युद्देशेनाग्रहणं निरालम्बनत्वेनार्थव
क्यापत्तेरानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्याया
यस्त्वमित्याह * अर्थवादेति * अपिशब्देन बहिष्पवमाने
त्रयानुक्रमणस्य स्तोत्रीयाविधानार्थत्वात्तार्थवादतेत्यपि सूचि
मन्त्रार्थवादावगतस्यार्थस्य विध्युद्देशेन ग्रहणे त्रिवृदादिशब्दा
विधानवकादिवाचित्वेन वृद्धव्यवहारादनवगते विधौ गौण
मित्याशङ्क्याह * गौणो वेति * प्रमाणाभावेनान्यत्र विधौ
नार्थायेत इह तु वेदप्रमाणकत्वाद्गौणत्वमप्ययुक्तमित्याशयः ।
ननु त्रिवृदादिशब्दानां स्तोत्रीयानवकादिष्वपि गुणयोगात
न्मुख्यत्वमेवाभिमतम् । नन्वेवमपि तृचत्रयानुक्रमणेन नव
वन्तीति वचनेन बहिष्पवमाने स्तोत्रीयानवकप्राप्तेस्त्रिवृद्रूप

कमित्याशङ्क्य तृचत्रयानुक्रमेण नवकवचनयोरभावे ऽपि त्रिवृदग्नि-
ष्टोम इत्यादौ नवकसिद्धिरस्य विचारस्य प्रयोजनमिति दर्शयितुमाह
* त्रिवृच्छब्द इति * एतदेवास्य विचारस्य प्रयोजनं दशमे त्रिवृद-
ग्निष्टोम इत्युदाहृत्य किमग्निष्टोमसाधनमात्रगतसंख्याविकारिकेयं
त्रिवृत्संख्या स्तोमगतसंख्याविकारिका वेति सन्दिह्य त्रिवृद्रज्जुरि-
त्यादौ लोके त्रिवृच्छब्दस्य त्रैगुण्यमात्रवाचित्वदर्शनाद् बहिष्पवमा-
नस्य च तृचत्रयानुक्रमणादेः स्तोत्रीयानवकावगतिकारणस्याभा-
वात् त्रिवृत्त्वस्य च संख्यात्वसामान्येन संख्यामात्रकार्ये विनियोगप्रती-
तेः सर्वसंख्याविकारिका त्रिवृत्संख्येति त्रिवृत्संख्यात्सर्वसंख्याविका-
रः स्यादिति सूत्रेण पूर्वपक्षयित्वा त्रिवृद्बहिष्पवमानमित्युक्त्वा स्तो-
त्रीयानवकाम्नानात्त्रयास्त्रिकपालाः त्रिवृता स्तोमेन सम्मिता इति च
नवानां कपालानां त्रिवृता स्तोमेन समानवचनात्त्रिवृच्छब्दस्य स्तोत्री-
यानवकवाचित्वप्रतीतेरत्रोभयसम्भवे ऽपि वैदिकत्वसामान्येन स्तो-
त्रीयानवकविषयत्वावधारणात्स्तोमगतैव पञ्चदशत्वादिसंख्या त्रिवृ-
त्संख्यया बाध्यत इति स्तोमस्य वा तल्लिङ्गत्वादिति सूत्रेण सिद्धान्त-
यदतोपपादयिष्यते । प्रसङ्गादादिशब्दोपात्तस्य स्तोमशब्दस्य लोकप्र-
सिद्धसमुदायमात्रवचनत्वातिक्रमेण स्तोत्रीयासमुदायवचनत्वं वेद-
याज्ञिकव्याकरणप्रसिद्धिबलेनाहैवमिति । तथाप्यवश्यमेव त्रिवृ-
दादिषु दृष्टव्य इत्यध्याहृत्य योज्यं, लौकिक्याः समुदायमात्रवचन-
त्वप्रसिद्धेः का गतिरित्यपेक्षायां * लोकेत्युक्तम् * ननु त्रिवृच्छब्दस्य
स्तोत्रीयानवकवचनत्वे विप्रस्योर्ध्ववृतं त्रिवृते त्रिवृता ग्रन्थिनैकेना-
नुवचनमयुक्तं स्यादित्याशङ्क्य पौरुषेयवाक्येषु लोकवेदप्रसिद्ध्यो-
स्तुल्यबलत्वेन यथासम्भवं प्रसिद्ध्यनुसारोपपत्तेरिह त्रैगुण्यवाचि-
त्वमाश्रित्य परिहरति * पौरुषेति * उपवीतारम्भिकाया वा रज्ज-
नवतन्तुकारभ्यत्वात्तस्या एव च ग्रन्थ्यारम्भकत्वाद्वैदिकप्रसिद्ध्य-
नुसारेणैव अनुवचनं युज्यत इत्याह * यद्वेति * ननु वेदे ऽपि त्रि-
वृद्वलीति रशनात्रैगुण्यप्रयोगदर्शनाल्लौकिकीप्रसिद्धिराश्रितेत्याश-
ङ्क्य तत्रापि मौञ्ज्या याज्ञिकप्रसिद्ध्यनादरेण वैदिकप्रसिद्ध्यनुसारात्त्रि-
गुणत्वं भविष्यतीत्याह * तथेति * अयं तु पक्षः स्तोत्रीयाख्यार्थ-
स्यैकेनाप्यत्र नवकसंख्यायां त्रिवृच्छब्दप्रयोगाभावादयुक्त इति वेद-
सिद्धस्तोत्रीयागतनवकसंख्यारूपार्थासम्भवाद्रशनादौ वेदविरोधा-
भावाल्लोकप्रसिद्धं त्रैगुण्यमेव ग्राह्यमित्याह * यद्वेति * ननु स्तोत्री-
यागतनवकवाचित्वेन शोणादिवन्नवकत्वावान्तरजात्यभावादाकृ-
त्यधिकरणविरुद्धं विशिष्टवाचित्वं प्रसज्येतेत्याशङ्क्य यथैवेत्युक्तम्

यत्र विशेषणमात्रे शक्तौ कलितायां[1] तदविनाभावाद्विशे
युज्यते तदेवाकृत्यधिकरणस्य विषयः । अविनाभावाभ
वादिशब्दानां पुत्राभार्याभावे यांचादिविशिष्टवाचित्वा
वृद्धव्यवहारावसेये चार्थे अन्वयव्यतिरेकाभ्यां निकृष्ट
ल्प्येतेह तु त्रिवृद्बहिष्पवमानमित्युक्त्वा स्तोत्रीयानवकानु
वसंख्यायास्त्रिवृच्छब्दवाच्यत्वं कल्प्यमानं स्तोत्रीयागताय
ल्पयितुं शक्यं न शुद्धायाः प्रमाणाभावादित्याशयः ।
विशिष्टस्य नवकत्वस्य वाच्यत्वात्तदेकदेशस्य नवकत्वस्य
भिप्रेतम् । आश्रयबलाबलानादरेण स्वरूपबलाबलवशा
णायमभिप्रेत्य * उत्तरसूत्रइत्युक्तम् * चरुशब्दस्य त्वोद
नेव स्थाल्यां प्रयोगोपपत्तेर्लौकप्रसिद्धे ऽर्थे शक्तिर्नैव कल्प्येत
थेति * सौर्यं चरुं निर्वपेदित्यादौ वाक्यशेषाभावे ऽप्योद
युक्तत्वादित्यत्र चरुशब्दस्य वेदयाज्ञिकप्रसिद्धिभ्यामोदनम
त्वावसायादोदनस्यैव ग्रहणमिति दशमे वक्ष्यमाणं चरु
त्यपिशब्देन सूचितम् । अन्यत्राप्योदनविषय एवेत्यर्थः ।
वर्णके दाशमिकयोस्त्रिवृच्चर्वधिकरणयोः एतदधिकरणप्रयो
पादनार्थत्वान्न पौनरुक्त्यम् । याज्ञिकशब्दस्य पूर्वनिपातेन वेद
निरपेक्षस्य याज्ञिकवृद्धव्यवहारस्य वाच्यवाचकभावावग
त्कारणत्वेनाभ्यर्हितत्वं सूचितम् । आश्ववालैक्षवीशब्द
मुदायप्रसिद्धेर्बलीयस्त्वेनापि दुर्बललौकिकावयवप्रसि
काशतन्मूलवाचित्वमेवावसीयतइत्याह * आश्ववालेति
दीर्घश्लक्ष्णपत्राणां काशानामश्वकेशैः सादृश्यादश्ववालश
शेषु गौणप्रयोगोपपत्तेर्न समुदायस्य शक्त्यन्तरकल्पनं युक्त
ख्यातिमकायाः समुदायप्रसिद्धेः कथं बलीयस्त्वमित्याशङ्क्य
स्यापि [illegible] त्वाद् बलीयस्त्वमाह * अथापीति
[illegible]नेन यजेतेति विहिते याग [illegible]धिकरणयाच्छ्येननाम
सिद्धेर्नैकशक्तिकल्पनाभयाद्वाच्यवाचकभा[illegible]भ्युपगमे ऽपि
श्येनो निपत्यादत्त एवं मयं द्विषन्तं भ्रातृव्यं निपत्याद[illegible]
वगतनिपत्यादायकत्वसादृश्येन श्येनपक्षिजात्योपमिते गौणत
णावाप्तप्रसिद्धिः । श्येनशब्दः पुनरिषुयागे धर्मातिदेशाय सम
तरच्छ्येनेनेति प्रयुज्यमानो गौणो ऽपि वेदक्लृप्तत्वाद्यागविषय
वाश्रीयते तथाश्ववालशब्दो ऽप्याश्ववालः प्रस्तर इत्यत्र वाक्य
त्काशविषयत्वेन प्रतीयमानो ऽनेकशक्तिकल्पनाभयात्तद्वाचकत्वा

१ कल्पितायामिति २ पु० पा० ।

पगमे ऽपि दीर्घश्लक्ष्णत्वादिसादृश्याद्गौणत्वद्वारेण काशेष्वेवाप्तप्रसिद्धिर्वाक्यशेषाभावे ऽपि वेदक्लृप्तत्वात् काशविषयत्वेनैवाश्रीयतइत्यर्थः। नन्वश्ववालशब्दस्य गौणत्वाभ्युपगमे गौणतायाः पदान्तरसामानाधिकरण्यसापेक्षत्वेनासामर्थ्यापत्तेराश्ववाल इति तद्धितानुत्पत्तिप्रसङ्गान्नाश्ववालशब्दस्य गौणत्वं युक्तमित्याशङ्क्याभ्युपगमवादमात्रत्वमस्य प्रकटयितुमाह * अथापीति * यद्यपि गौणत्वं न च ते वालाः काशतां प्राप्ता इति काशरूपेणाश्वस्य वालानां परिणामाभिधानात्प्रकृतिविकारयोश्च सादृश्यसम्भवाच्छब्दावगतप्रकृतिविकारभावमात्रेणोत्प्रेक्षितं न वास्तवमिति शब्दग्रहणेन सूचितम्। वेदस्य सम्बन्धिदृष्टमवगतं चेन्न केनापि वार्यते स्वतन्त्रत्वेनापौरुषेयत्वेन वेदे दोषाशङ्कानुपपत्तेरित्यर्थः। ननु धर्मातिदेशादिव्यवहारसिद्ध्यर्थं केन चिद् गुणयोगेन श्येनशब्दस्य यागविशेषनामत्वाङ्गीकरणमर्थवत्पुरोडाशानलं कुर्वित्यादौ च लाघवार्थं पुरोडाशशब्देन धानादिहविःपञ्चकलक्षणार्थे वेतीह तु मुख्येन काशशब्देनैवं प्रस्तरविधिसिद्धेर्गौणलाक्षणिकाश्ववालशब्दानर्थक्यापत्तिः मुख्यत्वे त्वाश्ववालः प्रस्तरः कार्यः काशाश्चाश्ववालशब्देनोच्यन्ते इत्यनेकार्थपरत्वापत्तेर्वाक्यभेदः प्रसज्येतेत्याशङ्क्याह * गौणमिति * काशाश्ववालशब्दयोर्वाच्यवाचकत्वाभावे निरालम्बनवाक्यशेषापत्तेरगत्या वाक्यभेदो ऽपि वेदाङ्गीकृतत्वान्न दोषमावहति परमार्थतस्तु विधिस्तुत्येकवाक्यत्वान्यथानुपपत्त्यैवात्र वाच्यवाचकत्वप्रतीतेर्न वाक्यभेदो ऽस्तीति वाशब्देन सूचितम्। ननु वाक्यशेषबलेन त्रिवृदादिशब्दार्थनिर्णये पूर्वोक्तमेव पौनरुक्त्यं स्यादित्याशङ्क्याह * न चात्रेति * असन्दिग्धत्वमेव विवृणोति * लौकिकीति * एतद्वर्णकसिद्धान्तमुपसंहरति * बाधतइति * सुखग्रहणार्थं वर्णकत्रयसिद्धान्तं सङ्क्षिपति * तस्मादिति * आद्ये वर्णके शास्त्रशब्देन शास्त्रानुसारित्वादार्या विवक्ष्यन्ते। द्वितीये स्मृतिः। तृतीये वेदः। मुक्तकानां नियमशून्यानां म्लेच्छानामाचारैरित्याद्यवर्णके ऽर्थः। मुक्तकैरनिबद्धैरितीतरयोः सदाचाराणां स्मृतिव्यवधानाद्धर्मविप्रकर्षः * इतरेषां त्वसम्बन्धादेव *

॥ अथ म्लेच्छप्रसिद्धार्थप्रामाण्याधिकरणम् ॥ ६ ॥

चोदितं तु प्रतीयेताविरोधात्प्रमाणेन ॥ ९ ॥

अत्र भाष्याच्छास्त्रस्थम्लेच्छप्रसिद्ध्योर्बलाबलचिन्तेति प्रतिभाति तच्च म्लेच्छाचारप्रामाण्यस्य प्रागव्युत्पादितत्वादयुक्तमाशङ्क्य

ब्दार्थविषये म्लेच्छाचारप्रामाण्याप्रामाण्यचिन्तापरत्वेन सन्देह-
भाष्यं व्याचष्टे * ये शब्दा इति * म्लेच्छप्रसिद्धार्थाग्रहणे ऽपि का-
ऽ शब्दानर्थक्यमाशङ्क्य भाष्यकृता धातुतो ऽर्थः प्रकल्पयितव्य इत्यु-
त्यभिधानादार्यप्रसिद्ध्यभावे ऽपि म्लेच्छप्रसिद्धार्थो न ग्राह्य इति
र्वपक्षवचनव्यक्तिः सूचितेत्याशयः । किमत्र सन्देहकारणमित्यपे-
ायामाश्रयस्वरूपबलाबलविसंवादं सन्देहकारणं दर्शयितुमाह *
थेति *प्रकृतचिन्तासिद्ध्यर्थम् । एतदपि चिन्त्यते इति तथाशब्दार्थः ।
नेरुक्तव्याकियाद्वारेत्यनेन शास्त्रस्थत्वमवयवप्रसिद्धित्वं सूचितं स-
ुदायप्रसिद्धिर्वा बलीयसीत्यनुषङ्गः । ननु पद्धे वचनात्पृथक्कार-
प्राधानस्य सर्वशेषत्वादित्यत्राधिकरणे समुदायप्रसिद्धेरवयवप्रसि-
द्धितो बलीयस्त्वस्य वक्ष्यमाणत्वात्समुदायावयवप्रसिद्ध्योर्बलाब-
ऽचिन्ता पुनरुक्तेत्याशङ्क्य * म्लेच्छस्यैवेत्युक्तम् * शास्त्रस्थप्रसिद्धि-
लीयस्त्वे समुदायप्रसिद्धिर्म्लेच्छेष्वेव तिष्ठति नार्यगामिनी भवति
ार्यान्प्रत्यात्मानं लभतइत्यर्थः । अथ वावयवप्रसिद्धित्वेन तस्या
ौर्बल्यात्समुदायप्रसिद्धिराचार्यानपि प्रति भवेदात्मानं लभतइत्य-
ः । समुदायप्रसिद्धेरेवात्र प्रामाण्याप्रामाण्यरूपात्मलाभसद्भा-
ावसिद्ध्यर्थं निरुक्तादिद्वारप्रसिद्धिबलाबलविचारः क्रियतइत्याश-
ः । यद्वा किं निरुक्तादिद्वारा प्रसिद्धिः शास्त्रस्थत्वाद् बलीयसी
लेच्छस्यैवं वा समुदायप्रसिद्धित्वादित्येकं विचारप्रकारमुक्त्वा किं
िरुक्तादिद्वारावयवप्रसिद्धिर्वा म्लेच्छस्थत्वादिति प्रकारान्तरसूच-
ार्थत्वेन वाथवा शब्दो योज्यः । यद्वा शास्त्रस्थम्लेच्छप्रसिद्ध्योः
ा बलीयसीत्येवं प्रकारमुक्त्वा म्लेच्छस्यैव वा किं म्लेच्छस्थत्वाद्दु-
र्बला समुदायप्रसिद्धित्वाद् बलीयसीत्येवं विचार्यो भवेदिति प्र-
ारान्तरप्रतिज्ञानार्थो ऽथवा शब्दः म्लेच्छस्यैव प्रसिद्धिर्विचार्या
वेदित्युक्ते कथं विचार्येत्यपेक्षायां विचारस्वरूपं सोपपत्तिकं दर्श-
ति * म्लेच्छस्थप्रसिद्धिरिति * पूर्वव्याख्यानयोरप्येतदेव प्रकारा-
तरमप्रतिज्ञातमेवानेन ग्रन्थेन प्रतिपाद्यतइति विशेषः । निरुक्तादि-
ारैव वा प्रसिद्धिः किं शास्त्रस्थत्वाद् बलीयसी अवयवप्रसिद्धित्वा-
ा दुर्बलेति प्रकारान्तरमाह * तथेति * भाष्ये ऽपि निगमनि-
व्याकरणवशेनेत्यनेनावयवप्रसिद्धेः शास्त्रस्थत्वं बलीयस्त्वहेतु-
मुक्तम् । कल्पयितव्य इति कल्पनीयत्वं दौर्बल्यकारणम् । म्ले-
ा इति च समुदायप्रसिद्धेर्म्लेच्छस्थत्वं दौर्बल्यकारणमुक्तम् ।
ाचरन्तीति क्लृप्तत्वं बलीयस्त्वकारणमिति विवेकः । शिष्टाचार-
त्यादिपूर्वपक्षभाष्यं सन्देहभाष्यव्याख्यानोपसंहारपूर्वकं व्याचष्टे

एवमिति * म्लेच्छप्रसिद्धौ प्रयोक्तृदौर्बल्यं स्वरूपबलीयस्त्वमि-
त्र प्रयोक्तृबलीयस्त्वं स्वरूपदौर्बल्यमित्युपपत्तिचतुष्टयान्म्लेच्छ-
सिद्धप्रामाण्याप्रामाण्यसन्देहे सिद्ध इत्यर्थः । पूर्वापवादत्वेनानन्त-
ङ्गतिसूचनार्थं सूत्रोपन्यासः । पिकादिशब्दार्थप्रसिद्धेः शास्त्रस्थाना-
सिद्धत्वात्कथं बलीयस्त्वमित्याशङ्क्य * कल्प्यापीत्युक्तम् * नावक्लृ-
प्ताः स्वरूपेणैवासत्त्वात्कथं बलीयस्त्वमित्याशङ्क्य साधुमूलबलेना-
ङ्कृप्ता अपि साधयितुं शक्यत्वादिति परिहरति * तन्मूलस्येति *
समुदायप्रसिद्ध्यावयवप्रसिद्धिबाधात्कथं प्रामाण्यमित्याशङ्का-
राकरणार्थं नाशिष्टस्मृतेरिति भाष्यावयवं व्याचष्टे * न सिद्ध-
ेति * म्लेच्छप्रसिद्धे ऽर्थे वैदिकानां शब्दानां समुदायप्रसिद्धेरा-
त्मलाभासम्भवान्नावयवप्रसिद्धेर्बाधकमस्तीत्याशयः । सिद्धमप्य-
मूलं न प्रमाणमिति लुप्तभावप्रत्ययप्रमाणशब्दानुषङ्गेण योज्यम् ।
शब्दार्थसम्बन्धस्य वृद्धव्यवहारमात्रप्रमाणकत्वान्म्लेच्छव्यवहा-
रापि तत्र प्रामाण्योपपत्तेः कथमाश्रयदोषेण दुष्टत्वमित्याशङ्क्या-
भ्युपगम्यापि तावन्म्लेच्छव्यवहारस्य शब्दार्थसम्बन्धे प्रामाण्यं वै-
दिकशब्दानां म्लेच्छप्रसिद्धार्थाभिधायित्वं न सम्भवतीत्याह * क-
थमिति * गृहीतसम्बन्धस्य श्रुतस्य शब्दस्यार्थाभिधायकत्वान्म्लेच्छा-
च सम्बन्धग्रहणसम्भवे ऽपि वैदिकशब्दश्रवणाभावात्त्रैवर्णिकानां
र्णानां म्लेच्छसम्भाषणनिषेधेन तत्प्रसिद्धार्थसम्बन्धग्रहणास-
वान्नार्यान्प्रति समुदायप्रसिद्धेरात्मलाभः सम्भवतीत्याशयः ।
च्छप्रसिद्धार्थग्रहणे च निगमादीनामानर्थक्यापत्तेस्तद्ग्रहणं न
मिति प्रतिपादनार्थं निगमादीनां चेति भाष्यं म्लेच्छप्रसिद्धा-
भावे निगमादीनामर्थवत्त्वोपपत्तेरयुक्तमाशङ्क्योपपादयति * एवं
े * म्लेच्छप्रसिद्धेः प्रमाणत्वे सतीत्यर्थः । ननु सर्वम्लेच्छदेशा-
णे ऽपि यस्यार्थस्याप्रसिद्धिः स निगमादीनां विषयो भविष्य-
माशङ्क्याह * अनन्तेति * शङ्कामेवोपपादयति * अनन्तेषु
े * को ऽर्थः क देशे सिद्ध इत्यर्थः । सर्वम्लेच्छदेशान्वेषणे तु
शङ्कादुष्परिहरेत्याह * निगमादीति * अस्मत्पक्षे त्वार्यावर्तदे-
ाल्पत्वेन सर्वान्वेषणसम्भवात्तदप्रसिद्धो ऽर्थो निगमादीना वि-
भविष्यतीत्याह * म्लेच्छाचारेति * उपसंहरति * तस्मा-
त् * म्लेच्छव्यवहारस्य शब्दार्थसम्बन्धे प्रामाण्यमभ्युपगम्य १
कशब्दार्थावधारणं म्लेच्छव्यवहारान्न * सिद्ध्यतीत्युक्तम् *
ार्थतत्त्वानभियुक्तत्वान्म्लेच्छानां न तद्व्यवहारः शब्दार्थसम्ब-
प्रमाणमिति प्रतिपादनार्थमनभियोगश्चेत्यादिभाष्यं व्याचष्टे *

धर्मे चेति * नन्वपभ्रष्टस्य शब्दस्यार्थतत्त्वानवधारणे ऽपि संस्कृ
शब्दस्य म्लेच्छव्यवहारादप्यर्थतत्त्वावधारणं भविष्यतीत्याशङ्क्या
न चेति * न म्लेच्छभाषां शिक्षेतेति तद्भाषानिषेधसूचना
भाषणमित्युक्तम् ननु पिकादिशब्दानां वेदतदभियुक्तप्रयुक्त
संस्कृतानां म्लेच्छभाषायां दृष्टत्वादसत्त्ववचनमयुक्तमित्याशङ्क्
संस्कृतेति * अविभक्तिकत्वात्संस्कृतसदृशास्तैः प्रयुज्यन्ते
सादृश्यमात्रेण शालाशब्दस्येव मालाशब्दार्थवाचकत्वं युक्तमित्य
यवादिशब्दानां ऽचार्थान्तरे प्रयोगाच्च म्लेच्छव्यवहारेणार्थतत्त्व
वसाय इति द्योतनायार्थान्तर * इत्युक्तम् * संस्कृतप्रतिरूपे
म्लेच्छप्रयुक्तेभ्यः । संस्कृतशब्दकल्पने अनेकविधोत्प्रेक्षासम
च व्यवस्थितशब्दार्थावधारणं सम्भवतीत्याह * आर्याश्चेति *
पदान्तराक्षरोपेतं कल्पयन्तीत्यपेक्षिते कदा चनेति * प्रका
मुक्तम् * यन्म्लेच्छैरधिकाक्षरं प्रयुक्तं तदूनाक्षरं कल्पयन्ति ।
तैश्चोरित्यादिन्यूनाक्षरं प्रयुक्तं तत्र स्वराद्यधिकमक्षरं प्रक्षिपन
र्थः । एतदेव विवृणोति * तद्यथेति * आदिशब्दो ऽनुस्वार
त्वर्थीयप्रत्ययाभिप्रायः । स्वरान्तत्वकल्पनामुदाहरति * तद्य
स्वरान्तत्वविभक्त्यन्तत्वकल्पनयोरुदाहरणमाह * पन्थानमि
स्वरान्तानुस्वारलोपकल्पनयोरुदाहरणमाह * तत्त्वेति * स्त्री
कल्पनामुदाहरति * एवमिति * मत्वर्थीयप्रत्ययकल्पनामुद
* वैरशब्दं चेति * विशेषतः प्रत्यन्तवासिम्लेच्छभाषायां
स्थितशब्दार्थावधारणं न सम्भवतीत्याह * तद्यदेति * किं
स्वरूपं स्वभाषानुरूपमुत्प्रेक्ष्य किमर्थरूपं प्रतिपत्स्यन्तइत्यर्थः ।
हरति * तस्मादिति * विविधं कल्प्यतइत्यर्थः । तस्मा
संहारभाष्यं व्याचष्टे * निरुक्तेति * निरुक्तादिभ्यो ऽनेकार्थप्र
ऽप्यक्षादिशब्दवत्प्रकरणादिना विशेषावधारणं तदभावे ऽप्यर
द्व्युत्पत्तिपदार्थव्यावृत्त्या सम्भवद्व्युत्पत्तिपदार्थविशेषरूपेण
णं भविष्यतीत्याशयः । सूत्रव्याख्यानार्थमेवं प्राप्तइत्यादिसिद्धान
शब्दाविप्लुत्यभावेनार्थविप्लुतिशङ्कानिराकरणाशक्तेरयुक्तमा
ब्दान्तरेषु विप्लुतिशङ्कानिराकरणाशक्तावपि पिकादिशब्दान
दिशास्त्रप्रयुक्तत्वेनाविभक्तिकम्लेच्छप्रयोगे ऽपि प्रातिपदिक
तिनिश्चयान्मुख्यार्थान्तराप्रसिद्धेश्च गौणत्वायोगादनादिम्ले
वहारान्यथानुपपत्त्या वाचकत्वकल्पनं युक्तमित्यभिप्रायेण
१५८।१ * एवमिति * पिकादिशब्दस्वरूपस्य शिष्टैरप्यवगतत्वाद्गौ
म्भवप्रतिपादनार्थं शिष्टानवगतिविशेषणानुपपत्तिमाशङ्क्यार्थे

तीयेतेत्यस्य न्यूनत्वाशङ्कानिराकरणार्थम् * तथैवेत्यक्तुम् * वि-
यनुवादविवेकार्थौ यत्तच्छब्दौ । अविरोधत इति तसिला यत्प्रमा-
नोति यच्छब्दो यस्मादित्यर्थे व्याख्यातः । तदवगम्यमानमिति
ाष्यावयवं विप्लुतिशङ्कानिराकरणार्थत्वेन व्याख्यातुम् * पिके-
युक्तम् * यथाभाष्यं सूत्रपदानामन्वयं कृत्वा पदार्थान्व्याचष्टे
* चोदितं हीति * हिशब्दो ऽलङ्कारार्थो न तद्धर्मप्रमाणेनेत्यत्र
ाकृष्य व्याख्येयः । म्लेच्छप्रयुक्तस्यार्थस्यार्यान्प्रत्यप्रसिद्धिमाशङ्क्य
* अवधृतमित्युक्तम्*विरोधाभावाभिप्रायेणाविरोधपदं व्याख्याया-
मिपदवद्विरोधविपरीतानुसाराभिप्रायेण व्याचष्टे * अपि चेति *
ास्मिन्व्याख्याने ऽवगम्यमानमित्यवशब्दो ऽनेकार्थत्वान्निपातोपस-
ाणामनुशब्दार्थे व्याख्येयः । स्वयमन्यथा द्वेधा सूत्रं योजयति
पिकादाविति * म्लेच्छप्रसिद्धस्यार्थस्यार्यैरपेक्षणे दृष्टान्तमाह *य-
वेति * तेषामप्युदाहरणत्वाद्दृष्टान्तत्वमाशङ्क्य विशस्तपश्ववयव-
विभागाविकारेण सामान्यतः पश्ववयवत्वज्ञानाद्विशेषमात्रापेक्षायां
रुक्तादिना निर्धारितविशेषावधारणासम्भवात् पश्ववयवत्वसा-
ान्यांशे ऽथ म्लेच्छप्रसिद्धेः सम्वादाभावादगत्या म्लेच्छप्रसिद्धार्थ-
हणे सिद्धेर्दृष्टान्तत्वमुपपादयितुम् * पश्ववयवा इत्युक्तम् *
व्यान्तरमिश्रं हिरण्यं कूटमिति कूटशब्दवाच्यज्ञाने ऽपीदं शुद्ध-
दं मिश्रमिति विवेकाय तदभियुक्तापेक्षा प्रसिद्धैवेति दृष्टान्तान्त-
माह * यथा चेति * दार्ष्टान्तिके योजयन्स्वयमेव तृतीये व्या-
याप्रकारमाह * तथेहेति * सूत्रेण म्लेच्छाचारप्रमाणक-
मुदायप्रसिद्धिसद्भावमुपपाद्य शास्त्रस्थप्रसिद्धेर्बलीयस्त्वेन त-
बाधस्य पूर्वपक्षितस्य निराकरणार्थं यत्तु शिष्टाचार इति
ाष्यं व्याचष्टे * यत्त्विति * एवमनुभाष्य स्वयं तावच्छब्दा-
व्यवहारे ऽपि पूर्वाधिकरणन्यायेन शास्त्रस्थप्रसिद्धिबलीयस्त्वम-
ीकृत्य विरोधाभावेनाबाधमाह * नेती * नन्वविरोधे ऽपि शा-
यादिग्रन्थवच्छिष्टापरिगृहीतत्वान्म्लेच्छव्यवहारस्याप्रामाण्यं भ-
ाष्यतीत्याशङ्क्याह * यदेवेति * या वेदबाह्याः स्मृतय इत्या-
ना वेदबाह्यस्मृतीनां निष्फलत्वस्मरणाच्छाक्यादिग्रन्थावगत-
य श्रुत्यादिसम्वादिना ऽपि श्रेयःसाधनत्वाभावप्रतीतेरदृ-
ार्थेषु वेदबाह्यानां विरोधाभावे * ऽप्यप्रामाण्यं युक्तम् * दृष्टार्थे
शब्दार्थव्यवहारे म्लेच्छानामपि प्रतीतिप्रयोगान्यथानुपपत्तिप्रभव-
ाच्यवाचकभावविषयार्थापत्तिज्ञानस्य निराकर्तुमशक्यत्वादप्रतिहृ-
प्रामाण्यमित्याशयः । एतदेव पूर्वाधिकरणव्युत्पादिताभियुक्त-

तरार्थप्रसिद्धिर्बलीयस्त्वेन द्रढयति * अत एवेति * यत एवावि
रोधे दुर्बलस्यापि ग्राह्यत्वमत एव वैदिकवाक्यार्थे ये ऽभियुक्तत
आर्या याज्ञिका ये च स्वविषयप्रयुक्तपदार्थमात्रे ऽभियुक्ततरा
स्तेषामितरार्येभ्यो बलीयस्त्वमन्यथा शास्त्रापेक्षया तत्प्रसिद्धेर
दौर्बल्यादग्राह्यत्वं स्यादित्यर्थः । नन्वार्यान्तरेभ्यो ऽप्यभियुक्ततर
राणां बलीयस्त्वे म्लेच्छेभ्यः सुतरां स्यादित्याशङ्क्याह * प्रसिद्ध
विति * श्लोकं विवृणोति * अष्टकादिषु हीति * अष्टकाद्यर्थे
मन्वादीनां शाक्यादिभ्यो बलीयस्त्वं पदस्वरूपज्ञानेषु वैयाकरणा
नामितरेभ्यः पदार्थज्ञानेषु याज्ञिकानां वैद्यानां च पिकादिषु तु म्लेच्छ
प्रयोगेभ्यो ऽर्थनिर्णये सति न किं चिद्विरुद्धं प्रत्युताकाङ्क्षितं पदा
ज्ञानं सेत्स्यतीत्यन्वयः । ननु विप्लुतिभूयिष्ठत्वेन म्लेच्छप्रयोगेभ्यः
शब्दस्य स्वरूपस्यैवानवगतेः कथं चिद् बाह्यस्वरूपावगमे ऽपि स्तोर
क्षरवद्वाचकत्वस्यापि सम्भवात् कथं पदार्थज्ञानाकाङ्क्षेत्याशङ्क्
र्थेत्युक्तम् । वेदादौ प्रयोगात्स्वरूपावगमः वाक्यान्वयान्यथानुप
पत्त्या च वाचकत्वावगमः वाक्यविशेषज्ञानमपि तर्हि आर्येभ्य ।
भविष्यतीत्याशङ्क्य * वाच्येत्युक्तम् । ननु म्लेच्छप्रयोगान्निर्मूलाज्ञा
निर्णयो युक्त इत्याशङ्क्य * पद्वदित्युक्तम् * म्लेच्छानामपि
प्रमाणसम्भवो दृष्टग्रहणेनोक्तः अनादित्वेन दोषनिरासः पक्षे यः
प्रत्यक्षत्वान्म्लेच्छैरपि लब्धप्रसिद्धिः एवं दृष्टो यः कोकिलादिः
तत्प्रतिपत्त्यर्थो यो ऽनादिः पिकादिशब्दप्रयोगः । तेन लब्धशब्द
सम्बन्धविषया प्रसिद्धिर्यैर्म्लेच्छैस्ते तथोक्ताः । नन्वार्यप्रसिद्ध्य
वे ऽपि निगमादिभ्यो ऽर्थनिर्णये सिद्धे म्लेच्छप्रसिद्धिबाधः स्या
त्याशङ्क्याह * निगमेति * ननु निगमादिभिर्निर्धारितरूपार्थावि
नुदाहरणे ऽप्यवयवव्युत्पत्त्या कश्चिदर्थविशेषो ज्ञाप्यते ऽत इ
* काल्पनिक इति * अनेन च सत्यपि विरोधे समुदायप्रसिद्धे
रथकाराधिकरणन्यायेनावयवप्रसिद्धितो बलीयस्त्वाद्बाध इत्
भाष्यकृता त्वदृष्टार्थेष्वेव शिष्टाचारस्य म्लेच्छाचाराद् बलीयस्त्व
लौकिकेष्विति तत्प्रत्यक्षानवगतेष्विति परिहारः कृतः तद्व्या
* आश्रयाणां चेति * म्लेच्छानामनभियुक्तत्वात्तदाचारस्य श
र्थसम्बन्धाप्रामाण्यं पूर्वपक्षोक्तं यत्त्वभियुक्ता इत्यनुभाष्याभि
तरा इति भाष्येण परिहृतं तद्व्याचष्टे * तस्मादिति * वा
निर्णये म्लेच्छानां प्रामाण्याभावे कौशलमात्रस्याप्रयोजकत्वात् श
षु शिष्टम्लेच्छयोः प्रामाण्येन तुल्यत्वमनन्तरोक्तं तस्माच्छब्देन
स्पष्टम् । यत्तु शब्दस्वरूपवन्म्लेच्छप्रसिद्धे ऽर्थे ऽप्यविश्वास

रिहरति * शब्देति * शिष्टाचारे निबन्धनेनाश्वासो न स्व- १६०।१
क इत्याशयः। किं च पिकादिशब्दवाच्यानां कोकिलादीना-
ासद्भावात्पिकादिशब्दवाच्यत्वरूपेणार्याणामप्रसिद्धावपि स्व-
ासिद्धिसम्भवान्न तत्स्वरूपज्ञाने म्लेच्छापेक्षा पत्रोर्णादिश-
ानां तु स्वरूपज्ञाने ऽपि म्लेच्छापेक्षणादवश्यं तत्प्रसिद्धिरा-
त्याह * पत्रोर्णेति * पत्रोर्णं धौतकौशेयं वारमोषधिरसपा-
ानविशेषः। वाणो वाद्यविशेषः। कञ्चुकं वा। तथा चैकमेवे-
ाणपदम्।कथं चिच्छब्दार्थे नेमशब्दः। यदपि म्लेच्छप्रसिद्धा-
रणे निगमाद्यानर्थक्यमुक्तं तत्स्वयं तावद्भिन्नविषयत्वेन प-
ा * निरुक्तादेश्चेति * अर्थप्रतिपादनपरत्वाभावे निर्विषय-
ाद्धिमात्रप्रतिपादनानुपपत्तिमाशङ्क्यान्यतः सिद्धे ऽर्थइत्यु-
ननूतत्वः पश्यन्न ददर्श वाचमित्यादौ त्वादिशब्दानामेका-
ाप्रतिपादनस्य निरुक्ते दर्शनात्कथं निमित्तमात्रे व्यापार उ-
याकरणे च षधिर्हिंसायामित्यादौ साध्यादेर्हिंसाद्यपूर्वार्थप्र-
ादर्शनात्कथं शब्दस्वरूपान्वाख्यानमात्रे व्यापार उच्यते इ-
ा स्वरूपत इत्युक्तम्। स्वेनात्मीयेनार्थप्रतिपत्तिशेषत्वेन रूपे-
ात्पत्त्या तात्पर्येणेत्यस्यार्थः। श्लोकं व्याचष्टे * निरुक्तेन ता-
* भाष्यकृता तु म्लेच्छानामप्यप्रसिद्धे ऽर्थे निगमादीनाम-
ते। यत्तु निगमेत्यादिनानुभाष्येण पूर्वमानर्थक्यं परिहृतं
ष्टे * यस्य चेति * सर्वं नामधातुजमित्यर्थकल्पनाद्वारं नि-
दर्शितम्। यत्र पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च त-
ति व्याकरणे म्लेच्छदेशानन्त्ये ऽपि देशान्तरगतपुरुषवार्त्तोप-
ा सर्वदेशप्रसिद्ध्यभावनिश्चयः सम्भवतीत्याशयः। काम-
नानावश्यकत्वं दर्शितमुपपादयति * विक्षिप्तेति * प्रकृतिप्र-
योरेकत्रानन्वाख्यानाद्विक्षिप्तत्वं क्लेशहेतुत्वेनोक्तम्। अने-
कृतिप्रत्ययार्थान्वाख्यानाद्बहुरूपत्वं सन्देहहेतुत्वेनोक्तम्। न-
र्थप्रतिपादनपरत्वाभावे निमित्तमात्रप्रतिपादनेन प्रयोजना-
ानर्थक्यं स्यादित्याशङ्क्याह * न चेति * षडङ्गाद्वेदाद्यद्वेदा-
नं ज्ञानं च तत्पूर्वायाः कर्मणः क्रियाकरणमनुष्ठानं ततो हि
ावतीत्यर्थः। निरुक्तजन्यस्य शब्दप्रवृत्तिनिमित्तत्वज्ञानस्य त-
ानुष्ठानद्वारेणादृष्टोपयोगित्वे व्यासवचनं सिद्धं दृष्टान्तं ताव-
* यथेति * निर्वचनज्ञानमात्रात्सर्वपापक्षयसिद्धौ भारता-
नतदर्थानुष्ठानानर्थक्यापत्तेः प्रधानफलमेवेदमङ्गस्तुत्यर्थं की-

ार्थादिश्चेति २ पु० पा०।

१२ र्त्तितमित्याशयः दार्ष्टान्तिके योजयन् श्लोकं व्याचष्टे * एवमिति
वेदमात्रात्कर्मावबोधसिद्धेर्निरुक्ताद्यानर्थक्यमाशङ्क्याव्युत्पन्नरूपे
त्युक्तम् । निरुक्तादावगतो यो धात्वर्थपूर्वको नामार्थस्तद्ज्ञानद्वा
या वाक्यार्थप्रतिपत्तिस्तत्पूर्वकादनुष्ठानादित्यर्थः ॥

॥ अथ कल्पसूत्राऽस्वतः प्रामाण्याधिकरणम् ॥ ७ ॥

प्रयोगशास्त्रमिति चेत् ॥ १० ॥

अत्र भाष्यकृता कल्पसूत्रेषु प्रामाण्याप्रामाण्यसन्देहमुपन्य
स्य प्रामाण्यं पूर्वपक्षयित्वा सिद्धान्ते निराकृतं, तत्स्मृत्यधिकरणा
त्पादितसकलविद्यास्थानप्रामाण्यविरुद्धत्वादयुक्तमाशङ्क्य पूर्वप
वचनव्यक्तिगतं प्रामाण्यशब्दं स्वतःप्रामाण्याभिप्रायत्वेन द्वेधा व
चष्टे * कल्पेति * म्लेच्छाचाराणामपि केषांचिदनादित्वेन
ष्टाचारतुल्यतया स्वतःप्रामाण्ये ऽभिहिते वेदातिरिक्तविद्यास्था
नामप्यध्येतृस्मरणेनानादितया वेदत्वेन वेदतुल्यतया वा स्वत
माण्योपपत्तेर्न वेदमूलत्वं तद्विरोधिनां वा प्रामाण्यं युक्तमित्यन
राधिकरणाव्युत्पादितस्वतःप्रामाण्योपजीवनेन स्मृतिविरोधाधि
करणद्वयाक्षेपादनन्तरसङ्गतिं प्रकृतसङ्गतिं च सूचयितुं सम्प्रतीत्युप
विचार्यतइति विचारार्थं पूर्वपक्षवचनव्यक्तिर्द्वेधोपन्यस्यतइत्यर्थः
मन्वादिस्मृतिवदेषामपि पौरुषेयत्वेन पारतन्त्र्यावगमात्स्वतः प्र
ण्यशङ्का न युक्तेत्याशङ्क्याह * वैदिकेति * मन्वादिस्मृतीनां
रोहितप्रायवेदार्थनिबन्धनादर्थवत्त्वं कल्पसूत्राणां तु स्पष्टवेदार्थ
यत्वात्प्रणयनानर्थक्यापत्तेरपौरुषेयत्वावगमात्स्वतःप्रामाण्यशङ्
क्तेत्याशयः । कल्पसूत्रशब्दयोरेकार्थत्वाद् द्वयोरुपादानमनर्थक
मन्यमानः पृच्छति *आहेति* कार्यतस्तावद्भेदमाह *सिद्धरूप इ
अवयवव्युत्पत्त्या भेदमाह * कल्पनाद्धीति * स्वरूपतो भेद
कल्पा इति * प्रतिक्रतुप्रयोगाणां प्रतिपादकतया पाठत एव ि
न तु स्वसंज्ञाभिर्व्याख्यानापेक्षा इत्यर्थः । एतत्तीर्थमित्याचक्षते
त्यादिभिः स्वसंज्ञाभिर्ऋचं पादग्रहणमित्यादिभिः स्वपरिभाष
र्येतिसिद्धमित्यतीतसिद्धशब्दानिःकृष्टविपरिणतानुषङ्गेण योज्यः
ये यजामहे। यथागूर्याज्यादिरित्याद्युत्सर्गवदनुयाजवर्जमित्याद्य
दवद्धक्षयेयुरिति गाणगारितत्संस्कारत्वादित्यादिहेतुमत्सम्प्रैष
देशात्पशुवन्ति (पातानिति यथाध्वर्युः सम्प्रैषं दद्यात्तद्धोता
शान् द्रव्यादेशान् कुर्यात् । छागपदेन प्रैषे छागपदे ऽनादे
आज्येन चाज्यपदेन भेद उद्धृतं पार्श्वतः श्रोणित इत्यादयः ।

वयवयवाचिनः निपाता इत्युच्यन्ते । तान् पशुवत्क्रियायां पशु-
द्रयान्नान्यथेत्यर्थः । यस्मिन् क्रतावग्नीषोमीयस्थाने सवनीयस्थाने
पश्वेकादशिनी कृता तत्र शालामुखीये त्वाष्ट्रेण पशुना यजेत ।
स्य पर्यग्निकरणान्तं कृत्वोत्सर्गः पूर्वमुक्तः । पर्यग्निकृत्वोत्सृजत्य-
नरायनायेति तस्य तावत्येव समाप्तिः आज्येन शेषं संस्थापयेदिति
। आज्येन समापने मन्त्रेषु छागशब्देन निगमाः कार्या इत्येकः
क्षः । आज्यस्य प्रतिनिधित्वेन स्थानिवद्भावात् द्रव्यान्तरत्वे त्वा-
यशब्देन निगमाः कार्याः इत्यन्यः पक्षः । तत्र प्रयोगमाह । यदि
ध्वर्यव आज्येन समाप्नुयुस्तथैव होता कुर्यात्सम्प्रैष वदादेशा पशु-
[१])पात्यादिदृष्टान्तवत् पुरस्ताल्लक्षणा पुरोऽनुवाक्ये इत्यादिलक्ष्य
यापि लक्षणं तत्सूत्रमित्यर्थः ।लक्ष्यस्यापिलक्षणं यस्मिन्निति सप्त-
गोबहुव्रीहिः । ननु स्वसंज्ञापरिभाषादियोगे पौरुषेयत्वापत्तेः कथं
स्मृतिवैलक्षण्यमित्याशङ्क्याह * तत्रेति * सकलपुरुषप्रत्यक्षवेदप्रति-
गाद्यार्थविषयग्रन्थप्रणयनवैयर्थ्यापत्तेरपौरुषेयत्वावसायात्सर्वाण्ये-
त्रेतानि प्रज्ञानस्य नामधेयानि भवन्तीत्यादिवदन्यपरसंज्ञादीनीति
पूर्वपक्षी मन्यते इत्याशयः । एवं कल्पसूत्राणामपि स्मृत्यधिकरणे
वेदमूलत्वं प्रतिपादितमित्यभ्युपेत्य तदाक्षेपेण प्रत्यवस्थानमुपपादि-
तमिदानीमशब्दत्वेन तत्र पूर्वपक्षकरणात्कल्पसूत्रेषु च तदसम्भवा-
देषां स्मृत्यधिकरणविषयत्वाभावादिह विचारो न विरुद्ध इति
परिहारान्तरमाह * अप्रामाण्यमिति *अशक्यत्वमुपपादयति *
प्रत्यक्षेति * तत्र स्मृत्यधिकरणपूर्वपक्षे ऽपगतशब्दता शब्दशून्य-
तोक्ता सा कल्पसूत्रेष्वशक्या वक्तुमित्यर्थः । न केवलं पूर्वपक्षास-
म्भवादेषां स्मृत्यधिकरणाविषयत्वं किं तु मूलभूतवेदानुमानेन तत्र
सिद्धान्तकरणात् प्रत्यक्षवेदमूलेषु कल्पसूत्रेष्वनुमानायोगात् सिद्धा-
न्तासम्भवेनाप्येषां स्मृत्यधिकरणविषयत्वं नास्तीत्याह * स्मृत्यधि-
करणे चेति * यत्र न वैदिकं शब्दमुपलभ्यन्ते इति च सम्भवद्शब्द-
त्वलक्षणपूर्वपक्षहेतुकानामेव तत्रोदाहृतत्वादुदाहणभाष्यपर्यालोच-
नयाप्येषां स्मृत्यधिरणाविषयत्वं प्रतीयतइत्याह * एतानि चेति *
इदं तु परिहारान्तरमनुपलभ्यमाने मूलस्मृतिप्राण्यसाधने प्रत्यक्षमू-
लानां कल्पसूत्राणामविचारितस्यापि प्रामाण्यस्य तुल्यन्यायसिद्धत्वा-
दन्यथा च विरोधाधिकरणे सर्ववेष्टनस्मृत्युदाहरणानुपपत्तेः शिष्टा
कोपाधिकरणे च क्रत्वर्थस्मृत्युदाहणानुपपत्तेरयुक्तमित्यपरितोषात्पू-
र्वमेव परिहारमनुसन्दधाति * न चेति * यद्यप्येषामिहाधिकरणे

१ अयं २ पा० २ पु० ना० ।

पूर्वपक्षे प्रामाण्यप्रतिपादनमाभाति तथापि सिद्धान्ते स्व
कथशेषाभावाभिधानेन वेदवैलक्षण्यप्रतिपादनात्स्वतः
राकणप्रतीतेर्न प्रामाण्यं पूर्वपक्षे प्रतिपाद्यं येनेह त
त्स्मृत्यधिकरणविरोधः स्यादित्यर्थः । परमार्थतस्तु क
अपि विप्रकीर्णानेकशाखागतश्रुत्यर्थनिबन्धनेन स्मृतितु
त्यधिकरणविषयत्वमस्त्येवेत्यपरितोषात्स्वमतेन सर्वेषां
कविद्यास्थानानां स्मृत्यधिकरणप्रतिपादितवेदमूलत्वमा
माधीयतइति परिहारमाह * अङ्गेति * स्वातन्त्र्यलक्ष
प्रामाण्यमतिप्रामाण्यं, ननु स्मृतीनां प्रत्यक्षवेदार्थोपनिब
वेदवैलक्षण्यात्कथं स्वतःप्रामाण्याशङ्केत्यपेक्षायां पौ
करणेन प्रामाण्याभ्युपगमे कल्पनागौरवापत्तेस्तत्परिहा
यत्वमेवोचितमिति सन्देहोपपादनाय पूर्वपक्षं सम्भावय
दीति * विषयव्याप्त्यर्थं षडङ्गस्यैतद्विचारविषयत्वमा
ति * न्यायवशात्स्वातन्त्र्यलक्षणप्रयोगशास्त्रत्वसम्भवे
वाच्यत्वस्याभियुक्तप्रयोगाधीनत्वात्तदभावे वेदत्वशङ्का
शङ्क्य * षडङ्गेऽपीत्युक्तम् * एतदेव विवृणोति
ति * विरोधाधिकरणस्य शाक्यादिग्रन्थविषयत्वे तदा
नार्थं तेषामप्येतदधिकरणविषयत्वं सम्भवतीत्याह * य
विरोधाधिकरणं विषयान्तरासम्भवादनङ्गीकृतमपि के
क्यादिग्रन्थस्य वेदमूलत्वसम्भावनामात्रेणाशङ्क्य तन्निर
त्वेन व्याख्यातमिदं तु विषयान्तरसम्भवात्किमित्यनङ्गी
१६।३।१ निराकरणार्थत्वेन व्याख्यायतेऽत आह * शाक्यादयो
कथं वदन्तीत्यपेक्षायामुत्पादाद्वेति शाक्यग्रन्थमुदाहरति
उत्पादादिति प्रवाहनित्यत्वमभिप्रेतम् अनुत्पादादिति
त्वम् । तथागता बौद्धाः । धर्मनित्यत्वस्य तत्प्रतिपादक
त्वमन्तरेणायोगात्तन्नित्यतात्यनेनोक्तेत्याशयः । एतदेवं
* ततश्चेति * वाशब्दोऽत्राध्याहार्यः । एवमपि किमर्थं
त्यपेक्षायामाह * चोदनेति * ननु शाक्याद्यागमस्य
निराकृतं वेदत्वं वेदतुल्यत्वं वा दूरादेवापास्तम् । कथम
इत्याशङ्क्य रूपकद्वारेणाशङ्कामुपपादयति * काममिति *
दिचोरः स्वागमप्रामाण्यग्रामं प्रत्यक्षादिमूलत्वेन वेदमू
द्वारेण प्रवेष्टुमुद्यतोऽतीन्द्रियार्थदर्शनासामर्थ्यवेदमार्ग
क्षणन्यायदण्डपाणिभिर्मीमांसकैर्वारितो वरं न प्रविशेत्सम्प्र
मांसकानुमतेनापौरुषेयत्वेन महापथेन प्रकटं प्रवेष्टुमिच्छ

षामपि विचारविषयत्वं स्वाभिमतं द्योतयितुं भाष्यकारीयोदाह-
स्योपलक्षणार्थतामाह *एवमिति * पूर्वपक्षसूत्रव्याख्यानार्थं प्रयो-
ति भाष्यं व्याचष्टे * का गतिरिति * पूर्वार्द्धेनेति चेदिति सूत्राव
व्याख्यातः प्रयोगशास्त्रशब्दव्याख्यानार्थं सत्यवाचामिति भाष्यं
व्याचष्टे * वेदत्वमिति * पौरुषेयस्य विधायकोपस्थापनमात्र-
तार्थत्वेन साक्षादनुष्ठानविधायकत्वाभावात्प्रयोगशास्त्रशब्देना-
षेयत्वलक्षणं स्वातन्त्र्यमुक्तमित्याशयः । भाष्यकृता कथमवगम्य
ते पृष्ठा वैदिकैरेषां संवादो भवतीत्युक्तं तदपौरुषेयत्वे संवादा
त्वादयुक्तमाशङ्क्य वेदसंवादेन प्रामाण्यनिश्चयात्पौरुषेयत्वे
रुषतन्मूलप्रमाणवेदतन्नित्यत्वकल्पनेन गौरवापत्तेरपौरुषेयत्वे-
माण्योपपादनार्थतया व्याचष्टे * वेदेनैवेति * ननु माशकादि
ख्यया पौरुषेयावगमात्तेषां वेदत्वं वेदतुल्यत्वं वा न युक्तमित्या-
ते * ननु चेति* प्रवचनयोगेनापि समाख्योपपत्तेर्न तद्बलेन
येयत्वसिद्धिरिति परिहरति * नैतेषामिति * वेददृष्टान्तसूचि-
प्रकटयति * माशकादीति * ननु कल्पादिशब्दानां (चरण-
ऽध्येतृपुरुषवाची[1]) चरणविशेषवाचित्वाच्चरणानां चानादि-
न्निमित्तादिसमाख्या युक्ता माशकादिशब्दानां त्वेकपुरुषाभिधा-
त्तत्समाख्यातग्रन्थनित्यत्वेन युक्तमित्याशङ्क्याह *यथैवेति *
कादिव्यक्तीनां वेदसमाम्नानान्यथानुपपत्त्या नित्यत्वं भविष्य-
ाशयः । वेदसमाम्नातेन मशकादिना समाख्यातस्य ग्रन्थस्य
तेत्यर्थः । ननु न समाख्यामात्रेणैषां पौरुषेयत्वं ब्रूमः किं तु
केनेदं कृतमित्यादिदृढविच्छिन्नाध्येतृस्मरणेनेत्याशङ्क्याह * यथा
* मशकादीनामृषित्वप्रसिद्धेर्ऋषिगतावित्यस्य धातोरिन्नित्य-
त्येगुपधात्किदित्यौणादिके इन्प्रत्यये कृते ऋषिशब्दव्युत्पत्तेर्गमेश्च
र्थत्वाद् दृषिदर्शनादिति च स्मरणाद् ऋषिशब्दस्य दर्शननिमि-
प्रतीतेः । करोतेश्चानेकार्थत्वाद् गन्धनावक्षेपणसेवनसाहसि-
तियत्नप्रकथनोपयोगेषु कृञ इति स्मृतिपर्यालोचनया वा प्रक-
र्थत्वाद्दर्शनाभिप्रायं कथनाभिप्रायं वा मशकादिकर्तृस्मरणमि-
यः। एतदेव विवृणोति * तथा हीति * प्रयोक्तृग्रहणं दर्शनम-
लक्षयति । नित्यविधिविषयत्वान्यथानुपपत्त्यापि कल्पसूत्राणां
त्वमित्याह * ब्रह्मयज्ञेति *पुराणेतिहासानामप्येतेनैव सामान्ये-
रुषेयत्वाभ्युपगमान्न तैरनैकान्तिकत्वाशङ्केत्याशयः । पुरुषकृ- १६१
मित्यनेनार्थशब्दो नित्याभिप्रायो व्यतिरेकमुखेन व्याख्यातः ।

[1] अयं पा० २ पु० ना० ।

ऋषिणा दृष्टं प्रोक्तं वेत्यस्मिन्नर्थे तद्धितोपपत्तेरसतश्च दर्श
नायोगात्कालानवच्छेदेन सर्वदा सत्त्वप्रतीतेरार्षशब्दस्य नि
यत्वसिद्धिः । नन्वर्थवादाद्यभावाद्वेदमुद्रारहितत्वेनैषामवेदत्
यतइत्याशङ्क्याह * अरुणेति * प्रत्युत वेदतुल्यतैवावसी
दर्शयितुम् * सर्वयाज्ञिकैश्चेत्याद्युक्तम् * आर्षत्वप्रसिद्ध्यापि
कल्पत्वं प्रतीयतइत्याह * आर्षमिति * न केवलं न्यायमात्रेण
कल्पत्वं प्रतीयेत किं तु सूत्रकारवचनादपीत्याह * लाटेति
काराभ्यामपि ब्राह्मणविहितादप्यार्षकल्पविहितगरीयस्त्वम
तत्प्रत्यक्षविहितां त्वितीदमुक्तमित्यन्वयः।को ऽत्रार्षः कल्पो
त इत्याकाङ्क्षायाम् * माशकमपेक्ष्येत्युक्तम् * ननु ब्राह्म
स्वतःप्रामाण्यात्कथं तस्मात्कल्पगरीयस्त्वमित्याशङ्क्य स्
प्रामाण्यापेक्षयेत्युक्तम् । कल्पप्रामाण्यं निश्चितमभिप्रेत्याति
त्रं गरीयस्त्वाभिधानमित्याशयः । कात्यायनेनापि कल्पगरीय
ङ्गीकृतमित्याह * कात्यायनेन चेति * यज्ञविषयाणां ब्राह्मण
स्तोत्रसाधनसामविशेषापेक्षिणां सामविशेषलक्षणार्थं वाक्यशे
ष्ये यथा माशकं मया लक्षणं करिष्यतइति कात्यायनवचनस्यार्थ
वलं प्रतिज्ञामात्रं किं तु कृतमपि तथैवेत्याह * तथा चेति *
मयानिकस्य प्रथमस्याह्नः प्रायणीयसंज्ञकस्याग्निष्टोमस्तोत्रसाध
विशेषापेक्षायां यद्‍ब्राह्मणेनाग्निष्टोमसाधनत्वेन जराबोधी
हितम् । तत्कात्यायनेनार्भवपवमानाख्यस्तोत्रान्तरसाधनेषु
सामसु लक्ष्यमाणेषु तदीयात्प्रथमाद्गायत्राख्यात्साम्नस्तृत
लक्षितं जरासादिति सूत्रेणेत्यर्थः । कथमनेन सूत्रेण जराब
मार्भवीयगायत्रतृतीयत्वेन लक्षितमित्यपेक्षायामाह * आर्भव
माध्यन्दिनपवमाने ऽपि गायत्रसद्भावात्तद्व्यावृत्त्यर्थमार्भवीयां
प्रकृतार्भवपवमाने संहितस्य गायत्रानन्तरत्वात्तस्यैव सर्वत्र स
संज्ञा माभूदिति गायत्रेणोपलक्षणं यद्यत्रार्भवपवमाने गायत्र
साम तत्र तस्य समिति संज्ञेत्यर्थः। परशब्देन सादिति पञ्चमी
गेन व्याख्याता कथं जराशब्दस्य जराबोधीयवाचितेत्यपेक्षाय
कदेशइत्युक्तम् । न केवलमन्यत्र विनियोगाद्‍ब्राह्मणानादरः
१६५।२ ग्निष्टोमसामत्वेनाविनियोगादपीत्याह * ढशब्देन चेति *
ष्टोमसाम्नो ढयज्ञायज्ञीयमितिसूत्रेण प्रायणीयाग्निष्टोमसामत्
ज्ञायज्ञीयमेव नियतमित्यर्थः । नन्वार्भवीयगायत्रतृतीयत्वेन
विशद्‍ब्राह्मणे सामन्तराविधानाच्च जराबोधीयस्य तत्र वि
ब्राह्मणविरोधः नाप्यग्निष्टोमसामत्वेन यज्ञायज्ञीयनियमे ब्राह्म

त्वाहुर्यज्ञायज्ञीयमेवाग्निष्टोमसामकार्यमिति तस्य नियत-
शङ्क्याह * यदि चेति * यज्ञायज्ञीयनियमे जराबोधी-
र्थक्यापत्तेरेवकारस्य च यदेव प्रकृतौ तदेवात्रापीत्येवं प-
त्तेर्विकल्पपरमेव ब्राह्मणमित्याशयः। एवं तर्हि कात्याय-
त्यक्षविरोधादग्राह्यं स्यादित्याशङ्क्याह * बह्विति * यद्यपि
सूत्रं पौरुषेयं तथापि तस्य वेदोत्थापिनां न्यायानामध्येयं
यो ऽयं न्यायाभास इति विवेककुशलत्वाज्ञाकुशलैर्मिथ्या-
ध्यवसातुं शक्यमित्यर्थः। परमार्थतस्त्वस्मिन्पूर्वपक्षे सर्वेषा-
त्वान्न कस्य चिद् बाध इत्येतावानाशयः। करोतिप्रयोग-
गास्तु प्रवचनाभिप्रायेण दर्शनाभिप्रायेण वा व्याख्येया
व। श्रुतिबलादप्येवं वेदतुल्यत्वमवसीयत इति प्रतिपाद-
ार्यवचनइतिभाष्यं व्याचष्टे * आचार्यवचनानां चेति *
ाण्यस्य स्वतस्त्वात्तत्प्रतिपादनपरा श्रुतिरनर्थिका स्यादित्या-
ग्रतःसिद्धस्यापि प्रामाण्यस्यापवादशङ्कानिरासाय प्रमाणा-
यां तादर्थ्येन प्रामाण्यश्रुतिसाफल्यप्रतिपादनार्थं प्रत्यक्षत
भाष्यं व्याचष्टे * यथा चेति * श्लोकाभिप्रायं विवृणोति
ीति * अनाप्तवाक्येष्वपि सम्वादेनापवादाशङ्का निवर्त्तते
ौरुषेयेष्वित्याशयः। एतदेवोपसंहरति * सत्यवाचां चे-
त्यकल्पत्वएवोपपत्त्यन्तरप्रतिपादनार्थं वेदवाक्यैश्चेति भा-
चष्टे * अपि चेति * तुल्यत्वोपपादनार्थैवातिशयोक्तिः।
कर्तृकादरार्थतया व्याख्याय ब्रह्मयज्ञविधिकृतादरार्थतयैतदेव
तुल्यं चेति सम्प्रदायो ऽध्ययनं तद्विधायकं य एवं विद्वा-
यमधीतइति ब्रह्मयज्ञविधिवाक्यं तद्वेदवाक्यैः सह कल्पसू-
ल्यमित्यर्थः। अध्येतृकर्तृको वादरो ऽनेन भाष्येणोक्त इति
व्याख्यानमाह * अथ वेति * यत्नतुल्यत्वमेव दर्शयति
ोगेष्विति * वेदकौशलजिज्ञासार्थं तत्तद्वेदभागचिह्नलेख्या- १६६।१
कायां कुम्भाख्यायां निक्षिप्य तत्तद्वेदभागपरीक्षाकाले ता-
ाकृष्टलेख्यचिह्नितं वेदं पठत्यध्येतारो न युञ्जतइति घटिका-
ैनो ऽनुयोगाः। तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मा-
एतमेव न्यायं विद्यास्थानान्तरेष्वतिदिशति * एतेनेति *
ं च धर्मशास्त्रव्यपदेशादपि स्वातन्त्र्यलक्षणा प्रयोगशास्त्रताव-
त्याह * धर्मेति * तुल्यवच्च विद्यास्थानत्वव्यपदेशात्स-
ल्यतेत्याह * अपि चेति * वैदिकमन्त्रप्रकाश्यप्रकाशक-
षां वेदत्वमवसीयतइत्याह * किं चेति * नन्ववेदत्वे ऽपि

स्मृतीनां वेदमूलत्वेन तत्प्रतिपाद्यानामष्टकादीनां वैदिकत्वाद्वैदि
मत्र प्रकाश्यं च युक्तमित्याशङ्क्याह * एवं चेति * कल्पनागौर
पत्तेर्वेदमूलकत्वकल्पनातो वेदत्वकल्पनैव ज्यायसीत्यर्थः ।
नित्यत्वपक्षे तस्य चाप्रामाण्यस्य च कल्प्यत्वाद्वेदत्वपक्षे च तस्य
तृतीयस्य कल्प्यत्वाद्गौरवं स्यादित्याशङ्क्याह * सिद्धानामिति *
त्यत्वे सति निर्दोषत्वेनैव प्रामाण्यसिद्धेर्नित्यतैवैका साध्या सा
वध्यस्मरणेनैव सुसाधा वेदता च वेदार्थविषयत्वात्प्रकल्प्यतइत्य
एतदेवोपसंहरति * तस्मादिति * किं तु यान्येवेत्युत्तरश्लो
योज्यः । वेदमूलत्वे च तत्समर्पणक्लेशाधिक्यापत्तेरेषामेव वे
६७।४ युक्तमित्याह * मन्वादिभिरिति * मूलसमर्पणक्लेशाङ्गीक
ऽप्येषां प्रति कञ्चुकत्वादग्राह्यत्वं स्यादित्याह * के हीति * ः
कञ्चुकानामग्राह्यत्वं दृष्टान्तेनोपपादयति * यथा चेति * ननु
दमूलत्वे ऽपि सम्प्रदायविनाशभयेनासमर्पणीयत्वान्न क्लेशापत्ति
ष्यग्राह्यत्वापत्तिरित्याशङ्क्याह * सम्प्रदायेति * एतदेव विवृ
* वेदेति * अवेदत्वे च तद्विज्ञातस्यार्थस्य श्रेयःसाधनत्वाभा
त्तेः शास्त्रप्रणयनवैयर्थ्यं स्यादित्याशङ्क्याह * वेदादेव चे
नन्वस्तु तर्हि वेदवाक्यानामेव विप्रकीर्णानामेकत्र स
वेशस्य मन्वादिभिः कृतत्वात्पौरुषेयतेत्याशङ्क्याह * न
ति * एतदेव विवृणोति * ईदृगिति * ननु मूलान्तरा
कत्र कल्पना रचना युज्यते सम्प्रदायविनाशापत्तेरिति योज
उपसंहरति ननु पौरुषेयत्वे ऽपि वेदमूलत्वेन धर्मप्रामाण्यो
कथं तदभ्युपगमे नित्यत्वापत्तिरित्याशङ्क्याह * चोदनेति *
साधनत्वमात्रेण धर्मत्वे कृष्यादेरपि धर्मत्वापत्तेर्विध्यनुष्ठापि
धर्मत्वाद्विधेश्च पौरुषेयेषु पुरुषाभिप्रायप्रतिपादकत्वेनासम्भवा
प्रामाण्यासम्भव इत्याशयः । स एव ब्राह्मणस्याप्यवेदत्वे चो
त्वाभावे ऽर्थवादरूपस्य विध्येकवाक्यत्वाभावे धर्मप्रामाण्यं ना
वदता विवृतः । एतदेवोपसंहरति * तेनेति * ननु मूलभूत
नाकल्पनेनैषां धर्मप्रामाण्यं भविष्यत्यत आह * वदन्ती
चोदनाकल्पने तन्मात्रेणोपक्षीणानां धर्मप्रतिपत्तावव्यापाराद
ण्यापत्तिरित्याशयः । यावदुक्तं शब्देन विषयीकृतं तावत्येव शब्द
माणं येषां तैरित्यस्मिन्नर्थे ऽव्ययीभावगर्भो बहुव्रीहिः । ननू
न्यथानुपपत्त्यानुक्तकल्पनमपि युक्तमेवेत्याशङ्क्याह * उक्तमि
उक्तं धर्मरूपमर्थमादौ परित्यज्यानुक्तं वेदवाक्यं तावत्प्रतीर
ल्प्यते अनुक्तेन च वेदवाक्येन सपूर्वपरित्यक्तो ऽर्थो ऽपि प

तीयतइति यत्कल्पनं तत्कथानुपपत्त्येत्यर्थः। विद्यास्थानान्तरेषु पूर्व पक्षमुक्तमर्थमुपसंहरति * तस्मादिति * शाक्यादिग्रन्थानां च नित्यत्वमनेन सूत्रेणोच्यतइत्याह * शाक्यादीति * शाक्यादि ग्रन्थनित्यत्वे को न्याय इत्यपेक्षायामाह * येनैवेति* नन्वेवं सत्या सत्वलक्षणगुणाभावात्कथं प्रामाण्यसिद्धिरित्याशङ्क्य स्वतस्त्वा ङ्गीकरणेन परिहरति * बोधकत्वादिति * कथमकृतकमित्यपेक्षाय क्र्तृ * स्मरणवर्जनादित्युक्तम् * ननु सामाख्यानिकं कर्तृस्मरणम स्तीत्याशङ्क्याह * बुद्धेति * यथाक्रमं दृष्टान्तद्वयमनुपलब्धिविरोध दिदूषणमपि वेदवत्परिहर्त्तव्यमित्याह * यावदेवेति * उप संहरति * तेनेति * नासन्नियमादिति सिद्धान्तसूत्रं स्वयं तावद्व्या चष्टे * एवमिति * यदेतत्सर्वेषामविशेषेण नित्यत्वं वेदत्वं स्वतःप्र माणत्वं तत्कारणं च कर्तृस्मरणवर्जनाद्युक्तं न तस्य किं चिन्नित्यं नि बन्धनं नियतं कारणमागमो न्यायो वास्तीत्यर्थः। अनेन चासन्नियम दिति हेतुर्निबन्धनाभावादित्येवं व्याख्यातः। सर्वसाम्योक्तेरसन्निब- न्धनत्वमेवोपपादयितुं चतुर्द्धा वैलक्षण्यमाह * इहेति * वेदतदङ्ग- धर्मशास्त्रशाक्यादिग्रन्थरूपेषु तुल्यत्वेनोपन्यस्तेषु अर्थेषु मध्ये वेदे- षु या वेदत्वनित्यता बुद्धिः सा वेदस्वरूपदर्शनादेव जायते बाधका- भावाच्च पारमार्थिकी तदङ्गेषु तु कल्पसूत्रेषु शिक्षादिषु च वैदिक- ग्रहैष्टकाद्यर्थप्रबन्धात् षडङ्गमेक इतिस्मृतेश्च वेदत्वनित्यत्वबुद्धिर्जा- यमाना दृढकर्तृस्मरणान्मन्त्रब्राह्मणयोर्वेद इति नामधेयमिति बहु- मतिविरोधाच्च भ्रान्तिर्द्धर्मशास्त्रेषु वैदिकग्रहाद्यर्थनिबन्धलिङ्गाभा- वाद्वेदत्वास्मरणाच्च वेदत्वनित्यत्वबुद्धिरजायतैव शाक्यादिग्रन्थेषु वतीन्द्रियार्थनिबन्धनेन स्थितेवेयं धर्मनित्यतेत्यादिपर्यालोचनया च वेदत्वनित्यत्वबुद्धिर्जातापि स्वसिद्धान्तविरोधाद्दुष्यतीत्यर्थः। ननु शाक्यादिग्रन्थेषु स्वसिद्धान्तविरोधात्कथं वेदत्वनित्यत्वबुद्धिर्जायते त्याशङ्क्याह * परेणेति*उक्तिप्रत्युक्तिरूपं वाकोवाक्यम्। प्रतिभा- । किं कारणमित्यपेक्षायां परवाक्येभ्यो ऽवगतानां नित्यत्वोपपत्तीनां वागमेष्वारोपः। प्रतिभानकारणत्वेनोक्तः। ननु स्वसिद्धान्तज्ञाने रोक्तोपपत्त्या ऽरोपो न सम्भवतीत्याशङ्क्याह * छायामिति * आगमप्रामाण्यप्रतिज्ञाहान्या पराजयात् मुखच्छायां नश्यन्तीं रक्ष- येतुमित्यर्थः। यद्यप्यात्मीयं सिद्धान्तं जानन्तीत्यध्याहृत्य तथापिश- ब्दो योज्यः। एतदेवोदाहरणनिष्ठमाह * यथेति * ननु वेदमूलत्वे- ऽपि स्वागमप्रामाण्यसिद्धेर्नित्यत्वाभिधानमनर्थकमित्याशङ्क्याह * द्वेषादिति * ननु स्वानङ्गीकृतनित्यत्वाभिधानादसत्यवादित्वं स्या-

दित्याशङ्क्याह * तन्मात्रे ऽपि चेति * नित्यत्वाभि
दित्वाभावे ऽपि स्वागमप्रामाण्याभिधानविषये सत्यव
तीत्यर्थः । नन्वहिंसादेर्वेदमूलस्याभिधानात्कथं तेषां
द्वेष इत्याशङ्क्याह * भूयसामिति * शाक्यैरप्यहिंसा
तन्त्रेणैव विधीयते न वेदादुपलभ्येत्यर्थः । नित्यत्व
तेषां प्रयोजनमित्यपेक्षायामाह * ततश्चेति * वेदनि
भासैर्विमोह्यते विभ्राम्यते विप्रतीपीक्रियते निवार्यत
तैर्नित्यत्वस्याप्तत्वलक्षणवाक्यप्रामाण्यकारणगुणाभाव
दप्रामाण्यबाधकत्वादभ्युपगन्तव्यं वेदत्वाभिधानेन
नेन वा स्वागमाप्रामाण्यं विमोह्यतइत्याशङ्क्याह *
१ यादृशं परेणोक्तं तादृशमविचार्यैव ये मन्यन्ते यादृश
णाः । तैरप्यतीन्द्रियविषये पुरुषवचनप्रामाण्यस्य निर
त्वान्निरुत्तरीकृताः परवाक्यान्यनुकुर्वन्तः स्वागमनित
न्वयः । ननु चक्षुरादीनामतीन्द्रियार्थग्रहणासामर्थ्ये
देरतीन्द्रियार्थग्रहणसामर्थ्यस्य तैरुपपादितत्वात्कथं
त्याशङ्क्य * बालेत्याद्युक्तम् * अनेन चोपपत्तिव
गमप्रामाण्यं साधयामो ऽनेन वेति यद्यपि हृदयं व्याकुल
प्रक्षीणकुहेतुवचनजालत्वेन तद्वाक्यानां बालानुकरण
त्वान्न स्वपक्षसाधनक्षमतास्तीत्यर्थः । ननु नित्यत
क्यप्रामाण्यकारणाप्तलक्षणगुणाभावात्प्रामाण्यानुपपत्ते
क्यानुकरणमनर्थकमित्याशङ्क्य * अपौरुषेयत्वेत्यु
मांसकोपपादितस्वतःप्रामाण्यनिराकरणाशक्तेरित्याश
नुकरणे मूर्खवरस्य गोत्रप्रश्नविषयमुत्तरं दृष्टान्त
१७०।१ दृशमुत्तरमित्यपेक्षायाम् * यद्वेत्युदाहरणम् *
क्यादीनामागमनित्यत्वोक्तावपसिद्धान्तापत्तिः स्या
अस्मदीयमिति आगमनित्यत्वप्रतिपादकं यद्वचनं व
दीयमिति मीमांसकैरुदिताः शाक्यादयो ऽस्माकमेवे
मांसकैः श्रुत्वा हृतमिति जल्पन्तीत्यर्थः । कथमेवं ते
त्याशङ्क्याह * त्यक्तलज्जमिति * क्रियाविशेषणत्वान्न
एवं शाक्यादिग्रन्थेषु वेदत्वनित्यत्वबुद्धेर्जन्मोपपाद्य दूष
त्रेति * कथं क्षणिकवादित्वप्रसिद्धिस्तेषामित्याशङ्क्याह
केन ग्रन्थेनायं धर्मः शाक्येनोपदिष्ट इत्यपेक्षायां तदीयं
* क्षणिका इति * सर्वेषां संस्काराणां संस्कृतानां

१ अभिधानांश० २ पु० पा०

णिकत्वेनास्थिरत्वात्क्रियाकालं यावत् स्थायित्वाभावान्न क्रियाव्यापारः कुतः सम्भवतीति क्रियापदार्थं निषेधता शाक्येन सर्वस्य संस्कृतस्य कृतकस्यानित्यत्वलक्षणो धर्मो ऽभिहित इत्यर्थः। नन्वकृतकानां प्रतिसंख्यानिरोधव्योम्नां शाक्यैर्नित्यत्वाभ्युपगमात्तन्न्यायेनागमस्यापि नित्यत्वं तेषामभिमतं भविष्यतीत्याशङ्क्याह * बुद्धीति * मुद्गरप्रहाराद्युत्तरकालीनस्य घटाद्यभावस्य प्रतिसंख्यानिरोधाख्यस्य व्योम्नश्चावरणाभावरूपस्यावस्तुत्वात्कृतकत्वादिधर्मयोगासम्भवे ऽप्यागमस्य वस्तुत्वात्कृतकत्वं क्षणिकत्वं च शाक्यानामभिमतमेवेत्याशयः। वस्तुत्वं चार्थक्रियाकारित्वलक्षणं बुद्धेर्ग्राहकशक्तियोगाद्बोध्यस्य च ग्राह्यशक्तियोगान्नेतरस्येति दर्शयितुम् * बुद्धिबोध्यत्वमित्युक्तम् * विशेषतश्च पदाद्यनित्यत्वाभिधानादागमानित्यत्वं शाक्यानामनभिमतमिति ज्ञायतइति तदीयग्रन्थोपन्यासेनैव दर्शयति * तथेति * शब्देनाभिव्यक्तिर्युज्यते सा हीन्द्रियसंस्काराद्वा स्याद्विषयसंस्काराद्वा द्वेधापि दोषो ऽस्ति। कथमित्यपेक्षायां बुद्धेर्नियमादित्युक्तं कश्चिदेव शब्दः केन चिदेव युज्यते इति द्विविधो बुद्धिनियमो दृश्यते स चेन्द्रियसंस्कारपक्षे गोशब्दाभिव्यक्त्यर्थं संस्कृतेन श्रोत्रेण सर्वगतत्वेन तत्समानदेशस्याप्युपलम्भापत्तेर्विषयसंस्कारपक्षे स्रुघ्नसंस्कृतस्य शब्दस्य पाटलिपुत्रे ऽप्युपलम्भापत्तेर्न युज्यते इति शाक्यग्रन्थार्थः। ननु पदाद्यनित्यत्वे ऽप्यागमानित्यत्वमभ्यस्मरणादिना सेत्स्यतीत्याशङ्क्याह * यस्त्वन्तूनीति * पदसंघातात्मकस्यागमस्य पदाश्रितत्वात्तदनित्यत्वे नित्यत्वं न युज्यतइत्याशयः। आगमनित्यत्वसिद्ध्यर्थं चोपकल्पिते पदादिनित्यत्वे शाक्यैर्निराकृतमागमनित्यत्वमिति रूपकद्वारेणाह * यावदिति * आगमनित्यत्ववेश्मार्थं यावत्पदनित्यत्वादिदारूपकल्पितं तस्मिञ्छाक्योक्तैर्हेत्वाभासाग्निर्निर्दग्धे तदागमनित्यत्वरूपं वेश्म दुष्करमित्यर्थः। ननु कूटस्थनित्यत्वासम्भवे ऽपि व्यवहारानित्यत्वं प्रवाहनित्यत्वापरपर्यायं भविष्यतीत्याशङ्क्याह * व्यवहारेति * अर्थप्रतिपादनलक्षणक्रियानित्यत्वमिह व्यवहारनित्यत्वं वाच्यम्। न चाश्रयनित्यत्वं विना तदाश्रितक्रियानित्यत्वं युक्तमित्यर्थः। नन्वाश्रयस्य पदादेः कूटस्थनित्यत्वाभावे ऽपि प्रवाहनित्यत्वात्तदाश्रितक्रियानित्यत्वं भविष्यतीत्याशङ्क्याह * न चेति * पदावयवभूतानां वर्णानामपि क्षणिकत्वाभ्युपगमाच्च पदार्थनित्यत्वस्यापि जातितो व्यक्तितो वा ऽनुपपत्तेर्न पदादेः प्रवाहनित्यतापि शाक्यपक्षे सम्भवतीत्याशयः अतः स्थितैवैषां धर्मानित्यतेति वचनाच्छाक्यागमे वेदत्वानि-

त्यत्वबुद्धिर्जातापि सर्वक्षणिकसिद्धान्तविरोधाद् दुष्यतीत्युप
१७१।२ ति * स्थितैवेति * किं च क्षणिकत्वे पूर्वोपलब्धाया धर्मता
देशकाले विनष्टत्वादेषेति सर्वनामनिर्देश एव तावन्न युक्तः ।
नष्टत्वाद्वैषेत्यस्य तदेकवाक्यतात्यन्तमयुक्तेत्याह * एषेति *
सूत्रं योजयति * तेनेति * असत्त्वस्य क्षणिकत्वस्य सर्व
विशेषतश्च पदादिषु नियमान्निबद्धत्वादभ्युपगतत्वादागमानि
नुपपत्तिं प्रतिपाद्यमालोच्य प्रागसतश्च कृत्रिमस्यातीन्द्रियेऽर्थे
ऽन्यलक्षणं प्रयोगशास्त्रत्वाभावं प्रतिपाद्यमालोच्यैतत्सूत्रमिर
असाधुशब्दाभिप्रायो वायमसच्छब्दो व्याख्येय इत्याह * अ
ति * पूर्वार्द्धं व्याचष्टे * मागधेति * मागधभाषागता अ
शब्दा मागधाः दाक्षिणात्यभाषागता दाक्षिणात्याः । तदुभ
शप्रायाश्चासाधवो ये शब्दास्तैर्निबन्धनं येषामागमानामिति
मागधदाक्षिणात्या एव तावदसाधवः शब्दाः तदपभ्रंशास्त्वस
इत्याशयः।अत्रापि भिक्षवः कर्म वर्त्ततएवाशरीरपातादित्याद्याः
उत्क्षिप्ते लोष्टे उत्क्षेपेऽस्ति कारणं पतने नास्ति कारणम
च्यकारणम् इमे च संस्कृता धर्माः सम्भवन्ति सकारण
कारणा विनश्यन्ति । उत्पत्तिमनुकारणमपेक्षन्तइत्याद्याग
रार्थः उत्तरार्द्धं व्याचष्टे * ततश्चेति * नन्ववध्यस्मरणेऽप्यस
द्भूयिष्ठत्वादिना शाक्याद्यागमानां कृतकत्वापादने वेदस्यापि
सङ्घातात्मकत्वादिहेतुना कृतकत्वमापद्येतेत्याशङ्कां निराकुर्वा
परमार्थेनेतिश्लोकस्य पूर्वार्द्धं व्याचष्टे*वेदेषु हीति * आदिम
नाद्वेदे पौरुषेयत्वभ्रान्तिर्निवर्त्तते किमुत समस्तवेददर्शनादित्याः
दिमात्रमिति*कथमित्यपेक्षिते पौरुषेयत्वेऽप्यवैलक्षण्यं दर्शयि
षेयग्रन्थानां तावत्प्रमाणान्तरानुसारिपदवाक्यनिषिद्धत्वमाह*
१७२।२ विवाति * वेदानां तद्वैलक्षण्यात्पौरुषेयत्वासम्भवं दर्शयन्नृग्वेदस
दलौकिकप्रायानियतस्वरकपदनिबद्धत्वात्पौरुषेयत्वासम्भवमा
पाठकेति * आदिमात्रदर्शनेनाप्यृग्वेदस्यापौरुषेयत्वन्निश्चीयत
* अग्निमिति * कथमस्य पौरुषेयत्वं न सम्भवतीत्याशङ्क्य
किमालोच्येति * यजुर्वेदस्याप्यादिमात्रदर्शनेनापौरुषेयत्वं नि
तइत्याह * इषे त्वेति * प्रसङ्गादेतमन्त्रविनियोजकस्य ब्राह्म
पि विनियोगरूपदर्शनादेवापौरुषेयत्वं निश्चीयतइत्याह *
ति * द्वितीयमन्त्रविनियोजकस्याप्यपौरुषेयत्वनिश्चयमाह *
मिति * ऊर्जेयित्ययमितिवक्तव्ये श्लोकाक्षरातिरेकापत्तिभीत्य
तारः सन्ति मेत्युक्त्वेति मानवीयश्लोकवदिकारो न युक्तः ।

मन्त्रविनियोजकस्याप्याह * वायव्येति * एकशो विनियोगे
ानुपपत्तिरित्याशङ्क्याह * वायुशब्देनेति । सामवेदस्याप्यादिमा-
श्रवणेनापौरुषेयत्वनिश्चय इत्याह * सामवेद इति * कथं पौरुषे १
त्वे निरभिप्रायत्वापत्तिरित्याशङ्क्याह * को नामेति * अर्थाभि-
ानपराणामृगक्षराणामित्यनादरे षष्ठ्यौ । अनवगतपूर्वं विकुर्या-
दिति क्रियाविशेषणम् । अक्षरान्तरेष्वपि विकारः पौरुषेयत्वेन
उज्यतइत्याह * तथेति * वेदे पुरुषप्रदर्शनमात्रेणापौरुषेयत्वनिश्चय-
मुपसंहरति * तेनेति * ननु लौकिकवाक्ये विलक्षणरूपदर्शनाद्वे-
दस्यापौरुषेयत्वे सूर्य एकाकी चरतीत्यादीनां तत्सादृश्यात्पौरुषेय-
त्वापत्तिरित्याशङ्क्य तत्रापि स्वरादिनियमाद्वैलक्षण्यमाह * किं चे-
देति * अतो निरपवादासिद्धं वेदस्य रूपदर्शनेनापौरुषेयत्वमित्युप-
संहरति * एवं चेति * ननु रूपदर्शनमात्रेणापौरुषेयत्वनिश्चये
मीमांसकानां न्यायप्रतिपादनक्लेशो ऽनर्थकः स्यादित्याशङ्क्याह
तावता त्विति सानुभवरूपा दृढा प्रतीतिरनवच्छिन्नप्रतीतिप्रवाह-
वाचकत्वाद्भावनेत्युच्यते । इतिकरणो हेतौ । बाह्यतार्किकपराम-
र्शी तच्छब्दः । शाक्यादिग्रन्थेषु रूपदर्शनमात्रेण पौरुषेयत्वनिश्चयो
भवतीति व्यतिरेकमाह * शाक्यादीति * प्रज्ञप्तिविज्ञप्तिशब्दयो-
र्ज्ञानातेर्णिजन्तत्वाभावे युगागमस्यासाधुत्वं णिजन्तत्वे तु ण्यास-
श्रन्थो युजिति विशेषविहितेन युच्प्रत्ययेन. स्त्रियां क्तिन्निति सामा-
न्यविहितस्य क्तिन्प्रत्ययस्य बाधादसाधुत्वम् शिति प्रत्यये परभूते दृशेः
पश्यादेशविधानात्पश्यनाशब्दस्यासाधुत्वम्। ननु भिक्षुशब्दगतस्य क्ष-
कारस्य प्राकृतव्याकरणे स्तुरवकारे इति खकारादेशविधानात्तस्य
च शेषादेशयोर्द्वित्वमनादाविति द्वित्वविधानात्कथमत्र दुष्टतरत्वमि-
त्याशङ्क्याह * द्वितीयेति * इदुदुभ्यां शसोणो इति स्मरणाद्भिक्षूनि-
त्यस्य स्थाने भिक्खुणो इति प्राप्ते ऐकान्तत्वायोगाद्भिक्खुणं भिक्षुशब्दाद्
द्वितीयाबहुवचनस्य शसोण इति णेकारादेशविधानाद्भक्ष इति भिक्ष
इति घञन्तं भिक्षशब्दं व्युत्पाद्य भिक्षुं वाति गच्छति प्राप्नोतीत्य-
स्मिन्नर्थे वा गतिगन्धनयोरित्यस्माद्धातोरातोनुपसर्गे क इति कप्र-
त्ययोत्पादनेनाकारान्तभिक्षुशब्दमभ्युपेत्यैकारान्तम् * दृष्टमित्यु-
क्तम् * आदिशब्दोक्तं शब्दान्तरापभ्रष्टतरत्वं दर्शयति * संस्कृते
ति * स्वयमेव च शाक्येनात्र डकारापत्तिर्निषिद्धेत्याह *सो ऽय
मिति * नासन्नियमादिति सूत्रस्यासाधुशब्दनिबन्धनाभिप्रायं व्या
ख्यानमुपसंहरति * इतीति * व्याकरणानुगतशब्दनियमाभावा

१ ब्रकाप्र० २ पु० पा०।

दिति तृतीयं व्याख्यानं कर्त्तुमर्थं तावदाह * यावांश्चे
ऽर्थे सूत्रं व्याचष्टे * असन्नियमादिति वेति * प्रागवि
न्धस्य निबन्धनादिति चतुर्थं व्याख्यानमाह * क्ष
स्वसिद्धान्तप्रसिद्धसर्वक्षणिकत्वनिराकृतेन स्थिते वेयं
त्युक्तेन धर्मप्रतिपादकागमनित्यत्वेन सिद्धमनित्यत्वं य
तथोक्तः अत एव निबन्धनात्प्रागत्यन्ताविद्यमानस्य नि
गमादित्यभिप्रायेणेति योज्यम् । अविद्यमानानां क्षणभ
बन्धनादिति पञ्चमं व्याख्यानमाह * असतो वेति *
हेतुभिर्निबन्धनादिति षष्ठं व्याख्यानमाह * असद्धे
ननु क्षणभङ्गादीनामविद्यमानानां हेत्वाभासैर्निबन्धने
मैर्निबन्धनानां कथमप्रामाण्यमित्याशङ्क्याह * तदेकक
तावदसाधारणैर्हेतुभिः शाक्याद्यागमानां पौरुषेयत्व
दानीं वेदातिरिक्तविद्यास्थानसाधारणेन कर्तृस्मृतिद्वार
ति * कर्त्रिति । अनेनैव हेतुना वेदातिरिक्तविद्यास्थाना
पौरुषेयत्वमित्याह * एवमिति * अनेन चापौरुषेय
स्मरणस्य धर्मशास्त्रेष्वभावाद्वेदत्वबुद्धिर्न जायतइत्य
तापि त्वन्येति श्लोकावयवो व्याख्यातः । ननु कल
च वेदाङ्गेषु च वैदिकार्थप्रबन्धात्षडङ्गमेक इति च
द्धिर्जाता केन हेतुना बाध्यते इत्याशङ्क्याह * तेनेति
विशेषे ऽपि कल्पसूत्रेषु वैदिकार्थप्रबन्धाधिक्यात् व
प्रतीयमानापि स्वतन्त्रता कर्त्तृस्मरणेन प्रत्याख्यातेति
भ्रान्तिरिति श्लोकावयवो व्याख्यातः । ननूभयत्र हेत
पौरुषेयत्वस्यैव निश्चय इत्याशङ्क्याह * येनेति * स्म
मेव दृश्यादर्शनवत्कर्त्रभावे प्रमाणं, तच्च कल्पसूत्रे नां
प्रबन्धस्तु वेदमूलत्वेनाप्युपपत्तेर्न वेदत्वसाधनायालम
चाङ्गेषु वेदत्वस्मृत्यभावात् षडङ्गमेक इत्यपस्मृतिरित्य
न्वीश्वरप्रणीतो वेद इति तार्किकाणां कर्तृस्मरणे सत्यपि
त्वमुक्तं तथाङ्गेष्वपि भविष्यतीत्याशङ्क्याह * यथैव हि
तृस्मृतेरनभियुक्तगतत्वेनाप्रामाण्यान्न वेदे कर्तृसिद्धिः।
ध्येतॄणामेव कर्तृस्मृतेः पौरुषेयत्वमित्याशयः । अत्रापि प्र
१७५।१ तिरिक्तविद्यास्थानानां निबन्धनादित्येवं सूत्रं योजयति
नन्वत्र माशकादिसमाख्यानिमित्ताध्येतॄणां कर्तृस्मृतिः
प्रवचनयोगेनाप्युपपत्तेर्न कर्तृसाधनमित्याशङ्क्याह
ति * मशकादिशब्दानां च कठादिशब्दवदनां

यित्वाम्नानादिसमाख्याव्युत्पत्तिनिमित्तत्वं सम्भवतीत्याह * य-
चेति * अत्राप्यर्थे माशकादिसमाख्यायाः प्रागवि-
मानग्रन्थविषयत्वादित्येवं सूत्रं योजयति * अतश्चेति * स्वस-
द्यालौकिकरूपाभावादिति तृतीयं व्याख्यानमाह * वेदेति * अ-
ध्यायनियमाभावादिति चतुर्थं व्याख्यानमाह * कामं त्विति *
ष्यकृता तत्सूत्रं स्वरनियमाभावाभिप्रायेण व्याख्यतवदिष्टविघात-
रित्वादयुक्तमित्याह * यस्त्विति * समाधत्ते * तस्मादिति *
पाठकचतुःषष्ठीत्यादिना यत्स्वसंवेद्यमलौकिकं वेदरूपमुक्तं तस्य
ल्पसूत्रेष्वभावोऽत्र भाष्ये प्रयोगशास्त्रत्वाभावकारणं विवक्षितम्।
रग्रहणरूपलक्षणार्थमित्यर्थः * अवाक्यशेषात् * अनेनसूत्रेणा-
वादरहितत्वात्कल्पसूत्राणामवेदत्वमुक्तमिति प्रतिभाति तदप्यरुण-
राशरश।खाब्राह्मणस्य वसन्ताय कपिञ्जलानालभतइत्यादीनां चार्थ-
ादरहितत्वेनावेदत्वापत्तेरयुक्तमित्याशङ्क्यालौकिकवेदरूपाभावोप-
लक्षणार्थत्वेन व्याचष्टे * अतश्चेति * तच्छब्देन स्वसंवेद्यरूपाभावः
रामृष्टः वाक्यशेषाणामलौकिकरूपत्वमुपपादयति * बहव इति *
लोकं व्याचष्टे * बृहस्पतिरिति * नन्वर्थवादानामपि विध्येकवा-
क्यत्वेनानुष्ठानोपयोगित्वात्प्रणयनमर्थवदित्याशङ्क्याह * नित्यत्वे
सतीति * नित्यत्वे पर्यनुयोगासम्भवात्कथं चिद्वृत्तिः कार्या प्रणयनं
तु क्लिष्टार्थस्य मूढतामापादयतीत्यर्थः। वाक्यशेषाणामलौकिकरू-
पत्वमुपपाद्य कल्पादिषु तदभावान्नापौरुषेयत्वमिति सूत्रार्थसिद्धि-
माह * न चेति * भाष्यकृता तु विधानार्थाच्छिषेः शिष्यते विधी-
यते ऽनेनेत्यस्मिन्नर्थे घञुत्पत्तेर्विधायकवचनं शेषशब्दमङ्गीकृत्य वि-
धायकवाक्यरहितत्वादित्येवं तावत्प्रथमं सूत्रं व्याख्यातं तस्य सा-
ध्यप्रयोगशास्त्रत्वाभावोपयोगितामाह * विधीति * ननु वर्त्तमा-
नापदेशस्यापि समिधो यजतीत्यादेर्विधित्वाङ्गीकरणान्न तेन विध्य-
भावः शक्यो वक्तुं वचनानामित्याशङ्क्य वाक्यशेषान्वयान्यथानु-
पपत्त्या तत्र विधिपरत्वं कल्प्यते न तु कल्पादिष्वसावस्तीत्येवं पर-
तया पुनरेतत्सूत्रव्याख्यानार्थं। न चात्रेति भाष्यं व्याचष्टे * वर्त्तमा-
नेति * विधित्वे ऽङ्गीकृते तत्प्ररोचकत्वेनार्थवादान्वयोपपत्तेस्तदुप-
पादकत्वेन विधिकल्पनमभिप्रेत्यार्थवादप्ररोचितइत्युक्तम्। ननु
विध्येकवाक्यत्वं विना लाक्षणिकप्ररोचनार्थत्वं युक्तमिति प्रागेवोप-
पादितम्। ननु वसन्ताय कपिञ्जलानालभतइत्यादौ वाक्यशेषाभावे
ऽपि वर्त्तमानापदेशस्य विधित्वदर्शनात् कल्पादिष्वपि तथा भवि-
ष्यतीत्याशङ्क्याह * पञ्चमेनेति * छन्दसीत्यधिकृत्य लिङर्थे ले-

डिति स्मृतेर्नान्यत्र पञ्चमलकारो ऽस्तीत्याशयः । ननु छन्
वेदविषयत्वात्पूर्वपक्षे च कल्पादीनामपि वेदत्वाभ्युपगमा
कारो युज्यतएवेत्याशङ्क्याह * यद्यपीति * यथैव छन्
गायत्र्यादिछन्दोयोगाद्दृग्मात्रविषयत्वप्रतीतावपि मन्त्रान्तं
णे ऽपि छन्दोनिमित्ता यस्य पादिविधिदर्शनात्ताद्विष
सायत तथैव मन्त्रब्राह्मणव्यतिरेकेण वेदशब्दाभि
तर्के छन्दोनिमित्तविध्यदर्शनान्मन्त्रब्राह्मणमात्रविषयत्व
वेदमात्रविषयश्छन्दःशब्द इत्याशयः । एतदेव विवृणोति
हीति * विधिर्ब्राह्मणं विधेयो मन्त्रः तर्को मीमांसा
तृभिर्मीमांसायां वेदशब्दाप्रयोगात्तदनपेक्षया चैतय
विध्यादीनां वेदत्वोक्ता श्रुत्या विध्युद्देशस्यैव विधिश
नार्थवादमन्त्रोपनिषदामवेदत्वापत्तेर्विषयत्वतर्कत्वाभ्यां
त्रादिन्यायविस्तरादीनामपि वेदत्वापत्तेर्नानया स्मृत्या
दत्वमुच्यते किं तु कश्चिद्वेदभागो विधायकः कश्चिद्विधे
स एव नेति नेत्यादिरनित्यशरीरादिव्यतिरेकेण नित्यात्म
द्रूपतर्कानुरूपत्वात्तर्क इति त्रैविध्यं वेदस्योच्यते तथा
दित्रयस्य वेदत्वप्रतिपादनार्थेयं स्मृतिरिति परमताभ्युप
ष्टान्त इति सूचनार्थमेतस्मिन्दर्शने सतीत्युक्तम् । भाष्य
सूत्राणां वेदवाक्यैस्तुल्यादरत्वं पूर्वोक्तं यश्चादर इत्यनु
न्तरीयकत्वादिति परिहारमुक्त्वा कथं नान्तरीयकत्व
शाखान्तरगतकर्माङ्गभूतमन्त्ररूपवेदवाक्यमिश्राणां कल्प
दान्मन्त्रकौशलार्थं घटिकादिष्वादरे नान्तरीयकः कल्पसू
तदतिस्पष्टत्वान्न व्याख्यातम् । ब्रह्मयज्ञविधिविषयत्वतुल
ण तुल्यादरभाष्यव्याख्याने स्वयमनुभाषणपूर्वकं परिह
त्वाति * कल्पसूत्राण्येवात्रोदाहरणमित्यभिमानेनानै
पन्यासः । अतो ऽनैकान्तिकत्वान्न विधेयत्वमात्रेणाक्र
१७७।२ इत्याह * तस्मादिति * प्रवाहनित्यत्वाच्च नित्यानि
रोधपरिहार इत्याह * वेदार्थेति * ननु प्रवाहनित्यत्वे
ग्रन्थस्य कल्पसंज्ञाकरणान्नित्यसंयोगविरोधः प्रसज्ये
* वेदार्थेति * यौगिकेयं संज्ञा न ग्रन्थव्यक्तिनि
प्रयोगप्राग्भावोपयोगिकर्मानुसन्धानप्रयोजनत्वाच्चा
च येन केन चित्प्रयोगकल्पनात्मकेन शब्देनोपपत्तेर्ग्रन्थ
धिविषयत्वाभावान्न नित्यतापत्तिरित्याह * कर्मेति *
सेनानुसन्धानं विधिप्रयोजनमित्यर्थः । प्रयोजनव

ा नात्र कल्पाख्यग्रन्थाध्ययनं विधेयं किं त्विक्स्मरणइत्यस्य धा-
रधीतइति रूपमङ्गीकृत्य कर्मणो वेदार्थस्याहरहरभ्यासेन स्मरणं
धेयमिति। परिहारान्तरमनेनोच्यते चशब्दो वाशब्दार्थः। ऋङ्गादौ
ऽध्ययनइत्येतद्धातुरूपत्वेनावधारितस्याधीतइत्यस्य कल्पानित्यत्रा-
क्तस्य धात्वन्तररूपत्वायोगादन्वाचयोपपत्तित्वसूचनार्थः । वै-
:कार्थप्रबन्धस्य वेदत्वहेतोर्भाष्यकारेणापरिहृतत्वात्स्वयमनुभाष-
पूर्वकं परिहारमाह * पुनरिति * अत एव स्वातन्त्र्यमपि न-
म्वादात्सिध्यतीत्याह * तदर्थेति * ननु षडङ्गमेक इति कल्पा-
ेनां वेदत्वस्मृतेः किमित्यन्यथा सम्वादो नीयतइत्याह * वेदेति *
ङ्गे ऽध्येतृभिर्वेदशब्दाप्रयोगादपस्मृतिरेषेत्यर्थः ततश्चैतन्न सिद्धा
तभाषितमित्येवं चशब्दो योज्यः। यच्च कल्पसूत्राणां वैदिकार्थानुवा
त्वं तदर्थानुगमाच्चेत्यनेनोक्तम् तदुपपादयति * संवादे चेति *
नु शाखान्तरन्यायेनैषामपि विधित्वमविरुद्धमित्याशङ्क्याह * न चे-
ते * एतदेव विवृणोति * सर्वेति * किं च होतुर्वषट्कारे चमसा
नीयन्ते उद्गातुर्ब्रह्मणो यजमानस्येति भक्षणार्थं नयनमुक्त्वा केनादौ
भक्षणीयमित्यपेक्षायां तेषां होताग्रे भक्षयेदिति प्रतिज्ञाय तस्य वषट्-
कारान्वयत्वादित्यादिभिर्वषट्कर्त्तुः प्रथमभक्ष इत्यादिब्राह्मणोक्तैर्हे-
तुभिर्व्याख्यानदर्शनात्कल्पसूत्राणां ब्राह्मणोक्तार्थानुवादकतावसी-
यतइत्याह * विवृण्वन्तश्चेति * तथा प्राश्य घृतं शंसेद्यथा वाह
वा इदमनो वा रथो वाक्तो वर्त्ततएवं हैवाक्तो वर्त्तते इत्यादिभिर्घृ-
तप्राशनादिविधिशेषभूतैर्ब्राह्मणैर्नाचामेद्विशदिति विवायते देवरथो
वा यद्धोता नाक्षमद्भिः करवाणीत्यादिवाक्यैराचमनाभावादिज्ञाप-
नादनुवादकत्वनिश्चय इत्याह * अन्यार्थैरिति * उपसंहरति *
अर्थेति * आचार्यवचः प्रामाण्यं श्रुत्यैवोक्तमिति पूर्वोक्तस्य यत्वि
त्याद्यनुभाषणपूर्वकं परिहारभाष्यं व्याचष्टे * आचार्येति * वेद
वचः प्रमाणमित्येवमन्यार्थताभाष्यकृतोदितेत्यर्थः। अव्युत्पन्नो व
ऽयमाचार्यशब्दो व्याख्यात्रध्यापयितृविषयो न तु कल्पसूत्रकारविष
य इति परिहारान्तरं यद्वेति भाष्येणोक्तं तद्व्याचष्टे * व्याचक्षाण
स्येति * शिष्याणां स्वप्रत्यये संवादनैरपेक्ष्यप्रदर्शनार्थं स्वयम्प्रमाण
तेत्युक्तम्। अयमेवपरिहारः स्मृत्यानुगुण्याद्युक्त इत्याह * आच
ति * नन्वाप्तवाक्यप्रामाण्यस्य लोकप्रसिद्धत्वाद्वचनमनर्थकमित्याश
ङ्क्याह * वेदेति * अनेन भाष्येण यत्प्रमाणमाचर्यवचनं तदपेक्ष
श्रुतिरित्युक्त्वा कतरदितिपृष्टे यत्प्रमाणगम्यमित्यभिधानात् व्य
ख्यातृवचनमध्यापकवचनमपि वा सम्भवन्मूलप्रमाणकमेव स

न सर्वमित्युक्तं तदुपपादयति * न चेति * अनृतत्व
श्रुतेः प्रायाभिप्रायत्वेन रूपात्प्रायादित्यत्र व्याख्यात
कम् । श्रुत्यन्तरमुदाहरति * अन्यत्रापीति * यदि
त्कल्पसूत्राणां वेदत्वं वेदतुल्यत्वं वोच्यते ततः क
द्वैपरीत्यमपि शक्यं वक्तुमित्येतदर्थत्वेन सर्वत्र च प्र
धानशास्त्राच्चेति सूत्रं यच्चोक्तमिति भाष्येणावतारितं
वेदादेवेति * यज्ञायज्ञीयमेव प्रायणीयाग्निष्टोमसा
पञ्चविंशब्राह्मणे जराबोधीययज्ञायज्ञीययोः प्रायणीय
कार्यवैकल्पिकविधानेन साक्षाद्वेदेन विसंवाददर्शनाद
गोत्राः स्युरित्यादेस्तनूनपान्नाराशंसकल्पाद्यवैगुण्याय
नामेव सर्वेष्वधिकार इति वेदोत्थेन न्यायेन विसंवा
सूत्रकारवाचां वेदादेवानृतत्वावगतिरित्यर्थः । इह च
सूत्रावतारणार्थानुभाषणभाष्ये च शब्दप्रयोगात्तुल्य
प्रामाण्यश्रुत्योः परिहारौ सर्वत्र चेति सौत्रेण चश
कल्प्येते । यद्वा पूर्वमेव सूत्रं नञमपनीय व्यवधारण
तस्मिन्परिहारद्वये योज्यम् । शेषस्य शेषिमिश्रत्वेन व
वाक्यमिश्रत्वप्रतीतेरर्थवादे च वाक्यशेषशब्दस्य प्र
न वाक्यशेषः स्यादेतच्छङ्काद्वयमिति च व्यवधारण
व्याख्योपपत्तेर्नोत्सूत्रत्वाशङ्का । उक्ते ऽर्थे सूत्रं योजय
चेति * पूर्वेण सूत्रावयवेन विसंवादविषयोदाहरणे
संवादाभिधानमित्यर्थः । अतिशयार्थो ऽभ्यासः अत्र
सर्वत्र तिथिषु कल्पसूत्रकारैः पौर्णमास्यामावास्याख्य
कत्वादनुष्ठापितत्वादित्येवं सूत्रावयवं व्याचक्षाणेन श्रु
कस्यां चित्तिथावमावास्याख्यं कर्म कार्यमिति कल्पसूत्रव
नोदाहृतं तद्दूषयति * तत्रेति * यद्वृत्तिकारेणोदाहृ
दनाहत्य इत्यन्वयः । अत्यन्तासिद्धस्याध्यारोपेण कल्पस
मभिभवः कार्य इत्यभिप्रायेण युक्तत्वादिति हेतुः । कि
मध्यारोपितमित्यपेक्षायां दर्शेत्युक्तं दर्शपूर्णमासयोश्च
द्विषयं कल्पसूत्रकारवचनं चेत्यसदेवाध्यारोपितमित्यर्थ
वास्यापौर्णमासीशब्दयोर्दर्शपूर्णमासयोर्दर्शनात् कथं तां
त्वमित्याशङ्क्य पार्वणेत्युक्तम् । गृह्यकारवचनत्वेन श्रव
द्विषयत्वे हेतुः । गृह्यशब्दस्योपासनाग्न्यधिकरणकर्मविष
त्प्रतिपादनाधिकृतानां वैतानिककर्मप्रतिपादनस्यानु
भावः । एतदेव दृष्टान्तेनोपपादयति * गृह्येति * प्रदोष

कालः सङ्क्रान्तः प्रातस्तमतिनीय चतुर्गृहीतमाज्यं जुहुयादित्यग्निहोत्रस्य[१] स्वकालातिक्रमे प्रायश्चित्तस्मरणादपस्मृतेस्तद्विषयत्वाभावनिश्चयाद् दृष्टान्तत्वम्। गृह्यकारवचनत्वेन स्वयंदृष्टत्वाद्भाष्यकारोदाहृतसमानविषयमुदाहरणान्तरमुक्तम्। किं तर्ह्यत्रोदाहरणमित्यपेक्षायामाह * तस्मादिति * सर्वाणि हवींषि पर्यग्निकरोतीति। कल्पसूत्रकारैः पर्यग्निकरणस्य सर्वत्र हविःषु प्रयुक्तत्वात्तद्विरुद्धस्य च पुरोडाशं पर्यग्निकरोतीति शास्त्रस्य सन्निधानादित्येवं व्याख्येयमित्यर्थः।

॥ अथ होलाकाधिकरणम्॥ ९॥ सामान्यश्रुतिकल्पनाधिकरणम्॥

अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात्॥११॥

अनुमानादित्यादिभाष्यात्स्मृत्याचाराणां किं व्यवस्थया प्रामाण्यमव्यवस्थया वेति चिन्ता प्रतिभाति तत्र प्रमाणस्य तावदालोकवत्सर्वपुरुषसाधारण्यान्न व्यवस्थाशङ्कोपपत्तिमती, अथ स्मृत्याचारमूलभूता श्रुतिः किं व्यवस्थितविषया सर्वविषया वेत्यभिप्रायः। तथाऽष्टकादिस्मृतीनां प्रदीपाद्याचाराणां च व्यवस्थितविषयमूलाशङ्का निर्बीजैव मूलविशेषविषयचिन्तात्वाच्च स्मृत्यधिकरणानन्तरं सङ्गच्छेत तस्माद्धोलाकादयः प्राच्यैरेवेत्यादिभाष्यात्त्वधिकारिव्यवस्था सदसद्भावाच्चिन्ता सा च प्रमाणेन लक्षणेन सङ्गतेत्याशङ्क्याह * देशधर्मानिति * व्यवस्थिताव्यवस्थितमूलचिन्तैवेयमधिकारव्यवस्था सदसद्भावप्रयोजनेत्याशयः। सा च देशाचारमात्रविषया न सर्वस्मृत्याचारविषयेति देशधर्मानित्यनेनोक्तम्। पूर्वाधिकरणे च स्वातन्त्र्यनिराकरणेन वेदमूलत्वे दृढीकृते तद्विशेषविचार इति सम्प्रतिशब्देनोक्तम्। तत्र किं कल्पकानामाचाराणां व्यवस्थादर्शनात्तदनुसारेण व्यवस्थितिविषयमेव मूलं कल्प्यं व्यवस्थितमूलासम्भवाद्वा तदनुसारेणाचाराणां सर्वधर्मता कल्प्येति। कल्प्यकल्पकविप्रतिपत्तेः सन्देहकारणत्वं दर्शयितुमप्रतियोगिभूतवचनव्यक्तिद्वयोपन्यासः। नन्वनुष्ठेयानामेव भाष्यकृतोदाहृतत्वात्कथमविशेषेण देशधर्माणामुदाहरणत्वमुक्तमित्याशङ्क्योपलक्षणार्थं भाष्यमित्याह * विध्यर्थेति * विषयवचनोऽर्थशब्दः। विधिनिषेधयोराचारकल्पत्वात्के विधिविषयभूताः के वा निषेधविषयभूता इति कथं ज्ञेयमित्यपेक्षायां क्रियेत्युक्तम्। करणं विधिविषयचिह्नं

१ वार्त्तिकव्याख्यानभूतेऽस्मिन् ग्रन्थे वार्त्तिकाभिमता एव तत्तत्सूत्रेषु वङ्का निर्दिष्टाः, इति क्वचित् स्थले भाष्यपुस्तकस्थाङ्कतो वैलक्षण्यमस्ति।

वर्जनं निषेधविषयचिह्नमित्यर्थः । एतदेव प्रपञ्चय
नन्वाचाराणामेवोदाहरणत्वे स्मृतेराचाराणां
ग्रहणमनर्थकं स्यादित्याशङ्क्याह * आद्येति * सू
रमात्रविषयत्वात्सर्वसूत्रव्यापिविचारविषयप्रदर्श
कमित्याशयः । सूत्रशब्दो धर्मशास्त्रविषयः ।
तमादिप्रणीतानां च धर्मशास्त्राणां किं व्यवस्थोत
एतदपि प्रपञ्चयति * पुराणेति * प्रामाण्यस्या
प्रति साधारण्याद्ग्राह्यत्वाभिप्रायः प्रमाणशब्दः वि
तानि तैरेव ग्राह्याण्युत सर्वाणि सर्वैरित्यर्थः ।
हितानामपि स्थालीपाकादीनां शाखान्तरन्यायेन
व्यवस्थानुपपत्तेः पूर्वपक्षे ऽपि सर्वधर्मत्वावधारण
रुषधर्मत्वेन गृह्यादौ क्वचिदेव विहितं तदेव पूर्व
यम् । यथा कपालं भगालमिति ब्रूयादिति गौत
गतं[1] वा ऽनुष्ठेयं सिद्धान्तछन्दोगतं[2] वा । उपनयन
दाध्ययनाङ्गतत्तच्छाखाध्ययनानुग्राहकोपकारभेद
ताभेदापेक्षोपपत्तेः

बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्ति
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो

इत्यादिवचनानां चात्यन्तानर्थक्यापत्तेः
सर्वधर्मत्वान्नोदाहरणत्वमनुमानादित्यादिपूर्वपक्ष
भाष्यं व्यवस्थितविषयमूलप्रतिपादनपरत्वेन व्य
१८०।२ तावदिति * किं व्यवस्थितमूला इति सन्देहा
नव्यक्त्युपन्यासात्स्मृत्याचारमूलानां व्यवस्थित
पूर्वपक्षार्थः । पाठग्रहणेनाचारो ऽप्युपलक्षित
द्वा व्यवस्थिताद्व्यवस्थितविषयैव श्रुतिः कल्प्ये
चानुमापकस्य कल्पकस्य पाठस्याचारस्य वा व्य
तविषयोपपदसंयुक्तं मूलप्रमाणं स्यादिति सूत्रं यो
मूलश्रुत्यनुमानेन स्मृत्याचारप्रामाण्याद्येनैव श्रु
स्मृत्याचाराः प्रमाणं तेनैव व्यवस्थितविषयश्रुत्यनुम
वस्थितविषयमेव स्मृत्याचारप्रामाण्यमिति वदता
स्थितविषयमूलत्वस्यैव स्मृत्याचारप्रामाण्यव्यवस्था
नाद्विपरीतहेतुसद्भावाभिधानं भाष्यविरुद्धं स्यादि

१ पूर्वपक्षे छन्दोगैरेवानुष्ठेयम् ।
२ सिद्धान्ते ऽप्यछन्दोगैरपि सर्वैः ।

नेनेति * मूलव्यवस्थायाः कल्पत्वेन हेतुत्वायोगात्प्रामा-
सर्वपुरुषसाधारण्याद्व्यवस्थानुपपत्तेर्नेदं व्यवस्थितमूलत्वेन
राणां धर्माधर्मौ प्रति व्यवस्थितप्रामाण्यप्रतिपादनपरं भा-
व्यवस्थितत्वाद्व्यवस्थिताविषयामेव श्रुतिं प्रति प्रामण्याप्र-
र्गमिति भावः । तेनैवं भाष्यं योज्यम् । अनुमापकत्वेन
राणां मूलं प्रति प्रामाण्याद्येनैवान्यथानुपपत्तिलक्षणेन हे-
मूलश्रुतिं प्रति प्रामाण्यं तेनैव व्यवस्थितत्वात्तादृशीमेव
ग्यामिति । कल्पकाभिप्रायो वार्त्तिके लिङ्गशब्दः। व्यव-
मृत्याचाररूपस्य कल्पकस्य व्यवस्थितविषयश्रुतिकल्पक-
ुक्त्वा दृष्टान्तद्वारेण प्रकृते योजयति * तच्चेति * श्लोकं
* ग्रन्थेति * न चादृष्टधूमैरिति दृष्टान्ततयोक्तम् । यथा
लेङ्गत्वमेवमपक्षधर्मस्यापीत्यर्थः। ननु लिङ्गस्य पक्षधर्मत्वेन
द्व्यवस्थितलिङ्गानुमापकत्वं युक्तं स्मृत्याचाराणां त्वनुपप-
कत्वात्तस्याश्च तद्विषयश्रुतिकल्पनमात्रेण परिहारान्नियत-
ा निष्प्रमाणिकेत्याशङ्क्याह * यथेति * यथाग्निहोत्रादीनां
काधानोपनयनमन्यानि विद्यासाधनकत्वान्यथानुपपत्त्या
यत्वं कल्पितं तथात्रापि नियतकर्तृविषयश्रुतिकल्पनं
तकर्तृत्वानुपपत्तेर्नियतकर्तृविषयैव श्रुतिः कल्प्येत्याशयः।
केषां चित्स्मृत्याचाराणां नियतकर्तृविषयश्रुतिकल्पकत्व-
पादनार्थं यथेति भाष्यं व्याचष्टे * यथा चेति * जातयो
ास्तद्भेदा गोत्रचरणानि तदवान्तरभेदाः कुलानि। ननु तत्र
ाच्चकोपपदसम्भवाद्व्यवस्था युक्ता होलाकाद्यनुष्ठातृवा-
ासम्भवान्नेह व्यवस्था युक्तेत्याशङ्क्याह *यदि स्यादिति*
पपत्त्या किं चिदुपपदं कल्प्यमिति भावः । एवं व्यवस्थि-
ापदरहितश्रुतिकल्पनमात्रेणानुपपत्तेरपरिहारादुपपदमपि
युक्तमिदानीं सर्वविषयश्रुतिकल्पने प्रमाणमेव नास्तीत्या-
यथेति * श्लोकं व्याचष्टे * यस्मादिति * व्यवस्थितविषय-
तश्रुतिकल्पकत्वं दृष्टान्तेनोपपादयति * तथा चेति * १८।११
ाब्दस्य स्मृत्याचारविषयत्वं प्रमाणशब्दस्य च श्रुतिविषय-
न्पूर्वपक्षमुपसंहरति * अनुमानेति * अपि वा सर्वधर्मः
ायत्वाद्विधानस्येति सिद्धान्तसूत्रं व्याचष्टे * अपि चेति *
धर्मत्वस्योपपादको न्यायो विधेः सर्वविषयत्वं यस्मिन्क-

िकी इ० २ पु० पा० ।
ेकी इ० २ पु० पा० ।

ल्पे विधाने विधायके वाक्ये ऽस्ति तत्तन्न्यायं तस्य भावस्तन्
त्वम् । कथं कल्पे विधायके वाक्ये सर्वविषयविधित्वन्याय
पेक्षायाम् * शक्तेत्युक्तम् * यस्माच्छक्तमात्रं पुरुषं विधायक
च्यमधिकरोति नातिरिक्तं विशेषणमपेक्षते तस्मात्तस्य सर्वविष
धित्वं न्याय्यमित्यर्थः । ननु कर्तृविषयज्ञानं विना नैराकाङ्क्ष्याभ
त्कथं विधेः प्रवृत्तिरित्याशङ्क्य साध्यसाधनेतिकर्त्तव्यताविशिष्ट
वनाविधानमात्रेण भावनाक्षेपादेव तन्निष्पादनसमर्थकर्त्रवगम
द्धेर्नैराकाङ्क्ष्यं वक्तुं यावता विना नैराकाङ्क्ष्यं न भवति ता
शयति * इहेति * भावना च नाम विशेषणव्यवच्छिन्नो य
द्धिधात्वर्थविशेषश्च स्वर्गादिफलं च द्रव्यदेवतादिकारकं च या
ष्टेतिकर्त्तव्यता च तद्विधायको विधिश्च श्रुतिष्वनुमीयमानास्वन्
यतइत्यन्वयः । अवश्यमित्येतावतामनुमाने कारणत्वमुक्तम् । त
कुत इत्यपेक्षायाम् * कारणानुविधायीत्युक्तम् * कारणात्तथ
धत्वं विना कार्यतथाविधत्वानुपपत्तिः । कार्यानुरूपकारणानु
हेतुरित्यर्थः । निषेधे कियता नैराकाङ्क्ष्यमित्यपेक्षायामाह *
मिति * नन्वेतावत्यनुमिते ऽपि निरधिकारयोर्विधिनिषेधयोरप्र
रधिकारिविशेषोपादानं विना नैराकाङ्क्ष्यं न सम्भवतीत्याशङ्क्
ह*तावता चेति*अशक्यविधानानुपपत्तेरसमर्थव्यावृत्त्यवगमा
क्तमात्रस्य कर्तृत्वावधारणात्कर्तृत्वस्य चाधिकारं विनानुपपत्तेः।
विशेषेणैवाधिकारिविशेषावधारणासिद्धेर्न होलादौ दिग्देशपरि
च्छिन्नस्यैव कर्तृविशेषस्याधिकार इति नियता प्रतिपत्तिर्लभ्यतइत्यर्थः।
शक्तस्यापि विधिमन्तरेणाप्रवृत्तेस्तस्य चात्राचारकल्पत्वात्तदा
च्येण दिग्देशपरिच्छिन्नकर्तृविशेषविषयत्वप्रतीतेः कथं तन्निरा
णमित्यभिप्रायेण पृच्छति * कुत इति * उत्तरमाह *त्रिधैवे
स्वर्गकामो यजेतेत्यविशेषश्रवणे ऽप्यग्निविद्यारहितत्वेनायोग्
शूद्रादेः कर्तृत्वासम्भवाद्योग्यत्वेन त्रैवर्णिकः कर्त्ता विशेषरू
ज्ञायते पतितषण्ढयोर्द्विजातिकर्मभ्यो हानिरिति निषेधात्तद्व
प्रतिषिद्धत्वेन ज्ञायते । राजा राजसूयेन यजेतेति विशेषापादन
येन क्षत्रियः कर्त्ता विशेषरूपेण ज्ञायते । न त्विहैषां मध्ये किं
द्विग्देशपरिच्छिन्नकर्तृविशेषज्ञानकारणमस्तीत्याशयः । यत्र यो
त्वस्य तावदविशिष्टत्वान्न दिग्देशपरिच्छिन्नकर्तृविशेषज्ञानकारण
स्तीत्याह * तादिहेति * श्रावयेच्चतुरो वर्णानित्यादिश्रुतिपर्या
चनया शूद्राणामपि वैदिकमन्त्ररहितेषु स्मृत्याचारप्राप्तेषु कर्मस्व
कारो ऽस्तीति समस्तशब्देनोक्तं, सर्वधर्मबहिष्कृतत्वस्मृत्या म्लेच्

णैनधिकारावगमादार्यावर्त्तनिवासिग्रहणं निषेधाधिकारे त्व-
ात्सर्वाधिकारोपपत्तेराचारकल्प्यत्वाद्विधेयस्याचारस्य याव-
ाराश्रमिभिर्म्लेच्छादिभिर्वानुष्ठानं दृश्यते तावतां तस्मिन्नाचारे
ार इति प्रतिपादनायानवक्लृप्तिरुक्ता। अप्रतिषिद्धत्वस्य कर्तृ-
ज्ञानकारणत्वं पूर्वोपन्यस्तमप्युपपदनिराकरणाधीननिराकर-
दुपेक्ष्योपपदं तावन्निराकरोति * न त्वत्रेति * यथा चात्र १८२।
र्तृविशेषः कल्पः तद्वाचकत्वेन तदनुसारियदुपपदमनुमीयते
म्भवतीत्यर्थः। प्राच्याद्युपपदशङ्कानिराकरणार्थम् * देश-
कम् * गृह्यादौ त्वाचारशब्दपाठोपलक्षणार्थमङ्गीकृत्य नात्र
ोतमीयादौ यथापाठं छन्दोगादिकर्तृविशेषानुसार्युपपदं किं
ात्तं यत्तन्मूलभूतायां श्रुतावनुमीयेतेति योज्यम्। प्रतिषेध्य-
पपदासम्भवेनाप्रतिषिद्धत्वमपि कर्तृविशेषज्ञानकारणं नेह स-
ीत्याह * ये ऽपि चेति * आचारानुरूपकर्तृविशेषवाच्युपप-
भवं न तस्याकृतिवचनतेति भाष्योक्तेन मार्गेणोपपादयितुमुप-
* योग्यत्वेनेति * प्रश्नपूर्वकमुपपादयति * कुत इति *
व्याख्यातुमाकृतिवाच्युपपदासम्भवं तावत्प्रपञ्चयति * न
ेति * व्यक्तिवाच्युपपदासम्भवं प्रपञ्चयति * व्यक्तिवाचि-
* एतदेवोपपादयति * न हीति * नन्वनन्तभेदानामपि पु-
क्तीनां शुक्लो होतेतिवदेकेन केनचिद् गुणेनैष्टव्यो विवेक्के इति
कया चिदेकया क्रिययोपलक्षितानामेकमभिधानमवकल्पिष्य-
ाशङ्क्याह * एतेनेति * आचारानुरूपविशेषणानुपपत्तिरेत-
न परामृष्टा गुणस्य क्रियाया वा विशेषरूपेणानेकपुरुषव्यक्त्यु-
ाणशक्त्यसम्भवाज्जातिग्रहणम्। एतदेवोपपादयति * न ही-
ननु व्यक्त्याकृतिवाच्युपपदासम्भवे ऽप्यर्थान्तरवाचिकिञ्चि-
यतीत्याशङ्क्याह * व्यक्तीति * उक्ते ऽर्थे न तस्याकृतिवचन- १८३।
भाष्यं योजयति * एतदेवेति * विधानपरामर्शिनस्तच्छब्दा-
षष्ठी विधानविशेषणार्थोपपदव्यतिरेकजनितेत्याशयः। विधा-
ोषणार्थस्योपपदस्य व्यक्त्याकृतिवचनत्वासम्भवेनोपपादनार्थे न
भाष्यं हि शब्दार्थे च शब्दमङ्गीकृत्य व्याचष्टे * न हीति *
कवाचित्वनिराकरणे ऽनुष्ठातृविशेषाणां यदेकं सामान्यं साधा-
ुपलक्षणं न तन्निमित्तानुष्ठातृविशेषाणां वाचको ऽस्तीति तस्यो-
णार्थत्वेन सर्वेषां शब्द इति शब्दव्यतिरेकजनितषष्ठ्यङ्गीकरणेन
ाम्। नन्वार्जितपाठान्तरमाकृतिवाच्युपपदासम्भवादयुक्तमा-
ोपन्यासपूर्वकं व्याचष्टे * केषाञ्चिन्त्विति * स्वर्गकामो यजेते-

व्याख्यातोपात्तभावनाक्षिप्तकर्तृविशेषणोपादेयार्थे स्वर्गकामपदे पुल्लिङ्गनिर्देशात्स्त्रिया नाधिकार इति पूर्वपक्षं कृत्वा कर्तृविशेषणत्वेनाप्यन्वितस्य स्वर्गकामस्य विध्यन्यथानुपपत्त्या प्राधान्यावगतेरुद्देश्यत्वाद्विशेषणाविवक्षेति षष्ठे सिद्धान्तयितुं यथा विशेषणाविवक्षाभिप्रायेण जातिशब्दः प्रयुक्त इति नैव वयं ब्रूमो जातिवचन इह शब्दोऽधिकारक इति किं तर्हि स्वर्गकामशब्देनोभावपि स्त्रीपुंसावभिक्रियेते इत्यविवक्षितं पुल्लिङ्गमिति भाष्ये वक्ष्यते तथात्रापि विशेषणाविवक्षाभिप्रायेणाकृतिशब्दः प्रयुक्त इत्यर्थः। अस्मिंश्च पाठे ननु दिग्देशपरिच्छिन्नकर्तृविशेषमात्रवर्त्त्यवान्तरजातिवाच्ये च तर्ह्युपपदं कल्पयिष्यतइत्याशङ्कानिराकरणार्थत्वेन न चेति भाष्यं स्वार्थचशब्दकं योज्यं, पूर्वस्मिन्नेव पाठे वैयाकरणगन्धिनो मीमांसकस्य व्याख्यानं दूषयितुमुपन्यस्यति * कश्चित्पुनरिति * शब्दान्तरानाख्येयार्थत्वेनाख्यातशब्दमनेन भाष्येणोपवर्णयन्नेवमाहेत्यन्वयः । किमाहेत्यपेक्षिते भावइति तदीयो ग्रन्थः पठितः । तस्यार्थो भावाख्यो यो लिङाद्यर्थः।सो ऽतो लिङादिशब्दजनिताज्ज्ञानादन्येन शब्दान्तरजनितेन ज्ञानेनानाख्येयः। तृतीयान्तमन्यादित्यव्ययम्। भावादिशब्दैराख्यातदर्शनाच्छब्दान्तरानाख्येयत्वानुपपत्तिमाशङ्क्य स्वधर्मेण पूर्वापरीभावेन कालत्रयासंसृष्टत्वेन लिङ्गसम्बन्धायोग्यत्वेन च शब्दान्तरेण *नाख्यायतइत्युक्तम्* यद्वा शब्दान्तरानाख्येयत्वकारणम् *स्वधर्मेणेत्यनेनोक्तम्* शब्दान्तरेण ह्याख्यायमानो ऽर्थः सामान्यरूपेण विशेषरूपेण व्याख्यायते न च लिङाद्यर्थस्य सामान्यरूपता विशेषरूपता वा स्वधर्मः तस्याव्यपदेश्यत्वेनानुवृत्तिव्यावृत्तिप्रत्ययगोचरत्वाभावादित्याशयः । यथा कारकं क्रियायां व्याप्रियमाणत्वरूपेण स्वधर्मेण द्वितीयादिविभक्तितो ऽन्येन शब्देन नाख्यायते तथा भावो ऽनाख्यातादन्येन शब्देन स्वधर्मेणाख्यायतइति दृष्टान्तार्थः नन्वाकृतिवचनत्वस्यात्र न्याय्यत्वाभिधानात्तस्याश्च सत्त्वरूपत्वेन शब्दान्तरैराख्यातुं शक्यत्वान्नेदं भाष्यं शब्दान्तराख्येयत्वनिराकरणसमर्थमित्याशङ्क्येममित्युक्तम्। ननु पूर्वपाठे ऽप्युक्तेन प्रकारेणोपपदस्याव्यक्त्याकृतिवाचित्वनिराकरणप्रतीतेर्नाख्यातार्थोपवर्णनसामर्थ्यमित्याशङ्क्य *सूत्रेत्युक्तम्*सूत्रगतस्याख्यातवाचिनो विधानशब्दस्य यावच्छ्रुतस्य स्वसम्बन्ध्युपपदप्रतिपादनानपेक्षस्य व्याख्येयत्वेन प्रकृतत्वान्न तस्य विधायकस्याख्यातस्य कर्तृविशेषव्यवस्थापकव्यक्त्याकृतिवचनता न्याय्या। न चान्यो ऽपि कश्चिच्छब्दः सर्वेषामनुष्ठातॄणां व्यवस्थापकस्य सामान्यस्य वाचको ऽस्तीति भाष्यार्थभ्रान्तिर्जायतइ

। सूत्रगतेन यावच्छ्रुतेन विधानशब्देन जनिता भ्रान्तिर्यस्येति
ः । नन्वेवमपि विधायकाख्यातार्थस्य विधेः शब्दान्तरानाख्ये
ग्राच्यं न भावशब्दाभिधेयाया भावनाया इत्याशङ्क्य * विधी-
म् * ननु भावार्थाधिकरणे यज्याद्यर्थश्चातो ऽवगम्यते भाव-
ते चेति भाष्ये विध्यर्थातिरिक्तभावनाव्युत्पादनादभेदाङ्गीकरणं
कृमित्याशङ्क्योभयेत्युक्तम् । क्रियारूपत्वे भावनाया धात्वर्थादभे-
दः कार्यरूपता वाच्या ततश्च कार्यरूपाद्विधेर्विलक्षणं कीदृशं
: स्वरूपमिति निरूपणीयमित्येवं रूपात्पर्यनुयोगस्तेन भावार्था-
रणसिद्धान्तो नाशित इत्यर्थः । नन्वेवं सति को लिङाद्यर्थ
पृष्टे कीदृशमुत्तरं देयमित्याशङ्क्याह * तेनेति * आख्यातश-
लिङाद्यभिप्रायः । भावनाशब्दो विध्यभिप्रायस्तं प्रति कुर्याच्छ-
त्तरं दास्यतइत्यन्वयः । यथा कः पिक इति पृष्टे कोकिल इ-
रं दीयते तथा को विधिरिति पृष्टे कुर्यादित्युत्तरं देयमित्यर्थः ।
करोतेः क्रियासामान्यवाचित्वात्तदर्थस्य शब्दान्तराख्येयत्वं प्र-
तेत्याशङ्क्य लिङादीत्युक्तं करोत्युच्चारणं तर्हि किमर्थमित्याश-
केवलेत्युक्तम् । ननु धात्वन्तरेण प्रत्ययानुग्रहासिद्धेः करोति-
नः किमर्थ इत्याशङ्क्य * सर्वेत्युक्तम् * सर्वविधिव्याप्त्यर्थः ।
तिप्रयोग इत्याशयः । शब्दान्तरानाख्येयत्वे कोपपत्तिरित्यपेक्षा-
ाष्योक्तामेवोपपत्तिमाह * सर्वश्चेति * अत्रैव भाष्यं योजय- १८
* तदेव चेति * किलेत्यपारमार्थिकत्वं द्योतितं विधानेत्या-
। भाष्यस्य सामर्थ्यं दर्शितम् । व्यक्त्याकृतिवचनत्वाभावमुप-
यति * कुर्यादिति * करोतीति कार्यतामात्रं प्रपद्यते ऽङ्गीक-
। न तु विधेः सामान्यरूपतां व्यक्तिरूपतां वावगच्छतीत्यर्थः ।
ग्रतिरिक्तभावनावादिमते तस्या अपि विधायकाख्यातात्कार्यतया
ातीतेः सिद्धरूपत्वाभावेनानुवृत्तिव्यावृत्तिप्रत्ययगोचरत्वासम्भ-
सामान्यविशेषरूपत्वप्रतीत्यसम्भवं दर्शयितुम् * भावनाया वे-
क्तम् * दूषयति * तदिदमिति * तदिदमन्यार्थमेव सदन्य-
न्नेवार्थे योजितमित्यन्वयः किमर्थमित्यपेक्षायाम् * भाष्यकारे-
क्तम् । अयमेवाभिप्रायः कस्माद्भाष्यकृतो ऽभिप्रेतो न भवतीत्या-
ह्य * असम्बद्धत्वानुपपत्तिकत्वाभ्यामित्युक्तम् * कथं तर्ह्यत्र
जितमित्यपेक्षिते श्रुतीत्युक्तम् । यथा चत्वारि शृङ्गेति मन्त्रो
भवति होतुराज्ये विनियोगादादित्यरूपेणाग्नेः स्तुत्यर्थो ऽन्यत्रापि
नियोगाद्यज्ञमात्रस्तुत्यर्थो वैयाकरणैर्नामाख्यातोपसर्गनिपाताः श-
ब्रह्मणः चत्वारि शृङ्गेति भूतभविष्यद्वर्त्तमानकालवाचिनः प्रत्यया

उदात्तानुदात्ता स्वरिता वा स्वरास्त्रयः पादाः वर्णनादात्मकौ
प्रकृतिप्रत्ययौ च द्वे दीर्घे नामिक्यो विभक्तयः सप्त हस्ताः उर.
शिराश्च नाभ्युरः कण्ठेषु वा त्रिधा बद्धः स्वर्गादिसाधनकर्मावि
द्वारेण वर्षणाद्वृषभः शब्दात्मकत्वाद्रोरवीति सर्वगतत्वान्मह
व्यवहारसाधनत्वादेव मनुष्यैरुच्चार्यमाणत्वान्मर्त्यानाविवेशो
योगानपेक्षेण श्रुतिसामान्यमात्रेण शब्दप्रतिपादनरूपे ऽर्थे
इति दृष्टान्तार्थः । कथं पूर्वोक्तस्यार्थस्य भाष्यकारानभिप्रेतत्वा
शङ्क्याह * द्वेधेति * परव्याख्यानस्यासम्बद्धत्वं निरुपपत्ति
च पूर्वोक्तमुपपादयितुं विवृणोति * यदि त्विति * न प्रकृते
ऽव्याख्यानेन सम्बन्ध्यते नापि सर्वधर्मत्वोपपत्तिः प्रत्युपयुज्य
सम्बद्धत्वाद् द्वेधा व्याख्यातं तत्रासम्बद्धत्वं तावदुपपादयति
था हीति * एतदेव विवृणोति * यदि नामेति * निरुपपत्ति
त्वन्यानाख्येयार्थत्वमुक्त्वा स्वयमेव च लिङाद्यर्थस्य पर्यायान
१८५।२ ख्यानात्स्पष्टीकृतमित्याह * अनाख्येयत्वमिति * एतदेव विवृ
* विधीति * विध्युपदेशशब्दयोः पर्यायत्वे ऽपि कर्तव्यता
विधिविषयत्वरूपाभिधायित्वाद्भावनाशब्दस्य च पुंव्यापारा
यित्वादत्यन्ताविद्यमानपर्यायत्वारोपाभिधानमतीव स्थापितार्
हासः । ननु नानेन ग्रन्थेन भावनाख्यस्य विध्याख्यातार्थस्य व्य
कृतिरूपेणानभिधानात्सर्वधर्मत्वं साध्यते किं त्वनेन दृष्टान्तेन
राख्यातार्थत्वेन व्यक्त्याकृतिरूपेणानभिधानाद्व्यक्त्याकृतिद्वा
व्यवस्थाशङ्कानिरासेन सर्वधर्मत्वसिद्ध्यर्थमन्यानाख्येयत्वोपप
पेण व्यक्त्याकृतिवाचित्वनिराकरणं नासम्बद्धमित्याशङ्क्याह
द्यपि तावदिति * व्यक्त्याकृतिरूपेण कर्तुराख्यातवाच्यत्वे ऽ
दन्तयजमानपदोपात्तकर्तृवदुपपदं विना व्यवस्थानुपपत्तेः ।
करणे चाख्यातवाचित्वनिराकरणात्कर्तृव्यक्त्याकृतिवाचित्वा
रणमनुपयोगीति भावः । ननु माभूत् कर्तृव्यक्त्याकृतिवा
व्यवस्थानापादकत्वान्निरासः किं तु स्वरूपमात्राभिधाने विशे
षेन सर्वधर्मत्वसिद्ध्यर्थमित्याशङ्क्याह * यदि चेति * न
सूयादीनामप्याख्यातवशात्सर्वधर्मत्वं प्राप्नोति च किं तूपपद
षणापोदितमिह त्वपवादाभावात्तत्सिद्धिरित्याशङ्क्य * अथो
वमप्यपवादनिरासं विना सर्वधर्मत्वासिद्धेराख्यातार्थनिरूप
र्थमिति परिहरति * एवं तत्रापीति * अतो ऽस्मदीयमेव
व्याख्यानं युक्तमित्युपसंहरति * तच्चेति * उत्तरसूत्रस
मपि उपपदनिरासार्थतयैवायं ग्रन्थो व्याख्येय इत्याह *

श्रुति * तन्न्यायत्वादिति सूत्रावयवव्याख्यानार्थं तस्मादिति भाष्यं सर्वधर्मत्वस्यैव साध्यत्वाद्धेतुत्वानुपपत्तेरयुक्तमाशङ्क्य सर्वधर्मत्वसाधकसर्वाधिकारन्यायत्वादित्येवं व्याचक्षाणाः सर्वधर्मत्वप्रतिज्ञां योजयति * तस्मादिति *

दर्शनाद्विनियोगः स्यात् ॥ १२ ॥

एतत्सूत्रावतारणार्थमथेत्यनुभाषणभाष्यं व्याचष्टे * यस्त्विते * आर्षेयपक्षार्षेयगोत्रव्यवस्थया शिखाकल्पव्यवस्थादर्शनाद् गोत्रविशेषवाच्युपपदानुमानेन कर्तृविशेषविनियोगः स्यादित्येवं सूत्रव्याख्यानार्थं गोत्रेति भाष्यं व्याचष्टे * तत्रेति * श्लोकं व्याचष्टे * यथैवेति * वसिष्ठादिगोत्रस्यान्वयतो नाराशंसो व्यतिरेकस्तनूनपादित्युपलक्षणतेत्यर्थः।

लिङ्गाभावाच्च नित्यस्य ॥ १३ ॥

श्यामादिचिह्नविशेषवाच्युपपदानुमानाशङ्कानिरासार्थमेतत्सूत्रमिति प्रतिपादनार्थं वेदमिति भाष्यं व्याचष्टे *व्यक्तीति * एतदेव विवृणोति * व्यक्तीति * नित्यस्य व्यवस्थिताचारान्नियतस्य कर्तुरुपलक्षणभूतस्य लिङ्गस्याभावात्तद्वाच्युपपदानुमानानुपपत्तेः। सर्वधर्मतेति लिङ्गीभूतकर्तृविशेषणनित्यशब्दाङ्गीकरणेन स्वयं सूत्रं व्याचष्टे *लिङ्गेति* नियमाभावमुपपादयदन्ये ऽपीति भाष्यं व्याचष्टे * यच्चिह्नमिति * अन्वयव्यभिचारार्थं भाष्यं व्याख्याय नैवं लिङ्गा इति व्यतिरेकव्यभिचारार्थं भाष्यं व्याचष्टे * दृष्टमिति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * ननु नास्ति तन्नित्यमेषां लिङ्गमिति भाष्यान्नित्यशब्दस्य लिङ्गविशेषणत्वप्रतीतेः कर्तृविशेषणत्वेन व्याख्यानमयुक्तमित्याशङ्क्याह * यस्त्विति * नित्यकर्तुरुपलक्षणाशक्तिप्रदर्शनार्थं लिङ्गस्य नित्यत्वं भाष्यकृत निराकृतम्। ननु सौत्रो नित्यशब्दो लिङ्गविशेषणत्वेन व्याख्यात इति मन्यते इति काक्वा सूचितम्। नित्यशब्दसापेक्षत्वाल्लिङ्गशब्दस्याभावशब्देन सह * असमासप्रसङ्ग इत्युक्तम् * ननु राजपुरुष शोभन इति पुरुषशब्दस्य शोभनशब्दसापेक्षस्यापि राजशब्देन सः समासो दृष्ट इत्याशङ्क्य * उपसर्जनीभूतेत्युक्तम् * भवति हि प्रधानस्य सापेक्षस्यापि समास इति स्मृतेः। पुरुषस्य राजानं प्रति प्राधान्याद्युक्तः समासः। लिङ्गस्याभावं प्रत्युपसर्जनत्वात् वृद्धस राज्ञः पुरुष इति वदयुक्त इत्याशयः। ननु नित्यशब्दस्य प्रतिपाद्यं नियतत्वं विना लिङ्गशब्दार्थस्य लिङ्गत्वानुपपत्तेर्लिङ्गशब्दार्थमेव नित्यश

ब्दार्थाक्षेपाच्छब्दस्यान्यत्र व्यापाराभावेन सामर्थ्याविघातादुपसज
सापेक्षत्वे ऽपि देवदत्तस्य गुरुकुलमितिवन्नित्यसापेक्षत्वात्समा
विरोध इत्याशङ्कते * नन्विति * यदि हि सम्बन्ध्यन्तरस्य नित्य
ब्दस्यार्थो नियतत्वं लिङ्गशब्दार्थेनैव स्वार्थसम्बन्धितया समभिव
हारान्यथानुपपत्त्याक्षिप्येत ततो ऽन्यत्र व्यापृतत्वात्तावत्सम्बन
क्षेपे ऽसामर्थ्यं स्याल्लिङ्गशब्दार्थेनैव तु हेतुत्वेन नित्यशब्दार्थाक्षेप
तेन लिङ्गशब्दस्याभावात् शब्दं प्रति सामर्थ्यं विहन्यतइत्यर्थः । ग
शब्दस्य सम्बन्धिशब्दत्वाच्छिष्यसम्बन्धिरूपं विना स्वार्थप्रतिप
नाशक्तेस्ताद्रूतप्यमन्तरेण स्वार्थाभिधानापर्यवसानादपर्यवसितस्
र्थाभिधानएव शब्दान्तराभिधानसंयोगात्स्वार्थाभिधानवेलायामेव
म्बन्ध्यन्तरशिष्यमात्रप्रतीतौ निर्विशेषसामान्यानुपपत्तेस्तद्विशेष
क्षायामपि पर्यवसितस्वार्थाभिधानव्यापारस्य शब्दस्य सम्बन्ध्यन्त
न्वयसिद्धौ[1] व्यापारान्तराभावेन सामर्थ्याविघातात्समासो यु
लिङ्गशब्दस्य तु सम्बन्धिशब्दत्वाभावात्सम्बन्ध्यन्तरमनपेक्ष्यैव पर
सिते स्वार्थाभिधाने ऽर्थापेक्षया प्रतीतस्यापि सम्बन्ध्यन्तरस्याशा
त्वेनान्वयात्पर्यवसितव्यापारस्यापि शब्दस्यैव सम्बन्ध्यन्तरापेक्षा
ल्पनायामभावशब्देन सहैकार्थलक्षणं व्यपेक्षालक्षणं वा सामर्थ्यं
७।२ सम्भवतीत्यभिप्रायेण परिहरति * नैतदिति * सम्बन्धिशब्देषु
सम्बन्ध्यन्तरापेक्षां विना शब्दप्रवृत्त्यसम्भवाच्छब्दप्रवृत्तिनिमित्त
सम्बन्ध्यन्तरापेक्षा सम्भवति इह तु तदभावाच्छब्दकृतापेक्षातो
क्षान्तरेणार्थकृतेन लिङ्गशब्दस्य नित्यशब्देन सह सङ्गतेर्नैतल्लिङ्गश
स्य नित्यशब्दसापेक्षत्वमनेन गुरुशब्दस्य देवदत्तशब्दसापेक्षत्वेन तु
मित्यर्थः । एतदेवोत्तरार्थत्वेन तूपपादितं लिङ्गत्वं चेन्नित्यत्वमेव ऽ
सतां लभते यथा भार्या त्वं पतिमेव पति न स्त्री त्वामिव सर्वसा
रणं ततो लिङ्गशब्दः स्वार्थस्य लिङ्गशब्दस्य नित्यापेक्षां विनात्म
भायोगात्तदपेक्षेत न त्वेतदस्ति । तथा हि । नित्यशब्दो ऽयं नियत
भिप्रायो वा स्यात्तद्धर्मनियतत्वाभिप्रायो वा तत्राग्न्यादिनियाम
मेव प्रतिधूमादेर्लिङ्गत्वदर्शनान्नियतापेक्षा तावदनाशङ्कनीयैव नि
तत्वेन तु विना यद्यपि लिङ्गत्वं नास्ति तथापि नियतत्वप्रतियो
कत्वाभावान्न तत्प्रत्येव लिङ्गत्वस्य सत्ता साधारणसत्तानिबन्धन
क्षिकत्वाभावेन तत्प्रतिपादकस्य लिङ्गशब्दस्य स्वार्थाभिधानकाले
त्यशब्दप्रतिपाद्यार्थान्तरापेक्षा निरस्ता तत्पर्यवसितस्वार्थाभिध
व्यापारस्यार्थान्तरान्वयसिद्धेर्व्यापारान्तरापत्तेः सामर्थ्यविघात

१ सिद्धाविति २ पु० ना० ।

रः। दृष्टान्तं तावद्वैधर्म्यपरत्वेन व्याचष्टे * गुरुशब्दस्य हीति *
शार्थस्य गर्भाधानादिपूर्वकवेदाध्यापनस्य शिष्यापेक्षात्मकलाभ-
चाराच्छब्दे ऽभिहितं देवदत्तशब्देन षष्ठ्यन्तेनोपात्तो यः शिष्य-
धः सो ऽनतिरेकेण स्वार्थसत्तालाभादनाधिक्येनान्तर्णीतो
गुरुशब्दस्य स्वार्थः स तथोक्तः तस्य भावस्तत्त्वम्। ननु
ग्रस्यापि गुरुत्ववत्सर्वान्प्रत्यसत्त्वेनासाधारणसत्तानिबन्धना-
त्वसद्भावात्तद्वाचकस्य लिङ्गशब्दस्यापि गुरुशब्दवत्सम्ब-
ब्देन नित्यसापेक्षत्वात्सामर्थ्याविघात इत्याशङ्क्याभ्युपगम्य
सम्बन्धिशब्दत्वं * लिङ्ग्यपेक्षया न तु नित्यशब्दार्थापेक्ष-
ारिहरति * ननु नित्यशब्दार्थनियतत्वं विना लिङ्गत्वा-
स्येव तदपेक्षापीति कथमुच्यते लिङ्ग्यपेक्षयैव लिङ्गत्वं न नि-
ायेत्याशङ्क्याह * यद्यपि चेति * लिङ्गिनैव प्रतिलिङ्गत्वस्य स-
लेङ्गशब्दस्य सम्बन्धिशब्दत्वाय लिङ्गशब्देन विवक्षिता। न च
ाप्रतियोगिकी लिङ्गत्वस्य सत्ता प्रतीयते यथा परिणयनं विना
वाभावे ऽपि न परिणयनं प्रति भार्यात्वस्य सत्ता किं तु पति-
तीत्याशयः। गम्यगमकयोर्नियमलक्षणे सम्बन्धे सतीत्यर्थः।
ापकस्यैवाक्षिप्यमाणेन नियतत्वादाक्षेप्याक्षेपकाभिप्रायौ गम्य-
ाब्दौ। यथा यद्यपि गुर्वादिशब्दः स्वसम्बन्धिना विना प्र-
तथापि शिष्यादिसम्बन्धापेक्षाकृतगुर्वादिशब्दप्रवृत्तिनिमित्ता
दिशब्दस्य सम्बन्धिशब्दत्वप्रसिद्धिः तथास्य लिङ्गशब्दस्य न नि-
क्षणसम्बन्धापेक्षा कृतशब्दप्रवृत्तिनिमित्ता सम्बन्धिशब्दत्वप्र-
रित्यर्थः। ननु सम्बन्धिशब्दत्वाभावे ऽपि यौगिकत्वाद्यथा
ाब्दस्य शब्दप्रवृत्तिनिमित्तभूतयोगसिद्ध्यर्थं प्रतियोगिलिङ्गापेक्षा
लेङ्गशब्दस्यापि यौगिकत्वाच्छब्दप्रवृत्तिनिमित्तभूतयोगापेक्षेति
गिश्च सम्बन्धः स च लिङ्गत्वौपयिको नियमरूप एवेति नि-
वाच्यनियमापेक्षासिद्धेः सामर्थ्ये विघात इत्याशङ्क्याह * लि-
* अयमाशयः यद्यप्यवयवयोगेन प्रवृत्तेरुभयोर्यौगिकत्वं तुल्यम्।
। लिङ्गिशब्दस्य तद्धितान्तत्वात्प्रातिपदिकाच्च तद्धितोत्पत्तेः
ादिकार्थलिङ्गापेक्षा लिङ्गशब्दस्य तु कृदन्तत्वात्तस्य च धातो
द्धात्वर्थलिङ्गेन क्रियायोगनिमित्तत्वाच्छब्दप्रवृत्तिनिमित्तभूत-
ोगस्य प्रतिसम्बन्धिधात्वर्थमात्रेण सिद्धेर्नान्यापेक्षेति॥ ननु
ब्दस्य सम्बन्धिशब्दत्वाभावाल्लिङ्गियोगनिमित्तत्वाभावाच्च
नो लिङ्ग्यनपेक्षणो लिङ्गदर्शनमित्यभियुक्तप्रयोगो नोपपद्यत-
ङ्क्याह * लिङ्ग्यत इति * सम्बन्धिशब्दानां गुर्वादीनां समुदा-

यशक्त्यैवाध्यापनादिक्रियाजन्याद् व्याप्याद्यवच्छिन्नाध्यापयित्रादि
गतातिशयवाचित्वादवयवार्थयोगनिमित्तप्रवृत्तित्वलक्षणयौगिकत्व
नुपपत्तिर्लिङ्गेन क्रियायोगनिमित्तत्वेन यौगिकस्य लिङ्गशब्दस्य स
म्बन्धिशब्दत्वासम्भवे ऽपि ज्ञानाख्याया लिङ्गनक्रियाया ज्ञेयलिङ्गि
रूपणाधीननिरूपणत्वाच्छब्दप्रवृत्तिनिमित्तभूतयोगप्रतिसम्बन्धिज्ञा
नापरपर्यायलिङ्गनाख्यधात्वर्थनिरूपणाय ज्ञेयलिङ्ग्यपेक्षा सदास्ती
सामर्थ्याविघात इत्याशयः सबन्धिशब्दवच्च वाक्यासाधारणयनि
न्धनापेक्षा नितरां प्रतिसम्बन्धिधात्वर्थनिरूपणवेलायामेव नित्यं
दपेक्षा नान्यदेति सूचयितुकाममित्युक्तमपिशब्देन क्लेशः सूचितः।
न्वेवं सति नित्यशब्दाभिधेयस्य नियमलक्षणसम्बन्धस्यापि लिङ्ग
क्रियासिद्ध्युपयोगित्वेन तत्कारकतया लिङ्गेनैव नित्यमपेक्षणात
त्सापेक्षत्वे ऽपि सामर्थ्याविघातः स्यादित्याशङ्क्याह * नित्यत्वं पु
रिति * नियमाधीनत्वे ऽपि लिङ्गनक्रियायास्तदधीननिरूपणत्वाभ
वान्नित्यत्वनिरपेक्षेणैव लिङ्गशब्देन स्वार्थे लिङ्गलब्धे लिङ्गत्वस्य नि
यतत्वं विना ऽनुपपत्तेरर्थेन स्वसिद्ध्यर्थं नित्यत्वमपेक्षितं न शब्दे
त्यर्थः । लब्धेन स्वार्थेन लिङ्गेनापेक्षितमिति विग्रहः । नन्वेवं त
शब्दस्य नैरपेक्ष्यात्सामर्थ्यस्याविघातः स्यादित्याशङ्क्याह * तद्ध
तयेति * विगृहीतया षष्ठ्या लिङ्गधर्मतया नित्यत्वं लिङ्गस्य स
र्यते लिङ्गेनान्वीयतइत्यन्वयसिद्ध्यर्थं लिङ्गस्य नित्यत्वे * सम
न्धापेक्षायामित्युक्तं * तस्माद्भाष्यकृतो ऽपि कर्तृविशेषणमधिकारि
शेषणं वा नित्यशब्दो ऽभिमतो न लिङ्गविशेषणमित्याह * तस्मा
ति * उभयत्रापि सूत्रं योजयति * नियतस्येति * तस्मादित्यु
संहारभाष्यं व्याचष्टे * इतीति *

आख्या हि देशसंयोगात् ॥ १४ ॥

अथेत्यादिभाष्येणेदमपि सूत्रं पदोत्तरत्वेन व्याख्यातं प्राच्य
दिसमाख्याकर्तृविशेषणत्वेनाशङ्किता तत्र संस्थादिवत्समाख्या
अपि व्यभिचारदर्शनात्केन चिद्विशेषेणोपन्यास इत्याशङ्क्याह *
१ दानीमिति * ननु देशान्तरादागत्य प्राग्देशे वसतां प्राच्यत्वे सत
पि होलाकाद्यनुष्ठानादर्शनात्प्राग्देशाच्च निर्गत्य देशान्तरे वसतां
च्यत्वाभावे ऽप्यनुष्ठानदर्शनात्कथं समाख्याया अप्यत्यन्तानुवृत्ति
त्याशङ्क्याह * सर्वे हीति * नेयं देशनिमित्ता समाख्या किं तु
त्यादिनिमित्ता ऽभिमानमात्रनिमित्ता वेत्युत्तरसूत्रे वक्ष्यमाणो ऽ
प्रायः । एतदेव पूर्वपक्षिणो विशेषणमभिमतमिति सूचयितुमत्रैव

वस्थानादिति पूर्वपक्षसूत्रं योजयति * तस्मादिति * यानार्थं नैतदेवमिति भाष्यं व्याचष्टे * तत्रेति * सर्वप्राख्यातपुरुषव्यक्तिवर्त्तिनस्तदसमाख्येभ्यश्च व्यावृत्तस्य जानान्निर्मूलस्य चाभिमानस्यायोगादित्याशयः । देशविशेषदोष इत्यपेक्षायां नैतदेवमिति भाष्येण सूचितं तावद्दोषमाश्चेति * ननु दिगूपानवस्थाने ऽपि विन्ध्यापेक्षया निरूढोदेशव्यवस्थादर्शनाच्च देशविशेषणत्वे ऽपि कश्चिद्दोष इत्याकरणार्थं दक्षिणादित्यादिभाष्यं व्याचष्टे * न चेति * देत्वाभिधानाभिप्रायविवरणपूर्वकं श्लोकं व्याचष्टे * समावदिति * उभयशब्दो ऽन्वयव्यतिरेकाभिप्रायः ।

न स्याद्देशान्तरेष्विति चेत् ॥ १५ ॥

त्याशङ्कासूत्रं पूर्वपक्षानौपयिकत्वेनायुक्तमाशङ्क्य देशनिमिसमाख्यायाः व्यभिचारित्वेन विशेषणत्वायोगादव्यभिचारितरकल्पनार्थत्वेन पूर्वपक्षोपयोगितां दर्शयन्नवतारयति * ते * यथैव देशसंयोगव्यभिचारलक्षणयोपपत्त्या तन्नि: समाख्यायाः व्यभिचारो ऽभिहितः तथैव देशनिमित्तत्वादेशव्यभिचारेण समाख्याव्यभिचार इत्यस्ति यस्य समाषणत्वं पक्षस्योपपत्तिलब्धपूर्वपाक्षिणेत्यर्थः । कीदृशं प्रत्यवयपेक्षायामाह * यदीति * सूत्रव्याख्यानार्थमिति चोदित्वाव्याचष्टे * सतीति * किं तर्ह्येतन्निमित्तमित्याशङ्क्याह * ति * अनौपाधिकसन्तानविशेषव्यवस्थितप्राच्यादिव्यवहानुपपत्त्या ब्राह्मण्यादिवत्प्राच्यत्वादिजातिरपि कल्पयितुं शदसम्भवे ऽपि वा सन्तानविशेषएव प्राच्यादिशब्दवाच्यो तीत्याशयः । निमित्तान्तरासम्भवे ऽपि प्राच्यादिशब्दप्रयोगमूलाभिमानमात्रनिबन्धना भविष्यतीत्याह * अस्तु वेति * प्रयोगपरम्परैव किं निमित्तेत्याशङ्क्याह * लब्धेति * लब्धं दिसमाख्याख्यमाचारनिमित्तं यैरिति विग्रहः । नो ऽस्माकपदार्थः । सूत्रतात्पर्यप्रदर्शनार्थं तस्मादित्युपसंहारभाष्यं : * तस्मादिति * १८९।१

स्याद्योगाख्या हि माथुरवत् ॥ १६ ॥

इति सूत्रमाशङ्कानिराकरणार्थत्वेनावतारयति * इत्युक्त देशसंयोगनिमित्तायामित्यादिभाष्येण देशसंयोगविशेषव्य-

भिचारे ऽपि देशसंयोगमात्रस्याव्यभिचारान्निमित्तत्वाभिधानार्थं
नैतत्सूत्रं व्याख्यातं तत्र भूतादिशब्ददर्शनात्कालविशेषावच्छे
देशसंयोगस्य विशेषणरूपत्वोक्ता प्रतिभाति सा च देशसंयोगनि
त्तानां तद्धितानां कालविशेषविषयत्वेनास्मृतेरयुक्तेत्याशङ्क्याह *
म्बन्धैरिति * भूतशब्देन तदागमनहेतुकः सम्बन्धो ऽभिप्रेतः । व
मानशब्देन निवासहेतुकः । गर्भसम्भवलक्षणभवहेतुकस्य प्रसव
क्षणाजातत्वहेतुकस्य चोभयरूपतोक्ता । भविष्यच्छब्देन बहुश
सूचितः प्रस्थानहेतुको ऽभिप्रेतः । श्लोकं व्याचष्टे * सो ऽस्येति
नन्वेवं सति देशसंयोगमात्रनिमित्ता समाख्याप्यव्यभिचाराच्छ
त्यैव कर्त्तारं विशेष्टुमित्याशङ्क्याह * न चैनामिति * चिरनिर्ग
पुरुषस्य पुत्रादीनां पूर्वदेशगर्भसम्भवस्याप्ययोगादित्याशयः । अ
यस्य त्वतो ऽन्यतमः सम्बन्धो नास्ति न स माथुर इति दृष्टान्तभ
सूचितम् । यस्य चिरनिर्गतपुरुषपुत्रादेरतो ऽन्यतमः सम्बन्धो
स्ति न स प्राच्यसमाख्यो ऽथ च होलाकादीन्करोतीति समाख
व्यभिचारप्रतिपादनं विवृतम् । तस्मादित्युपसंहारभाष्यं व्या
* इतीति * ननु मथुरामभिप्रस्थित इति भाष्यं किमित्युपेक्षित
त्याशङ्क्याह * यस्त्विति * नन्वेवं दूतविषयत्वेन कस्मान्न व
ख्यातामित्याशङ्क्याह * अप्रत्ययितेति * प्राग्देशमभिप्रस्थितो द
प्राच्यो ऽनेन दृष्टान्तेनापाद्येत न दौत्ये व्यापृतस्य होलाकाद्यनु
दृश्यतइत्याशयः ।

कर्मधर्मो वा प्रवणवदिति ॥ १७ ॥

सूत्रं कर्माङ्गदेशविशेषणवाच्युपपदशङ्कार्थत्वेनाथेत्यादिभा
ण व्याख्यातं तथा मन्त्रादिकर्तृविशेषणवत् कृष्णमृत्तिकाप्रायत्व
देशविशेषणस्यापि व्यभिचारेण निरस्तत्वात्प्राच्यादिवच्च प्राक्त
देरपि निरस्तत्वात्केन विशेषेणोपन्यस्यतइत्याशङ्क्याह * इदा
मिति * कर्तॄणामानन्त्यादसम्भवे प्राक्त्वादेरपि देशस्यैक्याद्वि
शेषणोपपत्तेरित्येतावानाशयः । भाष्ये कृष्णमृत्तिकाप्रायग्रहणं
क्त्वादेरुपलक्षणार्थं प्राचीनप्रवणोदाहरणं च प्रागुदक्प्रवणस्या
ति व्याचष्टे * प्रागिति * तुल्यं तु कर्तृधर्मेणेति सूत्रमव्यवस्थि
तुल्यत्वाभिप्रायेण व्यभिचारतुल्यत्वाभिप्रायेण व्याचष्टे * तु
त्विति दिक् * कृष्णमृत्तिकाप्रायप्रभृति यत्तस्य देशस्य चिह्नं त
चारानुमेयश्रुतिगतोपपदवाक्यत्वेनाशङ्कितं तदनवस्थितत्वाद्व्य
चाराच्च कर्तृधर्मेण प्राच्यत्वादिना श्यामत्वादिना च तुल्यमित्य

शस्त्रावद्देशविशेषचिह्नत्वासम्भवमुपपादयति * प्राग्देशइति * ष्णमृत्तिकादेरनवस्थितत्वं यथेत्यादिभाष्योक्तमुपपादयति * मृ- त्तिकाद्यपीति * तत्र दाक्षिणदेशे ऽन्यत्र च देशान्तरे तत्समभित्यर्थः। व्यभिचारानवस्थितत्वयोरितरेतरनैरपेक्ष्ये ऽप्युपपादननिराकरणार्थं दर्शयितुं तस्मादित्युपसंहारभाष्यं तावद्व्याचष्टे * होलाकादी- ति * कृष्णमृत्तिकाप्रायेणापीति व्यभिचार इत्यादिभाष्यं व्याचष्टे * पुरुषापेक्षयेति * अत्राप्युपसंहारभाष्यमावृत्त्या योजयति * त- स्मादिति * कर्तृविशेषवद्देशो ऽपि होलाकादिव्यवस्थाकरणं न भवतीत्यर्थः॥

इति श्रीमत्त्रिकाण्डमीमांसामण्डलभतिवसन्तसोमयाजिभट्ट- माधवात्मजभट्टसोमेश्वरविरचितायां तन्त्रवार्तिकटीकायां सर्वा- नवद्यकारिण्यां न्यायसुधाख्यायां प्रथमाध्यायस्य तृतीयस्मृ- तिचरणपूर्वार्द्धम्॥

न्यायसुधायाम् ।

प्रथमाध्यायस्य तृतीयपादस्य उत्तरार्धो भागः ।

॥ साधुपदप्रयोगनियमाधिकरणम् ॥ ९ ॥

प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात्॥ १८॥

अत्र भाष्यकृता गोगाव्यादिशब्दानुदाहृत्य किमेते सर्वएव साक्षादिमतो ऽर्थस्य वाचकाः सन्तो वाक्यार्थे प्रमाणम् उत एक एवेति साक्षादिमतो वा पदार्थस्य कार्यायां वाक्यार्थप्रमायां कारणं किमेते सर्व एवोत एक एवेति सन्देहमुपन्यस्य प्रयोगभेदेनाविरोधात्सर्वेषां व्रीहियवादिवद्विकल्पेन प्रामाण्योपपत्तेः । सिद्धान्ताभावेन सन्देहानुपपत्तिमाशङ्क्य किमत्रेति भाष्येण शक्त्या विना शब्दस्यार्थप्रत्यायकत्वं सम्भवत्युत नेति सन्देहकारणमुक्त्वा सर्वइत्यादिना भाष्येण पूर्वपक्षः कृतः । तत्र यववराहाधिकरणे शास्त्रस्थप्रयोगबलेन लौकिकप्रयोगबाधस्योक्तत्वात्,पूर्वपक्षानुपपत्तिमाशङ्क्याह*एकस्मादिति * व्यवस्थितशास्त्रस्थप्रयोगबलेनाव्यवस्थितलौकिकप्रयोगबाधमङ्गीकृत्य यवादिशब्दानां दीर्घशूकाद्यर्थनिर्धारणं यत्प्रतिपादितं तद्विकल्पदोषभयादनेकादृष्टशक्तिकल्पनाप्रसङ्गाद्गौणमुख्यविभागाश्रयणाच्चेति योज्यम् । एतत्कारणत्रयोपपादनायैकस्मादित्युक्तं, यवैर्यजेतेत्येकस्माद्यवपदाद्दीर्घशूकैर्वा यष्टव्यं प्रियङ्गुभिर्वेत्यनेकार्थप्रतीतेर्विकल्पो ऽनेकशक्तिकल्पना ह्येकस्य शब्दस्यापद्येत एकस्मिश्चार्थे शब्दस्य शक्तौ क्लृप्तायां गौणत्वेनेतरत्र प्रयोगोपपत्तेर्नानेकशक्तिकल्पनं युक्तम् इह तु गोशब्दश्रवणात्ततो ऽर्थप्रतीतिर्गावीशब्दश्रवणे तस्मादिति व्यवस्थोपपत्तेर्न तावच्छ्रोतुर्विकल्पापत्तिः । वक्तुरप्ययमेव शब्दः प्रयोज्य इति नियमाभावात्प्रसज्यमानो ऽपीच्छया विकल्पेन दोषमावहति यत्र च कारणात्कार्यदर्शनं तत्र शक्तेरस्तित्वं सम्प्रतीयतइति न्यायेन शक्तेः कारणाश्रितत्वेन शब्दसमवेतत्वात्तद्भेदे युक्त एव भेदो गाव्यादीनां चार्थान्तरे मुख्यगौणाभावात्साक्षादिमति गौणत्वायो-

गात् शब्दसादृश्यमात्रेण शब्दस्य शब्दान्तरार्थप्रत्यायकत्वे
ब्दस्यापि मालाशब्दार्थप्रत्यायकत्वापत्तेर्मुख्यत्वमनपह्नं प्रत्
वैपरीत्यं, प्रियङ्गुदीर्घशूकयोश्चैकपदोक्तयोर्विकल्पे तस्यैव
युगपदेकार्थापेक्षया प्रामाण्यमर्थान्तरापेक्षया चाप्रामाण्यमिति
विरोधं वक्तुम् * एकस्मादित्युक्तम् * येषां त्वदीर्घशूके
ऽन्येषां प्रियङ्गुष्वित्यनेकार्थप्रतिभानकारणमुक्तम् । यववरा
रणन्यायमुक्त्वा तद्वैषम्यमत्रैव दर्शयन् पूर्वपक्षयति * यत
त्यादिना * साधुत्वेनावधार्यन्तइत्यन्तेन तत्र सत्यप्येकाथि
शब्दत्वेऽर्थसाधनत्वात्साधुत्वेनावधार्यन्तइति वक्ष्यमाणन्
येन शक्तिभेदोपपत्तेरविरोधादिति च पञ्चमीद्वयं योज्यं,
तत्वाच्छक्तेस्तद्भेदे शक्तिभेदौचित्यं समवायिशब्दोक्तम् ।
वावच्छिन्नशब्दाश्रितैकशक्तिकल्पनामात्रेणोभयनियमोपपत्तेः
रशक्तिकल्पने वा शक्तिद्वयकल्पनेऽप्यर्थस्य सर्वशब्दवाच्य
शब्दस्य च सर्वार्थवाचकत्वापत्तेरर्थाश्रितशक्त्यभावात्
ऽप्येकस्यानेकशक्तिकल्पनादोषो नास्तीत्याशयः । यवादिविधे
यप्रयोगेण दीर्घशूकादिविषयत्वावधारणात्तद्विरुद्धलौकिक
वगतप्रियङ्ग्वादिविषयत्ववाचोदाहृतगवादिशब्दप्रयोगमात्रे
ण्यादिशब्दानामप्रयोगत्वाभावात्सर्वपर्यायप्रयोगानियमाच्च
याच्च शास्त्रीयप्रयोगेण लौकिकप्रयोगबाध इति शास्त्रीयत्व
अत्रैव पूर्वपक्षहेतुद्वयस्य यववराहाधिकरणन्यायवैषम्यप्रति
र्थत्वप्रदर्शनार्थं सत्यपि विरोधे शास्त्रस्य साध्वसाधुत्वप्रा
व्यापाराभावाच्छास्त्रप्रयोगस्य निर्मूलत्वेन लौकिकप्रयोग
त्वादपि सर्वे साधुत्वेनावधार्यन्तइति उत्तरोपपत्तिर्व्यवस्था
व्यवस्थापकरूपेण पदपूर्वकत्वाच्चेति सोपपादकोपन्यासपू
र्त्ता अनेन व्याकरणस्मृत्यप्रामाण्येन पूर्वपक्षकरणाद्विचार
न्यायसङ्गतिर्दर्शिता । अनन्तराधिकरणसङ्गतिस्त्वादिगमस्य
नार्थमेव चेत्यत्र होलाकाधिकरणोक्तव्यवस्थाक्षत्यादिना व्यु
त्पत्त्युपजीवनेनात्र पूर्वपक्षोत्थानादस्मिन् व्याकरणशास्त्र
पदपूर्वकत्वोपपादनार्थं वाक्यात्मकत्वं विशेषणम् । अनेन
करणशास्त्रस्य लोकप्रसिद्धपदप्रयोगाद्युत्पत्तेः । साध्वसाधुत्व
शास्त्राविषयत्वायोगादि लोकप्रयोगोत्तरस्मरणत्वादिति सू
व्याख्यातः । लोकप्रसिद्धसाधुशब्दवशात् व्याकरणशास्त्रं
तस्माच्च लौकिकशब्दानां साध्वसाधुत्वनिर्णय इतीतरेतराश्र
दूनार्थम् * तथा हीत्युक्तम् * शब्दरूपप्रमाणार्थश्चेत्यत्र

शब्दो व्याख्येयपदार्थज्ञानाय वा शब्दशास्त्रस्य पदरूपश-
र्शनार्थो ऽर्थशब्दः । नन्वेवमप्यर्थप्रतिपादकत्वेन गोगा-
नां लोके प्रसिद्धत्वात्साधुत्वं भेर्यादिशब्दानां त्वर्थप्रति-
सिद्धेरसाधुतेति व्यवस्थोपपत्तेः शब्देषु न व्यवस्था स्या-
त्याशङ्क्य * अत इत्युक्तम् * लोकप्रयुक्तेष्वेव गोगा-
ध्वसाधुत्वव्यवस्थानिरासार्थमेतदित्याशयः । नन्वेवं स-
स्मृतिबाधः स्यात्स च पूर्वोक्तस्मृतिबलाबलीयस्त्वविरुद्ध
* वाक्यार्थेषु हीत्युक्तम् * तत्र आचारानपेक्षायाः
बलीयस्त्वमिह तु स्मृतेराचारापेक्षत्वेन विपरीतबलाबल-
कादेव साध्वसाधुता निर्णेतव्येत्याचारेण स्मृतिबाधो
वेत्याशयः । ननु लोकस्य सङ्कीर्णव्यवहारित्वा-
धुत्वनिर्णायकत्वं न युक्तमित्याशङ्क्य * वाचकेत्युक्तम् *
को यो गोगाव्यादिशब्दः स साधुरप्रत्यायको भेर्यादिशब्द-
ति व्यवस्था लोकसिद्धैवेत्यर्थः । ध्वनिमात्राणीत्यनेनैतदे-
। मात्रिका वर्णसमाम्नायः । ननु वेदादिविद्यास्थानप्रयु-
वादिशब्देषु साधुत्वप्रसिद्धेर्गाव्यादिशब्देषु च तत्राप्रयुक्ते-
प्रसिद्धेर्लोके चैवंविधव्यवस्थानुपलब्धेर्न ततो निर्णयः स-
शङ्क्य साध्वसाधुशब्दयोरर्थप्रत्ययसाधनत्वासाधनत्वानि-
रूढित्वाभावाल्लोके च भेर्यादिशब्दानामप्रत्यायकत्वनिश्च-
गाव्यादिशब्दानां प्रत्यायकत्वनिश्चयात्सिद्धैव व्यवस्थेति *
नोक्तम् * अपशब्दत्वमप्यर्थप्रत्ययापगमनिमित्तत्वाद्भेर्यादि-
व्यवस्थितमित्यनर्थकत्वादित्यनेनोक्तम्। नन्वेकेनैवार्थप्रत्यय-
थमेकस्मिन्नर्थे अनेकेषां साधुतेत्याशङ्क्य गवादिदृष्टान्तेन
एवं वाचकशक्तिभेदोपपत्तिरविरोधादिति च पञ्चमीद्वया-
वद्ग्रन्थतात्पर्यमेकवाक्यतया व्याख्यातम्। यद्वा तत्र वाचके
पपत्तिप्रतिरोधत्वं पर्यालोच्य यो निर्णयो भवति सर्वेषां
मित्येवंरूपः स्वीकार्यः । न तु शास्त्रस्थप्रयोगबलेन लौकिक-
धं पर्यालोच्येति ल्यब्लोपे पञ्चमीद्वयमङ्गीकृत्य पूर्वफक्कि-
ष्ठोयशब्दानुषङ्गेण वैषम्यप्रतिपादनार्थत्वेनाविरोधादित्यन्तं
व्याख्याय ननु वाचकशक्तिभेदोपपत्तौ शास्त्रस्थप्रयोगाविरो-
ऽप्यपि व्याकरणशास्त्रेण गवादिशब्दानामेव साधुत्वान्वा-
रेषामसाधुत्वप्रतिपादनान्न तद्विरुद्धाचारबलेन सर्वेषां सा-
क्तमित्याशङ्कानिराकरणार्थतयोत्तरग्रन्थो व्याख्येयः । अत्र
ता सर्वं इति ब्रूम इत्यनेन शब्देषु न व्यवस्था स्यादिति सूत्रा-

गात् शब्दसादृश्यमात्रेण शब्दस्य शब्दान्तरार्थप्रत्यायकत्वे शा
ब्दस्यापि मालाशब्दार्थप्रत्यायकत्वापत्तेर्मुख्यत्वमवश्यं प्रतीय
वैषम्यं, प्रियङ्गुदीर्घशूकयोश्चैकपदोक्तयोर्विकल्पे तस्यैव यवप
युगपदेकार्थापेक्षया प्रामाण्यमर्थान्तरापेक्षया चाप्रामाण्यमित्यस्य
विरोधं वक्तुम् ॥ एकस्मादित्युक्तम् ॥ केषांचिद्दीर्घशूकेषु प्रय
ऽन्येषां प्रियङ्गुष्वित्यनेकार्थप्रतिभानकारणमुक्तम् । यववराहाधि
रणन्यायमुक्त्वा तद्वैषम्यमत्रैव दर्शयन् पूर्वपक्षयति ॥ यत्र पुन
त्यादिना ॥ साधुत्वेनावधार्यन्तइत्यन्तेन तत्र सत्यप्येकविषयत्वे
शब्दत्वे ऽर्थसाधनत्वात्साधुत्वेनावधार्यन्तइति वक्ष्यमाणसाध्या
चनेन शक्तिभेदोपपत्तेरविरोधादिति च पञ्चमीद्वयं योज्यं, शब्दा
त्वाच्छक्तेस्तद्भेदे शक्तिभेदौचित्यं समवायिशब्देनोक्तम् । अर्थवि
षावच्छिन्नशब्दाश्रितैकशक्तिकल्पनामात्रेणोभयनियमोपपत्तेरनवच्छि
न्नशक्तिकल्पने वा शक्तिद्वयकल्पने ऽप्यर्थस्य सर्वशब्दवाच्यत्वाप
शब्दस्य च सर्वार्थवाचकत्वापत्तेरर्थाश्रितशक्त्यभावात् अर्थव
ऽप्येकस्यानेकशक्तिकल्पनाद्दोषो नास्तीत्याशयः । यवादिविधेश्च शास्
स्थप्रयोगेण दीर्घशूकादिविषयत्वावधारणात्सद्धिरुद्धलौकिकप्रयोग
वगतप्रियङ्ग्वादिविषयत्वबाधोदाहृतगवादिशब्दप्रयोगमात्रेण ग
व्यादिशब्दानामप्रयोगत्वावगमात्सर्वपर्यायप्रयोगानियमाच्चाविरो
धात्र शास्त्रस्थप्रयोगेण लौकिकप्रयोगबाध इति शास्त्रस्थेत्यस्यार्थः
अस्यैव पूर्वपक्षहेतुद्वयस्य यववराहाधिकरणन्यायवैषम्यप्रतिपादना
र्थत्वप्रदर्शनार्थं सत्यपि विरोधे शास्त्रस्य साध्वसाधुत्वप्रतिपादन
व्यापाराभावाच्छास्त्रस्थप्रयोगस्य निर्मूलत्वेन लौकिकप्रयोगाबाधक
त्वादपि सर्वे साधुत्वेनावधार्यन्तइति उत्तरोपपत्तिर्वक्ष्यमाणसाध्य
व्यवधायकरूपेण पदपूर्वकत्वाच्चेति स्वोपपादकोपन्यासपूर्वमुपन्य-
स्ता अनेन व्याकरणस्मृत्यप्रामाण्येन पूर्वपक्षकरणाद्विचारस्य पादा-
ध्यायसङ्गतिर्दर्शिता । अनन्तराधिकरणसङ्गतिस्त्वीदृगसम्भवप्रतिपाद-
नार्थमेव वेत्यत्र होलाकाधिकरणोक्तव्यक्त्याकृत्यादिवाच्युपपदास-
म्भवोपजीवनेनात्र पूर्वपक्षोत्थानाद्द्रष्टव्यते व्याकरणशास्त्रव्यापारस्य
पदपूर्वकत्वोपपादनार्थं वाक्यात्मकत्वं विशेषणम् । अनेन च व्या-
करणशास्त्रस्य लोकप्रसिद्धपदप्रयोगादुत्पत्तेः । साध्वसाधुव्यवस्थायाः
शास्त्राविषयत्वायोगादित्येवम्प्रयोगोत्पत्त्यशास्त्रत्वादिति सूत्रावयवो
व्याख्यातः । लोकप्रसिद्धसाधुशब्दवशात् व्याकरणशास्त्रं प्रवर्त्तते
तस्माच्च लौकिकशब्दानां साध्वसाधुत्वनिर्णय इतीतरेतराश्रयोपपा-
दनार्थम् ॥ तथा हीत्युक्तम् ॥ शब्दरूपश्चासावर्थश्चेत्येवं वस्तुव-

चनत्वेनार्थशब्दो व्याख्येयपदार्थज्ञानाय वा शब्दशास्त्रस्य पदरूपश-
ब्दापेक्षाप्रदर्शनार्थो ऽर्थशब्दः । नन्वेवमप्यर्थप्रतिपादकत्वेन गोगा-
व्यादिशब्दानां लोके प्रसिद्धत्वात्साधुत्वं भेर्यादिशब्दानां त्वर्थप्रति-
पादकत्वाप्रसिद्धेरसाधुतेति व्यवस्थोपपत्तेः शब्देषु न व्यवस्था स्या-
दित्ययुक्तमित्याशङ्क्य * अत इत्युक्तम् * लोकप्रयुक्तेष्वेव गोगा-
व्यादिषु साध्वसाधुत्वव्यवस्थानिरासार्थमेतदित्याशयः । नन्वेवं स-
दाचारेण स्मृतिबाधः स्यात्स च पूर्वोक्तस्मृतिबलाबलीयस्त्वविरुद्ध
इत्याशङ्क्य * वाक्यार्थेषु हीत्युक्तम् * तत्र आचारानपेक्षायाः
स्मृतेस्ततो बलीयस्त्वमिह तु स्मृतेराचारापेक्षत्वेन विपरीतबलाबल-
क्रमत्वाल्लोकादेव साध्वसाधुता निर्णेतव्येत्याचारेण स्मृतिबाधो
युक्त एवेत्याशयः । ननु लोकस्य सङ्कीर्णव्यवहारित्वा-
त्साध्वसाधुत्वनिर्णायकत्वं न युक्तमित्याशङ्क्य * वाचकेत्युक्तम् *
अर्थप्रत्यायको यो गोगाव्यादिशब्दः स साधुरप्रत्यायको भेर्यादिशब्द-
श्चासाधुरिति व्यवस्था लोकसिद्धैवेत्यर्थः । ध्वनिमात्राणीत्यनेनैतदे-
व विवृतम् । शात्रिका वर्णसमाम्नायः । ननु वेदादिविद्यास्थानप्रयु-
क्तेष्वेव गवादिशब्देषु साधुत्वप्रसिद्धेर्गाव्यादिशब्देषु च तत्राप्रयुक्ते-
ष्वसाधुत्वप्रसिद्धेर्लोके चैवंविधव्यवस्थानुपलब्धेर्न ततो निर्णयः स-
म्भवतीत्याशङ्क्य साध्वसाधुशब्दयोरर्थप्रत्ययसाधनत्वासाधनत्वनि-
मित्तत्वेन रूढित्वाभावाल्लोके च भेर्यादिशब्दानामप्रत्यायकत्वनिश्च-
यात् । गोगाव्यादिशब्दानां प्रत्यायकत्वनिश्चयात्सिद्धैव व्यवस्थेति *
नेत्यादिनोक्तम् * अपशब्दत्वमप्यर्थप्रत्ययापगमनिमित्तत्वाद्भेर्यादि-
ष्वेवेव व्यवस्थितमित्यनर्थकत्वादित्यनेनोक्तम्। नन्वेकैनैवार्थप्रत्यय-
सिद्धेः कथमेकस्मिन्नर्थे अनेकेषां साधुतेत्याशङ्क्य गवादिदृष्टान्तेन
परस्ता एवं वाचकशक्तिभेदोपपत्तिरविरोधादिति च पञ्चमीद्वया-
न्वयायैतावद्ग्रन्थतात्पर्यमेकवाक्यतया व्याख्यातम्। यद्वा तत्र वाचक-
शक्तिभेदोपपत्तिप्रतिरोधत्वं पर्यालोच्य यो निर्णयो भवति सर्वेषां
साधुत्वमित्येवंरूपः स्वीकार्यः । न तु शास्त्रस्थप्रयोगबलेन लौकिकप्र-
योगबाधं पर्यालोच्येति ल्यब्लोपे पञ्चमीद्वयमङ्गीकृत्य पूर्वपक्षिक-
आगतनिर्णयशब्दानुषङ्गेण वैषम्यप्रतिपादनार्थत्वेनाविरोधादित्यन्तं
ग्रन्थं व्याख्याय ननु वाचकशक्तिभेदोपपत्तौ शास्त्रस्थप्रयोगाविरो-
धे च सत्यपि व्याकरणशास्त्रेण गवादिशब्दानामेव साधुत्वान्वा-
ख्यानेनेतरेषामसाधुत्वप्रतिपादनाच्च तद्विरुद्धाचारबलेन सर्वेषां सा-
धुत्वं युक्तमित्याशङ्कानिराकरणार्थतयोत्तरग्रन्थो व्याख्येयः । अत्र
शाप्यक्रुता सर्वे इति ब्रूम इत्यनेन शब्देषु न व्यवस्था स्यादिति सूत्रा-

वयवं सर्वशब्दानादित्वपूर्वपक्षप्रतिज्ञानार्थत्वेन व्याख्याय
त्यादिनार्थप्रत्ययान्यथानुपपत्त्या गाव्यादिशब्दानामपि स
तार्थेन सह वाच्यवाचकसम्भवं प्रश्नपूर्वमुपपाद्याशक्तिज
शत्वशङ्कामबाध्यस्मृत्या निराकृत्य कर्त्रस्मृत्या च सामयिक
सम्बन्धग्रन्थे निराकृतामुक्त्वा तस्मात्सर्वे साधव इत्युपसं
र्वेषामर्थवत्त्वात्सर्वैर्भाषितव्यमिति पूर्वपक्षप्रयोजनमुक्त्वा ते
दृष्टार्थसाधनत्वाविशेषे ऽप्यदृष्टार्थो गवादिशब्दनियमो भ
त्याशङ्कानिरासार्थत्वेन प्रयोगोत्पत्तेरुच्चारणानियमस्याशास्त्री
स्येवं प्रयोगोत्पत्त्यशास्त्रत्वादितिसूत्रावयवो व्याख्यातः। त
तात्पर्यविवेकार्थं दृष्टार्थत्वे साधनत्वाद् गाव्यादिशब्दानाम
१९१।६ सम्भवमुपपादितमुपसंहरति * ततश्चेति * न च दृष्टार्थस
निबन्धनत्वात् साधुशब्दस्य गाव्यादिशब्दानां तदभावात्सा
व्यवस्था भविष्यतीत्याशङ्कते * अदृष्टेति * साध्वसाधुव्यव
यद्वा श्रेयोरूपादृष्टसाधनत्वनिबन्धना साधुता प्रत्यवायरूपाद
नत्वनिबन्धनात्वसाधुतेत्यर्थः साधूनामेवादृष्टसाधनत्वमदृष्ट
त्वमेव वा साधुत्वमित्युभयथापि व्यवस्था वेदाधीना न च
दवाक्यैर्निर्दिष्टा अदृष्टसाधनत्वं वान्यप्रमाणविषय एव
तीति निराकरोति * वेदवाक्यैरिति * न च दृष्टसाध
प्रमाणान्तराविषयत्वे ऽपि तद्धेतुभूतयोः साध्वसाधुत्वयो
णान्तरावगतयोर्वेदेनादृष्टसाधनत्वबोधो भविष्यतीत्याशङ्क
प्रत्यक्षेण तावदिति * उपमानस्य सादृश्यमात्रविषय
नाशङ्कनीयत्वादर्थप्रत्यायन्यथानुपपत्तेश्चान्याथापत्त्या सर्वेष
चकत्वप्रतीतेर्व्यवस्थापकत्वस्य दूरनिरस्तत्वादनिराकरणम्
प्रमाणान्तरासम्भवे ऽपि वेदवाक्यं साधुत्वासाधुत
हकं भविष्यतीत्याशङ्क्याह * वेदेति * साध्वसाधुत्वयोः
ब्दावान्तरजातिरूपत्वे वस्तुस्वरूपान्वाख्यनपरमेते साधव
इत्येवं रूपं वाक्यं कल्प्यं धर्मान्तरत्वे साधुत्वगुणान्वाख्यान
साधुत्वदोषान्वाख्यानपरं तस्य च पुरुषार्थानुबन्धित्वाभावेन
क्यापतेरध्ययनविधिना तात्पर्यानवधारणात्प्रामाण्यं न युक्तमि
शयः। आत्मस्वरूपप्रतिपादकानां तूपासनादिविध्यपेक्षितार्था
नात्सरस्वतीविनशनादिना वाक्यानां सारस्वतसत्रादिकर्मवि
षयिकत्वानामानर्थक्यापत्तिरिति वैषम्यसूचनार्थं विधीत्युक्त
अस्तु तर्हि विधिनिषेधरूपमेव वाक्यं साध्वसाधुत्वप्रतिपादक
त्याशङ्क्याह * न वेति * ननु माभूत्स्वरूपेण विधिनिषेधविष

ाधुभिरभिदध्यादसाधुभिर्नेत्यभिधानकरणत्वेन तु भविष्यतीत्या-
ङ्क्ते * अभिधेति * गोशब्देनाभिदध्यादश्वशब्देनाभिदध्यान्न
ावीशब्देनाभिदध्यान्न गोणीशब्देनाभिदध्यादित्यादि स्वरूपा प्रत्येकं
ा विधिनिषेधा कल्प्यन्ते साधुभिरभिदध्यादसाधुभिर्नेति द्वावेव
ा तत्रानन्त्यापत्तेराद्यं पक्षं तावद् दूषयति *नेति * कथं कल्पना-
पपत्तिरित्यपेक्षायां व्याकरणस्मृतिमूलत्वेन कल्प्यत्वादनन्तानां चा-
ोतुमशक्यत्वादनुपपत्तिरित्याह * यो हीति * यो हि व्याकरण-
णेता तद्गुणतया य एव पदानां प्रतिपत्तौ प्रतिपदं पाठ इति महा-
ाष्यकारोक्तन्यायेन साधूनां प्रतिपदं पाठन्नाध्यवस्यतीत्यर्थः। स एकै-
स्य शब्दस्य गावीगोणयाद्यनेकापशब्ददर्शनात्तेषां विशेषमाह*अपश-
ाश्चेति*कलञ्जादिवदिति वैधर्म्यदृष्टान्तं विवृणोति *व्रीह्यादीनि ही-
ि*कलञ्जादिग्रहणेन तुल्यन्यायतया व्रीह्यादीनां विधेयत्वसम्भव-
ूचनार्थं व्रीह्यादिग्रहणम्। अनन्तरोक्तव्यतिरेकमुखेन द्वितीयपक्षं
िराकरोति * न त्विति * सर्वानुगतैकधर्म्ममात्रोपलक्षणार्थो जा-
तिशब्दः तत्र एकोपलक्षणत्वाभावेनैकविधिनिषेधविषयत्वासम्भव-
ुपपादयति * न तावदिति * अयमाशयः न तावच्छब्दत्वाति- १९
ेक्ता सर्वसाधुशब्दानुयायिन्यासाधुभ्यो व्यावृत्ता विलक्षणैकाका-
प्रत्ययवेद्या साधुत्वजातिरसाधुत्वजातिर्वा साधुशब्दानुगता सा-
ुभ्यो व्यावृत्तोपलभ्यते न वान्यो ऽपि कश्चिद्धर्मः साध्वसाधुश-
दाभिधेयः सम्भवति तथा हि न तावच्छब्दव्यतिरिक्तस्येन्द्रियलि-
ादेः शब्दस्यापि वा वक्तृज्ञानविवक्षाविषयप्रत्यायकत्वं साधुत्वं
स्य चिदिष्टम्। न च शब्दस्यार्थप्रत्यायकत्वं साधुत्वं गाव्यादिश-
देष्वव्याप्तेः। न च शब्दस्य शक्त्यर्थप्रतिपादकत्वं साधुत्वं गङ्गायां
ोषो ऽग्निर्माणवक इत्यादौ गङ्गाग्निशब्दयोस्तीरमाणवकादिषु श-
क्त्यभावे ऽपि तत्र साधुत्वप्रसिद्धार्थान्तरविषयशक्त्या अर्थान्तर-
वषयसाधुत्वाभ्युपगमे गोणीशब्दस्याप्यावपनविषयशक्तिसद्भावात्
ास्नादिमति साधुत्वापत्तिः देवदत्तादिशब्दानां च संस्कृतेनार्थप्र-
तिपादनं, न च शब्दस्यार्थप्रत्यायकत्वं साधुत्वं गाव्यादिशब्देष्व-
याप्तेः। न च शब्दस्य शक्त्या अर्थप्रतिपादकानां शक्त्यभावादसा-
ुत्वापत्तिः। स्नुषादिशब्दानां पुत्रभार्यादिवाचिता पुत्राद्यनभिधाय
ाद्विशिष्टभार्याद्यभिधानशक्तेः पुत्रादौ शक्तिसद्भावात्साधुत्वापत्तिः।
अर्थविषयानादिप्रयोगत्वे तु साधुत्वलक्षणे गाव्यादिशब्दानाम-
पि सास्नादिमदर्थविषयप्रयोगावध्यस्मरणेनानादित्वावगमात्साधु-
त्वमशक्यं निराकर्त्तुं स्वाभाविकार्थपरत्वमपि प्रतीतिप्रयोगाविशेषा-

डवादिशब्दवद्गाव्यादिशब्देष्वपि तुल्यं लक्षणानुगमो ऽपि च सिद्धेरुभयानर्थक्यमाशङ्क्य चम्पतीत्यादिशब्देषु वृद्धाप्रयुक्तत्वेना साधुतया ऽभिमतेषु भावान्न साधुत्वलक्षणमिति न कथं चित् साधुत्वं निरूपयितुं शक्यमनेनैव मार्गेणासाधुत्वमपि निराकार्यमिति एतदेव विवृणोति *अविभक्ता हीति* अतश्चैकोपलक्षणाभावात्सामान्यरूपेण साध्वसाधूनां विधिनिषेधविषयत्वानुपपत्तेः । व्यक्तिरूपेण विधिनिषेधविषयत्वानुपपत्तेः । पूर्वोक्तमेव विधिनिषेधानन्यप्राप्तमित्युपसंहरति * तेनेति * ननूपलक्षणान्तरासम्भवे ऽपि स्वाभाविकार्थपरत्वलक्षणसाधुत्वतद्विपर्ययलक्षणासाधुत्वोपलक्षणयोगेन विधिनिषेधविषयत्वं भविष्यतीत्याशङ्क्याह * न चेति* अर्थप्रत्यायनोद्देशेन सर्वेषां प्रयोगदर्शनेनार्थप्रत्यायनार्थत्वावसायादर्थप्रत्ययनार्थत्वलक्षणस्य वाचकत्वस्याव्यावर्त्तकत्वात्तद्विपर्ययलक्षणस्य वा वाचकत्वस्यासत्वाच्चोपलक्षणत्वं सम्भवतीत्याशयः। ननु गाव्यादिशब्दाव्यावर्त्तकत्वे ऽपि प्रसिद्धावाचकत्वमेर्यादिशब्दव्यावर्तकत्वाद्वाचकत्वस्य विधेयशब्दोपलक्षणत्वोपपत्तेरवाचकत्वस्य निषेध्यमेर्यादिशब्दोपलक्षणतोपपत्तेस्तन्निबन्धनौ विधिनिषेधौ भविष्यत इत्याशङ्क्याह * वाचकैरिति * प्राप्ताप्राप्ततया विधिनिषेधविषयत्वाभावे दृष्टान्तमाह *न हीति * डवदव्यमात्रोपलक्षणार्थमुदकग्रहणम् । ननु विधिनिषेधरूपश्रुतिमूलानपेक्षव्याकरणपरम्परामात्रेण साध्वसाधुविवेकसिद्धेर्विधिनिषेधनिराकरणमनर्थकं मूलश्रुत्यपेक्षायामपि वा साध्वनुशासनात्मकत्वेन व्याकरणस्य साधुविधिमात्रापेक्षत्वादसाधुनिषेधनिराकरणमनर्थकमित्याशङ्क्याह * अवश्यं चेति * निर्मूलत्वे अन्धपरम्परान्यायापत्तेर्न साध्वसाधुविवेकसिद्धिरित्याशयः । साधुविधानेनासाधुवर्जनसिद्धेरसाधुनिषेधेन वा साधुप्रयोगसिद्धेरुभयानर्थक्यमाशङ्क्य * संयोगेत्युक्तम् * विधेयेष्टसंयोगो विधेः फलं निषेध्यानिष्टसंयोगो निषेधस्येत्यर्थः । ननु उपलक्षणमूलत्वे निषेधमूलसाध्वनुशासनं न युक्तमित्याशङ्क्याह * त्रिष्वपि चेति*साधूनामसाधुभ्यो ऽल्पत्वाद्व्यवस्थितत्वाच्च सौकर्यम् । एतदेव विवृणोति * यदीति * यथा पञ्चनखानाम्मध्ये पञ्चैव शशादयो भक्ष्या इति नियमे कृते ततो ऽन्येषां श्वादीनामभक्ष्यत्वं गम्यते तथा गवादय एव साधव इति नियमे कृते ऽन्येषामसाधुत्वावगतिरित्यर्थः । एतदेवोपसंहरति * स एष इति * प्रासङ्गिकं व्याकरणस्य त्रिविधश्रुतिमूलत्वे ऽपि साध्वनुशासनमात्रात्मकत्वसम्भवमुपसंहृत्य प्रकृतं मूलश्रुत्यनुमानासम्भवमुपसंहरति * नन्वि-

* मूलासम्भवमेव द्रढयितुं व्यवस्थापकोपपदासम्भवं पूर्वाधिकरणोक्तमत्रापि योजयन्नाह * इदगीति * एवमेकोपलक्षणासत्वेन विधिनिषेधासम्भवमुक्त्वा विधिविषयासम्भवादपि विध्यसम्भवमाह * अथ प्राप्तश्चेति * अनेन च शब्दप्रयोगस्य लोकव्यवहारार्थत्वेनैवोत्पत्तेः । सिद्धेरशास्त्रविषयत्वादित्येतत्सूत्रावयवो व्याख्यातः। नन्वत्र महावार्त्तिककारेण सिद्धे शब्दार्थसम्बन्धे लोकतो ऽर्थ प्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेष्विति व्यवहारलक्षणेनैवार्थेन साध्वसाधुशब्दप्रयोगे आक्षिप्ते धर्मार्थं शास्त्रेण साधुनियमः क्रियते यथा लोके क्षुत्प्रतीघातार्थे प्राप्ते भक्षणे भक्ष्याभक्ष्यनियमो वेदे वा पयोव्रतं ब्राह्मणस्येत्यादिवदिते नियम इति वदता समाधानमुक्तमित्याशङ्कते * अथेति * धर्मजिज्ञासापह्नवेन धर्मस्य नियम इति षष्ठीविग्रहे ऽपि सम्बन्धमात्रोत्पन्नायाः षष्ठ्यास्तादर्थ्यलक्षणविशेषनिष्ठत्वसन्दर्शनार्थं धर्मायेति चतुर्थीनिर्देशः । साधूनां नियमाविषयत्वासम्भवेनैतन्निराकरोति * तदिति * नित्यप्राप्तस्य नियमाविषयत्वासम्भवे हेतुमाह * यस्य हीति * ननु गाव्यादिभ्यो ऽप्यर्थप्रत्ययसिद्धेस्तत्प्रसक्तौ गवादिशब्दस्य पाक्षिकत्वापत्तेर्गाव्यादिनिवृत्त्यर्थो नियमो भविष्यतीत्याशङ्क्याह * यस्यापीति * गाव्यादिशब्दानां साध्वसाधुत्वपक्षद्वये ऽपि व्यावर्त्यत्वायोगादित्याशयः । एतदेवोपपादयितुं विकल्पयति * कीदृशश्चेति * उभयत्र दोषमाह * यदीति * न च साधूनामप्यर्थप्रत्ययहेतुत्वादस्तिप्रसक्तिरित्याशङ्क्याह *यदि हीति* शब्दव्यापारसाध्यमर्थप्रतिपादनं, भाषणं नार्थप्रतिपादनमात्रं शब्दस्य च मुख्यार्थे साक्षाद्व्यापारो गौणलाक्षणिकयोस्त्वभिधेयसादृश्याविनाभावद्वारा गाव्यादीनां तु कथं चिद्व्यापारालाघवशब्दव्यापारसाध्यार्थप्रतिपादनात्मके भाषणे हेतुतास्तीत्याशयः। ननु साधूच्चारणायैव प्रवृत्तस्य प्रमादेनाशक्त्या वा प्रसज्यमानस्यासाधोर्निवृत्त्यर्थो नियमो भविष्यतीत्याशङ्कते * अथेति *प्रमादाशक्तिजानां दोषाणां परिहर्त्तुमशक्यत्वात्तन्निवारणमनर्थकमिति परिहरति * तदसदिति * नन्वव्यग्राणां शक्तानामपि च गाव्यादिशब्दप्रयोगदर्शनादप्रयुक्ताभिधानमयुक्तमित्याशङ्कते * दृष्ट इति * मत्पक्षे गाव्यादिशब्दानामप्यर्थप्रतिपादने व्यापारसद्भावाद्युक्ता प्रसक्तिः । त्वत्पक्षे तु तेषां कथं चिद्व्यापाराभावान्न तावच्छब्दव्यापारसाध्यार्थप्रतिपादनात्मके भाषणे प्रसक्तिः । यथा कथं चिदर्थप्रतिपादने तु प्रसक्तस्य गाव्यादेर्निवृत्त्यर्थं नियमाभ्यु

पगमे अक्षिनिकोचादेरपि प्रसक्तेस्तन्निवृत्त्यर्थो
शब्दव्यतिरिक्तसर्वप्रमाणोच्छेदः स्यादित्यभि
उच्यतइति * निवृत्त्यर्थत्वे च नियमत्वं व्याहन
साध्वसाध्वोश्च द्वयोर्नित्यप्राप्त्यभावात्परिसंख्य
मेति * किं चादृष्टार्थस्य यागादीष्टसिद्ध्यर्थं पुं
स्तत्प्रकृतित्वादिनियमस्तदपेक्षितावघाताद्युपाय।
प्रयोगस्य तु परप्रतिपत्त्यर्थत्वेन दृष्टार्थत्वान्न
युक्त इत्याह * न चेति * नन्वेकः शब्दः सम्
शास्त्रान्वितः स्वर्गे लोके कामधुग्भवतीति शब्द
नत्वावगमात्तदन्यथानुपपत्तिरस्त्येवापूर्वकल्पन
ङ्क्याह * परार्थत्वाच्चेति * ननु यथा दृष्टार्थस्या
ष्यं प्राङ्मुखो भुङ्क्तइत्यदृष्टार्थः । प्राङ्मुखत्वा
पि शब्दप्रयोगस्यादृष्टार्थः साधुनियमो भविष्य
चेदमिति * शब्दादीनां विषयाणां गोचरे स
शब्दस्य तावन्नियमजन्यादृष्टाश्रयत्वस्य सम्भव
स्येति * कर्तृत्वेन परार्थस्यापि स्वर्गकामादेः
प्राधान्यस्यापि भावेनापूर्वाश्रयत्वदर्शनात्तद्व्यम
त्यन्तग्रहणम् * यत्पुनः परार्थस्याप्याहवनीया
पूर्वाश्रयत्वप्रदर्शनात् * दृष्टार्थग्रहणम् * न
प्राधान्यादपूर्वाश्रयत्वं भविष्यतीत्याशङ्क्याह *
क्रत्वङ्गभूतानामप्यर्थानामर्थाक्षिप्तस्याभिधानस्या
दृष्टार्थत्वान्नापूर्वेणोपयोग इत्याशयः । ननु श्र
याफलभोक्तृत्वयोग्यताधानायापूर्वापेक्षणात्तदा
स्याशङ्क्याह * श्रोतुः पुनरिति * शब्दार्थविष
क्षणिकत्वान्नापूर्वाश्रयत्वशङ्केत्याह * बुद्धेश्चेति
वद्गुणभूतत्वान्नापूर्वाश्रयतेत्याह*वक्तेति*ननु
प्रयोगस्य फलसाधनत्वावगमात्प्रयोक्तुः फलभा
ष्यतीत्याशङ्क्याह * नेति * स्वर्गकामादिशब
वगतेस्तदनुरोधेन क्रियाफलभाक्त्वावगतिः। इह
स्य फलसाधनत्वमात्रं प्रतीयते तच्चार्थवादमात्रत
फलभाक्त्वमाक्षिपतीत्याशयः । यदि वात्र वक्
स्यात्ततः सप्तदश वैश्यस्येत्यादिवत् षष्ठ्युक्तस
क्षावशात्स्वस्वामिलक्षणविशेषरूपत्वप्रतीतेः प्रा
१९५।१ वस्तीत्याह * न चेति * ननु यथा कामिपदाद्य

ानि भुञ्जीतेत्याख्याताक्षिप्तस्य भोक्तुर्गुणभूतस्य दिङ्नियमापूर्वाश्र-
यं तथात्रापि साधुशब्दप्रयोगाक्षिप्तस्य प्रयोक्तुः । साधुनियमा-
ाश्रयत्वं भविष्यतीत्याशङ्क्याह * यत्त्विति * कर्मिपदाद्यभावे
ऽपि भोजनं प्रति भोक्तुर्लोकादेव प्राधान्यावगतेरपूर्वाश्रयत्वं युक्त-
ति भावः । अपूर्वाश्रयत्वमुच्चारणस्यानाशङ्क्यमेवेत्याह * स्व-
रेण पुनरिति * अतो विषयाभावाद्व्यवस्थाभावाद्दृष्टार्थत्वाभा-
च्च नियमानुपपत्तेस्साधुनियमार्थस्य व्याकरणस्य वेदमूलत्वायो-
च्छास्त्रेण धर्मनियम इति यन्महावार्त्तिककारेणोक्तं तदयुक्तमि-
पसंहरति * एवं चेति * अनेन च साधुशब्दप्रयोगाणामुत्पत्ति-
मादिति व्युत्पत्त्या व्याकरणं प्रयोगोत्पत्तिशब्देनाभिप्रेत्य तस्याः
स्त्रमूलत्वाच्छब्दव्यवस्थानियमो न प्रयोजनमिति सूत्रं योजितम् ।
नु स्वयमेवैतस्य वेदवच्छास्त्रत्वं भविष्यतीत्याशङ्क्याह * न चेति *
त्रापि प्रयोगोत्पत्तेर्व्याकरणस्य शास्त्रत्वाभावादिति योज्यं, साधितं
ास्य स्वातन्त्र्यं कल्पसूत्राधिकरणइत्याह * तदुक्तमिति * एत-
व विवृणोति * न हीति * यद्वा पौरुषेयत्वात् व्याकरणस्य व-
ाभिप्रायमात्रपर्यवसानेनार्थपरत्वाभावात्साधुप्रयोगनियमं प्रत्यशा-
त्रत्वादिति षष्ठेन प्रकारेण योज्यमित्याह * सर्वत्र हीति * स्मृ-
तेशास्त्रान्तरसंवादाभावादिति सप्तमीं योजनामाह * न चेति *
तदेव विवृणोति * प्रायेणेति * अस्तु तावत्स्मृत्यन्तरेणासंवादः
रस्परमपि व्याख्येयव्याख्यानग्रन्थानां न संवादोऽस्तीत्याह * प-
स्परेण चेति * सूत्रवार्तिकभाष्येषु ये पाणिनिकात्यायनपतञ्जलय
ाचार्यास्ते विगीतवचना इत्यर्थः । कीदृशं विगानमित्यपेक्षायां निः
प्रयोजनं व्याकरणं सूत्रकृतोऽभिप्रेतं, साधुशब्दप्रयोगद्वारेण धर्मप्र-
योजनत्वं वार्त्तिककृतः, साधुशब्दज्ञानद्वारेण भाष्यकारस्येति वि-
गानं दर्शयितुमाह * न तावदिति * तेन तस्य प्रयोजनाभावाभिप्रायो
लक्ष्यतइति भावः । ननु विस्मृत्याप्यनुक्त्युपपत्तेः । कथं प्रयोज-
नाभावाभिप्रायो लक्ष्यतइत्याशङ्क्याह * कथं चेति * एतावत्त्वेन
बह्वायासत्वमभिप्रेतम् । एतदेव विवृणोति * येष्विति *
मोक्षाणामिति निर्द्धारणे षष्ठी न चानादरेणानुक्त्युपपत्तिरित्याह
* न चेति * सुज्ञानत्वेनापि नोपपत्तिरित्याह * सुज्ञानत्वं पुन-
रिति * यद्यपि वार्त्तिककृता शास्त्रेण धर्मनियम इति धर्मप्रयो-
जनत्वं व्याकरणस्योक्तं तद्व्याकरणे धर्मस्याप्रतिपाद्यमानत्वादयुक्त-
मित्याह * धर्मश्चेति * ननु न साक्षाद् धर्मप्रयोजनत्वं व्याकर-
णस्याभिप्रेतं किं तु तदनुगतशब्दप्रयोगद्वारेण ज्ञानद्वारेण वेत्याशङ्क्या-

पगमे अक्षिनिकोचादेरपि प्रसक्तेस्तन्निवृत्त्यर्थो नियम
शब्दव्यतिरिक्तसर्वप्रमाणोच्छेदः स्यादित्यभिप्रायेण
उच्यतइति * निवृत्त्यर्थत्वे च नियमत्वं व्याहन्येतेत्या
साध्वसाध्वोश्च द्वयोर्नित्यप्राप्त्यभावात्परिसंख्या युक्ते
मेति * किं चाहृष्टार्थस्य यागादीष्टसिद्ध्यर्थं पुरोडाशा
स्तत्प्रकृतित्वादिनियमस्तदपेक्षितावघाताद्युपायनियमश्च
प्रयोगस्य तु परप्रतिपत्त्यर्थत्वेन दृष्टार्थत्वान्न तत्साध
युक्त इत्याह * न चेति * नन्वेकः शब्दः सम्यग् ज्ञा
शास्त्रान्वितः स्वर्गे लोके कामधुग्भवतीति शब्दप्रयोगस
नत्वावगमात्तदन्यथानुपपत्तिरस्त्येवापूर्वकल्पनायां प्रम
ङ्क्याह * परार्थत्वाच्चेति * ननु यथा दृष्टार्थस्यापि भोज
ष्यं प्राङ्मुखो भुङ्क्तइत्यदृष्टार्थः। प्राङ्मुखत्वनियमस्तथ
पि शब्दप्रयोगस्यादृष्टार्थः साधुनियमो भविष्यतीत्याशङ्
चेदमिति * शब्दादीनां विषयाणां गोचरे समुदाये तन्
शब्दस्य तावन्नियमजन्यादृष्टाश्रयत्वस्य सम्भवमुपपादय
स्येति * कर्तृत्वेन परार्थस्यापि स्वर्गकामादेः कर्मफल
प्राधान्यस्यापि भावेनापूर्वाश्रयत्वदर्शनात्तद्वैषम्यप्रदर्शना
त्यन्तग्रहणम् * यत्पुनः परार्थस्याप्याहवनीयादेस्सम्मा
पूर्वाश्रयत्वप्रदर्शनात् * दृष्टार्थग्रहणम् * नन्वर्थस्य
प्राधान्यादपूर्वाश्रयत्वं भविष्यतीत्याशङ्क्याह * सत्यपि
क्रत्वङ्गभूतानामप्यर्थानामर्थाक्षिप्तस्याभिधानस्यापि वैधत्वे
दृष्टार्थत्वान्नापूर्वेणोपयोग इत्याशयः। ननु श्रोतुरनुष्ठेय
याफलभोक्तृत्वयोग्यताधानायापूर्वापेक्षणात्तदाश्रयत्वं
त्याशङ्क्याह * श्रोतुः पुनरिति * शब्दार्थविषययोस्तु क्ष
क्षणिकत्वान्नापूर्वाश्रयत्वशङ्केत्याह * बुद्ध्योश्चेति *वक्तुरपि
वद्गुणभूतत्वान्नापूर्वाश्रयतेत्याह*वक्तेति*ननु कामधुक्शब्द
प्रयोगस्य फलसाधनत्वावगमात्प्रयोक्तुः फलभाक्त्वात्प्राधा
ष्यतीत्याशङ्क्याह * नेति * स्वर्गकामादिशब्दात्काम्योप
वगतेस्तदनुरोधेन क्रियाफलभाक्त्वावगतिः। इह तु साधुशब्द
स्य फलसाधनत्वमात्रं प्रतीयते तच्चार्थवादमात्रत्वेनोपपत्तेर्न
फलभाक्त्वमाक्षिपतीत्याशयः। यदि वात्र वक्तुः कामधुगि
स्यात्ततः सप्तदश वैश्यस्येत्यादिवत् षष्ठ्युक्तसम्बन्धसामान्
क्षावशात्स्वस्वामिलक्षणविशेषरूपत्वप्रतीतेः प्राधान्यं स्यान्न
१९५।१ वतीत्याह * न चेति * ननु यथा कामिपदाद्यभावेऽपि प्रा

ज्ञानि भुञ्जीतेत्याख्याताक्षिप्तस्य भोक्तुर्गुणभूतस्य दिङ्नियमापूर्वाश्र-
त्वं तथात्रापि साधुशब्दप्रयोगाक्षिप्तस्य प्रयोक्तुः। साधुनियमा-
पूर्वाश्रयत्वं भविष्यतीत्याशङ्क्याह * यस्त्विति * कर्मिपदाद्यभावे
ऽपि भोजनं प्रति भोक्तुर्लोकादेव प्राधान्यावगतेरपूर्वाश्रयत्वं युक्त-
मिति भावः। अपूर्वाश्रयत्वमुच्चारणस्यानाशङ्क्यमेवेत्याह * स्व-
रूपेण पुनरिति * अतो विषयाभावाद्व्यवस्थाभावाद्दृष्टार्थत्वाभा-
वाच्च नियमानुपपत्तेस्साधुनियमार्थस्य व्याकरणस्य वेदमूलत्वायो-
गाच्छास्त्रेण धर्मनियम इति यन्महावार्त्तिककारेणोक्तं तदयुक्तमि-
त्युपसंहरति * एवं चेति * अनेन च साधुशब्दप्रयोगाणामुत्पत्ति-
रस्मादिति व्युत्पत्त्या व्याकरणं प्रयोगोत्पत्तिशब्देनाभिप्रेत्य तस्याः
शास्त्रमूलत्वाच्छब्दव्यवस्थानियमो न प्रयोजनमिति सूत्रं योजितम्।
ननु स्वयमेवैतस्य वेदवच्छास्त्रत्वं भविष्यतीत्याशङ्क्याह * न चेति*
अत्रापि प्रयोगोत्पत्तेर्व्याकरणस्य शास्त्रत्वाभावादिति योज्यं, साधितं
शास्य स्वातन्त्र्यं कल्पसूत्राधिकरणइत्याह * तदुक्तमिति * एत-
देव विवृणोति * न हीति * यद्वा पौरुषेयत्वात् व्याकरणस्य व-
क्त्रभिप्रायमात्रपर्यवसानेनार्थपरत्वाभावात्साधुप्रयोगनियमं प्रत्यशा-
स्त्रत्वादिति षष्ठेन प्रकारेण योज्यमित्याह * सर्वत्र हीति * स्मृ-
तेशास्त्रान्तरसम्वादाभावादिति सप्तमीं योजनामाह * न चेति *
एतदेव विवृणोति * प्रायेणेति * अस्तु तावत्स्मृत्यन्तरेणासम्वादः
परस्परमपि व्याख्येयव्याख्यानग्रन्थानां न सम्वादोऽस्तीत्याह * प-
रस्परेण चेति * सूत्रवार्तिकभाष्येषु ये पाणिनिकात्यायनपतञ्जलय
आचार्यास्ते विगीतवचना इत्यर्थः। कीदृशं विगानमित्यपेक्षायां निः
प्रयोजनं व्याकरणं सूत्रकृतोऽभिप्रेतं, साधुशब्दप्रयोगद्वारेण धर्मप्र-
योजनत्वं वार्त्तिककृतः, साधुशब्दज्ञानद्वारेण भाष्यकारस्येति वि-
गानं दर्शयितुमाह *न तावदिति * तेन तस्य प्रयोजनाभावाभिप्रायो
लक्ष्यतइति भावः। ननु विस्मृत्याप्यनुक्त्युपपत्तेः। कथं प्रयोज-
नाभावाभिप्रायो लक्ष्यतइत्याशङ्क्याह * कथं चेति * एतावत्त्वेन
प्रज्ञायासत्वमभिप्रेतम्। एतदेव विवृणोति * येष्विति *
मोक्षाणामिति निर्द्धारणे षष्ठी न चानादरेणानुक्त्युपपत्तिरित्याह
* न चेति * सुज्ञानत्वेनापि नोपपत्तिरित्याह * सुज्ञानत्वं पुन- १
रिति * यद्यपि वार्त्तिककृता शास्त्रेण धर्मनियम इति धर्मप्रयो-
जनत्वं व्याकरणस्योक्तं तद्व्याकरणे धर्मस्याप्रतिपाद्यमानत्वादयुक्त-
मित्याह * धर्मश्चेति * ननु न साक्षाद् धर्मप्रयोजनत्वं व्याकर-
णस्याभिप्रेतं किं तु तदनुगतशब्दप्रयोगद्वारेण ज्ञानद्वारेण वेत्याशङ्क्या-

ह ※ धर्म्मत्वमिति ※ एतदेव विवृणोति ※ शास्त्रार्थो ह
किं पुनः शब्दस्य ज्ञाने धर्म्म आहो स्वित्प्रयोगइति सन्दिग्धो
ष्यकृता ज्ञाने धर्म्म इति चेत्तथाधर्म्म इत्यनेन साध्वसाधुवि
रिणो व्याकरणवत्साधुत्वज्ञाने ऽर्थान्तरो लक्षणरहितानामस
ज्ञानापत्तेस्तस्य च न म्लेच्छभाषां शिक्षेतेत्यादिनिषेधपर्यालोच
र्म्मसाधनत्वावसायादधर्म्मः प्रसज्येतेत्युक्त्वा प्रयोगे तर्हि
भविष्यतीत्याशङ्क्य तस्मिन्पक्षे व्याकरणानभिज्ञानामपि स
प्रयोगात् धर्म्मोत्पत्तेर्व्याकरणानर्थक्यमिति । प्रयोगे सर्व
त्यनेनोक्त्वा दोषद्वयभयाच्छास्त्रपूर्वके प्रयोगे ऽभ्युदयस्तस्य
शब्देनेत्यनेन व्याकरणजनितज्ञानपूर्वकसाधुशब्दप्रयोगो धर
नं यथा वेदशब्दपूर्वको ऽग्निष्टोमादिर्वेदजनितज्ञानपूर्वकः
धर्म्मसाधनं यथा वा वेदरूपः शब्दो नियमपूर्वमधीतो धर्म
मित्युक्तं भाष्यकृता तत्सर्वं व्याख्यायाथ वा पुनरस्तु ज्ञाने
त्युक्तम् । न चैवमव्यवस्थितशास्त्रार्थावधारणं युक्तमित्यर्थः ।
म्यग् ज्ञातः सुप्रयुक्त इत्युभयोर्ज्ञानप्रयोगयोरेकवाक्योपादा
च्चितयोर्धर्म्मित्वं भविष्यतीत्याशङ्क्याह ※ सम्बद्धयो
एकवाक्योपात्तयोरप्याख्यातनामार्थयोः समुच्चयः प्रतिपद
एकपदे एवापूर्वमित्यधिकरणे यदेकस्मादपूर्वं तदेतरत्तदर्थ
त्यर्थः प्रतिपदाधिकरणे निराकरिष्यतइत्याशयः । सामान्य
क्त्वा प्रकृते योजयति ※ तदिहेति ※ एकस्मिन्वाक्ये सा
विध्ययोगात्सति ज्ञाने साधुशब्दप्रयोगो ऽप्यनुषङ्गान्निष्पद
ज्ञानस्तुत्यर्थत्वेन सुप्रयुक्तस्तु शब्दो ज्ञानस्य धर्म्मसाधनत्वप
ख्येयः। प्रयोगपक्षे तु ज्ञातमात्रो ऽपि साधुशब्दः स्वर्गं साधय
मुत प्रयुक्त इति प्रयोगस्तुत्यर्थत्वेन सम्यग्ज्ञानशब्दो व्याख्येय
ज्ञानधर्म्मत्वे प्रयोगस्य धर्म्मत्वायोगात् लोकसिद्धस्यैव ज्ञाना
दित्वेन सत्यामपि व्याकरणादुपकारनिर्वृत्तौ व्याकरणं प्रा
जकत्वाभावान्न भावाभिप्रेतद्वारेण व्याकरणस्य धर्म्मप्रयोजन
प्रयोगस्य तु धर्म्मत्वे यदेकस्मादपूर्वं तदेतरत्तदर्थमितिन्या
नस्य प्रयोगाङ्गत्वेन पारार्थ्यज्ञानात्फलश्रुतेः सुप्रयुक्त इति
ग्ज्ञात इत्यनेनाप्यन्वये कल्प्यमाने ऽर्थवादत्वावसायेन ज्ञा
र्म्मत्वायोगात्तद्द्वारेणापि व्याकरणस्य धर्म्मप्रयोजनत्वं
मित्यर्थः । आदिमध्याद्व्याकरणानुगतशब्दप्रयोगस्यानादिशा
यत्वाभावादित्यष्टमीं योजनामाह ※ किं चेति ※ व्याकरण
१९७।२ नप्रयोगयोरित्यर्थः । एतदेव विवृणोति ※ यज्ञामेति ※ म

गतस्यानित्यसंयोगस्य परिहारोऽन्यो न्यायो नित्यानित्यसंयोगविरो-
रूपस्तेनेत्यर्थः । न च व्याकरणस्यापि नित्यत्वं शङ्कनीयमित्याह *
चेति * ननु व्याकरणस्य कूटस्थनित्यत्वाभावे ऽपि प्रवाहनित्य-
त्वाद्वैदिकविधिविषयत्वं भविष्यतीत्याशङ्क्याह * अथापीति * उ-
क्तमौत्पत्तिकसूत्रे ऽध्येतॄणामस्मरणादिभिश्शब्दपूर्वत्वमिति वेदाधि-
करणसिद्धान्तसूत्रोक्तेन न्यायेन सर्वपुरुषेभ्यो वेदस्य प्राथम्यादप
ौरुषेयग्रन्थविषयत्वं युक्तमित्यर्थः । ननु व्याकरणत्वजातेः कूट-
स्थनित्यत्वाद्वेदविषयत्वं भविष्यतीत्यत आह * न चेति * ननु व्या-
करणस्य सूत्रमिति षष्ठ्यर्थस्य भेदं विनानुपपत्तेः सूत्रमात्राच्छब्दा-
प्रतिपत्तेः । व्याकरणाच्छब्दान्प्रतिपद्यामहइति प्रयोगानुपपत्तेः । न
सूत्रस्य व्याकरणत्वं युक्तं नापि शब्दस्य व्याक्रियन्ते शब्दा अनेनेति
व्याकरणमिति ल्युडर्थानुपपत्तेर्योगस्य च शब्दवत्त्वाभावाद् व्या-
करणे भवो योगो वैयाकरण इति भवतद्धितानुपपत्तेः । शब्दस्य च
पाणिन्यादिभिरप्रोक्तत्वेन पाणिनिना प्रोक्तं पाणिनीयमिति प्रोक्त-
तद्धितानुपपत्तेरिति वार्तिककारेण व्याकरणशब्दस्य सूत्रपरत्वश-
ब्दपरत्वरूपे पक्षद्वये इत्यर्थः । पक्षद्वये ऽपि दूषिते भाष्यकारेण श-
ब्दपक्षे तावद् दोषपरिहारार्थं प्रस्कन्दनं प्रपतनमित्यपादानादिष्वपि
दर्शनेन करणाधिकरणयोरेव ल्युट्प्रत्ययनियमाभावाद् व्याक्रियत
इति व्याकरणमिति कर्मव्युत्पत्त्या लुडर्थोपपत्तिमुक्त्वा भवप्रोक्तादि-
तद्धितोपपत्त्यर्थं लक्ष्यलक्षणे व्याकरणमिति लक्ष्यलक्षणयोः शब्द-
सूत्रयोः समुदितयोर्व्याकरणत्वाभिधानात्सूत्रात्मकस्य व्याकरण
स्य कृत्रिमत्वे ऽपि शब्दात्मकस्य नित्यत्वाद्वेदविषयत्वं युक्तमित्याश-
ङ्कते * अथेति * लक्षणानिरपेक्षाणां शब्दानामानन्त्याद्विधिविषय-
त्वानुपपत्तिर्न तु गवादिगाव्यादीनां जातिरूपेण व्यक्तिरूपेण वा
विधिप्रतिषेधौ उपपद्यते इत्यादिनोक्तेन परिहरति * तदिति * ननु
यथा यदितिहासपुराणानि कल्पानीति ब्रह्मयज्ञविधिविषयत्वान्यथा-
नुपपत्त्या कल्पसूत्राणां कर्तृस्मृतिदार्ढ्यात्कूटस्थनित्यत्वाभावे ऽपि प्र-
वाहनित्यत्वमुक्तं तथात्रापि, तस्मादेषा व्याकृता वागुद्यतइति व्याक-
करणानुगताया अर्थवाचो वादितव्यत्वश्रुतेर्व्याकरणस्य नित्यत्वं भवि-
ष्यतीत्याशङ्कते *ननु वेदेति * तद्ग्रन्थस्याध्येतव्यत्वायोगाद्ग्रन्थ-
नित्यत्वं कल्पितम् । इह तु श्रुतिसामान्यमात्रेणापि व्याकृतशब्द-
व्याख्यानोपपत्तेर्न ग्रन्थनित्यत्वकल्पने प्रमाणमस्तीति परिहरति *
नैतदिति * ननु वैदिक्या वाचः स्वराद्यविप्लुतरूपेणानिरूपिता-
कारत्वरूपस्य व्याकृतत्वस्य प्राप्तत्वाद्विध्यानर्थक्यमित्याशङ्क्य कर्म-

काले स्वाध्यायकाले वोच्यमाने *इयमनूदितेत्युक्तम् * इ
चष्टे * अव्याकृताया हीति * अस्य च व्याख्यामेकः शब्द
श्रुतिर्वैदिकस्यैव शब्दस्य स्वराद्यविप्लुतिरूपेण ज्ञानप्रयोगप्र
११८।२ तिपादनार्थतया व्याख्यातुं शक्येति सूचयितुमाह * तत्र
नन्वेकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः शास्त्रान्वित इ
स्त्रशब्दस्य ग्रन्थविषयत्वाद्व्याकरणग्रन्थस्य वेदविषयत्व
त्यत्वकल्पना भविष्यतीत्याशङ्क्याह * यदपि चेति *
त्वमेवोपपादयति * अहरहरिति * शास्त्रशब्दस्तर्हि
आह * शास्त्रेति * लोकव्युत्पत्त्या शिक्षणात्मकशा
ना शास्त्रशब्देन ग्रहणाध्ययनकालीनः स्वस्यात्मीयस्य
ध्यायः शिक्षणार्थः पाठो विवक्षितो ग्रन्थ इत्याशयः । न
क्तशब्दस्तर्हि पुनरुक्तः स्यादित्याशङ्क्याह * सम्यगिति *
नमाचार्यकर्तृको माणवकसंस्कारः उपसदने सुश्रूषे माण
त्वयं वै तद्ग्रहणाध्ययनकालीनमपि विशिष्टेतिकर्तव्यताक
स्कृतस्य तस्यैव वेदस्य ब्रह्मयज्ञोपयोगित्वादुपन्यस्तम्। ननु तस्म
णेन न म्लेच्छितवै म्लेच्छो ह वा एष यदपशब्द इत्येषा श्रु
द्यपशब्दनिषेधार्थत्वाच्छब्दापशब्दविवेकस्य च व्याकरण
द्व्याकरणापेक्षा भविष्यतीत्याशङ्क्याह * यदपि चेति *
तवैकेन्केन्यत्वन इति कृत्यार्थे छन्दसि तवैप्रत्ययस्मरणात
च प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चेति प्रैषार्थत्वस्मरणादप्रा
च विधित्वान्नञ्योगेन निषेधार्थतोक्ता। कथं वैदिकविषयत्व
पशब्दनिषेधस्येत्यपेक्षायां वैदिकशब्दापेतत्वरूपव्युत्पत्तिसम
ज्ञानत्वं च कारणद्वयमाह * वैदिकाच्चेति * सर्वेभ्यः
ऽपेत इति च व्युत्पत्तिः शब्दस्य अशब्दत्वयोगाच्च सम्भव
* न चेति* ननु नायमभाववचनो ऽपेत्युपसर्गः किं तु वर्ज
अतो गव्यादीनां सत्यपि शब्दत्वे शास्त्रकारैर्वर्जितत्वादपश
विष्यतीत्याशङ्क्याह * अथापीति * वर्जने ऽर्थे बर्बरादि
क्षणस्य स्मृत्या निषिद्धत्वाच्छ्रुतौ चापशब्दत्वस्य म्लेच्छितश
नाधिकरण्येन निर्देशाद् बर्बरादिभाषागतस्य शब्दस्यापशब्द
दित्यर्थः । म्लेच्छितत्वशब्देन म्लेच्छ अव्यक्तायां वाचीत्यव्य
रणार्थस्य म्लेच्छशब्दस्य म्लेच्छो व्यक्तोच्चारित इत्यर्थो द
किं चान्येषामपि बर्बरादिसम्बन्धिनामाचाराणां निषिद्धत्व
प्रयोगरूपस्याप्याचारस्य तत्सम्बन्धिन एव निषेधो ऽवसीय
* युक्तं चेति * गव्यादीनां तु प्रसिद्धम्लेच्छबर्बरादिसम्ब

ाव्यक्तोच्चारणत्वेन वा म्लेच्छतिधात्वर्थानुगमाभावादार्यप्रयुक्तश-
दायत्तत्वाभावाद्वा नापशब्दतेत्याह * नत्विति * यथावृत्तादार्या-
ारादपेतत्वात्तदपवृत्तमित्युच्यते नैवं गाव्यादिष्वार्यप्रयुक्तशब्दापे-
ात्वमस्ति तेषामप्यार्यैः प्रयुक्तत्वादिति वैधर्म्यदृष्टान्तार्थं, नन्वाहिता-
ग्नेरपशब्दं प्रयुज्येति श्रुतेर्म्लेच्छशब्दसामानाधिकरण्याभावाद् व्या-
करणानुगतशब्दापेतत्वनिमित्तलब्धापशब्दव्यपदेश्यत्वगाव्यादिप्र-
योगनिमित्तप्रायश्चित्तविधानार्थत्वाद् व्याकरणापेक्षा भविष्यती-
त्याशङ्क्याह * यदपि चेति * निषिद्धाचरणनिमित्तत्वात्प्राय- १
श्चित्तस्य गाव्यादीनां च शिष्टावर्जितत्वेनानिषिद्धत्वादसायाद्यथास-
म्भवमन्यविषयतैवेयं श्रुतिर्भवेदित्याशयः । व्याकरणानुगतव्यति-
रेक्तशब्दाविषयत्वासम्भवमुपपादयति * तथा हीति * गाव्यादि
शब्दप्रयोगलक्षणस्य कार्यस्य सर्वशिष्टपरिगृहीतत्वेनापरिहरणीयत्व-
मीदृशशब्देनोक्तं श्लोकं विवृणोति * प्रायेण हीति * ननु सर्व-
थापि व्याकरणानुगतशब्दप्रयोगनियमो न दृश्यतइत्याह * न
चेति * एतदेव प्रपञ्चयितुमाह * कल्पेति * कल्पकारस्यापश-
ब्दमुदाहरति * समानमिति * छान्दोग्यसूत्रकारस्योदाहरति *सू-
त्रेति * बह्वृचसूत्रकारस्यापशब्दद्वयमुदाहरति * तथेति *
कल्पादिग्रहणस्योपलक्षणार्थत्वात् शिक्षाकारस्यापशब्दमुदाहरति
* तथेति * स्मृतिकारस्योदाहरति * मनुनापीति * स्मृतिग्रन्थ-
कारेणापि साक्षिणः सन्ति मेत्युक्त्वा वदेत्युक्त्वा वदेत्तु य इत्यत्र
मेशब्दस्येतीकारे परभूते संहितायामेचो ऽयवायाव इत्ययादेशे कृते
लोपः शाकल्यस्येति च यकारलोपे कृते म इतीति व्याकरणानुगतां
संहितामनपेक्ष्यान्यथा कृतेत्यर्थः । मीमांसाकारस्यापशब्दद्वयमुदा-
हरति * तथेति * सम्वत्सरसत्रेषु गवामयनिकविध्यन्तातिदेश- २
प्रतिपादनायाष्टमे गवामयनोत्तरकालविहितेष्वादित्यानामयनप्रभृ-
तिषु गवामयनस्य विध्यन्तः प्रवर्ततइति वक्तव्ये तस्य विकारावयवे
च प्राण्यौषधिवृक्षेभ्य इत्यधिकृत्य गोपयसोर्यदिति विकारावयवयो-
र्विहितो यत्प्रत्ययो ऽर्थवादावगतगोकर्तृकत्वमात्रनिमित्तप्रयुक्तः । न
चैवाग्नीषोमीयप्रकरणाधीतः स्यादिति मासामुमोक्ते तानिति बहुव-
चनान्तस्यापि मन्त्रस्य प्रातिपदिकार्थसमवायाद् बहुवचनस्य प्रातिप-
दिकार्थलक्षितावयवबहुत्वाभिधानार्थत्वेनोपपत्तेरनुत्कर्ष इति सि-
द्धान्तिते द्यावापृथिव्योरहं देवयज्ययोभयोर्लोकयोर्ऋध्यासमित्या-
दीनां दर्शपूर्णमासप्रकरणाधीतानां द्यावापृथिव्याद्यनुमन्त्रणानामपि
केन चिद्गुणयोगेन दर्शपूर्णमासदेवताप्रकाशकत्वोपपत्तेरनुत्कर्ष इ-

स्याशङ्कार्थं सूत्रे सरूपाणामेकशेषः इत्याद्येकशेषलक्षणहि
त्युक्तमित्यर्थः । गृह्यकारेणापि जिघ्राणामिति ल्युडन्त
पाघ्रादिसूत्रेण शित्येव प्रत्यये परभूते घ्रातेर्जिघ्रादेशमन्वा
पेक्ष्यैव कृत इत्याह * तथेति * व्याकरणसर्वस्वे ि
व्याकरणाननुगताः शब्दाः सन्तीत्याह * कात्स्न्र्येइति *
तुके परभूते ब्रुवो वच्यादेशस्याभिधानात्तदकरणं हीनल
र्थः ।एतदेव विवृणोति *सम्वत्सरमिति* पुराणेतिहास
धिकारिणस्तु नात्यन्तं व्याकरणमाद्रियन्तइत्याह * अन
स्तिशिक्षादिग्रन्थकारिणो ये उभाभ्यादिरूपा अपशब्द
नास्तीत्यर्थः । एतदेव विवृणोति * युगपदिति * वे
च शब्दानामपशब्दत्वाशङ्कानुपपत्तेर्निश्चितसाधुत्वाना
नादव्यापकं लक्षणं स्यादित्याह * वेदेष्वपीति* साम
भाषायां च साधारणं चातुर्वर्ण्यादिवत्स्वार्थे तद्धितः
त्ययो बहुलमिति बहुलग्रहणेन विकरणवत्सुबादीनामपि
चनाद् बहुलं छन्दसीति च लोपाद्यनियमविधानादस्ति
छान्दसं लक्षणमित्याशङ्क्याह * न हीति *

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृय
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति

इति वचनान्नियतविषय एव व्यत्ययविधिः
ति हि प्राप्ते धुरि दक्षिणाया इति सुपो व्यत्ययः । त
थे अश्वयूपाय तक्षतीति तिङः स्रुवन्तीति प्राप्ते स्र
इत्युपग्रहस्य इन्द्रः सोमस्य कामुक इति प्राप्ते काम्
स्य । मम्रुवां आवाहाइत्यत्रावाहादिति प्रथमपुरुषप्राप्तौ
पुरुषस्य । अग्निमद्यहोतारन्यमवृणीतेत्यत्राद्यतनकालवा
रे प्राप्ते अनद्यतनकालवाचिलङ्प्रयोगात्कालव्यत्ययः ।
कामुकेइति प्राप्ते णकारप्रयोगाद्धल्व्यत्ययः । अभ्यक्तस
त्याकारे प्राप्ते अभ्यगिति संहितादर्शनेनाकारप्रयोगा
अश्वावतीर्गोमतीरित्यत्रान्तोदात्तत्वे प्राप्ते ऽश्वावतीरित
त्स्वरव्यत्ययः । कर्तृशब्दस्य कारकोपलक्षणत्वाद्दद्भिर्द
म्प्रदानस्य दातृत्वेन प्रत्युपकारार्थदानकरणत्वाभिधान
प्राप्ते ददद्भिरितिकर्तृव्यत्ययः यङ्शब्दस्य प्रत्याहारत्वेन
विकरणप्रत्ययग्राहित्वाद्वृत्रं हनतीत्यत्र हन्तीतिप्राप्ते
व्यत्ययः । बहुलं छन्दसीति च आदिप्रभृतिभ्यः शप
रविशेषेण शबादिविषयमेवावसीयते न सर्वविषयमित

णद्वयमाह * तद्यथेति * आपस्येत्यत्र तावल्लिङ्गवचनव्यत्ययो न
त्ययसूत्रस्य विषयः तस्य बहुलग्रहणेन नियतलिङ्गवचनविधेय-
ाभावात् नाप्युपधादीर्घादेशो व्यञ्जनान्तस्य च स्वरागमो बहुलं
न्दसीत्यत्राधिकृतो येन लक्षणानुगमः स्यादित्याह * न हीति *
ाबित्यस्य नित्यं स्त्रीलिङ्गस्य बहुवचनाविषयमस्य व्यञ्जनान्तस्य प्राति-
दिकस्य षष्ठ्यन्तस्यापामित्यविकृतस्यान्वाख्यानादापस्येत्यस्त्रीलिङ्ग-
ाकविषयमकारान्तं दीर्घोपधं रूपं न केनापि लक्षणेनानुगतमित्य-
ः । द्वारशब्दे ऽपि दकारलोपौ पाकारस्य च वकारादेशो न केन
चल्लक्षणेनानुगत इत्याह * नापीति * बहुलग्रहणस्य दृष्टानुवि-
ग्रानार्थत्वाद् द्वारशब्दस्य भाषायामपि व्यत्ययस्यादर्शनाच्च दृष्टानुवि-
ग्रानमस्तीति दर्शयितुम् * लाटेत्युक्तम् * अतो वैदिकशब्दानाम-
साधुत्वाशङ्कानुपपत्तेर्लक्षणमेवाव्यापकत्वादुपेक्षणीयमित्युपसंहरति
* तेनेति * व्याकरणान्तरयुक्तानामपि तदनुगतशब्दप्रयोगदर्शनाच्च
व्याकरणप्रामाण्याध्यवसानमित्याह * ये ऽपीति * प्रमादादिनि-
मित्तशङ्कानिवृत्त्यर्थं प्रायेणेत्यस्यार्थे * सुतरामित्युक्तम् * सन्तु व्या-
करणाभियुक्ताः व्याकरणकाराणामेव तदननुगतशब्ददर्शनात्प्रामा-
ण्याध्यवसानं दुर्लभमित्याह * सूत्रेति * न च तेषां विस्मृत्या
प्रयोगोपपत्तिरिति दृष्टान्तद्वारेणाह * अश्वेति * एकैकस्य द्वे द्वे अ-
(पशब्दोदाहरणे दर्शयति * सूत्रइति * जनिशब्दः षष्ठीसमासश्च
द्वावपशब्दौ जनिशब्दस्य तावद[1]) पशब्दत्वमुपपादयति * जनीति *
लक्षणेनाननुगतत्वाज्जनिशब्देन धातुरेव निर्दिश्यतइत्यर्थः । धातु-
कर्तृप्रकृतेश्चापादानसञ्ज्ञानभ्युपगमाच्च धातुरत्र विवक्षित इत्याह
* न चेति * यस्य तु जन्माख्यस्य व्यापारस्य जनिशब्दार्थत्वेन वि-
वक्षितस्य कर्तुर्घटादेः प्रकृतेर्मृत्पिण्डादेरपादानसञ्ज्ञेष्यते तस्य जाय-
मानसम्बन्धिनो जन्माख्यस्यार्थस्य जनिशब्दो न वाचक इत्याह
* जायमानस्येति * व्यधिकरणे षष्ठ्यौ नन्वेवमपि धातौ साधु-
त्वाच्चापशब्दतेत्याशङ्क्याह * तेनेति * क्व चित्साधोरप्यर्थान्तरं
प्रत्यसाधुत्वादपशब्दत्वं भवतीत्याशयः । षष्ठीसमासस्यापशब्दत्वमु-
पपादयति * तथेति * (अकस्य निन्दकहिंसकइत्यादौ तच्छीला-
द्यर्थवुञ्प्रत्ययादेशत्वेनानेकार्थत्वात्तद्योगे कर्त्रर्थषष्ठ्याः प्राप्तेस्तद्योगे
एव समासनिषेधार्थम् । आद्यं तृजकाभ्यां कर्त्तरीति सूत्रं न तु
तृज्योगे कर्त्रर्थषष्ठीसमासनिषेधार्थमिदं सूत्रम् । तृचः कर्तर्येव
विधानात्तद्योगे कर्तुरनभिहितत्वाभावेन कर्त्रर्थषष्ठ्याः प्राप्त्यभावा

[1] अयं पा० २ पु० ना० ।

तू । प्राप्तिपूर्वकत्वाच्च निषेधस्य अतः तृज्ग्रहणम् उत्त
त्यर्थमेव कृतं नात्र तस्य प्रयोजनम् । अकस्य तृसयत्रोप
मुत्तरसूत्रे तृजकयोरनुवृत्तिं वक्तुमाद्यसूत्रं वार्तिकपठित
कर्तर्येव तृज्विधेस्तत्प्रयोगे कर्तृषष्ठ्यभावादकस्य निन्दहिं
दादिधातुविहिततच्छीलादिवाचिवुञ्प्रत्ययादेशत्वेनानेका
गे कर्तृवाचिन्याः षष्ठ्याः समासनिषेधार्थमाद्यसूत्रमुक्तः
काभ्यामित्यस्यानुवृत्तिप्रतिपादनार्थं पठितम् । कर्तृवाचि
काभ्यां योगे कर्त्तरि चेति सूत्रे षष्ठीसमासनिषेधादपशब्द
तृच्प्रत्यययोगनिमित्तनिषिद्धं षष्ठीसमासमुदाहृत्याकप्रत
मित्तनिषिद्धमुदाहरति * पचामिति * वार्त्तिककृतो ऽ
योगनिमित्तनिषिद्धषष्ठीसमासापशब्दोदाहरणं तावदाह :
हलन्ताच्चेति सूत्रेणेक्समीपाद्धलः परो झलादिः सन् किद्
दम्भेः सनि कृते दम्भ इट् चेति किति सत्यपि नकारेण ऽ
दम्भिधातुसम्बन्धिनो हलो झकारस्य इक्सामीप्याभाव
रस्य झलादेरपि सनः किरवासिद्धौ[2] गुणापत्तेर्धिप्सती
सिद्ध्येदित्याशङ्क्य हल्ग्रहणस्य जातिवाचकत्वाद्दम्भेर्द्धी
स्य झलादेः सनः * किरवं सिद्धमित्युक्तम् * (
तिवाचकपदे कप्रत्ययान्तस्य षष्ठीसमासो ऽपशब्दः[3]) तस्यैव
न्तरमुदाहरति * तथेति * अइउणिति प्रत्याहारसूत्रगते
रानुबन्धकेनाकारेण धात्वादिगतस्याकारस्य णाकारानुबन्
त्वाद्ग्रहणं न प्राप्नोतीति शङ्कित्वा भेदाभावाद्धात्वादिष्वस्या
सिद्धमिति परमतेन परिहारमुक्त्वा तन्निराकरणार्थम् * ।
कृतेदमुक्तम् * दराड अग्रमिति व्यस्तोच्चारणे दण्डपदान्त्यः
द्याद्यस्य वाकारस्यान्तरालकालानुपलम्भलक्षणात्कालव्यव
वधानाद् * अन्यत्वमित्युक्तम् * नन्वेकत्वे ऽपि व्यञ्जकाभाव
ऽनुपलब्धिर्युज्यत इत्याशङ्क्य * शब्दव्यवायादित्युक्तम् * द
स्यत्र दकारडकारपरयोरकारयोर्मध्ये व्यञ्जकाभावे णकारडक
रप्यनुपलम्भः स्यान्न च व्यञ्जकानां प्रतिनियतविषयत्वं द
दृष्टं येन णाकारडकारयोर्व्यञ्जकसद्भावादुपलब्धिरकारस्य तु व्य
भावादनुपलब्धिरिति व्यवस्था युज्येतेत्याशयः। अत्र चान्यभा
त्यन्यशब्दः तथा हि निष्कर्षलक्षणगुणाभिधायी भाव्यशब्दो

---

१ अयं पा० २ पु० ना० ।

२ अनिदितां हलउपधायाः क्ङिङ्तीत्युक्ते नलोपो न सिद्ध्यतीत्यर्थः । नलो

३ अयं पा० २ पु० ना० ।

नैष्कर्षणीयान्यशब्दवाच्यगुण्युपसर्जनत्वेन निष्कर्षलक्षणं गुणं ब्रूते
ऽतो गुणमुक्त्वा गुणिनि वर्तमानत्वेन गुणवचनसंज्ञापत्तेः । पूरणगु-
सुहितार्थसदव्ययतव्यसमानाधिकरणेनेति षष्ठीसमासनिषेधादपश-
दत्वं स्वप्रधानगुणाभिधायित्वाभ्युपगमेन तु षष्ठीसमासकल्पने
गुणवचनसंज्ञाबाधाद् गुणवचनसूत्राननुगतष्यञ्प्रयोगायोगादपश-
दतेत्यर्थः । कर्मधारयस्तु (कर्मण्युपपदे धातोरण्प्रत्ययोक्तेर्नित्य-
समासाच्च कुम्भकार इति वत् हिमवत् भावः इत्यादिप्रयोगमा-
शङ्क्य अनभिधानात्तादृशप्रयोगाभावादित्युत्तरे अविरविकेति दृष्टा-
न्तः । भावशब्दस्यान्यत्वगुणविशिष्टगुणिपरत्वेनान्यशब्दसमानार्थत्वा-
त्पर्यायाणां सहप्रयोगाभावाद्वैयर्थ्यमित्यर्थः[1]) भावशब्दस्यानर्थक्या-
पत्तेरयुक्त इत्याशयः । भाष्यकृतापि कर्मण्यणिति सूत्रे हिमवन्तं
शृणोत्यादित्यं पश्यतीति दृशिशृणोतिभ्यामण्प्रत्ययः कस्मान्न भ-
वतीत्याशङ्क्यानभिधानादिति परिहारमुक्तम् । यथाविकशब्दस्य स्वा-
र्थिककप्रत्ययान्तस्याविशब्दसमानार्थत्वेऽपि तस्य विकार इति वि-
कारतद्धिते लक्षणानुगतेऽप्याविकं मांसमितिप्रयोगदर्शनादविक-
शब्दादेवोत्पद्यते नाविशब्दात्तथात्रापि प्रयोगाभावेनाभिधानसाम-
र्थ्याभावान्न ष्यञ्प्रत्ययोत्पत्तिरित्युपपादनायाविरविकन्यायेनेति दृ-
ष्टान्तेऽभिहितेऽपशब्दः प्रयुक्त इत्याह * भाष्येऽपीति * अविश्चाविक-
श्चाऽव्यविकौ तयोर्न्याय इति द्वन्द्वगर्भस्तत्पुरुषः तस्यैवापशब्दान्तरमु-
दाहरति * तथेति * ऋलृगित्यत्र सूत्रे वार्त्तिककारेण लृकारस्य
स्वातन्त्र्येण क्वचिदप्यप्रयोगात् क्लृपिस्थस्य च यणादिकार्यं प्रत्य-
सिद्धत्वादुपदेशानर्थक्यमित्याशङ्क्य यदृच्छाशब्दादिषु (कुमारी ऋ-
तकमिति वाक्ये लृतकमित्यनुकरणशब्दो यदृच्छाशब्दः । तत्र लृ-
कारे परे ईकारस्यानुकार्ये यणादेशः कुमारी लृतकमित्येवं लृकारस्य
प्रयोजनमित्यर्थः[2]) यणादिकार्यसिद्धिर्लृकारोपदेशप्रयोजनमुक्त्वा य-
दृच्छाभावात्तद्विषयाच्च कार्यसिद्धिप्रयोजनत्वासम्भवेऽभिहिते भा-
ष्यकारेणान्यथाकृत्वा प्रयोजनमुक्तमन्यथा कृत्वा परिहारः सन्ति
यदृच्छाशब्दा इति कृत्वा प्रयोजनमुक्तं न सन्तीति परिहारदूषण-
माशङ्कितं तत्र अन्यथैवं कथमित्थं सुसिद्धाप्रयोगश्चेदिति सूत्रेणा-
न्यथादिषु चतुर्षूपपदेषु करोतेर्णमुल्विधानादन्यथाकारमिति प्रयो-
क्तव्ये ऽन्यथाकृत्वेति क्त्वाप्रत्ययप्रयोगादपशब्द इत्यर्थः । अन्येन प्र-
योजनमुक्तमन्येन प्रकारेण परिहार इत्यस्यार्थस्यान्यथाशब्दमात्रेण

१ अयं पा० २ पु० ना० ।

२ अयं पा० २ पु० ना० ।

सिद्धेर्नियमेन प्रयोज्यत्वाभावान्नार्थं करोति अन्यथाकृत्वा शि
ङ्क्ते इति वदसिद्धप्रयोग इत्याशयः । एतच्च प्रयोजनं परि
द्देन निराकार्यतयोपन्यस्तमिति सूचितत्वादाशङ्कामात्रं ना
मिति द्योतनार्थं महाभाष्यगतं प्रयोजनमुक्तमिति पाठं ता
व्याख्यातुं चोदितपदं तत्स्थाने ऽप्रयुक्तम् । नन्वृतिवगादिः
तिसद्धवत्प्रयोगरूपनिपातानां साधुत्वं भेत्स्यतीत्याशङ्क्याह
२०२।१ चेति * ननु प्रयोगमूलत्वाद्व्याकरणस्मृतेस्तद्बाधकत्वं न
मित्याशङ्क्य प्रयोगमूलताद्याप्यसिद्धेति मत्वा पूर्वोक्तं स्मृ
यस्त्वमाह * स्मृतीति * अतो नैषां निपातनात्साधुत्वसिद्धि
संहरति * प्रत्यक्षेति * नन्वेवं सत्येकप्रयोगमात्रेणेतरासाधुत्व
यात्प्रकृतिप्रत्ययान्वाख्यानं विना प्रयोगमात्रेण साध्वसाधु
कासिद्धेर्निपातनानर्थक्यं स्यादित्याशङ्क्याह * प्रत्यक्षे
निपातनानर्थक्यपरिहारायान्वाख्यानमनुमीयतइत्याशयः । ल
क्षणवाक्यगतानां शब्दानां स्वात्मनि क्रियाविरोधेन तद्व्याकर
क्षयितुमशक्यत्वाल्लौकिकवैदिकशब्दलक्षणार्थत्वेन च व्या
स्यात्मार्थत्वाभावात्प्रदेशान्तरस्थानामप्यलक्षणीयत्वेनानुगमा
च व्याकरणकाराणां व्याकरणाननुगतशब्दप्रयोगो दोष इत्या
ह * न चेति * व्याकरणगतानामपि शब्दानां लोकवेद
रणन्यायेन लौकिकेभ्यो भेदाभावाल्लक्षणीयत्वोपपत्ति
* लक्ष्यभूतइत्युक्तम् * अत एव व्याख्यातृभिर्वृद्धिरादैजि
वृद्धिरादैजदेङ् गुण इति जस्त्वदर्शनेन पदसञ्ज्ञत्वावगमाच्चो
ति कुत्वेन भवितव्यमित्याशङ्क्य अयस्मयादीनि च्छन्दसीति
त्वापि छन्दोवद्भावेन भसञ्ज्ञत्वात्सस्तुष्टुभा(सक्रुकतेत्यत्र ऋ
त्यर्थके पदे ऋच्शब्दस्य वतिपरे पदसञ्ज्ञत्वाच्चोः कुरिति
ऋक्तेति सिध्यति । अत्र पदसञ्ज्ञत्वात् झलाञ्जशोन्ते इ
इत्वेन नश्रस्य जकारः कस्य ढकारो वा न भवति । अयस्मय
च्छन्दसीत्युक्त्या भसञ्ज्ञया पदसञ्ज्ञाबाधात् । न च पद
वात्कुत्वमपि न स्यादिति वाच्यम् । प्रयोगानुसारित्वाद्व्य
स्य तेन यथा तत्र मत्वा जश्त्वाभावः । पदत्वाच्च कुत्वमिति
द्वयसमावेशः । तथा प्रकृते ऽपीति भावः । अत्र वृद्धिरादैजि
सहोच्चारणं सिद्धं कृत्वोक्तम्)अन्यदेव तु उपदेशे ऽजनुनासि
त्याद्युदाहार्यम्[1])।सक्रुकता गणेनेतिवत्सञ्ज्ञाद्वयाविरोधात्कु
त्वोपपत्तिरित्यादिपरिहाराभिधानवत् समर्थः पदविधिरि

१ अ० १ पा० २ पु० ना० ।

ाधिशब्दः कर्मसाधनो भावसाधनः करणादिसाधनो वेति पृष्ट्वा
पूर्वाद्धातोः कर्म्मसाधन इकारो विधीयतइति कर्म्मसाधनतया
ाख्यानाल्लक्षणसूत्रेष्वपि लक्षणानुगमादरः कृत इत्याह * तथा
ाति * अन्यथा न क्वचिदपि साधुशब्दादरः स्यादित्याह * यदि
ाति * न त्वाचारे नियम इत्यत्र वार्त्तिके भाष्यकृता याज्ञे कर्म्म-
ा स नियमो ऽन्यत्रानियम इत्युक्तत्वाच्च व्याकरणे कल्पसूत्रादिषु
ा ऽपशब्दप्रयोगो दुष्यतीत्याशङ्कते *अथेति* फलवत्त्वेन क्रत्वर्थ-
ायोगाक्रतुविषयत्वानुपपत्तिरिति परिहरति *तद्साद्ति* आ-
हिताग्निग्रहणानर्थक्यापत्तेश्च न यज्ञविषयतेत्याह * सारस्वतीति *
ानु तस्माद् ब्राह्मणे न म्लेच्छितवै इत्यपशब्दनिषेधस्य प्रकर-
ाज्ज्योतिष्टोमाङ्गत्वावगतेरन्यत्रानियमो ऽवसीयतइत्याशङ्क्याह *
ाा ऽपि चेति * आदित एव च व्याकरणे निरुपपत्तिकपूर्वापर-
वेरुद्धाभिधानादनाप्तप्रणीतता ऽवसीयतइत्याह * यदपि चेति *
ाष्यकृता हि शास्त्रादावथ शब्दानुशासनमिति शास्त्रस्य विषयमु-
क्त्वा केषां शब्दानामिति पृष्ट्वा लौकिकानां वैदिकानां चेत्युत्तरं
ुक्तं तत्तावद् बहूनां शब्दानां लोकवेदसाधारण्यादयुक्तमित्यर्थः । उभ-
यत्रापि च साधारणशब्दोदाहरणमत्यन्तमयुक्तमित्याह * न चेति*
ानु वेदादिवाक्योदाहरणत्वेनैषां लौकिकेभ्यो भेदो ऽस्तीत्याशङ्क्या-
ह * न चेति * कानि तर्हि वैदिकत्वेनोदाहार्याणीत्यपेक्षायामाह*
अत इति * ननु गाव्यादिपदानामपि नियतस्वरत्वादिना छान्दसत्वा-
द्युक्तोदाहरणतेत्याशङ्क्याह * छान्दसेति * एवमपि सिद्धे शब्दा-
र्थसम्बन्धइति शास्त्रारम्भवार्त्तिकव्याख्यानावसरे कथं पुनर्ज्ञायते
सिद्धः शब्दो ऽर्थः सम्बन्धश्चेत्याशङ्कानिराकरणार्थत्वेन लौकत
इति वार्तिकावयवस्य यद्व्याख्यानं करिष्यते तद्व्याहन्येत स्वर-
नियमादेर्लौकतः सिद्ध्यभावादित्याशयः । गाव्यादिशब्दानन्वाख्या-
नात् लौकिकान्वाख्याने प्रतिज्ञा न युक्तेत्याह * यदि चेति * गवा-
दिशब्दानां तु केवलवैदिकत्वस्यापि वक्तुं शक्यत्वात्तद्व्याख्यान-
मात्रेण लौकिकान्वाख्यानासिद्धिरित्याह * गवादयः पुनरिति *
एतदेव च सर्वेषां च स नामानि कर्म्माणि च पृथक्पृथगित्यादिना म-
नुवचनेनोपादयति * तथा चेति * ननु लौकिकार्थविवक्षायां
वैदिकशब्दप्रयोगो न युक्त इत्याशङ्क्याह * दृश्यन्ते चेति *
वैदिकानां च पाठसिद्धत्वादनर्थकं लक्षणमित्याह * न चेति *
दीधीवेवीटामित्येतत्सूत्रदूषणार्थं च दीधीवेव्योश्छन्दोविषय-
त्वाद् दृष्टानुविधित्वाच्च छन्दस्यदीधेददीधयुरिति च गुणदर्शना-

दप्रतिषेध इति वार्तिके दीधीवेव्यौ छन्दोविषयौ दृष्टानुं
छन्दसि भवति। तत्र च होत्राय वृत्तः कृपयन्नदीधेत् अदीधयुर्दा
शे वृतास इति गुणस्य दर्शनादनर्थकः प्रतिषेध इत्येवं व्याचक्ष
भाष्यकृता स्वयमेव वैदिकशब्दलक्षणानर्थक्याभिधानाच्छान्द
हरणं व्याहतमित्याह * दृष्टेति * मन्दशब्दो मृदूक्त्यर्थः । अ
क्यमेव दृष्टान्तेनोपपादयति * यथैवेति * न च भाष्यकृतैव
पुनरस्य शब्दानुशासनस्य प्रयोजनानीति पृष्ट्वा रक्षोहागमल
न्देहाः प्रयोजनमिति मुख्यानि च पञ्चप्रयोजनान्यभिधायेमानि
शब्दानुशासनस्य प्रयोजनानीत्यानुषङ्गिकाणां त्रयोदशानामुक्त
कथमानर्थक्यमित्याशङ्क्याह * रक्षाद्यपीति * वेदरक्षणस्य
२०४।१ सिद्धिमुपपादयति * शिष्येति * महच्छब्देन व्यापकतोक्ता
क्रमरक्षानादरणीयेत्याह * तद्विनाशे ऽपि चेति * ननु लोपा
र्णविकारद्वारा पदरक्षा व्याकरणधीनेत्याशङ्कानिराकरणार्थं
रूपसिद्धेः स्वतो ऽपि चेति व्याख्यातुं वृद्धवाक्यमुदाहरति
उक्तं चेति * नन्वाम्नायप्रसिद्धानामपि प्रस्तावोद्गीथप्रतीहारो
निधनानां सामपर्वणां लक्षणार्थस्यौच्छिक्याख्यग्रन्थस्येव व्या
स्याप्यर्थवत्त्वं भविष्यतीत्याशङ्कते * समाम्नायेति * वैषम्य
तद्युक्तेति * प्रतिकृत्स्नस्य साम्नः सिद्धिर्यस्मात्तत्कृत्स्न
तस्य भावः कृत्स्नसिद्धित्वम् । ननु कृत्स्नसिद्धित्वं ऽप्या
सिद्धत्वाल्लक्षणानर्थक्यमित्याशङ्क्य कर्त्तव्येन ऋगन्तरस
येन प्रस्तावादिनार्थेनार्थवदित्युक्तम् । कृत्स्नसिद्धित्वादिति
* औच्छिक्ये हीति * कर्त्तव्यार्थेन वेति व्याचष्टे * ब्राह्मणे
यथा योन्यां गायति तदुत्तरयोर्गायतीत्यादिब्राह्मणगतवि
योन्यामप्याम्नातस्य साम्न उत्तर ऋगन्तरे सञ्चारणायामि
व्याकरणे त्वेतदुद्वयमपि नास्तीत्याह * पदेति * विशिष्टपद
त्मकानां वाक्यानां संघातो रूपं येषां वेदानामिति व्याकरण
संज्ञाभिधानं न सम्भवति कर्त्तव्यानि पदानि वाक्यानि वा
देष्विति कर्त्तव्यार्थत्वाभावाभिधानम् । ननु प्रकृतिप्रत्ययान्
नरूपस्य पदानुगमस्यान्यतः सिद्धेः कर्त्तव्यत्वाद्व कर्त्तव्य
भाव इत्याशङ्क्याह * लक्षयेदिति * वेदरक्षार्थत्वे च व्याव
वैदिकवर्णमात्रादिनिर्णयो वैयाकरणाधीनः प्रसज्येतेत्याह
चेति * एतदेव दृष्टान्तेनोपपादयति * कर्षेति * ननु क
वैयाकरणानां सन्निधानाभावादनादरो भविष्यतीत्याशङ्क्य
लोक इति * यस्य यदर्थत्वमित्यत्रोदाहरणमापादयन्नाह *

मेति * आम्नावेत्यत्रोदाहरणमाह * व्याधितेति * ननु वेदाध्या-
ना व्याकरणं वैय्याकरणैर्वाद्रियन्तइत्याह * न त्विति * कस्तर्हि २८
रक्षाहेतुरित्यपेक्षायामाह * सहाध्यायिभिरेवेति * एतदेव वि-
णोति * तस्मादिति * उपाध्यायग्रहणं सहाध्याय्युपलक्षणार्थं
नभोजनादिषु वेदपरीक्षाधिकारः करणशब्देनाभिप्रेतः तत्संयुक्ताः
रणिकाः तेषां दयालूनां दोषान्वेषणतात्पर्याभावात् * द्विष्टैरि-
क्तम् । अध्येतॄणामेव वेदरक्षाहेतुतेति तात्पर्यार्थः । वेदरक्षाप्रयो-
त्वाभावमुपसंहरति * तस्मादिति * एवं वेदरक्षार्थत्वे निराकृते
दि कश्चिल्लौकिकवाक्यरक्षार्थत्वं ब्रूयात्तं प्रत्याह * लोके त्विति *
ु सुव्यवहारवाक्यरक्षार्थत्वाभावेऽपि काव्यादिरक्षार्थं व्या-
रणं भविष्यतीत्याशङ्क्याह * काव्यादिष्वपीति * एतदेव वि-
णोति * यदि त्विति * यथा काव्यस्य नाटकस्य वा लक्षणं
कृतभाषायाश्च व्याकरणं शुद्धाखण्डा च मात्रादिः सम्पूर्णेति च-
विधा द्विपदीकरणाख्येन तालेन परिगीयतइत्यादि च द्विपदीनां
क्षणमष्टादशमात्रा विरतिरपि यस्य रासकनामास चतुरंघ्रि-
र्गोकशीत्यादि च व्यसकाणां लक्षणमादिशब्दाच्च ध्रुवकादीनां
क्षणं संव्यवहारवाक्येष्वनुपयुज्यमानमपि काव्यनामकप्रबन्धार्थे-
नोपयुक्तं तथेदमपि संस्कृतमात्रं काव्यप्रबन्धार्थत्वेनोपयोक्ष्यतइ-
ाशङ्कार्थः । संस्कृतभाषानियमप्रयोजनाभावाभिप्रायेण परिहारः
त्रारूढः कृतः काव्यशोभापि न नियमप्रयोजनं वैपरित्यापत्तेरि-
ाह * काव्येति * किं च लोकप्रसिद्धैर्वा शब्दैः काव्यप्रबन्धार्थं
क्षणं स्यादप्रसिद्धैर्वा नोभयथाऽपि युक्तम् । अप्रसिद्धौ सम्बन्धस्या-
ास्त्रहेतुत्वादित्यनेन न्यायेन सत्यपि लक्षणानुगमे वचन्तीत्यादिव-
ौकिकशब्दप्रयोगे ऽर्थप्रत्ययाभावापत्तेः । प्रसिद्धौ वानर्थक्याप-
त्तिरित्याह * न चेति * ऊहार्थत्वं निराकरोति * ऊहार्थमपी-
ते * यथोह्यानूह्यविभागो मीमांसासिद्धत्वान्न व्याकरणापेक्षस्त-
ोहस्वरूपमपि लोकवेदप्रयोगसिद्धत्वादित्यर्थः । दृष्टान्तं विवृणोति
* तथा चेति * इयं गौस्तया क्रीणामि तस्यै शृतमित्यादौ सोम-
यार्थैकहायनीप्रकाशनार्थे मन्त्रे क्षीरादिवाचिनां शृतादिशब्दानां
वेकेलानमनार्थत्वाद् दृष्टार्थत्वेऽपि क्रमसाधनार्थत्वाच्च स्वार्थत्वे
ऽपि कालान्तरे चैकहायन्या अपि क्षीरादिसम्भवात्समवेतार्थत्वे
ऽप्येकहायन्यवस्थायामुच्यमानस्य क्षीरादिसम्भवस्य मुख्यत्वाभावा-
दौपचारिकस्य क्षीरादिसम्भवस्य साण्डोत्पादयिष्यमाणधेनुद्वारेण
साण्डेषूपपत्तेरूहाभावान्मुख्येत्युक्तम् । पत्नीं सन्नह्येति यजमानप-

त्नीसन्नहवत्प्रेषार्थे मन्त्रे पत्नीमित्येकवचनस्य विद्यमानार्थत्वेन
ख्यत्वे ऽपि सन्नहनीयपत्नीसंख्याप्रकाशनाच्च स्वार्थत्वे ऽप्येकत
चानेकपत्नीकप्रयोगे ऽपि पत्नीत्वसामान्यसमवायात्समवेता
ऽपि प्रकृतावपूर्वसाधनीभूतपत्नीव्यक्तिपरत्वात्सामान्यसंख्या
शनस्यादृष्टार्थत्वेनोहाभावाद् * दृष्टार्थतेत्युक्तं * इडोपह्वान
यज्ञपतिं वर्द्धानिति यज्ञपतिशब्दस्य यजमाने मुख्यत्वे ऽपि तत्प्रो
हनार्थत्वेन दृष्टार्थत्वसम्भवे ऽपि यजमानस्य च कर्म्मसमवाय
मवेतार्थत्वे पीडास्तुत्यर्थवृद्धिविशेषणत्वाभावेनोहाभावात्स्व
त्युक्तम् । इन्द्रागच्छ हरिव आगच्छेति सुब्रह्मण्यामन्त्रे हरिव
स्य हरिवत्त्वलक्षणे गुणे मुख्यतेति तस्य चेन्द्राय हरिवते
निर्वपेदिति सवनीयहविरादिषु देवतात्वान्तर्गतेर्दृष्टार्थत्वे ऽपि
माणेन्द्रप्रकाशनाच्च स्वार्थत्वे ऽपि वस्तुवृत्त्येन्द्रे हरिवत्त्वासमव
समवेतार्थत्वाभावेनोहाभावात् * समवेतार्थतेत्युक्तम् * सत्या
ख्यत्वादिष्वर्थप्रकाशनवच्छब्दस्वरूपस्याप्यादरे सत्यर्थान्तरयु
विकृतावैन्द्रीवद्गौणत्वोपपत्तेरूहासम्भवात्प्रकृतौ यथोत्पत्ति
मर्थानां तथोत्तरस्यान्ततो तत्प्रकृतित्वादर्थे चाकार्यत्वादित्येत
करणसिद्धशब्दस्वरूपनादरसूचनायादिशब्दः । नवमएव हि तृ
पादाद्यधिकरणे ऽग्नये जुष्टन्निर्वपामि व्रीहीणामेधः सुमनस्यमान
व्रीह्यग्निशब्दौ द्रव्यदेवतान्तरयुक्तायां विकृतावूह्यावनुह्यौ वे
णयार्थे किमर्थप्रकाशनवच्छब्दस्वरूपमपि विवक्षितं न वेति स
शब्दस्वरूपानादरे समाम्नानार्थक्यापत्तावौत्पत्तिकसमाम्नाय
तशब्दस्वरूपमनतिक्रम्यार्थानां वचनमाभिधानं प्रकृतान्वयीति
त्तरस्यामपि ततो विकृतिविस्तारे तथाभूतमविकृतमेव शब्द
प्रयोक्तव्यं प्रकृतिदृष्टस्यैव शब्दस्वरूपस्य प्रकृतिवच्छब्देन विनि
त्वादिति प्रकृतौ यथोत्पत्तिवचनमर्थानां तथोत्तरस्यां ततो त
तित्वादिति सूत्रावयवेन पूर्वपक्षयित्वा कर्म्मसमवेतार्थप्रकाश
शेन विहितानां मन्त्राणां प्रधानवशवर्त्तित्वेन प्रकृताविति
च्चास्यार्थप्रकाशननिरपेक्षस्वरूपादरायोगाद्वैकृते च सूर्यनीवा
ऽग्निव्रीह्यादिशब्दानां प्रकाशनाख्यकार्याभावात्तत्समर्थशब्दापा
विकृतौ मन्त्रोच्चारणं युक्तमित्यर्थे चाकार्यत्वादित्युत्तरावयवे
द्धान्तयिष्यते । ननु प्रकृतिमन्त्राणां मुख्यत्वादिरूपेण प्रयोगे
विकृतावर्थान्तरयुक्तायामतिदेशेन प्राप्तानां तदीयद्रव्यदेवत
काशनसामर्थ्येन प्राकृतकार्यार्थत्वायोगादातिदेशिकवचनवर
र्यान्तरकल्पनैवोचिता नोहेन प्राकृतकार्यसामर्थ्यकल्पनेर

कारेषु कार्यातिदेशतो गता * इत्युक्तम् * प्राकृतकार्यनिरपे- २८
क्षेण पदार्थातिदेशे शास्त्रातिदेशे वा कार्यान्तरकल्पना युज्येत वै-
तभावनाकाङ्क्षावशात्तु करणोपकारलक्षणकार्यद्वारस्यैवातिदेशस्य
शमाद्ये वक्ष्यमाणत्वान्न कार्यान्तरकल्पनेत्याशयः। कार्यद्वारातिदेशे
पि कार्यान्तरार्थे व्रीह्यादौ व्रीहीणां मेधेत्यादिमन्त्रप्रयोगस्यैवाभा-
त्प्राकृतकार्यार्थत्वे ऽप्यर्थान्तरत्वाभावेनाविकृतस्यैव प्रयोगोपपत्ते-
हाभावात्प्राकृतकार्यतापत्तेश्च * अर्थान्तरेष्वित्युक्तम् * कथं
ार्यापत्त्यवगतिरित्यपेक्षायाम् * पञ्चधेत्युक्तम् * नैवारश्चरुरिति
प्रकारतद्धितेन नीवाराणां चरुप्रकृतित्वाभिधानात्प्रत्यक्षविधिना
देयप्रकृतित्वलक्षणव्रीहिकार्यापत्तिरवसीयते संस्थिते षडहे म-
वाशयेद् घृतं वेति मधुघृताशनयोः षडहाभावे विधानात्प्रत्यक्षवि-
धना षडहकार्यापत्तिः सत्रायावगूर्य विश्वजिता यजेतेति वा स-
ाभावे विश्वजितो विधानात्सत्रकार्यापत्तिः। नैवारश्चरुर्नखावपू-
ानामिति वैतुष्यलक्षणविकारफलकानिर्लुञ्चनापरपर्यायावपनाङ्ग-
वेन नखानां विधानाद्विकारेण वैतुष्योत्पादनलक्षणोलूखलमुसल-
कार्यापत्तिः। परिधौ पशुं नियुञ्जन्तीति परिधेर्नियोजनेविधानात्स्व-
शब्देन विनियोजनलक्षणरूपकार्यापत्तिः। न गिरागिरेति ब्रूयादैरं
कृत्वोद्गेयमितीरापदविध्येकवाक्यतया गिरापदस्य निषेधानुवादाव-
गतेरेकार्थत्वाभावे चेरापदेन गिरापदबाधायोगान्निषेधानुवादानुप-
पत्तेर्निषेधानुवादेन गिरापदकार्यापत्तिरिति पञ्चप्रकारत्वम्। प्र-
त्यक्षविधिना भावे विधानेन विकारतः स्वशब्दाच्च निषेधानुवा-
दात्तत्कार्यकारितेति संग्रहश्लोकः। ननु व्रीह्यादिकार्याय तेष्वपि
नीवारादिषु व्रीह्यादिप्रकाशनार्थानां मन्त्राणां व्रीह्यादिस्वरूपस्या-
भावेनाप्राप्तेर्नोहः स्यादित्याशङ्क्य * अपूर्वार्थद्वारेणेत्युक्तम् * स्व-
रूपप्रयुक्तत्वनिराकरणेनापूर्वप्रयुक्तत्वस्य नवमाद्ये वक्ष्यमाणत्वान्नी-
वारादिषु व्रीह्यादिस्वरूपाभावे ऽपि व्रीह्यादिलक्षितापूर्वार्थत्वसद्भा-
वात्तद्द्वारेणास्ति प्राप्तिरित्याशयः। नन्वर्थान्तरेष्वप्यूहेन मन्त्राणां
प्रयोगोपपत्तौ याज्यानुवाक्ययोरनुपदेशे गायत्र्यादिना लक्षणेनानु-
वाक्यकल्पनवचनं त्रिष्टुबादिना च लक्षणेन याज्याकल्पनवचनं ता-
दृशलक्षणयोश्चासम्भवेन असञ्ज्ञकयोर्निमामश्रृणुधीहवं स्तीर्णं बर्हि-
रानुषासवेतदित्यनयोरिरागमवचनमनर्थकं स्यादित्याशङ्क्य * अनि-
षिद्धोहा इत्युक्तम् * पूयति वा एतदृचो ऽक्षरं यदेतदूह इति त-
स्मादृचं नोहेदित्यादावूहनिषेधान्न देवतान्तरवत्यां विकृतौ प्राकृत-
योर्याज्यानुवाक्ययोः प्राप्तिः सम्भवतीत्याशयः। न माता वर्द्धते न

पितेति तु यज्ञपतिन्यायप्राप्तनिषेधानुवादत्वान्नोदाहरणमेवम्भूत
बोहोपपत्तिकलापस्य मीमांसागम्यत्वादस्माकमेवोहः सिद्ध्यति
वैयाकरणानामिति * न इत्यनेनोक्तम् * न त्ववघातादिसस्क
विषयस्य दृढादृढप्रहारादिरूपस्योहस्य सामविषयस्य बोत्तराकृता
द्धतालव्याश्रितापि भावरूपस्य व्याकरणानपेक्षत्वे ऽपि मन्त्रोः
वैयाकरणाधीनत्वेन महाभाष्यकृतोक्तस्य शब्दरूपत्वाद्वैयाकरणा
क्षा भविष्यतीत्याशङ्क्य व्रीह्यादिसम्बन्धित्वेनावगतानां धर्माणां
धारादिसम्बन्धित्वापादकरूपवितर्कणात्मकस्योहरूपस्य मन्त्रवि
ऽप्यूहे साम्याद्वितर्कणायाश्च मीमांसाधीनत्वान्न वैयाकरणापेक्
* मन्त्रशब्देनोक्तम् * ननूह्यानूह्यविभागस्य मीमांसकाधीः
ऽप्यूह्यपदस्वरूपज्ञानं वैयाकरणापेक्षं भविष्यतीत्याशङ्क्याह *
तावतीति * ननु कथं साध्वसाधुशब्दाविवेकानभिज्ञस्य योग
दलाभ इत्याशङ्क्याह * वेद एव हीति * यत्किञ्चिच्छब्दोहेः
वा मन्त्रवाक्यनैराकाङ्क्ष्यसिद्धेर्न योग्यपदादरो युक्त इत्याह *
वेति * एतच्च देवतापदव्यतिरिक्तविषयमुक्तं तेषां विधिगत
तिरेकेण साधूनामप्यप्रयोज्यत्वादिति दर्शयंश्लोकं व्याचष्टे *
तेति * आग्नेयादियागाङ्गभूतेष्वावाहनादिषु निगमनस्थानेषु कि
केन चित्पर्यायेण देवताभिधेयार्थविधिगतेनैव शब्देनेति सन्दिह्य
केन चिदर्थसिद्धेरनियमे प्राप्ते देवतायाः प्रतिग्रहादिव्यापाराभ
त्स्वरूपेण कर्मसमवायानुपपत्तेः शब्देनाग्निमुद्दिश्य हविस्त्यजे
विध्यर्थावगमात्केन शब्देनेत्यपेक्षायां बुद्धिस्थाग्निशब्दातिक्रमे
णाभावादग्निशब्देनैवाग्निमुद्दिशेदिति विधिगतेनैव शब्देन देः
त्वविधानान्मन्त्रकार्ये तस्यैवोच्चारणं कार्यमिति विधिशब्दस्
न्त्रत्वे भावः स्यात्तेन चोदनेति सूत्रोक्तदाशमिकन्यायेन वि
तप्रयोगानुसारेणैव विकृतौ देवतापदान्यूह्यमानानि प्रयोक्ष्यन्त
र्थः । ननु सौर्यं चरुमिति विधौ प्रातिपदिकमात्रश्रवणादग्नये
ष्टमिति चतुर्थ्यन्ताग्निपदस्थाने सूर्यपदं कीदृशं प्रयोज्यमिति
करणं विना न ज्ञायतइत्याशङ्क्य * तद्वाक्यशेषेत्युक्तम् *
विधिवाक्यस्य शेषे वाक्यान्तरे वा महोदेवाय सूर्याय शंसतेः
यदधिगतमर्थाभिधानमित्यन्तेनेत्यर्थः । नन्वेवं सति शब्दव्यवस्
मपि प्रयोगोत्पत्तिशास्त्रत्वदर्शनात्कथं तेनाव्यवस्थासिद्धिरित्या
तेषु हीत्युक्तम् किंविषयं तर्ह्यव्यवस्थितोह्यपदप्रयोज्यत्वाभि
मित्यपेक्षिते * यानीत्युक्तम् * पौण्डरीके बर्हिषि दर्भैस्तृणीत
तैः सुपर्णैरित्यतिदेशप्राप्ते मन्त्रे दर्भपदस्थाने पुण्डरीकैरिति द्व

ादिशब्दात्सुपर्णपदस्थाने पुण्डरीकावयववाचिपदम् । एवं व्रीही-
ां मेधः सुमनस्यमान इत्यादौ यथासम्भवं नीराणामित्यादीनि
थासम्भवं द्रव्यादिपदान्युदाहार्याणि । ननु नीवारादिपदव्यतिरि
ानां तत्पर्यायाणां साध्वसाधूनां मानाप्राप्तत्वेनाप्रतीतरूपाणां प्रयो-
विधिविषयत्वाभावात्प्रयोगानुपपत्तेर्नाऽव्यवस्था युक्तेत्याशङ्क्य *स-
न्निहितेत्युक्तम् । सन्निहितेन नीवारादिविधित· प्रतीतेन नीवारादि-
ार्थेन पर्युपस्थापितानि समस्तानि पर्यायभूतानि साध्वसाधूनि रू-
ाणि येषामिति विग्रहः । पूर्वमेव तर्हि नीवाराद्यर्थस्य स्मृतत्वान्नी-
ारादिपदोहो ऽनर्थकः स्यादित्याशङ्क्य *असन्निहितेत्युक्तम् * अ-
सन्निहितार्थस्य व्रीह्यादिपदस्य निवृत्त्या हेतुभूतया न्यूनत्वात्साका-
ं यद्व्रीहीणां मेधेत्यादिमन्त्रवाक्यं तस्य निराकाङ्क्षीकरणायेति
ग्रहः। द्रव्यादेर्हि श्रुतिसमवायित्वाभावेन विधिगतशब्दप्रयोगनिय-
ाभावात्कर्म्मविधानार्थस्यैव शास्त्रस्य शब्दप्रयोगोत्पत्तिशास्त्रत्वा-
ुपपत्तेर्मन्त्राम्नानरूपेण वा शास्त्रेण प्रयोगोत्पत्तेः शास्त्रवत्त्वं वाच्यं
्याकरणाख्येन वा तत्र मन्त्राम्नानं तावद्विकृतौ नास्तीत्याह * प्र-
कृतौ हीति * व्याकरणस्य च सम्भाव्यमानमूलशास्त्रत्वात्कृतकत्वा-
द्दोषग्रस्तत्वात्पौरुषेयत्वेन चानादियज्ञगतशब्दविषयत्वायोगान्न
्रयोगोत्पत्तिशास्त्रत्वं युक्तमित्याह * व्याकरणस्यापीति * कृतकत्व-
स्यानाप्तप्रणीतत्वाशङ्कापादकत्वेन दोषत्वं व्याकरणानुगतशब्दप्रयो-
गनियामकत्वाभावेन * अविधायकत्वस्योक्तम् * इत्युपसंख्याना-
नामादिशब्दोपात्तानां च वक्तव्यानामाचार्य्यसूत्राणां च दीधीवेवी-
णामित्यादीनां प्रत्याख्यानं सूत्रवार्तिकभाष्याणां परस्परविरोधे विशे-
षाग्रहेण इदमेव प्रमाणमित्यनिश्चयादनवस्थितं प्रमाणत्वं विकरण-
स्य केचित्प्रकृत्यन्तर्भावमिच्छन्ति, अन्ये प्रत्ययान्तर्भावमिति, यथारु-
चि कल्पितं प्रकृतेः प्रत्ययस्य वा परिमाणं धातुप्रातिपदिकादिलक्षण-
दूषणान्यादिशब्देनोपात्तानि सत्यप्याप्तप्रणीतत्वे नित्यानित्यसंयोग-
विरोधेनानादियज्ञगतशब्दविषयत्वं निराकृतम् । ऊहस्यान्यतः सि-
द्धेर्व्याकरणप्रयोजनत्वासम्भवमुपसंहरति * तेनेति * प्रकृति-
विकृतिविभागज्ञानं कर्म्मज्ञानं प्रकृतौ द्रव्यदेवतामन्त्राणां विकृ-
तौ द्रव्यदेवतान्तरस्य प्राकृतानां च मन्त्राणां ज्ञानं कर्म्मा-
ङ्गज्ञानं प्रकृतावपूर्वप्रयुक्तत्वं कार्यातिदेशेन च विकृतिग-
मनं वैकृतानां चाङ्गानां प्राकृतकार्यापत्तिज्ञानं वाक्यार्थज्ञानं तेषु
कौशलैः कर्तव्यतया लोकवेदप्रयोगाच्च स्वरूपेणोह सिद्धेर्व्याकरणा-
नर्थक्यमित्यर्थः । व्याकरणतः सिद्धेरप्यूहस्य तत्प्रयोजनत्वं न यु-

क्तमित्युपपादयितुं व्याकरणपर्य्यालोचनया कर्त्तव्यत्वेनावगतः
मीमांसानुसारेणापवादः कल्पसूत्रव्याख्यातृभिः कृत इत्याह
चेति * देव्याः शमितार आरभध्वम् इत्यादिः पशुविशसनप्रै
अध्रिगुशब्दवत्त्वेनाध्रिगुरुच्यते तत्र पुराणन्यायादीन्यङ्गानि अः
मातेत्यादीनि ज्ञातिनामानि श्येनमस्येत्याद्या उपमाः सूर्यं चक्षु
दीनीन्द्रियाणि यज्ञपतिशब्दवत्पारार्थ्येनैषामन्यैरूहविषयैर्वैषः
ध्रिगावूह्यते इत्यर्थः । यथागमः खल्वपीत्युपक्रम्य ब्राह्मणेन निष
धर्मः षडङ्गो वेदो ऽध्येयो ज्ञेयश्चेति स्मरणमावश्यकधर्म्मं
षडङ्गवेदाध्ययनविधानार्थं व्याकरणाध्ययनप्रयोजनत्वेनोपन्य
त्प्रयोजनं प्रयोजनिभाववैपरीत्येन दूषयति * आगम इति *
वेदाध्ययनं प्रति प्रयोजनभूतानां कर्म्मणां नाध्ययनं प्रयोजन
षडङ्गवेदाध्ययनविधायकमागमं प्रति प्रयोजनभूतस्य व्या
ध्ययनस्य नागमप्रयोजनमित्युपालम्भार्थः । न त्वागमप्रयो
प्रतिपादकं भाष्यमनुष्ठापकत्वाभिप्रायं व्याख्यातृभिर्व्याख्यात
थं फलपरत्वं प्रयोजनशब्दस्यारोप्य दूषणमुक्तमित्याशङ्कानि
णार्थः फलपदप्रयोगः । रक्षोहागमलघ्वसन्देहाः प्रयोज
सकृच्छ्रुतस्य प्रयोजनशब्दस्य रक्षादौ फलपरत्वमागमे ऽनु
परत्वं न युक्तमित्याशयः । एतदेव विवृणोति *
हेति * न चागमप्रयोजनत्वाभिधानेन लक्षणया
नाख्यमागमोक्तं प्रयोजनमभिमतमित्याशङ्कते * अथेति *
वेदाध्ययनवद्धर्म्मज्ञानस्याप्यनुष्ठेयत्वमनेनागमेनोक्तं न प्रयोज
ति मत्वा परिहरति * तदपीति * नन्वेकस्मिन्वाक्ये विधि
योगाद्धर्म्मस्य ज्ञेयत्वाभिधानं प्रयोजनत्वेनैव व्याख्येयमत उ
निष्कारणतयेति * श्रेयःसाधनत्वेन धर्म्मस्य निष्प्रयोजनत्व
न्निष्कारणशब्दस्य षडङ्गशब्देनैवान्वयात्पौरुषेयेषु च वाक्ये
दोषत्वादित्याशयः । एतदेव विवृणोति * निष्कारणेति *
ऽनुष्ठाप्यते ऽनेनेति व्युत्पत्त्या प्रयोजनवचनो ऽयं कारणश
वक्तुं निष्प्रयोजनत्वशब्दः । अवेदत्वाच्चास्यागमत्वं नास्तीत्
आगम इति * नन्ववेदत्वे ऽपि वेदमूलत्वेनागमत्वं भविष्यत
ङ्क्याह * कथं चेति * नन्वेवं तर्हि तस्याः स्मृतेर्वेदमूलत्वाभ
दाध्ययनस्यावैधत्वं स्यादित्याशङ्क्याह * तस्मादिति * न च
लवेदविषयस्य विधेर्नित्यानित्यसंयोगविरोधो ऽस्तीत्याह *
त्रं चेति * ननु व्याकरणादेरपि प्रवाहनित्यत्वान्नित्यविधि
त्वं न विरोत्स्यतइत्यत आह * व्याकरणादीति * प्रत्यक्षश्रुति

ि सति तदन्यथानुपपत्त्या प्रवाहनित्यत्वं कल्प्येत तदभावे ऽप्यप-
वृत्तित्वेनाप्युपपत्तेर्न कल्पनागौरवाश्रयणं युक्तमित्याशयः । न
ास्य वेदत्वेन तत्तुल्यत्वेन वा स्वयमागमत्वं सम्भवति कल्पसू-
ाधिकरणे निरस्तत्वादित्याह * न चेति * किं च प्रधानं च
डङ्गेषु व्याकरणमिति भाष्येण वेदाङ्गत्वाद्व्याकरणस्यैतदागमप्र-
ाजनत्वमुक्तम् । अङ्गशब्दश्च तादर्थ्यवाची वा स्यादवयववाची
ा नोभयथापि व्याकरणस्याङ्गतास्तीत्याह * न चेति * उभय-
पाभावमुपपादयति * श्रुतीति * कस्तर्ह्यस्याः स्मृतेरर्थ इत्य-
क्षायामाह * तस्मादिति * लिङ्गादेरशब्दरूपत्वे ऽपि तत्कल्प्या- २
ं श्रुतीनां वेदावयवत्वं भविष्यतीति भावः । अभिधानसमर्थानां
ा मन्त्राणां लिङ्गत्वमङ्गानां सापेक्षवाक्यार्थप्रतिपादकवाक्यसमु-
ायस्य प्रकरणत्वम् । सन्निधिपठितानां वाक्यानां क्रमत्वम् । यौ-
गिकस्य शब्दस्य समाख्यात्वमभिप्रेत्य * अवयवत्वमुक्तम् * एवं
वेधषडङ्गवेदाध्ययनस्य चान्वयव्यतिरेकाभ्यां धर्म्मज्ञानहेतुत्वाव-
गमाद्धर्मो ज्ञेय इत्यस्य तत्प्रयोजनत्वाभिधायकत्वोपपत्तेर्नानेकवि-
धाने निमित्तवाक्यभेदापत्तिरिति सूचयन्नाह * तैः षड्भिरिति *
नन्वेवं सति वेदाध्ययनेनैव तदवयवाध्ययनसिद्धेः विशेषणानर्थ-
क्यापत्तिं शङ्कते * नन्विति * प्रविभक्तरूपश्रुत्यादिज्ञानार्थत्वेन
विशेषणसाधुत्वमाह * उच्यतइति * श्रुतेर्विनियोजकत्वे हे-
तुर्मुख्यं गौणं वा सामर्थ्यं तेन विना विनियोजकत्वस्यासम्भवा-
द्विनियोजकाक्षरश्रवणरूपं व्यर्थं लक्षिते पूर्वं साधनांशे वि-
नियोगः फलं सामान्यसम्बन्धाख्यः क्रतुसम्बन्धो लिङ्गस्य
विनियोजकत्वे हेतुः सामर्थ्यं रूपं मुख्ये ऽर्थे विनियोगः फलं सम-
भिव्याहारान्यथानुपपत्तिर्वाक्यस्य विनियोजकत्वे हेतुः । सन्निहि-
ताकाङ्क्षितयोग्यपदार्थप्रतिपादकपदसमुदायो रूपं पूर्वापरपदाविरो-
धेन विनियोगः फलं प्रकरणस्य विनियोजकत्वे फलसंयोगाभावो
हेतुः साकाङ्क्षफलवत्सन्निधानं रूपं फलवति विनियोजकत्वे सा-
दृश्यं हेतुः । निराकाङ्क्षफलवत्सन्निधानं रूपं फलवत्याकाङ्क्षो-
त्थापनेन विनियोगः फलं सामान्यतः प्राप्तिः समाख्याया विनियो-
जकत्वे हेतुः यौगिकशब्दत्वं रूपं प्रतियोगिनि विनियोगः फलमिति ।
पृथग्भूतैर्हेतुरूपफलैः प्रविभक्तरूपेण श्रुत्यादिज्ञानं मीमांसानिरपेक्षा-
द्वेदाध्ययनमात्रान्न सिध्यतीत्याशयः । ज्ञात्वेति च ज्ञास्यामीत्यध्यव-
सायेत्येवमग्निष्टोमसाम कृत्वेतिवद्व्याख्येयं विधेरर्थमित्यनेन षडङ्गो
वेदो ऽध्येयो ज्ञेयश्चेत्यागमस्य वेदः पठितव्यः स च परस्परवि-

विक्तश्रुत्यादिषडङ्गरूपेण ज्ञेय इत्यर्थः । सूचितं मीमांसाधी
च्चास्यार्थस्य न इत्यस्मदा सूचितम् । ननु ज्ञेयशब्दस्य षडङ्गश
न्वये धर्मशब्दस्यानन्वयापत्तेर्नानेन श्रुत्यादीनां चोक्तरूपेण ज्ञानं
धियतइत्याशङ्क्य अध्येयशब्दस्यैवेणा् गताविव्येतद्धातुरूपत्वाज्ञी
शेन ज्ञानविधायकतेति व्याख्यानान्तरमाह * अधीति * अ
रप्रश्लेषरहितेन वानेन ध्यानं विधीयतइति तृतीयं व्याख्यान
* ध्यायतेरिति * अध्ययनविधित एव नान्तरीयकतयाध्ययनसि
विधानानर्थक्यमित्याशङ्क्य श्रुत्याद्युपायकार्थप्रतिपादकत्वरूपेण
ङ्गस्य वेदस्य ध्यानं विवक्षितं न स्वरूपेण तस्यापि च वेदार्थाव
रणकालसिद्धत्वात्पश्चादप्यनुष्ठेयत्वसिद्ध्यर्थं विधानमिति दर्शि
माह * श्रुत्यादीति * एवं च मीमांसाध्ययनानुष्ठापकतैवास
गमस्यावसीयते न व्याकरणाध्ययनानुष्ठापकतेत्यनुष्ठापकत्वेनाग
स्य व्याकरणप्रयोजनत्वाभिधानं न युक्तमित्याह * ततश्चेति
अनुष्ठानार्थत्वाद्वा विधिवाक्याध्ययनमात्रेण स्वाध्यायविध्यर्थसि
रर्थवादान्तर्गतव्याकरणाद्यङ्गसहितवेदाध्ययनविधानार्थत्वेनास्य
गमस्य न पाणिन्यादिप्रणीतग्रन्थाध्ययनानुष्ठापकतास्तीति चतु
व्याख्या तामाह * वेद इति * श्लोकं व्याचष्टे * तदभ्र इति
तदेनमधिनोत्तदभ्रो दधित्वमिति धिनोतेः प्रीणातिकर्मणो दधित्व
ब्दनिर्वचनादेतन्निरुक्तोदाहरणं तदाहुर्यदन्यो जुहोत्यथ यो ऽनुवा
याति तं च कस्मान्न होतेत्याचक्षतइति पृष्टे यद्वाव स तत्र यथा
जनं देवता अमुमावहामुमावहेत्यावाहयति तं देवहोतुर्होतृत्वमि
व्हयतेः कृतसम्प्रसारणस्यैतद्रूपं न तृजन्तं जुहोतेरिति प्रकृतिविशे
न्वाख्यानान्न व्याकरणोदाहरणम् आदिशब्दोपात्तस्य छन्दोवि
त्यादेरष्टाक्षरा गायत्रीत्याद्युदाहरणं यथासम्भवं मृग्यम् । अस्तु
निरुक्तादिग्रन्थानां षडङ्गाध्ययनस्मृतिविषयत्वम् । ननु व्याकरण
प्रातिशाख्यैः संख्याः पूरयिष्यतइति पञ्चमीव्याख्यामाह * प्रातिश
ख्यानि वेति * यानि प्रातिशाख्यान्यध्येतारो ऽधीयते तेष्वेव प
संख्यापूरणार्थं सङ्गतं न व्याकरणेष्वित्येवकारार्थे द्वितीयो वाशब
गृह्यमाणं लिङ्गेन स्वाध्यायार्थत्वं ह्येषामिति हेत्वर्थः वेदसंहिताध्य
यनानुगतस्वरसन्ध्याद्यनुसाराभिधानार्थः । स्वाध्यायत्ववदिति इ
तिः स्वाध्यायानुगतस्वराद्युच्चारणनियामकत्वरूपं प्रयोगशास्त्रत्वं त
दर्थग्रहणहेतुतया स्वाध्यायवदित्यनेनोक्तमुपपादयति * यानि
हीति * तदुपपादितं गृह्यमाणतदर्थत्वं व्याचष्टे * तेष्विति *
अतस्तेष्वित्यध्याहारेण योज्यम् । एवकारार्थस्य वाशब्दस्य व्याव

यैमाह * नन्विति * ननु कतिपयानामपि तावद्वैदिकशब्दानामुच्चा- २
णनियामकत्वात् व्याकरणानामपि प्रयोगशास्त्रतास्तीत्याशङ्क्याह
* प्रातिशाख्यानीवेति * अन्वाख्यायमानेष्वपि वैदिकशब्देष्व-
ययनानुगतस्वरसन्ध्यादियुक्ते रूपे व्यापाराभावान्नैषां प्रयोगशा-
स्त्रतास्तीति नियामकत्वाद्व्याकरणानामपि प्रयोगशास्त्रतास्तीति प-
रिहरति * नेति * प्रातिशाख्यानां वेदस्वरूपे व्यापारं विवृणोति
* प्रातिशाख्यैः पुनरिति * उदात्तपौर्वापर्यत्वे तयोर्मध्ये कालः
स्वरसन्धिः सर्वानुदात्तपदसंहतिः प्रयतिः असंहिता विवृतिः
स्वरितस्योदात्तो ऽशः पूर्वाङ्गः, अनुदात्तः पराङ्गः आदिशब्दे-
ङ्गाद्युक्तम्। एवं तावद्व्याकरणाध्ययनाविधायकत्वान्नास्यागमस्य
व्याकरणं प्रत्यनुष्ठापकत्वरूपप्रयोजकत्वान्नास्य किमपि प्रयोजनत्वम्
सम्भवतीत्युक्तम् * इदानीमस्यागमस्य व्याकरणाध्ययनविधायक-
त्वे ऽपि निष्कारणशब्देनाध्ययनमात्रपर्यवसानावसायादर्थज्ञाननिर-
पेक्षेणाध्ययनमात्रेण शब्दानामनुशासितुमशक्यत्वाच्छब्दानुशासन-
रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति पूर्वोक्तेन प्रतिज्ञानेन तव
प्रयोजनत्वेनाभिमतस्यागमस्यानुसन्धानसंवादो नास्तीत्याह * पूर्वो-
क्तेनेति * यो ह्ययमागमस्त्वया प्रयोजनत्वेनोपन्यस्तः सो ऽध्यय-
नं प्रति तन्मात्रे पर्यवस्यति न शब्दानुशासनपर्यन्तं गच्छति प्राक्
शब्दानुशासनमागमप्रयोजनत्वेन प्रतिज्ञातमित्यध्याहारेण योज्यम्।
तस्माच्चागमादध्ययनमात्रे धर्म इति प्रतीतेर्महाभाष्यकृता ज्ञाने
धर्म इति वक्ष्यते शास्त्रपूर्वं प्रयोगेऽभ्युदय इति च वार्त्तिककृता तदु-
क्तमप्यागमविरुद्धं स्यादित्याह * ब्राह्मणेनेति * यच्च लाघवा-
र्थमध्येयं व्याकरणमित्यादिभाष्येण लघुनोपायेन शब्दज्ञानं व्याक-
रणस्य प्रयोजनमित्युक्तं तदत्यन्तक्लिष्टत्वेन व्याकरणस्य लघूपायत्वा-
भावात्प्रयोजनातिक्लिष्टव्याकरणाध्ययनमध्येतुर्लाघवं मन्दबुद्धित्वमा-
वेदयतीत्यध्येतृलाघवमेवास्य प्रयोजनमित्येवं व्याख्येयमित्युपहसति
यदपि चेति * उपहासान्तरमाह * यदि वेति * श्लोकं व्याचष्टे
लोकप्रसिद्धानामेवेति * धातुशब्देन धातुपाठो विवक्षितः गण-
शब्देन गणपाठ उणादिशब्देन दशपादी पञ्चपादी वा सूत्रशब्देनाष्टा-
ध्यायी आदिशब्देन वार्त्तिकादीनां तेषां पाठतो ऽर्थतश्च क्लिष्टत्वाद-
त्यन्तवैषम्यं विशेषणं क्लिष्टार्थत्वोपपादनायोत्तरवदत्रापि विग्रहद्व-
यम्। अलौकिकीभिर्वृद्धिरादैजित्यादिभिः संज्ञाभिरिको गुणवृद्धी-
त्यादिभिश्च परिभाषाभिर्निबद्धा प्रक्रिया येषां धात्वादीनामिति
प्रथमविग्रहः द्वितीयस्त्वनवस्थितौ स्थापनाक्षेपौ यस्य सिद्धान्तस्य स

सिद्धान्तो यस्य विचारस्य स विचारो येषु धात्वादिष्विति
भैबहुव्रीहिगर्भो बहुव्रीहिः । तद्यथा सिद्धे शब्दार्थसम्बन्धे
त्वारम्भवार्त्तिके भाष्यकृता सिद्धे शब्दे ऽर्थे सम्बन्धे चे
कृत्वा नित्यपर्यायवाचित्वेन सिद्धशब्दं व्याख्याय कं पुन
मत्वैष विग्रहः क्रियत इति विचारमुपक्रम्याकृतिमित्या
भिप्रायत्वं प्रतिज्ञायाकृतिर्हि नित्या द्रव्यमनित्यमिति हे
ऽथ वा द्रव्यपदार्थ एष विग्रहो द्रव्यं हि नित्यमाकृति
द्रव्यातीन्द्रियत्वमुक्त्वा पुनराकृतावपि पदार्थएष विग्रहं
इत्युक्त्वा नित्याकृतिरेकद्रव्यविनाशे ऽपि द्रव्यान्तरे प्रत्य
दिति चाक्षेपं परिहृत्य कूटस्थनित्यत्वाभावे ऽपि वा पट्टकु
ष्टा वा अथाकृतेर्द्रव्यान्तरभावे ऽयमिति तत्त्वप्रतिज्ञानान्नि
रिहारान्तरमुक्त्वा ऽथ वा किं न एतेन इदं नित्यमिदमनि
यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियतइति पदार्थविच
न्तस्थापनाक्षेपानवस्थितहेतूपन्यासेनानवस्थितौ कृते एवमत
मैर्धात्वादिभिर्लोकप्रसिद्धानामेव शब्दानां क्लेशेनान्तं गत्वा
स्थितानुवादमात्रकरणान्निष्फलश्रमापत्तिरित्यर्थः । तत्रापि
यथावस्थितशब्दज्ञानमपि सर्वप्रतिपत्तॄणां न भवतीत्युक्तम
त्यर्थमित्यन्तासम्भाविता स्तुतिरपि न सम्भवतीति सूचित
भाष्यकृता न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक
ज्ञातुमिति लघूपायान्तराभावाभिधानाद् गुरोरप्यस्य प्रति
त्मकगुरुतरोपायापेक्षया लघुत्वं भविष्यति एतदेव चान्यैरु
मित्याशङ्कानुभाषणपूर्वकमुपसंहरति * यदपीति * तत्त्व
रूपादेर्नास्ति व्याकरणाद्दतइत्याद्यपि वक्तव्यमित्यर्थः । न
देः प्रत्यक्षगम्यत्वान्न व्याकरणापेक्षा तत्साध्वसाधुशब्दावि
व्याकरणमन्तरेणाज्ञानान्नोपहासो युक्त इत्याशङ्कार्थप्रतीति
त्वात्सर्वेषां गोगाव्यादिशब्दानां साधुत्वे तेषां च श्रोत्रे
म्यत्वान्न व्याकरणापेक्षेत्यभिप्रायेण परिहरति * को हीति
णान्तरागोचरार्थविषयत्वं शास्त्रस्य स्वभावः प्रमाणान्तरगृह
नुवादित्वं लोकस्य इतिकरणार्थवाची इहशब्दप्रयोगात्तत
रणमिति प्रथमा कीदृशं तदर्थप्रवृत्तितत्त्वानां शब्दा एव नि
२१०।२ मिति श्लोकस्योत्तरार्द्धं वक्तव्यमित्यपेक्षायामाह * अत इति
द्यप्यसन्देहार्थं चाध्येयं व्याकरणमित्यादिभाष्येण वेदार्थगत
निवृत्तिप्रयोजनत्वं व्याकरणस्योक्तं तदपि दूषयति * अस
ति * पदार्थगतस्य चासन्देहस्य निवृत्तिर्व्याकरणस्याप्रयोजनं

न्तरा वा उभयथाप्यन्यतः सिद्धत्वात् व्याकरणाच्चासिद्धेर्न व्या-
णप्रयोजनमित्यर्थः। पदार्थसन्देहनिवृत्तेरन्यतः सिद्धिमुपपादयति
पदार्थेति * व्याकरणेन चासिद्धिमुपपादयति * व्याकरणेन
ारिति * नन्वीदृशं पदमस्मिन्नर्थे साध्वित्यर्थविशेषावच्छिन्नस्यैव
स्वरूपस्यान्वाख्यानादर्थज्ञानमपि व्याकरणात्सम्भवतीत्याश-
शब्दान्वाख्यानोपायमात्रकेन व्याकरणे ऽर्थकथनं न तात्पर्येणेति
दर्शयितुमाह * तथा हीति * व्याकरणाद्धि सर्वनाम्नां धातु-
त्वेन क्रियायोगनिमित्तता प्रतीयते न च वृद्धव्यवहारे तथा प्रती-
रित्यर्थः। अत्रैवोदाहरणमाह * गमेरिति * अनेन सूत्रेण गत्य-
त् गमेर्धातोरौणादिके डोप्रत्यये विहिते डित्करणाच्च टिलोपे कृ-
कर्त्तरि कृदिति गन्तरि गोशब्दव्युत्पादनार्थान्वाख्यानादरे लोके
द्धा जातिवाचिता हीयेत लोकमूलत्वाच्च व्याकरणस्य नैतद्यु-
मित्यर्थः (उदाहरणान्तरमाह * तथा चेति * कुशला दातरि कु-
ठशब्दस्य दातरि च दारशब्दस्य व्याकरणे ऽनुगमः। लोके च
ारा ये कुशलशब्दस्य दातृमहत्त्वयो वाच्य दारशब्दस्येत्यर्थः।[1])
कृदन्तेष्वपि कृदन्तत्वान्वाख्यानात् व्याकरणस्य लोकविरोधमु-
वा समासाभावे ऽपि समासान्वाख्यानात्सर्वविरोधमाह * अ-
ति * अतद्धितान्तेष्वपि तद्धितान्तवद्व्याख्यानाद्विरोधमाह
एवमिति * वेदविरुद्धार्थान्वाख्यानाद्यद्व्याघाताशङ्कापत्तेर्न
ाकरणस्यार्थे तात्पर्यमित्याह * तथेति * अत्रैवोदाहरणद्वयमाह
कलेरिति * आपो वा ऋत्वियमार्छन्तासां वायुः पृष्ठेत्यवर्त्तत
ा वसुवामं समभवत्तस्मिन्मित्रावरुणौ पर्यपश्यतां तावब्रूतां
मं मयाऽदं देवेष्वाजनीति तस्माद्वामदेव्यामिति वामदेवेष्विति
गभिव्याहृतशब्दद्वयोच्चारणनिमित्तवामदेव्यशब्दव्युत्पत्तिः कल-
क्रियानिमित्तकालेयशब्दव्युत्पत्तिश्च वैदिकी वैयाकरणी दर्शननि-
त्ततां बाधतइत्यर्थः। कल्पसूत्रकारैश्च कृष्णाशस्वास इति कृष्ण-
ाब्दस्य व्याकरणाननुगतदकारापगमेन कृष्णदशब्दवाचितया
ाख्यानात्कृष्णवलक्षे अजिने इति च वलक्षशब्दस्य लोकव्याकर-
नवगतशुक्लत्ववाचितया व्याख्यानाद्रूपादिशब्दानां च व्याकर-
मनादृत्यैव व्याख्यानान्न व्याकरणस्य पदार्थनिश्चायकत्वमस्तीत्याह
तथेति * नन्वस्तु नाम पदान्तरेषु व्याकरणानपेक्षो ऽर्थनिर्णयः। २१
तु भाष्यकृता स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेत्यत्र किं
ूला चासौ पृषती चेति कर्मधारयः। स्थूलानि पृषन्ति यस्याः सेयं

१ अयं पा० २ पु० ना०।

स्थूलपृषतीति बहुव्रीहिर्वेति सन्देहनिवृत्तिर्नावैयाकरणस्य भ
त्युक्तं तत्र कः परिहार इत्याशङ्क्याह * यथा चेति * पदार्थ
हनिवृत्तेर्व्याकरणप्रयोजनत्वं निराकृत्य वाक्यार्थसन्देहनिवृत्ति
निराकरोति * किं चेति * ननु वाक्यार्थसन्देहनिवृत्तिप्रयोज
भाष्यकृतानुक्तत्वान्न निराकार्यमित्याशङ्क्य प्रसङ्गापादनार्थं तां
करणमित्याह * यदीति * किं चिदित्यक्रियार्थत्वमभिमतम् ।
दुम्बराधिकरणस्य साध्यांशविचारार्थत्वाभावे किमौदुम्बर
फलसमभिव्याहारः साधारणत्वप्रतिपत्त्यर्थः । प्रशंसार्थो
व्याख्येयं प्रमाणान्तरेणाज्ञकरणत्वस्य होमसम्बन्धहेतुत्वमज्ञातं
प्यत इत्यज्ञातज्ञापनाभिप्रायो विधिशब्दः हेतुद्वारो ऽर्थवाद इति
पार्थिववन्मध्यमपदलोपी समासः इष्टार्थत्वशब्देनार्थतात्पर्य
सर्वमन्त्रसाधारणं मन्त्राधिकरणे व्युत्पादितं न स्मारकत्वं स्तो
त्रादिमन्त्रव्यापकत्वादिति दर्शितं व्याकरणानपेक्षोदाहरणा
कत्वाविवक्षायामेकवचनस्मृतेर्व्याकरणेनैकत्वविवक्षाप्रतीतेर्विरं
ऽप्यस्तीति दर्शयितुम् * ग्रहेत्युक्तम् * न त्वनन्यलभ्यस्य प्र
नवदर्थवादत्वादिनिर्णयस्य च मीमांसासिद्धत्वान्न व्याकरणप्र
नत्वोपपत्तिरिति स्वयमेवाशङ्क्याह *अथेति * स्थूलपृषत्यादि
र्थस्यापि कल्पकारादिव्याख्यानान्निर्णयः सेत्स्यतीत्याशयः । ननु
प्रमाणानिरपेक्षस्य व्याख्यानमात्रस्य निर्णायकत्वं न युक्तमित्या
त्वया ऽपि व्याख्यानिर्णायकत्वाभ्युपगमान्नेदं दूषणमित्याह *
चेति * लक्षणोत्थसन्देहे व्याख्यानस्य निर्णायकत्वप्रतिपादकं
र्थं वेदोत्थसन्देहेन योजयितुमाह * व्याख्यानत इति * भा
ता हि शास्त्रारम्भवार्त्तिकगतस्य सिद्धशब्दस्य (एकपरिहारयु
सार्थत्वमुपपाद्य चतुर्थः परिहारो ऽभिहित इत्यन्वयः सिद्धशब्द
कः पदार्थ इति पृष्ट्वा सिद्धा द्यौः सिद्धा पृथिवी सिद्धमाकाश
नित्येषु प्रयोगान्नित्यपर्यायवाची सिद्धशब्द इत्युक्त्वा सिद्ध अं
सिद्धः सूपः सिद्धा यवागूरिति कार्येष्वपि प्रयोगात्कथं नि
इत्याशङ्क्य संग्रहे तावत्कार्यप्रतिद्वन्द्विभावप्रसिद्धामिति भाष्येण
ग्रहाख्ये वार्त्तिककारकृते ग्रन्थान्तरे किं कार्यः शब्दः सिद्धो
कार्यप्रतियोगित्वेन नित्यार्थत्वावसायादिहापि तादर्थ्यनिर्णय
परिहारमुक्त्वा ऽथ वा सन्त्येकपदान्यप्यवधारणानीति भाष्येण
क्षो वायुभक्ष इतिवत्सिद्ध एव न साध्य इत्यवधारणेन नित्या
मुपपाद्याथ वा पूर्वपदलोपो ऽत्र द्रष्टव्यः । अत्यन्तसिद्धः सिद्ध

१ अयं पा० २ पु० ना० ।

द्यथा देवदत्तो दत्त इति सत्यभामा भामेति भाष्यग्रात्यन्तत्वावि-
षणेन नित्यार्थत्वमुपपाद्याथ वा व्याख्यानतो विशेषप्रतिपत्तिर्न हि
न्देहादलक्षणमिति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्याम
ति भाष्येण चतुर्थः परिहारो ऽभिहितः । ननु लक्षणोत्थसन्देह-
वृत्तिलक्षणकारिपुरुषकृतव्याख्यानपरम्परयोपपद्यते वेदे तु क-
भावेन तत्कृतस्य व्याख्यानस्य मूलत्वायोगात् व्याकरणं वेदव्या-
यापरम्पराया मूलं भवतीत्याशङ्क्याह * न चेति * कल्पादि- २
पो वेदार्थाग्रहणे व्याकरणमात्रेण व्याख्यानाशक्तेः कल्पादीनामेव
लत्वं युक्तमित्याशयः । वेदवद्धानादित्वात् व्याख्यानपरम्परा न
लान्तरमपेक्षतइत्याह * यथैवेति * ननु भाष्यकृता यदि पूर्व-
दप्रकृतिस्वरत्वं ततो बहुव्रीहिः अथ समासान्तोदात्तत्वं ततस्तत्पु-
ष इति भाष्येण बहुव्रीहौ प्रकृत्या पूर्वपदमिति बहुव्रीह्याद्यस्य पदस्य
कृतित्वाभिमताद्युदात्तस्वरत्वस्मृतेरुदात्ताधिकारे चान्तोवत्या इत्यतो
न्त इत्यनुवर्त्तमाने समासस्येति सूत्रेण समासविशेषनिर्णायान्तरेषु-
र्गः अन्तोदात्तत्वस्मृतेरनुदात्तं पदमेकवर्जमिति च विहितस्वरवर्ज-
मुदात्तत्वस्मृतेर्बहुव्रीहिं विना आद्यपदोदात्तत्वायोगाद्व्याकरणस्य
मासविशेषनिर्णयद्वारार्थविशेषनिर्णायकत्वाभिधानाद्व्याकरणस्य
र्णायकत्वाभिधानाद्व्याकरणाधीनादध्येतृप्रसिद्धाद्युदात्तत्वाद् ब-
व्रीहित्वेन स्थूलपृषत्यादिशब्दव्याख्येत्याशङ्क्याह *न चेति * श्लोकं
ाचष्टे *वृद्धेति * वेदे तु स्वरविवेके सत्यप्यर्थविशेषेण सह स्वर-
शेषस्य सम्बन्धग्रहणाभावान्न स्वरविशेषं कृत्वार्थविशेषव्यवस्था
ज्यतइत्याह *यत्र त्विति*ननु वेदे सम्बन्धग्रहणाभावे ऽपि लोकतो
नेकार्थतया ऽवगतस्य पदस्य वेदे श्रवणात्सन्देहे सत्यर्थप्रकरणा-
भिर्निर्णयो ऽभ्युपगम्यते तत्र चार्थद्वयसाधारणस्य पदस्यैकत्रैवार्थे
र्थं वृत्तिरित्यपेक्षायां स्वरविशेषश्रवणात्तत्स्वरयुक्तस्यैव पदस्यासा-
र्थविशेषनिर्णयोपायत्वं स्वरस्याप्यस्तीत्याशङ्क्याह * तत्रापीति *
ाधारणस्यापि शब्दरूपस्य लोकावधारितार्थप्रकरणादिनिर्णयोपाय-
शेनैव एकार्थपरत्वावधारणोपपत्तेर्न लोकानवगतस्य स्वरस्याप्य-
निर्णायसामग्रीमध्ये निवेशकल्पना युक्तेत्याशयः । ननु स्वरस्या-
ाधानङ्गत्वे ऽनर्थकः पाठः स्यादित्याशङ्क्याह * तेनेति * न कदा
ादृष्टार्थतास्तीति दर्शयितुम् * सर्वदेत्युक्तम् * ब्रह्मयज्ञेषु ज्यो-
ाष्टोमादिषु ये जपमन्त्रास्ते ऽप्यङ्गमिति निष्कृष्य योज्यम् । जप-
ुङ्खसामव्यतिरेकेण यज्ञकर्मण्येकश्रुत्यस्मृतेश्चकारेण न्यूङ्खसा-
ामुपादानम् । एवं च व्याकरणेन स्वरानुगमो ब्रह्मयज्ञाद्युपयो-

गित्वेनार्थवानस्तु न त्वर्थनिर्णयार्थतेत्याशङ्क्याह * व्याकर
अलौकिके ऽर्थे सम्बन्धग्रहणासम्भवेनावश्यकत्वाज्ञानात् :
किकेत्युक्तम् * न वर्णवद्वाचकत्वेन लोके स्वर: प्रयुर
व्यानुपूर्व्यादिवद्वाचकसहकारिता * इत्यत्यन्तशब्देनोक्तम्
लोकाप्रयुक्तेष्वप्युणादिशब्देषु वाचकत्वोपलक्षणाल्लोकप्र
व वाचकत्वज्ञानमिति नियमायोगाद्व्याकरणादपि
शेषस्यार्थविशेषं प्रतिवाचकत्वज्ञानं भविष्यतीत्याशङ्क्याह
चेति * शास्त्रारम्भभाष्ये ऽथ शब्दानुशासनमिति श
ख्यानार्थत्वाख्याने तात्पर्याभावाच्च व्याकरणस्य प्रामाण्य
य: । अत्रैव सूत्रावयवं योजयन्नसन्देहप्रयोजनत्वासम्भव
यति * तस्मादिति * रक्षादीनामपि पूर्वोक्तप्रयोजनत्वासम्
हारार्थो ऽपिशब्द: । एवं मुख्यानि पञ्चप्रयोजनान्युपन्यासपू
यित्वा ते ऽसुरा: दुष्ट: शब्द: यदधीतं यस्तु प्रयुङ्क्ते अविद्व
र्भाक्ति कुर्वन्ति यो वा इमां चत्वारि उत त्व: सक्तुमिव सार
शस्यां पुत्रस्य सुदेवो असि वरुणेत्यानुषङ्गिकाण्यपि त्रयोद
पतस्तावत् दूषयति * यान्यपि चेति *

अम्लेच्छत्वमदुष्टोक्तिर्विज्ञानं फलभागिता ।
अग्नीसाम्यं विभक्त्युक्ति: सप्तमं चार्त्विजीनता ॥
मनीषिवत् सम्मतत्वं देवेन महताप्यम् ।
वाक्स्वरूपप्रकटनं लक्ष्म्या वाचि निधापनम् ॥
अप्रायश्चित्तभाक्तं च द्वादशं पुत्रनाम च ।
त्रयोदशं सुदेवत्वमुक्तं भाष्ये प्रयोजनम् ॥
प्रथमं च द्वितीयं च सप्तमं चाप्रयोजनम् ।
दशमैकादशौ चेति व्याक्रिया न ह्यपेक्ष्यते ॥
तृतीयादीनि चत्वारि नवमद्वादशे अपि ।
प्रयोजनवदाभान्ति किं तु नान्येन सिद्धित: ॥
सुदेव इति मन्त्रस्य चत्वारीति द्वयोरपि ।
असामर्थ्यं न चरममष्टमं वा प्रमाणकम् ॥

मुख्यप्रयोजनैश्च प्रयोजनवत्त्वासम्भवेनानुषङ्गिकप
केत्याह * अपि चेति * नद्या वेगेन नीयमानो यस्तीर
क्षमप्यवष्टभ्य स्थातुं न शक्नोति तस्य यथा कुशावष्टम्भनं व
म्भनं चानर्थकं तथैतदपीत्यर्थ: । पूर्वोक्तमेव प्रपञ्चयितुं प्र
२१३।१ न्यस्योपन्यस्य दूषयति * तत्रेति * भाष्यकृता ते ऽसुरा
हे ऽलय इति ब्रुवन्त: पराबभूवुस्तस्माद् ब्राह्मणेन न म्ले

म्लेच्छो ह वा एष यदपशब्द इत्यपशब्दनिषेधवाक्यमुपन्यस्य म्लेच्छा माभूमेत्यध्येयं व्याकरणमिति भाष्येण म्लेच्छरूपापशब्दप्रयोगात्प्रयोक्तुर्म्लेच्छत्वापत्तेरज्ञातस्यापशब्दस्य वर्जनायोगाच्छब्दापशब्दविवेकज्ञानार्थम् * व्याकरणमित्युक्तम् * यस्मादसुरा अरय इति रेफस्थाने लकारप्रयोगेण हैहेप्रयोगे हैहेयोरित्येतत्सूत्रविहितप्लुतप्रयोगेण प्लुतप्रगृह्या अचीति च प्रकृतिभावविधानाद्धे अरय इति प्रयोक्तव्ये हे ऽलय इति त्रिविधापशब्दभाषणरूपम्लेच्छनात्पराभवं प्राप्तास्तस्माद् ब्राह्मणेन न म्लेच्छितव्यं नापभाषितव्यमिति समभिव्याहारेणापशब्दनिषेधस्यापराभवार्थत्वप्रतीतेर्म्लेच्छा माभूमेति म्लेच्छत्वपरिहारस्य प्रयोजनत्वं भाष्यकारोक्तमयुक्तमाशङ्क्य पराभवाख्यानस्यापभाषणफलप्रदर्शनार्थत्वे प्रतीते म्लेच्छो ह वा एष यदपशब्द इत्यस्यानर्थक्यापत्तेरपशब्दस्य म्लेच्छशब्दप्रयोक्तुर्म्लेच्छत्वं भवतीत्यपशब्दम्लेच्छत्वाभिधानार्थत्वादस्य फलपरत्वसूचनायोपन्यस्तार्थवादतोक्ता निषेधस्य तु प्रयोजनत्वमागमवत्प्रयोजकत्वेनाक्षेपकत्वेनोक्तं स निषेधो यथा गुरुसम्प्रदायागतवैदिकशब्दविषयो म्लेच्छभाषाविषयो वा न तु गाव्यादिशब्दविषयस्तथा यदपि च तस्माद् ब्राह्मणेनेत्यादिग्रन्थेन प्रागुक्तमित्यर्थः । ततश्च व्याकरणानपेक्षत्वात्तत्प्रयोजनत्वयोग्यतेत्याशयः । यच्च भाष्यकृता ।

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतो ऽपराधात् ॥

इति श्लोकमुपन्यस्य दुष्टाँश्शब्दान्माप्रयुक्ष्महीत्यध्येयं व्याकरणमिति भाष्येण दुष्टशब्दवर्जनं व्याकरणप्रयोजनमुक्तं तदपि मन्त्रविनाशविषयत्वस्य च व्याकरणानपेक्षत्वाच्च व्याकरणप्रयोजनत्वयोग्यमित्यर्थान्तरन्यासेनाह * दुष्ट इति * अत्रापि पूर्ववद्व्याकरणानपेक्षत्वात्तत्प्रयोजनत्वयोग्यतेत्यपिशब्देन सूचितम् । ननु दुष्टादुष्टशब्दज्ञानस्य व्याकरणाधीनत्वात्कथं तदनपेक्षेत्याशङ्क्य दुष्टः शब्द इति पाठे भवेद् व्याकरणापेक्षा न त्वीदृशः पाठो ऽस्तीति दर्शयितुमाह * वाग्वीति * मन्त्रो हीनः स्वरतो वर्णतो वेति बहुजनप्रसिद्धस्य शिक्षाकारपठितस्य मन्त्रपदस्योद्धारेण पदान्तरप्रक्षेपः स्वपक्षानुरागमात्रेण कृतो न वस्तुत इत्यर्थः । मन्त्रविनाशविषयत्वे चास्य वाक्यस्य श्रुतिमूलत्वं भविष्यतीत्याह * दुष्टेति * दुष्टपदप्रक्षेपे ऽपि मन्त्रदोषविषयत्वेनोपपत्तेर्व्याकरणापेक्षानापादकत्वात्पाठान्तरोत्प्रेक्षानर्थक्यसूचनार्थो दुष्टशब्दः शब्दमात्रदोषविषयत्वे ऽस्य वाक्यस्य निर्मूलत्वसूचनार्थस्तुशब्दः उदाहरणपर्यालोचनयापि मन्त्रविनाश-

विषयतैवास्य श्लोकस्यावसीयतइत्याह * तथा चेति * स यज्ञवैश
कृत्वा प्रासहाया ममापि च तस्य यदशिष्यत तत्त्वष्टाहवनीयमुपप्रा
र्त्तयत्स्वाहेन्द्रशत्रुर्वर्द्धस्वेति यदवर्तयत्तद् वृत्रस्य वृत्रत्वं यदब्रवीत्स्वा
न्द्रशत्रुर्वर्द्धस्वेति तस्मादस्येन्द्रःशत्रुरभवदित्याद्युदात्तेन्द्रशत्रुपद
योगेणेन्द्रो यस्य शत्रुरिति बहुव्रीह्यर्थसम्पत्तेस्त्वष्टुः पुत्रस्य वृत्रस
न्द्रः शातयिता हिंसिता जात इत्याद्युदात्तत्वलक्षणस्वरदोषेण वृत्र
त्रोरिन्द्रस्योद्यत्वादिन्द्रवधसमर्थपुत्रोत्पादनार्थं यागं कुर्वाणस्य त्व
र्यजमानस्याभिप्रेतार्थासिद्धिलक्षणा हिंसा जातेति स्वरापराधलक्ष
मन्त्रविनाशनिमित्तयजमानगामिदोषोदाहरणं कृतमित्यर्थः । इन्द्
शत्रुरिति मन्त्रपदं स्वरापराधात् यथा यजमानं हिनस्तीत्युदाह
णार्थः । तस्मादिन्द्रस्य शत्रुर्भूत्वा वर्द्धस्वेति तत्पुरुषार्थविवक्षा
मन्त्रोदाहृतमिदं प्रयोज्यमित्याशयः । यच्च नाम भाष्यकृता ।

यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥

इति श्लोकमुपन्यस्य तस्मादविज्ञातमनर्थकमाधिगीष्महीत्य
ध्येयं व्याकरणमिति वेदाध्ययनसाध्यं वेदार्थज्ञानं व्याकरणप्रयो
जनत्वेनोक्तं तद्व्याकरणप्रयोजनत्वेनाभासमानमप्यन्यतः सिद्धे
व्याकरणप्रयोजनमित्याह * यत्त्विति * अध्ययनविधेर्दृष्टार्थत्वाभि
धानान्मीमांसाप्रयोजनत्वेनैतद्युक्तं भवतीत्याशयः । ननु मीमांसाव
द्व्याकरणमपि वेदार्थज्ञानसाधनं भविष्यतीत्याशङ्क्याह * नन्वि
ति * शब्दानुशासनार्थत्वेनार्थपरत्वाभावः सूत्रावयवयोजनया सू
चितः । नन्वर्थविशेषविषयशब्दानुशासननान्तरीयकत्वेनार्थानुशास
नमपि सेत्स्यतीति स्वयमेवाशङ्क्योत्तरं सूत्रावयवं परिहारे योजय
ति * शब्देति * नन्वर्थगतसन्देहविपर्ययनिरासमात्रस्य मीमांसासा
ध्यत्वाद्वेदार्थस्वरूपज्ञानं व्याकरणाद्भविष्यतीत्याशङ्कां निरस्यन्नुपसं
हरति * तस्मादिति * यच्च

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले ।
सोऽनन्तमाप्नोति फलं परत्र वाग्योगविद् दुष्यति चापशब्दैः

इति श्लोकेन शब्दव्यवहारकालेऽर्थविशेषे सम्यक्शब्दप्रयोगस
पारलौकिकफलप्राप्तिहेतुत्वाभिधानात्तत्सिद्धिर्व्याकरणस्य प्रयोजन
मिति भाष्यकृतोक्तं तदप्यन्यथा व्याख्यातुं शक्यत्वात्प्रयोजनाभास
मित्याह * यस्त्विति * गुरुसम्प्रदायागते स्वरादिविशेषे कुशल
सन्वेदाध्ययनादिव्यवहारकाले वैदिकाञ्छब्दान्प्रयुङ्क्तइति व्या
ख्येयमित्याशयः । ननु मन्त्रब्राह्मणेष्वपशब्दाभावात्तद्विषयत्वे दुष्य

चापशब्दैरित्ययुक्तं स्यादित्याशङ्क्याह * यथेति * कथं वैदिकश
विनाशविषयता ऽस्या ऽवसीयतइत्यपेक्षायामाह * स्वाध्याये
* पौरुषेयत्वेनास्य प्रमाणान्तरावगतदोषानुवादत्वावसायादुदा-
ेन वचनेन यजनयाजनगतवेदशब्दविनाशहेतुकदोषावगतेरा दिश-
श्चेतिकरणसूचितेन च ।

हस्तहीनं तु यो ऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥

इति स्मृत्यनुमितेन वचनेनाध्ययनाध्यापनगतवेदशब्दविनाशहे-
कदोषावगतेस्तद्विषयत्वनियम इत्याशयः । यद्यप्येषामृगादिशब्दा-
मुपक्रमानुरोधेन वेदपरत्वं तृतीये वक्ष्यते तथापि ऋग्वेदादिवि-
तमन्त्रविषयाया अप्यार्तेर्विनाशाख्यायाः पदार्थान्तरार्तिवत्सामा-
शब्देनोपपादानादविरोधः । ननु प्रकृतिप्रत्ययरूपयोर्वाचोर्योगं
म्बन्धं वेत्तीति व्युत्पत्त्या वाग्योगविच्छब्देन वैयाकरणाभिधानात्स-
मभिव्याहारेणास्य वाक्यस्य व्याकरणानुगताननुगतशब्दप्रयोग-
षयतावगम्यतइत्याशङ्क्य त्रेधा परिहरति * वागिति * वाचः
तियोगितयाक्षिप्तेनार्थेन यो वाचं वेत्तीति प्रथमे परिहारे निगमनि-
कादिकुशलो वाग्योगवित् द्वितीये तु वाचो वचनस्य योगं पदा-
वयवविशेषरूपां व्यक्तिं ब्राह्मणवाक्येषु मन्त्रेषु च वाचो भासन-
प्रकाशनस्य योग्यं योगमर्हं वेत्तीति मीमांसको ऽभिधीयते चो-
तत्वेनावगतस्य स्वार्थत्वात्प्रकाशनार्हत्वम् अनूदितत्वेनावगतस्य
रार्थत्वात्प्रकाशनानर्हत्वं वेत्तीति समासार्थः । निर्वापमन्त्रे त्व-
श्चोदितत्वेनानुष्ठानाय स्मर्त्तव्यत्वात्प्रकाशनार्हत्वं सवित्रादीनां
चोदितत्वेन निर्वापकस्तुत्यर्थत्वात्प्रकाशनानर्हत्वं प्रसिद्धं विदे-
च्चारणार्थत्वसूचनार्थं प्रकाशनानर्हत्वं प्रतियोगितयोक्तं वैयाकर-
स्य वाग्योगवित्त्वासम्भवोपपादनायास्य पदस्यान्येनार्थेन प्रकृष्टो
ोगः स्वाभाविकसम्बन्धो ऽस्य वचनस्यैवम्भूतपदान्वयरूपाव्यक्ति-
स्य वा मन्त्रस्यायमर्थः प्रकाशनयोग्य इत्येवं विविधप्रयोगोत्पत्ति
ति व्याकरणस्याशास्त्रत्वादिति त्रेधा सूत्रावयवं तन्त्रेण योजयति
वैयाकरणस्येति * यच्च २

अविद्वांसः प्रत्यभिवादे नाम्नो येन प्लुतिं विदुः ।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेद् ॥

इति श्लोकमुपन्यस्य स्त्रीवन्माभूमेत्यध्येयं व्याकरणमिति भा-
येण स्त्रीसाम्यपरिहारो व्याकरणप्रयोजनमित्युक्तं तदपि प्रयोजना-
ासमित्याह * यदपीति * तत्प्लुतस्येति तच्छब्दो ऽव्ययं तत्रेत्य-

र्थे तस्मिन् विषये तद्व्याकरणं प्लुतप्रयोगोत्पत्तिं पूज्यशास्त्रप्ल
रूपस्य लोकसिद्धत्वान्नामान्ते च प्लुतप्रयोगस्य मन्वाद्युपदि
दित्यर्थः । ऊकालो ऽज्झ्रस्वदीर्घप्लुत इत्येतत्सूत्राधीनत्वं प्लुतः
ज्ञानस्य ह्युपगम्य प्रकृतिप्रत्ययान्वाख्यानाद्वाशब्दापशब्दविवेक
नैकसूत्रमात्रसाध्यं प्रयोजनं युक्तमितिशब्देषु न व्यवस्था स्या
त्तरसूत्रावयवयोजनया दर्शयति * न चेति * शब्दविषया
क्या या व्याकरणेन न क्रियते सा न कर्त्तव्या स्यादित्येवं सूत्रा
ऽनेन योजितः । यच्च विभक्तिं कुर्वन्तीत्युपक्रम्य याज्ञिकाः ए
प्रयाजाः सविभक्तिकाः कर्तव्या इति न चान्तरेण व्याकरणं
जाः सविभक्तिकाः शक्याः कर्त्तुमिति भाष्येण विभक्तिज्ञानं ह
रणप्रयोजनमुक्तं तदपि प्रयोजनाभासमित्याह * एवमिति *
दित्यव्ययं तन्नेत्यर्थे तत्रापि व्याकरणमशास्त्रमित्यपिशब्दाध्या
योज्यं कस्मादित्यपेक्षिते सौत्रं प्रयोगोत्पत्तिपदं समासान्नि
हेत्वर्थत्वेन त्रिविधोपपत्तिपूर्वकं याज्ञिकेत्यादिना योजितं स
समिधो ऽग्नआज्यस्य व्यन्तु तनूनपादग्निमग्न आज्यस्य वेतु इड
मग्नआज्यस्य व्यन्तु बर्हिरग्निरग्नआज्यस्य वेत्विति याज्ञिकः
द्देशेन सम्बुद्धिद्वितीयातृतीयाप्रथमानां विभक्तीनां प्रयाजेषु
द्धत्वाच्छान्दोग्यब्राह्मणे च षडहर्विभक्तिर्नानारूपेत्युपक्रम्याग्
प्रथमस्याह्नोरूपमग्निमिति द्वितीयस्याग्निनेति तृतीयस्याग्नि
चतुर्थस्याग्नेरिति पञ्चमस्याग्नइति षष्ठस्येति परस्परविभक्तः
द्धिद्वितीयातृतीयाप्रथमाषष्ठीसम्बुद्ध्याख्यविभक्तिप्रयोगदर्शनान्
चाग्निर्वृत्राणीत्यादिषु विभक्तविभक्तिप्रयोगदर्शनात्प्रयोगदर्शना
ऽपि वा सिद्धशब्दानुक्रमाख्यवैभक्तिकग्रन्थमात्रालोचनेनापि ।
क्तिप्रयोगसिद्धेरित्यर्थः । यच्च यो वा इमां पदशः स्वरशो ऽक्ष
वाचं विदधाति स आर्त्विजीनो भवतीति श्रुतिमुपन्यस्यार्त्विज
स्यामेत्यध्येयं व्याकरणमिति भाष्येणार्त्विज्यार्हत्वं व्याकरणप्र
नमुक्तं तद्गुरुसम्प्रदायसिद्धत्वाद्व्याकरणप्रयोजनत्वं योग्यमे
भवतीत्याह * यो इमामिति * चत्वारि शृङ्गेत्यृचं महाभाष्य
पूर्वोपन्यस्तामपि मन्त्राधिकरणे ऽन्यविषयत्वेन व्याख्याततवा
क्ष्यापर आहेत्युपक्रम्य चत्वारि वाक्परिमिता पदानि तानि वि
ह्मणा ये मनीषिणः गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं व
मनुष्या वदन्तीत्यृचमुपक्रम्य चत्वारि पदजातानि नामाख्यातोप
निपाताश्चेति भाष्येण ये ब्राह्मणास्तानि विदुस्ते मनीषिण
र्थाश्रयणेन पदचतुष्टयज्ञानसाध्यं मनीषित्वं व्याकरण

नमुक्तं तदस्या ऋचो ऽन्यपरत्वादप्रमाणकमित्याह * तथेति *
रुक्ते यान्योङ्कारो भूर्भुवः स्वरिति महाव्याहृतित्रयं वेति चतुष्टय-
दिशब्दाद्वेदचतुष्टयं मृगपक्षिसरीसृपमनुष्याः वाक्चतुष्टयमनपा
नी पश्यन्ती मध्यमा वैखरीति सूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूलरूपा-
ाभेदभिन्नवाक्चतुष्टयमिति चतुष्टयबाहुल्यरूपप्रयोजनानुसारेण
वारि दजातानि प्रपञ्चितानि तत्र व्याकरणस्य व्यापार इत्यर्थः ।
ष्य पदनिर्वचनसामर्थ्ये ऽपि तद्विषये सचार्थसंख्यामात्रसामा-
दुक्तं न प्रामाणिकमित्यर्थः । अप्यक्षरेति निरुक्ताकारवचनोपन्या-
सूचितं, ननु वैयाकरणाभिमतं नामादिचतुष्टयमपि निरुक्तैरुक्तं
चाकरणापेक्षं भविष्यतीत्याशङ्क्याह * यत्त्विति * परमार्थतस्तु
ार्द्धर्चविरोधान्नैतद्विषयताप्यस्या ऋचः सम्भवतीत्याह * एत-
ायत्वे चेति कस्तर्ह्यस्या ऋचः पारमार्थिको ऽर्थः पूर्वापरार्द्धर्चा-
ोधीत्यपेक्षायामाह * तस्मादिति * अस्मिन् व्याख्याने वागिति २१
षष्ठ्यन्तत्वेन विपरिणमयितव्यं प्रवो देवायाग्नयइति शंसतीति
कविधिप्रभवमवयवान्तरानुमानं विश्वजिता यजेतेत्यत्राव्यक्त-
नात्वरूपप्राकृतवाक्यसारूप्यसम्भवं ज्योतिष्टोमवदिति पदोप-
विधिप्रत्ययावगतफलव्यतिरेकेणानुपपद्यमानयागकर्त्तव्यत्वप्र-
स्वर्गकामपदकल्पिकार्थापत्तिः दध्नेन्द्रियकामस्येत्यत्र सारू-
भावे ऽपि सन्निधानमात्रेणाग्निहोत्रवदिति पदोपमानसूचनाया-
ाब्दः ननु प्रमाणषट्कस्य प्रथमपादे व्युत्पादितत्वाच्चतुष्ट्वं प्र-
ानां न युक्तमित्याशङ्क्याह * षडिति * अपोद्धारे कारणमाह
भावस्तावदिति * न चैरं कृत्वोद्गेयमित्यागमाधक्षायश्रियस्ये-
इवत्त्वागतेरागमस्याप्यागमप्रामाण्यमस्तीत्याशङ्क्याह * प्रत्यक्षे-
* स्वरूपोपादानेनात्र प्रत्यक्षत्वसम्भवान्नागमगम्यतेत्याशयः ।
नामादिपदचतुष्टयविषयत्वे भाष्यकृता पूर्वं चत्वारि शृङ्गा
अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो
ीति महो देवो मर्त्यां आविवेशेतीयमृगुपन्यस्ता सा किमित्यपे-
त्याशङ्क्याह चत्वारीति * ननु भाष्यकृता चत्वारि शृङ्गेति च-
रे पदजातानि नामाख्यातोपसर्गनिपाताश्च त्रयो अस्य पादा भूत-
व्यत्वर्त्तमाना द्वे शीर्षे शब्दात्मनौ नित्यः कार्यश्चेति सप्त हस्ता
स्य सप्त विभक्तयः त्रिधा बद्धो वृषभो रोरवीति त्रिषु स्थानेषु
उरसि कण्ठे शिरसीति वृषभो वर्षणात् रोरवीति शब्दं करोति
देवो मर्त्यां आविवेश महान्देवः शब्दः मर्त्यान्मरणधर्माणो मनु-
ाविवेशेति व्याख्याय महता देवेन नः साम्यं स्यादित्यध्येयं

व्याकरणमिति भाष्येण शब्दब्रह्मसाम्यं व्याकरणप्रयोजनमुक्तं ।
तत्रानुपपत्तिरित्याशङ्क्याह * यस्त्विति * विनियोगनिरपेक्षं म
स्यार्थतात्पर्यावधारणमशक्यमित्याशयः । संख्यासामान्यमात्रेण
विनियोगानिरपेक्षमन्त्रयोजनायां वैशेषिकादिष्वपि तन्त्रेषु योजयि
शक्यत्वादव्यवस्था स्यादित्याह * तादृशं चेति * पार्थिवाप्य
जसवायवीयान्यवयविद्रव्याणि चत्वारि शृङ्गाणि त्रयो अस्य लोक
पादा महत् कार्यारम्भकाणि द्व्यणुकानि द्वे शीर्षे प्रधाना
धानपुरुषौ सप्त हस्ता द्रव्यगुणकर्मसामान्यविशेषसमवायाख्य
षड्भावरूपाः सप्तमश्चाभावः त्रिधा बद्धः । समवाय्यसमव
यिनिमित्तकारणैर्बद्धः । वृषभो भोगहेतुः रोरवीति शब्दव
न्महो देवो द्योतनात् मर्त्यानाविवेश मर्त्यैर्भोग्य इत्येवमादिय
जनोपपत्तेरतिप्रसक्तिः स्यादित्याशयः । यच्च भाष्यकृतोत त्व
पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् । उतो त्वस्मै त
विसस्रे जायेव पत्य उशती सुवासा इत्यृचमुपन्यस्याप्येकः पश्यन्न
न पश्यति शृण्वन्नपि न शृणोत्येनामिति पूर्वार्द्धर्चमविद्वांसम
हार्धमिति भाष्येणाविद्वांसमर्धं पूर्वार्द्धं वा वदतीत्यभिधानाद्वेद
र्थविद्विषयत्वेन व्याख्यायोतो त्वस्मै तन्वं विसस्रे तनुं विवृणु
जायेव पत्य उशती सुवासाः तद्यथजाया पत्ये कामयमाना सुवास
स्वमात्मानं विवृणुते एवं वाग्वाग्विदे स्वमात्मानं विवृणुत इत्युत्तर
र्द्धर्चं व्याख्याय वाङ् नो विवृणुयादित्यध्येयं व्याकरणमिति भाष्ये
वाक्प्रकाशनं व्याकरणप्रयोजनमुक्तं तदन्यतः सिद्धेः प्रयोजन
भासमित्याह * उतत्व इति * यत्तु भाष्यकृता सक्तुमिव तितउ
ना पुनन्तो यत्र धीरा मनसा वाचमक्रत अत्रा सखायः सख्या
जानते भद्रैषां लक्ष्मीर्निहिताधिवाचीत्यृचमुपन्यस्य सक्तुः सचतेः
दुर्धावो भवति कसतेर्वा विपरीताद्विकसितो भवतीति तितउ परिपव
ततवद्वा तुन्नवद्वा धीरा ध्यानवन्तः मनसा प्रज्ञानेन वाचमकृष
अत्र सखायः सन्तः सख्यानि जानते क्व एष दुर्गो मार्गः एकगम्य
वाग्विषयः के पुनस्ते वैयाकरणाः कुत एतत् भद्रैषां लक्ष्मीर्निहिता
धिवाचि भद्रा ह्येषां लक्ष्मीर्निहिता भवति क्व अधिवाचि लक्ष्मी
र्लक्षणाद्भासनाद्वा परिवृढा भवतीति व्याख्यानेन लक्ष्मीनि
धानं व्याकरणप्रयोजनमुक्तं तद्गुरुसम्प्रदायसिद्धत्वात् व्याकरण
प्रयोजनत्वयोग्यं न भवतीत्याह * एवमिति * यच्च सारस्वतीमित्यु
पक्रम्य याज्ञिकाः पठन्त्याहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां
सारस्वतीमिष्टिं निर्वपेदिति श्रुतिमुपन्यस्य प्रायश्चित्तीया मा

मित्यध्येयं व्याकरणमिति भाष्येण प्रायश्चित्ताभाजनत्वं व्याकरण-
प्रयोजनमुक्तं तदपि वैदिकशब्दविनाशविषयत्वात् व्याकरणप्रयो-
जनत्वयोग्यं न भवतीत्याह ॥ आहिताग्निरिति ॥ यच्च दशम्यां
पुत्रस्येत्युपक्रम्य याज्ञिकाः पठन्ति दशम्युत्तरकालं पुत्रस्य जातस्य
पिता नाम विदध्यात् घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरुषानूकमनरि
प्रतिष्ठितं तद्धि सुप्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा कृतं कु-
र्यान्न तद्धितमिति न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या
विज्ञातुमिति भाष्येण पुत्रनामज्ञानं व्याकरणप्रयोजनमुक्तं तदन्यतः
सिद्धेः प्रयोजनाभासमित्याह ॥ यदपीति ॥ घोषवन्तो वर्गतृ-
तीयाद्या वर्णा आदौ यस्य नाम्नस्तद्घोषवदादि अन्तस्था यरलवा अ-
न्तर्मध्ये यस्य तदन्तरं तस्य घोषवदादेरन्तरन्तस्थस्य द्विचतुरादिवर्णस्य
कृदन्तस्य नाम्नः परिग्रहस्तद्धितस्य वर्जनं वा तयोर्यन्नामकरणे व-
र्णितं तत्र न व्याकरणं नामप्रयोगोत्पत्तिशास्त्रत्वेनापेक्षणीयमिति
कृत्तद्धितसञ्ज्ञयोरिति तदित्यव्ययं लुप्तसप्तमीकमङ्गीकृत्य योज्यं
उपपादनार्थं कृत्तद्धितसञ्ज्ञयोरित्याद्युक्तम् । यच्च भाष्यकृता
देवो असि वरुण यस्य ते सप्तसिन्धवः । अनुक्षरन्ति काकुदं सू-
र्म्यं सुषिरामिवेत्यृचमुपन्यस्य सुदेवो असि वरुणसत्यदेवो यस्य ते
सप्तसिन्धवः सप्तविभक्तयः अनुक्षरन्ति काकुदं तालु, काकुर्जिह्वा-
ऽस्मिन्नुद्यतइति काकुदं सूर्म्यं सुषिरामिव तद्यथा सूर्म्यं सुषिरा-
मग्निरनुप्रविश्य तदन्तर्गतं मलमपहन्ति एवं सप्तसिन्धवः तान्वनु-
क्षरन्ति तेनासि सत्यदेव इति व्याख्याय सत्यदेवाः स्यामेत्यध्येयं
व्याकरणमिति भाष्येण सत्यदेवत्वप्राप्तिर्व्याकरणप्रयोजनमुक्तं त-
था ऋचः सङ्ख्यासामान्यमात्रेण विभक्तिविषयत्वमभ्युपगम्या-
न्यतः सिद्धत्वान्नातीव व्याकरणापेक्षेति तावदाह ॥ सुदेव इति॥ २१६
वास्तवार्थतस्तु सिन्धुशब्दस्य नदीवाचित्वेन प्रसिद्धत्वान्नद्य एवात्र
विवक्षिताः । अथापि वरुणशब्देन यज्ञमृत्विजं यजमानं वा
प्रेत्य तत्प्रशंसापरेयमृगिष्यते तथापि होत्रीयाप्रशास्त्रीयाब्राह्म-
णाच्छंसीयापोत्रीयानेष्ट्रीयाच्छावाकीयाग्नीध्रीयाख्यहोत्रागताः स-
प्त वा षड्जऋषभगान्धारमध्यमपञ्चमधैवतनिषादाख्यसामस्वरगता
वा प्रस्तावप्रणवोद्गीथहिङ्कारप्रतिहारोपद्रवनिधनाख्यसामभक्तिगता
वा ऋचः सप्तेत्यन्यपरत्वात् व्याकरणप्रयोजनत्वं निष्प्रमाणकमित्याह
यदा पुनरिति ॥ नदीनामैतिहासिकगोचरापन्नत्वादितरासां
लौकिकगोचरापन्नत्वादित्यर्थः । एवं महाभाष्योक्तमुख्यानुष-
ङ्गिकप्रयोजननिराकरणेन न चाश्रितप्रातिपदपाठानां वैदिकानां

लक्षणेन कार्यमित्यादिग्रन्थोक्ते व्याकरणस्य निष्प्रयोजनत्वे समर्थिते यदि कश्चित्तस्माद्व्याकृता वागुद्यतइति श्रुतिपर्यालोचनेन व्याकरणासंस्कृतानां शब्दानामदृष्टसाधनत्वलक्षणसाधुत्वावगमात्साधुत्वसिद्धिर्व्याकरणप्रयोजनं वदेत्तं प्रत्याह * संस्कृतानां चेति * श्लोकं व्याचष्टे * व्याकरणेनेति * शब्दत्ववर्णत्वतद्व्यक्तितत्समुदायावयविस्फोटगोशब्दत्वक्रमग्रहणोच्चारणतत्साधनपुरुषाणां मध्ये किं वास्त्विति कस्येत्यस्य व्याख्या । उत्पत्त्यादीनां चतुर्णां मध्ये कः संस्कार इति को वेत्यस्य शब्दत्ववर्णत्वजातिव्यक्तिपक्षेषु तावद्दोषमाह * न तावदिति *जातिपक्षे तावदुभयत्र प्रसङ्गं विवृणोति * शब्दत्वइति * वर्णव्यक्तीनां तु संस्कारः प्रत्येकं वा स्यात्समुदितानां वा तत्र प्रत्येकपक्षे ऽतिप्रसङ्गं विवृणोति * एतेनेति * समुदायाभावात् समुदितानामपि संस्कारो न भवतीत्याह * समुदायस्त्विति* किं च नित्यानां वर्णव्यक्तीनां संस्कारः स्यादनित्यानां वा । तत्रानित्यपक्षे तावद्विनष्टानुत्पन्नानामसंस्कार्यत्वादुत्पन्नानामपि संस्कारक्षणं यावदनवस्थानान्न संस्कारः सम्भवतीत्याह *येषां तावदिति * संस्कारक्षणं यावदवस्थानाभ्युपगमे ऽपि व्यवहारकाले विनष्टत्वेन कार्यानुपयोगित्वात्संस्कारो न तु युक्त इत्याह * न चेति * एतदेव विवृणोति * यथैवेति * ननु भाष्यकृता किं नार्नित्यः शब्दः आहो स्वित्कार्य इति पृष्ट्वा सङ्ग्रहएतत्प्राधान्येन परीक्ष्यते नित्यो वा स्यात्कार्यो वेति भाष्येण सङ्ग्रहाख्ये वार्त्तिककारकृते ग्रन्थान्तरे तात्पर्येणैतद्विचार्यते नात्र तेन विचारेण प्रयोजनमित्युत्तरे दत्ते कथं तर्ह्यत्र लक्षणप्रवृत्तिरित्याशङ्क्य यद्यपि नित्यो ऽथापि कार्य उभयथापि लक्षणं प्रवर्त्त्यमित्युक्त्वा कथमनित्यपक्षे संस्कारोपपत्तिरित्याशङ्क्याह * ततश्चेति * अत्यन्तविरुद्धत्वाच्च नित्यानित्यत्वयोरनियमाभिधानं न युक्तमित्याह * अदूरेति * कार्यत्वे शब्दस्योत्पत्तिलक्षणः संस्कारः स्यात्तत्र च नित्यस्य वेदस्यानित्यशब्दव्युत्पत्तिविषयत्वायोगेन व्याकरणस्य वेदमूलत्वासम्भवादनित्यशब्दोपयुक्तत्वेन च नित्यवेदाङ्गत्वाभावादुभयविधमपि शास्त्रत्वं हीयेतेत्याह * उत्पादश्चेति * श्लोकं व्याचष्टे * व्याकरणेति * शब्दोत्पादकत्वेन तु व्याकरणस्य वेदाङ्गत्वे वेदो ऽप्यप्रमाणं स्यादित्याह * अथेति * कार्यत्वे च शब्दस्य संस्कारो ऽशक्यो ऽनर्थकश्चेति दोषद्वयं पूर्वोक्तमप्यानियमनिरासायाह * शब्दश्चेति * नित्यत्वे शब्दस्य विक्रियाख्यो ऽपि शब्दादुत्पत्त्याख्यश्च तावत्संस्कारो न भवतीत्याह * तस्मादिति * न च ज्ञानरूपप्राप्तिलक्षणः सं-

कारः शब्दस्य व्याकरणेन क्रियते श्रोत्रजन्मत्वात्तस्येत्याह * वि-
ति * अविहितत्वाच्च व्याकरणस्य नापूर्वसाधनसामर्थ्याधानल-
णसंस्कारार्थता युक्तेत्याह * अदृष्टार्थस्त्विति * शब्दानां च
ष्टार्थत्वेनापूर्वसाधनत्वाभावान्न तत्सामर्थ्याधानलक्षणेन संस्का-
ण प्रयोजनमस्तीत्याह * दृष्टार्थेषु चेति * ननु लोकव्यवहारा-
ानां शब्दानां दृष्टार्थत्वात्संस्कार्यत्वायोगे ऽपि क्रत्वर्थानां व्रीहि-
वयन्नियमापूर्वार्थत्वात् संस्कार्यत्वं भविष्यतीत्याशङ्क्याह * कर्म-
ा * किं च व्याकरणक्रियायाः पौरुषेयग्रन्थाधीनत्वे ऽनादिविधिवि-
यतैव न युज्यते प्रकरणाम्नानं दूरनिरस्तमित्याह * हन्त्यादीति *
ु तस्मादेषा व्याकृता वागुद्यतइत्यनारभ्याधीतः प्रत्यक्षो विधिः
थमपह्नूयतइत्याशङ्क्याह * तेनेति * नित्यानित्यसंयोगविरोध-
सङ्गाच्चास्यैतत्परतास्तीति प्रागेवोक्तमित्याशयः । व्याकरणक्रियाया-
ध्येयत्वाभ्युपगमे ऽपि प्रकरणाभावेन क्रत्वर्थत्वाभावान्न क्रत्वर्थश-
संस्कारत्वं युक्तमित्याह * अनारभ्येति * नन्वनारभ्याधीत-
ापि खादिरादेर्दर्शपूर्णमासार्थतादृष्टेत्याशङ्क्याह * ऐकान्तिकं
ाति * ननु यथाफलकल्पनालाघवायाश्वप्रतिग्रहेष्टौ वैदिकाश्वदा-
विषयत्वं तृतीये वक्ष्यते तथेहापि वैदिकशब्दविषयत्वं व्याकरण-
क्रियाया भविष्यतीत्याशङ्क्याह * लोकेति * लौकिकवैदिकशब्दानां
दस्य निराकरिष्यमाणत्वान्न संस्कार्यासंस्कार्यव्यवस्था युक्तेत्याश-
: । उपसंहरति * अत इति * किं च श्रोत्रोपलब्धिबुद्धिनिर्ग्राह्यः
योगेणाभिलक्षितः आकाशदेशः शब्द इति वदद्भिर्वैयाकरणैः शब्द-
ाकाशाश्रितत्वाभ्युपगमान्नित्याश्च शब्दा इति च नित्यत्वा-
युपगमादमूर्तत्वाच्चाकाशाश्रितविभुत्वदृष्टान्तेन संस्कार्यत्वं वा-
णीयमित्याह * आकाश इति * विभुत्वस्य ज्ञान-
ष्यत्वलक्षणप्राप्तिसम्भवे ऽपि गां दोग्धीत्यादौ स्वरूपप्राप्तेः सं-
कारत्वेन प्रसिद्धायाः वारणीयत्वेनानिष्टत्वान्न साध्यविकलत्वम् । अ-
उणित्यादिचतुर्दशसूत्रात्कृताणादिसंज्ञात्मकप्रत्याहारमात्रेण वर्णा-
क्तिसंस्कारसिद्धेः शेषग्रन्थानर्थक्यं स्यादित्याह * वर्णेति *
ातिव्यक्तिसंस्कारपक्षौ दूषयित्वा समुदायसंस्कारपक्षं दूषय-
। * समुदायस्त्विति * नन्वनेकेषां गकारौकारविसर्जनीयानामे- २
गोशब्दबुद्धिविषयत्वलक्षणः समुदायो लोकसिद्धत्वान्नापह्नवम-
ीत्याशङ्क्याह * प्रत्येकं चेति * यथा नवमे हिरण्यशकलसहस्रे
ाग्नि प्रोक्षतीत्यग्निबुद्धिविषयभूतानामिष्टकानां धर्मः प्रोक्षणादिः
ीष्टकमावर्तनीय इति पूर्वपक्षे वक्ष्यते तथात्रापि गकारादिवर्णा-

समुदायसंस्कारपक्षे प्रतिवर्णं संस्कारावृत्तिः प्रसज्येतेत्यर्थः ।
पूर्वपक्षस्यास्थायित्वाच्च दृष्टान्तता युक्तेत्याशङ्क्याह * न चे
अयमाशयः इष्टकाव्यतिरिक्तावयव्यभावेनाग्निशब्दस्येष्टक
दायमात्रवाचित्वात्समुदायसंस्कारत्वाभ्युपगमेन पूर्वपक्षिते ।
व्यस्यावयविनो ऽग्निशब्दवाच्यस्येष्टकाभिरारम्भोपपादनेन सं
र्यद्रव्यैक्यात्संस्कारानावृत्तिरिति पूर्वपक्षन्यायानुपमर्देन सिद्धा
रणाद् युक्तं दृष्टान्तत्वं, न चात्र गकारादिभिःएको गोशब्दो ऽवर
रभ्यते येनाग्निधर्मसिद्धान्तन्यायो न स्यात् ।

विच्छिन्नयत्नव्यङ्ग्यैश्च नित्यैः सर्वगतैरपि ।
व्यतिरिक्तपदारम्भो वर्णैर्नाप्युपपद्यते ॥

इति श्लोकेन स्फोटवादे निराकृतत्वादिति स्फोटगोशब्द
दीनामप्यवयविवन्निराकृतत्वाच्च संस्कार्यत्वं सम्भवतीत्याह * इ
ति * समुदायसंस्कारपक्षे च सर्ववर्णसमुदायो वा संस्क्रियेत कति
वर्णसमुदायो वा तत्राद्ये पक्षे सर्ववर्णसमुदायस्यार्थाभावाद
के शब्दप्रयोगे शास्त्रेण धर्मनियम इति वार्त्तिकमयुक्तं स्यादित्य
सर्वेति * कतिपयवर्णसंस्कारपक्षे ऽपि केचिदेव वर्णाः । संस्कि
नान्यइति व्यवस्थाहेत्वभावेन स्वरूपतः कतिपयत्वायोगात्कति ।
वं संस्क्रियन्तइति संख्यातः कतिपयत्वं वाच्यं, तत्र संख्यां विन
र्णानामसंस्कार्यत्वेनान्वयव्यतिरेकाभ्यां वर्णसंख्यायाः संस्कार्य
त्साधुत्वं स्यात्तच्च गाव्यादिपदेषु अपि समानमित्याह * अर्थो
गवादिपदगतैव वर्णसंख्या संस्कार्या न गाव्यादिपदगतेति व्यव
शङ्कानिरासार्थम् * पदेपदइत्युक्तम् * क्रमसंस्कारपक्षं दूषयो
संस्क्रियेतेति * शब्दधर्मत्वाभावेन तत्संस्कारे ऽपि शब्दस्य
त्वं न सिध्यतीत्युक्तं ग्रहणोच्चारणद्वारौपचारिकशब्दधर्मत्वाश्र
मे ऽपि गाव्यादिष्वप्यानुपूर्व्याः सम्भवात्साधुत्वं प्रसज्येतेत्यर्थः
हणोच्चारणसंस्कारपक्षौ दूषयति * ग्रहणेति * कोपरिष्टादि
क्षायामाह * वक्ष्यति हीति * यथाभिक्रामं जुहोतीत्यभिक्रम
होमसाधनत्वासम्भवो ऽभिक्रमाधिकरणपूर्वपक्षे वक्ष्यते । तथा
णमुच्चारणं वा प्रतिव्याकरणक्रियायाः साधनत्वं न भवतीत्यर्थः
ननु साक्षात्साधनत्वाभावे ऽपि यथाभिक्रमणस्य कर्तृप्रत्यासत्ति
नद्वारा होमसाधनत्वं सिद्धान्ते वक्ष्यते तथोच्चारणसाधनता
दिसंस्कारद्वारोच्चारणसाधनत्वं ग्रहणसाधनश्रोत्रसंस्कारद्वार
ग्रहणसाधनत्वं व्याक्रियाया भविष्यतीत्याशङ्क्याह * तात
ति * अस्तु तदुच्चारयितुः पुरुषस्य संस्कारद्वारा त

संस्कारद्वारा वोच्चारणसाधनत्वं ग्रहीतृपुरुषसंस्कारद्वारा तन्मनः संस्कारद्वारा वा ग्रहणसाधनत्वमिति स्वयमेवाशङ्क्याह *मनोवेति* यच्छास्त्रारम्भे भाष्यकृता ऽथ शब्दानुशासनमित्युक्त्वा अथेत्ययं शब्दो ऽधिकारार्थः प्रयुज्यते शब्दानुशासनं शास्त्रमधिकृतं वेदितव्यमिति स्वयमेव व्याख्यातं तद्व्यर्थं स्यादित्यर्थः । इतश्च शब्दानुशासनं व्यर्थमित्याह * शिष्येति * किं च वैयाकरणैः स्फोटात्मकः शब्दो ऽभ्युपगतः तस्य च निरवयवत्वात्प्रकृतिप्रत्ययान्वाख्यानरूपः संस्कारो न युक्त इत्याह * स्फोटेति * स्फोटपक्षे न केवलं वर्णा एवासन्तः किं तु प्रकृतिप्रत्ययावपीत्यर्थः वाक्यस्फोटापेक्षायां च स्वरूपेणापि पदस्फोटस्यासत्त्वात्संस्कार्यत्वं न युक्तमित्याह * वाक्येति * नन्वसतामेव नामादीनां निष्कृष्य कल्पनया संस्कारो भविष्यतीत्याशङ्क्याह * अपोद्धारेणेति * कल्पनाप्यसतो न सम्भवतीत्याशयः। ननु निरवयवो ऽपि पदस्फोटस्तत्तद्ध्वनिसहकृतश्रोत्रवशात्पूर्वं गकारादिरूपेण प्रतीयते ततस्तदाकारमिथ्याज्ञानसहकृतेन श्रोत्रेण गौरित्येकं पदमिति स्फुटं पदतत्त्वज्ञानं जन्यते रत्नतत्त्वपरीक्षायामिवानेकमिथ्याज्ञानसहकृतेन चक्षुषा स्फुटारत्नतत्त्वप्रतीति एवं वाक्यस्फोटो ऽपि पूर्वं गोपदाकारेण शुक्लपदाकारेण च प्रतीयते ततः पदाकारमिथ्याज्ञानसहकृतेन श्रोत्रेण गौः शुक्ल इत्येकं वाक्यमिति स्वरूपेण वाक्यस्फोटः प्रतीयते । ततश्च ध्वनयो यत्स्थानकरणवशादेकस्मिन्पदस्फोटे वाक्यस्फोटे वा यद्वर्णाकारं यत्पदाकारं वा ज्ञानं जनयन्ति पदवाक्यस्फोटान्तरे ऽपि तत्स्थानकरणवशात्तद्वर्णाकारं तत्पदाकारं वा ज्ञा[नं] जनयन्तः सादृश्यनिमित्तभ्रान्तिवशात्स एवायं वर्णस्तदेवे[दं] पदमिति प्रत्यभिज्ञानं जनयन्तीत्यन्योन्यविलक्षणेषु गौः शुक्लो गौ[ः] कृष्ण इत्यादिषु सादृश्याध्यवसितैकत्वानां नामादीनामपोद्धार[ो] भविष्यतीत्याशङ्क्याह * अन्येति * अन्यस्य वाक्यस्फोटस्याव[य]वानामन्यस्य वाक्यस्फोटस्यावयवैः सारूप्यादित्यर्थः । सादृश्यमप्य[स]तो न सम्भवतीत्याशयः । ननु ।

गवये नरसिंहे वाप्येकज्ञानादृते यथा ।
भागं जात्यन्तरस्यैव सदृशं प्रतिपद्यते ॥

इत्यादिस्फोटवादिभिरसतामप्यवयवानां सादृश्यसम्भवे [नि]दर्शनमुक्तं तत्कथमसत्त्वे सादृश्यानुपपत्तिरित्याशङ्क्याह * ग[व]यादिष्विति* लेख्यादिकृतेषु गवयादिषु ये ऽवयवास्तेषां मुख्यगवय[ा]दिगतैः कर्णखुरादिभिरवयवैः सारूप्यं यन्निदर्शितं तत्तेषां सत्यत्व

त्स्वावयवसामान्ययोगाच्चोपपन्नं तथा इहापि वाक्यस्फोटे तथात्
ऽवयवानां सत्यत्वे स्वावयवसामान्ययोगे च सति सारूप्यं स्यात्
ततश्च निरवयवस्फोटसिद्धान्तहानिरित्याशयः । विस्तरेण चैत
त्पूर्वं निरस्तमित्याह * वाक्येति * उपसंहरति * तेनेति * ना
मादीनामपोद्धारेण प्रकृतिप्रत्ययान्वाख्यानरूपस्य संस्कारस्य कल्प
नेत्यर्थः । अप्रामाण्यापत्तेश्चासतामपोद्धारो न युक्त इत्याह * अ
न्वाचक्षीतेति * यच्च शब्दानुशासकत्वेन शास्त्रत्वं व्याकरणस्यो-
क्तं तत्पदविषयं वा स्याद्वाक्यविषयं वा तत्रासत्यत्वेन पदानामनु-
शास्यत्वाद्वाक्यानुशासनस्य च व्याकरणेनाकृतत्वान्नोभयथापि यु-
क्तमित्याह * अशिष्यत्वादिति * युक्तं तु वाक्यस्यैवानुशासनं लो-
कतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम इति वार्त्तिककृता-
र्थप्रयुक्तानां शब्दानामनुशास्यत्वाभिधानाद्वाक्यस्यैव चार्थप्रयुक्तत्वे-
नेष्टत्वादित्याह * अर्थेनेति * ननु सूत्रकारादिभिः पदपदार्थाना-
मनिराकरणात्कथमुच्यते वाक्यमेवंविधं चेष्टमित्याशङ्क्य टीकाकृतै-
वमुक्तमिति दर्शयितुमाह * ब्राह्मणार्थ इति * यथा ब्राह्मणशब्दे
ब्रह्मशब्दार्थो नञर्थश्च णकारार्थ एव वा ज्ञानाख्योऽनिरुपाख्यश्च नास्ति
कम्बलशब्दे च कंशब्दार्थो बलशब्दार्थो वा नास्ति तथा देवदत्तादयः
शब्दा वाक्येऽनर्थकाः स्युरिति टीकाकारश्लोकार्थः । एवमादिना
ग्रन्थेन बहुप्रपञ्चमुक्त्वा पदानामर्थव्यभिचाराभिधानादव्यभिचारि-
णामपि केवलाप्रयोगित्वेनार्थपरत्वनिराकरणाद्वाक्यान्वाख्यानार्थत्वे-
न व्याकरणव्याचिख्यासा टीकाकाराणामवसीयते पश्चात्तु तदनाश्रय-
णात्पूर्वापरविरुद्धार्थाभिधानेनाप्रामाण्यं व्याकरणस्य सूचितं भव-
तीत्यर्थः । सूत्रकृतो जनिकर्त्तुरित्यादिनिषिद्धमासकरणात्पूर्वापरवि-
रुद्धाभिधानं दृष्टान्ततं सन्ति यदृच्छाशब्दा न सन्तीत्यादिवार्त्तिक-
कृतः । आकृतिर्नित्या द्रव्यमनित्यं द्रव्यं नित्यमाकृतिरनित्येत्यादि-
भाष्यकृतः । सूत्रकारादिवदेव वाक्यान्वाख्यानानाश्रयणादिति वा
योज्यम् । पूर्वपक्षमुपसंहरति * अत इति * आचार्याणां पर-
स्परं विप्रतिपत्तेर्विगानभूयिष्ठत्वं स्वयमेव पूर्वापरविरुद्धाभिधानात्
विरुद्धत्वम् । एकानेकमूलश्रुतिकल्पनायोगान्निर्मूलत्वम् । मुख्यामु-
ख्यप्रयोजनासम्भवान्निष्फलत्वं सर्वैर्भाषितव्यमिति भाष्यात्कर्मस्वा-
ध्यायकालवैदिकशब्दप्रयोगेष्वव्यवस्थाशङ्का कस्य चित्स्यात्तन्निवृत्त्यर्थ-
माह * ततश्चेति * यस्तूपपादितमर्थं तार्किकत्वाभिमानी साध-
नप्रयोगमन्तरेण न बुध्यसे तं प्रति साधनप्रयोगा वक्ष्यन्त इत्याह
* अत्रेति * सर्वेषामर्थप्रत्यायनशक्तत्वलक्षणे वाचकत्वे तावत्प्र-

ोगमाह * गावीति * गौणलाक्षणिकानामादिशब्दोपादानाशङ्का-
नवृत्त्यर्थं प्रकृतग्राहीसर्वशब्दः गोणीशब्दस्यावपनवाचित्वात्सिद्ध-
ाध्यतामाशङ्क्य * गोत्वस्येत्युक्तम् * उस्रादिशब्दैरनैकान्तिकत्वं
त्र शब्देन निरस्तं गाव्यादिशब्दैर्वृद्धशब्देन अर्थप्रत्यायनाङ्गत्वलक्षणे
ाधुत्वे प्रयोगमाह * एवमिति * अत्रापि गोणीशब्दे सिद्धसा-
ातापरिहारार्थं गोत्वे साधुत्वमिति विशेषणीयं साधनशब्दोक्तस्य
ायकत्वस्य गाव्यादिशब्दैरनैकान्तिकत्वमाशङ्कार्थस्यैव साधना-
ति मध्यमपदलोपिसमासाभ्युपगमेन मूलशब्दोपस्थापननिरपेक्षा-
प्रत्यायकत्वरूपहेतुसूचनार्थो ऽर्थशब्दः। अपभ्रंशरूपापशब्दत्वा-
ागाच्छब्दत्वाभावरूपमपशब्दत्वं गाव्यादीनां वाच्यमित्यापाद्य त-
ाकरणे प्रयोगमाह * औत्पत्त्यादिति * अत्रापि प्रयोगद्वये ह-
न्तः स एवेत्याह * पूर्वेति * अनादित्वे प्रयोगमाह * अना-
त्वं चेति * अवध्यनवधारणस्य चिरन्तनकूपादिभिरनैकान्तिक-
ाद्वध्यभावावधारणादिति हेत्वर्थः। तत्सिद्ध्यर्थम् * वक्तुरि-
ुक्तम् * गवादिशब्दसम्बन्धे सर्वो ऽन्यस्मात्प्रपद्यते। महत्तद्व्यव-
ारित्वादिति सम्बन्धानादित्वन्यायेन सर्वेभ्यो वक्तृभ्यः पूर्वं वि-
मानत्वादित्यर्थः। साधुभाषणस्यादृष्टार्थत्वात्प्रयोगमाह * सा-
भिरिति * अत्रैव साध्ये हेतुदृष्टान्तान्तरमाह * अशास्त्रेति *
द्रोक्तैश्च शब्दैरर्थाभिधानवदित्यर्थः। हेतुसिद्ध्यर्थं संस्कृतव्याक-
ास्याशास्त्रत्वे प्रयोगमाह * शास्त्रं नेति * संस्कृतव्याकरणत्व-
त्यध्याहारः। साक्षाच्छास्त्रत्वाभावे ऽपि वेदमूलतया प्रामाण्या-
द्विहितस्य साधुभाषणस्याष्टकादिवददृष्टार्थत्वं भविष्यतीत्याशङ्क्य
भावे प्रयोगमाह * वेदेति * वेदाङ्गत्वाभावे प्रयोगमाह
शास्त्राङ्गमपीति * हेतुसिद्ध्यर्थमतादर्थ्ये प्रयोगमाह * अता-
र्थ्यमिति * कथादिरेव दृष्टान्तः वेदानङ्गत्वे ऽपि शब्दप्रयोगाङ्ग-
ात्प्रयोगोत्पत्तिशास्त्रत्वं भविष्यतीत्याशङ्क्य तदभावे प्रयोगमाह
न चेति * एतदेव व्याचष्टे * यथा हीति * अशास्त्रत्वादि-
ाधनस्य पूर्वपक्षोपयोगमाह * तस्मादिति * यदाचारैरेषां प्र- २१
ज्यत्वमवगतं न तच्छास्त्रैरवधारितमित्यर्थः।

शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम् ॥ २२ ॥

अत्र भाष्यं कृता महता प्रयत्नेनेत्यादिना सूत्रं व्याख्यायते
अपराधादित्यादिना * गाव्यादिशब्देष्वपराधसम्भावनामात्रे सू-
य तात्पर्यमुक्तं तत्सम्भावनामात्रेण सिद्धान्तासिद्धेरयुक्तमाश-

ङ्क्य नेदं सिद्धान्तसूत्रं किं तु पूर्वपक्षदूषणार्थमित्याह * अ
न्तिकता तावदिति * निर्णयवचनादेकान्तशब्दात्तस्मै प्रभवति
न्तापादिभ्य इति ठक्प्रत्यये कृते ऽनैकान्तिकशब्दव्युत्पत्तेरनिर्णा
त्वमनैकान्तिकता एवं न कस्य चिच्छब्दस्य वाचकत्वं स्यादित्य
ङ्क्याह * वाचकत्वादिति * परपक्षसन्देहापादनस्य स्वपक्षनिर्ण
नुपयोगित्वादानर्थक्यमाशङ्क्याह * संशयेति * एतदेव व्या
* इहेति * पूर्ववाचकत्वानिश्चयार्थत्वेनैतत्सूत्रं व्याख्यातमिद
मनादित्वानिश्चयार्थत्वेन व्याचष्टे * अथ वेति * श्लोकं व्याच
यदि हीति * ननु विविधाँश्छब्दानभिव्यनक्तीति भाष्येण कस
सौत्रो निष्पत्तिशब्दो ऽभिव्यक्त्यर्थत्वेन व्याख्यात इत्याशङ्क्य
ब्दाधिकरणे शब्दोत्पत्तेर्निषिद्धत्वादित्याह * प्रयत्नेति * यथाभ
द्वेधा सूत्रं व्याख्याय स्वयमकारप्रश्लेषेणाप्रयत्नेनापि निष्पत्तेरिति
ध्यमपदलोपिसमासाङ्गीकरणेन तावदन्यथा व्याचष्टे * अ
२२३।१ इति * विधानशब्दः प्रकारवचनः निष्पत्तिशब्दस्य चोत्पत्त्यर्थ
षष्ठ्यन्तत्वेन च प्रयत्नस्य निष्पत्तेरिति च षष्ठीसमासाश्रयणेनैत
त्रं व्याख्येयमित्याह * अथ वेति * अपराधव्यतिरेकजनितेयं ष
ति प्रकटयितुं तस्यामिति सप्तमी। ननु प्रयत्ननिष्पत्तेरपराधभा
शब्दस्य किमायातमित्याशङ्क्य तद्गतस्यापराधस्य शब्दे सञ्चारप्रति
दनार्थत्वेन शब्द इति सूत्रावयवं व्याचष्टे * यश्चेति * यद्वै
पलक्षणाभावात्साध्वसाधूनां विधिनिषेधविषयत्वासम्भवाभिप्रा
साधुभिर्भाषितासाधुभिर्नेति प्रयोगोत्पत्तेरुच्चारणानियमस्याशास्त्री
त्वादिति यो हेतुरुक्तः तस्यासिद्धत्वप्रतिपादनार्थमेतत्सूत्रमित्यन्य
व्याख्यातं साध्वसाधुत्वव्यवस्थां तावदाह * अतश्चेति *

ग्रस्तं निरस्तं निहतावलम्बिते अम्बूकृतं ध्मातमथो विकम्पित
संदष्टमेणीकृतमर्द्धकं द्रुतं विकीर्णमेताः स्वरदोषभावनाः

इत्यादिस्मृत्यवगतग्रस्तत्वादिदोषवर्जितनियतह्रस्वादिकाला
व्यङ्ग्ययथालक्षितक्रमग्राह्येषु वर्णेष्वभियुक्तो साधुशब्दप्रयोगात
द्विपरीतेषु चासाधुशब्दप्रयोगादवश्यं तदालम्बनं किं चित् व्यवस्थि
वक्तव्यं तत्र चानित्यस्तु स्याद्दर्शनस्य परार्थत्वादिति सूत्रे साधुत्वे
नाभिमतानां नित्यानां शब्दानामर्थप्रत्यायनाङ्गत्वस्योक्तत्वात्तस्य
फलवद्व्यवहाराङ्गभूतार्थप्रत्ययाङ्गता निष्फलत्वेन शब्दस्य योग्यत्व
दवसीयतइति वार्त्तिकेनोपपादितत्वादर्थप्रत्यायनाङ्गत्वं साधुत्वमव
गम्यते। तच्च वाचकवृत्त्या लक्षणावृत्त्या गौणीवृत्त्या चेति त्रिविधम्। ग
व्यादिशब्दानां मुख्यार्थान्तराभावाद्गौणलाक्षणिकत्वे तावदनाशङ्क्य

। वाचकशक्तिकल्पनं त्वन्यथाप्युपपत्तेर्निषिद्धं न च प्रा? न्तं-
ण शब्दस्यार्थप्रत्ययाङ्गत्वं सम्भवतीत्यव्याप्त्यतिव्याप्त्यभावादेतदे-
साधुत्वलक्षणं युक्तं तच्चानपभ्रष्टेष्वेव शब्देषु नापभ्रष्टेष्वस्त्यनपभ्रं-
पभ्रंशकृता साध्वसाधुव्यवस्था सेत्स्यतीत्यर्थः । इष्टं चानपभ्रष्टेष्वेव
वर्णादिषु व्यवहाराङ्गत्वलक्षणं साधुत्वं नापभ्रष्टेषु कूटेष्वित्या-
* लोके ऽपि चेति * इदमेव वानपभ्रष्टत्वं साधुत्वमपभ्रष्टत्वं
ासाधुत्वं तयोश्च सम्यक्त्वासम्यक्त्ववाचिभ्यां सत्यासत्यशब्दाभ्यां
क्तुं शक्यत्वात्सत्यं वदेदनृतं न वदेदिति विधिनिषेधविषयत्वोप-
त्तेर्धर्माधर्मोपयोगो ऽस्तीत्यन्यथा साध्वसाधुव्यवस्थामाह * यद्वे-
ि * एतदेव विवृणोति * धर्मेति * नन्वर्थतथात्वातथात्व-
षयत्वादनयोर्विधिनिषेधयोर्न शब्दतथात्वातथात्वविषयता युक्ते-
ाशङ्क्याह * अर्थसत्यमिति * एतच्चार्थे सत्यासत्यत्वयोः स-
ासत्त्वरूपत्वाच्छब्दे चानपभ्रष्टापभ्रष्टरूपत्वात्सकृच्छ्रुतयोश्च स-
ानृतशब्दयोरुभयपरत्वायोगादेष ह्वै सत्यं वदन् सत्ये जुहोति
ऽस्तमिते सायं जुहोत्युदिते प्रातः प्रातः प्रातरनृतं ते वदन्ति
रोदयात् जुह्वति ये ऽग्निहोत्रमित्यादिश्रुतिपर्यालोचनया चार्थपर-
ावसायाच्छब्दपरत्वानुपपत्तेर्गाव्यादिशब्दस्य च शिष्टैरगर्हितत्वा-
ौढिमात्रेणोक्तम् । उक्तेन च प्रकारेण साध्वसाधुत्वयोर्व्यवस्था-
ं सत्यां विधिनिषेधविषयत्वोपपत्तेः प्रयोगोत्पत्त्यशास्त्रत्वादि-
ासिद्धो हेतुरित्याह * एवमिति * अपराधभागित्वेन चासाधुत्वे-
ानियमेनाप्राप्तेरसाधूनां च प्रसक्तेर्नियमनिषेधविषयत्वसम्भवात्
योगोत्पत्त्यशास्त्रत्वादित्यस्य हेतोरसिद्धत्वमनेन सूत्रेणोच्यत इत्य-
था व्याचष्टे * अथ वेति * धर्माय नियमो धर्मप्रसक्तये वा नियमो
ास्तीत्यर्थः । एतदेव विवृणोति * यदि हीति * नियमशास्त्रशब्दे-
निषेधशास्त्रमप्युपलक्षितं साधुनियमकारिशब्देनासाधुनिषेध-
ारिणो ऽप्युपलक्षणम् । ननु गाव्यादिशब्दस्य सास्नादिमदर्थाप्रतिपा-
कत्वे प्रसक्त्ययोगात्प्रसक्तिसिद्ध्यर्थमवश्यं सास्नादिपर्यायतुल्यं वा-
कशब्दान्तरत्वमेष्टव्यमित्याशङ्क्याह * एक एवेति * पूर्वं प्रत्यया-
ति पूर्वपक्षभाष्येणार्थापत्तिः सर्वेषां वाचकत्वे प्रमाणमुक्तेत्यभिप्रे-
ान्यथाप्युपपत्तिलक्षणदूषणाभिधानार्थत्वेनैतत्सूत्रं याख्यातम् । इ-
ानीमनुमानोपन्यासार्थं तद्भाष्यमित्यभिप्रेत्यानैकान्तिकत्वलक्षणहेतु-
षणप्रतिपादनार्थत्वेनैतत्सूत्रं व्याचष्टे * किं चेति * अनेन च दे-
दत्तादिशब्दे बालैः प्रयुक्ते ऽप्यपटुकारणत्वेनाप्रयत्ननिष्पत्तेस्तादि-
पेण नाशात् कठोरबुद्धिभिरपि बालप्रयुक्तशब्दानुकरणाप्रयत्ननि-

व्यक्तेस्त्वसाधुरूपेण नाशादपराधभागित्वं दृष्टं ततश्च प्रत्ययादिति
व्योक्तस्य शब्दश्रवणानन्तरभाव्यार्थप्रत्ययलक्षणस्य वाचकत्वहे
स्तदुपलक्षितस्य चार्थविषयशब्दप्रयोगलक्षणस्यानैकान्तिकतेति
योजितम् । श्लोकं व्याचष्टे * तत्रेति * गाव्यादिशब्दैरप्यनैकान्ति
काविमौ हेतू इत्याह * अपभ्रंशाश्चेति * ननु तेषामपि पक्षत्वा
विपक्षतेत्याशङ्कयाह * कतिषु चिदेवेति * एवमपराधभागित्व
चके ऽपि शब्दे हेतोर्दर्शनादनैकान्तिकत्वभूतमपशब्दापराधप्रति
पादनार्थमेव तत् *सूत्रमित्युक्तम्* हेतोरेव चानैकान्तिकत्वलक्षणा
२५।२ राधभागित्वम् अनेन सूत्रेणोच्यतइत्याह * ततश्चेति * एवमपि
प्रयोजना सम्भवतीत्यपिशब्दार्थः । यद्वा यथा शब्दे अन्यथोच्चा
रणादपभ्रंशलक्षणापराधभागित्वं तथा हेतोरनैकान्तिकत्वाद्धेत्वा
सत्वलक्षणापराधभागित्वमित्येवमनैकान्तिकत्वप्रतिपादनार्थतयैत
त्सूत्रं योज्यमित्याह * अन्यथेति * एवमपि सूत्रयोजना सम्भवती
ति चशब्दार्थः सन्देहापादनार्थत्वं सूत्रस्योक्तमुपसंहरति *
स्मादिति * नन्वत्र सर्वेषां वा शब्दानां वाचकत्वमेकस्यैव वेति
द्वावेव पक्षौ तत्र सर्ववाचकत्वपक्षे सन्देहापादनेन निरस्ते पारि
शेष्यादेकस्यैव वाचकतेति निर्णयसिद्धेरन्येन निर्णयाभिधानमयु
क्तमित्याशङ्कयाह * संशयेति * किन्तदुत्तरसूत्रमित्यपेक्षायाम् ।

अन्यायश्चानेकशब्दत्वमिति ॥ २३ ॥

अत्र भाष्यकृता न चैष इत्यादिनैकस्यार्थस्यानेकशब्दत्वमयुक्त
मित्येवं सूत्रं व्याख्याय हेत्वपेक्षायां प्रत्ययमात्रेत्याद्युक्तं तदन्य
थाप्युपपत्तिमात्रप्रतिपादकत्वेन पूर्ववत्सन्देहमात्रापादनादनिर्णाय
तत्प्रकारनिरूपणं च तदशक्तिश्चेत्यत्र वक्ष्यमाणत्वापुनरुक्तमित्युपेक्ष्य
स्वयं प्रश्नपूर्वं पञ्चहेतूनाह * कथं पुनरिति * कारकयोः साक्षात्
सम्बन्धात् क्रियासम्बन्धे सत्येकक्रियावशीकारात्परस्परनियमस
म्बन्धो ऽभिधीयते । यथोक्तम् ।

प्रतिपत्तावुपादानात्साहित्ये च विवक्षिते ।
नियम्येत यदेकस्यां सम्बन्धः सो ऽर्थशब्दयोः ॥

इति स च वाच्यवाचकानेकत्वे स्वरूपान्नियमलक्षणाद्धीयत
इत्यर्थः । वाच्यवाचकत्वयोः कर्मकरणरूपकात्मकत्वात्कर्तृत्वेन का
रकत्वमभिप्रेत्य सामर्थ्यशब्दः । क्रियाव्यापृतत्वरूपस्य तु कारकत्व
मभिप्रेत्य तद्व्यवस्थासिद्ध्यार्थादृष्टातिशयरूपशक्त्यभ्युपगमे वा वा
च्यावच्छिन्नवाचकाश्रितैकशक्तिमात्रेणोभयव्यवस्थोपपत्तेरनवच्छि-

वे वा शक्तिद्वयकल्पने ऽपि व्यवस्थानुपपत्तेर्वोच्यावच्छिन्नस्य वा-
हाश्रितस्य सामर्थ्यस्याभिधायां नियमो यः सम्बन्धशब्दाभिधेय इ-
योऽयम्। श्लोकं व्याचष्टे *एकेति * योग्यार्थोपस्यनुदयाद-
नेकवाचकशक्तिकल्पनमन्याय्यमित्याह *किं चेति * श्लोकं
चष्टे * अत्यन्तेति * आनर्थक्यादप्यनेकशब्दत्वमन्याय्यमि-
ह *नाम चेति*विकल्पापत्तेरप्यन्याय्यमित्याह*किं चेति* अर्थ- २२
ापत्तेरप्यन्याय्यमित्याह * नामान्तरइति * ननु हस्तकरादिष्व-
शब्दत्वदर्शनात्कथमन्यायतेत्याशङ्क्य हस्त इत्यादिभाष्येणाभि-
कोपदेशाभावे सत्यन्याय्यत्वेति परिहृतं तद्गाव्यादिष्वपशब्देष्व-
भियुक्तोपदेशस्य पूर्वपक्षि इत्वादयुक्तमाशङ्क्य गत्यन्तराभावसू-
नार्थत्वेन व्याचष्टे * यत्त्विति * दृढस्मरणेनेत्यभियुक्तोपदेशो
न्यागतिकत्वोपपादनार्थत्वेन व्याख्यातः । तदुपलक्षितमसादृश्यं
कारेण सूचितं सम्प्रत्युपेक्षितं भाष्यं गाव्यादिशब्देषु गत्यन्तरस-
ावसूचनार्थत्वेन व्याचष्टे * एकेति * गोशब्दोच्चिचारयिषाया-
क्त्या केन चिद्गावीत्युच्चारिते श्रुतगावीशब्दसादृश्यं गोशब्दस्यो-
ानेनावगम्य गावीशब्दोच्चारणस्य गोशब्दोच्चिचारयिषामूलत्वा-
मानाद् गोशब्दशक्त्यनुसारेण गावीशब्दादप्यर्थप्रत्ययोपपत्तेर्न गावी-
ब्दस्य शक्त्यन्तरकल्पनमित्यर्थः । अनेकशब्दत्वस्यान्याय्यत्वं पञ्च-
पपादितमुपसंहरति * तस्मादिति * स्वरूपं नियमरूपतासम्ब-
ः सामर्थ्यलक्षणः शब्दो नामार्थो नामान्तरे ऽप्यभिन्न इत्येषां च-
ष्टयोपसंहारः । निरूपणशब्दव्यवस्थार्थत्वेनावश्यं विकल्पप्रसङ्गल-
णोपपत्त्युपसंहारः । सर्वशब्दमध्ये एकैकस्यैव गवाश्वादिशब्दस्य
चकत्वनियमादिति वीप्सार्थः । यद्वैकस्यैव शब्दस्य वाचकत्वनिय-
देकस्यैव चार्थस्य वाच्यत्वनियमादिति यववराहाधिकरणोक्तो
च्यैकत्वनियमो दृष्टान्तत्वेन वीप्सयोक्तः कथं पुनरुपमानानुमाना-
ामेकशक्त्यनुसारेण गतिसम्भव इत्याशङ्क्याह * यथा चेति *
दृष्टान्तमुपसंहरति * तेनेति *

तत्र तत्त्वमभियोगविशेषात्स्यादिति ॥ २४ ॥

भाष्यकृता पदोत्तरत्वेन सूत्रं व्याख्यातुं कथं पुनरित्याशङ्कितं
द्व्याचष्टे * तुल्येति * ततश्च पुनरपि अगृह्यमाणविशेषत्वात्
वेषां वाचकत्वमापद्येतेत्याशयः । शक्यमित्याहेति भाष्येणैतदा-
ङ्कानिरासार्थत्वेनैतत्सूत्रमवतारितं तद्व्याचष्टे * अत आहेति *
मार्थिनो ऽभियुक्ता भवन्तीत्यादिभाष्याद्दृष्टार्थिनामार्याणां शब्दार्थ-

विषयादरविशेषात्तदुपदेशे वाचकत्वावधारणाकारणमित्या
तच्च गाव्यादिशब्देष्वप्यार्योपदेशतुल्यत्वादयुक्तमितिमत्वार्थवि
प्रातिपिपादयिषया पृच्छति*कः पुनरिति* अभियोगतद्विशेषशब
प्रकृतोपयोगिनमर्थमाह * तदुच्यतइति * शब्दपरो ऽभियोग
निर्देशः लक्षणस्य व्याकरणस्य यच्छ्रवणं तदभ्यासनिमित्तस
विषयीकृत्याभियोगशब्दः प्रवर्त्तते लक्षणश्रवणाभ्यासो ऽत्राभियो
ब्देनोक्त इत्यर्थः । यल्लक्ष्यमुदाहरणीकृत्य लक्षणश्रवणमभ्यस्तं
द्व्यतिरिक्तानान्तुल्यन्यायानां लक्ष्याणां तेन लक्षणश्रवणाभ्या
ज्ञानमभियोगविशेषः फलेन तद्धेतोरभ्यासातिशयस्य लक्षणाह
णश्रवणाभ्यासातिशयो ऽभियोगविशेष इत्युक्तं भवति। ननु प्रति
पाठेनैव वाचकत्वनिरूपणसिद्धेर्न लक्षणश्रवणाभ्यासातिशयापेक्षे
१२७।३ शङ्कां निरस्यंस्तृतीयस्य प्रश्नस्योत्तरमाह * प्रतिपदेति * ननु
तिपदपाठस्याशक्यत्वे ऽपि वेदान्नो वैदिकाः सिद्धाः लोकाच्चैव
लौकिकाः । अनर्थकं व्याकरणमिति न्यायेन लौकिकवैदिकप्रयो
सिद्धत्वाद्वाचकतत्त्वनिरूपणस्य न व्याकरणापेक्षेत्याशङ्क्याह *
स्मादिति * वाचकसामस्त्याज्ञानत्वावाचकत्वनिश्चयो ऽपि न स
वतीत्याह * तत्सामस्त्येति * ननु वाचकसामस्त्यज्ञाने ऽपि
थमवाचकनिश्चयः स्यादित्याशङ्क्याह * लक्षणेति * सूत्रार्थमुप
हरति * तेनेति * सूत्रं व्याख्याय पूर्वपक्षोक्तानि दूषणानि परि
रिष्यन्पदपूर्वकत्वाच्च वाक्यात्मकशास्त्रव्यापारसिद्धेरित्यादिनो
मितरेतराश्रयमनुभाषणपूर्वकं परिहरति * यत्त्विति * प्रयोगोत
त्यशास्त्रत्वादित्यनेन लक्षणशास्त्रस्य तन्मूलशास्त्रस्य वा लोक
सिद्धपदप्रयोगादुत्पत्तेः प्रयोगनियामकत्वासम्भवादितरेतराश्रयः
यदुक्तं तद्यदि तावन्निर्णीतवाचकत्वैः पदैरन्वाख्यानम् अन्वा
ख्यानाच्च वाचकत्वनिर्णय इत्येवं रूपमभिप्रेतं ततो वाचकत्व
निर्णये ऽपि प्रतिपादकत्वमात्रेणान्वाख्यायकत्वोपपत्तेः सुपरिहरमि
त्यर्थः । ननु च कुत्वं कस्मान्न भवतीत्यादिलक्षणानुगमदर्शनाद्व्या
करणावयवभूतेष्वपि पदेषु साधुत्वनिर्णयेन भाव्यमित्याशङ्क्य
पुनस्तैरपीत्युक्तम्* अथ लक्ष्याणां शब्दानां साधुत्वे सत्यन्वाख्यान
मन्वाख्यानाच्च साधुतेतीतरेतराश्रयमभिप्रेतं तत्राह * यदीति
न त्वेतदस्तीति शेषः । ननु व्याकरणात्प्रागेव साधुत्वज्ञाने व्याक
रणानर्थक्यं स्यादित्याशङ्क्याह * निर्ज्ञानेति * श्लोकं व्याचष्टे
तेनेति * ननु लौकिकशब्दानां सङ्कीर्णत्वाद्भवत्वन्वाख्यानमर्थवद्वै
दिकानां त्वसङ्कीर्णत्वादनर्थकमित्याशङ्कते * वेद इति * अनेन

ग्राश्रितप्रतिपदपाठानां लक्षणं न कार्यमित्यादिनोक्तमानर्थक्यं प्रस-
त्परिहारायानुभाषितं सर्वसाधुशब्दानां वेदे प्रयोगे सति व्याकर-
ानर्थक्यं स्यात्कृत्स्नसाधुशब्दविषयत्वाभावात्तु वेदस्य तदनुगत-
ब्दान्वाख्यानार्थं व्याकरणं भविष्यतीति परिहरति ।

नाकृत्स्नविषयत्वात् ॥ २५ ॥

भाषायामित्यधिकृत्यानुगतानां लोकविषयत्वाच्छन्दसीत्य-
कृत्यानुगतानां च वेदविषयत्वान्न वेदस्य कृत्स्नविषयतेत्युपपाद-
ति *केचिदिति * तेन लोकव्यवस्थितानां तावल्लक्षणमर्थवदित्या-
यः । कृत्स्नसाधारणासाधुशब्दविषयत्वस्याप्येकस्यां शाखायाम-
ावात्सर्वशाखागतानां चाध्ययनाशक्तेः शाखान्तरगतसाधारण-
ब्दानामप्यपभ्रंशेभ्यो विवेकाय लक्षणमर्थवदित्याह * सर्वेति *
तदेव विवृणोति * यथैवेति * अशक्तावानन्त्यं कारणमाह
प्रकृतीति * इत्थं निर्णीतवाचकत्वैः पदैरन्वाख्यानमन्वाख्यानाच्च
ाचकत्वनिर्णय इत्येवं रूपे लक्ष्याणां शब्दानां साधुत्वे सत्यन्वाख्या-
ामन्वाख्यानाच्च साधुतेत्येवं रूपं वा लक्षणगतेऽन्योन्याश्रये परि-
ते यदि कश्चिद्व्याकरणमूलभूतो वैदिको विधिर्व्याकरणाश्रयो
ादविद्याश्रयं च व्याकरणमित्येवं रूपं तस्मान्न ब्राह्मणेन म्लेच्छित-
ाइत्यादिलक्षणमूलगतमितरेतराश्रयं ब्रूयात्तत्राह * एतेनेति *
ुरुषार्थं यत्स्वर्गे लोके कामधुग्भवतीति प्रतिपादितमदृष्टं साध्यं क्र-
वर्थं च ब्राह्मणेन न म्लेच्छितवाइतिज्योतिष्टोमप्रकरणाधीतवाक्य-
ल्पव्याकृता वागुद्यतइत्यनारभ्याधीतवाक्यकल्पं वा यत्साध्यं यच्च
साधुशब्दप्रयोगाख्यं साधुशब्दज्ञानाख्यं वा साधनं तयोर्यत्साध्यसा-
धनभावविधायकं वाक्यं तद्गतानां शास्त्रान्वितादिपदानां वा या
व्याक्रिया तस्याश्च या पूर्वप्रसिद्धविधिवाक्यमूलत्वकल्पना त्वयेष्टा
तस्याश्च तद्वाक्यमूलत्वे वेदविधितः प्राक्सिद्धत्वकल्पनापत्तेस्तदा-
श्रयो वेदविधिः तस्याश्च तन्मूलत्वकल्पना तदाश्रया सेतीतरेतराश्र-
यत्वस्य यः प्रसङ्गः शक्यते एतेन प्रासङ्गिकानर्थक्यपरिहारसमाधा-
नस्याबुद्धिस्थेन लक्षणगतेनेतरेतराश्रयत्वपरिहारन्यायेन प्रत्युक्त इत्य-
र्थः । एतदेव व्यतिरेकदर्शनपूर्वकं विवृणोति *यदिहीति* अन्वाख्यानं
प्रकृत्यादिविभागेनाख्यानम् अन्वाख्येयाः साधुशब्दाः अन्वाख्याता-
नां ऽविधिर्व्याकृता वागुद्यतइत्यादिप्रयोगो व्यवहारकालइति चतु
ष्टयं साधुशब्दविषयं ब्राह्मणेन न म्लेच्छितवाइत्यनन्वाख्यातानां प्र-
तिषेधः व्यवहारकाले वर्जनं चेत्यसाधुविषयं द्वयमिति षट्कस्याप्य-

नादित्वे सति सर्वेषामन्वाख्यानादीनां सर्वदानवगतपूर्वापरा
सम्बन्धे सति यदात्यन्तादृष्टार्थत्वमात्रमेषां शास्त्रीयप्रत्यया
स्वरूपं तदा सर्वकालव्याक्रियमाणत्वेन विद्यमानस्य शब्दस्य
यमविधित्वस्येत्यर्थः । निषेधो ऽपि विधिशब्देनोपलक्षितः तय
दित्वे ऽवगम्यमानश्चासौ वेदविधिश्चेति वेदविधित्वेनावगम्य
त्वं हेतुः । इतरेषामवगम्यमानो वैदिको विधिर्मूलं येषामित
म्यमानवेदविधिमूलत्वं वैदिकस्य विधेरनादित्वाक्षेपकत्वे वेद
स्वरूपविषयः कार्यविषयः साधनविषयश्च दृष्टान्तिताः । ए
मात्राण्यसाधूनीत्यादिना गाव्यादीनामवाचकत्वस्य लोकविरु
यदुक्तं तत्परिहारायानुभाष्यते * यत्त्विति * मेयादिशब्दश्च
काक्षपाठश्च प्रसिद्धानि च न्यूनवर्णान्यतिरिक्तवर्णानि विपर्य
र्णानि च यानि पदानि तद्व्यतिरिक्ता ये प्रसिद्धा गाव्यादयः श
१२९।४ स्तेषां मध्यइत्यर्थः परिहरति * तत्रेति * एकार्थविषयेषु सदृश
ब्देष्वेकस्य शक्तौ क्लृप्तायामितरेभ्यस्तदशक्तिजत्वेनापि प्रतीत्यु
त्तेरेकस्यैव शक्तिरिति निर्णीते ऽपि कस्यैकस्येत्यनिर्णयात्संमुग्ध
चके लोके सत्यविरुद्धो लक्षणाद्वाचकनिर्णयः । यदि तु लक्षण
नादृत्यागृह्यमाणविशेषत्वात्सर्वेषां वाचकत्वं कश्चिद्वदेत्तं प्रति स
त्याचारबाधो वाच्य इत्यर्थः । श्लोकं व्याचष्टे * लोकेति *
न्वेवं सत्यवाचकत्वप्रतिज्ञाया लोकविरोधः प्रथमपादे कथमुक्त
त्याशङ्क्याह * तर्केणेति * सम्बन्धग्रहणात्पूर्वं यस्माद्गमयत्य
गवादेर्नाभिधाशक्तिर्देवदत्तपदे यथेत्यनुमानस्य लोके ऽपेक्षितवाच
कावाचकविवेकहेतुत्वाभावाल्लोकविरोधः । स्मृतेस्तु तदपेक्षित
विवेकहेतुत्वादविरोध इत्याशयः । दृष्टान्तं विवृणोति * यथैव
ति * वर्णविवेकावधारणस्य प्रत्यक्षत्वेनोक्तत्वात्स्मरणादेवेत्यवधा
रणं सहकार्यान्तरमात्रनिवृत्त्यर्थं लोकविरोधाभाव इत्यनेन स्मर्य
माणस्य तु वाचकावाचकविवेकस्य ब्राह्मणादिविवेकस्येव न लोक
विरोध इति नञध्याहारेणोत्तरार्द्धं योजितं, विपरीतबाधप्रतिपादक-
त्वं नाध्याहारं विना स्मर्यमाणेन विरोधो बाध इत्येवमन्यथा व्या-
चष्टे * यथा चेति * स्मृत्या बाध इति विग्रहः । ननु निर्मूल-
त्वात् स्मृतेर्न बाधकत्वं युक्तमित्याशङ्क्याह * आदितश्चेति * प्र-
माणमूलत्वेन स्मृतेर्बाधकत्वोपपादनायादितः * स्मृतेरित्युक्तम् *
कुतः सिद्ध इत्यपेक्षिते * प्रत्यक्षेणेत्युक्तम् * नन्वधैयाकरणैरन-
वगमाद्वारस्य प्रत्यक्षता युक्तेत्याशङ्क्य * कुशलैरित्युक्तम् * यथा
मातापितृसम्बन्धस्मृतिकुशलैर्ब्राह्मणादिभिर्ब्रह्मभेदो ऽवगम्यते तथा

तिप्रत्ययाख्यानकुशलैः साध्वसाधुविभाग इत्यर्थः । यद्यप्यर्थ-
ायनाङ्गत्वलक्षणं साधुत्वं लिङ्गावगम्यं तथापि तदाश्रयस्यानप-
शब्दरूपस्य प्रत्यक्षताभिप्रेता एवमसाधुत्वमुपन्यस्यापभ्रष्टरूपस्ये-
ोषः ।

अर्थबोधानपेक्षा तु नानपभ्रष्टरूपता ।
साधुत्वमेकवर्णे ऽपि प्रसङ्गादिति वर्णितम् ॥

ननु स्मृतीनां शास्त्रमूलत्वस्योक्तत्वात्तद्विरुद्धं व्याकरणस्मृतेः
ाक्षमूलत्वाभिधानमित्याशङ्क्याह * यो नामेति * फलो-
तेरनियतकालत्वात्सम्बन्धस्यानियतकालत्वं साध्वसाधुविवेकस्य
प्रत्यक्षग्राह्यत्वोपपत्तेस्तदपह्नवे न केवलं स्मृत्या बाधः किं तु
ाक्षेणापीत्याह * यस्य त्विति * सङ्गीतशास्त्रे स्वरगतरागवि- २३
प्रकीर्णकप्रबन्धतालवाद्यनृत्ताख्याः सप्ताध्यायाः तत्र ।

आत्मा विवक्षमाणो ऽयं मनः प्रेरयते मनः ।
देहस्थं वह्निमाहन्ति स प्रेरयति मारुतम् ॥
ब्रह्मग्रन्थिस्थितः सो ऽथ क्रमादूर्ध्वपथे चरन् ।
नाभिहृत्कण्ठमूर्द्धास्येष्वाविर्भावयति ध्वनिम् ॥
नादो ऽतिसूक्ष्मः सूक्ष्मश्च पुष्टापुष्टश्च कृत्रिमः ।
इति पञ्चाभिधावन्तः पञ्चस्थानस्थितीः क्रमात् ॥
व्यवहारे त्वसौ त्रेधा हृदि मन्द्रो ऽभिधीयते ।
कण्ठे मध्यो मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तरः ॥
तस्य द्वाविंशतिर्भेदाः श्रवणाच्छ्रुतयो मताः ।
स्यातां निषादगान्धारौ द्विश्रुती धैवतर्षभौ ॥
त्रिश्रुती वेदश्रुतयः षड्जमध्यमपञ्चमाः ।
मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः ॥
गर्दभः सप्तषड्जादिक्रमादुच्चारयन्त्यमी ।

इत्यादिलक्षणैः षड्जादीनां विवेके द्वितीयेन राग-
विकसञ्ज्ञकेनाध्यायेन कृते तदभ्याससंस्कृतेन श्रोत्रेण यथा
ड्जो ऽयमृषभो ऽयं गान्धारो ऽयं मध्यमो ऽयं पञ्चमो
यं धैवतो ऽयं निषादो ऽयमिति स्वरविवेकज्ञानं जायते तथा
स्य व्याकरणस्मृतिजनिते साध्वसाधुविवेके पूर्वं जाते पश्चाद्व्याक-
णश्रवणाभ्याससंस्कृतश्रोत्रस्य साध्वसाधुविवेकविषयं प्रत्यक्षं जा-
ते तं प्रति साध्वसाधुसङ्करं साधयतः प्रत्यक्षबाधो ब्राह्मणादिवर्ण-
ङ्करसाधनवद्भवतीत्यर्थः । अतस्त्वत्पक्षस्यैव प्रमाणविरोधो ना-
स्मत्पक्षस्येत्युपसंहरति * तेनेति * प्रत्यक्षग्राह्यत्वे सति तत्पूर्वक-

स्यानुमानादेरपि सम्भवात्समस्तशब्दः । यच्चादृष्टविषयवच्च साध्वसाधुतेत्यादिना साध्वसाधुविवेकस्याप्रामाणिकत्वेन विधेयविषयत्वायोगाच्च धर्माधर्मसाधनत्वरूपापि साध्वसाधुतेम् । तदपि साध्वसाधुविवेकस्य सप्रमाणकत्वाभिधानं प्र भवतीत्याह * तेनेति * ननु

साधुत्वं नेन्द्रियग्राह्यं लिङ्गं वास्य न विद्यते ।
शास्त्रस्यं विषयो नैष प्रयोगे ऽप्यस्य सङ्करः ॥

इत्यन्यैरुक्तं तस्य कः परिहार इत्याशङ्क्याह * यस्त्विति न्द्रियग्राह्यत्वं विवृणोति * ग्रस्तेति * ग्रस्तमविभक्तिकोच्चरनिरस्तं विश्लेषितसंयोगम् अम्बूकृतं सनिष्ठीवितं संवृतकलग्रगीगीतक्ष्विणरोमशादीनामादिशब्देनोपादानं दोषवर्जितानां नियत्वादिमात्रकालाभिव्यङ्ग्यानां यथावृद्धव्यवहारं लक्षितेन ग्राह्याणां वर्णानामिन्द्रियग्राह्यत्वमित्यर्थः । नन्वेवमप्यर्थप्रत्याङ्गत्वलक्षणस्य साधुत्वस्येन्द्रियग्राह्यत्वं नास्तीत्याशङ्क्य वाचकसाधुत्वस्याविनष्टत्वेन निरूप्यत्वात्तद्विषयस्य ज्ञानस्य श्रोत्रजन्यत न्द्रियग्राह्यत्वं नास्तीति वक्तुम् *अविनष्टेत्युक्तम् *प्रकृतिप्रत्ययान्वाख्यानस्मृतिसहकृतस्य च श्रोत्रस्याविनष्टरूपविषयज्ञानहेतुत्वाद्वैय्याकरणस्याज्ञानं युक्तमिति *स्मर्यमाणशब्देनोक्तम् * यथोदात्तादिरूप नश्रोत्रं स्मृतिमपेक्षते तद्वदविनष्टरूपज्ञाने ऽपीति दृष्टान्तार्थः । लि ग्राह्यत्वं विवृणोति * तद्वदुत्तरेति * प्रत्यक्षेण साध्वसाधुविवेकग्रणोत्तरकालं यत्प्रवृत्तं लक्षणं तद्गतं प्रकृतिप्रत्ययलोपादिसाधुत्वाव्यभिचारितया लक्षणेनावगतत्वादुदाहृतशब्दे दृष्टान्तेन शब्दान्तरे साधुत्वानुमानाय लिङ्गं भवतीत्यर्थः। वृद्धप्रयोगगम्यो हि शब्दार्थसम्बन्ध एव न इत्यनेन न्यायेन शब्दार्थस्य वृद्धप्रयोगमात्रावसेयत्वावधारणा भवन्तीत्यादिषु शब्देषु वृद्धाप्रयुक्तत्वेनार्थप्रत्यायकत्वाभावात्साधुत्वरहितेष्वपि प्रकृतिप्रत्ययान्वाख्यानदर्शनात् व्यभिचारमाशङ्क्य व्यवहारगतार्थप्रतिपत्तिसहितत्वं विशेषणं कृतम् । अस्मादेव विशेषणादर्थप्रत्यायनार्थत्वं साधुत्वलक्षणं वार्त्तिककृतो ऽभिप्रेतमिति ज्ञायते । शास्त्रविषयत्वं विवृणोति * शास्त्रस्य चेति * श्रुतिस्मृतिरूपत्वेन क्रत्वर्थपुरुषार्थसाधनत्वप्रतिपादकत्वरूपेण विधिनिषेधानिबन्धनार्थानर्थज्ञापकत्वरूपेण कार्यस्वरूपज्ञापकत्वरूपेण चेति चतुर्द्धा द्वैविध्यं विवृतं साधुत्वमिन्द्रियग्राह्यमिति साधुत्वशब्देनासाधुत्वस्याप्युपलक्षितत्वादनर्थज्ञानार्थनिषेधशास्त्रविषयत्व (मसाधुत्वस्य दर्शितम् । अयं साध्वसाधुत्वरूपो विषय इत्यर्थः । ननु साध्वसाधु-

द्दप्रयोगयोरिष्टानिष्टसाधनत्वज्ञापने साध्यसाधनभावविषयत्वा-
शास्त्रस्य साध्वसाधुविषयत्वं न स्यादित्याशङ्क्यैवंविध एवान्यो
ात्युक्तम् । अन्यो ऽपि यागादिरेव विधिरेव विषय इत्यर्थः । द्वि-
धशास्त्रविषयत्वमेवोपपादयति * अविनष्टैरिति * साधुश-
प्रयोगस्य स्वर्गसाधनत्वम् । एकः शब्द इत्यस्य कामधु
ाब्दयुक्तस्य शास्त्रस्य विषयः । यज्ञोपकारसाधनत्वव्या-
ता वागुद्यतइत्यनारभ्याधीतस्याप्यश्वप्रतिग्रहेष्टिन्यायेन व्याकृ-
वस्य लौकिकवैदिकवाग्वदनविषयकत्वे क्रत्वर्थपुरुषार्थत्व-
क्षणावैरूप्यापत्तेर्लौकिकमात्रविषयत्वे ऽपि फलकल्पनागौरवाप-
वैदिके कर्मणि या वागुद्यते सा व्याकृतेत्यर्थावधारणात् विषयः ।
पशब्दभाषणस्य प्रतिषिद्धाचरणनिमित्तक्रतुवैगुण्यरूपानर्थसाधन-
ब्राह्मणेन न म्लेच्छितवाइति निषेधशास्त्रस्य ज्योतिष्टोमप्र-
रणाधीतस्य विषयः । अस्य निषेधस्यानृतवदननिषेधवत्प्राकर-
ाकं क्रत्वर्थत्वं याज्ञे कर्म्मणि स नियमो ऽन्यत्रानि-
म इत्यादिना महाभाष्यकृता ऽप्युक्तमिति सूचयितुम्
* याज्ञे कर्मणीत्युक्तम् * वाग्योगवित् दुष्यति चापश
ैरिति स्मृत्यापि वाचैव हि मनसा च यज्ञो वर्त्ततइत्यादिलिङ्गद-
नाद्वाग्योगशब्दस्य यज्ञपरत्वावगतेर्वाग्योगविच्छब्दस्यर्त्विग्यज-
ानविषयतया व्याख्यातुं शक्यत्वाद्यज्ञविषयत्वमपशब्दनिषेधस्या-
सीयतइति सूचयितुम् * यथोक्तमित्युक्तम् * यच्च प्रतिशब्दं वि- २
धिनिषेधवाक्यानुमानकल्पनानुपपत्तेर्न साध्वसाधुतयोर्विधिनिषेध-
विषयत्वं सम्भवतीत्युक्तं तत्परिहरति * द्वाभ्यामेवेति * क्रत्व-
पुरुषार्थविध्योर्भेदे ऽपि विधित्वेनैक्यं मत्वा * द्वाभ्यामित्युक्त-
म् * ननु वेदवचनं पुनर्वस्तुस्वरूपतद्गतगुणदोषान्वाख्यानपरं वि-
धिप्रतिषेधानपेक्षं नैव किं चित्प्रमाणत्वेन सम्भवतीत्यनेन वेदस्य
स्वरूपपरत्वनिषेधात्कथं स्वरूपज्ञानार्थशास्त्रविषयता साध्वसाधु
शब्दयोरुक्तेत्याशङ्क्याह * न चेति * यावदेकाहेनाश्वो याति ताव-
त्पश्चीनं ननु तत्राप्यविनाशी वा अरे ऽयमात्मा ज्ञातव्य इत्येवंविधि-
परस्यैव शास्त्रस्य स्वरूपज्ञानार्थत्वान्न तन्निरपेक्षस्येत्याशङ्क्याह * अ-
त्रापीति * अत्रापि तर्ह्यर्थप्रत्यायनाङ्गत्वविशिष्टलक्षणानुगतत्वरूपे-
णोपलक्षणोपपत्तेर्ये ऽर्थप्रत्यायनाङ्गभूताः शब्दा लक्षणानुगतास्ते सा-
धवो ऽन्ये चासाधवः प्रत्येतव्या इत्येवं ज्ञात्वा शास्त्रावधारितप्रयो-
जनान् साधुशब्दान्प्रयोक्तुमिच्छेज्ञानर्थप्रत्यायनाङ्गभूताः शब्दा लक्ष-

अयं पा० २ पु० ना०

णेनानुगतास्ते साधवो न वा लक्षणेनाननुगतानित्येवं विधिनि
ध्योः शास्त्रयोः साध्वसाधुस्वरूपज्ञानार्थत्वं भविष्यतीत्याशयः
तद्रूपमित्यनेन द्वयोरेव विधिनिषेधयोरेकेनोपलक्षणेन * सर्व
पशब्दव्यापित्वमुक्तम् * शास्त्रस्य विषयो ऽप्येष इत्यपिशब्द
तमुपमानादिप्रमाणविषयत्वं दर्शयन्नुपमानं तावद् द्विवि
* निःसन्दिग्धेति * यो ह्यविनष्टत्वेन निःसन्दिग्धो वृद्ध
देवदत्तशब्दो यश्च विनष्टत्वेन निःसन्दिग्धो बालप्रयुक्तस्तत् र
त्सादृश्यं यच्च पटुकरणाभिव्यङ्ग्यत्वादिधर्मसामान्यभूत
गोशब्दादेरुपमानेनावगम्य पटुकरणाभिव्यङ्ग्यत्वस्य विनष्टा
रूपत्वेन देवदत्तादिशब्दे व्याप्तिदर्शनाद्गोशब्दादौ विनष्टाविन
त्वानुमानं सम्भवतीत्युपमानपूर्वकानुमानविषयत्वं साध्वस
योरुपचारादुपमानविषयत्वेन विवक्षितमिति * शक्यशब्दे
च्चितम् * सङ्कीर्णसाधुविषयं चेदमुपमानं लक्षणानुगतवैदिक
सादृश्यं लक्षणानुगतत्वस्याविनष्टत्वेन वैदिकेषु व्याप्तिदर्शनात
किकेष्वविनष्टत्वानुमानमित्येतदप्युपमानपूर्वकमेवानुमानमसङ्कु
साधुत्वविषयमिति * दर्शयितव्यमित्यनेन सूचितम् * सङ्
साधुत्वविषयांस्तावदर्थापत्तिमाह * तथेति * लक्षणैरपे
भिप्रायो लौकिकशब्दः वृद्धव्यवहारनिबन्धनेनार्थप्रत्ययेन यो
पिता वाचकत्वविषयार्थापत्तिः तया विनष्टस्य स्वाभाविकार्थाः
नशक्तत्वरूपवाचकत्वानुपपत्तेरविनष्टरूपं साधुत्वं गाव्यादिश
ङ्कीर्णं निश्चीयतइत्यर्थः । असङ्कीर्णसाधुत्वविषयामर्थापत्तिमाह
इति * अन्यासक्तिनिमित्तं तदनासक्तिनिमित्तं स्पृष्टादिकर
शुरयनिमित्तं वा यत्सम्भवत्यपभ्रष्टं रूपं तद्वर्जितस्य केवलस्य सा
येल्लक्षणेनान्वाख्यानं तदन्यथानुपपत्त्या गोशब्दादेरेव साधु
सिद्धं, गवादिशब्दनियतमसङ्कीर्णसाधुत्वज्ञानमित्यर्थः । गाव्य
शब्दानां लक्षणाभावस्यासाधुत्वं विनानुपपत्तेरभावपूर्विकयार्थाप
साधुत्वाभावनिश्चयात्तद्द्वारेणाभावस्यापि साध्वसाधुत्वनिर्णयो
१३।२।१ पय इत्याह * अपभ्रंशेष्विति * ननु प्रत्यक्षादित्रयविषयत्वा
धानमात्रेण परोक्तश्लोकप्रतिकञ्चुकसिद्धेरुपमानादित्रयविषयत
भिधानं किमर्थमित्याशङ्क्याह * इतीति * व्यापारशब्देनाभावोप
नयोः साक्षात्साध्वसाधुत्वनिर्णायकत्वाभावे ऽपि व्यापारसङ्गा
त्तद्विषयतेति सूचितम् । प्रयोगे ऽप्यस्त्यसङ्कर इत्येतद्विवृणोति
यद्यपीति * मातापितृसम्बन्धकुशलानां ब्राह्मणादिविवेकवत्प्रकृ
प्रत्ययान्वाख्यानकुशलानां साध्वसाधुशब्दाविवेको ऽस्तीत्यर्थः ।

साधुत्वं नाम दोषवर्जितत्वं तच्चान्यत्रापि परीक्षकगम्यं दृष्टमि-
ाह * यथा चेति * रत्नतत्त्वपरीक्षका यथा पद्मरागादीनि वि-
केन जानन्ति तथा परे शब्दनामदोषवर्जितत्वं तच्चान्यत्रापि परी-
कतत्त्वपरीक्षकाः साधुत्वं विवेकेन जानन्तीत्यर्थः। लक्षणस्य च
ाध्वसाधुविवेकोपायता रत्नपरीक्षायामेव दृष्टेत्याह * यथेति *
वं च साध्वसाधुविवेकस्य प्रत्यक्षादिनावगतिसम्भवे तन्निराकर-
ाच्च तत्पूर्वकपुरुषवचननिराक्रियापि सिद्धेति यदुक्तं तदपि प्रति
तं भवतीत्याह * पौरुषेयेति * ननु व्याकरणानुगतसाधुत्वा-
न्तरं प्रत्यक्षेणासङ्कीर्णसाधुत्वदर्शने माभूदन्धपरम्परान्यायापत्तिः।
ङ्कीर्णस्य तु साधुत्वस्य पूर्वदृष्टस्य व्याकरणमात्रात् विवेकज्ञाने त-
ापत्तिरपरिहार्येत्याशङ्क्याह * यावानिति * अयमाशयः न
ावददृष्टसाधनत्वलक्षणसाधुत्वविवेकेऽन्धपरम्परान्यायापत्तिः वि-
त्रनिषेधमूलत्वादविनष्टरूपसाधुविवेकेऽपि न तदापत्तिर्वेदा-
ङ्गविद्यास्थानप्रयोगमूलत्वादिति। यच्चार्थप्राप्तश्च यो ऽर्थः
ादित्यनेनार्थप्राप्तत्वात्साधुविधानानुपपत्तिरित्युक्तं तदनुभाषणपू-
कं परिहरति * यत्त्विति *यथा चतुर्थे समे दर्शपूर्णमासाभ्यां
जेत पौर्णमास्यां पौर्णमास्या यजेत दर्शपौर्णमासयोश्चत्वार ऋत्विज
त्युपात्तानामपि देशादीनामर्थप्राप्तत्वादविधानमिति पूर्वपक्षयित्वा
क्षप्राप्तानामपि नियमार्थो विधिरिति नियमार्था श्रुतिरुच्येत्तदिति-
सूत्रेण सिद्धान्तयिष्यते तथात्रापि नियमार्थो विधिर्भविष्यतीत्या-
ायः। यच्चात्यन्तावाचकत्वादित्यनेन व्यावर्त्यासाध्वप्रसक्तेरसाधु-
नेवृत्त्यर्थस्य नियमस्यानुपपत्तिरित्युक्तं तदप्यनुभाषणपूर्वकं परि-
हरति * यस्त्विति * यस्त्वया ऽन्यनिवृत्तिफलो विधिर्नियम इत्युक्तः
स नियमः परिसंख्या वेत्यनेन किं नादौ परस्तान्नियमः किन्तु परि-
संख्येत्याशयः। सा चात्यन्तव्यावृत्त्याद्विना नेष्यते यस्तु परमार्थ-
तो नियमः स नित्यतामात्रकारीति किमिति व्यावृत्त्याद्विना न ल-
भ्यतइत्यर्थः। ननु भाषणे साधूनां नित्यप्राप्तत्वान्नियमो ऽनर्थकः
स्यात् भाषणनियमे तु मौने दोषः प्रसज्येतेत्युक्तं तत्राह * सतीति*
द्विधा परस्यार्थः पुरुषेण ज्ञाप्यते स्वाभिप्रायप्रकाशनद्वारेण वा त-
न्निरपेक्षमुख्यगौणलाक्षणिकैच त्रैरूप्यादिस्मरणमात्रे वा। तत्र स्वा-
भिप्रायप्रकाशनद्वारार्थज्ञापनमिह त्रैरूप्यस्मारणादिद्वारार्थप्रकाशन-
व्यावृत्त्यर्थभाषितव्यशब्देन लक्षणयोक्तम्। अनेन च पूर्वपक्षोक्तं दू-
षणद्वयमपि परिहृतम्। शब्दव्यापारद्वारार्थज्ञानरूपे हि भाषणे सा-
धुव्यतिरिक्तोपायाप्रसक्तेः साधुनियमानर्थक्यमपरिहार्यम्। अर्थ-

ज्ञापनमात्रे तु साधुनियमे त्रैरूप्याद्युपन्यासः शास्त्रकाराण
श्चेत । स्वातन्त्र्येण तु सर्वदा साधुभाषणनियमे मौने दोषो
हार्यः स्वाभिप्रायप्रकाशनद्वारार्थज्ञापनं मौनिनाक्षिनिको
क्रियमाणं न श्रेयःसाधनमित्याक्षिनिकोचादिव्यावृत्त्यभिधाने
चितम् । अतश्च भोजनादौ मौनविधाने शाकादेर्भाषणनिव
हस्तसंज्ञादिना न कार्यं शिष्टाचारविरोधापरिहारार्थं वा मौ
भावविषयत्वं साधुभाषणनियमस्य कल्पनीयं भाषणानुवादे
धुनियामकत्वं कल्प्यं साधुभाषाशब्दस्त्वस्मिन्पक्षे विशेषण
नन्वन्यानिवृत्त्या शिष्टाचारविरोधपरिहारार्थं वा मौनविध्यभा
नित्यत्वायोगान्नियमे ऽप्यन्यनिवृत्तिरवश्यं कल्प्येत्याशङ्क्याह
२३३।४ पि चेति * साधुस्मृत्या व्यवहितानामसाधूनां तदर्थप्रति
त्वोपपत्तेरपभ्रंशकाले प्रयोगः सम्भवतीति विप्रकर्षाभिधायि
ब्दोक्तानां स्मर्यमाणावधिदीर्घकालप्रयोगरूपरूढशब्दोक्तम्लेच्छ
णविलक्षणसाधुसादृश्यरूपात्मककारणद्वयजन्यया भ्रान्त्या
त्वेनार्वाचीनैर्गृहीतानामिदानीन्तनकाले प्रयोगः सम्भवती
गाव्यादिशब्दानामविवेकिलोकप्रसिद्धशब्दान्तरत्वमङ्गीकृत्य प्र
दर्शिता । परमार्थतस्तु तेषां गवादिशब्दापभ्रंशमात्रत्वेन शब्द
त्वाभावाद्विनाशनिवृत्तिमात्रं नियमफलमित्याह*अथ वेति*
श्चिद्विनीनशदित्येकवचनान्वयायाध्याहार्यं विनाशनिवृत्त्यर्थत्वं
मस्य दृष्टान्तपूर्वकमुपपादयति * तद्यथेति * तस्माद् ब्राह्म
प्रतिषेधस्तस्माद्वेषेति च त्रिविधिरविनष्टप्रयोगनियमार्थं इत्य
म्लेच्छतिधात्वर्थव्याख्यार्थत्वापभाषितत्वादिति महाभाष्यकृत
धात्वन्तरं दर्शितं विनाशनिवृत्त्यर्थत्वोपपादनाय दुष्टः शब्द इति
त्युपन्यासः । किं चिद्विनष्टस्यापि भग्नशृङ्गगोन्यायेन शब्दत्वा
यात्कथमपशब्दतेत्याशङ्क्य * प्रमादादिनिमित्तेन विनाशेनेत्याह
म् * अयमित्यनेनापशब्दत्वं परामृष्टम् । विनष्टस्यापि गव
शब्दस्य म्लेच्छैरप्रयोगात् किन्निमित्तो म्लेच्छशब्द इत्याशङ्क्य
तिप्रत्ययान्वाख्यानरूपव्यक्तवाभावेनाव्यक्तोच्चारणत्वनिमित्तता
रणेन सूचिता प्रत्यक्षविधिनिषेधोपन्यासेन नात्र साधुभिर्भाषि
साधुभिर्नेति विधिनिषेधौ कल्प्यौ येनोक्तदोषद्वयापत्तिः स्यादि
सूचितम् । ननु प्रमादादेरभावे विनाशस्याप्रसक्तेर्भावे वा परि
तुमशक्तेर्निषेधो न युक्त इत्याशङ्कते * नन्विति * विनाश
रणनिषेधद्वारेण विनाशनिषेधो भविष्यतीति परिहरति * उच्य
इति * अशक्तेः प्राग्भावरूपायाः स्वभावासिद्धत्वात् निषेधो न

य इत्याशङ्क्य * सामर्थ्यायेत्युक्तम् * प्रमादाशक्तभावेऽपि च
था प्रसक्तिः सम्भवतीत्यन्यथा परिहरति * अन्यइति * उपसं-
रति * तत्कथं नामेति * यत्किं चित्प्रमादाशक्तिरूपक्लेशो वा २ः
ाक्षिण्याद्यनुवर्त्तनं वाऽनभियुक्तसंव्यवहारो वापभ्रंशकारणं तत्प-
ःहारार्थमविनष्टशब्दप्रयोगविषयापन्नो नियम्यतइत्यर्थः।यच्च न चा-
ष्टार्थतापि तस्येत्यनेन दृष्टार्थत्वाच्छब्दप्रयोगस्यादृष्टार्थो * नियमो
युक्त इत्युक्तम् * तत्क्रियास्वरूपस्य नैराकाङ्क्ष्येऽपि तद्गतस्य
ायमस्यादृष्टार्थत्वं विनानर्थक्यापत्तेरयुक्तमित्यभिप्रायेणानुभाषण-
र्वकं परिहरति * यत्त्विति * ननु फलासिद्ध्यर्थत्वादपूर्वकल्पन-
ात्र तदभावान्नापूर्वकल्पना युक्तेत्याशङ्क्य क्रतूपकाररूपं पुरुषार्थ-
पं च फलं दर्शयितुमाह * क्रत्वर्थमिति * एतदेवोपपादयितुमे-
ास्य उभयत्वं संयोगपृथक्त्वमिति चातुर्थिकं सूत्रं साध्याहारमुप-
यस्यति *एकस्य त्विति* ननु,तत्रःदध्ना जुहोति दध्नेन्द्रियकामस्य जु-
यादिति वाक्यद्वयश्रवणात् तस्मात्स्वगुणानां च परार्थत्वादसंबन्धः
ामत्वात्स्यादित्यनेन न्यायेन परस्परासङ्गतेरेकेन विहितस्य दध्नो परेण
ालबोधायोगात्परस्परनिरपेक्षवाक्यद्वयेन युक्तोभयरूपता । नन्विह
थाविधं वाक्यद्वयं श्रूयतइत्याशङ्क्याह * तच्चेहेति * ब्राह्मणेन न
लेच्छितवाइति प्राकरणिकेन निषेधेनासाधुभाषणस्य क्रतुवैगुण्या-
ादकत्वावगतेरर्थात्साधुभाषणनियमस्य क्रत्वर्थतावसीयते । एकः
ाब्दः सम्यक्ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गे लोके कामधुग् भ-
तीति चानारभ्यवादेन शास्त्रशब्दस्य रूढ्या विद्यास्थानवाचित्वा-
सम्प्रदायपरतया व्याख्यानानुपपत्तेर्व्याकरणशास्त्रानुगतसाधुश-
दभाषणनियमस्य स्वर्गसाधनत्वावगतेः पुरुषार्थतावसीयतइत्यर्थः ।
ानु भाषणस्यार्थप्रतिपत्त्यर्थत्वेन जुह्वादिवत्पारार्थ्यादपापश्लोकश्रव-
ावत्स्वर्गे लोके कामधुगिति फलश्रुतेरर्थवादत्वात्पर्णमयीत्वनियमा-
दृष्टवत्साधुनियमादृष्टस्यापि पुरुषार्थता न युक्तेत्याशङ्क्याह * तत्रे-
त * यदि क्रत्वर्थस्य भाषणस्योपायनियमरूपफलश्रुतिरेषा स्यात्ततो
वेदर्थवादस्यानारभ्यविहितस्य तु भाषणस्य क्रत्वर्थत्वे प्रमाणाभा-
ाद् दृष्टार्थव्यवहारहेतुत्वेन शुद्धपुरुषार्थत्वावगतेस्तस्य च नियमं
वेनापि सिद्धेरदृष्टफलाकाङ्क्षिणि नियमे फलानिर्देशात्फलमेवाव-
सीयतइत्यर्थः एतदुपपादनार्थं फलमात्रेयो निर्देशादिति सूत्रोक्तं
वतुर्थन्यायं दर्शयितुम् * आत्रेयेत्युक्तम् * श्लोकं व्याचष्टे क्रत्व-
र्थे हीति * पुरुषार्थांशइत्यनवधारितक्रत्वर्थत्वमात्राभिप्रायेण नि-
यमस्य पुरुषार्थतोक्ता । अनेन च क्रत्वर्थस्यांश इति क्रत्वर्थशब्दे वि-

ग्रहः सूचितः । यच्च न चेदं नियमापूर्वमित्याश्रयासम्भ
* अपूर्वकल्पना न युक्तेत्युक्तम् * तदनुभाष्य परिहरति * य
ति * पूर्वार्धेन क्रत्वर्थशब्देन साधुभाषणनियमस्यानृतवदनव
वच्छुद्धक्रतुधर्मत्वाभिधानात्तस्य च क्रतुसंयुक्तपुरुषधर्मविषय
णासंयुक्तवाक्यविषयत्वायोगात्तस्मादेषा व्याकृता वागुद्यतद्द
वाक्येन या वागुद्यते साऽव्याकृतेति वाग्वदनानुवादेन व्याकर
गतत्वविधिप्रतीतिरनारभ्याधीतस्यापि चैषेति सर्वनाम्ना सन्नि
वैदिकवाग्वदनविषयत्वप्रतीतेर्लौकिकविषयत्वे च फलकल्पना
वापत्तेर्वैदिककर्माङ्गभूतव्रीह्यादिपदार्थव्यवहारार्थे लौकिकशब्दे
योक्तव्ये व्याकरणानुगतशब्दनियमात्तज्जन्यं यदवघातादिनिय
न्यापूर्ववत् शुद्धक्रत्वर्थमपूर्वं तदङ्गभूतेष्वेव व्रीह्यादिष्वाश्रितं,
न ब्राह्मणेन म्लेच्छितवाइति ज्योतिष्टोमप्रकरणाधीतापशब्दा
सामर्थ्यलभ्याद्यज्ञमध्यगतमुक्तभाषणविषयात्साधुशब्दनियमा
तज्जञ्जभ्यमानन्यायेनापशब्दवर्जनस्य क्रतुयुक्तपुरुषधर्मत्वावधा
क्रतुसाधनीभूतपुरुषाश्रितमित्यर्थः । क्रत्वङ्गभूतानामपि पदार्थ
मङ्गत्वरूपेण यदभिधानं तदर्थं तद्विषयं यन्न भवतीत्यनङ्गत्वा
नार्थमित्युक्तम् । अपूर्वहेतोर्नियमस्याभिधानविषयत्वमुपचा
पूर्वे ऽभिहितम् । यद्वाङ्गभूतस्यापि यस्यानङ्गत्वेन प्राप्तत्वेनाभि
यस्य स अनङ्गत्वाभिधानो यजमानः तदर्थमित्यर्थः । उत्तरार्द्धं
२३५।१ चष्टे *प्रकरणेति* ननु जञ्जभ्यमानाधिकरणन्यायेन क्रतुयुक्त
संस्कारत्वसिद्धावपि ऋत्विजामपि संस्कारोपपत्तेः कथं
मानसंस्कारत्वावधारणेत्याशङ्क्य न्यायान्तरमुक्तं शुद्ध
ङ्गधर्मत्वेन क्रतुयुक्तपुरुषधर्मत्वेन च क्रत्वर्थस्य साधुभाषणनि
पूर्वस्याश्रयमुक्त्वा पुरुषार्थस्याह * पुरुषार्थेति * पुरुषार्थवाक्ये
प्रयोक्राश्रितं साधुभाषणनियमापूर्वमित्यन्वयः । कथमित्यपेक्ष
सम्यगित्यनेन सन्निधिः प्रमाणत्वेनोक्तः ज्ञानपूर्वकस्य प्रयोगस्या
हेतुत्वसूचनाय ज्ञातृग्रहणम् । अपूर्वजनिकायाः साधुभाषणक्रि
या जन्यस्य च स्वर्गस्य फलस्य च तदाश्रितत्वात्तदधीननिरूपण
पूर्वस्यापि तदाश्रितत्वं युक्तमिति योग्यतोक्ता यथा प्रधानयाग
ध्यमादिशब्दोपात्तत्वमारादुपकारकाङ्गसाध्यमपूर्वं प्रयोगकर्त्रा
मनुष्ठात्राश्रितमिति दृष्टान्तार्थः । ननु वक्ता तु भाषणे सर्व
नेन ब्राह्मणेनेति तृतीयया सुप्रयुक्त इति चोक्तिक्रियाया वक्तृ
त्वावगमात्संस्कार्यत्वं निषिद्धमत आह * तृतीयेति * दृष्टान्तं
वृणोति * यथैवेति * यथा तृतीयानिर्दिष्टस्यापि शेषस्य भूतो

ोत्वाद्धविषु क्षारणेन प्रतिपात्तिरूपः संस्कारः शेषधारणार्थपात्रा-
तराप्रयोजकत्वाय चतुर्थे वक्ष्यते । तथेहापि ब्राह्मणस्य ज्योतिष्टोम-
ाध्यफलोपभोगलक्षणकार्योपयोगित्वाद्वपनादिनेव फलग्रहणायो-
ग्यतारूपः संस्कारो भविष्यतीत्यर्थः । यद्वा वर्जनीयाया म्लेच्छन-
क्रियाया वपनादिवदेव यजमानकर्तृकत्वे सिद्धे तृतीयायाः कर्तृवि-
ानार्थत्वायोगेनानुवादमात्रार्थत्वात्तस्य चान्यतः सिद्ध्यपेक्षत्वात्
ागकर्तृत्वस्यैव च प्रकरणसिद्धत्वात्तद्विषयत्वेनेयं तृतीयाङ्ग-
ाव प्रतिवक्तुर्गुणत्वं ब्रूते न म्लेच्छत्वं प्रतीत्याह * यदि चेति
* पुरुषार्थवाक्ये तु कामिपदादेव स्वर्गकामादिवत्प्राधान्यलाभ इ-
याह * कामधुगिति * गोदोहनादिवदधिकृताधिकारशङ्कानिवृत्त्य-
र्थो बहिःशब्दः पूर्वार्द्धं व्याचष्टे * नैवेति * कथं तर्हि म्लेच्छति-
ान्वय इत्याशङ्क्याह * कुर्वतेति * यागगुणत्वं च व्रीह्यादिवत्सं-
स्कार्यत्वस्यानुकूलमेवेत्याह * याग इति * यागोपयोगिना ब्राह्म-
णेन संयुक्तस्य म्लेच्छनस्यारादुपकारित्वायोगात्संस्कारत्वमेव युक्त-
मित्यर्थः । ननूपयोगित्वे ऽपि ब्राह्मणस्य व्रीह्यादिवत्प्राधान्यावेदक-
द्वितीयाद्यभावात्कथं प्राधान्यावगतिरित्याशङ्क्याह * तच्चेति * उ-
पयोगितैव शेषस्वीकारसामर्थ्यात्प्राधान्याक्षेपिकेत्याशयः । उत्तरार्द्धं
व्याचष्टे * बाह्येति * साधुशब्दप्रयोगस्य फलसाधनतैवावगम्य-
माना प्रयोक्तुः फलभाक्त्वमाक्षिपतीत्याशयः । अनेन चानप्रस्थपदं
चात्र विद्यतइति परिहृतम् । यच्च न वेदोच्चारणमुच्चारयितृर्थ-
मित्यनेनोच्चारणस्य पुरुषार्थापूर्वद्वारता न युक्तेत्युक्तं तत्परिहरति
* यद्यपि चेति * अन्यार्थाश्रितस्य निषेधस्यान्यार्थत्वे तदहर्मांसमै-
थुने वर्जयेदिति दर्शपूर्णमासप्रकरणाधीतं निषेधमुदाहरति * तथा
हीति * नियमस्यान्याश्रितस्यान्यार्थत्वे खादिरं वीर्यकामस्य यूपं
कुर्यादित्युदाहरणमाह * क्रत्वर्थादिति * ननु संयोगपृथक्त्वान्न
क्रत्वर्थत्वेनानुष्ठितस्य खादिरत्वस्य पुरुषार्थनियमाश्रयतास्तीत्याश-
ङ्क्योदाहरणान्तरमाह * भोजनाच्चेति * खादिरत्वरूपेणैक्यमभि-
प्रेत्य पूर्वोदाहरणं समर्थनीयमुपसंहरति * अतश्चेति * एवं चावे-
दमूलत्वादित्युपसंहारं दूषयति * अतश्चेति * यत्तु न चास्याः
शास्त्रता स्वयमित्युक्तं तदपि दूषयति * यच्चेति * नासन्नियमा-
दिति सूत्रोपन्यासेन कृतकत्वमशास्त्रत्वे हेतुरुक्त इत्यभिप्रेत्य * कृ-
त्रिमत्वेनेत्युक्तम् * प्रसिद्धिं दर्शयति * शास्त्रेति * यौगिकत्वे
ऽपि प्रसिद्धिमुपपादयति * अथापीति * किं च शब्दार्थस्य वृ-
द्धप्रयोगैकसमधिगम्यत्वेन तर्कविषयत्वाभावान्न तर्केण शास्त्रत्वबा-

रणं युक्तमिति प्रसङ्गापत्तेरित्याह *प्रसिद्धमपीति * श्लोकं व्या
* यथैव हीति * वेदातिरिक्तविद्यास्थानानां चाशास्त्रत्वमप्राम
वोच्यमानमङ्गीकृतप्रामाण्यवेदमूलत्वेन वार्येत वेदस्यैव त्वशा
त्वमप्रामाण्यं वोच्यमानं कथं वार्येतेति सोपहासं दृष्टान्तेन द
तुमाह * यो हीति * शुष्कं निष्ठुरं ननु पूर्वव्युत्पादितेनेष्टा
प्राप्तिपरिहारसाधनोपदेशकत्वेन परतः प्रामाण्याद्यप्रामाण्यका
निरासेन च वेदस्याप्रामाण्यं वारयिष्यत इत्याशङ्कानिराकरणं
यितुं मातापित्रोर्निष्ठुराभिधायिनोर्वारकान्तराभावे ऽपि तावेव
।३७।१ रकौ भविष्यत इत्याशङ्कां निरस्यति * परत्रेति * वेदवदितर
व्याख्यानानामपि प्रामाण्यस्य व्युत्पादितत्वान्न तदनादरेणेदं प्र
ख्यानम् । तदवस्थितन्यायानादरे कश्चित्प्रतीकार इत्याशयः । दृष्टा
सूचितमर्थं प्रकटयति * तथेति *व्याकरणस्य वेदाङ्गत्वाद्धर्मशा
दिभ्यो ऽतिशयं सूचयितुं * साङ्गेनेत्युक्तम् * ननु व्याकरण
स्याप्रामाण्यं मयोच्यते न वेदस्य तेनायं वृथोपहास इत्याश
* करुद्ध इति * न चाङ्गीकृतेतरविद्यास्थानप्रामाण्यो व्याकर
णस्याप्रामाण्यं वक्तुमर्हत्यविशेषादित्याह * श्रुतीति * यच्च
स्मृत्यन्तरं किं चिदित्यनेन स्मृत्यन्तरसंवादाभावाद्व्याकरणाप्र
ण्यमुक्तं तदनुभाषणपूर्वकं परिहरति *यत्त्विति* ननु वर्णाश्रमध
देशित्वाभावे व्याकरणस्य स्मृतित्वाभावान्न तन्न्यायेन प्रा
स्यादित्याशङ्क्याह * स्मृतित्वं त्विति * पूर्वानुभवप
न्यनिमित्तस्मृतिशब्दो न वर्णाश्रमधर्मोपदेशित्वनिमित्त
शयः । स्मृतित्वाभावे ऽपि वा तत्तुल्यत्वस्मरणशास्त्रत्व
ण्ययोः सिद्धिरित्याह * अथापीति * न्यायतुल्यत्व
तत्सिद्धिरित्याह * अपि चेति * न च मूलासम्भवात्स्मृति
याभावः मूलस्योपपादितत्वादित्याह * प्रमाणेति * दृष्टार्थ
यनफलत्वरूपेण सर्वप्रमाणमूलत्वम् । अदृष्टफलत्वरूपेण तु शा
लतेति विवेकः । मूलप्रमाणसम्भवे च व्याकरणान्तरमूलतापि
२३८।१ ष्यतीत्याह *एकस्य चेति* ननु पुंवाक्यमूलत्वे ऽन्धपरम्परा
स्यादित्याशङ्क्याह * असम्भावितेति * यच्च परस्परेण चान्या
त्यादिना ऽन्योन्यविगानादप्रामाण्यमुक्तं तदप्यनुभाष्य परिह
* यत्त्विति * श्रुतीनां च विगीतत्वे तन्मूलश्रुतीनामविगान
प्रामाण्यमापादयेदित्याह * विगीतेति * न चान्योन्यस
प्रामाण्यकारणं येन तदभावादप्रामाण्यं स्यादित्याह *
ति * उपसंहरति * परस्परेति * सिद्धे वस्तुनि वि

गाद्यथासम्भवविषयं विकल्पाभिधानं न सर्वविगीतव्याकरणस्मु-
विषयं विगानं च धर्माधर्मसाधनत्वविषयं वा स्यादन्वाख्यान-
षयं वा सूत्रप्रत्याख्यानसमाधानरूपं वा इष्ट्युपसंख्यानावापरूपं
त्र सूत्रकृतो ऽपि प्रयोजनाभावाभिप्रायाभावमभिप्रेत्य धर्माधर्मसा-
नत्वे तावद्विगानं नास्तीत्याह * धर्मेति * यत्तु

सम्बोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम्।
माध्यन्दिनिर्वष्टि गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः॥

इत्याद्यन्वाख्यानविगानं तत्र ब्रूमः यदात्मानः सर्वेष्वेतेषु भिद्य-
इति तद्भूताधिकरणोक्तेन न्यायेन लक्ष्याणां सान्तनान्तादिश-
नां भेदादविरुद्धमित्याह * अन्वाख्यानेति * सूत्रप्रत्याख्या-
समाधानयोश्च तर्कमूलत्वात्तस्य चोच्चावचपुरुषबुद्धिप्रभवत्वेनाने-
त्वरूपत्वोपपत्तेर्न व्याकरणाप्रामाण्यापादकतेत्याह * पुनरुक्त-
णादिना हीति * हिशब्दो ऽप्यर्थे वैदिकत्वाच्च मूलत्वे तस्यैकरूप-
नानेकरूपप्रत्याख्यानाद्यनुपपत्तिः स्याञ्च त्वेतदस्तीत्यर्थः। इष्टुप-
संख्यानयोरपि व्याकरणान्तरमूलत्वादधिकोपसंख्यानस्य च मू-
ोपसंख्यानाप्रामाण्यप्रसञ्जकत्वाच्च व्याकरणाप्रामाण्यापादकते-
याह * ये चापीति * अल्पविषयत्वमात्रस्याप्रामाण्यकारणत्वाभावं
ष्टान्तेनोपपादयति * तद्यथेति * ननु सूत्रकारस्य प्रयोजनानभि-
ानात्तदभावाभिप्रायावगतेर्वार्त्तिककारादिभिश्च प्रयोजनाभिधाना-
द्गानमुक्तं तस्य कः परिहार इत्याशङ्क्यान्यानुभाषणपूर्वकं परिहा-
माह * यास्त्विति * वार्त्तिककृता शास्त्रेण धर्मनियम इति वदता
ाधुशब्दप्रयोगद्वारा धर्मसिद्धिः परं प्रयोजनमुक्तं भाष्यकृता चा-
। शब्दानुशासनमितिवदता साधुशब्दज्ञानं साक्षात्प्रयोजनमुक्तं तत्र
स्तावद्वार्त्तिककारोक्तप्रयोजनानभिधाननिमित्तः सूत्रकारस्योपा-
म्भः कृतः स चोपालम्भनत्वस्यानर्हो समर्थः श्रुतिस्मृतिसिद्ध-
वनिबन्धनत्वात्प्रयोजनानभिधानस्य भाष्यकारोक्तस्य च लक्षण-
वणानन्तरमेव स्वसंवेद्यत्वेन सुज्ञानत्वादित्यर्थः। एकैकसूत्रेण
ाब्दाज्ञानात् * ग्रन्थान्तरइत्युक्तम् * धर्मसिद्धेः श्रुतिस्मृतिसिद्धत्वं २
वेवृणोति * सत्येति * कामधुगादिश्रुतेर्वर्त्तमानापदेशत्वेन फलप-
त्वस्य दुर्ज्ञानत्वात्साधुशब्दप्रयोगविधिपरत्वेनानभिमतापि सत्यव-
वनविषया श्रुतिः स्मृतिश्चोपरिक्षिप्ता। ननु सत्यशब्दस्य लोक-
वेदयोरर्थविषयत्वाप्रसिद्धेः शब्दविषयता न युक्तेत्याशङ्क्य प्रौढिवा-
देन पूर्वोक्तमेवोभयविषयत्वं स्मारयति * सत्यं चेति * नानृतं
वदेदित्यभिधानार्थत्वाद्वदतेरर्थाभिधानकालएवासाधुभाषणं प्रत्य-

वायहेतुर्नान्यदेति विनियोगकालविशेषणेनोक्तम् । साधुशब्दज्ञा
स्यानुभवसिद्धत्वं विवृणोति * शब्दसाधुत्वेति * उपसंहरति
तस्मादिति * शास्त्रेण सर्वशब्दान्वाख्यानस्य प्रयोजनं यत्स्व
सूत्रकृता नोक्तं तद्विज्ञायमानत्वाज्ज्ञाभावाभिप्रायादित्यर्थः । नित
सापेक्षत्वेनान्वाख्यानशब्दस्य समासाविघातः । यच्च सुज्ञानत
निरासाय सुज्ञानत्वं पुनरीदृशं येनाद्यापि विवदन्तइत्युक्तं तदसि
द्धमित्याह * न चेति * ननु मुख्यामुख्यप्रयोजनासम्भवेन निष
योजनत्वस्य पूर्वपक्षे ऽभिधानादू विवादो ऽस्त्येवेत्याशङ्क्याह * स
व त्विति * प्रयोजनप्रस्तावे तीर्थिकान्तरविप्रतिपत्तावपि सूत्रक
राभिप्रेतत्वे विप्रतिपत्त्यभावान्न सूत्रकारस्य स्वतीर्थिकैः सह विर
तवचनत्वं भवतीत्याशयः । यच्च धर्म्मश्च फलसम्बन्धमित्यनेन धर्म
स्य वार्त्तिककृता प्रयोजनत्वेनोक्तस्य व्याकरणे ऽनुपदेशान्निष्प्रयो
नत्वं व्याकरणस्योक्तं तत्परिहरति * धर्म्मायेति * नियमः प्र
जनत्वेनोक्तो न धर्म्मस्वरूपमित्यर्थः । ननु नियमो ऽपि धर्मार्थं स
धुशब्दा एव प्रयोक्तव्यास्त एव वा श्रेयःसाधनमित्येवं रूपो न व्या
रणेन क्रियतइत्याशङ्क्याह * वेदेति * एत एव साधव इत्येवं रू
नियमो व्याकरणाधीन इत्यर्थः । नन्वाचारे नियम इत्यादिवार्त्ति
पर्यालोचनया प्रयोगनियमो ऽत्र विवक्षितो गम्यते न स्वरूपनि
इत्याशङ्क्याह * नियमेति * प्रयोगनियमनिरपेक्षस्य स्वरूपनि
मस्यानर्थक्यात्तन्निरपेक्षस्य चेतरस्य सिद्धेर्नियमद्वयमपि व्याक
णस्य प्रयोजनमित्यर्थः । तत्राद्यो वेदासिद्धत्वान्न व्याकरणेन क्रि
इत्याह * साध्विति * तदा च शास्त्रेण धर्म्मनियम इति वा
ककृतः शास्त्रशब्दो वेदविषयतया व्याख्येय इत्याह * अतश्चेति
इतरस्तु व्याकरणाख्येन शास्त्रेण क्रियतइत्याह * तथेति * धर
शब्दश्चास्मिन्पक्षे श्रेयःसाधनत्वात्साधुशब्दप्रयोगविषय इत
* तेनेति * येन कारणेन व्याकरणाद्विना साधुस्वरूपनियमं
सिध्यति तेन वेदावगतः सम्यग्ज्ञातस्य साधोः शब्दस्य प्रयोगा
को यो धर्म्मस्तदर्थत्वेनायमेव नित्यो वाचकः शब्द इति नियत
रूपज्ञानं क्रियतइत्यर्थः । नियमे कारणीभूतस्य शास्त्रस्येतिकर्त्त
पेक्षायां व्याकरणगता प्रकृतिप्रत्ययान्वाख्यानप्रक्रियेतिकर्त्तव्यता
यद्वा व्याकरणेन स्वरूपनियमः किमर्थं क्रियते का वेतिकर्त्तव्य
त्यपेक्षायामियं फक्किकावतारणीया तदा च तेन व्याकरणेनेत्यर्
यदपि धर्म्मत्वं यच्च विज्ञानशास्त्रपूर्वप्रयोगयोरित्यादिना ऽनवस्थि
शास्त्रार्थाभिधानं व्यवस्थिताभिप्रायत्वे च भाष्यवार्त्तिकयोर्वि

मुक्तं तदप्यनुभाषणपूर्वकं परिहरति * यच्चेति * यच्च ज्ञाने धर्म्म इति चेदिति वार्त्तिकेन शब्दसाधुज्ञानस्य धर्म्मत्वपक्षमुपन्यस्य तथाधर्म्म इत्यनेन दोषमभिधाय शास्त्रेत्यनेन शास्त्रपूर्वस्य प्रयोगस्य श्रेयःसिद्ध्युपायत्वे कात्यायनेनावधारिते भाष्यकारेण तदेव व्याख्याय पुनः परावृत्य अथ वा पुनरस्तु ज्ञाने धर्म्म इति यदुक्तं तदभ्युपेत्य वादमात्रमुक्तमित्यन्वयः। विगानावस्थिताभिधानयोरप्यनुवादद्योतनार्थं यच्च यत्पुनरिति यच्छब्दद्वयं को दोष इत्यपेक्षायामपशब्दानामपि ज्ञानादधर्मापत्तेर्दोष इति द्वेषेण वार्त्तिकव्याख्योक्ता यथा व्याकरणाच्छब्दज्ञानं भवत्येवमपशब्दज्ञानमपीत्यपिशब्दो योज्यः अधर्म्मत्वापत्तिरिति च शब्दार्थं न विद्मः। शब्दानुशासनार्थाद्व्याकरणात्कथमपशब्दज्ञानमित्याशङ्क्य साध्वसाधुविवेकार्थत्वे व्याकरणस्य तन्त्रेण साध्वनुशासनमात्रार्थत्वे * प्रसङ्गेनेत्युक्तम् * किमर्थो ऽभ्युपेत्यवाद इत्यपेक्षायाम् * पूर्वोक्तेत्युक्तम् * अत्र भाष्यकृता नैष दोषः शास्त्रप्रमाणका वयं यच्छब्द आह तदस्माकं प्रमाणं शब्दश्च शब्दज्ञाने धर्म्ममाह नापशब्दज्ञाने अधर्म्मं यच्च पुनरशिष्टाप्रतिषिद्धत्वान्नैव दोषाय भवति नाभ्युदयाय तद्यथा हिक्कितहसितकण्डूयितानि नैव दोषाय भवन्ति नाभ्युदयायेति भाष्येणापशब्दज्ञानस्यानिषिद्धत्वान्न म्लेच्छाभाषां शिक्षेतेति निषेधस्य बर्बरादिभाषाविषयत्वान्नाधर्म्मापत्तिरित्येकं परिहारमुक्त्वा ऽथ वा ऽभ्युपाय एवापशब्दज्ञानस्येत्यादिभाष्येणासङ्कीर्णशब्दज्ञानस्य प्रतियोग्यपशब्दज्ञानस्येत्यादिभाष्येणासङ्कीर्णशब्दज्ञानस्य प्रतियोग्यपशब्दज्ञानाधीनत्वात् धर्मसाधनतैवेति परिहारान्तरमुक्त्वा ऽथ वा कूपखानकवदेतद्भविष्यतीति तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति सो ऽप्सु सञ्जातासु तत एव तद्गुणमासादयति येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन युज्यते एवमिहापि यद्यप्यपशब्दज्ञाने ऽधर्म्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्म्मस्तेन स च दोषो निर्घानिष्यते भूयसा चाभ्युदयेन योगो भविष्यतीति भाष्येणोत्पन्नस्याप्यधर्म्मस्य साधुशब्दज्ञानजनितधर्म्मेण निर्घातादृदोष इति तृतीयपरिहाराभिधानात् पूर्वोक्तस्य दोषस्य परिहारत्रयसामर्थ्यप्रदर्शनार्थं च ज्ञायत इत्यर्थः। ननु परमार्थत. शब्दज्ञानस्य धर्म्महेतुत्वाभावात्परिहारत्रयमप्येतदनर्थकमित्याशङ्क्य * कृत्वा चिन्तान्यायेनेत्युक्तम् * नन्वयमपि पक्षो ऽभिमतः कस्मान्न भवतीत्याशङ्क्याह * परमार्थतस्त्विति * ज्ञानमात्रस्य श्रेयोहेतुत्वे तत्पूर्वकस्य प्रयोगस्यानर्थक्यप्रसङ्गेन ज्ञानस्य च स्वभावतो विज्ञानेन पारार्थ्येना-

पादितमर्थवादत्वं यस्याः फलश्रुतेः सा तथोक्ता अर्थवादत्वादिति
पाठे त्वापादितार्थवादत्वादिति कर्म्मधारयः । सदृष्टान्तमन्यानर्थ
क्यप्रसङ्गमुपपादयति * यथेति * किं तर्ह्यालम्बनं फलश्रुतेरित्या
शङ्कां निराकुर्वन् प्रकृतमुपसंहरति * तस्मादिति * देवो ऽत्र वर्षति
तण्डुलानित्यत्र यथावर्षणसाध्यस्य निष्पत्त्यादिकार्यपरम्परागततण्डु
लफलत्वं वृष्टावुपचर्यते तथात्रापि प्रयोगफलं तत्कारणे ज्ञानइत्य
र्थः । ननु सम्यग्ज्ञात इति प्रथमश्रुतत्वेन ज्ञानस्यैव फलवत् प्रतिप
त्तेः सुप्रयुक्तपदस्य च सुष्ठु प्रयोगार्हो यथा सम्यग्ज्ञात इत्येवं सम्य
क्त्वाव्याख्यानार्थत्वेनाप्युपपत्तेः फलपरत्वाभावादानर्थक्यप्रसङ्ग
नास्तीत्याशङ्क्य कारणान्तरमुपन्यस्तं विवृणोति * द्रव्येति * द्र
व्यादित्रयाविषयाया एव फलश्रुतेः पारार्थ्यहेतुकार्थवादत्वाभिधाना
च्छब्दज्ञानस्य क्वान्तर्गतिः संस्कारान्तर्गतावपि कस्य संस्कार इ
त्याशङ्काद्वयं निराकर्त्तुं ज्ञातुः पुरुषस्य ज्ञेयस्य वा * शब्दस्य संस्का
र इत्युक्तम् * शब्दज्ञानस्य संस्कारत्वं पारार्थ्यं चोपपादयितुमाह
* सर्वत्रैव हीति * संस्कारस्यापि चूडाकरणाधानादेः संस्कार्यसा
ध्यकर्मार्थत्वाभावात्तेन च विना फलश्रुतेरर्थवादत्वाभावात् * प
राङ्गं चेत्युक्तम् * पुरुषार्थस्यात्मज्ञानस्य पराङ्गत्वाभावात् * तते
ऽन्यत्रेत्युक्तम् * इतिकरणः संस्कारत्वपारार्थ्यत्वभावत्वपरामर्शा
र्थः संस्कारत्वपारार्थ्यत्वभाव्यावधारणाद्यस्मात्सर्वत्र ज्ञानं संस्का
रत्वेन पराङ्गत्वेनावगम्यते तस्माच्छब्दज्ञानमपि तथेति हिशब्दो
योज्यः । ननु सम्बन्धग्रन्थे कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यतइ
त्यत्रादर्थवादाधिकरणे च क्रत्वर्थकर्तृप्रतिपादनेनोपनिषदान्नैराका
ङ्क्ष्यमित्यत्रात्मज्ञानस्य क्रत्वर्थाभिधानात् किमित्यत्र वर्जनमि
त्याशङ्क्याह * आत्मज्ञानं हीति * अविनाशी वा अरे अयमात्मा
ऽनुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवतीति मात्राशब्देन भूतेन्द्रि-
यधर्माभिधानात् शरीरादिव्यतिरिक्तसंसारीकर्तृभोक्तृनित्यात्मप्रति-
पादनपूर्वकस्यात्मा वा अरे द्रष्टव्य इत्यात्मज्ञानविधेः कैमर्थ्याकाङ्क्षायां
फलश्रुतेर्दृष्टसम्भवे चादृष्टकल्पनानुपपत्तेर्योग्यतया कर्मप्रवृत्तिसि-
द्ध्यर्थत्वावसायादनारभ्याधीतस्यापि च यदेव विद्यया करोति श्रद्ध-
योपनिषदा तदेव वीर्यवत्तरं भवतीति श्रुत्योपनिषच्छब्दवाच्यस्या-
त्मविज्ञानस्य क्रत्वर्थत्वं युक्तम् । अत एवात्मा ज्ञातव्य इत्येतन्मोक्षा-
र्थं, न च चोदितमित्येतच्छब्दप्रयोगेण संसारिरूपात्मज्ञानस्यैव मो-
क्षार्थत्वनिरासेन कर्मप्रवृत्तिहेतुतोक्ता असंसारिरूपात्मज्ञानस्य तु
कर्म्मप्रवृत्त्यर्थत्वायोगात्पुरुषार्थतैव युक्तेत्याशयः । नन्वात्मनो लो-

कवेदसाधारण्येन क्रत्वव्यभिचाराभावात्कथं तज्ज्ञानस्य क्रत्वर्थ-
वावसाय इत्याशङ्क्याह * तेन विनेति * अयमाशयः लौकिक-
र्माङ्गत्वव्यावृत्त्यर्थं क्रत्वव्यभिचारोद्धारस्याकाङ्क्षत्वेनादृष्टार्थं लौ-
ककर्मप्रवृत्तेश्च शरीरादिव्यतिरिक्तनित्यात्मज्ञानं विनापि सिद्धेः
ाकाङ्क्षान्वयसम्भवे च निराकाङ्क्षान्वयायोगाल्लौकिककर्माङ्ग-
त्वव्यावृत्तिरैकान्तिकद्वाराभावे ऽपि सिध्यति अत एव परलोकफ-
कर्मविध्यन्यथानुपपत्त्या सामान्यसम्बन्धस्य क्लृप्तत्वाल्लौकिक-
ानियोगाविरोधः यद्वोपकारकत्वमात्राभिप्रायको ऽर्थवादः। अत
व निषिद्धकर्मनिवृत्त्यर्थत्वसूचनार्थो निवृत्तिशब्दो घटते निषिद्धक-
ङ्गत्वे त्वात्मज्ञानस्यानात्मज्ञेन कृतं ब्रह्महत्यादिकं वैगुण्यान्न प्रत्य-
ायं जनयेत् इति इह तु पुरुषार्थत्वं कर्तृत्वभोक्तृत्वादिसंसारिरू-
ात्मज्ञानस्योच्यते तस्य च क्रत्वर्थत्वायोगादाकाङ्क्षावशेनार्थवादि-
फलकल्पना युक्तैवेति दर्शयितुमाह * तथेति * पापजरामृत्यु-
ोकक्षुत्पिपासाराहित्यकाम्यमानफलप्राप्तिप्रयत्नानपेक्षसङ्कल्पमा-
ाधीनसिद्धिरूपगुणविशिष्टात्मप्रतिपादनपूर्विकया ऽन्वेष्टव्यः स
ाजिज्ञासितव्य इति श्रुत्या वेदान्तवाक्यार्थविचारणात्मकजिज्ञा-
ासहितस्य तदवधारितात्मरूपार्थानुचिन्तनाख्यान्वेषणात्मकस्या-
हतपाप्मत्वादिगुणविशिष्टात्मज्ञानस्य विधानं, यश्च मन्तव्यो बोद्धव्य
ते श्रुत्या न्यायविमर्शनात्मकमननसहितस्य तन्निर्द्धारितात्मरूपसा-
ात्काराख्यबोधात्मकस्य सगुणात्मज्ञानस्यैव विधानं यद्यात्मानमु-
सीतेति श्रुत्या केवलनिर्गुणात्मविषयावबोधपर्यन्तस्य स्पष्टस्याप-
क्षरूपस्यात्मतत्त्वज्ञानस्य विधानं तदपेक्षितस्य वाक्यान्तरोपात्तस्य
विधस्याभ्युदयरूपस्य निश्रेयसरूपस्य च फलस्य सम्बन्धः काम-
दलोकवादवचनविशेषैर्ज्ञायतइत्येवं क्रत्वर्थं पुरुषार्थत्वेन ज्ञायत-
ेतत्फक्किकागतपदानुषङ्गेण योज्यं श्रुतिभेदज्ञापनार्थः पुनस्तथाश-
ः। सगुणात्मज्ञानविध्यपेक्षिताभ्युदयरूपफलं सम्बन्धज्ञापकं का-
ादं तावदुदाहरति * स सर्वांश्चेति * लोकावाप्तेः कामोपभो-
र्थत्वेनैकवाक्यत्वायाभिधानात्कामवादो ऽयमभिप्रेतः तद्विषयमेव
कवादमुदाहरति * तथेति * पितृलोकेन मातृलोकेन भ्रातृ- २४
केन स्वसृलोकेन सखिलोकेन गन्धमाल्यलोकेन यानलोकेन
ीतवादित्रलोकेन स्त्रीलोकेन सम्पन्नो महीयतइति जनका-
भिः सुखसाधनयोग्यत्वेन लोकशब्दवाच्यैः सम्पत्त्यभिधाना-
लोकवादो ऽयमभिप्रेतः एतच्च जनकादिसम्पत्तिव-
ं यं कामं कामयते सो ऽस्य सङ्कल्पादेव समुत्तिष्ठतीत्युप-

संहारादष्टगुणैश्वर्यसिद्ध्यभिप्रायं न स्वर्गकामादिश्रुतिवन्नि
लपरमिति दर्शयितुम् * योगजन्येत्युक्तम् * योगबलात्परमा
तिसूक्ष्मता पर्वतवन्महत्त्वं सूर्यरश्म्यवलम्बनादिरूपं लाघवं
चन्द्रस्पर्शादिरूपप्राप्तिः । अप्स्विव भूमावुन्मज्जनमित्यादी
नभिघातः । प्राकाम्यं भूतभौतिकाज्ञापयितृत्वरूपमीशित्वम् ।
भौतिकानां तदाज्ञप्ताचरणं वशित्वं अनाज्ञप्तानामेव तदिच्छानु
वृत्तित्वं कामावसायितेत्यष्टौ गुणाः अणिमा महिमा लघिमा
प्राकाम्यमित्यपि ईशित्वं च वशित्वं च यत्र कामावसा
स्मृताः सगुणात्मज्ञानफलप्रतिपादकं कामवादं लोकवादं चोव
निर्गुणात्मज्ञानविध्यपेक्षितानिश्रेयसरूपफलप्रतिपादकं वचनवि
मुदाहरति * तथेति * लोकात्मकब्रह्मप्राप्तिरूपस्य फलस्याक्षय
भिधानाद्वचनविशेषोऽयमभिप्रेत इत्यपुनरावृत्त्यात्मकपरमात्मप्र
वसायस्य फलस्य वचनमित्यनेन सूचितं स्थानविशेषात्मकलो
प्तेर्जन्यत्वेनाक्षयत्वानुपपत्तिमाशङ्क्य परमात्मैव ब्रह्मशब्दवाच्य
रमानन्दोपभोगे हेतुत्वात्कर्म्मधारयसमासाश्रयणेन लोके विव
तत्प्राप्तेश्च शरीरसम्बन्धोपाधिककर्तृभोक्तृत्वात्मकसंसारिरूपा
परित्यागेनाकर्तृभोक्तृत्वात्मकासंसारिरूपनिजावस्थात्मकत्वेना
त्वाद्युक्तमक्षयत्वमिति सूचयितुम् * परमात्मेत्युक्तम् * अ
धिकरूपाभिप्रायः परमशब्दः पूर्वकृताशेषबन्धहेतुकर्म्मक्षयाद्वा
सारिरूपप्राप्तौ कर्तृत्वाभावेन कर्म्मान्तरानुपपत्तेः पुनर्भवास
नापुनरावृत्तेः प्राप्ताया अनुवादात्तत् फलं तदक्षयत्वरूपार्थद्व
धाननिमित्तवाक्यभेदापत्तिरिति सूचयितुमपुनरावृत्तेर्ब्रह्मप्राप्ति
निरासायापुनरावृत्त्यात्मकतोक्ता कामवादलोकवचनविशेषजिज्ञ
मनःसहितेति पाठेत्वेवं व्याचक्षते कामः सत्यकामत्वं वादः सत्य
लोकः सूर्यमण्डलाद्युपासनस्थानं वचनविशेष उपदेष्टृत्वं कामा
मनःपर्यन्तैः सहितस्यात्मनो ज्ञानमित्यवान्तरसमासार्थः।केन वा
न्तरेणाभ्युदयरूपं फलमुपात्तमित्यपेक्षायां वाक्यद्वयमुदाहृतं ।
यसरूपं केनोपात्तमित्यपेक्षायां स ब्रह्मोपासको यावदायुषमेवं
वृत्तिमाचरन् कुर्वँल्लोकात्मकं ब्रह्माभिसम्पद्यतइतिवाक्यमुदाहृत
न्वासां फलश्रुतीनां पर्णमयीन्यायेनार्थवादत्वस्य सम्बन्धग्रन्थे
हितत्वान्न फलसमर्पकत्वं युक्तमित्याशङ्क्याह * अप्रकरणगतो
अयमाशयः पारार्थ्ये निर्ज्ञाते फलश्रुतेरर्थवादत्वं भवति
रणाच्च यदङ्क्ते वज्र एव भ्रातृव्यस्य अङ्क्तइत्यञ्जनस्य पारार्थ्यं नि
तं यस्य खादिरः स्रुवो भवति छन्दसामेव रसेनावद्यतीति च

स्वर्थेऽव्यभिचारित्सुवादिद्वारा खादिरत्वादेः। न चात्मज्ञानं प्रकरणागतं, न चात्मनो द्वारभूतस्यैकान्तिकः स्वाभाविकः क्रतुसम्बन्धोऽस्ति शरीरसम्बन्धोपाधिकत्वात्कर्तृत्वस्याशरीरिरूपात्मज्ञाने तदभावादिति। न च संसारिरूपात्मज्ञानस्य मोक्षसाधनत्वे तस्मिन्सति कर्मसु प्रवृत्त्ययोगाद्यद् बृहट्टीकायां ननु निःश्रेयसज्ञानात् बन्धहेतोर्न कर्म्मण इत्याशङ्क्य नैकस्मादपि तत् किं तु * ज्ञानकर्मसमुच्चयादित्युक्तम् * तद्विरुद्धमित्याशङ्क्याह * न चेति * सत्यपि ज्ञाने नित्यनैमित्तिककर्म्मानुष्ठानं विना पूर्वकृतदुरितक्षयायोगादकरणनिमित्तानागतप्रत्यवायपरिहारायोगाच्च तत्फलोपभोगार्थं बन्धप्रसक्तेर्मोक्षायोगात्कर्मनाशार्थत्वेन च(ज्ञानविध्यनुपलब्धेर्ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते ऽर्जुनेत्यादिस्मृतेश्चौपचारिकत्वेनोपपत्तेः सम्बन्धग्रन्थे ज्ञानस्य कर्मनाशकत्वनिषेधाच्च) ज्ञानस्य मोक्षसाधनतया विधानेन कर्मणो मोक्षसम्बन्धो वार्यते। न चासंसारिरूपात्मज्ञानपरिपाकात् प्राक्कर्तृभोक्तृत्वाभिमानानिवृत्तौ कर्मसु प्रवृत्त्यनुपपत्तिरिति विधानशब्देन सूचितम्। परिपक्वेन ज्ञानेनात्मनः कर्म्मसम्बन्धः कर्तृत्वं वार्यते विधानावस्थायाङ्कर्तृत्वाभिमानानिवृत्तौ नियोज्यत्वासम्भवाद्विधानानुपपत्तिरित्याशयः। एतदेव विवृणोति * प्रत्याश्रमेति * नन्वेवमपि।

मोक्षार्थी न प्रवर्त्तेत तत्र काम्यनिषिद्धयोः।
नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया॥

इत्यनेन न्यायेन काम्यनिषिद्धवर्जनात्तत्फलोपभोगार्थं शरीरानुत्पत्तेर्नित्यनैमित्तिकानुष्ठानाच्च तदकरणनिमित्तप्रत्यवायफलोपभोगार्थं शरीरानुत्पत्तेर्ज्ञानवाक्यानां चौपचारिकव्याख्यानोपपत्तेः कर्म्मणा ज्ञानं बाध्यतां तुल्यबलत्वाद्वा विकल्पोऽस्तु, विरोधपरिहाराय चाङ्गाङ्गीभावः कल्प्यतां न तु निरपेक्षविहितयोः समुच्चयो युक्त इत्याशङ्क्याह * न चेति * अयमाशयः अवान्तरकार्यैक्ये सति बाधो विकल्पो वा स्यादिह तु कर्म्मणां पूर्वकृतपापनाशावश्यविहिताकरणनिमित्तपापपरिहारप्रयोजनत्वान्निर्गुणात्मज्ञानस्य च तत्त्वप्रकाशनप्रयोजनत्वान्नावान्तरकार्यैक्यमस्ति। न च बन्धहेतुकर्म्मक्षयान्मोक्षसिद्धेस्तत्त्वप्रकाशनानर्थक्यं शङ्क्यं सत्यपि पूर्वकृतकर्मक्षये कर्तृत्वभोक्तृत्वाभिमानानिवृत्तौ निर्व्यापारत्वानुपपत्तेरवश्यं कस्य चिद्बन्धहेतोः कर्म्मणः प्रसङ्गात्तं निवृत्त्यर्थं कर्तृत्वभोक्तृत्वाभिमानिवृत्तेरपेक्षितायास्तत्त्वप्रकाशनं विनानुपपत्तेः। एतदेवाभिप्रेत्य बृ-

१ श्रयं पा० २ पु० ना०।

हट्टीकायामुक्तम् ।

नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयन् ॥
वैराग्यात्पक्वविज्ञानः कैवल्यं भजते नरः ।

इति अतो ऽवान्तरकार्यभेदान्न तावद् बाधविकल्पौ जीवानादि त्ववतश्च कर्मस्वधिकारान्मुमुक्षोश्च ज्ञानाधिकारादधिकारिभेद णाद्भिन्नमार्गत्वान्नाङ्गाङ्गीभावः सम्भवतीति पारिशेष्यात्समुच्च युक्त इति। नन्वात्मज्ञानवच्छब्दज्ञानस्यापि फलसम्बन्धः कस्मा अत आह ॥ शब्देति ॥ यच्चादिमत्त्वाच्च धर्मत्वं नैतज्ज्ञान गयोरित्यनेनादिमद्व्याकरणाधीनस्य ज्ञानस्य तत्पूर्वकस्य वा प्र स्यानादिना वेदेन फलसाधनत्वं वक्तुं न शक्यमित्युक्तं तदप्य षणपूर्वकं परिहरति ॥ यद्यपीति ॥ व्याकरणपरम्परानादित्वं वा दिवेदविषयत्वान्यथानुपपत्त्या कर्तृस्मृत्या च पौरुषेयत्वावगं सीयतइत्याह ॥ तस्मादिति ॥ यत्तु व्याकृता सम्प्रदायेन नित्यैव वैदिकीत्युक्तं तन्निराकरोति ॥ न चेति ॥ वैदिक्या ह्युच्चारणार्थत्वाव्यवच्छेदायोद्यतइत्येतावदुक्तव्यम् । अव्याकृत प्रसक्तेस्तु व्याकृत्वोक्तिर्निष्फला स्यादित्यर्थः ।

अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च ।
श्रोत्रियाश्च यजानाश्च विज्ञेयाः पङ्क्तिपावनाः ॥

इति च मनुप्रोक्तवेदत्वस्य पूर्वोक्तत्वाद्यश्च मीमांसते ऽध्व ति च यज्ञमीमांसनस्य पश्चादुक्तत्वाद्यश्च व्याकुरुते वाचमिति करणस्य पङ्क्तिपावनत्वापादकत्वाभिधानं प्रकृतिप्रत्ययान्वाख्य रूपव्याकरणविषयं न तु स्वरवर्णमात्रा कर्माविप्लुतिरूपवैदिकः व्याकरणविषयम् । नाप्युद्दिश्यमानोपादीयमानगुणप्रधानादि वचनव्यक्तिव्याकरणविषयमित्यवधारणात्तस्य च वेदपूर्वत्व त्वानित्यसंयोगपरिहाराय नित्यत्वं व्याकरणस्याध्यवसीयतइ ॥ यदपि चेति ॥ तदशक्तिश्चानुरूपत्वादिति सूत्रं भाष्यकृता यदुक्तमित्यादिभाष्येण गाव्यादिशब्दस्य शक्त्या विना कथम तिपादकतेति शङ्कानिराकरणार्थत्वेन व्याख्यातं तच्च यथाप्रकृति रूप्यद्वारेणापभ्रंशाः प्राकृतामेव शक्तिमाविर्भावयन्तो ऽर्थप्रतिप दुपयोगं गच्छन्ति तथा तदशक्तिश्चानुरूपत्वादित्यत्र वर्ण्यते इ नेनैव प्रतिपादनप्रकारविशेषाभिधानार्थतया व्याख्यातत्वान्नेह व ख्यातम् । एकदेशत्वाच्च विभक्तिव्यत्यये स्यादिति सूत्रान्तरमा एवेत्यादिभाष्येणैवं गाव्यादिशब्ददर्शनादिति दार्ष्टान्तिके योज

ाब्दस्य साधुशब्दानुस्मारणेनार्थप्रतिपादकत्वे दृष्टान्ताभि-
ा व्याख्यातमिति प्रतीतेः स्पष्टत्वान्न व्याख्यातम्।

॥ लोकवेदयोः शब्दार्थैक्याधिकरणम्॥ १०॥

॥ आकृतिशक्त्यधिकरण वर्णकान्तरारम्भश्च॥

ायोगचोदनाभावादर्थैकत्वमविभागात्॥ २६

त्र भाष्यकारेणाथ गौरित्येवमादयः शब्दाः किमाकृतेर्वा-
तो वाच्यार्थे प्रमाणमुत व्यक्तेरिति गवादिविशेषणोपा-
वशब्दानामेतद्विचारविधेयतेति सूचितं तत्र केषां शब्दानां
विवक्षितेत्यपेक्षायां जातिशब्दानामेवोदाहरणत्वमङ्गीकृत्य
क्तानां व्यावृत्तिरिति दर्शयितुमाह * इहेति * आख्या- २४२।२
य द्वितीयाद्ये विचारयिष्यमाणत्वान्निपातोपसर्गाणां च
ाभिधायकत्वाभावान्नामान्येवेहोदाहरणत्वेन गृह्यन्ते ते-
ड्विधानां मध्ये शुक्लादिगुणानामेतयैव दिशा वाच्या शु-
नित्यतेत्यादिवार्त्तिकोक्तन्यायेनावान्तरभेदाभावेन गुणा-
जातिवाचित्वायोगात् क्रियाणामप्यर्थप्रत्यक्षे नित्य एवेति
ान्तरभेदस्य संख्याभावसूत्रे निराकृतत्वेन यागादिशब्दा-
ातिवाचित्वायोगात्पाकाद्येकोपाधियोगेन वा ऽनेकत्र पा-
काकारे प्रत्ययोपपत्तेः। पाचकत्वादिजात्यभावेन तच्छ-
जातिवाचित्वायोगाद्देवदत्तादिशब्दानां च सङ्केतितार्थ-
चित्वात्सर्वनामशब्दानां च सन्निहितार्थविशेषवाचित्वा-
ानामेवात्रैवमादय इति सादृश्यवचनेनैव शब्देनैवोदाहर-
तमित्यर्थः। परमतेन चैतदुक्तं स्वमते तु ततः शुक्लादित-
णेषु प्रतितिष्ठतीत्यादिना गुणकर्मणाप्यवान्तरभेदाभ्युप-
ार्थं विना पौनरुक्त्यस्य चोत्तरप्रस्थाने परिहरिष्यमाणत्वात्
शब्दानामप्याख्यातानामपि चोदाहरणत्वमस्त्येव तथाचो-
ाप्यत्याख्याने गवादिशब्दग्रहणं सर्वनामाख्यातशब्दानाम-
मिति वक्ष्यति। नन्वेवं सति जातिशब्दा इत्येव स्पष्टत्वा-
निर्देशः कार्यो गोशब्दोदाहरणं तु किमर्थमित्याशङ्क्य पू-
ा गोशब्दस्य गाव्यादिशब्दव्युदासेन साधुत्वाभिधानात्क-
तस्य साधुतेति प्रासङ्गिकी, सङ्गतिसूचनार्थं तदुदाहरणा-
ायितुमाह * तेषामपीति * गोशब्दमुदाहृत्य यद्विचार्यते
करणोदाहरणेन सहैतदधिकरणोदाहरणस्यैकत्वं सङ्गति-
दर्शयितुमित्यर्थः। ननु पदार्थानुपदप्रामाण्यस्य शब्दे निरा

कृतत्वात्किमाकृतेः प्रमाणमित्ययुक्तमित्याशङ्कावाचकव्यतिरे
निते षष्ठ्या विनैव प्रामाण्यव्यतिरेकजनिते इति व्याख्यातुमा
किं पुनरिति * किमाकृतेर्वाचकाः सन्तो वाक्यार्थे प्रमाणमथ
क्तेरिति व्याख्या अनेनोक्ता व्यक्त्याकृतिवाचित्वसन्देहमुप
च्यत इत्यादिभाष्येण मध्ये चिन्तान्तरं कृतं तत्किमर्थमित्या
प्रकृतिचिन्तोपोद्घातार्थत्वमाह * तत इति * न निर्णयार्थं
कापि चिन्ता कर्तुं शक्या न च निष्फला प्रतितिष्ठति लौकिक
कशब्दार्थभेदे च वैदिकशब्दार्थचिन्ता निरुपाया लौकिकश
चिन्ता च निष्फला स्यादित्याशयः । नन्वेवं सति प्रतिपदाधिक
दिवत्प्रकृतचिन्तामनुपक्रम्यैवोपोद्घातचिन्ता कस्मान्न कृते
ङ्गानन्तराधिकरणासङ्गतिप्रसङ्गादिति दर्शयितुम् * तत इत्यु
प्रतिपदाधिकरणादौ तु नानन्तरसङ्गत्यपेक्षाध्यायादित्वादित्य
ततो व्यक्त्याकृतिवाचित्वसन्देहोपन्यासानन्तरं वक्ष्यमाणं पूर्व
दिसांन्यासिकं त्यागार्हं कृत्वा सम्प्रतीदं तावद्विचार्यतइत्यन्व
त्यागार्थात्सन्न्यासप्रातिपदिकात्तदर्हतीत्यस्मिन्नर्थे ठगुत्पत्तेः
न्न्यासिकपदव्युत्पत्तिः अहिताशङ्कानिराकरणार्थस्तुशब्दः । कि
एवेति शब्दविषयं किं तएवेति चार्थविषयं सन्देहभाष्यद्वयं
व्याख्यातुम् * किं यएवेत्युक्तम् * उपायफलसिद्ध्यर्थत्वं प्र
विवृणोति * आहेति * शब्दग्रहणमर्थानामप्युपलक्षणार्थम्
व्यक्त्याकृतिविचारफलोपाययोर्भिन्नविषयत्वे ऽपि लौकिकवैदि
ब्दार्थैकत्वे यत्नः किमर्थ इत्यपेक्षायामाह * यदीति * एतस्य
क्त्याकृतिसन्निधानचिन्ताया इति हेतौ पञ्चमी एतच्छब्दो वेद
त्वद्योतनार्थः । निर्णयोपायव्याख्यानार्थम् * वृद्धेत्युक्तम् * ज
भिधेयत्वं व्यक्तेरनभिधेयत्वमिति निर्णयः नान्यथेति शेषः ।
न्यत्वे ऽपि लोकविषयैषा चिन्ता भविष्यतीत्याशङ्क्याह * अ
स्त्विति * शङ्कानिराकरणार्थस्तुशब्दः प्रयोजनाभावमुपपा
२४३।२ * सम्मूर्छितेति * आशङ्काभिप्रायमनूद्य निराकरोति * यदी
नन्वेवं तर्हि वेदविषयैव चिन्तान्यत्वे ऽपि यूपादिशब्दनिर्णयोपा
सम्भवात्सेत्स्यतीत्याशङ्क्याह * स्यादिति * वृद्धव्यवहारस्थाने
प्रयोगानुसरणमेवाकृतिवाचित्वनिर्णयोपायो न यूपादिवद्वचनव्य
विपर्ययाश्रयणादित्याशयः । अतः शब्दार्थान्यत्वे एकाङ्गवि
त्वाच्चिन्तेयमनारभ्या स्यादित्याह * तेनेति * ननु शब्दार्थान
फलोपाययोर्भिन्नविषयत्वेनैकाङ्गवैकल्याविषयः स्यादित्याश
* अभेदे इति * शब्दार्थान्यानन्यत्वचिन्तायाः प्रकृतचिन्तोपो

चोपसंहारपूर्वकं पूर्वपक्षमाह * तेनेति * अनेन च तत्रान्यपूर्वप-
प्रतिज्ञाभाष्यं व्याख्यातं अत्र व्यपदेशभेदाद्रूपभेदाच्चेति हेतुद्वयं
ाष्यकृतोक्तं तत्र व्यपदेशभेदस्य भाष्यकृतैव व्याख्याातत्वाद्रूपभेदं
याचष्टे * नियतेति * वैदिकेषु पदेषु नियतः स्वरो लौकिकेष्व-
नयतः वैदिकेषु च छन्दोविषयतया विहितस्य प्रकृतिप्रत्यययोर्लो-
स्यागमस्य वा वर्णविकारस्य वा सद्भावो लौकिकेष्वसद्भावः तत्कृ-
ाद्रूपभेदादित्यर्थः । नन्वेवं सति छान्दोग्यब्राह्मणेषु स्वरनियमा-
ावाद्दवादिशब्देषु च प्रकृतिलोपाद्यभावान्न भेदः सिद्ध्येदित्याश-
्य धर्मभेदाभिप्रायेण रूपभेदं व्याख्यातुमाह * अध्यायेति *
धीयते ऽस्यामिति व्युत्पत्त्याध्ययनतिथिरध्यायो द्वितीयादिरष्ट-
याद्यनध्ययनतिथिरनध्यायः वेदवाक्यान्यध्याययज्ञोपवीतेनैव त्रैव-
र्णिकेनैव च प्रयोज्यानि लौकिकान्यनध्याये ऽप्यनुपनीतेनापि चातु-
र्वर्ण्येनापि च प्रयोज्यानि अप्रयोज्यत्वेनाप्रेष्यत्वेन च हेतुना परिच्र-
या प्रसादितो यो गुरुस्तदुच्चारणपूर्वकं वेदवाक्यानि प्रयुक्तानि
दिच्छया प्रयुक्तानि लौकिकानीति धर्मभेदाद्यथा लौकिकवैदिक-
ाक्यानामन्यत्वं तदन्यत्वाच्च वाक्यार्थान्यत्वं तथा पदानां धर्मभे-
ात्पदार्थानां च पदभेदाद्भेद इति पूर्वपक्षं प्रतिज्ञायान्वयः । धर्मभे-
मात्रेण कथं पदभेदः कथं च पदभेदमात्रेण पदार्थभेद इत्याश-
ङ्काद्वयनिराकरणार्थं हेतुगर्भविशेषणसहितदृष्टान्तोपादानम् । श-
दाभेदे धर्मव्यवस्थावैयर्थ्यापत्तेस्तत्साफल्याय शब्दभेदः कल्प्य-
। तद्भेदे चौत्सर्गिको ऽर्थभेदः संज्ञा चोत्पत्तिसंयोगादित्यनेन सेत्
यतिं पदादृष्टार्थप्रतिपत्त्यर्थस्य शब्दस्यादृष्टार्थेन धर्मेण प्रयोजनाभावा-
र्थप्रतिपत्त्यर्थमेव धर्मापेक्षेत्यर्थप्रतिपादनसामग्र्यतिरेकाद्वाचकभे-
ो जराराजेति क्रमभेदादिवेत्याशयः । ननु वैदिकपदानां लौकिके-
भ्यो ऽन्यत्वे सम्बन्धग्रहणाभावेनार्थानवधारणादर्थान्यत्वेन पूर्वप-
क्षो न युक्त इत्याशङ्क्याह * यदीति * लौकिकार्थासम्भवएवानर्थ-
क्येन वेदाप्रामाण्यापादनायान्यत्वमिषेण पूर्वपक्षिणो वक्तुमभिप्रेतः
नोर्विषयत्वाच्च प्रकृतचिन्तानारम्भायैव वेदाप्रामाण्योपपादनायोच्यत
त्यविरोध इत्याशयः । अग्निर्वृत्राणि जङ्घनदित्यन्यदिदं रूपमिति भा-
ष्यं न्यूनाधिकक्रमान्यत्वाद्यभावेन रूपभेदानुपलब्धेरयुक्तमाशङ्क्य
याचष्टे * स्वरेणेति * लौकिकस्यानियतस्वरत्वात्स्वरानपेक्षस्या-
प्रतिपादकत्वं वेदे तु स्वरनियमात्सो ऽपि सहकारीति सामग्रीभे-
ाद् गौगौरिति वर्णातिरेकवत्स्वरातिरेकात्पदान्यतेत्याशयः । धर्मा-
भिप्रायो वा रूपशब्द इति व्याख्यान्तरमाह * अध्यायेति * कर्म-

व्युत्पन्नावध्यायानध्यायशब्दौ यदा कदा चिद्येन केन चिद्यथा
चिदध्येयो न वैदिक इत्यर्थः । यद्वा अग्निर्वृत्राणि जङ्घनदि
दिकस्याग्निशब्दस्य वृत्रहननसमर्थवस्तुवाचित्वावगमो लौ
व्युत्पन्नाग्निशब्दवाच्यस्य च ज्वलनस्य तदसामर्थ्यादर्थान्तरे च
त्पन्नस्यैव शक्त्यन्तरकल्पने गौरवापत्तेर्गत्यर्थस्य णिधातोः शौनि
पश्चेति सूत्रेणौणादिके निप्रत्यये कृते ऽग्निशब्दव्युत्पत्त्यवधार
प्रकृतिप्रत्ययान्वाख्यानभेदेनाव्युत्पन्नाल्लौकिकादग्निशब्दाद्
न्नस्य वैदिकस्याग्निशब्दस्य रूपान्यताभिप्रेतेति व्याख्यान्त
* वृत्रेति * शब्दान्यत्वाच्चेति पदान्यत्वेन पदार्थान्यत्वप्रति
भाष्यं स्पष्टत्वान्न व्याख्यातं अपि चेत्यादिभाष्यं लोकसिद्धा
गवां देवसम्बन्धनिमित्तोत्तानवहनात्मकधर्मविशेषप्रतिपादक
स्य वाक्यस्य अन्यार्थत्वलिङ्गत्वाभावादयुक्तमाशङ्क्योपपादयि
* विदग्धेति * यथा यो विदग्धः स नैर्ऋत इति स्वरसतो
ग्धोद्देशेन नैर्ऋतत्वविधिः प्रतीयमानो व्युत्पत्तिशिष्टदेवता
देवतान्तरविध्ययोगाद्यो नैर्ऋतः स विदग्ध इति वचनव्यक्त्य
ङ्गीकरणेन प्रकरणे सम्भवन्नपकर्षो न कल्प्येतत्यत्र भाष्यकृ
ग्नः तथात्र वषट्कर्त्तुः प्रथमभक्ष इतिवत् समाख्याविप्रकृष्य गो
स्योद्देशायोगात् देवगवानां चोत्तानवहनवदसिद्धत्वाविशेषात
चित् सिद्धेश्चोत्तानवहनस्यापि सम्भवाद्यच्छब्दयोगः प्राथम्यं
द्युद्देश्यलक्षणमित्यनेन न्यायेन प्राथम्योपात्तोत्तानवहनोद्देशप्र
दुद्देशेन गोशब्दवाच्यत्वविध्याश्रयणात्स्वरसतः प्रतीयमानस्य
वोद्देशेनोत्तानवहनविधौ भङ्गः कृत इत्यर्थः । नन्वेवं सति य
वहन्ति ते देवानां गोशब्दवाच्या इति वेदवाक्यगतपदपौर्वाप
र्येणालौकिकस्याप्यर्थस्य यूपादिवत्प्रतीतिसिद्धेर्लौकिकवैदिक
र्थान्यत्वे ऽपि व्यक्त्याकृतिचिन्तोपपत्तेरुपोद्घातो ऽनर्थकः स्या
शङ्क्याह *सर्वेषां चेति* नन्वर्थावगत्यभावे कथमस्यार्थान्यथा
तेत्याशङ्कापातप्रतिभानेन लिङ्गमेतत्पूर्वपक्षिणोक्तं परमार्थत
ब्दान्यत्वमेवार्थान्यहेतुरिति दर्शयितुमाह *आहृत्वादीति* स्वा
वोपनीतेनैव त्रैवर्णिकेनैव शुश्रूषासाधितगुरुसम्प्रदायेनैव च
वैदिकानां धर्मः यदा कदा चिद्येन केन चिद्यथा कथं चि
आहृत्वं लौकिकानामिति धर्मभेदः। आदिशब्दो नियतानियत
द्यभिप्रायः नियतैः पदैर्वाक्यरचना वेदे लोके त्वनियतैः त
वैदिकानीमानि पदानि लौकिकानीति व्यपदेशभेदः । वा
निबन्धनत्वात् व्यपदेशभेदस्य न पदभेदापादकतेत्याशङ्क्या

णार्थम् * नियतेत्युक्तम् * पदरचनात्मकत्वात् वाक्यानां पदभेदं विना तद्भेदायोगाद्वाक्यभेदनिबन्धनत्वे पदभेदस्येतरेतराश्रयत्वापत्तेः स्वरादिनियमानियमकृतपदस्वरूपभेदनिबन्धनएव व्यपदेशभेद इत्याशयः। धर्मभेदव्यपदेशभेदाभ्यां शब्दानां भेदस्तद्भेदाच्चार्थानामित्यर्थः । भिन्नानां वर्णानामेकार्थप्रतिपादननिबन्धनत्वेनैकपदत्वस्यार्थभेदनिबन्धनत्वात्पदभेदस्य पदभेदनिबन्धनत्वे ऽर्थभेदस्येतराश्रयं स्यादित्याशङ्कानिराकरणार्थं पदभेदे कारणान्तरस्य पूर्वोक्तस्योपन्यासः। वनस्पते हिरण्यपर्णेति सामानाधिकरण्यनिर्देशे लोकसिद्धस्य वनस्पतेर्हिरण्यपर्णत्वस्यानुपलब्धिविरोधेन वक्तुमशक्यत्वादलौकिकस्य वस्त्वन्तरस्य हिरण्यपर्णस्य वनस्पतिशब्दवाच्यत्वप्रतीतेर्घृतस्य च मधुशब्दवाच्यत्वप्रतीतेर्वाक्यस्वारस्यादेव स्पष्टत्वान्न तत्प्रतिपादकं भाष्यद्वयं व्याख्यातम् । सिद्धान्ते यथाभाष्यं सुयोजमपि सूत्रमाकृत्यधिकरणपूर्वपक्षे ऽन्यथा योजयिष्यमाणत्वाद्विवेकार्थं योजयति * प्रयोगेति * तेष्विति लौकिकवैदिकशब्दार्थेष्वित्यर्थः । अविभागादिति सूत्रावयवावतारणार्थम् * तस्मादित्युक्तम् । यएवेतिभाष्येण प्रयोगचोदनाभावादित्यकारप्रश्लेषं विना व्याख्यायेतरथेत्यनेनाकारप्रश्लेषेण व्याख्यानान्तरं कृतं तत्रैकत्वे ऽनेकत्वे चोभयत्र भावप्राप्तावेकत्वे सति पुनर्वचनस्य परिसंख्यार्थत्वापत्तेर्द्वितीयमेव व्याख्यानं सम्मतमिति सूचयितुमादौ व्याचष्टे * भेदे सतीति * आद्यव्याख्यानं व्याचष्टे * एकत्वे सतीति * तस्मादेकशब्दत्वमिति भाष्यं सौत्रमर्थपदं शब्दस्याप्युपलक्षणार्थमिति दर्शयितुं द्वेधार्थैकत्वपदं व्याचष्टे * अर्थैकत्वमिति * एतदेव प्रपञ्चयति * शब्देति * ननु प्रयोगचोदनाभावादित्यनेनैव शब्दार्थैकत्वसिद्धेरविभागादित्यनर्थकं हेत्वन्तराभिधानार्थत्वे वा शब्दैक्यमात्रविषयत्वेनाव्यापकतया दौर्बल्याद् बलवति हेतौ प्रयुक्ते दुर्बलोपन्यासः क्लिष्टो भवतीत्यनेन न्यायेन पूर्वमुपन्यस्येतेत्याशङ्क्योच्यतइति भाष्येण पूर्वस्य प्रयोजनाभिधानार्थत्वादेतदेव हेत्वभिधानमित्युक्तमाभाति * तस्मादिष्टापत्तिरूपहेत्वभिधानप्रतीतेरयुक्तमाशङ्क्याह * प्रयोगेति * लिङ्गदर्शनबलेनात्रैको वेदवादी पूर्वपक्षी रूपभेदादिनान्यः शुष्कतार्किकः तत्र पूर्वं प्रतिहेतुरेव पूर्वः शुष्कतार्किकस्य त्विदं प्रत्यवस्थानमित्याशयः। अत इति ल्यब्लोपे पञ्चमी इदमभिप्रेत्याहेत्यर्थः अविभागं पञ्चधा व्याचष्टे * तदुच्यतइति * स एवायं गोशब्दइति प्रत्यभिज्ञानरूपप्रत्ययस्य लौकिकवैदिकशब्देष्वविभागादित्यर्थः । रूपाविभागादित्यनेन विलक्षणरूपाप्रतीतेरित्युक्ते घटपटयोरज्ञायमा-

नत्वावस्थायां वैलक्षण्याप्रतीतावैक्याभावात्तन्मात्रेणैक्यासिद्धि
ङ्क्य *ज्ञायमानयोर्लौकिकवैदिकशब्दयोरित्युक्तम्* सादृश्यनि
भ्रान्त्यध्यवसितैकत्ववशेनापि वैलक्षण्याप्रतीत्युपपत्तिमाशङ्क्य ज्ञ
मानयोरर्थयोरवश्यं कथं चिद्वैलक्षण्येन भाव्यं तदभावात्विह
नास्तीत्याशयः । वाक्यतत्समूहमात्रनिबन्धनस्य पदवर्णानां त
र्गतत्वादयं न पदवर्णविषयत्वस्यैते लौकिका इमे वैदिका इति
पदेशस्य वस्तुतः पदवर्णेषु विभागाभावादित्यर्थः । वस्तुतो
क्यनिबन्धनस्तत्समूहनिबन्धनो वाऽयं व्यपदेशः तदन्तर्गतनिमि
तु भ्रान्त्या पदवर्णविषयत्वमनेनोपात्तमित्यौपाधिकत्वान्नासौ प
र्णानां भेदमापादयतीत्याशयः । शब्दानां प्रतिनियतविलक्षणाभिव्य
काभिव्यङ्ग्यत्वनियमात्तदाभावो वात्राभेदहेतुरुक्त इति * तथेत
नोक्तम् * लक्षणेत्यनेन लक्षणाभेदो लक्ष्याभेदे*हेतुरुक्त इ
क्तम् * छन्दसि भाषायां वेति विशेषणेन भिन्नलक्षणलक्षित
सिद्धान्तिनापि भेदाभ्युपगमात्तद्व्यावृत्तिसूचनार्थम् * बहु
त्युक्तम् * अत इत्युपसंहारभाष्यं व्याचष्टे * प्रत्यक्षेति
तांश्चेति भाष्यं चकारेण शब्दैक्यमर्थैक्ये हेतुं सूचयतीति व्याचष्टे
एकेति * यच्चोक्तमिति भाष्येण लिङ्गदर्शनान्यनुभाष्य नास्तिव
मित्यादिनोत्तानवहनानुवादेन गोशब्दवाच्यत्वविधित्वमस्य नि
त्य गवानुवादेनोत्तानवहनविधित्वमुक्तं तद्व्याचष्टे * यथाश्रुतो
गोमधुवनस्पतिशब्दानां यार्थान्तरद्योतिका श्रुतिरुपन्यस्ता सा न
यसिद्धार्थैकत्वाविरोधेन प्रयोजनेनोत्तानवहनादिगुणमात्रा न
परा व्याख्येयेत्यर्थः । अनन्तरोक्तार्थैकत्वसाधकशब्दैकत्वलक्ष
न्यायपरामर्शार्थं यथाश्रुतत्वं लोकसिद्धत्वं विशेषणमुक्तम् । न
गुणमात्रान्यत्वेनार्थान्यत्वं भविष्यतीति दृष्टान्तपूर्वकमाह * य
३५।१ हीति * अस्तु वा गुणान्यत्वेन देवसम्बन्धिनां गोमधुवनस्पत
भेदः तथाप्यगृहीतसम्बन्धत्वेन तेषां वाच्यत्वायोगाद्वैदिकाना
गवादिशब्दानां लौकिका एवार्था इति मत्वाह * न चेति *
क्षिणादिसाधनत्वेन च विहितानां गवां देवसम्बन्धिनामस्वत
दातुमशक्यत्वान्मनुष्यसम्बन्धितैव निश्चीयतइत्याह * मनुष्ये
देवसम्बन्धिनश्च वनस्पतेर्मेरुगतस्य गुणान्यत्वेन लौकिकवनस्पति
भेदेऽपि कर्मभूमिगतयज्ञसाधनत्वायोगाद्वैदिकस्यापि वनस्पति
ब्दस्य लौकिक एवार्थ इत्याह * एवमिति * लौकिकस्य च
तस्य देवसम्बन्धान्मधुत्वेन लौकिकान्मधुतो भेदेऽपि देवसम्बन्
पादितरसवीर्यविपाकात्पूर्वं घृतस्य मधुत्वाभावेन मधुपर्कादिसा

ग्योगाद्वैदिकस्यापि मधुशब्दस्य लौकिक एवार्थ इत्याह * यत्त्वि-
* सर्वेषां च वैदिकशब्दार्थानामन्यत्वे सत्युक्तानादिशब्दार्थाना-
यज्ञानान्न तदनुवादेन गवादिशब्दवाच्यत्वं विधातुं शक्यमिति
तेपादनार्थं यदि चान्य इति भाष्यं व्याचष्टे * न चेति * मधुगुण-
त्रान्यतापरत्वे कार्योपयोगाभावाद्वाक्यानर्थक्यं स्यादित्याशङ्का-
राकरणार्थं न चेति भाष्येण स्तुत्यर्थत्वमुक्तं तत्र निरालम्बनस्तु-
नुपपत्तिमाशङ्क्यालम्बनमाह * अत इति * लौकिकानामेव
गादीनां यज्ञादौ विनियुक्तानामिह स्वर्गे वै त्वालोकं गमयिष्याम
श्यादिदर्शनेन स्वर्गलोकप्राप्तेर्दैवसम्बन्धप्रभावादुत्तानवहनाद्यलौ-
ककगुणान्तरप्राप्तिर्भविष्यतीत्याशयः। स्वर्गगमनाभावे ऽपि वा भू-
गतानामेव गवां देवाश्च याभिर्यजते ददाति च वा ज्योगित्ताभिः
च ते गोपतिः सहेत्यादिदर्शनाद्देवोद्देशेन त्यक्तानां दुःखसागर-
रणार्थत्वावगतेरुत्तानवहनत्वादिगततारणगुणयोगेनोत्तानवहनप्र-
पादनमित्यालम्बनान्तरमाह * अथ वेति * यद्वोत्तानवहनाभावे
पि देवानां तथा प्रतीतेस्तदालम्बनमुत्तानवहनप्रतिपादनमित्यालम्ब-
न्तरमाह * पृथिवीति * दृष्टिवशाद्वोत्तानवहनप्रतिपादन-
त्यत्राप्यतीतेनान्वयः कथं देवानामुत्तानवहनदृष्टिरित्यपेक्षा-
ां * पृथिवीगोलकत्रैलोक्यभ्रमणादिनेत्युक्तम् * पृथिवीगोलक-
य भ्रमणे किं प्रमाणमित्यपेक्षायां * पुराणोक्तेनेत्युक्तम् * ननु
त्यपि भ्रमणे कथमुत्तानवहनदर्शनमित्यपेक्षायामाह * यथैवेति *
धोदेशस्योपरिदर्शनं परिवर्त्तनं विप्रतीपीभावं विना न युक्तमिति
भूमेर्विप्रतीपीभावात्तद्गतानां गवामुत्तानवहनदर्शनमुपपन्नमित्यर्थः।
तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * यदेति प्रकृत-
विचारानुसन्धानभाष्यं व्याचष्टे * इतीति * श्रोतृबुद्धिप्रथनाय
पक्षान्तराण्यपि दर्शयितुमौचित्यप्रतिज्ञां तावत्करोति * द्वौ चेति *
यद्यपीत्यनेन भाष्यकारो ऽपि पदोच्चारणानर्थक्यं तत्र व्यक्तिरर्थो-
ऽन्यत्राकृतिरिति भाष्येणोभयपक्षमस्तु विशेषणत्वेनाकृतिं वक्ष्यति
विशेष्यत्वेन व्यक्तिमित्यनेन चाकृतिविशिष्टायामाकृतौ वर्त्ततेत्य-
नेन च व्यक्तिविशिष्टाकृतिपक्षं दर्शयिष्यतीति सूचितं तानि दर्शयितुं
जातिव्यक्त्योस्तावदष्टपक्षीमुद्दिश्यते * नियोगेनेति * नियोगश-
ब्देन च नियमं विना पक्षद्वयं विशिष्टावेत्यनेन च पक्षद्वयमुक्तम्
एतेषामेवाष्टानां पक्षाणां परस्परव्यतिकरेणापरान् षण्णवतिपक्षान्
सूचयितुमाह * एत इति * जातिव्यक्त्योरेवोद्दिष्टानां नियमादि-
पक्षाणां लिङ्गादिसिद्धिनियोगेन संहतात्मभिरसंहतात्मभिश्च सह

सम्प्रधारणो विविक्तोद्देशेन परस्परव्यतिकरेण चापरांश्चतुर्दश
ज्ञातानि च पक्षान् वक्तुं योजना कार्येत्याह * लिङ्गेति * ि
गेनेति श्लोकं व्याचष्टे * प्रथमं तावदिति * एते पक्षा इति
कार्धं व्याख्यातुं षण्णवतिपक्षानाह * तथेति * द्वाभ्य
त्यनेन विशेषणविशेष्यभावनिरपेक्षाभ्यां व्यक्त्याकृतिभ्यां
मुच्चिताभ्यां विशिष्टः सम्बन्धो गोशब्दस्यार्थ इति चतुर्थः
लाघवायान्ते दर्शित इत्येकाष्टपक्षी । किमाकृत्यैव विशिष्टसमु
किं व्यक्त्यैवाथाकृत्या व्यक्त्या वाथ सम्बन्धेनार्थाकृतिविशि
व्यक्त्याथ व्यक्तिविशिष्टयाकृत्या अथ व्यक्त्याकृतिभ्यां परस्प
शिष्टाभ्यामथ विशेषणविशेष्यत्वनिरपेक्षाभ्यां समुच्चिताभ्यां
क्त्याकृतिभ्यां परस्परविशिष्टाभ्यामथ विशेषणविशेष्यत्वनिर
भ्यां समुच्चिताभ्यां व्यक्त्याकृतिभ्यामिति द्वितीया किमाकृत्यैव
शिष्टः सम्बन्ध एव गोशब्दस्यार्थः अथ समुदाय एवाथ सम्
वा समुदायो वाप्यसम्बन्धश्च समुदायश्च उत व्यक्त्यैव विशिष्ट
म्बन्ध एवाप्यसमुदाय एव अथ विकल्पो ऽथ समुच्चयविशि
कृत्या किं व्यक्तिः अथाकृत्या ऽथ वा विशिष्टः सम्बन्ध एव ।
समुदाय एव अथ विकल्पो ऽथ समुच्चयः । अथ एवं समु
विशिष्टः सम्बन्ध एवाथ सम्बन्धेन विशिष्टः समुदायएवाथ
ल्पो ऽथ समुच्चयः किमाकृतिविशिष्टया व्यक्त्या विशिष्टः सम्बन्
वाथ समुदाय एवाथ विकल्पो ऽथ समुच्चयः । अथोभाभ्यां प
रविशिष्टाभ्यां विशिष्टः सम्बन्ध एवाथ समुदाय एवाथ विकल्प
समुच्चयः । अथोभाभ्यां स्वतन्त्राभ्यां विशिष्टः सम्बन्ध एवा
मुदाय एवाथ विकल्पो ऽथ समुच्चय इति चतस्रो ऽष्टपक्ष्य
म्बन्ध एवेत्येवकारेण प्रतियोगिभूतेन समुदायेन सह नियोग
ल्पसमुच्चयरूपपक्षचतुष्टयसूचनात् पूर्वोक्ताभ्यां सह षड् भ
सम्बन्धवत्समुदायमपि प्रत्याकृत्यादेर्विशेषणत्वपक्षः पूर्ववत्स
विशिष्टसमुदायपक्षमात्रातिरिक्तत्वेन योज्या इत्यर्थः । किं
न्धविशिष्टसमुदायपक्षमात्रातिरिक्तत्वेन योज्य इत्यर्थः । किं
न्धेनैव विशिष्टाकृतिरित्याकृतिग्रहणस्य व्यक्त्युपलक्षणार्थत
सम्बन्धेनैव विशिष्टा व्यक्तिर्गोशब्दार्थो ऽथ समुदायेनैव वि
थ विकल्पमानाभ्यामुत समुच्चिताभ्यामित्यपरपक्षचतुष्टयीस
सप्तम्यष्टपक्ष्युक्ता तथैतद्विशिष्टापीत्येतच्छब्देन सम्बन्धसमुद
परामर्शादष्टम्युक्ता किमाकृतिविशिष्टसमुदायविशिष्टा व्यक्ति
व्यक्तिविशिष्टसमुदायविशिष्टाकृतिरेवाथ विकल्प उत समुच्च

सम्बन्धवत्समुदायमपि व्यक्त्याकृत्योर्विशेषणविशेष्यभावयोजनात्
नवम्युक्ता सम्बन्धवत्समुदायस्यादिविशेषणत्वयोजनाद्दशमी सम्ब-
न्धवत्समुदायमपि प्रत्यादिविशेषणयोर्व्यक्त्याकृत्योर्नियोगादिपक्षच-
तुष्टययोजनादेकादशी विशेष्यविशेषणयोर्व्यक्त्याकृत्योर्नियोगादिपक्ष-
चतुष्टयकल्पनायाम् आदिविशेषणत्वेन सम्बन्धवत्समुदायस्यादिवि-
शेषणत्वयोजनाद् द्वादशी इति परस्परव्यतिकरेण षण्णवत्यष्टपक्ष्या
सह चतुः शतं पक्षा भवन्ति लिङ्गकारकसंख्याभिरित्यनेन सूचिता-
नपरांश्चतुर्दश चतुःशतानि पक्षी संक्षेपेण दर्शयति*एवं जातिलिङ्ग-
योरिति * किं लिङ्गमेव गोशब्दार्थो ऽथ लिङ्गं वाथ जातिर्वाथ
लिङ्गं च जातिश्च अथ जातिलिङ्गयोः सम्बन्धो ऽथ समुदायो ऽथ
लिङ्गविशिष्टा जातिः । अथ जातिविशिष्टं लिङ्गमित्याद्यामष्टपक्षीं
दर्शयित्वा किमाकृत्यैव विशिष्टः सम्बन्धो लिङ्गेनैव वेत्यादिव्यक्ति-
स्थाने लिङ्गं प्रक्षिप्य परस्परव्यतिकरेणषण्णवतिपक्षयोजनया चतु
शतं रचयितव्यम् । कारकस्य जात्या सम्प्रधारणे द्वितीयं चतुः श
तम् । संख्यायास्तृतीयम् । लिङ्गस्य व्यक्त्या सह सम्प्रधारणे चतुर्थं
कारकस्य पञ्चमं संख्यायाः षष्ठं लिङ्गसंख्यायुगलस्य जात्या सह
सम्प्रधारणात् सप्तमं लिङ्गकारकयुगलस्य अष्टमं संख्याकारकयुग
लस्य व्यक्त्या सह सम्प्रधारणे दशमं लिङ्गकारकयुगलस्यैकादशम्
संख्याकारकयुगलस्य द्वादशम् । लिङ्गादित्रयस्य जात्या सह सम्प्र
धारणे त्रयोदशं व्यक्त्या सह चतुर्दशमितिन्यायेन चतुःशतेन सा
पञ्चदश चतुःशतानि । षष्ठाधिकं सार्द्धपक्षसहस्रं भवति ग्रन्थ
स्त्वेवं योज्यः । जातिव्यक्तिविषयैर्नियोगादिभिरष्टभिः पक्षैर्विकल्पि
ताः परस्परव्यतिकरेण कल्पिता ये ऽन्ये षण्णवतिः पक्षास्तेषामादे
रष्टभिः सह समुच्चितानां प्रत्येकं लिङ्गादीनां जात्या सह सम्प्र
धारणायामुत्थानं दर्शयित्वा व्यक्त्या सह दर्शयितव्यं तथा लिङ्ग
संख्यादियुगलानि व्यतिकरेण कल्पयित्वा लिङ्गादिसहितैकैकज
व्यक्तिविषयापेक्षया विकल्पा दर्शयितव्याः । लिङ्गादीनां किय
जात्या व्यक्त्या वा सम्प्रधारणेत्यपेक्षायां प्रत्येकमेकैकेन द्वाभ्
युगलीभूताभ्यां त्रिभिश्च लिङ्गादिभिः सहिताया एकैकस्या जा
व्यक्तेश्च * विकल्प्य इत्युक्तम् * ननु लिङ्गादीनां प्रत्ययार्थत्व
त्प्रातिपदिकवाच्यत्वेन चिन्ता न युक्तेत्याशङ्क्य * त्रियोगेत्युक्तम्
स्त्रियां यत्प्रातिपदिकं वर्त्तत इति व्याख्यादर्शनाद्वैयाकरणैस्तावज्
तिव्यक्तिवल्लिङ्गस्यापि प्रातिपदिकार्थतेष्टेति त्रिकप्रातिपदिकार्थः
चित्वात्ते त्रियोगाः निपातोपसर्गवत्प्रत्ययस्यापि द्योतकमात्रत

ते * गोशब्दालम्बनत्वासम्भवे कारणमाह * तस्य हीति * न-
ं सति संस्थानस्याकृतित्वशङ्काकारणाभावात् किं तन्निराकर-
र्थेन सर्वसामान्यानामाकृतित्वाभिधानेनेत्याशङ्क्याह * तेनेति *
संस्थानस्याकृतित्वं न युक्तं तेन निराकृतमिति तेनेत्यस्य योज-
शङ्कोपोद्बलनाय दृष्टान्ताभिधानम्। ननु सामान्यशब्देनैव सं-
नशङ्कानिवृत्तिसिद्धेः सर्वसामान्यव्याप्त्यर्थो मात्रशब्दो ऽनर्थे-
इत्याशङ्क्याह * अतश्चेति * सर्वं सामान्यमाकृतिरित्यभिप्रे-
यो मात्रशब्दः प्रयुक्तः सो ऽतः शङ्काव्यावर्तनात् कारणा-
ङ्काव्यावृत्त्यर्थमिति यावदिति योज्यम्। ऊहितशङ्कानिवृत्त्यर्थश्च-
रः व्यक्तौ च सर्वशब्दानां वाच्येहाकृतित्वेन विवक्षिता न सा-
न्यान्तराणीति शङ्कान्तरनिराससूचनार्थो वा व्यक्तिस्वरूपनिरू-
ार्थस्यासाधारणेति भाष्यस्यान्येषां व्याख्यानं दूषयितुमुपन्य- २५।
ते * असाधारणेति * गौर्गौरित्येकाकारप्रत्ययस्य सामान्या-
ानुवृत्ताकारविषयत्वाच्छाबलेयो बाहुलेय इति अनेकाकारप्रत्य-
य च्च विशेषाख्यव्यावृत्ताकारविषयत्वान्न तद्व्यतिरिक्ताकारिभू-
ास्तुसद्भावे प्रमाणमस्तीति व्यक्तिशब्दस्य विशेषसमूहवाचित्वेन
ा वनमितिवद्वचनभेदे दोषाभावाद्वृक्षाणामाश्रयो वनमितिव-
श्रय (विशेषाणामाश्रयो व्यक्तिरिति अग्नेरुत्ताना भाष्यस्तु व्यव-
रस्य वृक्षाणामाश्रयो वनमितिवदुपपत्तेरित्यर्थः[1]) व्यपदेशोपपत्तेः
र्मधारय एव युक्त इत्याशयः।

आविर्भावतिरोभावधर्म्मकेष्वनुयायि यत्।
तद्धर्मि यत्र वा ज्ञानं प्राग्धर्मग्रहणाद् भवेद्॥

इत्यनेन न्यायेन प्रत्यक्षसूत्रावयवानुवृत्तव्यावृत्तव्यतिरिक्तस्य
र्म्मिणः साधितत्वात्तदपह्नवो न युक्त इत्यभिप्रायेण दूषयति
तत्त्विति * साधारण्यत्वविशेषाणां नासाधारणव्यक्त्यात्मकत्वं
कमित्याह * खण्डेति * एतदेव व्याचष्टे * खण्डेति * अन्यो
ित्यनेनान्तरशब्दो शाबलेयवर्णे ऽपि शबलापत्य इत्येवं व्याख्यातः
बलाशब्देन च तच्छब्दः वार्त्तिकश्लोकस्य इत्यर्थः। शाबलेयशब्दप्र-
तिभूतशबलाप्रातिपदिकपरामर्शार्थत्वेन व्याख्यातः। एतच्चेत्यनेना-
शब्दोक्तं शबलाख्यविशेषस्य साधारण्यं व्याख्यातम्। एतदेव
बलेति नामान्यत्रापि व्यक्तौ वर्त्तत इत्यर्थः। कथमित्यपेक्षिते प्र-
ारद्वयमुक्तं यादृच्छिकत्वासिद्धौ * सङ्केतवशादित्युक्तम् * ना-
शब्देनावास्तवो ऽपि वर्णद्वयशून्यो ऽयं विशेषः प्रोक्तव्य इति सू-

१ अयं पा० २ पु० ना०।

दित्यर्थः । नन्वेवं सति व्याख्यातृभिरुपपत्तयोऽपि सर्वेषु पक्षे
२।१ प्रत्येकमुपन्यस्योपन्यस्य निराकार्या इत्याशङ्क्याह * दर्शितेष्वर्प
ति * शब्दशक्त्यपर्यालोचनस्य पूर्वपक्षबीजस्य सर्वेषु तुल्यत्वादि
याशयः । का पुनरिति भाष्येणाकृतिव्यक्त्योः प्रश्नपूर्वकं स्वरू
निरूपणं कृतं तस्य प्रयोजनमाह * ततश्चेति * विषयावधार
विचारमुखं, ननु सम्बन्धादीनामपि विचारविषयत्वात्किमिति स्व
रूपं न निरूपितमित्याशङ्क्य प्राधान्येनाकृतिव्यक्त्योरेव विचारवि
षयत्वमनन्तरोक्तं ततश्चेत्यनेन कारणतया परामृष्टम् । आकृतिस्व
रूपनिरूपणस्य पौनरुक्त्यमाशङ्कते * नन्विति * परिहरति * सत्य
मिति * मात्रशब्दं सर्वसामान्यव्याप्त्यर्थत्वेन व्याख्यातुं भाष्यपाठ
पूर्वकं सामान्यानि विभजति * द्रव्येति * प्रथमशब्देन परशब्द
कुतश्चिदव्याकृतत्वात्सर्वसामान्योक्त्वाभिप्रायेण व्याख्यातः । गु
णत्वकर्मत्वयोरादिशब्देनोपादानं द्रव्यत्वावान्तरसामान्यानि वि
भजति * पुनरिति * वायुत्वादीनां भिन्नतेत्यर्थः । पृथिवीत्वस्य
तद्भेदघटत्वादिसामान्योक्त्या ज्ञातुं शक्यत्वादनुपन्यासः । मनोभेद-
स्य चात्मभेदाधीनत्वादात्मत्वसामान्योक्त्यैव मनस्त्वसामान्यसिद्धे-
रनुपन्यासः । पृथिवीत्वावान्तरसामान्यान्यवधिभेदेन विभजति
* पृथिवीत्वादिति * पृथिवीत्वात्परं पाश्चात्यं घटत्वं घटव्यक्तिषु
समाप्य एतेषु घटत्वं तद्व्यक्तिष्वन्यं सामान्यमित्यर्थः । घटत्वादी-
न्यन्यानि पृथिवीत्वावान्तरसामान्यानि घटत्वेनैव व्याख्यातानि
वृक्षत्वात्तु पृथिवीत्वावान्तरसामान्यात्परं शिंशपात्वाद्येवान्त्यं सामा-
न्यमित्याह * वृक्षत्वादिति * शरीरत्वात्परं गोत्वादीत्याह * शरी-
रत्वाच्चेति * मनुष्यत्ववाची पुंस्त्वशब्दः गोत्वात्परस्य सामान्य-
स्याभावात्तत्त्यागेनाश्वत्वात्परं वाजिकत्वाद्यन्त्यं सामान्यमित्याह *
वाजिकत्वादि चेति * ननु कर्कत्वशोणत्वादेरप्यवान्तरसामा-
न्यस्य भावान्न वाजिकत्वादेरन्त्यतेत्याशङ्क्य * कर्कादिस्त्विति *
अश्वत्वैकार्थसमवायिशुक्लावान्तरसामान्यं कर्कत्वं रक्तावान्तरसा-
मान्यं शोणत्वमित्यर्थः । हस्तित्वात्परा भद्रादिजातयोऽन्त्या इत्याह *
हस्तित्वादिति * आदिशब्देन मृगजात्युपादानं ताश्च दिङ्नागकुलजा-
तास्वेव हस्तिव्यक्तिषु वर्त्तन्तइति दिङ्नागकुलशब्देनोक्तम् । मनु-
ष्यत्वात्परोऽवान्तरसामान्यभेदो ब्राह्मणत्वं ब्राह्मणत्वसामान्यावा-
न्तरभेदात्कौण्डिन्यत्वादौ सामान्ये समाप्यतइत्याह * पुंस्त्वादि-
ते * द्रव्यावान्तरसामान्यानि विभज्य गुणकर्मावान्तरसामान्या-
नि विभक्तुमाह * तथेति * गुणत्वस्य रूपतादि यदवान्तरसामान्यं

ते * गोशब्दालम्बनत्वासम्भवे कारणमाह * तस्य हीति * न-
ं सति संस्थानस्याकृतित्वशङ्काकारणाभावात् किं तन्निराकर-
र्थेन सर्वसामान्यानामाकृतित्वाभिधानेनेत्याशङ्क्याह * तेनेति *
संस्थानस्याकृतित्वं न युक्तं तेन निराकृतमिति तेनेत्यस्य योज-
शङ्कोपोद्बलनाय दृष्टान्ताभिधानम्। ननु सामान्यशब्देनैव सं-
नशङ्कानिवृत्तिसिद्धेः सर्वसामान्यव्याप्त्यर्थो मात्रशब्दो ऽनर्थ-
इत्याशङ्क्याह * अतश्चेति * सर्वं सामान्यमाकृतिरित्याभिप्रे-
यो मात्रशब्दः प्रयुक्तः सो ऽतः शङ्काव्यावर्तनात् कारणा-
ङ्काव्यावृत्त्यर्थमिति यावदिति योज्यम्। ऊहितशङ्कानिवृत्त्यर्थश्च-
रः व्यक्तौ च सर्वशब्दानां वाच्येष्वाकृतित्वेन विवक्षिता न सा-
न्यान्तराणीति शङ्कान्तरनिराससूचनार्थो वा व्यक्तिस्वरूपनिरू-
ार्थस्यासाधारणेति भाष्यस्यान्येषां व्याख्यानं दूषयितुमुपन्य- २५
ते * असाधारणेति * गौर्गौरित्येकाकारप्रत्ययस्य सामान्या-
ानुवृत्ताकारविषयत्वाच्छाबलेयो बाहुलेय इति अनेकाकारप्रत्य-
य च विशेषाख्यव्यावृत्ताकारविषयत्वान्न तद्व्यतिरिक्ताकारिभू-
ास्तुसद्भावे प्रमाणमस्तीति व्यक्तिशब्दस्य विशेषसमूहवाचित्वेन
ा वनमितिवद्वचनभेदे दोषाभावाद्वृक्षाणामाश्रयो वनमितिव-
श्रय (विशेषाणामाश्रयो व्यक्तिरिति अग्नेरुक्तानाभाष्यस्तु व्यव-
रस्य वृक्षाणामाश्रयो वनमितिवदुपपत्तेरित्यर्थः[1]) व्यपदेशोपपत्तेः
र्मधारय एव युक्त इत्याशयः।

आविर्भावतिरोभावधर्म्मकेष्वनुयायि यत्।
तद्धर्मि यत्र वा ज्ञानं प्राग्धर्मग्रहणाद् भवेद्॥

इत्यनेन न्यायेन प्रत्यक्षसूत्रावयवानुवृत्तव्यावृत्तव्यतिरिक्तस्य
र्मिणः साधितत्वात्तदपह्नवो न युक्त इत्यभिप्रायेण दूषयति
तस्त्विति * साधारण्यत्वविशेषाणां नासाधारणव्यक्त्यात्मकत्वं
कमित्याह * खण्डेति * एतदेव व्याचष्टे * खण्डेति * अन्यो
ित्यनेनान्तरशब्दो शाबलेयवर्णे ऽपि शबलापत्य इत्येवं व्याख्यातः
बलाशब्देन च तच्छब्दः वार्त्तिकश्लोकस्य इत्यर्थः। शाबलेयशब्दप्र-
तिभूतशबलाप्रातिपदिकपरामर्शार्थत्वेन व्याख्यातः। एतच्चेत्यनेना-
शब्दोक्तं शबलाख्यविशेषस्य साधारण्यं व्याख्यातम्। एतदेव
बलेति नामान्यत्रापि व्यक्तौ वर्त्तत इत्यर्थः। कथमित्यपेक्षिते प्र-
ारद्वयमुक्तं यादृच्छिकत्वासिद्धौ * सङ्केतवशादित्युक्तम् * ना-
शब्देनावास्तवो ऽपि वर्णद्वयशून्यो ऽयं विशेषः प्रोक्तव्य इति सू-

1 अयं पा० २ पु० ना०।

भाग: स्यादिति पूर्वपक्षसूत्रेणोक्तमाश्रयभेदेन भेदं निराकर्तुं
वदिति दृष्टान्तितं यथा सत्त्वस्य गोत्वादेः पदार्थस्य गौरित्याद
नामधेयमभेदापादकं तथा प्रतिनिधिनिष्पादिते ऽपि कर्म्मणि
पूर्णमासादिनामधेयं याज्ञिकैः प्रयुक्तमभेदापादकमिति युक्तम्
प्रत्यभिज्ञानेनैवैक्ये सिद्धे ऽभ्युच्चयमात्रत्वान्नेहोपन्यस्तम् । प्रति
निष्पादितकर्मविषयस्याप्यस्य न्यायस्य विध्यन्तरविहितेष्वपि
त्वं मन्वानानामभिप्रायेणैतदुदाहृतम् । एवं सामान्या
भज्य सर्वव्याप्त्यर्थत्वेन भाष्यं व्याचष्टे * एवमिति *
कृतिशब्दस्य संस्थानवाचित्वमक्षपादाद्युक्तं परित्यज्य जातिव
त्वं [illegible] द्रव्येषु गुणकर्मसु चा
दित्याह * नेति * क्व पुनः संस्थानमस्ति क्व वा नेत्यपेक्षायामा
सर्वेषु हीति * पार्थिवेषु स्वाभाविकं संस्थानम् अग्नेर्ज्वलनादि
संस्थानानुसारिसंस्थानभेददर्शनात्तोयस्य चाधारभूतपात्रसंस्थाना
रिसंस्थानभेददर्शनाद् घटाद्यवच्छिन्नाकाशस्य चावच्छेदकघट
स्थानानुसारिसंस्थानभेदर्शनात् वायोश्च घटाद्यवच्छिन्नाकाशसं
णो घटादिसंस्थानानुसारिसंस्थानभेददर्शनादौपाधिकं यद्यपि क
द् वृष्टुचदकोद्ध्र्वगतज्वालादौ पार्थिवद्रव्यपरिग्रहाभावे ऽप्या
संस्थानापरपर्यायः प्रतीयते तथापि विलक्षणाकारस्याप्यग्नितोर
क्ष्वग्नितोयशब्दप्रयोगान्नैकशब्दवाच्यत्वयोग्यः सर्वाग्नितोर
ष्वनुवृत्तैक आकारश्च पदरचनात्मकसंस्थानशब्दवाच्यो यो ऽ
याकृतिलक्षणः स्यादित्यनुवृत्तिशब्देन सूचितम् । कल्प्यतेत्यने
धिकत्वं दर्शितम् । दिगादीनां तु न स्वाभाविकं संस्थानं भाव्यं
धिकमित्यर्थः । नन्वनुगतैकाकारप्रत्ययवेद्यत्वाज्जातिरप्याकारा
न सम्भवतीत्याशङ्क्याह * सामान्येति * संस्थानाख्याकारा
ऽप्येकाकारप्रत्ययवेद्यः सर्वस्वव्यक्त्यनुगतो विजातीयेभ्यो
वृत्तो निरालम्बनबुद्ध्ययोगाद् ब्राह्मण्यादिवन्नापह्नोतुं शक्य इ
शयः । सर्वेषु स्वविशेषेष्वनुवृत्तिरेव रूपं यस्येति विग्रहः उ
हरति * तस्मादिति * नन्वाकृत्यादिषु संस्थानासम्भवे ऽपि ग
षु सद्भावाद् गवादिशब्दानां संस्थानात्मकाकृतिवाचित्वं भविष्य
त्याशङ्क्याह * संस्थानस्य चेति * नानाव्यक्त्यनुगतनित्य
मान्याभ्युपगमात्संस्थानस्याकृतित्वे सामान्यं वाच्यमिति व्यव
न युज्यतइत्यर्थः । संस्थानसामान्यस्य त्वाकृतिलक्षणत्वेन गोत्वा
कृतीनां वैलक्षण्यं सिद्ध्येदित्याह * अथेति * नन्ववान्तरसंस्
सामान्यस्याकृतित्वाभ्युपगमाच्च सङ्करापत्तिरित्याशङ्क्याह *

च्चितम् । यादृच्छिकशबलापत्ये साधारण्यार्थं तदपत्ये वेति
वचनं शाबलेय इति नाम वर्ततइत्याद्यनुषङ्गेण योज्यम् । ननु
धारण्ये ऽपि व्यक्तिमात्रलक्षणार्थत्वेनादोषो भविष्यतीत्याशङ्
* असाधारणेति * दोषान्तराभिधानार्थं चेदमुक्तम् । दोष
रमाह * विशेषेति * व्यक्तिशब्दस्य समुदायवाचित्वाभावात्
क्षा वनमित्येतत्तुल्यतेत्याशयः । स्वमतेन व्याचष्टे * तस्मादि
दोषसाम्यमाशङ्कते * नन्विति * या व्यक्तिः सोऽल लक्ष
लक्षणत्वेनोपादीयमानानां विशेषाणां समुदायेनासाधारण्येन च
शेषणाद्युक्तमसाधारण्यं परमते तु विशेषव्यतिरिक्ताया व्यक्ते
वेनोद्देश्यत्वायोगाद्ये विशेषास्ते व्यक्तिशब्दवाच्या इत्युद्देश्यानां
शेषाणामविशेषेण व्यक्तिविशेषशब्दयोः पर्यायत्वापत्तेस्तान्निवृ
मृष्यामहे हविषा विशेषणमितिवदेकस्मिन् विशेषणे कृते ऽर्थ
द्धेर्विशेषणान्तरस्य विवक्षितुमशक्यत्वाच्छ्रुतेनासाधारण्येन
शेषितानां व्यक्तिशब्देनेत्यर्थः । समुदायेन विशेषणानुपपत्तेः प्रत्येक
विशेषाणां व्यक्तिशब्दवाच्यत्वप्रसङ्गाद्वैषम्यमभिप्रेत्य परिह
* उच्यतइति * ननु विशेषसमुदायाश्रयत्वमात्रेण व्यक्त्युपल
णासिद्धेः । किमसाधारणविशेषणेनेत्याशङ्क्याह * प्रविभक्ता ही
पिण्डात्मना समुदायात्मना साधारणत्वेनेत्यर्थः । विशिष्टा व्य
गवादिशब्दवाच्यत्वेनाभिमता नासाधारण्यं विनोपलक्षयितुं शक
त्याशयः । नन्वेवं सत्यत्यन्तसदृशव्यक्तिगतस्य खण्डादिविशेष
मूहस्यासाधारण्याभावान्नोपलक्षणत्वं स्यादित्याशङ्क्याह *न चेति
ननु प्रतिव्यक्त्यपूर्वविशेषाभ्युपगमे विशेषानन्त्यापत्तेरदृष्टकल्प
६।२।२ गौरवं स्यादित्याशङ्क्याह * अनन्तेति * ननु खण्डत्वादीनाम
कव्यक्तिसाधारण्ये कथं विशेषव्यपदेश्यतेत्याशङ्क्याह * परेति
व्यक्तेर्विशेषेभ्यो ऽन्यत्वं पूर्वोक्तं भाष्यकृद्वचनेन द्रढयति * प
क्षेति * सामान्यस्य व्यक्तिपारतन्त्र्याद् व्यक्तेः सामान्याश्रय
मुख्यं समुदाय्याश्रयत्वं तु वृक्षाश्रयो वनमितिवत् समुदायस्य त
ध्ये समुदायिप्रतीतेरौपचारिकं, न च सकृच्छ्रुतस्याश्रयशब्दस्योभ
रूपता युक्तेत्याशयः । व्यक्तिभाष्यस्य परव्याख्यादूषणेनाकृति
ष्यस्य द्रव्याद्यनुगतसत्तासामान्यमेवाकृतिर्न गोत्वाद्यवान्तरसा
न्यमिति सत्तावाच्यत्ववादिनां व्याख्यां बुद्धिस्थां दूषयितुं तन्
तावदुपन्यस्यति * तत्रेति * उपन्यासार्थस्तत्र शब्दः सर्वशब्दा
पर्यायत्वशङ्कानिवृत्तये शब्दस्वरूपेण गोत्वादिना वा व्यवच्छेदा
धानम् । अत्रार्थे तदीयं श्लोकं पठति *यथाहुरिति* अस्तीत्येवं रू

सामान्यरूपः सर्वशब्दानामर्थ इतीदृशं प्रत्याख्यस्य वाक्यस्य लक्ष-
डुः । तस्य गवादिपदेष्वपूर्वादिपदैः सह तुल्यत्वादित्यर्थः ।
ादीनां हि शब्दैकगोचरत्वात्तेन च विशेषाप्रतीतेरस्ति किं
त्येतावन्मात्ररूपेण प्रतीतेरपूर्वादिशब्दानां सत्तावाचित्वावधा-
तद्दृष्टान्तेन गवादिशब्दानामपि सत्तावाचिता ऽनुमीयतइत्य-
। एतच्च सत्त्वप्रधानानि नामानि प्रातिपदिकार्थः सत्तेत्या-
ीनाम्नामविषयमेवेति सर्वशब्दस्तद्विषयतया सङ्कोचनीयः
ाति * तत्त्विति * कक्ष्याशब्दः कोष्ठवाची द्रव्यत्वगुणत्वकर्म-
येकस्यां सत्तावान्तरसामान्यकक्ष्यायां वर्त्तन्ते । पृथिवीत्वादीनि
त्वावान्तरसामान्यकक्ष्यायां रूपत्वादीनि गुणत्वावान्तरसामा-
क्ष्यायामित्येवमादिः कक्ष्याणां विभागः । तत्र द्रव्यशब्देन द्रव्य-
त्तयोर्निश्चयं प्रतीतिर्भवति । पृथिवीत्वादिषु सन्दिग्धा प्रतीति-
त्वादिषु त्वप्रतीतिरेव गुणशब्दाद् गुणत्वसत्तयोर्निश्चयप्रतीतिः ।
त्वादिषु सन्दिग्धप्रतीतिः । द्रव्यत्वादिष्वप्रतीतिरेवेत्यादिकक्ष्या-
ागेन सामान्यानां प्रतिपादनात्सर्वशब्दानां च सत्तावाचित्वे
शब्दाद् गुणत्ववद् द्रव्यत्वस्याप्यप्रत्ययापत्तेः । सत्ताद्वारेण वा
ये पृथिवीत्वादिवत् सन्दिग्धप्रतीतिप्रसङ्गाद् गुणत्वादावपि च
क्प्रतीतिप्रसङ्गात् सत्तावान्तरसामान्यविषयाणां द्रव्यादिशब्दा-
ेव तावत् सत्तावाचित्वमयुक्तं तत्रैवं सति दूरान्तरितार्थानां
ादिशब्दानां सुतरां सत्त्वावाचकत्वे शक्तिर्नास्तीत्यर्थः । श्लोकं
चष्टे * प्रतिनियतेति * ननु द्रव्यादिशब्दानां द्रव्यत्वाद्यवच्छि-
शब्दवाचित्वाद्व्यवस्था भविष्यतीत्याशङ्कानिराकरणार्थं विशिष्टा-
धानपक्षं निराकरिष्यन्परानभिमतमपि शुद्धाभिधानं विशिष्टा-
धाने निराकृते यदि कश्चिदङ्गीकुर्यात्ततस्तदपि निराकार्यमिति
वा विकल्पयति तावत्सत्तामिति आद्यं तावत्पक्षं निराकरोति *
क्षेति * ननु देशाद्यपेक्षया घटादिवत्सत्तायां नास्तित्वाभिधानं न
रोत्स्यते ऽत आह * देशेति * आदिशब्दो वस्त्वभिप्रायो यथा- २
ाशस्य कूपपूरणेनोपलम्भप्रतिबन्धात्प्रतीयमानावस्थापेक्षया ना-
याकाशमित्युच्यते तथात्रापीत्याशङ्कानिराकरणार्थः । मूर्त्तद्रव्याव-
म्भो ह्याकाशोपलम्भप्रतिबन्धको ऽन्वयव्यतिरेकाभ्यामवगम्यते न
; सत्तायाः किञ्चिदुपलम्भप्रतिबन्धकमस्तीत्याशयः । व्यक्तिमात्रग-
त्वे ऽपि जातेराकाशादिव्यक्तीनां विभुत्वात् सत्ताया विभुत्वसि-
द्धेः सत्ताशब्दस्य लौकिकव्यवहारे च जातिवाचित्वाभावात् सर्व-
ब्दानां महासामान्यवाचित्वे ऽपि सत्तावाचित्वाभिधानं न युक्त-

मित्याह * रूढीति * लोकदृष्टचेत्यनेन गवादिशब्दवत् सत्ताशब्द
लौकिकव्यवहारे प्रयोगाभावाज्जातिवाचित्वनिषेधस्य लोकविरो
परिहृतः । किं तर्हि सत्ताशब्दवाच्यं युज्यतइत्यपेक्षायामाह
य एव हीति * यो ऽस्तिशब्देन द्वितीयो भावविकार उच्यते स ए
सत्तेत्येतद्युज्यतइत्यर्थः । अनेन चास्तिशब्दो ऽपि न वस्तुत्वापरपय
यमहासामान्यवाचीति सूचितम् । द्वितीयभावविकारवाचिनो ऽस
धातोः शत्रन्तात्तलि कृते सत्ताशब्दव्युत्पत्तेरित्याशयः । ननु वस
शब्दस्यापि द्वितीयभावविकारवाचित्वात्सत्तास्तिशब्दयोर्वस्तुशब
पर्यायत्वमविरुद्धमित्याशङ्क्याह * जायमानेति * प्रथमो भावा
कारो जायमानत्वं विपरिणामस्तृतीयः । आदिशब्देन वृद्ध्यपक्ष
चतुर्थपञ्चमावुपात्तौ विनश्यता षष्ठः । सर्वशब्देन भावविकाररा
तेष्वपि नित्येष्वाकाशादिषु वस्तुत्वप्रतीतेर्न वस्तुशब्दो भावविक
रवाचीति सूचितम् । ततश्चास्तिशब्दो ऽपि न वस्तुत्ववाचीति
वैसूचितमर्थं प्रकटयन्नस्त्यर्थ इति पाठं दूषयति * तेनेति *
किकप्रयोगाभावाच्चासमुदायप्रसिद्ध्यात्मलाभाभावे क्लृप्तावय
र्थत्यागेन समुदायस्य शक्त्यन्तरकल्पनं प्रोक्षिण्यादिशब्दवन्न युक्त
स्याह * न चेति * सत्ताशब्दप्रकृतित्वात् सन्शब्दस्योपन्यास
तस्माद्यौगिक एव सत्ताशब्दो न रूढिरित्युपसंहरति * इतीति
यथा भवतीत्याख्यातस्यार्थे भवन्निति भवच्छब्दो धात्वर्थविशि
कर्तृवाचित्वाद्यौगिकः तथास्तीत्याख्यातस्यार्थे सन्निति शब्दो ऽपि
ततश्च सतो भाव इत्यस्मिन्नर्थे सच्छब्दात्तल्प्रत्ययोत्पत्त्या सत्त
प्रवर्त्तमानो यौगिक एव । ननु सत्ताशब्देन जातिः प्रतिपत्तव्या
शेषिकपरिभाषैव हि तत्प्रतिकारणं नान्यत्किं चिदित्यर्थः । कीदृ
परिभाषेत्यपेक्षिते काश्यपीयं सूत्रं पठितम् । इतिकरणो बुद्ध्युप
क्षणार्थः । यतो वस्तुत्वान्महासामान्याद् द्रव्यादिषु सदिति बुद्धिर
ति सा सत्तेति सूत्रार्थः । परिभाषाशब्ददर्शनात् परिभाषासूत्र
शङ्कां निवर्त्तयितुं लक्षणसूत्रमेवेदं स्वोत्प्रेक्षितत्वद्योतनार्थन्तु परि
षात्वाभिधानमिति लक्षणशब्देन सूचितम् । किं पुनर्वैशेषिक
सत्ताशब्दस्य जातिवाचित्वप्रसिद्धौ कारणमित्यपेक्षामाह * सेय
ति * वस्तुपर्यायेण कर्मणा वक्तीति वस्तुपर्यायवाची वस्तुत्व
चीत्यर्थः । भवच्छब्देन सह साधारणो द्वितीयभावविकाररूपो
ऽर्थोति भवसाधारणार्थः । घटो भवति इत्यादिषूत्पत्त्याख्यप्रथमभ
विकारवाचित्वेनापि प्रसिद्धस्य भवतेर्भूसत्तायामिति सत्ताख्य
तीयभावविकारवाचित्वस्मृतिबलाद्भवत्साधारणार्थत्वमव्ययसं

ास्तिशब्दस्योक्तेः। भवतिधात्वर्थमात्रवाचित्वे ऽपि अव्ययास्तिश-
ब्स्य प्रकृत्यनुग्रहार्थं शतृप्रत्ययोपादानाद्वस्तुत्वद्वितीयं भावविका-
रूपार्थद्वयवाचिना अव्ययसंज्ञकेनास्तिशब्देनेयं प्रसिद्धिरुपपादिते-
र्थः। क्व पुनरव्ययास्तिशब्दो वस्तुत्ववाची दृष्ट इत्यपेक्षायामाह *
स्तित्वमिति * दिग्योगनिमित्ता पञ्चमी यस्मादस्तिशब्दात्परौ
तलौ दृश्येते स वस्तुत्ववाचीत्यर्थः। आख्यातप्रतिरूपक इत्या-
ख्यातत्वभ्रान्तौ कारणमुक्तम्। नन्वाख्यात(शब्द एवायं कस्मान्न भ-
वतीत्याशङ्क्याह * अप्रातिपदिकत्वाद्धीति * भवत्साधारणार्थत्व-
पपादयन्नामाख्यातत्वे कारणान्तरमाह * अस्तीति * तेनास्ति) श-
ब्देन सह समासाभ्युपगमादनाख्यातत्वं तस्य च सत्शब्दवाच्यद्वि-
तीयभावविकारवाचित्वावगमात् भवत्साधारणार्थतेत्यर्थः। एतदेव
याचष्टे * अस्तीति * अस्तिपदेन सह यो बहुव्रीहिः सो ऽव्यय-
ज्ञकेन नाख्यातसंज्ञकेन तस्यासुबन्तत्वेन समासायोगादित्युक्तेः
न्वव्ययस्यापि सुब्लोपान्वाख्यानेनासुबन्तत्वादव्ययीभाववद्बाहत्य
हुव्रीह्यविधानात्कथं समासः स्यादित्याशङ्क्य प्रत्ययलोपे प्रत्ययलक्षण-
मेति स्मृतेः प्रत्ययलक्षणद्वारेण सुबन्तत्वमुक्तम्। ननु सुबुत्पत्तेः
ागसुबन्ततास्तीत्याशङ्क्यावश्यम्भावित्वेन सुबुत्पत्तेः प्राथम्यमु-
क्तम्। आवश्यकत्वोपपादनार्थं प्रातिपदिकत्वेन योग्यतोक्ता। ननु
यथा पठतितमामित्यप्रातिपदिकादपि तद्धितो जातस्तथात्र तिङ-
न्तस्यापि समासो भविष्यतीत्याशङ्क्य तिङन्तेत्युक्तम्। तिङश्चेति
सूत्रेणाहत्य विधानात्तत्र तद्धितो जातः तिङन्तस्य तु समासस्वेनोप-
संख्यानमपि नास्तीत्यर्थः। सदर्थवचन इत्यनेन सद्वाचिनः
सच्छब्दस्यार्थपरत्वं व्याख्यातम्। कथमव्ययशब्देनेयं प्रसिद्धि-
रुपपादितेत्यपेक्षायामाह * ततश्चेति * वस्तुनि महासामान्ये
सति च द्वितीये भावविकारे सत्संज्ञकमस्तिशब्दं प्रयुज्यमा-
नमुपलभ्य तदीयद्वितीयं भावविकाराख्यार्थानुसरणेन च कृ-
त्वाव्ययास्तिशब्देन सह प्रत्यासन्नमदूरान्तरार्थं कर्तृप्रतीत्या
विनेति द्वितीयभावविकारवाचितयास्त्यर्थं सच्छब्दमुपलभ्य
महासामान्यमप्यव्ययास्ति (शब्दवाच्यः सच्छब्दवाच्या सत्तेत्येवं
कल्पितमित्यर्थः। नन्वव्ययास्तिशब्दवाच्यस्य द्वितीयभावविकारस्य
सच्छब्दवाच्यत्वे ऽपि कथं महासामान्यस्य सच्छब्दवाच्यत्वकल्पन-
माशङ्क्याव्ययास्तिशब्दवाच्यत्वहेतुना द्वितीयभावविकारदृष्टान्तेन
तस्यापि सच्छब्दवाच्यत्वानुमानसूचनार्थं तार्किकैरित्युक्तम्। न-

---

२ अयं पा० २ पु० ना०।

न्वेवमपि तल्प्रत्ययाधिक्या सत्ता)शब्दस्य कथं महासामान्यवा
त्याशङ्क्य देवात्तलितिस्मृतेर्यथा देवतेति तल्प्रत्ययः स्वार्थि
थायमपीत्युक्तम् । ननु द्वितीयभावविकारे कृत्सञ्ज्ञकशतृप्रत्
पात्तकर्तृविशेषणतया सच्छब्दवाच्यत्वेन सहाव्ययास्तिशब्दवा
त्वेन सहाव्ययास्तिशब्दवाच्यत्वस्य व्याप्तेर्महासामान्यस्यापि कर्तृ
षणतयैव सच्छब्दवाच्यतानुमितसामान्यस्य बाधकर्तृकत्वान्न
यानुमानं सम्भवतीति धर्मविशेषविपरीतसाधनात् विरुद्धो
५३।२ स्यादित्याशङ्क्य * इहापीत्युक्तम् * यथा ऽव्ययास्तिशब्दवाच्ये द्वि
भावविकारे कर्तृविशेषणत्वप्रतीतिर्नास्ति तथेह सच्छब्दवाच्ये
तीयभावविकारे भवतीमपि कर्तृप्रतीतिं सक्षीरेति समासोपप
सुबन्तत्वयोग्यप्रातिपदिकत्वयोग्यप्रातिपदिकत्वसिद्ध्यर्थं कृत्स
कशतृप्रत्ययोच्चारणोपपत्तेरतन्त्रीकृत्य कर्तृनिरपेक्षधात्वर्थमात्र
ची सच्छब्दस्तत्समानार्थत्वाच्च सत्ताशब्दो ऽपीत्यर्थः । ननु स्मृ
भावाच्छब्दपरस्य तल्प्रत्ययार्थस्य स्वार्थिकं तत्त्वमविवक्षाहेत्वभाव
कर्तृप्रतीतेरतन्त्रीकरणमयुक्तमित्याशङ्क्यापारमार्थिकाभ्युपगममा
द्योतनार्थम् * गृहीत्वेत्युक्तम् * स्वार्थिकं तलं गृहीत्वा धा
र्थमात्रवचनौ च सच्छब्दसत्ताशब्दौ गृहीत्वेत्यन्वयः । नन्वनेन न्
येनाख्यातसञ्ज्ञकस्याप्यस्तिशब्दस्य द्वितीयभावविकारवाचित्वान्
हासामान्यवाचितापि प्रसज्येतेत्यनिष्टापत्तिशङ्कानिराकरणायाख्
तप्रत्ययोच्चारणास्यानन्यार्थत्वेन कर्तृसंख्याकालादिप्रतीतेरतन्त्
कर्तुमशक्यत्वात्कर्तृसंख्याकालादिनिरपेक्षशुद्धधात्वर्थमात्रवाचित
माख्यातास्तिशब्दस्य नास्तीति सूचयितुमेवकारः। ततश्चाख्यातास्ति
ब्दवाच्यद्वितीयभावविकारदृष्टान्तेनाव्ययत्वे ऽस्तिशब्दवाच्यत्वहेतु
वस्तुत्वस्याख्यातास्तिशब्दवाक्यमिहानुमीयमानं कर्तृसंख्यादिवि
ष्टत्वेनैवानुमीयेत यदव्ययास्तिशब्दवाच्यं तत्कर्तृसंख्यादिविशिष्टत
नाख्यातास्तिशब्दवाच्यमित्याख्यातास्तिशब्दवाच्ये द्वितीयभाववि
कारे व्याप्तिदर्शनादित्याशयः । ननु वस्तुत्वजातेः सच्छब्दवाच्य
तार्किककल्पिता पदवाक्यार्थतत्त्वज्ञैर्निराक्रियमाणा कथं प्रसि
यायादित्याशङ्क्याह * तदुक्तेति *

यावद्यावद्विवादाय मुक्तर्के दीयते मनः ।
अनवस्थादिदोषेण तावत्तावद्विहन्यते ॥

इत्यनेन न्यायेन चिरनिखाततडागादिगतशैवालवच्छुष्कतर्क
स्याप्रतिष्ठितत्वेन निराकृतस्यापि पुनः पुनरुद्भवेन समापयितुमशक्य

१भय पा० २ पु० मा० ।

वार्त्तिकोक्तस्यान्तगमने समापने अनादरादभियुक्तैरुपेक्षित-
वात्प्रसिद्धं, सदिमां युक्तायुक्तत्वविचारावस्थां प्राप्तमित्यर्थः।प्रसि-
द्धयाभासं चेदं न परमार्थतो नियुक्तानामेवं प्रसिद्धिरस्तीति चशब्दे-
नोक्तम्। किं तदित्यपेक्षायामाह * येनेति * येन सत्ताया वस्तु-
वापरपर्यायमहासामान्यात्मकत्वेन गवादिशब्दवाच्यत्वेनापि संज्ञा
सम्भाव्यते। तत्सत्ताया महासामान्यरूपत्वमिमामवस्थां प्राप्तमित्यर्थः।
यद्वा युक्तायुक्तत्वविचारस्य कः प्रस्तुतोपयोग इत्यपेक्षायामिदमु-
क्तं, येन कारणेन सत्तायाः सामान्यरूपत्वे सति गवादिशब्दवाच्य-
त्वेनापि न सत्ता सम्भाव्यते तेन तन्निराकरणार्थं रूढिशब्दश्च नैवा-
मित्यादिर्न सत्ताशब्दस्य जातिवाचिता निराकृतेत्यर्थः। परमार्थत-
स्तु वस्तुत्वस्य जातिरूपस्यापि गवादिशब्दवाच्यत्वं नास्ति किमुत
सत्तायाः। जात्याख्याद्धर्माद्धर्म्मान्तरत्वेन द्वितीयभावविकारत्वेन व-
र्त्तमानत्वादित्याह * नन्विति * ननु वस्तुशब्दस्यापि निवासार्थाद्व-
सधातोर्वसेस्तुन्निति सूत्रेणौणादिके तुन्प्रत्यये कृते व्युत्पत्तिसम्भ-
वादनेकत्र नितरां प्रत्येकमेकमेव वसतिवर्त्ततइत्यवयवार्थयोगेन स-
त्तादिषु सामान्यं सामान्यमित्येकाकारप्रत्ययालम्बनस्यानेकेष्वेकस्य
प्रत्येकवृत्तित्वलक्षणस्याभिधानाद्यौगिकत्वेन जातिवाचित्वं न यु-
क्तमित्याशङ्कां निराकुर्वन्नर्थगम्यत्वं विवृणोति * वस्तुशब्दो हीति *
व्यक्तेः प्रत्येकवृत्तित्वाभावादेवंविधयोगनिमित्तत्वे वस्तुशब्दस्य
व्यक्तौ प्रयोगानुपपत्तिप्रसङ्गाद्यौगिकत्वासम्भवाभिधानार्थं व्यक्त्या-
श्रितत्वं वस्तुत्वसामान्यस्योक्तम्। जातेर्जात्याश्रितत्वाभावाद्वस्तुश-
ब्दस्य जातिवाचित्वे जातौ प्रयोगानुपपत्तिमाशङ्क्य निःसामान्यानि
सामान्यादीनीति वैशेषिकपारिभाषायाः प्रतीतिविरोधेनायुक्तत्वा-
ज्जातेरपि जात्याश्रयत्वं सम्भवतीति दर्शयितुं जात्यन्तराश्रितत्वमु-
क्तम्। नन्वेवं सति वस्तुत्वे ऽपि वस्तुत्वप्रतीतेर्जात्यन्तराश्रयणा-
न्तरशब्दः। यथैव गोत्वरूपेण शाबलेयादौ गवाकारप्रत्ययसि-
द्ध्यर्थं गोत्वमङ्गीकृतं न गोत्वे तत्र गवाकारप्रत्ययस्य स्वरूपनिब-
न्धनोपपत्तेः। तथा जात्यन्तरे व्यक्तौ च वस्त्वाकारप्रत्ययसिद्ध्यर्थं
वस्तुत्वं जातिरिष्यते तत्र स्वरूपनिबन्धनत्वेनैव वस्त्वाकारप्रत्ययोप-
पत्तेर्नापरा वस्तुत्वं जातिरङ्गीकार्येत्याशयः। शुद्धाभिधानपक्षस्य द्र-
ढत्वोपसंहारपूर्वकं विशिष्टाभिधानपक्षस्य दुष्टत्वं प्रतिजानाति ता-
त् * शुद्धेति * दूषयति * यदेवेति * एतदेव प्रपञ्चयितुं विक-
ल्पयति * गोसत्तां चापीति * आद्ये कल्पे दोषमाह * तत्रेति *
तदेवोपपादयति * विशेषणमिति * गोव्यक्तिविशिष्टसत्ताभि-

२५४।२ धाने ऽप्येतमेव दोषमतिदिशति * तथेति * कल्पनागौरवा
केवलव्यक्त्यभिधानपक्षवद्विशेषणभूतव्यक्त्यभिधानपक्षो ऽ
इत्याह * अनित्येति * अनित्यः सम्बन्धस्तस्य चान्वयव्यतिरे
विना ऽपि ज्ञानमनन्ताश्च शब्दशक्तयो यस्मिन्व्यक्त्यभिधाने प्र
न्ते तत्तथोक्तम्।दृष्टान्तं साध्यविकलत्वेन दूषयितुमनुभाषते*
ति*दूषयतिश्लोकं* तत्रेति*श्लोकं व्याचष्टे * केचिदिति *
र्थापत्त्या पर्युपस्थापितस्यार्थविशेषस्य वचना वाचका इति पूर्व
मासान्निष्कृष्य योऽयं पर्युपस्थापनस्य नित्यपर्युपस्थापकसापेक्षत्व
पस्थापितशब्दस्य श्रुतार्थापत्तिसापेक्षत्वे ऽप्युत्तरपदसमासार्
श्रुतार्थापत्त्या अपूर्वं पर्युपस्थाप्यते । स्वर्गो देवताश्च वाच्यशे
वादैर्वाक्यान्तरैश्च मन्त्रोपनिषदादिभिरुपस्थाप्यन्ते । ननु
श्रुतस्वर्गयागसाध्यसाधनसम्बन्धान्यथानुपपत्त्या यागजन्यः
त्पादनसामर्थ्यातिशयविशेषः कल्प्यते । तथापि समस्तवै
ष्टार्थकर्म्मजन्यातिशयानुगतमपूर्वशब्दवाच्यं सामान्यं न स
ऽन्यत्प्रमाणान्तरेण लभ्यते । एवं सवनीयसूक्तादिमहेन्द्र
वताविशेषावगमे ऽपि सर्वदेवतानुगतं सामान्यं देवताशब्दवा
सत्तातो ऽन्येन लभ्यते ये हि जनाः पुण्यकृत इत्यादिवाच्य
नक्षत्रलोकादिस्वर्गविशेषावगमे ऽपि न च वै स्वर्गलोका इत्य
क्यशेषेभ्यो ऽनेकस्वर्गावगतेः सर्वानुयायिस्वर्गशब्दवाक्यं स
ऽन्येन लभ्यते इति बलात्सत्तैवापूर्वादिशब्दवाच्या स्यादित्याश
* कार्येति * सामान्येनेतीत्थम्भूतलक्षणे तृतीया । सामा
मप्यपूर्वादिसत्तातो ऽन्यदेव लभ्यतइत्येवकारार्थे तुशब्दः ।
दित्यपेक्षिते सर्वातिशयानुवर्त्तिस्वर्गादिकार्योत्पादनसामर्थ्य
न्यमपूर्वशब्दवाच्यं सर्वेन्द्रादिदेवतानुवर्त्तिदीव्यतिधात्वर्थ
सामान्यं देवताशब्दवाच्यम् । सर्वस्वर्गानुवर्त्तित्वदुःखमि
निष्टसुखसङ्गतिसामान्यं स्वर्गशब्दवाच्यमित्युक्तम् । श्लोकं
ख्यातुमपूर्वशब्दस्य तावत्सत्तातिरिक्तसामान्यवाचित्वमुपप
* सर्वेति * ननु लौकिकसाधनगतानां सामर्थ्यानां क
पत्तिगम्यत्वे ऽप्यपूर्वशब्दवाच्यत्वाभावात्तद्वाच्यानां च वै
गादिजन्यानां सामर्थ्यानां विशेषतः श्रुतार्थापत्तिगम्यत्वे ऽ
कर्मसामान्यविध्यभावेन सामान्यतः प्रमाणान्तरेणानवगमा
न्धग्रहणासम्भवेन कथमपूर्वशब्दाभिधेयतेत्याशङ्क्य * याग
क्तम् * क्लृप्तावयवसामर्थ्यानुसारेणैवापूर्वशब्दस्य सत्ता
कर्मजन्यातिशयविशेषवर्त्यवान्तरसामान्याभिधायकत्वोपपत्ते

कसम्बन्धग्रहणापेक्षेति भावः । देवताशब्दस्य सत्तातिरिक्तसर्व-
वतावर्त्यवान्तरसामान्यवाचित्वमुपपापयति * तथेति * दिवु-
ोडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिष्विति सप्तस्वर्थेषु
वृताद्दीव्यतेर्धातोर्घञि कृते देयशब्दव्युत्पत्तेः । सर्वेन्द्रादिदेवानु-
तस्य क्रीडादिदीव्यत्यर्थयोगस्य सामान्यस्य सत्तातिरिक्तस्य सद्भा-
ात्सुज्ञानो देवशब्देन सह देवानां सबन्ध इत्यर्थः । सत्ताव्यावृ-
र्थो विशेषशब्दौपाधिकत्वाद्वा देवशब्दस्यापूर्वशब्दवदेव जातिवा-
त्वनिराकरणार्थः । ननु क्रीडादिदीव्यत्यर्थयोगस्य प्रमाणान्तरेण
वेष्वनवगमात्कथं तद्योगनिमित्तेन देवशब्देन सह सम्बन्धज्ञान-
त्याशङ्कार्थान्तरानवगमे ऽपि द्युत्यादेर्दीव्यत्यर्थस्य चन्द्रादौ प्रत्य-
णोपलम्भाद्देवशब्दप्रवृत्तिनिमित्तत्वं भविष्यतीति दर्शयितुम् *द्यो-
न्ते वेत्युक्तम् * ग्रहशब्देनैव चन्द्रादित्योपादाने सिद्धे ऽपि द्युत्य-
ाशयात्तयोः पृथगुपादानं चन्द्रतारकेभ्यो नक्षत्राणां द्युत्यतिशा-
त्पृथगुपादानं रूपेणेतीत्थम्भूतलक्षणे तृतीया योजना तु दीव्य-
ीति व्युत्पत्त्या क्रीडादिदीव्यत्यर्थयोगात्सर्वे देवाश्चन्द्रादिरूपेण ग-
ने स्थिता द्योतन्तइति दिव्यत्यर्थः । द्युतियोगाद्देवाः वायवः सतत-
त्या दीव्यत्यर्थगतियोगाद्देवाश्च शब्दोपात्ताश्चेतरे सर्वे ऽपि वा स्तू-
न्तइति दीव्यत्यर्थस्तुतियोगाद्देवा इति प्रकारवचनमितिकरणं
ारावर्त्यं कार्या गत्येत्यत्र तु तृतीययैवेतिकरणार्थस्य लब्धत्वान्नेति
रणापेक्षा आर्थवादिकीनां स्तुतीनां विधिशेषत्वेन देवता(स्वरूपप-
त्वाभावान्मन्त्रैरित्युक्तम् । अस्य च ग्रन्थस्य क्रमेण श्लोकगतेन्द्रा-
पदोपात्तार्थविवरणत्वावगमात्सर्वेन्द्रादिदेवतागतदेवता) त्वसा-
न्यपरमिन्द्रादिपदमवसीयतइति कृत्वा तथास्माभिर्व्याख्यातम् ।
र्गशब्दस्य सत्तातिरिक्तार्थवाचित्वमुपपादयितुं नक्षत्रदेशो वा मे-
पृष्ठं वा विशेष एवं स्वर्गशब्दवाच्यो न सामान्यमिति प्रकारद्वयं
ावदाह * तथेति * वैदिकेन प्रकृष्टेन स्पष्टेन वादेन तन्मूलेन
पौराणिकानां मातल्यर्जुनसम्वादादिगतेन दर्शनेन याज्ञिकानां
ाइ गन्मस्तुवः संज्योतिषा भूमेत्यादिप्रोत्साहनमन्त्रार्थानुसन्धान-
पेण दर्शनेनेत्यर्थः । वैदिकप्रवादद्वयं यथा वेद इत्युपक्रम्योदाहृ-
म् । ननु न च वै स्वर्गलोका इत्यादिदर्शनेनानेकस्वर्गानुगतसा-
न्यं स्वर्गशब्दवाच्यमङ्गीकार्यं न वा तत्सत्तातो ऽन्यत्सम्भ-
तीत्याशङ्कानिराकरणार्थत्वेन निर्मिश्रसुखसङ्गतिरित्येतद्व्याचष्टे
अथ वेति * केवलमेव सुखं स्वर्गशब्देनोच्यतइत्यनुष- २(

१ अयं पा० २ पु० मा० ।

ङ्गः । सुखस्य केवलं दुःखामिश्रत्वमुपपादयितुं दुःखाभावे ऽप्य
स्पातदुःखासद्भावे ऽपि च व्यतिरेकाद् * दुःखाद्विभक्तमित्यु
म् * नन्वेवं सति कियत्कालं केवलसुखस्येहापि दर्शनात् स्वर्ग
मुष्मिकत्वं न स्यात् इत्याशङ्क्य * यदित्युक्तम् * सर्वसुखसा
सम्पन्नस्यापि पिपासादिदुःखाभावे स्वादूदकपानाद्यप्रवृत्तेः कं
त्काले दुःखस्यापरिहार्यत्वादिष्टवियोगादिदुःखस्य चापरिहार्य
च्चिरकाले केवलसुखोपभोगस्यास्मिन् देशे ऽनुपपत्तेः । परलं
भोग्यत्वादल्पकालस्य च केवलसुखस्य स्वर्गशब्दानभिधेयत्वात्
लौकिकता सिद्धेत्यर्थः । ननु चिरकालोपभोग्यस्य केवलसुः
प्रमाणान्तरेणानवगमात्कथं सम्बन्धग्रहणमित्याशङ्कां निराकुर्वः
र्गादिशब्दार्थनिरूपणस्य प्रकृतसत्तावाचित्वनिराकरणोपयोगित
पसंहरति * तच्चेति * यागादिजन्यस्य चिरकालकेवलसुखस्
माणान्तरेणाग्रहणे ऽपि लौकिके एव सुखे ऽन्वयव्यतिरेका
दुःखामिश्रात्सुखान्निष्कृष्टे गृहीतसम्बन्धः स्वर्गशब्दो ऽल्पकाले
तद्विना प्रत्यासत्तिजन्यदुःखापरिहारेणामिश्रत्वायोगात्कैवल्ये
च्चिरकालताक्षेपाद्विशिष्टमेवालौकिकं प्रतिपादयतीत्याशयः । स्
शब्दस्य सत्तावाचित्वनिराकरणोपसंहारेणेतरयोरपि तुल्यन्याय
द्धत्वात्पृथगनुक्तिः अतश्चापूर्वादिशब्दभोग्यं गवादिशब्दानां स्वा
भिधानेन मन्त्रागमकतया ऽस्मत्पक्षे ऽप्युपपन्नमित्याह * तेनेति
परपक्षनिराकरणमुपसंहरति * अतश्चेति * नन्वेवं तर्हि गोत्वा
श्वादिभ्यो व्यावृत्तत्वेन विशेषरूपत्वादाकृतिवाच्यत्वपक्षो ऽनु
ज्ञः स्यादित्याशङ्क्याह * गोत्वेति * अश्वादिभ्यो व्यावृत्तत्वे
शाबलेयादिष्वनुवृत्तेः सामान्यरूपताप्यस्तीत्याशयः । कुत इति
देहे तु प्रश्नभाष्यं द्वयोः प्रतीतिरेकाभिधानेनैवाविनाभावादित
तीतिसिद्धेः सन्देहहेतोः स्पष्टत्वादयुक्तमाशङ्क्य व्यक्तिपक्षनिश्च
भिप्रायत्वेन व्याचष्टे * कुत इति * सन्देहहेतुप्रतिपादनार्थं गौः
भाष्यं प्रत्ययस्य व्यक्त्याकृत्योस्तुल्यत्वादयुक्तमाशङ्क्य प्रत्ययेह
ब्दशक्तिलक्षणार्थप्रत्ययशब्दाङ्गीकरणेन व्याचष्टे * उच्यतइति
प्रत्ययशब्दस्यानार्जवं द्योतयितुं व्युत्क्रमेण व्याख्यातम् । नन्वेवं र
विरुद्धाव्यभिचारित्वापत्तौ केनान्येन निर्णय इत्याशङ्क्याह * श
ति * नात्रान्येन निर्णयः किं त्वनयोरेव बलाबलावधारणे
भावः । प्रयोगचोदनाभावादितिसूत्रं लोकवेदाधिकरणसिद्ध
ऽन्यथा योजितत्वाद्विवेकायाकृत्यधिकरणपूर्वपक्षे ऽप्यावृत्त्या यो
ति * किं ।ावदिति * लौकिक एवार्थो वेदे ऽपीत्युक्तम् *

नावित्यपेक्षायां प्रयोगचोदनाभावं पर्यालोच्य यो युक्तः स इत्ये-
व्यक्तिवाच्यत्वप्रतिज्ञावगतेः * व्यक्तिर्वाच्येत्युक्तम् * अर्थैकत्व-
ाति सूत्रावयवं द्वयोः प्रतीयमानत्वाद्व्यक्तिमात्रवाच्यत्वं न युक्त-
त्याशङ्कानिराकरणार्थत्वेन व्याख्यातुम् * नन्वित्युक्तम् * एकस्य
ाच्यत्वे द्वयप्रतीतिः कथमित्याशङ्क्य द्वयप्रतीत्युपपादनार्थत्वेना-
भागादिति सूत्रावयवो व्याख्यातः । ननु शक्त्यनुसारेण शब्दानां
ाचकत्वाच्छक्तेश्चान्वयव्यतिरेकाभ्यां जातावेव ज्ञातुं शक्यत्वात्का-
योगाभावे ऽपि तस्या एव वाच्यत्वं युक्तं न व्यक्तेरित्याशङ्क्याह *
त्यमिति * वाक्यार्थप्रतिपादनात्मकप्रयोजनकाले शब्दानामुच्चारि-
नां वाक्यार्थप्रत्यायनार्थत्वानुसारेणैतद्वाक्यार्थप्रतिपादनोपयोगिप-
ार्थप्रतिपत्तिरेवंविधेन शब्दविभागेन भवतीति ज्ञात्वा तथाविधश-
द्विभागावधारणम्।शब्दविभागसन्देहाभावे ऽपि वाक्यार्थविशेषो-
योगिशब्दार्थविशेषावधारणं तद्यथा श्वेतो धावतीत्यत्रार्थप्रकरणा-
दिना गौरो निर्णेनेक्ति इत्येवं वाक्यार्थपरत्वावधारणे श्वेत इत्येक-
दत्वं धावतेश्च निर्णेजनार्थतावधार्यते । अस्माद्देशाच्छीघ्रं गच्छती-
तद्वाक्यार्थपरत्वे ऽश्वा इति पदद्वित्वं गत्यर्थत्वं च धावतेर्निश्ची-
ते । एवं यथा येन प्रकारेण जातिवाच्यत्वनिरूपणरूपेण व्यक्ति-
ाच्यत्वनिरूपणरूपेण वा पदार्थानां वाक्यार्थप्रत्ययार्थता भवति
था पदार्थानां जात्याख्यस्य व्यक्त्याख्यस्य वा रूपस्य निरूपणं कार्यं
शक्त्यनुरोधेन कार्यावसेयत्वेन तस्यास्तदानुगुण्येन कल्प्यत्वादिति-
ाव: । प्रयोगचोदनाभावव्याख्यानार्थमालम्भनेति भाष्यं व्याचष्टे
आकृतिरिति * ननु देवतोद्देशपूर्वकत्यागसङ्कल्पमात्रत्वाद्याग-
याकृतावप्युपपत्तिरित्याशङ्क्य * नेत्युक्तम् * निष्क्रियत्वेनाकृतेर्य- २
ाष्ठविनियोज्यत्वलक्षणासत्तायोगात्स्वत्वनिवृत्तिरूपत्यागो न सम्भ-
तीत्याशयः । आदिशब्दोपात्तमवघाताद्ययोग्यत्वमुपपादयितुमा-
* अमूर्ता हीति * अवघाताद्युत्तरकालं वा व्रीह्यादेस्त्याज्यत्वा-
ाकृतेश्चावघाताद्ययोग्यत्वात् त्यागानुपपत्त्युपपादनार्थो ऽयं ग्रन्थः
श्लोकद्वयं व्याचष्टे * व्रीहीनिति * यावन्तो ऽवघातादयः संस्का-
ा विनाशिमूर्त्तिमद्द्रव्यविषयत्वादाकृतौ न युज्यन्ते ये चावेक्षणा-
दयो विनाशिमूर्त्तिमद्द्रव्यविषयत्वाभावे ऽपि यागापूर्वाख्यप्रयोज-
नसिद्ध्यर्थत्वादाकृतेश्च यागसाधनत्वाभावान्न तत्र युज्यन्ते । तेषां
सर्वेषां या प्रयोगचोदना तस्या आकृतावभावाद् व्यक्तौ च भावा-
द्विधिविषयत्वयोग्यो यो व्यक्त्याख्यः पदार्थस्तत्कल्पनमवश्याङ्गीक-
र्तव्यमित्यन्वयः । कथं व्यक्तेर्विधिविषयत्वयोग्यतेत्यपेक्षिते * वा-

क्यार्थेत्युक्तम् * ननु विधिविषयत्वायोग्यत्वे ऽप्याकृतेः सम्ब
ग्रहणवशाद्वाच्यत्वं भविष्यतीत्याशङ्क्य * कार्येत्युक्तम् *
र्योपयोगिन्येवार्थे सम्बन्धग्रहणसम्भवो नेतरत्रेत्याशयः
कथमित्यपेक्षायाम् * विध्यधीनत्वाच्चेत्युक्तम् * श
श्रवणानन्तरभाविन्या हि प्रयोज्यवृद्धप्रवृत्त्या तद्विषयज्ञानमनुमाप
त्कारणत्वं शब्दस्य कल्प्यमानं प्रवृत्तेर्विध्यधीनत्वात्तद्विषयज्ञान
रणत्वमेव कल्पयितुं युक्तमिति भावः । एतच्च पूर्वोक्तमेव विव
भाष्यव्याख्यावसरे ऽभिहितमिति न पौनरुक्त्यम् । आकृतेर्निषेध
षयत्वासम्भवमुपपादयति * तथेति * उपसंहरति * तस्मादि
यद्यप्यन्वयव्यतिरेकनिष्कृष्टशक्तिवशेनाकृतेस्तत्त्वतो वाच्यताव
रयितुं शक्या । तथापि कार्यानौपयिकत्वेनास्याः पदार्थकल्पन
स्वज्ञानमात्रादहष्टसिद्ध्यर्थं स्यात्प्रयोगचोदनाविरोधित्वात्त्वसावर्
त्यर्थः। अर्थैकत्वमिति सूत्रावयवावतारणार्थं यत्रेत्याशङ्काभाष्यं
चष्टे *स्यादिति * एतदाशङ्कानिराकरणार्थत्वेन सूत्रावयवव्या
नार्थमुक्तमिति भाष्यं व्याचष्टे * तदिति * केन न्यायेनेत्यप
यामन्यायश्चानेकशब्दत्वमितिसूत्रं भाष्यकृता ऽन्यायश्चानेकार्
मित्यूहित्वा पठितमिति व्याचक्षाणः सूत्रोक्तं न्यायत्रयमाह *अ
स्थितेति * यववराहाधिकरणोक्तन्यायपरामर्शार्थं वेदं भाष्यमि
व्याख्यानान्तरार्थं तत्र न्यायमाह * सम्बन्धानां चेति * र
सदृशानां प्रियङ्गुदीर्घशूकादीनामेकाभिधानेनैवेतरप्रतीतिसि
वादिशब्दानामर्थैक्यं स्थितम् । तथैव सम्बन्धानामप्येकाभिधाने
तरत्र प्रतीतिसिद्धेरन्याय्यानेकार्थतेत्यर्थः । कथमित्याशङ्का
व्याचष्टे * कथं तर्हीति * सादृश्यवत्सम्बन्धादप्येकाभि
नेतरप्रतीतिसिद्धावुक्तायामपि किमिह सादृश्यादेकाभिधा
तरप्रतीतिसम्बन्धाद्वेति विशेषजिज्ञासयोरन्वयः प्रश्नपूर्व
ख्याने तु समञ्जस एव । व्यक्तिपदार्थकस्येत्यादिभाष्यमेतत्प्र
सम्बन्धत्वादुपेक्ष्य स्वयमविभागादिति सूत्रावयवमेतत्प्रश्नाया
णार्थत्वेनावतारयति * अत आहेति * इह च प्रश्नोत्तरएव स
न्धाद्भाष्यकृतः शून्यहृदयाभिधानापत्तेरेतदाशङ्कापरिहारासाम
च्च शुद्धव्यक्त्यभिधानपक्षत्यागादाकृतिविशिष्टव्यक्त्यभिधानपक्ष
ग्रहार्थत्वेनोत्तरभाष्यव्याख्याने प्रतिज्ञासंन्यासाख्यनिग्रहस्थाना
विभागादिति च सूत्रावयवेनैव सुपरिहरत्वेनासामर्थ्यायोगात्स
वयवव्याख्योपेक्षाकारणाभावाच्चैतत्सूत्रावयवव्याख्यानार्थं व्य
सम्बन्धादित्युत्तरभाष्यं, कथं व्यक्त्यन्तरेण प्रयोग इति चाशङ्का

ष्यं भाष्यकृतोक्तमपि लेखकैः प्रमादान्न लिखितं लिखितमपि प्र-
नमिति प्रतिभाति । अवतारितं सूत्रावयवं व्याचष्टे * यतस्त्वि-
ति * शङ्कानिराकरणार्थस्तुशब्द. । एतच्च यत्र हि शुक्ल इति वा
ष्ण इति वा गुणः प्रतीतो भवति भवति खल्वसावलङ्कुणवति प्र-
यमाधातुमिति तद्भूताधिकरणभाष्येण तुल्यन्यायत्वादुक्तं भव-
त्याह * तदुक्तमिति * नन्वालम्भादिचोदनासु व्यक्त्योर्वा-
धत्वं श्येनचितादिचोदनासु त्वाकृतेरेव क्रियार्थत्वाल्लक्षितायाश्चा-
ब्दत्वेन धूमगम्याग्निवच्छाब्दक्रियान्वयायोगात्तस्या एव वाच्यता-
कार्येत्याशङ्क्याह * यस्य त्विति * शङ्कानिराकरणार्थस्तुशब्दः
णलाक्षणिकत्वयोः शब्दस्य शक्त्यभावे ऽपि तात्पर्यसद्भावाच्छ्वशु-
ल्लज्जते स्नुषेत्यादौ च पुत्रविशिष्टभार्यादिवाचिनः स्नुषादिश-
स्य विशेषणभूतपुत्राद्यनभिधाने विशेष्यभूतभार्याभिधानाशक्तेः
नुषादिशब्दाभिहितस्यापि पुत्रादेर्लज्जादिक्रियान्वयादर्शनेन ता-
र्यवृत्तेरेव पदार्थान्वयकारणत्वावसायाल्लाक्षणिका ऽप्याकृतिः
क्रियात्वं प्रतिपत्तुं शक्तेत्याशयः । तस्य पदस्य तत्रस्थस्य तत्रैवार्थे व-
मानस्येत्यर्थः । नन्वेवं सति व्यक्तेरपि लाक्षणिकया क्रियान्वयो-
पत्तेर्जातिवाचितैव कस्मादिष्टेत्याशङ्क्याह * इत्यपि चेति * इति २१
रणो ऽयमेवशब्दार्थे एवमपीत्युक्तं भवति यद्यप्युभयथापि क्रिया-
न्वयो युज्यते तथाप्याकृतेर्व्यक्तिविशेषनिश्चायकत्वाभावाद्व्यक्तेश्चा-
तिविशेषनिश्चायकत्वसद्भावादाकृतेरेव लाक्षणिकत्वं युक्तं न व्य-
क्तेरित्यर्थः । उपसंहरति * तस्मादिति * ननु विकल्पादिपक्षा-
तरसम्भवाशायमुपसंहारो युक्त इत्याशङ्क्याह * न चेति * अद्र-
व्यशब्दत्वादितिसूत्रं स्वयं तावद्व्याचष्टे * अपि चेति * पूर्वस्मि-
न्नेव पक्षे ऽयमपि हेतुरित्यपिच शब्दस्यार्थः । जातिपक्षे द्रव्यशब्दत्वा-
भावापत्तेर्व्यक्तेरेव वाच्यतेत्युक्ते तदापत्तौ को दोष इत्यपेक्षायाम्
* सामानाधिकरण्यं हीत्युक्तम् * ततश्चेत्यर्थे हिशब्दः श्लोकं व्या-
चष्टे * गोशब्दादीनामिति * एतदेवोपपादयति * गोत्वस्येति *
ननु गोत्वस्य शुक्लादिगुणैः सहैकार्थसमवायलक्षणः सम्बन्धो ऽस्ती-
त्याशङ्क्याह * न हीति * व्यक्तिद्वारस्यैकार्थसमवायस्य व्यक्त्यन-
भिधाने रूपरसादिशब्दवत्सामानाधिकरण्यानापादकत्वात्साक्षा-
त्सम्बन्धेन भाव्यं न चासावस्तीति भावः । ननु व्यक्तिपक्षे गोश-
ब्देन जातिविशिष्टायास्तदुपलक्षिताया वा व्यक्तेरभिधानाच्छुक्लश-
ब्देन च गुणविशिष्टायास्तदुपलक्षिताया वा ऽभिधानात्तयोश्चैकत्वे
प्रमाणाभावात्कथं सामानाधिकरण्यमित्याशङ्क्याह * मम हीति *

व्यक्तिपक्षे सर्वव्यक्त्यभिधानाद्गोशब्दस्य शुक्लायामपि गोव्यक्तौ वृ
शुक्लशब्दस्य च गोजातीयायामपि शुक्लव्यक्तौ वृत्तेरैकार्थ्या
द्धिः । जातिपक्षे तु व्यक्तेः शब्देनानुक्तत्वाल्लक्ष्यमाणायाश्चै
त्वे प्रमाणाभावाद्गवाश्वशब्दयोरिव भिन्नार्थतेति भावः
(मम हि व्यक्तीति व्यक्तिशब्दः । न बलत्वद्रव्येति द्रव्यशब्दः । उ
रार्धे पूर्वार्धस्य विपर्ययेणाव्यक्तिशब्दत्वादिति वक्तव्ये द्रव्यशब्दव्या
करेण मिश्रणेन गुणशब्दस्य गुणवचनशब्दस्य शुक्लादिशब्दस्य
णवचनशब्दस्य शुक्लादिशब्दस्य गुणोपलक्षितद्रव्यवाचित्वमेव न
गुणवाचित्वमिति व्यक्त्यभिधानपक्षे पूर्वपक्षमते सूचितमित्यन्वय
व्यक्तिद्रव्यशब्दव्यतिकरेण इति सूचितमित्यन्वयः । मम हि व्यक्त
ति व्यक्तिशब्दः न बलत्वद्रव्यशब्देति च द्रव्यशब्दः तयोः झटि
न्वयव्यतिरेकयोरेकविषयत्वोपस्थित्यै व्यक्तिशब्दस्य द्रव्यशब्दस्यैव
उभयत्र प्रयोज्यत्वौचित्ये ऽपि तयोः व्यतिकरः भिन्नरूपयोः प्रयो
तेन गुणशब्दस्य गुणवचनसंज्ञकशब्दस्य गुणव्यक्तिवाचित्वशङ्का
व्यक्तिवाचित्वपक्षे प्रसक्ता सा[1]) गुणशब्दस्य गुणोपलक्षितद्रव्य
चित्वं न तु गुणव्यक्तिवाचित्वं जातिपक्षोक्तदोषसाम्यादिति सूचि
तम् । श्लोकं व्याचष्टे * जातीति * ननु गोशब्देन कृष्णादिव्यक्तीन
मप्यभिधानाच्छुक्लशब्देन चाश्वादिव्यक्तीनामप्यभिधानात्कथं स
मानाधिकरण्यमित्याशङ्क्य * तच्चेत्युक्तम् * द्रव्यान्तराभिधाने ऽ
तस्यापि तावदभिधानात्सा(मानाधिकरण्यसिद्धिरित्यपिशब्दार्थे न
शब्दः नन्वाकृतिपक्षे ऽपि तर्हि जातिगुणाभ्यां लक्षितस्य द्रव्यस्यै
त्वमपि सम्भवतीति पाक्षिकं सा[2])माधिकरण्यं स्यादित्याशङ्क्य * ए
विधमपीत्युक्तम् * व्यक्तिपक्षे भिन्नव्यक्तिवाचित्वे ऽप्येकव्यक्तिव
चित्वं नित्यमस्ति। जातिपक्षे तु भिन्नार्थत्वसङ्कीर्णमप्येकार्थत्वं नास्ति
त्यर्थः। अद्रव्यशब्दत्वादित्यस्याकृतिपक्षे लक्षणयाप्येकद्रव्यशब्दत्व
भावप्रसङ्गादित्येवं साक्षात्सामानाधिकरण्याभावप्रसङ्गाभिधानप
त्वेन व्याख्यानान्तरमाह * इतीति * ननु द्रव्याश्रयस्येति भा
ण द्रव्यशब्दस्य लक्षणया गुणपरत्वमुक्त्वा न भवेदिति न
भवतिनान्वयः कृतः तत्किमित्यन्यथा भवता व्याख्यातमित्य
शङ्क्याह * यस्त्विति * कथं द्रव्यशब्देन गुणलक्षणेत्यपेक्षा
* तत् द्रव्यमाश्रयो ऽस्येत्युक्तम् * भेदाधिष्ठानत्वाच्चाश्रयाश्रयिभ
वस्य यत्र पदस्य युक्त इति व्यधिकरणत्वेन निर्दिष्टस्य गुणस्य प्रयो

१ अयं पा० २ पु० ना० ।
२ अयं पा० २ पु० ना० ।

स्तदर्हत्वमप्यनेनैवोपपादितम् * अतिक्लिष्टत्वोपपादनार्थमप्रधान-
तगुणाविपरीतार्थेन प्रधानभूतार्थेन द्रव्यशब्देन लक्षणा । नञश्च
वत्यर्थसापेक्षस्य द्रव्योपसर्जनत्वेनासमर्थस्य द्रव्यशब्देन * स-
ासाङ्गीकरणमुक्तम् * यद्यपि क्रिया न स्यादिति चेदर्थान्तरे वि-
ानं द्रव्यमिति चेदित्यनुभाषणसूत्रगतो द्रव्यशब्दः षडादिशब्द-
द्रव्यवाचित्वाभावादगत्या गुणलक्षणार्थो व्याख्यायते तथापी-
द्रव्यशब्देनैव गुणस्य वक्तुं शक्यत्वात्तल्लक्षणाश्रयणं युक्तमि-
ाशयः । किमेवं सत्ययुक्तमिदं भाष्यमित्याशङ्क्याह * तत्रापि
ति * नात्र द्रव्यशब्देन समस्तस्य नञो भवत्यन्वयो विवक्षितः ।
ः त्वकारप्रश्लेषेण गुणशब्देनाद्रव्यशब्दएव सौत्रे व्याख्यानायो-
ः । जातिशब्दस्याप्यद्रव्यशब्दत्वोपपत्तेः कथं गुणशब्दस्यैवाद्रव्य-
ब्दतेत्याशङ्कानिराकरणार्थं द्रव्यत्वेन नापर्युदस्ते तदन्यापेक्षायां द्र-
ाकाश्रयत्वाद् गुण एव शीघ्रमुपतिष्ठते जातिस्त्वनेकद्रव्यगुणकर्मा-
यत्वान्न शीघ्रमुपतिष्ठतइत्यद्रव्यशब्देन गुणाभिधानाद् गुणशब्द
ाद्रव्यशब्द इति * द्रव्याश्रयस्येत्युक्तम् * नन्वेवं सति नकारा- २८
ाभावान्न द्रव्याश्रयवचन इति भाष्यं कथमित्याशङ्क्याध्याहारेण
जयितुम् * स आकृतेरित्युक्तम् * स्वरूपेण शब्दस्य निषेद्धुम-
क्यत्वाद्यस्याकृतिः शब्दार्थ इति चानन्तरमभिधानादाकृतिवाचि-
ब्दसम्बन्धिनश्चेदित्यर्थलाभं मत्वा * एकवाक्यसम्बन्धमित्युक्तम् ।
वेवं सत्यन्याय्यलक्षणासमर्थसमासदोषपरिहारादक्षरार्थमात्र-
सम्भवेनैषा योजनेति किमित्युक्तमित्याशङ्क्याह * सामानाधि-
रण्येति * षड्गावो देया इति समानाधिकरणनिर्दिष्टगुणशब्दोदा-
रणाद्गोशब्दस्याकृतिवाचित्वे तत्सामानाधिकरण्यं षडादिशब्दानां
युज्येतेति पूर्वपक्षिणः सिद्धान्तबोधं प्रतीयते । तच्च भेदाधिष्ठाना-
याश्रयिभावोक्तेर्निष्कृष्टगुणवचनस्याद्रव्यशब्दत्वावसायात्तस्य च
ाक्तिपक्षे ऽपि गुणव्यक्तिपर्यवसायित्वेन द्रव्यव्यक्तिपरत्वाभावा-
शेषात्तदानीमपि क्लेशेनाक्षरार्थयोजनायामप्यनुपपन्नमेवेत्यर्थः । का
र्हि सूत्रस्य गतिरित्याशङ्क्याह*इतीति*यास्माभिर्व्यक्तिद्रव्यशब्दव्य-
करेण व्यक्तिपक्षे गुणोपलक्षितद्रव्यव्यक्तिवाचित्वं गुणशब्दानां सूच-
त्वा जातिपक्षे द्रव्यशब्दत्वाभावात्सामानाधिकरण्यं न सम्भवतीति
ाख्या कृता सैव युक्ता न तु या भाष्यकृता गुणशब्दस्य व्यक्तिपक्षे
णव्यक्तिवाचित्वमभिप्रेत्य कृता तस्मिन्व्याख्याने सामानाधिकर-
ाभावप्रसङ्गस्योभयवादिसाम्येनाचोद्यत्वापत्तिरित्यर्थः । अन्यदर्श-
ाच्चेति पूर्वपक्षसूत्रान्तरगतभाष्यं स्पष्टत्वादुपेक्ष्याकृतिस्तु क्रियार्थ-

त्वादिति सिद्धान्तसूत्रव्याख्यानार्थं वचनमाकृतौ सम्भवतीति
गुणत्वसामान्येन बुद्धिस्थमपठित्वैव दूषयति । * किं चेति * न
त्वमेतदेव भाष्यमुपेक्षितव्यं किं त्वन्यदपीति किं चशब्दार्थ
द्वा कस्मै देवाय हविषा विधेमेत्येकशब्दार्थे किमो व्याख्यान
शब्दस्य चापो भूयिष्ठा इत्येको अब्रवीदित्यन्यार्थदर्शनादन्यच्च भ
मुपेक्षितव्यमित्यर्थलाभः । किमित्युपेक्षितव्यमित्यपेक्षायाम् * नै
कम् * नैवाकृतिस्तु क्रियार्थत्वादिति वदता सूत्रकृतेष्टका
कृतिसम्पादनमभ्युपगतं येन च यत्र साकृतौ सम्भवतीत्येवं
व्याख्या युज्येतेत्यर्थः किमिति नाभ्युपगतमित्याशङ्क्याह * य
ति * स्वरूपेण जातेर्नित्यत्वात्स्वव्यक्तिभूतद्रव्यसमवायित्वे
म्पादनं वाच्यं। तदपि नित्येष्वात्मादिषु नित्यसिद्धत्वान्न सम्प
अपेक्षते । कृतकेष्वप्यारम्भकहेतुस्वभावादेव तदारब्धे द्रव्ये स
समवायाच्छ्येनत्वजातीयव्यक्त्यनारम्भिकाभिरिष्टकाभिः श्ये
जातिसम्पादनमयुक्तमित्येवं रूपस्योपालम्भस्य दोषस्येष्टकाभिः
नत्वाकृतिसम्पादनाभ्युपगमे प्रसङ्गाच्चेदमभ्युपगतमित्यर्थः । क
श्येनवच्चनचोदनार्थं इत्याशङ्क्याह * पिष्टेति * अमी पि
ण्डाः सिंहाः कार्या इत्युक्ते पिष्टपिण्डेन सिंहाकृतिव्यक्तेः स
दनाशक्तेर्यथा पिष्टपिण्डानामेव सिंहाकृतिसादृश्यसम्पादनं
नार्थस्तथात्रापीत्यर्थः । प्रयोज्यव्यापारवाचिना सम्पत्तिशब्देन
योजकव्यापारः सम्पादनं लक्ष्यते । नन्वाकृतेर्नित्यत्वे सम्पाद
त्तच्चित्त्वे श्येनशब्दस्य सादृश्यपरत्वेन गौणत्वापत्तेस्तत्परिह
व्यक्तिपक्ष एवात्राश्रीयते श्येनव्यक्तेश्च यत्नेनानुत्पाद्यत्वे ऽपि श
स्त्रीपुंसयोगेनोत्पादयितुं शक्यत्वात्प्रथमश्रुतश्येनशब्दानुरोधेन
श्चाच्छ्रुतस्य चिनोतेस्तल्लक्षणार्थतया व्याख्यातुं शक्यत्वादित
ङ्क्य * पक्षद्वये ऽपीत्युक्तम् * श्येनस्त्रीपुंसयोगेनोत्पादितायाः
श्येनव्यक्तेरग्न्याधारत्वायोगेनाग्न्याधारानुपपत्तेः । कर्मशय
ख्यायामिति स्मृतिबाधप्रसङ्गाददृष्टार्थत्वापत्तेश्च तत्परिहाराय
णत्वाश्रयणमप्युचितमित्याशयः । नन्वेवं सति व्यक्तिसादृश्य
पि सम्पादयितुं शक्यत्वात्कथमस्य श्येनशब्दस्याकृतिवाचित्वेन
श्रय इत्याशङ्क्याह * सा त्विति * सा सादृश्यसम्पत्तिः श्येन
त्यास्या आकृत्यन्तरमात्रविलक्षणत्वात्तस्य च कतिपयविशेषोपाद
सम्पादयितुं शक्यत्वात् सकलव्यक्त्यन्तरविलक्षणेन श्येनविशे
व्यक्तिशब्दाभिलप्येन सादृश्यसम्पादनं सकलविशेषोपादानेन
न चेष्टकाभिरत्यन्तकुशलेनापि सम्पादयितुं शक्यमिति भाव

थ सामान्यविशेषाश्रयभूतमसाधारणं व्यक्तिशब्देनाभिप्रेतं तत-
त्वस्यैवंविधमिति निरूपणरूपविकल्पगोचरत्वाभावात्तानेन सह
कल्पगोचरस्य सादृश्यसम्पादनं कथं चिच्छक्यमित्यर्थः । ननु
द्यपि सामान्यविशेषाश्रयस्य व्यक्त्याख्यस्यासाधारणस्य रूपेणैवं-
विधमिति विकल्पागोचरत्वात्सादृश्यप्रतियोगित्वं न सम्भवतीति
शेषावच्छिन्नेन च तेन सादृश्यमिष्टकाभिरशक्यसम्पादं सामा-
न्यावच्छिन्नेन च सादृश्यमुच्यमानं विशेषणे पूर्वनिपातात्सामान्ये-
वोक्तं स्यात्तथापि सामान्यविशेषाभ्यामन्यदित्येवंरूपविकल्पगोच-
त्वोपपत्तेरसाधारणशब्दाभिलप्यया व्यक्त्या सह सादृश्यं सम्पा-
यिष्यतइत्याशङ्क्यानिर्धारितविशेषया यया कया चिद्व्यक्त्या सा-
श्यं (विधीयेत निर्धारितविशेषया वा यया कया चिदिति विक-
पाद्यपक्षे तावद् दूषणमाह * सामान्येति * सामान्य विशेषावच्छे-
कत्वेन यत्रापेक्षते सादृश्यं[1]) तत्तथोक्तम् । तच्च व्यक्तिमात्रे ऽपि
नेत्यप्राप्तं सर्वस्य येन केन चित्सादृश्यावश्यं भावादित्यर्थः । श्येन-
व्यक्त्या यया कया चिदिति तु विशेषणे श्येनत्वाकृतिव्यतिरिक्तस्य श्ये-
नव्यक्तिमात्रस्याभावाच्छ्येनत्वाकृतिसादृश्यमेव ... द्यते इति भावः ।
द्वितीयपक्षे तु यद्व्यक्तिसादृश्यं विहितं तद्दर्शि... तत्सादृश्यस्याश-
क्यसम्पाद्यत्वाद्व्यक्त्यन्तरसादृश्यस्य चाविहितत्वात्सर्वपुरुषविषय
वं शास्त्रस्य व्याहन्येतेत्याह * एकेति * सूत्रार्थमुपसंहरति * त-
स्मादिति * ननु चेति भाष्येण श्येनव्यक्तेश्चयनोत्पाद्यत्वायोगे ऽपि
चयनोत्पादकत्वेन विधिः सम्भवति एकव्यक्त्यनुत्पाद्यत्वे ऽपि चय-
नस्य बह्वीभिरुत्पादयितुं शक्यत्वादित्याशङ्क्य न साधकतम इत्यनेन
श्येनशब्दार्थस्येप्सिततमत्वावगतेः साधनत्वेन विधिर्न सम्भवतीत्युक्तं
तदुपपादयति *न हीति* यद्यप्ययं कर्मशब्दः क्विप्प्रत्ययवाच्यवि-
शेषणत्वान्नोपपदविशेषणं तथापि कर्मणि हन इत्यतः सूत्रादनुव-
र्तमानस्य कर्मशब्दस्योपपदविशेषणत्वान्न शब्दार्थस्य कर्मतावसीयत-
इत्याशयः । अतश्चयनेनेति विध्यर्थप्रतिपादकं भाष्यं व्याचष्टे * श्ये-
नमिति * ननु श्येनाकृतिव्यक्त्योश्चयनेनोत्पादयितुमशक्यत्वात्क-
थमेष विध्यर्थः स्यादित्याशङ्क्योक्तमेव सादृश्यलक्षणार्थत्वं भाष्य-
काराभिप्रेतत्वप्रदर्शनार्थं पुनराह * तत्रापीति * श्येनसदृशं चीय-
मानमिष्टकासमूहं चयनेन भावयेदिति विध्यर्थो ऽनेन दर्शितः
चयनमाकृतौ सम्भवतीत्याद्यस्यापि भाष्यस्य सादृश्यविषयत्वेन स-
मर्थनोपपत्तेर्यथाश्रुतस्यैव पूर्वोक्तं दूषणं दर्शितम् । उभयत्रेत्यादिना

१ अयं पा० २ पु० मा० ।

क्रियार्थत्वस्योभयत्र साम्येनानिश्चायकत्वमाशङ्क्य किं पुनरत्रेत्यं
पूर्वपक्षहेतोरनिश्चायकत्वापादनायैवाकृतेः क्रियार्थत्वमुक्तं नाकृ
वाच्यत्वनिश्चयायेति सूचितम् । तत्स्पष्टत्वादव्याख्याय कथं
ह्याकृतिवाच्यत्वनिश्चय इत्यपेक्षायामाकृतिस्त्विति तुशब्दसूचि
पपत्तिप्रदर्शनार्थमाकृतिरित्यादिभाष्यमाकृतिवाच्यत्वं प्रतिज्ञाय
क्तिवाच्यत्वपारिशेष्याद‌निराकरणादयुक्तमाशङ्क्य संक्षेपेण व्या
* असाधारण इति * व्यक्त्याकृत्योर्मध्ये का वाच्येति विचारणा
व्यक्तिवाच्यत्वे निराकृते पारिशेष्यादाकृतिवाच्यत्वं निश्चीयतइ
भावः । ग्रन्थस्त्वेवं योज्यः असाधारणे व्यक्त्याख्ये यदा शब्दप्र
त्तिर्न सम्भवति तदा पारिशेष्यादाकृतिः शब्दार्थ इति परिग्रह इ
पूर्वग्रन्थगतं परिग्रहपदमनुवक्तव्यं शब्दार्थपदं चाध्याहार्यं क
व्यक्तौ शब्दस्य प्रवृत्त्यसम्भव इत्याशङ्कानिराकरणार्थत्वेन यदिति
भाष्यं व्याख्यातुमसाधारणे वाच्ये ऽङ्गीक्रियमाणे शब्दस्य प्रभृतेष्व
नेकेष्वर्थेषु वृत्त्यसम्भवादित्येतदेवावृत्त्या योज्यम् । असाधारणत्वा
व्यक्तेरेकस्यामपि शब्दप्रवृत्तिर्न सम्भवतीति भाष्यसूचितार्थप्रदर्श
नायासाधारणशब्दः । सर्वसामान्यविशेषवियुक्ता हीत्यनेनैका
व्यक्तिर्न शब्दार्थ इत्युक्तमिति व्याख्यानार्थत्वेन चैतद्योज्यं वि
चिद्धि सामान्यरूपं किं चिद्धि विशेषरूपं वावलम्ब्य शब्देन प्र
वर्त्तितव्यं तद्वियुक्ते रूपं कथं प्रवर्त्तेतेत्याशयः । ननु सामान्यविशे
षरूपशब्दप्रवृत्तिनिमित्ताभावे ऽपि तदुभयरूपरहितत्वमेव निमित्त
भविष्यति । न च तदेवसामान्यम् वस्तुरूपत्वादिति नैष दोष इत्या
दिना न हि तत्सामान्यमित्यन्तेन भाष्येणाशङ्क्य सामान्यविशेषरूप
रहितत्वस्य तदाश्रयाव्यपदेश्यत्वापरपर्यायस्याश्वादिव्यक्तिष्वपि
भावाद्गोशब्दप्रवृत्तिः प्रसज्येतेति प्रतिपादनार्थं यदीति भाष्यं व्याख्या-
तुम् * अव्यपदेश्यत्वेन चेत्युक्तम् * ननु सामान्यविशेषवियुक्तत्वाविशेषे
ऽप्यृगादिशब्दवत्प्रयोगतो व्यवस्था भविष्यतीत्याहेतिभाष्येणाशङ्क्य तथा
सत्यद्यजातायाङ्गव्यदृष्टप्रयोगत्वात्प्रथमः प्रयोगो न स्यादिति यदीत्यने-
न दूषणमुक्त्वा कथं चित्प्रयोगसम्भवे ऽपि व्यवहारकालीनस्य प्रयोग-
य निर्द्धारितैकव्यक्तिविषयत्वेनानेकव्यक्तिसाधारण्याभावाद्गौर्न पदा
स्पृष्टव्येत्यादौ शाबलेया बाहुलेया वेति विकल्पबुद्धिः स्यान्न गोमा-
मिति सामान्यबुद्धिरित्येतदर्थप्रतिपादकं सामान्यप्रत्ययश्चेति भाष्यं
याख्यातुम् * सामान्याकारेण चेत्युक्तम् * गौर्न पदा स्पृष्टव्येत्या-
ौ यत्र सामान्याकारेण व्यक्तिविशेषमनाश्रित्य शब्दः प्रयुज्यते तत्र
विकल्पः प्रसज्येतेत्यर्थः । ननु व्यक्तिवाचिनो ऽपि शब्दादभिधेया-

नाभावेन सामान्यप्रत्ययोपपत्तिरित्याशङ्क्य * व्यापकेत्युक्तम् * त्वैकार्थसमवायिनां शाबलेयत्वाद्यवान्तरसामान्यरूपाणां विशे- णां गोत्वव्याप्यत्वाश्वव्यापकगोत्वापेक्षामात्रेणेतरत्र तदाश्रयभू- मसाधारणं व्यक्तिशब्दाभिलप्यं नैव गोत्वापेक्षं भवति। इतरेति ठे त्वसाधारणशब्देनोक्तत्वात् व्यक्तिः परामृश्यते। ननु विशेषा- ं गोत्वापेक्षत्वे तदाश्रयस्यासाधारणस्याप्यव्यभिचाराद्गोत्वापेक्षा- ऽदापद्येतेत्याशङ्क्य व्याप्यस्य धूमत्वसामान्यस्य व्यापकाग्न्यपेक्ष- ऽपि तदाश्रयस्यासाधारणस्याग्न्यपेक्षा नास्ति वाक्यादिभावेन न्दिग्धे धूमे असाधारणनिश्चये ऽप्यनिश्चयादिति प्रतिपादयितुम् व्याप्यसामान्यस्य नैवं विशेषव्याप्यापेक्षयेत्युक्तम् * नन्वसाधा- णरूपेण व्यक्तेः शब्दार्थत्वासम्भवे ऽपि शाबलेयत्वाद्यवान्तरसामा- ात्मकविशेषावच्छिन्नत्वरूपेण शब्दार्थत्वोपपत्तेः। कथं पारिशे- ादाकृतेः शब्दार्थत्वावधारणेत्याशङ्क्याह * तत्रेति * तत्रैवं सा- रणरूपेण शब्दप्रवृत्त्यसम्भवे सति विशेषावच्छिन्नत्वरूपेण व्यक्ते- भिधेयं वाच्यं तस्मिंश्च पक्षे सम्बन्धकथनासम्भवादयो दोषाः ुरित्यर्थः। वाच्यवाचकनियमहानिः सम्बन्धानित्यत्वापत्तिर्वि- ऽपप्रसङ्गो शेषव्यक्त्यानयनापत्तिः। नित्यबहुवचनप्रसङ्गशुक्ला- शब्दसामानाधिकरण्यासम्भवश्चादिशब्देनोपात्ताः। एतेनैव व्य- ्रभिधानपक्षे सर्वव्यक्त्यभिधानपक्षे च यथासम्भवं योज्याः। अनि- ियमानत्वादपि न विशेषाणां वाच्यतेत्याह * न चेति * नन्वेव- पे विकल्पसमुच्चयाद्यनेकपक्षसम्भवान्नाकृतेः परिशेषसिद्धिरि- ाशङ्क्य स्वतन्त्रयोर्विशेषणविशेष्यभावरहितयोस्तावद्व्यक्त्याकृ- ार्विकल्पेन समुच्चयेन वाभिधाननिरासेनैव निरस्तमित्याह * ए- ाति * व्यक्तिविशिष्टाकृतिपक्षो ऽपि व्यक्तेर्विशेषणत्वेन पूर्वाभि- नापत्तेस्तन्निरासेनैव निरस्त इत्याह * व्यक्तीति * एतेन प्रयुक्त ग्नुषङ्गः। आकृतिरिति पाठे प्रयुक्तेति विपरिणतानुषङ्गः सम्ब- समुदायाभिधानपक्षैर्निराकर्तुमाह * सम्बन्धेति * सम्बन्धस- ायययोरपि वाच्यत्वाभ्युपगमे ऽवश्यवाच्यभूतसम्बन्धिसमुदायि- शेषणता ऽभ्युपगन्तव्या भवतीत्यन्वयः। कस्मादित्यपेक्षिते स्वरूपेत्युक्तम् * सम्बन्धो ऽयं समुदायो ऽयमिति स्वतन्त्ररू- ाप्रतीतेः सम्बन्धिसमुदायिनिरपेक्षस्य सम्बन्धसमुदायानिरूपणा- ादावविभागेन सर्वशब्दानां पर्यायत्वापत्तेरित्यर्थः। तथा सति दोष इत्यपेक्षायामाह * तत्रापीति * व्यक्त्यंशे च व्यक्त्याभि- नपक्षोक्ताः सर्वे दोषाः स्युरित्याह * व्यक्त्यंशे चेति * समुदा-

यस्य स्पर्द्धमानैककार्यपरार्थविषयत्वात्साक्षात् क्रियानिष्पत्ति
साधनविशेषणात्मकभिन्नकार्ययोर्विशेषणत्वेन विशेष्यत्वेन व
र्द्धमानयोर्व्यक्त्याकृत्योर्नास्त्येवेत्याह * न चेति * जा
त्योश्चात्यन्तभेदाभावादुभावपि न स्त इत्याह *
२५१.१२ नन्त्यन्तेति * आकृतिविशिष्टव्यक्तिपक्षे ऽपि व्यक्ति
ष्टो वाकृतिविशिष्टो वाच्यो व्यक्तिमात्रं च विकल्प्याद्यपक्ष
वद् दूषयति * आकृतीति * द्वितीयपक्षे त्वाकृतिव्यतिरि
द्विशिष्टव्यक्तिमात्राव्यक्त्यभावात्सिद्धान्तापत्तिरिति स्वयमेवाह
ह * व्यक्तीति * एवमाकृतिव्यतिरिक्तायास्सप्तपक्ष्या नि
त्वात्तन्निरासेनैव च व्यतिकीर्णपक्षनिरासंसिद्धेर्लिङ्गकारकस
नां च प्रत्ययार्थत्वेन प्रातिपदिकवाच्यत्वासिद्धेः शब्दस्वरूपस्य
त्यक्षसिद्धत्वेनावाच्यत्वस्य नात्मानमभिधत्ते हि शब्दः कश्चित्कद
नेति शून्यवादवार्त्तिकपाठानिरस्तत्वात्पारिशेष्यादाकृतिवाच्यत
द्धिरित्युक्तम् * इदानीम् *

तत्र प्रयोगबाहुल्यात्तद्विशेषेषु सत्स्वपि ।
प्रयोगात्परसामान्ये सति वाच्यप्रयोगतः ॥
सास्नाद्येकार्थसम्बन्धिगोत्वमात्रस्य वाचकः ।
गोशब्द इति विज्ञानमन्वयव्यतिरेकजम् ॥

इत्यनेन न्यायेनान्वयव्यतिरेकाभ्यामपि गोत्वस्यैव गोशब्दव
तावसीयतइत्याह *नानेति* गोत्वाकारविषयैव गोशब्दस्य वा
सह सम्बन्धे वाचकत्वरूपे शक्तिरन्वयव्यतिरेकाभ्यां गम्यतइ
कृत्तद्धितसमासैः सम्बन्धाभिधानं भावप्रत्ययेनेति स्मृतेः । २
न्धवाची वाच्यत्वशब्दः शब्दशक्तिजन्यज्ञानकर्मत्वमेव वा श
शब्देनाभिप्रेत्य गोत्वाकाराश्रितैव गोशब्दं प्रति वाच्यत्वरूपा शक्ति
ति योज्यम् । ननु वृद्धव्यवहारावसेयत्वाच्छक्तेः तस्य च सन् हि
स्तुविषयत्वात् कथं निष्कृष्टैकाकारविषया शक्तिरवसीयतइत्या
* तद्भेदेत्युक्तम् * सर्वात्मकवस्तुविषयत्वे शब्दशक्तेरेकेनैव
ब्दादिना सर्वात्मकवस्तुप्रतीतिसिद्धेः शुक्लादिशब्दानर्थक्य
ङ्गात्तद्भेदाद्वस्तुगतान् भिन्नाकारांश्छब्दशक्तयो ऽनुसरन्ति
र्थः । भिद्यन्तइति भेदाइति व्युत्पत्त्या वस्तुगता भेदा इति
ग्रहीतव्यं वस्तुगतभिन्नाकारानुसाराभावेनैकशब्दव्यक्त्यानर्थक्य
सङ्गाद् बहुवचनेन सूचितः । निरंशवस्तुवादिनं निराकर्तुं *नान
रेष्वित्युक्तम् * नानेकाकारेष्विति पाठे व्यावृत्तानुवृत्ताकारेष्वि
र्थः । ननु गोत्वमात्रविषयत्वे गोशब्दशक्तेः कथं गोशब्दात्पशु

गोत्वपार्थिवत्वद्रव्यत्वसत्त्वावगतिः । एकार्थसमवायमात्रेण तन्नि-
श्रयाभ्युपगमे शाबलेयत्वादीनामपि निश्चयः स्यादित्याशङ्क्याह
तदेकेति सामान्यान्तरावगतिर्निश्चयस्तैः सामान्यान्तरैर्गोशब्दा-
र्थस्य गोत्वस्य व्याप्तैर्विशेषैश्च साहचर्ये सत्यप्यव्याप्तेस्तेषां सन्देहनि-
श्चयेऽन्यतोऽवधारणाकाङ्क्षेत्यर्थः । एवं सिद्धान्तमुपपाद्य पूर्वोक्तान्
दोषान्परिहर्तुमाह *अनत्यन्तेति* आदिशब्दान्नित्यत्वम् । ननु वस्तुतो
ऽत्यन्तव्यतिरेकाभावे ऽपि शब्दान्निकृष्टावगतेः कथं दोषप्रसङ्गाभा-
व इत आह * सा हीति * कैवल्याभिप्रायो निकृष्टशब्दो न स्वनि-
कृष्टत्वाभिप्रायः । यद्यप्याकृतिः शब्दाच्छुद्धा प्रतीयते तथापि क्रिया-
न्वयस्यापि प्रतीतेस्तदन्यथानुपपत्त्या व्यक्तितादात्म्यावगमात्सम्भव-
त्येव क्रियान्वय इत्यर्थः । प्रोक्षणादि तु व्यतिरेके ऽपि सम्भवतीत्याह
* प्रोक्षणेति * क्षरणार्थसिञ्चतिधात्वर्थवाचित्वादुक्षतेः क्षार्यस्य
चोदकादेरूर्ध्वाधोदेशविभागसंयोगमात्रेण सिद्धेराभिमुख्यमात्रेण
क्षरणसिद्धिराभिमुख्यमात्रेण च जातेरपि द्रव्यवत्कर्मत्वोपपत्तेः ।
सिच्यमानस्योदकादेः कर्मीभूतव्रीह्यादिसंयोगानपेक्षणात्पुञ्जीकृतेषु
च व्रीह्युपरिस्थितव्रीहितिरोहितानामधःस्थितानां व्रीहीणां सिच्यमा-
नोदकसंयोगाभावे ऽपि शास्त्रार्थनिष्पत्तिप्रसिद्धेः व्रीह्यादिसंयोगापेक्षा-
यामनुपपत्तेः प्रोक्षणमाकृतेः स्वतो ऽपि सम्भवति अवेक्षणं चाकृतेश्च-
क्षुःसंयुक्तद्रव्यसमवायात्प्रसिद्धमेव आदिशब्देन ध्यानोपादानं कि-
मर्थं तर्ह्यव्यतिरेकोपन्यास इत्याशङ्क्याह * विशसनादीति * प्र-
तीतिसिद्धत्वाकृतेर्विशसनादियोगो न स्वमनीषिकामात्रकल्पित
इत्याह * तथा हीति * पश्वादिष्वपनीताङ्गेषु विच्छिन्नावयवेषु
या विशसनादिविशिष्टा बुद्धिः सामान्यविषयैव विभक्तैरवयवैः सा-
मान्यमात्रानुमानोपपत्तेः । न तु व्यक्तिविषया व्यक्तिविशेषानु-
मानासम्भवे तत्तद्बुद्ध्यभावादित्यर्थः । नन्वाकृतेर्विशसनादियोगे
ऽनित्यत्वप्रसङ्गादनिष्टापत्तिः स्यादित्याशङ्कते * नन्विति * विनष्ट-
व्यक्त्यात्मकरूपेणाकृतेरपि विनाशाभ्युपगमान्नानिष्टापत्तिरिति परि-
हरति * तेनेति * नन्वेवं सत्याकृतिपक्षे ऽपि सम्बन्धानित्यत्वं न
सिद्ध्येदित्याशङ्क्याह * आश्रयान्तरेति * अत्यन्तव्यतिरेकवादि-
नाप्यन्तराले ऽनुपलम्भात् स्वपिण्डमात्राश्रिताकृतिरेष्टव्या तस्या-
श्चाश्रयविनाशे स्थातुमशक्तेरन्यत्र च गमनायोगादवश्याङ्गीकरणा-
त्तेराश्रयान्तराविनाशादेव नित्यत्वमेष्टव्यमिति * सर्वैरित्यनेनो-
क्तम् * एतदेव विवृणोति * तेनेति * नन्वत्यन्तव्यतिरेके ऽप्या-
कृतिलक्षितव्यक्तिद्वारेण प्रयोगचोदनोपपत्तेरित्यत्यन्ताक्लिष्टभेदाभे-

दपक्षाश्रयणमित्याशङ्क्याह * अत्यन्तेति * अव्यवस्थामुपप
तुमाह * न चेति * ननु पशुनोपलक्षितं द्रव्यं पशुं विशास्तीत
धर्मविधीनां विषयो भविष्यत्यत आह * तदुपलक्षितं त्वि
द्रव्यरूपताया द्रव्यत्वप्रतिपादनं विना प्रतिपादयितुं शक्तेस्तद
तिपाद्यं स्यात्तत्र च स एव दोष इत्यर्थः । ननु द्रव्य
तिपादनद्वाराप्याश्रयोपलक्षणोपपत्तेर्नामूर्त्तत्वदोषापत्तिरित्याश
* आश्रयेति * ननु पशुत्वेन स्वाश्रयोपलक्षणाद्वाक्कल
ण द्रव्यत्ववदाश्रयपक्षदोषास्तत्वानिर्णायफलवादेन युक्ता
शङ्क्य पशुत्वाश्रयमात्रोपलक्षणे तस्य पश्वाकृतितोऽन्यत्वेनानिरू
दाकृतेरेव बलाद्धर्मविषयत्वापत्तेराश्रयविशेषस्योपलक्षणं वाक
त्वव्याप्ते न सम्भवतीत्याह * विशेषस्त्विति * परानभ्युप
त्वादनाशङ्क्यत्वाच्च द्रव्यत्वस्येति दृष्टान्ततया व्याख्येयम् । अगम्यं
तुमशक्य इत्यर्थः । आगमगम्य इति पाठस्त्वव्यापकत्वेन लक्ष
शक्यत्वाद्यदि परमागमगम्यः स्यान्न चासवस्तीत्युपहासार्थत्वेन
ख्येयः । ननु निर्विशेषसामान्यानुपपत्तेः कस्यचिद्विशेषस्याव
थाद्धर्मविधिविषयत्वं भविष्यत्यत आह * न चेति * प्रत्येक
निर्द्धारितरूपेणानवगतं विधिना न सम्बन्ध्यतइत्यर्थः । ननु
त्वाश्रयो यो विशेष इत्येवं निर्द्धारणाद्विधिविषयतोपपत्स्यतइत
ङ्क्याह * न चेति * पशुत्वाश्रयाणामनेकत्वात्सर्वेषां चोपाद
शक्तेरयं वोपादेयो ऽयं वेति सन्देहानिवृत्तेर्न निर्धारणोपपत्तिरि
शयः । ननु सामान्यमात्रे पर्यवसिते ऽपि शास्त्रे ऽनुष्ठानवेल
विशसनादेस्तत्रासम्भवात्तदाश्रयविशेषे प्रत्यक्षोपनयनेन निर्द्धा
ऽनुष्ठानं भविष्यतीत्याशङ्क्याह * न चेति * यस्मादन्यत्रोक्तो
र्मस्तत्रासम्भवमात्रेणान्यत्र न कार्यतया शास्त्रेणानुज्ञातस्तस्म
सामान्ये कृतो विहितो विशेषेषु कर्त्तुं युक्त इत्यर्थः । किं च ऽ
क्षैकसमधिगम्यस्यासाधारणस्य शब्दव्यवहाराविषयत्वाच्छुक्ल
रूपो विशेषो वाक्यस्तस्य चामूर्त्तत्वात्पशुत्ववदेव विधिविषयत्व
६०।२ म्भव इत्याह * विशेषा इति * उपसंहरति * तस्मादिति *
त्यन्तव्यतिरेकपक्षे च गौः शुक्ल इति सामानाधिकरण्यं पशुनेति
ङ्कारकसंख्यान्वयश्च लक्षणया स्यात्सा च लोके मुख्यत्वप्रसिद्ध
युक्तेत्याह * सामानाधिकरण्यादि चेति * ननु यदि पशुं वि
स्तीत्यादावन्यत्सव्यतिरेकपक्षे धर्मविधिविषयत्वयोग्या व्यक्तिर्न
तीयते कथं तर्हि भाष्यकृताकृतिर्व्यक्त्या नित्यसम्बन्धा सम्बन्धि
च तस्यामवगतायां सम्बन्ध्यन्तरमवगम्यतइति व्यतिरेकमभ्युपग

तदात्मप्रत्यक्षं शब्द उच्चरिते व्यक्तिः प्रतीयतइति वदताकृति-
चिशब्दोच्चारणे व्यक्तिप्रतीतिरुक्तेत्याशङ्क्याह * भाष्येति *
तिरेकाभ्युपगमे ऽनया व्यक्तेर्गतिः प्रतीतिरुक्ता साश्रयत्वमात्रेण
विशेषरूपेण न हि विशेषरूपा व्यक्तिः शब्दात्प्रतीयतइत्यर्थः । अ-
पगमशब्देन परमताभ्युपगममात्रेण व्यतिरेको ऽभिहितो न स्व-
ाभिप्रायेणेति सूचितम् । ननु व्यतिरेकस्यानभिमतत्वे यो ऽर्थः सा-
न्यस्य विशेषाणां स्वाश्रयः सा व्यक्तिरित्याश्रयाश्रयिभावोक्तिर्न-
येतेत्याशङ्क्याह * यो ऽपीति * नन्वाकृतिः प्रतीता सती प्रो-
ाश्रयं विशेक्ष्यतीति भाष्याद्विशेषलक्षणप्रतीतेः कथमाश्रयमात्रग-
ङ्क्तेत्युक्तमित्याशङ्क्याह * सामान्याच्चेति * सामान्याद्विशेषस्य
ाणं यद्भाष्यकृतोक्तं तत्राश्रयितव्यम् आश्रयणमादरणं न कर्त्त-
मेति भावे कृत्यं व्युत्पाद्य व्याख्येयम् । लक्षणानाश्रयितव्येति
: सा ऽनादर्त्तव्या आक्षेपमात्रस्य भावाद्विशेषस्य त्वाक्षेप्यस्य ग-
स्याव्यभिचारिलिङ्गाभावेनाभावादित्यर्थः । यद्वा यच्छब्द उच्च-
' व्यक्तिः प्रतीयतइत्ययं प्रपञ्चो न व्यक्तिप्रतीतिसद्भावविषयः किं
केशब्दादाकृतेर्वेत्येतद्विचारविषयत्वेन यथा सिद्धव्यक्तिः प्रतीत्य-
ादो ऽयमित्याह *अथ वेति* प्रसङ्गादादितः सो ऽन्वयव्यतिरेका-
मिति भाष्यं व्याचष्टे*अन्वयेति* शब्दव्यतिरेके ऽप्याकृत्यन्वये व्य-
प्रत्ययान्वयप्रतिपादनार्थमन्तरेणापीति भाष्यमुदाहरणनिष्ठतया
चष्टे * यो हीति* आकाङ्क्षाशब्देन निर्विशेषसामान्यायोगात् क-
इत्र तीक्ष्णमन्दादिरग्निविशेषः स्यादिति प्रमाणतो विशेषनिर्धा-
ाकाङ्क्षा भवतीत्येवम्परत्वेनाबुद्ध्येतैवासौ व्यक्तिमिति भाष्यं
ख्यातं शब्दान्वये ऽप्याकृतिव्यतिरेके व्यक्तिप्रत्ययव्यतिरेकप्रति-
नार्थं यस्त्विति भाष्यं मनो वै यग्न्योच्छब्दार्थसम्बन्धात्स्मृतौ स-
र्यभावाच्छब्दस्यापि व्यतिरेकापत्तेः स्मृतौ वा मनो वै यग्न्या-
ादाकृतेरप्यन्वयापत्तेरयुक्तमाशङ्क्य द्वेधा व्याचष्टे * मानसादि-
* निष्कृष्टाकृतिवाचित्वनिश्चयात्सामर्थ्यात्मकजाड्यरूपेणापत्त्या-
सम्बन्धस्मृतावव्याकृत्यप्रतीतिः शीघ्राप्रतीतिर्वा विवक्षितेति
: । ननु यदि गोशब्दात्स्वतन्त्राकृतिः प्रतीयते ततः केन हेतुना
ब्दस्य शाबलेयादिशब्दसामानाधिकरण्यं प्रतीयते न गोत्वशब्द-
ाशङ्क्ते * केनेति * गोत्वमित्यत्र प्रातिपदिकवाच्याया जाते-
प्रत्ययेन व्यतिरेकांशस्य विवक्षितत्वात्सामानाधिकरण्याप्रती-
। गोरित्यत्रान्वयव्यतिरेकांशस्य विवक्षितत्वात्सामानाधिकरण्य-

अत्राशुद्धं प्रतिभाति ।

प्रतीतिरिति विशेषहेतुमाह * व्यतिरेकांशस्येति * ननु भावप्र
व्यतिरेकांशस्य विवक्षायां गोत्ववाँश्शाबलेय इत्यपि सामानाधि
ण्यं न स्यादित्यशङ्क्याह*गोत्ववानिति * यद्यप्यत्र स्फुटो व्यति
विवक्षितस्तथापि प्रकृतिप्रत्ययविभागोपपत्तेर्मतुप्प्रत्ययेन जाति
भिधानात्तद्वाचिना शाबलेयादिशब्दस्य सामाधिकरण्यं युक्त
भावः । गोत्ववाचिनि स्फुटमितिपाठे स्फुटमिति क्रियावि
स्फुटं निष्कृष्टत्वेन गोत्ववाचिनि गोत्वशब्दे यत्र परतो मतुप्प्र
भवति तत्र तेन जातिमदभिधानमित्यर्थः । ननु मतुप्प्रत्ययेनापि
त्त्यभिधाने व्यक्त्यभिधानपक्षोक्ताः सम्बन्धानाख्याताद्यो द
प्रसज्येरन्नित्याशङ्क्याह * सामान्यस्य वेति * जातिमदभिधा
मेयान्तर्गतत्वेन व्यावर्त्तकत्वाज्जातेर्विशेषणत्वे ऽपि विशिष्टवाँ
प्रत्ययेनानुपादानादुपलक्षणत्वोक्तिः । ननु गौरित्यत्राव्यतिरेक
विवक्षायां जातिव्यक्त्योरभेदात् व्यक्तेर्वा गोशब्दो वाचको ज
ति चिन्ता न युज्यतेत्याशङ्क्याह * भेदानामिति * अयं वि
त्वेन प्रकृतो गोशब्दः पक्षद्वये भेदानां व्यक्तीनामेव वाचकः । स
नाधिकरण्याद्यन्यथानुपपत्तेरिष्यते । स्वरूपेण व्यक्तिर्वाच्या
त्यात्मना वेत्येतावांस्तु विचारार्थः । व्यक्तिवाचित्वे ऽपि व्यक्त
प्रयोगोपपादनार्थम् * सर्वेषामित्युक्तम् * नन्वेवं सत्यानन्त्य
म्बन्धग्रहणानुपपत्तिरित्याशङ्क्य * प्रत्येकमित्युक्तम् * समुदि
वाच्यत्वे सम्बन्धग्रहणासम्भवः स्यान्नान्योन्यनिरपेक्षाणां वाच
जात्यात्मना चैकेन नित्येन रूपेण वाच्यत्वान्न शक्त्यानन्त्याद्याप
रिति भावः । ननु गोशब्दोच्चारणे व्यक्तिविशेषानिर्धारणान्न व
वाच्यत्वं युक्तमित्याशङ्क्याह * यस्त्विति * व्रीहीन्प्रोक्षतीत्या
दिश्यमानेषु व्रीह्यादिषु प्रकृतापूर्वसाधनव्यक्तिविशेषनिर्णयान्न
न्देहाशङ्का व्रीहिभिर्यजेतेत्यादावुपादीयमानत्वे ऽप्यन्यजाती
क्तिभ्यो व्रीहिजातीयानां व्यावृत्तिप्रतीतेर्व्रीहिजातीयैव व्यक्ति
स्त्येव निर्णयः । सर्वासां तूपादानायोगात्कियतीनामुपादेय
संख्याश्रयमात्ररूपसन्देहो न व्यक्तिरूप इत्यर्थः । अधिकरणोप
जातिशब्दा एवात्र विद्यन्तइति यदुक्तम् । तत्परमतेनेति द्योत
तस्माद् गौरश्व इत्येवमादय इत्युपसंहारभाष्यं स्वमतेन नामख्या
पाद्विविधपदविषयत्वेन व्याचष्टे * गवादीति * गुणक्रियाशब्दो
ग्रहार्थः सर्वशब्दः विचारप्रयोजनमाह*प्रयोजनमिति * पूर्वपक्ष
शेषणसामर्थ्यात् सिद्धान्ते बाध इत्युक्तं भवति वर्णकान्तरत्वा
ऽपि पूर्वव्याख्याप्रकारे केन चिद्व्याक्षेपदोषेणाप्रसङ्गाभिधाना

ःशापत्तेः। सुखप्रतिपत्त्यर्थं प्रकारान्तरमारभते * एवं वेति *
ङ्गिकत्वेन तावत्सङ्गतिमाह * गौरिति * विचारविषयं बोध-
* चतुर्विध इति * संशयोत्पत्तेरित्यनेन यावकादिद्रव्यशब्दानां
त्त्वादियदृच्छाशब्दानां सर्वादीनां च सर्वनामशब्दानां व्यक्तिवा-
त्रेन निश्चयात्संशयानुत्पत्तेर्निपातोपसर्गवद्विचारविषयत्वमस्ती-
सूचितं निपातोपसर्गयोर्जातिव्यक्तिवाचित्वसंशयानुत्पत्तौ हेतु-
* तयोरिति* अभ्युपगमस्यापि वाचकत्वमन्वित्यादिषूपसर्गेषु २६१।
ादित्यादिषु च निपातेषु पदान्तरान्वयात् पूर्वं कस्य चिद्वार्थ-
ातीतेः पदान्तरान्वये च विशेषस्यैव प्रतीतेः। सन्देहानुत्प-
ाह * वाचकत्वे ऽपीति * पाश्चात्यशब्दान्तर्गतः पश्चाच्छब्दो
दाहरणं संशयेन ज्ञाप्यते न विषयीक्रियतइत्यर्थः। एतदेव
णोति * यदीति * ननु पौनरुक्त्यापत्तेर्नेहाख्यातं विचार्यमि-
ङ्कते * आख्यातस्यापीति * ननु द्वितीयाध्यायाद्ये ऽधिकरणे
ादिशब्देभ्यो ऽपूर्वं भावशब्देभ्यो वेति विचारान्नाख्यातार्थविचा-
याशङ्क्याह * कः पुनरिति * अन्यार्थे ऽप्यधिकरणप्रसङ्गाद्वा-
ताख्यातार्थनिरूपणात्पौनरुक्त्यं भवतीत्याशयः। तत्र प्रत्यया-
ान्तेवं प्रकृत्यर्थचिन्तेति परिहरति*प्रत्ययार्थस्येति * आश्रयं तु
यार्थविचारे पौनरुक्त्यं परिहर्तुमशक्नुवतां परिहारे इत्यपरितो-
न्यथा स्वमतेन परिहरति * प्रकृत्यर्थेति * प्रत्ययार्थस्य प्रकृत्य-
द्वेवेकायेह सिद्ध एव प्रकृत्यर्थस्तत्र वक्ष्यतइत्यर्थः। ते च याग-
होमसम्बद्धा इत्यादिना प्रकृत्यर्थस्य यागस्य भाष्यकृता स्पष्टीकृ-
ात् * भाष्यकारेणोत्युक्तम् * ननु सूत्रकारानुक्तिसूचनार्थं ते-
े कर्मशब्दपदेन प्रकृत्यर्थस्योक्तत्वात् अयमपि विषयभेदं वक्तु-
क्नुवतां परिहार इत्यपरितोषात्स्वमतेनान्यथा परिहरति * यु-
द्यर्थे ऽपि वेति * सामान्यविशेषयोर्मध्ये इति निर्धारणे षष्ठी
ातीहावसरप्राप्त्युक्त्या तत्रासङ्गतत्वात्सामान्यविशेषविचाराभा-
सूचितः। प्रासङ्गिककथया चैतत्पौनरुक्त्यं परिहृतं प्रधानचिन्त-
तु पौनरुक्त्यशङ्कैव नास्तीत्याह * अपूर्वमिति * अतो ऽत्र
ा द्विविधस्य पदस्यार्थचिन्तेत्युपसंहरति * नामेति * गोस-
ा गवयः इति जातौ गोशब्दप्रयोगाद्गौरानय इति च व्यक्तौ प्र-
गाञ्च गोशब्दोच्चारणाच्चोभयप्रतीतेर्वृद्धव्यवहारस्योभयत्र तुल्यत्वं
द्लक्षणे महाभाष्यकारेण किं पुनराकृतिः पदार्थ आहो स्विद् द्र-
मिति पृष्ट्वोभयमित्याहेत्याकृतिपक्षवद्व्यक्तिपक्षस्याप्यभिधानाच्च
ास्त्रस्याप्युभयत्र तुल्यतेति द्वेधा सन्देहहेतुमाह * प्रयोगस्येति *

भाष्योक्तसन्देहहेतुनिरासार्थमस्माद्धेतुद्वयादेव * संशयो नः
६२।१ तिभातीत्युक्तम् * ननु यदि सामान्यप्रत्ययाद्व्यक्तौ च क्रियासं
वात्सन्देहः स्यात्ततः प्रतीयमानाया आकृतेरक्रियार्थत्वात् क्रि
र्थायाश्च व्यक्तेरप्रतीतेर्वाक्यार्थोपयिकपदार्थासम्भवाद्व्यक्तिवा
त्वपूर्वपक्षस्याकृतिवाच्यत्वासम्भवप्रतिपादनमात्रपरत्वात्पूर्वपक्षे
द्वाप्रामाण्यं सिद्धान्ते चाकृतेरपि क्रियार्थत्वाद्वाक्यार्थोपयि
त्वोपपत्तेर्वेदप्रामाण्यमिति प्रामाण्याप्रामाण्यफलत्वात्प्रामाण्यल
णासङ्गतेयं चिन्ता स्यात् व्यक्त्याकृत्योस्तु प्रतीतिप्रयोगतुल्यत्वे
क्षद्वये ऽपि प्रामाण्याविशेषात्कथं तल्लक्षणसङ्गतिः । प्रतीतिप्र
गतुल्यत्वेनैव च व्यक्तिवाच्यत्वस्मृतेरपि समूलत्वोपपत्तेरेतत्प
गतेन स्मृतिमूलविचारेणापि कथं सङ्गतिः स्यादित्याशङ्क्ते *
यमिति * पादानामैकार्थ्यनियमाभावान्नावश्यं सर्वत्र पादसङ्ग
रपेक्षणीया एकप्रकरणगतानां त्वधिकरणानां प्रकरणप्रतिपाद्य
र्थान्वयाय प्रकरणसङ्गतिरवश्यापेक्षणीयेति मत्वा * प्र
न चेत्युक्तम् *स्मृतिमूलविचारो ह्यस्मिन्पादे प्रकरणार्थः तथा

स्मृतीनां श्रुतिमूलत्वं विरोधे भ्रान्तिमूलता ।
उक्तोपवीतस्मृत्यादावविरोधं निरूप्य च ॥
आर्यविरोधे म्लेच्छानां शब्दार्थविषयस्मृतेः ।
भ्रान्तिमूलमसत्त्वे ऽस्य पिकादौ लोकमूलता ॥
मूलापेक्षा च कल्पादेरव्यवस्थितगोचरम् ।

होलाकादिस्मृतेर्मूलमुक्तं शब्दस्मृतेरपि तत्प्रामाण्य
त्वप्रासङ्गिकत्वेनास्याश्चिन्तायाः पूर्वचिन्ताया लक्षणप्रकरण
त्वेवास्या अपि तद्द्वारेण सङ्गतिलाभान्न पृथक्सङ्गत्यं
परिहरति * द्वयमिति * ननु यदि कस्मिन्नर्थे गोशब्दस्य स
त्यनेन प्रसङ्गेनास्य विचारस्यावान्तरस्तुतेरर्थनिरपेक्षस्य साधु
निरूपयितुमशक्यत्वाद्व्यक्त्याकृतिचिन्तैव पूर्वं प्रसज्येतेत्या
* वक्तव्य इति * सास्नादिना शब्दस्य साधुवाच्ये इत्येतावति
व्यक्त्याकृतिविवेकाज्ञाने ऽपि साधुत्वं निरूपयितुं शक्यमिति
रति * अनिश्चिते ऽपीति * एतदेव विवृणोति * वाच्ये
पूर्वापवादत्वेन चास्य सङ्गतिरिति परिहारान्तरसापेक्षत्वे ऽ
विचार्यतद्इत्यपेक्षायामाह * व्यक्तिरिति * अस्मिश्च पक्षे
धापि सङ्गतिः साक्षादेवेत्याह * स्मृतेरिति * प्रयोजनाभ
धिकरणानारम्भमाशङ्क्ते * ननु चेति * शब्दार्थशब्देनाकृ
क्षिता प्रोक्षणादेः क्रिया व्रह्यादेश्चाक्रिया पक्षद्वये ऽप्याकृ

शाद्वयक्तावेवेत्यर्थः। वेदे प्रयोजनाभावे ऽपि लोके प्रयोजनं भ-
यतीति तावत्परिहरति * यद्यपीति * किं फलमित्यपेक्षायामा-
* व्यक्तीति * लोकव्यवहारस्य प्रमाणान्तरानुसारित्वात्तदर्थं
ार्थतत्त्वचिन्तानर्थक्यापत्तेर्वेदार्थनिर्णयानौपयिकत्वाच्च शास्त्र-
ङ्गत्वभावापत्तेरपरितोषात्स्वमतेन प्रयोजनमाह * वेदे ऽपि चेति*
वपेक्षायामुदाहरणद्वयमाह * व्रीहीति * भेदो विशेषः आद्योदा-
ःणे विशेषं विवृणोति * प्रोक्षणमिति * सन्निधिरूपं क्रमं बाधि- २६:
त्यर्थः। द्वितीयोदाहरणं विवृणोति * पदमिति * यदाहवनीये
होति पदे जुहोतीत्यादिसामान्यविशेषशास्त्रयोः पूर्वपक्षे विकल्पः
ाद्धान्ते सामान्यशास्त्रस्य विशेषशास्त्रेण बाध इत्याद्यपि प्रयोजन-
ात्याह * सोपपत्तिकमिति * उपसंहरति * कर्त्तव्येति * पौ-
रुक्त्यमाशङ्कते * नन्विति * गौरिति शब्द आदिर्यस्य तस्य गौ-
ःत्यस्य शब्दस्य को ऽर्थ इत्यस्य भाष्यस्य तस्मिन्नित्यर्थः आद्यपाद-
। भाष्ये विचारितमित्यर्थः। तत्र प्रतिज्ञायामिहानुपपत्तिरिति ता-
त्परिहरति * आकृतेरिति * यथा चाकृतिशब्दार्थस्तथाकृति-
तु क्रियार्थत्वादित्यत्र निपुणतरमुपपादयिष्याम इत्याकृतिवादा-
ते भाष्यकृताप्येवमेवोदितमित्याह * यथा चेति * विषयप्रदर्श-
ार्थत्वात्प्रतिज्ञाया हेतुं विनानर्थक्यापत्तेरिहापि चाकृतिः शब्दार्थ
ःति प्रतिज्ञायाः पौनरुक्त्यापत्तेरेतत्परिहारेष्वपरितोषात्स्वमतेनान्य-
ा परिहरति * यद्वेति * नन्वेवं सत्याकृतेः शब्दार्थत्वोक्तिस्तत्र-
ा कथमित्याशङ्क्य सङ्गतिप्रतिपादनायैव; प्रकृतानुपयोगप्रसङ्गान्न
साक्षाद्वाच्यत्वोपक्रमस्तत्रेत्याह * या त्विति * चिन्ताविषयत्वेन
नोक्तेत्यर्थः। प्रतिज्ञामात्रेणाकृतिवाच्यत्वासिद्धेरनभिमतमपि परिहा-
रान्तरं विभवार्थमाह * उक्ते वापीति * व्यक्त्याकृतिचिन्तामुपक्र-
म्य भाष्यकृता लौकिकवैदिकशब्दार्थभेदाभेदचिन्ता कृता तस्याः
प्रकृतोपोद्घातार्थत्वेन सङ्गतिमाह * एतदिति * ननु संख्याभा-
वादित्यनेन न्यायेनाभेदस्य सिद्धत्वात्पुनः को ऽयं विचारः स्यादि-
त्याशङ्क्य लौकिकशब्दाभेदे ऽपि वैदिकानां रूपभेदाद्व्यपदेशभेदाच्च
भेदशङ्कोपपत्तेस्तन्निराकरणार्थो ऽयमारम्भ इति संशय्यते अस्मिन्नित्य-
धिकरणव्युत्पत्त्या संशयविपर्ययप्रतिपादकेन * संशयशब्देनोक्तम्।
उपोद्घातत्वमेव विवृणोति * एकत्वे सतीति * लौकिकवैदिक-
योः शब्दयोर्वाच्ययोश्चैकत्वे सति लोकव्युत्पन्नाद्वैदिकाद् गोशब्दाद्व्य-
क्त्याकृतिरूपत्वादिपदार्थप्रत्ययोत्पत्तौ को ऽर्थो वाच्यः को वा
गस्य इति सन्देहाद्विचारः कार्यः भेदे व्युत्पत्त्यभावेन वैदिकास्त-

ब्दादर्थप्रतीतेः सन्देहाभावान्न चिन्तावसर इत्यर्थः । ननु
सन्देहसम्भवाच्चिन्ता भविष्यतीत्याशङ्क्याह * शब्दार्थेनेति *
तु शब्दविषये ऽर्थविषये च य एव लौकिकः शब्दो ऽर्थश्च स ए
मिति प्रत्यभिज्ञाने सति लोकव्युत्पन्नाद्वैदिकाच्छब्दादर्थप्रतीतेः
ऽर्थो वाच्यः को वा गम्य इति विवेक्तुं शक्यम् । अलौकिके
दिके शब्दे ऽर्थे वाचकरूपाज्ञानाद्वाच्यविषयः सन्देह एव न स्या
२६४।२ पूर्वोक्तमेव विवृणोति * वेदे त्विति * उपसंहरति * तेने
संशयशब्दसूचितं पौनरुक्त्यपरिहारं वक्तुमाशङ्कते * तावत्
ति * न हेत्वन्तराभिधित्सया पुनरारम्भस्तस्यानुक्तत्वादित्याह
अभेदेति * ननु न प्रयोगचोदनाभावादिति हेत्वन्तरमप्युक्तमि
ङ्क्याह * अन्यत्त्विति* शङ्कामुपसंहरति *तेनेति* परिहरति
किकेष्वेवेति*ननु वैदिकेषु काधिका शङ्कृत्यपेक्षायामाह*व्यप
दीति* रूपभेदो लिङ्गं चादिशब्देनोपात्तम् । अर्थभेदाभेदाच्चिन्
स्तु पौनरुक्त्याशङ्कैव नास्तीत्याह*एकत्वे ऽपि चेति*न च शब्दैक
त्रेण प्रकृतचिन्तासिद्धिर्येनार्थैक्यमचीन्त्यं स्यादित्याह *
ति * शब्दाभेदे सत्यपि यद्यर्थाभेदः स्यात्ततो व्यक्त्याकृत्योर्
ध्ये कस्य वाच्यतेतीयं चिन्ता घटते न शब्दैक्यमात्रेणेत्यर्थः ।
इहेतुमाह * व्यपदेशादीति * उभयविषयप्रतिज्ञापूर्वकं श
दाभावहेतूनाह * किं प्राप्तमिति * आख्यायाः शब्दस्य
णं तस्य भाषायां छन्दसीति चोपबन्धेन भिन्नत्वादित्यर्थः ।
२६५।२ दे हेतुमाह * अश्वबालादीति * नन्वग्निर्वृत्राणीति भाष्ये
ननादिक्रियाभेदो हेतुः प्रतीयते स किमित्युपेक्षित इत्यपेक्ष
र्थभेदे हेतुत्वं तावन्न सम्भवतीत्याह * अग्न्यादीनां चेति
न्वग्निस्वरूपाभेदे ऽपि वृत्रहन्तृत्वविशिष्टस्य वैदिकाग्निपदवा
दर्थभेदो भविष्यतीत्याशङ्क्याह * हन्तीति * वृत्रहन्तृत्
ष्टस्य वाक्यार्थत्वेनाशब्दवाच्यत्वान्न वैदिकाग्निशब्दवाच्यता
त्यर्थः । हन्तृत्वे च प्रमाणाभावान्न तेनापि रूपेणान्यत्वं युक्त
ह * हननमिति * न च यो वृत्रहन्ता सो ऽग्निरिति व
क्यार्थान्यत्वसिद्धिर्वृत्रशब्दार्थस्य जङ्घनादिति च क्रियाश
लौकिकत्वेनैवंविधवचनव्यक्त्यसम्भवादित्याह * अपूर्वे इति
वतायाश्च विग्रहाभावस्य नवमे वक्ष्यमाणत्वेन क्रियया वृत्
योगान्मन्त्रस्य स्तुतिमात्रार्थत्वावगतेर्न वृत्रहन्तृत्वानुवादेनाग्नि
च्यत्वविधिर्युक्त इत्याह * स्तुतीति * कथमक्रियतेत्यपेक्षाया
भाष्योक्तैरित्युक्तम् * कानि तानि वाक्यानीत्यपेक्षायां नाव

ाधिकरणोक्त*युक्तिपरामर्शार्थमितीत्युक्तम्* अतो ऽश्ववालादि-
ब्दानां स्पष्टार्थान्तरदर्शनादित्येवार्थान्यत्वे युक्तिरित्युपसंहरति *
नेति*शब्दभेदहेतुत्वं तु क्रियाभेदहेतुत्वे ऽप्यनाशङ्क्यमेवेत्याह*यच्चे-
।*अथ भेदकारितो ऽपि शब्दभेदो न भवति किमुत तद्गुणभेदका-
त इत्यर्थः। भाष्यस्य तर्हि का गतिरित्यपेक्षायां भाष्योक्तं रूपा-
त्वं स्वरादिभेदाभिप्रायं व्याख्येयमित्याह * तेनेति * पूर्वपक्षो-
संहारपूर्वकं सिद्धान्तप्रतिज्ञां करोति * तस्मादिति * प्रतिज्ञा-
तमेव तावद्धेतुमाह * वेदस्यैवेति * प्रसज्यतामित्येवं वादिनम्
प्रति प्रसज्येतेत्युक्तम् * प्रयोगचोदनाभावादिति सौत्रं हेतुं प्र-
ोगस्य चोदनायाश्चाभावादित्येवं व्याचष्टे * प्रयोगस्येति * चो-
नायाः कथमभाव इत्यपेक्षायाम् * प्रत्ययार्थस्येत्युक्तम् * अर्था- २१
तरे शब्दप्रयोगविषयायाश्चोदनाया विधेरभावादित्येवमन्यथा व्या-
ष्टे * अर्थान्तरे चेति * कस्माद्वेदेनार्थान्तरे शब्दप्रयोगो न वि-
ीयते इत्यपेक्षायां गुणाद्वाप्यभिधानं स्यात् सम्बन्धस्य शास्त्रहेतु-
वादित्यैन्द्र्यधिकरणसूत्रावयवो ऽर्थतः पठितः वचनान्वयार्थमैन्द्री
यादिति सूत्रेणैन्द्र्या गार्हपत्यमुपतिष्ठतइति श्रुतिबलेनैन्द्र्या गार्हप-
योपस्थानाङ्गत्वे विहिते श्रुत्याप्यशक्तविनियोगासम्भवात्कथमिन्द्र-
ाब्देन गार्हपत्याभिधानमित्यपेक्षायां गुणयोगेनेति पूर्वावयवेनोक्त-
। नन्विन्द्रशब्दस्य गार्हपत्याभिधानशक्तिप्रदर्शनार्थमेवैतद्वचनं क-
स्मान्न भवतीत्याशङ्क्य शब्दार्थसम्बन्धस्य वृद्धव्यवहारावसेयत्वेन
शास्त्रहेतुकत्वाभावादित्यनेनोक्तम्। अविभागादिति सूत्रावयवो
न तेषामेषां विभागमुपलभामहइति भाष्येण शब्दप्रत्यभिज्ञाभिधाना-
र्थत्वेन तांश्चार्थानवगच्छाम इत्यनेन चार्थप्रत्यभिधानार्थत्वेन व्या-
ख्यातः। तदुभयमपि यथाक्रममनुसन्धत्ते * किं चेति * शब्द-
लक्षणाविभागादित्येवं स्वयमन्यथा व्याचष्टे * लक्षणस्येति * ननु
कतिपयलक्षणाविभागे ऽपि भाषायां छन्दसीत्युपबन्धेनोक्तानां ल-
क्षणानां भेदात्कथं सर्वशब्दैक्यसिद्धिरित्याशङ्क्याह * सर्वथेति *
भिन्नलक्षणकानां शब्दानामश्ववालाद्यर्थानां च भेदस्य सिद्धान्तिना
ऽपीष्टत्वादितरशब्दार्थानामैक्यं साध्यं तेषां चोक्तैर्हेतुभिर्न भेदः शा-
क्यो वक्तुमित्यर्थः। याज्ञिकानां च गवादिविधौ लौकिकैरेव सा-
स्नादिमदाद्यर्थैर्व्यवहारान्मीमांसायां च लोकव्युत्पत्त्यनुसारेण वेदा-
र्थनिर्णयादुभयानुग्रहार्थं लौकिकवैदिकशब्दार्थानामैक्यमाश्रयणीय-
मित्याह * एकत्वेति * मीमांसा चानुगृह्यतइत्यनुषङ्गः। अवि-
भागशब्देनोक्तं प्रत्यभिज्ञानमेव पूर्वपक्षोक्तानां हेतूनां कालात्ययाप-

दिष्टत्वलक्षणदोषाभिधानार्थत्वेन व्याचष्टे * व्यपदेशादीति * अ
दिशब्देनाव्यालक्षणास्वरोपादानम् । ननु व्यपदेशादिभेदेन तद्
च्छिन्नात्मनां भेदस्यावश्यम्भावात्कथं न भेदानुमानमित्याशङ्क्य
न्यरूपतेत्युक्तम् रूपिणः स्वरूपतो ऽन्यता रूपान्यता अत्र भेदानुमे
विचारे यो व्यपदेशादिभेदैरैक्यरूपतालक्षणो भेदो ऽनुमीयते स तु
युक्तः वैदिकशब्दे प्रत्यक्षप्रत्यभिज्ञानादित्यर्थः । भेदादेरिति प
द्वितीयेनादिशब्देन लोपागमव्यत्ययोपादानम् । अन्यनिबन्धनत्वाद
व्यपदेशभेदो रूपभेदो वा न भेदानुमानायालमित्याह * व्यपदेश
दीति * नन्वेवमपि पदावधारणोपायत्वदूक्तिनिछन्दतिसूरयः[1] क्र
न्यूनातिरिक्तत्वस्वरवाक्यस्मृतिश्रुतीत्यनेन न्यायेनाचारादिभेदेन
भेदो भविष्यतीत्याशङ्क्य आह * स्वरादयश्चेति * अभिधाना
भूतस्वरादिभेदो ऽभिधायकपदभेदहेतुत्वेन तत्रोक्तः अग्निर्वृत्रा
जङ्घनदित्यादिषु तु स्वरानियमस्य व्योमन्नित्यादिषु च वर्णलोप
देवास इत्यादिषु आगमस्यागृभ्णान्नित्यादिषु विकारस्य स्वाध्य
विध्यपेक्षितवेदत्वसिद्ध्यर्थं त्वदृष्टार्थोपयोगितयाभिधानाङ्गत्वाभा
न्नाभिधायकभेदावधारणोपायतास्तीत्यर्थः । यत्तु स्वरव्युपादिस
भेदशब्दसाहचर्यं गवादिशब्दे भेदहेतुत्वेनोपन्यस्तं तन्निराकरण
विभागशब्दोक्तशब्दप्रत्यभिज्ञानं योजयति * स्वार्विति * अन
यादिधर्मभेदस्य शूद्रोच्चारणवर्जनस्य च वाचानिकत्वेनाप्युपप
भेदहेतुतेत्याह * वचनादिति * उच्चारणधर्मत्वादप्येषां न भे
तुतेत्याह * धर्माविति * यत्त्वाश्वबालादिशब्दानां स्पष्टार्था
दर्शनाद्गवादिशब्दानामपि भिन्नार्थतेत्युक्तं तन्निराकरणे ऽप्यनि
गशब्दोक्तमर्थप्रत्यभिज्ञानं योजयति * अश्वबालादीति * व
शेषात्मकवचनवशात्तत्रार्थभेदे जाते ऽपि प्रत्यभिज्ञायमानार्थे
वादिशब्देष्वर्थान्यत्वद्योतकत्वाभावान्नार्थान्यता युक्तेत्यर्थः । न
हाप्युत्तानवहनादिवचनकारितो ऽर्थभेदो भविष्यतीत्याशङ्क्याह
त्तानानां चेति * उत्तानवहनासिद्धेस्तदनुवादेन गोशब्दवाच
विध्ययोगात्सर्वेषां च वैदिकानामन्यत्वे सम्बन्धज्ञानाभावेनैकस
पदार्थस्याग्रहणाद्वाक्यार्थानवगतेर्नातो वाक्यादर्थान्यत्वावसाय
र्थः । किमर्थं तर्ह्युत्तानवाक्यम् इत्यपेक्षायामाह * विधेरिति
२६७।२ सिद्धान्तमुपसंहरति * तस्मादिति * प्रकृतविचारमनुस
* यद्वा चेति * अतो ऽधुना क्रियतइत्यध्याहारेण योज्यं पः
राणामप्यभिधानं प्रतिजानाति * बहव इति * अभिनवे पद

1 घनाग्रह प्रति० ।

ुपन्यस्ते निराकरणोपपत्त्या ज्ञानाच्छिष्याणां व्यामोहापत्तेस्तन्नि-
र्थं सर्वे ऽभिधेया इत्यर्थः । बहुपक्षप्रतिभाने कारणमाह * गौ-
ते * शब्दस्वरूपस्य प्रत्यक्षग्राह्यत्वेन तद्विषयाभिधानशक्तिकल्प-
पपत्तेर्नव्यानभिधानो हि शब्दः कश्चित्कदा चनेति शून्यवादे वृ-
ीकायां स्वरूपाभिधानस्य निरस्तत्वाच्छब्दवाच्यत्वशङ्कानुपपत्ति
सूचनार्थं तदित्युक्तम् * समवस्तुप्रतिभाने ऽपि कथं बहुपक्षप्रति-
ामित्याह * तेषामिति * पक्षानुद्दिशति * किं जातिरेवेति *
तिव्यक्त्योः सामानाधिकरण्यबुद्धिहेतुभूतस्य ।

आश्रयी येन भिन्नो ऽपि सम्बन्धेनाश्रये धियम् ।
स्वानुरूपां सदा कुर्यात्समवायः स कीर्त्यते ॥

इत्येवं लक्षणस्समवायाख्यस्य सम्बन्धस्य जात्या सा-
धाराधेयसम्बन्धसद्भावाज्जातिसम्बन्धयोः सच्छब्दवद्यः सम्ब-
ः शब्दार्थ इत्यस्यापि पक्षस्योपपत्तेर्वस्तुगतस्य जात्या-
ाया अनुवृत्ताकारस्य व्यावृत्ताकारस्य च व्यक्तित्वेनाभिप्रेतस्यै-
वस्तुगतत्वादेकदेशस्थवृक्षवद्यः समुदायस्तस्याकारद्वयाकारद्व-
ारे धर्मिभूते वस्तुनि प्रतीतेस्तदाश्रितया जात्या सहैकवस्तु-
त्वादेव समुदायोपपत्तेः । सर्वत्राष्टपक्षीसम्भवः । यथा जातेर्व्य-
ादिभिः षड्भिः सह प्रत्येकमष्टौ पक्षाः कृतास्तथा व्यक्त्यादेर-
कैकस्येतरैः सह कार्या इत्याह * एवमेकैकस्येति * ननु व्य-
ादिभिः सह सम्प्रधारितया जात्या सह व्यक्त्यादेः सम्प्रधारणे
भेदो नास्तीत्याशङ्क्य * उक्तवदित्युक्तम् * एकाद्वित्रिचतुःपञ्चष-
ः सह विकल्पनेत्युक्तद्विकादिप्रकारभेदात्पक्षविवेक इत्याशयः ।
श्च व्यक्तिसम्बन्धयोर्व्यक्तिसमुदाययोर्व्यक्तिलिङ्गयोः व्यक्तिका-
योः व्यक्तिसंख्ययोः सम्बन्धसमुदाययोः सम्बन्धलिङ्गयोः
बन्धकारकयोः सम्बन्धसंख्ययोः समुदायलिङ्गयोः समुदाय-
रकयोः समुदायसंख्ययोर्लिङ्गकारकयोः लिङ्गसंख्ययोः कारक-
ख्ययोः पञ्चदशाष्टपक्षीः पूर्वाभिः षड्भिः सहैकविंशतिं कृत्वा
तेर्व्यक्तिसम्बन्धव्यक्तिसमुदायव्यक्तिलिङ्गव्यक्तिकारकव्यक्तिस-
ख्यासम्बन्धसमुदायसम्बन्धलिङ्गसम्बन्धकारकसम्बन्धसंख्यास-
दायलिङ्गसमुदायकारकसमुदायसंख्यालिङ्गकारकलिङ्गसंख्याका-
कसंख्याद्विकैः पञ्चदश । व्यक्तेर्जातिसम्बन्धजातिसमुदाय-
ातिलिङ्गजातिकारकजातिसंख्यासम्बन्धसमुदायसम्बन्धलिङ्गसंब-
कारकसम्बन्धसंख्यासमुदायलिङ्गसमुदायकारकसमुदायसंख्या-
ङ्गसंख्याकारकसंख्याद्विकैः पञ्चदशसम्बन्धस्य जातिव्यक्ति-

जातिसमुदायजातिलिङ्गजातिकारकजातिसंख्याव्यक्तिसमुदाय
क्तिलिङ्गव्यक्तिकारकव्यक्तिसंख्यासमुदायलिङ्गसमुदायकारक
दायसंख्यालिङ्गकारकालिङ्गसंख्याकारकसंख्याद्विकैः पञ्चदश
दायस्य जातिव्यक्तिजातिसम्बन्धजातिलिङ्गजातिकारकजातिसं
व्यक्तिसम्बन्धव्यक्तिलिङ्गव्यक्तिकारकव्यक्तिसंख्यासम्बन्धा
सम्बन्धकारकसम्बन्धसंख्यालिङ्गकारकसंख्याद्विकैः पञ्चदश ।
स्य जातिव्यक्तिजातिसम्बन्धजातिसमुदायजातिकारकजातिसं
व्यक्तिसम्बन्धव्यक्तिसमुदायव्यक्तिकारकव्यक्तिसंख्यासम्ब
मुदायसम्बन्धकारकसम्बन्धसंख्यासमुदायकारकसमुदायसंख
रकसंख्यायुगलैः पञ्चदशकारकस्य जातिव्यक्तिजातिसम्बन
तिसमुदायजातिलिङ्गजातिसंख्याव्यक्तिसम्बन्धव्यक्तिसमुदा
क्तिलिङ्गव्यक्तिसंख्यासम्बन्धसमुदायालिङ्गसम्बन्धसख्यासमु
लिङ्गसमुदायसंख्यालिङ्गसख्याद्विकैः पञ्चदश संख्याया जातिव
जातिसम्बन्धजातिसमुदायजातिलिङ्गजातिकारकव्यक्तिसम्बं
क्तिसमुदायव्यक्तिलिङ्गव्यक्तिकारकसम्बन्धसमुदायसम्बन्धा
म्बन्धकारकसमुदायलिङ्गकारकाद्विकैः पञ्चदश जातेर्व्यक्तिस
समुदायव्यक्तिसमुदायलिङ्गकारकव्यक्तिकारकसंख्यासम्बन्ध
दायलिङ्गसम्बन्धलिङ्गकारकसंख्यासमुदायलिङ्गकारकसमुद
रकसङ्ख्यालिङ्गकारकसङ्ख्यात्रिकैर्दश व्यक्तेर्जातिसम्बन्धस
सङ्ख्याजातिसमुदायलिङ्गजातिलिङ्गकारकजातिकारकसङ्ख
म्बन्धसमुदायलिङ्गसम्बन्धलिङ्गकारकसम्बन्धकारकसंख्या
यलिङ्गकारकसमुदायकारकसंख्यात्रिकैर्दश सम्बन्धस्य ज
क्तिसमुदायजातिसमुदायलिङ्गजातिलिङ्गकारकजातिकार
व्यक्तिसमुदायलिङ्गव्यक्तिलिङ्गकारकव्यक्तिकारकसंख्यास
लिङ्गकारकसमुदायकारकसंख्यालिङ्गकारकसंख्यात्रिकैर्दश
मुदायस्य जातिव्यक्तिसम्बन्धजातिसम्बन्धलिङ्गजातिलिङ्ग
जातिकारकसंख्याव्यक्तिसम्बन्धलिङ्गव्यक्तिलिङ्गकारकव्यां
कसंख्यासम्बन्धलिङ्गकारकसम्बन्धकारकसंख्यात्रिकैर्दश,लिः
तिव्यक्तिसम्बन्धजातिसम्बन्धसमुदायजातिसमुदायकारकः
रकसंख्याव्यक्तिसम्बन्धसमुदायकारकव्यक्तिकारकसंख्या
समुदायकारकसम्बन्धकारकसंख्यासमुदायकारकसंख्यात्रि
कारकस्य जातिव्यक्तिसम्बन्धजातिसम्बन्धसमुदायजाति
यलिङ्गजातिलिङ्गसंख्याव्यक्तिसम्बन्धसमुदायव्यक्तिसमुदा
व्यक्तिलिङ्गसंख्यासम्बन्धसमुदायालिङ्गकारकव्यक्तिसम्बन्

व्यक्तिसमुदायलिङ्गव्यक्तिलिङ्गकारकसम्बन्धसमुदायलिङ्गसम्ब-
लिङ्गकारकसम्बन्धलिङ्गकारकसंख्यासमुदायलिङ्गकारकसंख्या-
तुष्कैः षट् । व्यक्तेः जातिसम्बन्धसमुदायलिङ्गजातिसमुदाय-
ङ्गकारकजातिलिङ्गकारकसंख्यासम्बन्धसमुदायलिङ्गकारकसम्ब-
लिङ्गकारकसंख्यासमुदायलिङ्गकारकसंख्याचतुष्कैः षट् । स-
न्धस्य जातिव्यक्तिसमुदायलिङ्गजातिसमुदायलिङ्गकारकजाति-
ङ्गकारकसंख्याव्यक्तिसमुदायलिङ्गकारकव्यक्तिलिङ्गकारकसंख्या-
मुदायलिङ्गकारकसंख्याचतुष्कैः षट् । समुदायस्य जातिव्य-
कसम्बन्धलिङ्गजातिसम्बन्धलिङ्गकारकजातिव्यक्तिसम्बन्धसमुदा-
जातिसम्बन्धसमुदायकारकजातिसमुदायकारकसंख्याव्यक्तिस-
न्धसमुदायकारकव्यक्तिसमुदायकारकसंख्यासम्बन्धसमुदायका-
कसंख्याचतुष्कैः षट् ।कारकस्य जातिव्यक्तिसम्बन्धसमुदायजाति-
म्बन्धसमुदायलिङ्गजातिसमुदायलिङ्गसंख्याव्यक्तिसम्बन्धसमुदा-
लिङ्गव्यक्तिसमुदायलिङ्गसंख्यासम्बन्धसमुदायलिङ्गसंख्याचतुष्कैः
ट्।संख्याया जातिव्यक्तिसम्बन्धसमुदायलिङ्गजातिसमुदायजाति-
मुदायलिङ्गकारकव्यक्तिसम्बन्धसमुदायलिङ्गव्यक्तिसमुदायलिङ्ग-
रकसंख्यासमुदायलिङ्गकारकचतुष्कैः षट् । जातेः व्यक्तिसम्ब-
समुदायलिङ्गकारकव्यक्तिसमुदायलिङ्गकारकसंख्यासम्बन्धसमु-
ायलिङ्गकारकसंख्यापञ्चकैस्त्रिस्रः । व्यक्तेर्जातिसम्बन्धसमुदाय-
ङ्गकारकजातिसमुदायलिङ्गकारकसंख्यासम्बन्धसमुदायलिङ्गका-
कसंख्यापञ्चकैस्त्रिस्रः।सम्बन्धस्य जातिव्यक्तिसमुदायलिङ्गकारक-
ख्याव्यक्तिसमुदायलिङ्गकारकसंख्यापञ्चकैस्त्रिस्रः । समुदायस्य
ातिव्यक्तिसम्बन्धलिङ्गकारकजातिसम्बन्धलिङ्गकारकसङ्ख्याव्य-
क्तसम्बन्धलिङ्गकारकसंख्यापञ्चकैस्त्रिस्रः । लिङ्गस्य जातिव्यक्ति-
म्बन्धसमुदायकारकसंख्याव्यक्तिसम्बन्धसमुदायकारकजातिस-
बन्धसमुदायकारकसंख्याव्यक्तिसम्बन्धसमुदायकारकसंख्यापञ्च-
कैस्त्रिस्रः । कारकस्य जातिव्यक्तिसम्बन्धसमुदायलिङ्गजातिसम्ब-
धसमुदायलिङ्गसंख्याव्यक्तिसम्बन्धलमुदायलिङ्गसंख्यापञ्चकैस्त्रि-
स्रः । संख्यायाः जातिव्यक्तिसम्बन्धसमुदायलिङ्गजातिसम्बन्ध-
समुदायलिङ्गकारकव्यक्तिसम्बन्धसमुदायलिङ्गकारकपञ्चकैस्त्रिस्रः।
जातेर्व्यक्तिसम्बन्धसमुदायलिङ्गकारकसंख्याषट्कैणैका व्यक्तेर्जा-
तिसम्बन्धसमुदायलिङ्गकारकसंख्याषट्केणैका सम्बन्धस्य जातिव्य-
क्तिसमुदायलिङ्गकारकसंख्याषट्केणैका समुदायस्य जातिव्यक्तिस-
म्बन्धलिङ्गकारकसंख्याषट्केणैका लिङ्गस्य जातिव्यक्तिसम्बन्धस-

मुद्रायकारकषट्कोणैकेति पञ्चचत्वारिंशदधिकं शतद्वयमष्टप ञ्चैकविंशत्या षष्ठ्यधिकं शतद्वयं कार्या इत्यर्थः । विपूर्वस्य धातिसमानार्थत्वाद्विपूर्वस्य दधातेः करोत्यर्थे प्रयोगदर्शनाद्वि व्यशब्देन कार्य्यतोक्ता एवं चैतेषां षट्षष्ट्यधिकाष्टपञ्चाशतद्व नामष्टाविंशतिसहितशताधिकसहस्रद्वयसंख्याकानां पक्षाणां स्थानोक्तप्रकार एव परस्परव्यतिकरेणैकैकस्या अष्टपक्ष्याश्च पक्षोत्पत्तेश्चतुःषष्टिसहितषट्शताधिकसप्तविंशतिसहस्रपक्षस्ता तावतां झटिति सङ्कलनाशक्तेरानन्त्यं भवतीत्याह * एवमिति

इह पक्षसहस्राणां मिलिताः सप्तविंशतिः ।
शतानि षट् चतुःषष्टिश्चापरा वस्तुसप्तके ॥
शीघ्रसङ्कलनाशक्तेरुपचारात्तथापि तु ।
आनन्त्यवचनं यद्वा लिङ्गाद्याधिक्यकारितात् ॥
विशेषणविशेष्यत्वप्रकाराधिक्यतो ऽधिकाः ।
पक्षाश्चतुःशतात्पूर्वं गणितादित्यनन्तता ॥

ननु भाष्ये किमाकृतिः शब्दार्थो व्यक्तिरिति पक्षद्वय पन्यासाद्द्व्याख्यातृणामेतावत्पक्षोपन्यासो न युक्त इत्याशङ्क्या ऽऽ वैपक्षे ऽपीति * यत्रोच्चारणानर्थक्यं तत्र व्यक्तिरर्थो ऽन्यत्रा ऽऽ च्वन इति भाष्ये पूर्वपक्षवेलायां द्वयवाच्यत्वपक्षस्यापि व्यक्ति वदुपन्यासादपिशब्दाच्च सिद्धान्तवेलायामथ किं विशेषणा कृतिं वक्ष्यति विशेष्यत्वेन व्यक्तिमित्याकृतिविशिष्टव्यक्तिपक्षो सास्न तु व्यक्तिविशिष्टायामाकृतौ वर्त्तेत इति च व्यक्तिविशि तिपक्षोपन्यासादुपलक्षणार्थः सन्देहवेलायां पक्षद्वयोपन्यास शयः । नन्वेवं सति सर्वेषामेवोपन्यासनिराकरणे कस्मान्न कृ इत्याशङ्क्याह * उपन्यासेन चेति * सन्देहवेलायामपि पक्षद्व न्यासो ऽत एवेत्याह * तेनेति * भाष्योक्तसन्देहहेतुमुपन्या

२६८।१ कं दूषयति * भाष्यकारेण चेति * अतः प्रयोगस्य प्रतीतेश्च त्वाच्छब्दलक्षणो व्यक्तिपक्षाविधानाच्चेत्यस्मदुक्त एव द्वेधा हहेतुरित्याह * तेनेति * का पुनराकृतिरिति प्रश्नभाष्यं प्रश देन त्वाकृतिः साध्यास्ति वा न वेत्याशङ्क्य न प्रत्यक्षा सती भवितुमर्हतीत्यादिना रुचकादिद्व्यात्मकवस्तूदाहरणेनाकृतिस स्य निरूपितत्वादयुक्तमित्याशङ्क्ते * का पुनरिति * तदश्रा ज्ञानाभिप्रायेण तावत्प्रश्नमुपपादयति * नैष दोष इति * प्रश दाश्राविणस्तृतीयपादश्रवणे ऽनधिकारज्ञानाभिप्रायायोगादुक्तं द्व्याकारे वस्तुनि को व्यक्त्याकारः को वा ऽऽकृत्याकार इत्य

कात्सन्देहाभिप्रायेणोपपादयति * सन्देहाद्वेति * श्येनादिमत्स्र
शङ्कानिराकरणेनानुगताकारस्याकृतित्वनिश्चयात् सन्देहानुपपत्ते
श्चाप्याकृतिर्व्यक्तिव्यतिरेकेणानुपलम्भान्न सम्भवतीति विपर्ययाभि
प्रायेणोपपादयति * वैपरीत्येन वेति * युक्तिविशेषस्योत्तरे ऽनभि
धानेनोक्ताक्षेपाभिप्रायेण प्रश्नायोगात्स्वमतानुगताकारस्य व्यक्ति
ऽत्यन्तभेदाभावेनाविचार्यत्वान्नातो ऽत्यन्तभिन्नाकृतिर्वाच्या न च
स्यावस्तीत्येवं विपर्ययाभिप्रायेणोपपादयति * अथ वेति * द्रव्य
त्युत्तरभाष्यमज्ञानसन्देहनिरासार्थत्वेन तावदवतारणपूर्वकं व्याच
ष्टे * तत्राहेति * अत्यन्तभेदे सति व्यतिरेकानुपलम्भादभा
स्याद्भिन्नाभिन्नयोस्तु न भेदानुपलम्भमात्रेणाभावो भवतीत्युक्ताक्षे
निरासार्थत्वेन व्याचष्टे * यस्त्विति * ननु प्रथमपादोक्तन्याये
वाकृतिसिद्धावयं ग्रन्थो ऽनर्थकः स्यादित्याशङ्क्याह * न चेति
एतदेवोपपादयति * तेनैवेति * विवेककथनार्थत्वाभावे स्वरूपक
थनस्य सामान्यमित्येतावतैव सिद्धेर्मात्रशब्दो ऽनर्थकः स्यादित्यर्थः
अत्यन्तभेदाभावे ऽपि कथं चिद् भेदाद्विचार्यत्वं भवतीति द्विती
विपर्ययाभिप्रायनिरासार्थत्वेन व्याचष्टे * यद्यपीति * यथा च
मात्रशब्दो ऽत्यन्तभेदनिरासार्थस्तथा सर्वसामान्यव्याप्त्यर्थो ऽपी
दर्शयितुं तदभावे सत्तामात्रमेव द्रव्यत्वादित्रयमात्रमेव वा निर्दि
स्यादिति पक्षद्वयं तावदाह *द्रव्यादीनां चेति* एतत्पक्षद्वयनिरा
मात्रशब्दं योजयितुमाह * अथ वेति * असाधारणविशेषेतिस
मासं पराभिमतकर्मधारयत्वनिरासेन बहुव्रीहितया व्याचष्टे * अ
साधारणेति * कस्मादित्यपेक्षायां यो ऽर्थः सामान्यस्य विशेषा
श्चाश्रयः सा व्यक्तिरित्युपरिष्टादभिधानाद् द्रव्यगुणकर्मणां साम
न्यविशेषवत्त्वं साधर्म्यमिति च वैशेषिकतन्त्रे द्रव्यगुणकर्मव्यक्ती
नां सामान्यविशेषाधारत्वस्मृतेश्चेत्याह * उपरिष्टादिति * अन्त्य
विशेषाणां वा नित्यद्रव्यवृत्तित्वस्मृत्या सामान्यतो विशेषा
द्रव्यवृत्तित्वं स्मृतं न भवतीति मत्वा * स्मृतेश्चेत्युक्तम् * कु
प्रश्नपूर्वकस्य व्यक्त्याकृतिविवेकाभिधानस्य प्रस्तुतोपयोग इत्या
शङ्क्य व्यक्त्याकृतिवाच्यत्वविचारानुपपत्तिशङ्कानिरासार्थत्वं सू
यितुमाह * तेनेति * प्रयोगचोदनाभावादितिसूत्रमावृत्त्यैतद
धिकारपूर्वपक्षे ऽपि योजयति * किं प्राप्तमिति * अनेनैव सूत्रावय
नाक्षिप्तानि हेत्वन्तराण्याह * संख्येति*एतदेव विवृणोति * य
हीति * प्रयोगचोदनादिसिद्ध्यर्थं व्यक्तिलक्षणायां लक्षणैव दो
स्यादित्याह * लाक्षणिकेति * ननु लक्षणापि शब्दवृत्तिप्रकारत्वा

२७०।१ न्न दोषमित्याशङ्क्याह * तथा चेति * ततश्च श्रुतिलक्षण
न स्यादिति भावः । मुख्यसामानाधिकरण्यसिद्ध्यर्थमपि
शब्दार्थतेत्याह * व्यक्तीति * पशुचोदनाक्षिप्तहृदयादिव्यव
द्ध्यर्थमपि व्यक्तेरेव शब्दार्थतेत्याह * पशुमिति * अपेक्षि
सिद्ध्यर्थमपि सैव शब्दार्थ इत्याह * कर्मभिश्चेति * स
सिद्धत्वाच्च सैव वाच्येत्याह * सिद्धेति * अर्थैकत्वमिति स
वमवतारयितुं शङ्कते * किमितीति * प्रयोगप्रतीत्युपपत्तेर
क्या क्रियोपपत्तेश्च व्यक्तिरित्यर्थः । सूत्रावयवेनेमां शङ्कां नि
ति * नेति * अविभागादिति सूत्रावयवावतारणाय शङ्कते
मान्येति * एतदाशङ्कानिराकरणार्थत्वेन सूत्रावयवं व्याच
क्तीति * अर्थैकत्वमिति सूत्रावयवावतारणार्थं यत्रेति श
निरुपपत्तिकमाशङ्क्योपपादयति * यत्रैवेति * सूत्राव
ख्यानार्थत्वमुक्तमिति भाष्यमुपपादयति * नेति * आदिशब
कल्पोपादानं गौरिति एकपदोच्चारणे क्रियाविशेषानवधार
सम्भवासम्भवसन्देहादुच्चारणानर्थक्यसन्देहे संशयोत्पत्ति
मिति प्रश्नभाष्यं व्यक्तिपदार्थकस्येत्युत्तरानुरूपत्वादुपेक्ष्योत्त
स्वयं प्रश्नान्तरं करोति * व्यक्तीति * एतत्प्रश्नापाकरणार्थ
रभाष्यं व्याचष्टे * आकृतीति * ननु कथं सामान्यावगति
त्प्रश्नोत्तरभाष्यस्य प्रश्नानन्तरापाकरणार्थत्वेन व्याख्या न यु
शङ्क्य यथाश्रुतस्य दूषणमाह * भाष्यकारस्त्विति * का त
ष्यस्य गतिरित्यपेक्षायामाह * तेनेति * अविभागादिति स
वावतरणार्थोऽयं प्रश्न इति भावः । एवं भाष्यकृतः श
यतापत्तेरन्यथा व्याचष्टे * यद्वेति * ननु विशिष्टाभिध
पक्षिणोऽभिमते कथं सामान्यावगतिरितिप्रश्नानुपपत्तिः
भिधाने तु पक्षान्तरपरिग्रहे प्रतिज्ञान्तरापत्तिर्निग्रहस्थानं
त्याशङ्क्य व्यक्तिः शब्दार्थः इति पूर्वपक्षप्रतिज्ञाया द्वैवि
२७१।२ यितुमाह * तेनेति * अद्रव्यशब्दत्वादिति सूत्रं सङ्क्षेपेण
ष्टे * तथा चेति * तस्मान्नाकृतिवचन इति उपसंह
व्यक्तिः शब्दार्थ इति इति प्रतिज्ञानुरोधात् व्यतिरेकमुखेन
भिधानोपसंहारार्थमेवेति सूत्रयितुं तथा चेत्युक्तम् । अन्यदर्श
सूत्रमन्वयमुखेन तावत्स्वयं व्याचष्टे * अन्यमिति * य
वचन इति व्यतिरेकमुखेन भाष्यकारीयव्याख्यानमनुसन्ध
न्ययेति * पूर्वपक्षमुपसंहरति * तस्मादिति * आ
क्रियार्थत्वादिति सिद्धान्तसूत्रमुभयत्र क्रियासम्भवादुभया

ातिपादनार्थम् कस्य चिद् भ्रान्तिः स्यात्तन्निवृत्त्यर्थं जातिमात्राभिधा-
ाप्रतिपादनार्थत्वेन व्याचष्टे*इतीति*नन्वाकृतेरपि व्यक्तिवच्चयने-
ानुत्पाद्यत्वात्कथमाख्याश्रवणादाकृतेः पदार्थत्वविज्ञानमित्याशङ्क्या-
ह *अत्र हीति*अत्र हि श्येनमिव चितं चयनेन निवर्त्तयेदिति वा-
क्यार्थ इत्यन्वयः। श्येन इव चीयतइति श्येनचिच्छब्दस्य कर्मव्यु-
त्पत्तिप्रदर्शनार्थः स्थलशब्दः क्विप्प्रत्ययस्याग्न्याख्यात्वौपाधिकत्वप्रदर्श-
नार्थो ऽग्निशब्दसादृश्यवाचिशब्दाश्रवणात् कथं सादृश्यलाभ इत्या-
शङ्क्य * परिशेषादित्युक्तम् * ननु श्येनव्यक्तिभिः स्थलस्य चेतुं
शक्यत्वात् कथं सादृश्यलाभ इत्याशङ्क्य श्येनशब्दार्थकरणत्वस्य
नेष्यमानत्वात्कर्म्मतैव वाच्येति दर्शयितुम् * वाक्यार्थद्वयमुक्त-
म् * नन्वेवमपि न सादृश्यलाभ इत्याशङ्क्यैतद्वाक्यार्थद्वयदूषणार्थं
* यावदित्याद्युक्तम् * चयनेन श्येनव्यक्तिं कुर्यादित्येतद्यावन्नोप-
पद्यते तथाकृतिं कुर्यादित्येतदपि यावन्नोपपद्यते तावत्पारिशेषात्साद-
श्यलाभ इति यस्मादर्थे यावच्छब्दावृत्तिः तस्मादर्थे तावच्छब्दोत्क-
र्षण योऽयं चयनेन श्येनव्यक्तिं कुर्यादित्येतत्कस्मान्नोपपद्यतइत्यपे-
क्षायाम् * इष्टकाभिरित्युक्तम् * स्नाय्वादिभिस्तर्हि श्येनव्यक्त्यन्त-
रोद्भूतेः क्रियतामित्याशङ्क्य स्नाय्वादिभिः *अपीति हेतुद्वयमुक्त-
म् * ननु स्त्रीपुंसमैथुनेन तर्हि क्रियतामित्याशङ्क्य तेन निष्पन्नाया
अपि श्येनव्यक्तेरग्निधारणाशक्तत्वात्तादर्थ्यासम्भवेन प्रयोजना-
न्तरकल्पनापत्तेर्मैथुने च चिनोतेरप्रसिद्धत्वादमुख्यार्थत्वापत्तेर-
ग्न्याधारत्वासम्भवेनैव चाग्न्याख्यानुपपत्तेरग्न्याख्यानिमित्तक्विप्प्र-
त्यय * स्मृतिपरित्यागापत्तेश्चेत्युक्तम् * इष्टकाबाधश्चात्रापि तु-
ल्यः। चयनेनाकृतिं कुर्यादिति वाक्यार्थानुपपादनार्थम् * आ-
कृतेरपीत्युक्तम् * ननु सादृश्यमपि श्येनव्यक्त्या सह करिष्यते
त आह * ततश्चेति * एकया वा श्येनव्यक्त्यन्तरविलक्षणाया
श्येनव्यक्त्या सहाग्न्याख्यस्थलस्य सादृश्यं सम्पद्येत सर्वाभिर्वा त-
ासानिर्द्धारितरूपैकव्यक्तिसादृश्यस्य व्यक्तिनिरपेक्षजातिसादृश्या-
सम्भवेन जातिसादृश्यव्यतिरेकापत्तेर्निर्द्धारितरूपव्यक्त्यन्तरविलक्ष-
णकव्यक्तिसादृश्यं वाच्यं न चेष्टकाभिस्तत्सुसम्पादम्। सर्वव्य-
क्तिसादृश्यं तु तासां परस्परवैलक्षण्यादतीतानागतानां चाग्रहणेन
तत्सादृश्याग्रहणादनाशङ्क्यमेवेत्याशयः।ननु चेत्याशङ्काभाष्यं व्याच-
ष्टे * अथेति * न साधकतम इत्युत्तरभाष्यमनुवादपूर्वकमाक्षि-
पति * तत्रेति * यद्यपि सिंहं देवदत्तमानयेति सिंहशब्दवच्छ्ये-
नं चितमिति द्वितीयान्तः श्येनशब्दः स्यात्तथापि तावत्सादृश्याविशे-

षणार्थत्वेन मुख्यार्थत्वाभावान्मुख्यार्थत्वे ऽपि वा श्येनमानयेति
शब्दवत्परविशेषणार्थत्वेन स्वप्रधानभूतार्थप्रतिपादकत्वाभावान्न
ख्यश्येनशब्दार्थस्य करणत्वेनाशङ्कितस्येप्सिततमत्वाभिधानायाल
अयं च द्वितीयान्तवत् भवति तस्याः श्येनशब्दानन्तर्याभावादि
र्थः । क्विप्प्रत्ययान्तः शब्दो ऽत्रेप्सिततमत्वनिर्देशको ऽभिमतो न
तीयेतिभाष्यं समाधत्ते ※ तेनेति ※ स्मृतिपर्यालोच्येति ल्यब्ल
पञ्चमी कथमेतत्स्मृतिपर्यालोचनया श्येनशब्दार्थस्य करणत्वानि
१ ऽत आह ※ कर्म्मणि हीति ※ नन्वेवमपि प्रत्ययार्थमात्रस्य क
त्वावगतेर्नोपपदार्थस्य कर्मत्वं सिद्ध्येदित्याशङ्क्याह ※ यदीति
नन्वेवमप्युपपदस्य किमायातमित्याशङ्क्याह ※ न चेति ※ निरु
दस्य चिनोतेरग्नौ प्रयोगादर्शनेनाग्न्याख्यात्वाभावात्प्रसिद्धाग्न्याख
निमित्तत्वाच्च क्विप्प्रत्ययस्मृतेः सोपपदस्यैव चिनोतेरग्न्याख्यात्वं
म्यत इत्यर्थः । ननु कर्म्मणीति वाच्यसप्तम्या चिच्छब्दमात्रस्य
र्मवाचित्वावगतेरुपपदस्य कर्मवाचित्वनियमाभावात् कथं सम
स्यैकार्थत्वमित्याशङ्क्याह ※ तेनेति ※ केवलस्य चिनोतेरग्न्याख
नुपपदापेक्षया कर्मणि हन इत्येतत्सूत्रगतस्योपपदविशेषणस्य कर्म
ब्दस्यावश्यानुवर्त्तनीयत्वादुपपदस्यापि कर्मवाचित्वावगतेर्न श्येन
ब्दस्य कर्मवाचिना चिच्छब्देन सह वैयधिकरण्यमित्यर्थः । उप
हराति ※ ततश्चेति ※ तृतीया तत्कृतार्थेन गुणवचनेनेत्यादितृ
यासमासलक्षणाभावादपि न श्येनशब्दार्थः करणमित्याह ※ त
वेति ※ यद्यसौ करणं स्यात्ततस्तृतीयासमासो वाच्यः स च
नुपपन्नो लक्षणाभावादित्यर्थः । नन्वश्रुततृतीयाकल्पनं चास्मि
न्पक्षे स्यादित्याह ※ तृतीया चेति ※ काम्यत्वेन च श्रुता
श्येनव्यक्तिभिर्नित्यानामिष्टकानां बाधो ऽस्मिन्पक्षे स्यान्न च
बाधपक्षसम्भवो बाधपक्षव्याप्य इत्याह ※ श्रुतेति ※ वि
जिति तत्परत्वान्निषिद्धानुष्ठानं प्रसज्येतेत्याह ※ सत्यां चेति
अत इत्याशङ्कानिराकरणोपसंहारभाष्यं व्याचष्टे ※ तेनेति ※
थाकृतिवचनत्वे विकल्पतइति पुनरुक्तं भाष्यं चयनमाकृतौ सम
वतीत्यनेन पुनरुक्तं भासमानं सूत्रार्थोपसंहारार्थत्वेन व्याख्यातुम
※ अतश्चेति ※ उभयत्रेत्याक्षेपभाष्यस्य तात्पर्यमाह ※ नैतदिति
व्यतिरेकमुखेन तात्पर्यं तु योगसाध्यं भाष्यकारोक्तं द्रढयितुमन्वय
खेन स्वयमुक्तं पर्यनुयोगं सामान्ये ऽपि व्यक्तिपक्षस्य ज्यायस्
सिद्ध्यर्थम् ※ बहुत्वाच्चेत्युक्तम्※परिहारसाम्यप्रतिपादनार्थं य
प्युच्यतइति भाष्यं व्याचष्टे ※ अथेति ※ परिहारसाम्ये ऽपि व्यक्ति

क्षस्य ज्यायस्त्वसिद्ध्यर्थं विशेषमाह * युक्ता चेति * व्यक्तेरेव
ाचकरूपत्वेन क्रियायोगसिद्ध्यर्थमनन्वाख्यातो ऽपि तृतीयासमा-
तो ऽङ्गीकरिष्यतइत्याह * अगत्या वेति * व्यक्तिपक्षे ऽन्यो ऽपि
वेशेषो ऽस्तीत्याह * संख्येति * किं पुनरत्र ज्याय इति काक्वा सू-
चेतमाक्षेपतात्पर्यं व्याचष्टे * तेनेति * आकृतिः शब्दार्थ इति स-
ाधानभाष्यसूचिताः पर्यनुयोगपरिहारसाम्ये ऽप्याकृतिपक्षस्य
यायस्त्वसाधिका युक्तीर्वक्तुं स्वरूपतस्तावत् व्याचष्टे * इतीति *
श्नपूर्वकं युक्तीराह * कुत इति * आद्यां युक्तिं व्याचष्टे * गो-
ब्दोच्चारणे हीति * गौरित्युक्ते सजातीयव्यक्त्यन्तराव्यवच्छेदेन
जातीयव्यक्तिमात्रव्यवच्छेदप्रतीत्या सामान्यप्रतीतेः पूर्वभावमु-
पादयितुम् * तदाकारेत्युक्तम् * एवमपि कथं जातिवाचित्वनि-
यो ऽत आह * अतश्चेति * द्वितीयां व्याचष्टे * यदीति * तृतीयां २
याचष्टे * गामिति * ननु व्यक्तिपक्षज्यायस्त्वे युक्तीनामुपन्यस्त-
ात्कथमन्यतरपक्षावधारणेत्याशङ्क्य व्यक्तिपक्षं दूषयितुं त्रेधा विक-
पयति * व्यक्तीति * सर्वव्यक्त्यभिधानपक्षे तावत्कल्पना गौ-
त्वसम्बन्धानित्यत्वापत्तिव्यवहारद्व्येकवचनशुक्लादिसामानाधिकर-
ानुष्ठानासम्भवरूपदोषषट्कमाह * तत्रेति * व्यक्तिसमु-
यााभिधानपक्षे ऽप्येतानेव दोषानतिदिशति * एवमिति * अ-
देशमुपपादयति * तत्रापि हीति * विशेष्यांशे ऽपि व्यक्ति-
तिरिक्तसमुदायकल्पनाभिधानानर्थक्यसम्बन्धानित्यत्वप्रसङ्गाद्वि-
वनबहुवचनसामानाधिकरण्यानुष्ठानासम्भवरूपदोषषट्कमाह *
कतीति * एकव्यक्त्यभिधानपक्षे ऽपि सम्बन्धानित्यत्वव्यवहा-
ामान्यधीद्विवचनबहुवचनप्रत्युत्तरकालप्रयोगासम्भवविशेषहेत्व-
वरूपं दोषषट्कमाह * अथेति * भाष्योक्ता युक्तीर्व्याख्या-
प्रतिजानाति * अत इति * वक्ष्यतइति शेषः । यदीति
ष्यं व्याचष्टे * यदि चेति * एकव्यक्त्यभिधानविषयत्वं भा- २१
ोक्तं दोषाणां द्योतयितुम् * एकेत्युक्तम् * सर्वसामान्यविशेष-
निर्मुक्ता हीति कस्मिन्नर्थे हेतुरित्यपेक्षायां केन चित्साम्येन
यक्त्यन्तरे प्रयोगो भविष्यतीत्याशङ्कानिराकरणहेतोरत्यन्तवैलक्ष-
ण्योपपादनार्थो ऽयं हेतुरिति दर्शयितुमाह * अत्यन्तेति *
त्वादिना हि सामान्येन खण्डमुण्डादिना च विशेषेण व्यक्तेर्व्य-
न्तरेण साम्यं स्यान्न व्यक्तेः सामान्यरूपता विशेषरूपता वा-
त्यर्थः । ननु एषां तर्हि साम्यं न भविष्यतीत्याशङ्क्याह * न
ते * नैष दोष इत्याद्याशङ्काभाष्यं व्याचष्टे * ननु चेति *

यदीति परिहारभाष्यं व्याचष्टे * यद्येवमिति
इत्याशङ्काभाष्यं व्याचष्टे * पूर्वपक्षेति *
करणव्याख्यानायैवं शब्दः व्यक्त्यन्तरे सर्वसा
मुक्त एव वर्त्तिष्यतइत्यनेन सामान्यविशेषवि
त्तीकृत्य व्यक्त्यन्तरे वर्त्ततइति नोच्यतइत्येवं भ
* सामान्यविशेषविनिर्मुक्तत्वादित्युक्तम् * य
सामान्यविशेषविनिर्मुक्तत्वं निमित्तीकृत्य वर्त्तते
रे इत्येवकारसूचितार्थकथनार्थं * व्यक्तावित्यु
र्हि उच्यतइत्यपेक्षायां यो ऽर्थ इति भाष्यवाच्यव
न सामान्यविशेषविनिर्मुक्ततोच्यतइत्येतदर्थप्रति
ख्यातुमाह * किं त्विति* नन्वन्यापोहवती सामा
लक्षिता चेद्व्यक्तिर्वाच्यत्वेन कथ्यते ततस्तदाश्रय
तेत्याशङ्क्य सामान्यविशेषव्यतिरिक्तत्वं सामा
भाववाचिना विनिर्मुक्तशब्देनोच्यते नाश्रयत्वाभा
तिरेकशब्देनोक्तम् तृतीयेत्थम्भूतलक्षणा * र
मुक्तइत्युक्तम् * इति नेयं निमित्तसप्तमी किं तु
वदियमपि विषयसप्तमीत्याशयः । निमित्तत्वोक्ति
द्धान्त्युक्तानिष्टापत्तिपरिहारोपयोगितां दर्शयितुम
व्याख्याते ऽर्थे भाष्यं योजयितुमाह * यो ह्यर्थ इ
ङ्कोपसंहारभाष्यं व्याचष्टे * ततश्चेति * अनेन
लक्षितेन व्यतिरिक्तत्वेनोपलक्षणेन व्यक्त्यन्तरे वृ
तावता सामान्याभिधानापत्तिर्दोषो व्यक्त्यन्तरस्य स
वादित्येवं भाष्यं व्याख्यातम् । यदीति परिहारभा
यत्वादिसामान्यविशेषाश्रयत्वैकार्थसमवायिनः स
निर्मुक्तत्वस्योपलक्षणत्वाभ्युपगमाच्छुद्धस्यापि च
पिङ्गाक्षत्वाद्युपलक्षितस्य देवदत्तशब्दवाच्यत्वोक्ताव
पलक्षिते प्रयोगादर्शनेनोपलक्षणसद्भावे सर्वत्र
भावादयुक्तमाशङ्क्य यदि व्यक्त्यन्तरेष्वपि सर्वस
निर्मुक्तत्वं निमित्तीकृत्य गोशब्दो भवति ततः श
त्वात्सामान्यमेव वाच्यमापद्येतेति । यदि सा
मुक्तत्वाद्व्यक्त्यन्तरं शब्दप्रवृत्तिविषयस्तर्हि सामान
क्त्यन्तरं वाच्यं स्यादित्यनेनैवोक्तम् । यदि तु सर्वस
निर्मुक्तत्वरूपं सामान्यं निमित्तं न भवति तदोपल
कत्र शब्दप्रवृत्तिहेतुत्वाभावाद्व्यक्त्यन्तरे वृत्तिरदोषो

दोष एव । यदि तु निमित्ताभावे ऽपि व्यक्त्यन्तरेषु शब्दो भवति
तो ऽश्वव्यक्तावपि वर्त्ततइत्यनुषङ्गेणावृत्त्या वा योजयितुमाह*सि-
द्धान्तेति * आहेत्याशङ्काभाष्यं व्याचष्टे * नैवमिति * यदीति प-
रिहारभाष्यं व्याचष्टे * यद्येवमिति * सामान्यप्रत्ययश्चेति भाष्यं
कृतासङ्गतत्वादपकृष्य यदि व्यक्तिः शब्दार्थो व्यक्त्यन्तरे न प्रयु-
येतेत्येतस्मादनन्तरं व्याख्येयमित्याह * यस्त्विति * भाष्यकृता
कनिमित्तशून्ये ऽक्षशब्दस्यानेकत्र प्रयोगे ऽक्षत्रयानुगतैकसामान्यप्र-
ययादर्शनादिहाप्येकनिमित्ताभावे प्रयोगमात्रेणानुगतैकाकारप्रत्ययो
स्यादितिसङ्गतिं मत्वा प्रोक्तम्।एवं तर्हीत्याशङ्काभाष्यं व्याचष्टे*श-
या तर्हीति * नैवमिति परिहारभाष्यं व्याचष्टे * नैवमपीति *
त्वमित्याशङ्काभाष्यं व्याचष्टे * जात्येति * एवं तर्हीति परिहा-
भाष्यं गोत्वविशिष्टा व्यक्तिर्गोशब्दवाच्यतया प्रतीयेतेत्यस्य सिद्धा-
तनो ऽप्यनिष्टत्वादयुक्तमाशङ्क्याकृत्यभिधानापादनार्थत्वेन व्याचष्टे
सत्यमिति * अस्तीत्याशङ्काभाष्यं प्रतिज्ञान्तराख्यनिग्रहस्थानाप-
रयुक्तमाशङ्क्य पूर्वपक्षान्तरपरिग्रहार्थत्वेन व्याचष्टे * पूर्वपक्षे-
* नैतदेवमिति परिहारभाष्यं व्याचष्टे * इतर इति * नन्वक्षा-
शब्देष्वनेकार्थप्रत्ययस्यानेकशक्तिकल्पनाहेतुतया क्लृप्तस्येहापि
वादस्त्यनेकशक्तिकल्पनायां प्रमाणमित्याशङ्क्याह * नचेति *
रस्परासम्बन्धार्थत्वेनागत्या तत्रानेकशक्तिकल्पनासामान्यविशेष-
स्तु परस्परान्वयादेकाभिधानेनेतरप्रतीतिसिद्धेरस्ति गतिरित्याश-
। तदेतदिति भाष्येण शब्दाकृतिप्रत्ययसन्निधाने व्यक्तिप्रत्यय-
कृतिप्रत्यय एव हेतुर्न शब्द इति कथं निश्चय इत्याशङ्क्यान्वय-
तिरेकाभ्यां निश्चय उक्तः तद्व्याचष्टे * अन्वयेति * अनन्तरक-
्यमाणपक्षान्तरशङ्कोत्थापनार्थं सिद्धान्तमुपसंहरति * तेनेति *
भवत्वाकृतिः शब्दार्थः तथापि व्यक्तिधर्मत्वेन तस्यास्तन्निरपे-
याः प्रतीत्ययोगाद्व्यक्तिविशिष्टैवाकृतिः शब्दार्थो भविष्यतीति प-
न्तरशङ्कार्थं नन्वितिभाष्यं तस्माच्छब्द आकृतिप्रत्ययस्य निमित्त-
यन्वयव्यतिरेकसाधितविभागोपसंहारस्य ननु गुणभूतेति चाकृ-
विशिष्टव्यक्त्यभिधानशङ्काशेषनिराकरणस्य च वक्ष्यमाणत्वात्पू-
न्यस्तपक्षापर्यवसानावगतेर्मध्ये पक्षान्तरोपन्यासस्यासङ्गतत्वाद-
स्माशङ्क्य समर्थयते * साम्प्रतमिति * तस्माच्छब्द इत्यस्य व्य-
विशिष्टाकृतिपक्षनिराकरणोपसंहारार्थत्वेनापि व्याख्यातुं शक्य-
ननु गुणभूतेत्याशङ्कायाश्चोभयसाधारण्योपपत्तेः पक्षान्तरोप-
सान्यथानुपपत्त्यैव पूर्वोपन्यस्तपक्षपर्यवसाननिश्चयात्पक्षान्तरो-

पन्यासावसरोपपत्तिसूचनार्थम् * सम्प्रत्युक्तम् * इति सा
मितीतिकरणोपक्रमो वायं ग्रन्थः । यस्मात्पूर्वोपक्रान्तः पक्ष
प्राप्तस्तस्मात्साम्प्रतं पक्षान्तरोपन्यासो युक्त इतीति करणो
र्थः । पूर्वं ग्रन्थशेषत्वे ऽनुसमासचर्थः । पक्षान्तरकरणबी
ह * तदेतदिति * आद्यावेव वाशब्दप्रयोगेणास्य व्याख्यानस्य
रमतत्वं सूचितम् । व्यक्तिविशिष्टाकृतिपक्षनिरासस्य विस्तरो
भावेनोपसंहारानर्थक्यात्तस्माच्छब्द इत्यस्य वाञ्चस्येन तदर्थाप्रती
ननु गुणभूतेत्यस्य चाकृतिर्गुणाभावेन विवक्षितेत्येतदनुभाषणा
वगतेः साधारण्यायोगात्सिद्धान्तोपसंहारं च विनास्य पक्षस्या
ताराद्श्रुतोपसंहारापत्तेरिति स्वमतेन व्याचष्टे * यद्वेति *
क्तिधर्मत्वेनाकृतेस्ततः प्राक् प्रतीत्ययोगादन्वयव्यतिरेकाक्षेपार्थ
सङ्गतिरित्याशयः । ननु व्यक्तिविशिष्टाकृतिपक्षोपन्यासात् कथ
ङ्काया व्यक्तेः शब्दार्थत्वं सिद्ध्येदित्याशङ्क्याह * अनेनेति * आ
शब्दार्थत्वं मदभिमतमनेन पूर्वपक्षिणाभ्युपगतमेव क्रियासम्बन्ध
क्तिविशेषणाद्भाविष्यतीत्यभिप्रायेण सिद्धान्ते व्यक्तेरपि गुण
भिधानमिच्छति ततो ऽहं पूर्वं शुद्धव्यक्त्यभिधानं साधयिष्या
नेनाभिप्रायेणेदमुच्यतइत्यन्वयः । व्यक्तिविशिष्टायां तदिति पा
रभाष्यं व्याचष्टे * इतरस्त्विति * व्यक्त्यभिधानपक्षोक्तसर्व
पलक्षणार्थत्वमस्य दर्शयितुमाह * यदीति * तस्मादिति ग्रन्थं
कान्वयव्यतिरेकसाधितव्यक्तिप्रत्ययनिमित्तविभागोपसंहारार्थ
स्पष्टत्वाद्व्याख्यायात्र ग्रन्थपातनिकार्थं शुद्धाकृतिपक्षं सिद्धा
न्तमुपसंहरति * तेनेति * पूर्वव्याख्यानेन शब्दः शुद्धाकृतिप्रत्य
निमित्तं व्यक्तिप्रत्ययस्य त्वाकृतिप्रत्यय एवेत्युपसंहारभाष्यव्या
नार्थो ऽयं ग्रन्थः । नन्वाकृतेर्व्यक्तिधर्मत्वाच्छुद्धाया वाच्यत
युक्तमित्याशङ्कार्थं नन्विति भाष्यं व्याचष्टे * नन्विति *
७२।१ गुणीभाव इति परिहारभाष्यं व्याचष्टे * नैवमिति * वस्तुतो
क्तिधर्मत्वे ऽप्याकृतेः शब्दतः स्वरूपमात्रेण प्रतीतेः शुद्धाभिधा
बोध इत्याशयः । व्यक्त्यभिधाने ऽप्याकृतेरुपलक्षणत्वाद्व्यक्त्यन्त
योगो व्यवस्था वोपपन्नेति पूर्वपक्षिणोक्ते यत्सिद्धान्तिते एवं तर्हि
दिनोपलक्षणत्वे सत्याकृतेरपि विशेषणत्वेनाभिधानम् * प्रस
तेत्युक्तम् । तदाक्षेपार्थं ननु चेत्याशङ्काभाष्यं व्याचष्टे * नन्वा
भाष्यकारीयदण्डशब्दोदाहरणमाक्षेप्तुमुपन्यस्यति * भाष्ये
द्रेधा ऽऽक्षिपति * नन्विति * आद्यमाक्षेपं परिहरति * यत्विति
शेषणोपलक्षणशब्दयोर्व्यावर्तकत्वापरपर्यायविशेषणत्वात्स्वतन्त्र

व्यावर्त्तकस्योपलक्षणत्वाद्वस्त्येव भेद इत्याशङ्क्य परिहारान्तरमाह
यद्येति * किं तत्सामान्यमित्यपेक्षिते यथा दण्डो विशिष्टवाचिना
शब्देनानभिधेयस्तथाकृतिरपि तदुपलक्षितव्यक्तिवाचिना गोशब्दे-
नानभिधेयैव । यथा दण्डो व्यावर्त्तकस्तथाकृतिरपीति विशेषण-
न वेति सामान्यद्वयमुक्तम् आकृतिविशिष्टेति वास्मिन्परिहारे त-
दुपलक्षिताभिप्रायमुपचाराद्व्याख्येयम् । समाधानमुपसंहरति *
तस्मादिति* ननूपलक्षणत्वे ऽप्याकृतेः सामान्यप्रत्ययश्च न प्राप्नोतीति
दूषणं परिहर्त्तुमशक्यम् । उपलक्षणस्योपलक्ष्ये स्वानुरक्तप्रत्ययजन-
कत्वादर्शनात् न ह्येकापवरकस्याक्षत्रयस्य यदिदानीमस्मिन्नपवरके
न तदक्षशब्दवाच्यमित्येकापवरकत्वमुपलक्षणीकृत्य केन चित्स-
म्बन्धकथने कृते ऽपि व्यवहारकाले ऽक्षशब्दोच्चारणादेकापवरक-
त्वाकारेण नाक्षः प्रतीयते किं त्वक्षमात्रं तेनोपलक्षणत्वे ऽपि ग-
कारप्रतीत्ययोगात्सामान्यप्रत्ययो न स्यादेवेत्यनर्थकमुपलक्षणत्वा-
करणमित्याशङ्क्याह * एवं चेति * एतद्दोषापरिहारोत्तरदोषप-
रिहारार्थोपलक्षणत्वोक्तिरित्याशयः । नैतदितिपरिहारभाष्यं व्या-
चष्टे * तदेतदिति * यथोपलक्षणाभावे ऽश्वव्यक्तावपि गोशब्दो-
ऽस्तीत्यतिप्रसक्तिरुक्ता तथा चातो ऽप्युपलक्षणस्याप्रतीतस्याविशे-
षकत्वात्प्राप्नोतीत्यर्थः । नन्वेवं सति मत्वर्थीयेभ्यो ऽपि विशेषणा-
भिधानद्वारेण तदविनाभावाद्विशिष्टप्रत्ययोपपत्तिस्तेषामपि न
विशिष्टवाचिता स्यादित्याशङ्कानिराकरणार्थं न च यथेति भाष्यं व्या-
चष्टे * न चेति * प्रकृत्यर्थस्य दण्डस्य प्रत्ययेन विशेषणत्वोक्तौ २९
विशेषणत्वान्यथानुपपत्त्या विशिष्टप्रतीतिसम्भवे ऽपि मत्वर्थीयप्र-
त्ययस्य विशेषणे प्रयोगाभावाद्विशिष्टवाचितेष्टा तद्वज्जातिशब्दानाम-
प्याकृतौ प्रयोगाभावे सति विशिष्टवाचिता स्यान्न चासावस्ति श्ये-
नचिच्छब्दे जातिशब्दस्याकृतौ प्रयोगदर्शनादित्यर्थः । यदा च केव-
लाकृत्यभिधायिश्येनशब्दो दृष्टस्तदान्वयव्यतिरेकाभ्यामप्याकृतिवा-
चिता निश्चीयते व्यक्तिसम्बन्धाभावे ऽप्याकृतौ प्रयोगादाकृतिस-
म्बन्धं विना क चिदपि व्यक्तावप्रयोगादिति प्रतिपादनार्थं तदेव-
मिति भाष्यं व्याचष्टे * अन्वयेति * व्यक्तेरशाब्दत्वे ऽन्वयव्यतिरे-
कौ पूर्वमुक्तौ शब्दस्याकृतिवाचितायामधुनेति विवेकः तस्मादि-
त्युपसंहारभाष्यं व्यक्त्यभिधाने निरस्ते ऽपि सम्बन्धाभिधानादि-
पक्षाणामनिरस्तत्वात्परिशेषासिद्धेरयुक्तमाशङ्क्य समर्थयते
एवमिति * न क्रिया स्यादिति चेदर्थान्तरे विधा-
न द्रव्यमितिचेदिति सूत्रं प्रथमं वेति चेदिति सूत्रावय-

वेनाकृत्यभिधानपक्षपरामर्शादाकृतिवाचितायामालम्भनादिक्रिय
स्यादन्यं तद्वर्णं तद्वयसमालभेतेति चार्थान्तरे आलम्भवि
न स्यात् षड् देया इति च द्रव्याश्रयस्य संख्यालक्ष
वाचकः षडिति शब्दो न स्यादिति पूर्वपक्षसूत्रार्थानुभा
र्थत्वेनाथ यदुक्तमित्यादिभाष्येण व्याख्याय तत्परिहारार्थत्वेन
र्थत्वात्प्रयोगस्याविभाग इति सूत्रं व्याख्यातुं सङ्क्षेपेणानुस
* ये त्विति * भाष्यकृतेदं सूत्रं न्यायेन शब्दस्याकृत्यर्थत्वाव
णादालम्भादिक्रियाया द्रव्ये प्रयोगस्यानुष्ठानस्य षडादिसंख्या
द्रव्ये प्रकर्षकत्वेन विशेषकत्वेन योगस्यान्वयस्योपाकृतपशुना सं
तिनिहिते द्रव्यान्तरे प्रयोगस्यानुष्ठानस्याविभागो द्रव्यस्याकृत्य
म्बन्धः कारणं जातिवाचिनोऽपि शब्दस्य लक्षणया व्यक्तिपः
दविरोध इत्याशय इत्येवं व्याख्यातं तत्स्पष्टत्वादव्याख्याय स्व
न्यथा व्याचष्टे * तदर्थत्वादिति * प्रयुज्यमानक्रियाप्रयं
त्वेनानिर्दिष्टमप्यपूर्वं बुद्धिस्थत्वात्तच्छब्देन परामृश्यापूर्वार्थत्वा
म्भनादेराकृतिपक्षेऽपि प्रयोगस्यानुष्ठानस्याविशेष इति व्या
मित्यर्थः । नन्वाकृतिपक्षे तस्या एवापूर्वसाधनत्वावगतिः क
क्षद्वये प्रयोगस्य विशेष इत्याशङ्क्याह * द्रव्यं चेति *
द्वारा पश्वादेरपूर्वसाधनत्वं न चाकृतेर्निष्क्रियत्वात्त्यक्तुं योक
क्येत्यर्थः । किमर्थं तर्ह्याकृत्यभिधानमत आह * तदभिधान
ति * नन्वदृष्टार्थत्वेनैव तर्ह्याकृतेः प्रोक्षणादिवदपूर्वसाधनत
विष्यतीत्याशङ्क्य क्रियारूपाया जातेस्तद्द्वारमन्तरेणादृष्टसाध
*अप्रतीतेरित्युक्तम् * नन्वाकृतेः साधनत्वाभावे पशुना यजे
दिकरणनिर्देशा न युज्यन्तइत्याशङ्क्याह *यदपीति* अनुपा
द्रव्यस्य क्रियासाधनाशक्तेरनवधारितविशेषस्य चोपादाना
दाकृत्या च विना द्रव्यविशेषानवधारणाद् द्रव्यविशेषावच्छे
त्वेनैवाकृतेः करणत्वं न साक्षादित्यर्थः । अत्राद्विसूत्रं यो
* तेनेति * न द्रव्यमित्यनुभाषणसूत्रगतेन द्रव्यशब्देन द्र
द्रव्यं तच्छब्देन परामृश्यतइति भावः । प्रयोगस्याविभाग इ
त्रावयवव्याख्यानार्थं द्रव्ये वेत्युक्तं तमेवावतारणपूर्वकं व्याख्य
योजयति * तदा हेति * आकृतिपक्षेऽपि प्रयोगस्याविशेष
मेव वात्राप्यपूर्वार्थत्वादिति पूर्वव्याख्याभवदुत्तरावयवो योज्य
७९।१ ह * अथ वेति * व्यक्त्याकृत्योस्त्वभेदविवक्षायां भेदानामेव
प्रत्येकं सर्वेषां वाचक इति पूर्वप्रस्थानोक्तन्यायेन पक्षद्वयेऽपि
त्त्यभिधानाविशेषात्स्वरूपेणैवासौ वाच्या ज्यात्यात्मना वेत

ात्रस्य विचारार्थत्वात्सिद्धान्ते ऽपि क्रियाद्युत्पत्तेस्तुल्यत्वाद्यादि
: जात्यात्मना व्यक्त्यभिधानपक्षे निर्द्धारितविशेषव्यक्त्युपादाना-
ःभवात् क्रियाद्यनुपपत्तिर्वाच्या तच्च स्वरूपेणाप्येकव्यक्त्यभिधाने
ुत्पत्तेः प्रागुत्तरकालं च क्रियानुपपत्तेः सर्वव्यक्त्यभिधाने च स-
पादानाशक्तेः कदा चिदपि क्रियानुष्ठानासम्भवेनानिर्धारितविशे-
यक्त्यभिधानस्यावश्याङ्गीकार्यत्वात्तुल्यमित्येतदर्थप्रतिपादनाया-
थासूत्रं व्याचष्टे * यद्वेति * द्रव्यशब्दवाच्याया व्यक्तेरुभयरू-
वे ऽपि व्यावृत्ताकारतात्र व्यक्तिरूपशब्देनाभिमता पक्षविकल्पार्थौ
ाचिच्छब्दौ अस्मिन्नपि व्याख्याने पूर्वप्रकृतद्रव्यपरामर्शिनं तच्छब्द-
भेप्रेत्यानुवृत्तव्यावृत्तोभयरूपवदनिर्धारितविशेषद्रव्यार्थत्वाच्छब्दस्य
पक्षे ऽपि प्रयोगस्यानुष्ठानस्य निर्द्धारितविशेषव्यक्तिविषयत्वायो-
त्र विभागो व्याहशतेति योजयितुम् * शब्दस्येत्युक्तम् * यद्वा
ातिश्च व्यक्तिश्च तामस एवार्थ इत्येवं तदर्थत्वादिति सूत्रार्थ-
ानैव जातिव्यक्त्योरत्यन्तभेदाभावो ऽभिधीयते ततश्चाकृतौ वि-
तस्या लम्भादिप्रयोगस्य विभागो निष्कृष्टाकृतिविषयता नास्ती-
न क्रियानुपपत्त्यादिदोषापत्तिरिति चतुर्थीं व्याख्यामाह * जा-
ीति * भेदे ऽपि व्याकृतिर्व्यक्त्या न क्रिया स्यादित्यनुभाषणसू-
निर्दिष्टां क्रियां तच्छब्देन परामृश्याप्याकृतावनवच्छिन्नव्यक्त्युपा-
नाभावेन आकृतिनिरपेक्षया व्यक्त्या साधनत्वायोगेन उभयोर-
न्यापेक्षयो र्यागापूर्वसाधनत्वावसायात्साधनत्वापेक्षायाः शक्तेर-
साधनशक्तत्वाच्च । धर्म्माणां कर्मसम्बन्धे च शेषिसाहित्यस्या-
वक्षितत्वेनैकत्रापि कृतानामुपकारकत्वोपपत्तेरपूर्वसाधनव्रीहि-
व विहितानां धर्माणां यथेष्वाकृतावपि विहितानां व्यक्ताव-
ानोपपत्ते र्व्यक्त्याकृत्योर्द्वयो र्यागापूर्वार्थत्वाच्चाकृतौ विहितस्याल-
ादिप्रयोगस्य व्यक्तिविषयत्वाद्विभागो भेदो नास्तीति नाकृत्य-
धानपक्षे क्रियानुपपत्तिरितिसूत्रं व्याख्येयमित्याह * यद्वेति *
ःमादित्यु पसंहारभाष्यं व्याचष्टे * तस्मादिति * सास्नाद्येका-
सम्बन्धिगोत्वमात्रस्य वाचकः गोशब्द इति विज्ञातमन्वयव्य-
रेकिणामित्यनेन न्यायेनान्वयव्यतिरेकबलेनैवाकृत्यभिधानस्यावि-
ारितसिद्धत्वात्प्रयोगचोदनाद्यनुपपत्तेस्तदसम्भवाच्छङ्कामात्रं नि-
कर्तुमेतदधिकरणमिति सूचयितुम् * आकृतिपक्षे ऽपीत्युक्तम् *

इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रातिवसन्तसोमयाजिभट्टमा-
वात्मजभट्टसोमेश्वरविरचितायां तन्त्रवार्त्तिकटीकायां सर्वानवद्य-
ारिण्यां न्यायसुधाख्यायां प्रथमस्याध्यायस्य तृतीयः पादः समाप्तः ।

॥ न्यायसुधायाम् ॥

प्रथमाध्यायस्य चतुर्थः पादः

॥ अथ उद्भिदादिशब्दानां यागनामताधिकरणम् ॥ १ ॥

उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात्॥ १॥

अत्र भाष्यकृतोद्भिदादिशब्दा गुणविधयो नामधेयानि वेति
न्ता कृता । सा किमुद्भिदादिशब्दानांधर्मप्रमोपयोगसिद्ध्यर्थं वा
थार्थव्याख्यानाय वा तत्राध्ययनविधिसामर्थ्यात् सकलवेदप्रा-
ण्यस्य विधिना त्वेकवाक्यत्वादिति तुशब्देन तुल्यं च साम्प्रदा-
कमित्यनेन वा सूत्रेण प्रागेवोक्तत्वात् न तावदाद्यः पक्षः नाप्यु-
ः सन्दिग्धार्थनिर्णये वाक्यशेषसामर्थ्ययोः प्रामाण्यस्य वक्ष्यमा-
त्वात् । द्वितीयाध्यायोपक्रमे च प्रथमे ऽध्याये प्रमाणलक्षणं वृ-
मेति भाष्येण सकलस्यैवाध्यायस्य प्रमाणलक्षणत्वाभिधानात् अ-
गासे प्रमाणलक्षणे मध्ये वाक्यार्थव्याख्यानस्यासम्बद्धत्वापत्तेरि-
क्षिपति * एवं स्मृतिसहितस्येति * सकलवेदप्रामाण्यासिद्धौ २८
तिविचारायोगात्स च न सम्भवति ततश्च तत्सिद्ध्युपोद्बलना-
स्मृतिसाहित्योक्तिः । तेजो वै घृतं स्रुवेणावद्यतीत्यादेः सन्दि-
र्थनिर्णये व्यापाराभावे ऽपि स्तुतिविध्यर्थत्वेन प्रामाण्यसिद्धेस्त-
चारात्प्रागपि सकलवेदप्रामाण्यसिद्धिरविरुद्धेति सूचनार्थम्
वाक्यार्थइत्युक्तम् * वाक्यार्थव्याख्यानावसरत्वादेव च गुणवि-
त्यं प्रतीयते स च न सम्भवति ततश्चाप्रमाणमित्यप्रामाण्याशङ्का
त्र गुणविधित्वशङ्केत्यप्ययुक्तं सिद्धे ऽपि प्रामाण्ये कस्यार्थस्य
णमिति विषयविशेषविचारात् प्रमाणलक्षणसङ्गतिरित्यन्येषां
ाधानमुपन्यासपूर्वकं दूषयति *केचिदिति* पूर्वपक्षाभिधानार्थ-
न चाद्यसूत्रव्याख्या न युक्तेत्याह*ये ऽपि चेति* विधिना त्वेकवा-
त्वादिति हि तुशब्दोक्तेन तुल्यं च साम्प्रदायिकमित्यनेन वा कि-
र्थत्वेन हेतुना यदुद्भिच्चित्रादिशब्दानां विध्यादित्रयान्तर्भावव-

चनमनेन सूत्रेण क्रियते तत् सिद्धान्तिनो नानिष्टमित्यर्थः । स्व
नेन समाप्यते * तस्मादिति * आद्ये अधिकरणे विचारस्वरूपम
* तत्रेति * यथाप्यध्ययनविधिसामर्थ्यादेवोद्भिच्चित्रादिशब्दान
र्थानर्थक्यं निराकृतं द्व्यर्थापि च प्रामाण्योपपत्तेर्न द्वाराभावेन प्र
र्थानां युक्तं, मन्त्रार्थलक्षणादेश्चानर्थक्याज्ज्यायस्त्वान्न तद्वचेनान
र्थक्याङ्गीकरणं युक्तम् । आनर्थक्यासम्भवाच्चाप्रसिद्धस्याप्युद्भिच्चि
त्रशब्दस्य तृतीयागतकरणत्वबलात् करणत्वयोग्यद्रव्यविशेष
चित्वस्य नामधेयत्वाभावे ऽवश्यङ्कल्प्यत्वाच्च । न पौष्णं
पणं विकृतौ श्रीयितास्याचोदनात् प्रकृतौ इत्यादिवत्
ोचितमात्रायाः प्राप्त्यर्थं सामान्यन्यायसिद्धस्यैव क्रियार्थत्व
नेकविचारान्तरितस्य स्मरणं क्रियतइति वाच्यं, तत्र ह्यग्निष्टो
मकरणादुत्कृष्टं मन्नर्दनं प्रथमप्रयोगाच्चोत्कृष्टः प्रवर्ग्यः सर्वत्रा
नयतीत्युक्ते तद्वत्पेषणमपि दर्शपूर्णमासप्रकरणादुत्कृष्टं किमनि
यागेषु पशौ पुरोडाशे च भवत्युत चरावेवेत्युपस्थितस्य विचार
स्य सङ्गत्यभावादिहैव वाक्यप्रकरणविरोधाविरोधचिन्ताप्रस्त
अवश्यकर्त्तव्यत्वात् तत्प्राप्त्यर्थं पेषणस्योत्कर्षाभिधानं युक्तम् ।
वसंस्कारस्यापि च बर्हिर्लवनादेरङ्गप्रधानेषु समानविध्ये विच
त्यर्थं कर्तृकनाप्यङ्गप्रधानेषु समाना न वेति विचारेण प्राप्तानामृ
त्वां विनियोजिकायाः समाख्यायाः लिङ्गप्रकरणाभ्यां विरोधो
न वेति विचारिते ऽन्यत्रापि समाख्यायाः पूर्वैः सह विरोधाविर
विचारे समाप्ते यत्प्रसक्त्या यो विचारस्तत्समाप्तौ स एव बुद्धिस्थो
भवतीति बर्हिर्लवनादिविचारप्रसक्तानुप्रसक्तिसमाप्त्या बुद्धि
बर्हिर्लवनादिविचारस्य यूपावटस्तरणबर्हिषि लवनमस्त्युत नेति
पलक्षणसङ्गत्यान्तरविवक्षया स्मरणं युक्तं, गुणविधिनामधेयाचि
यास्तु लक्षणा ऽसङ्गतत्वेनेह कर्त्तव्यत्वाभावात् भावार्थाधिकरणे
द्भिच्चित्रादिशब्दानां फलपदान्वयनिरासेन यज्यन्वये ऽभिहिते
गुणविधित्वेनैवान्तदन्वयो नामधेयत्वेन वेति प्रसङ्गादुभय
यज्यन्वयासम्भवे बलात्फलपदान्वयापत्तेस्तन्निरासार्थं भावाधि
करणशेषत्वेनैव विचारोपपत्तेस्तत्समाप्तौ चैवमप्यपूर्वाभावात
शब्देभ्यो ऽपूर्वं नामपदेभ्यो वेति चिन्ता न युक्तेति प्रकृतचिन्त
णापूर्वविचारस्यापि सङ्गत्युपपत्तेस्ताद्विवक्षयोद्भिदादिप्रामाण्यस्म
मयुक्तं प्रामाण्यस्मारणेनैव प्रसक्तत्वाल्लक्षणासङ्गतस्यापि चिन्त
कर्त्तव्यत्वोक्तौ स्मारणात्कर्त्तव्यत्वं कर्त्तव्यत्वे च सति तत्सङ्गति

१ उत्तरविचारेति २ पु० पा० ।

द्ध्यर्थं स्मारणमितीतरेतराश्रयापत्तिरत एव च टुप्टिकायां केचिदानर्थक्येनोत्सूत्रं पूर्वपक्षं कुर्वन्ति सूत्रेण तत्परिहारमित्येतन्मतमुपन्यस्य तत्रानर्थक्यस्य पूर्वमेव सर्ववेदविषयस्य निराकृतत्वादिति स्वयमेव दूषितम् । तथापि नामधेयत्वे सति उद्भिच्चित्रादिशब्दानां धर्मप्रमोपयोगो ऽस्त्युत नेती चिन्ता क्रियमाणा न विरुध्यते। को धर्मः कथं लक्षण इति हि प्रकारवाचिना थमुप्रत्ययेन प्रामाण्यप्रकारो ऽपि लक्षणार्थत्वेनाभिहितः। यथोक्तम् * बृहट्टीकायाम् *

चोदनासूत्रनिर्द्दिष्टो यः प्रमाणपरिग्रहः।
सप्रकारः स आद्येन लक्षणेन प्रपञ्चितः॥

इति। किं प्रत्यक्षश्रवणमेव वेदस्य प्रामाण्यप्रकारो ऽथ मन्वादिस्मरणेनोपस्थापनमपीति सामग्रीगतप्रकारे तृतीयपादेन चिन्तिते किमप्रवृत्तप्रवर्त्तनस्तुतिविहितार्थप्रकाशनान्येव प्रामाण्यद्वाराण्युत नामधेयतापीति अवान्तरव्यापाररूपप्रकारान्तरचिन्तार्थो ऽयमारम्भो लक्षणपूर्वपादाभ्यां सङ्गच्छते। प्रामाण्यस्वरूपविषयत्वे त्वस्याश्चिन्तायाः प्रत्यक्षवेदविषयत्वात्स्मृतिविचारात्प्रागेव कार्यतापत्तेर्न स्मृतिपादानन्तरमारम्भो युक्तस्तस्मान्नामधेयानां धर्मप्रमोपयोगो ऽस्ति न वेति इह विचारार्थः । तत्सिद्ध्यर्थं चैषां विध्यादित्रयान्यतमान्तःपातो ऽस्त्युत नेति चिन्तनीयम् । ज्यंशवेदातिरिक्तत्वे नामधेयानामनुष्ठानानौपयिकत्वेन धर्मप्रमायोगानुपपत्तेरिति नामधेयानर्थक्ये ऽप्याम्नायस्येति सूत्रं योजयन् पूर्वपक्षमाह * किं तावदिति[1] * ननु सर्ववेदविषयस्यानर्थक्यस्याध्ययनविधिबलेन तत्रैव सिद्धान्ते निराकृतत्वान्नामधेयानर्थक्ये ऽप्युद्भिच्चित्रादिशब्दानां गुणविधित्वेनापि प्रामाण्योपपत्तेर्मन्त्रार्थवादवत् पुनः प्रत्यवस्थानायोगात् नानर्थक्याशङ्का युक्तेत्याशङ्क्य नोद्भिच्चित्रादिशब्दानां स्वरूपेणानर्थक्यं विवक्षितं किं तु नामधेयत्वे सतीत्येतमर्थं दर्शयितुं वृद्धवाक्यमुदाहरति * आह चेति * यद्युद्भिच्चित्रादिपदं नामधेयत्वेन त्र्यंशाद्वेदादधिकमतिरिक्तमिष्यते ततो धर्मानुपयुक्तार्थाभिधायित्वादानर्थक्यं प्रपद्यतइत्यर्थः। अनुपयुक्तं सदितिपाठे नामधेयत्वेन त्र्यंशाद्वेदादधिकं सदानर्थक्यं प्रपद्यतइत्यर्थः । ननु त्र्यंशवेदातिरेके ऽपि नामधेयत्वेनैव धर्मप्रमोपयोगो भविष्यतीत्याशङ्क्य * त्र्यंशेत्युक्तम् * ननु नामधेयत्वे ऽप्युद्भित्संज्ञको यागः कार्य इति विध्युद्देशान्तर्गतिसम्भवात् फलोद्देशनिमित्तोद्भित्संज्ञकत्वात् प्रशस्तो ऽयं याग इति चार्थवादान्तर्गत्युपपत्तेः संज्ञात्वेन

१ किं प्राप्तमिति २ पु॰ पा॰ ।

वानुष्ठेयसंज्ञियागप्रकाशनसामर्थ्यान्मन्त्रकार्योपपत्तेः कथमति
८।१।२ पत्तिरित्याशङ्क्याह * न हीति * यागानुष्ठेयताया यजेतेत्येत
सिद्धेरेतद्विधेयत्वेनैव च यागविशेषावधारणसिद्धेः साध्यांशा
धानेनैव विध्युद्देशान्तर्भावो वाक्यो न च नामधेयत्वे ऽन्यतमां
धानं सम्भवतीत्याह * साध्येति * संज्ञायाः संज्ञिस्वरूपानि
र्थत्वेन प्राशस्त्यपरत्वाभावास्तुतिबुद्ध्यनुत्पादकत्वेनार्थवादाति
पपादयति * स्तुतीति * स्वरूपनिर्देशार्थत्वेनैव च कृतार्थत्वा
योगार्हरूपाभावेन कर्मकालप्रयोज्यत्वाभावात् विभुत्वेन च
कर्वांशे[1] प्रयोग इत्यज्ञानात् कर्मस्वरूपप्रकाशनार्थत्वायोगात् क
भूतस्य चोद्भिदादिसंज्ञकस्य प्रकाशनार्हस्याभावान्न मन्त्रान्तर्ग
त्याह * कर्मेति[2] * उद्भिच्चित्रादिपदेषु अध्येतृभिर्मन्त्रशब्दा
त् मुख्यमन्त्रत्वशङ्कानुपपत्तेस्तत्कार्यकारित्वमात्रेण मन्त्रान्तर्ग
त्येति सूचयितुं कार्यशब्दः । ननु विध्यादित्रयातिरेके[3] ऽपि न
यस्य गुणफलोपबन्धोपयोगित्वेनार्थवत्त्वं भविष्यतीत्याशङ्क्य
न चेति * विधित एव यागविशेषावधारणसिद्धेर्गुणफलोप
ऽपि सेत्स्यतीत्याशयः । उपसंहरति * इतीति * सूत्रोक्तं सि
माह * अत्रेति * उक्तेनाध्ययनविधिसामर्थ्यलक्षणेन हेतुना
वेदस्य त्र्यंशत्वावधारणात् यदुद्भिच्चित्रादिशब्दस्य नामधेयत्वे
त्र्यंशत्रयातिरेकापत्तेरप्रामाण्यं पूर्वपक्षिणोक्तं तन्न सिध्यति
यस्यापि वेदत्वेनांशत्रयान्तःपातावसायात् इत्यर्थः । एतेन
नोक्तमस्माभिरित्याद्यन्यतमस्मै प्रयोजनाय भवेयुरित्यन्तं भा
द्यसूत्रव्याख्यानार्थमिति सूचितम् । नामधेयप्रामाण्यविचार
न्ताभिधानार्थमप्येतत्सूत्रं गुणविधिनामधेयविचारपूर्वपक्षे
ध्याहारेण शक्यं योजयितुमिति प्रदर्शनायादौ भाष्यकृता
यविचारोपक्रमः कृतः । वार्त्तिककृता त्वध्याहाररहितस्य
पूर्वपक्षाभिधानासामर्थ्यमुक्तम् उभयाभिधानशक्तस्यापि सूत्र
क्यभेदापत्तेरुभयत्र तात्पर्यासम्भवमभिप्रेत्य द्वितीयाधिकरण
क्षस्यानुमितत्वोक्तिरिति भाष्यवार्त्तिकयोरविरोधः तत्र तावा
दिभाष्यं नामधेयस्य मन्त्रार्थवादान्तर्भावशङ्कानिराकरणार्थं त
र्गतावप्यन्यतमांशान्तर्गतिसिद्धेरतदर्थकमित्याह * यदेति
द्धारितरूपांशविशेषान्तर्गतिं विनान्यतमांशान्तर्गत्यनिर्वाहात्

१ अत्रेति अधिकं २ पु० पा० ।
२ कर्माङ्गभूतेति २ पु० पा० ।
३ आधिक्ये ऽपीति २ पु० पा० ।

स्मात्कारणात् तन्नामधेयं विध्याद्यर्थत्रयान्यतमार्थमित्युक्तमपि
शेषानिरूपणात् निर्वाहमगत्यैव स्थितं तदा तस्मात्कारणात् कि-
र्थमिति विशेषविचारः कर्त्तव्य इत्यर्थः । न त्वेकस्मिन्विचारे पर्य-
सिते विचारान्तरारम्भोक्तिरेषा तथा सत्यधिकरणत्रयापत्तेर्द्वयोर-
करणयोरित्यनुपपत्तिप्रसङ्गात् तत्र तावदिति भाष्यं व्याचष्टे *
तावदिति * एतदेवाक्षेपपूर्वकमुपपादयति * कथं पुनरिति *
वयववाच्ययं शेषशब्दः किं तूपयुक्तेतरवाची वायव्यं श्वेतमि-
ादेर्हि स एवैनं भूतिं गमयतीत्यन्तस्यैकस्य वाक्यस्य मध्ये भूति-
मान्तेभ्यः साध्याद्प्रतिपादनेन विधेयार्थाभिधानोपयुक्तेभ्यः
ेभ्यः परिशिष्टानां वायुर्वै क्षेपिष्ठेत्यादीनामर्थवादतेष्यते । ननु
धिवाक्यावयवत्वरूपैकवाक्यत्वमात्रेण भूतिकामादिपदानामप्य-
वादत्वापत्तेर्नामधेयानां च विधिविषयविशेषावधारणार्थत्वेन वि-
यार्थाभिधानोपयुक्तत्वात् न परिशिष्टतास्तीत्यर्थः । ननु विधिवि-
षादेव विधेयविशेषावधारणसिद्धेर्नामधेयानां तादर्थ्यासम्भवात्
रिशिष्टता भविष्यतीत्याशङ्क्याह * तदिति * उत्पत्तिवाक्ये विधे-
विशेषावधारणस्यान्यतः सिद्धावपि समे यजेतेत्यादौ दर्शपूर्णमा-
दिनामधेयं विना विशेषावधारणासिद्धेर्वक्ष्यमाणत्वात् विध्यु-
ान्तर्गतिस्तावत्सम्भवत्येव न च तत्सम्भवे स्तुत्यर्थत्वाङ्गीकरणं
क्तमिति प्रधानं विधिरङ्गं स्तुतिस्तत्र प्रधानविशेषणसम्भविनस्त-
ामित्वमेव न्याय्यमित्यत्रोक्तमित्यर्थः । गुणगुणिसम्बन्धकीर्त्तना-
कत्वाच्च स्तुतेर्न गुणमात्रैकवाचिनैकेन पदेनोपपत्तिरित्याह *
चेति * ननु संज्ञया गुणिभूतस्य संज्ञिनोऽर्थातूपात्तस्योपस्थाप-
पपत्तेः स्तुतिः सेत्स्यतीत्याशङ्क्याह * न चेहेति * संज्ञायाः संज्ञि-
वहारार्थत्वेन स्तुतिपरत्वायोगान्नेह नामधेये स्तुतिप्रतिपत्तिः स-
वतीत्यर्थः । ननु नामधेयस्यापि फलोद्भेदनादिगुणयोगनिमित्त-
ात् सहस्राक्षादिवत्स्तावकत्वोपपत्तिरित्याशङ्क्याह * यद्पीति *
ज्ञायाः संज्ञिव्यवहारार्थत्वेन कृतार्थायाः संज्ञायाः स्तुत्यर्थत्वमेव
ावत्स्वमनीषिकामात्रेण कल्प्यं न तु युक्तियुक्तं कथं चित्कल्पित-
प्येतत्फलोद्भेदनस्य कर्त्तेति धातूपपदप्रत्ययार्थसमुदायस्य तृतीय-
न्यार्थत्वप्रतीतेः प्रातिपदिकार्थप्राधान्यविघाताद् बाध्येतेत्यर्थः ।
मन्त्र इति । मन्त्रान्तर्गतिशङ्कानिराकरणार्थं भाष्यं व्याख्यातुं
मन्त्रस्वरूपनिराकरणे तावत्प्रायिकस्यात्यन्तत्वादिलक्षणस्याभिधान-
ादकत्वस्य चाध्येतृप्रयोगस्य च व्यापकस्याभावं सूचयितुं हेतुमाह

१ निरासार्थमिति २ पु० वा० ।

* न चार्थेति * ननु स्वरूपतो मन्त्रत्वाभावे ऽप्यूहप्रवरनामधे-
वत् प्रयोजनाकाङ्क्षायां प्रयोजनान्तरायोगेनानुष्ठेयस्मारकत्वाद्वा
मन्त्रकार्यकरत्वेनौपचारिकं मन्त्रत्वं भविष्यतीत्याशङ्क्य तथं
चन्निराकरोति * न चेति * पदार्थमात्रस्यानुष्ठेयत्वात् प्रयोजना-
नुपपत्तेर्वाक्यार्थस्यैवानुष्ठेयत्वेन प्रयोजनत्वादेकस्य च पदस्य वाक्या-
र्थप्रतिपादनासामर्थ्यात् प्रयोजनाकाङ्क्षैव तावन्नास्ति सत्यामपि
प्रयोजनाकाङ्क्षायां स्मारकत्वं न युक्तं करणत्वप्रतीत्या स्मरणार्हत्वा-
त्प्रातिपदिकार्थप्राधान्यबाधादित्यर्थः । एतच्च ब्राह्मणैक-
देशीभूतस्य कर्मकाले स्वतन्त्रप्रयोज्यत्वाभावान्मन्त्रकार्यक-
रित्वानुपपत्तेर्मन्त्रकार्यकरत्ववादिनोद्भिदादिनामधेयानां स्वातन्त्र्य-
मभ्युपगन्तव्यम् इत्यापाद्यैकपदत्वमुक्तम् । वस्तुतस्तु य-
सामानाधिकरण्यं विना नामधेयत्वायोगात् भिन्नवाक्य-
त्वे प्रकारान्तरेणोपयोगानुपपत्तेरानर्थक्यस्यापरिहार्यत्वादेव-
कवाक्यत्वम् । अत एव विद्वद्वाक्यशेषिप्रादिवदेकवाक्यता-
र्यतइत्युक्तम् । अनङ्गीकृतनामधेयत्वस्य तूद्भिदादिपदस्वरूप-
र्थवादत्वनिराकरणे सत्यस्यैकवाक्यत्वशङ्का तदङ्गीकारेण
निष्युद्देशान्तर्गत्या परिहारो न कथं विद्युज्यते । यद्वा
मन्त्रकार्यकरत्वाङ्गीकरणे ब्राह्मणैकवाक्यत्वानुपपत्तेः क-
स्यैकपदता पद्यते तदा सामानाधिकरण्याभावेन
मधेयत्वायोगात् तदभिधेयस्य चार्थस्य वाक्यान्तरेण कर्मत्व-
धानात् प्रयोगसमवेतार्थाभावात्स्मारकत्वं न युक्तमित्याह * न
तद्विति * अनेन चैवं जातीयकस्येति भाष्यसूद्भिच्चित्रादिशब्द-
नामधेयत्वे तद्वाक्यस्य प्रधानकर्मण एव प्रकाशनीयस्य स्मृ-
दयुक्तमाशङ्काप्राद्योक्त्या व्याख्यातं यद्वा कर्मणो विभुत्वेनास्य
शे प्रयोग इत्यज्ञानात् कर्मस्वरूपप्रकाशनार्थत्वानुपपत्तेःकर्माङ्ग-
काशनार्थत्वं वाच्यं न चैतदभिधेयः कर्माङ्गभूतो ऽर्थो ऽस्ती-
शयः । नन्वसमवेतार्थत्वे ऽपि स्तोत्रशस्त्रमन्त्रवदङ्गत्वं भविष्यतीत्या-
शङ्क्याह * न चेति * स्तोत्रादिसाधनत्वेन विधानाभावात् प्रकर-
पाठेनैषां कर्माङ्गप्रकाशनेनैव विनियोगो वाच्यः । न चासौ सम्भव-
तीत्याशयः । नन्वुद्भिदादिशब्दवाक्यस्य खनित्रादेर्मन्त्रवर्णात् व-
णि समवायः कल्पयिष्यते ऽत आह * मान्त्रवर्णिकेति *
अग्निहोत्रादिशब्दानां द्रव्यवाचित्वानाशङ्कनादुपलक्षणार्थो द्र-
शब्दो द्रष्टव्यः श्रुत्यविनियुक्तत्वाच्चास्य स्वार्थसमवायकल्पकत्वं
तीत्याह * न चेति * सम्भवत्यपि नामधेयत्वे कर्मस्वरूपप्र-

र्थत्वे च ब्राह्मणाद्विच्छिन्नस्यैकपदमात्रस्य मन्त्रत्वानाशङ्कनात्
ास्य चाख्यातान्वयं विना नैराकाङ्क्ष्याभावाच्च कर्मकालप्रयोज्य-
सम्भवतीत्याह * न चेति नन्वध्याहारेण निराकाङ्क्षीकृत्य
कालप्रयोज्यत्वं भविष्यतीत्याशङ्कां निराकुर्वन् कर्मकालाप्रयो-
त्वमेवोपसंहरति * अतश्चेति * अतः साकाङ्क्षत्वेनाप्रयोगार्ह-
न कर्मकाले प्रयोगः सम्भवति न चाध्याहारेण निराकाङ्क्षीकृत्य
गो ऽविनियुक्तत्वेन प्रत्यक्षविनियोगान्यथानुपपत्तिकल्प्या-
हारायोगादित्यर्थः । नामधेयत्वेन च प्रत्यक्षब्राह्मणैकवाक्यत्व-
तेनैव श्रुताध्याहारेण निराकाङ्क्षीकरणं युक्तमित्याह * स्फुटं
ं * मन्त्रानन्तर्गतिमुपसंहरति * इतीति * पारिशेष्यादिति २९
ये मन्त्रार्थवादान्तर्गत्यसम्भवे ऽपि नामधेयत्वोपपत्तेः पारिशे-
द् गुणविध्यसिद्धेरयुक्तमाशङ्क्य समाधानमाह * तस्मादिति *
धेयस्य विध्युद्देशान्तर्गतिमात्रं पारिशेष्येणाभिमतं गुणग्रहणं
राधिकरणापातनिकार्थमित्याशयः । विध्युद्देशान्तर्गतस्यैव ना-
स्य गुणविधिर्नामधेयं वेत्येवं विचारः क्रियतइति भावे लकारः
थाङ्गसमर्पकत्वाभिप्रायो गुणविधिशब्दः नामधेयस्य च विध्यु-
न्तर्गतेन नामधेयं विधास्यतइत्येतद्भाष्यव्याख्याने विस्तरेणो-
दयिष्यमाणत्वात् तदपरूपेणेह सिद्धवदभिधानमुद्भिदादिश-
ां च नामधेयत्वं याज्ञिकप्रसिद्धैव सिद्धं स एष यज्ञः पञ्चवि-
ग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इत्यादिलिङ्ग-
श्चावधारितम् इत्यविचारितसिद्धमङ्गीकृत्य नामधेयत्वस्य धर्म-
ाणप्रकारता ऽस्त्युत नेत्याद्येनाधिकरणेन विचारिते क्वास्ति
धेयं क्व वा नेति कोष्ठशोधनिकार्थमुत्तरः प्रपञ्चः । सो ऽपि
थार्थव्याख्यानत्वेन प्रमाणलक्षणासङ्गतिप्रसङ्गादुद्भिदादिशब्दो
विधिर्नामधेयं वेत्येवं रूपः । किं तु यथा सर्ववाक्यशेषाणाम् आ-
क्यनिराकरणेनार्थवादत्वे ऽर्थवादाधिकरणेनैव सिद्धे तद्दृढी-
विधित्वाशङ्कानिराकरणायोत्तराधिकरणद्वयं तथोद्भिदादिश-
ां याज्ञिकप्रसिद्ध्यवधारितेन नामधेयत्वेन धर्मप्रमोपयोगे सा-
प्रसिद्ध्यादिहेतुकेन गुणविधित्वेनैव धर्मप्रमोपयोगसिद्धेः किं
न नामधेयत्वेनेत्याशङ्क्य नामधेयत्वमेव दृढीकर्तुं गुणविधित्वा-
निरासायोत्तराधिकरणचतुष्टयं । ततो वाजपेयाधिकरणे तन्त्र-
न्धेन विशिष्टविधिसम्भवाद् गुणविधिपक्षोक्तमत्वर्थलक्षणादि-
परिहारेण प्रत्यवस्थानमाशङ्क्य वैरूप्यात्तन्त्रसम्बन्धानुपपत्तेर्वि-
द्वारासम्भवेन गुणविधित्वनिराकरणं दृढीकृते विशिष्टवि-

धावाख्यातोपपदार्थयोर्द्वयोर्विधानात्सन्निकृष्टविध्यसम्भवनिबन्ध
त्वाच्च विप्रकृष्टविधेर्युगपत्सम्भवासम्भवविरोधाच्च क्वापि विशि
धिः सम्भवतीत्याशङ्क्याग्नेयाधिकरणे विशिष्टविधौ व्युत्पादिते
हिरादिशब्दाः संस्कारनिमित्ताः जातिनिमित्ता यौगिका वेत्या
रणत्रयेण प्रसङ्गाद्विचारिते प्रासङ्गिकसमाप्त्या बुद्धिस्थस्य वि
विधिव्युत्पादनस्य प्रयोजनमुत्पत्तिशिष्टबलीयस्त्वं वैश्वदेवश
गुणविधित्वशङ्कानिराकरणार्थं व्युत्पाद्याष्टाकपालादिशब्दाना
वाक्यगतत्वेनोत्पत्त्युत्पन्नशिष्टत्वविभागाभावाद् गुणविधित्व
ङ्काष्टत्वादीनां परस्परविरोधित्वेनैकवाक्यविधानायोगाद् बल
क्यभेदप्रसक्तेरुत्पत्तिशिष्टद्वादशत्वावरुद्धे यागे ऽष्टत्वादिविधय
दष्टाकपालादिशब्दैर्गुणवृत्त्या द्वादशकपालस्तुतिरिति वैश्वानर
करणे ऽभिहिते प्रसङ्गाद् गुणवृत्तित्वलक्षणं तत्सिद्धिसूत्रेण
यथा विध्युद्देशान्तर्गतस्यापि उद्भिदादिपदस्य नामधेयरूपेण प्र
न्तरेण धर्मप्रमोपयोगित्वं तथा वाक्यशेषस्यापि स्तावकत्वाति
सन्दिग्धनिर्णायकत्वेनेत्युक्ताधिकरणेनोक्ते स्रुवाधिकरणे वाक्
पवत् सामर्थ्यस्यापि सन्दिग्धनिर्णायकत्वेन धर्मप्रमोपयोगव्युत्
नात् सकलस्य पादस्य प्रमाणलक्षणसङ्गत्यविघातः। भाष्यानु
णोद्भिदादिशब्दानां गुणविधित्वेन धर्मप्रमोपयोगित्वं नामधे
वेत्युभयथा प्रामाण्यमङ्गीकृत्य प्रकारविशेषव्युत्पादनार्थापि गु
धिनामधेयचिन्ता प्रकारस्यापि लक्षणार्थत्वात् न लक्षणसङ्गति
हन्ति प्रामाण्यविषयविशेषनिरूपणार्थेयं गुणविधिनामधेयचिन्त
प्रकारविशेषनिरूपणार्थेति परव्याख्यादूषणार्थस्तु वार्त्तिकका
यत्न इति सर्वमनवद्यम्॥ उद्भिद्गुणत्वेत्यादिद्वितीयाधिकरण
पक्षभाष्यं तात्पर्यतो व्याचष्टे * तत्र तावदिति * नतूद्भिदा
ब्दानां लोके खनित्रादावप्यप्रसिद्धत्वादवयवव्युत्पत्त्या तु क्व
पि प्रवृत्तिसम्भवात् कथं प्रसिद्ध्या गुणविधित्वनिश्चय इत्या
* बलवत्त्वेनेत्युक्तम् * उच्छब्दस्योर्द्धत्वे भिदेश्च विदारणे लोक
करणयोः प्रसिद्धत्वादुद्भिच्छब्दस्य खनित्रेऽवयवप्रसिद्धिर्बली
प्रकाशनार्थतायास्त्वप्रसिद्धत्वाद्यागस्य चाबोधकत्वेन प्रकाश
भावात् उत्पादकत्वेनापि प्रकाशकत्वोपचारे सर्वकर्मणां स्व
त्पादकत्वेनोद्भिच्छब्दवाच्यतापत्तेर्यागे प्रसिद्धिर्दुर्बलेति भावः
विधौ त्विति भाष्यमभ्यधिकमर्थं विदधत इत्यवयवत्वेन प्रवृ
शेषकरत्वमुक्तमर्थवन्तो भविष्यन्तीत्यनेन च प्रयोजनवत्त्वा

१ बलवतीति २ पु० पा०।

ख्यातुं प्रयोजनवशेन चाधिकत्वात् * प्रवृत्तेश्चेत्युक्तम् * वि-
[शान्तर्गतस्योद्भिदादिशब्दस्य गुणरूपमङ्गरूपं वाच्यमित्यनुष-
याहाराभ्यां योज्यम् । किमर्थं तदुच्यतइत्यपेक्षायामाख्यातेन
ातुमिति * विधीयत * इत्यनेनोक्तं भाष्यमप्युद्भिदगु-
ं यागस्याख्यातेन विधातुमुद्भिदादिशब्दो विधेयगुणस-
ीक इत्येवं योज्यं धातूपसर्गरूपावयवशक्त्यनुसारेण ताव-
च्छब्दस्योर्द्ध्वविदारणसाधनद्रव्यवाचित्वमुपपादयति * प्राति-
कमिति[1] * द्रव्यविषयायाः प्रसिद्धेर्बलीयस्त्वोपपादनार्थं न-
ामिति भाष्यावयवं व्याचष्टे * न चेति * भिदिर्विदारणइति-
प्रकाशने स्मृत्यभावाद्यागस्याप्रकाशकत्वादौपचारिकप्रकाश-
ा सत्यप्यतिप्रसङ्गापत्तेरवयवप्रसिद्ध्योद्भिच्छब्दस्य यागार्थत्वा-
ात्समुदायप्रसिद्ध्या तदर्थता वाच्या न चासावस्तीति सूचना-
समुदायशब्दः । ननु लोकप्रसिद्ध्यभावेऽपि यजिसामानाधि-
ण्याद्यागार्थतावगम्यतइत्याशङ्कानिराकरणार्थं न चेति भाष्याव-
सामानाधिकरण्यावगतस्यार्थस्य पारिभाषिकत्वाभावात् अ-
माशङ्क्य व्याचष्टे * न चेति * वैय्यधिकरण्येनापि यजिस-
ध्योपपत्तेः सामानाधिकरण्येन यागार्थत्वस्यावगन्तुमशक्यत्वा-
किकार्थकल्पना पारिभाषिकी आपद्येत सा च सम्बन्धस्याशास्त्र-
वादित्यैन्द्र्यधिकरणसूत्रावयवेन निरस्तत्वादयुक्तेत्याशयः ।
यया चोद्भिच्छब्दार्थस्य करणत्वावगतेर्द्रव्यस्यैव च करणत्वोपपत्ते-
नुसारेणापि उद्भिच्छब्दस्य द्रव्यवाचितावसीयतइत्याह * तृती-
ो चेति * ननु यागस्यापि फलोद्भेदनहेतुत्वात्फलभावनाकरण-
च तद्वाचित्वेऽप्यवयवप्रसिद्धिस्तृतीया च न विरोत्स्यतइ-
ाङ्क्याह *न चेति[2] * यागस्योदूर्ध्वविदारकत्वं प्रकाशकत्वं वा ता-
ास्त्येव करणत्वं तु विधिसामर्थ्यगम्यमपि कर्तृव्यापार-
ाय्यत्वरूपकर्मत्वापेक्षत्वेन ततो दौर्बल्यात्तेनाभिभूतं सन्न तृती-
ादनक्षममिति प्रसिद्धशब्देन प्रकृष्टत्वेन कर्मत्वात् बलीयस्त्वेन
ाद्धं यतस्तेनाभिभवितुं न शक्यतइत्यभिधानात्सूचितम्।कुठा-
ानां तु छेदनादौ करणत्वात् उद्यमनादौ च कर्म-
द्भिन्नविषयत्वेनाविरोधादनभिभूतं करणत्वं तृतीयोत्पादन-
मित्याशयः । नन्वर्थवन्तो भविष्यन्ति इतिभाष्यावयवेनार्थवत्त्व-
तृतीयोपपत्तित्वेनोक्तत्वात् प्रयोजनवशेन चेति द्वितीयोपपत्ति-

१ प्रातिपादकं तावदिति २ पु० पा० ।

२ न च यागस्येति पु० पा० ।

नेन व्याख्या न युक्तेत्याशङ्क्याह * अर्थवत्त्वादिति * प्रवृत्ति विशेषकरत्वोपपत्तिद्योतनार्थं तृतीयया युक्ता प्रागस्य व्याख्या नयः । प्रवृत्तिविशेषकरत्वं व्याचष्टे * विधायकेति * द्रव्यार्पकत्वानिरपेक्षप्रवृत्तिहेतुत्वाभिधाने ऽपि विधेयसमर्पणे द्रव्यविकियानुष्ठाने च यथाक्रमं प्रवृत्तौ विशेष इत्यर्थः । ननु नामो ऽपि संज्ञानिमित्ते कर्मणि प्रवृत्तेरवच्छेदकरूपो विशेषो ऽस्तीत्याह * अन्यथा हीति * विधिविशेषादेव यागविशेषसिद्धेस्तस्यानतिरिक्तार्थत्वात् । अनुच्चारिते तस्मिन्यावती विधायकप्रवृत्तिस्तावत्येवोच्चारिते ऽपि स्यादित्यर्थः । उद्भिदपदस्यानुक्तप्रवृत्त्यंशे ऽप्याधिक्याभावं यागेन तुल्यं वक्तुमपाग्नेति वाक्यं प्रसिद्धार्थवत्त्वोपपत्तिसूचनार्थं प्रागर्थवत्त्वव्याख्येत्यत्र चेति * प्रसिद्धस्यापि लोकादेर्निःप्रयोजनत्वात् प्रसिद्धेः अर्थवत्त्वोपपत्तिन्यासमवसमाशङ्काभिधेयवाचित्वेनार्थवादस्य समुद्भिदपदस्य गुणे प्रसिद्धत्वात् विधेयगुणसमर्पकस्य सतो र्थवत्त्वमित्यर्थः । अस्मिंस्तु व्याख्याद्वये गुणविधौ हेतुद्वयापत्तेः दर्शितः पूर्वपक्ष इति द्वयेनाधिकरणसाम्ये तत्सूचनानुपपत्तिनापरितोषाद्धेतुभेदे ऽपि प्रवृत्तिविशेषकरत्वे ऽपि प्रयोजनानिर्वृत्त्यापत्तिं सूचयितुं प्राक् व्याख्येति परमार्थिकम् । नयुक्तव्याभिप्रायं दर्शयितुमाह * अथ चेति * कस्येति पूर्वपक्षार्थवत्त्वेनोद्भिदपदस्य प्रवृत्तिविशेषो दर्शितः । किमपरमप्रवृत्तिविशेषोपन्यासेनेति * आह ततश्चेति * प्राप्तमतिविधायित्वेनोक्तेनाश्रयणेनोद्भिदपदस्यासतः प्रवृत्तिविशेषकरत्वायुक्तत्वादिह विधिगुणयोरित्युक्तम् । नामधेयानर्थक्यं यदि चेति भाष्यमाक्षिपति * नन्विति * समाधत्ते * तेन श्लोकं व्याचष्टे * यद्वेति * किमपरमित्यनेन धातुनैव यागनामनिर्देशात् ततश्चानर्थक्यमितीदं वा चेति व्याख्यातमत्वेन जातिश्रुत्यानुश्रिता ततः सामान्याभिधानयोः सामान्यवत्त्वमुच्येत वा चानिष्ठमनुसराऽन्वयो व्याख्यातः सिद्धान्तव्याख्यानमत

२८३।१ सिद्धान्तिनो ऽप्यभिमतां दर्शयति * सिद्धत्वादित्यत्र चेति * स्यान्यतो ऽसिद्धौ तस्माविपरीते नामधेयत्वानर्थक्यविषयत्व निरासो न युज्येत इत्याशयः । ननु निरोपसिद्धे नामधेयाधीनव्यवहारस्यानुसारेणैव कर्मण्यपि प्रवृत्तिसिद्धेः । संज्ञार्थविधिनिरासार्थं तद्व्याख्यामित्याशङ्क्याह * यद्वा चेति * शिष्यकन्यविधिशून्येन लौकिकेनाव्यवहारस्यानुसारेण रूपेणा

द्दादिपदानां विशेषवाचित्वाभ्युपगमे तत एव विशेषसिद्धे-
नर्थक्यं प्रसज्येत न च सामान्योक्त्या तस्यार्थवत्त्वं विशेषान्त-
त्र सामान्यसिद्धेरित्यर्थः । ननु यागविधिवाक्ये गुणस्यापि
गौरवं स्यादित्याशङ्क्याह * लाघवं चेति * हेतुत्रयसङ्कल-
त्प्रतिपादकान् भाष्यावयवान् यदि गुणविधिरित्यादिभाष्यो-
। व्याख्यायापेक्षितं यदीत्यादिभाष्येण तद्व्याचष्टे * यद्येवमि-
ति ब्रूम इति परिहारभाष्यमाक्षेप्तुमवतारयति * अत आहे-
आक्षिपति * नन्विति * कर्मविध्यभावे गुणविध्ययोगादवश्यं
श्यत् कर्मविधाने ऽभ्युपगन्तव्ये ज्योतिष्टोमवाक्यसन्निधा-
र्त्तव्यतास्नानात् तस्याश्च कर्त्तव्यत्वलिङ्गत्वात् भूयस्त्वेनो-
ोत्यनेन न्यायेनास्य कर्मविधित्वं भविष्यतीति समाधत्ते *ग-
ादिति * नन्वेवं सति ज्योतिष्टोमपदस्य का गतिरित्याश-
ा गतिमाह * तद्व्यावृत्त्येति * नन्वेवमपि तद्विकार-
ान्तराभावात् प्रकृतिशब्दो न युक्त इत्यन्यथाक्षिपति * न-
ति * समाधत्ते * सिद्धान्तेति * प्रस्तुताधिकरणासि-
प्रकृतित्वानभिधानादव्यक्तासु तु सोमस्येत्यत्र वक्ष्यमाण-
द्भिदादियागप्रकृतित्वस्योद्भिदादिशब्दानां गुणविधित्वाभिधा-
धत्वेनानुद्भाव्यत्वादपरितोषेणान्यथा समाधत्ते * अथ
कथं दूरस्थे ज्योतिष्टोमे गुणविधिरित्याशङ्क्य * ताण्डके *
ष्टोमानन्तरमुद्भिदाद्याम्नानाद् गुणविधित्वेन चासम्बद्धपदा-
ाभावात् सर्वत्र ज्योतिष्टोमस्य प्रकृतत्वोपपत्तेस्तत्र गुणविधि-
ावः प्रकृतित्वाभिधानेनोक्त इति भावः । यदा त्वथैष ज्यो-
ादिवज्जेमुदाहरणमिति श्येनाधिकरणवक्ष्यमाणन्यायेन ज्यो-
शब्दानां गुणविधित्वाशङ्काविषयत्वं नेष्यते तदा तेष्वपि गु-
ुपपत्तेज्योतिष्टोममात्रे गुणविधानाभिधानमयुक्तमित्याशङ्क्य
त्रा छिरुक्तत्वादिति न्यायं सूचयितुं तदपेक्षया प्रकृतित्वाभि-
त्याह*अथ वेति*अव्यापारस्य व्यापारावच्छेदं विना विधेय-
ात्तस्य च व्यापारवाच्याख्यातान्वयाधीनत्वात् कारकविभक्तिं
ाख्यातान्वयायोगात् लोकसिद्धस्यैव च गुणस्य कारकविभक्ति-
ाज्यत्वात् न स्वरूपज्ञापनार्थप्रातिपदिकार्थप्रधानप्रथमानिर्दिष्ट-
ेयत्वं सम्भवतीत्याशयः । नन्वेवमपि ज्योतिष्टोमपदस्य ना-
र्थं तद्वाक्येन फलसम्बन्धे व्यापृतेनापेक्षितायाः कर्मोत्पत्तेः
यजेतेत्यनेन करणादुत्पत्तिशिष्टेन सोमेन गुणविधित्वे वा
ाप्ते कर्मणि गुणफलसम्बन्धरूपानेकार्थविधाने वाक्यभेदा-

पत्तेर्ज्योतिष्टोमवाक्यस्यैव कर्मोत्पादकत्वात् उत्पत्तिशिष्टेन ज्योति
षां श्रुतिमतामग्न्यादिद्रव्याणां स्तोमेन समुदायेन ज्योतिष्टोमशब्द
वयवशक्त्यनुसारावगतेनावरोधाज्ज्योतिष्टोमे गुणविधानं न युक्त
मित्यन्यथाक्षिपति * नन्विति * फलपदानुरोधात् फले गुणा
धिप्रतीतेर्ज्योतिष्टोमाश्रितस्य गुणस्य फले विधानं भाष्यकृतोक्तं
ति मत्वा तावत्समाधत्ते * काम्यत्वादिति * एवं तावदुद्भिद
दिद्रव्येण यागमभिनिर्वर्तयेदिति सन्देहहेतुभाष्यस्योद्भिद्गुण
यागस्येति च पूर्वपक्षभाष्यस्याविहिते च कर्मणि तत्र गुणविधा
मनर्थकमित्याशङ्काभाष्यस्य चानुपपत्तिप्रसङ्गात्सर्वकाम्यप्राप्तपश्च
दिफलानुवादकत्वेन च फलपदोपपत्तेरपरितोषादन्यथा समा
त्ते * अथ वेति * यद्यपि गुणाविशिष्टं विहितं कर्मोत्पत्तिकेन
णेन नैराकाङ्क्ष्याच्च तद्विरुद्धं वाक्यान्तरोपात्तं गुणान्तरं ग्रहीतुं
क्नोति तथापि यजिना गुणरहितं स्वरूपमात्रं निष्कृष्याकाङ्क्षोत्थ
नेन गुणान्तरं विहितं सन्नोत्पत्तिकाद्विशिष्यतइत्यध्याहृत्य यदि त
शब्दकावपि शब्दावृत्त्या योज्यम्।

अपि वा नामधेयं स्याद्यदुत्पत्तावपूर्वमविधा
कत्वात्॥ २॥

पूर्वसूत्रे श्रुत्यार्थाद्वा गुणविधित्वस्यानुक्तत्वादशाब्दस्य
शाब्दनिराकरणानन्वयात्तन्निरासार्थापि वा शब्दासामञ्जस्यं व्याख्या
पेक्षया सूचितं भाष्यकृता त्वाकृत्यधिकरणाद्यसूत्रवन्ना
याधिकरणसिद्धान्ताभिधानार्थस्यापि सूत्रस्यावृत्त्या ततश्चान्यथ
यार्थत्वासम्भवात्पारिशेष्याद् गुणविधिरित्यध्याहारेणैतदधिक
पूर्वपक्षेऽपि योजना शक्येति मत्वा तन्निरासार्थत्वेनापि वाः
व्याख्यातः। यथा सर्वमुद्भिच्चित्रादिनामधेयमपि क्रियार्थं स्य
त्युक्ते नामधेयस्य विध्युद्देशान्तर्गतत्वेन श्रुतिस्मृत्यर्थत्वायोगात्
वृत्तिविशेषकरत्वाभावेन च विध्युद्देशेऽनुपयोगादानर्थक्यं स्य
त्याशङ्कामुपस्थितां निराकर्तुमपि वा नामधेयं स्यादिति सूत्रा
शेषं तु यौगिकानां कर्मसामानाधिकरण्यनिर्दिष्टानां गुणविधि
धेयत्वविचारे सिद्धान्ताभिधानार्थमिति व्याख्येयम्। एतदेव
व्यानमभिप्रेत्य यदा तदर्थत्रयान्यतमार्थमिति स्थितं तदा विचा
त्याद्यधिकरणशेषभूतं विचारान्तरं कृतम्। आद्याधिकरणशेषत्व
स्य विचारस्य द्वयोरधिकरणयोरित्यविरुद्धं तस्मान्नामधेयमपि

र्थमेव स्यादिति पूर्वसूत्रगततदर्थशब्दानुषङ्गेणैव शब्दार्थे वाश-
ङ्किकारेण चाद्याधिकरणशेषतया व्याख्यानस्य स्पष्टत्वात् एत-
प्रकरणशेषत्वाभावाच्चाव्याख्यानामिति सर्वं समञ्जसं यदुत्पत्ता-
र्वेमिति सूत्रावयवमाधिकरणविषया ऽभिधानार्थतया तावत्स्वयं
चष्टे ※ यदुत्पत्ताविततीति ※ प्रथमेत्यनेनोत्पत्तिशब्दस्य सामा- २८।
धिकरण्यप्राग्भाववाचितया व्याख्यानाद्व्यधिकरणानिर्दिष्टेष्वग्नि-
त्रादिशब्देषु तत्प्राग्भावविशेषणानर्थक्यात् अग्निहोत्रादिशब्दव्या-
कत्वं सूचितम्। अर्थान्तरेत्यनेनापूर्वशब्दस्यार्थान्तरनिरूढचित्रा-
ब्दव्यावर्त्तकत्वं सूचितम्। सामानाधिकरण्यात् प्रागर्थविशेषा
श्रयोक्त्या सामानाधिकरण्यस्य नामधेयत्वनिश्चायकत्वं सूचि-
नेति दर्शयितुम् ※ सामानाधिकरण्यादित्युक्तम् ※ भाष्यकृता
यस्माच्छब्दार्थे यदित्यव्ययमभिप्रेत्यापूर्वशब्दो नामधेयत्वहेतुप्रति-
दनार्थत्वेनैवमिति भाष्येण व्याख्यातः तदनुसन्धत्ते ※अथ वेति ※
मधेयत्वस्य सामानाधिकरण्येनैव यागविषयत्वनिश्चयात्तदनाश्रय-
वा नामधेयत्वस्यैवायोगाद् द्रव्यनामत्वे च द्रव्यस्य विधेयत्वापत्ते-
विधिप्रतियोगिनो नामधेयशब्दस्य प्रधानकर्मनामधेयविषयत्वाव-
त्कस्य नामधेयमिति सन्देहानुपपत्तेरपूर्वनिष्पादकत्वस्य च नाम-
निमित्तत्वाभावाद्धोमादिसाधारण्याच्चोपलक्षणत्वानुपपत्तेरन-
मतमपि व्याख्यानान्तरं विभवार्थमाह ※ अथ वेति ※ अविधाय-
वादिति सूत्रावयवं स्वव्याख्याने हेत्वभिधानार्थत्वेनावता-
पूर्वकं व्याचष्टे ※ किं कारणमिति ※ नामधेयत्वे प्रतिज्ञाते गु-
णविधित्वनिराकरणहेत्वभिधानेनाद्याधिकरणसिद्धं नामधेयत्वानां
षां गुणविधिमात्रशङ्कानिराकरणार्थान्युत्तराधिकरणानीति सू-
तम्। कथं न युज्यतइत्यपेक्षायां फले तावद् गुणविधौ पञ्चदोषानाह
फलमिति ※ यजिपरेणाख्यातेनोद्भिदा पशून्भावयेदिति पर-
योः सम्बन्धविधानम् उद्भिदा यजेत पशुकाम इति च व्यवधाने-
न्नातयोः सम्बन्धकल्पना धातोर्विध्यनुपयोगित्वेन प्रत्ययानुग्रह-
र्थत्वात् पारार्थ्यं काम्यत्वाच्च नित्यस्य सोमेन यजेतेत्युत्पत्ति-
क्याविशिष्टस्य सोमस्य बाधः कुशरादिवच्च यागसाधनत्वेनाप्रसि-
नाभक्षेण याग इत्यर्थः।ज्योतिष्टोममात्रे गुणविधौ फलपदानर्थक्यं
मेन सह विकल्प इति द्वौ दोषौ फलविशिष्टे तु ज्योतिष्टोमे गुण-
धौ वाक्यभेदः सामान्यशिष्टस्य च सोमस्य विशेषशिष्टेन खनि-
दिना बाध इति द्वौ दोषौ परपदार्थविधानात् प्रत्ययव्यापारस्य वि-
कर्षः। धात्वर्थे च गुणविधानात् धातोः पारार्थ्यं अभक्ष्येण च

याग इति दोषत्रयम् । द्वयोस्तुल्यमिति द्वेधा यागे गुणविधे-
रप्य पञ्चदोषानाह * तथेति * विशिष्टविधावपि विशिष्टस्याप्र-
त्वेन सर्वेषां नामधात्वाख्यातानां तत्समर्पणार्थत्वात् पारार्थ्यं ।
पर्णाविधिं च विना विशिष्टविध्ययोगादनेकार्थविधानकल्पना ।
च्छब्दस्य च द्रव्यविशिष्टयागपरत्वान्मत्वर्थलक्षणा विधिसाम-
तृतीयान्तधात्वर्थावगतेस्तुल्यविभक्तित्वेनावगम्यमानस्यैकार्थत्व-
स्य त्यागो ऽश्वयागश्चेति पञ्चदोषानाह * तथेति * उप-
ति * तस्मादिति * एतच्च नामधेयत्वसिद्ध्यर्थं गुणविधित्वनिरा-
भाष्यकृतापि मत्वर्थलक्षणादोषोपन्यासेन कृतत्वान्नास्माकम-
ङ्गाभिधायितामापादयतीत्याह * तदिति * श्रुतिश्चेति भ-
सौत्रमुत्पत्त्याख्याद्यभावविकारगतप्राथम्यलक्षणगुणयोगेन श्रु-
त्तिपरं व्याख्याय तद्व्यतिरेकप्रतिपादनार्थत्वेन गुणविधौ मत्व-
क्षणोपन्यासान्नामधेयत्वोपपादनार्थेनोत्पत्तिशब्देनैवार्थाद् गुण-
मत्वर्थलक्षणोक्तेति सूचितमिति न भाष्यस्याप्युत्सूत्राभिधानं
स्मः विधानायोद्भिदादिश्रुतिः खनित्रादीन् वक्ष्यति यजिसा-
धिकरण्यार्थं च तद्वतो यागान् लक्षयेदिति युगपत् श्रुतिल-
पत्तिरित्यर्थः । एवं त्वाख्यातद्वयान्वयार्थं चकाराध्याहारापत्ते-
ञन्तं पाठान्तरमुक्तं यागेनेत्यादि भाष्यस्य श्रुतिश्चेत्यादिना सह
रुक्तमाशङ्क्य विवेकमाह * प्रातिपदिकेति * समुच्चयवाचि-
व्दाभावात् पुनरुक्तत्वं न युक्तमित्याशङ्क्य किं च शब्दाभ्या-
यागेन कुर्यादिति व्याचष्टे * किं चेति * ननु यागानुवा-
गुणविधानस्य पूर्वपक्षत्वाद् गुणविधौ च तस्य साध्यत्वेनानुव-
करणमित्याशङ्क्य * अनुवादे चैत्युक्तम् * अनुवादो ऽप्यपूर्वस्या-
गुणं विधातुं यद्यागेन कुर्यादित्येवमेव स्यादित्याशयः । ना-
भाष्येणोद्भिच्छब्दस्यावयवव्युत्पत्त्योर्ध्वविदारणसमर्थद्रव्यवाचि-
सिद्धेस्तस्य यागेनाप्रसिद्धकर्मवाचित्वकल्पना निष्प्रमाणिका तृ-
निर्देशस्य व्रीह्यादिषु कर्मवाचित्वाभावे ऽपि दर्शनेनासाध-
दित्याशङ्क्योच्यत इत्यनेन कोकिलः पिक इत्यादौ लोके प्रसि-
मानाधिकरण्येनाप्रसिद्धार्थनिर्णयदर्शनाद् व्रीह्यादिवच्च वा-
क्याद्विपरीतप्रसिद्ध्यभावात् तृतीयानिर्देशो ऽप्यत्र प्रामाण्यमित्य-
येण परिहारमुक्त्वा कथं तृतीयानिर्देशात्कर्मवाचितावगम्य
१८५।२ पृष्टे करणवाचिनो हीत्युत्तरं दत्तं तदाक्षिपति * यदीति * ।
सामर्थ्यनिमानममूर्तं सन्तं क्रियायाः करणमिति शब्द आह
रणाभिधायिन्या तृतीयया विभक्त्या संयुज्य निर्दिशत्यस्मा

ाष्यान्तरविरुद्धं प्रातिपदिकस्य करणवाचित्वाभिधानमित्य-
। करणशक्त्यधिष्ठानलक्षणार्थो ऽयं करणशब्द इति परिह-
* नैष इति * करणशब्दार्थविषयो वायं करणशब्द इ-
परिहारान्तरमाह * अथ वेति * करणशब्दवदुद्भिदप्रा-
दिकस्य करणशक्तिविशिष्टद्रव्यानभिधायित्वाद्यादृशतादृशश-
द्रव्यरूपत्वमात्राभिप्रायौ व्याख्येयौ करणशब्दो यादृशरूपमर्थं ब्र-
ते तादृशस्य द्रव्यरूपस्य प्रातिपदिकं वाचकमित्यर्थः। ननु करण-
ऽपि करोतिना क्रियाभिधानात् ल्युटा च करणशक्त्यभिधानात्
द्रव्यवाचितास्तीत्याशङ्क्याह * कृदन्तेनेति * द्रव्योपसर्जनत्वे-
करणशक्तिर्ल्युटोच्यते न तृतीयावन्निष्कृष्येत्यर्थः । एतदेवोपपाद-
। * तथा चेति * कथं कारकान्तरयोगमात्रेणाप्राधान्यं कर-
क्तेरित्यपेक्षायामाहँ * अन्यथा हीति * कारकप्राधान्येन त-
सर्जनत्वात् द्रव्यस्यैकेन कारकेण वशीकाराद्यथा घटमानयेति
कारकेण वशीकृतस्य घटस्य घटेनेत्यादिपदान्तरोपात्तेनापि द्रव्य-
कारकान्तरेण योगो न भवति तथा ल्युट्प्रत्ययोपात्तं करणकार-
प्रत्युपसर्जनस्य करणशब्दवाच्यस्यापि द्रव्यस्य कारकान्तरयोगो
स्यादित्यर्थः । ननु द्रव्योपसर्जनत्वात् कारकान्तरयोगासम्भवे
। ल्युट्प्रत्ययोक्तस्य करणकारकस्यैव कारकान्तरयोगो भविष्य-
याशङ्क्याह * शक्तेस्त्विति * कारकं हि शक्तिस्तस्याश्च प्रति-
र्थं व्यवस्थिताया एव कल्पितत्वात् न व्यवस्थासिद्धये शक्त्यन्तर-
पना युक्तेत्याशयः। एतमेव परिहारमुपसंहरति * तस्मादिति *
करूपसर्जनमस्येति विग्रहः । एतदेव भाष्यं व्याचष्टे * तेनेति *
ीयानिर्देशाभावात्कथं यागस्य करणतेत्याशङ्क्य भावार्थाधिकर-
क्ष्यमाणतोक्ता नैतद्युक्तमित्याशङ्काभाष्यं तात्पर्यतो व्याचष्टे *
चेति * करणभूतयागैकवाक्यत्वविशिष्टतृतीयान्तत्वस्य
ागवाचित्वे साध्ये नैकान्तिकत्वप्रदर्शनार्थत्वेन व्रीहिसोम-
दिति दृष्टान्तं व्याचष्टे * यथैवेति * कर्तृव्यापारव्या-
धीनत्वात्करणत्वस्य तदाक्षिप्तकर्तृव्यापारव्याप्यत्वरूपानीप्सित-
त्वापेक्षया व्रीह्यादिशब्दानां यजिना सह वैयधिकरण्ये
ार्थत्वे ऽपि यथा करणभूतयागैकवाक्यत्वविशिष्टं तृती-
न्तत्वमविरुद्धमेवमत्रापीत्यर्थः । हठशब्दं व्याचष्टे * हठ इति *
द्भिच्छब्दस्य यागवाचित्वं लौकिकाप्रसिद्धमपि अत्र नैव वाक्येन
ध्यत इत्याशङ्कानिरासार्थमपि चेति भाष्यं स्पष्टत्वान्न व्याख्यातं
द्भिच्छब्दस्याप्रसिद्धमेव यागनामधेयत्वं करणभूतयागैकवाक्यत्व-

विशिष्टतृतीयान्तत्वेनाज्ञातं ज्ञाप्यते किं तु द्रव्ये यागे वावयवव्युत्प
त्तितुल्यत्वात्सन्देहे सति सामानाधिकरण्येन लोकनिर्णयोपायेन नि
र्णीयतइति परिहाराभिधानार्थं न नामधेयं विधायिष्यतइति भाष्यम
र्थतो व्याचष्टे * तदुच्यतइति * उद्भिच्छब्दस्यावयवव्युत्पत्त्यप
र्यालोचने द्रव्यवाचित्वस्याप्यज्ञानात् पर्यालोचने वा सन्देहादुभयो
पादाने ऽपि कादिपदमर्थविशेषवाचित्वेनाज्ञातं सन्दिग्धं चाक्षादिप
कोकिलः पिको ऽधिदेवनो ऽक्ष इत्यर्थविशेषवाचित्वेन प्रसिद्धैरपृथ
क्श्रुतिसामानाधिकरण्यनिर्दिष्टं सदर्थविशेषवाचित्वेन निर्णीयमा
लोके दृष्टमित्युद्भिदादिपदमपि तथा निर्णीयते । यत्त्वर्थविशेषवाचि
त्वेन निरूढं नियतं तत्प्रसिद्धपदसामानाधिकरण्ये ऽपि स्वार्थान्नाप
नीयतइत्यर्थः । अनेन चानिरूढत्वविशेषणाद्धेतोरपि व्यभिचारः परि
।२ हृतः । श्लोकं व्याचष्टे * व्रीह्यादयो हीति * ननूद्भिच्छब्दस्य स्मृत्य
नुसारेणोदूर्ध्वं विदारणसमर्थद्रव्यवाचित्वावधारणात् प्रकाशनार्थ
त्वे तु स्मृत्यभावादतुल्यत्वेन सन्देहाभावात् कथं सामानाधिकरण्या
न्निर्णय इत्याशङ्क्याह * प्रधानं चेति * किमुद्भित्प्रातिपदिकस्या
वयवार्थानुसारात् द्रव्यवाचितास्तु तृतीयानुसाराद्वा यागवाचिते
ति सन्देहे ऽवयवार्थस्य गुणत्वात् तद्बाधेन प्रधानभूततृती
यार्थानुसाराद्यागवाचितैव न्याय्येत्याशयः * अपि चेति * भाष्यो
क्तवाक्यभेदाशङ्कानिरासार्थमध्ये तदेवं भाष्यम् उद्भित्सञ्ज्ञकेन यागेः
पशून्भावयेदित्येवं नामधेयस्यापि यज्यर्थविशेषणत्वेन विधेयत्वात
अयुक्तमाशङ्क्य धूम एवाग्नेर्दिवा ददृशे नार्चिचरितिवद्यथा गुणविधे
बहुविधानं नैवं नामधेयपक्षे ऽस्तीत्यौपचारिकार्थत्वेन व्याचष्टे *वि
चेति * शङ्कान्तरनिरासार्थं भाष्यावृत्तिसूचनार्थः किंचशब्दः यश्च
नामधेयपक्षे वाक्यभेदः शङ्कितः सो ऽप्ययुक्तः प्रत्युत तस्मिन्नेव पक्षे
विधिलाघवेन गुणविधिपक्षवद् गौरवलक्षणवाक्यभेदाभावान्नामधे
यविशिष्टयागभावनारूपैकार्थविधेश्चावृत्तिलक्षणवाक्यभेदस्यानाश-
ङ्क्यत्वादित्यर्थः । ननु यथा नामधेयपक्षे प्रातिपदिकस्य यज्यर्थविशे
षकत्वेन विधिसम्बन्धे सत्याख्यातावगतयोः संख्याकारकयोर्विभ
क्त्यानुवादोपपत्तेर्लाघवं तथा गुणविधिपक्षे ऽपि यागोद्देशेन विहि
तस्य द्रव्यस्य योग्यतया करणत्वावगमात् प्राथम्येन चैकत्वावगतेर
नुवादो भविष्यतीत्याशङ्क्याह * त्वत्पक्षे हीति * कारकान्वयं वि
ना प्रातिपदिकार्थस्य क्रियान्वयासम्भवेन विधेयत्वायोग्यत्वात्
श्रुतायाश्च संख्यायाः कारकाङ्गत्वाभावात् तत्रैकत्वमयज्ञाङ्गभूतमि
त्यनेन न्यायेनाविवक्षापत्तेः प्रातिपदिकार्थैकत्वविशिष्टं करणत्वमेव

पक्षे विधेयं स्यादित्याशयः। ननूद्भिच्छब्दस्य भाष्यकारोक्ते प्रशने स्मृत्यभावात् कर्मणश्चाप्रकाशकत्वात् अवयवद्वारेणापि कयप्रसिद्धेर्नामधेयत्वायोगात् अगत्या गौरवाश्रयणमदोषमित्याशाह * तस्मादिति * उक्तेन यजिसामानाधिकरण्यप्रधानानुरोत्तिविधिलाघवलक्षणेन हेतुत्रयेण कर्मनामधेयत्वावधारणे प्रवृत्तिमित्तं विना तदनिर्वाहाद्यथासम्भवे कस्मिंश्चिन्निमित्ते नामधेयत्वाहायान्विष्यमाणे भूविदारणस्य भूनिखातनिध्यादिप्रकाशनहोद्भिदारणवाचिनो भिदेर्लक्षणया तत्कार्ये प्रकाशने प्रवृत्त्युपपत्तेते च वस्तुनि केन चित्प्रकाशिते ऽनेनेदमुद्भेदितमिति प्रयोगदावुत्पादकस्य च कर्मणः प्रकाशनहेतूत्पत्तिकारणत्वेनोपचारात्प्राकत्वव्यपदेशोपपत्तेर्युक्ता पशुप्रकाशनस्योद्भिच्छब्दप्रवृत्तिनिमित्याशयः। या भाष्यकृतावयवद्वारेण कर्मण्यपि प्रसिद्धिरुक्ता तस्मादनन्तरोक्ताद्धेतुत्रयान्नामधेयत्वावधारणे सति तदन्यथापत्तिलभ्यत्वादप्युपपन्नेति योज्यम्। न च सुराणां वै बलस्त प्रावृतो स्माभिधानमासीत्तस्मिन् गव्यं वस्त्वन्तरासीत् तं देवा क्नुवन् भेत्तुं ते ततो बृहस्पतिमब्रुवन्निमाश्च उत्सृजेति स उद्भिबलं व्यच्यावयत्तं बलभिदाभिनदित्यन्वाख्यानावगतगोयुक्तबिवरापरपर्यायबलच्यावनद्वारस्य तद्भिदारणद्वारस्य वा पशुप्रकास्य निष्प्रमाणकत्वात् मुख्यवृत्त्योद्भिद्बलभिच्छब्दप्रवृत्तिनिमिानुपपत्तेः पशुकामपदावगतपश्वाख्यफलोत्पादनं लक्षणयोद्भिठभिच्छब्दप्रवृत्तिनिमित्तं वाच्यं तस्य च ज्योतिष्टोमादावपि तुवेनातिप्रसङ्गापत्तेर्नोद्भिद्बलाभिच्छब्दप्रवृत्तिनिमित्तत्वं सम्भवाशङ्कते * ज्योतिष्टोमादेरिति * समुदायशक्त्यैव यागविशाचित्वात् नातिप्रसङ्ग इति परिहरति * नेति * सामानारण्येनैवावधारितैतद्वाक्यविहितयागाख्यविषयविशेषस्योद्भिदस्य गवादिशब्दवद्व्युत्पत्तिनिमित्तमात्रत्वेनावयवान्वाख्यानार्थः। सम्बन्धस्याशास्त्रहेतुत्वाद्वैदिकसामानाधिकरण्यरूपप्रमात्रेण समुदायशक्तिकल्पनानुपपत्तेर्न व्युत्पत्तिनिमित्तमात्रता द्भेदनस्य युक्तेत्यपरितोषात्परिहारान्तरमाह * अथ वेति * पङ्कजशब्दस्य विशिष्टविषयप्रयोगान्यथानुपपत्त्या पद्मत्वैकार्थत्रतपङ्कजननविशेषनिमित्तत्वावधारणात् व्यवस्था तथोद्भिच्छाप्येतद्यागगतोद्भेदनविशेषनिमित्तत्वावधारणाद्व्यवस्थेत्यर्थः। ब्दस्य जातिनिमित्तस्यापि व्याकरणे ऽवयवान्वाख्यानात् दृष्टानोपादानम्। ननु यद्यत्र भाष्ये कर्मण्यप्युद्भिच्छब्दस्य प्रसिद्धिः

सामानाधिकरण्याधीननिर्णयोपपादनार्थं विवक्षिता ततो न
यं विधायिष्यतइति किमर्थमुक्तमित्याशङ्क्याह * अविधा
दिति * नैतद्युक्तमित्यादिभाष्योक्तामप्रसिद्धकल्पनाशङ्काम
न्नावयवेन निरस्तां दर्शयितुमेव मुक्तमित्याशयः । यदि तु
तइत्यादिना स्वयमाशङ्कापरिहारमुक्त्वा इदानीमेवैतद्भाष्यमे
वयवव्याख्यानार्थत्वेन व्याख्यायते ततः स्वयमुद्भावितशङ्काप
नभिधानात् भाष्यकृतः शून्यहृदयतापद्येतात एव टुप्टिकाया
ष्यव्याख्यानार्थं क्रियायोगेन प्राप्तत्वादिति द्वयोरपि परिहार
क्तम् । वाक्यभेदशङ्कापरिहारे मुख्यवृत्त्यैतद्भाष्यं योजयितुमा
ङ्क्षेति * यदि हि यागेन पशून्भावयेत्तस्य च यागस्योद्भित
साध्यसाधनसम्बन्धसञ्ज्ञासञ्ज्ञिसम्बन्धरूपौ द्वावर्थौ वि
ततो वाक्यभेदः स्यात् सञ्ज्ञासञ्ज्ञिसम्बन्धस्य त्वननुष्ठेयत
मानाधिकरण्यावयवप्रसिद्धिभ्यामेव च सिद्धेरविधेयत्वान्न
भेदापत्तिरित्यर्थः । नन्वविधेयत्वे नामधेयस्य विध्युद्देशा
न स्यादित्याशङ्क्याह * नन्विति * नामधेयस्वरूपाविधा
द्भित्सञ्ज्ञकेन यागेन पशून् भावयेदिति तदर्थविधानाद्विध्यु
भावोपपत्तिरित्याशयः। ननु विहितविधानासम्भवेनैतद्विधि
यागस्य विध्यन्तरयागेभ्यो भेदावगमाद्धातुत एवानुष्ठेयत्वय
२८७।१ गविशेषसिद्धेरनर्थको नामधेयार्थविधिरित्याशङ्क्याह * तद
त्वादिति * अप्रवृत्तप्रवर्त्तनात्मकविधिविषयत्वान्यथानुपप
लोचनया धातोर्यागविशेषपरत्वावगमे ऽपि को ऽसौ या
इति निर्द्धारणस्य स्वरूपोक्तिमन्तरेणाशक्यत्वाद् द्रव्यदेवत
श्रवणात् नामधेयार्थविधानधीनैव निर्द्धारितविशेषसिद्धिरित
नन्विह सामानाधिकरण्येन विशेषणविशेष्यभावस्येष्टत्वात
भिन्नप्रवृत्तिनिमित्तैकार्थवृत्तित्वलक्षणस्य संज्ञासंज्ञिनोरसम
ल्यविभक्तिकनिर्देशमात्रस्य सामानाधिकरण्यस्य तु गौरश्व इ
विशेषणविशेष्यभावानापादकत्वात्कथं संज्ञया संज्ञिविशेष
त्याशङ्क्याह * इह हीति * सामानाधिकरण्याभावे ऽपीह वि
विशेष्यभावान्न भेदो नान्यथात्वं किं तु विशेषणविशेष्यभाव
भावे लकारः कथमित्यपेक्षायामात्मरूपेत्युक्तम् । अर्थद्वारे वि
विशेष्यभावे भिन्नप्रवृत्तिनिमित्तैकार्थवृत्तित्वलक्षणसामाना
ण्यापेक्षा संज्ञायास्तु स्वरूपेणैव संज्ञान्तरविशेषात्स्वविषयव
कत्वान्नैवं रूपसामानाधिकरण्यापेक्षेत्याशयः । ननु संज्ञयात्म
द्यागाभिधाने विशेषणत्वादात्मापि अभिधीयेतेत्याशङ्क्य * न

णान्तरावगतस्यापि काकनिलयानादिवद्व्यावर्त्तकत्वोपपत्तेर्ना-
भिधानापत्तिरिति परिहरति * प्रत्यक्षेति * कथं तर्हि जाति-
शेषव्यक्त्यभिधाने जात्याभिधानापत्तिरित्याशङ्क्याह * सर्वत्रेति *
दे हि व्यवहारे जातेः प्रत्यक्षेणाग्रहणात् अभिधानापत्तिरिति
र्थः । ननु संज्ञाया विशेषणत्वे स्वानुरक्तबुद्धिजनकत्वलक्षणत्वा-
त्र स्वरूपस्य संज्ञिन्यारोपापत्तिरित्याशङ्क्याह * न चेति *
शविशेषा गोत्वादयो ऽर्थे[1] वस्तुनि न विद्यन्ते ततो गवादिशब्द-
स्वानुरूपबुद्धिजनकत्वेनार्थे ऽध्यासः स्यात्तेषां तु विद्यमानाना-
गवादिशब्दैरुद्धरणमात्रं निष्कर्षमात्रं क्रियते इत्यनन्तधर्मके
स्येकधर्मावधारणो शब्दो ऽभ्युपायमात्रं स्यान्नात्माध्यारोपकार-
त्यत्र प्रत्यक्षसूत्रे ऽभिहितमित्यर्थः । स्वानुरूपबुद्धिजननं विना
शब्देनांशविशेषोद्धरणमित्याशङ्क्य तदनुवेधेनेत्युक्तम् । एतच्छ-
च्यो ऽयमित्यवधारिते यत्तेन शब्देनानुबन्धः, स्ववाच्यस्य शा-
तरवाच्येभ्यो व्यवच्छेदस्तेनेत्यर्थः । एवं तावद्यत्राप्यनन्यपर-
त्रेपुनःश्रवणान्यथानुपपत्त्या विध्यन्तरविहितेभ्यो यागेभ्यः स्व-
यस्य भेदसिद्धिस्तत्रापि निर्द्धारितरूपविशेषप्रतीतिर्नामधेया-
त्युक्तम् । उद्भिदादिवाक्ये तु विधिपुनःश्रवणस्य फलाद्यर्थत्व-
भवेनाभेदकत्वादनुपादेयसम्बन्धसहकृता सन्निधिलक्षणेन च
रणान्तरेण दूरस्थेभ्यो भेदावगमे ऽपि प्रकृताद्व्यवधायकाभावेन
हिताज्ज्योतिष्टोमान्नामधेयं विना भेदासिद्धेर्नामधेया ऽर्थो ऽव-
विधेय इत्याह * नाम्नैवेति * भेदं विना प्रकृतिविकारभावा-
द्विशेषणानर्थक्यापत्तेश्च प्रकृतौ ज्योतिष्टोमे इति भाष्यगतप्रक्र-
ब्दवदयमपि प्रक्रियतइति व्युत्पत्त्या प्रकृतवचनः । यद्वा देव-
शपूर्वकद्रव्यत्यागरूपत्वं निमित्तीकृत्य यजिप्रवृत्तेः पशूद्देदनहे-
च निमित्तीकृत्योद्भिच्छब्दप्रवृत्तेर्भिन्नप्रवृत्तिनिमित्तैकार्थवृत्तित्व-
णसामानाधिकरण्यनिबन्धनैव विशेषणविशेष्यता सम्भवतीत्या-
: अथ वेति * यथारुणैकहायन्यादौ सामानाधिकरण्यनिबन्धना-
षणविशेष्यता तद्वदेवात्रापीत्यर्थः एतच्च यजेत पशुकाम इत्ये-
तासिद्धत्वात्पशूद्देदनहेतुना यागेन पशून् भावयेदिति नामधे-
विध्यानर्थक्यापत्तेः प्रौढिमात्रेणोक्तम्[2] । एवमाकृतेरविधेयत्वा-
त् पूर्वपक्षवार्त्तिकोक्तं नामधेयानर्थक्यं परिहृत्य यदा च लौ-
नापि प्रकारेणेत्यनेनोक्तम् । नामधेयार्थविधौ यज्यानर्थक्यं प-

थर्थे इ० २ पु० पा० ।
णेत्युक्तमिति २ पु० पा० ।

विवृणोति * न चेति * अवयवव्युत्पत्तिपर्यालोचनयोद्भिच्छब्दस्य । न्यायोपादानानुकूलस्वभावविध्यन्तराविहितकर्मव्यावृत्तकर्मविशेषनामत्वावगमे ऽपि यागरूपता कर्मणो यज्यधीनेति दर्शयितुं यागशब्दः । ननैवं सतीतरेतराश्रयत्वं शङ्कनीयं परस्परसन्निधानलभ्यत्वेनान्योन्यनियमस्यैकैकाधीनत्वानभ्युपगमादित्याह * परस्परेति । ननु विधानायोग्यत्वेनैव सामान्यव्यावृत्तिसिद्धेर्न तदर्थं नामधेयसन्निधानापेक्षा इत्याशङ्क्य प्रकृतस्यैव फलाद्यर्थं पुनःश्रुत्युपपत्तेर्न तद्व्यावृत्तिर्नाम्ना विना सिध्यतीति दर्शयितुं प्रकृतौ वेत्युक्तम् । एतदेवोपसंहरति * तस्मादिति * ननूभयाविधाने वाक्यभेदापत्तेर्नामधेयस्यानुवादताङ्गीकार्येत्याशङ्क्याह * विशिष्टेति * वाक्यभेदं विनाप्युभयविध्युपपत्तेर्न तद्भयेनानुवादताभ्युपगन्तव्येत्यर्थः । नामधेयार्थस्य विधेयत्वे नामधेयत्वस्य गुणविधिप्रतियोगित्वे ऽपि विधित्वमात्रप्रतियोगित्वाभावात् तद्भयेन परेषां विध्यादित्रयातिरेकवर्णनमयुक्तमित्याह * एवमिति * यत्त्वित्यादिभाष्येणोद्भिदादिशब्दो नामधेयत्वे ऽन्यप्रवृत्तिविशेषकरत्वादनर्थकः स्यादिति पूर्वपक्षोक्तं नामधेयानर्थक्यमनुभाष्य गुणफलोपबन्धेनार्थवत्त्वमुक्तं तस्योपलक्षणार्थत्वं दर्शयितुमाह * अशेषेति *

संज्ञायाः कर्मभेतृत्वं द्वितीये यद्वदिष्यते ।
यच्चेष्टौ यागषट्कस्य फलवत्त्वं वदिष्यते ॥
नामयागस्य च ज्योतिष्टोमे ऽध्याये चतुर्थके ।
यथाग्निहोत्रधर्माणां प्रवेशः कौण्डपायिने ॥
सप्तमे वक्ष्यते सर्वं तन्नाम्ना फलमिष्यते ।
वाक्यान्तरोत्पादिते च कर्मण्यङ्गं विधीयते ॥
फले वा यत्र तत्रास्मान्नत्तें कर्मविशेषधीः ।
द्रव्यदेवतशून्यायां यागोत्पत्तौ च नामतः ॥
विना निर्द्धारणाभावाद्विशेषस्याविधेयता ।
धर्मप्रमोपयोगित्वमप्यस्येत्थं च सिध्यति ॥
यागेनानेन यक्ष्ये ऽहं तेन याजय मामिति ।
नाम्ना विनैवमादिश्च व्यवहारो न सिध्यति ॥
मीमांसाविधिवाक्यार्थज्ञानानुष्ठानलक्षणे ।
त्रिविधे व्यवहारे ऽस्मिन्सर्वस्मिन्नामकारणम् ॥

ननु विधायकवाक्यनिर्देशेनाप्यर्तिवग्वरणादिषु यागविशेषाख्यानसिद्धेः कथं नाम्नामशेषव्यवहाराङ्गतेत्याशङ्क्याह * न हीति * विधिवाक्यं पठित्वानेन विहितो यो याग इत्याख्याने गौरवापत्तेर्ना-

मधेयादन्यो लघुराख्यानोपायो नास्तीत्यध्याहारेण योज्यम् । भाष्याभिप्रेतमर्थमुक्त्वा स्वरूपतो व्याचष्टे * दर्शपूर्णमासाविति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * एवं जातीयकशब्देन सौत्रोत्पत्तिशब्दसूचितं सामानाधिकरण्यनिर्दिष्टत्वम् अपूर्वशब्दसूचितं च यौगिकत्वं विवक्षितम् ॥ १ ॥

॥ चित्रादिशब्दानां यागनामताधिकरणम् ॥ २ ॥

यस्मिन् गुणोपदेशः प्रधानतोऽभिसम्बन्धः ॥ ३ ॥

इत्युदाहरणमितीतिकरणेन भाष्यकृता गुणविधौ प्रसजद्वाक्यभेदानां वाक्यानामुदाहरणत्वं यस्मिन् गुणविधौ प्रसजद्वाक्यभेदानां वाक्यानामुदाहरणत्वं यस्मिन् गुणोपदेश इति सूत्रावयवसूचितं दर्शितं तदिहापि कर्मसामानाधिकरण्येनैव गुणविधित्वनिरासिद्धेः । कारणान्तरोपन्यासानर्थक्यात् अयुक्तमाशङ्क्य सामानाधिकरण्यहेतुकानिर्णयाविषयत्वं दर्शयितुमाह * इदानीमिति * अयौगिकशब्दव्याख्यानार्थं लोकरूढेष्वित्युक्तं कस्मिन्नर्थे लोके रूढा इत्यपेक्षायां जातीत्युक्तम् । आज्यशब्दो घृतजातौ रूढः पृष्ठशब्दः शरीरावयवजातौ चित्राशब्दो गुणे पवमानशब्दोऽपि पवनक्रियायोगनिमित्तत्वात्सर्वत्र यौगिकैर्द्रव्यमेवाभिधीयतइति न्यायात्पावनक्रियाकर्त्तरि रूढः । अनेन च यदुत्पत्तावपूर्वमिति सूत्रावयवनिर्दिष्टस्य सामानाधिकरण्यानिर्देशानिरूढत्वविशेषणद्वययुक्तस्य पूर्वाधिकरणविषयस्यात्रानिरूढत्वविशेषणाभावेनाभावात् पूर्वाधिकरणप्रत्युदाहरणरूपेण पूर्वस्मिन्प्रत्यवस्थानादनन्तरसङ्गतिरप्युक्ता भवति एतच्च न चैते कर्मणि प्रसिद्धा न च यौगिका इत्यत्र भाष्ये स्पष्टयिष्यते । ननु निरूढार्थत्वेनाज्ञातसन्दिग्धत्वाभावात्सामानाधिकरण्यानिर्णयत्वेऽपि प्रधानभूतकरणत्वानुरोधात्कर्मवाचित्वानुमानं भविष्यतीत्याशङ्क्याह * न हीति * प्रसिद्धिद्वयस्यापि कल्प्यत्वे प्रधानाश्रितयेतरा बाध्यते न तु क्लृप्तायाः प्रधानाश्रितयापि कल्प्यया बाधो युक्त इत्याशयः । आज्याद्युदाहरणान्याक्षिपति * नन्विति * ननु चित्रावाक्यवदनुत्पत्तिवाक्योदाहरणेऽपि न दोष इत्याशङ्क्याह * तथा हीति * उत्पत्तिशब्देनेह कर्मनिर्देशो विवक्षितः । तदभावे च निर्विषययोर्गुणनामधेययोरवधारणासम्भवान्न व्यवहाराङ्गत्वं स्यादिति भावः । अतः सैवोदाहरणाय क्षमा युक्तेत्यर्थः । नातिप्रयत्निनां समाधानमाह * सा त्विति * उदाहरणान्यप्युपपत्तिर्यत्रोदाहृता तत्सूत्रकृता गुणवाक्यस्योदाहरणायाश्रि-

तत्वादित्यर्थः । सूत्रकारस्यापि पर्यनुयोगस्याभ्यैनैतत्समाधानं :
थति * अथेति * तेषामेव परिहारमाह * यथेति * उत्प
वाक्योदाहरणे फलविशेषस्योक्तत्वादेतत्परिहारापरितोषेण परि
हारान्तरमाह * पूर्वपक्षेति * उत्पत्तिवाक्ये पक्षद्वयोपपादकत्वे
ऽपि तत्रैव पूर्वोत्तरपक्षौ विचार्य पक्षद्वयबलाबलनिर्णयार्थं वाक्य
न्तरगतेनापि वाक्यभेदेन पूर्वपक्षनिराकरणोपपत्तेरभाष्यपरित
त्क्रमतेनान्यथा परिहरति * अथ वेति * नामधेयत्वे तात्पर्यक
सिद्ध्यपेक्षामुपपादयति * घृतेति * निरूढार्थत्वात्सामानाधि
करण्यमात्राऽनिर्णायकमित्याशयः । किञ्च न नामधेयं विधायिष्य
तेऽनेन न्यायेन नामधेयार्थविधाने ऽपि सम्भावनाश्रितत्व
स्यानुपपन्नत्वात् अन्यतः सिद्धिरपेक्षणीयेत्याह * यान्याज्या
ति * ननूद्भिदादिवदुत्पत्तिवाक्यगतकर्मसमानाधिकरण्येनैव
कर्मनामत्वसिद्धेर्नान्यतः सिद्ध्यपेक्षेत्याशङ्क्य * यद्यपीत्युक्तम्
समानाधिकरणकर्मनिर्देशस्योत्पत्तिशब्देन विवक्षितत्वात्तस्यापि
सामानाधिकरण्ये प्रवृत्तिनिमित्तं विना कर्मनामत्वानिर्वा
हात् पशुकामादिवच्चेहोत्पत्तिवाक्ये प्रवृत्तिनिमित्तद्योतकशब्दा
भावादन्यतः सिद्ध्यपेक्षेत्यर्थः । सहैव दशभिः पुत्रैः
वहति गर्दभीमितिवत्सहयोगिन्या तृतीयया समभ्यर्थलाभः । ननु
सामानाधिकरण्येनावधारिते नामधेयत्वे कथमनेनाभिधीयतइति !
निमित्तापेक्षायां तद्बलेन कस्य चित्कल्पयितुं शक्यत्वात्तद
वाक्यान्तरोदाहरणे ऽर्थवादस्योदाहार्यत्वापत्तेरपरितोषात्क्रमतेन
द्विपरित्यागायान्यतः सिद्ध्यपेक्षामाह * उत्पत्तीति * उत्पत्ति
वाक्ये सामानाधिकरण्यात्स्तुतिनामधेयतया विधानमवगतमाज्यादि
वाधकत्वादित्यागेन स्तुतिनामत्वनिर्वाहायान्यतः सिद्ध्यपेक्षामित्यर्थः
यद्वोत्पत्तिवाक्यस्यास्य आज्यादिपदस्याविचार्यत्वं पूर्वमुक्तम् । इदा
मुत्पत्तिवाक्यस्यैवाज्यादिपदं विचारयितुमुपायत्वेन गुणवाक्य
स्यैवाज्यादिपदं विचारयितुमुपायत्वेन गुणवाक्यस्याज्यादिपद
चार्यतोच्यतइति विवेकः । गुणविधित्वे ऽन्यतः सिद्ध्यपेक्षामुपपा
दयति * गुणेति * आज्यशब्देन तत्प्रकाशकान्मन्त्राल्लक्षयित्वा ते
स्तोत्रसम्बन्धकारिवाक्यमाज्यप्रकाशकैर्मन्त्रैः स्तोतव्यमित्येवं विधान
क्षणीयमित्यर्थः । नन्वाज्यैः स्तुवतइत्यत्रैवाज्यशब्दलक्षितानां मन्त्रा
णां स्तुतिकरणत्वेन विध्युपपत्तेर्न वाक्यान्तरापेक्षेत्याशङ्क्याह * इ
ति * ननु वाक्यान्तरप्राप्तस्तोत्रसम्बन्धस्यानुवादे ऽपि सत्य
१ लक्षणा तुल्येत्याशङ्क्याह * अनुवादत्वे त्विति * प्रमाणान्तरा

रित्वादनुवादे प्रसज्यमानापि लक्षणा न दोष इत्यर्थः । नन्व-
त्कत्वे ऽपि घृतस्य सन्निधानमात्रेण स्मारकतया स्तुत्यु-
गित्वाद्यथार्थेष्वाग् माहेन्द्रस्तोत्रमुपाकरोतीतिवत्करणत्वोप-
नीज्यशब्देन मन्त्रलक्षणापत्तिरित्याशङ्क्याह * तेनेति *
करणेन विधौ मत्वर्थलक्षणादोषो नानुवादे तेन
णेन स्तोत्राणामाज्यलक्षितमन्त्रवत्तावदाज्यवत्ताप्यन्यत एव
गम्येत्यर्थः । पक्षद्वये प्यन्यसापेक्षत्वमुपसंहरति * तदिति *
ादित्यर्थे तदित्यव्ययम् । आज्यादिशब्दार्थानिर्णयं तद्युत्पत्तिवा-
य कीदृशो ऽर्थ इत्यपेक्षायामाह *ततश्चेति * गुणवाक्योदाहर-
रणमुपसंहरति * इतीति * उत्पत्तिवाक्यस्थस्यैवाज्यादिशब्द-
यतो ऽर्थनिर्णयार्थं गुणवाक्योदाहरणमित्यर्थः । पवमानशब्दो-
रणं पूर्वन्यायसिद्धत्वेनाक्षिपति * पवमानशब्दस्त्विति * यौ-
त्वे ऽपि पवनक्रियाकर्त्तरि निरूढत्वात् स्तोत्रस्य च पवमान-
ाकर्तृत्वासम्भवाच्च पूर्वन्यायेन सिद्धिरिति परिहरति * अ-
त्विति * ननु पवमानशब्दवाच्यसोमप्रकाशकमन्त्रसाध्यत्वात्
ऽपि पवमानशब्दप्रसिद्धेः सन्देहे सत्यस्त्येव पूर्वन्यायविषय-
शङ्क्याह * सोमो हीति * तत्रावयवप्रसिद्ध्यभावाल्लक्षितल-
यात् सा च मत्वर्थलक्षणातो दुर्बलेति सामानाधिकरण्येन नाम-
वासिद्धेर्न पूर्वन्यायसिद्धान्त इत्यर्थः। नन्वेवं सति मत्वर्थलक्ष-
सङ्गनाच्च गुणविधित्वनिरासासिद्धेः । केन हेतुना निरास इ-
ङ्क्य * वाक्यभेदेन वेत्युक्तम् * अनेन गुणविधौ प्रसङ्गाद्वाक्य-
नाभिहोदाहरणत्वं वाक्यभेदपरिहारसम्भवासम्भवाभ्यां च
ह इत्यपि सूचितम् । प्रसिद्धेरिति पूर्वपक्षभाष्यं व्याचष्टे *तत्रे-
* प्रवृत्तिविशेषकरत्वे ऽर्थवत्त्वं हेतुः वाक्यवत्स्वरूपे वार्थवत्त्वे
द्धिर्हेतुः त्रयो ऽपि वा गुणविधित्वे साक्षाद्धेतव इति व्याख्या-
पूर्वशब्देनातिदिष्टं विज्ञातत्वाच्च यागाविधिरिति विशिष्टविधिनि-
ात् गुणे फलकल्पनायामित्यनेन च फले गुणविधिनिरासात्
या चित्राशब्दो गुणविधिशिष्टः स कस्मिन्कर्मणीत्यपेक्षायामाह
त्रेति * ननु दधिमधुपयोघृतन्धाना उदकं तण्डुलास्तत्संसृष्टं
ापत्यमिति प्राकृतप्राजापत्येष्टियागेनाग्नीषोमीये गुणविधिर्मा-
तो ऽभिप्रेत इति कथं ज्ञायतइत्यपेक्षायां चित्रो गुणो विधीयमा-
स्त्रीलिङ्गनिर्देशात्स्त्रीद्रव्यके यागे विधीयेत न चासौ स्त्रीपुंपशु-
के यागे ऽग्नीषोमीये ऽस्ति पशुकामपदोपादानात् । पशुकामक-
विधीयेत सो ऽपि पशुकामः कर्त्ता नाग्नीषोमीये ज्योतिष्टो-

मांसिकाग्निकर्तृके ऽस्तीत्युत्तरपक्षे निरासेन द्योतनादित्युक्तम् । प्रकृतकर्मसंयोगेनाप्रकृते गुणविधिः कस्मादिष्ट इत्याशङ्क्याह * अत्रेति * चित्रत्वस्यानैकपदोपात्तेन स्त्रीत्वेन योगो ऽवगम्यते स्त्रीत्वयोगश्च प्राणिजातावेव सम्भवति तेन कारणेनैते चित्रत्वस्त्रीत्वे प्राणिद्रव्यकस्य यागस्याङ्गमित्यर्थः । स्त्रीत्वयोगनिमित्तं चित्रत्वस्य प्राणियागाङ्गत्वं वक्तुं द्विवचनम् । नन्वप्राणिन्यपि खट्वादौ स्त्रीप्रत्ययदर्शनान्न स्त्रीत्वस्य प्राणित्वाव्यभिचारितेत्याशङ्क्य स्वभावत इत्युक्तम् । खट्वादौ त्वविद्यमानमेव स्त्रीत्वं टाबादिप्रत्ययदर्शनेनानुमीयत इति भावः । ननु प्राणियागाङ्गत्वे ऽपि मेष्यां चित्रमात्रविध्युपपत्तेर्नाग्नीषोमीये चित्रत्वस्त्रीत्वयोर्विधिर्युक्त इत्याशङ्क्य * प्रकृतिमित्युक्तम् * प्राकृतेन कृष्णसारङ्गादिना गुणान्तरेण निराकाङ्क्षत्वान्मेष्यामनारभ्यविधिना चित्रत्वं विधातुं शक्यं प्रकृतौ त्वाकाङ्क्षावशाच्छक्यमित्याशयः । कथमग्नीषोमीयस्य सर्वप्राणियागप्रकृतितेत्याशङ्क्य दैक्षस्य चेतरेष्वित्याद्यमिकन्यायं सूचयितुं यो दीक्षितो यदग्नीषोमीयं पशुमालभेतेति दीक्षायागयुक्तवाक्यविधाननिमित्तो ऽग्नीषोमीये दैक्षशब्दः प्रयुक्तः । श्लोकं व्याचष्टे * स्त्रीत्वादिति * सर्वप्राणियागेषु कस्मान्न विधीयत इत्याशङ्क्य तार्तीयन्यायोपन्यासः । सौत्यस्यैकादशिनीप्रकृतित्वादैकादशिनीनां च पशुगणप्रकृतिनिमित्तत्वात्कथं दैक्षस्य सर्वप्राणियागप्रकृतितेत्याशङ्कानिरासार्थः परमशब्दः । नन्वग्नीषोमीयक्रमाम्नातेन कृष्णसारङ्गादिना गुणेन उत्पत्तिवाक्यशिष्टेन पुंस्त्वेन च बाधापत्तेर्नाग्नीषोमीये चित्रत्वस्त्रीत्वयोर्विधिर्युक्त इत्याशङ्क्याह * तत्रेति * कृष्णसारङ्गादेरुत्पत्तिवाक्यशिष्टत्वाभावादुत्पत्तिवाक्यशिष्टं पुंस्त्वं क्रमाम्नातं कृष्णसारङ्गादिगुणान्तरं चेति व्यवहितान्वयः कृष्णसारङ्गो ऽग्नीषोमीय इति सामानाधिकरण्यनिर्देशाभिप्रायो वोत्पत्तिशब्दः । फले विद्याबुद्धिदेव सोमस्य बाधो यागे तु विधौ विकल्प इति पूर्ववच्छब्दार्थः । नन्वनारभ्याधीतत्वाच्चित्रत्वस्त्रीत्वयोरेव प्रकरणाविशेषात्तु विकृतौ विरोधः स्यादिति तार्तीयिकन्यायेन बाधः स्यादित्याशङ्क्याह * साप्तदशेति * सामिधेनीमात्रसंयोगेन श्रुतस्य साप्तदश्यस्याऽक्लृप्तक्रतुसंयोगत्वात् पाञ्चदश्येन प्रकरणक्लृप्तक्रतुसंयोगेन बाधो युक्तः चित्रत्वस्त्रीत्वयोस्तु क्रतुसंयोगेनैव श्रवणात्तद्विशेषाग्नीषोमीये सम्बन्धो यथा कृष्णसारङ्गादेः पशुसंयोगश्रुतस्य क्रमात्तथानयोः सामर्थ्यानुगृहीतात् प्रकृतावेति स्यायादिति तुल्यत्वात् साप्तदश्यपूर्वपक्षे यथोभयोः सामिधेनीसंयोगाविशेषाद्विकल्पः तथात्रापीत्याशयः । नन्वग्नीषो-

ीये चित्रत्ववत् स्त्रीत्वस्याप्यप्राप्तेरनेकार्थविधानाद्वाक्यभेदः स्यादि-
ाशङ्क्याह * एकेति * परस्परासम्बद्धानेकार्थविधौ वाक्यभेद-
ापरिहार्यत्वात् विशेषणविशेष्यभावसिद्ध्यर्थम् एकपदोपादानमुक्त-
[। ननु चित्रत्वस्त्रीत्वयोर्द्रव्याश्रितत्वेनान्योन्यविशेषणविशेष्य-
ायोगान्नैकपदोपादाने ऽपि न तत्प्रतीतिः सम्भवति इत्याशङ्क्यैक-
ारकेत्युक्तम् । चित्रत्वस्त्रीत्वविशिष्टमेकं तृतीयोपात्तं कारकं वि-
ीयतइति भावः । ननु चित्रत्वस्त्रीत्वयोरेकपदोपात्तत्वाद्वाक्यभे-
ानापादकत्वे ऽपि पशुकामपदोपात्तफलसम्बन्धविधानाच्चित्राप-
ोपात्तगुणसम्बन्धविधानाच्च वाक्यभेदः स्यादित्याशङ्क्याह * पशु-
ामेति * स्वतन्त्रकर्मविधौ कामिपदस्य फलपरत्वाभावे नैष्फल्या-
धानानर्थक्यापत्तेः । फलपरत्वे ऽपि फलवज्ज्योतिष्टोमाङ्गभूते
ग्नीषोमीये गुणविधौ साक्षात्फलाभावे ऽपि ज्योतिष्टोमफलेन प-
म्परया फलवत्त्वोपपत्तेरयं पशुकामशब्दो न पशुयागफलं प्रतिपा-
यतीति शेषः । ननु अफलस्य काम्यत्वायोगात्कामशब्दोपबन्धे
साधकं तु तादर्थ्यादिति स्वर्गकामाधिकरणसिद्धान्तन्यायेन
लपरो ऽयमित्याशङ्क्यानुवाद इत्युक्तम् । पशोरिहाफलत्वेन मु-
वृत्त्या भविष्यतीति भावः । कथं प्राप्तिरित्याशङ्क्यार्जनाङ्गत्वा-
त्युक्तम् । अनर्जितानुपात्तेन पशुना यष्टुमशक्यत्वादकाम्यस्य
पादानायोगादुपादानाङ्गत्वेन प्राप्ता कामनानूद्यतइत्यर्थः । ननु
ुकामशब्दात्पशोः साधनत्वाप्रतीतेः कथं तदुपादानाङ्गत्वेन काम-
प्राप्नुयादित्याशङ्क्य स्वर्गेत्युक्तं स्वर्गकामादिबहुव्रीह्यर्थस्य पुरुषस्य
वनाक्षेपलभ्यत्वात् एकादशाद्यभाष्योक्तन्यायेन स्वर्गकामादिश-
स्य लोहितोष्णीषादिवत् विशेषणपरत्वावगतेस्तदुपात्तस्य स्वर्गो-
ागं प्रति गुणत्वेनान्वयः प्राधान्येन वेति सन्दिह्य द्रव्याणां कर्म-
योगे गुणत्वेनाभिसम्बन्ध इति षष्ठाद्यस्वर्गकामाधिकरणपूर्वपक्ष-
त्रे भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यतइति न्यायात् भूतस्य
र्गपश्वादेर्द्रव्यस्य भव्यं कर्म प्रति गुणत्वेनान्वयस्य वक्ष्यमाणत्वात्
ुकामशब्दात्पशोः साधनत्वावगतिसिद्धिरित्यर्थः । नन्वेवमपि
ुकामपदोपात्तसाधनभूतपशुविधानाच्चित्रापदार्थविधानाच्च वा-
भेदः स्यादित्याशङ्कां निरस्यन्नर्जनाङ्गत्वेन कामनाप्राप्तिं विवृणोति
न हीति * पशुसाधनताग्नीषोमीयस्योत्पत्तिवाक्यादेवावगतेति
ता पशुयागशब्देनाशङ्का निरस्ता । चित्रया यजेतेति गुणविधौ
शिष्टविधिनिमित्तगौरवशङ्कानिरासार्थं भाष्यं मध्यप्रतीकेनावता-
पपादयति * यागेति * श्लोकं व्याचष्टे * यावदिति * नन्वेवं २

सति न क्व चिद्विशिष्टविधिः स्यादित्याशङ्क्याह * आगत्ये
ति * एवं तर्ह्यत्रापि प्रकृते प्राजापत्ययागे तत्र साधनेषु द्रव्या
श्रितत्वापाद्यनाशकेः स्त्रीत्वयोगाभावाच्च श्रितत्वस्य विधातु
मशक्यत्वादग्नीषोमीयस्य च दूरस्थत्वादगत्यैव विशिष्टविधिर्भविष्य
त्याशङ्क्याह * अस्ति चेति * दूरस्थोऽपि स्त्रीत्वेनोपस्थापितो
वदितुं शक्यते इत्याशयः । फले गुणविधिनिरासार्थं गुणे फल
कल्पनायामिति भाष्यमाक्षिपति * गुणेति * नातिप्रयोजनं स
धानमाह * सिद्धान्तेति * प्राधान्यप्रतिपक्षं तु गुणशब्दं मत्वा स
समाधानमाह * अपरे त्विति * अत्र ह्यस्य गुणशब्दस्य प्राधान्यप्र
पक्षत्वाभावादेतद् दूषयति * तदयुक्तमिति * गुणविधित्वस्य
प्राधान्यप्रतिपक्षत्वाभावे भाष्यकृतः संमतिमाह * तथा चेति *
अनेन भाष्येण गुणविधेः प्राधान्यप्रतिपक्षत्वाभावो द्योत्यत इत्या
शङ्क्याह * फलेति * चित्रादिपदं वा फलपदेन सम्बध्यत
इत्यातपदं वेति विचारे दर्शिते। ननु चित्रादिपदस्य फलपदसम्बन्धे
ऽर्थस्य फलसाधनत्वलक्षणात् प्राधान्यात्तस्य च निर्योपात्स्य
साधनत्वायोगाद्यागं कुर्वता चित्रादिना फलं भावयेदिति वैय्यधि
करण्येन यज्यन्वयापत्तेः सामानाधिकरण्यानिमित्तनामधेयत्वास
म्बादेकान्तेन गुणविधित्वापत्तेर्गुणविधिनिरासेनैव फलपदस
म्बन्धनिरासेनैव पदसम्बन्धस्य निरस्तत्वात्पूर्वपक्षासम्भवेनायं विच
न युक्त इत्याशङ्कां निराकुर्वता ख्येन पत्ते सिद्धान्ते भाष्येण गु
धेः फलसम्बन्धे सत्यैकान्तिकत्वसूचनादत्र प्रधानप्रतिपक्षता द्यो
सूचितेत्याशयः । स्वयं समाधत्ते * तेनेति * विशिष्टविधावपि
एव गुणविधेस्तुल्यत्वं मत्वा अथ इत्युक्तम् । एकैकस्येति क
ष्ठी तुच्छत्वद्योतनार्थं चास्य पक्षस्य निरासो वादिद्वयसम्मतो
पूर्वपक्षावसरएव कृत इत्याह * तत्रेति * धातुपारार्थ्यप्रसङ्गादि
नेन यजतेर्विवक्षेति भाष्यावयवो धात्वर्थस्यानुपयोगित्वेन ध
धात्वन्तरसमानार्थत्वाभिप्रायो व्याख्यातः । एवं चेत्कथं पूर्व
ऽवतिष्ठत इत्याह * अतश्चेति * ननु विधानवदनुवादेऽपि द्र
स्य करणत्वाविनाभावेन करणतया निर्दिष्टस्य गुणस्य विधायकता स
नेति मत्वर्थलक्षणां विना तदन्वयायोगाद्यसत्यपि पूर्वपक्षो दु
इत्याशङ्क्याह * करणेति * कुठारादिषु करणत्वस्याध्यमन
कर्तृव्यापारव्याप्यत्वापेक्षादर्शनात्करणत्वेनाधीक्षस्य साध्यांशा
नुवादेन गुणविधौ न मत्वर्थलक्षणेत्यर्थः । ननूत्पत्तिवाक्यपरि
णीतवाक्यानां परस्परान्वयाभावान्न गुणविधौ प्रयोगवाक्यात्

करणत्वाक्षिप्तस्य साध्यांशानुवादो युक्त इत्याशङ्क्योत्पत्तिवाक्ये
पे विधिबलात् करणत्वावगमो ऽस्तीति सूचयितुम् * उत्पक्षेत्यु-
म् * पूर्वोत्तरपूर्वपक्षभाष्यसन्देशेनास्यापि पूर्वपक्षभाष्यत्वाव-
ः साधारणत्वायोगात् पूर्वपक्षभाष्यमेवैतदिति स्वमतमाह *गु-
ति * भाष्योक्तस्य धातुपारार्थ्यस्य परपदसम्बन्धाविधानव्यव-
तकल्पनौत्पत्तिकगुणबाधोपलक्षणार्थत्वं सूचयितुम् * पूर्वाधि-
रणेत्युक्तम् * आज्याद्युदाहरणेषु पूर्वपक्षाभिधानार्थं तथेति
ष्यमश्रुतं भवत्यध्याहारादयुक्तमाशङ्क्याह * तथेति * अस्ति-
न्तीति परः प्रथमपुरुषे ऽप्रयुज्यमानो ऽप्यस्तीति स्मृत्यास्तिधातुर्भव-
शब्दवाच्यवर्त्तमानार्थलड्विभक्तिपरः प्रथमपुरुषे समानाधिकर-
मदस्मद्व्यतिरिक्तोपपदे सत्यप्रयुज्यमानो ऽप्यस्तीत्यनुशासनात्
स्तिभवत्योश्चैकार्थत्वाद्भवत्यध्याहारेण सत्तायाः स्तोत्रसमीपे क-
नं रचनं पूर्वपक्षिणो ऽभिमतमिति शेषः । नन्वेवमपि विधाय-
श्रवणाद् गुणविधित्वं न युक्तमित्याशङ्क्याह * प्रयोगेति * ननु
त्ययान्तस्य पञ्चदशादिशब्दस्य स्तोत्रीयसंख्यावाचित्वात्तत्समा-
धिकरणयोराज्यपृष्ठशब्दयोर्घृतशरीराङ्गवाचिता न युक्तेत्याशङ्कते
ननु चेति * कस्मान्नायं संख्यामात्रवाचीत्याशङ्क्य स्मृतिं प-
ते * स्तोम इति * कथमनया स्मृत्या संख्यामात्रवाचित्वं वा-
इत्याशङ्क्याह * न हीति * स्तुतेर्मानं स्तोम इति स्मृतेः स्तोत्री-
संख्यावाचित्वावधारणादित्याशयः । स्तुतेः साधनद्वारेण सं-
त्मकमानपरिच्छेद्यत्वात् स्तुतिसाधनपरिच्छेदिकायाः स्तुतिमा-
वेन स्तोमत्वादृचामिव घृतादेरपि रथघोषवदुपस्थापकतया स्तु-
साधनत्वोपपत्तेः उप्रत्ययाविरोध इति परिहरति * नैष दोष २९
े * स्तोत्रसाधनानामृचामेव परिच्छेदिका संख्या स्तोमशब्दवा-
ा न साधनान्तरपरिच्छेदिका इति शङ्कानिवृत्त्यर्थो मात्रशब्दः ।
ेवं सति स्तोमशब्दवाच्यस्तोत्रसाधनसंख्यापरिच्छेद्यत्वार्थं घृता-
नां स्तोत्रसाधनत्वं वक्तुम् आज्यवन्ति पृष्ठवन्ति बहिष्पवमानवन्ति
त्राणीति वक्तव्यं तथा च[2] मत्वर्थलक्षणाप्रसङ्गान्न लक्षणेत्ययुक्त-
त्याशङ्क्याह * न चात्रेति * एतदेव प्रश्नपूर्वकमुपपादयति
कुत इति * विवक्षितार्थापेक्षया न्यूनत्वाभ्युपगमे लक्षणावाक्य-
े आधिक्याभ्युपगमे त्वादिशब्दोक्तमानर्थक्यम् । अथ वा[3] न्यूनस्या-

१ उत्पत्तौत्युक्तमिति २ पु० पा० अयमेव मुद्रिततन्त्रवार्तिके दृश्यते ।

२ वक्तव्यं तथा चेति २ पु० पा० ।

३ यद्वेति २ पु० पा० ।

धिकार्थविषयत्वकल्पने लक्षणावाक्यभेदौ गौणत्वाध्याहारौ इत्यर्थः । न्यूनत्वे लक्षणावाक्यभेदौ आधिक्ये त्वानर्थक्यं अन्य त्वकल्पने विपरिणामव्यवहितकल्पना व्यवधारणकल्पनादोष वा योज्यम् । अनुमिते तु विवक्षितार्थाभिधानशक्तस्यैवानुमा कश्चिद्दोष इति भावः । द्रव्यसंख्यारूपानेकार्थविधिलक्षणावाक दपरिहारो ऽपि लक्षणापरिहारन्यायेनैवोक्त इति सूचयितुं वा भेदोपादानम् । ननु इहाज्याज्यैः स्तुवतइत्यादिषु श्रुतिष्वेवोत्पत्ति क्येषु मत्वर्थलक्षणा प्रसज्येतेत्याशङ्क्याह * इह तावदिति * मत्वर्थलक्षणापत्तेः श्रुतवाक्यगतेन विधिना सहाज्यादीनां संब भावात् स्तोत्रप्रकरणे यत्पञ्चदशानीत्यादिगुणवाक्याम्नानं त मिते च पञ्चदशसंख्याविशिष्टैराज्यैः स्तोत्रस्योपकर्त्तव्यमित्यादि क्येन कृतो यः स्तोत्राज्यादिसम्बन्धस्तत्पूर्वकप्रयोगवचनेन विधि त्यर्थः । नन्वाज्यादीनामक्रियात्मकत्वेन प्रकरणग्रहणायोगान्न तत न वाक्यानुमानं युक्तमित्याशङ्कते *तत्रेति* भवत्युपात्ताज्यादि त्ता प्रकरणग्राह्या भविष्यतीति परिहरति * सत्त्वेति * ननु वाच्यत्वमात्रेण सत्तायाः क्रियात्वे ऽपि चेतनक्रियात्वाभावेना ष्ठेयत्वान्न प्रकरणग्राह्या भविष्यतीत्याशङ्क्याह * प्रधानेति * स याः स्वरूपेणाननुष्ठेयत्वे ऽपि अङ्गत्वेन स्तोत्रसामीप्यावगमात्तस सन्निधिस्थापनासाध्यत्वात्तेन रूपेणानुष्ठेयत्वं भविष्यतीत्याशयः सर्पिर्द्रव्यत्वादाज्यानां स्वरूपेण संख्यायोगाभावे ऽपि पञ्चद ज्यपात्राणि समीपे निधाय स्तोतव्यं पूर्वपक्षे कर्त्तव्यं सप्तदश ङ्मुखप्राणिस्थापनेन सप्तदश पृष्ठानि समीपे निधाय स्तोतव्यं छन्दोवाच्यं च त्रिपुटा त्रिभिधापरपर्यायलताद्रव्यम् पवनाहे कृत्वा वस्त्रादौ पवमानं सदसो बर्हिः समीपे निधाय स्तोतव्यं तत्वाक्यार्थानुष्ठानं सन्निधिस्थापनमात्रेणाप्यग्निवदुपकारकत्वो तेः साधकतमत्वविवक्षया उत्पत्तिवाक्येषु अनुवादार्थतृतीयया देशोपपत्तिरिति दर्शयितुमाह * अतश्चेति * नन्वेवं सत्युत्पत्ति क्येष्वाज्याद्यनुवादो ऽनर्थकः स्यादित्याशङ्क्य प्रशस्तमिदं स्तोत्रं त्क्रियमाणमाज्यादिसन्निधियुक्तं भवतीत्येवं स्तोत्रप्रशंसार्थत्वेः वादसाफल्यं सूचयितुमाहेतीति भाष्यकृता गुणोपदेश इत गुणोपदेशयुक्तविषयनिर्देशेनैव वाक्यभेदप्रसङ्गस्य गुणवि रासहेतोः सूचितत्वात्प्रधानतो ऽभिसम्बन्ध इति सूत्रा वो नामधेयत्वप्रतिज्ञार्थतया व्याख्यातः । तत्र नामधेयत्वप्रति

१ बर्हिरिति २ पु० पा० ।

ः पूर्वसूत्रोक्ताया एवानुषङ्गसम्भवात् प्रधानशब्दस्य च कर्मपर-
लक्षणादोषापत्तेः कर्मसम्बन्धस्य च गुणविधावप्युपपत्तेर्नामधे-
यात् सहार्थेन च तसिप्रयोगादर्शनेनासाधुत्वापत्तेरपरितोषात्स्व-
वाक्यभेदोपपादनार्थतया अवतारणपूर्वकं व्याचष्टे *प्रधानत इति
अनेन च प्रधानद्वारानेकेषां गुणानामनेकविशेषणविधिप्रस-
समर्थैनैकेन विधिना सम्बन्धो भवति न चात्र प्रधानभूतं क-
त्वतूपक्षे विधीयतइत्येवं व्याख्यातं विषयानिर्देशकगुणोपदेश-
ब्दसूचितं गुणविधिनिरासहेतुवाक्यभेदप्रसङ्गव्याख्यानार्थं गुण-
धौ हीति भाष्यमाग्नेयो ऽष्टाकपाल इत्यादौ गुणविधावपि वाक्य-
ाभावादयुक्तमाशङ्क्य कर्मानुवादविषयत्वेन व्याचष्टे * अत्र पु-
रेति * पुंपशाविति भाष्येणोत्पत्तिशिष्टपुंस्त्वावरुद्धे ऽग्नीषोमीये
त्वं विधातुमशक्यमिति अभिधानपूर्वकं चित्रत्वस्त्रीत्वगुणपशुफ-
रूपानेकार्थविधानाद्वाक्यभेदो विवृतः । तत्रोत्पत्तिशिष्टगुणावरुद्धे
द्विरोधित्वगुणान्तराविध्यसम्भवो वैश्वदेवाधिकरणे व्युत्पादयि-
माणो ऽत्र हेत्वन्तरसमुच्चयार्थमुक्तो वाक्यभेदप्रसङ्ग एव त्वत्र
ोपदेशशब्दोक्तः प्रधानहेतुरित्यभ्यर्हितं पूर्वं निपततीतिन्यायेन सू-
ार्थं प्रथमं वाक्यभेदमुपपादयितुं चित्रत्वस्त्रीत्वविशिष्टैककारक-
धानादवाक्यभेदाभिप्रायं पूर्वोपन्यस्तं निरस्यति * न चेति *
र्वत्कारकस्य द्रव्यस्यापि चोत्पत्तिवाक्यादेव प्राप्तत्वाच्चित्रत्व-
त्वमात्रमत्र विधेयं तयोश्च परस्परविशेषणविशेष्यत्वाभावेनैक-
शिष्टेतरविध्ययोगादपरिहार्यो वाक्यभेद इत्याशयः । भुक्तसम्मत्यैत-
ा द्रढयति * आह चेति * ननु चित्रया कुर्यादिति सकृदु-
ारितस्य प्रत्ययस्यानेकार्थप्रतिपादकेनाप्येकेन चित्रापदेनान्वयोप-
त्ते प्रत्ययोच्चारणावृत्त्यापत्तिरित्याशङ्क्याह * एकेति * अथापि
त्रतन्त्रत्वं तथापि तदनेकतेति ग्रहाधिकरणवार्त्तिकोक्तन्यायेन स-
ृदुच्चारितस्यापि प्रत्ययस्यैकपदोपात्तानेकार्थविधिशक्तत्वे ऽप्येकेनैव
ापारेणानेकविध्यशक्तेर्व्यापारभेदकल्पनावश्यम्भाविनीत्यर्थः । श-
ाशब्देन व्यापारो विवक्षितः पुंपशाविति भाष्यावयवोक्तोत्पत्ति-
ष्टगुणावरुद्धे कर्मणि तद्विरुद्धगुणान्तरविध्यसम्भवं हेत्वन्तरस-
च्चयार्थत्वेनेदानीं व्याचष्टे * उत्पत्तीति * विधातुमिति शेषः
ुत्पत्तिशिष्टैकहायन्यवरुद्धे ऽपि क्रये हिरण्यादीनां विधिदर्शनात्
थमशक्यतेत्याशङ्क्य * तद्विरोधीत्युक्तम् * विक्रेत्रानतिजन- २९
ैकहायन्याः क्रयसाधनत्वादानत्यतिरेकार्थं द्रव्यान्तरसमुच्चयो-

१ एवेति २ पु० ना० ।

पपत्तेरविरोध इत्याशयः । ननु विरोधे ऽप्युत्पत्तिशिष्टगुणबाधे
विकल्पेन वा गुणान्तरनिवेशो भविष्यतीत्यत आह * यत्रेति
विशिष्टविधौ शुद्धस्याविहितत्वेनाप्राप्तेरनुवादायोगाद्विशिष्टमेव
मानुवादितव्यं तस्य च समुच्चये प्यानतिवदतिरेकाभावादेकेनैव
शेनाकाङ्क्षानिवृत्तेर्न गुणान्तरसम्बधोपपत्तिरित्यर्थः । यत्तु विशेषण
विशेष्यविधिपूर्वकत्वाद्विशिष्टविधेर्विशेषणवद्विशेष्यस्वरूपस्याप्यर्थ
पत्तिप्रसूतेन विधिना विहितत्वेन प्राप्तिसम्भवाद्विशिष्टविहितस्या
कर्मणः स्वरूपमात्रं निष्कृष्य गुणान्तरविधानमुद्भिदधिकरणपूर्वप
ऽभिहितं तन्निरस्यति * न चेति * एतदेव प्रश्नपूर्वकमुपपादया
* कुत इति * शुद्धस्य कर्मणो ऽननुष्ठेयत्वेन विधातुमशक्यत्व
च्छ्रुतेष्वपि गुणविधिषु स्वातन्त्र्येण गुणविधानस्याघाराग्निहोत्र
धिकरणे वार्त्तिककृता निराकरिष्यमाणत्वेनार्थापत्तिप्रसूतेषु स्वात
न्त्र्यस्य दूरनिरस्तत्वात्तद्दृष्टान्तत्वेन विशेष्यस्वरूपस्य स्वातन्त्र्य
विधानाशङ्कानुपपत्तेरार्थैरपि विधिभिर्विशिष्टावयवत्वेनैव विशे
णविशेष्यांशानां विधानाच्छुद्धस्य कर्मणो प्राप्तेर्न निष्कृष्यानुवा
युक्तः । एवं सत्यपि यदि स्ववाक्यस्थगुणसम्बन्धवेलायामेव व
क्यान्तरगतानामपि गुणानां क्रियासम्बन्धः स्यात्ततो विशेषाग्रहण
त् सर्वेषां तुल्यबलत्वं स्यात्तेषां तु पूर्वपश्चाद्भावात्स्ववाक्यस्थगुण
निराकाङ्क्षायां क्रियायां वाक्यान्तरगतगुणविधानानुपपत्तिरित्याश
यः । नन्वुत्पत्त्युत्पन्नशिष्टयोः क्रियासम्बन्धपूर्वपश्चाद्भावनिमित्ते
लाबलविशेषे सत्युत्पन्नशिष्टानामपि व्रीह्यादीनां भिन्नवाक्यगतत्वे
युगपत् क्रियासम्बन्धायोगात्पौर्वापर्यनिमित्तं बलाबलं स्यादित्य
शङ्क्याह * यानीति * उत्पत्तिवाक्यापेक्षत्वेनोत्पन्नवाक्यानां तत
दौर्बल्यं न पौर्वापर्यमात्रकृतमित्याशयः । चित्रत्वविधौ स्त्रीत्वविध्य
सम्भवं वाक्यभेदप्रसङ्गेनोत्पत्तिशिष्टपुंस्त्वविरोधाच्च पुंपशावि
भाष्यावयवोक्तमुपपाद्य पशवः फलमिति भाष्यावयवोक्तं वाक्यभे
दापत्तेरेव फलविध्यसम्भवमुपपादयति * पशुकामेति * न
फलस्याविधेयत्वात्कथं वाक्यभेदो ऽत आह*यद्यपि चेति * न के
वलमनेकार्थविधिलक्षणो वाक्यभेदः किं तु वैरूप्यमपीत्याह * अ
चेति* ननु स्त्रीपशुद्रव्यके मेषीयागे चित्रत्वमात्रविधानादुपादान
त्वप्राप्तपशुकामानुवादाच्च गुणविधावपि न वाक्यभेद इत्याश
ङ्कानिरासार्थं चित्रो गुणो विधीयमानो वाक्यभेदपरिहाराय
यत्र यागे द्रव्यं तत्र विधीयते तत्र च स्त्रीद्रव्यके ऽपि मेषीया
प्राकृतकृष्णसारङ्गादिगुणनिराकाङ्क्षे ऽनारभ्याधीतस्य चित्रत्वस

ातुमशक्यत्वादग्नीषोमीयसर्वपशुयागपरमप्रकृतिभूते गुणाका-
ृष्णसारङ्गादिगुणान्तरेण सह पूर्वोपपादिततुल्यकल्पत्वाद्विक-
मानो विधीयते । न चासौ स्त्रीपुंपशुद्रव्यके ऽग्नीषोमीये ऽस्तीति
वाविधानापत्तेरपरिहार्यो वाक्यभेदः पशुकामश्च यत्र कर्त्ता
विधीयेत तत्र च षष्ठाद्यसिद्धान्तन्यायेन पशुकामशब्दस्य फलप-
तावधारितस्योपादानाङ्गत्वप्राप्तपशुकामानुवादकत्वायोगात् फ-
न पशून् कामयमानः पशुकामशब्देन वाच्यः । सो ऽपि प-
ामा नाग्नीषोमीये ऽस्तीति तन्निमित्तो ऽपि वाक्यभेदो ऽपरिहा
ते भाष्यकृतोक्तम् । तत्र मेषीयागाङ्गत्वाशङ्कानिरासस्य स्पष्टत्वा-
याज्र्जनाङ्गत्वप्राप्तानुवादाशङ्कानिरासं व्याचष्टे * न चेति *
व प्रश्नपूर्वकमुपपादयति * कथमिति * नन्विच्छां विना कर-
कर्त्तव्यत्वयोः कथं प्रवृत्तिरित्याशङ्क्याह * तत्साधनेति *
येनार्थनमिच्छा कामना नेच्छामात्रं पुरुषार्थसाधने तदङ्गे चेदं
वेदिति एवं प्राधान्येनानर्थे विनापि प्रार्थितसिद्ध्येच्छया प्र-
रेत्यर्थः । एतदेव व्याचष्टे * न हीति * ननु करणोपकारा-
ुरुषार्थे ऽपि काम्यत्वव्यपदेशो ऽस्तीत्याशङ्क्याह * गौणी वे-
यथाकाम्यसिद्ध्यर्थं प्रवर्त्तते तथा करणोपकारसिद्धये ऽपीति
र्यात्काम्यत्वोपचारस्तत्रेत्यर्थः । नन्वेवं सति काम्यमान-
ार्थत्वेन गुणवृत्त्या वा साधनस्यापि काम्यत्वोपपत्तेर्न कामश-
न्धात् फलत्वावगतिः सम्भवतीत्याशङ्क्याह * अत इति *
पेक्षस्य गौणस्य वा काम्यत्वस्य प्रमाणान्तरानुसारेण कल्प्य-
दे च तदभावान्नात्र तत्कल्पना युक्तेत्याशयः । तदेव कामशब्दो-
ात्प्रतीमः । तच्च फलमिति योज्यं यदि च कामशब्दोपसम्बन्धा-
पश्वादेः फलत्वं न प्रतीयते ततो निष्फलस्य कर्मणो न कश्चि-
को ऽनुष्ठाता स्यात् फलार्थत्वात्कर्मणि प्रवृत्तेरिति युक्त्यन्तरं
ाक्यमित्याशयेन स्वर्गकामाधिकरणसिद्धान्तसूत्रं पठति * वि-
चैतदिति * कामशब्दोपसम्बन्धस्य फलत्वाप्रतिपादकत्वे क-
साधकशून्यं स्यात् फलार्थत्वात् प्रवृत्तेरिति सूत्रार्थः । नन्वेक-
ा ऽन्ये क्रतवः कामायाह्रियन्ते सर्वेभ्यो ज्योतिष्टोम इति ज्यो-
मद्वारा सार्वकाम्यप्राप्तपशुफलत्वानुवादस्तर्हि भविष्यतीत्या-
ाह * फलं चेति * औपचारिकानुवादस्यानर्थक्यापत्तेरस-
विशेषणत्वं तु वाक्यभेदापत्त्यैव सार्वकाम्यप्राप्तज्योतिष्टोमवि-
त्वे वाक्यभेद इत्युद्भिदाधिकरणवार्त्तिकोक्तन्यायानिरस्तमित्या-
। प्राजापत्येष्टिप्रकरणबाधापत्तेरप्यग्नीषोमीये गुणविधिर्न युक्त

इत्याह * प्रकरणं चेति * ननु चित्राशब्दस्य गुणे निरूढत्वेनो
दादिशब्दवत्कर्मण्यवयवद्वारेण प्रसिद्ध्यभावात्संज्ञासंज्ञिसम्बन्ध
वादानुपपत्तेर्नामधेयत्वपक्षे ऽपि प्राजापत्येष्टेः फलं पशवः सा च
न्नासंशकेतिकर्मफलसम्बन्धसंज्ञासंज्ञिसम्बन्धरूपानेकार्थविधानाः
क्यभेदः स्यादित्याशङ्क्याह * नामधेयत्वे त्विति *
ध्यादिचित्रद्रव्यकत्वात् स्त्रीप्रत्ययान्तेनेष्टिशब्दवाच्यत्वाच्च क
णि स्त्रीलिङ्गचित्राशब्दप्रसिद्धेरनुवादोपपत्तिरिति भावः । आज
ष्वुदाहरणेषु द्रव्यसंख्यासम्बन्धस्तोत्रद्रव्यसम्बन्धरूपानेकार्थवि
लक्षणवाक्यभेदाभिधानार्थं तथेति भाष्यं तात्पर्यतो व्याचष्टे
पञ्चदशानीति * द्रव्यानुवादाभावे ऽपि भाष्योक्तं यदि कश्चित
ख्यानुवादेन द्रव्यविधानमाशङ्केत तन्निरासार्थं द्रव्यसंख्ययोरि
क्तम् । ननु स्तोत्रेष्वप्राप्तावपि कर्मान्तरे ऽप्युपसदादिषु आज्य
३।१ प्राप्तेस्तदनुवादेन संख्याविधिर्भविष्यतीत्याशङ्क्याह * कर्मान्तर
चेति * स्तोत्रप्रकरणे कर्मान्तरस्याबुद्धिस्थत्वादित्याशयः । न च
व्यस्वरूपानुवादेन संख्याविधिर्युक्तः । तथा सति द्रव्याङ्गत्वापत्तेर
र्माङ्गत्वप्रसङ्गेनानर्थक्यापातादित्याह * तदनुवादेन चेति * दो
न्तरमाह * प्रकरणेति * एवं तर्हि संख्याविशिष्टं द्रव्यमेव प्रकर
न स्तोत्राङ्गत्वासिद्ध्यर्थं विधीयतामत आह * न चेति * अ
चाथ कस्मान्न पञ्चदशसंख्याविशिष्टान्याज्यानीत्यादिभाष्ये द्वा
तावर्थौ एकस्य वाक्यस्याशक्यावित्यस्यानन्तरं द्रष्टव्यमित्यपद्ध
व्याख्येयत्वस्य वक्ष्यमाणत्वात्कथं व्याख्येयमित्यपेक्षायामिति क
ख्यातं द्रव्यसंख्ययोः प्रधानभूतैकक्रियावशीकारं विशेषणवि
ष्यत्वाप्रतीतेः संख्याविशिष्टद्रव्यविध्यसम्भवहेतोः भाष्यव्याख
येव विचारिष्यमाणत्वात् भाष्यसूचितानि हेत्वन्तराणि वक्तुं
ख्याविशिष्टद्रव्यविधौ द्रव्यविशेषणत्वेन संख्यायाः कर्माङ्गत्व
भावादनुपादाने ऽपि कर्मवैगुण्याभावेनानादरं तत्रैवान्वयस
ङ्गभूतमर्थस्य गुणभूतत्वादिति चतुर्थाधिकरणपूर्वपक्षसूत्रो
तावदाह * इतीति * तच्छब्देन द्रव्याणि त्वविशेषेणान
क्यात् प्रतीयेरन्निति पूर्वाधिकरणसूत्रोपात्तद्रव्यपरामर्शा
कत्वग्रहणस्य चोपादेयगतसंख्यामात्रोपलक्षणार्थत्वाद्यजशब्दस्य
क्रियामात्रोपलक्षणार्थत्वात् तत्र द्रव्ये यत्पशुमालभेतेत्येकत्वमन
वाहौ युनक्तीति वा द्वित्वं कपिञ्जलानालभेतेति वा बहुत्वं तदा
याङ्गमुपश्लेषलक्षणया श्रुत्या प्रातिपदिकार्थं प्रति गुणभूतत्वादि
सूत्रार्थः । द्रव्यविशिष्टस्य विधेयत्वसम्भवे ऽप्यक्रियाङ्गत्वापत्ते

ष्टद्रव्याविध्यसम्भव उक्तः। परमार्थतस्त्वक्रियाविशेषणस्य-
येयत्वमेव न सम्भवतीत्याह * न चेति * कथं तर्हि पश्वेक-
देर्विधेयत्वं क्रियाङ्गत्वं वेत्याशङ्क्य तत्र विधेयत्वाक्रियोपादानात्
यायाश्चैकप्रत्ययोपादानलक्षणया श्रुत्यैकपदोपादानलक्षणश्रुतिग-
ातिपदिकार्थाङ्गबाधेन कारकाङ्गत्वावगतेस्तद्द्वारेण क्रियाङ्ग-
प्रसायात् क्रियाङ्गत्वेन विधेयत्वं पश्वेकत्वाधिकरणसिद्धान्ते च-
ाणां सम्भवति इह तु क्रियानुपादानाच्चतुर्थाधिकरणसिद्धा-
ायासम्भव इति वैलक्षण्यं वक्तुमाह * न चेति * क्रियानु-
नादेवाक्रियात्मकत्वेन स्तोत्रप्रकरणग्राह्यत्वायोगात् तदङ्गत्वा-
त्तेरानर्थक्यापातादपि विशिष्टद्रव्याविध्यसम्भव इत्याह * न
मिति * अक्रियात्मकस्य प्रकरणाग्राह्यत्वे वृद्धसम्मतिमाह
ाह चेति * नन्वस्तिर्भवन्तीपर इति स्मृतिकल्पितभवतिवा-
ात्ता द्रव्यक्रियाद्वारा द्रव्यसंख्ययोः प्रकरणेन ग्रहणं भ-
तीत्याशङ्क्याह * न चेति * द्रव्यसंख्ययोर्भवतिक्रियाङ्ग-
ाति तद्द्वारा प्रकरणेन ग्रहणं स्यात् न तु द्रव्यसंख्ययोः
तां प्रत्यङ्गत्वं सम्भवतीत्यर्थः। असम्भवे हेतुमाह * सर्वो ही-
* क्रियासिद्धौ व्याप्रियमाणं कारकं क्रियाङ्गं भवति सत्तासि-
द्धायां चालब्धात्मकत्वान्न व्यापारः सम्भवति इत्याशयः। न-
याख्याद्यभावविकारेण लब्धात्मकस्य सत्ताख्याद्वितीयभावावि-
सिद्धौ व्यापारः सम्भविष्यतीत्याशङ्क्याह * सत्तायास्त्व-
उत्पत्तुमारभमाणस्यापि कुतश्चित्कारणात्सत्तासिद्ध्यभावे सि-
द्ध इत्यात्मलाभव्यवहारासम्भवात् सत्तातः प्रागलब्धात्मक-
तद्व्यापारः सम्भवतीत्याशयः। वस्त्वात्मलाभमात्रस्य सत्तातो
ात् समाप्तेस्तस्या न वस्तुना साध्यत्वमिति योज्यम्।आद्यभावावि-
ोपक्रान्तस्यात्मलाभस्य द्वितीयेन पर्यवसानमित्यपवर्गशब्देनो-
दि च पञ्चदशसंख्यैराज्यैः स्वसत्तां भावयेदिति वाक्यार्थः
तो ऽन्यसाध्यानपेक्षणेन स्तोत्रोपकारस्य साध्यत्वेनासम्बन्धात्
त्राङ्गत्वं स्यादित्याह * तद्व्यतिरिक्तेति * ननु रथन्तरं भव-
दौ भवतिक्रियाद्वारेण प्रधानक्रियाङ्गत्वदर्शनादिहापि तथा
त्याशङ्क्याह * यत्त्विति * बृहद्वा रथन्तरं वा पृष्ठं भवतीति वचने-
ाख्यस्तोत्रसाधनतया विकल्पेन विहितयोर्बृहद्रथन्तरयोर्विकृ-
तदेशप्राप्तायां वैकल्पिकायां सत्तायां रथन्तरसत्तानियमार्थमि-
यम्। तत्र चातिदेशप्राप्तस्य पृष्ठाख्यस्तोत्ररूपावान्तरक्रियास-
धस्य प्रज्ञानाद्युक्तं विकृतिप्रकरणग्रहणमित्यर्थः। लोकसि-

अन्येन चाज्यादिसत्ताया विधेयत्वायोगात् न तद्द्वाराज्यादीनां स्तोत्रप्रकरणग्रहणं युक्तमित्याह * नचेति * नन्वाज्यादिसत्तायाः स्वरूपतः सिद्धावपि स्तोत्रसामीप्यासिद्धेस्तेन रूपेण विधेयत्वं भविष्यतीत्याशङ्कते * स्तुतीति * स्तोत्रसान्निध्यरूपेणासिद्धावपि सत्तायाः पुंव्यापारत्वाभावेनानुष्ठेयत्वाभावाद्विधेयत्वं न सम्भवतीत्याशङ्कानिरासायानुष्ठानार्हस्थापनोपन्यासः । कथमश्रुतोपस्थापनप्रतीतिरित्याशङ्क्याप्राप्तत्वेनाज्यादिसत्ताया विधेयत्वप्रतीतेर्विधेश्च विधेयस्वभावनैकगोचरत्वेन विधेश्च भावनाक्षेपकत्वाद्भावनायाश्चानुष्ठेयधात्वर्थावच्छेदं विनात्मलाभाभावादवच्छेदकधात्वर्थविशेषापेक्षायां योग्यतया स्थापनावगतिं सूचयितुं भावनाग्रहणं विधेरश्रुतत्वात् सत्तायाश्चाननुष्ठेयत्वेन विधानानर्हत्वात् अश्रुतविधिकल्पनानुपपत्तेर्न तावद्विध्यन्यथानुपपत्त्या भावनाक्षेपस्तदवच्छेदकस्थापनाख्यधात्वर्थविशेषाक्षेपो वा युक्तः । अविधेयत्वेन चाङ्गत्वायोगात् न स्तोत्राङ्गत्वकल्पिततत्सामीप्यसम्पादनायापि सन्निधिस्थापनाक्षेपो युक्तः सामीप्यसम्पादनरूपेण विधेयत्वादङ्गत्वम् अङ्गत्वं विना सामीप्यासिद्धेरितरेतराश्रयत्वं स्यादित्यभिप्रेत्य निराकरोति * नेति * अतस्तु सन्निधिस्थापनस्य विधानं प्रकरणग्रहणं च युक्तमिति पूर्वपक्षोक्तदृष्टान्तवैषम्यमाह * अग्निमिति * अथ त्विति भाष्यमपि चैतेनापि पूर्वपक्षस्यैव निरासान्मध्ये सिद्धान्तसमर्थनस्यासङ्गतत्वादयुक्तमाशङ्क्याग्नेयो ऽष्टाकपालो भवतीत्यादिवदिहाप्यावश्यककल्प्यं भवति वाच्यभावनाख्यप्रयोज्यव्यापाराक्षिप्तभावनाख्यप्रयोजकव्यापारविध्यन्यथानुपपत्त्या पञ्चदशसंख्यैराज्यैः स्तोत्रोपकारं भावयेदिति विनियोजकवाक्यकल्पनयाज्यानां स्तोत्रसम्बन्धासिद्धेः श्रुतस्य संख्यासम्बन्धमात्रविधानान्न वाक्यभेद इति वाक्यभेदपरिहाराशङ्कानिरासार्थत्वेन व्याख्यातुमाह * सिद्धान्तेन चेति * गुणविधिकल्पनायामपि न लक्षणेति पूर्वपक्षिणोक्तं तन्निरासार्थमपि चेति भाष्यमुदाहृतवाक्ये स्तोत्राज्यसामानाधिकरण्यानुपादानादयुक्तमाशङ्क्योत्पत्तिवाक्याभिप्रायेण व्याचष्टे * यदि त्विति * अनेन च यदि वाक्यभेदपरिहारायोत्पत्तिवाक्यविहिताज्यानुवादेन पञ्चदशत्वं गुणो विधीयते ततः सामानाधिकरण्यसिद्ध्यर्थमाज्यशब्देन मत्वर्थलक्षणया विहितेष्वाज्येषु गुणविध्यापत्तेर्लक्षणैव दोष इत्येवं भाष्यं व्याख्यातम्।उत्पत्तिवाक्ये तृतीयानिर्दिष्टानामप्याज्यानां गुणविधौ करणत्वाविवक्षासूचनार्थो भाष्ये प्रथमानिर्देशः संसर्गित्वेनाज्यानाम् अनेकेषामप्येकत्र मेलने सत्येकत्वापत्तेः पृथ-

वेशिपञ्चदशत्वयोगासम्भवात्पञ्चदशाज्यपात्राणीत्याज्यभेदा-
त्राज्याधारभूतपात्रलक्षणापि गुणवाक्ये स्यादित्याह * संसर्गे-
पलादिपरिमाणभेदे ऽपि पात्रभेदं विनाज्ये भेदबुद्ध्यनुपपत्तेः
देपरिमाणावच्छेदकपात्रभेदोपलक्षणार्थं पलादिग्रहणम् अतः
ामधेयानीति भाष्यं गुणवाक्यगतानामप्याज्यादिशब्दानां गु-
धित्वे वाक्यभेदापत्तेरुत्पत्तिवाक्यगतानां नामधेयत्वस्यासम्भव-
पत्तेरयुक्तमाशङ्क्योपपादयितुमाह * तेनेति * गुणवाक्यस्य-
स्योत्पत्तिवाक्यावगतार्थाधीनत्वेन गुणवाक्ये गुणविधिनाम-
ाचारानुपयोगात् उत्पत्तिवाक्यगतानामेवाज्यादिशब्दानां ना-
त्वसिद्ध्यर्थं गुणवाक्ये गुणविधित्वे वाक्यभेदापादनात् ना-
द्गतेत्याशयः। यत्त्विति भाष्येण न चैते कर्मणि प्रसिद्धा
पूर्वपक्षोक्तं प्रसिद्ध्यभावात्कर्मनामत्वासम्भवमनुभाष्यावयव-
ेत्यादिनावयवोपयोगेन प्रसिद्धिमुपपाद्य तस्मादित्यनेनोप-
: कृतः सो ऽतः कर्मनामधेयानीत्यनेन पुनरुक्त इत्याशङ्क्य सर्व-
ङ्कलनार्थत्वादपौनरुक्त्यं सूचयितुमाह * गुणवाक्येति * २९४।
त्रेति भाष्योक्तसामानाधिकरण्यलक्षणहेतुसङ्कलनार्थं समभि-
ोन चेत्युक्तम्। अस्यान्वयहेतुत्वसूचनार्थश्चकारः आज्यार्थ-
ाठित्वां व्याचष्टे * यदाजिमिति * प्रजापतिर्देवेभ्य आत्मानं
त्वा प्रायच्छत्ते ऽन्योन्यस्मा अग्रायणातिष्ठन्त तानब्रवीदाजि-
बेतेति आजिमायन्निति अर्थवादोपक्रमव्याख्यान्व्याख्यानरूप-
ानार्थमस्मिन् यज्ञे काष्ठां गच्छतेति प्रजापतिवचनादेतानि
णि काष्ठां कृत्वा यस्मादाजिगता देवास्तस्मादाज्यार्हत्वादेषा-
वमित्यर्थवादार्थः। स्पर्शनवचनात्पृष्ठानीति पृष्ठशब्दव्युत्पत्ति-
दनार्थं भाष्यं स्पर्शननिमित्तपृष्ठशब्दप्रतिपादनपरार्थवादाश्र-
ुक्तमाशङ्क्योपपादयितुमाह * तथेति * पृष्ठानि वा असृ-
इत्युक्ते कथमसृज्यन्तेत्यपेक्षायामापो वा ऋतुविषमार्छन्ता-
ुः पृष्ठे व्यवर्त्तत इत्यात्तवयुक्तानामपां पृष्ठे वायोर्विवर्त्तन-
ामिव स्त्रियां पुंसो ऽभिधीयमानं मैथुनात्मकं स्पर्शनमेव
स्तोत्रसाधनत्वनिमित्तपृष्ठशब्दवाच्यं रथन्तरादिसृष्टिहेतु-
भवतीत्याशयः। विवर्त्तनशब्दस्य मैथुनाख्यस्पर्शवा-
द्योतयितुं पृष्ठइत्युक्तं स्पर्शनवचनस्य कैमर्थ्यापेक्षायां पू-
ः पृष्ठसृष्टेर्हेत्वाकाङ्क्षापूरणार्थत्वेनापेक्षिताभिधानसिद्ध्यर्थं पृ-
हेत्वभिधानार्थत्वावगमादुत्पाद्योत्पादकभावाभिधानस्य च
ेक्षायां पशवो वै बृहद्रथन्तरे इत्युपक्रस्याभिधा-

नेन रथन्तरादिषु पृष्ठशब्दव्युत्पत्तिनिमित्तप्रतिपादनाश
गमाद्रथन्तरादीनीत्युक्तम् । अनेन च स्पृशेर्धातोरौः
थक्प्रत्यये कृते तिथपृष्ठगूथप्रोथा इति सूत्रेण सकारलोपे ि
व्रश्चादिसूत्रेण च शकारस्य षकारादेशे कृते ष्टुत्वे च कृते पृ
व्युत्पत्तिरुक्ता भवति न न्वापो वा ऋत्वियमार्च्छन्नित्युपक्रः
वसुवामं समभवत् तन्मित्रावरुणौ पर्यपश्यतां तावब्रूतां वाः
इदं देवेष्वाजनीति तस्माद्वामदेव्यमित्यनन्तरं वामदेव्यशब्दप्र
मित्ताभिधानाद्वामदेव्यादिष्वेव पृष्ठशब्दप्रवृत्तिनिमित्ताभिधा
स्यावसीयते न रथन्तरबृहद्वैरूपवैराजशाक्वररैवतेष्वित्याः
* तत्प्रकृतित्वाच्चेति * अयमाशयः पृष्ठैः स्तुवतइत्युत्पत्तिवाः
असामानाधिकरण्यात् पृष्ठशब्दस्य स्तोत्रमेव वाच्यं न रथन्तरा
थन्तरं पृष्ठं भवतीत्यादौ पृष्ठशब्दस्य साधनलक्षणार्थत्वात्सा
करणयं रथन्तरं पृष्ठाख्यस्तोत्रस्य साधनं भवतीत्यर्थः । पृ
ष्ठतइत्यादौ तु रथन्तरादिषु पृष्ठशब्दप्रसिद्धिसिद्ध्यर्थमनेनार्थः
प्रवृत्तिनिमित्ताभिधानम् । पशवो वै बृहद्रथन्तरम् इत्युपक्र
प्रतीयते वामदेव्यनौधसश्यैतेषु ज्योतिष्टोमे पृष्ठशब्दाभावात्व
न्वसृज्यन्तेति बहुवचनमित्यपेक्षायां पृष्ठशब्दवाच्यरथन्तरा
त्वेन तेषामौपचारिकपृष्ठत्वप्रदर्शनार्थस्य पिता वै वामदे
पृष्ठानीति अर्थवादस्य तत्पृष्ठेषु न्यदधुरिति अस्य चावसरः
ततो वामदेव्यमित्याद्युक्तम् इति पृष्ठैः स्तुवतइत्येतत्तु बहुव
भृत उपदधातीतिवत् लिङ्गसमवायादिति सप्तमे वक्ष्यते
विश्वजित्सर्वपृष्ठो भवतीति उदाहृत्य किमयं पृष्ठशब्दोऽि
न वेति विचारयितुं ज्योतिष्टोमिकपृष्ठविषयोऽयं पृष्ठशब्द
कपृष्ठविषयो वेति सन्दिग्धे विश्वजितो ज्योतिष्टोमपूर्वकः
च पृष्ठैः स्तुवतइति सप्तदशानि पृष्ठानि इति बहुवचनवः
न्द्रादिषु चतुर्षु स्तोत्रेषु पृष्ठशब्दवाच्यत्वावगतेः । पृष्ठबहु
वाद्तिदेशप्राप्तज्योतिष्टोमिकपृष्ठानुवादत्वान्नातिदेशार्थो ऽ
ब्द इति विश्वजिति सर्वपृष्ठे तत्पूर्वकत्वात् ज्योतिष्टोमिकाि
स्ति च पृष्ठशब्द इतिसूत्रेण पूर्वपक्षयित्वा बृहद्वा रथन्तरं व
वतीत्येकस्यैव पृष्ठस्य ज्योतिष्टोमे विकल्पेन विधानात् पृष्ठ
वेन सर्वशब्दायोगात् षाडहिकानामेव रथन्तरबृहद्वैरूपवैः
रैवतानां षण्णां पृष्ठानामतिदेशार्थः पृष्ठशब्द इति षडहाद
चोदनेनेति सूत्रेण सिद्धान्तयिष्यते।ननु ज्योतिष्टोमे पृष्ठबहु

१ नकाररहितः कथमिति पा० २ पु० दृश्यते ।

हुवचनानुपपत्तिः स्यात् इत्याशङ्कानिरासार्थोत्पन्नाधिकारी ज्योतिष्टोम
तेसूत्रेण माहेन्द्रस्तोत्रस्यैव बृहद्वा रथन्तरं वा पृष्ठं भवतीति वाक्ये-
ज्योतिष्टोमे पृष्ठत्वावधारणात् वामदेव्यनौधसश्यैतानां पृष्ठत्वा-
ावादुत्पन्नानि चान्यतः पृष्ठत्वेनावगतानि स्तोत्राण्यधिकृत्य पृष्ठ-
ब्दप्रयोगात् प्रमाणान्तरापेक्षत्वेन लिङ्गसंमवायात् पुरोडाशानल-
विंत्यादिबहुवचनोपपत्तिरित्युक्तम् । ननु पृष्ठैः स्तुवतइति पृष्ठ-
ब्दस्य स्तोत्रनामत्वे रथन्तरादिविषयपृष्ठशब्दप्रसिद्ध्यर्थो ऽयमर्थवा-
ऽनर्थकः स्यात्। न च पृष्ठैरुपातिष्ठतइत्येतद्वाक्यगतरथन्तरादिवि-
यपृष्ठशब्दप्रसिद्ध्यर्थो ऽयमर्थवादो युक्तस्तस्याभित्वेत्याद्यृग्वाचित्वस्य
समे वक्ष्यमाणत्वात् तत्र ह्ययं पृष्ठशब्दो हिङ्कारादिपृष्ठधर्मातिदे-
र्थो न वेति विचारयितुङ्किमयं स्तोत्रवाची ऋग्वाची वेति सन्दि-
चित्राधिकरणे स्तोत्रक्रियावाचित्वेन स्थितस्य पृष्ठशब्दस्येहानेका-
दोषप्रसङ्गाहक्द्रव्यवाचित्वकल्पनानुपपत्तेर्मुख्यानां च पृष्ठानाम् अ-
त्र क्रियावाक्ये विनियुक्तानामिह विनियोगात् मासमग्नि-
त्रं जुहोतीतिवर्द्धमातिदेशार्थतेति कर्मणि पृष्ठशब्दः स्यात्तथाभू-
ापदेशादिति सूत्रेण पूर्वपक्षिते ऽभिधानोपदेशाद्वा विप्रतिषेधा-
द्रव्येषु पृष्ठशब्दः स्यादिति सूत्रेणाभित्वा शूरेत्याद्यानामृचामयं पृष्ठ-
ब्दो वाचक इति सिद्धान्तयिष्यते उपान्मन्त्रकरणइति उपपूर्वका-
ष्ठतेर्मन्त्रकरणे ऽर्थे वर्त्तमानादात्मनेपदस्मृतेः समीपस्थाने च म-
स्य करणत्वायोगादभिधानार्थोपस्थानवाचित्वं धातोः कल्पयि-
ोपस्थानकार्यमभिधानं कुर्वतो मन्त्रस्योपस्थाने ऽपि यागस्य कार्यफ-
प्रति ग्रहणायोग्यत्वं कुर्वतां यजमानसंस्काराणां याग इव कर-
णत्वोपपत्तेरभिधानार्थमग्निसमीपे तिष्ठेदित्याख्यातपदार्थावगमा-
समभिव्याहृतस्य पृष्ठशब्दस्य स्तोत्रक्रियावाचित्वे सत्यात्मनेपद-
प्रतिषेधापत्तेस्तत्परिहारार्थं पृष्ठाख्यस्तोत्रसाधनत्वेनान्यत्र विनियु-
ासु ऋक्षु लक्षणया प्रवृत्त्युपपत्तेः।

कुशा दूर्वादयो मन्त्रा ब्राह्मणाश्च बहुश्रुताः।
न ते निर्माल्यतां यान्ति विनियोज्याः पुनः पुनः॥

इतिस्मृतेश्च मन्त्राणां विनियुक्तविनियोगाविरोधात् ऋग्वा-
यं पृष्ठशब्द इति सूत्रार्थः । अतो ऽर्थवादाद्रथन्तरादीनां पृष्ठत्वं
त्प्रकृतित्वाद्वामदेव्यादीनामित्ययुक्तम् । उच्यते रथन्तरादिगीति-
शिष्टानामेव ऋचां पृष्ठसाधनतया पृष्ठशब्देन लक्षयितुं शक्यत्वाद्-
था चाऽभित्वाद्यृग्विशेषप्रतीतावपि करणाभावाद्विशेषणे च पूर्व-
प्रत्ययाद्रथन्तरं पृष्ठं भवतीत्यादौ च रथन्तरादिषु पृष्ठशब्दप्रयोगा-

तु साम्नो ऽपि चाभिधायकाक्षराभिव्यक्तिद्वाराभिधाने ऽपि क
करणत्वोपपत्तेर्न ऋग्वाचित्वाभिधानाद्रथन्तरादिवाचित्वं पृष्ठ
स्य प्रसिद्धं किं त्वनुज्ञातमेवेत्यदोषः । द्रव्यसंख्यारूपानेकार्थप्र
पादितवाक्यभेदपरिहाराशङ्कानिराकरणभाष्यमधिकरणसिद्धा
पसंहारादनन्तरम् असङ्गतत्वादयुक्तमाशङ्क्यापकृष्य व्याख्येयमि
ह * द्वावेताविति * भाष्यकृता तु प्रधानतो ऽभिसम्बन्ध इत्यं
सूत्रावयवेनावृत्त्या प्रधानक्रियोपादाने सत्येव क्रियावशीकारा
भिमुखीभूतयोर्द्रव्यसंख्ययोर्विशेषणविशेष्यसम्बन्धः स्यात् न
प्रधानक्रियोपादानमस्तीत्येवमेषा शङ्का निराक्रियते इति सूचनार्
वता शङ्कापरिहारावन्ते कृतावित्यदोषः । आशङ्कानिराकरणार्थं
शिष्टानामिति भाष्यं विशिष्टवाचिशब्दाभावे ऽप्यरुणैकहायनी
अग्ने शुचये ऽष्टाकपालं निर्वपेदिति वद्वा सामानाधिकरण्यमा
विशिष्टप्रतीतिसम्भवादयुक्तमाशङ्क्याह * विशिष्टानामिति * अय
शयः गौरश्व इतिवत्परस्परसामीप्यैकविभक्तिनिर्देशमात्रेण
मानाधिकरण्यायोगान्नारुणैकहायन्योस्तद्द्वाराद्विशेषणविशेष्यभा
गतिः किं तु निर्द्रव्यगुणस्यामूर्त्तत्वेन क्रियासाधनत्वानुपपत्तेर्नि
स्य च द्रव्यस्यानुपादेयत्वेन क्रियासाधनत्वानुपपत्तेर्द्वयोः
क्रियानुगृहीतत्वेन द्रव्यगुणान्तरानपेक्षकत्वात् क्रियासाधन
नुपपत्त्याग्निशुच्योस्तु देवतात्वेनान्वयात् तस्य चोद्देश्यत्व
त्रेण क्रियासाधनत्वात् अमूर्त्तस्य निर्गुणस्यापि चोद्देश्य
पपत्तेः क्रियासाधनत्वान्यथानुपपत्त्या विशेषणविशेष्यभ
नवगमे ऽपि तदनभ्युपगमे प्रत्येकमन्वयायाख्यातावृत्त्यापत्तेः
धानभूताख्यातावृत्तेश्चात्यन्तान्याय्यत्वात् प्रत्येकं च देवतात्वापः
णभेदेनादृष्टकल्पनागौरवापादककर्मभेदप्रसङ्गादेकक्रियावशीका
वसायात्तदन्यथानुपपत्त्या विशेषणविशेष्यभावावगतिः । पञ्च
न्याज्यानीत्यत्र तु प्रधानभूतसाध्याक्रियावाक्याख्याताश्रवणात
तस्य सामानाधिकरण्यनिर्देशमात्रेण विशेषणविशेष्यभावावगति
स्भवतीति । नन्वित्याशङ्काभाष्यमाख्यातनिरपेक्षस्य समभिव्याह
मात्रस्य विशिष्टावगतिकरणत्वानुपपत्तेरुक्तत्वादयुक्तमाशङ्क्याह
न्विति * न तत्पदद्वयमपीत्याशङ्कानिराकरणभाष्यं तस्य किल
माशयः पञ्चदशान्याज्यानीत्यत्र विशेषणविशेष्यभूते द्रव्यसं
विधीयेते अनूद्येते वा एकानुवादेनेतरविशिष्टना वा विधीयते तत्र
योर्विधाने परस्परनैरपेक्ष्याद्विशेषणविशेष्यभावो न स्यात् लोके
चिद्विशेषणविशेष्यभावेन प्राप्तयोर्द्रव्यसंख्ययोरनुवादे श्रुतस्य

यस्यानुवादव्यापृतत्वेन स्तोत्रसम्बन्धविधायकत्वाभावात्तस्य-
नुपपत्तेरानर्थक्यापत्तिः स्वरूपेण चैकमनूद्येतरविधानानर्थक्या-
ः स्तोत्रसम्बन्धित्वेन चैकस्याप्यप्राप्तेर्नैकानुवादेनेतरविशिष्ट-
विधातुं शक्येति तदैकभवतिक्रियावशीकारेणोभयोर्विधीय-
नयोरस्वैकहायन्यादिवद्विशेषणविशेष्यभावोपपत्तेरनुपपत्तिमाश-
ाह * न तदिति * भवतिवाच्यायाः सत्ताख्यायाः क्रियाया द्रव्यसं-
ः प्रत्यात्मलाभोपकारजननेन गुणत्वात्प्राधान्याभावेनोभयवशी-
रसामर्थ्यं नास्तीत्याशयः । ननु निर्द्रव्यायाः संख्यायाः निःसंख्यस्य
द्रव्यस्यात्मलाभाभावात् कथं सत्तायाः प्रत्येकवर्त्तित्वमित्याशङ्क्याह *
दशानीति * अर्थाक्षिप्तयत्किञ्चित् द्रव्यसंख्याक्षेपे ऽप्यप्रधान-
या क्रियया वशीकर्त्तुमशक्यत्वात् नान्योन्यनियमसिद्धिरित्याश-
। नन्वेकक्रियावशीकाराभावे ऽपि द्रव्यसंख्ययोरितरेतरापेक्षायां
प्रधानेनैतयोरेव परस्परनियमाद्विशेषणविशेष्यभावो भविष्य-
याशङ्क्याह * तस्मादिति * एकक्रियावशीकारसम्भवे तद्व-
विशेषणविशेष्यभावापत्तेः संख्याविशिष्टद्रव्यविधिः शङ्कितुं
ष्यते तदसम्भवे तु स्वतन्त्रयोरेव विधानापत्तेस्तस्य च वाक्यभे-
सङ्गनासम्भवात् पाश्चात्येन विशेषणविशेष्यभावेन विधानका-
नस्य वाक्यभेदस्य परिहर्त्तुमशक्यत्वात् नोभयविधिः सम्भवती-
यः । अविधायक इतिभाष्यावयवं व्याख्यातुमाह * न चेति *
शः क्वचिल्लोके पञ्चदशघटनिक्षिप्तेष्वाज्यपञ्चदशत्वयोर्विशेषण-
शेष्यभावः प्राप्तस्तादृशस्य स्तोत्रेषु विधायकाभावेनाभावात् स्तो-
; विधायकाभावेनाभावात् स्तोत्रसम्बन्धित्वेन विधानानुवादायो-
त् स्वतन्त्रानुवादे त्वानर्थक्यप्रसङ्गान्नोभयमनुवादकमित्यर्थः ।
सत्रेति भाष्यावयवं प्राक् पठितमपि उभयविध्यनुवादासम्भवा-
तसिद्धत्वात् पश्चाद्व्याचष्टे * तस्मादिति * नन्वेवं सत्या-
नुवादेन तेषां पञ्चदशत्वसंख्याविशिष्टविधिराशङ्कायायुक्तः सि-
दित्याशङ्क्याह * नामधेयत्वइति * स्तोत्रनामत्वे सत्याज्यश-
दस्याज्यैः स्तुवतइत्येतद्वाक्यप्रामाण्यादाज्यान्यनूद्य संख्याविशिष्टत्वं
धातुं शक्यं घृतानां त्वप्राप्तत्वान्नानुवादः सम्भवतीत्याशयः ।
न चास्य भाष्यावयवस्याशङ्कानिराकरणमध्यगतस्यापि लिङ्गवली-
त्वात्सिद्धान्तसिद्ध्यर्थतोक्ता लिङादिरहितस्य विध्यशक्तेर्विधाय-
त्वानुपपत्तिमाशङ्क्याह * विधायकमिति * ननु संख्याविशिष्टा-
विध्यसम्भवे ऽपि पञ्चदशान्याज्यानि स्तोत्रेषु भवन्तीत्याज्यस्य
स्य स्तोत्रसंख्यापदाभ्यां तत्र सम्बन्धादर्थाद् द्रव्यसंख्ययोर्विशेष-

णविशेष्यभावो भविष्यतीत्याशङ्क्य वैरूप्यापादनेन तन्त्रसम्ब
रासार्थं न चात्रैकमाज्यपदं विशेषणं संख्यां प्रत्युद्देशकमिति
वाजपेयाधिकरणवक्ष्यमाणस्य तन्त्रसम्बन्धनिरासस्यानागता
न्यायेनेहाभिधानार्थमिति सूचनायोपेक्षितम् । डप्रत्ययान्तशब्दस
धिकरणयलिङ्गादप्याज्यपृष्ठशब्दयोः स्तोत्रनामतावसीयतइत्याह
श्वदशानीति * क्रियामानस्य कारकमानाधीननिरूपणत्वात् ह
च कथं चिदुपस्थापकत्वेनोपकारकत्वसम्भवे ऽप्यवाचकत्वेन
घत्त्वाभिधानलक्षणां स्तुतिं प्रति कारकत्वायोगात् तृतीयया
कतमत्वोपचारे ऽपि मुख्यसाधकतमत्वासम्भवात् न तत्सं
मुख्यं स्तोमत्वमवसीयतइत्याशयः ॥ २ ॥

॥ अथ अग्निहोत्रादिशब्दानां यागनामधेयताधिकरणम् ॥ ३

१९५।१ तत्प्रख्यं चान्यशास्त्रम् ॥ ४ ॥

निरूढानिरूढत्वेन द्विविधस्यापि नामधेयस्य विच
त्वादुत्तराधिकरणद्वयानर्थक्यमाशङ्कते * नन्विति * पूर्व
णविधिनिरासहेत्वभावादिह हेत्वन्तरेण निरासार्थं चिन्तेति
रति * उच्यतइति * वाक्यभेदासम्भवाच्चिन्तेत्यनुषङ्गः ।
तत्प्रख्यान्यशास्त्रसद्भावेन गुणविधिनिराकरणमुत्तरत्र तद्व्यप
न्यशास्त्रसद्भावेनेति विवेकः । यथा चाज्यादिशब्दानां गुण
गतवाक्यभेदालोचनेन गुणविधित्वनिरासस्तथाग्निहोत्राद्या
योरपि गुणवाक्यगततत्प्रख्यान्यशास्त्रलोचनेनेत्यनन्तरसङ्ग
तद्व्यपदेशस्य त्वर्थवादगतत्वाद्वैलक्षण्यं, न च यौगिकत्वसाम्य
उद्भिदधिकरणानन्तरमेतदारब्धुं युक्तं सामानाधिकरण्यनि
यौगिकत्वस्य नामधेयासाधकत्वेना किं चित्करत्वात्तत्प्रख्यत्वप
संभवासम्भवाभ्यां च सन्देह इति सर्वमनवद्यम् । अग्निहोत्र
देवतालक्षणगुणविधित्वाभिधानार्थं गम्यते हीति भाष्यं चत
मासलक्षणाभावादयुक्तमाशङ्क्याह * तत्रेति * ननु सिद्धा
माणान्तरावगतार्थानुवादत्वात्तेन चाग्नेर्देवतात्वावगतेस्तद
चतुर्थीबहुव्रीह्यङ्गीकरणं युक्तं, विधिपक्षे तु प्रमाणान्तराभाव
क्षणा । ननु गतसमासाङ्गीकरणं युक्तमित्याशङ्क्यान्येत्युक्तम्
तत्पुरुषे सम्बन्धविशेषानवधारणेन व्यवहारासिद्धेः सर्वहोमा
न्याधारत्वस्य यदाहवनीयवाक्यादेव प्राप्तेः सप्तमीबहुव्री
क्यालक्षणाननुगतत्वाद्विशेषाच्च समासान्तरानुपपत्तेः ह
च्याच्चतुर्थीबहुव्रीहिरेवावसीयतइत्याशयः । न चेति भाष्ये वक्ष

ङ्गिन्न्यायवैषम्यं बहुव्रीह्यङ्गीकरणस्य प्रयोजनमित्याह * अन्त-
तेति * प्रसिद्ध्यादिहेतुत्रयं विक्षिप्योक्तं सङ्कलय्य पूर्ववद्व्या-
यमित्याह * तएव चेति * पूर्वव्याख्यातिदेशार्थस्तत्त्वोपचारः।
गौरवभयेनेहाप्युद्भिच्चित्रादिवद्विशिष्टविध्यनाश्रयणाद्यद-
ये च प्रजापतये च सायं जुहोति यत्सूर्याय च
ापतये च प्रातर्जुहोतीति वाक्ययोरनेकगुणोपादानात्क-
नुवादेन गुणमात्रविधौ वाक्यभेदापत्तेर्गुणविशिष्टकर्मविधानाव-
ात् तद्विहितयोः कर्मणोः सन्निधानादग्निहोत्रशब्दो गुणविधिः
ज्येत तत्र च सायं होमे ऽग्नेः प्राप्तत्वावगमात्तत्प्रख्यशास्त्रान्तर-
ावे चानर्थक्यापत्तेर्नाग्न्याख्यदेवताविधिर्युक्त इत्याशङ्क्याह *
यामिति * तद्वर्जमित्यनेनोभयोः सन्निधानाविशेषे ऽपि प्राप्त-
त् सायं होमवर्जनमिति दर्शितम्। उत्पत्तिशिष्टसूर्यप्रजापत्यवरुद्धे
प्रतिहोमे ताभ्यां सह समुच्चयेन विकल्पेन वाग्निर्निवेक्ष्यते य-
ग्निहोत्रं जुहुयात्स्वर्गकाम इत्यत्र वाक्ये ऽग्निहोत्रशब्देन फले
ीयमानो गुणः प्रकृताश्रयापेक्षायां सायं होमे ऽग्न्याख्यस्य गुण-
न्यतः प्राप्तेरभिधेयतया फलान्वयायोगेनाश्रयान्तरापेक्षत्वात् प्रा-
मिमाश्रयत्वेन गृह्णन्नित्यतद्गुणं सूर्यादिकं बाधित्वा निवेक्ष्यते
यज्जुहोति तत्सूर्याय च प्रजापतये चेति चशब्देनान्योन्यसा-
स्यैव देवताद्वयस्य क्रियान्वयप्रतीतेः प्रतिकारकं प्रत्ययव्यापारा-
ादनेकगुणोपादाने ऽपि वाक्यभेदानापत्तेः सूर्यवाक्यस्यापि गुण-
रितविधिशक्तत्वेन कर्मोत्पादकत्वाभावात् सूर्यप्रजापत्योरुत्प-
शिष्टत्वाभावेन बलीयस्त्वानुपपत्तेः सायं च प्रातश्च जुहोतीत्य-
नुपादेयकालसम्बन्धात् प्रकरणान्तरन्यायेनाश्विनवाक्यवत् पू-
क्षे कर्मविधित्वावगमात्तस्य चासम्भवद्विकल्पसमुच्चयसायम्प्रातः
ललक्षणगुणद्वययोगेन यदाग्नेयो ऽष्टाकपाल इतिवत् कर्म-
विधायकत्वावगतेस्तद्विहिते प्रातर्होमे वाक्यान्तरविहिताभ्यां
प्रजापतिभ्यां सह तुल्यबलत्वाद्विकल्पेनाग्निहोत्रवाक्यमग्निं वि-
यतीति वक्ष्यमाणानुषङ्गेण वाक्यं पूरणीयम्। भाष्यकृता तु सायं
प्रातश्च जुहोतीत्येतद्वाक्यविहितस्य कर्मद्वयस्य यदग्नये च सू-
चेति वाक्याभ्यां सायम्प्रातःकालविशिष्टकर्मविशेषानुवादेन
ताविधायकाभ्यां विहितेनाग्निसूर्यादिना नैराकाङ्क्ष्यात्सन्निहिते
तस्मिन् अग्निहोत्रवाक्येन गुणविधानाशक्तेर्दूरस्थेष्वप्यविहि-
वताकेषु जुहोतिचोदितेषु दर्विहोमशब्दवाच्येषु गुणविधिरित्यु-
। तदुपपादयति * होमेति * सूर्याग्निवाक्ययोः कालदेवता-

विशिष्टकर्मविधायित्वे सायम्प्रातर्वाक्यस्य तत्र कालविधायित्वायोगादत्यपूर्वपक्षे चाग्निहोत्रवाक्यस्य कर्मविधायित्वाभावात्कालविशिष्टकर्मविधायित्वापत्तेस्तद्विहिते ऽपि कर्मणि जुहोतिचोदितत्वाद्विहोमशब्दवाच्ये देवताविधिं वक्तुं सर्वशब्दः । नन्वेवं सन्निहित एव सायम्प्रातर्वाक्यविहिते कर्मणि गुणविध्युपपत्तेर्दूरस्थेषु विधिर्न युक्त इत्याशङ्क्य होममात्रेत्युक्तं सूर्याग्निवाक्ययोः कालविशिष्टकर्मानुवादेन देवताविधायकतया विशेषरूपत्वात् तद्विहितदेवतावरुद्धे कर्मणि सन्निहिते ऽप्यग्निहोत्रवाक्यं होममात्रानुवादेन देवताविधायकतया सामान्यरूपत्वात् ततो दुर्बलं न शक्नोति देवतान्तरं विधातुमित्याशयः । नन्वसन्निहितस्य कर्मणो प्रत्यभिज्ञाना कथमनुवाद इत्याशङ्क्यैकवाक्योपात्तजुहोतिसामर्थ्यात् प्रत्यभिज्ञानोत्पत्तिरुक्ता । नन्वाघारमाघारयतीत्येतद्वाक्यविहिते कर्मणि चतुर्गृहीतं वा एतदभूत्तस्याघारमाघार्य त्रिरितः प्राञ्चं प्रयाजान् यजतीति वाक्यान्तरेणाघारशब्दवाच्यस्य क्षरणार्हद्रवद्रव्यस्य चतुर्गृहीतस्याज्यविशेषरूपेण प्राप्तत्वात् सामान्यविधेश्चाविशेषोपसंहारेण पयःभृतिद्रवद्रव्यान्तरप्रापकत्वायोगात्तत्प्रत्यभिज्ञान्तरसद्भावेनाघारशब्दस्य गुणविधित्वं न युक्तमित्याशङ्क्याघारश्चेति भाष्येणाघारशब्दवाच्यं द्रव्यमात्रमुपांशुयाजे विधीयत इत्युक्तं तदुपपादयितुमाह * … थेति * ननु क्षारितस्य नष्टत्वात्कथं प्रयोजनापेक्षेत्याशङ्क्याह * … संमार्गं चेति * प्रतिपत्त्यर्थत्वे दृष्टार्थत्वात् सर्वस्य क्षारणं स्यात् … त्वदृष्टसंस्कारार्थत्वात् शब्दमात्रे ऽनुष्ठिते ऽपवृज्येतेत्यर्थः * तत्क्षारितेति * तस्मादित्यर्थे तदित्यव्ययम् । ननु यदि सोमं न विन्देत पूतीकानभिषुणुयादित्यभिषवस्य स यदि राजन्यं वा वैश्यं वा याजयेत् स यदि सोमं बिभक्षयिषेन्न्यग्रोधस्तिभीनाहृत्य ताः सम्पिष्य दध्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोममिति भक्षस्य च प्रकरणेन यागसाधनसंस्कारतया प्रत्यभिज्ञानादभिषवयुक्तानां पूतिकाख्यवृक्षविशेषाणां भक्षयुक्तस्य च न्यग्रोधस्यावरोधांश्च फलानि चौम्बराण्याश्वत्थानि प्लाक्षाणि अभिषुणुयात्तानि भक्षयेदित्येतस्य ह्यतो ऽवरोधशब्दवाच्यानां स्तिभिनीनामौदुम्बरादिफलस्याभिधवणात्तत्समुदायस्य भूम्ना फलचमसशब्दाभिधेयस्य यागसाधनयुक्तं क्षारणस्य तु कथमित्याशङ्क्याह * लोके ऽपि चेति * क्षरणस्याप्युपयोक्ष्यमाणसंस्कारत्वेन लोके ऽवधारणात् तद्युक्तस्य द्रवद्रव्यस्यावश्यं क्व चित्कर्मणि साधनत्वावगमेर्युक्ता प्रयोजनापेक्षेत्याशयः । प्रयोजनापेक्षामुपसंहरति * तेनेति * ननु यदि सोमं न

। सोमाभावे पूतिकानां प्रतिनिधिनियमार्थेन विधिप्रतीतेस्तत्का-
रित्वं युक्तमाघाराख्यस्य तु द्रव्यस्य कस्य चिदभावे विध्यभा-
प्रतिनिधित्वाप्रतीतेः कथं कर्मापेक्षेत्याशङ्कानिरासाय प्रतिनि-
रहितदृष्टान्तान्तराभिधानं पूतिकादिवत् संस्कार्यत्वान्यथानुप-
स्यापि कर्माङ्गत्वावसायात् विशेषानवगतेः सामान्यतस्तावद्-
गपो ऽस्तीत्यर्थः । नन्वेवमपि उपांशुयाजार्थत्वापत्तिः कथमि-
ङ्क्याह * प्रकरणेति * पार्वणहोमादिनिवृत्त्यर्थः प्रधानशब्दः
क्रियात्मकत्वेन द्रव्यस्य प्रकरणग्राह्यत्वात् स्ववाक्योपात्तेनैव
णान्वयो युक्तो न प्रकृतेनेत्याशङ्कानिरासार्थं वृद्धसम्मतिमाह
गह चेति * श्रुतः संस्कारेण सम्बन्धो यस्य द्रव्यस्य तन्मुख्यैः
मावगतैः स्ववाक्योपात्तैः कर्मभिरसङ्गतमपि कर्मान्वयं विना
कारसम्बन्धायोग्यत्वात्प्रकृतैरन्वयं यातीत्यर्थः । यद्वा यदि
मं न विन्देत यदि सोमं विभक्षयिषेदिति च मुख्ययागसाधन-
मप्रसङ्गात्[1] पूतीकफलचमसयोस्तत्कर्मकारित्वप्रतीतेः प्रकृतकर्मा-
यो युक्तो ऽस्य तु कथमित्याशङ्कानिराकरणार्थं मुख्यैराघारणसं-
र्यैर्द्रव्यान्तरे येद्यप्यसङ्गतमित्युक्तम् । एवमाघारवाक्यस्य सं-
ारविधायित्वमङ्गीकृत्य संस्कार्यत्वान्यथानुपपत्त्योपांशुयाजे द्र-
विनियोगपर्यवसायितोक्तेदानीं वाक्यस्यैवोपांशुयाजे द्रव्यविनि-
जकत्वमाह * अथ वेति * नन्वाघारणलक्षणधात्वर्थभेदा-
ब्दान्तरन्यायेन भावनाभेदप्रतीतेः कथमुपांशुयाजभावनानुवाद
ाशङ्क्याघारद्रव्यसाध्यत्वादेवेत्युक्तम्। आघारणक्रियायोगप्रवृत्ता-
रशब्दवाच्येन यत् साध्यते तदाघारणमेव भवतीत्येवं प्राप्तो धा-
र्थः प्रत्ययानुग्रहायानूद्यमानो न भावनां भिनत्तीत्याशयः । नन्वत्र
द्भावनावाचिकरोत्यश्रवणात् शुद्धस्य चाख्यातस्याप्रयोज्यत्वात्
तुविशिष्टेन प्रत्ययेन धात्वर्थावच्छिन्नभावनानुवादपूर्वकद्रव्यवि-
नापत्तेः प्रागेव धात्वर्थप्राप्तिर्वाच्येत्याशङ्कानिरासायान्यथाप्राप्ति-
ह * ध्रौवप्राप्तेति * तावब्रूतामग्नीषोमावाज्यस्यैव नौ उपांशु २
र्णमास्यां यजन्नित्यस्य कालविध्यर्थत्वेनाज्यविध्यर्थत्वासम्भवात्स-
र्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यमित्याज्यप्रापकमुक्तम्
वं तर्ह्यविलीनाज्यस्य होमाशक्त्यैव व्यावृत्तेराघारशब्दस्याज्यवि-
षयत्वायोगात् आनर्थक्यं स्यादित्याशङ्क्य * क्षरणेत्यु-
क्तम् * क्षरणात्मकत्वसिद्ध्यर्थं प्रागाज्यप्राप्त्यभ्युपगमे एवा-
र्थक्यपरिहारायाज्येन सह विकल्पमानं द्रवद्रव्यमात्रं विधीय-

१ संयोगादिति २ पु० पा० ।

तद्दस्याशयः । ननु नामधेयत्वेनैवानर्थक्यपरिहारो भविष्य
त्याह * न चेति * क्षरणात्मकत्वविशेषस्य धात्वर्थपर
त्वैव सिद्धेर्नामानर्थक्यमित्यर्थः । आघारणस्य च तस्याघार
त्वाश्रुत्या प्रयाजार्थजौहवचतुर्गृहीताज्यसंस्कारार्थत्वाव
संस्काराणां च संस्कार्यनिष्ठत्वात्तद्विशेषेणैव विशेषसिद्धे
क्यमित्याह * न चेति * आघारशब्दे गुणविध्यर्थे ऽपि
लक्षणा नास्तीत्यभिधानार्थमाघार इति भाष्यं गुणावि
भिमतस्याघारशब्दस्य द्वितीयान्तत्वाद् गुणत्वाभिधानाश
माशङ्क्य व्याचष्टे * श्रुत्यैवेति * विधित्सित
मन्यच्छास्त्रं यस्मिंस्तदपि नामधेयमिति पूर्व
स्मिच्छब्दानुषङ्गेण च सूत्रं योजयन् सिद्धान्तमाह *
पूर्वसूत्रनिर्दिष्टगुणपरामर्शार्थत्वेन तच्छब्दं व्याख्यातुं
गुणेत्युक्तम् अनेन च स विधित्सितो गुणः प्रख्याप्यते प्राप्य
विग्रहो दर्शितः । अग्निप्रजापत्योर्द्वयोः शाखान्तरप्राप्तयोः
चनं प्रजापतिपरिसंख्यार्थमित्याशङ्क्य प्रत्यक्षश्रुतपरिसंख्या
षत्वापत्तेः परिसंख्येयस्य च विध्यानर्थक्यापत्तेरयुक्ता
त्याभिधानार्थं प्रजापतिनिवृत्त्यर्थमित्यादिभाष्यं व्यर्थत्वोक्त्या
तं भवति इह च सोऽन्यतः प्राप्तो यदग्नये चेति दुष्टीव
त्वादिहापि देवताव्यवस्थापरे वाक्ये वाक्यान्तरतः प्रा
ऽनूद्यतद्दस्याघाराग्निहोत्राधिकरणे वक्ष्यमाणत्वात् भाष्य
कृतोऽपि यदग्नये च प्रजापतये च सायं जुहोतीत्येतद
न्यशाखान्तरमभिमतं लक्ष्यते भिन्नपदोपात्तस्यापि देवता
शब्दात् परस्परसापेक्षस्याख्यातान्वयप्रतीतेः । प्रत्येकं वि
राभावात् वाक्यभेदानापत्तिश्चादीनां हि निपातोपसर्गाण
पदत्वे ऽपि केवलाप्रयोगित्वेन स्वातन्त्र्येणार्थप्रतिपादकत्व
दान्तरार्थातिशयद्योतनार्थत्वावधारणात् तत्समभिव्याहृत
पदस्याख्यातपदस्य वा तन्नैरपेक्ष्येण स्वार्थासमाप्तत्वात् पद
यानुपपत्तेश्चशब्दोपहितयोरेवाग्निप्रजापतिशब्दयोराख्यात
रेतरनिरपेक्षयोः प्रत्येकं विधिव्यापारो युज्यते अत एव
श्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च
तस्य द्वादशशतं दक्षिणेति चशब्दसमुच्चितानां[2] दक्षिणा
धेनुर्दक्षिणेति श्रुतायाः धेन्वाः प्राकृतकृत्स्नदक्षिणाविव

---

१ तत्पूर्वसूत्रगतनामधेयपदानुषङ्गेणेति २ पु० पा० ।

२ चशब्दयोगेन समुच्चितानामिति २ पु० पा० ।

शमे वक्ष्यते तत्र ह्यथैष भूर्भुवःस्वरग्निष्टुदे सर्वस्तस्य विश्ववत्यः स्तो-
त्रीया धेनुर्दक्षिणेत्युदाहृत्य किं धेनुर्गवां निवर्त्तिकोतकृत्स्नाया द-
क्षिणाया इति सन्दिग्धे यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणाभि-
धानेन न्यायेन दक्षिणासम्बन्धे प्रथमं गवादीनामुपादानेनोद्देश्यत्वाव-
गमात् उद्देश्यगतस्य चशब्दोक्तस्यापि साहित्यस्याविवक्षितत्वात् प्र-
त्येकं दक्षिणात्वावगतेर्गोत्वैकार्थसमवेतदोग्ध्रीत्ववाचिना धेनुशब्दे-
न गवामेव दोग्ध्रीणां निवृत्तिप्रतीतेरेकवचनेन च द्वादशशतसंख्या-
निवृत्तिप्रतीतेर्यथा सौर्यं चरुं निर्वपेदिति निर्वापलक्षणगुणशब्दे नै-
ष्ठिको विध्यन्तो नियम्यते तथा धेनुशब्देन गोमात्रनिवृत्तेर्नाश्वादि-
निवृत्तिरिति तस्य धेनुरिति गवां प्रकृतौ विभक्तचोदितत्वात् सामा-
न्यात्तद्विकारः स्यात् यथेष्टिर्गुणशब्देनेति सूत्रेण पूर्वपक्षयित्वा सर्वस्य
वा क्रतुसंयोगादेकत्वाद्दक्षिणार्थस्य गुणानां चार्थैकत्वादर्थे विकृतौ
श्रुतिभूतं स्यात्तत्समवायो हि कर्मभिरिति सूत्रेण सिद्धान्तितं तस्या-
र्थः सर्वस्य क्रतुदाक्षिण्यस्य धेनुर्विकारो बाधिका कुतः तस्य विश्व-
वत्यः स्तोत्रीया इति तच्छब्दानुषङ्गेण तस्य भूनाम्नः क्रतोर्धेनुर्दक्षि-
णेति कृत्स्नक्रतुसंयोगाद्विकृतौ भूनाम्नि क्रतौ प्राकृतेऽर्थे दक्षिणा-
त्मके कार्ये श्रुतितो भूतं प्रत्यक्षश्रुत्या प्राप्तं धेनुद्रव्यमानुमानिकं स-
र्वदक्षिणाबाधकं स्यात् । ननु ज्योतिष्टोमे बहुद्रव्यानतानामृत्विजां
कर्मसम्बन्धावगतेस्तद्विकृतौ भुव्यप्येकद्रव्यानतानां कर्मसम्बन्धो न
युक्त इत्याशङ्क्य * तत्समवायो हीत्युक्तम् * तया दक्षिणया ऋ-
त्विजां कर्मसम्बन्धावधारणात् एकेनापि द्रव्येण दक्षिणात्वेन श्रुते-
नानतानां कर्मसमवायो युक्त इत्यर्थः । ननु गवादिद्रव्यजन्यानाः-
मानतीनां भेदाश्च गोजन्यानत्यर्थं विहितया धेन्वाश्वादिनिवृत्तिर्यु-
क्तेत्याशङ्क्यैकत्वाद्दक्षिणार्थस्येत्युक्तम् । ऋत्विगानत्युपायापेक्षायामृ-
त्विग्भ्यो दक्षिणां ददातीत्यानतिसाधनवाचिदक्षिणाशब्दस्य ददात्य-
न्वयाद्दक्षिणायाश्चोपादेयत्वेन विवक्षितैकसंख्यत्वात् तदर्थस्य प्रयो-
जनस्यानमनस्याप्येकत्वमित्यर्थः । ननु दक्षिणां ददातीत्येकवच-
नश्रवणेऽपि गौश्चाश्वश्चेत्यादिवाक्ये दक्षिणासमुच्चयप्रतीतेस्तत्प्र-
योजनानतिभेदोऽवसीयतइत्याशङ्क्य गुणानां चार्थैकत्वादित्युक्तं
चशब्देनेतरेतरसहितानामेव गवादीनां दक्षिणात्वप्रतीतेस्तस्य द्वादश-
शतं दक्षिणेत्येकवचनाच्च समुच्चितानामेव दक्षिणात्वमित्यर्थः । गवा-
दीनामुद्देश्यत्वात् साहित्याविवक्षाशङ्कानिरासायोपादेयत्वज्ञापना-
र्थङ्गुणशब्देनाभिधानं दक्षिणात्वं च गवादीनां प्रत्युद्देश्यमिति ज्ञाप-
यितुमर्थशब्देनोक्तं ततश्च यथैव गौर्दक्षिणेति न प्रत्येकं दक्षिणाशब्द

सम्बध्यते तथाऽऽदित्याय जुहोति प्रजापतये जुहोतीति प्रत्येकमाख्यात
सम्बन्धाभावाच्च वाक्यभेदापत्तिः।न चैतावताग्नीषोमादिवत्सम्भूय
तयोर्देवतात्वापत्तिः पृथक्चतुर्थीनिर्देशेनेतरेतरनिरपेक्षयोरेव देवता
त्वप्रतीतेः पदान्तरसम्बन्धे हि चशब्दात्साहित्यं प्रतीयते न विभ
क्तिसम्बन्धे तत्सम्बन्धात् यागपरिपूर्णस्य पदान्तरेण चशब्देनान्व
यानुपपत्तेः । तस्माद्देवतयोरेवात्र चशब्दात्साहित्यमवगम्यते ।
सहितयोर्देवतात्वं न चाग्निसूर्यवाक्याभ्यां देवताविधौ तत्प्रकाश
नसमर्थयोर्मन्त्रयोर्लिङ्गादेव प्राप्तेरग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा
सायं जुहोति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातर्जुहोतीति मन्त्र
विध्योस्तदर्थशास्त्रसद्भावेनानर्थक्यं शङ्कनीयम् अग्निर्ज्योतिर्ज्योति
सूर्यः स्वाहेति सायं जुहोति सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रात
र्जुहोतीति च मिश्रलिङ्गमन्त्रविधिपर्युदस्तयोः केवललिङ्गयोः प्रतिप्रस
वार्थं विधानार्थवत्त्वोपपत्तेश्चतुर्थीतश्च मन्त्रवर्णदौर्बल्यात् प्रजापते
रपि च यज्ञसाधनत्वधर्मसंयोगात् अङ्गतेर्वा गत्यर्थादग्निशब्द
त्पत्तेर्हिरण्यगर्भत्वसंस्तवसामान्याद्वाग्निशब्देनैन्द्रीवद्गौण्यावृत्त्या
धानोपपत्तेर्न चतुर्थीसद्भावे देवताप्रापकत्वं युक्तं मिश्रलिङ्ग
न्त्रपक्षे च द्विदेवत्यहोमापत्तेः केवलस्याग्नेर्देवतात्वाभावान्नित्य
दनुवादो न युक्तः । प्रजापतिमात्रविधेश्चैकेनैव वाक्येन सिद्धेरन्यत
वाक्यानर्थक्यं व्यवस्थानपेक्षणाच्च सायम्प्रातःशब्दावनर्थकौ स्या
तस्मादाधाराग्निहोत्राधिकरणे मान्त्रवर्णिकदेवताभिधानं परमत
लि द्रष्टव्यम् । ततश्च ब्राह्मणेनाग्निसूर्ययोः शुद्धयोर्देवतात्वविधा
च्छुद्धावेवाग्निसूर्यौ द्रव्यत्यागवेलायामुद्देष्टव्यौ न मन्त्रवर्णानुसा
ज्योतिष्ट्वगुणविशिष्टाविति यदग्नये चेति शास्त्रान्तरेण सायं ह
ऽग्निविधानाच्चतुर्गृहीतं वा इत्यनेनाघाराख्ये कर्मणि द्रव्यविधा
च्चाग्निहोत्राघारशब्दयोर्विधानार्थत्वं युक्तमित्यभिधानार्थं यदग्न
चेत्यादिभाष्यं दर्विहोमोपांशुयाजयोर्गुणविधिः पूर्वपक्षोक्तस्य क
न्तरगतेन गुणविधिना वैयर्थ्यानापादनादयुक्तमित्याशङ्क्य ॥
त्रेति ॥ पूर्वपक्षिणा उक्तमपि सायंहोमे देवताविधिमात्र
च द्रव्यविधिमापाद्यतदुक्तमित्येवं भाष्यं समाधातुमग्नि
त्रशब्दस्य तावत् परमार्थतो विधानार्थत्वं नास्ती
ह ॥ उच्यतइति ॥ यद्याग्निहोत्रशब्दो नामार्थत्वात् विधे
समर्पकः स्यात् ततोऽस्य विधेयगुणविषयभूतकर्मापेक्षिणः प्र
प्रातर्होमे दूरस्थेऽपि वा दर्विहोमे निवेशः स्याद्विशिष्टविधौ गौर

१ यागपरिपूर्णस्य पदस्येति २ पु० पा० ।

:। कर्मानुवादेन गुणविधानस्य युक्तत्वात् यदग्नये चेति त्वन्ये-
ात्रेणाग्नेर्होत्रेण हूयमानेन हविषा सम्बन्धे कृते प्रवर्त्तमान-
ान प्राप्तार्थत्वादग्निहोत्रपदे ऽनुवादलक्षणं स्पष्टमित्यर्थः। न केवलं
ार्थविधानात्[1] गुणविध्यसम्भवः किं त्वनुवाद्यकर्माभावादपीत्याह
अनूद्येति * ततश्च प्रकृतकर्मानुवादेन गुणविधावुत्पत्तिशिष्टसूर्या-
ाधेन प्रातर्होमे गुणविध्ययोगात् सायं होमे गुणविध्यापत्तेस्तत्र
ग्नेः शास्त्रान्तरेण प्राप्तेः सिद्धा तत्प्रख्यतेत्याह * प्रकृतमिति *
तत्प्रख्यतापरिहारायैवाप्रकृतौ विधिर्भविष्यतीत्याशङ्क्याह *
यत्रेति * प्रत्यभिज्ञायमानविषयत्वं नानुवादानां प्रकृतपरिग्रहस्य
ाय्यत्वादित्यर्थः। न केवलं तत्प्रख्यत्वात् प्रत्यभिज्ञायमानदोषाभ्यां
ृता ऽप्रकृतानुवाद्यकर्मालाभः किं त्वप्राप्तत्वादपीत्याह * नेति *
णविधित्वाभावे तर्ह्यग्निहोत्रवाक्यस्य का गतिरित्याशङ्क्याह *
ःमादिति * ननु यदग्नये चेत्यादीनां ऋजुमाघारयतीत्येवमादी- २९
गुणसंक्रान्तिशक्तित्वात् कर्मविधायित्वासम्भवे ऽपि सायं च प्रा-
श्च जुहोतीत्यस्यानुपादेयकालसम्बन्धादग्निहोत्रं जुहुयात्स्वर्गकाम
यस्य चानुपादेयफलसम्बन्धाद्यावज्जीवमग्निहोत्रं जुहोतीत्यस्य
ानुपादेयनिमित्तसम्बन्धादूर्ध्वमाघारयतीत्यस्य चानुपादेयदेशस-
न्धात् प्रकरणान्तरन्यायेन कर्मविधायित्वात् तद्विहितयोः कर्म-
ोरग्निहोत्राघारशब्दौ गुणविधी भविष्यतइत्याशङ्क्याह * साय-
ाति * सिद्धान्ते तावदग्निहोत्राघारवाक्यविहितयोः कर्मणोः प्र-
ाभिज्ञानात् प्रकरणान्तरन्यायाभावात्पूर्वपक्षे ऽपि विशिष्टविधेः
व चिदनभ्युपगमात् केवलस्य गुणस्य कर्मणो वा विधेयत्वापत्तेर्न
करणान्तरन्यायः सम्भवतीत्याशयः। ननु भिन्ने जुहोतीत्यादिष्व-
ाहितदेवताकेषु दूरस्थेषु दर्विहोमेषु कर्मप्रत्यभिज्ञाभावेनानुपादेय-
ामित्तादिसम्बन्धेन च प्रकरणान्तरन्यायात् कर्मविधिप्रतीतेस्तत्र
वताविधिर्भविष्यतीत्याशङ्क्याह * दूरस्थस्येति * तेषामसम्बन्ध-
यवायेनाबुद्धिस्थत्वान्नानुवादः सम्भवतीत्यर्थः। कुण्डपायिनामिदं
ौण्डपायिनं कुण्डपायिनामयनाख्यं सत्रं तत्सम्बन्धिनो होमस्य
ासमग्निहोत्रं जुहोतीति विहितस्य असम्बद्धव्यवायेनाबुद्धिस्थत्वा-
द्यदग्नये चेत्यादिदेवताविधौ दध्ना जुहोतीत्यादिद्रव्यविधौ चानु-
ादो यथा न युक्त इत्यातिदेशिककर्मसम्बन्धाङ्गीकरणेन दृष्टान्त-
सिद्धिः। यदाहवनीये जुहोतीत्यादौ द्रव्यदेवतस्योपदेशतो ऽतिदे-

१ प्राप्तार्थत्वादिति पु० पा०।

२ असंबद्धपदव्यवायेनेति पु० पा०।

ज्ञातो वा लाभासम्भवेनारूपत्वात्कर्मणो विध्यनुपपत्तेरगत्या द्रव्य
नुवादाश्रयणमित्याशयः । एवं कर्मानुवादेन गुणविधित्वे ऽग्निहो
वाक्यस्य पूर्वपक्षयुक्ते निरस्ते यदि कश्चिद् गुणविशिष्टकर्मविधिमङ्गी
त्य प्रत्यवतिष्ठेत तं प्रति अन्यतो विशेषणांशस्य विशेष्यांशस्य
प्राप्तिसम्भवे विशिष्टविधिगौरवाश्रयणमयुक्तम् । यदुभये चेति
त्रान्तरेण चोभयवादिसिद्धगुणविधित्वेनेह विधित्सितस्य प्रा
त्वात् व्यर्थं विशिष्टविधानमित्युत्तरद्वयं वाच्यमित्याह ॥ वि
धीयतामिति ॥ विकल्प्यते ऽन्यथा पूर्वपक्षो रच्यतइत्य
देवताधिकरणे देवताप्राधान्यस्य निषेध्यमानरूपतया होत्रशब्दा
धेयस्य हूयमानस्याग्न्यर्थत्वाभावात् प्रकृतिविकारभावायोगाच्च च
र्थीतदर्थार्थबलिहितसुखरक्षितैरिति चतुर्थीसमासलक्षणाभाव
व्यधिकरणबहुव्रीहेश्च नियतविषयत्वाच्च चतुर्थीबहुव्रीहिर्युक्त इत्य
ह ॥ नेति ॥ समासान्तरं तर्हि भवत्वित्याशङ्क्याह ॥ न चेति
ननु शेषलक्षणाया अपि षष्ठ्याः सम्प्रदानसम्प्रदेयलक्षणसम्बन्ध
शेषनिष्ठत्वसम्भवाद्देवतायाश्च सम्प्रदानशब्दवाच्यं त्यज्यमान
व्योद्देश्यत्वप्रतिग्रहीतृत्वसमुदायैकदेशेन त्याज्यद्रव्योद्देश्यत्वेन
तिग्रहीतृत्वांशाभावे ऽपि समुदायलक्षणया सम्प्रदानत्वोपपत्तेः षष
तत्पुरुषेण देवताविधिर्भविष्यतीत्याशङ्क्याह ॥ य इति ॥ वि
लक्षणानुपपत्तेरिति भावः । षष्ठीसमासाश्रयणे ऽपि व्यधिकरण
हुव्रीहेरसामञ्जस्यात्तत्पुरुषो ऽभ्युपगन्तव्य इति तत्पुरुषादित्यनेन
यस्मिन्नग्नये होत्रं होमे तद्धोमात्मकं कर्माग्निहोत्रशब्दवाच्यं भ
तीति भाष्येण सिद्धान्ते ऽपि चतुर्थीबहुव्रीहिराश्रितः स कथं स
ञ्जसः स्यादित्याशङ्क्याह ॥ अनुवाद इति ॥ नामधेयत्वे ऽनुवा
त्वात्तस्य च प्रमाणान्तरपारतन्त्र्यादन्यतः सिद्धे देवतात्वलक्षण
सम्बन्धविशेषे तल्लक्षणार्था सम्बन्धमात्रवाचिन्यपि षष्ठी हूयतइति
कर्मणि जुहोतेर्धातोर्हुपामाश्रुभसिभ्यस्त्रा इत्यौणादिके त्रन् प्रत
कृते सार्वधातुकार्द्धधातुकयोरिति च गुणे कृते होत्रशब्दव्युत्प
रग्निहोत्रशब्दस्य बहुव्रीहिं विना जुहोतिसामानाधिकरण्यायोगाद्व्य
धिकरणे बहुव्रीहिः कण्ठेकालवत्कथ्यते इत्यर्थः । यथा ऽश्वार्थो घ
इति प्रमाणान्तरसिद्धतादर्थ्यविवक्षायामपि प्रकृतिविकारभावा
वेन तदर्थसमासायोगात् तादर्थ्यलक्षणार्थः षष्ठीतत्पुरुषः कथ्यते
दृष्टान्तार्थः । ननु यद्यपि गौरवापत्तेस्तत्प्रख्यशास्त्रान्तरसद्भाव
विधिर्न युक्तः । नापि च सायं होमे गुणविधिः द्रव्यस्यानुवादा भा
च्च न दर्विहोमे गुणविधिः तथापि प्रकृते प्रातर्होमे देवताविधिर्भवि

ाशङ्क्याह * विधातव्यश्चेति * बहुव्रीह्यर्थस्य होमस्य प्राप्तत्वा-
हितोष्णीषादिवत्तद्विशेषणभूतयोर्द्रव्यदेवतयोर्होत्राग्निपदार्थयोः
बन्धो जुहोतिपरेण प्रत्ययेन विधातव्यः स्यादित्यर्थः। समासा-
त्त्यादिदोषसमुच्चयार्थश्चशब्दः। ननु प्रातर्होमे ऽग्नेरविधाने नि-
ाभावान्नाग्निहोत्रनामधेयानुवादः सम्भवेदित्याशङ्क्याह * ए-
शे ऽपि चेति * अग्निहोत्रवाक्योत्पादितस्य कर्मणः सायं च
श्च जुहोतीति वाक्यान्तरवशात्सायम्प्रातरावृत्तावपि ज्योतिष्टोमव-
रूपभेदाभावात् तदेकदेशे सायं होमे ऽग्निदेवत्यत्वज्ञानान्नाग्नि-
ा नामधेयानुवादो ऽपगच्छतीत्यर्थः। एतच्चाहवनीये होमो
रयोरिति गार्हपत्यान्वाहार्यपचनयोर्होमनिषेधाद् बह्वृचब्राह्मणे
च शतानि विंशतिश्च संवत्सरे सायमाहुतयः सप्तशतानि
ातिश्च संवत्सरे प्रातराहुतयः तावत्यो ऽग्नेर्यजुष्मत्य इष्ट-
संवत्सरेणाहास्याग्निना चित्येनेष्टं भवति य एवं वि-
ाग्निहोत्रं जुहोतीत्याहवनीयाहुतिसंख्ययैवाग्निहोत्रस्य स्तुत
त् प्रातर्होमे चाहवनीये ऽग्निदेवत्यहोमाभावात्तत्पक्षाश्रयणेनो-
द्वे आहवनीये जुहोति चतस्रो गार्हपत्ये चतस्रो ऽन्वाहार्यप-
इति तु दशाहुतिपक्षे। द्वे आहवनीये द्वे गार्हपत्ये द्वे आन्वाहार्य-
नइति षडाहुतिपक्षे वा प्रातर्होमे ऽपि गार्हपत्यान्वाहार्यपचन-
ग्नये गृहपतये स्वाहा ऽग्नये संवेशपतये स्वाहेत्यादिमान्त्रवर्णिका-
देवत्यहोमसद्भावादग्निहोत्रशब्दप्रवृत्तिः सुतरां युज्यते यथा च
पदार्थसम्बन्धविधानादिक्लेशापत्तेर्नाग्निहोत्रशब्दस्य प्रकृते ऽपि-
र्होमे गुणविधित्वं युक्तं तथाघारशब्दस्यापि क्षरणसमर्थद्रव्य-
त्रवाचित्वं कल्पयित्वा तस्यान्यत्र विनियुक्तस्यापि द्वितीयामात्रे-
संस्कार्यत्वं कल्पयित्वा तदन्यथानुपपत्त्योपांशुयाजाङ्गत्वकल्प-
ाघारयति परेण वा प्रत्ययेनोपांशुयाजभावनामनूद्याघाराख्य-
याविधिकल्पने ध्रौवाज्यप्राप्तापादितक्षरणात्मकत्वोपांशुयाजभा-
ानुवादेन वा द्रव्यविधिकल्पनेति क्लेशापत्तेर्नाघारशब्दस्योपांशु-
ाख्येन कर्मणा सह तदङ्गभूतार्थाभिधानेनान्वयो युक्त इत्याह
आघारस्येति * तत्रश्चोपांशुयाजे द्रव्यविध्यसम्भवात् आघार-
ोत्याख्यातविहिते कर्मण्याघारशब्दस्य द्रव्यविधित्वापत्तेस्तत्र च
ुर्गृहीतवाक्येनैव द्रवद्रव्याज्यप्राप्तेः। प्रयाजाज्यसंस्कारार्थे चाघा-
द्रव्यान्तरानपेक्षणात्पयःप्रभृति द्रवद्रव्यमात्रविधानानुपपत्तेः त-
ख्यशास्त्रान्तरसद्भावो ऽपरिहार्य इत्याशयः। नन्वस्य संस्कारकर्मत्वे
ति यद्भाष्यकृतोच्यतइत्यादिना घारणक्रियया प्रयाजद्रव्यस्यैकदेश-

घाचितेत्युक्ते ननूद्भिदादिसिद्धान्तन्यायेन तृतीयान्ततयैव सामा
धिकरण्यात् कर्मनामत्वं सेत्स्यतीत्याशङ्कानिरासार्थं नन्विति भ
व्याचष्टे * न चेति * निरूढार्थत्वेनैषां न सामानाधिकरण्यं
र्णायकमितिभावः । ननु यथा वै श्येन इत्याद्यर्थवादावगतो व
र्थः कर्मणि प्रवृत्तिनिमित्तं भविष्यतीत्याशङ्क्याह * वत्यर्थोपा
नेन चेति * श्रुतिवृत्त्यपेक्षया विप्रकृष्टापि लक्षणा वाच्
स्वसम्बन्ध्युपस्थापनात् सन्निकृष्टा गौणता तु वाच्यल
तेन वाच्यसम्बन्धिनोऽर्थस्योपस्थापनात् अत्यन्तविप्रकृष्टा वत्यर्थो
दानेन कर्मणि प्रवृत्तौ गौणता स्यात् सा चात्यन्तविप्रकृष्टेति योज्य
ननु श्येनादेर्यागसम्बन्धानवगमात् कथं लक्षकतेत्याशङ्क्याह * स
नं हीति * उद्भिदादीनामिवेति दृष्टान्तोपादानेन तद्वदेव ज्यो
ष्टोमे गुणविधानस्य सूचितत्वात् तदुद्देशेन विधीयमानस्य श्येन
स्तत्साधनत्वप्रतीतिः । स्वसाध्यलक्षकत्वं युक्तमिति भावः । नः
सति वैदिकत्वेन श्येनादिशब्दानामपि निरूढलक्षणापत्तेः गुणाद
नत्वान्मतुप्लोपोऽन्वाख्यातव्यः स्यादित्याशङ्क्याह * विनैवेति
मतुप्लोपः स्मर्यतइति सिद्धान्ते दर्शनात् स्मर्यमाणेनेति
कल्पनीयः । गुणवचनेषु शब्दस्वभावनिबन्धनत्वात् लक्षणाया गुण
ब्दस्य गुणिनि वृत्तिप्रतीतेर्वाचकत्वशङ्कायां तन्निरासार्थं मतुः
पान्वाख्यानं श्येनादिशब्दानां तु पदान्तरसामानाधिकरण्यनिब
नत्वात् मतुल्लोपानन्वाख्यानेऽपि वाचकत्वशङ्काभावात् तन्निरा
र्थमन्वाख्यानमनर्थकमित्याशयः । मत्वर्थलक्षणायां च श्रुत्यर्थस
वाक्यार्थान्वयित्वेनात्यागाछ्रुत्यर्थस्य प्रतीतिमात्रौपाधिकत्वेन वाच
र्थान्वयाभावात् त्यागापत्तेर्मत्वर्थलक्षणैव ज्यायसीत्याह * किं चे
मत्वर्थस्य वैशिष्ट्यस्य यज्यन्वयमात्रात्सिद्धेः श्येनप्रातिपदि
तात्पर्याभावेन श्रुत्यर्थप्राधान्याविघातात् स्वार्थपरश्येनौपयिक
वा पाताख्यानान्वयासम्भवेऽपि[1] यजिसामानाधिकरण्योत्तरः
तदन्यथानुपपत्त्या लक्षणेति सामानाधिकरण्यरूपैकवाक्यवश
त्युक्तं गौणत्वे तु श्रुत्यर्थस्य वाक्यार्थानन्वयात् श्येनप्रातिपदि
तात्पर्यानुपपत्तेर्वत्यर्थ एव सादृश्ये तात्पर्यकल्पनां विनाख्यात
वायोगात् वत्यर्थाकल्पनापुरःसराख्यातान्वयसिद्ध्यर्थं पदं
थामेवासौ श्रुत्यर्थतात्पर्यत्यागेन लक्षणीय इति श्रुत्यर्थबाधापत्ते
र्थाद् दुर्बल इत्यर्थः । श्लोकं व्याचष्टे * गुणविधिपक्षे हीति
तेन श्येनादिनेति भाष्येण सौत्रं तच्छब्दं यस्मिन् गुणोपदेश

१ स्वार्थपरस्यैवाख्यातान्वयासंभवेऽपीति २ पु० पा० ।

त्रोनादृष्टविधित्सितगुणपरामर्शिनमङ्गीकृत्य विशब्दं च भेदवा-
मङ्गीकृत्य तेन विधित्सितेन च श्येनादिरूपेण गुणेन भिन्नार्थ-
व्यपदेशः सङ्कीर्त्तनं यस्य श्येनादिपदस्य तदपि नामधेयमिति ना-
प्रपदानुवृत्त्या सूत्रं योजितं तत्र कथं भिन्नार्थत्वावगतिरित्यपेक्षिते
ादिशब्दानां कर्मणि प्रवृत्तिनिमित्तप्रदर्शनार्थेन सादृश्यव्यपदेशादि-
ष्टेभाष्येणोक्तमार्थवादिकं श्येनसादृश्यमेव भिन्नार्थत्वावगताव-
कारणमिति प्रदर्शयन् सिद्धान्तमाह * तदिति * उपपत्तिरि-
ावुपशब्दस्य सादृश्यार्थत्वदर्शनात् उपमीयते सादृश्येनावगम्यते
ति व्युत्पत्त्या सादृश्यावच्छेदकमुपमाशब्देनोक्तं तथा यद्वस्तु
ते तद्भिन्नया सत्या तस्माच्छ्येनद्रव्यरूपोपमानेनोपमितस्य श्ये-
यजेतेति श्येनशब्दार्थस्य श्येनद्रव्याद्भेदो ऽवसीयतइत्यर्थः ।
श्येनशब्दार्थस्य पक्षिविशेषस्योपमानात् पक्षिविशेषादभेदे ऽपि
ा यागस्य ततो भेदात्सादृश्येन स्तुतिर्भविष्यतीत्याशङ्क्य विधे-
त्युक्तम् । एतदधिकरणपूर्वपक्षे याजिना ज्योतिष्टोममनूद्य तत्र
ादिगुणमात्रविधानमभ्युपगमात् तदेव स्तोतव्यं न याग इत्याश-
ननु स्तुतिः स्वरूपसत्यत्वानपेक्षणात् यथा कथं चिदुपपत्स्यते
ाशङ्क्य न हीत्युक्तं सादृश्यद्वारा स्तुतिर्भेदाभावे सादृश्यस्योपा-
त्रत्वेनापि वक्तुमशक्यत्वात् निरालम्बना स्यादित्याशयः । ननु
ं गगनाकारं सागरः सागरोपम इत्यादावभेदे ऽपि सादृश्येन
तेर्दृष्टेत्याशङ्क्य * सदेत्युक्तम् * काल्पनिकभेदाश्रया स्तुतिर्गत्या
चिदङ्गीक्रियते न सर्वदेत्यर्थः । श्लोकं व्याचष्टे *
ादिवाक्येषु हीति * सदेति पदं शङ्कानिरासार्थत्वेनार्थोच्यते-
देना व्याख्यातम् । श्रुतिर्हीति भाष्यं नामधेयत्वे वत्यर्थलक्षणया
र्थत्यागापत्तेरयुक्तमाशङ्क्योपमासामञ्जस्यपरत्वेन व्याचष्टे * ना-
यत्वे त्विति * लक्षणेति भाष्यं मत्वर्थलक्षणाया वत्यर्थलक्षणा-
याश्वस्त्वस्योक्तत्वादयुक्तमाशङ्क्य वत्यर्थलक्षणायाः पक्षद्वयसाम्ये-
र्येनुयोज्यत्वाद् गुणविधौ च काल्पनिकभेदाश्रयणत्वेनात्यन्ता-
ाज्ञत्वात् मत्वर्थलक्षणादोषाधिक्याभिप्रायत्वेन व्याचष्टे * इतर-
हीति * सामानाधिकरण्यसिद्ध्यर्थं श्येनवता यागेनेति मत्व-
ावल्लक्षयितव्यः कर्माङ्गभूतस्य च श्येनस्य इतरश्येनैकजातीय-
भूयो ऽवयवसामान्ये योगो जात्यन्तरस्य तदिति भिन्नजातीया-
त्वेनोक्तस्य जातिसादृश्यस्याभावात् काल्पनिकभेदाश्रयणे ऽपि
णि व्यापृतस्य भ्रातृव्यादातृत्वायोगादभिचारार्थस्य च यजमानभ्रा-
प्रस्यादाने योग्यत्वस्याप्यभावात् सादृश्यानुपपत्तेरर्थवादोक्तस्यापि

वस्तुतो सम्भवात्तदालम्बनसिद्ध्यर्थं भ्रातृव्यादानसाधनद्वारा तदङ्गभूते श्येने वस्त्वर्थोऽपि लक्षयितव्य इत्यर्थः। ननु यागस्य भ्रातृव्यादानसाधनत्वेन श्येनसादृश्योपपत्तेर्विधेयश्येनस्तुत्यर्थायामिव वेतसावकास्तुत्यर्था स्तुतिर्भविष्यतीत्याशङ्क्याह * न चेति * यागविधेर्निराकर्तुमशक्यत्वात् स्तुतेर्नान्यत्र सञ्चारो युक्त इत्यर्थः। एतदेव विवृणोति
१ * अविधेयेति * ननु यागविधावपि तद्विशेषणतया द्रव्यस्यापि विधेयत्वोपपत्तेः स्तुतिभाक्त्वं भविष्यतीत्याशङ्क्य नामधेयत्वेन गतिसम्भवे विशिष्टविधिगौरवस्यानाश्रयणीयत्वात् द्रव्यस्याविधेयत्वमुक्तं सामानाधिकरण्यार्थं च द्रव्येण मत्वर्थे यागं लक्षयित्वा यागस्तुतिं द्रव्ये सञ्चारयितुं पुनरपि यागेन द्रव्यलक्षणाद्विप्रकर्षोऽस्मिन् पक्षे स्यादित्याह * पुनरपि चेति * यथा च लौकिकप्रयोगात् श्येनशब्दस्य द्रव्यवचनत्वं मुख्यं तथा वैदिकात् सामानाधिकरण्याद्यागवचनत्वमपि मुख्यं वक्तुं शक्यमिति श्रुतिर्हीति भाष्यं प्रौढया यथाश्रुतं व्याख्यातुमाह * समभिव्याहाराच्चेति * लक्षणेत्यादिभाष्यम् अन्यथा व्याचष्टे * विधौ चेति* गुणे श्येनशब्देन विहिते विधौ मत्वर्थलक्षणा स्यात् इत्येवमनेन भाष्येण व्याख्यातम् । एतदेवं भाष्यं गुणशब्देषु मतुल्लोपस्य विहितत्वात् मत्वर्थलक्षणा युक्ता नान्यत्रेत्यन्यथा व्याख्यातुमाह * गुणेति * नन्विवलोपस्याप्यस्मरणात् तदर्थलक्षणाप्ययुक्ता स्यादित्याशङ्क्याह * इवार्थेस्त्विति * क्लृप्तकल्पाभिप्रायौ वा भाष्यगतौ श्रुतिलक्षणाशब्दावित्यन्यथा व्याख्यातुमाह * मत्वर्थलक्षणा त्विति * दोषान्तराण्यपि भाष्यगतेन लक्षणाशब्देनोपलक्षितानीति सूचयितुम् उद्भिदधिकरणवार्त्तिकोक्तान्यागं प्रति गुणविधावभिचरन्निति फलपदस्यानुवाद्यज्योतिष्टोमयागविशेषणत्वासम्भवादानर्थक्यं सार्वकाम्यप्राप्तज्योतिष्टोमविशेषणत्वे वाक्यभेदः प्रत्ययव्यापारविप्रकर्षः धातुपारार्थ्ये यागमात्रे च गुणविधौ उत्पत्तिविशिष्टेन सह विकल्पः फलविशिष्टयागे गुणविधौ सामान्यशिष्टस्य सोमस्य विशेषविशिष्टेन श्येनादिना बाध इति दोषान् योजयति * पूर्वोक्तांश्चेति *

॥ अथ वाजपेयादिशब्दानां यागनामधेयताधिकरणम् ॥ ५ ॥

नामधेये गुणश्रुतौ स्याद्विधानमिति चेत् ॥ ६ ॥

ननु किमत्र ज्योतिष्टोमयागानुवादेन वाजपेयलक्षणगुणविधिः पूर्वपक्ष्यते, गुणविशिष्टयागविधिर्वा, तत्राद्ये कल्पे ज्योतिष्टोमक्रियातो वाजपेयक्रियाया भेदाभावाल्लिङ्गदर्शनसूत्रानुपपत्तिः । सा-

ाप्तस्वाराज्यकामानुवादापत्तेश्च । फलसम्बन्धस्याविवक्षित-
ा सूत्रस्याप्यनुपपत्तिः । द्वितीयकल्पे तु मत्वर्थलक्षणा स्यात्
न्धेन मत्वर्थलक्षणापरिहारशङ्कायामुद्भिदादिष्वपि तन्त्रस-
ुपगमेन मत्वर्थलक्षणापरिहारोपपत्तेर्गुणविधित्वसम्भवात्
वसिद्धान्तः प्रत्युद्भ्रियेत वाजं पयमस्मिन्निति बहुव्रीहिणा
भाभ्युपगमे बहुव्रीह्यान्तर्गतिगुणसम्बन्धस्य कर्मण एव श्रु-
विधानादर्थाद् गुणविधाने ऽपि वचनव्यक्त्यन्यथात्वाभावा-
त्रानुपपत्तिस्तदवस्थितेत्याशङ्क्याह *तन्त्रसम्बन्धेनेति* वि-
ावपि तन्त्रसम्बन्धेन मत्वर्थलक्षणापरिहारशङ्कोद्भिदादि-
प्रसज्यमाना तदाक्षेपेण प्रत्यवस्थानान्न दूष्यतीति ता-
। यागानुवादेन गुणविधावनूद्यमानस्य यागस्य फ-
ाधुमशक्यत्वादुभयसम्बन्धाभावेन तन्त्रत्वानुपपत्तेः । फ-
तयान्यतः प्राप्तस्य गुणवत्त्वाभिधानायावश्यं मत्वर्थलक्षणा-
शिष्टविधौ तु विध्युत्तरकालं तत्सामर्थ्यलभ्ये धात्वर्थस्य
ते करणत्वे ऽर्थाक्षिप्ते च गुणं प्रति साध्यत्वे सत्यपि वि-
ावस्थायां कारकविभक्त्यभावाद्धातुतः स्वरूपमात्रेण प्रतीत-
म्बन्धो मत्वर्थलक्षणां विना ऽपि न विरुध्यते फलसम्ब-
ालं गुणसम्बन्धाभ्युपगमे फलसम्बन्धेन साधनत्वाक्षेपात्
साधनभूतेन गुणेन समत्वात् सम्बन्धो न युज्यते गुणस-
रकालं च फलसम्बन्धाभ्युपगमे गुणसम्बन्धेन साध्य-
् साध्यभूतेन फलेन न युज्येतेति युगपदुभयसम्ब-
नार्थं तन्त्रत्वमुक्तम् । आख्यातपदस्य तन्त्रेणोभयसम्बन्धो-
तेनैव हेतुना धात्वर्थस्य साध्यसाधनभावो भवन्न विरोत्स्य-
ौ तृतीयामङ्गीकृत्य योज्यम् । ननु वैरूप्यापत्तेर्मत्वर्थलक्षणां
सम्बन्धो न युक्त इत्याशङ्क्य तेनेत्युक्तं येन कारणेन धात्व-
ाध्यसाधनत्वनिरपेक्षस्य स्वरूपमात्रेण धातुनोक्तस्योभयस-
रकालमर्थादापन्नः साध्यसाधनभावो न विरुध्यते तेन का-
ापद्विधेयव्यापारोत्तरकालं तद्धेतुकसाध्यसाधनरूपेणोभा-
र्थलक्षणया विनैव धात्वर्थस्य सम्बन्धत्वसिद्धिरित्यर्थः ।
न्धेन च विशिष्टविधावपि मत्वर्थलक्षणपरिहारसम्भवे
क्ये ऽपि चित्रात्वस्त्रीत्वविशिष्टयागविधानोपपत्तेः । स्त्री-
ाशिद्रव्यकत्वेन दैक्षसादृश्यात्तदीयेतिकर्त्तव्यतालाभेन नै-
ोपपत्तेर्न वाक्यभेदापत्तिः । आज्यैः स्तुवतइत्यादिष्वप्याज्या-
ष्टस्तुतिविधानोपपत्तेः पञ्चदशादिवाक्यैराज्याद्यनुवादेन सं-

यसाधनत्वनिरपेक्षस्य स्वरूपमात्रे णधातुनोक्तस्योभयसंबन्ध इ० २ पु० पा० ।

ख्यामात्रविधानान्न वाक्यभेदापत्तिः सूर्याग्निवाक्ययोश्च देवताद्रव
विशिष्टहोमान्तरविधायित्वोपपत्तेरग्निहोत्रवाक्याविहिते होमे शास्त्र
न्तरेणाग्नेः प्राप्त्यभावात्तत्प्रख्यता परिहर्तुं शक्या ।श्येनादिवाक्येष्वा
श्येनादिवाक्यविहितस्य च द्रव्यविशिष्टस्य यागस्य श्येनादिद्रव्योपम
नेन स्तुत्युपपत्तेस्तद्व्यपदेशतापि परिहर्त्तुं शक्येति सूचितम्।यद्यपि घृ
तादेः स्तुतावकरणत्वात्कारकविभक्तिसम्भवे चोपपदविभक्तित्वाश्र
यणस्यायुक्तत्वात् सहार्थे तृतीयाङ्गीकरणेनाज्यादिभिः सह स्तुवतः
त्येवमपि विशिष्टविधानं न युज्यते तथापि पञ्चदशादिवाक्येष्वेवाध्याह
तमभवतिपराख्यातोक्ताया यागभावनायाः स्थापनाख्यधात्वर्थावच्छेद
भ्युपगमात्तस्य च देशानपेक्षस्यानुष्ठानाशक्तेर्विध्ययोगात् प्रकरणर
गम्यस्तोत्रदेशान्विताज्यादिविध्यवगतेराज्यादिपदस्य प्रकरणप्राप्ते
स्तोत्रेण वाक्योपात्तया च संख्यया सह तन्त्रेण सम्बन्धात् संख्य
विशिष्टघृतादिरूपैकार्थविधानोपपत्तेर्न वाक्यभेदापत्तिरिति दर्शयि
तथेत्युक्तम् । आदिशब्दास्त्रिवृच्छब्दस्य बहिष्पवमानत्वयोगोक्त्यर्थः स
र्वाक्षेपे सूत्रसामञ्जस्यप्रदर्शनार्थम् * तस्मादित्यनेन * सूत्रम् र
जितं मत्वर्थलक्षणापरिहारमात्रेणाक्षेपे सत्युद्भिदधिकरणानन्तरमे
तदधिकरणारम्भोपपत्तेरिहासङ्गतिमाशङ्क्य सर्वेत्युक्तम्। कथं वाक्य
भेदादिपरिहरणीयमित्यपेक्षिते ऽस्मदुक्तप्रकारसूचनार्थं यथासम्भ
वमित्युक्तमिति । ननु पूर्वाधिकरणचतुष्टयाक्षेपेणैतदधिकरणारम्भ
सत्यपूर्ववाक्योदाहरणमनर्थकमित्याशङ्क्याह * तत्रेदमिति * वा
पेयमिसिमान्निति बहुव्रीहिणैव मत्वर्थलाभान्मत्वर्थलक्षणानापत्तेः पे
त्वस्य च वाजशब्दवाच्यान्नविशेषणत्वोपपत्तेः पानार्हत्वविशिष्टवा
रूपैकार्थविधानसम्भवाद्वाक्यभेदानापत्तेस्तत्प्रख्यान्यशास्त्रतद्व्यपदे
शयोश्चाभावात् पूर्वन्यायचतुष्टयेन वाजपेयशब्दस्य गुणविधित्वानि
सासिद्धेर्वैरूप्यापत्त्या तन्निरासायेदं वाक्यम् उदाहृतमित्यर्थः। य
प्युपदिष्टेषु धात्वर्थेषूपदेशसामर्थ्यात्करणत्वं प्रतीयते तेन चार्थात्
तृव्यापारव्याप्यत्वरूपं साध्यत्वं कल्प्यते तथाप्युपदिश्यमानावस्थ
कारकविभक्त्यभावात् साध्यसाधनत्वशून्यरूपस्वरूपमात्रेण ध
नोक्तस्य धात्वर्थस्य तन्त्रसम्बन्धेन मत्वर्थलक्षणां विनैव गुणवि
नोपपत्तेर्नास्ति मत्वर्थलक्षणेति यदुक्तं तत्रैव वृद्धसम्मतिमाह
आह चेति* यद्वा करणभूतस्यापि च यागस्योत्पत्तिवाक्यावगतक
णत्वाक्षिप्तसाध्यांशानुवादेन गुणे ऽपि विधीयमानेन मत्वर्थलक्ष
ति चित्राधिकरणपूर्वपक्षवार्त्तिकोक्तन्यायेन यागानुवादेनापि गुण
धौ मत्वर्थलक्षणानापत्तेः किमिति विशिष्टविधिमभ्युपेत्य तन्त

ध्येन मत्वर्थलक्षणापरिहारक्लेशः क्रियतइत्याशङ्कानिरासार्थो ऽयं ोकः करणेषूपदिष्टेषु सत्सु याथार्थ्यसाध्यत्वकल्पना तस्यां च गु-वधाने मत्वर्थलक्षणा न नास्ति किं त्वस्त्येति द्वौ नञौ प्रकृत्यर्थं ायतः इति न्यायेन योज्यः। विधिसामर्थ्याद्धातोः साधनत्वरूपस्या-ातिपादकत्वावगतेस्तत्सिद्धये ऽर्थाक्षिप्तस्यापि साध्यत्वस्याशाब्द-च्छब्देन गुणेनान्वयानुपपत्तेरन्यथा च क्व चिदपि मत्वर्थलक्ष-नापत्तेरित्याशयः।

तुल्यत्वात् क्रिययोर्न ॥ ७ ॥

नन्वेतल्लिङ्गोपन्यासात् वाजपेयवाक्यमेवात्रोदाहरणं प्रतीय-त्याशङ्क्याह * वाजपेये तावदिति * वक्ष्यमाणसूत्रोक्तवैरूप्यल-ान्यायमूलत्वाल्लिङ्गस्य न्यायस्य च सर्वसाधारण्यान्न लिङ्गमात्रेण ङ्कोचो युक्त इत्याशयः। भाष्यकृता सौत्रं नञं पूर्वपक्षनिरासा-त्वेन व्याख्याय गुणविशिष्टकर्मविधिपक्षे वाजपेयक्रियाया दर्शपूर्ण-सक्रियया तुल्यत्वात् दार्शपौर्णमासिकविध्यन्तापत्तेर्दीक्षयोपसद्द-ं न युक्तमिति पूर्वपक्षनिरासलिङ्गाभिधानार्थत्वेन च सूत्रं व्या-ाय नामधेयत्वे सत्यव्यक्तचोदितत्वेन ज्योतिष्टोमक्रियया तुल्यत्वा-ीक्षोपसद्दर्शनं युक्तमिति सिद्धान्तलिङ्गाभिधानार्थत्वेन व्याख्यातं त्र नामधेयपक्षवद् गुणविधिपक्षे ऽपि स्वार्थविहितदेवताशून्यत्वलक्ष-ाऽव्यक्तचोदितत्वसद्भावात् सौमिकविध्यन्तप्राप्त्युपपत्तेरौषधद्र-यकत्वेनेष्टिसादृश्ये ऽपि सत्यैष्टिको विध्यन्तः सौमिको वेति सन्देहे ीक्षोपसद्दर्शनात् सन्दिग्धेषु वाक्यशेषादिति न्यायेन सौमिकविध्य-तनिश्चयात् नानेन लिङ्गेन गुणविधित्वनिरासो नामधेयत्वं वा ध्यतीत्याशङ्क्याह * वाजमिति * विप्रतिपत्तौ हविषा नियम्येत र्मणस्तदुपाख्यत्वादित्यष्टमाधिकरणन्यायेन द्रव्यसादृश्यस्य बली-स्त्वाद्दीक्षोपसद्दर्शनस्यापि वा न्यायपूर्वत्वाद्यन्न नित्यानुवादव-नानि स्युरिति विध्यन्ताधिकरणोक्तन्यायेन यथा सम्भवं परि-ारोपपत्तेरौषधिद्रव्यकत्वे सति द्रव्यसारूप्येण वाजपेयस्य दर्श-ूर्णमासाभ्यां समानत्वादिष्टिप्रकृतिकत्वं प्रसज्येतेत्यर्थः।

एकशब्द्ये परार्थवत् ॥ ८ ॥

भाष्यकृता यदि गुणविशिष्टकर्म विधिः स्यात् ततः स्वा-र्थवत्परार्थवत्त्वाभिधानं प्रसज्येत तच्च यजेतेत्यस्य शब्दस्यै-कत्वाद्विप्रतिषिध्येतेति वदता गुणविशिष्टकर्मविधौ स्वार्थवत्

स्वविधानार्थवदपूर्वविधित्वेनोपादेयत्वेन गुणत्वेन चाभिहित याागस्य परार्थवत् गुणविधानार्थवत् प्राप्तानुवादत्वेनोद्देश्यत्वेन प्र धान्येन च अभिधानमेकशब्दे सकृदुच्चरिते धातोर्न युक्तमिति पूर्व सूत्रगतस्य नञः काकाक्षिवदिहाप्यन्वयमङ्गीकृत्य विप्रतिषेधशब्दे न नञर्थव्याख्यानात् सूत्रं योजितं तत्र गुणप्रधानत्वाद्यनपेक्षस्वरु पमात्रेण धातुनोक्तस्य यागस्य पश्चाद्गुणप्रधानत्वादिरूपापत्तावि विधीयमानावस्थायामैकरूप्येण तन्त्रसम्बन्धोपपत्तेरुक्तत्वाद्विप्रति धासम्भवमाशङ्क्याह * तन्त्रत्वमिति * अयमाशयः। धात्वर्थस्य क्रियारूपत्वात् कर्मकारकेण तत्फलेन करणकारकेण च गुणेन स साक्षात् सम्बन्धायोगात् भावनाद्वारा ताभ्यां सम्बन्धो वाच्यः। चाकारकरूपस्य क्रियारूपया भावनयान्वयः सम्भवतीति भावनान्व यायावश्यं कारकरूपता धात्वर्थस्याभ्युपगन्तव्या अशाब्देन च कार कत्वेन शाब्दे व्यवहारे अन्वयायोगात् कारकत्वरूपेणैव धात्वर्थ भावनान्वयार्थं धातुनाभिधातव्यस्तत्र कर्मत्वेनाभिधाने फलसम्ब न्धायोगात् करणत्वेन चाभिधाने गुणसम्बन्धायोगात् तन्त्रसम्ब न्धायोगात्तन्त्रसम्बन्धानुपपत्तिरिति योज्यं चैवं यदि यः फलस साधनाकाङ्क्षापूरणलक्षणो धात्वर्थसम्बन्धेनोपकारः क्रियते स एव गुणस्यापि यो वा गुणस्य साध्याकाङ्क्षापूरणलक्षणः स ए फलस्यापि[1] ततो वैरूप्याभावात् तन्त्रत्वं युक्तं तदभावे त्विह हावृत्तेरुभयसम्बन्धो लक्षणद्योतको भवतीति नन्वृत्विजो वृणी ते अहं सम्मार्ष्टीत्यादौ उपकारतुल्यत्वे ऽपि प्रत्येकं वाक्यप रिसमाप्तेरावृत्तिप्रसङ्गात् तन्त्रत्वं नास्तीत्याशङ्क्याह * द्रव्ये हीति * सकृदुक्तस्यापि वरणसम्मार्गादेः सभामध्यस्थप्रदीप वत् प्रत्येकमुपकारकत्वेनान्वयोपपत्तेर्नाख्यातावृत्तिस्तत्र कल्प्येत्य शयः। एवं तर्ह्यरुणया पिङ्गाक्ष्यैकहायन्येति क्रयवदृत्विगादिसमु दाये ऽपि वाक्यपरिसमाप्तिः कस्मान्नेष्टेत्याशङ्क्याह * आख्यातगु णत्वेति * आख्यातेन च स्वार्थस्य गुणत्वप्राधान्यरूपेणानभिधाने प्र धानभूतेनर्त्विगादिना गुणभूतेन चारुणादिनान्वयायोगात् गुणत्व प्राधान्यरूपेण स्वार्थाभिधानद्योतनायाख्यातस्य गुणप्रधानतार्थगते पचारेणोक्ता गुणभूतेन चरणादिना प्रधानभूतानामृत्विगादीनां स मुदायिकर्षमशक्यत्वात् आख्याततन्त्रत्वे ऽपि प्रत्येकं वाक्यसम प्तिरङ्गीकार्येत्याशयः। पूर्वसूत्रगतानुषक्तनञभिहितविप्रतिषेधविवर णार्थेन यदीति भाष्येण फलं प्रति विधेयतयोक्तस्य यागस्य गुणादि

१ फलस्यापीति २ पु० पा० ।

नायानुवाद्यतयाभिधानं न युक्तं तत्रोत्पत्तिविधिव्यापारपूर्वकत्वे-
ारविधिव्यापाराणां द्रव्यवत्फलस्याप्यनुत्पन्नया क्रिययान्वयायो-
त् उत्पन्नायाश्च विधानायोगात् पूर्वं फलसम्बन्धे ऽपि तद्विधाना-
यागस्यानुवाद्यत्वाद्विप्रतिषेधानुपपत्तिमाशङ्क्याह * तदिहेति *
श्च न फलसम्बन्धे यागस्यानुवाद्यतेत्याशयः। कथं विधेयत्वस्य
लत्वाभावापादकतेत्याशङ्क्याह * उद्दिश्यमानं हीति * यमर्थ-
धकृत्य प्रवर्त्तन्ते तत्प्रयोजनमिति नैयायिकोक्तलक्षणानुसारात्
युद्देश्यप्रयोजनस्य फलत्वप्रसिद्धेर्विधेयत्वं च यागमनुतिष्ठता स्वा-
ग्यं कामयितव्यमित्युपादेयत्वापत्तेः। कृत्युद्देश्यत्वाभावात्फलत्वं
स्यात् प्रत्युत विधेयत्वादङ्गतैव स्यादित्यर्थः। एवं तर्हि फलस-
न्धवत् द्रव्यसम्बन्धे ऽपि यागस्यैव सन्निकृष्टतया विधेयत्वेनैक-
यात् तन्त्रत्वं युक्तमित्याशङ्क्याह * यागो ऽपीति * यद्यपि वि-
त्वं प्रत्ययोपात्तं न नामपदमृच्छतीत्याघाराग्निहोत्राधिकरणवा-
कोक्तन्यायेन सर्वत्र धात्वर्थावच्छिन्ना भावनैव विधेया तथापि
लं सिद्धवत्कृत्य यथापाद्यत्वेन यागो विधीयते नैवं द्रव्यं सिद्धव-
त्यापाद्यत्वेनासौ विधीयते निमित्तदेशकालसंस्कार्याणां पश्चाना-
त्र सिद्धवत्कारोपपत्तेर्द्रव्यस्य च देशादिचतुष्टयान्तर्गत्यसम्भवा-
ारिशेष्यात्संस्कार्यत्वापत्तेस्तथा च सति तृतीयाबाधापत्तिरित्यर्थः।
तभाव्युपयोगाभावाच्च द्रव्यस्य च संस्कार्यता न युक्तेत्याह * न
ति * एवं यजेः तन्त्रेण फलद्रव्यपदसम्बन्धे पूर्वपक्ष्युक्ते निरस्ते
दि कश्चिद् द्रव्यपदस्येतराभ्यां तन्त्रसम्बन्धं ब्रूयात् तन्निरासायाह
एतेनेति * यागस्य द्रव्यं प्रत्युपादानस्य निरस्तत्वेन फलस्य च
गं प्रत्युपादानस्य निरासात् सुतरां द्रव्यं प्रत्यसम्भावनेत्यर्थः।
व्यस्यैवंभूतप्रत्युपादेयत्वेनैकरूप्यं फलं प्रत्युपादानस्य निराकरि-
माणत्वात् न सम्भवतीत्याशयः। नन्वेवं सति फलस्य सर्वप्रा-
न्येनैकरूप्यादितराभ्यां तन्त्रसम्बन्धो भविष्यतीत्याशङ्क्याह *
चेति * फलस्य त्वितरे प्रत्युपादानमनाशङ्क्यमेवेत्याशयः। ननु
था सोमेन यजेतेत्यादौ यागद्रव्ययोरेकस्यां भावनायामुपादानमि-
ते तथा फले ऽपि किं न स्यादित्याशङ्क्याह * एकेनेति * भा-
नायाः साध्यसाधनेतिकर्त्तव्यतारूपांशत्रयाकाङ्क्षत्वात् साधनाका-
यां धात्वर्थान्वयनिवृत्तायामपीतिकर्त्तव्यताकाङ्क्षायां द्रव्येणान्व-
यो युक्तः। फलस्य तु साधनप्रतियोगिकसाध्यत्वसिद्ध्यर्थं साधन-
त्राकाङ्क्षत्वात् एकेन साधनेन नैराकाङ्क्ष्ये कृते ऽन्यस्य तदुद्देशे-
ाविधानात् न तादर्थ्येनापाद्यता युक्तेत्याशयः। ननु द्रव्यमप्यप्राप्त-

त्वादवश्यविधेयं तस्य फलार्थत्वाभावे कैमर्थ्येन विधिः
ङ्क्याह * यथेति * प्रतिपदाधिकरणभाष्योक्तन्यायेन
व्यं भविष्यतीत्यर्थः । नन्वेवमपि द्रव्येण विशेष्यमाण
फले विधानात् तन्त्रसम्बन्धाविरोध इत्याशङ्क्याह
फलसाधनतया विधीयमानस्य यागस्य तृतीयानिर्दिष्टेन
त्वर्थलक्षणां विना विशेष्टुमशक्यत्वादिति भावः । मत्वर्थ
हारार्थं तु फले यागविधाने यागे च द्रव्यविधाने चा
वैरूप्यमपरिहार्यमित्याह * तत्रेति * नन्वर्थाद्यागस्य
साधनत्वापत्तौ द्रव्यसम्बन्धे च साध्यत्वापत्तावपि
पेणाभिधानान्न वैरूप्यापत्तिरित्याशङ्कां निराकर्त्तुं तन्
म्भवमुपसंहरति * ततश्चेति * भावनान्वयनिरपेक्षस्य
धातुमशक्यत्वात् अविधीयमानस्य च भावनान्वय
न्वयायोगाद्विधीयमानावस्थायामेव साधनरूपताभ्युपगम
शाब्देन साध्यसाधनत्वरूपेण शाब्दे व्यवहारे ऽन्वयः
शब्देनैव साध्यसाधनरूपताभिधातव्येत्यपरिहार्यं वैरूप
साध्यसाधनत्वरूपाभिधानस्य त्रिविधवैरूप्यापादकत्व
देशेत्युक्तं साध्यस्य तावत्प्रयोजनत्वात् प्राधान्यम्। साधन
सिद्ध्यर्थत्वेन पारार्थ्यात् शेषत्वापरपर्यायं गुणत्वं प्रा
न्यस्य च कृत्युद्देश्यं विनानुपपत्तेरुद्देश्यत्वापादकत्वम्
देष्टुमशक्यत्वात् प्राप्तानुकीर्त्तनरूपानुवादापादकत्वम्
स्य शेषिपारतन्त्र्यरूपत्वात् पारतन्त्र्यापाद्यत्वलक्षणोप
कत्वम् । उपादेयत्वस्य विध्यधीनत्वात् विधेयत्वापाद
रुद्धत्रिकद्वयापत्तिः । देशकालयोर्विधेयगुणभावे ऽप्युपा
त् प्राधान्यानुवाद्यत्वाभावे ऽपि चोद्देश्यत्वाभ्युपगमा
त्वस्योपादेयत्वापादकत्वमुद्देश्यत्वस्य चानुवाद्यत्वापाद
ङ्कानिवृत्त्यर्थं यागशब्दः देशकालयोः स्वभावसिद्धत्वेन
त् सिद्धवत् करणरूपमुद्देश्यत्वं प्रधानत्वं स्वाभाविक
ऽपि नापनीयते कर्मणस्तु स्वभावसिद्ध्यभावात् उभय
सम्भवे प्रतियोग्यन्वयानुरूपविवक्षोपपत्तेर्गुणत्वस्योप
कत्वं सिद्धवत्करणस्य च स्वयम्प्राप्त्यनापादकत्वे ऽप्य
द्धवत्कर्त्तुमशक्यत्वात् प्राप्त्यपेक्षत्वं युक्तमेवेत्याशयः
देश्यानूद्यप्रधानभूतापेक्षणादित्यपेक्षामात्रमुक्तम् । इह
क्यश्चेत्यत्र गदमदचरयमश्चानुपसर्गइत्येतत्सूत्रगतानु

१ सिद्धसाध्यरूपेत्यर्थः ।

या ऽनुपसर्गे सुबन्ते उपपदे वदतेःक्यप्प्रत्ययान्वाख्यानात् उप-
र्गयोगे क्यप्प्रत्ययाभावेन किन्निमित्तसम्प्रसारणाभावात् ऋहलो-
र्ण्यदिति सामान्यविहितण्यत्प्रत्ययप्राप्तेः प्रवाद्यापवाद्येतिवदनु-
द्येति रूपापत्तेर्नु क्षिप्रं वाद्यं नूद्यामिति क्षिप्रवाचिनि नुशब्दे निपा-
रूपे सुप्युपपदे वदः क्यपं कृत्वा ऽनुवाद्यस्य प्राप्त्यपेक्षत्वेन
प्रोद्यत्वायोगात् नूद्यं न भवतीत्यनूद्यामिति नञ्समासाश्रयणेन
पसिद्धिः कार्या। ननु यद्यपि फलेनोपादेयत्वादिरूपेण यागो
श्रुते गुणेन चोद्देश्यत्वादिरूपेण तथापि एकेन रूपेणा-
भिधानादितरेण चार्थात्प्रतीतस्योभयसम्बन्धो न विरोत्स्यते इ-
त्याशङ्क्याह * एकेति * आभिधानिकं रूपं विना शाब्दे
व्यवहारे ऽन्वयायोगाद्यागस्यैकरूपाभिधाने ऽप्यविशेषादुपादे-
यत्वादिरूपेणाभिधानाश्रयणे गुणस्य यागेनासम्बन्धादुद्देश्यत्वा-
साधारणादिरूपेण फलस्यासम्बन्धस्तन्त्रत्वाभाव इत्यतीतानुषङ्गे-
 समापनीयम्। तर्ह्युपादेयोद्देश्यत्वादिसाधारणरूपेणाभिधानादु-
भयसम्बन्धो भविष्यतीत्याशङ्क्याह * तत्रेति * अनेन च सिध्येत
इति भाष्यं व्याख्यातम्। ननु सकृदुच्चरितस्यैवोभयसम्बन्धात् कथं
वाक्यभेदापत्तिरित्याशङ्क्याह * अवश्यं हीति * सकृदुच्चरिते चा-
र्थमन् विवक्षैकैव दृश्यतइति अनेन न्यायेन सकृदुच्चरितस्य विरु-
द्धानेकरूपाभिधानपरत्वायोगाद्यत्र गुणसम्बन्धे यागस्योद्दिश्यमाना-
दिरूपमभिधेयं यत्र च फलसम्बन्धे यागस्योपादीयमानाद्यात्मकता-
भिधेया तत्राख्यातपदावृत्त्या स्वाराज्यकामो यजेत वाजपेयेन यजेते-
ति द्वे वाक्ये कल्पनीये स्यातामित्यर्थः। भावनायाः सर्वत्रैकरूप्या-
त्तन्त्रेणानेकसम्बन्धसम्भवे ऽपि भावनासम्बन्धोत्तरकाले धात्वर्थस्य
कारकसम्बन्धालोचनकाले वैरूप्यापत्तिरिति सूचयितुम् * याग-
इत्युक्तम्। नन्वित्याशङ्काभाष्यमाख्यातैक्येनैकवाक्यतायाः स्पष्ट-
त्वादयुक्तमाशङ्क्य व्याचष्टे * ननु चेति * तन्त्रेणाख्यातस्योभयस-
म्बन्धाद्वाक्यार्थद्वित्वेन वाक्यद्वित्वाभिधानमित्यर्थः। नैतदेवमिति
परिहारभाष्यमाख्यातद्वयाभावे ऽपि तन्त्रसम्बन्धोपपत्तेः। पदचतु-
ष्टयाप्रसङ्गादयुक्तमाशङ्क्याह * चत्वारीति * उच्यतइत्याशङ्काभि-
प्रायविवरणार्थं भाष्यं व्याचष्टे * परस्य त्विति * विभक्त्यभावा-
त्कर्मकरणत्वनिरपेक्षस्वरूपमात्रेण धात्वर्थस्य धातुना ऽभिधाना- ३
दित्याशयः। कारकरूपाभिधानं विना क्रियारूपया भावनया सहा-
न्वयायोगात्कारकरूपेणैव धात्वर्थो ऽभिधातव्यः। ततश्च धात्वर्था-
भिधानलक्षणकार्यप्राधान्यात्कार्यगतकर्मकरणत्वाभिधानवैरूप्याद्यागं

यागेनेति शब्दरूपस्य भेदापत्तिरिति परिहाराभिप्रायविवरण
तदस्तीति भाष्यं व्याचष्टे * नैतदस्तीति * यद्यपि विभक्त्यभ
तोः स्वतो रूपभेदो नास्ति तथापि यद्यप्राप्तो धात्वर्थस्तलो
विधिः प्राप्ते त्वनुवाद इति विध्यनुवादरूपत्वात् अर्थतो
प्रसज्येतेति भाष्यार्थः । विधिशब्देनोपादानगुणत्वे ऽनुवा
चोद्देश्यत्वप्राधान्ये ऽप्युपलक्षिते वाजपेयेन गुणेन सम्बन्धं
मनूद्येतेत्यनेन यद् गुणसम्बन्धे धात्वर्थस्यानुवाद्यत्वं वैरूप
नायोक्तं तदाक्षेपार्थमाहेति भाष्यं व्याचष्टे * आहेति *
जपेयशब्दस्याख्यातकृत्यवत्प्रवर्त्तनानभिधायित्वे ऽपि विधेयस
त्वाद्विधायकत्वं भविष्यतीत्याशङ्क्य भाष्यकृता नामशब्दा
व्यापार एव साक्षाद्विधेयः न च नामशब्दस्यार्थो व्यापार इ
नन्वाख्यातशब्दार्थव्यापारद्वारा नामशब्दार्थस्य विधेयत्वं
तीत्याशङ्क्य यश्चाग्नेत्युक्तं पूर्वापरीभूतानिष्पन्नरूपत्वात् धात्व
व्यापारः धातोश्चानुवाद्यत्वसमर्पकत्वस्य त्वयोक्तत्वात्तस्या
पारो न विधातुं शक्यतइत्याशयः । अतः फलसम्बन्धवद्
सम्बन्धो ऽप्याख्यातस्य विधिरूपत्वात् न वैरूप्यापत्तिरिति
यार्थः यदीति समाधानभाष्यस्यायमाशयः धात्वर्थानुवादे ऽ
यार्थस्य भावनायाः सर्वकारकानुरञ्जनसहत्वात् फलविशिष्टत्व
णविशिष्टतयाप्यैकरूप्येण विधानात्तद्द्वारा नामशब्दार्थस्यापि
पपत्तेर्न विध्यभावदोषापत्तिः।यदि तु भावनातिरस्कारेण साक्ष
त्वर्थस्यैव फलवद् गुणविधिरिष्यते ततस्तस्य व्यापारात्मकत्वे ऽ
त्पादानुकूलस्वभावत्वाभावेनाक्रियारूपस्यैकरूप्येणानुरूपरूपाने
रकानुरञ्जनासहत्वात् फलं प्रति गुणभूतस्य गुणं प्रति प्रा
योगेनोभयं प्रति गुणत्वापत्तेः प्रत्येकं वाक्यपरिसमाप्तिप्रसङ्गा
गुणयोः परस्परानन्वयः स्यादिति तत्र वाजपेयाख्यद्रव्यं प्रति
गुणत्वे द्रव्यस्य यागसंस्कार्यत्वापत्तेस्तृतीयानुपपत्तिदोषः
श्चोक्त इत्याशङ्क्याह * यदीति * स्पष्टतानादरकारणा
यः । ननु यथा व्रीहिविधेर्दर्शपूर्णमासविध्येकत्वाभावे ऽपि प्र
दर्शपूर्णमासयोरेव व्रीहीणामवरोधात् व्यवस्था तथा वाजपे
स्वाराज्यकामयागएव प्रकरणेनावरोधात् व्यवस्था भविष्यत
ङ्कार्थं प्रकरणादिति भाष्यं व्याचष्टे * प्रकरणेति * नेति
रभाष्यमपूर्वसाधनांशलक्षणार्थं वाक्यस्य प्रकरणापेक्षित्वा
धोपपत्तेरयुक्तमाशङ्क्य व्याचष्टे * नेति * यद्वाजपेयेन
तत् स्वाराज्यकामा यत् स्वाराज्यकामो यजेत तद्वाजपेयेन

शेषितेन यागेनेतरस्य सम्बन्धे ज्ञातवद्विशेषणत्वेनोपादाना-
ावच्च विधानाद्वैरूप्यलक्षणवाक्यभेदापत्तेस्तन्त्रसम्बन्धे परस्प-
क्षेति भाष्यतात्पर्यव्याख्या तत्रैवं परस्परनैरपेक्ष्ये सति गुणो
यमानः सार्वत्रिको ऽपूर्वयागसम्बन्धो वेति मात्रशब्दस्य द्वेधा
या प्रकरणानिष्पत्तेः शुद्धयजिसम्बन्धादित्याशङ्कापरिहारः अ-
याशङ्काभाष्यं स्पष्टत्वादव्याख्याय नेत्यादिपरिहारान्तरभाष्यं
ष्टे * तेनेति *

॥ अथाग्नेयादीनां नामनामताधिकरणम् ॥ ६ ॥

तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थे न चेद-न्येन शिष्टाः ॥ ९ ॥

अत्र भाष्यकृताग्नेयादयः शब्दा गुणविधयः कर्मनामधेयानि
चिन्ता दर्शिता साष्टाकपालादिसामानाधिकरण्यात् कर्मणश्चा-
ान्मन्त्रतस्तु विरोधे स्यात् इत्यत्र चाग्नेयाग्नीषोमीययोर्ब्राह्मणा-
पर्ययेण मन्त्रक्रमाम्नानस्य वक्ष्यमाणत्वेन क्रमाविनियुक्तमन्त्रा-
त् श्रुत्यविनियुक्तानां च मन्त्राणां स्वार्थसमवायकल्पकत्वाभा-
मान्त्रवर्णिकदेवताकल्पनानुपपत्तेर्द्रव्यदेवतासंयोगेनापि यागस्य
येतुमशक्यत्वात् आग्नेयं चतुर्द्धा करोतीत्यादिव्यवहारस्य द्रव्य-
त्वेन कर्मनामानपेक्षत्वात् निष्प्रयोजनत्वेनाप्याग्नेयादिशब्दस्य
मत्वशङ्कानुपपत्तेरयुक्तेत्याशङ्क्याह * एवमिति * अयमाशयः
प्रकरणे तन्त्रसम्बन्धानुपपत्त्या विशिष्टविधौ निरस्ते क्व चिद्-
क्तेन प्रत्ययेन विशिष्टविधिर्न सम्भवतीत्याशङ्क्य विशिष्टविधिव्यु-
ायैतदधिकरणं तद्व्युत्पादनस्य चोत्पत्तिशिष्टबलीयस्त्वसिद्धिः
नं सोमेन यजेतेति सोमविशिष्टे यागे श्रुतेन प्रत्ययेन विहिते
याप्राप्तत्वेनानुवादायोगात् विशिष्टस्य च द्रव्यान्तरानाकाङ्क्ष-
त्पत्तिशिष्टसोमावरुद्धे ज्योतिष्टोमे खनित्रादिद्रव्यान्तरं वि-
शक्यमित्युद्भिदादिशब्दानां नामधेयत्वं सिध्यति श्रुतेन तु प्र-
शुद्धं यागं विधायोपपदानर्थक्यपरिजिहीर्षया तदर्थविधा-
श्रुतप्रत्ययान्तरकल्पने श्रुतस्यैव वा वृत्तिकल्पने शुद्धयागानुवा-
रस्युत्पन्नशिष्टयोर्वाक्यीयत्वाविशेषात्तुल्यबलत्वेन विकल्पोप-
मधेयत्वं न सिध्यतीत्युद्भिदादिशब्दानामुत्पत्तिशिष्टगुणाव-
यागे गुणान्तरविधायकत्वासम्भवान्नामधेयत्वं द्रढयितुं
विधिरिह व्युत्पाद्यते सर्वे चात्र विशिष्टविधयः उदाह-

रणं तत्र सन्निकृष्टविध्यसम्भवनिबन्धनत्वाद्विप्रकृष्टविधेर्विशिष्ट
धौ च सन्निकृष्टविप्रकृष्टयोर्विशेष्यविशेषणयोर्युगपद्विधेयत्वात्
न्निकृष्टविधानार्थं तस्य विधेयत्वसम्भवो विप्रकृष्टविधानार्थं
सम्भवो ऽभ्युपगन्तव्यः स्यादिति युगपद्विरुद्धसम्भवाऽसम्भवा
गात् न क्वचित्सकृच्छ्रुतेन प्रत्ययेन विशिष्टविधिः सम्भवतीति प्र
तत्र यागादिकर्मतद्विशेषणभूताश्च सोमादयो गुणा युगपद्विधीयेरा
ति प्रतिज्ञाय शुद्धस्य कर्मणो ऽनुष्ठानाशक्तेर्विधानासम्भवाद्वि
नार्थे लिङ्प्रत्यये विशेषणविशेष्यविधिविभागाभावादिति हेतुरु
एवं तर्ह्यंशत्रयोपेताया भावनायाः सर्वत्रानुष्ठानयोग्यत्वेन विधेयत
द्वाक्यान्तरगतानामप्यङ्गानां प्रधानविधिनैव विधेयत्वापत्तेरुत्प
त्पन्नशिष्टविवेको न स्यादित्याशङ्क्य न चेदन्येन शिष्टा इत्युक्तं
च्चित्केन चित्कथं चित् कुर्यादिति सर्वत्र सामान्यतः साध्यस
नेतिकर्त्तव्यतान्वितभावनाविधाने ऽपि विशेषाकाङ्क्षायां वाक्यान्त
विहितविशेषलाभेनोपपन्नस्य प्रधानविधायिनः प्रत्ययस्य तद्विध
क्लेशाङ्गीकरणायोगात् स्ववाक्यगतविशेषविधानमात्रपर्यवसानं
पत्तेरुत्पत्त्युत्पन्नविशिष्टविवेकाविरोध इत्याशयः । अतः परमार्थं
विशिष्टविधिव्युत्पादनायैवैतदधिकरणम् तथापि पूर्वापवादत्वेन
ङ्गतिं वक्तुं भाष्यकृता गुणविधयः कर्मनामधेयानि वेति विच
दर्शित इत्यपवादशब्देन सूचितं । नामधेयत्वाशङ्कायाश्चेह निर्बी
त्वात्तदपवादो ऽनर्थक इति तद्द्वारा नामधेयकार्यस्य गुणफल
बन्धादेरपवादो ऽयमिति नामधेयकार्यशब्देन सूचितम् । नामधे
भावे ऽप्याग्नेयं चतुर्द्धा करोतीत्यादिव्यवहारोपपत्तेश्चशब्देनाग्ने
दिशब्दे गुणविधिनामधेयचिन्तायाः निष्प्रयोजनत्वं सूचितम् । उ
द्भादिशब्देषु हि गुणविधित्वे खनित्रादिना यष्टव्यं नामधेयत्वे
मेनैवेति चिन्ताप्रयोजनं चित्राशब्देष्वप्येवं स्पष्टमेव प्रयोजनं त
ख्याविचारे ऽप्यग्निहोत्रशब्दस्य गुणविधित्वे दर्विहोमेष्वविहित
वताकेष्वग्निर्देवता नामत्वे मान्त्रवर्णिकी आघारशब्दस्य तु गुण
धित्वे द्रवद्रव्यमात्रेणोपांशुयाजः कार्यो नामत्वे त्वाज्येनैवेति प्रयो
नमाग्नेयादिशब्दस्य तु गुणविधिनामधेयत्वयोर्न प्रयोजनवि
ऽस्तीत्यपवादत्वे सङ्गतिप्रदर्शनमात्रार्थः । सन्देहवेलायां नामधे
क्षोपन्यासो ऽत एवानेकगुणोपादानात् गुणविध्यसम्भव एव पू
क्षितः । सिद्धान्ते ऽपि गुणविधित्वसमर्थनमात्रं कृतं न नामत्वं
राकृतं गुणविध्यसम्भवस्य चाधिकरणपञ्चकोक्तस्यापवादायै
धिकरणं गुणविध्यसम्भवे त्वाग्नेयादिशब्दस्यानर्थक्यपरिहार

ात्या यथा कथं चिन्नामत्वं शिरो वा एतद्यज्ञस्य यदाग्नेयो हृदयमु-
ांशुयाजः पादावग्नीषोमीय इत्यादि व्यवहारसिद्ध्यर्थमेष्टव्यमिति
र्शयितुं नामधेयत्वोपन्यास इति द्रष्टव्यम्। ननु समाप्तायां नामधेयत्व-
चिन्तायाम् अपवादप्रस्तावस्योचितत्वात् दर्विहोमपदमविचार्यापवा-
ो न युक्त इत्याशङ्कते *कस्मादिति* वैश्वदेवपदस्य तु नामत्वमङ्गी-
कृत्य गुणार्थताप्यस्ति नास्तीति वैश्वदेवाधिकरणे चिन्तेत्यभिप्रेत्य त-
च्चिन्तेहानाशङ्किता समिदादिपदानामपि तत्प्रख्यन्यायान्नामत्वे स-
येव पार्वणशब्दस्य कर्मनामधेयस्यापि कालाभीज्या समुदायाभीज्या
ति विचारेण देवताविधित्वावसायात्तन्न्यायेन देवताविधित्वमङ्गी-
कृत्य प्रकृतसमिदादिशब्दवाच्यदेवतासंस्कारार्थाः प्रयाजा इत्याश-
ङ्क्य द्वितीयान्तत्वेन देवताविधित्वायोगात् मान्त्रवर्णिकसमिदादि-
देवतायोगेन यागेषु लक्षणया समिदादिशब्दप्रवृत्तेर्मन्त्रवर्णेभ्यश्चा-
पूर्वाणां देवतानामेव यागार्थत्वप्रतीतेर्न देवतासंस्कारार्थतेति नवमे
वक्ष्यमाणत्वात् नेह तच्चिन्ताशङ्किता। दर्विहोमपदं किं गुणविधिः
कर्मनामधेयं वेत्यष्टमे विचारयिष्यमाणमिहैव कस्मान्न विचारितमि-
त्याशङ्कितम्। लौकिकहोमेष्वाचारतस्त्वग्बिलया मूलदण्डया दर्व्या
जुहोतीति स्मृत्या च विधित्सितस्य दर्विलक्षणस्य गुणस्य प्राप्तेः पु-
रो ऽनुवाक्यामनुयाज्यया जुहोति सदेवत्वायेति विध्येकवाक्यतया
ऽर्थवादत्वेनोपयुक्तस्य समासान्निःकृष्य दर्विपदस्य तद्विधायित्वम-
ङ्गीकृत्य स्मृतिमूलत्वकल्पनायोगात्तत्प्रख्यन्यायेनैव नामधेयत्वं सि-
द्धं वैदिकेष्वपि स्रुवेण जुहोति चमसेन जुहोतीति साक्षाद्विहितेन
स्रुवादिना सह समासान्निष्कृष्य विधेयत्वेन कल्प्यमानाया दर्वे-
र्विकल्पायोगाच्छास्त्रान्तरेण वैपरीत्यप्राप्तेस्तत्प्रापणस्यासम्भवेन वै-
यर्थ्यापत्तेस्तेनैव च सिद्धमित्याभिप्रेत्य परिहरति * विचारितमिति*
एवं त्वाष्टमिकस्य गुणविधिनामधेयविचारस्य पौनरुक्त्यापत्तेरपरि-
तोषादन्यथा परिहरति * विध्युद्देशगतानामिति * ततश्च विध्यु-
द्देशगतानां नामधेयविचारस्य समाप्तत्वाद्युक्तो ऽपवाद इत्याशयः
अर्थवादगतानामपि तुल्यन्यायतया सिद्धस्य नामधेयत्वस्य किं लौ-
किकानामेवैतन्नामधेयमुत अलौकिकानां वैदिकानां तत्रापि किं यज-
तिचोदनानामप्युत जुहोतिचोदनानामेवेति विशेषविचारार्थं स्मारण
मितीहाप्यपरितोषादन्यथा परिहरति * सिद्धे वेति * ननु विशेष-
विचारे गुणविध्याशङ्का न युक्तेत्याशङ्क्याह * या त्विति * परि- ३
चोदनामात्रत्वोपपादनायात्राधिकरणमध्यशब्दः तत्र हि दर्विहोमो

१ अनूच्य याज्यया जुहोतीति २ पु० पा०।

यज्ञाभिधानं होमसंयोगादिति सूत्रेण होमपदेनास्य समासपद
संयोगात्तत्र च होमस्य प्राधान्यात्तद्वाची दर्विहोमशब्द इति श
शब्दलक्षितकर्मनामधेयत्वं प्रस्तुत्य तद्विशेषे ऽपेक्षिते स लौकि
नां स्यात् कर्त्तुस्तदाख्यत्वादित्यनेन स्मार्त्ताष्टकादिकर्त्तरि दर्विहो
कसमाख्यानात् स्मार्त्तानामेवैतन्नामेति पूर्वपक्षं कृत्वा सर्वेषां
दर्शनाद्वा ऽस्तु होमे इत्यनेन वैदिके ऽपि वास्तु होमे यदेकया जुहु
दू दर्विहोमं कुर्यादिति दर्विहोमशब्दप्रयोगात् वैदिकानां चैतन्न
कत्वाभावे सत्येकया स्रुचा दर्विहोमशब्दप्रयोगानुपपत्तिप्रसङ्
होमशब्दस्य च सामान्याभिधायित्वात्सर्वेषां नामेति सिद्धान्ति
तत्रापि विशेषापेक्षायां यजतिचोदनानामपि दर्शपूर्णमासादे
चतुरवत्तादिवाक्यैर्होमत्वापत्तेस्तेषामप्येतन्नामेति प्राप्ते जुहोति
दनानां चातत्संयोगादित्यनेन होमशब्दसंयोगात् होमनामत्वप्रत
र्यजतिचोदनानां च देवतोद्देशद्रव्यत्यागमात्रेण पर्यवसानाच्चतु
त्तादिवाक्यैर्यागीयद्रव्यप्रतिपत्त्यर्थं प्रक्षेपविधाने ऽपि होमत्वाच
त्तेर्जुहोतिचोदनानामेव दर्विहोमशब्दो नामेति सिद्धान्तयित्वा द्रव
पदेशाद्वा गुणाभिधानं स्यादित्यनेन दर्विहोमशब्दात्पात्ररूपद्रव्य
देशप्रतीतेर्गुणविधिरित्याशङ्क्य न लौकिकानामाचारग्रहणात् ३
वतां चान्यार्थविधानात् इत्यनेन लौकिकेष्वाचारेषु दर्व्या गृ
तत्वाद्वैदिकेषु चान्येषां स्रुवादीनां पात्राणां होमनार्थितानाम
ङ्कितानां विधानाद्दर्विसमासान्निष्कृष्य विधानं न युक्तमित्याश
निराकृत्य नामधेयत्वमुपसंहृते ननु विशेषविचारो ऽपीहैव नाम
चिन्ताधिकारात्कर्तुं युक्तो नाष्टमे विशेषातिदेशलक्षणत्वात् त
त्याशङ्क्याह * सर्वमेवेति * लक्षणान्तरगोचरो ऽपि विच
प्रसङ्गाल्लक्षणान्तरे क्रियमाणो न दोषमावहतीत्याशयः । कथं
प्रसङ्ग इत्यपेक्षायामाह * पूर्ववदिति * अविहितेतिकर्त्तव्यत
ष्वतिदेशेनेतिकर्त्तव्यताप्राप्ता युक्तायां दर्विहोमेष्वविहितेतिक
व्यताकेष्वपि नातिदेशेनेतिकर्त्तव्यता प्राप्तिरस्तीत्यपवादार्थं किं द
होमाः कुतश्चिद्धर्मग्राहित्वात् पूर्ववन्तो ऽथ पूर्वा इति चिन्ताम
कृत्य सर्वेषां जुहोतिचोदितानामपूर्वत्वसिद्ध्यर्थं विशेषचिन्तेत
आग्नेयादिवाक्येषु कर्माश्रवणात् नाग्नेयादिशब्दानां तन्नामत
त्वायुक्तेत्याशङ्कते * केनेति * तत्र शिरो वा एतद्यज्ञस्य यदा
इति यज्ञावयवस्तुत्या प्रसिद्धयागनामोपांशुयाजशब्दसाहचर्या
यागनामत्वप्रतीतेर्व्युत्क्रमाम्नातानामष्टाकपालादीनां लिङ्गदर्शनत
कस्यां चिच्छाखायां क्रमाम्नानं भविष्यतीत्यारोप्य मान्त्रवर्णि

वतान्वयेन यागकल्पनोपपादनार्थं प्रकाशनार्हानुष्ठेयक्रियां विना
प्रकाशकमन्त्रान्वयायोगादष्टाकपालादीनामप्राप्तत्वेन विधेयत्वाव-
सायात् विधेश्च भावनैकगोचरत्वात् तदाक्षेपकत्वेनाष्टाकपालादि-
वाक्येषु भावनाप्रतीतिं तावदाह * तादिति * भावनानां चा-
वच्छेदकधात्वर्थविशेषापेक्षायां यागाख्यधात्वर्थान्वयसिद्धये ऽग्न्या-
दिदेवत्यमन्त्रान्वयं दर्शयितुमाह * तासां चेति*आनन्तर्यमचोदने-
त्यानन्तर्यलक्षणस्य क्रमस्याविनियोजकत्वाभ्युपगमात् पाठसादृश्य-
लक्षणक्रमप्रतिपत्त्यर्थः स्थानशब्दः यागाङ्गमन्त्रवाचियाज्यानुवाक्या-
समाख्ययापि यागाक्षेपसूचनार्थं याज्यानुवाक्यायुगलानीत्युक्तम्
ननु श्रुत्यविनियुक्तानां मन्त्राणां करणत्वानवगमाददृष्टार्थत्वेनाप्य-
ङ्गत्वोपपत्तेः स्वार्थसमवायकत्वाभावाच्च तत्प्रतिपाद्यस्याग्न्यादेः क्रि-
याङ्गत्वसिद्धिरित्याशङ्क्योपांशुयाजे याज्यानुवाक्यायुगलानां क्र-
मविनियुक्तानामपि देवताकल्पकत्वदर्शनात् तत्सामान्यमात्रेणा-
पि देवताकल्पकत्वसम्भवं दर्शयितुमाह * तानीति * ननू-
पांशुयाजे यजिना विहितस्य यागस्य देवताकाङ्क्षत्वाद्यथाकथं-
चिदुपस्थापितदेवताग्रहणं युक्तम् । इह तु यज्यश्रवणेनानाकाङ्क्षि-
ताया देवतायास्तत्सम्बन्धप्रमाणतद्धिताद्यभावेन युक्ता कल्पनेत्या-
शङ्क्याघारादिवद्यज्यश्रवणे ऽपि क्रियातत्समवेतार्थप्रकाशनेन मन्त्रा-
णां क्रियाङ्गतेति सामान्यतो दृष्टेनाग्न्यादेः क्रियाङ्गत्वमुपपादय-
ति * न हीत्यादिना * क्रियाङ्गमित्यन्तेन नन्वग्न्यादेः क्रियान्वये
देवतात्वावगतिः कथमित्याशङ्क्याह * न चेति * अग्निर्मूर्द्धेत्यादि-
मन्त्रेष्वग्न्यादीनां प्राधान्येनाभिधानाद्यमर्थं प्राधान्येन मन्त्रो ऽभिद-
धाति सापि देवतेति लक्षणेन देवतात्वावसायात् कर्मस्वपि देवता-
त्वावगतिरित्यर्थः । नकेवलं मन्त्रेष्वग्न्यादीनां देवतात्वात् कर्मस्व-
पि देवतात्वं किं त्वष्टाकपालादिशब्दानामनेकत्र पुरोडाशशब्दसा-
मानाधिकरण्यदर्शनादिहापि ते पुरोडाशं कूर्मभूतं सर्पन्तमपश्य-
न्नित्यष्टाकपालवाक्यशेषात् पुरोडाशपरत्वावगतेः पुरोडाशादीनां च
वृद्धव्यवहारात् धानाः करम्भः परिवापः पुरोडाशः पयस्येत्येष वै
यज्ञो हविःपङ्क्तिरित्यादिलिङ्गाच्च हविष्ट्वप्रसिद्धेर्हविःशब्दस्य चा-
र्चिशुचिहुसृपिछदिछर्दिभ्य इसिरिति जुहोतेरौणादिके कर्मणि इसिप्र-
त्यये कृते हूयतइत्येतस्मिन्नर्थे हविःशब्दव्युत्पत्तेर्देवतां च विना होमा-
योगात् द्रव्याकाङ्क्षावशादग्न्यादेर्देवतात्वावगतिरित्याह * पुरोडा-
शादिभिरिति * जुहोत्युत्पन्नस्यापि हविःशब्दस्याहूयमाने ऽपि द्रव्ये
हवींष्यासादयतीति प्रयोगदर्शनात् तादर्थ्यनिमित्तत्वाप्रतीतेर्जुहो-

तिचोदिते कर्मणि होमस्यैव यागीयद्रव्यसंस्कारार्थत्वेन द्रव्यस्य
मार्थत्वायोगात् यागार्थद्रव्यवाची हविःशब्द इति मत्वा देवतान्व
विनापि द्रव्यान्वयमात्राद्यागानुमानसूचनार्थं यागेत्युक्तम् । नन्व
सत्यपि देवतान्वये कथं यागकल्पनं कथं च सत्स्वपि यागेष्वा
यादिशब्दानां नामतेत्याशङ्क्याह * इतीति * यजतिस्तु द्रव्यफ
भोक्तृत्वसंयोगादित्यत्र द्रव्यदेवतान्वयेन यागकल्पनस्य वक्ष्यमा
त्वाद्विधित्सितस्य च गुणस्यान्यतः प्राप्तौ नामत्वस्योक्तत्वात् उभ
सिद्धिरिति भावः । नन्वष्टाकपालादिवाक्यान्याग्नेयादिशब्दैर्विना प
वस्यन्ति न वा तत्रापर्यवसाने स्वार्थासमाप्तस्य वाक्यस्य वाक्यान्तर
न्वयायोगात् मन्त्रान्वयाभावे तत्प्रतिपाद्यदेवतान्वयकल्प्ययाग
सिद्धिः । पर्यवसाने त्वाग्नेयादिशब्दस्यानन्वयान्नामत्वानुपपत्तिरित्य
शङ्क्याश्रुतयागनामत्वाशङ्कासम्भवे ऽपि च चतुरवत्तं जुहोतीति
तद्धोमनामत्वेन पूर्वपक्षो भविष्यतीत्याह * अथ चेति * चतुरव
वाक्याद्धोमनिष्पत्तावपि आग्नेयादिशब्दानां कथं तन्नामतेत्याश
क्रमविनियुक्तमन्त्रवशात् देवताप्राप्तेस्तत्प्रख्यन्यायेनैवेति दर्शि
तथैवेत्युक्तम् । सकृच्छ्रवणेन होमैक्यान्मन्त्राणां च बहुत्वाद्विसंख्यत
न क्रमानुपपत्तिमाशङ्क्य यावद्द्रव्यमित्युक्तम् । कानि द्रव्याणीत्य
क्षिते ऽष्टाकपालादीनां सम्बन्धिनां होमानामित्युक्तं कथं चतुरव
वाक्यस्याष्टाकपालादिविषयतेत्याशङ्क्याष्टाकपालादीनां चतुरवत्त
क्ता तदुपपादनार्थं द्विरिति वाक्याद्द्व्यवदानसिद्धिरुक्ता तस्याष्टा
पालादिविषयत्वोपपादनार्थं हविष्ट्वादित्युक्तम् । एवमपि चतुरव
निष्पत्तिः कथमित्यपेक्षिते चोदनान्तरेणेत्युक्तम् । ननूपस्तृणात्यभि
रयतीति चोदनान्तरेणोपस्तरणाभिघारणयोर्ग्रहणे ऽपि तयोरुपस्त
णाभिघारणयोरुपस्तृणन्नभिघार्याज्यस्य यजेतेति ध्रौवाज्यसाध
त्वेनाष्टाकपालादीनां कथं चतुरवत्ततेत्याशङ्क्य तत्संस्कारार्थत्यु
दशमे कृष्णलचरावुपस्तरणाभिघारणयोरर्थलोपेन बाधं वक्तुं
वा संसर्गार्थनिवृत्तित्वात् तस्मादाप्तिसमर्थत्वमिति सिद्धान्तस
हविषः स्रुक्संसर्गस्योपस्तरणाभिघारणयोर्निवर्त्यत्वेन प्रयोजन
कृष्णले च विशदत्वेन स्वत एव निवृत्तेश्चत्वारि चत्वारि कृष्
लान्यवद्यति चतुरवत्तस्याप्त्यै इति चोपस्तरणाभिघारणसाध्यस्य
तुरवत्तत्वसम्पादनस्यान्येनाप्तेस्तदकरणसमर्थनादकरणं तयोरि
वक्ष्यमाणत्वाद्धविषः स्रुच्यसंसर्गलक्षणसंस्कारार्थत्वमनयोरव
यतइत्याशयः । नन्वग्नीषोमीयब्राह्मणस्य प्राक्पाठादाग्नेयब्राह्मण
च पश्चात्पाठाद्याज्यानुवाक्यायुगलयोश्च ब्राह्मणक्रमविपर्ययेण

ठादविद्यमानक्रमाम्नानाध्यारोपेणात्यन्तक्लिष्टनामत्वाशङ्का न युक्तेत्याशङ्क्य * आहैवं चेति * प्राप्ते कर्मण्याग्नेयादिवाक्यैर्द्रव्यदेवताद्यनेकगुणविधाने चोदिते हि तदर्थत्वात् तस्य तस्योपादिश्यतेत्यनेन वाक्यभेददोषापत्तिः । विशिष्टविधाने तु सन्निकृष्टविप्रकृष्टविशेषणविशेष्यरूपानेकार्थविधानापत्तेस्तत्र च सन्निकृष्टविधानासम्भवनिमित्तत्वाद्विप्रकृष्टविधानस्य युगपत्सन्निकृष्टविधानसम्भवासम्भवाभ्युपगमदोषसम्भवाद् गुणविध्यसम्भवमात्रमत्र पूर्वपक्षिणोऽभिमतं तथा च सत्याग्नेयादिशब्दानर्थक्यापत्तेस्तत्परिहारार्थं यथाकथञ्चिन्नामधेयत्वाभिधानमित्याशयः । एवं नामधेयत्वे सत्याग्नेयादिशब्दस्य गुणविधित्वाभावान्न सन्निकृष्टविप्रकृष्टविशेष्यविशेषणरूपानेकार्थविधिनिमित्तो युगपत् सन्निकृष्टविप्रकृष्टविधिसम्भवासम्भवाभ्युपगमदोषो भविष्यत्येतदर्थं नामधेयत्वं यथाकथञ्चिदुक्तं न तु पूर्वपक्षिणोऽभिमतमित्यर्थः । पूर्वपक्षभाष्यं चानेन व्याख्यातं तत्र च विशिष्टविधेः सिद्धान्तिनोऽभिमतत्वात् विशेष्यस्य यागस्याश्रुतत्वेन द्रव्यदेवतासम्बन्धलक्षणगुणविधिकल्प्यत्वात् श्रुत्या गुणमात्रविधिं मत्वा गुणे विधिशब्दः तस्मिन्सत्यनेको विशेषणविशेष्यरूपोऽर्थोऽभिधीयते तत्र च सन्निकृष्टविध्यसम्भवनिमित्तत्वाद्विप्रकृष्टविधेर्युगपत्सन्निकृष्टविशेष्यविधिसम्भवासम्भवाभ्युपगमदोषापत्तिरित्युक्तम् । ननु विशेष्यस्य यागस्याश्रुतत्वात् कथं गुणविधौ सति विशेषणविशेष्यरूपानेकार्थविधिः स्यादित्याशङ्क्याग्निर्देवता पुरोडाशो द्रव्यमिति द्रव्यदेवतासम्बन्धलक्षणगुणविधिद्वारेत्युक्तमिति भाष्यं योज्यम् । एतच्च वार्त्तिककृताधाराग्निहोत्राधिकरणे परदौर्बल्यवतोऽष्टौ श्रुतिप्रकारान् परोक्तान्निराकुर्वता विशिष्टविधेरत्यन्तक्लिष्टत्वं तृतीयस्थानानिवेशासम्भवोपपादनार्थं वक्ष्यमाणत्वान्नेह प्रपञ्चितमित्यनवद्यम् । सूत्रं योजयन् सिद्धान्तमाह * तथेति * यत्र पुनरन्येन वचनेन शिष्टा गुणा भवन्तीति भाष्याद्विशेषणस्यैवान्यतः प्राप्तावविधेयत्वं विशेष्यस्य त्वन्यतः प्राप्तावपि सन्निरपेक्षविशेषणविध्ययोगात् विधेयतेत्याभाति तच्च सर्वतो पदार्थसङ्क्रान्तविधिशक्तौ धात्वर्थानुवादाभ्युपगमात् अयुक्तमित्याशङ्क्य गुणग्रहणस्योपलक्षणार्थत्वं दर्शयितुं यागइत्युक्तम् । न चेदिति सूत्रावयवे प्राप्तेर्विधेयत्वहेतुत्वाभिधानार्थं इति प्राग्व्याख्यया सूचितम् । तच्च कर्मेति भाष्यात् तच्च गुणाश्चेत्येकवचनाध्याहारेण विग्रहः प्रतिभाति तच्चोदाहरणबहुत्वेन तुल्यत्वाक्रिययोर्नेति सूत्रोक्तक्रियापरामर्शितच्छब्दोपात्तयागबहुत्वोपपत्तेः श्रुतस्यैव बहुवचनस्य तन्त्रेणोभयान्वये

सम्भवत्यश्रुतैकवचनाध्याहारायोगात् अयुक्तमित्याशङ्क्य न इ
हुवचनान्तविग्रहो दर्शितः । सोमेन यजेतेत्यादौ गुणकर्मणो
पदोपादाने ऽपि तावच्छुद्धस्य कर्मणो ऽशक्यानुष्ठानत्वेन वि
गात्सन्निकृष्टस्य शुद्धरूपेण विध्यसम्भवात् विशिष्टरूपेण च
धात् रूपभेदेन युगपत्सम्भवासम्भवविरोधपरिहारोपपत्तेर्विशि
धेरदुष्टत्वाभिधानार्थमविभागाद्विधानार्थे इति सूत्रावयवविः
लिङ्प्रत्यये गुणकर्मविध्योरविभागादित्येव व्याख्यातुमविभक्त
सकृदुच्चरितेन विधिनेत्युक्तम् । आग्नेयादिवाक्ये त्वेकस्मिन्न
धेयसमर्पके तद्धितान्ते शब्दे गुणकर्मविभागादित्येवं व्याख्या
धेयसमर्पकेण तद्धितान्तेन शब्देन सह गुणकर्मशब्दानामवि
त्सन्निकर्षविप्रकर्षविरोधाभावाभिधानायैकशब्दोपादानप्रदर्शन
तद्धितान्तेन विधिनेति योज्यम् । हिशब्दः पादपूरणार्थः । ननु :
वर्णिकदेवतासंयोगान्यथानुपपत्त्या यागप्राप्तेरसिद्धान्यथाशिष्ट
शङ्कां निराकरोति * नेति * संस्कारशब्देन स्मृतिहेतुस
योद्बोधार्थो मन्त्रो विवक्षितः । अष्टाकपालादिद्रव्यं देवतासंः
अग्निर्मूर्द्धेत्यादिमन्त्रः तत्संयोगेन यो ऽत्र यागविधिः पूर्वपक्षि
स नोपपद्यतइत्यर्थः । यदपि पुरोडाशादीनां हविष्ट्वाद्याग
त्वप्रतीतेर्यागानुमानमुक्तं तदपि निराकरिष्यतइति तावन्
सूचितम् । यद्वा यागविधिस्तावन्नोपपद्यते ततश्च तन्नामत्वमन
चतुरवत्तचोदनाविहितहोमतापि निराकरिष्यतइत्येवं ताव
योज्यः । एतदेव प्रश्नपूर्वकमुपपादयति * कथमिति * नन्
वनाकाङ्क्षायां मन्त्रसम्बन्धस्योक्तत्वात् स्वरूपेण द्रव्यस्य मन्
ङ्क्षानिरासो न युक्त इत्याशङ्क्याह * नेति * भावनाया :
त्वात् विध्यश्रवणाच्च तद्वशेनापि कल्पयितुमशक्यत्वात् अप्रा
पि च द्रव्यस्य भावनानिवेशं विना विधेयत्वायोगात् विधि
भावनाकल्पने विधेरपि भावनाकल्प्यत्वेनेतरेतराश्रयं वक्तुं ।
भावाभिधानं कथं चिद्भावनाकल्पने ऽपि धात्वर्थानवच्छिन्ना
स्या अनुष्ठातुमशक्यत्वान्मन्त्राकाङ्क्षानुपपत्तेर्मन्त्रान्वयादेव
क्यदेवतासंयोगेन यागाख्यधात्वर्थकल्पने चानुष्ठेयत्वासिद्धये
र्थविशेषावच्छेदाधीनत्वात् मन्त्रान्वयस्येतरेतराश्रयापत्तेर्द्रव्यस
रूपेणैवाकाङ्क्षापद्यतइति सूचनार्थः कश्चिच्छब्दः । सामान्यतं
पुरुषव्यापारो न विधीयते किमुत धात्वर्थावच्छिन्न इत्यर्थः ।
ष्टाकपालभवनस्यासिद्धत्वेनानुष्ठेयत्वान्मन्त्राकाङ्क्षा भविष्यः
शङ्क्य न चेत्युक्तम् । भवनक्रियायामसिद्धस्यैव कर्तृनियमात् ि

स्मकपुरुषानुष्ठेयत्वायोगाच्च स्मारकापेक्षेत्याशयः । ननु द्रव्यस्यैव
तदनुष्ठानात्प्राक् असिद्धत्वेनानुष्ठानापाद्यत्वात् स्मारकापेक्षा भवि-
ष्यतीत्याशङ्क्य नापीत्युक्तम् । तस्याव्यापारात्मकत्वेनानुनिष्पादितत्-
वत्यादिवत् साध्यत्वे ऽपि अननुष्ठेयत्वात् न स्मारकापेक्षेत्याशयः ।
कथं चित्सत्यामपि द्रव्यस्य मन्त्राकाङ्क्षायां अग्न्यादिवाचिना म-
न्त्रेण सह सम्बन्धो न प्रतीयतइत्येवमुत्तरार्द्धं व्याचष्टे * न चेति *
ननु पुरोडाशादिभिर्हविरात्मकत्वाद्यागसाधनत्वेनावगम्यमानैर्देव-
तापेक्षणात्तद्वाचिमन्त्राणामन्वयो भविष्यतीत्याशङ्क्याह * न चेति*
पुरोडाशे यागः साध्यत्वेन नावधारित इत्युक्ते यागसम्बन्धाश्रयणे
ऽपि हविः शब्दाभिधेयत्वात् यागानुमानं भविष्यतीत्याशङ्क्य हविष्ट्व-
मपि नावधारितमित्युक्तम् । श्लोकं व्याचष्टे *यदि हीति* भावनो-
पादाने सति तस्या धात्वर्थविशेषापेक्षायां कथञ्चिद्यागत्वावधारणं
शक्येत न तु तदस्तीति दर्शयितुं भवतिशब्देन भावनानुपादानाद्याग-
त्वं नोक्तमित्युक्तं हविः शब्दस्तु यागान्वयं विना न क चिदस्तीत्यर्थः।
हविष्ट्वाभावादेव चतुरवत्तचोदनाविहितहोमनामतापि निरस्तेत्याह
* एतेनेति * नन्वाघारादिवद्यागत्वावधारणात् प्रागपि मान्त्रवर्णि-
कदेवताकल्पनं भविष्यतीत्याशङ्क्याह * आघारादिषु त्विति *
उपांशुयाजे तु वाचनिकविनियोगाभावे ऽपि यागात्मकत्वात् सामा-
न्यतो देवतान्वये सिद्धे मन्त्रवर्णाद्धि शेषमात्रावधारणं युक्तं न तु
श्रुत्यविनियुक्तस्य मन्त्रस्यापूर्वदेवताकल्पकत्वं क चिदस्तीत्याशयः ।
तद्धितेन देवतान्वयसम्भवे तद्धितचतुर्थीमन्त्रवर्णानां देवतान्वयप्र-
माणानां मध्ये जघन्येन मन्त्रवर्णेन देवताकल्पनं न युक्तमित्याह
* सर्वजघन्यश्चेति * न च तद्धितसम्भवे मन्त्रवर्णस्य प्रामाण्यम-
प्यस्तीत्याह * अन्यथेति * मन्त्राङ्गत्वान्यथानुपपत्तिस्तद्धितेन दे-
वतान्वये ऽवधारिते नास्तीत्यर्थः । ननु तद्धितेन देवतान्वयावगमे
लिङ्गादेव मन्त्रप्राप्तेर्मन्त्राम्नानमनर्थकं स्यादित्याशङ्कां निराकुर्वन्
सिद्धान्तमुपसंहरति * तस्मादिति * सामान्यतो ऽग्निदेवत्यम-
न्त्रप्राप्तावप्यग्निर्मूर्द्धेत्यादिमन्त्रविशेषार्थं क्रमाम्नानमित्यर्थः । अ-
विद्यमानमपि क्रमं पूर्वपक्ष्यारोपितमभ्युपगम्य परिहारसामर्थ्य-
प्रदर्शनार्थः क्रमशब्दः । ननु तद्धितेन देवतान्वये कृते ऽपि तस्या-
विधायकत्वाद्विधीयेरन्नित्ययुक्तमित्याशङ्क्य भवति इति पञ्चमल-
काररूपेणाख्यातशब्देनेत्युक्तम् । नन्वस्य वर्तमानापदेशसन्दिग्धत्वात्
पञ्चमलकारत्वनिश्चयः कथमित्याशङ्क्यार्थवादेत्युक्तम् अङ्गिरसो
वा इत उत्तमाः स्वर्गं लोकमायन्नित्याद्यर्थवादान्वयान्यथानुपपत्त्या

विधित्वनिश्चयः । अन्यथास्यार्थवादत्वासम्भवेनानर्थक्यापत्तेः
शयः । नन्वेवं सति विधिगौरवक्लेशः स्यादित्याशङ्क्याह * अ
न्वेति * विधानार्थ इति भाष्यं तद्धितस्याख्यातकृत्यत्वाभावे
धायकत्वादयुक्तमाशङ्क्य व्याचष्टे * विधानार्थेति * अविभा
ति सूत्रावयवव्याख्यानार्थमविभक्ता हीति भाष्यावयवं तद्धि
गत्यभिधानार्थत्वेन तत्सापेक्षत्वात् पश्चाद्व्याचष्टे * सर्वे चे
एतदेवोपपादयति * देवतेति * नन्वाग्नेयतेति भावप्रत्ययात्
न्धस्यापि अविभक्ततोक्ता प्रतिभाति सा च सम्बन्धवाच्यत्वस
रुणाधिकरणे निषेत्स्यमानत्वादयुक्तेत्याशङ्क्याह * सम्बन्धो
ति * नन्वेवमप्यष्टाकपालशब्दवाच्यस्याष्टत्वकपालतदधिकर
स्कारोपसर्ज्जनस्य पुरोडाशस्याग्नेयादिशब्दानन्तर्गतत्वादष्टाक
स्येति विशेषणाभिधानमयुक्तमित्याशङ्क्याह * तदिति * नैव ।
व्यमात्रस्य तद्धितैर्देवतोच्यते अस्य शब्दाभिधेयस्य विशेषस्यैव
तेत्यनेन न्यायेनाष्टाकपालपदार्थो ऽपि तद्धितान्त एव शब्दान्तर्
त्यर्थः । स एष इति भाष्येण यागस्य तद्धितान्तर्गतिरुक्ता सा
विनापि यथाकथञ्चित्सिद्धाग्नेयत्वसङ्कीर्त्तनोपपत्तेरयुक्तेत्याशङ्
थस्य भाव्यमानत्वं यागं विना न सिध्यतीति दर्शयितुं भावना
तिपूर्वकं यागान्तर्गतिमाह * द्रव्यस्येति * अन्तर्गतेति शेषः
व्यापारस्य भावनाया यागावच्छेदकत्वाद्विशेषो न व्यक्तिः
सर्वान्तर्गत्यभिधानस्य पूर्वपक्षोक्तवाक्यभेदपरिहारं प्रयोजनम
ततश्चेति * तद्धितान्तपदेनोपात्तस्यार्थस्य विधिनेति विग्रहः
पदोपादानाभावान्न वाक्यभेदापत्तिरित्याशयः । नन्वेकपदोपाने
नेकार्थस्य विधानाच्चित्रत्वश्रोत्वविधाविव वाक्यभेदः स्यादि
शङ्क्याह * भावनेति * यागो हि विहितो भवतीति भाष्ये
शब्दो यागावच्छिन्नभावनाभिप्रायेणेत्याशयः । स एवमिति
व्याचष्टे * तत इति * ननु सम्बन्धो हीति भाष्येण सम्बन्धवि
न्यथानुपपत्त्या सम्बन्धिनोर्द्रव्यदेवतयोर्विधानाक्षेपस्योक्तत्वात
ष्यविरुद्धं भावनाविधानाभिधानमित्याशङ्क्याह * सर्वेति *
र्धात्वर्थकारकैः सम्बध्यतइति कर्मव्युत्पत्त्या भावना सम्बन्ध
नोक्तेत्यर्थः । किमित्येवं व्याख्यायतइत्यपेक्षायामाह * न हीं
विशिष्टविधावप्यन्यतो लभ्यमानस्याविधानान्न गौरवलक्षणव
भेदापत्तिरित्यभिधानार्थो न चेदन्येन शिष्टा इति सूत्रावयवो
श्चित्यादिभाष्येणानेककपालाधिकरणसंस्कारस्य पुरोडाशादः
प्रसिद्धेस्ते पुरोडाशं कूर्मं भूत्वा सर्पन्तमपश्यन्नित्यर्थवादाव

पुरोडाशस्याष्टसंख्यकपालाधिकरणसंस्कारविधिनैव प्राप्तेः कपालानां तद्बहुत्वस्य तदधिकरणस्य संस्कारस्य च कपालेषु श्रपयतीति वाक्यान्तरादेव प्राप्तेर्बहुत्वविशिष्टत्वमात्रविशिष्टद्रव्यविशेषाग्न्याख्यदेवताविशिष्टयागभावनाविधानान्नातिगौरवापत्तिरित्येवं व्याख्यातः। तन्नाविभागादित्यावृत्तिलक्षणवाक्यभेदपरिहारार्थो हेतुः। न चेदिति तु गौरवलक्षणवाक्यभेदपरिहारार्थ इति हेतुद्वयस्य विविक्तविषयत्वं दर्शयितुमाह * अविभागादिति * तद्धितान्तोक्तेन देवताविशिष्टेन द्रव्येण सम्बन्धस्य विभागात् सम्बन्धं विना वैशिष्ट्यासिद्धेरर्थात् सम्बन्धाक्षेपः। न क्रियाकर्तृसम्बन्धादृते सम्बन्धनं क चिदित्यनेन च न्यायेन क्रियागर्भत्वात्सर्वसम्बन्धानां देवतोद्देशपूर्वकद्रव्यत्यागाच्च विना द्रव्यस्य देवतान्वयायोगाद्यागाख्यस्य क्रियाविशेषस्य द्रव्यदेवतासम्बन्धाविभागात्तेनार्थादाक्षेपः। यागस्य चाभावितस्यानिष्पत्तेर्भावनाया यागाविभागात्तेनार्थादाक्षेप इत्यर्थः। अन्यथानुपपत्त्यधीनत्वाच्चार्थाक्षेपस्यान्यतः प्राप्तस्य कपालादेरनाक्षेपान्नातिगौरवापत्तिरित्यदुष्टो विशिष्टविधिरित्याशयः। यत्तु विधित्सितस्यान्यतः प्राप्तौ तद्वाचिनः शब्दस्य नामधेयतेति एतदर्थपरत्वेन न चेदित्यवयवस्य पाठपूर्वकं व्याख्यानान्तरं भाष्यकृता कृतं तन्नामधेयत्वस्य पूर्वपक्षिणोऽप्यनभिमतत्वात्तत्प्रख्यं चान्यशास्त्रमित्यनेन च पौनरुक्त्यापत्तेरयुक्तमित्युपेक्षितं वार्त्तिककृतेति विशिष्टविधिव्युत्पादनार्थतैवास्याधिकरणस्यावसीयते॥

॥ बर्हिरादिशब्दानां जातिवाचिताधिकरणम् ॥ ७॥

बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः ॥१०॥

बर्हिरादिशब्दो लवनादिसंस्कारनिमित्तः कुशत्वादिजातिनिमित्तो वेति चिन्तायाः प्रकृतगुणविधिनामधेयचिन्तारूपत्वाभावात् पूर्वाधिकरणकृतविशिष्टविधिव्युत्पादनवच्च तच्छेषत्वाभावाच्च प्रकरणसङ्गतिरित्याशङ्क्य प्रासङ्गिकीं प्रकरणसङ्गतिमाह * नामधेयेति * अनन्तरसङ्गतिस्त्वाग्नेयादिशब्दानां देवतोद्देशपूर्वकद्रव्यत्यागात्मकयागाख्यक्रियागर्भसम्बन्धनिमित्तदेवताविशिष्टद्रव्यवाचित्वात्तद्द्वारेण क्रियानिमित्तत्वेऽभिहिते बर्हिरादिशब्दानामपि संस्कारात्मकक्रियानिमित्ततास्त्युत नेति विचारात् स्पष्टैवेति नोक्ता पुरोडाशोदाहरणमुत्सूत्रत्वादयुक्तमाशङ्क्याह * तुल्यहेतुत्वादिति * यूपादिवद्वचनव्यक्तिविपर्ययाश्रयणसम्भवासम्भवमस्य सन्देहहेतोः

१ असंख्येति २ पु० पा०।

संस्कृतप्रयोगबलीयस्त्वस्य च पूर्वपक्षहेतोः संस्कारनिमित्त
परस्पराश्रयपरिहारासम्भवस्य च सिद्धान्तहेतोस्तुल्यत्वात
बर्हिराज्यग्रहणमुपलक्षणार्थमित्याशयः । सर्वत्रेति भाष्या
संस्कृतप्रयोगस्य सार्वत्रिकत्वं पूर्वपक्षोपपत्तित्वेनोक्तं नासंस्कृ
त्यनेन चासंस्कृतप्रयोगाभावः तदुभयमप्ययाज्ञिकदेशे संस्कृ
योगाभावादसंस्कृतेष्वपि च कस्मिंश्चिद्देशे प्रयोगादयुक्तम
व्याचक्षाणः पूर्वपक्षमाह * तत्रेति * याज्ञिकप्रयोगो
विवक्षितः सर्वे च याज्ञिकाः संस्कृतेष्वेव प्रयुञ्जते नास
ष्वित्याशयः । तस्य बलीयस्त्वाय शास्त्रस्था वेत्युक्तं यश्चासं
क्व चित्प्रयोगः स प्रादेशिकत्वेनाशिष्टस्थत्वेन च दौर्बल्यात्साद
पत्तेर्न याज्ञिकप्रयोगस्य विगीतत्वापादने शक्त इत्येवमर्थत्वेन
संस्कृतेष्वपीत्याशङ्कानिरासार्थं सादृश्यादिति भाष्यं व्याख्या
गीतत्वादित्युक्तम् । ननु बर्हिराद्यनुवादेन विधीयमानस्य संस्
प्राक्सिद्धबर्हिराद्यपेक्षत्वेनेतरेतराश्रयापत्तेर्न बर्हिरादिशब्द
३०५।१ निमित्तता युक्तेत्याशङ्क्याह * तथा हीति * क्व चिद्देशे पुरो
दिशब्दैर्व्यवहारे सत्यप्यभियुक्तजने लोक्यते दृश्यते शब्दार्थ
न्धो ऽनेनेति व्युत्पत्त्या लोकशब्देन विवक्षिते व्यवहाराभाव
ष्टप्रयोगविरोधेनाशिष्टप्रयोगस्याप्रामाण्यात् यद् बर्हिस्तल्लुना
द्विवचनव्यक्त्यनुपपत्तेर्यल्लूयते तद् बर्हिरित्यादिविपरीतवच
त्त्याश्रयणात् । पुरोडाशादिशब्दानां संस्कारहेतुतेत्यर्थः । य
पलाशे बध्नातीति प्रकृत्य यूपं छिनत्तीति श्रवणाच्छेदनस्य
शविषयत्वावधारणाच्छेदनसंस्कृतपलाशनामत्वं यूपशब्द
सीयते तथात्रापि दर्भैस्तृणीत हरितैः सुपर्णैरिति बर्हिस्त
मन्त्रे कुशवाचिदर्भशब्दश्रवणाद् बर्हिःशब्दस्य लवनादिसंस्कृत
नामत्वावधारणात् पिष्टानि संयौति पिण्डं करोतीत्यादिश्र
पुरोडाशशब्दस्य प्रथनादिसंस्कृतपिष्टपिण्डनामत्वावधारणा
नादीनां च घृतविषयत्वं कथं त्रिवृत्प्रेष्याज्यशब्दस्योत्पवन
स्कृतघृतनामत्वावधारणाद्यूपादिवद्वचनव्यक्तिविपर्ययाश्रवण
मिति दृष्टान्तेन सूचितम् । संस्काररहिते कुशादिजातिमात्रे ब
दिशब्दस्य क्व चित्प्रयुक्तस्य संस्कृतेष्वपि जात्यनपगमेन ला
संस्कारशब्द इत्येवं सूत्रव्याख्यानार्थमेवं प्राप्तइति भाष्यं व
* तदिति * शास्त्रस्य शब्दार्थसम्बन्धहेतुत्वाभावेन लोकप्र
पेक्षत्वात् प्रादेशिकस्यापि प्रयोगस्य शास्त्रस्थप्रसिद्ध्या बाध्यो
इति वक्तुमेकदेशे ऽपीत्युक्तम् । श्लोकं व्याचष्टे *य एवेति *

ामिति भाष्येणासंस्कृतेषु सादृश्यात् प्रयोगोपपत्तिं पूर्वपक्षोक्तामभाष्य तन्नेत्यनेन संस्कारशब्दत्वप्रसिद्धेः सादृश्यानिमित्तप्रयोगकपना न युक्तेत्युक्तं तदतिस्पष्टत्वादव्याख्याय कथमिति प्रश्नपूर्वकमसिद्ध्युपपादनार्थं बर्हिरित्यादिभाष्यम् असंस्कृतेष्वपि शब्दलाभात्यनेनैकस्या युक्तेरुक्तत्वाद्युक्त्यन्तरसमुच्चयार्थत्वेन व्याचष्टे * किंति * जातिशब्दत्वाभावे पलाशे बध्नातीतिवत्कुशादीनामप्रकृतन संस्कारान्वयाज्ञानात् मन्त्रस्य च श्रुत्यविनियुक्तत्वेन स्वार्थसवायकल्पकत्वानुपपत्तेस्तद्वशेनापि लवनादेः कुशविषयत्वाज्ञाना उत्पवनादीनां च घृतविषयत्वोत्प्रेक्षायाः प्रापकानुपलम्भेनायोात् प्रथनादीनां च कथं चित्पिष्टपिण्डविषयत्वज्ञानसम्भवे ऽपि युकार्यपशुबन्धनार्थत्वेनेव पलाशस्य पुरोडाशकार्ययागार्थत्वेन पिपिण्डस्याश्रवणात् पुरोडाशशब्दस्य प्रथनादिसंस्कृतापिष्टपिण्डनात्वावधारणाशक्तेः पिष्टपिण्डप्रथनादिना पुरोडाशीकुर्यादिति वचनप्रस्याश्रयणायोगात् यद्बर्हिरादिशब्दवाच्यं तत्संस्कार्यं यच्च संस्क्रियते तद्बर्हिरादिशब्दवाच्यमितीतरेतराश्रयस्यापरिहार्यत्वात् लोकसम्मतं बर्हिरादिशब्दानां जातिशब्दत्वं तद्वेदेनापि लवनादिस्कारे विधेये तस्मात्प्रागाश्रितमित्यर्थः । ननु संस्कारविधितः ागेव केन चिद्यदृच्छया लवनादिभिः संस्कृतं कुशादि बर्हिरादिशरुद्दिश्य संस्कारविधिसम्भवान्नेतरेतराश्रयापत्तिरित्याशङ्कायाः । ाश्रयस्यापूर्वसाधनत्वयोग्यताधानार्थायाः क्रियायाः संस्कारशवाच्यत्वाद्विध्यभावे च तादर्थ्यानवधारणात् यदृच्छया लवनादौ ते ऽपि संस्कारस्याभावेन बर्हिरादिशब्दप्रवृत्तौ निमित्तत्वायोगात् परिहार्यमितरेतराश्रयमित्येवं निरासार्थं न चेत्यादिभाष्यम् आङ्कायास्तुच्छत्वे ऽप्यन्वयव्यतिरेकाभ्यां जातिवाचित्वावधारणामिति व्याख्यातुमाह * तेनेति * येन संस्कारात् प्रागेव जातिब्दत्वमाश्रितं तेनेत्यर्थः । तस्यां च गतौ वचनव्यक्तिविपर्ययाङ्गीरणमयुक्तमित्यभिधानार्थं न चालौकिकानां सतामित्यादिभाष्यं ाचष्टे * न चेति * श्लोकं व्याचष्टे * यदि हीति * प्रयोजनाष्यं तु निर्देशात्तु विकृतावपूर्वस्यानधिकार इत्यत्र तृतीये यूपावटस्तणार्थे बर्हिषि यूपाञ्जनार्थे चाज्ये लवनोत्पवनादयः संस्काराः कार्या वेति विचारेण स्पष्टीकरिष्यमाणत्वान्न व्याख्यातम् ।

॥ प्रोक्षण्यादिशब्दानां यौगिकताधिकरणम् ॥ ८ ॥

प्रोक्षणीष्वर्थसंयोगात् ॥ ११ ॥

अत्र भाष्यकृता प्रोक्षणीशब्दः किमुत्पवनादिसंस्कारनि
जातिनिमित्तो वा प्रकर्षसेचनलक्षणक्रियानिमित्तो वेति सं
पूर्वन्यायनिरस्तमपि संस्कारशब्दत्वमत्तच्छब्द इति पूर्वसूत्राव
ह सूत्रे प्रतिज्ञाकाङ्क्षयानुषक्तेन निरासप्रतीतेस्तद्व्याख्यानायो
सपूर्वकं निरस्य पूर्वन्यायेनैव जातिशब्दत्वं प्राप्तं यौगिकत्वेनाप
तद्रथकाराधिकरणे समुदायप्रसिद्धेरवयवप्रसिद्धितो बलीयस्त्व
क्ष्यमाणत्वात् विरुद्धमित्याशङ्कते * नन्विति * षष्ठे हि वचन
कारस्याधानस्य सर्वशेषत्वात् इत्यत्र वर्षासु रथकार आदधीतेति
मवयवप्रसिद्ध्या त्रैवर्णिकानामन्यतमो रथकारशब्देनोच्यते स
यप्रसिद्ध्या वा ऽन्यो जातिशब्द इति सन्दिग्धे ऽवयवप्रसिद्ध्या
कारिणि त्रैवर्णिके रथकारशब्दसम्भवात् अपशूद्राऽधिकरणप्र
द्धस्यात्रैवर्णिकस्याधिकारो न युक्त इति प्राप्ते समुदायप्रसिद्ध्य
वप्रसिद्धिबाधाद्वचनबलेनात्रैवर्णिकस्यैवाऽधिकार इति वक्ष्यते
न्यत एव तु समुदायप्रसिद्धिबलीयस्त्वसिद्धौ न्यायेन प्रतिषि
ध्यत्रैवर्णिकस्यैव वचनबलेनाधिकारनिश्चयात्सन्देहाभावेन र
राधिकरणारम्भो न युज्येत। न चान्यत्र क्वचित्समुदायप्रसि
लीयस्त्वव्युत्पादनं दृश्यते । न च तद्व्युत्पादनं विना पारिशेष्य
णात्रैवर्णिकस्याधिकारसिद्धिः। त्रैवर्णिकस्याप्यवयवार्थयोगेन र
रशब्दवाच्यत्वसम्भवे वसन्तादिवाक्यैस्तस्याधानप्राप्तावपि र
कारित्वेन निमित्तेन वर्षाकालाधानार्थतया वचनोपपत्तावा
ऽत्रैवर्णिकस्याधिकारकल्पनानुपपत्तेः । अत एव वचनादिति
हेतुं व्याख्यायाधानस्यासर्वशेषत्वादित्यनेनाधानसम्बन्धितया स
ब्राह्मणराजन्यवैश्येभ्यः प्राप्तेभ्यो ऽत्रैवर्णिकस्य परिशिष्टत्वादयम
विधिरित्येवमुक्तो हेतुः सर्वशेषश्चात्रैवर्णिक आधानइति भाष्ये
कारेण चशब्दप्रयोगादुपचयोपपत्तित्वेन व्याख्यातः । तस्माद्र
राधिकरणसिद्धमेतत्समुदायप्रसिद्धिबलीयस्त्वमिहोक्तम्। कथं
दायप्रसिद्धेः श्रुतिस्थानीयत्वं कथं चावयवप्रसिद्धेर्वाक्यस्थानीय
पेक्षिते रथकाराधिकरणवक्ष्यमाणमेवोभयमुपपादयति * तत्र
३०६॥१ ति * वर्णसमुदायशक्तिनिमित्तज्ञानात्मकत्वेन समुदायप्र
शब्दात्मकत्वात् श्रुतित्वाभावे ऽप्यक्षरश्रवणमात्रापेक्षत्वात् श्रु
त्यत्वं प्रातिपदिकावयवशक्तिनिमित्तज्ञानात्मिकायास्त्ववय
द्धेरेकार्थपदसमुदायात्मकवाक्यत्वाभावे ऽपि यौगिकप्रातिप
तिपाद्यस्य विशिष्टस्यार्थस्य ये प्रकर्षादयो भागास्तेषामेकार्थवृ
नियमलक्षणेनोपसंहारेण प्रवृत्तेर्विप्रकृष्टत्वाद्वाक्यतुल्यतेत्य

काराधिकरणे ऽवयवप्रसिद्धितः समुदायप्रसिद्धेर्बलीय-
ते तथापीह समुदायप्रसिद्धेरात्मलाभसदसद्भावौ चिन्त्येते
समुदायप्रसिद्धेरात्मलाभसदसद्भावौ चिन्त्येते यदि च
दायस्यैव शक्तिर्न क चिदवयवानां ततः सा चिन्ता विरु-
तदस्ति तथा सत्यवयवप्रसिद्धेः सर्वत्राभावापत्तेरित्य-
परिहरति * सत्यमिति * ननु समुदायप्रसिद्धेः स्वा-
ास्ति क च नेति कथं ज्ञातव्यमित्यपेक्षायामाह * तत्र
ननु समुदायप्रसिद्ध्या सर्वत्रावयवप्रसिद्धेर्बाधेनावयवा-
सर्वत्रैव समुदायः प्रसिद्ध्येदित्याशङ्कानिरासपूर्वं श्लोकं
* लब्धात्मिका हीति * नन्वेवं सति रथकारशब्दे ऽवय-
थे समुदायप्रसिद्ध्यनात्मलाभादभावे चाप्रातियोग्यभावात्त-
ानुपपत्तेरनर्थकं रथकाराधिकरणं स्यात् इत्याशङ्क्याह
त * रथकारशब्दस्य रथकारिण्यवयवप्रसिद्धिसम्भवात्
करिण्यां च रथकारः प्रजायतइति * स्मृते* श्चानुलोम-
न्वनास्तुहीनत्वात्मन्त्रवर्णात् प्रतीयेरन्नित्यनेन वा न्यायेन
वा देवतानां व्रतपते व्रतेनादधामि इति रथकारस्यादध्यादि-
त्रवर्णात् सौधन्वना ऋभव इति च सौधन्वनशब्दसामा-
यस्य ऋभुशब्दस्य तं नेमिमृभवो यथेति मन्त्रवर्णाद्रथका-
प्रसिद्धेः।
व्रात्यात्तु जायते वैश्यात् सुधन्वाचार्य एव च।
मारुषश्च विजन्मा च मैत्रः सात्वत एव च॥
ति सात्वताद्यपरपर्याये सौधन्वनाख्ये जातिविशे-
ायप्रसिद्धिसम्भवाद्रथकार आदधीतेत्यत्र समुदाय-
लीयस्त्वाभिधानं युक्तमित्यर्थः। नन्वेवं तर्ह्युदासी-
प्रकर्षसेचनकरणत्वाभावे ऽपि क चिद्देशे प्रयोग-
प्रकर्षसेचनकरणत्वे सत्यपि च तैलादावप्रयोगाद्योगस्य
रत्वेन समुदायप्रसिद्ध्यात्मलाभोपपत्तेस्तद्बलीयस्त्वाद्रथ-
रणसिद्धान्तात् जातिवाचितैव युक्तेत्याशङ्कां तुशब्दस-
पुनःशब्देन निरस्यन् सिद्धान्तमाह * अत्रेति * औदा-
ायामपि प्रकर्षसेचनकरणत्वशक्तिसद्भावात् प्रयोगोपप-
द्भावेन च शब्दप्रयोगावश्यम्भावाभावात् तैलादावप्रयो-
। क्लृप्तावयवशक्त्यानुसारेणैव शब्दप्रयोगोपपत्त्यार्थापत्तेः
समुदायस्य शक्त्यन्तरकल्पनानुपपत्तेः समुदायप्रसिद्ध्या-
ास्तीत्याशयः। स्वरूपतो ऽवयवार्थाभावे शक्तिसद्भावमा-

त्रेणाम्नाविवादग्धृत्वावस्थायामपि दग्धृशब्दस्य प्रोक्षणीशब्दः
पपत्तौ समुदायस्य शक्त्यन्तरकल्पनं न युक्तमित्येतदेव व्या
ष्टान्तमुखेन दर्शयितुमाह * तथा हीति * शालाख्ये वृक्ष
ऽश्वत्वकर्णत्वयोः शक्तिरूपेणाप्यभावात्समुदायस्य शालजाति
त्वं कल्पितमित्यर्थः । सिद्धान्तमुपसंहरति * तस्मादिति
न्वेवं सति तैलादावपि प्रोक्षणीशब्दः किमिति न प्रयुज्यते
ङ्क्याह * इतीति * समुदायप्रसिद्ध्यभावसिद्धयौगिक
मर्शार्थो ऽयमितिकरणः । यस्मात्प्रोक्षणीशब्दस्य समुदा
द्ध्यभावाद्यौगिकत्वं सिद्धं तस्मात्तैलादावपि साधारणतास्
योगाभावस्तु सत्यपि वाच्ये न विरुध्यतइत्याशयः । यद्वा स
प्रसिद्धेर्बलीयस्त्वे ऽप्यप्सु प्रोक्षणीशब्दस्य तदभावादवयवप्र
रङ्गीक्रियमाणा न रथकाराधिकरणविरुद्धेति सूचनार्थत्वात्
ऽयमितिकरणः । प्रयोजनभाष्ये प्रोक्षणीशब्दस्य संस्कार
धृते ऽप्यविकृतस्य प्रयोगमुक्तमाक्षिपति * नन्विति * प
* यदि हीति * निपातानामनेकार्थत्वात् शङ्कानिरासार्थो हि
एतदेवोपसंहरति * तस्मादिति * यौगिकत्वे स्त्रीप्रत्यय
३०७।१ वृत्तिप्रयोजनत्वेनोक्तामुपपादयति * यौगिकत्वे त्विति * न
गिकत्वे ऽपि घृतप्रोक्षणं भवतीति विधिवाक्ये घृतशब्दश्रवण
धिशब्दस्य मन्त्रत्वाभावः स्यात्तेन चोदनेति दशमाधिकरण
द्रव्ये ऽपि देवतावद्विधिगतस्यैव शब्दस्य प्रयोगनियमाज्ञातिर
वत् घृतशब्दस्यैव प्राप्तेः प्रातिपदिकस्यापि निवृत्तत्वात् स्त्रीप्र
अनिवृत्त्यभिधानं न युक्तमित्याशङ्क्याह * न चेति * दश
ग्नये पवमानायाष्टाकपालं पुरोडाशं निर्वपेदिति विहिते किम
वमानादिगुणशब्दसहितेनाग्निशब्देनाभिधेयः केवलेन वेति
प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यादिति सिद्धान्तेनोप
विकारो वार्थशब्दानपायात् स्याद् द्रव्यवदित्यनेनार्थस्याग्न
प्राप्तस्य चाग्निशब्दस्य केवलाभिधाने ऽप्यनपायात्तथा सा
सर्वदेवत्या यदजा वशा वायव्यामालभेत भूतिकाम इत्यजाश
विहिते द्रव्ये वशाशब्दवाच्यवन्ध्यात्वगुणयुक्ते चातिदेशप्राप्तौ
गशब्देन निर्गुणेन चाभिधानं तथेहाप्यविकारः स्यादिति पू
पन्यस्यारम्भासमवायाद्वा चोदितेनाभिधानं स्यादर्थस्य श्रु
वायित्वादवचने च गुणशास्त्रमनर्थकं स्यादित्यनेनार्थस्य दे
श्रुतिसमवायित्वादारम्भेण स्वरूपेण कर्मण्यसमवायाद् गुण
धाने च गुणशास्त्रस्यानर्थक्यापत्तेः चोदितेन सगुणेना

स्यादित्येवं निरस्य द्रव्येष्वेवारम्भगामित्वादर्थे विकारसामर्थ्यमि त्यनेनारम्भेण स्वरूपेण द्रव्येषु क्रियागामित्वाद्विकारसहितस्यापि शब्दस्य द्रव्यरूपेऽर्थे सामर्थ्यमस्तीति वैधर्म्यं वदता द्रव्येष्वर्थरूपेण कर्मणि समवायाभ्युपगमाद्विधिगतशब्दप्रयोगनियमो नास्तीत्यर्थः ।

॥ अथ निर्मन्थ्यशब्दस्य यौगिकत्वाधिकरणम् ॥ ९ ॥

तथा निर्मन्थ्ये ॥ १२ ॥

वैद्युताद्याग्निव्यक्तेर्मन्थनजन्यत्वे शक्तेरप्यभावात् पूर्वन्याया त्तुल्यत्वमाशङ्क्य विशेषरूपेण शक्त्यभावेऽप्यग्निजातीयस्य कस्य चि न्मन्थनजन्यत्वदर्शनेन शक्त्यवधारणाद्वैद्युतादावप्यग्निजातीयकत्वा विशेषेण सामान्यतः शक्तिसम्भवेन कथं चित् क्लृप्तावयवशक्त्यनु सारात्प्रयोगोपपत्तौ समुदायस्य शक्त्यन्तरकल्पनानुपपत्तेस्तुल्यत्वा तिदेशायेदमधिकरणमित्याह * निर्मन्थ्येऽपीति * भाष्यकारेणा चिरनिर्मन्थितत्वं यौगिकत्वप्रयोजनमुक्तमाक्षिपति * वैद्युतेति * पाकान्यथानुपपत्त्याग्निमात्रप्राप्तौ मन्थनजन्यत्वविशेषणस्यातज्जन्या ग्निव्यावृत्त्या कृतार्थत्वात् नाचिरत्वाक्षेपकत्वं युक्तमित्यर्थः । ननु ना वनीतेन भुङ्क्त इत्यत्रापि घृतशब्दानुदापानात्तैलादेरपि प्राप्तौ तन्नि वृत्त्या नावनीतशब्दस्य कृतार्थत्वात् नाचिरत्वाक्षेपकतेत्याशङ्क्याह * लोक इति * प्रमाणान्तरावगतवक्तृभिप्रायानुसारात्तत्र विशेषप्र तीतिर्न शब्दसामर्थ्यादिति भावः । यद्वा यथैवाभ्यासः सामधेनीनां प्राथम्यात् स्थानधर्मः स्यादित्यत्र त्रिः प्रथमामन्वाह त्रिरुत्तमामिति प्रथमोत्तमशब्दयोः प्रथमावगताद्यन्तस्थानपरत्वातिक्रमहेत्वभावात्त तदुपलक्षितप्रवो वाजा आजुहोतेति ऋक्परतेति नवमे वक्ष्यते तथा नावनीतशब्दस्यापि प्रथमावगतनवनीतविकारत्वलक्षणधर्मातिक्रमेण तदुपलक्षितघृताख्यधर्मिपरत्वाभावात् धर्मस्य च प्रवो वाजा इति प्रथमऋक्प्रतीकम् । आजुहोतेति अन्त्यऋक्प्रतीकं तत्परता धर्मिग तस्पर्द्धमानधर्ममात्रव्यावर्त्तकत्वेनास्पर्द्धमानधर्म्यन्तरव्यावर्त्तकत्वा योगात् तैलादिव्यावृत्त्यप्रतीतेर्घृते च नवनीतविकारत्वावरुद्धधर्मान्त राऽभावादबुद्धिस्थनवनीतव्यक्तिविकारत्वव्यावृत्त्या बुद्धिस्थनवनी तव्यक्तविकारपरत्वावगतेश्चिरकालवगतायाश्च नवनीतव्यक्तेरबुद्धि स्थत्वादचिरावगतनवनीतव्यक्तिविकारत्वप्रतीतेः । शब्दसामर्थ्या देवाचिरनिर्दग्धत्वावगतिरित्याह * सर्वघृतानां चेति * प्र करणादिना घृतप्रतीतिमभिप्रेत्य पुनःश्रुतेरित्युक्तं नावनीतेन घृतेन भुङ्क्त इत्येवंविधवाक्याभिप्रायेण वा पञ्चम्यन्तं वा श्रुतिशब्दमङ्गीकृ

स्य श्रुतितो ऽपि पुनरेवमचिरनिर्दग्धत्वावगतिरित्येवं योज्यम्। अ
र्थैक्यानुपपत्तिलक्षणार्थो वा पुनः शब्दः।निर्मन्थ्यशब्दे तु शब्दप्र
णकत्वेन प्रमाणान्तरानुसारायोगादमन्थनजन्याग्निनिवृत्त्या च वृ
र्थत्वेन शब्दसामर्थ्याभावादचिरनिर्मन्थितत्वाप्रतीतेर्नाचिरनिर्मा
तविषयता कल्प्येति वैषम्यमाह*इह त्विति * चिरग्रहणं दृष्टान्
ननु पङ्कजादिशब्दवन्निर्मन्थ्यशब्दस्य योगरूढित्वादचिरनिर्मन्थि
ग्निगतमन्थनक्रियायोगनिमित्तत्वप्रतीतेर्विशेषावगतिर्भविष्यतीत्य
ङ्क्याह * न हीति * पद्मव्यतिरिक्ते द्रव्ये पङ्कजन्यत्वे सत
पङ्कजशब्दप्रयोगाभावात् योगरूढित्वं कल्पितं निर्मन्थ्यशब्दस्य
ग्निमात्रे प्रयोगस्य भाष्यकृतोक्तत्वान्न योगरूढिता कल्प्येत्याश
आक्षेपमुपसंहरति * तस्मादिति * पाकाङ्गत्वेनेह विधीयमा
मन्थनस्य पाकैकदेशकालकर्तृकत्वादचिरनिर्मन्थितत्वसिद्धिं
परिहरति * नैष दोष इति * श्लोकं व्याचष्टे * यथैवेति
नन्वेवं सति देशकर्त्रैक्यमपि कस्मान्नोक्तमित्याशङ्क्याह * तेनेति

॥ अथ विश्वदेवादिशब्दानां यागनामधेयताधिकरणम् ॥ १० ।

वैश्वदेवे विकल्प इति चेत् ॥ १३ ॥

अत्र भाष्यकृता किं वैश्वदेवशब्दो गुणविधिः कर्म न
धेयं वेति चिन्तोक्ता सा पूर्वपक्षसूत्रे विकल्पाभिधानात् सिद्धा
सूत्रे च तन्निराकरणमात्रप्रतीतेरयुक्ता च प्रकरणपर्यालोचनया
णविधिनामधेयविचारो ऽधिकरणस्य तात्पर्यावगमादेवमुपन्य
युक्तः । आग्नेयाधिकरणे ऽपवादान्नामधेयविचारस्य पर्यवसित
वगतेर्नामधेयविचारस्यापर्यवसितस्याप्यपवादसम्भवे दर्विहोम
स्यैहैव विचार्यत्वाशङ्काष्टमाध्यायासङ्गत्या शङ्कायास्तत्रैव नि
कार्यत्वेनेहाप्रस्तुतत्वात् न युज्येताथाग्नेयाधिकरणस्यापवाद
न सङ्गतिप्रदर्शनार्थं गुणविधिनामधेयविचारे ऽपि विधि
विधिव्युत्पादने तात्पर्यादपवादे तात्पर्याभावेन पर्यवसानद
कत्वं नास्तीत्युच्यते तथा सत्युत्पत्तिशिष्टगुणबलीयस्त्वासि
प्रयोजनत्वाद्विशिष्टविधिव्युत्पादनस्य तदधिकरणोक्तक्रियान
स्तत्वप्रसक्त्या कृते ऽधिकरणत्रये यत्प्रसक्त्या यो विच
स्तत्समाप्तौ स एव बुद्धिस्थो भवतीति प्रासङ्गिकाधिकरण
समाप्त्या तस्यैव बुद्धिस्थस्य प्रयोजनविचारायैतदधिकरणमिति
णमिति गुणविधिनामधेयविचारे तात्पर्याभावात्तदुपन्यासस्तात
तो ऽप्ययुक्तः । उत्पत्तिशिष्टबलीयस्त्वव्युत्पादनार्थे चास्मिन्नधि

णे सत्युद्भिदादीनामेवोदाहरणत्वोपपत्तेर्वैश्वदेवोदाहरणं व्यर्थ-
त्याशङ्क्याह * तद्धितेति * अयमाशयः (सत्यपि विशिष्टवि ३
धौ[1]) गुणविशिष्टस्यापि कर्मणो विहितस्य विशिष्टविध्यन्यथानुपपत्ति-
सूतेन विधिना विशेष्यस्यापि विशेषणवद्विधानाच्छुद्धानुवादेनापि
ाक्यान्तरस्थस्यापि गुणस्य स्ववाक्यस्थवद्वाक्यीयत्वाविशेषाद्विकल्पे-
विधानोपपत्तेरुत्पत्तिशिष्टेनापि सोमेनोत्पन्नशिष्टस्य खनित्रादेर्बा-
ाययोगादुद्भिदादिशब्दानां ज्योतिष्टोमे गुणविधित्वोपपत्तेरुत्पत्ति-
ाष्टबलीयस्त्वेन गुणविधित्वानिरासायोत्पत्तिशिष्टबलीयस्त्वसिद्ध्य-
विशिष्टविधिव्युत्पादनं व्यर्थमित्याशङ्क्यानुष्ठानायोग्यत्वेन शुद्ध-
य विधातुमशक्यत्वात् अग्निहोत्रं जुहोतीत्यादावपि सामान्यतो
व्यदेवताविशिष्टस्यैव विधेयत्वाभ्युपगमात् विशिष्टविधौ स्ववा-
यश्रुतद्रव्यादिविशेषविशिष्टस्यैव प्राप्तत्वेनानुवादापत्तेस्तादृशेन च
राकाङ्क्षे स्ववाक्यश्रुतगुणविरोधिगुणान्तरविध्यनुपपत्तेर्विशिष्ट-
धौ सत्युत्पत्तिशिष्टेनोत्पन्नशिष्टस्य बाधसिद्धिरिति विशिष्टविधि-
ुत्पादनप्रयोजनमुत्पत्तिशिष्टबलीयस्त्वं समर्थयितुमेतदधिकरणम्
थाप्युत्पत्तिशिष्टबलीयस्त्वेनैव वैश्वदेवशब्दस्य नामधेयत्वं सिध्यति
ान्यथेति दर्शयितुं भाष्यकृतैवं विचारारम्भः कृतः । वैश्वदेवोदा-
रणस्याप्येतदेव प्रयोजनमित्येतदेवोपपादयितुं पूर्वोक्तकारणासम-
स्तद्धितोपात्तत्वादित्यादिना दर्शितः । न तूद्भिदाद्यधिकरणैरगता-
त्वम् दर्शयितुम् इति भ्रमितव्यं गतार्थत्वशङ्कानुपपत्तेस्तन्निरासाया-
तार्थत्वाभिधानानर्थक्यात् सास्यदेवतेति हि देवतातद्धिताधिकारे
ुक्तहविषोरिति स्मृतेर्देवतातद्धितस्य सूक्ते हविषि वा मुख्यत्वाव-
मे ऽपि द्रव्यविशेषस्येहानुपादानेनास्य शब्दाभिधेयत्वायोगात्सा-
ानाधिकरण्योपात्तत्वेनास्य शब्दाभिधेयस्य यागस्यैव देवतास-
बन्धावगतेस्तदन्यथानुपपत्त्या द्रव्यस्यैव लक्ष्यमाणत्वात् मत्वर्थस्य
ागस्य लक्षणा नाशङ्कितुं शक्या आग्नेयमष्टाकपालं निर्वपति सौम्यं
रुं सावित्रं द्वादशकपालं सारस्वतं चरुं पौष्णं चरुं मारुतं सप्तक-
ालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालमित्यष्टौ कर्माणि
कृतानि वैश्वदेवेन यजेतेति याजिनानूद्य विधित्सितस्य देवतालक्ष-
ास्य गुणस्यामिक्षायागे प्राप्तस्यापि इतरेषु सप्तसु प्राप्त्यभावात्
विधिसम्भवे तत्प्रापणवैयर्थ्याभावात् तत्प्रख्यतापि नाशङ्कितुं शक्या
ाक्यभेदाद्याशङ्का त्वत्यन्तनिर्मूलेत्यगतार्थत्वाभिधानर्थक्यापत्तिरु-
पत्तिशिष्टबलीयस्त्वेनैव वैश्वदेवशब्दस्य नामधेयत्वं दर्शयितुमेव-

१ अयं पा० २ पु० पा० ।

मारम्भ इतीदृश्येव ग्रन्थतात्पर्यव्याख्या युक्ता । ननु गुणविधि
धेयचिन्तात्मकस्याधिकरणस्य बर्हिराज्यादिविचारात् प्रागेवार
स्यादित्याशङ्क्याह * सर्वत्र चेति * बर्हिरादिशब्दोऽपि कस्य
त्वयं विचारात्मकत्वात् तस्याव्यवधायकत्वेत्यर्थः । यद्वा
णविधिप्रतियोगित्वेन विधिनिरपेक्षलोकप्रसिद्धदध्यादिनाम
क्षणं विधेयकर्मण्यलौकिकं नाम वेदेन विधीयमानं नामधेयशब्द
च्यते तदा संस्कारनिमित्तत्वपक्षे यल्लूयते तस्य बर्हिःशब्दो
ति विधेयसंस्कारयुक्ते द्रव्ये वेदेनालौकिकस्य नाम्नो विधीयम
त्वात् नामधेयत्वजातिनिमित्तत्वे यौगिकत्वे च विधिनिरपेक्षलो
सिद्धत्वात्तन्नामधेयतेति सामान्यत एव नामधेयचिन्तात्मक
स्पष्टमेवाव्यवधायकत्वं यद्वा निर्मन्थ्यशब्दस्य यौगिकस्य नाम
त्वे सत्यपि गुणविधित्वस्य दर्शनाद्वैश्वदेवशब्दस्यापि यौगिकत
सत्यपि नामधेयत्वे गुणविधित्वमप्यास्त्विति समुच्चयेन पूर्वपक्ष
वलनामधेयत्वेन सिद्धान्त इत्येव विचाराङ्गीकरणेनानन्तरसङ्गा
वं वक्तुं शक्येत्याह * अथ वेति * एतच्चानन्तरसङ्गत्युपपा
सामर्थ्यप्रदर्शनमात्रार्थमुक्तं न पारमार्थिकं सिद्धे हि वैश्वदेवश
नामधेयत्वे समुच्चयेन पूर्वपक्षः स्यात् तत्सिद्धिश्च तत्प्रख्यतयैव
वेषां नामधेयमिति वार्त्तिकदर्शनात् तत्प्रख्यन्यायेनाशङ्क्यते
चाविदितबोधनं च विधिरित्युच्यते विदितं चात्रान्यतो गुणवि
नमिति तत्प्रख्याधिकरणभाष्यादतस्तत्प्रापणं व्यर्थमिति च
र्त्तिकाद्विधित्सितस्य गुणस्यान्यतः प्राप्तौ विध्यानर्थक्याद् गुणवि
त्वानुपपत्तेः पारिशेष्यान्नामधेयतेत्येवं रूपः प्रतीयते न चामिक्षाय
व्यतिरिक्तेषु यागेष्वन्यत्र विधित्सितस्य गुणस्यान्यतःप्राप्तिरस्ति
कृत्याविशेषेणाष्टस्वपि यागेषु गुणविधित्वापत्तावप्यस्यामिक्षाति
कार्यत्वेनानर्थक्यायोगात् गुणविधित्वमाश्रित्य वैश्वदेवीमामि
मित्यस्यैवामिक्षामात्रविशिष्टभावनाविधायित्वाश्रयणेन क्रमावि
युक्तवैश्वदेवयाज्यानुवाक्यायुगलकल्पितमान्त्रवार्णिकदेवता
याद्यागेऽनुमिते वैश्वदेवीशब्दस्यामिक्षायागनामधेयत्वं वरं
मन्त्रवर्णाच्च तद्धितस्य बलीयस्त्वात् तद्धितनियुक्ताया अपि देवत
वैश्वदेवेन यजेतेत्यनेन विधिराविरुद्धः उत्पत्तिशिष्टाग्न्याद्यवर
त्वादामिक्षायागव्यतिरिक्तेषु देवताविध्यसम्भवेनामिक्षायागे देव
विधिप्रसक्तिमापाद्य तत्प्रख्यतया नामधेयत्वासिद्ध्यभ्युपगमे केव
मिक्षायागनामत्वापत्तेः सर्वनामतेष्टा न सिध्येत् । वार्त्तिककारैः
तत्प्रख्यत्वाभिधानमुत्पत्तिशिष्टबलीयस्त्वेनैतदधिकरणव्युत्पादिते

णविध्यसम्भवान्नामधेयत्वे साधिते प्रवृत्तिनिमित्तप्रदर्शनार्थं न तु
मधेयत्वसिद्ध्यर्थम् सर्वत्र च गुणविधित्वसम्भवेनैव नामधेयत्वा-
भिधानात् इह गुणविधित्वसम्भवे नामधेयत्वानुपपत्तेः । समुच्चयेन
पक्षस्यानाशङ्क्यत्वात्प्रौढिमात्रमेतदिति स्थितं विशिष्टविध्यसम्भवे
स्य चिद् गुणस्योत्पत्तिशिष्टस्याभावात्तद्बलेन प्रसिद्ध्यादिहेतुत्रया-
श्रितगुणविधित्वनिरासाशक्तेः सन्देहायोगाद्विशिष्टविधौ व्युत्पा-
ते सत्युत्पत्तिशिष्टगुणसम्भवात्तद्बलीयस्त्वसन्देहेन गुणविधि-
मधेयसन्देहो भवतीति सूचनार्थत्वेनेति चेदिति सूत्रावयवव्या-
र्थं यदीति भाष्यं स्पष्टत्वान्न व्याख्यातं विकल्पशब्दस्य गुणवि-
प्रतिज्ञानार्थत्वेन व्याख्यानार्थं वैश्वदेव इति भाष्यमुपपादयति
तत्रेति * विफलेन गुणविधिप्रतिज्ञानस्य किं प्रयोजनमित्य-
ायामुत्पत्तिशिष्टाग्न्याद्यविरुद्धेषु यागेषु देवतान्तरविध्ययोगाद्
विध्यसम्भवाशङ्कानिरासप्रयोजनमाह * एवं हीति * ननू-
त्तिशिष्टबलीयस्त्वस्योत्पत्तिवाक्यविज्ञातमित्यादिना चिन्ताधिकर-
साधितत्वात् नेहोत्पत्त्युत्पन्नशिष्टयोर्विकल्पः पूर्वपक्षयितुं युक्त इ-
शङ्क्याह * न चेति * वाक्यभेदापत्त्या तत्र गुणविधित्वानिरा-
त् पुंपशौ प्राप्ते स्त्रीपशुरिति भाष्यावयवव्याख्यानार्थानागतावेक्ष-
नैतदधिकरणसिद्धोत्पत्तिशिष्टबलीयतास्माभिरुक्तेत्यर्थः[1] । भाष्या-
वो ऽप्यनागतावेक्षणेनाभ्युच्चयहेत्वभिधानायेति भाष्यकारशब्दे-
सूचितम् । ननूत्पत्तिशिष्टामिक्षावरुद्धे यागे वाजिनस्योत्पन्नशिष्टस्य
धाना ऽयोगेन भेदकत्वस्य गुणाधिकरणे वक्ष्यमाणत्वात् इह तु-
बलत्वाशङ्का न युक्तेत्याशङ्क्य * क्व चिदित्युक्तम् * वैश्वदेव्या-
क्षा वाजिभ्यो वाजिनमिति तद्धितचतुर्थीकृतं बलाबलं तत्र च-
ते नोत्पत्त्युत्पन्नशिष्टकृतमित्याशयः । नन्वेवमप्यष्टदोषविकल्पा-
दकत्वाद् गुणविधिर्न युक्त इत्याशङ्क्याह * किं चेति * वसन्ता-
दिकालादियोगेनैव समुदायापादनासिद्धेः समस्तानुवादानर्थक्य-
ङ्गाद्वैश्वदेवशब्दस्य चाग्नेयादिषु प्रत्येकं समुदाये वा प्रवृत्तिनि-
त्ताभावेन नामधेयत्वायोगादगत्या विकल्पापादको गुणविधिरेव
ख्यानित्याशयः । श्लोकं व्याचष्टे * यदि हीति * नन्वाग्नेयादिषु
कं समुदाये वा विश्वेदेवसम्बन्धस्य प्रवृत्तिनिमित्तस्याभावान्ना-
यत्वासम्भवे ऽप्यामिक्षायागनामत्वं प्रवृत्तिनिमित्तसद्भावाद्भवि-
तीत्याशङ्क्याह * न चेति * यजिसामानाधिकरण्यनिबन्धनत्वान्ना-
यत्वस्य यजेश्चामिक्षायागमात्राग्राहित्वायोगात् तन्मात्रनामधेय-

[1] तन्त्राध्य इ० २ पु० पा० ।

त्वस्य च निष्प्रयोजनत्वेन सिद्धान्तिनो ऽप्यनिष्टत्वात् नैषा युक्तेत्यर्थः । आमिक्षायागे तत्प्रख्यान्यशास्त्रसद्भावाद् गुणविधि
३०९।१ स्यादित्याशङ्कां निरस्यन् पूर्वपक्षमुपसंहरति * तस्मादिति * २
वुत्पत्त्युत्पन्नशिष्टयोस्तुल्यबलत्वेनोत्पत्तिशिष्टाग्न्याद्यवरुद्धेष्वा
गेषु विकल्पेन देवतान्तरनिवेशः सम्भवति नामधेयत्वं च स
नुवादानर्थक्यापत्तेरामिक्षायागव्यतिरिक्तेयु च प्रवृत्तिनिमित्त
वात् तन्मात्रनामत्वस्य चानिष्टत्वात् न युज्यते तस्मादित्यर्थः
ङ्कानिरासार्थं सर्वास्वित्युक्तम् । ननु प्रकृतत्वाविशेषात् सर्वेषु याग
जिना गृहीतेषु एकस्यैव वैश्वदेवशब्दस्यामिक्षायागव्यतिरिक्तेषु
धित्वं तस्मिंश्चानुवादत्वं वैरूप्यापत्तेर्न युक्तमित्याशङ्कते * तत्रे
परिहरति*तत्रेति* प्रकृतत्वात् सर्वयागानां ग्रहणाविशेषे ऽपि
यागेषु गुणस्याप्राप्तिस्तेषु विधिप्रत्ययस्य तात्पर्योपसंहारात् त
समर्पकस्य वैश्वदेवशब्दस्यापेक्षाऽभेदाद्वैरूप्यमित्यर्थः ।

न प्रकरणात्प्रत्यक्षविधानाच्च न हि प्रकरणं
व्यस्य ॥ १४ ॥

वैश्वदेवशब्दे गुणविधानस्य प्रकृतयागापेक्षत्वात् तेषु
त्यक्षेण द्रव्यदेवताविशिष्टयागविधिनैवाग्न्यादिदेवतालक्षणस्य
स्य विधानात्तद्विरोधिगुणान्तरनिवेशानुपपत्तेर्न गुणविधिः स
तीत्युत्पत्तिशिष्टबलीयस्त्वेन गुणविधिनिराकरणमविहितदेव
पांशुयाजादियागे देवताविधौ देवताविशिष्टयागान्तरविधौ
सम्भवतीति प्रकृतयागानुवादो न गुणविधिरुत्पत्तिशिष्टबलीयः
निरस्यत इति दर्शयन्सौत्रनञुक्तां प्रतिज्ञां व्याचष्टे * अत्रेति
त्पत्त्युत्पन्नशिष्टत्वलक्षणवैषम्याभिधानसूचितमुत्पत्तिशिष्टेनोत्प
ष्टस्य बाधं प्रश्नपूर्वकं हेतुत्वेनाह * कथमिति * उत्पत्त्युत्पन्न
योर्वाक्ययित्वाविशेषात् विकल्पोपपत्तेः किमित्युपत्तिशिष्टगुण
द्धे कर्मणि उत्पन्नशिष्टो गुणो नावकाशार्ह इत्यपेक्षायां प्रकरण
त्यक्षविधानाच्चेति सूत्रावयवोक्तं वैषम्यं हेतुत्वेन योजयति *
कल्पो ऽपीति * पारिशेष्यान्नामत्वसिद्धिं तस्मादित्युपसंहा
व्योक्तां विवरीतुम् * तस्मादित्युक्तम् * उत्पत्तिशिष्टबली
प्रत्यक्षविधानादिति * सूत्रावयवोक्तम् * दर्शयितुं प्रत्यक्षेति
र्थं व्याचष्टे * अग्न्यादयो हीति * यद्यपि सोमेन यजेत

१ नामामति २ पु० पा० ।

र्मगुणयोर्भिन्नपदोपादाने ऽपि सकृच्छ्रुतेनैव प्रत्ययेनोभयविधाना-
: शुद्धकर्माप्राप्तेरुत्पत्तिशिष्टबलीयस्त्वं सिध्यति तथापीह विधेय-
मर्पकमप्येकमेव पदमस्तीत्यतिशयाभिधानार्थं तद्धितग्रहणं तेषां
गादीनामिति भाष्योक्तस्याग्न्यादीनां यागसम्बन्धस्य द्रव्यसम्ब-
द्वारत्वं दर्शयितुमष्टाकपालादीनामित्युक्तम्। एकपदोपात्ताग्न्या-
वैषम्यसूचितामितरेषां भिन्नपदोपादानं विश्वेदेवा इत्यनेन दार्शि-
म्। नन्वाग्नेयमष्टाकपालं निर्वपतीत्यादावुत्पत्तिवाक्ये ऽपि द्रव्य-
शेषसम्बन्धस्याष्टाकपालादिपदान्तरसम्बन्धाधीनत्वाद्वाक्यीयत्वेन
व्यतेत्याशङ्कते * नन्विति * नैव हि द्रव्यमात्रस्य तद्धितैर्देवतो-
यते अस्य शब्दाभिधेयस्य विग्रहवाक्यस्थेनास्येति सर्वनाम्ना सन्नि-
तस्य द्रव्यविशेषस्यैव देवतासम्बन्धस्तद्धितेन क्रियते न चैतावता
दान्तरानर्थक्यम्।

आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।
आमिक्षापदसामीप्यात्तस्यैव विषयार्पणम्॥

इत्यनेनैव न्यायेन सन्निहितविशेषणापेक्षितविशेष्यासमर्पणा-
त्वात् पदान्तरस्येति परिहरति * नेति * प्रत्यक्षविधानादिति
त्रावयवोक्तेनैव तद्धितवाच्यद्रव्यविशेषसम्बन्धेन पशुसोमाधि-
रणादौ व्यवहारादपौनरुक्त्यम् अस्यापि तद्धितत्वाविशेषात् तुल्य-
माशङ्कते * वैश्वदेवशब्दे ऽपीति * देवताशब्दस्य सम्बन्धिश-
त्वेन गुर्वादिशब्दवत् प्रतिसम्बन्धिनमपेक्ष्य प्रवृत्तेर्यागस्य च स-
न्धापादकत्वेनाध्यापनादिवत् प्रतिसम्बन्धित्वायोगात् द्रव्यस्यैव
ष्यादिवत् प्रतिसम्बन्धित्वप्रतीतेः। सास्यदेवतेति देवतातद्धिता-
कारसूत्रे ऽस्य शब्दस्य प्रतिसम्बन्धिद्रव्यविषयत्वावधारणात् सू-
हविषोरिति नियतविषयत्वस्मृतेश्च वैश्वदेवशब्दस्य देवतासम्ब-
धद्रव्यवाचित्वावसायाद्यागलक्षितस्य द्रव्यस्य देवतासम्बन्धं क-
पयित्वा तद्द्वारेण यागस्य देवतासम्बन्धात्प्रवृत्तेर्विप्रकर्षसाम्या-
क्येनेति भाष्यकृतोक्तमिति परिहरति * नेति * नन्वष्टाकपा-
दे: प्रकृतस्य देवतासम्बन्धित्वोपपत्तेः किमिति यागेन द्रव्यं लक्ष्य-
यमित्याशङ्कानिरासपूर्वकमेतदेव व्याचष्टे * न तावदिति * द्र-
सम्बन्धं विना तद्धितशब्दस्यापर्यवसानेन वाक्यान्तरान्वयायो-
त् अप्रकृतवत्प्रकृतेनापि द्रव्येण स्ववाक्ये श्रवणं विना सम्बन्धा-
पपत्तेरपरिहार्या लक्षणेत्याशयः। ननु वाक्येनैव विश्वेषां देवानां
गसम्बन्धलाभेन प्रकरणादिति सूत्रावयवेन प्रकरणापेक्षत्वाभि-
नमयुक्तं स्यादित्याशङ्कानिरासार्थं प्रकरणादिति भाष्यं व्याचष्टे

* वाक्येन चेति * कर्मानुवादिनां धातूनां सामान्यविषयत्वे
सङ्करापत्तेस्तत्परिहारायानुवाद्यकर्मविशेषलाभार्थं प्रकरणापे
शयः। तथा च प्रत्यक्षविधानादित्यनेनाग्न्यादीनामेकपदोपादा
धानाद्विश्वेषां देवानां भिन्नपदोपादानां सूचितम् । तथा प्रक
दित्यनेन विश्वेदेवविधौ प्रकरणापेक्षाभिधानादग्न्यादिविधौ
पेक्षा सूचितेति दर्शयितुमाह * न त्विति * भाष्यगतेन वा
ब्देन वैश्वदेवशब्दे द्रव्यलक्षणाभिधानात्तत्सदसद्भावकृतमपि
म्यं सूचितमिति दर्शयितुं लक्षणाशब्दः । न हीति सूत्रावयवं
तावन्नन्वाग्नेयादिवाक्ये ऽपि द्रव्यदेवतासम्बन्धान्यथानुपपत्त्या
कल्पयितुमारभ्यमाणो वैश्वदेवेन यजेतेति प्रत्यक्षश्रुतेन कल्प
तिबन्धात् तस्यैव ग्रहणायास्त्वेव प्रकरणापेक्षेत्याशङ्कानिरासा
निर्वपतेरतिदेशप्राप्तानुवादत्वेन पुंव्यापारनियोगाभावात् आ
दिवाक्यस्य स्वार्थासमाप्तत्वेन वाक्यान्तरान्वयायोगात् नाष्टा
लादिद्रव्यस्याग्न्यादिसम्बन्धे प्रकरणापेक्षेत्येवं व्याचष्टे *न हं
यद्वा वैश्वदेववाक्ये यागेन द्रव्यलक्षणाद्विप्रकर्षे ऽभिहिते ननु
तस्याष्टाकपालादेर्देवतान्वयसम्भवान्न यागेन द्रव्यं लक्षणीया
शङ्कानिरासार्थत्वेन द्रव्यसम्बन्धं विना तद्धितस्यापर्यवसानेन
क्यान्तरान्वयायोगात् यद्द्रव्यस्य प्रकरणे श्रवणं तन्न वैश्वदे
क्येनाश्रितम् इत्येवं व्याख्येयमित्याह * अथ वेति* भाष्यकृता
ग्नेयादिवाक्ये प्राकरणिकयज्यपेक्षायां वैश्वदेववाक्यस्यैव या
धायित्वापत्तेः पूर्वपक्षहानिप्रसङ्गात् ।प्राप्ते च कर्मण्याग्नेयादिव
नानेकगुणविधेर्वाक्यभेदापत्त्या पौर्णमास्यधिकरणे निराकरिष्य
णत्वात्। आद्यायाः शङ्कायास्तुच्छत्वात् यागेन च द्रव्यलक्षणाया
प्रानुक्तत्वेन तद्विषयाशङ्कानिरासार्थतया सूत्रावयवयोजनस्य
ष्टत्वात् । प्रत्यक्षविधानप्रकरणशब्दोक्तस्योत्पत्त्युत्पन्नशिष्टत्वलक्ष
वैषम्यस्य प्रस्तुतविकल्पनिरासोपयोगित्वप्रतिपादनार्थत्वेनायं
वयवश्चशब्दार्थे हिशब्दं द्रव्यशब्दं चाग्न्यादिदेवतापरमङ्गीकृत्य
करणापेक्षं विश्वेदेवदेवताख्यं वस्तुश्रुतस्याग्न्यादेः पाक्षिकबाधनं
समर्थं येन विकल्पः स्यादिति अध्याहारेण व्याख्यातः तत्र क
व्यशब्देन देवतोच्यते इत्यपेक्षायामाह * भाष्ये त्विति * देवत
तिरेकजनितां वा षष्ठीमङ्गीकृत्य श्रुतस्य द्रव्यस्येति षष्ठ्या वैयधि
रणनिर्देशेन द्रव्यस्याष्टाकपालादेः सम्बन्धित्वेन श्रुतस्याग्नादेर्दे
रूपस्येत्येवं भाष्यकृद्व्याख्यानुसर्तव्येत्याह * वैय्यधिकरण्यं वे
देवतात्वेनादीयते गृह्यते यदग्न्यादीत्येतदर्थप्रतिपादनार्थो ऽयम्

शब्दः यागसम्बन्धित्वेन श्रुतेभ्यो विश्वेदेवेभ्यो ऽग्न्यादीनां वैषम्यप्रदर्शनार्थं द्रव्यसम्बन्धाभिधानम्। ननु प्रकृतेषु गुणविध्यसम्भवे ऽप्यविहितदेवताकोपांशुयाजानुवादेन गुणविधिर्गुणविशिष्टापूर्वकर्मविधिर्वा भविष्यतीत्याशङ्क्याह * प्रकृतेति * समस्तानुवादानर्थक्यं पूर्वपक्षोक्तं परिहरति * विप्रकीर्णेति * यद्विश्वेदेवा अयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वमित्यर्थवादावगतविश्वेदेवकर्तृकत्वलक्षणैकधर्मयोगनिमित्तमष्टानां यागानां समुदायरूपत्वेनैकीकरणं समुदायानुवादप्रयोजनमित्यर्थः । ननु प्राजापत्यपशुयागादिवत् समुदायानुवादं विनापि प्रकृतत्वयागत्वाभ्यामेकबुद्धिविषयत्वलक्षणसमुदायत्वं सेत्स्यतीत्याशङ्क्य विप्रकीर्णेत्युक्तं सह विधानाभावान्नैषां प्राजापत्यादितुल्यतेत्याशयः । ननु वसन्ताद्येककालादियोगात् समुदायत्वं सेत्स्यतीत्याशङ्क्याह * न हीति * वैश्वदेवशब्दस्य समुदायवाचित्वाभावे भिन्नवाक्यविहितानां यागानां साहित्याप्रतीतेर्भिन्नेष्वपि च वसन्तकालेषु प्राचीनप्रवणदेशेषु वानुष्ठाने वसन्तादिविध्यर्थसम्पत्तेर्गुणानुरोधेन प्रधानसाहित्यकल्पनायोगात् नैकदेशकपालायोगात्समुदायत्वसिद्धिरित्याशयः। विश्वे देवा न च प्राप्ता इत्यनेन प्रवृत्तिनिमित्ताभावान्नामधेयत्वासम्भवमुक्तं परिहरति *तस्मादिति * यस्मात्समुदायानुवादेन समुदायत्वं सिद्धं तस्माल्लिङ्गसमवायात्सर्वेषां तत्प्रख्यस्य वैश्वदेवशब्दव्यपदेश्यत्वस्योपपत्तेः सर्वेषामेव वैश्वदेवशब्दो नामधेयमित्यर्थः । समुदायत्वसिद्धावपि वैश्वदेवशब्देन समुदाये गुणस्याविधित्सितत्वात्समुदाये गुणप्रापकशास्त्रान्तरस्याभावादेकदेशे प्राप्तस्य गुणस्यैकदेशान्तरे प्रापणवैयर्थ्यायोगात्तत्प्रख्यशब्दस्य च तत्प्रख्यान्यशास्त्रसद्भावप्रतिपादनासामर्थ्यात्तत्प्रख्याधिकरणन्यायसिद्धत्वं नामधेयस्यानेनोक्तमिति न भ्रमितव्यम् ।

मिथश्चानर्थसम्बन्धः ॥ १५ ॥

ननु यथा वाजिभ्यो वाजिनमित्यत्र स्ववाक्यगतेन वाजिशब्देनामिक्षाक्षागं लक्षयित्वा विधीयमानस्य वाजिनस्य प्रकरणापेक्षाभावात्तन्निमित्तदौर्बल्याभावेनोत्पत्तिशिष्टामिक्षावरुद्धस्यापि यागस्य विधीयमानद्रव्यान्तराकाङ्क्षावशेनाकाङ्क्षोत्थापनात्तस्मिन्नेव यागे वाजिनस्य निवेशोपपत्तिरिति गुणाधिकरणे पूर्वपक्षयिष्यते तथेहापि स्ववाक्यगतेन वैश्वदेवशब्देनैवाग्नेयादियागलक्षणोपपत्तेः प्रकरणानपेक्षत्वात् तदपेक्षानिमित्तदौर्बल्याभावेनोत्पत्तिशिष्टाग्न्याद्यवरुद्धे-

ष्वपि यागेषु विधीयमानदेवतान्तराकाङ्क्षावशेनाकाङ्क्ष
नाद्देवतान्तरं निवेक्ष्यते यथा चैतद्यदनुसवनं पुरोडाशा नि
इति पुरोडाशशब्देन धानाः करम्भः परिवापः पुरोडाशः पर
ष वै यज्ञो हविष्पङ्क्तिरित्येकस्यैव पुरोडाशस्य प्रकृतत्वाद् बहु
न्वयाय हविर्गणो लक्ष्यते तथा वैश्वदेवशब्देनाप्यामिक्षाया
श्वेषां देवानां प्राप्तत्वेन विधानायोगात् तद्विधानायामिक्षा
क्षणायामानर्थक्यापत्तेस्तत्सहचरिताग्नेयादियागलक्षणा न
त्याशङ्कानिरासार्थत्वेनैतत्सूत्रव्याख्यानार्थमथोच्येतेति भाष्यं
च्य व्याचष्टे * वैश्वदेवमिति * उपाधिके चेति चकारेण ल
र्थस्यापि उपशब्दस्य कर्मप्रवचनीयसंज्ञान्वाख्यानात्कर्मप्रवचनी
द्वितीयेति स्मृतेस्तद्योगनिमित्तद्वितीयाभ्युपगमेन विश्वेदेवः
समीपे विहितानाग्नेयादियागान् वैश्वदेवशब्देनादाय देवतोप
त इति यदाशङ्क्ते तन्न युक्तमित्येवं योज्यम् । यदा त्वनन्तरसङ्ग
मेन द्रव्यशब्दानुपादाने ऽपि देवताशब्दस्य सम्बन्धिशब्दत्वा
तिसम्बन्धिद्रव्यमपेक्ष्य प्रवृत्तेः सास्य देवतेति अधिकारसूत्रग
स्य शब्दस्य द्रव्यविषयत्वावगतेः सूक्तहविषोरिति च तद्विष
तेर्विश्वेदेवा अस्य हविषो देवता इति वैश्वदेवशब्दार्थावसाय
जिसामानाधिकरण्यसिद्ध्यर्थं वैश्वदेवद्रव्यवतायागेनेति प्र
लक्षणाप्रसङ्गात् उद्भिन्न्यायसिद्धं नामधेयत्वमाश्रित्य प्रवृत्ति
त्तसिद्ध्यर्थं गुणविधिरप्यस्त्विति समुच्चयेन पूर्वपक्षः क्रियते
नामधेयगुणविधिरूपयोरर्थयोः प्रयोजनयोः सकृदुच्चरितेन वै
वशब्देन सह प्रयोजनप्रयोजनिभावलक्षणः सम्बन्धो न युक्त
सूत्रं व्याख्येयमित्याह * अथ वेति * ननु निर्मन्थ्यशब्दे प्रयो
यदर्शनान्नानयोर्विरोधो ऽस्तीत्याशङ्क्याह * निर्मन्थ्यस्त्विति *
ग्निशब्दाश्रवणेन तत्सामानाधिकरण्याभावाश्रवणे ऽपि वा निर्म
शब्दस्याग्निपर्यायत्वाभावेनाग्निमात्रनामत्वायोगात् मन्थनजन्य
विशेषस्याक्षेपकाभावेनाप्रतीतेस्तन्नामत्वस्याप्ययोगाद् गुणवि
केवलो ऽसावित्यर्थः ।

परार्थत्वाद् गुणानाम् ॥ १६ ॥

भाष्यकृता गुणानां हविषां प्रधानार्थत्वेन तदावर्त्तकत्वा
सहप्रदानप्रसङ्गात् त्रिंशत्सम्पतिवचनं न युज्येतेत्यध्याहारेणैत
व्याख्यातम् । तत्र बहुपदाध्याहारदोषेणापरितोषात् पूर्वेण स
सूत्रतया व्याचष्टे * पूर्वेणेति * त्रिंशदाहुतया हूयन्तइति वा

र्थसम्बन्धो न स्यादित्यर्थः । गुणविधावपि हविर्भेदेन प्रधानावृत्तेः कथं सहप्रदानापत्तिरित्याशङ्कानिरासार्थत्वेन परार्थत्वादित्यत्र गुणशब्दं हविःपरमङ्गीकृत्य योजयति * कुत इति * ननु स्वत एव कर्मणां भेदात् नाश्रुतावृत्त्यापत्तिरित्याशङ्क्याह * देवतैक्यादिति * भिन्नानामपि कर्म्मणां प्रयोगवचनेन सहानु ्नं विहितमशक्त्या त्यज्यते एकां तु देवतां सकृदुद्दिश्यानेकद्रव्यत्यागशक्तेः साहित्यत्यागो न युक्त इत्यर्थः । ननु गुणानां प्रधानावर्त्तनाशक्तावपि प्रधानानां भेदात् स्वत एवानुष्ठानभेदो भविष्यतीत्याशङ्कानिरासार्थं तत इति भाष्यं व्याचष्टे * तेनेति * कथं भिन्नानां सहानुष्ठानं शक्यम् इत्याशङ्कानिरासार्थं सम्प्रतिपन्नेति भाष्यं व्याचष्टे * सम्प्रतिपन्नेति * सकृदनुष्ठानापादनस्य प्रकृतोपयोगाभिधानार्थं तत्रेतिभाष्यं व्याचष्टे * ततश्चेति * ननु प्रधानानुष्ठानभेदे ऽप्यष्टसंख्यासम्पत्तेस्त्रिंशत्सम्पत्तिवचनं न युज्यैतैवेत्याशङ्क्याह * त्रिंशत्पूरणं चेति * अपरेषां तु स्विष्टकृद्यागवाजिनेज्याग्रहणादाधारौ न गणितौ इति लिङ्गदर्शनसूत्रमुपसंहरति * सर्वथेति *

॥ वैश्वानरेऽष्टत्वाद्यर्थवादताधिकरणम् ॥ ११ ॥

पर्ववन्तो विधानार्थास्तत्सामर्थ्यं समाम्नाये ॥ १७॥

ननु नामधेयाधिकरणे नामधेयानां ऽर्थशवेदबाह्यत्वाद्धर्मप्रमोपयोगाभावेनानर्थक्यमाशङ्क्य गुणफलोपबन्धाद्युपयोगित्वेन विध्युद्देशान्तर्गत्या धर्मप्रमोपयोगं प्रसाध्य क्वास्ति नामधेयत्वं क्व वेति कोष्ठशोधनमुद्भिदाद्यधिकरणैः कर्त्तुमारब्धं तस्य चात्राविचारेण पर्यवसानात्कोष्ठशोधनेन नामधेयप्रामाण्यविचारशेषत्वानुपपत्तेरर्थवादकोष्ठशोधनार्थत्वे वा द्वितीयपादएवार्थवादप्रकरणे कर्त्तव्यत्वापत्तेः स्वातन्त्र्येण तु गुणविध्यर्थवादविचारे वाक्यार्थव्याख्यानापत्तेः प्रमाणलक्षणसङ्गत्यभावप्रसङ्गादनारभ्यमिदमधिकरणमित्याशङ्क्याह * गुणविधीति * सर्वत्र गुणविध्यसम्भवेनैव नामधेयत्वस्योक्तत्वात् तद्विचारे पर्यवसिते प्रतियोगित्वेन बुद्धिस्थस्य गुणविधित्वस्य विचारः पूर्वाधिकरणव्युत्पादितस्योत्पत्तिशिष्टेनोत्पन्नशिष्टबाधस्याष्टाकपालादिविषयो भवति न वेत्येतन्निर्णयार्थत्वे नामधेयत्वसिद्ध्यर्थोत्पत्तिशिष्टबलीयस्त्वविषयविवेकफलतया नामधेयविचारशेषत्वं प्रतिपद्यमानो नासङ्गत इत्याशयः । यद्वा गुणविधिनामधेयं निर्णीतं सन्दिग्धानामर्थानां वाक्यशेषादर्थोऽव्यवसानमुक्तमिति द्वितीयाध्यायोपक्रमभाष्यपर्यालोचनया ऽक्त

धिकरणं यावन्नामधेयविचारप्रतीतेः साक्षान्नामधेयाविचा
सङ्गतिसिद्ध्यर्थम् अष्टाकपालादिशब्दानां नामधेयत्वेनापि पू
पक्षः कर्तुं यक्ष्यतइत्याह * अथ चेति * अष्टाकपालादिशब्द
नां विशेष्यापेक्षायां द्वितीयान्तस्यापि वैश्वानरपदस्य प्रथमान
त्वेन परिज्ञातस्यान्वयप्रतीतेः । तस्य च देवतान्वितद्रव्यवाचित्वे ऽ
यागानुमानपर्यवसायित्वात् उत्पत्तिशिष्टद्वादकपालावरुद्धे
यागे ऽष्टाकपालादीनां निवेशायोगात् द्वादशत्वान्तर्गताष्टत्वादियो
स्य च प्रवृत्तिनिमित्तस्य सम्भवाद्वैश्वदेवशब्दवद्यागनामत्वमाश
द्वादशकपालस्याष्टाकपालादिव्यपदेश्यत्वलक्षणस्य तत्प्रख्यत्वस्या
वेन प्रवृत्तिनिमित्ताभावान्निराकृत्य वैकल्पिकानेकसंख्याविशिष
श्वानरयागाख्यैकार्थविधानेनानेकगुणविधावपि वाक्यभेदाप्रस
सर्वेषामुत्पत्तिशिष्टत्वाविशेषाद्वैश्वदेवन्यायवैषम्येण गुणविधि
पपाद्य सामानाधिकरण्यनिर्दिष्टद्वादशकपालान्वयेन निराका
वैश्वानरस्य विपरिणामेनाष्टाकपालाद्यन्वयकल्पनानुपपत्तेर्गुणवि
वेकवाक्यत्वायोगात् वैश्वदेवन्यायसाम्यापादनेन निराकृत्यार्थ
दत्वं सिद्धान्त्यतइत्यर्थः । नन्वौदुम्बराधिकरणे एव सर्वेषां वि
वन्निगदानां विधित्वाशङ्कानिरासेनार्थवादाधिकरणव्युत्पादित
र्थवादत्वस्यापि स्थापितत्वादनर्थकमेतदधिकरणं स्यादित्याशङ्क्य
र्वसिद्धैर्वेत्युक्तम् * भाष्यकारान्तरकृता ऽऽकारप्रश्लेषरहितसूत्र
ख्यानत्यागेनाकारप्रश्लेषेण भाष्यकृतो व्याख्याने कारणं वक्तुमुप
सपूर्वकं तद् दूषयति *तत्रेति* यस्माद्यदुत्पत्तावपूर्वमित्यनेना
द्धानामुद्भिदादिशब्दानां नामधेयत्वावधारणात् लोकप्रसिद्धानां
विधानेनार्थवत्त्वमर्थादुक्तं भवति तस्मादेते ऽष्टाकपालादयः शब्द
कप्रसिद्धार्थत्वाद् गुणविधय इत्यर्थः । द्वादशकपालं निर्वपेदित्य
पुरोडाशप्राप्तेः संख्यामात्रपरत्वमष्टाकपालादिशब्दानां सूचयित
त्वादय इत्युक्तम् । उद्भेदनादेरवयवार्थस्य लोकप्रसिद्धस्यैव नाम
प्रवृत्तिनिमित्तत्वाल्लोकप्रसिद्धार्थस्यापि चित्रादिशब्दस्य नामधेय
सिद्धेर्न लोकप्रसिद्धार्थत्वमात्रेण गुणविधित्वासिद्धिरिति द
शयः । किमर्थं तर्हि यदुत्पत्तावपूर्वमित्युक्तमित्याशङ्क्याह *
ति * नालौकिकार्थत्वमपूर्वशब्देनोक्तं किं त्वनिरूढार्थत्वमिति
चयितुम् * सर्वत्रेत्युक्तम् * तदपि नामधेयत्वावधारणे सा
धिकरण्यसहकारिकारणं न साक्षादिति समभिव्याहारादिशि
नेनोक्तं पूर्ववच्छब्दं प्राप्तार्थाभिप्रायमङ्गीकृत्याकारप्रश्लेषेण
कारीयव्याख्यानमनुसन्धत्ते * तस्मादिति * पूर्ववन्तो वि

ो इति सूत्रावयवो ये हीति भाष्यानुसारात् पूर्वार्द्धेन व्याख्यातः ।
देतादिति भाष्यानुसारादुत्तरार्द्धेनोत्तरः पूर्वार्द्धं व्याचष्टे * यदि
ोति * उत्तरार्द्धं व्याचष्टे *न त्विति* ननु द्वादशत्वे ऽष्टत्वादीना-
न्तर्गतः प्राप्तिर्भविष्यतीत्याशङ्क्याह * तथा हीति * यथा देव-
त्त गामानयेति त्रिपदे वाक्ये गामानयेति पदद्वयसमुदायो ऽन्य-
। वाक्यार्थाभिधानलक्षणैकार्थक्रियाकारित्वधर्मयोगाल्लब्धात्मको
त्र प्रत्याभिज्ञायमानो ऽपि विवक्षितवाक्यार्थाभिधाने व्यापाराभा
ान्न समुदायत्वेन व्यपदिश्यते तथा संख्येयपरिच्छेदकत्वेना-
यत्र लब्धात्मिकाप्यष्टत्वादिसंख्या द्वादशसंख्यापरिच्छेद्यानां क-
ालानामपरिच्छेदकत्वात् परिच्छेदकत्वं च विना निरूपयितुमश-
क्यत्वात् न संख्यात्वेन व्यपदिश्यतइत्युक्तम्।ननु महासंख्यायामवा-
तरसंख्याव्यपदेशाभावे सहस्रदर्शनेन शतानुमानं शतं ब्राह्मणाः
सोमान् भक्षयन्तीति चोक्ते द्वादशैकैकमिति विभागकथनं सप्तमा-
ध्ये च चोदकनामधेययोर्विरोधे नामधेयबलीयस्त्वे सिद्धान्तिते ग-
वामयने तर्हि वैश्वानरो ज्योतिष्टोमं प्रायणीयमहर्भवति इति प्रथ-
मस्याह्नो नामधेयबलीयस्त्वात् ज्योतिष्टोमविकारत्वेन त्र्युपसत्त्वे प्रा-
प्ते तस्य च मुख्यत्वात् तदनुरोधेनान्येषामपि त्र्युपसत्त्वापत्तेर्द्वाद-
शोपसत्त्वदर्शनं न युक्तमित्याशङ्क्य द्वादशसु तिसृणां भावात् सर्वे-
षामनुग्रहार्थं द्वादशोपसत्त्वस्य तन्न्याय्यत्वात् युक्तं तद्दर्शनमित्य-
भिधानं न युज्येतेत्याशङ्क्य * अर्थात्मनेत्युक्तं * वस्तुवचनो ऽर्थ-
शब्दः महासंख्यापरिच्छेद्येभ्यः संख्येयेभ्यः कतिषु चिन्निष्कृष्यमा-
णेष्ववान्तरसंख्या वस्तुरूपेणास्त्येवेत्यर्थः । एवं तर्हि प्राप्तत्वान्ना-
ष्टत्वादीनां विधेयत्वं सिध्येदित्याशङ्क्य * नासावित्युक्तम् *
अष्टसु कपालेषु संस्कृतमिति विग्रहवाक्यगतया सप्तम्याष्टत्वस्य
संस्काराख्यक्रियाङ्गत्वप्रतीतेस्तस्य च संस्कारसाधनीभूतकपालपरि-
च्छेदद्वारत्वात्तेषां च द्वादशत्वपरिच्छिन्नानामष्टत्वेन परिच्छेत्तुमश-
क्यत्वात् निर्द्धारणस्य गुणस्य क्रियासाधनत्वायोगात् नाष्टत्वा-
देर्द्वादशकपालपुरोडाशसंस्काराङ्गत्वेन प्राप्तिरस्तीत्याशयः । यथा
कथं चित्प्राप्तिमभ्युपेत्यापि तद्धितसमासयोः सामर्थ्यापेक्षत्वा-
त् विशेषणत्वं च विना सामर्थ्यायोगात् द्वादशान्तर्गतस्य
चाष्टत्वादेः संख्यान्तरव्यावर्त्तकात्वाद्विशेषणत्वाऽसम्भवेनाष्टा-
कपालादिशब्दानुपपत्तिसूचनायाङ्गमिति वक्तव्ये * विशेषण-
मित्युक्तम् * श्लोकं व्याचष्टे * न हीति * निष्क्रि-
यत्वेन संख्यायाः संस्कारसाधनीभूतकपालपरिच्छेदनिरपेक्षायाः

संस्कारे व्यापाराभावान्नाङ्गत्वेन प्राप्तिरस्तीत्यर्थः । अप्राप्त्यर्थमेव संख्यापरिच्छेदकत्वं विना संख्यानिरूपणाशक्तेरसत्तुल्यत्वमविद्यमानताशब्देनोक्तं कति चिन्निष्कृष्याष्टावेतानीति परिच्छेदकत्वात् प्राप्तिसम्भवे ऽपि संस्कारसाधनीभूतद्वादशसंख्याकपालपरिच्छेदकत्वाभावान्नाष्टाकपालादिव्यपदेशोपपत्तिरिति * यद्यपि चेत्यनेनोक्तम् * ननु द्वादशकपाले ऽप्यष्टौ कपालानि सन्ति अस्मिन्निति अष्टाकपालशब्दो न शक्यो वक्तुमित्याशङ्क्य * संस्कृतेत्युक्तम् * तत्रेत्यनुवर्त्तमाने संस्कृतं भक्षा इत्यनेनाष्टसु कपालेषु संस्कृतमित्यस्मिन्नर्थे संख्यापूर्वसमासत्वेन द्विगुसञ्ज्ञा दृष्टा कपालप्रातिपदिकाद्विहितस्याण्प्रत्ययस्य द्विगोर्लुगनपत्य इति द्विगुपरतद्धितलुक्स्मरणेन लोपादष्टाकपालशब्दसिद्धिरित्याशयः । नन्वेवमपि समासवेलायां संस्कारकत्वस्योपाधेरभावात् संस्कारकाणामष्टत्वेनापरिच्छेद्यत्वे ऽपि केषां चिन्निष्कृष्टानां तत्परिच्छेद्यत्वेन समासोपपत्तिराधिकानामपि च संस्कारकत्वानपायात्तद्धितोपपत्तेरष्टाकपालशब्दो न विरुध्यत इत्याशङ्क्य * तद्धितार्थेत्युक्तम् * तद्धितार्थोत्तरपदसमाहारे चेति तद्धितार्थे विषयभूते दिक्संख्ययोः सामानाधिकरण्यसमासस्मृतेः संस्कारकत्वस्योपाधित्वावसायात् द्वादशत्वपरिच्छिन्नानां च संस्कारकाणामष्टत्वेन परिच्छेत्तुमशक्यत्वात् अष्टाकपालशब्दानुपपत्तिरित्याशयः । ननु द्वादशत्वपरिच्छेद्यसमुदायैकदेशभूतानि तानि कपालानि निष्कृष्याष्टत्वादिना परिच्छेत्तुं शक्यन्त एवेत्याशङ्क्याह *तौ चेति* एकदेशभूतानामेकदेशान्तरसापेक्षत्वात्तद्धितसमासयोर्द्वयोरप्यनुपपत्तिः स्यादित्याशयः । द्वादशकपाले ऽष्टत्वाद्यभावाभिधानस्य प्रकृतोपयोगमाह * तेनेति * अष्टाकपालादिशब्देन द्वादशकपालसङ्कीर्त्तनस्यासम्भवादित्यर्थः । नामधेयत्वपूर्वपक्षस्यानभिमतत्वद्योतनार्थं तदुपेक्षा अनेन चेतरथेति भाष्यमपि व्याख्यातं भवति । नन्वष्टाकपालादिशब्दैर्द्वादशकपालाऽनभिधानात्तत्प्ररोचनाऽसम्भवे ऽप्यष्टत्वादीनां द्वादशत्वान्तर्गतानां प्ररोचनार्था स्तुतिर्भविष्यतीत्याशङ्क्याह* न चेति * द्वादशकपालसाध्ये कर्मण्यष्टत्वादेर्द्वादशत्ववत् कपालपरिच्छेदकत्वाभावात् तल्लक्षण्येन च प्रकारान्तरेण संख्यायाः कर्मोपयोगासम्भवात् अनुपयोगिनः स्तुतिर्व्यर्था स्यादित्याशयः । अविभागाद्विति सूत्रे यदा त्वष्टत्वादिप्ररोचनार्था अनर्थका इत्यवगतमित्यनुभाषणार्थकथनपरभाष्यदर्शनादितरथेति भाष्यस्याप्ययमेवाशयो गम्यते एतच्च तत्सामर्थ्यमिति सूत्रावयवेन विधानएव साम-

१ संस्कारकत्वं तावता न तत्राधिकं २ पु० पा० ।

र्थमित्यवधारणादर्थवादत्वे सत्यसामर्थ्यमित्यर्थादुक्तं भाष्यकृता याख्यातम्। नन्वष्टत्वादेः कर्मानुपयोगित्वात्स्वतः स्तुत्यनर्हत्वे द्वादश- वस्तुत्यर्थं वेतसावकस्तुत्यर्थं चेयं स्तुतिर्भविष्यतीत्याशङ्कानिरासा- ं न चेति भाष्यं व्याचष्टे * यद्यपि चेति * द्वादशकपालाष्टा- कपालशब्दयोः पुरोडाशवाचित्वादष्टाकपालपुरोडाशस्तुत्या द्वाद- ।कपालपुरोडाशस्तुतिरिह प्रतीयते न च गायत्र्याद्यक्षरसंख्यासा- ान्येनाष्टत्वादौ कपालविशेषणे स्तुते तद्द्वारा द्वादशत्वे स्तुते क- ालाधारसंस्कारविशेष्यः पुरोडाशः स्तुतो भवतीत्यर्थः । अनेन च त्यक्षा ह्यष्टानां कपालानां स्तुतिः परोक्षा द्वादशानां पुरोडाशस्य तु कथं चिदित्येवं भाष्यं व्याख्यातम् । ननु संख्यास्तुत्या पुरोडाशस्तु- ासम्भवे ऽपि द्वादशसंख्यैवाष्टादिसंख्या स्तोष्यतइत्याशङ्कानिरा- ार्थत्वेन प्रत्यक्षाभावे चेति भाष्यं द्वादशत्वस्यासाक्षात् सम्बन्धि- नुत्यभावे ऽष्टत्वादिद्वाराङ्गीकार्या स्यात् तत्सद्भावात्तु परोक्षाङ्गी- रणं न युक्तमित्येवं व्याचष्टे * अपि चेति * तस्मादित्युपसंहा- भाष्यं व्याचष्टे * तस्मादिति * ननूत्पत्त्युत्पन्नशिष्टयोर्विकल्पः र्वाधिकरणएव निरस्त इत्याशङ्क्याह * सर्वं चेति * वैश्वानरं ादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ह्मवर्चसेन पुनाति यन्नवकपालो भवति त्रिवृतैवास्मिंस्तेजो दधा- : यद्दशकपालो भवति विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशक- लो भवति त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यद्द्वादशकपालो भव- : जगत्यैवास्मिन् पशून्दधाति यस्मिन् जातएतामिष्टिं निर्वपति ा एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवतीत्युपक्रमोपसंहा- ोरेकजातेष्टिविषयत्वेनैकवाक्यत्वान्नोत्पत्त्युत्पन्नशिष्टरूपो विशेषो ास्तीत्यर्थः । एकवाक्यविहितानामपि संख्यानां समुच्चयायोगात् कल्पो न विरुद्ध इत्याशयः । अनेन चैकवाक्यत्वाभिधानार्थत्वेन त्रं समाम्नाय पदं व्याख्यातं भवति न त्वविधानार्था इत्याकारप्र- षेण व्याख्याने तत्सामर्थ्यमिति तच्छब्देनाविधानस्यैव परामर्शा- ाविधानसामर्थ्यमिति भाष्यकारीयं व्याख्यानं पूर्वापरविरुद्ध- त्याशङ्क्याह * तत्सामर्थ्यमिति चेति * तत्रत्यपूर्वपक्षे विक- न फलेन गुणविधिप्रतिज्ञानात् व्यवहितस्यापि योग्यत्वात्तच्छ- । परामर्शो भाष्यकृता विधानशब्देन दर्शितो नैतत्सूत्रस्थस्येत्याश- । योग्यत्वमेव विवृणोति * तदीयं हीति * प्रतिज्ञाध्याहारेण ं पूरयति * तस्मादिति * ये वैश्वदेवादिशब्दाः पूर्ववन्तो वा- न्तरेण गुणविशिष्टे कर्मणि पूर्वमुत्पन्ने तद्विरुद्धगुणान्तराभिधा-

यिनः ते स्ववाक्यस्थेन गुणेन निराकाङ्क्षे कर्मणि तद्विरुद्धगुण
न्तराभिधानाशक्तेरविधानार्था अष्टाकपालादिशब्दानां तु सामान्न
यत्वात् सहोच्चारणत्वात् एकवाक्यगतत्वात् उत्पत्त्युत्पन्नशिष्टत्व
विशेषानवगमाद्वैश्वदेवशब्दस्य पूर्वपक्षे सामर्थ्यं तदेषामस्ति र
स्तूत्पत्तिशिष्टेनोत्पन्नशिष्टस्य बाधस्तत्रोक्तः सो ऽत्र नास्तीति सूत्र
र्थो ऽनेनोक्तो भवति ।

गुणस्य तु विधानार्थे ऽतद्गुणाः प्रयोगे स्युरनर्थव
न हि तं प्रत्यर्थवत्तास्ति ॥ १८ ॥

गुणविधानार्थत्वे ऽष्टाकपालादिशब्दानां बलाद्वाक्यभेद
पत्तेरुत्पत्तिशिष्टद्वादशत्वावरुद्धे यागे ऽष्टत्वादीनां निवेशाशक्तेरत
द्गुणेनानर्थक्यम् उपपादयितुं गुणस्येत्यादिभाष्यमकृते द्वादशत्वाव
वरुद्धे गुणविधौ गुणविशिष्टयागान्तरविधौ चानर्थक्याभावादयु
३।२ क्तमाशङ्क्योपलक्षणार्थत्वेन व्याचष्टे * प्रकृत इति * तथाशब्दे
प्रकृताप्रकृतत्वे परामृष्टे गुणविशिष्टो यागश्चकारेणोक्तः । यागे ताव
त् त्रेधापि गुणविध्यसम्भवमुपपादयति * प्रकृत इति * द्रव्यदे
वतासंयोगाश्रयणेन यागानुमानं निरस्तं द्रव्ये ऽपि प्रकृतयागसम्ब
न्धिनि दूरस्थयागसम्बन्धिन्यपूर्वयागसम्बन्धिनि वा गुणविधिरि
विधो ऽपि यागे गुणविधिनिरासान्निरस्त इत्याह * एतेनेति * गु
णविशिष्टद्रव्यविध्यसम्भवं प्रतिज्ञातमुपपादयितुं स्मारयति * त
थेति * त्रेधापि प्रत्युक्तमित्यतिदेशार्थस्तथाशब्दः । प्रकृते ताव
द्यागे गुणविशिष्टद्रव्यविध्यसम्भवमुपपादयति * न हीति * यद
हवनीये जुहोतीतिवद्यजेतेति स्वशब्देनानुवादाभावाद् दूरस्थे ऽपि
द्रव्यविधिर्न सम्भवतीत्याह * नापीति * नन्वेवमपि तर्हि स्व
तन्त्रमेव गुणविशिष्टं द्रव्यं विधीयतामत आह * न चेति * न के
वलमानर्थक्यापत्तेरविधानं किं त्वशक्यत्वादपीत्याह * नापीति
विध्यशक्तेरेव तदधीनफलकल्पनाशक्तेर्नाश्रुतफलकल्पनयानर्थक
परिहर्तुं शक्यमित्याह * अत इति * ननु वैश्वानरो ऽष्टाकपाल
भवतीति वैश्वानरपदानुषङ्गेण द्रव्यदेवतासम्बन्धानुमितयागलाभ
दष्टाकपालादिपुरोडाशविशिष्टापूर्वयागविधिर्भविष्यतीति तृतीयं प्र
कारमाशङ्क्याह * वैश्वानरपदमिति * पदोत्तरत्वेन श्लोकं व्या
चष्टे * स्यादेतदिति * ननु स्तुतिरपि विधेयवैश्वानरयागविषय
त्वान्न वैश्वानरपदानुषङ्गं विना युक्तेत्याशङ्क्याह * तदा चेति

नुवादस्य प्रमाणान्तराधीनत्वान्न शब्दव्यापारापेक्षेत्याशयः। अतस्त्रे-
ापि पुरोडाशविधानं न सम्भवतीत्युपसंहरति * तस्मादिति *
त्रं प्रकृताप्रकृतापूर्वयागसम्बन्धितया त्रेधाप्यष्टाकपालादिपुरो-
ाशविधाने निरस्ते यदि कश्चित् प्रकृते द्वादशकपाले ऽष्टाकपा-
ऽष्टाकपालादिविधिमाशङ्कते तं प्रत्याह * न चेति * अयमा-
यः । यथैवाष्टाकपालस्य यागाङ्गत्ववादिना वैश्वानरो ऽष्टाकपा-
इति विपरिणतवैश्वानरपदानुषङ्गो ऽङ्गीक्रियते तथैव द्वादशक-
लो ऽष्टाकपाल इति विपरिणतद्वादशकपालपदानुषङ्गोऽङ्गीका-
: । स च तद्वदेवाप्रमाणकः । तदभ्युपगमे ऽपि सामानाधिक-
यनिर्देशेन पुरोडाशभेदानवगमात् द्वादशकपालाङ्गत्वेनाऽष्टाक-
लादिशब्दैर्वैकल्पिकसंख्यान्तरविधानापत्तेस्तस्य च यागाङ्गत्ववान्नि-
द्धत्वान्नाशङ्का युक्तेति ननूत्पत्तिशिष्टद्वादशत्वावरोधान्नाष्टत्वादेः
कृते यागे पुरोडाशे वा विधिः सम्भवतीति त्वयोक्तं तच्च सर्वस्यै-
वाक्यत्वात्पूर्वपक्षिणा परिहृतमित्याशङ्क्याह * न चेति * वै- २
ानरपदस्य द्वितीयान्तेन द्वादशकपालपदेन प्रथमान्तैश्चाष्टाकपाला-
पदैर्वैरूप्यापत्तेस्तत्रान्वयायोगात् श्रुतद्वितीयान्तद्वादशकपाल-
ान्वयत्यागेनाष्टाकपालादिपदैरन्वयापत्तेर्द्वितीयान्तत्वेन परिणतै-
न्त्रान्वयाभ्युपगमस्यात्यन्तायुक्तत्वात् वैश्वानरवाक्ये द्रव्यदेवता-
शिष्टो यागो विधेयत्वेन प्रयोजनमितरेषु संख्येति प्रयोजनरूपार्थ-
शद्विभागे च नैराकाङ्क्ष्याद् गुणविधिपक्षे बलाद्वाक्यभेदः प्रस-
तेत्याशयः । एकवाक्यत्वे चाऽष्टाकपालं नवकपालं दशकपाल-
कादशकपालं द्वादशकपालं वैश्वानरं कुर्यादिति समुदाये वाक्य-
माप्त्या सर्वसंख्याविशिष्टैकभावनाविधिप्रतीतेर्वस्तुतः संख्यानां
मावेशायोगे ऽपि निरपेक्षसाधनत्वानवसायान्न विकल्पः स्यादि-
ाह * यदि चेति * आख्यातगुणभावेनाष्टाकपालं वैश्वानरं कु-
न्नवकपालं कुर्यादित्यादिप्रत्येकं वाक्यसमाप्त्ययोगान्न निरपेक्ष-
धनत्वं वक्तुं शक्यमित्याह * अष्टत्वादीनां चेति * ननु समु-
येन तर्हि पूर्वपक्षो ऽस्त्वित्याशङ्क्याह * न चेति * तथा सति
शशत्संख्यापत्तेरष्टत्वादीनां मध्ये न काचित्स्यादित्यर्थः । नन्व-
वादीनां द्वादशत्वान्तर्भूतानामेव समुच्चयोपपत्तेर्न संख्यान्तरोपज-
ापत्तिरित्याशङ्क्याह * संख्यान्तरेति * अतो वैश्वदेवन्या-
हाप्युत्पत्तिशिष्टेनोत्पन्नशिष्टबाधान्न गुणविधिः सम्भवती-
पसंहरति * तेनेति * अपि चेति भाष्येणाष्टत्वादीनां प्रक-
गम्ययागाङ्गत्वबाधेन पुरोडाशैकवाक्यत्वावगमात् न यागाङ्ग-

त्वम् * सम्भवतीत्युक्तम् * तत्पूर्वेण पुनरुक्तमाशङ्क्य विविक्ता
षयत्वं भाष्यद्वयस्याह * एवमिति * पूर्वेणोत्पत्तिशिष्टद्वादशत्व
वरोधाद्यागस्याष्टत्वाद्यनाकाङ्क्षोक्ता अनेनाभ्युपगम्य यागाकाङ्क्षां
क्येन पुरोडाशाङ्गत्वावसायान्न यागाङ्गतेत्युच्यते इति विवेकः
ननु पुरोडाशस्वरूपचिन्तायामानर्थक्यापत्तेरपूर्वसाधनांशलक्षण
वाक्येन प्रकरणापेक्षणात् न विरोधो ऽस्तीत्याशङ्क्य * ऽष्टत्वा
इत्युक्तम् * द्वादशत्वावरुद्धपुरोडाशद्वाराष्टत्वादेर्यागाङ्गत्वायो
त् तन्नैरपेक्ष्येण यागाङ्गत्वं वाच्यम्। न च पुरोडाशमतिक्रम्याष्टत्वाद
यागान्वयं सहन्तइत्याशयः । सहेः कर्त्तरि क्तप्रत्यये परभूते हं
इति हकारस्य ढकारादेशे कृते झषस्तथोर्धो ध इति तकारस्य ध
ष्टुत्वे कृते ढोढे लोप इति पूर्वढकारे लुप्ते कृते सहिवहोरोदवर्ण
स्यकारस्यौकारादेशात्सोढा इति रूपसिद्धिः । यागप्रकरणशब्दौ
श्वानरयागविषयतयैकवाक्यत्वे च यागानङ्गत्वं हेतुतया व्या
* ते ऽपीति * कस्मिन्नर्थे पुरोडाशैकवाक्यत्वं हेतुरित्यपेक्षायां
वेत्युक्तं कस्य प्रकरणमित्यपेक्षायां तच्छब्देन वैश्वानरयागः प
मृष्टः भाष्यस्थं यागशब्दं वैश्वानरविषयं द्योतयितुं त
त्युक्तम् । वैश्वानरयागप्रकरणं बाधित्वा पुरोडाशैकवा
त्वान्नाष्टत्वादयः पुरोडाशान्वयानपेक्षाः वैश्वानरयागस्य भवि
न्ति येनोत्पत्तिशिष्टेन द्वादशत्वेन भिन्नविषयतया विरोधा
वान्न बाधेरन्निति भाष्यार्थः । यागशब्देन च भाष्यकृता परार्थ
द् गुणानामिति पूर्वाधिकरणसूत्रगतेन परशब्देन निर्दिष्टो यागो
दगुणा इति तच्छब्देन परामृष्ट इति द्योतितम् यागानङ्गत्वे को
इत्याशङ्क्य प्रयोगे स्युरनर्थका इति सूत्रकृतोक्तं तद्व्याख्यानार्थं
गासम्बन्धे चेति भाष्यं व्याचष्टे * तथा चेति * पुरोडाशस्य
गाङ्गत्वात् तद्द्वारा ऽष्टत्वादेः पुरोडाशान्वये ऽपि फलवत्त्वोप
फलाभावादित्ययुक्तमाशङ्क्य केवलेत्युक्तम्।यागाङ्गभूतस्य पुरोडा
द्वादशत्वावरोधेनाष्टत्वाद्यन्वयायोगात् पुरोडाशस्वरूपान्वयो
त्वादेर्वाच्यस्तत्र चानर्थक्यं स्यादित्याशयः।न हि तं प्रत्यर्थवत्तास्ती
तत्सूत्रावयवव्याख्यानार्थमपि पुरोडाशेति भाष्यमतद्गुणा इति
च्छब्दपरामृष्टयागान्यवाचिता नञा निर्दिष्टस्य पुरोडाशस्य तं प्रत
तच्छब्देन परामर्शो ऽनेन भाष्येणोक्त इति सूचयितुं पूर्वेणैकी
व्याख्यातम्। न हीति सूत्रावयवः पुरोडाशेति भाष्येण कथं
ख्यात इत्यपेक्षायामाह * न हीति * स्वयमन्यथा व्याच
अथ वेति * तच्छेषो नोपपद्यतइति चेदिति सूत्रापातानिकार्थः

ःत्वेन त्विति भाष्यं तत्तु स्तुत्यर्थत्वेनोपपन्नत्वान्नानर्थकमित्यनेना-
ा व्याख्यातत्वान्न व्याख्यातम् एतत्सूत्रार्थस्य चेतरथार्थवादाः
तो ऽनर्थकाः स्युरिति भाष्येण तत्सामर्थ्यमिति विशेषणाक्षिप्त-
क्तत्वादिति यदुक्तमितिभाष्येणाभाषान्तमेतत्सूत्रमित्युक्त्वा वि-
गाद्विधानार्थे स्तुत्यर्थेनोपपद्येरन्निति सूत्रं परिहारार्थत्वेन भा-
कृता पृथक् पठितमपि यदा त्विति भाष्यावयवेनाभाषासूत्रार्थस्य
ःहारसूत्रार्थेन सहैकीकृत्य व्याख्यानात् स्वयमपि तथा व्याख्या-
कीकृत्य पठति * तच्छेष इति इति चेदिति * पदद्वयं भाष्य-
ऽणापठितमपि वृत्त्यन्तरे दृष्टत्वाद्वार्त्तिककृता पाठितं यदा त्विति
्यावयवेन पूर्वसूत्रगतगुणशब्दनिर्दिष्टाष्टत्वादिपरामर्शितं तच्छे-
ाङ्गीकृत्याष्टत्वादिशेषो यदष्टाकपालो भवतीत्याद्यर्थवादो नोप-
त इति एवमाभाषासूत्रं व्याख्यातं तदष्टत्वादेर्भवतिपरेणाख्या-
विहितस्य स्तुत्युपपत्तेरयुक्तमाशङ्क्योपपादयति *अष्टत्वादीति* ३१
त्तिशिष्टद्वादशत्वावरुद्धे यागे ऽष्टत्वादेर्विधानानर्हत्वात् इयमष्ट-
देः प्ररोचना सती व्यर्था स्यादित्यर्थः।तदेति भाष्यावयवेन विधा-
र्थे स्तुत्यर्थे नोपपद्येरन्निति परिहारसूत्रावयवं विधानविषयभू-
ादशत्वस्तुत्यर्थेन यदष्टाकपालो भवतीत्यादयः शब्दा उपपद्यन्त
। एवं च व्याख्यातुं लक्षणयाष्टाकपालादिशब्दैर्द्वादशकपालस्तुति-
युक्तं तत्र लक्षणायां को हेतुः कथं चाष्टत्वादिना द्वादशत्वं
यतइत्यपेक्षायामाह * तस्मादिति * अष्टत्वादिप्ररोचनार्थै-
र्थस्य हेतुत्वं तस्माच्छब्देनोक्तम् । अवयवावयविसम्बन्धस्य च ल-
ाबीजत्वमवयववद्वारमित्यनेनोक्तम्। एतदेव व्याचष्टे* यदिति *
ष्टाकपालादिशब्दानां द्वादशत्वान्तर्गताष्टत्वादिपरत्वं कथम-
्यमित्याशङ्कानिरासार्थत्वेनाविभागादिति सूत्रावयवव्याख्यानं-
सन्ति हीति भाष्यं तात्पर्यतो व्याचष्टे * तदिति * सामीप्य-
व्यविभागशब्द इत्याशयः। ननु गायत्र्यादिशब्दैः संख्यासा-
नाष्टत्वादिषु स्तुतिप्रतीतेः कथं द्वादशकपालस्तुतिरित्युक्तामि-
शङ्क्याष्टत्वाद्येवात्र द्वादशत्वस्तुत्यर्थं स्तूयतइति अत इति भा-
णोक्ता कथमवयवस्तुत्यावयवी स्तुतो भवतीत्याशङ्कानिरासार्थं
ाति भाष्ये दृष्टान्ताभिधानं कृतं तत्तात्पर्यतो व्याचष्टे * एकदे-
ते * ननु चक्रावयवत्वान्नेम्यादेस्तत्स्तुत्यावयविनः स्तुतिर्युक्ता
ध्यानां त्ववयवावयविभावाभावान्नाष्टत्वादिस्तुत्या द्वादशत्वं
तं भवतीत्याशङ्क्यावयवावयविभावाभावे ऽप्येकदेशैकदेशिभावेन

१ उपपन्नतरत्वादिति २ पु० पा०।

समुदायिहस्त्यादिस्तुत्या समुदायसेनास्तुतिदर्शनात् संख्यानाम
चैकदेशैकदेशिभावप्रसिद्धेरदृष्टत्वाद्येकदेशस्तुत्यैकदेशिनीद्वादशत
सङ्ख्या स्तुता भवतीति प्रतिपादनार्थत्वं द्वितीयदृष्टान्त
भिधानस्य सूचयितुमेकदेशैकदेशिशब्दौ तस्मादित्युपसंह
रभाष्यं कीदृशी स्तुतिरित्यज्ञानाद्व्याचष्टे * तेनेति * यच्च प्रत्यक्ष
भावे त्वपरोक्षः स्यादिति पूर्वपक्षभाष्येण द्वादशत्वस्य प्रत्यक्षरूप
त्मीयस्तुतिसद्भावात् परोक्षादृष्टत्वादिद्वारा स्तुत्यङ्गीकरणमयुक्तं
त्परिहारार्थत्वेनाप्येतदेव भाष्यं पूर्वोक्तानुभाषणपूर्वकं व्याचष्टे
यत्विति * प्रत्यक्षपरोक्षस्तुतीनां प्रत्येकं ग्रहणे सति प्रत्यक्षरै
नैराकाङ्क्ष्यात् परोक्षाश्रयणमयुक्तं स्यात् तासां तु यस्मिन् जा
एतामिष्टिं निर्वपति स पूत एव तेजस्वी अन्नाद इन्द्रियावी पशु
मान् भवतीति प्राशस्त्यप्रतिपादनोपपादकतया सर्वासां युगपत् ग्र
हणान्नैकया नैराकाङ्क्ष्यमिति वक्तुम् * एकरूप्येणेत्युक्तम् * अ
ल्पयैव स्तुत्या प्ररोचनोपपत्तौ महती स्तुतिरनर्थिकेत्याशङ्कानिर
सायापरिमाणत्वादित्युक्तम् । अनियतपरिमाणत्वमेवोपपादयति
सर्वत्रेति *

कारणं स्यादिति चेत् ॥ २० ॥

स्वयं तावत्सूत्रं व्याचष्टे * जनकत्वेनेति * भाष्यकारी
व्याख्यानमुपपादयति * तेषामिति * फलस्य साधनविषयप्रवृत्ति
हेतुत्वात् साधनं प्रति कारयितृतास्तीत्याशयः । किमेवमिति भ
ष्येण किमर्थं कारणत्वाभिधानमिति पृष्ट्वा पुरोडाशस्येत्यादिन
क्तदोषपरिहाराय गुणफलसम्बन्धिरूपपूर्वपक्षान्तरप्रदर्शनार्थमेतत्स
त्रमित्युक्तम्।तत्प्रपञ्चयितुमाह* यदुक्तमिति*काम्यस्याप्युपन्नशि
स्योत्पत्तिशिष्टबाधकत्वं कथमित्याशङ्क्य नैमित्तिके तु प्रकृतौ त
द्विकारः सम्प्रयोगविशेषादिति तृतीयाधिकरणवक्ष्यमाणन्यायमा
११ * तथा हीति * अविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य त
सन्दिग्धमाराद्विशेषशिष्टं स्यादिति दशमाधिकरणन्यायेन ना
काम्यं नित्यस्य बाधकमित्याह * विशेषतश्चेति * जातेष्टिप्रयोगम
त्रविषयत्वात् सामान्यरूपे द्वादशत्वे प्राप्ते ब्रह्मवर्च्चसकामादिप्रयो
गविशेषविषयत्वेनाष्टत्वादेः प्रवर्त्तनादित्यर्थः । पौर्वापर्ये पूर्वदौर्बल
प्रकृतिवदिति षष्ठाधिकरणन्यायेनाप्येवमित्याह * पूर्वेति * उ
त्पत्तिशिष्टत्वात् पूर्वं प्राप्ते द्वादशत्वे ऽष्टत्वादेरुत्पन्नकर्माश्रयत्वे
पश्चात्प्रवर्त्तनादित्यर्थः । तार्त्तीयं न्यायं विवृणोति * पुरुषार्थेति

ाक्यस्य नित्यबाधकत्वे ऽयमेव मुख्यो न्यायः सम्भवमात्रेण तु
ायान्तरोपन्यासस्तत्रेति सूचयितुमस्यैव विवरणगुणफलसम्बन्ध-
धानोपपादनफलमानर्थक्यपरिहारमुपसंहरति * तस्मादिति *
तु भवतीति वर्त्तमानापदेशसन्दिग्धस्य पञ्चमलकारतया विधित्व-
र्णयः स्तुत्यन्वयान्यथानुपपत्त्यधीना गायत्र्यैवैनमित्यादेस्तुत्यभा-
नास्य विधित्वनिर्णयाशक्तेर्गुणफलसम्बन्धविधिर्न युज्येतेत्याशङ्क्य
* ननु चेति * विध्यभावे ऽपि समभिव्याहाराद्देव गुणफल-
म्बन्धः सेत्स्यतीति केषांचित्परिहारमुपन्यासपूर्वकं दूषयति *
न्नेति * स्वमतेन परिहरति * अतो ऽयमिति * श्लोकं व्याचष्टे
यदिति *

आनर्थक्यादकारणं कर्त्तुर्हि कारणानि गुणार्थो हि विधीयते ॥ २१ ॥

गुणफलसम्बन्धविधौ स्तुत्यर्थत्वायोगादेकोपक्रमोपसंहार-
पत्वेन एकवाक्यत्वं प्रतीयमानं बाध्येतेत्यानर्थक्यादकारणमिति
त्रावयवव्याख्यानार्थं यदीति भाष्यं व्याचष्टे * वाक्यानीति *
ोकं व्याचष्टे * पुत्र इति * तस्येति भाष्यावयवं यद्यष्टत्वादयो
सम्बध्येरन्स्ततो वाक्यान्तरत्वं स्यात् स्तुत्यर्थत्वेन सम्बन्धोपपत्ते-
वाक्यान्तरता युक्तेति व्यवधारणकल्पनया व्याख्यातुमाह
तावतीति चेति * ननूपक्रमोपसंहारपर्यालोचनयैकवाक्य-
सति सर्वसंख्यानामुत्पत्तिशिष्टत्वाविशेषेण बलाबलवि-
षाभावादाद्यपूर्वपक्षनिरासो न युक्तः स्यादित्याशङ्क्याह * त-
ति * तस्मिन्नपि पक्षे न चाष्टत्वादीनां द्वादशकपालेनैकवा-
यता तवोपपद्यतइत्यादिनैकवाक्यस्य निरस्तत्वादिति भावः । अनेन
गुणफलसम्बन्धविधिपक्षे वाक्यभेदापादनेन गुणफलसम्बन्ध-
धौ गम्यमानैकार्थ्याभावप्रसङ्गादित्येवमानर्थक्यादिति सूत्रावयवो
ोजितो भवतीत्याह * अर्थान्तरेति * स्तुत्या विनैकवाक्यता क- ३
माञ्चोपपद्यतइत्यपेक्षितस्य ग्रन्थस्य तदुपपादनार्थत्वेनान्वयप्रतीते-
ानर्थक्यादित्यस्यार्थैक्याभावप्रसङ्गादित्यर्थावसायादेवं व्याख्यातं य-
ाश्रुतस्यानन्वयापत्तेः । एवं च गुणफलसम्बन्धविधौ वाक्यभेदापा-
नस्य सूत्रारूढतोक्ता भवति स्तुत्यर्थत्वानभ्युपगमे ऽर्थान्तरस्यास-
भवादानर्थक्यमेवावशिष्यतइत्यभिधानार्थेनैवानेन सूत्रावयवेनार्था-
तरपरत्वे वाक्यभेदप्रसङ्गाख्यं दूषणान्तरमप्युपलक्षितं भाष्यकृता

विवृतं स्वरूपार्थस्तु यद्यर्थवादा अपीत्यनेन वक्ष्यते अस्मिन्पक्षे ऽथ
न्तरेति ग्रन्थो लिङ्गात् स्वातन्त्र्येणानर्थक्यादिति सूत्रावयवयोजन
र्थो यथाश्रुत एव भवति । ननु गुणफलसम्बन्धविधानेनाप्यर्थवत्त्वं
पपत्तेः कथमानर्थक्यापात्तिरित्याशङ्कानिरासार्थं कर्तुर्हि कारणानी
सूत्रावयवं व्यवधारणकल्पनया व्याचष्टे * यदि हीति * गोदो
नेन पशुकामस्य प्रणयेदितिवत् पूतत्वकामस्याष्टाकपालो भवती
श्रवणे सति कामिनः कर्तुः काम्यमानतया सम्बन्धीनि सन्ति पू
त्वादीनि फलत्वात्कर्तुः प्रवृत्तिकारणानि स्युस्तेषां तु यस्मिन् जा
एताभिरिष्टिं निर्वपति पूत एव स इत्यादिसमभिव्याहाराद्वैश्वानरेष्टि
मात्रसम्बन्धित्वप्रतीतेः कामिपदनिरपेक्षसमभिव्याहारमात्रप्रमा
कत्वस्य च साध्यत्वस्य पर्णमय्यधिकरणे निराकरिष्यमाणत्वात्
लाभावेन कर्तृप्रवृत्तिकारणत्वं नास्तीति भाष्यानुसारात्सूत्रावय
ऽनेन योजितः । अष्टत्वादौ कारणशब्देन विवक्षिते यद्यष्टाकपालं
र्यादिति कर्तुः प्रवृत्तिविषयतयाष्टत्वादीनि सम्बन्धीनि स्युस्तत
मीहितसाधनत्वं विना प्रवृत्तिविषयत्वायोगात् उत्पत्तिशिष्टद्वा
शावरुद्धवैश्वानरयागोपकारसाधनत्वस्यासम्भवाद्रात्रिसत्रन्यायेन
र्थवादावगतानि पूतत्वादीनि प्रवृत्तिजनकानि स्युः । विध्यश्रवणे
त्वेषां समीहितसाधनत्वाप्रतीतेः समभिव्याहारमात्रकल्पस्य सा
नत्वस्यौदुम्बराधिकरणे निरस्तत्वात् न पूतत्वादीनि प्रति कारण
स्तीति योज्यः । ननु पूतत्वादेः फलत्वाभावे किमर्थं कीर्त्तनमित्याश
ङ्कानिरासार्थं गुणार्थो हीति सूत्रावयवं व्याचष्टे * तस्मादिति
निपातानामनेकार्थत्वात्तस्माच्छब्दार्थे हि शब्दव्याख्यानार्थं तस्मा
त्युक्ता तद्व्याख्यानायान्यस्यार्थान्तरस्यासम्भवादित्युक्तम् । स्तुति
षयत्वेन गुणशब्दं व्याख्यातुं स्तुत्यर्थ इत्युक्तम् । इतिशब्दः पूर्वो
स्तुतिप्रकारपरामर्शार्थः । यस्मादन्यो ऽर्थो न सम्भवति तस्माद्गु
प्रकारस्तुतिरूपो ऽर्थः पूत एवेत्यादिभिर्ज्ञाप्यतइत्यर्थः । अनेन च
एष इतिभाष्यगतस्य तच्छब्दस्य स्तुत्यर्थेनोपपद्येरन्निति एतत्सू
कस्तुतिरूपार्थपरामर्शकत्वात् सौत्रगुणशब्दव्याख्यानार्थत्वमेतच्छ
ब्दस्य च पूर्वोक्तावयवद्वारस्वरूपस्तुतिप्रकारपरामर्शकत्वं सूचित
अविधीयते वैश्वानरयाम इति भाष्यावयवेन सौत्रो हिशब्दः प्र
द्धार्थवाचित्वात् वैश्वानरेष्टेश्च पूर्वविहितत्वेन प्रसिद्धत्वादष्टत्व
देः स्तुतिसम्बन्धे सति विधेयत्वापत्तेस्तन्निरासार्थं पूतत्वाद
श्वानरेष्टिविषयत्वाभिधानार्थतया व्याख्यातस्तदुपपादयितुमाह *

१ मतीति २ पु० पा० ।

ति* यस्तदोरेकविषयत्वाद्यस्मिन् जात एताम् इष्टिं निर्वपेदिति स
इति पूतत्वादीनां जातेष्ट्यन्वयप्रतीतिर्नाष्टत्वाद्यन्वयो ऽस्तीत्यर्थः ।
ष्टेर्नैमित्तिकत्वेन फलानपेक्षतया पूतत्वाद्यन्वयायोगाद् गुण-
सम्बन्धविधानायाष्टत्वाद्यन्वयः कल्पयिष्यते ऽत आह * न
।*स्तुत्यर्थेनेष्ट्यन्वयोपपत्तेर्नाप्रतीयमानाष्टत्वान्वयकल्पना युक्तेति
ः। पूतत्वादीनां च पूत एव स इति तच्छब्दानिर्दिष्टैकपुत्रविषय-
समुच्चयप्रतीतिर्व्यवस्थितत्वादष्टत्वादिफलत्वं न सम्भवती-
* न चेति * नन्वेवं सत्येकैकस्याष्टत्वादेः फलपञ्चकं भवि-
त्याशङ्क्य निरासार्थं ब्रह्मवर्चसादीनामित्युक्तम् । गायत्र्यैवैनं ब्र-
र्चसेन पुनातीत्यादिवाक्यवशेनाष्टत्वादीनां व्यवस्थितफलत्वाव-
त् समुच्चयो न युक्त इत्याशयः । यो ऽष्टत्वादीनां गुणानां ब्र-
र्चसादीनां च स्तवनानाम् एभिः पूतत्वादिभिर्विभागेन सम्बन्धो
क्षतः स न प्रतीयतइत्यर्थः । नन्वेवं तर्हि गायत्र्यैवैनमित्यादि-
व विभागेन फलसम्बन्धः करिष्यतइत्याशङ्क्याह * यत्र त्वि-
* स्तुत्यभावे विध्यभावोपपत्तेरित्याशयः । ननु चतुर्थे फल-
गस्त्वचोदितेन स्यादशेषभूतत्वादित्यत्रैतदेव वाक्यमुदाहृत्य कि-
वैश्वानरेष्टिरात्मगामिफलप्रयुक्ता पुत्रगामिफलप्रयुक्ता वेति
दध्याधानगतात्मनेपदपर्यालोचनयात्मगामिफलप्रयुक्तत्वे प्राप्ते
मन् जातएतामिष्टिं निवर्पति पूत एव स इति फलवचनस्य पुत्र-
त्वावगते पितृशेषत्वाभावात्फलभागित्वेनाचोदिते पितरि
संयोगो न स्यादिति पूतत्वादीनां पुत्रगामिफलत्वस्य वक्ष्यमाण-
फलसम्बन्धापन्हवो न युक्त इत्याह *अत इति* रात्रिसत्रन्याये-
वादत्वेनोपयुक्तानां पूतादिफलवचनानां परावर्त्य फलपरत्वक-
ऽप्यष्टत्वादीन् प्रति फलं नास्तीत्यर्थः । फलपरत्वे सतीह स्तु-
ाभिधानं विरुध्येतेत्याशङ्क्याह * प्रथमेति * नन्वेवं पूतादि-
व स्तुतिसिद्धेर्यदष्टाकपाल इत्यादीनां गुणफलसम्बन्धाविधि-
ङ्गीकरणे सत्यानर्थक्यं स्यादित्याशङ्कानिरासार्थं तेन चेत्यादि-
यं व्याचष्टे * एतैरेवेति * नन्वेवं सति स्तुत्यर्थवत्त्वोपपत्ते-
र्थक्याभिधानं न युक्तमित्याशङ्क्यार्थवादत्वानभ्युपगमेन गुणफ-
म्बन्धविधिपरत्वाभ्युपगमे तदसम्भवादानर्थक्यमापद्येतेत्येवमा-
क्यपदव्याख्यानार्थं ततः कामायेति भाष्यम् अर्थान्तरपरतायामि-
नैव व्याख्यातत्वात् तस्मादिति ***कारणपदव्याख्यानार्थं पूर्व-
गतकारणपदव्याख्यानार्थभाष्यव्याख्यानेन तेषां कार्यितृत्वाद्धि-
नैव व्याख्यातत्वान्नेह व्याख्यातम् । तस्मादित्यर्थवादत्वोपसंहा-

स्भाष्यमर्थवादविचारस्येहासङ्गतत्वेन गुणविधित्वसम्भवासम्भ
मात्रविचारस्याधिकरणार्थत्वात् अयुक्तमित्याशङ्क्य गुणविधित्वा
म्भवोपसंहारपरतया व्याचष्टे * तस्मादिति *

॥ अथ यजमानशब्दस्य प्रस्तरादिस्तुत्यर्थताधिकरणम् ॥ १२ ॥

तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवाया इति
गुणाश्रया ॥ २२ ॥

अत्र भाष्यकृता यजमानः प्रस्तर इत्यादूयुदाहृत्य विध्यर्थव
दचिन्ता सा तावत् पूर्ववदेवासङ्गता गुणविधिसम्भवासम्भवचि
न्ताप्येवंविधेषु विधिप्रत्ययशून्येषु सम्भवविध्यन्तरैकवाक्यत्वेन
दुम्बराधिकरणएव विधित्वाशङ्काया निरस्तत्वात् । अयुक्ता पूर्वाधि
करणे त्वौदुम्बराधिकरणपूर्वपक्षन्यायेन विधित्वमङ्गीकृत्य वैश्व
वाधिकरणोक्तस्योत्पत्तिशिष्टेनोत्पन्नशिष्टबाधस्यादृष्टत्वादेर्विषयो भ
ति न वेति चिन्तितम् । इह त्वङ्गीकृत्य विधित्वं चिन्तान्तराभावा
कृत्वाचिन्तान्यायः सम्भवति । न चार्थवादत्वाभिधाने विधित्वा
रासे वैतत्सूत्रं समर्थम् । तत्सिद्ध्यादीनां गुणवादनिमित्तत्वाभिध
नमात्रप्रतीतेस्तदभिधानमपि यदि निमित्तासम्भवेन गुणवादा
म्भवशङ्कानिरासार्थं ततो रूपात्प्रायादित्यादिना यथासम्भवगुणव
दनिमित्तानामुक्तत्वादनर्थकम् । लक्षणासम्भवेन तु गुणवादासम्भ
शङ्का गौणमुख्याधिकरणे स्वाभिधेयलक्ष्यमाणगुणयोगनिमित्तलक्ष
णाया गौण्या वृत्तेः साधयिष्यमाणत्वादयुक्ता । अथ तत्र प्रकृतगौण
मुख्यविषयमन्त्रविनियोगविचारसिद्ध्यर्थं गौणवृत्तिसद्भावप्रतिप
दनान्न लक्षणविशेषाभिधाने तात्पर्यम् । इह तु प्रसिद्धार्थत्यागेनाप्रसि
द्धतद्गुणवृत्तित्वलक्षणे गौणत्वे स्वार्थत्यागेन वेदाप्रामाण्यापत्तेः
समुदायवाचिनो वैकदेशवृत्तित्वलक्षणे समुदायानित्यत्वेन शब्द
र्थसम्बन्धस्यानित्यत्वापत्त्या वेदाप्रामाण्यापत्तेरारोपितार्थवृत्तित्वल
क्षणस्य च गौणत्वस्यारोपकपुरुषाभावाद्वेदे ऽनुपपत्तेरेतल्लक्षणत्र
यनिरासेन गुणयोगनिमित्तवृत्तित्वलक्षणप्रतिपादनार्थं तत्सिद्ध्यादि
नां निमित्तत्वाभिधानमित्युच्यते ततो गुणवादसूत्रानन्तरमेवैत
त्सूत्रं कार्यं गौणवृत्तित्वलक्षणाभिधानार्थे चास्मिन्सूत्रे सति क
भाष्यकारीया विध्यर्थवादचिन्ता सम्बध्येतेत्याशङ्कासप्तकं निराक
र्तुमाह * अर्थवादेति * विध्यर्थवादचिन्तायाः प्रकरणासङ्गतत्व
विधित्वशङ्कानिरासस्य चौदुम्बराधिकरणेन गतत्वम् । सूत्रस्य

भिधानात्सामर्थ्यं तादर्थ्यानभ्युपगमेनैव परिहृतम्। गुणवादास-
वाशङ्कानिरासार्थत्वेनाभ्युपगमो ऽपि लक्षणशब्देनोक्तः। नात्र गुण-
इत्तस्य वा निमित्तमभिधीयते येन गौणमुख्याधिकरणेन रूपात्
गादित्यादिना वा गतार्थत्वं स्यात् किं तु गुणवादस्य तत्सिद्ध्या-
नेमित्ताभिधानद्वारेण लक्षणमभिधीयते। गुणशब्देन गौणवृत्त्य-
धानादाश्रयशब्देन च निमित्ताभिधानात्तत्सिद्ध्यादयो गौणया वृत्ते-
मत्तमित्युक्ते यस्यां वृत्तौ ते निमित्तं सा गौणी वृत्तिरित्यर्थात् प्रतीते
नेमित्ते गुणयोगनिमित्तायां च वृत्तौ तेषां निमित्तत्वाद् गुणयोग-
मत्तवृत्तित्वमेव गौणया वृत्तेर्लक्षणमित्यवसीयतइत्याशयः। गुण-
सूत्रानन्तराभिधेयत्वशङ्कानिवृत्त्यर्थं तत्र नोक्तमित्युक्तम्। अर्थ-
वत् श्येनचितं चिन्वीत नेन्द्रस्त्वमसि दाशुषे मासमग्निहोत्रं
वतीत्यादिषु विधिमन्त्रनामधेयेष्वपि श्येनेन्द्राग्निहोत्रादिशब्दा-
गौणत्वदर्शनात् सर्वसाधारण्यसूचनाय सर्वोपयोगव्युत्पादनान-
मेव गौणवृत्तिलक्षणाभिधानं युक्तमित्याशयः। सूत्रस्य गौणवृत्ति-
णार्थत्वे विध्यर्थवादविचारासम्बद्धत्वशङ्कानिवृत्त्यर्थम् *अर्थवा-
युक्तम् * सूत्रकृतो प्रसक्ताभिधायित्वपरिहाराय लक्षणाभिधान-
प्रसङ्गसिद्ध्यर्थं विध्यर्थवादचिन्तयोपक्रान्तम् यथाकृतिसद्भावे
प्रतिपिपादयिषितेयं गौरित्यस्य शब्दस्य को ऽर्थ इति वाच्यत्व-
नोपक्रान्तमित्यर्थः। कथमर्थवादत्वोक्त्या गौणवृत्तिलक्षणाभिधा-
प्रसङ्गो भवतीत्यपेक्षायां तदुपकारीत्युक्तम्। पूर्वाधिकरणस्य गु-
धिसम्भवासम्भवचिन्तार्थत्वेनार्थवादत्वाभिधाने तात्पर्याभा-
पूर्वाधिकरणोक्तार्थवादप्रसङ्गेनानन्तरसङ्गतिरनाशङ्कनीया। ननु
मत्ताभिधानद्वारेण चेदनेन सूत्रेण लक्षणमुच्यते ततो रूपात्प्रा-
दित्यादिभिरपि सूत्रैर्निमित्ताभिधानद्वारेण लक्षणज्ञानसिद्धेरनर्थ-
दं सूत्रं स्यादित्याशङ्कते * ननु चेति * रूपप्रायेति वक्तव्ये
क्तिनिर्देशः प्रदेशविशेषज्ञापनार्थः इति गुणाश्रया इति प्रकार-
वेनेतिकरणेन तत्सिद्ध्यादिप्रकाराणि गुणवादनिमित्तानीत्यभि-
ात् प्रकारस्य च व्यवच्छेदकत्वेन लक्षणत्वाद्यथा तत्सिद्ध्यादेर्गौ-
त्तिनिमित्तलक्षणत्वेनाभिधानं नैवं रूपादेः किन्तु स्तेनं मन इ-
युदाहृतार्थवादगतगुणवादाख्यलक्ष्यविषयस्य किन्निमित्तो ऽयं
वाद इत्येवंविधस्य व्यवहारस्य सिद्ध्यर्थमिह सिद्धं सारूप्यशब्देन
स्य निमित्तत्वं भूमशब्देन च प्रायभूयस्त्वयोर्निमित्तत्वं प्रशंसाश-
च दूरस्थचपराधनिमित्तदुर्ज्ञानत्वादेः सुकरस्य प्रशस्तत्वात् द-
स्य तदभावात्मकत्वान्निमित्तत्वं तत्र नीतमिति परिहरति * स

त्यमिति * उदाहृतशब्देन रूपादेः सर्वगुणवादाव्यापकत्वादपि ल
क्षणत्वं नास्तीति सूचितम् । ननु यदष्टाकपाल इत्यादौ तत्सिद्ध्यादेरभा
वेनाव्यापकत्वादलक्षणं स्यादिति शङ्कां सर्वशब्देन निरस्यन्नितिकरणे
न प्रकारवाचिना तत्सिद्ध्यादीनां निमित्तं लक्षणेनोक्तमिति व्यतिरे
कमाह * अत्र त्विति * अष्टत्वादेरपि द्वादशत्वपरिच्छेद्यानां क
पालानां मध्ये कति चिन्निष्कृष्याष्टावेतानीत्यादिसंख्येयपरिच्छेदक
त्वेन द्वादशत्वकार्यकरत्वोपपत्तेरष्टाकपालादिशब्देन तत्सिद्धिस
द्भावादन्यत्रापि च यथासम्भवं तत्सिद्ध्यादिषट्कमध्ये कस्य चिन्नि
मित्तस्योहितुं शक्यत्वान्नाव्यापकतेत्याशयः । ननु सहचरणस्थान
तादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्च
कटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावे ऽपि तद्वदुपचार
इति सूत्रेण यष्टीः प्रवेशयेति सहचरणात् ब्राह्मणेषु यष्टि
शब्दस्य मञ्चाः क्रोशन्तीति स्थानात्पुरुषेषु मञ्चशब्दस्य क
टं च्छिनत्तीति तादर्थ्यद्वारेण कटशब्दस्य यमो ऽयं राजेति वृत्तात् रा
ज्ञि यमशब्दस्य आढकमश्नातीति मानात् सक्तुष्वाढकशब्दस्य तुलया
तुलिम्पतीति धारणाच्चन्दने तुलाशब्दस्य गङ्गायां घोष इति सामीप्या
त्तीरे गङ्गाशब्दस्य नीलः शाटक इति योगाच्छाटके नीलशब्दसामाना
धिकरण्यस्य अन्नं बलमिति साधनाद् बले ऽन्नशब्दसामानाधिकरण्य
स्य अयं पुरुषः कुलमित्याधिपत्यात्कुले पुरुषशब्दसामानाधिकरण्य
स्य प्रयोग इति वदद्भिर्नैयायिकादिभिरन्येषामपि गौणवृत्तिनिमित्ता
नामुक्तत्वान्न षट्कस्यापि सर्वगौणवृत्तिव्यापकतेत्याशङ्क्ते * ननु चे
ति * न चैतत् तार्किकस्थितिमात्रं लोके ऽपि दर्शनादित्याह*लोके
चेति * लक्षणार्थे च निमित्ताभिधाने व्यापकत्वाय सर्वाण्युपसं
हार्याणीत्याह * तानीति * परमतेन परिहरति * लिङ्गेति * पर
तु सृष्टिशब्दे ऽपि सृष्टिसञ्ज्ञेष्टकासमवायेनेतरेष्टकाप्रतीत्युपपत्तेर्भूम्नं
ऽप्यवाचकत्वापत्तेर्भूयो ऽल्पत्वप्रतीतिवैलक्षण्याद्वा भेदेनोपन्यासे
ऽत्रापि साहचर्यादिप्रतीतिवैलक्षण्यात् पृथगुपन्यासापत्तेरपरितोषा
त् परिहारान्तरमाह * अथ वेति * जहत्स्वार्थाभिधायित्वलक्षणं
समुदायवाचिनो वैकदेशवृत्तित्वलक्षणे ऽध्यारोपितार्थवृत्तित्वलक्षणं
वा गौणत्वे वेदे तदसम्भवेनाप्रामाण्यापत्तेस्तन्निरासेन लक्ष्यमाणगु
णयोगवृत्तित्वलक्षणज्ञापनायैतन्निमित्ताऽभिधानम् । लक्षणावृत्तौ
वेदाप्रामाण्यापादकस्य लक्षणस्य कैश्चिदनुक्तत्वेन वेदप्रामाण्यावि
रोधिलक्षणज्ञापनार्थेन निमित्ताभिधानेनोपयोगाभावात्साहचर्या
दीनां च लक्षणावृत्तिनिमित्तत्वान्नेहाभिधानमिति भावः । न

यत्र परशब्दस्य परत्र वृत्तेस्तुल्यत्वाज्ज्ञानयोः शब्दवृ-
र्भेदो ऽस्तीत्याशयेन पृच्छति * किं चेति * लक्षणभेदा-
नोत्तरमाह * बाढमिति * प्रश्नपूर्वकं लक्षणभेदमा-
* कुत इति * अभिधेयसम्बन्धित्वरूपापरित्यागप्रदर्शना-
ऽभिधेयाविनाभूतशब्दः गौण्यां तु वृत्तावभिधेयसिंहादि-
बन्धित्वरूपानादरेण तल्लक्षितप्रसह्यकारित्वादिगुणयोगमात्रादर-
र्शनायाभिधेयस्य गुणलक्षणायां व्यापारे ऽप्यनुपादानम्। ननु ल-
ायामविनाभावापेक्षणे यष्ट्यादेः पुरुषाविनाभावाभावात् न य-
ादिशब्दे लक्षणा स्यात् इत्याशङ्क्याह * तत्रेति * अयमाशयः नात्र
णाहेतुत्वेनाविनाभावोपादानं तस्याः सम्बन्धमात्रेण शब्दतात्प-
शादुपपत्तेः। न चात्र लक्षकस्याभिधेयस्य लक्ष्येणाविनाभावो ऽग्नि-
धूमस्योक्तः विपरीताभिधानात्। किं त्वभिधेयसम्बन्धित्वरूपा-
प्रदर्शनार्थं यष्ट्यादिशब्दानामपि चाभिधेययष्ट्यादिसम्बन्धित्वा-
रेण पुरुषस्वरूपे प्रवृत्त्यभावेनाभिधेयाविनाभूतप्रवृत्तित्वाविघा-
त् सम्बन्धमात्रस्य च लक्षणाहेतोर्भावाद् युक्तैव लक्षणया प्रवृत्ति-
ते। ननु सम्बन्धमात्रेण लक्षणोपपत्तावग्न्यादिशब्दानामपि अ-
ग्नेयाग्न्यादिसम्बद्धपैङ्गल्यादिसम्बन्धेन लक्षितलक्षणाया माणव-
दौ प्रवृत्त्युपपत्तेर्गौणत्वाख्यवृत्त्यङ्गीकरणं न युक्तमित्याशङ्क्याह *
नेरिति* लक्षणाहेतुसम्बन्धसद्भावे ऽप्यविनाभावशब्दोक्ताभिधे-
म्बन्धिस्वरूपादराभावाच्च लक्षणात्वप्रसिद्धिरभियुक्तानामित्या-
ः। अभिधेयसम्बन्धित्वरूपानादरमेव प्रश्नपूर्वकमुपपादयन्नाह
क तर्हीति* लक्षणोपायमात्रत्वेनाभिधेयस्यावस्थानं सूचयितुम् *
हत्यलक्षितादित्युक्तम् * सादृश्यसामान्यापेक्षत्वादग्निसम्बन्धा-
क्षपैङ्गल्यादिस्वरूपमात्रयोगान्माणवके ऽग्निशब्दप्रवृत्तिरिति सा-
श्यशब्देनोक्तम्। नन्वत्र लक्षणानिमित्तानभिधाने भूमलिङ्गसमवा-
ारभिधेयसम्बन्धादरेण लक्षणानिमित्तत्वात् उपन्यासो न युक्त
ाशङ्क्याह * सर्वत्र चेति * वस्तुतस्तयोर्लक्षणानिमित्तत्वे ऽप्य-
ग्र्यसृष्ट्यादिसमुदायिलक्ष्यमाणसमुदायाख्यगुणयोगात् समुदा-
तरे सृष्ट्यादिशब्दवृत्तेर्गौणत्वसम्भवात् जहत्स्वार्थवृत्त्यादिलक्ष-
ङ्गायां वेदाप्रामाण्यापत्तेस्तन्निरासायाभ्युपगम्य गौणत्वं तन्नि-
त्त्वेनेहोपन्यास इत्याशयः। प्रस्तरप्रभृतौ तत्सिद्धिकरादौ यजमा-
दिशब्दानां क्व चिल्लक्षणावृत्तिसद्भावे ऽपीयं तावद् गौणी वृ-
त्त्येवेति बोध्यम्। सूत्रकृतो ऽप्रसक्तगौणत्ववृत्तिलक्षणाभिधा-

---

१ वृत्तिभेदाङ्गीकरणमिति २ पु० पा०।

यित्वपरिहारार्थं प्रकृतसिद्ध्यर्थवादचिन्तयोपक्रमितुं भाष्यकृता
थोपन्यस्ते ऽपि सन्देहे पूर्ववत् प्रौढ्या नामधेयचिन्तया सह साक्ष
सङ्गतिप्रदर्शनार्थं त्रेधा सन्देहमाह * अत्रापि चेति * पूर्वस्मिन
धिकरणे त्रयः पक्षा स्त एवात्रापीति योज्यम् । किं तावदित्यादिपू
पक्षभाष्यमर्थवादानर्थक्यस्यार्थवादाधिकरणे निरस्तत्वादयुक्तमाः
ङ्क्योपपादयति * तत्रेति * ननु शब्दसमभिव्याहारमात्रेण स्तुत्य
तीतावपि सर्वाभ्यर्हितयजमानत्वोपचारेण प्रस्तरस्तुतिः प्रत्येष्यं
इत्याशङ्क्याह * न चेति * ननु गौण्या वृत्त्या परशब्दस्य परत्र
त्तिर्गुणवादसूत्रे वर्णितेत्याशङ्क्याह * न चेति * एतत्सूत्रसिद्धां
दे गौणीं वृत्तिमङ्गीकृत्य तत्र गुणवादेन परशब्दस्य परत्र वृत्तिः
ष्यते इह तु सैव वेदप्रामाण्याविरोधिनिमित्ताभावाद्वेदे न सम्भः
तीति पूर्वपक्षी मन्यतइति भावः । ननु सत्सिद्धिकरत्वादि तस्या नि
मित्तं तच्च वेदे ऽपि सम्भवतीत्याशङ्क्याभ्युपगम्य तस्य निमित्त
प्रस्तरे यजमानशब्दप्रवृत्तौ यजमानकार्यकरत्वस्य निमित्तस्य प्रम
णान्तरेणासिद्धे स्तत्कार्ये प्रस्तरविध्यपेक्षत्वात् गुणविधिरेव बल
दापद्येतेत्याह * न चेति * तस्माद्विधिरिति पूर्वपक्षोपसंहारभ
ष्यं व्याचष्टे * तस्मादिति * न च प्रस्तरो याजमानं शक्नोति
र्तुमित्युत्तरभाष्यदर्शनात् अन्यतर इत्युपक्रममात्रं कुण्डपायिना
यने यो होता सो ऽध्वर्युः स पोता य उद्गाता स नेष्टा सो ऽच्छाव
को यो मैत्रावरुणः स ब्रह्मा स प्रतिहर्त्ता यः प्रस्तोता स ब्राह्मण
च्छंसी स ग्रावस्तुधः प्रतिप्रस्थाता सो ऽग्नीत्स उन्नेता गृहपतिः
हपतिः सुब्रह्मण्यः सुब्रह्मण्य इत्यृत्विक्समासे समाम्नाते होत्रा
शब्दानां मुख्यार्थत्वमङ्गीकृत्य तत्सामानाधिकरण्यायाध्वर्य्वादिशब्द
नां लक्षणार्थत्वं तृतीये विप्रतिषेधे करणः समवायविशेषादिति
मवायविशेषव्याचक्षणेन भाष्यकृतोक्तमिह दृष्टान्तितम् । अन्यवा
तशास्त्रार्थायोगात्कतरो ऽत्र कार्यलक्षणो ऽर्थः पूर्वपक्षिणो ऽभि
इत्यपेक्षायां मुख्यं वा पूर्वचोदनाल्लोकवदिति द्वादशाधिकरणन्याय
यजमानशब्दस्य मुख्यार्थत्वमङ्गीकृत्य प्रस्तरशब्दस्य कार्यलक्षणार्थत
माह * तत्रापीति * आग्नावैष्णवमेकादशकपालं निर्वपेत्स
स्वतीमाज्यस्य यजेतेत्युदाहृत्य किं विकल्पेनान्यतरस्य तन्त्रं प्रस
नान्यतरस्योपकारकत्वात् कर्त्तव्यम् उतआग्नावैष्णवं चरुं तन्त्रमेवे
सन्दिह्य विशेषादनियमे प्राप्ते भूयसां स्यात् स्वधर्मत्वामिति पूर्वस्

१ प्रतत्रतव्येति २ पु० पा० ।
२ चरुमिति १ पु० ना० ।

स्वधर्मत्वपदं परित्यक्तभावप्रत्ययमनुषज्य मुख्यमाग्नावैष्णवक-
र्मचोदितत्वेनानुपसञ्जातविरोधित्वात् स्वधर्मकं यथा लोके
तानां पूर्वासनेषूपवेशनं जघन्यागतानामितरेष्विति वक्ष्यते ।
वमित्यादिसिद्धान्तभाष्यं यजमानशब्दस्य मुख्यत्वेन कार्यलक्ष-
त्वायोगात् तत्कार्ये प्रस्तरविधानस्यानाशङ्कितत्वेनायुक्तमाश-
पादयति * न तावदिति * प्रस्तरकार्ये यजमानविधौ निरस्ते
कश्चिद्यजमानकार्ये प्रस्तरविधिः शङ्केत तन्निरासाय स्वकार्यवि-
द्यजमानस्येन प्रस्तरकार्ययोगो ऽचेतनस्य च प्रस्तरस्य चेतनकार्य-
धाद्यजमानकार्ययोगो न सम्भवतीति यजमानकार्ये प्रस्तरचोद-
पत्तिमभ्युपेत्यैतावदुक्तम् वस्तुतस्तु मुख्यत्वेन यजमानशब्दस्य
लक्षणार्थत्वायोगात्सापि नोपपद्यतइत्यर्थः । आदिशब्देनैकक-
ोपादानम् । यजमानस्यैककपालकार्यार्थत्वे सर्वतन्त्रलोपापत्त्यभि-
प्रस्तरकार्यार्थत्वे ऽपि तुल्यमित्याह * एकेति * भाष्यकृता तु ३१०
रस्य मान्त्रवर्णिकदेवतान्वयेनानुषङ्गीकयागसाधनत्वे ऽपि प्रह-
स्य प्रतिपत्तित्वेन प्रस्तरकार्यत्वाभावाद्यजमानस्य च पुरोडाशक-
वदन्यार्थस्यैव स्रुग्धारणविनियोगे ऽपि तन्मात्रनिष्पत्त्या कृतार्थ-
भावेनाप्रतिपाद्यत्वात् प्रहरणानापत्तेस्तदुपेक्ष्येतरत्रैव दूषणमुक्तम्
न्तरं चेत्यादिभाष्येण विध्येकवाक्यत्वं विनार्थवादत्वायोगेना-
क्यपरिहाराय कथं चिद्विधित्वमेष्टव्यम् इत्याशङ्कानिरासायैकस्यो-
सादनविधिशेषता इतरस्य च सर्वहोमविधिशेषतेत्यभिधानपूर्व-
विधित्वासम्भवोपसंहारेणानुवादत्वमुक्तं तद्व्याचष्टे * तस्मा-
ति * कथं पुनरिति भाष्येण प्रस्तरैककपालशब्दयोः कार्यलक्षणा-
वाभावे कथं यजमानशब्दसामानाधिकरण्यज्ञानमिति पृष्ठा गौ-
वृत्त्या सामानाधिकरण्यं भविष्यतीत्याशङ्कानिरासार्थं वेदे गौ-
वृत्त्यसम्भवं मनसि कृत्वा कथमिति प्रश्नाभिप्रायो विवृतः । त-
ङ्क्षिप्य व्याचष्टे * कथमिति * किमर्थं चेति प्रश्नान्तरभाष्यं वि-
र्थवादचिन्तोपक्रमेण सम्वादस्य स्तुत्यर्थत्वाज्ञानादयुक्तमाशङ्क्य
तिप्रकारप्रश्नविषयतया व्याचष्टे * किमाकारा वेति * उक्तय-
ति द्वितीयप्रश्नोत्तरभाष्यं व्याचष्टे * यजमानो हीति * उत्तर-
ब्दव्याख्यानायोपरिशब्दः कथमित्यादिप्रश्नानुभाषणपूर्वकं गौणवृ-
लक्षणाभिधानापातनिकार्थं गुणवादस्त्वितिसूत्रेणोत्तराभिधाना-
भाष्यं व्याचष्टे * गुणाच्चेति * गौणवृत्त्यसम्भवाभिधानार्थं क-
मिति भाष्यं गुणादिति पञ्चम्या परशब्दस्य परत्र प्रवृत्तौ गुणस्य
तुत्वमात्राभिधानात् लक्ष्यमाणस्यापि च हेतुत्वोपपत्तेर्वाच्यत्वान-

भिधानादयुक्तमाशङ्क्य व्याचष्टे * कथमिति * अयमाशयः न लक्ष्यमाणगुणयोगमात्रेण सिंहादिशब्दस्य देवदत्तादौ वृत्तिर्युक्ता लक्ष्यमाणगुणस्याशाब्दत्वाच्छब्देन देवदत्तादिना धूमोऽयं ज्वलतीतिवदनन्वयापत्तेः । प्रसह्यकारित्ववच्च दंष्ट्रित्वचतुष्पात्त्वादेरपि सिंहगुणस्य देवदत्ते प्रत्ययापत्तेर्लक्षणायां त्वभिधेयसम्बन्धित्वरूपादरेण तत्र शब्दतात्पर्यावगतेर्यत्परः शब्दः स शब्दार्थ इत्यनेन न्यायेनाभिधेयसम्बन्धित्वरूपस्यापि शब्दार्थत्वाच्छाब्दार्थान्तरेणान्वयो युक्तः । तात्पर्यव्यवस्थानादेव च गङ्गादिशब्दानामभिधेयसम्बन्धाविशेषेऽपि सिकतादिलक्षकत्वानापत्तिः । तस्माल्लक्ष्यमाणगुणयोगनिमित्तवृत्तित्वस्य गौणवृत्तिलक्षणस्यायोगात् प्रसिद्धवाच्यत्यागेन तद्गुणवाचित्वं गौणवृत्तित्वलक्षणमभ्युपगन्तव्यम् । सिंहादिशब्दस्य हि स्वार्थवाचित्वे देवदत्तशब्दसामानाधिकरण्यायोगात् तद्गुणप्रसह्यकारित्ववाचित्वाकल्पनायां देवदत्तेऽपि तत्सद्भावाद्गौरो देवदत्त इतिवत्सामानाधिकरण्यमुपपादयितुं शक्यते । स्वार्थत्यागेन च तद्गुणे वर्तमानत्वात्तत्र भव इत्येतस्मिन्नर्थे तद्धितोत्पत्तिः । पौरुषेये च वाक्ये वक्त्रभिप्रायानुसारात् स्वार्थत्यागेन तद्गुणे वृत्तिर्युक्ता वेदे तु स्वार्थत्यागेन प्रामाण्यबाधापत्तेस्तत्त्यागेन गुणवाचित्वकल्पना न युक्तेति स्वार्थाभिधानेनेत्युत्तरभाष्याभिप्रायमाह * सिद्धान्तिस्त्विति * गुणस्यावाचकोऽपि स्वार्थमभिधाय लक्षणया गुणं ब्रवीतीति वदता लक्ष्यमाणगुणयोगनिमित्तत्वं सिद्धान्त्यभिमतं गौण्या वृत्तेर्लक्षणं सूचितं भवतीत्याशयः । सर्व इति भाष्यं पराभिमतलक्षणनिरासार्थतया व्याचष्टे * अजहत्स्वार्था इति * न जहाति शब्दः स्वमर्थं यासु वृत्तिषु इति विग्रहः । यथा श्रुतिवृत्तौ लक्षणावृत्तौ वा शब्दः स्वार्थं न जहाति तथा गौण्यामपीत्यर्थः ततश्च स्वार्थत्यागाभावान्न वेदाप्रामाण्यापत्तिरित्याशयः । भाष्यकृता प्रसिद्धार्थहानाप्रसिद्धार्थकल्पनापत्तिः पराभिमतलक्षणनिरासे हेतुत्वेनोक्ता सा गवादिशब्दानामपि सास्नादिमदर्थत्यागेन पृथिव्यादिवाचित्वनिरासापादकत्वादहेतुरित्याशङ्क्य स्वयं हेतुमाह * पूर्वेति * कथं पूर्वक्लृप्तशक्त्यनुसारेण परशब्दस्य परत्र वृत्तिरित्याशङ्क्यार्थसम्बन्धादित्यादिभाष्ये वक्ष्यमाणं प्रकारमाह * सम्भविष्यति चेति * भविष्यन्निर्देशेनान्यस्य प्रकारस्य वक्ष्यमाणत्वं सूचितम् भाष्योक्तं हेतुमनुसन्धत्ते * इतीति * स्वोक्तहेतूपजीवित्वसूचनायेति करणः प्रसिद्धहानाप्रसिद्धकल्पनस्य दोषत्वोपपादनार्थं व्यवहारोच्छेदकत्वाभिधानम् । न चेति भाष्यं मतान्तरनिरासार्थत्वेन

तुं तत्तावदुपन्यस्यति * अन्येषां त्विति * सिंहादिशब्दो-
जातिवद् द्रव्यादीनामपि प्रतीतेरवाच्यत्वे वा शब्दत्वेन द्र-
ाचिशब्दान्तरासामानाधिकरण्यायोगात् समुदायवाची सिं-
ो देवदत्तादौ समुदायाभावेनैकदेशे गुणादौ लक्षणया व-
गुणशब्दस्याङ्गे प्रयोगादङ्गशब्दस्य चावयवापरपर्यायैकदेशे प्र-
देशाख्ये गुणे वर्त्तमानत्वात् पूर्ववद् गौण इत्युच्यते तस्मा-
दायवाचिनस्तदेकदेशवृत्तित्वं गौणवृत्तिलक्षणं तच्च समु-
यत्वेन शब्दार्थसम्बन्धानित्यत्वापत्तेरप्रामाण्यापादकत्वाद्-
सम्भवतीत्याशयः । एतन्मतनिरासार्थतया न चेति
याचष्टे * तत्रेति * समुदायवाची वेति भाष्यावयवस्य
वाचित्वाङ्गीकरणेन एकदेशवृत्तिनिरासार्थत्वशङ्कानिवृत्तये
क्यत्वेन समुदायवाचित्वनिरासार्थत्वसूचनायादौ व्या-
वेवं सति वेदमधीत्य स्नायादिति क्त्वाप्रत्ययस्य पूर्वकालतानन्त-
यवाचिनो ऽध्ययनविध्यविरोधार्थं तदेकदेशे पूर्वकालत्व-
त्यभ्युपगमो विरुध्येतेत्याशङ्का नावयवे श्रुत्या वर्त्तितुमर्ह-
ध्याहारेण व्याख्यातुं मुख्यरूपेणेत्युक्तं गुणहीने ऽपि इत्या-
यवव्याख्यानार्थं भवतीत्याद्युक्तम् । समुदायवाचित्वनि-
सर्वेति दूषणान्तरभाष्यं सिद्धान्तविरोधाभिधानार्थतया
ाचष्टे * सामान्येति * एतदेव भाष्यं सामान्यवचनः शब्द
तेज्ञासिद्ध्यर्थो यदि व्यक्तिः शब्दार्थो भवेदित्यादिभाष्योक्तो
ाचित्वनिरासो न्याय्य इत्येवं व्याख्यातुमाह * क्रिये- ३२०।१
प्रबलारिमर्दनादिक्रियाणां शौर्यादिगुणानामित्यर्थः । किं
वाचित्वपक्षे व्यक्त्यन्तरे प्रयोगासम्भवे ऽप्येकस्यां ताव-
कालान्तरे ऽपि प्रयोगः सम्भवति । गुणादिसमुदायवा-
वेकस्यामपि व्यक्ताववस्थाभेदेन तेषां भेदात् सम्बन्धाग्रह-
धानाशक्तिरित्याह * एकस्यामेवेति * ननु गुणक्रियाणाम-
प्येकं किं चिद् गुणक्रियावान्तरसामान्यसम्बन्धग्रहणायोपल-
विष्यतीत्याशङ्क्याह * न चेति * आसां गुणक्रियाणां समु-
व्यापकमुपलक्षणभूतं सिंहत्वादन्यत्सामान्यं नास्ति । न
त्वादिसामान्यस्यैव सिंहशब्दवाच्यत्वोपलक्षणत्वं युक्तम् । तस्य
शो व्यापकत्वाभावेन प्रत्येकमुपलक्षणापत्तेस्तथोपलक्षितानां
क्रियाणां व्याघ्रादिजात्यन्तरे ऽपि व्यस्तानां भावात् सिंहश-
त्वं नास्तीत्याशयः । ननु सिंहत्वमेव तर्ह्युपलक्षणं भवत्वि-

देति २ पु० ना० ।

स्याशङ्क्याह * तत्रेति * उत्तरार्द्धं व्याचष्टे * न हीति * स
र्वाचित्वान्निरासस्य परोक्तगौणवृत्तिलक्षणनिरासोपयोगमाह *
ति * न चास्तीति भाष्यमारोपितार्थवृत्तित्वरूपगौणवृत्तिल
निरासार्थत्वेन व्याख्यातुं तन्मतं तावदुपन्यस्यति * कश्चिदि
समारोपिते तस्मिन् वाच्ये भावः प्रवृत्तिर्यस्य शब्दस्य स गु
वाच्यमारोप्य प्रवर्त्तमानत्वात्तत आगत इत्यस्मिन्नर्थे तद्धितान
गौण इति उच्यते समारोपितो वा यस्मिन्नर्थे तस्य वाच्यस्य :
भावः सोऽर्थो गुणतो वाच्यारोपेण शब्दात् प्रतीतत्वात् गौण
इत्युच्यते ततश्च समारोपितार्थवृत्तित्वं शब्दस्य गौणत्वलक्षणं सम
पितार्थाश्रयत्वं चार्थस्य तच्च वेदे समारोपकपुरुषाभावाच्च सम्
तीत्याशयः। एतदेव लक्षणमुपपादयितुमाह * तस्येति * शब्दस्य
भिधाने वृत्तिर्व्यापारो न चासावभिधेया ऽभावे सम्भवतीत्याश
ननु सिंहशब्दस्य देवदत्ताभिधाने व्यापाराभावे ऽपि स्वाभिधेय
क्ष्यमाणगुणयोगेन देवदत्तप्रतिपत्त्यर्थं प्रयोगो भविष्यतीत्याशङ्क्य
* न चेति * सिंहशब्दाभिहितेन सिंहत्वेन गम्यमानस्यापि गुणस्य
शब्दत्वाच्छब्देन देवदत्तेनान्वयायोगादित्याशयः। सिद्धान्त्यभि
लक्षणासम्भवमुक्त्वा स्वाभिमतं प्रश्नपूर्वकमुपपादयति * कथं त
ति * ननु सिंहशब्देनैव देवदत्ते स्ववाच्यसिंहत्वरूपमारोपेणा
विषयीकृत्य शब्दप्रवृत्तावितरेतराश्रयः स्यादित्याशङ्क्य स्वयमेव
वक्ताध्यारोप्येत्युक्तम्। आरोपनिमित्तमाह * सिंहादीति * सिं
हादिरूपतां प्रतिपद्यन्तइत्यर्थः। ननु देवदत्ते सिंहत्वं वक्त्रारोपि
तमिति कथं ज्ञायतइत्याशङ्क्याह * ततश्चेति * शब्दप्रयोगस्य स्वा
र्थवोपपत्तेः सिंहशब्दप्रयोगान्यथानुपपत्त्या सिंहत्वारोपः कल्प्य
इत्याशयः। नन्वेवं वाच्ये एव शब्दप्रयोगान्मुख्यत्वं स्यादित्याशङ्क्या
ह * न चेति * नन्वारोपिते वाच्ये ऽर्थान्तराभिधानानपेक्षत्वात् :
स्ववत्प्रथमप्रवृत्तेर्मुख्यत्वाविरोध इत्याशङ्क्याह * यत्र त्विति
वस्तुवृत्त्या स एवार्थो यत्र न पुनरारोप्यते तत्र प्रवर्त्तमानः शब्
मुख्य इत्युच्यते इतरस्तु जघनवदारोपात् पश्चात्प्रवृत्तेर्जघन्यः
गुणतश्चारोपात् गौण इत्युच्यतइत्याशयः। न च शुक्तिकादावा
रजतत्वारोपेण रजतादिशब्दप्रवृत्तेर्गौणत्वापत्तिः। पुरुषोत्प्रेक्ष
प्रभवत्वाभावेन शुक्तिकादौ रजतादिबुद्धेरारोपितत्वाभावादि
सूचनायादोष इत्युक्तम्। एतन्मतनिरासार्थत्वेन भाष्यं व्या
चष्टे * तत्रेति * एतदेवोपपादयति * तथा हीति * सिं
हदेवदत्तयोरत्यन्तवैलक्षण्येनारोपायोगात्सम्भावितस्यार्थापत्त्यापि

ःर्पयितुमशक्यत्वात् नाभिधानसिद्ध्यर्थमध्यारोपो युक्त इत्यर्थः ।
क्षण्यं ऽप्यूषरादौ तोयाध्यारोपदर्शनाद् * भ्रान्तिवर्जितैः *
युक्तम्। नचैवं सति योषा वा गौतमाग्निरिति योषायामग्नित्वारोप-
र्थेन स्यादितिवाच्यम्। तद्रेतःप्रक्षेपस्य सध्यायत्कत्वमभवद्भाक्त
। द्वाभ्यामृग्भ्यां स्वाहाकारान्ताभ्यां रेतः सिञ्चेदिति स्वाहाकार-
व्यत्वस्मृतेस्तथाविधस्य च होमत्वप्रसिद्धेर्यूपशकला होतव्या इ-
च देवतोद्देशद्रव्यत्यागनिरपेक्षप्रक्षेपमात्रे ऽपि जुहोतेर्वेदे दर्शना-
कर्मीभूतस्य रेतसो ऽर्चिशुचिहुसृपिछादिछर्दिभ्य इस्निरिति जुहो-
ःस्निप्रत्ययान्वाख्यानाद्धविःशब्दव्यपदेश्यत्वेन योषाया रेतोरू-
विराधारतयाग्निसादृश्यसम्भवाच्छ्येनचितं चिन्वीतेति च यो-
षामग्निसादृश्यारोपस्य विधेयत्वादित्याशयः । ननु भ्रान्तिवर्जि-
तं विसदृशे वस्तुनि वस्त्वन्तरारोपाशक्तावपि भ्रान्त्यवसितसा-
ऽपि तत्त्वारोपेण शब्दः प्रयोक्ष्यतइत्याशङ्क्याह * यदेति * ३२
मतभोषरे भ्रान्त्या शौक्ल्यचञ्चलत्वादितोयगुणदर्शनेन तोयसा-
गाध्यवसानात्तोयमुत्प्रेक्ष्य तोयशब्दप्रयोगे तत्त्वतो भ्रान्तावपि भ्रा-
न्त्यवसितस्यैव कारणत्वोपपत्तेरुत्प्रेक्षामात्रत्वाभावेनारोपाभावाद्
मपि गत्वा भ्रान्तित्वस्य परिहर्तुमशक्यत्वे प्रथममेव सादृश्यज्ञा-
नापेक्षस्य भ्रान्त्यङ्गीकरणस्य च युक्तत्वात् मुख्यतैवावसीयते न
गतेत्याशयः । परानभिमतमपि वा भ्रान्तेरारोपत्वं लोकप्रसिद्ध्यनु-
रोधापाद्यारोप्येत्युक्तम्। तोयस्य तत्राविद्यमानत्वात् मुख्यत्वानुप-
त्तमाशङ्क्य *भ्रान्तीत्युक्तम्*भ्रान्त्यध्यवसितस्यापि प्रथमं शब्दात्प्र-
मुख्यत्वाविरोध इत्याशयः । भ्रान्त्यध्यवसितो मुख्यो भ्रान्तिमुख्य
। शाकपार्थिववन्मध्यमपदलोपी समासः । ननूभयोर्भ्रान्तावर्थान्त-
भ्रान्ननैरपेक्ष्येण प्रथमवृत्तेर्मुख्यत्वाद् गौणत्वासम्भवे ऽपि वक्तु-
न्त्यभावेऽपि श्रोतृप्रतारणायोषरे तोयशब्दप्रयोगे भ्रान्तिमुख्यत्वस्या-
सम्भवाद् गौणत्वं भविष्यतीत्याशङ्क्याह*अथापीति*श्रोतृवञ्चना-
व परशब्दस्य परत्र प्रयोगोपपत्तेर्नासम्भाविनो ऽध्यारोपस्य कल्प-
युक्तेत्याशयः । ननु द्वयोः श्रोतुरेव वा भ्रान्त्या वारोपाभावे ऽपि
न्त्या प्रतारणार्थेन वा परशब्दस्य परत्र प्रयोगोपपत्तेर्माभूदारोपक-
ना द्वयोरपि तु भ्रान्त्यभावे सिंहो देवदत्त इत्यादावारोपं विना
प्रयोगानुपपत्तेस्तत्कल्पनैवोचितेत्याशङ्क्याह * यदा त्विति *
दृश्यमादिशब्दोपात्तो वा सादृश्यहेतुर्गुणयोगो निमित्तं यस्य व-
र्थस्य तस्य परत्र परशब्दप्रवृत्तौ निमित्तत्वेनाध्यवसानान्नारोपक-
ना युक्तेत्यर्थः । वत्यप्रयोगात्तदर्थाध्यवसानासम्भवाशङ्कानि-

शास्त्रायान्तर्णीतशब्देनाभिप्रेतत्वमुक्तम् । ननु वक्त्रर्थाभिप्रायस्यैव
निमित्तत्वं नारोपस्येति नियमे को हेतुरित्याशङ्क्य पूर्वश्लोकव्याख्
नेन निरस्यति * तथा हीति * ननु सत्यपि विवेके प्रसह्यका
त्वादिसादृश्यादारोपः सम्भवतीत्याशङ्क्याह * यथेति * विवे
क्षानाम् पुंसाम् आरोपानुपपत्तौ हेतुमाह*न हीति * ज्ञानस्य व्य
हाराङ्गत्वात् अर्थनिरपेक्षेण च ज्ञानरूपेण व्यवहाराभावात् अ
ध्यवसानात्मकमेव सर्वं ज्ञानं न ततो ऽन्यादृशं न च विवेकेन
ऽध्यवसिते तत्त्वारोपः सम्भवतीत्याशयः । यद्वा विवेकज्ञान
तत्त्वभ्रान्त्यसम्भवे ऽप्युत्प्रेक्षामात्रप्रभवा कल्पनारूपा बुद्धि
रोपशब्दवाच्योपपत्स्यतइत्याशङ्क्य * न हीत्युक्तम् * अ
माशयः कल्पनारूपापि बुद्धिरर्थान्तरात्मना यद्यर्थान्तर
वभासयेत्ततो मानान्तरेण भ्रान्तिरेव स्यात् सा च विवेकिन
सम्भवतीत्यर्थानवभासिकासावभ्युपगन्तव्या न चार्थानवभासि
बुद्धिः सम्भवतीति व्यवहारानङ्गत्वापत्तेस्तावन्निरालम्बना बुद्धि
सम्भवतीत्युक्तं बुद्धिस्वाभाव्यादप्येवमित्याह * किं चेति * पु
षप्रयोज्यत्वात्तदधीनो ऽपि शब्दः प्रवृत्तिनिमित्तं विषयं विना न
वर्त्तते घटे वैयात्यात्पटशब्दोच्चारणे ऽपि बुद्ध्यनुपपत्तेः । बुद्धि
स्वच्छन्दत्वाद्विषयं विनोत्पत्तुमेव नार्हतीत्यर्थः । ननु स्वांशएव
षयो भविष्यतीत्याशङ्क्याह * न चेति * आरोपसम्भवात्कल्पना
युक्तेत्युक्त्वा कल्पकाभावादपि तत्कल्पना न युक्तेत्याह * अ
चेति*अयमाशयः । स्वप्रत्ययानुसारेण श्रोत्रा वक्त्रभिप्रायानुसार
श्रोतुरारोपितार्थप्रत्यये सति वक्तर्यारोपकल्पना युज्येत तस्यैव दे
दत्तपदसामानाधिकरण्यात्पूर्वं सिंहपदात्सम्बन्धग्रहणकालावग
नारोपितसिंहत्वरूपार्थप्रतीतेस्तत्सामानाधिकरण्योत्तरकालमपि
हसादृश्यमात्रप्रतीतेरारोपितार्थप्रत्ययाभावान्न वक्तर्यारोपकल्प
युक्तेति पदजन्यस्य पदार्थज्ञानस्य केवलसंस्कारजन्यत्वाभाव
स्मृतित्वाभावे ऽपि अधिकार्थत्वाभावसूचनार्थः स्मृतित्वोपच
ततश्चानारोपितमुख्यार्थग्रहणान्न श्रोतरि नापि वक्तर्यारोप इत्यर्थ
श्लोकं व्याचष्टे * सर्वथेति * यदि द्रुतमध्यादिविभागवदर्थवि
षनिरपेक्षो गौणमुख्यविभागः स्यात् ततः श्रोतृप्रत्ययानपेक्षत्वात्
त्र परशब्दप्रयोगान्यथानुपपत्त्याध्यारोपः कल्प्येतापि स त्वर्थप्र
यापेक्षत्वात् तस्य श्रोतृगामित्वात् श्रोतुरारोपितार्थप्रत्ययान्यथान्
पत्त्या कल्पनीयः। न च तस्यारोपितार्थप्रत्ययः सम्भवतीति दर्शयि
*श्रोतृणामित्युक्तम् * सादृश्यादीत्यादिशब्देन तद्धेतुगुणयोगो

म्। नन्वेवं सति सादृश्यस्यैव वाच्यत्वापत्तेः स्वार्थत्यागः स्यादि-
शङ्क्य * सा चेत्युक्तम् *तमेवन्यायं प्रश्नपूर्वकं वक्तुम्* कथमि ३२
रुम्* अस्यैव श्लोकस्योत्तरार्द्धं व्याख्यातुम् *यदा चेत्युक्तम् *
शी तर्हि परत्र परशब्दप्रयोगोपपत्त्यर्थं वक्तरि कल्पनेत्यपेक्षायां प्र-
र्वकम् *कथं तर्हीत्युक्तम्* प्रसह्यकारित्वादेः सिंहत्वेनाविना-
देवदत्ते ऽनुपपत्तिप्रसङ्गात् बहुव्रीह्यभ्युपगमे चाविनाभूतशब्द-
विशेषणत्वात्पूर्वनिपातापत्तिः बाधिते च सिंहे व्यभिचारात् प्र-
कारिता तत्र प्रायेणेति भाष्ये प्रायशब्देनाविनाभावानादरसूच-
सम्बन्धमात्रविवक्षया ऽविनाभूतशब्दः अनेन च कथं तु स्वार्था-
नेन प्रत्यय इत्यादिभाष्यमनागतावेक्षणन्यायेन व्याख्यातं भव-
स्वोत्प्रेक्षितगौणवृत्तिलक्षणाभ्युपगमे ऽनवस्थितवेदप्रामाण्याप-
यानुचितत्वान्नारोपितार्थवृत्तित्वं गौण्या वृत्तेर्लक्षणमित्याह* किं
* आरोपस्य पुरुषधर्मप्रदर्शनार्थं वक्तृणामित्युक्तम् किं तर्हि
वृत्तिनिमित्तलक्षणमित्याशङ्क्येति गुणाश्रया इतीतिकरणेन प्र-
वाचिना तत्सिद्ध्यादिगुणयोगस्य गौणवृत्तिनिमित्तत्वाभिधाना-
चेतम्। गुणयोगवृत्तित्वं गौणवृत्तिलक्षणमाह*तस्मादिति* उ-
धीनवृत्तित्वादीनां गौणवृत्तिलक्षणानां वेदाप्रामाण्यापादकत्वा-
निराकरणे ऽपि गौणमुख्याधिकरणे निराकरिष्यमाणत्वात् प-
सिद्धिप्रदर्शनार्थम् * तस्मादित्युक्तम् * गुणयोगनिमित्तायाः
प्रवृत्तेर्गौणत्वेनेष्टत्वाद्वाच्यगुणानां प्रभूतानामर्थान्तरे वृत्तियोगः
जने प्रवृत्तौ निमित्तं यस्य स गौण इत्येवं व्याख्येयम्। गुणानाम-
त्वाच्छब्देनार्थान्तरेणान्वयानुपपत्तिः प्रसह्यकारित्वादिवच्च दं-
ादेरपि प्रत्यापत्तिरित्याशङ्कानिरासार्थं यो हि मन्यते प्रसह्य-
र्णं प्रत्याययेयमिति भाष्यावयवव्याख्यानार्थेन सिंहत्वाविनाभू-
कक्रियागुणसमुदायो ऽनेन विवक्षित इति ग्रन्थेन प्रसह्यकारि-
नां तात्पर्यवृत्त्या व्यवस्थितं शाब्दत्वं यत्सूचितं तद्विवरणार्थेन
जनशब्देन प्रयुज्यते ऽनेनेति व्युत्पत्त्या निमित्तमुक्तम्। भेदनादे-
त्तस्य होमादिप्रयोजकत्वाभ्युपगमान्नारोपिणो ऽपि तावन्निमि-
प्रयोजकत्वासम्भवोपालम्भः। इह तु यथा रामस्य वेतनदाने
त्तस्य शेषित्वरूपमपि प्रयोजनत्वं तथा देवदत्ते सिंहगुणयोगस्य
शब्दप्रवृत्तौ निमित्तत्ववत् प्रतिपाद्यत्वेन प्रयोजनत्वमप्यस्तीति-
यितुं प्रयोजनशब्देनाभिधानं युक्तमेव। आरोपवाद्यस्य लक्षण-
यापकत्वमाशङ्कते * नन्वेवमिति * खपुष्पादेरसद्रूपत्वेन गु-

व्याधिते इति २ पु० पा०।

णाभावादात्मादौ तद्गुणयोगानुपपत्तेः खपुष्पादीनां शब्दानां
ष्पमात्मेत्यादिगौणप्रयोगो ऽस्मिन् लक्षणे न युज्येतेत्यर्थः । न
द्रूपस्याध्यारोपयितुमशक्यत्वादारोपितार्थवृत्तित्वमपि खपु
त्मेत्यादिगौणप्रयोगेष्वसम्भवादव्यापकं स्यादित्याशङ्क्याह *
ष्यादीति * असद्रूपस्यारोपासम्भवे प्रधानादेरसद्रूपत्वेनाप्र
प्रसङ्गादप्रसक्तस्य प्रधानं नास्तीत्यादिनिषेधायोगात् प्रस
सद्रूपत्वाभ्युपगमे निषेधविरोधापत्तेरारोपस्यैव प्रसक्ति
ये ऽवश्याङ्गीकार्यत्वादसतो ऽप्यारोपापत्तेरात्मनि
ष्पत्वारोपेण खपुष्पमात्मेति गौणप्रयोगसम्भवान्नास्मत्पक्षे
क्षणस्याव्यापकतेत्याशयः । सिद्धान्ते तु त्वदीयस्यैव ल
स्याव्यापकत्वाख्यो दोषो नास्मदीयस्येति प्रतिजानाति ता
अत्रेति * परपक्षे तावत्प्रश्नपूर्वकं दोषमुपपादयति * कुत इ
किं चिद्रूपमुपादायातद्रूपे तद्रूपकल्पनारोपः खपुष्पस्य त्वेवं
मिति निरूपणासम्भवान्न शक्या कल्पना गौणप्रयोगसिद्ध्यर्थं
र्थान्तरे ऽन्वयारोपो वाच्यः अर्थान्तरस्य चात्मनो सद्रूपतयात्म
पुष्पमात्मेति गौणशब्दप्रयोक्तुर्बौद्धादेरभिप्रेतत्वान्न तस्मिन्नारो
त्तिरित्यर्थः । एतदेव व्यतिरेकमुखेनोत्तरार्द्धेन विवृतं गुणे
सत्ता च प्रज्ञातं यस्येति विग्रहः । एतदेवोपपादयति * यस्
दिति * असद्रूपस्यारोपाभावे प्रसक्त्यभावात् खपुष्पं नास्तीति
योगानुपपत्तेरसद्रूपस्यापि खपुष्पादेरारोपो ऽङ्गीकार्य इति श
ङ्का प्रधानादिनिषेधोपन्यासेन कृता सा येऽपि प्रधानात्मादीनां नि
इत्युपन्यासपूर्वकं पश्चात्परिहरिष्यते खपुष्पमात्मेत्यादिगौणप्र
तावत् खपुष्पस्यारोपासम्भवो ऽधुनोच्यतइति तावच्छब्दार्थः ।
पुष्पशब्दस्य गौणत्वद्योतनार्थः स्थानीयशब्दः । अनिर्द्धारितरूपस्
पासम्भवद्योतनार्थं निर्द्धारणार्थतरप्प्रत्ययप्रयोगः । अन्यस्य
न्यत्रारोपो भवति खपुष्पस्यारोप्यत्वेनाभिमतस्यारोप्याश्रयादात
ऽन्यत्वेनानवधारणान्नात्मन्यारोपः सम्भवतीत्यन्यशब्देनोक्तम्
२३।१ न्यात्मनः सद्रूपादसद्रूपस्यान्यता प्रसिद्धैवेत्याशङ्क्य *त्वयेत्युक्त
नैरात्म्यवादिनो बौद्धादेः खपुष्पमात्मेति प्रयोगः तन्मते चासत्त्व
शेषान्नान्यत्वं सम्भवतीत्याशयः । यद्यपि खपुष्पशब्दस्य खाधा
ष्पावच्छिन्नाभाववाचित्वं गम्यते तयोश्चाभाववाचित्वं पूर्वेणैवा
वे ऽवगते इत्यादिना वक्ष्यते तेनैव न्यायेनात्मशब्दस्यापि नैरात्म
क्षे शरीराद्याधाराहम्प्रत्ययग्राह्यावच्छिन्नाभाववाचित्वं गम्यते त
श्चाभावयोर्द्धर्मिप्रतियोगिभेदेन भेदादात्मनो ऽन्यत् खपुष्पं इ

पि वक्तुं शक्यते तथापि खपुष्पत्वरूपस्य शरीराद्यात्मा-
नात्मरूपे ऽध्यारोपाभावात् स्वरूपेण चाऽभावयोरवैलक्ष-
रूपस्यान्यत्वावधारणं सम्भवतीति दर्शयितुं* यदध्यारो-
* तस्मादात्मनि खपुष्पारोपासम्भवेनारोपितार्थ-
स्मेनप्रयोगे ऽनुपपत्तेस्तवैवाऽव्यापकत्वलक्षणो दोषः
तात्पर्यार्थः । ननु खस्य पुष्पस्य च कथं चित् संसर्गक-
त्मकं खपुष्पमभ्युपगम्यात्मन्यारोपयिष्यते इत्याशङ्क्याह
एवं खपुष्पशब्दस्य खपुष्पसंसर्गात्मकारोपितार्थत्वेन ख-
णत्वोपपत्तेर्गौणशब्दवृत्तिविषयतया खपुष्पस्यैवारोप्यस्य
द्येत न चैतस्यारोप्यस्य लोके गौणत्वं प्रसिद्धं सिंहत्वा-
गौणत्वप्रसिद्धेः। ततश्चैतद्गौणत्वलक्षणमतिव्यापकं स्या-
येन कारणेन स्वरूपेणानवधारितस्यान्यत्रारोपो न स-
त पूर्वं तावत्स्वरूपमेवारोपात्मकमभ्युपगन्तव्यं ततश्च
तस्यैवापद्येत सा च लोकाननुसारित्वादयुक्तेत्यर्थः ।
भागस्यार्थविषयत्वे ऽर्थस्यारोपितार्थवृत्तिशब्दविषयत्वं
णमभिप्रेत्यैतदुक्तम । शब्दविषयत्वेन चैतस्मिन्नारोप्ये
स्य सिंहादिशब्दस्येव लोके गौणत्वप्रतीतिरिति व्याख्येयम्
तार्थशब्दवृत्तिविषयत्वगौणत्वलक्षणं येन सिंहत्वादेरपि
सज्येत किं त्वारोपितार्थाश्रयत्वं ततश्च सिंहत्वादेस्ताव-
प्तिः खपुष्पस्य तु गौणत्वं युक्तमेव तथा हि खपुष्प-
ऽवृत्तिर्वक्ष्यते न चाभावस्तस्य वाच्यः तथा सति खपु-
प्रयोगानुपपत्तिप्रसङ्गादतो स्ववाच्यखपुष्पसंसर्गारोपे-
र्तमानः खपुष्पशब्दो गौणो भविष्यति आरोपितखपुष्प-
त्वाभावाच्चाभावो गौण इत्याशङ्क्याह* मुख्य इति *अ-
समासं विना खपुष्पशब्दात्संसर्गाप्रतीतेः समासवा-
ष्पसंसर्गस्याभ्युपगन्तव्यं विग्रहवाक्यार्थश्च समासवा-
न्तरेण च खस्य पुष्पस्य खसंसर्गाप्रतीतेः खस्य पुष्पम-
ह्यायोगात्खस्य पुष्पं नास्तीति वाक्यार्थे समासप्रतीतेः ख-
एव खपुष्पशब्दस्य वाच्यत्वान्मुख्यो ऽर्थ इति संसर्गस्यैव
राभिमतमभ्युपेत्य लोके गौणस्य मुख्यपूर्वकत्वप्रसिद्धेर्मु-
भावेन गौणतानेन निरस्यते । नन्वारोपितस्य मृगतो-
मुख्यत्वप्रसिद्ध्यभावात्पारिशेष्याद्गौणतैव स्यात् इत्याश-
प्रथमेति * गौणमुख्यव्यवहारे मुखवत् प्रथमं प्रतीय-

तीति २ पु० पा० ।

मानं मुख्यत्वेन प्रसिद्धमित्याशयः । ऊहितां शङ्कामुद्घाटयति
थमिति * आरोपिते मुख्यत्ववत् गौणत्वस्याप्यप्रसिद्धेस्तु
माह * तुल्यमिति * नन्वसतो गुणायोगासम्भवान्माभूत्ति
गौणत्वमारोपनिमित्तं तु भविष्यतीत्याशङ्क्याह * यत्र हं
आरोप्याश्रयस्य देवदत्तादेर्गौणत्वं प्रसिद्धं नारोप्यस्य सिंह
रित्यर्थः । नन्विहाप्यारोप्यस्य खपुष्पस्य गौणत्वासम्भवे ऽ
प्याश्रयस्यात्मनो गौणत्वं भविष्यतीत्याशङ्क्याह * खपुष्पं ३
खपुष्पमात्मेति गौणप्रयोगवादिमते आरोप्यखपुष्पाश्रयत्वेना
स्यात्मनो ऽप्यसत्त्वाद्भेदाधिष्ठानत्वेन चाश्रयाश्रयिभावस्य स
एव खपुष्पारोपस्यानाशङ्कनीयत्वात् आश्रयानपेक्षकेवलारो
त्मरूपतया खपुष्पस्यारोपितार्थाश्रयस्वरूपलोकप्रसिद्ध्यनुसारि
णायोगात् आरोपितार्थवृत्तिशब्दविषयत्वमेवारोपवादिना
वाच्यं तच्च मुख्ये ऽपि सिंहत्वादावारोपवादिमते ऽस्तीति अति
कं लक्षणं स्यादारोपितार्थाश्रयत्वं तु खपुष्पमात्मेति प्रयोगे ऽनु
रव्यापकमिति तात्पर्यार्थः । एवमविद्यमानमेव खस्य पुष्पस्य च
गमारोप्य खपुष्पाभावे खपुष्पशब्दप्रवृत्तेरारोपितार्थवृत्तित्वं ः
गौणत्वलक्षणमारोपितार्थवृत्तिशब्दविषयत्वं चार्थारोपवाद्यि
मित्यङ्गीकृत्य सिंहत्वे ऽपि सिंहशब्दस्य गौणत्वापत्तेर्दूषणे ऽ
ऽध्यारोपवादी स्वाभिमतमारोपिताश्रयत्वमर्थस्य गौणत्वलक्षणं
सिकृत्वा खपुष्पस्याप्यारोपितघटादिसत्ताश्रयत्वाद् गौणत्वमस्
नाव्यापकत्वं लक्षणस्येति शङ्कते * तत्रैतत्स्यादिति * आत्मन्य
तसत्ताकत्वरूपखपुष्पगुणदर्शनेन देवदत्ते सिंहत्ववत् खपुष्पर
पोपपत्तेः । खपुष्पमात्मेति अत्रापि गौणप्रयोगलक्षणसद्भावा
पकत्वमनाशङ्क्यमेवेति भावः । विद्यमानस्य घटादेर्यत्सद्रूपं तत्स
पुष्पादावारोप्यते प्रातिपदिकार्थः सत्तेति सर्वप्रातिपदिकानां
वाचित्वस्मृतेः । ततश्चारोपितसत्तारूपार्थाश्रयत्वात् खपुष्प
णतास्त्येवेत्यर्थः । सर्वप्रातिपदिकानां सत्तावाचित्वस्याकृत्यधि
निरस्तत्वात् स्मृतेश्च लिङ्गसंख्यान्वययोग्यसिद्धरूपार्थप्रतिपाद
त्रपरत्वात् यदि परं प्रतीतिबलेन खपुष्पशब्दस्य सत्तावाचित
क्तव्यं न च खपुष्पादिशब्दात् सद्रूपप्रतीतिरस्तीति निराकरोति
दिति * नन्वेवं सति पदात्सदसत्साधारणरूपार्थप्रतीतेरभावः
खपुष्पशब्दवाच्यत्वं न स्यात् । अथ सदसत्साधारणपदार्थस्वरू
त्रवाचिनो ऽपि पदस्य व्यवहारयोग्यार्थाभिधाने तात्पर्यात् स
णस्वरूपस्य च व्यवहारायोग्यत्वात् अभाववाचितेष्यते । तथा

पं नास्तीति असद्रूपस्य खपुष्पस्य निषेधे सद्रूपत्वापत्तेर्नि-
श्चयसिद्ध्यर्थं खपुष्पशब्दस्य सद्रूपताभिधायितैवेष्टेत्याशङ्क्याह
द्यं हीति* यदि कश्चिदाकाशस्यानन्तदेशगतत्वान्न क्व चिद्दे-
मस्तीत्यवधारणाऽशक्तेः। खपुष्पशब्दस्याभावेन सम्बन्धग्रहणा-
द्भावा ऽभावसन्देहे चाभावज्ञानस्य भावज्ञानसापेक्षत्वात् स-
त्र खपुष्पस्यानुभवमाशङ्केत तं प्रत्युदाहरणान्तरं निषेधान्वय-
मासार्थकथनार्थो भविष्यतीत्याशयः। ननु घटादेः सद्रूपस्यैव
वदर्शनात् शशविषाणादेरपि वाच्यत्वसिद्ध्यर्थं प्रमाणानवगत-
सद्रूपत्वं घटादिगतमारोपयिष्यते इत्याशङ्क्याह * न चेति *
न्धग्रहणपूर्वकसम्बन्धग्रहणापेक्षत्वात् वाच्यत्वस्य यो ऽर्थो येन
सम्बन्धिग्रहणकाले गृहीतस्तेनैव रूपेण तस्य सम्बन्धग्रहणा-
यत्वं न्याय्यं न चार्थान्तरस्य सद्रूपत्वग्रहणमात्रेण खपुष्पादौ स-
सम्बन्धग्रहणं सम्भवतीत्यर्थः। नन्ववयवद्वारा खपुष्पशब्दस्या-
पादकत्वात्तयोश्च सद्रूपेण खेन पुष्पेण च सम्बन्धानुभवात्सद्रू-
रोपपत्तिरित्याशङ्क्याह*ययोरिति*सामासार्थो ऽत्र चिन्त्यते न
सद्रूपतया सम्बन्धग्रहणं विना सद्रूपतयाभिधातुं शक्यतइति
ननु सद्रूपत्वेनाप्रतीतस्य शशविषाणादेरप्रसक्तत्वान्निषेधो न
त्याशङ्कते * कथं तर्हीति*सद्रूपप्रतीतावपि निषेधानुपपत्ति-
माह * सदिति * सद्रूपत्वेनापि प्रतीतस्य घटादेर्देशान्त-
नेषधदर्शनादात्यन्तिकेत्युक्तम् एतदेव विवृणोति * पश्येति*
षाणादौ देशकालाद्यवच्छेदाप्रतीतेरविशेषेण सर्वत्र भावा-
सद्भादेकत्रैवेत्युक्तम्। ननु वस्तुवृत्त्यैकत्र सदसद्रूपत्वासम्भवे
पेण सद्रूपतया प्रतीतस्यैकत्र शुक्तिरजतवदविरुद्धो निषेध
ङ्कते * तेनेति* येन कारणेनैकत्र वस्तुवृत्त्या सदसत्त्वे विरु-
नैव कारणेन सद्रूपत्वमारोप्यतइत्युक्तमिति शेषः। खपु-
न्यदारोप्येत खपुष्पं वान्यत्र तस्य त्वसिद्धसद्भावत्वान्नारो-
त्वेनारोप्यारोपविषयत्वं युक्तमित्याह * नेति * यथापवरके
स्तीति निषेधो ऽपवरकाख्यस्य निषेधाश्रयस्य निषेध्यघटप्रदे-
देशान्तरस्य सद्भावं निषेध्यस्य च घटस्य प्रदेशान्तरे सद्भा-
ते तथारोप्ये ऽप्यारोप्याश्रयस्योषरादेरारोप्य तोयादिप्रदेशा-
: प्रदेशान्तरस्य सद्भावमारोप्यस्य च तोयादेः प्रदेशान्तरे
सद्भावमपेक्षते इति प्रदेशान्तरसद्भावशब्दस्यावृत्त्या षष्ठीसमा-
मीसमासं चाङ्गीकृत्य योज्यम्। ननु यद्यपि खपुष्पस्यात्यन्ता-
र घटादिसत्तायास्तस्मिन्नारोपस्तस्य वा घटादावारोपः सम्भ-

वति तथापि वृक्षादौ ज्ञातसद्भावस्य पुष्पस्याकाशे ऽध्यारो
ष्यतीत्याशङ्कयाह *न चेति* खपुष्पशब्दस्य केसरादिमद्रूपा
यवपरिमाणवाचित्वाद्वृक्षादिपुष्पस्य च ताद्रूप्याभावेन ततो
न्यस्य वृक्षादिपुष्पस्य सद्भावेनान्यस्याकाशावयवसन्नि
षरूपपरिमाणात्मकस्यात्यन्तासत्ताकस्यारोपः सम्भवतीत्य
यथा केशो ऽडूकादौ मनुष्यमस्तकादिगतकेशेभ्यो ऽन्यत्वे ऽ
वयवसंनिवेशविशेषरूपपरिमाणात्मकानामत्यन्तासतां
रोपो दृष्टस्तथेहापि भविष्यतीत्याशङ्कय * असम्बन्धादि
तिमिरादिविरलीकृता लोकविच्छिन्नास्तमो ऽवयवास्तत्रा
कृष्ण्यकार्ष्ण्यादिदैर्घ्यादिगुणसम्बन्धेन सादृश्यात् केशरूपत
प्यन्ते खपुष्पवृक्षपुष्पयोस्तु सदसद्रूपताया कथं चिदव
न्यसम्बन्धाभावेनासादृश्यान्न केशो ऽडूकादितुल्यतेत्याशयः
स्यारोपाश्रयभूतस्यावाकाशस्य सद्भावेनान्यस्यात्यन्तासतः
रोपो न सिध्यति सदसतोरेकधर्मसम्बन्धाभावेनासादृश्या
अथ वा प्रदेशान्तरस्यारोप्याश्रयस्य खपुष्पस्यासत्त्वात् न
त्तायास्तस्मिन्नारोपः सम्भवतीति पूर्वग्रन्थेनोक्ते खपुष्पस्यैव
टादावारोपो ऽस्त्वित्याशङ्कयान्यस्य प्रदेशान्तरस्य घटादेः
त्रेणान्यस्यारोपविषयस्य खपुष्पस्यारोपो न सिध्यति खपुष
दिनैकधर्मसम्बन्धाभावेनासादृश्यादित्यनेन ग्रन्थेनोच्यते
ध्वनिधर्माणामसदृशेष्वपि वर्णेष्वभिव्यङ्ग्याभिव्यञ्जकत्वस
मित्तारोपदर्शनात् पित्तधर्मस्य च पीतत्वस्य चाक्षुषरश्मी
प्राप्तौ रश्मिसंयुक्तानां पित्तावयवानामपि शङ्खप्राप्तेः शङ्खसं
वायनिमित्तारोपदर्शनात् सादृश्यादिना केन चित्सम्बन्धेन
वति न सम्बन्धं विनेति दर्शयितुम् *असम्बन्धादित्युक्तम्
द्रव्यस्य द्रव्यान्तरे सादृश्यं विनारोपादर्शनात् सादृश्याभा
व्याख्यातम्। ननूषरेण तोयस्य सादृश्यादिना केन चित्सम्बन्ध
कथं तत्र तोयादेरारोप इत्याशङ्कते * कथमिति * तोयस
पत्वे सादृश्यादिसम्बन्धसद्भावात् शौक्ल्यचञ्चलत्वादिधर्मव
युक्तेनोषरेण सह साक्षात् सादृश्याभावे ऽप्यूषरसंयुक्तर
श्यादारोपोपपत्तिरित्याशयेन परिहरति * प्रदेशान्तरेति
ष्पस्यासम्भवादारोपासम्भवे ऽभिहिते तोयस्याप्यसम्बन्ध
न स्यादित्याशङ्कार्थप्रतीतेरत्यन्तासत्त्वाभिप्रायस्य च प्रत्य
नानुपपत्तेस्तन्निरासार्थं तोयस्य सद्भावादूषरसम्बन्धप्र

१ असंबन्धादिति २ पु० पा०।

व्याख्येयम् । सम्बन्धानपेक्षणे च तत्रासतो ऽत्यन्तासतश्च विशेषाभावात्तत्रासदपि भ्रान्तौ प्रकाशते ऽत्यन्तासत्तु न प्रकाशते इति व्यवस्थाहेत्वभावात्परिभाषामात्रापत्तेरत्यन्तासतो ऽपि शुक्तिरजततादात्म्यस्य प्रकाशनदर्शनात् प्रदेशान्तरसत्ताया न कश्चिदुपयोगः।अत एव च प्रज्ञातगुणसत्ताकमित्यत्र गुणग्रहणं कृतम् । ननु शशविषाणस्य निषेधानुपपत्तौ शशविषाणं नास्तीति नास्तिशब्दप्रयोगः कथं घटतेत्याशङ्कते * कथमिति * नायं नास्तिशब्दो निषेधार्थः किं त्वनुवादमात्रमिति परिहरति * पूर्वेणेति * अप्राप्तस्यानुवादानुपपत्तिमाशङ्क्य * पूर्वेणैवेत्युक्तम् * प्रमाणान्तरेण कदा चिच्छशशृङ्गानुपलब्धेः । शशे विषाणमस्तीति विग्रहवाक्यार्थे समासायोगादभावाख्यप्रमाणावगतस्यात्यन्ताभावस्यैव सम्बन्धग्रहणसम्भवात्समासार्थत्वोपपत्तेः। शशे विषाणं नास्तीति विग्रहवाक्यार्थे ऽन्तर्णीतनिषेधो ऽयं समासश्चन्द्राननमित्यन्तर्णीतवत्यर्थो यथेति अवधारणाच्छशविषाणशब्दस्यात्यन्ताभाववाचित्वप्रतीतेः । शशविषाणशब्देनैव भावावगमान्नास्तिशब्दस्यानुवादत्वोपपत्तिरित्यर्थः।अनुवादमात्रानर्थक्यापत्तेरपरितोषादभावसामान्यस्य नास्तिशब्दोक्तस्य विशेषणार्थो ऽत्यन्ताभावाख्यविशेषवाचिशशविषाणप्रयोग इति परिहारान्तरमाह * अथ वेति * नन्वीदृशएव विशेषणविशेष्यभावो न तु विपरीत इति कथं निश्चेयमत आह * नेति * अर्थद्वारशब्दयोर्विशेषणविशेष्यभावः । न चाभावसामान्येनात्यन्ताभावाख्यविशेषरूपं शशविषाणं विशेष्यते गोत्वादिसामान्यं हि बाहुलेयादिविशेषान्तरे व्यभिचाराच्छाबलेयादिविशेषेण विशेष्यमाणं दृष्टं विशेषस्य व्यभिचारात् सामान्येन विशेषणं न युक्तमित्यर्थः । एवमपि शशविषाणादिशब्दादेव कर्कादिवद्व्यभिचाराभावेन विशेषान्तर्गतसामान्यप्रतीतेरपि सिद्धेर्नास्तिशब्दानर्थक्यमपरिहार्यमित्यपरितोषात्प्रमाणान्तरेण शशे शृङ्गाप्रतीतावपि शशविषाणशब्दादेव वस्तुतो ऽत्यन्तभाववचनादपि भ्रान्तस्य संसर्गप्रतीतिं वारयितुम् अयं निषेध इति परिहारान्तरमाह * अथ वेति * नन्ववयवार्थग्रहणे षष्ठ्यर्थस्मृतिप्रसङ्गे ऽपि योग्यानुपलब्ध्या शशस्य शृङ्गराहित्यावगमात् कथं संसर्गभ्रान्तिरित्याशङ्क्य * न चेत्युक्तम् * एवं त्वाभाववाचित्ववादिनं प्रति प्रयोगानुपपत्तेरपरिहारेणापरितोषात् स्वमतेन समासार्थकथनार्थत्वं नास्तिशब्दस्य द्योतयितुमाह * अथ वेति * शशे विषाणं नास्तीति विग्रहवाक्यसूचनार्थम् * विनैवेत्युक्तम् * शृङ्गेतरपरत्वाश्रयत्वे निषेधविवक्षासूचनाय *अधिकरणत्वेनेत्युक्तम्*

विषाणस्याधेयत्वाविवक्षायामपि प्रथमाया एव प्रयोज्यत्वात्त
निर्देशार्थत्वेनैव प्राप्तेर्विषाणं च निर्दिश्येतेत्येतावदुक्तम्।नन्वस्तो
रोपं विनाधेयत्वनिर्देशायोगात् परपक्षापत्तिरित्याशङ्क्य * गव
त्युक्तम् * शशगतस्य शृङ्गस्य निर्देशो नारोपं विना युज्यत
वादिगतस्य तु प्रमाणसिद्धत्वान्नारोपापेक्षेति भावः । गवादिग
निषेधानुपपत्तिमाशङ्क्य निषेधभूतस्य शशसम्बन्धविषयत्वं व
तयोरित्युक्तम् शशविषाणयोः सम्बन्धस्याप्रसक्तेर्निषेधानर्थ
माशङ्क्य शशविषाणस्यात्यन्ताभावेन सह वाच्यवाचकसम्बन्ध
नार्थत्वसूचनार्थं तेनैवेत्युक्तम्। चन्द्राननेन समासार्थकथनार्थं
इवाननमिति विग्रहवाक्यवच्छशविषाणसमासार्थकथनार्थेन
विषाणं नास्तीति विग्रहवाक्येनानुभूतस्य सम्बन्धस्य श्रोतुः शश
षाणशब्दः तद्वाक्यप्रतिपाद्यमेवात्यन्ताभावं गमयिष्यतीत्येतदर्थं
स्तिशब्दप्रयोग इति व्यवहितेनान्वयः । क्रियायां च क्रियार्थाया
लृङः क्रियार्थक्रियोपपदनिमित्तत्वात् गमयिष्यतीत्येतदर्थमि
लभ्यते शशविषाणं नाम किमित्यपेक्षायामेकदेशेन विग्रहवाक्य
नार्थे नास्तीति शब्दप्रयोग इति तात्पर्यार्थः । शशे विषाणं नास
विग्रहवाक्यस्य निषेधपरत्वमभ्युपगम्य समासार्थकथनप्रयोजनं
वानुभूतसम्बन्धस्येत्यनेन सूचितम् । वस्तुतस्तु भावान्तरमभावो
न कश्चिदनिरूपणादित्यनेन न्यायेन भावनिरपेक्षस्याभावस्य व
मशक्यत्वात् शृङ्गाकारेण परिणतः शशमूर्द्धैव भावरूपो विग्र
क्यार्थ इति निषेधार्थत्वाभावान्नारोपापेक्षेत्याह * अथ चेति *
तश्च शशविषाणं नास्तीत्यत्राप्येकदेशेन समासार्थकथनार्थवि
वाक्यसूचनार्थस्य नास्तिशब्दस्याप्यसावेव विषय इति निषेधार्थ
भावादारोपाभावे ऽपि प्रयोगाविरोध इति निषेधार्थत्वाभावादार
भावे ऽपि प्रयोगाविरोध इति कथं तर्हि शशविषाणं नास्तीति प्र
ग इत्याशङ्कानिरासमुपसंहरति * इतीति * भावस्यापि नास्ति
द्विविषयत्वं दृष्टान्तेनोपपादयितुं वृद्धसम्मतिमाह * तथा चेति
तिष्ठतेर्गतिनिवृत्तौ स्मरणे ऽपि पूर्वां सन्ध्यां जपंस्तिष्ठेदित्यादावूर्द्
वस्थाने प्रयोगाद्वस्तुवाचितोक्ता । स्वातन्त्र्यमात्रं चाभावस्य ना
ति अभिप्रेतं न सर्वात्मना निरूपणाभावः सदसद्विवेकाभावप्रस
दिति । एवं तवैवायं दोष इत्यनेनारोपितार्थवृत्तित्वस्य गौणत्वलक्ष
स्याव्यापकत्वं दोषं प्रतिज्ञातम् । खपुष्पस्यात्मन्यारोपायोगात्त
रोपेण खपुष्पस्यात्मनि वृत्त्यनुपपत्तेः खपुष्पमात्मेति गौणप्रयोग
क्षणासम्भवेनोपपाद्यम् । नन्वेवं सति खपुष्पादीनां स्वार्थाविन

गुणाभावात् गौणप्रयोगाभावप्रसङ्ग इत्यनेनाशङ्कितं गुणयोगनि-
त्तवृत्तित्वस्य गौणलक्षणस्याव्यापकत्वं परिहरति * तेनेति *
रोपितस्य खपुष्पादेर्गुणायोगाद्वास्तवत्वप्रतिपादनार्थो लब्धशब्दः
ब्यार्थान्तराभावादित्यादिनोपपादितस्य मुख्यत्वस्य गौणप्रयोगो-
ादनोपयोगसूचनार्थो मुख्यशब्दः । येन कारणेन लब्धो वास्तवो
न्ताभावाख्यो वाच्यो ऽर्थः शशविषाणादिशब्दानां तेनान्यत्रा-
त्मादौ शशविषाणमात्मेति गौणः प्रयोगः सिद्ध इत्यर्थः । तन्नि-
त्तगुणाभिधानार्थम् । प्रसिद्धीत्युक्तम् । वस्तुतः सद्रूपत्वेन या प्र-
द्धिः ततो ऽन्येन प्रकारेणाद्रूपत्वेनावस्थानं नाम खपुष्पादेर्गुण
ते भावः । मुख्यशब्दसूचितम् मुख्यत्वस्य गौणत्वोपयोगं प्रकट-
तुमाह * तव त्विति * आरोपवादिनो ह्याकाशस्य पुष्पस्य च
र्गः खपुष्पशब्दस्य मुख्यो ऽर्थो ऽभिमतः । तस्य च वस्तुतो
त्वात्तत्पूर्वको गौणो न सिध्येदिति भावः । लब्धमुख्यार्थानामि-
मुख्यशब्देनैव न चैतस्य लोके गौणत्वप्रतीतेरिति खपुष्पगौणत्व-
तेरिति खपुष्पगौणत्वनिरासस्यार्थाद् गौणप्रयोगोपपादनोपयोगं
चेतं प्रकटयितुमाह * यदि चेति * पुष्पाकाशयोः संसर्गारोपेण
र्थे ऽत्यन्ताभावे खपुष्पशब्दस्य गौणतारोपवादिनो ऽभिमता
ा च सत्यात्मनि गौणत्वं न स्यादित्यर्थः । एतदेवोपपादयति *
हीति * नन्वग्निशब्दस्यापि गौणमाणवकद्वारान्यत्र गौणत्वं क-
ञ्च भवतीत्याशङ्क्य षाष्ठं न्यायमाह * तथा चेति * प्रतिनिधावु-
ते ऽपचरिते प्रतिनिधिसदृशमुपादेयं मुख्यसदृशं वेति स-
हे प्रतिनिधेरुपात्तत्वेन शास्त्रपरिगृहीतत्वात्तादृशोपादाने प्राप्ते
नास्त्वन्यास्यमभावे तत्सामान्येन प्रतिनिधेरभावात् इतर-
ते सूत्रोदभावे तत्सामान्येन प्रतिनिधिरिति पदत्रयानुष-
ा प्रतिनिधावुपात्ते तदभावेन तत्सामान्येन प्रतिनिधिर्नो-
यः मुख्यावयवोपादित्सयोपात्तस्यापि प्रतिनिधेरचोदितत्वेने-
साम्यादिति षष्ठे वक्ष्यते तेनैव न्यायेन माणवकस्याग्न्यवाच्य-
सामान्यान्नाग्निशब्दस्य तद्द्वारा ऽन्यत्र गौणतेत्याशयः । यदप्य-
पस्यारोपाभावे सांख्यादिकल्पितप्रधानादिनिषेधो न * सम्भ-
त्युक्तम् * तदप्यनुभाषणपूर्वकं परिहरति * ये ऽपीति *
माणुकारणवादिभिर्वैशेषिकैः परमाणुभ्यो ऽन्यदेव प्रधानरूपं
रात्मवादिभिश्चार्वाकैः शरीरादन्यादृगात्मरूपं शरीरादित्यादि-
ोपात्तज्ञानसन्तानात्मवादिभिर्बौद्धैर्ज्ञानसन्तानादन्यादृगात्मादी-

१ पूर्वपक्षसूत्रादित २ पु० पा० ।

त्यादिशब्दोपात्तपृथिव्यप्तेजोवाय्वाख्यचतुष्टयतत्त्ववाचिभिश्चा
स्तेभ्यो ऽन्यादृक्रूपशब्दोपलक्षितमाकाशादितत्त्वं नास्तीति व
इति योज्यम् । श्लोकं व्याचष्टे * प्रधानादीति * एवं स्वार्थाभि
नेनेति भाष्यमुपसंहारार्थत्वेन व्याख्यातुमाह * तस्मादिति *
चमिति गुणाश्रया इति सूत्रावयवसूचितं गौणवृत्तिलक्षणाभिध
र्थं कथमगुणवचनो गुणं ब्रूयादिति भाष्यं व्याख्याय प्रकृतोदा
कीदृशो गुणसम्बन्ध इति प्रश्नोत्तरत्वेन तत्सिद्धिशब्दव्याख्या
२५।२ इह त्विति भाष्यं व्याचष्टे * अतश्चेति * प्राप्नोति परमां सिद्धि
त्यादावीप्सिते कार्ये सिद्धिशब्दप्रयोगात्तस्य मुख्यस्यार्थस्य सि
कार्यमस्येति व्यधिकरणबहुव्रीहिणा तत्सिद्धिशब्देन तत्कार्यका
उक्तेति दर्शयितुं स्वार्थस्य यजमानस्य या सिद्धिः कार्यं * त
त्वमित्युक्तम् * भाष्यं तु कीदृशः प्रस्तरादेर्यजमानगुणसम्बन्ध
पृष्टे यजमानसिद्धिकरः प्रस्तरादिरिति योज्यम् सर्वो हीत्यादि
ष्यं संक्षिप्य व्याचष्टे * प्रस्तरेति * तस्मादित्युपसंहारभाष
क्षया विध्यर्थवादविचारानादरः सूचितः । जात्यादिविषयभू
ष्याग्नेयाद्युदाहरणेषु विध्यर्थवादविचारोपक्रमस्य गुणवादनिमि
भिधानावसरकरणार्थत्वान्न विध्यर्थवादविचारे ऽभिनिवेष्टव्यम्
सूचयितुमाह * एतेनेति * तत्सिद्धेर्गुणवादनिमित्तत्वाभिध
जात्यादीन्यपि तन्निमित्तत्वेन व्याख्यातानीत्यर्थः ।

॥ आग्नेयादिशब्दानां ब्राह्मणस्तुत्यर्थत्वाधिकरणम् ॥ १३ ॥

जातिः ॥ २२ ॥

भाष्योक्तोदाहरणं दूषयति* तत्रेति*अर्थवादान्तरोक्तप्रजा
मुखाद्येकप्रकृतिप्रभवत्वेन ब्राह्मणादीनामग्न्यादिभिर्भ्रातृवत् सम्ब
सद्भावादर्थवादोक्तस्यापि च सम्बन्धस्यान्यैः स्तुवतइत्यादिषु प्र
शब्दप्रवृत्तिनिमित्तत्वदर्शनात् ब्राह्मणादिष्वाग्नेयादिशब्दानां मुख
त्याशयः । ननु देवतातद्धितस्येह मुख्यत्वं न सम्भवतीत्याह *
नेति * सर्वत्राग्निकलिभ्यां ढगिति सम्बन्धमात्रे ऽग्निशब्दात्
स्मृतेस्तस्येदमिति चाणप्रत्ययस्यापि तन्मात्रे स्मृतेर्नायं देवतात
इति भावः । त्रैवर्णिकानां वा यागाधिकारित्वाद्यागदेवताभिः
यादिभिर्देवतासम्बन्ध एव वक्तुं शक्यतइत्याह * देवतेति *
देवताशब्दस्य सम्बन्धिशब्दत्वात् प्रतिसम्बन्धित्यज्यमानं हविरे
क्ष्य प्रवृत्तेः शिष्यस्येव गुरुसम्बन्धवत्तत् विषयएवं देवतासम्ब

१ भ्रातृत्वेति २ पु० पा० ।
२ विषयत्वाभि हविषइति २ पु० पा० ।

स्येत्याशङ्क्याह * न हीति * त्यक्तारमपेक्ष्य देवताशब्दस्या-
ावपि देवतोद्देशपूर्वकद्रव्यत्यागाख्यैकक्रियाविषयनियमलक्ष-
त्वात् द्रव्यदेवतयोः सम्बन्धस्यैतस्य च त्यक्त्रपेक्षत्वात् येन देव-
शपूर्वकद्रव्यत्यागाख्यैकक्रियासम्बन्धेन द्रव्यस्य सम्बन्धिनी दे-
तेनैव त्यक्तुरपीत्यर्थः। त्यक्तुरपि देवतासम्बन्धे भाष्यकृतः
तिमाह * यथेति * आग्नेयो ब्राह्मणः स सोमेनेष्ट्वा ऽग्नीषोमी-
भवति यदेवादः पौर्णमासं हविस्तत्तर्ह्यनुनिर्वपेत्तर्हि स उभयदे-
भवतीत्यनेन सोमयागादूर्ध्वं ब्राह्मणो ऽग्नीषोमदेवतो भव-
ाभिधानादग्नीषोमीयहविर्मात्रमुत्कृष्यते न दर्शपौर्णमासौ नापि
कृत्स्ना पौर्णमासीत्युक्तेः कथं पुरुषस्य देवतान्वय इत्याश-
त्पञ्चमे भाष्यकृतोक्तं दूषणमुपसंहरति * तस्मादिति *
मुदाहरणान्तरमाह * अत इति * नन्वग्न्यादिगुणस्य ब्राह्मणा-
ादर्शनात् कथमत्र गौणप्रयोगोपपत्तिरित्याशङ्क्याह * अग्निरि-
* भाष्यकृता गुणवादनिमित्ताभिधानावसरार्थे को गुणवाद
ान वादशब्दमुद्यतइति कर्मव्युत्पत्त्या ऽभिधेयवाचिनमङ्गी-
कर्मधारये को गुणो विवक्षित इति पृष्ट्वाग्निसम्बन्ध इत्यनेना-
ाब्दवाच्यस्याग्निदेवत्यस्य हविषो ऽग्निसम्बन्धो गुणो ब्राह्मणे
क्षित इत्युत्तरे दत्ते कथं ब्राह्मणस्याग्निसम्बन्ध इति पृष्ट्वा तदुत्त-
र जातिशब्दव्याख्यानाय * एकजातीयत्वादित्युक्तम् * तत्सा-
ावाचितया जातिशब्दव्याख्यानार्थमिति शङ्कां निवर्त्तयितुमाह
ातिरिति * जातिशब्दस्याद्यभावविकारवाचित्वज्ञापनार्थं ज-
ुक्तं जायते ऽस्मादिति व्युत्पत्त्या प्रकृतिवाचित्वज्ञापनायोपादा-
देनोत्पत्तिहेतुः प्रकृतिरुक्ता। तच्छब्दानुषङ्गेण तस्य मुख्यस्या-
जातिः प्रकृतिः सैव यस्य ब्राह्मणस्य जातिरिति पूर्ववच्च्यधिक-
बहुव्रीहिणा तज्जातिशब्देन द्वयोरेकजातीयतोक्ता भवतीति कृ-
जातीयत्वं भाष्यकृतोक्तम्। ननु संसारानादित्वेनाग्निब्राह्मणादेः
पत्तिमुख्यादिप्रकृतिकत्वं नास्तीति किमेकजातीयकत्वमिति भा-
ाशङ्क्यार्थवादोपन्यासस्याशङ्कानिरासार्थत्वं सूचयितुमाह * य-
चेति * अन्तरशब्देनाग्नेयो ब्राह्मण इत्यस्याग्नेयमष्टाकपालं नि-
ः ब्राह्मणो ब्रह्मवर्च्चसकाम इति विध्यन्तरशेषत्वेनार्थवादत्वसि-
ानुसन्धानं सूचितम्। एकस्मिन्निति भाष्यतात्पर्यं वक्तुमिहे-
म्। इहोदाहरणे ऽग्न्यादिशब्दस्य ब्राह्मणादौ प्रवृत्तिनिमित्ततां प्र-
स्यतइत्यर्थः। स्वरूपार्थस्त्वग्निर्हीत्यनेनैवानागतावेक्षणेनोक्तः॥

॥ यूपादिशब्दानां यजमानस्तुत्यर्थत्वाधिकरणम्॥ १४॥

सारूप्यात् ॥ २२ ॥

लिङ्गसमवाया इति द्वन्द्वसमासे प्रथमाबहुवचनदर्शना
त्सिद्धिश्च जातिश्च सारूप्यं च प्रशंसा च भूमा च लिङ्गसम
श्चेति प्रथमयैव सर्वत्र विगृहीतव्ये ऽपि प्रस्तरादेर्यजमानादिस
तत्कार्यकरत्वादिधर्मसामान्यात् सम्भवदपिशब्दस्य तत्कार्यक
दिमात्रे पर्यवसानेन शाब्दबुद्धिविषयत्वाभावात् अविषयस्य च प्र
दनात्मकशब्दप्रवृत्तिनिमित्तत्वायोगात् न शब्दप्रवृत्तिनिमित्तं
त्वादित्ययजमानसारूप्यं शब्दप्रतीतिविषयत्वाच्छब्दप्रवृत्तिनि
मिति वैषम्यं दर्शयितुं पञ्चम्यध्याहृता गुणाश्रयशब्देन सर्वेषां
त्वनिमित्तत्वे ऽभिहिते पुनः सारूप्यस्य निमित्तत्वाभिधानाच्च
बुद्धिविषयत्वात्मकनिमित्तत्वविशेषप्रतीतमेवाशयं शङ्कापूर्वकं
णोति * नन्विति * सारूप्यं विना गौणत्वाभावात्तस्य गौ
निमित्तत्वे ऽपि बोधकत्वातिरिक्तायाः शब्दस्य वृत्तेरभावाद्वि
यायाश्च बुद्धेरसम्भवाच्छाब्दबुद्धिविषयस्यैव शब्दवृत्तिनिमित्तत
च्यम् । न शब्दतात्पर्यावधारणं विना शाब्दबुद्धिविषयत्वं युक्त
त्कार्यकरत्वादिनिमित्ते च सारूप्यं तन्मात्रपर्यवसितस्य शब्दस
त्पर्यावधारणमशक्यम् । इह तु प्रत्यक्षत्वेन सारूप्यस्य प्रथमं प्रत
त्रैव शब्दस्य तात्पर्यावधारणाच्छाब्दबुद्धिविषयत्वेन शब्दप्रवृ
मित्तत्वं युक्तमित्याशयः । चक्षुर्ग्राह्ये सादृश्ये तात्पर्याख्यविव
धारणसम्भवात् शाब्दबुद्धिविषयत्वरूपशब्दप्रवृत्तिनिमित्तत्वाद
भिधानार्थं तत्कार्यकरत्वादिहेतुकेभ्यः सद्भावमात्रेण गौणत्व
त्तेभ्यः सादृश्येभ्यो ऽस्य पृथगसाधारण्येनेहोपादानमित्यर्थः ।
क्यत्वादिति सिद्धान्तभाष्यं यजमाने ऽपि पशोर्बन्धुं शक्य
अयुक्तमाशङ्क्याह * यजमानस्य हीति * खलेवालीवद्यू
यूपकार्ये विधानात् यूपनिष्पत्तिमात्रापवर्गिणां धर्माणां निवृ
च्युत्तरवेदेः प्राग्देशे पशुधारणस्य निखननस्य च पशुनिरोधा
न यूपकार्यान्तःपातात्तत्कार्यापन्ने यजमाने प्राप्ते दक्षिणापा
पदार्थकरणविरोधप्रसङ्गादशक्यतेति भावः । आदित्यस्य यू
पार्थत्वनिरासः कस्मान्न कृत इत्याशङ्क्य स्पष्टत्वादिति सूच
माह * सहस्ररश्मेस्त्विति * ननु दारुमय्यामादित्यप्रतिकृतौ
पशुबन्धनमित्याशङ्क्याह * यदि चेति * प्रतीयमानयूपोच्च
विध्येकवाक्यत्वत्यागापत्तिदोषसूचनार्थम् * नास्तिक्यादित्यु
ननु श्येनचितं चिन्वीतेत्यादौ सादृश्यसम्पत्तेरपि विधिवि

याशङ्क्याह * तदिति * स्तुतौ गौणत्वसम्भवे विधौ तदाश्रयणं ३२१
[क्तमित्याशयः ॥

॥ अपश्वादिशब्दानां गवादिस्तुत्यर्थत्वाधिकरणम् ॥ १५ ॥

प्रशंसा ॥ २२ ॥

गोअश्वान् प्रशंसितुमित्यादिभाष्यात् प्रशंसायाः प्रयोजनत्वेन स्येव वेतनदाने निमित्ततोक्त्याभाति तस्याश्च सर्वत्र प्रयोजन-वेशेषादिहोपादानमनर्थकमित्याशङ्कते * नन्विति * नात्र प्र-नत्वेन निमित्तत्वं विवक्षितं किं तु प्रसह्यकारित्वादिवदभिधेय-माणगुणत्वेनेत्याशयेन परिहरति * फलमिति * ननु गवाश्व-तरेकेष्वजादिष्वपि पशुशब्दप्रवृत्तौ प्रशंसाया निमित्तत्वं न स-ाति गवाश्वावुपादेयत्वेन विहितौ प्रशंसितुमत्रान्येषां निन्दाया क्षितत्वात् इत्याशयेन कथं प्रशंसाप्रवृत्तिनिमित्तत्वमिति पृच्छति कथमिति * नञ्समासावयवभूतस्य पशुशब्दस्य समासान्त-ा ऽजादिषु प्रवृत्तौ प्रशंसानिमित्तमित्याशयेनोतरमाह * गवे- * नञ्समासावयवभूतेन पशुशब्देन प्रशस्ततां लक्षयित्वा न-मासेनान्यपशुषु तदभावः कथ्यतइत्यर्थः । ननु पशुशब्दस्य ामासे कृते निषेधपर्यवसायित्वादकृते च परशब्दत्वाभावान्न स्त्यलक्षणार्थता युक्तेत्याशङ्क्य * पूर्वमित्युक्तम् * समासवि-तद्योग्यार्थलक्षणा गङ्गावास्यादिशब्दवदविरुद्धेत्याशयः । न-ादेरपि पयोदानाद्युपकारित्वेन प्राशस्त्यसद्भावान्निषेधानुपपत्ति-ाशङ्क्य * गवेत्युक्तम् * गवाश्वान्यत्वोक्त्या तद्गतप्राश-ातिशयलक्षणार्थतावसीयतइत्याशयः । उदाहरणान्तरविषया-[शब्दौ। ननु पशुत्वाभाव एव नञ्समासेन कस्मान्न कथ्यतइत्या-याह * नेति * पशुत्वस्यायं निषेधस्तल्लक्षितस्य वा यागादिका-पुत्रकार्यमकुर्वतीव पुत्रे न ममैष पुत्र इति । तत्राद्ये प्रत्यक्ष-धो द्वितीये ऽग्नीषोमीय इत्यादिवचनविरोध इत्यर्थः । अनेन ात्तिरनर्थिकास्यादिति भाष्यावयवगतेनोत्पत्तिशब्देन प्राथम्यगु-[गात्पशुयज्ञसत्रग्राहिप्रत्यक्षमुक्तम् तस्य च निर्विषयत्वापत्तिः पनिषेधे ऽनर्थिकेत्यनेनोक्ताम् कार्यनिषेधे वचनविरोधो विध्य-चेत्यनेनोक्त इति व्याख्यातम् । ननु विकल्पाङ्गीकरणेन विरो-ारिहरिष्यते ऽत आह * न चेति * नन्वगत्या वैषम्ये ऽपि ल्पः स्यादित्याह * स्तुत्या चेति * न च मुख्यार्थत्यागापत्ते-प्रर्थत्वासम्भवः । कार्यलक्षणायामपि तुल्यत्वादित्याह * तुल्य-

श्चेति * गवाश्वव्यतिरिक्तस्य च पशुकार्यकरत्वनिषेधे पारिशे
गवाश्वस्य पशुकार्यकरत्वसिद्धेस्तदुपादानानर्थक्यम् ।प्राशस्त्या
तु गवाश्वगतं प्राशस्त्याविषयत्वं निषेधस्य ज्ञापयितुं पशुशब्दस्
वाश्वशब्दसामानाधिकरण्योपादानमनर्थकमित्याशयेनाह *
शव इति * ननु पशुस्वरूपस्य तत्कार्यस्य वा निषेधार
वे ऽपि पशुगता क्रिया गुणो वा अजादौ निषेत्स्यत इत्याश
ह * न चेति * पशुमात्रवर्तिक्रिया गुणसामान्यं वा निर्
गवाश्वगताः क्रिया गुणविशेषा वा आद्ये पूर्ववत्प्रत्यक्षविरोधः
ये योग्यानुपलब्धितो ऽपि ज्ञातुं शक्यत्वान्मन्दफलत्वम् अन्य
विशेषस्यान्यत्रासम्भवादन्यशब्देनैव सिद्धेरत्यन्तानर्थक्यमित्
ननूक्तेन प्रकारेण नञ्समासस्य निषेध्यान्तरासम्भवात्प्राश
निषेधकत्वे प्रशंसालक्षणार्थत्वाभावान्न प्रशंसोदाहरणत्वं गुर
त्याशङ्कानिरासाय श्लोकगतपूर्वशब्दोक्तम् निषेधान्वयात् प्रा
मासावयवभूतेन पशुशब्देन प्राशस्त्योपादानमुपपादयति * अ
चेति * नन्वेवं सति केवलस्य पशुशब्दस्य मुख्यार्थत्वसम
त्प्राशस्त्यलक्षणा न युक्तेत्याशङ्क्याह * न चेति * निषेधान्वय
ग्यत्वान्न मुख्यो ऽर्थः सम्भवतीत्याशयः । ननु प्राशस्त्यस्यापि
यागुणवत् पशुमात्रधर्मिणो निषेधाशक्तेर्गवाश्वगतस्य च प्राश
स्याप्रतीतेर्निषेधो न सम्भवतीत्याशङ्क्याह * शक्नुवन्ति चेति
वाश्वशब्दसमभिव्याहारात् गवाश्वगतप्राशस्त्यातिशयप्रतीति
र्थः । ननु पशुशब्दोदाहरणे पशवो गो अश्वा इति गवाश्वप
मानाधिकरण्येन पशुशब्दोपादानात्तद्गतप्राशस्त्यातिशयप्रती
म्भवे ऽप्ययज्ञाऽसत्रशब्दोदाहरणयोः सामवच्छन्दोमवच्छब्दस
नाधिकरण्येन यज्ञसत्रशब्दानुपादानात्कथं तद्गतप्राशस्त्यातिश
तीतिरित्याशङ्कानिराससूचनयादिशब्दः सामरहितस्य वा य
ऽभिहिते छन्दोमरहितस्य वा सत्रत्वे ऽभिहिते ऽर्थात् साम
यज्ञः छन्दोमवत्सत्रमिति सामानाधिकरण्यप्रतीतेः । सामवच्छन्
वत्तद्गतप्राशस्त्यातिशयावगतिः सम्भवतीत्याशयः । ननु
हिताहितविवेकराहित्यादिदोषदुष्टत्वेनाप्राशस्त्यस्यापि भावात्त
पि च निषेध्यत्वोपपत्तेरेकान्ततः पशुत्वेन प्राशस्त्यस्य लक्षयितु
क्यत्वात् नेह प्रशंसाया गुणवादनिमित्तत्वाभिधानं युक्तमित्
ङ्क्याह * यद्यपीति * पुरस्तात्प्रतीचीनमश्वस्योपदधाति प
त्प्राचीनमृषभस्येति गवाश्वविधिप्रक्रमेण तदप्राशस्त्यानपेक्षित
त् तदपेक्षितगवाश्वप्राशस्त्यसिद्ध्यर्थं पश्वन्तरप्राशस्त्यस्यैव ।

ार्हतेत्यर्थः । ननु पश्वन्तरप्राशस्त्यनिषेधस्य तन्निन्दार्थत्वात् निन्दा-
र्थ विधिनानपेक्षणात् न गवाश्वविधिना ऽन्वयः सम्भवतीत्याश-
याह *तदिति[1] * गवाश्वप्राशस्त्यख्यापनार्था पश्वन्तरानिन्देत्याशयः ।
श्वन्तरप्राशस्त्यनिषेधेन गवाश्वप्राशस्त्यख्यापनात्तेषामपि च प्राश-
स्त्यसद्भावेन तन्निषेधायोगात् कथं तद्‌द्वारेण गवाश्वप्राशस्त्यख्या-
नामित्याशङ्क्य गवाश्वगतप्राशस्त्यातिशयः पश्वन्तरे निषिध्यतइति
चनार्थस्तरप्प्रत्ययः पश्वन्तरस्य हि प्राशस्त्यातिशये निषिद्धे तत्स-
व एव गवाश्वस्य ख्यापितो भवति अनेन च गोअश्वान् प्रशंसि-
मेत्यादिभाष्यं पश्वन्तरे प्राशस्त्यनिषेधस्य गवाश्वप्राशस्त्यख्या-
पर्यवसानाभिधानार्थत्वेन व्याख्यातं तरपा सूचितमर्थं विवृणो-
* एतदिति * पश्वन्तरेष्वपशुशब्दप्रवृत्तेः प्रशंसाया निमि-
त्तमुपसंहरति * एवमिति * गवाश्वादिगता प्रशंसा यस्या प्रति- ३
स्यापशुशब्दस्य पश्वन्तरेष्वपशुशब्दप्रवृत्तौ निमित्तं स तथोक्तः ।
पश्वन्तरप्राशस्त्यनिषेधस्य गवाश्वप्रशंसार्थत्वात्कथं प्रशंसा-
निषेधं प्रति निमित्ततेत्याशङ्क्याह *सा चेति * शब्देनार्थप्रति-
दने कृते तस्य कैमर्थ्याकाङ्क्षायां विध्येकवाक्यत्वेन प्रशंसार्थत्वं
ल्पनीयम् परशब्दस्य परत्र प्रवृत्तेर्निमित्तमन्तरेणासम्भवात् प्रथ-
व गवाश्वगता प्रशंसा प्रवृत्तिनिमित्तत्वेनाश्रितेति कृ-
प्रशंसानिमित्तः प्रतिषेध इत्यन्तेनान्वयः[2] । प्रयो-
त्वाभिधानं तर्हि विरुध्येतेत्याशङ्क्याह * अनन्येति * प्रशंसां
मित्तीकृत्य पश्वन्तरेष्वपशुशब्दे प्रवृत्ते पश्वन्तरप्राशस्त्यनिषेधस्य
मर्थ्यापेक्षायां प्रयोजनान्तरासम्भवान्निमित्तभूतैव प्रशंसाप्रयोज-
या शब्दप्रवृत्तेः पश्चादवगम्यतइत्यर्थः । ननु यजमानादिशब्दाना-
ं प्रस्तरादिषु प्रवृत्तौ प्रशंसानिमित्तं कस्मान्नेष्टेत्याशङ्क्याह *
यत्र पुनरिति * शब्दप्रवृत्तेः प्रथममप्रतीतत्वात् प्रशंसाया नि-
त्तत्वं न सम्भवतीत्याशयः ।

॥ अथ बाहुल्येन सृष्टिव्यपदेशाधिकरणम् ॥ १६ ॥

भूमा ॥ २२ ॥

सृष्टिमन्त्रका उपदधातीति भाष्यावयवात् पदद्वयस्यापि
धित्वाशङ्कानिरासः प्रतिभाति तच्च समस्तवाक्यार्थानर्थक्यापत्ते-
क्तमित्याशङ्क्योपधानानुवादेन शब्दविधिः पूर्वपक्षिणो ऽपि मतो

१ तरप्प्रतिषेधेति २ पु० पा० ।

२ इत्यतीतेनेति २ पु० पा० ।

निरस्यते । सृष्टिशङ्कायास्तु सबीजत्वायाख्यातोपन्यास इति सूत्र
यदीति भाष्यं व्याचष्टे * यदीति * तत्रेत्याशङ्काभाष्यं व्याचष्टे
तत्रेति * तद्वानासामुपधानो मन्त्रइतीष्टकासु लुक् च मतो
स्मृतेः । सृष्ट्यभिधायिमन्त्रैरुपधेयानामिष्टकानां सृष्टिशब्दवाच्य
वगमे ऽपि कासामिष्टकानां सृष्टिमन्त्रैरुपधानमिति विशेषानवग
वाक्यान्तराद्वा विशेषावगमे सत्येतद्वाक्यानर्थक्यापत्तेर्नोपधान
वादेन सृष्टिसंज्ञकेष्टकाविधिर्विशिष्टविधिर्वा सम्भवतीत्याशयः ।
नूपधानानुवादेनेष्टकाविधेरिष्टकाविशिष्टोपधानविधेर्वानुपपत्ताव
पधानानुवादेन सृष्टिलिङ्गमन्त्रविधिर्भविष्यतीत्याशङ्कानिरासार्थं
सर्वासामितिभाष्यं व्याचष्टे * तत्रेति * पूर्वपक्षनिरासभाष्यं
ख्याय तस्मादिति सिद्धान्तभाष्यं व्याचष्टे * तस्मादिति * भाष
क्तं सिद्धान्तमाक्षिपति * अत्रेति * उपधानस्याविधेयत्वान्म
विधेश्च मन्त्राम्नानानुमेयत्वेन प्रदेशान्तरस्थत्वाद्विध्येकवाक्यक
त्वाच्चार्थवादत्वस्य तदभावान्नायमर्थवाद इत्यर्थः । विध्येकवाक
च विनार्थवादत्वानुपपत्तिर्येन विधीयते तस्य शेषो ऽर्थवाद
प्रथनार्थवादे ऽभिधानाद्भाष्यकृतो ऽप्यभिमतेत्याह * तथा चेति
भाष्योक्ते ऽर्थवादत्वे निरस्ते यदि कश्चित्प्रकरणप्राप्तमन्त्रेषु पुनः
रश्म्यादानमन्त्रवद् गुणार्थत्वं शङ्केत तदपि मन्त्रव्यतिरिक्तगुणाश्र
णादयुक्तमित्याह * न चेति*मन्त्रान्तरपरिसंख्यार्थता तु मन्त्रा
रानर्थक्यापत्त्यैव निरस्तेत्याह * तत्रेति * तस्माद् ग्रहणादिका
न्तरपरिसंख्यार्थो ऽयमुपधाने मन्त्रविधिरिति पूर्वपक्ष एव ज्या
नित्युपसंहरति * तत्रेति * नन्वनुपधीयमानाभिरिष्टकाभिश्चय
कर्तुमशक्यत्वादिष्टकाभिरग्निं चिनुतइति इष्टकासाध्यतया वि
तेन चयनेनेष्टकोपधानस्यार्थादाक्षेपाद्विधानानर्थक्यमिति शङ्काम
भाषणपूर्वकं निराकरोति * चयनेनेति * व्यूहविशेषेण च स्थाप
मुपधानं तद्विधानाभावे यथाकथं चित्स्थापने ऽपि चयनं सम्भव
समुदितानामपि च स्थापनोपपत्तेर्न प्रत्येकं स्थापनसिद्धिरित्यर्थः
ननु समुदितोपधानस्यापि सम्भवात्तदपि कथं प्रत्येकं सिध्येदि
शङ्कते * नन्विति * विहितत्वेन तस्याङ्गत्वात् प्रतिप्रधानमावृ
न्यायात्सेत्स्यतीति परिहरति * नेति * उपादेयत्वेनाङ्गत्वं लक्षित
अर्थाक्षेपस्य श्रुत्यनुमानेन विलम्बितत्वादप्राप्तावस्थस्योपधानस्य
अप्रवृत्तिना प्रत्यक्षविधिना विधानोपपत्तेर्निष्प्रयोजनत्वमात्रेणाविध
वक्तव्यम् । अस्तित्वे चाध्वर्युकर्तृकत्वसिद्धिर्विधेः प्रयोजनमित्याह
अपि चेति * आध्वर्यवसमाख्यातचयनविधिनापि कल्पितस्योप

ोरसमानत्वात्तादृशे चाभियुक्तैराध्वर्यवादिशब्दाप्रयोगेणाध्व-
'माख्यानालाभादध्वर्युकर्तृकत्वं न लभ्यतइत्युक्तम्। ननु चयन-
माख्ययाध्वर्युकर्तृकत्वात्तस्य चोपधानादृते ऽध्वर्युणा कर्त्तुम-
ःवात् उपधानस्याध्वर्युकर्तृकत्वं लप्स्यतइत्याशङ्क्यैककर्तृकत्वं
क्रम्। अन्यसहायेनापि सन्धुक्षणादाववान्तरव्यापारे कृते देव-
पाकः कृत इति लोके व्यपदेशादुपधाने ऽन्यसहायेनापि कृते
स्याध्वर्युकर्तृकत्वप्रसिद्धेर्नैकाध्वर्युकर्तृकत्वं सेत्स्यतीत्याशयः।
[सर्ववाक्येषूपधानमात्रविधानात् अभ्यासन्यायेनोपधानभे-
ः सकृद्विहितस्यापि चेष्टकाः प्रत्यङ्गत्वात्प्रतीष्टकमावृत्तिसिद्धे-
द्विधिप्रयोजनाभावेनापरितोषात्स्वमतेनार्थाक्षिप्तोपधानानुवादेन
विधिरिति पूर्वपक्षमेव न्याय्यं मत्वा प्रकरणप्राप्तमन्त्रेषु
श्रुतेर्मन्त्रान्तरपरिसंख्यार्थत्वासम्भवे ऽपि ग्रहणादिकार्यान्त-
संख्याप्रयोजनत्वं दर्शयितुमाह * न चेति * ग्रहणादीना- ३२८
चयनचोदनाक्षिप्तत्वाविशेषेणोपधानतुल्यत्वात् लिङ्गविशेषर-
ां मन्त्राणां प्रकरणादुपधाने ग्रहणादिषु च प्राप्नुवतामु-
सम्बन्धः पुनःश्रवणमश्वाभिधान्यादानसम्बन्धपुनःश्रवणवत्
तरपरिसङ्ख्यार्थं न त्वाज्यभागपुनःश्रवणवदङ्गान्तरपरिस-
ं येन मन्त्रान्तरानर्थक्यमापद्यतेत्याशयः। पञ्चमे तु मध्य-
तु वचनात् ब्राह्मणवतीत्यत्र यां वै काञ्चन ब्राह्मणवतीमिष्टका-
ानीयात्तां मध्यमायां चितावुपदध्यादिति वचनवशेनाभिपूर्व-
नातेः प्रत्यक्षज्ञानवाचित्वात् प्रत्यक्षब्राह्मणविहितानाम् इष्टका-
मचित्याश्रयत्वस्य वक्ष्यमाणत्वादिष्टकानां चोपधानकरणभू-
न्वयं विना निरूपणाशक्तेस्तद्द्वारेणैव विधेयत्वान्मध्यमाचि-
त्वसिद्धिरप्युपधानसम्बन्धितया मन्त्रविधेः प्रयोजनं भवि-
ह * अपि चेति * मन्त्राणामुपधानसम्बन्धो विधेय इत्य-
अनारभ्याधीतानां च मन्त्राणां प्राकरणिकसामान्यसम्ब-
म्भवात्तदपेक्षलैङ्गिकविनियोगानुपपत्तेरप्राप्तविधिरेव भविष्य-
ाह * ये त्विति * ननु सृष्टिमन्त्राणां विधानाभ्युपगमे
त्वासिद्धान्तो भज्येतेत्याशङ्क्याह * न चेति * गुणाश्रया
सूत्रान्ते गुणवादनिमित्तत्वाभिधानदर्शनात्तादर्थ्यनिश्चयसूच-
सूत्रावयवे सूत्रशब्दः सकलसूत्रविषयत्वे वा तल्लिङ्गं तत्सि-
प्युपलक्षणार्थम्। ननु भूमेत्येतावदेव सूत्रं तत्सिद्ध्यादेरेकसू-
ादौ पठितत्वाद् देवतावतश्चावाचकत्वात् तिसृभिरस्तुवत
ज्यत ब्रह्मणस्पतिरधिपतिरासीदित्यादिष्वाद्यचतुर्दशान्त्यव्य-

तिरिक्तेषु चतुर्दशसु सृजधातुयोगात् सृष्टिलिङ्गेष्वेकया।
जाधीयन्त प्रजापतिरधिपतिरासीत्सप्तविंशत्या स्तुवत द्या
तां वसवो रुद्रा आदित्या अनुव्यायंस्तेषामाधिपत्यमासीत्
शता स्तुवत भूतान्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपतिर
द्यचतुर्दशान्त्येषु त्रिष्वसृष्टिलिङ्गेषु भूयस्त्वनिमित्ता स
प्रवृत्तिरित्येतावन्मात्रस्यानेन सूत्रेण कथनात् नार्थवादत्वं
तदित्यर्थः । ननु भाष्यकृतार्थवादत्वस्योक्तत्वात् सूत्रस्य
र्थ्यमवसीयतइत्याशङ्क्याह * अत इति * युक्त्यागमानुप
क्ष्यं तद्भाष्यमित्याशयः । किमर्थं तर्हि भाष्यकृतार्थवादतो
यामाह * भाष्यकारेण त्विति * एतमेव भाष्यकाराभि
दर्शयितुमपि चेतिभाष्यं व्याचष्टे * एकयेति * प्रतीकेन
मन्त्रसमुदायात्मकसर्वोऽनुवाको गृहीत इति सूचनार्थो
शब्दः । मुख्यलक्षणायाः क्वचिददृष्टत्वादत्यन्तानौचित्यसू
शब्दः आत्मत्यागान्यद्वारस्वीकारयोरिव स्वार्थस्यापि त्याग
स्वीकारयोरत्यन्तानौचित्यसूचनार्थं शब्दार्थयोरभेदोपचारे
विषयावात्मशब्दौ सृष्टिरूपदधातीत्युपक्रम्यैकया स्तुवतेत्या
द्यमन्त्रोपधानसाधनिकानामिष्टकानां प्रत्येकं स्तुतिं कृत्वा
दशेष्टका उपदधातीत्युपसंहारात् सृष्टिशब्दस्य सप्तदशम
त्वावगते स्ववाक्यसृष्टिलिङ्गमन्त्रमात्रपरत्वे तद्बाधप्रस
पर्यवसायित्वत्यागेनेतरा सृष्टिलिङ्गमन्त्रलक्षणार्थता वाक्यस
मुदायद्वारा स्यात् समुदायस्य चैकार्थ्याभावेनोपधानप्रक
नुपपत्तेस्तत्रापि पर्यवसानासम्भवात् तदितरमसृष्टिमन्त्रवा
मन्त्रलक्षितसमुदायद्वारेण लक्षयित्वा सृष्ट्यसृष्टिमन्त्रलि
मुदायसम्बन्धित्वाविशेषादसृष्टिमन्त्रवत् स्वार्थसृष्टिमन्त्रो
त्पर्यतः सृष्टिशब्देन प्रतिपादनीय इति षष्ठ्यन्तं तृतीयान्तं स
मध्याहृत्य योज्यम् । स्वरूपाभिधानस्य शून्यवादवार्त्तिकेन नि
दजहत्स्वार्थत्वस्य चात्रैवोक्ते वक्ष्यमाणत्वात् वाच्येन च
लक्षणया मन्त्रगणं लक्षयेदिति भाष्ये वक्ष्यमाणत्वादेवं व्य
म् । अनेन चैकया स्तुवतेत्यत्रानुवाके याः सृष्टयस्तन्मात्र
नरूपेण त्यक्त्वा तत्र[2] तत्सृष्ट्यसृष्टिसमुदायं लक्षयित्वा पञ्च
भिः सहितास्तात्पर्यतः सृष्टिशब्दो लक्षयेत्प्रतिपादयेदित्येव
व्याख्यातम् । नन्वित्याशङ्कानिरासार्थं नानुवादेति भाष्यं

---

१ वक्ष्यमाणत्वादिति २ पु० ना० ।
२ ताभिरिति २ पु० ना० ।

पधानेति * कथं त्विति भाष्यं तल्लिङ्गेति सूत्रावयवेनैव व्या-
तत्वान्न व्याख्यातम् ।

॥ अथ प्राणभृदादिशब्दानां स्तुत्यर्थताधिकरणम् ॥ १७ ॥

लिङ्गसमवायात् ॥ २२ ॥

ननु सृष्टिशब्दस्योपधानाविधिशेषतयार्थवादत्वं युक्तं प्राणभृ-
वाक्येषु तु सृष्टिवाक्यविहितत्वेनोपधानस्य विधातुमशक्यत्वा-
ध्येकवाक्यत्वं च विनार्थवादस्वायोगाद् गुणाश्रवणाच्च प्रकरण-
मन्त्रपुनःश्रुतेस्तादर्थ्यस्यापि कल्पयितुमशक्यत्वात् परिसंख्यार्थ-
त्र मन्त्रान्तरानर्थक्यापत्तेः प्राणभृदादिशब्दस्य न किञ्चित्प्रयो-
मेत्याशङ्क्याह * सृष्टिवदिति * सृष्टौ यथास्माभिर्ग्रहणादि-
न्तरपरिसंख्यामध्यमचित्याश्रयत्वसिद्धिश्चोपधानसम्बन्धितया
पुनःश्रुतेः परिहारो ऽस्य चोद्यस्योक्तस्तथात्रापि वक्तव्यः । भा-
क्षे त्विदं चोद्यं यथा प्राणभृदादिष्वपरिहार्यं तथा सृष्टावपि वि-
भावेन प्राणभृद्वाक्यविहितत्वात् सृष्टिवाक्यमुपधानस्याविधाय-
इत्यपि वक्तुं शक्यत्वादिति द्वन्द्वनिर्देशेन सूचितम् । ननु वाच्यै-
मुदायिलक्षितसमुदायद्वारा समुदाय्यन्तरे शब्दवृत्तेरुभयत्र तु-
यान्नोदाहरणभेदो युक्त इत्याशङ्क्याह * अल्पैरिति * अयमाश-
शब्दस्य प्रवृत्तिर्नाम बोधकत्वमेव निर्विषयायाश्च बुद्धेरस-
ात् बुद्धिविषयस्यैव प्रवृत्तिनिमित्तत्वं वाच्यम् । अत एवाभिधे-
ायोगेन सारूप्यं सर्वत्र सम्भवदपि आदित्यो यूप इत्यत्रैव बु-
षयत्वादुक्तं नान्यत्र न हि यजमानः प्रस्तर इत्यत्र यजमानस-
प्रस्तर इति बुद्धिरुदेति तत्कार्यकारित्वमात्रबुद्धेर्ब्राह्मणस्याप्य-
दवशात् प्रजापतिमुखजातत्वमात्रबुद्धिरजादौ गवाश्वगतप्राश-
भावमात्रबुद्धिः यूपे त्वादित्यसारूप्यमात्रबुद्धेः सारूप्यं प्रवृत्ति-
त्तमुक्तम् तेनेहापि सृष्टिशब्दात् सृष्टिबाहुल्यबुद्धेस्तस्यैव प्रवृ-
तेमित्तत्वं प्राणभृच्छब्दात्तु प्राणभृल्लिङ्गसमवायमात्रबुद्धेस्तस्यैव
त्तनिमित्तत्वाद्भेदेनोपादानं युक्तमेवेति भूयस्त्वाप्रतीतिप्रदर्शना-
ल्पशब्दः भूयस्त्वानपेक्षस्य लिङ्गसमवायमात्रस्य निमित्तत्वसू-
यैव लिङ्गसमवायादिति पञ्चम्युदाहृता एकेनेति भाष्येण लि-
ब्दं चिन्हार्थत्वेन व्याख्याय ननु सम्बन्धं विना लिङ्गत्वायोगात्
शब्देनैव समवायशब्दोक्तसम्बन्धसिद्धेः समवायशब्दो ऽनर्थक
शङ्क्य न चायमित्यादिभाष्येण लिङ्गस्यापि स्वलक्षिते गणे ऽन्त-

द्वादशाधिकरणमारभ्य सप्तदशाधिकरणपर्यन्तमेकवर्णकमेव वार्तिके नाधिकरणभेदः ।

भावप्रतिपादनार्थत्वं समवायशब्दस्योक्तं तद्व्याचष्टे * स्वार्थे
उभयत्रेत्यनेन भूम्न्यपि समवायशब्दानुषङ्गः सूचितः । मन्त्रगण
णायां व्यापृतः प्राणभृदादिशब्दः किमिति स्वार्थं न जहाति
शङ्कानिरासार्थत्वेन समवायशब्दव्याख्यानार्थं तद्गुण इतिभ
वयवं व्याख्यातुम् * उपादीयमानत्वादित्युक्तम् * सर्वसमु
व्यासक्तेन समुदायेन स्वसमवायितयेतरसमुदायित्वलक्षक
समुदायिन उपादीयमानत्वात् स्वार्थापरित्याग इत्यर्थः । न
ष्टिशब्दस्याप्यभिधेयसृष्टिलक्षितसृष्ट्यसृष्टिसमुदायलक्षणगुणयं
नासृष्टिषु प्रवृत्तेर्गौणत्वाद्गौण्यां च वृत्तावभिधेयसम्बन्धित्वरूपा
रात् सृष्टिलक्षितस्य समुदायस्य सृष्टिसमुदाय्यनादरेणासृष्टिष्वेव
सज्यवृत्त्युपपत्तेः कथं तेनाभिधेयानां सृष्टीनां लक्षणभूताना
दानमित्याशङ्कानिरासार्थं वृद्धवाक्यं पठति * आह चेति * र
माणगुणयोगनिमित्तवृत्तिस्वरूपगौणत्वलक्षणसद्भावात्सृष्ट्यादि
ब्दानां गौणत्वे ऽपि स्वार्थासम्बद्धस्य समुदायाख्यस्य गुणस्य
यितुमशक्यत्वात् । तस्य च व्यासज्यवृत्तित्वेनैकसमुदायित्यागे
दायस्याप्यभावोपपत्तेः सर्वेषामपि समुदायिनामविशेषेणैवोपाद
पैङ्गल्यादेस्तु सामान्यरूपेणाग्नित्वादिना लक्षितस्य प्रत्येकं पैङ्ग
दिगुणव्यक्तिषु वृत्तेरग्न्यादिगतायाश्च पैङ्गल्यादिगुणव्यक्तेर्मा
कादावभावाद्युक्तो ऽग्न्यादिसम्बन्धानादर इत्याशयः । अभि
सम्बन्धादरानादरलक्षणे तु गौणी लक्षणा वृत्तिविवेके सृष्ट्या
ब्दानामपि लक्षणावृत्तिरेवास्तु गौणत्वाभ्युपगमे न तु जहत्स्व
वृत्तित्वादिलक्षणान्तरनिरासार्थमिहोदाहरणम् श्लोकस्त्वेवं योः
यत्र यजमानादिशब्दे लक्षणं यजमानाद्युपलक्षणमात्रीकृत्य तत्
यजमानकार्ययागापूर्वनिष्पत्त्यादौ प्रस्तरादेर्यजमानादिसम्बन्धिस
प्रधानानुष्ठानसाध्यापूर्वनिष्पत्त्याख्यकार्यकरत्वाभावाद्यजमानादि
म्बन्धिरूपनिरपेक्षशब्दकार्यमर्थप्रत्यायनं नियुज्यते वाच्यसम्ब
त्वानादरेण वाच्यगुणस्वरूपमात्रलक्षणे यत्र शब्दस्य तात्पर्यमि
र्थः । तस्मिन् शब्दे लक्ष्यस्वरूपमात्रस्य शाब्दप्रतीतिविषयत्वेन
णं न तूपायमात्रतयावस्थितस्य लक्षणस्यापि यत्र सृष्ट्यादिशब्दे ल
णभूतसृष्ट्यादिलक्षितेन सृष्ट्यादिसम्बन्धिना समुदायेन सृष्ट्या
त्यागे व्यासज्यवृत्तित्वाभावादात्मानमलभमानेन सृष्ट्यादेर्लक्ष
स्यापि स्वाश्रयत्वेनोपादानं तत्र लक्ष्यलक्षणयोः शाब्दप्रतीतिवि
त्वेन ग्रहणमिति ।

---

१ स्वार्थसमुदायिन इति २ पु० पा० ।

॥ अथ वाक्यशेषेण सन्दिग्धार्थनिरूपणाधिकरणम् ॥ १८ ॥

सन्दिग्धेषु वाक्यशेषात् ॥ २३ ॥

विध्युद्देशान्तर्गतानामण्युद्भिदादिपदानां विधानातिरेकेण नाधेयतयोपयोगे प्रतिपादिते ऽर्थवादानामपि स्तावकत्वातिरेकेण सन्दिग्धार्थनिर्णायकत्वेनोपयोगप्रतिपादनार्थं कल्पनैकदेशत्वादिति त्तरसूत्रगतपदद्वयानुषङ्गेणैतत्सूत्रं प्रकरणान्तरत्वाच्चानन्तरसङ्गभावे ऽपि न दोषः प्राणभृदादिशब्दानां वा लिङ्गसमवायात्तल्लिगतल्लिङ्गेषु प्रवृत्तावुक्तायां घृतशब्दस्यापि घृताघृतोक्तेषु लिङ्गसवायात् प्रवृत्तिः प्राप्तात्रापोद्यतइत्यनन्तरसङ्गतिरपि सम्भवति प्रपादितप्रामाण्योपयोगिद्वाराणामपि तद्विशेषोपयोगिद्वारान्तरप्रतिदनात्पादाध्यायसङ्गतिरिति सूचयितुमाह * विधीति * निर्णयात्वेन कल्पनाशब्दव्याख्यानाय *अवधार्यतइत्युक्तम् * अर्थवादस्य ाधिगतसन्देहापनायकत्वेन साध्ये यद्द्वा स्तुवते तदसुरा अन्वायन् इत्याद्यर्थवादगतस्तुतिनिन्दार्थत्वसन्देहापनायकत्वं य एवं द्वान् साम्ना स्तुवीतेत्यादिविधेरर्थवादाधिकरणोक्तं दृष्टान्तयितुकत्रेतरेणेत्युक्तम् । ननूपक्रमानुरोधेनोपसंहारव्याख्यानस्य तृतीये दो वा प्रायदर्शनादित्यत्र वक्ष्यमाणत्वान्नोपसंहारस्थेनार्थवादेनोपक्रस्थविध्यर्थनिर्णयो युक्त इत्याशङ्क्य * सन्दिग्धमित्युक्तम् * तत्रोक्रमस्य वेदविषयत्वेन निश्चितत्वादुपसंहारगतानामृगादिशब्दानां दनुरोधवृत्तिता युक्तेत्याशयः । ननूपक्रमोपसंहारविप्रतिपत्त्यालोनया सन्देहस्तत्राप्यस्तीत्याशङ्क्य * एकत्रेत्युक्तम् * सन्दिग्धशब्देव्यवस्थितार्थप्रतीतिरभिमता सा विध्युद्देशमात्रपरामर्शाद्भवन्ती वाक्यशेषावधारितया व्यवस्थया वार्यतइत्याशयः । निर्णीयतइति वाक्ये ऽवधार्यते पदं प्रयुञ्जानेनैतदेव सूचितम् । सन्दिग्धावधारणरूपमाण्यविशेषोपयोगिद्वारान्तरप्रतिपादनाच्च पादलक्षणसङ्गतिः सूत्रता । अनन्तरसङ्गतेस्त्वभावो यथा सृष्टिष्वसृष्टिषु चेति भाष्यचितत्वाद्वा स्पष्टत्वमनभिधानेन सूचितम् । एकदेशशब्दमेको ऽर्थो श्यते प्रतिपाद्यते याभ्यां विध्यर्थवादाभ्यां तावेकदेशौ तयोर्भावत्वमिति व्युत्पत्त्यैकविषयत्वाभिधानार्थत्वेन व्याख्यातुं पूर्वार्द्धसंवाय सदा शब्देन च स्तुतिनिरपेक्षस्य विधेरपर्यवसानमुक्तम् । रोचनानपेक्षस्य विधेः पर्यवसानसम्भवे ऽर्थवादान्वयासम्भवागेवार्थाक्षिप्तविशेषकल्पनया निर्णये कृते पश्चादर्थवादानर्थक्यपहाराय वैकृताङ्गवदन्यतराकाङ्क्षयार्थवादान्वये सत्यपि निर्णीता-

र्थत्यागायोगात्तदर्थवादस्यैवासामञ्जस्यमङ्गीकार्यमपर्यवसाने
वादावगतस्यैव विशेषस्य ग्रहणमिति न्यायावताराङ्गभूतोपन्
न्देहकारणप्रश्नार्थं कथमिति भाष्यं वृत्यन्तरोक्तसन्देहकार
सार्थमिति दर्शयितुं स्वरूपतस्तावद् व्याचष्टे * किमिति * त
ध्यर्थवादयोर्भिन्नवाक्यत्वेनार्थवादिकस्य विशेषस्य विधिवाक्य
धारणवेलायामप्रतीतेः । सामान्यमात्रप्रत्ययाद्विशेषं प्रतिसन्
त्येकेषां मतमुपन्यासपूर्वकं दूषयति * विधाविति * विधि
न्याक्षिप्ताञ्जनसमर्थद्रव्यमात्रनिर्णयान्नैतत्सन्देहकारणं युक्तमि
सामान्यमात्रनिर्णयादिति यावच्छ्रुतं मत्वा तेषामाशयं विवृ
* स्यादिति * दूषयित्वा दृष्टान्ताभिधानेनोत्तरं विवृणोति *
वदिति * यथा घृतत्वसामान्यं स्वोपलक्षितयत्किंचिद्विशेषा
णोनाङ्गमेवमञ्जनक्रियाक्षिप्तं स्नेहद्रव्यसामान्यमपीत्यर्थः ।
घृते ऽपि सन्देहोपपादनपूर्वकं विवृणोति * तत्रेति * (
सामान्यश्रवणादर्थवादे च विशेषश्रवणात् वाक्यद्वयविप्रतिप
सन्देहकारणमित्यन्येषां मतमुपन्यस्यति[1]) *तस्मादिति* वि
सामान्यश्रवणमात्रस्य सन्देहकारणतोक्तेति भ्रान्त्या विधिनि
स्य घृतप्रापकत्वायोगाद्विध्यर्थवादयोरेकवाक्यत्वमभिप्रेत्यैतदु
ति भ्रान्त्या दूषयति * तथापीति * एकवाक्यगतसामान्यवि
श्रवणं न सन्देहकारणमिति दृष्टान्तेनोपपादयितुं * न हीत्युक्त
दृष्टान्तवैषम्याभिधानेनापरेषामाशयं विवृणोति * विषम इ
गौः शुक्ल इत्येकवाक्यगतयोः सामान्यविशेषयोः श्रवणादि
भिन्नवाक्यगताविति वैषम्यम् एतदेव प्रश्नपूर्वकं विवृणो
कथमिति * सामान्यविषयविधिवाक्यगत एव यदि विशेषः
ततो ऽत्रापि न सन्देहः शुक्लः प्रशस्त इति वाक्यान्तरगते तु
तत्रापि सन्देह इत्यर्थः । श्लोकं व्याचष्टे * यदि हीति * अन्
वेनैतमेवाशयं विवृणोति * अत इति * चकारेण सामान्यश्रव
हितस्य विशेषश्रवणस्य सहकारित्वाभिधानादाद्या भ्रान्तिनि
विध्यर्थवादयोर्भिन्नवाक्यत्वाभ्युपगमेनैतन्मतद्वयं तच्चैकवाक्य
वगतेरयुक्तमिति दर्शयिष्यन्सन्देहदर्शनमेवोभयेषां भिन्नवा
त्वभ्रान्तौ कारणमित्याह * केचिदिति * केचित्साम
मात्रश्रवणसन्देहकारणवादिनश्चकारादपरे ऽपि भिन्नवाक्यगत
मान्यविशेषश्रवणसन्देहकारणवादिन इत्यर्थः । एतदेवोप
यति * यदि हीति * नन्वेवं सति सूत्रविरोधः स्यादित्याश

१ भयं पा० २ पु० ना० ।

यत्विति * नन्वाकाङ्क्षानिबन्धनत्वात्सम्बन्धस्यावान्तरवाक्यार्थ-
तिपादनमात्रेणाकाङ्क्षापर्यवसाने वाक्यान्तरान्वयायोगात्कथं भि-
योः पश्चादेकवाक्यतेत्याशङ्क्याह * तथा हीति * पदा-
नां परस्परान्वयाकाङ्क्षापर्यवसाने ऽपि वाक्यार्थानां परस्प-
पेक्षया ऽन्वयो न विरुद्ध इत्याशयः । भावप्रत्ययेन सम्बन्धाभि-
नादङ्गस्याङ्गिसम्बन्धापेक्षयाङ्गिनश्चाङ्गसम्बन्धापेक्षयादिशब्देनाग्ने-
दिप्रधानानामेकफलसम्बन्धापेक्षयाङ्गानां चैककरणोपकारसम्ब-
ापेक्षया स्वार्थपर्यवसितानामपि वाक्यानां संहत्यैकमहावाक्या-
पादनेनैकवाक्यत्वं भवतीत्यर्थः । अङ्गप्रधानवाक्यैः सहार्थवा-
नां वैषम्याभिधानेनैतद् दूषयति * न त्विति * सिद्धार्थप्रतिपाद- ३
नामप्युपनिषद्वाक्यानां चतुस्त्रिंशदाश्वीनानि सरस्वत्याविशनात्
क्षप्रश्रवणमित्यादीनां च पुरुषार्थौपयिकस्य कर्मौपयिकस्य वा प्रयो-
नस्य लाभात्स्वार्थपर्यवसानं युक्तम् अर्थवादार्थस्य तु निष्प्रयोजन-
ान्न तत्रार्थवादानां पर्यवसानमिति प्रयोजनशब्देनोक्तम् भिन्नवा-
त्वे च व्रीहियववाक्यवत्सामान्यविशेषवाक्ययोरप्यन्योन्यानिर-
वैकल्पिकसाधननिश्चायकत्वात्सन्देहो नतरां युज्येतेत्याह * दु-
भेति * सामान्यविशेषयोर्मध्ये इतरत्र सामान्ये सामान्यवाक्य-
तरत्रविशेषे विशेषवाक्यस्य पर्यवसानादित्यर्थः । ननु वाक्यद्व-
यान्योन्यानिरपेक्षस्यार्थपर्यवसाने ऽपि विप्रतिपत्तेः सन्देहः स्या-
त्याशङ्क्याह * यदिति * वैकल्पिकानुष्ठानेन विरोधपरिहार
याशयः । नन्वङ्गाङ्गिवत्सामान्यविशेषयोरप्यन्योन्यापेक्षितत्वात्सा-
र्यवसितयोरपि तद्वाक्ययोरङ्गाङ्गिवाक्यवत्पश्चादेकवाक्यत्वक-
नायामेकविषयत्वायैकानुरोधेनेतरवृत्तेरवश्यम्भावित्वात्कस्या-
ोधेन किं वर्त्ततइति जिज्ञासायां विशेषानिर्द्धारणात्सन्देहः स्या-
याशङ्क्याह * सामान्येति * एवं सति सामान्यमात्रे पर्यवसि-
य विधेरर्थवादविरोधाद्विषयसङ्कोचात्मकबाधाभ्युपगमेन सिद्धा-
स्यान्न चार्थवादानुरोधेन विधिबाधो युक्त इत्याशयः । न वि-
विशेषो ऽस्येत्यविशेषो विशेषरहितः स्यात् इत्यर्थः । ननु
पशुमालभेतेति सामान्यपर्यवसितस्यापि विधेः छागस्य वपाया
सो ऽनुब्रूहीति मन्त्रवर्णानुरोधेन सङ्कोचो विधिमन्त्रयोरेकविष-
ात् सामान्यस्य च कृत्स्नस्य छागे ऽपि विभावेनाविरोधान्निय-
सम्भवे चानियमानुपपत्तेः षष्ठान्त्ये वक्ष्यते तथात्रापि भविष्यतीति
ते * मन्त्रेति * पौनरुक्त्यापत्त्या तं दूषयति * एवमिति *
वाक्यत्वे रुपक्रमबलीयस्त्वेनात्र पूर्वपक्षसम्भवादपौनरुक्त्यमि-

तिभावः । स्वाभिमतन्यायावताराङ्गभूतसन्देहकारणाभिधान
ञ्जनसामान्येनेत्यादिभाष्यं व्याचष्टे * तस्मादिति * ननूप
लीयस्त्वस्य वेदो वा प्रायदर्शनादित्यत्र वक्ष्यमाणत्वात्सिद्धान
नव्यत्ययसम्भवेनैकवाक्ये सन्देहो न युक्त इत्याशङ्क्य * वि
नेत्युक्तम् * अर्थवादप्रवृत्तेर्विध्यधीनत्वे विप्रतिपत्त्यभावात्प्र
विना विध्यपर्यवसानेनार्थवादाधीना किं विधेः प्रवृत्तिः पर्यव
वा तदधीनार्थवादस्येति सन्देहार्थः । अतो ऽनेन प्ररोचनापे
धिपर्यवसानसम्भवासम्भवसन्देहः * सन्देहकारणमित्युक्त
भवति पर्यवसाने विध्युद्देशेन सामान्याक्षिप्तविशेषमात्रनिर्णय
वादानर्थक्यपरिहारायान्यतराकाङ्क्षया वैकृताङ्गवदर्थवादः प
न्वीयमानो ऽपि विध्यनुरोधेनैव व्याख्येयः । अपर्यवसाने त्व
द्योक्ताविशेषसद्भावे विशेषाक्षेपकत्वायोगादर्थवादोक्तस्यैव ग्रहण
किं समञ्जसमिति भाष्यावयवमर्थतः पठित्वा व्याचष्टे * कस्यं
प्रवमिति पूर्वपक्षभाष्यं व्याचष्टे * तत्रेति * विध्यधीनत्वे
क्रमस्थायाः स्तुतेः श्रौतत्वदर्शनादुपसंहारस्थत्वाभिधानायानु
* वादादित्युक्तम् * अनेन च विनिगमने त्विति भाष्यावयव
धिना त्वेकवाक्यत्वादित्येतत्सूत्रसिद्धविध्यधीनत्वाङ्गीकरणेन
रपि प्ररोचनं विना प्रवृत्त्यशक्तत्वेन स्तुत्यधीनत्वान्नानेन हेतुना
लक्षणावृत्तिर्निश्चेतुं शक्येत्याशङ्कानिरासार्थत्वेन व्याख्यातः ।
रेण च लक्षणार्थं घृतवचनमिति भाष्यावयवो विशेषस्याव्यभि
ण सामान्यलक्षणे सामर्थ्यात् घृताख्यविशेष्यवचनं स्नेहद्र
मान्यलक्षणार्थमित्येव व्याख्यातः।मुख्यत्वादित्यनेनाविरोधाच्चो
कारसहितेनोपक्रमस्थत्वेन विरोधात्सामान्येन च व्यभिच
विशेषस्य लक्षयितुमशक्यत्वात् उपक्रमस्थेन सामान्यवचनेन
शेषः परिकल्पयितुं लक्षयितुं युक्तमित्येवमुपक्रमे सामान्यवचने
न विशेषः कल्प्यतइति भाष्यावयवं व्याख्यायाविरोधाच्चे
ननु सामान्यमात्रस्याननुष्ठेयत्वाद्विशेषस्य चानिश्चयादुपक्रमो
सन्दिग्धार्थत्वादुपसंहारेण निर्णेतव्य इत्याशङ्कानिरासार्थत्वेन
न्दिग्धेष्वविरोधादिति भाष्यावयवो ऽप्यापातप्रतिभानात्सन्दे
सामान्याक्षिप्तस्नेहद्रव्यमात्रनिर्णयोपपत्तेरर्थवादाभावे ऽप्यन
सामान्यमात्ररूपार्थाविधायकत्वलक्षणविरोधाभावादित्येवं व्या
तः । प्ररोचनानपेक्षस्य विधेः प्रवृत्तावसामर्थ्यादर्थवादसन्निध
स्वयमप्ररोचकत्वादर्थवादसहितस्यैव विधायकत्वावगतेस्तत्स
तविशेषलाभे विशेषान्तरकल्पनायोगेनोपक्रमस्थस्यापि विधेर्नि

त्वाशक्तेरुपसंहारस्थेनापि अर्थवादेन निर्णयो युक्त इत्याशङ्कानिरा-
ार्थत्वेन प्ररोचनानपेक्षस्यैव विधेः स्वविषयेष्टसाधनत्वज्ञापनमात्रे-
प्रवर्त्तकत्वोपपत्तेरर्थवादाभावे ऽपि विधायकत्वाविरोधादिति
ाष्यावयवो व्याख्यातः। श्लोकं व्याचष्टे * विधीयमानं हीति *
ुतेर्विध्यधीनत्वोक्त्यार्थाद्विधेस्तुत्यनधीनता ऽनुवादत्वोक्त्या च प्रा-
र्थतोक्तेति सूचनार्थम् *नन्वित्याद्युक्तम् * ननु विधेः स्तुत्यनधी-
त्वे कथमुच्चैर्ऋचा क्रियतइत्यादि विध्युद्देशस्थानामृगादिशब्दाना-
र्थवादानुरोधेन वेदलक्षणार्थं तृतीये वक्ष्यतइत्याशङ्कानिरासार्थत्वेन
ध्यत्वादित्यवयवं व्याख्यातुम् * यद्यपि तावदित्युक्तम् * अ-
रोधाच्चेत्यवयवं व्याख्यातुं विनापिचेत्युक्तम् विधेः स्तु-
नधीनत्वं च पूर्वोक्तमनेनोपपादितम्। स्तुतिपदान्यनर्थका-
भविष्यन् साकाङ्क्षाणीत्यादेर्यो ऽसौ विध्युद्देशः स शक्नोति नि-
क्षार्थं विधातुमित्यर्थवादाधिकरणभाष्यादर्थवादनिरपेक्षस्य वि-
मात्रस्य प्रवृत्तिशक्तावप्यर्थवादानर्थक्यपरिहारमात्रार्थमर्थवादा-
यप्रतीतेरेतत्पूर्वपक्षिणोक्तम्। स्तुतेर्विध्यधीनत्वोपपादनायार्थ-
वादस्त्वित्युक्तम् * आद्यचकारसूचितं द्वितीयभाष्यावयवार्थं
ाचष्टे * विशेषश्चेति * द्वितीयचकारसूचितमाद्यभाष्यावयवार्थं
ाख्यातुमाह *न सामान्यमिति * वाक्यशेषस्यैव सन्दिग्धार्थनि-
ायकतास्ति न वेति चिन्ताविषयत्वेनोदाहरणत्वे विध्युद्देशोपन्या-
स्तु तद्विषयत्वमात्रेणेति सूचनार्थं व्युत्क्रमेण व्याख्यातमुपसंहर-
* तस्मादिति * एवं प्ररोचनानपेक्षस्यापि विधेः प्रवृत्तिसाम-
नार्थवादान्वयात्प्रागेव विध्युद्देशार्थनिर्णयान्नार्थवादोक्तविशेषग्र-
ामित्युक्त्वा प्ररोचनानपेक्षस्यासामर्थ्ये ऽप्यर्थवादाभावे विधेरेव
ोचनाशक्त्याविर्भावात्सामान्यविधेयस्य विशेषाकाङ्क्षायां घृते
र्थवादकस्याभिधायकत्वमितरयोः केवलस्य भविष्यतीति घृतश-
स्य स्नेहमात्रलक्षणार्थतापि नास्तीत्याह * कामं वेति * ननु य-
ग्निविद्यासाध्यस्याग्निहोत्रादेस्तदनुरोधेन त्रैवर्णिकविषयतया स-
चो वक्ष्यते तथा विधानस्याप्यर्थवादसाध्यत्वात्तदनुरोधेन विष-
सङ्कोचः कस्मान्न स्यादित्याशङ्क्याह * यथेति * अयमाशयः ३
ाङ्गेन विना प्रधानं न सिध्यति स्वयं च नाक्षिप्यते तदनुरोधेन
ानस्यापि सङ्कोचो भवति विनापि त्वर्थवादेन विधेरेव तु प्ररोच-
ाक्तिकल्पनेन विधायकत्वोपपत्तेः यथेन्द्राय त्वा वसुमते गृह्णा-
ऐन्द्रमन्त्रसाध्यस्यापि सोमग्रहणस्य मन्त्राभावे ध्यानादिनापि
तस्यानुष्ठानोपपत्तेर्नाङ्गभूतमन्त्रानुरोधेन प्रधानस्य सोमग्रहण-

स्यैन्द्रप्रदानमात्रसङ्कोचो युक्त इति तृतीये लिङ्गविशेषनिर्दे
त्समानविधाने ऽप्यैन्द्राग्नामनन्त्रत्वामित्यत्र वक्ष्यते तथा
भूतार्थवादानुरोधेन प्रधानभूतस्य विधेः सङ्कोचो न यु
इति । नन्वत्राप्यर्थवादसद्भावेन विधेः प्ररोचनाशक्त्य
पगमात्तैलादावर्थवादाभावेन विधायकत्वायोगात्तदनुरोधेन
ङ्कोचो युक्त एवत्याशङ्क्याह * यत्रेति * अर्थवादसद्भावकृत
त्प्ररोचनाशक्त्यपगमस्य घृतमात्रे तत्सद्भावादपगमो युक्तो नेतर
स्याशयः । पूर्वपक्षमुपसंहरति * इतीति * सन्दिग्धेष्वित्यादि
द्धान्तभाष्यमक्तशर्करोपधानस्य अर्थवादसद्भावे वर्त्तमानापदेश
पपत्तेराख्यातस्य पञ्चमलकारत्वेन विधायकत्वावगमाद्विध्यभावे
विध्येकवाक्यत्वकल्पस्यार्थवादत्वस्याप्ययोगादिमां स्पृष्ट्वोद्गायेदि
तदुदाहरणाव्यापकत्वाच्चायुक्तमाशङ्क्यार्थवादानपेक्षविधिपर्यवस
नाभावाभिप्रायेण व्याचष्टे *उच्यतइति* प्रवृत्तिप्रतिबन्धकाल
दिभङ्गं विना चेतनस्य प्रवर्त्तयितुमशक्यत्वादालस्यादिभङ्गाख्यप्र
चनासापेक्षस्यैव विधेः प्रवर्त्तकत्वनिर्वाहादर्थवादसद्भावे च वि
प्ररोचनशक्त्यभावादर्थवादस्य च घृतमात्रविषयत्वाद्विधेरपि त
त्रविषयतैव युक्तेत्याशयः । श्लोकं व्याचष्टे * यद्यपीति * प्रकर
ब्देनापर्यवसानं सूचितम । यद्यप्यञ्जनाक्रियासाधनत्वाविशेषात्तै
वसयोरप्यर्थाक्षेपेणोपादानं तथाप्यनुष्ठानस्य विध्यधीनत्वाद्वि
प्ररोचनापेक्षत्वे घृतमात्रविषयत्वात्तैलवसे नानुष्ठेये इत्यर्थः । वस्
स्तु प्रत्यक्षश्रुतेर्घृते ऽर्थाक्षेपायोगान्नार्थाक्षेपात्मकमुपादानमपि तै
वसयोरस्तीति क्रियामात्रमिवोदितमित्यादिना वक्ष्यतइति ताव
ब्देन सूचितम् । यत्तु तैलवसयोरर्थवादाभावाद्विधेरेव प्ररोचनाश
कल्पनया पर्यवसानं कामं चेति श्लोकेनोक्तं तदाग्नेयाधिकरण
त्पादयिष्यमाणगौरवलक्षणवाक्यभेदापादनेन निराकरोति *
ल्पयितव्येति * घृतप्ररोचनोपादानेन वा समाप्ते वाक्ये काल
कतैलादिप्ररोचनया वाक्यान्तरारम्भापत्तेर्वाक्यभेदो ऽभिप्रेतः
रूप्यलक्षणो ऽपि वाक्यभेदो ऽस्मिन् पक्षे स्यादित्याह * घृतइ
अतो ऽर्थवादस्य घृतमात्रविषयत्वात्तत्सद्भावे च विधेः प्ररोच
कल्पनायोगात्तस्यापि तन्मात्रविषयतेति । श्लोकार्थमुपसंहरति *
स्मादिति * एवं तात्पर्यतो भाष्यं व्याख्याय स्वरूपतो व्याचिख्या
सुः सामान्यवचनेनेति भाष्यावयवमञ्जनसमर्थद्रव्यसामान्यस्य
वणाद्युक्तमाशङ्क्याभ्युपेत्यवादत्वेन व्याचष्टे * यद्यपि चेति
अभ्युपेत्यवादस्य च वासः परिधत्तइत्यादौ निरासतुल्यत्वासि

ोजनम् कथं न तद्विशेष इत्याशङ्क्य भाष्यशेषव्याख्यानेन परिह- ो * तत्रेति * अनेन च यो वाक्यस्य सामान्यवचनेनोपक्रमः स ामनवशेन श्रुत एव विशेषे व्यवस्थाप्यते तस्योपक्रमापेक्षितवि- समर्पणेन तदानुकूल्यादिति व्यवस्थाप्यतइत्यध्याहारेण योजि- । ननूपक्रमस्थसामान्याक्षिप्तस्य तैलादेर्नोपसंहारानुरोधेन त्यागो इतिभाष्येणाशङ्क्य श्रुतविशेषसद्भावे ऽर्थाक्षेपायोगान्न स्नेह मान्यमर्थाद्विहितं येन निगमनस्योपक्रमविरोधः स्यादिति न ही- न परिहृतम् तद्व्याचष्टे * घृते चेति * ननु विध्युद्देशमात्रप- र्शात्स्नेहमात्रप्रतीतिर्भवत्येवेति कथमुच्यते न सामान्यं विहित- ाशङ्कानिरासार्थत्वेन सन्दिग्धेष्विति भाष्यावयवं व्याचष्टे * ेहमात्रं हीति * पूर्वमनिर्द्धारितविशेषाभिप्रायेण सामान्यशब्दं ख्याय द्रव्यसामान्यमपि न विहितमिति यथाश्रुतं व्याख्यातुमा- क्रियामात्रमिति * विधानेत्यादिभाष्यस्यापर्यवसानाभिप्रायेण केनैव व्याख्यातत्वान्नापौत्यस्य च घृतेः प्रत्यक्षस्तुतिसद्भावात्सा- यस्नेहमात्रस्य तैलादेः साक्षात्स्वयमेव विधितः स्तुतिः कल्पयितुं ुक्तेत्येव विधेः प्ररोचनकल्पनाशङ्कानिरासार्थत्वेन कल्पयितव्या ादिनैव व्याख्यातत्वाल्लक्षणयेति भाष्यं लक्षणात्रयोपलक्षणार्थ- व्याख्यातुमाह * तैलादीति * तस्मादित्युपसंहारभाष्यं व्या- * तस्मादिति * वृत्त्यन्तरोदाहृतमन्त्रवर्णापेक्षणे भाष्यकृतो ३३ प्रायमाह * वृत्त्यन्तरेष्विति * विध्यर्थवादयोर्भिन्नवाक्यत्वाभ्यु- ेनास्मिन्विचारे तुल्यन्यायत्वान्मन्त्रवर्णो ऽप्युदाहरणं स्यात् वाक्यगतस्य विशेषशब्दस्यात्रैव नियामकत्वे ऽभिहिते षष्ठान्त्य- र्कं स्यादित्यर्थः।

थ सामर्थ्यानुसारेण अव्यवस्थितानां व्यवस्थाधिकरणम् ॥ १९॥

अर्थाद्वा कल्पनैकदेशत्वात् ॥ २४ ॥

वाक्यशेषस्य सन्दिग्धार्थनिर्णायकत्वे स्तावकत्वातिरिक्तधर्म- पयोगद्वाराभिधानार्थं व्युत्पादिते प्रसङ्गात्सामर्थ्यस्यापि स- धार्थनिर्णायकत्वव्युत्पादनेनानन्तराधिकरणसङ्गतिं सूचयन् पू- त्रगतसन्दिग्धपदानुषङ्गेण सूत्रं व्याचष्टे * अथेति * नन्वर्थश- त्सामर्थ्यकल्प्यद्रवादिविषयविशेषस्याशाब्दत्वाच्छाब्देन विधिना ो न सम्भवतीत्याशङ्कानिरासार्थत्वेनैकदेशत्वादिति सूत्रावयवं ख्यातुं सामर्थ्यकल्पितेन शब्देन * विध्यंशेनेत्युक्तम् * व्यवस्था-

प्ररोचकत्वेति २ पु० पा०।

र्थत्वेन कल्पनाशब्दं व्याख्यातुं निर्णयशब्दः । ननु सामर्थ्यस्य
ङ्गत्वात्तत्प्रामाण्यं व्युत्पादनस्य च तृतीयविषयत्वान्नास्मिल्लक्ष
सङ्गतिरित्याशङ्क्य प्रासङ्गिकसङ्गतिसूचनाय * अथेत्युक्तम् * प्र
ङ्कारणं[1] वक्तुं सन्दिग्धशब्दः इतिकरणोभ्रान्त्युत्पन्नतैलाद्याका
ति वार्त्तिकसूचितविध्युद्देशमात्रपर्यालोचनोत्थविषयोपलक्षणाभ्
व्यवस्थितार्थप्रतीतिरूपसन्देहप्रकारपरामर्शार्थः । न्यायावताराङ्गभ्
स्तु सन्देहः किमव्यवस्थितविषयतया भासमानस्य विधेरव्यवस्थि
विषयतैवोचिता सामर्थ्याद्वा विषयव्यवस्थाकल्पनायेत्येवं रूपो य
भाष्यमेव स्पष्टत्वान्नोक्तः । विधेर्वस्तुसामर्थ्यापेक्षासदसद्भावसं
हश्च तत्कारणमाख्यातशब्दानामर्थं ब्रुवतां शक्तिः सहकारिणी
सिद्धान्तभाष्यपर्यालोचनयावगन्तुं शक्यत्वान्नोक्तम् । पूर्वपक्षो
प्रमाणान्तरगम्यवस्तुसामर्थ्यापेक्षणो वेदस्य सापेक्षत्वेनाप्रामाण्य
त्तेर्वस्तुसामर्थ्यानपेक्षत्वात्तीक्ष्णपुष्करधारस्य च स्रुवस्य संहतश
क्ककठिनद्रव्यावदाने पि सामर्थ्यसम्भवादायसावष्टम्भेन स्रुवह
योर्मांसावदाने ऽपि शक्तिसम्भवात्कोटरवतश्च स्वधितेर्द्रवाव
ऽपि सामर्थ्योपपत्तेरनुग्राहकापेक्षायामपि निरपेक्षसाधनत्ववि
ताद्व्यवस्थैव युक्तेत्येवंरूपो भाष्योक्तविशेषानभिधानेनैव स्पष्ट
श्नोक्तः वाक्यशेषप्रत्युदाहरणरूपेणात्र पूर्वपक्षिणः प्रत्यवस्थाना
न्तरसङ्गतिं वक्तुम् * यत्र वाक्यशेषो न विधीयतइत्युक्तम् * स
क्षत्वेन वेदाप्रामाण्यापत्तेः प्रमाणान्तरगम्यवस्तुसामर्थ्यापेक्षा विं
युक्तेत्याशङ्कानिरासायैवकारः । अशक्यार्थानुष्ठानायोगात्प्रवर्त्तक
व्याघातापत्तेः सर्वविधिभिः सामर्थ्यस्यावश्यापेक्षणीयत्वात्साम
स्य च प्रमाणान्तरगम्यत्वे ऽपि विषयस्यान्यतो ऽनवगतेर्वेदस्य
रपेक्ष्याविघातात्तीक्ष्णपुष्करधारिणापि स्रुवेण मांसावदानाशक्ते
रपेक्षसाधनत्वविरोधाच्चायसावष्टम्भनकल्पनानुपपत्तेः । केव
नापि च स्रुवेण द्रवावदानोपपत्तेरायसस्यानुग्राहकत्वक
नायोगात्स्वधितेश्च रूपं वा शेषभूतत्वादित्यनेन न्यायेन
सोवल्लोकसिद्धस्य चोपादेयत्वात्कोटरकरणेन सामर्थ्याधी
ल्पनानुपपत्तेः सामर्थ्याद् व्यवस्थितविषयत्वकल्पना युक्तेत्याश
स्रुवाद्युदाहरणेषु सामर्थ्येनानुवाद्यगतसन्देहनिरासदर्शनाद्वि
गतसन्देहनिरासमर्थ्यशङ्कानिरासायोदाहरणान्तरस्य सिद्धा
भाष्ये दत्तस्याकोशे ऽप्यञ्जलिशब्दवाच्याद्विहस्तसंयोगाविरोधा
न्देहविषयत्वानुपपत्तिमाशङ्क्याकोशाख्यविशेषविवक्षासदसद्भाव

---

१ प्रकारमिति २ पु० पा० ।

यत्वेन सन्देहमुपपादयञ्छ्लोकं व्याचष्टे * देवतेति * एकदेश-
योगे ऽपि संयोगप्रसिद्धेः सर्वावयवसंयोगप्रदर्शनार्थं संहतयोर्ह-
स्तयोः * संयोगइत्युक्तम् * आकोशशब्दवाच्येषत्कोशाकार-
पावृत्त्यर्थो मात्रशब्दः। आकोशे तर्हि सर्वावयवसंयोगाभावान्नाञ्ज-
लत्वं स्यादित्याशङ्क्य नाञ्जलिनेति प्रयोगो दर्शितः संहतत्वाकोशत्व-
योर्विशेषयोः सामान्यवाचिनो ऽञ्जलिशब्दात्सन्देहः सक्तुहोमे ऽञ्ज-
लिचोदनायां भवतीत्यर्थः। चोदनाशब्देन विधेयगतत्वं दर्शितम्। अ-
पीति चेत्यनेन घृतवत्सन्देहव्यावर्त्तकाकोशविषयवाक्यशेषाश्रवणे
ऽपि होमान्यथानुपपत्तिकल्पितेन वाक्यशेषेणाकोशनिर्णयाभिधा-
नाच्छ्लोको व्याख्यातः। ननु सामान्यतः प्रवृत्तस्य विधेः सामर्थ्यक-
ल्पितवाक्यशेषानुरोधेन विषयसङ्कोचाभ्युपगमे दर्शपूर्णमासविधेर-
पि सामान्यतः सर्वाङ्गविशिष्टकर्मविषयप्रवृत्तस्य सामर्थ्यकल्पितवा-
क्यशेषानुरोधेन शक्यमात्राङ्गविषयतया सङ्कोचापत्तेरन्धादीनामपि
कर्मण्यधिकारप्रसङ्गात्तिर्यगधिकरणविरोधः स्यादित्याशङ्कते * न-
चेति * येन प्रकारेण कर्त्तुं शक्नुयात्तेन प्रकारेण कुर्यादिति वा-
क्यशेषेणान्धादीनामाज्यावेक्षणादिप्रकारव्यावृत्तेस्तद्रहितो ऽधिकारः
स्यादित्यर्थः। विधिस्त्वेकश्रुतित्वादित्येकादशाधिकरणन्यायेन स-
र्वाङ्गोपसंहारनिश्चयात्किमङ्गं प्रयोक्तव्यमिति सन्देहानुपपत्तेर्नात्र
सामर्थ्यानुरोधेन सङ्कोचापादको वाक्यशेष इति परिहरति *नेति*
तदेव विवृणोति * सन्दिग्धेति * ननु प्रयोगविधिपर्यालोचनया
सर्वाङ्गोपसंहारावगमे ऽप्यधिकारस्य सामर्थ्यानपेक्षत्वादन्धादेश्चा-
ज्यावेक्षणादौ सामर्थ्याभावात्किं प्रयोगशास्त्रानुरोधेनाधिकारशास्त्रं
समस्ताङ्गोपसंहारसमर्थपुरुषविषयतया सङ्कोचनीयमधिकारशास्त्रा-
नुरोधेन वा प्रयोगशास्त्रं शक्यमात्राङ्गविषयतयेति सन्देहे ऽधिकार-
स्य फलपर्यवसायित्वेन प्राधान्यात्तदनुरोधेन यथा शक्नुयात्तथा
कुर्यादिति वाक्यशेषकल्पनया प्रयोगविधेः शक्यमात्राङ्गविषयतया
सङ्कोचोपपत्तेरन्धाद्यधिकारो दुर्वार इत्याह * न चेति * कार्ये
इति ऽधिकारः स्यादित्यनेन न्यायेन प्रयोगविधिप्रयोज्यसमस्ताङ्गाव-
धारणपूर्वकत्वेनाधिकारविधेरेव प्रयोगविध्यनुरोधवृत्तित्वस्य न्या-
य्यत्वात् समस्तधर्मोपेतं यः शक्नुयादिति वाक्यशेषकल्पनेन सर्वा-
ङ्गोपसंहारसमर्थस्यैवाधिकारनिश्चयान्नाधिकारे ऽपि सन्देह इत्यपि
शब्दार्थे चशब्दमङ्गीकृत्य योज्यम्। यः शक्नुयात्स कुर्यादिति वक्तव्ये
इतिसमाधेयाङ्गवैकल्ये सति तिमिराद्यपनयनेनापादितस्याप्यधिका-
रसद्भावमङ्गहीनस्य तद्धर्मेत्यत्र षष्ठाद्याधिकरणएव वक्ष्यमाणं सूच-

यितुं यथा शक्नुयात् * तथा कुर्यादित्युक्तम् * द्रव्येन्द्रिय
दिना स्वतो ऽशक्तो ऽपि द्रव्यार्जनादिना यथा शक्तो भव
शक्तिमापाद्य सर्वधर्मोपेतं कुर्यादित्यर्थः । यदि तु न क
ङ्गोपसंहारसमर्थः स्यात्ततः कतिपयाङ्गोपसंहारेणाप्यधिक
लप्यते नन्वेतदस्तीत्याह * सन्ति चेति * अतः प्रयोगविधे
चं विना ऽनुपपत्त्यभावाच्च शक्यमात्राङ्गविषयतया सङ्कोच
युक्तेत्युपसंहरति * इतीति * नन्वेवं सति नित्याधिकारे
समस्तधर्मोपेतं कर्तुं शक्नुयात्सो ऽवश्यं कुर्यादिति वाक्यशेष
या सर्वाङ्गोपसंहारसमर्थस्यैवाधिकारोपपत्तेः सर्वशक्त्यधि
विरोधः स्यादित्याशङ्क्याह * यत्र त्विति * जीवने सत्यप
जीवितस्य निमित्तत्वव्याघातापत्तेः पौर्णमास्यादिकालवद्वाज
णादेरुपादेयत्वेनानुपादेयनिमित्ततावच्छेदकत्वायोगान्निमित्त
त्वाच्च प्रयोगविधेस्तदनुरोधेन निमितश्रुतिबाधायोगान्निमित्त
गतावश्यकर्तव्यतानुरोधेन यावज्जीवादिप्रयोगविधेः शक्यम
विषयतया सङ्कोचकल्पना युक्तेत्याशयः । प्रयोगचोदनान्य
पत्तिरेव शब्देन परामृष्टा । अनुष्ठानमात्रादविषयश्चात्र सङ्को
लप्यते प्रयोगविधिस्तु नित्याधिकारे ऽपि सर्वाङ्गविशिष्टमेव
मनुष्ठापयतीति तत्रापि सामर्थ्यापादने यतितव्यमिति स्या
सूचितम्। अशक्याङ्गत्यागस्य च विधिनानुज्ञातत्वान्न वैगुण्या
तेति विशेषेणोक्तम् चोदनयानुज्ञातत्वं चोदनाशब्देनोक्तम्
कामाधिकारे ऽन्धादीनामधिकारस्यानिर्दिष्टस्यानापत्तेर्नित्या
च्चापाद्यमानस्येष्टत्वात्सामान्यतः प्रवृत्तस्य विधेः सामर्थ्यानुरोधे
ङ्कोचकल्पने ऽपि नानिष्टापत्तिरित्युपसंहरति * इतीति *
दीनामधिकारमिति विपरिणतेऽर्थव्यवहितान्वयेन योज्यम् । ननु
सामर्थ्येनाश्रुतो ऽपि वाक्यशेषः कल्प्यते ततः कामाधिकारे
हाभावे ऽपि यथा शक्नुयात्तथा कुर्यादिति वाक्यशेषस्य कल
शक्यत्वादन्धाद्यधिकारो ऽनिवार एव स्यादित्याशङ्क्याह*तस
ति* अयमाशयः वैदिकस्यार्थस्य प्रमाणान्तरगोचरत्वाद्वैदि
व वाक्यशेषः सामर्थ्येन कल्पनीयः कल्प्यस्य वाक्यशेषस्य वे
गतत्वेन व्यतिरिक्तं वैदिकत्वं न सम्भवति न च निर्णीतार्थे
दो वाक्यशेषमनुमन्यतइति तस्माच्छब्दस्य योग्यतया चोदितः
क्तचोदनानुमितत्वपरामर्शित्वात् चोदनयानुमतत्वादित्यर्थः ।
ब्धात्मकशब्देन सन्दिग्धार्थत्वात् * अपर्यवसितत्वमित्युक्तम्*
द्धशब्देन पर्यवसितत्वं पौरुषेयत्वशब्देन पुरुषोत्प्रेक्षाप्रभवत्वम्

देकशब्दसामर्थ्यस्यैव वेदानुमतत्वात् वैदिकत्वोपपत्तेः किं वाक्य-
ाकल्पनयेत्याशङ्क्याह * सामर्थ्येति * वाक्यशेषसिद्धमात्रं सा-
र्याधीनं न वैदिकार्थनिर्णयः शब्दैकसमधिगम्यत्वात्तस्य सामर्थ्य-
चाशाब्दत्वात्कल्पितस्य चार्थस्याशाब्दवैदिकार्थान्वयानुपपत्तेर्वेदा-
तत्वासम्भवादित्याशयः । ननु व्यवस्थितविषयस्य सामर्थ्यस्य
वस्थितविषयमङ्गत्वं विनानुपपत्तेः सामर्थ्यव्यवस्थयाङ्गत्वं व्य-
ामात्रं कल्पयितुं युक्तम् । शब्देन तु विनानुपपत्त्यभावाच्छब्दक-
ा न युक्तेत्याशङ्क्य सामर्थ्यस्य शब्दकल्पकत्वे वृद्धसम्मतिमाह *
ह चेति * विभज्यमानसाकाङ्क्षसंहत्यार्थविशिष्टैकार्थप्रतिपादक-
समुदायस्य वाक्यत्वात्तस्य च वाक्यार्थप्रतिपत्त्युपायभूतकल्प-
र्थवाचिपदाभावे सकाङ्क्षत्वेनापरिपूर्णस्य विशिष्टार्थप्रतिपादक-
योगाद्विशिष्टाश्रुतिपादनार्थं[1] च विना व्यवहारासाधनत्वेनानर्थ-
पत्तेः परिपूर्णत्वाय श्रुतपदैकवाक्यभूतपदान्तरकल्पना यु-
ति भावः । प्रतिपत्तेर्नित्यं प्रतिपाद्यसापेक्षत्वात्प्रतिपत्तिशब्दस्य श्रु-
ब्दसापेक्षत्वे ऽपि उपायशब्देन सह समासाविघातः साम-
ल्पितायाः श्रुतेः स्मृतिकल्प्यश्रुतिवत् पृथक्वाक्यत्वाभावा-
तवाक्यशेषभूतपदविषयः श्रुतिशब्दः । ननु कल्प्यानां श्रुतीनां
चिच्छाखायामनाम्नानादभावावगतेः शशशृङ्गवत्कल्पना न यु-
ाशङ्क्य * तेनैव चेत्युक्तम् * सामर्थ्यलभ्यत्वेनाम्नानोपपत्ते-
ावकल्पना युक्तेति भावः । ननु सामर्थ्यलभ्यानामपि प्रतिप-
ीकर्यादाम्नानं युक्तमित्याशङ्क्य * सहस्रेत्युक्तम् * सहस्रशब्दो
नन्तवाची । सामर्थ्यलभ्यानामाम्नाने ऽनन्तावयववेनाम्नाना-
रिति क्लेशः स्यादित्यर्थः । श्रोतृप्रोत्साहनाय सूत्रकृतः शाङ्क-
यशङ्कानिरासाय यत्नपूर्वकमर्थचिन्तां कुर्वता राज्ञा सह रूपकालं
ङ्कारेण श्लेषं दर्शयन् प्रमाणलक्षणसमाप्तिं तस्याश्च प्रमेयचिन्ता-
रैकादशलक्षणीं प्रति हेतुत्वात्तदारम्भसम्भवं सूचयति * इती-
बहुमार्गं विस्तीर्णं च दुर्गं तद्रक्षिणां प्रवेशनिर्गमनाविरोधाशक्तेः
ाप्राकारोपेतं चतुरस्रं प्रवेष्टुमशक्तेः परैरभिभवितुमशक्यं प्र-
ार्थस्य हिरण्यादेः कियानर्थः कश्च किमर्थः किमर्थं वो-
यते केन च क्रमेण कश्च कस्मिन्स्वामीत्यादिविभागेन चिन्ता
े तथा धर्मस्यापि दुरधिगमत्वात् दुर्गत्वेनोपचरितस्य मन्त्रा-
: कृताः कर्मस्मृत्यादयः प्रकारभेदेन प्राप्तिहेतुत्वात् बहवो मा-
ामधेयसामर्थ्ययोर्विध्यन्तर्भावाद्वाक्यशेषस्य चार्थवादान्तर्भा-

---

[1] विशिष्टार्थप्रतिपादनमिति २ पु० पा० ।

वात्पृथगुपन्यासः । स्मृतिशब्दोपलक्षितानि वेदातिरिक्तधर्म
णानि शिष्टाचारसहितानि विद्यास्थानानि प्रकारतयोपचरितवे
वधानेन धर्मदुर्गरक्षाहेतुत्वात् वेदाच्चापकृष्टत्वात्परिखात्वेनोप
तानि साक्षाद्धर्मदुर्गरक्षाहेतुत्वात् वेदानां प्रकारस्थानीयशालाः
गृहवाचिना परिवेष्टनभित्तिरूपत्वगुणवशेन प्राकारत्वोपचा
गृहतेः सम्वरणार्थत्वात् सम्वरणेन च सम्वेष्टनापरपर्यायेण श
तपराभवात् दुर्गस्य रक्षणात् वेदाख्यशालया प्राकारेण गूढं रा
मित्यर्थः । साक्षाद्रक्षाहेतुत्वसूचनायोपशब्देन सामीप्यमा
चोक्तम् प्रमाणस्य प्रमेयतद्भावपरिच्छेदकत्वाद्रक्षितत्वोपचा
बहुदातर्युदारशब्दप्रसिद्धेर्विस्तीर्णबहूनामवकाशदानादुदारशब्दे
लक्षितम् पराक्रान्तेदुर्गे तान्सम्प्रविश्येत्यनेन साधितम् । दुर्ग
व्यवहारात्साधने प्रवेशत्वेनोपचारः । वेदार्थस्याप्यर्थशब्दवाच्
सामान्येन हिरण्यादिना श्लिष्टस्तस्यापि हिरण्यादिवत्परिमाण
योगप्रयुक्तिक्रमाधिकार्यादिप्रविभागेन द्वितीयादौ चिन्तां करोत
र्थः । प्रथमपादे प्रमाणचिन्तापर्यवसानादर्थचिन्तैव त्रिपाद्या
कृतेत्याशङ्कानिरासाय * इदानीमित्युक्तम् * अर्थवादपादगतस्य
चारस्यार्थपरत्वाभावेऽपि नामधेयपादगतस्यार्थपरत्वशङ्कानिवृ
समस्तशब्दः ।

इतिकरणः समस्तोक्तप्रकारपरामर्शार्थः ।

इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रातिवसन्तसोमयाजि
माधवात्मजभट्टसोमेश्वरविरचितायां तन्त्रवार्त्तिकटीकायां स
नवद्यकारिण्यां न्यायसुधाख्यायां प्रथमाध्यायस्य चतु
पादः अध्यायश्च समाप्तः ।

॥ न्यायसुधायाम् ॥

॥ द्वितीयाध्यायस्य प्रथमः पादः ॥

॥ अथापूर्वस्याख्यातप्रतिपाद्यत्वाधिकरणम् ॥ १ ॥

भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते ॥ १ ॥ ३३१

प्रथमे ऽध्याये इत्यादिना प्रसक्तानुप्रसक्तं चेत्यनेन कृतस्य
वर्त्तिष्यमाणार्थकीर्त्तनस्य प्रयोजनमाह * सम्बन्धं तावदिति *
क्रमेणोपक्रमभाष्यविषयत्वज्ञानात् भाष्याननुभाषणं तावच्छब्दा-
पूर्वं तावत् सम्बन्धं करोति पश्चात् व्याख्यामिति प्रतीतेरुपक्रम-
यविषयत्वज्ञानं सर्वेषां वा वृत्तवर्त्तिष्यमाणाध्यायार्थकीर्त्तनानां
ङ्गेन क्रमं बाधित्वा साधारणप्रयोजनाभिधानायेदमिति न भा-
विशेषो ऽनुभाषणीयः। एकादशानामप्यध्यायानां प्रथमाध्यायो-
ामाण्यापेक्षत्वान्न द्वितीयाध्यायार्थमात्रकीर्त्तनमसाधारणसम्ब-
र्थमुक्तमित्याशङ्का लक्षणद्वयस्येत्यनेन निराकृता। भेदादिसापेक्षस्य
ाण्यस्य शेषादिहेतुत्वे ऽप्यन्यानिरपेक्षस्य भेदमेव प्रति हेतुत्वा-
ाधारण्यमन्यथा भेदादीनामप्युत्तराध्यायार्थान् प्रति असाधा-
नुपपत्तेरित्याशयः। यद्वा कर्मोत्पत्तिप्रतिपादनेनोत्पन्नस्योत्पत्ति-
यानर्थक्यप्रसङ्गात्तत्परिहाराय शब्दान्तरादिभिर्भेदः प्रतिपाद्यते
द्प्रामाण्यस्य ह्यानर्थक्यं परिहरणीयमिति प्रामाण्यापेक्षो भेदः
घातादीनां त्वाज्याद्यर्थत्वे ऽप्यदृष्टार्थत्वेनार्थवत्त्वोपपत्तेः। सर्व-
पे चैवमेव वक्तुं शक्यत्वान्न प्रामाण्यबलेन शेषादिसिद्धिरिति
ाधारण्यं स्पष्टम्। किं च को धर्मः कथं लक्षणः कान्यस्य सा-
ानि कान्यस्य साधनाभासानि किं परश्चेति चतुर्विधा धर्मजिज्ञा
प्रथमसूत्रेणोपक्षिप्ता तत्राध्यायद्वयप्रतिपाद्यप्रमाणस्वरूपविषयं
ज्ञाद्वयं श्रुत्यर्थाभ्यां द्वितीयसूत्रेण कृत्वा तस्य निमित्तपरीष्टिरि-
देना प्रथमाध्यायेन वेदप्रामाण्ये साधिते तद्बलेन चैत्यवन्द-
नानां धर्मत्वव्युदासेन ज्योतिष्टोमादीनामेव धर्मत्वमिति धर्म-

स्वरूपे ज्ञाते ऽपि इयन्त्येव धर्मस्वरूपाणीति कार्त्स्न्येन धर्मस्वरू
दनिरूपणाधीनज्ञानमित्यध्यायद्वयस्य चोदनासूत्रपरिकरत्वात
तरासाधारणेह सङ्गतिरिति । यथोक्तम् ।

अथ वा द्वयमेवेदं सर्वशास्त्रमुखं मतम् ।
द्व्यध्याय्याश्चोदनासूत्रं शेषाणां शेषलक्षणम् ॥
चोदनासूत्रनिर्दिष्टो यः प्रामाण्यपरिग्रहः ।
सप्रकारः स आद्येन लक्षणेन प्रपञ्चितः ॥

इति सम्प्रत्येतदेवभाष्यमवयवशो व्याख्यास्यन् वृत्तानुब
न्धभाष्यावयवद्वयं प्रतीकेनानुभाष्याक्षिपति * तत्रेति* धर्मप्रमा
विध्यात्मकस्य वेदस्य तत्र प्रामाण्यव्युत्पादनात्कथमयुक्तमिति :
पृच्छति * कुत इति * अभिप्रायमाह * नैव हीति * सजातीय
जातीयार्थान्तरव्यावृत्तासाधारणधर्मप्रतिपादको रूढ्या लक्षणश
स्तार्किकाणां प्रसिद्धस्तदभ्युपगमेनाप्येतत्समर्थयितुं शक्यमित
त्प्रतिपादनार्थो ऽयमारम्भः परमार्थतस्तु नानाकर्मलक्षणमित्यादि
त् व्युत्पादनमात्रार्थः प्रमाणलक्षणशब्दो ऽपीति न चोद्यावक
विध्यादावपि परिहारदर्शनादादिशब्देन तद्ग्रहणं प्रत्यक्षाद्यभि
ये प्रमाणशब्दे तल्लक्षणमुपसंह्रियेत तस्य त्वसौत्रत्वेनाध्या
त्वाभावादनुपसंहार्यत्वे वक्तुम् सूत्रकारेणेत्युक्तम् * अभि
स्पष्टयति * तन्नामेति * नामशब्देन रूढ्यर्थत्वं दर्शितं र
कारेणेत्येतद्व्याचष्टे * अनुमानादीनीति * प्रत्यक्षलक्षणमपि
सूत्रितं प्रत्यक्षसूत्रस्याप्यनिमित्तपरत्वादित्याह * प्रत्यक्षम
ति * ननु चोदनासूत्रेण चोदनाया धर्मप्रामाण्याभिधा
धर्मप्रमाणस्य चोदनात्वं लक्षणमुक्तं भवत्यत आह *
चेति * धर्मानुवादेन प्रमाणविशेषविधिपरं तत्र प्रमाणस्य च
नात्वलक्षणविधिपरं न चार्थात्तत्परत्वमन्यतः सिद्धत्वादित
* अस्मिन्नेवेति * साध्यसाधनसम्बन्धरूपधर्मप्रमाणमूलस्याग
तशब्दस्य येषां तूत्पत्तावित्यत्र वक्ष्यमाणत्वादित्यर्थः । नन्वसू
तस्यापि प्रत्यक्षादिलक्षणस्य वृत्तिकारोक्तत्वादुपसंहारो भविष्यत
आह * यदपीति * हेतुमाह * सूत्रेति * अध्यायार्थो ह्युपसंहार
सूत्राश्रितत्वाच्चाध्यायव्यवस्थायाः सूत्रारूढस्यैवाध्यायार्थत्वमि
भावः । सूत्रारूढो ऽध्यायार्थ इति शाकपार्थिवादित्वान्मध्यमप
लोपेन समासः । न च तद्व्याख्यातएवार्थे सूत्रतात्पर्यं कल्प्यं
तिज्ञातचोदनाप्रामाण्यतत्सिद्ध्यर्थेतराप्रामाण्यतदुभयोपपत्तिप्रति
दनरूपसमस्तलक्षणार्थव्यतिरिक्तरूपत्वादित्याह * कथं चेति *

सूत्रावयवमात्रस्य लक्षणपरत्वोक्तावपि औचित्यकथनार्थम् *सू-
णीत्युक्तम् * न च तेनापि लक्षणपरत्वमुक्तम् उपक्रमोपसंहार-
लोचनेनापरीक्षापरत्वावसायादित्याह * अपि चेति * तद्विवृ-
ति * लोकेति * विध्याद्याक्षेपस्य विधेरिदं रूपमित्यादिना प-
रे विवरिष्यमाणत्वादिहाप्रपञ्चः समाधातुमुपक्रमते * तस्मा- ३
ते * आद्यावयवस्य तावत्समाधानप्रकारमाह * तत्रेति * प्र-
ालक्षणमिति यदुक्तं तच्चोदनालक्षणसूत्रोक्तार्थानुवादार्थमित्य-
। द्वितीयावयवसमाधानप्रकारमाह *विध्यादीति* विध्यादी-
प्रामाण्येन या निर्णीतिः स्थिता सैव तत्त्वनिर्णीतिरभिप्रेतेत्यर्थः ।
ध्यायसङ्गत्यै समस्ताध्यायार्थानुवादो युक्तो नैकसूत्रार्थानुवादः।
सर्वेण वृत्तानुकीर्त्तनभाष्येणावयवशः समस्तानुवादो नैतावते-
यते तथापि विध्यर्थवादेत्यादिना त्रिपाद्यर्थानुवादात्समस्तप्रथ-
दार्थः पूर्वावयवत्वेनानुवाद्यो ऽत आह * समस्तो हीति * अ-
यद्वयस्यापि तत्परिकरत्वे त्रिपाद्यर्थस्योत्तरावयवैरनुवादात्प्रथम-
ार्थमात्रानुभाषणार्थत्वमस्य दर्शयितुं तस्य तावत्परिकरत्वमस्ती-
प्रेत्य प्रमाणान्तरनिरासेन वा सम्मुग्धवेदप्रामाण्यं तन्मात्रेण
स्यतीत्याभिप्रेत्य प्रथमपादोक्तिः कथं चोदनासूत्रेण प्रमाणलक्ष-
धानमित्यभिप्रेत्य स्वरूपवचनव्यक्तिपक्षे तावदुपपादयति *तत्र
* यश्चोदनाप्रमाणकः स धर्म इत्युक्ते चोदितत्वं धर्मस्य ल-
मुक्तं भवतीति भावः। चोदनाप्रमाणकत्वं वा धर्मस्य लक्षणत्वेनो-
त्यध्याहार्यं भाष्ये धर्मशब्दानुपादानात्कथमेतदर्थलाभ इत्याश-
ह * अत इति * कर्मव्युत्पत्तावपि कथं विशेषलाभो ऽत आह
त्यपि चेति * इदानीं प्रमाणवचनव्यक्तिपक्षे ऽप्युपपादयत्य-
ति प्रत्यक्षादिविषयत्वाशङ्कां निराकर्त्तुमाह * यद्यपि चेति *
गविधिपरत्वात्तस्य कथं तदनुवादेन लक्षणविधिपरत्वमित्याश-
ादुक्तं भवतीति दर्शयितुम् * एतावतैवेत्युक्तम् * चोदनात्व-
लोकवेदसाधारण्येनातिव्यापकत्वादलक्षणत्वमाशङ्क्याह * न
* विजातीयव्यावृत्त्या क्रियावत्तस्येनाद्द्रव्यव्यावृत्त्या कथं चि-
णत्वं सम्भवतीति भावः । औत्पत्तिकसूत्रेण वा नित्यत्वाद्य-
ाने वैदिकत्वलाभान्नातिव्याप्तिरित्याह * अपि चेति * एवं
काभिमतं लक्षणशब्दार्थमुपपाद्य स्वतन्त्रप्रक्रियया न्यायव्युत्पा-
त्वात्समञ्जसमेवानुभाषणमित्याह *अथ वेति * एवं त्रिप्रका-
वयवव्याख्यानेन पूर्वार्द्धं प्रपञ्चयोत्तरार्द्धं व्याचष्टे * तथेति *
ादीनां प्रामाण्योपयोगिद्वारविशेषः प्रवर्त्तकत्वस्तावकत्वस्मार-

क्रत्वरूपस्तत्त्वशब्दार्थो ऽभिमतः । किमित्यसौ द्वारविशेषो न च
मनुक्रान्तो ऽत आह * अवसराभावादिति * भेदलक्षणास
तद्धेतुमात्रानुभाषणस्योपयोगादिति भावः । स्मृतिप्रामाण्यो
गिनं द्वारविशेषमाह * श्रुतिमूलत्वमिति * स्मृतिमूलस्येत्यध्य
रः एवमवयवद्वयमाक्षेपपूर्वकं व्याख्यायेदानीं तृतीयावयवे वा
र्थविचाराभावाद् गुणविधिग्रहणानुपपत्तिमाशङ्क्याह * नामधे
ति * सत्यं नामधेयप्रामाण्यमेव सप्रपञ्चमुक्तं तस्य तु चोदना
तत्वादाग्नेयादौ तदसम्भवे ऽर्थवादत्वानुपपत्तेः परिशेषाद् गुण
धित्वमेव भवतीति दर्शयितुं तद्ग्रहणमित्यर्थः । चतुर्थावयवे स
न्धे विशेषणस्य प्रयोजनमाह * सन्दिग्धार्थेति * प्रथमपाद
चेत्प्रमाणलक्षणोक्तिः कथमध्यायस्य प्रमाणलक्षणाख्येत्याशङ्
* एवमिति * उक्तेन प्रकारेण सामान्यविशेषाभ्यां समस्तस्य प्र
ण्यव्युत्पादनार्थत्वादिति भावः । तत्र प्रसमर्त्तव्यामिति भाष्यम
ययोर्हेतुहेतुमद्भावप्रतिपादनार्थतया व्याचष्टे * तत्रेति * त
ष्यमाणार्थकीर्त्तनभाष्यमनन्तरमित्यादि तत्र प्रधानाप्रधानानी
यं भेदलक्षणासङ्गतत्वेनाक्षिपति * ननु प्रधानेति * प्रधा
धानचिन्तादिशेषशेषिरूपत्वात्साक्षात्तृतीये सङ्गच्छते । चतुर्थे
फलक्रतुप्रयुक्तत्वविवेकार्थं यथोक्तं पुनः श्रुत्यादिषट्केन क्रत्वर्थ
षार्थयोः प्रयोज्यत्वाप्रयोज्यत्वशेषधर्मविचारणा । फलवि
वादत्वकालार्थाङ्गप्रधानता फलक्रतुप्रयुक्तत्वविवेकार्थं विचा
इति अत्र तु कथं सङ्गतिरिति भावः । अत्राज्ञाताक्षेपाभिप्रायास्
द्वैधमित्यादिगुणप्रधानविचारदर्शनेनोत्पन्नभ्रमाभेदस्यैव लक्षणा
निर्द्धारयितुमशक्नुवन्तः शेषशेषिविचाररूपेण सामान्येन पौनरु
मनेनाशङ्कितमिति मन्यमानाः परिहारमाहुरित्याह * केचिदि
६।२ दूषयति * तदयुक्तमिति * यद्यवघातसम्मार्गादीनां गुणक
स्तोत्रशस्त्रयोश्च प्रधानकर्मत्वमधिकरणान्तरसिद्धं स्यात् ततः पौ
रुक्त्यशङ्कासम्भवात् तत्परिहाराभिधानं युज्येत शेषशेषिरूपतास
न्येन तु पौनरुक्त्यमनेनाशङ्क्य परिहारं द्रव्यगुणसंस्कारेष्वित्यत्र
स्कारशब्देनावघातादेर्द्रव्यशेषत्वाभिधानात् द्रव्यशब्देन द्रव्यस्य
त्वाभिधानेन तत्प्रति कर्मणः प्राधान्याभिधानादित्यर्थः । तस्म
समाधेयमित्याह * तेनेति * सत्यन्तत्वेन लक्षणार्थत्वेन ल
प्रति प्राधान्येन भेद एव लक्षणप्रतिपाद्यो ऽपूर्वभेदो ऽपि तु प्रति
एव । न चैवं लक्षणभेदापत्तिरनुनिष्पादित्वात्तस्येत्युक्तम् * तम
ति * अतस्तत्प्रसिद्ध्या प्राधान्यं विचार्यमाणं नासङ्गतमिति भा

भाष्यार्थः । अनन्तरं भिन्नान्यभिन्नानि च कर्माणि परीक्षि-
तदनुनिष्पाद्यपूर्वभेदाभेदसिद्ध्यर्थं च द्रव्यं प्रति प्रधानान्यप्र-
नीति। ननु अभेदस्यापि परीक्षणे लक्षणभेदः स्यादत आह *क-
स्तावदिति * उत्सर्गापवादाभ्यां तस्यैव परीक्षेत्यर्थः। उत्तरार्द्धं
ष्टे * तदनुनिष्पादिना त्विति * एतदेव प्रपञ्चयत्सम-
ायाधिकरणान्यनुक्रामति * तत्रेति * तत्र शब्देनापूर्वनिष्पा-
र्यन्तेन भावार्थाधिकरणेन कर्मशब्देभ्यो ऽपूर्वं प्रतीयतइति व्यु-
यता कर्मभेदानुनिष्पादित्वे ऽपूर्वस्य सिद्धे * सतीत्युक्तम् *
विषयत्वेन प्रसिद्ध इत्यर्थः । यत्पुनः तृतीयविषयः सन्नन्यार-
तदपवादत्वेनेत्यसङ्गतिनिरासार्थम् * पुनरित्युक्तम् * अप-
दर्शयति * सत्यपीति * ननु चतुर्थे संस्कारे च तत्प्रधानत्वा-
न्नावहन्त्यादीनां दृष्टार्थत्वेन प्राप्तत्वादविधेयत्वमाशङ्क्य नियमा-
त्वेन देशादिवद्विधानं भविष्यतीति वक्ष्यमाणत्वात् कथमपू-
र्वाभिधानमत आह * यत्त्विति * पुरोडाशनिष्पत्त्यर्थस्य त-
भावस्यानेकानि स्वनिष्पत्तिसमर्थानि साधनान्यालोचयतो
घातविधिना साधनविशेषसमर्पणेन तत्रोपसंहारः क्रियते स
नियमनिबन्धादिशब्देनोच्यते अर्थाक्षेपेण हि प्राप्स्यन्नप्यवघात-
लीभावजनकत्वेन नियम्यमानो जन्यजनकनियमस्यादृष्टं प्रयो-
पेक्षते ततश्चावघातेन तण्डुलीभावे कृते तज्जन्यत्वात्तण्डुले-
ायो निष्पाद्यमानो नावघातक्रियाजन्यो वक्तुं शक्यते तण्डु-
दनानिरपेक्षावघातस्वरूपजन्यत्वाभ्युपगमे कृष्णलेष्वप्यतिदे-
ो ऽवघातो न वारयितुं शक्यते तस्मान्नियमादृष्टस्य चतुर्था-
णे क्रियाजन्यत्वानभ्युपगमान्न तद्विरोध इत्यर्थः । अन्ये त्व-
स्य विधिकल्पनानिरपेक्षस्याप्रापकत्वेन मन्थरत्वादप्राप्तावस्थस्य
स्वरूपस्यैव विधेयत्वात्प्रयोजनकल्पनोचिता न फलमात्रत्वे-
थतस्य नियमस्येति मन्वाना नियमादृष्टस्यापि क्रियाजन्यत्वमि-
स्तादर्थ्यमात्रनिराकरणपरतयेदं वार्त्तिकमेवं व्याचक्षते क्रि-
यक्रियाकृतशब्दाभ्यामीप्सितत्वमुद्देश्यत्वाद्यपरनामधेयमभिप्रे-
पाद्यत्वमात्रं न तथा व्यपदिश्यतइति च क्रियोत्पाद्यत्वे स-
ुषङ्गिकत्वात्तद्व्यपदेशमात्रं निराकरणपरमिति आनुषङ्गिक-
च कृष्णलेष्ववघाताप्रयोजकत्वमिति भावः। अपवादसिद्धि-
हरति *तेनेति* गुणकर्मस्वप्यदृष्टार्थेषु अपूर्वाङ्गीकरणादेका-
ति पूरणीयं प्रोक्षणादिजन्यस्य वा व्रीह्याद्याश्रितस्यातिशयस्य
ानीयत्वेनात्माश्रितावान्तरद्वाररूपापूर्वशब्दवाच्यत्वाभावात्त-

स्य चानन्तरभावित्वेन तत्सिद्ध्यर्थापूर्वान्तरकल्पने प्रमाणा
त्प्रोक्षणजन्ये ऽतिशये प्रमाणान्तरागोचरत्वसाम्येनौपचारिव
वेशब्दप्रयोग इत्यविरोधः । अस्य चेत्यादिभेदलक्षणार्थ इत्ये
सुगमम् * तदपवादार्थमिति * गुणत्वलक्षणस्यापवादः प्र
लक्षणं तदपवादार्थं प्रधानत्वलक्षणस्यापवादो गुणत्वलक्षणं
वादार्थमुत्तरमित्यर्थः । प्रक्रियाशब्देन विरुद्धलक्षणया प्रकरण
मुक्तं । केचित्तु प्रथमाध्यायप्रतिपादितप्रामाण्यस्य शास्त्रस्य स
बन्धभेदाभ्यां भेदो ऽस्मिन्नध्याये प्रतिपाद्यतइत्युक्तं तत्र
संयवनस्य पिण्डोत्पत्तिः गोदोहनस्य पयःप्राप्तिः अवघातस्य
विकारः प्रोक्षणस्य संस्कार इति चतुर्विधमन्योन्यनिरपेक्षं
स्तत्सामवायिकाङ्गशास्त्राणां भेदकं द्वितीयाश्रुत्या एषां साध्य
त्वावसायात् क्रियारूपानुबन्धनिष्ठत्वाभावेन तद्भेदनिमित्तभे
गात्तथारादुपकारकाङ्गसाध्यः करणोपकारः प्रधानसाध्यानि
रणावान्तरकार्याणीति तद्भेदेनाङ्गप्रधानशास्त्रभेदः समस्ताङ्ग
साध्यश्चैश्वर्यलक्षणो ऽधिकारः कामजीवनाधिकाररूपेण भि
तच्छास्त्रभेदाध्यवसानमिति शब्दान्तरादिप्रमाणकविषयापर
यानुबन्धभेदाच्च यागहोमादिशास्त्राणां भेद इति तन्निराकरण
एवार्थो वर्णनीयो नान्य इति भाष्यं व्याचष्टे * एष एवेति *
माशयः अङ्गाङ्गित्वाद्यवधारणार्थत्वेनानुष्ठानोपयोगित्वाच्छास्त्र
पकर्मभेद एव विचार्यो नानुपयोगी शास्त्रभेदो ऽनुष्ठानपर्यव
त्वान्मीमांसाशास्त्रस्येति । किं च साध्यानुबन्धभेदयोः शास्त्र
दद्वारा वा शास्त्राभेदकत्वं तन्निरपेक्षं वेति विकल्पनीयं न त
द्यः पक्षः । शास्त्रभेदावधारणात्प्रागेव शास्त्रार्थभेदे ऽवधारिते
नसिद्धेरनुनिष्पादिशास्त्रभेदावधारणानर्थक्यान्नैरपेक्ष्यं तु न
वत्येव साध्यानुबन्धभेदयोः शास्त्रार्थेन भावनया नियोगेन वा
न्धं विना शास्त्रेणासम्बन्धाद्भेदकत्वानुपपत्तेः । अस्तु वा ऽनुबन्
नाधिकारलक्षणसाध्यभेदेन च शास्त्रार्थभेदाध्यवसायात्तद्
शास्त्रभेदः साध्यान्तराणां तु शास्त्रार्थाभेदकत्वात्कथं शास्त्र
त्वमिति वाच्यम् । उत्पत्त्यादीनामशाब्दत्वेन शास्त्रार्थनियोगानव
कत्वात्तद्भेदकत्वानुपपत्तिः । तदेवं भाष्यकारेणैव शास्त्रभेदस्य ल
र्थत्वनिराकरणात्प्राभाकराणां प्रधानप्रधानानीति भाष्यस्य श
दलक्षणार्थप्रतिपादनपरतया व्याख्यानमतिमूढतामापादयती
लमनेन कर्मभेदस्य लक्षणार्थत्वे कथं प्रमाणलक्षणानन्तरसङ्ग
त्याशङ्क्य भाष्यकृतोक्तम् । एष एवाध्याय सम्बन्ध इति तद

ास्मर्त्तव्यमित्यनेन च हेतुहेतुमद्भावलक्षणसम्बन्धप्रतिपादनेन भे-
[लक्षणस्य चावसरप्रतिपादनाल्लक्षणान्तरावसरनिरासपरतया इदं
ाष्यं व्याचष्टे * न चान्यस्येति * एतदेव प्रश्नपूर्वकमुपपादय-
ते * कुत इति * उपदेशो ज्ञात इत्यनुषङ्गः सर्वेषामुत्तरोत्तराध्या- ३
ानां पूर्वपूर्वापेक्षत्वं दर्शयितुं श्लोकानुक्तमपि प्रमाणलक्षणापेक्षत्वं
र्शयति * प्राक् तावदिति * तत्रापीत्यादिना ऽपेक्षत इत्यन्तेन श्लोक-
याख्यानं तत्रावृत्तिप्रसङ्गानामुपदेशातिदेशसाधारण्ये ऽपि भूम्नोत्त-
षट्कस्यातिदेशविषयत्वाभिधानं लक्षणान्तरावसरनिराकरणपरत्वे
ार्थं प्रस्तुताशङ्कानिराकरणमत आह * ततश्चेति * तदिहेत्यादि-
ाष्ये भेदस्य स्वतो वैलक्षण्याभावात् षड्विधत्वानुपपत्तिमाशङ्क्य
याचष्टे * षड्विधइति * नामधेयक्रमस्त्वविवक्षित इत्याह * व-
यमाणेति * शब्दान्तरादीनां भेदत्वाभावात्सामानाधिकरण्यानुप-
त्तिमाशङ्क्य वैयधिकरण्येन व्याचष्टे * इतिकरण इति * शङ्का-
यमप्यन्यथा परिहरति * अथ वेति * संज्ञायाः शब्दान्तरवदभि-
ानान्तरत्वेनाभिधेयान्तरोपस्थापकत्वात्संख्यायाश्च गुणत्वाविशेषा-
[दोपादानमनर्थकमाशङ्क्याह * संज्ञाशब्दान्तरयोरिति * धा-
न्तररूपं शब्दान्तरं भविनानुरञ्जकव्यापाररूपेण स्वार्थं व-
त्स्वार्थानुरक्ताया भावनायाः धात्वर्थान्तरानुरक्तभावनातः
पष्टं भेदं बोधयति संज्ञा तु न स्वेन भावनानुञ्जकव्यापार-
पेण धात्वर्थं वदति नाम्नां निष्पन्नरूपाभिधानस्वभाव-
ात्त्वासौ धात्वर्थमात्रभेदे व्याप्रियते तद्भेदात्तु शब्दान्तरन्यायेन भा-
नाभेदसिद्धिः। गुणश्च गुणान्तरावरुद्धे कर्मण्यसम्भवात्स्वविशिष्ट-
र्मोत्पत्तिमाक्षिपन्नुत्पन्नस्योत्पत्त्यसम्भवात्कर्मान्तरेभ्यो भेदं बोध-
ति संख्या तु व्यासज्यवृत्तित्वेनैकनिष्ठत्वाभावात्संख्यान्तरावरुद्धे-
ऽपि कर्मसु उपजनापायेनोपपत्तेः स्वविशिष्टकर्मोत्पत्तिमाक्षेप्तुमश-
नुवन्ती प्रमाणान्तरेण कर्मोत्पत्तावयधारितायामनेकत्वमात्रं बोध-
तीति स्वरूपानभिधायित्वात्सञ्ज्ञाशब्दान्तरात्पृथक् व्यासज्यसम-
ायाच्च संख्या भिन्ना गुणान्तरादित्यस्मिन्वार्त्तिके वक्ष्यतइति भि-
ान्यभिन्नानि चेत्येतावतैव हेतुमत्तया वर्त्तिष्यमाणकथनसिद्धेः ष-
विधकथनानर्थक्यमाशङ्क्य वक्ष्यमाणमित्यादिभाष्येण सङ्क्षेपप्रदर्श-
पूर्वकस्य विस्तरवचनव्याख्यातुः प्रतिपादनसौकर्यं श्रोतुश्च प्रतिप-
त्तसौकर्यं प्रयोजनमुक्तं तदिष्टं विदुषां लोके समासव्यासधारणमि-
ि न्यायेन स्पष्टत्वात् तदेतदित्येतदप्यनादिसमाख्याबलेन शास्त्रभे-
लक्षणार्थत्वनिराकरणपरतया ऽतिस्पष्टत्वान्न व्याख्यातम्। यद्वोप-

क्रमोपसंहारपर्यालोचनया सर्वमेवैतन्निराकरणपरं व्याख्येयं हे
तुमल्लक्षणो ह्यध्यायानां सम्बन्धः प्रसिद्धो न प्रासङ्गिको प्राधा
पत्तेः। षड्विधत्वेन साध्यानुबन्धभेदाभ्यां द्वैविध्यमवान्तरविव
त्रयोदशाविधत्वं निराकृतं कर्मशब्देन शास्त्रविषयत्वं शब्दान्तर
ग्रहणेन साध्यादीनि । परोक्ताध्यायार्थनिरासेन स्वाभिमतार्थः
नस्य व्याख्यानतो ज्ञास्यमानत्वादानर्थक्यमाशङ्क्योत्तरभाष्यमिति
चोक्रमोपसंहारभाष्ययोः सत्यमन्यमर्थं पश्यामः । एतत्तात्पर्यं
भाष्ये काक्वा भेदमात्रतात्पर्याभिधानं बलाबलस्यापि वक्तव्यत्वा
त्तमाशङ्क्य व्याचष्टे * सर्वदा चेति * न यत्रैकेन भेदो बो
तत्रैवेतरेणोति भिन्नविषयत्वम्। उपोद्घातादिशब्दार्थं व्याचष्टे *
ति * यत्प्रस्तुतादुपजायते तत्प्रसक्तानुप्रसक्तादीति योज्यम्
पुनरुपोद्घाताधिकरणमत आह * यथेति * अनुसरतीति क
घञं व्युत्पाद्य प्रकृतो यो ऽनुनिष्पाद्यपूर्वको भेदानुसारी कर्म
तत्सिद्ध्यर्थमिति योज्यम्। धात्वर्थस्य हि फलभावनाकरणत्वे तद्
नुनिष्पादी फलापूर्वभेदः सिध्यति कारणभेदानुनिष्पादित्वात्का
दस्य नामार्थस्य तु करणत्वे तद्भेद एवापूर्वभेदापादकः स्यादित्या
प्रकृतानुनिष्पाद्यान्यथादरदर्शनान्नानुनिष्पादित्वमात्रेणापूर्वभेदः
नादरणीयत्वम् । धर्मापेक्षाज्ञानार्थं चेह कर्मभेदस्य प्रतिपाद्य
त्फलसाधनत्वेन कर्मणां धर्मत्वात्तस्य चापूर्वद्वारत्वादनुनिष्पा
ऽप्यपूर्वभेदस्य विवक्षोपपत्तेः। प्रकृतकर्मभेदविशेषणत्वाविरोध
भावशब्देभ्यो ऽपूर्वं किं द्रव्यगुणशब्देभ्य इति सन्देहभाष्यम्।अप
शब्दवाच्यत्वाभावादयुक्तमाशङ्क्य फलपदसम्बन्धद्वारा भावश
द्रव्यगुणशब्दानां चापूर्वगमकताभिप्रेतेति भावः । अनेन च ना
स्य फलभावनाकरणत्वं धात्वर्थस्य वेत्यधिकरणार्थः सूचि
करणभेदाभेदयोरपूर्वभेदाभेदहेतुत्वसूचनायानुगन्तव्यावित्युक्तं
षां फलपदसम्बन्धे कतरस्य सम्बन्ध इति चिन्तानुपपत्तेस्तत्सि
प्रथमं तावदित्यादिभाष्येणैकस्य फलसम्बन्धः सर्वेषां चेति चि
न्तरं कुर्वतो ऽर्थस्याप्यस्य चिन्तान्तरस्य धर्मभेदाभेदफलत्वाल
णसङ्गतिरप्यस्तीति दर्शयितुं किं पदेन पदेन धर्म उच्यते उत स
क इति । प्रथमं चिन्त्यतइत्युक्तम् । भेदस्य च पदार्थस्वरूप
प्रमाणलक्षणावच्छेदलक्षणस्यापि चोदनासूत्रप्रतिज्ञातधर्मस्वरू
त्पादनार्थत्वात्तयैव प्रतिज्ञया सङ्गतिरिति सूचयितुम्* प्रथमे
यइत्युक्तम् * नन्वेवं सति चोदनाशब्दस्य विधिप्रत्ययमात्रव
त्वात्तत्पदेन पदेनेति चिन्ता न युक्तेत्याशङ्क्य * वाक्यमित्युक्त

तुपपादनार्थं विधेरत्र्यंशभावनाविषयत्वं वक्तुम् * क्रियाया इ-
युक्तम् * तच्चोदनासूत्रएव द्वयध्याय्याञ्चोदनासूत्रमित्यनेन प्रमा-
लक्षणवद्भेदलक्षणस्यापि चोदनासूत्रपरिकरत्वाभिधानात्किमाद्य-
क्षितैः पूर्णः समर्थप्रत्ययो विधावित्यनेन वाक्यस्य चोदनात्वाभि
नात् स्पष्टमित्युपेक्ष्य वाक्ये चेति वाक्यंवाक्यार्थसावयवत्वाभि-
नस्य प्रकृतोपयोगमाह * यदेति * भाष्यार्थमजानानः शङ्कते *
त्रापीति * वाक्यवाक्यार्थयोः सावयवत्वे ऽपि चोद्यं भवतीत्यर्थः। ३
र्मस्य वाक्यरूपचोदनागम्यत्वेन वाक्यार्थत्वात्प्रतिपदमित्याशङ्का
युक्ता वाक्यार्थस्य लक्ष्यमाणत्वाद्वाच्यत्वाभिधानं न युक्तमिति
द्यार्थः। एतदेव व्याचष्टे * यदि हीति * किं वाक्यार्थस्य धर्म-
मभिप्रेत्येयमाशङ्का भाष्येण धर्मस्य पदार्थता उक्तेत्यभिमानाद्वा
त्र पदार्थस्यैव श्रेयःसाधनत्वेन धर्मत्वान्न तावद्वाक्यार्थस्य धर्मता
क्तेत्याह * तदुच्यतइति * धर्मस्य वाक्यार्थत्वे ऽपि वाक्यार्थस्य
र्मत्वं नास्तीत्याशयः। न च भाष्येण धर्मस्य पदार्थतोक्तेत्याह * न
त्रेति* श्रेयःसाधनत्वस्य फलपदसमभिव्याहारलभ्यत्वाद्वार्यात्मत्वे
ति वाक्यार्थत्वप्रसिद्ध्युपपादनायोक्ते पदार्थस्य धर्मत्वे सर्वपदा-
मेकवाच्याभावात्सर्वशब्दानर्थक्यमाशङ्क्येतरेत्युक्तम्। पदार्था-
रानुपगृहीतस्यैकपदार्थस्यैव फलपदान्वयाधीना श्रेयःसाधनत्वाव-
तिरित्याशयः। अत्रैव भाष्यं योजयति *तथा चेति* नन्वेवमपि पद-
यमात्राधीनत्वाद्धर्मत्वावगतेर्बहुविषयसर्वशब्दानर्थक्यं द्रव्यादेरपि
लवदुपकारित्वेन धर्मत्वात्तदभिधायिपदापेक्षत्वेन सर्वशब्दस्या-
त्त्वे सत्येकपदानर्थक्यं स्यादित्याशङ्क्याह *साक्षादिति* कान्यस्य
धनानीत्यादौ अङ्गस्य धर्मसाधनत्वाभिधानेन धर्मत्वानभ्युपग-
ञ्च धर्मानेकत्वापत्तिरित्याशयः। यथा श्रुतं त्वसमञ्जसमेव स्यादि-
ाह *न त्विति* नन्वत्र किं पदेनेति भाष्यात्सर्वेषां धर्मत्वम् एक-
य वेति विचारः प्रतिभाति यदेकस्मादपूर्वम् इत्यस्माच्च सर्वेषां
ऽपूर्वसाधनत्वमेकस्य वेति यआहुः किमपि भावयेदिति ते
र्गकामपदसम्बन्धात्स्वर्गं भावयेदिति ब्रूयुरिति मुख्योपोद्घाता-
करणभाष्याच्च एकस्य फलसम्बन्धः सर्वेषां चेति तत्र किं प्रा-
न्येन विचार्यमित्याशङ्क्याह * यच्चेति * फलपदसम्बन्धावग-
धर्मत्वकल्प्यत्वादपूर्वसाधनत्वस्य फलपदसम्बन्धएव मूलत्वा-
धान्येन विचार्य इत्यर्थः। किं तावदिति पूर्वपक्षप्रतिज्ञामुपपादयितुं
ाचष्टे * किं प्राप्तमिति * प्रतिज्ञासूचितामुपपत्तिं प्रश्नपूर्व-

१ वाक्येति २ पु० ना०।

क्रमाह * कुत इति * सर्वेषामगृह्यमाणविशेषतया ऐकरूप्यात
पदसम्बन्ध इति हेतौ तृतीयामङ्गीकृत्य तावद्व्याचष्टे *यदि ही
सर्वेषां फलपदसम्बन्धे सति ऐकरूप्येण सम्बन्धः सिद्ध्यतीति
म्भावे तृतीयामङ्गीकृत्यान्यथा व्याचष्टे * यदि चेति * व्याख्या
समुच्चयार्थश्चशब्दः प्रधानेन चेत्युपपत्त्यन्तरं गुणसम्बन्धे ऽप्य
त्वोपपत्तेरयुक्तमाशङ्क्योपपादयति * सर्वश्चेति * ननु सर्वेष
लपदसम्बन्धस्य प्रतिज्ञार्थत्वे धर्मग्रहणमसङ्गतं स्यादित्याशङ्क
लतः सङ्गतिं दर्शयन्नुत्तरार्द्धं व्याचष्टे * तस्मादिति * न
सति धर्मभेदाभेदफलत्वाद्विचारस्य तस्मादेकमपूर्वमिति सिद्धा
पसंहारवत्पूर्वपक्षे भिन्नो धर्म इति वाच्यमित्याशङ्क्याह *
त्विति * प्रत्येकं फलसाधनत्वे सति भेदेन श्रेयःसाधनत्वाद्धर्म
सिद्ध्येन्न च सर्वेषामपि फलपदसम्बन्धे नियमेन प्रत्येकं फलसा
तास्तीत्याशयः। पुरुषार्थैकसिद्धित्वात्तस्य तस्याधिकारः स्या
षष्ठाधिकरणन्यायेन यथा सत्रिणः प्रत्येकं कृत्स्नं फलं लभन्ते
नामधात्वर्था अपि किं प्रत्येकं फलं साधयन्त्यथ एकप्रयोजनार्थ
म्बन्धात्पृथक्सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगादित्येकाद
धिकरणन्यायेन यथा दर्शपूर्णमासौ संहत्य साधयतस्तथैते
संहत्य साधयन्तीति यथेष्टं कल्पनोपपत्तेः सर्वेषां फलसाधनत्वे
पृथक्फलसाधनत्वनियमाभावान्नैकान्ततो धर्मभेदः सिद्ध्येदि
प्रत्येकमपि फलसाधनत्वे ऽग्निहोत्रे दध्यादिवददृष्टार्थत्वेनैकार्थ
दन्योन्यानैरपेक्ष्याद्विकल्पे सत्यथ वा ऽग्निहोत्रदर्शपूर्णमासादि
न्योन्यनैरपेक्ष्याभावात्समुच्चये सति नात्यन्तिको धर्मभेदः सिध
च्चाग्निहोत्रदर्शपूर्णमासादिवदेकान्तत एकशब्दोपादानमप्यस्त
सूचयितुम् * तथेत्युक्तम् * आदिशब्दसूचितानवक्लृप्तिर्यथेष्ट
ब्देन स्वीकृता। ननु ऋद्धिकामाः सत्रमासीरन्नित्याख्यातोक्तस्य बहु
र्तृत्वस्य संहतानां कर्तृत्वाद् द्रव्यभेदे ऽपि कर्तृरूपैक्यादनुपपत्तेः
त्येकं कर्तृत्वावसायात्पुरुषार्थस्य फलस्यैकस्मात्कर्तुः सिद्धेः त
तस्य कर्तुः प्रत्येकमधिकारो युक्तः। श्येनेनाभिचरन्यजेत चित्रया
जेत पशुकाम इत्यादौ तु नामधात्वर्थानां फलभावनां प्रत्युपादय
समुदाये वाक्यपरिसमाप्तेः संहत्यकारित्वावगमात्प्रत्येकसाधन
त्त्यवगमहेतोर्बहुवचनस्याभावात्कथं प्रत्येकं फलसाधनतेत्याशङ्क्य
* तत्रेति * नामधात्वर्थयोरस्मिन्पूर्वपक्षे ऽरुणैकहायन्यादिवद्वि
षणविशेष्यभावानभ्युपगमाद्दर्शपूर्णमासादिवच्चैकशब्दोपादानाभा
वात्साहित्यानवगतेरुपादेयत्वे ऽपि समुदाये वाक्यसमाप्तययोग

ावे ऽपि नामार्थस्य तृतीयया व्रीह्यादिवन्निरपेक्षसाधन-
ात्वर्थस्याप्यन्यसापेक्षस्य साधनत्वे सामर्थ्याभावात्सम-
धेरिति पदमात्रविधौ सामर्थ्याधीनत्वस्मृतेः प्रत्ययार्था-
क्तिप्रसङ्गान्निरपेक्ष्यावगतेर्बहुवचनाभावे ऽपि पृथक्फल-
गतिः सम्भवतीत्यर्थः। समुच्चयस्तर्हि न सम्भवेदित्या-
सत्रिणां प्रत्येकं साधनत्वशक्त्यवगमे ऽपि समुच्चयस्तथा-
ानामपीत्येतावता दृष्टान्ताभिधानम्। नन्वत्र सत्रिवत्
ावात्कथं समुच्चयावगतिरित्याशङ्क्य * फलेत्युक्तम् *
ादेः साहित्ये ऽपि फलानतिशयादगत्या विकल्पो ऽङ्गीकृ-
प्रत्येकं साधनत्वे ऽपि समुच्चयेन फलभूयस्त्वस्य सार-
ा कल्पयितुं शक्यत्वान्न विकल्पाङ्गीकरणं युक्तमिति
वेवं सति दर्शपूर्णमासवदेकशब्दोपादानाभावात्कथं संह-
त्वपक्षसम्भावनेत्याशङ्क्याह * अथ वेति * अन्योन्यने-
त्य साधनत्वायोगे ऽपि दर्शपूर्णमासवत्साधनानां साहि-
ोपादानाभावे ऽप्येकवाक्योपादानात्सम्भवतीत्यर्थः। स-
्यसमाप्तिसम्भावनार्थो ऽरुणादिदृष्टान्तः। विकल्पपक्ष-
ावयत्यथ वेति। दर्शपूर्णमासवदेकशब्दोपादानाभावेन
ोदरुणादिवच्चान्योन्याकाङ्क्षाभावेन वस्तुसामर्थ्यादपि
वगतेः। समुदाये प्रमाणाभावात्प्रत्येकं वाक्यसमाप्त्या
तिभातीत्यर्थः * इति प्राप्तइति * सिद्धान्तभाष्यं प्रति प-
सर्वेषां फलसाधनत्वे पूर्वपक्षिते तत्प्रतियोगित्वेनैकस्य
त्वे ऽभिधातव्ये ऽपूर्वसाधनत्वाभिधानादयुक्तमाशङ्क्योप-
द्धान्तयति *अत्रेति* अदृष्टकल्पनागौरवापत्त्या सर्वेषां फ-
ा निराकर्तुमेवमुक्तमित्याशयः। सर्वेषां हि फलसाधनत्वे
हित्य पक्षे ऽपि उत्पत्त्यपूर्वभेदो ऽवश्याङ्गीकार्यः। विक-
त्येकमपूर्वकल्पना प्रसज्येतैव तत्र यद्येकस्य फलापूर्वसा-
मार्थस्य धात्वर्थस्यानर्थक्यं स्यात्ततो ऽगत्या बह्वदृष्टकल्प-
पि सर्वेषां फलापूर्वसाधनत्वं कल्प्येत। न त्वेतदस्ति धा-
धनत्वे नामार्थस्य धात्वर्थनिष्पादकत्वेन तादर्थ्योपपत्तेः
चासाधनत्वे निराश्रयस्य तस्य साधनत्वायोगेनाश्रयतया
नामार्थोपकारित्वोपपत्तेः। ततश्चादृष्टानुमानस्य प्रसङ्गो
नायां साल्पीयसी भविष्यतीति भाष्यार्थो ऽनेन सूचितः।
चष्टे * यदि हीति * तस्मादित्युपसंहारभाष्यं फलस-
ऽपूर्वसम्बन्धाभिधानात्पूर्वपक्षप्रतियोगित्वोपपत्तावप्युप-

क्रमानुरोधेनैकस्मादपूर्वमित्युपसंहृत्तेऽन्ये पूर्वैक्योपसंहारादयु
शङ्क्यैकस्मादित्यनेनैकस्य फलापूर्वसाधनतया उक्तस्य तस्माच्छ
परामर्शमभिप्रेत्यैकस्मात्फलसम्बन्धिनो ऽपूर्वमित्येवं व्याख्यां
यन् सिद्धान्तमुपसंहरति * तस्मादिति * भाष्यकृता तु स
फलसम्बन्धे फलांशस्याविधेयत्वेन नामधात्वर्थविशिष्टफलभा
विध्यनुपपत्तेर्नामधात्वर्थानामेकविशिष्टविधिप्रसूतार्थविधिविधे
योगाच्छ्रौतव्यापारनानात्वेन वाक्यभेदापत्तेरेकस्यैव फलो
विधेयत्वादेकमेवापूर्वं प्रमाणवदिति सूचनायापूर्वैक्यमुक्तम् ।
च सर्वेषां फलसाधनत्वपक्षे प्रत्येकं विकल्पेनैव फलसाधनत
त्तधर्मभेदात् सिद्धान्ते चाभेदात्साक्षादप्यस्याश्चिन्ताया लक्षण
तिः सूचिता भवति । यस्त्वेकस्य फलवत्त्वे ऽन्यस्य तदुपकारित्वे
रूप्याख्यो वाक्यभेदो ऽभिहितः तं परिहरति * न चेति * ना
स्य फलसम्बन्धे सोमेन यजेतेत्यादौ चैतत्परिहारायोगाद्भावार्थ
करणसिद्धान्तत्वाच्च पूर्वं नामधेयत्वस्य वक्तुमशक्तेरपरितोषा
मतेनान्यथा परिहरति * अगत्या वेति * अदृष्टकल्पनातो ल
ज्यायसीति सूचनायागत्येत्युक्तम् । इह नामार्थस्य फलसम्बन्धे
गवता श्येनेनेति मत्वर्थलक्षणा धात्वर्थपक्षे तु श्येनवता यागेनेति म
र्थलक्षणाप्यत्र नास्तीति प्रौढ्या परिहारान्तरमाह * अर्थाक्षिप्तेति *
त्वर्थस्य करणत्वे कर्तृव्यापारव्याप्यत्वात्करणस्य यो ऽर्थात्करण
नाक्षिप्तः कर्तृव्यापारव्याप्यत्वरूपः साध्यांशस्तद्द्वारेण धात्व
त्मनो निष्पादकस्य नामार्थरूपकरणस्य ग्रहणसिद्धेः शब्दस्योपा
त्वोद्देश्यत्वविधेयत्वानुवाद्यत्वगुणत्वप्रधानत्वरूपविरुद्धत्रिकद्वय
त्वाभावाच्च वैरूप्यलक्षणो विरोधो भविष्यतीत्यर्थः । नामार्थस्य
रणत्वे निर्व्यापारस्य तस्य करणत्वायोगादात्मनः करणत्वसि
ऽर्थाक्षिप्तो यः कस्य चिद्व्यापारस्य साध्यत्वाख्यः सामान्यरूपो
स्तद्द्वारेण नामार्थैरात्मीयस्ववाक्योपात्तयागादिविशेषरूपसाध
ग्रहणसिद्धेरित्यूहेन योज्यम् ॥१॥ सर्वेषां फलसाधनत्वे कतरस्य स
नतेति विचारायोगात्तत्सिद्ध्यर्थमेकस्य साधनत्वे साधिते मुख्यो
द्धातोपक्रमार्थं यदेति भाष्यं तस्माच्छब्दपरामृष्टादेकस्मात्फलस
न्धिनो ऽपूर्वमित्येवं व्याचष्टे * एवमिति * अत्रापि भाष्यगतस्मै
शब्दस्य पूर्वोक्तमेव प्रयोजनद्वयमविशेषेणेति पूर्वपक्षभाष्यादनिर
पक्षो ऽप्यत्राभिप्रेत इति शङ्का स्यात्तन्निवृत्तये निर्द्धारणार्थो ऽत
त्ययः । ननु सर्वेषां फलसाधनत्वयोग्यतायामप्यनेकादृष्टकल्प
परिहारायैकस्य साधनतोक्ता तस्य च पक्षद्वये ऽप्युपपत्तेरनिर

प्राप्नोतीत्याशङ्कामुपन्यासपूर्वकं निरस्यति * सर्वथेति * नन्व-
मे विकल्पापत्तेस्तस्य च पूर्वाधिकरणपूर्वपक्षनिरासेन निरस्त-
त्रेहानियमाशङ्का युक्तेत्याशङ्कानिरासस्सूचनार्थः प्राप्तिशब्दः सर्व-
फलसाधनत्वं वाक्यं बोधयतीति पूर्वाधिकरणपूर्वपक्षार्थः। प्रयोगे
वेकल्पो योगसिद्ध्यधिकरणन्यायेन सिद्धः फलत्वेनोक्तः। इदानीं
ाक्येनैवानियमः प्रतिपाद्यतइति शङ्कानिरसनीयेत्याशयः । वि-
ीनत्वात्फलसाधनत्वस्य एकस्मिंश्च वाक्ये विधेयद्वयायोगेनैक-
ष्टस्येतरस्य विधेयत्वात् धात्वर्थस्य फलसम्बन्धे श्येनवता यागे-
फलसम्बन्धिनो धात्वर्थस्य विशेष्यत्वरूपात्प्राधान्यात्फलसम्ब-
न्धे नामार्थस्य विशेषणत्वरूपादङ्गत्वान्नामार्थस्य तु फलसम्बन्धे
वता श्येनेनेति विपरीतविशेषणविशेष्यभावापत्तेरेकस्य चैकत्र
ये वचनव्यक्तिभेदप्रसङ्गेन विशेषणविशेष्यत्वाख्याङ्गप्रधानत्वा-
ान्नानियमः शङ्कितुं युक्त इत्याशयः। श्लोकं व्याचष्टे *न हीति * ३५०।
निर्द्धारणार्थो डतरप्रत्ययो युक्त इत्युपसंहरति * तस्मादिति*
पुनरिति भाष्येणाख्यातशब्दानां भावनावाचित्वव्युत्पादनार्थं
इयं कृतं तद्भावप्रधानमाख्यातमिति स्मृत्याख्यातस्य भावनावा-
प्रसिद्धेरयुक्तमाशङ्क्योपपादयति * कः पुनरिति * इह व्यु-
मानभावनावाचित्वबलेन भावनाक्षेपादेव कर्त्तृप्रतीतिसिद्धेरा-
ास्य कर्त्तृवाचित्वं कर्त्रधिकरणे निषेत्स्यमानमपि असिद्धभावना-
त्वावस्थायामुच्यमानं न विरुद्धत्वेनाशङ्कनीयं विशेष्यत्वेन वा
रणत्वेन वा कर्तैवाख्यातेनोच्यते न तु कथं चिद्भावनेति सूच-
कर्त्तुः प्रत्ययार्थत्वेनाप्राधान्याद्विशेष्यत्वे ऽभिहिते प्रत्ययार्थत्वो-
नार्थं लः कर्मणि चेति सूत्रे चकारेण कर्त्तरिकृदित्यतः कर्त्त-
ुकर्षणात्कर्त्तरि लकारोत्पत्तिरुक्ता । नन्वनेककारकानुरञ्जन-
ेन भावनायाः प्राधान्यदर्शनात्प्रत्ययार्थत्वं न्याय्यं न कर्त्तुरि-
ङ्क्य फलभाक्त्वात्कर्त्तुः प्राधान्यं वक्तुम् * फलेत्युक्तम् *
कृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोः प्रत्ययार्थः प्राधान्येनेति
न्यस्मृतेर्भावप्रधानमाख्यातमिति विशेषस्मृत्या बाधाद्भावनाया
ाधान्यात्प्रत्ययार्थता युक्तेत्याशङ्क्य * कथं चिद्धेत्युक्तम् * धा-
तिरिक्तायाः भावनायाः स्वरूपेणैव सिद्धायाः प्राधान्यप्रत्यया-
ोर्दूरोत्सारितत्वाद्धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयतइ-
भावशब्दस्य स्वतन्त्रधात्वर्थवाचित्वस्मृतेर्विशेषस्मृतिबलेन प्र-
त्ययार्थप्राधान्यविपर्ययमभ्युपगम्य कर्तृविशिष्टयागाद्यभिधानं
न तु भावनाप्राधान्यपरेयं स्मृतिरित्याशयः । ननु कः पुन-

र्भाव इति भावनाक्षेपेणैव तद्वाचिशब्दाक्षेपसिद्धेः के भावशब्दा
पुनराक्षेपो अयुक्त इत्याशङ्क्याह * सत्यामपीति * यदि कश्चि
वोत्पन्नल्युडादिप्रत्ययान्तधातुवाच्यस्य भावत्वाभ्युपगमेनार्थप
योगं परिहरेत्तं प्रति श्येनेन यजेतेत्यादिषु एतदधिकरणोदाहर
तेषु वाक्येषु तादृक्भावशब्दाभावादन्य एव भावो भावशब्द
भिमता इतिप्रत्युत्तरसूचनायोभयप्रश्न इत्यर्थः । अलौकिकशब्द
याकरणाप्रसिद्धत्वाभिप्रायः । न केवलं भाव एवालौकिकः ।
भावशब्दा अपीत्यपिशब्दार्थः यजतीत्युत्तरभाष्ये शब्दमात्रकथ
व्यापकमाशङ्क्य शब्दान्तरकथनेनार्थान्तरस्यापि सूचनाद्व्याप
दर्शयन् व्याचष्टे * सिद्धान्तेति * वैयाकरणाभिमतशुद्धधात्व
तिरिक्तभावनारूपार्थवाचित्वोपपादनार्थं हेतुमति चेति णिचि
भावीतीकारान्तत्वादेराजित्यच्प्रत्यये सति णेरनिटीति णिलोपे
वशब्दव्युत्पत्तिनिरूपणेन कः पुनर्भाव इति प्रश्ने निरस्ते के भा
ब्दा इति प्रश्ननिरासाय आख्यातस्य * चेत्युक्तम् * धात्वर्था
क्तभावनाख्यभावाभ्युपगमेनोदाहृतानां तद्वाचित्वासम्भवाश
नन्विति भाष्यं धातोर्यागादिधात्वर्थवाचित्वे ऽपि आख्यातस्य
नावाचित्वोपपत्तेरयुक्तमाशङ्क्योपपादयति * परः पुनरिति *
वनाया णिजन्तभवतिधातुमात्रवाचित्वाच्छब्दान्तरवाच्यत्वा
ऽभिहिते ननु यजत्यादिधात्वन्तरवाच्यत्वाभावे ऽप्याख्यातवाच
भविष्यतीत्याशङ्क्याख्यातस्य धात्वर्थवाचित्वादर्शनाद्भावयतेश्च
द्यन्ता धातव इति धातुसञ्ज्ञत्वेनाख्यातप्रकृतिभूतयजत्यादिधात
त्वाभावे ऽपि भावनाया धात्वन्तरार्थत्वान्नाख्यातवाच्यत्वं सम
तीति दर्शयितुं * न चेत्युक्तम् * नन्वेवमपि धातूनां भावन
चित्वस्य सिद्धान्त्यनभिमतत्वात्तन्निषेधो न युक्त इत्याशङ्क्य *
ममित्युक्तम् । धात्वर्थत्वेनाख्यातप्रत्ययार्थत्वे निषिद्धे यदि क
ध्याति वाति गच्छतीत्यादिधातूनां तुल्यार्थत्वदर्शनाद्यजत्यादिधा
भावयतिधातुवाच्यभावनावाचित्वं शङ्केत तन्निरासायेदमुक्तमि
शयः *नैतदेवमिति* परिहारभाष्यं धात्वर्थाभिधानानर्थक्यमा
भावनानुरञ्जकत्वेन धात्वर्थाभिधानं दर्शयन् व्याचष्टे * अत्रो
धात्वर्थस्यापि प्रत्ययार्थतानन्यथासिद्धप्रतीतिबलादवगम्यमान
विरुद्धेत्याशयः । श्लोकं व्याचष्टे * यावानेव हीति * नन्वा
तप्रत्ययस्य भावनावाचित्वे ऽपि इह धात्वर्थस्य फलभावनाकरण
भिधानार्थं धातोः फलपदसम्बन्धेनापूर्वगमकताया विवक्षितस्य
वनावाचित्वाभावेन भावशब्दत्वाभावात् किं भावशब्देभ्यो ऽपूर्वं

। सिद्धान्तवचनव्यक्तिरयुक्ता प्रत्ययसम्बन्धानुग्रहात्तु भावनानुर-
कस्यार्थवाचितया भावशब्दत्वे द्रव्यगुणशब्दानामपि पूर्वपक्षे प्र-
यसम्बन्धस्य सर्वेषां भावार्थ इति चेदित्यत्र वक्ष्यमाणत्वा-
ावशब्दत्वापत्तिरित्याशङ्कानिरासार्थं द्रव्यगुणशब्देभ्यो द्रव्य-
णप्रत्ययो न तु तेभ्यो भावना प्रतीयते तदर्थस्य भा-
नानुरञ्जकत्वायोगादिति प्रत्ययशब्दस्य समासान्निष्कृष्य भा-
नाशब्देनान्वयं कर्मव्युत्पत्तिं चाङ्गीकृत्य भाष्यकृतोक्तम्। तत्र
द्रव्यगुणाः के वा तच्छब्दा इति प्रश्नपूर्वकं तत्स्वरूपमनु-
वैव भावशब्दत्वशङ्कानिरासो न युक्त इत्याशङ्क्याह * तद्व्यति-
क्तास्त्विति * आख्यातानां भावशब्दत्वे कथिते तद्व्यतिरिक्तानां
ञ्यगुणशब्दत्वज्ञानसिद्धेः प्रश्नपूर्वकमनभिधानमित्यर्थः। उपलक्ष-
र्थः पृष्ठशब्दः निपातोपसर्गाणामाख्यातव्यतिरेके ऽपि स्वतन्त्रा-
नभिधायित्वेनेहाविवक्षितत्वान्न द्रव्यगुणशब्दत्वापत्तिः। द्रव्य-
गशब्दत्वेन च निष्पन्नार्थाभिधायित्वस्य विवक्षितत्वात्क्रियावाचि-
नाम्नां द्रव्यगुणशब्दत्वापत्तावप्यदोषः। किं तावदिति पूर्वप-
भाष्यमव्यवस्थितशास्त्रार्थानुपपत्तेरनियमपक्षायोगादयुक्तमाशङ्क्य
दे भावशब्देभ्य एवाकाङ्क्षोत्पद्यते न द्रव्यगुणशब्देभ्य इति विशे-
स्यात्ततो द्रव्यगुणशब्दानां नैराकाङ्क्ष्येणाकाङ्क्षानिबन्धनफलप-
म्बन्धायोगान्नापूर्वगमकत्वं स्यान्न त्वसावस्ति द्रव्यगुणशब्दे-
ो ऽपि करणविभक्त्यन्तेभ्यः साध्याद्याकाङ्क्षोत्पत्तेरविशेषादित्ये-
व्याख्यां सूचयन् पूर्वपक्षमाह * तत्रेति * यथैव भावशब्देभ्यो ३४
वार्थत्वात् भावनाकाङ्क्षोत्पत्तिस्तथैव द्रव्यगुणशब्देभ्यो ऽपि
रणार्थत्वादित्यविशेषपदव्याख्यासूचनार्थं करणार्थत्वेन फलपद्-
ङ्गतौ योग्यत्वादित्युक्तम्। इतरथा निष्पन्नार्थाभिधायित्वेनैव यो-
त्वसिद्धेः करणार्थत्वस्य च धाताविपि तुल्यत्वात्करणार्थत्वश-
ऽनर्थकः स्यादिति। नन्वविशेषे सति कथं द्रव्यादिशब्दानामेव
ऽपदसङ्गतिरित्याशङ्क्य निष्पन्नार्थाभिधायित्वलक्षणाभिधानमनेन
भाष्येणाकाङ्क्षोत्पादकत्वलक्षणविशेषसदसद्भावसन्देहएव ना-
र्थस्य फलभावनाकरणत्वं धात्वर्थस्य चेति सन्देहकारणमिति सू-
तं भवति। अत एव सर्वेषां भावो ऽर्थ इति चेदित्यनेन सर्वेषां
काङ्क्षत्वाविशेषमाशङ्क्य येषामुत्पत्ताविति सूत्रद्वयेन विशेषो
यते। श्लोकं व्याचष्टे * सर्वत्र हीति * न साध्यान्तरमित्यनेन
त्वर्थस्य विधिसामर्थ्यात्करणत्वावगतेः साध्यापेक्षायामपि असि-
त्वेन तस्यापि साध्यत्वादसम्बन्धः समत्वात्स्यादिति न्यायान्न

साध्यान्वयो ऽस्तीति सूचितम् । उच्यतइति सिद्धान्तभाष्यं व्या
ष्टे * इतीति * सूत्रशब्देन प्रतिपदाधिकरणसिद्धान्तस्योत्सूत्र
सूचितम् । कीदृशेन सूत्रेण भाष्यकृतोत्तरं दीयतइत्यपेक्षिते स
योजयति * भावार्था इति * यच्छब्देन भावप्रधानमाख्यातमित्य
ख्यातशब्दानां भावनावाचित्वप्रसिद्धेस्तद्विषयो ऽयं निर्देश इति
चितम् । फलस्येति भाष्यात् क्रियाशब्दस्य फलनिष्पादनाविषय
प्रतीतावपि भावशब्दानां फलनिष्पादनप्रत्यायकत्वाभिधानस्य य
क्रमपूर्वं तदा सन्देहः । किं भावशब्देभ्य इति सन्देहभाष्याद्भाव
ब्देभ्यो ऽपूर्वमिति सिद्धान्तवचनव्यस्त्यर्थत्वावगतेस्तद्धेतुत्वसूचन
र्थमपूर्वक्रियागतिरित्युक्तम् । एष ह्यर्थो विधीयतइत्युक्ते को ऽस
वित्यपेक्षायाम् * कुर्यादित्युक्तम् * आख्यातपदानां फलपदान्व
धात्वर्थस्य फलभावनाकरणत्वं सिद्धान्त्यभिमतं सिद्ध्यतीति प्रदर्श
नार्थम् * यजिनेत्युक्तम् * (फलसाधनविधिमात्रेण भावशब्दानाम
पूर्वगमकत्वासिद्धेस्तैरित्यध्याहृतम् भावशब्दानामेव फलपदान्वयं
न द्रव्यगुणशब्दानामित्याशयः।[1]) ननु भावशब्दानां फलसाधनविधा
यकत्वस्यापूर्वगमकत्वे कथं हेतुतेत्याशङ्क्याह * फलेति * ननु भाव
शब्दानामेव फलपदान्वयो न द्रव्यगुणशब्दानामित्येतदेव कथमव
गम्यतइत्याशङ्क्याह * सम्बन्धश्चेति * द्रव्यगुणशब्देभ्यः करणा
र्थत्वेन क्रियामात्राकाङ्क्षोत्पत्तावपि कारकाणां क्रियान्वयनिरपेक्षान्यो
न्यान्वयायोगेन साध्यानाकाङ्क्षत्वात्तदभावे चेतिकर्त्तव्यतान्वयानु-
पपत्तेः भावशब्दवत् सर्वपदार्थान्वयः स्यादित्याकाङ्क्षा नोत्पद्यत
इति सूचयितुम् * प्रसर्पन्तीत्युक्तम् * दृश्यतइत्यनेन प्रतीतिसा-
क्षिकतोक्ता अतो भावशब्दानां फलपदान्वयेन फलसाधनविधायक-
त्वादपूर्वगमकतेति सूत्रयोजनामुपसंहरति * तस्मादिति * क्रि-
याशब्दव्याख्यानार्थो भावनाशब्दः । न चात्र धात्वर्थस्य फलभावना-
करणत्वं तद्भेदानुनिष्पाद्यपूर्वभेदसिद्ध्यर्थं वाच्यम् । तच्च भावनावा-
चिनः प्रत्ययस्य फलपदान्वये ऽपि करणाकाङ्क्षायां सिद्धत्वेन यो-
ग्यत्वात्पदान्तरोपात्तस्यापि नामार्थस्यैव करणत्वापत्तेर्न सिद्ध्यती-
त्याशङ्क्याह * तत्र चेति * योग्यत्वं नाम लिङ्गं तच्चैकपदोपादा-
ननिमित्तप्रत्यासत्तिलक्षणया श्रुत्या बाध्यतइति भावः । स्वकारक-
निष्पादितस्य धात्वर्थस्यापि योग्यतास्तीति सूचनार्थश्चकारः । सिद्धे
च धात्वर्थस्य करणत्वे तदन्यथानुपपत्तिकल्प्यत्वेनापूर्वस्य तद्भेदा-
नुनिष्पादी भेदः सिद्ध्यतीति सूचयन्नाह * अत इति * भाष्यं चा-

१ अयं पा० २ पु० ना० ।

र व्याख्यातम् । भावशब्देभ्यः फलक्रियाप्रतीयतइति भावश-
ां फलपदान्वये ऽभिहिते कुतो भावशब्दानामन्वय इति पृष्टे
त्रयाकाङ्क्षभावनावाचित्वादेवेत्युक्त्वा यआहुरित्यनेन किमपीति
शकाङ्क्षाप्रदर्शनपूर्वकमेतदेवोपपादयनन्वाख्यातस्य भावनावा-
: फलपदान्वये ऽपि करणाकाङ्क्षायां नामार्थस्यापि करणत्वो-
ः कथं धात्वर्थस्य करणत्वसिद्धिरित्याशङ्क्य ते चेत्यनेन धा-
ानुरक्तभावनावाचितया धात्वर्थसम्बद्धानां स्वर्गोत्पादनाभिधा-
ात्प्रत्यासत्तेर्धात्वर्थस्यैव करणत्वावगतिरिति कर्मशब्दा इति ए-
त्रावयवसूचिते ऽर्थे ऽभिहिते नन्वेकप्रत्ययोपादानश्रुत्या धा-
निरपेक्षायाः भावनाया विध्यन्वयात्स्वर्गादिपुरुषार्थफलत्वे ऽव-
करणाकाङ्क्षायामपि निष्पन्नत्वेनायोग्यत्वात्प्रत्यासन्नमपि धा-
भाव्यांशवत्करणांशादपि प्रच्याव्य नामार्थेनैवान्वयावगमात्कु-
ात्वर्थ सम्बन्ध इति पृष्ट्वा एष हीति सूत्रावयेन प्रकृतिप्रत्यय-
पर्यनियमाच्छुद्धभावनानवगतेरनुष्ठानाशक्तेश्च धात्वर्थानुरक्ता-
एव फलोद्देशेन विधीयमानत्वाद्विधिगम्यत्वाच्च करणत्वस्य केन
येत्स्वर्गमित्यपेक्षायां यागादिनेत्येवान्वयो युक्त इत्युत्तरे दत्ते
ार्थकरणत्वाभिधानफलं भावनाशब्दानामपूर्वगमकत्वं यस्य चे-
नोक्तमिति अपूर्वभावनागम्यतइति भावनाशब्देन निष्पत्त्युत्प-
ब्दयोः प्रयोज्यव्यापारवाचिनोरपि प्रयोजकव्यापारलक्षणार्थत्वं
तम् । अन्यथानुपपत्तिशब्देन तेनापूर्वं कृत्वा नान्यथेति भाष्ये-
स्यार्थापत्तिगम्यता पराभिमतलिङादिवाच्यत्वनिरासायोक्ते-
चितं तथा च ननु कश्चिच्छब्दः साक्षादपूर्वस्य वाचको ऽस्ती-
। लिङादिव्यतिरिक्तशब्दाभिप्रायत्वे तु कश्चिच्छब्दो ऽसमञ्जसः
।अपूर्वशब्दस्याप्यनुष्ठानात्पूर्वं न जायत इत्यवयवव्युत्पत्त्या प्रवृ-
वाचकतास्तीत्यविरोधः।

अतो लिङादिवाच्यत्वमपूर्वस्य वदन्तिये ।
एतद्भाष्यविरोधस्तैः परिहर्त्तुं न शक्यते ॥

एवं सूत्रयोजनापूर्वकं सङ्क्षेपेण भाष्यं व्याख्यायाख्या-
भावनावाचित्वमाक्षिपति * कथं पुनरिति * यद्यपि
ावाचित्ववद्यज्यादिवाच्यत्वमप्याक्षेप्तुरनिष्टं तथापि प्रत्य-
वाच्यत्वसिद्धान्तसूचनार्थं यागादिना स्वर्गकाम इति
ांशवाचित्वेन यज्यादीन्धातून्पृथक्कृत्य प्रत्ययमात्रवा-
भावनारूपो ऽर्थो यो ऽभ्युपगम्यते * स कथं ल-
इति * अनुवादपूर्वकमाक्षेपः कृतः । एवकारेण धातुवाच्यत्व-

निरासस्सिद्धावपि धातुप्रत्ययसमुदायवाच्यत्वनिरासार्थः केवल
ब्दः। ये तु भावनारूपो ऽर्थो ऽङ्गीक्रियमाणो धातोः स्वार्थाभिधाने
क्षीणशक्तित्वात्प्रत्ययवाच्यो ङ्गीकार्यः । स च न सम्भवतीति
वनासद्भावाक्षेपार्थत्वेनेमं ग्रन्थं व्याचक्षते तेषामभिद्ध्युः *स्वश
हीति* वाच्यत्वाक्षेपोपपादनार्थः सिद्धकर्तृक्रियावाचिनीत्यादि
स्मात्प्रत्ययार्थ एव भावनेत्युपपन्नमित्यन्तश्च वाच्यत्वसमर्थनार्थ
सर्वो ऽयं ग्रन्थो ऽन्यपरत्वापत्तेरसमञ्जस एव स्यात्। न चाख्यात
च्यत्वासम्भवमात्रेण वस्त्वभावो भवति घटादिवन्नामवाच्यत्वोप
उत्पादनमेव च प्रयत्नानुष्ठानाद्यपरपर्यायं भावनाशब्देनाभिप्रेत
तच्च सर्वलोकप्रसिद्धत्वान्नापह्नोतुं शक्यम्। धात्वर्थमात्रातिरेके
प्रतिपत्तिः तत्र चानतिरेके ऽपि धातुना धात्वर्थस्वरूपमभिधाय
स्यैवान्योत्पादानुकूलत्वरूपभावनाप्रत्ययेनोच्यतइति वक्तुं शक्य
श्च धात्वर्थातिरेकाक्षेपार्थत्वं वाच्यत्वाक्षेपस्य युक्तम् । भावनाय
धात्वर्थस्य करणत्वसिद्ध्यर्थम्। ननु च यदि प्रयोजकव्यापारो भ
ण्यते इत्यादिना शङ्कापूर्वकं धात्वर्थातिरेको वक्ष्यते अत एव
यार्थस्य भावस्य वाच्यता तत्र चिन्तितेत्याकृत्यधिकरणे ऽभिहि
वाच्यत्वाक्षेपं प्रश्नपूर्वकमुपपादयति*कुत इति* आख्यातप्रत्यय
स्य भावनावाचित्वाक्षेपे ऽप्युदाहरणभूतविधिवाक्यगताख्यात
प्रायेण * विधिमात्रमित्युक्तम् * कर्तृसंख्योपग्रहविशे
धाने ऽपि भावनाभिधाननिरासार्थो मात्रशब्दः । धातुप्रत्यय
ययोगिन्याख्याते धात्वंशस्य करणांशवाचित्वाभ्युपगमात्प्रत्यय
भावनावाचित्वासम्भवे ऽनभिधेयताक्षेप्तुरभिमता सिद्ध्यतीति
चयितुम् * केनेत्युक्तम् * नन्वाख्यातप्रत्ययस्यानेकार्थत्वाद्वि
धायित्वे ऽप्यविरुद्धं भावनाभिधायित्वमित्याशङ्क्य * स्वशा
क्तम् * स्वप्रत्ययार्थमात्रे प्रत्ययस्य शक्तेर्भावयतिधातुवाच्य
नाभिधायित्वं न सम्भवतीत्याशयः । नन्वेवमपि धात्वंशेना
नोपपत्तेः केनांशेनेत्यनभिधेयत्वाभिधानमयुक्तमित्याशङ्क्याह
चेति * यज्यादिधातूनामण्यन्तधात्वर्थाभिधानव्यापृतत्वात्
न्तभावयतिधात्वर्थाभिधायिता न युक्तेत्यर्थः । नन्वाख्यात
नन्तरं भावनाप्रतीत्यन्यथानुपपत्त्या तत्रापिशक्तिः कल्पनीये
ङ्क्याह *अत इति* नास्माभिः प्रतीयमानाया अपि भा
युक्त्या वाच्यत्वं निरस्यते किं त्वप्रतीयमानत्वादेव स्वपक्षात्
त्वप्रतीयमानायामपि प्रतीत्यारोपवादिनं प्रति युक्त्युपन्यास
यः । यतो लिङादयो धातवो वा न भावनां प्रतिपादयन्ति

तेपत्तिं जनयन्ति न तेभ्यो भावनाप्रतिपत्तिर्जायते अतः श-
तप्रतीतिरहितमेवेदमारोप्यतइत्यर्थः । ननु लिङादीनां धा-
र्थवाचित्वायोगे ऽपि करोतिभावयतिभ्यां विवरणदर्शनात्त-
वावगतेस्तदर्थवाचिता युक्तेत्याशङ्क्याह * किं चेति * पि-
द्धान्तरस्य यो ऽर्थः कोकिलादिपर्यायैर्व्याख्यायते तस्मिन्नर्थे
र्यायस्तेन शब्दान्तरेण सह प्रयुज्यते किं तु केवलस्ततश्च प-
य सहाप्रयोज्यत्वेन व्याप्तेराख्याते करोतिभावयतिभ्यां स-
ुयत्वव्यावृत्त्या तत्पर्यायत्वव्यावृत्तिरित्याशयः । श्लोकं व्या-
तद्यथेति * ननु करोतिभावयतिमात्रेणाख्यातार्थकथन-
ापि केवलधातुप्रयोगायोगात्तदनुग्रहार्थं प्रत्ययः प्रयुज्यमानो
मावहतीत्याशङ्क्याह * न हीति * प्रत्ययसहितकरोतिभा- ३४२।१
योगे सति या करोतिना भावयतिना वा यजत्यादिपदप्रत्या-
या व्याख्यायते सा यथा धात्वर्थस्य यागेनेति पृथगुपादाना-
ा न सम्भवति तथा पर्याययोः सह प्रयोगायोगेनाख्यातवा-
ाप्यसम्भवो वा विशेषाद्व्याख्यान्यथानुपपत्त्या चैकेनांशेन
ावगतावपि किं यजत्यादिधात्वंशेन प्रत्याय्याख्यातांशेन वेति
ानान्नार्थकथनं सिद्ध्येदिति भावः । नन्वेवं सति प्रत्ययो
यतामित्याशङ्क्याह * अत्र त्विति * केवलधातुप्रयोगाद्-
त्ययः प्रयोज्य इति भावः । करोतिभावयतिपरप्रत्ययप्रयोगे
ा तेनैव यजिपरप्रत्ययार्थोपादानात्करोतिभावयत्योस्तदर्थकथ-
ानुपपत्तेरानर्थक्यं स्यादित्याह * अतश्चेति * अधिकस्या-
क्षेपो ऽस्यास्तीति बहुव्रीह्यर्थः । नन्वधिकावापो ऽपि विश्व-
वाक्ये स्वर्गकामादिपदावापवन्न दोषमावहतीत्याशङ्कानिरा-
यन्नुपसंहरति * तस्मादिति * आनर्थक्येन वेदाननुमत-
य तत्तुल्यतेत्याशयः । आख्यातस्य भावनावाचित्वमाक्षिप्तं
तुं करोत्यर्थवाचित्वं तावदुपपादयति * अत्रेति * किं करोति
ते करोतिसामानाधिकरण्येनाख्यातप्रत्यये करोत्यर्थो वाच्यो
ातइत्युक्ते भवत्यादिपराख्यातप्रत्यये करोत्यर्थसामानाधिक-
ावात्करोत्यर्थवाचित्वं न सिद्ध्यतीत्याशङ्क्य * सिद्धेत्यु-
आक्षेपवाद्यसिद्धमपि आख्यातप्रत्ययस्य क्रियावाचित्वं स्व-
तसिद्धमङ्गीकृत्य नाख्यातमात्रस्य करोत्यर्थवाचित्वं ब्रूमः किं
तिसामानाधिकरण्यवतामेवाख्यातानामिति ख्यापनाय सिद्ध-
यावाचित्वमुपलक्षणं कृतम्। यद्वा ये धात्वर्थस्य स्वरूपेण धा-
हितस्यापि निष्पाद्यत्वलक्षणक्रियारूपेण प्रमाप्रत्ययवाच्यत्व-

मङ्गीकृत्य मीमांसकाभिमतधात्वर्थातिरिक्तभाव्यनिष्ठभावन
त्वं प्रत्ययस्य नेच्छन्ति तान्प्रति भावनावाचित्वं साधयितुं
र्थवाचितानेन साध्यतइत्यदोषः। नन्वसिद्धकर्तृविषयेष्वस्त्य
ष्वाख्यातेषु करोतिसामानाधिकरण्याभावेन करोत्यर्थक्रिय
त्वाभावात्तद्व्यावृत्त्यर्थं सिद्धविशेषणं व्यर्थमित्याशङ्क्य भा
भावनारूपकरोतिवाच्यक्रियावाचित्वाभावे ऽपि कर्त्रात्मल
क्रियावाचित्वसद्भावाद्विशेषणसाफल्यं दर्शयितुं सिद्धासि
क्रियावाचीन्याख्यातानि विविनक्ति *इहेति*भवतेर्जन्माख्या
विकारवाचित्वात्ततः परा तिङ्विभक्तिर्जायमानस्य कर्तुर्जन्मे
द्यपरपर्यायात्मलाभमात्ररूपं व्यापारं प्रतिपादयन्ति। अस्तिवि
द्वितीयभावविकारवाचित्वात्ततः परां सत्तां प्रतिपद्यमानस्य
स्वसत्ताख्यात्मलाभमात्ररूपमित्यर्थः। अन्यात्मलाभविषयसै
पारस्य करोत्यर्थत्वात्तस्य चास्त्यादिपरया विभक्त्यानभिधा
त्यर्थक्रियावाचित्वाभावे ऽप्यात्मलाभस्यानिष्पन्नरूपत्वेन व्य
ब्दवाच्यत्वाद्व्यापारस्य क्रियात्वप्रसिद्धेर्व्यापाराख्यक्रियाव
स्य सर्वाख्यातेषु भावादर्थवद्विशेषणमित्यर्थः। ननु द्रव्यव्य
ण व्यापारस्यानुपलब्धेरभावान्न वाच्यत्वं सम्भवतीत्याश
द्रव्यमेव चेति * जातिगुणवत्क्रियाया अपि द्रव्यादत्यन्त
काभावान्न व्यतिरेकानुपलम्भमात्रेणाभावो भवतीति सूचयि
द्रव्यमेवेत्युक्तम् * ननु द्रव्यस्य व्यापारशब्दवाच्यत्वे सर्वद
भवति देवदत्तः पचतीति प्रयोगः स्यादित्याशङ्क्य प्रचलित
मात्मनस्तत्त्वमौदासीन्यस्वरूपं यस्येति द्रव्यगतस्यावस्थावि
व्यापारशब्दवाच्यत्वं सूचितम्। नन्वेवं सति यौवनाद्यवस्था
स्यापि व्यापारत्वं स्यादित्याशङ्क्य विप्रकीर्णो विक्षिप्तो ऽनेक
सक्तत्वादेकत्रानुपसंहृतः स्व आत्मीयो भावो धर्मो यस्येति
स्थान्तरव्यावृत्त्यर्थं व्यापारावस्थाया विप्रकीर्णत्वं विशेषणम्
सत्यवयविरूपस्याप्यनेकावयवव्यासक्तत्वेनैकत्रानुपसंहृतत्वा
रत्वं स्यादित्याशङ्क्य तद्व्यावृत्त्यर्थं क्रियावयवानां क्षणिकत्वे
क्षणव्यासक्तत्वाभावे ऽपि।

यदा त्वाद्यपरिस्पन्दात्प्रभृत्या फललाभतः।
क्रिया पूर्वापरीभूता लक्ष्यते वर्तते तदा॥

अनेकफलसाधनानेकक्रियावयवसमूहस्यैव क्रिया
धानात्तस्याः पूर्वापरानेकक्षणव्यासक्तत्वरूपं पूर्वापरीभूतत
शेषणम्। अवयविनस्त्वनेकावयवव्यासक्तत्वे ऽपि युगप

ेकक्षणव्यासक्तास्तीति भावः । नन्वेवं सत्यनेकक्षण-
र्तित्वेन क्रियाया द्रव्यतुल्यत्वात्कथं द्रव्याद्भेदाध्यवसाय इत्या-
ग्र पूर्वौदासीन्यावस्थातः प्रच्युतं परमौदासान्यावस्थामप्राप्त-
ति पूर्वापरावस्थयोरनुवृत्ता द्रव्याद्व्यावृत्तरूपाभिधानेन भेदो
ीतः । नन्वस्तु नाम द्रव्यस्यैवंविधावस्थाविशेषस्तस्य तु व्यापार-
ब्दवाच्यत्वे किं निमित्तमित्याशङ्क्य फलोत्पादानुकूलत्वस्य निमि-
वसूचनार्थम् * विशिष्टेत्युक्तम् * यद्वा ननु घटो भवतीत्यादौ
स्य वा कर्तृत्वं विवक्षितं मृत्पिण्डस्य वा । तच्च घटस्यासिद्धसत्ता-
त्वेन व्यापाराश्रयत्वायोगान्मृत्पिण्डस्य च सिद्धत्वेन कर्त्रात्मला-
भव्यापाराश्रयत्वायोगान्नोभयथापि सम्भवतीत्याशङ्क्येदमुक्तम् ।
त्पत्तेः प्रागपि घटविषयायाः मृत्पिण्डाश्रितायाः शक्तेः कार्यकार-
ेयमान्यथानुपपत्तिकल्पितायाः सद्भावात्स्वरूपेण चाविद्यमान-
पि शक्तिसद्भावमात्रेणातीतानागतज्ञानादौ कारकत्वदर्शनात्कर्तृ-
पपत्तेः।समवायिकारणाच्च कार्यस्यात्यन्तभेदाभावान्मृत्पिण्डात्म-
व्यापाराश्रयत्वोपपत्तेर्घटात्मना चासिद्धत्वोपपत्तेरुभयथाप्यवि-
ा इत्याशयः । नन्वस्य सिद्धासिद्धकर्त्राश्रितत्वे तस्यैव करोत्यर्थ-
दस्त्यादावपि करोतिसामानाधिकरण्यापत्तिः सिद्धकर्तृमात्राश्रि-
े त्वस्त्यादिपराया विभक्तेर्व्यापारप्रतिपादकत्वाभिधानं न यु-
तेत्याशङ्क्यासिद्धकर्त्राश्रितस्य व्यापारस्य करोत्यर्थत्वाभावं दर्श-
ुमाश्रयं तावद्विविनक्ति *तत्रेति* अन्योत्पादानुकूलस्यैव व्यापा-
 करोत्यर्थे वक्तुमेवकारः । अन्यात्मलाभफलकस्य हि व्यापार-
कर्त्ता करोतीति व्यपदिश्यते अस्त्या पराख्यातप्रयोगे च कर्त्तु-
ात्मलाभाख्यव्यापारावस्थात्वप्रतीतेरन्यात्मलाभफलकव्यापारायो-
ा करोतिव्यपदेशता युक्तेत्याशयः । एवंशब्दात्प्रकृतव्यापारमात्र-
मर्शावगमे ऽपि सिद्धे कर्त्तर्यन्यस्यैवमवस्थात्वाभिधानेन तस्यासि-
कर्त्तृविषयत्वावसायात्तस्य चात्मलाभातिरिक्तव्यापाराभावात्तत्प-
व्याख्यानमसिद्धे कर्त्तरि तस्यैव व्यापारत्वं प्रतीयते सिद्धे त्व-
 ऽपीत्यपिशब्दाध्याहारेण व्याख्याने व्यापारमात्रपरामर्शो ऽव्य-
ः । अन्यस्यात्मलाभाख्यं व्यापारं प्रति कर्तृत्वे ऽपि सिद्धकर्त्तृत्वस्य
ोतिप्रयोगविषयत्वात्तत्र चासिद्धस्य कर्तृत्वाप्रतीतेः कर्त्तुरन्यत्व-
ारुद्धं ततश्चासिद्धे कर्त्तर्यन्यात्मलाभफलाभावेन तद्व्यापारस्य
ोत्यर्थत्वायोगात् सिद्धकर्त्तुर्व्यापारस्य त्वन्यात्मलाभफलत्वात्क-
यर्थत्वोपपत्तेर्व्यवस्था युक्तेत्याह * तदिति * तस्मादित्यर्थे तदि-
व्ययम् । सिद्धकर्त्राश्रितस्यैव व्यापारस्य करोतिवाच्यत्वं ना-

सिद्धकर्त्राश्रितस्येत्येतदेव करोतिसामानाधिकरण्यव्यवस्थयोपपा
यति * तथा चेति * नन्वाख्यातकरोत्योर्द्वयोरप्याकृत्यधिकर
न्यायेन सामान्यवाचित्वात्पर्यायत्वापत्तेः सामानाधिकरण्यं न
क्तमित्याशङ्क्य * सामान्येत्युक्तम् * सामान्यवाचिनोऽप्याख्या
स्य प्रकृत्यर्थोपधानेन विशेषपरत्वात्को राजा यातीति शुद्धसामा
वाचिनो राजशब्दस्येव पाञ्चालराजशब्देन पाञ्चालविशेषोपहितरा
सामान्यवाचिना सामानाधिकरण्यं युक्तमित्याशयः। यथाहुः म
नमिश्राः भेदोपहितसामान्यवचनेऽप्यपृथक् श्रुतिरिति । श्लोका
मुपसंहरति * तस्मादिति * ननु लब्धात्मककर्तृव्यापारवाचि
माख्यातानां करोतिसामानाधिकरण्यात्करोत्यर्थत्वेऽपि भावय
र्थभावनावाचित्वं कथमित्याशङ्क्य भावनावाचित्वोपपादनार्थं
रोतिभावयत्योस्तुल्यार्थत्वमुपपादयितुं भावयतिवत् करोतेरपि
त्यर्थककर्तृकर्मनिष्ठत्वं दर्शयन्कर्मनिष्ठतामेव तावदाह*तत्र चेति*
पसर्जनत्वेनाप्यनन्तरनिर्दिष्टस्य करोत्यर्थस्य योग्यतया तत्शब्देन प
३।१ मर्शात्तत्र करोत्यर्थ इत्यर्थः । एतदेव प्रश्नपूर्वकमुपपादयति *
इति*ननु कर्मनिष्ठत्वेऽपि ग्रामं गच्छतीतिवद्भवत्यर्थकर्मकर्तृनिष्ठ
भावात्कथं भावयतिना तुल्यार्थतेत्याशङ्क्य करोत्यर्थं प्रति भव
र्थकर्तुरेव कर्मतेत्याह * भवत्यर्थस्येति * करोतेरर्थस्येत्यर्थे
तिरेकजनिता षष्ठी यजतिस्तिवत्यादिवद्धात्वर्थपरो वायं धातुनि
श्लोकपूर्वार्द्धं व्याचष्टे * करोतेरिति * उत्तरार्द्धं व्याख्यातुं
मेणः प्रधानक्रियातिरिक्तावान्तरक्रियाकर्तृत्वापेक्षां तावदाह *
वेति * नन्ववान्तरक्रियापेक्षायामपि भवनक्रियापेक्षायाः प्र
क्रियान्तरेष्वदर्शनात्कथमत्र तदपेक्षेत्याशङ्क्याह * प्रतिक्रियं च
अन्वयव्यतिरेकौ दर्शयति * तथा हीति * व्यतिरेकाभिधा
चितान्वयदर्शनपूर्वकं श्लोकं व्याचष्टे * य एवेति * स्वयं वि
बीजे अङ्कुरस्य प्रवृत्त्योत्पत्त्याख्यभवनस्य जलावसेकारोपणादिनो
दनाख्यप्रयुक्तिदर्शनात्प्रवृत्तभवनः प्रयुज्यत इत्युक्ते ननु प्रवृत्त्यर्थत्व
युक्तेः प्रवृत्तस्यानर्थक्यापत्तेः प्रयुक्तिरयुक्तेत्याशङ्क्य * सम्भा
भवनो वेत्युक्तम् * मृदादाविव घटादिस्सर्वः सम्भावितभवन
प्रयुज्यते स्वयं विशीर्णबीजाङ्कुरस्यापि वृक्षादिरूपेणाप्रवृत्तोत्पत्तं
जलावसेकादिनोत्पादनादित्याशयः । ननु सिद्धस्यापि पा
करोत्यर्थकर्मत्वदर्शनाद्व्यतिरेको व्यभिचरतीत्याशङ्क्याह * यत्र
ति * ननूत्पूर्वस्य करोतेरुपकारप्रयुक्तहिंसात्मकसूचनाख्ये ग
अपपूर्वस्य च भर्त्सनाख्येऽवक्षेपणे प्रपूर्वस्य चानुवृत्त्याख्यसेवने

थनाख्यप्रकथने धर्माद्यर्थविनियोगाख्योपयोगे उपपूर्वस्य साहसि-
कर्माख्यसाहसिक्ये उपपूर्वस्य सतो गुणान्तराधानाख्ये प्रतियत्ने प्र-
गाद् गन्धनावक्षेपणासेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु
व इतिस्मृतेश्चानेकार्थत्वेनोत्पादनार्थत्वनियमाभावात्कथमुत्पत्त्या-
भवनकर्तृकर्मनिष्ठत्वनियम इत्याशङ्क्याह * सत्यपि चेति *
यमाभावे ऽपि वा यदोत्पादनार्थत्वं तदोत्पाद्यमानकर्मनिष्ठत्वं
वेष्यतीत्याह * अथ वेति * करोत्यर्थकर्मणो भवनक्रियापेक्षा-
पादितामुपसंहरति * तेनेति * लब्धायां च भवनक्रियायां
कर्तृकर्मनिष्ठत्वं करोत्यर्थस्य सिद्धं भवतीति तावच्छब्देन सूचि-
। नन्वेवं करोतेर्भावयतिवद्भवत्यर्थकर्तृकर्मनिष्ठत्वे ऽपि णिजन्त-
भावेन प्रयोजकव्यापारवाचित्वायोगात्कथं भावयतिना तुल्या-
त्याशङ्क्याह * ततश्चेति * करोत्यर्थस्य भावयत्यर्थत्वोपपाद-
य प्रयोजकव्यापारत्वप्रतिपादनार्थं तत्कर्तुः प्रयोजकत्वाभिधानं
ोज्यं विना प्रयोजकत्वायोगात्तत्सिद्ध्यर्थं प्रयोजत्वाभिधानम्। ननु
प्रत्ययरहितस्य धातोः प्रयोजकव्यापारवाचित्वे करोतिवद्भवते-
पे तद्वाचित्वापत्तेर्भावयतीति णिच्प्रत्ययो ऽनर्थकः स्यात्प्रयोज्य-
पारवाचित्वे वा भवतिवत्करोतेरपि तद्वाचित्वापत्तेः प्रयोजक-
पारवाचित्वं न स्यादित्याशङ्क्याह * भवतीति * णिच्प्रत्यय-
हेतत्वाविशेषे ऽपि यथा विक्लिदेः प्रयोज्यतण्डुलव्यापारवाचित्वं
चतेस्तु प्रयोजकदेवदत्तव्यापारवाचित्वं वृद्धव्यवहारान्नियतं तथा
योरपीत्यर्थः। ननु प्रयोज्यप्रयोजकव्यापारयोः परस्परापेक्षत्वा-
थमनयोः प्रयोज्यप्रयोजकव्यापारमात्रवाचितेत्याशङ्क्याह * तत्र
ति * प्रयोज्यव्यापारानपेक्षप्रयोजकव्यापारयोगादेवकारोक्ता-
मात्रे विवक्षा न युक्तेत्याशङ्क्य प्रयोज्यव्यापारस्यान्यतो ऽवगति-
द्धेः पारिशेष्यात्प्रयोजकव्यापारमात्रविवक्षोपपन्नेति केवलमित्य-
न तु पारिशेष्यवाचिना क्रियाविशेषणेनोक्ते कथं प्रयोज्यव्यापार-
ाभिधानं विनावगतिरित्यपेक्षायां घटमिति द्वितीययाभिहितया क-
ाख्यया शक्त्याक्षिप्तः प्रयोज्यस्य घटस्य भवनाख्यो व्यापारो य-
स्मिन्नित्युक्तम्। कथं वा कर्मणः प्रयोज्यव्यापाराक्षेप इत्याशङ्क्य *क-
णः शक्त्येत्युक्तम् * निर्व्यापारस्य कर्मत्वायोगात्तद्बलेनाक्षेप इति ३
ावः। करोतिमात्रप्रयोगे कथमाक्षेप इत्याशङ्क्य * स्वयमाक्षिप्तप्र-
ोज्यव्यापारेत्युक्तम् * घटो भवतीत्यत्र प्रथमाया अप्यभिहि-
कारकविभक्तित्वाभ्युपगमात्प्रथमाभिहितकर्तृशक्त्याक्षिप्तः प्रयोज-
व्यापारो यस्मिन्स्वयं वाक्षिप्तः प्रयोजकव्यापारो येनेति बहुव्रीहि-

विग्रहेण व्याख्येयम् । पचतिविक्लिद्यतीतिदृष्टान्तार्थौ उभयोस्तु व
पारयोर्भिन्नपदोपात्तयोः समुच्चयेन विवक्षायां करोतिभवत्योः स
ञ्चित्य प्रयोग इत्याह * कदा चिदिति * ननु करोतेः प्रयोजकव
पारवाचित्वे तदाक्षिप्तस्यापि भावनाख्यस्य प्रयोज्यस्य व्यापारस्य
ब्दत्वेन प्राधान्यानुपपत्तेः क्रियते घट इति प्रयोज्यवाचिना घ
ब्देन सामानाधिकरण्यं न स्यादित्याशङ्क्याह * कदा चिदिति
तिङा घटस्य कर्मत्वोक्तेः कर्मणश्च वस्तुतः प्राधान्यात् सव्याप
स्यैव च कर्मत्वादाक्षिप्तस्यापि प्रयोज्यव्यापारस्योपसर्जनीभूतः
योजकव्यापारो यस्य स विवक्ष्यतइत्युत्तरग्रन्थगतविवक्ष्यतइति प
नुषङ्गेण व्याख्येयम्।ननु प्रयोज्यव्यापारस्य प्राधान्यविवक्षायां करो
प्रयोगोपपत्तावुपसर्जनत्वविवक्षायां सुतरामुपपत्तेर्न कदा चिद्भ
यतिः प्रयुज्येतेत्याशङ्क्याह *कदा चित्पुनरिति* समानस्य पदस्यैक
शेनोपात्ता प्रयोज्यक्रियोपसर्जनीभूता यस्येति विग्रहः तदा च स
नपदैकदेशोपात्तत्वविवक्षायां करोतेरेवाशक्तत्वेन भवतेरपि प्रयो
क्रियामात्रपर्यवसायित्वेन प्रयोजकव्यापारविवक्षायां णिच्प्र
विना प्रवृत्त्यशक्तेः सो ऽप्यधिकः प्रयुज्यतइत्यर्थः । क्रियाया धातु
च्यत्वप्रसिद्धेर्णिचश्च केवलस्य धातुत्वाभावान्न क्रियावाचितास्ते
ये वदन्ति तन्मते न द्योतकत्वोक्तिः । स्वमते तु भुविक्लिद्योः प्रयो
कक्रियावाचित्वे केवलप्रयोज्यक्रियानिष्ठत्वोक्तिर्विरोधापत्तेर्णिच
व तद्वाचकत्वम् । प्रयोज्यक्रियावाचिना णिचा विना प्रयोजकक्रि
यामशक्तिं वृद्धवचनेन द्रढयति * तथा चाहेति * प्रयोज्यक
काणां भवनादीनां व्यापाराणां प्रतिपादका ये भूवादयो धात
स्तेषां प्रयोज्यानां घटादीनां ये प्रयोजकाः कुलालादयस्तेषां व्यापा
णयन्ता एव प्रयुज्यन्तइत्यर्थः । भवनादीनामन्योत्पादानुकूलत्वाभ
नाव्यापारत्वमाशङ्क्य *एकान्तेत्युक्तम्* अन्योत्पादानुकूलत्वा
वे ऽप्यनिष्पन्नरूपत्वादेकान्तेन व्यापारतास्तीत्याशयः । ननु भ
त्यादीनां णिचं विना प्रयोजकक्रियाभिधानाशक्तौ करोत्यादीन
प्यशक्तिप्रसङ्गात्तेषां वा शक्तावन्येषामपि शक्तिप्रसङ्गादव्यवस्थ
युक्तेत्याशङ्क्याह * न चेति * शक्तीनां स्वभावत्वेनापर्यनुयो
त्वात्प्रकृतयः प्रत्ययास्तत्समुदायात्मकानि चादिशब्दोक्तानि पद
नानारूपानर्थान्वदन्तीत्यर्थः । अतो भवत्यर्थकर्तृकर्मनिष्ठप्रयोज
व्यापारवाचित्वेन करोतिभावयत्योस्तुल्यार्थत्वात्सिद्धकर्तृक्रिया
चिषु चाख्यातेषु करोतिसामानाधिकरण्येन करोत्यर्थस्य
च्यत्वावगमात्तद्द्वारा भावयत्यर्थस्यापि वाच्यत्वसिद्धेर्यज

श्वातो ऽवगम्यते भावयेदिति चेदित्यादिभाष्यं युक्त-
याह * एवमिति * ननु भावनायाः प्रत्ययवाच्यत्वे
धात्वर्थस्यैव निष्पाद्यत्वलक्षणक्रियारूपेण प्रत्ययेनाभिधानाद्भा-
त्वोपपत्तेरन्योत्पादानुकूलत्वे ऽपि वा भावनालक्षणे धात्वर्थ-
धातुना व्यापारात्मनोपादीयमानस्य प्रत्ययावगतानुष्ठेयत्वान्य-
पपत्त्या फलोत्पादानुकूलतयावगमाद्भावनात्वोपपत्तेर्भावयेद्या-
ते क्रियाकरणतया भेदेन निर्देशो न युक्त इत्याशङ्क्य भवनक्रि-
र्तृकर्मनिष्ठप्रयोजकव्यापारत्वं धात्वर्थव्यावर्त्तकं लक्षणमाह *
ते * येन कारणेन करोतिभावयत्योरुक्तप्रकारेण तुल्यार्थत्वं
कारणेनेत्यर्थः। यत्त्वाक्षेप्त्रा विधिमात्राभिधायित्वाल्लिङादीनां
नाभिधायित्वं न सम्भवतीत्युक्तं तदनुभाषणपूर्वकं निराकरो-
* यत्तूक्तमिति। अयमाशयः * किं विधिमात्रशब्देन भावयति-
वाच्यत्वं भावनायाः प्रत्ययानभिधेयत्वे कारणमभिप्रेतं विधि-
तिरिक्तभावनाभावो वा। तत्र विधेरपि भावयतिधातुवाच्यत्वेन
गद्यवाच्यत्वापत्तेर्नाद्यः कल्प इत्यभिधाभावनाशब्देन सूचितं
जकव्यापारवाचित्वात् भावनाशब्दस्य विधेरपि प्रयोजकलि-
ङ्व्यापारत्वात् भावनात्वमस्तीत्याशयः। ननु विधेर्लिङादिवा-
ाभ्युपगमात्तदुच्चारणात्प्रागसिद्धत्वे सति अगृहीतसम्बन्धत्वेन
परत्वायोगाल्लिङाद्युच्चारणात्प्रागेव सिद्धेस्तत्परत्वं न युक्तमि-
ङ्क्य शब्दश्रवणानन्तरभाविप्रवृत्तिहेतुप्रेषणाध्येषणादिव्यापारा-
प्रवर्त्तनासामान्याभिधानेन तद्विशेषापेक्षायामपौरुषेये वेदे पुरु-
स्य प्रेषणादेरसम्भवात्तद्व्यतिरिक्तविध्याख्यस्य विशेषस्य पारि-
ाल्लक्षणया गम्यमानस्य सम्बन्धग्रहणानपेक्षत्वेन प्राक् सिद्ध्य-
णादविरुद्धा शब्दव्यापारतेति सूचनायाभिधाशब्दः। कर्त्तृव्युत्प-
करणव्युत्पत्त्या वाभिधाशब्दस्य शब्दपरत्वमङ्गीकृत्याभिधायाः
स्यात्मनो भावनां व्यापारं प्रवर्त्तनासामान्यव्यक्तिभूतं लिङाद्-
रवर्त्तनासामान्यमभिदधाना निर्विशेषसामान्यायोगात्प्रैषादौ च
दृष्टस्य विशेषस्य पुरुषधर्मत्वेनापौरुषेये वेदेऽसम्भवात्प्रवर्त्तना-
ान्यस्य च प्रैषादिप्रवर्त्तकव्यापारवर्त्तित्वदर्शनाल्लिङादेरेव च
प्रवर्त्तकत्वावधारणाल्लक्षणया गमयन्तीत्यर्थः। अन्यामित्यपरत्व-
वना ऽन्यशब्देन शब्दभावनायाः पाश्चात्यमभिदधतार्थभावना-
पत्वेन तदपेक्षत्वसूचनाद्विध्यभिधायित्वं नार्थभावनाभिधायि-
बाधकं प्रत्युत साधकमिति सूचितम्। न च विधिव्यतिरि-
ावनापह्नवार्थो विधिमात्रशब्दार्थो युज्यते विध्यभावे ऽपि सर्वा-

ख्यातेषु दर्शनेनापह्नोतुमशक्यत्वादिति द्वितीयकल्पनिरासायो
र्धे विधेयायाः भावनायाः पुरुषार्थरूपभाव्यनिष्ठत्वसूचनायेच्छ
नित्वं सूचयितुमिच्छार्थादर्थयतेर्णिजन्तादर्थयतइति कर्तृवि
यामेरजित्यच्प्रत्ययोत्पादनेनार्थिनः पुरुषस्यार्थशब्देनाभिधान
वनायाश्च पुरुषधर्मत्वाद्धर्मधर्मिणोश्चात्यन्तभेदाभावात्तादात्म्यं
वक्षितत्वार्थात्मा चासौ भावना चेति विग्रहः कार्यः । अन्याभि
१५।२ भावनापेक्षित्वं शब्दभावनायाः सूचितमुपपादयति * यदा हि
पुरुषव्यापाररूपेत्यनेनार्थशब्दस्यार्थयतइति व्युत्पत्त्यार्थिपुरुषप
व्याख्यानं सूचितम् । विध्यादीनां भावनाव्यक्तित्वाभावे ऽपि वि
त्वेनावच्छेदकत्वात् विशेषतोक्ता लिङादिषु शब्दविशेषेषु अ
यत्सामान्यमाख्यातत्वं नाम तद्व्यतिरिक्तैर्लिङादिशब्दविशेषैव
इत्याख्यातत्वेति त्वप्रत्ययाध्याहारेण व्याख्येयम् । व्यक्तीनां साम
दत्यन्तव्यतिरेकाभावे ऽपि आख्यातरूपवाच्यार्थभावनाव्यति
विध्याद्यर्थान्तरवाचित्वोपपादनार्थं कथं चिद्व्यतिरेकविवक्षया
तिरेकशब्दः । लिङ्लोट्तव्यपञ्चमलकाराणां विधिर्वाच्यस्तेषाम
ञ्युक्तानां निषेधः । लङ्लुङ्लिटां भूतकालः लृट्लुटोर्भविष्य
त्कः लटो वर्त्तमानकालः आदिशब्दोपात्ता क्रियातिपत्तिर्लृङ
आशीरादीनामपि लिङादिशब्दवाच्यानामादिशब्देनोपादानं
वोदाहरणैरुपपादयितुम् * तथा चेत्युक्तम् * ननु विध्या
भावनापेक्षित्वे ऽप्यभिधाभावनायाः किमायातं का वाभिधाऽ
कथं चास्याः सापेक्षतेत्याशङ्क्य * तत्रेत्युक्तम् * विधेरेवाभि
शब्दधर्मभावनात्वात्तस्याश्च प्रयोजकशब्दव्यापारत्वेन प्रयोज्य
व्यापारात्मकार्थभावनाविषयत्वात्तदपेक्षितेत्याशयः । शब्दव्यति
ण व्यापारस्यानुपलम्भेनाभावमाशङ्क्यात्यन्तभेदाभावेनानुपलम्भ
पादनायाभिधात्मिकेत्युक्तम् । ननु भावनायाः सर्वत्रांशत्रयोपे
द्विधेश्चांशत्रयानिरूपणान्न भावनात्वमस्तीत्याशङ्क्याह * विधे
श्चेति * पुरुषप्रवृत्तिविधिज्ञानप्ररोचनाख्यसाध्यसाधनेतिकर्त्तव
विशिष्टरूपेण वर्णितेत्यर्थः । यच्च करोतिभावयत्योः प्रत्ययेन
प्रयोगात्सहाप्रयोज्यत्वलक्षणपर्यायाश्रित्यतिलङ्घनेनापर्यायत्वमुप
दप्यनुभाषणापूर्वकं त्रेधा परिहरति * यस्त्विति * प
णां सहाप्रयोज्यत्वस्यानर्थक्यापत्तिप्रयुक्तत्वात् पर्यायत्वस्वरू
प्रयोजकत्वेन स्वरूपप्रयुक्तसाहित्यलक्षणव्याप्त्यभावादिह च
त्यनुग्रहादिप्रयोजनत्रयसद्भावेनानर्थक्यापत्त्यभावाच्च सह
ज्यत्वनिवृत्त्या पर्यायत्वनिवृत्तिरित्याशयः । प्रकृत्यनुग्रहार्थत

ादयति*यदि हीति* ननु तृजादिप्रयोगेणापि प्रकृत्यनुग्रहसि-
ख्यातनियमो ऽनर्थकः स्यादित्याशङ्क्याह *तेनेति* येन प्रत्ययं
पभ्रंशत्वप्रसङ्गस्तेनावश्यं कस्मिंश्चित्प्रत्यये प्रयोज्ये तृजादिप्र-
कर्त्राद्यर्थान्तरापत्तेस्तस्य च विवक्षितार्थाभ्यधिकत्वेनावाच्य-
्कृत्यर्थानुवाद्याख्यातमेव नियम्यतइत्यर्थः। नन्वधिकार्थापत्ति-
[कर्त्ता भावयितेत्यादिकर्त्रादिवाचितृजादिप्रयोगायोगे ऽपि
श्तिपो वाभ्यधिकार्थानापादकत्वेन प्रयोगोपपत्तेः क्रिभाविः क-
ाविययतिरिति वा कस्मान्न प्रयुज्यतइत्याशङ्क्ते*ननु चेति *
धिकार्थत्वाभावे ऽपि तद्युक्तयोः करोतिभावयत्योः स्वरूपवा-
नाख्यातार्थवाचित्वहानापत्तेर्न युक्तः प्रयोग इति परिहरति
ादिति * नन्वर्थे ऽपीङ्न्तस्य श्तिबन्तस्य वा धातोः प्रयोगान्ना-
त्रत्वहानिरित्याशङ्क्याह * यस्त्विति * एतदेवोपसंहरति
स्मादिति * कर्तृसंख्यादिसङ्ग्रहार्थत्वं विवृणोति * यदि ३५६
* पूर्वस्मिन्परिहारे सर्वप्रत्ययार्थाविवक्षापत्तेः परिहारान्तर-
: भावनांशानुवादस्त्विहापि तुल्य इत्याह * यस्त्विति *
ावनायाः प्राधान्येनाख्यातार्थत्वाद् गुणभूतकर्तृसंख्यादिसंग्र-
ुवाद्यत्वानुपपत्तेः प्रकृत्यनुग्रहाय धातुनिर्देशार्थस्यैव प्रत्ययस्य
्यार्थपरत्वोपपत्तेः प्रयोगो युक्त इत्याशङ्क्याह * अन्यथा
* आख्यातार्थकथनाय भावनामात्रवाचिनि क्रिभाव्यादि-
प्रयुज्यमाने भावनामात्रस्याख्यातार्थत्वभ्रान्ति करोतिभा-
ावौ सर्वाख्यातार्थवाचित्वभ्रान्ति व्यावर्त्तयितुं कर्तृसं-
ाख्यातेनावश्यं वाच्यमित्यर्थः। रूपाविनाशसिद्ध्यर्थ-
पादयति * नित्यं चेति * एतच्च ननु कारो भाव
[भावोत्पन्नकृत्प्रयोगे ऽभ्यधिकार्थान्तरानापत्तेः शब्द-
कत्वानापत्तेश्च नाख्यातनियमः सम्भवतीत्याशङ्क्य * परिहा-
मुक्तम् * श्लोकार्थमुपसंहरति * तस्मादिति * एवं पर्याय-
े प्रत्ययस्य प्रयोजनान्तरार्थत्वेन पौनरुक्त्याभावात्सह प्रयोगो
वेरुध्यतइत्युक्तम् * इदानीं भावनाया वस्तुतः प्रत्ययमात्रवा-
ऽपि प्रतीतिमात्रव्यवहारिणा लोकेन विवेक्तुमशक्यत्वादा-
रदेन धात्वर्थवत् भावनाप्युच्यतइत्येतावदवगम्य पचतीत्यस्य
। इति पृष्टे धातुमात्रवाच्यत्वेन निश्चितं धात्वर्थं पाकमिति
ाय सम्मुग्धाख्यातपदवाच्यत्वेन भावनां ख्यापयितुं करोतौ
तौ वा प्रयुज्यमाने प्रकृत्यनुग्रहार्थं प्रत्ययमात्रस्य भावनावाचि-
वेनापौनरुक्त्यं मत्वा प्रयोगो न विरुध्यतइत्याह * किं चेति *

पर्यायत्वाभावादपि तिङ्प्रयोगाविरोध इत्येवम् किं च शब्दव्या
नपूर्वकम् । श्लोकं व्याचष्टे * यदि हीति * लोकानवगतं ि
कुर्वतां परीक्षकाणां लोकविरोधपरिहारसूचनार्थं लोकस्य विवे
नप्रयोजनाभावाभिधानम् । ननु धातोः व्यभिचारित्वेनावाच
निश्चयात्प्रत्ययमात्रवाच्यत्वं विवेक्तुं शक्यमित्याशङ्कते * स्य
दिति * प्रत्ययस्यापि व्यभिचारस्तुल्य इति तावत्परिहरति *
दिति * प्रौढ्या भावनावाचित्वेनाभिमतस्य सिद्धकर्तृक्रियावा
धातोरव्यभिचारं वक्तुमुपक्रमते * न वेति * प्राधान्याप्रतीत
स्वरूपमात्रप्रतीतिदर्शनायात्यन्तमित्युक्तम् । अस्तिः प्रतीतिलक्षण
तत्र कृद्विशेषाणां कृत्यानां प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चेति प्रै
चित्वस्मृतेरप्राप्तविषयस्य च प्रैषस्य विधित्वाद्विधेश्च भावनावि
त्वादप्रधानभूतायाश्चांशत्रयोपसंहारासामर्थ्येन विधातुमशक्य
दीषत्प्राधान्यमप्यस्तीति सूचयितुं पूर्वं कृत्येषु किं चिदपकृष्ट
णभावनारूपप्रतीतिं दर्शयति * कृत्येषु तावदिति * कृत्यमध्ये
भोक्तव्यमित्यादेर्भावोत्पन्नात्कृत्याद्गन्तव्य इत्यादिषु कर्मोत्पन्नेषु
७।१ नतरागम्यतइत्याह * तत्रापीति * द्रव्यप्राधान्येन धात्वर्थस्
प्राधान्याभावाद्भावनायाः सुतरां नास्तीति सूचितं कथं न्यूनत
चेत्यपेक्षायामाह * न हीति * भोजनं कर्त्तव्यमित्यत्र प्रयोजक
पारस्य धात्वर्थप्रधानत्वाद्गन्तव्य इत्यत्र च प्रयोज्यद्रव्यपरत
प्राधान्यमित्यर्थः । द्रव्यस्वरूपस्य तव्यवाच्यत्वाभावेन प्राधा
योगात् कर्मस्वरूपेण प्राधान्यं वक्तुं प्रयोज्यशब्दः । निर्व्यापा
प्रयोज्यत्वायोगात्कर्मशक्त्याक्षिप्तप्रयोज्यव्यापारविशिष्टतोक्ता । न
वं सति तिङ्क्षु भावनावाचित्वस्य भावनाप्राधान्यव्याप्तेः कृ
भावनाप्राधान्यनिवृत्त्या तद्वाचितापि निवर्त्ततइत्याशङ्क्य तिङ्क्
सर्वेषु भावनाप्राधान्याभावाद्व्याप्त्यभावं सूचयितुमाह * ए
ति * भावोत्पन्नाः कर्मोत्पन्ना वा स्थानिनो लकारा येषां भु
देवदत्तेन भुज्यते ऽन्नमित्यादीनामादेशानां तिङन्ते ऽप्यनेन भावक
त्पन्नकृत्यव्याख्यानेन व्याख्याता इत्यर्थः । एतदेव विवृणोति *
ष्वपीति * अतो भावनावाचिनामपि सर्वेषां तिङन्तानां तत्प्रा
न्यलक्षणतुल्यत्वाभावाद्भावनावाचित्वस्य तत्प्राधान्येनाव्याप्तेर्न
त्येषु भावनाप्राधान्यनिवृत्त्या तद्वाचित्वनिवृत्तिरित्युपसंहरति
अत इति * अव्ययसंज्ञकेषु कृत्सु कृत्यसंज्ञकेभ्यो ऽपीषत्न्यूनभ
नाज्ञानमित्याह * तथेति * ननु तेषामपि भोक्तव्यमिति कृत्यसं
कत्कद्भावोत्पन्नत्वस्मरणाविशेषात्कथं कृत्यवाच्यभावनातो ऽव्यय

च्यावा भावनायाः न्यूनतेत्याशङ्क्य * अव्ययेत्युक्तम् * स्मृत्युप-
ासेनाव्ययकृत्सु इति ज्ञातुं शक्यत्वान्न कण्ठेनोक्तम् । ईषन्न्यून-
वनाज्ञानस्य स्वसंवेद्यत्वमुदाहरणैर्दर्शयति * अभिक्राममिति *
तुसम्बन्धे प्रत्यया इति धातुसम्बन्धाधिकारविहितानामपि णमु-
दीनां धात्वर्थसम्बन्धं विना धातुसम्बन्धायोगात् धात्वर्थनिष्पा-
ऽक्षणभावनायाः सम्बन्धं च विना धात्वर्थसम्बन्धायोगाद्भाव-
सम्बन्धवाचित्वप्रतीतेः समानकर्तृकयोः पूर्वकालइत्यनेन समान-
ृकयोः धात्वर्थयोः पूर्वकाले धात्वर्थे वर्त्तमानाद्धातोः क्त्वाप्रत्ययं
ाय आभिक्ष्ण्ये णमुल्चेति तस्मिन्नेवार्थे पौनःपुन्याख्याभीक्ष्णाधि-
णमुल्विधानादभिक्रमणं कृत्वा होमं करोतीति णमुल्श्रुत्यैव
ाभावना सापेक्षाभिक्रमणभावनाश्रीयते । करणे हन इति च क-
वाचिन्युपपदे हन्तेर्णमुल्प्रत्ययविधानादुपहननं कृत्वा होमं क-
ोति हननभावना होमभावना सापेक्षावगम्यते । होमं कृत्वा भ-
् करोतीति भक्षणभावना सापेक्षा होमभावना क्त्वाश्रुत्यैवावग-
े । भावलक्षणे स्थेणकृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् इत्यनेन
ुमर्थइत्यनुवर्त्त्य भावं च तुमर्थत्वेन विवक्षित्वा भावो लक्ष्यते-
ाति च भावलक्षणशब्दार्थे विवक्षित्वा तिष्ठतेरिणः कृञोवदेश्चरे-
तिस्तमिर्जनेश्च धातोर्भावलक्षणार्थे भावे वर्त्तमानात्तोसुन् विधा-
ुरा वाचःप्रवदितोरनूच्य इत्यत्र प्रवदितोरित्यव्ययतोसुन् श्रुत्यैव
ते दिक्शब्दयोगात् लुप्तपञ्चमीकतया वाक्प्रवादक्रियातः पुराप्रात
ाकानुवचनं कार्यमित्यनुवाचनभावनासापेक्षा प्रवादभावना ग-
। अतो भावनान्तरसापेक्षत्वात्स्वसम्वेद्या न्यूनतेत्याशयः । नि-
ञ्ज्ञयोस्तु क्तक्तवत्वोः कृतो न्यूनतरभावनाज्ञानं स्वसम्वेद्यमि-
* पक्व इति * पक्वः पक्ववानित्यत्रोदनः कृतपाको देवदत्तः पाक-
वानिति निष्पन्नरूपायाः भावनायाः यथासंख्यं कर्मकर्तृरूपद्र-
ासर्जनत्वप्रतीतेर्निष्पाद्यत्वप्राधान्ययोर्द्वयोरप्यभावात्कृत्यसञ्ज्ञ-
ः कृद्भ्यो न्यूनतरेत्याशयः । एवं कृत्याव्ययनिष्ठासञ्ज्ञकेषु
शेषेषु अपकृष्यमाणभावनारूपप्रतीतिमुक्त्वा कृदन्तरेषु यथा-
ावमतिदिशति * एवमिति * पाचकः पक्तेत्यादिषु कर्तृत्प-
पाककारकः पाककर्त्तेत्यादिकर्तृप्राधान्यप्रतीतेरादिशब्दोपात्तेषु
इत्यादिषु भावोत्पन्नेषु पाकः क्रियेत्यादिधात्वर्थप्राधान्यप्रतीते-
यत्वाभावेन च प्राधान्यानपेक्षणात् कृत्येभ्यो न्यूनतरेति भा-
स्वसम्वेद्यमपि सर्वेषु सिद्धकर्तृक्रियावाचिषु धातुषु भावनाज्ञानं
तेपन्नान्प्रत्ययापत्त्या साधयति * तथा चेति * भावोत्पन्नेषु

कृत्येषु कस्य केनेति कर्मकर्तृकरणानां कर्मोत्पन्नेषु केनेति
णयोरभिक्रामामित्यत्र कर्तुरुपघातमित्यत्र कस्य कः केनेति
र्तृकरणानां प्रवदितोरित्यत्र कस्येति कर्मकर्त्रोः पक्व इत्यः
कर्तृकरणयोः पक्ववानित्यत्र कस्य केनेति कर्मकरणयोः पाच
त्र कस्य केनेति कर्मकरणयोः पाक इत्यत्र कस्येति कर्मकर्त्रो
च करणस्याधिकरणाद्यपेक्षायाश्च यथायोगं दर्शनात्तस्याश्च
दिषु भावनानुपलब्धावदर्शनाद्भावनाज्ञानहेतुत्वावधारणा
थानुपपत्त्या भावनाज्ञानं कल्प्यतइत्यर्थः । करोतेश्च
प्रत्यये कारकशब्दस्य मनिन्प्रत्यये । कर्मशब्दस्य तृच्प्रत्यये
ब्दस्य ल्युट्प्रत्यये करणशब्दस्य व्युत्पत्तेः कारकव्यपदेशतद्वि
र्मादिव्यपदेशानां करोत्यर्थव्यापारसम्बन्धनिबन्धत्वात्तदन्य
पत्त्यापि भावनाज्ञानं कल्प्यतइत्याह * न चेति * ननु धात्व
व्यापारत्वात्कारकापेक्षा कर्मादिषु च कारककर्मादिव्यपदेशाः
स्स्यन्त इत्याशङ्क्याह * न त्वस्तीति * धात्वर्थस्य निष्पाद्यत
त्यप्यन्योत्पादानुकूलत्वलक्षणकरोत्यर्थक्रियारूपव्यापारत्वाभा
क्रियासम्बन्धिरूपकारकापेक्षा धात्वर्थसम्बन्धनिबन्धना वा
कादिव्यपदेशाः सम्भवन्तीत्याशयः । यत्र धात्वर्थे किं चि
जायते स व्यापारो न भवतीत्यर्थः । अतः करोतिभावयत्योर्य
स्सर्वधातूनामर्थः सिद्ध इत्युपसंहरति * ततश्चेति *
ख्यातेषु भावनावाचित्वं करोतिसामानाधिकरण्येन व्याप्तं (
करोतिसामानाधिकरण्ये व्यावृत्त्या न व्याप्तं) कृत्सु करोतिसा
धिकरण्ये व्यावर्त्तते इत्याशङ्क्याह * शक्यते चेति * ननु प
रानेकक्षणव्यासक्तरूपपूर्वापरीभूतत्वस्य व्यापारलक्षणस्य घ
दिष्वप्रतीतेः कथं भावनाख्यव्यापारवाचितास्तीत्याशङ्क्य *
पीत्युक्तम् * यथा शुक्लत्वमित्यत्र भावप्रत्ययाद् गुणस्य नि
प्रतीतेर्द्रव्योपसर्जनत्वरूपाप्रतीतावपि गुणस्वरूपवाचित्वं न
न्यते तथात्रापि घञादिप्रत्ययात् सिद्धरूपप्रतीतेः पूर्वापरीभूत
पनिष्पाद्यत्वाप्रतीतावपि भावनास्वरूपवाचित्वं न विहन्य
भावः । कथं शक्यमित्यपेक्षायामाह * तद्यथेति * णमुल
तौ करोतिसामानाधिकरण्यं प्रदर्शयितुं प्रश्नार्थे किमिति प्रयो
अन्यथैवं कथमित्थम्विनियोगिनि किम्युपपदे करोतेर्णमुल्प्रत्य
धानात् * कथङ्कारमित्युक्तम् * किं कृत्वा भक्षयन्त्यभि
हुत्वेति वक्तव्यं होमाभिषवयोः पौर्वापर्यसन्देहनिवृत्त्यर्थं जुहोत

१ अयं पा० १ पु० मा० ।

किङ्कर्त्रोः पुरा प्रवादितोरिति कृञ्वदिभ्यामेकसूत्रेण तोसुन्वि-
ात्सुज्ञातत्वाच्च दर्शितम् किं कर्त्तेत्युच्यमाने कर्मविशेषप्रश्नाश-
ास्तेः क्रियाविशेषविषयत्वज्ञापनार्थं का क्रियास्येति विवक्षित-
त् * किं क्रिय इत्युक्तम् * नन्वाख्यातेषु भावनायाः प्राधान्य-
तेः प्रत्ययार्थत्वावधारणाच्च धातुवाच्यतेत्याशङ्क्याह * न च-
* प्रत्ययार्थस्यापि कर्तृसंख्यादेर्गुणत्वदर्शनात्प्रत्ययार्थस्य प्राधा-
मृतिरप्रमाणमित्याशयः । अतो यथा धातवो धात्वर्थं न व्य-
रन्ति तथा भावनामपीत्युपसंहरति * तस्मादिति * भिन्न-
ऽपिशब्दः सर्वधातूनां करोत्यर्थवाचित्वे ऽभियुक्तानां संमति-
* तथा चाहुरिति *

विभज्य सेनां परमार्थकर्मा सेनापतींश्चापि पुरन्दरोत्थः ।
नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातून् ॥

नन्वाख्यातेषु सर्वधातुवाच्यत्वे भावनायाः प्राधान्यप्रतीतिः क-
त्याशङ्क्याह * यत्त्विति * गुणप्रधानभावस्यार्थाद्गम्यमानत्वेन
ार्थत्वपक्षे ऽपि प्राधान्यस्य वाच्यत्वाभावात्प्रौढिमात्रेण वा-
ाभिधानमिति सूचयितुम् * काममित्युक्तम् * अस्मिन्पक्षे
ार्थश्चात इत्यतःशब्देन धातुमात्रपरामर्शात् धात्वर्थश्च धातो-
म्यते भावयेदिति चेति भाष्यं व्याख्येयम्।नन्वेवं भावनायाः प्र-
ाच्यत्वाभावात्प्रत्ययस्य करोतिभावयतिभ्यां पौनरुक्त्याभावे
यागेनेति घञन्तेन धातुना धात्वर्थे कथ्यमाने भावनाया
तेनैव धातुनोपात्तत्वाद्भावयेदिति पुनरुक्तं स्यादित्याश-
* नन्विति * ननु घञा भावनातो धात्वर्थस्य निष्कृष्टत्वात्कथं
ोपादानमित्याशङ्क्यैकशब्दोपात्तयोः शुद्धाभिधानलक्षणानिष्क-
ात्सिद्धरूपाभिधानलक्षणो निष्कर्षो वाच्यः । भावनाया अपि
रूपेणाभिधानोपपत्तेरपरिहार्यं पौनरुक्त्यमिति सूचयितुं व्या-
मानं इति वक्तव्ये निष्कृष्टमित्युक्तम् । तृतीयान्तेन करणात्मना
र्थस्य निष्कृष्टत्वाद्भावनायाश्च क्रियात्वेन करणत्वायोगाद्धात्व-
धातुना विवक्षित्वा शब्दान्तरेण भावनारूपार्थव्याख्या
परिहरति * नैष दोष इति * सामान्यविशेषशब्दयोरवच्छे- ३४८।
छेदकपरत्वं विशेषणभावाच्च यागादयो भावनाविशेषा इत्यत्र
व वक्ष्यते एवं प्रौढ्या धातुमात्रवाच्यत्वमुपपाद्य केवलयोर्धा-
पयोर्व्यभिचाराद्धात्वनुगृहीतेन प्रत्ययेन प्रत्ययानुगृहीतेन वा
उभाभ्यां वा परस्परानुगृहीताभ्यां भावनोच्यत इत्यपि
ाक्यमिति यदुपक्रमे ऽभिहितं तदुपपादयति *अथ वेति* कर-

णांशस्य धात्वर्थस्य कर्तृसंख्यादीनां चैकवाच्यत्वे ऽपि भाव-
समुदायवाच्यत्वाविरोध इत्याशयः । अस्मिन्पक्षे यज्याद्यर्थश्चात
त्यतःशब्देन धातुप्रत्ययसमुदायं परामृश्यातःसमुदायाद्यज्यादि
त्वंशस्य चार्थो ऽवगम्यते समुदायार्थश्च भावनेति भाष्यं व्याख्ये
प्रकृतसूत्रपर्यालोचनयाप्येतत्पक्षद्वयं प्रतिभातीत्याह * तथा चे
क्रियतइत्यस्मिन्नर्थे करोतेर्मनिन्प्रत्ययस्मृतेः कर्मशब्दस्यानुष्ठे
ष्यत्वाद्धात्वर्थानवच्छिन्नायाश्च भावनाया अनुष्ठेयत्वाद्धात्वर्थस्यै
नुष्ठेयत्वेन कर्मशब्दवाच्यत्वात्कर्मशब्दशब्देन धातून् विवक्षित्वा
त्सामानाधिकरण्याद्भावार्थता तेषामेवाश्रितेत्यर्थः । समुदायवा-
त्वपक्षे भावार्थानां धातुप्रत्ययसमुदायानां धात्वंशेन कर्मशब्द
त्सामानाधिकरण्यं प्रत्ययस्य तु भावार्थत्वेन कथं चित् सामाना
करण्यमित्याशयः । नन्वेवं सति सिद्धकर्तृक्रियावाचिन्याख्यात
त्यये सति इत्यादिना कस्मात्प्रत्ययवाच्यतोक्तेत्याशङ्क्याह * शा
त्विति * इहैव तावद्यज्याद्यर्थश्चातो यजेतेति पदादवगम्यते २
वयेदिति चेति धातुवाच्यादर्थाद्भेदेन भावनावगमाभिधानाद्धातुम
त्रस्य चानिर्दिष्टस्यातःशब्देन परामर्शानुपपत्तेस्तन्मात्रपरामर्शे
यागादिश्चातो ऽवगम्यते इति वक्तव्यत्वात्प्रत्ययार्थत्वाभिप्रायागव
शब्दान्तराधिकरणे च यजेतेत्यस्य पूर्वो भागो यजत्यर्थं ब्रवीति २
त्तरो भागो भावयेदिति इत्यादिभाष्ये परो भागो भावनावचन इत्य
त्र च स्पष्टप्रत्ययवाच्यत्वाभिधानात्सामानाधिकरण्यस्य चाख्यात
पदरूपाः शब्दाः प्रत्ययांशेन भावार्थाः धात्वंशेन कर्मशब्दा इत्ये
धातव एव भावनाविशेषणभूतस्वार्थवाचित्वेन भावनाप्रयोजन
त्वाद्भावार्था इत्येवं वोपपत्तेः । प्रत्ययमात्रार्थता शास्त्रकाराणामभिप्रे
तेत्याशयः । प्रत्ययार्थत्वमुपपादयितुमुपक्रमते * तत्रेति * भा
वप्रधानामाख्यातमिति नैरुक्तिकस्मृतेर्णिजन्ताद्भवतेरच्प्रत्यये कृते
भावशब्दव्युत्पत्तेर्भावनाप्राधान्यविषयत्वावसायात्प्राधान्याभावे च
कृदन्तवन्निरपेक्षस्य कारकान्वयायोगापत्तेराख्यातेभ्यश्च भावनाप्रा-
धान्यावगतेः । सर्वस्य सम्वेद्यत्वान्न तावत्प्राधान्ये विप्रतिपत्तुं श-
क्यम् । प्रकृत्यर्थत्वे च सति विशेषणत्वापत्तेः प्राधान्याभावप्रसङ्गा-
त्प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोः प्रत्ययार्थः प्राधान्येनेति प्र-
त्ययार्थप्राधान्यस्मृतेश्च कर्तृसंख्यादेः प्रत्ययार्थस्य प्राधान्याभावात्प्र-
त्ययार्थः प्रधानमेवेति नियमायोगे ऽपि प्रत्ययार्थ एव प्रधानमिति
नियमोपपत्तेर्नामस्वपि च कृत्तद्धितान्तेषु कारकविभक्त्यन्तेषु च
प्राधान्यस्य प्रत्ययार्थत्वाव्यभिचारात्सत्त्वप्रधानानि नामानि इति

तेश्च लिङ्गसंख्यासम्बन्धार्हत्वाविषयतया व्याख्यानोपपत्तेः । प्रा-
दिकार्थप्राधान्यपरत्वेऽपि वा प्रतीत्यनुसारात्प्रथमान्तनामवि-
तया व्याख्यानोपपत्तेः। प्रातिपदिकार्थप्राधान्यस्य प्रत्ययार्थत्वव्य-
चारानापादकत्वात्प्राधान्येन भावनायाः प्रत्ययार्थतावसीयतइ-
ाय: । प्रकृत्यर्थस्य विशेषणत्वोपपादनार्थं पूर्वार्द्धं प्रत्ययार्थवि-
णीभूतस्यार्थाभिधानेन प्रकृतेः प्रत्ययार्थपरत्वस्य विवक्षितत्वात्
कतात्पर्यं व्याचष्टे * यद्यपीति * तदागमन्यायेनापि भावना-
प्रत्ययार्थतावसीयतइत्याह * तथेति * नन्वन्वयव्यतिरेका-
निष्कृष्टेऽर्थे नियम्यतइत्यन्वयव्यतिरेकैकशरणत्वान्निष्कृष्टार्थ-
यशक्तिनियमस्य धातुव्यतिरेकेण चाख्याताभावादिह तन्मात्रा-
व्यतिरेकानुपपत्तेः कथं तन्मात्रवाच्यत्वनिर्णय इत्याशङ्क्याह
केवलमिति * धात्वपरित्यागेऽपि प्रत्ययश्रवणकाले धातुश्र-
भावेऽपि भावनाप्रतीतेर्धातुश्रवणकाले च प्रत्ययश्रवणाभावे
तीतेः शब्दवत्तूपलभ्यते न तदागमे हि तद् दृश्यते तस्य
यथान्येषामिति चातुर्थन्यायेन निर्णयो भविष्यती-
ाय: । यत्तु कृदन्तधातुवदस्त्यादिपरस्य प्रत्ययस्या-
भावनाव्यभिचारात्तद्वाचित्वं न सम्भवतीत्युक्तं तद्-
षणपूर्वकं परिहरति * यत्त्विति * अयमाशयः पचतीत्या-
प्रतीयमानायाः भावनायाः धात्वर्थेन स्वनिष्पादकतया लक्ष्य-
त्वे गुणत्वापत्तेः प्राधान्यप्रतीतिविरोधापाताद्वाच्यत्वं तावद्-
ङ्गीकार्यं तच्च व्यभिचारात्प्रत्ययस्यावाचकत्वे धातुसमुदाययो-
ाचकत्वापत्तेर्विरुध्येत समुदायार्थत्वपक्षेऽपि हि धातुमात्रस्या-
साहित्यात्मकः समुदायो भावनावाची स्यात्पच्यादिधातुवि-
र वा तत्र धातुविशेषस्य शुद्धस्यापि अव्यभिचारोपपत्तेर्द्वयो-
कत्वकल्पनस्यान्याय्यत्वाच्छुद्धधातुवाच्यत्वस्य प्राधान्यविरो-
भ्युपगमे प्राधान्यस्य शुद्धप्रत्ययार्थत्वेन कारकविभक्तिवाच्येषु
कषु व्याप्तेः। शुद्धप्रत्ययार्थत्वस्यैव न्याय्यत्वापत्तेर्धातुमात्राख्या-
दायार्थताभ्युपगन्तव्या सा च व्यभिचाराविशेषान्न युक्तेति
ये ऽपि यत्र पचतीत्यादौ भावना प्रतीयते तत्रैव वाच्यताङ्गी-
तच्च चोक्तरीत्या प्रत्ययार्थतैव निश्चीयतइति । नन्वेवं सति
ायाः सार्वत्रिकं प्रत्ययार्थत्वं न सिध्यतीत्याशङ्क्याह * अन्य-
ाति * प्रयोजकव्यापारस्य भावनात्वात् अस्त्याद्यर्थकर्तुश्चा-
त्वेन प्रयोजकत्वायोगात् भावनानुपपत्तेरसत्याश्च कस्य वा-
विचाराविषयत्वात्प्रत्ययस्य भावनावाचित्वाभावेऽपि प्रकृ-

त्यनुग्रहार्थत्वेन कर्तृसंख्याद्यभिधानार्थत्वेन वा टाबादेरिव
वाचिनः खट्वादौ स्त्रीत्वाभावेन तद्वाचित्वाभावे ऽप्यर्थवर
त्तेरानर्थक्यपरिहारायापि वाच्यानाकाङ्क्षणाद्यत्र प्रतीयते तः
त्ययार्थत्वं विचार्यते तत्र च सार्वत्रिकतास्त्येवेत्याशयः ।
सति व्यभिचारात्प्रत्ययस्य भावनावाचिता न युक्तेत्याशङ्क्याह
चिदिति *

नान्वयव्यतिरेकाभ्यां त्वपूर्वो ऽर्थो ऽवगम्यते ।
सङ्कीर्णो ऽवगते त्वर्थे ताभ्यां शक्तिर्नियम्यते ॥

तेनानेकात्मकाच्छब्दादनेकार्थावबोधने सिद्धे यदागम
ऽर्थः स तस्येत्यवधार्यते इत्यनेनानेकशब्दोच्चारणादने
प्रतीतौ कस्य शब्दस्य को ऽर्थ इति विवेकमात्रस्य तदागम
यात्मकान्वयव्यतिरेकाधीनत्वादस्त्यादौ च भावनाप्रतीत्य
कस्यासावर्थ इति विवेकानाकाङ्क्षणात्कूपयूपसूपादिवद्व्यभि
ऽपि यत्रानेकार्थप्रतीतिस्तत्र तदागमन्यायाविघाताच्च कश्चि
प इत्युत्तरमुक्तमित्यर्थः । प्रौढ्या ऽस्त्यादिना परस्पर
यस्य भावनावाचित्वं वक्तुमुपक्रमते * अथ वेति * प्र
प्रश्नपूर्वकमुपपादयति * कुत इति * भाव्यं विना भावनानुपप
माशङ्क्य भाव्यान्तराभावे ऽपि कर्तैव भाव्यो भविष्यतीत्युक्ते
थमेकस्यैव कर्तृकर्मतेत्याशङ्कानिरासायांशशब्दः घटो भवतीत्यु
माने घटे प्रयोगात्तस्यां चावस्थायां पूर्वापरीभूतस्य घटस्य केन
देशेन सिद्धत्वात्केन चित्साध्यत्वात्सिद्धेः कर्तुर्घटस्यांशे सम
भाव्यकर्त्रंशविषया भावनास्त्येवेत्यंशशब्दात्परां सप्तमीमधिकर
कर्मरूपविषयपरतयावस्थं व्याख्येयम् । नन्वेवं सति तत्र करो
सामानाधिकरण्यं कस्मान्न भवतीत्याशङ्क्योत्तरार्द्धं सिद्धासि
नां घटावयवानामत्यन्तभेदाभावादन्यत्र कर्तृव्यतिरिक्ते भाव्ये
त्वाभावाद्व्यतिरिक्तभाव्यनिष्ठत्वाभावात्करोत्यर्थभावनारूपेण
न प्रकाशते न प्रतिभातीत्यर्थः । केन चिद्देशेन सिद्धो घ
ऽशान्तरं करोतीत्यपि विवक्षितुं शक्यत्वात्प्रत्युक्तम्। कथं चित्करो
१ थरूपप्रतीतावपि प्रकर्षेण न प्रतीयतइत्यर्थः।अनुपलब्धिविरोधाशङ्
निरासार्थत्वेनोत्तरार्द्धव्याख्यानपूर्वकम् श्लोकं व्याचष्टे * यद्य
ति * प्रशब्दव्याख्यानाय * अतीवेत्युक्तम् * अंशांशिनोरत्यन्त
दाभावात् * आत्मानमित्युक्तम् * अंशत्रयं विना भावनाया नैराक
ङ्क्ष्याभावाद्भाव्यांशसूचितौ करणेतिकर्तव्यतांशौ दर्शयितुं निरन्तरपू
क्षणावयवोत्पत्तेः करणत्वं व्यवहितावयवोत्पत्तेश्चेतिकर्तव्यतात्वम्

। ननु घटो भवतीति वाक्ये कथमंशत्रयप्रतीतिरित्याशङ्क्य तत्र
गे त्रयो ऽप्यंशा धातूपात्तेन भवनेन * पूर्यन्तइत्युक्तम् * प्रत्य-
त्ताया भावनाया भाव्यापेक्षायां घटस्य भवतिपदात् भवितृत्वा-
र्भाव्यांशे निवेशार्हत्वाद्धातूपात्तस्य च भवनस्य धात्वर्थान्तर-
करणेतिकर्त्तव्यतांशान्वयात् घटः स्वभवनेन करणेतिकर्त्तव्य-
रेणात्मानं भवनं भावयतीत्यर्थो भवतीत्याशयः । ननु व्यापा-
रासम्भवे ऽप्येकस्य भवनस्यानेकांशपूरकत्वं न युक्तमित्याशङ्क्य
कर्तृभूतावयवभेदेन भवनभेदं सूचयितुं केचिदवयवाः प्रयुज्य-
ः चित्प्रयोजका इति श्लोकगतांशशब्दार्थे व्याख्याते के प्रयो-
के प्रयोजका इति व्यवस्थापेक्षायां भवनं कुर्वतामुत्तरावयवा-
ग्योज्यत्वोक्त्या भवनस्य प्रयोज्यव्यापारत्वेन भाव्यांशपूरकता
भवनानां च पूर्वावयवानां प्रयोजकत्वोक्त्या सिद्धत्वेन करणे-
र्तव्यतांशपूरकतोपपादिता अवस्थाविशेषाभिप्रायौ चेमावंशाव-
ब्दौ । घटादिर्हि मृत्पिण्डादेरुत्पद्यमानो घटादिशब्दवाच्यपृथु-
राद्याकारात्मकावस्थाविशेषात्प्रागवस्थान्तराणि अनुभूय घटा-
दवाच्यावस्थाविशेषरूपेणोत्पत्तेः पूर्वावस्थाभिर्भाव्यः पूर्वा-
गश्च तत्साधनत्वाद्यथार्हं करणेतिकर्त्तव्यतात्वेन विव-
शक्यन्ते घटशब्दवाच्यस्य त्वस्यैवैकस्यावस्थाविशेषस्य प्रयोज्यत्वे
ततः प्राचीनानामप्युत्तरोत्तरावस्थानां पूर्वपूर्वावस्थाहेतुकत्वं
तार्थं सूचयितुम् अवयवा इति बहुवचनम् । ननु सिद्धभवनानां
यवानां प्रयोजकत्वेनाभिमतानामसिद्धभवनोत्तरावयवोत्पत्तौ
तः को ऽसौ व्यापारो यो भावनेत्युच्यतइत्याशङ्क्य * सिद्धे-
त् * सिद्धभवनानां नियतपूर्वक्षणवर्त्तित्वेनासिद्धभवनो-
कत्वावगमात् व्यापारं च विनोत्पादकत्वायोगाद्भवनाख्यस्या-
ष्ठत्वेनान्योत्पत्त्यननुकूलत्वादवश्यं सिद्धभवनप्रयोजकावय-
गारत्वात्तत्पूर्त्यसिद्धभवनप्रयोज्यावयवनिष्ठत्वाच्च तद्वृत्तिस-
र्थानुरञ्जनसहत्वरूपं व्यापारसामान्यमभ्युपगन्तव्यम् । तच्च
निष्ठभावकव्यापारत्वेन भाव्यभावकोभयसम्पर्काद्भावनेत्यु-
त्यर्थः । भवतिपराख्यातस्य भावनावाचित्वोपपादनेन तत्प-
न्यादिपरस्य सिद्धमपि भावनावाचित्वं भूसत्तायामिति स्मृतेः
व्यद्वितीयभावविकारवाचित्वेन भवतेराद्यभावविकारवाचि-
दिपर्यायत्वं नास्तीति भ्रमप्रसङ्गात्तद्व्यावृत्त्यर्थं लोकप्रयोगानु-
र् भवतेराद्यभावविकारवाचित्वेन जन्यादिपर्यायत्वं सूच-

भवन्तमिति २ पु॰ पा॰ ।

विनुमतिदिशति * एतेनेति * आदिशब्देनोत्पद्यतिपराव
धानम् । ननु भवतेरुत्पत्त्याख्यप्रथमभावविकारवाचित्वेन
वस्तुनि प्रयोगाद्भावान्तरायोगे ऽपि आत्मनो[1] भाव्यत्वो
भवनानन्तरं ऽपि अस्तेः सत्ताख्यद्वितीयभावविकारवा
निष्पन्ने वस्तुनि प्रयोगादात्मनो भाव्यत्वानुपपत्तेः । स्वनिष्ठत
भावान्तरायोगात्कथं तत्र भावनावाचित्वं स्यादित्याशङ्काय
भिः पुनरिति * लभ्यमानसत्ताकत्वावस्थैवास्तेर्वाच्या न ल
त्ताकत्वावस्था तस्याविपरिणामादिभावविकारान्तरेष्वप्यनुवृ
तीयभावविकारवाचित्वाभावापत्तेस्तस्यां चावस्थायामलब्धस
त्ताकत्वेनात्मनो भाव्यतेत्याशयसूचनाय * उपरितनीमित्युत्त
भवनानन्तरं भवितृत्वायोगात्कथं भाव्यतेत्याशङ्क्य * सत्त
कम् * सिद्धभवनस्य मद्रूपेणापि कथं भवितृतेत्याशङ्क्य व
धिकरणार्थाश्रित्याधिकरणे ल्युडुत्पत्तेः । भवनाश्रयवाचिना भ
ब्देन भवनविशिष्टत्वाभिधानादात्मना स्वरूपेण सिद्धभवन
सत्ताकरणा भवनकर्तृता * युक्तेत्युक्तम् * आत्मना भवनं र
वद्भाविना वा भवनविशिष्टत्वाभिधानं करोतिकर्तव्यताका
मनुपात्तायाः सत्ताया एव करणोतिकर्तव्यतांशपूरकत्वं वक्तुं
शक्यत्वाद्वर्णनीयम् । सत्तया भवदित्यनुपात्तभवनविशेषणत्वं स
न युक्तमित्याशङ्क्य भवनानन्तर्यात्सत्ताया एव भवनलक्षणार्थ
भवनार्थलक्षणार्थो भवति प्रयुक्तः कथं भवतिवाच्यावस्था
त्वमस्तिवाच्यायाः अवस्थाया इत्याशङ्क्यातिदेशसूचितं जन्या
वीयत्वं विवृतम्। ननु घटाकारावस्थाविशेषोत्पत्तेरतदाकारावस्थ
कोत्पत्तिसापेक्षत्वात्प्रयोज्यप्रयोजकव्यापारभेदकल्पना युक्ता स
त्तायास्त्ववस्थान्तरानपेक्षत्वेन एवंविधभेदकल्पना न युक्तेत्याशङ्क्
* तत्रापि त्विति * उत्पत्त्याख्याद्यभावविकारानन्तरभावित्व
तीयभावविकाररूपायाः सत्तायास्तस्याश्चावस्थाकालभेदेन भेदा
नुनिष्पादितसत्ताभेदस्यावश्यम्भावात्सिद्धसत्ताकाः पूर्वे ऽवयवा
योजकाः सत्ताभवनव्यावृताश्चासिद्धसत्ताका उत्तरे ऽवयवाः
योज्याः । सिद्धसत्ताकासिद्धसत्ताकवर्तित्वसामान्यं भावना
व्यापार इति कल्पनानुसर्तव्येत्यर्थः । ननु वस्तुत्वसामान्यरूप
सत्तायाः स्वरूपेणैकत्वे ऽपि कालकृतो भेदो ऽनेनोक्त इति शङ्क
यम् । तस्या धातुवाच्यत्वाभावान्निष्पन्ने वस्तुनि इदानीमस्तीति प्र
योगस्य कालसंसर्गविषयत्वेन वस्तुस्वरूपविषयत्वाभावात् पूर्वक

१ भावनाभाव्यत्वेति २ पु० पा० ।

तासम्बन्धस्य चोत्तरकालसत्तासम्बन्धं प्रति हेतुत्वाभावेन प्र-
जकत्वव्यवस्थानुपयोगितया इह कालसंसर्गस्याविवक्षितत्वात्काल-
ो भेदो येषां पूर्वोत्तरावयवानां तेषां या सत्ता या चोभयवर्त्तिनी
मान्यसत्ता तद्रूपेणेति विग्रहः । नन्वेवं सत्याग्नेयो ऽष्टाकपालो
तीत्यादौ भवत्यर्थावच्छिन्नायाः पुरोडाशभावनाया विधेयत्वोप-
ः पुरुषव्यापारकल्पनानर्थिका स्यादित्याशङ्क्याह * सत्यामपि
ति * निष्पन्नकर्तृविषयत्वोपपादनार्थं चेतनग्रहणम् । ननु भव-
ग्रर्थे ऽपि विधिदर्शनात्कथं तत्र विधिप्रतिषेधयोरसम्भव इत्या-
ते * स्यादेतदिति * स्वप्रयोजकसिद्धकर्तृव्यापारलक्षणार्थ-
ात्र भवत्याद्यर्थस्य विधिविषयत्वं युक्तमिति परिहरति * स-
ोति * भवतिनास्तिरप्युपलक्षितः नन्वृत्विक्त्वस्यासिद्धत्वेन
वनस्य सिद्धपुरुषव्यापारलक्षणार्थतास्तु रथन्तरादेस्तु सिद्ध-
तद्भवनस्य विधिविषयत्वोपपत्तेः पुरुषव्यापारलक्षणार्थत्वं न स-
ातीत्याशङ्क्याह * तथेति * भवतीति श्रुत्या भवनस्य विधिस-
त्र प्रतीयमाने ऽप्यचेतनव्यापारे विध्यसम्भवाद्विधेये भावना
गेत्याशयः । ननु चेतनगतस्य तर्हि भवनस्य वि-
ाषयत्वं भविष्यतीत्याशङ्क्याह * यत्र त्विति * ति-
र्थवाचित्वात्स्मृतावपि इह भवेदिति देशविशेषाश्रितस-
ग्धानेन गतिनिवृत्त्याख्यातिष्ठत्यर्थवाचित्वसम्पत्तेरेवमुक्तामि-
क्रः स्यादिति प्रयोगे ऽस्तेरपि तिष्ठत्यर्थवाचितैवमूहितव्या
त्विजा भवितव्यमित्यादावृत्विक्त्वादिभवितृव्यातिरिक्तभावयि-
षव्यापाररूपभावनासद्भावे भवितृव्यापारस्य भावनाभ्युपगमो
ः स्यादित्याशङ्क्याह * तेनेति * विध्यादिशब्दोपात्ते च प्रैषादौ ३५०।१
त्रे च भवितृव्यापारव्यतिरिक्ताख्यातवाच्यभावनासद्भावे ऽपि
ग्रुपदेशेष्वभावान्न भवितृव्यापारस्य भावनात्वाभ्युपगमस्य वै-
ापत्तिरित्याशयः । ननु श्रुताद्युपदेशे ऽपि आत्मानमभावय-
ग्रति भावयिष्यतीति वा व्यवहारादर्शनाद्व्यर्थो भवितृव्यापा-
भावनात्वाभ्युपगमः स्यादित्याशङ्क्य *अपारमार्थिकमित्युक्तम *
ारानुपात्यापि भवितृव्यापारस्य भावनात्वमाख्यातार्थत्वाय
भ्युपगतमित्याशयः । एतच्च सिद्धभवनानामवयवानां भावना-
यापारो भवतिपदेन भवनं करोतीत्यभिधानादुच्यते ऽसिद्धभव-
वव्यापारस्तु धातुमात्रेणोच्यतइत्यङ्गीकृत्य प्रयोज्यनिष्ठप्रयोज-
पाररूपभावनावाचित्वमाख्यातस्योक्तम् ।यदा प्रतीत्यनुसारात्स-
र भ्रमचक्रोपस्थानप्रभृतेर्घटाकारनिष्पत्तिपर्यन्तस्य व्यापारस्य

वाचको धातुरिष्यते तदा प्रयोज्यप्रयोजकव्यापारभेदा
प्रयोजकव्यापारस्य च कर्त्तुरेकत्वेन प्रयोज्यप्रयोजकत्वभेदा
ऽसत्वेन च घटस्य प्रयोजकत्वायोगादवयवलक्षणायां च
भावात्प्रयोजकव्यापाररूपभावनानुपपत्तेर्भूतादुपदेशे ऽपि
दिमात्रमाख्यातेनोच्यते न भावनेत्याह * भूतादीति *
मानमत्ताकत्वावस्थावाचित्वात्तस्याश्चोत्पत्तिवदतदाकारा
पानपक्षत्वेनावयवशब्दाभिलप्यावस्थाभेदायोगे ऽप्युत्पत्त्यन
त्वेनोत्पत्त्यवस्थाकालभेदेन भेदावश्यम्भावापत्तिसूचनार्थ
वाम् । यथा प्रतीत्यनारूढत्वादवयवकालव्यतिरिक्तार्थान्तर
स्यानाश्रयणं तथावयवकालकृतस्यापीत्यादिशब्देन सूचितम् ।
चैकस्यैव प्रयोज्यव्यापारता प्रयोजकव्यापारता च विरुद्धे
एवं तर्हि व्यभिचारो दुर्वारः स्यादित्याशङ्क्याह * न चेति
धातूनां भावनावाचित्वमुक्तं तदनुभाषणपूर्वकं दूषयति *
ति * धात्वश्रवणे ऽप्योदने पच्यमाने दृष्टे पक्तृव्यापाररू
प्रतीतेर्धातुश्रवणे ऽपि च मानसादपचाराद्धात्वर्थाप्रतीता
धात्वर्थाव्यभिचारद्वारा धातूनामव्यभिचारो न स्यात इत्यर्थ
त्वर्थाव्यभिचारे च सति तत एव प्रतीत्युपपत्तेः । सत्यपि
भिचारे तद्वाच्यत्वकल्पना न युक्तेत्याह * तैरेव त्विति * त
ऽनुशब्दः यदि चाख्यातवत् स्वप्राधान्येन कृदन्तेषु भावना
त ततो धात्वर्थप्रतीतिनिरपेक्षभावनाप्रतीत्युपपत्तेर्वाच्यत्वं
धात्वर्थनिष्पादकत्वेन तु तद्गुणत्वप्रतीतेर्धात्वर्थप्रतीतिसा
च साक्षाद्वाच्यत्वकल्पना युक्तेत्याह * तथा हीति * देवद
दिकारकाविभक्तिश्रवणे यथाकारकसिद्ध्यर्थत्वेन तद्गुणतया
गम्यमानाया भावनाया न कारकविभक्तिवाच्यत्वं कल्पते त
त्वर्थसिद्ध्यर्थत्वेनाप्यवगम्यमानाया न धातुवाच्यत्वं कल्पनी
दृष्टान्तार्थं कारकग्रहणम् । एतदेव कर्त्रधिकरणसिद्धदृष्टान्तपू
वृणोति * यथैवेति * नन्वर्थादवगम्यमानाया भावनाया अशा
त्करोतिसामानाधिकरण्यं पदान्तरोपात्तकारकान्वयश्च न
त्याशङ्क्याह * गम्यमानेति * पक्तव्यमित्यादेर्भावनानपेक्षत
कर्त्तव्यमित्यादिप्रश्नानुरूप्यायोगादुरवायामोदनस्य कार्ष्ठैर्दे
पाक इत्यादौ च क्रियतइत्याद्याख्यातानपेक्षत्वे पाकभावनेत
ऽन्वयाप्रतीतेः । निष्पाद्यरूपभावनावगतिसापेक्षत्वादन्वयस्य
नायां तात्पर्यावगतेरवाच्यत्वे ऽपि भावनायास्तात्पर्यवृत्त्या
त्वाद्युक्तं सामानाधिकरण्यादीत्याशयः । गम्यमानाया अपि भ

नश्चाख्यातस्यापेक्षया तात्पर्यावगतिरिति तात्पर्यसूचना-
गम्यमानस्यापि तात्पर्यवृत्त्या शाब्दत्वात्सामानाधिक-
ौ कर्त्रधिकरणसिद्धदृष्टान्ताभिधानं तथाभूतयेत्यपेक्ष्य-
ात्पर्यवृत्त्या शाब्दीभूतयेत्यर्थः भावनया कारकाणामन्व-
पे धात्वर्थेनैव गम्यमानभावनान्वयापादितसाध्यभावेना-
यतीति प्रौढ्या परिहारान्तरमाह * अथ वेति * धात्व-
त्वसिद्ध्यर्थभावनायास्तन्निष्पादकत्वेनोपसर्जनतोक्ता।ननु
क्रियारूपत्वात्कथं कारकान्वयो ऽत आह * स एव
याया अपि निष्पन्नायाः कारकानपेक्षत्वात् साध्यत्वप्र-
ेक्षावगतेरक्रियारूपस्यापि च धात्वर्थस्य क्रियान्वयेन
ेर्युक्तः कारकान्वय इत्याशयः। नन्वाख्यातश्रवणे तर्हि
न्वयाभ्युपगमो ऽत आह * भावनापि चेति * गुणस्येव
विना कारकाणां धात्वर्थनिष्पादनं विना भावनान्वया-
सिद्ध्यर्थत्वेनैव भावनया ग्रहणादाख्याताश्रवणे भाव-
ऽपि धात्वर्थान्वयो गौररुणेत्यत्र गुणस्य द्रव्यवद्विरु-
।कारकान्वयान्यथानुपपत्त्या कृदन्तानां भावनानभिधा-
वेषां भावनापरतोक्ता तद्विशेषाणां तु कृत्यानां प्रैषवा-
पपत्त्यापि भावनापरतावगम्यतइत्याह * कृत्यानां
देव प्रश्नपूर्वकमुपपादयति * कुत इति * प्रैषाणां पुं-
त्वे ऽपि धात्वर्थस्यैव पुंव्यापारत्वोपपत्तेः किं भाव-
ः तस्य चेत्युक्तम् * पुंसः को व्यापार इत्यपेक्षायां
ष्यमित्यर्थः । एवमपि प्राधान्याप्रतीतेः साध्यसाध-
शत्रयवशीकारासामर्थ्यात्कथमंशत्रयपरिपूर्णतेत्याशं-
ाकेत्युक्तम्।अंशत्रयावच्छेदं विना ऽनुष्ठेयत्वाभावादे-
तेपात्तदूबलेनैव प्राधान्यमपि कथं चिद्भविष्यतीत्याश-
पुंव्यापारविषयत्वोपपादनपूर्वकम् श्लोकं व्याचष्टे *
णां भावनाविषयत्वोपपादनस्य प्रकृतभावनातात्पर्यो-
* ते यदीति * ननु वैदिकानां कृत्यानां पुरुषाशयवि- ३५।१।१
ायोगाद्विधौ चास्मृतेरनुष्ठापकत्वाभावात् कथं
ाङ्क्याह * यावांश्चेति * प्राप्तविषयत्वप्रवर्त्तकत्व-
पवाचिनां कृत्यानां ब्राह्मणे प्राप्तविषयत्वाभा-
ासम्भवे ऽपि प्रवर्त्तनात्मकत्वे तदेकदेशे ऽपि लक्षणया
ाप्तविषयप्रवर्त्तनस्य च विधित्वादस्मृतमपि विधाय-
ःयाशयः।मन्त्रगतेषु कृत्येषु प्राप्तविषयत्वोपपत्तेर्ब्राह्मण-

[illegible] ननु प्रणतं नीचं प्रत्येषणां स्वाभिमतसाधने
[illegible] प्रत्येषणं अध्येषणम् गत्यर्थेष्वि
[illegible] मदभिमतसाधनमनेनानुष्ठेयमित्येव
[illegible] कत्वेनापौरुषेये वेदे क्वचिदप्य
[illegible] र्थमित्याशङ्क्याह * अयमेव चेति *
[illegible] तृणां प्रैषसमाख्यानात् भृत्यादि
[illegible] पदार्थानुष्ठानार्थं वृतत्वेन पदार्थानुष्ठाने
[illegible] नोपलक्षितस्य प्रवर्त्तनस्य प्रैषशब्दवा
[illegible] पुरुषाशयत्वं प्रैषलक्षणान्तःपातीतिभावः
[illegible] प्रत्ययार्थत्वमुपपादितमुपसंहरति: * त
[illegible] धात्वर्थाद्भेदे सत्युक्तेन न्यायेनास्तु प्रत्यय
[illegible] स्तीति शङ्कते * ननु चेति * अयमा
[illegible] णेन प्रयोज्यव्यापाररूपाद्विक्लेदन
[illegible] णादेः प्रयोजकव्यापाररूपाद्भेदो नोप
[illegible] सेचनतण्डुलावापादिप्रयोजकव्यापार
[illegible] धिः पचिनोच्यते कः पच्यर्थो येयं
[illegible] नि तु महाभाष्यकारीयं विक्लित्यर्थत्वाभि
[illegible] नाख्यप्रयोज्यव्यापारवाचित्वे देवदत्तः
[illegible] करणयोगापत्तेर्येनापि देवतोद्देशपूर्वकं द्रव्
[illegible] प्रयोजकव्यापार एवोच्यते अतो धात्वर्थादभि
[illegible] भावनेति । पचौ प्रतीयमानान्यधिश्रयणादीनि
[illegible] प्रयोजकव्यापार इति कृत्वैवमादीनां
[illegible] । ननु स्थाल्यादीनां चुल्ल्यादिसंयोगस्याधिश्र
[illegible] व्यापारत्वान्न भावनात्वापत्तिरित्याशङ्क्य * अ
[illegible] * अधिश्रयणादीनां पचिवाच्यस्य पचावधिः
[illegible] सिद्धत्वात् प्रयोजकव्यापारत्वावधारणायैवका
[illegible] पा एवाधिश्रयणादयः पच्यादिधात्वर्था न सं
[illegible] * अयमाशयः * संयोगमात्रं वा ऽधिश्रयणश
[illegible] संयोगो वा । तत्राद्ये कल्पे सर्वधातूनां पर्याय
[illegible] रभिधानापत्तेर्गौरवं दोषः। संयोगवा
[illegible] ऽपि पक्तरि संयोगसद्भावो ऽधिश्रयणं व
[illegible] । क्रियमाणसंयोगवाचित्वे वा प्रत्ययवाच्याश्र
[illegible] विशेषणत्वायोगाद्धातुनैव क्रियाविशिष्टसं
[illegible] प्रयोजकक्रियाधातुवाच्यत्वम् अनेनैव न्यायेन

चित्वं निरसनीयम् । संयोगविभागविशेषलाभाय च
गिनोश्चाभिधानापत्तेरतिगौरवं यज्यादेश्च संयोग-
ायोगात् संयोगविभागात्मकधात्वर्थवचनमव्यापकं
त्मकस्वस्वामिविभागयज्यर्थाभ्युपगमे ऽपि ज्ञाना-
चेत्संयोगविभागानिरूपणादव्याप्त्यपरिहारः भवति
दात्तु विक्लिदिपचत्योरिव नियतं प्रयोज्यप्रयोज-
वामिति वार्त्तिकाद्व्यापारस्यैव धात्वर्थतावसीयते
च्च न प्रत्ययविषयतयातद्वार्त्तिकं व्याख्यातुं शक्यम्
न्तत्वाभावात्प्रयोज्यकर्तृकैकान्तव्यापारप्रतिपादकाः
युज्येत संयोगविभागात्मकत्वे च धात्वर्थस्याव्यापार-
नादिभिराश्रयत्वेन ग्रहणं न युज्यते धात्वर्थावच्छि-
पत्राश्रयत्वाभ्युपगमे गुणफलसम्बन्धविधौ वा-
ताश्रयापेक्षणाद्भावनाभेदमुपपत्तेर्गुणकामेष्वाश्रयैः
ानविध्यविचारः संस्थाधिकरणे करिष्यमाणो न
पत्वे ऽपि करोत्यर्थक्रियारूपत्वाभावात्क्रियारूपायां
त्वाविरोधः ।

रूपधात्वर्थादतो भेदमपश्यताम् ॥
रूपधात्वर्थवर्णनं भेदतृष्णया ॥ १ ॥
रूपधात्वर्थात् साऽन्या स्पन्दात्मिका हि किम् ॥
मा द्विरूपा वा सर्वथापि न युज्यते ॥ २ ॥
भावना चेत् स्यान्न रथो गच्छतीति हि ॥
स्यात्प्रयत्नो हि चेतनेष्वेव सम्भवेत् ॥ ३ ॥
र भावनात्वे तु यजेतेति न चेतने ॥
ारणरूपत्वे शब्दो वक्तीत्यसम्भवः ॥ ४ ॥
स्पन्दयत्नौ हि विभुत्वाच्चेतनत्वतः ॥
ातिधात्वर्थसामान्यं भावना पतेत् ॥ ५ ॥
हेतुभूतमन्यत्तन्नोपलभ्यते ॥
ादनं चान्यद्धात्वर्थान्नैव दृश्यते ॥ ६ ॥
दानुकूलत्वे भावनैकं च तद्यदा ॥
ावनाभेदो भवेद्धात्वर्थभेदतः ॥ ७ ॥
र्थमन्यत्वं न च तस्यावधार्यते ॥
दमात्रेण फलभेदप्रसिद्धितः ॥ ८ ॥
ण येन स्याद्धात्वर्थः फलसाधनम् ॥
भावनान्यश्च प्रतिधात्वर्थमिष्यते ॥ ९ ॥

तस्य धात्वर्थधर्मत्वे पुंधर्मत्वं विरुध्यते ॥
पुंधर्मस्तु प्रयत्नः स्यात् स च पूर्वं निराकृतः ॥ १०
किं च धात्वर्थनिर्वृत्तिपर्यन्तत्वात् सभावना ॥
कथं धात्वर्थसाध्या हि सेष्यते फलसाधनम् ॥ ११ ।
अथ धात्वर्थजन्योऽपि शक्त्यात्मा पुरुषाश्रितः ॥
प्रतिधात्वर्थमन्योऽसौ नापूर्वादतिरिच्यते ॥ १२ ॥
तस्याव्यापाररूपत्वाद्भावनात्वं न चेष्यते ॥
व्यापारत्वेऽपि करणव्यापारत्वान्न भावना ॥ १३ ।
तत्कर्तृव्यापृतिः सा हि प्रत्ययार्थश्च नत्वदः ॥

अतो धात्वर्थातिरिक्तभावनानुपपत्तेः प्रत्ययार्थता न
तात्पर्यार्थः । परिहरति * नैष इति * व्यापारत्वाविशेषाद्धात्वर्
नयोर्भेदानवभासेऽपि पाकं करोति यागं करोतीति भिन्नेषु धा
करोत्यर्थानुवृत्तेर्धात्वर्थाद्भेदोऽध्यवसीयत इत्यर्थः । श्लोकं व
* सर्वत्र हीति * सर्वधात्वर्थसाधारणस्य व्यापाररूपस्य करं
स्याख्यातपदांशप्रत्ययवेलायां प्रतीतिसूचनायांशशब्दः विक्ले
द्देशेन क्रियमाणस्याधिश्रयणादेः पचिवाच्यत्वं वक्तुं विक्लि
णां समासस्थायाः षष्ठ्याः सम्बन्धमात्रोत्पन्नाया अपि तादर्थ्
णसम्बन्धविशेषनिष्ठत्वाद्विक्लित्त्यर्था अधिश्रयणादय इति स
र्थः । आदिशब्दोपात्तस्य वा विक्लिदेर्विक्लित्तिर्वाच्या धात्व
नियतकर्तृस्थभावनातो वैलक्षण्यं वक्तुं केषांचित्कर्मस्थत्व
नायोक्ता कोऽसावधिश्रयणादिकर्तृस्थव्यापारातिरिक्तसामान्
व्यापार इत्यपेक्षायामाह * तत्रेति * औदासीन्यमकुर्वत् रू
वस्था ततः प्रच्युतिः कुर्वद्रूपत्वं करोतिप्रत्ययवेद्यमन्योत्पाद
लत्वं तेन रूपेण यन्निरूप्यते सा भावना इत्यर्थः । संयोगवि
दिहेतोः स्पन्दादेर्धात्वर्थाद्वैलक्षण्यप्रदर्शनार्थो मात्रशब्दः अव
धातुवाच्यध्वननादिधात्वर्थानन्तरं नियमेनान्योत्पादादर्शनात्स
कधातुवाच्येभ्यश्च गमनादिभ्योऽनन्तरमेव संयोगविभागादु
त्पाद्यानाकाङ्क्षणाद्भाव्याकाङ्क्षालक्षणभाव्यनिष्ठत्वापरपर्याया
त्पादानुकूलत्वरहिताद्धात्वर्थादकुर्वद्रूपत्वलक्षणौदासीन्यप्रच्यु
त्मकत्वेनान्योत्पादनरूपत्वादनन्तरं च फलानुत्पत्तेर्भाव्यनिष्ठ
रपर्यायान्योत्पादाकाङ्क्षालक्षणान्योत्पादानुकूलत्वात् भाव
वैलक्षण्यमित्याशयः । ततश्च यथा प्रयोज्यापरपर्यायकर्मस्थस्य
क्लेदनादेर्व्यापारत्वे सत्यपि प्रयोजकापरपर्यायकर्तृव्यापारत्व
वात् न भावनात्वं तथाधिश्रयणादेः प्रयोजकव्यापारत्वे स

्यनिष्ठत्वाभावान्न भावनात्वमित्याशङ्कापरिहारः सूचितो भवति
ाधिश्रयणादेः परिस्पन्दात्मकात्प्रयोजकव्यापारादन्यो भाव्यनि-
प्रयोजकव्यापारश्चेदस्ति किमिति तद्व्यतिरेकेण नोपलभ्यतइ-
शङ्क्य *परिस्पन्दरूपमित्युक्तम्* भावनाया धात्वर्थेन विषयभूतेन
स्येव ज्ञेयेन निरूपिताया अवच्छिन्नायाः कार्यभूतेन वा धात्वर्थेन
गतया निरूपितायाः कल्पितायाः निरूप्यत्वाद्धात्वर्थं विनानुप-
र्ययुक्तेति भावः । भावनावच्छेदकधात्वर्थमात्रोपलक्षणार्थः
स्पन्दशब्दः रूपशब्दस्य करणव्युत्पत्तौ परिस्पन्दो रूपमस्येति
हः। कर्मव्युत्पत्तौ वा परिस्पन्देन निरूप्यमाणमिति विग्रहः। स्व-
रस्य स्पन्दस्य ह्यात्मप्रयत्नहेतुकत्वव्याप्तेः। परशरीरे स्पन्ददर्शना-
त्नो ऽनुमीयते स्वप्रयत्नश्च मानसप्रत्यक्षवेद्यो ऽपि गमने ऽहम्प्र-
पाके ऽहम्प्रयते इति गमनादिना स्पन्देन यागे ऽहम्प्रयते ध्याने
प्रयतइति वा चलनात्मकेन यागादिना धात्वर्थेनावच्छिन्न एव
भाव्यनिष्ठप्रयोजकव्यापारत्वात्मकभावनालक्षणयोगादर्थिपुरुष-
ारत्वाच्चार्थयतइति कर्तृव्युत्पत्तिद्वारा ऽर्थयितृपुरुषव्यापारवा-
भावनाशब्दव्याच्यः सर्वेषु लङाद्याख्यातेषु गम्यते । यत्त्वस्मि-
रथो गच्छतीत्यचेतने नाख्यातं प्रयुज्यते इत्युक्तं । तत्रैवं वाच्यं
ाख्यातप्रयोगान्यथानुपपत्त्या रथादौ भावना कल्प्यते। प्रतीतिब-
ाभ्युपगम्यते न तावत् स्पन्दातिरिक्ता भावना प्रत्यक्षेण प्रतीयते
कादाचित्कत्वं स्पन्दाख्यकार्यदर्शनात्कल्प्यते इति रथवोढ़-
इप्रयत्नात् स्पन्दमानाश्वादिशरीरसंयोगात्तदभावे ऽपि वा प-
तिबन्धकाधारसंयोगाभावसहकृताद् गुरुत्वाद्रथस्पन्दोपपत्तेः
संयोगादिसद्भावभावितया च दृष्टस्य पर्णादिपतनस्य न कार-
कल्पना युक्ता वायोस्तु स्वाभाविकस्पन्दो न शक्नोत्येव स्वका-
वेन व्यापारान्तरं कल्पयितुं स्पन्दस्य च वायुरथादेः स्पन्दनं च-
गमनं वर्त्ततइति आख्याताश्रवणे ऽपि धातुमात्रात्प्रतीतेरा-
ार्थत्वं भाव्यनिष्ठत्वाभावाच्च भावनात्वं नाभ्युपगन्तुं युक्तं
ातिचलत्योश्चाकर्मकत्वात्तद्वाच्यस्य स्पन्दस्य भाव्यनिष्ठत्वमना-
मेव ततश्च वायुरथादौ स्पन्दस्य भावनात्वायोगात्तदतिरिक्त-
ारानुपलब्धेश्च प्रयत्नात्मकभावनानभ्युपगमे आख्यातस्य भा-
यभिचारो दुष्परिहरः स्पन्दस्य भावनात्वाभ्युपगमे ऽपि स्प-
ादिधातुनैव तदभिधानासिद्धेस्तत्परस्याख्यातस्य व्यभिचारस्त-
व एव स्पन्दत्यादिपराख्यातवच्च पचत्यादिपराख्यातस्यापि
वाचित्वं न युक्तं न हि पचतीत्यस्य पाके स्पन्दतइत्यर्थं के

च्चिद्व्याचक्षते तथा यज्यायर्थश्चातो ऽवगम्यते भावयेदिति चेत्
कीदृशी पुनराख्याताद्भावनावगम्यते इत्यपेक्षायां तथा यतेत
किंचिद्भवतीति प्रयत्नवाचिताख्यातस्य भाष्यकृता विवृता दर्शनी
यकामाधिकरणे च जुहुयादिति शब्दस्यैतत्सामर्थ्यं यद्धोमविषय
प्रयत्नमाहेत्यभिधानात् जुहुयादित्यस्य होमे यतेतेत्यर्थः सूचि
भवति। प्रयत्नस्य चेच्छायोनित्वान्निष्फले चेच्छायोगाद्भाव्यनिष्ठ
वगतेर्धात्वर्थनिष्पत्तिमात्रेण च फलवत्त्वासिद्धेस्तन्निष्पत्तिमात्रेण
र्यवसानायोगेन धात्वर्थकरणकस्य प्रयत्नस्य फलसाधनत्व
वातात्प्रयत्नस्य भावनात्वे न कश्चिद्दोषः। प्रयत्नाभावे च वातरोग
ना देवदत्ते स्पन्दमाने नायं स्पन्दं करोति किं तु वातादिवशा
स्पन्दो भवतीति व्यवहारदर्शनात्प्रयत्न एव करोत्यर्थो ऽवगम्यते
थादावपि न रथः स्वयं गमनं करोति किं त्वश्वादिनास्य गमनं
यते इति व्यवहारदर्शनाद्धातुवाच्यस्पन्दातिरिक्तकरोत्यर्थभाव
प्रतीत्यभावः सिद्धः। आख्यातप्रयोगान्यथानुपपत्त्या तु रथादौ
वनाकल्पने रथो भवतीत्यत्रापि सर्वदा भावनाकल्पनापत्तेः
दिकथने ऽप्यवयवादिकृतभेदानाश्रयणे धात्वर्थमात्रं कर्तृसंख्य
आख्यातपदार्थत्वेनावधार्यन्ते न भावना न च भावनाव्यभिच
दोष इति वार्त्तिकं विरुध्यते अवयवादिकृतभेदविवक्षायामस्य
भावनाभ्युपगमः पूर्वोत्तरवार्त्तिकपर्यालोचनया प्रौढिमात्रेणेत्
अथ वा सो ऽपि प्रयत्नाभिप्रायेण व्याख्यातुं शक्यते नित्यस्यात्म
रीरशरीरिणोरभेदविवक्षया शरीरानिष्पत्तावनिष्पत्तिव्यपदेशो
पञ्चधातून् स्वयं षष्ठ आदत्ते युगपत्प्रभुरित्यादिस्मृतिपर्यालो
या चात्मनः शरीरोत्पादनप्रयत्नावगमात् सिद्धभवनशरीर
वाधिष्ठानेनात्मनासिद्धभवनान् शरीरावयवान्प्रति प्रयोजक
स्य प्रयत्नात्मिका भावना न विरुध्यते। एवं च सिद्धकर्तृक्रियाव
नीत्यपि चेतनाभिप्रायं व्याख्यातुं शक्यम्। यद्वा अर्थभावनायाश्च
मात्राश्रयत्वे ऽपि शब्दभावनायाश्चेतनाश्रयत्वायोगादुभयव्या
सिद्धमात्रग्रहणं नित्यस्यापि शब्दस्याभिव्यक्तिः सिद्धिरभिप्रेत
व्यनिष्ठप्रयोजकव्यापारत्वलक्षणयोगाच्च शब्दव्यापारस्यार्थ
भावनात्वं। यथैव हि इच्छायोनित्वात्प्रयत्नस्येष्यमाणभाव्यं चि
लाभायोगाद्भाव्यनिष्ठत्वं तथा लिङादिव्यापारस्यापि प्रेरणा
प्रवृत्त्याख्यभाव्यकल्पत्वेन तन्निष्ठतावसीयते। न च यथा स्पन्दा
मेव संयोगविभागोत्पत्तेराकाङ्क्षातः प्रागेवाकाङ्क्षणीयलाभ
व्यालाभनिमित्ताकाङ्क्षानुपपत्तेरन्यथा च कदाचिदैराकाङ्

त्तिप्रसङ्गात् स्पन्दस्य भाव्याकाङ्क्षालक्षणं भाव्यनिष्ठत्वं नास्ति । प्रेषणाया भाव्यनिष्ठत्वाभावः पुरुषप्रवृत्तेः साध्यसाधनेतिकर्तव्यतापर्यालोचना सापेक्षत्वेन प्रेरणानन्तरमनुत्पत्तेः अनेनैव न्यायेन सर्वशब्दगतस्याभिधानलक्षणस्यापि व्यापारस्यार्थप्रतिपत्त्याख्यभाव्यकल्पितस्य भावनात्वमनुसन्धेयं तस्या अनभिहिताया एव कारकयोगित्वाल्लिङादियुक्तेषु वाक्येषु द्वे भावने प्रतीयेते इत्यादौ वचनाद्वयोपन्यासाविरोधः ॥

स्पन्दप्रयत्नयोरेव भावनात्वमिति भ्रमम् ।
अपनेतुं प्रसक्तानुप्रसक्त्यैतदुदीरितम् ॥
प्रयत्नव्यतिरिक्तार्थभावना तु न शक्यते ।
वक्तुमाख्यातवाच्येह प्रस्तुतेत्युपरम्यते ॥ २ ॥
स्त्रीत्वाभावे ऽपि खट्वादौ टाबादिप्रत्ययो यथा ।
प्रयुज्यते तथाख्यातं यत्नाभावे ऽप्यचेतने ॥
स्त्रीत्वादेः प्रत्ययार्थत्वं चतुर्थे वक्ष्यते स्फुटम् ।
तथा च लिङ्गमित्यत्र प्रयत्नस्य तथा भवेत् ॥
धातोरनुग्रहार्थं वा वाच्यन्तरधियेथ वा ।
प्रत्ययो ऽवश्यवक्तव्यस्तावता न त्ववाच्यता ॥
वोढ्रश्वादिगतं यत्नं रथादावुपचर्य वा ।
उपपाद्यः प्रयोगो ऽत्र मुख्यार्थानुपपत्तितः ॥
तिङ्वाच्यो हि करोत्यर्थः सामानाधिकरण्यतः ।
प्रयत्नश्च करोत्यर्थस्तदन्यानुपलम्भनात् ॥
न चौलूक्यैः प्रयत्नस्य गुणत्वपरिभाषणात् ।
अकरोत्यर्थता शङ्क्या सिद्धरूपा प्रतीतितः ॥
बुद्धीच्छाद्वेषयत्नानां शब्दज्ञैः कर्मतेष्यते ।
इत्याचार्यैश्च यत्नस्य व्यापारत्वाभिधानतः ॥
चेतनप्रेरकत्वं च विधेस्तद्विषयत्वतः ।
काष्ठाद्यप्यन्यथाकस्मान्न प्रेरयति वायुवत् ॥
विध्यर्थाज्ञानतो प्रेर्यं चेत्काष्ठादि ततः कथम् ।
सौधन्वननिषादादेरप्रेर्यस्याधिकारिताम् ॥
विधिस्त्वाप्रेरयत्यत्रेत्यप्रेर्यो ज्ञाप्यते कथम् ।
विद्वद्भिर्ज्ञापनादेव प्रेर्यत्वे ऽन्योन्यसंश्रयम् ॥
धात्वर्थव्यतिरिक्तातः प्रयत्नाख्यार्थभावना ।
यजत्यादिपराख्यातवाच्यतेत्यसमञ्जसम् ॥

ननु धात्वर्थभावनयोर्द्वयोर्व्यापाररूपत्वे समत्वेनान्योन्य-

समन्वयो न स्यादित्याशङ्क्याह * ये त्विति *
पारत्वसाम्ये ऽपि भावनाया एव भाव्यनिष्ठत्वेन करोत्यर्थ
क्रियात्वाद्धात्वर्थस्य च भाव्यनिष्ठत्वाभावेन क्रियारूपत्वाद्यथा
सन्निकर्षविप्रकर्षापेक्षया करणत्वेनेतिकर्त्तव्यतात्वेन वा भावन
यः सम्भवतीत्याशयः । यथा कर्मगतस्य विक्लेदनादेः प्रयोज्य
पारस्य विक्लिद्यतस्तण्डुलान् पचतीत्यादिप्रयोगदर्शनात् व्या
त्वसाम्ये ऽपि भावनान्वयो न विरुध्यते तथा कर्तृगतस्य पा
प्रयोजकव्यापारत्वसाम्ये ऽपीत्यर्थः । एवं च तर्हि यस्य कस्य
धात्वर्थस्य यया कया चिद्भावनयान्वयः कस्मान्न स्यादित्याशङ्क
रासायानुरञ्जकत्वविशेषणम् । ननु धात्वर्थविशेषाणां भावनानुर
त्वाभ्युपगमे गौः शाबलेय इतिवत् सामान्यविशेषात्मकैकत्
त्वापत्तेः क्रियाकरणविभागो न स्यात् इत्याशङ्कते * एवं तर्हि
भावनायाः प्रयत्नात्मकत्वात् धात्वर्थस्य च स्पन्दात्मकत्वादे
त्त्वात्मकत्वाभावे ऽपि भावनाया भाव्यनिष्ठत्वाद्धात्वर्थे च
भाव्यासिद्धेः स्वरूपेण धात्वर्थसाधनत्वे ऽपि भाव्यावच्छिन्न
धात्वर्थविशेषसाध्यत्वात् सामान्यरूपतोपपन्नेति परिहरति *
मिति * एतदेव प्रश्नपूर्वकमुपपादयति * कथमिति * अयमा
द्वैधीभावाद्युद्देशप्रवृत्तोद्यमनादिकर्तृव्यापारव्याप्यस्य परश्वादेः
णत्वदर्शनात् भाव्योद्देशप्रवृत्तभावनाव्याप्यत्वेनाख्याते धात्वर्थ
रणतयावसीयते णिजन्ताद्धि भवतेरचो यदिति कर्मणि कृत
कृते भाव्यशब्दव्युत्पत्तेरीप्सिततमस्य च कर्मत्वाद्भावयितुमि
यदुद्दिश्य भावना प्रवर्त्तते तद्भाव्यं ततश्च यथा ग्रामानयायं
इत्युक्ते तृतीयां विनापि दण्डस्यान्यथान्वयायोगात्करणत्वं प्र
तथा किञ्चिदीप्सितं भाव्यं भावयतीत्युक्ते भाव्यान्तरोद्देशेन
त्तया भावनया धात्वर्थस्य भाव्यत्वेनान्वयायोगात्करणत्वं प्र
तस्माद्यागादौ साध्यात्मकभावनासामान्याविरुद्धकरणात्मक
र्थसामान्यसद्भावात् भावनासामान्यं न समवेतमिति करण
भावनासामान्याविरोधप्रदर्शनायोत्तरार्द्धम् । ननु निर्विशेषभाव
मान्यायोगाद् बलाद्धात्वर्थेषु विशेषेषु समवायापत्तिरित्याशङ्क्य
भावनाया हीति * ज्ञेयैक्ये ऽपि ज्ञानस्येव धात्वर्थैक्ये ऽपीष
ऽहमतिशयेन प्रयते ऽहमिति सातिशयानतिशयादिभेदेन प्रयत
भावनाभेदावगतेरनौपाधिकभेदद्योतनायैवकारः भावना चेन्न
त्वर्थसामान्यं किं तदित्यपेक्षायामाह * तथेति * यथा यद्भ
सामान्यं तद्धात्वर्थेन समवैति तथा यद्धात्वर्थसमवेतं तद्भाव

न्यं न भवतीति सूचनार्थस्तथाशब्दः कथं यागादेर्भावनाकर-
तित्याशङ्क्य भावनायाः केनेति करणांशेनापेक्षाहेतुत्वेनोक्ता धात्व-
भावनयोर्भेदस्य सूत्रकृत्सूचितत्वं द्योतयितुं यद्भावार्थाः कर्मश-
ा इत्यनेन कर्मशब्देनाभिधीयतइत्युक्तम । नन्वेवं सति कृभ्वस्तयः
ियासान्यवचनाः क्रियाविशेषवचनाः पचत्यादय इत्यादियागा-
धात्वर्थानां क्रियाख्यभावनाविशेषस्मरणं न युज्यते इत्याशङ्क्या-
* विशेषणेति * भुवो णिजन्तस्य क्रियासामान्यवचनताभिप्रेता ३
स्तेरप्यार्द्धधातुके णिचि कृते ऽस्तेर्भूरिति भ्वादेशस्मृतेर्भावनाख्य-
ियासामान्यवाचित्वोपपत्तिः । ननु क्रियाशब्दो यथा तद्भूतानां क्रि-
र्थेन सामाम्नायः । आम्नायस्य क्रियार्थत्वात्तेभ्यः क्रिया प्रतीयते
ियायां पुरुषश्रुतिः । प्रतिषेधेषु कर्मत्वात् क्रिया स्यात् क्रिया स्याद्ध-
मात्राणामित्यत्र भावनायां प्रयुज्यते तथा आकृतिस्तु क्रियार्थत्वात्
ियाणामाश्रितत्वात्क्रियाया ह्यस्तिसम्बन्धः क्रियातो व्यपदिश्ये-
त् तस्य क्रियाग्रहणार्थोक्तं क्रियाभिधानमित्यत्र धात्वर्थे ऽपि तथा
ध्यत्व।। क्रिययोर्न क्रियार्थानां संस्कारे तु क्रियान्तरमित्यत्रोभयोः क-
शब्दश्च यथा फलस्य कर्मनिष्पत्तेः भावार्थाः कर्मशब्दास्तद्भेदात्क-
णो ऽभ्यासः संख्यायाः कर्मभेदः स्यात् फलश्रुतेस्तु कर्म स्यात्
ःलस्य कर्मयोगित्वात् समेषु कर्मयुक्तं स्यात्संस्कारश्चाप्रकरणे क-
शब्दत्वात्कर्मणः श्रुतिमूलत्वात् एतेषां कर्मसम्बन्धात्केवले कर्म-
ाषः स्यात्कर्माण्यपि जैमिनिः कर्तृगुणेषु कर्मसमवायात् अचोदितं
र्म भेदात् कर्मणो चोदितत्वात् कर्मणो व्यवस्था स्यात् द्रव्याणां
र्मसंयोगे कर्मतो ह्यभिसम्बन्धः तस्मात्कर्मापदेशः स्यात् । अपि
 कर्मशब्दः स्यात् ॥ कर्मणः पृष्ठशब्दः स्याद्धविर्भेदात्कर्मणो ऽभ्यास
त्यत्र धात्वर्थेषु प्रयुज्यते तथा कर्मके तत्र दर्शनादित्यत्र तच्छब्दप-
ामृष्टः कर्मविषयः कर्मशब्दः कर्मणः सम्बन्धात् शब्दान्तरे कर्मभे-
स्तदुत्सर्गे कर्माणीत्यत्र भावनायामपि एकस्यैवमित्यत्र चैवं शब्दे-
ानुकृष्टः कर्मशब्दः फलं वा कर्मसन्निधावविभागात्तु कर्मणः क-
धर्मः प्रकरणादित्यत्र चोभयोस्तेनैव व्यतिकरदर्शनाद्धात्वर्थभाव-
योरभेदो ऽध्यवसीयते इत्याशङ्क्याह * शास्त्रेति * भावनावा-
चिनः क्रियाशब्दस्य धात्वर्थवाचिनश्च कर्मशब्दस्य लक्षणयेतरत्र प्र-
योगोपपत्तिरित्याशयः । भावनाधात्वर्थस्वरूपवाचिनामपदाभा-
ाच्च लाक्षणिको ऽपि प्रयोगो न दोषायेति न स्वरूपाभिधानेनेत्यनेन
सूचितम । एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * श्लोकं व्या-
चष्टे * भावनाशब्दो हीति * एकास्मिन् क्षणे भावनायाः समस्तो-

पसंहृतरूपाप्रतीतेः । कथं निष्पन्नरूपतेत्याशङ्क्य वस्तुतो नि रूपत्वे ऽपि नामपदसामर्थ्यात् सत्त्वस्य द्रव्यस्य यदेकत्रोपसंहृ रूपं तदापन्नामारोपितासिद्धरूपामित्युक्तं कथं नामपदसाम द्रव्यरूपत्वारोप इत्याशङ्क्य नामपदोक्तो लिङ्गादियोगः कारण क्तः द्रव्यधर्मलिङ्गादियोगात् भास्वरत्वादिनेव शुक्तौ रजतत्व युक्त इत्याशयः । न केवलं नामपदेनाख्यातसदृशी भावना नो किं तु करोत्यादिधातुनापी त्याह * तथेति * अनन्यशब्दव त्वोपपादनस्यासाधारण्येनाख्यातस्य भावनार्थत्वसिद्धिप्रयो सूचयितुम् उपसंहरति * इतीति* नन्वाख्यातप्रत्ययस्य भाव त्वे ऽपि स्वर्गस्य द्वितीयाभावेन भाव्यत्वाप्रतीतेः स्वर्गकामपदस म्बन्धात् स्वर्गं भावयेदिति ब्रूयुरिति भाष्यमयुक्तमित्याशङ्क्य स्व भाव्यांशनिवेशमुपपादयितुमुपक्रमते * सा त्विति * साध्यत्व यात् प्रागंशान्तरान्वये भावनास्वरूपस्य सङ्कल्पाख्येच्छाविशेषरू त्वेन यागादेस्तत्साधनत्वायोगात्तत्सिद्ध्यर्थं साध्यनिष्ठत्वाभावे धनात्वस्यैव बाधापत्तेः साध्यांशस्य प्राधान्यात् साधनेतिकर्त्तव शवच्चापेक्षान्तराधीनत्वाभावात्प्राथम्यमुक्तम् । नन्वेकप्रत्ययोपा त् भावनामात्रस्य विधेयत्वावगतेः साध्याद्यन्वयः प्रतीतो ऽपि ध्यसंस्पर्शादविवक्षितः स्यादित्याशङ्क्याह * तत्रेति * उ धाः किरिति विपूर्वस्य दधातेः किप्रत्यये कृते विधिशब्दव्यु कृदन्तत्वाद्भावप्रत्ययेन विधिसम्बन्धाभिधानम् । नन्वेवमप्येक पादानेन प्रत्यासत्तेर्धात्वर्थस्यैव भाव्यत्वं कस्मान्न भवतीत्याश * विधित्वेति * कामियोगादपि स्वर्गस्य साध्यत्वावगति पुरुषार्थ इत्यनेनोक्ता ।

यस्य येनार्थसम्बन्धो दूरस्थस्यापि तेन सः ।
अर्थतो ह्यसमर्थानामानन्तर्यमकारणम् ॥

इति श्लोको ऽपि चाम्नानसामर्थ्याच्चोदनार्थेन गम्येताथ ह्यर्थवत्त्वेन वचनानि प्रतीयन्ते ऽर्थतो ह्यसमर्थानामानन्तर्ये ऽ म्बन्धः तस्माच्छ्रुत्येकदेशः स इति विश्वजिदधिकरणसिद्धान्त गतस्यार्थानां ह्यर्थवत्त्वेनेत्याद्यवयवस्य योग्यतानुरोधेन व्यवहि यप्रतिपादनपरतया व्याख्यानात्तत्रैव पूर्वाचार्यैर्वक्ष्यत इत्यौचित चनया प्रतिभाति पदश्रुत्या धात्वर्थस्य साध्यत्वावगमे ऽप्येका नश्रुत्या पुरुषार्थसाध्यत्वावगमाद् बाध इति सकलस्य तात्पर्य विरोध एव नास्तीत्याह * किं चेति * श्लोकं व्याचष्टे *

।३५।॥ ध्येति * एवं भावनाया भाव्यापेक्षायां धात्वर्थस्य भाव्यत्व

। विध्यन्वयबलात् पुरुषार्थस्य भाव्यतोक्ता अधुना इच्छायोनि-
न भावनायाः समीहितभाव्यनिष्ठत्वावधारणात् भावनास्वरूपा-
चनयैव पुरुषार्थस्य भाव्यतामाह * किं चेति * श्लोकं व्या-
ष्टे * यत्र हीति * ननु भावनास्वरूपालोचनयैव समीहितसा-
त्वावगमे स्वर्गकामादिपदं व्यर्थं स्यादित्याशङ्क्याह * तत्रेति *
वेवमपि स्वर्गादिपुरुषार्थविशेषलाभस्य शास्त्राधीनत्वात् सर्वथा
ध्यांशनिवेशस्य विधिविषयत्वनिरासो न युक्त इत्याशङ्क्याह
तदपि चेति * साध्यशब्दस्य इष्टतमत्वलक्षणकर्मवाचिकृत्यप्र-
ग्रान्तत्वेन साधयितुमिष्टमित्येवमर्थत्वात् स्वर्गादेश्चेष्टतमत्वस्य
सम्वेद्यत्वेन शास्त्रानधीनत्वाच्च साध्यत्वेन विशेषः शास्त्रादपेक्ष्यते
पे तु स्वर्गादीनां साध्यानां मध्ये ऽस्या भावनायाः को विषय इत्येवं
वेयभावनाविषयत्वेनेत्यर्थः। साध्यांशस्य विधेयत्वनिरासप्रयोज-
ुपसंहरति *ततश्चेति*एवकारो धात्वर्थनिवृत्त्यर्थः अश्रुतपश्वादि-
वृत्त्यर्थः कृतास्पदशब्दः कृतं कमिपदेनास्पदं साध्यांशनिवेशार्हत्वरू-
पस्येत्यर्थः।ननु स्वर्गादेः साध्यस्याशास्त्रीयत्वेन सन्निकर्षविप्रकर्षा-
क्षत्वे ऽपि भावनाविशेषान्वयस्य शास्त्रीयत्वेन तदपेक्षत्वात्सन्नि-
ष्टेन धात्वर्थस्य भावनान्वयेन बाधः स्यादित्याशङ्क्याह * धात्व-
ते * धात्वर्थस्यायोग्यत्वेन साध्यांशनिवेशितयानपेक्षितत्वान्ना-
यः सम्भवतीत्याशयः । न केवलमनपेक्षितत्वाद्धात्वर्थस्य सा-
ांशेन नान्वयः किं तु विधिश्रुतिबाधापत्तेरपीत्याह * विधीति *
तुश्रुतेः प्रत्यासत्तिमात्रबाधात्तरामित्युक्तं न केवलं स्वर्गादेरिष्ट-
त्वाद्भाव्यत्वं किं तु भवितृतयोपादानादपीत्याह * किं चेति *
ु धात्वर्थस्यापि निष्पाद्यत्वाद्भवितृतास्तीत्याशङ्क्याह * न चेति*
ाब्दं भवितृत्वं शाब्दे व्यवहारे ऽनुपयोगीति भावः। स्वर्गादेः कथं
वितृतयोपादानमित्याशङ्क्याह * स्वर्गादीनां त्विति * एतदेव प्र-
श्नपूर्वकमुपपादयति * कुत इति * भवेदेतदित्येवंरूपस्यैवाशयस्ये- ३
ष्टत्वादिच्छाविषयत्वोपपादनादेवान्यथानुपपत्त्या भवितृत्वावग-
ारिति भावः। स्वर्गाख्यदेशविशेषस्य सिद्धत्वात् भवितृत्वाभावमा-
ङ्क्य स्वसम्बन्धित्वेन भवितृत्वं भेदशब्देनोक्तं भवितृतयोपादानस्य
व्यंशान्वयोपयोगित्वे भावनापेक्षाकारणमाह * तेनेति* नन्वेवम-
कशब्दोपात्तस्य धात्वर्थस्य यागादिनेति भाष्येण पश्चादन्वयाभि-
ानं न युक्तमित्याशङ्क्याह * तत इति* धात्वर्थस्य करणांशे निवे-
ाभिधानाद्भावनास्वरूपस्य च निर्ज्ञातसङ्कल्पाख्येच्छाविशेषकरण-
त्वेन करणानाकाङ्क्षत्वात्फलान्वितरूपस्य करणाकाङ्क्षयाः फला-

न्वयोत्तरकालं प्रवृत्तेर्युक्तं पश्चाद्धात्वर्थान्वयाभिधानम् इत्याशय
नन्वेवमपि नामार्थस्य सिद्धत्वेन योग्यत्वात्करणांशान्वये वा
धात्वर्थस्यासिद्धत्वेनायोग्यत्वात्करणांशान्वयाभिधानमयुक्तमित्य
शङ्क्याह * तत्रेति * आदिशब्देन नामार्थस्य करणांशानिवेशहेतु
प्रकर्षो ऽभिप्रेतः।ननु सन्निधिवद्योग्यत्वस्याप्यन्वयहेतुत्वान्नामार्थ
सिद्धत्वेन योग्यत्वात् करणांशनिवेशो युक्तो न धात्वर्थस्यासि
त्वेनायोग्यत्वादित्याशङ्क्य प्रमाणान्तराच्चेत्युक्तं सिद्धस्यापि मृ
दे: पटादावयोग्यत्वेन सिद्धत्वमात्राद्योग्यतानवगतेरदृष्टार्थेषु
कार्यगम्यविशेषयोग्यत्वस्य प्रमाणान्तरेण ज्ञातुमशक्यत्वात् सा
न्यतश्च धात्वर्थस्यापि भोजनादेस्तृप्त्यादिफलसाधनत्वदर्शनेन ३
शक्यत्वान्नायोग्यत्वेन धात्वर्थस्य करणांशात्प्रच्युतिर्युक्तेत्याशय
न च साध्यांशवत्करणांशनिवेशे विधिविरोधो ऽस्तीति विध्यविरो
धेत्यनेनोक्तं ततश्चायोग्यत्वविरोधलक्षणस्य साध्यांशे धात्वर्था
मकारणद्वयस्यात्राभावात् यागेनेत्येवमन्वयो विज्ञायतइत्यर्थः ।
त्युत नामार्थस्यैव धात्वर्थनिरपेक्षस्य क्व चित्करणत्वानुपलब्ध
योग्यतातिक्रमणकारणमस्तीति सर्वत्यनेनोक्तम् । यत्त्वनिष्पन्नत्वेन
ग्यत्वं पूर्वपक्षिणोक्तं तन्निरस्यति * यद्यपि चेति * नन्वेवं
स्वनिष्पत्त्यपेक्षणाद्विलम्बः स्यादित्याशङ्क्य नामार्थस्यापि नित्यसि
भावात् साम्यमाह * सर्वमेव चेति * न च प्राक्सिद्धस्यैव शा
करणत्वं वाच्यमिति नियमे हेतुरस्तीत्याह * न चेति * किं
तीतस्यापि ग्रहोपसर्गादेः शुभाशुभोत्पत्तौ वर्त्तमानस्य च ज्ञा
र्थप्रकाशे भविष्यन्त्याश्च वृष्टेर्मत्स्यविकारहेतुत्वदर्शनाच्च प्रागसि
मात्रेण साधनांशनिवेशायोग्यतेत्याह * प्रमाणेति * उपसंहरति
स्मादिति * यस्य चेति भाष्यं सङ्क्षेपेण व्याचष्टे * तश्चेति *
च यागादिधात्वर्थरूपकर्मवाचिभ्यो धातुशब्देभ्यो ऽपूर्वप्रतीति
प्रयोजनवाच्यर्थशब्दाभ्युपगमेन प्रकृतिप्रत्ययौ प्रत्ययार्थं सह
इति स्मृत्यनुसाराद्धातोरपि भावार्थत्वोपपत्तेः सामानाधिक
व्याख्यासम्भवात् नावश्यं प्रत्ययांशेन भावार्थाः धात्वंशेन च
शब्दाः पदरूपाः शब्दा इत्येवं व्याख्येयमित्याह * ततश्चेति *
यदि भावनाया भाव्यनिष्ठत्वादीप्सिततमस्य च कर्मणो भाव्य
नीप्सितधात्वर्थातिक्रमेणेप्सिततमस्य स्वर्गादेर्भावनाकर्मत्वं ।
र्थस्य च भाव्यान्वितभावनारूपे करणत्वं ततो ऽकर्मकेषु धातु
र्माभावाद्भावना न स्याद्भावनाभ्युपगमे वा तेषामपि सकर्मकत्वा
रित्याशङ्कते * ननु चेति * भावनावगतिहेतुत्वाद्वा सकर्मक

रर्वमाख्यातं प्राप्नोतीत्यर्थादुक्तं शङ्काभिप्रायं व्याचष्टे *
। * येन कारणेनेप्सिततमैः स्वर्गादिभिः पदार्थैर्भावना-
त्यंशो ऽवरुध्यते धात्वर्थश्चेप्सिततमभावावरुद्धकिमित्यंश-
गी तेन कारणेन न कश्चिद्धातुः अकर्मकः स्यादकर्मको
कश्चिद्धातुः स सर्वो न भावनायोगी स्यादिति द्वेधा
द्वेधा श्लोकं व्याचष्टे * यदि वेति * भावनाकर्मणैव
कर्मकत्वे स्यादथ दोषः न त्वेतदस्ति धात्वर्थसाध्यकर्मनिब-
द्धातोः सकर्मकत्वस्येति परिहरति * नैष दोष इति *
ाध्यस्य कर्मणो ऽकर्मकेष्वभावान्न सर्वेषां सकर्मकत्वाप-
पूर्वार्द्धेनाद्यशङ्कापरिहारः भावनानिबन्धनस्य कर्मणः
भावान्नाकर्मकेष्य भावनानुपपत्तिरित्युत्तरार्द्धेन द्विती-
भिप्रायपरिहारः धात्वर्थभावनाकर्मणोरभेदे भावाभाव-
ुपपत्तेस्तत्सिद्धये ऽन्यत्वाभिधानं धात्वर्थसाध्यमिति वाच्ये
र्मणो व्यवहितसिद्धेर्धात्वर्थकर्मणो ऽनन्तरसिद्धत्वेनान्यत्वो-
र्थम् * प्राप्यमित्युक्तम् * कर्मद्वयस्याधिष्ठानान्यत्वनियमा-
: यदेव धात्वर्थं प्रति कर्मत्वं तदेव भावनां प्रति न भवती-
त्ररूपान्यतोक्ता यद्धि यथाकथञ्चिदपि धात्वर्थसिद्धौ स-
रं नियमेनोत्पद्यते तद्धात्वर्थस्वरूपप्रयुक्तत्वाद्धात्वर्थकर्म
ारितेन पुंसानुष्ठितकर्मणि कदा चिदुत्पद्यते कुतश्चिद्वाकार-
दा चिदुत्पद्यते तन्नियोगप्रयुक्तत्वान्नियोगस्य च भावना-
ात् भावनाकर्म। उदाहरणनिष्ठं श्लोकं व्याचष्टे * ओदन- ३।५५।२
: पाकसमाप्त्यनन्तरमेवौदनाख्यं कर्मोत्पद्यते गमनसमा-
रं च ग्रामप्राप्त्याख्यं नान्यत्किं चिदपेक्षितमिति द्योतनायाप-
: अधिष्ठानान्यत्वनियमो ऽनेनोक्त इति शङ्कानिवृत्त्यर्थं तत्रे-
धात्वर्थसमाप्त्यनन्तरं नियमेनोत्पद्यमानत्वादोदनस्य धा-
त्वे ऽप्युद्देश्यत्वलक्षणेप्सिततमत्वस्य प्रयत्नाख्यभावनैकगो-
ोदनमात्रोद्देशेन यदा प्रवर्त्तते तदैकस्यैवोभे प्रति कर्मता य-
दनादिकर्मविशिष्टेन धात्वर्थेनावच्छिन्ना भावनान्यद्वेतनला-
सततममुद्दिश्य प्रवर्त्तेत तदा कर्माधिष्ठानमपि भिद्यतइत्याशयः
ानिष्पत्त्युत्तरकालभाविना वेतनलाभादेः कथं निष्कृष्य भाव-
त्वावधारणेत्याशङ्क्याह * ततश्चेति * विप्रकर्षार्थः पर-
। धात्वर्थाद्विप्रकृष्टकालत्वेन धात्वर्थान्तरैश्च व्यवधानेन
देधात्वर्थकर्मत्वावधारणाशक्तेर्भावनाकर्मत्वावधारणेत्युक्ते न-
ानाकर्मत्वावधारणाप्यस्मादेव हेतुद्वयादशक्येत्याशङ्क्य तद्वा-

स्य * मात्रत्वेनेत्युक्तम् * धात्वर्थफलस्य स्वरूपप्रयुक्तत्वात् स
व्यवधाने न शक्यो जन्यजनकभावो ऽवसातुं भावनाफल
नियोगप्रयुक्तत्वात्तस्य च लोके नियोक्तृ राजादेः सन्तोषादिपूर्वफ
लदानप्रवृत्त्या व्यवधानदर्शनात् वेदे ऽपि योगसिद्ध्यधिकरणन्य
नानन्तर्यनियमाभावादनन्तरजन्यत्वानपेक्षभावनाव्याप्यमात्रत्वे
नियोगवशाद् गम्यमानत्वात् भावनाकर्मत्वावधारणेत्याशयः ।
त्वाकर्मकधातुयुक्तेष्वप्याख्यातेषु भावाद्भावनावगतिः सम्भव
सर्वत्रेत्यनेन सूचितम् । नन्वकर्मकेषु धात्वर्थकर्मभावे ऽपि भावन
र्माभ्युपगमे स्वास्थ्यं शयीतेति द्वितीया कस्मान्न प्रयुज्यतइत्य
ङ्क्याह * तच्चेति * भावनाया भाव्यनिष्ठत्वाद्भवितुरेव भ
त्वात् द्वितीयायाश्च प्राधान्यापरपर्यायेप्सिततमत्वमात्रवाचि
भवितृत्वानभिधायित्वादेवं कामशब्दात्त्विदं भवेदिति भवितृत्व
तेनैव भावनाकर्मत्वप्रतीतिः । अग्निमादधीतेत्यादौ तु भावन
र्मत्वान्यथानुपपत्त्या भवितृत्वकल्पनया क्लेशेन भावनाकर्मत
वोह इत्यर्थः । धात्वर्थभावनाकर्मणोरन्यत्वाभिधानस्याशङ्कानिरा
योजनत्वं पूर्वसूचितं प्रकटयितुमाह * सत्यपीति * प्रकट
* तेनेति * नन्वग्निमादधीतेत्यादौ द्वितीयानिर्दिष्टस्यैव प्रायेण
वनाकर्मत्वदर्शनादेवं कामशब्दहेतुकत्वस्य प्रायिकत्वाभिधानम
स्यादित्याशङ्क्याह * यजेरपि त्विति * विष्णुं यजतीत्यादौ द्वि
यानिर्दिष्टामपि देवतां कामशब्दोपबन्धाभावाद्भावनाकर्मत्वेन त्य
कामशब्दोपबद्धस्य स्वर्गादेरेव भावनाकर्मत्वाश्रयणाद्युक्ता का
ब्दोपबन्धहेतुकत्वस्य प्रायिकतेत्याशयः । द्वितीयोक्तस्य कर्मत्वस्य
विशेषत्वाशङ्कानिरासार्थं यजिधात्वर्थकर्मतोक्ता यागे ऽपि देवत
स्वरूपेणासमवायात् कर्मत्वायोगमाशङ्क्यानभिमतमपि पूज्यत्वं
ज्यमानद्रव्योद्देश्यत्वलक्षणत्वाद्देवतात्वस्य त्यज्यमानद्रव्योद्दे
च गुर्वादेर्लोके पूज्यत्वदर्शनादुपचारेणोक्तं शङ्कानिरासमुपसंह
* तस्मादिति * नन्वेवमपि भावनाकर्मणैव तद्विशेषणभूतस्या
शयनादेरपि धात्वर्थस्य सकर्मकत्वे सकर्मकाकर्मकविभागो न
ज्यतइत्याशङ्कते * कस्तर्हीति * भावनाविशेषणत्वसाम्ये ऽपि
भागहेतुमाह * उच्यतइति व्यवहितस्याप्यङ्कुरादिरूपतया बी
दिपरिणतस्य बीजावापादिधात्वर्थकर्मत्वदर्शनात् साक्षाच्छब्दे
चिन्नैरन्तर्ये क चिन्नियतरूपत्वमभिप्रेतं यदुप्तं बीजं तदेवाङ्कुरस
परिणतमिति नियतरूपेण प्रतीतेः। पारम्पर्यशब्देन साक्षात् शब्द
नैरन्तर्याभाववाचिना तदुक्तस्यैव नियतरूपत्वस्याव्यभिचारशब्द

व नियमस्याभाव उपलक्षितः । भावनाकर्माभिधानस्य धात्वर्था-
कत्वोपपादने तात्पर्यं सूचयितुं व्युत्क्रमेण श्लोकं व्याचष्टे *
नेति * श्रान्तस्यासीनस्य सुखीभावाच्छयानस्य स्वास्थ्याभावा-
भिचारोपलब्धेः कदा चित्प्रबुद्धस्य चिरेणान्नपचनादिना धातु-
यलक्षणस्वास्थ्यासद्भावेऽप्यानन्तर्याभावाच्छयानस्यासीनस्य चै-
लौमिति नियतरूपानिरूपणाद्वा साक्षादनुपपत्तेर्धात्वर्थकर्मत्वा-
ादास्यादेरकर्मत्वं पच्यादीनां तु धात्वर्थानां विक्लिद्यता त-
ादिना तच्छब्देन परामृष्टगमिधात्वर्थलक्षितं गन्तृसंयुज्यमानेन
ग्रामादिना साक्षादानन्तर्येणेदं तदिति वा नियतरूपतया धात्व-
म्बन्धिनौदनरूपापत्त्या प्राप्यमाणत्वेन वा कर्मत्वेन कर्मणा
भिचाराभावात्पच्यादीनां धातूनां सकर्मकत्वमिति पचिगम्या-
ामिति धात्वर्थपरतया स्वरूपपरतया चावश्यं योज्यम् । साध्यसा-
न्वयाभिधानमात्रेण सूत्रव्याख्यानसिद्धेः । किं केन कथमित्या-
ात्रयाभिधानमनर्थकमित्याशङ्क्याह * सेयमिति * कथं यथा
कर्षं शास्त्रानुसारेण कल्प्यते कथं वा तदभावाद्यथा कथं चि-
ाप्यमानेत्यपेक्षायां * श्रुत्यादीत्युक्तम् * अतिदेशस्योपकारद्वार-
* अत्यन्तेत्युक्तम् * भावनायास्त्र्यंशापेक्षत्वेऽपि स्ववाक्योपात्त- ३५६
नमात्रान्वये विधिपर्यवसानभ्रान्तिं निवर्त्तयितुमाह * तत इति *
विशेषणविधिं विना विशिष्टविधिर्न सम्भवतीत्याह * तद्विधा-
ति * तस्मादित्युपसंहारभाष्यमधिकरणार्थोपसंहारार्थमिति
ं निवर्त्तयितुं सूत्रार्थमात्रोपसंहारार्थत्वेन व्याचष्टे * इतीति *
शब्दत्वभावार्थत्वयोरेकैकेनाख्यातोपलक्षणासिद्धेरुभयोपादानान-
यमथेति भाष्येणाशङ्क्योच्यतइत्यनेन भावार्थत्वविशेषणप्रयो-
मुक्तं तत्र श्येनादिशब्दानां कर्मनामधेयत्वस्य यजिसामाना-
करण्याधीनत्वाद्यागादिस्वतन्त्रकर्मशब्दत्यागेनोदाहरणमयुक्तमि-
शङ्क्याह * भवन्तीति * ननु श्येनादिशब्दवद्यागा-
ब्दानामपि धात्वर्थाख्यकर्मवाचित्वाद्भावार्थता नास्तीत्याशङ्क्याह
यागादयो हीति * धातोराख्यातप्रत्ययोपात्तभावनोपश्लिष्टस्वा-
ाचित्वोपलम्भादिहापि भावनोपश्लिष्टस्वार्थवाचित्वं कथं नानु-
तइत्याशयः । कर्मशब्दत्वविशेषणप्रयोजनाभिधानार्थं के चिदि-
भाष्यं तत्रोदाहरणमाक्षिपति * के चिदिति * ननु णिजन्ता-
ातेरुप्रत्ययोत्पादनेन भावनावाचितया भावशब्दस्य व्युत्पादित-
त्कथमनुदाहरणतेत्याशङ्क्याह * तत्रेति * भवनाख्यप्रयोज्य-
ापारविशिष्टप्रयोजकव्यापारवाचिभावशब्दार्थैकदेशप्रयोज्यव्यापा-

रवाचित्वात् लक्षणयैतस्योरपि भावार्थतोपपत्स्यतइति परिहर
* तावपि त्विति * यदा तु भावनाप्रयोजनत्वाभिप्रायो भावा
शब्दो व्याख्यायते तदा भावनैकदेशभूतभवनवाचित्वेनैषां भावना
योजनत्वाद्युक्तैव भावार्थतेति परिहारान्तरमाह * अथ चेति * न
भावादिशब्दानां लक्षणया भावनाप्रयोजनत्वाद्वा भावार्थत्वे कम
स्यानुष्ठेयव्यापारवाचित्वेन कर्मशब्दत्वान्नानेन विशेषणेन व्या
प्तिरित्याशङ्कते * कथं पुनरिति * क्रियतइत्यस्मिन्नर्थे करोतेः
णादिके मनिन्प्रत्ययस्मृतेः । कर्मशब्दस्यानुष्ठेयव्यापारवाचित्वाद्
वनादेश्चासिद्धकर्तृव्यापारत्वेनानुष्ठेयत्वात्तद्वाचिनो भवत्यादेर्धा
कर्मशब्दत्वायोगादुत्तरवार्त्तिकानुसाराच्चानुष्ठेयव्यापारवाचित्वं
धात्वभिप्रायो धातुमात्रशब्दः धात्वर्थविशेषानवच्छिन्नायाः भाव
या अनुष्ठातुमशक्यत्वात्तद्वाचिनो धातोरपि कर्मशब्दत्वं नास्ती
परिहरति *निर्विशेषस्येति* ननु भवनाख्यधात्वर्थविशेषावच्छिन्न
या भावनायास्तर्ह्यनुष्ठेयत्वात् भावादिशब्दानां कर्मशब्दतो
पत्स्यतइत्याशङ्क्याह * अत इति * भवनस्यासिद्धकर्तृव्यापारत्व
भावनाविशेषणत्वं नास्तीत्याशयः । किं पुनरित्यादिभाष्येणोदाहर
प्रश्नपूर्वकं विचारस्वरूपं स्पष्टयित्वा स्थितइत्युक्तम् । तच्छङ्कोत्तर
नावतारयति * यदीति * नन्वेवं सति नामधेयचिन्तोपोद्घातत
१९ ततः प्रागेवेदं कार्यमिति शङ्कते * कस्मादिति*सत्यप्युपोद्घातत
भेदचिन्तयैव नामधेयचिन्तयापि सम्बन्धे ऽर्थचिन्तात्मकत्वात्प्र
णलक्षणासङ्गतेस्तत्र न कृतमिति परिहरति * प्रमाणेति * एवं
ह्याख्यातपदस्य फलपदान्वयान्नामपदस्य तदन्वये ऽस्मिन्नधिक
निरस्ते तदेतरत्तदर्थमित्याख्यातान्वयप्राप्तौ गुणविधित्वेनाख्याता
नामधेयत्वेन वेति इहापि प्रसङ्गात् सङ्गत्युपपत्तेः ।
स्मान्नामधेयचिन्तापीहैव न कृतेति शङ्कते * अथेति * प्रा
ङ्गिकत्वेनानन्तरसङ्गतौ सम्भवन्त्यामपि लक्षणासङ्गतेर्नेह
तेति परिहरति * भेदेति * शङ्काद्वयनिरासमुपसंहरति * तस्
दिति * तथेत्यादिभाष्यं स्पष्टत्वादव्याख्याय न चेति भाष्यं स
भावयेदिति फलान्वयस्य प्रागुक्तत्वात्किं केन कथमिति भाव्या
काङ्क्षाया एवोपायस्योक्तत्वात्तद्विरुद्धपुरुषान्वयाभिधानादयुक्त
शङ्क्य व्याचष्टे * न चेति * अर्थवाचिनः कामिपदस्य लक्षण
ऽर्थिशब्देनाभिधानात्तस्य चैकादशाद्यभाष्ये फलपरत्वस्य वक्ष्यमा
त्वादविरोध इति भावः । श्येनेनाभिचरन्निति व्यधिकरणविभ
त्त्वलक्षणस्य विभक्तित्वस्य साध्यसाधनान्वयापादकत्वेन विपरीत

त्वादहेतुत्वमाशङ्क्य वीत्युपसर्गौ विगमार्थौ विशेषार्थौ वेति
। व्याचष्टे * विभक्तित्वादिति * तस्मादित्युपसंहारभाष्यं फ-
। क्रियेति फलभावनान्वयोपक्रमान्न द्रव्यगुणशब्दाः फलान्व-
रापूर्वस्याक्षेपका इत्येवमर्थमिति सूचयन्व्याचष्टे * तस्मादिति *
व सिद्धान्तं वृद्धवचनेन द्रढयति * आह चेति *

सर्वेषां भावो ऽर्थ इति चेत् ॥ २ ॥

नन्वाख्यातपदादेव भावनाप्रतीतेः। सर्वेषां भावनार्थत्वाभि-
मयुक्तमित्याशङ्क्याह * न तावदिति * अयमाशयः धात्वर्थस्य
गत्वं वक्तुं धातोः फलपदान्वयद्वारेणापूर्वाक्षेपकत्वं यदुक्तं त-
पायेदं सूत्रम्। न च भावनावाचिनः प्रत्ययस्य फलपदान्वयद्वा-
र्वाक्षेपकत्वं सिद्धान्तिनो ऽपीष्टं धातोरपि स्वतः प्रत्ययनिरपे-
। भावनावाचित्वाभावेन फलपदान्वयायोगान्नापूर्वाक्षेपकत्वमिष्टं
तु परतः प्रत्ययान्वयद्वाराभावनानुरञ्जकत्वलक्षणाया भावार्थत्वव-
त्तच्च नाम्नो ऽपि श्येनेन कुर्यादिति प्रत्ययान्वयेन भावार्थत्वोप-
: सममिति श्लोकं व्याचष्टे *यदीति* भावनावचनस्यैवेत्येवका-
कारणवाचिशब्दानपेक्षोक्ता भावनावाचित्वेन तु फलपदद्वारा प्र-
स्यापूर्वाक्षेपकतोभयवादिसमानत्वान्न विचार्यत्वेनेष्टेत्याशयः। ना-
स्यापीत्यपिशब्देन श्लोकस्थो वा शब्दार्थो ऽप्यर्थे व्याख्यातः।

येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामा-
नि तस्मात्तेभ्यः पराकाङ्क्षाभूतत्वात् स्वे-
प्रयोगे ॥ ३ ॥

ननु भावार्थत्वाविशेषाद्धातुवन्नाम्नो ऽपि फलपदान्वयसम्भ-
न्नियमानुपपत्तौ शङ्कितायां नामाख्यातयोः स्वरूपकथनमसम्बद्ध-
याशङ्क्याह *यदुक्तमिति* अयमर्थः धात्वर्थानपेक्षस्य नामार्थस्य ३५८
वनानुरञ्जनाशक्तेर्न तावद्धातुतुल्यं भावार्थत्वं नाम्नो ऽस्ति तद-
ये ऽपि दध्नेन्द्रियकामस्येत्यादौ नाम्नः फलपदान्वयदर्शनाद्य-
कथं चित्तु भावार्थत्वमात्रस्य फलपदान्वयोपयोगित्वमाशङ्का-
ग्रभिमतमभ्युपगम्य धातुनाम्नोर्विशेषं वक्तुमेतत् सूत्रद्वयं तत्र
कस्मादिति भाष्येण सर्वेषां फलपदान्वये बह्वदृष्टकल्पनापत्ति-
स्य तु तदन्वये ऽल्पकल्पनेति यदुक्तं तत्रैकान्वये ऽपि नाम्नो
यबहुकल्पना धातोस्त्वन्वये ऽल्पकल्पनेति विशेषः सार्द्धेन सूत्रे-

णोक्तः आश्रितत्वात्प्रयोगस्येति सूत्रावयवेन श्रुतिवाक्यकृतश्च
अयं च सिद्धसाध्यत्वकृतो विशेषो न श्रुतिवाक्यकृतविशेषवच्छब्द
मात्रनिमित्तः किं तु वास्तवोऽपीति वस्तुधर्मत्वेनेत्यनेनोक्तं कीदृश
ऽसौ विशेष इति प्रश्नपूर्वं विवरीतुमाह * कथमिति * प्रतिपद्
क्षारिष्टत्वोपपादनस्यानिष्टापत्त्यभिधानार्थत्वेन प्रस्तुतोपयोगं वक्तु
माह * कस्मादिति * कथं नाम्नः फलपदान्वये बह्वदृष्टप्रसङ्गापरि
हार इत्याशङ्क्याह * नाम्नश्चेति * ननु सिद्धरूपस्यापि नामार्थ
स्याश्रयत्वेन निष्पाद्यो धात्वर्थो दृष्टेनोपकरिष्यतीत्याशङ्क्याह *
हीति * विधीयमानस्य धात्वर्थस्य किं चित् समीहितं प्रति साध
नत्वं विना विधेरपर्यवसानान्नामार्थं प्रति साधनत्वायोगात्तादर्थ्ये
न विध्यनुपपत्तेरन्यार्थत्वेनैव विहितस्याश्रयत्वेन ग्रहणात् सत्यप्या
श्रयत्वे कश्चिददृष्टो नामार्थस्योपकारो धात्वर्थसाध्योऽस्मिन्पक्षे
कल्प्यः स्यादित्याशयः । आश्रयत्वेन धात्वर्थं गृह्णन्नपि नामार्थः सा
धनत्वेन नापेक्षते येन नामार्थस्य फलान्वये धात्वर्थस्तस्य दृष्टेनोप
कुर्यादित्यर्थः । उच्चारणोत्पत्ताविति भाष्यावयवेनोत्पत्तिशब्दमुच्चा
रणार्थत्वेन व्याख्याय स्वे ऽर्थइत्यनेन प्रयोगशब्दो वाच्यार्थत्वेन
व्याख्यातः । तत्र प्रयुज्यमानशब्दात्कर्मव्युत्पत्तिरुक्तेत्याभाति तत्स्वा
र्थस्योच्चार्यत्वाख्यप्रयोज्यत्वाभावादयुक्तमाशङ्क्याधिकरणव्युत्पत्ति-
माह * प्रयुज्यतइति * प्रयुज्यमानशब्दविषयभूते ऽर्थे रूपोपलब्धि
रिति व्याख्यानेन सूचिता प्रयुज्यमानशब्दविषयत्वाल्लक्षणयार्थस्य
प्रयुज्यमानतोक्तेत्याशयः । सूत्रान्त्यप्रयोगशब्दवत् अयमप्युच्चार
णार्थतया प्रसिद्धः प्रयोगशब्दो वाच्यार्थतया कस्माद्व्याख्यायतइ
त्याशङ्क्य प्रयोगस्य सप्तम्या रूपोपलब्ध्या ऽऽधारत्वोक्तेर्वाच्याश्रितत्वा
च्च तस्या इत्याह * तदाधारैव हीति * उच्चारणे ऽपि निष्पाद्य
रूपोपलब्धेर्निष्पन्नरूपतेह विवक्षितेति निष्पन्नशब्देनोक्तं यत्सकृदिति
भाष्येण रूपोपलब्धिपदं स्थायिरूपाभिप्रायेणान्वयमुखेन व्याख्याय
क्रियावैधर्म्याभिधानेन व्यतिरेकमुखेन व्याख्यातं तदुभयमपि ना
मार्थस्य साधनानपेक्षत्वाय निष्पन्नत्वस्य वक्तव्यत्वाद्धात्वर्थस्य साध
नापेक्षत्वायानिष्पन्नत्वस्य वक्तव्यत्वादयुक्तमाशङ्क्याह *अनुत्पन्नत्व
इति* निष्पन्नत्वे नामार्थस्य वक्तव्ये स्थायित्वप्रदर्शनमित्यर्थादुक्तं कर्म
नामधेयत्वेन नाम्नः फलपदान्वयस्यानाशङ्क्यत्वात्तन्निरासार्थसिद्धरू
पार्थत्वाभिधानानर्थक्यापत्तेः द्रव्यगुणशब्दत्वाभ्युपगमे ऽनाशङ्केति
सूचयितुं द्रव्यगुणशब्दा इति व्याख्याते किमर्थं तर्हि नामानीत्युक्तम्
इत्याशङ्क्य सत्त्वप्रधानानि नामानीति स्मृत्या सिद्धार्थत्वोपपादनार्थं

पर्यायत्वाभिधानेन सूचितं, तत्स्पष्टत्वाद्व्याख्याय तस्मात्तेभ्यः
ाकाङ्क्षेति सूत्रावयवव्याख्यानार्थं यत एषामिति भाष्यं सूत्रे नञ-
ादयुक्तमाशङ्क्याध्याहारार्थत्वेन व्याचष्टे * तेभ्य इति * स्व-
न्यवाचित्वेन परशब्दं व्याख्याय प्रधानवाचित्वं भाष्योक्तं व्या-
तुम् *निष्पाद्यत्वेन वेत्युक्तम्* निष्पाद्यत्वेन प्रधानस्य सतो या
अनाकाङ्क्षा सा न विद्यते निष्पाद्यत्वाभावादित्यर्थः । दूरवाचि-
श परशब्देनैव नञर्थो लभ्यतइत्यन्यथा व्याचष्टे * अथ वेति *
त्वादित्यादिसूत्रावयवं नैराकाङ्क्ष्योपपादनार्थत्वेन व्याचष्टे *कृत
पौनरुक्त्यं परिहरति * स्वरूपेति *

येषां तूत्पत्तावर्थे स्वे प्रयोगो न विद्यते तान्याख्या-
तानि तस्मात्तेभ्यः प्रतीयेताश्रितत्वात्प्रयोगस्य ॥४॥

आख्यातस्वरूपकथनस्य प्रयोजनमाह * आख्यातेति * स्त्रो- ३५९
व्याचष्टे * धात्वर्थस्तावदिति * व्यापारात्मकत्वाद्धात्वर्थस्य
ारस्य चानुपसंहृतरूपत्वाख्यानिष्पन्नरूपत्वात्स्वभावेनैव साध्या-
ातेत्याशयः । ननु नामधेयत्वे नाम्नो ऽपि साध्यार्थत्वान्निष्पन्नस्य
ुष्ठेयत्वाख्यसाध्यत्वायोगात्फलपदान्वयः प्रसज्येतेत्याशङ्कते
न्विति * नामधेयत्वस्य धातुसामानाधिकरण्याभिधानत्वात्फलप-
ये च सामानाधिकरण्याभावान्नामधेयत्वं न स्यादिति परिहरति
ति * अन्योत्पादानुकूलार्थाभिधायित्वेन साध्यसाधनेतिकर्त्त-
ाकाङ्क्षोत्थानसूचनार्थं ते भावशब्दा इति वक्तव्ये तान्याख्या-
त्यभिधानात् सूचितम् । परिहारान्तरमाह *अपि चेति* स्त्रो-
याचष्टे * यद्यपीति * ननु सिद्धस्वरूपतयाभिधाने ऽपि व-
ः साध्यत्वात् साधनाकाङ्क्षानुष्ठेयत्वनिर्वाहार्थं च फलाकाङ्-
भविष्यतीत्याशङ्क्याह * अभिधानेति * यागादिशब्दोच्चारणे
साध्यत्वानुरक्तावाकाङ्क्षानुपलब्धेरभिधानकृतैवाकाङ्क्षेत्या-
। तस्मात्तेभ्यः प्रतीयेतेति तस्माच्छब्देन साध्यत्वोपपादित-
ानाकाङ्क्षावशान्नामार्थस्य धात्वर्थान्वये दृष्टार्थत्वं हेतुत्वेन प-
ष्टमिति सूचयितुमुपसंहरति * तस्मादिति * अनेन च भ-
र्थास्त इति भाष्यमपि तात्पर्यतो व्याख्यातम् । उच्चारणाख्यप्रयोग-
स्वार्थे प्रयोगो न विद्यतइत्युक्ते प्रयोगकाले प्रयोगनिषेधायोगा-
षणभूते ऽर्थे निषेधावतारात्प्रयोगकाले ऽर्थो न विद्यतइत्यर्थप्र-

---

ामानाधिकरण्याधीनत्वादिति २ पु० पा० ।

तीतेः स्पष्टत्वात्तद्व्याख्यानार्थं भाष्यं न व्याख्यातम् । अदृष्टकल्पनाल्प त्वबहुत्वकृतेन विशेषेण धात्वर्थफलवत्त्वसिद्धेराश्रितत्वादिति हे त्वानर्थक्यमाशङ्क्य किं चेति भाष्येण हेत्वन्तरसमुच्चयार्थत्वेन व्या ख्यातम् । पूर्वोक्ताद्विशेषादेतदुक्तस्य विशेषस्य विवेकमाह * विं चेति * एक पदोपादानाद्धात्वर्थस्य प्रत्यासत्तिलक्षणया श्रुत्या भा वनान्वयः नामार्थस्य वाक्येनेत्यर्थः । धात्वर्थानपेक्षस्य नामार्थस्य भावनाननुरञ्जकत्वाद्वस्तुतो ऽपि धात्वर्थस्यैव प्रत्यासत्तेर्न शब्दग्रह णाद्भास्त्वत्वनिवृत्तिः । अत्र भाष्यकृतौ तेषामाख्यातानां प्रयुज्यते ऽस्मिन्निति व्युत्पत्त्या प्रयोगशब्दवाच्यः प्रतिपाद्यो ऽर्थो धात्वर्थानु रक्तभावनाख्यः पुरुषेणाश्रित इति सूत्रावयवस्वरूपं व्याख्याय तदु पपादनार्थं पुरुषान्वितभावनाख्यातैरुच्यतइत्युक्तेन व्याख्यातेषु पुरु षानुपादानात्कथं तदन्वयावगतिरित्याशङ्क्य पुरुषस्याख्यातैर्भावनायां नियोगादर्थाक्षेपलभ्यत्वमुक्त्वा तथापि धात्वर्थस्य फलपदान्वयः कथ मित्याशङ्क्यार्थाक्षिप्तस्य पुरुषस्य फलपदाद्विशेषप्रतीतेराख्यातोपात्तस्य धात्वर्थस्य भावनाद्वारा पुरुषान्वयः प्रतीयते न तु द्रव्यादेर्नामार्थस्ये त्युक्ते तस्यापि भावनाद्वारान्वयो भविष्यतीति सर्वेषां भावो ऽर्थ इति सूत्रोक्तं चोद्यमनुभाष्य श्रुतिवाक्यविशेषाभिधानेन परिहृतं तत्सङ्क्षेपतो व्याचष्टे * पुरुषेति * भावनायां पुरुषस्य नियोज्य त्वोपपादनार्थं तद्व्यापारतोक्ता धात्वर्थानवच्छिन्नभावनानुष्ठानाश क्तेस्तदुपश्लेषो भावनायाः पुरुषेणापेक्षितइत्युक्तम् । दर्शपूर्णमासाभ्या मिति नाम्नः फलपदान्वये दर्शकालः पौर्णमासकालश्चेति भाष्ये कालवाचित्वाभिधानान्नामधेयविचारे ऽनुदाहृतत्वाद्धात्वर्थस्यापि फलान्वये गुणविधित्वाशङ्काप्रसक्तेस्तन्निरासार्थं दर्शपूर्णमासकाला न्वितस्यैवाग्नेयादियागस्य विहितत्वात्तत्प्रख्यन्यायेन लक्षणाया याग नामधेयत्वाभिधायकं यदा यागेनेति भाष्यं स्पष्टत्वान्न व्याख्यातम् ।

॥ अथ अपूर्वस्यास्तिताधिकरणम् ॥ २ ॥

चोदनापुनरारम्भः ॥ ५ ॥

कथं पुनरित्यादिभाष्येण शङ्कानिरासार्थत्वेनैतत्सूत्रमवतारि तमिति दर्शयितुमाह * सूत्रासिद्धमिति * अपूर्वाभावे केभ्यो ऽपूर्वं प्रतीयते इति प्रतिपत्त्युपायविशेषविचारायोगात्तत्प्रतिपादनापेक्षायां सूत्रकृदाहेति भाष्यतात्पर्यमित्यर्थः चोदनेत्यपूर्वं ब्रूम इत्यादिभा ष्योक्तं सूत्रार्थं तात्पर्यतो व्याचष्टे * फलायेति * चतुर्थ्युक्तफला र्थत्वं तच्छब्देन परामृष्टं श्लोकं व्याचष्टे * वेदवाक्येति * बूयन्त

:पूर्वाभावे ऽपि कर्मफलसम्बन्धोपपत्तेरपूर्वस्य निष्प्रमाणकत्वा-
र्थाधिकरणस्य च केऽयः फलोत्पादावगतिरित्येतावति पर्यव-
पपत्तेः सूत्रस्य चारम्भकं प्रवर्त्तकं वाक्यं चोदनेति चोदनाख्य-
थनार्थतयापि व्याख्यातुं शक्यत्वान्नेदं सूत्रमपूर्वसद्भावाभिधा-
नेत्युक्तं तद् दूषयितुमुपन्यस्यति * अत्रेति * केन चित्प्रमाणे-
गतपूर्वकत्वादवयवार्थमनुगतमस्य नामेति बहुव्रीहिरुपहासार्थः
व्याचष्टे * वस्त्विति * प्रत्यक्षाप्रवृत्तिं तावदुपपादयति * त-
* आदिशब्देन लोकसिद्धेन्द्रियविषयमात्रग्रहणम् । अनुमाना-
मुपपादयति * नापीति * प्रत्यक्षसूत्रे सत्ता च नानुमानेन
चित्सम्प्रतीयतइत्यत्रोक्तं शब्दाप्रवृत्तिमुपपादयति * पदेति *
व्याचष्टे * आगमिकत्वमिति * उपमानाप्रवृत्तिमुपपादयति
चेति * प्रत्युतासत्त्वएवोपमानं प्रवर्त्तते इत्युपहासार्थमाह ३६१।
नमिति * अर्थापत्त्यप्रवृत्तिमुपपादयति * अर्थापत्त्यापीति *
न्ताभिमतश्रुतार्थापत्तिनिरासार्थम् * फलेत्युक्तम् * श्लोकं
ष्टे * दृष्टार्थापत्तिरिति * शब्दप्रामाण्यानादरेण दृष्टार्थाप-
ारासथा चेश्वरेच्छादेरपि वैचित्र्यहेतोः पराभिमतस्यापि श-
ादानम् । ननु श्रुतायाः फलयागादिसङ्गतेरपूर्वं विना ऽनुपपत्तेः
ापत्तिर्निराकर्त्तुमशक्येत्याशङ्क्याह * श्रुतार्थापत्तिरिति * अ-
न कदा चित्फलसाधनत्वेन सम्भाव्यतइति व्यतिरिक्तोभि-
त् सम्भवित्वाभिधानायान्यथानुपपत्तेः कथं चित्परिहारा-
ः दार्ढ्यवाचिना प्रत्यक्षशब्देनोक्तमिति न कथं चिदपीत्यनेन
ातं।न केवलमन्यथानुपपत्तेः कथंचित्परिहारासम्भवादेव द्रव-
त्वस्य सम्भवित्वं किं तु सामान्यतः प्राप्तत्वादपीत्यपि चेत्यनेनो-
ृवेष्वप्यवदानप्रसक्तेरित्यर्थः। द्रवाख्यविशेषे ऽप्यवदेयसामान्य-
श्रुतहान्यभावः सामान्येन च विशेषाक्षेपादश्रुतापत्त्यभावः ।
व्यमानस्याविरोधिनश्च श्रुतार्थापत्तिविषयत्वात् श्रुतार्थापत्ते-
र्वो न प्रवर्त्ततइति भावः । तत्रापूर्वाभावे ऽपि श्रुतसाध्यसा-
म्बन्धानुपपत्तिपरिहारं कथं विनष्टं साधयतीत्यादिनाशङ्कापूर्वं-
दायिष्यमाणमभिप्रेत्यापूर्वस्यासम्भावित्वं तावदाह * अपूर्वं त्वि-
अनेनैव ग्रन्थेन पाक्षिकप्रसक्तेरपि निरस्तत्वात्परिशेषसिद्धिरू-
वदर्थापत्तिरनाशङ्क्यैवेति यतो ऽन्येत्यनेनोक्तम्। ननु प्रसक्त्यभावे
ानिवृत्तिमात्रेण परिशेषः कस्मान्न सिद्ध्येदित्याशङ्क्याह * य-
* श्लोकं व्याचष्टे * न हीति * श्रुतसाधनसम्बन्धविरो-

व्यतिरिक्ताभिधानादिति १ पु० पा० ।

धि चापूर्वमित्याह * अपि चेति * न च साध्यसाधनत्वाका
६२।१ तत्कल्पयितुं शक्यं प्रमाणाभावादित्याह * न चेति * कः
श्रुतसाध्यसाधनसम्बन्धासिद्धिरित्याशङ्क्याह * तेनेति *
वाशङ्कापूर्वकमुपपादयति * कथमिति * न च स्थायित्वं
धकत्वे प्रयोजकमाकाशादिष्वपि प्रसङ्गादित्याह * अपि चे
एतदेव विवृणोति * यदि चेति * ननु शास्त्रेण यागादे
साधनत्वावसायाद्विनष्टत्वेन च तस्य साक्षात् साधनत्वायोग
धिसम्बन्धिद्वारा साधनत्वसिद्धये ऽपूर्वकल्पनेति स्वयमे
निरस्यति * अथेति * तदेव व्याचष्टे * यदीति * अ
ऽतीतो विनष्टो यागो यस्येति विग्रहः । नन्वात्मनः स्वरूपे
ऽप्याद्यागादेश्चातिक्रान्तस्यासत्त्वेनावच्छेदकत्वायोगात् फलं
हेतुत्वं न स्यादित्याशङ्क्य यागादिविनाशस्य तर्हि प्रतियो
दिनिरूपणाधीननिरूपणत्वादसत एव घटादेर्विनाशप्रतियो
र्गेनावच्छेदापादितवैचित्र्यस्य फले ऽपि वैचित्र्यहेतुत्वोपपत्तेः
नः सम्बन्धिनश्च साधनत्वं भविष्यतीति पक्षान्तरमाह * र
श्लोकं व्याचष्टे * विनाशिनीति * ननु विनाशोत्तरकाली
फलस्य कथं तज्जन्यत्वावधारणेत्याशङ्क्य यच्च यत् प्रतीत्य
प्राप्य यस्मिन्सतीत्युक्तम्।ननु कर्मविनाशान्वितस्यात्मनः साध
न चातिक्रान्तयागेभ्यः पुरुषेभ्यः फलोद्गतिरित्यादिना नि
नत्वात् स्वतन्त्रस्याभावस्य क चित्साधनत्वादर्शनाच्चेह साध
ल्पनेति स्वयमेवाशङ्क्य निरस्यति * स्यादेतदिति * श्लोके
प्त्यादिफलोत्पत्तिनिमित्तस्य भोजनादेः क्रियात्वं धर्मो दृष्टस
मस्योभयपक्षसाम्यात् तत्कल्पत्वाविशेषेणाभावस्यैव तन्नि
कल्पनोचितेत्यर्थः । विनष्टस्य कर्मणः साधनत्वायोगे क
भाविफलसाधनत्वस्यापूर्वकल्पकस्य शास्त्रार्थत्वानवधारण
६३।१ पूर्वकल्पनेत्याह * किं चेति * श्लोकं व्याचष्टे * क्रिये
ष्वनन्तरफलानुपलब्धेः शास्त्रप्रामाण्याच्चावश्यं फलोत्पत्त्य
त्कालान्तरभाविफलसाधनत्वं भविष्यतीत्याशङ्कते * तत्रेति
नुष्ठानात्प्रागनन्तरानुत्पत्तेर्ज्ञातुमशक्यत्वादुत्तरकालं च शा
पाराच्छास्त्रान्तर्गतिर्नापूर्वस्य सम्भवतीति परिहरति * त
श्लोकं व्याचष्टे * न हीति * ननु योग्यत्वावधारणाधी
क्यार्थप्रतीतेरननुष्ठितस्य च योग्यताया: प्रमातुमशक्यत्वात्त
नुष्ठानोत्तरकालं शास्त्रार्थावधारणेत्याशङ्क्य ज्ञाते वा वचनं
द्धान्विहितो ऽस्तीति तार्तीयसूत्रावयवेनानुष्ठानोत्तरकालं स

वधारणे सत्यन्योन्याश्रयापत्तिः सूचिता कर्मफलकालयोर्वियोगो
विप्रकर्षः प्राक्चापूर्वानपेक्षस्य कर्मणः साधनत्वे निश्चिते पश्चात्तदन्त-
र्भावना शास्त्रविरुद्धेति सूचयितुम् * यच्चेत्युक्तम् *वैगुण्यकल्पनया-
पि वानन्तरानुत्पत्तिसम्भवान्न शास्त्राविरुद्धार्थापूर्वकल्पना युक्तेत्या-
ह *अपि चेति* सर्वाङ्गप्रधानसाध्यत्वात्फलस्य कस्मिंश्चित् विगुणे
सति इतरसादुगुण्ये ऽप्यनुत्पत्तिसम्भवं वक्तुं सर्वशब्दः।बहुपुरुषसा-
ध्यत्वाच्चैकाशक्तावपि वैगुण्यापत्तिः कर्तृष्वितिबहुवचनेनोक्ता । स-
र्वेषु पदार्थेषु बहवः कर्त्तारस्तेषु मध्ये क्व चित्पदार्थे क्व चित्कर्त्तर्यश-
क्तेरपरिहार्यत्वादित्यर्थः । श्लोकं व्याचष्टे * दृश्यतइति* प्रायेण ता-
वद्वैगुण्यं दृश्यते यत्रापि न दृश्यते तत्रापि शास्त्राविरोधात्तदेव क-
ल्पनीयमित्यर्थः । ननु स्वर्गनरकयोरामुष्मिकत्वेनानन्तर्यायोगात्प्राग-
प्यनुष्ठानादपूर्वद्वारैव तदुत्पत्त्यवधारणं भविष्यतीत्याशङ्क्याह * न
चेति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * निरति-
शयसुखदुःखात्मकयोस्तादृशसुखदुःखोपभोगयोग्ययोर्देशविशेषयोर्वा
स्वर्गनरकवाच्यत्वात्तयोश्चानेन शरीरेण प्राप्त्यसम्भवाच्चानन्तर्योप-
पत्तेरित्याशङ्क्यालौकिकयोः सम्बन्धग्रहणासम्भवेन वाच्यत्वायोगा-
त्सूक्ष्माणि वासांसि स्वर्गः चन्दनं स्वर्ग इति च सुखहेतौ द्रव्ये स्व-
र्गशब्दप्रयोगेणाकृतिन्यायाद्विशेषणभूतस्य लौकिकस्य सुखस्य स्वर्ग-
शब्दवाच्यत्वावगतेर्दुःखहेतौ च दारिद्र्ये नरकापरपर्यायदुर्गतिश-
ब्दप्रयोगाद्विष्ठायां च दुःखहेतौ नरकशब्दप्रयोगदर्शनादाकृतिन्याये-
नैव लौकिकदुःखवाचित्वावगतेरानन्तर्योपपत्तिरिति सुखदुःखात्म-
कत्वेनेत्यनेनेन सूचितम् । श्लोकं व्याचष्टे * न हीति *ततश्च स्वर्ग-
नरकयोरप्यानन्तर्योपपत्तेर्न ग्रामादिभ्यो विशेषो ऽस्तीत्युपसंहरति*
नेतीति * शास्त्रीयक्रियाजन्यत्वेनापूर्वस्य चेष्टत्वान्निषेधाधिकारे च
निषेध्यस्य हननादेर्लोकसिद्धत्वेनाशास्त्रीयत्वात् शास्त्रीयायाश्च त-
न्निवृत्तेः फलाभावेनापूर्वानपेक्षत्वान्न तत्कल्पना युक्तेत्याह * किं
चेति* श्लोकं व्याचष्टे * ब्राह्मण इति*एवं चापूर्वस्य श्रुतसाध्यसा-
धनसम्बन्धविरोधित्वाद्विनष्टस्यापि च कर्मणस्तत्सम्बन्धिनः पुरु-
षस्य वा विनाशस्यैव वा साधनत्वोपपत्तेः कालान्तरभाविफलत्वान-
वसायाद्वापूर्वस्यासम्भवित्वात्कल्पनानुपपत्तिमुक्त्वा इदानीं श्रुतसा-
ध्यसाधनसम्बन्धानुपपादकत्वादपि कल्पनानुपपत्तिमाह * कल्प-
तमिति * यागादेर्हि व्यापारात्मकत्वात् जन्मनैव कार्यारम्भकत्वं यु-
क्तम् अपूर्वस्य त्वव्यापारात्मकत्वान्निर्व्यापारस्य कार्यारम्भकत्वानुप-
पत्तेः । श्रुतसाध्यसाधनसम्बन्धानुपपादकत्वाद्व्यर्था कल्पनेत्याशयः ।

स्वर्गनरकोपभोगाय देशान्तरे शरीरस्य प्राप्तिर्लोभोत्पत्त्यपरपर्या
क्षिता य चादिशब्दात्पुत्रादेः प्राप्तिरपेक्षिता तत्साधनेनापूर्वं सम
त्यर्थः। स्थाय्याश्रयाभावेन चापूर्वस्य स्थायित्वायोगाच्छ्रुतसाध्य
नसम्बन्धोपपादकत्वं नास्तीत्याह *न चेति * प्रक्षेपान्तस्य या
पूर्वारम्भकत्वेनेष्टत्वात्प्रक्षेपस्य च द्रव्यवदानाश्रितत्वाद् द्रव्यवदा
तिरिक्ते यजमाने ऽपूर्वारम्भकत्वानुपपत्तेर्द्रव्यवदानस्य च विना
श्चापूर्वाश्रयः स्थायी सम्भवतीत्याशयः । वार्त्तिककृन्मते यागस्य
डाशसाध्यत्वे ऽपि सङ्कल्पात्मकत्वेनात्माश्रितत्वाद् द्रव्यवदानप्र
दीनां हि सर्वेषामिति सिद्धान्तवार्त्तिकदर्शनाच्च पुरोडाशादा
मानत्वात्पुरोडाशादिशब्देन द्रव्यवदानमेवोक्तम्। अङ्गापूर्वाणामप
स्थाय्याश्रयः सम्भवतीत्यतिदिशति * एवमिति * अङ्गापू
प्रधानापूर्वेण सम्बद्धं न वा असम्बद्धत्वे तावन्नोपकारित्वं स
तीत्याह *किं चेति * आराच्छब्देन क्रियासाधनासमवायो ऽभि
प्रधानाश्रयात्माश्रितत्वात्प्रधानाश्रयत्वे त्वारादुपकारित्वं विरु
त्याशयः । श्लोकार्थमुपपादयति * न हीति * सम्बन्धस्तु सं
द्यभावादाश्रयाश्रयिभावो वाच्यः अङ्गानां च प्रधानापूर्वसम्ब
भावेन तत्समवेतापूर्वोत्पादकत्वायोगात्पारिशेष्यात्पतनप्रबन्धल
एवाश्रयाश्रयिभावः परिशिष्यते। न चामूर्त्तस्य पतनप्रतिबन्ध
स्तीत्याह *न चेति * नन्वारादुपकार्यङ्गानां प्रधानापूर्वसम्बन्ध
धेन तत्समवेतापूर्वोत्पादकतायोगे ऽपि सन्निपत्योपकार्यङ्गा
धानापूर्वसाधनाश्रयत्वेन तत्सम्बन्धसद्भावात्तत्समवेतापूर्वो
कत्वं भविष्यतीत्याशङ्क्याह * यदपि चेति * लक्षणार्थत्वेनोपक्ष
व्रीह्यादिद्रव्यमात्रक्षये तत्समवायिनो ऽपूर्वस्य क्षयादित्यर्थः
व्रीह्याश्रितस्याप्यपूर्वस्यावघातेन व्रीहिनाशे ऽन्यत्र तण्डुलादावस
रान्न तद् द्वाराप्रधानापूर्वोपकारित्वं स्यादित्यर्थः। सन्निपात्य
प्रात्यात्मिकापूर्वमात्रपर्यवसायित्वस्य वक्ष्यमाणत्वात्फलसाधनस
धानस्य साध्यं यदपूर्वं तस्येति व्यधिकरणे षष्ठ्यौ व्याख्येये ।
ङ्गापूर्वाणां प्रधानापूर्वसमवाये ऽपि प्रधानापूर्वाश्रयात्माश्रित
कार्थसमवायात्प्रधानापूर्वोपकारकत्वं भविष्यति फलसाधनत
व्यतासाधनार्थत्वेन च क्रियासाधनांशानिवेशाभावात् सन्निपत्
कारित्वानापत्तेरारादुपकारकत्वाविरोध इत्याशयेनाशङ्कते *
५।१ त्विति*प्रधानापूर्वाणामप्यात्माश्रितत्वसूचनायापिशब्दः आत्मा
त्वे सत्यपूर्वस्य योग्यतालक्षणत्वात्फलभोगयोग्यत्वस्यैवात्मनापेक्ष
त्पुरुषार्थतापद्येतेति दूषणमाह*एवं सतीति* विधिस्थैकश्रुतित्व

त्र चान्योन्यसापेक्षाणामङ्गापूर्वाणामुपकारकत्वस्य वक्ष्यमाणत्वा-
सम्बन्धानां चान्योन्यसापेक्षैककार्यारम्भकत्वलक्षणयौगपद्यायोगा-
पकारकत्वं सम्भवतीत्याह * अपि चेति * एकोखासंयोगादिलक्ष-
न्योन्यसम्बन्धसम्बद्धानामेव ग्रावादीनामेकोखाख्यैव धारणाख्य
कार्यारम्भदर्शनात् सम्बन्धं विनान्योन्यस्यापेक्षैककार्यारम्भक-
लक्षणं यौगपद्यं न सम्भवतीत्याशयः । प्रधानापूर्वाणामप्यन्यो-
पेक्षायामेकफलसाधनत्वलक्षणं फले यौगपद्यमेकादशाद्ये वक्ष्य-
णमन्योन्यसम्बन्धभावादेवायुक्तमित्यतिदिशति * एतेनेति *
ो ऽपूर्वस्यासम्भवित्वाद्विरोधित्वादनुपपादकत्वाच्च कल्पनानुप-
स्तन्निरपेक्षाणामेव प्रधानानां पुरुषार्थसाधनत्वमङ्गानां च प्रधा-
कारसाधनत्वमित्युपसंहरति * तस्मादिति * कृतत्वमात्र-
ेन विनष्टस्य कर्मणो ऽतिक्रान्तयागस्य वा पुरुषस्य कर्मविनाश-
व वा फलसाधनतेति पक्षत्रयमपि संगृहीतं, किं चापूर्वं यागादि-
रुत्पाद्यते ऽभिव्यज्यते च नोभयथापि सम्भवतीत्याह * न चे-
* उत्पत्त्यसम्भवे तावत्प्रश्नपूर्वकं विकल्प्य हेतुमाह * कुत
। * अङ्गकर्मजन्यस्योपकारापूर्वस्य प्रधानकर्मजन्यस्य च फला-
स्यानवयवत्वात्क्रमशो ऽपि तज्जन्मसम्भवित्वं न प्रतीयतइत्यर्थः ।
देवोपसंहरति * एवं तावदिति * ननु यथा स्फोटवादिभिर्नि-
यवस्यापि स्फोटस्य क्रमवर्त्तिभिर्नादैरस्फुटस्फुटस्फुटतरत्वेनाभि-
क्तेरिष्यते तथापूर्वस्य निरवयवस्याप्याग्नेयादिभिः क्रमप्रवर्त्ति-
रस्फुटस्फुटस्फुटतरत्वेनाभिव्यक्तिर्भविष्यतीति द्वितीयकल्पमा-
ह्य दूषयति * न चेति * एतदेव प्रश्नपूर्वमुपपादयति * क-
मेति * प्रत्यक्षग्राह्यस्यैवार्थस्य लोके ऽभिव्यक्त्यपेक्षादर्शनात्त-
श्चेन्द्रियविषयद्वयान्यतमसंस्कारद्वारदर्शनादप्रत्यक्षत्वाच्चापूर्वे
नुपपत्तेर्नाभिव्यक्तिः सम्भवतित्याशयः । ननु कुलालादिव्यापा-
तत्विलक्षणाप्यभिव्यक्तिः घटादेः सांख्यैरिष्टेत्याशङ्क्य नो लौकि-
नां * दर्शनइत्युक्तम् * श्लोकं व्याचष्टे * सर्वेति * अपूर्वापे-
न्तरशब्दः घटादेश्चालोकानन्तरमुपलम्भात् प्रत्यभिज्ञया च प्राक्
वावसायात्तदभिव्यङ्गतेष्यते ऽपूर्वस्य तु यागाद्यनन्तरमप्यनुपल-
त्प्राक् सत्त्वे च प्रमाणासत्त्वान्न द्वयमप्यभिव्यङ्ग्यत्वकारणमस्ती-
ह * यदि चेति * अपरेषां निपुणंमन्यानां मतमुपन्यस्तमुपसं-
ति * इतीति * असम्भाव्यमानत्वाद्विरोधित्वादनुपपादकत्वा-
रत्यभिव्यक्त्योश्चाभावादिति सर्वथाशब्देनोक्तं न केवलमपूर्वास-
वादस्य सूत्रस्यापूर्वसद्भावप्रतिपादनार्थत्वं ते नेच्छन्ति किं त्ववा-

चकत्वादपीत्याह * न चेति * भाष्यकृद्व्याख्यादूषणमुपसंह
* इतीति * प्राभाकरवत्कार्यनियोगापरपर्यायस्वतन्त्रापूर्वाभ्यु
गमे परोक्ता दोषाः स्युर्नास्मदभिमतशक्तिरूपाभ्युपगम इति भाष्य
द्व्याख्यानमभिधातुमुपक्रमते * अत्रेति * विग्रहवद्देवेति शरी
तं स्वातन्त्र्येण कार्यारम्भकत्वमुपमानेनोपलक्षितम् । अङ्गकर्मभ्यः
फलोत्पादनायोग्यस्य प्रधानकर्मणः फलोत्पादनयोग्यता प्रधान
भ्यः प्राक् फलोपभोक्तृत्वायोग्यस्य पुरुषस्य फलभोक्तृत्वयोग्य
र्थः । कर्मजन्यत्वं वक्तुं कर्मभ्यः परेत्युक्तं लौकिककर्मजन्याया
ग्यताया अपूर्वत्वनिवृत्त्यर्थम् * शास्त्रेत्युक्तम् * श्लोकं व्या
* प्रधानेति * सदुपलम्भकप्रमाणाभावेनापूर्वस्यासत्त्वं यदुक्तं
६।५ दनुभाषणपूर्वकं निरस्यति * यस्त्विति * सर्वप्रमाणाभावे
भावः स्यान्न कतिपयप्रमाणाभावमात्रेणेत्याशयः । न तु प्रत्यक्ष
प्रवृत्तौ शशशृङ्गवदभावनिश्चयात्तद्विरोधेन श्रुतार्थापत्तेरप्यप्र
पपत्तेः कथमन्याप्रवृत्तिरदोष इति स्वयमेवाशङ्क्याह * किमि
प्रमाणान्तरायोग्यत्वादप्रवृत्त्या नाभावनिश्चय इत्याशयः । न
सत्यपूर्वस्यानागमिकत्वात्तद्द्वारस्य श्रेयः साधनत्वस्यागमिकत
स्यादित्याशङ्क्याह *शब्देति * श्रुतशब्दैकदेशभूतशब्दकल्पकत्वेन
ब्दैकदेशभावाच्छ्रुतार्थापत्तिरप्यागम एवेत्यर्थः । विवक्षितार्थ
वाक्यार्थप्रतिपादनाशक्तेः श्रुतशब्दमात्रस्यापरिपूर्णत्वसूचनार्थः
र्थशब्दः । शब्दैकदेशत्वमेवोपपादयितुमुपक्रमते * येनेति *
विनष्टाविनष्टकारणासाधारणी शक्तिः कार्यकारणनियमासि
कल्प्यमानापि क्रियाजन्यत्वाभावान्नापूर्वशब्दाभिधेयेत्याश
* नियोगतश्चेति * शक्तिकल्पनावश्यकत्वं वक्तुमेतदुक्तं व
स्त्वत्र कर्मफलसम्बन्धचोदनायामतीतानामेव कर्मणां जन
क्तिरेष्टव्येत्यर्थः अनन्तरफलोत्पत्तावप्यावश्यकत्वं नियोगतश्चे
नोक्तम् । एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * श्लोकं
चष्टे * यदेव हीति * केवलस्यापि दर्शस्यानेककर्मात्मकत्व
।७।१ क्तिं विना साहित्यासम्पत्तेः * तदन्त्यं वेत्युक्तम् * यदा च
विना भूयसां यौगपद्यं न सम्भवति तदानन्तरफलोत्पत्तावपि
कर्मान्ते फलोत्पत्तेरभ्युपगन्तव्यत्वाच्छक्त्यनङ्गीकरणे चानन्त
शेषेणैकस्यैव साधनत्वापत्तेः शक्तिद्वारा यौगपद्यं सर्वकर्मणां
धनत्वव्यवहारायाङ्गीकार्यमित्याह * नियोगतश्चेति * सर्व
द्ववाक्येन द्रढयति * तथा चाहेति * सर्वपदार्थानां कार्या
स्यव्यवहाराङ्गतत्त्वस्य शक्तिद्वारत्वात्प्रोक्षणादिपदार्थस्वरूपे

तत्वादन्यदेशे विनष्टत्वाच्चान्यकाले ऽपि सञ्चारिस्थायिशक्ति-
टा व्यवहारः सिद्ध्यतीत्यर्थः । नन्वविनष्टस्य कर्मणः शक्तिरलौकि-
त्याह * लौकिकं चापीति * कालान्तरे यस्योद्गतिरिति विग्रहः
र्कं व्याचष्टे * यान्यपि चेति * क्रियाजन्यकार्योत्पत्त्यनुकूलाद्द-
तिशयात्मकत्वात् संस्काररूपतापूर्वस्य संस्कारशब्देन सूचिता
; लोके प्रमाणान्तरानुसारात्संस्कारात्मकशक्तिकल्पनं युक्तं वेदे
ास्त्रैकसमधिगम्यत्वात्तस्य चानुष्ठानात्प्रागेव प्रवृत्तेस्तदा च फ-
य कालान्तरीयत्वानिश्चयान्नापूर्वाख्यसंस्कारात्मकशक्तिकल्पना
त्याशङ्कां निरस्यन् श्रुतार्थापत्तिप्रमाणकत्वमपूर्वस्योपसंहरति *
ति * फलस्यानेकाङ्गप्रधानसाध्यत्वात्तेषां च क्षणिकत्वेन स्वरूप-
हित्यायोगात्फलस्यानन्तरोत्पत्तावपि साहित्यसिद्ध्यर्थे शक्तिक-
नानुष्ठानात्प्रागप्युपपन्नेत्याशयः । एवं स्वपक्षसाधनमुक्त्वा इदा-
परोक्तानि दूषणानि परिहरिष्यन्नपि च यदि तावदित्यनेनोक्तं
तसाध्यसाधनसम्बन्धाविरोधं तावदनुभाषणपूर्वकं परिहरति *
त्वाति * श्लोकं व्याचष्टे * यदि हीति ननूदकाहरणसाधनघट- ३।
धनस्यापि कुलालस्योदकाहरणसाधनत्वाप्रसिद्धेः । कथं यागो-
ादितया शक्त्या साधितस्य फलस्य यागः साधनमित्याशङ्कानिरा-
र्थत्वेन द्वारशब्दं व्याख्यातुम् * सर्वेत्युक्तम् * यथा काष्ठादेर्ज्व-
ाद्यवान्तरव्यापाररूपद्वारापेक्षत्वे ऽपि पाकादौ साधनत्वाविघा-
तथासंस्कारात्मकद्वारापेक्षत्वे ऽपि साधनत्वाविघात इति सूच-
तुं व्यापारशब्दः । नन्वपूर्वस्य व्यापारात्मकतानेनोक्ता व्यापारत्वे
य स्थायित्वानुपपत्तेः । शक्तिसंस्कारत्वोक्तिविराधापत्तेश्च का-
त्पत्त्यनुकूलो ह्यदृष्टो ऽतिशयः सिद्धरूपः शक्तिशब्दवाच्यः सामा-
तः प्रसिद्धस्तद्विशेषस्त्वागन्तुकः संस्कारशब्दवाच्यः प्रसिद्धो न
ापारात्मकः साध्योद्देशप्रवृत्तकर्तृव्यापारव्याप्यत्वाद्व्यवहितस्या-
यागस्य साधनत्वाविघात इत्याशयः । अथ वेत्यनेन सर्वस्य द्-
ादेरवस्थान्तरापत्त्यपेक्षत्वे ऽपि साध्यत्वाविघातदर्शनात् स्वर्गादेः
त्याख्यापूर्वात्मकावस्थान्तरापत्त्यपेक्षित्वे ऽपि साध्यत्वाविघाता-
ाधानार्थत्वेनोत्तरार्द्धं व्याख्यातम् । उपभोग्यानुपभोग्यावस्थे स्थूल-
क्ष्मशब्दाभ्यामभिप्रेते यदा च स्थाय्यपूर्वं शक्त्यात्मकत्वात्कर्मफ-
ाभ्यामनत्यन्तभिन्नं तदा फलं भवद्भावयेदनेनेत्थमिति त्र्याणामपि
ावनांशानां यौगपद्याभिधानमपि कर्मफलकालयोरविच्छेदादुपप-
: भवतीति सूचयितुमाह * एतावानिति * परिहारद्वये ऽपि वृ-
:सम्मतिमाह *आह चेति * ज्वलनक्रियाद्वारा पक्तव्यमिति द्वार-

निर्देशोक्तिः सर्वसाधनानां द्वारापेक्षाप्रदर्शनार्था साध्यस्यावस्थान्त
रापेक्षायामुत्तरार्द्धेन दृष्टान्तो ऽभिहितः । यत्त्वपूर्वं विनापि कर्मफल
योः साध्यसाधनसम्बन्धानुपपत्तिपरिहारोपपत्तेर्नापूर्वं कदा चि
त्फलसाधनत्वेन सम्भाव्यतइत्युक्तं तदनुभाषणपूर्वकं निरसितुमुप
क्रमते * यत्त्विति * यदि शास्त्रादेवावगम्यते किं भवतो विरुध्य
इत्यनेन विनष्टस्यापि कर्मणस्साधनत्वोपपादनेनानुपपत्तिपरिहारमु
क्तम् तावत्प्रश्नपूर्वं निरस्यति * कुत इति * न सम्भावि
सामर्थ्यरूपेण स्थायित्वं यस्येति विग्रहः । श्लोकं व्याचष्टे *नूनमि
ति * एतदेवोपसंहरति * तस्मादिति * अवधारणाद्यपूर्वस्यानुष्ठा
नात्प्रागेव सिद्धा किमुत सम्भावनेत्यर्थः । यदपि यष्टुरेवात्मनं
यागैः सङ्गतस्येत्यनेनातिक्रान्तयागस्य साधनत्वोपपत्तेरपूर्वस्यासम्भ
वित्वमुपपादितं तदपि निरस्यति * न वेति * श्लोकं व्याच
* यदि हीति * अतिक्रान्तानतिक्रान्तयागयोरिति बहुव्रीहिद्व
अतिक्रान्तानतिक्रान्तयागपुरुषविशेष इति मध्यमपदलोपीसमासं
व्याख्यातः । अविशेषमेवोपपादयति * आत्मत्वमिति * नन्वा
त्मत्वाविशेषे ऽपि विनष्टयागे पुरुष सं एष यज्ञायुधी यजमान इ
त्यादिप्रयोगदर्शनेन यजमानत्वस्य भावादकृतयागे चाभावाद्विशेषं
ऽस्तीत्याशङ्क्याह * यागत्वमपीति * अयं भावः यागान्वितं व
रूपं यजमानत्वेनाभिमतं यागविषयं कर्तृत्वमात्रं वा तत्राद्ये कल्पे
यागरूपस्य विनष्टानुत्पन्नत्वेनोभयत्रासरूपतया तुल्यत्वादविशेष
इति स्वरूपनिष्कर्षार्थभावप्रत्ययान्तेन यागशब्देनोक्तम् । यजमानशब्द-
प्रयोगस्तु भूतगत्या भविष्यत्तीति द्वितीयं कल्पं निरस्यति *न चेति*
यथा क्रियारहितस्यानुत्पन्नक्रियस्य निर्व्यापारत्वात्कर्तृत्वं नास्ति तथौ-
दासीन्याख्यमवस्थान्तरं प्राप्तस्य विनष्टक्रियस्यापीत्यर्थः । कर्तृश-
क्तिस्तु सर्वदा सद्भावान्न विशेषादिकेति स्वयमेवाशङ्क्याह * क-
र्त्रीति * उक्तेन च प्रकारेणातिक्रान्तानतिक्रान्तयागयोः पुरुषयोर्वि-
शेषाभावे शुद्धस्य पुरुषस्य साधनत्वापत्तेस्तस्य चावैलक्षण्यात्फलवै-
लक्षण्यं न स्यादित्याह * अपि चेति * ननु विशेषान्तराभावे ऽप्य-
तिक्रान्तयागत्वमेव विशेषो भविष्यतीत्याशङ्क्याह * तथेति *
अतिक्रमस्य विनाशस्य कार्यानुपयोगित्वेनोपलक्षणमात्रार्थत्वाद्यागा-
न्तरातिक्रमे चोपलक्ष्ये पुरुषे विशेषाप्रतीतेः फलविशेषासिद्धिरित्या-
शयः । एकयागगतप्रयोगाल्पत्वबहुत्वे ऽप्येतं दोषमतिदिशति * एते-
नैवेति * फलविशेषाभाक्त्वेन निरस्ता इत्यर्थः । कर्तुश्चाख्यातवा-
च्यत्वे सति प्रकृत्यर्थस्य यागस्य तद्विशेषणत्वप्रतीतेर्विनष्टस्य च का-

नुपयोगित्वात्प्रमेयान्तर्भूतव्यावर्त्तकत्वे लक्षणाविशेषणत्वानुपपत्ते-
रलक्षणत्वमात्रकल्पनयातिक्रान्तयागस्य पुरुषस्य साधनत्वं स-
म्भाव्येत तस्य कर्त्रधिकरणे निषेत्स्यमानत्वाद्यागस्य पुरुषोपलक्षण-
त्वानुपपत्तेः शुद्धस्यैव पुरुषस्य साधनतापत्तेः फलनानात्ववैचित्र्ये
न युज्येते एवेत्याह * कर्त्रिति * ननु विनष्टस्य यागस्य वैलक्षण्या-
पादकत्वे तज्जन्यस्यापूर्वस्यापि वैलक्षण्यानुपकृतेर्नावैलक्षण्यापत्ते-
रपूर्वपक्षे ऽप्येतौ दोषौ तुल्यावित्याशङ्क्याह * यस्य त्विति * का-
र्यकल्प्यत्वाद्यथाकार्यं विलक्षणमेव तत्कल्प्यत इत्याशयः । यथा
ऽसत्तातिक्रान्तयागस्य कर्त्तुः फलसाधनस्य फलान्तरोत्पादनकाले
ऽपे भावाद् बहुप्रयोगानुष्ठानानर्थक्यं तथातिक्रान्ताङ्गस्यापि कर्त्तुः
कर्मोपकारित्वाभ्युपगमे सकृत्कृतेष्वङ्गेषु श्रुतिक्रान्ताङ्गस्य कर्त्तुः क-
र्मान्तरकाले ऽपि भावात्कर्मान्तराणामप्युपकारसिद्धेः पुनरनुष्ठाना-
नर्थक्यमित्याह * किं चेति * कुसूलमध्यगतस्य धान्यस्य धान्या-
न्तराद्यवच्छेद्यत्वदर्शनादङ्गमध्यगतत्वेनाङ्गावच्छिन्नतोक्ता यथा प्रधा-
नावच्छिन्नः कर्त्ता फलसाधनं तथोपकारको ऽप्यङ्गावच्छिन्नः कर्त्तैव
विदिष्यते ततः प्रकृतौ कृतैरङ्गैर्विकृतावपि प्रसङ्गेनोपकारसिद्धेर्विकृ-
त्यवङ्गानां प्राप्तिर्न स्यादित्यर्थः । श्लोकं व्याचष्टे *प्रयाजादीनामिति*
उपकार्यभेदे ऽपि तावदन्यार्थसिद्धोपकारसद्भावे ऽप्यन्यो नापेक्ष्यते
इह तूपकार्यमप्यभिन्नमिति सो ऽपि चेत्यनेन सूचितम् । नन्वङ्गानामपू-
र्वार्थत्वस्य वक्ष्यमाणत्वान्न कर्त्तुरुपकार्यतेत्याशङ्क्य *अपूर्वाभावादि-
त्युक्तम् * प्रयाजादिगतस्यातिक्रान्तप्रयाजादिकर्तृजन्यस्योपकारस्य
सद्भावेनान्यार्थाङ्गकृतस्योपकारस्येतरत्रापि सन्निधानाविशेषरूपप्रस-
ङ्गलक्षणसद्भावात्तस्य कृतप्रयाजादेः पुरुषस्य न पुनरङ्गान्यनुष्ठातव्या-
नीति कर्त्तृषष्ठ्यङ्गीकरणात्तेन नानुष्ठातव्यानीत्यर्थः । ननु तन्त्रम-
ध्यविधानाद्वा मुख्यतन्त्रेण सिद्धिः स्यात्तन्त्रार्थस्याविशिष्टत्वादि-
[illegible] तन्त्रमध्यविधाननिबन्धन-
[illegible] प्रसङ्गस्य वक्ष्यमाणत्वात्कथमिह तदभावे प्रसङ्गः स्यादित्याश-
ङ्क्य * विनापीत्युक्तम् * अन्यार्थाङ्गकृतस्योपकारस्यान्यत्रापि सन्नि-
धानाविशेषस्तन्त्रार्थस्याविशिष्टत्वादित्यनेनोक्तः । तन्त्रमध्यविधानस्य
फलं तच्चेह न तन्त्रमध्यविधानं विनाप्युपकारस्यात्मनो विततत्वादनु-
ष्ठेयतइत्यर्थः । को ऽननुष्ठाने दोष इत्याशङ्क्याह *तत्रेति* ननु पश्व-
र्थमनुष्ठितैर्विद्युदादिभिर्ब्राह्मणतर्पणान्तैः सर्वैरङ्गैः सम्पाद्यस्योपकार-
स्याद्याङ्गानुष्ठानेनोपक्रान्तस्यान्त्याङ्गानुष्ठानात्प्रागसमाप्तेस्तन्मध्ये ऽनु-

१ अनुपलम्भे नेति २ पु० पा० ।

ायमानेन पशुपुरोडाशेनैकदेशकालकर्तृकत्वात्प्रसङ्गेन तादर्थ्यमवि क्तं, विकृतेस्तु प्रकृतिप्रयोगबहिर्भावात्प्रकृतौ कृतस्योपकारस्य वि- त्या सहैकदेशकालकर्तृत्वानुपपत्तेस्तादर्थ्यमयुक्तमित्याशङ्कते * न वति * प्रकृतौ कृतानां प्रयाजादीनां विकृत्या सह कालभेदादेत- याजाद्युपकृतमात्मरूपं न विकृतौ प्रसङ्गेनोपकरोतीत्यर्थः । पश्व- स्यापि प्रयाजानुयाजादेः पुरोडाशप्रयोगे ऽनुपक्रान्ते समाप्ते वा ुष्ठानाद्भिन्नकालस्यापि प्रासङ्गिकत्वोपकारकत्वं दृष्टमित्याशङ्क्य अत्यन्तेत्युक्तम् * पश्वर्थप्रयाजादिप्रयोगस्य पुरोडाशप्रयोगाद् ब- र्भावे ऽपि पुरोडाशप्रयोगस्य तदन्तर्भावेन नात्यन्तं कालभेदो ऽस्ती- ाशयः । विकाराच्च न भेदः स्यादर्थस्याविकृतत्वादिति द्वादशा- ाकरणसूत्रे पाशुकानां प्रयाजानुयाजानामेकादशसंख्यत्वेन पौरो- शिकेभ्यः पञ्चत्रिसंख्येभ्यो ऽनुयाजानां च पृषदाज्यद्रव्यकत्वेन शु- ाज्यद्रव्यकेभ्यः पौरोडाशिकेभ्यो गुणतो विकृतत्वात्तिष्ठत्पशुका- त्वेन च पाशुकानां प्रयाजानां पौरोडाशिकेभ्यः सन्नहविष्काले- ः कालतो विकृतत्वादनुष्ठानभेदः स्यादित्याशङ्कानिरासार्थं गुण- ालविकारे सत्यप्यर्थस्योपकारस्याविकृतत्वान्नानुष्ठानभेद इत्यभि- ानेनास्यापि चोद्यस्योत्तरमुक्तं भवतीत्याह * वक्ष्यतीति * न- ातदेककालोपकारविषयत्वात्कथं कालभेदचोद्यस्योत्तरमित्याश- ा आह * यदेव हीति * कर्तृव्यतिरिक्तापूर्वानभ्युपगमेनास्मि- क्षे कर्तुरेवोपकारकत्वात्तस्य च स्थायित्वेनाविकृतत्वात्कालभेदे यन्यथात्वाभावात्प्रसङ्गसिद्धिराविरुद्धेत्याशयः । अतिक्रान्तयाग- ृपक्षोक्तदोषाः कर्मविनाशस्यापि साधनत्वपक्षे ऽतिदेष्टव्या इत्याह एतद्धति * कथमित्यपेक्षायामनुभाषणापूर्वकमातिदिशति * य- ापि चेति * हिशब्दार्थे चशब्दः एतदेव दृष्टान्तेनोपपादयति *त- ा हीति * महारोगापेक्षया रोगान्तराणां शुभत्वं विवक्षित्वा शु- शुभकर्मविनाशाविशेषदृष्टान्तत्वं वा औषधेन रोगानुत्पत्तेरप्युपल- णात्प्राक् प्रध्वंसाभावाविशेषदृष्टान्तत्वं विनाशानां तु वैचित्र्याभ्यु- ामे वस्तुन्येव वैचित्र्यदर्शनात् वस्तुत्वापत्तेः । कर्मानन्तरभावित- ्वबन्धिवस्त्वन्तराभावान्नामान्तरेणापूर्वमेव स्यादित्याह * यदि ाति * श्रुतहानाश्रुतकल्पनाप्रसङ्गश्चास्मिन्पक्षे स्यादित्याह * न ति * श्लोकं व्याचष्टे * यजेतेति * यद्वा यथाश्रुतस्वर्गत्यागे- श्रुतस्वर्गाभावस्य फलत्वकल्पनं न युक्तं तथा श्रुतयागत्यागेनाश्रु- य यागाभावस्य साधनत्वकल्पनमपीति वक्रोक्त्या दर्शयन् पूर्वार्द्धं ाचष्टे * अथ वेति * ननु यथापूर्वसाधनत्वकल्पने ऽपि न या-

ासाधनत्वाद्धानिस्तथा यागाभावस्यापि साधनत्वेन तद्धानिरित्याश-
ङ्कानिरासार्थत्वेनोत्तरार्द्धं व्याख्यातुं पूर्वोक्तमेवापूर्वपक्षे श्रुतहानाश्रु-
तकल्पनाप्रसङ्गाभावमाशङ्कापूर्वकं स्मारयति * अपूर्वेति * भाव-
नेरपेक्षस्याभावस्य साधनत्वादर्शनान्न विनाशस्य साधनत्वं सम्भ-
तीत्याह * न चेति * ननु विहिताकरणस्याभावरूपस्यापि प्रत्य-
ायसाधनत्वस्मृतेस्तत्कालान्यकरणापेक्षत्वे च तस्यौदासीन्यमात्रे-
ापि प्रत्यवायपरिहारसिद्धेरनुष्ठानानर्थक्यप्रसङ्गादवर्जनीयस्य नि-
मेषितादेः प्रत्यवायसाधनत्वे विहितानुष्ठाने ऽपि प्रत्यवायापत्ते विहि-
ाकरणापेक्षत्वे[1] च तस्यौदासीन्यमात्रस्य निमिषितादेः साधनत्वे
न्वयव्यतिरेकाभ्यामकरणस्यैव साधनत्वापत्तेर्भावनिरपेक्षस्याभा-
ास्य साधनत्वं दृष्टमित्याशङ्क्याह * यदि त्विति * गुर्वाज्ञप्तान-
ुष्ठानेनाहमवज्ञातो ऽस्मीत्यवज्ञानिमित्तगुरुकोपदर्शनाद्विहितावज्ञा-
ख्यभावसहकृतस्यैव विहितानतुष्ठानस्य साधनत्वकल्पना युक्तेत्या-
ाय: * अत एवाचार्यैः *

स्वकाले यदकुर्वंस्तत्करोत्यन्यदचेतनः ।
प्रत्यवायो ऽस्य तेनैव नाभावेन स जन्यते ॥

इति विहितमकुर्वन्यदन्यत्करोतीति वदद्भिर्विहिताकरणनि-
मित्तस्यान्यकरणस्य प्रत्यवायनिमित्तत्वाभिधानादवज्ञायामेव वा-
करणस्य निमित्तत्वोपपत्तेर्विहितावज्ञानमेव प्रत्यवायहेतुत्वेनोक्तम् ।
ाभावेनैव जन्यतइत्येवशब्दोत्कर्षेण केवलस्य हेतुत्वं निरस्तम्।एवं च
विहितस्याननुष्ठानान्नरः पतनमृच्छतीति स्मृतिरनुगृहीता भवति
निमिषितादेस्तु हेतुत्वे विहिताकरणस्य किं चित्करणत्वाभावात् स्मृ-
तेर्बाधापत्तिः एतां वाव स देवतामपरुणद्धि यो ऽलमग्निहोत्राय स-
ाग्निहोत्रं जुहोतीति वापरोधशब्देनावज्ञाभिधानात्सैव प्रत्यवायहे-
ुर्वेदादवसीयते निमिषितादेस्तु हेतुत्वं निष्प्रमाणकमेव तस्मादव-
ाख्याशयविशेषरूपस्य भावान्तरस्य तत्रसम्भवान्न शुद्धस्य क
चिद्धेतुता दृष्टेति ग्रन्थार्थः । याप्यपूर्वेऽस्य दोषस्य तुल्यतोक्ता ताम-
ुभाषणपूर्वं परिहरति * यत्त्विति * यत्त्वपूर्वस्य शास्त्रानन्तर्गति-
रुक्ता तामप्यनुभाषणपूर्वं परिहर्तुमाह * यत्त्विति * अनन्तरफ-
लत्वे ऽप्यनेकाङ्गप्रधानसाहित्यमपूर्वं विना न सम्भवतीत्याशयः
स्वर्गस्य ज्वरादिदुःखाननुविद्धकेवलसुखात्मकत्वेन परलोकानुभव-
ीयत्वेन च षष्ठाद्ये भाष्यकृता वक्ष्यमाणत्वात्तत्प्रतियोगित्वेन नरक-
य सुखाननुविद्धकेवलदुःखात्मकत्वेन परलोकानुभवनीयत्वेन च

१ पेक्षसेति २ पु० पा० । तत्र तस्यौदासीन्यमात्रस्येति नास्ति

।२ सूचयिष्यमाणत्वप्रतीतेरानन्तर्यासम्भवाच्छास्त्रार्थावधारणवेलाय
च कर्मफलकालयोर्विप्रकर्षावगतेरपूर्वस्य शास्त्रान्तर्गतिरस्तीत
स्वर्गेति निरतिशयत्वस्यालौकिकत्वेऽपि शब्दे सुखदुःखात्मकत्व
सम्बन्धग्रहणासम्भवाच्चन्दनविष्ठादावुपचारेण स्वर्गनरकशब्दप्रयो
पपत्तेर्वाक्यशेषेऽप्यस्य सुखनिरतिशयावगतेर्निरतिशयसुखदुःख
र्वाच्यत्वं सम्भवतीत्याशयः।ऐहिकस्यापि पुत्रादेरानन्तर्यं न सम्भव
त्याह * ऐहिकमिति * ग्रामादिप्राप्तेष्वानन्तर्यसम्भवेऽपि चिरव
लोपभोगयोग्यत्वेन ग्रामादेः पुरुषापेक्षावशात्फलत्वावगमात्तस्य चा
र्वं विनानुपपत्तेः सूत्रादप्यपूर्वस्य शास्त्रान्तर्गतिरस्तीत्याह *न चेति
श्लोकं व्याचष्टे *चिरेति * एवं चानुष्ठानात्प्रागेव पूर्वान्तर्गत्यव
रणाद्वैगुण्यकल्पनयार्थापत्तेः प्रतिबन्धो यो ऽभिहितः सो ऽप्ययु
इत्याह * अतश्चेति * यापि निषेधेष्वपूर्वानन्तर्गतिरुक्ता तामप्य
भाषणपूर्वकं परिहरति * यत्त्विति * विधिवन्निषेधस्यापि शास
त्वात्तद्विषयस्य हननादेरपि शास्त्रीयतास्तीत्याशयः । हननादेर्लौकि
त्वाद्वैदिकापूर्वजनकत्वानुपपत्तिशङ्कां निरस्यन् श्लोकं व्याचष्टे *य
हीति * एवमसर्वस्य विरोधित्वासम्भवित्वे निरस्येदानीमनुपपा
कत्वं निरसितुं कल्पितमपि चेत्यनेनोक्तं निष्क्रियत्वं तावत् स
ध्यसाधनसम्बन्धानुपपादकत्वे हेतुं निरस्यति * सत्यपीति * नि
श्चलस्याप्ययस्कान्तादेर्देशान्तरे कार्यारम्भकत्वदर्शनाच्चलनाख्यक्रि
यासाहित्यनिमित्तो यः कार्यारम्भासामर्थ्यरूप उपालम्भो दोष उक्त
सो ऽप्ययुक्त इत्याशयः। निश्चलस्याप्यात्मनः प्रयत्नाख्यक्रियावत्त्वं
देशान्तरे शरीरप्रापणसामर्थ्यदर्शनाच्चलनादीत्यादिशब्देन यत्रोप
दानं प्रापणादीत्यादिशब्देन शरीरोत्पादनमुपभोग्यविषयोपनय
श्चोपात्तं येऽपि स्थाय्याश्रयासम्भवेनानुपपादकतोक्ता तामपि नि
२ स्यति * आत्मैव चेति * यत्वपूर्वजनिकायाः प्रक्षेपादिक्रियाया द्र
व्याश्रितत्वात्तद्व्यतिरिक्ते यजमानात्मन्यपूर्वारम्भकत्वं न सम्भवती
त्युक्तं तत्परिहरति* क्रियापीति । ननु प्रक्षेपादिक्रियायाश्चलनात्मक
त्वात्सर्वगतात्माश्रितत्वं न युक्तमित्याशङ्क्याह * आत्मवाद इति
द्रुचवदानचलनहेतुभूतशरीरचलनात्मकस्य प्रक्षेपादेः प्रयोजक
व्यापारत्वात्प्रयोज्यव्यापारद्रुचवदानवत्कर्मभूतद्रव्याश्रितत्वानुपप
कर्त्राश्रितत्वस्यैव न्याय्यत्वाच्छरीरचलनेऽपि चात्मन एव कर्तृत्व
स्यात्मवादे सूचितत्वाच्चलनस्य शरीराश्रितत्वेऽपि तदवच्छिन्न
शरीरचालनात्मकस्य प्रयत्नस्य भावनात्मकस्यापूर्वजनकस्यात्म
न्यपूर्वारम्भकत्वं युक्तमित्याशयः । एतदेव व्याचष्टे * द्रुचवदानेति

वात्माश्रितत्वे ऽपि क्रियायाः क्षणिकत्वेनोत्पन्नमात्रविनाशिन्यास्ते-
ऽपद्यविनष्टत्वान्नास्यारम्भक्षणो ऽपि हीत्यनेन न्यायेनापूर्वारम्भ-
त्वं न सम्भवतीत्याशङ्क्याह *अतश्चेति*आशुतरविनाशः क्षणिक-
नोत्पन्नविनाशित्वेत्याशयः । नन्वात्माश्रितत्वे ऽपि क्रियायाः स्वस-
तापूर्वाख्यशक्तिजनकत्वानभ्युपगमे क्रियापूर्वयोः काष्ठज्वलनव-
र्धर्मि भावाभावेनात्यन्तभेदापत्तेः श्रुतक्रियासाधनत्वानिर्वाहप्रस-
न् स्वसमवेतापूर्वजनकत्वस्य बलादभ्युपगमनीयत्वापत्तेः क्रिया-
नाशे तदाश्रितस्यापूर्वस्यापि काष्ठविनाश इव ज्वलनस्य विनाशे
ोत्पत्तिकालं यावदनवस्थानाच्छ्रुतसाध्यसाधनसम्बन्धोपपाद-
त्वं न सम्भवतीत्याशयेनाशङ्कते * कथमिति * द्रव्यमेव विशि-
त्त्यपेतं व्यापारशब्दवाच्यं भवतीत्यनेन न्यायेन क्रियात्मनोरत्य-
भेदाभावेनात्मसमवेतस्यापूर्वस्य क्रियातो ऽत्यन्तभेदाभावात् सा-
ाधनसम्बन्धोपपादकत्वं सम्भवतीत्याशयेन परिहरति * अत्रे-
* शङ्कापरिहाराशयौ प्रकटयति * कथमिति * आत्मसमवाये
शक्तित्वं विरुध्यतइत्याशङ्कार्थः।किं चाग्न्यादेरप्यदृष्टे ऽस्यातिशय-
दाहादिकार्यसाधकत्वोपपादकत्वमेवाग्न्यादिशक्तित्वं नाग्न्या-
मवेतत्वं भास्वरत्वादेरग्न्यादिसमवेतत्वेनापि तच्छक्तित्वाप्रसि-
स्मृतिहेतौ च संस्कारे स्मर्त्रात्मसमवेते ऽपि संवित्सामर्थ्य-
त्रेनः स्मरणादित्यादिप्रयोगादनुभवशक्तित्वप्रसिद्धिरतो ऽन्यसम-
ऽपि कर्मशक्तित्वाविरोध इत्याह * अपि चेति * श्लोकं व्या-
* यदेति*नैतावता कर्मशक्तित्वहानिरिति शेषः । यच्चारादु-
र्यङ्गापूर्वाणां प्रधानसम्बन्धाभावे तदुपकारित्वं न सम्भवति प्र-
साधनशब्दसमवायात्तु प्रधासम्बन्धाभ्युपगमे वपनादिवत् स-
त्योपकारित्वापत्तेरारादुपकारित्वं विरुध्येतेत्युक्तं तदपि निर-
ा *तथेति* वपनादेरात्मनेपदेन लिङ्गेन वा वपनाद्याश्रयभूतप्र-
सम्बन्धियजमानशेषत्वात् सन्निपत्योपकारित्वं ज्ञातं तेषां त्वा-
ाषत्वाभावात् सन्निपत्योपकारित्वानापत्तेर्नारादुपकारकत्ववि-
इत्याशयः । यत्त्वङ्गानां यजमानशेषत्वाभावात् सन्निपत्योपका-
ाभावे ऽपि अङ्गापूर्वाणां यजमानाश्रितत्वाभ्युपगमे ऽपूर्वस्य
तालक्षणत्वाद्यजमानेन च फलभोक्तृत्वएव योग्यतापेक्षणात्फ-
कतृत्वयोग्यतापादकत्वात् प्रधानवत्पुरुषार्थत्वापत्तेः कर्माङ्गत्व-
हीयेतेत्युक्तम् * तदप्यनुभाषणपूर्वकं निरस्यति * यदिव-
* तदुद्देशविधिविषयत्वलक्षणतादर्थ्यहेतुकत्वाच्छेषत्वस्याङ्गा-
न पुरुषोद्देशेनाविधानात्प्रधानस्य च फलसाधनत्वयोग्यताधा-

नेन योग्यत्वलक्षणाविरोधात्पुरुषाश्रितत्वमात्रेण तच्छेषत्वे व
र्ग्यं न च तत्सम्भवतीत्याशयः । आश्रितत्वस्य शेषत्वाहेतुर
दृष्टान्तेनोपपादयति * राजार्थेति * राजशेषभूतस्याङ्गानुलेपस्य
पयिकमित्यर्थः । न च पतनप्रतिबन्धलक्षण एवाश्रयाश्रयिभावो विव
क्षितः येनामूर्त्तानां न स्यादित्याह * न चेति * नन्वारादुपकारं
ङ्गापूर्वाणामात्माश्रितत्वात् स्थायित्वेनोपकारित्वोपपत्तावपि सन्नि
त्योपकार्यङ्गापूर्वाणां संस्कार्यव्रीह्यादिनाशे नाशात् स्थायित्वाभावेनं
पकारित्वं न सम्भवतीत्युक्तमत आह * यत्त्विति * व्रीहिसमव
यिनो ऽप्यपूर्वस्य तन्नाशे नाशात्तण्डुलादौ सञ्चारासम्भवमाशङ्
व्रीह्यादिद्रव्यस्यैवावस्थाविशेषस्तण्डुलादिरूप इत्युक्तं न व्रीह्यादिरू
संस्कार्यं किं तु तदुपलक्षितं प्रधानापूर्वसाधनीभूतं द्रव्यं तच्चावस्थ
भेदे ऽप्याहवनीयप्रक्षेपात्प्राङ्न विनश्यतीत्याशयः ।यत् व्रीहिसमव
य्यपूर्वं तत्तण्डुलादिषु व्रीह्यादिद्रव्यावस्थासु सञ्चरणपरम्परया ह्य
दानपर्यन्तं गतमिति तच्छब्दाध्याहारेण योज्यम् । ननु ह्यवदानपर्य
गमने ऽपि तस्याहवनीयप्रक्षेपान्नाशे सति तद्गतस्यापूर्वस्यापि न
शान्न प्रधानापूर्वोपकारित्वं सम्भवतीत्याशङ्क्याह *तत्रापीति* प्रोक्ष
णादिजनितापूर्वविशिष्टह्यवदानसाधितस्यैव प्रधानस्य स्वापूर्वनिष्पाद
त्वात्प्रधानीयापूर्वनिष्पत्तौ व्यापृत्य प्रोक्षणादिजनितमपूर्वं निवर्त्त
नश्यतीति।ननु प्रधानापूर्वमनिष्पाद्येत्युक्तम्। ननु क्रियाश्रयत्वेन च स्थिते
यागादेः प्रधानस्यात्मनि समवायाभिधानात् प्रक्षेपादेश्च ह्यवदा
चलनहेतुभूतशरीरचलनात्मकत्वादात्मन्यसमवाये ऽपि प्रयोजकव्य
पारत्वात् शरीरसमवेतत्वेन ह्यवदानसमवायाभावात्तद्गतस्य प्र
क्षणादिजन्यस्यापूर्वस्य प्रधानसम्बन्धानुपपत्तेः कथं तदीयापूर्वनि
ष्पत्तौ तद्व्यापार इत्याशङ्क्य * तत्रापीत्युक्तम् * देवतोद्देशद्रव
त्यागात्मकप्रयोजकव्यापाररूपांशद्वययुक्तस्य यागाख्यप्रधानस्य र
द्देशावुद्देश्यदेवतात्याज्यद्रव्ययोः प्रयोज्ययोर्व्यापारौ प्रयोजकव्य
पारान्यथानुपपत्तिकल्पितौ तयोर्मध्ये यस्त्याज्यस्य द्रव्यस्य त्याग
शं प्रयोजकव्यापारं प्रति प्रयोज्यस्य व्यापारस्त्यागद्वारा प्रधानस्य
शस्तेन ह्यवदाने प्रधानस्य समवायाद्धोमाख्यस्य च प्रधानस्य
वतोद्देशद्रव्यत्यागप्रक्षेपात्मकप्रयोजकव्यापाररूपांशत्रययुक्तस्य त्य
गप्रक्षेपौ प्रयोजकव्यापाररूपावंशौ प्रति प्रयोज्यस्य त्याज्यस्य प्र
पस्य द्रव्यस्य यौ व्यापारौ त्यागप्रक्षेपद्वारेणांशौ ताभ्यां तद्ध्र
वदाने प्रधानस्य समवायादित्यर्थः । स्वमते च कृतस्य पुरोडाश
यागसाधनत्वाद् ह्यवदाने यागस्य समवायो भाष्यकारमतेनो

सर्वाङ्गानुष्ठानोत्तरकाले समस्ताङ्गापूर्वाणां युगपत्प्रधानोपका-
धनत्वस्य वक्ष्यमाणत्वात्प्रधानापूर्वनिष्पत्तौ व्यावृत्त्यनिवृत्तिरयु-
पाशङ्कानिरासार्थैवकारः आरादुपकार्यङ्गविषयोऽसौ समस्तश-
इत्याशयः। सन्निपत्योपकार्यङ्गापूर्वाणां प्रधानापूर्वनिष्पादनमात्रेण
वसानं तेषामर्थाधिकरणे वक्ष्यमाणया व्यवस्थयोपपादयति *
व चेति * यच्च युगपत्प्रयोगवचनग्रहणावगतमङ्गापूर्वाणां प्र- ३७
नोपकारे प्रधानापूर्वाणां च फले यौगपद्यमन्योन्यसम्बन्धाभावा-
सम्भवतीत्युक्तम्। तदपि निरस्यति*यथैव चेति * यथाङ्गापूर्वा-
प्रधानापूर्वाणां चान्योन्यसम्बन्धस्तथारादुपकार्यङ्गापूर्वाणामे-
त्माश्रितत्वेनान्योन्यसम्बन्धाद्युगपत्प्रधानोपकारलक्षणकार्यारम्भ-
द्भिः।प्रधानापूर्वाणामप्येवमेवान्योन्यसम्बन्धात्फलाख्यकार्यारम्भ-
द्भिरित्यर्थः । ननूक्तेन न्यायेनाङ्गप्रधानापूर्वाणां स्थायित्वे सम्ब-
च सम्भवत्यपि प्रधानापूर्वनिष्पादनमात्रेणाङ्गापूर्वाणां विनाश-
क्तत्वात्। प्रधानापूर्वाणां क्रमोत्पत्तित्वेनाङ्गापूर्वाणां प्रधानसम-
ठानां क्रमवर्त्तित्वापत्तेः। प्रागूर्ध्वं चोत्पद्यमानानामत्यन्तविप्रकर्षा-
हित्यानुपपत्तेर्न युगपदुपकारः सम्भवतीति शङ्कते * कथं पु-
ति * सन्निपत्यारादुपकारिणां सर्वेषां प्रधानापूर्वनिष्पत्तौ
पारमाशङ्कावाद्यभिमतमभ्युपगम्यैव तावन्निष्पन्नानामङ्गापूर्वाणां
रूपेणानागतानां च कर्त्तव्यत्वावधारणेन यौगपद्यमुपपादयति
के चित्तावदाहुरिति * समस्ताङ्गोपेतप्रधानप्रयोगप्रक्रमादागा-
नामपि तादर्थ्यावस्थायाः प्रचलितत्वात्प्रधानसहायतोपपन्नेत्य-
। न त्वेवं सर्वाङ्गापूर्वाणां यौगपद्योपपत्तावपि एकप्रधानापूर्व-
पत्तौ विनष्टत्वात्प्रधानान्तरसहकारित्वानुपपत्तेरेकैकमिति वी-
न युक्तेत्याशङ्क्याह * आतिथ्येति * यदातिथ्यायां बर्हिस्त-
सदां तदग्नीषोमीयस्येति श्रुतेः साधारणार्थतया चतुर्थे वक्ष्यमा-
त्राद्यथातिथ्यायामुपात्तस्य बर्हिषस्तत्समाप्तावपि नापवर्ग इति च-
सिद्धो दृष्टान्तः अनागतानामसत्त्वान्नोपकारित्वं सम्भवती-
शङ्कते * कथं पुनरिति * स्वरूपासत्त्वेऽपि कर्त्तव्य-
वधारणमात्रेण हेतुतान्यत्रापि दृष्टत्वादुपपन्नेति परिहरति
एकान्तेति*नन्वेवं सत्युत्पत्त्युत्तराङ्गानुष्ठानवैयर्थ्यं स्यादिति शङ्कते
ननु चेति * समस्ताङ्गोपेतप्रधानानुष्ठानोपदेशान्यथानुपपत्त्यो-
ाङ्गानुष्ठानसहकृतानां प्रधानापूर्वाणां फलापूर्वनिष्पादकत्वावग-
दकरणे सहकार्यभावे निष्पन्नान्यपि प्रधानापूर्वाणि स्वकार्यं

१ तेषामर्थेन संबन्ध इति तृतीये।

फलापूर्वं न निष्पादयन्तीत्याशयेन परिहरति *कथमिति* कार्योपव
गित्वादपूर्वाणामपवर्गेण कार्यानिष्पादकत्वं लक्षितं कर्त्तव्यत्वाव
धारणस्याविहितत्वात्प्रधानोपकारित्वकल्पनानुपपत्तेरुत्तराङ्गविधीन
कर्त्तव्यत्वावधारणपरत्वाभ्युपगमे वानुष्ठानस्याविहितत्वात्प्रधानाप
र्वसहकारित्वकल्पनानुपपत्तेर्विधे चार्थे प्रमाणान्तरानवतारादनेन प्र
कारेण यौगपद्यानुपपत्तेरपरितोषात्स्वमतेन सन्निपत्योपकार्यङ्गापूर्व
णां प्रधानापूर्वनिष्पत्तौ सहकारित्वात्तेषां चात्मीयप्रधानापूर्वनिष्प
त्तावपवर्गे ऽपि फलापूर्वनिष्पत्तौ सहकारिणामारादुपकार्यङ्गापूर्व
णां फलापूर्वनिष्पत्तेः प्रागनपवर्गाद्यौगपद्यं सम्भवतीति दर्शयितुम
पूर्वोत्पत्तिप्रक्रियामाह*अन्येपुनरिति * प्रधानानामन्योन्याङ्गत्वाभा
ऽपि तत्क्रमस्याङ्गत्वात्पूर्वं प्रधानमकृत्वोत्तरप्रधानानुष्ठाने ऽप्यपूर्वानि
ष्पत्तेस्तदानुत्पन्नेत्युक्तम्।पाश्चात्यानां सामवायिकानां प्रतिपत्तित्वाच्च
स्याश्च क्रत्वर्थोपात्तद्रव्यनाशदोषापरिहारनिमित्तक्रतुवैगुण्यापत्त्य
कदा चिन्निष्पन्नस्याप्यपूर्वस्य नाशापत्तेस्तत्परिहारार्थं प्रक्रान्तद्रव्य
क्रतुसम्बन्धसमापनार्थत्वेनापूर्वनिष्पत्त्यर्थत्वाभावात्प्रथमकृतेत्युक्तम
आरादुपकार्यङ्गापूर्वाणां प्रधानापूर्वनिष्पादकत्वनिरासार्थो मात्रश
ब्दः । ननु सामवायिकाङ्गापूर्वाणां प्रधानापूर्वनिष्पत्तौ व्याप
रे सति तन्मात्रेणापवर्गात्फलापूर्वोत्पादकरूपप्रधानोपकारनिष्पत्त
व्यापाराभावे सर्वेषां युगपत् प्रधानोपकारजनकत्वमेकदेशे वक्ष्यम
णं विरुध्यते इत्याशङ्क्यैवमित्याद्युक्तं सामवायिकाङ्गापूर्वानुगृहीतप्रध
नजन्यत्वं सर्वेषां प्रधानापूर्वाणामेवंशब्देनोक्तम्।यद्यप्यारादुपकार्यङ्ग
पूर्वाणामेव प्रधानोपकारनिष्पत्तौ व्यापारस्तथापि प्रधानापूर्वेष्व
निष्पन्नेषूपकारानिष्पादनात्तन्निष्पत्तेश्च सामवायिकाङ्गाधीनत्वात्स
र्वेषां युगपत् प्रधानोपकारजनकत्वाभिधानमिति दर्शयितुम् * यत्
त्युक्तम् * परमार्थतः पौर्णमास्यमावास्याख्यस्यैकैकस्य प्रधानत्रिक
स्य स्वाङ्गापूर्वानुगृहीतस्यैकैकस्वसमुदायापूर्वजनकत्वे ऽप्येकदेशि
मतेन समुदायापूर्वाभावमभिप्रेत्य दर्शापूर्वाणां तदीयारादुपकार्यङ्ग
पूर्वाणां च प्रतीक्षणमुक्तम् सामवायिकाङ्गापूर्वसाध्यात् प्रधानापूर्व
निष्पादनात्मकात्प्रात्यात्मिकात्। प्रधानोपकारात्क्रमवत्प्रधानानुसारि
तया क्रमेणोत्पद्यमानात्प्रधानवैचित्र्यतो विचित्रादारादुपकार्यङ्ग
पूर्वं साध्यस्यस्योपकारस्य आरादुपकारीण्यङ्गानि प्रतिसाध्यतया प्र
धानानि च प्रत्यनुग्राहकतया साधारणरूपत्वेनादृष्टोपयोगित्वाच्च
पूर्वात्मकत्वेन युगपदुत्पत्त्यैकरूपत्वेन वैलक्षण्यं दर्शयितुमङ्गानीत्य
द्युक्तम्।तदुपपादनार्थं विधिस्त्वेकश्रुतित्वादपर्यायविधानादित्येका

धिकरणसूत्रावयवोक्तमपर्यायविधानमनुकीर्त्तितं व्याख्यातुम् * पादित्युक्तम् * आरादुपकार्यङ्गापूर्वाणामखण्डोपकारनिष्पत्तेः गविनाशाद्यौगपद्यं सम्भवतीति सकलस्य तात्पर्यं कः पुनर्निष्पातिरिक्तः प्रधानापूर्वाणामारादुपकार्यङ्गापूर्वैरुपकारः क्रियतइत्यशयां फलापूर्वोत्पादनयोग्यताधानात्मकमुपकारं दर्शयितुमाह- तत इति * ननु फलापूर्वस्यापि संस्कारूपत्वाभ्युपगमात्संकारस्यानुभवादिजन्यस्य कालविप्रकर्षेण क्षीणत्वस्य चात्यन्तं नास्य चोपलम्भादपूर्वान्तरवत्फललाभात्प्रागपि नाशापत्तेः साध्यसानसम्बन्धोपपादकत्वं न स्यादित्याशङ्क्याह * तत्त्विति * फल- ३ भार्थत्वेनैव तस्य कल्पितत्वात्तत्पर्यन्तं तस्य स्थायित्वमक्षीणत्वं कल्पितमित्याशयः। ननु यत्र प्रतिबन्धकादिवशादनन्तरं फलं नोद्यते तत्रास्तु नाम फलापूर्वकल्पनं यत्र त्वैहिकत्वात् पुत्रादिवदृष्टकारणानपेक्षत्वादनन्तरमप्युत्पत्तुं शक्तं प्रतिबन्धकाभावादनन्तमप्युत्पद्यते तत्र तत्कल्पनं विनापि साध्यसाधनसम्बन्धोपपत्तेरन्तरापूर्वद्वारा चाङ्गप्रधानसाहित्योपपत्तेर्यस्य च शब्दस्यार्थेन लं साध्यते तेनापूर्वं कृत्वा नान्यथेति फलापूर्वस्य सार्वत्रिकत्वाभिधानमयुक्तमिति कोमलोक्त्या शङ्कते * यदि पुनरिति * तापीत्यर्थे ततोऽपीत्युक्तम्। अनन्तरं फलोत्पत्तावप्यपूर्वं विना चिरकालोपभोगासम्भवस्योपभोगश्चिरेणैषां न निमित्ताद्विना भवेदित्रोक्तत्वात्कल्पनीयं फलापूर्वमिति परिहरति * बाढमिति * न्वपूर्वस्य चिरकालस्थायित्वाभ्युपगमे अङ्गापूर्वाणामेव साक्षात्प्रधानोपकारकत्वोपपत्तेरखण्डोपकारापूर्वकल्पनं व्यर्थं प्रधानापूर्वाणां च साक्षात्फलजनकत्वोपपत्तेः फलापूर्वकल्पनं व्यर्थमित्याशङ्कते *अथेते * प्रात्यात्मिकशब्देन प्रत्येकमेकैकाङ्गजन्यतोक्ता साक्षात्तेषां जनकत्वसम्भवेऽपि कल्पकक्रमानुरोधेनैवङ्कल्पितमिति परिहरति * सत्यमिति * निषेधार्थे न हीत्यखण्डं पदं श्लोकं व्याचष्टे * प्रधानानामिति * उत्पत्तिवाक्यावगतभेदानामपि प्रधानानां फलान्वयात्प्रागङ्गानां च प्रधानोपकारान्वयात्प्रागपूर्वानपेक्षत्वात्तदन्वयकाले च यौगपद्यप्रतीतेर्भिन्नापूर्वकल्पनाहेत्वभावादेकमेव फलापूर्वमुपकारापूर्वं च प्रतीयते प्रयोगकाले तु क्रमप्रतीतेः स्वरूपतः साहित्यायोगात्साहित्यसम्पत्त्यर्थं प्रात्यात्मिकानेकापूर्वकल्पनेत्यर्थः। नन्ववश्यकल्प्यैः प्रात्यात्मिकापूर्वैरेव साहित्यवत्फलसाधनोपकारान्वययोरप्युपपत्तेर्गौरवापादिका प्रागेकापूर्वकल्पना न युक्तेत्याशङ्क्याह * सर्वत्र चेति * प्रत्यात्मिकापूर्वाणां साहित्यासिद्ध्यर्थं क-

क्षिप्तत्वात्कार्यान्तरोपयोगित्वं न सम्भवतीत्याशयः । प्रौढ्या इ
तेषां कार्यान्तरोपयोगित्वे ऽप्यदोष इति प्रागुक्तं तस्मात्फलापूर्वमेव
समस्तफलोपभोगपर्यन्तं स्थायि कल्प्यते तदुत्पादनमात्रेण तु प्रधाना
पूर्वाणां नाशः । आरादुपकार्यङ्गापूर्वाणां प्रधानोपकारोत्पादनेन सा
मवायिकाङ्गापूर्वाणां प्रात्यात्मिकप्रधानापूर्वोत्पादनेनेति व्यवस्था सि
द्धेति तात्पर्यार्थः । यस्त्वस्मिन्पक्षे पौर्णमास्यां निष्पन्नानामङ्गापूर्वाण
दार्शब्राह्मणतर्पणानन्तरमुपकारोत्पादनेनापवर्गाभिधानात्तावत्कालं
स्थायित्वमुक्तं तदमावास्यायां पुनरनुष्ठेयत्वापत्त्या दूषयति
* के चित्त्विति * को ऽननुष्ठेयत्वापत्तौ विरोध इत्याशङ्क
* आहैवञ्चेति * प्रधानाहुत्योर्द्वसङ्ख्यत्वादङ्गाहुतीर्विना न त्रयो
दशसङ्ख्या सम्पद्येतेत्याशयः । पौर्णमास्यां पौर्णमास्या य
जेतामावास्यायाममावास्ययेति पौर्णमास्यमावास्याख्ययोस्त्रिकयो
करणत्वप्रतीतेस्तस्य च साधकतमत्वलक्षणत्वात्तमवर्थस्याति
शयस्यापेक्षिकत्वेनाङ्गसाहित्यं विनानुपपत्तेरङ्गसाहित्यावगमात्तस्य
चानुपादेयकालं प्रत्युपादेयत्वेन विवक्षितत्वादेकैकस्य त्रिकस्य फल
साधनत्वाभावेनानुपकार्यत्वात् त्रिकद्वयस्यैकस्मिन्काले ऽनुत्पन्न
स्योपकर्तुमशक्यत्वादुपकारानिष्पत्तौ चाकृतकार्यत्वेनाङ्गापूर्वाणा
मपवर्गाभावे ऽपि वचनबलात्त्रिःप्रयुक्तानामुपकारकत्वाकल्पनया
त्रिरनुष्ठानं सेत्स्यतीत्येकदेशिनां दूषणपरिहाराभिप्रायमाशङ्कते*
अन्ये त्विति* यैः प्रयोगद्वयान्ते ऽङ्गापूर्वाणामपवर्गः प्रागुक्तस्त एवा
न्यशब्देन परामृष्टा त्रिः सम्मार्ष्टीत्यादिवदावृत्त्य विधानात् । सकृत्प्र
त्प्रयुक्तानामेवोपकारकत्वोपपत्तेरपवर्गाभावे पुनः प्रयोगानर्थक्या
पत्तेरपरिहार्यत्वात् स्वमतेन पौर्णमास्यान्निष्पन्नानामङ्गापूर्वाणां पौ
र्णमास्याख्यप्रधानत्रयसमुदायापूर्वनिर्वृत्तावपवर्गं दर्शयितुमाह* अथ
येति * कथं प्रधानापूर्वत्रयस्यैकसमुदायापूर्वजनकत्वावगतिरित्ये
क्षायां पौर्णमास्येति तृतीयाश्रुत्या करणत्वावगमादित्युक्ते ननु फला
पूर्वमेव प्रति करणत्वं भविष्यतीत्याशङ्क्य समर्थः पदविधिरिति पद
मात्रविधेः सामर्थ्याधीनत्वस्मरणात् सापेक्षत्वे च सामर्थ्यविघा
तापत्तेर्विभक्तिश्रुत्यामावास्यानैरपेक्ष्यावगमात्पौर्णमास्यसहितामावा
स्यया स्वार्थं समुदायापूर्वं करोतीत्यकारप्रश्लेषेणोक्तम् । अङ्गापेक्षा
तु करणश्रुत्याक्षिप्तत्वान्न सामर्थ्यविघातिकेति साङ्गेत्यनेन सूचितम्
यद्वा साङ्गा पौर्णमासी स्वार्थं समुदायापूर्वं करोति अमावास्याप्यमावा
स्ययेति करणविभक्तिश्रुतेरङ्गसहिता स्वार्थं समुदायापूर्वान्तरं करोती
ति योज्यम् । यदि त्वमावास्याख्यसमुदायसहितस्य पौर्णमास्याख्यसमु

यस्य दर्शपूर्णमासाभ्यामिति करणविभक्तिश्रुतेः स्वार्थफलापूर्वसा-
नत्वावगमात्समुदायद्वयस्य चापूर्वं विना साहित्यानुपपत्तेः। समु-
यापूर्वजनकत्वावगतिरित्येवं व्याख्यायते ततः साहित्यस्य द्वन्द्वा-
गम्यत्वाद्विभक्तिगम्यत्वाभिधानं तावदयुक्तं समुदाययोश्च फल-
धनत्वाभ्युपगमे पौर्णमास्यधिकरणे तन्निरासादरो ऽपि विरुध्येत
ङ्गापूर्वाणां प्रधानोपकारापूर्वोत्पादनमात्रेण निवृत्तिसूचनार्थम् *
श्रोक्तेनैवेत्युक्तम् * पौर्णमासीकालीनेष्वङ्गापूर्वेषु पौर्णमास्याख्यप्र-
नत्रयोपकारं कृत्वा निवृत्तेष्वङ्गापूर्वजनितानुग्रहविशिष्टं पौर्ण-
स्याख्यप्रधानापूर्वत्रयम् एकं समुदायापूर्वं कृत्वा अपवृज्य-
इत्यर्थः. फलापूर्वस्य तर्हि कथं निवृत्तिरित्याशङ्क्याह * त-
नरिति * स्वाङ्गापूर्वजनितानुग्रहविशिष्टामावास्याख्यप्रधानापूर्वत्र- ३
जन्यतामावास्याख्यसमुदायापूर्वस्यैवंशब्देनोक्ता समुदायापूर्वद्वया-
ुपगमस्य प्रकृतोपयोगमाह *अत श्चेति * समुदायापूर्वद्वयाभ्युप-
मे पौर्णमासाख्यसमुदायापूर्वजननार्थं पौर्णमासाख्यप्रधानापूर्वत्र-
ण स्वाङ्गापूर्वजनितोपकारापेक्षणादुपकारनिर्वृत्तौ च कृतार्थतया
र्णमासीनिष्पन्नाङ्गापूर्वनाशादमावास्यायां पुनः प्रयोगानर्थक्यदो-
भावः । तदनभ्युपगमे त्वकृतार्थत्वात्पौर्णमास्यां निष्पन्नानामङ्गा-
र्वाणां नाशायोगात्पुनः प्रयोगानर्थक्यदोषो दुःपरिहर इत्यर्थः। यद-
पूर्वस्य कर्मभिरुत्पत्तिरभिव्यक्तिर्वेति विकल्पोत्पत्तिरपि युगपत्ता-
न्न सम्भवति क्रमवर्त्तित्वात्कर्मणामित्युक्तं तदप्यपूर्वद्वारा कर्मणां
गपद्योपपादनात्सुपरिहरमित्याह * एतयैवेति * कर्मवर्त्तिनामपि
र्मणामवान्तरकार्ययौगपद्यद्वारा युगपत्परमकार्यारम्भकत्वं वृद्धो-
हृतेन दृष्टान्तेनोपपादयितुमाह * आह चेति * वाक्यतदवयवा-
यनरूपेण क्रमवर्त्तिनीभिरावृत्तिभिरभ्यासकर्मभिर्यथावान्तरसं-
कारयौगपद्यद्वारा वाक्यसमुदायात्मकाध्यायग्रहणसामर्थ्यरूपः पर-
संस्कारो युगपद्भवति तथेदमपीति श्लोकार्थः। यच्चानवयवत्वा-
क्रमशो ऽभ्युत्पत्तिर्न सम्भवतीत्युक्तं तदपि प्रौढ्या सावयवत्वाभ्यु-
गमेन निराकर्त्तुमाह * न चेति * आत्मादावमूर्त्ते निरवयवत्वद-
र्शनादपूर्वस्यामूर्त्तत्वेन निरवयवत्वं वाच्यम्। न चामूर्त्तत्वं निरवयवत्वे
प्रयोजकं मूर्त्तेष्वपि परमाणुषु निरवयवत्वादर्शनादनेकप्रयोजक-
कल्पनापत्तेः । किं त्ववयवसन्निवेशानात्मकतेत्याशयः । नन्वपूर्वस्या-
वयवसन्निवेशानुपपत्तेर्निरवयवत्वं भविष्यतीत्याशङ्क्याह * अनवै-
हीति *कारणायौगपद्याद्युगपदुत्पत्त्ययोगात्क्रमोत्पत्तिप्रतीतेस्तस्याश्च
निरवयवत्वे ऽनुपपत्तेः। सूक्ष्मदर्शनायोग्यावयवसन्निवेशरूपेणापूर्वं

प्रतीयतश्चत्पद्यतइत्यर्थः । अस्मिंस्तु पक्षे सर्वेषामेकफलसाधमानां प्रधानानां साक्षादेकफलापूर्वसाधनत्वाभ्युपगमात्सर्वेषां चाङ्गानां साक्षादेककरणोपकारापूर्वसाधनत्वाभ्युपगमात्कर्मभेदानुनिष्पाद्यपूर्वभेदाभ्युपगमो विरुध्येत।तदभावे चाज्यौषधमांससान्नाय्यादिधर्मव्यवस्था त्तार्त्तीया वाङ्नियमादेश्चावान्तरापूर्वप्रयुक्तत्वं नावमिकं न सिद्ध्येदित्यवश्यं प्रतिकर्मापूर्वभेदस्य कल्प्यत्वात्तद्द्वारा च क्रमवर्त्तिनामपि कर्मणां युगपदपूर्वोत्पादकत्वोपपत्तेर्नार्थापत्तिरवयवकल्पनायै प्रभवति कल्पितानामपि चावयवानाममूर्त्तत्वेनान्योन्यानवष्टम्भकत्वान्नावयवारम्भकत्वसम्भवः । मूर्त्तत्वकल्पने तदारब्धस्यापूर्वस्यापि मूर्त्तत्वापत्तेर्विग्रहवदिव स्वतन्त्रमपूर्वं कल्प्यमानं श्रुतकर्मफलसम्बन्धबोधकमेव स्यादिति प्रौढिमात्रमिदं प्राक् सत्त्वे प्रमाणाभावाच्छक्तिनियमाच्च कार्यकारणनियमासिद्धेरभिव्यक्तेरप्यत्यन्तासत्या एवोत्पत्तेरवश्याभ्युपगन्तव्यत्वात् सांख्योक्तसत्कार्यवादानुपपत्तेरनभिमतमप्यभिव्यक्तिपक्षं प्रौढ्या दर्शयति * यदापीति * फलदानाभिमुख्यकरणरूपास्यापूर्वस्याभिव्यक्तिर्विषयेन्द्रियोभयसंस्काररूपत्वात्शब्दादिविलक्षणा कर्मभिर्भविष्यतीत्युक्तं कथं कर्मभिरपूर्वस्य फलदानाभिमुख्यं क्रियतइत्यपेक्षायां प्रतिपुरुषं स्वीकारादित्युक्तम्।प्रतिग्रहेणेव कर्मभिः कर्त्तारं प्रत्यपूर्वस्य स्वत्वापादनादित्यर्थः । नन्विन्द्रियसंस्कारेण विषयसंस्कारेणोभयसंस्कारेण वा लोके शब्दाद्यभिव्यक्तिदर्शनात्कथं तद्विलक्षणास्याभिव्यक्तिः कल्प्यतइत्याशङ्क्याह * तथा हीति * कुलालादिव्यापारेणापि घटाद्यभिव्यक्तेः सांख्यैरिष्टत्वादिति भावः।तस्मादात्मनाधिष्ठितस्यापूर्वस्य फलदानोन्मुखत्वलक्षणाभिव्यक्तिर्युक्तेति परिहरति * आत्मस्थेति * आत्मकामादिश्रुतितो वात्मनः स्वभावेन सर्वफलावाप्तिः सामर्थ्यावगमात्फलानुपभोगस्य प्रतिबन्धनिमित्तत्वावगतेस्तदपनयनरूपाभिव्यक्तिः सामर्थ्यात्मकस्यापूर्वस्य कर्मभिः क्रियते नादैरिव शब्दस्य श्रवणप्रतिबन्धकास्तिमितवाताद्यपनयरूपेति प्रौढ्या शब्दतुल्यामेवाभिव्यक्तिमाह* सर्वेति * आप्तकामादिश्रुतेरनुपलब्धिविरोधेनार्थवादत्वादयमपि प्रौढिवादः।अतो ऽपूर्वस्य श्रुतार्थापत्तिप्रमाणकत्वात्तत्प्रतिपादनार्थत्वेन भाष्यकारीयं सूत्रव्याख्यानं युक्तमित्युपसंहरति * तस्मादिति*यच्च वृत्त्यन्तरकारैरारभतेर्णिजन्तादच्प्रत्ययमुत्पाद्यारम्भयति प्रवर्त्तयतीत्यारम्भकं प्रवर्त्तकं वाक्यं चोदनेति चोदनास्वरूपकथनार्थतया एतत्सूत्रं व्याख्यातं तत्प्रकृतापूर्वप्रतिपत्त्युपायशब्दचिन्तानौपयिकत्वाच्चोदनास्वरूपकथनार्थत्वे चास्य सूत्रस्य चोदनासूत्रानन्तरं

तैव्यर्थत्वापत्तेरयुक्तमित्याह * सूत्रस्यापीति * यदपि न चैतत्सूत्रं
प्रतिपादने स्पष्टमित्युक्तं तन्निरासायापूर्वप्रतिपादने सूत्रं यथाभाष्यं
जयति * तेनेति * आरम्भःशिष्यतइति भाष्येणारम्भप्राति-
देकात्फलोत्पादनवाचिनस्तत्करोति तदाचष्टइति स्मृतेरारम्भमा-
ष्टे इत्यस्मिन्नर्थे णिचमुत्पाद्याचप्रत्ययकरणेनारम्भ फलोत्पादनमा-
ष्टे इत्यारम्भशब्दव्याख्यानादारम्भश्चोदनेत्यारम्भशब्दार्थो लभ्यते.
दनेत्यपूर्वमित्यनेन च भावशब्दा अपूर्वस्य बोधका इति भाष्य-
ानात् चोद्यतआक्षिप्यते इति कर्मव्युत्पत्त्यापूर्वस्य चोदनात्वमु-
मिति प्रतीतेश्चोद्यते ऽनेनेति करणव्युत्पत्तौ चोदनमिति भाव-
त्पत्तौ वा ऽपूर्वस्य चोदनेत्यर्थः । तेभ्यः क्रिया प्रतीयेतेति क्रियाश-
स्य तेभ्यो ऽपूर्वक्रियावगतिरित्यनेन अपूर्वविषयत्वेन व्याख्यानात्
याश्च तस्मात्तेभ्यः क्रिया प्रतीयेतेत्यनन्तरसूत्रोपपत्त्यायुक्तमाश-
व्याचष्टे * यदि पुनरिति * कल्प्यस्य पूर्वस्थस्यानुवृत्तेर्विनै-
याहारेण लभ्यते कथमाख्यातेभ्यो ऽपूर्वं प्रतीयतइत्यपेक्षायां चो
पुनराक्षिप्यते आख्यातेनापूर्वम् । अपूर्वस्य वा चोदकमाख्यातम् ।
म्भकत्वात्फलोत्पादनव्यापकत्वादित्यभिधानाच्च प्रकृतोपयोगी
पष्टश्चायमेव सूत्रार्थ इत्याशयेन यो भाष्यकृतोक्तः सूत्रार्थः स-
युक्तो न वृत्त्यन्तरकारोक्त इत्येवकारेणाभिधानात्तद्व्याख्यानार्थं
प्रमपि व्याकृतं भवति । यदि पुनरित्याशङ्काभाष्यं नश्वरस्य कर्म-
स्थायित्वकल्पनानुपपत्तेरयुक्तमात्रमाशङ्क्य व्याचष्टे * यदि पुन-
ि * कल्प्यस्यापूर्वस्य स्थायित्वकल्पनायाः सिद्धस्य कर्मणः
येत्वकल्पना लाघवाद्युक्तेत्याशयः । नैवमित्यादिपरिहारभाष्य-
तपति * न हीति * गन्तापि प्रत्यक्षो देशान्तरं च तेन गत
विजानात्यागत इति चेति गन्तृगम्यप्रत्यक्षत्वाभिधानेन गम-
प्रत्यक्षत्वाभिधानम् । अपि वा व्यतिरेकाद्रूपशब्दाविभागाच्च गो-
दैककर्म्यं स्यान्नामधेयं च सत्ववदिति षष्ठाधिकरणसिद्धान्तसू-
रूपशब्दाविभागाच्चेत्यवयवं व्याख्यातुं यद्भाष्यकृता करिष्यते
ोधो भङ्गित्वाद्यागस्येति च विनाशित्वेन यागस्य प्रस्तुतत्वात्त-
श्र देवतोद्देशपूर्वकद्रव्यस्य त्यागात्मकसङ्कल्परूपत्वेनाचलनात्म-
द्देशान्तरप्रापकत्वं नास्तीत्यर्थः । नानेन प्रत्यक्षानुपलब्धिरुक्ता
। प्रतिक्षणविनाशिपूर्वापरीभूतावयवत्वात्सिद्धरूपा प्रतीतेः स्था-
रूपानुपलब्धिरित्येवं व्याख्यानेनाद्यं तावदाक्षेपं परिहरति
त्रेति * श्लोकं व्याचष्टे * यद्यपीति * स्वरूपेणाचलनात्म- ३९
ऽपि यागस्य चलनात्मकप्रक्षेपादिविशिष्टस्य फलसाधनत्वात्ते-

नांशेन चलनात्मकत्वमभिप्रेत्य देशान्तरप्रापकत्वाभिधानमिति द्वि तीयमाक्षेपं परिहरति * यागे ऽपीति * श्लोकं व्याचष्टे * न हीति * यागग्रहणेन होमस्याप्युपलक्षणमभिप्रेत्य तस्य प्रक्षेपाधिकयागात्मकत्वात्समस्तादित्युक्तम् । कथं देशान्तरप्रापकत्वस्य स्थायित्वनिरासहेतुतेत्यपेक्षायामाह * तत्रेति * देशान्तरप्रापकत्वव्याख्यानार्थं संयोगविभागफलत्वं धात्वर्थानां वदता संयोगविभागयोर्धातुवाच्यत्वं निरस्तम् ।

त्यक्तं प्रतीतियुक्तिभ्यां भाष्यवार्त्तिकवारितम् ।
तयोर्धात्वभिधेयत्वं वदन्न व्रीडते कथम् ॥

निराश्रयस्य प्रक्षेपादेरवस्थानायोगात्तस्य स्थायित्वसिद्ध्यर्थं तदाश्रयेणापि स्थायिना भवितव्यं न चासावाश्रयः स्थाय्यस्ति संयोगविभागफलत्वेन प्रक्षेपादेः संयोगविभागयोग्यप्रादेशिकाश्रयापेक्षत्वात्तस्य स्थायिनो ऽनुपपत्तेः । स्थाय्याश्रयाभावात्कर्मणः स्थायिता न युक्तेत्याशयः । ननु चलनात्मककर्माश्रयस्य शरीरस्य कं चित्कालस्थायित्वोपपत्तेरैहिकफलानां तावत्कर्मणां फलोत्पत्तिं यावत् स्थायित्वं सम्भवतीत्याशङ्क्याह * न चेति * अनुष्ठानोत्तरकालं योग्यानुपलब्ध्या कर्मणो सत्त्वावधारणान्नाश्रयस्थायित्वे ऽपि स्थायिता युक्तेत्याशयः । न चाभिव्यञ्जकाभावेनानुपलब्धिरभिव्यक्तस्याप्यनुपलम्भादित्यभिव्यक्तिशब्देनोक्तम् । अयं भावः अनभिव्यक्तस्य फलसाधनत्वाभावादनुष्ठानेनाभिव्यक्तिर्वक्तव्या तस्याश्च क्षणिकत्वे संस्कारजनकत्वानभ्युपगमात्फलासिद्धेः स्थायिताङ्गीकार्येति अनेन चानुष्ठानोत्तरकालानुपलम्भाभिप्रायेणान्यथाभाष्यं व्याख्यातम् । ननु चलनात्मकस्य कर्मणः स्थाय्याश्रयाभावेनास्थायित्वे ऽपि सङ्कल्पादेः स्थाय्यात्माश्रयत्वात् स्थायित्वं भविष्यतीत्याशङ्क्याह * सङ्कल्पेति * सङ्कल्पादेरपि क्षणान्तरानुपलम्भादेव नावस्थायित्वं विशेषतो ऽन्योन्यविरोधेन सङ्कल्पान्तरोत्पत्तौ पूर्वसङ्कल्पनाशादित्यर्थः । समुद्रध्यानाद्यादिशब्दाभ्यामुपात्तं न तदित्यादिभाष्यं विकल्पस्थाय्याश्रयनिरासार्थत्वेन व्याख्यातुं विकल्पं तावदाह * अवस्थानं चेति * तत्राद्यनिरासार्थं न तदित्यादिभाष्यं व्याचष्टे * न तावदिति * गमनफलप्राप्तिलक्षणार्थत्वं गमेर्दर्शयितुं व्यापिन इत्युक्तम् । विभागविशिष्टसंयोगफलत्वाच्चलनस्यात्मनि विभागरहिते ऽनुपलब्धिरित्याशयः । सर्वत्रेति भाष्यं हेतुप्रश्नोत्तरत्वेनावतारयति * कथमिति * तद्व्याख्यातुमाह * अहम्प्रत्ययेन हीति * यथास्मिन्काले ऽहमस्मीति न विशि-

ते तथास्मिन्देशे इत्यपीति मात्रशब्दव्यावर्त्यं दर्शिते नन्वस्मिन्देशे
ाम्यहमित्यादिदेशतः कालतो चावच्छेदः प्रतीयत एवेत्याशङ्क्य
न्येत्युक्तम् प्रत्यक्षेण शरीरस्य देशकालवच्छेददर्शनाच्छरीराभे-
चारेणासावहं प्रत्ययः परमार्थतः स्वात्मनश्चैतन्यस्वभावत्वे-
त्स्वभावाच्छरीराद्भेदाच्चैतन्यस्य च देशकालावच्छेदाप्रतीतेर्ना-
ऽवच्छेदो ऽस्तीत्याशयः। कथमेतावता सर्वव्यापितेत्याशङ्क्याह *
श्चेति * नन्वहम्प्रत्ययस्यात्मग्राहकत्वात्तत्कार्यत्वव्यपदेशो न
इत्याशङ्क्याह * सर्वत्रेति * ग्राहकत्ववत्कार्यत्वस्यापि सद्भा-
र्थेष्टं व्यपदेशोपपत्तिरित्याशयः।सुखादि वा कार्यशब्देनाभिमत-
ान्यथा व्याचष्टे * सुखेति * सुखादेः सार्वत्रिकत्वमुपपादय-
* न हीति * ननु शरीर एव सुखाद्युपलम्भात् कार्यत्वं भविष्य-
ाशङ्क्याह * न चेति * सुखादयश्च स्वयमुपालभ्यन्ते न रू-
य इव शरीरगुणाः परेणापीति भाष्ये पठिते ऽपि शरीरे परेणा
क्षेणानुपलम्भादित्यनेन हेतुना सुखादेः शरीरधर्मता निषिद्धेत्य-
कार्यस्य कारणासमानदेशत्वानियमात्समवायिकारणे कार्यसम-
त्कार्यशब्देनात्मधर्मत्वविवक्षा धर्मशब्देन सूचिता सार्वत्रिक-
ाद्युपलब्धेरात्मसार्वत्रिकत्वे हेतुतामुपपादयति * तत्रेति *
रात्मसंयोगहेतुकत्वात्सर्वस्यात्मकार्यस्य प्रादेशिकत्वे चात्मन-
द्देशातिरिक्तदेशान्तरगमने ऽपि शरीरस्यात्मसंयोगायोगात्तद्वत्ते-
म् नन्वित्याशङ्काभाष्यमवतारयति * शरीरमात्रेति * शरीर-
मेतात्मवाद्यार्हतः शरीरान्तर्गतात्मवाद्यौपनिषदः लिङ्गपदानु-
पूरणार्थः किमनेन हेतोर्दूषणमित्यपेक्षायामाह * अतश्चेति *
मनस्यासर्वगतत्वाक्षेपकत्वादित्याशयः। ननु सर्वगते व्योम्नि सर्व-
काशदानाख्यकार्योपलम्भदर्शनात्कथं विरुद्धतेति प्रश्नपूर्वकमु-
यति * कुत इति * अयं भावः युगपत्सर्वत्र कार्योपलम्भो
ावत्सर्वगतत्वं साधयेन्न चासावात्मन्यस्ति पर्यायेण सर्वत्र का-
लम्भस्त्वसर्वगतेष्वेव दर्शनाद्विरुद्ध इति श्लोकं व्याचष्टे * यदि
* सुखादेः शरीरात्मसंयोगहेतुकत्वेन बहिरसम्भवात्किञ्चि- ३९
दित्युक्तं सुखादेरपि शरीरान्तरगतस्योपलम्भे युगपत्सर्वत्रात्म-
पलम्भः स्यान्न चासावस्तीति शरीरान्तर इत्यनेनोक्तं यदि गमनं
कार्यक्रमो घटते ततः शरीरे ऽपि तथा स्यादित्यन्यथा हीत्यने-
सक्रियत्वप्रसङ्ग इत्यनेन सर्वगतत्वसाध्यनिश्चलत्वविरोधित्वं
क्तं निर्विशेषणस्तर्हि सर्वत्र कार्योपलम्भो हेतुर्भविष्यतीत्याश-
* सन्देहे वेति * सम्प्रति साधनस्यानिर्णायकत्वात्साधा-

रणत्वं विशेषणं शरीरसहितगमनात्सर्वत्र कार्योपपत्तेः पराभिमतः वृद्धवाक्येनाह * आह चेति * शरीरेणैव सह गमनादिति वक्तव्ये श्लोकपूरणार्थमनुवादभूतः संशब्दप्रयोगः तदुपपादनाय संमिश्रत्वाभिधानं न हीति परिहारभाष्यमवतारयति * तत्रेति * न त्विति पूर्वभाष्यपाठे तु हिताशङ्कानिरासे तेन प्रतिज्ञातेन नोपपत्तिरुच्यते इति योज्यमित्याह * येषां त्विति * पूर्वपाठेतु न हीत्यखण्डं पदं शङ्कानिरासाक्षमत्वेनोत्तरभाष्यमाक्षिपति*कथं*पुनरिति श्लोकं व्याचष्टे * परेणापि हीति * पर्यायेण हि सर्वत्र कार्योपलम्भस्यासर्वगतेष्वेव दर्शनाद्विरुद्धत्वं निर्विशेषणस्य चानैकान्तिकत्वं यदुक्तं तन्निरासो ऽस्माद्मावगम्यतइत्याशयः । गमनाभावे सति सर्वत्रोपलभ्यमानकार्यत्वादित्येवं विधस्य हेतोर्व्योम्नि सद्भावेन विरुद्धत्वाभावाच्छरीरे वा वृत्तेरनैकान्तिकत्वाभावादपुष्टत्वं मत्वा गमनाभावोपपादनेनाशङ्कानिरासायैतद्भाष्यमिति परिहर्त्तु परिसंख्यार्थत्वेनाशङ्कानिराससामर्थ्यमाह * तत्रेति * श्लोकं व्याचष्टे * परिसंख्यारूपेणेति * तद्बहुविरुद्धमित्यपेक्षायामाह*तदिति*अमूर्त्तस्य कात्स्र्न्यायोगेन क्षीरोदकवत् कृत्स्नसंयोगासम्भवात् शरीराख्यभूतमिश्रत्वासम्भवाच्च भूतैः सहात्मनो गतिर्युक्तेत्युक्ते नन्वसर्वगतद्रव्यपरिमाणक्षणत्वामूर्त्तेरसर्वगतात्मवादिनं प्रत्यसिद्धममूर्त्तत्वमित्याशङ्क्य * स्वतस्तावदित्युक्तम् * मुक्तावस्थायां सर्वैः सर्वगतत्वाभ्युपगमात्संसारावस्थायां शरीरसंबन्धोपाधिकमेव मूर्त्तत्वं परैरिष्यते न चौपाधिकेन मूर्त्तत्वेनाकाशस्येव घटादिनास्य मिश्रत्वं सम्भवतीत्याशयः । श्लोकं व्याचष्टे * यदेति * सूक्ष्मत्वेन कृत्स्नसंयोगासम्भवकारणं सर्वतो विसारित्वं सूचितं चन्द्रप्रकाशादेरप्यनियतपरिमाणत्वेन कथं चिदमूर्त्तत्वव्यपदेशोपपत्तेस्तद्वैषम्यायात्यन्तशब्दः दृष्टान्तत्वेन ज्ञानसन्तानोपादानं स्वतः शब्दाव्यावर्त्त्यं दर्शयितुम्*यो ऽपीत्युक्तम्*स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यश्च स्यान्नास्ति चावक्तव्यश्च स्यादस्ति च नास्ति चावक्तव्यश्चेति सप्तभङ्गिनयवाद्यार्हतःस्याद्वादी स्याच्छब्दस्याख्यातप्रतिरूपकाव्ययस्य कथं चिच्छब्दार्थवाचित्वाभ्युपगमादनैकान्तवादी बद्धानां संसारिणामात्मनां शरीरादत्यन्तव्यतिरेकाभावेन तन्मिश्रत्वान् मूर्त्तत्वं वदति अपिशब्दादौपनिषदो ऽपि यावत्संसारभाव्यणुपरिमाणलिङ्गशरीरमिश्रत्वामूर्त्तत्वं वदतीति सूचितं स्वस्वामिभावमात्रेण सम्बन्धस्योपपत्तेर्मिश्रत्वानाक्षेपकत्वादितरेतराश्रयाभिधानं नान्यस्य कदा चिदमूर्त्त-

वगमान्मूर्त्ततैव स्वाभाविकी भविष्यतीत्याशङ्क्य * मुक्तेत्युक्त-
मुक्तावस्थायां मूर्त्तत्वे सति वाय्वाद्यभिघातदुःखापरिहार्य-
मुक्तित्वे ऽप्यर्थापत्तेरमूर्त्तत्वेन लक्षितस्य स्वभावानपायित्वा-
रावस्थायामपि न स्वभावान्यता युक्तेत्याशयः। ननु मिश्रणसं-
परपर्यायसम्पर्काभावे ऽपि शरीराश्रितत्वाद्द्रव्येनेव रथी श-
त्मा नेष्यते इत्याशङ्क्यास्पर्शवत्त्वाच्चेत्युक्तम् । एकदेशसंयु-
कर्षणं दृष्टं न चास्पर्शस्यैकदेशेनापि संयोगः सम्भवतीत्याश-
नु माभूच्छरीरेणात्मनो नयनं वाय्वादिभिस्तु ज्वालादिवत्प्रेर-
विष्यतीत्याशङ्क्याह *न हीति* परप्रेरितस्य गमनासम्भवे ऽभि-
स्वतन्त्रस्य तर्हीच्छापूर्वकात्प्रयत्नाद् गमनं भविष्यतीत्याशङ्का-
रसूचनार्थम् *स्वतन्त्रइत्युक्तम्* शरीराद् बहिः कदाचिदिच्छ
मनादर्शनाच्छरीरगमनेनात्मगमनासिद्धेः शरीरगतावेव प्रय-
तुर्नात्मगतावित्याशयः। नन्वेवं सति देशान्तरादागमनस्यैवास-
त्सद्भावाभ्युपगमे बहुविरोधाभिधानमयुक्तमित्याशङ्क्याह *
* गमननिमित्तसार्वत्रिककार्याभ्युपगमे गमनासम्भवात्केव-
शरीरस्याचेतनत्वेन कार्याक्षमत्वात्सर्वकार्योच्छेदाभिप्रायं बहु-
भिधानमित्याशयः। अस्मत्पक्षे गमनाभावे ऽपि तत्फललाभा-
ध इत्याह *सर्वासर्वगतत्वे त्विति* यथेत्यनेन सर्वत्रोपलभ्य-
र्यत्वात्सर्वगतत्वे साध्ये व्योम्नो दृष्टान्तत्वं सूचितम्। गमनाक्षि-
सर्वगतत्वस्य बहुविरोधास्पदत्वाद् गमनस्य बहुविरोधास्पद-
त्वानमिति सूचयितुं सर्वगतपक्षो न कथंचित्सम्भवतीत्याह
ति * शरीरपरिमितपक्षे ऽपि बहिर्निर्गतस्य केशादेरात्माधि-
रासायानिर्गत इत्युक्तं देहादनिर्गत इत्यनेन च श्यामाकतण्डु-
ग्राङ्गुष्ठाणुमात्रपक्षात्सामान्यतो निर्दिश्याणुमात्रपक्षस्य
त्वसूचनार्थं पुनर्विशेषतो निर्देशः। ननु बौद्धैर्ज्ञानसन्तानस्या-
भ्युपगमात्तस्य चाद्रव्यत्वेनापरिमाणपक्षो ऽपि सम्भवात् क-
निरस्यतइत्याशङ्क्यात्मवादे तन्निरासादित्याह * ज्ञानेति *
त्रपक्षे तावद्दोषानाह * तत्रेति * मध्यमपरिमाणत्वे घटादि-
शापत्तेः सर्वाभ्युपगतनित्यत्वाविरोधित्वे नाणुमात्रपक्षस्य ब-
वसूचनार्थम् * नित्यः सन्नित्युक्तम् * श्लोकं व्याचष्टे *
ति* तन्मात्रेत्यनेन मात्रान्तरसञ्चारानभ्युपगमे सर्वमात्रस्य-
सम्भव इति यथाश्रुतं व्याख्याय तदभ्युपगमे ऽपि युगपत्पद्दा-
ण व्याख्यातुम् *ततश्चेत्युक्तम्* अथेत्यनेन गात्रान्तरसञ्चा- ३७१

त्त्वैयर्थ्योपपत्तेरिति २ पु० पा० ।

रात्सर्वत्रोपलम्भो लघुत्वाच्च सूक्ष्मकालभेदानुपलब्धिरिति शङ्का
ञ्चरणप्रमाणाभावान्निपुणतो ऽपि लक्ष्यमाणे कालभेदानुपलम्भ
तिसौक्ष्म्ये च वेदानां तदनुभवोत्पत्तिकाले यावदेकत्रानवस्थानेनै
गात्रे ऽप्युपलम्भापत्तेरुपन्यासपूर्वकं निरस्ता क्रमेण वाणुमात्रेषु श
रावयवेषु सञ्चरतो ऽनन्तपरमाण्वारब्धे शरीरे बहुकालं पूर्वस
द्धपरमाणुवियोगापत्तेः पुष्टिरादिशब्दोपात्तौ च वृद्ध्यशोषौ न र
तामित्येवं पुष्ट्यादीत्यवयवं व्याख्यातुम् * शरीरेत्याद्युक्तम्
शरीरमात्रपक्षो ऽप्यनेकादृष्टकल्पनापत्तेरयुक्त इत्याह * अथेति
एतदेवोपपादयति * सद्भाव इति * श्लोकं व्याचष्टे * सर्वे हीति
यथा सकलप्रतीत्यप्रतीतिव्यतिरेकेण विकलप्रतीत्यभावाच्छब्द
सावयवत्वमार्हतोक्तं स्फोटवादे प्रत्याख्यातं शब्दाधिकरणे च
वत्वाभावेनावयवानामसंश्लेषो विश्लेषावश्यम्भावाच्च नित्यत्वं
त्याख्यातं तथात्मनो ऽपीत्यर्थः । अवयवेयत्तायामुपचयापचय
रतम्यायोगादवयवानन्त्यमार्हतोक्तं शरीरमात्रपक्षविरोधीत्यवधि
ब्देनोक्तं संश्लेषाभावे को दोष इत्याशङ्क्य न चासंश्लिष्टानामित्यु
गात्रच्छेदे चेत्यनेन तत्सद्भावे चेति चकारेण सूचितमर्थं व्याख्यात
र्हतोक्तप्रमाणनिरासार्थं *यत्त्वित्युक्तम्* आत्मनः सङ्कोचविकासो
।१ पत्तावार्हतोक्तदृष्टान्तनिरासार्थम् * दीपप्रभेत्याद्युक्तम् * अतिश
व्याख्यातुं कथं चिदित्युक्तं श्लोकद्वयोक्तातिरिक्ताप्यदृष्टकल
नास्मिन्पक्षे स्यादित्याह * तेन चेति * सहसा जायते त
सहसैव विनश्यतीत्यादिशब्देनोक्तमुपसंहरति * तस्मादिति * न
सर्वगतत्वे सत्युपनिषत्सु श्यामाकतण्डुलादिपरिमाणं विरुध्येतेत्य
शङ्क्याह * यत्त्विति * बालाग्रमात्रत्वाद्यादिशब्देनोक्तम् । वाक्यान
रेत्यनेनौपचारिकत्वे ऽनन्यार्थविभुत्वश्रुतिविरोधो हेतुरुक्तः सा
त्र्युपाख्याने ऽङ्गुष्ठमात्रत्वाभिधानमङ्गुष्ठपरिमाणे हृदये नीयमानत्व
त्कथं चिच्छ्रुतिसामान्यमात्रेण वपादिवाक्यवद्व्याख्येयमित्य
* यदपीति * गौणार्थत्वोपपादनार्थं पतिव्रताप्रशंसापरमेतद्वा
क्यमित्युक्ते ननु स्वमहिम्ना साविञ्या पतिव्रतया मृत्योस्त्रातः
तिरित्येतावता पतिव्रतात्वप्रशंसासिद्धेरङ्गुष्ठमात्रत्वाभिधानं कि
र्थमित्याशङ्क्य * काव्येत्युक्तम् * भारतस्येतिहासत्वे ऽप्यङ्गुष्ठम
त्रत्वस्योत्प्रेक्षामात्रत्वसूचनार्थः काव्यशब्दः ।

अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा ।
अन्यथोत्प्रेक्षते यत्र तामुत्प्रेक्षां विदुर्बुधाः ॥

इत्येवं लक्षणे उत्प्रेक्षाख्यकाव्यालङ्कारार्थे यमवशगा

मृत्युरिति च विस्पष्टस्य प्रसिद्धस्य व्यवहारस्य प्रक्र-
म शंसनार्थं कीर्त्तनार्थमित्यर्थः । एतच्च द्वैपायनेनैव नि-
ः सर्वगतः स्थाणुरचलो ऽयं सनातन इत्यादौ सर्व-
तत्वाभिधानादवसीयतइत्याह * तथा हीति * नन्वेवं सत्येकेनै-
त्मना सर्वशरीरादिष्वोपपत्तेः ते सर्वे स्वेन स्वेनात्मनोपलभ्यमा-
ः सन्त्येवेत्यात्मवादभाष्ये प्रतिशरीरात्मभेदाभिधानमयुक्तमित्या-
ङ्कते * ननु चेति * ऐकात्म्ये पशुमनुष्यादिभिन्नजातीयदेहोप-
ग्यानां फलानाम् एकजातीयेन देहेन भोगासम्भवे ऽप्येकजातीय-
होपभोग्यानां फलानामेकेन देहेनोपभोगसम्भवादनेकशरीरवैय-
पत्तेः सुखदुःखादिव्यवस्थानुपपत्तेरेकशरीरस्थेन चात्मना दृष्टार्थे
रीरान्तरस्थस्यात्मनः प्रत्यभिज्ञापत्तेर्भेद एव युक्त इति परिहरति
नैष दोष इति * आद्यं हेतुं व्याचष्टे * इतरथा हीति * ननु
थापूर्वकृतकर्मफलोपभोगायोपात्ते देहे तदुपभोगान्नष्टे कर्मान्तर-
लोपभोगार्थं देहान्तरार्थवत्त्वं तथैकस्मिन्नपि जन्मनि यत्कर्मफलो-
भोगार्थं यो देहो ऽर्जितस्तेन कर्मान्तरफलोपभोगस्याशक्यत्वात्तदर्थं
हान्तरार्थवत्त्वं भविष्यतीत्याशङ्कते * जन्मान्तरेति * परिहरति
नेति * यावन्ति कर्माणि फलदानाय प्रवृत्तानि तावद्भिरुपात्तेनै-
नैव देहेन सर्वफलोपभोगसिद्धेर्देहान्तरानर्थक्यं जन्मान्तरे तु पू-
देहनाशाद्देहान्तरार्थवत्त्वेत्यर्थः । द्वितीयं हेतुं व्याचष्टे * सर्वोति
तशरीरं चेति * चकारसूचितानि हेत्वन्तराण्याह * अन्यदीये-
ति * प्रत्यभिज्ञापत्तिरप्यनेन सूचिता वसन्ते ब्राह्मणो ऽग्नीनाद-
त ग्रीष्मे राजन्य इत्यादिवर्णविशेषव्यवस्थया यः कर्मचोदनानां
वस्थाख्यो भेदः स न स्यादित्युक्तम् । ननु ब्राह्मणत्वादेर्देहाश्रितत्वे-
त्मैक्ये ऽपि देहभेदाद्व्यवस्थोपपद्यते इत्याशङ्क्य * एकस्यैवेत्युक्त- ३
* चेतनप्रवर्त्तकत्वाच्चोदनानामात्मनो ऽपि च देहसम्बन्धौपा-
ाकब्राह्मणत्वाद्यभिमानेन ब्राह्मणत्वादिव्यपदेशोपपत्तेः सर्वदेहेष्वै-
ः सति व्यवस्थानुपपत्तिरिति भावः । नानात्वे तु नैते दोषाः स-
ीत्याह * आत्मेति * ननु नानात्वे सति सर्वगतत्वाभ्युपमात्स-
ामेकदेशत्वं स्यात्, तच्च द्रव्याणां भिन्नदेशवृत्तित्वनियमाद्विरुद्ध-
त्याशङ्क्याह * सर्वेषामिति * मूर्त्तत्वप्रयुक्तो ऽसौ नियमो न द्र-
प्रयुक्त इति भावः । ननु यथा ह्ययं ज्योतिरात्मा विवस्वानपो भि-
बहुधैको ऽनुगच्छन्नुपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजो
मात्मेत्याद्युपनिषत्स्वैकात्म्यव्यवहारो नानात्वे विरुध्येतेत्याशङ्क्याह
तदपेक्षयैव चेति * समानदेशवृत्तिस्तच्छब्देन परामृष्टा चैतन्यं

बोधरूपत्वमात्ममहङ्कारास्पदत्वं सुखाद्याश्रयतादिशब्देनोक्ता
षनिवृत्तये स चौपचारिको व्यवहार इत्याशयः । ननु नानात्
सर्वगतत्वाभ्युपगमेन सर्वदेहसम्बन्धात्सुखाद्युपलब्धिव्यवस्
स्यादित्याशङ्कते * कथं पुनरिति * देहान्तरगतस्य सुखादे
समवायाभावान्नोपलम्भापत्तिरित्याशङ्क्य * अन्यदीयेत्युक्त
स्वासमवेतस्यापि देहादेरुपलम्भात्समानदेशत्वमात्रमुपलम्भहे
त्याशयः । परपक्षसाम्यापत्त्यान्येषां परिहारं दूषयितुमुपन्य
* केचित्तावदिति * गर्भस्य मातुश्च यावात्मानौ तद्वर्त्तिना
समासार्थः। श्लोकं व्याचष्टे *शरीरेति* स्वसमवेतस्यैव दुःखा
लब्धिरिति परिहारसाम्यमभिप्रेत्य* तत्रेत्युक्तम्* स्वासमवेत
देहादेरुपलम्भदर्शनादेनं परिहारं दूषयति * स्यादिति *
सुखाद्युपलम्भव्यवस्थायामित्यर्थः। ननूभयपक्षतुल्यस्य दोषस्यैकं
द्भावनायोगाददोषो भविष्यतीत्याशङ्क्याह * न त्विति *
साम्यमस्तीत्याह * अपि चेति * स्वकर्मोपात्तस्यैव सुखादे
योग्यत्वाद्व्यवस्थेति स्वमतेन परिहरति * तस्मादिति *
व्याचष्टे * यदि हीति * न त्वन्यस्यात्मनोऽन्यदीये देहे भ
त्वत्कृतयोरपि धर्माधर्मयोरात्मीयत्वापत्तेरव्यवस्था स्यादित्या
निरस्यन्नुपसंहरति * तस्मादिति * तत्कर्मोपार्जितैस्त्वेतैः
:२।२ माणेषु कर्मसु कर्तृता यजमानानामृत्विक्परशुकर्मवदित्यात्मव
क्तन्यायवार्त्तिकाद् शरीरात्मनोः स्वस्वामिभावव्यवस्थानाद्व्य
त्यर्थः । सर्वगतत्वसाधनस्य प्रकृतोपयोगमाह * एवमिति *
मात्मसमवेतस्य कर्मणोऽवस्थानमित्याद्यकल्पनिरासार्थं नेत्य
भाष्यं व्याख्याय प्रदेयद्रव्यसमवेतस्यावस्थानमिति द्वितीयकल्
रासार्थं यत्रेति भाष्यं व्याचष्टे * अथेति * आश्रयोऽपीति
व्याचष्टे * न चेति * सत्यपीत्यादिभाष्येण द्व्यवदानस्यैवाव
विशेषत्वाद्भस्मनोऽप्यवदानविरोधित्वमाशङ्क्य भस्मावस्थायां
वदानरूपाप्रत्यभिज्ञानात् भस्मनस्तदवस्थात्वायोगाद्विरोधितोच्य
ति तद्विपरीतशब्देन सूचितम् ।नन्वदृश्यमानमपि द्व्यवदानं काला
रभाविफलसिद्ध्यन्यथानुपपत्त्यावधारितस्थायित्वस्य कर्मणो निर
थस्यानुपपत्तेराश्रयत्वेनानुमास्यत इत्याशङ्क्यादर्शनहेत्वभावाद्योग्य
पलब्धिविरोधेनानुमानासम्भवाभिधानार्थं फलक्रियेत्यादि
व्याचष्टे *न चास्येति* सौक्ष्म्यादीनामित्याशङ्काभाष्यं व्याचष्टे *अ
पत्त्येति* कल्पितमिति परिहारार्थं भाष्यं निश्चितानभिधानादयुक्त
शङ्क्य मृदूक्त्या परपक्षेऽप्यतिगौरवाभिधानार्थत्वेन व्याचष्टे

रतीति * ननु स्वतन्त्रस्यैव कर्मणः स्थितिर्भविष्यतीत्याशङ्का-
र्थमनाश्रितमिति भाष्यं व्याचष्टे * एवमिति * क्षणिकत्वे-
वगतस्य कर्मणो ऽत्र स्थितिरनुपलब्धिकारणं च स्वातन्त्र्या-
ल्प्यमित्यतिगौरवमेवंशब्देन वदता तादृशशब्दस्यायुक्तार्थत्वं
। देशान्तरप्रापणस्वभावत्वेनान्यत्रावगतस्य कर्मण औदासी-
वकल्पने ऽप्यतिगौरवाभिधानार्थं स्वभावान्तरेति भाष्यं
पविषयत्वेन व्याचष्टे * अथेति * तस्मादित्युपसंहारभा-
चष्टे * तस्मादिति * एवकारेण स्थायित्वकल्पनस्यायुक्त-
नाद्भङ्गीत्यवयवो व्याख्यातः । प्रयोजनभाष्ये चिन्ता-
वद्व्याचष्टे * मूलेति * अनन्तरसूत्राभिहिता पूर्वसद्भावप्र-
शङ्का निवृत्त्यर्थत्वे चिन्ताशब्दस्याधिकरणशब्देनोक्ते ननु
शब्दा अपीत्यपिशब्दात्प्रतिपदाधिकरणप्रयोजनमेतदित्यभावे
दपूर्वमित्येतावन्मात्रस्य सिद्धान्तार्थत्वेन द्रव्यादेरपूर्वार्थे-
ः प्रतिनिधिर्न युक्त इत्याशङ्क्य मूलशब्देन प्राधान्याद्भावा-
णमुक्तम्। एवंशब्दार्थे ऽपि शब्द इत्यर्थः। प्रयोजनमुपपादयति
दीनामिति * न देवताग्निशब्दक्रियमन्यार्थसंयोगादिति
रणे कर्मणामदृष्टार्थत्वात्तस्य प्रतिनिधिना सिद्धौ प्रमाणा-
तनिध्यभावो वक्ष्यतइत्यर्थः । ननु प्रक्रान्तापरिसमाप्तिनि-
परिहारार्थं कर्मणो ऽवश्यं समापनाय द्रव्यान्तरस्यावश्यो-
त् पूर्वपक्षप्रयोजनं न युक्तमित्याशङ्कते * कथं तर्हीति *
ोपादाने सदृशानादरः पूर्वपक्षप्रयोजनमिति परिहरति
नीयमेवेति * ननु पूर्वपक्षे ऽप्याश्रयत्वेन कर्मणो ऽन्वया-
े सदृशादरो भविष्यतीत्याशङ्क्य कर्मणश्चेत्युक्तम्। नन्वेवमपि
रुपात्तः स्यादित्याशङ्क्याह * न चेति * अन्यार्थत्वमुपपा-
ः पूर्वद्रव्यमिति * प्रक्रान्ता समाप्तिनिमित्तो दोषः प्रत्य-
ोक्तः। काम्यवन्नैमित्तिकस्यापि कर्मणः प्रतिनिधिना समा-
तासमापनदोषपरिहारमात्रार्थं न फलसिद्ध्यर्थमिति शङ्का-
म् * नैमित्तिकेत्युक्तम् * प्रतिनिधिना ऽप्यनुष्ठितं नै- ३८३।१
कर्माकरणनिमित्तप्रत्यवायपरिहाराख्यं फलं साधयतीत्या-
धातोश्च फलभावनाकरणवाचित्वे श्येनादिशब्दानां तत्सा-
रण्यान्नामधेयतापि सिद्धान्तप्रयोजनमित्याह * नामधेये-
स्मात्तर्हि भाष्यकृता ऽसौ नोक्तेत्याशङ्क्याह * सेति *
ेमन्नधिकरणइत्यत्रोक्तत्वादित्यर्थः । गुणाविधित्वे त्वनुष्ठे-
ाश्रेयत्वे तदभावादनुष्ठानोपयोगित्वेन प्रयोजनत्वोपपत्तिः।

॥ अथ कर्मणां गुणप्रधानभावविभागाधिकरणम् ॥ ३ ॥

तानि द्वैधं गुणप्रधानभूतानि ॥ ६ ॥

अवगतमेतदित्यादिभाष्येण भावशब्दानामपूर्वगमकत्वोक्त
तदेतरस्तदर्थमिति न्यायान्नामशब्दार्थस्य भावशब्दार्थं कर्मप्रत्य
स्थावगतेः कर्मणां नामार्थं प्रति प्राधान्याभिधानात्प्रधानकर्मवाि
त्वस्यार्थादुक्तस्यापवादायेदमधिकरणं युक्तं तत्र गुणप्रधानचिन्त
या भेदलक्षणासङ्गतिमाशङ्क्योपक्रमोक्तामेव सङ्गतिं स्मारयत्येवाि
ति द्रव्यं प्रति कर्मणो गुणत्वे दृष्टार्थत्वात् कर्मभेदे ऽप्यपूर्वभे
नास्तीत्याशयः । विवेकशब्देन च न किं चिद् गुणकर्मास्तीत्याशङ्क
गुणकर्मव्युत्पादनार्थता ऽस्याधिकरणस्य सूचिता भावार्थत्वेति पू
पक्षभाष्यं व्याचष्टे * तत्रेति * आद्यपादेनावहन्त्यादेरपि यज्य
दिवद्भाव्याद्याकाङ्क्षोत्थापनहेतुभावनावाच्याख्यातप्रत्यययोगेन भ
धार्थत्वात्प्रसक्तिलक्षणाया श्रुत्या तदर्थस्य भावनया भाव्यसाध्य
त्वेन ग्रहणात्प्राधान्यमित्येवमाश्रितत्वात् प्रयोगस्येति सूत्रावयवे
क्तश्रुतिकृतधात्वर्थप्राधान्याभिधानार्थत्वेन भाष्यं व्याख्याय भाव्यत
इति व्युत्पत्त्या भावशब्देन साध्याभिधानात्साध्यार्थत्वाविशेषादित्ये
भूतभव्यसमुच्चारणन्यायार्थतया द्वितीयेन व्याख्याते ननु व्रीह्यादेर्ना
मार्थस्य द्वितीयया भाव्यत्वेनान्वयान्नेह भूतभव्यसमुच्चारणन्याय
ऽस्तीत्याशङ्क्य भवनकर्तृभावनावाचित्वरूपभावार्थत्वाविशेषात्सि
व्रीह्यादौ भावनां प्रति भाव्यत्वमशक्यं द्वितीयया वक्तुमित्येवं तृतीये
व्याख्यातम् । प्रधानभूतकर्मवाचिताख्यातस्य प्राधान्योक्त्योक्ता । न
व्रीह्यादेर्भाव्यत्वानभ्युपगमे तृतीयानिर्देशाभावे च साधनत्वस्याप्ययो
गादनन्वयः स्यादित्याशङ्क्य धात्वर्थस्य प्रधानत्वेनाङ्गापेक्षत्वात्फल
वत्सन्निधावफलं तदङ्गमिति न्यायेनापूर्वप्रयुक्तत्वात्कर्माणां धात्व
र्थस्य चापूर्वसाधनत्वाद् तृतीयानिर्दिष्टस्यापि व्रीह्यादेर्धात्वर्थसाधन
तावसीयतइति सूचयितुमाह * यावद्धीति * न्याय्यशब्देन धात्वर्थ
फलवत्त्वस्य पूर्वाधिकरणन्यायसिद्धतोक्ता यथा यज्यादीनामर्थो
व्रीह्यादिभिर्निष्पाद्यस्तथा ऽवहत्यादीनामपीति वदता सक्तुवत् द्विती-
याभङ्गः सूचितः । प्रधानकर्मत्वपूर्वपक्षस्यापूर्वभेदोपयोगित्वमाह * अत
श्चेति * ततो ब्रूम इत्यादिसिद्धान्तभाष्यं तात्पर्यतो व्याचष्टे * अ-
त्रेति * यद्यपि द्रव्यस्य चाख्यातपदार्थस्य चान्वये धात्वर्थस्या-
ख्यातपदश्रुत्या फलवत्त्वावगमाद्भूतभव्यसमुच्चारणन्यायाच्च सर्व-
त्र धात्वर्थनिष्पादकत्वं द्रव्यस्यावसीयते तथापि द्रव्यनिष्पादितस्य

। कैमर्थ्यापेक्षायामक्लृप्तप्रयोजनस्यैव यागादेरदृष्टापूर्वसाध-
मवघातादेस्तत्कृतेनैव द्रव्योपकारेण नैराकाङ्क्षेणाप्रामा-
ादृष्टार्थता युक्तेत्यर्थः। अनेन च सर्वेभ्य इति भाष्योक्तगु-
ुत्पादनस्य अपूर्वभेदापवादार्थत्वं विवृतम्।श्लोकं व्याचष्टे*
* अनेन चाख्यातत्वाविशेषणभूतैर्भाव्यार्थजन्मन इति-
प्रागवस्थायामभ्युपगमेन परिहृतं व्रीह्यादेर्द्रव्यस्य सिद्ध-
रूपेण भाव्यत्वायोगे ऽप्यसिद्धेन तण्डुलीभावादिरूपेणा
म्भवात् सिद्धे च साध्यत्वाशक्तेरित्येतत्परिहृतं भवतीति
पकरोतीत्युक्तम्। ३८४।१

॥ प्रधानकर्मलक्षणम् ॥

द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य
णभूतत्वात् ॥ ७ ॥

यद्यपि यदक्लृप्तप्रयोजनं तस्यैवापूर्वसाधनत्वं युक्तं
तथापि किमक्लृप्तप्रयोजनमिति व्यवस्थाहेत्वभावाद्विधि-
नर्वेषामपूर्वसाधनतावश्यमापद्येतेत्याशङ्क्य तद्विवेकार्थ-
धानलक्षणस्यैवं सतीति भाष्योक्तमध्यायोपक्रमएवास्य
कार्थं यद्गुणप्रधानलक्षणमिति वार्त्तिकेन विवृतत्वा-
ार्थं यैरिति भाष्यं व्याचष्टे * यैरिति * यद्य-
नां भावशब्दत्वेनाभिप्रेतानां पूर्वनिर्दिष्टानां तानि इत्य-
ब्देन परामर्शात्तद्वाच्यानां कर्मणां गुणप्रधानद्वारा तेषां
ाचितोक्तेति यद्भावशब्दवाच्यैर्यैः कर्मभिर्न द्रव्यमुप-
ं कर्मणां प्रधानत्वात्तद्वाचीनि भावशब्दाख्यान्याख्यातानि
ाचीनीति व्याचक्षाणेन भाष्यकृतोक्तम्।तथा व्याख्याता-
ुद्धिस्थत्वात्तच्छब्देन परामर्शोपपत्तेः क्लिष्टव्याख्या न
ेवा भाष्यस्थं भावशब्दमुपेक्ष्य कर्मभिरित्येतावन्मात्रमुक्तं
यस्य सूत्रोक्तं च प्रातिविकारार्थत्वं च दर्शयितुं* धर्म तो
* प्रधानत्वाभिधानस्यापूर्वभेदोपयोगित्वमदृष्टार्थानीत्यने-

॥ गुणकर्मलक्षणम् ॥

तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयते तस्य
व्यप्रधानत्वात् ॥ ८ ॥

सूत्रं व्याचष्टे * यैः पुनरिति * अग्निमादधीतेत्यग्नि
भाव्यत्वार्हकर्माङ्गभूताहवनीयादिरूपवाचित्वात्तस्य च यू
शास्त्रीयकर्मोत्पाद्यत्वाद्यथाधानेनाग्न्यइत्युक्तं स्वमतेनार्त्विजां
त्वाद्भाष्यकृन्मतेन चोत्पाद्यत्वादवाप्यन्ते क्रियन्ते वेत्युक्तम
ष्यादिलक्षणं विकारमेव पुरोडाशोत्पादनयोग्यत्वाधानार्थत्व
स्कारत्वेनाभिप्रेत्य संस्क्रियन्ते वेत्युक्तम् । द्रव्यप्राधान्योप
र्थः प्रयोजनवच्छब्दः सूत्रद्वयोक्तव्यवस्थाहेतूपसंहारार्थं प्र
त्यादिभाष्यं स्पष्टत्वान्न व्याख्यातं गुणप्रधानविचारस्यापूर्
द्भावविवेकप्रयोजनतया न सर्वेभ्यः शक्यमपूर्वं कल्पयितुमि
ष्यात् कुतो ऽपूर्वमित्यस्माच्च ज्ञातत्वेन प्रयोजनान्तरानपेक्षत्व
पादकं प्रयोजनमिति भाष्यमयुक्तमाशङ्क्योपपादयति * यं
यथैव भावार्थाधिकरणस्य लक्षणसङ्गत्यै धात्वर्थभेदानुनिष्प
भेदानुसारसिद्धिप्रयोजनत्वे ऽन्यदुपोद्घातेनेत्युपोद्घातश
ऽप्यनुष्ठानार्थत्वाच्चिन्तायास्तदुपयोगिप्रयोजनान्तराभिधानं त
त्याशयः । पूर्वपक्षप्रयोजनभाष्यं प्रैयङ्गवे चरौ व्रीह्यनुपदेशाद
शङ्क्य व्याचष्टे * तदुच्यतइति * नन्वतिदेशप्राप्तानामपि
प्रियङ्गुभिर्बाधात् कथमुत्पाद्यतइति प्रश्नपूर्वकमुपपादयति
इति * प्रयाजेज्याङ्गभूतमाज्यं यथा प्रधानाङ्गतया श्रुतेन प्रि
व्येण न बाध्यते तथा ऽवघाताङ्गभूता व्रीहयो ऽपीत्यर्थः ।
सति सिद्धान्ते ऽप्युत्पाद्या इत्याशङ्क्याह * सिद्धान्ते त्विति
देव प्रश्नपूर्वकमुपपादयति * कुत इति * व्रीहिस्वरूपानाद
साधनांशनिवेशं संस्काराणां वक्तुं प्रधानौपयिकशब्दः । नन
तस्य निर्वापोत्तरकालं विधानात्तथावनिरुप्तानामेवावघात
व्रीह्यन्तरोत्पादनानाक्षेपात्तेषां च यागप्रयुक्त्यैव लाभेनावघा
प्रयोजकत्वान्नेह पूर्वपक्षे ऽपि व्रीहिप्राप्तिरित्याशङ्कते *
चेति * सत्यं पदप्रयुक्तोपजीवित्वेनाप्रयोजकत्वं भवति गु
कारे गुणफलसम्बन्धविधिपरस्य शास्त्रस्य वाक्यभेदापत्तेर
श्रयिसम्बन्धपरत्वायोगान्निराश्रयस्य च गुणस्य फलसाधन
पपत्तेराश्रयाक्षेपकशास्त्रान्तरापेक्षत्वाद्भवति वाजिनेज्यादौ च
स्य नैरपेक्ष्ये ऽपि वाजिनादेः प्रयुक्त्यशक्तेरिह त्ववघातशास्त्रस्य
शास्त्रानपेक्षत्वादवघातस्य च प्रयुक्तिशक्त्यविघातान्नान्यप्रयुक्त
त्वे हेतुरस्तीत्याशयेन परिहरति * नैतदिति * तुल्यशब्द
८५।२ न्यानपेक्षतोक्ता । श्लोकं व्याचष्टे * व्रीहिभिरिति * यागार्थ
नियमाभावं वक्ष्यमाणमभिप्रेत्य विशेषहेत्वभावोक्तिः । न च य

दध्यामिक्षा वाजिभ्यो वाजिनमिति शास्त्रयोरन्योन्यानपेक्षत्वे
तप्ते पयसि दध्यानयतीत्यानयतेर्द्विकर्मकत्वात्पयसश्चाधिकर-
नाद्यदध्याख्यकर्मव्याप्यतया द्वितीयकर्मत्वात्समाप्तिः । शब्दार्थे
यायेनागारे गावो वास्यन्तामित्यगारस्येव गोवासनं प्रति दध्या-
प्रति प्राधान्यावसायादामिक्षायाश्च पयोरसप्रत्यभिज्ञानेन पयो
ाविशेषमात्रत्वेन ततो ऽर्थान्तरत्वाभावादामिक्षार्थत्वेन दध्यान-
य तत्प्रयुक्तत्वावगतेरामिक्षानुनिष्पादित्वे दध्यानयनान्निष्पत्तिर-
। वाजिनस्यामिक्षाप्रयुक्तादपि दध्यानयनान्निष्पत्तिसिद्धेर्दध्यान-
र च वाजिनार्थत्वेन प्रमाणाभावाच्च दध्यानयनं प्रति वाजिनस्य
नकत्वे ऽर्थापत्तिः प्रभवति । तथावघातस्य यागानुनिष्पादित्वा-
द्यागवच्च तस्यापि पूर्वपक्षे व्रीहीन्प्रति प्राधान्याविशेषाच्च च यथा
प्तमं पदमध्वर्युरञ्जलिना गृह्णातीति सप्तमपदपांसुग्रहणकर्म-
नुनिष्पादित्वाभावे ऽपि क्रयवच्च नयनस्य स्ववाक्याश्रुतेः । स-
नारवद्रूपदान्यनुनिष्क्रामतीति विहितनयनसाध्यत्वाविशेषे ऽपि
स्य प्रकृतैकहायनीसंस्कारार्थत्वेन तद्द्वारा क्रयार्थत्वावसाया-
युक्तत्वावगतेस्तत्प्रयुक्तनयनस्य लाभेनैव पदपांसुग्रहणकर्मणो
नैराकाङ्क्ष्यात्प्रयोजकत्वाभावस्तथावघातस्य यागार्थव्रीहिभिर्नै-
ङ्क्ष्यस्ववाक्यश्रुतव्रीहिसंयोगेन वाक्यान्तरस्थव्रीह्यनपेक्षत्वादे-
ङ्क्ष्यत्वं चाप्रयोजकत्वकारणं तदुपलक्षितं च निनयनादिव-
पत्तित्वमनाशङ्क्यमेव उत्तरार्द्धादादिरादानमिति भावव्युत्पत्त्या-
देनावदानमुक्तम् । ननु निर्वापोत्तरकालमवघातविधानाद्यागार्थ
ानामेव व्रीहीणामवघातसाधनत्वावगतेर्यथा पुरोडाशार्थकपा-
धनत्वात्तुषोपवापस्य कपालं प्रत्यप्रयोजकत्वं तथावघातस्यापि
र्थव्रीहिसाध्यत्वाद् व्रीहीन्प्रत्यप्रयोजकत्वं भविष्यतीत्यभिप्राये-
ोजकत्वं चोद्यमिति सूचयितुं पदकर्मानन्तरमर्थाभिधानकर्मोदा-
ापि चरममुदाहृतम् । यागव्रीहीनवहन्तीत्यन्यार्थत्वेनाभिधाना-
त्र तुषोपवापतुल्यतेत्यर्थः । श्लोकार्थमुपसंहरति *तस्मादिति*
ागार्थत्वाभिधानाभावे ऽप्युपादानगौरवपरिहाराय यागार्थाना-
ोहीणामवघातसाधनत्वावगतेरन्यार्थत्वाभिधानफललाभादप्र-
त्वं भविष्यतीत्याशङ्क्याह * न चास्मिन्निति * निर्वापस्था-
र्पक्षे यागार्थव्रीहिविषयत्वे प्रमाणाभावान्निर्वापावशिष्टानाम-
व्रीहीणां सन्निधेरुपादानगौरवाभावाच्च यागार्थव्रीहिनियमः
प्रतीत्याशयः । नन्वाग्नेय्याग्नीध्रमुपतिष्ठतइतिवदप्रकृतोपादा-
तकत्वन्वयलक्षणसामान्यसम्बन्धस्यापि कल्प्यत्वाद्गौरवापत्ते-

स्तत्परिहारार्थं प्रकृतानामेव व्रीहीणां ग्रहणं युक्तमित्याशङ्क्याह
चात्रेति * विशेषाश्रुतेरिमे व्रीहयः क्लृप्तसामान्यसम्बन्धा ने
विशेषाज्ञानादाग्नेयीन्यायानुपपत्तेः। प्रकरणस्यैव विशेषकत्वं वा
च तत्सम्भवति विनियोगमात्रे तस्य व्यापारादित्याशयः । ननु
नियोगे प्रमाणभूतस्येतिकर्त्तव्यताकाङ्क्षालक्षणस्य प्रकरणस्याि
कत्वे ऽपि सान्निध्यपरपर्यायाधिकारलक्षणस्य प्रकरणस्य सप्त
पांसुग्रहणादौ प्रकृतैकहायन्यादिसम्बन्धित्वाभ्युपगमेन दर्शना
शेन विशेषो भविष्यतीत्याशङ्क्याह * न चेति * यदवदघातं
णां साकाङ्क्षात्वाभावान्नैराकाङ्क्ष्ये चाधिकारस्य नवमाधिकर
ण्ये विशेषकत्वनिरासान्नात्र प्रकृतग्रहणे प्रमाणमित्यर्थः। सिद्धान्ते
कथं प्रकृतग्रहणमित्याशङ्क्याह * संस्कारेति * आनर्थक्य
द्वारायापूर्वसाधनविशेषाकाङ्क्षायामधिकाराद्विशेषलाभो युक्त इ
शयः । तत्रापि व्रीह्यादिशब्दस्यापूर्वसाधनत्वानभिधायित्वात्
वाच्यलक्षितकर्मलक्षितापूर्वसाधनत्वस्य लक्षणापरम्परयाव
क्लेशाभिधानं पूर्वपक्षे तु नासौ न्यायो ऽस्तीत्याह * न चेति *
थोक्तं प्रयोजनमुपपाद्य स्वयं प्रयोजनान्तराण्याह * धर्मेति *
थौन्दुबरमुलूखलं सर्वौषधस्य पूरयित्वावहन्त्यथैनमुपदधातीत्य
तस्य तण्डुलसाध्यपुरोडाशादिप्रयोजनाभावात्तण्डुलनिवृत्त्यर्थत्वा
वेनादृष्टार्थत्वात् सकृदनुष्ठानं धर्ममात्रे त्वदर्शनात् शब्दार्थेनाप
स्यादित्येकादशाधिकरणे वक्ष्यते तथात्रापि पूर्वपक्षे स्यादित्येवं प्र
जनं यागव्रीहीणां चावघातनियमाभावो द्वितीयम्।सान्नाय्योपांशु
जाङ्गत्वाविशेषात्तद्विकारेष्वपि प्रयोगस्तृतीयम् । आदिशब्दाद्यच
ऽपि व्रीहीणामेवावघातस्त्रयाणामेव चेति प्रयोजनद्वयम् ।

॥ अथ संमार्जनादीनामप्रधानताधिकरणम् ॥ ४ ॥

धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् ॥ ९

उदाहरणबहुत्वस्य प्रयोजनमाह * स्रुगिति * संमार्ग
ग्निकरणसमुदायभूम्ना संमार्गशब्दः । अग्निजुह्वोद्धर्चवदानद्व
प्रधानान्वयतुल्यत्वे ऽपि स्रुगन्तरविषयो विप्रकर्षो ऽभिमतः । द्र
दानस्याग्निसम्बन्धापादनद्वारा च प्रधानसाधनत्वात् जुह्वा अ
न्यपेक्षया विप्रकर्षः सम्भवति। उपभृतः प्रयाजानुयाजार्थाज्याधा
ऽपि प्रधानहविराधारत्वाभावात् ध्रुवायाश्चोपांशुयाजार्थाज्याधार
ऽप्यसाधारण्याभावात्प्रधानकालविप्रकर्षाच्च प्रधानाविप्रकर्षः ।

---

१ भाष्यार्थमेलि २ पु० पा० ।

ीनां जुहूतुल्याग्निपरिधानार्थत्वे ऽपि प्रक्षिप्यमाणहविर्बर्हिःपत-
तिबन्धकत्वेन प्रधानकालोपयोगित्वात् हविरन्यन्वयान्तरितप्र-
नकालजुह्वपेक्षया प्रधानप्रत्यासत्तिः स्रुगन्तरापेक्षया तु स्पष्टैव
डाशस्य त्याज्यत्वात् त्याज्यद्व्यवदानसमवायित्वाद्वान्यतः प्रत्या-
त्तेः। ननु प्रत्यासत्तिविशेषसूचनस्य किं प्रयोजनमित्याशङ्क्य प्राति-
ायेन सिद्धान्तोपयोगमाह * एतदिति * किं तावत्प्राप्तमित्या-
ूर्वपक्षभाष्यमुपकारलक्षणशेषत्वाभावेन तदभावमात्रस्य प्रधान-
त्वानापादकत्वादयुक्तमाशङ्क्योपपादयति * तत्रेति * यद्यप्यु- ३८६
ारलक्षणशेषत्वाभावात् कुतो ऽपूर्वं कुतो नेति भाष्याच्चादृष्टार्थ-
लक्षणमिदं न प्रधानलक्षणमिति वस्तुतो ऽवसीयते तथापि
ाश्रुतात् सूत्रात्प्रधानकर्मलक्षणं मत्वा पूर्वपक्ष इत्यर्थः। अनेन च
नकर्मलक्षणापवादार्थतास्याधिकरणस्योक्ता एवं चापवादत्वेन
तिसिद्ध्यर्थमेव तान्यदृष्टार्थानीति वक्तव्ये तानि प्रधानभूतानीत्य-
ानात् सूत्रानुपालम्भः। सिद्धान्ते वा संमार्गादेरप्यदृष्टद्रव्योपका-
ाकत्वाभ्युपगमाद्यथाश्रुतमपि लक्षणसूत्रद्वयमविरुद्धं तदा त्वे-
धिकरणस्य गुणकर्मत्वाभिधानप्रयोजनापूर्वाभावापवादाद् गुण-
लक्षणस्यैवापवादार्थत्वम्। उत्तरेण तु गुणकर्मस्यैवापवदिष्यते अत
तदपवादापवादार्थमेतदधिकरणद्वयमेतदिति तच्छब्देनानन्तर्य-
षात्प्रधानत्वलक्षणं परामृश्य तदपवादस्य गुणत्वलक्षणस्यापवा-
मित्येवं व्याख्यातं वक्ष्यमाणगुणकर्मत्वापवादादुपचारतो
णापवादाभिधानं यदा तु सम्मार्गादिसाध्यस्यादृष्टोपकारस्याद्वा-
द्वारत्वाभावान्नापूर्वशब्दवाच्यतेष्यते तदा गुणकर्मस्वदृष्टार्थेष्वप्य
भावाद् गुणकर्मलक्षणद्रव्योपकारत्वस्य सम्मार्गादावपवादमभा-
यापकत्वमाशङ्क्य व्यापकत्वसिद्धये तदपवादार्थमेतदधिकरणम्।
ं तु स्तुतशस्त्रयोर्गुणकर्मत्वाभावे ऽप्युपकारकत्वसद्भावादति-
ाकत्वाभिधानेनापवादार्थमित्यध्यायार्थानुक्रमणवार्तिकं व्याख्ये-
अस्मिंस्तु व्याख्याद्वये नास्याधिकरणस्य प्रधानकर्मलक्षणापवा-
त्वाभिधानार्थं यैर्द्रव्यं न चिकीर्ष्यतइत्यनेन प्रधानकर्मलक्षणेनाहे-
ः किं तु पूर्वपक्षबीजप्रदर्शनार्थं किमाहेत्यपेक्षायां सङ्क्षेपतः पूर्व-
र्थमाह * द्रव्येणेति * कर्मणो ऽनुपकारित्वाद् गुणत्वाभावे
ाकार्यत्वस्याप्यभावात्प्राधान्यमपि न स्यादित्याशङ्कानिरासार्थत्वे-
्व्यं त्वेवं जातीयकमदृष्टार्थं कर्माभिनिर्वर्त्तयन्तत्प्रतिगुणभूत-
वं भाष्यावयवं व्याख्यातुम् * द्रव्येणेत्युक्तम् * द्वितीयाया

व्याख्याने दर्श० २ पु० पा०।

गुणकर्मत्वप्रामाण्यासम्भवमभिप्रेत्य तदन्यथानुपपत्तिकल्प
कारायोगाद् दृष्ट एवोपकारो वाच्यो न चासावस्तीति न
तद्दित्युक्तम् *

तुल्यश्रुतित्वाद्वेतरैः स धर्मः स्यात् ॥ १०

नन्ववघातादिषूक्तस्य गुणकर्मलक्षणस्येहाभावात्तत्प
भिधानमयुक्तमित्याशङ्क्याह * नैव हीति * यस्मान्नैतल्लक्ष
स्माद् गुणकर्मत्वप्रमाणाद्द्वितीयातुल्यत्वात्साधर्म्याभिधानं
मिति हि शब्दार्थः । पूर्वोक्तलक्षणत्यागे हेतुमाह *
ति * तथा सति को विरोध इत्याशङ्क्याह * तादर्थ्येति *
यजतइत्यादिभिर्द्रव्यं न चिकीर्ष्यतइति भाष्यात्प्रत्यक्षगम्यस्यं
स्य लक्षणतोक्ता भाति सा च तृतीये निषत्स्यमानत्वाद्द्वि
* श्रुत्यादीत्यनेनोक्तम् * न प्रत्यक्षादेर्ज्ञापकत्वेन निमित्तत्वं
कारस्य कारकत्वेनेत्यर्थः । लक्षणत्वाभावे किमुपन्यासप्रयो
प्रश्नपूर्वकमाह * किमर्थं तर्हीति * अपूर्वाभावोपयोगित
न स्वातन्त्र्येणेत्याशयः । श्लोकं व्याचष्टे * यत्रेति * पूर्व
न सम्भवतीत्याशङ्क्याह * पूर्वपक्षेति * द्वितीयाप्रमाणकगुण
योगादेतल्लक्षणाधीनत्वमापाद्य पूर्वपक्ष इति भावः । अव
द्रव्ये द्वितीयाया गुणकर्मत्वेन व्याप्तिः सधर्मशब्देनोक्तेति
ऽनैकान्तिकत्वादिदोषदुष्टत्वान्नेह सामान्यतो दृष्टं सम्भवती
गुणकर्मणीति प्रश्नद्वाराशङ्कितेनेति ब्रूम इति भाष्येणोप्स
स्यप्राधान्यवाचित्वस्मृतेः । प्रतियोगिनः कर्मणो गुणत्वावग
परिहृत्य * यद्यपीत्युक्तम् * तदुक्तार्थत्वात्प्रत्यक्षाद्यगृहीते
ब्दप्रामाण्यशङ्कायाश्च प्रागेव निरस्तत्वेनासम्भवादनर्थकमा
पकारं विना विहितस्य कर्मणोऽङ्गत्वापरपर्यायगुणत्वानुपपत्ति
निरासार्थत्वेनोपकारं लक्षणया गुणभावशब्देनोक्ता प्रत्यक्षग
काराभावेऽपि शब्दावगताङ्गत्वान्यथानुपपत्त्योपकारकत्वक
विष्यतीति प्रतिपादनार्थत्वेनार्थवदिति सूचयितुमाह * सि
सि * पश्चादुपकारापेक्षायां दर्शनं कल्पनं वा भविष्यतीत्यर्थ
चोपकारकत्वस्याप्यव्याप्तिः परिहृता एतदेव व्याचष्टे: * त

द्रव्योपदेश इतिचेत् ॥ ११ ॥

३८७।१ पूर्वपक्षाभिप्रायविवरणार्थत्वेन सूत्रं व्याचष्टे * परस्मि
श्लोकं व्याचष्टे * तत्रामेति * उपदेशान्यथानुपपत्तिलभ्यगुण

वेशेषणं गुणभूते ऽपीति भाष्योक्तं दर्शयितुम् * गुणभूतेत्युक्तम् *
भाष्योक्तमन्वयव्यभिचारोदाहरणं दर्शयित्वा स्वयं व्यतिरेकव्य-
भिचारोदाहरणम् * तथेत्यनेनोक्तम् * हविषामभिघारणाधारत्वे
ऽपि आधारानियमजन्यसंस्कारभाक्तेन प्राधान्यस्यापि विवक्षितत्वा-
न्वयाव्यभिचारादनुदाहरणत्वम्।व्यभिचाराभिधानस्य प्रकृतोपयोग-
माह * अत इति * सत्यामपि द्वितीयायामित्यर्थः ।

न तदर्थत्वाल्लोकवत्तस्य च शेषभूतत्वात् ॥१२॥

न गुणभूतइति भाष्येण व्यभिचारनिरासार्थत्वेन सौत्रं नञं
व्याख्याय तदुपपादनाय एवं हीत्यनेन स्मृतिरुपन्यस्ता। तत्र पूर्वपक्षि-
णा प्रयोगव्यभिचारस्योक्तत्वात्तन्निरासार्थं घटं करोतीत्यादौ प्राधान्ये
ऽपि प्रयोगादनेकार्थत्वस्य वान्याय्यत्वाद्व्याप्यत्वेप्सितमत्वसमुदाया-
त्मकेप्सिततमत्ववाचिन्याश्च द्वितीयायास्तदेकदेशव्याप्यत्वमात्रेण
लक्षणया विषं भक्षयतीत्यादौ प्रयोगदर्शनाद्व्याप्यत्वमात्रवाचित्वे-
ऽप्सिततमत्वाश्रियप्रतीत्ययोगाद् गुणत्वे तु क्व चिदप्रयोगात् प्राधान्य-
मेव वाच्यमिति प्रयोग एवोपन्यसनीयः । तमुपेक्ष्य स्मृत्युपन्यास-
स्याभिप्रायमाह * तिष्ठत्विति * स्मृतौ सत्यां प्रयोगो नादर्त्तव्य
इत्याशयः । प्रयोगाविरोधो ऽपि न चेति भाष्येण वक्ष्यतइति ताव-
च्छब्दार्थः । एतदेव प्रश्नपूर्वकमुपपादयति * किमिति * विशे-
षतो ऽत्रेत्याह * विवक्षेति * एतदेव व्याचष्टे * यदि हीति *
यथा युक्तं चानीप्सितमिति स्मृतिस्तु लाक्षणिकप्रयोगसाधु-
त्वान्वाख्यानार्थान्यथालाघवाद्व्याप्यं कर्मेति स्मरणापत्तिरित्या-
शयः । न चेति भाष्यं प्राधान्ये ऽपि प्रयोगानुपन्यासात्परोक्त-
मेकप्रयोगप्रतियोगिप्राधान्यप्रयोगानुपन्यासाच्चापूर्वमाशङ्क्य पूर-
यितुमाह * तथा चेति * यदपि चेत्यादिभाष्यं सङ्कलय्य तात्पर्यं
व्याचष्टे * यानि त्विति * ओदनशिखण्डाख्यकर्मान्तरोपादा-
नात् पचतिकरोत्योश्च द्विकर्मकत्वाभावात्तण्डुलबल्वजयोस्तदन्व-
यितया करणत्वावगतेर्होमान्वये च होमस्याग्न्यधिकरणत्वप्रसिद्धे-
रग्नौ प्रक्षेपेण भस्मसाद्भावापत्तेः प्राधान्यायोगात्तृतीयार्थे द्वितीयेति
शङ्काभिप्रायः। परिहाराभिप्रायमाह * तत्रेति * ओदनाद्यवस्थाया-
स्तण्डुलाद्यवस्थया सह भिन्नाभिन्नत्वाद्भेदविवक्षायां तण्डुलादेर्गु- ३८
णकारत्वमभेदविवक्षायां प्रधानाकारतेत्यर्थः । प्राधान्यांशमुपादाय-
विशेषणसामर्थ्यसूचितं तादर्थ्यं व्याचष्टे * यदेति * श्रुत्यु-

१ अपूर्णेति २ पु० पा० ।

क्तं व्याचष्टे * यदा त्विति * यदा तण्डुला बल्बजाश्चाप्तुमि
यदा च तण्डुलान्होमसम्बन्धित्वेनाभिप्रेत्यैषमप्रेष्यति तदा प्राधा
वं भजन्तीत्यर्थः। तण्डुलानां होमाङ्गत्वाभावे होमसम्बन्धित्वेनो
त्वायोगात्तण्डुलैर्जुहोतीति वेदवाक्येन गुणाभावावगतिरुक्ता
सम्बन्धिनो भस्मीभावादीप्सितत्वानुपपत्तिमाशङ्क्य स्वस्य
नाख्यस्य कर्मणः शोभादर्शनार्थमित्युक्तम्। पुंसः कण्डने शोभा
भावात्। ब्राह्मण्या इति स्त्रीविषयतोक्ता एतावता तण्डुलानामी
त्वायोगेनापरितोषात् गुणकामो वेत्युक्तं वीर्यकामस्तण्डुलैर्जुहो
तण्डुलानां वीर्यसाधनत्वश्रुतेर्या पत्युरात्मनो वा वीर्यं कामयते
तेषां प्राधान्यं विवक्षतीत्यर्थः। ईप्सिततत्त्वाभिप्रायस्य सम्भवित्व
धानार्थं भवति हीति भाष्यं व्याचष्टे * भवति हीति * तण्ड
लानोदनं पचेत्यादौ केन चिदभेदविवक्षादिना कारणेन कश्चि
नावस्थापरिणतिरूपः प्राधान्यांशो विवक्ष्यते अगारे गावो वास
मिति प्रधानभूते ऽप्यगारे गुणांशस्तण्डुलान्पच तैरोदनं कुर्वि
सन्ति तण्डुला इत्यंशद्वयस्याप्यविवक्षादीप्सिततत्त्वाभिप्राया
ऽपि लक्षणया प्रयोगोपपत्तेर्न गुणत्वस्यापि द्वितीयावाच्यत्व
नोचितेत्यभिधानार्थमन्यायश्चेति भाष्यं व्याचष्टे * न चेति *
त्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * ननु वेदे वक्त्रभावेन
वक्षिकप्राधान्यायोगात्सक्तवादेश्च वास्तवप्राधान्याभावाद् गुणा
चित्वाभावे द्वितीया न स्यादित्याशङ्कार्थं वेदे त्विति भाष्यं व
ष्टे * कथं त्विति * द्वितीयेत्यादिपरिहारभाष्यं व्याचष्टे *
च्यत। इति * सक्तुषु विद्यमानं प्राधान्यं, कथं वदतीत्याशङ्क
च्यत इत्युक्तम् * गुणाभावोपपत्तिप्रश्नापाकरणार्थं प्राधान्या
भिधानस्य गुणत्वलक्षणापर्यवसायित्वमुत्तरार्द्धेन दर्शयता स
द्वितीयान्त इत्यादिवक्ष्यमाणं भाष्यमनागतावेक्षणेन व्याच
श्लोकं व्याचष्टे * द्वितीया तावदिति * कुतो हेतोः प्राधान्या
इति पृष्टे होमस्य सक्त्वर्थत्वं च कल्पते इति सम्भवलक्षणा
भिधानार्थं न होमस्येति भाष्यं स्पष्टत्वादव्याख्याय कुतो होमस्य
क्त्वर्थत्वं नावकल्पतइति प्रश्नार्थं कुत इति भाष्यं व्याचष्टे *
२१।४ पुनरिति * सक्तूनामित्युत्तरभाष्यं व्याचष्टे * अत आहेति
श्लोकं व्याचष्टे * यस्य हीति * यत्पुनरिति पूर्वार्द्धार्थोपपादनेन
दीति भाष्यमपि प्रसङ्गाद्व्याख्यातम्। नन्वेवं प्राधान्यासम्भवे ऽप्य
तगुणत्वाङ्गीकरणं कथमित्याशङ्क्याह * तत्रेति * नन्वेवं सति
धान्यप्रतीतेर्भ्रान्तित्वं स्यादित्याशङ्क्याह * मुख्यार्थेति * अप

पुत्सर्गस्य भ्रान्तिता युक्तेत्याशयः । ननु लोके प्रमाणान्तरेण
लाक्षणिकार्थपरत्वावसायान्मुख्यार्थत्यागो युक्तो न तु वेदे प्र-
णान्तराभावादित्याशङ्क्याह *सर्वत्रैवेति* लोकेऽप्यानर्थक्यप्रस-
एव लक्षणादिनिमित्तं तदभावेऽर्थान्तरे तात्पर्यस्याशक्यज्ञानत्वा-
यस्यैवार्थस्योपपत्तेरित्यर्थः । अथेत्यादिभाष्यं सङ्क्षेपतो व्याच-
: तेनेति * नन्वित्याशङ्काभाष्यं निर्व्यापारस्य द्रव्यस्य क्रतूप-
ख्यप्रयोजनसाधनत्वायोगाद्धोमातिरिक्तस्य च व्यापारस्याश्रु-
मे च सति भस्मसाद्भावापत्तेरयुक्तमाशङ्क्य व्याचष्टे * नन्वि-
: हूयमानावस्थानामुपकारसाधनत्वं भविष्यतीत्याशयः । को
परिहारभाष्यं पूर्वोक्तनिष्प्रयोजनत्वविरोधित्वादयुक्तमाशङ्क्य
ष्टे * सिद्धान्तेति * नन्विति भाष्येण सक्तूनामपि प्रकरण-
ात्साक्षादुपकारसाधनत्वं भविष्यतीत्याशङ्क्य द्रव्यस्याक्रिया-
त्वात्प्रकरणाग्रहणाभिधानार्थं तदुच्यतइति भाष्यं व्याचष्टे *
ति* आदिशब्देनेत्थंभावेनैवोपादानम् । ननु द्रव्यस्यापि विधी-
स्य किं भाव्यमित्यपेक्षायामनीप्सितत्वेन वाक्यसंयुक्तायाः
या भाव्यत्वायोगात्साक्षात्पुरुषार्थस्य ज्योतिष्टोमेनावरोधात्त-
रस्यैव भाव्यत्वावगतेः कथं भावादिना सङ्गतिर्भविष्यती-
ङ्कां निरस्यन् श्लोकं व्याचष्टे * यथेति * किमित्यपेक्षा-
यक्रियात्मकत्वात् कथं भावेनाग्रहणमित्यर्थः । ननु सक्तूनां
त्करणोपकारसाधनत्वासम्भवे ऽपि होमद्वारा भविष्यतीति
तं भाष्येणाशङ्क्य नास्तीत्यनेन निरस्तं तदभिप्रायतस्तावद्व्या-
: न चेति*कथं तर्हि गोदोहनादेरदृष्टसाधनतेत्याशङ्क्याह* य-
ते*स्वस्वरूपतो व्याचष्टे*न चेति*नन्विति शङ्काभाष्यं व्याचष्टे
ोयेति*न हीति परिहारभाष्यं प्रतीतिविपरीताभिधानादयुक्त-
ङ्क्य छित्वा व्याचष्टे *न हीति* हेतुत्वेनोत्तरावयवं व्याचष्टे *
ा हीति* कथं द्वितीयायास्तादर्थ्यज्ञापकतेत्याशङ्क्य *प्राधान्य-
कम्* कुर्याच्छब्देनावास्तवत्वं सूचितम् । ननु सक्तूनां प्रयोजनव-
वे होमस्य तादर्थ्यायोगात्तदन्यथानुपपत्त्या प्रयोजनवत्त्वकल्प-
ायतइत्याशङ्क्य होमव्याप्यत्वेन सक्तूनामौपचारिकं होमस्य
त्वं न प्रयोजनवत्त्वकल्पनायालमित्यभिधानार्थं भवेदिति भाष्यं
ष्टे * तेनेति * येन कारणेन सक्तूनां प्रयोजनवत्त्वं द्वितीया ३९०॥१
यति तेन मुख्यतादर्थ्यायोगादौपचारिकी सक्त्वर्थतेति प्रसा-
त्सूचितम् । सक्तूनां त्यागप्रक्षेपांशमात्रव्याप्यत्वे ऽपि देवतोद्दे-
त्यागप्रक्षेपसमुदायात्मकहोमव्याप्यत्वाभावसूचनार्थं कथं ना-

नेत्युक्तं व्याप्यत्वमात्रस्य प्रयोजनवत्त्वकल्पनाशक्तिर्नेत्यनेनोक्त
क्रियाजन्यफलाश्रयत्वलक्षणं व्याप्यत्वमपि होमविनाश्यानां
नामयुक्तमित्याशङ्क्याहवनीयप्राप्त्युत्तरकालं विनाशे ऽप्याहवनं
ख्याख्यक्रियाफलाश्रयत्वाविरोधसूचनार्थं भवन्तीति भाष्यं व
* तत्रेति * उद्देशत्यागप्रक्षेपसमुदायं प्रति कस्य चित्कर्मत्व
त्तद्वाचिनो जुहोतेरकर्मकत्वे ऽप्यंशकल्पनया त्यागप्रक्षेपांशवि
चारिकव्याप्यत्वाभिधानाख्यकर्मवाचित्वे ऽपि द्वितीयायाः प्र
नकत्वकल्पनासामर्थ्यप्रदर्शनार्थतां दर्शयितुमाहेतीति व्य
प्राधान्योपचारः । ननु प्रयोजनवत्त्वकल्पनासामर्थ्यो ऽपि
याया होमस्य सक्त्वर्थत्वज्ञापकत्वाभ्युपगमेन होमस्य केन चि
रेण सक्त्वर्थतेति पूर्वोक्तं विरुध्येतेत्याशङ्क्य सक्त्वर्थत्वाि
सम्बन्धशब्दसूचितौपचारिकत्वप्रदर्शनार्थं होमस्य सक्त्वर्थते
भाष्यं व्याचष्टे * तत्रेति * सक्तूनामदृष्टार्थत्वकल्पनेन सक्त
वचनस्यानर्थक्यपरिहारशङ्कानिरासार्थं न च तद्वचनादिति
वयवमानर्थक्यस्यावश्यपरिहर्त्तव्यत्वात्प्रकारानभिधानाच्चायु
शङ्क्यौपचारिकत्वाख्यप्रकारान्तराभिप्रायत्वेन जिज्ञासापूर्वकं
ख्यातुम् * तद्वचनाद्धेत्याद्युक्तम् * पुरुषदोषकृतत्वाच्छ्रा
भ्रान्तत्वस्य वेदे ऽनुपपत्तेर्भ्रान्तिशब्देनौपचारिकतोक्ता श्रोतुः
मुख्यार्थत्वज्ञानस्य भ्रान्तित्वम् । एतदन्तेन च न होमस्य केन
कारेणेत्यादिभाष्येणैवमवगते प्राधान्ये बलीयसा हेतुना नास्ति
न्यमित्यवगम्यतइत्येतदेवोपपादितमिति सूचयितुं प्राधान्योक्ति
न्वेवं द्वितीयावगतप्राधान्याभावावगमे ऽपि कथं द्वितीयानिर्
णभाव इति प्रश्नो नापाकृतः स्यादित्याशङ्कानिरासार्थं स एव
दिभाष्यं विरोधात्तेन सम्बन्धीगुणाभावस्तु लक्ष्यतइत्यनेन
व्याख्यातत्वादुपेक्ष्यास्मिन्नेवार्थे भगवदुपवर्षसम्मतिप्रदर्शनार्
णाभावे चेति भाष्यं व्याचष्टे * ततश्चेति * स्थानशब्देन
वस्य द्वितीयार्थता निरस्तेत्याशयः । देवतोद्देशद्रव्यत्याग
ख्यधात्वर्थत्रयसमुदायरूपं जुहोत्यर्थं प्रति देवताया द्रव्यस्य
र्मत्वायोगात् जुहोतियोगे कर्मणि द्वितीयानुपपत्तेस्तृतीयार्थव
पवर्षेणोक्ता । व्याकरणे द्वितीयायास्तृतीयार्थवाचित्वानभि
परीष्टिर्निमित्तानां कर्त्तव्येत्युपपादिता सा महाभाष्यकारेण
व्येति वर्णितेत्युपवर्षे महाभाष्यकारशब्दप्रयोगाच्चैवं व्याख्या
तीयोक्तस्यापि सक्तुप्राधान्यस्यासम्भवाद् बाध इति सकलस्र

१ प्रयोजनवत्त्वेति २ पु० पा० ।

र्थे तेनेत्यादिभाष्येण तदर्थत्वादिति तच्छब्दो धर्ममात्रे तु कर्मेति व
वहितनिर्दिष्टस्यापि कर्मणो योग्यत्वात्परामर्शकः कस्य तदर्थता
वक्षितेत्यपेक्षायां च द्रव्योपदेश इति द्रव्यशब्दस्त्वधिकरणविषय
तः संसर्गादिसंस्कार्यत्वेनाभिमतस्य स्रुगादेः परामर्शक इत्यङ्ग
कृत्य सूत्रावयवद्वयं व्याख्यातम्। तत्र लोकवदिति सूत्रावयवमव्य
ख्याय प्राक् तस्य चेति सूत्रावयवव्याख्यानं किमर्थमित्याशङ्क्य
मसंसर्गवैषम्याभिधानार्थत्वं दर्शयितुमाह * तेनेति * कथं
क्तूनां होमार्थतेत्यपेक्षायां तेनेति भाष्यगतेन तच्छब्देन निष्प्रयोज
त्वं हेतुत्वेन परामृष्टमिति निष्प्रयोजनशब्देन सूचितं तत्रेति भाष्य
वयवव्याख्यानार्थम् * पर्यग्निकरणादित्युक्तम् * लोकवदि
सूत्रावयवपातनिकार्थं पर्यग्निकरणादेर्दृष्टोपकारजनकत्वाभाव
संस्कारत्वासम्भवमाशङ्क्यादृष्टोपकारजनको ऽपि संस्कारः सम्भ
तीत्यभिप्रायकथनार्थं न स इत्यादिभाष्यं व्याचष्टे * दृढे चेति
तदुपपादनाय लौकिकदृष्टान्ताभिधानार्थं लोकवदिति सूत्राव
व्याख्यातुम् अदृष्टो ऽपीति भाष्यं व्याचष्टे * लोके ऽपीति *
न्यर्थत्वेनादृष्टार्थतोक्ता। ननु लोकप्रसिद्धमपि पर्यग्निकरणस्यादृष्ट
स्कारार्थत्वं प्रमाणाभावादयुक्तमित्याशङ्कानिरासार्थं लोके चेति
ष्यं व्याचष्टे * न चेति * मूलश्रुतिकल्पनेनाचारस्यापि प्रामाण
दित्यर्थः। सिद्धान्तमुपसंहरति * तेनेति * ननु पुरोडाश
प्रयोजनवत्त्वेन पर्यग्निकरणादिप्रतिप्राधान्ये तस्यैव सक्त्वादिष्व
वेनाव्यभिचारित्वात्प्राधान्ये हेतुत्वोपपत्तेः। द्वितीयोपन्यासो
र्थक इत्याशङ्कते * नन्विति * केवलतृतीयाकृतो वेत्यनेन नि
योजनत्वस्यैव सक्त्वादिष्वव्यभिचारित्वाद् गुणभावहेतुत्वोपपत्ते
णभावे च तृतीयेतिभाष्यसूचितस्तृतीयाहेतुकगुणभावोपन्या
ऽप्यनर्थक इति सूचितम्। द्वयोः प्रयोजनवत्त्वाविशेषे ऽन्यतरप्रा
न्यस्य प्रयोजनवत्त्वेनाशक्यज्ञानत्वात्प्रयोजनवत्त्वानपेक्षद्वितीयाकृत
व प्राधान्यमित्यत्र तावद् दृष्टान्तमाह * तदुच्यतइति * इन्द्रस्य
गार्हपत्यवत् क्रत्वङ्गत्वेन प्रयोजनवत्त्वाविशेषात्तन्निरपेक्षद्वितीय
तमेव प्राधान्यमित्युक्तम्। ननु तत्र कतरस्य प्राधान्यमिति सन्देहे
र्णायकान्तराभावात् निर्णयमात्रे द्वितीयोपयोगो न विनियोग इ
शङ्क्य * लिङ्गादित्युक्तम् * न च वाक्याद् गार्हपत्यप्राधान्यं ग
पत्यसमीपे स्थित्वेन्द्रमुपतिष्ठेतेत्येवमपि तदेकवाक्यत्वोपपत्तेः
गार्हपत्येत्यनेनोक्तं निष्प्रयोजनत्वनिरपेक्षकेवलतृतीयाकृतमेव गु
त्वमित्यत्रापि दृष्टान्तमाह * तथेति * सूक्तवाकस्येष्टदेवताप्र

ज्ञानार्थत्वात्प्रहरणस्य च स्रुगासादनोपयुक्तप्रस्तरप्रतिपत्त्यर्थत्वा
योजनत्वाविशेषान्नैकस्यापि निष्प्रयोजनतेत्यर्थः । सक्तूनामपि
द्वितीयया प्राधान्यं स्यादित्याशङ्क्याह * तेनेति * भाष्योक्तं वि
त्प्रयोजनं दूषयति * प्रयोजनं त्विति * आधेनादिशब्देन परिद
पादानं द्वितीयेन हिरण्मयीत्वबाणवत्त्वयोः सिद्धान्तवत्पूर्वपक्षे ऽ
ङ्गप्रधानार्थत्वात् प्रयोजनाविशेष इत्यर्थः । ननु प्रियङ्गुवत्प्रकर
त्प्रधानमात्रार्थतावगतेनाङ्गप्रधानार्थतेत्याशङ्कां निरस्यन् श्लोकं
चष्टे * प्रियङ्गवो हीति * प्रैयङ्गवश्चरुरिति वाक्यात् प्रधानयाग
धनचरुप्रकृतित्वप्रतीतेः प्रियङ्गूणां प्रधानमात्रार्थत्वं न प्रकरण
स्याशयः । यथा च बर्हिरादेस्तृतीये वाक्यसंयोगबलीयस्त्वेन
प्रधानहविरासादनार्थत्वं वक्ष्यते तथा शमीमयीत्वादेरङ्गप्र
स्रुगाद्यर्थतेत्यर्थः । ननु यथा यज्ञाथर्वणं वै काम्या इष्टयस्ता उ
कर्त्तव्या इत्युपांशुत्वं विकृतावातिदेशिकत्वेनाप्राप्तावस्थेष्वङ्गेषु वि
यमानत्वात्प्रधानमात्रार्थं तथैतदपीत्याशङ्कते * स्यादेतदिति
वैकृताङ्गविधिकाले प्राकृतस्याङ्गस्य विकृतावचोदितत्वादित्ये
व्याख्यानमुपजीव्यैतत्सूत्रं पठितम् । काम्यशब्दोपात्तस्य प्रधानमा
तच्छब्दपरामृष्टस्योपांशुत्वविधेरङ्गसम्बन्धित्वेनोपांशुत्वस्याचोदि
त्वादिति तार्त्तीयसूत्रार्थमभिप्रेत्य परिहरति * तदिति *
१२ व्याचष्टे * यज्ञार्थवणेति * शङ्किताभिप्रायं विवृणोति *
चेति * परिहर्त्ता निरस्यति * नार्हतीति * परव्याख्यानुप
हेतुम् * आहैवं हीति * तृतीये निर्देशात्तु विकृतावपूर्वस्यान
कार इत्यत्र बर्हिर्यूपावटमवस्तृणातीत्यप्राकृतयूपावटस्तरणाख्य
र्थार्थबर्हिरर्थत्वं प्राकृतानां बर्हिर्धर्माणामस्ति नास्तीति चिन्तायाः प्र
तवैकृताङ्गप्राप्तिपौर्वापर्यचिन्ताधीनत्वाद्धर्मसाधारण्यशास्त्रातिदे
योश्च सप्तमदशमाद्ये निषेत्स्यमानत्वेन तदभिप्रायपूर्वपक्षायोगात्त
क्षत्वेन प्राग्वैकृताङ्गप्राप्तेः पश्चादतिदिश्यमानेन बर्हिर्लुनातीत्यादि
स्त्रेण सर्वप्राकृतवैकृतबर्हिरनुवादेन लवनादिधर्मविधिसम्भवाद्
वटस्तरणबर्हिषो ऽपि धर्मवत्तेति पूर्वपक्षिते क्लृप्तोपकाराङ्गस
कल्पनागौरवापादकाक्लृप्तोपकाराङ्गानाकाङ्क्षणाद्विकृतौ प्राकृत
मङ्गानां पूर्वनिर्देशात्त्वापूर्वस्य वैकृतस्य यूपावटस्तरणबर्हिषः प्रा
धर्मविधावधिकार इति सिद्धान्तस्य वक्ष्यमाणत्वात् प्राकृतानाम
नां वैकृतेभ्यः प्राक्प्राप्तिः स्यास्यतीत्यर्थः । किं चोपदेशेनानुवाद्यस
परिधिप्राप्तये ऽतिदेशः प्रागेवेष्टव्य इत्याह * अवश्यं चेति * उ
क्षापत्तेरपि प्रधानमात्रार्थता न युक्तेत्याह * किं चेति * नन्वा

पर्णतादेरपि प्रधानमात्रसम्बन्धापत्तेः । प्रकृतौ प्रयाजादिस्रुक्षु
भावात् कथं विकृतौ प्रसक्तिरित्याशङ्कातइत्युक्तं प्रकृतौ का-
कॢप्तत्वात्पदार्थोद्देशेन विधीयमानेषु धर्मेषु पर्णमयादिवा-
ह्वादिमात्रोद्देशेन पर्णतादिविधानादङ्गप्रधानस्रुगर्थत्वं युक्तं वि-
तु प्राकृतकार्यपृष्ठेन पदार्थप्राप्तेः स्रुक्शब्दलक्षितकार्योद्देशेन
ादिविधीयमानं जुह्वा जुहोति स्रुवः सम्मार्ष्टीति प्राकृतकार्यद्व-
ावे ऽप्येकत्रैव प्राकृतधर्मबाधेन चरितार्थस्य वैकृतधर्मविधेर-
ापि बाधकत्वायोगात्कस्मिन्नेकस्मिन्विधीयतामित्यपेक्षायां प्रक-
ा प्रधानभूतहोमाख्यकार्यार्थत्वप्रतीतेः । प्रधानमात्रार्थत्वमिति
ते प्रकृतौ नानावृक्षस्रुक्सम्मार्गसाध्यमपूर्वमिति वदतः पक्षस्त-
ऽनिष्टापत्तिरेवेत्याशयः । ननु प्रयाजानामपि होमाख्यकार्यस-
त्त्वस्यादिविधानोपपत्तेः कथं प्राकृतजातिप्रसक्तिरित्याशङ्क्या-
य एव हीति * होमत्वाविशेषे ऽपि प्रधानहोमेभ्यः प्रयाजादि-
नां भेदात्सम्मार्गवत्प्राकृतविरुद्धवैकृतधर्माप्राप्तिरित्याशयः ।
ं सत्येवमेवयुक्तत्वात्कानिष्टापत्तिरित्याशङ्क्याह *न चेति* अयं
स्रुक्कार्यस्य शमीजात्या कर्त्तुमशक्यत्वात्स्रुक्कार्ये च शमी-
स्रुवां बाधापत्तेः। कार्ये विधीयमाना शमी पर्णतादिकार्ये स्रु-
ातिद्रव्यपरिच्छेदलक्षणे स्रुक्शब्दोपस्थापिते विधीयेत तस्य च
ायी जुहूर्भवतीत्याद्युपदेशविध्यैक्येनैकत्वात्तदुद्देशेनापि विधी-
ायाः शम्याः सर्वार्थतैव युक्ता। अथ स्रुक्प्रकृतिपरिच्छेदत्वेनै-
ात्वे ऽपि प्रधानस्रुक्प्रकृतिपरिच्छेदलक्षणात्कार्यादङ्गस्रुक्प्र-
परिच्छेदलक्षणस्य कार्यस्यान्यत्वाद्विकृतौ प्रयाजादिस्रुग्वर्जनं
प्रकृतावप्यपूर्वसाधनांशे धर्मविध्यभ्युपगमात्प्रधानापूर्वसाधन-
र्थतैव पर्णतादेर्बर्हिषश्च प्रधानहविर्मात्रसादनार्थता स्यादिति स-
वेति न्यायो बाध्येत।अथ प्राकृताङ्गबाधेन वैकृताङ्गनिवेशादेकत्र
ाधेन चरितार्थस्य वैकृताङ्गविधेः सर्वत्र बाधकत्वायोगान्न वि-
वसौ न्यायः। ततो ऽङ्गगुणविरोधन्यायेनाङ्गस्रुक्ष्वेव प्राकृतजाति-
स्य युक्तत्वाद्वैपरीत्यापत्तिरुपदेशेनातिदेशबाधस्यानुग्रहपक्षवृत्तिः
प्रधानगुणबाधाभ्युपगमे ऽङ्गानामप्यनुग्राह्यत्वात्सर्वार्थतैव पुनरा-
ते अभ्युपगमस्यापि किं चिच्छमीमयीत्वादेः प्रधानमात्रसम्बन्ध-
णां प्रधानस्रुचामेव विकृतावपि प्रसङ्गेनाङ्गसाधनत्वोपपत्तेः प-
यीत्वादेश्च स्रुक्प्रयोजकत्वाभावात्तद्वशेनापि स्रुगन्तरोपादा-
ोगात्सम्मार्गः स्रुक्षु पर्णतादिप्राप्तिः पूर्वपक्षे नास्तीत्याह * यद्यपि

१ अङ्गगुणविरोधे च तादर्थ्यादिति न्यायः ।

ति * ननु पशुयागस्य वपाप्रचारेणोपक्रमादङ्गप्रचारेण चोपसं-
रात्तन्मध्यपातिनः पुरोडाशस्य पाशुकैरङ्गैः प्रसङ्गोपकारदर्शना-
म्मार्गादेः प्रधानप्रम्मवित्वात्तद्बहिर्भूतस्य कथं प्रधानार्थाभिः स्रु-
भः प्रसङ्गेनोपकार इत्याशङ्क्य*सौमिकेत्युक्तम् * षड्त्रिंशत्प्रक्रमा
चीत्यादिवाक्यविहिताया वेदेस्तद्युक्ते तु फलश्रुतिस्तस्मात्सर्वेचि-
र्षो स्यादित्यत्र तृतीये साङ्गसोमयागार्थत्वेनोक्तायाः अप्यौपव-
थ्याहे क्रियमाणत्वेन तत्प्राचीनाङ्गार्थत्वाभावाद्वेदिकरणोत्तरकाल-
ाव्यग्नीषोमीयपशुयागार्थत्वे च सत्यपि तत्प्रक्रमात्प्रागेव सौमि-
ग्निप्रणयनप्रक्रमे ऽनुष्ठानेन सोमार्थानुष्ठानावधारणात् सौमिक-
ाभिधानं तथा च प्रधानार्थयाप्यग्नीषोमीयादिष्वतिदेशप्राप्तदार्श-
र्णमासिकवेदिकार्यस्य हविरासादनस्यापि प्रसङ्गात्सिद्धेर्दार्शिकपौ-
मासिकी यजमानसम्मिता वेदिर्निवर्त्ततइति'द्वादशे वक्ष्यते । अत-
न्त्रिमध्यपाताभावे ऽपि तन्त्रमध्यपातनमात्रेण प्रसङ्गो भवतीत्या-
यः । ननु महावेदेः सोमार्थत्वे ऽप्यग्नीषोमीयार्थत्वस्यापि भावात्त-
ङ्गकार्यान्तरसाधकतापि प्रसङ्गाद्युक्ता । शमीमयीत्वस्य तु प्रधानमा-
त्सम्बन्धे ऽङ्गार्हत्वाभावात्कथं प्रसङ्गेनाङ्गोपकारितेत्याशङ्क्य दक्षिणाः
ामस्येति वाक्यात्प्रधानमात्रार्थाया अपि दक्षिणायाः प्रसङ्गेनाङ्गो-
कारित्वाद्दीक्षणीयादिष्वतिदेशप्राप्तान्वाहार्यनिवर्त्तकत्वात् द्वादशा-
द्धमेव दृष्टान्तितम् । अर्थाभिधानकर्म चेति चतुर्थन्यायेनाप्रयोजक-
ाभ्युपगमे ऽपि वा यथाश्रुतसम्मार्गानिष्पत्तेः प्राकृतजात्युपसं-
ङ्गो न युक्त इत्याह * किं चेति * अग्निपरिधानाख्येन कार्येण
रधेः स्वरूपं लक्षितं स्रुचां चादिशब्दोपात्तानां द्रव्यवृत्त्याख्येने
र्धः । न विद्यते तत्परिधानादिकार्यं यस्य पलाशादेस्तस्य सम्मार्गः
यमाणः परिधेरकृतः स्यात्परिधीकृतस्य वा पलाशादेः सम्मार्गः
यमाणः परिहितपरिधानस्य प्रकृतावभावादप्राकृतकार्यस्य स्यादि-
त्तरार्द्धं द्विधा योज्यम् । श्लोकं व्याचष्टे * परिधिरिति*स्रुक्शब्द-
जुह्वादिपरत्वाद्धोमार्थायाश्च स्रुचो जुहूत्वात् जुहूधारणार्थाया-
पभृत्त्वादाज्यावदानापादानभूतायाश्च ध्रुवात्वादादिशब्दोपात्ता-
स्रुचामपि कार्येणैव स्वरूपोपलक्षणं तच्चेत्यनेनोक्तम् । नन्वर्थाभि-
नकर्मत्वस्याप्रयोजकत्वमात्रहेतुत्वात्किमर्थो ऽपिशब्द इत्याशङ्क्या-
रासार्थस्ततश्चशब्दः । न केवलं ततो ऽर्थाभिधानकर्मत्वादप्रयो-
कत्वं किं तु वक्ष्यमाणयथाश्रुतसम्मार्गानिष्पत्तेश्चेत्यर्थः । ननूभ-
र्षां समुच्चयेन परिधानार्थत्वात्पौर्वापर्याभावेनाप्रकृतार्थत्वानाप-
रित्याशङ्क्य * न चेत्युक्तम् * अग्न्यर्थत्वाभावे च सम्मार्गस्या-

नहोमार्थाग्निद्वाराङ्गप्रधानहोमार्थत्वाभावेनापबर्हिषः प्रयाजा-
पबर्हिषावनूयाजौ यजतीति विहितप्रयाजानुयाजाङ्गत्वेन प्रा-
ादवभृथस्य च दशमे वक्ष्यमाणेनापूर्वत्वेनातिदेशतो ऽपि प्रा-
ात्कथं चित्प्राप्तावप्यप्स्ववभृथेन चरन्तीति तृतीयोक्तकर-
प्तताङ्गसाहित्यस्य विवक्षितत्वाच्चरत्युक्तस्य च प्रयोगस्य सा-
नविषयत्वादपां च देशत्वात्प्रयोगाङ्गत्वावगतेरेकादशे साङ्ग-
र्थाग्निविकारत्वस्य वक्ष्यमाणत्वादग्न्यप्राप्तेरग्न्युदाहरणे ऽपि
ाक् प्रयोजनमित्याह * अवभृथस्य त्विति * पुरोडाशोदाहर- ३९३।४
जनमनुजानाति * तरसेति * तरसा उदाहरणं विषयो यस्य
ास्येति विग्रहः। ननु तरसोदाहरणे ऽपि पुरोडाशमात्रानुवादेन
धानात्पूर्वपक्षे ऽपि सवनीयपुरोडाशवत्तदङ्गपर्यग्निकरणपु-
ऽपि मांसप्राप्तेर्न प्रयोजनसत्यतेत्याशङ्क्याह * तत्र हीति *
। सवनीयानां चोदनाविशेषादिति तृतीयान्त्याधिकरणे पुरो-
ादेशा सवनीयमात्रे मांसविधेर्वक्ष्यमाणत्वान्न पर्यग्निकर-
ाशे मांसप्राप्तिरित्यर्थः। ननु सवनीयाङ्गभूतस्य पर्यग्निकर-
। सवनाधारत्वे सवनीयशब्दवाच्यत्वात्तदीये ऽपि पुरोडाशे
पादित्याशङ्क्याह * न हीति * तादर्थ्याभिप्रायः सम्बन्धिश-
न्द्रं प्रातःसवन इत्यादौ तु सप्तमीनिर्देशात्सवनाधारमात्रे
धेरित्याशयः । ननु पर्यग्निकरणस्यारादुपकारित्वे प्रकृतौ
रोडाशग्रहणस्याशास्त्रीयत्वेन विकृतौ व्रीहिमयत्वस्य यवमय-
ातिदेशायोगादुपादानलाघवाय सवनीयस्य मांसमयस्यैव पुरो-
पर्यग्निकरणसाधनत्वापत्तेर्न पूर्वसिद्धान्तपक्षयोः प्रयोज-
स्यादित्याशयेनाशङ्कते *तत्रापि त्विति* व्रीहिशब्दो यवानाम-
क्षणम्। ननु व्रीहियवनियमाभावे ऽप्यनियतधान्यमांसादिप्रकृ-
ाकतैव पूर्वपक्षे प्रयोजनं भविष्यतीत्येकदेशी शङ्कते *एवं त-
पर्यग्निकरणपुरोडाशस्यानियतद्रव्यकत्वे प्राप्ते यथैकपात्रभोजि-
शिष्ययोः शिष्यस्य कांस्यपात्रभोजित्वानियमे गुरोश्चानियतपा-
ात्वे शिष्यानुरोधेनापि गुरोर्नियमदर्शनादाग्रयणे द्यावापृथिवी
कपालस्य वैश्वदेवैककपालप्रकृतिकत्वेन प्रसूनबर्हिर्नियमाद्-
र्हिषो मुख्यस्याप्यैन्द्राग्न्यादेरमुख्यानुरोधेनाप्याधिकश्च गुणः
गो ऽविरोधात्कांस्यभोजिवदमुख्ये ऽपीत्यत्र द्वादशे प्रसूनबर्हि-
वक्ष्यते । तथा सवनीयपुरोडाशस्य मांसप्रकृतिकत्वानि-

प्रकृतिलिङ्गेनेत्यर्थः।
ावभृथे प्रधाने ऽग्निविकारः स्यान्न त्वितराङ्गेषु रग्निसंयोग इत्यर्थः।

यमात्पर्यग्निकरणपुरोडाशस्यापि मांसप्रकृतिकत्वनियमाप
देश्युक्तम् प्रयोजनमाशङ्किता निरस्यति * तदपीति *
क्षप्रयोजनमाक्षिप्तं परमतेन तावत्समाधत्ते * तस्मादिति *
शास्त्रसहकारित्वेनोपादानगौरवभयं कथंचिच्छब्देनोक्तम्। प्रद्
डाशग्रहणस्य प्रकृतौ शास्त्रीयत्वाद्विकृतावतिदेशसम्भवो ऽपि
मयस्य यवमस्य वा पुरोडाशस्याभावात्पर्यग्निकरणलोपापत्त्या
समाधानं दूषयति * तत्रापि त्विति * तुल्यो हि व्रीहिस्
शास्त्राद्यागावघातयोरिति वार्त्तिकोक्तन्यायेनारादुपकारिणा
धानप्रयुक्तद्रव्यग्रहणस्य निरस्तत्वादयुक्तापि शब्देन सूचिता
एव तर्ह्यस्तु पूर्वपक्षप्रयोजनमिति मतान्तरमाह * तेनेति
त्वेकहायन्यानयनस्य सप्तमपदपांसुग्रहणाप्रयुक्तत्वात्तदर्थम
ऽप्यक्षाभ्यञ्जनस्य तेनाक्षमञ्ज्यादिति तृतीयोक्ताक्षाभ्यञ्जनशेष
सून्प्रति प्रयोजकत्वात्पदपांस्वभावे ऽपि यान्कांश्चित्पांसूनुपाद
भ्यञ्जनस्यानुष्ठानसिद्धेर्लोपाभावादिहाप्युक्तेन न्यायेन पर्यां
णस्य पुरोडाशं प्रत्यप्रयोजकत्वलक्षणाभावादेकहायनीन्यायेन
डाशोक्ता प्रकृतिव्रीहियवाप्रयोजकत्वे ऽपि यत्किंचिद् द्रव्य
नेन पुरोडाशसिद्धेः पर्यग्निकरणलोपस्यायुक्तत्वेनैतत्प्रयोजना
षात्स्वमतेनानियतधान्यप्रकृतिकपुरोडाशसिद्धेर्व्रीहिमयत्वस्य
यत्वस्य चातिदेशाभावे ऽपि मांसमयस्य पुरोडाशस्य पूर्वपक्षे
करणानापत्तेर्युक्तं पूर्वपक्षप्रयोजनमिति समाधत्ते * अनिय
यत्वनियमे सति मांसस्यापि पक्षे प्राप्तेः कांस्यभोजिन्यायेन म
यमात् सिद्धान्तसदृशकर्मापत्तिरित्युक्तं तन्निरस्यति * न च
विशिष्टाकारस्य पिण्डस्य पुरोडाशशब्दवाच्यस्य मांसेनानिष्प
ऽप्यप्राप्तिरित्याशयः । ननु सवनीयस्य तर्हि पुरोडाशस्य क
सप्रकृतिकतेत्याशङ्कते * सवनीयेति * सवनीयपुरोडाश
त्वेन न प्राप्तं विधीयते किं तु तत्कार्यसाधनत्वेनेति परिहरति
वेति * तरसपुरोडाशमन्त्रसंरोधादिति छान्दोग्यसूत्रकृता
णेन मांसस्य पुरोडाशनिष्पादने सामर्थ्यस्योक्तत्वात्तदनिष्पा
चराविव पेषणनिवृत्त्या तदर्थाधिवापनिवर्त्तनेन धान्यमसीत्य
पमन्त्रनिवृत्त्यापत्तेर्धान्यशब्दोहानूहचिन्तायाः शाक्यानामयन
न्मन्त्रस्थधान्यशब्दोहानूहप्रयोजनत्वोक्त्ययोगप्रसङ्गात्पुरोडाशस्य
सविध्युक्त्ययोगमाशङ्क्य सवनीयशब्देन धानाकरम्भपरिवाप
शपयस्याख्यानां पञ्चानामपि हविषामभिधानात्पुरोडाशशब्दः
लिङ्गसमवायाद्धानादिष्वपि प्रवृत्तेर्भ्रष्टयवानां च धानाख्या

नाच्चूर्णस्य दध्यक्तस्य करम्भाख्यस्य परिवापाख्यानां च लाजा
मामिक्षाख्यायाश्च पयस्याया मांसेनान्नमिश्रितेनापि निष्पादनाश
रेकेन च वाक्येन धानादौ तत्कार्यकरत्वेन पुरोडाशे च तत्प्रकृति
न मांसाविधानस्य वैरूप्यापादकत्वेनायोगान्मुख्यभूयोधानाद्यनु
धेन पुरोडाशे ऽपि तत्कार्यकारित्वेनैव मांसाविधिर्युक्तः छान्दो
शाखायां श्वेतेन वै गौरवीति शाक्यस्तरसपुरोडाशोपव्यावृत्त्या स
मृद्धिमाप्नोदिति परकृतिसरूपार्थवादकल्पे विधौ सवनीयशब्दा
वात्पुरोडाशमात्रोद्देशेन मांसविध्यवगते ऽसहायोपादानेनापि च
सस्य पुरोडाशनिष्पादकत्वसम्भवे पुरोडाशश्रुतेः कार्यलक्षणार्थत्व
ल्पनायोगाद् व्रीह्योदनो देवदत्त इति वच्च तरसमयः पुरोडाशो ऽ
ति मध्यमपदलोपिबहुव्रीह्यर्थाश्रयणेन पदद्वयस्यापि श्रुतिसंस्थि
ऽहनि गृहपतिर्मृगयातिशयान् मृगान्हन्ति तेषां तरसाः सवनी
पुरोडाशा भवन्तीति पुरोडाशमात्रोद्देशेन मांसाविव गतेः सहायो
दानेनापि च मांसस्य पुरोडाशनिष्पादकत्वसम्भवे पुरोडाशश्रु
कार्यलक्षणार्थत्ववृत्तित्वोपपत्तेः। सूत्रकृतान्नमिश्रेण मांस
पुरोडाशशक्ततोक्ता तद्विषयमेव च धान्यशब्दोहानूहचिन्त
प्रयोजनत्वं धान्याधिकरणप्रयोजनभाष्ये तु सवनीयशब्दवद्वाक्य
दाहरणमनादृत्यमिति परिहारसूचनार्थम् * यथेत्याद्युक्तम् * व
च्चिच्छब्देनान्नमिश्रिततोक्ता समाहितं पूर्वपक्षप्रयोजनमुपसंहरति
अतश्चेति * यथा प्रैयङ्गवे चरौ प्रधानमात्रे प्रियङ्गुभिर्व्रीहिनिवृ
व्रीहिसाधनक एवावघात इति दृष्टान्तार्थः। एवशब्दो मांसशङ्कानि
स्यर्थः। एवं तर्ह्यनियतद्रव्यकत्वेत्यनियमस्य मांसनियमेन निरास
न्मांसविषयत्वप्रतीतेरनियतद्रव्यकत्वं वेत्यस्यापि तद्विषयत्वशङ्
पत्तेस्तन्निरासेन धान्यमात्रविषयत्वसूचनायैवशब्देन मांसं निय
पुनः*सत्यमित्युक्तम्*न चास्मिन्पक्षे नियोगतो यागार्थाएवेति न्या
प्रकृतपुरोडाशग्रहणस्य निरस्तत्वात्प्रकृतावपि व्रीहियवद्रव्यकत्व
सिद्धेः पूर्वपक्षप्रयोजनत्वेनानादरात् कथं चिद्धेत्युक्तम्*स्वयं प्रयो
नान्तराण्याह * एतानि चेति * पुरोडाशोदाहरणे भाष्योक्तप्र
जनानुज्ञासूचनार्थश्चकारः पशौ पृषदाज्येनानुयाजान्यजतीत
म्नानात्पृषदाज्यधारणायोपभृदन्तरकरणाच्चतस्रः स्रुचश्चातुर्मास्ये
वरुणप्रघासाख्ये द्वितीये पर्वणि पृथगग्निं प्रणयतइति विहारद्वय
म्नानेन जुहूपभृन्द्रभृताद्वयकरणात्त्वषट् यत्र च वरुणप्रघासेषु

१ संस्थिते संस्थिते ऽहनि गृहपतिर्मृगयां याति स यान् यान् मृगान् हन्ति स
तरसाः सवनीयाः पुरोडाशा भवन्तीति।

द्वाराद्वित्वेन षट्संख्यत्वात्परिधिवृद्धिस्तत्रैकवर्जं पञ्चाना
गोपत्तेर्महान्प्रयोजनविशेष इत्यर्थः । अग्निमुपधाय स्तुवतइ
ङ्गत्वेनारादुपकारके ऽग्न्युपनिधाने विहिते यथा लौकिकस्
निधानं विषये लौकिकं स्यात्सर्वार्थत्वान्न वैदिकमर्थनिर्देश
सप्तमाधिकरणे वक्ष्यतइति दृष्टान्तार्थः । अग्निसम्मार्गस्या
धींश्चाग्निं च त्रिस्त्रिः सम्मृड्ढीति प्रयाजकालीनसम्मार्गप्रै
स्पारिधींश्चाग्निं च सकृत्सकृत्सम्मृड्ढीति चानुयाजकालीन
प्रैषात्परिधिसम्मार्गसाहित्यावगतेराहवनीयस्यैव परिध्यन्व
म्मार्गावगमात्सर्वैश्च याज्ञिकैराहवनीयस्यैव सम्मार्गानुष्ठ
वनीयादीनामित्यादिशब्दो वैदिकत्वसादृश्योपस्थापितपुरो
संग्रहार्थः । सर्वशब्दश्च विहारपृथक्त्वेनैकाहवनीयसम्मा
तकार्याणां चाहवनीयस्रुक्परिधिपुरोडाशानां कृतसंस्का
नाशदोषापहारेष्वन्येषामुत्पादितानां संस्कारावृत्त्यर्थो व्या

॥ स्तोत्रादिप्राधान्याधिकरणम् ॥ ५ ॥

स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभि
नत्वात् ॥ १३ ॥

ननु स्तोत्रशस्त्रयोः पूर्वाधिकरणोक्तगुणकर्मत्वहेतु
स्यभावात्कथं गुणकर्मत्वशङ्केत्याशङ्क्याह * यैस्त्विति *
रित्वस्य स्वातन्त्र्येण गुणकर्मलक्षणत्वानभ्युपगमे ऽप्यपू
योगिलक्षणत्वस्यान्यतः सिद्धशेषाणामित्यत्रोक्तत्वादिह
प्राप्ता ऽपोद्यतइत्याशयः।सूत्रगतस्तुतशस्त्रशब्दव्याख्यानार्थं
मितिभाष्यं व्याचष्टे * स्तुतिरिति * गुणमात्राभिधानस्
भाष्यकृतोक्तमिति शङ्कां निराकर्त्तुमाह * गुणेति * गुणा
म्बन्धितया वचनमिति भाष्यार्थो ऽनेनोक्तः । नन्वभिधा
त्वे तस्यैकान्तेनाभिधेयशेषत्वात्प्राधान्यसिद्धान्तायोगात्
स्यादित्याशङ्क्याह * सा चेति * अभिधेयं विना ऽभिधान
भिधेयाभिधानारहितशब्दोच्चारणापातात् स्तुतित्वं हि
नन्वेवं सति गुणगुणिनावुभावपि प्रतिस्तुतेः शेषिशेषि
गुणिनां देवतामेव प्रतिगुणप्रधानभावचिन्ता न युज्येतेत्य
तत्रेति * मण्डूकाक्षादेरदेवतात्वे ऽप्यग्निराजसूयादौ वि
स्तुतेस्तच्छेषत्वस्य पूर्वपक्षाभिमतत्वात्सन्देहभाष्यगतस्य
स्य स्तुत्यमात्रोपलक्षणार्थत्वसूचनाय * स्तुत्यस्येत्युक्तम

प्रति स्तुतेः साध्यत्वात्स्वभावतो शेषत्वे ऽपि कैमर्थ्याकाङ्क्षायां शेषत्वं भवतीति सूचनार्थः शेषीति च्विप्रत्ययः। पूर्वपक्षसूत्रव्याख्यानार्थं तत्रेति भाष्यं सङ्क्षेपतो व्याचष्टे * किमिति *

अर्थे न त्वपकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वात् ॥ १४ ॥

ननु यत्रेति वार्थवत्त्वात्स्यादिति सूत्रे पूर्वपक्षिणोत्कर्षस्याभ्युपेष्यमाणत्वादनिष्टापत्तिदोषाभिधानमयुक्तमित्याशङ्क्याह * प्रमाणेति * क्रमसन्निधाख्यप्रमाणद्वयविरोधो ऽनेन सूत्रेण पूर्वपक्षे ऽभिधीयते नानिष्टापत्तिरित्यर्थः । नन्वाम्नातेष्विति वक्ष्यमाणानर्थक्यापत्तिदोषान्तरसूचनार्थस्तावच्छब्दः कीदृक्दूषणमित्यपेक्षायामाह * तथा हीति * यस्मात् संस्कारकर्मत्वे यत्र स्तोत्रे अविद्यमानार्थो मन्त्रः प्रयुज्यते तस्य स्तोत्रस्य मन्त्रप्रकाश्येन देवतारूपेणार्थेन स्तोत्रप्रयोजनेनापकृष्टत्वात् क्रमसन्निधिप्राप्तस्याविद्यमानार्थमन्त्रसाध्यस्य स्तोत्रस्य बाधः प्रसज्यतइति यस्माच्छब्दार्थे यदित्यव्ययं व्याख्येयम् । स्तौतिशंसतिवाक्यविहिताया अपि स्तुतेर्मन्त्रविशेषसाध्यत्वं विना विशेषरूपानवधारणेन देवतासंस्कारत्वायोगान्मन्त्रापकर्षेण भाष्यकृता स्तुत्यपकर्षस्याभ्युक्त्यवगतेः स्तुत्या एव च संस्कारत्वनिमित्तापकर्षस्य वक्तुं युक्तत्वाच्चोदनाशब्देन च स्तुत्यपकर्षस्यैव सूत्रकृतोक्तत्वात् स्तोत्रस्यापकृष्टत्वादित्युक्तं तस्मात्संस्कारपक्षो दुष्ट इति शेषः। उक्ते ऽर्थे यथापूर्वं भाष्यं,सूत्रं योजयति *येति* को ऽपकर्षे दोष इत्याशङ्कानिरासार्थं तत्रेति भाष्यं व्याचष्टे * ततश्चेति * ननु-क्रमसन्निधिशब्दयोः स्थानाख्यप्रश्नमविनियोगप्रमाणवाचित्वेनैकार्थ्याद्भेदोपादानमयुक्तमित्याशङ्क्याह * क्रमश्चेति * येन क्रमेण यजुर्वेदे ग्रहयागाभ्यासा विहितास्तेनैव क्रमेण सामवेदे तदङ्गभूतानि स्तोत्राणि ब्राह्मणेन विहितानि तेनैव च क्रमेणोत्तराग्रन्थे स्तोत्रसाधनभूता ऋचः पठिताः मन्त्रानपेक्षायाः स्तुतेरपकर्षायोगात् स्तुत्यपकर्षेण मन्त्रापकर्षे ऽपि लक्षणान्मन्त्रक्रमाभिधानाविरोधः रथन्तरं पृष्ठं भवतीति चोदनया रथन्तरयोनित्वेनाभित्वा शूरेत्यृगुपस्थापनमेकं साम तृचे क्रियते स्तोत्रियमिति च स्तोत्रसाधनभूतस्य साम्नस्तृचाधारत्वश्रुतेः। ऋगन्तरापेक्षायां यद्योन्यां गायति तदुत्तरयोर्गायतीति योन्युत्तरर्गपेक्षया त्रित्वपूरणविधानादुत्तराग्रन्थे च तदुत्तरत्वेन नत्वावानित्यृचः पाठादुपस्थापनं त्रित्वपूरणं तु तयोः

पूर्वा बृहती ककुभावुत्तरे इति वचनात् प्रथमायाश्चतुर्थपादेन द्वि यायाश्चार्द्धर्चेनैकं ककुभं कृत्वा द्वितीयायां द्वितीयादिपादत्रयेण कृत्वा प्रगाथसंज्ञा यावृत्त्या भविष्यतीति भाष्यकृता प्रगाथश सूचितम् । एवं तु क्रमहेतुकोपस्थापनमात्रवाचित्वात्सन्निधिश च प्रमाणान्तरानभिधानापत्तेः क्रमसन्निधी उपरुध्येयातामिति वचनानुपपत्तिप्रसङ्गादपरितोषेण प्रकरणपरामर्शो वेत्युक्तम् । रणाद्यैन्द्रस्य प्रगाथस्य ज्योतिष्टोमाङ्गत्वे ऽवगते ऽपि द्वारविशे पेक्षायां पृष्ठाख्यस्तोत्रद्वारत्वं क्रमादवगम्यतइत्याशयः । प्रकरणेन यारूपस्य मन्त्रस्येतिकर्त्तव्यतात्वेनाग्रहणे ऽपीतिकर्त्तव्यताभूतस्त साधनसामाधारत्वेन सन्निधिं परामृश्य ग्रहणात्साकाङ्क्षफलवत्स धानलक्षणप्रकरणावयवभूतो ऽत्र सन्निधिर्विवक्षित इति सूचन परामर्शशब्दः ।

वशावद्वा गुणार्थं स्यात् ॥ १५ ॥

न पर्युदसिष्याम इति भाष्यात् पूर्वपक्षसमर्थनायैतत् सूत्रमि भाति तत्पूर्वपक्षिणो ऽप्युत्कर्षस्याभिमतत्वादयुक्तमाशङ्क्य पूर्वपः देशी प्रमाणविरोधाख्यं दोषमनेन सूत्रेण परिहरतीति व्याख्यात ह * नायमिति * प्रश्नपूर्वदोषपरिहारमुपपादयति * किमिति श्लोकं व्याचष्टे * य एवेति * सन्निहितातिक्रममात्रवाचित्वेने षापकर्षशब्दयोरैकार्थ्यादपकृष्येतेत्युक्तस्योत्कर्षशब्देनानुभाषणा धो ऽपकर्षः स्यादित्यनेन सूचितः । नन्वैक्ये ऽपीन्द्रमाहेन्द्रयोर्मा ग्रह गृह्णातीति महत्त्वगुणविशिष्टस्य देवतात्वश्रुतेः शुद्धप्रकाश मन्त्रस्यापकर्षः स्यादित्याशङ्कानिरासार्थत्वे यथा वशात्वगुणविशि स्याप्यजाद्रव्यस्यागुणार्थं शुद्धाजाप्रकाशनार्थमभिधानं स्यादेव न यमपकृष्यते तथा शुद्धेन्द्रप्रकाशनार्थमप्यभिधानं स्यादेवेत्यक श्लेषेण सूत्रव्याख्यां सूचयति * न चेति * उत्तरसूत्रव्याख्या भाष्ये गुणश्चानर्थकः स्यादित्यत्र च सूत्रे गुणस्य देवतात्वानन्त तिनिरासाद्वशावद्वेति वाशब्देन गुणस्य देवतात्वे ऽनन्तर्गतिः स सेति ये मन्यन्ते तन्मतेन गुणस्यातन्त्रत्वादित्युक्तम् । आपाद्या निरासोपपत्तेर्वशादृष्टान्तात्तद्वशगुणे चोदित इतिभाष्याच्च गुणस्य वतात्वान्तर्गतिः । तद्विरुद्धाया निरुपपत्तिकायाश्चानन्तर्गतिः द्धितुमशक्यत्वात्स्वमतेनान्तर्गतस्यापि गुणस्य महत्त्वविशिष्टदेव करणेन लभ्यमानस्मरणत्वादित्युक्तं निर्गुणशब्देनाकारप्रश्लेषो ः र्थमिति सूत्रावयवे सूचितः । वशात्वगुणस्यातन्त्रत्वाभावात्

न्तरपक्ष एव दृष्टान्तः । ननु शब्दमात्रस्य देवतात्वादिन्द्रमहेन्द्रशब्दयोश्च भेदात्कथं देवतैक्यमित्याशङ्क्याह * न चेति * नवमे ऽपि वाशब्दपूर्वत्वाद्यज्ञकर्म प्रधानं स्याद् गुणत्वे देवताश्रुतिरितिसूत्रे भूतभव्यसमुच्चारणन्यायेन देवता यागं प्रति गुणत्वे ऽभिहिते ननु कर्मणो ऽपीप्सितादभिप्रेतत्वं देवताया गम्यतइत्याशङ्क्य नास्या अभिप्रेततामहनुमहे तद्धितशब्देन चतुर्थ्या वा संयुक्तस्य देवतार्थस्य वाक्यादभिप्रेततागम्यत इति भाष्येणानर्थकवर्णमूहस्य प्रातिपदिकत्वाभावे तद्धितचतुर्थीसंयोगायोगात्तत्संयोगाभिधानेनार्थग्रहणेन शब्दमात्रस्य देवतात्वं निरस्तम् । दशमे च विधिशब्दस्य मन्त्रत्वे भाव स्यात्तेन चोदनेत्यत्रावाहनादौ येन केन चित्पर्यायेण देवताभिधानसिद्धेर्विधिगताग्न्यादिशब्दानादर इति पूर्वपक्षयित्वा आग्नेयो ऽष्टाकपाल इति विधिगतेनाग्निशब्देन देवताया हविःसम्बन्धविधानात् मन्त्रकार्ये देवतोद्देशे विधिगतस्यैव शब्दस्योच्चारणं कार्यमिति सिद्धान्तिते का पुनरियं देवतानामिति पृष्ट्वेन्द्रादीनां द्युस्थानां यः वा वेदे ऽग्निर्देवता वा ऽतो देवतेत्यादिर्देवताशब्दः प्रयुक्तः सा देवतेति परमतद्वयमहःशार्दूलादीनामनुपसंग्रहापत्तेर्निरस्य स्वमतेः सूक्तभाजो हविर्भाजश्च देवता इति भाष्येणाग्निदैवत्यं सूक्तमग्निदैवत्यं हविरित्यादिप्रयोगादाहुतिभाजो वा अन्या देवता अन्या स्तोमभाजः छन्दोभाजश्चेति लिङ्गाच्च सूक्तस्तुत्यत्वस्य त्यज्यमानहविरुद्देश्यत्वस्य च देवतात्वाभिधानादर्थस्यैव स्तुत्यत्वोद्देश्यत्वावगतेः मूर्त्तानाममूर्त्तानां चेतनानामचेतानानां च श्रुत्या कं चिदर्थं प्रति तादर्थ्येन सङ्कल्पनीयानां देवतात्वं भविष्यतीति च भाष्येर मूर्त्तानां चेतनानां देवतात्वाभिधानाद्यस्य वाचकं शब्दमुद्दिश्य स्मृत्वा वा हविस्त्यक्ष्यामीति सङ्कल्पः क्रियते सा भवतीति च भाष्येणोच्चारणार्थत्वाद्दिशेरुच्चार्यमाणेन शब्देन प्रजापतिं मनसा यजेतेत्यादिविधौ वा स्मर्यमाणेन वाच्यस्य देवतात्वाभिधानात् नन्वेवं सति सुतरां च येन केन चिदग्निशब्देन निर्देशः करणीय इति वाशङ्क्य भवेदेवं यद्यग्निशब्दो ऽग्निप्रत्यायनार्थमुच्चार्येतापि हविः सम्बद्धार्थं प्रत्याय्येतेत्युपक्रम्य देवतायाश्च यज्ञसाधनभावेरूपेण भवति केन तर्हि सम्बन्धिना शब्देनेत्यादिना भाष्येण शब्दसम्बन्धितद्व्यतिरिक्ताभिधानाच्छब्दस्य देवतात्वं निरस्तं भवति । नन्वर्थस्यापि देवतात्वे कथमैक्यनिश्चयो ऽत आह * ततश्चेति * प्रमाणविरोधाख्यदोषपरिहाराशङ्कामुपसंहरति * तस्मादिति *

न श्रुतिसमवायित्वात् ॥ १६ ॥

नञर्थव्याख्यानार्थं नैतदितिभाष्यं व्याचष्टे * नेति * इ
ऽस्येत्यादिभाष्यं तद्धितश्रुत्याश्च कर्मणादिवदवयवार्थानपेक्षस्य :
न्द्रस्य ग्रहसमवायेनेन्द्राद्भेदावगमादित्येवं श्रुतिसमवायित्वा
सूत्रावयवव्याख्यानार्थतया परमतेन दूषयितुं प्रश्नपूर्वं व्याख्या
पक्रमते * कुत इति * श्लोकं व्याचष्टे * यदीति * नन्व
वार्थप्रत्यभिज्ञानात्समुदायशक्तिकल्पनानुपपत्तेः कथं तद्बलीयस
मित्याशङ्क्याह * तथा हीति * ततो वाक्यभेदादिः स्यात् तच्च
ष्यतीत्यर्थः । आदिशब्देनासमर्थतद्धितसामासापत्तिरुत्तरपदवृत्ति
युक्तिर्महत्वस्येन्द्रविशेषणत्वानुपपत्तिश्चोक्ता अनेन च म
विशिष्ट इत्यन्तं भाष्यं तात्पर्यतो व्याख्यातं महेन्द्रशब्द
इत्युत्तरार्द्धेनावयवव्युत्पत्तिनिरासे भाष्यं योजयितुमुपक्रमते
न चेति * व्युत्पत्तिशब्देनेन्द्रो महत्वविशिष्टो ऽस्येत्यध्या
रेण पूर्वावयवव्याख्या सूचिता कथमनेन भाष्येणावयवव्युत्प
निराक्रियेत्यपेक्षायां प्रश्नपूर्वकमुपक्रमते * कथमिति * श्ल
व्याचष्टे * समर्थ इति * समर्थः पदविधिरिति सूत्रात्समासवृ
सामर्थ्यं विशेषणं समर्थानां प्रथमाद्वेत्यस्मात्तद्धिते ऽपीत्यर्थः। कथ
सामर्थ्याभाव इत्यपेक्षायां तद्धितसमासवृत्ती युगपत्स्यातां क्र
वेति विकल्प्य यौगपद्यपक्षे वृत्तिद्वये ऽपि सामर्थ्याभावप्रतिपादन
न चास्येति भाष्यं व्याख्यातुं सामर्थ्याभावं प्रति जानीते * र
चेति * एतदुपपादनार्थत्वेन प्रश्नपूर्वं भाष्यं व्याचष्टे * कुत इति
उत्तरार्द्धेन तद्धितसंयोगापेक्षस्य वा या महत्वसम्बन्धात्समासकल
सा नोपपद्यतइति नञानुषङ्गेणोत्तरावयवो व्याख्यातः । ननु
मर्थ्याभावं प्रतिज्ञाय सम्बन्धाभावोपपादनमसम्बद्धमित्याशङ्क्य
७।२ * एकार्थीभावेति * समित्युपसर्गस्यैकीभाववाचित्वादैकार्थ्यं
त्कारणं चार्थान्तरानपेक्षत्वं सामर्थ्यं तदेव भाष्यकृतः शब्दसम्ब
हेतुत्वात्सम्बन्धशब्देनाभिप्रेतमित्याशयः। सापेक्षत्वस्यैकार्थ्यलक्षण
मर्थ्यविहन्तृत्वं तावत्प्रश्नपूर्वकमुपपादयति * कथमिति * श्ल
व्याचष्टे * अविक्षिप्यमाणौ हीति * विशेषणविशेष्यभूतयोरर्थ
रेकस्मिन्विशिष्टरूपे ऽर्थे लोलीभावात् प्रधानचलनाद्व्यापारात्स
सवृत्तिस्तद्धितवृत्तिर्वा भवति । विविधं च क्षिप्यमाणयोरन्यत्र व्य
प्रियमाणयोरर्थयोस्तात्पर्यनानात्वनिमित्तात् बुद्धेः सन्दिग्धत्वरू
त्कालुष्यात् दुष्टयोर्नैकस्मिन्नर्थे व्यापारः सम्भवतीत्यर्थः । ननु ता

नात्वोपपत्तेः कथं सन्दिग्धत्वरूपकालुष्यापत्तिरित्याशङ्क्य स-
च्चरितस्यानेकतात्पर्यायोगं लोकप्रसिद्धमुदाहरति * यो हीति *
सकृदुच्चरितस्येन्द्रशब्दस्यानेकतात्पर्यायोगात् किं विशेषणेन
येनान्वयो ऽस्तु विशेष्येण वा तद्धितार्थेन ग्रहेणेति सन्देहापत्ते-
र्थ्यलक्षणां सामर्थ्यं भवतीत्युपसंहरति *इत्येवमिति * व्यपेक्षा-
ासामर्थ्यविहन्तृत्वं तु सापेक्षस्यातिस्पष्टमित्याह * व्यपेक्षा
ेति * श्लोकं व्याचष्टे * न हीति * व्याख्यातं भाष्यार्थमुप-
ाति * इतीति * पूर्वोत्तरभाष्ययोर्विषयविवेकार्थं पूर्वभाष्यस्य
वृत्तिद्वयनिरासपरत्वमाह * एवं तावदिति * दोषः समर्थ-
तस्य समासापत्तिरूपः । न चेत्युत्तरभाष्यं क्रमेण वृत्तिद्वयनि-
रतयार्थतो व्याचष्टे * क्रमेणेति * वक्ष्यमाणाद्वैरूप्यलक्षणा-
ार्थविधिलक्षणाच्च वाक्यभेदाद्विवेकायावृत्तिलक्षणवाक्यभेदा-
ानार्थत्वमस्य भाष्यस्य वक्तुम् * असकृदित्युक्तम् * असकृच्छ्
विवृणोति * कृत्वेति * महांश्चासाविन्द्रश्चेति विग्रहे महेन्द्र
समासं कृत्वा तद्धितान्वये क्रियमाणे महानिन्द्रो ऽस्य देवतेति
यानार्थं महदिन्द्रशब्दयोरावृत्तिप्रसङ्ग इत्यर्थः । समासशब्देन
तस्याप्युपलक्षणादिन्द्रो ऽस्य देवतेति विग्रहे ऐन्द्र इति तद्धि-
त्वं कृत्वा समासे क्रियमाणे महांश्चासावैन्द्रश्चेति व्याख्यानार्थे-
तिपादिकतद्धितयोरावृत्तिः स्यादिति सूचितम् । ननु न वा-
दो ऽस्माद्भाष्यात्सम्प्रतीयतइत्याशङ्क्याह * एतदेवेति * क्र-
ृत्तिद्वयनिरासस्य हेत्वाकाङ्क्षायां योग्यत्वाद्वाक्यभेदो हेतुत्वेन
कृतो ऽभिप्रेतो ऽवसीयतइत्याशयः । तद्धितपूर्वत्वे ऽन्यदपि
ंयं भाष्यकृतो ऽभिप्रेतमित्याह * तद्धितेति * श्लोकं व्याचष्टे
न्द्र इति* वाक्यभेदमात्राभिधानं तर्हि कथमित्याशङ्क्याह * न
* समासपूर्वत्वे तदेवैकं दूषणमित्याशयः । कृत्वासमास-
समासशब्देनाप्येतदेव सूचितम् । एतस्मिश्चेवेति युगपद् वृ-
ाशङ्काभाष्यं यौगपद्यपक्षस्य प्रागेव निरस्तत्वाद्दोषान्तराभि-
या वा पुनरुपन्यासे क्रमवृत्तिनिरासव्यवधानादयुक्तमाशङ्क्य
ष्टे * तेनेति * तद्धितसमासवृत्त्योः कापूर्वत्यानिश्चयेन क्रमा-
यौगपद्यमेव वृत्तिद्वयवादिना वाच्यम् । क्रमस्त्वनादरणी-
एवेति सूचनार्थं क्रमनिरासोत्तरकालं पुनर्यौगपद्यस्यो-
तपूर्वकं निरास इति प्रतिपादयितुं व्यपादर्शितम् । न चायमिति
क्षणदोषाभिधानार्थं भाष्यं व्याचष्टे * ऐकशब्द्य इति * ३०,
प्रतीन्द्रशब्दस्यानुवाद्योद्देश्यप्रधानभूतार्थवाचित्वात्तद्धितार्थं

च प्रति विधेयोपादेयगुणभूतार्थवाचित्वाद्वैरूप्यं विस्पष्टश्चेत्यने
विधिदोषाभिधानार्थं भाष्यं व्याचष्टे * विधीति * एकवि
चेतरानाक्षेपात्प्रत्ययावृत्तिरप्यनेकार्थे विधौ स्यादित्येवमर्थत्वे
कृदुच्चारणे चेति भाष्यं व्याचष्टे * तथा हीति * तस्मादित्य
व्युत्पत्तिनिरासोपसंहारभाष्यमकारप्रश्लेषेणाध्याहृतशुद्धं कथं
शब्दकवाक्यभेदेन वा स्वमतेन व्याख्यास्यमानत्वात्परमते ऽपि
ङ्का प्रसज्यमानां निराकर्त्तुं यथास्थितं पठति *तस्मादिति* नन
व्युत्पत्त्यनभ्युपगमे समासत्वाभावादर्थान्तरे चागृहीतसम्बन्ध
र्थवत्त्वायोगात्प्रातिपदिकत्वाभावेन तद्धितानुत्पत्तिः स्यादित्या
ध्येतृप्रयुक्ततद्धितान्यथानुपपत्त्यैव प्रातिपदिकत्वं कल्पयित्व
सिद्ध्यर्थं समासार्थयोगेनावयवार्थवत्त्वसम्बन्धग्रहणाभावेनार्थ
षानवधारणे ऽपि कश्चिन्महेन्द्रप्रातिपदिकस्यार्थो ऽस्तीति
न्यतः कल्पयिष्यतइत्यभिधानार्थं महेन्द्रशब्दादित्यादिभाष्यं
चष्टे * किं तर्हीति * व्युत्पत्तिनिरासप्रयोजनाभिधानार्थं तस
तिभाष्यं व्याचष्टे * ततश्चेति * नन्विन्द्रस्य वृत्रवधोत्तरका
हत्त्वयोगेन यन्महानिन्द्रो ऽभवत्तन्माहेन्द्रस्य महेन्द्रत्वमिति म
शब्दवाच्यत्वश्रुतेः समुदायशक्तिकल्पना न युक्तेत्याशङ्कानिर
यदपीत्यादिभाष्यं व्याचष्टे * न चेति * रूढित्वोपपादनार्थत
भाष्यस्य दर्शयितुम् * अत इत्युक्तम् *

व्यपदेशाच्चेति[1] ॥ १७ ॥

सूत्रोक्तेनेन्द्रमहेन्द्रयोर्भेदापदेशेन हेतुना श्रुतिसमवायिन
साध्याया महेन्द्रस्याशुणार्थं शुद्धेन्द्रप्रकाशनार्थमभिधानं न स
तीति प्रतिज्ञायाः साधयितुमशक्यत्वाद्देवताभेदप्रतिज्ञां पूर्वहेतोर
रसाध्यत्वेन विवक्षितामस्मिन्हेतावध्याहारेण योजयितुमाह
पदेशेति* विशब्दव्याख्यानार्थम्*भेदादित्युक्तम् * कथं व्यप
देवताभेदहेतुतेत्यपेक्षायामाह*एवमिति *समुदायस्तवदृष्टार्थत
रयुक्त इत्याह * असति चेति * देवताभेदोपपादनस्य प्र
योगमनुसन्धत्ते * तस्मादिति * एतद्व्याख्यानमतिप्रसङ्गाप
तावद् दूषयति * एवमिति * तद्धिते सति समासपदस्
कारेण रूढित्वे व्याख्यायमाने सर्वेषामग्नीषोमीयादीशब्दानां
त्वापत्तेर्द्विर्देवताभिधायित्वं न स्यादित्यर्थः । एवं शब्दार्थे प्र
नू श्लोकं व्याचष्टे * यथैव हीति * द्वन्द्वसमासस्येतरेतरय

---

१ व्यपदेशभेदाच्चेतिक्व चित् पुस्तके पा० ।

वादग्नेरपि सोमसापेक्षत्वे द्वयोश्च तद्धितान्वयाविशेषे ऽप्युप-
णार्थं सोमस्याग्निसापेक्षत्वे तद्धितानन्वयाभिधानम् । सोमपद-
ग्निनाग्निपदस्य वा सोमेन तुल्यकक्ष्यार्थत्वात्तद्धितार्थे च प्रति
ोषणीभूतार्थत्वाद्वैरूप्यं सोमपदोक्तिरूपलक्षणार्था । नन्वग्नीषोमा-
ाब्दानां न्यायेन रूढित्वावसायाद्याज्ञिकव्यवहारस्य भ्रान्तित्वेनो-
ो न दोषायेत्याशङ्क्याह * न चेति * न केवलं याज्ञिकानां ३९
वत्यत्वव्यवहारः किं तु मिमांसकानामपीत्यर्थः तार्त्तीयांस्तावत्
वत्यव्यवहारानुदाहरति * तद्यथेति * आग्नेयं चतुर्द्धा करो-
नेयशब्देन सापेक्षाग्निदेवत्ययोरैन्द्राग्नाग्नीषोमीययोः पुरोडाश-
ग्रहणं व्यवस्था वार्थसंयोगाल्लिङ्गस्यार्थेन सम्बन्धाल्लक्षणार्था
श्रुतिरिति चतुर्द्धाकरणविचारतृतीयप्रथमे सिद्धान्तसूत्रे वक्ष्य-
एकस्मिन्वा देवतान्तराद्विभागवदितीन्द्रपीतविचारसिद्धान्तसूत्रे
्पीतसमासस्थेनेन्द्रशब्देन सापेक्षेन्द्रदेवत्यस्यैन्द्राग्नादेः सोम-
ाहणं वक्ष्यति । एकस्मिन्नेकसंयोगादिति पूषाप्रपिष्टभागविचा-
पूषशब्देन सापेक्षपूषदेवत्यस्यैन्द्रापौष्णादेश्चरोग्रहणं वक्ष्यती-
ः। रूढित्वे चैकदेवतात्वापत्तेः सापेक्षत्वं न युज्येतेत्याह * रूढि-
हीति * आष्टमिकं द्विदेवत्यव्यवहारमुदाहरति * तथेति *
र्थाद्वा नियम्येत पूर्ववत्वाद्विकारो हीति सूत्रे द्विदेवत्यानां
पौर्णमासिकद्विदेवत्ययागप्रकृतिकत्वं वक्ष्यतइत्यर्थः । नावमिक-
हरति * तथेति * आशासानामेधपतिभ्यो मेधमित्यध्रिगुप्रैष-
ेधपतिशब्दे देवता तु तदाशब्दात्सम्प्राप्तत्वात्स्वामिन्यनर्थिका
इति सूत्रे मेधशब्दव्याच्यस्य पशोः स्वामिन्यस्य सम्बन्धस्य
त्वेनाशासानानर्थक्यापत्तेर्देवतैव मेधपतिरिति मेधपतित्वं स्वामि-
यस्योत्पाद्यसूत्रगतमेधपतित्वशब्दस्य स्वामिनो वेत्यनन्तरसूत्रे
ाक्तस्य लुप्तभावप्रत्ययस्यानुषङ्गेण द्विवचनान्तमेधपतिव्याच्यम-
ोमाख्यदेवतारूपमर्थद्वयमाश्रयिष्यतइत्यर्थः । दाशमिकमुदाह-
* तथेति * मनोतायां तु वचनादविकारः स्यादित्यत्र त्वं ह्य-
ाथमो मनोतेति मनोताख्यो मन्त्रो ऽन्यदेवत्यपशावूहितव्यो न
सन्देहमुपन्यस्य ननु प्रकृतावन्यार्थो ऽयं निगदो यदग्नीषोमौ
ाकृतौ देवता ऽयं वाग्नेयो ऽर्थतो सम्भवेनाभिधायित्वादविकारेण
क्तव्य इत्याशङ्क्ते सत्यग्नीषोमौ देवताप्रकृतावित्युक्त्वा यौ तु
ग्नीषोमाविति भाष्यकृद्वक्ष्यति व्याकरणशास्त्रे ऽपि द्विदेवत्य-
व्यवहारो ऽस्तीत्याह * तथेति * देवता द्वन्द्वे चेत्यधिकृत्येदग्नेः

१ स्वामिन्यं वार्थकामः स्वादिति ।

सोमवरुणयोरिति सोमशब्दे वरुणशब्दे च परभूते ऽग्निशब्दस्य
ताद्वन्द्वनिमित्तमीत्वं स्मृतं मूर्द्धन्याधिकारे चाग्नेः स्तुत्स्तोमस
इत्यत्राग्निशब्दात्परस्य सोमशब्दस्य मूर्द्धन्यादेशेन षत्वस्मृतेः।
मशब्दस्याग्निशब्दाद्भेदावगमादर्थाद्देवताद्वन्द्वावगतिरादिशब्दात
वेपदप्रकृतिस्वराधिकारे उभे वनस्पत्यादिषु युगपदित्यनुवर्त्त
देवता द्वन्द्वे चेत्यनेनेन्द्रासोमाविन्द्रावरुणावित्यादिषूभयपदप्र
स्वरत्वं वृद्ध्यधिकारे च हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्यनुवर्त्त
देवता द्वन्द्वे चेत्याग्नावैष्णवादिशब्दे उभयपदवृद्धिः आनङृत
न्द्वइति चानुवर्त्तमाने देवताद्वन्द्वे चेत्यानङादेशः।ननु व्याकरणस
तात्पर्याभावान्न ततो द्विदेवत्यत्वावधारणं भवतीत्याशङ्क्याह
यदि चेति * तद्धितोच्चारणे देवतात्वप्रतीतेस्तदभ्युपगमे द्वित
प्रतीत्यविशेषादभ्युपगन्तव्यमित्याह * अथेति * ननु वाक्य
दिदोषापत्तेः समासस्यार्थरहितस्यान्वाख्यानात्समासकार्यस्व
क्षणशब्दसंस्कारमात्रसिद्ध्यर्थं तद्धितान्तेषु शब्देषु द्वन्द्वस्मृतेः
माण्यं कल्प्यते न द्विदेवत्यत्वसिद्ध्यर्थमित्याशङ्क्याह * एतेनो
एतेनार्थद्वयावगमेन हेतुना स्वरसंस्कारमात्रसिद्ध्यर्थत्वकल्प
युक्तेत्यर्थः। अश्वकर्णादिवैषम्यमुपपादयति * तथा हीति
न्विन्द्रे ऽपि महत्वगुणयोगस्य प्रमाणान्तरेणासंवादान्महेन्
ऽपि समासान्वाख्यानं स्वरसंस्कारमात्रार्थं स्यादित्याशङ्क्याह
दिति * महाब्राह्मण इत्यादौ महच्छब्दस्य पूज्यत्वाख्यगुणवाचि
वगमादिन्द्रशब्दस्य च स्तवनीयसूक्तादिना देवताविशेषवाचि
गमादवयवयोरर्थवत्त्वं विशेषणविशेष्यरूपार्थवाचित्वं च तावत
मेवेत्यर्थः। नन्वेवमपीन्द्रे महत्वगुणयोगे प्रमाणाभावाद्विशिष्ट
ता महेन्द्रशब्दस्य न युक्तेत्याशङ्क्याह * तत्रेति * निर्दोषकल
यवार्थशब्दप्रयोगान्यथानुपपत्तिरेवेन्द्रमहत्वगुणयोगे प्रमाणमि
शयः। न चाश्वकर्णादिवद्योग्यानुपलब्धिर्विशिष्टार्थबुद्धेर्बाधिक
स्तीत्याह * न चेति * ननु समुदायप्रसिद्धिरेवावयवप्रसिद्धेः
का भविष्यतीत्याशङ्क्याह * न चेति * समुदायशक्तिकल्पना
रवयवार्थाभावस्यानिश्चयात्समुदायप्रसिद्धेरात्मलाभानुपपत्तेर्वा
त्वं न सम्भवतीत्यर्थः। नन्ववयवार्थाभावानिश्चये ऽपि स
स्याप्यनिश्चयात् समुदायप्रसिद्ध्यात्मलाभो भविष्यतीत्याशङ्क्
००|२ न चेति * अन्यथानुपपत्तिलभ्यत्वाच्छक्तेरवयवार्थाभावानि
ऽन्यथानुपपत्तेरनिश्चयान्न शक्तिकल्पना शक्येत्याशयः। अ
शापत्तेरपि शक्त्यन्तरकल्पना न युक्तेत्याह * किं चेति *

ष्टे * प्रत्यक्षे ऽपीति * परव्याख्यादूषणमुपसंहरति * तस्मा-
* ननु क्रमेण युगपद्वा वृत्तिद्वययोगादवयवव्युत्पत्तिर्न सम्भव-
क्रमत आह * न चेति* क्रमवृत्तावसामर्थ्यं परेणानुक्तमपि त-
पूर्वत्वे वस्तुतो ऽसामर्थ्यात्समासपूर्वत्वे ऽप्यसामर्थ्यशङ्कापत्ते-
रासार्थं निरस्तं समासवेलायामिन्द्रशब्दस्य तद्धितापेक्षत्वे ऽपि
न्यात् सामर्थ्याविघातः तद्धितवेलायां च समासार्थेनैव तद्धिता-
त्तद्व्यतिरिक्तस्याचार्थस्यापेक्षणीयस्यानुपादानान्नासामर्थ्यापत्ति-
र्थः। यस्त्वस्मिन्पक्षे महदिन्द्रशब्दयोरुच्चारणावृत्त्यापत्तेर्वाक्य-
उक्तस्तन्निरस्यति * न चेति * एकार्थशब्दस्य सकृदुच्चरित-
कार्थत्वायोगादनेकार्थतायामुच्चारणावृत्तिः स्यात् माहेन्द्रपदेन
नैवोपात्तानामनेकेषामर्थानामसकृदुच्चरितैः लौकिकैः शब्दैः
ऽपि न वैदिकशब्दावृत्त्यापत्तिरित्यर्थः। कथं माहेन्द्रपदेनानेका-
दानमित्याशङ्क्याह * वृत्तीति * नन्वेवमपि पदस्य पदार्थमा-
चित्वात् महत्वेन्द्रविशेषणविशेष्यभावद्रव्यदेवतान्वयरूपानेक-
ार्थकथनमुच्चारणावृत्तिं प्रयुञ्जीतेत्याशङ्क्याह * एकैका चेति *
च सकृदुच्चरितस्यापि माहेन्द्रशब्दस्य वाक्यद्वयेनार्थकथनं यु-
त्याह * तत्रेति * न च विवरणवाक्यगतोच्चारणावृत्त्या वेद-
ावृत्तिरित्याह * यच्चेति * अत्र हेतुमाह * न हीति * यथा
स्यैव वेदस्योच्चारणावृत्तिर्भवति नान्यरूपस्येत्याशयः। ननु समा-
कथनवेलायां महेन्द्र इत्येतावतः समासप्रातिपदिकस्य तद्धिता-
पृथक्करणात्तद्धितार्थकथनवेलायां च पुनस्तद्धितसहितप्र-
दुच्चारणावृत्तिः प्रसज्येतैवेत्याशङ्क्याह * न चेति * कथं वि-
विनार्थकथनमित्याकाङ्क्षायामाह * किं त्विति * आवृत्तिं
ऽनेकार्थाभिधानशक्तस्य पदस्याविभक्तस्याप्यनेकार्थकथनं पुं-
र्युक्तमित्याशयः। ननु विभागाभावे पदसमुदायात्मकवाक्य-
ावाद्वाक्यार्थाभिधायित्वं न युज्येतेत्याशङ्क्याह * विचित्रेति * ४०१
ावाक्यत्वे ऽपि वाक्यार्थाभिधायिता दृष्टत्वादविरुद्धेत्याशयः।
नेकार्थप्रतीतिवैचित्र्यमर्थकथनवैचित्र्येणोपपादयति * तथेति*
दाहरणान्याह * तद्यथेति * बहुतरपदेन वाक्येन पदार्थकथ-
हरणार्थं परगामिफलं पाकं निर्वर्त्तयत्येकः पाकं निर्वर्त्तयतीति
वयवीभूतं पाकं निर्वर्त्तयति वर्त्तमानकाले पाकं निर्वर्त्तयतीत्य-
न वाक्येन पदार्थकथनोदाहरणार्थम् * वा तथेत्युक्तम् * न
केन वाक्येन कथ्यमानार्थस्य पचत्यादिपदस्य वाक्यभेदो शा-
वा तदर्थस्य लोके प्रसिद्धमित्याह * न चेति * लौकिकवा-

कयन्यायं प्रकृते ऽतिदिशति * एवमेवेति * पौरुषेयत्वशब्देन
र्थतोक्ता । नन्वेवं सति यौगपद्यमेव कस्मान्नेष्टमित्याशङ्क्याह *
श्यश्चेति * क्रमवृत्तित्वाद्वाचो युगपदेनेकार्थकथनस्याशक्
वश्यं भावी क्रम इत्यर्थः । एवमपि समासपूर्वत्वे को हेतु
ङ्क्याह * सो ऽपि चेति * समासवृत्तेः प्रकृत्यर्थत्वात्तद्धि
प्रत्ययार्थत्वात्समासपूर्वतैवोचितेत्याशयः । सापेक्षत्वपरिहा
समासपूर्वतैवोचितेत्याह * न चेति * ननु महत्वविशिष्ट
तद्धितान्वयात्तद्धितवृत्ताविन्द्रस्य महत्वानपेक्षत्वे ऽपि सम
तद्धितापेक्षत्वात्समासो न युज्येतेत्याशङ्क्याह * अथ वेति *
सति यौगपद्ये तद्धितापेक्षत्वेनेन्द्रशब्दस्य महच्छब्दसमासानु
योक्ता साप्ययुक्तेत्याह * अतश्चेति * नन्वेवं सति क्रमवृ
द्वाचो युगपद्वृत्तिद्वयार्थकथनाशक्तावपि क्रियापदस्येवानेकै
कपदैर्वस्तुतो युगपत्तद्धितमहच्छब्दाभ्यामिन्द्रशब्दान्वयोपप
द्यते यौगपद्यं कस्मान्नेष्टमित्याशङ्क्याह * तथापीति * क्र
ऽप्ययमेव हेतुरित्याह * यौगपद्ये च गुणस्य देवतात्वा
स्यादित्याह * यदीति * ननु तद्धितार्थप्राधान्यात्तद्वशीकृतयोरि
त्वयोरन्योन्यनियमाद् गुणस्य देवतान्तर्गतिर्भविष्यतीत्याश
न चेति * क्रियाया युगपदनेककारकसाध्यत्वानियमवत्त्वं यु
तार्थस्य तु देवतात्वस्यैकेन नैराकाङ्क्ष्यान्नोभयनियामकत्वे हेतु
यः । युगपदुपनिपाते च सतीन्द्रवन्महत्वस्यापि साक्षाद्देवता
०२।१ ग्नीषोमादिवत् इन्द्रस्य देवतात्वं स्यादित्याह *
चेति * यौगपद्ये च समासस्याकृतावस्थत्वेन समासनि
निपादिकैक्याभावात् ङ्याप्प्रातिपदिकादिति चोपादेयत्वेन
क्षितैकसंख्यत्वात्तद्धितान्वयो न स्यादित्याह * अकृ
सुबन्तत्वे च महदिन्द्रशब्दयोरप्रत्यय इतिपर्युदासेनाप्रातिप
तद्धितान्वयायोगादसुबन्तत्वे च समासायोगाद्युगपच्च सु
सुबन्तत्वाविरोधात् वृत्तिद्वययौगपद्यं न युक्तमित्याह * किं
क्रमपक्षे समासकाले च सुबन्तत्वं तद्धितकाले चासुबन्तत
धसूचनार्थं न यौगपद्यवादिनः पक्ष इत्युक्तम् । यौगपद्यनिरास
रति * तस्मादिति * समासपूर्वत्वोपपादनस्य प्रकृतोप
* इतीति * अतो नैवं व्याख्यायमाने पूर्वपक्षनिरासः सिध
* अतश्चेति * स्वमतेन पूर्वपक्षनिरासे सूत्रं योजयति *
विधिगतशब्दाभिप्रायः श्रुतिशब्द इति भावः । श्लोकं व्याच
रूपीति * ऐक्ये ऽप्यैन्द्रमहेन्द्रयोर्विधिशब्दस्य मन्त्रत्वे भावः

चोदनेति दशमाधिकरणन्यायेनावाहनादिविषये निगमे मन्त्रका॰
विधिगतस्यैवशब्दस्योच्चारणावधारणात् महेन्द्रशब्दोक्तस्यैवार्थस्य दे
धतात्वप्रतीतेरैन्द्रमन्त्रोत्कर्षो ऽपरिहार्य इत्यर्थः । ननु दशमाधिक
रणे पर्यायभूतशब्दान्तरनिषेधे ऽपीन्द्रशब्दस्य महेन्द्रशब्दावयवत्व
न्नोत्कर्षापत्तिरित्याशङ्क्याह * तत्रेति * तेन चोदनेति दाशमिक
सूत्रावयवव्याख्यायै तदुपपादयति * तथा हीति * देवतायाः ॰
तिग्रहीतृत्वाभावेन रूपासमवायादुद्देश्यत्वमात्रेणोपकारित्वादुद्देश॰
च शब्दाधीनत्वात्केन शब्देनोद्देष्टव्या देवतेत्यपेक्षायां श्रुतशब्दत्या॰
नाश्रुतशब्दकल्पनायोगाद्विधिगतेनैवशब्देन देवतात्वचोदनावगते
शब्दान्तरवत् न्यूनशब्दोच्चारणे ऽपि देवतात्वप्रसिद्धिरित्यर्थ
यत्तु शब्दमात्रस्य देवतात्वाभावादर्थस्य गुणाद्युक्तावपि तत्त्वानपाय
न्यूनशब्दोच्चारणे ऽपि देवतात्वाविघात इत्युक्तं तन्निरासाय * ॰
र्थो ऽपीत्युक्तम् * महत्त्वविशिष्टस्येन्द्रस्येह देवतात्वविधानान्न ॰
द्रस्य देवतात्वमस्तीत्यर्थः । श्लोकं व्याचष्टे * देवतात्वस्येति * दे
तात्वस्य प्रमाणान्तराविषयत्वमविहितदेवताकल्पनाशङ्कानिरास
र्थेन नासति विधाने देवताभावात् सम्बन्धिशब्दो ऽयं देवतेत्यादि
पौर्णमास्यधिकरणभाष्येणोपपादयति * यथेति * श्लोकार्थमुप
हरति * तेनेति * नन्वग्निपुरोडाशयोरिन्द्रसोमाभ्यामत्यन्तभे॰
द्विहितार्थासम्पादकत्वे ऽपि निर्गुणस्य सगुणादत्यन्तभेदाभावा
हितार्थसम्पादकत्वं भविष्यतीत्याशङ्क्याभिष्टुतस्येत्युक्तम् ननु द्र॰
त्वेन विहितस्य रसस्य लतावस्थायामभावाल्लतायां विहितार्थास॰
दकत्वे ऽपि इन्द्रस्य शुद्धोक्तावपि वस्तुतो गुणवत्त्वसद्भावाद्वि
तार्थसम्पत्तिर्भविष्यतीत्याशङ्क्य *शुद्धे चेत्युक्तम् * वस्तुवृत्ति॰
क्षायामैन्द्रदध्यमावास्यायामिति शुद्धेन्द्रविधावपि वस्तुतो गु॰
त्वसद्भावात् सगुणस्य देवतात्वप्रसक्तेः शब्दाभिधानेन देवत
वाच्यम् । न च शुद्धाभिधानेन गुणवत्त्वोक्तिर्भविष्यतीत्याशयः।
गुणस्य गुण्युपलक्षणमात्रार्थत्वेन देवतात्वान्तर्गत्यभावात्कथं ॰
वद्विधौ निर्गुणस्य देवतात्वाभाव इत्याशङ्कां प्रश्नपूर्वं निरस्यति *
इति * श्लोकं व्याचष्टे * यदि हीति * ननु गुणस्य देवता
न्तर्गतौ स्वरूपेणापि देवताया यागसमवाये निर्गुणाभिधानो॰
सिद्धे व्यर्थं श्रुतिसमवायाभिधानमित्याशङ्क्याह * तदिहेति *
तिशयार्थं श्रुतिसमवायाभिधानमित्याशयः । नन्वेवं सति म
न्द्ररूपानेकार्थविधानाद्वाक्यभेदः स्यादित्याशङ्क्याह * सम
ति *विशिष्टरूपैकार्थविधानान्न वाक्यभेद इत्याशयः । शुद्धदेव॰

निरासस्य प्रकृतेन्द्रप्रगाथोत्कर्षोपयोगमाह * तत्रेति * शुद्धे
वतात्वनिरासे ऽपि विधिश्रुत्या सम्यगवापो ऽवगमो यस्य देव
स्य तच्छ्रुतिसमवायि तस्य भावः श्रुतिसमवायित्वमित्ये
योजयति * अतश्चेति * ननु देवतात्वस्य विधिश्रुत्यधीनज्ञान
द्धितसंयोगेन विज्ञायेतेति भाष्यमयुक्तं स्यादित्याशङ्क्याह *
ति * उपधानार्थस्य चरोर्बार्हस्पत्यो भवतीति तद्धितसंयोगे
विधानेन देवतात्वानभ्युपगमाद्विध्यधीनमेव देवतात्वं विधे
पकत्वेन तु तद्धितो भाष्यकृतोक्त इत्याशयः । अतो ऽधिष्ठा
ऽपि देवतारूपं भिन्नमित्युपसंहरति * तस्मादिति * असि
र्थे प्रश्नपूर्वं भाष्यं गमयितुमुपक्रमते *कथं त्विति* तत्रेन्द्रो
भाष्यं शुद्धेन्द्रदेवतानिरासार्थत्वेन व्याख्यास्यन् पूर्वपक्षिणा
द्धस्य देवतात्वानभ्युपगमादयुक्तमाशङ्क्यापाद्योक्तित्वेन व
* पूर्वपक्षेति * ननु वशादृष्टान्तात् सगुणो चोदित इति भा
सगुणदेवतात्वस्यापूर्वपक्ष्यभिमतत्वप्रतीतेः । कथं शुद्धेन्द्रदेव
४०४।७ पूर्वपक्ष्यभिमतत्वापादनमित्याशङ्क्याह * सिद्धवच्चेति *
षो ऽर्थो वस्तुतः पूर्वपक्षिणो ऽनभिमतस्तथाप्यन्यथानुत्कर्षा
नुपपत्तिकमपि सिद्धवदभिप्रेतं मन्वानः सिद्धान्ती इन्द्रो ऽस्य
देवतेति ब्रवीतीत्युक्ते तु[1] सिद्धान्ते ऽपीन्द्रस्यैव महत्वविशिष्टस
तात्वादिन्द्रस्य देवतात्वनिरासो न युक्त इत्याशङ्क्य *निष्कृ
म् * महत्वान्निष्कृष्य शुद्धस्येन्द्रस्य देवतात्वमापाद्य निरस्
र्थः। यत्रेति वार्थवत्त्वादित्यत्रोत्कर्षस्य पूर्वपक्षिणाभ्युपेष्यमाण
र्वपक्ष्येकदेशी पूर्वपक्षिवादिशब्देनोक्तः (स्वयं वानुत्कर्षे ऽप्यर्थ
दिशब्देनोक्तः[2]) स्वयं वानुत्कर्षे ऽप्यर्थवत्त्वाभिधानार्थतया तस्य
व्याख्यास्यमानत्वात्पूर्वपक्षिणो ऽनुत्कर्षो ऽभिमतः । न
भाष्यमपि शुद्धपदाध्याहारेण व्याचष्टे * न चेति * वृत्तिद्व
पद्यनिरासार्थत्वप्रदर्शनाय * अकृतइत्युक्तम् * प्रधानस्य स
ऽपि समासतद्धितसंयोगोपपत्तेरुपसर्जनीभूतस्येत्युक्तं तद्धितो
प्रधानसापेक्षत्वे समासाविघातादयुक्तमाशङ्क्यासुबन्तत्वानि
मासासम्भवाभिप्रायेण व्याचष्टे * तद्धितेति * कस्तर्हि प्र
पेक्षसमासान्वाख्यानस्य विषय इत्याशङ्क्याह * तेनेति * न
न्तत्वात् समासायोगे ऽप्यसमस्तयोरेव महदिन्द्रशब्दयोस्तद्धि
यो भविष्यतीत्याशङ्क्याह * अकृते चेति * यदि त्वेतद्दोषप

---

१ तुशब्दस्थाने नास्ति प० ।

२ अयं पा० २ पु० ना० ।

येन्द्रप्रातिपदिकमात्रस्य तद्धितान्वयोऽभ्युपगम्यते ततो गुणस्य दे-
वतात्वानन्तर्गतेर्महच्छब्दानर्थक्यं तद्धितप्रकृतौ च प्रातिपदिके म-
हच्छब्दस्य विशेषणस्यानन्तर्गतेः पूर्वपदवृत्तिर्न स्यादित्याह * शुद्धस्य
चेति * न चेति भाष्यं यौगपद्ये दोषान्तराणां वक्ष्यमाणत्वान्मध्ये
क्रमानिरासानौचित्येनायुक्तमाशङ्क्य परानभिप्रेतत्वाभिधानार्थत्वेन
व्याचष्टे * क्रमेति * क्रमवृत्तौ महत्वविशिष्टस्येन्द्रस्य देवतात्वाप-
त्तेरित्याशयः । ननु तद्धितपूर्वत्वे विशिष्टस्य देवतात्वानापत्तेः कि-
मित्यनभिप्रेतत्वमित्याशङ्क्याह * पूर्वमिति * समासपूर्वत्वस्य स्वा-
भिमतत्वान्निरासो न युक्त इत्याशङ्क्य ननु समासपूर्वत्वेऽपि प्रा-
धान्येनेन्द्रस्य शुद्धस्यैव तद्धितान्वयाद्देवतात्वं भविष्यतीत्याशङ्कोत्तर-
त्वेन शुद्धपदाध्याहारेण व्याचष्टे * न चेति * समासान्तर्गतस्ये-
न्द्रस्य पृथक् प्रातिपदिकत्वाभावात्तद्धितान्वयो न युक्त इत्याशयः
एतस्मिन्नेवेति यौगपद्याशङ्काभाष्यं प्रागेव यौगपद्यनिरासादयुक्तमा-
शङ्क्य क्रमवृत्तौ निरस्तायां पारिशेष्यान्निरस्तमपि यौगपद्यमेव क्रमवि-
शेषानवधारणेनौचित्यादापाद्यतइत्येवमर्थत्वेन व्याचष्टे * तेनेति *
न चेति वैरूप्याभिधानार्थं भाष्यं व्याचष्टे * ततश्चे-
ति * विस्पष्टश्चेत्यनेकार्थविधिदोषाभिधानार्थं भाष्यं समासार्थस्य-
कस्य देवतात्वविधावनेकार्थविध्यनापत्तेरयुक्तमाशङ्क्याकृतसमासाव-
स्थाविषयत्वेन व्याचष्टे * विस्पष्टश्चेति प्राक्समासाद्वाक्यभेदमाहे-
त्यन्वयः । तस्मादित्युपसंहारभाष्यं स्वाभिप्रेतार्थानुगुणत्वायाकारप्र-
श्लेषेणाध्याहृतशुद्ध कथं तर्हि शब्दकभिन्नवाक्यत्वेन वा द्वेधा व्या-
चष्टे * तस्मादिति * महेन्द्रेति भाष्यं विशिष्टदेवतात्वोपपादनार्थ-
त्वेन व्याचष्टे*समासेति* न तु केवलादिन्द्रशब्दादित्येवं भाष्यगत-
स्तुशब्दो व्याख्येयः । ननु सकलान्महेन्द्रशब्दात्तद्धितोत्पत्तिर्न त्वि-
न्द्रशब्दमात्रादिति कथमवगम्यते इत्याशङ्क्य यस्मात्सकलान्महेन्द्र
शब्दात्तद्धितोत्पत्तिस्तस्मात्सकलं प्रतिपादिकमर्थवन्न त्ववयवस्ये-
न्द्रशब्दमात्रस्य तद्धितसम्बन्धेन सकलं प्रातिपदिकमर्थवन्महच्छ
ब्दानर्थक्यापत्तेर्निष्कर्षाशक्तेश्चावयवस्य तद्धितसम्बन्धायोगादित्य
भिधानार्थं तस्मादिति भाष्यं परोक्तावयवव्युत्पत्तिनिराकरणार्थनि
रासपूर्वकं व्याचष्टे * न त्विति * शुद्धेन्द्रदेवतात्वनिरासप्रयोज
नाभिधानार्थं तस्मादितिभाष्यम् इन्द्रस्यैव महत्ववैशिष्ट्येन महेन्द्रदे
वतात्वादयुक्तमाशङ्क्य व्याचष्टे * तस्मादिति * अधिष्ठानैक्येऽ
व्यपदेशभेदसम्भवे वृद्धोक्तं दृष्टान्तमुदाहरत्याह * चेति * आच
र्यशब्दार्थस्य शिष्यमेव प्रतिसद्भावेन शिष्यापेक्षत्वादपेक्षणीयाभा

वा ऽपेक्षानुपपत्तेरपेक्षणीयः शिष्यः प्रतिसम्बन्ध्याचार्यस्य शि
क्षायां हेतुः मातुलस्य च भागिनेयापेक्षायां भागिनेयो हेतुः त
द्रव्यैक्ये ऽपि पृथक्त्वेन व्यवहारो दृश्यतइति वृद्धश्लोकार्थः ।
पीति शङ्काभाष्यं पूर्वपक्षिणः कदा चिदपि महत्वस्य देवता
र्गतेन्द्रनिष्ठत्वेन वृत्रवधोत्तरकालत्वाभिधानानर्थक्यादयुक्तमा
नन्तर्गत्याभिधानार्थत्वेन व्याचष्टे * यद्पीति * तथेत्युक्त
प्रागेव व्याख्यातमित्याह * अस्य त्विति * ननु महत्वस्य
त्वान्तर्गतौ शुद्धेन्द्रदेवत्यप्रगाथस्य तत्प्रकाशनासामर्थ्येन दे
ऽप्युत्कर्षसिद्धेर्भेदाभिधाने व्यर्थमित्याशङ्क्य भेदाभावे छागम
वशाजाद्र्व्यकादिन्द्रमन्त्रस्य महेन्द्रदेवताकात्कर्मणः कथं चि
शकत्वसम्भवेनोत्कर्षासिद्धेस्तत्सिद्ध्यर्थं प्रयत्नेन देवताभेदा
मिति सूचयितुं देवताभेदेन कथं चिदनुत्कर्षः सिद्ध्यतीति व
* स्थिते चेति * अनुत्कर्षवादिना हि शुद्धस्येन्द्रस्य यत्प्रका
द्देवताया एव प्रकाशनं शुद्धस्यैव देवतात्वाद्विशिष्टस्यापि दे
शुद्धेनेन्द्रशब्देन छागशब्देनेव वशात्वविशिष्टस्य द्रव्यस्य विशे
काशने ऽपि स्वरूपेण प्रकाशनं विशिष्टस्यापि वा तद्धितान्व
विशेषणस्यानन्वयाच्छुद्धस्यैव देवतात्वं शुद्धेन्द्रशब्दोच्चार
वा प्रगाथगतेन मनोतागतेनैवाग्निशब्देनाग्नीषोमयोर्लक्षणया
ष्टप्रकाशनम् आदिशब्दात्परमैश्वर्यवाचिनेन्दतिधातुना महत्व
प्रकाशनमिति वाच्यम् । न चैषां प्रकाराणां मध्ये कश्चित्प्रकार
वतीत्युत्कर्षो दुष्परिहर इत्यर्थः । ननु देवताभेदे सतीन्द्रश
हेन्द्रप्रकाशनाशक्तेः सिद्धान्ते ऽप्युत्कर्षः स्यादित्याशङ्क्याह
त्पक्षइति * यागानङ्गस्येन्द्रादेस्त्यज्यमानद्रव्योद्देश्यत्वलक्षण
काख्यदेवतात्वाभावे ऽपि यमर्थं प्राधान्येन मन्त्रो ऽभिधत्ते
तेत्येवं लक्षणस्तुतिभाक्त्वाख्यदेवतात्वसद्भावाद्देवतामित्युक्त
रणान्माहेन्द्रयागाङ्गत्वे ऽप्यैन्द्रप्रगाथसाध्यायाः पृष्ठाख्या
सन्निपत्योपकारित्वे पशुपुरोडाशान्तिमप्रयाजादिवद्देवतासं
रा यागाङ्गत्वशङ्कानिरासार्थो मात्रशब्दः । व्यपदेशाच्चेति
पदेशभेदाच्च भेद इत्यादिना प्रागेव व्याख्यातत्वान्न व्याख्

गुणश्चानर्थकः स्यात् ॥ १८ ॥

यदेत्यादिभाष्येण शुद्धस्येन्द्रस्य देवतात्वे महत्वगु
नर्थक्यापत्तिरित्येवं सूत्रं व्याख्यातं तत्प्रमादपाठस्य तुल्य
कत्वेन निरस्तस्य आशङ्कितुमशक्यत्वेन गुणस्य देवतात्वान

ा स्तुत्यर्थकीर्त्तनस्यावश्यवाच्यत्वादानर्थक्यपरिहारोपपत्तेरयु-
ाशङ्क्य प्रकृतग्रहसम्बन्धनिरपेक्षस्येन्द्रस्वरूपस्य वा स्तुतिः
तग्रहसम्बन्धिनो वेति विकल्प्याद्यकल्पे विधिशेषत्वाभावेनानर्थ-
मुपपादयितुमाह * यदि चेति * स्तुतेर्विध्यङ्गत्वं विनानर्थ-
पत्तेर्देवतात्वान्तर्गत्यभावे गुणाभिधानानर्थक्यस्यापरिहार्यत्वम्
र्वो हीत्यनेनोक्तम् * अथोच्येतेति भाष्येण द्वितीयं कल्पमा-
[नैवमित्यनेनेन्द्रस्य प्रकृतग्रहसम्बन्धाप्रतीतेर्न स्तुत्येन्द्रविशेष-
ा प्रकृतग्रहसम्बन्धस्य सम्भवतीत्युक्तम्। नन्वेवं तर्हि को ऽसावि-
इत्यपेक्षायां यो महानिति विधेयेन्द्रोपलक्षणार्थं गुणाभिधानं भ-
प्रतीत्याशङ्कानिरासार्थं गुणसम्बन्धस्य चेत्युक्तम्। तदुभयं व्याचष्टे
न चेति* इन्द्रस्य ग्रहसम्बन्धप्राप्तेः पश्चादभिहितः सन् विधेयदे- ४।
ोपलक्षणत्वेन वोक्तः सन् गुणो देवतात्वे ऽनन्तर्गतो भवेन्न चैत-
त्रादभिधानं देवतोपलक्षणत्वेन वा वचनमस्ति सम्भवतीन्द्रस्य
महत्वसम्बन्धयोरन्यतो ऽप्राप्तत्वादित्युक्तम्। नन्वन्यतो प्राप्तावपि
न्द्रपदादेव प्राप्तिर्भविष्यतीत्याशङ्क्य त्वत्पक्षे ऽस्य पदस्य स्तुत्य-
ान लक्षणार्थत्वेन वा विध्यर्थत्वायोगादेकस्मिंश्च पदे निष्कर्षास-
त्रेनांशेन विध्यनुवादायोगान्नास्मादेव प्राप्तिः सम्भवतीति तेशब्दे-
कम् श्लोकं व्याचष्टे * न हीति * तस्मादपीत्युपसंहारभाष्यं
चष्टे * तस्मादिति *

तथा याज्यापुरोरुचोः ॥ १९ ॥

पुरोरुक्शब्दस्य शस्त्रगतमन्त्रविशेषवाचित्वे ऽपि याज्यासा-
र्येणेहानुवाक्यावाचित्वं वक्तुं भाष्यकृता पुरो ऽनुवाक्याशब्दः
क्तः। तथा शब्दो बहुदुग्धिमन्त्रयोर्भेदव्यपदेशादिन्द्रमहेन्द्रयोर्भेद-
न्द्रसानसिं रयिं प्रससाहिषे पुरुहूत शत्रूनिति याज्यानुवाक्याद्व-
न्द्रं महां इन्द्रो य ओजसा भुवस्त्वमिन्द्र ब्रह्मणा महानिति माहे-
र्मेति व्यपदेशभेदादिन्द्रमहेन्द्रयोर्भेद इत्येवं व्याख्यातः। तत्र कथं
पदेशस्य देवताभेदहेतुतेत्यपेक्षायां बहुदुग्धिमन्त्रोक्तां देवतैक्ये
कल्पापत्तिमतिदेष्टुमाह * पूर्ववदिति * व्यवहितातिदेशपरिहा-
माहेन्द्रं दध्यमावास्यायां माहेन्द्रं पयो ऽमावास्यायामित्यत्रापि
त्वस्य देवतात्वानन्तर्गतौ गुणानर्थक्यं तथाशब्देनातिदेष्टव्यम्।

वशायामर्थसमवायात् ॥ २० ॥

ननु वशादृष्टान्तेन विशिष्टविधावपि शुक्लप्रकाशनोपपत्तेर-

नाशङ्कितगुणानन्तर्गत्यापादनेन दूषणाभिधानमयुक्तमित्याश
रासायैतत्सूत्रं वशायामर्थरूपेण कर्मसमवायिनो हृदयाद्यः
न्वयं प्रत्यक्षेणावगच्छाम इति भाष्येण वशायामर्थसमवायाद्
र्थस्याप्यभिधानस्यानुत्कर्षो युक्त इत्येवं व्याख्यातं तदुपपादय
वशादीति *

यतेति वार्थवत्वात् स्यात् ॥ २१ ॥

संस्कारकर्मत्वे ऽप्यनुत्कर्षवादिनि पूर्वपक्ष्येकदेशिनि न
समवायित्वादितिसूत्रपञ्चकेन निरस्ते परमपूर्वपक्षी लिङ्गेन
न्निधी बाधित्वा न्याय्य एवोत्कर्ष इत्यनेन सूत्रेण प्रतिपादयत
थाभाष्यं तावद् व्याचष्टे * बलवदिति * अनेन चेतिकरणे
स्कार्यसद्भावं परामृश्य यत्र संस्कार्यसद्भावस्तत्र प्रगाथः स्या
वं सूत्रं व्याख्यातम् । प्रागाथमेव वेतिकरणेन परामृश्य यत्र
पठ्यते तत्रैव स्यादिन्द्राभिधानद्वारेण लक्षणया महत्वविशिष्टेन्द्
शनेनार्थवत्त्वादित्युत्कर्षापत्तिपरिहारार्थत्वेनैवैतत् पूर्वपक्षसूत्
ख्येयमित्याह * अथ वेति * यथा मनोताख्यसूक्तस्थो ऽग्नि
करणेनाग्नीषोमसमासस्याग्निप्रकाशकतयावगम्यमानः सह
सोमलक्षकत्वात् समासत्यर्थस्य समुदायस्य प्रकाशनं करो
थायमिन्द्रशब्दो महेन्द्रसमासार्थैकदेशतया प्रत्यभिज्ञायमा
समासार्थविशिष्टस्य प्रकाशनं करोतीत्यर्थः । श्लोकं व्याच
न्वार्थेति * ननु त्वं ह्यग्ने प्रथमो मनोतेति सूक्तमन्वाहेति
मनोतासूक्तविधानाल्लैङ्गिकोत्कर्षानुपपत्तेर्लाक्षणिकार्थत्वं युक्तं
थस्य तु श्रौतविधानाभावाल्लिङ्गेनोत्कर्षोपपत्तेर्न लाक्षणिक
युक्तम् अनुत्कर्षाभिधानार्थत्वे चास्य सूत्रस्योत्तरसूत्रमुत्कर्षे स
चिन्मन्त्रेष्वानर्थक्यापत्तेर्नोत्कर्षपक्षो युक्त इत्यभिधानार्थं न
३०७।१ न्क्तेत्याशङ्क्याह * अतश्चेति * अनुत्कर्षे ऽप्यर्थवत्त्वोपपत्ते
स्कारकर्मत्वं सत्यसमवेताभिधानलक्षणदोषापत्तिरिति प्रौढि
नायेयं व्याख्या उत्तरसूत्रं तु याम्यादीनामेकदेशतयापि स
र्थलक्षणकत्वायोगादुत्कर्षापत्तेरपरिहार्यमानर्थक्यमित्यभिधा
त्याशयः ।

न त्वाम्नातेषु ॥ २२ ॥

ऐन्द्रप्रगाथादिषूत्कृष्यमाणेष्वर्थवत्त्वसम्भवे ऽपि सर्वे
ष्वाम्नातेष्वप्युत्कृष्टे ऽर्थवत्त्वं नास्तीत्युत्कर्षापादकसंस्कारक

क्षो न युक्त इति परमपूर्वपक्षदूषणाशङ्कार्थत्वेन सूत्रव्याख्यानार्थमपरेषामिति भाष्यं व्याचष्टे * आम्नातेष्वपीति * अर्थदर्शनमित्यनेन पूर्वपक्षसूत्रस्थस्यार्थवत्त्वशब्दस्य प्रथमान्तत्वेन विपरिणतस्यानुषङ्गो दर्शितः। उत्कृष्टशब्देनाग्निमारुते विहितानां याम्यादीनामुत्कृष्टानामन्यत्राप्यर्थवत्ता नास्तीति भाष्यार्थः सूचितः। एतदेवोपपादयति * न हीति * विधिशब्देनाम्नातशब्दो विहितार्थतया व्याख्यातो भवति। ननु यमादेर्ग्रहान्तरे ऽपि देवतात्वाभावाद्याम्यादेरानर्थक्ये ऽप्यैन्द्रप्रगाथादेरैन्द्राग्निग्रहयागेष्वर्थवत्त्वोपपत्तेः संस्कारकर्मत्वं भविष्यतीत्याशङ्क्याह * ततश्चेति *

दृश्यते ॥ २३ ॥

तदुच्यतइत्यादिभाष्येण सर्वेष्वर्थवत्त्वं दृश्यतइत्येवमानर्थक्यापत्तिलक्षणदूषणशङ्कानिरासार्थत्वेनैतत्सूत्रं व्याख्यातं तत्र याम्यादीनां ग्रहयागसान्निध्याम्नातेन तद्देवतास्मारकत्वावगतेर्यमादीनां च क्व चित् ग्रहदेवतात्वाभावाद् दूषणपरिहारासम्भवमाशङ्क्याह * यमादय इति * ग्रहदेवतात्वाभावे ऽपि कर्मान्तरदेवतात्वेन प्रकारान्तरेण वा यथासम्भवमुपयोगात्प्रकाश्यत्वं भविष्यतीत्यर्थः। मण्डूकसूक्तस्याप्यर्थवत्त्वं भाष्योक्तमुपपादयति * मण्डूकेति * राजसूये ऽक्षसूक्तस्योपपादयति * अक्षेति * मूषिकासूक्तस्येति भाष्यमेकादशिन्यामथाखुविनियोगाभावादयुक्तमाशङ्क्योपपादयति * मूषिकेति * आखोरविनियोगे ऽप्युपशयो यूपो भवतीत्युपशयस्यैकादशिन्यां विनियोगात्तस्य च सर्वे वान्ये यूपाः पशुमन्तो ऽथो ऽपशव एवापशुरित्युपक्रम्यासौ ते पशुरिति निर्दिशेद्यं द्विष्यादित्युक्त्वा यदि न द्विष्यादाखुस्ते पशुरिति ब्रूयादिति मन्त्रविधानादाखुसम्बन्धकीर्त्तनाखुस्तुतिद्वारेणोपशयस्तुतित्वान्मूषिकासूक्तस्यैकादशिन्यां प्रयोग इत्यर्थः। सर्वेषामिति कुसुम्भकसूक्तादिविषयत्वेन व्याचष्टे * कुसुम्भकेति * सर्वा इति श्रुत्युपन्यासस्य हेतुत्वेनोपयोगमाह * वाचस्तोम इति * यस्येति श्रुत्यन्तरोपन्यासस्यार्थवत्त्वाभिधानार्थत्वमाह * तथेति * सहस्रमृचामोदेतोः शंसेदित्याश्विनाख्ये शस्त्रे सूर्योदयावध्यृक्सहस्रं समाप्योदिते सूर्ये सौर्यस्य सूक्तम् शंसनं विधाय समाप्ते ऽप्यृक्सहस्रे सूर्यानुदये सत्यृक्सहस्रसमाप्तेः सूर्योदयावधित्वासम्भवाच्छस्त्राविच्छेदपरिहाराय सूर्योदयावधि यासां कासां चिदुपदेशात् सर्वासामर्थवत्तेत्यर्थः। मण्डलाख्यदशावयवत्वेन ऋग्वेदसंहिताया दशतयीत्वाद् तद् गता ऋच

दाशतय इति व्याख्यातुमृचामित्युक्तम् । ननु वाचस्तोमादि
पि कुसुम्भकसूक्तादेः समवेतार्थत्वाभावाददृष्टार्थत्वाभ्युपग
तूत्कृष्टस्यार्थवत्त्वोपपत्तेरुत्कर्षाभिधानानर्थक्यमित्याशङ्कानिर
स्मादिति भाष्यं व्याचष्टे * तत्र चेति* तत्र वाचस्तोमा
रेव मन्त्रविधानसामर्थ्याददृष्टाश्रयणत्वं युक्तमित्युक्ते । नन्वेवं
देरपि तर्ह्यनुत्कृष्टस्यैव सन्निधावाम्नानकल्प्यविधिसामर्थ्याद
भविष्यतीत्याशङ्क्य * वचनेनैवेत्युक्तम् * श्रुतिविहितस्यैव
बाधेनादृष्टार्थतोचिता न दुर्बलसांनिध्यादिप्रमाणकस्येत्याश
न्वेवं सति श्रुतिबलादैन्द्रीवद् गौणलाक्षणिकवृत्त्यन्तराश्रय
मवेतार्थाभिधायित्वं सूक्तवाकवद्वा मन्त्राभिधेयस्य कर्म
कस्मान्न भवतीत्याशङ्क्य *असमवेतार्थेत्युक्तम् * करणत्वे
युक्तस्य मन्त्रस्य क्रियां तत्साधनं वा ऽनभिदधतः करण
स्तत्सिद्ध्यर्थं गौणत्वादिकल्पना मन्त्रार्थस्य कर्मसमवा
वोचिता न चैषां करणत्वेन विनियोगो ऽस्तीत्याशयः । अ
त्कृष्टानां प्रकृतावप्रयोज्यानामपि कुसुम्भकसूक्तादीनां त
स्तोमादौ विधानात् समवेतार्थत्वाभावे ऽप्यदृष्टार्थत्वेनार्थ
ति भाष्यं व्याख्यातम् । नन्वेवं सति मण्डूकसूक्तादेरपि वा
श्विनयोरेव विधिसामर्थ्येनादृष्टार्थतया निवेशोपपत्तेर्नाग्ने
नियोगकल्पनेत्याशङ्क्याह * न चेति * दृष्टार्थसम्भवे त
युक्त इत्याशयः । एतदेव दृष्टान्तेनोपपादयति * तथा हीति
न्यत् यज्ञस्य साधनादावपघातो देवा अवन्तु न इति जपे
ऽन्यां वैष्णवीमिति यज्ञाङ्गभ्रेषे तत्समाधानापेक्षायां विधि
जपस्य तादर्थ्येनादृष्टार्थतया तत्साधनभूताया वैष्णव्यादेः
ष्टार्थत्वायोगेनादृष्टार्थत्वे ऽपि न तद्दृष्टान्तेन दृष्टार्थयागा
स्मृतिसाधनत्वेन सम्भवद्दृष्टार्थत्वस्य याज्यादेरपि दृष्टार्थत्व
चितेत्यर्थः ।

अपि वा श्रुतिसंयोगात्प्रकरणे स्तौतिशंसतं
क्रियोत्पत्तिं विदध्याताम् ॥ २४ ॥

पूर्वपक्षानिरासे सिद्धान्ताभिधायित्वे ऽपि पक्षद्वय
त्सन्देहापत्तेस्तन्निरासे श्रुतिसंयोगात्प्रकरण इति सूत्राव
यन् अथ वार्थैकदेशो ऽयमिति स्वयं व्याख्यातं पूर्वपक्षसूत्र
४०८।६ वदनुभाषणपूर्वकं योजयति * यदुक्तमिति * एतच्छब्देन

परामर्शः । अनेन च प्रकृतदेवतालक्षणार्थत्वे सत्यश्रुतिसंयोगाद्दोषा
त्तेरित्यकारप्रश्लेषेण सूत्रावयवो योजितः । ननु मनोतावल्लक्ष
न दोषायेत्याशङ्क्याह * न हीति * मनोतायै हविषो ऽवदीयमा
स्यानुब्रूहीति प्रैषसामर्थ्यान्मनोतासूक्तस्य हविर्देवतास्मृत्यर्थत्वावग
सोमसहितस्यैव चाग्नेर्हविर्देवतात्वाद्युक्ता लक्षणा ऐन्द्रप्रगाथस्य
हविर्देवतास्मृत्यर्थत्वे प्रमाणाभावात्स्वरूपमात्रेणेन्द्रस्य स्तुत्यर्थं
काश्यत्वोपपत्तेर्न लक्षणा युक्तेत्याशयः । ननु विरोधाभावे ऽपि
ष्टार्थत्वाय लक्षणाङ्गीकरणं युक्तमित्याशङ्क्याह * सर्वेति * वैष
व्यादेरपि देवताभूताग्न्यादिलक्षणया दृष्टार्थत्वोपपत्तेरनिष्टापा
स्यादित्यर्थः। भाष्यकृद्व्याख्यातपूर्वपक्षसूत्रपक्षे ऽप्यनुभाषणपूर्वक
कारप्रश्लेषं विना योजयति*यस्त्विति* अनेन च प्रक्रियतइति क
व्युत्पन्नं प्रकरणशब्दमङ्गीकृत्य प्रकृते माहेन्द्रयागाङ्गभूते पृष्ठा
स्तोत्रे रथन्तरचोदनोपस्थानात्मकेन सन्निधिना क्लृप्तया श्रुत्यैन्द्र
प्रगाथस्याङ्गत्वेन संयोगादिति सूत्रावयवो योजितः । ननु सन्नि
लिङ्गेन बाधाच्छ्रुतिकल्पकत्वं न सम्भवतीत्याशङ्क्याह * विनो
लिङ्गस्येह सन्निधिबाधकत्वायोगे चकारसूचितं तावद्धेतुमाह
यदीति * पूषाद्यनुमन्त्रणमन्त्राणां यागानुमन्त्रणसमाख्यया ।

मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत् ।
शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम् ॥

इत्यनुमन्त्रणानां स्मारकत्वलक्षणेन दृष्टार्थत्वावगतेः
कृताग्नेयादियागस्मृत्यसामर्थ्याच्च लिङ्गेन प्रकरणकल्प्यश्रुतिप्र
बन्धो युक्तः । ऐन्द्रप्रगाथादेस्तु दृष्टार्थत्वस्य प्रागनवगतेर्लिङ्गव्य
राभावान्न क्रमसन्निधिकल्प्यश्रुतिप्रतिबन्धकत्वं सम्भवतीत्याश
लिङ्गादेर्बलवद्विरोधे श्रुतिकल्पकत्वाभावात्प्रतिबन्धवाची बाधश
लिङ्गक्रमसमाख्यानादित्यत्र च लिङ्गस्य सामान्यसम्बन्धसापेक्ष
स्य वक्ष्यमाणत्वादस्य च प्रगाथस्य क्रत्वन्तरेण सामान्यसम्बन्धा
वात् लिङ्गविनियोज्यत्वानुपपत्तेर्न तद्बलेन क्रमसान्निधिकल्प्यश्रु
प्रतिबन्धो युक्त इति कण्ठोक्तं हेतुं व्याचष्टे * न चेति * कर्म
यं विना हविर्भाक्त्वलक्षणदेवतात्वायोगात् स्तुतिभाक्त्वलक्ष
वतात्वाभिप्रायो देवताशब्दः सामर्थ्येन देवतास्वरूपे कर्मान्वय
पेक्षविनियोगापत्तेरानर्थक्यं स्यादित्यर्थः । न मन्त्रमिति तु पाठे
त्सामर्थ्यमन्त्रं न विनियुञ्जीतेत्युक्ते कस्मादित्यपेक्षायां स्वरूपवि
योगे सत्यानर्थक्यापत्तेः कर्मान्वितरूपे च लिङ्गस्य व्यापाराभाव

---

१ दृष्टार्थोमहेन्द्रस्तदुपलक्षणार्थत्वमिन्द्रशब्दस्येत्यर्थः ।

ति विकल्प्य व्याख्येयम्। ननु लिङ्गस्य कर्मान्वितरूपाविनियोगे
रभावे कथं पूषाद्यनुमन्त्राणानां पूषादिदेवत्ये कर्मणि लिङ्गेन
४०९।१ योगो ऽत आह * तदेतदिति * यागानुमन्त्रणसमाख्यया
न्यतः क्रतुसम्बन्धावगतेर्लिङ्गेन द्वारविशेषविनियोगो युक्त इ
यः । ततश्चानर्थक्यापत्तेरुत्कर्षो न युक्त इत्युपसंहरति *
दिति * स्तुत्यर्थत्वेन मन्त्राणां दृष्टार्थत्वे ऽपि तज्जन्याया स्तुते
र्थतोक्ता एवं पूर्वपक्षनिरासार्थत्वेन स्वयं द्वेधा श्रुतिसंयोगं व
याधुना सिद्धान्तोपपादनार्थत्वेन भाष्यकारीयाश्चतस्रो व्याख्
ङ्क्षाति * किं चेति * अभिधानं च कर्मवदिति सूत्रस्य द्वेध
ख्यास्यमानत्वात् द्वितीयाभिप्रायत्वे पौनरुक्त्यापत्तेराख्यातश्
प्रायतयापि च श्रुतिसंयोगो भवति प्रउगं शंसतीति भाष्यस्
ख्यानादाख्यातमपि द्वितीयाग्रहणेनोपलक्षितं भाष्यक्रमात् स
न्तरं द्वितीयानुक्रमितव्यापिपादभङ्गापत्तेः षष्ठ्यनन्तरमनुक्रा
क्रान्ते सप्तमीसंयोगसम्भवाभिप्रायार्थं यदीति भाष्यं गुणव
नाख्यायाः स्तुतेः स्तोतृपुरुषाधारत्वेनाक्षरानाधारत्वेनायुक्त
ङ्क्योपपादयति * गुणेति * अयमाशयः ज्ञानहेतुर्व्यापारो
स चाक्षराणामविधानाख्यः पुरुषस्याप्यभिधायकाक्षरोच्च
ख्यः । तत्र पुंव्यापारे ऽक्षराणामकर्तृत्वेनाधारत्वायोगे ऽप्य
नाख्ये व्यापारे ऽक्षराणां कर्तृत्वात्कर्त्राधारत्वाच्च व्यापारस्य
धारता युक्तेति पूर्वपक्षे सप्तमीसंयोगानुपपत्त्यभिधानार्थं यदि
नमिति भाष्यं व्याचष्टे * प्रकाशने त्विति * नन्वभिधाना
स्तुतावपि तृतीयाप्राप्तिस्तुल्येत्याशङ्कते * नन्विति * शब्दान
णत्वं वा कर्तृत्वं वा निरूप्यतइत्यभिधानक्रियायां शब्दानां क
वत् कर्तृत्वस्यापि विवक्षाभेदेनोक्तत्वात्कर्तुश्च क्रियाधारत्वस
त्सप्तमी युक्तेति परिहरति * नैष दोष इति * प्रकाशना
तु शब्दस्य न कथं चिदस्तीत्याह * प्रकाशनमिति * ननु प्र
नशब्देन ज्ञानजन्यातिशयविवक्षायां तस्याक्रियात्वेन कारक
योगात् कवतीनां न तत्र करणत्वं ज्ञानक्रियाविवक्षायां त्वात्म
त्वात्तस्या देवताधारत्वाभिधानं न युक्तमित्याशङ्कानिरासार्थम
रमार्थतस्तावदित्युक्तम् * समावायिकारणस्याधारत्वप्रसिद्
मार्थशब्देनात्मसमवेतता ज्ञानस्योक्ता साक्षाच्छब्दार्थं वा परमा
ज्ञानमात्मसमवेतत्वात्साक्षादात्माधारमित्यर्थः। यत्तु भाष्यकृत
ताधारं प्रकाशनमित्युक्तम् तद्देवताया ज्ञानजन्यातिशयाश्रय
णात् व्याप्यत्वात्फलगतं हेतावुपचरितमित्युक्तं। ननु ज्ञानस्य

नागतवर्त्तमानविषयत्वादतीतानागतयोश्चाश्रयत्वायोगात् ज्ञानस्य विषयाश्रितातिशयहेतुता न युक्तेत्याशङ्क्य * कर्मत्वेत्युक्तम् * पाकादिक्रियाकर्मणस्तण्डुलादेः क्रियाजन्यातिशयाश्रयत्वदर्शनात्कर्मत्वेन ज्ञानक्रियाकर्मणोऽपि क्रियाजन्यातिशयाश्रयत्वेऽनुमिते तद्बलेनातीतानागतयोरपि अतिक्रान्तदिवसादिगतसङ्ख्यादिवदाश्रयत्वोपपत्तिरभ्युपगन्तव्येत्याशयः। नन्वौपचारिकदेवताधारत्वाभिधानस्य किं प्रयोजनमित्याशङ्क्य कवतीनामौपचारिकमपि ज्ञानाधारत्वं नास्तीत्यभिधानप्रयोजनं सूचयितुमाह * तत्रेति * अपि चेति भाष्यं श्लोके द्वितीयाग्रहणेनाख्यातस्याप्युपलक्षितत्वाद् द्वितीयाश्रुतिसंयोगस्य चाभिधानं च कर्मवदिति सूत्रव्याख्यातभाष्यात्प्रउगं निष्कैवल्यमिति द्वितीयया स्तुतेः प्राधान्यावगतिरित्येवमर्थतया ज्ञातुं शक्यत्वात्तदुपलक्षितमाख्यातश्रुतिसंयोगं शंसतीत्याख्यातेन स्तुत्याख्यस्य धात्वर्थस्य भावनाकरणत्वावगतेः करणत्वस्य च कर्त्तृव्यापारव्याप्यत्वलक्षणं कर्मत्वं विनानुपपत्तेरनिष्पन्नस्य चोत्पाद्यत्वातिरिक्तकर्मत्वायोगादुत्पाद्यत्वप्रतीतिरुत्पादिकां गुणिनीं देवतां प्रतिप्राधान्यावगतिरित्येवं व्याचष्टे * अपिचेति * किमेतत् गुणभूतं देवतां प्रत्युत प्रधानामिति सन्देहभाष्ये देवताम् प्रति स्तुतेर्गुणप्राधान्यविचारस्योक्तत्वाद्देवतया स्तुतिर्निर्वर्त्तयितव्येति वाच्येऽप्यभिधीयमानायाः देवतायाः स्तुतिनिर्वर्त्तकत्वादभिधानस्य च मन्त्राधीनत्वाद्भाष्यकृता * मन्त्रेणेत्युक्तम् *तद् व्याख्यातुं मन्त्रशब्दः स्तुतिमात्रोपलक्षणार्थः स्तोत्रशब्दः अनेन च गुणवचनः शब्द इति भाष्यावयवो व्याख्यातः। प्रकाशननिर्वर्त्तकत्वेनार्थवत्त्वेऽपि दृष्टार्थत्वसाम्यात्स्तुतिविशेषणानर्थक्यमाशङ्क्य * शास्त्रदृष्टमित्युक्तम् * विशेषणसूचितं प्रकाशनार्थतायामदृष्टार्थत्वं प्रकाशनार्थत्वस्य शास्त्रेणादृष्टत्वादिति व्याख्यातुमचोदित्वकरणादित्युक्तम्। ननु प्रकाशनार्थत्वानभ्युपगमे स्तुतीनामदृष्टार्थत्वं स्यादित्याशङ्क्याह * ततश्चेति * शास्त्राङ्गीकृतत्वात् स्तुतेरदृष्टार्थत्वं युक्तं न मन्त्रस्येत्याशयः। षष्ठ्यभिप्रायेण श्रुतिसंयोगव्याख्यातार्थमपि चेति भाष्यं व्याचष्टे * किं चेति * नन्वेवमपि वीर्यादिगुणस्य द्वितीयान्वयाद्विशेष्यत्वाच्च प्राधान्योपपत्तेर्न स्तुतिप्राधान्यं सिद्ध्येदित्याशङ्क्याह * न प्रधानमिति * कर्मानङ्गत्वाद् गुणानां प्राधान्यं न युक्तमित्याशयः। देवताभिधानार्थं इति भाष्यं व्याचष्टे * देवतेति * अथ यत्प्रथमान्तामित्याशङ्क्यतइत्युच्यत इत्युत्तरभाष्यं व्याचष्टे*यद्पीति* प्रथमासामर्थ्यात्मकेन लिङ्गेनेन्द्रप्राधान्यावगतेर्न वाक्येन स्तुत्यर्थता

युक्तेत्याशङ्क्य या ऽतो ऽवसितस्येत्यादेर्गुणाभिधानार्थस्य
समुदायस्य गुणयाकाङ्क्षस्य निराकाङ्क्षीकरणसामर्थ्यात्मकं
वाक्यस्योपोद्बलकमस्तीति वक्ष्यमाणं परिहारं सूचयितुम् *
३१०।१ ग्यताशब्दः * नन्वेवं सत्येकवाक्यतोपगमनसामर्थ्यात्मकस्य
स्य सर्ववाक्येषु भावाच्च क्व चिल्लिङ्गेन वाक्यं बाध्येतेत्याश
रासार्थः पूर्वशब्दः।एकवाक्यतोपगमनसामर्थ्यस्यैकवाक्यताक
नोपोद्बलकत्वं न सम्भवतीत्यशयः । जङ्गमस्येत्यनेन षष्ठीपर
त्ययान्तस्य पातेर्धातोर्यात इति रूपमिति स्थितं चकाराच्छम
न्तिकरस्योदकजातस्य शृङ्गिणः पर्वतजातस्य राजेति सूचितम्
सति राजत्ववज्रबाहुत्वादीनां गुणानामेव प्राधान्यं कस्मान्नेष्
शङ्क्य * न चेत्यु पपत्तिरुक्ता * शङ्काभिप्रायविवरणार्थं
भाष्यं स्पष्टत्वादव्याख्याय सत्यमिति भाष्यं वक्ष्यमाणस्यार्
ङ्गत्वानुज्ञानार्थतया ऽवभासमानं परेण तस्य लिङ्गत्वानभि
युक्तमाशङ्क्य सत्यमित्येतावच्छिनत्ति * सत्यमिति * एत
भाष्यं प्रागेव योग्यताशब्देन व्याख्यातत्वात् स्पष्टत्वाच्चोपेक्ष
पीत्याशङ्काभाष्यं वाक्यशेषादित्युत्तरभाष्यं च तात्पर्यतः
व्याचष्टे * तत्रेति * सत्यपीति मध्यमावयवेनाशङ्का
व्याख्यातः वाक्यशेषादेवेत्युत्तरे निर्णयहेत्वभिधानान्नेन्द्रशब्द
ताभिधानार्थ इति निर्णयस्वरूपाभिधानात्कुत इति तसिः प
प्रथमार्थे च यदावृत्त्या व्याख्येयं शेषशब्देन च स्तुत्यर्थपदस
त्रस्य सम्पूर्णवाक्यत्वाभावे ऽपि स्तुतिवाक्यस्येति वाक्यश
ज्रबाह्वादिपदानामपि साकाङ्क्षत्वाभिधानार्थं इति सूचितम्
भिधानमात्रपर्यवसानानिरासस्य स्तुत्यर्थपदसमूहैकवाक्यत
र्थत्वं स्तुत्यर्थत्वेनैवेति वार्त्तिकावयवेनोक्तं सौतिशंसत्योर्धात्वं
स्तुतिवाचित्वादित्येवं श्रुतिसंयोगव्याख्यानार्थमपि चेति
व्याचष्टे * न चेति * स्तुतेर्देवतास्वरूपाभिधानपूर्वकत्व
रूपाभिधानमात्रपर्यवसानाभ्युपगमे स्तुत्यविवक्षापत्तेर्ल
सङ्ग इत्याशयः । प्रकरणइतिसूत्रावयवमुत्कर्षाभ्युपग
सार्थत्वेन तु ज्ञातत्वाद्भाष्यकृतोपेक्ष्य तस्मादित्यनेन सौत
सूत्रावयवो व्याख्यातस्तत्तात्पर्यतो व्याचष्टे * इतीति *
संस्कारकर्मत्वस्योक्तत्वात्प्रतियोगितया प्रधानकर्मत्वस्य
त्वात्तदेव फलेनोक्तमित्याशयः ।

शब्दपृथक्त्वाच्च ॥ २५ ॥

द्वादशेति भाष्यं संख्यापृथक्त्वयोर्भेदप्रसिद्धेः पृथक्त्वव्या-
ानाशक्तत्वादयुक्तमाशङ्क्योपपादयति * पृथक्त्वे सति निवेष्टुं
ोलमस्या इति सदर्थसप्तमीसमासेन पृथक्त्वैकार्थसमवायितोक्ता
ास्त्राणां शस्त्राणां च या द्वादशसंख्या द्वादशस्तोत्रशस्त्रो ऽग्निष्टोम
ानेन शब्देनोच्यते सा प्रकाशनार्थत्वपक्षे तस्याभेदे सति न युक्ता
ाक्त्वनिवेशिनी यस्मादित्यर्थः।शब्दग्रहणेन द्वादशशब्देन स्तोत्राणां-
स्त्राणां च पृथक्त्वेनाभिधानादित्येवं तृतीयासमासत्वेन सूत्रव्या-
ासूचिता शब्देन कृतात्पृथक्त्वादिति च तत्कृतार्थतृतीयासमासेनोक्ते
द्धस्याभिधानएव कारणत्वेनाभिधानालाभान्नाश्रुताभिधाने शब्दा-
ाहारोपपत्तिः प्रकाशनशब्देन च भाष्यस्थयोः स्तोत्रशब्दयोः[1] प्रका-
नवाचित्वं सूचितम् । अथेति भाष्यं व्याचष्टे*सामान्येति * अनेन
क्याभिधानं सामान्याभिप्रायमिति दर्शितं पदार्थज्ञानस्यैकैकपद-
्यत्वात्प्रतिपदम् * चेत्युक्तत् * ननु स्तुतेरपि सामान्यरूपेणा-
ाद्विशेषरूपेण च प्रत्यृचं भेदादृक्समुदायस्य चैकस्तुतिसाधन-
ाभावेनावान्तरभेदविवक्षानुपपत्तेर्न द्वादशत्वे ऽवस्थानं स्यादित्या-
ङ्कते * ननु चेति * नन्वृक्समुदायस्यैकस्तुतिसाधनत्वाभावे
येकसमुदायसाध्यानां स्तुतिनामैक्यमुपचर्य द्वादशत्वं भविष्यती-
ाशङ्क्याह * अथेति * पदात्वाद्यपरिस्पन्दात्प्रभृत्या फललाभतः
्या पूर्वापरिभूता लक्ष्यते वर्त्तते तदेत्यनेन न्यायेनैकफलसाधना-
कक्रियावयवसमुदायस्यैकक्रियात्वादपूर्वार्थत्वेन द्वादशत्वेन स्तुति-
दशेति परिहरति * उच्यतइति * प्रकाशनार्थत्वे तु प्रत्यृचं प्र-
पदं वा प्रकाशनाख्यफलनिष्पत्तिदर्शनेन प्रत्यृचं प्रतिपदं वा त-
ाधनज्ञानाख्यक्रियासमाप्त्यवगतेर्न द्वादशत्वव्यवस्थेति वैषम्याभि-
ानपूर्वकं श्लोकं व्याचष्टे * प्रकाशनार्थत्वे हीति * नन्वपूर्वैकैक-
ुतिजन्यत्वे तस्याः प्रत्यृचं निष्पत्तिदर्शनात्प्रत्यृचमेवापूर्वं कल्प्यं
वैस्तुतिजन्यत्वे त्वपूर्वैक्यापत्तेर्द्वादशत्वं न स्यादित्याशङ्क्याह * न
ति * यथाविहितर्क्समुदायसाध्यस्तुतिसमुदायजन्यत्वेनापूर्वस्य
मुदायद्वादशत्वात् द्वादशत्वसिद्धिरित्याशयः ।

अनर्थकं च तद्वचनम् ॥ २६ ॥ ४

अग्निष्टुत्यादिभाष्येणैतत्सूत्रं देवताभिधानत्वादित्याद्यसूत्रावय-
ापात्तदेवताभिधानपरामर्शिनं तच्छब्दमङ्गीकृत्य संस्कारकर्मत्वपक्षे
ोनदेवत्यग्राहिकायां विकृतौ लिङ्गेनैवाग्नेयीनामृचां प्राप्तेर्देवताभि-

१ सवनप्रसवनशब्दयोरित्यर्थः ।

धायिनीनामाग्नेयीनामृचां वचनमनर्थकमित्येवं व्याख्यातं ः
कृतानामनाग्नेयीनामप्यृचां संस्कारकर्मत्वे ऽग्निपदोहेन प्राप्त
र्याविध्यर्थवत्त्वोपपत्तेरयुक्तमाशङ्क्योपपादयति * ऋचामि
पूर्वेतिवा एतदृचो ऽक्षरं यदेनदूहति तस्मादृचं नोहेदिति निष
मूहानर्हत्वादाग्नेयीनामेव प्राप्तेर्विध्यानर्थक्यमित्यर्थः । संस
त्वनिरासद्वारा चास्यापि सूत्रस्य प्रधानकर्मत्वोपपादनार्थत्वा
न्तरसूत्रानन्वयदोषः ।

अन्यश्चार्थः प्रतीयते ॥ २७ ॥

कथं सम्बन्धत्वश्रुत्या स्तोत्रशस्त्ररूपस्यार्थस्यान्यत
रित्याशङ्कानिरासार्थं यद्यन्यदिति भाष्यं व्याचष्टे * सम्बन
अन्यत्वप्रतीतेः सिद्धान्तोपपादकत्वाभिधानार्थं यदि चे
सङ्क्षेपेण व्याचष्टे * स चेति * प्रकाशनार्थत्वइति शेषः
स्त्रसाधनभूतानां मन्त्राणां प्रगीताप्रगीतविशेषणभेदेन भे
धिकः स्तोत्रशस्त्रयोर्भेदो भविष्यतीत्यधिकाशङ्कानिरासार्थं
त्वतुल्यावष्याशङ्कापरिहारावाह * नन्विति * ननु प्रका
प्रगीताप्रगीतमन्त्रलक्षणोपायनियमापूर्वभेदाद्भेदो भवि
शङ्क्याह * नन्विति * यत्तु नियमापूर्वं सत्क्रियाकृतं ः
वार्त्तिकेनाध्यायोपक्रमे नियमापूर्वस्य क्रियाजन्यत्वनिषेध
देन क्रियाभेदसिद्धिरित्याशयः ।

अभिधानं च कर्मवत् ॥ २८ ॥

प्रधानकर्मणो अग्निहोत्रादेर्यथा द्वितीयासंयं
तथा शस्त्रस्यापि द्वितीयासंयोगेन भवतीत्येवं प्रधानेत्व
ण व्याख्यातं तद्धात्वर्थस्य करणत्वेनेप्सिततमत्वलक्ष
योगात् द्वितीयायाश्च करणत्वाक्षिप्तकर्तृव्यापारव्याप
त्तेरयुक्तमाशङ्क्योपपादयति * यदिदमिति * श्रुतायां
रणत्वे ऽप्यग्निहोत्रादेर्धात्वर्थस्याकृतः सो ऽपि नास्ती
णवाञ्छनमित्यनेन न्यायेनार्थाक्षिप्तायां धात्वर्थनिष्पाति
तत्वात् प्राधान्यं युक्तमित्याशयः । नन्वेवं सति संस्का
निष्पत्त्या प्राधान्यापत्तिरित्याशङ्क्याह * न संस्कार
व्रीह्यादिनिष्पाद्यस्यावघातस्य तान्प्रति गुणत्वेनावघा
नेव प्रति प्राधान्यं युक्तमित्याशयः । चतुर्गृहीतं वा एत
माघार्य त्रिरितः प्राचीनं प्रयाजान्यजतीति वाक्येना

ाज्यसंस्कारत्वावगमे ऽपि मान्त्रवर्णिकदेवतान्वयापन्नयागरूपा-
नप्रायं प्राधान्याभिधानं स्वरूपाधारविषयं वा यदा तु द्वितीयाभि-
ायः श्रुतिसंयोगो व्याख्यायते तदा पौनरुक्त्यापत्तेः। प्रधानकर्मण
ग्राभिधानं भवतीत्येतावद्भाष्यं यथा प्रधानकर्मणो नामधेयं भवति
था स्तोत्रशस्त्रयोरपीत्येवं सूत्रव्याख्यानार्थतया व्याचष्टे * अथ
ति * ननु संस्कारकर्मणो ऽपि स्रुव्यापारादेर्नामधेयदर्शनान्न तेन
ाधान्यसिद्धिरित्याशङ्क्याह * इतरथा हीति * संस्कारस्य संस्का-
निष्ठत्वात्तदवच्छेदेनैव व्यवहारसिद्धेर्न तावत्संज्ञया कार्यं सौका-
र्थं तु तदपेक्षयामपि दृष्टसंस्कारोपाधिक्यैव प्रकाशनसंज्ञयाधारव-
द्व्यवहारसिद्धेःसंज्ञान्तरमनर्थकमित्याशयः।

फलनिर्वृत्तिश्च ॥ २९ ॥

स्रुतस्य स्तुतमस्यूर्जस्वत्स्वदामामास्तोत्रस्य स्तोत्रं गम्यादिति
न्त्रे भावनिष्ठया स्तोत्रमामन्त्र्य स्तोत्रस्य मध्ये त्वं स्तोत्रमसि तदेवं
भूतस्तोत्रस्य मध्ये स्तोत्रमूर्जस्वत्पयस्वत् भूत्वा मामागम्यादिती-
द्रशब्दोपलक्षितानेकदेवतास्तुत्येन्द्रादिदेवतावन्तः सन्तो वयं त्वां
ाचामहे प्रजामिषं भक्षीमहीति च याचामहे सा सर्वा यज्ञशब्द
लक्षितस्य यज्ञाङ्गस्य सम्बन्धिनी ममाशीः सत्या भूयादिति स्तोत्रात
प्रधानकर्मण इव फलनिष्पत्तिर्दृश्यतइत्येवं सूत्रव्याख्यानार्थं फले
यादिभाष्यं व्याचष्टे * यो ऽयमिति * न देवताया इति फलव्याति
केसूचितमर्थं व्याचष्टे * त्वत्पक्षे त्विति *

॥ अथ मन्त्राविधायकत्वाधिकरणम् ॥ ६ ॥

विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात् ॥ ३० ॥

सूत्रभाष्ययोर्मन्त्रग्रहणात् मन्त्रगतभावशब्दविषयत्वेनैतद
धिकरणं कश्चिद्व्याख्यातं तत् दूषयितुमुपन्यस्यति * तावदिहेति *
यद्याद्युपबन्धस्य ब्राह्मणे ऽपि तुल्यत्वान्मन्त्रत्वातिरिक्तविधायकत्वास
म्भवहेत्वप्रतीतेर्मन्त्रग्रहणस्य हेत्वर्थत्वं मत्वा मन्त्रत्वादित्युक्तम्। प्र
मार्थत्वाच्चेत्यनेन विहितत्वादिति भाष्योक्तो हेतुर्ब्राह्मणविहितस
मन्त्रो ऽनुवादको मन्त्रविहितस्य वा ब्राह्मणमित्यनिश्चयादभ्युच्चयत्वे
व्याख्यातः। कर्मान्तरत्वाशङ्कानिरासार्थं नेति भाष्यं व्याचष्टे
तथा हीति * स्तुत्यर्थतायामपीत्यपिशब्दसूचितार्थव्याख्यानपूर्वं
भाष्यमुत्तरार्द्धेन व्याचष्टे *न चेति* गुणग्रहणं फलनिमित्तयोरप्यु
पलक्षणार्थम्। ननु विधौ ब्राह्मणे मन्त्रे च यान्याख्यातानि तेषां स

षामेकमेव विधानरूपं प्रयोजनं ब्राह्मणे विधायकशक्तियुक्त
धारितस्याख्यानशब्दस्य मन्त्रे ऽप्यैक्येन प्रत्यभिज्ञानादिति
सूत्रकृता विधायकत्वमात्रस्य पूर्वपक्षितत्वात् स्तुतित्वनिरा
र्थक इत्याशङ्कानिरासपूर्वकं श्लोकं व्याचष्टे * स्मारक
फलनिमित्तयोरविधेयत्वे ऽप्यज्ञातज्ञापनाभिप्रायेण विधीयेर
तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * दूषयि
मते *इतीति* मन्त्रत्वस्य तावद्धेतुत्वं दूषयति * किं पुन
ननु मन्त्रशब्देन विधिशक्त्याविर्भावहेतुब्राह्मणत्वाभावो
इत्याशङ्क्याह * कथं चेति * कारणाभावमेवोभयत्रापि व्य
दर्शनेनोपपादयति * इष्टाश्चेति * एतदेवोपसंहरति *
ति * प्रासार्थत्वस्यापि हेतुत्वं दूषयति * किं चेति * श्लो
१३।१ चष्टे * न हीति * ततश्चोभयोरपि विधायकतैव युक्तेत्याह
श्चेति * नन्वेकेन विहिते विध्यन्तरानर्थक्यं स्यादित्याशङ्क्य
भ्यासाश्चेति* यच्चासकृदपीत्युक्तं तदप्ययुक्तमित्याह *
ति * दूषणमुपसंहरति * तस्मादिति * अन्यैस्तु मन्त्र
विधशक्तितिरोधानाहेतुत्वे ऽपि कर्मकरणतया ब्राह्मणेन वि
मानत्वस्य ब्रीह्यादावविधायकत्वेन व्याप्तिदर्शनाद्धेतुत्वं
दयुक्तम् । तदपि दूषयितुमुपन्यस्यति * ये ऽपीति* विधाय
ब्राह्मणस्य ब्रह्मयज्ञे ब्राह्मणेन विनियोगदर्शनात्करणत्वविशे
ननु ब्राह्मणामपि ब्रह्मयज्ञफलकरणत्वेनैव विनियुक्तमित्याश
णामिति विशेषितम् । ननु पञ्चमे पाठाधिकरणे ऽर्थकृते वानु
स्मारकत्वं परार्थत्वात्तेन सम्बन्धस्तस्मात् स्वशब्द उच्यत
परार्थो हि वेदो यदनेन शक्यते कर्त्तुं तस्मै तस्मादेव स
शक्यते नानेन परार्थो विधातुं क्रियाकाले च प्रतिपत्तुं
पदार्थाश्च ज्ञातुमुपादेयः क्रियाकाले च प्रतिपत्तुमित्यादिभ
ह्मणस्यापि स्मारकत्वस्य वक्ष्यमाणत्वात्कर्मकरणत्वेन
ऽर्नात्याशङ्क्य ब्राह्मणेनेति विशेषितं स्मारकतया ब्राह्मण
विनियोगो न ब्राह्मणेनेत्याशयः । दूषयति *तैरपीति * म
त्वं हेतोरप्रयोजकत्वं प्रश्नपूर्वमुपपादयति * कुत इति
मार्गविरोधी हेतुः साध्याक्षेपकत्वात्प्रयोजको भवति । न
गो विधायकत्वाविरोधीत्याशयः । श्लोकं व्याचष्टे * न
विनियुक्तशब्देन श्लोकस्थो नियोगशब्दो विनियोगवाचि
ख्यातो । पूर्वश्लोके ऽप्यधर्माविरोधमेव पाठाधिकरणे वक्ष्य
ह्मणस्योभयार्थत्वेनोपपादयति * तथा हीति * ननु ब्राह्म

धायकत्वोत्तरकालं सम्बन्धित्वेन यत्सन्निधाने यो दृष्ट इति न्याया-
द्विधेयस्मारकत्वावगतेर्विनियोगात्प्राग्विधायकत्वमविरुद्धं मन्त्रस्य
तु प्रागेव ब्राह्मणेन विनियोगात् स्मारकत्वप्रतीतेर्विधायकत्वानुपप-
त्तिरित्याशङ्कानिराससूचनायार्थम् * प्रथममित्युक्तम् * अर्थत्वेन
प्रतिपाद्यत्वेन स्मार्यत्वं तच्च विधानात्प्रागप्यस्तीत्याशयः । ननु मन्त्र-
तस्तु विरोधे स्यात् प्रयोगरूपसामर्थ्यात्तस्मादुत्पत्तिदेशः स इत्य-
स्मिन्नधिकरणे मन्त्रस्य कर्मकालप्रयोज्यत्वाद्रूपेणाभिधानेनैव कर्म-
प्रयोगे ऽनुष्ठाने सामर्थ्यात्स्मारकत्वावगतेः स्मृतिकार्यत्वेन चानुष्ठा-
नस्य स्मृतिक्रमेण क्रमस्य न्याय्यत्वान्मन्त्रब्राह्मणपाठक्रमयोर्विरोधे
मन्त्रपाठक्रमानुरोधेन पश्चाद्विहितस्याप्याग्नेयस्य प्रागनुष्ठानमित्युक्ते
ननु च ब्राह्मणपाठस्यापि तदेव दृष्टमनुष्ठेयस्मरणं प्रयोजनमित्या-
शङ्कोत्पत्तिदेशः स इति सूत्रावयवेन कर्मोत्पत्तिमात्रार्थो ब्राह्मणपाठ
इति वक्ष्यमाणत्वात् पाठाधिकरणे ब्राह्मणस्य विधिस्मृत्याख्यप्रयो-
जनद्वयार्थत्वाभिधानं भाष्यकारीयमनादृतमित्याशङ्क्याह * मन्त्रत-
स्त्विति * प्रभृत्यर्थेनेतिकरणेनोत्पत्तिदेशः स इति सूत्रावयव
परामृष्टः उत्पत्तिदेशः स इति यत्सूत्रकृद्वक्ष्यति तदत्र विरोधे सति
न त्वविरोधे ऽपीत्यर्थः। ननु ब्राह्मणस्य शक्त्यालोचनया स्मारकत्वाव-
गमे ऽपि कर्मानुवादेनाविनियोगान्न कर्मविधायित्वं विरुध्यते मन्त्र-
स्य तु कर्मानुवादेन तत्स्मारकतया वचनेन विनियोगात्कर्मविधा-
यित्वानुपपत्तिरित्याशङ्क्याह * ये चेति * वाचस्तोमादौ सर्वमन्त्रा
णां वचनेन विनियोगे ऽपि स्वार्थविधायित्वाविरोधाद् यस्मिन्कर्म
णि यो मन्त्रो विनियुज्यते तत्कर्मविधायिता तस्य विरुध्येतेति वाच्य
म् । न च सर्वमन्त्राणां स्वाभिधेये कर्मणि विनियोगो ऽस्तीत्याशयः
उदाहृत एव हि तावन्मन्त्रो ऽनुबन्ध्यपशुपुरोडाशानुनिर्वाप्यः देवीह
विर्यागे चरुद्रव्यके गोदेवत्ये याज्यात्वेन विनियुक्तः । न चानेन गो
देवत्यं कर्माभिधीयते यागे गवां करणत्वाभिधानाद्दाने च साम
र्थ्यात्कर्मतयान्वयावगतेरतो गोदेवत्ये यागे वाचनिकविनियोगस
द्भावे ऽपि गोद्रव्यकयागदानविधायिता न विरुध्यते यदि वात्र म
न्त्रो विधायको न वेति चिन्त्यते ततः प्रकृताख्यातशब्दचिन्ता सङ्ग
तिर्न स्यादित्याह * न चेति * मन्त्रब्राह्मणसाधारणयथाद्युपबन्धा
ख्यातशब्दविषयत्वेनाधिकरणं स्वमतेन व्याख्यातुमुपक्रमते * इती
ति * गुणप्रधानकर्मविधायकत्वेन द्विविधमित्यपि वाच्ये लक्षणै
कदेशेन तदर्थलाभात् विधायकशब्दानुक्तिः । ननु तृतीये ऽपि प्रक्ा
व्युत्पाद्ये प्रागेव तानि त्रैधं गुणप्रधानानीति सूत्रं कस्मान्न कृतमि

स्याशङ्कय द्वैविध्योक्त्यनन्तरमेव तृतीयप्रकारोक्तेः प्रसङ्गो न प्रा
इदानीं शब्दसूचितमर्थमुपपादयितुं पूर्वप्रकृतापेक्षित्ववाच्यथः
प्रयुक्तः । विधायकत्वमात्रप्रतियोगित्वेनाविधायकत्वस्य विधाय
विध्यमनपेक्ष्य तृतीयत्वं न सम्भवतीत्याशयः । विधिशक्तियुक्त
नावगतस्य लिङादेर्यच्छब्दाद्युपबन्धे ऽपि प्रत्यभिज्ञानाद्यदाग्नेयो
कपाल इत्यादौ यच्छब्दाद्युपबन्धे ऽपि विधित्वाभ्युपगमाद्यच्छब
पबन्धस्य विधिशक्तिप्रतिबन्धकत्वानुपपत्तेरभिधायकत्वाख्यप्रक
न्तराभावाभिधानार्थतया पूर्वपक्षसूत्रं व्याचष्टे * तत्रेति * ।
रान्तरव्युत्पादनार्थत्वेनापि वा प्रयोगसामर्थ्यान्मन्त्रो ऽभिधान
स्यादिति सिद्धान्तसूत्रमवतरणपूर्वं व्याचष्टे * तथेति * अ
नातिरिक्तप्रेरणाख्यव्यापारनिषेधार्थमभिधानकारीति वाच्ये
त्यर्थे तत्साधुकारित्ववाचिना णिनिप्रत्ययेन विवक्षितत्वा प्रत्यय
द्यार्थे कर्मिण्यभिद्धातौ प्रयोज्ये ऽनुवादार्थो वचिः प्रयुक्त इत्
भिधानवाचीति सूत्रावयवार्थं सूचयितुं विधायकत्वाभावो ऽ
यकशब्देनोक्तः । केषामाख्यातानां विधायकत्वाभावः कश्च तः
४।२ तुरित्यपेक्षायामाह * पश्येति * सिद्धत्वद्योतनाद्वक्त्राभिमुख
म्भवाद्विधौ ।

आत्मनि प्रेरणायोगान्निमित्तत्वाभिधानतः ।
विधिशक्तिविहन्तृ स्याद्यच्छब्दादिचतुष्टयम् ॥
प्राप्त्ययोगे ऽपि तत्रापि क चित्स्यादपि हन्तृत

श्लोकं व्याचष्टे*मन्त्रेति*एतदेव प्रपञ्चयति *तत्रेति*
गोभिर्यजते याश्च ददाति ता गावो न नश्यन्ति न च तस्करो
न चासां कं चिदवयवममित्रकृतो व्यधिरुपद्रवः पीडयति गो
च्च ताभिः सह ज्योक् चिरकालं स च ते संसक्तः संयुक्तो भव
गोस्तुत्यर्थे मन्त्रे गोयागगोदानयोर्यच्छब्देन सिद्धवद्भावाभि
द्विधायकत्वोपघातः वक्त्रभिमुखकरणार्थे या चामन्त्रणवि
लिङादेः समान्यतो वक्त्रभिहितार्थानुष्ठानप्रवृत्तवक्त्राभिमुखपु
वर्त्तकत्वावगमादप्रवृत्तप्रवर्त्तनात्मकविधिशक्तिविघातः बर्हिर्दे
दामि शुक्रं त्वा शुक्राय धाम्ने धाम्ने देवेभ्यो यजुषे यजुषे गृ
त्यस्मदर्थेनोत्तमपुरुषेणात्मनि प्रवर्त्तनानुपपत्तेर्निमित्तत्ववाचि
यदिशब्देन प्राप्तिबुद्धेरित्याशयः । नन्वविशेषेण मन्त्रब्राह्मण
नां यच्छब्दाद्युपबद्धानामाख्यातानां विचार्यत्वे सूत्रभाष्ययो
दाहरणमयुक्तमित्याशङ्कयाह * न चेति * यद्योत्तरसूत्रे मन
मविधाकत्वं प्रायिकमिति भाष्यकृद्वक्ष्यति तत्रामन्त्रणावि

बाहुल्यमेव कारणमिति प्रसङ्गादाह * अविधायका इति * ते
धिशक्त्यपघातका यच्छब्दादयः प्रायेण मन्त्रेष्वित्येव हेतोरसाव-
तृप्रसिद्धिरित्यर्थः। यश्च ब्राह्मणे विधिशब्दश्चेति मन्त्राधिकरणा-
पसूत्रादौ विधिमन्त्रयोरित्यत्र च विधायकत्वव्यपदेशस्तत्रानुपहृ-
विधिशक्तिप्रत्ययबाहुल्यं कारणमित्याह * ब्राह्मणे त्विति * ब्रा-
णानुदाहरणे वा विधायकाल्पत्वमेव कारणमित्यर्थादुक्तमपि स्प-
कर्तुमाह * अल्पे त्विति * ब्राह्मणस्य तु विधायकत्वे ऽनुपहते
धिशक्तित्वमेव कारणं न ब्राह्मणत्वं कारणं किन्तूपहतविधिशक्ति-
त्याह * विधायकत्वेति * न मन्त्रस्याविधायकत्वहेतुत्वाभावे म-
विशेषणानर्थक्यं स्यादित्याशङ्कां निरस्यन् प्रयोगसामर्थ्यादिति
त्रावयवं व्याचष्टे * तत्र त्विति*यथाद्युपबन्धत्वरूपान्निमित्तादि-
त्यायनार्थत्वावगतेः स्वयमविधायकत्वे ऽप्येकां गां दक्षिणां दद्या-
त्याद्याख्यातां तदैकवाक्यत्वेन विधिप्रयोजनत्वात्प्रयोगसामर्थ्यभा-
च्च न ब्राह्मणगतानामाख्यातानामभिधानमात्रपर्यवसानम्। मन्त्र-
तानां तु विधायकैकवाक्यत्वाभावेन निमित्तादिप्रत्यायनार्थत्वान-
गमात्प्रयोगसामर्थ्याच्चाभिधानमात्रपर्यवसानमित्याशयः। प्रयो-
सामर्थ्यमेव प्रश्नपूर्वमुपपादयितुं मन्त्राधिकरणोक्तमनुष्ठेयार्थ-
मारकत्वं तावत् स्मारयति * कुत इति * श्लोकं व्याचष्टे * न
वदिति * यश्चास्माभिर्यच्छब्दाद्युपबन्धेन विधिशक्तिविघातो
भिहितस्तत्रैव भाष्यमपि प्रतिज्ञापूर्वं योजयति * भाष्यमपीति *

॥ अथ मन्त्रनिर्वचनाधिकरणम् ॥ ७ ॥

तच्चोदकेषु मन्त्राख्या ॥ ३२ ॥

मन्त्रगत इति भाष्येण मन्त्रलक्षणस्य प्रासङ्गिकत्वेन सङ्ग-
मुक्त्वोच्यतइत्यनेन मन्त्रलक्षणात्प्राक्तद्गताख्यातविचाराशक्ति-
ाशङ्क्येदमित्यनेनार्थतो विपरीतक्रमतोक्ता साऽनादृत्येत्याह * य-
ोक्तेनेति * भाष्यकृतानुमन्त्रत्वस्याविधायकत्वाप्रयोजकत्वे ऽप्य-
भिधानमात्रपर्यवसानस्य विध्येकवाक्यत्वाभावेन मन्त्रेष्वेव भावा-
मन्त्राणामेव पूर्वाधिकरणोदाहरणत्वं मत्वा विपरीतक्रमतोक्ते-
याह * भाष्येति * चुदेः प्रेरणार्थत्वात्प्रयोजनस्य च प्रेरकत्वात्प्र-
ोजनवाचिनं चोदकशब्दमङ्गीकृत्य तच्चोदकेष्विति सूत्रावयवं स्वयं
ावद्व्याचष्टे * तच्चोदकेष्विति * या तु भाष्यकृता प्रवृत्ति-
ारणवाचिनः चोदकशब्दस्य लक्षणया कारणमात्रार्थवाचित्वमङ्गी-
कृत्य तच्छब्दव्याख्यानायाभिधानस्येति षष्ठ्युक्ता सा लक्षणा दोषाद्-

भिधानकारणत्वस्य च ब्राह्मणे ऽपि भावेनातिव्यापकत्वाप
केति कारणस्य कार्यप्रयोजनत्वाद्विवक्षिताभिधानप्रयोजनक
।१६।१ पार्थप्रदर्शनायैवेत्याह *अर्थेति * षष्ठीसमासप्रदर्शनार्थत्वानिवृ
मात्रशब्दः अभियुक्ता इति भाष्यावयवेन मन्त्राख्येति सूत्रावयवं
ख्याय ननु लक्षणसूत्रे वृद्धप्रयोगाभिधानमनर्थकमित्याशङ्क्य
कमित्यादिभाष्येण प्रयोगोपलक्षणार्थमेवेदं लक्षणमित्युक्तं तद्व
*अध्येत्रिति * ननु वृद्धप्रयोगगम्ये मन्त्रशब्दार्थे लक्षणाभिध
नर्थकमित्याशङ्क्य न शक्यमिति भाष्येण लक्षणं विना साकल्ये
योगविषयाज्ञानाल्लक्षणार्थत्वोक्ता तत्र पृष्ठा कोटशब्दं व्याच
धरणीति * तच्छब्देनेतिकरणसूचितकुटिलीकरणजन्यक्लेश
मर्शात्पृष्ठा कोटजन्यक्लेशसामान्येन प्रत्येकं मन्त्रपदप्रयोगवि
लोचनस्य पृष्ठस्याकोटः । कौटिल्यं वक्रत्वम् । अस्मिन्निति पृष्ठाक
ब्देनाभिधानमित्यर्थः । ऋषयो ऽपीति श्लोकस्य न शक्यमित्यने
नरुक्त्यमाशङ्क्य ननु पदार्थान्तराणां प्रत्येकनिरूपणाशक्तावपि
पदार्थानामध्येतृपरम्परया प्रत्येकं निरूपयितुं शक्यत्वाल्लक्षण
कथमित्याशङ्कानिरासार्थत्वसूचनार्थं पदार्थशब्दस्थाने लक्ष्यपदप्र
प्रतिज्ञापूर्वं पठति * श्लोकश्चेति * विप्रकीर्णानेकशाखागतान
कल्येनोपसंहारो न शक्य इत्याशङ्कानिरासाशयः । नन्वभिधान
जनत्वस्य मन्त्रलक्षणत्वे किमिति वृत्तिकारेणास्यन्तत्वादिमन्त्र
णमुक्तमित्याशङ्क्योदाहरणमित्यादिभाष्येणास्यन्तादेः स्वमतेन
रणत्वमुक्त्वा तच्चेत्यनेन तच्छब्देन लक्षणं परामृश्य यदिदमस्य
दिवृत्तिकारेण तल्लक्षणमाख्यातं तदुदाहरणमिषेण न तु परम
लक्षणम् * प्रायिकत्वादित्युक्तम् तद्व्याचष्टे * वृत्ताविति *
देतेषां मन्त्राणामस्यन्तत्वादिलक्षणं वृत्तावुक्तं स मन्त्राणामु
रणविस्तरो मतो न तु वस्तुतो लक्षणं प्रायिकत्वादित्यर्थः ।
र्दा अस्यायुर्मे देहीत्याशिषम् । अग्निर्मूर्द्धा दिवः ककुदिति स्तुति
भमेका तस्य यो ऽस्मान् द्वेष्टि यं च वयं द्विष्म इति संख्य
च स्पष्टत्वाद्व्याख्यायाक्षीत्यस्य तु विग्रीवो वयोदर इत्यादिवा
स्तुत्यर्थत्वोपपत्तेः । प्रलपितत्वानुपपत्तिमाशङ्क्य स्तुत्यसम्भवसू
र्थं डुलिशब्दं व्याचष्टे* डुलिरिति*अम्बे ऽम्बिके ऽम्बालिके न :
यति कश्च न स सस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीमिति
कल्याणरूपां काम्पिलदेशवासिनीं मां न कश्चिन्नयति कुत्सितो
स्वपितीति किशोर्याः परिदेवनमग्नीदग्नीन्विहरेति प्रैषं को
कस्यासि को नामासि यस्य ते नाम मन्महि यं त्वा सोमेनाति

त्यन्वेषणं पृच्छामि त्वा परमन्तं पृथिव्या इति पृष्टमियं वेदिः परो न्तः पृथिव्या इत्याख्यानं च स्पष्टत्वादव्याख्यायाच्छिद्रेण पवित्रे- वसोः सूर्यस्य रश्मिभिरित्यनुषङ्गविषयमाह * प्रतीति*प्रयोग- दात्तानुदात्तस्वरिताख्यत्रैस्वर्यरूपत्वेन सन्नतराधिकं चातुःस्वर्यरूप- वेन च भाष्यकृता व्याख्यातत्वादव्याख्याय सामर्थ्यस्याव्यापार- व्यापारवाचिनाभिधानशब्देन व्याख्यानानुपपत्तिमाशङ्क्याभिधा- शब्दं शक्तिविषयत्वेन व्याख्यातुमाह * सामर्थ्यमिति * लक्षण- वासम्भवोपपादनायास्यन्तत्वान्तयोरव्याप्त्यभिधानार्थत्वेनासिम- या अपि चेत्यादिभाष्यं स्पष्टत्वादव्याख्यायाशीरित्यादावतिव्या- प्त्यभिधानार्थत्वेन परिदेवनप्रैषौ व्याचष्टे* ये मामिति* किं जाना- ते भवान् किं शाखावर्ती सूर्मिमित्यस्यार्थस्य पृष्टशब्दादेव ज्ञातत्वा- त् सूर्मिशब्दमात्रार्थं व्याचष्टे * कर्णवन्तीमिति * भाष्यशेषः स्पष्ट- त्वान्न व्याख्यातः । मन्त्रप्रतिपत्तेः प्रयोजनापेक्षायामस्तीत्यनेनाहे बु- ध्न्य मन्त्रं मे पाहि यमृषयस्त्रयीविदो विदुः ऋचो यजूंषि सामानि- ता हि श्रीरमृता सतामित्यादौ वेदे प्रयुक्तस्य मन्त्रशब्दस्यार्थज्ञानं प्रयोजनमुक्तम् ।

॥ अथ ब्राह्मणनिर्वचनाधिकरणम् ॥ ८ ॥

शेषे ब्राह्मणशब्दः ॥ ३३ ॥

यदि वेदप्रयुक्तमन्त्रशब्दार्थज्ञानार्थं मन्त्रलक्षणमुक्तं तर्हि तत् ब्राह्मणकान्येव पञ्चहवींषि भवन्ति यद्ब्राह्मणकानीतराणीत्यादौ वे- दप्रयुक्तब्राह्मणशब्दार्थज्ञानार्थं ब्राह्मणस्यापि लक्षणं वक्तव्यमित्यर्थे- ते भाष्येणा पूर्वप्रकृतापेक्षित्ववाच्यथशब्दयुक्तेनाशङ्क्य तन्निरासार्थ- त्वेन सूत्रव्याख्यानार्थं मन्त्राश्चेति भाष्यमिति वक्तुं सूत्रस्य मन्त्र- व्यतिरिक्तरूपब्राह्मणलक्षणाभिधानार्थत्वप्रतीतेः । सूत्रदूषणार्थमिति शङ्कामुपन्यासपूर्वकमुपन्यस्यति * परिशेषेति * सूत्रे शेषशब्दप्रयो- गात्परिशेषशब्देन तद्व्याख्याप्रतीतेस्तद्भाष्यं लक्षणावक्तव्यत्वाभि- धानार्थत्वेन सूत्रस्य व्याख्यानमेवेत्युक्ते ननु शेषशब्देन मन्त्रव्यति- रिक्तत्वरूपलक्षणाभिधानान्न लक्षणावक्तव्यत्वं सूत्रेणोक्तमित्याश- ङ्क्य * लक्षणेत्युक्तम् । मन्त्रव्यतिरिक्तत्वमात्रस्याब्राह्मणे ऽपि भा- वान्मन्त्रव्यतिरिक्तवेदत्वं लक्षणं वाच्यं तच्च द्विविध एव वेद इति जानतानुक्तस्यापि ज्ञातुं शक्यत्वादजानता तूक्ते ऽपि लक्षणे कल्पा- देरपि मन्त्रव्यतिरिक्तत्वेन कतमत् ब्राह्मणमिति ज्ञातुमशक्यत्वाद- व्याच्यमित्याशयः । ननु लक्षणपरत्वाभावे सूत्रानर्थक्यं स्यादिति श-

ङ्कते * किमर्थं पुनरिति * तृतीयप्रकारनिरासार्थत्वेन।
हरति * नेति * ननु ब्राह्मणलक्षणस्यावचनीयत्वे वि
कारेणेति करणबाहुल्यादिलक्षणमुक्तमित्याशङ्कानिरास
स्त्वित्यादिभाष्ये यदेनमधिनोत्तद्दध्नो दधित्वमिति
त्यमिन्द्रमधिनोत्तस्मात्तद्धीति धिनोतेः प्रीतिकर्मणो
र्वचनम्।उपवीता वा एतस्याग्नयो यत् ब्रह्मा सामानि
मगाने विलम्बेनाग्निविगमापत्तेर्निन्दां प्रशंसादीनि
स्यादिरूपेण प्रसिद्धत्वादव्याख्याय परकृत्यादिशब्दाः
४१७।१ एकेति* एकः कर्त्ता यस्मिन्नुपाख्याने विषय इति सम
कर्तृकमित्यत्राप्येवं ब्राह्मणलक्षणस्य विवक्षितत्वाद्विधिः
माशङ्क्य व्याचष्टे * विधीति * इति करणबाहुल्याद
नां मध्ये सत्यं ज्ञानमनन्तं ब्रह्मेत्यादौ कस्य चिद्भाव
नालक्षणत्वाभिधानार्थमेतदपीति भाष्यमिति करणेत्य
त्यभिधानार्थं स्पष्टत्वान्न व्याख्यातम्। तुग्रो ह भुज्युमश्वि
न्न कश्चिन्ममृवाँ अवाहाः तमूहथुर्नौभि रात्मन्वत
द्भिरपोदकाभिरित्यस्यैवमाख्यायिकासरूपत्वं हे अ
नाम कश्चिद्राजा भुज्युनामानं स्वपुत्रमुदमेघे समुद्रे
यामास इति तिङां तिङो भवन्तीति प्रथमपुरुषार्थ
द्विद्योतनार्थो हकारः नकारस्योपमार्थत्वाद्यथा कश्चिन्म
णो रयिं धनं समुद्रे वाहयतीति दृष्टान्तः तं भुज्युमात्मन्व
भिरन्तरिक्षप्रुद्भिराकाशगामिनीभिरपोदकाभिर्निजलाभिः
हथुः समुद्रादुत्तरयामासथुरिति इन्द्रवायू इमे सुता
गतमिति पूर्वार्द्धर्चेण हे इन्द्रवायू इमे सोमा अभिषु
यौभिरन्नैर्यजमानाय देयैः सह युवामागतमित्युक्ते यस
युवामुशन्तीच्छन्तीतिहेतुः यत्प्रेषिता वरुणेन ताः शीभं
द्याप्नोदिन्द्रो वोयतीस्तस्मादापो अनुष्ठनेति हे आपो यः
रुणेन प्रेषिताः सत्यः शीभं स्वाच्छन्द्यं समबला तव लाः
यतीः कुर्वतीर्वो युष्मानिन्द्र आप्नोत्तस्मादापः स्थ
र्थसंज्ञात्वद्योतनार्थानुशब्दयोगादप्शब्दनिर्वचनमिति
स्वान्न निर्वचनमित्युक्तं मोघमन्नं विन्दते अ
ब्रवीमि वध इत् स तस्यनार्यमणं पुष्यति नो
लाद्यो भवति केवलादीत्येव निन्दा यः केवलम् एकाक्य
ब्दोपलक्षितं देवगणं सखायं च मनुष्यगणं पोषयति
निष्फलमन्नं लभते न तस्यान्नं फलदं भवति प्रत्युत वो।

वाद्धधकार्यैव भवति केवलपापश्च सम्भवति सत्यमेतद् ब्रवीमीति । ग्निर्मूर्द्धा दिव इति द्युमूर्द्धत्वादिगुणकीर्त्तनात्प्रशंसा तिरश्चीनो ततो रश्मिरेषामधः स्विदासीदुपरिस्विदासीदित्येषां कवयो म- षेति पूर्वस्यामृचि निर्दिष्टानां कवीनां रश्मिः तिरश्चीनो विततः कमध आसीदुतोपरीति स्विच्छब्दयोगात् प्लुत्या च संशयः । वृणीया- देन्नाधमानायतव्यानिति भोज्यान्पदार्थान्याचमानाय दद्यादिति वधिः चित्र इद्राजा राजका इदन्यकेत्यकेसरस्वतीमनुपर्जन्य इव तनद्धि वृष्ट्या सहस्रमयुता ददिति हे राजकाश्चित्रो नाम राजा रस्वतीदेशे ऽन्यस्मिंश्च यस्मिन्कस्मिंश्चित्पुण्यदेशे सहस्रं गवा- युतानि दत्तवानित्येकचरितोपाख्यानं परकृतिः यज्ञेन ज्योतिष्टोमा- देना विष्णुर्वै यज्ञ इति श्रुतिर्यज्ञं विष्णुमयजन्त देवा इति बहुचरि- तोपाख्यानं पुराकल्पः ।

॥ ऊहाद्यमन्त्रताधिकरणम् ॥ ९ ॥

अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः ॥ ३४ ॥

वेदस्य त्रैराश्यनियमे सत्यूहादेरप्यनुमानादिगम्यवेदत्वाभ्यु- पगमात् विधिप्रयोजनत्वाभावेन च ब्राह्मणत्वाभावान्मन्त्रत्वप्रसङ्गे पठ्यमानवेदविषयत्वं त्रैराश्यनियमस्य वक्तुमेतदधिकरणमिति ब्रा- ह्मणलक्षणावक्तव्यत्वाभिधातव्यवधेरदोषत्वं स्पष्टत्वादनभिधाया- धिकरणविषयं व्याचष्टे ॥ सूर्यायेति ॥ प्राकृतस्थानपतितपदा- र्थान्तरकार्यगः उहः प्रयोगो विकृतावूह्यमानतयोदित इत्यग्निपदस्था- ने सूर्यपदप्रयोगस्य विकृतत्वादूहत्वं यत्र शब्दे काश्यपावत्सारनैध्रु- वेत्याद्यार्षेयत्रयं कीर्त्यते स प्रवरः देवदत्तस्य पिता यजत इत्यादि य- जमानपुत्रादिनामग्रहणं सूक्तवाकाद्याशास्ते ऽयं यजमानो ऽसाव- सावित्यादिसर्वनामयुक्तमन्त्राम्नाने नामधेयस्य मन्त्रताया वक्ष्यमा- णत्वात् सर्वनामस्थाने प्रक्षेप्य नामधेयव्यावृत्त्यर्थम् ॥ यथेत्युक्तम् ॥ पूर्वपक्षसिद्धान्तौ यथाभाष्यं स्फुटत्वात् संक्षिपति ॥ तेषामपी- ति ॥ भाष्यानुक्तो ऽपि मन्त्रमध्यपातो हेतुः सम्भवादुक्तः । मन्त्रमध्य पातस्य हेतुत्वशङ्कोत्प्रेक्षामात्रत्वादयुक्तेत्याशयः । ऊहादिभ्रेषे मन्त्रभ्रं शनिमित्तप्रायश्चित्ताभाववदूहितपदवतो वाक्यस्य समस्तस्यामन्त्र त्वात् मन्त्रनिमित्तशब्दविकाराभावो ऽपि कस्मात् सिद्धान्तप्रयोज नत्वेन भाष्यकृता नोक्त इत्याशङ्कानिरासार्थं स्वयं चिन्तान्तरं प्रस्तौ ति ॥ किं पुनरिति ॥ पूर्वपक्षमाह ॥ समस्तस्येति ॥ श्लोकं व्या चष्टे ॥ सम्प्रदायेति ॥ मन्त्रैकदेशे मन्त्रत्वसञ्ज्ञाभ्युपगमे ऽति

सक्तिरित्याह * अथेति * पूर्वपक्षप्रयोजनमाह * तस्मा
एतदेव प्रपञ्चयति * अतश्चेति * तस्योहवतो वाक्यस्य न
हितावयवमात्रवर्त्तिनि निमित्तांशे मन्त्रभ्रंशनिमित्तप्रायश्चि
त्तः । किं तु सर्वावयववर्त्तिनीत्येकं तावत्प्रयोजनं मन्त्रे श्वेत
शस्पुरोडाशो गिवन्नित्यादिना यावन्तः श्वेतवा दनुत्कशाः पुरो
दयो मन्त्रविषयत्वेन ह्यग्रहोर्भः छन्दसीत्यादिना च्याम्नातवे
न्दोविषयत्वेन आन्यं दिवो मातरिश्वा जभार इमामगृभ्णा
यावन्तः शब्दविशेषाः स्मर्यन्ते तेषामभावाच्छ्वेतवाहउक्थ
रोडाशो जहार अगृह्णन्नित्यादिलौकिकप्रयोगः कार्य इति
ति दृष्टान्तदार्ष्टान्तिकव्याजेन प्रयोजनद्वयमुक्तम् सिद्धान्तमा
३।१८।२ श्रेति * ऋगादिजातिवन्मन्त्रजातेरप्यभावाद्रचनाविशेषा
गोत्वनिदर्शनायाकृतिशब्दः । यथा छिन्नवृक्षोपजनापाये ऽपि
वनमिति प्रत्यभिज्ञानात् पूर्ववनाविनाशस्तथात्रापि स एव
इति प्रत्यभिज्ञानान्मन्त्राविनाश इत्याशयः । श्लोकं व्याच
ष्टीति * प्रत्यक्षोपलम्भमेव व्यवहारेण द्रढयति * तथा
याज्यान्तप्लुतविधौ वर्णविकारः इरापदविधौ गिरापदलोप
पः उदात्तानुदात्तस्वरितानामत्यन्तसन्निकर्षलक्षणैकश्रुत्यवि
रान्तरनियोगः । श्लोकं व्याचष्टे * यत्रेति * न तु यथा व्यं
ह्वणास इत्यादिपदे वर्णलोपागमादिविधिना न्यूनाधिक्ये ऽ
वगतार्थाभिधानशक्त्यविघातावगमात्पूर्वपदाविनाशस्तथेहापी
धिना मन्त्रस्य पूर्वावगतार्थतात्पर्याविघातावगमान्मन्त्रत्व
इत्याशयेनाशङ्कते * स्यादिति * एवं तर्ह्यूहादावपि पूर्वावग
मवेतदेवताभिधानाद्यर्थत्वाविघातेनोहितपदवतो ऽपि मन्
नाशापत्तिसाम्यादेतत्कारणत्वानुपपत्तेर्विहितत्वमात्रं मन्त्र
शाकरणं वाक्यं तच्चामन्त्रे ऽपि व्रीह्यादौ विहितत्वादकार
शयेन परिहरति * तदिति * अस्तु तर्हि इरापदादिमतो
मन्त्रतेत्याशङ्क्याह * न चेति * एवं कतिपयवर्णपदान्यत्वे
न्त्रत्वाविनाशे स्थिते प्रसङ्गादूहादिवैषम्येणेरापदादेर्मन्त्रत्वं
र्वपक्षं दर्शयन्ननन्तरमुपसंहरत्यतश्चेति । सिद्धान्तमाह * न
गिरापदवन्मन्त्राम्नानमात्रालोचनेनेरापदस्यामन्त्रत्वप्रतिभा
इरापदविध्यालोचनान्मन्त्रत्वावधारणेति समस्तेत्यनेनोक्तम्
सतीरापदेन गिरापदस्य बाधात् सामाम्नायावगतमन्त्रत्वं
त्याशङ्कानिराससूचनायेह स्वाध्यायकाले गिरापदवान्मन्त्र
गवेलायामिरापदवानित्युक्तम्।इह गिरापदं मन्त्रे इहेरापदं

ये मन्त्रश्रेषनिमित्तप्रायश्चित्तविषयत्वमात्रप्रदर्शनार्थं पदस्य मन्त्रो-
क्ता । वस्तुतस्तु वाक्यस्यैव मन्त्रत्वं न पदस्येति सूचयितुम् *प-
दानित्युक्तम् * नन्वमन्त्रस्यापि व्रीह्यादेर्विधिदर्शनात्तत्कथं विध्या-
म्नानान्मन्त्रत्वावधारणेत्याशङ्क्याह * एवेत्युक्तम् * विधेः
प्राग्विधेयसमर्पणाम्नानवेलायामित्यर्थः । आम्नानेन मन्त्रत्वं न वि-
धिमात्रेणेत्याशयः । परस्त्वैरमित्यनेनैरापदस्य स्वरूपेणाम्नानाभा-
वादुच्चार्यत्वेन विधानमाम्नानं वाच्यं तच्चोहादेरप्यस्तीत्याशयेन
साम्यमाह * यद्येवमिति * निष्कृष्टस्यैरापदस्याम्नानाभावे ऽपि त
द्धितान्तपदान्तर्गतस्याम्नानमस्तीत्याशयेन सिद्धान्ती निरस्यति *
इति* वैदिकशब्देनाम्नानमभिप्रेतम् । श्लोकं व्याचष्टे *वैदिकं हीति*
ननु न्यायेनाप्युच्चार्यत्वेनैकल्पत्वादुच्चारणस्यैवाम्नानत्वादूहस्यैवो-
हस्याम्नानमित्याशङ्कानिरासस्सूचनार्थत्वेनोत्तरार्द्धं व्याख्यातुम् * न
चेत्युक्तम् * परस्तु वेदप्रमेयत्वं वैदिकशब्देनोक्तमिति भ्रान्त्या पु-
नः साम्यमाशङ्कते * ननु चेति * सिद्धान्ती स्वाशयं प्रकटयति *
अत्रेति * नन्विरापदस्याप्युच्चारणीयरूपेणाम्नानं नास्तीत्याशङ्क्यो-
च्चारणीयनिष्कृष्टरूपानाम्नाने ऽपि तद्धितान्तर्गताम्नानादूहादिवै-
षम्यमाह *तत्रेति* नन्वेवं सति सूर्यशब्दस्यापि तद्धितान्तपदा-
न्तर्गतस्याम्नानमस्तीति पुनः साम्यमाशङ्कते* नन्विति * उच्चार-
णीयत्वोपपादनाय * श्रुतीत्युक्तम्* सूर्यशब्देन देवतामुद्दिश्य हवि-
स्त्यजेदित्युच्चार्यत्वेन विनियोगाच्च व्रीह्यादितुल्यतेत्याशयः । मन्त्रा-
ख्यवाक्यावयवत्वेन पदस्य मन्त्रत्वान्मन्त्रावयवत्वेनाम्नानं मन्त्रत्वे
हेतुः । न च तत्सूर्यादिपदे ऽस्तीति परिहरति *नेति* एतदेवोपसंह-
रति * तस्मादिति * मन्त्रावयवत्वेन सूर्यादिपदानां विनियोज-
कानाम्नानान्मन्त्रावयवत्वेनाम्नानं नास्तीत्यमन्त्रतेत्यर्थः । नन्वेवं स-
त्यग्ने महाँ असि ब्राह्मण भारतेत्यादिमन्त्रावयवत्वेन प्रवरविध्या-
म्नानात् सुब्रह्मण्यानि निगदावयवत्वेन च नामविध्याम्नानयोर्मन्त्र-
त्वं स्यादित्याशङ्कते * नन्विति * मन्त्रत्वहेतुं स्वरूपाम्नानासिद्ध्यै-
तद्विध्याम्नानस्योक्तत्वात् स्वरूपाम्नानरहितं विध्याम्नानं न हि म-
न्त्रत्वहेतुरित्याशयेन परिहरति * स्यादिति * नन्वेवं सत्याशास्ते
ऽयं यजमानो ऽसावित्यादिसर्वनामसंयुक्तमन्त्राम्नाने ऽपि नाम्नः
स्वरूपेणानाम्नानादमन्त्रत्वं स्यादित्याशङ्कते * एवं तर्हीति * स-
र्वनाम्नः स्वरूपाम्नानप्रकारत्वोपपादनायाशक्तानामभ्युपगमेनोत्त-
रमाह * तथा नामेति * सर्वनामद्वारा स्वरूपाम्नानाच्च मन्त्र-

---

१ आम्नानात्तयोरिति २ पु० पा० ।

त्यानुपपत्तिरिति स्वमतेन परिहरति * अथ वेति * ननु देवद
द्विनाम्नो मन्त्रत्वे इरापदादिवत्कस्मात्साक्षादनाम्नानमित्याः
विशेषाणामित्युक्तं कथं सर्वनाम्ना स्वरूपाम्नानमित्याशङ्क्य *
न्येत्युक्तम् * सर्वनाम्नो प्रयोगार्हत्वात्तत्स्थानस्य शून्यत्वापत्तेः
गार्हदेवदत्तादिनाम तत्स्थानपूरकतयावसीतइत्याशयः । एत
पपादयति * इतरथा हीति * आशास्ते ऽयं यजमान इत्ये
ताप्यभिधानसिद्धेस्तदंशेत्युक्तम् । नन्वेवमपि देवदत्तादिपदस्या
भिरनाम्नानाद्विधानात्कथं सर्वनामस्थाने प्रयोग इत्याशङ्क्य
प्रवरेति * इरापदादिवत्साक्षाद्विध्यभावे ऽपि सूक्तवाकादिम
धिनैव मन्त्रगतसर्वनामार्थवत्त्वाय तत्स्थाने देवदत्तादिपदप्र
कल्प्यतइत्यर्थः । यजमानस्य तत्पूर्वेषामपरेषां च प्रत्येकं नाम
ह्लातीति सर्वनामरहितसुब्रह्मण्यानिगदविधिविहितं नामधेयं
न्तः । सर्वनामस्थानप्रक्षेप्यनामधेयस्य मन्त्रत्वोपपादनप्रयोजनः
तस्मादिति * अधिकरणाविषयभूतानाम् ऊहादीनां मन्त्रत्वाि
सर्वनामस्थानप्रक्षेप्यनामेरापदादिवैषम्यमुपसंहरति * नन्वि
च्चिन्तान्तरसिद्धान्तमुपसंहरति * अतश्चेति * क्रतुनाकाङ्क्षि
त्यभिज्ञायमानं च मन्त्रत्वं यस्येति विग्रहः । अविशिष्टं तथा मन
प्राप्तत्वात् क्रत्वाकाङ्क्षितप्रत्यभिज्ञायमानमन्त्रत्वाच्च प्रायश्चित्ते
न्द्रसप्रयोगैश्च न वर्जनीयमित्युक्ते कथं मन्त्ररूपप्राप्तिस्तत्प्र
कथमूह्यपदस्यामन्त्रस्य प्रक्षेप इत्याशङ्काभिधानेत्युक्तं कर्मसमवे
काशनाख्यस्याभिधानस्य प्रकृतिवद्विकृतावपि कर्मसमवेतो ऽर्थे
जुष्टं निर्वपामीत्यनेन सकलेनाभिधेय इत्येवं चोदकेन प्रापित
ह्यपदप्रक्षेपः । प्रकृतिवद्यथासमाम्नायावगतेन मन्त्रस्वरूपेण
इत्येवं रूपेण चार्थस्य यथा समाम्नायावगतमन्त्ररूपस्य चोदके
पितत्वान्मन्त्ररूपप्राप्तिरित्यर्थः ।

॥ ऋग्लक्षणाधिकरणम् ॥ १० ॥

तेषामृग्यत्रार्थवशेन पादव्यवस्था ॥ ३५ ॥

ननु कर्मभेदानुनिष्पाद्यपूर्वभेदसिद्ध्यर्थे भावशब्देभ्यो
धिगतिरिति भावार्थाधिकरणेनोक्ते तदपवादायाख्यातद्वैविध्य
प्रसङ्गान्मन्त्रगतस्याख्यातस्याविधायकत्वलक्षणे तृतीयप्रकारे
हिते तदनुप्रसङ्गान्मन्त्रलक्षणोक्त्या ऽध्यायोपक्रमप्रतिज्ञातपदा
तेः कथमृगादिलक्षणसङ्गतिरित्याशङ्क्याह * प्रसक्तेति * ः
नुप्रसक्तं चेति भाष्यगतेन चकारेण तदनुप्रसक्तस्याप्यर्थस्य

ादविरोध इत्याशयः। ननु तेषां मन्त्राणां मध्ये यत्र मन्त्रे पाद-
व्यवस्था स मन्त्र ऋगिति लक्षणस्यादुष्टत्वादेवं जातीयकेष्वित्यादि-
भाष्येणाभियुक्तोपदेशाभिधानं व्यर्थमित्याशङ्क्याह * शब्दार्थस्ये-
ते * यदीति भाष्येणार्थवशत्वस्येह लक्षणान्तर्गार्ति मत्वा यदग्ने स्या-
महं त्वमित्यादावर्थवशत्वसद्भावे ऽप्यग्निः पूर्वेभिर्ऋषिभिः यद्वा ज-
गज्जगत्याहितं पदमित्यादौ लघुगुर्वक्षरसामाख्यवृत्तवशेनाग्निमील-
इत्यादौ चाक्षरसंख्यानियमलक्षणाच्छन्दोवशेन तमुत्वामिन्द्रं न रेज-
मानमित्यादौ चान्यवैषम्येणैवादेवमिन्द्रो विव्ये नृन्प्रेत्यादौ च प्रायव-
शेन पादव्यवस्थायामर्थवशत्वाभावाल्लक्षणाव्याप्तिं शङ्कितामुपपाद-
यति * क्रियापदेति * नन्वेवं सति न क चिदर्थवशेन पादव्यव-
स्था स्यादित्याशङ्कते * ननु चेति * ऋगर्थापर्यवसाने ऽप्यवान्तरा-
र्थपर्यवसानात्परिहरति * कथमिति * आख्याताभावेनोत्तरयोर-
सावप्यसमाप्त इत्याशङ्कते * परयोरिति * तयोरप्याख्यातान्वया-
त्समाप्तिमाह*नेति* अनावृत्तस्यैवानेकान्वयमालाविवक्षयानुषङ्गाभि-
धानान्न वाक्यभेदापत्तिः। एतदेवोपसंहरति * तस्मादिति * ना-
र्थवशेनेति परिहारभाष्यं व्याचष्टे * एतस्य त्विति * पादव्यवस्थैव
कथमित्यपेक्षायां लक्षणानन्तर्गतस्याप्यर्थवशत्वस्यार्थवशेन वृत्तव-
शेनाध्येतृप्रसिद्धिवशेनेत्युपलक्षणायाभिधानान्नानर्थक्यमित्याशयः।

॥ सामलक्षणाधिकरणम ॥ ११ ॥

गीतिषु सामाख्या ॥ ३६ ॥

गीतित्वस्य लौकिक्यामपि गीतौ सद्भावेनातिव्यापकत्वमाश-
ङ्क्य मन्त्रगतत्वविशेषणसूचनायाह * तेषामिति*अभियुक्तोपदेशो
ऽत्रापि पूर्वोक्तप्रयोजन एवेत्याह*अत्रापीति* सिद्धप्रामाण्येनोपदे-
शेन व्यवहाराय प्रथमं दृष्टान्तेन तत्प्रामाण्योपपादनस्योचितत्वेन
मन्त्रलक्षण एव कार्यत्वादभियुक्तोपदेशश्चेत्यादिभाष्यं पठनीयमिति
स्वयमेवाशङ्क्य परमतेन तावत्परिहरति * प्राथम्यादिति * यथेति
मध्यप्रतीकेनाभियुक्तेत्याद्युक्तं नाभियुक्तोपदेशमात्रप्रामाण्याभिधा-
यैनातदुक्तं किं तु गीतेः सामत्वे साम्ना स्तुवतइति स्तुतिसाधन-
त्वायोगापत्तेरयमप्रमाणमित्याशङ्कानिरासाद्यत्रैव वाच्यमित्याशयेन
स्वयं परिहरति * अथ वेति * अभियुक्तोपदेशं दृष्टान्तं मत्व
साध्यविकलत्वमाशङ्कते * ननु चेति * नात्यन्तसाम्येन दृष्टान्त इ
त्याशयेन परिहरति * नैष दोष इति * ननूपदेशदृष्टस्य प्रामाण्ये
ऽपि गीतिमात्रविषयत्वं कथमवसीयतइत्याशङ्कानिरासार्थं गीति

विशिष्टे चेदिति भाष्यं व्याचष्टे * गीतेरिति * सप्तमद्वितीय
वक्ष्यमाणस्यैव गीतिमात्रवाच्यत्वस्येह लक्षणसमर्थनायानागता
णेन भाष्यकृतोक्तत्वादपौनरुक्त्यम् । अत्रैव वृद्धसम्मतिमाह *
२।१ चेति *

॥ यजुर्लक्षणाधिकरणम् ॥ १२ ॥

शेषे यजुः शब्दः ॥ ३७ ॥

यजुष इति भाष्यस्य सूत्रप्रत्याख्यानार्थत्वभ्रान्तिं निरस्यति
शेष इति *

॥ निगदानां यजुष्ट्वाधिकरणम् ॥ १३ ॥

निगदो वा चतुर्थं स्याद्धर्मविशेषात् ॥ ३८

निगदा इति भाष्यं सूत्रानारूढमाशङ्क्य व्याचष्टे *शेष ः
धर्मस्य विशेषाश्रवणादन्यत्ववाचितया विशेषशब्दं व्य
* धर्मेति*तृतीये वेदो वा प्रायदर्शनादित्यत्रोच्चैस्त्वोपांशुत्वयं
धर्मत्वे वक्ष्यमाणे ऽपि तत्रत्यपूर्वपक्षे स्थित्वोपांशुत्वस्य यजुर्जा
त्वेनोच्चैस्त्वस्य तदन्यतोक्ता विधित्वे विशेषशास्त्रेण सामान्यः
बाधात्सिद्धान्ते ऽपि धर्मान्यत्वोपपत्तेः पूर्वपक्षोपपादनाशरि
त्वोच्चैरित्यस्यानुवादता भाष्यकृतोक्तेति भ्रान्तिं निवर्त्तयितुं ।
त्वे ऽप्यबाधपक्षसम्भवे बाधपक्षस्यानङ्गीकार्यत्वाद्धर्मान्यत्वस्
पक्षोपपादकत्वं वक्तुमाह * यदि तावदिति * अनुवादः
निगदस्य यजुषो भेदेन विनोच्चैस्त्वधर्मप्राप्तेःसुसाधो भे
त्याह * अथेति *

व्यपदेशाच्च ॥ ३९ ॥

धर्मान्यत्वस्य तार्तीयवाक्याधिकरणाविरुद्धत्वेनाभ्युच्चयमात्र
न्मुख्यहेत्वभिधानार्थमिदं सूत्रं यथा भाष्यं स्पष्टत्वान्न
ख्यातम् ।

यजूंषि वा तद्रूपत्वात् ॥ ४० ॥

तद्रूपत्वस्य हेतोः यजूरूपत्वादिति भाष्यकृद्व्याख्यान
थापि निगदस्य मन्त्ररूपत्वाद्यजुषो वा निगदरूपत्वस्य श्रव
गदस्यैव वोच्चैस्त्वधर्मरूपत्वाद्व्यपदेशभेदसिद्धिरिति व्याख्
सूचयन्सूत्रं व्याचष्टे * अह इति * कं मन्त्रमित्यपेक्षायामृचो
षि सामानीत्यृग्यजुःसामस्वेव मन्त्रत्वोपसंहारात् मन्

येतृप्रसिद्धेरस्य निगदस्य त्रयान्यतमान्तर्भावावगतेर्ऋक्सामवैलक्ष-
ण्येन पारिशेष्याद्यजुष्ट्वमित्येको हेत्वर्थः । तदाहुः । ऋक्सुब्रह्मण्या
यजूः सामा इति प्रश्नोत्तरभूते मन्त्र एव खल्वयं निगदभूतो भव-
ते तस्माद्यजुरिति वेदे निगदशब्दस्य मन्त्रशब्दसामानाधिकरण्येन
हेतुना यजुष्ट्वापरित्यागेनैव निगदे मन्त्रशब्दप्रयोगावगमादिति द्वि-
तीयः निगदस्य यजुष्ट्वापरित्यागेनैव धर्मविशेषेणोच्चैस्त्वेन व्यपदेशभेद-
सिद्धेरिति पूर्वपदावृत्त्या तृतीयः । गुणार्थो व्यपदेश इत्यत्र व्यपदेश
हेतुर्निराकरिष्यमाणो ऽपि मुख्यत्वसूचनायेह निराकृतः । परिशेषेत्य-
नेन भाष्योक्तहेत्वर्थो व्याख्यातः । यद्वा त्रिष्वेव मन्त्रत्वोपसंहारान्म-
न्त्र एव खल्वयं निगदभूतो भवतीति च वेदे निगदस्य मन्त्रशब्दसा-
मानाधिकरण्येन निगदे मन्त्रशब्दप्रयोगादित्येक एव हेतुः ।

वचनाद्धर्मविशेषः ॥ ४१ ॥

उच्चैस्त्वोपांशुत्वयोर्जातिधर्मत्वाभावान्न तावद्यजुष्ट्वेन निग-
दस्योपांशुत्वप्राप्तिः यदि परं प्रायेण यजुर्वेदविहितत्वात्तत्प्राप्तिः
स्यात्सास्य वचनेनैवोच्चैस्त्वावगमान्निरस्तेत्यभिधानायैतत्सूत्रं तत्र-
वचनशब्दो वचनं परमित्यादौ विधानवाचित्वेन प्रसिद्धः कस्माद्भा-
ष्यकृताभिधानवाचित्वेन व्याख्यात इत्याशङ्क्याह * न्यायेति *
अग्नीदग्नीन् विहरेत्यादेर्निगदस्य प्रैषसामर्थ्यात्परप्रत्यायनेनार्थव-
त्त्वावगतेरुच्चैस्त्वं च विना परस्य प्रत्यापयितुमशक्यत्वान्न्यायप्राप्ते-
नोच्चैस्त्वेनोपांशुत्वबाध इत्यर्थः ।

अर्थाच्च ॥ ४२ ॥

परप्रत्यायनार्थत्वादपि निगदस्य यजुष्ट्वे ऽपि धर्मविशेषो युक्त
इत्येवमर्थतयैतत्सूत्रमाभासमानं पूर्वसूत्रेण पौनरुक्त्यापत्तेर्ननूपांशुत्वं
परप्रत्यायनाशक्तौ प्रैषत्वायोगात्प्राप्तकालतायां लोट् भविष्यतीत्याश
ङ्कानिरासार्थत्वेनैतत्व्याख्यानार्थमस्ति चेति भाष्यं व्याचष्टे * अस्ति
चेति * अवयवार्थालोचनेनाप्युच्चैस्त्वमिति हेत्वन्तराभिधानार्थ
त्वेनैतत्सूत्रव्याख्यानार्थं यानीति भाष्यं व्याचष्टे * तथा चेति
न्यायेन वचनबाधो न युक्त इत्याशङ्कोपन्यासपूर्वं तन्निरासार्थं नन्वि
त्यादिभाष्यं व्याचष्टे * वाचनिकमपि चेति * परसंवेदनार्थत्व
न्निगदस्य तद्द्वारेणोच्चैस्त्वे स्वरूपतश्चोपांशुत्वे प्राप्ते ।

गुणे स्वरूपतो धर्मः प्रधानद्वारतो परः ।
यत्र स्यात्तत्र विज्ञेयं गुणधर्मस्य बाधनमिति ॥

अनेन न्यायेनोच्चैस्त्वस्योपांशुत्वाद् बलीयस्त्वात् प्रमाण लाच्च प्रमेयबलाबलबलीयस्त्वस्योक्तत्वाद्वाचनिकस्याप्युपांः न्यायप्राप्तेनोच्चैस्त्वेन युक्तो बाधः यजुरन्तरविषयत्वाच्च व र्थक्यपरिहार इत्याशयः ।

गुणार्थो व्यपदेशः ॥ ४३ ॥

यस्तु व्यपदेशो भेदहेतुत्वेनोक्तः स यजुष्ट्वेऽपि निग च्चैस्त्वगुणाभिधानार्थत्वेनोपपन्नत्वान्न भेदसाधक इत्येवं सू ख्यानार्थमथेति भाष्यं व्याचष्टे * ब्राह्मणेति *

सर्वेषामिति चेत् ॥ ४४ ॥

निगदशब्दस्योच्चैस्त्वगुणाभिधानार्थत्वे सत्यृक्ष्वपि । शब्दः स्यादित्येवमर्थत्वेन सूत्रव्याख्यानार्थं यदि त्विति भाष्य चष्टे * अतिप्रसङ्गेति *

नर्ग्व्यपदेशात् ॥ ४५ ॥

ऋचः सकाशात् निगदस्य भेदेनोपदेशान्नर्चो निगदत्व रित्येवं सूत्रव्याख्यानार्थं नेत्यादिभाष्यं व्याचष्टे *न तावदिति त्तिमनभिधाय लिङ्गमात्राभिधानमसाधकत्वादयुक्तमित्याशङ्क्य सङ्गस्तावन्निगदशब्दस्यानृग्वाचित्वहेतुप्रवृत्तिनिमित्तप्रापकाज्ञा व्यपदेशान्निरस्तः या तूच्चैस्त्वे सत्यप्यृचि निगदशब्दाप्रयोगात भिचाराशङ्का तन्निरासः प्राप्त्यभिधानभाष्ये भविष्यतीति ताव न सूचितम् ।उच्यतइत्यादिप्रश्नपूर्वं प्राप्त्यभिधानार्थं भाष्यं व्या न चेति * गदतेरपादबद्धपदसमुदायवाचित्वात्प्रकर्षवाचिनि ब्दोपसृष्टस्योच्चैरविनोच्चार्यमाणापादबद्धसमूहवाचितावसीयत शयः । प्रयोजनं पूर्वपक्षे निगदानामृग्यजुःसामान्यत्वाद्वाच शंसनाभावः । सिद्धान्ते यजुष्ट्वाच्छंसनमिति ।

॥ एकवाक्यत्वलक्षणाधिकरणम् ॥ १४ ॥

अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् ।

भाष्योक्तयजुःपरिमाणाभिधानार्थत्वत्यागेन वाक्यलक्ष तयैतत्सूत्रं कैश्चिद्व्याख्यातं तद्दूषणायोपन्यस्यति* केचिदि वाक्यस्यापि लौकिकस्यैव लक्षणमित्याह * तत्रापीति * एतदे
२४।१ इनपूर्वकमुपपादयति * कुत इति * श्लोकं व्याचष्टे * लौकि हीति * ननु वाक्ये लक्षयितव्ये वैदिकं कस्मान्न लक्ष्यतइत्या

* वैदिकानां पुनरिति * यस्य वाक्यस्यैकत्वादर्थैकत्वं गम्यते त-
स्यमिति वैदिकानां लक्षणमित्यर्थैकत्वमितीतिकरणेन सूचितं
माद्वैदिकवाक्यानामेतल्लक्षणानुपपत्तिरित्याशङ्क्य * अनन्येत्युक्त
* वैदिकानामर्थस्यानन्यप्रमाणगम्यत्वेन प्राग्वाक्यादज्ञातत्वाद्-
ने ऽपि वाक्यात्प्राग्वाक्यैकत्वाज्ञानादर्थैकत्वासिद्धेर्नार्थैकत्वस्य वा-
लक्षणतोपपन्नेत्यर्थः कथं वाक्यैकत्वस्यार्थैकत्वज्ञानहेतुतेत्याश-
ाह * यथैव हीति*वेदवाक्यानां सौत्रलक्षणानुपपत्तौ वृद्धसम्म-
माह*आह चेति* शास्त्रासङ्गतत्वेन लौकिकवाक्यलक्षणं दूषय-
* अत्रेति * नन्वर्थापत्त्या विपरीतवेदवाक्यलक्षणार्थं लौकिक-
क्यलक्षणाभिधानमित्याशङ्क्याह * वैदिकेति * वाक्यैकत्वस्य
क्यार्थैकत्वज्ञानहेतुत्वं विनापि शब्दान्तरादिभिर्वाक्यार्थभावनाभे-
सिद्धेर्न भेदलक्षणोपयोग्येतल्लक्षणमित्याशयः । यदि त्वज्ञातलक्ष-
स्य वेदवाक्यस्य धर्मप्रामाण्यज्ञानायोगात्प्रामाण्यासिद्ध्यै लक्षणा-
भधानं ततः प्रमाणलक्षणे वाच्यमित्याशयेनाह * किमर्थमिति *
कशब्दानर्थक्यापत्तेश्च न लौकिकवाक्यलक्षणे ऽप्येतत्सूत्रं सम-
ञ्जसमित्याह * एकेति * ननु एकशब्दस्य लौकिकवाक्यलक्षणा-
पयोगे ऽप्यर्थैकत्वज्ञानहेतुवाक्यैकत्वपदसमूहत्वं वेदवाक्यलक्षणं
सूचयितुमेकशब्द इत्याशङ्क्य वेदवाक्यलक्षणमपि मन्त्रप्रकरणासङ्ग-
तत्वादयुक्तमित्याशयेनाह * कथं चेति * भाष्यविरोधश्च तेषां
स्यादित्याह * भाष्येति * न केवलं शास्त्रलक्षणाप्रकरणासङ्गति-
भाष्यविरोधा एव तद्व्याख्याने दोषाः किं त्वनुपयोगो ऽपीत्याह *
किं चेति * एकशब्दार्थवत्त्वायैकवाक्यत्वस्येदं लक्षणमिति यदि क-
श्चित् ब्रूयात्तदप्यनुपयोगीति वक्तुम् * एकत्वस्येत्युक्तम् *
मन्त्रादिषु मध्ये क उपयुज्यतइति वाक्यं तदेकत्वलक्षणवादिभिर्वक्त-
व्यमितीतिकरणाध्याहारेण योज्यम् । यजुर्व्यतिरिक्तमन्त्रेषु तावदनु-
पयोगं विवृणोति * ऋगिति * ब्राह्मणे विवृणोति * तथेति * ए-
कवाक्यत्वलक्षणस्य वाक्यभेदपरिहारोपयोगं शङ्कते * नन्विति *
दोषत्वावधारणेन वाक्यभेदस्य परिहार्यत्वात् वाक्यैकवाक्यत्वज्ञानं
च विनाप्यावृत्तिविभागयोर्दोषत्वावधारणान्नैकवाक्यत्वलक्षणस्य वा-
क्यभेदपरिहारोपयोग इति परिहरति * नेति * अनावृत्तस्याविभ-
क्तस्य वा शब्दस्य विवक्षितानेकार्थाभिधानाशक्तेः पदादिरूपस्य श-
ब्दस्यावृत्तिरादिशब्दोक्तो विभागो सामर्थ्यहेतुकत्वात् स्वत एव
दोषत्वसूचनायासामर्थ्यमित्युपचरितः असामर्थ्यहेतुकं यच्छब्दा-
वृत्त्यादि स वाक्यभेदः स चासामर्थ्यरूपत्वात् स्वत एव तावद्दोष-

त्वेनावधार्येते विभागावृत्त्योस्तु दोषतोपपादयिष्यतइत्याशयः
व्याचष्टे * पदेति * वाजपेयगुणविधावाख्यातपदावृत्तिः।अ
विवक्षायां पदैकदेशप्रातिपदिकावृत्तिः हविरार्त्तैरुभयत्वेन ह
हविरार्त्तिमार्छेदिति पदसमुदायावृत्तिः। आरुण्यस्य कृष्णप्रक
शे ऽरुणयेति पदस्य पिङ्गाक्ष्यादिवाक्याद्विभागः। नानात्वग्रह
न्तार्थं कथं वाक्यैकत्वज्ञाननिरपेक्षैरावृत्तिलक्षणो विभागलक्ष
वाक्यभेदो दोषत्वेनावधार्यतइत्याशङ्क्याह * विभागेति * उ
क्रीणातीति तृतीयया क्रियान्वयस्य गम्यमानस्य त्यागः प्रा
कानां चानेकद्रव्याणामारुण्यनियमादनेकादृष्टकल्पना आवृत्ति
वाक्यभेदे त्वावृत्तेरभेदत्वेनाप्रामाण्यं दोष इत्यर्थः। एतदेवोप
* इतीति * लोके त्वत्यन्तानुपयोग इत्याह * पौरुषेयेति *
णान्तरापेक्षामभ्युपेत्यैतल्लक्षणमनुपयोगीत्याह * यदि चेति
हेतुप्रसिद्धेर्लौकिकवाक्यलक्षणमेतदित्युक्तं तद्वक्त्रर्थं श्रोत्रर्थं
विकल्प्य दूषयति * वक्तृणां चेति * व्यवहारानौपयिकं च
ज्ञानमात्रार्थं लक्षणं वेदवाक्ये ऽपि कस्मान्नोक्तमित्याह *
चेति * यत्त्वर्थापत्त्या विपरीतं लक्षणं सूचितमित्युक्तं तद
दूषयति*यदि त्विति*न च वाक्यैकत्वादर्थैकत्वमितीदृग्वाच
णमित्याह * न चेति * नन्वनेनार्थैकत्वज्ञानहेत्वेकवाक्यत्वं
४२६।१ क्यलक्षणं सूचितमित्याशङ्क्याह *अपि चेति * वेदवाक्यलक्ष
योत्थितार्थापत्तिर्नैकान्ततो विपरीतं लक्षणं कल्पयतीत्याशय
लौकिकानामेवैतल्लक्षणमिति परिसंख्ययास्य लक्षणस्य वैदिक
त्वनिवृत्तेर्विपरीतं वेदवाक्यलक्षणं कल्प्यतइत्याशङ्क्याह *
ति * सत्यामपि सामान्यविशेषोपादानेन सम्भवत्या परि
वेदवाक्यविषयत्वनिवृत्तावनेकैतत्व्यतिरिक्तलक्षणसम्भवान्न
गतो वाक्यैकत्वादर्थैकत्वमिति लक्षणं कल्पयितुं शक्य
* यदि हीति * ननु विपरीतमेव लक्षणं बुद्धिस्थं भवति
मात्रमित्याशङ्क्याह*एवमपीति* वैपरीत्यस्याप्यनेकधा सम्भ
द्धारणं भवतीत्याशयः।या चार्थैकत्वस्यासिद्धतोक्ता सा वाक
स्यापि तुल्येत्याह * किं चेति * श्लोकं व्याचष्टे * वाक
एतदेवोपपादयति * तथा हीति * बहुवाक्यवर्त्तिष्वेकवाक
षु वा वर्णेषु बहूनि वाक्यान्येकं वेत्यवधारणा न दृष्टेत्यर्थः। उ
श्रोक्तेनैव लक्षणेन एकवाक्यत्वसिद्धिरित्याह * तस्मादिति
र्वसाधारणं चैतल्लक्षणमित्याह * लोकेति * या त्वर्थैकत्व
द्धतोक्ता तामनुभाषणपूर्वकं परिहरति * यत्त्विति * श्लो

चष्टे * यदि हीति * भावनायाश्च वाक्यार्थत्वात्तस्याश्च भेदाभेदावधारणस्य शब्दान्तरादिसदसद्भावाधीनत्वाद्वाक्यैक्यज्ञानात्प्रागर्थैक्यावधारणं सम्भवतीत्याह * भावनैव चेति * प्राधान्यं विनानेकपदार्थवैशिष्ट्यायोगाद्वाक्यार्थत्वोपपादनाय प्राधान्यसूचनार्थम् * स्वकारकैरित्युक्तम् * शब्दान्तरादिभिर्विना भेदासिद्धिर्नित्यमित्यनेनोक्तां श्लोकं व्याचष्टे * यस्मिन्निति * दध्ना जुहोतीत्यादौ भावनास्वरूपाभेदे ऽपि गुणविशिष्टत्वरूपेणोत्पत्तिवाक्यविहितधात्वर्थमात्रविशिष्टभावनारूपाद्भेदसद्भावान्नोत्पत्तिवाक्यस्य गुणवाक्यैः सहैकवाक्यतापत्तिः। परव्याख्यां दूषयित्वा यथाभाष्यं सूत्रं व्याख्यातुमुपक्रमते * तस्मादिति * सङ्गतिं तावदाह * भेदेति * ऋचो यजूंषि सामानीति बहुवचनश्रवणादृगाद्यवान्तरभेदाकाङ्क्षायामेतावतीयमृगित्युपदेशकाध्येतृवाक्यादृचाम् एतावदिदं सामेत्यस्माच्च साम्नां भेदसिद्धेर्लक्षणं न कृतम् करणे ऽपि यजुर्वेदस्याध्येतृवाक्याद्सिद्धेर्भेदज्ञानार्थं लक्षणमित्यर्थः। ननूत्तरादिः पूर्वान्तलक्षणमिति वचनादिषे त्वेति शाखां छिनत्त्यूर्जे त्वेत्यनुमार्ष्टीत्यादिभिन्नप्रतीकाविनियोगेन यजुषामपि भेदसिद्धेस्तद्भेदलक्षणमपि न कार्यमित्याशङ्कते * नन्विति * अभ्युपगम्यैतद्वचनप्रामाण्यमव्यापकत्वं तावदाह * न तावदिति * सौत्रविनियोगस्य भेदप्रतीतिमूलतया तन्निरपेक्ष्येण लक्षणत्वायोगात् * ब्राह्मण इत्युक्तम् * सत्यपि वा सर्वेषामभिमतभेदानां विनियोगे मध्ये विनियोगरहितमन्त्रान्तरसद्भावशङ्कानिवारणाशक्तेरर्थापत्त्ययोगाद्वचनस्य चावैदिकतया स्वातन्त्र्येण प्रामाण्याभावात्सूत्रकृद्वचनस्य चैकार्थ्यनिबन्धना पदसमूहस्यैकवाक्यतेति न्यायमूलत्वात्तस्य लक्षणस्वरूपमुच्यतइत्याह * न चेति * यजुःपरिमाणे सूत्रयोजनार्थं यावतेति भाष्यमिषे त्वेत्यादियजुषां यागे विनियोगाभावादयुक्तमाशङ्कावतारणपूर्वं व्याचष्टे * तत्रेति * यजेरुसिं प्रत्यये कृते यजुःशब्दव्युत्पत्तेस्तस्य चोणादित्वेन बाहुलकत्वात्प्रयोगानुसारेण करणवाचित्वावगतेरिषे त्वेत्यादीनामपि च प्रकरणाम्नानानुमितेन वाक्येन यागाङ्गत्वावगमाद्यजुष्ट्वाविरोध इत्याशयः। ननु श्रुत्यादिभिः छेदनादौ विनियुक्तानां कथं यागाङ्गतेत्याशङ्कानिरासार्थं यावता क्रियाया इति भाष्यं व्याचष्टे * तत इति * तावच्चेति योजनोपसंहारभाष्यं व्याचष्टे * तेनेति * वाक्यविशेषस्यैव यजुष्ट्वाद्यजुर्विषयः सूत्रे वाक्यशब्द इत्यर्थः। श्लोकं व्याचष्टे * वचनाद्धि हीति * यावान्पदसमूहो वाक्यं तावानेव यजुरिति वाक्यपरिमाणेन यजुः परिमाणं वक्तुं वाक्यलक्षणमित्यर्थः। ननु म-

न्त्रावान्तरभेदप्रस्तावाद्यजुर्भेदे प्रतिपाद्ये यजुः परिमाणलक्षणम
ङ्गतमित्याशङ्कानिरासार्थत्वेनैतदस्माच्चेदिति भाष्यं व्याचष्टे *
चेति * अनेन चैतस्माच्चोदकार्थत्वात्कारणादेकयजुर्वाक्यता
ति तस्माद्यावानेकार्थः पदसमूहस्तावदेवैकं यजुर्वाक्यमधिकं
जुर्वाक्यान्तरमिति सावधारणत्वेन भाष्यं योजितम्। किमित्युदा
प्रश्नभाष्यं विपर्ययाशयेन व्याचष्टे * किमिति * चेच्छब्दे
र्थसाकाङ्क्षावयवत्वयोः संहतयोः लक्षणत्वेनाभिधानात्प्रत्येकं
णत्वाभावेन लक्षणद्वित्वायोगाल्लक्षणाधिष्ठानाभिप्रायो लक्षण
एतदेवोपपादयति * तथा हीति * श्लोकं व्याचष्टे * पदस्य ह
प्रकृतिप्रत्यययोरन्वयव्यतिरेकाभ्यां प्रत्येकमर्थप्रत्यायनशक्त्य
द्विभक्तप्रयोगाभावेनार्थप्रत्ययाभावः शक्तिशब्देन लक्षितः देव
दाहरणभाष्याशयमाह * प्रयोजनेति * नन्वित्यादिभेदानां
र्गाणां च बहुत्वादित्यन्तमाशङ्काभाष्यं तात्पर्यतस्तावद्व्याचष्टे
न्विति * एकैकपदस्यैकार्थ्यात्पदसमूहस्यानुदाहार्यत्वशङ्कायां
काङ्क्षावयवत्वाभावात्सत्यामित्यनेन निरस्तायां न तर्हीत्यनेन प
नेकत्वात्पदसङ्घस्य च पदार्थातिरिक्तैकार्थवाचितायास्तद्भूताधि
निरस्तत्वात्पदसङ्घस्यानुदाहार्यत्वशङ्काशये विवृते ननु पदार्था
क्तैकनिर्भागवाक्यार्थायोगे ऽपि पदार्थानां भेदः संसर्गो वाक्या
त्याशङ्कानुपपत्त्यभिधानार्थं भेद इति भाष्यं व्याचष्टे * यद्
तथापीत्याशङ्कासमर्थनार्थं भाष्यमुपपादयितुमवतारयति *
इति * भेदानेकत्वं तावत्प्रश्नपूर्वकमुपपादयति * कथमि
ऋगतावित्यस्य धातोरौणादिके थन्प्रत्यय कृते ऽर्थशब्दव्युत्पत्तेः
९।२ तिपदमर्थत्वाद् गम्यमानत्वादित्यर्थः।श्लोकं व्याचष्टे * व्यक्तीं
ननु यथा शुक्लशब्दसन्निधानात् कृष्णादिभ्यो गोव्यक्तेर्व्यव
प्रतीयते तथा शुक्लत्वसंसर्गस्यापि प्रतीतेः कस्मान्न वाक्यार्थः
शङ्क्य शुक्लत्वसंसर्गस्य गोपदार्थान्तर्गतत्वादित्युक्तं गोव्यक्ते
क्लशब्देन कृष्णादिभ्यः शुक्लव्यक्तेश्च गोशब्देनाश्वादिभ्यो नि
वाच्यायां कृष्णादिव्यक्तिष्वपि गोत्वस्याश्वादिष्वपि शौक्ल्यस्
त्वात्स्वरूपेणाव्यावृत्तेः शब्दवाच्यत्वरूपेण व्यावृत्तिं वक्तुं गोश
शुक्लशब्दस्य चेति चोक्तं संसर्गानेकत्वमुपपादयति * तथे
श्लोकं व्याचष्टे * आकृतीति * गोत्वशुक्लत्वयोरेकार्थसमवा
क्षणस्य संसर्गस्य सम्बन्धत्वेन द्विष्ठत्वात्तत्सम्बन्धिभेदे ऽप्यैक्या
ङ्क्य * सामस्त्येनेत्युक्तम् * व्यक्तिसमवेतं गोत्वमितिवद् ग
समवेता व्यक्तिरित्यप्रतीतेः सम्बन्धत्वे ऽपि समवायस्य व्यासि

ध्येये सामस्त्येनोपलम्भात् द्विष्ठत्वाभावेनैकव्यक्त्युपसंहारात्मकस्यै-
कार्थसमवायस्यापि न द्विष्ठतेत्याशयः । ननु यद्यपि गोत्वविशिष्टायां
व्यक्तौ शुक्लत्वसंसर्गाच्छुक्लत्वविशिष्टायां व्यक्तौ गोत्वस्य संसर्गो
ऽन्यस्तथापि गौः शुक्ल इति वाक्यादेकस्मिन्नर्थे गोत्वशुक्लत्वयोः
संसर्ग इत्येकरूप्येण प्रतीतेर्वाक्यार्थैक्यमित्याशङ्क्याह * यद्यपीति *
गौः शुक्लः स्थूल इति त्रिपदएव तावद्वाक्ये गौः शुक्लो गौः स्थूलः
शुक्लः स्थूल इति येन येन वाक्यैकदेशेनावस्थितं पदद्वयमन्योन्यं सं-
सृज्यते तेन तेन वाक्यैकदेशेन गोत्वशुक्लत्वादिसंसर्गस्य प्रतीतेर्वा-
क्यार्थत्रयापत्तिरित्यर्थः । द्विपदे ऽप्येकप्रयोजनवशीकाराभावेन
पदार्थानामुपकार्य्योपकारकत्वाभावात्स्वातन्त्र्येणैकार्थविशेषणत्वरू-
पैकत्वाभावात्प्रत्येकं भेदसंसर्गस्य प्रतीतेरपरिहार्यं वाक्यार्थनानात्व-
मित्याह * किं चेति * श्लोकं व्याचष्टे * यावद्धीति * ननु सि-
द्धान्तिनो व्यक्तिपदार्थकत्वाभावाद्भेदवाक्यार्थत्वशङ्कानुपपत्तेस्त-
दुपन्यासो न युक्त इत्याशङ्क्याह * यद्यपि चेति * एकेति भाष्यं ४:
प्राधानाशयविवरणार्थत्वेन व्याचष्टे * सिद्धान्तेति * सर्वपदे-
ष्वेकस्यैव पदार्थस्येतरविशिष्टस्यैव प्राधान्येन प्रतिपाद्यत्वादेकार्थते-
त्याशयः । एवं च सति विशेष्यस्यैवैकस्य पदार्थस्येतरैः सह संसर्ग-
स्य भेदस्य वा प्रतिपाद्यत्वाच्छक्यमेवैक्यं वक्तुमित्याह *एवमिति*
उक्तोदाहरणे विशिष्टैकप्रयोजनाभिधानार्थं यथा तावदिति भाष्यं
पदार्थान्तराणां निर्वापविशेषणत्वासिद्धेरयुक्तमाशङ्क्योपपादयति
तस्मादिति * नन्वित्याशङ्काभाष्यं व्याचष्टे * परस्त्विति * यदीति
परिहारभाष्यं व्याचष्टे *सिद्धान्तेति* विशेषणद्वयानर्थक्याशङ्कार्थम-
ति भाष्यं व्याचष्टे*किमर्थमिति*उच्यतइत्यादि पुरोडाशप्रतिष्ठाप-
न इत्यन्तं भाष्यं तात्पर्यतस्तावद्व्याचष्टे*प्रत्युदाहरणे इति* अवयव
। व्याचिख्यासुर्भवतीति भाष्यं तावद्व्याचष्टे*पुरोडाशेति*नन्वित्यै-
कार्थ्याभावाशङ्काभाष्यं निर्वापन्यायेनेहाप्याशङ्कानिरासोपपत्तेरयुक्त
माशङ्क्योपपादयति * निर्वापे इति* नेति परिहारभाष्यमसकृदुच्चा-
रिताख्यातयोगेन भगादीनां संहत्य विशेषणत्वादनुपादानान्निरपेक्ष
साधनत्वावगतेस्तद्भेदेन विभागनानात्वावगमादयुक्तमाशङ्क्योपपा-
दयति * तत्रेति * स्तुत्यर्थमसमवेतनिरपेक्षसाधनभेदाभिधाने ऽपि
क्रियान्यत्वाभावस्य चित्याधिकरणेन च कारकभेदादस्य भेदो भव-
ति वार्त्तिके वक्ष्यमाणत्वाद्भागादिकर्त्तृभेदमात्रेण तावन्न विभागा-
न्यत्वापत्तिः। न चायुरादिवदसमवेतत्वे ऽपि प्रोत्साहनायाशास्यत्वे
भागादेः प्राधान्यं येन विशेषणभेदात् क्लृप्तिवद्विभागभेदः स्या-

द्रित्यर्थः । विशेषणाविवक्षाभिधानार्थः सामान्यशब्दः तं
४३११ दाहरणान्तराभिधानार्थं भाष्यं व्याचष्टे * तस्मिन्निति *
भ्यगिति परिहारोपसंहारभाष्यं व्याचष्टे * तस्मादिति *

॥ वाक्यभेदाधिकरणम् ॥ १५ ॥

समेषु वाक्यभेदः स्यात् ॥ ४७ ॥

कियतः पदसमूहस्येह चिन्ताविषयतेति दर्शयन्
ति * तेषामिति * दृष्टार्थस्यैव लिङ्गविनियोज्यत्वात्तत्पर्यु
ष्टार्थमन्त्रत्वपर्युदासे सिद्धे ऽपीषे त्वेति शाखां छिनत्यूर्जे
ष्टीत्याद्यनेकवाक्यानिकविनियोगसद्भावे ऽपि मन्त्रैक्यं वक्
गित्युक्तम् * इषे त्वेत्यादिमन्त्राणां छेदनादिकरणत्वेन
भिधानं च विना मन्त्राणां करणत्वायोगाद्यावता क्रियाया
प्रकाश्यतइत्यादिभाष्याद्यावता पदसङ्घेन स्मार्यते यागसा
दिवार्त्तिकाच्च प्रतिपाद्यार्थैकत्वस्यैवैकवाक्यलक्षणत्वप्रती
शस्त्रमन्त्राणां चैकादृष्टसाधनत्वे ऽप्यैकमन्त्र्याभावात्कल
भ्यछेदनादिक्रियाभिधानाभिप्रायो भाष्यवार्त्तिकयोरदृष्ट
एव तदुभाभ्यामेवं कल्पयितुं न्याय्यमित्युभयशब्दोक्तेन
यमात्रस्यैकवाक्यत्वेन प्राक् दृष्टार्थत्यविरुद्धं वायवस्थेत्य
श्रुतत्वाद्वायुवच्छीघ्रगामिनो भवथेति चोक्ते ऽर्थादपाकर
पत्तेरपाकरणावाच्याख्यातस्य कल्प्यत्वादितरथास्यापि यश
त्स्यापाकरणाभिधानार्थत्वायोगाददृष्टार्थत्वापत्तेरविधित्व
रुद्ध्येत आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पताम् अ
कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां श्रो
ल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतां आत्मा य
यज्ञो यज्ञेन कल्पताम् इत्येतावतः पदसमूहस्यैकमन्त्र
एतदेवोपपादयति * तथा हीति * तेषामदृश्यमानसम
पदानामप्रतीतो वाक्यार्थः प्रयोजनभूतः कल्प्यस्तस्य चा
माणवत्त्वादेक एवार्थ इत्यर्थः । अनेन चादृष्टस्य वाक्य
यस्यां कल्पनायां साल्पीयसीति भाष्यं व्याख्यातं श्लोकं
यदा हीति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * इती
कमन्त्रे प्रतीकभेदग्रहणं बहुवचनं वा युक्तं स्यादित्याश
पुनरिति * आनः प्राण एतु परावतश्चान्तरिक्षात् दिव
पृथिव्या अध्यमृतमसि प्राणाय त्वेति हिरण्यमभिव्यनि
केन विनियोगस्य सङ्कर्षे वक्ष्यमाणत्वान्मध्यान्त्यप्रतीका

योगोपपत्तेरभ्यासापेक्षया च बहुवचनोपपत्तेरुभयमप्युपपादय-
* तदुच्यतइति*श्लोकं व्याचष्टे * आदीति * एवमिति सि-
न्तोपक्रमभाष्यं व्याचष्टे * उच्यत इति * सौत्रसमशब्दो-
परस्परानाकाङ्क्षत्वं कल्प्यैकार्थत्वेन विभज्यमानसाकाङ्क्ष-
विगमादयुक्तमाशङ्क्षेषे त्वेति भाष्येणानेकार्थत्वमुक्तमुपपा-
येतुं सामान्यन्यायं तावदाह * रूपादिति * श्लोकं व्या-
ष्टे * तिष्ठतु तावदिति * प्राणाय प्रयोजनाय त्वामभिव्यनि- ४३१
त्युक्ते कथं हिरण्याभिधानस्य प्राणप्राप्त्यर्थतेत्यपेक्षायां परावतो
देशादन्तरिक्षाद्दिवश्च सर्वतः प्राणो ऽस्मानागच्छतु। यच्च पृथि-
ा उपर्यायुस्तदप्यागच्छतु तवामृतत्वेनायुः प्राणादानसामर्थ्यादि-
पक्रमोपसंहारपर्यालोचनया प्राणप्राप्तिसिद्ध्यर्थत्वेन प्राणप्राप्त्या-
सनस्य रूपादेकवाक्यत्वावगतेस्तद्दशेनान्त्यप्रतीकेनापि सकल-
नियोगो युक्तो न त्वेकवाक्यत्वरूपावगमात्प्रागिति विनियोगवा-
ं वेत्यनेन सूचितम्। न च रूपभेदानुसारात्प्रयोजनभेदकल्पने ऽपि
षः प्रमाणवन्त्यदृष्टानि कल्प्यन्ते सुबहुन्यपीत्युक्तत्वादित्याह * प्र-
णवच्चेति * एवं च सतीह त्वाशब्दभेदेन भिन्नवाक्यरूपावसाया-
न्योन्याकाङ्क्षोपलभ्यते। न चैकप्रयोजनत्वात्कल्प्यते तस्याप्यनुप-
म्भादिति सामान्यन्यायस्य प्रकृतोपयोगमाह * रूपेति * नन्वि-
ख्याताश्रवणेन तल्लभ्यस्य प्रयोजनस्य कल्प्यत्वात्कल्पनालाघ-
दैक्यमेव युक्तमित्याशङ्क्याह * ततश्चेति * रूपभेदात्प्रयोजन-
दावगतेर्न तदैक्यकल्पना युक्तेत्याशयः। या च प्रयोजनैक्यात्सा-
ङ्क्षावयवत्वकल्पनोक्ता साप्याकाङ्क्षावशेनैव प्रयोजनैक्यस्य क-
यत्वादयुक्तत्वादयुक्तेत्याह * न चेति * नैराकाङ्क्ष्ये च सति
वेदा वाक्यभेदः सिद्ध इत्याह * तेन चेति * विनियोगभेदा
प्रैहैकवाक्यत्वे ऽपि दुर्वारः प्रयोजनभेद इत्याहे * त्वत्पक्षे ऽपि
ति * अभ्युपगम्यादृष्टार्थभेदः साधितः। वस्तुतस्तु छेदनादिसाध-
त्त्वविनियोगादि इषेत्वा छिनद्म्यूर्जे त्वानुमार्ज्मीति भिन्नाख्यातक-
नेन दृष्टार्थत्वात्तद्भेदेन स्पष्टो भेद इत्याह * न चेति * अनेन च
न्वेत्याशङ्कानिरासार्थं यद्यपीति भाष्यं प्रत्यक्षाद्यनुपलब्धो ऽपि
योजनभूतो वाक्यार्थः श्रुतार्थापत्त्या छिनद्मीत्यादिशब्दकल्पनया ग-
त इत्येवं व्याख्यातम्। ये तु श्रुतार्थापत्तेः शब्दकल्पकत्वं नेच्छन्ति
मते ऽप्यवाचकस्यापि मन्त्रस्य रथघोषवत्स्मारकत्वोपपत्तेर्दृष्टा-
त्याह * यद्येति * ननु त्वेतिकर्मकारकवाचिनः पदस्य क्रियापदं
ना नैराकाङ्क्ष्यायोगाच्छ्रुतार्थापत्तेश्च शब्दाकल्पकत्वे ऽनुषङ्गेण

वाक्यसमाप्तिर्लौकिकवाक्यशेषो वेत्युत्तराधिकरणाच्चिन्त
विशिष्टस्तु वाक्यार्थ इति चाभिधानार्थत्वस्य मन्त्र
क्तस्य बाधापत्तेरवाचकस्य मन्त्रस्य स्मारकत्वं न युक्तमि
*उभयमपि चेति*अयुक्तो ऽप्ययं पक्षः कश्चिदाश्रितत्वादु
यः । वस्तुतस्तु व्यवस्थितशास्त्रार्थाभ्युपगमस्य न्याय्यत्व
न्पक्षे ग्राह्ये मन्त्राधिकरणोक्ताभिधानार्थत्वविरोधेनावाच
नुपपत्तेर्विकल्पस्य च वाक्यस्य साकाङ्क्षत्वाद्वाचकत्वायो
गेन प्रयोगासम्भवादध्याहार एव युक्त इत्याह * स
सूत्रकृद्भ्रान्तौ किं मूलमित्याशङ्क्याह * अथ चेति *
यथाविनियोगं च यावान्मन्त्रो ऽवगतस्तदनुसार्यत्वाद्विनि
णस्यानुष्ठानकाले ऽनुसन्धानेन संस्कारोद्बोधे यतितव्यमि
स्त्रार्थभ्रमः सूत्रकृद्भ्रान्तौ मूलमित्याशयः । ननु भ्रान्तिम
पक्षो न कैश्चिद्याज्ञिकैर्गृह्यतइत्याशङ्क्याह * तत्रेति * मन्त्रस
तपदवत्त्वे ऽप्यध्याहृतपदभ्रेषे मन्त्रभ्रेषनिमित्तप्रायश्चित्ताभ
म्नानोपपत्तेस्तावन्मात्रमन्त्रत्वे ऽर्थापत्त्यभावाद्वस्तुतो शास्त्री
सूत्रानुसाराच्छास्त्रीयत्वभ्रान्त्यानुष्ठानात् परिग्रह इत्याशयः।
संहरति * इतीति * यजुर्विषयत्वाच्चेह वाक्यशब्दस्य
ब्दस्य च यागसाधनवाचित्वेन यौगिकत्वात्सूक्तवाक्यवत्
यकाले भेदानभ्युपगमे ऽपि कर्मकाले विनियोगभेदाद्यजुर्भे
२३।१ भेदेनैव प्रयोज्यतेत्याशयेनाह * किं चेति * नियोगशब्दो
योगवाची प्रत्येकं यागहेतुत्वसिद्धये ऽन्योन्यानिरपेक्षाणां का
क्ता विनियोगभेदेनोपपादितो अनेन वेषे त्वेति छिनत्तीति
गाभिधानभाष्यं तात्पर्यतो व्याख्यातम्।आयुरिति भाष्यं व्याच
थेति * नन्वित्याद्याशङ्काभाष्यं व्याचष्टे * निर्वापवदि
च्यतइत्यादिपरिहारभाष्यं प्रत्यवयवं व्याचष्टे * नेति * म
क्लृप्तिशब्दस्य मन्त्रपरतोक्ता । ननु निर्विशेषक्लृप्तिमात्रस्येह
तत्वेन क्लृप्तिमन्त्रस्यार्थैक्यादैक्यावगतेः श्रुतमपि बहुवचनम
भिप्रायं व्याख्येयमित्याशङ्कानिरासार्थं ताश्चेति भाष्यावयवं
मेवार्थमनपेक्ष्योच्चार्यत्वेनार्थैक्यनिमित्तैकवाक्यता नास्तीत्येव
चशब्दमङ्गीकृत्य व्याचष्टे * इह तावदिति * मन्त्रपरत्व
परमतत्वसूचनार्थस्तावच्छब्दः । नन्वर्थाविवक्षायां वाक्यभेदहे
दाभावात् भिन्नवाक्यतापि न स्यादित्याशङ्कानिरासार्थं
भाष्यावयवं व्याचष्टे * तत्र चेति * बहुवचनान्यथानुपप
त्ताणि प्रत्युपसर्जनभूतस्याप्यर्थस्य भेदो ऽवसीयतइत्याशयः।

ःय चार्थस्याविवक्षितत्वेन विशेषानपेक्षत्वादायुरादिविशेषा-
ानस्य मन्त्रबहुत्वापादनमेव प्रयोजनमित्यभिधानार्थं क्लृप्तीति
ावयवं व्याचष्टे * क्लृप्तीति * ननु बहुवचनस्य श्रुताभ्या-
क्षयोपपत्तेरर्थभेदकल्पनानुपपत्तेर्मन्त्रे च क्लृप्तिसंज्ञायाः क्लृ-
भिधानमात्रेणोपपत्तेरेकवाक्यतैव युक्तेति शङ्कार्थे नन्विति भा-
पूर्वदृष्टान्तत्यागेन दृष्टान्तान्तराभिधाने ऽभिप्रायमाह * यथेति *
बहुरुतत्वान्निर्वापस्य भेदे ऽप्यभ्यासेन क्लृप्तीनां भेदो भविष्यती-
त्यवस्थानानुत्थानार्थं दृष्टान्तान्तराभिधानमित्याशयः। एतदेव
गोति * पुनरिति * क्लृप्तिसंज्ञायाः कल्पतामिति शब्दवत्त्वे-
ुपपत्तेः क्लृप्तिमात्रस्याप्यविवक्षितत्वान्नैकार्थेनैकवाक्यतापत्ति-
ागसमान्यस्य तु कर्माङ्गत्वेन तत्प्रकाशनं दृष्टार्थत्वाद्युक्तमिति वै-
ाभिधानार्थं नैतदिति भाष्यं व्याचष्टे * नैतदिति * शङ्काशेषत्वे
थेति भाष्यावयवं व्याख्यायेदानीं परिहारशेषत्वेन व्याचष्टे *
वेति * विभागमन्त्रैक्याभिप्रायेणैतद् दृष्टान्ताभिधानमिति भ्रा-
शङ्कते * ननु चेति * भ्रान्तिनिरासेनोत्तरमाहैवं * तर्हीति *
सत्यष्टदोषदुष्टविकल्पापत्तेरैक्यमेव युक्तमित्यनेन प्रकारेण भे-
वाक्षेपान्नासङ्गतिदोषः कथमस्माद्भाष्याद्विकल्पप्रतीतिरित्याश-
ष्टान्तेन सहात्यन्तसाम्यापादनपरत्वादित्युक्तं शङ्काभाष्यं वि-
ापादने योजयित्वा तन्निरासे परिहारभाष्यं योजयति * नै-
ते * यदि गुणभूते इत्यादिपूर्वाधिकरणभाष्येण साधनप्राधा-
ादाभिधानादिहार्थाविवक्षायामपि प्रतीतिमात्रेणायुरादिप्राधा-
भिधानं क्रियाप्राधान्ये ऽपि विशेषणभेदाद्भेदः शक्यो वक्तुमि-
ोढिदर्शनाय * अथापीत्युक्तम् * नन्विहार्थस्याविवक्षितत्वात्कथं ४३४
ःपरतेत्याशङ्कानिरासार्थत्वेन दृष्टार्थत्वादिति भाष्यावयवं व्याच-
भेदपरत्वे चेति * पूर्वं मन्त्रबहुत्वापादनार्थत्वरूपं यद् दृष्टा-
ुक्तं तदेव भेदपरत्वे साध्ये हेतुत्वेनोच्यत इत्यर्थः। अपि चे-
ःभाष्यमिहेत्यादिभाष्येण पुनरुक्ततया भासनं पूर्वोक्तमन्त्रपर-
ाद्दर्थपरत्वरूपपक्षान्तराभिधानार्थत्वेन व्याचष्टे * अथ वेति *
ईं अग्ने ऽस्यायुर्मे देहीत्यादिवदिहाप्यायुरादिशब्दानां प्रधान-
क्षणार्थत्वेन प्रोत्साहनार्थत्वोपपत्तेस्तद्वदेव च लक्ष्यमाणार्थैक्ये
भिधेयार्थभेदाद्भिन्नवाक्यत्वोपपत्तेः मन्त्राधिकरणनिरस्तोच्चार-
त्रप्रयोजनत्वपक्षानुपपत्तिसूचनार्थो ऽथ वा शब्दः। ननूच्चारणार्थे-
चेरर्थकर्मता न युक्तेत्याशङ्कते * कथं पुनरिति * शब्दः पद्यते
ते ऽभिव्यज्यते ऽनेनेति व्युत्पत्त्योच्चारणं शब्दपदशब्देनोक्तम्। उ-

च्चारणावाच्छितया लोके वचिः प्रयुज्यतइत्यर्थः । अभिधानव
ऽपि लोके वचिः प्रयुज्यत इति परिहरति * नैष इति * श
रयन्तं प्रयुञ्जाने वाचयतेः प्रयोगात्तदन्तर्गतस्य वचेर्यथोच्
र्थता ऽवगम्यते तथार्थमभिदधानं प्रयुञ्जाने ऽपि प्रयोगाद्य
र्थतापि गम्यतइत्याशयः । तेनैष शास्त्रार्थो भवतीत्याह *तस्म
क्रियाभिधानप्रतिपादनस्य प्रकृतोपयोगाभिधानार्थमाशुरित्या
ऽयाचष्टे * तत्प्रकाशनेन चेति * इष्टार्थशब्देन प्रोत्साहनाः
शेषान्मन्त्रभेदे ऽपि सर्वप्रयोगः सूचितः । प्रयोजनं तु मन्त्रे
त्येकदेशश्लेषे ऽपि सर्वावृत्तिः भेदे तु यस्मिन्मन्त्रे श्लेषस्तस्यै
रित्याशयः । तस्मादित्युपसंहारभाष्यं व्याचष्टे * इतीति *

॥ अनुषङ्गाधिकरणम् ॥ १६ ॥

अनुषङ्गो वाक्यपरिसमाप्तिः सर्वेषु तुल्ययोगि त्वात् ॥ ४८ ॥

भिन्नाहः प्रयोज्यत्वेनानुष्ठानकाले ऽत्यन्ताबुद्धिस्थस्या
समाम्नानकाले बुद्धिस्थत्वादनुषङ्गो भवतीत्यतिशयद्योतनार्थ
हरणमिति सूचयितुं मन्त्रप्रयोगस्य विषयं विविनक्ति * ज्यो
इति* पूर्वाह्णापराह्णयोरभ्यस्यमानमाग्नेयसौम्यवैष्णवयागत्रय
सत् तथाविधानां तिसृणामुपसदां ज्योतिष्टोमे विहितानाम
ता प्रत्येकमादावाग्नेय्युपसदग्निमनीकमिति वाक्येन विहिता
ग्नेय्यास्तिस्रो भवन्तीत्यपिशब्देन सूचितम् । एवं च सति मन्त्रत्रः
थासंख्यलक्षणेन क्रमेण भिन्नाहप्रयोज्याग्नेय्यङ्गत्वात् भिन्नाहः
तेत्याशयः । अहस्त्रयावच्छेदेनोपसदां त्रित्वात्प्रथमोपसद्वय
ग्नेयी प्रथमा उत्तरोपसदवयवभूते उत्तरे अत्रेति सन्देहभाष्यं
न्यतः शेषसद्भावासिद्धौ लौकिको वैदिको वेति विशेषचिन्त
देरयुक्तमाशङ्क्योपपादयितुमाह * तत्रेति * नन्वध्ययना
ध्ययनेनैव वेदोपादाननियमादनधीतस्य शेषस्याभावावगमे
३५।२ मात्रस्य पूर्णतावसायात्कथं कल्पनेति पृष्टोत्तरमाह * कुत
साकाङ्क्षवाक्यानर्थक्यापत्तेरवश्यकल्पनीयत्वाच्छेषस्याधीत
विषयो ऽध्ययनोपादाननियमो ऽवसीयतइत्याशयः । श्लोकं
* न हीति * सन्देहभाष्योपपादनोपसंहारपूर्वं किं प्राप्त
र्वपक्षप्रतिज्ञाभाष्यं व्याचष्टे * तत्रेति * न हीत्युपपत्तिभा
त्पर्यतो व्याचष्टे * तथा हीति * श्लोकं व्याचष्टे * यं

वग्निसम्बन्धिन्यास्तन्वाः पत्न्या वा रजाशयत्वादिति विशेषणाभि-
विशेषानिर्द्धारणाद्वैदिकवाक्यशेषस्यानभ्युपगमे कीदृशो वाक्य-
ः प्रयोज्य इत्यनध्यवसायः स्यादित्याशङ्क्याह * तत्रेति * ब्य-
तत्वेन बुद्धिविलम्बाभावाद्वैदिकस्याव्यवस्थितात्लौकिकाल्लघु-
प्रयोगत्वेन प्रयोज्यत्वावधारणे ऽपि वैदिकत्वबुद्धिनिरासः पूर्वप-
णो ऽभिमत इत्यर्थः। कथं वैदिके तद्बुद्धिनिरास इत्याशङ्क्याह
था हीति*न हीति भाष्यस्य तात्पर्यान्तरमाह * यदीति * स च ४३
मान्तानां विशेषणविशेष्याणां चतुर्थ्यन्तान्वयार्हत्वात्प्रथमान्ता-
ानर्हेण स्वाहाशब्देन व्यवायादनन्वयापत्तेरयुक्त इत्याशयः। एत-
ुपसंहरति * तस्मादिति * सिद्धान्तमारभमाणः सामान्य-
यं तावदाह * इतीति * श्लोकं व्याचष्टे* वैदिकस्येति * मन्त्र-
विधित्वे ऽपि वेदाभिप्रायश्चोदनाशब्दः । नन्वेवमपि याते अ-
यज्ञियेत्यादिशेषस्य तनूस्तयेहीत्यादेरपि वैदिकस्य सम्भवात्कथं
वर्विष्ठेति शेषनियम इत्याशङ्क्याह * या चेति * सन्निकर्षक्रमं
याति * तत्रेति * एतदेव व्याचष्टे * एकस्मिन्निति * लिङा-
त्ययोक्तस्य विधेर्विषयाकाङ्क्षायां तत्रैव भावनाख्यविषयदर्शे-
भणीयमित्यदृष्टशब्दव्यतिरेकमाख्याय प्रकृतौ प्रत्यये वेत्यनेन प्र-
चदृष्टो भावनादिरर्थः प्रत्यये ऽन्विष्यते प्रत्यये चादृष्टः करणांशः
ावन्विष्यतइत्यावृत्त्या व्याख्यातं प्रकृतिप्रत्ययात्मके स्वस्मिन्पदे
ातीत्यस्मिन्नदृष्टं कर्मकरणं वा पदान्तरे ऽन्वेष्यं स्ववाक्ये सा
देवीत्यत्रादृष्टस्तप्ते पयसीत्यनन्तरवाक्यान्तरे अनन्तरे त्वदृष्टस्ते-
ान्तरादिक्रमेण प्रकृते वाक्यान्तरे सौर्यादौ स्वप्रकरणे ऽनुपल-
करणोपकारश्चोदनादिसामान्यद्वारोपस्थाप्यमानाग्नेयादिगतो-
ानुसारेण प्रकरणान्तरे ऽन्विष्यतइत्यर्थः।सर्वात्मना ऽन्वेषणं व्या-
र त्यक्तव्यापारे वेदे लौकिकाभ्यनुज्ञां व्याचष्टे * यदा त्विति *
ापतिराशिषेत्यादौ गच्छतामित्यादिपदाध्याहारो ऽत्रोदाहरणम्।
साकाङ्क्षस्याकाङ्क्षणीयालाभे व्यवहारानुपपत्तौ दर्विहोमानां
क्षानां लौकिककरणोपकारालाभात्कार्यासाधनत्वं स्यादित्याश-
ः * लोके ऽपि चेति *सर्वात्मनान्विष्यमाणाकाङ्क्षणीयालाभे
लुब्धेन नैराकाङ्क्ष्यं कल्प्यतइत्यर्थः। ननु लौकिकस्यापि शेषस्य
ाभ्यनुज्ञाने लौकिकवैदिकयोः को विशेष इत्याशङ्क्याह * सर्वे-
ति * सामान्यन्यायमुक्त्वा प्रकृते स्वपदस्ववाक्ययोः शेषाला- ४३९
यनन्तरैकान्तरवाक्ये लाभात् स एव ग्राह्य इति सिद्धान्तमाह
देहेति * कस्मिन्वाख्यान्तरइत्यपेक्षायामाह * स चेति *

याद्दग्विशेष्यसमर्पकः शेषो ऽपेक्षितस्ताद्दग्प्रजाशयेत्यस्यान
येत्यस्य व्यवहितो ऽधस्तादुपलभ्यतइत्यर्थः । उभयाकाङ्
शेष्याकाङ्क्ष्यान्वयो युक्त इति प्रतीतिसौकार्यार्थं शेषिण
पेणाह * यद्यपि चेति * आवयोरण्यर्थेनायमाम्नातो
यार्थेनेति भ्रमितव्यमित्येवं विधं प्रयोजकव्यापारं वाक
त्तारं पुरुषं प्रति कुरुतइत्यर्थः । सर्वेत्यनेनैकसामीप्यस्या
पादकत्वं निरस्तं सर्वानन्तराम्नानरूपसर्वार्थत्वप्रमाणात्
णाकाङ्क्षायोग्यतासन्निधित्वाविशेषरूपेण सर्वार्थत्वल
सकृत्पाठवैयर्थ्यात्सकृत्पाठकारणं प्रमाणान्तरेत्यनेनोक्तम्
तस्य सर्वार्थत्वे सत्युत्तरयोः प्रागाम्नानात्प्रागेव प्रयोगः
ङ्क्याह * यद्यपि चेति * प्रथमान्तविशेषणविशेष्यान्वया
हाशब्देन व्यवायपरिहारार्थं पश्चात्प्रदेशवर्त्तित्वेनाकाङ्
श्रैव निवेश इत्यर्थः । ननु पश्चान्निवेशे पुनात्वाच्छिद्रेणेत्यादि
पश्चात्पाठापत्तेः तदभावे नेहपश्चात्सन्निवेशो न युक्त इत्याश
त्तरमाह * कुत इति * श्लोकं व्याचष्टे * स हीति *
न्तरपाठे ऽपि पूर्वयोर्व्यवधानापत्तेः सर्वेषामीप्सिते प्रदेशे
न शक्यमित्याशयः । यद्वा पाठक्रमात्प्राङ् निवेशः प्रतीतः
द्रियतइत्याशयेन पृष्टे प्रतीतिमात्रार्थत्वेनापि पाठोपपत्तेर्ना
धिनः प्राङ्निवेशस्यादरो युक्त इत्युक्त्वा पूर्वमन्त्रवदुत्तरयोः
च्छेषनिवेशज्ञापनार्थत्वात् प्रदेशपाठो ऽपि नात्यन्तमनर्थक इ
नोक्तोनन्वेवं सति सर्वेभ्यः पश्चात्कस्मान्नाम्नात इत्याशङ्क्यानि
हीत्युक्तमिति व्याख्येयम् । नन्वाकाङ्क्षासान्निधियोग्यत्वानि
नन्तर्याविशेषो ऽपि सर्वार्थत्वहेतुर्भाष्यकृतोक्तः स कस्म
इत्याशङ्क्योपेक्षाकारणं दर्शयिष्यन् भाष्यं तावदनुसन्धत्ते *
यथैव हीति भाष्येण प्रथमद्वितीययोर्मध्ये पाठादानन्तर्येण
यमुक्त्वा हराशयेत्यनेन तृतीयस्य व्यवधानमाशङ्क्य तन्नेत्य
काङ्क्षत्वाविशेषेणोभयोरेकशेषग्रहणलक्षणैकधर्मयोगात्सर
दनेनाव्यवधाने साधिते समुदायान्वयापत्तिमाशङ्क्य समुदा
नेन समुदायस्यैकार्थ्याभावेनाप्रयोज्यत्वाच्छेषान्वयायोग्यत्वेन
स्य तेनान्वयाभावात्समुदाय्यन्वये ऽभिहिते नन्वेवं स
नैव समुदायिनान्वयः स्यादित्याशङ्क्य समुदायीत्य
न्यन्वयाद् विशेषाग्रहणेनोभयान्वयमुक्त्वा
कसमुदाय्यन्वयोपपत्तेर्नावृत्त्यापादकः
युक्त इत्याशङ्क्य समुदायिनोः प्राधान्या

धेन शेषावृत्तेर्युक्तत्वात् कृत्स्नः शेषान्वयं च विना समुदायिनोर्नै-
राकाङ्क्ष्यानुपपत्तेः प्रत्येकमेकैकेन समुदायिना कृत्स्नस्य शेषस्या-
न्वय इति तस्मादित्यनेनावधार्यापि चेत्यादिना पुनः सर्वेषु तुल्ययो-
गित्वादिति सूत्रावयवस्य सर्वेषु शेषिषु तुल्यशेषानन्तर्ययोगित्वा-
दिति पूर्वव्याख्यानात्तुल्याकाङ्क्षासन्निधियोग्यतायोगित्वादित्येवं
व्याख्यान्तरं कृतमित्यर्थः । तत्रानयोस्तुल्यत्वं परमतेनाह * तत्रेति* ६
स्वमतमाह * परे त्विति * अपरितोषहेतुं प्रश्नपूर्वकमाह * कि-
मेति * श्लोकं व्याचष्टे * समुदायत्वमित्यादिना * पद्यतइत्यन्तेन
दे वर्णानां वाक्ये च पदानामेकार्थप्रतिपादनकार्यकारित्वादाग्ने-
यादिषट्कस्य च फलसाधनत्वात्त्रिकस्यैककार्यकारित्वाभावे ऽपि य-
एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजतइत्येक-
शब्दोपादानात्समुदायत्वं कार्यैक्यमाशङ्कते * नन्विति * क्रत्वङ्गप्र-
काशनमेव मन्त्राणां कार्यं नैकशेषग्रहणमित्याशयेनोपहसति *अत्य-
ोन्विति* कस्माच्छेषग्रहणमपि कार्यं न स्यादित्याशङ्क्याह *अपेक्षा-
ेति * कार्यसिद्धये तु ग्राहकत्वेन शेषग्रहणे समुदायिनोरपेक्षा-
ऽव्यान्तरव्यापारत्वेनापेक्ष्यमाणत्वात् कथं शेषग्रहणं समुदायत्वा-
दनसमर्थं प्रधानकार्यमित्युच्यत इत्यर्थः । समुदायिनौ च प्रत्यस्या-
त्वेनावृत्त्या तदन्वयोपपत्तेर्न शेषवशेन समुदायिनोः समुदायत्वा-
प्तिरित्याह * शेष इति * पश्चाच्च प्रत्येकं शेषान्वयनिर्माणे प्राक्
मुदायत्वहेतुर्न प्रतीयतइत्येवमुत्तरार्धं व्याचष्टे * पश्चादपि चेति*
मुदायत्वोपपत्तौ च पश्चात्प्रत्येकनिर्माणहेतुर्नास्तीत्यन्यथा व्या-
ष्टे * यदि चेति * एकपुत्रस्यात्यन्तप्रियत्वेन पितृभ्यामनिवार-
द्राजकीयत्वेन चान्यैरनिवारणादत्यन्तान्याय्या यथा क्रीडा तथेय-
त्यर्थः । न चास्मिन्पक्षे प्राक्शब्दप्रयोगो वारयितुं शक्यतइत्या-
* पुरस्तादेव चेति * न चैकस्य पश्चादितरयोश्च प्राक्शेषा-
नानन्तर्याच्छेषस्यागृह्यमाणे विशेषत्वं भवति देशभेदेन गृह्यमा-
विशेषत्वात्तश्च न गम्यते विशेष इत्येतद्भाष्यमयुक्तमित्याशये-
ह * न चेति * तन्त्रं भिद्यते विदार्यते नाश्यते ऽनेनेति व्युत्प-
विशेषग्रहणं तन्त्रभेदशब्देनोक्तं देशभेदो ऽनिमित्तं यस्यासौ दे-
भेदनिमित्तः स चासौ तन्त्रभेदश्चेति विग्रहः देशभेदमेव द-
ति * प्रथमस्य हीति * तेनोत्तरे च सर्वेषु तुल्ययोगित्वादिति
ादवयवव्याख्या युक्तेत्याह * तस्मादिति * कीदृक्तादित्यपेक्षा-
याह * आकाङ्क्षेति * योग्यताशब्देनाकाङ्क्षापरिपूरणसामर्थ्यं
ख्यातम् । आनन्तर्यस्यान्वयहेतुत्वाभावादपि सर्वार्थतेत्येवमपि च-

शब्दव्याख्यासूचनार्थम् * नेत्युक्तम् * आनन्तर्यस्यान्वयाहेतुत
पादयति * यो हीति * नन्वनन्तरमात्रान्वयप्रतीतेराका
दित्रयासिद्धेस्तत्रानन्तर्यस्य हेतुताश्रयणीयेत्याशङ्क्याह * :
धीति * आनन्तर्यं सन्निधिविशेषः तस्मादानन्तर्याश्रयस्य
रस्य शीघ्रं बुद्धिस्थत्वात्तेनैवान्वयो नान्येनेति या प्रतीतिर्भवति
भ्रान्तित्वान्न सम्यगन्वयहेतुतानन्तर्यस्यास्तीत्याशयः । कथमन
१२ मात्रान्वयप्रतीतेर्भ्रान्ततावसीयत इत्याशङ्क्याह * सा त्विति *
दत्त गामानयेत्यादौ व्यवहितस्यापि देवदत्तादेरानयनाद्यन्वय
नाद् भ्रान्तितावसीयत इत्याशयः । अत्रैव दृष्टान्तमाह *यथेति*
कानन्तरपाठस्तर्ह्यनर्थकः स्यादित्याशङ्क्याह * एवं हीति * सव
स्याप्यवर्जनीयमेकानन्तर्यमित्यर्थः । उपसंहरति *तस्मादिति *
न्वत्यन्तसन्निकर्षस्य सन्निधित्वे नामान्तरेणानन्तर्यमेव कथं चि
न्निकर्षस्य त्वसंबद्धपदव्यवाये ऽपि भावादतिप्रसक्तिरित्याश
किं यास्त्विति पृष्ट्वा यावतीति भाष्येणोत्तरं दत्तं तद्व्याचष्टे * स
धिरिति * विशेषणविशेष्येषु बुद्ध्यनुवृत्तिं विना सर्वविशेषणवि
ष्टैकबुद्ध्युत्पत्त्यसम्भवाद्विशिष्टबुद्ध्युत्पत्तिं यावद्विशेषणविशेष्य
द्धीनामनुवृत्तिरिष्यते विशेषणविशेष्यान्वयस्यापेक्षाधीनत्वादपे
काले न बुद्ध्यनुवृत्तिकालोपलक्षणमेतदित्याशयः । कश्चेत्यनेनापेक्षाक
लस्योपलक्षणं पृष्ट्वानन्तर्यमित्युत्तरं दत्तं तद्व्याचष्टे * सा चेति
नन्वव्यवधेः सन्निधिशब्दव्याप्यत्वाद्व्यवसायस्य सन्निधित्वं विरु
मित्याशङ्क्य सम्बन्धपदव्यवाये सम्बन्धादेव हेतोर्बुद्धिविच्छेदहेत्वस
म्बन्धबुद्ध्युत्पत्त्यभावेन पूर्वबुद्धेः क्षणिकत्वात् स्वरूपेण नाशे ऽ
संस्कारद्वारानपायात्पदव्यवाये ऽपि तज्जनितबुद्ध्यव्यवायादविरो
इत्यभिधानार्थं सम्बद्धेति भाष्यं तात्पर्यतो व्याचष्टे * सम्बन्धेति *
सम्बन्धपदव्यवधेरपि बुद्ध्यानन्तर्यप्रकार एवेत्यर्थः । ननु रजाशये
त्यस्य शेषान्वये ऽपि तद्व्यवधानाद्धराशयेत्यस्य शेषान्वयानुपपत्ते
सम्बन्धो नास्तीत्याशङ्क्य यत्रापि हराशयेत्यस्मिन् रजाशयेत्यने
शेषाकाङ्क्षेण व्यवायसूत्रे ऽपि शेषान्वयो ऽस्ति यतो द्वयोर
शेषिणोरपेक्षितविशेष्यान्वयरूपं कार्यं वक्तव्यमित्येतदर्थं पूर्वं शेषि
गं शेषो ऽपेक्षते तच्चोत्तरापेक्षायामपि तुल्यं कारणमिति यथैवोभ
याकाङ्क्षया पूर्वस्य शेषिणः शेषान्वयस्तथैवोत्तरस्यापि शेष्यन्तरम
नपेक्ष्यमाणे तु शेषे ऽन्यतरः शेषी शेषालाभेन शेषाकाङ्क्षत्वा
प्रमादाधीतः स्यात् शक्यते पूर्ववदुत्तरो ऽपि शेषी शेषेणापे
क्षितुं तस्माद्यथैवायं शेषो रजाशयेत्यस्य पश्चादपतितो ऽपि यो

त्वाद्यथाकाङ्क्षिते देशे सन्निधौ भवत्येवं हराशयेत्यस्यापी
भिधानार्थं यत्रापीत्यादिभाष्यमानन्तर्योपपादनार्थत्वेन प्रश्नपूर्व
त्पर्यतो व्याचष्टे * कथमिति * आद्येन यथाकाङ्क्षिते देशे
म्बन्धं प्राप्य द्वितीयस्यापि यथाकाङ्क्षिते देशे ऽनन्तरो भवति ततो
तीयस्योपरि देशे निविष्टस्तृतीयस्यापि यथाकाङ्क्षितदेशएवान-
र्यं प्राप्नोतीत्यर्थः । श्लोकं व्याचष्टे * यात इति * द्वयोरप्यसम्ब-
पदाव्यवायात् द्वयोरपि चाकाङ्क्षावत्त्वाच्छेषान्वयस्तुल्य इत्येव-
र्थे द्वयोरपीति भाष्यं गतार्थमाभासमानम् । ननु व्यवहितस्याप्यनुष-
भ्युपगमे सर्वत्र तत्सम्भवान्नाध्याहारः क्व चित् स्यादित्याशङ्कानि-
सार्थत्वेनासम्बद्धपदाव्यवाय एवाकाङ्क्षावत्त्वएव चानुषङ्गो भ-
ते नान्यथेति परिसंख्यार्थमिति सूचयितुमाह *ततः परं त्विति*
रणादिवाक्येष्वप्ययं न्यायस्तुल्य इत्येतत्सूचनार्थं चेदं भाष्यमिति
वयितुं सर्वत्रेमं न्यायमतिदिशति * सर्वत्रैवेति * नत्वानन्तर्य-
शेषैकान्वयप्रतीत्या नैराकाङ्क्ष्यान्नान्यान्वय इत्याशङ्कानिरासा-
तावच्चेति भाष्यमुपपादयितुमाह * यद्यपि चेति * युगपदा-
नाशक्तिमात्रनिबन्धनत्वेनावास्तवत्वादानन्तर्यमकारणमित्याशयः ।
न्नकृष्टविप्रकृष्टान्वययोः प्रामाण्याविशेषोपपादनार्थं सर्वलोकवे-
ाधरणत्वमस्य न्यायस्याह * एवमिति * यद्वा किमित्यानन्तर्यम-
रणमित्याशङ्क्य यस्मादसम्बद्धपदाव्यवधाने सत्यानन्तर्याभावे
सर्वत्र लोके वेदे च वाक्ये पदानां प्रकरणे च वाक्यानां सम्ब-
भवतीत्येवमर्थत्वेनाव्यवधान इति भाष्यं * व्याख्यातुमेतदुक्त-
* एतदेव भाष्यं तात्पर्यतो व्याचष्टे * अव्यवधान इति *
नादित्युपसंहारभाष्यं व्याचक्षाणो ऽनुषङ्गसमाप्तिशब्दौ व्याचष्टे
तस्मादिति * अथेति भाष्येणविषयान्तरव्याप्त्यर्थमावृत्त्यैतत्सूत्रं
ख्यातं तदुभयत्राप्यसम्बद्धपदव्यवायाभावे सत्येवान्यतराका-
त्यैव चानुषङ्गाद्वैलक्षण्याभावेनायुक्तमाशङ्क्य वैलक्षण्यं दर्शयन् ४४
चष्टे *यत्र तावदिति* शेषस्यावृत्त्यानेकशेष्यन्वयाद् गौणवृत्त्यै-
ावृत्त्यानेकान्वयिशेषत्वेनानेकं च व्यावर्त्यमानैकान्वयिशेषत्वेनो-
। अनेकेषु साकाङ्क्षेष्वेकस्मिञ्छेषान्वयेन निराकाङ्क्षीकृते ऽपी-
तराकाङ्क्ष्यायानुषङ्गो युक्तः । शेषस्य त्वेकस्यैकशेष्यन्वयेन नैराका-
शेष्यन्तरान्वयायानुषङ्गो ऽनर्थक इत्यधिकाशङ्केत्याशयः । अत्र ही-
दिनास्ति सर्वत्रानुषङ्गम् इत्यन्तं पूर्वपक्षभाष्यं तात्पर्यतो व्याचष्टे
केमिति * आह नैतदेवं पुनातु शब्देनेतिसिद्धान्तभाष्यं व्याचष्टे
उच्यतइति * कर्तृकर्मक्रियापदसमूहात्मकवाक्यशेषत्वे सति

शेषिवाक्यानेकत्वादेकशेष्यन्वयेन निराकाङ्क्षस्य शेष्य
स्यात् कारकाणां त्वन्योन्यान्वयायोगात्करणवाचिनः शे
पदमात्रान्वयप्रतीतिराख्यातवाच्यार्थद्वारा सर्वमन्त्रान्व
कारकपदस्यानन्तर्याभावे ऽप्यरुणादिवक्रियापदेनैवान्वय
भिधानानर्थक्यमाशङ्क्यातिशयार्थत्वेन व्याचष्टे * आ
एकश्चेति भाष्यं व्याचष्टे * स चेति * ननु शब्दैक्ये ऽ
देनैव क्लृप्तेश्चित्पत्यादिकारकभेदेन पवनक्रियारूपार्थभे
न्वयः शेषस्य स्यादित्याशङ्क्याह * न चेति * आयुरादे
वाये ऽपि प्रोत्साहनायाशास्यत्वात्तद्भेदेन क्रियाभेदो यु
करणमन्त्रत्वेन प्रोत्साहनार्थत्वाभावादसमवेतार्थत्वाभाव
दिवत्स्तुतिमात्रार्थमुपात्तस्य चित्पत्यादेर्भेदे ऽपि क्रियाभे
स्याशयः । नन्वेवमपि सकृदन्वयेन कृतार्थस्य शेषस्य रि
त्तावप्यावृत्तिरयुक्तेत्याशङ्क्याह * न चेति * तेनावगच
भाष्यं व्याचष्टे * तस्मादिति * ननु क्रियैक्यभ्यासभेदा
वच्चित्पत्यादिवच्चाच्छिद्रादेरपि व्यवस्था भविष्यतीत्याशङ्क्
ति * वैषम्यमाह * उच्यत इति * श्लोकं व्याचष्टे *
थादीति * प्रत्युताव्यवस्थायामेव कारणमस्तीति करणस्ये
यथा चेत्युत्तरार्द्धंव्याख्याकर्तृभेदमात्रेण तु करणभेदो ऽ
४४१।५ एवेत्याह * न चेति * अतिप्रसक्तिमाशङ्कते * नन्विति
हरति * नैष इति * यथा बर्हिर्धर्माणां प्रकरणादर्शपूर्णमा
र्थत्वावगतेर्न पिण्डपितृयज्ञबर्हिषि प्रसक्तिस्तथास्यापि शेषस्य
णपठितपुनातुशब्दैकवाक्यतया तादर्थ्यावगतेर्न मन्त्रान्तरग
शब्दान्वयप्रसक्तिरित्यर्थः । एतदेव विवृणोति * इहेति *
न्तरापत्तिमाशङ्कते * नन्विति * विभागमन्त्रवद्युक्त प
विकल्प इति परिहरति * कुतो वेति * असम्बद्धपदव्यव
न मन्त्रान्तरेषु प्रसक्तिरित्याह * सर्वेषु चेति * तथा च
भाष्यं व्याचष्टे * तस्मादिति * श्लोकं व्याचष्टे * सर्वेति
स्मादित्युपसंहारभाष्यं व्याचष्टे * इतीति * उदाहृतेषु सर्
भावान्मन्त्रवृत्त्यसम्भवे ऽपीषएकपदीत्यादिषु भवेत्यादिशेषा
स्याप्येतन्न्यायाविषयत्वात्तत्र च केषांचित्सकृत्प्रयोगदर्शनादर
विरोधमाशङ्क्य *आहैवं चेति* नन्वनु पश्चात्सज्यतइति वयु
हृदयस्याग्रे ऽवद्यतीत्यादौ च पुरस्तादाम्नातस्यैवानुषङ्गस्य पश्
म्नातेनैव प्रायशो ऽन्वयदर्शनात्पश्चादाम्नातस्याच्छिद्रेणेत्यादेः
षङ्गो युक्त इत्याशङ्क्याह * पुरस्तादिति * न्यायतुल्यत्वाद्विशे

देत्यर्थः ।

॥ व्यवेतानुषङ्गाधिकरणम् ॥ १७ ॥

व्यवायान्नानुषज्यते ॥ ४९ ॥

नन्वसम्बद्धपदव्यवायाभाव एव सर्वेषु तुल्ययोगित्वादित्य-
नानुषङ्गस्योक्तत्वाद्व्यवाये ऽनुषङ्गाप्रसक्तेर्व्यर्थमिदं सूत्रमित्याश-
ङ्क्याह * प्रत्युदाहरणत्वेनेति * वायुरित्यादिभाष्यं व्याचष्टे
सन्त इति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * ततश्चेति *
न्वध्याहार्यपदस्य यथैव पाठः प्रतिपत्त्युपाय इत्यनेन न्यायेन साम-
र्थ्यलभ्यतयानुच्चार्यमाणत्वाल्लौकिकशेषकर्त्तव्यत्वाभिधानमयुक्तमि-
याशङ्क्याह * तत्रेति * कल्प्यपदसहितानां श्रुतानां पदानां
वाक्यार्थप्रतिपादकत्वात्तेन विना न्यूनत्वापत्तेरुच्चार्यमाणपदैकवा-
क्यतयावश्यं सामर्थ्यकल्प्यं पदमित्यर्थः । यद्यपीत्यनेन कल्प्यस्यापि
पदस्याभिधानकरणत्वात् कर्तृव्यापारव्याप्यत्वं च विना करणत्वा-
योगात्तदुच्चारणातिरिक्तासाधारणशब्दविषयकर्तृव्यापाराभावाच्चो-
च्चार्यत्वम् सूचितम् । अनुषङ्गप्रत्युदाहरणत्वायाध्याहारोपसंहारस्या-
नुषङ्गासंभवोपसंहारपरत्वं वक्तुमाह * तस्मादिति * उभयत्रो-
च्चार्यत्वे ऽपि किं चिन्तायाः प्रयोजनमित्याशङ्क्याह * प्रयोजनमि-
ति * अत्रैव वृद्धसम्मतिमाह * आह चेति *

इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रातिवसन्तसोमयाजिभ-
ट्टमाधवात्मजसोमेश्वरकृतायां तन्त्रवार्त्तिकटीकायां सर्वानवद्यका-
रिण्यां न्यायसुधाख्यायां द्वितीयस्याध्यायस्य प्रथमः पादः ।

॥ न्यायसुधायाम् ॥

द्वितीयाध्यायस्य द्वितीयपादः

॥ अङ्गापूर्वभेदाधिकरणम् ॥ १ ॥

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् ॥ १ ॥

लक्षणार्थविचारस्यावसरमाह * उपोद्घातेति * उपोद्घात-
ा वार्थाधिकरणोक्तकर्मभेदानुनिष्पाद्यपूर्वभेदापवादार्थाख्यातद्वैवि-
यप्रसक्तमन्त्रगताख्याताविधायकत्वलक्षणतृतीयप्रकारानुप्रसक्तम-
त्रलक्षणे प्रसक्तानुप्रसक्तं चेत्यध्यायोपक्रमभाष्यगतचशब्दप्रतिज्ञा-
ा ऋक्सामलक्षणादौ समाप्तइत्यर्थः । शब्दान्तरस्यापर्यायभूत-
ातुभेदरूपत्वेन धात्वर्थभेदद्वारा भावनाभेदकत्वस्य स्पष्टत्वं प्रा
युत्पाद्यत्वे कारणमाह * तत्रेति * भावार्थाधिकरणोक्तस्य धा-
ार्थभेदानुनिष्पादिना ऽपूर्वभेदस्य धात्वर्थभेदे ऽप्यपूर्वभेदहेतुभाव-
ाभेदाभावेनाक्षिप्य समाधानार्थतयास्यैवादौ सङ्गतत्वादिति हेत्व-
ारसूचनार्थस्तावच्छब्दः स्पष्टत्वस्य वा कथं प्राग्वाच्यत्वहेतुतेत्याश-
् स्थूलसूक्ष्मयोः क्रमे बुद्ध्युत्पत्तेरिति सूचनार्थः ।अस्तीतिभाष्येण
ोतिष्टोमगतधातुभेदोदाहरणस्यैकप्रयोगवाक्यगताख्यातप्रत्ययसं-
ाद्धानां प्रात्यात्मिकानेकाख्यातप्रत्ययसम्बद्धानां सर्वधातूनामुदा-
णत्वज्ञापनं प्रयोजनमाह * एकेति * धातुत्रयोदाहरणं तर्हि ४
मर्थमित्याशङ्क्याह * भाष्येति * स्वत्वत्यागांशसाम्येन धातुत्रया-
नामन्त्यन्तभेदाप्रतीतेर्धातुत्रयस्य पर्यायत्वभ्रमाच्छब्दान्तरत्वाभिम-
पर्यायभूतभेदाभावाशङ्कानिरासार्थं त्रयोदाहरणमित्याशयः । य-
ीति सन्देहभाष्यं त्रिविधसन्देहपरतया परमतेन व्याचष्टे * त-
ते * ननु धातुनिर्देशार्थानां यजत्यादिशब्दानां लक्षणया धात्व-
रत्वे लक्षितलक्षणया भावनापरत्वे सम्भवत्यपि भावनाधात्वर्थ-
र्धात्वर्थधातुजन्यत्वाभावात्कार्यशब्दो न युज्येतेत्याशङ्क्याह * का-
ते * विशेष्यप्रतिपाद्ययोरप्युपकार्यशब्दैकदेशकार्यशब्देन भामा-
देनेव सत्यभामायाः शब्दमभिधानमित्याशयः । कुर्वन्तात्यप्यप-

कुर्वन्तीत्येवं व्याख्येयमित्याह * भावनेति * संहत्यापीत्यादिभ
सन्देहहेत्वभिधानार्थत्वेनावतारयति *कुत इति* व्याचष्टे*सा
त्वमिति * स्वमतेन संहत्यैकभावनाविशेषणत्वात्संहत्यैकमपूर्वं
वनाशब्दाश्चोदयन्त्युत वियुत्यानेकभावनाविशेषणत्वाद्भिन्नान्यपू
र्णीति भावनाभेदाभेदफलभूतापूर्वभेदाभेदचिन्ताद्वारा भावनाभे
भेदावेव चिन्त्येते इत्येवं सन्देहभाष्यं व्याचष्टे* अथ वेति * प्रा
रणिकसर्वधात्वर्थानुरक्तेति वाच्ये ऽप्युदाहृतापेक्षया त्रयोक्ति
ननु क्रियतइति व्युत्पत्त्यापूर्वस्य क्रियते ऽनेनेति व्युत्पत्त्या धात्वर्थ
कर्मशब्दवाच्यत्वाद्भावनाभेदे विचार्ये सौत्रः कर्मशब्दो न युज्य
तेत्याशङ्क्याह * भावनैव चेति * कर्मशब्दवाच्यधात्वर्थानुराग
द्भावनापि कर्मशब्देन वक्तुं शक्येत्याशयः । नन्वेवं क्लिष्टव्याख्य
को हेतुरित्याशङ्क्याह * तस्या एवेति * संख्यादिष्वपूर्वभेदचिन्त
या भाष्ये ऽप्यभावेनानाशङ्क्यत्वादादिशब्दो ऽभ्यासविषयः । अभ्य
सस्य धात्वर्थभेदकत्वे वक्ष्यमाणे ऽप्यपूर्वापेक्षयैवकारः । कस्म
च्छब्दान्तरादेर्नापूर्वभेदकतेत्याशङ्क्याह * अपूर्वस्येति * शब्द
ब्दान्तरेणानुरञ्जकप्रकृत्यर्थहेतुकप्रत्ययार्थभेदावगमात्पुनर्विधानाख्
चाभ्यासेनाभिधानपूर्वकत्वाद्विधानस्याभिधेयस्यैव भेदागमम
त्रान्नानभिधेयभेदकता युक्तेत्याशयः । अननुष्ठेयत्वादपि ना
र्वस्य भेदाभेदौ चिन्त्यावित्याह * कर्मेति * नन्व
पूर्वस्याविचार्यत्वे ऽपि फलत्वाद्युज्येतोपन्यासो धात्वर्थैकत्वोपन्य
सस्तु यद्वेति भाष्ये करिष्यमाणः कथं युज्येतेत्याशङ्क्याह * प्रास
ङ्गिकत्वेति * धात्वर्थभेदे ऽपि भावनाभेदो नास्तीत्युक्ते भावनैक्य
प्रसङ्गाद्धात्वर्थैक्यं पूर्वपक्षातिशयायोक्तमित्यर्थः । प्रधानतैवास्
कस्मान्न स्यादित्याशङ्क्याह * कथमिति * सर्वधात्वर्थाव्यापकत्वा
न्नास्य प्रधानता युक्तेत्यर्थः । नन्वेकधात्वर्थानुरक्तायां भावनाय
धात्वन्तरार्थानवकाशाद् गुणन्यायेनैव भावनाभेदसिद्धेः । पूर्वपक्षा
सम्भवाद्भावनाभेदाभेदसन्देहो न युक्त इत्याशङ्क्याह * ततश्चेति *
किं सोमेन यजेतेत्यादिवाक्यैस्तत्तद्धात्वर्थविशिष्टाभावना विधीयमान
प्रतिधात्वर्थं भिद्यते ऽथ वा ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिवा
क्येनानादृतधात्वर्थविशेषां भावनां फलोद्देशेन विहितां सोमेन यजे
तेत्यादिवाक्यैरनूद्य तां प्रति विधीयमाना यागदानहोमादयो धात्व
र्थाः संहत्य विशेषन्तीति सोमादिवाक्ये धात्वर्थविशिष्टभावनावि
धिर्वाक्यान्तरविहितशुद्धभावनोद्देशेन वा धात्वर्थविधिरिति सन्देहो
भावनाभेदाभेदसन्देहकारणमित्याशयः । ननु ज्योतिष्टोमवाक्ये ऽपि

ागानुरक्तभावनाप्रतीतेर्धात्वर्थान्तरानुरागायोगाच्च गुणन्यायाति-
क्रम इत्याशङ्क्य फलवाक्ये धात्वर्थानुरागविवक्षायां भावनायाः फलं
त्युपादानविधानगुणभावाद्धात्वर्थं च प्रति उद्देशानुवादप्रधानभा-
ाद्वैरूप्यापत्तेर्धात्वर्थानुरागविवक्षा पूर्वपक्षिणो ऽभिमतेति सूचना-
र्थम् * पूर्वोक्तम् * भाष्योक्तसन्देहकारणानिवृत्त्यर्थो ऽपिश-
ब्दः। अयं चार्थः प्रयोगवाक्यशेषभावेन हि समुदायस्य सत्ता सम्ब-
न्धो गम्यतइत्यादिभाष्यालोचनयोक्तत्वान्न स्वोत्प्रेक्षितत्वेनोपहा-
रः परमतेन त्रिविधपूर्वपक्षाभिधानार्थत्वेन भाष्यं व्याख्यातुं पठति
: किं तावदिति * संहत्यशब्दं तिस्रो भावनाः संहत्यैकमपूर्वं कु-
र्वन्तीत्येवं व्याख्यातुमाह * तत्रेति * अदृष्टार्थानामिति भाष्यस्या-
वैक्योक्त्यैव व्याख्यातत्वात्तदुपपादनार्थमदृष्ट इतिभाष्यावयवं
याचष्टे * इयं चेति * विरुध्यमान इति भाष्यावयवार्थमाह
दृष्टेति * उक्ते ऽर्थे भाष्यावयवं योजयति * तदिति * विशेष- ४
ादित्यवयवं व्याचष्टे * तत्रापीति * बहुभ्य इत्यवयवं तस्माच्छ-
ान्तमुपसंहारार्थत्वेन व्याचष्टे * तस्मादिति * ननु स्वर्गकामो
जेतेति फलवाक्ये यागभावनामात्रविधानात्कथं यागहोमदानादि-
ावनासमुदायस्य फलापूर्वसाधनतेत्याशङ्क्य निरासार्थं समुदाय
तेभाष्यमपनीतितस्माच्छब्दकपाठेन सूचितव्याख्यानत्वाद्व्याख्याय
दुपपादनार्थं न चेति भाष्यमाशङ्कोत्तरत्वेन व्याचष्टे * तत्रेति *
लवाक्यगताख्यातविहितभावनासमुदायावयवभूतैकैकधात्वर्थाव-
च्छिन्नभावनावाचिभिर्सोमादिवाक्यगतैर्यजतिजुहोतिददातीत्याख्या-
ाब्दैः कल्पनागौरवभयात्प्रतिभावनं भाष्यान्वयमसहमानैर-
भाव्यान्वयाय भावनासमुदायस्यार्थाक्षिप्तत्वेन शाब्दत्वात्फलवाक्ये
लसाधनतया युक्तो विधिरित्यर्थः। अथ वेति भाष्यं पक्षान्तरप-
रहार्थत्वेन व्याचष्टे * अथ वेति * उत्तरस्तमेवानुवदतीति भा-
ानुवादाभिधानेनैकस्यां भावनायां त्रयो यजत्यादय उपाया वि-
न्तइति चोपायतया धात्वर्थविधानाभिधानेन सूचितामुपपत्ति-
ह * तस्यापीति * श्लोकं व्याचष्टे * यदि हीति * धात्वर्थानां
ान्ये सति फलवत्स्वरूपेणाविधेयत्वापत्तेः फलवाक्यविहितभाव-
ात्यभिज्ञाने ऽपि सोमादिवाक्येषु तत्तद्धात्वर्थविशिष्टरूपेण विधी-
ाना भावनैकधात्वर्थविशिष्टायां धात्वर्थान्तरनिवेशायोगाद् गुण-
येन प्रतिधात्वर्थं भिद्यते भावप्रधानमाख्यातमिति स्मृतेस्त्वाख्याते
ानायाः प्राधान्याद्भावशब्दस्य धात्वर्थविषयत्वव्याख्याने ऽपि धा
तिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोः प्रत्ययार्थः प्राधान्येनेति स्मृतेः

प्रत्ययार्थत्वेन भावनायाः प्राधान्यात्फलवाक्यविहितशुद्धभावनानुवादेन सोमादिवाक्यैरनादृतपौर्वापर्यैर्युगपत्सर्वधात्वर्थविधानान्न गुणन्यायो ऽस्तीत्याशयः । ननु सोमादिवाक्येषु भावनाविध्यभावे विशेषणसम्बन्धमात्रार्थं भावनाभिधानावृत्तिः स्यान्न चासौ युक्तेत्याशङ्क्याह * यद्यपीति * असत्यां गतौ गुणानुरोधेनापि प्रधानावृत्तिर्युक्तेत्याशयः । न तु केवलप्रकृतिप्रयोगासम्भवमात्रात्प्रत्ययावृत्तिसिद्धेः केवलप्रत्ययप्रयोगासम्भवः किमर्थमुक्त इत्याशङ्क्याह * यदि त्विति * क्लृप्तचादौ विशेषणान्वयाभिधानावृत्तिर्दृष्टेत्याह * दृष्टा चेति * अनन्यगतिगुणसम्पादनार्था चानुष्ठानावृत्तिरपि
१ दृष्टा किमुताभिधानावृत्तिरित्याह * तथेति * नन्वेवं सति भिन्नवाक्योपादानाद्धात्वर्थानां प्रत्येकमेव भावनाविशेषणता युक्तेत्याशङ्क्याह * तस्मादिति * यस्मात्कल्पनालाघवाय संहृत्य विशेषणत्वं प्रतीयते ,तस्मात्सर्वधात्वर्थविशिष्टैकभावनाभिधानार्थत्वेनानेकार्थत्वात्सर्वं प्रकरणमेकं वाक्यमित्यर्थः । तस्मादित्युपसंहारभाष्यं सङ्क्षिप्य व्याचष्टे * एकमिति * संहृत्य विशेषणत्वकल्पनस्यादृष्टकल्पनालाघवहेतुकत्वाभिधानार्थमत इति भाष्यं व्याचष्टे * एकं चेति * तृतीयपूर्वपक्षाभिधानार्थं यद्वेति भाष्यं स्वत्वपरित्यागांशेत्यनेन व्याख्यातत्वादसार्वत्रिकत्वेन चानादृत्य तथोक्तत्वादुपेक्ष्य स्वमते पूर्वपक्षैकध्याभिधानायाद्यं पूर्वपक्षं दूषयितुमारभते * अयमेव चेति * एतदेव प्रश्नपूर्वमुपपादयति * कुत इति * श्लोकं व्याचष्टे * यदि हीति * अदृष्टार्थभावनाभेदान्यथानुपपत्त्या भावनाभेदवदपूर्वभेदस्याप्यवश्याभ्युपगन्तव्यत्वापत्तेः किमनेन पूर्वपक्षेण सिद्धान्तप्रतिकूलं क्षतं स्यादित्यर्थः कथमेकशब्दोपादानात्समुदायत्वापादनमित्यपेक्षिते समुदायानुवादरूपेण वा * फलादिसम्बन्धेन वेत्युक्तम् * पौर्णमासीमित्येकशब्दोपादानं तावद्यजिनानूद्यमानानां यागानां समुदायत्वापादनार्थमेव राजसूयेनेत्यस्य फलान्वयपरत्वात्समुदायापादनार्थत्वाभावे ऽप्येकशब्दोपादानेनैकफलान्वयात्समुदायत्वापत्तिरित्याशयः । ज्योतिष्टोमशब्दस्य सर्वप्राकरणिकया होमाद्यवच्छिन्नभावनासमूहवाचित्वमाशङ्कते * ननु चेति * यजिसामानाधिकरण्याद्भावनावाचितैव तावदयुक्ता धात्वर्थद्वारलक्षणया तु तद्वाचित्वाभ्युपगमे ऽपि यजिमात्रसामानाधिकरण्याद्धोमाद्यवच्छिन्नभावनासमूहवाचिता दुराशङ्केति परिहरति * नेति * उपसंहरति * तस्मादिति * का तर्हि भाष्यस्य गतिरित्याशङ्क्याह * एवं त्विति * यथेन्द्रायुधं लोहितशु-

ठकृष्णैस्त्रिभिर्धातुभिः संहत्यानुरज्यते तथा सर्वधात्वर्थैर्भावनेति
तेन्नाभाष्यव्याख्या भावनैक्योपपादनार्थत्वेनादृष्टार्थानामित्यादि-
ष्यं व्याचष्टे * तत्सिद्ध्यर्थास्त्विति * कर्मभेदे हीत्यनेनाबहुभ्य
कमपूर्वमिति अकारप्रश्लेषो भाष्ये सूचितः भावनैक्ये समुदाय-
द्धानुपपत्तिमाशङ्क्य धात्वर्थसमुदायानुरक्तस्यैकस्य भावनाख्यस्य
र्मणो ऽनुरञ्जकस्य समुदायस्यावयवभूतानां धात्वर्थानां समुदा-
ऽभिप्रेत इत्येवं व्याचष्टे * तस्मादिति * भाष्यं च धात्वर्थानां
मुदायाप्रतीतेः कथं संहत्यानुरञ्जकतेत्याशङ्कानिरासार्थत्वे यस्मा-
ल्पनालाघवाय भावनैक्यं युक्तं तस्मात्तत्सिद्ध्यर्थं धात्वर्थसमु-
यो ऽनुरञ्जकः कर्त्तुं वेदस्येष्टो ऽवसीयत इत्येवं व्याख्येयम् । अथ
ते भाष्यं पक्षान्तराभावेनायुक्तमाशङ्क्य परमतेनोपसंहारार्थत्वेन
ाचष्टे * अत इति * स्वमतेनोपपत्त्यन्तरार्थत्वेन व्याचष्टे * शङ्क्यं
ति * अभिन्नार्थत्वामेवोत्तरस्तमेवेति भावनैक्याभिधानेन दर्श-
तीत्याह * तदिति * परेषां व्याख्यानं दूषयितुमुपन्यस्यति * ए-
मिति * दूषयति * तत्त्विति * स्वमतेन भावनापरामर्शितया त-
द्बद्धं व्याचष्टे *तस्मादिति* पूर्वभाष्यपर्यालोचनयाप्येष एवार्थः प्र- ४४
ायतइत्याह * तथा चेति* एतदेवोपपादयति *अतइति* तस्मा-
त्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * यजत्यादित्रये धात्व-
क्यादपि भावनैक्यमित्युपपत्त्यन्तराभिधानार्थं यद्वेति भाष्यं व्या-
ष्टे * तस्मादिति * यजत्यादित्रये धात्वर्थैक्यादपि भावनैक्यमि-
ुपपत्त्यन्तराभिधानार्थं यद्वेति भाष्यं व्याचष्टे *यद्वेति* ननु नैकां-
साम्यमात्रेण धात्वर्थैक्यं युक्तमर्थैकांशसाम्येन सादृश्याद् गौण-
त्या ददातिजुहोतिभ्यां यजत्यर्थानुवादो ऽभिहितः सो ऽपि गौण-
दोषापत्तेरयुक्त इत्याशङ्क्याह * अथापीति * जघन्यत्वसाम्याद्
णतैव लक्षणा शब्देनोक्ता समुदायवाचिना वा त्यागाख्यैकदेशे वृ-
त्तलक्षणाभिमता गुणसम्बन्धार्थामिति भाष्यावयवं व्याचष्टे * गुणे-
ा * को गुण इत्यपेक्षायामाह *एकत्रेति* प्राकाशावध्वर्यवे ददा-
तिवत्सम्बन्धविधानाद्वाक्यभेदाभिप्रायः दक्षिणाकालत्वलक्षणो
णो दाक्षिणशब्देनाभिमतः । ननु दक्षिणानयनोत्तरकालमेतद्धोमावि-
ानात् क्रमेणैव दक्षिणाकालत्वप्राप्तेस्तत्प्रख्यन्यायेन दाक्षिणशब्दस्य
ामत्वाद् गुणविधित्वं नास्तीत्याशङ्कते * नन्विति * धात्वर्था-
वादपक्षे गुणविधित्वापत्तिरिति परिहरति * कर्मेति * अस्मिंश्च
क्षे सन्देहभाष्यगता यजत्यादिशब्दा श्रुतिवृत्ता एवेत्याह * तदा
ति * कार्यशब्दस्वरूपक्रमानुरोधात्क्रियासामान्यवाचिना करो-

तिना तद्विशेषोक्तिक्रियालक्षणाद्वाच्यधात्वर्थविषयो ऽर्थाक्षेप्या विषयो वेत्याह * एकामिति * संहत्यकारित्वे कार्यै * लाभादेकमित्युक्तम् * एकं धात्वर्थमेकं वापूर्वं त्रयो धा गमयन्तीति कुर्वन्तिशब्दार्थे व्याख्याते ददातिजुहोत्योर्गुणस न्धार्थत्वेन धात्वर्थाविधायकत्वात्कथं धात्वर्थसाध्यापूर्वगमकते शङ्क्य * तदेत्युक्तम् * यजत्यर्थानुग्राहकगुणविधायकत्वेन त र्यजत्यनुग्राहकत्वात्तत्सहकृतस्य यजतेरपूर्वगमकत्वमाभिप्रेत्य संह त्युक्तमित्याशयः * तस्मादिति * पूर्वपक्षोपसंहारभाष्यं फल भावनैक्योपसंहारार्थत्वेन व्याचष्टे * तस्मादिति * उत्तराधिक पूर्वशब्दस्य फलतः कर्मविषयतया व्याख्यास्यमानत्वादिहाव्या सिद्धान्तसूत्रं व्याचष्टे * उच्यतइति * शब्दान्तरस्य धात्वर्थभे द्वारा भावनाभेदप्रमाणत्वं वक्तुम् * धात्वर्थभेद इत्युक्तम् * धा र्थस्य प्रयत्नाख्यभावनाजन्यत्वात्तद्भेदस्य भावनाभेदकत्वासम्भवा शङ्क्य ज्ञापकहेतुत्वं वक्तुम् * विज्ञेयमित्युक्तम् * संख्यादित्रय भावनाभेदकत्वाभावे ऽपि धात्वर्थभेदाद्भावनाभेदसिद्धिं वक्तु *सर्वत्रेत्युक्तम्* कृतानुबन्धत्वव्याख्यानायोत्तरार्द्धम् । ननु भावन वाचिप्रत्ययैक्यात् भावनायाः स्वतस्तावदैक्यप्रतीतेः प्राधान्या धात्वर्थभेदे ऽप्यावृत्त्यनुपपत्तेः कथं धात्वर्थभेदाद्भेद इत्याशङ्क्य निर लोकार्थं प्रपञ्चयति * यद्यपीति * सम्बन्धिनिरूपणाधीननिरूपण सम्बन्धस्य सम्बन्धिभेदेन ज्ञेयनिरूपणाधीननिरूपणस्य ज्ञानस्य ज्ञे भेदेन भेददर्शनाद्यदधीनं निरूपणं तत्तद्भेदेन भिद्यतइति व्याप्तेर्धात्व र्थाधीननिरूपणत्वाद्भावनाया धात्वर्थभेदेन भेदो ऽनुमीयत इत्याश यः । कथमनुरञ्जकभेदस्यान्नुरजनयभेदाक्षेपकतेत्याशङ्क्याह * हीति * भावनाया धात्वर्थावच्छेदं विना भावनान्तराद्व्यावृत्त्यप्र तीतेरेकभावनावच्छेदकत्वविरोधप्रसङ्गेनैकस्यां भावनायामनेकानु रञ्जकसमावेशायोगादनुरञ्जकभेदो ऽनुरज्यभेदमाक्षिपतीत्याशयः त्रयाणामप्येकस्यां भावनायां समावेशो न सम्भवति किमुत प्रकर णगतानां सर्वधात्वर्थानामिति त्रय इत्यनेनोक्तम् । ननु प्रत्येकमनुरञ्ज कत्वे माभूत्समावेशः समुच्चितानामेव तु धात्वर्थानामेकभावनानुर ञ्जकत्वं घटपटाविति युगपत् घटपटज्ञाने घटपटयोरिवैकज्ञानानुरञ्ज कत्वं भविष्यतीत्याशङ्क्याह * न चेति * युगपत् घटपटसंयुक्ते न्द्रियेण घटपटविषयैकज्ञानोत्पत्तावपि ज्ञानजन्यार्थप्रकाशाख्यस्य फलस्याश्रयभूतघटपटभेदेन भेदात् घटप्रकाशांशे घटस्यानुरञ्जकत्वं पटप्रकाशांशे पटस्येत्यंशभेदेनोभयोरेकज्ञानानुरञ्जकत्वं युक्तम् । धात्व-

ानुकरणांशनिवेशेन भावनानुरञ्जकत्वात्करणांशस्य चैक्याभा-
नुरञ्जकत्वापेक्षेत्याशयः । ननु समुच्चितानामेव करणांशनिवेशो
ष्यतीत्याशङ्क्याह * अन्योन्येति * भिन्नशब्दोपादाने ऽपि धा-
मूहात्प्रत्ययोत्पन्नत्वादग्नीषोमयोरिव धात्वर्थसमुच्चयः स्याद्धा-
नु प्रकृतित्वेनोपादेयतया विवक्षितसंख्यत्वान्न समूहात्प्रत्ययो-
ावग्नीषोमयोरिव धात्वर्थसमुच्चयः स्याद्धातोस्तु प्रकृतित्वेनो-
यतया विवक्षितसंख्यत्वान्न समूहात्प्रत्ययोत्पत्तिरित्याह * न ४४
* नन्वेकस्मिन्पदे ऽनेकधातूपादानाभावे ऽपि प्राकरणिकानां
धातूनां प्रयोगवाक्यैकवाक्यत्वात्तद्विहितायां भावनायां प्राकर-
सर्वधात्वर्थानां निवेशो भविष्यतीत्याशङ्क्याह * न चेति *
गवाक्ये शुद्धभावनाप्रतीत्यभावात्सोमादिवाक्येषु च भावनावि-
रपेक्षधात्वर्थविध्ययोगात्साकाङ्क्षत्वाभावेन प्राकरणिकसर्वधा-
ानुरक्तैकभावनाविधानरूपैकार्थत्वाभावान्नैकवाक्यता युक्तेत्या-
। ननु कल्पनालाघवायापूर्वैक्यावधारणात्तस्य च भावनैक्यं
ानुपपत्तेः सर्वप्राकरणिकवाक्यानामेकभावनाप्रयोजनत्वेनैका-
देकवाक्यता भविष्यतीत्याशङ्क्याह * न चेति * रूपाद्युत्तर-
 हि विनियोगप्रयोजने इत्यनेन न्यायेनादृष्टप्रयोजनभेदाभेदयो-
भेदाभेदपूर्वकत्ववत्कर्मभेदो भेदपूर्वकत्वावगतेर्नापूर्वैक्येनैकार्थ्यै
कवाक्यकल्पना युक्तेति प्रत्याख्यानप्रकारं प्रकृते योजयितुमाह
 चेति * ननु फलवाक्ये भावनाया धात्वर्थानुरागविवक्षायां
प्रत्युपादेयविधेयगुणत्वाद्धात्वर्थे च प्रत्युद्देश्यानुवाद्यप्रधानत्वाद्वै-
ापत्तेः शुद्धाया विधेयत्वात्सोमादिवाक्यैस्तदनुवादेन यागादि-
त्वर्थानुरागविधानमेकवाक्यत्वाभ्युपगमेन वा सर्वधात्वर्थानुरक्तै-
ावनाविधानं युक्तमिति पूर्वपक्षाशयमाशङ्क्य निरस्यति * यदि
 * ननु भिन्नवाक्यगतैरपि धात्वर्थैरनुरागसम्भवे किमित्यप्र-
मानैकवाक्यत्वकल्पनेत्याशङ्क्याष्टदोषविकल्पपरिहाराय समुच्च-
ाद्व्यर्थत्वं सूचयितुम् * युगपद्वेत्युक्तम् * पृथक्शब्देन धात्व-
ुरागनिरपेक्षतोक्ता प्रत्ययेन शुद्धभावनोपादाने ऽप्यशक्यानुष्ठान-
द् शुद्धाया विधेयत्वासम्भवसूचनार्थो विधिवाच्युत्पत्तिशब्दः।भा-
याश्च धात्वर्थवत् कारकत्वानभ्युपगमात्कर्मकरणत्वाभावेन तन्नि-
ोद्देश्योपादेयत्वाद्यभावाद्धात्वर्थनिरपेक्षायाश्चाविहितत्वेन धा-
ान्वये ऽप्यनुवाद्यत्वाभावान्न वैरूप्यापत्तिरित्याशयः। यदा च
वर्थनिरपेक्षाया भावनाया विधेयत्वं न सम्भवति तदा ददात्या-
ां धात्वर्थानां मध्ये केन चिदेकेन धात्वर्थेन समस्तैर्वा धात्वर्थैर-

वच्छिन्नोत्पादयितव्या न शुद्धेत्याह *इतीति * ननु समस्तधात्व
वच्छिन्नभावनोत्पत्तिपक्षे पूर्वपक्षासिद्धिः स्यादित्याशङ्क्याह *स
ति * समस्तानामपि संहत्यावच्छेदकत्वायोगात्प्रत्येकमवच्छेद
त्वावगतेः प्रतिधात्वर्थं भावनाविधौ विहिताया विध्यसम्भवाद्भे
सिद्धिरित्यर्थः । अथैकेन धात्वर्थेनावच्छिन्ना भावनैकहायन्येव क्र
विधीयते ऽन्ये तु धात्वर्थास्तस्यामेव भावनायां हिरण्यादीनीव
विधीयमानानि न भावनाभेदमापादयन्तीत्युच्यन्ते तत्राप्येकहा
नीवाक्येनैकगुणोपादानरूपकर्मोत्पत्तिचिन्हवदिह कस्मिंश्चिद्भा
भावनोत्पत्तिचिन्हाभावेन व्यवस्थाहेत्वभावादगृह्यमाणविशेष
सर्वत्र भावनाविध्यापत्तेर्दुर्वारो भावनाभेद इत्याह * अथेति *
त्वर्थान्तरेषु भावनाविध्यभावसूचनार्थं तावच्छब्दः अथागृह्यम
विशेषत्वे ऽप्यनेकोत्पत्त्यानर्थक्याद्येन केन चिदेकेन धात्वर्थेना
क्ताया भावनाया उत्पत्तिरिष्यते तथाप्येकधात्वर्थानुरक्तायां धा
र्थान्तरस्य गुणन्यायेनानिवेशाद्भावनाभेद एवेत्याह * येन केन चि
ति* धातुशब्दो ऽर्थपरः श्लोकं व्याचष्टे * येनैव हीति * सर्वप्रव
णैकवाक्यत्वविवक्षया वाक्यशब्दप्रत्याख्यातं वाक्यभेदविवक्षया
करणशब्दः एतदेवोदाहरणनिष्ठं विवृणोति * ददातिर्हीति
सर्वत्र पदश्रुतिगम्यत्वात् तुल्यबलत्वमाशङ्कते * ननु चेति*
त्वर्थान्तरानुक्तभावनाविशेषान्वयस्य श्रुत्यानवगतेरतुल्यबलत्व
ह * सत्यमिति * ननु भावनायाः स्वतो वैलक्षण्यानवभासेन
वैत्रैकयास्त्यागानुरक्तान्या दानानुरक्तान्येति भेदव्यवहारो न युक्त
त्याशङ्कते * ननु चेति * भिन्नधात्वर्थानुष्ठाने प्रयत्नाख्यभावना
क्तिवैलक्षण्यस्य स्वसंवेद्यत्वाद्वैलक्षण्यानवभासेन सामान्यस्यै
वाच्यं तदिष्टमेवेत्युपहासेन परिहरति * केन चेति * धात्वर्थ
रक्तभावनाव्यक्तिवाची कर्मशब्दः व्यक्तेरपि धात्वर्थवैलक्षण्यं
वैलक्षण्याप्रतीतेर्न भेदो ऽस्तीत्याशङ्किता स्वाशयं दर्शयति *
न्विति * धात्वर्थवैलक्षण्याख्यसामग्र्यपेक्षो ऽपि भावनाव्यक्ति
लक्षण्यावभासो बाधाभावात्प्रमाणमिति निराकरोति * कथमि
बाधाभावे ऽप्यन्योपाधिकत्वाच्छब्दभेदप्रत्ययवद्भावनाभेदप्रत्ययो
श्येत्याशङ्किता स्वाशयं विवृणोति * नन्विति * अन्यसन्निधि
न्यत्वमात्रं वौपाधिकत्वमभिप्रेतमन्यधर्माध्यासनिबन्धनत्वं वेति
कल्पं मनसि कृत्वाद्ये कल्पे तावत्प्रतिवर्णव्यञ्जकध्वनिभेद
न्नध्वनिसन्निधिजन्यत्वस्य सत्वे ऽपि गकारो ऽयं ककारो ऽयमि
दिप्रत्ययभेददर्शनादनैकान्तिकत्वं तदभिप्रायत्वेन दृष्टान्तस्य स

लपत्वमाह * नैतदिति * अथ द्रुतो ऽयं मध्यमो ऽयं विलम्बि-
यमित्यादिभेदप्रत्ययदृष्टान्तेनान्यधर्माध्यासनिबन्धनत्वं भावना-
त्ययस्य मिथ्यात्वे हेतुरभिप्रेतः । सो सिद्धः ध्वनिधर्मो हि
तुःपञ्चकमात्रत्वरूपा द्रुतादिवृत्तयस्तस्मादुच्चारणं तेषां मात्रा-
प्रतीयते द्विमात्रं वा त्रिमात्रं वा न वर्णो मात्रिकः स्वयमिति
मात्रानिषेधात् । तत्कल्पनानुपपत्तेर्वस्तुतो सत्वादध्यासेन प्र-
न्तइति युक्तम् । धात्वर्थधर्मस्त्वनन्तरं नियमेन किं चिदुत्पादनरूपो
नाफलस्यानन्तरोत्पत्तिनियमाभावान्न भावनायां प्रतीयते पूर्वा-
भावानिष्पन्नत्वरूपस्तु भावनायामपि व्यापारत्वेन वास्तवत्वा-
यस्त इत्याशयेनाह * न चेति * द्रुतादिधर्मरहिताच्छब्दाद्विल-
णधर्मतार्थान्तरशब्देनानन्तरं किं चिदुत्पादननियमरूपधर्मरहि-
च भावनाख्यात्प्रयत्नाद्विलक्षणधर्मता व्यतिरिक्तशब्देन विवक्षि-
। पूर्वापरीभावानिष्पन्नत्वरूपधात्वर्थधर्मतुल्यत्वप्रदर्शनार्थो ना-
वाच्यदूरशब्दः उपसंहरति * तस्मादिति * एवं धात्वर्थाधा-
रूपणत्वाद्धात्वर्थभेदे वास्तवं भावनास्वरूपभेदमुक्त्वेदानीं स्वरू-
भावनाव्यक्त्यैक्ये ऽपि शब्दान्तरादिभिर्विधेयरूपभेदस्य व्युत्पा-
ाद्धात्वर्थानुरक्ताया एव च भावनाया विधेयत्वाद्धात्वर्थानुर-
पेण भेदो भविष्यतीति वक्तुं वृद्धानां श्लोकं पठति *आह चेति*
न लाक्षादिनोपधानेनावरुद्धे स्फटिके चोदिते सति कृष्णफटिक-
यत्यादिचोदनया यद्विहितं तद्रक्तचोदनाविहिते स्फटिके का-
ादेर्निवेशो योगात्तस्मादन्यद्यथा गृह्यते तथैकधात्वर्थावरुद्धा भा-
विधाने सति या धात्वर्थान्तरचोदनास्तास्ता भावनान्तरविष-
स्युरित्यर्थः । नन्वेवं सति गुणन्यायादेव भेदसिद्धेः शब्दान्तरा-
क्यं स्यादित्याशङ्क्याह * यस्मात्त्विति * पूर्वपक्षनिरुत्तरी-
णायैतदुक्तं । वस्तुतस्तु यस्मात्प्रत्ययः कृतधात्वर्थावच्छेदमेव स्वा-
ददाति तस्मात्फलवाक्ये ऽपि शुद्धभावनानवगतेर्नैकस्यां भावना-
नेकधात्वर्थावच्छेदः सम्भवतीत्येतदिह व्युत्पाद्यमित्याशयः । ननु

प्रकृतिप्रत्ययौ ब्रूतः प्राधान्येन सहेति यत् ।
भेदेनैवाभिधाने हि प्राधान्यं तत्तयोच्यते ॥
स्याच्चेत्स उभयोर्वाच्यः प्रत्ययार्थः कथं भवेत् ।
व्यपदिश्येत नैकेन यद्यर्थ उभयोरसौ ॥
सर्वदा तूच्यते यस्मात्प्रकृत्यर्थोपसर्जनः ।
तेनासावुभयोरर्थः प्रयोजनतयोदितः ॥
यान्यावयवशक्तिभ्यां शक्तिःकाचित्पदाश्रया ।

विद्यते यत एकस्माद्विशिष्टार्थगतिर्भवेत् ॥ इति

शब्दे प्रकृतिप्रत्यययोरप्यन्विताभिधानस्य निरस्तत्वात्कृतानुबन्धमेव स्वार्थं प्रत्ययो वदतीत्ययुक्तमित्याशङ्क्य * प्रकृतीत्युक्तम्

नित्यं विशिष्टएवार्थे प्रत्ययो यत्प्रवर्त्तते ।

तत्पूर्वेतरविज्ञातप्रकृत्यर्थविशेषणात् ॥

इत्यनेन न्यायेनान्वितानभिधाने ऽपि परश्चेति प्रत्ययस्य प्रकृतिपरत्वस्मृतेर्वृद्धप्रयोगरूपाच्चाचारात्स्वार्थाभिधाने प्रकृतिप्रत्ययक्रमस्य नित्यं विवक्षितत्वावगतेरवर्ज्जनीया विशिष्टार्थावगतिरित्याशयः । इममेवार्थं तद्भूताधिकरणभाष्येण द्रढयति यथोक्तमिति * यजेतेत्यनेनेति भाष्येण कृतानुबन्धत्वादिति सूत्रवयवं व्याख्याय ननु धात्वर्थसमुदायेनैवावच्छेदाख्यो ऽनुबन्धो भवनाया भविष्यतीत्याशङ्कानिरासार्थं प्रयोगेति भाष्यमुत्पत्तिवाक्यशेषत्वेनापि धात्वर्थसमूहस्यापि सत्ताशब्दोक्तभावनान्वयोपपत्तेरयुक्तमाशङ्क्योपपादयति * प्रयोगवाक्येति * उत्पत्तिवाक्यं नैव सर्वाणि प्राकरणिकानि गुणफलनिमित्तवाक्यानि सम्बन्ध्यन्ते परस्परेणेतीन्द्रियकामाधिकरणवार्त्तिकवक्ष्यमाणन्यायेन प्रयोगवाक्यं भावनोत्पत्त्यभावान्नान्येषां तच्छेषत्वं सम्भवतीत्याशङ्क्योत्पत्तिलक्षणार्थेन सत्ताशब्देन प्रयोगवाक्ये भावनोत्पत्तिर्विवक्षितेति भावनाशब्देन सूचितम् । समुदायानुरागकल्पनस्यापूर्वकल्पनालाघवात्वात्फलान्वयकल्पत्वाच्चापूर्वस्य फलान्वयस्य च धात्वर्थोत्पत्तिवाक्यानां प्रयोगवाक्यशेषत्वाधीनत्वात्समुदायानुरागकल्पनस्य प्रयोगवाक्यशेषत्वहेतुकतेत्यर्थः । ननु धात्वर्थावच्छेदानपेक्षेण स्वरूपेण भावनाभाव्यनिष्ठत्वात्फलान्वयोपपत्तेस्तादृश्याश्च धात्वर्थोत्पादकसोमादिवाक्यानपेक्षाद्भावनोत्पादकात् ज्योतिष्टोमवाक्यात्प्रतीतेः किमः सोमादिवाक्यानां ज्योतिष्टोमवाक्यशेषत्वापेक्षेत्याशङ्क्याह * नेति धात्वर्थावच्छेदं विनानुष्ठेयत्वात्फलान्वयो न सम्भवतीत्याशयः प्रकरणान्तरगतासु राजसूयादिभावनासु ज्योतिष्टोमभावनान्वरनिदेशसूचनार्थं बहुवचनम् । ननु भिन्नानामपि भावनानामेकप्रयोगवाक्यग्रहणात्समुदितानामेवापूर्वसाधनत्वाभ्युपगमेन कल्पनालाघोपपत्तेः कथं प्रयोगवाक्यशेषत्वाद्धात्वर्थसमूहस्यैकभावनान्वयगतिरित्याशङ्क्याह * अवधूतेति * अवधूतभेदानामेकवाक्योपादाने ऽप्येकशब्दानुपादानात्समुदायानुवादरूपतयैकीकरणमशक्यमित्यर्थः । स्वर्गकामो यजेतेत्युपश्लेषलक्षणया श्रुत्या धात्वसंपादकस्य यागस्यैव भावनासम्बन्धो ऽवगम्यतइति श्रुतेति भाष्य

ेव्याख्यार्थे सन्निहितयोरपीति भाष्ये दानहोमयोः प्रयोगवाक्ये
ादानाभेकवाक्योपादानलक्षणः संनिधिरस्तीत्यपिशब्दसूचित-
व्याचष्टे * न चेति * श्रुत्येतिशब्दं यजेरुपलक्षणार्थत्वशङ्का-
ासूचनार्थत्वेन व्याचष्टे * न चेति * ननु यागायागसङ्क
समवायाद्यजिप्रवृत्तेस्तदान्तर्गतस्य यागस्याप्युक्तत्वान्न स्वार्थत्या-
त्तिरित्याशङ्क्य * अहोभयेति * भावनावद्धात्वर्थानामपि
ापत्तिहेतुत्वभावात्स्वरूपेण यागाभिधाने युगपद् वृत्तिद्वयापत्ति-
ाशयः। तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * भा-
वाचिप्रत्ययैक्यात् शब्दान्तरत्वानुपपत्तिमाशङ्क्य शब्दान्तरं चे-
क्रमपूर्वकं शब्दान्तरत्वोपपादनार्थं तत्रार्थान्तरमित्यादि च श-
तरहेतुकभावनाभेदोपसंहारभाष्यमेकहेलया व्याचष्टे * अत-
ते * ननु यथा केवलस्य प्रधानस्य फलसाधनत्वज्ञानमुत्पन्नमपि
णस्येतिकर्त्तव्यतापेक्षत्वात्सेतिकर्त्तव्यताकस्य फलसाधनत्वज्ञानेन
यते तथा केवलस्य धात्वर्थस्य भावनावच्छेदकत्वज्ञानमुत्पन्नमपि
त्वेन तस्य भावनावच्छेदकत्वात् कारकानपेक्षेण च प्रत्ययवाच्या-
भावनामात्रेण धात्वर्थाजननात्सिद्धरूपकारकाभ्युपगमे च तस्य
र्यापारस्य कारकत्वायोगाद्व्यापारकल्पनायां गौरवापत्तेर्धात्वर्थ-
कारकावच्छिन्नस्य धात्वर्थस्य भावनावच्छेदकत्वज्ञानेन बाधिष्य-
त्याशङ्कानिरासार्थं नन्विति भाष्यं व्याचष्टे * न चेति * इष्टे-
द्रव्यसम्प्रदानादिना कारकसङ्घेन दानादिधात्वर्थनिष्पत्तेर्न त-
त्पादकधात्वर्थान्तरापेक्षेत्याशयः। यदा च शुद्धभावनाप्रतीत्य-
ाद्धात्वर्थान्तरानपेक्षत्वान्न विभज्यमानसाकाङ्क्षत्वं भावनाभेदे
भावयितव्यापूर्वभेदावश्यम्भावान्न संहत्यैकार्थं तदैकवाक्योपादा-
भावादपि धात्वर्थसम्पाद्यस्यैकभावनावच्छेदकता न युक्तेत्यभिधा-
ये तस्मादिति भाष्यं न वैतत्पदत्रयमेकवाक्यतां गच्छतीत्यादिना
भावयितव्यापूर्वभेदादृते नैव भिद्यतइत्यन्तेन च व्याख्यातप्राय-
न्न व्याख्यातं यजत्यादित्रये धात्वर्थैक्यादपि भावनैक्यमित्युप-
पन्तरनिरासार्थं न चेत्यादिभाष्यं व्याचष्टे * न चेति * भाष्यस्थो
नमिति शब्दो धातुलक्षणार्थः परसम्बन्धार्थत्वादित्यनेनासेचनार्थ-
ात् जुहोतेरित्युपलक्षितमित्यासेचनशब्देन सूचितम्। ननूद्देशत्या-
क्षेपसमुदायवाचिनो जुहोतेस्त्यागपरस्वत्वापादनसमुदायवाचि-
य ददातेस्तदेकदेशत्यागमात्रलक्षणयैकार्थ्यं भविष्यतीत्याशङ्क्याह
न चेति* देवतोद्देशसद्भावेऽप्यासेचनपरस्वत्वापादानापेक्षो मा-
ब्दः त्यागमात्रार्थत्वादिति भाष्येऽपि मात्रशब्दोऽनेन सूचितः।

कालार्थे च तद्धितास्मृतेर्दाक्षिणशब्दस्य दक्षिणाकालवाचित्वात्प्रसिद्धेर्विधौ चावाचकशब्दायोगादर्थाक्षिप्तसाध्यांशसामानाधिकरण्याच्च नामत्वावगतेः कर्मण एव विधेयत्वात्सिद्धो भेद इत्याह * नेति * धात्वर्थभेदाभेदचिन्तायां ददातिवाक्ये गुणविधौ सम्बन्धविधेराघाराग्निहोत्राधिकरणे निराकरिष्यमाणत्वाद्वाक्यभेदापत्तेः पूर्वपक्षायोगादुक्तोदाहरणानुपपत्तिप्रसक्तेर्नेह तच्चिन्तेति प्रसङ्गाद्दर्शयितुमाह * ददातिना त्विति * प्रयोजनभाष्यं धात्वर्थसङ्गस्यैकं भावनावच्छेदकत्वे सर्वेषामेकापूर्वसाधनत्वादङ्गाङ्गित्वाभावः पूर्वपक्षे सिद्धान्ते ज्योतिष्टोमयागाङ्गतेतरधात्वर्थानामित्येवं स्पष्टत्वान्न व्याख्यातम् ।

॥ समिदाद्यपूर्वभेदाधिकरणम् ॥ २ ॥

एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं हि स्यात् ॥ १ ॥

ननु शब्दभेदरूपत्वेन सञ्ज्ञायाः शब्दान्तरसादृश्यादनन्तरविचार्यत्वासमाप्तेः कथमभ्याससर्वानन्तरं विचार्यतेत्याशङ्क्याह * शब्दान्तरेति * धात्वर्थविषयत्वेन सञ्ज्ञायास्तन्मात्रभेदकत्वाच्छब्दान्तरस्य तु धात्वर्थवाचित्वेऽपि धात्वर्थस्य स्पष्टभेदत्वेनाभेदाशङ्कायोगाद्विशेषणशब्दानां च विशेष्यपरत्वेन धात्वर्थमात्रे धातोरपर्यवसानाद्धात्वर्थभेदद्वारा भावनाभेदकत्वाद्वैलक्षण्यमभ्यासस्य तु पुनर्विधानात्मकत्वाद्विधेश्च धात्वर्थानुरक्तभावनाविषयत्वेनोभयभेदकत्वाद्भावनाभेदकत्वांशेन साम्याद्धातुभेदे धात्वर्थभेदाद्भावनाभेदो धात्वर्थभेदे तर्हि धात्वर्थाभेदाद्भावनाया अप्यभेद इति च प्रत्युदाहरणरूपेण पूर्वपक्षसौकार्यादनन्तरसङ्गतिरित्याशयः । उदाहरणासंभवेनाभ्यासचिन्तामाक्षेप्तुं भाष्योक्तं तावदुदाहरणमुपन्यासपूर्वकमाक्षिपति * तत्रेति * ननु प्रमाणान्तरसम्भवेऽप्यभ्यासोऽपि प्रमाणं न वेति चिन्ता भविष्यतीत्याशङ्क्याह * षडपीति * एकस्मिन्विषये ऽनेकप्रमाणव्यापृतावेकप्रमाणव्युत्पादनेनैव कर्मभेदसिद्धेः प्रमाणान्तरस्य व्युत्पादने परस्याधिकस्यानन्यलभ्यस्य भागस्य भज्यमानस्य फलस्य लाभो नास्तीत्यर्थः । तर्हि उदाहरणान्तरं भवत्वित्याशङ्क्याह * न चेति * एतदेव प्रश्नपूर्वमुपपादयति * कुत इति * नन्वैन्द्रवायवादिनाम्नः संस्कार्यसोमपरत्वेनोक्तगतिद्वयाभावात्तद्युक्तमाख्यातमुदाहरणं भविष्यतीत्याशङ्क्याह * ऐन्द्रवायवमिति * देवतालक्षणगुणविधानार्थत्वादैन्द्रवायवादिनाम्नो वाऽपि गुणाद्भेद इत्यर्थः । भिन्नादिनाम्नस्तर्हि निमित्तार्थत्वेनागुणवि-

र्थत्वात्तद्युक्तमाख्यातं भेदकं स्यादित्याशङ्क्याह * भिन्ने इति*
णान्तरेण भेदसिद्धेरभ्यासस्य चाभेदकत्वान्नोदाहरणतेत्यर्थः ।
द्वैशाख्याममावास्यायां सप्तदशमारुतीस्त्रिवत्सरा उपाकरोति
श पृश्नीनुक्षणस्तान्पर्यग्निकृतानेतरा लभते प्रेतरात्सृज्जृ-
ततः संवत्सरा नवनीतपृश्नारुणा आनयन्ति तांश्चैवोक्षण-
र्यग्निकृतानेतरा लभन्ते प्रेतरान्सृजन्ति ततः संवत्सरे राजी-
नयन्ति तांश्चैवोक्षणन्पर्यग्निकृतानेतरेतरा लभन्ते प्रेतरान्सृ-
ततः संवत्सरे पिशङ्गीरानयन्ति तांश्चैवोक्षणस्तान्पर्यग्निकृता-
लभन्ते प्रेतरां सृजन्ति ततः सम्वत्सरे सारङ्गीरानयन्ति
ोक्षणस्तान्पर्यग्निकृतानेतरा लभन्ते प्रेतरात्सृजन्तीति पञ्च-
याख्याहीनसम्बन्धिषु पशुषु विहितेषु पञ्चकृत्वः पर्यग्निक-
ग्रासमुदाहृतमुपन्यासपूर्वकं निरस्यति * ये त्विति * पञ्च
यास्तथेति चेदित्येकादशाधिकरणे प्राजापत्योत्सर्गवदुक्षणाम-
ः संस्कारनिषेध इति प्राप्ते संस्कारनिषेधे सति त्रींस्त्रीनु-
कैकस्मिन्नहन्यालभेरन्यं चोत्तम इति प्राप्ते कर्मत्रयनेकगुणवि-
क्यभेदापत्तेर्नवमोपान्त्यव्युत्पादितारण्योत्सर्गवत्कर्मशेषनिषे-
दनैकवाक्यत्वादिति सूत्रेण सिद्धान्तयित्वा संस्काराणां च
रेति सूत्रान्तरेण प्रतिवर्षं संस्कारानुवाददर्शनात्कर्मैक्ये च
देन पुनः पुनः संस्कारानर्थक्यात्प्रतिवर्षं कर्मसमाप्तिरवसी-
त्का ननु वचनमेतद्भविष्यतीत्याशङ्क्य पर्यग्नि करोति प-
तांश्चोत्सर्जन्तीत्यनेकार्थविधौ वाक्यभेदापत्तेर्वत्सतरीषु च
प्तानुवादत्वात्तत्साहचर्येणोक्षस्वप्यनुवादतैव न्याय्येति भा-
यति । नन्वविधेयत्वात्पर्यग्निकरणस्य पुनर्विधानरूपा-
गावे ऽपि यागानां पुनर्विधानेन भेदस्यैकादशे वक्ष्यमाणत्वा-
णत्वं भविष्यतीत्याशङ्क्याह * न चात्रेति * द्रव्यदेवतान्व-
वाद्यागानां तद्भेदेन गुणादेव यागभेदावगतेर्नाभ्यासस्य
ऽस्तीत्याशयः । उदाहरणासम्भवमुपसंहरतीति भाष्योक्तमे-
णां समाधातुमाह * यथोदाहृतेष्वेव त्विति * भिन्ने जु-
देरनुपादेयार्थस्याख्यातान्वितस्यापि नाम्नस्तत्पारतन्त्र्यभा-
प्रायेणेत्युक्तम् * श्लोकं व्याचष्टे * यानीति * ननु सर्व- ४५।१।१
चाख्यातं तेनाकाङ्क्षानिवर्तनादित्यनेन न्यायेनाश्रुताख्यात-
पि वाक्येषु तत्कल्पनेनाख्यातवत्त्वान्न क्व चित्संज्ञागुणा-
त्वं स्यादित्याशङ्कते * नन्विति * कल्पस्याख्यातस्य कल्प-
र्येण भेदाभेदयोरव्यापारात् ज्योतिरादौ चैतेन सहस्रद-

क्षिणेन यजेतेत्यादिगुणान्वयव्यापारेणैतेनर्द्धिकामो यजेतेत्यादि न्वयव्यापारेण च श्रुतस्याप्याख्यातस्य भेदाभेदयोरव्यापारात्त तस्यापि नाम्नो ऽपि भेदकत्वमविरुद्धमिति परिहरति * तत्रे भेदव्यापाराभावमात्रं सम्भवशब्देनोक्तम्। ननु यच्छब्दाद्यनुपबन्ध ख्यातस्य विधेयान्तरोपादानात्प्राक् प्रकृतनिवेशनिश्चये ऽप्या तसामानाधिकरण्यं विना संज्ञात्वानिश्चयात्कथं तथाभेद इत ङ्क्य * तत इत्युक्तम् * यागसंज्ञात्वानिश्चये ऽप्यधिकारार्थाथश न्वयेनानुष्ठेयक्रियासंज्ञात्वनिश्चयाद्भेदकत्वोपपत्तिरित्याशयः । न सत्यैन्द्रवायवं गृह्णात्युद्भिदा यजेतेत्यादिनाम्नामाख्यातपारतन् द्भेदकत्वानुपपत्तेः सर्वाणि परस्परासङ्गतोत्पत्तिकगुणयोगाद्धि नाम्नैव चैवमादीनां भेद इति चायुक्तं स्यादित्याशङ्क्याह * यत्र ति * आनर्थक्यप्रतिहतानां विपरीतं बलाबलमितिन्यायेनागत्या भेदकतेत्याशयः । एकसंज्ञावरुद्धे संज्ञिनि संज्ञान्तरस्याप्यसम्भ द् गुणशब्देन संज्ञाप्युपलक्षिता आनर्थक्यनिमित्तत्वप्रदर्शनार्थं दिशब्देनाक्रियमाणे यागे न शक्यः कर्तुमित्यनर्थकः स्यादित्यु क्तम्।नन्वेवं सत्यत्रापि गुणादेव भेदसिद्धेः किमभ्यासोपन्यासेने शङ्क्याह * तत्रेति * आख्यातस्य भेदकत्वसम्भवे तत्पारतन्त्र्य गुणस्य भेदकत्वं नास्तीत्याशयः।ननु भाष्ये पूर्वभेदाभेदस्य सन्देहा धानात्किमेकस्य कर्मणो वाचकमनेकस्येत्ययुक्तमुक्तमित्याशङ्क्य व्याचष्टे * किमिति *यजतिशब्दः किम् यागे ऽभ्यासपूर्वमन्यत्का विधत्ते किं वा प्रतियजतिशब्दाभ्यासमन्येषां कर्मणां भेद इति तीयव्याख्यायां भाष्यार्थः।अपूर्वशब्दो ऽन्यवाची कर्मविशेषणमित्य शयः । पूर्वपक्षं प्रतिजानाति * किमिति * हेतुप्रश्नोत्तरत्व शब्दान्तरइति भाष्यं पूर्वोक्तभेदहेत्वभावाभिधानार्थत्वेन व्याचष्टे कुत इति*इहेति भाष्यं कर्मप्रत्यभिज्ञाख्याभेदहेत्वन्तरार्थत्वेन व्या चष्टे * अपि चेति * शब्दस्य तत्त्वात्पूर्वमेव कर्मबुद्धौ निवेशितमि त्यर्थः।श्लोकं व्याचष्टे * यथैवेति * नन्विति भाष्येणानन्यपरविधि पुनः श्रुतविधेयकर्मभेदं विनानर्थक्यापत्तेर्भेदकत्वमाशङ्क्य सत्यमि भाष्येणार्थशब्दो ऽभिधेयवाची प्रयोजनवाची वेति विकल्प्याद्यपक्षे ! योजनाभावे ऽप्यभिधेयसद्भावानर्थक्यमित्युक्तं तद्व्याचष्टे * यश्चेति * वार्त्तिके निष्प्रयोजनत्ववाच्यनर्थशब्दः । ननु वेदस्य प्रयोज नवदर्थाभिधायित्वनियमस्यार्थवादाधिकरणे स्थितत्वान्निष्प्रयोजन त्वापादकः कर्मैक्यपक्षो न युज्येतेत्याशङ्क्याह * न चेति * स्व रूपपरत्वे ऽर्थवादानां प्रत्यक्षादिविरोधेनाप्रामाण्यापत्तेः स्तुत्यर्थत

: श्रुतेश्च पूर्वकर्मविधायित्वे ऽप्यनपेक्षत्वेनाप्रामाण्यानापत्तेः
जनत्वमात्रेण न भेदकत्वं कल्प्यमित्याशयः। न चेति भाष्येण
जनतापि नास्तीत्युक्तं तत्र भाष्योक्तस्य देवताविध्यर्थत्वस्य
न्त्रभेदापत्तेरयुक्तत्वेनापरितोषात्स्वयं तावत्प्रयोजनत्रयमाह
च्येति * मन्त्रवत्कर्मकालप्रयोगितैकं प्रयोजनमित्याशयः।
रणात्प्रयोगार्हरूपाभावेन प्रयोज्यत्वानुपपत्तेरपरितोषात्प्रयो-
माह * अथ वेति * प्रतिप्रधानप्रयोगमावृत्तिराभीक्ष्ण्यं
कनातिशयः। नन्वाभीक्ष्ण्ये द्वे भवतइति स्मृतेः पञ्चकृत्वो
न युक्त इत्याशङ्क्याह * अस्ति हीति * सकृत्प्रयुक्तात्प्र-
यर्थे तात्पर्यातिशयद्योतनार्थत्वादभ्यासस्यातिशयातिरेका-
ासातिरेक इत्यर्थः। पञ्चकृत्वो ऽप्यभ्यासो दृश्यतइत्याह
। * इन्द्रस्य त्वष्टृपुत्रवधात्तेजोधर्ममाविशद् बलं वायुं रूपम-
र्द्धमात्मन्यतिष्ठन्ततः पाण्डुपत्न्यां कुन्त्यां धर्मेण तेजोनि-
धिष्ठिरो ऽभवद्वायुनिक्षिप्तं बलं भीमः इन्द्रनिक्षिप्तं देहार्द्धम-
र्द्धाभ्यां माद्र्यां निक्षिप्तं रूपं नकुलसहदेवाविति पञ्चापीन्द्रा-
लित्यादिन्द्रा एवेति पञ्चेन्द्रोपाख्याने कुमार्येव वृद्धतां प्राप्त-
मे देहीति पञ्चकृत्वो वरमीश्वरः प्रार्थित इति श्रूयतइत्य-
न्त्वेवं सति पतिपञ्चकवद्यागपञ्चकमपि स्यादित्याशङ्क्याह
ते * अर्थान्तरविवक्षया प्रयुक्तस्य शब्दस्यार्थान्तरकल्प-
ाव्याख्यानं छलं निद्रिते ऽन्यमनस्के वा प्रबोध्यमाने बुध्यस्व
े यावत्प्रबोधं वृद्धकुमार्याश्च यावद्वरलाभमभ्यासस्सम्भवे
ायत्वाद्वेदे तादृगाशयानुपपत्तेः। प्रतिप्रधानानुष्ठानमावृ-
यादेव सिद्धेरनुष्ठानादरस्य च विहित एव सिद्धेरपरितो-
नां विकल्पेन विधात्रेति तृतीयं प्रयोजनमाह. * अथ
अध्येतृभेदाभावाद्व्यवस्थितविकल्पानुपपत्तेरेकस्मिन्नध्येत-
पि सर्वाध्ययनानर्थक्यापत्तेरपरितोषाद्भाष्योक्तं प्रयोजनम-
द्देनानुसन्धत्ते * अथ वेति * ननु समिदादिशब्दानां
यर्थत्वनिरासेन नामधेयत्वस्य वक्ष्यमाणत्वाद्देवताविधा-
युक्तेत्याशङ्क्याह * कर्मेति * विध्यपेक्षितविधेयविशेष-
त्वान्नामधेयस्य प्राक्सिद्धविशेषापेक्षिण्यनुवादे ऽनुपपत्ते-
णार्थत्वापत्तिरित्यर्थः। वैश्वदेवादिनामधेयस्य गुणानुपद-
नार्थवत्त्वादनुवादे ऽप्युपपत्तिरित्याशयः। प्रत्यभिज्ञायाः क-
ण्याभावे ऽपि गुणविधानुपपद्याक्रान्तविधिशक्तित्वेन क-
वगतेर्गुणविधित्वस्याप्यभ्युपेत्यवादत्वं सूचयितुमाह * त-

०

स्मादपीति * वस्तुतस्तु प्रत्यभिज्ञैवाभेदे हेतुरित्याह *यत्रापि चेति* न देशान्तरस्थशब्दार्थप्रत्यभिज्ञानोक्तिरतिशयार्था विधेयभेदज्ञानं च विना विध्यभ्यासाज्ञानाद्विध्यभ्यासाद्विधेयरूपभेदाभ्युपगमे ऽन्यन्योन्याश्रयापत्तेः पुनरुच्चारणरूपाद्वाचकाभ्यासाद्वाच्यभेदो ऽभ्युपगन्तव्यस्तत्र जातिर्भेदायोगाद्व्यक्तेर्वाच्यत्वापत्तेस्तस्याश्चानित्यत्वा-
१ च्छब्दार्थसम्बन्धानित्यत्वाद्वेदाप्रामाण्यापात्तिरित्याशयेनाह * यदि चेति * यदा त्वन्ये त्वभेदमाचार्याः कर्मणामेव मन्यन्तइत्येतन्मताश्रयणेनैकैव यागव्यक्तिर्गकारादिव्यक्तिवन्नित्येष्यते तदा तद्व्यतिरिक्तजात्यभावात्प्रत्यभिज्ञानायास्तद्विषयत्वाशङ्कानुपपत्तेर्व्यक्त्यैक्यप्रामाण्यं स्पष्टमेवेत्याशयेनाह *किं चेति* संख्यानिबन्धनस्तु भेदो द्व्यादिकारकात्मकव्यञ्जकभेदोपाधिको वर्णस्येव द्रुतादिभेदोपाधिक इत्याशयः। अस्मिंश्च पक्षे ऽभ्यासार्थत्वेनापि पुनःश्रुत्युपपत्तेर्न कर्मप्रतीकतास्तीत्याह * यद्यपि चेति * स एव तर्ह्यस्त्वित्याशङ्क्याह * न चेति * ज्योतिष्टोमे ग्रहणान्वयित्वेन श्रुतानां देवतानां प्रकरणेन ग्रहणद्वारा योगान्वयात्प्रकरणस्य च युगपत्सर्वाङ्गग्राहित्वात्समुच्चयावगतेः प्रत्येकं च ग्रहणान्वयासंहतानां यागान्वयायोगाभ्यासो युक्तो न त्वत्र देवतासमुच्चयहेतुरस्तीत्याशयः। पूर्वपक्षप्रयोजनं चानेन समर्थितं तस्मादित्युपसंहारभाष्यस्थमपूर्वशब्दमयागेभ्यो ऽन्यत्ववाचितया व्याख्यातुमाह*तस्मादिति * भाष्योक्तां सूत्रव्याख्यां स्पष्टयति * एवमिति * विधेरप्रवृत्तप्रवर्त्तनस्वभावत्वाद्विहितविधावप्रामाण्यापत्तेर्विधिपुनःश्रवणस्य भेदकत्वावश्यम्भावात्कर्मैक्यवादिना कर्मानुवादाभ्युपगमेन विधिपुनः श्रवणाभावो वाच्य इति मत्वा तदेव प्रश्नपूर्वमुपपादयति * कथमिति * नन्वन्याक्षिप्तशक्तित्वाभावे ऽपि विपरिवृत्तेरनुवादो ऽवसीयतइत्याशङ्क्याह * यदि हीति * ननु व्रीहिभिर्यजेतेत्यादौ विपरिवर्त्तमानस्यैवानुवादाभ्युपगमादवश्यमनुवादे विपरिवृत्तेः किं चित्कारो वाच्यसूत्रानुवादत्वं चेत्तथा न क्रियते किं तर्हि क्रियतइति पृष्टवोत्तरमाह * किं तर्हीति * समान्यतस्त्वनुवादत्वप्रसिद्धिरन्याक्षिप्तविधिशक्तित्वादेवेत्याह * तत्सामान्येति * एतदेव व्याचष्टे * यदा हीति* नन्वनेकविध्यशक्तौ न क्व चिद्विशिष्टविधिः स्यादित्याशङ्क्याह * तां चेति * विपरिवृत्त्यभावे विशिष्टविधिरगत्या स्यादित्याशयः । ननु य एवं विद्वान्पौर्णमासीं यजतइत्यादौ रूपालाभादिनाप्युच्चारणदर्शनात्किमन्याक्षिप्तत्वेनेत्याशङ्क्याह * धात्वर्थेति * चतुर्जुह्वां गृह्णाति अयाजेभ्यस्तत् गृह्णाति अष्टावुपभृति गृह्णाति प्रयाजानुयाजेभ्यस्तत्

गातीति वाक्यान्तराभ्यां जौह्वावोपाभृताज्यद्रव्यलाभान्मान्त्र-
कदेवतालाभाच्चाद्वान्यो नोत्तारणहेतुरस्तीत्याशयः । ननु सा-
ंतो ऽनुवादत्वाप्रसिद्धावपि प्रकृतस्यानुवाद इत्यनुवादविशेषत्व-
तर्हि विपरिवृत्तेरस्त्वित्याशङ्क्याह * सर्वत्रैवेति * शब्दशक्त्या-
ास्य विधित्वस्यासम्भवावधारणं विना नानुवादकता युक्तेत्याश-
ंतो ऽनुवादाकाङ्क्षा प्राप्तिश्चानुवादत्वे हेतुर्न प्राप्तिमात्रमित्युप-
ंति * तस्मादिति * अनुवादत्वावधारणे ऽनुवादाकाङ्क्षायां ४५४
त्राभिधानस्य प्रकृतोपयोगमाह *तत्रेति* पूर्वं तेनैव शब्देनैत्यनेन
भिज्ञानात्कर्मैक्यावगतेर्न तद्विरुद्धो भेदः पुनर्विधानात् सि-
ति यदुक्तं तद् दूषयितुमनुभाषते * यस्त्विति * दूषयति*
ंति * एतदेव विवृणोति * तथा हीति * श्लोकं व्याचष्टे *
ायकौ हीति * ननु दध्यादिवाक्ये ऽपि तर्हि कर्मान्तरत्वं स्या-
ाशङ्क्याह * यत्र पुनरिति * प्रत्यभिज्ञानस्यापि जातिविषयत्वे-
ात्तेर्नात्यन्तबाध इत्याह * तस्मादिति * सामान्येनैक्ये चेद्-
दः कस्य तर्ह्यत्र भेदश्चिन्त्यत इत्यपेक्षायामाह * तथा हीति *
दीनां यागत्वसामान्यैक्ये ऽपि पशुत्वाद्यवान्तरसामान्यात्मक-
ारूपेणान्योन्यं पशूनां चाग्नीषोमीयादीनां सोमानां ज्योतिष्टोमा-
म इष्टीनां च दर्शपूर्णमासाद्यानानां विधेयात्मकव्यक्तिरूपेणान्यो-
ाद्श्चिन्त्यत इत्यर्थः । सर्वत्र शब्देन संख्यादिसाधारणतास्याभि-
योक्ता । ननु विधिश्रुत्या कर्मान्तरज्ञानवद्यजिश्रुत्यैवैक्यज्ञानाद्य
ाले विशेष इत्याशङ्कते * ननु चेति * यागत्वमात्रज्ञानं तथा
ज्ञानमिति परिहरति * नेतदिति * श्लोकं व्याचष्टे * न
* ननु शब्दार्थरूपस्येह भेदाभेदविचाराद्व्यक्तेश्चाशब्दार्थ-
ब्दार्थभूतस्य च सामान्यस्यैक्याद्यजिश्रुत्यैव कर्मैक्यज्ञानसि-
त्याशङ्किता स्वाशयं विवृणोति * नन्विति * शब्दावाच्यत्वेनै- ४५५
ामवाच्यत्वाच्छब्दार्थतायामैक्यापत्तेर्विपरीतसाधनो हेतुरि-
येन परिहरति * येनेति * नन्ववाच्यत्वे सत्यैक्यवद्भेद-
ानवगमात्कथं विपरीतसाधनतेत्याशङ्क्य प्रश्नपूर्वं निरस्यति
थमिति * विधेयरूपस्येह भेदाभेदविचाराज्जातेश्चाननुष्ठेयत्वे-
ेयत्वात्तल्लक्षितानां व्यक्तीनामेव विधेयत्वावगतेर्विधेयसमर्प-
यजेस्तात्पर्यवृत्त्या व्यक्तिविषयत्वेनैक्यज्ञाने व्यापाराभावाद्विहि-
ानायोगेन विधिपुनःश्रुत्या सन्नधिकृतैक्यज्ञानबाधाद्भेदज्ञानसि-
त्याशयः । श्लोकं व्याचष्टे * यदिति * गत्वादिवन्न चैतेष्वि-
। व्यक्त्याकृतिभेदाभावमुक्तं दूषणायानुभाषयते * यस्त्विति *

दूषयति * सत्यमिति * कर्मव्यक्तीनां स्वरूपेण क्षणिकत्वाद्व
च्याकृतिभेदादिप्रमेयस्य विधेयरूपस्य विधिनित्यत्वेन नित्यत्वाद्वि
यरूपव्यक्त्याकृतिभेदो ऽपह्नोतव्यः स च शब्दान्तरादिभेदप्रमा
विना नास्तीत्येतावता न तत्सद्भावो ऽपह्नोतुं शक्य इत्याशयेन श्लो
व्याचष्टे * यथैवेति * व्रीहियवद्रव्यभेदे ऽप्याग्नेयादेरभ्युदया
मित्तदेवताभेदे ऽपि चाभेदसूचनार्थं यजमानादीत्यादिशब्देन द्रव्य
३।२ देवतोपादानम्। एतदेव व्यवहारेण द्रढयति * तथा हीति * याग
होमादिकर्मव्यक्तिवद्यागव्यक्तीनां स्वरूपवैलक्षण्यानुपलब्धेर्भेदानुप
पत्तिशङ्कानिरासार्थत्वेन प्राक् तस्मादिति व्याचष्टे * न चेति
यन्मानमिति श्लोकार्थमुपसंहरति * अतो ऽन्येति * अतः शब्द
रामृष्टप्रामाण्याविशेषमुपपादयति * न हीति * इष्ट्यादिषु सम
स्तेषु प्रत्येकं वा भेदप्रत्ययस्यानौपाधिकत्वाद् बाधाभावाच्च न प्र
माण्ये विशेष इत्यर्थः । देशादिभेदे ऽपि विधेयरूपेण व्यक्त्यभेदो
पसंहारमेवकारसूचितं विवृणोति * तेनेति * येन कारणेन श
ब्दान्तरादिषट्काधिरेव भेदस्तेन व्यक्तिभेदे शब्दान्तरादिप्रमाणा
भावाच्छब्दव्यक्तिवद्यागव्यक्तिषु नित्याभिव्यञ्जकभेदाद्भेदप्रतीतिरि
त्याशयः।ननु कर्मणः पूर्वापरीभूतानिष्पन्नस्वरूपत्वान्नित्यत्वं न सम्भ
वतीत्याशङ्क्य कूटस्थनित्यत्वाभावे ऽपि नित्यविधिविषयत्वरूपेण
प्रवाहनित्यत्वसूचनार्थम् * तास्तु विधेयरूपास्त्वित्युक्तम् * एकवि
धिविषयभूतव्यक्तिवद्भिन्नविधिविषयभूतेष्विष्ट्यादिषु भेदप्रत्ययस्या
भिव्यञ्जकभेदनिबन्धनत्वान्निरासार्थेवकारः । ननु सङ्कल्पात्मक
यागस्वरूपस्य मानसप्रत्यक्षगम्यत्वाद्विधेयरूपस्य च विधिगम्यत्वा
त्कथं देशाद्यभिव्यङ्ग्यतेत्याशङ्क्याह * तेभ्यश्चेति * विधेयरूपा
श्रयस्य यागस्वरूपस्य देशादिभिर्निष्पादनान्निष्पन्ने चाश्रयरूपे त
दाश्रयविधेयरूपप्रतीतेर्देशादिना विधेयरूपाभिव्यक्तिरित्याशयः
द्रव्यदेवतामात्राद्यागसिद्धेर्न देशादिभ्यो यागसिद्धिरित्याशङ्क्य
* फलेत्युक्तम् * देशादीतिकर्तव्यतारहिताद्यागात्फलासिद्धेर्विधे
यरूपोपलक्षितफलसाधनत्वरूपेण यागस्य देशादिभ्यः सिद्धिरित्या
शयः । यदा त्वथ प्रत्यक्षे नित्ये चेति शब्दाधिकरणभाष्यानुसारा-
द् बुद्धिकर्मणोरपि वर्णवत् कूटस्थनित्यतेष्यते तदा यागनित्यत्वे
पूर्वकल्पनानुपपत्त्या शङ्कानिरासार्थत्वेनायं ग्रन्थो ऽनुष्ठानं नित्ययागा-
भिव्यञ्जकमाश्रित्य शब्दाभिव्यञ्जकानुच्चारणाच्छब्दफलार्थप्रतीति-
सिद्धिवत्तेभ्यो नित्ययागाभिव्यञ्जकेभ्यो ऽनुष्ठानेभ्यो यागफलस्य
सिद्धिस्तेषां क्षणिकत्वादुक्ता ऽपूर्वकल्पनेत्येवं योज्यः । नन्वनित्याना-

पि व्यक्तीनां नित्यसामान्योपलक्षितानां नित्यविधिविषयत्वोपप-
व्यक्तिनित्यत्वाभ्युपगमो वृथेत्याशङ्क्याह * यागत्वमेव चेति *
ध्यन्तरविषयव्यावृत्तावान्तरसामान्यं विनानन्यविहितविधिवि-
शेपलक्षणायोगाद्यागत्वातिरिक्तस्य चावान्तरसामान्यस्याभावा-
यक्तीनामेव प्रवाहरूपेण कूटस्थत्वेन वा नित्यताभ्युपगन्तव्येत्याश-
। ननु भिन्नासु ज्योतिष्टोमादिव्यक्तिषु अभिन्नस्यैकाहादिशब्द-
तज्जन्यस्य च प्रत्ययस्य यागत्वातिरिक्तावान्तरसामान्याभावे
पपत्तेस्तान्येष्टव्यानीत्याशङ्कते * नन्विति * एकोपाधियोगादु-
त्तेः हरिहरादि * नेति * एकाहशब्दस्योपाधिमाह * एकेनेति *
ीनशब्दस्याह * द्व्यादिभिरिति * यजिचोदिताहर्गणयोग-
पाधित्वं प्रागित्यनेन सूचितम् । ननु द्वादशाहस्यापि यजिचोदि-
र्गणयोगेनाहीनत्वात्तस्मात्प्रागिति कस्मादुक्तमित्याशङ्क्याभ्युपैति
दितत्वसत्रलक्षणस्यापि सद्भावेन तस्य केवलाहीनत्वासम्भवादि-
ह * स त्विति * आसीरन्नित्यस्चिोदितगतस्योपेयुरित्युपे-
चोदितगतस्य वा सततानुष्ठानस्य सत्रशब्दोपाधित्वमाह * तद्-
त्रकमेवेति * द्वादशाहस्याप्यवधित्वेन सत्रतोक्ता सहस्रसंव-
र तदायुषासम्भवान्मनुष्येष्वित्यत्र षष्ठाधिकरणे सहस्रसं-
सरशब्दस्याहः सहस्रवाचितया वक्ष्यमाणत्वात्षड्त्रिंशत्संवत्स-
स्तदवधिककालत्वे ऽपि पूर्वपक्षे स्थित्वा सहस्रसंवत्सरपर्यन्ता-
ना सर्वसत्रान्ते विधानाद्वा यागगतपशुसोमातिरिक्तहविष्कत्व-
ष्टिशब्दस्य पशुहविष्कत्वं पशुशब्दस्य सोमहविष्कत्वं होमशब्द-
पाधिमाह * हविर्विशेषेति * वस्तुवृत्तिकथनार्थं चेदमेकाह-
घवान्तरजात्यभावाभिधानं तत्सद्भावे ऽपि त्वनेकज्योतिष्टोम-
श्वजिदादिविधेयसाधारण्येनैकाहत्वादेरसाधारणविधेयोपलक्षण-
योगाद्व्यक्तिनित्यताभ्युपगन्तव्येत्याह * अथापीति * स्वमतेन
न्तरादिषट्कस्य विधेयरूपभेदे व्यापारमभिप्रेत्य भिन्नानामपि
क्तीनां यजिवाच्यैकयागत्वजात्योपलक्षितानामेकविधिविषय-
पत्तेर्विधिविशेषविषयत्वाच्च विधेयान्तरेभ्यो व्यावृत्त्युपपत्तेर्या-
तिरिक्तावान्तरजात्यभावो ऽभिहितः स्वरूपभेद एव तु शब्दा-
दिषट्कव्यापाराभ्युपगमे विधेयान्तरव्यावर्तकप्रतिविध्यसा-
णावान्तरज्योतिष्टोमत्वादिजात्या विना विधेयान्तरेभ्यो व्यावृत्त्य-
त्तेर्ज्योतिष्टोमादिव्यक्त्याकृतिभेदे ऽप्यशोषाङ्कारादिवद्व्यक्त्या-
भेदो नास्तीति यदुक्तं तदयुक्तमित्याशयेन * आहैवमिति *
हत्वादिज्योतिष्टोमत्वादीनि प्रतिविध्यसाधारणान्यवान्तरसामा-

न्यानि यदि कल्पन्ते ततश्च स एवायं ज्योतिष्टोम इत्यादिप्रत्यभिज्ञा
या: सामान्यविषयत्वोपपत्तेर्देशादिभेदाद्व्यक्तयो यदि भिन्ना भवन्ति
तथा प्यदोष इत्यर्थः ॥ स्वरूपभेदाभेदचिन्तापक्षे भिन्नानां व्यक्ती
नामेकविधिविषयत्वरूपेणैक्यस्यानादरसूचनार्थो ऽत्यन्तशब्दः परा
भिमतत्रैलोक्यवर्त्तियागव्यक्त्यैक्याभ्युपगमे ऽप्यनुष्ठानभेदविषयत्वेन
भेदप्रमाणानां व्यापाराद् प्रौढ्या दर्शयति * तथेति * कर्मभेदं कु
र्यादिति भाष्यमस्मिन्पक्षे न युज्येतेत्याशयेनाशङ्कते * नन्विति *
भाष्यस्यायुक्तत्वे ऽपि भेदचिन्ताप्रयोजनं तावत्सिद्ध्यतीति परिहर
ति * सर्वथा तावदिति * भाष्यमप्युपपादयितुमाह * तथापि
त्विति * ग्रहयागेषु ज्योतिष्टोमवाक्येन ज्योतिष्टोमरूपतयानुष्ठान-
विधानात् ज्योतिष्टोमरूपतायाश्च सर्वाभ्यासेष्वैक्यान्नानुष्ठानभेदचो-
दनेति विशेषनिमित्तमित्याशयः विशेषनिमित्तान्तरमाह * अभ्या-
सेष्विति * ज्योतिष्टोमरूपावयव्युत्पादनात्तदपेक्षया ग्रहयागाभ्यासे-
ष्ववयवबुद्धिर्न प्रयाजाभ्यासेष्वित्यतो ऽपि निमित्ताद्विशेषः । वैषम्य-
मित्यपिशब्दाभ्याहारेण योज्यम् । नन्वेवमपि कर्मभेदशब्देनैवंविधवैष-
४ म्यसूचनस्य किं प्रयोजनमित्याशङ्क्याह *एतत्ज्ञानस्य चेति* प्रया-
जाभ्यासवत् ग्रहाभ्यासेष्वप्यनुष्ठानभेदचोदनायां धर्मग्रहणशक्त्या-
पूर्वभेदात्पशुसोमाधिकरणपूर्वपक्षवत्सिद्धान्ते ऽपि सोमविकारेष्वे-
कस्यैव ग्रहणस्य धर्मैः सकृदनुष्ठानेन च भवितव्यमिति प्रकृतितुल्या-
नुष्ठानं पशुसोमाधिकरणसिद्धान्तप्रयोजनं न सेत्स्यतीत्याशयः ।
प्रौढेरेव सबीजत्वार्थं भाष्यसम्मतिमाह * तस्मादिति * अस्यैव स्व-
मतत्वशङ्कानिवृत्त्यर्थं वक्ष्यमाणमेव भाष्यं स्वमतेनान्यथा व्याच-
ष्टे * अथ चेति * बहुकृत्वो ऽपीति पूर्वपक्षभाष्योक्तार्थानुभाषणार्थं
नन्विति भाष्यं विहितविधानानर्थक्यापत्तेर्वाधिपुनः श्रुतेः कर्मान्तर-
विधिशक्त्यवगमादयुक्तमाशङ्क्य व्याचष्टे * नन्विति * उच्यतइ-
त्यादिभाष्यं समिदादिशब्दानां देवताविधित्वस्य नवमे निराकरि-
ष्यमाणत्वादयुक्तमाशङ्क्याभ्युपेत्यवादत्वेन व्याचष्टे * तत्रेति * की-
दृशो ऽभ्युपेत्यवाद इत्यपेक्षायां पुनःश्रुतेर्देवताविधानाक्षिप्तशक्तित्वा-
त्कर्मभेदकत्वाभावे ऽपि गुणाद्भेदो भविष्यतीत्येवं रूपं वक्तुं समि-
द्वाक्येन शुद्धे यागे विहिते तनूनपादादिवाक्ये देवताविध्युपपत्तेर्न
गुणाद्भेद इत्याशङ्कानिरासार्थं समिधो यजतीत्यादिभाष्यं व्याचष्टे *
यत्तावदिति * भाष्यस्थस्य देवताशब्दस्योपलक्षणार्थत्वज्ञापनार्थो द्र-
व्यशब्दः गुणस्य भेदकत्वाय पूर्वकर्मसंयोगासम्भवाभिधानार्थं तत्रेति
भाष्यं व्याचष्टे * उभयमपि चेति * अभ्युपेत्यवादस्वरूपार्थं स

इति भाष्यं व्याचष्टे * अवश्यं चेति * समिद्वाक्यन्यायमुक्त-
वाक्येष्वतिदिशति * एवमिति * अस्याप्यभ्युपेत्यवादत्वोपपा-
र्थं गुणविधित्वं द्रव्यविधित्वेन देवताविधित्वेन चेत्येवं विक-
ल्पं पक्षं तावन्निरस्यति * गुणेति * द्वितीयान्तेन शब्देन द्रव्य-
निरस्त इत्यर्थः । गुणविधित्वमपि कीदृगित्यध्याहृत्य योज्यं
च प्रतिपत्तिकर्मणि प्रस्तरप्रहरणादौ प्रक्षिप्यमाणांशेन कर्मभू-
तान्वयसम्भवे ऽपि यागे कथंचिद् द्रव्यस्य प्राधान्यलक्षणकर्म-
गान्न कर्मभूतद्रव्यान्वयः सम्भवतीत्याह * विशेषणा चेति *
ऽपि चेदित्यत्राधिकरणे श्रुत्याविनियुक्तानां मन्त्राणां स्वा-
वायकल्पकत्वासम्भवान्मान्त्रवर्णिकदेवताप्राप्त्यभावेन तत्प्रख्य-
भावान्नामधेयत्वानुपपत्तेर्विष्णुं यजतीतिवत्समिदादिशब्दानां
यान्तानां देवानां विधित्वं पूर्वपक्षयित्वा यजेः पूजावाचित्वा-
देवतायाः पूज्यमानकर्मत्वायोगात्तदुद्देशांशस्य वा समासित्वे-
शार्थत्वात्तत्कर्मणो ऽभिभूतत्वेन विवक्षानुपपत्तेरुद्देश्यत्वे ऽपि
प्सितत्वात्प्राधान्यलक्षणकर्मत्वानुपपत्तेः श्रुत्यविनियुक्तानामपि
णामुपांशुयाजवद्यागाकाङ्क्षितदेवताकल्पकत्वोपपत्तेर्देवतावि-
त्व निराकरिष्यमाणत्वाद्देवताविधित्वेनापि गुणविधित्वं न स-
ीति द्वितीयं पक्षं निरस्यति * नचायमिति * तस्मादिति
न्तोपसंहारभाष्यं फलतो यागभेदोपसंहारार्थत्वेन व्याचष्टे *
दिति * अनेन च यस्मात्समिदादिवाक्यैः प्रधानयागानुवादे ४५८।
पुनर्यागस्याक्रियमाणत्वाद्देवतान्तरान्वयकरणाशक्तेर्विध्यानर्थ-
क्तिस्तस्माद्यागविधित्वमभ्युपगम्य विहितविध्ययोगात् भिन्ना
भेदेन कार्या इत्येवं भाष्यं व्याख्यातम् । ननु यागभेदे ऽपि प्रयाज-
यैककार्यत्वावगतेर्विकल्पस्य न्याय्यत्वान्नाभ्यासो युक्त इत्या-
निरासार्थं प्रत्यभ्यासं चेति भाष्यं तद्विवरणार्थं च न च यत्स-
ान्वयेन कर्तोरदृष्टमुपकाररूपं क्रियते तदेव तनूनपाद्यागा-
तयोर्यागयोर्भिन्नत्वेन तदनुनिष्पाद्यदृष्टभेदावगतेः समाख्या-
प्रधानप्राग्भावमात्रनिमित्तत्वेन कार्यभेदे ऽप्यविरोधादित्य-
नाय यागैक्ये ऽप्यनेकदेवतान्वयसम्पादनायानुष्ठानाभ्यासोप-
पूर्वपक्षप्रयोजनाभावाशङ्कानिरासार्थं च प्रयोजनभाष्यं स्पष्ट-
व्याख्यातम् ।

॥ आघाराद्याग्नेयादीनामङ्गाङ्गिभावाधिकरणम् ॥ ३ ॥

प्रकरणं तु पौर्णमास्यां रूपावचनात् ॥ २ ॥

समप्राधान्याङ्गाङ्गिभावचिन्ताया लक्षणासङ्गतिं पौन
च्चाशङ्कते * समस्तानीति * एवं समामनन्तीति प्रकारवाचिने
ब्देनानूयाजादिसूचनात् * समस्तानित्युक्तम् * आघारसमि
जुषोहोमत्वे ऽपि यागेष्वेव समप्राधान्यशङ्कोपपत्तेर्भूम्ना याग
अवघातादौ गुणप्रधानकर्मत्वचिन्ताया लक्षणार्थत्वाभावे ऽपि
प्रासङ्गिकसङ्गतिस्तथापीह नास्तीति केन * नाम्ने त्युक्तम् * ।
षतश्चेयं चतुर्थोपान्त्ये करिष्यमाणत्वात्पुनरुक्तेत्यमित्यनेनोक्तम्।
ङ्गतिं तावद्विवृणोति * अभ्यासेति * लक्षणार्थत्वशङ्कामुपन्य
पूर्वं दूषयति * केचिदिति * पौनरुक्त्यं विवृणोति * महतो
श्लोकार्थमुपसंहरति * तस्मादिति * चिन्ताद्वयं चैकस्मिन्ना
रणे न युक्तमित्याह * य एवामिति * शब्दान्तरत्वादित्यपि
५९।३ च्यमयुक्तमित्याह * अपि चेति * श्लोकं व्याचष्टे * शब्दान्तर
दिति * ननु प्रयोगचोदनाभावादर्थैकत्वमविभागादितिवत्
चिन्ताद्वयं भविष्यतीत्याशङ्क्य * आह न चेति * समप्राधा
ङ्गाङ्गिभावयोः पक्षयोर्हेतू न दृश्येते इत्याशयः । विध्यनुवादचिन्ते
धिकरणार्थो नाद्येति समाधत्ते * तस्मादिति * द्वयोरेवोदाहर
वाक्यान्तरानर्थक्यमाशङ्क्याह * तत्रैतरेषामिति * कस्मात्स
प्राधान्याङ्गाङ्गिभावो नाधिकरणपक्षावित्याशङ्क्य पौनरुक्त्या सङ्ग
ह्रत्वभावात्मकयुक्तित्रयपरामर्शार्थोक्तशब्दः । नन्वेवमपि प्रकृताना
र्मणामनुवदितारावपूर्वयोर्वा कर्मणोर्विधातारौ वेति प्रकृतापूर्
द्वाभ्यां भेदाभेदयोरपि चिन्त्यत्वप्रतीतेश्चिन्ताद्वयापत्तिरित्याशङ्
* तदिहेति * विध्यनुवादसिद्धौ पूर्वन्यायादेव भेदाभेदयोः सि
पृथगचिन्त्यत्वात्त्रिकस्य त्रिकस्यैकपक्षतेत्यर्थः । किमर्थं तर्हि त्र
पन्यास इत्याशङ्क्य * उत्तरफलत्वेनेत्युक्तम् * विधातृत्वे ऽपि
र्मभेदाभावे पुनर्विधानार्थवत्त्वाय फलवाक्यस्थद्विवचनान्तद
र्णमासशब्दापेक्षितद्वित्वसम्पादनार्थमाग्नेयादिसमुदायद्वयविधि
त्वापत्तेः सिद्धान्तवत्तेनैव फलान्वयेनेतरेषामङ्गत्वात्समप्राधान्
सिद्धेरनुवादत्वे ऽपि चाग्नेयाद्यतिरिक्तकर्मानुवादित्वात्तेभ्यो ऽन्य
स्त्वाग्नेयादिसमुदायद्वयाक्लृप्तेः फलवाक्यस्थदर्शपूर्णमासशब्द
ग्नेयादिषट्कविषयत्वाप्रसिद्धेर्यजिविशेषकत्वायोगात्समप्राधान्या
स्याङ्गाङ्गिभावासिद्धेरुत्तरोत्तरस्य फलत्वज्ञापनार्थं त्रयोपन्यास इत
शयः । नन्वेवमप्यभ्यासलक्षणभेदातिप्रसङ्गापवादार्थत्वेनाधि
रणस्य सङ्गतिसिद्ध्यर्थं भेदाभेदाभ्यां च विना विध्यनुवादत्वमा
त्समप्राधान्याङ्गाङ्गिभावासिद्धेः प्रयोजनाभावेनाधिकरणानारम्भः

सङ्गाद्भेदाभेदावेवोपन्यसनीयावित्याशङ्क्याह * त्रितयस्य चेति * ६
दाभेदयोः प्राधान्येन विचार्यत्वे ऽप्युपायभूतविध्यनुवादद्वारा फ-
भूतसमप्राधान्याङ्गाङ्गिभावद्वारा चेष्टभेदाभेदसिद्धिं मत्वा न श्रु-
ोपन्यास इत्याशयः । पश्चात्तर्हि प्रकृतापूर्वशब्दाभ्यां तयोः श्रुत्यो-
्यासः किमर्थमित्याशङ्क्याह*तत्र चेति * नन्वादौ भेदाभेदावुप-
स्य तत्सिद्ध्यर्थत्वेन विध्यनुवादचिन्ताकस्मान्न कृतेत्याशङ्कते
किमर्थं पुनरिति * फलद्वारोपन्यासो भाष्यकृत्प्रक्रियेति केषां
त्परिहारमाह * एषा हीति * स्वमतेन लिङ्गदर्शनानुसारेणैवं
तेमिति परिहरति * अथ वेति*नन्वेवमपि तत्रेति सन्देहभाष्या-
वो ऽनर्थकं इत्याशङ्क्याह * तत्रेति * आग्नेयादिवाक्यानां क-
वेधायकत्वे सत्येव विद्वद्वाक्ययोस्तद्व्यतिरिक्तकर्मविधायित्वादे-
पूर्वपक्ष इत्युक्तशब्दान्तरत्वादिति भाष्याद्भेदक्रू पूर्वपक्षः प्रतीयत
ाशङ्क्य * समप्राधान्यद्वारेणेत्युक्तम् * द्वितीयपूर्वपक्षाभिप्रा-
ूत्रेति भाष्यावयव इत्याशयः । अनेन च विद्वत्संयुक्तावप्याख्या-
त्ययौ विधातारावित्यपिशब्दाध्याहारेणाद्यपूर्वपक्षवचनव्यक्तौ
त्रेवेत्येवशब्दाध्याहारेण चावृत्त्या द्वितीयपूर्वपक्षवचनव्यक्तावथ
ते भाष्यावयवं व्याख्याय विद्वद्वाक्याभ्यामेव कर्मविधावाग्नेया-
वाक्यानर्थक्याशङ्कानिरासार्थत्वेन तत्रेति भाष्यावयवो व्याख्यातो
ाति * किं तावदिति * पूर्वपक्षभाष्यं व्याचष्टे * प्रथमं ताव-
ति * व्यतिरेकशब्देनाद्यपूर्वपक्षार्थतोक्ता भेदे च दृष्टसामर्थ्याद्वि-
ानोक्तमाक्षेपं परिहरति * यद्यपि चेति * अभ्यासलक्षणभेदा-
ासङ्गापवादार्थत्वे ऽप्यधिकरणस्य समप्राधान्ये सत्यङ्गाभावा-
ामपेक्ष्य प्रधानतेत्याशङ्क्यायागानामाघारादीनां राजसूयवदङ्गत्व-
ानार्थं शब्दान्तरेणाग्नेयादिभ्यो भेदः पूर्वपक्षितः । ननु विद्वद्वाक्य-
ानुवादत्वेन विधातृत्वाभावान्न पूर्वन्यायद्वयविषयतेत्याशङ्क्याह
न चेति * प्रकृतयागानुवादे च प्रयाजादेरपि प्रकृतत्वाविशेषे-
ुवादापत्तेः सञ्ज्ञायाश्चाप्रसिद्धत्वेनाविशेषकत्वात्फलवाक्यस्य-
ाचनापेक्षिताग्नेयादिसमुदायद्वयसम्पादनमपि प्रयोजनं न स-
वतीत्याशयेनाह * न चैषेति * न च लिङाद्यभावेनाविधातृ- ४१
ाह * वर्त्तमानेति * यावदुक्थो नोपाप्नोति तावदुपाप्नोतीत्य-
दात् पौर्णमासीवाक्यस्य यावदतिरात्रेणोपाप्नोति तावदुपाप्नो-
र्थवादाच्चामावास्यावाक्यस्य विधित्वनिश्चयः यच्छब्दोपबन्धो
न विधिशक्तिं व्याहन्तीत्याह * सत्यपि चेति * विधायकत्वे
ात्यभ्यासाद्भेदसिद्धिरित्याह * न चेति * नन्वर्थवादता-

नयोः कस्मान्न कल्पितेत्याशङ्क्याह * न चेति * नन्वरूपत्वात्क-
र्मविधिर्न सम्भवतीत्याशङ्कते * किं पुनरिति * परिहरति * त-
दिति * हेत्वर्थतया साधारणशब्दं व्याचष्टे * सर्वस्मै वा इति *
ननु विहिताज्यद्रव्यकेष्वेवानेन ध्रौवत्वमात्रविधिरित्याशङ्क्योपांशु-
याजमन्तरा यजतीति हविर्लिङ्गाश्रुतत्वाद्यथा कामी प्रतीयेतेति सू
त्रेण दशमे हविर्विशेषाश्रवणेनोपांशुयाजे द्रव्यानियमं पूर्वपक्षयित्वा
ध्रौवाद्वा सर्वसंयोगादित्यनेनाविहितद्रव्यकेषु ध्रौवविधिर्वक्ष्यमाण
इष्टान्ततः। यच्च तत्र भाष्यकृता आज्यस्यैव नावित्यनेनाज्यविधिमा-
शङ्क्यैवमप्यनियमो यत्किं चिदाज्यमिति वक्ष्यते तदभ्युपेत्यवादमा
त्रमित्याशयः । ननु तृतीये मिथश्चानर्थसम्बन्ध इत्यत्राज्यभागक्रमा
म्नानेन वार्त्रघ्नीवृधन्वत्याख्यमन्त्राणां तदङ्गत्वस्य वक्ष्यमाणत्वात्क
थमनयोः कर्मणोस्तद्वशाद्देवताप्राप्तिरित्याशङ्कां निरस्यन्मात्रवर्णिक
व्याचष्टे * तथेति * आग्नेयादेर्निज्ञातदेवतात्वनार्थान्तरवाचिम
न्त्रान्वयायोगात्तादर्थ्येन वाक्यविनियोगानुपपत्तावपि विद्वद्वाक्य
विहितयोः कर्मणोरनिर्ज्ञातदेवतात्वेनैतन्मन्त्रान्वयाविरोधात् वा
क्येन क्रमं बाधित्वैतदङ्गतया विनियोगोपपत्तिरनयोरित्यने
सूचिता । नन्वनुवाक्याविधिस्थयोः पौर्णमास्यमावास्याशब्द
योः कालवाचित्वात्कथं वाक्येन कर्माङ्गतेत्याशङ्क्याह *
हीति * ननु कर्मणिलक्षणापत्तेः श्रुत्या कालार्थतैवोचिते
त्याशङ्कते * नन्विति * कालस्याननुष्ठेयत्वेन मन्त्रानाकाङ्क्ष
त्वात्तदङ्गत्वे मन्त्रस्यानर्थक्यापत्तेरर्थवत्त्वाय लक्षणाप्युचितेति परि
हरति * किं हीति * ननु कर्मणो ऽधिकरणत्वायोगात्तद्वाचित
सप्तमी न युज्येतेत्याशङ्क्याह * दृष्टश्चेति * अधिकरणस्याधेयस
स्कार्यत्वेनागारे गावो वास्यन्तामित्यादौ प्राधान्यदर्शनाल्लक्षणय
धिकरणवाचिन्याः सप्तम्याः प्राधान्यार्थता युक्तेत्याशयः । नन्वेव
स्मिन्कर्मण्यनुवाक्याद्वयानर्थक्यं याज्यानुपलब्धेश्च यागानुष्ठान
सिद्धिरित्याशङ्काद्वयं चतुर्द्धा परिहरति * तेनेति * अनुवाक्य
द्वयस्यैकयागार्थत्वाद्विकल्पो याज्यापि चाश्रुता देवतलक्षणयाज्या
वाक्या इत्यसमाम्नातयाज्यानुवाक्याविषये यागाङ्गदेवतावाचिय
ज्यानुवाक्याकल्पनस्मृतेराग्नेय्यनुवाक्यापक्षे याज्याप्याग्नेयी सं
मीपक्षे सौमीकल्पेत्येकः परिहारः इतरेतरयोर्विहितद्वन्द्वापवादत्वं
नैकशेषस्यापीतरेतरयोगावाचित्वादनुवाक्याद्वयस्य समुच्चयप्रतीत
स्तद्वशेनाग्नीषोमयोर्देवतात्वकल्पनाद्वयोरर्थवत्त्वं याज्या च तदानुर
क्ष्येणैवाग्नेयी सौमी चान्या कल्पेति द्वितीयः । कर्मद्वयाभिप्रा

मनालाघवे ऽप्येकैव द्विदेवत्या याज्येति तृतीयः। एकस्मि-
ाक्याद्वयानर्थक्याद्याज्यानुवाक्यात्वे ऽपि चेतरेतेतरयोगो-
शब्दस्य च याज्यायामपि प्रैषपश्चाद्भावेनाविरोधात्समु-
ङ्गत्वेनाग्नीषोमदेवत्यकर्माध्यवसानान्मनोतान्यायेनैकदेश-
त्प्रकाशनेनोभयोः सम्वादोपपत्तेरश्रुतकल्पनापरिहाराच्च
मध्ये ऽनुवाक्यैका याज्यैकेति चतुर्थः। आज्यभागयोस्तद्धी-
ल्पदेवतानुपपत्तेः साकाङ्क्षत्वं स्यादित्याशङ्क्याह * आ-
स्त्विति * तौ होचतुरग्नीषोमौ किमावयोस्ततः स्यादि- ४६२।१
ोः प्रक्रान्तयोः नाविति द्वितीयया यजिकर्मत्वनिर्देशाद्वि-
ीत्यादिवद्देवतात्वावधारणेत्याशयः । जुषाणो ऽग्निरा-
जुषाणः सोम आज्यस्य वेत्विति याज्यायास्तु केन चित्सा-
शङ्क्येत्याह * याज्येति * नन्वनुवाक्ययोर्बाधितत्वात्त-
त्रं स्यादित्याशङ्क्याह * अनुवाक्येति * रूपवन्तावित्युक्त-
यष्टे*तस्मादिति * पूर्वपक्षभाष्यार्थं व्याख्यातमुपसंहरति
ते * ननु भेदे ऽपि चतुर्थोपान्त्यन्यायेन दर्शपूर्णमासा-
यागानां प्राधान्यान्नेतरेषामङ्गत्वात्समप्राधान्यसिद्धिरि-
* भेद इति * तमेव न्यायं प्रश्नपूर्वकमाह *कुत इति*
भधानयोर्निवेशः श्रुतितो व्यपदेशाच्च तत्पुनर्मुख्यलक्षणं
वसंयुक्तं तदङ्गं स्याद्भागित्वात्कारणस्याश्रुतान्यसम्बन्ध
न्तसूत्रावयवं केषु चिद्देवेत्यध्याहारेण व्याख्यातुं पूर्वार्द्धं
साभ्यामिति द्विवचनश्रुतेर्दर्श इत्यभिधानस्य पूर्णमासश-
पूर्णमास इत्यस्य च दर्शशब्दवाच्यात्पृथक्त्वेन निवेशः प्रती-
प्रकृतयागमात्रवाचित्वे पृथक्त्वायोगात्केषु चिदेव यागेषु
नर्वेष्वित्यर्थः।दर्शशब्दस्याप्रसिद्धार्थत्वात्पूर्णमासशब्दवच्च केन
ग्ना सारूप्याभावात्कथं यागविशेषे निवेश इत्याशङ्क्यारम्भ-
ोषे दर्शो वा एतयोः पूर्वः पूर्णमास उत्तरो ऽथ यत्पूर्णमासं
ते तद् यथापूर्वं क्रियते तस्मात्पूर्णमासमारभमाणः सरस्व-
र्वपेत्सरस्वते द्वादशकपालममावास्या वै रस्वती पूर्णमासः
ावेतौ यथा पूर्वं कल्पयित्वा ऽऽरभतइत्यमावास्याख्ययाग-
दर्शव्यपदेशाच्चन्द्रदर्शनाद्वामावास्यायां तिथौ दर्शव्यपदे-
ाद्दर्शषष्ठीषु न कुर्याद्दन्तधावनमित्यादौ चामावास्यायां दर्श-
प्रसिद्धार्थतोक्ता अतो यागविशेषाणां फलवत्त्वात्फलवत्त्व-
ाधान्यापरपर्यायमुख्यलक्षणत्वात्सन्निहितस्य फलासंयुक्त-
ं प्रकरणादिति कर्त्तव्यतार्थित्वादिति तृतीयाधिकरणन्या-

येनाङ्गत्वकारणभागित्वादश्रुतान्यफलान्वयकल्पने च गौरवापत्तेर ङ्गत्वैव युक्तेति सूत्रार्थः सङ्क्षेपेणोत्तरार्द्धेनोक्तः । श्लोकं व्याचष्टे * दर्शेति * विद्वद्वाक्याभ्यां समुदायद्वयाकरणे दर्शपूर्णमासनाम्नो प्रसिद्धार्थत्वेन यज्यर्थाविशेषत्वान्न चतुर्थोन्त्यन्यायमुदाहरति * यथेति * जोतींषि वा एतानि य एते स्तोमा इत्यर्थवादे त्रिवृदादिस्तोमेषु ज्योतिष्ट्ववव्यपदेशात् ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोतीति च विधौ सोमयागस्य त्रिवृदादिस्तोमयोगावगमात्प्रसिद्धार्थेन नाम्ना यज्यर्थो विशेष्यतइत्यर्थः । यजिना नामार्थविशेषणं चतुर्थस्यैव चतुर्थपादाद्यन्यायमुदाहरति*तथेति * राजसूयेन स्वाराज्यकामो यजेतेति फलविधिपरे वाक्ये यजेः प्रकृतेष्टिपशुसोमयागमात्रानुवादित्वावधारणात्प्रसिद्धार्थेन यजिना नाम विशेष्यत इत्यर्थः । उत्तरार्द्धं व्याचष्टे * तदिहेति * ननु प्रकृतयागमात्रविषयत्वे दर्शपूर्णमासशब्दस्य तदवयवभूतयोर्दर्शपूर्णमासशब्दयोर्द्विवच

४ नस्य च को ऽर्थ इत्याशङ्क्याह * ततश्चेति * अवयवार्थो समासार्थश्च द्वित्वं चाविवक्षितानि यस्मिन्पद इति विग्रहः; समासार्थेतरेतरयोगविवक्षायामवयवार्थाविवक्षानुपपत्तेस्तदविवक्षाभिधानम्।अर्थान्तराविवक्षायामपि करणत्वविवक्षया यजिसामानाधिकरण्याद्राजसूयनामवद्यागनामतेत्युक्ते ऽवयवार्थाविवक्षायां प्रवृत्तिनिमित्ताभावात्कथं यागनामतेत्याशङ्क्य वर्णपङ्क्तिमात्ररूपत्वेन रूढितोक्ता।ननु रूढिर्योगमपहरतीति न्यायेनावयवार्थाविवक्षायामपि द्विवचनार्थाविवक्षा न युक्तेत्याशङ्क्याह * सुपामिति * नन्वमावास्यापौर्णमासीकालवाचिनोर्दर्शपूर्णमासशब्दयोस्तद्योगिष्वाग्नेयादियागेषु द्विवचनस्य च द्वित्वयोगिष्वाज्यभागादिषु लक्षणया प्रसिद्धिसम्भवान्नाप्रसिद्धार्थतेत्याशङ्कते * कथं पुनरिति * नन्वेवमपि प्रकृतिप्रत्ययसमुदायात्मकस्य पदस्याप्रसिद्धार्थत्वाद्यज्यनुरोधवृत्तित्वमपरिहार्यमित्याशङ्कां निरस्यन् श्लोकं व्याचष्टे * तन्नामेति * लब्धार्थप्रतिपादकानुरोधेनेवाविभक्तिव्याख्याविभक्त्यनुरोधेन वा प्रातिपदिकव्याख्या भविष्यतीत्याशयः । स्वार्थासमाप्तस्य वाक्यस्य वाक्यान्तरानन्वयवत्पदस्यापि स्वार्थासमाप्तस्य पदान्तरानन्वयान्नैकैकांशप्रसिद्धिमात्रेण यजिविशेषकता युक्तेति परिहरति * तदिति * श्लोकं व्याचष्टे * यद्यपीति * नन्वाग्नेयवाक्येनासम्भवत्समुच्चयपौर्णमास्यमावास्याकालद्वयगुणककर्मविधानाद् गुणानुरोधेन च प्रधानावृत्त्ययोगाच्चशब्दयोगाच्च कालविकल्पानुपपत्तेरेककर्मासम्भविगुणद्वययोगेनाग्नेययागद्वित्वावगतेस्तयोश्चैकवाक्यविहितत्वावा

सामान्यावच्छेदेनामावास्यापौर्णमासीकालयोगिषु यागान्तरेषु स-
पि द्वित्वसंख्यावृत्त्युपपत्तेर्द्वयोरपि प्रकृतिप्रत्ययार्थयोस्तत्र सद्भा-
र्शपूर्णमासशब्दस्याग्नेययागद्वयवाचित्वेन प्रसिद्धत्वाद्यजिविशे-
त्वं भविष्यतीत्याशङ्क्याह * न चेति * विद्वद्वाक्ययोः प्रकृतया-
वाद्वित्वाभावे पौर्णमास्यमावास्याशब्दयोस्तद्वाच्यकालयोगिप्रकृ-
गनामत्वानवगतेस्तयोर्वा लक्षणया प्रकृतयागप्रवृत्तावपि दर्श-
मासशब्दयोस्तात्पर्यावधारणहेतुसामानाधिकरण्याभावात्पूर्णमा-
ब्दस्य किं चिद्वर्णसाम्याद्वाचकपौर्णमासीशब्दोपस्थापनेनाख्या-
पौर्णमासीशब्दविकारमात्रत्वाद्वा ततोऽनन्यत्वेन दर्शशब्दस्य ज-
वृत्तिसाम्याद् गौणत्वशब्दोक्त्या विरुद्धलक्षणयामावास्याशब्दे-
र्थकल्पनाद्दर्शपूर्णमासशब्दस्य प्रकृतपौर्णमास्यमावास्याकालयो-
ागविषयत्वाध्यवसानं न भवतीत्यर्थः। ननु ज्योतींषि वा एतानि
एते स्तोमा इतिवद्वाचकशब्दसामानाधिकरण्याभावेऽप्ययैते
माना इवेत्यत्र धान्यशब्दस्य दीर्घशूकविषयत्वमाग्नेय्याग्नीमित्य-
ाग्नेयिशब्दस्य प्रकृताग्नेयीविषयतावसीयतइत्याशङ्क्य*अर्थैस्तु-
[* शब्दान्तरवदर्थप्रकरणाभ्यामपि सामानाधिकरण्याध्य-
ानं न भविष्यतीत्याशयः । नन्वाग्नेययागयोः पौर्णमास्य-
ास्यानामत्वानवगतेर्दर्शपूर्णमासशब्दस्य तद्विषयत्वाध्यवसा-
ावेऽपि विद्वद्वाक्यस्थयोः पौर्णमास्यमावास्याशब्दयोरर्थाक्षिप्त-
स्यांशसामानाधिकरण्येनापूर्वयागनामत्वावगतेर्दर्शपूर्णमासशब्द-
तद्विषयत्वाध्यवसानात्प्रसिद्धार्थत्वेन यजिविशेषकत्वोपपत्तेर्वि-
ाक्यविहितयोरेव यागयोः फलवत्त्वेन प्राधान्यादितरेषामङ्गत्वं
ेष्यतीत्याशङ्कते * कस्मात्पुनरिति * एतदेव सिद्धान्तन्यायतु-
त्वापादनेनोपपादयति * तथा हीति * शङ्कोत्तरत्वेन श्लोकं
चष्टे * यदीति * पौर्णमास्यामावास्याशब्दयोर्यागनामत्वेऽपि १
पूर्णमासशब्दस्य यागनामत्वानवधारणात्कालयोगेन च वृत्तेरा-
ग्रादिष्वपि तुल्यत्वेन विद्वद्वाक्यविहितयोर्यागयोराग्नेयवदेक-
स्यविधानाभावे भावान्तरसामान्यावच्छेदाभावाद्द्वित्वसंख्यापरि-
द्यत्वानुपपत्तेर्नाष्टानां मध्ये तयोर्निष्कर्षः सम्भवतीति परिहरति
दिति श्लोकं व्याचष्टे * न हीति * ननु निष्कर्षायोगेऽपि
ः कयोश्चिद्द्वयोः फलान्वयो भविष्यतीत्याशङ्कते * स्यादिति *
र्यं वाष्टानां मध्ये ययोः कयोश्चिद्द्वयोः फलवत्त्वाय दर्शपूर्णमास-
ेन ग्रहणं विकल्पेन वेति विकल्पाद्यपक्षे निर्द्धारणहेत्वभावा-
ाणाभावो द्वितीये चैकस्याङ्गप्रधानत्वविरोधापत्तिरिति परिह-

ति * तदिति * श्लोकं व्याचष्टे * विनेति*अतिदेशो सन्देहापत्ति
श्च द्वितीये पक्षे स्यादित्याह*-उभयात्मनां चेति * अभ्युपेत्यवादे
चैतदुक्तं वस्तुतस्त्ववान्तरसामान्यावच्छेदं विना द्वित्वानवधार
णान्नैको ऽपि पक्षः सम्भवतीत्याह * सर्वेति * ननु सिद्धान्ते ऽ
१४ षण्णां कथं द्वित्वापत्तिरित्याशङ्क्याह * सिद्धान्ते त्विति*नन्वेवं द्वि
वचनोपपत्तावपि प्रातिपदिकयोरप्रसिद्धार्थत्वाद्याजिविशेषकता न श
क्येत्याशङ्क्याह * तद्वशेन चेति * पूर्वपक्षे समुदायत्वानापादना
षम्यमाह * नन्विति*ननु समुदायगताद्वित्वाभावे ऽपि कालगतद्वि
त्वापेक्षं द्विवचनं भविष्यतीत्याशङ्कते * अथेति * विद्वद्वाक्य
भ्यां फलवाक्यस्थदर्शपूर्णमासशब्दगतद्वित्वसम्पत्त्यर्थं समुदायद्वय
नापादने दर्शपूर्णमासशब्देन तात्पर्यप्रमाणाभावादाग्नेयादिविषय
यानवधारितेनाख्यातं न विशेष्टुं शक्यमिति परिहरति * नेदृशे
ति * कालगतायाः संख्याया यागान्वयकल्पना न शक्येत्य
* न चेति * समुदायगतसंख्यान्वयस्तु समुदायिनां युक्त इत्य
* समुदायेति * पूर्वपक्षप्रयोजनमुपपादितमुपसंहरति * तस्मा
दिति * सूत्रं द्वेधा योजयन् तत्सिद्धान्तमाह * तथेति * पौ
र्णमासीशब्देनोदाहरणीभूतविद्वद्वाक्ययोरुपलक्षणं प्रकरणशब्दस्य
मव्युत्पत्तावालम्बनपदाध्याहारो भावव्युत्पत्तौ सहकारिपदाध्याह
इत्यर्थः । द्वितीयव्याख्याने ऽपि प्रकृतानामिति भाष्यानुसारं
क्तुम् * ततश्चेत्युक्तम् * रूपावचनस्य प्रकृतानुवादहेतुत्वोपप
नार्थं य एवं विद्वानित्यादिभाष्येण सञ्ज्ञया कर्मविशेषाभिधाना
च विनाविशेषाप्रतिपत्तेर्विध्यसम्भवो ऽभिहित आघाराग्निहोत्रा
करणे सञ्ज्ञोपबन्धादित्यस्मिन्सूत्रे व्याख्यास्यमानत्वादुपेक्ष्य र
विधिस्वभावमेव तावत्प्रश्नपूर्वमुपपादकमाह * कुत इति *
ष्योक्तामप्युपपत्तिमनुसन्दधानः श्लोकं व्याचष्टे * न हीति *
१६।२ ध्यनुरोधो ऽननुष्ठेयसामान्यवाचित्वनिरासायानेनेति विशेषणेनो
अव्यक्तासु तु सोमस्येत्यनेन न्यायेनातिदेशाद्रूपलाभमाशङ्क्याव्य
चोदितत्वेन सोमधर्मातिदेशस्य वक्ष्यमाणत्वादिह च श्रुतस्याख्या
यच्छब्दोपबन्धेनाविधायकत्वाद्विध्यध्याहारस्यैव विधानयोग्यरू
त्कर्मावगतिसापेक्षत्वादातिदेशिकरूपालाभाद्विध्यध्याहारे विध्यध
हाराच्च विधेयत्वेनातिदेशिकरूपलाभे ऽन्योन्याश्रयापत्तेर्नाति
शाद् रूपलाभः सम्भवतीति सूचनार्थो ऽपूर्वशब्दः । नन्वनुवादो ऽ
ज्ञातरूपस्य न सम्भवतीत्याशङ्क्यानुवादस्य बुद्धिविपरिवृत्तिनिमि
त्तेन प्रकृतविषयत्वात्प्रकृतानां च ज्ञातरूपत्वेनानुवादसम्भवाभि

र्थम् अथ त्विति भाष्यं व्याचष्टे * प्रकृतेति * पूर्वपक्षोक्तं द्रव्यदे-
तमनुभाष्येण पूर्वं निरस्यति * नन्विति * सत्यमित्युपहासः सू-
तः । यागमात्रसाधारणत्वेन स्थितस्य ध्रौवस्य सञ्ज्ञाविशेषावच्छि-
यागविशेषानवच्छेदकत्वात्सत्यपि लाभेनावच्छेदकत्वाख्यारूपता-
त्याशयः । यथाकथं चिदित्यनेन ध्रुवावाक्यस्यार्थवादसरूपस्या-
न्यथानुपपत्त्या क्लेशेन ध्रौवत्वविशिष्टाज्यप्रापकत्वात्प्राप्तिक्लेशः
चितः । मान्त्रवर्णिकदेवताप्राप्तिमाशङ्कितां निरस्यति * न
ति * न केवलं विरोधापत्तेः कर्मवाचित्वं न युक्तं किं तु लाक्षणि-
त्वादपीत्याह * किं चेति * ननु लक्षणापि शब्दवृत्तिप्रकार एवे-
ाशङ्क्याह * यदि हीति * सप्तमीनिर्देशादपि कालवाचितैव यु-
त्याह * अपि चेति * कालस्य मन्त्रान्वयायोगात्तद्वाचित्वानु-
पत्तिर्योक्ता तामप्यनुभाष्य निरस्यति * यत्त्विति * नन्वाज्यभा- ४१
योः कालयोगाश्रवणात्प्रधानद्वारा कालयोगाश्रयणे वा पौर्णमासी-
प्रधानाङ्गभूतयोरिति च युगपच्छ्रुतिलक्षणाविरोधापत्तेः कालतश्च
वस्थाश्रयणे विकृतिषु य इष्ट्येति वाक्येन कालविकल्पविधानात्
र्णमासीकालोपांशुयाजाग्नीषोमीयविकारो यदामावास्यायां क्रियते
मावास्याकालसान्नाय्यविकारो वा पौर्णमास्यां तदा पौर्णमासकाल-
धानाङ्गभूतयोराज्यभागयोर्वृधन्वतीप्राप्तेरमावास्याकालप्रधानाङ्ग-
तयोश्च वार्त्रघ्नीप्राप्तेः प्रकृतिवद्भावबाधप्रसङ्गात्प्रधानसाद्गुण्या-
त्वाच्चाङ्गगुणानुष्ठानस्य तद्बाधे प्रधाने वैगुण्यापत्तेः कर्मवाचि-
ना ऽपि च पौर्णमास्यमावास्याशब्दयोः पौर्णमास्याख्यकर्माङ्गभूत-
राज्यभागयोर्वार्त्रघ्न्यौ अमावाख्यस्याकर्माङ्गभूतयोर्वृधन्वत्यौ इति
संकृतव्यवस्थार्थत्वेन वाक्यस्याविरोधोपपत्तेस्तत्र जयानिति यच्चा-
रभागव्यतिरेकजनितप्राधान्यार्थतैव युक्ता नापूर्वयोः कर्मणोः मन्त्र-
धानार्थतेति स्वमतेन मान्त्रवर्णिकदेवताकल्पनानुपपत्तिप्रकारमाह
किं चेति * श्लोकं व्याचष्टे * सर्वत्रैवेति * यत्त्वनुवाक्याद्व-
नर्थक्यपरिहारायाश्रुतयाज्याकल्पनपरिहाराय च श्रुतयोरेव वार्त्र-
घ्नोर्वृधन्वत्योश्च मध्ये ऽनुवाक्यैका याज्या चैकेत्युक्तं तदनुभाष्य
षयति * यच्चैति * अज्ञातदेवतात्वादेवापूर्वयोः कर्मणोः प्रका-
येन देवतारूपेण प्रकाशकतया मन्त्रस्यानपेक्षितत्वात्प्रकाशनाख्ये
ाज्यानुवाक्याकार्ये वार्त्रघ्नोर्वृधन्वत्योर्वा विनियोगाद्याज्यात्ववद-
वाक्यात्वमपि न स्यादित्याशयेनाह * अपि चेति * मन्त्रार्थस्य
र्मसमवाये सिद्धे मन्त्रस्यालिङ्गविनियोज्यत्वापत्तेस्तदभावाभिधा-
न मन्त्रार्थस्य कर्मसमवायासिद्धिः प्रकाशकानपेक्षत्वायोक्ता वाक्यी-

यविनियोगान्यथानुपपत्त्या मन्त्रार्थस्य कर्मसमवायकल्पनामाशङ्क्य
* वाक्ये चेत्युक्तम् * कर्मसमवेतार्थप्रकाशकत्वं विना मन्त्रस्य च
रणात्वायोगात्करणत्वश्रवणे तदन्यथानुपपत्त्या मन्त्रार्थस्य कर्मस
मवायकल्पना नान्यथेतित्याशयः । अनुपूर्ववच्चियोगेनानुवाक्य
त्वमाशङ्क्याज्ञातदेवते कर्मणि विहितायां वैष्णव्यां व्यभिचारो ऽभि
हितः । ननु सन्निपत्योपकारित्वसिद्धये ऽनुवाक्यात्वं कल्पयिष्य
तइत्याशङ्क्याह * मान्त्रवर्णिकेति * समवेतार्थत्वसम्भवे सन्नि
त्योपकारित्वेनारादुपकारित्वं बाध्यते नान्यथेत्याशयः । यच्चापूर्वक
र्मविषयत्वे ऽनुवाक्याद्वयानर्थक्यं लिङ्गाविनियोज्यत्वाच्चादृष्टार्थत्व
क्तं तदुभयमप्याज्यभागविषयत्वेन प्राप्नोतीत्याह * आज्यभागयं
पुनरिति * यागद्वित्वाद्देवताद्वित्वाच्चानुवाक्याद्वयस्यार्थवत्त्वं लिङ्
विनियुक्तत्वाच्च दृष्टार्थतेति दृष्टार्थशब्देनार्थवत्त्वस्यापि सूचन
दित्यर्थः । यश्चानेकार्थविधिप्रसङ्गो ऽपूर्वकर्मविषयत्वे ऽस्तीत्य
ह * तत्र चेति * अपेक्षितविधानं त्वादावेवोक्तम् । :
न्वाज्यभागाङ्गत्वस्य लिङ्गक्रमाभ्यामेव प्राप्तेस्तदर्थशास्त्रा
र्थक्यमित्याशङ्क्याह * न चेति * लिङ्गस्य व्यवस्थापकत्वा
ङ्गानुपपत्तेः क्रममात्रस्य निरासः मान्त्रवर्णिकदेवताप्राप्त्यभावमु
।१ संहरति * तस्मादिति * सूत्रार्थमुपसंहरति * अतश्चेति * अ
नर्थक्यापत्त्यानुवादत्वानुपपत्तिमाशङ्कते * किं पुनरिति * आन
क्यमेवोपपादयति * पश्येति * दध्ना जुहोतीतिकरणत्वेन दर्
विधानात्पदार्थचोदना दण्डी प्रैषानन्वाहेति दण्डप्रातिपदिकार्था
धानातद्गुणार्थचोदना सोमेन यजेतेति विशिष्टविधानाद्वाक्यार्थच
दनेति यथाग्नेयादिवाक्येष्वनेन कर्तृसमीहितं कुर्यादित्यवगमे ऽ
कर्तृविशेषानुपादानात्सामान्यस्य चाकर्तृत्वात्कर्तृसमीहितसाध
त्वलक्षणधर्मबोधाशक्तत्वे ऽपि स्वर्गकामवाक्यस्य कर्मकर्तृविशे
पादानेन धर्मबोधोपयोगित्वात्तच्छेषत्वेनाग्नेयादिवाक्यानां धर्म
मोपयोगस्तथा विद्वद्वाक्ययोरपि प्रयोगवचनाङ्गत्वाद्धर्मप्रमोपयो
भविष्यतीति परिहरति * उच्यत इति * कथमनयोः प्रयोगवः
नाङ्गतेत्याशङ्क्य द्वित्वसिद्ध्या * प्रयोजनभूतयेत्युक्तम् * द्वित्व
त्पादकत्वे ऽप्यनयोः कः प्रयोगवचनस्योपकार इत्यपेक्षिते प्रयोग
चने द्वित्वस्योपादानादित्युक्तम् । श्लोकतात्पर्यं व्याचष्टे * वाक्येति
अविधायकत्वेनानयोराग्नेयादिवाक्यवैषम्यमाशङ्क्याह * न हीति
ननु समुदायद्वयावचने ऽपि पौर्णमास्यमावास्याख्यकालद्वययोगः
ग्नेयादीनां द्वित्वसिद्धेर्नानयोर्द्वित्वासिद्धिप्रयोजनतेत्याशङ्क्याह *

प्नोतीति * कालकर्मणोरत्यन्तभेदात्कालगतसंख्यायोगः कर्मणो न सम्भवतीत्याशयः । विद्वद्वाक्याभ्यां विनाग्नेयादीनां द्वित्वासिद्धिं भाष्यकाराभिप्रेतत्वेन द्रढयति * एतदेव चेति * आग्नेयादीनि प्रयोन्तानि प्रधानानि आघारादीन्यारादुपकारकाणयङ्गानीत्यनुवादपक्षे प्रयोजनस्याङ्गप्रधानत्वस्यादावुपन्यासात्तत्सिद्ध्यर्थद्वित्वसिद्ध्यर्थतानुवादस्यावसीयतइत्याशयः । नन्वङ्गप्रधानत्वस्य प्रयोजनोपन्यासे ऽधिकरणान्ते कार्यता स्यादित्याशङ्क्याह * इतरथा हीति * प्रयोजनमप्यनुवादत्वनिर्वाहायादावुपन्यस्तमित्याशयः । अनुवादानर्थक्यपरिहारमुपसंहरति * तस्मादेति * कथं पुनरित्यादिभाष्येणैकवचनान्तयोः पौर्णमास्यमावास्याशब्दयोरनेकाग्नेयादिवाचित्वानुपपत्तिमाशङ्क्य समुदायशब्दतयैकवचनावक्लृप्तिमुक्त्वा कथं भिन्नवाक्यविहितानामाग्नेयादीनां साहित्यात्मकः समुदाय इत्याशङ्क्य रूपवन्तो हीत्यनेन प्रपञ्चेनानेकस्यैकधर्मान्वयेन शिष्टः कृतः समुदायो ऽस्तीत्युक्तं तद्व्याख्यातुमाशङ्कते * कथं पुनरिति * अभेदे समुदायायोगाद्भिन्नवाक्यविधानाभिप्रायो भिन्नशब्दः । प्रकृतत्वाविशेषाद्यजेः सर्वप्रकृतयागविषयत्वप्रतीतेः सर्वेषां चैककालयोगाभावात्तन्निमित्तो ऽपि समुदायो न सम्भवतीति सूचनायात्यन्तशब्दः व्याचष्टे * शक्यमिति * कालयोगनिमित्तनामधेयावच्छेदेन यजेः कालयोगियागविषयत्वावसायाद्भिन्नवाक्यविहितानामप्येककालान्वयात्समुदायः सम्भवतीत्याशयः । श्लोकं व्याचष्टे * यथैव हीति * ननु सत्यपि समुदाये पौर्णमास्यमावास्यानामधेययोः सामानाधिकरण्येन यागविषयत्वात्तेषां च बहुत्वान्नैकवचनोपपत्तिरित्याशङ्कानिरासार्थं भवति हीति भाष्यं व्याचष्टे * तद्गतेति * समुदायगतस्यैकत्वस्य समुदायसमुदायिनोरत्यन्तभेदाभावेन लक्षणया वा समुदाय्यन्वयावधारणादित्यर्थः । यदाग्नेयादीनां समुदायवचनावेताविति समुदायानुवादप्रयोजनाङ्गाङ्गिभावाभिधानार्थादुत्तरभाष्यात्पौर्णमास्यमावास्याशब्दयोः समुदायवाचित्वशङ्कां निराकर्त्तुमाह * समुदायीति * तच्छब्देन समुदायिनः परामृष्टाः एतदेवोपपादयति * तथा हीति * नञ् पूर्वेण ९
सम्बद्ध्य किं त्वित्यध्याहारेणोत्तरावयवो योज्यः । श्लोकं व्याचष्टे * पौर्णमासीमिति * समुदायस्य च कालयोगाभावात्तन्निमित्तयोर्नाम्नोः समुदायवाचिता न युक्तेत्याह * न चेति * पौर्णमास्यां पौर्णमास्या यजेतेत्यत्र समुदायस्य कालयोगमाशङ्क्यानयोर्नाम्नोस्तद्वाक्यविहितकालयोगनिमित्तत्वेन नामप्रवृत्तौ सत्यां तन्नामकानां

यागानां कालविधिः कालविधौ च सति नामप्रवृत्तिरितीतरे
श्रयापत्तेरुत्पत्तिवाक्यविहितकालयोगनिमित्तस्यापि समुदाय
त्वात्फले विधानापत्ते (रितियुक्तेति सूचनायोत्पत्तिशब्दः समु
नामत्वे ऽवयवानामसाधनत्वापत्तेः प्रत्येकमपूर्वककल्पनप्रमाण
वाङ्गान्याभेदेन भावनाभेदाभावे सत्यनेकधात्वर्थानुरक्तत्वे चान
र्शपूर्णमासशब्देनैतएवाभिधीयन्त इति भाष्यं विरुध्येतेत्याह*
चेति*समुदाययोश्च फलसाध्यैकैकभावनापत्तेः[1]) कर्मभेदवाचो
रभिधेयाभावाद्विगतार्थत्वं स्यादित्याह * अत इति*तेषामर्थाधि
णवक्ष्यमाणा च धर्मव्यवस्थापूर्वैक्ये भज्येतेत्याह*सर्वेति*एकाद
ता तन्त्रावृत्तिचिन्तादिशब्दोक्ता च द्वादशगता प्रसङ्गचिन्ता ऽपू
भज्येतेत्याह*न चेति*समस्तान्वये चेतिकर्त्तव्यतायाः प्रत्येकावि
सौर्यादावतिदेशायोगादैकार्थ्याद्वा नियम्येन पूर्ववद्वा विकारो ह
ष्टमाधिकरणसिद्धान्तो भज्येतेत्याह * नन्विति* दशमान्त्ये च ऽ
सोमादेकपुरोडाशा पौर्णमासी साम्नाय्यरहितामावास्येति व्यव
पौर्णमास्यमावास्याशब्दयोः समुदायवाचित्वे न युज्येतेत्याह
सहस्रेति * नवमे च त्सरा वा एषा यज्ञस्य तस्माद्यत्किं चि
चीनमग्नीषोमीयात्तेनोपांशु चरन्तीति उदाहृत्य यज्ञभागधर्मो
दुपांशुत्वं पदार्थधर्मो वेति सन्दिग्धे यज्ञस्य फलवत्त्वेन धर्मप्रयुक्त
मर्थ्याद्यज्ञस्य यत्प्राचीनेति व्यवहितेनापि यज्ञशब्देन प्राचीनः
स्यान्वयप्रतीतेः श्रुत्या च प्राग्देशवाचिनः प्राचीनशब्दस्य लक्ष
तद्देशपदार्थपरत्वायोगाद्यज्ञभागधर्मत्वं पूर्वपक्षयित्वा प्राचीनश
वीप्सा किं चित्किं चिच्छब्दसमभिव्याहृतयच्छब्दान्वयाद्वीप्साः
बहुविषयत्वेनैकस्मिन्देशे ऽनुपपत्तेर्लक्षणयाग्नीषोमीयप्राग्देशपद
परत्वस्यैव न्याय्यत्वात्पदार्थधर्मतेति सिद्धान्तयितुं तद्देशान
सङ्घातस्याचोदितत्वादिति सूत्रे ऽङ्गप्रधानसङ्घातस्य यज्ञशब्दवा
त्वाभावात्साङ्गप्रधानसङ्घातापेक्षया च प्राग्भाविनो ऽङ्गजातस्य
श्चावयवत्वायोगेन प्राचीनयज्ञशब्दान्वये ऽप्यवयवव्यतिरेकजनि
ष्टयनुपपत्तेः । तत्सम्बन्धितयोपांशुत्वस्याचोदितत्वान्न यज्ञभ
धर्मतेति वक्ष्यमाणत्वात्सप्तमान्त्ये च गवामयनिकेषु ज्योतिर
श्वहस्सु नाम्नैकाहरूपज्योतिरादिधर्मेषु चोदकाच्च द्वादशाह
षु प्राप्तेषु चोदकबलीयस्त्वाद्द्वादशाहधर्माः कार्या नामबलीयस्
दैकाहधर्मा इति सन्दिग्धे प्रत्येकं फलसाधनत्वाभावेन नामाव
प्रात्यात्मिकधर्म्मानाकाङ्क्षत्वादविरुद्धाधिकधर्मातिदेशकत्वे च

१ अयं पा० ढ० प्राचमः प्रतिभाति ।

पत्तेर्द्वादशाहिकद्वादशोपसत्त्वैकादशिनीविहारदर्शनाभ्यां च
गभ्यां चोदकानुग्रहेण द्वादशाहिकधर्मातिदेशे प्राप्ते फलवा-
साधनभूतानामह्नां साहित्यावगमे ऽव्युत्पत्तिवाक्येषु प्रत्ये-
त्र साधनत्वावगमाद्धर्माकाङ्क्षोपपत्तेर्नाम्नां च प्रत्यक्षत्वेनानु-
ंकाद्यागत्वाव्यक्तचोदितत्वाद्गणत्वाद्यनेकलिङ्गापेक्षाच्चोदका-
ऽीयस्त्वात् ज्योतिरादिनाम्नां च यागवाचित्वेनाधिकधर्मातिदे-
त्वायोगादेकाहरूपज्योतिरादिधर्मातिदेशं सिद्धान्तयित्वा लिङ्गं
ातधर्मः स्यात्तदर्थोपपत्तेर्द्रव्यवदिति सूत्रेणाहःसङ्घातात्मकस्य
मयनस्याहःसङ्घातात्मकद्वादशाहकार्यापन्नत्वेन नीवारादौ
धर्मवत्तदीयद्वादशोपसत्त्वैकादशिनीविहारप्राप्तेर्लिङ्गद्वयोपपत्ति
तेनोक्तां निराकर्तुं न वार्थधर्मत्वात्सङ्घातस्य गुणत्वादित्यत्र
शशब्देन संख्यावाचितार्थादुक्तस्यापि सङ्घातस्य फलसाधनी-
हःशब्दोक्तयागविशेषणत्वेन गुणभूतत्वात्साधनत्वाभावेन ध-
ाहकत्वान्न सङ्घातकार्यापत्त्या धर्मप्राप्तिर्युक्तेति वक्ष्यमाणत्वात्सू-
तो ऽपि समुदायवाचित्वाभावाभिप्रायो ऽवगत इत्याह * सङ्घा-
ेति * यद्यप्यङ्गप्रधानसङ्घातसम्बन्धितयोपांशुत्वस्याचोदित-
ानेनोक्तं तथापि यथाङ्गप्रधानानां समुदितानां फलसिद्धिहेतुत्वे
समुदायस्य शब्दवाच्यत्वाभावात्तत्सम्बन्धित्वेनोपांशुत्वस्या-
नात्तथा प्रधानानां समुदितानामपि फलसाधनत्वे तत्समुदाय-
शब्दवाच्यत्वाभावेनाचोदनेति प्रकृतोपयोगसिद्धेरुदाहृत-
। कथं तर्हि समुदायवचनावेताविति भाष्यमित्याशङ्क्याह
तस्मादिति * सकृदुच्चरिते चास्मिन्विवक्षैकैव दृश्यतइत्यनेन
येनानेकार्थस्यापि शब्दस्य सकृदुच्चारणेनैकार्थपरत्वायो-
पौर्णमास्यमावास्याशब्दयोरनेकयागनामत्वायोगशङ्कानिरासार्थं
दुच्चरितस्याप्यन्योन्यसापेक्षानेकार्थपरत्वोपपत्त्यै समुदायस्योप-
णाख्योपसर्जनत्वोक्त्यर्थत्वेन समुदायो वचनमाग्नेयादुक्तावुपल-
ोक्तो निमित्तमेतयोरिति कृत्यल्युटो बहुलमिति निमित्ते ल्यु-
ुत्पाद्य समुदायवचनशब्दो व्याख्येय इत्याशयः । समुदायश-
येति भाष्यस्य का गतिरित्याशङ्क्याह * तेषां त्विति * समुदा-
वाचिनोरपि पौर्णमास्यमावास्याशब्दयोर्वाच्यसमुदायी लक्षित-
ुदायगतसंख्याद्वारैकवचनयोगाभिधानार्थं समुदायशब्दतोक्ते-
ः॥ कथं समुदायशब्दत्वोक्त्यायमर्थो लभ्यतइत्याशङ्क्य समुदा-
ेक्षः शब्दः समुदायशब्द इति शाकपार्थिववन्मध्यमपादलोपि-
ासत्वं भाष्यकृतोक्तमिति सूचयितुमाह * तथा चेति * नत्व-

नयोः समुदायवाचित्वाभावे समुदायवाचियूथादिशब्ददृष्टान्
३७०।१ दानमयुक्तमित्याशङ्क्याह * यूथेति * कुलपर्वच्छब्दयोराक्र
दे ऽनुदाहृतत्वादस्त्येव सङ्गतिश्चात्र वृक्षा हि बहवो वनमित्या
समुदायोपलक्षितमुदायिवाचिता यूथादिशब्दानां तत्रोक्तेति
नार्थं द्विवचनं तन्त्राविरोधात्तु तेषां समुदायवाचित्वे ऽपि स
यनिमित्तैकवचनलाभमात्रसाम्याद्दृष्टान्तत्वोपपत्तिर्यदा त्विस्य
क्ता दर्शपूर्णमासशब्देन तएवाभिधीयन्तइति भाष्यावयवपर्य
चनयापि समुदायवचनशब्दस्य समुदायिवाचित्वेन तत्पर्याय
दर्शपूर्णमासशब्दयोसमुदायिभिधानत्वार्थत्वं गम्यतइति सूच
येदेति भाष्यमर्थतो व्याचष्टे * एतेनेति * पौर्णमास्यामावा
शब्दयोः समुदायिवाचित्वे त्वव्याख्योपपत्तेः समुदायिवाचि
समुदायवचनशब्देनोक्तेत्याशयः । तत इति भाष्यं स
यानुवादप्रयोजनाभिधानार्थत्वेन व्याख्यातुं पूर्वोक्तमेव
मुदायानुवादप्रयोजनं स्मारयति * तस्मादिति * इ
कमिदं चैकमित्येकत्वद्वयविषयं प्रत्ययमपेक्ष्य द्वित्वोत्पत्तेर्द्वि
स्य निमित्तकारणं यो द्वित्वे ऽनपेक्ष्यमाणत्वादपेक्षाख्य एकत्वद्व
प्रत्ययस्तस्य सिद्धिरित्यर्थः । एतदेव चतुर्थोपान्त्यन्यायाभिधाने
पपादयितुं तदीयसिद्धान्तसूत्रावयवं तावत्पठति * यथेति
न्यायमभिधत्ते * तद्द्वित्वेति * पौर्णमास्यमावास्याशब्दोक्तसमुद
द्वित्वानुसारित्वाद्दर्शपूर्णमासशब्दयोः समुदायविषयत्वे ऽभि
ननु द्विवचनान्तत्वमात्रेण प्रपौर्णमास्यमावास्याशब्दविलक्षणयोर्द
पूर्णमासशब्दयोस्तत्सम्पादितसमुदायद्वित्वानुसारित्वानवसायात्त
तद्विषयत्वावगतिरित्याशङ्क्याह * अस्ति चेत्याद्युक्तं * दर्शशब्द
विरुद्धलक्षलणया दर्शनविपर्ययादर्शनगमकत्वात्स्पष्टामावास्यावि
यत्वप्रतिपत्तिरित्यर्थः । शक्यते चेति तत्रत्यं भाष्यं पठितं दर्शौ
एतयोः पूर्व इत्युपक्रम्यामावास्या वै सरस्वतीत्युपसंहाराद्दर्शामाव
स्ययोः सामानाधिकरण्यावगतिः । भाष्यं व्याचष्टे * तेनेति *
नरुक्त्यं शङ्कते * ननु चेति * विद्वद्वाक्ययोः समुदायानुवाद
स्थिते ऽपि दर्शपूर्णमासशब्दयोरप्रसिद्धार्थत्वाद्यागमात्रं ग्रहणशङ्क
निरासायैतदधिकरणस्य प्रयोजनाधिकरणं तदिति पौनरुक्त्यं प
हरति * नैष दोष * इति हिशब्दो ऽपिशब्दार्थे पौर्णमास्यधिकर
विनेज्याधिकरणपूर्वपक्ष एव स्यादितीज्याधिकरणस्य पौर्णमास्यधि
करणाधीनत्वात्पौर्णमास्यधिकरणप्रयोजनत्वेनारम्भ इत्यर्थः । भ
ष्योक्तं फलवाक्यस्थद्वित्वसिद्धिप्रयोजनत्वमुपपाद्य स्वयं कालवा

थयोस्तृतीयान्तयोः पौर्णमास्यमावास्याशब्दयोराग्नेयादित्रिकद्व-
मत्वसिद्धिप्रयोजनताप्यस्तीत्याह * इदमिति * विद्वद्वाक्या-
मनयोः शब्दयोस्त्रिकद्वयनामत्वाकरणे का पौर्णमासी कामावा-
ज्ञानान्नैतद्वाक्यविहितस्त्रिकस्य त्रिकस्य कालयोगः सिद्ध्यतीत्या-
। वाक्यान्तरैरेवाग्नेयादीनाङ्कालविधानेनैतस्य कालवाक्यस्यानर्थ-
न्नैतद्वाक्यापेक्षितनामनामिसम्बन्धसिद्धिप्रयोजनत्वं विद्वद्वाक्य-
सम्भवतीत्याशङ्कते * तत्रेति * एतद्वाक्यविहितस्त्रिकस्य त्रि-
परस्परसहितस्य साङ्गस्य कालयोगो न वाक्यान्तरैः सि-
ोति परिहरति * उच्यतइति * श्लोकं व्याचष्टे * उत्पत्ती- ४७१
* परस्परसहितश्चेत्यनेनैकदेशकालकर्तृत्वं मुख्यानामेकशब्दो-
ात्स्यादित्येकादशाधिकरणवक्ष्यमाणा प्रधानकालतन्त्रतोक्ता
शब्देनाङ्गानि तु विधानत्वात्प्रधानेनोपदिश्येरंस्तस्मादेकदेश-
ति तदन्तरा गर्भिणीन्यायवक्ष्यमाणाङ्गाङ्गानां प्रधानकालतोक्ता
ञित्यनेन तुल्यानां तु यौगपद्यमेकशब्दोपदेशात्स्याद्विशेषाग्र-
देत्येकादशाधिकरणवक्ष्यमाणस्याङ्गानुष्ठानतन्त्रत्वस्य प्रधान-
तन्त्रत्वमन्तरेणासिद्धेरर्थाक्षिप्ता प्रधानप्रयोगतन्त्रतोक्ता काल-
न्यथात्वप्रयोगान्यथात्वापादकतौत्पत्तिकेत्यनेनोक्ता नन्वितरेत-
ानां साङ्गानां च करणत्वावगमात्तादृशानां कालसंयोगे
समुदायद्वयस्यापीतरेतरसाहित्यापत्तिः कालद्वये प्रयोगः
ग्रानिष्टापत्तिं शङ्कते * ननु चेति * पौर्णमासीकाले ऽमावा-
ासमुदायप्रयोगो ऽमावास्याकाले वा पौर्णमास्याख्यसमुदाय-
। ऽन्यसाहित्यलभ्यत्वेनौपाधिकत्वादौपाधिकस्य त्वाकाङ्क्षां विना
ायोगात्कालद्वयप्रयोगे चोत्पत्तिवाक्यविहितैककालयविरोधा-
स्माद्वाक्यात्प्रयुज्यतइति परिहरति *अत्रेति* श्लोकं व्याचष्टे
ावास्या हीति * कालद्वयप्रयोगे व्यवस्थितकालत्वानिमित्त-
नान्तदर्शपूर्णमासशब्दवाच्यत्वायोगाद्यजिविशेषकत्वं न स्या-
र्शत्वामित्यनेन सूचितम् । ननु फलं भवतु भावयेदनेनेत्थमिति
विधिनाङ्गप्रधानयोर्युगपदनुष्ठानविधानात्प्रयोगविधिवशेनैवा-
प्रधानकालत्वसिद्धेरेतद्वाक्यमनर्थकमित्याशयेनाशङ्कते * आ-
; फलभवनकालस्याप्रत्यक्षत्वेनाङ्गप्रधानकालपरिच्छेद्यत्वात्प्र- ४७२।१
ं चोत्पत्तिवाक्यालोचनेन प्रत्येकं कालयोगात् षट्सु पौर्णमा-
ास्यासु प्रयोगावगमात्तावत्कालानार्हिर्भावमात्रेणाङ्गानां प्रयो-
ावगतप्रधानकालत्वोपपत्तेरेकस्यां पौर्णमास्याममावास्यायां
ःप्रधानप्रयोगो नैतद्वाक्यं विना लभ्यतइति वक्ष्यमाणाशयेन प

रिहरति*उच्यतइति*मान्त्रवर्णिकमित्युपहासः कालस्य प्रयोगा
त्वात्प्रयोगस्य च साङ्गप्रधानविषयत्वादुत्पत्तिवाक्यावगतकालयो
नैवाङ्गप्रधानयोरेककालत्वावगतेरित्यन्तैककालत्वायोगाच्च सन्निकृ
कालत्वप्रतीतेर्दूरस्थानामङ्गानामनुपकारित्वावसायादेकस्यां पौर्णः
स्याममावास्यायां वा साङ्गप्रधानप्रयोगो ऽस्माद्धिनैव लभ्यतइत्
शयेनाशङ्कते * नन्विति * उत्पत्तिवाक्यस्थस्य कालस्य प्रयोग
ङ्गत्वात्साङ्गप्रधानविषयत्वानवगतेः सन्निकृष्टैरुपकर्त्तव्यमिति विां
तौ ऽनवगमान्न दूरस्थानामनुपकारित्वे किं चित्प्रमाणमस्तीत्याशं
परिहरति * सन्निकृष्टैरिति * ननु य इष्ट्या पशुना सोमेन
यजेत सो ऽमावास्यायां पौर्णमास्यां वेत्यनेनैव पश्वादेः सद्यस्का
त्वायाग्नेयादीनां प्रकृतौ पूर्वेद्युरन्वाधानाद्यङ्गविचारितद्व्यहकाल
द्विकृतिष्वपि तत्प्राप्तेः सद्यस्कालत्वायेष्टिशब्दार्थवानित्याशयेन प
स्परसाहित्याङ्गसाहित्ययोः सिद्धेरेतद्वाक्यमनर्थकमित्याशङ्कते *
नु चेति * षण्णामप्यनेन साहित्यं स्यान्न त्रिकस्येति परिहर
* सत्यमिति * श्लोकं व्याचष्टे * न तावत्त्रिकस्येति * रूढित्वः
दर्शनाय सोमाङ्गेषु दीक्षणीयादिषु दार्शिकपौर्णमासिकाविद्धचन
प्रवृत्तेः सोमे ऽपीष्टेर्दर्शपूर्णमास्याख्याया विध्यन्तस्य प्रवृत्तिरि
पूर्वपक्षाभिधानार्थं सूत्रं पठितम्।नन्वेवं सति पौर्णमास्यमावास्याव
१२ क्याभ्यामेवेष्टप्रयोगसिद्धेरिष्टेत्यनर्थकं स्यादित्याशङ्क्य * प्रकृत
वित्युक्तम् । नन्विष्टिवाक्येनेष्टप्रयोगासिद्धावपि देशवाक्ये त्रिकद्व
यस्योत्पत्तिवाक्यावगतकालयोगनिमित्तभिन्नशब्दोपादानेनेतरेतरयो
गावगतसाहित्याविवक्षया स्वसमुदायिस्वाङ्गसाहित्यमात्रसिद्धेरि
ष्टप्रयोगः सेत्स्यतीत्याशङ्कते * नन्विति * देशान्वयनिमित्तेन सा
हित्येन कालान्वयसाहित्यानवगतेर्नैकैकस्य त्रिकस्य साङ्गस्यैककाल
त्वं सिद्ध्यतीति परिहरति * तत्रेति * श्लोकं व्याचष्टे * भेदेनापि
हीति * भेदेनापि प्रयुज्यमानानां देशं प्रतिसाहित्योपपत्तेरितरेतर
योगानुरोधात्कालतन्त्रत्वाभ्युपगमे च षण्णामेवैककालत्वापत्तेरुत्पत्ति
वाक्यानुरोधात्वितरेतरयोगाविवक्षायामन्योन्यानपेक्षाणां निरङ्गान
च कालयोगापत्तेर्न देशवाक्येनाप्यभिप्रेतप्रयोगसिद्धिरित्यर्थः
षट्स्वित्यनेन पूर्वं दृष्टान्तव्याजेनाग्नेयादेः प्रत्येकानुष्ठानापत्तिमङ्गान
च षट्पक्षान्तराले सकृदनुष्ठानापत्तिमुक्त्वामत्रापि योजयित्वा प्र
योगभेदविधानाभावादिहापि वा कर्मपृथक्त्वात्तेषां तन्त्रविधाना
त्साङ्गानामुपदेशः स्यादित्येकादशवक्ष्यमाणप्रतिप्रधानावृत्तिन्याया
भावे ऽप्यभ्युपेत्यवादेनाथ वेत्युक्तोत्पत्तिवाक्यावगतस्य पौर्णमा

कालत्वस्यामावास्याकालत्वस्य चैकस्यामपि पौर्णमास्याममावा-
यां वा प्रयोगे विरोधाभावाद्विरुद्धसमुदाययौगपद्यबाधे ऽप्य-
देयसमदेशान्वयावगतस्वसमुदायियौगपद्यबाधायोगमथ त्वि-
नाशङ्क्य तत इत्यनेनैवमप्यावृत्त्योभयसमीपे ऽङ्गप्रयोगस्येष्टस्या-
द्धेरित्युक्ते करणविभक्तिवशेनोभयोरपि समुदाययोरङ्गसामी-
गतेस्तत्सम्पत्त्यर्थमावृत्तिम् *आशङ्क्याथ वेत्युक्तम् * सकृदष्टा-
नवस्यां वाङ्गप्रयोगे समुदायद्वयस्य तुल्याङ्गसामीप्यसम्प-
यन्तसामीप्यस्य चैकस्मिन्नप्यशक्यत्वान्नावृत्तिसिद्धिरित्याश-
। ननु फलवाक्येन साध्यसाधनेतिकर्त्तव्यताविशिष्टभावनावि-
धेनाङ्गप्रधानयोर्युगपत्प्रयोगविधानाद्यावता विलम्बेन विनानुष्ठा-
ाक्तिस्ततो ऽधिकस्य विलम्बस्य निवारणात्प्रधानकालएवाङ्गानु-
प्रतीतेरौत्पत्तिककालविरोधाच्च समुदायद्वययौगपद्यानुपपत्तेः
ऽवाक्याभ्यां विनापीष्टप्रयोगसिद्धिरित्याशङ्क्याह * अनेनैवेति*
वाक्यस्य स्वरूपेण फलविधिमात्रार्थत्वाभ्युपगमादुत्पत्तिविनि-
वाक्यैकवाक्यतया च प्रयोगविधानार्थत्वाभ्युपगमात्फलवि-
स्वरूपेणेष्टप्रयोगसाधकत्वं प्रयोगविधित्वरूपेण वेति विकल्प्य
ापक्षे ऽयमतिदेशः एतदेव विवृणोति * फलस्यापी-
* सिद्धे ऽपीत्यपिशब्दस्योत्कर्षो ऽन्यस्य चाध्याहारः प्र-
परत्वं विना प्रयोगतन्त्रासाधकत्वात्कालतन्त्रासाधकतेत्या-
:। द्वितीयपक्षाश्रयणेनाशङ्कते * अथेति * प्रयोगविधिमात्रा- ४७
ने षण्णामपि युगपदुपादानादिति पूर्वोक्तमेव न्यायेन समुदाय-
यौगपद्यापत्तेस्तस्याश्चौत्पत्तिवाक्यविरोधेन दोषत्वात्तदनुरोधे तु
कं कालयुक्तानामित्यादिपूर्वोक्तेनैव न्यायेन प्रत्येकं प्रधानप्र-
ो ऽङ्गानां च षट्पक्षान्तराले क्व चिदहनि प्रयोगः साङ्गस्य वै-
स्य प्रधानस्य प्रयोगस्त्रिकयोर्वा कालभेदेन प्रयुज्यमानयोरेकस्य
ा चित्समीपे ऽङ्गप्रयोगः पक्षान्तराले वा क्व चिदहनीत्यत्रापि यो-
पत्तेः प्रयोगविधिरूपेणापि नेष्टप्रयोगसिद्धिरित्याशयेन परिहर-
* तत्रापीति * ननु फलभवनकाले ऽङ्गप्रधानयोर्युगपदनुष्ठानाव-
त्रिकद्वयस्यौत्पत्तिककालाविरोधार्थं कालभेदेनानुष्ठाने त्रिक-
द्याप्यङ्गयौगपद्याङ्गावृत्तेर्न्याय्यत्वादिष्टप्रयोगसिद्धिरित्याशङ्क्याह
चेति*फलभवनकालेनाङ्गप्रधानकालपरिच्छेदे फलस्वरूपोत्पत्त्या
ऽन्तरभाविन्यैककाल्यायोगात्फलापूर्वोत्पत्तिकालेन परिच्छेद्य-
ात्तेस्तस्य च क्षणिकत्वेनाङ्गप्रधानयोरेकक्षणे ऽनुष्ठेयतापद्येताङ्गप्र-
कालेनैव तु फलापूर्वोत्पत्तिकालस्य परिच्छेद्यत्वात्तस्य चाद्यप-

दार्थारम्भात् प्रभृत्यासमाप्तेरेकत्वादुत्पत्तिवाक्यावगतपौर्णमास
मावास्याकालालोचनया यावन्तं षट्पक्षपरिमितं पक्षपरिमितं
कालं प्रधानानि व्याप्नुवन्ति तावतः फलभवनकालत्वात्तावत्कालत्व
त्तावत्कालमध्ये ऽङ्गेष्वनुष्ठितेष्वङ्गप्रधानाविषययौगपद्यासिद्धेरङ्गा
स्यनाक्षेपान्नेष्टप्रयोगसिद्धिरित्यभिधानायाङ्गप्रधानानीत्यङ्गशब्दे प्र
के निरङ्गानां प्रधानानामुत्पत्तिवाक्ये कालविधानात्कथमङ्गानां
धानकालतेत्याशङ्क्य * प्रयोगेत्युक्तम् * प्रयोगविधिविहितः
साङ्गप्रधानप्रयोगस्यापि कालान्तराश्रवणादौत्पत्तिक एव का
ऽवसीयतइत्याशयः । प्रत्येकं प्रयोगादियोजनां विवृण्वनुपसंह
तीतीति उत्पत्तिवाक्यमात्रानुरोधे तिसृषु पौर्णमासीषु त्रयाणां ति
ष्वमावास्यासु त्रयाणां प्रधानानां प्रतिप्रधानमङ्गावृत्तिपक्षे साङ्
नामन्यथा यत्र क्व चनान्तराले चशब्देनाङ्गप्रयोगसूचनाच्छुद्धाना
पवर्गः प्रयोगोत्पत्तिद्वयालोचने द्वयोः पौर्णमास्यमावास्ययोस्त्रिक
यप्रयोगो ऽङ्गप्रयोगश्चैकसमीपे पक्षान्तराले वेति योज्यम्। कालवाक्य
नर्थक्यपरिहारमुपसंहरति * तस्मादिति * कालवाक्याभ्यां
तर्हीष्टप्रयोगसिद्धेरुत्पत्तौ कालविध्यानर्थक्यमिति शङ्कते * नन्
ति * पौर्णमास्यमावास्याशब्दविषयज्ञानं प्रयोजनमित्याशयेन
रिहरति * कथमिति * एतदेव विवृणोति * पश्येति * श्लो
व्याचष्टे * पौर्णमासीति * उपसंहरति * तस्मादिति * भाष
३।१ कुतो ऽप्येतदेव प्रयोजनमभिमतमिति सूचयितुमाह * अत एवेति

विशेषदर्शनाच्च पूर्वेषां समेषु ह्यप्रवृत्तिः स्यात् ॥ ४

यदि चेति भाष्येण समप्राधान्यनिरासार्थत्वेनैतत्सूत्रं पू
षां प्राकृतानां प्रयाजादीनां विकृतौ कृष्णलहोमादिविशेषदर्शना
सर्वेषां समप्रधान्यमित्येवं व्याख्यातं तच्च शब्दात् पूर्वसूत्रोक्ते ऽ
वादत्वे हेत्वन्तरसमुच्चयार्थत्वप्रतीतेरयुक्तमाशङ्क्योपपादयति * य
दि चेति * पूर्वपक्षप्रयोजनसमप्राधान्यनिरासद्वारा पूर्वपक्षनिर
सेनार्थात्सिद्धान्तसिद्धेश्च शब्दोपपत्तिरित्याशयः । समप्राधान्ये क
थं विकृतौ प्रयाजादिदर्शनानुपपत्तिरित्याशङ्क्याह * ततश्चेति
कर्मणस्त्वप्रवृत्तित्वात्फलनियमकर्तृसमुदायस्यानन्वयस्तद्बन्धन-
त्वादित्यष्टमाधिकरणे फलस्य स्वर्गस्य नियमस्य यावज्जीवताय
कर्तुः स्वर्गकामस्य समुदाययोराग्नेयादित्रयसाहित्यात्मकयोर्विकृत
नन्वये कर्मणः करणभूतस्य विकृतावप्रवृत्तेर्हेतुतया वक्ष्यमाणत्व
त्प्रयाजादेरपि करणत्वे सत्यप्रवृत्तिः स्यादित्याशयः । अत इत्युप

ाष्यं सिद्धान्तप्रयोजनोपसंहारार्थत्वेन व्याचष्टे * तस्मादिति *

गुणस्तु श्रुतिसंयोगात् ॥ ५ ॥

नैतदिति भाष्येण सिद्धान्तनिरासार्थतया तु शब्दो व्या-
स्तत्स्पष्टत्वादव्याख्याय श्रुतिसंयोगव्याख्यानार्थं तथेति भाष्यं
ष्टे * पौर्णमासीति * स्वयं श्रुतिसंयोगं व्याचष्टे * प्रत्यक्षे-
अस्मिन्व्याख्याने श्रुतिसंयोगशब्देन सिद्धान्ते कल्पनागौर-
धानात्पूर्वपक्षपक्षे तदभावमाह * सोऽपि चेति * नानुमा-
भविष्यतीत्यनुषङ्गः। अनेकमित्यत्र नानुमातव्यमिति विपरि-
ुषङ्गः गुणशब्दं स्वयं तावद्विधित्वेऽधिको गुणोऽस्तीत्येवं व्या-
* समुदायेति * नन्विति भाष्येणारूपत्वेनापूर्वयोः कर्मणोर्वि-
म्भवं पूर्वसूत्रोक्तमनुभाष्य वाक्यान्तरेणेत्यादिना गुणो रूपं
ान्तरस्थपौर्णमास्यमावास्याश्रुतिसंयोगादवगम्यतइत्येवमावृत्त-
संयोगशब्दसहितो गुणशब्दो रूपत्वपरिहारार्थत्वेन व्याख्यात-
ाचक्षाणोऽस्मिन्नपि पक्षे विद्वद्वाक्ययोर्दर्शपूर्णमासशब्दतात्पर्यो-
रणार्थत्वाभावात्तात्पर्यावधारणं च विना लाक्षणिकशब्दप्रवृत्त्य-
दर्शपूर्णमासशब्दयोराग्नेयवाक्याविहितकर्मद्वयनामत्ववद्विद्वद्वा-
विहितकर्मद्वयनामत्वस्याप्रसिद्धेर्यजिविशेषकत्वायोगात् विशेषत-
स्मिन्पक्षेऽष्टाकपालादिवाक्यैः कालाविधानात्पौर्णमास्यां पौर्णमा-
वाक्यद्वयविहितकालयोगेन दर्शपूर्णमासशब्दप्रवृत्त्यभ्युपगमाप
त्र च तृतीयानिर्देशात्करणकृतयोः पौर्णमास्यमावास्ययोः का-
ायप्रतीतेः करणत्वस्य च फलवाक्याधीनत्वात्फलवाक्यस्थाभ्यां
र्णमासशब्दाभ्यां विद्वद्वाक्यविहितयोः कर्मणोः फलान्वयावगमे
त्वात्कालान्वयः। कालान्वये सति फलान्वयात्करणत्वावगति-
तरेतराश्रयापत्तेर्दर्शपूर्णमासशब्दयोरप्रसिद्धार्थत्वेन यजिविशे-
वायोगात्प्रकृतयागमात्रस्य फलान्वयात्समप्राधान्यापत्तेर्विकृतौ
जादिदर्शनानुपपत्तिरित्याशङ्कां निरस्यति * प्रयाजादीति *
मोपान्त्ये सौर्यादौ लौकिकी पार्वणस्थालीपाकेतिकर्त्तव्यताग्रय-
ालीपाकादौ दृष्टप्रवृत्तित्वेनातिदेष्टव्येति पूर्वपक्षिते बार्हस्पत्ये
बर्हिषो लुनातीति बर्हिषो लवनदर्शनं पितृयज्ञे च न होतारं
तइति होतृवरणनिषेधदर्शनं सौर्ये च प्रयाजे प्रयाजे कृष्णलं
तीति प्रयाजदर्शनं वैदिकेतिकर्त्तव्यतानातिदेशेन युज्येतेत्याश-
यापि वा न्यायपूर्वत्वाद्यत्र नित्यानुवादवचनानि स्युरिति सूत्रेण
बर्हिर्लवनं प्रत्यक्षविहितं तत्रार्द्धविधिर्होतृवरणनिषेधो नित्यानु-

वाद: प्रयाजवाक्यं कृष्णलविशिष्टप्रयाजविधानार्थमिति पूर्वपक्ष परिहरिष्यति सम्भवमात्रेण त्वत्र प्रकृतिस्थप्रयाजगुणविधिपक्षाभि धानम् । यद्वावगतार्थविषयत्वाद्वीप्सायाः प्राप्ताभावे ऽनुपपत्तेर वचनोदाहरणत्वं भाष्योक्तं दूषयित्वा स्वयं प्रकृतिस्थप्रयाजानुव दत्वस्य लक्ष्यमाणत्वात्स्वाभिप्रायेणैतदुक्तम् । आद्यात्पूर्वपक्षाद्भिद भिधानायैतावेवेत्येवकारः । नन्वष्टाकपालादिवाक्येषु पौर्णम स्यमावास्याशब्दयोः कालवाचित्वेन विद्वद्वाक्यविहितकर्मानुवादि शब्दाभावान्न तैरत्र गुणविधिः सम्भवतीत्याशङ्कानिरासार्थं यदि भाष्यं व्याचष्टे * अष्टाकपालादीति *

चोदना वा गुणानां युगपच्छास्त्राच्चोदिते हि तदर्थत्वात्तस्य तस्योपदिश्येत ॥ ६ ॥

चोदनाशब्दव्याख्यानार्थं कर्मचोदनाशब्दं गुणविधित्वनिरासार्थत या व्याचष्टे * नेत इति * सूत्रशेषव्याख्यानार्थं कुत इति, भाष तात्पर्यतो व्याचष्टे * कुत इति * अप्राप्ते कर्मणि दृष्टस्यानेकगुणवि धिप्रकारस्य प्राप्ते कर्मण्यसम्भवाभिधानायोत्तरार्द्धं तावद्व्याख्या पीठिकां करोति * कर्मोत्पत्तीति * फलाद्यनुपादेयपरे वाक्ये कर्म विधावप्यनेकगुणविध्यसम्भवसूचनायोत्पत्तिशब्दः । ननु कार कैर्विना भावनाविध्यपर्यवसाने ऽग्निहोत्रादिवाक्ये कारकाश्रवणा विधिः स्यादित्याशङ्क्याह * तत्रेति * आत्मनो निष्पादकत्वेनांश भूततयावगतानि यानि कारकसामान्यानि तदन्यथानुपपत्त्या क रकविशेषाक्षेपात्स्ववाक्ये कारकाश्रवणे ऽपि विधिपर्यवसानं सम्भ वतीत्याशयः । अर्थापत्त्या कारकविशेषाक्षेपे तद्वाचिपदानर्थक्यम शङ्क्य * कारकविभक्त्यन्तेत्युक्तम् * तत्र ईदृशं ह्येकं वाक्यं श्रुतं नुमितैकदेशं निष्पन्नमग्नीषोमीयेण पशुना यजेतेति पशुसोमाधिक रणावार्त्तिकवक्ष्यमाणन्यायेनाग्नेयेनाष्टाकपालेन यजेतेत्यादिप्रकार वचनव्यक्त्याश्रयणात्सर्वत्र कारकविभक्त्यन्तताभिप्रेता यः कश्चि द्विशेषो ऽर्थान्निर्द्धारितविशेषाक्षेपे ऽपि विशेषनिर्द्धारणार्थानि प दान्तराणीत्याशयः । वाक्यादेवेत्यनेन स्ववाक्योच्चारणस्योत्पत्ति शिष्टबलीयस्त्वं प्रयोजनं सूचितम् । विशेष्यते भावनेत्यन्वयः । नन्वे सत्यमूर्त्तत्वेन जात्यादेः कारकत्वायोगाद्भावनान्वयो न स्यादित्य शङ्क्याह * प्रतिपदं चेति * द्रव्याश्रितत्वेनामूर्त्तस्यापि द्रव्यद्वार कारकत्वोपपत्तिरुक्ता । ननु पशुत्वादिजातेरादिशब्दोक्तस्य चारुण

ुणस्याभिक्रमणादिक्रियायाश्च श्रुतिलक्षणद्वारैकशब्दोपादानल-
ाया श्रुत्या लिङ्गसंख्ययोश्चैकपदोपादानलक्षणया श्रुत्या द्रव्या-
ात्तादर्थ्यप्रतीतेः कथं भावनार्थतेत्याशङ्क्य * एकेत्युक्तम् *
ायादेर्द्रव्येण सह विशेषणविशेष्यभावे ऽपि जातिगुणयोः प्राति-
ःकार्थत्वात्प्रातिपदिकार्थकारकत्ववाचिन्या विभक्त्या संख्याया-
प्रत्ययार्थत्वेनैकाभिधानलक्षणया श्रुत्या लिङ्गस्यापि टाबादिप्र-
ार्थत्वात्प्रातिपदिकार्थत्वाद्वा यथासम्भवं कारकत्ववाचिन्या
या कारकत्वेन भावनार्थत्वप्रतीतेरभिक्रमणादेश्च धातुसम्बन्धा-
कारविहितणमुल्श्रुत्या धात्वर्थान्तरान्वयाभिधानात्तत्र वीप्सो-
। वृत्त्यन्यथानुपपत्त्यवगतसन्निपत्योपकारित्वेन कारकत्वावगत्या
वनार्थत्वप्रतीतेर्न द्रव्यशेषतास्तीत्याशयः । यथा द्रव्यस्य कारक-
ा भावनार्थत्वान्न जात्यादिशेषता तथा जात्यादेरपि न द्रव्यशेष-
ा परस्परशब्देनोक्तम् । नन्वेवमपि सन्निकृष्टपदान्वयमात्रेण भाव-
ाशिष्टयसिद्धेर्विप्रकृष्टपदानर्थक्यमित्याशङ्क्याह * एवमिति * का-
ात्मना भावनार्थतैवैवंशब्देनोक्ता व्याचष्टे * स चेति * ननु
ाशिष्टविधौ विशेषणानामपि विधेयत्वात्कथं नानेकशक्तिकल्पना-
तरित्याशङ्क्याह * तथा हीति * श्लोकं व्याचष्टे * विशिष्टाया- ४९
ति * ननु विशिष्टविधेः स्वार्थान्यथानुपपत्त्या विशेषणविधिकल्पकत्वे
ाषणे विहिते विशिष्टविधिर्विशिष्टे च विहिते विशेषणविधिरि-
ातरेतराश्रयः स्यादित्याशङ्क्याह * विशेषणेति * पश्चात्कल्पस्यापि
ाषणविधेः प्राक्प्रवृत्तत्वेनैव कल्प्यत्वान्नेतरेतराश्रयापत्तिरित्याश
। श्लोकं व्याचष्टे * विशिष्टेति * एकस्यानेकशक्तिकल्पनापत्ति-
हारमुपसंहरति * तेनेति * विशेषणविशेष्यविधेरन्योन्यनैरपे-
ापर्यवसानाद्युगपद्व्यापारो गम्यते विशेष्यानुवादेन विशेषण-
धिना क्रमेण अप्राप्ते त्वित्युत्तरार्द्धं व्याख्यातमुपसंहरति *
ाति * प्राप्ते कर्मणीति * पूर्वार्द्धं व्याख्यातुमुपक्रमते * नेति *
ादेव प्रश्नपूर्वं दृष्टान्तेनोपपादयति * कथमिति * श्लोकं व्या-
ास्यन् दार्ष्टान्तिके ऽङ्गाकर्षणन्यायं योजयति * यदा हीति *
ाघातस्य नित्यमपादानापेक्षत्वात्तस्या इति पञ्चम्यन्तसापेक्षत्वे ऽपि
ासाविघातः प्रधाननयनन्यायस्तत्र नास्तीत्याह * विशिष्टेति *
 प्राप्ते कर्मण्यनेकगुणविधानाशक्तावजया क्रीणातीत्यादिष्वनेक-
त्यादिविधिः प्राप्ते सोमक्रयादौ न स्यादित्याशङ्क्याह * त-
ते * यथानेककारकविशिष्टभावनाविधिना विशेषणभूताने- ४
ारकानिघ्याक्षेपस्तथानेकजात्यादिविशिष्टकारकविधिना विशे-

षणभूतानेकजात्यादिविध्याक्षेप इत्यर्थः । नन्वेवं सत्यग्ने
स्यापि द्रव्यदेवतारूपस्य कारकस्यैवाग्नेयपदोपादानात्पदान्त
पात्तस्यापि चाष्टाकपालस्य द्रव्यरूपैककारकत्वात्प्राप्ते व
णि विध्युपपत्तिरित्याशङ्क्याह * यदा त्विति * प
पदोपात्तस्याप्यनेकस्य कारकस्य परस्परान्वयाभावेनैकविशि
तराविध्ययोगान्नैकयत्नेन विधिः सम्भवतीत्याशयः । एकस्यापि
कारकस्यानेकपदोपात्तस्यैकयत्नेन विध्यसम्भवे ऽनेकपदसम्बद्ध
स्यात्राघाराग्निहोत्राधिकरणवार्त्तिके साधयिष्यते । दार्ष्टान्ति
ऽङ्कर्षणन्यायं योजितमुपसंहरति * एवं चेति * अत्रैव सूत्र
यवं योजयति * तदिति * भाष्यकृतां सूत्रानुक्तविशेषणोक्तौ
योजनमाह * परस्परेति * दृष्टान्ते श्लोकं व्याचष्टे * लोके
चेति * अमात्येन गन्तव्यमिति सकृदुच्चारणव्यापारे सेनान्यादि
मनहेतुप्रयत्नान्तरोपादानाशक्तेरुच्चारणावृत्तिः स्यादिति दृष्टान्त
र्यवसानं श्रुतिशब्दः श्रुतिहेतूच्चारणलक्षणार्थः । यदि तावदित्या
स एवाग्निरष्टाकपालस्य नान्यस्येत्यन्तस्य प्राप्ते कर्मण्यनेकगुण
धावुच्चारणावृत्तिलक्षणवाक्यभेदाभिधानपरत्वं तावदाह * प
मिति * एतदेवावयवशो व्याचिख्यासुर्यदि तावदित्यादिभा
व्याचष्टे * यदीति * कर्मान्वयितया ऽष्टाकपालविधौ अष्टाक
लस्वरूपकर्त्तव्यत्वस्यापि क्लेशलभ्यत्वादाग्नेयान्वयरूपार्थान्तरा
धानं दूरोत्सादितमित्यर्थः । अर्थान्तरविध्यशक्तौ तदानीमिति न
व्यावयवं योजयति * तदाहेति * अथाग्नेयइति भाष्यं न तत
ग्नेयः सत्तया सम्बध्यतइत्यर्थो लभ्यतइत्यनुक्तत्वान्न्यूनमाशङ्क्य
१ * अथेति * अथ पौर्णमास्यामित्यथ तस्यामिति च भाष्यद्वय
कहेलया व्याचष्टे * एवमिति * केन अष्टाकपालो विहित इ
नूद्यमानाष्टाकपालोत्पत्तिर्निरस्ता केन तस्याविहितइति चावृत
तस्य पौर्णमास्यन्वयो निरस्तः । विधीयमानाग्नेयोत्पत्तिनिरासः
प्राग्वत्सिद्ध इतरत्राप्यनूद्यमानाग्नेयोत्पत्तिपौर्णमास्यन्वयविधी
मानाष्टाकपालोत्पत्तिनिरासः । स एवोत्पत्तिदेशे ऽनेनोक्तः । १
सत्यपि क्लेशेन तद्विधीनभ्युपगम्याग्नेयस्याष्टाकपालस्य चाष्टा
पालेनाग्नेयेन वान्वयविधावतिगौरवं स्यादित्यर्थः । अथ पौ
मासीति भाष्यं व्याचष्टे * पौर्णमासीपदेति * द्रव्यदेवतोभयम
रूपकर्त्तव्यता पूर्वोक्तात्रापि योजिता । ननु पौर्णमास्याख्याक्रियान्व
द्वारः परस्परान्वयो भविष्यतीत्याशङ्क्याह * न चेति * द्रव्य
वताविशिष्टपौर्णमासीविधौ सत्युभयविशेषणवशीकारं विनोभ

ष्टत्वायोगादेकक्रियावशीकारात्परस्परानियमः सिद्ध्येत्तस्य त्व-
वेन दुष्टत्वाद्या पौर्णमासीत्यनूद्य तस्यामाग्नेय इत्युक्ते ऽष्टाक-
नुरागाप्रतीतेस्तस्यामष्टाकपाल इत्युक्ते चाग्नेयानुरागाप्रतीतेर्न
द्वारा द्रव्यदेवतयोः परस्परान्वयः सम्भवतीत्यर्थः। अथ द्रव्य-
इति भाष्यव्याख्यानपूर्वमथ केन चिदित्याशङ्काभाष्यमवतार-
* एतदिति * परस्परासम्बन्धपरिहारार्थं प्रागेव द्रव्यदे-
ाः परस्परसम्बन्धं कुर्वन्नन्यतः सिद्धं द्रव्यस्य देवतासबन्ध-
त्युक्तम्। ननु द्रव्यदेवतान्वयविधिपूर्वककर्मान्वयविध्यभ्युपगमे
द्रव्यदेवतान्वयसिद्धेरनुवादाभिधानं किमर्थमित्याशङ्क्याऽन्यतर-
न्धितया ऽन्यतरविधिर्द्वयोर्वा युगपदिति विकल्पद्रव्यसम्ब-
या देवताविधौ देवतासम्बन्धितया द्रव्यविधौ उभयोर्द्रव्यदे-
ः स्वरूपविधिः सम्बन्धविधिश्चेति क्लेशे युगपत्वितरेतरनैरपे-
भयविधौ परस्परसम्बन्धक्लेशमनुभूय पौर्णमासीसम्बन्धक्ले-
तत्परिहारार्थमित्युक्तमिति तच्छब्दाक्षिप्तयच्छब्दाध्याहारेणैक-
या योज्यम्। अवतारितभाष्यस्य परव्याख्यामुपन्यासपूर्वकं दू-
* तत्रेति * परस्वहरणमेव तावन्निषिद्धत्वादयुक्तं विशेषतो
ः सुतरामनपवृक्तकर्मण इत्यर्थः। केन चिदाग्नेयमष्टाकपालं
द्रुक्काम इत्यादिवाक्येन विधानात्सङ्कल्पविषयीकारित इत्येवं
न व्याचष्टे * तस्मादिति * रुक्कामेष्ट्यां विहितस्य पुरोडा-
तत्र त्यक्तस्यान्यत्रात्याज्यत्वेन साधारण्यायोगादाच्छिद्य वि-
रुक्कामेष्ट्यसिद्ध्यापत्तेः पौर्णमास्यां विध्ययोगे ऽपि पुरोडाशा-
प्र चाग्निनोपलक्षणायोगे ऽपि यो ऽष्टाकपालो ऽन्य-
रतया विहितः स पौर्णमास्यां भवतीत्यष्टाकपालत्वसाम्या-
ाशान्तरस्याग्न्युपलक्षितस्य पौर्णमास्यां विधिरित्याशयः।
ोति परिहारभाष्यमाग्नेयपदान्वयेनैवाग्निदेवत्यत्वसिद्धेरयुक्त-
चोपपादयति * तत्राहेति * अष्टाकपालस्य पौर्णमासीस-
विध्यर्थमुपलक्षणायाग्नेय इति शब्दो वाचको ऽस्येति व्युत्पत्त्या-
ब्दोक्तस्याग्नेयत्वस्यानूद्यमानात्वात्पौर्णमासीगतस्याष्टाकपा-
नाग्निदेवत्यत्वसिद्धिरित्यर्थः। सिद्ध्यर्थमिति पाठेलूपलक्षणभू-
सम्बन्धसिद्ध्यर्थमिति व्याख्येयम्। अथेति भाष्येणोपलक्षणार्थ-
धानार्थतामप्याग्नेयशब्दस्याशङ्क्य स वक्तव्य इत्यनेन वैश्व-
दवत्वात्सकृदुच्चरितस्याग्नेयादिशब्दस्य विध्यनुवादत्वासम्भ-
रिहतं तद्व्याचष्टे * युगपदिति * कल्पयिष्याम इति भा-
ष्टाकपालस्य पौर्णमासीयागान्वये विहिते देवतां विना द्रव्य-

स्य यागान्वयायोगाद्देवताकाङ्क्षायामुपलक्षणत्वेन बुद्धिस्थस्याग्ने
वतात्वकल्पनमाशङ्क्य नासतीत्यनेन यस्य वाचकं शब्दमुद्दि
स्मृत्वा वा हविस्त्यक्ष्यामीति सङ्कल्पः क्रियते सा देवता भवत
विधिशब्दाधिकरणवक्ष्यमाणलक्षणेन त्यज्यमानद्रव्यसम्बन्धापे
प्रवृत्तित्वात्मकसम्बन्धिशब्दत्वाद्देवताशब्दस्य गुर्वादिशब्दस्याध
पनादिक्रियाजन्याध्याप्याद्यवच्छिन्नाध्यापयित्रादिगतातिशयवाचि
त्वावगतिवत्त्यागोद्देशक्रियाजन्यद्रव्यावच्छिन्नाग्न्यादिगतातिशयः
चित्वावगतेर्विधानं च विनाग्न्यादेर्द्रव्यत्यागोद्देश्यत्वप्रमाणाभावे
द्देशक्रियाजन्यातिशयभाक्त्वायोगान्नाग्न्युद्देशेन द्रव्यत्यागविधिं
नाग्नेर्देवतात्वसिद्धिरित्युक्तम् ।

तदर्थो यादृशो यत्र देवतात्वेन चोदितः ।
मनागपि ततोऽन्यत्वे देवतेति न गम्यते ॥

इतिस्तुतशस्त्राधिकरणवार्त्तिके व्याख्यातमितीतिकरणे
सूचितम् । एवं तर्हि यो ऽष्टाकपालस्तयान्यत्राग्नेयो विहितः स पौर्ण
मास्यां भवतीत्यन्यतः सिद्धं देवताया द्रव्यान्वयमनूद्य कर्मान्वय
मात्रविधानादवाक्यभेदो भविष्यतीत्याशङ्क्य कर्मविधिं विना न क
चिद्वाक्यभेदपरिहारः सम्भवतीति दर्शयितुमाह * अनेनैवेति *

नियोगेन विकल्पेन द्वे वा सह समुच्चिते ।
सम्बन्धः समुदायो वा विशिष्टावेकयेतरे ॥

इत्यनेन न्यायेन बहुप्रकारावचनव्यक्तीराशङ्क्य देव
तानुपलक्षितद्रव्यमात्रविधौ द्रव्यानुपलक्षितदेवतामात्रविधौ वा
न्यतरपदानर्थक्यापत्तेर्यथा देवतोपलक्षितद्रव्यस्यैव विद्वद्वाक्य
विहितकर्मान्वयविधौ विधिं विना देवतानवगतेरुपलक्ष
णार्थत्वेनोपच्चरितस्याग्नेयशब्दस्याविधित्वकल्पने सकृदुच्चरितवि
ध्यनुवादत्वायोगेनोच्चारणावृत्तिलक्षणो वाक्यभेदस्तथा द्रव्योपल
क्षिताया देवताया एव विधौ द्रव्यस्यापि विधिं विना कर्मान्वया
सिद्धेरुपलक्षणार्थस्याष्टाकपालशब्दस्य विधित्वकल्पने ऽपि द्रव्यं
वा देवता वा विधीयतइत्यस्मिन्पक्षे विकल्पेनान्यतरस्योपलक्षणार्थ-
स्य विधित्वकल्पनवाक्यभेदः । द्रव्यं देवता चेति समुच्चयपक्षे स्पष्टो
वाक्यभेदः द्रव्यदेवतासम्बन्धसमुदाययोर्विधौ सम्बन्धो हि विधी-
यमानः सम्बन्धिनं तावदाक्षिपेद्धात्वर्थे पुनः स विधातव्य एवं
सम्बन्धी अन्यथासम्बन्धस्यैव सम्बन्धी शेषः स्यान्न क्रियाया इत्या-
धाराग्निहोत्राधिकरणवक्ष्यमाणन्यायेन द्रव्यदेवतयोरपि विध्यापत्ते-
र्वाक्यभेदः अन्यतरविशिष्टान्यतरविधावपि द्रव्यदेवतयोर्भिन्नकार-

त्कारकयोश्चान्योन्यविशेषणविशेष्यभावाभावेनैककारकविशि-
रकान्तरविध्ययोगादेकस्वरूपविशिष्टान्तरस्वरूपविध्यभ्युपगमे
योन्यविशेषणत्वप्रसङ्गाद्धात्वर्थे पुनः स विधातव्य सम्बन्धी-
र न्यायेन क्रियाङ्गत्वासिद्ध्यर्थं विशेषणस्यापि विध्यापत्तेर्वाक्य-
प्रपञ्चयितव्य इत्यर्थः।एते पक्षाः पुनर्योज्या व्यतिकीर्णाः परस्पर-
न्यायेन वचनव्यक्त्यानन्त्याद्वाक्यभेदानन्त्याभिधानं पौर्णमासी-
स्योपलक्षणार्थत्वेनामवास्याया अनुवादेनापि द्रव्यदेवताविधा-
निरस्तत्वात्किं तद्वाग्नेयादिवाक्ये विधीयतइत्याशङ्कायां तस्मादि-
भाष्यं व्याचष्टे * तेनेति * विद्वद्वाक्यविहितएव कर्मणि द्र-
वतासम्बन्धो विधीयतामित्याशङ्कानिरासार्थं स एष इति भाष्यं
ष्टे * न चेति * यजतिस्तु द्रव्यफलभोक्तृसंयोगादिनेव न्या-
योगं विना द्रव्यदेवतान्वयायोगाद्यागापेक्षायां वाक्यान्तरप्राप्ते
द्रव्यदेवतान्वयविधौ सम्बन्धो विधीयमान इत्याघाराग्निहो-
करणवार्त्तिकोक्तन्यायेन द्रव्यदेवतयोरपि विध्यापत्तेर्वाक्य-
सङ्गादस्मिन्नेव वाक्ये द्रव्यदेवताविशिष्टयागविधानात्स एव
भवतीत्यपरोक्षवाचिनैषशब्देन वाक्यान्तरविहितात्परोक्षा-
द्भेदः सूचित इत्याशयः।एवं तर्ह्याग्नेयादिवाक्यविहितं यागा-
व विद्वद्वाक्यविहितयोर्यागयोः पौर्णमास्यमावास्याशब्दोक्त-
त्वेन विधीयमानं रूपं भविष्यतीत्याशङ्कानिरासार्थं तेनेत्या-
ष्यं व्याचष्टे * कर्मान्तरत्वे चेति * आग्नेयादिवाक्यस्थयोः पौ- ४८
स्यमावास्याशब्दयोः श्रुत्या कालार्थत्वप्रतीतेर्लक्षणाहेत्वभा-
युक्तमप्याग्नेयादिवाक्यविहितानां यागानां विद्वद्वाक्यविहि-
ताङ्गत्वं प्रौढ्याभ्युपेत्य यागस्य यागान्तरव्यवच्छिन्नरूपयागप्र-
कत्वायोगात् रूपत्वाभावो भाष्यकृतोक्त इत्यवयवव्याख्यया
तं श्रुत इति सिद्धान्तोपसंहारभाष्यं व्याचष्टे * इतीति *
क्षसूत्रस्थश्रुतिसंयोगशब्दव्याख्यानार्थं तथा न लक्षणाशब्दो
यतीति भाष्येणार्थादुक्तं विद्वद्वाक्यस्थयोः । पौर्णमास्यमावा-
ब्दयोराग्नेयादियागसमुदायपरत्वे लाक्षणिकं दोषं यत्त्विति-
णानुभाष्य तत्परिहारार्थं नैष इति भाष्यं व्याचष्टे * अष्टश्चे-
ः एकवचनान्वयाय समुदायलक्षणा श्रुत्यर्थान्वयायोगादग-
यणीयेत्यर्थः । कालवाचिभ्यां पौर्णमास्यमावास्याशब्दाभ्यां
ऽक्षणा त्वत्पक्षे ऽपि तुल्येति सूचनायादिशब्दः। यत्तु स्वयं श्रु-
दव्याख्यार्थं प्रत्यक्षश्रुतश्च यजिनं द्रव्यदेवतासम्बन्धाक्लेशेना-
व्यो भविष्यतीत्युक्तम् तत्परिहरति * किं चेति * भावनैकविषय-

त्वाद्विधेर्द्रव्यदेवतान्वयं विदधताग्नेयादिवाक्ये तत्तदवच्छिन्नाय
वनाया एव विधेयत्वाद्व्यापारस्य च व्यापारान्वयं विना भावनाव
द्कत्वायोगादपुंव्यापारत्वेन च भवत्युक्तस्य व्यापारस्य पुम्प्रयत्न
पर्यायभावनावच्छेदकत्वायोगाद्भवत्युक्तक्रियातो ऽन्यक्रियायोग
वे वाक्यासमाप्तेरसमाप्तस्य चार्थाभावेनार्थद्वारवाक्यान्तरान्व
शान्न वाक्यान्तरे प्रत्यक्षश्रुतो ऽपि च यजिराग्नेयादिवाक्ये ऽन्वी
त्यर्थः। श्लोकं व्याचष्टे*अष्टाकपाल इति*यत्तु स्वयं पूर्वपक्षसूत्र
णशब्दव्याख्यानार्थं समुदायानुवादत्वाच्चः विधित्वं गुणवत्तरमि
तत्परिहर्तुमाह * अनुमिते चेति * प्रकृतप्रत्यभिज्ञानाद्यच्छब्द
न्धेन वानुवादसरूपत्वादनुवादतैवेह गुणवत्तरेत्याशयः । ननु
त्यपि यच्छब्दोपबन्धे यदाग्नेयो ऽष्टाकपाल इत्यादिवद्विधिशक्त
ङ्क्याह * क्रियेति * न वलोप इत्यत्र यच्छब्दस्य विधिशक्तिः
बन्धकनिरासात्कथं विद्वद्वाक्ययोरनुवादसरूपता यादृशी क्रिय
कुर्यादिति क्रियारूपानुवादे ऽपि कर्त्तव्यत्वाननुवादत्वेन क्रियास
नाधिकरणस्य यच्छब्दस्य विधिशक्त्यप्रतिबन्धकत्वे ऽपि कर्तृस
नाधिकरणं कर्त्तव्यत्वानुवादित्वाद्विधिशक्तिं प्रतिबध्नातीत्याशय
वृद्धवाक्येनैतदेव द्रढयति * तथा चेति * रुजेर्नाशापरपर्या
ङ्क्वाचित्वान्न नाशयेदित्यर्थः ।

व्यपदेशश्च तद्वत् ॥ ७ ॥

भाष्यकारीयव्यपदेशशब्दस्य पौर्वापर्यविषयतया व्याख
द्वितीयपूर्वपक्षनिरासार्थं सम्भवविषयत्वोपलक्षणार्थश्चेत्याह *
ष्टिरिति * यद्येको यागो ऽमावास्यायामिति विग्रहेण द्वितीयपूर्व
निरासार्थतोक्ता संहत्य युगपद्भावो धारणं निष्पादनं पौर्वापर्यं
द्वन्द्वैकवद्भावः। यागैक्ये ऽपि हविर्भेदादुभयोपपत्तिमाशङ्क्य *
साय्येत्युक्तम्* यागैक्ये सत्याग्नेयस्यैन्द्रस्य सान्नाय्यस्य दध्नः पय
वा विकल्पः स्यादित्यर्थः। व्यतिरेकमुखेन श्लोकं व्याचष्टे *कर्मो
आद्यपूर्वपक्षे पौर्वापर्यविवक्षायां देवतान्वयाविवक्षयेन्द्रत्वविशे
णाविवक्षां मत्वा व्याख्याविभवार्थं स्वयमुत्तरइति द्विवचनावि
त्वेन व्यपदेशशब्दं व्याचष्टे*प्रथमेति*पूर्वपक्षद्वये ऽपि सर्वेषां स
प्राधान्येनाग्नेयादेः प्राधान्यलक्षणसाधकतमत्वरूपतैक्ष्ण्यशब्दवाच
ग्रत्वाभावादुग्रत्वविषयतयापि व्यपदेशव्याख्यानं च शब्दात्सूचित

लिङ्गदर्शनाच्च ॥ ८ ॥

:।२

पूर्वपक्षद्वये ऽपि श्रुत्यर्थाभ्यां लिङ्गानुपपत्तिमाह कर्मान्तरेति * पञ्च प्रयाजा द्वावाज्यभागौ स्विष्टकृ-
ो ऽनुयाजा इत्याहवनीये यजिचोदिताङ्गाहुतीनामेकादशसंख्य-
द्विवद्वाक्ययोः कर्मान्तरविधित्वपक्षे पौर्णमास्यां प्रधानाहु-
चतुष्ट्वात्पञ्चदशसंख्यापत्तेरमावास्यायां या च प्रधानाहुतित्रि-
च्चतुर्दशसंख्यापत्तेराधिक्यात्तयोरेव कर्मविधित्वपक्षे प्रधानाहु-
त्येनोभयत्र द्वादशसंख्यापत्तेर्न्यूनत्वाच्छ्रुतसंख्यानुपपत्तिरित्यर्थः
ऐक्यपक्षे न्यायेनाग्नेयादिवाक्यविहितानां प्रधानाहुतीनां वि-
त्पापत्तावपि दशभिः क्रीणातीतिवच्चतुर्दशत्रयोदशवचनपर्या-
चनया समुच्चयावगमाद्याज्यानुवाक्याक्रमाच्चाहुतिपौर्वापर्यो-
त्तेर्लिङ्गव्यपदेशोपपत्तिमाशङ्क्य सिद्धान्तपक्षेणानुवादतयाप्युप-
ास्य चतुर्दशत्रयोदशवचनस्य विधित्वकल्पनायोगाद्विधित्वे च
ान्याहुतीनामेवैतत्संख्यत्वापत्तेरभ्यासलक्षणापत्तेश्च नैतत्समर्थनं
कमिति अनुवादशब्देन सूचितम् । ननु सिद्धान्ते ऽप्यसोमयाजिनः
र्णमास्याम् अग्नीषोमीयाभावादमावास्यायां च सान्नाय्याभावाल्लि-
नुपपत्तिरित्याशयेन पृष्टोत्तरमाह * कुत इति * सोमयाजिवि-
त्वात्पौर्णमास्याममावास्यायां तु सोमयाजिनः सान्नाय्यद्वयस्य
प्रतिपन्नदेवतात्वेनैकाहुतित्वादसोमयाजिनो ऽप्यैन्द्राग्नस्य पुरो-
ाशस्य सान्नाय्यद्वयस्थाने विधानेनैककर्म्यादेवैकाहुतित्वावगतेः सदा
ानाहुतिद्वित्वाल्लिङ्गोपपत्तिरित्याशयः । अधिकरणार्थमुपसंह-
ते * तस्मादिति * सुखग्रहणार्थं वृद्धानामधिकरणार्थसंग्रह-
ोकं पठति * आहेति *

उपांशुयाजापूर्वताधिकरणम् ॥ ४ ॥

पौर्णमासीवदुपांशुयाजः स्यात् ॥ ९ ॥

ननु सापवादाभ्यासचिन्तायाः समाप्तत्वात्संख्यादिनिमित्ते
र्मभेद चिन्त्ये मध्ये चिन्तान्तराण्यसङ्गतानीत्याशङ्क्य साधारणीं
ङ्गतिमाह * इदानीमिति * उपांशुयाजाघाराग्निहोत्रपशुसोम-
क्यानां वाक्यान्तरविहितसमुदायानुवादत्वे सत्युपांशुयाजा-
कर्मभेदो विधित्वे त्वभेद इति भेदाभेदफलत्वाल्लक्षणस-
तेः सूचिता अधिकरणत्रयमध्ये ऽप्यस्य प्राथम्यसिद्धौ वैशेषि-
सङ्गतिसूचनपूर्वकं सूत्रं व्याचक्षाणः पूर्वपक्षमाह * तत्रेति *
णवादिवाक्यैर्यागविधावुपांशुयाजत्रयापत्त्या पौर्णमास्यां षोड-
ाहुत्यापत्तेर्लिङ्गदर्शनाक्षेपेण पूर्वपक्षोत्थानादुपांशुयाजचिन्ताया

धेरपिक्रयनन्तरसङ्गतिस्तावच्छब्देन सूचिता विष्णवादिवाक्ये धेयत्वयोग्यस्वप्रधानभूतयागाश्रुतेः प्रकृतयागाभावात्पौर्णमासं चायोगं कुत इति भाष्येणाशङ्क्य नामसम्बन्धादित्यादिन ङ्गावोपपादनं कृतं तत्रोपांशुयाजशब्दस्य नामधेयतायाः स्थान त्वात्संज्ञावच्छेदनिमित्तमुपेक्ष्यारूपत्वप्रकृतयागसद्भावनिमित्तं ङ्गावं व्याचष्टे * कुत इति * श्लोकं व्याचष्टे * एतेषु तावदिति व्यस्य विधिवाचित्वादुपसर्जनत्वेनापि निर्दिष्टस्य यागस्य कृष्य विधेयत्वोपपत्तिसूचनार्थं तव्येत्युक्तम्।यजतीत्यस्य वर्त्त पदेशत्वान्नैकान्तिकविधितेति तावच्छब्देन सूचितम्। विष्णवा क्यानां विधित्वाभावे ऽप्यन्तरालवाक्ये रूपाज्ञानसाम्यात्त केवलं रूपाज्ञानं किं त्वदृष्टान्तरकल्पनं च प्राप्तमिति योज्यम् त्तरीयकशाखायामुपांशुयाजमन्तरा यजत्यजामित्वायेत्यन्तरा क्ये ऽप्यजामिकरणार्थवाददर्शनाद्भाष्यकृतोपेक्षितमपि हेत्व मुदाहृते वाक्ये तादृगर्थवादादर्शनात्स्वयमाह * किं चेति * विष्ण दिवाक्येषु प्रत्येकमजामिकरणावगतेस्तदेकविषयत्वेन जामिदं स्तेरपि विष्णवादिवाक्यविषयस्तुत्यर्थत्वावगमात्तस्याश्चोपक्र त्वात्तदनुरोधेनोपसंहारस्थास्यापांशुत्वविशिष्टयागविधेरपि वि दिवाक्यप्रतिपाद्यनावसीयत इत्याशयः । जामिदोषोपक्रममुपन्न नमित्यर्थः । सहार्थतृतीययोक्तः श्लोकं व्याचष्टे * यथोपक्र ति * जाम्युपन्यासाजामित्वयोरेकविषयत्वेनाजामित्वस्य वि दिवाक्योक्तयागविषयत्वाज्जामित्वस्याप्युपक्रमस्थस्य सन्दि वाक्यशेषादित्यनेन न्यायेन तद्विषयत्वावगतेरुपसंहारस्थस्य रुपक्रमानुसारित्वस्य न्याय्यत्वादिति विष्णवादियुक्ता एव इत्यर्थः । जामिदोषेण सहोपन्यसनमिति योजनसूचनायोपन्यास ब्दः । समुदायानुवादव्यवहितस्यापि जामित्वस्यानुवादेन स्तुते पक्षितत्वेनासम्बन्धाद् ।

यस्य येनार्थसम्बन्धो दूरस्थस्यापि तेन सः ।
अर्थतो ह्यसमर्थानामानर्थक्यमकारणम् ॥

इत्यनेन न्यायेनापेक्षावशाद्भिन्नवाक्यान्वयो ऽनेकैरपि नैरन्तर्येणान्वयो न विरुद्ध इत्याशयः । यागत्रयस्योपांशुत्वाद्येकधर्म गात्समुदायाकरणे शक्ये ऽप्यनुवादानर्थक्यमाशङ्क्याह * समु

१२ र्थेन * अन्यथा कालवाक्ये ऽग्नीषोमकीर्त्तनात्तद्देवत्यस्योपांशुया कालान्वयं सति विरुद्धवाक्यस्थेन पौर्णमासीशब्देनानुवादात्फल क्यस्थेन पूर्णमासशब्देन फलान्वयात्प्राधान्यावगतेर्वैष्णवप्राजाप

रङ्गत्वं स्यादित्याशयः । नन्वित्याशङ्काभाष्यमाक्षिपति * नन्विति * माधत्ते * नैष इति * नैवं जातीयक इति परिहारभाष्यमवतार-
र् व्याचष्टे * अत इति * नाम्नो ऽप्युपांशुत्वगुणकयागत्वानिमि-
त्वादकृतकत्वस्य तद्वाचकत्वापत्तेः पक्षद्वयसाम्येनादोषत्वशङ्का-
रासार्थमव्युत्पन्नास्त्विति भाष्यं व्याचष्टे * व्युत्पन्नेति * नन्वि-
शङ्काभाष्याशयं व्याचष्टे * नन्विति * माभूदिति परिहारभा-
शयमवतारणापूर्वं व्याचष्टे * तदिति *

चोदना वा प्रकृतत्वात् ॥ १० ॥

सूत्रं व्याचष्टे * कर्मेति * विष्णवादिसंयुक्तानां भिन्नवा-
त्वाभावे ऽप्यवान्तरपदसङ्घविषयो वाक्यशब्दः विष्णवादिवा-
नामविधायकत्वं न हीत्यादि भिद्येत वाक्यमित्यन्तभाष्योक्त्या
त्योपपादयति * यथेति * तथात्रापि न पृथग्विधित्वप्रतिप-
रित्यध्याहारेण नानेकादृष्टकल्पनानुबन्धिविध्यभ्युपगमो युक्त
ते व्यवहितान्वयेन वा पूरणीयम् । ननु वैश्वानरं द्वादशकपालं
र्वपेदित्युपक्रान्ताया वैश्वानरेष्टेर्यस्मिन्जातएतामिष्टिं निर्वपतीत्यु-
संहारेणैकवाक्यत्वावगमाद् दृष्टत्वादियुक्तानां शब्दानां पृथग्विधि-
योगो ऽप्यत्र जामित्वोपक्रमादजामित्वोपसंहाराच्चैकवाक्य-
नवगतेर्न तत्तुल्यतेत्याशङ्क्यैकं हीदं वाक्यमिति भाष्योपपादित-
कवाक्यत्वं प्रपञ्चयितुम् * जामि वा इत्युक्तम् * सोदर्यवाचि-
मिशब्दलक्षितस्य सादृश्यस्य नैरन्तर्यानुष्ठाने सत्यालस्यापादकत्वे-
दोषत्वात्तत्कीर्तनस्य च निषेधाश्रुतेर्निन्दापर्यवसायित्वायोगादा-
ङ्क्षावशेनाजामित्वकरकर्मस्तुत्यर्थत्वावगमाज्जामित्वोपन्यासयो-
कवाक्यतावसीयत इत्याशयः । ननु जामित्वाजामित्वोपन्यास-
रेकवाक्यत्वावसाये ऽप्यजामित्वस्य विष्णवादिवाक्योक्तयागविष-
त्वात्तदेकवाक्यतया जामित्वस्यापि तद्विषयत्वावगतेस्तस्य चोपक्र-
स्थत्वात्तदनुसारेणोपसंहारस्थस्य विधेरपि तद्विषयतावसीयत इ-
शङ्क्य कः पुनरित्यादिभाष्योक्तार्थवादस्यान्तरालवाक्योक्तयाग-
षयत्वाद्विधेरपि तद्विषयत्वमुपपादयितुम् *जामिता चेत्युक्तम् * ५
श्रम्यन्तवैश्वानरवाक्यवदत्रापि वाक्ये विध्यैक्यावसायान्न पृथक्
धितेत्यध्याहारेण नानेकेति व्यवहितान्वयेन वा पूरणीयम् । नन्वेव-
पि विष्णवादिवाक्येषु लव्यप्रत्ययेनैकान्तिकविधित्वावगमात्पृथ-
विधित्वापत्तिरित्याशङ्क्य तस्मिन्क्रियमाणइति भाष्योक्तं विधि-
त्वादरमुपपादयितुम् * विष्णवादीत्युक्तम् * न हीत्यनेन विधि-

त्वानपेक्षोपपादिता विष्णवादियुक्तगतस्याजामित्वस्य जामितया
सति विष्णवादियुक्तविधेस्तथान्वयः स्यान्न त्वजामित्वस्य विष्णवा
क्तगतत्वं सम्भवति विष्णवादियुक्तानामन्तरालसंयोगाभावेन
त्यनर्हत्वादित्याशयः । नन्वन्तरालयुक्तस्याप्यजामित्वान्वयाः
विधानार्हतास्तीत्याशङ्क्य तत्र व्यवधानादिति भाष्योक्तमन्तरा
योगेनैवाजामित्वान्वयावगमाज्जाम्युपक्रमेण वाक्येन विधाना
विवरीतुम् * अन्तरालेत्युक्तम् * विष्णवादिवाक्यानां यागावि
यकत्वमेवापि चेति भाष्योक्तेन युक्त्यन्तरेणोपपादयति *
चेति * विष्णवादिवाक्यैर्यागविधौ सति विष्णवादिदेवताया य
न्वये श्रुतेन विधिना कृते यागो ऽर्थाद्देवतां प्रत्युपसर्जनभूतो
धेयः स्यात्तच्चान्तरालवाक्येन श्रुते चकारात्स्वप्रधानभूते
विधेये सम्भवत्ययुक्तमित्यर्थः। अनेन चार्थाक्षेपाधीनत्वेनोपसर्जं
तस्य देवतासंस्कारकत्वापत्तेरविनियुक्तायाश्च देवतायाः संस्क
त्वायोगाद्देवताविधिसापेक्षत्वेन यागविधेर्विप्रकृष्टत्वमभिप्रेत्य भ
धाक्यशब्दः प्रयुक्त इति सूचितम्। श्लोकं व्याचष्टे *कर्मोत्पन्नः
याग उपसर्जनं विष्णवादिः प्रधानं यस्मिन्निति बहुव्रीहिं वि
यागोपसर्जनश्चासौ विष्णवादिप्रधानश्चेति कर्मधारयो विग्र
प्रत्यक्षस्य प्रधानस्य च यागस्य कर्त्तव्यत्वोपदेशोपपत्तेरित्यर्थः।
सत्यपि विधित्वे देवताविध्यापत्तेर्यागविधित्वं नास्तीत्याह *
ति * देवताविधितैव तर्ह्यस्तु इत्याशङ्क्याह * न चेति * दे
न्वयानभिधायित्वात्तव्यप्रत्ययानां देवताविधायित्वासम्भवे ऽभि
चतुर्थ्या देवतात्वानभिधायित्वे ऽपि यथा देवताविधायित्वं तथा
व्यस्यापि भविष्यतीत्याशङ्क्य * सम्प्रदानमित्युक्तम् * त्यज्यम
द्रव्योद्देश्यत्वप्रतिग्रहीतृत्वसमुदायात्मकसम्प्रदानत्ववाचिनी च
लक्षणया वाच्यैकदेशत्यज्यमानद्रव्योद्देश्यत्वात्मकं देवतात्वं व
त्याशयः। ननु कर्मत्ववाचिन्यापि द्वितीयया विष्णुं यजतीत
देवताविधिदर्शनात्तद्वाचिनस्तव्यप्रत्ययस्यापि देवताविधायित्वं
स्मान्न स्यादित्याशङ्क्याह*तत्रेति*तव्यस्य द्वितीयावत्प्रधानभूतक
नभिधायित्वात्तुल्यार्थतैव तावत् क्लेशलभ्या न च तल्लाभमा
वतासिद्धिः देवतायाः कर्मत्वाभावादित्याशयः। कथं तर्हि दे
यास्तव्यद्वितीयाभ्यां निर्देश इत्याशङ्क्य निर्देशालम्बनमाह *
णार्थत्वाद्वेति * देवतोद्देशद्रव्यत्यागसमुदायवाचित्वाद्यजेस्ता
स्य च कर्माभावाद् द्रव्यस्यापि पारमार्थिककर्मत्वाभावे ऽपि दे
धच्छब्दमात्रोपकारित्वशङ्कानिवृत्तये ऽर्थरूपोपकारित्वप्रदर्शनार्थं

ार्थशब्दः । उद्देशविशिष्टत्यागवाचिनो ऽपि यजेर्विशेषणांशाना-
गा विशेष्यांशविवक्षया त्यागार्थत्वमभिप्रेत्य कर्म भवतीति ल्प-
ोपे पञ्चमी । नन्वेवं सति देवतायाः कथं कर्मतेत्याशङ्क्य देवतो-
ेन द्रव्यत्यागोत्तरकालं देवतामुद्दिश्य त्यज्यमानेन द्रव्येण देव-
ाः प्रतिग्रहीतृत्वाभावे ऽपि प्रतिश्रवणेनेवाप्रतिगृह्णतो ऽपि
ाणस्य स्वाम्यापादनेनाप्यमानत्वात्तप्ते पयसि दध्यानयतीत्यत्रा-
तिकर्मणा दध्नेव व्याप्यमानस्य पयसो * द्वितीयकर्मत्वं भ-
ेत्युक्तम् * ननु देवताया द्रव्येणाप्यमानत्वस्य दध्नेव पयसः
कार्यत्वमात्रविवक्षायां द्विकर्मकलक्षणो धातुः प्रसज्येत गवेव
ाह्मणस्य स्वाम्यविवक्षायां सम्प्रदानत्वापत्तेश्चतुर्थी स्यादित्या-
ङ्क्य * तत्रेत्युक्तम् * प्रक्रमात्तु नियम्येतारम्भस्य क्रियानिमित्त- ४८
ादित्यत्र षष्ठाधिकरणसूत्रे प्रक्रान्तं कर्म वीतायामपि फलेच्छायां
ते वा फले ऽवश्यं समापनीयमित्येतदुपपादनार्थं भाष्यकृतोप-
ादारभ्य समाप्तिपर्यन्तस्य व्यापारसमूहस्याख्यातेन विधित्सित-
ात् श्रुत्या ह्यारम्भसमाप्त्योर्विधौ गौरवापत्तेरारम्भमात्रविधौ
नियोगतः समाप्त्यसिद्धेर्यागादि समापयेदिति शास्त्रार्थ इति
यमारम्भसमाप्तिशब्दार्थः । किं तर्हि समाप्तिरेव समाप्त्या व्यर्थ-
ात्वादारम्भस्य तस्मात्परिसमाप्तिः शब्दार्थ इति भाष्येण वक्ष्य-
ाणत्वाद्देवतास्वाम्यापत्तेश्च देवतोद्देशविशिष्टद्रव्यत्यागोत्तरकाल-
ेन समाप्तित्वात्तत्कर्ममात्राविर्भावेनैककर्मत्वावधारणात् द्विकर्म-
धात्वप्रसक्तेर्देवतायाश्च प्रतिग्रहीतृत्वाभावेन सम्प्रदानत्वाभावा-
तुर्थ्यप्रसक्तेस्तव्यद्वितीयोपपत्तिरित्यर्थः । न तु त्यज्यमानद्रव्याप्य-
ानस्य तव्यद्वितीयावाच्यत्वे तल्लक्षणत्वाद्देवतात्वमेव वाच्यं स्या-
त्याशङ्क्याह * नत्विति * त्यज्यमानद्रव्योद्देशकर्मत्वं देवतात्वं
ोद्देशांशस्य विशेषणत्वेन द्वितीयानन्वयान्न द्वितीययोच्यते देव
ेस्त्वाहवनीयप्राप्तेर्जुहोत्यर्थत्ववत् यज्यर्थत्वाभावान्नान्तरीयक-
द्धावपि अशास्त्रीयत्वेन तत्कर्मत्वलक्षणमाप्यमानत्वं न देवता-
ामित्याशयः । कथं तर्हि द्वितीयानिर्देशे देवतात्वसिद्धिरित्याश-
ाह * किं तर्हीति * देवतामुद्दिश्य त्यज्यमानेन द्रव्येणाप्यमान-
लक्षणस्य कर्मत्वस्य त्यज्यमानद्रव्योद्देश्यत्वलक्षणाद्देवतात्वाद्वि-
ानुपपत्तेस्तन्निमित्तया लक्षणया गम्यमानत्वाद्द्वितीयानिर्देशे देवता-
ानिश्चय इत्यर्थः । यजदेवपूजासङ्गतिकरणदानेष्विति स्मृतिबलेन
जाकर्मत्वलक्षणं देवतात्वं द्वितीयावाच्यमित्याशङ्क्ते * नन्विति *
ाकरणस्यार्थान्वाख्यानार्थत्वाभावेनार्थवत्त्वे प्रामाण्याभावात्पुरा-

णादौ च यज्ञानाधिकारिणो भीष्मादेर्यष्टृत्वकीर्त्तनालम्बनानि पू
प्रतिष्ठादानानि दर्शयितुमौपचारिकार्थान्वाख्यानोपपत्तेर्यजेः पू
वाचित्वाभावान्न तत्कर्मत्वं देवतात्वमित्याशयेन परिहरति *
इति * एतदेव प्रश्नपूर्वकमुपपादयति*कुत इति*श्लोकं व्याच
न हीति*अपि वा शब्दपूर्वत्वाद्यज्ञकर्मप्रधानं स्याद् गुणत्वे देवत
तिरित्यत्र नवमाधिकरणसूत्रे विग्रहाद्यभावेन रूपासमवायादेव
याः पूज्यत्वं निरस्यातिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्तस्य प्री
विधानत्वादिति दृष्टान्तवैषम्याभिधानार्थे सूत्रे विग्रहादिसद्भावे
यजेः पूजावाचित्वाभावाद्यागकर्मणि देवताप्राधान्याभाव इति म
भावयवेन देवताप्राधान्यस्य निषेत्स्यमानत्वं न चातिथिवदिति चव
सूचितम् । न च यजिरित्यनेन व्याख्यातं किं च पूजयतोःप्रीत्युत्पाद
चित्वादुत्पादनस्य च करोत्यर्थत्वेन नित्यं सकर्मकत्वात्पूज्यस्य त
र्मत्वे सत्यपि स्वास्थ्यकामः शयीतेत्यादौ प्रत्ययार्थकर्मणि स्वास्थ
दावदर्शनेन द्वितीयाया धात्वर्थकर्मविषयत्वावसायाद्दानादिना च
ज्यस्य धात्वर्थकर्मत्वदर्शनाद्यागेन देवतायाः पूज्यत्वे ऽपि यागव
त्वाभावान्न द्वितीयावाच्यतास्तीत्याशयेनाह *दानेन चेति * नन
सत्युपाध्यायवद्देवतायाः पूज्यत्वेन यज्यर्थत्यागकर्मणा त्याज्येन
न्धेयणाभिप्रेयमाणत्वात्सम्प्रदानत्वमेव देवतात्वं स्यादित्याशयेन
ङ्कते * एवं तर्हीति * मुख्यं वा संप्रदानत्वमापद्यते गौणं वा
मुख्यं तावन्न सम्भवतीत्याह * नेति * तादृशशब्देनोपाध्याय
न्मुख्यतोक्ता । नन्वप्रतिग्रहीतृत्वान्मुख्यसम्प्रदानत्वाभावेन सम
दानत्वनिर्देशाभावे सति मुख्यकर्मत्वाभावे सति मुख्यकर्मत्वाभ
कर्मत्वनिर्देशस्याप्यभावापत्तेर्विष्णुं यजतीत्यादिकर्मत्वनिर्देशान
ख्यकर्मतैव देवतायाः प्रतीयतइत्याशङ्क्य मुख्यसम्प्रदानत्वाभ
ऽपि सम्प्रदानत्वनिर्देशवन्मुख्यकर्मत्वाभावे ऽपि कर्मत्वनिर्देशोप
त्तिप्रदर्शनार्थं गौणसम्प्रदात्वनिर्देशमुदाहरति * अपि चेति *
चित्शब्देन गौणत्वं सूचितम् । एवमौपचारिकपूज्यत्वाभ्युपगमे
गौणे कर्मत्वे सम्प्रदानत्वे वा सत्यपि देवतात्वं नास्तीत्युक्तंदा
देवतायाः पूज्यत्वाभावात्तन्निमित्तं कर्मत्वं सम्प्रदानत्वं वा गौण
पि नास्तीत्याह * सर्वथेति * न मुख्यवृत्त्या नापि गौणवृत्त्येति स
र्वथाशब्देन सूचितम् । कथं तर्हि विष्णुं यजति सोमाय यजतइत्या
द्वितीयाचतुर्थीनिर्देशः इत्याशङ्क्यैतदालम्बनं वक्तुम् * आहास
धारणेन त्विति * पूजायाः प्रीत्युत्पादनात्मकत्वेन करोत्यर्थत्वाद्य
जिपरप्रत्ययार्थत्वे सत्योदनस्येव पाके देवतायाः पूजाख्ये प्रत्यय

येऽसिततमत्वलक्षणकर्मत्वोपपत्तेर्विषयस्यैव वा भक्षणे गौ-
ऽसतत्वलक्षणकर्मत्वोपपत्तेरप्रतिग्रहीतृत्वे ऽपि च यच्चान्यस्मै
तामित्यत्राप्रतिग्रहीतुरिव पूजाकर्मत्वाद्यागे गौणसम्प्रदानत्वो-
त्तद्व्यावृत्त्यर्थः केवलशब्दः । यजिपरस्य प्रत्ययस्य ददातिपरप्र-
त्पूज्यवाचित्वाभावाद्यागमात्रविषयं देवतायाः कर्मत्वं सम्प्र-
त्रं वा स्यात्तच्च कर्मान्तरसम्प्रदानान्तरव्यावृत्तेनैव रूपेण भव-
शयः । देवतायाः कर्मान्तरसम्प्रदानान्तरविलक्षणकर्मत्वं स-
नत्वाभ्युपगमे हेतुमाह * तच्चेति * तत्कर्मत्वं सम्प्रदानत्वं
यदेवं भूतमन्येभ्यो विलक्षणं कल्प्यते तद्देवतायाः का-
गावगमात्कर्तृकरणापादानाधिकरणकर्मसम्प्रदानातिरिक्तस्य
कस्याभावाद्देवतायाश्च कर्मसम्प्रदानातिरिक्तकारकत्वस्य क-
चिदप्ययोगात्पारिशेष्यात्कर्मत्वस्य सम्प्रदानत्वस्य वाव-
कर्मान्तरसम्प्रदानान्तरतुल्यस्य च तस्यायोगादित्य-
। कथं देवताया कारकत्वावगतिरित्याशङ्क्याह * न हीति *
कत्वं विना क्रियान्वयायोगात्प्रातिपदिकवाच्येनाकारकरूपेण
न्वयं न प्रतिपद्यते देवतेति । सर्वथेयं देवतेति देवताशब्दानु-
र योऽयम् । देवतावाच्यग्न्यादिप्रातिपदिकपरो ऽत्रत्यो देवताश-
देवताशब्दवाच्येनापि रूपेण देवतायागान्वयं न प्रतिपद्यते किं-
ग्न्यादिशब्दवाच्येनेत्यतिशयद्योतनार्थः । देवतातद्धितविषयो वा
ताशब्दः तद्धितनिर्देशे ऽपि देवताया द्रव्यमात्रान्वयप्रतीतेर्या-
यार्थमग्निमनेन यजेताग्नये यजेतेति वा वचनव्यक्तिः क-
त्याशयः । कीदृक् विलक्षणं रूपं कर्मसम्प्रदानयोरित्यपेक्षिते
दानस्य तावत् त्याज्यद्रव्योद्देश्यत्वप्रतिग्रहीतृत्वसमुदायात्मक-
देकदेशोद्देश्यत्वमात्रेण त्यज्यमानद्रव्यस्यान्यत्राविनियोज्यत्व-
णदेवतास्वत्वापत्तेः देवतायाः प्रतिग्रहीतृत्वाभावे ऽपि तत्फलला-
यज्यमानद्रव्योद्देश्यत्वमात्रे सकलसम्प्रदानरूपकल्पनात्मकं वै-
ण्यमाह * तेनेति * येन कारणेनान्यसम्प्रदानतुल्यं देवतायाः
दानत्वं नास्ति तेन कारणेन देवतोद्देशद्रव्यत्यागात्मकस्य याग-
त्यागांशप्राधान्यविवक्षायां प्रतिग्रहाद्विनापि तत्फललाभात्सकल-
प्रदानत्वकल्पनेन चतुर्थीनिर्देश इत्यर्थः । उद्देश्यांशप्राधान्यविव-
यां तद्विशेषणभूते त्यागांशे आप्यमानत्वाध्यायेन सकलं यागं
कर्मत्वरूपं कर्मणो वैलक्षण्यमाह * यद्वेति * वचनव्यक्ति-
नैतदेव स्पष्टयति * तेनेति * देवतोद्देशेन द्रव्यत्यागाद्देवता- ५
स्यापत्तावपि तदापादनस्याविहितत्वद्योतनायैवशब्दः परस्व-

त्वापादनत्यागयोः प्राधान्याविवक्षायामपि पश्चाद्भावद्योतः
मुनौ । ननु देवताया रूपासमवायेन तदुद्देशस्याप्राधान्यात्
योक्तकर्मान्वयः सम्भवतीत्याशङ्क्य होत्रादेर्द्रव्यस्यास्वाम्याभ
कृत्वायोगेन त्यागशून्ये देवतोद्देशमात्रे होतर्यजेत्यादेर्याजि
त्प्राधान्यमुपपादयितुमाह * तथा चेति * नन्वेवं रूपयो
र्मसम्प्रदानयोर्विभक्तिवाच्यत्वात्तद्रूपस्य देवतात्वस्य विभक्तिः
न विरुद्धेत्याशङ्क्याह * तदेतदिति * अनेकवाच्यशक्तिकल्प
नानयोर्देवतामात्रविषययोर्वाच्यत्वकल्पना युक्तेत्याशयः । नन
लाक्षणिकत्वाविशेषात्सम्प्रदाननिर्देशवत्कर्मनिर्देशे ऽपि देवता
स्मान्नेष्यतइत्याशङ्क्याह * तत्रापीति * प्रतिग्रहीतृत्वाभावेः
स्तात्मकत्वाद् दूषितमपि सम्प्रदानत्वमुद्देशत्यागाव्यभिचारि
त्सम्बन्धिनो देवतात्वस्य प्रत्यासन्नं कर्मत्वं तूद्देशत्यागव्यति
क्रियान्तरेष्वपि सम्भवेन सव्यभिचारित्वाद्विप्रकृष्टं ततश्च व
न देवतात्वलक्षणा ऽत्यन्तक्लिष्टेत्याशयः । ननु कर्मत्ववद्देवतात्
पि सप्तदेवताः शंसतीत्यादौ क्रियान्तरेषु भावात्तु तन्मात्रेण व
स्य देवतात्वाद्विप्रकर्षः स्यादित्याशङ्क्याह * न हीति * तः
हविर्भोक्तृलक्षणं देवतात्वं सकलं यथा यजिमेव प्रति ननु ि
न्तरमपि प्रति न तथा सकलं कर्म यजिमेव प्रतिः
न्तरेष्वपि कस्य चित्कर्मणः सद्भावादित्यर्थः । स्तुतिभाक्त
त्वितरद्देवतात्वं न हविर्भोक्तृलक्षणमित्याशयः । ननु कर्मत्वसम्
नत्वयोर्देवतात्वाभावाद्द्वितीयाचतुर्थ्यौ देवतानभिधायित्वे को
स्तद्वाची शब्दः स्यादित्याशङ्क्याह * परमार्थतः पुनरिति * स
तिबलेनैतदेवोपपादयति * तथा चेति * क्रीतादितद्धितौ
यथा तृतीयया कारकविभक्त्या वदनं कृतं न तथा देवतातद्धित
धाविदमग्नये ऽनेनाग्निमिति वा कारकविभक्त्या वदनं कृतमित्य
भावे ऽनिष्टा श्लोकं व्याचष्टे * ये हीति * अनन्यशब्दवाच्यत्वोप
दनस्य तव्यप्रत्ययवाच्यत्वोपयोगमाह * ततश्चेति * देवतायास्
वाच्यत्वोपपादनस्य प्रकृतयागविधायित्वाभावोपयोगमाह
तत्रेति * न त्विति भाष्येणान्तरालवाक्ये ऽपि यागान्तरालाः
थविधिप्रतीतेर्यागस्य स्वरूपविधिक्लेशसाम्यमाशङ्क्य बाढमित्यनेः
पांशुत्वान्तरालान्वयस्यैव विधेयत्वाभिधानेनाशङ्काशयानतिक्रम
द्विधित्वाभिधानाच्चायुक्तत्वमाशङ्क्यैकग्रन्थेनाशङ्कापरिहाभाष्यद्व
तात्पर्यतो व्याचष्टे *अन्तरेति * विशिष्टार्थप्रतीतौ सम्बन्धस्य न
न्तरीयकत्वात्सम्बन्धशब्देन लक्षणया वैशिष्ट्याभिधानाद्विधित्वं

नानर्थक्यापत्तेरनन्यगतित्वस्य हेतुत्वेन विवक्षितत्वाच्छङ्कापरि-
र इत्याशयः । केन भाष्येणानन्यगतित्वं हेतुत्वेन विवक्षितमि-
।शङ्क्य नन्वन्तरालसम्बन्धस्यान्यत्प्रयोजनमिति भाष्येणेति सूच-
तुमाह * न हीति * उपांशु पौर्णमास्यां यजन्नित्यत्रैकीकृतानां
।लसम्बन्धे सति सर्वेषां प्राधान्यं स्यादित्यत्र समुदायानुवादार्थे-
तोक्तेत्याशङ्कते*ननु चेति * शिरो वा एतद्यज्ञस्य यदाग्नेयो हृदय-
पांशुयाजः पादावग्नीषोमीय इत्यन्यार्थदर्शनस्य प्राधान्यद्योतकत्वे-
व्याख्यायां पूर्वपक्षे ऽग्नीषोमीयोपांशुयाजव्यतिरिक्तयोर्वैष्णव-
जापत्योपांशुयाजयोरप्राधान्यापत्त्यभिधानेन समुदायानुवादानर्थे-
यस्य वक्ष्यमाणत्वान्न सर्वोपांशुयाजप्राधान्यज्ञापनेनार्थवत्तेति परि-
रति*तथेति*एवं तु व्याख्यायमाने यदीमे ऽपि विधीयेरन् भिद्यते
।क्यमित्यस्यानन्तरमेकं हीदमित्यादेर्विष्ण्वादिसम्बन्धो ऽनूद्यतइ-
।न्तस्य भाष्यस्यान्वयापत्तेरुपांशुत्वादिसम्बन्धइत्यस्यानन्तरं च न
।न्तरालसम्बन्धस्येत्यस्यान्वयापत्तेर्व्यवहितान्वयदोषभयान्नन्वित्य-
न विष्ण्वादिवाक्यविहितेषु यागेष्वन्तरालगुणविधानायान्तरालवा-
यमित्याशङ्क्योपांशुत्वस्यादिशब्दोपात्तस्य चान्तरालस्य प्राप्ते कर्मण्ये-
।न वाक्येन विधानाशक्तेश्चोदना वा गुणानां युगपद् शास्त्रादित्य-
।न न्यायेन विष्ण्वादिवाक्यैर्यागविधावप्यन्तरालवाक्येन कर्मान्त-
।विधानापत्तौ वाढमित्यनेनार्हतीत्यन्तेनोक्तायां विष्ण्वादिवाक्यप्रा-
।।नामुपांशुत्वस्यान्तरालवाक्ये ऽनुवादात्कथमनेकगुणविधानात्क-
।न्तरापत्तिरित्याशयेन कथमिति पृष्टे जामि वेत्यादिनानूद्यत इत्य-
तेन विष्ण्वादिवाक्यानां विधायकत्वायोगान्न तत्प्राप्तोपांशुत्वानु-
।ादः सम्भवतीत्युक्ते ऽनुपादेयान्तरालकालान्वयात्प्रकरणान्तरन्या-
।नापि कर्मविधित्वाभिधानार्थं नन्वन्तरालसम्बन्धस्येति भाष्यमिति
।थान्यासमेव भाष्यव्याख्यां सूचयितुमाह * किं चेति * नन्व-
नुपादेयान्वये ऽपि विष्ण्वादिवाक्यविहितयागविपरिवृत्तेः प्रकरणा-
न्तरन्यायो नास्तीत्याशङ्क्याह * तादृगिति * एतदेव व्याचष्टे
* यादृशी हीति * अस्मिंश्च व्याख्याने विष्ण्वादिवाक्यानां कर्म-
विधित्वे ऽप्यन्तरालवाक्यस्य गुणात्प्रकरणान्तराद्वा कर्मान्तरविधि-
त्वाभिधानाद्भाष्यस्थः कर्मान्तरशब्दः समञ्जस एवेत्याह * तत्रेति *
ननूद्देश्यत्वेन देवताया अपि कालवदनुपादेयत्वात्तदन्वये ऽपि क-
र्मान्तरापत्तेस्तस्मिन्नेवान्तरालविहिते यागे देवतां विदध्युरिति वा-
र्त्तिकमयुक्तं स्यादित्याशङ्क्याह * देवतायाः पुनरिति * अस्या
इदमिति द्रव्यत्यागसङ्कल्पविषयत्वलक्षणोद्देश्यत्वे ऽपि देवतायाः

कर्मकाले शब्दप्रतिपाद्यत्वेनापाद्यत्वलक्षणोपादेयत्वाच्च तद्
कर्मान्तरत्वापादक इत्याशयः । ननु कर्मान्तरशब्दस्य विष्णु
वाक्यानां कर्मविधित्वाभ्युपगमविषयत्वे प्रकृतानां यागाना
यादिति भाष्यमयुक्तं स्यादित्याशङ्क्याह * कर्मेति * व्याख्
ख्याने त्वाग्नेयाद्यपेक्षया कर्मान्तरशब्द इत्याह * अथ वेति *
मार्थतस्तु द्वितीये व्याख्याने विष्ण्वादिवाक्यानां विधित्वमपि
वेति दर्शयन्नुपसंहरति * तस्मादिति * प्रकरणान्तरन्याय
ऽप्यनुपादेयान्वयस्याकर्मविधित्वापादकत्वं दर्शयितुमाह * य
च्चेति * अनुपादेयाङ्गविधितोऽपि तदुद्देशेन कर्मैव विधेयमित्य
ननु कुत्वप्रसक्त्योपांशुयाजशब्दस्य गुणविधित्वायोगेनोपांशुत्व
विधेयत्वाच्चानेकगुणविधानेन कर्मविधित्वसिद्धिरित्याशङ्क्यां नि
र्तुं प्रसक्तिं तावत्करोति * स त्विति * गुणविधित्वपक्षे
प्रसक्तिं नैवं जातीयक इति पूर्वपक्षभाष्योक्तां परिहर्तुमनु
* यत्त्विति * पक्षद्वयसाम्येन परिहर्तुम् । उपपत्तिसाम्यं ता
* तत्रेति * एतदेव प्रश्नपूर्वमुपपादति * कुत इति * :
व्याचष्टे * वाच्येति * यस्त्वव्युत्पन्नास्त्विति पूर्वपक्षभाष्येण
ग्निकृतं पात्नीवतमुत्सृजन्तीति पात्नीवतशब्दस्य त्वाष्ट्रपात्नीवत
चकस्यापि किं चिद्वर्णसारूप्यावगमात्तदनुवादकत्वदर्शनेनो
याजशब्दस्यानुवादकत्वे वाचकत्वानपेक्षेति परिहार उक्तस्त
७।२ सार्थमनुभाषते * स्यादिति * निराकरोति * तदिति * नन्वे
नामत्वानिरासेन गुणविधिनिश्चयः कथमित्याशङ्क्याह * न चे
श्लोकं व्याचष्टे * न तावदिति * उपांशुयाजनामकत्वाद्याह
मेण इदमवगम्यते नूनमस्योपांशुत्वं धर्म इति दशमोपान्त्यापि
ग्राभाष्यं त्वाग्नेयाग्नीषोमीयशब्दवद्धृदयमुपांशुयाज इत्यादिव
न्तरस्थगुणनिमित्तोपांशुयाजशब्दव्यवहारात्रिषयमित्याशयः ।
ऽन्तरालवाक्यस्थेनैवोपांशुयाजशब्देनोपांशुत्वविधिरित्युपसंहर
तस्मादिति * सूत्रकृतोऽपि गुणविधित्वेवेष्टेत्याह * तथा चे
कथं तेनेति भाष्येण जामित्वापनयनप्रकारं पृष्ट्वा तस्मिन्नित्ये
वतावैलक्षण्यं प्रकारत्वेनोक्तं तत्पुरोडाशनैरन्तर्येणोक्तस्य जामि
द्रव्यवैलक्षण्यं विनानपनयनादयुक्तमाशङ्क्य देवतावैलक्षण्य
लक्षणार्थत्वं दर्शयितुमाह * जामित्वेति * सर्वस्मै वा त
गृह्यते यत् ध्रुवायामाज्यमित्यनेनानिर्दिष्टद्रव्यकेषु यागेष्वाज्य
नाद् द्रव्यवैलक्षण्यमाग्नेयाग्नीषोमीययोर्मध्यमस्वरत्वात्स्वरवै
विष्णुप्रजापतिपक्षे देवतावैलक्षण्यं युगपत्पुनरिति भाष्येण वि

वाक्यानामर्थवादत्वद्देवताविधित्वाभावाद्विष्णवादेरप्राप्तत्वेनानुवा-
नुपपत्तिमाशङ्क्य यष्टव्यानित्यनेनायष्टव्यत्वे ऽप्युपांशुयाजस्तुत्यर्थं
ष्टव्यत्वकीर्त्तनमित्युक्तं तस्य ज्ञायत एवेति भाष्येण विरोधमाशङ्क्य
रिहर्त्तुमाह * ज्ञायत एवेति * देवतावैलक्षण्येनाग्नेयाग्नीषोमी-
भ्यामुपांशुयाजस्य वैचित्र्यप्रदर्शनार्थं कीर्त्तिता न विष्णवादिवा-
र्यविहितत्वप्रदर्शनार्थं तेन कारणेन विष्णवादेरवश्ययष्टव्यत्वा-
ावे ऽपि स्तुत्यर्थत्वेनोपादानाभिधानं न पूर्वभाष्यविरुद्ध-
त्याशयः । अयष्टव्ये यष्टव्यत्वोपपादनालम्बनम् * गु-
वादेनेत्यनेनोक्तम् * कीदृशो गुणवाद इत्यपेक्षिते* प्रा-
न्येत्युक्तम् * अग्निर्वै देवानामवमो विष्णुः परम इति
ुतेर्विष्णोः सर्वदेवानां मध्ये प्राधान्यप्रसिद्धिः एत इति वै प्रजाप-
र्देवानसृजतेति श्रुतेः प्रजापतेः प्राधान्यप्रसिद्धिरग्नीषोमीययो-
तु तावद्भूतामग्नीषोमावित्यत्र कीर्त्तनादुपांशुयाजे प्राधान्यप्रसि-
द्धः । ननु विष्णवादेः प्राधान्यमात्रेण यष्टव्यत्वाभिधाने यागान्त-
ष्वपि यष्टव्यत्वापत्तेर्वैलक्षण्यं न स्यादित्याशङ्क्य * यागइत्युक्तम्*
वेधिं विना देवतात्वाभावात्प्राप्तावनियमप्रसक्त्ययोगे ऽपि या का
चेदिह देवता स्यादित्यपेक्षायामनियमप्रसक्तिरुक्ता निर्दिष्टदेवता-
त्वाद्यागान्तरेष्वप्रसक्तिरित्याशयः । ननु विष्णुरुपांशु यष्टव्य इ-
प्रवमादीनां विधित्वाभावे विष्णवादेर्विधायकाभावाद्विध्येकगम्य-
वेन च देवताया यागाक्षेपमात्रेणालाभाद्देवताराहित्येनोपांशुयाज-
वेधिरवसीदेदित्याशङ्क्य तत्रेति भाष्येण शाखान्तरविधानेन विहि-
तत्वमुक्त्वा यद्यपीत्यनेन प्रत्यक्षविध्यभावे उपांशुधर्मकत्वेन विष्णु
रजापत्योः कल्पविधिविहितत्वं विष्णोश्च मन्त्रवर्णकल्पेनापि विधि-
ता विहितत्वमग्नीषोमयोस्तु पुराकल्पसरूपार्थवादकल्पविधिविहि-
तत्वमुक्तं तत्सर्वमाक्षेप्तुं शाखान्तरइति तावदाक्षिपति * शाखान्तर
इति * अनुदाहृत्यैव शाखान्तरे ऽस्तीत्यभिधाने यस्मै यद्रोचते
तत्सर्वं सिद्ध्येदित्याशयः । शाखान्तरे च देवताविधौ सत्युपांशुया-
जे पूर्वाधिकरणपूर्वपक्षे द्रव्यानियमवत्किं देवतायामप्यनियमः शा-
स्त्रैकप्रमाणत्वाद्वा देवतायास्तेन विना कल्पनायोगादाग्नेयमुपांशुया-
जमन्तरा यजत्यैन्द्रमुपांशुयाजमन्तरा यजतीत्यादिप्राकरणिकवा-
क्यान्तरस्थाग्नेयादिपदानुषङ्गेण वैकल्पिकप्रकृताग्न्यादिदेवताविधि-
कल्पनया प्रकृतानामेव मध्ये या का चित्प्रजापतिधर्मोपांशुत्वदर्श-
नाद्वा प्रजापतिविधिकल्पनया स एव प्रजापतिर्मनसा यजेतेति वा
प्रजापतेस्तूष्णीं भावधर्मकत्वविधानेनोपांशुत्वधर्मकत्वाभावात्प्रजा-

पतिविधिकल्पनानुपपत्तेर्नियमसम्भवे चानियमायोगान्मुख्यत
ग्नेयपदमात्रानुषङ्गेणाग्निविशिष्टोपांशुयाजविधिकल्पनयाग्निनि
इति विचारपूर्वकं विष्णुर्वा स्याद्धौत्रादमावास्या हविश्च स्याद्ध
तत्र दर्शनादिति सूत्रेण मान्त्रवर्णिकदेवताश्रयणं न युज्येत
* न चेति * अत्रत्यश्च यद्यपीति भाष्यावयवः प्रत्यक्षदेवता
सद्भावे न युज्येतेत्याह * यद्यपीति * प्रजापतिं मनसा यजे
प्रजापतितूष्णीम्भावधर्मकत्वश्रुतेस्तुष्णीं वै श्रेयस आकाङ्क्षते
यादाश्च श्रेयो ऽभ्यर्थनतूष्णीङ्कार्यत्वावगतेस्तस्मादाहुर्विष्णुर्देवान
इति च विष्णोः श्रेयस्त्वश्रुतेस्तूष्णीम्भावधर्मकत्वावगमाद्यत्कि
त्प्राजापत्यमिति च वर्त्तमानापदेशस्य रूपदृष्टविधिविहिततुष्णीम
विरुद्धोपांशुत्वविध्यशक्तेर्दैवताधर्मोपांशुत्वस्य यागं दर्शनेन वि
जापतिदेवत्यत्वकल्पनायोगाद्यदुपांशु तत्प्राजापत्यमिति विपरीत
नव्यक्त्याश्रयणेन तथापीत्यूक्तमित्यापाद्याक्षिपति * यद्प्युक्तमि
उपांशुयाजस्योपांशुधर्मत्वात् विष्णुप्रजापती प्राप्ताविति वदतोपां
स्य प्राजापत्यत्ववैष्णवत्वनिमित्तस्योपांशुयाजे ऽपि समानत्वात
पतिर्देवता विष्णुश्च प्राजापत्यवाक्यादेवमादिसङ्कीर्त्तनादिल
शब्दसूचिताश्च तत्सदृशाद्वैष्णववाक्याद्विष्णुप्रजापत्योरुपांशु
कयागान्वयावगमादिति देवताया यागाभेदोपचारेणोपांशुध
ब्दप्रयोगमभ्युपगम्य भाष्यार्थः सूचितः। स्तुत्यर्थत्वेनापि प्राज
वाक्यार्थोपपत्तेर्वचनव्यक्तिविपर्यासो न युक्त इत्याक्षेपाशयः
ग्नीषोमीययोस्त्विति भाष्यमाक्षिपति * यद्पीति * ननु त
८।१ चतुर्थ्यादेशाद्देवताविधिर्भविष्यतीत्याशङ्क्याह * यदि हीति *
ध्यधीनत्वात्प्रवृत्तेरग्नीषोमाभ्याममावास्यां यजेरन्नित्युक्ते ऽप्यः
किमग्नीषोमोक्तार्थानुष्ठानेनेति जानन्तो विधिना वयं प्रवर्ति
ति नावधारयेयुरित्यर्थः। अनेकार्थविधौ वाक्यभेदापत्तेर्नास्य दे
विधायितेत्याह * कालेति * देवतामात्रं तर्हि विधीयत
त्याशङ्क्याह * देवतेति * ननु पुरोडाशद्वयान्तराले वि
दमावास्यायां च पुरोडाशैक्येनान्तरालयोगादुत्पत्तिवाक्यादेव
र्णमासीकालत्वावगतेर्लिङ्गद्वाक्यस्थेन पौर्णमासीशब्देनानुवा
लवाक्यस्थेन पूर्णमासशब्देन ग्रहणोपपत्तेः प्राधान्यं सेत्स्यती
ङ्क्याह * सूत्रेति * अपि वा पौर्णमास्यां स्यात्प्रधानशब्दसं
त्मन्त्रो यथा प्रधानं स्यादिति सूत्रेण प्रधानस्योपांशुयाजस
शु पौर्णमास्यां यजन्निति शब्देन पौर्णमासीकालं संयो
र्णमास्यामेवोपांशुयाजः कार्यः मन्त्रस्तु वैष्णवयाज्य

यारूपे ऽमावास्याक्रमाम्नातो ऽपि प्रधानानुसारात्पौर्णमास्यामे-
स्यादिति वदतास्यैव कालविधानार्थत्वेनोपन्यासाज्ञो-
गत्तिवाक्ये कालविधिरित्याशयः । पौर्णमासीशब्देनानपाय-
र कालस्य लक्षणां हि पुरोडाशावित्यनेन न्यायेनैकपुरोडाशा-
ं पौर्णमास्यामिवामावास्यायामप्युपांशुयाजोपपत्तिः पौर्णमासी
त्रध्यभावे सूचिता शाखान्तरइतिभाष्यं तावत्समाधातुमारभते *
त्रेति * शाखाभेदेनोपांशुयाजक्रमे वैष्णवादियाज्यानुवाक्यायुग-
ाम्नानात् श्रुत्याविनियुक्तस्यापि मन्त्रस्य प्रधानाकाङ्क्षितदेवताप्रकाश-
लक्षणोपकारकत्वसम्भवेनाकाङ्क्षिताद्दष्टोपकारकल्पनायोगाद्देवता-
कल्पकत्वोपपत्तेर्मन्त्रवर्णकल्पो देवताविधिर्विष्णुर्वा स्याद्धौत्राम्ना-
ादिति दशमोपान्त्यधिकरणगतसूत्रवक्ष्यमाणन्यायेन स्थित इत्य-
ः । सूत्रे विष्णुग्रहणमन्तरेण एकशाखायाममावास्यायां विष्णु
ाज्यानुवाक्याम्नानादमावास्यायामेवोपांशुयाजहविः कार्यमिति
दर्शनार्थं पूर्वपक्षस्थेन कृतं न देवतान्तरनिवृत्त्यर्थमित्याशयः ।
ानु नाना शाखाधीतानामपि याज्यानुवाक्यायुगलानां देवताकल्पना-
प्राक् दृष्टार्थत्वेनानवसायाद्वसन्तमृतूनां प्रीणामीत्यादीनामेको ममे-
यादीनां च प्रयाजानुमन्त्रणानामिव समुच्चयापत्तेस्तत्कल्पानां
देवतानामपि समुच्चयः प्रसज्येतेत्याशङ्क्याह * तैश्चेति * देवताक-
ल्पनात्प्रागपि याज्यानुवाक्यासामान्यतो यागाङ्गदेवताप्रकाशनलक्ष-
णैककार्यत्वावगतेर्न समुच्चयो युक्त इत्याशयः । ननु याज्यानु-
वाक्यानां हौत्रप्रवचनाख्यवेदाम्नानेनाध्वर्यवप्रवचनाख्ययजुर्वेद-
विहितोपांशुयाजापेक्षया वेदान्तरीयत्वाच्छाखान्तरीयत्वाभिधानं न
प्रयुज्येतेत्याशङ्क्याह * तदेव चेति * वेदान्तरस्य शाखान्तर-
ताप्यस्तीत्याशयः। वेदैक्यएव शाखान्तरव्यपदेशाङ्गस्येनापरितोषात्प-
रिहारान्तरमाह * आध्वर्यवे ऽपि त्विति * नन्वेवं सत्यध्वर्युप्रयो-
ज्यतैव स्यादित्याशङ्क्य होतर्यजेति प्रैषसामर्थ्याद्धोतृ * प्रयोज्यत्व-
रूपेणेत्युक्तम् * यथाश्रुतवचनव्यक्त्याश्रयणेनैव विष्णुप्रजापत्योरु-
पांशुधर्मकत्वावगतेर्यागस्य विष्णुप्रजापत्योश्चोपांशुत्वसाम्याद्विष्णु-
प्रजापतिदेवत्यत्वप्रापकलिङ्गोपन्यास इत्येवं तथापीति भाष्यं स-
माधत्ते * उपांश्विति * उपांशुधर्माणावित्यनेन यद्विष्णुप्रजापत्यो-
रुपांशुत्वधर्मत्वमुक्तं तदुपांशुयाजस्य मन्त्रवर्णप्राप्तविष्णुप्रजापतिदे-
वत्यत्वद्योतनार्थमित्यर्थः । शाखान्तरभाष्योक्तस्य मान्त्रवर्णिकत्वस्य
विष्णुर्वा स्यादिति सूत्रवक्ष्यमाणत्वद्योतनार्थं मन्त्राम्नानाच्चेति भाष्य-
मिति सूचनार्थश्चकारः कथं विष्णुप्रजापत्योरुपांशुधर्मत्वेनोपांशु-

याजस्य तद्देवत्यत्वद्योतनेत्यपेक्षायामाह * अन्या हीति * ननु
क्षमानसत्वाविधिविरोधान्न लिङ्गेनोपांशुत्वप्राप्तिरित्याशङ्क्याह *
ष्णिवाति * यथान्यो न शृणोति तथोच्चारणस्योपांशुत्वादन्य
षणसादृश्येन मानसत्वपर्योपांशुशब्दो ऽनुक्तदेवताकेषु विष्णु
पतिर्देवत्यत्वद्योतनार्थं प्रयुक्त इत्याशयः। अग्नीषोमयोस्त्विति
कालविधायिनि वाक्ये ऽग्नीषोमयोः प्राप्तिरुदाह्रियतइत्येवं
क्षाणः समाधत्ते * तथेति * तावब्रूतामित्यस्मिन्कालस्य विध
वाक्ये ऽग्नीषोमीययोरनुवादेन मान्त्रवर्णिकीं प्राप्तिमग्नीषोमयो
ति भाष्यमुपोद्बलयतीत्युक्ते ननु पुराकल्पसदृशस्यापि विधा
त्वाभ्युपगमे देवताविधायकतापि कस्मान्नेष्टेत्याशङ्क्य कालस्य
धायके वाक्यभेदापत्तेर्देवता * विध्यसम्भवादित्युक्तम् * दे
तर्हि विधीयतां न काल इत्याशङ्क्य यथेत्यनेन देवताज्योपांशुत्व
लानामिह वाक्ये कीर्त्तितानां मध्ये ऽन्यतः प्राप्तिसम्भवासम्भ
वालोच्य विधेयतयानुवाद्यतया च ग्रहणस्य न्याय्यत्वात्कालव्य
रिक्तानां चान्यतःप्राप्तिसम्भवात्कालस्यै *वैतद्विधायकमित्युक्त

गुणोपबन्धात् ॥ ११ ॥

यदुच्यत इति भाष्येणोपांशुत्वगुणोपबन्धान्नारूपत्वेन
मासी लक्ष्यते इति पूर्वपक्षोक्तारूपत्वपरिहारार्थत्वेनैतत्सूत्रं
च्यातुमुपांशिवत्विति वाक्यमुदाहृतं तद्देवतावदुपांशुत्वस्याप्या
यकत्वाद्विध्यर्थत्वे चोपांशुशब्दस्य यागविशेषोपलक्षणार्थत्वा
न्निष्वपि पौर्णमासीयोगेषुपांशुत्वोपपत्तेर्नोदाहार्यमित्याशङ्क्यो
वाक्यस्यस्योपांशुयाजशब्दस्योपांशुत्वविधानार्थत्वोपोद्बलनायै
दाहृतमिति सूचयन् व्याचष्टे * यस्येति * यथाश्रुतार्थत्या
तुमाह * नन्विति * नन्वार्थवादकल्पविधित्वमात्रेणैकस्य
क्यस्यानेकार्थपरत्वे वाक्यभेदः शक्यपरिहारः ताभ्यामेतमग्नी
मीयमेकादशकपालं पूर्णमासे प्रायच्छदित्यादावनेकार्थविधौ च
ते हि ते हि तदर्थत्वात्तस्य तस्योपदिश्येतेत्यनेन वाक्यभेदाभि
नाद्रात्रिसत्त्रे ऽप्यर्थवादकल्पस्य विधेः फलमात्रपरत्वान्नानेका
रतास्तीत्याशयः। उपांशुत्वादिवच्चाज्यस्याप्यनेनैव विधानाप
र्विलिङ्गाश्रुतित्वादिति दशमोपान्त्याधिकरणसूत्राविरोधः। किम
र्थतदुदाहृतमित्यपेक्षायां पूर्वसूचितमेव प्राप्त्युपोद्बलनार्थत्वं
टयति * अत इति *

२।१ प्राये वचनाच्च ॥ १२ ॥

प्रधानेति भाष्येणोपांशुयाजस्य प्रधानप्राये वचनात् प्राधान्या-
गतेर्विष्णवादिवाक्यैश्च विधाबुपांशुयाजभेदे सत्यग्नीषोमीयस्यैवो-
ांशुयाजस्य कालविधिप्रसङ्गाद्विद्वाक्यानूदितत्वात्फलवाक्यग्रहे-
प्राधान्याद्वैष्णवप्राजापत्ययोरुपांशुयाजयोर्गुणत्वापत्तेरुपांशुयाज-
ाप्रप्राधान्यावगतिबाधप्रसङ्गान्नोपांशुयाजवाक्यं पौर्णमासीवाक्य-
त्समुदायानुवाद इत्येवं सूत्रं व्याख्यातं तत्र किं प्राये वचनमित्य-
क्षायामुदाहरति ※ हृदयमिति ※ यज्ञस्यामूर्त्तत्वेन शिरोहृद-
पादायोगमाशङ्क्य स्तुत्यर्थं पुरुषत्वोपचारः। ननूपांशुयाजभेदे ऽपि
ध्युद्देशान्तर्गतत्वात्सन्निहितत्वाच्चोपांशुत्वस्यैवार्थवादस्थव्यवहि-
देवतानपेक्षस्य यागोपलक्षकत्वात्सर्वेषामुपांशुयाजानां कालवि-
ावगतेर्विशेषतश्च समुदायेनैकीकृतानां कालयोगावगतेः पक्षद्वये
ाविशिष्टं प्राधान्यमित्याशङ्कते ※ कथं पुनरिति ※ यागोपलक्षणत्वं
ना देवताकीर्त्तनानर्थक्यापत्तेरर्थवादस्थयोर्व्यवहितयोरपि वाग्नी-
मयोरुपांशुत्ववदुपलक्षणत्वावगमात्कालोद्देशेन चोपादीयमाना-
यागानामनेकोपलक्षणान्वये ऽपि वाक्यभेदानापत्तेः समुदायी-
तानामपि च कालान्वये समुदायशब्दाभावेनाग्नीषोमदेवत्यस्यै-
पांशुयाजस्य कालविधिप्रतीतेः प्राधान्यापत्तिरिति परिहरति
उच्यतइति ※ अवधारिते ऽपीत्यपिशब्दो ऽध्याहार्यः अग्नीषो-
ीय एवेत्यनेनाग्नीषोमयोरुपलक्षणत्वावश्यं भावः सूचितः। श्लोकं
ाचष्टे ※ ताविति ※ नन्वेवं सत्युपांशुयाजैक्ये ऽप्यग्नीषोमपक्ष
ा कालविधानापत्तेर्नित्यवत्प्राधान्यकीर्त्तनं न युज्येतेत्याशङ्कते
नन्विति※ अष्टदोषदुष्टदेवताविकल्पापत्तेरप्युपांशुयाजैक्यपक्षो न
कइति सूचनार्थो दोषशब्दः। कर्मैक्ये सत्युपलक्षणापाये ऽप्युपल-
ानपायाद्देवतान्तरपक्षे ऽप्यविशिष्टः कालविधिरिति परिहरति
नैष इति ※ श्लोकं व्याचष्टे ※ यदि हीति ※ सर्वत्रेत्युक्ते क्वेत्यु-
हरणापेक्षायामसोमयाजिनो ऽग्नीषोमीयपुरोडाशाभावादन्तराल-
ालोपलक्षणीभूतपुरोडाशद्वयाभावे ऽपि तदुपलक्षिताग्नेयपश्चा-
ावलक्षककालानपायादुपांशुयाजानिवृत्त्यभिधानार्थं दशमान्त्याधि-
रणसूत्रमुदाहृतम्। एवं च सत्यग्नीषोमग्रहणस्योपलक्षणार्थत्वे
पे देवतान्तरपक्षे कालयोगनिवृत्तिप्रयोजनत्वानवगमात्फलवाक्ये
रूप्यापत्तेश्च कादाचित्कप्राधान्यप्रयोजनत्वायोगादानर्थक्यपरिहा-
याज्यग्रहणवत्स्तुत्यर्थतैव न्याय्येति सूचयितुमाह※नचेति※ भेदे
पलक्षणार्थतया विध्युद्देशान्तर्गतत्वेन प्रयोजनवत्तरत्वसम्भ-
मन्दप्रयोजनस्य स्तुत्यर्थत्वस्यान्याय्यत्वादुपलक्षणार्थतैवोचितेति

सूचयितुमाह * नानात्वे त्विति * तस्मादित्युपसंहारभा॰
यवचनहेतुसाध्याभिधानार्थत्वेन व्याचष्टे * तस्मादिति * उ
रणसिद्धान्तप्रयोजनाभिधानार्थम् * नैककर्मत्वायेत्युक्तम् *

॥ आघाराद्यपूर्वताधिकरणम् ॥ ५ ॥

१०११ आघाराग्निहोत्रमरूपत्वात् ॥ १२ ॥

नापूर्वविधी इति भाष्येण पूर्वाधिकरणपूर्वपक्षसूत्रस्थ
मासीवत्पदानुषङ्गेणाघाराग्निहोत्रं पौर्णमासीवत् समुदायाः
इत्येवमेतत्सूत्रं व्याख्यातं तत्रोपांशुयाजवत्प्रकृतकर्माभावे
समुदायानुवादत्वनिरासासिद्धेः प्रत्यवस्थानानुपपत्तिमाशङ्क्यो
याजवैषम्यमाहोर्ध्वमिति वैषम्योक्त्यानन्तरसङ्गतिरपि सूचिता।
ध्वादिवाक्यानां कर्मविधितैव नास्तीत्याशङ्क्याह * किं चे।
पक्रोपक्रमसंहाराभावेनैकवाक्यत्वावगतेः । कथं चिच्चैकवा
त्वप्रतीतावपि ऊर्द्धत्वादेः कथं चित्प्राप्त्यभावेन स्तुत्यर्थत्वाय
द्विधित्वावगतेः कर्मनिरपेक्षगुणविध्ययोगाद् गुणविशिष्टकर्मविधि
न्याय्येत्याशयः।श्लोकं व्याचष्टे*नेति* कर्मनिरपेक्षगुणविधिसम्भ
सम्भवसन्देहो ऽत्र मूलसन्देहे हेतुरिति सूचयितुं सन्देहपूर्वं ग
वत्कर्मगोचरपदव्याख्या एतदेव प्रश्नपूर्वमुपपादयति * कुत इ
श्लोकं व्याचष्टे * न तावदिति * विधौ स्मृताया लिङो
सुडागमविधानात् यादित्येतावतः प्रयोगाननुगतमपि विध्याभिधा
त्त्वमभ्युपेत्य * न हीत्युक्तम् * भावनाभिधायित्वं तु शुद्धस्य
प्रयोजनात्स्मृतेर्वावगम्यतइत्याशयः। कुर्याच्छब्दमात्रान्वये ऽपि
त्वर्थाद्व्यतिरेकः स्यान्न भावनातः। वस्तुतस्तु करोत्यर्थस्यापि
त्वर्थानवच्छिन्नस्याप्रतीतेर्न तद्व्यतिरेकेणापि विधित्वस्य दध्या
न्वयः सम्भवतीति किं * तर्हीत्यनेनोक्तम् * ननु भावनाया ध
त्वर्थानपेक्षगुणविध्ययोगे ऽपि तद्वारैव गुणविधिर्भविष्यतीत्या
ङ्क्याह * तस्मादिति * अशक्तिमेवोक्तवचनव्यक्तिद्वयातिरिक्त
वचनव्यक्त्यसम्भवेनोपपादयति * देवहीति * दध्युदूर्ध्वादिवाक्य
नां गुणवत्कर्मगोचरत्वमुपपादितमुपपादयति * तस्मादिति * न
तस्मादेव तावपि समुदायानुवादाविति पूर्वपक्षोपसंहारभाष्यात्सम
दायानुवादत्वं पूर्वपक्ष्यभिमतं गम्यते न च दध्युदूर्ध्वादिवाक्यवि
तानां कर्मणां समुदायो ऽस्त्येकधर्मयोगाभावादित्याशङ्क्याह * त
तश्चेति * हवनाधारणरूपैकजातीयैकदेशे पठितत्वलक्षणैकध
योगाख्येन प्रचयेनापादितः समुदायो ऽस्तीत्यर्थः। धात्वर्थसमुदा

व धातुना भावनासमुदायस्यापि प्रत्ययेनानुवाद इति वक्तुम
तासामित्युक्तम् * रूपवतीनामित्यनेनाघाराग्निहोत्रयोः स्ववा-
विहितरूपाभावाद्वाक्यान्तरविहितरूपापेक्षणे च विहिते कर्मणि
क्यान्तरैस्तदनुवादेन रूपविधिर्वाक्यान्तरविहिते च रूपे सति
विधिरितीतरेतराश्रयापत्तेः कर्मविध्ययोगं सूचयता न हीत्यरूप-
याख्यानार्थं भाष्यं व्याख्यातम्। अनुवादप्रयोजनापेक्षायामग्निहो-
क्ये तावद्यावज्जीवमग्निहोत्रं जुहुयादिति निमित्तचोदनाया-
होत्रं जुहुयादिति फलचोदनायां चैकत्वसिद्धिं प्रयोजनमाह *
मेत्तेति* पूर्वपक्षे निष्प्रयोजनत्वदोषं परिहृत्य प्रत्युतान्याय्यवि-
पपरिहारो गुण एव स्यादित्याह * एवं चेति * नन्वाघारकर्म- ४९
द्रव्यदेवतान्वयेन यागरूपतायास्तत्प्रख्याधिकरणेऽभिहितत्वा-
गरूपस्य च द्रव्यदेवतस्याघारवाक्यवदूर्ध्वादिवाक्येऽप्यश्रुतेररू-
तुल्येत्याशङ्क्याह * तथेति * आघारवाक्येष्वनुवादप्रयोजन-
इ * तस्यापीति *

संज्ञोपबन्धात् ॥ १४ ॥

संज्ञोपबन्धश्चेति सूत्रव्याख्यानार्थं भाष्यं व्याचष्टे * अपि
ते* असौ संज्ञाप्रतिपाद्यो विशेषोऽस्य जुहोत्याघारयति वाक्यस्य
णः क इति रूपं विना न निर्द्धार्यत इत्यर्थः। नन्विति भाष्येणा-
ग्निहोत्रसंज्ञाया यौगिकत्वेनोद्भिदादिवत्संज्ञयैव कर्मविशेषो वि-
प्रतइत्याशङ्क्य यदीत्यनेनोद्भित्संज्ञया पश्वनुत्पादककर्मव्यावृत्ते-
तेदेशिकद्रव्यदेवतलाभाच्च पशूत्पादकचित्रादिव्यावृत्तेर्विशेष ज्ञा-
म्भवेऽप्यत्र व्यवस्थितप्रकृत्यलाभेनातिदेशायोगादूर्ध्वादिवाक्येषु
शुद्धगुणविध्ययोगेनोपदेशतोऽपि द्रव्यदेवताऽलाभात्संज्ञया ना-
त्यागाद्धवनरूपकर्मव्यावृत्तावप्याघारणहवनरूपकर्मान्तराव्यावृत्ते-
शेषज्ञानासम्भवेनाघारणहवनसामान्ययोरेव संज्ञित्वापत्तेस्तयो-
दूर्ध्वादिवाक्यविहितविशेषान्तर्गतत्वेन ज्ञातपूर्वत्वादनुवादत्वैव
दिति परिहृतं तद्व्याचष्टे * सामान्यमिति * आघाराग्निहोत्र-
योर्यौगिकत्वेऽप्याघारणहवनसामान्यं प्रतिपाद्यं स्यादिदं चा-
त एव ज्ञातत्वान्न क्रियान्तरवद्विधानार्हमिति वत्यर्थकल्पनया
ज्यम्। अथेति भाष्येण विधिस्वभावादेव विधेयान्तरव्यावृत्तकर्म-
षप्रतिपत्तेरयौगिक्यामपि संज्ञायां विशेषज्ञानं सेत्स्यतीत्याश-
तथापीत्यनेन विधिस्वभावाद्विधेयान्तरव्यावृत्तिप्रतीतावपि न-
गशून्यायाः संज्ञाया व्यावृत्तिवाचित्वाभावात्तिष्ठतेरपि गतिनि-

वृत्तिवाचित्वे सत्युपवेशनादावपि प्रयोगापत्तेरुर्ध्वत्वोपलक्षण
न गतिर्निवृत्त्यर्थत्वस्मृतेर्व्याख्येयत्वाच्छुद्धयोश्चाघारणहवनयो
मन्यरूपत्वेनाविधेयतया विधानार्थं वाच्यत्वानर्हत्वाद्विधेयत्वं
वाच्यत्वार्हस्य विशेषस्य रूपं विनानवगतत्वेनापूर्वविशेषवि
ज्ञेयेति परिहृतं तद्व्याचष्टे * तदज्ञेयतयेति * तस्य विधाना
पूर्वस्य क्रियान्तरस्यान्यत्र दध्यादिवाक्येषु विधिर्युज्यते न त्वा
ग्निहोत्रवाक्ययोस्तत्र रूपाभावेनाज्ञेयत्वादित्यध्याहारेण योजन
ज्ञेति तु पाठः सुगम एव द्वितीयान्तसत्संज्ञोपबन्धादित्येवमः
सूत्रव्याख्यानार्थमपि चेति भाष्यं व्याचष्टे * क्रियाश्चेति * ।
कवाचित्वेन साधनशब्दव्याख्यानाया * कारकत्वेनेत्युक्तम् *
शब्देनानुवादेति भाष्यं व्याख्यातं श्लोकं व्याचष्टे * आघारमि
समुदायस्य समुदायिभ्यो ऽत्यन्तभेदाभावे ऽपि साध्यत्वोपपर्ा
ष्टान्तेनोक्ता ननु सामान्यशब्दोक्ताया भावनातो विशेषशब्दोक्तस्य
त्वर्थस्य व्यापाररूपत्वेनाभेदवद्भाव्याभाव्यनिष्ठत्वेन भेदस्यापि
याद्युक्तं कर्मत्वं समुदायस्य तु समुदायिभ्यः कथं चिदपि भेद
वात्कथं कर्मतेत्याशङ्कते * ननु चेति * समुदायिभ्यः समुदा
भेदाभावे ऽपि समुदायिनामेव प्रत्येकरूपासामस्त्यरूपस्य भेद
स्यैव च समुदायशब्दवाच्यत्वादेकधर्मान्वयाख्यप्रचयद्वारा च ऽ
करूपैः साध्यत्वात्कर्मत्वोपपत्तिरिति क्रियाणामिति भाष्यसू
.२।१ परिहारमाह * नेति * समुदायस्यावयवभूतानां क्रियाणां प्रच
साध्यत्वान्नायुक्ता कर्मतेत्यर्थः एतदेव विवृणोति * समस्ता
हीति * नन्वाघाराग्निहोत्रशब्दयोः पौर्णमास्यमावास्याशब्द
येन प्रत्येकरूपवाचित्वावधारणात्प्रत्येकरूपस्यैव कर्मत्वं वाच्यम्
तच्च विरुद्धमित्याशङ्कते * ननु चेति * अवाच्यस्यापि स
स्त्यरूपस्य लक्षणयावगतेः । कर्मत्वं भविष्यतीति परिहरति *
इति * ननु विधाव्योदनपाकं पचतीतिवद्भावनाधात्वर्थलक्ष
सामान्यविशेषभेदेनापि क्रियाकर्मत्वोपपत्तेर्न कर्मत्वनिर्देशो ऽ
वादत्वहेतुरित्याशङ्क्याह * न चेति * जुहोत्याघारयतिर
मानाधिकरण्यं विनाग्निहोत्राघारशब्दयोर्धात्वर्थवाचित्वानवग
जुहोत्याघारयत्योश्च पाकमितिवद्भावनाख्यसामान्यशब्दादाख्या
प्रत्ययाद्भेदेनानुपादानाद्धात्वर्थस्य कर्मत्वं यद्वतो ऽभिम
तन्न सम्भवतीत्यर्थः । ननु तत्प्रख्याधिकरणे सामाधि
रण्यं च साध्यांशेनेह कर्मण इति वार्त्तिके जुहोत्याघार
त्यर्थयोः शब्दभेदानुपादाने ऽपि साध्यत्वस्योक्तत्वात् द्वितीय

सञ्ज्ञोपबन्धस्य पूर्वपक्षहेतुमात्रत्वप्रतीतेः किमात्रातिनिर्बन्धेन-
ाशङ्क्याह * एतदिति * पौर्णमासीसिद्धान्तौपयिकत्वान्निर्बन्ध
प्राशयः । भाष्यकृता तु धात्वर्थस्य भाव्यनिष्ठत्वाभावेन करोत्य-
क्रियात्वाभावादकारकत्वे च क्रियारूपया भावनयानन्वयापत्त-
धिसामर्थ्याच्च करणत्वावगमे ऽपि कर्तृव्यापारव्याप्यत्वं विना
रणत्वायोगेनार्थाद्व्याप्यरूपकर्मत्वप्रतीतेर्विधिपक्षे ऽपि द्वितीया-
सञ्ज्ञोपबन्धोपपत्तेरेतद्व्याख्यानादरेणाथैव व्याख्या य एवं वि-
न्पौर्णमासीसञ्ज्ञकं यागं यजतइत्यादिना पौर्णमासी सिद्धान्ते
जिता द्विविधमपि सूत्रार्थमुपसंहरति * तस्मादिति *

अप्रकृतत्वाच्च ॥ १५ ॥

न च प्रकृतमपीति भाष्येणैतत्सूत्रमाघारे प्राकरणिकाङ्काक्या-
रादपि रूपानवगतेररूपत्वोपपादनार्थतया व्याख्यातमित्याभा-
तत्प्रख्याधिकरणे वाक्यान्तरतो द्रव्यदेवतालाभस्योक्तत्वादला-
वोर्ध्वादिवाक्यैरप्याघार्यद्रव्यं विनाघारणविध्ययोगापत्तेरयुक्तं
त्वा स्वयमाघाराग्निहोत्रवाक्ययोररूपत्वे ऽपि वाक्यान्तरेभ्यो रू-
वगतेर्विधेयत्वोपपत्तिशङ्कानिराकर्तुमेतत्सूत्रमिति वक्तुमाशङ्कां
वदाह * अथेति * तत्र वाक्यान्तरविहिते रूपे सति कर्मवि-
ः कर्मणि च विहिते सति तत्र रूपविधिरितीतरेतराश्रयं शब्दा-
स्य प्रयोगभूतत्वादिति सिद्धान्तसूत्रावयवेन परिहरिष्यमाणत्वा-
नुपन्यस्य दृष्टान्तवैषम्येण परिहारमाह * नेति * न चोर्ध्वा-
वाक्येष्वाघारशब्दो ऽस्तीत्यपि वाक्यसम्बन्धद्रव्यविधावाघारश-
ादप्यनुवाद्यविशेषाप्रतीतेर्वक्ष्यमाणत्वान्नोक्तम् । अतएव च तण्डुला-
वाक्येन प्रकृताग्निहोत्रशब्दाभावादित्येवं सूत्रं योजितम् । ननु यथा
ीहिभिर्यजेतेत्यादौ दर्शपूर्णमासशब्दाभावे ऽपि प्रकरणाद्यजस्तद्विष-
त्वावधारणं तथेह जुहोतेरग्निहोत्रविषयत्वावधारणं भविष्यती-
ाशङ्कते * ननु चेति * प्रकृतिशब्दाभावे व्युत्पाद्यावुत्पत्तिवाक्ये
करणाभावादित्येवमेतच्छङ्कानिरासे ऽप्येतत्सूत्रमवतारणपूर्वं यो-
यति * अत इति * उत्पत्तिवाक्ये ऽपि सामान्यफलकरणत्व-
तीतेरितिकर्तव्यताकाङ्क्षात्मकप्रकरणसद्भावे ऽप्यज्ञातरूपस्य वि-
प्रयोगात्फलकरणत्वप्रतीत्यभावाभिप्रायेणैतदुक्तं प्रयोगवाक्यारू-
स्यैव तर्हि जुहोत्यर्थस्य फलकरणत्वात्प्रकरणेन द्रव्यदेवतान्वयो
स्तीत्यज्ञाताशयः शङ्कते * तत्रेति * स्वाशयं प्रकटयन्परिहरति
* तदिति * तण्डुलादिवाक्यविहितानां तु कर्मणां प्रज्ञातरूपत्वा-

३९,३।२ त्फलान्वये सति प्रकरणोपपत्तेः प्रकरणेन ग्रहणं युक्तमित्याह
इति * नन्वाघारशब्दस्य मन्त्रद्रव्यविध्योर्भावादाघाररूपं ज्ञा
इत्याशङ्कते * नन्विति * विधौ सकलमन्त्रपाठे ऽपि ला
वार्त्तिके प्रतीकमात्रग्रहणं धात्वर्थानधिकार्थत्वान्नाघारशब्दो
र्थं विशेष्टुं शक्नोतीति परिहरति * नेति * एतदेवोपपा
* तत्रेति * आघारे ऽप्याशङ्कोपन्यासपूर्वकं तन्निरासे ऽपि
योजयति * नन्विति * एतदेव विवृणोति *दर्शेति * द
मासप्रकरणपठितानामपि प्रयाजानामवान्तरप्रकरणस्यातिक्र
करणे व्युत्पादयिष्यमाणत्वादेतदप्यज्ञातरूपाघारविध्ययोगाशय
ष्यमप्यस्मिन्नर्थे योज्यम्।कथं भावात्मकप्रकरणाभावे ऽप्यधिक
क्षणसान्निध्यात्मकात्प्रकरणाद्विशेषावगतिरित्याशङ्कोपन्यासपू
न्निरासे ऽपि नास्ति प्रकृतमस्येति विग्रहस्थषष्ठ्युक्तस्य सम्ब
नञा वयं प्रकृतमेवेति च प्रकृतशब्दो ऽवधारणमभिप्रेत्यैतत्सू
जयति * सन्निधेरिति * स्रौवाघारस्याप्याघारयतिनानुवा
पत्तेरित्याशयः । तण्डुलादेरपि वाक्यबलीयस्त्वेनाप्रकृतहो
यसूचनार्थं बहुवचनम् । नन्वेवं सति पूर्वपक्षे ऽप्युदूर्ध्वत्वतण्डु
स्रौवाघारजयाहोमादिभिरप्यन्वयः स्यादित्याशङ्क्याह * तदि
ज्ञातरूपाणां फलान्वयेन कथम्भावात्मकप्रकरणोपपत्तेस्तस्य
र्थसाधनत्वलक्षणार्थं वाक्येनापेक्षितत्वेनाविरोधादबाधः सि
त्वज्ञातरूपयोराघाराग्निहोत्रवाक्योत्पादितयोः कर्मणोः फ
धानाशक्तेः कथं भावात्मकप्रकरणायोगादधिकारात्मकस्य च
रणस्य वाक्येनानपेक्षणाद्विरोध इत्याशयः । तत्राधिकारात्म
प्रकरणस्य वाक्यविरोधे सत्येवं वक्ष्यमाणप्रकारेणाविरोध इति
शब्दार्थे तच्छब्दो योज्यः । नन्वेवमपि द्रव्यविशिष्टकर्मवाक्ये
ताभावाद्देवताविशिष्टकर्मवाक्ये च द्रव्याभावादूर्ध्वादिवाक्ये
भयाभावात्कर्मान्तरगुणस्य च कर्मान्तरे ऽनन्वयादेकेन च
निष्पत्तेर्द्रव्यं च विनोदूर्ध्वत्वादिमात्रेणाघारानिष्पत्तेर्न विधि
तीत्याशङ्क्याह * यत्र चेति * अन्येनापि रूपेण कर्मा
द्व्यावृत्तेः कर्मणि विहिते येन विना कर्मानिष्पत्तिस्तत्कर्मान्त
मन्यथानुपपत्त्या कल्प्यतइत्यर्थः । कश्चिदित्यनेनाद्रव्यं देवत
प्यूर्ध्वत्वादेः कर्मरूपत्वे द्रव्यदेवतादविशेष उक्तः । एवं च यदू
त्वादिवाक्येष्वपि न किंचिद्रूपं स्यात्ततो विशेषाग्रहणेनेतरय
विधित्वं स्यान्न त्वेतदस्तीत्याह * सर्वेषु चेति * तस्मादिति
श्नोपसंहारभाष्यम् * तस्मादिति *

चोदना वा शब्दार्थस्य प्रयोगभूतत्वात्तत्सन्निधेर्गु-
णार्थेन पुनः श्रुतिः ॥ १६ ॥

दध्यूर्द्धादिवाक्यानां कर्मविधित्वानभ्युपगमाद्भाष्यस्थकर्मा-
रोक्त्यनुपपत्तिमाशङ्क्याभ्युपेत्यवादेन स्रौवाघारचतुर्होतृहोमाद्य-
।या वा समाधत्ते * कर्मेति * कुत इत्यादिना रूपवन्तौ विधी- ४९
। इत्यन्तेन भाष्येण वाक्यान्तरविहितरूपापेक्षणे ऽन्योन्याश्र-
पत्तेः स्ववाक्याज्ञातरूपकर्मविध्ययोगस्यारूपत्वादित्यनेनोक्तस्या-
[त्तप्रवर्त्तनात्मकविधिस्वभावादेव विध्यन्तरविषयभूतकर्मान्तर-
ावृत्तविधानार्हकर्मप्रतीतेर्वाक्यान्तरावगतरूपवत्तया चानुष्ठाना-
वाद्विधिनिर्वाहोपपत्तेः । स्ववाक्याज्ञातरूपस्यापि कर्मणो वि-
ासम्भवाद्विधिनिर्वाहार्थं वाक्यान्तरविहितरूपापेक्षणे ऽपि विधि-
वृत्तावनपेक्षणान्नेतराश्रयमित्येवं परिहारार्थतया विधिशब्दार्थस्य
ग्रोगे ऽनुष्ठाने भूतत्वाद्वर्त्तमानत्वाद्व्याप्रियमाणत्वादनुष्ठापकरू-
त्वादन्यतः प्राप्ते चानुष्ठाने ऽनुष्ठापनानर्थक्याद्रूपं विना-
कर्मान्तरं विधेयं प्रतीयते तच्च वाक्यान्तरतो रूपावगत्या
वेहतीत्येवं सूत्रावयवो व्याख्यातः तदन्तर्गतेन चाघा-
त्यनेनाविज्ञातार्थावित्यन्तेन हवनाघारणयोर्विधिविषयसमानयो-
दिकीभूतयोः विधिविषयभूतयोरेव संज्ञाविषयत्वात्संज्ञोपबन्धो-
पादनार्थतया ऽघाराग्निहोत्रशब्दार्थस्य प्रयोज्यात्मभूतत्वादित्येवं
गख्यातस्तत्र द्वितीयव्याख्यानार्थं भाष्यं जुहोत्याघारयति * लक्षि-
ति * वार्त्तिकेन व्याख्यास्यमानत्वादुपेक्ष्य शेषं सङ्क्षेपतो व्याच-
* आघारयतीति * यदुक्तमिति भाष्येण पूर्वाभ्यो होमाघारेभ्य
ति पूर्वपक्षभाष्यावयवसूचितमर्थमनुभाष्य नैतदित्यादिना वा-
यार्थौ यस्तं विधातुमित्यन्तेन तन्निरासार्थतया तत्सन्निधेर्गुणार्थेन
नःश्रुतिरिति सूत्रावयवो व्याख्यातस्तत्र तस्मान्नानुवादाविति भाष्यं
ावत्तात्पर्यतो व्याचष्टे * न चेति * नन्विति भाष्येणोपपदश्रव-
ाद्दध्यादिवाक्यानां शुद्धहोमाघारविध्यशक्तावपि होमाघारसम्ब-
न्धतया दध्यूर्ध्वादिविध्यभ्युपगमात्सम्बन्धस्य च सम्बन्धिद्वयनि-
[त्वात्प्रतिसम्बन्धिभ्यां होमाघाराभ्यां विनानुपपत्तेरर्थापत्त्या तयो-
ापि प्राप्तिराघाराग्निहोत्रवाक्ययोरनुवादत्वं भविष्यतीत्याशङ्क्य नै-
ादेवमित्यनेन ब्रूम इत्यनेन निरस्तं तत्तात्पर्यतस्तावद्व्याचष्टे * न
चेदिति * भाष्यस्थस्य सम्बन्धशब्दस्य विशिष्टवाचित्वं शङ्कायाश्च

विशिष्टविधानाशयत्वं तन्निरासार्थत्वं चोत्तरस्यानेनोक्तम् अ
तारणपूर्वमस्मि हीति भाष्यावयवमध्याहारेण द्वेधा योजयि
दिति * अस्मिन्नाघाराग्निहोत्रवाक्यस्थे प्रत्यक्षे कर्मविधाने
न सम्बन्धो ऽर्थादापादक इत्याद्या योजना अस्मिन्सम्बन्धे
र्थाक्षेप्ये होमाघाराख्यसम्बन्धिविधौ प्रत्यक्षे सति सम्बन्धाख्य
धानेन सम्बन्धमात्रं विधीयतइति द्वितीयासम्बन्धशब्देनाभि
सम्बन्ध एवोक्त इति गुणशब्देनोक्तं तस्मादित्याशङ्कानिरा
हारभाष्यं व्याचष्टे * तस्मादिति * नन्वाघारयतीति श
श्रुत्या धात्वर्थावच्छिन्नभावनाविधिप्रतीतेर्न वाक्यीयसम्बन्ध
युक्त इत्याशङ्क्य सत्यमित्यनेन सम्बन्धस्य पदान्तरान्वयलभ्य
श्रौतत्वे ऽपि तच्छब्दपरामृष्टस्य धात्वर्थावच्छिन्नभावनाख्यक
र्मणः सन्निहिताघाराग्निहोत्रविधिप्राप्तत्वेनोदूर्ध्वादिवाक्यैर
त्वाद्वाक्यीयगुणविध्यर्थं कर्मश्रवणं न कर्मविध्यर्थमिति तन्निर
त्वेन सूत्रावयवो व्याख्यातस्तद्द्वयमेतच्छङ्कापरिहाराशय
र्थैरुत्तरभाष्यैरेव व्याख्यास्यमानत्वान्न व्याख्यातम्। ननु पदान्त
शङ्काशयविवरणार्थं भाष्यं व्याचष्टे * भावनेति * सत्यमेव
परिहाराशयविवरणार्थं भाष्यं व्याचष्टे * सप्तत्यमिति * भ
मध्यशब्देन तं व्यापारशब्दोक्तभावनाविशेषणभूतं स्वपदार्थं ध
गुणशब्दो विशेष्यतीति गुणस्य भावनाद्वारधात्वर्थविशेषणत
धानेन भावनाविशेषणतैवोक्तेति सूचितम्। ननु गुणविधावपि
नातो विध्यनुत्तारणे कर्मानुवादेन गुणविध्युद्घोषो विरुध्येते
ङ्क्याह * तेनेति * येन कारणेनोदूर्ध्वादिवाक्येष्वपि स्व
धात्वर्थगतव्यापारं भावनां वक्ष्यतीत्युक्तं तेन कारणेन
त्रैवैतद्वक्ष्यमाणमुपदिष्टं भवतीत्यर्थः । शास्त्राभिव्यक्ति
तिकरणाध्याहारेणोत्तरग्रन्थान्वयः विशिष्टविधेः सार्व
त्वे ऽपि तात्पर्याभिप्रायः । कर्मानुवादेन गुणविध्युद्घो
स्याशयः । नन्वेवमपि व्याख्यातॄणामष्टप्रकारश्रुत्युद्घोषो विरु
त्याशङ्क्य भ्रान्तिमूलत्वं तदुद्घोषस्याह *तत्रेति* आत्मना यथ
न्तिरुत्पन्ना तथान्येषामप्युत्पादयितुमित्युपहासः किलेति भ्रा
सूचितम् । भ्रान्तित्वोपपादनायाष्टावपि प्रकारान्परदौर्बल्यन्निर
दूषयन् शुद्धधात्वर्थविधिरूपं प्रथमं प्रकारं तावत्सोदाहर
२५।२ भाषणपूर्वं दूषयति * तत्र तावदिति * कस्मादयुक्तमित्यपेक्ष
मेकाभिधानश्रुत्या भावनान्वयस्य प्रागवगमादिति हेतुमाह :
हीति * भावनानिरपेक्षस्य धात्वर्थस्य पुरुप्रवृत्त्यविषयत्वादर्था

ह * न चेति * एतदेवोपपादयति * सा हीति * देहाश्रित-
ा विष्णुक्रमादेरात्माश्रितस्यापि च यागादेः प्रयत्नरूपभावना
प्रवृत्त्यविषयतापिशब्देन सूचिता किं च भावनावद्धात्वर्थस्या-
निष्पाद्यापरपर्यायसाध्यत्वेन विधानस्य अन्यदेव हि यागादौ
ान्यं करणात्मकम्। अन्यच्च भावनानाम साध्यत्वेन व्यवस्थितमि-
वार्त्तिके निरस्तत्वाद्दध्यादितत्करणत्वेनैव विधानावगतेः करण-
च क्रियारूपभावनान्वयनिबन्धनत्वान्न तां विना विधेयत्वो-
त्तेरित्याशयेनाह * इदं चेति * ननूत्पत्तिवाक्ये साध्यत्वेनापि
वेहितस्य किमर्थमपुरुषार्थरूपो धात्वर्थः साध्य इत्यपेक्षायां
वाक्ये करणत्वेन विधानात्फलवत्त्वोपपत्तेर्नोत्पत्तिवाक्ये करण-
विधिरित्याशङ्क्याह * न हीति * धात्वर्थस्य साध्यत्वेन विधौ
ास्य किमर्थमित्यपेक्षायामपि विधेयस्य करणत्वानवगतेः सा-
नपेक्षत्वात्पदार्थापेक्षां च विना पदार्थान्तरान्वयायोगात्फलवा-
ऽपि करणत्वेन विधिर्न सम्भवतीत्युक्ते ननु भावनावत्करण-
भावे ऽपि साध्यापेक्षा भविष्यतीत्याशङ्क्य*असावित्युक्तम्। भा-
ायाः करोत्यर्थरूपत्वेन नित्यं कर्मापरपर्यायसाध्यापेक्षत्वे ऽपि
वर्थस्य करोत्यर्थत्वान्न करणत्वं विना साध्यापेक्षत्याशयः। वि-
धात्वर्थविधिरूपं द्वितीयं प्रकारं दूषयति * सोमेनेति * तद्
ानां क्रियार्थेन समाम्नाय इत्यनेन न्यायेन धात्वर्थस्य कार-
णां च परस्परान्वयमपेक्ष्य भावनयान्वितानां पश्चाद्धात्वर्थस्या-
पन्नस्य करणत्वायोगात्कारकैश्च विना तदनिष्पत्तेः कारकापे-
यां कारकाणां च सिद्धरूपत्वेन व्यापाररूपधात्वर्थनिष्पादनं
ना साक्षाद्भावनान्वयायोगाद्धात्वर्थापेक्षायामरुणैकहायनीन्याये-
न्योन्यनियमाच्च भावनाविधिनिरपेक्षो गुणविशिष्टधात्वर्थविधि-
क इत्याशयः। सप्तमनवमाद्ययोश्च यजेतेत्यर्थमितीति कर्त्तव्यताया-
त्वर्थान्वयनिरासेनेत्थं कुर्यादिति भावनान्वयस्य भाष्यकृता च-
माणत्वाद् गुणानां धात्वर्थविशेषणत्वानुपपत्तेर्न तद्विशिष्टधा-
र्थविधिरित्याह * तथा चेति * गुणान्वये च धात्वर्थस्य
रूप्यं स्यादित्याह * भावनां चेति * धात्वर्थस्यान्यत्र विधिरूपं
तीयं प्रकारं दूषयति * तथेति * भावनायां तु धात्वर्थस्य
ारकाणां वा विधेः सर्वत्राविशेषात्तदभिप्रायान्यशब्दव्याख्या
युक्तेत्याह * यदि त्विति * अन्योद्देशेन च शुद्धधात्वर्थ-
धानस्य तन्निरपेक्षशुद्धधात्वर्थविधानात्पदान्तरापेक्षानिमित्तविप्र-
र्षेण दौर्बल्ये ऽपि अन्योद्देशनिरपेक्षविशिष्टधात्वर्थविधाने ऽपि

विप्रकर्षसाम्यात्ततो दौर्बल्यानुपपत्तेः प्रत्युताश्रुतविशेषणा
ल्पनाभावेन ततो बलीयस्त्वाद् द्वितीयस्थाननिवेशापत्तेस्तृती
निवेशो न युक्त इत्याह * न चेति * अन्योद्देशेन विशिष्ट
विधिरूपं चतुर्थं प्रकारं द्वितीयतृतीयपक्षोक्तदोषापादनेन
* पक्षेति * धात्वर्थे ऽन्यविधिरूपं पञ्चमप्रकारं दूषयति
ति * तृतीयानिर्दिष्टस्यापि दध्नो विधेयत्वेनानुष्ठानविषय
धेर्दध्यनुष्ठेयमित्यभिप्रेत्यानुष्ठानार्थकरोतिप्रयोगोपपत्तेस्तत्र जय
हुयादितिवच्च प्राधान्यविवक्षयापि सप्तमीप्रयोगोपपत्तेर्होमाधि
दध्यधिकर्त्तव्यत्वस्य परानभिप्रेतत्वे ऽपि दधिहोमं करोतीति पर
वचनव्यक्तेरश्रसैषो ऽर्थः प्रतिभातीत्यारोप्याच्छलेनेदं दूषणद्व
सप्तम्यश्रुतेर्न शब्दाद्धोमस्याधिकरणत्वं स्थालीवच्च पतनप्रति
कत्वाभावान्नार्थरूपेण दध्नश्च तृतीयाश्रुतेर्भूतभव्यसमुच्चार
येन करणत्वावगमात्कर्मत्वरूपा कर्त्तव्यता न युक्तेत्यर्थः । यथ
न्यत्र शुद्धधात्वर्थविधिश्रुतिर्विशिष्टविधानाद् बलीयसी तथा
४९६।२ र्थे ऽन्यविधिश्रुतिरपीति पञ्चमस्थाननिवेशो ऽस्या न युक्त इत्या
यमपि चेति * अन्यत्र शुद्धधात्वर्थविधेरपि द्विविधविशिष्टवि
क्षया बलीयस्त्वसूचनार्थश्चकारः हेतुमाह * एकेति * न
पदान्तरार्थविधिविषयत्वेन विप्रकृष्टार्थत्वार्थे दुर्बलेत्याशङ्क्य
उभयेति * विशिष्टविधावपि विशेषणभूतपदार्थान्तरविधि
शयः । दध्ना जुहोतीत्यत्र च सन्निकृष्टार्थविध्यसम्भवकृतत्व
प्रकृष्टार्थग्रहणं न दोषायेत्याह * सन्निकृष्टेति * प्रकृतश्रुति
यदधिपरामर्शार्थो ऽस्य शब्दः तत्र तु विशिष्टविधावुभयोर्विशे
विशेष्ययोर्विध्याश्रयणात्सन्निकृष्टविद्ध्यर्थे तत्सम्भवो विप्रकृ
ष्यर्थे चासम्भवो ऽभ्युपगन्तव्य इति युगपद्विरुद्धसम्भवासम्
पत्तिरित्याह * तत्रेति * सन्निकृष्टासम्भवकृतत्वाद्विप्रकृष्टग्र
स्योभयाश्रयणे सम्भवासम्भवविरोधापत्तिरित्येकग्रन्थतया वा वि
ष्टविधिदौर्बल्याभिधानार्थतयैतद्योज्यम् ।नन्वेवं सति न क्वचिद्वि
विधिराश्रीयेतेत्याशङ्क्याह * अगत्यैवेति * विशिष्टविधिरित्य
हारः ।यद्यपि च श्रौतेन विधिना सन्निकृष्टविधानात्काल्येन च
प्रकृष्टार्थविधानात्कालभेदेन विप्रतिषेधपरिहारोपपत्तेरन्योद्देश
रपेक्षविशिष्टविधेरियं विप्रकृष्टार्थविषयत्वात् गुर्वी तथाप्यन्यत्र
शिष्टविधानात्पदान्तरापेक्षानिमित्तविप्रकर्षस्योभयत्र सद्भावेन
शेषाद् गुर्वी न भवत्येवेत्याह * अन्यत्रेति * तदेव त्वातिगुर्वीति
चनार्थो ऽतिशब्दः प्रकृतमुपसंहरतीति क्व तर्हि निवेशयितव्येत्यपे

।।ह * काममिति * श्रुतिलिङ्गादिवदासां पूर्वपूर्वानपेक्षत्वान्न
पन्यासेन प्रयोजनं यदि त्ववश्यं क्रमेणोपन्यस्तव्या स्ततो वरमेवं
इति * काममित्यनेनोक्तम् * धात्वर्थे ऽन्यसम्बन्धविधिरूपं
प्रकारं दूषयति* यदिवेति*किं यद्ददातीति दानमात्रमनूद्य तत्र
ाशावध्वर्यवे इत्यानन्तर्यावगतः प्रदीपाध्वर्युसम्बन्धो विधीयते
ध्वर्यवे यद्ददातीति क्रियाकारकान्वये क्रियाप्राधान्यविवक्षया-
र्युविशिष्टं दानमनूद्य तस्य प्रदीपसम्बन्धे विधीयमाने ऽपीमाश्चा-
दक्षिणा इति स्मृतेः।प्राकाशशब्दवाच्ययोः प्रदीपयोर्दानसम्बन्ध-
प्रदानत्वाद्दानर्थक्यतदङ्गन्यायेन विशेषणे ऽवताराद्विशेषणभूत-
ध्वर्योः प्रदीपसम्बन्धविधिर्विधेयसम्बन्धित्वेन वाध्वर्योरेव प्रा-
न्यविवक्षायां दानविशिष्टमध्वर्युमनूद्य तस्य प्रदीपसम्बन्धविधिर्द-
यविवक्षया वा शुद्धाध्वर्य्वनुवादेन प्रदीपसम्बन्धविधिरिति वच-
यक्तीनां मध्ये कया धात्वर्थे ऽन्यसम्बन्धविधिरित्यशक्यं विवेक्तुमि-
र्थः। एतदेवोत्तरेण प्रपञ्चेन विवृणोति * सर्वत्र हीति * सम-
या ज्योतिष्टोमिक्या दक्षिणाया अश्वमेधेति देशप्राप्तायाः प्राकाश-
ामाधिकरणे ऽध्वर्युभागमात्रविकारत्वाभिधानेन निवेश्यमानः प्र-
ज्येतेत्यर्थः।द्विष्ठत्वाच्च सम्बन्धस्याध्वर्य्वाख्यसम्बन्धिप्राप्तावपि प्रा-
शाख्यसम्बन्ध्यप्राप्तौ विधातुमशक्यत्वात्प्राकाशयोरपि विध्या-
तर्वाक्यभेदः स्यादित्याह * प्रत्ययस्य चेति * ननु सम्बन्धवि-
निवार्थाक्षेपान्न वाक्यभेदापत्तिरित्याशङ्क्याह * सम्बन्धो हीति*
ग्मप्यर्थाक्षेपगौरवं तावदेको दोषः धात्वर्थाङ्गत्वेन चार्थाक्षेपल-
ग्स्यापि सम्बन्धिनो विधेयत्वात्प्रत्ययावृत्तिस्तदवस्थेत्याशयः । ननु
म्बन्धिविशिष्टस्यैव सम्बन्धस्य धात्वर्थाङ्गत्वात् विशेषणस्य
ाङ्गत्वं विना विशिष्टस्याङ्गत्वासिद्धेः सम्बन्धिनो ऽपि धात्वर्थाङ्ग-
र्थादेव लप्स्यते अतः सम्बन्धिनो धात्वर्थानङ्गत्वं वदता
म्बन्धस्यापि वाच्यं न च तद्वक्तुं शक्यम्। धात्वर्थानुरक्तेन प्रत्य-
न सम्बन्धस्य विधानाद्धात्वर्थाङ्गत्वावगतेरित्याशङ्कते * तत्रेति*
ात्वर्थानुरक्तेन प्रत्ययेन विधानाद्धात्वर्थाङ्गत्वे च दध्ना जुहोतीत्य-
ाः सम्बन्धविधित्वाभावाद्भेदोपादानार्थवत्त्वे ऽपि वायव्येन्द्रिय-
ुत्योः प्राकाशश्रुतिवत्सम्बन्धविधित्वाभ्युपगमाद्भेदोपादानानर्थक्यं
ोषमाह * एवं तर्हीति * ननु वायव्यश्रुतावेव धात्वर्थस्य प्रकृति-
ोतनार्थे विधायकप्रत्ययानुरञ्जकत्वं युक्तमिन्द्रियश्रुतौ त्वविवक्षि-
त्वान्न प्रत्ययानुरञ्जकतेत्याशङ्क्याह * न हीति * प्रकृतिप्रत्यययोः
ौर्वापर्यनियमाच्छुद्धप्रत्ययार्थानुपलब्धेर्धात्वर्थस्यानुरञ्जकता सर्वत्रा-

विशिष्टेत्याशयः । वायव्यश्रुत्युपन्यासो दृष्टान्तार्थः । नन्वि
श्रुतौ बलादापतितस्याप्यनुरञ्जकत्वस्यानुपकारित्वेन त्यागान्ना
कतेत्याशङ्क्य वायव्यवाक्ये ऽपि तर्हि धात्वर्थानपेक्षाद्व
आदालभतिचोदिताग्नीषोमीयपशुयागप्रकृतिद्योतनसिद्धेर्दद्वा
चाध्वर्युप्राकाशसम्बन्धापादकत्ववदालभत्यर्थस्य द्रव्यदेवत
न्धानापादकत्वेन विधायकप्रत्ययोपकारित्वाभावान्नानुरञ्जकत
दित्याह * प्रकृतीति * लिङ्गशब्दो भावव्युत्पत्त्या द्योतनाख्यां
थाची उपकारिणो ऽपि धातोरनुरञ्जकत्वानपेक्षणाद्धात्वर्थर
ञ्जकता दूरोत्सारितेति सूचनायात्मशब्दः । ननु क्रियागर्भत
म्बन्धस्य धात्वर्थं विना द्रव्यदेवतसम्बन्धानिष्पत्तेधा
न्तरवाचिशब्दाश्रवणाच्च विधेयसम्बन्धापादनेनात्मनो वि
स्योपकरिष्यतीत्याशङ्क्याह * न चेति * यदि च श्र
यो: सम्बन्धः कार्यः सचालम्भति द्वारेति विधीयेत न ततो
भेदः स्याद्विधेयापादकविधावपि त्ववाक्यभेदे गुणफलसम्ब
दकाश्रयाश्रयिसम्बन्धविधावप्यवाक्यभेदापत्तेरिन्द्रियवाक्ये
धात्वर्थत्यागोक्तिरयुक्ता स्यादित्याह * यदि चेति * विनाि
श्रयाश्रयिसम्बन्धे गुणफलसम्बन्धोपपत्तौ प्रकरणलभ्याश्रयि
४९.७।१ न्धाभ्युपगमो विरुध्येतेत्याह * किमिति वेति * सप्तमाष्टमश्र
कारावप्यनेन प्रसङ्गाद् दूषितौ भवतः अतो न धात्वर्थानुरक्तेन
नान्यसम्बन्धस्य विधानाद्धात्वर्थाङ्गत्वसिद्धिरित्युत्तरश्रुतिप्रव
यदूषणस्य प्रस्तुताशङ्कानिरासार्थत्वं दर्शयितुमाह * तस्मादि
पञ्चमश्रुतिप्रकारवत्तु धात्वर्थाङ्गत्वसिद्ध्यर्थं दाने प्रकाशाध्वर्यु
न्धं करोतीतिवचनव्यक्त्यभ्युपगमे पूर्ववद्धात्वर्थाधिकरणत्व
न्धकर्त्तव्यत्वे आपाद्य निराकार्ये इत्याह * पूर्ववच्चेति * न
त्वर्थाङ्गतयेह सम्बन्धस्य विधिरिष्टो न तु धात्वर्थस्याधिक
तासम्बन्धस्य वा कर्मेत्याशङ्क्याह * न चेति *
ऽपि भावनान्वयात्प्राक् धात्वर्थे विधिर्न सम्भवतीत्य
ब्दार्थः कस्मादित्यपेक्षायामाह * इतीति * यथा भावना
त्प्राक्कस्य चिद्धात्वर्थान्वयो न सम्भवति तथा तद्भूताधिक
क्तेन मार्गेणेत्यादिवार्त्तिकेनोक्तमित्यर्थः । यद्ददाति तत्रा
प्राकाशयोः सम्बन्ध इति वचनव्यक्तिनिरासमुपसंहरति *
तावदिति * आध्वर्यवे यद्ददाति तस्य प्राकाशसम्बन्ध इत्य
मपि वचनव्यक्तौ दानस्याध्वर्युविशिष्टत्वे ऽध्वर्योर्वा दानविशि
वाक्यभेदः स्यादित्याह * अथेति * यो ऽध्वर्युस्तस्मै प्राक

त्येत्यस्यां तु वचनव्यक्तौ क्रियागर्भत्वात्सम्बन्धस्य ददातिं विना सम्प्रदानसम्प्रदेयसम्बन्धायोगात्कल्पिते ददातौ सम्बन्धः सम्बन्धाच्च ददातिकल्पनेतीतरेतराश्रयापत्तेर्न धात्वर्थे ऽन्ययोः सम्बन्ध इति वचनस्य श्रुतेर्व्यक्तिः प्रकारः सम्भवतीत्याह * शुद्धेति * ननु सम्प्रदानश्रुत्याक्षिप्ताद्धात्वर्थादेवाध्वर्युप्रकाशयोः सम्बन्धसिद्धेर्धातुकल्पनाभावान्नेतरेतराश्रयापत्तिरित्याशङ्क्य * यद्यपीत्युक्तम् * धात्वर्थस्याशाब्दत्वे ऽन्वयायोगादन्वयसिद्धये ऽवश्यकल्प्यो धातुरित्याशयः । यथा च सोमेन यजेतेति श्रुतियजिसद्भावान्नेद्रवायव्यादिवाक्येष्वन्ययजिकल्पना युक्ता तथेहापि श्रुतददात्यविवक्षयान्यददातिकल्पनायोगान्न शुद्धाध्वर्य्वनुवादोपपत्तिरिति सूचनार्थो दृष्टान्तः दानाध्वर्य्वनुवादेन च तत्सम्बन्धितया प्राकाशविधानेनार्थात्सम्बन्धविधिसिद्धावपि तात्पर्याभावाच्छ्रुतिप्रकारत्वानुपपत्तिरित्याह * अवश्यं चेति * अन्यतराप्राप्तौ सम्बन्धस्याश्रौतत्वे भाष्यकृत्संमतिमाह * वक्ष्यति चेति * यत्र च सम्बन्धो विधीयते तत्रान्यतरस्यान्यत्र विधानं सम्बन्धो नान्तरीयको यत्रा सम्बन्धस्य विधानान्नान्तरीयकौ सम्बन्धिनाविति तृतीयाधिकरणभाष्ये सम्बन्धविधिद्वैविध्यमुक्ता यत्राभौ लक्षणत्वेन तत्र स्वशब्देन सम्बन्धो विधीयते यत्र त्वन्यतरो लक्षणत्वेन तत्रैकं लक्षयित्वान्यतरो विधीयत इति विषयोदाहरणभाष्ये प्राग्वक्ष्यमाणामपि प्रकृत्य परिधीन् हारियोजनं जुहोतीत्यादावुभयप्राप्तौ सम्बन्धस्य श्रौतत्वं जाघन्या पत्नीः संयाजयन्तीत्यनभिमतत्वाद्व्यतिरेकप्रदर्शनमनात्रायेति सूचनार्थम् * पश्चादुक्तम् * विधेयान्तराभावेनार्थाक्षेपायोगात् श्रौतत्वसिद्ध्यर्थः केवलशब्दः उभयाप्राप्तौ सम्बन्धिनोः सम्बन्धविधिनान्तरीयकत्वायोगादनुदाहरिष्यमाणाप्युभयाप्राप्तिर्वायव्यं श्वेतमित्यादौ विशिष्टविधिरूपसम्बन्धविधिनान्तरीयकत्वविषयतयानुभयप्राप्तौ वेत्यनेनोदाहृता आख्यातेन च पदार्थान्तरान्वयविधौ बुद्धिविक्षेपस्य श्रुतित्रये ऽपि साम्यान्न बलाबले विशेष इत्याह * तिसृणामिति * ननु सन्निकर्षविप्रकर्षाविशेषे ऽपि धात्वर्थे ऽन्यान्वयविधौ धात्वर्थस्याविषयत्वे ऽपि विधेयविषयतया ग्रहणेनानुग्रहाद्धात्वर्थानुरक्ते ननुप्रत्ययेनान्यान्वयविधौ धात्वर्थस्याविधेयत्वे ऽपि विधेयविषयतयाप्यग्रहणात्ततो दौर्बल्यं प्रत्यययोरनुरञ्जकत्वेन तु ग्रहणेनात्यन्तत्यागाभावाद्धात्वर्थत्यागेनान्यान्वयविधितो बलीयस्त्वमित्याशङ्क्याह * नापीति * विधेयविषयत्वप्रत्ययानुरञ्जकत्वत्यागानामेकधात्वर्थविषयत्वाभावेनाविरोधाच्च बलाबलज्ञानो

पयोग इत्याशयः। अतः परदौर्बल्याभावक्रमेणोपन्यासः सप्त
श्रुत्योश्च षष्ठश्रुत्यन्तर्भावादष्टत्वगणनोपन्यासो ऽनर्थक इत्य
इतीति * प्रकरणार्थमुपसंहरति * तस्मादिति* पुनःश्रुतिरि
श्रावयवेन विहिताया अपि भावनायाः पुनर्विधानाभिधानात्स
र्थगतं वक्ष्यतीति च भाष्यावयवेन स्वपदार्थधात्वर्थगतं भा
व्यापारं विधिश्रुतिर्विधास्यतीत्यभिधानात्सर्वत्र विशिष्टभावन
प्रतीतिरधिकरणगतसूत्रभाष्यावयवविवक्षया लाक्षणिको ऽ
णशब्दः प्रस्तुतदध्यूध्वादिवाक्यरूपविषयवाची वा। ननु सर्व
वनाविधौ न क्व चिद्विप्रकृष्टार्थविध्यभिधानं युज्येतेत्याशङ्क्य
यश्चेति * सन्निकृष्टं धात्वर्थस्य भावनाविशेषणत्वं विप्रकृष्टं
त्याशयः। स एष इति भाष्यं स्वस्वपदार्थभूतो धात्वर्थ एष
व्यव्यापारविशेषणीभूतः सन् गुणविशिष्टो विधिश्रुत्या प्र
४२८। विधास्यत इत्येवं व्याख्यातुमाशङ्कते * कथं पुनरिति * शङ्क
सार्थत्वेन भाष्यं व्याचष्टे * विशिष्टेति * ततश्च गुणविधि
शो ऽपि फलाभिप्रापेणोपपत्स्यत इत्याह*फलतश्चेति * ननु
ऽपि कर्मणो विशिष्टविधौ सत्यनेकार्थविधिनिमित्तप्रत्ययावृ
धानं विरुध्येतेत्याशङ्कते * नन्विति * श्रुतिवृत्त्या विधेः सर्व
वनाविषयत्वे ऽपि प्राप्तायां तस्यामप्राप्तप्रापणाविषयस्वभ
द्विधेस्तात्पर्यवृत्त्या विशेषणत्वात्सकृदुच्चरितस्य चानेकतात
गादपरिहार्या वृत्तिरिति परिहरति* नैष इति * कृदन्तविधि
त्पन्नेन भावप्रत्ययेन सम्बन्धाभिधानात्तेविधेर्भावनया सह
विषयिलक्षणस्य सम्बन्धस्य श्रुतिवृत्त्या सार्वत्रिकत्वे ऽपि ता
तात्पर्यापरपर्यायस्य तत्प्रयोजनत्वस्य तत्फलत्वस्याप्राप्तविषय
भक्तत्वाद्व्यवस्थितत्वाद्विशेषणफले विधित्वे ऽनेकविशेषणपरे
परिहार्यो वाक्यभेद इत्यर्थः। श्लोकं व्याचष्टे * यदा हीति *
द्विशेषणविधानवाक्यभेदस्यैक्ये उक्त्यवसितानां तु नार्थाक्षे
रुध्यते इति पौर्णमास्यधिकरणवार्त्तिकोक्तत्वे ऽपि भाष्यकृत
त्ववारवन्तीयको यागो विधीयते ननु वारवन्तीयनिर्वृ
रेवतीषु वारवन्तीयमभिनिर्वर्त्स्यतीत्यनेन वारवन्तीयाधिकरण
माणत्वाद्वक्ष्याम इत्युक्तम् * प्रपूर्वस्य वसेः स्वस्थानात्प्रसि
न्यत्र वासे प्रयोगाद्भावनातः प्रस्थायापरत्रोषितत्वादित्यर्थः।
देरज्ञानमित्यध्याहारः । ननु योग्यतालक्षणसम्बन्धेन चक्षु
हकत्वाच्चक्षुर्ग्राह्यरूपसमानदेशस्यापि स्पर्शादेर्योग्यत्वेनाग्र
कं विधेस्तु विशेषणे ऽप्यवतारस्य भावनान्वयमात्रापेक्षत्वाद्

सर्वविशेषणेष्वैक्याश्च व्यवस्था युक्तेत्याशङ्क्याह * सर्वेति * धित्वस्य यो देशो भावनाख्यः स सर्वेषां विशेषणानां यद्यपि मानस्तथापि भावनातः प्रच्यावितस्य फलालोचनहेतुकत्वादेकस्य विधेरनेकफलत्वायोगादेकत्रैव विशेषणे विधित्वं पर्यवसितं दिति हि तदर्थत्वादित्यत्र दर्शितमिति फलमालोच्येति ल्यब्लोप-अम्यर्थे तसिमङ्गीकृत्य व्याख्येयं विधेर्विशेषणेष्ववतारस्य तात्प-पेक्षत्वात्तात्पर्यस्य चैकत्रैवोपपत्तेरेकत्रैवावतारो युक्त इत्याशयः। रोधपरिहारमुपसंहरति * तस्मादिति * ननु विशेषणफलेन धाने ऽनेकार्थविधौ वाक्यभेददोषे सत्यभ्युदितेष्टिविधावग्न्यादिदे-तातद्गुणादात्रादिरूपानेकार्थविधानात्प्राकाशादिविधिषु प्राका-ादिदेयतद्विशेषणहिरण्मयत्वादिरूपानेकार्थविधानाद्दोषः स्या-दित्याशङ्क्याह * यस्त्विति * पञ्चमादिश्रुतिप्रकारचतुष्टयापेक्षः स-शब्दः ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदि-भ्युदितेष्टिविधौ हि चन्द्राभ्युदये निमित्ते भावनामनाहत्य प्रकृत-र्शाख्यधात्वर्थोद्देशेनान्यविधाने ऽपि देवतातद्गुणरूपानेकार्थवि-ानात्प्राकाशादिविधिषु च धात्वर्थे ऽन्यसम्बन्धविधाने ऽपि देयत-द्विशेषणरूपानेकार्थविधानात् त्रिष्वपि च सम्बन्धविधिपक्षेषु सम्ब-न्धो विधीयमानः सम्बन्धिनं तावदाक्षिपेदिति वार्त्तिकोक्तन्यायेन सम्बन्धाक्षिप्तयोः सम्बन्धिनोरक्रियाङ्गत्वेनाननुष्ठेयत्वादनुष्ठेयत्वासि-द्ध्यै क्रियाङ्गत्वेन तयोरपि विधानापत्तेस्तुल्यो वाक्यभेदस्त-तश्चोभयवादितुल्यत्वान्नैकः पर्यनुयोज्य इत्याशयः । नन्वेवं सति वाक्यभेदपरिहारायाभ्युदितेष्टिविधौ यागान्तरविधानापत्तेः प्राका-शादिविधिषु च प्राकृते दक्षिणादाने प्राकाशादिमात्रविधानात्समस्त प्राकृतदक्षिणाबाधापत्तेस्तदधिकरणसिद्धान्तहानिः * स्यादित्याश-ङ्क्याह * यथेति * षष्ठे ऽभ्युदितेष्ट्याधिकरणे टुप्टीकायां नैवा-त्रानेकगुणा विधीयन्ते किं तर्हि विद्यमानस्यैव हविषो मध्यमभागा-ग्निदातृत्वविशिष्टा भावना प्रकृतयागसंबद्धा विधीयते इत्यादिवा-र्त्तिकेन प्रकृतदर्शयागाभेदे ऽपि तदवच्छिन्नभावनान्तराभ्युपगमेन वाक्यभेदः परिहरिष्यते दशमे प्राकाशाधिकरणे यद्वा सर्वविशेष-णविशिष्टो ददातिरपूर्वो विधीयतइति भाष्येणैव कर्मान्तरविधाना-भिधानात्तेनैव न्यायेनोत्तराधिकरणेषु स ब्रह्मणे देय इति श्वेताश्व-ब्रह्मविशिष्टदानान्तरविधिप्रतीतेः सप्रियाय सगोत्राय ब्रह्मणे देय इति सोमचमसप्रियसगोत्रब्रह्मविशिष्टदानान्तरविधिप्रतीतेर्यजुर्युक्तं रथमध्वर्यवे ददातीति यजुर्युक्तरथाध्वर्युविशिष्टदानान्तरविधिप्रती-

तैर्वाक्यभेदपरिहारो भविष्यतीत्याशयः । भवेदित्याशङ्काभाष
तु स्वपदार्थमित्यनेन गुणस्य भावनाविशेषणीभूतधात्वर्थविः
त्वोक्त्या भावनाविशेषणत्वस्योक्तत्वादयुक्तमाशङ्क्य यद्यपि तस
वनाख्यव्यापारस्य सम्बन्धिनं धात्वर्थाख्यं पदार्थं गुणशब्दो ।
षन् व्यापारं विशिष्यात्तथापि विनानेन प्रकारेण गुणावच्छिन्न
व्यापारो विधेयः प्रतीयेतेत्येवं विधेयत्वनिरासार्थत्वेन व्
भवेदिति गुणस्यःसाक्षाद्विधेयत्वयोग्यतायां गुणविधानार्थं
च्छिन्नरूपविधेयत्वं स्यात्तस्य त्वयोग्यत्वाद् गुणविशिष्टायां भ
यामेव विधेस्तात्पर्यावसायान्न गुणविधानार्थत्वोपपत्तिरिति श
च्छब्देन सूचितं भावनापरेऽपि विधावर्थाक्षेपाद्धि विशेषणभूत
नुष्ठानसिद्धेर्नैयमाशङ्का युक्तेत्याशङ्काक्षेपार्थं तत्रेति भाष्यमनु
विध्यधीनत्वाद्विधिं विनानुपपत्तेरयुक्तमाशङ्क्य वाक्यावगता
भावनाविशेषणत्वानुपपत्तिकल्पितगुणविध्याशयत्वेन व्याचष्टे
त्रेति * अथाप्रियमाणेऽपीति भाष्यं व्यधिकरणे सप्तम्यासङ्
विधेयाया भावनाया धात्वर्थाधीननिरूपणत्वाद् गुणाधीननिः
त्वाभावाद् गुणे पुंस्त्वव्याप्रियमाणे विधौ वा तस्मिन्नव्याप्रि
ऽपि गुणानपेक्षधात्वर्थावच्छिन्नभावनाविधानेन विधिशब्द
पत्तेर्नानुष्ठानं सेत्स्यतीत्याशङ्काशयविवरणार्थत्वेन व्याचष्टे
व्याप्रियमाणेऽपीति * तत्रेत्यादिनैकग्रन्थेन वा स एवाशङ्
न्येनापृष्ट एवानुष्ठानं निरूपयत्यन्यथा व्याचष्टे *स एवेति* स
ब्देन प्रश्नानपेक्षोक्ता भावनाया गुणाधीननिरूपणत्वाभावाद् गु
क्षविधेयत्वापत्तावपि स्ववाक्योपात्तगुणश्रुत्यानर्थक्यपरिहार
णविधिः कल्प्य इति पुनराशङ्काक्षेपार्थङ्गुणेति भाष्यम्भ
विधिना गुणस्य विधातुमशक्यत्वाद्भावनानिरपेक्षस्य च विधे
ल्पनायोगादगत्यानर्थक्यमेव ज्याय इत्याशङ्काशयविवरणा
नर्थक्यञ्चेति भाष्यमेकहेलया व्याचष्टे * तेनैवेति * विधिक
शयः प्रश्नः कल्पनानुपपत्त्याशयं चोत्तरमित्यर्थः । सर्वस्य दे
ध्यनविधिनार्थवत्त्वावधारणे आनर्थक्यायोगादवश्यकल्प्यो गुण
रित्याशङ्काक्षेपाशयविवरणार्थं कथं पुनरिति भाष्यं व्याचष्टे *त
यथा तत्र किं भविष्यतीति प्रश्नः कल्पविध्याशयस्तथायमपि
कल्पविध्याशय इत्युक्तेः पौनरुक्त्यं तर्हीत्याशङ्काशयाधिक्यं वेद
क्तं पूर्वपक्षे भावनानुष्ठानार्थत्वाद्विधेः कारकशून्यायाश्चानुष्ठ
क्तेर्विशिष्टविधिना विशेषभूतकारकानुष्ठानाक्षेपार्थं गुणवचने
न्विध्यार्थवत्त्वोपपत्तेर्नानर्थक्यं सिद्धान्ते तु दध्यादिवाक्ये वि

रूढत्वे ऽपि तदनुष्ठानार्थत्वाभावात्कारकानुष्ठानाक्षेपाशक्तेः
त्रध्याम्नातस्यापि गुणस्यानुष्ठानानवगमादानर्थक्यमित्युत्तरार्थ
यं सिद्धान्ते ऽपि गुणानुष्ठानार्थत्वाभ्युपगमादयुक्तमाशङ्क्य म-
तीकेनावतार्यानर्थक्यापादनार्थत्वेन व्याचष्टे * असति त्वर्थ इति *
दित्यादि किमन्यदुच्यतेत्यन्तभाष्योक्ता कापरिहारार्थमेवन्तर्हीति
यं वाक्यशब्दे श्रवणादेकाभिधानलक्षणश्रुत्युपात्तभावनानपेक्ष-
विधानार्थं तथा भासमानं भावानार्थविधायकेनापि विधिना
धप्रयोजनभूतगुणसमर्पणार्थवाक्यापेक्षणाभिधानार्थत्वेन व्याचष्टे
एवं तर्हीति * वाक्याद्भविष्यतीति वाक्यं किं भविष्यतीत्यपेक्षा- ४०
नतिक्रान्तावेक्षणेन गुणगतस्य व्यापारस्य विधेयत्वप्रतीतिरित्यव-
ात् * विधिरित्युक्तम् * ननु गुणमतो व्यापारो भविष्यतीति
ष्यार्थकल्पनयानेन विधिशब्देन भाष्यगता व्यापारशब्दा विधिवा-
त्वेन व्याख्याता इति भ्रमितव्यम् नन्विदानीमेव वाक्याद् गुणव्या-
ए * उपगम्यतइत्युक्तम् * सत्यमेतदविधीयमानस्तु कुतो ऽवगम्य-
ति वक्ष्यमाणभाष्ये व्यापारस्याविधीयमानत्वोक्त्यनुपपत्तिप्रस-
द्विधिवाचित्वे च व्यापारशब्दानां भावनावाचिशब्दान्तरस्येहा-
वात्प्रस्तुताधिकरणन्यायेन सर्वत्र लिङ्शिष्टभावनाविधिरेव त-
मिति वार्त्तिकं निरालम्बनमेव स्यात् श्रुतिबलीयस्त्वेन पूर्वपाक्षि-
यवस्थानार्थं श्रुत्यर्थे सतीति भाष्यं श्रुत्युपात्तायां भावनायां विधे-
ात्पर्यायोगेन श्रुतिविरोधाभावादयुक्तमाशङ्क्य भावनाविधिद्वार-
ाद् गुणविधेर्भावनानिरपेक्षे गुणे तात्पर्यायोगादापाद्योक्त्यर्थत्वेन
ाचष्टे * परस्त्विति * भावनाद्वारापि प्रवर्त्तमानस्य विधेरप्राप्त-
ापणस्वभावत्वेनान्यतः प्राप्तायां तात्पर्यायोगादानर्थक्यतदङ्गन्या-
न गुणे तात्पर्यावतारो युक्त इति परिहारार्थं सत्यमित्यादिविहित-
ादित्यन्तं भाष्यं व्याचष्टे * सत्यमिति * तत्सन्निधेरिति सूत्रा-
यवव्याख्यानार्थं स्वपदार्थस्येति भाष्यावयवं कर्मान्तरविधानोपप-
रयुक्तमाशङ्क्य कथं चित्प्राप्तिसम्भवे विशिष्टविधिगौरवान्याय्य-
वाभिधानार्थस्तद्गुणाधिकरणाधिकरणसूत्रावयवः पठितः। नन्वेवं
ाति तेनैव न्यायेन श्रुत्यर्थाविवक्षासिद्धेः प्रश्नो न युक्त इत्याशङ्क्य
* कथमित्युक्तम् * श्रुत्यर्थाविवक्षायां द्वेषातिशयेनोक्तन्यायापरा-
मर्शात्प्रश्नः श्रुत्यर्थाविवक्षावादिन एव वा हेत्ववतारार्थं प्रश्नोक्तिरि-
यर्थः। तत्सन्निधेरिति सूत्रावयवव्याख्योपसंहारार्थं तस्मादिति
भाष्यं तस्मात् शब्दपरामृष्टतत्सन्निधिं त्रेधा व्याचष्टे * तस्मादि-
ति * पौर्णमास्यधिकरणादिस्थानां चोदनाशब्दानां शब्दान्तरे कर्म-

भेद इति कर्मशब्दालोचनेन कर्मचोदनाविषयतया व्याख्
स्मिन्कर्मणि गुणत्वस्य संशब्दोक्तेनैकैकीभावेन विधानात्कारः
यस्याविशेषत्वेन क्रियायाः क्रियाकारकयोरत्यन्तभेदाभावाति
रा गुणस्य विधेयत्वोपपत्तिरित्याद्ये व्याख्याने तत्सन्निधि
स्तस्य गुणस्य सन्निधौ पठितस्याविधाने प्रमादपाठा
ति द्वितीये तस्याः कर्मचोदनाया वाक्यान्तरस्थायाः प्रत्यभि
दध्यादिवाक्ये कर्मणि विधेयतेति तृतीये सत्यं न श्रूयतइत्य
व्येण गुणविधिव्युत्पादनार्थत्वेन तत्सन्निधेरित्यादिसूत्रावय
व्यायाख्यातपदार्थविधावाख्यातपदानर्थक्यशङ्कानिरासार्थत्वे
स्य कर्मणो ऽग्निहोत्राघारवाक्यचोदितस्य दध्यादिवाक्ये
धानाद् गुणान्वयार्था पुनः श्रुतिरित्येवं व्याख्यातुं जुहोतेरिति
स्पष्टत्वादव्याख्याय यदीत्याशङ्काभाष्यं विधायकप्रत्ययानुवा
नभिधानादयुक्तमाशङ्क्य धातोरनुवादत्वे प्रत्ययस्यापि कैव
योज्यत्वेनानुवादत्वापादनाशयत्वेन व्याचष्टे * जुहोतेरिति
न्वेवमपि दध्यादिशब्दस्य विधायकत्वानिरासात्प्रश्नो न युक्त
शङ्क्याह * दधिशब्देनेति * यथा वाजपेयाधिकरणे, यदि यजे
नुवादः केनेदानीं गुणो विधीयतइति प्रश्नोपपादनार्थं वाज
ब्देनेति मा वोचत न ह्याख्यातं वा कृत्यं वान्तरेण * नाम
विधिशक्तिरस्तीत्युक्तम् * तथात्रापि वाच्यमित्यर्थः। छायाशब
क्रियार्थः वाक्यावगतस्य गुणान्वयस्याप्राप्तत्वाद्विधेयत्वप्रतीते
न्यथानुपपत्तिकल्पितेनाख्यातेन विधिसम्भवाच्छङ्काक्षेपार्थं ना
भाष्यं श्रुताख्यातत्यागेनाश्रुतकल्पनायोगेनाशङ्कासमाधानार्थं
त्यमिति भाष्यं स्पष्टत्वादव्याख्यायैवं तर्हीत्युत्तरभाष्यं व्याच
प्रत्यय इति * प्रत्ययस्य विधित्वे तद्वाच्याया भावनाया विधेय
पत्तेर्धात्वर्थानवच्छिन्नायाश्च तस्या विध्ययोगाद्धात्वर्थस्यापि
यत्वापत्तिरिति कस्येति भाष्येणाशङ्क्येहाविधीयमानस्याप्यः
ऽवच्छेदकत्वेन प्राप्तेरनुवादोपपत्त्यभिधानार्थं धात्वर्थस्येति
व्याचष्टे * धात्वर्थ इति*धातुप्रत्यययोः सहप्रयोगनियमे ऽप्य
दाद्विध्यनुवादविभागोपपत्तिसूचनार्थो विवेकशब्दः। ननु स्वा
पात्तस्यापि धात्वर्थस्यान्यतः प्राप्तत्वेनानुवादाभ्युपगमे भाव
अपि प्राप्त्याविशेषेणानुवादापत्तेर्व्यापारशब्देन भावनाविधान
धानं न युक्तमित्याशङ्कार्थं यदीति भाष्यं व्याचष्टे * यदीति *
धनानिरपेक्षगुणविधानाशक्तेर्गुणविधानार्थं प्राप्ताया अपि भावन
गुणविशिष्टरूपेण गुणविधानोपपत्त्यभिधानार्थं वाक्यार्थ इति भ

ाभिमतधात्वर्थोद्देशेनान्यविधिनिरासेन विशिष्टभावनाविध्यभि-
यत्वेन व्याचष्टे * वाक्यार्थ इति*यथैवं तर्हि वाक्याद्भविष्यतीति
ष्यं विशिष्टभावनाशयं तथेतदपीत्यर्थः।तस्मादिति सिद्धान्तोपसं-
रभाष्यमुपक्रमभाष्यव्याख्यया व्याख्यातमप्यनन्तरोक्तवाक्यार्थ-
ध्यालोचनेन भ्रान्त्यापादकत्वाद्व्याचष्टे * तस्मादिति * केव-
गुणविध्यसम्भवाद्वाक्यान्तरतो ऽप्याघारणहवनरूपकर्मान्तरव्या-
तरूपाप्रतीतेः संज्ञोपबन्धासम्भवस्योक्तस्य केवलगुणविधिव्यु-
ादनात्परिहारसिद्धेर्भाष्यकृतोपेक्षितं परिहारं स्वयमाह * जुहो-
ति*ननु सजातीयकर्मान्तरव्यावृत्तिर्न जुहोत्याघारयतिश्यां सेत्स्य-
त्याशङ्क्याह * इहेति * विधिस्वभावात्सर्वतो व्यावृत्तेः संज्ञोपब-
ोपपत्तिरित्यर्थः । अप्रकृतत्वाच्चेति सूत्रोक्तं प्राकरणिकवाक्या-
ारतो ऽपि रूपालाभं परिहरति * प्रकरणाच्चेति * यत्त्वज्ञातरूप-
ा कर्मणो विध्यसम्भवात्फलकरणत्वानवगतेरुत्पत्तिवाक्ये कथं-
ावात्मकं प्रकरणं नास्तीत्युक्तम् । तद्वाक्यान्तरतो रूपलाभसम्भवे
ाभावात् ज्ञातरूपस्यापि कर्मणो विधिसम्भवादेव कर्मान्तरव्या-
त्तिसिद्धेर्विधिसम्भवादुत्पत्तिवाक्ये ऽपि सामान्यतः फलकारण-
ावगतेः प्रकरणं सम्भवतीत्येवं परिहरति * न चेति * ननु प्र-
ारविशेषाकाङ्क्षात्मकत्वात्कथम्भावस्य फलविशेषान्वयोत्तरकाल-
ाच्च प्रकारविशेषाकाङ्क्षाया नोत्पत्तिवाक्ये कथम्भावोपपत्ति-
त्याशङ्क्याह * फलेति * निर्विशेषसामान्याभावादुत्पत्तिवाक्ये
प्यनिर्द्धारितफलादिविशेषप्रतीतेरनिर्द्धारितफलविशेषान्वयोत्तरका-
ऽ कथम्भावोपपत्तिरित्याशङ्क्याह * फलेति * निर्विशेषसामान्या-
ावादुत्पत्तिवाक्ये ऽप्यनिर्द्धारितफलादिविशेषप्रतीतेरनिर्द्धारितफ-
विशेषान्वयोत्तरकालं कथम्भावोपपत्तिरित्याशयः।या चानभिज्ञात-
रूपस्य फले विधातुमशक्यतोक्ता साप्ययुक्तेत्याह * न चेति * ८
ोममात्ररूपेण फले विहितस्य कर्मणो द्रव्यादिग्रहणे विरोधा-
ावादित्यर्थः । विशेषतो ऽत्र द्रव्यादेर्वाक्यग्राह्यत्वेन प्रकरणानपेक्ष
ात्सन्निधिमात्रेण च कर्मानुवादोपपत्तेः कथम्भावाभावे ऽप्यविरोध
त्याह * दृश्यते चेति * वाक्यान्तरप्राप्तं च कर्मानूद्य वाक्यान्तरेण
रूपग्रहणसम्भवे स्ववाक्याज्ञातरूपस्यापि कर्मणो वाक्यान्तरतो
रूपलाभाद्विधिनिर्वाहोपपत्तेर्विध्ययोगाभिप्रायेणाघारप्रकरणनिरा-
ायोगात्परप्रकरणपाठमात्रेण तन्निरासो वाच्यः। स चाभिक्रमाधि-
करणे निराकरिष्यमाणत्वादयुक्त इत्याशयेनाह * न चेति *
तदेवोपसंहरति * तेनेति * यदुक्तमित्यादिभाष्यमप्याघारप्र-

करणसद्भावाभिधानार्थमित्यनेन सूचितम् । तण्डुलोदूर्ध्वा
क्यानां कर्मविधित्वे कर्मबहुत्वात्तदनुनिष्पाद्यपूर्वबहुत्वकल
द्येतेत्याह * बहूनि चेति * अथानेकादृष्टकल्पनापत्त
रूपवत्त्वेनैषां विधित्वमिष्यते तदपि नास्तीत्याह * न चेति
ण्डुलादियुक्तानां होमानां देवता नास्ति ऊर्ध्वादियुक्तानां चाघा
यथा देवता नास्त्येवं द्रव्यमपीत्युभयाभावाभिधानं यदग्नये
देवतायुक्ते होमे द्रव्याभावस्तस्याघारमिन्द्र ऊर्ध्वो ऽध्वर
वाक्यविहिते चाघारे ऽन्यतराभावश्चकारेण सूचितः । कर्मान्त
धेश्च कर्मान्तरे गुणसमर्पकत्वायोगाच्च वाक्यान्तराद्देवतादिला
त्याह * सर्वे चेति * तस्मादित्यधिकरणार्थोपसंहारभाष्यं
चष्टे * तत इति * ननु वाक्यान्तराद्रूपलाभसम्भवाभिधाने
सञ्ज्ञोपबन्धव्याख्यायां परिहारसिद्धावपि द्वितीयव्याख्यायां
हारानभिधानान्नोपसंहारो युक्त इत्याशङ्क्यानुभाषणपूर्वं परि
* यस्त्विति * प्रयत्नरूपभावनासाध्यत्वे ऽपि होमादिधात
करणभूतधात्वर्थानवच्छिन्नाया भावनायाः कर्मान्वयायोगात
च्छेदकत्वेन सङ्कल्पादिधात्वर्थोपन्यासो ऽनुष्ठेयहोमादिस्वरूप
न्धानं द्रव्यादिकारकसमवायाभिधानं वादिशब्दोपात्तं क्रियात
धात्वर्थस्य जन्यत्वात्कर्मत्वोपपत्तिः । वस्तुतस्तु धात्वर्थस्य
त्यर्थरूपक्रियात्वमेव नास्तीत्यपिशब्दार्थः । ननु सङ्कल्पादेर
दानाच्च तदपेक्षया कर्मत्वनिर्देशोपपत्तिरित्याशङ्क्याह * ते
अनिष्पन्नस्य होमादेः फलकरणत्वायोगात्सङ्कल्पादिनिष्पादिते
मेन फलं भावयेदिति शास्त्रार्थो ऽवसीयतइत्याशयः । ननु
दिवाक्यानां कर्मविधित्वाभावे ऽप्यग्निसूर्यवाक्ययोरनेकगुणवि
त्कर्मविधित्वावगतेरग्निहोत्रवाक्यस्य तद्वाक्यविहितसायम्प्रात
द्वयसमुदायानुवादत्वं भविष्यतीत्याशङ्क्ते * ननु चेति *
विधानं यदनेनोक्तं तदापद्यतइत्यर्थः । अत्र कैश्चिद्भाष्यमनादृत्य
पूर्वपक्षं कृत्वाद्यसूत्रत्रयेण समुदायानुवादत्वासिद्धान्तमुप
ग्निहोत्रे देवतायाः प्रकरणादप्यप्राप्तेर्विधित्वासम्भवस्य प्रकृत
ति सिद्धान्तसूत्रोक्तस्याग्निसूर्यवाक्याभ्यां देवताप्राप्तेरनुपपत्ति
ङ्क्याग्निसूर्यवाक्ययोः कर्मविधित्वं चोदना वा शब्दार्थस्य प्रयो
त्वादिति सूत्रावयवेनानेकगुणविधानान्यथानुपपत्त्योक्ताग्निस
क्ययोरपि द्रव्याभावात्कर्मविधित्वानुपपत्तिमाशङ्क्य दध्यादि
द्रव्यप्राप्तिरुत्तरावयवेनोक्तेत्युक्तं तेषां मतं दूषयितुमुपन्यस
तश्च नामेति * अत्रैव परोक्तामुपपत्तिमाह * एवं चेति *

ो इति द्वित्वसंख्यायाः पृथक्त्वनिवेशाद्भेदव्यवहारः व्यपदेशभेदः पृष्टः धर्मभेदोऽपि भेदापादकत्वाद्भेदं व्यवहारयतीत्यादिशब्देनोक्तः। नन्वभ्यासविषयाभेदे व्यवहारा भविष्यन्तीत्याशङ्क्याह * न मात्रेति * एकस्मिन्नभ्यासे सकलो ज्योतिष्टोम इति प्रतीत्यभावात्क्तं ज्योतिष्टोमावयवत्वमिह त्वेकैकस्मिन्सकलमग्निहोत्रमिते प्रतीतेर्नाग्निहोत्रावयवतेत्यर्थः। उभयत्र च समस्तेतिकर्त्तव्यतावृत्तेर्भेदापादिकेत्याह * एवञ्चेति * ननु कर्मैक्ये ऽपि कालभेदादेतिकर्त्तव्यतावृत्तिर्युक्तेत्याशङ्क्याह * अन्यथात्विति * एकादशेशपूर्णमासाख्ययोः समुदाययोः राजसूयाख्यानामिष्टिपशुसोमयागानां चातुर्मास्याख्यानां च वैश्वदेवादिपर्वणां कालभेदादङ्गावृत्तौ सद्धान्तितायां सवनीयपशौ च या पशुपुरोडाशाङ्गप्रचाराणां कालभेदे ऽप्यङ्गानावृत्तिवदिहाप्यनावृत्तिरित्याशङ्क्यैकस्य कर्मणः प्रक्रमात्प्रभृत्यासमाप्तेरेककालत्वात्सवनीयपशोश्चैककर्म्यात्प्रयोगाख्यस्य तन्त्रस्य विप्रकृष्टकालत्वे ऽप्यङ्गानावृत्तिर्युक्तेति वैषम्यं वक्ष्यमाणं दृष्टान्तितम्। दध्यादिवाक्यानां च कर्मविधित्वे दध्यादीनां भिन्नकर्मविषयत्वात्समुच्चये सति सम्प्रतिपन्नदेवतात्वात्सहप्रदानापत्तेर्विकल्पसिद्ध्यर्थं कर्मैक्यायाग्निहोत्रवाक्यस्य विधायकत्वं सिद्धान्तयितव्यं सूर्याग्निवाक्ययोस्तु कर्मविधित्वे पक्षद्वये ऽपि दध्यादिविकल्पसिद्धेर्विचारो ऽनर्थकः स्यादित्याशयेनाह * न चेति * परमतमुपसंहरति * तस्मादिति * सूर्याग्निवाक्ययोः कर्मविधित्वे सत्येककर्मासम्भविदेवताद्वयरूपगुणभेदितस्यैकैकवाक्यविहितस्य कर्मद्वयस्यैक्यमुपचर्यापराग्निकहोमानां चाग्निहोत्रवाक्यात्पश्चाद्विहितत्वेनानुवादायोगमभिप्रेत्य सायम्प्रातराहवनीयहोमविवक्षयाहुत्योरित्युक्तं परमतमुपन्यस्तं दूषयन्समुदायानुवादमेव तावन्निष्प्रयोजनत्वेन दूषयति * उच्यतइति * दर्शपूर्णमासाभ्यामिति द्विवचनस्य समुदायानुवादाव्यतिरेकेणासिद्धेर्विद्वद्वाक्ययोः समुदायानुवादो ऽर्थवान् अग्निहोत्रमिति वैकवचनस्य राजसूयेनेत्येकवचनवत् समुदायानुवादं विना ऽप्यसमुदायीकृतानामेव प्रकृतानां कर्मणामेकफलान्वयात्समुदायसिद्धौ सत्यां तद्गतैकत्वद्वारा सिद्धेः समुदायानुवादो ऽनर्थक इत्याशयः। नन्वग्निहोत्रशब्दविशेषितेन धातुना फलान्वयावगमात्ततः प्रागेव समुदायत्वसिद्ध्यर्थं समुदायानुवादो ऽर्थवानित्याशङ्कां निरस्यन् श्लोकं व्याचष्टे यथैव हीति * अनवगतफलानामपि कर्मणामेकप्रकरणविधानलक्षणैकधर्मान्वयाख्यात्प्रचयात्साहित्याख्यः समुदायः सेत्स्यतीत्याशङ्का-

निरासाशयः । प्राक्फलान्वयात्समुदायासिद्धावप्राप्तत्वान्नानु
ऽपि सिद्ध्येदिति सूचनार्थो दृष्टान्तः। समुदायसिद्ध्यैवैकवचना
नैकत्वसिद्धिर्न तत्सिद्ध्यर्थो ऽप्यनुवादो युक्त इति सूचनायैक
ब्दः । एवमग्निहोत्रं जुहुयात्स्वर्गकाम इति प्रयोगवाक्यगतमरि
श्रपदमपि प्रचयशिष्टसमुदायैकत्वद्वारेण भविष्यतीत्यध्याह
योज्यं यथा चेति श्लोकव्याख्या नन्वग्निहोत्रशब्दस्यैकप्रकरणा
नलक्षणप्रचयकृतसमुदायनिमित्तत्वे सति गार्हपत्यान्वाहार्य
होमानामपि प्रकृतत्वाविशेषात् ग्रहणेन फलान्वयापत्तेर्दर्शपू
सादौ च सर्वत्र गार्हपत्यान्वाहार्यपचनयोः प्रधानकर्माधिकरर
भावव्याप्तेरग्निहोत्रद्रव्यस्य च चतुरुन्नयनविधानाच्चतुरुन्न
स्कृतस्यैव प्रधानहोमार्थत्वावगमात्तस्य चाहवनीयहोममात्रा
दाहवनीयाधिकरणहोमविधायकाग्निसूर्यवाक्यानन्तर्याच्चाग्नि
जुहोतीति समुदायानुवादस्यस्याग्निहोत्रशब्दस्याहवनीयाहोम
विषयत्वेन तन्मात्रस्य फलान्वयावगतेर्नैकप्रकरणविधानापारि
मुदायनिमित्ताग्निहोत्रशब्दस्य सम्भवतीत्येतद्वाक्याभावे ऽ
र्यवाक्यविहितहोममात्रसमुदायासिद्धेस्तात्सिद्ध्यर्थः समुद
०।१।२ वादो ऽर्थवानित्याशयेनाशङ्कते * नन्विति * प्रकृतत्वावि
जुहोतेः सर्वहोमग्राहित्वावसायाद्वैदिके चार्थे ऽनुमानाप्रवृत्ते
यडपितृयज्ञादेश्चातिप्रणीताग्नौ विहितस्याहवनीयानधिकरणत्वे
प्राधान्यदर्शनात्संस्कारव्यवस्थामात्रेण च प्राधान्यव्यवस्थानु
रानन्तर्यस्य च पञ्चमक्रमात्मकप्रमाणत्वेन प्रकरणेन बाधाद्
यशब्दवत्प्रकृतमात्रग्राहिजुहोतिसामानाधिकरण्येनाग्निहोत्रश
सूर्यप्रकृतहोमविषयत्वावसायान्नाहवनीयहोममात्रासिद्ध्यर्थत्वं
दायानुवादस्य सम्भवतीत्याशयेन परिहरति * समुदायेति
बहुव्रीहेः सर्वनामार्थवृत्तित्वात्सन्निहिताहवनीयहोमविषयत्व
रापराग्निकेभ्यो व्यवच्छेदो भविष्यतीत्याशयेन शङ्कते*नन्वि
पाश्चात्ये ऽप्यथैष ज्योतिरित्यादौ सर्वनामप्रयोगदर्शनेन प्रा
मनादृत्य सन्निधिमात्रापेक्षणादापराग्निकहोमानामपि चैकप्र
गतत्वेन सन्निध्यविशेषादत्यन्तसन्निधेश्च द्वयोरप्यसम्भवा
हितार्थवृत्तित्वेन विशेषणत्वानुपपत्तेरग्निदेवत्यहोमाभिधायित
शेषणत्वं वाच्यं तच्चापराग्निकनामप्यग्निदेवत्यत्वान्न सम
त्यापाद्योक्त्या परिहरति * नेति * अग्निदेवत्यत्वे च विशेष
प्रातर्होमस्यापि प्राधान्यं न स्यादित्याह * अपि चेति* अतः
यानुवादाभाववत्समुदायानुवादे ऽपि सर्वेषां प्राधान्यात्समु

दो ऽनर्थक इत्युपसंहरति * तस्मादिति * नन्वग्निहोत्रवाक्यस्य
धित्वे सर्वाग्निष्वभ्यस्तस्य कर्मणो भेदाभावात्प्राधान्याविशेषे
यग्निसूर्यादिवाक्यानां कर्मविधित्वे ऽग्निहोत्रवाक्यास्यानन्यप्रयो-
नत्वात्समुदायानुवादार्थत्वावगतेः प्रकृतमात्रग्रहणे च समुदाया-
वादानर्थक्यापत्तेः प्राग्विहिताहवनीयहोममात्रानुवादावसाया-
परग्निकानामङ्गत्वं भविष्यतीत्याशङ्क्याह * तथेति * सूर्या-
यादिवाक्यानां कर्मविधित्वाभावे ऽपि गुणार्थतयार्थवत्त्वोपपत्तेर्न
षां कर्मविधित्वाभ्युपगमेनाग्निहोत्रवाक्यस्य समुदायानुवादता-
ुपगन्तुं युक्तेत्याशयः। शाखान्तरे च द्वे आहवनीये चतस्रो गार्ह-
त्ये चतस्रो ऽन्वाहार्यपचने दश सम्पद्यते दशाक्षरा विराट् य
वं विद्वान् विराट् सम्पन्नमग्निहोत्रं जुहोतीति सर्वहोमविषयत्वे-
ाग्निहोत्रशब्दप्रयोगात्सर्वविषतयैवाग्निहोत्रशब्दस्य निश्चीयत इ-
ाह * तथा चेति * विराट्शब्दस्य दशाकाख्यत्वादापराग्नि-
होमाग्रहणे च दशाकासम्पत्तेः सर्वविषयत्वलिङ्गेन विराट्सम्प-
दुपन्यासः अतः समुदायानुवादानर्थक्याद् गुणविधित्वस्य च त-
त्ख्याधिकरणे निरस्तत्वात्कर्मविधितैवाग्निहोत्रवाक्यस्य युक्तेत्या-
* तस्मादिति * नन्वेवमपि गार्हपत्यादिवाक्येषु संख्याधिक-
णारूपानेकगुणविधानात्कर्मविधिप्रतीतेः कर्मभेदे सति कर्मैक्यं न
सिध्यतीत्याशङ्क्याह * ततश्चेति * यदाहवनीये जुहोतीत्यनारभ्य-
ादेन सर्वहोमानामाहवनीयाधिकरणत्वप्राप्तेराहवनीये द्वे इत्यस्या-
त्यन्तरपरिसंख्यार्थत्वादष्टानामाहुतीनामधिकरणापेक्षायां गार्हप-
यान्वाहार्यपचनाधिकरणत्वविधौ समं स्यादश्रुतित्वादित्यनेन न्या-
ानैकैकत्र चतुष्टयस्य प्राप्तस्यानुवादाद् गार्हपत्ये जुहोत्यन्वाहार्यप-
चने जुहोतीति वाक्यान्तराभ्यां वा गार्हपत्यान्वाहार्यपचनप्राप्तेश्च-
ुरावृत्तिलक्षणगुणमात्रविधानार्थत्वात्तत्संयोगस्याहवनीयसंयोगस्य
च द्विरावृत्तिलक्षणगुणमात्रविधानार्थत्वान्न वाक्यभेदापत्तिरित्या-
ाशयः। ननु कर्मैक्ये सत्यग्नीनां विकल्पापत्तेस्तत्संयोगेन विहिताना-
मावृत्तीनामपि विकल्पप्रसङ्गाद्विराट्सम्पत्त्यनुवादो न युज्येतेत्याशये-
नाशङ्कते * कस्मात्पुनरिति * केषां चित्परिहारं दूषयितुमुप-
न्यस्यति * के चिदिति * प्रक्षेप्यस्य द्रव्यस्य क्व चित्प्रतिष्ठां वि-
नाप्याधारासिद्धयोजनमात्रेण प्रक्षेपसिद्धेरग्निसंयोगस्यादृष्टार्थत्वे-
नैक्यार्थ्ये प्रमाणाभावान्न विकल्प इत्यर्थः।अदृष्टार्थत्वे सति वैकल्पि-
कबाधायोगादविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य तत्सन्दिग्ध-
माराद्विशेषशिष्टं स्यादिति दशमाधिकरणविरोधः स्यादिति दूषण-

माह * एवं त्विति * तत्राङ्गानुरोधेनाश्रुतावृत्त्ययोगाद् बाध
ऽपीहावृत्तिश्रवणाद्विकल्पानुपपत्तिरित्याशयेनाशङ्कते * अथे
द्विरावृत्त्यादिश्रवणे ऽपि दशकृत्वा आवृत्त्यश्रवणाद्विराद्श्रुतेश्च
दसरूपत्वात्साम्यमित्याशयेन परिहराति * इहापीति * स्व
नुवादसरूपत्वमन्यतः प्राप्त्यभावाद्विधित्वे सति द्वादशाधि
न्यायेन समुच्चयसिद्धिरिति परिहरति * तस्मादिति * ि
सम्पत्त्यविधाने त्वदृष्टार्थत्वे ऽप्याहवनीयादिसंयोगस्य प्रत्ये
हुतीनां स्थानविशेषनियमात्स्थानान्तरपाते · च प्रायश्चित्ता
त्कर्ममध्ये चानुगते ऽग्नौ लौकिकाग्निब्राह्मपाण्यादौ होमविधि
नात्सप्तमीश्रुतेश्चाधारणत्वद्वारैवादृष्टार्थत्वावसायान्न देवत
शब्दक्रियमित्यत्र वाग्निप्रतिनिधिनिरासस्य प्रत्यक्षदृश्याग्नि
दृष्टार्थत्वे ऽप्याहवनीयादिरूपस्यादृष्टार्थत्वेनान्यत्र तदवयवा
प्रमाणाभावादुपपत्तेरन्योन्यनिरपेक्षस्य च विभक्तिश्रुत्याध
०२।२ प्रतीतेर्विकल्प एव स्यादित्याह * अन्यथा हीति * श्लोकं व्य
* सत्यपीति * ननु विद्वद्वाक्यस्य विधित्वाभ्युपगमे द्विचतु
कृत्व आवृत्तिलक्षणानेकगुणविधानात्कर्मोत्पादकत्वापत्तेरुत्पत्ति
संख्यया कर्मभेदः स्यादित्याशयेनाशङ्कते * कस्मात्पुनरिति :
ग्निहोत्रवाक्यस्यानन्यप्रयोजनत्वेन कर्मोत्पादकत्वावसायाद्वि
त्यादिवाक्यानां च विभागेनैकैकगुणविधायकत्वोपपत्तेरनुत
स्थत्वान्नेयं संख्या भेदिकेत्याशयेन परिहराति * नेति * नन्व
त्तिस्थापि संख्या कस्मान्न भेदिकेत्याशङ्क्याह * उत्पत्तिस्था ही
उत्पत्तिवाक्यावधारितसंख्ये कर्मणि संख्यान्तरानिवेशादावृत्त
च संख्यान्तरसम्पादनोपपत्तेर्नास्वरूपभेदकत्वं सम्भवतीत्याश
अग्निहोत्रवाक्यस्य कर्मविधित्वे कर्मैक्यसिद्धिमुपपादितामुपसं
ति * तेनेति * परोक्तं समुदायानुवादत्वं निष्प्रयोजनत्वेन दूष
त्वाग्निसूर्यवाक्ययोर्गुणविधित्वे वाक्यभेदापत्तेः । कर्मविधित्व
शङ्कितमनुभाषणपूर्वकं दूषयति * यत्त्विति * चशब्दात्समु
तस्य देवताद्वयस्य सकृच्छ्रुतेन प्रत्ययेन विधानोत्पत्तेः कालदे
रूपाणामेकार्थविधानाद्वाक्यभेदो वाच्यः स चात्र कालानुवादा
स्तीत्याशयः । नन्वनेकार्थविधिलक्षणवाक्यभेदाभावे ऽपि
शिष्टानुवादलक्षणो वाक्यभेदः स्यादित्याशङ्कते * नन्विति
कालमात्रानुवादात्परिहरति · * नेति * जुहोतेस्तर्हि का गतिरि
शङ्क्य प्रकरणलभ्यकर्मानुवादतोक्ता ननु कालस्य देवतान्वये
सम्भवतीत्याशङ्क्य द्वेधा परिहरति * स त्विति * प्राकरणिका

न्तरात्कालस्य कर्मान्वयावगतेस्तद्वारा देवतान्वय इत्येकः परि-
:। विधीयमानया सम्प्रदानभूतया देवतयाकाङ्क्षितत्वात्प्राकरणि-
क्यान्तरेण च होमस्य कालान्वयितयावगतेस्तल्लक्षणार्थः काल-
श इति द्वितीयः । ननु प्रत्यक्षश्रुतत्वाद्धोमस्य कालेन लक्षणा न
त्याशङ्क्याह * न चेति * वाक्यभेदापत्तेः श्रुतस्य होमस्य का-
विशेष्टुमशक्यात्प्रत्ययानुग्राहकत्वेन च धात्वर्थानर्थक्यपरिहारो-
नेलक्षणयैव लाभो ऽभ्युपगन्तव्य इत्याशयः । ननु कालेन हो-
क्षणायामनया यो हि कालस्येत्यनेन न्यायेनैककाललक्षितहोमस्य
ग्रन्तरे ऽप्यनपायादग्नीषोमलक्षितोपांशुयाजे विधीयमानस्य
मासीकालस्य देवतान्तरयुक्ते ऽपि प्राप्तिवदेककाललक्षिते होमे
ीयमानाया देवतायाः कालान्तरयुक्ते ऽपि प्राप्तेर्व्यवस्थापरत्वा-
न युज्येतेत्याशङ्क्याह * न चेति * कर्मस्वरूपमात्रलक्षणे स-
केनैव तत्सिद्धेः कालद्वयोपादानानर्थक्यप्रसङ्गात्स्वानुरक्तक-
क्षणे कालान्तरयुक्ते कर्मण्यप्राप्तेर्नोपांशुयाजतुल्यतेत्याश-
। अतो ऽग्निसूर्यवाक्ययोर्व्यवस्थापरता युक्तेत्याह *
ति * व्यवस्थायाः सूर्याग्निमात्रविषयत्वे ऽपीतरेतरयु-
वताद्वयविधेः प्रत्येकव्यापाराभावे वाच्यभेदसूचना-
द्वन्द्वनिर्देशो द्वन्द्वनिर्देशसूचितमपि वाक्यभेदपरिहारमजान-
वाक्यभेदोक्त्याशयमाशङ्कते * नन्विति * चशब्दाद्देवताद्व-
मुच्चयस्य सकृच्छ्रुतेन प्रत्ययेन विधानावगतेर्वाक्यभेदाभावे
। वाक्यभेदमाशङ्कमानेनाग्नेयपदोपात्तद्रव्यदेवतरूपानेककार-
दग्निप्रजापत्योरनेककारकत्वं वाच्यं तच्च नास्तीत्यनेककारकत्वं
नभिमतमप्यापाद्यान्येषां परिहारं दूषयितुमुपन्यस्यति *नेति* ५०
पदं च यावत्किं चित् द्रव्याश्रितं जातिलिङ्गसंख्यादीत्यादिपौ-
ास्यधिकरणवार्त्तिकोक्तं परामृष्टं पृथक्चतुर्थीनिर्देशादग्नीषोम-
समुच्चितयोः कारकत्वाप्रतीतेः कारकयोस्तु समुच्चये कारकभे-
त्तेरग्नये दात्रइत्यादिवद्विशेषणविशेष्यभावात्त्वेककारकत्वे
शब्दानुपपत्तिप्रसङ्गात्सत्यपि वा विशेषणविशेष्यभावेनैककार-
वे भिन्नकारकविभक्त्युपात्तयोररूणयैकहायन्यादिवत्क्रियान्व-
विना परस्परविशेषणविशेष्यभावायोगाद्यज्ञहोति तदग्नये त-
प्रजापतित्वगुणविशिष्टाय जुहोतीति प्रत्येकविधिव्यापारापत्ते-
रिहार्यो वाक्यभेद इत्याशयेन दूषयति*अत्रेति * अग्नये दात्र-
। वद्विशेषणविशेष्यत्वाङ्गीकरणेन प्रजापतित्वगुणविशिष्टस्याग्नेः
रकत्वाद्यद्यप्येकं कारकं तथाप्यनेककारकपदोपात्तयोः कारक-

विभक्तिश्रुत्या क्रियान्वयावगतेः क्रियान्वयात्प्राग्विशेषणविशे
प्रतीतेः प्रत्येकं विधिव्यापाराद्विधायकप्रत्ययावृत्तिः स्याद्वः
प्रजापतेः स्वतन्त्रदेवतात्वप्रसिद्धेर्विशेषणत्वाभावेन कारकैः
स्तीति यद्यपि शब्दार्थः श्लोकं व्याचष्टे * विभक्त्या हीति *
सस्यैकपद्यात्सकृच्छ्रुतप्रत्ययान्वयो युक्तः अग्नये च प्रजापत
त्यत्र समासाभावेनेतरेतरयुक्तस्याग्नीषोमवत्कारकत्वाभाव
षणत्वविशेष्यत्वाप्रतीतेश्च विशिष्टस्य कारकत्वाभावात्पर
स्तावन्नैकं कारकं यद्यप्येकं तथाप्यनेकपदोपादानात्प्रत्ययावृ
त्तिरित्यपि शब्दार्थः । ननु सम्प्रदानत्वमात्ररूपेण कारकैक
सम्भवति सामान्यस्याविधेयत्वाद्विभक्तिभेदे च कारकवि
क्यायोगादावृत्त्युपपादनार्थं प्रत्ययस्य क्रियैकविषयत्वेन क्रिय
विना चार्थस्य विषयीकरणरूपालोचनायोगात्कारकत्वं च
क्रियान्वयायोगाद्विभक्तिप्रयुक्तस्य प्रत्ययस्य नामार्थालोचन
भिन्नयोरपि कारकयोश्चशब्देनेतरेतरयुक्तयोर्विषयत्वावगमात्
विधिव्यापाराभावाद्भिन्नयोरपि विधेयत्वे विषयाभेदाद्वाक्यभेद
हारसम्भवे ऽपि यद्यवश्यमेकार्थविधिरेव वाक्यभेदपरिहाराय
व्य इत्याग्रहस्ततो देवताद्वयविधौ कारकैक्यसम्भवात्सामान्य
णैक्यसम्भवे ऽप्यनेकपदोपात्तयोरितरेतरयोगाविवक्षायामनेका
यत्वापत्तेस्त्वदुक्तपरिहारायोगाद्वरमेकदेवताविधानाभ्युपगमेन
क्यभेदः परिहर्त्तव्य इत्याह * तस्मादिति * प्रजापतिः
विधौ व्यवस्थानुपपत्तेः सायम्प्रातःशब्दयोरविवक्षितार्थत
केनैव वाक्येन कालद्वये ऽपि कर्मैक्यात्प्रजापतिः
वाक्यान्तरानर्थक्यप्रसङ्गाद्विधेयस्य प्रजापत्तेर्देवतान्तरसाहि
स्तुत्यर्थं पुनः प्रजापतिसङ्कीर्त्तनमित्यभ्युपगमे विध्यर्थवादर
कवाक्यत्वाद्वाक्यद्वयव्यवस्थानुपपत्तेर्यथाग्नाई पत्नीवान्निति मन
र्णाद्देवताभूताग्निप्राप्तेस्तद्विशेषणमात्रं पात्नीवतं गृह्णातीति त
तेन विधीयते तथात्राप्यग्निसूर्ययोः प्रजापतित्वविशेषणं साय
ग्नेः प्रजापतित्वं विशेषणं प्रातः सूर्यस्येत्येवं व्यवस्थया विधीय
इत्येवं व्याख्येयं नाग्नेः सूर्यस्य वा शुद्धस्य देवतात्वं किं तु
जापतित्वविशेषणमपि देवतात्वान्तर्गतमित्यभिधानार्थत्वाभ्युपग
च शब्दानर्थक्यं परिहार्य्यमित्याशयः । विशेष्ययोर्देवताभूतयोरग्नि
सूर्ययोः कुतः प्राप्तिरित्याशङ्क्याह * अग्नीति * अग्निर्ज्योतिर्ज्यो
तिरग्निः स्वाहेति सायं जुहोति सूर्यो ज्योतिः ज्योतिः सूर्यः स्वा
हेति प्रातर्जुहोतीति वाक्यान्तरविहितमन्त्रवशाद्विशेष्यप्राप्तिरि

प्रजापतेः स्वतन्त्रदेवतात्वे गुणवृत्त्यैन्द्रीवन्मन्त्रयोः प्रजापति-
कत्वोपपत्तेर्देवताकल्पकत्वायोगान्न मूर्द्धाग्निसूर्यप्राप्त्यर्थो ऽर्थ
। नन्वग्निसूर्ययोरन्यतः प्राप्तत्वे प्रजापतिविधौ कीर्त्तनं कि-
त्याशङ्क्याह * ताभ्यामेव चेति * स्तुतिशब्दस्य गुणप्र-
धानवाचित्वाद्विधीयमानप्रजापतित्वलक्षणगुणापेक्षितगुणिस्व-
योपादानमित्यर्थः । ननु प्रजापतिशब्दस्य देवताविशेषे रूढ-
जापालनगुणवाचिता न युक्तेत्याशङ्क्यागत्या गुणवाचित्वाङ्गी-
चित्याभिधानाय * औचित्येनेत्युक्तम् * नन्वेवं सति तत्प्र-
करणे * यदग्नये चेत्यत्र * नाग्निप्राप्त्यभिधानं न युज्येते-
त्याह * यदपि चेति * मन्त्रतो प्राप्तस्याग्नेर्विशेष्यत्वेनानु-
ोगान्मन्त्रस्याग्निप्रापकत्वालिङ्गतयेदं तत्रोदाहृतमित्यर्थः । न-
प्रजापत्योर्विशेषणविशेष्यभावे ऽग्नेः पूर्वाहुतिः प्रजापतेरुत्तरे-
विरोधेनापि पक्षस्यानभिमतत्वात्केन विशेषणोपन्यास इत्याश-
* आहैवं चेति * ब्राह्मणेनाग्निसूर्ययोरविधाने लिङ्गात्तद्दैवत्य-
प्राप्तेर्मन्त्रविषययोर्विध्योर्नानर्थक्यापत्तिरित्यर्थः । ननु लिङ्गा-
द्दैवत्यमन्त्रप्राप्तावप्यग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति सायं
ते सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातर्जुहोतीति मिश्रदेव-
त्रविधानात्पर्युदस्तयोः प्रतिप्रसवार्थत्वेनानर्थक्यं परिहर्त्तुं श-
त्याशङ्क्याह * अन्यथेति * परिह्रियते अनेनेति क-
परिहारशब्दं व्युत्पाद्य परिहारश्च तत्प्रयोजनं चेति कर्मधारयो-
ह्यः तदर्थशास्त्रत्वलक्षणस्य दोषस्य परिहारकं यत्प्रयोजनं म-
प्रकरणे गुणविधिरूपं परिसंख्यारूपमर्थवादरूपं चोक्तं तत्ता-
सम्भवति यत्त्वादिशब्दोक्तं पर्युदस्तमन्त्रप्रतिप्रसवरूपमिहाभिम-
ोजनं तस्मिन्कल्प्यमाने ऽति क्लेशः स्यादिति कल्प्यमानपदा-
रेण व्याख्येयम्। नन्वतिक्लेशापत्तावप्यग्नेः पूर्वाहुतिः प्रजाप-
तेरित्यादिश्रुतिविरुद्धविशेषणविशेष्यत्वकल्पना न युक्तेत्याश-
* तस्मादिति * एकार्थविधिं विना वाक्यभेदपरिहारास-
भिमानिनं प्रत्येकार्थविध्युपपादनार्थं मन्त्रवर्णप्राप्तयोरग्निसूर्य-
प्रजापतित्वलक्षणविशेषणरूपैकार्थविधिरनभिमतो ऽप्युक्तो न
मार्थिक इत्याशयः । कस्तर्हि पारमार्थिको वाक्यभेदपरिहार
शङ्क्याह * एतीति * येन कारणेन पारमार्थिको वाक्यभेद-
हारो भवति तत्प्रागेवाग्निप्रजापती सूर्यप्रजापती इति चेतरेतर-
हेत्यवाचिद्वन्द्वनिर्देशात्सूचितमित्यर्थः * अयमाशयः * यथा
ाश्वश्वाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च

माषाश्च तस्य द्वादशशतं दक्षिणेति वाक्ये चशब्देनेतरेतरसां
गवादिशब्दस्य दक्षिणाशब्दान्वयावगमात्समुदितानां गवादी न
दक्षिणात्वावगतेर्द्धेनुर्दक्षिणेति विकृतौ विहितायाः धेनोः सम
क्षिणाविकारत्वं दशमे वक्ष्यते तथेहापि यज्जुहोति तदग्नये
जापतये चेति चशब्दात्समुच्चितयोरेवाग्निप्रजापतिशब्दयोर्वि
कान्वयप्रतीतेः प्रतिपदं विधेरपर्यवसानेन विधिव्यापारभेदा
त्पृथक् चतुर्थीनिर्देशात्कारकभेदप्रतीतेर्भिन्नयोरपि विधेयत्वे
यावृत्त्यप्रसक्तेः समुदितरूपस्य च विधेयत्वेन विधेयभेदाभाव
कार्थत्वाप्रसक्तेर्देवताद्वयविधावपि न वाक्यभेदापत्तिरिति प्र
चैतत्तन्त्रसारे वाजपेयाधिकरणे ऽत्रापि तत्प्रख्याधिकरणे ऽस्
रुपपादितमिति ग्रन्थगौरवभयान्न बहुप्रपञ्च्यते । यत्तु ग्रहाभ
ज्योतिष्टोमावयवबुद्धिवत्सायम्प्रातर्होमयोरग्निहोत्रावयवबुद्ध्या
वेन तद्भेदव्यवहारस्यावयवविषयत्वायोगाद्भेदोपपादकत्वमु
दप्यनुभाषणपूर्वं दूषयति * यत्त्विति * यथा द
मासावृत्त्यात्मके दाक्षायणयज्ञे सकलयोर्दर्शपूर्णमास
रावृत्तेर्नावृत्तावयवबुद्धिस्तथाग्निहोत्रस्यापि सकलस्य
राड्वाक्याद्दशकृत्वो ऽभ्यस्तस्य द्वे आहवनीये द्वे गार्हपत्ये द्वे
हार्यपचनइति वाक्यात्षड्कृत्वो ऽभ्यस्तस्य तस्य वा एतस्याग्नि
स्य स च शतानि विंशतिश्च संवत्सरे सायमाहुतयः सप्त
शतानि विंशतिश्च संवत्सरे प्रातराहुतय इति वाक्यान्तरालो
वा द्विरभ्यस्तस्य सायम्प्रातःकालयोरावृत्तेर्नावृत्तावयवबुद्धि
र्थः । नन्वेकस्मिन्काले ऽग्निहोत्रसाकल्ये सति दाक्षायणया
वृत्त्यविधानात्प्रयोगसमाप्तेः कालद्वये ऽनुष्ठानप्रमाणाभावादाच
रोधः स्यात्सूर्याग्निवाक्यविहितयोस्तु कर्मणोरग्निहोत्रवाक्येन
दायानुवादे प्रयोगवाक्यस्थेनाग्निहोत्रशब्देन कर्मद्वयग्रहणात्व
ये ऽनुष्ठानोपपत्तिरित्याशयेन स एव पूर्वपक्षी प्रत्यवतिष्ठते
न्विति * एकैकस्मिन्काले प्रयोगसमाप्तावपि सायं जुहोति
होतीति वाक्यान्तरप्राप्तयोः कालयोः प्रयोगापेक्षितत्वेन तच्चे
यगतेर्यावज्जीवं सायम्प्रातर्जुहुयादिति प्रयोगशास्त्रार्थावधार
त्वे ऽपि कालस्यानुपादेयत्वसाम्येनार्थान्निमित्तभूतजीवनवि
त्वावगतेः कालावच्छिन्नस्य जीवनस्य निमित्तत्वात्प्रतिनिमि
नैमित्तिकानुष्ठानस्य षष्ठे वक्ष्यमाणत्वान्नैमित्तिकहोमकरणं ता
स्मिन्काले प्रयोगसमाप्तावपि यावज्जीवचोदनया भविष्यत
ष्ठानाविरोध इत्याशयेनैकदेशिनः परिहारं दूषयितुमुपन्यस्य

। * उभयत्रानुष्ठानस्यानेन प्रकारेण सिद्धावपि सायं होमे कृते ५८
मानापद्यप्यृत्विग्द्वारा प्रातर्होमो ऽवश्यकार्यत्वाचारविरोधः प्र-
ाभेदपक्षे दुष्परिहर इति दूषणमाह * सत्यमिति * अस्या-
रस्यैकप्रयोगपक्षे न्यायमूलत्वप्रदर्शनार्थम् * प्रक्रान्तेत्युक्तम् *
स्यप्रयोगे वोभयत्रानुष्ठानविरोधो ऽपि दुष्परिहर इत्याह * कि
ते * नन्वेकस्मिन्काले ऽनुष्ठानात्फलसिद्धावपि कालान्तरे नैमि-
कानुष्ठानोपपत्तेर्नाचारविरोध· इत्याशङ्क्य * सर्वाङ्गसंयुक्तः फ-
र्थिना चेत्युक्तम् * कालद्वये सर्वाङ्गादरः फलप्रार्थनं च विरु-
तेत्याशयः । प्रयोगैक्ये ऽत्वविरोध इत्याह * अभ्यस्तेति * एकदे-
परिहारं दूषयित्वा स्वमतेन प्रश्नपूर्वं परिहरति*कथं पुनरिति *
स्र एव साह्नस्योपसद इत्यादिवाक्यपर्यालोचनया पूर्वाह्णपारा-
गोपसत्प्रयोगैक्यावसायात्पुरस्तादुपसदां प्रवर्ग्येण चरन्तीत्युपस-
र्वं प्रयोज्यत्वविधानेन प्रवर्ग्यस्यापि पूर्वाह्णापराह्णान्तस्यैकप्रयोग-
तत्वावगतेस्तदुपमानेनाग्निहोत्रस्य कालद्वये ऽभ्यस्तस्यैकप्रयोगत्वं
ढयितुं प्रवर्ग्ये ऽपि माप्रक्रमोपन्यासः । ननु सायम्प्रातर्होमयो-
र्भिन्नकर्मत्वे ऽग्निहोत्रवाक्ये समुदायानुवादस्यार्थवत्त्वाय समुदि-
योः फलसाधनत्वावगमात्तत्समुच्चयसिद्धेर्नास्य वै शब्दयोगादनु-
ादस्वरूपस्य वचनत्वकल्पनापद्यते कर्मैक्ये तु वचनं विना कालद्व-
समुच्चयासिद्धेर्वचनत्वक्लेशापत्तिरित्याशङ्क्याह * भेदेति *
ङ्गाङ्गवाक्याद्यालोचनेन दशकृत्वः षट्कृत्वो द्विर्द्विवैकस्मिन्काले
भ्यस्तस्याग्निहोत्रशब्दवाच्यत्वावगतेः कालद्वयाभ्यस्तकर्मसमुदा-
ानुवादायोगाद्भेदपक्षे ऽपि वचनं विना समुच्चयो न सिद्ध्यती-
याशयश्चशब्दादेव समुच्चयो न वाक्यादित्यर्थः । नन्वेवमपि
कालयोगिनश्चशब्दात्कालसाहित्यावगतेः परस्परसहिते कालद्वये
सकृदनुष्ठानापत्तेर्नाभ्याससिद्धिरित्याशङ्क्याह * न चेति* अनुपादे-
यत्वेन कालसाहित्यस्याशक्यसम्पादत्वाभ्यासेनैव कालद्वयान्वयः
सम्पाद्य इत्यर्थः । ननु कालयोः कर्मण्युद्देश्यत्वात्समुच्चयस्य चो-
पादेयत्वात्समुच्चयविशिष्टकालविध्यनुपपत्तेः । स्वातन्त्र्येण काल-
समुच्चयरूपानेकार्थविशिष्टविधौ वाक्यभेदः स्यादित्याशङ्क्याह*प्राप्त-
योश्चेति * अतः सायम्प्रातरभ्यस्तमेकं कर्मेत्युपसंहरति * तस्मा-
दिति * कर्मैक्ये ऽङ्गावृत्त्ययोगमाशङ्कितमनुभाषणपूर्वं परिहरति
* यद्यपीति * प्रयोगवेलायां कालापेक्षत्वादनुत्पत्तिवाक्यस्थत्वा-
च्चोपांशुयाजाङ्गभूतकालवदुत्पत्तिशेषत्वानवगतेः कालस्य प्रयोगा-
ङ्गत्वेन विध्यवधारणात्प्रयोगस्य च साङ्गप्रधानविषयत्वात्प्रयोगावि-

धौ प्रधानस्याङ्गसाहित्येन विशेषणस्तस्य चोपादेयविशेषणत्वे
धक्षितत्वात्कालद्वयान्वयेन साङ्गस्य द्विः प्रयोगोऽवसीयते ।
यपशौ तु प्रयोगैकदेशभूतानां वपाप्रचारादीनामनेकका
ऽपि प्रयोगावच्छेदककालभेदाभावान्नेतिकर्त्तव्यतापत्तिरित्याः
प्रधानैक्ये ऽपि प्रयोगावयवभूतयोरभ्यासयोः सायम्प्रातः का
थात्सायन्तनस्य प्रातस्तनस्येति व्यपदेशौ यद्प्यग्निसूर्यवाक्ययो
विधायित्वं निराकृत्य कर्मैक्यसिद्धये ऽग्निहोत्रवाक्यस्य कर्म
यित्वं सिद्धान्तितम् * निष्प्रयोजनमित्युक्तम् * तदप्यनुभा
परिहरति * यत्त्विति * दध्यादीनां विकल्पाविशेषे ऽपि
सूर्यवाक्ययोः कर्मविधित्वे कर्मभेदाद्द्विकृतावेककर्मणि द्वि
विभागो हि चोदनैकत्वादित्यष्टमाधिकरणन्यायेन सायम्प्र
माङ्गयोर्विकल्पेन प्राप्तेः। कौण्डपायिनां होमः सायम्प्रातर्वा
ध्वनोरत्यन्तसंयोगइत्यत्यन्तसंयोगे द्वितीयास्मृतेरहरहर्वा चोदि
दिति सकृत्वे वक्ष्यमाणन्यायेन प्रत्यहं सकृत्कार्यः। सिद्धान्ते
मैक्यात्सायं प्रातः प्राकृतः प्रकृतिवदभ्यसितव्य इत्यभ्यासः
नवान् सिद्धान्त इत्यर्थः। दध्यादिवाक्यानां तु कर्मविधित्व
दध्यादिद्रव्यकेषु दशसु कर्मसु यदग्नये चेत्यादिवाक्यैर्दे
धानात्सम्प्रतिपन्नदेवतात्वेन दध्यादिद्रव्याणां साम्नाय्यद्वयः
प्रदानं सिद्धान्ते तु विकल्प इति स्पष्टं प्रयोजनम्।आघारे तु
क्ये ऽप्यूर्ध्वत्वादीनां भिन्नार्थत्वात्समुच्चयाविशेषे ऽपि कर्मभे
च समुदायीकरणार्थवत्त्वाय प्रयोगतन्त्रत्वाविशेषे ऽपि व
सत्यूर्ध्वत्वादीनां मध्ये यस्यान्तरायस्तद्युक्तं कर्मावर्त्तनीयं कर्मै
गुणलोपे प्रायश्चित्तं नावृत्तिरिति प्रयोजनमद्रव्यसंयोगाच्चो
शुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो न हि तस्य गुणो
नन्वाघाराग्निहोत्रयोरङ्गाङ्गिसम्बन्धाभावेनाभ्यर्हितं पूर्वं नि
त्यस्याविषयत्वादल्पाच्तरत्वेनाघारशब्दस्य पूर्वनिपातो युक्तः।
पशुशब्दस्य घ्यन्तत्वे ऽपि लक्षणहेत्वोः क्रियाया इत्यादौ द्व
पूर्वनिपातव्यभिचारात्सोमस्य प्राधान्येनाभ्यर्हितत्वात्पशोः
शभिधानमयुक्तमित्याशङ्क्याह * पशोरिति * न्यायनिष्ठे
न्यायव्युत्पादनादरविषयस्याभ्यर्हितत्वात्पशोश्च पूर्वपक्षस्य
ष्टत्वेन न्यायव्युत्पादनादरविषयत्वात् पूर्वनिपातो युक्त इत्या
सूत्रे च पशुमात्रग्रहणे ऽपि दैक्षस्य चेतरेष्विति दैक्षस्य सर्वप
तित्वेन वक्ष्यमाणत्वादग्नीषोमीयस्यैव वरुणपाशाभ्यां वा एषे
धीयते यो दीक्षित इति दीक्षोपक्रमविधानेन दैक्षशब्दवाच्य

वोदाहर्त्तव्य इति सूचयितुं भाष्ये ऽर्थवादावयवोदाहरणं हृदया-
स्तु पशुशब्देनानुवदति * सोमशब्देन च रसमिति * पूर्वपक्ष-
ाष्ये पशुसोमशब्दयोरप्यनुवादत्वाभिधानाच्छब्दद्वयस्य सन्देहवि-
यत्वमाह * द्वौ चेति * पशावपि यज्यनुवादेन पूर्वपक्षवचनव्य-
क्त परमतेन दर्शयितुं तस्मिन्पक्षे हृदयादिवाक्येष्वेव यज्यनुमा-
त्पशुवाक्ये यजेरभावान्न शङ्का युक्तेत्याशङ्क्य देवतान्वयान्यथानुप-
त्त्या यत्पशुना यजेत तदग्नीषोमीयेणेति प्राप्तेष्वपि यागेषु *
ज्यनुमानं युक्तमित्युक्तम् * सन्देहस्वरूपमाह * तत्रेति * कथं
र्हि भाष्यकृता धातुमात्रानुवादतावद्यतिगृह्णात्यभिहितकर्मविषयता-
ोक्तेत्याशङ्क्याह * किमवद्यतीति * गृह्णात्यवद्यत्योर्यागानभिधाय-
त्वाद्यजतिचोदनादुपायिचोदनादित्यादावभिधानार्थत्वेन दृष्टस्या-
े चोदयतेरिहाभिधानार्थत्वानुपपत्तेराक्षेपापरपर्यायकल्पनावा-
चित्वमङ्गीकृत्यावद्यतेर्यागीयद्रव्यसंस्कारार्थावक्षानवाचित्वेन याग-
ल्पत्वविवक्षयावद्यतिसम्बन्धानुमितानामित्येवं व्याख्याते गृह्णा-
ावितद्व्याख्यानासम्भवेनापरितोषाद्विधिवाचित्वमङ्गीकृत्यावद्यति-
ृह्णातिशब्दयोः प्रत्ययलक्षणार्थत्वाभ्युपगमेन व्याख्यान्तरं कृतं हृद-
ादिरससमुदायवाचिनौ पशुसोमशब्दावित्यप्यनेन भाष्येणोपल-
क्षितमिति प्रदर्शनशब्देनोक्तम्। ननूभयत्र यजेरनुवादकतायामालभ-
तशब्दो न युज्येतेत्याशङ्क्याह * आलभतिरपि चेति * अस्यां पूर्व-
क्षवचनव्यक्तौ भाष्यानार्जवापत्तेरवद्यतिगृह्णात्याक्षिप्तानां स्पर्श-
ायागकर्मणां समुदायरूयालभतियजती वदितारावििति यथाश्रुतं
ाष्यं व्याख्यातुं स्वमतेन पशावालभत्यनुवादपूर्वपक्षवचनव्यक्ति-
ङ्गीकृत्य सन्देहस्वरूपमाह * अथ वेति * अवद्यतियुक्तेषु वाक्येषु
ागविध्यप्रतीतेः पशुवाक्ये यागानुवादायोगद्योतनाय *अवद्यता-
ेत्युक्तम् * नन्वेवं सति पूर्वपक्षे ऽपि पशुवाक्ये यागविध्यापत्तेः
ः पूर्वोत्तरपक्षयोर्विशेष इत्याशङ्क्य यत्पशुशब्दलक्षितं हृदयाद्याल-
तेस्तदग्नीषोमीयं कुर्यादिति हृदयाद्यालम्भानुवादद्वारेणैकादशाना-
वदानानां प्रत्येकं देवतान्वयादेकादशयागाः पूर्वपक्षे सिद्धान्ते च
शुद्रव्यैक्येन देवतानन्वयैक्यादेको याग इति विशेषो ऽभिहितः।
क्षणसङ्गतिश्चानेन भेदाभेदफलत्वात्सूचिता अनन्तरसङ्गतिस्त्वा-
ाराग्निहोत्रवाक्यविहितयोः कर्मणोर्दध्यूद्ध्वादिवाक्यानां गुणवि-
धित्वोपपत्तेकर्मविधित्वाभावात्प्रकृतकर्माभावेन समुदायानुवादे नि-
स्ते हृदयैन्द्रवायवादिवाक्यानां पशुसोमवाक्यविहितयोः कर्मणो-
ुणविधित्वायोगात्कर्मविधित्वापत्तेः प्रकृतकर्मसद्भावात्पशुसोमवा-

क्ययोः समुदायानुवादत्वं भविष्यतीत्याशङ्कानिरासार्थत्वात्स्प
न्ववद्यतिना स्पर्शनाक्षेपे ऽपि गृह्णातिना यागानाक्षेपान्नेयं व्य
युक्तेत्याशङ्क्य यथावद्यतौ स्पर्शनाक्षेपस्तथा सोमे ऽपि यागाक्षेप इ
तदुपपादनाय * अयमेवेत्युक्तम् * ग्रहणस्य यागपर्यन्तत्वं विना दे
न्वयायोगाद्यागपर्यन्तत्वं सामानाधिकरण्योक्त्या विवक्षितं।यद्वा
पशौ पूर्वपक्षे बहवो यागाः सिद्धान्ते त्वेकस्तथा सोमे ऽपीत्युक्ते
रुपपादनार्थं पूर्वपक्षे ग्रहणवाक्येष्वेव यागकल्पनाभिधानाय
चेत्युक्तं भाष्याङ्गस्यादालभत्यनुवादव्याख्यैव युक्ता न यज्यनु
व्याख्येत्याह * तथा सतीति * भाष्यकृद्व्याख्याने ऽपि पूर्व
सौत्रत्वसिद्ध्यर्थमुपांशुयाजाधिकरणपूर्वपक्षसूत्रस्थेन पौर्णमा
च्छब्देनेहापि पूर्वपक्षाभिधानं सूचयत्पूर्वपक्षमारभते * त
नन्विह रूपश्रवणात्कथं पौर्णमासीतुल्यतेत्याशङ्क्य सोमवाक्ये
तानवगतेरैन्द्रवाक्यानां च यागानुमानात्प्रागपर्यवसानेन व
न्तरानन्वयाद्देवतासमर्पकत्वानुपपत्तेर्यागानां च रूपत्वाभावा
त्वमुपपादयति * तथा हीति * श्लोकं व्याचष्टे * न हं
ननु दध्यादिवाक्यवदैन्द्रवायवादिवाक्येष्वपि विधिगौरवापत्तं
र्मविधित्वाभ्युपगमो न युक्त इत्याशङ्क्याह * यश्चेति * सि
चैन्द्रवायवादिवाक्येष्वपि देवताविशिष्टग्रहणविध्यभ्युपगम
यत्र गौरवापत्तिरित्याह * अपि चेति * तत्सन्निधेर्गुणार्थ
श्रुतिरित्यत्र चोपपदश्रुतौ सम्भवदनुवादस्य कर्मणो विधेयत
धाश्च सोमवाक्ये यागविधिरित्याह * किं चेति * सम्भवः
दत्वं यादृशशब्देनोक्तं पूर्वपक्षे सोमशब्दस्याप्यनुवादत्वात् *
नित्युक्तम् * श्लोकं व्याचष्टे * एकत्रैवेति * सत्याङ्गताः
विधिशक्त्यभ्युपगमस्य न्याय्यत्वात्सम्भवेदनुवादे कर्मणि
गुणे विधिशक्तिः संक्रामतीत्यग्निहोत्राधिकरणे ऽ
मित्यर्थः। किं तावदित्यादिभाष्येणालभतियजत्योरनुवादत्वे
ते हृदयादिरसद्रव्यकेषु यागेषु पशुसोमशब्दयोरप्राप्तार्थत्वेन
दायोगात्तुत्पत्तिशिष्टगुणावरोधेन च विध्ययोगादानर्थक्यः
हृदयादींस्त्विवत्यनेन लक्षणया हृदयादिरसानुवादकतोक्ता त
वाक्ये देवताविध्यभ्युपगमाद्वाक्यभेदापत्तेर्द्रव्यविध्ययोगे ऽ
मवाक्ये अथैन्द्रवायवादिवाक्येषु लता विधीयतइति भाष्ये ;
धेराशङ्किष्यमाणत्वात्पक्षद्वयमाह * तत्रेति * ननु पशुश
दयाद्यनुवादो देवतान्वयायार्थवान्सोमशब्देन तु रसानुवा
र्थक इत्याशङ्क्य लक्षितलक्षणया नामधेयत्वेनोपयोगमाह *

* द्रव्ये रूढत्वादयागनामत्वेनावभासमानमप्यानर्थक्यपरिहा-
' नामधेयं भवतीति च्विप्रत्ययार्थः । नामान्तरसद्भावान्नामानर्थ-
ाशङ्क्यते * नन्विति * स एष यज्ञः पञ्चविधो ऽग्निहोत्रं द-
र्णमासौ चातुर्मास्यानि पशुः सोम इत्यादौ सोमशब्देनापि व्यव-
ाख्यानर्थक्यमिति परिहरति * यदीति * नन्वेवं सति समस्त-
्यानुवादो ऽनर्थकः स्यादित्याशङ्क्याह * समस्तेति * यत्पौर्ण-
द्विवाक्ये प्रयोगवाक्यगतसंख्योपजननं प्रयोजनमुक्तं तदेवात्रा-
ार्थसोमशब्दस्यानुवादत्वमुक्तमुपसंहरति * तस्मादिति * न-
द्रवायवादिवाक्येषु द्रव्यदेवतान्वयाद्यागकल्पनोपपत्तेः क्रया-
ाक्येभ्यश्च सोमरसावगतेः सोमवाक्ये पूर्वपक्षसम्भवे ऽपि
ग्रादिवाक्येषु देवताविरहाद्यागकल्पनानुपपत्तेर्हृदयादेश्च पशु-
तित्वस्यान्यतो ऽनवगतेः पशुवाक्ये पूर्वपक्षो न सम्भवतीत्या-
्कते * भवेदिति * पशुशब्देन हृदयाद्यनुवादं तावदुपपाद-
ि * उच्यतइति * षष्ठान्त्यवक्ष्यमाणो दृष्टान्तः उत्तरार्द्धं व्याचष्टे
द्दयादिभिरिति * नन्वेवमपि, यागानुवादो न सम्भवतीत्याश-
ह * तत्र त्विति * आलम्भानुवादेनेह पूर्वपक्षो न यागानुवादेने-
शयः। यागानुवादमपि प्रौढ्योपपादयति *अथ वेति* पशुसान्ना-
योः पशुप्रभवत्वसाम्येन द्रव्यसारूप्यात्पशुयागस्याष्टमे सान्ना-
यागविकारत्वाभिधानात्तेनैव न्यायेन हृदयाद्यवदानस्य द्रव्यसा-
यात्सान्नाय्यावदानप्रकृतिकत्वावगतेः सान्नाय्यावदानस्य च यागी
व्यसंस्कारार्थत्वेनास्यापि तथात्वावसायाद् हृदयादीनां संस्का-
ान्यथानुपपत्त्या पूतीकफलचमसवद्यागान्वयप्रतीतेः प्रत्यवदानं
ाकल्पनात्पशुवाक्ये यागसमुदायानुवादोपपत्तिरित्यर्थः । परमत-
द्योतनार्थोत्प्रेक्ष्यमाणशब्दः । यच्च सोमवाक्ये प्रत्यक्षयजिसद्भावा-
द्रवायवादिवाक्येषु तत्कल्पना युक्तेति दूषणं तदिहोभयत्राप्या-
ानिकत्वाविशेषान्नाशङ्क्यमित्याह * साधारणश्चेति * दश
ृणातीति ग्रहणसमुच्चयदर्शनात्तस्य च यागार्थत्वाद्यागसमुच्च-
तीतेर्दशमो गृह्यते तृतीयो हूयत इति च द्वयोरपि क्रमदर्शनाद्या-
ये च दध्यादिवद्देवताविकल्पापत्तेः क्रमसमुच्चयानुपपत्तिप्रस-
द्यागभेदार्थमपि ऐन्द्रवायवादिवाक्यानामेव यागविधिताश्रयणीयेत्य-
ानार्थमपि चेति भाष्यं व्याचष्टे *सोमेति* एतदेव संस्कारस्तु
भिद्येतेति सूत्रे खादिरतादिवैषम्यस्य वक्ष्यमाणत्वात्तद्दृष्टान्तेनो-
ादयति * पश्येति * ननु भेदपक्षे ऽपि ग्रहं वा गृहीत्वा चमसं
ीय स्तोत्रमुपाकरोतीति प्रत्येकं ज्योतिःशब्दवाच्यस्तोमयोगानि-

भिन्नज्योतिष्टोमशब्दवाच्यत्वात्प्रत्येकं फलान्वयेन
त्तेः क्रमसमुच्चयदर्शनानुपपत्तिरित्याशङ्क्य स
लात्समुदितानां फलान्वयावगत्यभिधानार्थमथ पु
व्याचष्टे * मम त्विति * पशौ क्रमसमुच्चयदर्शन
शयमाह * पशाविति * एतदेव विवृणोति *
हृदयादिसमुच्चये ऽपि लोहितं निरस्यतीत्यादिवाक्या
णां च्छित्पश्ववयवानामपनयान्न सर्वेण पशुनेष्टं स्या
* यन्मात्रमिति * किं चिदपनयेति बाहुल्यात् सा
पपत्तिरित्याशयः । नन्वेवं सत्यनिषिद्धेन हृदयाद्ये
तिरिक्तेनापि यागापत्तेरेकादशभ्य एव हृदयादिभ्य
दशमाधिकरणसिद्धान्तो विरुध्येतेत्याशङ्क्याह
न्यायात्सर्वप्राप्तावप्येकादशपशोरवदानानीत्यस्यानन्य
यवान्तरपरिसंख्यार्थत्वेन तत्रत्यः सिद्धान्त इत्याशय
त्वनुवादकत्वादिह लिङ्गत्वेनोपन्यासः। ननु सोमस्य
पर्वणो बहूदकादिषु तस्य प्रादेशमात्रेण पात्रेण सम
शक्यत्वात्सोमयागैक्ये ऽपि समस्तसोमसाधनकत्वादे
दर्शनोपपत्तिरित्याशङ्क्याह *सोमे त्विति* उत्पत्तिवा
मस्तचोदनाभावात्पशुवैषम्यं भाष्यकृतो ऽभिमतमित्य
दिति पूर्वपक्षोपसंहारभाष्यं व्याचष्टे*तस्मादिति*स
वचनप्रयोगे ऽपि पशुसोमयोरिति सप्तमीद्विवचनेनो
ग्रहात्कर्मणोश्चोदने इति द्विवचनान्तेन व्याख्याय श
शङ्कानिरासार्थं प्रकारवाचिविधानशब्दप्रयोगेण वि
मुक्तं तत्स्पष्टत्वाद्व्याख्यायापूर्वद्रव्यसंयोगादित्येकं
णहेतुव्याख्यानार्थस्य कुत इत्यादिभाष्यस्य तात्पर्यं
तिं * श्लोकं व्याचष्टे * यदि हीति * एवं विद्वानि
ताशेषरूपपरामर्शादशेषरूपप्रत्यभिज्ञाने ऽभिहिते वि
शब्दस्य यज्यनन्वयाद्यागरूपापरामर्शकत्वे तु द्रव्यं
नेनैव भाष्येणोक्तमिति सूचयितुम् * यदि वेत्युक्ता
रस्य हृदयादेर्लक्षणया पशुशब्देनाभिधानात्सोमविव
स्य सोमशब्देनाभिधानाच्च पूर्वद्रव्यसंयोगो ऽस्तीत्या
त्वेन प्रकरणे ह्यनर्थको द्रव्यसंयोग इति सूत्रावयव
व्यं द्रव्यं यागे संयोजयतीति व्युत्पत्त्या द्रव्यसं
पशुशब्दः सोमशब्दश्च प्रक्रियतइति व्युत्पत्त्या प्रकृते
च मुख्यार्थस्यागापत्तेर्न प्रवर्त्ततइत्येवं व्याख्यानार्थं

ाष्यं तावद्व्याचष्टे * तत्रेति * नैतदित्यादिव्याख्याभाष्यं व्या-
ष्टे * तत्रेति * किं लक्षणाश्रयणे कारणं यदिह नास्तीत्यपेक्षाया-
ाह * विस्पष्टे हीति*मञ्चाः क्रोशन्तीतिवत्परशब्दसामानाधिक-
ण्याभावे ऽपि गङ्गायां घोष इत्यादौ लक्षणां विना पदान्तरान्वया-
म्भवे लक्षणादर्शनाद् *अनन्यथासम्भवे वेत्युक्तम्* ननूत्पत्तिशि-
रसहृदयाद्यवरुद्धयोर्यागयोर्लताप्राणिविध्ययोगात्पशुशब्दस्य च प्र-
तहृदयाद्यनिवेशो देवताविधिपरे वाक्ये द्रव्यविध्ययोगेनानर्थक्या-
त्तेरस्त्यनन्यथा सम्भव इत्याशङ्क्याह * शक्यं हीति * यागान्तर-
ध्यभ्युपगमान्नैको ऽपि दोष इत्याशयः। अपूर्वयोः कर्मणोरिति
सद्धान्तोपक्रमस्थमपूर्वशब्दं उपांशुयाजाघाराग्निहोत्राधिकरणसि-
द्धान्तोपक्रमभाष्यस्थकर्मान्तरशब्दवदभ्युपेत्यवादत्वेन व्याचक्षाणः
स्मादित्युपसंहारभाष्यं तदनुसारितया व्याचष्टे * तेनेति * न ५
ई तस्य गुणार्थेनेति सूत्रावयवं प्रकृतेषु यागेष्वनर्थको द्रव्यसंयो-
। इत्येवमर्थान्तत्पूर्वावयवसहितमाशङ्कोत्तरत्वेन व्याख्यातुमथेत्या-
याशङ्काभाष्यमुत्पत्तिशिष्टरसावरुद्धे यागे प्रदेयतया लताविध्या-
ाङ्कानुपपत्तेरयुक्तमाशङ्क्य प्रदेयप्रकृतित्वेन लताविध्याशङ्कार्थतया
याचष्टे * कस्मादिति * भाष्यानारूढपशुग्रहणेन सिद्धान्ते द्वयो
ऽपि प्रदेयप्रकृतित्वेन विधिः सूचितः। न सेति भाष्यं मध्यप्रतीके-
ोत्तरतयावतारयति * तत्राहेति*प्रदेयप्रकृतित्वेनापि विधौ शङ्किते
ृह्णादिवाक्येष्वखण्ड्या धारया गृह्णातीति प्राकरणिकवाक्यान्त-
ालोचनेन धाराग्रहणायोग्यद्रव्यप्रतीतावपि स्वाभाविकद्रवत्वयुक्त-
योदकादेरपि धाराग्रहणोपपत्तेर्विकारद्रव्यानवगमेन सोममभि-
ुणोतीत्यादिवाक्यालोचनाद्विकारद्रव्यावगमाभ्युपगमे तु प्रकृतिद्र-
यस्याप्यवगमे प्रकृत्यनपेक्षणात्प्रदेयतयैव विधेयत्वं शङ्कनीयमि-
यापाद्य श्रौतरसावरुद्धेषु यागेषु वाक्येन लताविध्यनुपपत्त्यभिधा-
ार्थत्वेन भाष्यं व्याचिख्यासुरवद्यतिवाक्येषु हृदयादिविकारद्र-
यप्रतीतेस्तत्प्रकृतित्वेन पशुविध्याशङ्कापरिहारौ कस्मान्नोपन्यस्तावि-
याशङ्कानिरासपूर्वं व्याचष्टे * पशुस्तावदिति * ननु तद्धितश्रुत्यनु-
ात्तत्वान्न रसस्य लतातो बलीयस्त्वं प्रत्युत प्रकरणलभ्यत्वाद्दौर्ब-
ल्यमित्याशङ्कते * कथं पुनरिति * सास्य देवतेति सन्निहितविशेष-
ाचिसर्वनामास्य शब्दार्थे तद्धितस्मृतेः श्रौतत्वमाहोच्यत इति न-
वनुपात्तस्य द्रव्यविशेषस्य देवतान्वयो न सम्भवतीत्याशङ्क्याह*
अधिकारेणेति* सन्निहितत्वोपलक्षितस्य द्रव्यविशेषस्य तद्धितश्रुत्या
देवतान्वये कृते कस्येति निर्द्धारणापेक्षायां प्रकरणान्निर्द्धार्यत इ-

त्यर्थः । एतच्च तद्धितनिर्देशो श्रुत्येति गुणाधिकरणभाष्यव्याख्यावेलायां देवतासङ्गतिः श्रुत्या तद्धितान्तात्प्रतीयतइत्यादिवार्तिकेनोपपादयिष्याम इत्याह * गुणश्चेति * वैश्वदेवाधिकरणव्युत्पादितोत्पत्त्युत्पन्नशिष्टबलाबलाभिधानार्थं चैतद्भाष्यमिति सूचयितुं गुणान्तरमाह * किं चेति * दुर्बलतरत्वसूचनार्थं प्रवृत्तापेक्षत्वाक्यान्तरस्य विशेषणम् । लतायाश्च दौर्बल्याद्रसावरुद्धेषु यागेषु विधातुमशक्यत्वे सति न केवलं प्रकृतप्रत्यभिज्ञानानुवादायोगाद्यागस्य विधेयत्वापत्तेः पुनर्विधानलक्षणादभ्यासाद्भेदः किं तु गुणादपीत्याह * ततश्चेति * व्याख्यातं भाष्यं दूषयितुमारभ * शक्येति * प्रकृतेषु यागेषु रसविरोधात्प्रदेयतयाँ लताविध्ययोगे ऽपि व्रीहिवत्प्रदेयप्रकृतितया विध्युपपत्तेः शक्यपरिहारं भव्योक्तं दूषणमित्याशयः । नन्वष्टाकपालादिशब्दानां संस्कृततद्धितान्तत्वात्ते पुरोडाशं कूर्मं भूत्वा सर्पन्तमपश्यन्नित्याग्नेयवाक्यशेषाच्चाष्टाकपालशब्दस्य पुरोडाशविषयत्वावगमाद्विकारद्रव्यप्रतीतेः प्रकृत्यपेक्षायां युक्तः प्रकृतित्वेन व्रीहिविधिरैन्द्रवायवादिवाक्ये तु धारावाक्याद्रवद्रव्यावगमे ऽपि विकारद्रव्यत्वानवगतेरभिषवादिवाक्यालोचने तु प्रकृतिद्रव्यस्याप्यवगतेर्न लतायाः प्रकृतित्वेन विधिर्युक्त इत्याशयेन पृच्छति * कुत इति * विकारद्रव्यत्वाभावे ऽपि धानादिवत्कपालसंस्कार्यत्वोपपत्तेर्वाक्यशेषस्य विष्णुरुपांशु यष्टव्य इत्यादिवदूर्जो ऽवरुध्या इत्यादिवच्च स्तुतिमात्रोपयुक्तस्य विध्युद्देशापेक्षितार्थसमर्पकत्वायोगादश्वशफमात्रः पुरोडाशो भवतीत्यादिविध्यन्तरालोचनाच्च पुरोडाशप्रतीत्या विध्युद्देशपर्यवसानोपपत्तौ स्तुत्युपयुक्तस्य रात्रिसत्रवत्पराबृत्त्यर्थित्वकल्पनानुपपत्तेरष्टाकपालादौ प्रकरणानालोचने प्रकृतिविकारद्रव्ययोर्द्वयोरप्यप्रतीतेस्तदालोचने च द्वयोरपि प्रतीतेः किं प्रकृतिरसावित्यनपेक्षायामपि किं पुरोडाशप्रकृतिभूता व्रीहयस्तन्निष्पत्तौ व्यापारयितव्याः किं वा नो वासोजाघनीवद्यथा कथं चिन्निष्पन्नव्रीहिमयपुरोडाशस्वरूपमात्रं व्यापारयितव्यमित्यपेक्षायां निर्वापावघातपेषणसंयवनपिण्डकरणादिनिष्पादकविधिदर्शनेन प्रयोगकाले निष्पादनावगमादसम्भवे ऽपि निष्पादकविध्यनालोचने च पर्णमयी जुहुर्भवतीत्यादिवत्प्रकृतिद्रव्यविधाने ऽपि यथा कथं चिन्निशिष्टद्रव्यलाभेनापि प्रयोगोपपत्तेः प्रयोगकाले निष्पादनानाक्षेपात्तेर्यथा व्रीहीणामविधानेसक्तुवदसंस्कार्यत्वापत्तोर्निर्वापादिविधीनामारादुपकारित्वप्रसङ्गाद्यागाङ्गत्वेनैव विहितेषु व्रीहिषु योग्यत

पुरोडाशप्रकृतित्वेनाविरोधोपपत्तौ विरोधापादकसाक्षाद्यागसाधन-
त्वाङ्गीकरणानौचित्यात्प्रकृतितावसीयते तथा सोमे ऽपीत्याशयेना-
न्तरमाह * यथैवेति * श्लोकं व्याचष्टे * विधीयमानं हीति *
लताविशिष्टयागविधिपक्षे ऽपि चाभिषवेण लतास्वरूपनाशात्प्रदेय-
प्रकृतित्वेनैव यागाङ्गता तुल्येत्याह * अपि चेति * रसलतयोश्च ८
विरोधाभ्युपगमे रसस्योत्पत्तिशिष्टत्वपक्षे लताया दौर्बल्यात्तदानुगु-
ण्येन प्रवृत्तेस्तदापेक्षितप्रकृतित्वाङ्गीकरणेन विरोधः शक्यपरिहारः
लतायास्तूत्पत्तिशिष्टत्वे दुष्परिहर इत्याह * अपि चेति * श्लोकं
व्याचष्टे * रसस्येति * का तर्ह्यैन्द्रवायवादिष्वित्यादेर्भाष्यस्य
गतिरित्यपेक्षायामुत्पत्तिशिष्टरसावरोधात्प्रदेयत्वेन लताविध्याश-
ङ्कानुपपत्तेः प्रदेयप्रकृतित्वाशङ्कायाश्च निराकर्त्तुमशक्यत्वादुपेक्षणी-
यत्वं वक्तुमाह * तस्मादिति * पशुसोमाख्यगुणस्य प्रदेयप्रकृति-
त्वेन विधिरित्याशङ्का नोद्घाटनीयेति वाच्ये तन्निरासार्थस्य न हीति
सूत्रावयवस्याप्युपेक्षणीयत्वसूचनायानुद्घाट्यैवोत्तरं सूत्रं प्रस्ताव्य-
मिति त्वपि प्रयुक्ते ऽवयवदोषेण सकलसूत्रापेक्षां प्रसज्यमानां नि-
राकर्त्तुं समुदायेत्युक्ते गुणविधित्वाशङ्कायामनिरस्तायां कथं
कर्मविधित्वसिद्धान्तसिद्धिरित्याशङ्क्य पशावित्युक्तं प्राप्ते कर्मण्य-
नेकगुणविध्ययोगादेव तदाशङ्का नोत्तिष्ठतीत्याशयः। सोमे कथं
सिद्धान्तसिद्धिरित्यपेक्षायामुत्तरसूत्रेण गृह्णातिवाक्यानां कर्मवि-
धित्वनिरासादिति सोमे त्वित्यनेनोक्तमिति योज्यम्। समुदायानुवा-
दत्वमात्रं निराकृत्यमिति सुगमः पाठः। एवं तु सूत्रभाष्यकृतोर्द्वयोर-
प्यबुद्धिपूर्वकारित्वापत्तेः पूर्ववदपरितोषेणोत्पत्तिशिष्टरसावरोधा-
दैन्द्रवायवादिवाक्यविहितेषु यागेषु लता विधातुं शक्येति पूर्वसू-
त्रावयवोक्तामुपपत्तिं चकारेणोत्पत्तिशिष्टरसावरोधे ऽपि तत्प्रकृति-
त्वेन लताविधिसम्भवरूपनिराकरणहेतुसूचनपूर्वमुत्तरसूत्रेणैन्द्रवा-
यवादिवाक्यानां कर्मविधायित्वाभावाच्च रसस्योत्पत्तिशिष्टत्वं च
निराकृत्यैन्द्रवायवादिवाक्यानां कर्मविधित्वाभावलक्षणयैवोपपत्त्या
सोमवाक्यस्य कर्मविधित्वं निर्णेतव्यमिति पक्षान्तरमाह * अथ
चेति * निराकार्योपपत्त्युपन्यासस्यापि मन्दप्रयोजनत्वेनेहाप्यपरि-
तोषात्स्वयमन्यथा सूत्रव्याख्यामारभते * पूर्वेति * पशुसोमवा-
क्योदाहरणे ऽस्य सूत्रस्य पूर्वपक्षोक्त्यशक्तिमाशङ्कते * कथं पुन-
रिति * गृह्णात्यवद्यतिवाक्योदाहरणाङ्गीकरणेन पूर्वपक्षे सूत्रं यो-
जयितुं सन्देहस्वरूपं तावदाह * उच्यते इति * योजयति * कि-
मिति * पशुसोमवाक्ययोरुत्पत्तिचोदनात्वे सति प्रकरणापेक्षा

गृह्णात्यवद्यतिवाक्येषु रसहृदयादिद्रव्यसंयोगो वि
यागाङ्गत्वं प्रतिपद्येतेति मध्यमावयवे व्याख्याते ऽव
पशुसोमसंस्कारार्थत्वेनाविरोधशङ्कानिरासार्थतयाशङ्क
पनाशकत्वात्संस्कारार्थत्वायोगाभिधानार्थत्वेन न हीति
व्याख्याय प्रदेयप्रकृतित्वेनाविरोधाशङ्कानिरासार्थतय
वाक्यैः प्रदेयत्वेन प्रकृतस्य रसहृदयादेः प्रकृतित्वल
पशुसोमयोः संस्कारवाक्यैरेव सोमं क्रीणातीत्यादि
न्यायेन सिद्धतया विध्ययोगात्प्रकृतेरसहृदयादौ प्रकृति
मद्द्रव्यसंयोगो ऽनर्थक इति व्याख्यान्तरे ऽथ वेत्यनेन कृत
५११।८ नेन पूर्वपक्षे ऽर्थवत्त्वोक्त्या पूर्वपक्षसूत्रार्थमुपसंहरति * त

अचोदकाश्च संस्काराः ॥ १८ ॥

पूर्वसूत्रसमर्थनार्थं गृह्णात्यवद्यतिवाक्यानां
धित्वपूर्वपक्षकरणे ऽप्यधिकरणत्रयस्य समुदा
वादार्थत्वेन पशुसोमवाक्ययोः समुदायानुवा
च विवक्षितत्वात्तन्निवृत्त्यर्थत्वेन तुशब्दस्थाने वाशब
* नैवेति * पशुसोमवाक्यस्थयोराख्यातशब्दयोः समु
त्वनिराससाध्ये ऽवद्यतिगृह्णातिपराणां प्रत्ययानां
त्वस्य साक्षादहेतुत्वात्पूर्वाधिकरणसिद्धान्तहेतोश्च श
योगभूतत्वादित्यस्य निर्गुणाख्यातश्रुतिविषयत्वेनेहाभा
धिकरणसिद्धान्तहेतोरप्रकृतत्वादित्यस्य पूर्वाधिकरणे
कृतकर्मसद्भावे निर्गुणश्रुतावपि पौर्णमासीवत्सम
दापत्तेरपेक्षितत्वेनानुषक्तस्यात्राप्यनुषङ्गं करोति
चेति * अप्रकृतत्वोपपादनार्थत्वेन प्रश्नपूर्व
जयति * कथमिति * संस्कारविधिष्वपि यागकल्प
क्षोक्तं निराकर्त्तुमारभते * तन्मात्रेति * ऐन्द्रवायव
तावत्सोमेन यजेतेति श्रुतयागप्रत्यभिज्ञानात्कल्पनानुपपत्ति
हैवं हीति * भाष्यमप्यनेन व्याख्यातं भवति यागानुमान
यादिवाक्यवत्स्वार्थपर्यवसानं पूर्वपक्षोक्तमनुभाषणपूर्वं
यदुक्तमिति * अतो ऽत्र नियोगापरपर्यायविधिविषयभूत
लाभाद्वाक्यस्य सङ्गतार्थत्वं पर्यवसानमस्तीत्यर्थः । तल्लाभे
५१२।१ वाक्यान्तरसङ्गतियुक्तेति वा योज्यम् । श्लोकं व्याचष्टे * आग
समाप्यते शब्देन सङ्गतिशब्दस्य समाप्त्यर्थत्वं व्याख्यातम्
णभावनालाभे ऽपि यागं विना देवतान्वयासिद्धेः कथं च

सिरित्याशङ्क्याह * इदं त्विति * स्वकार्याक्षमत्वनिबन्धनत्वेनासमाप्तेर्विधिविषयलाभमात्राद्विधानाख्ये कार्ये विधिवाक्यस्य क्षमत्वसिद्धेः सापेक्षत्वे ऽपि समाप्त्युपपत्तिरित्याशयः । सापेक्षत्वानिबन्धनया त्वसमाप्त्या वाक्यान्तरानन्वयेन कस्य चिद्वाक्यस्य वाक्यान्तरानन्वयः स्यादिति दर्शयितुमाह * सर्वमेव हीति *समाप्त्यभिधानस्य प्रकृतोपयोगं दर्शयन्वाक्यान्तरान्वयार्थत्वेन सङ्गतिशब्दं व्याचष्टे * तेनेति * न हि सापेक्षस्यापि वाक्यान्तरान्वये सत्याग्नेयादिवाक्यस्यापि कस्मान्न स्यादित्याशङ्क्य विधिविषयालाभादित्याह*आग्नेय इति * पूर्वपक्षसूत्रस्थचोदनाशब्दसूचितं यागानुमानात् प्रागपर्यवसानं परिहृत्यावदानग्रहणयोः पशुसोमस्वरूपनाशकत्वेनोत्पत्तिशिष्टस्य पशुसोमद्रव्यस्य संस्कारलक्षणगुणार्थेन विध्ययोगात्प्रकरणे विधीयमानो हृदयादिरसः संयुक्तो ऽवदानग्रहणाख्यः पदार्थो ऽनर्थकः स्यादिति प्रकरणे हीत्यादिसूत्रावयवोक्तं सिद्धान्तदूषणमनुभाषणपूर्वं परिहरति * अथेति * सूत्रोक्तस्य दोषस्य सूत्रेणापरिहारे सूत्रकृतः शून्यहृदयत्वापत्तेश्चोदयतेः प्रेरणे स्मरणेन नुदिसमानार्थत्वान्नुदेश्चापनयनाख्ये बाधे प्रयोगाच्चोदकशब्दस्य बाधकवाचित्वमङ्गीकृत्यावदानग्रहणपदार्थाः संस्कारत्वात्पशुसोमयोरबाधका इत्येवमस्मिन्परिहारे सूत्रं योज्यम् ।विशसनाभिषवादिना पशुसोमयोर्विनाशात्साधनत्वासम्भवाशङ्का द्वारशब्देन निरस्ता प्रदेयप्रकृतित्वेनैव पशुसोमयोः साधनतेत्याशयः । श्लोकं व्याचष्टे * यदीति * ननु न हि द्रव्यकथम्भावादतिदेशो ऽत्र कल्प्यतइति संख्याधिकरणवार्त्तिके द्रव्यस्येतिकर्त्तव्यताकाङ्क्षाया निराकरिष्यमाणत्वान्न पशुसोमयोरितिकर्त्तव्यतान्वयः सम्भवतीत्याशङ्क्याह * पश्विति * संख्याधिकरणपूर्वपक्षे सप्तदशानां पशूनामेकसाधनत्वेन प्रत्येकं साधनत्वाभावादितिकर्त्तव्यतानाकाङ्क्षत्वे ऽपीह साधनत्वसद्भावाद्युक्तेतिकर्त्तव्यताकाङ्क्षेत्याशयः।संस्कारवाक्येभ्य एव पशुसोमयोः प्रदेयप्रकृतित्वेन प्राप्त्युपपत्तेः प्रकृतित्वलक्षणगुणार्थत्वेन विध्ययोगात्प्रकृते हृदयादौ रसे पशुसोमद्रव्यसंयोगो ऽनर्थकः स्यादित्येवमर्थाङ्गीकरणेन प्रकरणे हीत्यादिसूत्रावयवोक्तं दूषणमनुभाषणपूर्वं परिहरति * यत्त्विति * उत्पत्तिशिष्टविरोधोत्तरस्यापि सौत्रतापिशब्देनोक्ता पशुसोमयोरविनियोगे क्रमोपकरणादिवाक्यानां सक्तुहोमादिवाक्यवदारादुपकारिकर्मविधायित्वापत्तेर्न पशुसोमाक्षेपशक्तिरस्तीत्याशयः ।या च हृदयादिभिः प्रकृतिद्रव्यापेक्षिते छागस्य वपाया मेदसो ऽनुब्रूहीति म-

न्त्रवर्णेन छागलाभात्तदन्तर्गतपशुत्वप्राप्तिरुक्ता सास्य मन्त्रस्
क्तवाकादिवच्छुत्यविनियुक्तत्वेनात्यन्ताप्राप्तार्थप्रापणाशक्तेर्विनि
कस्य लिङ्गस्य सामर्थ्यलक्षणत्वात्तस्य च वाक्यशेषवत्सन्दि
र्थनिर्णायकत्वेनार्थाद्वा कल्पनैकदेशत्वादित्यत्र स्थितत्वादयुक्तं
* न चेति * कथं तर्हि षष्ठान्त्ये छागप्राप्त्यभिधानमित्याश
*पशिवति * अनेनैव यथैव पशुसामान्यइति वार्त्तिकोक्तस्य
पक्षस्य निरस्तत्वात्प्रसङ्गेनाथ वा सान्नाय्यं वा तत्प्रभवत्वादि
न्यायेनेत्यादिवार्त्तिकोक्तं पूर्वपक्षं निरस्यति * न चेति *
साधारणश्चायं तवाप्यानुमानिकयागाभ्युपगम इति यदुक्तं त
युक्तमित्याह * द्रव्येति * या च सान्नाय्यावदानप्रकृतित्वेन
याद्यवदानानां यागीयद्रव्यसंस्कारार्थत्वाद्यागानुमापकतोक्ता
सान्नाय्यावदानस्य चतुरवत्तहोमविधिनार्थगृहीतत्वेनाविधेयत्व
धेयानि हृदयाद्यवदानानि प्रतिप्रकृतित्वानुपपत्तेः संस्कारार्थ
च्चानङ्गत्वेनानतिदेश्यत्वादयुक्तेत्याह * न चेति * नन्वतिदेशा
व्यवदानत्वेन हेतुना यागीयद्रव्यसंस्कारार्थतानुमास्यते ऽत आ
न चेति * पूतीकानभिषुणुयात्तमस्मै भक्षं प्रयच्छेदित्यनयोस्तु
कृताभिषवभक्षप्रत्यभिज्ञानाद्यदि सोमं न विन्देत यदि सोमं
क्षयिषेदित्येकवाक्यत्वाच्च यागद्रव्यार्थत्वविज्ञानं युक्तमिति
न्तवैषम्यमाह * प्रतीकेति * प्रसङ्गाद्यश्चात्र पक्षे विशिष्टवि
श्रयणे दोष इति वार्त्तिकोक्तं सोमवाक्ये विशिष्टवि
तुल्यत्वं निरस्यति * सोम इति * नन्वैन्द्रवायवादिवाक्येषु
विध्यभावे देवताया ग्रहणानन्वयाद्विशेषणविशेष्यत्वशून्ययोर्दे
ग्रहणयोर्विधेयत्वापत्तेर्वाक्यभेदप्रसङ्गादालभतिवत्प्रकृतिवल्लिङ्ग
तनाय गृह्णातिपरप्रत्ययेनैन्द्रवायवं कुर्यादिति वचनव्यक्त्याश्रय
विशिष्टयागविधिरवसीयतइत्याशङ्क्याह * न चेति * सोम
मिन्द्रवायुदेवत्यं कर्त्तुं पात्रे गृह्णीयादिति विहिते यागसम्प
त्वाद् द्रव्यदेवतान्वयस्य ग्रहणमात्रेणासिद्धावपि प्रकरणलभ्यया
न्वयासिद्ध्युपपत्तेर्न वाक्यभेद इत्याशयेन प्रश्नपूर्वमुपपादयति
कुत* इति देवताग्रहणं चेत्यनेन रूपेण विधेयानेकभावे ऽपि प्र
णलभ्ययागाख्यक्रियान्तरप्रसादेन देवताविशिष्टग्रहणविधिस
इत्यर्थः । श्लोकं व्याचष्टे * शक्यते हीति * ग्रहैर्जुहोतीतिवि
र्थस्य ग्रहणपात्रेषु ग्रहणमन्तरेणानिष्पत्तेरर्थप्राप्तग्रहणानुवादस
याद्विशिष्टविधिगौरवमपि नास्तीत्यर्थप्राप्त्यभिधानेनोक्तं समासे
नेन देवताद्वयनिमित्तवाक्यभेदाशङ्का निरस्ता यागान्वयं वि

हणस्य देवतान्वयानुपपत्त्या शङ्कानिरासार्थत्वेन क्रियान्तरप्रसादे-
ति व्याख्यातुम् * प्रकरणेत्युक्तम् * देवताग्रहणयोर्यागगुणत्वा-
त्परस्परानपेक्षत्वे ऽपि यागद्वारा परस्परान्वयोपपत्तेर्देवताविशिष्ट-
हणविधिसम्भवाभिधानार्थम् * गुणेत्युक्तम् * यादृशं द्रव्यस-
बद्धमित्येतद्वार्त्तिकोक्तं प्रकृतयागसद्भावात्सोमवाक्ये यागविध्य-
म्भवं परिहर्तुमाह * तस्मादिति * सोमवाक्यस्य यागविधित्वे
गुणत्रयमाह * एवं च सतीति * समुदायानुवादाभावे ऽपि राज- ५
सूयवत्प्रयोगवाक्यस्यैकत्वसिद्धेर्ज्योतिष्टोमब्दस्य च सोमद्रव्यकया-
गवाचित्वाद्दीक्षणीयादिव्यावृत्तिसिद्धेरानर्थक्यमित्याशयः । आ-
द्यसूत्रोक्ताया युक्तेः सिद्धान्ते ऽनुपपत्तेः पूर्वपक्षे तद्योजितं पशु-
सोमवाक्ययोस्तु विधित्वसिद्धान्तो ऽतो युक्त एवेति सूचयन्सिद्धा-
न्तमुपसंहरति * तेनेति *

तद्भेदात्कर्मणो ऽभ्यासो द्रव्यपृथक्त्वादनर्थकं हि स्यात् भेदो द्रव्यगुणीभावात् ॥ १९ ॥

पशुविषयायाश्चिन्तायाः पर्यवसितत्वं भाष्योक्तमुपपादयति
* कर्मेति * काधिकरणे कीदृशी बोद्धविष्यतीत्यपेक्षायामाह * प-
शोरिति * अग्नीषोमीयं पशुमालभेतेति तद्धितेनाष्टाकपालादिव-
त्समस्तपशोर्देवतान्वयात्प्रदेयत्वलक्षणहविष्ट्वावगतेः समस्तादवदाने
पशोरेकहविष्ट्वं समस्तचोदितत्वादिति सूत्रेण पूर्वपक्षिते प्रत्यङ्गं वा
ग्रहणवदङ्गानां पृथक्प्रकल्पनत्वादिति सूत्रेण पशुस्वरूपस्य विशस-
नेन नाशितत्वात्प्रदेयत्वानुपपत्तेः पृथक्कल्पितेभ्यश्च हृदयादिभ्यो
ऽवदानविधानात्तद्धितोक्तस्य देवतान्वयस्य साक्षादसम्भवादगत्या
व्यवहितविषयत्वावगतेः प्रत्यङ्गं हविष्ट्वेनावदानस्य सिद्धान्तयिष्य-
माणत्वात्प्रत्येकमङ्गानां हविष्ट्वविवक्षयोत प्रत्यङ्गमित्युतशब्दं पूर्वाक्षि-
पात्य साङ्गानां हविष्ट्वे सिद्धे तद्विशेषचिन्तासां सर्वाङ्गविवक्षया
प्रत्यङ्गमुतैकस्मादित्यावृत्त्या यो ऽयं हृदयजिह्वावक्षोयकृद्वृक्कौ स-
व्यन्दोरुभे पार्श्वे दक्षिणाश्रोणिगुदं तृतीयमित्येकादशदैवतान्यवदा-
नानि परिगणितानि। सोम इति परिहारप्रतिज्ञाभाष्यं व्याचष्टे *सोमे
त्विति * इन्द्रवाय्वा इति परिहारभाष्यं व्याचष्टे * वाक्येनेति *
ततो विकल्पिष्यन्ते इत्यध्याहारेण यदि शब्दान्वयः वाक्यव्यतिरेक
वाचिना तु शब्देन प्रकरणसूचनात्प्रकरणेन तु यागसङ्गतत्वात्सर्वा
सां समुच्चय इति सर्वशब्देन समुच्चये सूचिते प्रकरणेनाप्यन्वये
त्यार्थत्वाद् द्विकल्पः कस्मान्न भवतीत्याशङ्क्यान्योन्यनैरपेक्ष्येणान्

याभावाद्विकल्पानापत्त्यभिधानार्थम् * युगपादित्युक्तम् *
नान्वये समुच्चयः कस्मान्न भवतीत्याशङ्क्य यत्र दध्ना जु
वाक्येनान्वयश्चोद्यते तत्र तुल्यार्थत्वादसमुच्चय इत्युक्ते
प्यन्वये तुल्यार्थत्वाविशेषमाशङ्क्यान्योन्यसापेक्षतुल्यार्थत्वा
मुच्चयानापत्त्यभिधानार्थं निरपेक्षेणेत्यनेन पृथक्शब्दोक्तं
व्याख्यातम्। आद्यं श्लोकं व्याचष्टे *यदीति * य इमाः पु
युगपदेव सम्बन्ध्यन्तइत्यनेन सर्वास्त्विति श्लोकावयवो
देवतानामक्रियात्मकत्वात् प्रकरणग्रहणानुपपत्तिमाशङ्
वेत्यनेन ग्रहणाख्यक्रियाद्वारा तदुपपादितं द्विती
३१५।४ कं व्याचष्टे * तत्र नामेति *एतदेव प्रश्नपूर्वकमुपपादया
मिति * नन्विन्द्रवाय्वादीनां देवतात्वेनैव सामर्थ्यात्प्रत्येकं
तात्वावगतेः प्रत्येकमेव सामर्थ्यमवसीयतइत्याशङ्क्याह *
ति * ननु त्यज्यमानद्रव्योद्देश्यत्वमात्रेण देवताया यागां
त्वात्प्रत्येकमेव चोद्देश्यत्वप्रतीतेरेकैकया देवतयास्त्वेव य
रित्याशङ्क्याह * सत्यपि चेति * यागरूपनिष्पत्तावपि या
त्मकज्योतिष्टोमरूपनिष्पादनसामर्थ्यस्य शब्दैकसमधिगम
ताविनियोजकशब्दकल्पनायाश्च प्रकरणाधीनत्वात्तस्य च
वृत्तित्वान्न प्रत्येकं सामर्थ्ये प्रमाणमस्तीत्याशयः। नन्वेका
कल्पेरन्समुच्चये ह्यावृत्तिः स्यात्प्रधानस्येति द्वादशाधिकर
र्थत्वमात्रेण विकल्पस्य वक्ष्यमाणत्वात् प्रत्येकत्वविशेषण
शङ्क्याह * प्रत्येकमिति * दधिमधुपयोघृतं धाना उदकं त
त्संसृष्टं प्राजापत्यमिति चित्रेष्टिद्रव्याणां तुल्यार्थत्वे ऽन्य
पेक्षत्वेन विकल्पाभावाद्विशेषणार्थवत्त्वेत्याशयः। दृष्टान्ते
रपेक्ष्यमुपपादयति * वाक्येति * ननु ग्रहणद्वारा देवता
न्वयात्तत्र च वाक्येन प्रत्येकमेव विनियोगात्प्रत्येकं तु
सीयत इत्याशङ्कानिरासार्थं भाष्यकारस्यादृष्टसंस्काराभि
सूचयितुमाशङ्कां तावदाह * नन्विति * ग्रहणासंस्कार
त्वेन प्रमाणान्तरतो भेदाभेदानवधारणान्न तादर्थ्येन विहि
ष्टानां देवतानामैकार्थ्ये प्रमाणमस्तीत्याशङ्कानिरानिरासा
रित्याद्येवमपरेष्वपि ग्रहणेष्वित्यन्तं भाष्यं ग्रहपात्रं
विना ग्रहैर्जुहोतीतिविध्यर्थानिष्पत्तेर्ग्रहणस्य दृष्टार्थत्वाद
ङ्क्योद्देश्यत्वेन देवताया ग्रहणसाधनत्वाद्यागवच्च ग्रहण
द्देशाधीननिष्पत्तित्वाभावेन ग्रहणं देवतोद्देशस्यादृष्टार्थत्वा
रूपेण ग्रहणस्यादृष्टार्थताभिप्रेतेति सूचयन्परिहरति * स

ग्रहणे देवतान्वयस्यादृष्टार्थत्वान्नैकार्थ्यमिति वदता ग्रहणसंस्कारा-
र्थत्वेन देवताविधानात्तत्र देवतोद्देशस्य दृष्टार्थत्वायोगात् ग्रहणेना-
दृष्टः संस्कारो जन्यतइति भाष्यार्थः * सूचितः * ननु निर्वापादि-
ष्विव देवतोद्देशस्य वक्ष्यमाणदेवतास्मृत्यर्थत्वान्नादृष्टार्थतेत्याशङ्कते
* कथमिति * ग्रहणान्वयात्प्राग्देवताया यागेऽन्वये सति देवता-
स्मृत्या प्रधानोपकारसिद्धेर्ग्रहणे देवतोद्देशः स्मृत्यर्थः स्यान्न त्विह
तथास्तीति परिहरति * उच्यतइति * नन्वन्यत्राविनियोगेऽपि
यागवद्ग्रहणे देवतोद्देशस्यादृष्टार्थत्वं भविष्यतीत्याशङ्क्य विनेत्युक्तं
देवतोद्देश्ययागावयवत्वात्तेन विना यागासिद्धेर्यागसिद्ध्यर्थमेव त-
त्रोद्देशः ग्रहणावयवत्वाभावात्तु नोद्देशेन विना ग्रहणसंस्कारासि-
द्धिरित्याशयः । श्लोकं व्याचष्टे * यदि हीति * ततः शब्देन तदि-
त्यव्ययं व्याख्यातं श्रवणशब्देन कर्मव्युत्पत्त्या देवतावाचिशब्दाभि-
धानाद्देवतोद्देशोऽदृष्टार्थमिति नपुंसकलिङ्गसिद्ध्यर्थं विवक्षितः
ननु प्राग्यागान्वयानवगमेऽपि ग्रहणान्वयद्वारा यागान्वयज्ञाना-
त्तत्स्मृत्यर्थत्वाविरोध इत्याशङ्कते * ननु चेति * विधीयमानस्य ५।१६।२
देवतोद्देशस्य प्रयोजनापेक्षावेलायां देवतास्मृतेः प्रधानोपकारित्वा-
नवगमेन प्रयोजनत्वयोग्यत्वानवधारणात्प्रयोजनत्वकल्पना न युक्ते-
त्याशयेन प्रतिज्ञाहेतु प्रश्नपूर्वं परिहरति * नैतदिति * ननु विधी-
यमानाया एव देवतायाः प्रकरणात्प्रधानार्थत्वावगतेस्तत्स्मृतेः प्रयो-
जनत्वयोग्यतावधारयिष्यतइत्याशङ्कां निरस्यन् श्लोकं व्याचष्टे
* ऐन्द्रवायवमिति * देवतानां वाक्येन ग्रहणसंयोगाद्ग्रहयुक्तग्रा-
हिणा प्रकरणेनाग्राह्यत्वेऽभिहिते व्रीहिप्रोक्षणादिवदविरोधात्तद्यु-
क्तस्यापि ग्राह्यत्वोपपत्तिमाशङ्क्याक्रियात्मकत्वेन प्रकरणग्रहणा-
योग्यतोक्ता । ननु पश्चादपि देवतास्मरणस्य प्रयोजनत्वयोग्यताव-
धारणे दृष्टे सम्भवत्यदृष्टकल्पना न न्याय्येत्याशङ्क्यानुनिष्पादिनो-
ऽपि शास्त्रेण प्रयोजनतयाऽनङ्गीकृतत्वान्न तेन शास्त्रस्यादृष्टप्रयोज-
नकल्पने * प्रवृत्तिः प्रतिबध्यतइत्युक्तम् * तस्यापीत्युपसंहार-
भाष्यं देवतोद्देशसमुच्चयद्वारग्रहणसमुच्चयाभिधानार्थत्वेन व्या-
चष्टे * तेनेति * नन्वदृष्टार्थत्वाद्देवतोद्देशसमुच्चयेऽपि ग्रहणानां
स्वरूपेण दृष्टार्थत्वाद्विकल्पो भविष्यतीत्याशङ्क्य न चेत्यभ्यासा-
धिकरणभाष्योक्तगुणभेदानिमित्तकर्मभेदन्यायाभिधानं यदि ग्रहणा-
नि न समुच्चीयन्तइति वाच्ये भेदानभ्युपगमेऽभ्यासेनापि समु-
च्चयः करिष्यतीति प्रौढिप्रदर्शनार्थम् * नावर्त्ततइत्युक्तम् * अ-
त्रैव सूत्रं योजयति * एष तावदिति * [illegible]

वक्ष्यमाणार्थान्तरसूचनार्थस्तावच्छब्दः संस्कारशब्दोक्ते ग्रह-
णेन विशेषणभूतदेवतासंयोगोपस्थापनात्तच्छब्देन परामर्शो-
पपत्तिः गृहीतस्य ग्रहणायोगाशङ्कानिरासार्थे द्रव्यपृथ-
क्त्वादिति सूत्रावयवपूरणार्थम् * देवतासंयुक्तेत्युक्तम् * कथं
देवतोद्देशभेदस्य ग्रहणाभ्यासे हेतुतेत्याशङ्कानिरासार्थमनर्थकं ही-
त्यवयवं सकृद् ग्रहणेनैकदेवतोद्देशस्याशक्यत्वेनानुष्ठानायोगात्तच्छ्र-
वणानर्थक्याभिधानार्थत्वेन व्याख्यातुम् * संयोगान्तरेत्युक्तम् *
अतो भिन्नार्थत्वाद्देवतानां समुच्चयोपपत्तिरित्यभ्यासोक्तिप्रयोजना-
भिधानार्थत्वेन भेदशब्दं व्याख्यातुम् * तेनेत्युक्तम् * देवतोद्देशस्य
द्रव्यविषयत्वादेकस्मिंश्च द्रव्ये ऽनेकदेवतोद्देशायोगात्प्रकृतिप्रत्यय-
पौर्वापर्यनियमाच्च धात्वर्थभेदेन भावनाभेदवत्प्रकृत्यर्थदेवताभेदेन
प्रत्ययार्थद्रव्यभेदस्य न्याय्यत्वाद्देवतोद्देशभेदेन द्रव्यभेदे ऽप्येक-
स्मिन् ग्रहणे बन्धने खादिरत्वादिवद्विकल्पेनानेकद्रव्यान्वयसम्भ-
वेनानेकदेवतान्वयोपपत्तेर्न देवतोद्देशभेदाग्रहणाभ्यासकल्पना यु-
क्तेत्याशङ्कानिरासार्थं द्रव्यगुणीभावादित्यवयवं पूरयितुम् * सं-
स्कार्यमित्युक्तम् * खादिरादेस्त्वसंस्कार्यत्वेन बन्धनं प्रति गुणत्वाच्च
बन्धनभेदोपपादकतेत्याशयः । ननूक्तप्रकारेण ग्रहणे देवतोद्देश-
स्यादृष्टार्थत्वात्तत्समुच्चयेन ग्रहणाभ्यासप्रतीतेर्दशमो गृह्यते दश
गृह्णातीति ग्रहणविषयक्रमसमुच्चयदर्शनोपपत्तावपि विना ते-
न यदि वासौ न सिद्ध्यतीत्यनेनैव न्यायेन यागे देवतोद्देशस्य दृष्ट-
त्वात्प्रकरणगृहीतानामपि देवतानां विभागमन्त्रादिवद्विकल्पोपपत्ते-
र्यागाभ्यासानापादकत्वात्तृतीयो हूयतइति यागविषये क्रमसमुच्च-
यदर्शने नोपपद्येयातामेवेत्याशयेनाशङ्क्याह * एतद्देवतावन्तीति *
देवतासंयोगानामदृष्टार्थत्वादित्यनेनैव देवतासमुच्चयस्योक्तत्वाद्यागे
ऽपि देवतानां समुच्चयसिद्धिरिति प्रतिज्ञाते तदुपपादनार्थमिन्द्रवा-
य्वादिदेवतायुक्तानां ग्रहणानां द्रव्यदेवतान्वयापादकयागापेक्षत्वा-
द्यागस्य च श्रुत्यादित्रयालभ्यमानदेवतत्वेनाविहितदेवताकतया दे-
वतापेक्षत्वात्प्रकरणस्य चाक्रियात्मकदेवताविनियोगे व्यापाराभा-
वाद् ग्रहणविनियोगद्वारा देवताविनियोजकत्वावगतेर्देवताविशिष्टा-
त्मना च ग्रहणानामदृष्टार्थत्वाद्यागप्रकरणेन समुच्चितानां ग्रहण-
मुक्तं तद्विनियोजकमिति तच्छब्दो ऽध्याहार्यः । ननु भगो वां
विभजत्वित्यादिमन्त्राणां प्रकरणग्राह्यत्वे ऽपि विकल्पदर्शनाद्य या-
५१७।५ गे देवतासमुच्चयसिद्धिरित्याशङ्कते * नन्विति * मन्त्राणामप्य-
क्रियात्मकत्वेन साक्षात्प्रकरणग्राह्यत्वात्पौरोडाशिकसमाख्यया ल-

द्यसामान्यसम्बन्धेन लिङ्गेन विभागाङ्गत्वज्ञानोत्तरकालं तद्द्वारा प्रकरणेन ग्रहणाल्लिङ्गेन च विभागे विकल्पेन मन्त्रविनियोगाद्वैषम्य-माह * सत्यमिति * ननु समाख्ययैव सामान्यसम्बन्धलाभे प्रकर-णानपेक्षेण लिङ्गेन त्र्यम्बकपुरोडाशविभागे ऽपि मन्त्रविनियोगा-पत्तेः प्रकरणबाधान्न दार्शपौर्णमासिकपुरोडाशविभागमात्रार्थत्वं स्यादित्याशङ्क्य * विभागान्तरेष्वित्युक्तम् * आनर्थक्यपरिहाराया-पूर्वसाधनलक्षणार्थं प्रकरणमप्यनुग्राह्यमित्याशयः । ग्रहणानां भेदे ऽपि सामान्यरूपेणैक्यविवक्षया देवतासमुच्चयाभिधानम् । नन्वेवमपि यागस्य प्रत्येकं देवताग्रहणसमर्थत्वाद्विकल्पो भविष्यतीत्याशङ्क्य * तत्रेत्युक्तम् * ननु द्वारभूतानां ग्रहणानामपि यागीयद्रव्यपृथक्कर-णार्थत्वेन दृष्टार्थत्वाद्देवतोद्देशस्यापि च यागापेक्षितदेवतासमर्पणेन दृष्टार्थत्वोपपत्तेर्विकल्पस्य न्याय्यत्वात्तद्द्वारा ऽपि प्रविष्टानां देवता-नां विकल्प एव युक्त इत्याशङ्कते * नन्विति * एकदेवतासम-र्पणेन यागस्य नैराकाङ्क्ष्यसिद्धेरनेकदेवताविशिष्टग्रहणाम्नानान-र्थक्यप्रसङ्गाद्देवताविकल्पार्थे चानेकाम्नाने गुणपरत्वेन ग्रहणभे-दकत्वायोगाद् ग्रहणस्य भेदाभावेन विकल्पानुपपत्तेस्तद्द्वारा देवता-विकल्पायोगादनेकदेवताविशिष्टग्रहणानुष्ठानायैवानेकाम्नानस्याङ्गी-कार्यत्वादनेकदेवत्ययागानवगतेश्चानेकदेवताविशिष्टग्रहणानुष्ठानस्य दृष्टार्थत्वायोगाद्विकल्पानुपपत्तिरिति परिहरति * भेदादिति * ग्र-हणस्य दृष्टार्थत्वे ऽपि तद्भेदस्यादृष्टार्थतेति भेदशब्देनोक्तम् । ननु पुनः श्रुतेर्देवतान्वयार्थत्वेन भेदकत्वाभावाद् ग्रहणस्य भेदानुपपत्तेस्तत्रा-प्यैकार्थ्याद्देवतानां विकल्पापत्तेः कथं तद्द्वारा यागे समुच्चयः स्यादित्याशङ्क्याह * अवश्यं चेति * निर्गुणग्रहणाश्रुतेः केन चि-द्वाक्येन देवताविशिष्टग्रहणस्याङ्गीकार्यत्वाद्वाक्यान्तरैस्तत्प्राप्तिवि-शिष्टदेवतावरुद्धग्रहणे देवतान्तरविध्यशक्तेः ग्रहणान्तराण्येव विधी-यन्त इत्याशयः । वस्त्वशक्तेरपि गुणस्यात्र भेदकतात्पर्यातिशयं व-क्तुमारभते * न हीति * युगपत्तावत्सर्वोद्देशो ऽशक्य एवेत्याह * यौगपद्यं तावदिति * नन्विन्द्रवायुमित्रावरुणाद्यास्तैः प्रातिप-दिकैर्निर्दिश्य सर्वान्ते सकृच्चतुर्थ्युच्चारणेन सर्वा युगपदुद्देष्टुं शक्या इत्याशङ्क्याह * अदेवताभूत एव चेति * सकृच्चतुर्थीनिर्देशे समु-दायो देवत्वेनोद्दिष्टः स्यात् न चास्य देवतात्वमस्तीत्यर्थः । क्रमोद्दे-शासम्भवं प्रतिज्ञाहेतुप्रश्नपूर्वमुपपादयति * न चेति * विशिष्ट-विधिना विशेषणविशेष्ययोर्देवतोद्देशग्रहणयोरिन्द्रवायूद्देशविशिष्टं ग्रहणं कार्यमिति युगपद्विधानाद्यागाख्यकरणभेदेन च यौगप

धसम्पादनशक्तेर्विक्षेपः ।ननु ज्ञानादू गृह्यमाणे द्रव्ये देवतोद्देशः
कार्य. न च ग्रहणकाले सर्वदेवतोद्देशः शक्य इत्यर्थ. । "चतुर्दे-
वतोद्देशसम्भवे ऽप्यल्पाभिप्रायेण * एकमित्युक्तम् * ^ नैकका-
लत्यासम्भवे ऽपि प्रागूर्ध्वं वा ग्रहणप्रत्यासन्ने काले क्रमेण सर्व।
सम्भविष्यतीत्याशङ्क्याह * यदि त्विति * (प्राकृतदेवतोद्देशना-
६।१८।४ शापत्तेरपि क्रमेणोद्देशो न भवतीत्याह * किं चेति * दास्यामीति
त्यागरूपतेतिकरणेन परामृष्टा । श्लोकं व्याचष्टे *यदिति*[1]) एकदे-
वतोद्देशेन त्यक्ष्यामीति सङ्कल्पितस्य तदानीमित्युक्तस्याप्यन्यत्रा-
विनियोज्यत्वम् *प्रायशब्देनोक्तम् * इन्द्रवायुभ्यां गृह्णामीति श-
ब्दोच्चारणरूपस्योद्देशस्याध्वर्यवत्वे ऽपि त्यागसङ्कल्परूपोद्देश विना
तस्यापर्यवसानात्तस्य च यजमानादन्येन कर्तुमशक्यत्वात् * यज-
मानइत्युक्तम् * पूर्वपक्षीत्युक्तेरुपलक्षणार्थत्वम् * पूर्वसङ्कल्पे-
त्यनेनोक्तम् * गुणहेतुकभेदोक्तिमुपसंहरति * तेनेति * एवं ग्रह-
णस्वरूपस्य दृष्टार्थत्वे ऽपि देवतोद्देशविशिष्टरूपेणादृष्टार्थत्वाभिधा-
नपरतया भाष्य व्याख्यायेदानीं स्वरूपेणैव दृष्टार्थत्वाभिधानपरत-
या व्याख्यातुमाह * किं चेति * श्लोकं व्याचष्टे * देवतोद्देशेति*
प्रकरणालोचनेन रसस्य प्रदेयत्वावसायात्तत्सिद्धेश्च पाचनादिसं-
स्काराधीनत्वात्पूयमानावस्थेनेत्युक्तम् । उत्पत्तिवाक्यमात्रालोचने तु
लतायाः प्रदेयत्वप्रतीतेः क्रयातिरिक्तसंस्काराणामदृष्टार्थत्व प्रौढ्या
वक्तुं क्रयोत्तरकालतोक्ता रसाविधानमेव पुरोगशादिवैपरीत्याभिधा-
नेन सूचयितुमाह * यत्र त्विति * ननु ग्रहैर्जुहोति चमसैर्जुहोती-
ति विध्यर्थस्य ग्रहचमसपात्रेषु ग्रहणमन्तरेणासिद्धेस्तत्सिद्ध्यर्थत्वा-
दू ग्रहणं दृष्टार्थमेवेत्याशङ्क्याह *न चेति* ग्रहचमसविध्योरप्यदृष्टा-
दृष्टार्थत्वात्तद्द्वारा ग्रहणस्यापि प्रधानं प्रति दृष्टोपकारित्वाभावाददृ-
ष्टार्थतेत्याशयः । सोमस्य यागसाधनत्वविधिकाले ग्रहचमसस्थत्व-
विधौ सत्यन्यत्रस्थस्य साधनत्वाभावादू ग्रहचमसस्थत्व दृष्टार्थं स्या-
दुत्तरकालं तु प्रकरणालोचनयागवत्तस्यापि तत्स्थत्वस्य साधनान-
न्तर्गतेरदृष्टार्थतेति सूचनार्थोत्पत्तिशब्दः । अतो न केवल नानादेवतो-
द्देशजन्यादृष्टभेदनिष्पत्त्यर्थं ग्रहणानि समुच्चेतव्यानि किं तु स्वजन्या-
दृष्टभेदनिष्पत्त्यर्थमपीत्यदृष्टार्थत्वोक्तिप्रयोजनमाह * तेनेति * दृष्टा-
र्थत्वे, ऽपि ग्रहणस्य ग्राह्यभेदात्समुच्चयाभिधानार्थं ग्रहणं चेति
भाष्यं व्याचष्टे * दर्शेति * कृत्स्नस्य ग्रहणं नावकल्पत इत्यभिधा-
नमनिष्टापादकत्वादयुक्तमाशङ्क्य समुच्चयं विनत्यध्याहारेण व्या-

१ अय पा० २ पु० मा० ।

ख्यातुं स कृत्स्नः सोमो न ग्रहणभेदमन्तरेण शक्यते *
ग्रहीतुमित्युक्तम् * दशमुष्टैरभिषवे सति रसस्याल्पत्वादेक- ५१९।२
स्मिन्पात्रे ग्रहणोपपत्त्याशङ्कानिरासार्थत्वमुदककलशेषु संस्कारा-
भिधानं व्याख्यातुम् * नियतेत्युक्तम् * यानि चैवाभिपूयन्ते पु-
ष्पमूलफलैः शुभैरिति मिश्रीकरणे ऽभिषुणोतिप्रयोगदर्शनात् मि-
श्रीकृतवाच्यभिषुतशब्दः प्रादेशमात्रोक्तिप्रयोजनमल्पशब्देनोक्तम् ।
नन्वयागसाधनभूतसोमावयवग्रहणस्यादृष्टार्थत्वोपपत्तेः कृत्स्नस्यैव
ग्राह्यताया न्याय्यत्वात्कृत्स्नग्रहणसमर्थमहापरिमाणपात्रोत्पादनेनै-
कस्मिन्पात्रे कृत्स्नस्य सोमस्य ग्रहणमुपपत्स्यत इत्याशङ्कानिरासार्थं
यद्यपि चेत्यादिना ऽवकल्पेतेत्यन्तं भाष्यं श्रुतपरिमाणपात्रकलशं
स्यागेनाश्रुतपात्रान्तरोत्पादनाशङ्कानुपपत्तेर्नित्यवद्विहितानामपि चै-
कार्थ्ये व्रीहियवादिवदगत्या विकल्पाश्रयणोपपत्तेर्देवतासमुच्चयश-
ङ्कानिरासार्थस्य च कृत्स्नस्य ग्रहणं हीतिभाष्यावयवस्यैतस्या इति
सङ्कल्प इत्यादिवार्त्तिकेन व्याख्यातार्थत्वान्न व्याख्यातम्।नन्ववयवशो
ग्रहणेन गृह्यभेदाग्रहणाभ्यासोपपत्तेस्तद्विषयक्रमसमुच्चयदर्शनोप-
पत्तावप्यवयवशो गृहीतस्यापि सोमस्यैकीकरणेन कृत्स्नस्य सकृद्या-
गसाधनत्वोपपत्तेस्तृतीयो हूयते इति यागविषयक्रमसमुच्चयदर्शनानु
पपत्तिरित्याशङ्कानिरासार्थं तस्मादित्यादिभाष्यं तात्पर्यतस्ताव-
द्व्याचष्टे * तथावस्थेन चेति * भेदेन गृहीतस्य सोमस्यैकीकर-
णायोगाद्भिद्यावस्थितस्यैव यागनिष्पादकत्वावगतेरनभ्यस्तस्य च या-
गस्य तथावस्थितसर्वसोमविषयसमीहितकार्योपयोगित्वकरणलक्ष-
णसम्भावनयाभ्यसितव्यो याग इत्यर्थः । येन कारणेन यागाभ्यासो
भाष्यकृतोक्तस्तेन कारणेन ग्रहणाभ्यासवद्यागाभ्यासे ऽपि सूत्रं
योज्यमित्याह * तेनेति * योजयति तद्भेदादिति दृष्टार्थत्वे ग्रहणस्य
भेदकप्रमाणाभावेन भेदायोगाद्भाष्यकृतोक्तं तद्भेदमनादृत्य सं-
स्कारेण संस्कार्यद्रव्योपस्थापनात्तच्छब्देन परामर्शः। यागवेलायामे-
कीकरणे प्राक् पृथक्करणमनर्थकमिति भाष्यकृद्व्याख्यानं सूत्रादप्र-
तीतेरनादृत्य यागानभ्यासे द्रव्यपृथक्त्वमनर्थकमित्येवं व्याख्यातु
* सदोषमित्युक्तम् * पश्ववयवानामिव सोमावयवानामप्यसर्वत्या-
गोपपत्तिमाशङ्क्यैकादशपशोरवदानानीति वदिहावयवान्तरपरिस-
ङ्ख्याभावात्पशुवैपम्याभिधानार्थत्वेन पृथक्कृतस्य कृत्स्नस्य द्रव्यस्य
यागं प्रति गुणाभावाद्यागानुष्ठानभेद इत्येवं व्याख्यातुम * अत इत्यु-
क्तम् * अङ्गैः स्विष्टकृतं यजतीत्यादिना अवयवान्तराणामन्यत्र
विनियोगवत्सोमावयवानामन्यत्राविनियोगेनानर्थक्यपरिहारायोग-

सूचनार्थो ऽतः शब्दः। वाक्यान्तरैः कल्पिताभेदावस्था यस्यौत्पत्तिकस्य द्रव्यस्य तस्य यद्यागं प्रति गुणत्वं तदंशेनेत्यर्थः । तात्पर्यतो व्याख्यातं भाष्यमवयवशो व्याचिख्यासुरनर्थकं हि स्यादिति सूत्रावयवव्याख्यानार्थं नानेति भाष्यं कथमशक्यतेत्यपेक्षायामुपपादयितुमाह * तद्धीति * सूत्रावयवोक्तोपपत्त्यभिधानात्तद्व्याख्यानार्थनैकध्यनिरासभाष्यस्य सूचिता भाष्योक्तामुपपत्तिं व्याचष्टे * न चेति * पुनरेकीकरणाइत्यनुषङ्गः भागव्यवस्थानुपपत्त्याशयेन भाष्योक्तामुपपत्तिं व्याख्याय सर्वदेवतोद्देशानुपपत्त्याशयेन व्याचष्टे * न चेति * प्रस्तरप्रहरणोत्तमप्रयाजवत्क्रमेण सर्वा देवता उद्दिश्य सर्वेतत्त्यागोपपत्तेः सर्वदेवतोद्देशानुपपत्तिपरिहारसम्भवे ऽपि भागव्यवस्थानुपपत्तिरशक्यपरिहरेत्याह * तथा कृते ऽपि चेति * सर्वदेवतोद्देशेन सकृद्दाने कृते ऽपीत्यर्थः । ननु वायव्यैन्द्रवायवयवत्सङ्करो ऽपि न दोषायेत्याशङ्क्याह * प्रकल्पिते चेति * सङ्करे भागनानात्वकल्पनानर्थक्यापत्तेरेकपात्रा गृह्यन्त इति वचोत्सङ्करविध्यभावात्सङ्करो ऽनर्थक इत्याशयः । नन्वैकध्यकरणाशक्तावप्येकेन यागेन विहितयागनिष्पत्तेर्नाश्रुताभ्यासकल्पना युक्तेत्याशङ्कानिरासार्थं न चेति भाष्यमेतद्देवतावन्ति ग्रहणानीत्यादिवार्त्तिकेन व्याख्यातार्थत्वात् ज्योतिष्टोमशब्दस्याभ्यस्तयागरूपवाचित्वेनाभ्यासस्य ज्योतिष्टोमश्रुत्युक्तत्वाभिधानार्थं च तासु चेति भाष्यं न त्विह प्रत्येकं ज्योतिष्टोमनिवर्त्तनसामर्थ्यमित्यादिवार्त्तिकेन सर्वास्विज्यमानासु श्रुतो ज्योतिष्टोमाख्यो यागो निर्वृत्तो भवति नैकस्यां देवतायामिति व्याख्यातार्थत्वान्न देवतान्तरमिति च भाष्यं प्रकृतदेवताविनिर्वृत्यत्वादेव च श्रुतो यागो न देवतान्तरमाकाङ्क्षत्यन्यथा देवताशून्यत्वेनारूपत्वाच्छ्रुतो यागो न निर्वर्तेतत्येवं स्वप्रार्थत्वात्कृत्स्नेन चेत्यादि च भाष्यं दश मुष्टीर्मिमीतइति चेत्यादिवार्त्तिकेन भाष्यान्तरव्याख्यानार्थेनापि तस्मात्प्रकल्पनभेदादि भाष्यसमुदायतात्पर्यव्याख्यानार्थतयावस्थितेन चेत्यादिवार्त्तिकसहितेनार्थाद्देशो द्रव्यगुणीभावादिति सूत्रावयवव्याख्यानार्थत्वेन व्याख्यातत्वाद्व्याख्याय तस्मिंश्चेत्येत्यभ्यासोपपादनप्रयोजनाभिधानाभिप्रायं तस्मादिति परिचोदनापरिहारोपसंहारार्थं च भाष्यं निगमनपूर्वकमेकहेलया व्याचष्टे * तस्मादिति * दशेति ग्रहणसमुच्चयदर्शनं दशम इति क्रमदर्शनं तृतीयमित्येकमेव प्रकृत्यंशेन समुच्चयदर्शनं प्रत्ययांशेन च क्रमदर्शनं यथासङ्कल्पितस्य पृथगवस्थितस्य कृत्स्नस्य सोमस्य प्रदानात्सर्वदेवतासमुच्चयाच्चोपपन्नमित्यर्थः । स-

मुदायानुवादापवादस्य कर्मभेदापवादसिद्ध्यर्थत्वाल्लक्षणसङ्गतिर-स्त्यस्तीति सूचयन्नधिकरणार्थमुपसंहरति * तेनेति * ननु कर्मैक्ये ऽपि तत्तद्देवतोद्देशेन पृथक् द्रव्यत्यागे सत्यनुष्ठाने विशेषाभावात्कि चिन्तायाः प्रयोजनमित्याशङ्क्याह * प्रयोजनमिति * प्रकृतौ वि-शेषाभावे ऽपि कर्मभेदे सत्यकर्मणि विकल्पो विभागो हि चोदनै-कत्वादित्याद्यमाधिकरणन्यायेनैकस्यैन्द्रवायवादिवाक्यविहितस्य या-गस्य विकृतौ विकल्पेन विध्यन्तातिदेशाद्विकल्पेनैकस्य धर्माः कार्या सकृच्च यागः कर्मैक्ये यथा प्रकृतीति विशेष इत्यर्थः । ऐन्द्रवाय-वादिवाक्यैश्च यागविधावैन्द्रवायवेन यजेतेति वचनव्यक्त्यापत्ते-र्ज्योतिष्टोमस्यापि स्वार्थविहितद्रव्यदेवतावत्त्वलक्षणव्यक्तचोदनत्वा-देकाहाहीनसत्रेष्वव्यक्तचोदनत्वेन ज्योतिष्टोमसादृश्याभावान्न त-दीयविध्यन्तप्रवृत्तिः सोमवाक्ये । ननु विधौ द्रव्यश्रवणे ऽपि स्वार्थ-विहितदेवताराहित्येन ज्योतिष्टोमस्याप्यव्यक्तचोदनत्वात्तत्सादृश्ये-नैकाहादिषु ज्योतिष्टोमिकविध्यन्तप्रकृतिरिति प्रयोजनान्तरं त्वव्य-क्तासु तु सोमस्येत्यष्टमाधिकरणेन सुज्ञानत्वान्नोक्तम् ।

संख्याकृतकर्मभेदाधिकरणम् ॥७॥

पृथक्त्वनिवेशात्संख्यया कर्मभेदः स्यात् ॥ २१ ॥

संख्यानिमित्तभेदविचारस्याभ्यासनिमित्तभेदविचारेण सकृ-च्छ्रुतेरभ्यासप्रत्युदाहरणरूपेण पूर्वपक्षोत्थानात्समतिं दर्शयितुमाह * गत इति * प्रासङ्गिकचिन्तायाः सम्बन्धित्वेन प्रसञ्जकचिन्ताबु- ५२०।१
द्धिस्थकरणसामर्थ्याद्यथा यत्प्रसक्त्या या चिन्ता क्रियते तत्समाप्तौ प्रसञ्जकचिन्ता बुद्धिस्था भवति तथापवादकाचिन्ताया अपि सम्ब-न्धित्वाविशेषेणापवाद्यचिन्ताबुद्धिस्थीकरणसामर्थ्याद्यदपवादेन चि-न्ताया चिन्ता क्रियते तत्समाप्तावपवाद्यचिन्तापि बुद्धिस्थी भवती-त्यधिकरणत्रयकृतया समुदायानुवादापवादाचिन्तया ऽभ्यासनिमि-त्तभेदापवादभूतायाः समुदायानुवादाचिन्तायाः पौर्णमास्यधिकरण-कृताया बुद्धिस्थीकरणात्तद्द्वारा समुदायानुवादापवाद्याभ्यासचि-न्ताया बुद्धिस्थत्वात्तत्सङ्गत्याभिधानोपपत्तिसूचनायाभ्यासनिमित्तभे-दापवादानन्तरं तदपवादत्वेन प्रसङ्गो बुद्धिस्थत्वं यस्येति वि-ग्रहाभ्युपगमेनाभ्यासापवादापवादः प्रसङ्गशब्देनोक्तः । सोमयागस्यै-कत्वे ऽप्यभ्यासेन क्रमसमुच्चयदर्शनोपपत्तिवत्तिस्र आहुतीरिति त्रि-त्वसंख्याया अभ्यासेनोपपत्तेर्न कर्मभेदकतेत्यनन्तरोक्ताभ्यासोपजी-वनेन पूर्वपक्षकरणादनन्तरसङ्गतिसूचनायेदानीं शब्दः । ननु प्राजा-

पत्यवाक्ये ऽभ्यासेन पूर्वपक्षाकरणाच्चेदानीं शब्दसूचितानन्तरसङ्ग-
तिः सम्भवतीत्याशङ्क्याह * तत्रेति * द्रव्यसंख्यानिवृत्त्यर्थं स्वश-
ब्देन कर्मणि परामृष्टे समिधो यजतीत्यादिबहुत्वसंख्याया अप्युदा-
हरणत्वोपपत्तेस्तन्निवृत्त्यर्थम् * चोदिता इत्युक्तम् * समिदादिना-
मधेयस्य देवतायोगनिमित्तत्वात्सामिधो ऽग्न आज्यस्य व्यन्त्वित्यादि-
मन्त्रवर्णप्राप्तदेवताबहुत्वानुवादोपपत्तेर्न कर्मभेदकतेत्याशयः।एकाद-
श प्रयाजान्यजतीत्याद्युत्पन्नकर्मसंख्यानिवृत्त्यर्थमुत्पद्यमानत्वविशेष-
णं पार्वणौ जुहोत्याज्यभागौ यजतीत्याद्युत्पद्यमानकर्मगतसंख्यान्तर-
ग्रहणायादिशब्दः । सर्वत्रानन्यपरपुनः श्रुत्या कर्मोत्पत्त्यवगतेर्न
प्रमेयानुप्रवेशित्वापत्तिः सकृच्छ्रुत्या कर्मैक्यावगतेर्विज्ञातसंख्ये क-
र्मण्येकादशप्रयाजानित्यादिवदनपेक्षितपदान्तरोपात्तसंख्यानिवेशा-
योगादावृत्तिकल्पनया च सख्यानुग्रहोपपत्तेर्न कर्म भेदं इति वक्ष्य-
माणाशयेन पूर्वपक्षमाह * सकृदिति * आख्याते कर्मसंख्यानुपा-
दानाद्वाक्यान्तरश्रुतयागसम्भवे चैन्द्रवायवादिवाक्ये यागकल्प-
नानुपपत्तिवत्पदान्तरश्रुतसंख्यासम्भवात्स्वपदसंख्याकल्पनानुपप-
त्तेर्न निर्ज्ञातसंख्यत्वात्कर्मस्वरूपे संख्यानिवेशोपपत्तेः । पृथक्त्वैका-
र्थनिवेशित्वाच्चैकातिरिक्तं संख्याया भेदं विनानुपपत्तेः संख्यापि भे-
दिनीति वक्ष्यमाणाशयेन सिद्धान्तमाह * इतीति * धात्वर्थनाम-
त्वेनाहुतीतिशब्दस्याहुतीरिति संख्याया धात्वर्थविषयत्वावधारणा-
द्धात्वर्थमात्रभेदकत्वं होमशब्देन सूचितम्।पृथक्त्वेन विनेत्यनेन यत्र
पृथक्त्वं तत्र निवेश इत्येव पृथक्त्वैकार्थनिवेशवाचित्वेन पृथक्त्वनि-
वेशशब्दो व्याख्यातः । यस्त्वभ्यासेन संख्यानुग्रहो ऽभिहितः स न
युक्त इत्याह * न चेति * कथं तर्हि दशमे पशुपुरोडाशस्याग-
द्रूपकारित्वनिरासेन देवतासंस्कारत्वे सिद्धान्तिते सौत्रामण्यामा-
श्विनसारस्वतैन्द्रेषु पशुष्वैन्द्रसावित्रवारुणानां पुरोडाशानां पशुदे-
वतासंस्कारत्वायोगमाशङ्क्य तन्निरासार्थे ऽभ्यासो वा प्रयोजवदे-
कदेशो ऽन्यदेवत्य इति सूत्रे तद्यथा पशौ पञ्चानां प्रयाजानां चोद-
केन प्राप्तानामेकादशसंख्या विधीयते सा चान्तरेणाभ्यासं नावक-
ल्पत इत्यभ्यस्यन्ते प्रयाजा इत्यभ्यासेन संख्यापूरणं भाष्यकृद्वक्ष्य-
तीत्याशङ्क्याह * अगत्या सा हीति * इह त्वनिर्ज्ञातसंख्यत्वात्स्वरू-
पभेदोपपत्तेर्नागतिरस्तीत्याह * सम्भवति चेति * चतुः शब्दार्थे
चशब्दः । एतदेवोपसंहरति * तस्मादिति * अत एवैकाविंशेनाति-
रात्रेण प्रजाकामं याजयेदित्यादिस्तोमवृद्ध्यावागमेन संख्यापूरणां दृ-

१ पार्वणं जुहोतीति २ पु० पा० ।

शमे वक्ष्यते इत्याह * तथा चेति * पूर्वपक्षाशयं विवृणोति * ननु चेति * सिद्धान्ताशयं विवृणोति * नेति * निष्पन्नरूपत्वेनाप्रतीतिरसत्वम्। ननु तिङ्वाच्यायाः संख्यायाः सुब्वाच्यसंख्यावत्प्रकृत्यर्थविषयत्वावगतेः कथं धात्वर्थस्यासंख्यतेत्याशङ्क्याह * या हीति * तिङ्वाच्यायाः संख्यायाः प्रकृत्यर्थविषयताया स्मृत्याचारविरोधान्नानुमातुं शक्येत्याशयः। भावनाग्रहणं दृष्टान्तार्थम्। ननु तिङ्वाच्यस्यैकत्वस्य धात्वर्थगामित्वाभावेऽपि निःसंख्यधात्वर्थानुष्ठानाशक्तेः संख्यापेक्षायां सकृच्छ्रुतस्यैकत्वावगतेर्न पदान्तरोक्तसंख्याश्रयणं युक्तमित्याशङ्क्याह * तत्रेति * सिद्धान्तमुपसंहरति * तस्मादिति * कर्मसंख्यानुदाहार्यत्वे कस्माद्भाष्यकृता द्रव्यसंख्योदाहृतेत्याशङ्क्याह * यद्यपीति * तत्रेति सन्देहभाष्यं यागकल्पकप्राजापत्यशब्दार्थभूतदेवताविशिष्टद्रव्यसादृश्यात्कर्मसादृश्यप्रतीतेः पूर्वपक्षायोगेनाक्षिपति * कुत इति * सास्य देवतेति सर्वनामार्थे ५२१।१
तद्धितप्रवृत्तेः सर्वनाम्नश्च सन्निहितपशुपरामर्शित्वात्पशुशब्दस्य बहुवचनान्तत्वेनैकशेषत्वावधारणात्तत्परामर्शित्वसिद्धये सर्वनाम्नोऽप्यस्य चास्य चेति सप्तदशकृत्व उच्चार्यैषामिति सरूपैकशेषं कृत्वा प्रजापतिर्देवतेति देवतासम्बन्धे प्राजापत्य इति तद्धितः कार्यः। सन्निहितपरामर्शित्वेऽपि वा सर्वनाम्नस्तद्धितान्तपदान्तर्गतत्वेन बहुवचनान्वयात्प्रागपरिपूर्णे तद्धितान्ते पदे पदान्तरान्वयायोगात्पशुशब्दगतबहुवचनालोचनेनैकशेषाप्रतीतेः। पशुशब्दस्य च तद्धितविषयसमर्पकत्वेन के प्राजापत्या इत्यपेक्षायामन्वयात्तद्गतस्य बहुवचनस्य प्राजापत्यशब्दगतबहुवचनोक्तसंख्यानुवादित्वावगतेः। सर्वनाम्नस्तद्वशेनैकशेषत्वकल्पनायोगात्तद्धितान्तानामेव शब्दानामेकशेषत्वं न सर्वनाम्न (इति सर्वनामैकशेषत्वसदसद्भावसन्देहे तत्तद्द्रव्यदेवतान्वयभेदाभेदसन्देहात्कर्मभेदादसन्देहमुपपादयितुमाह * उच्यत इति * यो बहुवचनान्यथानुपपत्त्यैकशेषः कथ्यते किमयं तद्धितान्तानां प्राजापत्यशब्दानामेव कृतः स न युक्तो भवेन्न तु सर्वनाम्नः[1]) कार्य इति सिद्धान्तवचनव्यक्तिः कृतैकशेषाणां वा सर्वनाम्नां पश्चात्कृतेन तद्धितेन देवतासङ्गतिरिति पूर्वपक्षवचनव्यक्तिरितरेतरयोगाख्यचार्थस्मृतद्वन्द्वापवादत्वेनैकशेषस्येतरेतरयोगवाचित्वावगतेरितरेतरयोगिनां चेतरेतरसापेक्षत्वेनासामर्थ्यापत्तेरेकशेषे कृते तद्धितानुपपत्तिप्रसङ्ग इति पूर्वपक्षदूषणसूचनार्थं पश्चादुक्तवचनव्यक्तिद्वयस्य प्रातिलोम्येन पूर्वसिद्धान्तपक्षोपयोगितामाह * य-

१ अय पा० ३ पु० ना०।

दीति * सप्तदशानामित्यनेन पशुसमूहस्य द्रव्याख्यसम्बन्ध्यैक्ये सम्बन्धैक्यसिद्धये ऽभिहिते द्रव्यैक्ये ऽपीन्द्राय रथन्तरायेन्द्राय बार्हतायेन्द्राय वैरूपायेन्द्राय वैराजायेन्द्राय रैवतायेन्द्राय शाक्वरायेतिवद्देवताभेदे सम्बन्धभेदापत्तेस्तच्छङ्कानिरासाय * एकस्याश्चेत्युक्तम् * कुक्कुटावानय मिथुनं करिष्याम इत्यादिविरूपैकशेषस्यार्थप्रकरणसापेक्षत्वाद्विलम्बेनावगतेः शीघ्रप्रतीतिसूचनार्थः सरूपशब्दः किं तावदिति पूर्वपक्षप्रतिज्ञाभाष्यं व्याचष्टे * किं तावदिति * (कुत इत्यादिभाष्येण प्रश्नजिज्ञासोपन्यासपूर्वं सप्तदशपशुसमूहस्यैकदेवतासङ्कल्पेनोपपत्तिं यागैक्ये हेतुत्वेनोक्तामुपपादयितुमाह * कुत इति *[1]) विग्रहवाक्यस्य तद्धितपदार्थकथनार्थत्वाद्विग्रहवाक्यस्थसर्वनामपरामृष्टस्य पशुशब्दार्थस्य तद्धितप्रत्ययार्थत्वावगतेः पशुशब्दस्थेन बहुवचनेन तद्धितप्रत्ययार्थस्य पशुद्रव्यस्य तद्धितोत्पत्तेः प्राग्विग्रहवेलायामेव बहुत्वोपलम्भात्प्राजापत्यशब्दस्थस्य बहुवचनस्य तदनुवादित्वोपपत्तेस्तद्धितान्ते प्राजापत्यशब्दे बहुवचननिमित्तैकशेषत्वकल्पनायोगात्सर्वनाम्नामेवैकशेषः कार्यो न तद्धितान्तानामेवेत्याशयः । प्राजापत्यशब्दस्य चैकशेषत्वकल्पने तस्यावृत्तिपूर्वकत्वात्केवलप्रत्ययप्रयोगासम्भवेन प्रकृतिनिरपेक्षतद्धितमात्रवृत्त्ययोगात्प्रकृतिप्रत्यययोर्द्वयोरप्येकशेषकल्पनापत्त्या गौरवं स्यात्सर्वनाम्नस्त्वेकशेषकल्पने गौरवानापत्तिरित्याशयेनोपपत्त्यन्तर * माहेतीति * इतिकरणेनोक्तप्रकारपरामर्शात्तद्धितान्तैकशेषत्वाभावएव प्रजापतिप्रातिपदिकात्मिकायां प्रकृतौ प्रत्यये चोभयत्रैकशेषत्वं न भवेद्येन गौरवं नस्यादित्येवं चशब्दयोरध्याहारेणोपपत्त्यन्तरं योज्यम् । द्वयोरिति वाच्ये प्रत्ययानन्तरं बहुवचनश्रुतेस्तत्रैकशेषकल्पनोपपत्तावपि प्रकृतौ बहुवचनाश्रुतेर्नैकशेषकल्पना युक्तेति सूचयितुम् * प्रकृतावित्युक्तम् * पूर्वपक्षे लाघवोक्त्या सिद्धान्ते गौरवं सूचितमुपपादयितुमाह * यो हीति * (ननु प्रजापत्यशब्दस्थबहुवचनान्यथानुपपत्त्योभयोरेकशेषकल्पना युक्तेत्याशङ्क्य प्राजापत्यशब्दप्रतिपादके बहुवचनानुपलब्धिरुक्ता[2]) ननु प्राजापत्यशब्दस्थबहुवचनोपपत्त्यर्थं प्राजापत्यर्थशब्दे प्रत्ययार्थबहुत्वस्यावश्यदर्शनीयत्वात्तस्य च प्राजापत्यशब्दैकशेषं विना दर्शयितुमशक्यत्वात्प्रत्ययमात्रस्य चैकशेषत्वायोगाद्युक्तैवोभयोरेकशेषकल्पनेत्याशङ्क्य प्रत्ययार्थबहुत्वस्य विगृह्यमाणप्राजापत्यशब्दवेलायां कृते-

१ अय पा० ३ पु० ना० ।

२ अय पा० ३ पु० ना० ।

कशेषेण बहुवचनान्तेन सर्वनाम्नोक्तत्वात्सर्वनाम्नश्च तद्धितप्रत्ययार्थकथनार्थत्वात्सर्वनाम्नस्थबहुवचनोक्तं प्रत्ययार्थबहुत्वं प्राजापत्यशब्दैकशेषत्वं विनापि प्राजापत्यशब्दस्थेन बहुवचनेनानुवादाय दर्शयितुम् * शक्यतएवेत्युक्तम् * ये तु प्रत्ययानन्तरं बहुवचनश्रुतेस्तन्मात्रस्यैकशेषतापत्तेर्न श्लोकेनोच्यते कृत्स्नश्लोकव्याख्यानार्थश्च यो हीत्यादिग्रन्थ इति व्याचक्षते। तत्पक्षे तद्धितप्रत्ययस्य देवताविशिष्टद्रव्यवाचित्वात्तन्मात्रैकशेषत्वे ऽपि यागकल्पकदेवताविशिष्टरूपभेदाद्यागभेदापत्तेः पूर्वपक्षासिद्धिः। न च तदेकशेषमन्तरेणोक्तस्य च सर्वनाम्ना प्रत्ययैकशेषत्वस्य कथ्यमानत्वात्प्रातिपदिकैकशेषत्वं विनापि प्रत्ययरूपस्यार्थस्यैकशेषता दर्शयितुं शक्येत्येवं व्याख्येयत्वापत्तेः कथं सर्वनाम्ना प्रत्ययैकपदशेषत्वं कथ्यतइति वाच्यम्। सर्वनाम्नैकशेषत्वाभ्युपगमेन तद्धितान्तैकशेषनिरासस्य प्रकृतोपयोगमाह * तस्मादिति* प्रजापतिसकृच्छ्रुतत्वोक्तिर्देवताभेदनिरासार्था सप्तदशानामेवेति भाष्यावयवोक्तामनुपपत्तिं व्याख्याय यो हि बहून्यागानित्यनेनोक्तामेवमल्पीयसीत्यनेन चोक्तामेकहेलया व्यालष्टे * किं चेति * स्तोककल्पनेनैव द्रव्यदेवतान्वयरूपस्यार्थस्य सिद्धत्वान्न मे पक्षे बहुकल्पनास्तीत्यर्थः । मइति विशेषणसामर्थ्यात्परपक्षे सूचितं कल्पनागौरवमुपपादयति * कृत्वापि हीति * ननु कल्पनासाम्ये बह्वल्पकल्पनयोः को विशेष इत्याशङ्क्याह * न चेति * अदृष्टार्थानामुपकारकल्पनाल्पीयसी व्याप्येत्यादिभाष्ये ऽल्पकल्पनयानुपपत्तिपरिहारसम्भवे बहुकल्पनायां नार्थापत्तिः प्रभवतीत्युक्तमित्यर्थः शब्दान्तराधिकरणपूर्वपक्षोक्तमेव न्यायमत्रापि योजयति * यन्मात्रेण विनेति * ननु प्रागेवानेककल्पने ऽल्पस्याकल्पितत्वेनानुपप- ५२२।१
त्त्यपरिहारात्कथमधिकालाभ इत्याशङ्कानिरासार्थं यो हीति भाष्योक्तमेव कल्पनाक्रमं विवृणोति * अवश्यं हीति * नन्वेवमपि कल्पकसाप्तदश्यात्कल्पसाप्तदश्यं युक्तमेवेत्याशङ्क्याह * तत्रेति * यथा यागभेदे ऽपि देवतैक्याद्देवतोद्देशेन त्यक्ते द्रव्ये ऽयं यागानुष्ठितो नायमित्यगृह्यमाणविशेषत्वात्सकृदनुष्ठानेनामेकयागसिद्धेर्नानुष्ठानभेदः कल्प्यते तथा द्रव्यभेदे ऽपि यागकल्पकदेवतान्वयैक्यादेकस्मिन्यागे कल्पिते ऽस्य द्रव्यस्य देवतान्वयः सिद्धः । नास्येति विशेषाग्रहात्सर्वद्रव्याणां देवतान्वयसिद्धेर्नानेकयागकल्पना युक्तेत्यर्थः । ननु देवतान्वयैक्ये ऽप्येकस्मिन्यागे ऽनेकद्रव्यानर्थक्याप-

१ एकशेषतानेनेति २ पु० पा० ।

त्तेर्द्रव्यभेदाद्यागभेदः कल्पयिष्यतइत्याशङ्क्याह * किं चेति * न हि हृदयादिभेदात्तदुपादानकद्वयवदानभेदाद्वाग्नीषोमीयादिपशुयागकर्म भिद्यतइति द्रव्यभेदस्य यागभेदव्यभिचारितोक्ता । श्लोकं व्याचष्टे * यदि हीति * द्रव्यभेदस्य यागभेदासाधकतैव षष्ठाधिकरणसिद्धान्तावयवसूत्रेणोपपादिता नन्वेकस्य यागस्यैकपशुनिष्पत्तेर्नेकेनैव हृदयाद्येकादशावदानगणेन सिद्धेः पश्वन्तराणां यागसाधनत्वाभावेन देवतान्वयाभावापत्तेः । सप्तदशानां प्राजापत्यत्वे न स्यादित्याशङ्क्याह * प्रकृतौ चेति * अवदीयते ऽस्मादित्यपादानव्युत्पत्त्या हृदयादिष्ववदानशब्दपश्वङ्गत्वेनावदानगणस्योपाकरणादिवत्प्रतिपश्वावृत्तेस्तत्प्रकृतित्वेन सप्तदशानामपि पशूनां यागसाधनत्वोपपत्तिरित्याशयः । तस्मादिति पूर्वपक्षोपसंहारभाष्यं व्याचष्टे * तस्मादिति * विग्रहकाले तद्धितपदस्य विभक्त्यनन्वयेनापरिपूर्णत्वात्तदर्थकथनार्थविग्रहवाक्यान्तर्गतस्य सर्वनाम्नः पशुशब्दान्वयायोगेन तद्गतहुवचनालोचनाऽऽभावात्तन्निमित्तैकशेषानवगतेः कृते च सर्वनामैकशेषे तस्येतरेतरयोगवाचित्वात्सर्वनामपरामृष्टानां द्रव्याणामितरेतरसापेक्षत्वेनासामर्थ्यापत्तेस्तद्धितानुत्पत्तिप्रसङ्गात्तद्धितापेक्षत्वे वेतरेतरयोगासम्भवेनैकशेषानुपपत्तिप्रसङ्गादितरेतरयोगे च समुदायस्य देवतान्वयापत्तेः प्राजापत्यशब्दे बहुवचनानुपपत्तिप्रसङ्गात् द्रव्यस्वरूपापेक्षया वा कथंचिद् बहुवचनोत्पत्तौ विग्रहतद्धितयोर्द्वयोरप्येकशेषकल्पनापत्तेः सर्वनामैकशेषत्वायोगादेकवचनान्तेन सर्वनाम्ना विग्रहावगतेः प्रत्येकं देवतान्वयावसायेन द्रव्यभेदाद्यागभेद इति सर्वनामैकशेषत्वनिरासेन सिद्धान्तोक्तिमसम्भवे ऽपि यत्रैकया चतुर्थ्या बहुवचनान्तपदोक्तानां पशूनां पर्यग्निकृतानारण्यानुत्सृजन्तीत्याद्युत्सर्गविध्यभावेनातिदेशप्राप्तैकादशावदानगणवतां देवतान्वयः क्रियते तत्रापि यागभेदसिद्ध्यर्थं चोदकप्राप्तैकपशुनिष्पन्नैकादशावदानगणसाधनत्वबलेन भाष्यकृतोक्तं सिद्धान्तमुपपादयितुमाह * इतीति * दधि मधु पयो घृतं धाना उदकं तन्तुलास्तत्संसृष्टं प्राजापत्यमिति संसृष्टानां दध्यादीनामेकदेवतान्वयाद्यागैक्ये ऽपि मधूदकयोराज्यविकारत्वेनाष्टमे वक्ष्यमाणत्वाच्चोदकैक्ये चाज्यविकारानाज्यविकारयोः समसंख्यत्वेन भूयां ऽनुग्रहन्यायाविषयत्वान्मुख्यानुरोधेन सर्वेषु दधिधर्मप्राप्तेराज्यविकारत्वोक्त्यानर्थक्यप्रसङ्गात्प्रतिद्रव्यं चोदकभेदावगतेः कर्मैक्ये चोदकैक्योक्तिरयुक्तेत्याशङ्क्य * अत्रेत्युक्तम् * द्रव्य-

१ तद्धीत २ पु० पा० ।

धर्मविषयत्वात्तस्य न्यायस्यैकादशावदानगणस्य च यागधर्मत्वा-
दशावदानगणे कर्मैक्ये सति चोदकैक्यं स्यादित्याशयः। एकस्य ग-
णस्यैकस्माच्च पशोर्गणस्य प्राप्तचेत्येकशब्दो द्वेधा विग्रहविवक्षया
तन्त्रेण प्रयुक्तः। श्लोकं व्याचष्टे * न हीति * वाक्यशेषेण सन्दि-
ग्धोपदेशनिर्णयार्थत्वं चोदकोपन्यासस्य सूचयितुं वाक्यशेषत्वो-
क्तिः। ननु प्रकृतिवद्वाक्यशेषाङ्गीकारेऽपि तत्प्रवृत्तिर्गणेषु स्यादित्य-
ष्टमाधिकरणे प्राजापत्येष्वेकादशिनीविध्यन्तातिदेशस्य वक्ष्यमाणत्वा-
त्तस्यां च प्रतिपश्ववदानगणदर्शनादिहापि तत्प्राप्तिरुपपत्स्यतइत्या-
शङ्क्य भिन्नयागविषयत्वात्तस्य न्यायस्य यागैक्यपक्षे सुत्याका-
लत्वसाम्यैनैकादशिनीवत्प्राजापत्येष्वपि सवनीयविध्यन्तापत्तिरु-
क्ता तत्र प्राजापत्या इति श्रवणमुपरुध्येत सप्तदशसंख्या ना-
वकल्पेतेति च भाष्यावयवद्वयस्य विविक्तविषयत्वं स्वपदो-
पात्तमित्यनेनोक्तं यागभेदे संख्यासामञ्जस्योपपादनार्थं बहु-
ष्विति भाष्यं व्याचष्टे * यदा त्विति * पशुयागसादृश्यबु- ५२३।४
द्धौ केन चित्प्रमाणेन कृतायामश्रुतमपि पशुसादृश्यं स्तोमविवृद्धा-
वश्रुतसामागमवदागमनेन पूर्येतेत्यभ्युपगम्यवादार्थः वाक्यशेषत्वो-
क्तिसूचितं चोदकोपन्यासाभिप्रायं विवरीतुमाशङ्कते * ननु चेति *
शङ्कामेवोपपादयति * पश्येति * श्लोकं व्याचष्टे * नात्रेति *
प्राजापत्यानीतीतिकरणेन दुष्टीकोक्तः सिद्धान्तोपक्रमेऽस्माभिर्द-
र्शितः। सर्वनामैकशेषत्वनिरासेन तद्धितान्तैकशेषोपपादनप्रकारः
सूचितः। तद्धितव्युत्पादनात्प्रागपिकरणे पूर्वपक्षासिद्धेः सर्वनामैक-
शेषस्य तु पश्चादपि करणे सिद्धान्तासिद्धेरेकशेषस्य तद्धितात्प्रा-
क्करणे तद्विषयत्वायोगात्सर्वनामविषयत्वं पश्चात्करणे तद्विषयतेति
पौर्वापर्यात्क्वैकशेष सर्वनामविषयस्तद्धितविषयो वेति सन्देहो द-
र्शितः। प्राक् सन्देहोपपादनावसरोपादिष्टं सन्दिह्यमानमेकशेषस्य
तद्धितात्पौर्वापर्यस्योपदेशस्य रूपमिति विगृह्यैवंरूपत्वात्किमेकया-
गविधानव्ययमुपदेशोऽनेकयागविधायी वेति विधेयपरिमाणवि-
षयसामर्थ्यविशेषो न निश्चितोऽस्येति विग्रहोक्तस्य विधेर्भेदानि-
श्चयस्योपदेशेनैव कर्मभेदोऽवधारित इति निश्चयोक्तिविरुद्धत्वा-
त्प्रौढ्याभ्युपेत्यवादमात्रत्वं द्रष्टव्यम्। तच्छब्देनातिदेशोक्त्युपस्थापिता-
तिदेशविषयभूतप्राकृताङ्गपरामर्शात्प्राकृतैकपशुनिष्पन्नैकादशावदानगण-
ग्रहणे यादृशं सामर्थ्यमेकपशुसाध्याया विकृते प्रकृ-
तिवद्वाक्यशेषान्वयानुपपत्त्या कल्प्यते तादृशेनात्रापि क-

१ क्रियेते इ० २ पु० पा०।

लिपनेनोपदेशः सप्तदशयागविधायितया निर्णीयत इत्यर्थः ।
यस्तु कर्मोत्पत्तिकाल एव भेदाभेदावधारणावसरान्न पा-
श्चात्यातिदेशाधीनतेत्युक्तम् * तत्सत्यप्यवसरे सन्दिग्धत्वे-
नावधारणासामर्थ्यात्परिहरति * यद्यपि चेति * ननु देवतावि-
शिष्टद्रव्यवाचिप्राजापत्यप्रातिपदिकपरबहुवचनवतोपदेशेनैव या-
१२४। गबहुत्वनिश्चयोपपत्तेः किमतिदेशापेक्षयेत्याशङ्क्याह * ततश्चेति *
परमार्थेनोपदेशान्निश्चयोपपत्तावपि प्रौढ्या सन्देहमभ्युपेत्यातिदेशा-
न्निर्णयाभिधानमित्याशयः । विपर्ययोक्तिरतिशयार्था ननूपक्रमबली-
यस्त्वादुपदेशानुरोधेनातिदेशेन वर्तितव्यमित्याशङ्क्याह * न चा-
र्थेन * आनर्थक्यप्रतिहतानां विपरीतं बलाबलमितिन्यायेनान-
न्यगतित्वादतिदेशो ऽप्यत्रोपदेशाद् बलीयानित्याशयः । प्रकृतिद्र-
व्याणि प्रापयितुं समर्थ इत्यनुषङ्गः । यश्चोपदेशस्यातिदेशानुरोधे वृत्ति-
त्वे सन्दिग्धत्वरूपो विरुद्धरूपश्च प्रकारः सो ऽत्र नास्तीति न चे-
त्यादिनोक्तं तेनोभयथापि विग्रहोपपत्तावतिदेशानुरोधादेकवचना-
न्तेनैव सर्वनाम्नो विगृह्य तद्धितानामेकशेषत्वनिश्चयाद् द्रव्यदेवता-
न्वयभेदेन यागभेदसिद्धिरिति सिद्धान्तोपसंहारार्थं तस्मादिति-
भाष्यं व्याचष्टे * तस्मादिति * ननु प्रदेयैकादशावदानगणप्रकृति-
त्वस्य पशुधर्मत्वात्कर्मैक्ये ऽपि प्रतिपश्वावृत्तेर्न्याय्यत्वात्सप्तदशाव-
दानगणप्राप्त्युपपत्तेरतिदेशाविरोधात्तदनुरोधेन यागभेदानवधार-
णान्नायमुपसंहारो युक्त इत्याशङ्क्य पूर्वपक्षोक्तं पशुधर्मत्वमनुभा-
षणपूर्वं दूषयति * यदुक्तमिति * पशुसंस्कारेषूपाकरणादिषु द्र-
व्यकथम्भावोपपत्तावप्यत्रावदानगणे ऽवदानप्राप्तेः प्राक् त्यज्यमान-
त्वलक्षणस्य प्रकारस्य तद्धितसामर्थ्यादेव ज्ञातत्वात्कथम्भावो ना-
स्तीत्यनेनोक्तम् । यागस्य तु कथं पशुना निष्पादितेन मया ऽपूर्वं साध-
नीयं किं पुरोडाशवत्साक्षाद् व्रीहिवद्वा प्रदेयावदानगणप्रकृतित्वेने-
त्यवदानगणे कथम्भावोद्भावाद्यागधर्मतैवावदानगणस्यावसीयत इ-
त्यर्थः । श्लोकं व्याचष्टे * प्राजापत्येति * ननु प्राजापत्यपशुष्ववदा-
दानोपदेशाभावात्साक्षात्साधनत्वोपपत्तेरवदानगणानपेक्षायामग्नी-
षोमीये ऽवदाननाशितस्य पशोः साक्षाद्यागसाधनत्वायोगात्कथं
मया यागः साधनीय इत्यवदानगणापेक्षोपपत्तेः । पश्वङ्गतावदानग-
णस्य भविष्यतीत्याशङ्क्याह * प्रकृतावपि चेति * नाशितस्य
पशोः सक्तुवन्निष्फलत्वाद्धर्माकाङ्क्षा न युक्तेत्याशयः । ननु संस्का-
रकत्वेनावदानानपेक्षणे ऽपि द्वारत्वेन यागस्यापूर्वापेक्षावत्पशोरव-
दानापेक्षा भविष्यतीत्याशङ्क्याह * तद्धर्मत्वेति * अवदानोपदेशा-

त्प्राक् पशोर्विनाशाज्ञानाद्यागवत् द्वारापेक्षानुपपत्तेर्द्वारत्वे वापूर्ववदेव
द्वारिधर्मत्वायोगात्पशुधर्मत्वमिच्छता हृदयाद्यवदानानां पशुसंस्कार-
तैव द्व्यवदानस्य पुरोडाशसंस्कारत्ववदेष्टव्येत्याशयः ।

क्रत्वर्थश्चापि संस्कारः पशोर्नाशादुपक्रिया ।
इष्टैव त्ववदानानां निष्पत्तिः क्रत्वपेक्षिता ॥

इति वार्त्तिके तु हिंसायाः पशुसंस्कारत्वाभिधानं तस्याः प्राणवि-
योजनात्मकत्वे ऽपि स्वरूपनाशकत्वाभावादवदानप्रकृतित्वौपयिक-
त्वाच्चाविरुद्धम् । अवदानानां पशुधर्मत्वनिरासस्य पूर्वोक्तमतिदेश-
स्यैकस्मिन्कर्मणि सप्तदशावदानगणप्रापणासामर्थ्यमेकस्य चावदा-
नगणस्य सप्तदशद्रव्यप्रकृतिप्रापणासामर्थ्यं प्रत्युपयोगमाह * त-
स्मादिति * नन्वौपदेशिक्या सप्तदसंख्यया ऽतिदेशिक्या हृदया- ५२५।१
द्येकादशावदानगणप्रकृत्येकत्वं संख्याया बाधादनेकगणाग्रहणे
ऽप्यनेकपशुग्रहणं भविष्यतीत्याशङ्क्याह * यद्यपि चेति * सप्तदश-
यागकल्पनेनाविरोधोपपत्तेर्बाधाभावो यद्यपिशब्देन सूचितः । न-
न्वित्याशङ्काभाष्यं पशुसामानाधिकरण्येन श्रुतस्य सप्तदशत्वस्याव-
दानगणस्थत्वायोगादयुक्तमाशङ्क्योपपादयति * नन्विति * पश्ववं-
दानगणयोः सम्बन्धाप्रसिद्धेर्लक्षणानुपपत्तिमाशङ्क्य * यागेत्युक्त-
म् * पशुशब्दस्य प्राजापत्यशब्दसामाधिकरण्याद्यागीयद्रव्यवाचि-
त्वावगतेरवदानगणस्य च साक्षाद्यागसाधनत्वात्तल्लक्षणा युक्ते-
त्याशयः । नैतदिति परिहारभाष्यं पशुष्वपि श्रुतायाः संख्याया ल-
क्षणयावदानगणस्य त्वस्योक्तत्वादयुक्तमाशङ्क्योपपादयति * नैत-
दिति * पशोरपि यागीयद्रव्यप्रकृतित्वाद्यागीयत्वोपपत्तेर्लक्षणाकार-
णविरोधाभावान्न लक्षणा युक्तेत्याशयः।पशुभिरेव तर्हि सप्तदशभि-
श्चोदकं बाधित्वा पक्ष्यतइत्याशङ्कानिरासार्थमवदानानि चेत्यादिभा-
ष्यं तात्पर्यतो व्याचष्टे * तेनेति * ननु शुक्लकृष्णादिवर्णभेदभिन्ना-
नामृजुवक्रादिशृङ्गभेदभिन्नानां कुब्जवामनादिसंस्थानभेदभिन्नानां
वा सप्तदशानां मध्ये कश्चिदेकः पशुरित्येवमभिप्राय। सप्तदशसं-
ख्या यागैक्ये ऽप्युपत्स्यतइत्याशङ्कार्थमेवमिति भाष्यमश्रुतवर्णादि-
विषयत्वकल्पनप्रमाणाभावाद्वर्णादीनां च साप्तदश्यनियमाभावादा-
नर्थक्यापत्तेश्च ये सप्तदशेत्यनुवादानुपपत्तेर्विशेषानवधारणाच्च वर्णा-
न्तरादिव्यवच्छेदानुपपत्तेरयुक्तमाशङ्क्य मन्दा ऽप्याशङ्का पशुप्रातिप-
दिकस्यावदानलक्षणार्थत्वाभावात्प्राजापत्यैकपशुनिर्द्धारणावच्छेद-
कपशुबहुत्वाच्च बहुवचनोपपत्तेरतिदेशप्राप्तैकपशुनिष्पन्नैकादशाव-
दानसाध्यत्वाच्च कृत्स्नस्य प्रकृतिवद्वाक्यशेषसहितस्योपदेशवा-

क्यस्यागमनिकार्थमुदन्यस्तेत्याह * कृत्स्नेति * शङ्काशयमुक्तार्थं
व्याचष्टे*एतदिति * श्यामत्वं नियमाद्वर्णाशयत्वमशृङ्गत्वाख्यरूप-
परत्वनियमाच्छङ्गाशयत्वं न युक्तं पश्वनेकत्वं च विनानेकसंस्थानाप्रस-
क्तेः संस्थानैक्यरूपैक्योक्तिरनर्थिकेति परिहारार्थत्वेन ते हीति
भाष्यं व्याचष्टे * तत्रेति * तस्मादित्यधिकरणार्थोपसंहारभाष्यं
व्याचष्टे * तस्मादिति * पूर्वपक्षप्रयोजनभाष्यं प्रजापतये सप्तदश
पशवः सङ्कल्पन्त इति पूर्वपक्षोपक्रमादेको यागः सप्तदशभिः पशु-
भिर्निर्वर्त्स्यत इति उपसंहाराच्च सर्वपशुसाध्ययागत्वस्य पूर्वपक्षार्थ-
त्वावगतेरेकपशुसाधनत्वस्य पश्वन्तराहष्टार्थत्वस्य च पूर्वपक्ष्यन-
भिमतत्वावसायादयुक्तमाशङ्क्यैकमालभ्यमानमन्वालभ्येरन्न हष्टा-
यापर इति सिद्धान्तभाष्येऽप्यभिमतस्याप्येकपशुसाधनत्वस्येत-
राहष्टार्थत्वस्य चापादनादापाद्योक्त्यर्थत्वेनोपपादयति * प्रयो-
जनमिति * अवदानव्यमित्यनेनावदानप्राग्भाविनामुपाकरणादीनां
विशसनान्तानां पशुसंस्कारत्वादेकस्यावदानप्रकृतित्वरूपसाक्षात्सा-
धनत्वे ऽपि सप्तदशसंख्यस्य साधनत्वात्साधनत्वप्रयुक्तत्वाच्च सं-
स्काराणां सर्वपशुष्वनुष्ठानमवदानानां तु संस्कारत्वाभावादेकस्मा-
देव पशोरनुष्ठानमिति सूचयता लभतेः संस्कारमात्रोपलक्षणार्थत्वो-
क्तेश्चावदानप्रकृतित्वनिरासार्थत्वं व्याख्यातम् । यदा चैकस्यैवावदा-
नप्रकृतित्वेन यागसाधनत्वात्प्राधान्ये पश्वन्तराणां तु साध-
नभूतपशुसंख्यासम्पादनार्थत्वात्तादर्थ्यमिति पूर्वपक्षप्रयोजनमापा-
दितं तदैकपशुनाशे कृत्स्नपशुगणवृत्त्याख्यप्रयोजनान्तरोक्तिर्गुणानु-
रोधेनेतरावृत्त्ययोगादवदानप्रकृतिभूतपशुना ऽत्राविषयेति दर्शयितु-
६२६।१ माह * तद्विनाशे चेति * पूर्वोपात्तानामपि पशूनां विनष्टत्वापशु-
प्रतिनिधिभूतपश्वन्तरसंख्यासम्पादनार्थत्वोपपत्तेः कृतानामपि सं-
स्काराणां पुनः क्रिया पश्वावृत्तित्वेन विवक्षिता । एकस्य तु पशो-
रवदानप्रकृतित्वे पश्वन्तराणां देवतानन्वयापत्तेः प्राजापत्यशब्द-
स्य बहुवचनायोगप्रसङ्गादापाद्योक्तप्रयोजनापरितोषेणैकस्मिन्नित्या-
द्यप्रयोजनभाष्यमवदानगणस्य प्रतिपश्वावर्त्यां सर्वपशूनां यागसा-
धनत्वाविशेषात्समप्राधान्यमभिप्रेत्य यस्य कस्य चित्पशोर्नाशे कृत्स्न-
पशुगणावृत्त्युक्त्यर्थत्वेनान्यथा व्याख्यातुमाह*अथ वेति* य एव क-
श्चिदेको ऽनेको वा पशुर्नष्टस्तस्मिन्यस्मिन्कस्मिंश्चिन्नष्टे समस्तपश्वावृ-
त्तिः न त्वेकस्मिन्नष्टे पशौ सर्वेषां यागसाधनत्वाविशेषादित्येवकारा-
र्थः । ननु यथाप्रस्तोतोद्गातृप्रतिहर्तॄणामन्योन्यहस्तधारणेन समन्वा-
रब्धानां सदो गच्छतामुद्गात्रा हस्तमोचनेन विभागाख्ये विच्छेदे कृते

यत्रावृत्तिर्विहितातिदेशेनाहर्गणं प्राप्ता किं यस्मिन्नहन्यवच्छेदस्तस्यै-वावृत्तिः कृत्स्नस्य वाहर्गणस्येति सन्दिग्धे साहित्यसम्पत्त्यर्थं कृत्स्नावृत्तौ प्राप्तायामहर्गणेषु यस्मिन्नवच्छेदस्तदावर्त्तेत कर्म पृथक्त्वादिति षष्ठाधिकरणसूत्रेण प्रत्येकमितिकर्त्तव्यतान्वयादेकस्यैवावृत्तिर्वक्ष्यते तथात्रापि प्राप्तेनं कृत्स्नपशुगणावृत्तिर्युक्तेत्याशङ्कते * नन्विति * पृथगुत्पन्नत्वेनाह्नां प्रत्येकं साधनशक्त्यवगमात्सह प्रयोगेऽप्याग्नेयादिवत्प्रत्येकमितिकर्त्तव्यतान्वयोपपत्तिरेकावृत्त्युपपत्तावपि पशूनां पूर्वपक्षे व्यासङ्गिसाधनत्वात्तादृशानामेवेतिकर्त्तव्यतान्वयार्थं समस्तावृत्तिर्युक्तेति परिहरति * नैतदिति * सिद्धान्तप्रयोजनभाष्यं व्याचष्टे * सिद्धान्ते त्विति * ननु समुच्चितानां साधनत्वविधावेकनाशे कृत्स्नावृत्तावेकं साम तृचे क्रियते स्तोत्रीयत्रिवृद्बहिष्पवमानमित्यादौ समुच्चितानां मन्त्राणां स्तोत्रसाधनत्वविधानात् तृचं शसति सूक्तं शंसतीत्यादौ च शस्त्रसाधनत्वविधानात्तां चतुर्भिरादत्तइत्यादौ चाभ्र्यादानादिसाधनत्वविधानादेकमन्त्रविनाशे कृत्स्नमन्त्रावृत्तिः स्यादित्याशङ्कते * नन्विति * स्वार्थाभिधानद्वारा मन्त्राणां स्तोत्रादिसाधनत्वात्प्रतिमन्त्रं च वाक्यार्थभेदात्प्रत्येकमेव स्वार्थाभिधानाख्यावान्तरकार्यद्वारा स्तोत्रादिसाधनत्वे सति संख्यायुक्तेन वचनेन साधनानां समुच्चयाश्रयणात्समुच्चितसाधनत्वाभावेन साधनत्वस्य व्यासङ्गित्वाभावान्नैकनाशे कृत्स्नावृत्त्यापत्तिरिति परिहरति * नेति * एतदेव विवृणोति * यदिति * प्रत्येकं वाक्यार्थाभिधाननिष्पादनाशक्तौ विभज्यमानसाकाङ्क्षत्वे सत्यैकार्थत्वापत्तेरेकस्तोत्रादिसाधनानामेकमन्त्र्यं स्यादित्यर्थः । ननु मन्त्राणां स्वार्थाभिधानलक्षणे ऽवान्तरकार्ये प्रत्येकं निर्वर्त्तनसामर्थ्ये स्तोत्रादौ संहत्यकारित्वात्साधनत्वं व्यासङ्गि भविष्यतीत्याशङ्क्य * भिन्नैरेव चेत्युक्तम् * वाक्यार्थाभिधानानां प्रत्येकं स्तोत्रादिसाधनत्वशक्तिर्भिन्नशब्देनोक्ता संहत्यशब्देन साधनसाहित्यं मन्त्रकार्यैर्वाक्यार्थाभिधाने प्रत्येकं स्तोत्रादिसाधनशक्तिमद्भिरेव साधनसमुच्चयविधिना सह कृत्य स्तोत्रादिकार्यान्तरारम्भावगतेर्व्यासज्यसाधनत्वावसायान्न कार्यान्तरे ऽपि मन्त्राणां व्यासज्यसाधनतेत्यर्थः। पशूनां तु न मन्त्रवत्साधनानां साहित्यं किं तु सहितानां साधनतेति वैषम्यमाह * पशूनां त्विति * मन्त्रवत्तत्कार्याणामपि सहितसाधनत्वाभावे ऽपि प्रकारान्तरेणापि कृत्स्नावृत्तिद्योतनायाशङ्कते * तावन्मन्त्रेति * एकमन्त्रनाशेनैककार्यनाशे सति कृत्स्नस्वकार्यावृत्तिः स्यात्ततश्च तत्सिद्ध्यर्थं कृत्स्नमन्त्रावृ-

स्तिरपि स्यादित्याशयः । परिहरति * नेति * कार्याणां नान्तरीय-
कत्वेन सहितसाधनतया विध्यभावादेककार्यनाशे साधनत्वरूपना-
शकल्पनानुपपत्तेः साधनभूतमन्त्रनाशेनैव नाशस्याभ्युपेतव्यत्वा-
न्मन्त्राणां च प्रत्येकं साधनत्वेनैकमन्त्रनाशे ऽप्यविनष्टमन्त्रे कार्य-
नाशायोगादनुनिष्पादित्वेन च मन्त्रावृत्तिं विनावर्त्तयितुमशक्यत्वा-
न्निष्पन्नाविनष्टस्य च कार्यस्य साधनावृत्त्यनपेक्षकत्वान्नावृत्तिर्युक्तेत्या-
शय. । मन्त्राणां पशुवैपम्यमुपसंहरति * इतीति *

॥ संज्ञाकृतकर्मभेदाधिकरणम् ॥ ८ ॥

संज्ञा चोत्पत्तिसंयोगात् ॥ २२ ॥

ननु संख्यागुणयोः कर्माङ्गत्वेन तुल्यरूपत्वाद् गुणनिमित्तभे-
दचिन्तासंख्यानिमित्तभेदचिन्तानन्तरं युक्ता न संज्ञानिमित्तभेद-
१२ आ॰ चिन्तेत्याशङ्क्याह * बह्विति * बहुचिन्तायां बह्वायासत्वाकृत्यान्त-
राक्षिप्तचित्तेन कर्तुमशक्तेस्ततः प्रागल्पचिन्ताया युक्तत्वादल्पत्वसा-
म्येन च बुद्धिस्थत्वात्संख्याचिन्तानन्तरं संज्ञाचिन्ता युक्तेत्याशयः ।
पृथक्त्वनिवेशाख्यहेतुसाम्यादप्यनन्तरसङ्गतिः संख्यावच्च पृथक्त्व-
निवेशनीति वार्त्तिके सूचयिष्यते * किमेभिरिति * भाष्यं[1] प्रकृत-
सङ्कीर्त्तनकान्येतानि नामानि कर्मान्तरोपदेशीनि वेति संज्ञाया भेदक-
त्वसद्भावसन्देहोक्त्यर्थत्वेन स्पष्टत्वादव्याख्याय किं प्राप्तमिति पूर्व-
पक्षभाष्यं प्रकरणस्य तादर्थ्यप्रमाणत्वेन भेदाभेदयोरव्यापाराद् गुण-
विधानस्य च कर्मान्तरे ऽप्युपपत्तेस्तदुपन्यासानर्थक्यादयुक्तमाशङ्क्य
पूर्वप्रकृतस्य पश्चादुच्चारिताभ्यामथैपशब्दाभ्यां ग्रहणादित्येवं प्रकृ-
तप्रत्यभिज्ञानस्यानुग्राह्यत्वादित्येवं वा प्रकरणानुग्रहशब्दव्याख्यानं
गुणविध्युक्तेश्च कर्मविध्यभावेन कल्पनालाघवाभिधानार्थत्वं सूच-
यितुमाह * तत्रेति * पश्चस्यन्तापेक्षितं साध्यमकर्मान्तरत्वमिति
वक्ष्यमाणमनुसन्धेयम् । एपशब्दस्य सर्वनामत्वात्पूर्वप्रकृतपरामर्शि-
त्वलक्षणं पूर्वप्रकृतापेक्षत्वम् । अथशब्दस्य तु कर्मभेदप्रमाणाभावेना-
धिकारार्थत्वायोगात्पूर्वप्रकृतकर्मापेक्षत्वानन्तर्यार्थतया च स्वयमेव नि-
र्वक्ष्यमाणत्वाद् गुणविधानार्थस्य ज्योतिःशब्देन ज्योतिष्टोमानुवाद-
स्य पूर्वप्रकृतज्योतिष्टोमविध्यपेक्षित्ववाचित्वलक्षणं पूर्वप्रकृतापेक्ष-
त्वमभिप्रेतं प्रकृतहानेरप्रकृतप्रक्रियाकल्पनस्य च दौर्बल्यलक्षितबा-
ध्यत्वोक्त्या प्रकरणशब्दस्य तद्बाधकप्रकृतप्रत्यभिज्ञानलक्षणार्थत्वं
सूचितम् । पृथक्त्वनिवेशिशङ्काश्रुतिबलेन प्रकृतकर्मप्रत्यभिज्ञानस्यैव

१ सदेहभाष्यमिति ३ पु॰ पा॰ ।

बाध्यत्वमाशङ्क्य ज्योतिरिति ज्योतिष्टोमस्य प्रतीकमित्यादिभाष्ये वक्ष्यमाणेन ज्योतिःशब्दवाच्यत्रिवृदादिसर्वस्तोमवत्त्वलक्षणगुणयोगेनाथ पुनरिति भाष्यवक्ष्यमाणेन च द्योतनादिगुणयोगेनैकस्यापि ज्योतिष्टोमस्यानेकसंज्ञोपपत्तिरुक्ता अनेकानि नामधेयानि यस्यासावनेकनामधेयस्तस्य भावस्तत्त्वमिति विग्रहः । यथैकस्यैव दर्शपूर्णमासाख्यस्य कर्मणोऽयनादिशब्दवाच्यावृत्त्यादिगुणयोगेनानेकदाक्षायणादिसंज्ञोपपत्तिरिति दृष्टान्तार्थः । न चेत्यनेन गुणविध्युक्तेः कल्पनालाघवाभिधानार्थत्वं सूचितं गुणोक्त्या फलस्याप्युपलक्षणं सूचयितुं फलशब्दः । गुणान्वयार्थं फलान्वयार्थं वा ज्योतिरादिशब्देन ज्योतिष्टोमसङ्कीर्त्तनार्थवत्त्वोपपत्तेर्न सञ्ज्ञान्तरं कर्मान्तराक्षेपकमित्याशयः । भविष्यन्तीत्यध्यवसानादकर्मान्तरत्वमिति वक्ष्यमाणसाध्यानुषङ्गः भाष्यमप्यर्थैपशब्दाभ्यां प्रकृतग्रहणात्तदुपबद्धायाः संज्ञायाः प्रकृतविषयत्वावगतेः प्रकृतप्रत्यभिज्ञानस्य वानुग्राह्यत्वात्प्रकृतस्य च गुणविधानार्थं फलविधानार्थं वानेकसंज्ञोपपत्तेर्ज्योतिष्टोम एव ज्योतिरादिसंज्ञको न कर्मान्तरमित्येवं प्राप्तमिति वक्ष्यमाणसाध्यान्वयेन पूरणीयम् । संज्ञाया वा भेदकत्वनिरासायैव प्रकृते गुणविधानोपपादनार्थं प्रकरणानुग्रहोक्तिरित्येकवाक्यत्वेन भाष्यस्य व्याख्यान्तरं सूचयितुमाह * कथम्भावेति * अत्रापि भविष्यतीत्यध्यवसानादकर्मान्तरत्वमिति वक्ष्यमाणसाध्यानुषङ्गः किं चाथशब्दोपबन्धेन वा संज्ञाया भेदकत्वं स्यात्स्वतो वा तत्राधिकारार्थत्वे मन्दकफलत्वापत्तेः पूर्वप्रकृतकर्मापेक्षितार्थत्वेनापेक्ष्यापेक्षकभावस्य भेदाधिष्ठानत्वाद्भेदद्योदकताऽऽथशब्दस्य वाच्या न चाङ्गाङ्गिभावं संहत्य फलसाधनत्वं वा विनान्योन्यापेक्षा सम्भवतीत्याशयेनाह * न चेति * पञ्चमे च क्रतूनां क्रमानादरस्य वक्ष्यमाणत्वादानन्तर्यार्थत्वस्याप्यनुपपत्तेर्न तद्दर्शनापि भेदद्योतकतेत्याह * न च क्रतूनामिति * स्वतस्तु संख्याया भेदकत्वमनाशङ्क्यमेव भावनाभेदो हि लक्षणार्थं । न च ज्योतिरादिसंज्ञा भावनावाचिनी येन तां भिन्द्यादित्याह * न च सञ्ज्ञेति * ननु भावनावाचित्वाभावेऽपि सञ्ज्ञाया धात्वर्थवाचित्वाच्छब्दान्तरवद्धात्वर्थद्वारा भावनाभेदकत्वं (भविष्यतीत्याशङ्क्याह * न च धात्वर्थ इति * धातूक्तस्य धात्वर्थस्य भावनासंलग्नत्वात्तदवच्छेदकत्वावगतेर्बोध्यस्य बुद्धिभेदकत्ववद्भावनाभेदकत्वं युक्तं नामोक्तस्य तु भावनोपश्लेषाभावेन तदवच्छेदकत्वानवगतेरबुध्यमानस्य घटादेर्बुध्या भेदकत्वं न सम्भ-

१ अथ पा० ३ पु० ना० ।

ष्यतीत्याशयः[1]) । ननु शब्दान्तरवत्संज्ञाया भावनावच्छेदकत्वरू
पेण धात्वर्थवाचित्वाभावाच्छब्दान्तरन्यायेन भावनाभेदकत्वायो
गे ऽपि संज्ञाया विधेयविशेषप्रतिपत्त्यर्थत्वाद्भावनानिरपेक्षस्य
च धात्वर्थस्य विधेयत्वायोगाद्विधेयभावनाभेदं विना ऽनर्थ-
क्यापत्तेरभ्यासन्यायेन भावनाभेदकत्वं भविष्यतीत्याशङ्क्या-
ह * न चेति * (विधेरप्रवृत्तप्रवर्त्तनस्वाभावत्वादन्यतः
प्राप्तेर्विधित्वव्याघातापत्तेः पुनर्विधानलक्षणस्याभ्यासस्य भेदकत्वं
युक्तं[1]) सञ्ज्ञायास्त्वप्रवृत्तप्रवर्त्तनस्वभावत्वाभावान्नाभ्यासन्यायविष-
यतास्तीत्याशयः । नन्वप्रवृत्तप्रवर्तनस्वभावत्वाभावे ऽपि विधेय-
विशेषप्रतिपत्त्यर्थत्वात्सञ्ज्ञायाः सञ्ज्ञान्तरात्प्रतिपन्ने विशेषे सञ्ज्ञा-
न्तरानर्थक्यापत्तेर्भेदकत्वं भविष्यतीत्याशङ्क्याह * न चाप्रवर्त्तित
इति * नानासञ्ज्ञानामविशेषाद्विकल्पेनार्थवत्त्वोपपत्तेर्न तत्वद्भेद-
प्रतीतिरित्यपि शब्दार्थः प्रतीतो ऽपि तु भेदो विध्यसंस्पर्शादनादृत्य
इत्यतिशयोक्तिः । ननु सञ्ज्ञाया विधातृत्वाभावात्स्वतो भेदक-
त्वायोगे ऽपि ज्योतिरादिसञ्ज्ञस्य यागस्यैतेन सहस्रदक्षिणेन यजेते-
त्यनच्छब्दपरामृष्टस्याख्यातेन विधानाद्विधायकोपबृंहिताया भेदकत्वं
भविष्यतीत्याशङ्क्याह * यस्त्विति * विधायकस्यान्याक्षिप्तत्वे
सञ्ज्ञाविषयभूतकर्मस्वरूपविषयत्वाभावाद्विशिष्टविषयत्वेन सञ्ज्ञाविष-
यभूतकर्मभेदद्योतकत्वानुपपत्तेर्विशिष्टविधित्वाद्वा ऽन्यानाक्षिप्तत्वा-
भ्युपगमे सञ्ज्ञानिरपेक्षस्यैव तस्य भेदकत्वोपपत्तेः सञ्ज्ञासहका-
रित्वायोगान्न विधायकसहकृताया अपि सञ्ज्ञाया भेदकता युक्ते-
त्याशय. । आदिशब्देनैतनर्द्धिकामो यजेतेत्यादौ फलाक्षिप्तताक्ता
गुणादिना कर्मस्वरूपादुत्तार्यात्माभिमुख्येन क्षेपः प्रेरणं विधायक-
स्यात्मनि सञ्चारणमाक्षेपः प्रयुक्तिवाचिना वाक्षेपशब्देनातदर्थस्य
प्रयुक्त्ययोगात्तादर्थ्यं लक्षितम् । ननु गुणार्थस्य विधायकस्य सञ्ज्ञा-
विषयभूतकर्मस्वरूपविषयत्वाभावात्सञ्ज्ञाविषयभूतकर्मभेदद्योतक-
त्वायोगे ऽपि फलस्यानुपादेयत्वेन कर्मोद्दिश्योपादातुमशक्यत्वा-
त्फलार्थस्य विधायकस्य फलोद्देशेन कर्मोपादायकत्वात्प्रकरणान्त-
रन्यायेन कर्मस्वरूपविषयत्वात्सञ्ज्ञां च विना प्रकृतबुद्धिविच्छेदा-
सिद्धेस्तन्निरपेक्षस्यानुपादेयान्वयस्य भेदकत्वाभावात्सञ्ज्ञासहका-
रित्वं भविष्यतीत्याशङ्क्याह * फलेति * सञ्ज्ञां विना प्रकृतबु-
द्धिविच्छेदाभावे प्रकरणान्तरन्यायाविषयत्वादन्यतो वा प्रकृतबु-
द्धिविच्छेदे संज्ञानपेक्षणात्फलान्वितकर्मविधिसहकृताया भेदकत्वं

१ अयं पा० ३ पु० ना० ।

न सम्भवतीत्याशयः। गुणफलयोस्त्वेकवाक्योपादाने प्रकृतकर्माश्रितस्य गुणस्य फलसाधनत्वावगमात्फलान्वयस्य भेदकत्वशङ्का नास्तीत्याह *यद्येति* नन्विति भाष्येणापूर्वसञ्ज्ञाक्षिप्तस्य कर्मान्तरस्यैतेन सहस्रदक्षिणेनेत्येतच्छब्दसमभिव्याहारलक्षणाद्वाक्याद् गुणान्वयप्रतीतेः प्रकृतस्य गुणविध्ययोगमाशङ्क्य नैष इत्यनेन ज्योतिः शब्दस्य ज्योतिष्टोमशब्दप्रतीकत्वाद्विश्वज्योतिः सर्वज्योतिः शब्दयोश्च ज्योतिःशब्दवाच्यत्रिवृदादिस्तोमयोगात् ज्योतिष्टोमवाचित्वावगतेः प्रकरणस्य वाक्याविरोध उक्तः। तदत्राधिकरणे न्यायतुल्यत्वादेथष गौरित्यादीनामप्युदाहरणत्वावगतेर्गवादिशब्दानां च ज्योतिष्टोमे प्रवृत्तिनिमित्तादर्शनादव्यापकत्वेनायुक्तमाशङ्क्य सर्वेषामुदाहरणत्वेऽप्युदाहरणविशेषे पूर्वपक्षोपपत्तिविशेषप्रदर्शनार्थत्वेनोपपादयति *ज्योतिरादिषु त्विति* तुशब्देन तत्राथैषज्योतिरित्यादिष्वित्युदाहरणपरिग्रहार्थवार्त्तिकस्थस्यादिशब्दस्याथैष गौरथैष आयुरित्याद्युदाहरणान्तरपरिग्रहार्थत्वं सूचितम्। अवयवसादृश्ये ऽप्यवयवान्तरत्वात् ब्राह्मणशब्दाद् ब्राह्मशब्दस्येव ज्योतिष्टोमशब्दो ज्योतिःशब्दस्य पदान्तरत्वावगतेस्तत्प्रतीकत्वाभावमाशङ्क्य ज्योतिष्टोमशब्दार्थे प्रयोगात्तत्प्रतीकतोपपादिता विश्वज्योतिरिति भाष्यावयवः स्पष्टत्वान्न व्याख्यातः तस्मात्सञ्ज्ञान्तरविषये ऽपि सञ्ज्ञान्तरप्रयोगदर्शनेन सञ्ज्ञायाः स्वतो भेदकत्वाभावाच्छब्दान्तरादीनां च सहकारिणामभावान्न कर्मभेद इति पूर्वपक्षमुपसंहरति *तस्मादिति* सञ्ज्ञा हीतिभाष्येण संख्ययेति तृतीयोक्तस्य भेदहेतुत्वस्य चशब्देनानुकर्षणात्सञ्ज्ञापि कर्मभेदहेतुरित्येवं सञ्ज्ञा चेति सूत्रावयवं व्याख्यायोत्पत्तिसंयोगो व्याख्यातस्तदाथैष ज्योतिरादावाख्याताभावेन सञ्ज्ञां विनोत्पत्तिवाक्यत्वानवधारणादुत्पत्तिवाक्यस्थाया अपि च समिदादिसञ्ज्ञाया भेदकत्वानभ्युपगमादयुक्तमाशङ्क्याख्यातपारतन्त्र्यानिरासायाख्यातेन भेदाभेदावधारणात्प्रागेव सञ्ज्ञाश्रुतेरित्येव प्राथम्यवाचितयोत्पत्तिशब्दं व्याख्यातुमाह *इतीति* आख्यातसमुच्चारिताया अप्युद्भिदादिसञ्ज्ञाया नाम्नैव चैवमादीनां भेद इत्युद्भिदधिकरणवार्त्तिके ऽभिहितत्वात्समिदादिसञ्ज्ञाया अपि चाख्यातोच्चारणात्प्रागेव प्रवृत्तेर्भेदाभेदावधारणव्यापाराभावार्थो ऽनुक्तशब्दो व्याख्येयः। उद्भिदा यजेत पशुकाम इत्यादेस्तु कर्मशब्दस्य फलादिपरत्वोपपत्तेः समिदादिवदनन्यपरपुनः श्रुतित्वाभावाद्भेदावधारणाशक्तेर्य एवं विद्वान्पौर्णमासीं यजतइत्यादिवच्च यच्छब्दोपबन्धाभावादतिदेशतश्च रूपलाभसम्भवेनारूपत्वाभावादभेदावधा-

रणाशक्तेः सञ्ज्ञाया भेदकत्वोपपत्तिरित्याशयः । वस्त्वन्तरबुद्धेः सकाशासञ्ज्ञानपनयनोक्त्या पौर्णमास्यादिसञ्ज्ञाया अपि स्वतो वस्त्वन्तरबुद्धिहेतुतास्त्येव यच्छब्दोपबद्धेन च रूपकर्मशब्दोनाभेदावधारणादपनीयतइति सूचितम् । अनुक्त इति विशेषणस्य फलं दर्शयन् श्लोकं व्याचष्टे ॥ या हीति ॥ अनुक्तशब्दस्य सूत्रभाष्यस्थोत्पत्तिशब्द-
५२८।४ व्याख्यानार्थत्वसूचनार्थोत्पन्न इत्युक्त्वा संज्ञातः पूर्वं भेदकत्वेनाभेदकत्वेन वावधारित इति समुच्चरितधूमं हर्म्यतलमितिवह्निश्रयापरपर्यायाभिव्यक्तिवाचिनोच्चरतिना वचिर्व्याख्यातः । पादिचर्योश्च गमिसमानार्थत्वेन ज्ञानार्थत्वादुच्छब्दस्य चोत्कर्षार्थत्वेन निश्चयरूपज्ञानोत्कर्षवाचित्वादुत्पन्नोच्चरितशब्दयोरवधारितार्थत्वाविशेषः । ननु कर्मशब्दसमानाधिकरण्यं विना संज्ञायाः कर्मनामत्वाप्रसिद्धेः कथं तद्भेदकतेत्याशङ्क्य संज्ञावशात्पश्चाद्भिन्नकर्मविषयत्वेनावधारयिष्यमाणकर्मशब्दसामानाधिकरण्यमेतेन यजेतेत्युत्पत्स्यमानशब्देनोक्तम् । नन्वेवं संज्ञावशेनाख्यातस्य कर्मान्तरविषयत्वावधारणं तथाऽवधारिताख्यातसमानाधिकरण्याच्च संज्ञायाः कर्मान्तरनामत्वावधारणम् । इतरेतराश्रयं स्यादित्याशङ्क्य संज्ञायाः सर्वसञ्ज्ञाविषयत्वनिवेशायोगेन पृथक्कनिवेशात्कर्मनामतायामाख्यातापेक्षणेऽपि भेदकत्वे निरपेक्ष्यं संख्यावच्चेत्यनेनोक्तम् । पृथक्कनिवेशपवात्रापि हेतुश्चशब्देनानुकृष्टः अपवादकाभेदावधारकाख्यातसंयोगानिवृत्त्यर्थं तूत्पत्तिसंयोगोक्तिरिति सूचनार्थो दृष्टान्तः । पृथक्कनिवेशित्वमेव प्रश्नपूर्वमुपपादयितुं सामान्यन्यायं तावदाह ॥ कथमिति ॥ अनेकार्थत्वस्यान्याय्यत्वेनार्थान्तरदर्शनात्संज्ञान्तरापेक्षोक्तिर्दृष्टान्तार्था औत्सर्गिकोक्त्याऽन्योन्याश्रयत्वशङ्का परिहृता सामान्यन्यायं प्रकृते योजयति ॥ तदिहेति ॥ ज्योतिरादेः सञ्ज्ञान्तरत्वस्योपपादनापेक्षत्वान्निश्चितसंज्ञान्तरत्वमुदाहरणान्तरमुक्तं सर्वशब्दः सोमेन यजेत ज्योतिष्टोमेन स्वर्गकामो यजेत वसन्ते वसन्ते ज्योतिषा यजेतेत्यादिसोमयागवाचिप्रकृतसर्वयजतिविषयः । प्रागुच्चारिताः सर्वे यजतयो ज्योतिष्टोमविषयत्वाद् गव्यादिसंज्ञान्तरसामानाधिकरण्यं न लभन्ते येन ज्योतिष्टोमविषययजिसामानाधिकरण्यात्सञ्ज्ञान्तरस्यापि ज्योतिष्टोम एव संज्ञी स्यादित्युक्ते ऽर्थान्तरशब्देन लुप्तविषयशब्दकेनार्थान्तरविषयत्वालाभो दृष्टान्तत्वेनोक्तः । प्रागुच्चारितयजिविषयभूतो ज्योतिष्टोमश्चेन्न संज्ञी कस्तर्हि संज्ञीत्यपेक्षिते यस्त्वेतेन यजेतेति प्रस्तूयमानो यजतिः सोऽर्थान्तरे वर्त्ततइति कृत्वा तद्विषयभूतो यागः संज्ञान्तरस्य संज्ञीत्युक्ते । ननु तस्यापि गुणोपबन्धात्फलोपबन्धाद्वा विधायकस्य गुणं

फलेच्छाव्यापृतत्वेन यज्यर्थे व्यापाराभावादभ्यासन्यायेनार्थान्तरे वृ-
त्त्ययोगात्कथं तद्विषयभूतो यागः संज्ञान्तरस्य संज्ञी स्यादित्याशङ्क्य
यद्यपि प्रस्तूयमानो यजतिर्विधायकवशेन भिन्नार्थविषयो न भवति
तथापि विच्छिन्नानुसन्धानत्वादर्थान्तरे वर्त्ततइत्युक्ते ऽनुसन्धानवि-
च्छेदोपपादनायार्थान्तरानुरक्तायां बुद्धौ यजेर्निपातमुक्तमुपपादयितुं
प्रकरणविच्छेदस्योक्तस्योपपादनार्थं पूर्वकर्मविषयाया बुद्धेः प्रस्तूयमा-
नयज्युच्चारणकाले ननु वृत्तिमुक्तामुपपादयितुं गोशब्दस्य पूर्वकर्म-
ण्यनिवेशे ऽभिहिते गोशब्दस्य पूर्वांशानिवेशे ऽपि कस्मात्पूर्वं बुध्य-
ननुपङ्ग इत्याशङ्क्य व्यवायान्नानुषज्यतइतिन्यायोक्तिः प्रस्तूयमानस्य
यजेः संज्ञान्तरावरुद्धं ज्योतिष्टोमं प्रति गमनाशक्तौ ज्योतिष्टोमसं-
ज्ञाविलक्षणगवादिसंज्ञान्तरावच्छेदं हेतुं रूपकद्वाराह*तथा हीति*
पूर्वस्य यजेः प्रस्तूयमानं यजर्थागमनं दृष्टान्ततयोक्तं प्रस्तूयमान-
स्य यजेरर्थान्तरवृत्तिमुपसंहरतीति या तु कर्मान्तरपक्षे ऽथ शब्दस्य
पूर्वप्रकृतविध्यपेक्षावाचित्वायोगात्क्रनोश्च क्रत्वन्तरानपेक्षत्वेन पूर्वप्र-
कृतक्रत्वपेक्षावाचित्वायोगादविवक्षितक्रमत्वेन चानन्तर्यार्थत्वायोगा-
दानर्थक्यापत्तिरुक्ता सा कर्मान्तरत्वे सत्यविकारार्थत्वोपपत्तेर्नास्ती-
त्याह*एवं च सतीति*आदिशब्दः पूर्वपक्ष्यभिमतपूर्वप्रकृतविध्यपेक्षा- ५२९।१
ग्रहणार्थः प्रतिपत्तृचित्तसमानार्थत्वाच्चाधिकारोक्तेर्नैष्फल्यानापत्ति-
रित्याशयः। एषशब्दस्य वैष देवदत्त इति प्रागनिर्दिष्टे ऽपि सन्निहिते
प्रत्यक्षे प्रयोगदर्शनात्प्राक् प्रकृते ऽपि च सन्निहितप्रत्यक्षत्वेनैव प्रयो-
गोपपत्तेः प्राक्प्रकृतत्वस्य वाच्यत्वकल्पनायोगात्सन्निहितप्रत्यक्षरू-
पत्वस्य चोत्तरकालं प्रस्तूयमाने ऽप्यविशेषान्नैषशब्दः।प्राक् प्रकृतत्व-
मपेक्ष्यतइत्याह*एष शब्दो ऽपीति* या च प्रकृतहान्यप्रकृतप्रक्रिया-
कल्पनयोर्दुष्टतोक्ता सापि तयोः संज्ञाश्रुतिप्रभवत्वादयुक्तेत्याह*प्रकृ-
तेति* नासामिति भाष्यं पुनःश्रुतित्वाशङ्कानिरासार्थत्वेनाभासमान
शङ्कानुपपत्त्याक्षिपति* नासामिति* एतेन सहस्रदक्षिणेन यजे-
तेति गुणसंक्रान्तशक्तिनाख्यातेनाभेदावधारणान्न संज्ञाया भेतृत्वं
सम्भवतीत्याशङ्कामाख्यातस्य विशिष्टविधित्वोपपत्तेरभेदावधार-
णाशक्तत्वान्निराकर्तुमभेदावधारणोत्तरकालत्वं पुनःशब्देनोच्यते
नावृत्तिरित्याशयेन समाधत्ते * इतीति * गुणसंक्रान्तशक्तित्वेना-
ख्यातस्याभिन्नतयावधारिते कर्मणि पश्चाद्यदि ज्योतिरादिसञ्ज्ञा-
नामिमानि श्रवणानि स्युस्ततो न भिद्युर्न त्वाख्यतेनाभेद शक्यो
ऽवधारयितुमिति भाष्यार्थो ऽनेनोक्तः। ननु विधिभेदं विना विधेय-
भेदायोगादथैष ज्योतिरित्यादौ च विध्यप्रतीतेर्न सञ्ज्ञाया भेतृता-

युक्तेत्याशङ्क्य ज्योतिः सञ्ज्ञको यागः कार्य इत्यध्याहारेण यागविधित्वाभिधानार्थं तस्मादितिभाष्यं यस्मात्सञ्ज्ञाभेदाद्भिन्नो योगः तस्मादेतद्विधायकमित्यर्थप्रतीतेः स्पष्टत्वादव्याख्याय तदुपपादनार्थमनुवादे हीति भाष्यम् अध्वर्युर्गृहपतिं दीक्षयित्वेत्यादीनामनुवादानामर्थवत्त्वाभ्युपगमादयुक्तमाशङ्क्योपपादयति * समस्तमेवेति * तेषां तु क्रमादिविधायित्वेन अर्थवत्त्वेत्याशय । ननु गुणविधये ऽनुवादो ऽर्थवान् भविष्यतीत्याशङ्क्याह * अथेति * यागानुवादे ऽपि प्रकरणात्तद्गुणत्वं सेत्स्यतीत्याशयः । अथैष ज्योतिरित्यनेन च कर्मान्तरविधौ सहस्रदक्षिणादीनां ज्योतिष्टोमाङ्गत्वापत्तेस्तत्र च तद्विरोधिगुणान्तरविधानादष्टदोषो विकल्पः स्यादित्यभिधानार्थं प्रकृतस्य चेति भाष्यं व्याचष्टे *कर्मैकत्वेति* ननु कर्मान्तरे ऽप्यतिदेशात् द्वादशशतादिप्राप्तेर्विकल्पः स्यादित्याशङ्क्याह *कर्मान्तरत्वे त्विति* आतिदेशिकस्यौपदेशिकेन बाधान्न विकल्पापत्तिरित्याशयः । अनेन च पूर्वपक्षे द्वादशशतादीनां च विकल्पः सिद्धान्ते कर्मभेदाद्व्यवस्थेति प्रयोजनमपि सूचितम् ।नन्वकर्मान्तरत्वे ऽपि सहस्रदक्षिणादेः फले विधानात्काम्यत्वेन नित्यद्वादशशतादिबाधकत्वान्न विकल्पापत्तिरित्याशङ्क्याह * न चेति * प्रकृताश्रयलाभे सति विकल्पदोषः शक्यनैव परिहर्त्तुं सञ्ज्ञया तु प्रकृतबुद्धिविच्छेदात्प्रकृते कर्मणीव फले ऽपि गुणो विधातुमशक्य इत्याशयः । ननु गुणफलयोरेकवाक्योपादाने गुणविशिष्टस्य कर्मणः फले विधौ वाजपेयाधिकरणोक्तवैरूप्यापत्तेर्गुणस्यैव फले विध्यवगमाद् गुणसंक्रान्तशक्तिनाख्यातेन कर्मभेदे ऽवधारिते सञ्ज्ञाया भेदकत्वान्न प्रकृतबुद्धिविच्छेदकतेत्याशङ्क्याह * प्रस्तूयमानेति * अधिकारार्थाथशब्दसमभिव्याहारेणैपशब्दस्य प्रस्तूयमानकर्मविषयत्वावसायादेतेन यजेतेत्येपशब्दनिर्दिष्टप्रस्तूयमानकर्मप्रतिनिर्देशकैतच्छब्दसमभिव्याहृतस्य यजेरपि प्रस्तूयमानकर्मविषयत्वावगतेस्तदेकवाक्यत्वबलेन सञ्ज्ञादीनां प्रकरणावगतं पूर्वकर्मान्वयं बाधित्वा प्रस्तूयमानकर्मान्वयावधारणात्सञ्ज्ञया प्रकृतबुद्धिर्विच्छिद्यतएवेत्याशयः । यस्त्रिरात्रे विभ्रंशेत तस्मिन्पुनरस्त्यथ यो ज्योतिष्टोमे प्रायश्चित्तिमभूदपि ह्येतेनैकविंशतिदक्षिणेन पुनर्यजेतेत्यग्निष्टोमविभ्रंशनिमित्तप्रायश्चित्तार्थत्वेनापि ज्योतिषो विधानादादिशब्दस्तद्विषयः । ततश्च न केवलं सञ्ज्ञातः कर्मान्तरत्वं किं त्वथशब्दसमभिव्याहारादपीति सूचयितुमाह * तस्मादपीति * तस्माच्छब्देन प्रस्तूयमानकर्मान्वयपरामर्शात्तस्य च प्रस्तावापरपर्यायाधिकारार्थाथशब्दसमभिव्याहाराधीन-

स्वादेवं सूचनोपपत्तिः ज्योतिरादिसञ्ज्ञानां ज्योतिष्टोमवाचित्वाद्-
भेदकत्वं पूर्वपक्षोक्तं ज्योतिष्टोमशब्दावयवत्वाद्वास्यां ज्योतिष्टोमवा-
चित्वम् अवयवार्थालोचनया वेति विकल्पयाद्यपक्षनिरासार्थं तावन्न
चेत्यादिभाष्यं व्याचष्टे * न चेति * दशमे कण्वरथन्तरपृष्ठकार्ये
विहितमवयवभूतेन रथन्तरशब्देन रथन्तरधर्मातिदेशाद्रथन्तर-
योनौ गेयमिति पूर्वपाक्षिते कण्वरथन्तरशब्दस्य पुनानः सोम
धारयेऽत्यस्यामृच्युत्पन्ने सामविशेषे रूढत्वाद्रथन्तरशब्दस्य तदव-
यवत्वं स्वयोनौ गेयत्वं सिद्धान्तयितुं निराकरिष्यमाणं दृष्टान्तितं
विश्वज्योतिःसर्वज्योतिःशब्दयोरेकदेशसादृश्ये ऽप्येकदेशान्तरेणा-
सादृश्याच्छालामालाशब्ददृष्टान्तेन ज्योतिष्टोमशब्दावयवत्वनिरास-
द्वारा तदर्थवाचित्वे निरस्ते ज्योतिःशब्दस्य ज्योतिष्टोमशब्दप्रतीकत्वं
पूर्वपक्षोक्तं यत्त्विति भाष्येणानुभाष्य तन्निरासार्थं प्रकरणसामर्थ्या-
द्धीति भाष्यं प्रतीकत्वोपपादनार्थं पूर्वपक्षवार्त्तिकोक्तप्रयोगदर्शना-
नुभाषणपूर्वं व्याचष्टे * यत्त्विति * नन्वेतेन यजेतेत्येतच्छ-
ब्दसमभिव्याहारालोचनया यजेर्ज्योतिःशब्दैकवाक्यत्वावगमे
ऽपि प्रवृत्तिनिमित्ताभावात्कर्मान्तरे ज्योतिःशब्दप्रवृत्त्ययोगमाश-
ङ्क्य द्योततेर्द्योतोद्युतेर्सिन्नादेश्च ज इत्यौणादिके सिन्प्रत्यय-
विधेर्दकारस्य च जकारादेशविधेर्वृद्धिसाधनत्वकारितं द्योत-
नं मत्वर्थलक्षणया वा ज्योतिष्मत्त्वं प्रवृत्तिनिमित्तं व-
क्तुमथ पुनरिति भाष्यमर्थतो व्याचष्टे * न चेति * भाष्योक्त-
कर्मान्तरप्रवृत्तिनिमित्तसद्भावान्नेहान्यथानर्थक्यापत्तिप्रमाणकान् गौ-
णत्वात् ज्योतिष्टोमविषयतावगम्यतइत्याशयः । अवयवार्थालोचन
या विश्वज्योतिःसर्वज्योतिःशब्दयोर्ज्योतिष्टोमवाचितेति द्वितीयं
पक्षं पूर्वपक्षोक्तं यच्चेति भाष्येणानुभाष्य तन्निरासार्थं न हीति भाष्यं
व्याचष्टे * यो ऽपीति * तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्या-
चष्टे * तस्मादिति *

॥ देवताभेदकृतकर्मभेदाधिकरणम् ॥ ९ ॥

गुणश्चापूर्वसंयोगे वाक्ययोः समत्वात् ॥

संज्ञावद् गुणस्यापि पूर्वकर्मनिवेशानर्हत्वेन भेदकत्वाद् गुण-
चिन्तायाः संज्ञाचिन्तानन्तरं सङ्गतिमाह * अत इति * वाजिन-
वाक्यमेवाधिकरणस्य विषयः प्रतियोगियागविधायित्वेन तु वैश्वदे- ५३०।२
वीवाक्यं दध्यानयसंस्कृततप्तपय परामर्शितच्छब्दव्याख्यानार्थं च त-
त्तवाक्यमुपन्यस्तामिति विवेक्तुमाह * चातुर्मास्येष्विति * सन्देह-

भाष्यं व्याचष्टे * तत्रेति * देवताया अप्यप्राप्यत्वादुभयविधिः क-
स्मान्न पूर्वपक्षित इत्याशङ्क्याह * तत्रेति * तस्माद्युक्तं सन्देहभा-
ष्यमित्याह * तत्रेति * पूर्वपक्षप्रतिज्ञाभाष्यं व्याचष्टे * किमिति*
वाजिनामप्यप्राप्तेर्विधेयत्वावगमात्प्राप्ते च कर्मण्यनेकगुणविध्ययो-
गान्न पूर्वत्र गुणविधिः सम्भवतीत्याशयेन प्रश्नपूर्वं कुत इत्याशयेन
पूर्वं कुत इत्यादिपूर्वपक्षभाष्यं व्याचष्टे * कुत इति * नन्वेव दे-
वताप्रतीतावपि कर्माप्रतीतेः कथं तत्र द्रव्यविधिरित्याशङ्क्य द्रव्यदे-
वतान्वयस्य कर्मनिबन्धनत्वेनैवावगतत्वाद्वैश्वदेवामिक्षान्वयानुमितं
कर्मापि वाजिशब्दादेव प्रतीयतइत्युक्तं तस्मादिह पूर्वविहिते कर्मणि
वाजिनविध्युपपत्तिरित्युपसंहारः।ननु वाजिशब्दस्य रूढ्या देवताविशे-
षवाचित्वान्नावयवयोगकल्पना युक्तेत्याशङ्कां निरस्यन् श्लोकं व्या-
चष्टे * वाजिनो नामेति * नन्वेकस्मिन्कर्मणि गुणद्वयसमावेशः
कथमित्याशङ्कानिरासार्थं तेनोभयमिति भाष्यं द्वेधा व्याचष्टे * त-
स्मादिति * वाजयोगस्य देवताविशेषणत्वे वाजिशब्दादामिक्षान्व-
यापरित्यागेनैव वाजिनान्वयावगतेः समुच्चयः। उपलक्षणमात्रत्वे तु
वाजिनविधावामिक्षान्वयाप्रतीतेरन्योन्यानिरपेक्षैकार्थ्यादिकल्प इ-
त्याशयः। ननूत्पत्तिशिष्टबलीयस्त्वस्य वैश्वदेवाधिकरणे स्थितत्वा-
दुत्पत्तिशिष्टामिक्षावरुद्धे यागे वाजिनविध्यनुपपत्तेर्न विकल्पः स-
९३।१२ मुच्चयो वा युक्त इत्याशङ्क्याह * सत्यपि चेति * वैश्वदेवशब्दवत्
वाजिनशब्दस्य नामधेयत्वायोगाद् गुणविधित्वं विनानर्थक्यापत्तेर्वा-
जमेषामस्तीति च सर्वनामार्थवृत्तिना वाजिशब्देन देवताद्वारा सन्नि-
हितयागोपस्थापनात् गुणविशिष्टकर्मान्तरविध्यनुपपत्तेरामिक्षानिरा-
काङ्क्षे ऽपि सोमक्रये हिरण्यादिविधिवत्सम्भवतीति स्पष्टत्वादनुक्त्वा
विकल्पोपपादनार्थं निष्कर्षोक्तिः।ननु कथञ्चिद्यागस्येह स्वशब्दानुक्त-
त्वाद् द्रव्यदेवतानुमितत्वं च ततो निष्क्रष्टुमशक्यत्वान्न निष्कृष्टे यागे
गुणान्तरविधिः सम्भवतीत्याशङ्क्याह * यद्यपि चेति * द्रव्यदेव-
तानुरक्तत्वेनाप्यनुमितस्य यागस्य क्रियारूपतया कारकरूपाभ्यां द्र-
व्यदेवताभ्यां निष्कर्षः सम्भवतीत्याशयः। ननु सत्यपि व्यतिरेके वै-
श्वदेवीशब्दाच्छुद्धयागाप्रतीतेरशब्दावगतस्य च शाब्दवाजिनान्वया-
योगान्न तस्मिन्वाजिनविधिः सम्भवतीत्याशङ्क्याह * यागेति *
वैश्वदेव्यामिक्षाया यजेतेति श्रुतानुमितैकदेशनिष्पन्ने वाक्ये शुद्ध-
यागवाचिपदानुमानाच्छब्देनापि निष्कर्षः सम्भवतीत्याशयः।नन्वेवं
वैश्वदेवीवाक्ये निष्कृष्टयागोक्तावपि वाजिशब्देन निष्कृष्टाननुवादान्न
तत्र वाजिनविधिः सम्भवतीत्याशङ्क्याह * वाजीति * तत्रापि

वाजिदेवत्यो यो यागस्तत्र वाजिनं कुर्यादिति निष्कृष्टयागवाची
शब्दोऽनुमीयत इत्याशयः। तेन पूर्वपक्षोपसंहारभाष्यं व्याचष्टे *
तस्मादिति * अनेकगुणोपादानलक्षणस्य पूर्वकर्मसंयोगहेतोः पौर्ण-
मास्यधिकरणव्युत्पादितस्यात्राभावात् गुणान्तरावरोधलक्षणं हेत्व-
न्तरमत्राभिमतमिति दर्शयन् सिद्धान्तमाह *अत्रेति* अप्रकृतेनेति
भाष्यगा नञ्समासपूर्वकोत्तरपदसमासेनापूर्वसंयोगव्याख्याने ऽपि
दध्यादेः कर्मान्तरसंयोगार्हस्य भेदकत्वनिवृत्त्यर्थमपूर्वेणैव संयोग इ-
त्यवधारणेन पूर्वकर्मासंयोगस्यैवोक्तत्वात्पूर्वकर्मण्यसम्भवादित्यनेनै-
व सूचितमपूर्वसंयोगशब्दस्य व्याख्याद्वयमाह * अपूर्वेति * कार-
कयोः साक्षादनन्वयाद्देवताशब्दं कर्मलक्षणार्थं मत्वा * कर्मान्तरे-
त्युक्तम् * द्वितीयव्याख्यायामुत्तरपदसमासपूर्वको नञ्समासः पू-
र्वकर्मसंयोगानर्हत्वे ऽपि वैश्वदेववाक्यवत्कर्मोत्पादकत्वाभावे भेद-
कत्वायोगादपूर्वसंयोगस्य भेदापादकत्वाय कर्मविध्याक्षेपकत्वाभि-
धानार्थत्वेन वाक्ययोरिति सूत्रावयवव्याख्यानार्थं स मे हीति भा-
ष्यमिति सूचयन्सूत्रावयवं व्याचष्टे * वाक्ययोरिति * अपूर्वसं-
योगाक्षेपार्थं कथं पुनरिति भाष्यं व्याचष्टे * सत्यमिति * यदुत्या-
क्षेपभाष्यावयवं शङ्कोत्तरत्वेन व्याख्यातुं सिद्धान्तिनः शङ्कामाह *
तत्कार्येति * समुच्चयाशयत्वेन तावद्व्याचष्टे * कथमिति * विक-
ल्पाशयेनैतमेव भाष्यावयवं व्याख्यातुमेकार्थास्तु विकल्पेरन्समुच्चये
ह्यावृत्तिः स्यात्प्रधानस्येति द्वादशाधिकरणन्यायेन समुच्चयासम्भवं
शङ्कते * एकार्थास्त्विति * आमिक्षावाक्ये निरपेक्षामिक्षासाधन-
कत्वेनावगते यागे समुच्चयविध्ययोगाद्वाजिनोगस्य चोपलक्षणमा-
त्रत्वोपपत्तेर्न कथङ्क्यवद्वचनात्समुच्चयसिद्धिरित्याशय.। वि-
ध्यकल्पाशयत्वेन व्याचष्टे * विकल्प एवेति * समाधानार्थं न-
वुच्यतइति भाष्यं व्याचष्टे * नेति * तद्धितेति भाष्यं पूर्वभाष्यो-
क्तातुल्यबलवत्त्वविवरणार्थत्वेन व्याचष्टे * तदिति * भाष्यद्वये ऽपि
तद्धितचतुर्थ्योः श्रुतिवाक्यत्वकृतबलाबलोक्त्यविशेषात्पौनरुक्त्यमा-
शङ्क्य पूर्वस्य तावत्सामान्यन्यायोक्त्यार्थत्वं सूचयितुमाह * सर्वत्रैव
तावदिति * क चित्तद्धितेन क चिच्चतुर्थ्येति वाक्ये बलाबलोक्त्यै
श्रुतिवाक्योपन्यास इत्यनेन सूचितम्। द्वितीयस्य बलाबलोपपादना-
र्थत्वं सूचयितु शङ्कते * आहेति * द्वयोः श्रुतित्वाविशेषादित्याशयः
विशेषोक्तौ भाष्यं योजयति * तदिति * यत्रेति भाष्यस्य प्रकृते ५३२।१
समान्यन्याययोजनार्थत्वं सूचयितुमाह * वैश्वदेवी हीति * देव-
तान्वयस्योभयत्र श्रौतत्वादू द्रव्यान्वयस्य तूभयत्र वाक्यीयत्वाच्छ्रुति-

वाक्यत्वकृतविशेषायोगाशङ्कानिरासार्थं तत्रैषामिति भाष्यमाक्षि-
पति * नन्विति * भाष्यस्थो विशेषशब्दस्तद्धितान्तर्गतास्यशब्दो-
क्तद्रव्यान्वयस्याश्रौतत्वाद्वाक्यीयत्वोक्त्ययोगमाशङ्क्य सामान्यस्याप्र-
देयत्वेन देवतान्वयानर्हत्वाद्विशेषस्यैवान्वयो वाच्यः । स च वा-
क्याधीन इत्यभिधानार्थो ऽथ द्रव्यमात्रान्वयस्य श्रौतत्वे ऽपि वि-
शेषान्वयो वाक्यगम्य इत्यभिधानार्थं इति विकल्प्याद्यपक्षे द्रव्यान्व-
यस्योभयत्र वाक्यीयत्वाद्देवतात्वस्य उभयत्र श्रौतत्वादविशेषे द्र-
व्यसङ्गतिमात्रं करणादित्यन्तेनोक्ते ऽथ द्रव्यमात्रसंयोग इत्यादि-
ना चतुर्थ्या अपि कर्माभिप्रेयमाणत्वलक्षणसंप्रदानवाचित्वात्कर्म-
भूतद्रव्यान्वयोक्तिं विना सम्प्रदानोक्त्यनुपपत्तेर्द्रव्यान्वयवाचित्व-
स्यापि सम्प्रदानवाचित्वस्मृत्याक्षेपाद् द्रव्यान्वयस्यापि श्रौतत्वावग-
त्याशयेन द्वितीयपक्षे ऽव्यविशेषमुक्त्वापि चेत्यादिना द्रव्यमात्रान्व-
ये विरोधाभावेन बलाबलस्यावाच्यत्वात् विशेषान्वयस्योभयत्र वा-
क्यीयत्वान्नैकस्यापि श्रौततास्तीत्युक्तमिति विवेकः । आक्षिप्तं भाष्यं
समाधातुं श्रुत्या देवतात्वमिति भाष्यावयवं तावत्तद्धितान्ताद्देवता-
शब्दात्परस्य भावप्रत्ययस्य सम्बन्धवाचित्वमङ्गीकृत्य द्रव्यवि-
शेषस्य श्रौतदेवतान्वयोक्त्यर्थत्वेन व्याचष्टे * तदिति * विशे-
षस्यैव देवतोच्यतइत्यनुषङ्गः । अस्य शब्दस्य विशेषवाचित्वमु-
पपादयन् श्लोकं व्याचष्टे * विश्वेदेवा इति * विशेषस्यै-
व सर्वनामवाच्यत्वात्त्यागलक्षणव्यवहारयोग्यत्वाच्चास्य शब्देना-
भिधानात्तद्धितेन देवतान्वयोक्तिरित्यर्थः। सम्बधग्रहणाशक्तेर्विशेष-
स्य वाच्यत्वायोगमाशङ्क्य सन्निहितत्वं सम्बन्धोपलक्षणत्वेनो-
क्तम् । ननु द्रव्यविशेषस्यैव देवतान्वये तद्धितेनोक्ते सत्यामिक्षाश-
ब्दो ऽनर्थक इत्याशङ्कानिरासार्थत्वेन द्रव्यविशेषस्य देवतासम्ब-
५३३।२ न्धितया तद्धितोक्तस्यामिक्षया सह विशेषणविशेष्यसम्बन्धो वा-
क्येन गम्यतइत्येवमुत्तरावयवं व्याख्यातुमाह * ततश्चेति * त्यज्य-
मानं द्रव्यं प्रत्युद्देश्यत्वेन देवताया विशेषत्वात्सामान्यस्य च त्या-
गायोगाद्विशेषावगत्युपादानायोपसर्जनत्वमुक्त्वा सम्बन्धं विनोपस-
र्जनत्वासिद्धेस्तत्सिद्धये ऽन्तर्णीतः सम्बन्धो यस्यां देवतायां सोपस-
र्जनं यस्य द्रव्यस्य तत्प्रत्यये तद्धितान्तेन सन्निहितो द्रव्यविशेषो
देवताविशिष्ट इत्येवं निष्पादिते स्वरूपावगतिं विना तदपर्यवसाना-
त्तत्समर्पणाय *आमिक्षापदेनेत्युक्तं*ननु देवताविशिष्टस्य तद्धिता-
न्तपदवाच्यत्वाभ्युपगमे सम्बन्धस्य लक्ष्यमाणत्वापत्तेः श्रौतत्वोक्ति-
रयुक्तेत्याशङ्क्य वैय्याकरणमतेन श्रौतत्वोक्तिरित्याह * तत्रेति *

एवं तु स्वमते श्रौतत्वासिद्धेरपरितोषादेकपदगम्यत्वेनौपचारिकी श्रौतत्वोक्तिरित्यन्यथा परिहरति * अथापीति * भाष्यावयवद्वयस्योक्तमेव विविक्तविषयत्व स्पष्टयति * तेनेति * येन कारणेनामिक्षापदेन तद्धितोक्तो द्रव्यविशेषः समर्प्यते तेन कारणेन विशेषणविशेष्यत्वलक्षणस्यासम्बन्धस्याभावात् द्वाविह सम्बन्धावित्यर्थ । नन्वेवं सति पदान्तरान्वयसापेक्षत्वाच्छ्रुतेरपि न वाक्याद्विशेषः स्यादित्याशङ्क्याह * इतीति * सर्वनाम्नः पदान्तरसन्निधापितार्थविषयत्वात्तेन विना स्वार्थाभिधानपर्यवसानानुपपत्तेः पदान्तरस्यापि सन्निधापकस्य सर्वनामश्रुतिव्यापारान्तर्गतत्वावसायात्पर्यवसिताभिधानाभिधेयार्थाकाङ्क्षासन्निधियोग्यत्वाधीनपदान्तरान्वयात्सर्वनामार्थवृत्तितद्विषयसमर्पकपदद्वयान्वयस्य शीघ्रं प्रतीतेरस्त्यामिक्षावाजिनयोर्विशेष इत्याशयः । ननु विशेषणविशेष्यत्वलक्षणसम्बन्धाभ्युपगमे तस्य भेदाधिष्ठानत्वाद्वैश्वदेव्यामिक्षाशब्दयोर्भिन्नार्थत्वापत्तेर्नीलोत्पलशब्दयोरिव वाक्यलक्षण एवान्वयः स्यात् न श्रौत इत्याशङ्क्याह * ततश्चेति * यतश्च कारणादामिक्षापदेन तद्धितोक्तद्रव्यविशेषसमर्पणनिमित्तं विशेषणविशेष्यत्वम् अतोऽर्थभेदसमर्पणायोगाद्भिन्नार्थत्वानुपपत्तेर्नार्थयोर्विशेषणविशेष्यत्वं किं तु शब्दयोरेवेत्यर्थः। किं तर्हि विशेषणविशेष्यत्वे द्वारमित्यपेक्षायामामिक्षापदसन्निधानात्तद्धितस्य द्रव्यविशेषवाचित्वव्यवस्थापनं द्वारमाह * किं तर्हीति * पदद्वयश्रवणानन्तरं तत्प्रतीतेः समुदायवाच्यत्वशङ्का तद्धितएवेत्येवकारेण निरस्ता सर्वनामार्थवृत्तित्वलक्षणोपपत्तिर्वैषशब्देनोक्ता श्लोकं व्याचष्टे * नैवेति * अपत्यादितद्धितवद्विशेषानभिधानेऽपि सन्निहितत्वमात्रत्वाभिधानात्पर्यवसानमाशङ्क्य * अनुपयुक्तेत्युक्तम् * औपगवादिशब्दे देवदत्तादिविशेषाप्रतीतावप्युपगवपत्यत्वमात्रप्रतीत्युपपत्तेर्युक्तमभिधानपर्यवसानं सन्निहितत्वस्य तु प्रकृत्यर्थेनाविशेषणान्निर्विशेषणस्य च सर्वपदार्थसाधारण्येनानुपयोगितयानभिधेयत्वादपत्यादिविशेषणवच्चोपपदार्थविशेषणफलत्वाभावाच्च सन्निहितत्वमात्राभिधाने तद्धितस्य शक्तिः कल्प्येत्याशयः । वैश्वदेवीशब्दे एवेत्यनेन तद्धितएवेत्यन्वयः सूचितः । न चेत्यनेनोत्तरार्द्धं व्याख्यातम् । नन्वामिक्षापदेन विनामिक्षाविषयत्वाप्रतीतौ देवतायोगस्यामिक्षाविषयत्वं वाक्यार्थः स्यादित्याशङ्कानिरासायामिक्षामेवेत्यावृत्त्यैवकारान्वयसूचनार्थम् * न च वाक्यार्थत्वमित्याद्युक्तम् * सन्निहितार्थविशेषविहितत्वात्तद्धितस्य तत्समर्पकपदानपेक्षस्या-

न्वर्थाप्रसिद्धेः स्वतन्त्रपदार्थाग्रहणाद्वाक्यार्थत्वानुपपत्तिरित्यर्थः
भाष्यस्थविशेषपदोक्तशङ्कानिरासोपपादनार्थं तद्धितस्य विषया
र्पणमेवेत्येकारान्वयं सूचयितुम् * तेनेत्युक्तम् * उपपदसर्वनाम
तद्धितानामैकार्थ्ये वृद्धसम्मतिमाह * तथा चेति * आमिक्षाश
ब्देनैव सिद्धेर्वैश्वदेवीशब्दानर्थक्यं त्वनाशङ्क्यमेवेति सूचयन्नैकार्थ्य
६३४।२ मुपसंहरति * तेनेति * यैवेत्येवकारेणामिक्षा * शब्दोक्तैवेत्यु
क्तम् * सैव वैश्वदेवीशब्देनोक्ता सती देवतासम्बन्धं यास्यतीत्ये
तदर्थं वैश्वदेवीशब्देनोच्यते इति क्रियार्थायां क्रियायामुपपदे लृङ्
व्याख्यानेन योज्यम्।एकार्थे प्रवृत्तिनिमित्तभेदाभावात्सामानाधिकर
ण्यायोगमाशङ्क्यामिक्षाशब्दस्यामिक्षात्वं वैश्वदेवीशब्दस्य देवतान्वयं
प्रवृत्तिनिमित्तं देवतान्वयार्थामिक्षाशब्दोक्तार्थोक्तिपरामर्शिना तच्छ-
ब्देन सूचयन्नर्थविशेषणविशेष्यत्वानपेक्षत्वमुपसंहरति * तेनेति *
वाजिने तु द्रव्यदेवतान्वयो विशेषणविशेष्यत्वं च द्वयमपि वा-
क्यीयमेवेत्यभिधानार्थमेकलेति भाष्यं व्याचष्टे * इतरत्र त्विति *
सम्प्रदेयाद्विना सम्प्रदानायोगादर्थाक्षेपेण विभक्त्या द्रव्यदेवतायो-
गोक्तिमाशङ्क्य * स्वत इत्युक्तम् * समान्यतो द्रव्यदेवतायोगा-
क्षेपे ऽपि स्वेन वाजिनशब्दवाच्येन रूपेण हविषो देवतायोगो न वि-
भक्त्योक्त इत्यर्थः । श्लोकं व्याचष्टे * वाजिभ्य इति * तस्य
द्रव्यविशेषस्य देवतासम्बन्धः । तत्सम्बन्ध. सामान्यतो विशेषतो
वा द्रव्यदेवतासम्बन्धो न वाजिपदे ऽन्तर्गत इति कथं चिच्छब्दे-
नोक्तम्। यदि च तद्धितवच्चतुर्थी सर्वनामार्थे स्मर्येत ततः सम्प्रदेय-
स्य द्रव्यस्य सम्प्रदानभूतदेवतान्वयश्चतुर्थ्यन्ते पदे ऽन्तर्गतः स्यान्न
त्वेतदस्तीत्याह * अपि चेति * देवतात्वापेक्षयापिशब्दः श्लोकं
व्याचष्टे * सास्येति * यदि चान्यपदार्थो ऽपि चतुर्थ्यन्तात्प्रतीयेत
ततो स्मृतो ऽपि देवतान्वयचतुर्थ्यन्ते पदे ऽन्तर्गतः स्यान्न त्वेतद-
प्यस्तीति सम्प्रदानमात्रं प्रतीयत इति वदतोक्तम्। ननु सम्प्रदेयं विना
सम्प्रदानायोगात्सम्प्रदेयमपि चतुर्थ्यन्तात्प्रतीयत एवेत्याशङ्क्याह
* तेन त्विति * ननु सम्प्रदानमात्रस्य चतुर्थ्यर्थत्वे देवतात्वस्या-
पि तयानुक्तत्वाद्वाक्येनापि द्रव्यदेवतावगत्यनुपपत्तेरुभयस्य वा-
क्यीयत्वोक्तिरयुक्ता स्यादित्याशङ्क्याह * तेनेति * लक्षणया दे-
वतात्वोक्तिमभ्युपगम्य भाष्यमित्याशयः । नन्वेवं सति देवतात्व-
स्यामिक्षावाजिनवाक्ययोः श्रौतत्वाविशेषात्तुल्यबलत्वं स्यादित्या-
शङ्क्याह * तत्र चेति * अनेन च तदिहेति भाष्यस्थो ऽपि देव-
तात्वशब्दः पूर्वभाष्यस्थवत्सम्बन्धवाचितया व्याख्यातः । श्रौतवा-

कर्मीयत्वविशेषोक्तिप्रयोजनाभिधानार्थं विरोधे चेत्यादिभाष्यं व्याचष्टे * इतीति * सन्निकर्षविप्रकर्षौ वा भाष्यस्थाभ्यां श्रुतिवाक्यशब्दाभ्यां विवक्षिताविति व्याख्यानान्तरमाह * किं चेति * श्रुतिशब्दस्य सन्निकृष्टत्वमर्थो वाक्यशब्दस्य विप्रकृष्टतार्थ इत्यर्थः । कथमामिक्षान्वयस्य सन्निकृष्टत्वं वाजिनान्वयस्य विप्रकृष्टापेक्षिते
ऽष्टप्रकारं सन्निकर्षविप्रकर्षाभिधानं प्रतिजानाति तावत् * विप्र- ५३५।२
कृष्टेति * एतदेव व्याचष्टे * सर्वेति * आमिक्षायां सामान्यतो देवतान्वयाभिधानं न वाजिनस्येति तावत्प्रकारमाह * तद्यथेति * यद्यपि च भवतु नामेत्यनेन द्रव्यमात्ररूपत्वाविरुद्धात्मतोक्ता तामनुभाषणपूर्वं दूषयति * यत्त्विति * वैश्वदेवीतीतिकरणेन सन्निहितार्थवृत्तितद्धितपरस्त्रीप्रत्ययपरामर्शात्तेन च सन्निहितस्त्रीद्रव्योक्तेर्वाजिने च नपुंसकव्यवहितशब्दनिर्दिष्टे स्त्रीत्वसान्निध्ययोगाद्विरोधो ऽस्त्येवेत्याशयः । ददातिकल्पनाकल्पनरूपं प्रकारान्तरमाह * अपि चेति * अवश्यकल्पकर्त्तव्यतावचनेनैव पदद्वयान्वयसिद्धौ ददातिकल्पनानापत्तेस्तत्कल्पनासिद्ध्यर्थं सम्प्रदानसम्प्रदेयसङ्गतिं ददातिं विना * नास्तीत्युक्तम् * देवशब्दे ऽपि कल्पनीये धातुमात्रकल्पनस्यासाधारण्येन पर्यनुयोज्यत्वसूचनार्थं धात्वर्थेन तल्लक्षणा अवश्यकल्पकर्त्तव्यतावचनकल्पने ऽपि विप्रकर्षसिद्धेः कस्मान्न निरस्ता इत्याशङ्कां निरस्यन् श्लोकं व्याचष्टे * कर्त्तव्यतेति * प्रश्नपूर्वं वैधर्म्यमुपपादयति * कुत इति * वैश्वदेव्यामिक्षाशब्दयोस्तु सामाधिकरण्याद्वैधर्म्यदृष्टान्तत्वोपपत्तिरित्याशयः वाजिशब्दस्य कारकविभक्त्यन्तत्वादपि न नाम्नान्वयः सम्भवतीत्याह * न चेति * ददात्यध्याहारे च विप्रकर्षद्वयापत्तिर्दोष इत्याह * तत्रेति * नन्वामिक्षावाक्ये ऽपि वैश्वदेव्यामिक्षया यजेतेति कल्पनाद्विप्रकर्षद्वयापत्तिरविशिष्टेत्याशङ्कते * इतरत्रापीति * पदद्वयान्वयहेतुत्वाभावान्नान्वयविप्रकर्षापादकं यजिकल्पनमित्याशयेन परिहरति * नेति * आमिक्षावाक्ये च यजिमात्रं
कल्प्यं वाजिनवाक्ये तु यजिर्ददातिश्चेति विशेषमाह * तव त्विति * ५३६।१
वाजिनवाक्यस्यानेकदोषदुष्टत्वसूचनार्थं परकीयत्वं विवक्षितुम् * तवेत्युक्तम् * त्वदीये वाजिनवाक्ये ऽर्थयोर्द्रव्यदेवतयोः सम्बन्धसिद्ध्यर्थं यजिश्च पश्चाद्भविष्यत्यादौ च द्रव्यदेवतापदयोरन्वयार्थं ददातिरित्युक्ते ददातिनैवार्थयोरप्यन्वयसिद्धेः । किं यजिनेत्याशङ्क्य * परेत्युक्तम् * परस्या देवतायाः प्रतिग्रहीतृत्वाभावेन तत्स्वत्वापादनलक्षणदानायोगान्न तेन द्रव्यदेवतान्वयः सम्भवतीत्या-

शयः व्यतिरेकवाचिना तुशब्देनामिक्षावाक्ये यजिमात्रकल्पनेति सू-
चितं चतुर्थ्याश्चोत्सर्गतो ऽवगतस्यापि सम्प्रदानवाचित्वस्य वाजिन-
पदन्वयात्प्रागपवादकोपपद्योगाभावान्निश्चयेनानिर्णीतस्य देवतात्व-
स्वलक्षकत्वायोगात्प्रागेव च देवतात्वलक्षणायां ददातिकल्पनायो-
गापत्तेः सम्प्रदानसम्प्रदेयपदैकवाक्यत्वार्थं कल्पितेन ददातिना त-
दन्वये निष्पादिते वाजिनप्रतिग्रहीतृत्वाभावात्सम्प्रदानत्वानुपपत्ते-
र्देवतालक्षणार्थत्वं वाजिपदस्याभिप्रेत्य देवतापदत्वोक्तिर्ददातिकल्प-
नोत्तरकालमपि कारकपदयोरन्योन्यान्वयं विप्रकर्षमाह * कल्पिते
ऽपि चेति * वैश्वदेव्यामिक्षाशब्दयोस्तु सामानाधिकरण्यात्कारक-
विभक्त्यन्तत्वाभावाच्च न कश्चिद्विप्रकर्षहेतुरित्याह * नन्विति *
सामानाधिकरण्यवैयधिकरण्यलक्षणं तृतीय प्रकारमाह * सत्यपि
चेति * सर्वत्रैकविषयत्वनिबन्धनत्वादन्वयस्यैकविभक्त्यन्तत्वं वि-
नैकविषयत्वाप्रतीतेर्वाजिसम्प्रदानकं वाजिनमित्येकविभक्त्यन्तत्वाय
सम्प्रदानवाचिन्याश्चतुर्थ्याः सम्प्रदेयलक्षणार्थत्वाद्वैयधिकरण्ये विप्र-
कृष्टेत्याशयः। एतदेवारुणाधिकरणभाष्यसम्मत्या द्रढयति *
तथा चेति* श्रुतिलक्षणात्मकं चतुर्थं प्रकारमाह*किं चेति*लक्षणा
मुपपादयति*न हीति*दृष्टान्तेनामिक्षायां श्रुतिः सूचिता प्रसिद्धिवि-
रोधान्नात्रेयस्य देवतात्वमस्तीत्याशय।सम्प्रदानस्य देवतात्वे ऽनिष्टा-
पत्त्यन्तरमाह * यदि चेति * विरुद्धलक्षणत्वादपि संप्रदानस्य
देवतात्वं नास्तीत्याह * प्रतिग्रह इति * एवमपि कथं सम्प्रदान-
त्वेन देवतात्वं लक्ष्यतइत्यपेक्षायां प्रकारद्वयमाह * तेनेति * तस्या
देवताया उद्देश इति समासान्तर्गतषष्ठ्युक्तस्योद्देशकर्मत्वस्य विशे-
षणाप्रधानेन निर्देशेन लक्ष्यतोक्ता नन्वप्रतिग्रहीतृत्वाद्देवतायामैश्व-
र्यं सम्भवतीत्याशङ्क्याह * तादात्म्येति * देवब्राह्मणराज्ञां च
विज्ञेयं द्रव्यमुत्तममित्यादौ ब्राह्मणादिवद्देवताया अप्यैश्वर्यप्रसिद्धे-
र्यस्यै वा कस्यै देवतायै पशुरालभ्यते सैव मेधपतिरित्यार्थवादेभ्यश्च
देवतात्वस्यैश्वर्यरूपत्वप्रसिद्धेः प्रतिग्रहाभावे ऽपि तदुद्देशपूर्वकेण
त्यागेन तदधीनत्वापादनान्मुख्यैश्वर्याभावे ऽपि औपचारिकमैश्वर्य-
मस्तीत्याशयः। ये ऽपि सम्प्रदानद्वैविध्यमभ्युपगम्य प्रतिग्रहणा-
त्मकस्य सम्प्रदानस्य देवतात्वाभावे ऽप्यनिराकरणात्मकसम्प्रदा-
नस्य देवतात्वमिच्छन्ति तन्मते ऽपि चतुर्थ्युक्तेन सम्प्रदानत्वसामा-
न्ये नत्तद्विशेषदेवतात्वलक्षणाद्विप्रकर्ष इत्याह * यद्यपीति * सन्दि-
ग्धत्वलक्षणं पञ्चमं प्रकारमाह * अपि चेति * श्लोकं व्याचष्टे
३७।१ * वाजिभ्य इति * शङ्कोत्तरत्वेनोत्तरार्द्धं व्याख्यातुम् * नन्वित्या-

युक्तम्* सकलरूपसाम्ये ऽपि पदावधारणोपायान् बहूनिच्छन्ति सू-
रयः क्रमन्यूनातिरिक्तत्वस्वरवाक्यस्मृतिश्रुतीरिति प्रकृतिप्रत्यया-
न्वाख्यानस्मृतेरपि पदभेदावधारणोपायत्वेनेष्टत्वात्प्रयाजाः सविभ-
क्तिकाः कर्त्तव्या इत्यादौ च वेदे ऽपि विभक्तिप्रसिद्धेर्विभक्तीनां
पारिभाषिकत्वाभावादन्वाख्यानभेदेन शब्दभेदात्सन्देहोपपत्तेरर्थस-
न्देहस्य चोभयसाधारण्येनापर्युनुयोज्यत्वाच्छब्दसन्देह एवं विप्रक-
र्षोपादक इत्याशयः। उत्पन्नशिष्टत्वलक्षणं षष्ठं प्रकारमाह * किं
चेति * अस्तु तावदुत्पन्नशिष्टत्वलक्षणो विशेषो वैश्वदेवाधिकर-
णोक्तेनोत्पत्तिवाक्यविज्ञातमित्यादिचित्राधिकरणवार्त्तिकोपपादिते-
नोत्पत्तिशिष्टबलीयस्त्वेनोत्पत्तिशिष्टगुणावरुद्धे कर्मणि,गुणान्तरं वि-
धातुमेवाशक्यमित्याह * यथा चेति * श्लोकोक्तमुत्पत्त्युत्पन्नशि-
ष्टत्वविशेषस्य सन्निकर्षविप्रकर्षप्रकारत्वमुपपादयितुं प्रतिजानाति
* वैश्वदेवेति * प्रश्नपूर्वं वैश्वदेवाधिकरणोक्तमेव न्यायमुपपाद-
नार्थं स्मारयति * कुत इति * श्लोकं व्याचष्टे * वाजिनं हीति *
अस्मिंश्च व्याख्यानप्रकारे सामान्यतो ऽप्यामिक्षान्वयस्य श्रौतत्वा-
भावे ऽपि वाजिनाद् बलीयस्त्वमित्याह *ततश्चेति* वाक्येनैव सामा-
न्यतो ऽप्यामिक्षादेवतान्वयितया विधीयतइति वाच्ये तथापि सामा-
न्यस्य ऽब्रवीतीत्याद्यप्रकारानभ्युपगमे ऽपि आमिक्षाया बलीयस्त्वो-
क्त्यैतद्बुद्धिस्थीराकरणार्थो विपरीतोक्तिः। ननु यागमात्रान्वये ऽपि
भेदस्तावन्न सिध्यतीत्याशङ्क्याह * प्रकरणानपेक्षेति * अप्रकृतानां
यागानामप्रतीतेः प्राकृतानां चानपेक्षणाद्यागान्वयायोगाद्विशिष्टवि-
धिरेवापद्यतेत्याशयः। स्वार्थासमाप्तत्वेन च '[वाक्यान्तरानपेक्ष-
त्वान्न तद्विहिते कर्मण्यनेन गुणविधिः सम्भवतीत्याह * न चेति*
रूढियौगिकत्वलक्षणं सप्तमं प्रकारमाह * विश्वदेवाश्चेति * उत्त- ५३८।
रार्द्धं व्याचष्टे * वाजिन इति हीति * अवयवप्रसिद्धेर्विप्रकर्षोप-
पादनार्थमक्षरैरेव बुध्यन्तइति प्रोक्षणयाधिकरणवार्त्तिकोक्तं दौर्बल्यं
स्मारयति * वाक्यार्थवच्चेति * न केवलं विश्वेदेवस्य शब्दस्यया
रूढ्या वाजिशब्दस्यावयवप्रसिद्धिबाधः किं त्वात्मस्थयापीत्याह *वा-
जेति * देवतात्वे ऽश्वानामयोग्यत्वादस्त्येव विश्वेषु देवेषु वृत्तेर्दे-
वतात्वसिद्धिः। कार्यमित्याशङ्कां निरस्यन् श्लोकं व्याचष्टे * देव-
तात्वं नामेति * अन्यत्र देवतात्वोक्त्या न च गतयोग्यत्वस्याग्न्यादे-
रनवगतयोग्यत्वस्य वाश्वादेः शब्दैकसमधिगम्यत्वाद्युक्तं देवतात्व-
मित्यर्थः। यौगिकत्वाभ्युपगमे ऽपि विश्वदेवविषयता क्लेशगम्ये-
त्याह * सत्यपीति * श्लोकं व्याचष्टे * सर्वे हीति * ननु श्री-

हीन्प्रोक्षतीत्यादिवत् प्रकृतग्रहणं भविष्यतीत्याशङ्क्य वैषम्यमाह *
* गुणेति * एतदेव विवृणोति * संस्कार्यत्वे हीति * देवतायाः
संस्कार्यत्वं विनाऽप्याराादुपकारित्वाद्यागस्य प्रयोजनवत्त्वोपपत्तिरि-
त्यर्थः । संस्कारकर्मत्वे ऽपि तप्तस्य पयसो दध्यानयनसंस्कृतस्यामि॰
क्षाशब्देन घनीभूतस्य वैश्वदेवयागे विनियोगात्तदनुनिष्पादिनो
द्रवस्य वाजिनशब्दोक्तस्योपयुक्तशेषत्वात्प्रतिपत्त्युपेक्षस्य प्रतिपत्तिर्भ-
५३९।२ विष्यतीत्याह * कामं वेति * प्रकृतग्रहणे ऽप्यग्न्यादीनामष्टानां
प्रकृतत्वाविशेषाद्विश्वेदेवमात्रविषयत्वं न सिध्यतीत्याह * प्रकृते-
ति * ननु विश्वेदेवशब्देनाष्टानामपि ग्रहणं भविष्यतीत्याशङ्कते
* अथेति * एकदेवतोद्देशेन यागसिद्धेः सर्वदेवतोद्देशो निष्प्रमा-
णक इति परिहरति * तदिति * बहुवचनं प्रमाणत्वेनाशङ्कते
* बह्विति * न तत्सर्वोद्देशे प्रमाणमिति परिहरति * नेति *
अष्टानां मध्ये के ऽत्र ये ग्राह्या इत्यनवधारणात्सर्वग्रहणं भविष्यती-
त्याशङ्कते * न त्रिष्विति * द्वादशाधिकरणन्यायेनाद्या स्तिस्रो दे-
वता इत्यवधारणं सम्भवतीति परिहरति * न मुख्यं वेति * अतो
ऽष्टानां मध्ये विश्वेदेवमात्रग्रहणं निष्प्रमाणकमित्युपसंहरति * त-
स्मादिति * अनन्तरोपदिष्टवाजवतां च वाजिशब्देनोक्तौ नैराका-
ङ्क्ष्यान्न वाजिनान्वयो युक्त इत्याह * साकाङ्क्षा चेति * सप्तमं
प्रकारमुपसंहरति * तस्मादिति * देवशब्दस्य वाजिशब्देन लाभो-
पपत्तेर्दुर्लभत्वोक्तिरयुक्तेत्याशङ्क्य * तत्रापि चेत्युक्तम् * वाजि-
शब्दोच्चारणेनैव विश्वेदेवग्रहणसिद्धेः किं प्रयोजनलाभेनेत्याश-
ङ्क्याह * न चेति * शास्त्रेण च वाजिशब्दोच्चारणएव पुरु-
षस्य प्रवर्त्तितत्वान्न वाजिशब्देनार्थद्वारा विश्वेदेवशब्दलक्ष-
णायां प्रमाणमस्तीत्याह * वाजीति * एवं च वाजि-
नयागे विश्वेषां देवतात्वे सत्यपि वाजिशब्देनैवोक्तानां देवतात्वा-
द्देवताभेदेनामिक्षावाक्यस्थदेवतानुवादायोगात्पौर्णमास्यधिकरणव्यु-
त्पादितया प्राप्ते कर्मण्यनेकार्थविध्यशक्त्यापि कर्मभेदसिद्धिरित्याह *
५४०।२ ततश्चेति * परस्मादिति सूत्रार्थोपसंहारभाष्यं व्याचष्टे * इतीति *
अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेतेति सूत्रमथेत्यादिभाष्येणोपवं-
र्णनापरिहारार्थत्वेन व्याख्यायाथ वेत्यादिना दध्यादेरपि गुणस्या-
ष्टदोषविकल्पापत्तेः पूर्वकर्मण्यसम्भवाद्भेदकत्वप्रसक्तावयवादार्थ-
तया ऽधिकरणान्तरत्वेन व्याख्यातं तत्र द्वितीयव्याख्यायां तत्सन्निधे-
र्गुणार्थेन पुनः श्रुतिरित्यनेन पौनरुक्त्यापत्तेः प्रयोगकालीनविकल्पा-
लोचनेन चोत्पत्तिशास्त्रान्यथात्वकरणायोगात्पूर्वपक्षानुपपत्तेराद्यैव

व्याख्या युक्तेत्याह * अगुणेति * गुणान्तरावरुद्धकर्मोत्पत्त्यभावेनोदाहरणभेदहेतुत्वेनोक्तस्यापूर्वसंयोगस्याभावात्प्रत्युदाहरणत्वं दध्यादेर्वैषम्योक्तये ऽनेनोच्यतइत्यर्थः । प्रत्युदाहरणत्वं विवृणोति * अन्येमेति *

॥ दध्यादिद्रव्यसफलत्वधिकरणम् ॥ ११ ॥

फलश्रुतेस्तु कर्म स्यात्फलस्य कर्मयोगित्वात् ॥ २५॥

सम्भवत्प्रकृताश्रयलाभस्य गुणस्योदाहरणत्वाभिधानार्थमग्निहोत्रमिति भाष्यं व्याचष्टे * अग्निहोत्रमिति * सन्देहभाष्यं व्याचष्टे * तत्रेति * तस्यैवेति सिद्धान्तवचनव्यक्तिपूरणेनापवादतयानन्तरसङ्गतिः सूचितां गुणशब्दस्य सिद्धार्थवाचित्वात्सिद्धस्य च निर्व्यापारस्य फलसाधनत्वायोगाद्वाक्यभेदापत्तेश्चानेनैव द्वारभूतव्यापारविध्ययोगाद् गुणफलान्वयायोगाशङ्कानिरासार्थं प्रकृतकर्मसम्बन्धोक्तिः । ननु शुद्धकर्मोत्पत्तौ गुणस्यानन्तरस्तत्र एवाभेदकत्वोक्तेः पूर्वपक्षायोगात्सन्देहो न युक्त इत्याशङ्क्याह * द्वयमेवेति * यथा शुद्धोत्पत्तावभेदकतोक्ता तथानेकस्य गुणस्य प्राप्ते कर्मण्याशङ्क्य विधित्वाद्भेदकतापि चोदना वा गुणानां युगपच्छास्त्रादित्यनोक्ते ननु विध्यशक्तेस्तत्र भेदकत्वादिह गुणनिमित्तभेदप्रकरणे पूर्वपक्षहेतुत्वेनोपन्यासो न युक्त इत्याशङ्क्य यथा सगुणकर्मोत्पत्तौ पूर्वसंयोगानर्हत्वात् गुणस्य भेदकत्वं तथा शुद्धोत्पत्तावनेकस्यैव पूर्वकर्मसंयोगानर्हत्वंहेतुसाम्याद्भेदकत्वं विध्यशक्तिस्तु पूर्वसंयोगानर्हत्वोपपादिकेति सूचनार्थं दृष्टान्तत्वेन * स गुणोत्पत्तावित्युक्तम् * प्रकारान्तरव्याख्यानार्थम् * विधीयमानेत्युक्तम् * द्वयमेवेत्येवकारेण प्राप्ते कर्मण्यनेकविध्यशक्तेः साक्षाद्भेदहेतुत्वाभावः सूचितः । भेदहेतुत्वेन फलस्य गुणस्यानेकार्थोपादाने ऽप्युपपत्तौ नाव्यापिन्या विध्यशक्तेर्भेदकतेत्याशय । एवमपि कथं सन्देहोपपत्तिरित्याशङ्क्य * तनेत्युक्तम् * गुणफलात्मकानेकार्थोपादानस्य पूर्वत्रासम्भवे भेदकत्वात्सम्भवे चाभेदकत्वात्सम्भवासम्भवविषयः सन्देहो भेदाभेदसन्देहहेतुरित्याशयः । नन्वेवमपि किमग्निहोत्रहोमान्तरमिति पूर्वपक्षवचनव्यक्तिप्रतियोगितया स एवेति सिद्धान्तवचनव्यक्तिर्दर्शयितव्या न गुणात्फलमितीत्याशङ्क्याह * तत इति * यतः कारणात्पूर्वकर्मण्यनेकार्थोपादानसम्भवासम्भवसन्देहो भेदाभेदसन्देहहेतुस्ततः कारणादेतयोः सम्भवासम्भवयोः सिद्ध्यर्थं फलान्वयः कस्येति विचार्यमित्यर्थः । कर्मणां हि फलान्वये ऽनु

पादेयफलान्वयेन कर्मोत्पत्तेः प्रतीयमानाया बाधकस्य प्रत्यभिज्ञा-
नस्य गुणाधिक्येनाभावात्पूर्वस्मिन्कर्मणि गुणफलोपादानासम्भवः ।
गुणफलान्वयत्वाश्रयत्वेन पूर्वकर्म्मापेक्षणात्सम्भव इत्याशयः । वृ-
त्त्यन्तरोदाहृत्यातिक्रमेणोहोदाहरणान्तरोपादाने प्रश्नपूर्वकारणमा-
५४१।१ ह * किमर्थं पुनरिति * ननु भेदाभेदयोरनुष्ठानविशेषानुपयोगे
ऽपि कर्मणः फलान्वये दधिगोदोहनादेः क्रत्वर्थत्वात्फलकामनां
विनाप्यनुष्ठानं विकृतौ चातिदेशः स्यात् गुणफलान्वये तु पुरुषार्थ-
त्वात्सत्यां कामनायामनुष्ठानमनतिदेशाश्चेत्यनुष्ठानविशेषस्य द्वये
ऽपि साम्याद्विशेष इत्याशङ्क्याह * क्रत्वर्थेति * गोदोहनादेः पुरु-
षार्थतैवोन क्रत्वर्थतापीति क्रत्वर्थपुरुषार्थचिन्ता चतुर्थे करिष्य
माणत्वान्नेह कार्येत्याशयः । नन्वनुष्ठानविशेषानुपयोगे ऽपि भेदाभे-
दनिर्णयस्तावद्भविष्यतीत्याशङ्क्याह* इह त्विति * अनुष्ठानानुपयो-
गिनिर्णयानर्थक्यादुपयोगानुगुणमेवोदाहार्यमित्याशयः । कथं गोदो-
हनोदाहरणे भेदाभेदयोरनुष्ठानविशेषानुपयोग इत्याशङ्क्योपपादयति
* न चेति * ननु गोदोहनात्फले क्रत्वर्थप्रणयनाश्रितस्य फलसा-
धनत्वादन्तः क्रतुप्रयोगः प्रणयनात्तु फले क्रत्वर्थात्प्रणयनात्तस्य भे-
दापत्तेर्विवा एतद्यज्ञाच्छिद्यते यदन्यस्य तन्त्रे प्रतेतत् ऽन्यस्य तन्त्रं
प्रतीयतइति क्रतुमध्ये ऽन्यप्रयोगनिषेधाद् बहिः क्रत्वित्यनुष्ठानविशेषा-
शङ्कानिरासार्थम् * प्रणयनस्येत्युक्तम् * देशान्तरप्रापणरूपसं-
स्कारस्वभावत्वात्प्रणयनस्य प्रणेतव्यापेक्षायां स्ववाक्ये प्रणेतव्याश्र-
वणाच्चमसेनापः प्रणयन्तीति सन्निहितवाक्यान्तरश्रुतानामपां प्र-
णेतव्यत्वावगतेस्तासां च क्रत्वर्थत्वेन नैराकाङ्क्ष्यात्पदकर्मवत्प्रण-
यनस्याप्रयोजकत्वेनान्यासामनाक्षेपाद् बहिः प्रयोगे च पृथगितिक-
र्त्तव्यतानुष्ठानाक्षेपापत्तेः प्रयुक्तिलाघवार्थं भेदे ऽप्यन्तः क्रतुप्रयोगः
सेत्स्यतीत्याशयः । दध्युदाहरणे तु भेदाभेदयोरनुष्ठानविशेषोपयो-
गो ऽस्तीत्याह * इह पुनरिति * नन्विहापि पृथगितिकर्त्तव्यतानु-
ष्ठानाक्षेपापत्तेः प्रयुक्तिलाघवायान्तः क्रतुप्रयोगो भविष्यतीत्याशङ्क्य
* दर्वीत्युक्तम् * सर्वेषां जुहोतिचोदितानां दर्विहोमाख्यत्वस्यापू-
र्वत्वस्य च वक्ष्यमाणत्वादित्याशयः । अग्निहोत्रविध्यन्तग्रहणात्सा-
यम्प्रातरभ्यासससिद्धेः सकृत् क्रियानुपपत्तिशङ्कानिरासार्था वा पूर्वो-
क्तिः प्रयोजनाभावमात्रेण चेह गोदोहनस्यानुदाहरणोक्तिः । पर-
मार्थतस्तु तस्यापि दाक्षायणादेरुक्थ्यादिसंस्थानां च फलान्वयेनैनैव
न्यायेन सिद्धे तत्र तत्रांशान्तरचिन्तेति द्रष्टव्यम् । ननु स्वर्गे याव-
ज्जीवशब्दोक्ते च जीवने ऽनुपादेये विधीयमानो ऽपि होमः प्रत्यभि-

ज्ञानाद्यथा न भिद्यते तथेहापीति कर्मफलान्वयोक्तेर्भेदानुपयोग-
माशङ्कते * नन्विति * गुणाधिक्येनाप्रत्यभिज्ञानाद्वैषम्यमा-
ह * नैतदिति * श्लोकं व्याचष्टे * फलेति * प्रत्यभिज्ञासम्भवं
प्रश्नपूर्वमुपपादयति * कुत इति * श्लोकं व्याचष्टे * अग्निहोत्र- ५४२।२
मिति * शुद्धोत्पन्नस्यापि वाक्यान्तरेण दधिवैशिष्ट्यात्प्रत्य
भिज्ञानं शङ्कते * नन्विति * तस्यामुत्पादकत्वेन मुख्यत्वनि-
मित्तबलीयस्त्वाभावादुत्पत्तिप्रतिबन्धकत्वं न सम्भवतीत्याशयेन प-
रिहरति * नेति * एतदेव विवृणोति * येन तावदिति * अतु-
ल्यकार्यत्वादन्यगुणवाक्यस्योत्पत्तिप्रतिबन्धकत्वं न सम्भवतीत्याह
* उत्पत्तीति * फलवाक्यानन्वयादपि गुणवाक्यस्य फलोत्पाद-
कत्वप्रतिबन्धकत्वं न सम्भवतीत्याह * उत्पत्तीति * एतदेव
प्रश्नपूर्वमुपपादयति * कुत इति * गुणादिवाक्यानामपेक्षास-
न्निधिभ्यामुत्पत्तिवाक्येनैवान्वयः । परस्परं त्वनपेक्षत्वादेव तावदन-
न्वयः दध्नेन्द्रियकामस्येत्यादौ कथं चिदपेक्षासम्भवेऽप्यसम्बद्ध-
व्यवायेनाननुषङ्गात्सन्निधिरनाशङ्क्य एवेत्यर्थः । श्लोकं व्याचष्टे * अ-
नुत्पन्नस्येति * नन्वित्यनेन परस्परानपेक्षोत्पत्तिमेवापेक्षन्तइत्यव-
धारणाभ्युपगमेन सूचिता चतुर्थे त्वेकस्य दध्नः क्रत्वर्थत्वे पुरुषा-
८ र्थत्वे च दध्ना जुहोति दध्नेन्द्रियकामस्य जुहुयादिति संयोगपृथक्त्वं
कारणमित्युक्ते शेष इति चेदिति सूत्रेण दध्ना जुहोतीति विहितस्य
दध्नः फलापेक्षायामितरेण इन्द्रियफलत्वोक्तेरेकवाक्यत्वात्संयोग-
पृथक्त्वाभावमाशङ्क्य नार्थपृथक्त्वादिति सूत्रेण होमार्थत्वेन विहितस्य
दध्नः फलानाकाङ्क्षत्वादेकवाक्यताभावं वक्ष्यतीत्याह * वक्ष्यति
चेति * ननु फलवाक्यस्य गुणवाक्यानन्वयेऽप्युत्पत्तिवाक्येनैव
गुणवाक्यान्वितेनान्वयाद्दधिविशिष्टप्रत्यभिज्ञोपपत्स्यतइत्याशङ्कते *
तत्रेति * एवमपि ।

पयोदधियवागूश्च सर्पिरोदनतण्डुलाः ।
सोमो मांसं तथा तैलमापस्तानि दशैव तु ॥

इति दश द्रव्यविशिष्टत्वादुत्पत्तेर्नेह प्रत्यभिज्ञा सम्भवतीत्या-
शयेन परिहरति * तदिति * दशद्रव्यवैशिष्ट्याद्वैलक्षण्येन प्र-
त्यभिज्ञाने निरस्ते यदि कश्चित्फलवाक्ये गुणवाक्यानालोचनाद्वै-
लक्षण्यं ब्रूयात्तन्मते प्रत्यभिज्ञानुत्पत्तिः प्रागेवोक्तेति सूचनपूर्वं श्लोकं
व्याचष्टे * उत्पत्तीति * ननु दशद्रव्यवैशिष्ट्ये सत्यप्याकाङ्क्षा- ५४३।२
वशाद्दधिमात्रविशिष्टो होमः फलवाक्ये ग्रहीष्यतइत्याशङ्कते * अथ
दधिसद्भावेति * फलवाक्यस्य दधिवाक्यान्वयमनपेक्ष्य गुणवा-

क्यान्वितोत्पत्तिवाक्यमात्रान्वयद्वारा फलवाक्येन दधिविशिष्टहो-
मग्रहणे सर्वगुणवाक्यानामगृह्यमाणाविशेषत्वेन युगपत्फलवा-
क्यान्वयात्केवलदधिविशिष्टहोमग्रहणाशक्तेस्तन्मात्रग्रहणमिच्छता
फलवाक्यस्य दधिवाक्यान्वयो ऽभ्युपेतव्यः स च प्रागेव वारित
इति परिहरति * तथा सतीति * ननु दशानां द्रव्याणां समुच्च-
येन होमविशेषणत्वे सति दधिमात्रविशिष्टहोमग्रहणाशक्तिरस्तु तेषां
तु विकल्पेनान्वयाशक्यो दधिमात्रविशिष्टो होमो ग्रहीतुमित्याश-
ङ्क्याह * अपि चेति * एवमपि नित्यपाक्षिकत्वेन वैलक्षण्यात्प्रत्य-
भिज्ञा न सम्भवतीत्याशयः । श्लोकं व्याचष्टे * यद्यपि तावदिति *
ननु फलवाक्येनापि दधिपक्ष एव होमो ग्रहीष्यतइत्याशङ्क्याह *
न चेति * उद्देशं विना यदाशब्दान्वयायोगात्फलोद्देशे च होम-
स्योपादेयत्वावगतेरुद्देश्यत्वायोगान्नित्यं दध्नोः विशेषणत्वापत्तेर्नि-
त्यदधिविशिष्टस्य च होमस्यान्यतो प्राप्तेर्विधेयत्वाद्भेदापत्तिरित्याश-
यः । ननु नित्यदधिविशष्टरूपाप्रत्यभिज्ञाने ऽपि फले विधीयमानस्य
होमस्वरूपस्य प्रत्यभिज्ञानोपपत्तेः कर्मफलान्वयोत्तरकालं कर्मणो
गुणाधिक्यं विधीयमानमपि न भेदमापादयतीत्याशङ्कते * नन्वि-
ति * एवं सति प्रत्यभिज्ञोपपत्तावप्यनेकार्थविधानादाग्नेयादिष्विव
५४४।२ कर्मभेदापत्तिरिति परिहरति * नैतदिति * श्लोकं व्याचष्टे * द-
धिहोमेति * ननु विकल्पेन प्राप्तस्य दध्नो नियममात्रकरणान्नाने-
कार्थविध्यापत्तिरित्याशङ्क्याह * यथैव चेति * नियमस्यापि
विधित्वादन्यथा च गुणवाक्यानालोचने ऽप्यर्थादनियतानेकद्रव्यप्रा-
प्तेर्दधिशब्देन नियममात्रकरणात्कर्मफलान्वयरूपैकार्थविधानादवा-
क्यभेदापत्तेर्यथा दध्यादेर्वाक्यान्तरेण विधाविन्द्रियकामवाक्ये यदि
फलान्वयमनादृत्य केवलो दधिनियमः क्रियते तत एवैकार्थविधानं
फलान्वयस्यापि तु विधेयत्वादपरिहार्यमनेकार्थविधानतया वैक-
ल्पिकपशुद्रव्यफले वाक्यान्तरैः कल्पिते ऽपि यदि केवलस्य दधि-
नियमस्य करणं तत एवैकार्थविधानं सिद्ध्येन्न त्वेतदस्तीति व्यवधा-
रणकल्पनया ज्योज्यम् । विशेषतो ऽस्मिन्पक्षे तण्डुलादिपरिसंख्याप-
त्तेरपरिहार्यानेकार्थतेति तण्डुलादीत्यनेनै सूचितं फलान्वयस्यापि
तु करणं दधिनियमस्याप्यन्यतो प्राप्तस्य करणादपरिहार्यो वाक्य-
भेद इति सूचयितुमाह * न हीति * होमात्फले भेदापत्तिमुपपा-
दितामुपसंहरति * तेनेति * विधेयशब्दाध्याहारेण कर्मात्र विधेयं
स्यादिति भेदसिद्ध्यै कर्मविधित्वं प्रतिज्ञाय तद्धेतुत्वेन कर्मणः फ-
लान्वयः सूत्रशेषेणोक्त इत्येवं किमित्यादिभाष्यव्याख्याते ऽथ सूत्रं

योजयन् पूर्वपक्षमाह * अत इति * भाष्यस्थन्याय्यशब्दं भावार्था-
धिकरणन्यायविषयं सूचयन् श्लोकं व्याचष्टे * समस्तमेवेति *
कर्मणः फलान्वयसम्भवो गुणस्य चासम्भव इति द्वयस्यापि भा-
वार्थाधिकरणसिद्धत्वोक्त्यर्थः समस्तशब्दः । ननु फले गुणविध्य-
योगे ऽपि कर्मणि गुणो विधास्यते ऽत आह * नेति * एतदेव
प्रश्नपूर्वमुपपादयति * कथमिति * अप्राप्तस्यापि गोदोहनादेः
फलश्रुतिवैयर्थ्यापत्तेर्न कर्मणि विधिर्युक्त इत्युत्तरार्द्धेनोक्तं श्लोकं
व्याचष्टे*तत्र नामेति* कर्मणि गुणविध्ययोगे ऽपि फले गुणविधि-
र्भविष्यतीत्याशङ्कापि तस्माद्धोमात्फलमिति न्याय्यम् । न दध्नः फ-
लमिति न्याय्यमित्यादिभाष्यपर्यालोचनया कर्मण एव न्याय्यं न गु-
णादित्यवधारणप्रतीतेरनेनैव भाष्येण निरस्तेति सूचयन् समस्तं पूर्व-
पक्षभाष्यं व्याख्यानायावतारयति* अत इति * समस्तं भाष्यमव-
तारितमवयवशो व्याख्यास्यमानं किमित्यस्य दृष्टं हीत्येतदेकवाक्यत-
या भिन्नवाक्यतया च द्वेधा प्रतिभाने ऽप्येकवाक्यतैव युक्तेति वक्तु-
मुपक्रमते * तत्रेति * एतद्भाष्यमध्यइति तत्रशब्देनोक्तं भिन्नवाक्य-
त्वव्याख्यां दूषयितुमुपन्यस्यति * एकस्तावदिति * ननु दृष्टं ही- ५४५।२
त्येतदेकवाक्यतया किमेतदेव न्याय्यत्वे कारणं कारणान्तरं वेति
कारणविशेषप्रश्नप्रतीतेः किमितीति कारणप्रश्नार्थत्वेन व्याख्या न
युक्तेत्याशङ्क्यैतावानित्युक्ते तदुपपादनार्थम् * नेतीत्युक्तम् * सि-
द्धान्तप्रक्रियात्वं नञ्योगान्निराकरणप्रतीत्योपपादितं दृष्ट हीत्यादेस्तर्हि
कथं योजनेत्यपेक्षायाम्*इतर इत्याद्युक्तम्* दृष्टं हीत्यनेन पूर्वपाक्षि-
णोक्ते सामान्यतो दृष्टेनेत्यादिना सिद्धान्ती स्वयमेव यदीत्याद्याशङ्क्य
शङ्कां निराकरोतीत्यर्थः । नेति ब्रूम इत्यादेर्दृष्टाद्दृष्टसिद्धिरित्येतस्य
सिद्धान्तग्रन्थत्वे कथं तर्हीति सिद्धान्ती प्रश्नस्यासङ्गतत्वापत्तेरिमां
व्याख्यां दूषयति * तत्र त्विति * पूर्वपाक्षिप्रश्न एव तर्ह्यसावस्त्वि-
त्याशङ्क्य होमफलान्वयाक्षेपविषयत्वात्सिद्धान्तिप्रश्नत्वावगतिरै-
कान्तिकशब्देन सूचिता स्वमतेन दृष्टं हीत्येकवाक्यतया किमिति
प्रश्नं व्याख्यातुं सम्यक्त्वं तावदाह * इतीति * कीदृशीत्यपेक्षा-
यामाह * तच्चेति * स्थितन्यायसम्भवोपपादनार्थम् * दधीत्युक्त-
म् * नन्वनन्यप्रमाणकत्वाद्वेदार्थे ऽनुमानाशङ्का न युक्तेत्याशङ्क्याह
* यद्यपि चेति * वेदावगम्ये ऽर्थे ऽनुमानादीनां निषिद्धे ऽपि
कारणत्वे वेदार्थसन्देहे यो ऽनुमानाद्यविरुद्धः सो ऽङ्गीकार्यो न विरुद्ध
इत्येवं वेदार्थनिर्णये तेषां हेतुत्वं भविष्यतीत्याशयेनेतीति पूर्वप-
क्षभाष्यं व्याचष्टे * पुनः पुनरिति * सामान्यतो दृष्टे पूर्वपक्षिणा

होमफलान्वयरूपवेदार्थनिर्णायकत्वेनाभ्युपगम्यमाने बहून् दोषानु-
द्भावयिष्यामीत्येवं दुष्टाशयेन सिद्धान्तिना सामान्यतो दृष्टं मद-
भिप्रेतत्वेनारोपितमिति विदितसिद्धान्त्याशयत्वं पूर्वपक्षिणः सूच-
यितुं * मेत्युक्तम् * निर्दोषकारणासम्भवे काशकुशावलम्बन-
न्यायेनानुमानं मया वाच्यं शब्दस्य करणस्य सद्भावादनुमानस्य च
बहुदोषत्वेन मयापि ज्ञातत्वान्नानुमानमहं ब्रवीमीत्यर्थः । कृष्या-
दितः कर्मणः सकाशाद् व्रीह्यादिफलं दृष्टमिति कर्मफलान्वयस्य
न्याय्यत्वे कारणमारोपयता सिद्धान्तिना यत्कर्मफलान्वये साध्ये
कर्मणः फलवत्तया दर्शनमुक्तं तत्किं हेतुत्वेन सादृश्यरूपेण वा
साधर्म्यमात्रत्वेनैवेति त्रेधा विकल्प्य स्वयमेवाशङ्काशङ्का पूर्वपक्षि-
णा यदीत्यादिभाष्येण निरस्तं तद्व्याख्यातुमुपक्रमते * कथमिति *
यदीति हेतुत्वाशङ्काभाष्यं व्याचष्टे * यदि तावदिति * कृष्यादा-
विति भाष्येण होमविषयः कर्मशब्दः कृष्यादिविषयो वेति विक-
ल्पहोमदर्शनमसिद्धं कृष्यादौ च यद्दर्शनं तद्धोमधर्म इति दोषद्व-
यमुक्तं तद्व्याचष्टे * तत इति * फलवत्त्वस्य साध्यत्वेन साध्यध-
र्मविशिष्टधर्मिरूपप्रतिज्ञार्थैकदेशत्वादसिद्धेरसतश्च दर्शनायोगादसि-
द्धत्वाशय. । स्थवीयसो ऽपि द्वितीयकल्पस्य कृष्यादितः कर्मण
इति सामानाधिकरण्यादाद्यकल्पे ऽपि च होमस्थस्य फलवत्त्वदर्शन-
स्य कृष्यादावन्वयाभावेन स्थवीयस्त्वतुल्यत्वादुत्थानं ननु दृष्टं हीति
भाष्यस्य व्याप्त्याभिधानमात्रार्थत्वात्तद्गतस्य कर्मशब्दस्य हेतुविशे-
षणार्थत्वाप्रतीतेर्फलवत्त्वदर्शनमात्रं व्याप्तिपक्षधर्मत्वसम्भवाद्धेतुरि-
त्याशङ्कार्थमथेति भाष्यं होमे फलवत्त्वदर्शनमात्रस्याप्यसिद्धत्वे-
नापक्षधर्मत्वापरिहारादयुक्तमाशङ्कोपपादयति * अथ विनेति *
वस्तुतो सदपि पक्षधर्मत्वं कल्पनया ऽभ्युपगम्याशङ्केत्याशयः ।
वास्तवपक्षधर्मत्वाभावे ऽपि कल्प्योत पक्षधर्मतेत्यर्थः । फलवत्त्व-
मात्रस्याद्रव्ये ऽपि तन्त्वादौ पटादिफले दर्शनात् द्रव्यादपि दध्नः
फलापत्तेरिष्टविघातकारी हेतुस्तन्त्वादेर्वा निष्फलाभ्युपगमे ऽप्यन्व-
यव्यतिरेकजस्य फलवत्त्वदर्शनस्यापह्नोतुमशक्यत्वादनैकान्तिक इत्य-
भिधानार्थं द्रव्यादपीति भाष्यं व्याचष्टे * तत इति * ननु सौर्यादौ
प्रयाजादिदर्शपूर्णमासधर्मान्वयेनावगतात्सादृश्यात्तदीयानुयाजादि-
धर्मान्तरान्वयस्य तथा हि लिङ्गदर्शनमिति वदता वक्ष्यमाणत्वात्प्र-
सिद्धधर्मान्वयेन प्रवृत्तस्योपमानस्याप्रसिद्धधर्मान्वये ऽपि प्रामाण्यप्र-
तीतेर्होमे कृषिसादृश्यात्फलवत्त्वोपमानं भविष्यतीत्याशङ्कार्थमथ
कृषीति भाष्यं व्याचष्टे * अथ सादृश्येति * उपमया फलवत्त्वं

कल्प्यतइत्यर्थः। साधनवैलक्षण्येन स्वरूपवैलक्ष्यण्येन च होमस्याप्य-
सादृश्यादुपमानासम्भवोक्त्यर्थं होमो ऽपीति भाष्ये किं चिद्वैलक्षण्ये
ऽपि व्यापाररूपत्वेन सादृश्याविघातादयुक्तमाशङ्क्योपपादयति *
तत्रेति * धर्मसामान्यभूयस्त्वलक्षणत्वात्सादृश्यस्य भूयस्त्वस्य ६४६।२
त्वापेक्षिकत्वेन भूयस्तरापेक्षायां भूयसो ऽप्यभूयस्त्वापत्तेः सुसदृ-
शापेक्षायां मन्दसादृश्यस्य सादृश्यभावो युक्त एवेत्याशयः। प्रक्षे-
पाधिकस्त्यागो विवक्षितः यदीत्यादिशङ्कोत्तराणि पूर्वपक्षवचनत्वे-
नैकग्रन्थत्वे ऽपि विवेकायास्माभिः पृथक् कृतानि सुसदृशानपेक्षणे
ऽतिप्रसङ्गापत्तिलक्षणकारणोक्त्यर्थमथेत्यादिभाष्यं व्याचष्टे * अथे-
ति * सदनित्यं द्रव्यवत्कार्यं कारणं सामान्यविशेषवदिति द्रव्य-
गुणकर्मणां सामान्यमिति कश्यपवचनादघ्नो ऽपि सद्रूपत्वादि-
धर्मसामान्ययोगेन कृषिसादृश्यापत्तेस्तत्परिहारार्थं सुसदृशापेक्षेति
यो ऽभिप्रायः पूर्वं मनसि कृतः सो ऽनेन विवृत इत्यर्थः। होमो
ऽपीति भाष्याभिप्रायविवरणार्थमथ द्रव्यादिभाष्यं व्याचष्टे * अथे-
ति * भाष्यार्थं वृद्धश्लोकेन सङ्क्षिपति * आह चेति * न चे-
तिभाष्यमुपमानस्य यावद्दृष्टैकावच्छिन्नापराधारधर्मविषयत्वेनाप्रसि-
द्धधर्मान्वये प्रामाण्यायोगात्सौर्यादौ तु प्रकृतधर्मातिदेशस्य करणा-
नुग्रहान्यथानुपपत्तिप्रभवार्थापत्तिप्रमाणकत्वेन लिङ्गदर्शनस्योपोद्-
बलनमात्रार्थत्वात्सादृश्यमात्रेणादृष्टधर्मोपमानं न सम्भवतीत्यभि-
धानार्थं जातिप्रयोगापत्तेः साधर्म्यमात्रेणानुमानं न सम्भवतीत्य-
भिधानार्थं वेति द्वेधा व्याचष्टे * न चेति * फलवत्तया दृश्य-
मानकृषिसाधर्म्याद्धोमस्य फलवत्त्वानुमाने सत्त्वादिना द्रव्य-
साधर्म्यादघ्नो ऽपि फलवत्त्वं स्यादिति साधर्म्यसमाख्या जातिः सा-
धनादिवैलक्षण्येन कृषिवैषम्यान्निष्फलतेति वैधर्म्यसमाख्याविक-
ल्पसमाख्यादीन्यपि जात्यन्तराणि यथासम्भवं योज्यानि साधर्म्य-
शब्देन भाष्यस्थस्य सादृश्यशब्दस्य व्याख्यान्तरं कृतम्। मात्रशब्द-
व्याख्यानायोनुमानवादोक्तनियम्यनियामकत्वलक्षणव्याप्यव्यापक-
भावे नैरपेक्ष्योक्तिः साधर्म्यमात्रेण सर्वधर्मप्राप्त्ययोगं चोदनासू-
त्रस्थेन भाष्येण द्रढयति * तथा चेति * उपमानेन सर्वधर्मप्राप्त्य-
योगमुपपादयति * तथा हीति * यद्धीतिभाष्यं स्वरूपतस्तावद्व्या-
चष्टे * यद्धीति * आक्षेप्तुमाह * अत इति * साध्याक्षेपकत्वश-
क्तिः प्रयोजकत्वाख्या कारणशब्देनाभिप्रेतेति समाधत्ते * तस्मा- ६४७।४
दिति * दृष्टान्ते सन्ततोर्ध्वगत्याद्यवच्छिन्नस्य धूमादेर्विपक्षवृत्त्यभा-
वात्साध्याक्षेपशक्तिलक्षणप्रयोजनकत्वरूपव्याप्यत्वावगमे ऽपि गो-

पालघटिकादौ तादृग्रूपत्वाभावे साध्यानाक्षेपकत्वदर्शनात्पक्षे ता- द्रूप्येणैव प्रत्यभिज्ञायमानस्य साधकतेति वक्तुं सपक्षे यद्व्याप- कस्य साध्यभूतस्य गमकत्वसम्भावनात्मककारणत्वलक्षणव्याप्य- त्वरूपेण दृष्टं तदन्यत्र पक्षे तथाविधमेव गृह्यमाणं साधकमिति व- दता तच्च यथाविधं करणभूतं तथाविधमेव साध्ये ऽप्यवगम्यतइ- त्येवं कारणभूतमितीतिकरणस्य तादृग्रूपप्रत्यभिज्ञानार्थत्वमभ्युगम्य भाष्यं व्याख्यातं कारणशब्दस्य शक्त्यभिप्रायत्वं प्रकटयितुं न त्वप्र- सिद्धेः कार्यकारणभावइति भाष्यस्य स्वयं कृतां व्याख्यां स्मारयति *एवं चेति * न चैतत्स्वमनीषिकामात्रेणैवं व्याख्यायते किं त्वत्र- स्योपसंहारभाष्यालोचनयैवेत्याह * तथा चेति * अथेति हेत्व- न्तराशङ्काभाष्यं तन्निरासार्थं चोपरत इति भाष्यमेकग्रन्थेनावतार- णापूर्वकं व्याचष्टे * यदि तर्हीति * इदमा पक्षधर्मत्वाभावेन दूषि- तात्फलवत्त्वदर्शनात्कर्मत्वस्य हेतोः पक्षधर्मत्वनिश्चयाद्विशेषः सू- चितः । भाष्योक्तस्यानुमानस्य प्रतिज्ञाहेतुदृष्टान्तान्वदताग्निहोत्रवा- क्यविहितस्य कर्मणः सिद्धान्तिनापि फलवत्त्वाभ्युपगमात्सिद्ध- साध्यतापरिहारायात्र वाक्ये यच्छ्रुतमिति विशेषितम्।अर्थाक्षिप्ते प्र- योगान्तरे फलस्याप्येतदेव विशेषणमिदमोक्तमनुमाप्येत्यनेन दृष्टं हीति भाष्योक्तस्यैवानुमानस्यायमपि विकल्प इति सूचितं सम्प्रति साध- नत्वस्यापि सन्देहहेतुत्वेनैकान्ताख्यनिर्णयसाधकत्वाद् * अनैका- न्तिकी करोतीत्युक्तम्* तदेव फलवदिति सावधारणस्य प्रतिज्ञार्थ- त्वात्सम्प्रति साधनत्वोपपत्तिः दधिहोमसम्बन्धस्यापि सिद्धान्तिना फलसाधनत्वेनेष्टत्वात्तदभिप्रायेणैतद्वाक्यश्रुतौ दधिहोमसम्बन्धः फलवान्द्रव्यसम्बन्धत्वात्तन्तुसंयोगवदित्यनुमानसूचनार्थं संयोगा- नां चेति भाष्यावयवनोक्ते दधिहोमसम्बन्धस्य द्व्याश्रितत्वेन द्रव्यमात्राश्रितत्वाभावाद् द्रव्यसम्बन्धत्वस्यासिद्धत्वमाशङ्क्यानेका- श्रितत्वे ऽपि योगस्य द्व्याश्रयत्वे ऽपि भवत्यन्यतराश्रयो व्यपदेश इ- त्यनेन न्यायेनैकाश्रितत्वाविरोधसूचनार्थस्तच्छब्दः शक्तिरूप एव च क्रियाकारकयोः सम्बन्ध इतिवार्त्तिकाच्छक्तेः फलसाधनत्वप्रती- तेर्दध्नेति तृतीयोक्ता दध्नो होमकरणत्वाच्छक्तिः फलवती शक्तित्वा- त्तन्तुशक्तिवदिति चशब्दसूचितानुमानान्तरप्रदर्शनायादिशब्दः प- टादेर्वानादिकर्मजन्यत्वात्साध्यविकलत्वं दृष्टान्तस्याशङ्क्य कर्मणो विनष्टत्वेनाभावे सति पटाद्युत्पत्तेस्तन्तुजन्यत्वायोगोक्त्यर्थत्वेनोपर- तग्रहणं व्याख्यातुम् * उपरतेत्याद्युक्तम् * फलोत्पत्तिकाले उप- रतग्रहणसूचितः साध्यविकलत्वाभावस्तद्दर्शनार्थमित्यर्थः । कर्मा-

भावे फलोक्तिदर्शनार्थमित्यर्थः द्रव्यमपीति भाष्यावयवव्याख्याना-
र्थम् * तेनेत्युक्तम् * उपरनग्रहणा सूचितः साध्यविकलत्वाभा-
वस्तच्छब्देन परामृष्टः अपि चेति भाष्ये धर्मविशेषाविपरीतसाधन-
त्वलक्षणविरुद्धत्वोक्त्यर्थत्वेन व्याचष्टे * अपि चेति * दृष्टो ऽर्थः
फलमस्येति विग्रहः प्रत्यक्षदृष्टत्वस्याशब्दगम्यत्वोक्त्या व्याख्यानादा-
नन्तर्याशयो ऽयं दृष्टशब्दः ये ऽपि यथा निरपेक्षस्य कर्मणः संयोगवि-
भागौ फलमभिघाताद्यपेक्षस्य च वेगाख्यः संस्कारस्तथावयवसंयो-
गापेक्षस्यावयविद्रव्यमपीति वदन्ति । तन्मते ऽप्यवयवसंयोगापेक्ष-
त्वात्तदारब्धमवयविद्रव्यमेव व्रीह्यादितुल्यं स्यात् नापरोक्षार्थग्रह-
णशक्तिरूपमिन्द्रियमित्यभिधानार्थं कुपीति भाष्यं व्याख्यातुम्* व्री-
ह्यादीत्युक्तम् * तस्मादिति पूर्वपक्षोपसंहारभाष्यं व्याचष्टे * त-
स्मादिति * एवं जातीयकशब्देन शब्दैकसमधिगम्यत्वोक्त्या हेतो-
रप्रयोजकत्व सूचितं कथं तर्हीति सिद्धान्तिप्रश्नभाष्यमवधिद्वयेन
व्याचष्टे * यदीति * द्वितीयावधिनोत्तरभाष्यं व्याचष्टे * उच्य- ५४८।१
तइति * आद्यावधिपक्षे शब्देनेत्यवधारणीयं विशिष्टविधानाद्दधि-
पदानर्थक्यमपरिहार्यमित्याशयः । तस्मादित्युपसंहारभाष्यमेकस्य
न्याय्यत्वोक्त्यावितरान्याय्यत्वस्यार्थसिद्धत्वेनातिरिक्तत्वादयुक्तमाश-
ङ्क्य समाधत्ते * तस्मादिति * न केवलमेकभेदोपादानलक्षणया
श्रुत्या होमस्य फलभावनाकरणत्वावगतेर्वाक्योपात्तस्य दध्नः कर-
णत्वाभावः किं तु दध्नः फले होमे च विधौ वाक्यभेदापत्तेरपीत्य-
भिधानार्थमपि चेति भाष्यं होमे दधिविधेः सिद्धान्तिनो ऽनिष्टत्वा-
दयुक्तमाशङ्क्योपपादयति * अपि चेति * निर्व्यापारस्याव्यापार-
रूपस्य करणत्वायोगादापाद्यैतदुक्तमित्याशयः । नन्वित्याशङ्काभाष्यं
वस्तुसामर्थ्ये ऽपि वाक्यभेदापत्तेरुभयार्थत्वेन विध्ययोगाद्विध्यधीन-
त्वाच्च तादर्थ्यस्यायुक्तमाशङ्क्य व्याचष्टे * नन्विति * फलार्थ-
मेव विहितस्याश्रयापेक्षायां प्रकरणाद्धोमस्याश्रयत्वावगमात्प्रसङ्गेन
होमसाधनत्वसिद्धेर्नोभयार्थत्वायोगोभयत्र विध्यापादनं युक्तमित्या-
शयः । यद्वैकस्य वस्तुनो ऽनेककार्याशक्त्याशयमसामर्थ्याभिधान-
मिति मत्वेयमाशङ्केत्यन्यथा व्याचष्टे * वस्त्विति * नन्वेकस्य
वस्तुनो ऽनेककार्योत्पादनशक्तेरनेकत्र दर्शनाद्वस्तवशक्त्याशयेनासा-
मर्थ्योक्त्यनुपपत्तेर्विध्यशक्त्याशयैर्वा सामर्थ्योक्तिरवसीयतइत्याश-
ङ्क्याह * तथा हीति * न ब्रूम इति परिहारभाष्यं व्याचष्टे * न
ब्रूम इति * अविहितेत्यनेनाश्रयापेक्षायामपि विधिं विना दधिहो-
मान्वयानुष्ठानासिद्धेः प्रसङ्गसिद्धिर्निरस्ता युगपत्सम्भवासम्भवा-

भ्युपगमापत्तेरभ्युभयार्थत्वेन विधिर्न सम्भवतीत्याह * सन्निकृष्टे-
ति *स्वपदार्थेऽन्यान्वयविधानाद्दधिहोमान्वयः सन्निकृष्टः । ननू-
भयार्थत्वेन विध्ययोगेऽपि फलपदानर्थक्यपरिहारार्थं सन्निकृष्टत्या-
गेन विप्रकृष्टः विधिरपि युक्त इत्याशङ्क्याह * तस्मादिति * दधि-
विशिष्टस्य होमस्य फले विधौ स्वपदार्थस्यैवान्यान्वयविधानात्स-
न्निकृष्टविध्युपपत्तेस्तदभिमतो विप्रकृष्टविधिर्न सम्भवतीत्याशयः । त-
स्मादिति पूर्वपक्षोपसंहारभाष्यं सूत्रोक्तकर्मफलान्वयोपसंहारार्थ-
त्वेन व्याचष्टे * इतीति *

अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत ॥२६॥

स्वर्गकामवाक्यातुल्यत्वोक्तेर्भावार्थाधिकरणन्यायाविषयत्व-
६४९।१ सिद्धिं प्रयोजनमाह * यादृशेष्विति * फलस्यैकत्र कर्मान्वयेनाप-
रत्र गुणान्वयेनातुल्यत्वं भाष्यव्याख्यातं प्रश्नपूर्वमुपपादयति * क-
थमिति * सर्वत्रविधेर्भावनाविषयत्वाद् गुणसञ्चारायोगाशङ्कानि-
रासमाधाराग्निहोत्राधिकरणोक्तं स्मारयन् श्लोकं व्याचष्टे * भाव-
नास्थमेवेति * नन्वग्निहोत्रनामवद्दधिपदस्यापि वैकल्पिकदाधि-
प्राप्तेस्तत्प्रख्यन्यायेन नामत्वोपपत्तेर्विधातव्यार्थत्वायोगान्न तेन धा-
त्वर्थापतितस्य विधित्वस्य धात्वर्थादुत्तारणं सम्भवतीत्याशङ्क्य
* अशेषेत्युक्तम् * कर्मविषयतत्प्रख्यान्यशास्त्रसद्भावेऽपि फले
तत्प्रापणवैयर्थ्याभावान्नेह तत्प्रख्यन्यायोऽस्तीत्याशयः । ननु विधे-
यान्तरोपादानेऽपि विशिष्टविध्युपपत्तेर्धात्वर्थाद्विधित्वानुत्तारणाद्द-
धिविशिष्टस्य होमस्य साधनत्वोपपत्तिरवसीयतइत्याशङ्क्याह * न
चेति * तत्सन्निधेर्गुणार्थेन पुनः श्रुतिरित्यत्रोक्तं परामृष्टम् । ननु वि-
शिष्टविध्ययोगेऽपि होमे दधिविध्युपपत्तेर्न गुणफलान्वयः सेत्स्य-
तीत्याशङ्क्याह * यथा चेति * दध्नो वाक्यान्तरात् प्राप्तेस्तण्डु-
लादिवैयर्थ्यापत्तेश्च तद्व्युदासार्थविध्याशङ्कायोगान्न होमदधिविधि-
रित्याशयः । गोदोहनादेः प्रणयनादौ विध्याशङ्कां दधिव्याजेन निर-
सितुम् * फलेत्युक्तम् * अतुल्यत्वोपपादनस्य प्रकृतोपयोगमाह
* तस्मादिति * गुणफलयोः कारकत्वेन क्रियां विनान्वयायोगा-
त्स दध्ना कुर्यादित्यनेन दधिविशिष्टभावनाविधावुक्ते नामपदयो-
र्भावनानभिधायित्वादाख्यातपदार्थस्य चाविधेयत्वाभ्युपगमाद्विधे-
यत्वाभ्युपगमे वा भावार्थाधिकरणोक्तश्रुतिबलीयस्त्वाद्धात्वर्थस्यैव
फलान्वयापत्तिरित्याशङ्कार्थं कतमोऽत्रेति भाष्यं व्याचष्टे * कत-
मोऽत्रेति * फलान्वयस्याप्रवृत्तप्रवर्त्तनात्मकाविधिविषयत्वाभावे

ऽप्यज्ञातज्ञापनात्मकविधिविषयत्वसद्भावात्प्राप्तायां च भावनायां
फलान्वयज्ञापने गुणान्वयज्ञापने च भावना वा विधिप्रत्ययावृत्तिलक्ष-
णवाक्यभेदापत्तेर्भावनाविध्यवगमे ऽपि धात्वर्थविध्यापादकहेत्वभा-
वान्न धात्वर्थस्य फलान्वयापत्तिरित्याशयेन जुहुयादित्युत्तरभाष्यं
व्याचष्टे * सिद्धान्तेति * विधित्वविधिसम्बन्धो विधेयतेत्यर्थः । ५५०।४
नन्वित्याशङ्काभाष्यं व्याचष्टे * नन्विति * ननु होमान्वयस्य
श्रौतत्वोक्तावपि विधेयत्वानभिधानात्कथमनेन प्रश्नाभिप्रा-
यविवरणमित्याशङ्क्याह * पुरुषेति * प्रत्ययान्तस्य पुरुषाव्यभिचा-
रित्वाद्विशेषणानर्थक्यापत्तेः पुरुषानुष्ठेयत्वेन प्रयत्नं वदतीत्यर्थाव-
गमाद्विध्यधीनत्वाच्चानुष्ठेयत्वस्य होमसम्बद्धं प्रयत्नं विधेयं व-
दतीत्यभिधानाद्धोमस्यापि विधेयतोक्ता भवतीत्याशयः । होमान्व-
यविधौ दधिपदानर्थक्यापत्तेस्तत्परिहारायैकपदोपादानलक्षणप्रत्या-
सत्तिरूपायाः श्रुतेः शब्दधर्मत्वेनाक्षरश्रवणलक्षणाश्रुतितो दुर्बलाया
बाधायुक्त एवेत्यभिधानार्थमत्रेति परिहारभाष्यं व्याचष्टे * सत्य-
मिति * अस्मदीयेष्वितिभाष्यं स्पष्टत्वादव्याख्याय युष्मदीये-
ष्विति भाष्यं पूर्वोक्तदधिश्रुतिबाधातिशयोपपादनार्थत्वेन प्रश्नपूर्वं
व्याचष्टे * कथमिति * श्लोकं व्याचष्टे * स्तोकार्थेति * तस्मादिति
पूर्वपक्षनिरासोपसंहारभाष्यं स्पष्टत्वादव्याख्याय स्वपक्षसाधुत्वो-
क्त्यर्थं गुणेति भाष्यं व्याचष्टे * गुणेति * अवश्यं हीति भाष्यं
शङ्कोत्तरत्वेनावतारयति * तत्रेति * एतदेव प्रश्नपूर्वमुपपादयति
* कथमिति * श्लोकं व्याचष्टे * प्रत्ययस्तावदिति * एवमपि धातु- ५५१।२
विशेषस्य कथं वक्तव्यतेत्याशङ्क्य * ततश्चेत्युक्तम् * अप्राप्तार्थधा-
तूच्चारणे धात्वर्थविध्यापत्तेर्गुणफलान्वयरूपविवक्षितार्थालाभात्प्र-
करणप्राप्तहोमानुवादिधातूपादानमङ्गीकृतमित्याशयः । होमशब्दस्त-
द्वाचिधातुलक्षणार्थः । ननु जुहोत्युपादाने ऽपि निराश्रयस्य गुणस्य
फलसाधनत्वायोगाद्विधित्सितस्याश्रयाश्रयिसम्बन्धस्यापि विध्याप-
त्तेर्वाक्यभेदे प्रसङ्गाज्जुहोत्यनुपादाने तु पशुकाम उक्थ्यं गृह्णीयादित्या-
दिवद्धोमं कुर्वता दध्नेन्द्रियं कुर्यादित्याश्रयाश्रयिसम्बन्धविधायिवा-
क्यकल्पनेन गुणफलान्वयोपपत्तेर्जुहोत्युपादानमयुक्तमित्याशङ्क्याह
* दधिसम्बन्धो ऽपि चेति * वाक्यभेदापत्तेः श्रुतस्य वाक्यस्याश्रयाश्र-
यिसम्बन्धाविध्यशक्तित्वेन वाक्यकल्पनाप्रतिबन्धकत्वादधिकारलक्ष-
णप्रकरणोपस्थापितहोमान्वयविधायकादेव वाक्यात्प्राप्तस्याश्रयाश्र-
यिसम्बन्धस्यानुवादान्न वाक्यभेदापत्तिरित्याशयः । अनेन चैक-
स्य विधेः सम्बन्धद्वयविध्यसामर्थ्यं पूर्वपक्षोक्तं परिहृतम् । नन्वनुवाद-

मात्रार्थत्वे जुहोतेरविवक्षितार्थत्वादानर्थक्यं स्यादित्याशङ्क्याह *
यथा चेति * अर्थाविवक्षायामपि प्रत्ययानुग्रहार्थवत्त्वेनार्थवत्त्वं भ-
विष्यतीत्यर्थ.। नन्वित्याशङ्काभाष्यं प्रत्ययानुग्रहायाप्युच्चारिताद्धातोः
प्रतीतस्य होमस्याश्रयत्वेनाप्यवश्यविधेयतया ग्रहैकत्ववद्विध्यसंस्प-
र्शलक्षणाविवक्षाकारणाभावाद्विधानापत्तेस्तस्यैव भावार्थाधिकरणं
न्यायात्फलसाधनं स्यादित्यभिप्रायत्वेन व्याचष्टे * नन्विति *
विध्यसंस्पर्शलक्षणाविवक्षाकारणाभावे ऽपि वाक्यभेदापत्तेरनुवाद्य-
त्वलक्षणाविवक्षाकारणासद्भावेनाविधेयात्वान्न फलसाधनत्वापत्ति-
रित्यभिप्रायं नेति परिहाभाष्यं व्याचष्टे * नैष दोष इति *
करोत्यर्थस्य होमान्वयप्रतीतावपि तन्निरपेक्षस्य विधेयत्वा-
नपायात्तन्मात्रविधानेन च गुणफलान्वयरूपप्रयोजनसिद्धेः कल्प-
विधिप्राप्तभावनावच्छेदकगुणाश्रयत्वाद्वा भावनाविशेषणत्वानुवा-
दोपपत्तेर्न विधेयत्वापत्तिरित्यर्थः । भाष्यमपि होमान्विता ऽपि
करोत्यर्थः शुद्ध एव विधेयो होमान्वयरूपस्तु करोत्यर्थविशेषो ऽनू-
द्यते केवलं ननु होमविशिष्टं प्रयत्नं कुर्यादिति करोत्यर्थविधौ होम-
विशिष्टतानूद्यमाना करोत्यर्थस्य विधेयतां बाधते येन सा ऽपि वि-
धेया स्यादिति व्याख्येयम्। नन्वित्यगृहीताभिप्रायशङ्काभाष्यं व्याचष्टे
* नन्विति * प्रतीयमानस्वरूपेणापरित्यज्यमानो होमो विधेयो ऽपि
भवन्करणीभवतीत्यपिशब्दसूचितो ऽर्थः परिहाराभिप्रायविवरणा-
र्थमुच्यत इति भाष्यं व्याचष्टे * सिद्धान्तेति * शब्दसामर्थ्याद्धो-
मान्वितभावनाप्रतीतावपि दधिपदानर्थक्यापत्तेर्होमस्य फलसाध-
नत्वेन विध्ययोगात्साधनत्वप्रतीतिर्भ्रान्तेत्यर्थः । साध्यत्वेनाविधे-
यत्वोक्तेः दृष्टान्तार्थत्वं वक्तुम् * यथैवेत्युक्तम् * दधिपदेत्यनेन
वाक्यशब्दस्य वाक्योपात्तदधिपदानर्थक्यापत्तिलक्षणहोमविधिनि-
रासहेतूक्त्यर्थतोक्ता दध्यवच्छिन्नाश्रितशब्देनोक्त्यंशशब्देन सूचितं
होमवैशिष्ट्यप्रतीतेस्तर्हि का गतिरित्याशङ्कानिरासार्थता विशि-
ष्टशब्दस्य यथा चेत्यनेनोक्ता। ननु होमस्याविधेयत्वे दध्नः साक्षा-
त्फलसाधनत्वापत्तेस्तस्येति सूत्रावयवेन होमस्याश्रयत्वोक्तिरयुक्ते-
त्याशङ्क्य यत एव दध्यवच्छिन्ना भावना गम्यते ऽत एव धात्वर्थान-
पेक्षस्य गुणस्य भावनावच्छेदकत्वायोगाद्धोमद्वारा गुणस्य फ-
लसाधनतोपवर्णेणोक्तेत्यभिधानार्थमत एवेति भाष्यं व्याचष्टे *य-
५५२।२ थेति * राजदृष्टान्तेन द्वारावाचिताश्रयशब्दस्योपवर्णेणोक्तेति सू-
चनार्थं दृष्टान्तो ऽप्युदाहृतः तस्मादिति सिद्धान्तोपसंहारे भाष्यं
स्पष्टत्वान्न व्याख्यातं कथमितीति कर्त्तव्यताप्रश्नभाष्यं द्वारत्रय'

न्वितेन धात्वर्थेनैव गुणस्यानुग्रहसिद्धेरिति कर्त्तव्यतानाकाङ्क्षत्वादयुक्तमाशङ्क्योपपादयितुमाश्रयाश्रयिसम्बन्धो ऽशत्रयातिरिक्तः करणांशान्तर्गतो वेति पृच्छति * कः पुनरिति * द्वारान्वयस्यांशत्रयातिरिक्तत्वे गुणस्य करणत्वे द्वारेणैवानुग्रहसिद्धे कथम्भावायोगात्तत्सिद्ध्यर्थमतिरेकानतिरेकौ विचार्यावित्याशयः प्रश्नार्थं विवृणोति * किमिति * व्यतिरेकपक्षं गृह्णाति * के चित्ताववदिति * प्रश्नपूर्वमुपपादयति * कथमिति * गुणकरणिकायां भावनायां द्वारांशेनैव कथम्भावाकाङ्क्षानिवृत्तौ वा व्यतिरेकाव्यतिरेकचिन्तानर्थक्यापत्तेर्धात्वर्थकरणभावनांशत्रयातिरेकप्रदर्शनार्थश्चतुर्थशब्दः। श्लोकं व्याचष्टे * यत्रेति * धात्वर्थेन गुणस्य करणत्वानिष्पादने सिद्धान्तवद्धात्वर्थस्य करणांशान्तर्गत्यापत्तेः करणत्वस्य साधकतमत्वलक्षणत्वात्तमबर्थस्य चातिशयस्यापेक्षिकत्वादपेक्ष्यमाणानुग्राहकधात्वर्थाभावे ऽनुपपत्तिरभिप्रेता आपेक्षिकत्वातिशयरूपस्य करणत्वस्यापेक्ष्यमाणेनानुग्राहकेणोपजननमभिप्रेतं करणांशातिरेके च सति आश्रयस्य करणत्वोपजननेन करणानुग्राहकतयाङ्गत्वात्प्रकरणेनाश्रयलाभोपपत्तिरित्याह * तत्रेति * अङ्गत्वादेव च प्रकरणेनाश्रयलाभोपपत्तेश्चोदनालिङ्गभूतेन धातुना ऽनुवादोपपत्तिरित्याह * तथा लब्धश्चेति * कथं पुनः करणांशातिरेकमात्रेणाङ्गत्वसिद्धिरित्याशङ्क्याह * पदेति * नामपदमस्येति नामार्थो बहुव्रीहिणोक्तः स्वमतेन करणांशे व्यतिरेकमाह * शक्यते त्विति * प्रचिततरत्वमुपपादयति * धात्वर्थेन हीति * धात्वर्थस्य व्यापाररूपत्वात्साक्षात्कारकत्वोपपत्तेर्भावनावच्छेदकत्वोपपत्तेश्च शीघ्रं करणाकाङ्क्षानिवर्त्तकत्वं गुणस्य त्वव्यापाररूपत्वात्काष्ठादिवत्साक्षात्कारकत्वानुपपत्तेर्भावनावच्छेदकत्वानुपपत्तेश्च भावनाख्यक्रियावच्छेदकधात्वर्थसम्बन्धोत्तरकालं करणत्वनिष्पत्तेश्चिरेण करणाकाङ्क्षानिवर्त्तकतेत्यर्थः। करणांशान्तर्गतिमाश्रयस्योपसंहरति * तस्मादिति * आश्रयस्यांशत्रयातिरेकनिरास किमर्थ इत्यपेक्षायां कथम्भावोपपत्तिप्रयोजनत्वोक्तिपूर्णं संस्थाधिकरणन्यायेन सर्वेषां गुणानां काम्यानामाश्रयैः सह सामानाविध्यानिरासात्तत्रैव गुणस्य कर्मसादृश्याभावेन तद्धर्मतातिदेशायोगादिति कर्त्तव्यताविरहेण करणत्वानिर्वाहाशङ्कानिरासार्थमाश्रयभूतकर्मधर्मादिदेशस्य वक्तव्यत्वात्सन्निधानात्तु नित्यस्येति कर्त्तव्यतयेति गम्यत इति च संस्थाधिकरणभाष्ये वक्ष्यमाणत्वादिहाभिधानमयुक्तं प्रासङ्गिकाभिधाने ऽपि वा यस्मादेवं चायं जुहोत्यर्थो ऽनुवाद इत्यादिभाष्येणाधिकर-

शेषे समाप्ते ऽभिधेयत्वात्ततः प्रागयुक्तमभिधानमित्याशङ्काद्वयं
निरस्यति *तेनेति* एतदधिकरणव्युत्पाद्यगुणकरणत्वनिर्वाहार्थेहै-
वाश्रयधर्मातिदेशस्य वक्तव्यत्वेन प्रसक्तत्वादापन्नत्वादग्निहोत्रस्य
चाश्रयत्वेनोपस्थानाद्विध्यन्ताश्रयित्वे ऽभिहिते तस्य स्वयं फलवत्त्वेन
गुणं प्रति द्वारत्वाख्याश्रयत्वायोग्यदन्यस्य चाश्रयत्वयोग्यस्य होमस्या-
प्रकृतत्वादनेनैव वाक्येनाश्रयविधौ वाक्यभेदापत्तेर्गुणफलान्वयानुप-
पत्तिरित्याशङ्काशेषस्याग्निहोत्रविध्यन्तातिदेशोक्तः । प्रागनुत्थानाच्च-
न्निरासार्थं यस्मादेव चेत्यादिभाष्यशेषं विनाप्यधिकरणपर्यवसानो-
पपत्तेस्ततः प्रागस्मिन्नधिकरणे ऽभिधानं युक्तमित्याशयः । यद्यपि
च संस्थाधिकरणे सामानविध्ये निरस्ते कुतस्तर्हीति कर्त्तव्यताप्राप्ति-
रित्यपेक्षायामाश्रयगतेतिकर्त्तव्यतानिर्देशो वक्ष्यते तथापीह गुणफ-
लान्वयनिर्वाहार्थं वक्तव्य एवेति प्रयोजनभेदेनापौनरुक्त्यसूचनार्थं
संस्थाधिकरणविषयत्वोक्तिः। यद्वा संस्थानां काम्यत्वेनानित्यत्वान्नित्य-
धर्मात्ययानुपपत्तेः सामानविध्यायोगाद्विकारतान्यदीयधर्मग्राहितेति
विकारशब्देनान्यदीयधर्मग्राहित्वे ऽभिहिते कस्यासौ विकार इत्यपे-
क्षिते स नित्यस्येति सूत्रावयवेन नित्यस्याश्रयस्योक्थ्यादिः काम्यो गुणो
विकार इति नित्यत्वसाम्येनाश्रयस्य नित्यधर्मान्वयाविरोधादित्येवं
विकारास्तु कामसंयोगे स नित्यस्य समत्वादिति संस्थाधिकरणसि-
द्धान्तसूत्रस्य व्याख्यान्तरसूचनार्थः । आश्रयधर्मातिदेशस्य वक्त-
व्यमुक्त्वा तदभिधानार्थस्यानयेति भाष्यस्य किं केन कथं भावे
५५३।२ ऽव्यतिरिक्ताश्रयापेक्षावादिव्याख्यां दूषणायोपन्यस्यति * तत्रे-
ति * दूषयति * तत्त्विति * स्वमतेन षष्ठीसमासत्वेन व्याचष्टे *
अत इति * प्रश्ने कुत इति भाष्यं नासौ साध्यस्य भवतीति सा-
धनेन सम्बन्ध्यन्तइत्यादिसंस्थाधिकरणभाष्ये साध्यभूतधात्वर्था-
न्वयद्वारा साधनभूतस्य गुणस्येतिकर्त्तव्यतान्वयस्य वक्ष्यमाणत्वा-
द् गुणस्य साक्षादितिकर्त्तव्यतान्वयायोग्यत्वावगतेः कर्त्तव्यताविशेष-
त्वाच्चेतिकर्त्तव्यतायाः कर्त्तव्यतापरपर्यायानुष्ठेयरूपेण धात्वर्थेनैवा-
न्वययोग्यत्वप्रतीतेः । सिद्धरूपस्य गुणस्येति कर्त्तव्यतान्वयो न स-
म्भवतीत्यभिप्रायत्वेन व्याचष्टे *कुत इति* करणत्वप्रयुक्तत्वादि-
तिकर्त्तव्यतान्वयस्य साक्षात्करणत्वाभावाद् गुणस्य साक्षादितिक-
र्त्तव्यतान्वये ऽपि धात्वर्थद्वारा करणत्वेन तद्वारेतिकर्त्तव्यतान्व-
याविरोधात्कर्त्तव्यताविशेषत्वोक्तेश्चानुष्ठेयवाचित्वे धात्वर्थस्याप्य-
नुष्ठेयत्वेनेति कर्त्तव्यतां प्रति प्रयोजकत्वापत्तेरपूर्वप्रयुक्त्युक्तिबाध-
प्रसङ्गाद् भाव्यान्वयिवाचित्वावगतेर्गुणस्यापि करणत्वेन भाव्यफ-

त्वापूर्वान्वयाविशेषाद्धात्वर्थवदितिकर्त्तव्यतान्वयो युक्त एवेत्याशयः। फलसाधनस्येत्युत्तरभाष्यं व्याचष्टे * फलेति * गुणस्येतिकर्त्तव्यताकाङ्क्षित्वे ऽप्यग्निहोत्रगतायाः कथम्प्राप्तिरित्याशङ्कानिरासार्थं यस्याश्चेति भाष्यं सन्निधानशब्दस्य प्रकरणे स्थाने वा प्रसिद्धेस्ताभ्यां चेतिकर्त्तव्यताप्राप्तौ संस्थाधिकरणनिराकरिष्यमाणसामानविध्यापत्तेरतिदेशहेतुचोदनालिङ्गोक्तिविरोधापत्तेश्चायुक्तमित्याक्षिपति * अस्याश्चेति * चोदनालिङ्गस्यापि प्रकृतविशेषसान्निधापनेनैवातिदेशहेतुत्वादतिदेशहेतुत्वेनैवेह सन्निध्युक्तिर्न सामानविध्यमापादयति। जुहोतेस्तु नारिष्टादिसाधारण्येन चोदनालिङ्गत्वायोगादभ्युच्चयहेतुत्वेनोपन्यास इत्याशयेन समाधत्ते *तदिति* स्वातन्त्र्येणेतिकर्त्तव्यतासन्निधाने समानविध्यापत्तेस्तन्निरासार्थं होमद्वारत्वे ऽभिहिते होमस्यैव कथं सन्निधिरित्यपेक्षायाम् *आश्रयतयेत्युक्तम् * नन्वतिदेशस्य प्रकृतिविशेषमात्रज्ञानात्सिद्धेराश्रयत्वेनाग्निहोत्रस्य सन्निधानादिति वाच्यमितिकर्त्तव्यतासान्निध्युक्तिस्त्वनर्थिकेत्याशङ्क्याग्निहोत्रार्थमेवानुष्ठितायाः प्रसङ्गात्तन्त्रमध्यपतितं दध्यपि प्रत्युपकारसूचनायेतिकर्त्तव्यतासन्निध्युक्तिरिति सूचनाय * उपकारेत्युक्तम् * दध्नः करणत्वनिष्पादनलक्षणोपकारप्रदानं यथा स्वफलसिद्ध्यर्थमेवानुष्ठितेन होमेन प्रसङ्गात् क्रियते तथेतिकर्त्तव्यतयापि होमसन्निधापितया प्रसङ्गादुपकारः क्रियतइति प्रकारवाचिना क्रमशब्देनोक्तं चोदनालिङ्गस्याभ्युच्चयमात्रार्थत्वं चशब्देनोक्तं जुहोतेर्वा नारिष्टादिसाधारण्याच्चोदनालिङ्गत्वात् प्रागपि तदर्थस्य प्रत्यभिज्ञायमानस्याग्निहोत्राख्यसाधारण्याच्चोदनालिङ्गताभिप्रेता। नन्वग्निहोत्रस्य स्वयं फलवत्त्वेन गुणं प्रत्याश्रयत्वानर्हत्वादनेनैव वाक्येनाश्रयत्वयोग्यहोमान्तरविधौ वाक्यभेदः स्यादित्याशङ्कानिरासार्थं यस्मादेव चेति भाष्यमप्राप्तत्वात्प्रयोजनाभावाच्चानुवादानुपपत्तेरयुक्तमाशङ्क्य व्याचष्टे * यस्मादेव चेति * प्रकरणात्प्राप्तिश्चोदनालिङ्गत्वं च प्रयोजनमित्यर्थः। न विद्यते विधायको ऽस्येति बहुव्रीह्यर्थव्याख्याना * यास्येत्युक्तम् * वाक्यभेदापत्तेः श्रुतेन प्रत्ययेनाश्रयत्वाविधाने ऽप्युत्पत्तिफलान्वयवत्प्राकरणिकाद्विध्यन्तरादाश्रयत्वाप्राप्तेर्विधिं च विना प्रकरणावगते ऽप्याश्रयान्वये पुरुषस्याप्रवृत्तेरवश्यकल्पानुमानिकाश्रयविधायिप्रत्ययसद्भावाद्विधायकप्रत्ययराहित्योक्तिरयुक्तेत्याशङ्क्योत्पत्तिफलान्वयविषयएव विधायकाभावो विवक्षितो नाश्रयत्वविषय इति परिसंख्यारूपेण सूचयितुमुत्पत्तेः फलं वा * प्रतीत्युक्तम् * न चेति भाष्यं गुणका-

मवाक्यस्य कर्मोत्पत्तिवाक्यानन्वयात्तत्प्राप्तकर्मानुवादकत्वं न स-
म्भवतीत्याशङ्कोत्तरत्वेन व्याचष्टे * केनेति * उभयाकाङ्क्षालक्षणा-
न्वयाभावे ऽपि गुणकामस्याश्रयभूतकर्मोत्पत्त्यपेक्षत्वादुत्पत्तिवा-
क्यान्वयो ऽस्तीत्याशयः । परिसंख्यासूचनार्थं गुणकामवाक्यस्य
कर्मफलान्वयाविधायित्वे प्रागुक्ते ऽपि फलवाक्यान्वयाभावेन त-
त्प्राप्तकर्मानुवादस्यानाशङ्क्यत्वात्फलं प्रति वा विधायकं वाक्यं ना-
स्तीति व्याख्या न कृता । ननु गुणकामवाक्ये फलवाक्यप्राप्तहोमानु-
वादसिद्ध्यर्थं नान्यद्धोमस्य फलविधायकं वाक्यं नास्तीत्यवाच्ये
ऽपि होमस्य फलापेक्षत्वात्तस्यैवैन्द्रियफलं भविष्यतीत्याशङ्कानि-
रासायास्य भाष्यस्यैषो ऽर्थः कैश्चिद् कृतः स किमित्युपेक्षित इत्या-
शङ्क्योपन्यासपूर्वं तद्व्याख्यां दूषयति * के चित्त्विति * होमस्यावि-
धेयत्वे विहिते फलविध्याशङ्कानुत्थानादप्रस्तुतोपन्यासापत्तिरि-
त्याशयः। तस्मादित्याशङ्काशेषनिरासोपसंहारभाष्यं भिन्नवाक्यत-
या भासमानमेकवाक्यतया व्याचष्टे*तस्मादिति*अग्निहोत्रवाक्य-
प्राप्तकर्मानुवादित्वेनेन्द्रियवाक्यस्य कर्मान्तराविधायित्वाभावाच्च गु-
णफलान्वयविधायित्वानुपपत्तिरिति भाष्यार्थे दर्शिते जुहोतेः प्रत्य-
यानुग्रहार्थत्ववच्चोदनालिङ्गत्ववच्चाश्रयलिङ्गत्वमपि फलमनुवादा-
र्थवत्त्वाय सूचयितु गुणफलात्मककारकान्वयस्य क्रियात्मकभा-
वनाद्वारत्वाद् गुणस्य भावनावच्छेदकतया धात्वर्थद्वारत्वाद्धोमस्या-
नुग्राहकतोक्ता गुणधात्वर्थयोः साध्यसाधनान्वयस्य वा फलसाध-
नतेति पक्षान्तरोक्त्यर्थमथ वेति भाष्यं व्याचष्टे * अथ वेति * येन
कारणेन दध्नः फलमुक्तं तेनैव सम्बन्धादित्युक्ते किं तत्कारणमित्य-
पेक्षिते विवक्षितशब्दोक्तं दधिशब्दोऽप्रमादपाठत्वे कारणमुक्त्वा दध्न
एव तर्हि फलं युक्तमित्याशङ्क्य * केवलाच्चेत्युक्तम् * अस्मिन्पक्षे
५५४।१ वाक्यभेदं शङ्कते * अत्र त्विति * अत्र पक्षे ऽनेनैव वाक्येन द-
धिहोमान्वयविधानात्तस्य फलान्वयविधानाच्च वाक्यभेदः स्यादि-
त्युक्ते प्रकरणाद्धोमान्वयो भविष्यतीत्याशङ्क्य * दधिफलसम्बन्धे
चेत्युक्तम् * गुणस्य फलान्वयोत्तरकालं तदन्यथानुपपत्त्या सामा-
न्यतो धात्वर्थान्वये ऽवगते तद्विशेषापेक्षायां प्रकरणाद्धोमाख्यो वि-
शेषो लभ्यते नान्यथेत्याशयः । दध्ना जुहोतीति वाक्यात्तर्हि
होमान्वयो भविष्यतीत्याशङ्क्य * पूर्वोक्तेनेत्युक्तम् * गुणादीनां
त्वसम्बन्धादिति वार्त्तिकोक्तेन न्यायेनेन्द्रियवाक्यस्य दधिहोमान्व-
यकारिवाक्यैकवाक्यत्वाभावान्नैन्द्रियवाक्ये तत्कारितहोमान्वयग्र-
हणमित्याशयः । तस्मादाद्यैवैन्द्रियवाक्यव्याख्या युक्तेत्याह * अत

इति * अत्रैव समाप्तिभाष्यानुगुणयमाह * तथा चेति * का तर्ह्यथ वेति भाष्यस्य गतिरित्याशङ्क्याह * तेनेति * युक्तिशून्योत्प्रेक्षाविकल्पः एवं तु समस्तभाष्यभङ्गापत्तेराद्यपक्षोपसंहारैकवाक्यत्वेन व्याचष्टे * अन्ये त्विति * उपसंहारे दधिशब्दस्य विवक्षितत्वादिति हेतूक्त्यानर्थक्यमाशङ्क्य * सोपपत्तिकइत्युक्तम् * सम्बन्धशब्देन विशेषणप्रधानेन सम्बन्धोपसर्जनदधिनिर्देशात्समस्तभाष्यैकवाक्यत्वाविरोध इत्याशयः भाष्यस्थेति करणव्याख्यानायेति शब्दः स्वमतोपपादनाय वाक्यभेददूषणपरिहारं प्रतिजानाति * शक्येति * प्रश्नपूर्वं परिहरति * कथमिति * तृतीयोक्तस्य करणत्वस्येन्द्रियभावनोद्देशेन विधानात्तस्य च क्रियासम्बन्धिरूपत्वादर्थापत्त्या प्रतिसम्बन्धिरूपक्रियाप्रतीतेः सम्बन्धावगमान्न वाक्यभेद इत्याशयः। क्रियात्मकभावनावच्छेदकधात्वर्थविशेषानिर्धारणं मात्रशब्देनोक्तम्। ननु वाक्यभेदाभावे ऽपि श्रुतस्य दध्नो विधेयत्वसम्भवे गम्यमानस्य सम्बन्धस्य विधेयत्वकल्पना न युक्तेत्याशङ्क्याह * शक्तीति * करणशक्तिरेव क्रियाकारकरूपार्थद्वयाधीननिरूपणत्वात्सम्बन्धशब्देनोपचरितेत्याशयः । नन्वेवमपि करणत्ववद्दध्नो ऽपि विधेयत्वात्तस्य च धर्मित्वेन प्राधान्यात्करणत्वविशिष्टस्य दध्नः फलहेतुत्वं युक्तं न दधिविशिष्टस्य करणत्वस्येत्याशङ्क्याहेतीति शाब्दे व्यवहारे शाब्दस्यैव प्राधान्यस्य विवक्षितत्वात्सम्बन्धस्यैव विभक्त्योक्तत्वेन प्रत्ययार्थतया शब्दतः प्राधान्यात्फलहेतुता युक्तेत्याशयः । नन्वेवमपि होमाख्यधात्वर्थविशेषानवच्छिन्नक्रियामात्रसम्बन्धस्य फलसाधनत्वविधौ धात्वर्थविशेषानपेक्षणाद्धोमावच्छिन्नक्रियासम्बन्धस्य तु विधौ प्रकरणालोचनात्प्रागेव होमलाभाभ्युपगमापत्तेर्नोभयथापि प्रकरणाद्धोमलाभोपपत्तिरित्याशङ्क्याह * तत्र त्विति * यथा वैश्वदेवीशब्देनैव सन्निहितस्य द्रव्यविशेषस्य देवतान्वये ऽभिहिते ऽऽमिक्षाशब्दो विशेष्यान्वयार्थस्तथेहापि धात्वर्थविशेषानवच्छिन्नायां भावनायां दध्नः करणत्वायोगाद्वाक्यभेदापत्तेश्च वाक्योपात्तेन जुहोतिनेदन्तया धात्वर्थविशेषानुपनयनाद्य प्रकरणाद्धात्वर्थविशेषो लप्स्यते तदवच्छिन्नायां भावनायां करणं मद्दधिफलसाधनमिति प्रकरणलभ्यधात्वर्थविशेषावच्छिन्नया क्रियया सह दध्याख्यकारकसम्बन्धस्य फलान्वये वाक्येनावगते को ऽसौ क्रियात्मकभावनावच्छेदको धात्वर्थविशेषः प्रकरणलभ्य इति निर्द्धारणापेक्षायां प्रकरणाद्विशेषनिर्द्धारणमित्यर्थः । प्राकरणिकहोमलाभोक्तेर्भाष्योपपादनं प्रयोजनमाह * तेनेति * ननु दध्नेन्द्रियं

भावयेदिति फलभावनायां दध्नः करणत्वाभिधानाद्धोमभावनां
प्रति करणत्वानवगतेः फलभावनाकरणत्वलक्षणस्यैव तु क्रियाका-
रकान्वयस्य फलहेतुत्वाभ्युपगमे कर्मफलान्वये ऽपि फलभावनाक-
रणाभूताद्धोमात्फलमित्यपि वक्तुं शक्यत्वाक्रियाकारकान्वयस्य
फले विधापत्तेरन्यतरप्राप्तौ च सम्बन्धविधेर्जाघन्याधिकरणे निषे-
त्स्यमानत्वाद्धोमप्राप्तौ दधिहोमसम्बन्धविध्यनुपपत्तेरप्राप्तौ वा हो-
मस्यापि विध्यापत्तेरयुक्तमिदं पक्षान्तरमित्याशङ्क्याह * ततश्चेति *
समस्तभाष्यसमर्थनायायुक्तमपि पक्षान्तरं प्रौढ्योपपादितमित्या-
शयः । समासिभाष्य कथं तर्हि समर्थनीयमित्याशङ्क्य द्वेधा समर्थय-
१५५।१ ते * समासीति * विशेषणभूतसम्बन्धप्रधानो ऽयं निर्देश इत्याश-
यः । ननु कारकाणामन्योन्यान्वयायोगाद् गुणस्य साक्षात्फले विध्य-
नुपपत्तेर्भावनायां विधेयत्वात्प्राप्तायां च तस्यां फलान्वये गुणा-
न्वये च शाप्यमाने सकृदुच्चरितस्य वाक्यस्यानेकार्थपरत्वायोगादा-
वृत्तिलक्षणवाक्यभेदापत्तेस्तत्परिहारार्थं गुणफलान्वितापूर्वभावना-
विध्यभ्युपगमे ऽपि गौरवलक्षणो वाक्यभेदः स्यादित्याशङ्कते * न-
न्विति * पदद्वयान्वयव्यापारस्य पदद्वयसमभिव्याहारलभ्यत्वेनैका-
र्थवाच्यनेकपदकल्पकार्थापत्तिप्रसवशक्तिकल्पनलक्षणगौरवानापा-
दकत्वादनेकार्थविशिष्टैकभावनाविधायकस्य विधिप्रत्ययस्य नैकवि-
धिकल्पकार्थापत्तिप्रसवशक्तिकल्पनाद् गौरवं वाच्यं तच्चेह फलान्व-
यस्याविधेयत्वान्नास्तीत्याशयेन प्रतिज्ञाहेतुप्रश्नपूर्वं परिहरति * नैष
इति * श्लोकं व्याचष्टे * बहवो ऽपीति * फलभावनायां प्रवृत्ते-
र्विध्यनपेक्षत्वोपपादनार्थम् * यो हीत्युक्तम् * ननु भावनाख्ये ऽपि
विधित्वे गुणार्थत्वाद्विधेर्भावनायामतात्पर्याद्विधेयस्य च गुणस्य
करणत्वात्क्रियात्मकभावनाकाङ्क्षत्वे ऽपि प्रकृतस्वर्गफलकभाव-
नान्वयान्नैराकाङ्क्ष्योपपत्तेर्भाव्यानाकाङ्क्षत्वादनुवाद्यायाश्च भाव-
नाया भाव्येन विशेष्टुमशक्यत्वाद्भावनामात्रानुवादेन दधिविध्यापत्ते-
रिन्द्रियविशिष्टभावनानुवादोक्तिरयुक्तेत्याशङ्क्य दधिविशिष्टायां भा-
वनानुवादोक्तिरयुक्तेत्याशङ्क्य च दधिविशिष्टायां भावनायां विधेस्तात्पर्यं
वक्तुम् *भावनां विधत्त इत्युक्तम्* विधिमात्रार्थस्यापि प्रत्ययस्य स्वा-
रसिकफलांशप्रवृत्त्यनुमोदत्वाभिप्रायेणानुवादकत्वोक्तेर्नैकस्य प्रत्यय-
स्य विध्यनुवादार्थत्वविरोधः । ननु गुणकामेषु भावनाविध्यभ्युपगमे
विहितविध्ययोगाद्भावनाभेदः स्याद्विधेयायाश्च भावनायाः करणा-
काङ्क्षायां प्रत्यासत्तेर्द्धात्वर्थस्यैव कारणत्वान्न गुणात्फलं स्यादि-
त्याशङ्काद्वयं निरस्यन्नधिकरणार्थमुपसंहरति * तस्मादिति * प्रा-

सायां भावनायां गुणफलयोर्द्वयोरन्वयायोगादन्यतरानर्थक्यापत्ते-
र्भावनान्तरविध्यभ्युपगमे ऽपि धात्वर्थस्य प्राप्तत्वेनाविधेयत्वात्क-
रणत्वानुपपत्तेर्गुणस्यैव करणत्वमविधेयत्वादेव च धात्वर्थस्याभे-
दात्तस्यैव चेह कर्मशब्देनोक्तत्वादकर्मान्तरता युक्तेत्याशयः ।

॥ वारवन्तीयादीनां कर्मान्तरताधिकरणम् ॥ १२ ॥

समेषु कर्मयुक्तं स्यात् ॥ २७ ॥

प्रकृताश्रयालाभे गुणफलान्वयापवादार्थत्वेन धात्वर्थाभेदा-
पवादार्थत्वेन वानन्तरसङ्गतिमाह * इदानीमिति * रेवतीवाक्यस्यैव
विचार्यत्वादग्निष्टुद्वाक्योदाहरणानर्थक्यमाशङ्क्याह * तत्रेति * गु-
णफलान्वयस्य कर्मान्तरत्वस्य च पूर्वकर्मापेक्षत्वाद्विचार्यप्रतियोगि-
कर्मविधायित्वेनाग्निष्टुद्वाक्यस्यापि विचारविषयतास्तीत्याशयः ।
वारवन्तीयस्याग्निष्टोमसामत्वाप्राप्तौ पक्षद्वये ऽपि वाक्यभेदापत्तेस्त-
त्परिहारार्थं भाष्यानुदाहृतमपि वारवन्तीयवाक्यमुदाहृतम् * त-
त्रेति * सन्देहभाष्यं व्याचष्टे * तत्रापीति * पूर्वपक्षवचन-
व्यक्तिः क्लिष्टत्वसूचनार्थं पश्चादुक्ता पूर्वपक्षभाष्यं संक्षिप्य व्या-
चष्टे * किमिति * विदितस्येति भाष्योक्तो धात्वर्थानुवादः पशु-
काम एवं कृत्वेत्यादिभाष्योक्तश्च फलस्य कर्मसमभिव्याहारनिरा-
सेन गुणसमभिव्याहारः समस्तशब्देन व्याख्यातः। एतदेवोपपादय-
ति * तथा हीति * ननु रेवतीवारवन्तीयान्वयविधानात्तस्य च ५५६।२
फलान्वयविधानाद्वाक्यभेदः स्यादित्याशङ्क्याह * रेवतीति * पृ-
थक्श्रुतिः श्रवणमस्येति विग्रहः। शङ्कोत्तरत्वेन श्लोकं व्याचष्टे *
यस्त्विति * उत्पत्तिशब्देनोत्पत्तिफलत्वाल्लक्षणया रेवतीवारवन्ती-
ययोः सम्बन्धापादिका रेवत्याधारवारवन्तीयक्रियोक्ता तेन रेव-
तीषु वारवन्तीयं कुर्यात्तेन च पशून् कुर्यादित्यावृत्तिः स्यादित्याश-
ङ्कार्थः क्त्वाप्रत्ययेन विधावस्मृतेनापि धातुवाच्यायाः क्रियायाः पू-
र्वकालत्वोक्तेस्तस्याश्चाप्राप्तत्वेनानुष्ठानं विना पूर्वकालत्वायोगाद्वि-
धिफलानुष्ठानाक्षेपसिद्धेर्न विधिप्रत्ययावृत्तिरित्युत्तरार्थः । नन्वेवम-
प्यग्निष्टुति वारवन्तीयस्य प्राप्तत्वाद्रेवतीषु विधिसंक्रान्तेस्तासा-
मेव फलहेतुत्वापत्तेर्वारवन्तीये पशवः फलमिति भाष्यमयुक्तमि-
त्याशङ्क्याह * तत्रापीति * गुणफलान्वयविवादे तेनेति सर्वना-
म्नो गुणपरामर्शित्वस्याभ्युपगन्तव्यत्वात्तस्य च प्राधान्यनिर्दिष्टपरा-
मर्शित्वाद्रेवतीषु कृतेन वारवन्तीयेन पशून्कुर्यादिति वाक्यार्थप्रती-
तेर्वारवन्तीयस्य क्रत्वर्थत्वेन प्राप्तस्यापि दधिवत्फलं प्रति विधिर्यु-

क इत्याशयः। यागवद्वारवन्तीयस्यापि प्राप्तत्वाद्विधिर्न सम्भवतीत्या-
शङ्कां गुणोपादानवशेन यागाद्विधायकोत्तारणं न प्राप्तिमात्रेण रेव-
तीनां च करणीभूतगुणपरामर्शिनैतच्छब्देन विलिङ्गसंख्यात्वादुपा-
दानाशक्तेर्न वारवन्तीयाद्विधायकोत्तरणावगतिरित्याशयेन निरस्य-
न् श्लोकं व्याचष्टे * गुणेति * नन्ववगतप्राधान्यस्यान्यार्थता न
युक्तेत्याशङ्क्य धात्वर्थस्थानीयशब्देनेप्सिततमत्वाभावे ऽप्यनीप्सि-
तकर्मत्वेन प्राधान्योपचार इत्युक्ते तथापि कर्मत्वेनोक्तस्य कथं कर-
णतेत्याशङ्क्य करोतिवाच्यां भावनां प्रति कर्मत्वे ऽप्याख्यातोक्तां
प्रतिकरणत्वाविरोध करोत्यभिहितामित्यनेनोक्तः दधिहोमसम्बधो
वाक्येन विधीयते इति पूर्वाधिकरणभाष्योक्तेन न्यायेनेहापि रेव-
तीष्विति सप्तमीश्रुतेरधिकरणभूताभ्यो रेवतीभ्यः फलमित्यवगमा-
दधिकरणत्वाक्षिप्तस्य चाधाराधेयसम्बन्धस्य विभक्त्यन्तर्गतत्वेन प्र-
त्ययार्थतया प्राधान्याच्छ्रुत्या फले विधिप्रतीतेरेतेनेत्येकवचनान्तेन
च सर्वनाम्नो परामर्शोपपत्तेर्यत्पशून्भावयेत्तदेतेन रेवतीवारवन्तीय-
सम्बन्धेनेति वचनव्यक्त्यभ्युपगमे तु सम्बन्धादेव फलमित्याह *
अथ वेति * नन्वन्येषामपि वाक्यभेदानां सिद्धान्ते वक्ष्यमाणानां
कः परिहारः पूर्वपक्षिणो ऽभिमत इत्याशङ्क्याह * एवं च सती-
ति * क्त्वाशब्दार्थस्य रेवत्यन्वयविषयत्वेनाप्राप्तस्या ऽप्येकविंशतित्व-
मग्निष्टोमसाम कृत्वेत्यतो वारवन्तीयवाक्यसहिताद्वारवन्तीयाग्नि-
ष्टोमसामविषयत्वेन प्राप्तस्यादिशब्देनानुवादः सूचितः। सिद्धान्तएव
५५७।२ त्वतिगौरवलक्षणो वाक्यभेदः स्यादित्याह * कर्मान्तरेति * अल्पा-
र्थविधौ च सर्वपदार्थान्वयसम्भवे बह्वर्थविधिर्न लभ्यतइति प्रति-
ज्ञाहेतुप्रश्नगौरवलक्षणो ऽपूर्वमुपपादयति * तवेति * पूर्वपक्षे
वाक्यभेदपरिहारमुपसंहरति * तेनेति * भाष्यकृता तर्ह्येतच्छब्दा-
दीनामनुवादकता कस्मान्नोक्तेत्याशङ्क्याह * सर्वे चेति * प्रकृतवा-
क्येतच्छब्दान्वयेनाभेदोक्त्यर्थमपि चेतिभाष्यं स्पष्टत्वादव्याख्याय
तस्मादिति पूर्वपक्षोपसंहारभाष्यं फलतो व्याचष्टे * तस्मादिति *
प्रकृताश्रयालाभाद् गुणफलान्वयानुपपत्तिं वक्तुं गुणफलान्वयस्य
प्रकृताश्रयलाभापेक्षां दर्शयन् सिद्धान्तमारभते * इतीति * स गुणः
फले विधातुं शक्य इति वाक्ये प्रकृताश्रयालाभे गुणफलान्वयायोग-
वद्धात्ववगतस्य कर्मसम्बन्धस्यानुवादत्वायोगाद्विध्यापत्तेः प्रकृत-
यागाश्रितस्य वारवन्तीयस्य फलान्वयाभ्युपगमे ऽपि दुष्परिहरो
वाक्यभेद इति सूचयितुं फलभूतयागाभेदोक्तिः। उत्तरार्द्धसूचित-
मर्थं विवृणोति * इदं तावदिति * फले विधीयमानस्य गुणस्या-

श्रयभूतधात्वर्थापेक्षायामेकवाक्योपात्तस्य यागस्याश्रयत्वप्रतीतेस्ता-
दृशस्याप्तत्वेनानुवादायोगाद्विध्यापत्तेर्विध्ययोगाद्यागान्तरत्वं स्यादि-
त्याशयः। स चेति यच्छब्दार्थः परामृष्टः अत्रैव दृष्टान्तमाह *तद्यथेति*
यथेन्द्रियकामवाक्ये ऽन्यत एव दध्नो होमान्वयलाभान्न कर्मान्तर-
ता व्यवसितेति पूर्वानुषङ्गेण योज्यम्। दृष्टान्तं विवृणोति * श्रुतेति *
यद्वा दधिहोमसम्बन्धमात्रे विधीयमान इति ल्यब्लोपे पञ्चमीमङ्गी-
कृत्यैकग्रन्थतया योज्यम्। नन्विहाप्याश्रयापेक्षायां प्रकरणान्वयो ल-
प्स्यत इत्याशङ्क्याह * शक्नोति हीति * साम्नो यागनिष्पत्त्यशक्ता-
वपि रेवतीनां याज्यानुवाक्यावद्देवतोद्देशद्वारा निष्पादकत्वं भविष्य-
तीत्याशङ्कामग्निष्टुत्याग्नेया ग्रहा भवन्तीति सर्वाभ्यासु ष्वग्निर्देवत्याच्च
श्रुतेरैन्द्रीणामृचां साधनत्वायोगान्निराकर्तुं शक्यामपि सप्तम्या सा-
माधारत्वश्रुतेर्यागसाधनत्वाशङ्कैव नोत्तिष्ठतीत्येवं निराकर्तुम् *रे-
वतीगुणकमित्युक्तम् * एतदेवोपपादयति * तथा हीति * सा-
क्षाद्यागसाधनान्तरपरिसंख्यार्थं कर्तृग्रहणम् देवताभिधानार्थगक्ष-
राभिव्यक्तिद्वारापि स्तोत्रसाधनत्ववद्यागसाधनत्व यज्ञकर्मणी-
त्येकश्रुत्यविधिविरोधान्नानास्वरसमाहारात्मकस्य साम्नो न स-
म्भवतीति सूचयितुम् * साम्नेत्युक्तम् * सत्सम्बन्धानुवादित्वा-
दित्यनेन सूचितमर्थमुपसंहरति * तस्मादिति * नन्वेवमपि स्तो-
त्रस्याश्रयत्वोपपत्तेर्गुणफलान्वयो निर्वक्ष्यतीत्याशङ्क्याह * यस्त्वि-
ति * नन्ववान्तरप्रकरणात्प्रणयनस्य गोदोहनाश्रयत्ववदिहापि
वारवन्तीयमग्निष्टोमसाम कार्यमित्यग्निष्टोमस्तोत्रावान्तरप्रकरणान्तः
पातकल्पतयाग्निष्टोमस्तोत्रस्याश्रयत्वमभ्युपगमिष्याम इत्याशङ्क्य * ५५८।२
आतिदेशिकत्वादित्युक्तम् * उत्पत्तावेव प्रकरणाभिव्यक्तेर्विकृ-
तावुत्पत्त्यभावान्न स्तोत्राणां प्रकरणं सम्भवतीत्याशयः। वारवन्तीय-
स्याश्रयालाभं वृद्धवाक्येन द्रढयति * आह चेति * ननु षड्जादि-
स्वरसमाहाररूपाया गीतेः सिद्धरूपायाः फलसाधनत्वेन विधीयमा-
नाया निर्व्यापारायाः साधनत्वायोगात्साध्यभूतव्यापारापेक्षायां प्र-
करणाद्यागसाधनत्वस्यावगतस्य साक्षादसम्भवे ऽपि तदङ्गस्तोत्र-
द्वारोपपत्तेर्गुणफलान्वयो निर्वक्ष्यतीत्याशङ्कते * अथेति * वार-
वन्तीयस्य यागानङ्गत्वाद्याङ्गाङ्गभूते स्तोत्रे ऽवतारो न सम्भवतीति
परिहर्तुं यो हि प्रधानोपकारित्वेन श्रूयते स तदङ्गे ऽपि स्थित उ-
पकरोतीत्येवं कल्पत इत्यौदुम्बराधिकरणवार्त्तिकोक्तमङ्गावतारन्या-
यस्याङ्गमात्रविषयत्वं स्मारयति * तादिति * एतदेवाङ्गावतारन्या-
योदाहरणे सप्तदशारत्नित्वे वाजपेयाङ्गत्वं दर्शयन्नुपपादयति * स०

सदशेति * वाजपेयोपकारित्वं विना तदङ्गत्वायोगाद्वाजपेयस्य च साक्षात्परिमाणेनोपकारासम्भवाद्यथा वाजपेयस्योपकर्तुं शक्नोति सप्तदशारत्नित्वं तथोपकरिष्यतीत्यध्यवसानाद्वाजपेयाङ्गपशुयागाङ्गयूपाङ्गत्वद्वारोपकरोतीत्यवधार्यतइत्यर्थः । इदं पुनरित्यनेनोत्तरार्द्धमुपपादितं वारवन्तीयस्य क्रियानङ्गत्वं वक्तुमनङ्गभूताया अपि क्रियाया वारवन्तीयस्य करणत्वोपजननेनोपकारित्वाद् गुणभूततोक्ता। ननु वारवन्तीयस्य क्रियां प्रत्यनङ्गत्वे ऽपि फलसाधनत्वान्यथानुपपत्त्या साधनत्वावगमात्साक्षात्साधनत्वायोगे ऽपि स्तोत्रद्वारा कल्पयिष्यतइत्याशङ्क्य योग्यतानपेक्षेणाकाङ्क्षामात्रेण साध्यक्रियान्वयायोगं वक्तुमपेक्ष्यमाणं केवलं न तु सप्तदशारत्निस्त्ववच्चो * द्यमानमित्युक्तम् * अङ्गत्वं चपरम्परयाप्युपकारित्वमात्रेण युक्तमाश्रयापेक्षायास्तु निर्व्यापारस्य कारकत्वानुपपत्तेर्व्यापारवत्त्वसिद्ध्यर्थत्वादयोग्यतया च क्रियया व्यापारवत्त्वासिद्धेः फलसाधनत्वानुपपादकव्यवहिताश्रयकल्पना न युक्तेत्याश्रयत्वोक्त्या सूचितम्। अप्रकृतमेव तर्ह्याश्रयत्वयोग्यं क्रियान्तरं कल्पयिष्यतइत्याशङ्क्य * अथेत्युक्तम् * कर्मान्तराङ्गत्वरूपवाक्यार्थान्तरप्रतिपत्त्यापि वारवन्तीयार्थवत्त्वोपपत्तेः फलान्वयस्यावश्योपादेयत्वाभावान्नाप्राकृताश्रयकल्पना युक्तेत्याशयः अन्यथापि चानर्थक्यपरिहारोपपत्तौ नानर्थक्यतदङ्गन्यायो ऽस्तीत्याह * न चेति * फलान्वयवत्कर्मान्तरान्वये प्राकरणिकाश्रयान्वयकल्पनक्लेशाभावात् * सुतरामित्युक्तम् * नन्वावृत्तिसंख्यादेर्गुणस्य प्रकृतकर्मस्वरूपसाधनत्वाभावे ऽपि कर्मसम्बन्धिप्रयोगपरिच्छेदसाधनत्वात्फलान्वयवद्वारवन्तीयस्यापि यागसम्बन्धिस्तोत्रसाधनत्वात्फलान्वयो भविष्यतीत्याशङ्क्याह * अत्यन्तेति * कर्मसिद्धिं विना प्रयोगपरिच्छेदासिद्धेः प्रयोगपरिच्छेदे साधिते कर्मसाधितमिति बुद्धेर्वैषम्यमित्याशयः । नन्वत्यन्तभेदे ऽपि सम्बन्धिसम्बन्धात्पशुयागे ऽनुगृहीते वाजपेयो ऽनुगृहीत इति बुद्धिवत्स्तोत्रे कृते यागः कृत इति बुद्धिर्भविष्यतीत्याशङ्क्याह * वाजपेयस्येति त्विति * पशुयागविषयो यागशब्दः साध्यसाधनभावलक्षणसम्बन्धविशेषस्तु न व्यवधाने सम्भवतीत्याशयः । यथा कथं चिद्यागाश्रयत्वप्राप्तेस्तत्सम्बन्धानुवादोपपत्तावप्यग्निष्टोमाख्यस्तोत्रसाधनसामत्वलक्षणस्याग्निष्टोमसामत्वलक्षणस्याग्निष्टोमसामत्वस्याप्राप्तेरनुवादायोगाद्वाक्यभेदापत्तेश्च वि-
५५१।१ ध्ययोगादग्निष्टोमसामशब्दो ऽनर्थकः स्यादित्याह * यद्यपीति *
आश्रयत्वेन प्रसज्यमानेष्वित्यध्याहारः । अग्निष्टोमसाम्नीति साम-

शब्दः स्तोत्रलक्षणार्थः । एवमेतस्येत्युभयथा अनर्थकं स्यादित्याह * पुनरपि चेति * सन्निधानेनाग्निष्टुद्यागाङ्गाग्निष्टोमस्तोत्रसम्बन्धलाभशङ्कानिरासार्थम् * वाक्येनेत्युक्तम् * एतस्य यदग्निष्टोमस्तोत्रसाधनं साम तद्रेवतीषु वारवन्तीयं कृत्वा पशून्भावयेदित्यग्निष्टोमसाम्नो ऽग्निष्टुता विशेषणे विशिष्टानुवादाद्वाक्यभेदः स्यादित्यर्थः । अथैतस्य यत्स्तोत्रसाम तद्रेवतीषु वारवन्तीयं कृत्वेति पूर्वं वारवन्तीयस्याग्निष्टुत्सम्बन्धः क्रियते ततः पूर्ववत्सर्वस्तोत्रान्वयापत्तेरग्निष्टोमशब्दानर्थक्यात्प्रसङ्गात्तत्परिहारार्थं विशेषणे यथा वाक्येनाश्रयकल्पने वाक्यभेदस्तथैव स्यादित्याह * तस्यैवेति * तथैव वाक्यभेदे पौनरुक्त्यमाशङ्क्यैतस्यैवेति विशेषणे यो विशिष्टानुवादलक्षणः स एवेत्यनेकार्थविधिलक्षणादन्यतोक्ता रेवतीवारवन्तीयान्वयस्य च त्वाप्रत्ययेनाक्षेपोपपत्तेः विधायकानावृत्तावप्येकस्य वाक्यस्यानेकार्थव्यापाराद् गौरवमपरिहार्यमित्याह * ऋक्सामेति * वारवन्तीयस्य फलं प्रति विधेयोपादेयगुणभावाद्रेवतीः प्रत्यनुवाद्योद्देश्यप्रधानभावाद्वैरूप्यं चकारेण सूचितम्।नन्वग्निष्टुत्प्रकरणेनाश्रयान्वयलाभात्तस्मिंश्च वारवन्तीयमग्निष्टोम सामकार्यमिति विधिना वारवन्तीयस्याग्निष्टुत्सम्बन्ध्यग्निष्टोमस्तोत्रान्वयासिद्धेर्न वाक्यभेदापत्तिरित्याशङ्कते * ननु चेति * ननु क्रत्वर्थस्य वारवन्तीयस्याग्निष्टोमस्तोत्रान्वयविधाने ऽपि फलार्थस्य कथं तदन्वयसिद्धिरित्याशङ्क्याह * वारवन्तीयं हीति * वारवन्तीयेन साध्यतया क्रत्वपेक्षणादग्निष्टोमस्तोत्रद्वारैव च वारवन्ती यस्य साधनत्वात्क्रतोश्च साध्यत्वात्प्रकृतातिक्रमकारणाभावाच्च नान्यगतत्वाशङ्केत्यर्थः । पुरुषार्थस्य वा [2]वाक्येनाग्निष्टोमस्तोत्राश्रयत्वविधाने च प्रकरणलभ्याश्रयानपेक्षणात्स्वतन्त्राग्निष्टोमस्तोत्रप्रयोगाभावे ऽपि क्रत्वन्तरार्थप्रयोज्यस्याप्यग्निष्टोमस्तोत्रस्याश्रयत्वोपपत्तेरेतच्छब्दानर्थक्यप्रसङ्गं परिहर्त्तुं तेनाश्रयविशेषणे वारवन्तीयस्याश्रयान्वयविधिनिमित्तवाक्यभेदवदाश्रयस्याग्निष्टुद्विशेषणविधिनिमित्तो ऽपि वाक्यभेदः स्यादित्याह * पुनरपि चेति * एतस्य यद्वारवन्तीयं तद्रेवतीषु कृत्वा पशून् भावयेदिति प्रकरणप्राप्तक्रत्वङ्गत्वस्यैव वारवन्तीयस्य रेवत्याधारतया विधीयमानस्य फलान्वयविधानात्तस्य च वारवन्तीयाग्निष्टोमसामविधिवाक्येनाग्निष्टोमस्तो-

१ एवमेतस्येत्यारभ्यऋक्सामेत्यन्तस्य ग्रन्थस्य पाठान्तरं वाक्येनेत्यारभ्य ऋक्सामेत्यन्तं ज्ञेयम् ।

२ इदं पाठान्तरं ।

त्रद्वारैवाग्निष्टुदङ्गत्वावगमान्नैतद्वाक्यभेदद्वयापत्तिरित्याशङ्क्याह * एतस्यैवेति * वारवन्तीयस्य रेवत्यन्वयात्प्रागग्निष्टुदन्वये ऽप्याग्नेय्याग्नीध्रमुपतिष्ठतइत्यत्र प्राकृतानामाग्नेयीनां स्तोत्रादिद्वारा क्रत्वन्वये ऽपि द्वारविशेषानपेक्षे क्रत्वन्वयाश्रयणेनोपस्थानान्वयवद्वारवन्तीयस्याप्यग्निष्टोमस्तोत्रान्वयानपेक्षक्रत्वन्वयमात्रोपलक्षितस्य फलान्वयोपपत्तेः । क्रत्वन्वयप्राग्भाविफलान्वयपक्षवत्पश्चाद्भाविफलान्वयपक्षे ऽपि सर्वस्तोत्रान्वयापत्तेः द्वितीयवाक्यभेदाभावे चाद्यो वाक्यभेदः स्यादेवेत्यापिशब्दार्थे वाशब्दः स एवेत्येवशब्दोत्कपाङ्गीकारेण व्याख्येयम् । क्रत्वन्वयानुवादपूर्वं च वारवन्तीयस्य रेवत्यन्वयकरणे कृत्वाशब्दस्यातिगौरवं स्यादित्याह * ऋक्सामेति[1] * रेवतीयस्य वारवन्तीयवाक्येन वाग्निष्टोमस्तोत्रगामित्वं स्यात्तद्वाक्यविहिताद्वास्याभेदात्सामान्यतो दृष्टेन वेति त्रेधा विकल्प्य गुणादीनां त्वसम्बन्धादिति वार्त्तिके गुणाद्विदिवाक्यानामन्योन्यान्वयाभावस्योक्तत्वाद्रेवतीवाक्यस्य वारवन्तीयवाक्यैकत्वाभावेनाद्यं तावत्कल्पं दूषयति * नैतदिति * वारवन्तीयरूपैक्ये ऽपि क्रत्वर्थपुरुषार्थरूपेण भेदाद्देवदत्तस्येव युद्धभोजनावस्थयोः स्थानैक्यनियमो नास्तीति द्वितीयं दूषयति * पूर्वेति * पुरुषार्थस्य वारवन्तीयस्यात्मनो व्यापारवत्त्वसिद्ध्यर्थं क्रतुं साधयतो ऽपि क्रत्वङ्गत्वं वैलक्षण्योक्त्या निरस्तम् । ननु वेदस्य तत्स्थानत्वाकल्पकत्वे ऽपि क्रत्वर्थवारवन्तीयवक्रत्वन्तःप्रयोज्यवारवन्तीयत्वात्पुरुषार्थस्यापि सामन्यतो दृष्टेनाप्यग्निष्टोमस्तोत्रस्थानत्वकल्पना भविष्यतीति तृतीयं कल्पमाशङ्क्य दूषयति * सामान्यतो दृष्टेति * विशेषणेनाधानाङ्गवारवन्तीयादिव्यभिचारनिवृत्तावपि शब्दैकसमधिगम्येष्वर्थेषु सामान्यतो दृष्टप्रमाणात्वस्य नैवं जातीयकेष्वेतद्भवति दृष्टाद्दृष्टसिद्धिरितीति पूर्वाधिकरणभाष्येणोक्तत्वान्न सामान्यतो दृष्टेनाप्यग्निष्टोमस्तोत्रस्थानत्वसिद्धिरित्यर्थः अग्निष्टोमस्तोत्रस्थानत्वानवगतिमेव वृद्धवाक्येनोपपादयति * आह चेति * फलाय विहितं सामवेदमध्ये पाठं स्वरूपज्ञानार्थमपेक्षते न क्रतुकालीनमग्निष्टोमस्तोत्रस्थाने पाठं वारवन्तीयरूपमात्रविधानेनाग्निष्टोमस्तोत्रान्वयनैरपेक्ष्यलक्षणस्वातन्त्र्यावगमादित्यर्थः । ननूक्थ्यादीनां फले विधीयमानानां ज्योतिष्टोममाश्रयतां वाक्यान्तरवशेनान्ते निवेशवद्वारवन्तीयस्याप्याश्रयभूते ऽग्निष्टुत्यग्निष्टोमस्तोत्रस्थाने विधानात्तत्रैव निवेशो भविष्यतीत्याशङ्क्याह * यदीति * स्था-

१ इद पाठान्तरमितप्रारभ्यैतावत्पर्यन्त, ग्रन्थ, पुनरुक्त, प्रतिभाति ।

नान्तरादर्शनेनोक्थ्यादीनामन्यत्र निवेशो नाश्रये तत्स्थानत्वदर्शनमा-
त्रादित्याशयः। प्रकृतातिक्रमकारणाभावादिति यदुक्तं तदपि दूषयति
* यदि चेति * शङ्कादूषणमुपसंहरति * तस्मादिति * ननु ५६०।
पुरुषार्थस्यापि वारवन्तीयस्य प्रसङ्गेन क्रतुसाधनत्वात्क्रत्वर्थवारव-
न्तीयधर्मलाभो भविष्यतीत्याशङ्कते * ननु चेति * यथाऽभ्युदिते-
ष्ट्यामिज्यार्थयोरपि दधिपयसोस्तण्डुलैः सह श्रपणविधानेन प्रास-
ङ्गिकतण्डुलश्रपणरूपप्रतीनौ कार्यसाधनत्वात्प्रणीताधर्मलाभ इति
नावमिकदृष्टान्तार्थः। ग्रहणप्रणयनादीनां प्रणीताद्यङ्गत्वात्कार्यप्रयुक्त-
त्वाच्चाङ्गानां प्रणीताकार्यश्रपणापूर्वोपकारित्वावगतेरनङ्गस्थितानाम-
पि चोपकारिस्थितत्वमात्रेणोपकारित्वोपपत्तेः श्रपणोपकारिणोर्दधि-
पयसोः स्थितानां श्रपणापूर्वोपकारित्वात् प्रणीताकार्यापन्नयोर्दधि-
पयसोर्युक्तं करणमग्निष्टोमसामत्वस्य तु क्रत्वर्थवारवन्तीयानङ्गत्वा-
दनङ्गस्य चानतिदेश्यत्वात्क्रत्वर्थवारवन्तीयकार्यापन्ने ऽपि पुरुषार्थ-
रूपवारवन्तीये ऽतिदेशानुपपत्तेर्नानुष्ठानं युक्तमिति वैषम्यमाह * त-
त्रैवेति * क्रत्वर्थवारवन्तीयाङ्गताग्निष्टोमसामत्वस्यानाशङ्क्यत्वमत्य-
र्थान्तरन्यासेनाह * प्रकरणेति * फलार्थेन वारवन्तीयेन प्रकृता-
ग्निष्टुद्ग्रहणे सति वारवन्तीयस्याङ्गुत्साधनत्वे ऽग्निष्टोमसामत्वस्य द्वा-
रत्वेनोपकारित्वात्पुरुषार्थं वारवन्तीयं प्रति गुणत्वं शङ्क्येत क्रत्वर्थं
तु प्रतिगुणताशङ्कितुमप्यशक्येत्याशयः। साक्षाच्च साम्नो यागसा-
धनत्वाशक्तेरग्निष्टोमस्तोत्रद्वारा यागसाधनत्वं यागसाधनत्वाच्चा-
ग्निष्टोमस्तोत्रान्वय इत्यन्योन्याश्रयापत्तेः प्रकृताग्निष्टुद्ग्रहणस्यैवासि-
द्धत्वात्पुरुषार्थमपि प्रति गुणत्वं नास्तीति * तदेव त्वित्यनेनोक्तम् *
कदा चिदप्यसिद्धमिति वाच्ये * मृदुत्त्वाद्यापीत्युक्तम् * नन्व-
ग्निष्टोमसामत्वस्य क्रत्वर्थवारवन्तीयानङ्गत्वे ऽपि प्राकृताग्निष्टोम-
साम यज्ञायज्ञीयधर्माणां कार्यापत्त्या वारवन्तीयाङ्गत्वात्पुरुषार्थे ऽपि
वारवन्तीये प्रासङ्गिकक्रतुसाधनत्वात् प्राप्ते ऽग्निष्टोमसामधर्मक-
त्वात् गुणवृत्त्याग्निष्टोमसामत्वानुवादोपपत्तेर्न वाक्यभेदो भविष्य-
तीत्याशङ्कामर्थान्तरन्यासेनैव निरस्यन्नाह * यदि त्विति * पुरु-
षार्थस्य वारवन्तीयस्याग्निष्टोमसामशब्दवाच्याग्निष्टोमस्तोत्रसम्ब-
न्धावगमे सत्यग्निष्टोमसामभूतक्रत्वर्थवारवन्तीयधर्माणां पुरुषार्थे
वारवन्तीये दधिपयसोरिव प्रणीताधर्माणां प्राप्तिः स्यात्तदनवगमा-
त्तु क्रतुसाधनसामत्वमात्रेण सामान्तरेष्विवाग्निष्टोमसामधर्माप्राप्तेः
कार्यप्रयुक्तत्वाच्च धर्माणां वारवन्तीयत्वमात्रेणाधानाद्यङ्गवारवन्तीय
इव प्राप्त्ययोगान्न गुणवृत्त्याप्यग्निष्टोमसामत्वानुवादोपपत्तिरित्या-

शयः । अतः प्रासङ्गिकक्रतुसाधनत्वेनाग्निष्टोमसामत्वलाभादपि वाक्यभेदपरिहारो न सम्भवतीत्युपसंहरति * तस्मादिति * अतो गुणफलान्वये वाक्यभेदपरिहाराशक्तेस्तत्परिहारार्थं यागान्तरविधिरेष्टव्य इत्याह * इतीति * ननु यागान्तरविधावप्राप्तानेकार्थविशिष्टयागविधानाद् गौरवं स्यादित्याशङ्क्याह *तथा सति हीति * साद्यस्काः साहस्रा इति चैकेन शब्देन युगपदुपादानलक्षणसङ्घाख्यनिकायवतामग्निष्टुदादीनामेकाहानां निकायित्वावान्तरसामान्येन सुसदृशत्वात्पूर्वस्याग्निष्टुतो विध्यन्तो रेवत्यादियागेषु उत्तरेषु प्रवर्त्तते इत्यष्टमे निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यादित्यत्र वक्ष्यमाणत्वात्तदीयधर्मप्राप्तेरित्यर्थः । बहुप्राप्तिमेव विवृणोति * एषशब्दस्तावदिति*अतः क्त्वाशब्दाक्षिप्तार्थविशिष्टयागमात्रविधानाल्लाघवमित्युपसंहरति * क्त्वाशब्देति * ननु रेवतीवारवन्तीयान्वयस्याग्निष्टोमस्तोत्रक्रियाविशेषणत्वात्तस्याश्चेहाविधेयत्वात् न वि-
५६३।१ शिष्टविधिः सम्भवतीत्याशङ्कते * न त्विति * एतदेव विवृणोति * तथा हीति * श्लोकं व्याचष्टे * यानीति * अग्निष्टोमस्तोत्रस्याविधेयत्वात्तद्विशेषणत्वेन रेवतीवारवन्तीयान्वयानपेक्षे ऽपि क्त्वाशब्दोक्तायाः अग्निष्टोमस्तोत्रभावनायाः स्वरूपेण प्राप्ताया अपि रेवतीवारवन्तीयान्वयविशिष्टरूपेणाप्राप्तेस्तादर्थ्येन विधेयत्वात्तद्विशेषणासत्त्वेनाक्षेपोपपत्तेर्वाक्यभेदाप्रसङ्गाद्विशिष्टविधिः सम्भवतीति परिहरति * नैष इति * करोत्यर्थमिति वाच्ये करोत्यर्थस्याकारकत्वात्क्रियारूपभावनान्वयायोगाशङ्कानिरासार्थं धातुसम्बन्धाधिकारविहितक्त्वाप्रत्ययसामर्थ्यात्क्रिययोरप्यन्वयः प्रतीतेः क्रियाकारकलक्षणान्वयायोगे ऽपि च समानकर्तृकत्वेन पूर्वोत्तरकालत्वेन च विशेषणविशेष्यरूपान्वयोपपत्तिसूचनार्थं त्क्वान्तकरोत्युक्तिः । ननु क्त्वाशब्दोक्तभावनाद्वारा यागभावनया रेवतीवारवन्तीयान्वयग्रहणे ऽप्यग्निष्टोमसाम्ना विशेषणे वाक्यभेदापत्तेरग्निष्टोमस्तोत्रावच्छिन्नैव भावना क्त्वाशब्देनोक्तेति ज्ञातुमशक्यत्वाद्वारवन्तीयस्य च स्वरूपेणातिदेशतो ऽग्निष्टोमस्तोत्रान्वयप्राप्तावपि रेवत्याधाररूपेणाप्राप्तेस्तद्रूपविधावग्निष्टोमसामत्वानुवादायोगादग्निष्टोमसामशब्दो ऽनर्थकः स्यादित्याशङ्क्याह * नवेनेति * भावनावच्छेदकधात्वर्थान्वयं विना रेवतीवारवन्तीयान्वयस्य भावनाविशेषणत्वायोगात्साम्नश्च यागसाधनत्वाशक्तेः प्रधानभूतयागाख्यधात्वर्थान्वयायोगाद्रेवतीषु वारवन्तीयं यागसाधनं कृत्वेति यागस्य क्त्वाशब्दोक्तभावनावच्छेदकत्वानुपपत्तेस्तदवच्छेदकधा-

स्वर्थापेक्षायां वारवन्तीयस्यानिर्देशतो ऽग्निष्टोमस्तोत्रभावनाविशेषणत्वावगतेर्वारवन्तीयान्वितानां रेवतीनामपि तद्विशेषणत्वावगताद्रेवत्याधारस्य वारवन्तीयस्याप्यग्निष्टोमसामत्वानुवादोपपत्तिरित्याशयः। आद्यं श्लोकं व्याचष्टे * रेवतीति * कृदन्ताक्षेपशब्दयोगेन क्रतोरिति षष्ठ्याः कर्तृवाचित्वात्स्वविशेषणस्यैव क्रतुनाक्षेप इत्यर्थः । द्वितीयां व्याचष्टे * सत्विति * साक्षाद्रेवतीवारवन्तीयसम्बन्धोपजीवनाशक्तेर्गुणत्वेन चानर्थक्यतदङ्गन्यायविषयत्वादङ्गेषु तत्सम्बन्धं विक्षेप्तुमारभमाणः क्रतुः क्वाङ्गे निक्षेप्तव्य इत्यपेक्षायां वारवन्तीयस्यातिदेशेन विज्ञातस्थानत्वाद्रेवतीरपि तत्स्थानाः कल्पयतीत्यत्र वाक्ये ऽग्निष्टोमस्तोत्रसाधनतायाविधाने ऽपि रेवतीवारवन्तीयान्वयः क्रतुविशेषणमप्यग्निष्टोमस्तोत्रे संक्रामतीत्यग्निष्टोमसामशब्दानर्थक्यदोषो नास्तीत्यर्थः । एवमद्रव्यदेवतात्मकत्वेन वारवन्तीयस्य यागसिद्ध्यशक्तत्वान्न साक्षात्प्रकृतयागान्वयो ऽस्ति अङ्गावतारन्यायाविषयत्वाच्च स्तोत्रद्वारापि पुरुषार्थत्वपक्षे नास्ति क्रत्वर्थत्वपक्षे त्वङ्गावतारन्यायविषयत्वादस्तीति वैषम्यमुक्त्वा साम्नः स्वयं क्रियारूपत्वेनाश्रयभूतक्रियान्तरानपेक्षत्वात्पुरुषार्थस्य चाङ्गत्वेनान्वयायोगादिति वक्ष्यमाणादपि कारणात्प्रकृतयागान्वयो नास्तीत्याह * अतश्चेति * परपक्षदूषणवेलायामेवैतदपि कारणं वाच्यं सत्कस्मात्स्वपक्षसमर्थनात्पश्चादुक्तमित्याशङ्क्य मन्दत्वसूचनायेतीषदर्थवाच्याङ्प्रयोगेण दर्शितं वारवन्तीयस्य गीतिरूपत्वेन क्रियात्वादाश्रयभूतक्रियानपेक्षत्वे सौभरस्यापि वृष्ट्यादिफलार्थस्यानेनैव न्यायेनाश्रयानपेक्षत्वाद्व्यूहः क्रतुप्रयोगापत्तेः क्रत्वङ्गभूतस्तोत्राश्रयत्वप्राप्त्यभावेन स्तुवीतेत्यनुवादानुपपत्तिप्रसङ्गात्करणनिर्देशमात्रेण स्वाश्रयापेक्षत्वे यागादेरपि करणत्वाभ्युपगमादाश्रयापेक्षापत्तेर्वारवन्तीयस्यापि च फलभावनाकरणत्वे पशुकामो ह्येतेनेत्येतच्छब्देन परामर्शापत्तेः करणत्वनिर्देशेनाश्रयापेक्षत्वस्यापरिहार्यत्वप्रसङ्गाद्यागादिवच्च सौभरस्यापि फलभावनाकरणत्वमात्रात्करणत्वनिर्देशोपपत्तेः। प्रत्युतैकक्रियाकरणस्यान्यकरणत्वानुपपत्तेः फलभावनाकरणत्वमात्रात्करणत्वनिर्देशोपपत्तेर्वाच्यत्वादनभिमतैव साम्नः क्रियारूपता प्रौढ्योक्तेति गम्यते षड्जादिस्वरसमूहात्मकत्वेन गीतेः सिद्धरूपत्वात्तद्रूपस्यापि साम्नः क्रियात्वाभावादपि तु कर्मशब्दः स्याद्भावो ऽर्थः प्रसिद्धग्रहणत्वाद्विकारो ह्यविशिष्टो ऽन्यैरिति सामिक्याश्च क्रियात्वोक्तेः सामार्थो यः कश्च गीतेः सम्नरइति श्रुतेः सामशब्दस्य षड्गर्षभगान्धारमध्यमपञ्चमधैवताख्यस्वरसमूहवा-

च्चित्वावगमात्स्वरशब्दस्य च मारुतस्तूरसि चरन्भद्रं जनयति स्वर- मित्यादिदर्शनाद्वायवीयसंयोगविभागजनितनादाख्यध्वन्यपरपर्याय- घोषात्मकशब्दपरत्वावगतेस्तस्य चाकाशगुणत्वप्रसिद्धेः क्रियात्वे च साम्नो ऽशब्दात्मकत्वेनोच्चारणाख्याध्ययनायोगात्सामान्यधीयतइति प्रयोगायोगापत्तेर्ध्वनिनादापरपर्यायस्वरात्मकगीतिजनिकायामुच्चार- णक्रियायामृचं प्रति प्रधानसाम्नो गुणभूतत्वाय संस्कारकर्मत्वव्य- पदेशसिद्ध्यर्थं गीतित्वमुपचर्य व्याख्यातुं शक्यत्वादुच्चारणक्रिया- द्वारैव च वक्ष्यमाणाधिकरणस्थाया हींष्यादिप्रति सौरभस्याश्रयत्वो- पपत्तेरुपपादयितुं शक्यत्वाद्वारवन्तीयस्य च क्रियात्वे तस्यैवाग्निष्टुतो ऽग्निष्टोमस्य गुणे वारवन्तीये पशवः फलमिति पूर्वपक्षवचनव्यत्यय- योगात्सन्देहासम्भवेनाधिकरणारम्भानापत्तेर्न पारमार्थिकी क्रि- यात्वोक्तिः सप्तमाधिकरणे तु स्वरस्य सामत्वनिरासो न ह्यभिवत्पक्ष- णामभिव्यञ्जको यो ऽनादे स कवतीषु भावयितुं शक्यो यदि भा- व्येत न कवत्यो भवेयुरिति तत्रत्यभाष्यालोचनयैव गीत्याख्यषड्गा- दिस्वराभावे ऽप्यक्षराभिव्यक्तिदर्शनेन तेषां स्वानुरक्तत्वरूपाभिव्यञ्ज- कत्वे ऽप्यक्षरस्वरूपानभिव्यञ्जकत्वात्तदभिव्यञ्जकवायवीयसंयोग- विभागानां स्वरजनकत्वात्स्वरत्वमुपचर्यतइति द्रष्टव्यं तद्वैधर्म्योक्त्यैव षड्जादिस्वरूपस्यार्थस्याभिव्रनीयस्य कवतीषु भावयितुं शक्यताया भावो ऽर्थ इति तत्रत्यसिद्धान्तसूत्रावयवेनाभिधानात्तेनापि क्रियावा- च्चिता सामशब्दस्योक्तेति नाशङ्कनीयं रथन्तरादिशब्दस्य च गानतिवा- च्यत्वेन प्रसिद्धगानवाच्चित्वाद्दग्वाच्चित्वे प्रसिद्धग्रहणत्वादित्यवयवेन निरस्ते हन्तिविष्यादिजन्यविकारवदृग्विकारवाच्चित्वात् दग्वाच्चिता न युक्तेति विकारो ह्यविशिष्टो ऽन्यैरित्यन्त्यावयवेन हेत्वन्तराभिधाना- च्च हन्त्यादिदृष्टान्तोक्त्या क्रियात्वं सामसु चिन्तितमिति शङ्कनीयं किं तत्कारणमित्यपेक्षायामाह * पश्येति * श्लोकं व्याचष्टे * दधी-
५६२।१' ति * गडिवदनैकदेशे शक्तिशक्तौ विशिअवयवइत्यादावक्रियायामपि धातुस्मृतेर्गण्डादिशब्दाच्च क्रियानवगतेर्धातुवाच्यत्वमात्रात् क्रिया- त्वासिद्धेः परमार्थतो वारवन्तीयस्याव्यापारत्वेनाक्रियात्वे ऽपि प्रायेण धातूनां क्रियावाच्चित्वादौपचारिकाक्रियात्वसूचनार्थं धातुवाच्यत्वो- क्तिः क्रियानपेक्षत्वे को दोष इत्यपेक्षायामाह * ततश्चेति * सि- द्धान्तमुपसंहरति * तस्मादिति * सूत्रतात्पर्यं व्याख्याय भाष्य- मनुसन्दधानः समेष्विति सूत्रावयवं भाष्यकृद्व्याख्यानस्य क्लिष्ट- त्वात्स्वयं तावद्व्याचष्टे * समेष्विति * गुणशब्दस्येह सिद्धरूपार्थ- वाच्चित्वादाश्रयत्वानपेक्षत्वे ऽभ्युच्चयमात्रेण क्रियात्मकत्वहेतूक्तिः

भाष्यकृद्व्याख्यानमपि समर्थयते *भिन्नेति* न हीति भाष्यमप्राधान्याद्रेवतीनामेतच्छब्दान्वयायोगादप्राप्तेश्चोद्देश्यत्वायोगाशङ्कानुपपत्तेरयुक्तमाशङ्क्योपपादयति *न हीति* वारवन्तीयात् प्राथम्योक्तेर्यद्वृत्तयोगः प्राथम्यमित्युद्देश्यलक्षणमिति न्यायेनोद्देश्यत्वमुद्देश्यत्वाच्चप्राधान्यमप्याभातीत्यानन्तर्योक्त्या सूचितम्। ननु सतीष्वपि रेवतीषु विशिष्टानुवाददोषः प्राप्नुवन्कस्मान्नोक्त इत्याशङ्क्याह*तत्रेति* तच्चाग्निष्टोमसामत्यपरोऽपि वाक्यभेदः प्राप्नोतीति सूचनार्थेकशब्द. असतीनां च रेवतीनां फलार्थवारवन्तीयान्वयविधौ क्रत्वन्वयाप्राप्तेरन्यत्र च गुणभूतानामन्यान्वयविध्ययोगादेतच्छब्दोऽर्थशून्यः स्यादित्येतच्छब्दान्वयानुक्त्या सूचितं भाष्यकृतेत्युत्तरभाष्यपातनिकार्थमाह * तच्छब्देति * शुद्धानां रेवतीनां वारवन्तीयं प्रति विधौ पश्चादग्निष्टुद्यागान्वयायोगे ऽपि प्रागेव यागान्वयितया तां विधाय तासां च यागान्वये द्वारापेक्षायां द्वारतया वारवन्तीयान्वयं विधाय यागविशिष्टरेवतीविशिष्टस्य वारवन्तीयस्य फलान्वयविधिर्भविष्यतीत्याशङ्कार्थमथेति भाष्यं व्याचष्टे * अथ त्विति * रेवतीविशिष्टस्य वारवन्तीयस्याग्निष्टोमसामत्वाप्राप्तेरनुवादायोगाद्वाक्यभेदापत्तेश्च विध्ययोगादग्निष्टोमसामशब्दानर्थक्यदोषोक्त्यर्थं तथेति भाष्यं रेवतीयागान्वयरेवतीवारवतीयान्वयवारवन्तीयफलान्वयरूपार्थत्रयविधिनिमित्तवाक्यभेदानुपन्यासयुक्तमाशङ्क्य व्याचष्टे * तथापीति *

गौणं लाक्षणिकं वापि वाक्यभेदेन वा स्वयम् ।
वेदोऽयमाश्रयत्यर्थं को नु तं प्रतिकूलयेत् ॥

इत्यनेन न्यायेन वाक्यभेदत्रयाभ्युपगमवच्चतुष्टयाभ्युपगमे ऽप्यदोष इत्याशयेनाशङ्कार्थमथेति भाष्यं व्याचष्टे * अथेति * एतस्यैवेति परिहारभाष्यमेतत्पदानुरोधेनैवाग्निष्टुद्रेवत्यन्वयाभ्युपगमादयुक्तमाशङ्क्य द्वेधा व्याचष्टे * तथा सतीति * वारवन्तीयस्याग्निष्टोमसामत्वविधावनुज्ञाते वाक्यभेदत्रयातिरेकापत्तेस्तत्परिहारार्थमग्निष्टुद्रेवत्यन्वयविध्यपगमाद्वाक्यभेदत्रयातिरेकापत्तेरेव चैतच्छब्दस्य रेवतीशब्दवदग्निष्टोमसामशब्देनाप्यनन्वयादानर्थक्यं तच्चैतस्याग्निष्टोमसामेत्यन्वयविधौ वाक्यभेदत्रयातिरेकापत्तेरित्याद्यव्याख्याने ऽर्थः रेवतीविशेषणत्वेनैतच्छब्दविवक्षायामपि वाक्यभेदपञ्चकापत्तेः सकृच्छ्रुतस्यैतच्छब्दस्यानेकविशेषणत्वायोगादग्निष्टोमसामविशेषणत्वाविवक्षाविवक्षायां वा वाक्यभेदपञ्चकापत्तिरिति द्वितीये । यथा विशिष्टानुवादपक्षे यथा-

क्रममवस्थितस्यैतच्छब्दस्य रेवतीविशेषणत्वं तथा रेवत्युपादानपक्षे
ऽपि यथाक्रममेवावस्थानं नोत्कर्ष इत्येवकारार्थः। अस्मिन्पक्षे रेवती-
नामुपादेयत्वात्सामाम्नायसिद्धा या रेवत्यस्ता एतस्याग्निष्टुत कार्या
इति स्वरूपानुवादार्थतया यच्छब्दो योज्यः। सिद्धान्ते ऽपि कर्मान्त-
रस्य क्रियान्तरविशेषणस्यैव विधानात् वाक्यभेदो ऽपरिहार्य इत्या-
शयेनाथेति प्रश्नभाष्यं गुणे पुनः फले कल्पनातः इत्यादिभाष्येण
पूर्वपक्षे वक्ष्यमाणानां वाक्यभेदानामसमाप्तत्वान्मध्ये सिद्धान्तदो-
५६३।६ षं शङ्कानवकाशादयुक्तमाशङ्क्योपपादयति *इहैवेति* यागान्तर-
स्याग्निष्टुद्यागाङ्गत्वेन विधिर्गुणविशिष्टस्य वाग्निष्टुत फले विधिः फ-
लार्थस्यापि वा गुणस्य प्रकरणप्राप्तयागाङ्गत्वानुवाद इति पक्षान्तराणां
सिद्धान्तप्रतियोगित्वात्पूर्वपक्षत्वमभ्युपेत्यापि प्रश्नावसरसमर्थनार्थे-
तदुक्तं फले गुणविधिः प्रकरणप्राप्ताश्रयाभूतयागानुवादश्चेति त्वत्र-
त्यपूर्वपक्षवचनव्यक्तयः सर्वा निरस्ता एव । विस्मयहेतुदर्शनपूर्वं
भाष्यं व्याचष्टे *तथा नामेति* यजेतेति विदितस्यैतद्वचनामिति पूर्व-
भाष्योक्तयागानुवादद्वारेतरानुवादसिद्धिरेवं च सति विपरिवृत्तिप्रा-
प्तो यजिरित्यादिवार्त्तिकोक्त्या तथा शब्देन परामृष्टायागस्यायोग्यत्वे-
नाश्रयत्वाप्राप्तेर्वस्तुतो ऽसम्भवन्नप्यनुवादः पूर्वपक्षे स्थित्वोक्त इति
नामशब्देन सूचितम्। रेवतीष्वित्युत्तरभाष्यं व्याचष्टे *सिद्धा-
न्तेति* नन्विति प्रश्नाशयविवरणभाष्यं स्वविशेषणविशिष्टायाः
क्त्वाशब्दोक्ताया भावनाया यागभावनाविशेषणत्वाद्विशिष्टैकार्थ-
विध्युपपत्तेरयुक्तमाशङ्क्योपपादयति *नन्विति* क्त्वान्तत्वोक्त्या
तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वेति क्त्वाशब्दोक्तभाव-
नाया रेवतीयागे ऽतिदेशप्राप्तायाः प्रत्यभिज्ञानादविधेयत्वेनाविधेय-
भावनाविशेषणत्वायोगः सूचित। स्वरूपेणाविधेयत्वे ऽपि रेवतीवा-
रवन्तीयान्वयविशिष्टरूपेण विधेयत्वाद्विशेषणत्वोपपत्तिरित्याशये-
नेतीति परिहारभाष्यं व्याचष्टे *नेति* उच्यतइत्याशङ्काभाष्यं
विधेययागभावनाविशेषणत्वात्क्त्वाशब्दार्थस्य लिङा ऽर्थाद्विधाने
ऽपि रेवतीवारवन्तीयान्वयो लिङा क्त्वाप्रत्ययेन वा न विहित इत्येवं
व्याचष्टे *रेवतीनामिति* ननु रेवतीवारवन्तीयान्वयाविधाने ऽप्युभ-
योः क्त्वाशब्दोक्तैकभावनाविशेषणत्वेनारुणैकहायनीवदन्योन्यानि-
यमसिद्धः। समभिव्याहारलभ्यान्वयप्रतीतिराविरुद्धेत्याशङ्कानिरासा-
र्थं तत्रेति भाष्यमरुणैकहायनीन्यायवैषम्योक्त्यशक्तेरयुक्तमाशङ्क्योप-
पादयति *तेनेति* रेवतीवारवन्तीयविशिष्टक्त्वाशब्दार्थविशिष्ट-
यागभावनाविध्यर्थाक्षेपात्क्त्वाशब्दार्थस्य रेवतीवारवन्तीयविशिष्ट-

त्वप्रतीत्या तयोरन्योन्यनियमः प्रतीतो ऽप्यविधेयत्वान्नादर्त्तव्य इत्या-
शयः। सम्बद्धेति विशेषणप्रधानो निर्देशः। नन्वविधेयत्वे रेवतीवा-
रवन्तीययोरप्रयोग एव स्यादित्याशङ्क्य *यागेत्युक्तम्* क्त्वाशब्दो-
क्तभावनाविशेषणत्वेन प्रतीयमानयोः कथं यागभावनाविशेषणते-
त्याशङ्क्य * यद्यपीत्युक्तम् * रेवतीवारवन्तीयसम्बद्धत्वरूपेणोक्त-
त्वात्सम्बद्धत्वरूपेण सतीं प्रतीयमानामपि क्त्वाशब्दवाक्यां स-
म्बद्धत्वरूपस्याविधेयत्वाच्छुद्धायाश्चानुष्ठानाशक्तेरनादरणीयत्वाद-
सतीमप्रतीयमानामिव प्रतिपद्य रेवतीष्वन्यान्यपि सामानि प्राप्नु-
वन्ति सामान्यन्यास्वृक्षु प्राप्नोतीत्यध्यवस्यतीत्यध्याहारेण ल्यप्प्र-
त्ययो योज्यः। सन्निहितक्त्वाशब्दोक्तभावनाविशेषणत्वस्याविधे-
यत्वेनानादरणीयत्वाद्व्यवहितयाप्येकवाक्योपात्तया प्रधानभूतया
यागभावनया ऽन्वयो युक्त इत्याशयः। ननु यागभावनाविशेषणत्वे
ऽपि साक्षात्तदन्वयायोगादङ्गत्वेन च्याङ्गावतारन्यायविषयत्वात्तद-
ङ्गावतारावगतेः। कस्मिन्नङ्गविशेषे ऽवतार इत्यपेक्षायां वारवन्ती-
यस्य प्रकृतावग्निष्टुत्यग्निष्टोमस्तोत्रविषयत्वेनेहापि तद्विषयत्वावगमा-
द्रेवतीनां चाधारत्वश्रुतेः। साम्नैव प्रत्यृचामाधारत्वप्रसिद्धेः सा-
मान्तराणां चातिदेशतो निर्ज्ञातत्वेनर्गन्तरानाकाङ्क्षत्वादेकाग्निष्टो-
मस्तोत्रविषयतयान्योन्यनियमः सेत्स्यतीत्याशङ्क्य * एकस्तोत्रेत्यु-
क्तम् * वारवन्तीयस्याग्निष्टोमस्तोत्रविषयत्वेनातिदेशतः प्राप्तेरुपदे-
शानर्थक्यापत्तेः स्तोत्रान्तरविषयत्वावगमाच्चात्र च प्राकृतसामकार्या-
पत्तिप्रमाणाभावेनाधिकावापावगतेरारोप्यमाणानां च साम्नां त्रीणि
ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुबत्र ह्येवावपन्त्यत एवोद्वप-
न्तीति श्रुत्या प्राकृतीष्वेव गायत्र्यादिष्वभ्यस्यमानासु निवेशावगतेः
ऋगन्तरानाकाङ्क्षत्वाद्रेवतीनां तद्विषयत्वानवगतेरेकस्तोत्रविषय-
त्वानियमादेकस्तोत्रविषयत्वे ऽपि वानेकसामकयोर्माध्यन्दिनार्भवप-
वमानयोर्यस्मिन्नेवाद्ये मध्यमे ऽन्त्ये वा स्तोत्रैकदेशे वारवन्तीये तस्मि-
न्नेव रेवत्यइति नियमाभावान्नान्योन्यनियमः सेत्स्यतीत्याशयः। उ-
प्यन्ते प्रक्षिप्यन्ते सामान्यास्विति अधिकरणवाचि घञन्तेनावापश-
ब्देनाङ्गन्तुकस्य साम्नो ऽभिनिर्ज्ञातप्राकृतर्गाधारत्वेनाधारभूतर्गन्तरा-
नाकाङ्क्षत्वं सूचितम्। एवं सति को दोष इत्यपेक्षायामाह * तत्रे-
ति * तेनानयोरन्वयायातिदेशे ऽवगताग्निष्टोमस्तोत्रस्थानवारवन्ती-
योद्देशेन रेवतीविध्यापत्तेर्यागभावनानन्वयाद् दुष्परिहरो वाक्यभेदः
स्यादित्याह * अत इति * यागभावनान्वयनिरासायैवकारः नैष ६६४।२
दोष इत्यादिपरिहारभाष्याशयमाह * नैष इति * अप्राप्तविषय-

तैर्वंविधशब्देनोक्ता अप्राप्ते ऽर्थे कृत्वेत्यस्य विध्यन्वयो विधेयत्वाख्यः फलमित्यर्थः । श्लोकार्थमुपपादयति * सर्वत्रैवेति * कृत्वाशब्दार्थविशिष्टयागभावनाविधिना विशेषणस्याविधाने ऽपि क्त्वाप्रत्ययेन धातुवाच्यायाः क्रियायाः क्रियान्तरसमानकर्तृकत्वाभिधानादनुष्ठानं च विना कर्तृत्वायोगादनुष्ठानावगतेरप्राप्तत्वाच्च रैवतीवारवन्तीयानुवादायान्वयक्रियाया अभिषुत्य हुत्वेतिवन्निमित्तार्थश्रवणायोगादनुष्ठानानुवादानुपपत्तेर्विधावस्मृतस्यापि कृत्वाशब्दस्यार्थाद्विध्याक्षेपकत्वाद्विधेयं कृत्वा शब्दार्थविशेषणस्य रैवतीवारवन्तीयान्वयस्य विधेयत्वोपपत्तिरित्याशयः । कृत्वाशब्दोक्तायाः क्रियायाः प्राप्तत्वान्निमित्तार्थश्रवणोपपत्तिमाशङ्क्य स्वरूपेण प्राप्तावपि रैवतीवारवन्तीयान्वयवैशिष्ट्यरूपेणाप्राप्तेस्तादर्थ्येनैव च विधेयत्वाभ्युपगमाच्च निमित्तत्वाश्रयणं युक्तमिति * न चेहेत्यनेनोक्तम् * द्वाविति भाष्यं शङ्कोत्तरत्वेन व्याचष्टे * यदि तर्हीति * यथेति दृष्टान्तभाष्यमपि सकृदुच्चरितस्य क्त्वाप्रत्ययस्यानुष्ठेयत्वपूर्वकालत्वरूपानेकार्थपरत्वायोगादप्रवृत्तिलक्षणो वाक्यभेदः स्यादिति शङ्कोत्तरत्वेन व्याचष्टे * कथमिति * पूर्वकालत्वानुष्ठेयत्वयोर्विशेषणविशेष्यभावात्पूर्वकालत्वविशिष्टानुष्ठेयत्वरूपैकार्थोपपत्तेर्विशिष्टरूपेण च क्त्वाप्रत्ययेनोपादानादेकशब्दोपादानलक्षणाया अपि च वाक्यभेदपरिहारप्रक्रियायाः शोणशब्दे च त्वैकार्थसमवायिरक्तावान्तरजातिवाचित्वेन दृष्टत्वान्न वाक्यभेदापत्तिरित्याशयः । क्त्वाप्रत्ययाक्षिप्ताद्वितापरपर्यायानुष्ठानावगमे ऽपि भुक्त्वावागच्छतीत्यादौ विध्यभावे तत्कार्यत्वाप्रतीते कृत्वाशब्देनैव च तदर्थविधौ न चेदन्येन शिष्टा इत्यनेन न्यायेन विशिष्टयागभावनाविध्ययोगापत्तेर्भाष्योक्तपरिहारापरितोषात्स्वयं निर्विशेषणस्य करोत्यर्थस्य विशेषणत्वायोगाद्रैवतीवारवन्तीयान्वयस्य विधेययागभावनाविशेषणान्तर्भावाभ्युपगमेन लिङैव विधेयत्वमुपपादयति * अथ वेति * द्रव्यस्याविशेषितस्यापि स्वरूपमात्रेण विशेषणत्वोपपत्तेस्तद्विशेषणस्यानन्तर्भावादविधेयत्वे ऽपि करोत्यर्थस्याविशेषितस्य निरूपणाशक्तेर्विशेषणत्वायोगाद्विधेयविशेषणान्तर्गतत्वाद्रैवतीवारवन्तीयान्वयस्य विशेषणाविशेषणत्वे ऽपि विधेयता युक्तेत्याशयः । श्लोकं व्याचष्टे * तत्रेति * पञ्चकत्वाधिकरणपूर्वपक्षन्यायस्यापि क्रियाविशेषणत्वहेतुकाविवक्षासिद्धान्तेनाबाधादुपन्यासः यागभावनाविशेषणस्य करोत्यर्थस्य रैवतीवारवन्तीयान्वयविशिष्टतां विना विशेषणत्वायोगात्स्वावश्यमभ्युपगन्तव्येत्युक्ते कथं पदान्तरोपात्तस्यान्तर्गतिरित्यपेक्षायां यस्यां

भयं हविरार्त्तिमार्च्छेदित्यत्रार्तिनिमित्तभूतायाः मृष्यामहे हविषा वि-
शेषणमिति वदता भाष्यकारेण पदान्तरोक्तहविर्विशिष्टाया आर्ते-
र्निमित्तत्वोक्त्या पदान्तरोक्तस्य निमित्तान्तर्गतिमुक्त्वा दृष्टान्तत्वेन
सूचयितुमार्त्यधिकरणभाष्य पठितं ननु विशेषणविशेषणस्य कथं
प्रधानान्वय इत्याशङ्क्याह * तथा चेति * अङ्गगुणाविरोधे च ता- ५६५।
दर्थ्यादित्यत्राङ्गत्वाद्गुणयानुष्ठानस्य प्रधानत्वाद्गुणार्थताया वक्ष्य-
माणत्वादित्याशय. । रेवतीवारवन्तीयान्वयविध्युपपादनस्यानिय-
माशङ्कापरिहारोपयोगमाह * तस्मादिति * रेवतीवारवन्तीया-
न्वयेन विशेषितायां कृत्वाशब्दोक्तायां भावनायामुक्तसा-
मर्थ्यानियम इत्युक्ते तस्याः पूर्वकालत्वलक्षणनिष्पन्नरूपत्वात्कथम-
निष्पन्नरूपेणान्वयेन विशेषणमित्याशङ्क्य शुद्धस्य करोत्यर्थस्य पूर्व-
कालत्वनिरूपणाशक्तेर्विशिष्टस्य पूर्वकालत्वोक्त्या विशेषणस्य पूर्व-
कालत्वोक्तिर्निष्पन्नशब्देन सूचिता। ननु वारवन्तीयस्यानिदेशतो ऽग्नि-
ष्टोमस्तोत्रसाधनत्वावगमात्तस्य च सर्वस्तोत्रान्त्यत्वेन यागात्प्रागयोगा-
त्पूर्वकालत्वानुपपत्तेः । क्त्वाप्रत्ययस्य च मुखं व्यादाय स्वपिती-
तिवत्समानकर्तृकत्वमात्रेणोपपत्ते । पूर्वकालवाचित्वायोगाच्च त-
द्वशेनानुष्ठेयतया क्त्वाप्रत्ययोपात्तस्य रेवतीवारवन्तीयान्वयस्योत्तर-
क्रियान्वयः सिद्ध्येदित्याशङ्क्याह * कृत्वाशब्दश्चेति * मुखं
व्यादाय स्वपिति सम्मील्य हसतीत्युपसंख्यानात्समानकर्तृत्वमात्र-
वाचित्वे ऽप्याह स्मृतेः प्रयोगाच्च पूर्वकालवाचित्वस्यावगतस्य त्या-
गायोगादनेकार्थस्य करोतेरिहानुष्ठानवाचित्वायोगे ऽपि यागप्रक्र-
मात्प्रागेवाविकलानुष्ठानसिद्ध्यर्थं सर्वं पदार्थानामिदं करिष्यामी-
त्येवमध्यवसेयत्वाद्वाचा करोति मनसा करोतीत्यादौ चाध्यवसाने
ऽपि प्रयोगदर्शनात्परिकल्पनाध्यवसानापरपर्यायप्रतिपत्तिवाचित्वा-
वगतेः । सामानुष्ठानस्य चर्त्विक्कर्तृत्वाद्यजमानकर्तृकयागसमानक-
र्तृकत्वस्याप्यनुपपत्तेः क्त्वाप्रत्ययस्य पूर्वकालवाचित्वाविरोध इ-
त्याशयः । नन्वेवमपीत्याशङ्क्य भाष्यमर्थैकत्वादेकं वाक्यमित्यत्रार्थ-
शब्दस्य प्रयोजनवाचित्वाभ्युपगमाद्वाक्यभेदमात्रेण वाक्यभेदानाप-
त्तेरयुक्तमाशङ्क्य विधिप्रयोजनत्वाद्वाक्यस्य विधेयभेदाशयत्वेन
व्याचष्टे * नन्विति * नैष इति परिहारभाष्यं रेवत्यभिधान-
स्याप्यप्राप्तार्थत्वेन विधिप्रयोजनत्वाद्विधेयभेदप्रतीतेरयुक्तमाशङ्क्य
रेवत्यादिविशिष्टैकयागभावनाविधिसिद्ध्यर्थं रेवत्याद्यभिधानोपपत्ते-
र्न विधेयभेदो ऽस्तीत्येवमर्थत्वेन व्याचष्टे * नैष क्रोष इति * वाक्य-
नानात्वेनानेकार्थत्वस्यार्थैकत्वादित्यत्र प्रयोजनैकत्वादुपपन्नमिति भा-

ष्येण निरस्तत्वात्प्रयोजनस्य च विशिष्टभावनाविधानस्यैकत्वाच्च वा-
क्यभेदापत्तिरित्युक्ते भावनाया विधेयत्वे यागविध्युक्तिर्भाष्यकारी-
या न युक्तेत्याशङ्क्य * सा चेत्युक्तम् * नन्वितिभाष्यं पूर्वशङ्का-
शयाविवरणार्थत्वेन व्याचष्टे * नन्विति * वाच्यानेकत्वनिमित्तानेक-
कार्थत्वशङ्काभ्रान्तिनिवृत्त्यर्थम् * यदीत्युक्तम् * अत्रेति परिहार-
भाष्यं विशिष्टविध्यन्यथानुपपत्तिकल्पितैर्विधिभिरनेकार्थविधाने ऽपि
प्राधान्येनैव विधेयस्य प्रयोजनत्वात्तस्य चात्रैकत्वाच्च वाक्यभेदाप-
त्तिरित्येवमर्थत्वेन व्याचष्टे * उच्यतइति * न हीति भाष्यावय-
वमनेकप्राधान्यनिरासोपपादनार्थत्वेनावतारणपूर्वकं व्याचष्टे *
५६६॥१ तदाहेति * एतदेवोपपादयति * तथा हीति * धारणाव्यापृत-
रेवतीपर्यवसाने रेवत्यो धारयेयुरिति निर्देशप्रसङ्गाद्रेवत्याश्रयधा-
व्यापृतवारवन्तीयपर्यवसाने सम्बन्धिद्वयसम्बन्धेन व्यापृतसम्बन्ध-
पर्यवसाने वा रेवतीषु वारवन्तीयं कुर्यादिति निर्देशापत्तेः स्वोत्प-
त्तिव्यापृतयागपर्यवसाने यागः स्यादिति निर्देशापत्तेः फलपर्यवसा-
ने पशवः स्युरिति निर्देशापत्तेस्तच्छब्दपरामृष्टरेवत्यो वारवन्तीयमि-
तिं भाष्योक्तरेवतीवारवन्तीयतत्सम्बधयागपशुक्रियाणां यजमान-
व्यापारयागभावनान्तरव्यापारत्वावसायात्ततः प्राग्विधेरपर्यवसा-
नापत्तेर्नानेकस्य प्राधान्येन विधिः सम्भवतीत्याशयः । तस्मादिति
वाक्यभेदपरिहारोपसंहारभाष्यं व्याचष्टे * अहं तस्मादिति * ननु
गुणफलान्वयपक्षे ऽप्येतच्छब्दस्याग्निष्टोमसाममात्रविशेषणत्वाभ्यु-
पगमे रेवतीविशेषणत्वानभ्युपगमादेतच्छब्दस्योभयविशेषणत्वानभ्यु-
पगमादेतच्छब्दस्योभयविशेषणत्वनिमित्तो वाक्यभेदः परिहर्तुं शक्य
इत्याशङ्कानिरासार्थं गुणे पुनरिति भाष्यं व्याचष्टे * गुणेति * न-
थाप्यग्निष्टोमसाम्नो वारवन्तीयेनाग्निष्टुतान्वयविधानाद्वाक्यभेदो
ऽपरिहार्य इत्याशयः । अथेति भाष्येणाग्निष्टुद्यागाङ्गत्वेन यागान्तरं
रेवतीवारवन्तीयवाक्येन विधास्यतइत्याशङ्क्य तथापीत्यनेन निरस्तं
तदनेनापि प्रकारेण कर्मान्तरत्वसिद्धेः पूर्वपक्षानुपयोगित्वात्सिद्धा-
न्ताविरोधाच्चानर्थकमित्याशङ्क्याह * अथेति * शङ्काभाष्यं व्याचष्टे *
तत्रेति * एवं विधपक्षान्तराभ्युपगमे को गुणो भविष्यतीति पृ-
च्छति * किमिति * गुणविषयत्वे ऽपि सामान्यविवक्षया नपुंसक-
निर्देशाविरोधः प्रकरणाबाधैतत्पदानुग्रहरूपं गुणद्वयमाह * प्रकरणं
तावदिति * परिहारभाष्यं व्याचष्टे * तदेति * कीदृग्वाक्यभेद इ-
त्यपेक्षायां प्रत्युद्देश्यं वाक्यपरिसमाप्तिलक्षण इति दर्शयितुमाह *
न हीति * अथैवमित्यादिशङ्काभाष्यं गुणफलान्वयस्याभिधानात्पु-

नरुक्तमाभासमानं परमते नादर्थ्यमभ्युपेत्यैव रेवत्याख्यर्गन्तप्रगा-
नाद्वायव्यगाधारत्वलक्षणविशेषहानेनाश्रयवैगुण्यरूपदोषान्तरोक्त्य-
र्थत्वेन व्याचष्टे * अथेति * अग्निष्टुद्यागस्यैव गुणान्तर-
विशिष्टस्य फलान्वयाभिधानार्थेतदिति स्वमतेनार्थान्तरं गु-
णकामत्वापरित्यागेनैव वक्तुमाह * अथ चेति * एतदेव पक्षान्तर-
मुपपादयति * तथा च सतीति * कर्मान्तरपक्षे ऽपि सन्निकृष्टार्थ-
विधिर्लप्स्यतइत्याशङ्क्य * न चेत्युक्तम् * गुणविशिष्टकर्मान्तर-
विधौ गुणपरत्वात्कर्मोत्पत्तिपरत्वायोगे ऽपि कर्मोत्पत्तिसिद्ध्यर्थं उ-
त्पत्तिपरत्वस्यापि कल्प्यत्वात् गौरवापत्तिर्नास्मिन्पक्षइति विशेष
इत्याशयः । उत्पत्तिं करिष्यतीत्यनुषङ्गः । नन्वनुत्पत्तिपरत्वे रेवत्य-
स्तासां च पदान्तरोपात्तवारवन्तीयान्वय इत्यनेकार्थविधिर्न लभ्य-
तइत्याशङ्क्य * विधानाच्चेत्युक्तम् * फलस्यानुपादेयत्वेन प्राप्त-
स्यापि कर्मणः फले विधानादनेकगुणविशिष्टता सेत्स्यतीत्यर्थः ।
श्लोकं व्याचष्टे * यागं हीति * फलस्याज्ञातज्ञापनं विधिर्विवक्षि-
तः । ननु विशेषणफले चास्मिन् वाक्यभेदो भविष्यतीत्यनेन न्या-
येन कर्मविधाने ऽपि तात्पर्यस्य फले ऽवतारात् गुणविशिष्टत्वानुप-
पत्तिरित्याशङ्क्य विधेः फलपरत्वनिरासार्थं तस्योद्देश्यतोक्ता इति
करणः श्लोकार्थसमाप्त्यर्थः।ननु फले विधीयमानस्य कर्मणो ऽर्था-
दुत्पत्तिविधिमप्यनुभवितुं प्रक्रममाणस्य गुणान्तराधिक्यं बलवद्विप-
रिवृत्त्यभावनोत्पत्तेरनिवारणात्कथमकर्मान्तरतेत्याशङ्क्य मन्यमान-
शब्देनानभिमतत्वं सूचयितुमाह * एवमिति * नन्वेवं सति सा- ५६७।१
म्नो यागासाधनत्वात्तृतीया न युज्येतेत्याशङ्क्य द्वेधा समर्थय-
ते * स्तोत्रेति * दोषान्तरोक्त्यर्थं नैव शक्यमिति भाष्यं व्याच-
ष्टे * तत्रेति * गुणान्तरविशिष्टत्वे प्रत्यभिज्ञानातिरोधानेनानुपादेया-
न्वयनिमित्तकर्मोत्पत्त्यनिवारणात्कर्मान्तरत्वापत्तेर्न पूर्वस्मिन्यागे रे-
वतीवारवन्तीयान्वयविधिः शक्य इत्याशयः। रेवतीवारवन्तीयान्व-
यस्य क्रियान्तरविशेषणत्वाल्लिङो विध्यशक्तेर्ऋगन्तराणामविधेय-
त्वमभिप्रेत्यैतदुक्तमिति तन्निरासाय लिङो ऽशक्तत्वे ऽपि कृत्वाशब्द-
स्य विधिशक्तेरुक्तत्वाद्विधेयत्वोपपत्तेर्गुणफलान्वयपक्षे कार्त्स्न्येनैव
गुणविशिष्टकर्मफलान्वयपक्षे नैमित्तिकेन ऋगन्तरप्रगानेन नित्यवा-
यव्याधारत्वरूपविशेषबाधाद्धाने ऽपि वैगुण्यानापत्तिरित्यभिधानार्थं
नन्वित्याशङ्काभाष्यं व्याचष्टे * नन्विति * कृत्वाशब्देन विधातुं श-
क्यमिति सूचनार्थौ भाष्ये करोति. कर्मान्तरपक्षे नीरूपस्य कर्मणो
विधेयत्वायोगेन साधनाकाङ्क्षत्वाद्विधानाच्च प्रागतिदेशतो लाभा-

भावादर्थोत्साधनान्तरविधिर्युक्तः । पूर्वकर्मपक्षे त्वनाकाङ्क्षितसाधन-विधायित्वकल्पना कृत्वाशब्दस्य न युक्तेत्याशयं सतीति परिहार-भाष्यं व्याचष्टे * सिद्धान्तेति * वचन तर्हीत्याशङ्काभाष्यं वच-नशब्दस्य पूर्वभाष्यस्थवचनशब्दवत्कर्मान्तरविधिवाचित्वे ऽभ्युपग-मविरोधापत्तेर्गुणान्तरविशिष्टप्रकृतकर्मविधिवाचित्वं तु प्रकृ-ते कर्मानाकाङ्क्षितगुणान्तरविधिकल्पनस्यानन्तरभाष्यानिरस्तत्वेन गुणान्तरविशिष्टप्रकृतकर्मविध्ययोगादयुक्तमाशङ्कोपपादयितुमाह * वचनं तर्हीति * केनत्यपेक्षायां गुणान्तरविशिष्टप्रकृतकर्मवि-धेर्निरस्तस्याप्यनिरस्तत्वं मत्वेयमाशङ्केति सूचनार्थं पूर्वोक्ता-भिप्रायद्वयोक्तिः । ननु कर्मविध्यभ्युपगमे यजत्यनुवादोक्तिर्न युज्ये-तेत्याशङ्क्याह * यजिरिति * फलोद्देशेन कर्मविधाने ऽपि फलान्वयस्यापि गुणान्वयवद्विशेषणत्वात्तत्पक्षपरत्वे गुणविधे-रेवायोगेनानेकगुणविधेर्दूरोत्सारितत्वापत्तेरुत्पत्तिपरत्वं विनानेका-र्थविध्ययोगात्तदन्यथानुपपत्त्योत्पत्तिपरत्वावगतेरुत्पन्नोत्पत्त्ययोगा-त्कर्मान्तरत्वसिद्ध्युक्त्यर्थं यदीति परिहारभाष्यं व्याचष्टे * सिद्धा-न्तेति * स्वाभिप्रेतं कर्मान्तरत्वं यदनेकार्थं विध्यन्यथानुपपत्तेः फलं तत्कथयतीति वदतानेकार्थविध्यन्यथानुपपत्त्या प्रकृतकर्मविधिनिरस्त इति प्रकटितम्।अनेन वा रेवतीवारवन्तीयसम्बन्धसम्बन्धितया कर्मणो वचनमित्यध्याहारेण भाष्यव्याख्या सूचिता।ननु कृत्वा यजेतेत्युपपदा-क्रान्तत्वेन विधिशक्त्ययोगादवताराद्यागस्वरूपानुवादावगतेरङ्गाङ्गि-सम्बन्धार्थत्वेन चानुवादार्थवत्त्वोपपत्तेर्न कर्मान्तरत्वसिद्धिरित्याश-ङ्कार्थं नन्विति भाष्यं पूर्वस्मिन्कर्मण्यनेकार्थविधौ वाक्यभेदापत्तेःकर्मा-न्तरत्वसिद्ध्युक्त्या सूचितत्वादयुक्तमाशङ्कोपपादयति*नन्विति*गु-णान्तरविशिष्टप्रकृतकर्मविधिपक्षस्य कर्मान्तरत्वसिद्ध्युक्तिसूचितवा-क्यभेदापत्त्या निरस्तस्यापि कण्ठोक्त्या वाक्यभेदवचनेनानिरस्तत्वा-त्पुनः शङ्कोपपत्तिरित्याशयः । भाष्यं च कृत्वाशब्दसमभिव्याहाराद्गु-णे विधिसंक्रान्तिसूचनार्थस्ततः शब्द. प्रयोजनशब्दस्य प्रधानवाचि-त्वाद्रेवतीवारवन्तीयसम्बन्धस्याङ्गप्रधानलक्षणो यागेन सम्बन्धो भविष्यतीत्यर्थः । इहाप्युत्पत्त्यविधानाभिप्रायैवानुवादोक्तिः नैवमिति परिहारभाष्यं कर्मान्तरत्वसिद्ध्युक्तिसूचितार्थविवरणत्वेन व्याच-ष्टे * नैवमिति * कीदृग्विवरणमित्यपेक्षायामाह * यदि हीति * न तेन यागेन सम्बध्यतइत्युक्ते गुणेन तर्हि सम्बध्यतामित्याशङ्क्य गुणेनापि न सम्बध्यतइति नञनुषङ्गापिशब्दाध्याहाराभ्यां वदता यागस्य रेवतीयसम्बन्धस्य च पशुकामं प्रत्यसम्बन्ध इत्येवं भाष्यं

व्याख्यानम्। यद्वा गुणेनेतीत्थंभूततृतीयया गुणविशिष्टेन यागेनेत्यभि-
धानाद्विशिष्टस्य यागस्य पशुकामं प्रत्यसम्बन्ध इत्येवं व्याख्यानम्
उभयेतिभाष्यं रेवतीयसम्बन्धस्य यागफलाभ्यां सम्बन्ध इत्येवम-
र्थमाभासमानमस्मिन्पक्षे गुणस्य फलान्वयाभावादयुक्तमाशङ्क्य
यागस्य गुणफलाभ्यां सम्बन्ध इत्येवं व्याख्यातुमाह * सम्बध्यमानं ५६८।२
चेति * फलपद गुणविशिष्टेन यागेन सम्बध्यमानं यागस्योभयस-
म्बन्धापादकत्वाद्वाक्यं भिन्द्यादित्यर्थः । वाक्यभेदोक्तेरुपलक्षण-
त्वात्स्वयं पूर्वाधिकरणोपक्रमोक्तं कर्मान्तरत्वे युक्त्यन्तरं स्मा-
रयति * गुणेति * या च यदि तु पशुकामः स्यात्ततो ऽनेनैव
रेवत्यादिविशिष्टेनेति वचनव्यक्तिरुक्ता साप्यप्राप्तफलान्वया-
नुवादायोगादयुक्तेत्याह * न चेति * अप्राप्तत्वादेव फला-
न्वयस्य यदिशब्दोक्ता निमित्ततापि प्रत्युक्तेत्याह * तेनेति * फ-
लान्वयस्य निमित्तत्वाभावे नैमित्तिकेनर्गन्तरप्रगानेन नित्यवाय-
व्याधारत्वाख्यविशेषबाधाद्विगुणयपरिहाराशङ्का न युक्तेत्याह * अत-
श्चेति * ननु रेवतीवारवन्तीयान्वयस्य यागाङ्गत्वे यागस्य च फ-
लान्वये विधीयमाने वाक्यभेदापत्तेः। प्रकृतस्य यागस्य गुणवि-
शिष्टस्य फले विध्ययोगे ऽपि गुणस्यैव फले विधिः प्रकरणप्राप्त-
यागाङ्गत्वानुवादश्च भविष्यतीति पक्षान्तराशङ्कार्थमथेति भाष्यं
व्याचष्टे * अथेति * नन्वाश्रयाश्रयिभावानुवादनिरासन्यायेनै-
वाङ्गत्वानुवादनिरासिद्धेः पृथगुपन्यासो न युक्त इत्याशङ्कानिरा-
सार्थं प्रश्नपूर्वं विशेषमाह * कः पुनरिति * गुणफलान्वयविधायि-
नो वाक्यस्याश्रयलाभार्थं प्रकरणापेक्षत्वेन तद्बाधकत्वायोगात्प्रक-
रणेनाङ्गत्वज्ञाने सत्यानर्थक्यतदङ्गन्यायविषयत्वसम्भवाद्योग्यत्वा
त्स्तोत्रं ऽपरतो वारवन्तीयस्य तद्विशेषापेक्षायां क्रतुमात्रार्थो वार-
वन्तीये ऽग्निष्टोमस्तोत्रसाधनत्वदर्शनेनास्यापि तत्स्थानत्वावगतेस्त-
द्वारा रेवतीनामपि तत्स्थानत्वावधारणादनुवादोपपत्तिरित्याशयः ।
तदिति परिहारभाष्यं व्याचष्टे * तदिति * आश्रयलाभायाधिका-
रलक्षणप्रकरणापेक्षत्वे ऽप्यङ्गत्वप्रमाणभूतकथम्भावलक्षणप्रकरणा-
नपेक्षत्वात्तस्य चासंयुक्तप्रकरणादिति तृतीयाधिकरणसूत्रे श्रुत्या-
दित्रयसंयुक्ताङ्गविषयत्वनिषेधाद्वाक्यबाधितेन प्रकरणेनाङ्गता न श-
क्यावगन्तुमित्याशयः । तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मा-
दिति * यागगुणकं वेति भाष्यं शङ्कोत्तरत्वेन व्याचष्टे * तत्रेति *
रेवतीवारवन्तीयस्येति भाष्यावयवेन रेवत्याधारस्य वारवन्तीयस्य
फलसम्बन्धो ऽभिहितः । तस्मादिति सिद्धान्तोपसंहारभाष्यं व्या-

चष्टे * तस्मादिति * रेवत्याधारस्य वारवन्तीयस्य यागगुणत्वे
ऽग्निष्टोमस्तोत्रान्वयो न स्यादित्याशङ्कार्थमथ पुनरिति भाष्यं व्या-
चष्टे * अथ पुनरिति * क्रियान्तरस्य यागस्य विशेषणेन रेवत्या-
धारेण वारवन्तीयेन सहाग्निष्टोमसाम्नः कथं सम्बन्ध इत्यर्थः । उ-
च्यतइति परिहारभाष्यं कृत्वाशब्दस्य रेवतीवारन्तीयान्वयार्थत्वेना-
ग्निष्टोमसामान्वयायोगादनेन वचनेनाग्निष्टोमसामत्वासिद्धेरयुक्त-
माशङ्क्य वारवन्तीयमग्निष्टोमसाम कार्यमित्यग्निष्टुत्प्रकरणस्थातिदे
शप्राप्तवचनेनान्वयेनोपपादयति * तत्रेति * नन्वतिदेशाद्वारव-
न्तीयस्याग्निष्टोमस्तोत्रस्थानत्वप्राप्तावपि रेवतीनां कथं तत्स्थानत्व-
प्राप्तिरित्याशङ्क्य क्लृप्तस्थानेन साम्नैव रेवतीस्थानकल्पनेति प्रागु-
क्तन्यायोपन्यासः । अस्यैव भाष्यस्य स्वरूपार्थं व्याख्यातुमाक्षिपति *
अग्निष्टोमेति * द्वेधा व्याचष्टे * तेनेति * प्रकृतौ ज्योतिष्टोमे
यज्ञायज्ञीयस्याग्निष्टोमाख्यस्तोत्रसाधनत्वेनाग्निष्टोमसामशब्दवाच्य-
त्वात्तत्कार्यापत्तिर्वारवन्तीयस्याद्यव्याख्याने ऽभिप्रेता द्वितीय सा-
मशब्दस्य सामसाध्यस्तोत्रलक्षणार्थत्वमभिप्रेत्य कार्यार्थत्वात्सा-
धननियमस्य स्तोत्रकार्यार्थत्वेन वृत्तिर्विवक्षिता अथेति भाष्ये-
णापि चैतस्यैवेति विस्पष्टमकर्मान्तरवचनमिति पूर्व-
पक्षभाष्यार्थमनुभाष्य तन्न्यायविरोधादित्यनेन परिहृतं तदेतच्छब्द-
स्तावद्धर्मलक्षणायानुवादो भविष्यतीति वार्तिकेन व्याख्यातत्वाद्-
व्याख्याय तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्याचष्टे * त-
५६९।२ स्मादिति *

॥ सौभरनिधनयोः कामैक्याधिकरणम् ॥ १३ ॥

सौभरे पुरुषश्रुतेर्निधने कामसंयोगः ॥ २८ ॥

सौभरस्य केवलकाम्यत्वे हीषादेः समाम्नायावगतस्य नि-
धनान्वयस्य क्रत्वर्थे सौभरे ऽनुपयुक्तत्वात्समाम्नायानर्थक्यप
रिहारार्थं काम्यसौभरविषयत्वावगतेर्निधनत्वानुवादसम्भवाद्वा-
क्यभेदापत्त्या पूर्वपक्षनिरासासम्भवं तत्साध्यफलार्थस्य हीषादे-
र्भेदेन प्रार्थने ऽपि मन्दप्रयोजनत्वापत्तेः । फले विध्ययोगात्पूर्वप-
क्षासम्भवं चाशङ्क्य नित्ये नैमित्तिके च सौभरे हीषादेरनन्यसाध्य-
फलसाधनत्वं भविष्यतीति सूचयितुं त्रैविध्यमाह * ज्योतिष्टोम
इति * यदि बृहत्सामातिरात्रः स्यात्सौभरमुक्थ्यानां ब्रह्मसाम
कार्यं यदि रथन्तरसामा सौरभं कुर्यादिति वाक्याभ्यां बृहद्रथन्तर-

१ वचनाश्रयत्वेनेति २ पु० पा० ।

योर्निमित्तयोः सौरभविहितमित्यर्थः । नित्यविधिस्तु षोडशीसंस्थावि-
षयः । फलान्वये कादाचित्कत्वापत्तेर्नित्यत्वायोगात्सौभरमुक्थ्या-
नां ब्रह्मसाम भवतीति दाक्षायणयज्ञे द्वे पौर्णमास्यौ यजेत द्वे
अमावास्ये इति काम्याया दर्शपूर्णमासावृत्तेरिवोत्पत्त्यर्थं भविष्य-
तीत्याशङ्क्य * नित्यस्यैवेत्युक्तम् * फलोद्देशपूर्वकस्यानुष्ठानस्य का-
दाचित्कत्वे ऽपि तन्निरपेक्षानुष्ठानस्य नियतोपपन्नेत्याशयः । काम्य-
स्यापि नित्यत्वाविरोधं संस्थाधिकरणसिद्धान्तसूत्रावयवेन द्रढयति
* तथा चेति * ननु क्रत्वर्थे सति पारार्थ्यज्ञानात्फलश्रुतिरर्थवादः
स्यादित्याशङ्क्याह * क्रत्विति * अर्थवादकल्पफलविषयः पर्ण-
मय्यधिकरणन्याय इत्याशयः । नन्वेवमप्येकस्मात्सौभरप्रयोगा-
त्फलत्रयसिद्धेर्निधनव्यवस्थानुपपत्तेः । सिद्धान्तासम्भवे नेदमना-
रभ्यमित्याशङ्क्य प्रयोगभेदेनानेकफलसाधनत्वं चतुर्थाधिकरणे व-
क्ष्यमाणमाह * एतदपि चेति * सर्वेभ्यो दर्शपूर्णमासावित्यविशे-
षश्रुतेरेकस्मिन्प्रयोगे सर्वफलोत्पत्तिं पूर्वपक्षयित्वार्थस्य फललक्षण-
स्योत्पत्त्या प्रयोगे सोपादानलक्षणयोगाभावादनुपादेयस्य चाविव-
क्षितसाहित्यत्वात्सर्वशब्दस्य च प्रकृतग्राहित्वात्प्रकृतानां चेष्टिसा-
ध्यानां पशुग्रामादीनामन्योन्यनिरपेक्ष्यसाध्यत्वावगमात्तादृशानामेव
सर्वशब्दानिर्दिष्टानां दर्शपूर्णमाससाध्यत्वावगतेरेकमेव फलमेकस्मि-
न्प्रयोगे भवतीति योगेन पर्यायेण फलसिद्धिरिति सिद्धान्तयिष्यते
अधिकरणारम्भसिद्ध्यर्थं क्रत्वर्थस्यैव सौभरस्य फलत्रयान्वयः स
च पर्यायेणेत्युक्त्वा निधनवाक्यमात्रस्य चिन्ताविषयत्वात्सौभरवा-
क्योदाहरणमनर्थकमाशङ्क्य गुणफलान्वयस्याश्रयलाभार्थं निधन-
व्यवस्थायाश्च विषयलाभार्थमिति पक्षद्वये ऽप्युपयोगं प्रकृत्येतिश-
ब्देन सूचयन्नुदाहरणभाष्यं व्याचष्टे * तदिति * तत्रेति सन्देह-
भाष्यं व्याचष्टे * तत्रेति * ननु संख्यासञ्ज्ञावद् गुणस्यापि धात्व-
र्थानपेक्षस्य भावनान्वयात्साक्षाद्भावनाभेदकत्वानुपपत्तेः संख्यया
कर्मभेद इति धात्वर्थभेदवाचिनः कर्मभेदपदस्यात्रानुषङ्गाद्धात्वर्थ-
भेदाभेदयोर्गुणप्रकरणे विचार्यत्वावगतेरिह वोभयथापि धात्वर्था-
भेदात्प्रकरणासङ्गतिं विचारस्याशङ्क्य भावनाभेदाभेदविचारस्य प्रा-
सङ्गिकत्वेन तावत्सङ्गतिमाह * यद्यपि चेति * भावनाभेदाभेद-
योरपि वा लक्षणार्थत्वेन गुणप्रकरणे ऽप्यनुषङ्गाद्धात्वर्थभेदाभेद-
वत्प्रकरणासङ्गतिः सम्भवतीति परिहारान्तरमाह * अथ वेति *
तस्या एव च शब्दान्तरं भेदकं भविष्यत्यपूर्वस्यानभिधेयत्वात्कर्मभे-
दानुनिष्पाद्येव च तदिति न पृथग्विचारमर्हतीति शब्दान्तराधिक-

रणवार्त्तिके पूर्वभेदस्य लक्षणार्थत्वनिषेधाद्भावनाभेदाभेदाविति वा-
क्ये शुद्धाया भावनाया निरूपणाशक्तेर्भेदचिन्तानुपपत्तिमाशङ्क्य
धात्वर्थावच्छेदेन भेदानिरूपणे ऽपि फलावच्छेदेन भेदं निरूपयितुं
फलतो ऽपूर्वाभिभवेति व्युत्पत्त्या भावना फलापूर्वशब्देनोक्ता भाव-
नाभेदाभेदयोरेव लक्षणार्थत्वे ऽपि धात्वर्थनिरपेक्षायास्तस्या नि-
रूपणाशक्तेस्तत्सिद्ध्यर्थं धात्वर्थभेदाभेदयोरपि विचार्यत्वाल्लक्ष-
णार्थतापिशब्देनोक्ता यद्वा लक्षणार्थौ चेत् वेदा कृत्वाप्रकरणेनापि
सम्बन्ध इति सूचनार्थत्वेनोत्कृष्यापिशब्दो योज्यः । फलभेदादेव च
कर्मैक्याविशेषे ऽप्यनुष्ठानविशेषसिद्धेर्विचारस्य प्रयोजनवत्त्वं से-
त्स्यतीत्याह * एवं चेति * हीषादेः फले विधौ निधनव्यवस्थाप-
काभावात् वृष्ट्यर्थे सौभरे हीष्वनियमाभावादन्नाद्यर्थे स्वर्गार्थे वा
इतरयोरपि प्रयोगे निधनव्यवस्थायां हीषेव प्रयोक्तव्यमित्येको
विशेषः । यदा तु हीषापि वृष्टिमेव प्रार्थयते तदा द्वे वृष्टी पूर्वपक्षे
प्रार्थनीये सिद्धान्ते त्वेकैव सौभरेणेति विशेषान्तरं वृष्ट्यभावात्स-
स्यशोषापत्तौ यावत्या वृष्ट्या सस्यानि निष्पद्यन्ते तावत्या एव का-
म्यमानत्वात्तावत्याश्च सौभरादेव सिद्धेर्वृष्टेः सर्वस्य चासन्नतयैव
कान्तं वृष्ट्यादीति विचारग्रन्थवार्त्तिके कालान्तरीयतया काम्यत्व-
निषेधात्कालान्तरीयशोषशङ्कायामपि वृष्टिकामनानुपपत्तेरभ्युच्चय-
मात्रेणोक्तमिति सूचनयापि चशब्दः कथमिति सन्देहहेतु-
५७०।२ प्रश्नभाष्यं व्याचष्टे * कुत इति * यद्येवमित्यादे-
रधिकरणसमाप्तिपर्यन्तस्यान्येषां व्याख्यां दूषयितुमुपन्यस्यति
* केचित्तावदिति * ननूत्तरयोर्वाक्ययोर्निधनपदाश्रुतेर्निधनपदा-
न्वयो न सम्भवतीत्याशङ्क्याह * यद्यपि चेति * शाखान्तरे त्रि-
ष्वपि वाक्येषु निधनपदश्रुतेस्तदालोचनेनेहाप्याकाङ्क्षाकल्पनया
ऽनुषङ्गोपपत्तिर्यद्यपिशब्देन सूचिता पूर्वपक्षभाष्यं व्याचष्टे * किं
तावदिति * पुरुषप्रवर्त्तकविधिलक्षणार्थं पुरुषशब्दमभिप्रेत्य पुरुष-
श्रुतिव्याख्यानार्थं पुरुषस्येत्यादिभाष्यमाद्यपदेन व्याख्यातं विधौ
पुरुषस्येत्यादिभाष्यमाद्यपदेन व्याख्यातं विधौ पुरुषशब्दस्यासाधुत्वा-
च्च चाविहितमङ्गं भवतीति च न्यायेन नियतस्य निधनस्याङ्गत्वा-
त्समाम्नायात्साधारण्यतः प्राप्तस्यापि विध्यर्थवत्त्वोपपत्तेरपरितो-
षादन्यथापुरुषश्रुतिव्याख्यानार्थमथ वेति भाष्यं निधनपदेनापि ही-
षान्वये निधनाक्षिप्तसौभरविशेषणत्वेन श्रुतिवृत्तस्यैव वृष्टिकामपद-
स्यान्वयोपपत्तेः सौभरलक्षणार्थत्वायोगादयुक्तमाशङ्क्य श्रुतिशब्दः
स्वप्राधान्यवाची लक्षणाशब्दश्चान्यविशेषणत्ववाचीत्येवं द्वितीयेन

व्याख्यातं सूत्रसूचितहेत्वन्तरोक्त्यर्थमेवं चेति भाष्यं तृतीयेन वृ-
ष्ट्याद्यर्थं सौभरावयवत्वाद्धीषादेः सौभरद्वारा वृष्ट्याद्यन्वयसिद्धे-
र्निधने कामसंयोग इति प्रतिज्ञासूत्रावयवानुपपत्तिमाशङ्क्य फला-
न्तराभिप्रायत्वेन व्याख्यानार्थं सौभर इति पूर्वपक्षोपक्रमभाष्यं श्लो-
कस्य समस्तपूर्वपक्षभाष्यव्याख्यार्थत्वसूचनायान्त्येन व्याख्यातं ही-
षादेरित्यनेन निधनशब्दस्य हीषादिलक्षणार्थतोक्ता फलान्तरान्वय
हीषादेः सौभरानपेक्षत्वापत्तेर्निधनत्वासिद्धिमाशङ्क्य फले विहि
तस्य हीषादेराश्रयापेक्षायां प्रकरणात्सौभराश्रयत्वावगतेस्तत्र च
निधनत्वेनैव समाम्नानान्निधनत्वानुवादोपपत्तिरिति सूचनार्थः।सौ-
भर इति सूत्रावयवो निधनशब्दस्य हीषादिलक्षणार्थत्वव्याख्ययैव
व्याख्यातो भवति आद्यपादं व्याचष्टे * यदि हीति * शाखाभेदेन
हीषादेः सौभरनिधनत्वेन पठितस्य सौभरविधिश्रुत्या विकल्पेन
प्राप्तस्य स्वरसतः प्रापणात्मकविधिमात्रप्रवृत्तयैकपुन श्रुत्या फला-
न्वयित्वेनाप्राप्तविध्यर्थतया गतिसम्भवे ऽन्यव्यावृत्तिफलत्वायोगा-
द्बाधानुपपत्तेर्नियमो ऽनर्थकः स्यादित्याशयः। द्वितीयं व्याचष्टे *
वृष्टिकामेति * तृतीयं व्याचष्टे * पुरुषार्थेति * चतुर्थं व्याचष्टे * ५७१।२
तस्मादिति *

सर्वस्य वोक्तकामत्वात्तस्मिन्कामश्रुतिः
स्यान्निधनार्था पुन. श्रुति. ॥ २९ ॥

वाशब्दव्याख्यानार्थं तेन नास्य निधनादपरं फलमिति भाष्यं व्या-
चष्टे * उच्यत इति * अथेति भाष्येण हीषादेर्निधनपदान्वये फल-
पदस्य वाक्यभेदभयेनानन्वयात्प्रमादसमाम्नायापत्तिरित्याशङ्क्य त-
न्निरासार्थत्वेन वृष्टिकामायेत्यादिका या कामश्रुतिः सा तच्छब्दपरा
मृष्टसौभरविषया तद्विशेषणार्था न हीषादेः फलान्वयविध्यर्थेत्येवं स-
र्वस्योक्तकामत्वात्तस्मिन्कामश्रुति. स्यादिति सूत्रावयवव्याख्यार्थमुच्य-
त इत्यादिभाष्यं व्याचष्टे *निधनेन त्विति* फलश्रुतेर्हीषाद्यनन्वये
ऽपि निधनव्यवस्थाविषयभूतसौभरविशेषणार्थत्वान्नानर्थक्यापत्तिरि-
ति विशेषणत्वोक्त्या सूचितं निधनमात्रे हीष्विधौ निधानान्तरा-
नर्थक्यापत्तेर्निर्विशेषणस्य निधनस्यार्तिवदनुवादायोगाद्वृष्टिकामस्य
प्रकरणलभ्यनिधनविशेषणासौभरद्वारा निधनविशेषणत्वेनावगतस्या-
नुवादान्तर्गत्यवगतेरवाक्यभेदाशयः। भाष्ये लक्षयतीविशेषणवा-
ची पूर्वार्द्धं व्याचष्टे * हीषेति * हीषो निधनपदेनासम्बन्धे नि-

धनपदानर्थक्यमित्यर्थः * उत्तरार्द्धं व्याचष्टे * अस्मत्पक्षे त्विति *
सौभरफलान्वयविधायिनो यो वृष्टिकाम इति वचनान्तरस्यैक्ये ऽपि
फलस्योद्देश्यत्वाप्रत्युद्देश्यं च वाक्यसमाप्तेर्वचनान्तरैरिति बहुव-
चनं पदशब्दस्य लक्षणयावयववाचित्वात्सौभरावयवानां निधना-
दीनां समाम्नानादेव प्राप्तत्वाद्धीषादिनियममात्रविधौ नानेकार्थ-
विधिलक्षणवाक्यभेदापत्तिरित्यर्थः । किमर्थं त्वित्याशङ्को-
त्तरत्वेन निधनार्थेति सूत्रावयवव्याख्यानार्थं भाष्यं व्याचष्टे *
न चेति * वृष्ट्यादिफलत्वेनोक्तस्यापि सौभरस्यात्रोपलक्षणं नान-
र्थकमित्यर्थः । यत्तु काम्यत्वाभावे हीषादीनां बलविशेषाभावेना-
न्योन्यबाधकत्वायोगान्नियमानर्थक्यमुक्तं तत्परिहरति * विनापि
चेति * सौभरत्वसामान्याभावात्सर्वासां प्रस्तावोद्गीथप्रतिहा-
रोपद्रवनिधनाख्यानां भक्तानां यः साधारणत्वात्सामान्यरूपः स-
मूहस्तद्वाचित्वादित्यर्थः । तथापि कथं बाध इत्यपेक्षायामाह * त-
च्छ्रुत्या हीति * सौभरश्रुत्या लक्षणया निधनान्तरप्राप्तेरर्थाक्षिप्त-
श्चाद्विप्रकर्षविशेषाद् बाधा युक्तेत्यर्थः।सौभरशब्दस्य वाक्षरवाचित्वा-
भावात्तद्बाधेति श्रुत्यर्थबाधो नास्तीति परिहारमाह * अथ वेति *
स्तुतिसाधनर्गक्षराभिव्यक्त्यर्थत्वात्साम्नस्तद्बाधे प्रधानबाधद्वारापि
बाधः शङ्क्येत ऋगक्षरातिरिक्तविवर्णाक्षराख्यसौभरबाधे तु तस्य नि-
यतकालसामभागपरिपूरणार्थत्वेन साम प्रति गुणभूतत्वात्तद्बाधेन
कथं चित्सामबाधेति सूचनार्थम् * स्तोभेत्युक्तम् * परव्याख्यां
५७२।१ दूषयितुमुपक्रमते * एवं त्विति * सन्देहहेतुं तावत् दूषयति *
तदिति * श्लोकं व्याचष्टे * हीषिति * सिद्धान्तं दूषयति * तथे-
ति * श्लोकं व्याचष्टे * निधनेति * निधनमात्रानुवादेन हीष्विधौ
फलपदानर्थक्यात्सौभरश्रुत्यैव च प्राप्तत्वेन पुनः श्रुत्यानर्थक्याच्च्य-
वहितान्वयदोषपरिहारार्थं च वृष्टिकामविशिष्टनिधनानुवादेन ही-
ष्विधानस्योक्तत्वाद्वृष्टिकामत्वादेः प्राप्तत्वादनेकार्थविधिलक्षणवा-
क्यभेदाभावे ऽप्यबाधः कामत्वादेरपि प्राप्तेर्नित्यानुवादायोगाद्यथा
चार्त्तेः शुद्धाया नित्यत्वेन निमित्तत्वायोगाद्विशिष्टाया निमित्तता-
श्रिता तथेह विधेयान्वयनिरपेक्षस्वरूपमात्रालोचने शुद्धस्यापि नि-
धनस्यानुवादोपपत्तेर्विशेषणस्यानुवादान्तर्गत्याश्रयणहेत्वभावाद्विशि-
ष्टानुवादलक्षणो वाक्यभेदो ऽपरिहार्य इत्यर्थः । प्रकृताश्रयालाभस्य
पूर्वपक्षनिरासहेतोरनुक्तत्वान्निधनान्वयाविधिनिमित्तवाक्यभेदप्रस-
ङ्गस्य च निरासहेतोः सुपरिहरत्वात्पूर्वपक्षनिरासो ऽप्ययुक्त इत्याह
* पूर्वपक्षेति * स्वमतेन व्याचक्षाणः सन्देहस्वरूपं तद्धेतुं च ता-

धत्प्रतिज्ञापूर्वमाह * तस्मादिति * श्रुत्या फलपरत्वसम्भवे साधनभूतसौभरलक्षणानुपपत्तेः सन्देहायोगमाशङ्क्य प्रकृतसौभराश्रयत्वसम्भवात्सम्बन्धलक्षणासन्देहहेतुसूचनार्थम् * वाक्यमित्युक्तम् * प्रकृताश्रयत्वाभावाद् गुणफलान्वये वाक्यासामर्थ्ये सति श्रुत्या स्वरसवाल्लक्षणोपपत्तेर्वाक्यसामर्थ्यसद्भावालोचनात्सन्देहोपपत्तिरित्याशयः । श्लोकं व्याचष्टे * हीषेति * कथं तर्हि भाष्यं व्याख्येयमित्यपेक्षायामाह * तदा चेति * वृष्टिसाधने सौभरे हीषविधौ समाम्नायादेव प्राप्तेः फलतो निधनव्यवस्थार्थत्वावगतेर्हीषेति निधनमित्यर्थो लभ्यत इत्याशयः । विधेयहीषक्षरान्वये च वृष्टिकामशब्दस्य हीषक्षरान्वयान्यथानुपपत्त्या सौभरलक्षणार्थत्वकल्पनोपपत्तेस्तद्विषयतया विशेषणशब्दो व्याख्येय इत्याह * वृष्टिकामायेति * ननु सिद्धान्तेऽपि हीषक्षरान्वयिसौभरोपलक्षणार्थत्वाद् वृष्टिकामशब्दस्य हीषक्षरान्वयाभ्युपगमेन हीषेति सिद्धान्तवचनव्यक्तिभाष्यावयवेन तन्निरासो न युज्येतेत्याशङ्क्याह * न हीषेति * वृष्टिकामशब्दोक्तस्य ५७३।
फलस्य सौभरोपलक्षणत्वमनपेक्ष्य स्वेन रूपेण न सम्बन्ध इत्यर्थः. पूर्वोक्ते सन्देहे सन्देहभाष्यमुपपाद्य पुरुषश्रुतिव्याख्याभाष्यं यथा-पुनर्विधानसामर्थ्यादित्यनेन हीषादित्वनियोगाविच्छाशयं व्याख्यातं तथैव व्याख्येयमित्याह * तत्रेति * तत्र शब्दस्योक्तेन प्रकारेण सन्देहोपपत्तौ सत्यामित्यर्थः । व्याख्यातभाष्यान्तर्गतस्य प्रयोगेति भाष्यावयवस्य श्रुतिप्राप्तानां नियमेन निवर्त्तयितुमशक्यत्वादित्यादिवाक्यात्तकेन हीषादिप्रयोगस्य सौभरश्रुत्याख्यवचनप्राप्तत्वेन समर्थत्वाद् बाधितुमशक्यत्वान्नियमार्थत्वेनापि विधेरर्थवत्त्वेन सम्भवतीति सूचिताद्व्याख्यानादन्यथा सौभरप्रयोगविधिनैव तदङ्गभूतहीषाद्यनुष्ठानसिद्धेः कुर्यादिति पृथक्प्रयोगविधिरनर्थकः स्यादित्येवमपि व्याख्या सम्भवतीत्याह * प्रयोगेति * तामेव दर्शयति * यदि हीति * अथ वेति द्वितीयपुरुषश्रुतिव्याख्याभाष्यम् । अस्मिन्व्याख्याने सिद्धान्तेऽपि निधनपदानन्वयेन तस्य सौभरलक्षणार्थत्वायोगात्स्ववाक्यानुपात्तस्य विशेष्टुमशक्यत्वाद् वृष्टिकामशब्दस्य सौभरलक्षणार्थत्वेऽपि तद्विशेषणत्वानभ्युपगमात्स्वप्राधान्योपपत्तेर्भाष्यानाङ्गस्यापत्तेश्च स्वार्थत्वाच्च फलश्रुतेरिति स्वप्राधान्याशयव्याख्यानायोगाद्यथाश्रुतं व्याचष्टे * किं चेति * ननु प्रकृतसौभराधिकारिपुरुषप्रत्यभिज्ञानात्तस्य चावगतसौभरसाधनत्वेन काम्यमानवृष्टिसाधनानपेक्षत्वात्साधनवाचिहीषादिपदान्वयानुपपत्तेः । शाखाभेदप्राप्तानेकहीषादिव्यवस्थापेक्षत्वावगमाद्धीषादिपदानां निधन-

व्यवस्थार्थत्वप्रतीतेः क्व तेषां व्यवस्थेति निधनव्यवस्थाविषयापेक्षा-
यां यथा यदग्नये च प्रजापतये च सायं जुहोति यत्सूर्याय च प्र-
जापतये च प्रातरिति देवताव्यवस्थार्थयोर्वाक्ययोर्व्यवस्थाविषय-
भूतहोमलक्षणार्थत्वेन सायम्प्रातशब्दयोर्देवतापदान्वयस्तथा वृष्टि-
कामादिशब्दानां निधनव्यवस्थाविषयभूतसौभरलक्षणार्थत्वेन ही-
षादिपदान्वयसम्भवे प्रत्यभिज्ञा ऽविरुद्धा पूर्ववृष्टिकामादिकल्पनया
प्रकृताश्रयलाभक्लेशापादिका गुणफलान्वयकल्पना न युक्तेत्याश-
ङ्क्याह * साधनेति * अग्निसूर्ययोरन्यतो ऽप्राप्तयोः कालद्वयल-
क्षितहोमे विधानात्फलतो व्यवस्था युक्ता इह तु सौभरश्रुतिप्राप्त-
निन्तरव्यावृत्तौ त्रिदोषपरिसंख्यापत्तेः व्यवस्थार्थत्वायोगात्प्रकृता-
नुपपत्तेरपूर्ववृष्टिकामाद्यवगमात्साधनापेक्षायां साधनसमर्पणार्थनैव
हीषादिपदेन वृष्टिकामादेः सम्बन्धो न व्यवस्थार्थेनेत्याशयः। अ-
पूर्वेष्टिकामाद्यवगतिः साधनापेक्षित्वोक्त्या सूचिता इतरस्मिन्निति
भाष्यं व्याचष्टे * अन्यथेति * अनेन च भाष्येणास्मत्कृतमेव सन्दे-
हव्याख्यानं स्फुटीकृतमित्याह * तथेति * अभ्युच्चयमात्रार्थ-
त्वाद् भूयस्त्वभाष्यमुपेक्षितम् * हीषो निधनपदानन्वयाद्वाक्यभे-
दाशङ्कानुपपत्तेस्तन्निरासार्थत्वेनाद्यसिद्धान्तसूत्राव्याख्यानायोगा-
त्स्वयं सर्वस्य सौभरस्योक्तकामत्वेन प्रकृतप्रत्यभिज्ञानाल्लक्षणया प्र-
कृतसौभरानुवादिका कामश्रुतिर्नापूर्वफलोक्त्यर्थेत्येवं व्याचष्टे *
सिद्धान्ते त्विति * श्लोकं व्याचष्टे * सर्वस्येति * परोक्षवृत्त्या
निधनान्तरप्राप्तेर्मन्थरत्वादप्राप्तावस्थस्यैव हीषः प्रत्यक्षवृत्त्या शीघ्रं
विधानान्न त्रिदोषत्वापत्तिरित्याशयः। वृष्ट्यादेः स्ववाक्यानुपात्तसौ-
भरविशेषणत्वायोगात्किमर्थं सौभरं विशेष्यतइत्याशङ्कोत्तरत्वेनोत्त-
रावयवव्याख्यानायोगात्किमर्थमनूद्यतइत्याशङ्कोत्तरत्वेन व्याच-
ष्टे * किमर्थेति * वृष्टिकामादिशब्दैः श्रुत्युपात्तफलत्यागेन सौभर-
लक्षणा न युक्तेत्याकङ्कते * कस्मात्पुनरिति * प्रकृतस्य सौभर-
स्यैकाक्षरसाध्यत्वेनाश्रयत्वायोग्यत्वादाश्रयत्वयोग्यस्य च निधन-
स्य प्रकरणाभावात्प्रकृताश्रयालाभेन गुणफलान्वयायोगाच्छ्रुत्यर्था-
न्वयानुपपत्तेर्लक्षणा युक्तेति परिहरति * तदिति * फले साध्ये ने-
ष्टमाश्रयमाप्नुयादित्यन्वयः। श्लोकं व्याचष्टे * हीषेति * न केवलं
फलान्वयपरेण वाक्येनैवाश्रयलाभाद्वाक्यभेदः किं त्वाश्रयभूतस्य
५७४।७ निधनस्य सौभरेण विशेषणादपीत्याह * तथेति * स्ववाक्ये सौ-
भरानुपादानात्प्रकरणाद्विशेषलाभः कथमपीत्यनेन सूचितः। एवं
सति को दोष इत्याशङ्क्याह * तत्रापीति * ननु साक्षात्सौभरस्या-

अयत्वायोग्यत्वे ऽप्यवयवावयविनोरत्यन्तभेदाभावेनात्यन्तभेदाच्च यागस्तोत्रयोर्न स्तोत्रे साधिते यागः साधित इति शक्यं वक्तुमिति पूर्वाधिकरणवार्त्तिकोक्तन्यायाभावादवयवद्वाराश्रयत्वोपपत्तेस्तस्य च प्रकरणलभ्यत्वान्न वाक्यभेदापत्तिरित्याशङ्क्याभ्युपेत्यवादेन परिहरति * किं चेति * हीषित्यक्षरं यद्यपि सौभरस्य साधनं तथापि क्व भक्तौ तन्निविशतइत्यनेन च धारणान्निधनानुवादानुपपत्तेस्तद्विधावपरिहार्यो वाक्यभेद इत्याशयः। सामानाधिकरण्यबुद्धिहेतुकत्वादभेदस्यैकस्मिंश्चावयवे ऽवयविसामानाधिकरण्यबुद्ध्यभावेनाभेदाभावादेकावयवसाधनत्वेनावयविसाधनत्वानुपपत्तेरनङ्गेच्चाङ्गावतारन्यायस्य प्राधान्यावस्थितम्।यत्तु तदङ्गेनोपसर्पतीति पूर्वाधिकरणवार्त्तिके निषिद्धत्वाद्यथा शक्नुयात्तथाश्रयेदिति कल्पनानुपपत्तेरभ्युपेत्यवादमात्रत्वं दर्शयन् श्लोकं व्याचष्टे * न तावदिति* द्वादशाधिकरणसूत्रोदाहरणेनातिशयोक्तिः। ननु यथा पशुकामस्योक्थ्यं गृह्णीयात्षोडशिना वीर्यकामः स्तुवीतातिरात्रेण प्रजाकामं याजयेदित्युक्थ्यादिग्रहयागाभ्यासानां फले विहितानां यागाभ्याससमुदायात्मकज्योतिष्टोमाश्रितत्वेनावगतानां ज्योतिष्टोमस्यानेकयागाभ्यासरूपावयवस्योक्थ्याद्यभ्यासमात्रेणाव्याप्तेः क्वावयवे स्थितानां ज्योतिष्टोमसाधनत्वापेक्षायां तमग्निष्टोमात्पराञ्चं गृह्णीयादित्युक्थ्यस्याग्निष्टोमपरत्वं वाक्यात्तं पराञ्चमुक्थ्येभ्यो गृह्णीयादिति च षोडशिनस्तत्परत्वं वाक्यादतिरात्रे षोडशिनं गृह्णातीतिचोक्थ्यपरत्वेनावगतस्य षोडशिना ऽतिरात्रे विधानादतिरात्रस्य सर्वान्त्यत्वप्रतीतेरन्ते निवेशस्तथा समाम्नायाद्भविष्यतीत्याशङ्कते * अथेति * उक्थ्यादीनां ज्योतिष्टोमस्याद्ये मध्यमे वा प्रदेशान्तरे क्वाप्यदृष्टेरलौकिकत्वेन चान्यत्र स्थितानां रूपावधारणफलान्वयोक्थ्यादिव्यपदेशासम्भवात्सम्भवत्स्वपि रूपावधारणफलान्वयोक्थ्यादिव्यपदेशेषु वाक्यान्तरावगतस्यान्ते निवेशस्य विषयान्तराविज्ञानेन फलार्थोक्थ्यादिविषयत्वावधारणाद्युक्तो ऽन्ते निवेश हीषादीनां लोकावेदसामान्तरभक्त्यन्तरेष्वपि दृष्टेरन्तनिवेशानियमात्सौभरान्तनिवेशस्य च पाठप्राप्तस्य क्रतुपुरुषार्थसौभरसिद्ध्यर्थहीषादिविषयत्वेनोपयोजितत्वात्स्वातन्त्र्येण फले विहितानां स्थाननिवेशानवगतेर्निधनानुवादो न सम्भवतीति परिहरति * तदिति * श्लोकं व्याचष्टे * युक्तमिति * अलौकिकत्वं त्रेधोपपादयितुम् * ५७५।२
न चेत्युक्तम् * ग्रहयागाभ्यासत्वस्यान्यत्रापि भावात् ज्योतिष्टोमरूपनिष्पत्त्यर्थाभ्यासातिरिक्तत्वेनैवेषां निरूप्यत्वात्तन्मध्यपाते च

ज्योतिष्टोमरूपनिष्पत्तावेव व्यापारापत्तेरद्रव्यत्वात्केवले कर्मशेषः स्यादित्यैश्वदाभ्यन्यायेन यागान्तरत्वायोगाच्चाम्नान्तनिवेशं विना रूपावधारणं न चानवधारितरूपाणां फले विधिरुक्थ्यादिसंज्ञा चोपपद्यतइति स्वरूपेण फलान्वयित्वेन संज्ञित्वेन च त्रेधाप्यलौकिकतेत्याशयः।सम्भवत्यप्यन्यथा रूपाद्यवधारणे वाचनिकस्यान्ते निवेशस्यानन्यविषयत्वात्फलार्थस्यैवोक्थ्यादेर्विषयत्वावसाय इत्यधानार्थो ऽनन्यविषयत्वेनेति श्लोकवयवो ऽन्तनिवेशं विना रूपाद्यवधारणाभ्युपगमे ऽप्यन्तनिवेशोपपादनार्थ इति यो ऽपि चेति पश्चाद्व्याख्यया सूचितम् । अनेन चोक्थ्यादिषु व्यवस्थितं नियतमेव स्थानं यद्यप्यव्यवस्थितं तथापि वाचनिकस्य स्थानानिवेशस्यानन्यविषयत्वादेतद्विषयतयैव व्यवस्थितमित्यपि योजना सूचिता । क्रत्वर्थत्वेन फलार्थत्वेन च यत्सौभरविधानन्तेनोपयोजित इत्युक्ते गुणफलान्वयविधिवाक्येनाश्रयान्वयाविधाने ऽप्यविहितस्याग्राह्यत्वापत्तेः कल्पितविधिविषयत्वाभ्युपगमाद्धीषादेः फलान्वयसिद्ध्यर्थेन सौभरविधानेनोपयोजित इति भ्रान्ति निरासितुं सौभरेण फलं विशेषितं नन्वस्य हीषादेर्लोकादिवर्त्तित्वे ऽपि प्रकृतस्य सौभरावयवभूतस्यानन्यवर्त्तित्वान्निश्चय इत्याशङ्क्याह * यदीति * प्रकृतनियमे प्रमाणं नास्तीत्याशयः । ननु स्वरूपेण हीषादेः प्रकृतग्रहणनियामकाभावे ऽप्याश्रयत्वेन गृहीते सौभरे हीषादेर्निधनस्थानत्वात्फलार्थस्यापि हीषादेः सौभरावयवत्वेन सौभरे समाप्ता तेन हीषादिनैक्यान्निधनस्थानत्वं सेत्स्यतीत्याशङ्कते * ननु चेति * यद्यपि लोकादिगतो हीषादिर्गुणफलान्वये विधिना गृह्यते तथापि प्रकृतसौभराश्रितत्वाद्य एव सौभरावयवत्वेन समाम्नातो हीषादिः प्रकृतः फलार्थो ऽपि स एवेति सौभरावयवत्वेनैकत्वात्तदेव स्थानं भविष्यतीत्येकस्य हीषादेर्नानास्थानत्वादर्शनेनैवान्तनिवेशनियामकाभावस्योक्तत्वात्स्वरूपैक्यमात्रेणाशङ्कानुपपत्ते।सौभरावयवत्वेनैक्यं व्याख्येयम्।सत्यप्यैक्ये प्रयोजनभेदे स्थानस्य देवदत्तादौ शक्तिभेददर्शनात्स्थानान्तरे ऽपि च सौभरारम्भसमाप्त्यन्तराले प्रयुक्तस्य हीषादेः सौभरावयवत्वोपपत्तेरवयवान्तरोपजनापत्तेश्चोक्थ्यादिवदविरोधाच्च कार्यान्यत्वे तत्स्थानत्वनियमासिद्धिरिति परिहरति * नैतदिति * श्लोकं व्याचष्टे * न शब्दैकत्वेनेति* स्थानं दृष्टसामर्थ्यमित्यनेन शक्तिभेदः तत्स्थानस्येत्यध्याहारः सूचितः । स्वरूपनाशाशङ्कानुपपत्तेस्तन्निरासायोगादात्मीयवाचिस्वशब्दाङ्गीकारेण सौभरात्मीयस्य तदवयवत्वरूपस्यानाशादिति व्याख्येयम्। न चेत्यनेनोत्तरार्द्धं व्याख्यातं बारव-

न्तीये निरस्तमपि प्रणीताधर्मन्यायामितरेतराश्रयाख्यदोषान्तराभिधित्सया पुनरुपन्यासपूर्वं निरस्यति * प्रासङ्गिकेति * निधन- ५७६।२
स्थानप्रयोगाभावे समाम्नातेनैव हीषा सौभरसिद्धेः फलार्थस्य हीषः सौभरसाधनत्वायोगात्स्थाननिवेशादेव सौभरसाधनता वाच्येत्याशयः । नन्वप्रकृतस्य हीषादेः फले विधौ तस्य सौभरसाधनत्वात्प्राक् स्थानविशेषासिद्धेरितरेतराश्रयं स्यात्प्रकृतप्रत्यभिज्ञाने तु तद्विरोधेनाप्रकृतग्रहणायोगात् प्रकृतग्रहणावगतेस्तस्य च समाम्नायादेव स्थानविशेषसिद्धेर्नेतरेतराश्रयापत्तिरित्याशयेनाशङ्कते * नन्विति*यदि च वारवन्तीयसंस्कारः कश्चिद्विधीयेत ततः कथं चिद् व्रीहिप्रोक्षणादिष्विव प्रकृतप्रत्ययो भवेदिति पूर्वाधिकरणवार्त्तिकन्यायेनोपादीयमानत्वे प्रकृतग्रहणायोगमाशङ्क्य यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदियात्स त्रेधा तण्डुलान्विभजेद्ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधनश्चरुं ये क्षोदिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमिति अभ्युदितेष्टावुपादीयमानत्वेऽपि तण्डुलादीनां प्रकृतग्रहणं दृष्टान्तितं चन्द्राभ्युदये निमित्ते दार्शं हविः दार्शेभ्यो देवताभ्यो ऽपनयेदिति विभजतिवाक्यार्थस्य षष्ठे वक्ष्यमाणत्वाद्देवतां विना प्रक्रान्तदर्शानिष्पत्तेर्देवतान्वयाकाङ्क्षायां मध्यमादिवाक्यैरत्र प्रकृतस्य हविषो देवतान्तरविधावनपेक्षितविध्यापत्तेः प्रकृतहविर्विषयत्वावगमाद्यच्छब्दोपबन्धेन प्रकृतविषयत्वदृढीकरणात्प्रकृतनियमो युक्तः । इह तु श्रुतिकृतस्य हीषादिमात्रप्रत्ययस्य प्रत्यभिज्ञारूपेण सन्निधिना ।

श्रुतेः कर्मान्तरज्ञानं सन्निधेरेककर्मता ।
तत्र श्रुतिबलीयस्त्वं जानतां कथमेकता ॥

इति न्यायेन बाधायोगाद्धेत्वन्तराभावाच्च न प्रकृतनियमस्स भवतीति वैषम्योक्त्या परिहरति * युक्तं तत्रेति * अतो गुणफलान्वयरूपवाक्यार्थायोगान्निधनव्यवस्थारूप एव वाक्यार्थो युक्त इत्युपसंहरति * तस्मादिति* ननु वृष्टिकामादिशब्देन सौभरलक्षणापत्तेर्निधनव्यवस्थापक्षोऽप्ययुक्त इत्याशङ्क्याह * यदेति * अनेन च पुरुषश्रुतेरिति पूर्वपक्षहेतोर्द्वितीयव्याख्यापक्षे परिहार उक्तः । ननु साधनलक्षणायामपि कारीर्यादिसाधनलक्षणाप्रसङ्गे सौभरेण विशेषणाद्वाक्यभेदः स्यादित्याशङ्क्याह * तत्रेति * लक्षणायाः प्रकृतविषयव्यवस्थापकत्वात्प्रकृतस्यैव साधनस्य लक्षणेत्याशयः । निधनव्यवस्थाविषयभूतप्रकृतसौभरविशेषलक्षणार्थत्वाच्च वृष्टिकामशब्दस्य कारीर्यादिलक्षणा-

शङ्कामपि नाधिरोहतीत्याह * प्रकृतेति * कामोपबद्धानां पदानां फलपरत्वस्यैकादशाद्ये वक्ष्यमाणत्वाद् वृष्टिकामशब्दएव वृष्टिशब्द उक्तः । यथान्नाद्यस्य स्वर्गस्य वा साधनभूतं सौभरं वृष्टिशब्दो लक्षयतीत्याशङ्का न सम्भवति तथा वृष्टिसाधनकारीर्यादिलक्षणाशङ्कापि न सम्भवतीति सूचनार्थम् * दृष्टान्तत्वेन न चेत्युक्तम् * पुरुषश्रुतेरिति पूर्वपक्षहेतोर्विधिपुनः श्रुत्यपेक्षव्याख्यापक्षे परिहारमाह * सत्यामपि चेति * काम्यत्वाभावे हीषादीनां तुल्यबलत्वेनैकस्येतरबाधकत्वायोगान्नियमायोगाशङ्का विनापि च गुणकामत्वेनेत्यादिवार्त्तिके निरस्तेतीत्युक्तमित्यनेनोक्तम् । ननु प्रवो देवा ऽयम् इत्याज्यसूक्ते समाम्नायावगतक्रमाक्रमान्तरेण चाप्रयोगदर्शनेन सौभराङ्गरूपापि विधीयमानस्य हीषादेः समाम्नायावगतस्थाननियमप्रमाणाभावात् वृष्टिसाधनं यत्सौभरं तस्य च यन्निधनमिति विशिष्टानुवादाद्वाक्यभेदो ऽस्मिन्नपि पक्षे स्यादित्याशङ्क्याह * तं चेति * नियमस्य यथाप्राप्तविषयत्वान्नापूर्वविधाविव क्रमान्तराशङ्केत्याशयः । व्याख्याते ऽर्थे भाष्यं योजयति * तदिति * समाप्ते ऽधिकरणार्थे परव्याख्यादूषणव्याक्षिप्तचित्तत्वात्प्रागनुक्तामनन्तरसङ्गतिमाह * तदिति * ननु वृष्टिसाधनस्य सौभरेण विशेषणादस्मिन्नपि सिद्धान्तव्याख्याने परव्याख्यावद्विशिष्टानुवादलक्षणवाक्यभेदस्य प्रसक्तस्यापरिहृतत्वेनाधिकरणार्थासमाप्तेरन्तराले स्वावसरानुक्तानन्तरसङ्गत्यभिधानमयुक्तमाशङ्क्यास्मिन् व्याख्याने वाक्यभेदाप्रसक्तिमाह * यस्त्विति * हीषो निधनान्वये तस्योद्देश्यत्वेनाविवक्षितविशेषणत्वाद्वाक्यापन्नस्य निधनमात्रान्वयस्य प्रकरणलभ्यसौभरविशेषणत्वेनापादनप्रसङ्गाद्वाक्यभेदापत्तिः । फलपदान्वये तु तस्योद्देश्यलक्षणार्थत्वेन स्वयमनुद्देश्यत्वाल्लक्षणायाश्च हीषाद्यन्वयसिद्ध्यर्थत्वेन तदन्वयापादकप्रकृतसौभरविषयत्वावगमान्न वाक्यभेदप्रसक्तिरित्याशयः । परव्याख्याने चोदित आसीदिति भूतनिर्देशेनोक्तं प्रसङ्गान्निधनमात्रव्यवस्थार्थान्येतानि वाक्यानि तन्निधनकसौभरविशेषव्यवस्थार्थानि वेत्यनुष्ठानौपयिकं चिन्तान्तरं प्रस्तौति *
५७७।२ इदं त्विति * सर्वशाखागतानां सौभरविशेषाणां न चैकं प्रतिशिष्यतइत्यनेन व्यवस्थया प्रातिरेकस्माच्च फलसिद्धेः समुच्चयचायोगे ऽपि विकल्पेन प्रयोगोपपत्तेर्हीषादिश्रुते सौभरावाचित्वेन तद्व्यवस्थापकत्वायोगान्निधनमात्रव्यवस्थार्थानीति पूर्वपक्षमाह * तत्रेति * सिद्धान्तं प्रतिजानातीति प्रश्नपूर्वमुपपादयति * कथमिति * सौभरगीत्यविशेषे ऽपि प्रतिशाखमवान्तरगीतिविशेषसद्भावाच्छा-

खान्तरस्थस्य सौभरगीतिविशेषस्य शाखान्तरस्थसौभरभक्तियोगे सत्याधारभूताक्षरभूताक्षरविशेषाधीनत्वात्स्वरविशेषात् क्रमगीतिविशेषाभिव्यक्तेर्विकल्पप्राप्तिविषयस्यैव नियमविषयत्वात्समस्तस्य च सौभरस्य वृष्ट्यादिसाधनत्वेन विधानाद्विकल्पप्राप्तेः शाखाभेदेन पठितस्य समस्तस्यैव सौभरस्य व्यवस्थेत्यर्थः। श्लोकं व्याचष्टे* सामरूपं हीति*सूक्ष्मभिदभिन्नत्वाद् गीतिविशेषाणां भक्त्यन्तरयोगे रूपनाशापत्तेरित्याद्युक्त्यर्थः। ननु न गिरागिरेति ब्रूयादिति गिरापदनिषेधानुवादेनैरं कृत्वोद्गेयमितीरापदविधानाद्यज्ञायज्ञीयस्य गिरापदस्थाने इरापदप्रयोगाद्रूपान्यत्वापत्तिर्यथा न विरुध्यते तथा रूपान्यत्वापत्तिरविरुद्धेत्याशङ्क्य * न चेत्युक्तम् * तत्र रूपान्यत्वात्मकविकारानभ्युपगताविरापदविधिविरोधापत्तेस्तत्परिहारार्थं विकारो युक्तः न त्विह विरोधो ऽस्तीत्याशयः। ननु विकाराश्रयणे विरोधो नास्तीत्याशङ्क्य * सर्वत्र चेत्युक्तम् * प्राप्तरूपान्यत्वात्मके विकारे प्राप्तिप्रमाणविरोधापत्तेः शरैः कुशानां फलचमसेन सोमस्य सूर्यादिपदेन आग्न्यादिपदस्यागत्यैव बाधदर्शनात्सत्याङ्गतौ बाधा न युक्तेत्याशयः। विकल्पप्राप्तौ चेत्यनेन समस्तैव चेति चशब्दाध्याहारेण युक्त्यन्तरोक्त्यर्थत्वेनोत्तरार्द्धं व्याख्यातम्। ननु निधनमात्रनियमश्रुतौ अश्रुतसमस्तनियमाभ्युपगमो न युक्त इत्याशङ्क्याह * अत इति * शिष्याचार्ययोः सहभोजनप्राप्तौ शिष्यस्य कांस्यभाजित्वनियममनियतपात्रभोज्याचार्यो ऽनुरुन्धानो लोके दृश्यतइति द्वादशाधिकरणसिद्धो दृष्टान्तः। यद्वा वृष्टिकामः सौभरेणेति विधितः सौभरप्राप्तेः समाम्नायाच्च हीष्प्राप्तेरुभयप्राप्तौ च सम्बन्धविधिर्जाघन्यधिकरणे वक्ष्यमाणत्वात्सम्बन्धावधिप्रतीतेर्हीष निधनसौभरविशेषोपादानं च विना सम्बन्धासिद्धेर्हीष्निधनकसौभरनियम एव विध्यर्थ इत्याह * एषो ऽपि चेति * एवमेव सिद्धान्तमुपसंहरति * तस्मादिति *

इति श्रीमत्त्रिकाण्डमीमांसामण्डनभतिवसन्तसोमयाजिभट्टमाधवात्मजभट्टसोमेश्वरकृतौ तन्त्रवार्तिकटीकायां सर्वानवद्यकरिण्यां न्यायसुधाख्यायां द्वितीयाध्यायस्य द्वितीयः पादः।

न्यायसुधायाम् ।

॥ द्वितीयाध्यायस्य तृतीयः पादः ॥

॥ अथ ग्रहाग्रतायाः ज्योतिष्टोमाङ्गताधिकरणम् ॥ १ ॥

गुणस्तु क्रतुसंयोगात्कर्मान्तरं प्रयोजयत्संयोगस्याशेषभूतत्वात् * १ * ५७८।४

निश्चितविधेयत्वस्य गुणस्य क्व पूर्वत्रासम्भवाद्भेदकत्वं क्व वा फले विधानेन व्यवस्थार्थत्वेन वा पूर्वत्र सम्भवात् अभेदकतेति निर्णीते सन्दिग्धविधेयत्वस्य क्व विधेयत्वात् भेदकत्वं क्व वा तदभावादभेदकतेति निर्णेतुं यदि रथन्तरसामा यदि बृहत्सामेति वाक्ययोः किं रथन्तरसामत्वबृहत्सामत्वे विधीयेते ज्योतिष्टोमएव वा ग्रहाग्रविशेषविधौ निमित्ततयोच्यते इति चिन्तां दर्शयितुं तत्रेति सन्देहभाष्यं एकापूर्वसाधनीभूतस्तुतिसमूहात्मकस्तोत्रविशेषरूपपृष्ठैक्ये ऽव्यवान्तरकार्यभूतायाः स्तुतेर्गुणसङ्कीर्णात्मकत्वाद् द्रव्यान्तरेण शूरादेर्बृहता च चित्रादेर्गुणस्य कीर्त्तनात् बृहद्रथन्तरयोर्द्वारभेदेन पृष्ठसाधनत्वात्समुच्चयावगतेर्नित्यत्वेन कादाचित्कत्वान्निमित्तत्वानुपपत्तेः । सिद्धान्तवचनशक्त्ययोगादयुक्तमाशङ्क्योपपादयितुमाह * ज्योतिष्टोम इति * न्यायाद् बृहद्रथन्तरयोः समुच्चयावगमे ऽपि बृहद्वा रथन्तरं चेति वचनाद्विकल्पावगतेः पाक्षिकत्वान्निमित्तत्वोपपत्तिरित्याशयः । एवमपि कर्मश्रुतेस्तद्भेदाभेदसन्देहो न युक्त इत्याशङ्कां निरस्यन् भेदाभेदविषयत्वेन सन्देहभाष्यं व्याचष्टे * तत्रेति * रथन्तरसामत्वस्य बृहत्सामत्वस्य वा गुणस्य सोमयागविषयत्वात्सोमशब्दस्य सोमसाध्ययागलक्षणार्थत्वसूचनार्थं सगुणमित्युक्तं बृहद्रथन्तरसामत्वयोर्ज्योतिष्टोमे प्राप्तत्वेन विधेयत्वात्सामान्तरनिवृत्त्यर्थत्वे च तद्विध्यानर्थक्यापत्तेः । कर्मान्तरत्वनिश्चयात्सिद्धान्तासम्भवेन सन्देहायोगमाशङ्क्य प्राप्तयोरपि बृहद्रथन्तरसामत्वयोर्ग्रहाग्रविशेषविधौ निमित्तार्थं कीर्त्तनमिति सूचनार्था

ग्रहाग्रताविशेषविध्युक्तिरित्येवं सिद्धान्तवचनव्यक्तिभाष्यं व्याख्या-
तुम् * तस्यैवेत्युक्तम् * यदीति सन्देहहेतुभाष्यं प्रकरणाद् बृह-
द्रथन्तरसामशब्दयोर्ज्योतिष्टोमवाचित्वावगतेः पूर्वपक्षायोगादयुक्त-
माशङ्क्योपपादयितुमाह * तत इति * सर्वसामकार्येषु रथन्तर-
मेव बृहदेव वा न सामान्तराणीति कृत्स्नेन क्रतुना रथन्तरस्य बृहतो
वा संयोगे ज्योतिष्टोमे सामान्तरविध्यानर्थक्यापत्तेस्तदयोगात्कर्मा-
न्तरत्वं रथन्तरं बृहद्भवत्येवेति सत्तामात्रेण रथन्तरस्य बृहतो वा
क्रतुसंयोगे त्वकर्मान्तरतेत्याशय. । नन्वेवं सति बृहद्रथन्तरयोर्वि-
शेषणत्वेन सामान्तरव्यावर्त्तकत्वावगतेः कृत्स्नक्रतुसंयोगस्यैव न्या-
य्यत्वात्सिद्धान्तानुपपत्ते. । सन्देहो न युज्येतेत्याशङ्क्यासत्ताव्यावृ-
त्त्यापि बृहद्रथन्तरयोः पाक्षिकत्वात् विशेषणत्वोपपत्तेर्न तन्मात्रेण
कृत्स्नक्रतुसंयोगसिद्धिरिति परिहारसम्भवे ऽपि प्रौढ्या क्रतोरेव
विशेषणत्वाभ्युपगमने सिद्धान्तसम्भवं वक्तुमाह * तत्सिद्ध्यर्थम-
पीति * विशिष्टानुवाददोषापत्तेर्विशेषणविशेष्यत्वायोगमाशङ्कते *
ननु चेति * पूर्वपक्षे तावन्निमित्ततैव नास्तीति परिहरति * भवे-
दिति * केवलबृहद्रथन्तरसामकत्वस्याप्राप्तत्वान्निमित्तत्वं न स
म्भवतीत्याशयः । ननु सिद्धान्ते ऽपि अप्राप्तत्वादेव केवलबृहद्रथ-
५७९।। न्तरसामकत्वस्य निमित्तत्वं न सम्भवतीत्याशङ्क्याह * निमित्तत्व-
मपि चेति * समासश्रुत्यवगतस्य केवलरथन्तरसामकत्वस्य केवल-
बृहत्सामकत्वस्य वा प्राप्त्यभावान्निमित्तत्वायोगे ऽपि रथन्तरव-
त्वस्य बृहद्वत्त्वस्य वा निमित्तत्वसम्भवात् बृहद्रथन्तरयोरसत्ताव्या-
वृत्त्यान्योन्यमात्रव्यावृत्त्या वा विशेषणत्वाभ्युपगमेन विशेष्यत्वाभ्यु-
पगमेन वा बृहद्रथन्तरसामकत्वापादनेन निमित्तता सिद्धान्ते
ऽभ्युपगन्तव्येत्याशयः । नन्वेवमपि विशिष्टानुवाददोषापत्तेः कः
परिहार इत्यपेक्षायामाह * यत्सम्बन्धाच्चेति * शुद्धस्य क्रतोः सा-
म्नो वा ग्रहाग्रविधौ निमित्तत्वायोगाद्विशिष्टस्यैव निमित्तत्वाव-
गतेर्विशेषणस्याप्युद्देश्यान्तर्गतेर्न विशिष्टानुवाददोषापत्तिरित्याशयः।
शुद्धस्योद्देश्यत्वायोगे विशेषणस्योद्देश्यान्तर्गत्यभ्युपगमे ऽपि वाक्य-
भेदानापत्तिसूचनायात्र्याधिकरणभाष्यपाठः । पूर्वपक्षसूत्रस्थतुशब्द-
व्यावर्त्यसिद्धान्तोक्त्यर्थं किं तावदिति भाष्यप्रकरणोक्तिर्युक्त्यन्त-
राणामभ्युपलक्षणार्थेत्येवं व्याचष्टे * किं तावदिति * सन्निधिल-
क्षणात्प्रकरणात्सोमशब्दस्य ज्योतिष्टोमविषयत्वप्रतीतेर्बृहत्पृष्ठं भव-
ति रथन्तरं पृष्ठं भवतीति वचनान्तरेण बृहद्रथन्तरप्राप्तेर्यदि शब्द-
प्रतीतस्य च निमित्तत्वस्य प्राप्त्यपेक्षत्वादकर्मान्तरत्वे च ग्रहाग्र-

विशेषस्य ज्योतिष्टोमप्रयोगवचनेन ग्रहणात्प्रकृतकथम्भावानुग्रहो-पपत्तेर्ज्योतिष्टोमस्य चोत्पत्तिशिष्टसामान्तराभावेन बृहद्रथन्तरवि-रोधिगुणान्तरानवरोधात् बृहद्रथन्तरयोः पूर्वकर्मसंयोगानर्हत्वा-भावेन भेदकत्वानुपपत्तेर्दध्ना जुहोतीत्यादिवच्च प्रकृतकर्मप्रत्यभि-ज्ञानादकर्मान्तरतेत्यर्थः। बृहद्रथन्तरसामत्वलक्षणो गुणः कर्मान्तर-माक्षिपेदिति पूर्वपक्षप्रतिज्ञार्थसूत्रावयवव्याख्यानार्थमितीतिभाष्यं व्याचष्टे *एवमिति* बृहद्रथन्तरसामशब्दयोरपूर्वक्रतुसंयोगादित्येव-मर्थाभ्युपगमेन हेत्वर्थे क्रतुसंयोगादिति सूत्रावयवे पठिते नन्वि-तिभाष्येण शब्दद्वयस्यापि ज्योतिष्टोमवाचित्वोपपत्तेर्हेत्वसिद्धिमाश ङ्क्य नेति ब्रूम इत्यनेन संयोगस्य कृत्स्नभूतत्वादित्येवमर्थेनान्त्यसूत्रा-वयवेन तन्निरासमुपक्रम्य तदुपपादनार्थं कथमित्यादिना तत्सन्देह-हेतुरुक्तस्तं प्रागेव व्याख्यातत्वादुपेक्ष्य कृत्स्नक्रतुसंयोगोपपादनार्थस्य यदि रथन्तरसामेति को ऽर्थ इत्यादिभाष्यस्यार्थं व्याचष्टे * कुत इति * सामर्थ्यस्यैकार्थ्याधीनत्वाद्विशेषणविशेष्यत्वं च विनैकार्थ्या-योगाद्विशेषणत्वापेक्षा व्यवच्छेद्यत्वशब्देनासाधारण्यं व्याख्यातम्। जोतिष्टोमस्य चेति भाष्यावयवो ऽन्त्यपादेन व्याख्यातः। प्रातिलोम्येन श्लोकं व्याख्यातुं ज्योतिष्टोमे केवलबृहद्रथन्तरसामकत्वाभावमात्रेण कथं कर्मान्तरत्वसिद्धिरित्यपेक्षायां केवलरथन्तरसामकत्वलक्षणा-त्केवलबृहत्सामकत्वलक्षणाद्वा गुणाद्भेदसिद्धिं वक्तुमाह * गुण-श्चेति* तस्मात्कर्मान्तरमिति हिशब्दान्वयायाध्याहार्यम्। ननु विधेय-स्यैव गुणस्य भेदकत्वात् बृहद्रथन्तरसामकत्वयोश्च निमित्तत्वे-नाविधेयत्वान्न भेदकतेत्याशङ्क्याह * इह चेति * यदि श-ब्दोपबन्धेनेह निमित्तत्वं गम्यमानं बहुव्रीह्यर्थस्य विद्यमान-स्य गम्येत तस्य च केवलबृहद्रथन्तरसामकत्वरूपस्याविद्य-मानत्वेन निमित्तत्वायोगाद्विधेयत्वेन युक्ता भेदकतेत्याशयः। ननु बहुव्रीह्यर्थस्य निमित्तत्वायोगे ऽपि रथन्तरस्य बृहतो वा विद्यमान-त्वान्निमित्ततोपपत्स्यतइत्याशङ्क्याह *नेति * ननु रथन्तरमस्य सामेति विग्रहे रथन्तरस्य विशेष्यत्वप्रतीतेर्निमित्ततोपपत्स्यतइत्याश-ङ्क्याह * न चेति * विग्रहवाक्यस्यावैदिकत्वेन समासस्यैव वि-शेषणविशेष्यत्वस्य ग्राह्यत्वात्तत्र च सप्तमीविशेषणे बहुव्रीहाविति विशेषणस्य पूर्वनिपातस्मृतेः पूर्वनिपाताद्रथन्तरस्य विशेष्यता न युक्तेत्याशयः। क्रत्वन्तरेष्वपि च रथन्तरसद्भावान्न रथन्तरं क्रतुना विशेष्टुं शक्यमित्याह * न च तदिति * अतो रथन्तरमेवास्य सा-मेति बहुव्रीह्यर्थत्वात्तस्य चाप्राप्तत्वान्निमित्तत्वं न सम्भवतीत्युपसं-

हरति * तस्मादिति * अतो निमित्तत्वायोगेन विधेयत्वावगतेः केवलरथन्तरमेवास्य सामेति बहुव्रीह्यर्थत्वात्तस्य चाप्राप्तत्वान्निमित्तत्वं न सम्भवतीत्युपसंहरति * तस्मादिति * अतो निमित्तत्वायोगेन विधेयत्वावगतेः केवलरथन्तरसामकत्वलक्षणस्य गुणस्य भेदकता युक्तेति प्रकृतमुपसंहरति * अत इति * * निमित्तत्वावेदकस्य यदिशब्दस्य का गतिरित्याशङ्क्य प्रतीतमपि निमित्तत्वमसम्भवात्त्याज्यमित्यभिहितम् । निमित्तत्वान्यथानुपपत्त्या केवलरथन्तरसामकक्रत्वन्तरस्य विधेयत्वकल्पनापक्षस्तु केवलरथन्तरसामकक्रत्वन्तरस्य नित्यत्वेन निमित्तत्वायोगात्प्रौढिमात्रेणोक्तः । ननु कर्मान्तरे ऽप्यतिदेशात् गायत्र्यादिसामान्तरप्राप्तेः केवलरथन्तरसामत्वं
६८०।१ न सम्भवतीत्याशङ्क्याह * शक्यं हीति * अतिदेशस्योपदेशेन बाधोपपत्तेरित्याशयः । श्लोकान्त्यपादं व्याख्याय सामान्तरव्यावृत्त्या रथन्तरस्य ज्योतिष्टोमविशेषणत्वायोगे ऽन्ययोगव्यावृत्त्या विशेषणत्वं भविष्यतीत्याशङ्कानिरासार्थत्वेन तृतीयं व्याचष्टे * न चेति * रथन्तरस्याविशेषात्सर्वसामकार्यविशेषणत्वप्रतीतेः पृष्ठव्यतिरिक्तेषु च सामकार्येषु तस्यायोगव्यावृत्तेरप्ययोगाच्च सर्वव्यापिविशेषणत्वं सम्भवतीत्याशयः । महाबलमिदं चेच्छन्नमित्यादिवत्तर्ह्यविशेषणस्यैव सत्तामात्रेण निमित्तत्वं भविष्यतीत्याशङ्कानिरासार्थत्वेन द्वितीयं व्याचष्टे *नेति* विशेषणादि गायत्रच्छन्दस इत्यादिवत्तर्ह्यसामर्थ्यमेवास्त्वित्याशङ्कानिरासार्थत्वेनाद्यं व्याचष्टे * न च सामर्थ्येनेति * गायत्रच्छन्दःप्रभृतीनां तु मन्त्रगतत्वेन विधावशक्तत्वादगत्या यथा कथं चिद् गतिः कल्प्येत्याशयः ।समासाभावस्तु शङ्कितुमेवाशक्य इत्याह * दृश्यते चेति * अतः सिद्धा कर्मान्तरतेत्याह * एतीति * ज्योतिष्टोम एव तर्ह्येकसामकत्वं विकल्पेन विधास्यत इति शङ्कते * अथेति * विषमशिष्टत्वाद्विकल्पायोगमाह * न शक्यमिति * एतदेवोपपादयति * इदं हीति * क्रत्वन्तरे ऽपि तर्ह्येकसामकत्वं न सम्भवतीत्याशङ्क्याह * क्रत्वन्तरे त्विति * अनेन च ननु यथेत्याद्याशङ्कापरिहारभाष्यार्थो व्याख्यातः । स्वार्थप्राधान्याविघातादपि केवलरथन्तरसामकक्रत्वन्तरविधिरेव युक्त इत्याह * एवं चेति * ननु निमित्तार्थत्वे ऽपि बहुव्रीह्यर्थस्यैव निमित्तत्वात्स्वार्थप्राधान्यं न विहन्यतइत्याशङ्क्याह * अन्यथा हीति * क्रतो स्वरूपेण निमित्तत्वायोगादित्याशयः । उक्तेन च प्रकारेण केवलरथन्तरसामकत्वस्यावश्यविधेयत्वे व्यवहितान्वयहेतुहेतुमल्लिङ्पक्षयोर्यदि रथन्तरसामेत्यस्य ग्रहाग्रविध्येकवाक्यत्वाभ्युपगमात्

चोदना वा गुणानां युगपच्छास्त्रादित्यनेन न्यायेनानेकार्थोपादानल-
क्षणादपि गुणात्कर्मान्तरविधिसिद्धिरित्याह * यदि चेति * ऐ-
न्द्रवायवाग्रत्वस्य ग्रहणविशेषणत्वेन यागविशेषणत्वाभावात्तस्य च
पूर्वपक्षे ऽप्यतिदेशलभ्यत्वेनाविधेयत्वात्तद्द्वारापि विधेययागविशे-
षणत्वानुपपत्तेः । कर्मान्तरस्याप्यैन्द्रवायवाग्रत्वविशिष्टस्य विध्ययो-
गमाशङ्क्यैन्द्रवायवाग्रत्वविशिष्टगृह्णातिपरप्रत्ययोक्तापूर्वभावनावि-
शिष्टयागभावनान्तरविध्युपपत्तिसूचनार्था ग्रहाग्रभावना विधानश-
ब्देनोक्ता क्रत्वर्थोत्पादकस्य वाजिनादेर्गुणस्य तन्निरपेक्षभावनाभेद-
कत्वाभावे ऽपि तदनुत्पादकस्य साक्षाद्भावनयैवान्वयाद्भेदकत्वसू-
चनायापूर्वभावनाविध्युक्तिः । विधायकस्याच्छब्दानन्तर्यादपि सो-
मशब्दलक्षितयागविधिरवसीयतइत्याह * सोम इति * नन्विति
कर्त्तव्यतानुपदेशान्न कर्मान्तरविधिर्निर्वहतीत्याशङ्क्याह * सोमे-
ति * व्याख्याते ऽर्थे भाष्यमनुसन्धत्ते * इदमेवेति * वाक्येनेति
भाष्यावयवं यदिशब्दत्यागरुच्यध्याहारपक्षयोर्ग्रहाग्रविधेर्यागविध्ये-
कवाक्यत्वाभावादयुक्तमाशङ्क्य वाक्यग्रहणस्य च यदि रथन्त-
रसामा सोमः स्यात्सौभरेण स्तुवीतेति सन्दंशाभिव्यङ्ग्यावान्तर-
प्रकरणोपलक्षणत्वेनोपपादयितुमाह * ग्रहाग्रेति * आहेति भा-
ष्येण स्याच्छब्दस्य यदिशब्दोपहतशक्तित्वाद्यागविध्ययोगमाशङ्क्य
यदिशब्दत्यागेनानुपघातोक्त्यर्थमत्र ब्रूम इत्यादिभाष्यं महावाक्ये
ऽवान्तरवाक्याप्रामाण्यादयुक्तमाशङ्क्योपपादयति * यद्यपीति *
अथ वा यदीत्यथवाशब्दं यदिशब्दत्यागपक्षनिवृत्त्यर्थत्वेन व्याचष्टे *
परित्यागवदिति * ननु कल्पकाभावात्स्वोत्प्रेक्षामात्रकल्पितो रुच्य-
ध्याहारः प्रसज्येतेत्याशङ्क्याह * कर्त्तव्यतेति * विधिनानिच्छतः
प्रवर्त्तयितुमशक्यत्वात्कार्यत्वान्यथानुपपत्त्या रुचिः कल्प्यतइत्याश-
यः । वैकल्पिकत्वसिद्धिश्च रुच्यध्याहारप्रयोजनमेवकारेण सूचि-
ता अथ वा यथेत्यप्यथवाशब्दमध्याहारपक्षनिरासार्थत्वेन व्याचष्टे
* अध्याहारादपीति * पक्षान्तरमन्यथाभूतं यद्रचयति तदेवं मत्वे-
त्यर्थः । कथं पुनरित्याशङ्काभाष्यं दृष्टान्तस्य साध्यविकलत्वोक्त्यर्थ-
त्वेन व्याचष्टे * परस्त्विति * यद्युपबन्धात्साक्षान्न शालिभोजनस्य ५८१।४
विधेयत्वप्रतीतिर्व्यत्ययाभ्युपगमे ऽपि दध्युपसेचनस्य शालिभोजनं
प्रति यदिशब्दावगतनिमित्तत्वायोगात्तदेकवाक्यत्वानुपपत्तेः । स
यदि केन वाक्येन विहितत्वोक्तिः कथमित्याशयः । उच्यतइति भा-
ष्येण व्यवहितान्वयकल्पनया दध्युपसेचनस्येष्यमाणत्वेनावगतस्य
भोज्यव्यञ्जनार्थत्वेनेष्यमाणतया पाष्टिकान् पयसा भुञ्जीतेति व्य-

अनार्थपयःसाहचर्येणावधारणात् भोजनप्रयुक्तत्वेन तदभावे ऽनुष्ठानासिद्धेः कांस्यभोजिन्यायेनोपसेचननियमाच्छालिभोजननियमावगतेः स यदि केन वाक्येन भोजनविधिसिद्धिरिति परिहृतेन वै खल्वित्यनेन यदिशब्दान्वये ऽपि इच्छावाचित्वाभावात्क्षेष्यमाणत्वावगतिः सम्भवतीत्याशङ्क्योच्यतइत्यनेन कामप्रवेदने ऽकच्चिदितीति कच्चिच्छब्दोपपदवर्जं कामस्येच्छायाः प्रवेदने प्रज्ञापने गम्यमाने लिङ्विभक्तिस्मरणाल्लिङ्क्षेष्यमाणत्वावगतिरुपपादिता तत्र कथं व्यत्ययो लिङश्च कामप्रवेदनार्थतावगम्यतइत्याशङ्क्याह * व्यत्ययेनेति * अमगत्यादिष्विति गत्यर्थस्यामो धातोर्भावे क्तप्रत्ययमुत्पाद्यानुनासिकस्य क्विप् झलोः क्ङितीति दीर्घत्वादान्तङ्कृतमवगतमित्यान्तशब्दस्य ज्ञानवाचित्वाल्लोकप्रसिद्धस्य व्यत्ययकामप्रवेदनार्थत्वज्ञानस्य सिद्धं च तदान्तं चेति विग्रहेणोक्तस्य विवरणं कथनमित्यर्थः । एवं जातीयके वाक्ये लोके व्यत्ययकामप्रवेदनार्थत्वप्रतीतेरनिष्पन्नस्य चोपसेचनस्य निमित्तत्वायोगात्तदिच्छाया निष्पन्नाया यदिशब्देन निमित्तत्वोक्त्यवगतेस्तत्समभिव्याहृताया लिङः कामप्रवेदनार्थत्वस्य न्याय्यत्वादङ्गभूतोपसेचनकर्त्तव्यतया च प्रधानभूतेष्यमाणभोजनाक्षेपाशक्तेर्भोजनेष्यमाणत्वोक्तिवैयर्थ्यप्रसङ्गाद्व्यत्ययस्य न्याय्यत्वावगतेर्व्यत्ययकामप्रवेदनार्थलिङङ्गीकरणं युक्तमित्याशयः। एवमिति दार्ष्टान्तिकभाष्यं व्याचष्टे * तत्रेति * स यदि लौकिकवाक्येष्वेवं विधवाक्यार्थदर्शने सतीति तत्रशब्दार्थः व्यत्ययाभ्युपगमस्य किं प्रयोजनमित्यपेक्षायां विधिशक्तिप्रतिबन्धकयदिशब्दापनयनं प्रयोजनमाह * ततश्चेति * गुणविधायिरथन्तरसामशब्दानपेक्षत्वे ऽपि कर्मविधिस्तावत्सम्भवतीति पदद्वयोपन्यासेन सूचितम् । नन्वेवं सतीति भाष्येण ग्रहाग्रताविधेर्यदिशब्दान्वये सत्यविधायकत्वापत्तेर्ग्रहाग्रता नानुष्ठेया स्यादित्याशङ्क्योच्यतइत्यादिना परिहृतं तस्याशयद्वयमाह * ग्रहानिति * ऐन्द्रवायवशुक्राग्रत्वयोर्विधेयत्वेनेष्टत्वात्तच्छब्दयोरुपन्यसनीयत्वे ऽपि तयोरप्राप्तत्वाद्विधायकाश्रवणे ऽपि विधायककल्पनेनावश्यविधेयत्वसूचनायानुपन्यासः । इष्यमाणस्य साध्यत्वावगतेः फलवच्च यागानुष्ठानमात्रेण ग्रहाग्रत्वासिद्धेः पृथक् प्रयत्नसाध्यत्वात्कर्त्तव्यत्वकल्पनेत्याद्याशयार्थः ।ग्रहाग्रताविशेषमिच्छतो यागोपदेशेन ग्रहाग्रताया यागप्रयुक्तत्वसूचनेन यागाङ्गत्वबोधनात्साङ्गयागविधिनैव ग्रहाग्रताविशेषस्यापि विधिरिति द्वितीयार्थः । हेतुहेतुमतोर्लिङिति हेतौ कारणे स्वार्थान्यानुष्ठानापादके तत्प्रयोजको हेतुश्चेति हेतुसंज्ञत्वेन स्मृते प्रयोजके हे-

तुमति च फले परेण स्वार्थानुष्ठेतयापाद्ये प्रयोज्ये लिङ्विभक्तिस्मृ-
तेः स्यादिति हेतौ लिङ् गृह्णीयादिति विधौ गृह्णीयादिति चाहेतुम-
ति स्यादिति विधावित्ति पक्षान्तरोपन्यासो ऽपि पूर्वापरितोषगोवे-
त्याह * विनैवेति * न केवलं यदिशब्दत्यागाध्याहाराभ्यां विनेत्य-
पिशब्दार्थः। रथन्तरसामेति भाष्यं हेतौ स्यादिति लिङ्पक्षे रथन्तर-
सामसोमहेतुका ऐन्द्रवायवाग्रा ग्रहाः कर्त्तव्या इत्येवं विशेषणपरत्वेन
व्याख्यातुमाह*तत्रेति*यागकर्त्तव्यतास्मिन्पक्षे न सिद्ध्येदित्याशङ्क्या-
ह*न चेति*हेतुमति गृह्णीयादिति लिङ्पक्षे ऽप्येतदेव भाष्यम्। ऐन्द्र-
वायवाग्रत्वहेतुरथन्तरसामा सोमः कर्त्तव्य इत्येवं व्याख्यास्यन् पक्षं
तावदाह * अथ वेति*ननु हेतुमति लिङ्पक्षे यदिशब्दस्य व्यव-
हितान्वयाभावे ऽपि ऐन्द्रवायवाग्रत्वस्य विशेषणत्वेन प्रागभिधेय-
त्वादैन्द्रवायवाग्रान् गृह्णीयाद्यदि रथन्तरसामा सोमः स्यादिति प-
दानुपूर्व्या वाक्यार्थव्याख्यापत्तेर्मध्यपतितस्य यदिशब्दस्य पूर्वत्रान्वि-
तहेतुमदर्थे लिङन्वयाभ्युपगमे न स्यादिति लिङन्वयाभावान्निरूप-
पदायाश्च लिङो हेत्वर्थत्वानुपपत्तेः सोमयागस्य केन चिच्छब्देन हे-
तुत्वोक्तिरयुक्तेत्याशङ्क्याह * अनुक्तमपि चेति * हेतुमता हेतुमा-
क्षेपात्सोम एव हेतुरिति कथमवधारणेत्याशङ्क्य सन्निधेश्चेत्युक्तं
भाष्यं व्याचष्टे*तत्रापीति*परप्रकरणस्थस्य क्रत्वन्तरस्यावान्तरप्रक-
रणाभिव्यञ्जकसन्दंशशून्यायां शाखायां वाक्यं विना ग्रहाग्रविशेषस्य
तदङ्गत्वायोगादङ्गाङ्गित्वलक्षणार्थत्वं प्रयोज्यप्रयोजकत्वाख्यहेतुहेतु-
मत्वोक्तेर्वक्तुं कार्यते ऽन्यार्थमन्यदनुष्ठाप्यते ऽनेनेति व्युत्पन्नेन कारण-
शब्देन हेतुशब्दो वैयाकरणानुसाराद्व्याख्यातः। फलशब्देन च वैया-
करणानां हेतुमच्छब्दव्याख्यापरार्थोपाद्यानुष्ठानत्वलक्षणप्रयोज्यत्व-
विवरणायैव द्रष्टव्या सुखग्रहणायोक्तांश्चतुरः पक्षान्संगृह्णाति* यदि
शब्देति* ननु किमर्थः पूर्वपक्षे ऽतिनिर्बन्ध इत्यपेक्षायामाह * सर्वं
चेति * तस्मादिति सूत्रार्थोपसंहारभाष्यं स्पष्टत्वादव्याख्याय बृ-
हद्रथन्तरसामसंयोगस्य ग्रहाग्रत्वलक्षणाङ्गरूपशेषानुष्ठानवेलायाम-
भूतत्वादनिष्पन्नत्वादित्येव संयोगस्येति सूत्रावयवव्याख्यानार्थमपि
चेति भाष्यं व्याचष्टे * किं चेति * क्रतोरपि ग्रहणवेलायामनि-
ष्पन्नत्वात्कथं हेतुमल्लिङ्पक्षे निमित्ततेत्याशङ्क्यानिष्पन्नस्याप्यारब्ध-
त्वेन वर्त्तमानत्वान्निमित्तत्वं भवतीति वैधर्म्यदृष्टान्तेन सूचितम्। श्लोकं
व्याचष्टे * प्रातःसवने हीति * स्वसत्तयान्यानुष्ठानापादकवाच्य- ५८२।
यं कारणशब्दः पक्षत्रयाशयेन मम त्वित्युक्तं चतुर्थपक्षाशयेनाह*अथ
वेति*क्रतोरप्यनिष्पन्नत्वेनानिमित्तत्वाशङ्का स चेत्यनेन निरस्ता।यदि

जगत्सामाग्रयणाग्रानिति जगत्सामसंयोगस्य ज्योतिष्टोमं प्रत्यनङ्ग-
भूतत्वात्तत्साहचर्येण बृहद्रथन्तरसामसंयोगयोरप्यनङ्गत्वात्कर्मा-
न्तराक्षेपकतेत्येवं संयोगस्येति सूत्रावयवव्याख्यानार्थमपि च निःस-
न्दिग्धमिति भाष्यं व्याचष्टे * जगत्सामा चेति * जगदाख्यस्य
साम्नः क्वचिदभावाज्जगत्यामृच्युत्पन्नस्य साम्नो जगत्सञ्ज्ञत्वप्रती-
तेः सामशब्दस्य रथन्तरसामबृहत्सामेतिवत् तुल्यवन्निर्देशात्पृष्ठसा-
धनसामवाचित्वावगतेर्विषुवति च महादिवा कीर्त्यं पृष्ठं भवतीति
विभ्राड्बृहत् पिबत्विति जगत्यामुत्पन्नस्य महादिवाकीर्त्यस्य साम्नः
पृष्ठसाधनत्वेन विधानात् विषुवत्येवाग्रयणस्याग्रत्वं निविशतइति
वक्तुं दशमे ज्योतिष्टोमस्य जगत्सामत्वं निषेत्स्यति ।

एकस्य तु लिङ्गभेदात्प्रयोजनार्थमुच्येतैकत्वं गुणवाक्यत्वात् ॥ २ ॥

पूर्वपक्षनिरासद्वारा सिद्धान्तोक्त्यर्थतया तुशब्दव्याख्यार्थं
तुशब्दादिभाष्ये प्रकरणग्रहणं प्राग्वदुक्तान्तराणामप्युपलक्षणा-
र्थेति दर्शयितुमाह * पूर्वेति * ननु ज्योतिष्टोमस्य अ-
हाग्रत्वलक्षणगुणविधौ प्रकरणादेव तद्गुणत्वलाभात्तद्वाची सो-
मशब्दो ऽनर्थकः स्यादित्याशङ्कानिरासार्थमेकस्येत्यादिसूत्रावयवं
व्याचष्टे * एकस्यैव हीति * भावं लकारव्याख्यानार्थाच्चारणा-
मित्युक्तं सोमः स्यादिति कर्मविधिप्रतीतेर्भेदमाशङ्क्य अह' -
शब्दलक्षणगुणविधानार्थत्वेनाकर्मविधित्वात्कर्मभेदनिरासार्थमेकत्व-
मिति सूत्रावयवं व्याचष्टे * गुणेति * नन्वेतदुक्तमित्यादिभाष्ये-
ण बृहद्रथन्तरसामशब्दयोरनेकसामकत्वाज्ज्योतिष्टोमे ऽनुपपत्त्या-
शङ्कानिरासार्थत्वेन ज्योतिष्टोमस्य बृहद्वा पृष्ठं रथन्तरं पृष्ठं वा भव-
तीति गुणवाक्यान्वयात् बृहद्रथन्तरवत्त्वेनानेकसामत्वे ऽपि बृहद्र-
थन्तरसामव्यपदेशोपपत्तेर्न बृहद्रथन्तरसामत्वलक्षणाद्वा गुणाद्भेद
इत्येवमेकत्वमिति सूत्रावयवस्य सूचितं व्याख्यान्तरमाह * अथ
वेति * बृहद्वा पृष्ठं रथन्तरं वेति वाक्याद् बृहद्रथन्तरयोर्वैकल्पिक-
त्वावगतेरयोगव्यावृत्त्या विशेषणत्वसम्भवसूचनार्थं गुणवाक्यैरिति
बहुवचनं पुनरिति भाष्यं समासासम्भवानुभाषणार्थत्वेन व्याख्या-
तुमाह * यत्त्विति * विशेषणाभावादिति भावव्युत्पन्नेन विशेष-
णशब्देन नानेकसामकस्य कर्तारेकेन साम्ना विशेषणाभावे ऽभिहिते
ननु सामान्तरव्यावृत्त्या बृहद्रथन्तरयोर्विशेषणत्वासम्भवे ऽपि वैक-

त्विपकत्वात्स्वायोगव्यावृत्त्या विशेषणत्वं भविष्यतीत्याशङ्क्यास्य क्र-
तोर्यत्सामेति सर्वसामकार्यानुवादेन तत्र रथन्तरं भवत्ये-
वेति अयोगव्यावृत्तेरव्यापकत्वेनासम्भवस्य न च रथन्तर-
सत्तामात्रं विशेषणमिति वार्त्तिकेनोक्तत्वात्सामान्तरसापे-
क्षस्य रथन्तरस्य विशेषणत्वापत्तेः सापेक्षत्वेनासामर्थ्यात्स-
मासविघातः स्यादिति सामान्तरेत्यनेनोक्तं तदुच्यतइत्यादिभाष्योक्तं
तावत्परिहारमाह *तत्रेति*प्रौढ्या स्वयं परिहारान्तरमाह *विग्रह
इति * पूर्वार्द्धं व्याचष्टे *यदि हीति * पाक्षिकत्वविशेषणफलं नि-
त्यशब्देनोक्तं स्वातन्त्र्यलक्षणार्थवस्तुशब्दोक्तान्यनैरपेक्ष्यविशेषणफ-
लमन्यसहितशब्देनोक्तं स तयैवेत्येवकारेणान्यव्यवच्छेदव्याप्त्योर्व्या-
वर्त्तितत्वान्नित्यस्य चान्यव्यवच्छेदं विना ऽन्यसहितस्य च व्याप्तिं
विना विशेषणत्वायोगादुभयमुक्तं पाक्षिकत्वात्त्वन्यव्यवच्छेदाभा-
वे ऽप्ययोगव्यावृत्त्या विशेषणत्वसम्भवे यतस्त्वित्यनेनोक्ते नन्वेव-
कारं विना विशेषणत्वानभिव्यक्तेर्यत एव कारस्ततो ऽन्यस्य व्यावृ-
त्तिरिति न्यायेनैवकारस्यान्यव्यवच्छेदवाचित्वान्नाभावव्यवच्छेदोपप-
त्तिरित्याशङ्क्य * यदि चेत्युक्तम् * विनाप्येवकारं समाससाम-
र्थ्याद्विशेषणत्वाभिव्यक्तिर्यदिशब्देनोक्ता एवकारापेक्षणे ऽप्यत्र स-
त्ताया विशेषणत्वात्तदस्यास्तीति वास्त्यर्थस्मृतमत्वर्थवृत्तिबहुव्रीहि-
त्वाच्च तत एवैवकारप्रयोगेणासत्त्वव्यावृत्तिर्युक्तेत्याशयः। यद्धेत्य-
नेन श्रुतविशेष्यान्वितेनाप्येवकारेण रथन्तरासत्त्वव्यावृत्तिसिद्धेर्ना-
श्रुतसत्तान्वयो ऽवश्यकल्प्य इत्युक्ते कथमन्यान्वितेनैवकारेणान्या-
सत्त्वव्यावृत्तिसिद्धिरित्याशयेन तत्रेति पृष्ठे तद्धीत्यनेन साम-
रूपताया नित्यत्वेन तद्विषयावधारणानर्थक्यादस्य क्रतोः
सामकार्यं करोत्येवेत्यवधारणार्थप्रतीतेरसतश्च कार्यकरणत्वायो-
गाद् *असत्त्वव्यावृत्तिसिद्धिरित्युक्तम् * ननु पाक्षिकत्वे ऽपि ज्यो-
तिष्टोमगतसर्वसामकार्याव्यापित्वात्केवलस्य विशेषणत्वानुपपत्तेः
सामान्तरसापेक्षस्य विशेषणत्वाभ्युपगमापत्तेः समासानुपपत्तिरि-
त्याशङ्क्यान्यसहितं च स्यादित्यनेन सूचितं परिहारमाह * न चे- ५८३।६
ति *बृहद्रथन्तरे सामनी भवत इत्यादिवत् द्वंद्वनिर्देशे तदभावे ऽपि-
वा गायत्रामहीयवादिवदेकस्तोत्रविषयत्वे सत्यन्यसाहित्यं विना वि-
शेषणत्वायोगात्केवलस्य सापेक्षत्वापत्ति। रथन्तरं पृष्ठं भवतीति तु
सामान्तरनिरपेक्षस्य रथन्तरस्य पृष्ठाख्यस्तोत्रसाधनत्वेन विधाना-
दस्य क्रतोर्यत्सामेत्यनुवादे ऽपि रथन्तरसाध्यपृष्ठस्तोत्रमात्रद्वारा
क्रतुसम्बन्धित्वप्रतीतेः सर्वसामकार्याव्यापित्वे ऽपि विशेषणत्वस-

म्भवान्न सापेक्षत्वापत्तिरित्याशयः। सामशब्दस्य क्रतुसम्बन्धिरूपवाचित्वे ऽपि रथन्तरशब्दसमभिहारात्पृष्ठमात्रद्वारा क्रत्वन्वयनिमित्तत्वावगतेः पृष्ठसिद्धै च रथन्तरस्य सामान्तरानपेक्षत्वात्समासाविघातः प्रौढिमात्रेणोक्तः। परमार्थतस्तु सामशब्दं विनापि क्रतुसम्बन्धिनो रथन्तरस्य निमित्तत्वप्रतीत्युपपत्तेः। सामशब्दानर्थक्यप्रसङ्गादुक्थ्यो वैरूपसामा षोडशी वैराजसामेत्यादिषु पृष्ठार्थे वा प्रकृतिलिङ्गसंयोगादित्यनेन न्यायेन वैरूपादेः पृष्ठसाधनत्वद्योतनार्थत्वेन साम्नः पृष्ठलक्षणार्थत्वात् दूरापास्ता सामान्तरापेक्षेति यद्वेत्यनेनोक्तम्। सामशब्दस्य च पृष्ठलक्षणार्थत्वे बृहद्रथन्तरयोस्तद्विषयत्वेनेतरेतरव्यावृत्त्यापि विशेषणत्वं सम्भवतीत्याह * अथ वेति * पूर्वार्द्धव्याख्यानमुपसंहरति * तेनेति * उत्तरार्द्धं व्याख्यातुमुपक्रमते *अथ वास्त्विति * विग्रहे यद्विशेष्यत्वमित्यवयवं व्याख्यातुं न च क्रतुविशिष्टं रथन्तरमिह प्रतीयतइति पूर्वोक्त दूषणमनुभाषते * ननु चेति * परिहारत्वेन श्लोकावयवं व्याचष्टे * उच्यतइति * कृत्स्नसंयोगाभावेन रथन्तरस्य विशेषणत्वायोगादवैदिकस्यापि च विग्रहवाक्यस्य वैदिकसमासव्याख्यानार्थत्वेन वेदानुमतत्वात्तद्गतापि विशेष्यतागत्याङ्गीक्रियतइत्याशयः। वृत्तिविग्रहयोर्भिन्नार्थत्वायोगाद्रथन्तरं साम यस्याःसाविति विग्रहस्यापि अन्यपदार्थप्राधान्यार्थत्वावगतेर्लोहितोष्णीषादिवद्विशेषणतात्पर्यमात्रमत्राभिप्रेतमिति विवक्षोक्त्या सूचितम्। ननु क्रत्वन्तरेष्वपि रथन्तरस्याभावान्न क्रतुना विशेषणं सम्भवतीत्याशङ्क्याह * यद्यपि चेति * सर्वाङ्गोपसंहारिणा क्रतुप्रयोगविधिना युगपत्सर्वसामग्रहणाद्विनियोगवाक्येभ्यश्च प्रकरणालोचनं विना क्रत्वन्वयाप्रतीतेरेकैकसामान्वयानवगमान्नैकेन साम्ना क्रतुर्विशिष्टुं शक्यः साम्नस्त्वेकैकेन क्रतुना पर्यायेणान्वयादेकेन विशेषणत्वोपपत्तिरनन्तरमेवोपपादयिष्यते। यद्यपि तु विधिना रथन्तरस्य युगपदनेकक्रतुसाधारण्याप्रतीतावपि वास्तवात्साधारण्यादस्यैव रथन्तरं सामेति क्रत्वन्तरव्यावृत्त्या ज्योतिष्टोमस्य रथन्तराविशेषणत्वासम्भवस्तथाप्ययोगव्यावृत्त्या सम्भवतीत्यभ्युपेत्यवादाशयः। परमार्थतस्तु कार्यान्वयं विशेषणापेक्षणात्स्ववाक्योपात्तैन्द्रवायवाग्रत्वलक्षणकार्यान्वयिनि च रथंतरे ज्योतिष्टोमस्यासाधारण्योपपत्तेर्ज्योतिष्टोमस्यैव रथन्तरमैन्द्रवायवाग्रत्वे निमित्तमित्यन्यव्यावृत्त्या विशेषणत्वसम्भवं वक्तुमाह * स्ववाक्ये चेति * देवदत्तस्य गौरानय इत्यादौ वस्तुतो देवदत्तयज्ञदत्तादीनां गोसम्बन्धतुल्यत्वे ऽप्यानयनान्विते गवि देवदत्तस्यासाधारण्याद्वि-

शेषणतेत्याशयः। दृष्टान्तमेवोपपादयति * तथा हीति * गोसम्बन्धो न देवदत्तस्य केवलः किं तु यज्ञदत्तादेरपि येन गौस्तस्यैवोच्येत न चोत्पलस्य नीलत्वं केवलं किं तु रक्ततापि येन तदेवोत्पलमुच्येतेत्येव योज्यम्। वस्तुतो ऽसाधारण्ये च विशेषणमनर्थकं स्यादित्याह * यदि चेति * अतो देवदत्तस्य गौरित्यादौ वाक्योपात्तानयनादिकार्यान्वितगवादिविशेष्यविषयमेव देवदत्तादेर्विशेषणस्यासाधारण्यं वाच्यं न वास्तवमित्याह * तस्मादिति * नन्वन्येषामपि सोमयागानां ज्योतिष्टोमविकारत्वाद्रथन्तरसामत्वनिमित्तैन्द्रवायवाग्रत्वप्राप्तेरैन्द्रवायवाग्रत्वनिमित्तभूतरथन्तरविषयमपि ज्योतिष्टोमस्यासाधारण्यं भवतीत्याशङ्क्याह * अस्ति चेति * क्रत्वन्तरस्थस्य रथन्तरस्यातिदेशान्निमित्तत्वप्राप्तावप्युपदेशात् ज्योतिष्टोमस्थस्यैव निमित्तत्वेन पवमाने वा अन्न रथन्तरं कुर्वन्तीत्यादौ स्तोत्रान्तरसाधनरथन्तरवति क्रत्वन्तरे रथन्तरानिमित्तैन्द्रवायवाग्रत्वप्राप्तिनिवृत्त्यर्थमिष्टत्वात् ज्योतिष्टोमस्यापि स्ववाक्योपात्तकार्यान्वितरथन्तरविषयमसाधारण्यमस्तीत्यर्थः। शुद्धस्य च निमित्तत्वायोगान्निमित्तत्वप्रतीत्युत्तरकालं तन्निर्वाहार्थं विशेषणान्वयाभ्युपगमात्ततः प्राग्विशेषणविशेष्यभावानपेक्षणादुपसर्जनत्वेन रथन्तरस्य निमित्तत्वनिषेधानुपपत्तेः क्रतुरथन्तरयोर्मध्ये कस्य निमित्तत्वं कस्य निमित्तविशेषणतेत्यपेक्षायां प्रथमप्रतीतत्वाद्रथन्तरस्यैव निमित्तता युक्तेत्याह * प्रथमतरेति * इष्यते पाक्षिकं वस्त्विति श्लोकव्याख्यानमुपसंहरति * तस्मादिति * सम्भवति च रथन्तरविशिष्टस्य ज्योतिष्टोमस्य ज्योतिष्टोमविशिष्टस्य वा रथन्तरस्य निमित्तत्वे यदिशब्दत्यागादयश्चत्वारो ऽपि पक्षा न युक्ता इत्या * हेतीति * शुद्धायाश्च लिङः कामप्रवेदने हेतुहेतुमतोर्वा प्रयोगाभावात् यदिशब्दोक्तस्य निमित्तत्वस्यानिष्पन्नक्रियाविषयत्वायोगान्निष्पन्नतादिच्छाविषयत्वाभ्युपगमेन तदुपबद्धाया लिङः कामप्रवेदनार्थतां निमित्तत्वायोगाद्वा तद्गतेन स्वसत्ताप्यनुष्ठानप्रयोजकत्वेन प्रयोजकत्वसाम्यात्स्वार्थान्यानुष्ठानप्रयोजकत्वलक्षणया हेत्वर्थतां मथ्यमानाग्न्यनुत्पत्तिनिमित्तकरक्षोघ्न्यनुवचनविधिशेषे वा रक्षांसि वा एवं तह्यालभन्ते यर्हि न जायते यर्हि चिरं जायतइत्यग्न्युत्पत्तिप्रतिबन्धकरक्षोपघातार्थत्वेन रक्षोघ्नीस्तुत्यर्थे यर्ह्युपबद्धस्याग्न्यजन्मनस्तर्ह्युपबद्धरक्षःप्राप्तिनिमित्तकनैमित्तिकत्वकीर्तनात् यर्हिशब्दसमानार्थस्य यदिशब्दस्य नैमित्तिकवाचित्वमभ्युपेत्य तद्गतेनान्यसत्तयास्यानुष्ठानस्य प्रयोज्यत्वेन प्रयोज्यत्वसाम्यात्परार्थप्रयो-

ज्यस्वानुष्ठानत्वलक्षणया तदुपबद्धाया लिङो हेतुमदर्थतां वक्तुं
निमित्तत्वप्रतीतेरवश्याभ्युपगन्तव्यत्वात्प्रतीतस्य च निमित्तत्वस्यो-
करीत्यासम्भवित्वेन त्यागायोगाज्ञाप्रतीतकामप्रवेदनाद्यर्थग्रहणं यु-
क्तमित्याह * न चेति * बृहद्रथन्तरयोर्ग्रहणवेलायामनिष्पन्न-
त्वान्निमित्तत्वायोगस्याथेत्याद्यनुभाषणपूर्वं परिहारभाष्यं व्याचष्टे
* भूतेति * लोके भूतस्य पुत्रजन्मादेरुत्सवादौ वर्त्तमानस्य च
क्षेमसुभिक्षत्वस्य वासे भविष्यतश्च वर्षस्य गृहकरणे वेदे च पुत्र-
जन्मादेरेव भूतस्येष्ट्यादौ वर्त्तमानस्य च दीक्षितत्वस्य दानादिप-
र्युदासे भविष्यतश्च दर्शपूर्णमासारम्भस्यारम्भणीयायां निमित्तत्वा-
योगहेतुत्वेनाशङ्कनीयमित्यर्थः । यदि तु निष्पन्नेनैव निमित्तेन भा-
व्यमित्याग्रहस्ततः सङ्कल्पितत्वेनाननुष्ठितस्यापि भोजनस्य स्थलस-
म्मार्जने निमित्तत्वोपपत्तेर्निष्पन्नकार्यकारित्वान्निमित्तत्वोपचारः स-
५८५।२ म्भवत्येवेत्याह * अपि चेति * सूक्तवाक एव याज्येतिवदौपचारि-
कत्वद्योतनायैवकारः एकान्तावधारितत्वमेवोपपादयति * ज्योति-
ष्टोमेति * अङ्गभेदेन साङ्गप्रधानप्रयोगप्रक्रमे वैकल्पिकाङ्गानवधार-
णात् कस्य चित्प्रयोगस्य निरूपितैकरूपस्योपक्रमपूर्वसमाप्त्यसिद्धे-
रिदं कुर्यामिदं वेति च प्रयोगमध्ये दोलायमानमतेः कालविक्षेपात्
प्रयोगनैपुण्यासिद्धेः प्रयोगप्राशुभावार्थं च शुष्केष्टिकाले निरूपितै-
करूपप्रयोगाभ्यासासिद्धेर्वैकल्पिकाङ्गनिमित्तकेषु नानर्त्विक्कर्तृकेष्वै-
न्द्रवायवाग्रत्वादिषु नानर्त्विजां यजमानस्य च सम्प्रतिपत्त्यसिद्धेः
प्रयोगस्य कौशलस्याभ्यासस्यादिशब्दोक्तायाश्च सम्प्रतिपत्तेर्वैकल्पि-
काङ्गावधारणाधीनसिद्धत्वादेवं विधाङ्गमिदं कर्म कर्त्तव्यमित्यव-
धारणपूर्वकप्रवृत्तिनियमाज्ज्योतिष्टोमक्रमेणैव रथन्तरं प्रयोक्ष्यतइ-
त्येकान्तेनावधारितमित्यर्थः । एकान्तावधारणमात्रेण कथन्निष्प-
न्नकार्यकारितेत्याशङ्क्याह * न चेति * एतदेवोपसंहरति * त-
स्मादिति * क्रतोस्तु निमित्तत्वे वर्त्तमानमेव निमित्तं भविष्यती-
त्याह * यदा त्विति * स्यादितिचेति भाष्यं व्याचष्टे * चेति *
यत्त्वित्यादिसामान्यतो दृष्टानुभाषणपूर्वं परिहारभाष्यं द्वेधा व्याच-
ष्टे * यत्त्विति * स्वयं साध्यविकलत्वं दृष्टान्तस्याह * अपि
चेति * तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्याचष्टे * तस्मा-
दिति * जगत्साम्नोऽप्यपूर्वकर्मत्वाभावात् ज्योतिष्टोमापेक्ष
या कर्मान्तरं जगत्सामेत्युक्तं न विषुवदपेक्षयेति बहुवचनेन
सूचितम् ।

॥ अथ अवष्टे. क्रत्वन्तरताधिकारताधिकरणम् ॥ २ ॥

अवेष्टौ यज्ञसंयोगात्क्रतुप्रधानमुच्यते ॥ ३ ॥

उदाहरणभाष्यं व्याचष्टे * राजेति * सन्देहभाष्यं व्याचष्टे * तत्रेति * ब्राह्मणादिकर्तृलक्षणेन गुणेनेह भेदस्य प्रतिपाद्यत्वात्कर्त्तुश्च प्रयोगाङ्गत्वात्तन्मात्रभेदकत्वोपपत्तेर्भाष्ये यागशब्दः प्रयोगलक्षणार्थ इति प्रयोगान्तरोक्त्या सूचितम् । कथमिति भाष्येण सन्देहहेतुं पृष्ट्वा राजसूयवाक्यस्थो राजशब्दः क्षत्रियमात्रे वर्त्तते ब्राह्मणादिष्वपि वेति सन्देहो हेतुत्वेनोक्तस्तस्य साक्षान्मूलसन्देहत्वायोगाद्वर्णत्रयस्य राजसूये ऽधिकारः क्षत्रियमात्रस्य वेति मूलसन्देहहेतुभूतसन्देहहेतुत्वद्वारा मूलसन्देहहेतुत्वं दर्शयितुमाह * तत्सिद्ध्यर्थं चेति * न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतेन इति इत्यादिवाक्यस्थस्य राजशब्दस्य क्षत्रियवाचित्वाभावाद्राजसूयवाक्यस्थराजशब्दविषयत्वं विचारस्य वक्तुमधिकारीत्युक्तं त्रयाणामपि क्षत्रियस्यैवेति तथैवेत्यनेनातिदिष्टे योग्यत्वाद्वाचक इत्यध्याहारेण पूरणीयं केनचित्प्रकारेणेति यौगिकत्वोक्त्या सूचितम् । सन्देहान्तरं वर्णत्रयक्षत्रियमात्रवाचित्वसन्देहहेतुत्वेन दर्शयितुमाह * ततो ऽपीति * चतुर्थ्यर्थे तसिः । ननु राजसूये क्षत्रियमात्राधिकारे ऽप्येतयान्नाद्यकामं याजयेदित्येतद्वाक्यविहितेष्टिप्रयोगान्तरे वर्णविशेषानुपादानात् ब्राह्मणादेर्गुणस्य प्राप्तत्वेनाविधेयत्वाद्भेदकत्वानुपपत्तेः सिद्धान्तासम्भवात्सन्देहो न युक्त इत्याशङ्कते * ननु चेति * योगसिद्ध्यधिकरणन्यायेनैकस्मिन्प्रयोगे फलद्वयसिद्ध्ययोगादन्नाद्यकामावेष्टेः प्रयोगस्य राजसूयान्तर्गतावेष्टेः प्रयोगान्तरात् भेदावगतेः सन्निधौ त्वविभागादित्यत्र कर्मान्तरविधित्वे निराकरिष्यमाणे ऽपि प्रयोगान्तरविधिनान्नाद्यकामवाक्यस्यास्त्येवेति सूचयितुं पृथक्प्रयोगस्यैव वचनमित्येवकारः प्रयुक्तः । राजसूयवाक्यस्यापि फलपरत्वाद्वाक्यभेदापत्तेर्वर्णविशेषान्वयायोगमाशङ्क्य कर्त्तुः प्रयोगाङ्गत्वाद्वाक्यान्तरेण च राजसूयप्रयोगाविधानात् प्रयोगस्य चोत्पत्तिवत्क्रियाविषयत्वात्फलकर्तृविशिष्टक्रियाविषयप्रयोगविधौ वाक्यभेदानापत्तिसूचनार्थम् * प्रयोगेत्युक्तम् * ब्राह्मणादिवाक्यानां प्रयोगान्तराविधायित्वे राजसूयमध्यप्रयुक्ताया एवावेष्टेः संयोगपृथक्त्वात्फलद्वयोपपत्तेस्तस्याश्च विज्ञातक्षत्रियकर्तृकत्वाद् ब्राह्मणादिवाक्यवच्चान्नाद्यकामवाक्ये कर्त्रन्तराश्रयणेन प्रयोगान्तरानाक्षेपकत्वाद्योगसिद्ध्यधिकरणन्यायेन चैतस्मिन्प्रयोगे फलद्वयसिद्ध्ययोगात्प्रयोगान्तराक्षेपे ऽपि क्षत्रियस्यैवान्नाद्यकामस्य प्रयोगान्तरोपपत्ते-

वर्णान्तरस्याप्राप्तत्वात् ब्राह्मणादेर्गुणस्य विधेयत्वाद्भेदकत्वोपपत्तेः।स-
न्देहं समाधत्ते *नैतदिति * नन्वन्नाद्यकामशब्देन वर्णान्तरस्याप्यु-
पादानात्कथं न वर्णान्तरसम्बन्ध इत्याशङ्क्य दृष्टान्तद्वयेनोपपादयति
९८६।२ * तद्यथेति * अप्रवृत्तप्रवर्त्तकत्वाद्विधेरस्मिन्सति कुर्यादिति का-
दाचित्कयाः कर्त्तव्यताया विध्यर्थत्वात्कदाचित्केनैव निमित्तेना-
न्वयादधिकारिविशेषणस्य च तस्मिन्सत्यधिकारान्निमित्ते ऽन्तर्गते
जातेश्च नित्यत्वेनाधिकारिविशेषणत्वायोगात्कथं राजशब्दात् भो-
क्तृत्वलक्षणाधिकारिविशेषावगतिरित्याशङ्क्य * राजेत्युक्तम् *
जातेर्नित्यत्वेनापादनाशक्तेस्तद्वत एवाधिकारात्कर्तृविशेषणभूताया
एवार्थादधिकारिविशेषणतापीत्याशयः । यथा राजसूयान्तर्गते ऽवे
ष्टिप्रयोगे भोक्तृत्वविशेषो भवति तथा बाह्ये ऽपीत्यत्यन्तसाम्यार्थं दृ-
ष्टान्तान्तरम्।अतोऽन्नाद्यकामवाक्येन ब्राह्मणादिप्राप्त्ययोगाद्राजशब्द-
स्यायौगिकत्वे राजसूयाधिकारेण जातिवाचित्वे वा ब्राह्मणो यजे-
तेत्यादिवाक्यैर्ब्राह्मणादिप्राप्तिरिति द्वावेव पक्षौ न त्वन्नाद्यकाम-
वाक्यात्प्राप्तिः शङ्कनीयेत्युपसंहरति * तस्मादिति * किं ताव-
दित्यादिपूर्वपक्षप्रतिज्ञाभाष्यं तत्सिद्ध्यर्थमित्येतदर्थेन ततःशब्दे-
न निमित्तार्थसिद्ध्यर्थवर्णत्रयप्राप्तिसिद्ध्यर्थवर्णत्रयवृत्तित्वसिद्ध्यर्थे-
ता यौगिकत्वस्योक्ता इत्येवं व्याचष्टे * किं तावदि-
ति*सहशब्देन राजशब्दस्यापि वर्णत्रयवृत्तित्वमुक्तं राज्यंत्यनेन राज्यं
यस्येति भाष्यावयवो यौगिकशब्दस्य कुलालनापितादिशब्दवदवय-
वव्युत्पत्त्यनपेक्षत्वे ऽपि क्रियागनिमितत्वप्रदर्शनार्थत्वेन व्याख्यातः ।
भाष्यं वक्ष्यमाणयुक्तीः सुखग्रहणार्थं संक्षेप्तुमाह * तथा हीति *
क्रियायोगनिमित्तत्वे क्रियाकर्तृत्वयोर्द्वयोरपि शक्तिकल्पनापत्तेर्जा-
तिमात्रे शक्तिकल्पनायाः प्रयोगसम्भवे योगनिमित्तत्वायोगाच्च ग्रं-
मो न प्रयुज्यतइत्यादिभाष्येण प्राग्वक्ष्यमाणे ऽपि जातियोगलक्षणनि-
मित्तद्वयसम्भवे ऽपि प्रकरणवशाद्यदिशब्दसमभिव्याहाराच्च योग-
निमित्ततैवोचितेति युक्तिश्चशब्देन राजसूयशास्त्रस्य त्रैवर्णिकाधि-
कारोक्त्यर्थत्वेन महाविषयत्वलाभ सूचित इत्येवमथ वेत्यादिभाष्यं
वक्ष्यमाणयुक्तेः पश्चादभ्युच्चयमात्रत्वद्योतनार्थं व्याख्यातम् ।उत्तरा-
र्द्धं व्याचष्टे * उभयेति * तावच्छब्देनैषैव तावद्युक्तिरिति वद-
ताभ्युच्चयत्वं सूचितं निमित्तेत्यनेन भाष्यं वक्ष्यमाणप्रकरणादियु-
क्त्यन्तरसूचनार्थता एवं चेति चकारस्य व्याख्याता बार्हस्पत्यादंमध्य-
निधानपूर्वकाभिघारणस्य राजसूयप्रयोगवचनेन ग्रहणं प्रकृतावेष्टिप्र-

१ क्रमोऽन्त: प्रयजात इ० २ प्र० पा० ।

योगप्रत्यभिज्ञानं चादिशब्देनोक्तम्।यौगिकत्वोक्तेः प्रयोजनमाह*तस्मादिति*ननु राजशब्दस्य जातिवाचित्वाभावे राजयोगनिमित्तराज्यशब्दार्थानवधारणान्न राजशब्दस्य तत्कारणनिमित्तता युक्तेत्याशयेन किं पुनरिति भाष्येणाशङ्क्य जनपदेत्यनेन परस्वहरणे चौर्यशब्दवत् जनपदस्य च सर्वतो रक्षणे चौरादीनां च जनपदपुरेभ्यो निष्कासने राज्यशब्दस्य रूढितोक्ता तद्व्याचष्टे*तच्चेति*नामशब्देन रूढित्वं सूचितम् । यद्वा राजशब्दस्य पालननिमित्तत्वे ऽपि अध्वर्य्वादिशब्दवत् रूढित्वानपायात् पूर्वपक्षे ऽपि राज्यशब्दस्य राजयोगनिमित्तत्वोपपत्तेः प्रत्यभिज्ञायमानावयवार्थबाधायोगात्पालनस्य राजकर्मवाचिराज्यनामकत्वात्पालनकारिवाचिता राजशब्दस्यावसीयतइति सूचनार्थो नामशब्द । भाष्यमपि राजशब्दस्य राज्यकरणनिमित्तत्वायोगे ऽपि पालनकरणनिमित्तत्वाद्यौगिकतोपपन्नेत्येवमर्थत्वेन व्याख्येयम्।आर्यावर्त्तेति भाष्यादसार्वत्रिकत्वशङ्कां निवर्त्तयितुम् * सर्वेत्युक्तं * जनपदपुरोपद्रवे कार्योद्धरणं विना तद्रक्षणासिद्धेस्तदुद्धरणस्य रक्षणोक्त्यैव सिद्धत्वाद्रक्षणप्रतिबन्धकारिविषयतोद्धरणस्य राज्येत्यनेनोक्ता सर्वलोकप्रसिद्धावार्यावर्त्तविशेषणानर्थक्यमाशङ्क्यासार्वत्रिकत्वे ऽप्यप्रसिद्धितो ऽस्याः प्रसिद्धेर्बलीयस्त्वप्रदर्शनार्थतार्यावर्त्तेत्यनेनोक्ता पालने राज्यशब्दप्रयोगमात्रेण राजशब्दस्य तत्करणनिमित्तत्वावगतिः कथमित्यपेक्षायां राज्ञः कर्मेति भाष्येण राजप्रातिपदिकात्कर्मणि प्रत्ययस्मृतिहेतुत्वेन उदमेघप्रातिपदिकाच्चापत्ये प्रत्ययस्मृतिं दृष्टान्तत्वेनोक्ता । तत्सर्वं विपरीतसाधकत्वेनाक्षिपति * राज्ञ इति * पालनकारिणि राजशब्दस्य रूढ्या प्रवृत्तत्वात् राज्यशब्दानुगमानपेक्षत्वे ऽपि विदितराज्यशब्दार्थानां तद्वशेनापि राजशब्दार्थव्युत्पत्तिः सम्भवतीति जातिनिमित्तत्वानिरासायोक्तेति परिहरति * उच्यतइति * पालनकरणनिमित्तापेक्षत्वे ऽव्ययवयवयोगानपेक्षत्वात्स्वातन्त्र्योक्तिः । यद्यप्यवयवयोगमनपेक्ष्य साधुपालनासाधुनिग्रहकारी राजशब्दवाच्यत्वेन मनुपाणिन्यादिभिरवधारितस्तद्योगाच्च प्रतिज्ञातसाधुपालनासाधुनिग्रहव्यापारेण तदवश्यं कार्यं तस्य च कर्म राज्यशब्दवाच्यमित्यवधारितं तथाप्यस्माकं जातिवाची पालनकारिवाची वा राजशब्द इति सन्देहे राजकर्मवाचित्वेन स्मृतस्य राज्यशब्दस्य पालने प्रयोगात्पालनकारिवाचित्वनिर्णयसिद्धेर्युक्तो ऽस्माकं राजशब्दावधारणाधीनराज्यशब्दार्थावधारणाद्विपर्ययो राज्यशब्दार्थावधारणाधीनराजशब्दार्थावधारणात्मक इत्यर्थः । दृष्टान्तपूर्वं श्लोकं

५८७।२ व्याचष्टे * यथैवेति * जनपदरक्षणमादिशब्दोक्तं च दुष्टनिग्रहणं मया कार्यमित्यङ्गीकरणाद्यो लब्धराजव्यपदेशस्तेनावश्यं तत्कर्त्तव्यमिति मन्वादिभिस्तस्य कर्म राज्यमिति पाणिनिप्रभृतिभिः स्मृतमिति विवेकः। छेदनादिसंस्कारैर्बन्धनार्हीकृतं द्रव्यमालम्ब्य यथा यूपो निरूप्यते तथा राज्यशब्दवाच्यप्रजापालनकरणाङ्गीकरणात्तदधिकृतं द्रव्यमालम्ब्य राजेत्यर्थः । नन्वेवमपि क्षत्रियस्य प्रजापालनं परमो धर्म इति क्षत्रियस्यैव पालनस्मृतेस्तस्यैव राजशब्दवाच्यत्वाद्राजसूये ऽधिकारः स्यादित्याशङ्क्याह * तच्चेति * शूद्रस्यापि तर्ह्यधिकारः स्यादित्याशङ्क्याह * तत्त्विति * एतदेवाशङ्कापूर्वमुपपादयति * ननु चेति * यूपादिवद्राजत्वस्यालौकिकत्वे सति विहितोपायापेक्षा स्यात्तस्य तु प्रजापालनकारित्वरूपस्य प्रत्यक्षत्वात्तावन्मात्रस्य च क्रतुनोपेक्षितत्वाद्विप्रादेरविहितराज्यकरणप्रत्यवाये ऽपि अधिकाराविघात इत्याशयः। राज्यरहिते ऽपि क्षत्रिये राजशब्दप्रयोगात्तद्विरुद्धं राज्ययोगनिमित्तत्वानुमानम्। अयुक्तमित्याशङ्कार्थं नन्वितिभाष्यं व्याचष्टे * नन्विति * अधार्मिके राजनि साधुरक्षणासाधुनिग्रहाभावे ऽप्यैश्वर्यमात्रे राजशब्दप्रयोगाद्रक्षणेन चैश्वर्यमुपलक्ष्यतां तन्निमित्तकरादानवृत्त्युपजीवनेन वेत्यनियमसूचनार्थम् * वृत्तिमित्युक्तम् * ननु रक्षणवृत्त्युपजीविन्यक्षत्रिये ऽपि प्रयोगाद्यौगिकावगतेः प्रकर्षसेचनमकुर्वतीष्वप्सु प्रोक्षणीशब्दवद्योग्यत्वमात्रेणानीश्वरे क्षत्रिये प्रयोगसम्भवाज्जातिवाचित्वकल्पना न युक्तेत्याशङ्क्याह * उक्तं हीति * प्रकर्षसेचनयोग्यत्वकारणस्य द्रवत्वस्याप्सु स्वाभाविकस्य भावादुदासीनास्वपि प्रोक्षणीशब्दो युक्तः।जनपदपुरैश्वर्ययोग्यतायां तु हेतुभूताया हस्त्यश्वादिसम्पत्तेर्वीर्यातिशयस्य च क्षत्रिये ऽपि कचिदभावादितरेष्वपि च केषु चिद्भावात् विहितत्वनिमित्तायां तु क्षत्रियस्यैव योग्यतायां यौगिकत्वपक्षे ऽप्यश्वप्रतिग्रहेष्टिनिमित्ताश्वदानवन्निषिद्धसम्भवे निषिद्धाधिकारविशेषणायोगाद्विहितस्यैव राज्ये योग्यस्याधिकारविशेषणत्वापत्तेर्ब्राह्मणादिषु प्राप्त्ययोगाद्योग्यत्वनिमित्तराजशब्दप्रयोगानुपपत्तेर्जातिनिमित्तस्यावश्याभ्युपगमनीयत्वात् ।

एकदेशे ऽपि यः शब्दो दृष्टो जातिनिबन्धकः ।
तदत्यागान्न तस्यास्ति निमित्तान्तरकल्पना ॥

इति बर्हिराज्याधिकरणवार्त्तिकोक्तन्यायेन राज्यरहिते क्षत्रिये जातिनिमित्तत्वेनाभ्युपगतस्य राजशब्दस्य राज्ययोगिन्यपि क्ष-

त्रिये जात्यत्यागादक्षत्रिये ऽपि च क्षत्रियकार्यापत्त्या प्रयोगोपपत्तेरजहत्स्वार्थवृत्तित्वेन जात्यत्यागसम्भवान्नानेकशक्त्यापादकं निमित्तान्तरं कल्पनीयमित्याशयः । क्षत्रियस्य प्रजापालनं कार्यमित्यजानानामपि शूद्रादीनां ब्राह्मणादिषु राजशब्दप्रयोगात्कार्यापत्तिहेतुत्वानुपपत्तेरश्वकर्णादिवत् क्वचिज्जातिवाचित्वं क्वचिद्यौगिकतेति अवश्याभ्युपगमनीयत्वाद्राजसूयवाक्यस्थस्य राजशब्दस्य द्विधापि सम्भवात्सन्देहे सति प्रकरणादिभ्यो यौगिकत्वं निश्चीयतइति परिहारार्थं न ब्रूम इत्यादिभाष्यं व्याचष्टे * परः पुनरिति * यदिशब्दे समभिहाराच्चेत्यनेन यौगिकत्वस्य युक्तत्वं दर्शयतीति वदता राजशब्दस्य यौगिकत्वनिश्चयाद्राजसूयान्तर्गतस्यावेष्टिप्रयोगस्य ब्राह्मणादौ निमित्ते बार्हस्पत्यादिमध्यनिधानपूर्वकाभिघारणलक्षणगुणविधानमित्यध्याहारेण भाष्यव्याख्या सूचिता राजशब्दस्य यौगिकत्वे ब्राह्मणादेर्गुणस्य प्राप्तत्वेनाविधेयत्वादभेदकत्वोक्त्यर्थं न ब्राह्मणस्येति भाष्यं ब्राह्मणादेः कर्तृसंख्यावाच्याख्यातसामानाधिकरण्यात्कर्तृत्वावगतेः कर्त्तुश्च कर्मस्वरूपानङ्गत्वेन तद्भेदकत्वायोगादयुक्तमाशङ्क्य द्वेधा व्याचष्टे * न कर्मान्तरमिति * व्यवहितान्वयहेतुहेतुमल्लिङ्पक्षयोराख्याद्वयैकवाक्यत्वावगमादेकेन च वाक्येन ब्राह्मणाभिघारणलक्षणानेकगुणविध्यशक्तेरभिघारणस्य च हविः संस्कारार्थत्वेन कर्मस्वरूपाङ्गत्वात्कर्त्तुरपि च ब्राह्मणादेः प्रयोगद्वारा कर्माङ्गत्वोपपत्तेर्विधेयत्वे ऽनेकगुणोपादानात्कर्मान्तरापत्तेरविधाने तदनापत्त्युक्तिर्युक्तेति द्वितीयव्याख्याशयः । हेतौ हेतुमति च लिङिति प्रकारद्वयमभिप्रेत्य बहुवचने यौगिकत्वमात्राभ्युपगमे ऽपि क्षत्रियस्य प्रायेण वीर्यातिशयात्प्रजापालनविधानाच्चापालयत्यपि क्षत्रियजातीयत्वेन योग्यत्वाद्राजशब्दप्रयोगोपपत्तेः । सार्वलौकिकेनार्थप्रयोगेणासार्वलौकिकम्लेच्छप्रयोगबाधाद्यौगिकतैव प्रयुक्तेति परिहारान्तरार्थमथ वेत्यादिभाष्यमनेकशक्तिकल्पनापत्तेः पूर्वापरितोषणेत्येवं व्याचष्टे * एवं तावदिति * अप्रमाणमेव प्रमाणीकृत्येति च्विप्रत्य- ५८८।२
यार्थेनापरितोषः सूचितः।अपि चेति भाष्यं यौगिकप्रयोगस्य सार्वलौकिकत्वेन विप्रगीतत्वात्पुनरुक्तमाशङ्क्य प्रामाण्यरूपविशेषासिद्ध्यै प्राक् सार्वलौकिकात्सार्वलौकिकतोक्ता । इदानीं प्रामाण्यविशेषमभ्युपेत्य विश्वसनीयाविश्वसनीयरूपविशेषसिद्ध्यै सैवोच्यतइत्येवं तावत्परिहृति * अपि चेति * प्रत्ययो विश्वासो ऽस्य सञ्जात इति तदस्य सञ्जातं तारकादिभ्य इतजिति सञ्जातार्थस्मृतेरितच् प्रत्ययान्तेन प्रत्यायितशब्देन विश्वसनीयत्वोक्तेस्तृतीयया च नि-

मित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति कारयितृरूपप्रयोचनवाचि-
कारणशब्दोपपदकल्पनया प्रयोजनत्वोक्तेर्विश्वसनीयाविश्वसनीय-
त्वप्रयोजनतोक्ता शब्दभेदात्पुनरुपन्यस्तत्वोक्त्यनुपपत्तिमाशङ्क्याह
* न हीति * यद्वा यौगिकप्रसिद्धिर्म्लेच्छदेशे ऽप्यस्ति जातिप्र-
सिद्धिस्तु नार्यदेशे ऽस्तीति प्रागुक्तमिदानीं तु म्लेच्छा न यौगिकप्र-
योगाप्रामाण्ये विप्रतिपद्यन्ते आर्यास्तु तस्माद्वत्पराति जानन्तु पितर-
राजानमिति क्षत्रिये वत्परातावपि राजशब्दप्रयोगदर्शनाज्जातिप्रयो-
गप्रामाण्ये विप्रतिपद्यन्ते इत्यन्यथा पौनरुक्त्यं परिहरति * यद्वेति *
तथेति भाष्यं व्याचष्टे * तथेति * ननु यौगिकत्वे ऽपि क्षत्रियस्य
विहितराज्ययोगनिमित्तसम्भवे स्वाच्छन्द्यानुष्ठित(राज्ययोगनिमित्त-
त्वायोगात् ब्राह्मणाद्यप्राप्तिरित्याशङ्क्य हेतुब्राह्मणादौ राजशब्दप्रयो-
गस्य क्षत्रियस्थे) राज्ययोगनिमित्तत्वानुपपत्तेर्नोक्तिघ्नीति सूचनार्थं
तस्मादिति पूर्वपक्षोपसंहारभाष्यं व्याचष्टे * तस्मादिति * अपि
च निःसन्दिग्धं जगत्सामा कर्मान्तरमिति पूर्वाधिकरणपूर्वपक्षभा-
ष्यसूचितं युक्त्यन्तरमाह * अपि चेति * कर्मभेदसूचनायावेष्टि-
शब्देन ब्राह्मणादिवाक्यमुदाहरणत्वेनोक्त्वा ब्राह्मणादिगुणरूपं क्रतुश-
ब्दवाच्यप्रयोगार्थमुच्चार्येत क्षत्रियस्यैवैकस्य राजसूययज्ञसंयोगा-
दिति पूर्वाधिकरणपूर्वपक्षसूत्रस्थगुणशब्दसिद्धान्तसूत्रस्थैकशब्दयो-
रनुषङ्गेण सूत्रव्याख्याभाष्यं व्याचष्टे * एवमिति * यौगिकत्वा-
भ्युपगमे कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव इति दीप्त्यर्था-
द्राजेर्धातोरौणादिके कनिन्प्रत्यये कृते ककारेकारनकारलोपाज्जका-
रान्तराजशब्दव्युत्पत्तेर्धात्वर्थानुसाराद्वरं दीप्तियोगनिमित्तताभ्यु-
पगन्तुं युक्ता राज्ययोगनिमित्तता तु अवयवार्थानुस्माराभावादपू-
र्वशक्तिकल्पने च सम्बन्धिनावनुक्त्वा सम्बन्धोक्त्यशक्तेर्विशिष्टोक्ताव-
पि विशेषणविशेष्योक्त्यापत्तेरनेकशक्तिकल्पनापत्तिपरिहारार्थं जा-
तावेव शक्तिकल्पनस्य न्याय्यत्वादनाशङ्क्येति सूचयितुं यौगिकत्वं
विकल्प्य निरस्यति * क्षत्रियेति * स्वातन्त्र्येण पालयितृत्वस्य
राजशब्दप्रवृत्तिहेतुत्वे मण्डलेश्वरे राजशब्दो न युज्येतेत्याशङ्कापू-
र्वमाह * ननु चेति * क्षत्रियजातिरहिते ऽपि ब्राह्मणादावभिषिक्ते
राजशब्दप्रयोगात् बर्हिराजादिन्यायात्तुल्यत्वेनाभिषेकाख्यसंस्कार-
५८९।१ निमित्तत्वमाशङ्कते * तेन तर्हीति * राजानमभिषेचयेदिति राज-
शब्देन राजशब्दवाच्यतया प्रसिद्धस्य क्षत्रियस्यैवाभिषेकविधाना-
द्विधिवेलायामेव राजशब्दसंयोगाद्राजशब्दार्थस्योद्देश्यत्वेन प्राक् प्र-

२ अयं पा० ३ पु० ना० ।

सिद्ध्यपेक्षत्वात् म्लेच्छप्रसिद्धेरप्यादरणीयतया जातिवाचित्वावग-
तेराभिषेकनिमित्तत्वं न सम्भवतीति परिहरति * नैवमिति *
राजशब्देनाभिषेकः क्षत्रियस्यैव विधीयते सहैव राजशब्देन। ननु ब्र-
ह्मचर्यादिशब्दात्प्रागेवोपनयनादिराजशब्दात्प्राग्येन ब्रह्मचारिशब्द-
प्रवृत्तौ उपनयनवत् राजशब्दप्रवृत्तावभिषेको निमित्तं स्यादिति कृ-
त्वा सौराजशब्दो नाक्षत्रिये धर्मशास्त्रकाराणामभिमत इत्यर्थः । स-
त्यप्यभिषेकनिमित्तत्वे वृत्ते तस्मिन् राजशब्दप्रवृत्तेः स्वरूपेण नि-
मित्तत्वायोगात्संस्कारद्वारा निमित्तत्वस्याभ्युपगन्तव्यत्वात्तस्य च
विहितक्रियाजन्यत्वादक्षत्रियस्थस्याभिषेकस्य निमित्तत्वाभावो ऽपि-
शब्देन सूचितः । श्लोकं व्याचष्टे * तत इति * येनैव कारणेन वि-
धिवेलायामेव राजशब्देनाभिषेकः संयुज्यते तेनैव कारणेनाभिषेका-
त्प्राक् प्रयोगेण समुदायव्यभिचाराद्दतुयजनवरणसमुदायनिमित्त-
र्त्विक्शब्दवत् जात्यभिषेकसमुदायनिमित्तताप्ययुक्तेति तेनैव चेत्य-
नेन प्रसङ्गादुक्त्वा यदि हीत्यादिना प्रत्येकव्यभिचाराभावादपि न
समुदायवाचितेति व्यतिरेकमुखेन वक्तुं न तु केवलायां जातावि-
त्येवकारार्थेन जातिव्यभिचारं निरस्याभिषेकव्यभिचारनिरासार्थम्
* जात्यन्तरे वेत्युक्तम् * जात्यन्तरे यद्यभिषेको विधीयते राजश-
ब्दश्च न प्रयुज्येतेत्यध्याहारेण योज्यं यूपादिवैषम्येन चेत्यनेनोक्ते
यथा वेदशब्दस्य ऋग्वेदादौ मन्त्रब्राह्मणसमूहो निमित्तं वेदेन
वेदिं समार्ष्टीत्यादौ च क्रतुत्वाद्याकारदर्भमुष्टिबन्धनसंस्कारस्तथा
राजशब्दस्य क्वचिज्जातिः क्वचित्संस्कारो निमित्तं भविष्यतीति
आशङ्क्य * न चैकस्मिन्नित्युक्तम् * अभिषेकनिमित्तत्वे ऽपि चे-
त्यादिनापिशब्दसूचितो ऽर्थो व्याख्यातः । शब्दार्थसम्बन्धनित्यत्वसि-
द्ध्यर्थं च नित्यस्यैव शब्दप्रवृत्तिनिमित्तस्यापेक्षणादभिषेकस्य च
वस्तुतो नित्यत्वाभावेन विधिविहितत्वरूपेणैव नित्यत्वस्या-
भ्युपगन्तव्यत्वादक्षत्रियस्याविहितत्वान्निमित्तत्वं न सम्भवती-
त्याह * अपि चेति * श्लोकं व्याचष्टे * नित्यस्य हीति *
एवं चाभिषेकस्यापि निमित्तत्वे विहितस्यैव निमित्तत्वा-
त् क्षत्रियजातावेव च विहितत्वाज्जात्यव्यभिचारोपपत्तेर्जा-
तिस्थतैवं निमित्तोपलक्षणमापद्यत इत्युक्ते अस्तु तर्हि क्षत्रि-
यस्थत्वोपलक्षितस्याभिषेकस्यैव निमित्ततेत्याशङ्क्य * ततश्चेत्युक्त- ५९०।२
म् * साक्षान्निमित्तत्वसम्भवे निमित्तत्वोपलक्षणत्वस्यान्याय्यत्वा-
दित्याशयः । राज्ययोगनिमित्तत्वे ऽप्येतं न्यायमतिदिशति * एते-
नेति * नन्वभिषेकस्यादृष्टार्थत्वेन विधिविषयत्वात्तेन रूपेण नि-

न्यस्य क्षत्रियत्वस्य निमित्तत्वसम्भवे वर्णान्तरेण स्वच्छन्दकृतस्या-नित्यस्य निमित्तत्वायोगान्नित्यस्य च जात्यव्यभिचाराज्जातेर्निमित्तत्वे सम्भवत्यन्यनिमित्तत्वं युक्तम् । राज्ये त्वैश्वर्यात्मके लिप्सयैव प्रवृत्तेर्विधिविषयत्वाभावान्नित्यत्वानुपपत्तेरनित्यस्यैवागत्या चोरशब्दप्रवृत्तौ स्तेयस्येव राजशब्दप्रवृत्तौ राज्यस्य निमित्तत्वं भविष्यतीत्याशङ्क्याह * तदपीति * ऐश्वर्ये लिप्सातः प्रवृत्तिसम्भवे ऽपि पालने विधिं विना प्रवृत्त्ययोगात् ।

चाटतस्करदुर्वृत्तमहासाहसिकादिभिः ।
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः ॥

इत्यादिविधिदर्शनाद्राज्यस्यापि विधिविषयतास्तीत्याशयः । विधानाधीनत्वलक्षणार्थः प्रभृतिशब्दः । अन्वयव्यतिरेकाभ्यामपि जातिवाचितैवावसीयतइत्याह * दृष्टश्चेति * अभिषिक्ते ऽन्यजातीये ऽपि प्रयोगस्याभ्युपगच्छन्ति ते हि जनपदिनः प्रयोक्तारः सार्वभौमे प्रयोगमित्यान्ध्रद्रविडादिभिरभ्युपगतत्वेनोक्तत्वादयुक्ता विषयानभिधानोक्तिः । एतदेवोपसंहरति * तस्मादिति * जातिवाचिनश्च राजन्यशब्दस्य राज्ञो ऽपत्यमिति राजशब्दप्रकृतिकत्वान्यथानुपपत्त्या राजशब्दस्य जातिवाचितावसीयतइत्याह * तथा चेति * अन्यथानुपपत्तिं प्रश्नपूर्वमुपपादयति * कुत इति * सर्वएव वर्णाश्चेद्राजानस्ततो ऽपत्यापत्यवद्योगे राजन्यशब्दो ऽन्वाख्यायते क्षत्रियएव नियतइतीदृशं वैषम्यं कथं परिह्रियेतेत्यध्याहारेण योज्यम् । ननु राजशब्दस्य जातिवाचित्वं क्षत्रियापत्यत्वं विना क्षत्रियजातीयत्वायोगाद्राजप्रातिपदिकमात्रेण क्षत्रियापत्यत्वसिद्धेरपत्यवाची यत्प्रत्ययो ऽनर्थकः स्यात् यौगिकत्वे तु क्षत्रियो ऽयं राज्यकारिणो ऽपत्यमित्यस्यार्थस्य प्रातिपदिकमात्रेणासिद्धेरर्थवानिति राजशब्दप्रकृतित्वान्वाख्यानस्य विपरीतसाधनत्वमाशङ्कते * नन्विति * प्रकृतौ पितर्यपत्ये चैकजातीयत्वेन जातिशब्दस्य तुल्यत्वाद्राजापत्यमिति राजशब्देनाभिधीयतां न राजन्यशब्देनेत्यर्थः । दृष्टान्तपूर्वं श्लोकं व्याचष्टे * यथैवेति * अन्वाख्यानप्रकारमात्रमिदम् । ननु राजन्यप्रातिपदिके परमार्थतः प्रकृतिप्रत्ययविभागो ऽपत्यवाचितावास्तीति परिहरति * नैष इति * ननु परमार्थतो राजशब्दस्य राजन्यशब्दप्रकृतित्वाभावे कथं जातिवाचित्वकल्पनेत्याशङ्क्याह * स त्विति * क्षत्रस्यापत्यं क्षत्रिय इति जातिवाचिक्षत्रियशब्दप्रकृतित्वेनान्वाख्यानोपायमात्रतयाप्युक्ते न क्षत्रियशब्दस्य जातिवाचित्वकल्पना युक्तेत्याशयः । ननु राजइवसु-

राधदिति राजन्यशब्दान्वाख्यानसूत्रे कात्यायनेन राज्यकार्यपत्यमात्रे
प्रसक्तस्य राजन्यशब्दस्य परिसंख्यानेन जातिविषयत्वनियमोक्तेः
क्षत्रियगतराजापत्यत्ववाचित्वावसायाज्जातिवाचित्वाभावे ऽपि प-
ङ्कजादिशब्दवज्जातौ रूढित्वोपपत्तेर्न तदन्यथानुपपत्त्या राजशब्दजा-
तिवाचित्वकल्पना युक्तेत्याशयेन शङ्कते *ननु चेति* जातिग्रहणमि-
त्यत्र क्षत्रियत्वविशेषानुपादानादधिकारतो मनुष्यजातिमात्रावगमा-
द्राजन्यशब्दस्य मनुष्यमात्रगतराजापत्यत्ववाचित्वापत्तेस्तस्य च जा-
तिविशेषणं विनापि सिद्धेर्जातिग्रहणवार्त्तिकानर्थक्यापत्तिरित्याश-
येन परिहरति * नैतदिति * कथं मनुष्यजातिमात्रस्याधिकार इ-
त्यपेक्षायां त्वत्पक्षे राजशब्दस्य राज्यकारिमनुष्यवाचित्वादिति राज-
शब्ददृष्टान्तेन सूचितम् स्याच्छब्देन । ततश्च जातिग्रहणवार्त्तिकानर्थक्यं
स्यादित्यध्याहारः सूचितः । ननु राजा सर्वस्येष्टे ब्राह्मणवर्जमित्यादा-
विज्याध्ययनं दानमित्यादौ च राजन्यशब्दाभ्यां स्मृतिकारैर्यो राजा
विजिती स्यादप्येतत् यजमानआख्यापयेत वैतच्छौन शेपमाख्यानमि-
त्यादौ राजन्यो ऽमावास्यायां पौर्णमास्यां चाग्निहोत्रं जुहुयादित्यादौ
च कल्पसूत्रकारैः कर्मभेदोपदेशान्न तयोः पर्यायत्वं सम्भवतीत्या-
शङ्कते * ननु चेति * ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासे-
दित्यादौ जातिवाचिनो ऽपि ब्राह्मणशब्दस्य परिव्राजकब्राह्मणविशे-
षगामित्वात्प्रब्रूयात् ब्राह्मणश्चैषामित्याद्याश्रमान्तरस्थब्राह्मणविहित-
प्रवचनादिकर्मणः कर्मान्तरोपदेशो यथा न विरुध्यते तथा
राजशब्दस्यापि राजन्यविशेषगामित्वात्कर्मभेदोपदेशेन रा-
जराजन्यशब्दयोर्भेदप्रसिद्धिरविरुद्धेति परिहरति * सत्यमि-
ति * कथं[1] सामान्यशब्दत्वे विशेषगामितेत्याशङ्क्य * सा-
मर्थ्येत्युक्तम् * राजन्यानां युद्धमुपदिश्यैव राजा न हन्यादिति निषेध- ६९१।
स्य राजा सर्वस्येष्टइति ब्राह्मणव्यतिरिक्तवर्णत्रयेश्वरत्वोक्तेश्च
राजशब्दस्य विशेषगामित्वं विना योगात्को विशेष इत्यपेक्षाया-
मभिषेकविध्युत्तरकालं राज्ञः प्रजापालनादिविधानाद्राजेत्येतान-
भिषिक्तानाचक्षतइत्यादिलिङ्गाच्चाभिषिक्तत्वरूपविशेषप्रतीतेर्ब्राह्मणो
राजन्यो वैश्यो दीक्षिष्यमाणः क्षत्रियं देवयजनं यातीति क्षत्रि-
यशब्दस्यैवान्यथानुपपत्तिलक्षणसामर्थ्यलभ्या राजशब्दस्याभिषिक्त-
क्षत्रियविशेषगामितेत्याशयः । ननूभयाभिधानइति पूर्वपक्षानुभाष-
णभाष्यं व्याचष्टे * यत्त्विति * अत्रोति परिहारप्रतिज्ञाभाष्यं व्या-
चष्टे * तदिति * कुत इत्यादि प्रश्नपूर्वमुपपत्तिभाष्यं राजशब्दस्य

१ का। सामान्यशब्दत्व इ० २ पु० पा० ।

जातौ राज्यकारिणि च प्रयोगादुभयार्थत्वावगतेः सन्देहे सति प्रकरणानुग्रहादिलक्षणात्सामर्थ्याद्राज्यकारिवाचित्वं निर्णीयतइत्यनुभाषितार्थानिरासादयुक्तमाशङ्क्य राज्यशब्दस्य यौगिकत्वे राजयोगाद्राज्यशब्दो राज्ययोगाच्च राजशब्द इतीतरेतराश्रयप्रसङ्गात् राजशब्दस्य यौगिकत्वमिच्छता राज्यशब्दस्य रूढिताभ्युपगन्तव्येत्यापाद्य राजशब्दस्य यौगिकत्वनिरासार्थं राज्यशब्दस्य रूढित्वनिरास इति तथाहिशब्देन सूचयन्व्याचष्टे * तथा हीति * न ब्रूमो न प्रयुञ्जतइति जातिविषयान्ध्रप्रयोगाभ्युपगमात्कर्मविशेषानिमित्तत्वाद्राज्यशब्दस्येति च राज्यशब्दस्य पालने रूढित्वोक्तिप्रतीतेरुभौ शब्दौ योगानपेक्षौ पूर्वपक्षिणोऽभिमताविति प्रतिभाति तच्चैकस्यैव शक्तिकल्पनया यौगिकत्वेनेतरप्रयोगासिद्धेरुभयोः शक्तिकल्पनायामर्थापत्त्यनुत्पादादयुक्तमित्याशयः । व्याख्याते ऽर्थे भाष्यं योजयति *तदिति* कथं तर्हि भाष्ये आन्ध्रोक्तिरित्याशङ्क्योपलक्षणार्थत्वं वक्तुमाह *दाक्षिणात्येति * तस्मादित्युपसंहारभाष्यं व्याचष्टे *तस्मादिति* ननु राजशब्दस्य साधुपालनासाधुनिग्रहकारिवाचित्वे ऽपि राज्यशब्दाद्व्युत्पत्तेस्तस्य यौगिकत्वे ऽपीतरेतराश्रयाप्रसङ्गाद्राजशब्दस्यावयवव्युत्पत्त्यनपेक्षत्वे ऽपि कर्मविशेषयोगनिमित्तत्वात्कुलालनापितादिशब्दवद्यौगिकत्वं राज्यशब्दस्य त्ववयवव्युत्पत्त्यपेक्षत्वादेवेत्युभयोरपि यौगिकतोपपत्स्यतइत्याशङ्क्याह * नापीति * कुलालादिशब्दानां जातिवाचित्वायोगादगत्यानेकशक्तिकल्पनापादिका कर्मविशेषकारिवाचिता युक्ता। राजशब्दस्य तु द्रविडादिप्रयोगाज्जातिवाचित्वावगतेरन्यजातीये च कार्यापत्त्या प्रयोगोपपत्तेः साधुत्वासाधुत्वरूपगुणपालननिग्रहरूपक्रियाविशेषकर्तृत्वात्मकानेकार्थशक्तिकल्पनापादककर्मविशेषकारिवाचित्वाभ्युपगमायोगाद्यौगिकत्वाभ्युपगमे राज्यशब्दवाच्यत्वरूपेण साधुपालनादेरेकरूपत्वमभ्युपेत्य तत्कर्तृत्ववाचितायाः कल्पनापत्तेरितरेतराश्रयस्यापरिहार्यत्वान्नोभयोर्यौगिकता युक्तेत्याशयः । को न्वित्यादि प्रश्नपूर्वस्य भाष्यस्य तात्पर्यमाह *अन्यतरेति* एतदेव प्रश्नपूर्वमुपपादयति *कुत इति* सम्वादापरपर्यायसङ्गतिवाचिसम्बन्धशब्दयोगिना नञा तद्विरुद्धोक्तेर्विरोधनिमित्तसन्देहे सति सन्निबन्धनत्वेन बलीयस्त्वात्स्मृत्या निर्णयो वाच्यतइत्यर्थः।कथं स्मृत्या निर्णय इत्यपेक्षायामाह*राज्येति* राजशब्दस्य ब्राह्मणादिषु पाठात् ष्यञ्प्रत्ययः पुरोहितादिषु पाठाद्यक्प्रत्ययो भवतीत्यनियमसूचनार्थम् *सामान्यतः प्रत्ययविधेरित्युक्तम्* ष्यञ्प्रत्यय इति भाष्याद्यक्प्रत्ययव्यावृत्तिशङ्कां निवर्तयितुमाह *

तत्रेति * प्रत्ययद्वयाभ्युपगमं विनोभयत्र पाठस्यानर्थक्यापत्तेर्लौकि-
कस्य च राज्यशब्दस्य स्वरनियमानुपलब्धेस्ततो निर्णेतुमशक्यत्वा-
द्यकापीत्यपिशब्दो ऽध्याहार्यः । यदा राज्यायैव ते ऽभिषिच्यन्ते
राजेत्येतानभिषिक्तानाचक्षतइत्यादिलिङ्गाद्राज्ययोगनिमित्तत्वं राज-
शब्दस्याशङ्क्यते तदा तस्मिन् राज्यशब्दे प्रत्ययस्थस्याकारस्योदात्त-
स्वरत्वोपालम्भात् यक्प्रत्ययान्ततैव निश्चीयतइत्याह *तथा चेति *
कर्षात्वतो घञो ऽन्त उदात्त इतिसूत्रादन्त उदात्त इत्यनुवर्त्तमाने त-
द्धितस्येति वानुवर्त्तमाने कित इत्यनेन यकाराकारस्याद्यन्तवदेकस्मि-
न्नित्यन्तवद्भावेनोदात्तत्वविधानाद्यगन्तत्वे प्रत्ययोदात्तस्वरत्वं युक्तं
ष्यञन्तत्वे तु ञ्नित्यादिर्नित्यमित्यनेनाद्युदात्तविधानात्प्रकृतिस्वरे-
णाकारोदात्तत्वं स्यादित्यर्थः । अतो न यक्प्रत्ययव्यावृत्त्यर्था ष्यञ्प-
प्रत्ययविध्युपपत्तिरित्याह * तस्मादिति * नन्वितिभाष्यमवयव-
व्युत्पत्त्यनपेक्षस्य राजशब्दस्य पालनकर्तृवाचित्वे प्रत्ययलोपादिस्म-
रणानापत्तेरयुक्तमाशङ्क्यावयवव्युत्पत्त्यपेक्षत्वापादनाशयेन व्याचष्टे
राज्यशब्दाद्धीति तस्मादित्युपसंहारभाष्यं व्याचष्टे *तस्मादि- ५०.२१२
ति * द्रविडदेशे राजशब्दार्थस्य क्षत्रियस्वरूपेण विज्ञातत्वादौदमे-
धिन्यायानुपपत्तेर्न राजकर्मवाचिराज्यशब्दान्यथानुपपत्तिलक्षणया-
र्थापत्त्या राज्यस्य कर्त्ता राजेति वचनव्यक्तिः कल्पनीयेत्यर्थः ।
नित्याः शब्दार्थसम्बन्धा यथावस्थितगामिन इत्यनेन च न्यायेन नि-
त्यानित्यसंयोगविरोधपरिहारार्थं राज्यशब्दस्य राजविहितकर्मवा-
चितयाभ्युपगन्तव्यत्वाद्राज्यस्य कर्त्ता राजेत्यर्थापत्तिगम्यायां वच-
नव्यक्तौ कल्पितायामपि क्षत्रिय एव राजा विज्ञायतइति राजशब्द-
स्य यौगिकत्वकल्पनानर्थक्यं स्यादित्याशयेनाभ्युपेत्य वादेन दूषण-
माह * कल्पितायामपि चेति * राजशब्दे च राज्यशब्दरूपावयवा-
प्रत्यभिज्ञानान्न राज्यशब्दाद्राजशब्दव्युत्पत्तिः सम्भवतीत्याह *
सकलश्चेति * राज्यशब्दे ऽपि तर्हि राजशब्दस्य नकारान्तस्य
सकलस्याभावाद्राज्यशब्दस्यापि राजशब्दात् व्युत्पत्तिर्न स्यादि-
त्याशङ्क्य व्याकरणप्रक्रियया नकारान्तत्वे ऽप्यन्वयव्यतिरेकाभ्यां
नकारान्तस्याप्यर्थाभिधानशक्त्यविघातावसायाद्व्याकरणे ऽपि च
एकदेशविकृतमनन्यवद्भवतीति वचनात्सकल्पाविरोधसूचनार्थम् *
सकलश्चेत्युक्तम् * राज्यशब्दस्य यौगिकत्वे ऽपि राजशब्दस्याक्ष-
त्रिये ऽपि पालयितरि प्रयोगादव्युत्पन्नस्यैव पालयितृवाचित्वं क-
ल्पयिष्यन्त इत्याशङ्कार्थं नन्वितिभाष्यं तात्पर्यतो व्याचष्टे * स-
त्यमिति * नन्वद्वयप्रयोगेणार्यावर्त्तनिवासिप्रयोगविरोधपरिहारं

विना न म्लेच्छप्रयोगाज्जातिवाचितावसातुं शक्येति सूचितम् । न केवलं राजशब्दस्य यौगिकत्वाभावे लौकिकप्रयोग विरोधः । किं तु मन्वादिप्रयोगविरोधो ऽपीति दर्शयितुम् * तथेत्युक्तम् * राज्यशब्देन राज्ञः कर्मणीत्युक्ते शूद्रस्य राज्ञ इति सामानाधिकरण्यप्रत्ययाच्छूद्रे राजप्रयोगो ऽवसीयत इत्याशयः । पालयितृत्वनिमित्तत्वे राजशब्दस्य ब्राह्मणादिषु प्रयोगस्य वैधपालयितृत्वनिमित्तत्वायोगात्स्वच्छन्दककृते च पालयितृत्वे सर्वेषां योग्यताविशेषाद्योग्यत्वमाल्लणापालयितरि क्षत्रिये प्रयोगानुपपत्तेर्जातिवाचित्वस्यावश्यकल्पनीयत्वादक्षत्रिये च गौणत्वेनापि प्रयोगोपपत्तेरनेकशक्तिकल्पनापादकपालयितृत्ववाचित्वकल्पनानुपपत्तेर्न जातिवाचित्वे ऽपि शास्त्रस्थप्रयोगविरोधापत्तिरिति परिहारार्थमुच्यते इत्यादिभाष्यमवतारणपूर्वं व्याचष्टे * अत आहेति * शङ्कापूर्वं गौणत्वाशयं प्रकटयति * नन्विति * अग्न्यादिकार्यापत्तेः सूर्यादावूहस्य वक्ष्यमाणत्वान्न कार्यापत्तिमात्रेण गौण्या वृत्त्या मुख्यशब्दप्रयोगोपपत्तिरित्याशङ्क्य * प्रतिनिधीत्युक्तम् * राजकार्यापत्तेः पत्तिगणादौ राजशब्दप्रयोगवत् ब्राह्मणादावपि प्रयोगस्य दृष्टत्वाद् गौणतैवोचिता नातिदेशकल्प्याग्न्यादिशब्दप्रयोगवदपह्नव इत्यर्थः । अयुक्तः पत्तिगणको वा प्रतिनिधिशब्देनोक्तः । मुख्यत्वानभ्युपगमे भाष्यसम्मतिमाह * तथा चेति * नन्वत्रापि स्मृतिः प्रयोगदार्ढ्यात्कल्प्यत इत्येवमपि भाष्यार्थोपपत्तेर्न स्मृत्यभावोक्तिमात्रेण गौणत्वसम्मतिः कल्प्येत्याशङ्क्याह * तच्चेति * प्रयोगस्याचारत्वेन राज्ञः प्रजापालनं कर्मेति प्राक् सिद्धे राजानुवादेन तत्कार्यतया पालनस्य स्मृत्या पालयितृत्वानपेक्षराजशब्दार्थावधारणात् बाधेन गौणत्वावगतेर्गौणत्वाशयेन भाष्यं व्याख्येयमित्यर्थः । पाणिनिस्मृत्या राजकर्मवाचितयोक्तस्य राज्यशब्दस्य लोके पालने प्रयोगात्पालयितुरौदुम्बरन्यायेन राज्यशब्दप्रकृतिभूतराजशब्दवाच्यत्वानुमानस्यानुभाषणार्थं यत्त्विति भाष्यं व्याचष्टे * यत्त्विति * अनुमानादित्यादिपरिहारभाष्यं व्याचष्टे * तदिति * तथेत्यादिबलीयस्त्वमित्यन्तं भाष्यम् । आन्ध्रप्रयोगाज्जातिवाचित्वशक्त्यवगतेरनेकशक्तिकल्पनापादकावयवव्युत्पत्त्यनपेक्षपालयितृवाचित्वशक्त्ययोगे ऽपि राज्यस्य कर्त्तेत्यवयवयोगेन समुदायशक्त्यनपेक्षस्यैव राजशब्दस्य राज्यकर्तृवाचित्वं भविष्यतीत्याशङ्कानिरासार्थत्वेन व्याचष्टे * अथेति * राज्यमस्य कर्मेत्येवमवयवव्युत्पत्त्या ब्राह्मणादि राजशब्दे ऽभिधीयते न रूढ्याध्वर्युकुलालादिशब्दवदित्याशङ्कार्थः । ब्राह्मणादौ राजशब्द-

प्रवृत्तेर्निमित्तभूतो यः कर्मकर्त्रोरवयवार्थयोः सम्बन्धः स राजशब्दे
प्रत्यभिज्ञानासम्भवादनुमातव्य इति विपरिणतानुमातव्यपदान्वयेन
तथेति भाष्यावयवो राज्ञस्य कर्त्तेत्यवयवव्युत्पत्त्यपेक्षत्वे सत्यव-
यवयोगो प्रतीयमानः कल्प्यः स्यादित्येवं व्याख्यातः। तस्य चेत्यनेना-
नुमिमानश्चेत्यवयवः प्रत्ययलोपप्रातिपदिकं प्रत्यन्यतमस्मृतिं विना-
ऽवयवयोगानुमानायोगात् योगमनुमिता स्मृतिरनुमातव्येत्येवं व्या-
ख्यातः । राज्ञस्तु स्मरन्तस्त्वित्यवयवौ राज्ञ इत्यनेन
व्याख्यातौ तेनेत्यवयवस्तस्मादित्यनेन व्याख्यातः । वा-
च्यवाचकसम्बन्धस्य वृद्धप्रयोगगम्यत्वेन साध्वसाधुविभा-
गव्यापृतव्याकरणस्मृत्यविषयत्वात्स्मृतिबलीयस्त्वायोगाशङ्कार्थमा-
हेति भाष्यं व्याचष्टे * पर इति * अत्र ब्रूम इति भाष्यं स्मृतेर्वा-
च्यावाच्यविवेकपरत्वाभावाद्राज्यकारिणि च राजशब्दप्रयोगव्य-
भिचारादयुक्तमाशङ्क्य वाच्यविशेषत्वात्साधुत्वस्य तन्निरपेक्षसा-
धुविवेकासिद्धेर्वाच्यावाच्यविवेकस्यापि स्मृतितोऽर्थादवगमाद् ब-
लीयस्त्वोक्तिर्युक्तेत्याशयेन व्याचष्टे * तत्रेति * कथं राजशब्दस्य ५९३।५
राज्ययोगनिमित्तत्वं राज्ञः कर्म राज्यमिति स्मृत्या बाध्यतइत्याश-
ङ्क्य * राज इत्युक्तम् * अपि चेति भाष्यं व्याचष्टे * प्रयोगो ऽपि
चेति * नन्विति भाष्येण राज्यशब्दस्य राजयोगनिमित्तत्वव्यभि-
चारमनुभाष्य प्रयोगव्यभिचारे ऽपि स्मृत्या राजयोगनिमित्ताव-
सीयतइति परिहारार्थं यदीति भाष्यं व्याचष्टे *अस्मत्पक्षे त्विति*
राज्ञ एव कर्मेत्यसाधारण्येन चिन्तितादे राज्ञा विशेष्टुमशक्यत्वात्प्र-
योगो ऽपि न व्यभिचरतीति परिहारान्तरार्थं तेनेति भाष्यम् अश्व-
मेधादावसाधारण्ये ऽपि राज्यशब्दप्रयोगादयुक्तमाशङ्क्य किं च श-
ब्देनाभ्युच्चयार्थत्वं सूचयन् व्याचष्टे * किं चेति * श्लोकं व्या-
चष्टे * जनपदेति * यत्त्विति भाष्येणाथ वेति पूर्वपक्षभाष्योक्तं सा-
र्वलौकिकराजशब्दप्रयोगेणासार्वलौकिकजातिप्रयोगबाधमनुभाष्यते
न तत्र स्मृतिर्बलीयसीति पाणिनिस्मृत्या सार्वलौकिकप्रयोगबाधो-
क्त्या * परिहृतमित्युक्तम् * तद्व्याचष्टे * तेनेति * सार्वलौकि-
कमपि प्रयोगे बाधित्वेति ल्यब्लोपे पञ्चमी यदुक्तमिति भाष्येण त-
थेति पूर्वपक्षभाष्योक्तं म्लेच्छाचाराप्रामाण्यमनुभाष्याचारेषु मध्ये
शब्दप्रयोगरूपस्याचारस्यार्यम्लेच्छयोस्तुल्यत्वोक्त्या परिहृतं तद्व्या-
चष्टे * तुल्यश्चेति * तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्या-
चष्टे * तस्मादिति * नन्वधिकरणोपक्रमे ऽन्नाद्यकामवाक्योक्त-
स्यापि फलस्य राजसूयमध्यस्थावेष्टिप्रयोगविषयत्वोक्त्यभिधानात्तु

बहिःप्रयोगस्य फलान्तरकल्पनायामदृष्टकल्पनागौरवापत्तेः। प्रकरणा-
द्वा राजसूयाङ्गत्वकल्पने राजशब्दादक्षत्रियस्य राजसूयाप्राप्तावप्य-
ङ्गप्रधानयोरेककर्तृत्वनियमाद् राजसूयस्य ब्राह्मणादिकर्तृकत्वं विना
तदङ्गभूतावेष्टिप्रयोगस्य ब्राह्मणादिकर्तृकत्वानुपपत्तेर्ब्राह्मणादिवि-
शिष्टावेष्टिप्रयोगान्तरविध्यन्यथानुपपत्त्या ब्राह्मणादेरपि राजसूयप्रा-
प्तेर्यज्ञसंयोगात् क्षत्रियस्येति भाष्यावयवव्याख्यानार्थः । क्षत्रियस्यैव
राजसूयोऽस्तीति वार्त्तिकावयवो न युक्त इत्याशङ्क्य ब्राह्मणादिवा-
क्यैः प्रयोगान्तरविधावन्नाद्यकामवाक्योक्तस्य फलस्य बहिःप्रयो-
गविषयतैव युक्तेत्याह * ततश्चेति * एतदेव प्रश्नपूर्वमुपपादय-
ति * कुत इति * नन्वेतयेति सर्वनामश्रुत्या साक्षाद्विशेषरूपेण
चावेष्टौ प्रवृत्तेः क्रतुमध्यस्थस्याप्यवेष्टिप्रयोगस्य दुर्बलशास्त्रावगत-
स्वाराज्यफलत्वबाधेनान्नाद्यफलत्वावगमान्नान्नाद्यकामश्रुतेर्बहिःप्रयो-
५,४।५ गविषयता युक्तेत्याशङ्कते * ननु चेति * सत्यपि बलाबलविशेषे
प्रयोगभेदेन स्वाराज्यान्नाद्ययोः समुच्चयसम्भवे बाधो न युक्त इति
परिहरति *नैतदिति* एतदेव विवृणोति *तथा हीति* यत्र विरो-
धित्वं तत्र बाधानभ्युपगमे व्रीह्यादौ गुणभूते विकल्पः प्रधानभूते
सर्वेभ्यो ज्योतिष्टोम इत्यादौ प्रयोगावृत्तिकल्पना येन कारणेन
प्रसज्यते तेन कारणेन तत्परिहारार्थं बाधोऽभ्युपेयते स्वाराज्या-
न्नाद्ययोस्तु भिन्नप्रयोगविषयत्वाद्व्यवस्थोपपत्तेर्विरोधाभावाद् बलाब-
लत्वविशेषे सत्यपि बाधो नास्तीत्यर्थः । श्लोकं व्याचष्टे * न
हीति * ब्राह्मणादिसम्बन्धात्प्रयोगभेदावगतेरवश्यं भाविन्यावृ-
त्तिरित्युक्ते नन्वविरोधे सत्यबाधितया राजसूयचोदनयावेष्टिग्रह-
णात् क्षत्रियकर्तृकत्वावगमे सति तद्विरुद्धब्राह्मणादिकर्तृसम्बन्धा-
त्प्रयोगभेदः । प्रयोगभेदे च सत्यविरोध इतीतरेतराश्रयं स्यादित्या-
शङ्क्य * राजसूयेत्युक्तम् * ब्राह्मणादिवाक्येष्वेतच्छब्दाभावेन तद-
पेक्षया राजसूयचोदनाया दौर्बल्याभावात्तदुक्तक्षत्रियकर्तृकता न
बाधितुं शक्येत्याशयः । सम्प्रत्यन्नाद्यकामवाक्यादपि राजसूया-
द्वाक्यस्य दौर्बल्यं नास्तीत्याह * यदि चेति * अगृह्यमाणविशेष-
त्वमेवोपपादयति * यथैव हीति * या तु सामान्यप्रवृत्तत्वाद्रा-
जसूयश्रुतेर्दुर्बलतोक्ता सा नास्तीत्याह * न चेति * साधारणा-
शब्दताप्येतच्छब्दस्याप्यवेष्टिशब्दवाच्यानेकाग्नेयादियागसाधार-
णयात्तुल्येत्यर्थान्तरन्यासेनाह * इयांस्त्विति * नन्वेतच्छ्रुतेर्विशे-
षवाचित्वनिबन्धनबलीयस्त्वाभावेऽपि प्रत्यक्षशब्दोक्तसाक्षात्प्रकृ-
तावेष्टिवाचित्वाद् बलीयस्त्वोपपत्तेर्बलाबलविशेषो भविष्यतीत्या-

शङ्कते * नन्विति * प्रकृतयज्यालोचनानपेक्षालक्षणः साक्षाद्भा-
वः प्रत्यक्षशब्देन विवक्षितः फलान्वये वैतच्छब्दस्य प्रस्तूयमानवाचि-
त्वे वा प्रकृतयाज्यालोचनानपेक्षा स्यान्नन्वेतदुभयमप्यस्तीति परि-
हरति * स्यादिति * फलानन्वयोपपादनार्थम् *प्रत्ययेत्युक्तम्*
यजिशब्दगृहीतावेष्टिरेतावच्छब्देनोक्ता।नन्वेतच्छब्दस्य फलान्वये प्र-
स्तूयमानवाचित्वे वा सत्यपि सर्वनामत्वेन साक्षात्प्रकृतवाचितया
प्रकृतप्रत्यभिज्ञानपेक्षप्रकृतालम्बनत्वाद्राजसूययजितो बलीयस्त्वं भ-
विष्यतीत्याशङ्क्याह * प्रकृतमपि चेति * सर्वनाम्नो ऽपि सन्नि- ५९५।१
हितालम्बनत्वात्प्रत्यभिज्ञां च विना सन्निध्ययोगात्प्रकृतवाक्यालो-
चनाधीनप्रत्यभिज्ञापेक्षा तुल्येत्याशयः। ननु महाप्रकरणादवान्त-
रप्रकरणबलीयस्त्वस्याभिक्रमणाधिकरणे वक्ष्यमाणत्वाद्दर्शाद्यकाम-
वाक्यस्थस्य यजेरवान्तराधिकारलक्षणेनावान्तरप्रकरणेन प्रकृतग्रा-
हित्वाद् बलीयस्त्वं भविष्यतीत्याशङ्कते * नन्विति * कथम्भावा-
त्मकस्य प्रकरणस्य वाक्यैकवाक्यत्वकल्पनेन तादर्थ्यबोधकत्वा-
दवान्तरप्रकरणे च सन्देशेन शीघ्रमेकवाक्यत्वावगमात् महाप्रक-
रणे तु सन्देशाभावाच्छीघ्रमेकवाक्यत्वानवगतेः सन्निकर्षविप्रक-
र्षाभ्यां बलाबलविशेषो युक्तो ऽधिकारात्मकस्य तु प्रकरणस्य प्रकृ-
तत्वमात्रापेक्षित्वात् बहूनामल्पानां च प्रकृतत्वाविशेषात्तुल्यकालं
ग्रहणावगतेर्नावान्तरमहाधिकारयोर्बलाबलविशेषो ऽस्तीत्याशयेन
परिहरति * उच्यतइति * स्वमतेन ब्राह्मणादिवाक्यानां क-
र्मान्तराविधायित्वे ऽपि प्रयोगान्तरविधायित्वात्स्वाराज्या-
न्नाद्ययोर्भिन्नप्रयोगविषयत्वेनाप्यविरोधमुक्त्वा प्रौढ्या क-
र्मान्तरविधायित्वाभ्युपगमेनाविरोधमाह * यदि चेति * कर्मा-
न्तरत्वे बार्हस्पत्यादिलिङ्गात्प्रकृतावेष्टिप्रकृतिकत्वे ऽपि सकृद् वृत्त्यैक-
यागप्रतीतेर्यागान्तराणामनङ्गत्वेनातिदेशतो ऽप्यप्राप्तेर्मध्यनिधानवि-
ध्यन्यथानुपपत्त्याचाभितो ऽभिधेयद्रव्यान्तरकल्पने ऽतिक्लेशापत्तेस्त-
द्विशेषानवधारणाच्चानवस्थितशास्त्रार्थापत्तेः प्रौढिमात्रार्थत्वसूचना-
र्थो ऽपिशब्दः। ननु कर्मान्तरत्वे द्रव्यदेवतादीतिकर्त्तव्यतानव-
गतेः सकृद् वृत्त्या च यागैक्यावगमान्मध्यनिधानानुपपत्तेस्तद्विशि-
ष्टानुष्ठानासिद्धिरित्याशङ्क्याह * कर्मान्तरत्वे चेति * अतिदेशेनावे-
ष्टीष्वितिकर्त्तव्यतालाभान्मध्यनिधानान्यथानुपपत्त्या च कल्पितेषु द्र-
व्यान्तरेषु तुल्यत्वाद्यागीयत्वप्रतीतेः कल्पानां च यागान्तराणामिति-
कर्त्तव्यतापेक्षायां श्रुतयागप्रकृतित्वेनावगताया अवेष्टेरेव बुद्धिस्थ-
त्वात्तेषामपि तत्प्रकृतिकत्वावगतेस्तदीयेतिकर्त्तव्यतालाभादभितो

निधेयद्रव्यविशेषप्रतीतेर्निर्द्धारितशास्त्रार्थानुष्ठानसिद्धिरित्याशयः । नन्वेवमपि राजन्यवाक्यस्य निमित्तार्थत्वोपपत्तेर्ब्राह्मणादीनां प्रापकाणीति बहुवचनमयुक्तमित्याशङ्क्याह * राजन्यस्यापि चेति * यदिशब्दोपबन्धेनानित्यत्वावगमात् ब्राह्मणादिवाक्यतुल्यप्रवृत्तेः क्रतुमध्यप्रयोगे च राजन्यस्य नित्यत्वाद्यदिशब्दानुपपत्तेर्ब्राह्मणवाक्यस्थस्याख्यातस्य राजन्यवाक्ये ऽनुषक्तस्य विध्यनुवादवैरूप्यपरिहारार्थं ब्राह्मणवैश्यवाक्यवत् राजन्यवाक्ये ऽपि विधितया तुल्यप्रवृत्तेः ब्राह्मणवैश्यवत् राजन्यस्यापि कर्मान्तरेण प्रयोगान्तरेण वा सम्बन्ध इत्युक्ते ब्राह्मणवैश्ययोः क्षत्रियकर्तृके प्रयोगे निवेशायोगात् युक्तं भेदकत्वम्।राजन्यस्य तु क्रतुमध्यस्थप्रयोगे निवेशोपपत्तेर्न भेदकता युक्तेत्याशङ्क्य कर्तृभेदस्य भेदहेतोरभावे ऽपि योगसिद्ध्यधिकरणन्यायेन फलभेदस्य भेदकत्वसूचनार्थम् * फलपदेत्युक्तम् * अन्नाद्यकामवाक्यैकवाक्यत्वलक्ष्यस्य राजन्यो ऽन्नाद्यकामो यजेतेति फलपदानुषङ्गस्य ब्राह्मणो ऽन्नाद्यकामो वैश्यो ऽन्नाद्यकाम इति वत् राजन्यस्याप्यविशेषात्तत्प्रयोगस्यापि फलभेदाद्भेदावगतिरित्याशयः । यदि राजन्य ऐन्द्रं मध्ये निधायाहुतिं हुत्वा ऽभिघारयेदित्यनुषङ्गलक्ष्यस्य राजन्यकर्तृकप्रयोगविषयैन्द्रमध्यनिधानपूर्वकाभिघारणविधिवाक्यस्य तन्त्रप्रयोगं विनानुपपत्तेरपि प्रयोगभेदो ऽवसीयतइत्याह * एवं चेति * ननु क्रतुमध्यस्थे ऽपि प्रयोगे मध्यनिधानलिङ्गाद्वेदेरित्येकवचनश्रुतेश्च तन्त्रत्वं भविष्यतीत्याशङ्क्याह * राजसूयेति * आग्नेयो ऽष्टाकपालो हिरण्यं दक्षिणैन्द्र एकादशकपाल ऋषभो दक्षिणा वैश्वदेवश्चरुः पिशङ्गी पष्ठौही दक्षिणा मैत्रावरुण्यामिक्षा वशा दक्षिणा बार्हस्पत्यश्चरुः शितिपृष्ठो दक्षिणेति दक्षिणाभेदाद्दक्षिणायाश्च कर्त्रानत्यर्थत्वात्कर्तृत्वाधिष्ठानद्रव्यैक्ये ऽपि प्रयोगाङ्गभूतकर्तृरूपभेदद्वारा प्रतियागं प्रयोगभेदावगतेः क्रतुमध्यप्रयोगे मध्यनिधानविधिर्विरुध्येतेत्यर्थः । अतस्तस्मात् क्षत्रियस्यैवेत्युपसंहारवार्त्तिक युक्तमेवेत्याह * तस्मादिति *

॥ आधानस्य विधेयत्वाधिकरणम् ॥ ३ ॥

आधाने सर्वशेषत्वात् ॥ ४ ॥

यदिति भाष्येण वचनव्यक्तिभेदस्य सन्देहहेतुत्वेनोक्तस्याख्यातानपेक्षपदान्तरान्योन्यान्वयायोगेनायुक्तत्वात् पूर्वपक्षवचनव्यक्त्ययोगापत्तेर्ब्राह्मणादिप्राप्त्यप्राप्तिसन्देहे विध्यविधिसन्देहहेतुं वक्तुमाह * वसन्त इति * ननु सत्यामपि प्राप्तौ निमित्तवाचियज्यादिश-

ब्दाभावान्निमित्तार्थता न युक्तेत्याशङ्क्याह * तत्रेति * प्राप्तस्य ब्राह्मणादेर्निमित्तत्वं विनान्वयायोगात्तद्वाचिशब्दाभावे ऽपि निमित्तताऽवसीयत इत्याशयः। भाष्यस्य तर्हि का गतिरित्याशङ्क्याह * तदा चेति * ब्राह्मणो यद्यादधीत ततो वसन्तइति वचनव्यक्त्याव्याधाने वसन्तविधौ ब्राह्मणान्वयस्य निमित्तस्वोक्त्यर्थत्वं ब्राह्मणश्रुतेः सूचयितुं वचनव्यक्त्यन्तरोक्तिरित्याशयः। नन्वाधानस्यावेष्टिवन्नियतैकवर्णसंयोगात्पूर्वन्यायातुल्यत्वेन निमित्तार्थत्वमाशङ्क्य वर्णविशेषासंयोगे ऽपि स्वरूपेणवाप्राप्तौ निमित्तार्थत्वासम्भवातिदेशार्थत्वेनास्य विचारस्यानन्तरसङ्गतावपि कथं गुणप्रकरणसङ्गतिः किं च प्रयोजनमित्याशङ्क्याह * तदा चेति * ब्राह्मणादेर्गुणस्य विधेयत्वे भेदकता ऽविधेयत्वे त्वभेदकतेति सन्दिग्धविधेयत्वस्य गुणस्य भेदकाभेदकत्वनिर्णयार्थं विधेयाविधेयत्वविचारादवान्तरसङ्गतिरपि तदा चेति प्रापकत्वे भेदोक्त्या निमित्तार्थत्वे च तद्विपरीत्योक्त्या सूचिता। स्वार्था एव चेत्यनेनाद्यपूर्वपक्षनिरासप्रयोजनमुक्त्वा द्वितीयपूर्वपक्षनिरासप्रयोजनम् * शूद्रस्येत्यनेनोक्तम् * ननु शूद्रस्यानुपनीतत्वान्न ब्रह्माभिव्याहारेदित्यनुपनीतवेदाध्ययननिषेधेनाविधित्वात्पूर्वपक्षे ऽप्याधानाप्राप्तिरविशिष्टेत्याशङ्क्याह * एतेनेति * उपनयनस्याप्याधानवत्पूर्वपक्षे कर्मविधिभिस्तत्ज्ञानसा- ६९६।१
धनं वेदाध्ययनमाक्षिपद्भिरनुपनीताध्ययनायोगेनाक्षेपादविशेषाच्छूद्रस्याप्युपनयनमध्ययनं च प्राप्नोतीत्याशयः। सुखप्रतिपत्त्यर्थमधिकरणार्थं संग्रहीतुमाह * तत्रेति * सङ्क्षेपतो ऽधिकरणार्थ इत्यर्थः। द्विविधमपि पूर्वपक्षं सङ्गृह्णाति * सामर्थ्येति * आहवनीयादिसाध्याग्निहोत्रादिविधिभिः सामान्यतः कस्य चिदाहवनीयादिसाधनस्याक्षेपे ऽपि किं तदिति विशेषाज्ञानादग्निमादधीतेति द्वितीयाश्रवणे ऽप्यविहितस्याधानस्य साध्यानाकाङ्क्षत्वात् द्वितीयायाश्चोत्पाद्याप्यविकार्यसंस्कार्यात्मकचतुर्विधकर्मसाधारण्येनोत्पाद्यैकान्तिकत्वाभावादग्निमुपनिधाय स्तुवीत अग्निं संमार्ष्टीत्यादिवदुत्पाद्यत्वानवगतेरर्द्धोदिते सूर्ये आहवनीयमादधातीत्यादौ चाहवनीयादेर्यूपादिवत् असिद्धत्वाद्य आधीयते स आहवनीय इत्यवगमे ऽपि अविधीयमानस्याहवनीयोत्पादकत्वे प्रमाणाभावादाहवनीयादिवाक्यैराधानविध्यभ्युपगमे कामश्रुतिभिः प्राप्तत्वाच्चत्वात्प्रत्यग्निं वाधानभेदापत्तेर्विधिनिरपेक्षोत्पत्तिमात्रेण च साध्यसाधनत्वे सत्यौदुम्बरत्वादरप्युगवरोधादिसाधनत्वापत्तेर्याज्ञिकानां चाहिते ऽग्नौ आहवनीयादिशब्दप्रयोगस्याधानविध्यभावे निर्मूल-

त्वेनाप्रामाण्यान्मूलवैदिकप्रयोगकल्पने ऽप्यादित्यादौ यूपादिशब्दप्रयोगशब्दार्थाधिगमहेतुत्वाभावाद्धंसमुख्यः स्रुचो ऽश्वास्त्वक्तो बिला इति स्रुचां हंसमुखप्रसेकत्वादिविधिवदाहितो ऽग्निराहवनीय इति प्रयोगादाधानविधिकल्पने ऽतिक्लेशापत्तेः कामश्रुतिभिश्च विधिकल्पनवैयर्थ्यस्यापरिहार्यत्वादविधाने चाधानस्य प्रकरणायोगाद्वसन्तादिवाक्येषु ब्राह्मणादौ निमित्ते कालविधौ प्रकरणप्राप्ताधानानुवादानुपपत्तेर्ब्राह्मणादिविशिष्टाधानानुवाददोषस्यापरिहार्यत्वात्स्वविध्युत्पादितस्याप्याधानस्याग्निहोत्रादिविधिभिरनुप्रापनमाद्यपूर्वपक्षार्थ इति सूचनायाक्षिप्तशब्दः । टुप्टीकायां सम्भारेष्वादधातीति यो ऽस्मिन्नादधाति तेनाधाने प्राप्ते वसन्ते ब्राह्मणो ऽग्निमादधीतेत्यनूद्य वसन्तब्राह्मणसम्बन्धो विधीयतइत्यभिधानात्सम्भाराणां च वाक्षपार्थिवानां वाक्यान्तरविहितत्वात्तदधिकरणाधानमात्रविधिलाघवसम्भवे कर्तृकालरूपानेकार्थविशिष्टाधानविधिगौरवस्यानङ्गीकार्यत्वात्सम्भारवाक्योत्पादितस्याधानस्य कैमर्थ्यापेक्षायामाहवनीयादिवाक्यालोचनयाहवनीयादिसाधनत्वावगतेरग्निहोत्रादिभिः फलवत्त्वात्प्रयुक्तिशक्तेः प्रयुक्तिसम्भवे ब्राह्मणादिवाक्येन प्रयोगाङ्गभूतकर्तृसंयोगे ऽपि निमित्तार्थे तत्संयोगोपपत्तेर्नाधानप्रयोजकत्वकल्पना युक्तेत्याशयः । फलवतः प्रयुक्तिद्योतनायैव कामश्रुत्युपन्यासो भाष्ये अन्यथाहवनीयादिसाध्यकर्मविधिमात्रेण प्राप्त्युपपत्तेः कामविशेषणानर्थक्यापत्तेः यदि रथन्तरसामेति च सयदिके वाक्ये चिन्तिते सयदिकत्वसाम्येन बुद्धिस्थानां यदि ब्राह्मणो यजेतेत्यादिवाक्यानां पूर्वाधिकरणे निमित्तार्थत्वापवादेन प्रयोगविधित्वव्युत्पादनादिहापि ब्राह्मणादिसंयुक्तत्वसाम्येन बुद्धिस्थानां वसन्तादिवाक्यानां प्रयोगविधित्वव्युत्पादनादनन्तरसङ्गतिः सुलभा प्रयोजनं चाग्निहोत्रादिविधिप्रयुक्तत्वे ऽग्निहोत्रादिफलार्थिनैवाधानमनुष्ठेयं स्वविधिप्रयुक्तत्वे तु ब्राह्मणत्वादेः कर्तृविशेषणत्वे ऽपि जातेरनुपादेयत्वाद् ब्राह्मणादिकर्तृकस्य प्रयोगस्याब्राह्मणादिना कर्त्तुमशक्तेरशक्तस्य चानधिकारादर्थादधिकारविशेषणत्वावगतेः सिद्धत्वेन च जातेः काम्यतयाधिकारविशेषणत्वायोगादाधानस्य च काम्यत्वाभावेन राजसूयवन्निमित्तान्वयविरोधाभावान्निमित्तत्वप्रतीतेर्निमित्ते सति नैमित्तिकावश्यम्भावाज्जातपुत्रवाक्यात्पुत्रजन्मनो निमित्तविशेषणत्वप्रतीतेर्जातपुत्रेण ब्राह्मणादिना निष्कामेनावश्यानुष्ठेयं ततश्च कृष्णकेशवाक्याद्वयो ऽर्द्धानतिक्रमणप्रतीतेर्ब्राह्मणादेर्जातपुत्रस्यानाहिताग्नेर्वयोऽर्द्धातिक्रमे ऽवश्यं विहिताग्नि

होत्राद्यननुष्ठाननिमित्तप्रत्यवायवदाधानाननुष्ठाननिमित्तो ऽप्यपरः
प्रत्यवायो भवति अत एवानाहिताग्नितायामुपपातकत्वेन स्मर्यते
नानाहिताग्निर्म्रियेतेति च श्रुत्याधानस्यावश्यकतावसीयते सा च
स्वविधिप्रयुक्तत्वं विना न सिद्ध्यतीति सङ्गतत्वात्सप्रयोजनत्वाच्च
युक्तैव प्रयुक्तैवे प्रयुक्तिचिन्ताश्लोकं व्याचष्टे * एकस्तावदिति*
सिद्धान्तं संगृह्णाति * सिद्धान्तेति * सम्भाराहवनीयादिवा-
क्यालोचनयाहवनीयादीनामाधानजन्यत्वावगमेनाग्निहोत्रादिवि-
धिभिराधानप्रयुक्तिसम्भवे प्रत्यक्षवाक्यानर्थक्यमाशङ्क्य नियमेना-
ग्निहोत्रादिवाक्यानामाधानप्रयोजकत्वायोगान्नियमार्थत्वेनार्थवत्त्वं
दर्शयन् श्लोकं व्याचष्टे * न तावदिति * ननु विद्वद्वाक्यस्या-
धानविधायित्वं विनानर्थक्यं स्यादित्याशङ्क्याह * अस्ति चेति *
अप उपसृजतीत्यादिप्रत्यक्षविधियुक्तानामुदकस्थापनादिरूपाणां स-
म्भाराणाम् अथ सम्भरन्तीतिवत्सामान्यतो विधानं तत्प्रशंसार्थ-
त्वम् । एवं कृतान्सम्भारान्सम्भार्याण्येकत्र देशे स्थाप्यान्युदकादीनि
विद्वानेवमुक्तप्रकारसम्भरणपूर्वमग्निमाधत्ते सहायसम्पन्नमपि स-
मानस्वाम्यं स्पर्द्धमानशत्रुं यथावर्त्तनराहितो भवति तथा यजती-
त्येतदुपन्यासस्य प्रयोजनमस्तीति नानर्थक्यापत्तिरित्याशयः । सि-
द्धान्तमुपसंहरतीति * किमिति * प्रश्नभाष्याशयमाह * कि-
मिति * ब्राह्मणादीनामित्युत्तरभाष्यं निमित्तवाचिशब्दानुपन्या- ५९७।१
सादयुक्तमाशङ्क्य ब्राह्मणादेराधाने प्राप्तत्वाद्विधेयवसन्तादिनिमित्त-
त्वं विनान्वयायोगान्निमित्तत्वावगत्याशयत्वेन व्याचष्टे * ब्राह्मणा-
दीनामिति * नन्वित्याशङ्काभाष्याशयमाह * नन्विति * बाढ-
मिति परिहारभाष्याशयमाह * इतरस्त्विति * उक्ते ऽर्थे भाष्य-
सम्मतिप्रदर्शनार्थैकदेशपाठः केनेति प्रश्नभाष्यं सम्भाराहवनीया-
दिवाक्यालोचनयाधानस्याहवनीयादिसाधनत्वे ऽवगते कामश्रुति-
भिः प्राप्तिप्रतीतेर्विद्वद्वाक्यस्य च साक्षात्प्रापकस्य प्रत्यक्षत्वादयुक्त-
माशङ्क्य प्रत्यक्षविधिसद्भावे कामश्रुतीनां यच्छब्दोपबन्धाच्च वि-
द्वद्वाक्यस्य प्रापकत्वं न सम्भवतीत्याशयेन व्याचष्टे * केनेति *
कामेत्युत्तरभाष्यं प्रश्नाशयापरिहारादयुक्तमाशङ्क्य कथंचित्प्रा-
प्तिसम्भवे विशिष्टविधिगौरवस्यानङ्गीकार्यत्वात्प्रत्यक्षविधिसद्भाव-
मात्रेण कामश्रुतीनां प्रापकत्वनिराकरणं न सम्भवतीत्याशयेन
व्याचष्टे * इतरस्त्विति * साक्षात्प्रापकविद्वद्वाक्यत्यागेन का-
मश्रुत्युपन्यासानौचित्यशङ्कानिरासार्थम् * बलीयांसं चेत्युक्तम् *

१ प्रयुक्तैवेति २ पु० ना० ।

विद्वद्वाक्यस्याधानोत्पादकत्वसम्भवे ऽपि वसन्तादिवाक्यवत्प्रयो-
गविधिचिन्हप्रयोगाङ्गकर्तृकालादिसंयोगाभावात्स्वर्गकामादिवाक्य-
वच्च प्रयुक्तिशक्तिफलसंयोगाभावात्प्रयोजकत्वानुपपत्तेः तत्प्रयोज-
कत्वाय कामश्रुतीनामवश्योपन्यसनीयत्वाद् बलवति च प्रापके
प्रागुपन्यस्य निरस्ते दुर्बलोपन्यासानवकाशापत्तेरात्मनेपदरहितेन
वाक्येनाधानोत्पादने कामश्रुतीनां तत्प्रयोजकत्वस्य पाक्षिकत्वेन वि-
द्वद्वाक्योत्पादिताधानप्रयोजकत्वापेक्षया दौर्बल्यात्प्रागुपन्यास इ-
त्याशयः।कामश्रुतीनां प्रयोजकत्वे ऽस्य पाक्षिकत्वेन विद्वद्वाक्यस्य चो-
त्पादकत्वेन विवक्षितत्वाद्भिन्नविषयतया ऽनालोचनीये ऽपि बलाबले
ऽग्निहोत्राद्यनङ्गत्वेनाधानस्याग्निहोत्रादिविधिप्रयुक्तत्वासम्भवे ऽपि
विद्वद्वाक्येन द्वितीयावगताग्न्याख्यफलसंयोगात्प्रयुक्तिमता प्रयुक्ति-
सम्भवे वसन्तादिवाक्यानां विशिष्टविधिगौरवापादकप्रयोजकत्वक-
ल्पनानुपपत्तेर्विद्वद्वाक्यस्यैव प्रयोजकताप्यापद्यतइति सूचनार्था ब-
लीयस्त्वोक्तिः। का इति प्रश्नभाष्यं कामश्रुतीनां प्रत्यक्षत्वादयुक्तमा-
शङ्क्याहवनीयादिसाधनत्वेनाधानस्य विध्यन्तरतो ऽवगतस्याप्यग्नि-
होत्राद्यनङ्गत्वात्तद्विधिप्रयुक्तत्वासम्भवाशयत्वेन व्याख्यातुमाह *
का इति * प्रापणेत्यनेन क्रोधहेतुं वदताग्निहोत्रादिश्रुतीनामाधानं
प्रत्यशेषित्वात्प्रयोजकत्वाशक्तेस्तद्व्यतिरिक्त आधानशेषिविषयत्वा-
त्तत्प्रयुक्तिशक्तकाः कामश्रुतय इत्येवं भाष्यं व्याख्यातं प्रापणश-
क्त्याक्षेपस्यासर्वशेषत्वादिति सूत्रावयवोक्तत्वसूचनार्थो भूतनिर्देशः
प्रापणशक्तेराक्षिप्तत्वात्सक्रोधं दर्शयतीति वक्ष्यमाणानुषङ्गेण समाप-
नीयम् । अग्निहोत्रमित्युत्तरभाष्यमाक्षेपापरिहारादयुक्तमाशङ्क्या-
ज्ञातप्रश्नत्वारोपोत्तरत्वेन व्याचष्टे *स्वरूपमेवेति* फलवत्त्वात्प्रयु-
क्तिशक्तिसूचनार्थम् * फलेत्युक्तम् * प्रत्यक्षवचनाभावे ऽपि का-
मश्रुतीनामनङ्गभूताधानप्रयोजकशक्त्यभावसूचनार्थं सक्रोधमित्य-
स्याक्षेपक्रियाविशेषणत्वाभ्युपगमे त्वेकग्रन्थतया योज्यम् । कथमिति
भाष्यं का इति प्रश्नाशयविवरणार्थत्वेन व्याचष्टे * कथमिति *
अग्निहोत्रादिभावनाकरणोतिकर्त्तव्यतांशानिरिक्तत्वादाधानस्य त-
द्विधिप्रयुक्तत्वासम्भवो ऽन्यपरत्वोक्त्योक्तः करणेतिकर्त्तव्यतांशप्र-
योजकेन विधिना[1] तत्साधनमकरणेतिकर्त्तव्यताभूतमप्यन्यथानुपप-
त्त्या प्रयुज्यतइत्याशयेनोच्यतइत्यादिपरिहारभाष्यं व्याचष्टे * इती-
ति * ननु यथाग्निहोत्रादि निष्पद्यते तथा कुर्यादिति विपर्यासिद्ध्या-
क्षेपकत्वे ऽपि प्रयोगविधेरविषयभूतकरणेतिकर्त्तव्यताव्यतिरिक्ता-

१ तत्साधनमकरणेतिकर्तव्यताशप्रयोजकेन विधिनेति २ पु० अधिकम् ।

र्थाक्षेपकत्वं न सम्भवतीत्याशङ्कानिरासार्थं तेनेत्याद्यवगम्यतइत्यन्तं
भाष्यं व्याचष्टे * तेनेति * यथाग्निहोत्रमिति भाष्योक्तो विध्यर्थस्त-
च्छब्देनाधानाक्षेपहेतुतया परामृष्टः । अनङ्गस्यापि विधिनाक्षेपे वासो
ददात्यनो ददातीति वस्त्रशकटदानविधिना वस्त्रशकटोत्पादकयोर्वा
तक्षणयोराक्षेपः सप्तमाधिकरणपूर्वपक्षसूत्रे वक्ष्यमाणो दृष्टान्तितवा-
निति तक्षणाख्यकर्मजन्ये वस्त्रशकटे च विहिते तदुत्पादकं कर्माक्षि-
प्यते यथा यूपे विहिते तदुत्पादकछेदनादीति सूत्रार्थः कामश्रुतिप्रा-
प्त्युक्तिसम्प्राप्तिसूचनायेतिकरणकामश्रुतिप्राप्त्युक्तिप्रयोजनोक्त्यर्थं
तत्केनेत्यादिभाष्यं स्पष्टत्वादव्याख्यायापि चेति भाष्यं विशिष्टवि-
धौ वाक्यभेदाभावादयुक्तमाशङ्क्य सत्यां गतावेकस्य वाक्यस्य वि-
शिष्टविधिगौरवाक्षमत्वाद्वाक्यभेदोक्तिरित्याह * सर्वप्रकारेति *
क्रतुप्रधानमुच्यतेति पूर्वसूत्रोक्तप्रतिज्ञानुषङ्गेणाधानइति सूत्रावयव-
व्याख्यानार्थमेवमिति भाष्यं व्याचष्टे * एवमिति * सर्वकर्मणा-
मिति भाष्येणोत्तरावयवं यथाश्रुतं दूषयित्वा किं तर्हीत्यनेन सर्व-
कर्मशेषभूताग्निशेषत्वेनाधानस्यौपचारिकी सर्वकर्मशेषतोक्तेति भाति
तच्चाङ्गाङ्गत्वेनैवाधानाक्षेपस्य पूर्वपक्षिणो ऽभिहितत्वादयुक्तमिति
मत्वा सर्वकर्मणामिति भाष्यमकारप्रश्लेषेणोत्तरावयवव्याख्यार्थतया
व्याख्यातुमाह * कथमिति * शेषत्वनिरासस्यानाक्षेपहेतुमुपपाद-
यितुमाह * यदि हीति * शेषत्वे ऽपि स्वतन्त्रकालविधानेन कर्मप्र-
योगाद् बहिरनुष्ठानस्यावगतस्य कर्मविधिप्रयुक्तत्वे ऽनुपपत्तेराक्षेपा-
नावश्यकतानवक्लृप्त्योक्ता आहवनीयादिशब्दानामाधानलक्षणसं-
स्कारनिमित्तत्वादाहवनीये जुहोतीत्याद्याहवनीयादिश्रुत्यैवाधानस्य
कर्माङ्गत्वोक्तेः सर्वकर्मणामिति शेषत्वनिरासभाष्यमयुक्तमाशङ्क्यो-
पपादयति * तेषामिति * आधानजन्यस्य संस्कारस्याहवनीयादि-
शब्दनिमित्तत्वे ऽप्याधानस्य स्वरूपेण संस्कारत्वाभावादाहवनीयादि-
शब्देनानुक्तेरग्निहोत्रादिकर्मणामाहवनीयादिग्रहणमात्रपर्यवसाना-
न्न कश्चिदाधानस्य कर्माङ्गत्वज्ञापनहेतुरस्तीत्यर्थः । संस्कार-
निमित्तत्वेनाहवनीयादिशब्दानां जातिनिमित्तानोवास शब्द,वि-
षयसप्तमाधिकरणासिद्धान्तसूत्राविषयत्वे ऽपि यथा कर्मजे
ऽनसि वाससि वानोवासोरूपमेव प्राप्यते न तदुत्पादकं
कर्मानोवासःशब्दयोः संस्कारनिमित्तत्वाभावेन कर्मणो शेषत्वा-
त्तथाहवनीयादिशब्दानां संस्कारजनकस्याधानस्याग्निहोत्राद्यशेष-
तयाहवनीयादिश्रुत्या कर्मजे ऽप्याहवनीयादौ विहिते जन्यमाह-
वनीयादिरूपमेवाप्यते नोत्पादकमाधानमित्येतावता साम्येन तन्न्या-

योदाहरणं यद्याधानस्य कर्मार्थत्वं नास्ति किं तर्हि तृतीये तत्प्रकृत्यर्थे
यथान्ये ऽनारभ्यवादा इत्याधानस्य प्रकृत्यर्थत्वे पूर्वपक्षिते सर्वार्थं
वाधानस्य स्वकालत्वादिति सिद्धान्तसूत्रेणोच्यते न हि तत्सर्वेषां त्रै-
वर्णिकानामाधानस्य विहितत्वेन रथकारस्यैवाधानविधिनियोज्य-
तया परिशिष्टत्वादिति वचनाद्रथकारस्याधानस्य सर्वशेषत्वादिति
षष्ठाधिकरणोपकरणोपक्रमसिद्धान्तसूत्रवदन्यथा व्याख्यातुं शक्यं
नापि द्रव्यस्याकर्मकालनिष्पत्तेः प्रयोगः सर्वार्थः स्यात्स्वकालत्वा-
दित्येकादशाधिकरणसूत्रवत् कृत्वाचिन्तान्यायेन सर्वार्थत्वाङ्गीका-
रेण चिन्तान्तराभावादिति किं तर्हीति भाष्येणाशङ्क्य पारम्पर्येण
सर्वार्थत्वोक्त्यर्थतया तार्तीयसूत्रव्याख्यानार्थमग्नीनामिति भाष्यं
व्याख्यातुमाह *यत्त्विति* किमित्याशङ्काभाष्याशयमाह *किमिति*
अग्नयइति परिहारभाष्याशयमाह * सिद्धान्तेति * नन्वित्याशङ्का-
भाष्याशयमाह * नन्विति * उच्यतइत्यादधीतेत्यन्तं परिहारभा-
ष्यं व्याचष्टे * उच्यतइति * उत्पादनोक्त्याशयमाशङ्कापूर्वमाह *
६९८।८ तत्रेति * श्लोकं व्याचष्टे * यथैवेति * भाष्यार्थमुपसंहरति *
इत्यस्तीति * नन्विह प्रयुक्ते विचार्यत्वादाधानोत्पत्तिमप्राप्तिपक्षः
प्रयोजयिष्यतीति ब्राह्मणादिवाक्यानामुत्पत्तिविधिज्ञापनार्थस्योत्पत्ति-
शब्दस्यानर्थक्यं स्यादित्याशङ्क्य ब्राह्मणादिवाक्यानां प्रयोजकत्वाभ्यु-
पगमे कर्मविषयत्वेन क्लृप्तत्वात्तपामेवोत्पादकतापि युक्ता न गुणसं-
चरितशक्तीनां सम्भारादिवाक्यानामिति सूचयितुं तदुपपादनार्थं
पक्षे ऽप्युपायान्तराप्राप्तिं वक्ष्यमाणामाह * पक्षे ऽपि चेति * केव-
लप्रयोजकत्वे ह्यात्मनेपदयुक्तस्य तद्रहितविध्युत्पादितस्याधानस्या-
धातृगस्याहवनीयादिसाधनत्वानियमात्साध्यसाधनेतिकर्तव्यताविशि-
ष्टभावनावगमोत्तरकालं प्रवृत्तस्य प्रयोगविधेः साध्यसाधनत्वा-
नियामकत्वात् प्रत्यक्षे ऽपि प्रयोगविधौ सत्युपायान्तरप्राप्त्यविरो-
धात्तदर्थाप्राप्तेर्युक्तात्मनेपदयुक्तोत्पत्तिविधित्वोपपादनार्थेत्याशयः ।
क्रमादः प्राप्त्युपायादाधानात् भिन्नविषयस्य प्रत्यक्षविधिविहितेना-
प्याधानेन निवृत्त्ययोगाशङ्कानिरासार्थं यदित्यादिभाष्यं व्याचष्टे
* प्रत्यक्षेति * आत्मनेपदादनाधातारं प्रत्याहवनीयत्वाद्यभावाव-
गतेरर्थादाधानस्य च प्राप्त्युपायत्वनियमादेकविषयत्वेनोपायान्तर-
निवर्तकता युक्तेत्याशयः । उद्गातारः स्तुवतइत्यात्मनेपदस्यानात्म-
गामिन्यपि क्रियाफले दर्शनान्नात्मनेपदादात्मार्थतावगन्तुं शक्येत्या-
शयेन कथं चेत्याशङ्क्य स्वरितञितः कर्त्रभिप्राये क्रियाफलइति
स्मृतेर्ञकारे दधातिपदस्यात्मनेपदस्यात्मगामिक्रियाफलवाचितावग-

ता नान्यत्र व्यभिचारमात्रेणापहोतुं युक्तेत्याशयेन परिहारार्थं कर्त्रभिप्राये हीति भाष्यमादधीतेति धातुप्रयोगेण व्याख्यातम् । नन्वात्मनेपदाभावे ऽप्यग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादिवत् विधिसामर्थ्यात्कामश्रुतिपरिग्रहेण तदेकवाक्यत्वावगतेः स्वर्गकामादिसाङ्गं कुर्यादिति सामानाधिकरण्याच्चात्मार्थतावगमयिष्यते इत्याशङ्कान्यथानुपपत्त्या कामश्रुत्याक्षेपे ऽनङ्गत्वेनैकवाक्यत्वाप्रतीतेः पश्वादिवच्चात्मार्थमुत्पन्नस्याहवनीयादेर्दानादिनान्यसम्बन्धकरणे ऽपि विध्यविरोधान्नात्मनेपदं विना ऽनाधातारं प्रत्याहवनीयादितावगम्यतइत्याशयेन परिहारार्थमसतीति भाष्यं व्याचष्टे * अर्थेति * श्रुतिकल्पनेन सामर्थ्यस्य प्रापकत्वात्प्रत्यक्षश्रुतिसद्भावे च कल्पनायोगात्पक्षे ऽपि प्राप्तिर्न सम्भवतीत्यभिधानार्थमपि चेति भाष्यं तात्पर्यतस्तावद्व्याचष्टे * अपि चेति * नियमस्यादिशब्दोक्तायाश्च परिसंख्याया यावल्लिङ्गानुमिताः श्रुतयः प्रतिमन्त्रं कल्पयितुमारभ्यन्तइत्यादिमन्त्राधिकरणवार्त्तिके शुद्धविधिवदप्राप्तविधित्वोक्तेर्न पक्षे ऽपि प्राप्तिः सम्भवतीत्यर्थः । स्वरूपतो व्याचष्टे * सति चेति * नन्वाधानस्याग्निहोत्राद्यङ्गत्वे सत्याङ्गानां प्रधानविधिप्रयुक्तत्वात्प्रयाजादिवत्प्रत्यक्षविधिसद्भावे ऽपि कामश्रुतिप्रयुक्तत्वापत्तेरनङ्गत्वे वा प्रत्यक्षविध्यभावेन ऽपि कामश्रुतिभिः प्रयुक्त्यशक्तेः सतीष्विति विशेषणानर्थक्यमित्याशङ्क्यानङ्गत्वे ऽप्यन्यथानुपपत्त्याधानविधिकल्पनद्वारा प्रयुक्त्युपपत्त्याशयेन परिहारार्थमसतीष्विति भाष्यं व्याचष्टे * यदि त्विति * ननु सतीष्वपि ब्राह्मणादिश्रुतिषु शूद्रस्याप्राप्तेः कामश्रुतिभिः प्राप्तिर्युक्तेत्याशङ्कानिरासार्थं सतीति भाष्यं व्याचष्टे * सतीषु त्विति * अत्राहेति द्वितीयपूर्वपक्षभाष्ययाशयपूर्वं व्याचष्टे * पूर्वोक्तेति * तन्निरासार्थमुच्यतइति ५९९।२
भाष्यं व्याचष्टे * तत्रेति * विधेयस्य स्तावकत्वेन शेषभूतेत्यर्थः नेतीत्याशङ्काभाष्यमेवंशब्देन सम्भारपरामर्शात्सम्भारविध्येकवाक्यत्वप्रतीतेरयुक्तमाशङ्क्य भिन्नवाक्यत्वे ऽपि प्रकरणप्राप्तसम्भारपरामर्शोपपत्तेर्न तावन्मात्रेणैकवाक्यतावगतिरित्येवमुपपादयन् व्याचष्टे * परः पुनरिति * उच्यतइति परिहारभाष्यं व्याचष्टे * भवेदिति * गुणार्थमेवेति स्तुतिवाचिना गुणशब्देनापामुपसर्जनं तु विधीयतइति भाष्यस्थो विदधाति स्तुतिलक्षणार्थतया व्याख्यातः । नन्वित्याशङ्काभाष्यं विद्वद्वाक्यस्याधानविधित्वे ब्राह्मणादिश्रुतेश्च वसन्तादिलक्षणगुणार्थत्वे हेत्वनुपन्यासादयुक्तमाशङ्क्य निर्णयहेतुप्रश्नार्थत्वेन व्याचष्टे * कुतो न्विति * निर्णयहेतूक्त्यर्थं नेत्याद्याहे-

त्यन्तं भाष्यं व्याचष्टे * तदिति * प्रत्यक्षकल्पनीयत्वलक्षणो वि
शेषो निर्णयहेतुरित्याशयः । तस्मात्प्रशस्ततामितिभाष्यं तात्पर्य
व्याचष्टे * नैतदिति * भाष्यं व्याचष्टे * न चेति * यदि त्वि
त्याद्युपरुध्येतेत्यन्तं भाष्यं व्याचष्टे * यदि त्विति * नन्वित्याद्य
कल्प्यतएवेत्यन्तं भाष्यं व्याचष्टे * लिङ्गं त्विति * लिङ्गं वि
तस्याधानस्य सम्बन्धि यत्सम्भरणं तस्य यो विधिरथ सम्भारा
सम्भरतीत्यादिसामान्यरूपो विशेषरूपश्च तत्प्ररोचनार्थं स्तुतिस
हितस्याधानस्य पुनः श्रवणमित्यर्थः । अपि चेति भाष्यं व्याच
* लिङ्गं चेति * नन्वित्याशङ्काभाष्यं व्याचष्टे * नन्विति * उ
च्यतइति परिहारभाष्यं व्याचष्टे * सिद्धान्तेति * पदान्तरसम्ब
न्धात्मकेन वाक्येन ब्राह्मणादिविधाने ऽप्याधानस्य श्रुत्या विधा
६०७।१ नाद् बलीयस्त्वोपपादनार्थं परेति भाष्यं व्याचष्टे * स्वपदेति * छि
पच्छब्दः सपत्नशब्दव्याख्यार्थः ।शाखान्तरीयपाठप्रदर्शनार्थो वा न
न्विति भाष्येण विशिष्टविधिगौरवाद्दौर्बल्यमाशङ्कितं नैष इत्यनेन
विशिष्टविध्यन्यथानुपपत्तिकल्पे विध्यन्तरैर्विशेषणविधिसिद्धेः श्रौ-
तविधिव्यापारनानात्वाभावात्परिहृत्य द्वितीयपूर्वपक्षनिरासे तस्मा-
दित्यनेनोपसंहृते ऽपि चेति पूर्वपक्षभाष्योक्तं वाक्यभेदं गौरवाश-
येन परिहृतमपि ब्राह्मणादिजातेरनुपादेयतया निमित्तत्वेनेष्टत्वा-
त्कालनिमित्तयोर्द्वयोरुद्देश्यत्वापत्तेः प्रत्युद्देश्यवाक्यसमाप्तिलक्षण-
वाक्यभेदाशयेन यस्त्वित्यनेनानुभाष्य यदीत्यनेन चानुपादेयत्वाज्जा-
तेर्ब्राह्मणादिश्चेदादधीतेवेत्यर्थान्निमित्तत्वावगमे ऽप्यप्रवृत्तप्रवर्त्तना-
त्मकत्वेनेदानीं कुर्वीतेत्यस्य विध्यर्थस्य कादाचित्कत्वात्कादाचित्के-
नैव निमित्तेनान्वयावगतेर्नित्यत्वेन जातेर्निमित्तत्वायोगात्कर्तृसं-
ख्यासामानाधिकरण्यात्कर्तृतयैवान्वयावगतेः कर्तुश्चानुद्देश्यत्वात्
प्रत्युद्देश्यं वाक्यसमाप्तिर्न प्रत्युद्देश्यवाक्यपरिसमाप्तिलक्षणवाक्य-
भेदापत्तिरित्याशयेन परिहृत्याधिकरणार्थोपसंहारार्थम् * तस्मा-
दित्युक्तम् * तत्सर्वं सङ्क्षिप्य व्याचष्टे * कर्त्रिति * ब्राह्मणादि-
जातिनिमित्ततया कर्तृत्वापादनार्थत्वेनाप्राधान्यद्योतनार्थं कर्तृशब्द
विशिष्टशब्दो नैकार्थत्वनिरासार्थः। निमित्ताभावे ऽनुष्ठितस्यापि क-
र्मणो नैष्फल्यापत्तेस्तस्यापि क्रियोपकारित्वात् भाष्ये गुणत्वोक्त्यर्थ-
विरोधः निमित्तस्याविधेयत्वे ऽव्यवच्छेदकत्वात्फलसंस्कार्यवद्विधे-
यविशेषणत्वाविरोधः ।

॥ दाक्षायणादीनां गुणताधिकरणम् ॥ ४॥

अयनेषु चोदनान्तरं सञ्ज्ञोपबन्धात् ॥ ५ ॥

सन्दिग्धविधेयत्वार्थस्य रथन्तरसामादिशब्दस्य कस्य निमित्तार्थत्वेनाविधेयार्थत्वादभेदकत्वं कस्य वा तद्योगेन विधेयार्थत्वात् भेदकतेति चिन्तिते ऽधुना दाक्षायणादिशब्दस्य गुणविधिनामधेयत्वं सन्देहाद्विधेयाविधेयार्थतया सन्दिग्धस्याविधेयार्थत्वे ऽपि संज्ञातो ऽभ्यासात्प्रकरणान्तराद्वा भेदमाशङ्क्य विधेयार्थत्वाद् गुणफलान्वयावगतेरभेदाभिधानात्सङ्गतिसन्देहतद्धेतूनस्पष्टत्वादुपेक्ष्य दध्नेन्द्रियकामाधिकरणेनैव दाक्षायणादीनामपि गुणानां फलान्वयेनाभेदकत्वसिद्धेः पौनरुक्त्या शङ्कां परिहरन्संज्ञया भेदशङ्कार्थमाद्यसूत्रं व्याचष्टे * युक्तमिति * तृतीयान्तत्वाविशेषे ऽपि निरूढानिरूढत्वविशेषात्सामानाधिकरण्यवैयधिकरण्यविशेषोपपादनार्थम् * न चेत्युक्तम् * कर्मान्तरमित्यनेन चोदनाशब्दश्चोद्यतइति व्युत्पत्त्या कर्मवाचितया व्याख्यातः । साकम्प्रस्थाय्यादीनामयनत्वाभावे ऽपि तुल्यन्यायत्वादुदाहरणत्वाविरोधः ।

अगुणाच्च कर्मचोदना ॥ ६ ॥

न चेति भाष्येणाभ्यासेन भेदशङ्कार्थतया एतत्सूत्रं व्याख्यायापि चेत्यनेन गुणोपबन्धे ऽपि दाक्षायणसंक्रमणलक्षणयोर्गुणयोर्थविशेषणत्वेन समासपदोपात्तयोः निष्कृष्य विध्ययोगादाग्नेयमष्टाकपालं निर्वपेद्रुक्काम इतिवत्फले गुणविशिष्टकर्मविध्यापत्तेः * कर्मान्तरत्वसिद्धिरित्युक्तम् * तत्सूत्रानारूढत्वादयुक्तमाशङ्क्य चशब्दसूचिताभ्युपेत्यवादार्थत्वेनोपपादयितुमाह * विधीति * गुणानुबन्धे विधिशक्त्युत्तारणस्यानाशङ्क्यत्वात् गुणोपबन्धे ऽपीत्यध्याहारेण योज्यम् ।

समाप्तं च फले वाक्यम् ॥ ७ ॥

अनुपादेयान्वयात्प्रत्यभिज्ञायाश्च संज्ञान्तरान्वयेन गुणान्तरान्वयेन वा तिरोधानात् प्रकरणान्तरेण भेदशङ्कार्थतयैतत्सूत्रं व्याचष्टे * फलस्येति *

विकारो वा प्रकरणात् ॥ ८ ॥

प्रयोगान्यथात्वलक्षणो गुणोपनयनादिवाक्येषु विधीयते न कर्मान्तरमिति विकारशब्देन सिद्धान्ते प्रतिज्ञाते दाक्षायणसंक्रमणरूपयोर्गुणयोर्निष्कृष्य विध्ययोगात्तद्विशिष्टकर्मविध्यापत्तेः । कर्मान्तरत्वापरिहारमाशङ्क्य कर्मविध्यभ्युपगमे ऽपि विधिश्रुतेः स्व-

१ गुणायानादिवाक्येष्विति २ पु० पा०

रूपतात्पर्यभावेनाभेदकत्वाच्छ्रुत्यविरोधेन सन्निधानेनाभेदावगत्य-
भिधानार्थतया प्रकरणादिति सूत्रावयवं व्याख्यातुमाह * सत्यपी-
ति * विधिश्रुतेः स्वरूपतात्पर्याभावेनाविरोधमेवोपपादयति *
६०१।१ दध्यादिवच्चेति * दध्यादिवत्कर्मव्यतिरिक्तस्य दाक्षायणादिसञ्ज्ञ-
कस्य गुणस्याप्रसिद्धत्वादविधेयत्वाशङ्कानिरासार्थतयैनमेव सूत्राव-
यवं न चेतिवार्त्तिकावयवोक्तशङ्कानुभाषणपूर्वकं व्याचष्टे * य-
द्विवति * यथोक्त्यादेर्गुणस्यालौकिकस्यापि प्राकरणिकवाक्यान्त-
रालोचनात्सोमयागाभ्यासविशेषरूपतया प्रसिद्धेः फले विध्युपप-
त्तिस्तथा पौर्णमास्यौ यजेत द्वे अमावास्ये सह कुम्भीभिरभिक्रामन्
इत्यादिप्राकरणिकवाक्यान्तरालोचनेनावृत्ति, सहप्रस्थानादिरूपतया
दाक्षायणसाकम्प्रस्थाय्यादिगुणप्रसिद्धेः फले विध्युपपत्तिरित्यर्थः ।
एतदेव विवृणोति * एवमिति * वाक्यान्तराच्च साकम्प्रस्थाय्या-
दिशब्दस्य गुणवाचित्वप्रसिद्धौ दध्यादिवद्यागप्रयोग परिच्छिन्दता
सह प्रस्थानादिना फलं भावयेदिति वैयधिकरण्येन धात्वन्वया-
त्फलान्वयोपपत्तिरित्याह * दध्यादिवच्चेति * नन्वेवमपि दाक्षा-
यणादेः समासाद्यज्ञसामानाधिकरण्यावगतेर्दध्यादिवैलक्षण्यं भवि-
ष्यतीत्याशङ्क्याह * किं चेति * ये ऽपि दाक्षायणादयः सामाना-
धिकरण्येनैव प्रतीयन्ते ते ऽपि दाक्षायणादिना गुणेन यागप्रयोगं
परिच्छिन्दता फलं भावयेदिति वैयधिकरण्येन धात्वन्वयाद्दध्यादे-
रविलक्षणा इत्यप्यर्थसूचनार्थः किं च शब्दः । कथं सामानाधिकर-
ण्येन प्रतीयमानानां दध्याद्यवैलक्षण्यमित्याशङ्क्य यज्ञावस्थाविशेष-
रूपत्वलक्षणयज्ञप्रत्यासत्तिनिमित्तौपचारिकता दाक्षायणेन यजेतेति
सामानाधिकरण्यप्रतीतेरुक्तसिद्धान्तमुपसंहरति * तस्मादिति *
एवं हीति भाष्योक्तं प्रकरणादिति सूत्रावयवव्याख्यातुमनुसन्धत्ते *
एवं चेति * ननु गुणस्य फलवत्त्वं कथं भावनाग्रहात्प्रकरणानुग्रहो-
क्तिरयुक्तेत्याशङ्क्याह * यद्यपीति *

लिङ्गदर्शनाच्च ॥ ९ ॥

किमत्राभेदलिङ्गमित्यपेक्षायां पञ्चदशपर्वसंख्यया त्रिंशद्पर्वसं-
ख्यात्मकसम्पत्पूरणं द्वे पौर्णमास्यौ यजेत द्वे अमावास्ये इति पौर्ण-
मास्यमावास्याकीर्तनं चेति लिङ्गद्वयमाह * सम्पादिति * सम्प-
त्पूरणस्य लिङ्गत्वमुपपादयति * न हीति * ननु कर्मान्तरत्वे ऽप्य-
तिदेशप्राप्तत्रिंशद्पर्वसंख्यास्थाने पञ्चदशपर्वसंख्याविधानात्तत्सम्प-
त्करणोक्तिरुपपत्स्यत इत्याशङ्क्याह * न चेति * यावज्जीवपक्षवाग्नि-

शाकृर्षपक्षस्याप्यावश्यकत्वाक्षेपकत्वेन नियमरूपत्वात्तस्य च कर्म-
णस्तत्प्रवृत्तित्वात्फलनियमकर्तृसमुदायस्यानन्वयस्तद्बन्धनत्वादि-
त्यष्टमाधिकरणे ऽतिदेशानिषेधाच्च कर्मान्तरे सम्पत्पूरणोपपत्तिरि-
त्याशयः । ननु कर्मान्तरे सम्पत्पूरणानुपपत्तावपि दाक्षायणारब्धक-
र्मान्तरयाजित्वेन निमित्तेन दर्शपूर्णमासयोरेव पञ्चदशवर्षत्वविधा-
नात्रिंशत्पूरणोक्तिरुपपत्स्यतइत्याशङ्क्याह ॥ न चेति ॥ कर्मान्त-
रत्वे दाक्षायणयाजित्वस्य दर्शपूर्णमाससम्बन्धाभावेनावर्त्तमानयो-
र्दर्शपूर्णमासयोः पञ्चदशभिस्त्रिंशत्सम्पत्त्ययोगात्पञ्चदशैव वर्षाणि
दर्शपूर्णमासाभ्यां यजेतेति वाक्यार्थो न युज्येतेत्यर्थः । पौर्णमास्यमा-
वास्यासङ्कीर्त्तनस्य लिङ्गत्वमुपपादयति ॥ द्वे हीति ॥

गुणात्सञ्ज्ञोपबन्धः ॥ १० ॥

यः सञ्ज्ञोपबन्धो भेदहेतुत्वेनोक्तः सगुणवाचित्वेन कर्मस-
ञ्ज्ञात्वाभावान्न कर्मभेदक इतिसूत्रेणोक्तं पयसा प्रवर्ग्यं चरन्ति पय-
सा दाक्षायणयज्ञइत्यादौ कर्मनामप्रवर्ग्यादिसाहचर्याद्दाक्षायणस्यापि
कर्मनामत्वमाशङ्क्यान्यत्र कर्मसञ्ज्ञात्वे व्युत्पत्तिसंयोगाभावाच्च भे-
दकतास्तीत्याह ॥ उत्पत्तीति ॥ कथमुत्पत्तिः संयोगावगतिरित्या- ६०२।१
शङ्क्य पूर्वकर्मानन्वयो ज्ञापकत्वेनोक्तः । प्रस्तूयमानवाक्यार्थपशब्द-
प्रकारस्य प्रक्रमस्य पूर्वानन्वयहेतोरभावात्पयसा दाक्षायणयज्ञ इत्या-
दिसञ्ज्ञा नोत्पत्तियुक्तेत्यर्थः । गुणवाचिनो ऽपि दाक्षायणादिशब्दस्य
पशुसोमादिशब्दवत् लक्षणया क चित्कर्मसञ्ज्ञात्वाविरोधः दाक्षा-
यणयज्ञेन यजेतेत्यादौ तु दाक्षायणादिशब्दो गुणवाचित्वेन सञ्ज्ञा-
त्वाभावादेव न भिनत्तीति सूत्रार्थमनुसन्धत्ते ॥ सम्भवति चेति ॥
एतदेवोपपादयति ॥ दाक्षायणेति ॥ द्वे हि पौर्णमास्यौ यजेतेति
वाक्यान्तरादावृत्तिवाच्ययनशब्दयोगाच्च दाक्षायणशब्दस्याभ्यास-
वाचित्वप्रतीतेस्तस्य च यज्ञाश्रितत्वादौपचारिकयज्ञशब्दसामाना-
धिकरण्योपपत्तेर्न सञ्ज्ञात्वं कल्पनीयमित्याशयः । दक्षस्येति भाष्यो-
क्तामवयवप्रसिद्धिं विवृणोति ॥ दक्ष इति चेति ॥ ऋत्विक्कर्तृ-
का प्रयोगावृत्तिरयनशब्दवाच्या नार्त्विजामेवावृत्तिरितिसूचनार्थः प्र-
योगशब्दः।तथेति भाष्योक्तां साकम्प्रस्थाय्यशब्दस्य गुणवाचितां वि-
वृणोति ॥ साकम्प्रस्थाय्ये ऽपीति ॥ साकम्प्रस्थाय्यसञ्ज्ञके प्रयोगे
सायम्प्रातर्दोहकुम्भीभ्यां सह प्रस्थानात्सहप्रस्थानलक्षणगुणयोगा-
त्साकम्प्रस्थाय्यशब्देनासौ प्रयोगो ऽभिधीयतइत्यर्थः । शक्यते चेदि-
ति भाष्योक्तं गुणादिति सूत्रावयवतात्पर्यं विवृणोति ॥तस्मादिति॥

समाप्तिराविशिष्टा ॥ ११ ॥

फले वाक्यस्य पर्यवसानाख्या समाप्तिर्यानुपादेयफलान्वयेन कर्मणो विधेयत्वाद्भेदासिद्ध्यर्थमुक्ता सा गुणफलान्वयविधाने ऽप्य-विशिष्टत्वेन कर्मविध्यनापादकत्वान्न भेदं साधयतीति सूत्रतात्पर्य-माह * यद्यपीति * अविशिष्टत्वं विवृणोति * यथैव हीति * नन्वविशेषे सति कथं गुणस्यैव विधिर्न कर्मण इति निश्चीयते ऽत आह * इति सन्देह इति * प्रयोजनं पूर्वपक्षे सौर्यष्ट्यादिवद्दर्शपू-र्णमासप्रयोगाद् बहिर्दाक्षायणयज्ञप्रयोगः सिद्धान्ते दर्शपूर्णमासयो-रेवावृत्त्या प्रयोगः ॥

॥ अथ द्रव्यदेवतायुक्तानां यागान्तरताधिकरणम् ॥ ५ ॥

संस्कारश्चाप्रकरणे अकर्मशब्दत्वात् ॥ १२ ॥

विषयाविवेकार्थं प्रकरणशब्दव्याख्यार्थमनारभ्येति भाष्यं किं-चिदनारभ्येत्यन्वयं दर्शयन् व्याचष्टे * न कस्य चिदपीति * इह संस्कारश्चेति चशब्देन विकारो वेति पूर्वाधिकरणासिद्धान्तसूत्रस्थ-वाशब्दोक्ता कर्मान्तरत्वानुकर्षणात् यावदुक्तं चेति वाशब्देन तन्नि-वृत्त्या कर्मान्तरत्वाभिधानात् भेदाभेदविचारो यावदुक्तं यजति-स्त्विातिसूत्रावयवाभ्यां च यावच्छ्रुतयजिमत्त्वविचार इति यावदु-क्तसूत्रेणाद्यविचारे सिद्धान्तस्य द्वितीये च पूर्वपक्षस्यावृत्त्याभिधा-नाद्विचारद्वयं कृतं तत्राद्यवत् द्वितीयविचारे ऽपि देवतापदवत्फल-पदमनपेक्ष्यापि सिद्धान्तस्य वक्तुं शक्यत्वादकर्मान्तरत्वोपपादित-योक्तसंस्कारत्वनिरासार्थं प्रधानकर्मत्वसूचना यजतिसूत्रे फलग्रह-णे न कर्मान्तरत्वसिद्ध्यर्थं यागत्वसिद्ध्यर्थं वेति सूचयितुं पदद्वय-मात्रोदाहरणं किं दार्शपौर्णमासिके यदा न प्रकृतिमिति भाष्याभ्यां विचारद्वयं क्रमेणोक्तमप्याद्यविचारे ऽनुवादायोगात्कर्मणो विधे-यत्वेन भेदोक्तेर्लक्षणासङ्गतावपि द्रव्यदेवतासंयोगलक्षणस्य गुणस्य पूर्वकर्मसंयोगानर्हत्वाभावेनाभेदकत्वाद् गुणप्रकरणासङ्गतो द्वितीय-विचारे द्रव्यदेवतासंयोगलक्षणस्य गुणस्य यागरूपे कर्मण्यनिवे-शेन तद्भिन्नयागरूपबोधकत्वाद् गुणप्रकरणसङ्गत्युपपत्तेस्तल्लक्षणत-याद्यस्य सङ्गतिसूचनायैकहेलया विचारद्वयमाह * तत्रेति * यदा कर्मान्तरे तदा किं यावच्छ्रुते निर्वापालम्भनमात्ररूपे यागरूपे वेत्यर्थः । शब्दवाच्यत्वं विना यागस्यान्वयासिद्धेः यजेरपि क-ल्पनीयत्वसूचनार्थं यजिवाच्यत्वाविवक्षया * यजिमती इत्युक्तम् *

अनारभ्याधीतत्वोक्तेः प्रयोजनचतुष्टयमाह * तत्रेति * प्रश्नपूर्वं
संशयबीजार्थत्वं तावद्विवृणोति *कथमिति* दार्शपौर्णमासिकावाल- ६०३।१
म्भनिर्वापौ प्रकृत्येमावालम्भनिर्वापौ श्रूयेयातामित्याद्यावृत्त्या योज्य-
म् । अनारभ्याधीतत्वेन पूर्वपक्षवचनव्यक्त्ययोगात्सन्देहानुपपत्ति-
माशङ्क्य यदाहवनीये जुहोतीत्यादिवद् दूरस्थयोरप्यालम्भनिर्वापयोर्वै-
दिकत्वसाम्येन बुद्धिस्थतया ऽनुवादसम्भवात्पूर्वपक्षवचनव्यक्त्युप-
पादनाय * अनारभ्यवादे त्वित्युक्तम् * अपौनरुक्त्यार्थत्वं विवरीतुं
केन पौनरुक्त्याशङ्केत्यपेक्षायां तावदाह *तथेति * अग्नीषोमीयवा-
क्ये ऽप्येतदधिकरणसिद्धयजिवाच्यकर्मवाचित्वाङ्गीकरणेन पशु-
सोमाधिकरणे विध्यनुवादविचारात्पौनरुक्त्यनुपपत्तावप्युभयत्र
सिद्धान्ते यागविध्यभिधानात्, आपातमात्रात्पौनरुक्त्यभ्रान्तिरिति-
सूचनार्थः प्रायशब्दः । तदेव विवृणोति * तत्रेवेति * गतप्रायत्वप्र-
तिभाने सति यद्याजिमत्कर्मविधानत्वं पुनरुपन्यस्यते तदनारभ्याधी-
तत्वेन प्रकृतयागाभावात्प्रकृतयागानुवादाशङ्कायामसत्यां पशुसो-
माधिकरणपूर्वपक्षस्यात्राभावात्कथं गतप्रायं स्यादिति मत्वेत्युक्ते त-
दीयसिद्धान्तेनैव तर्हि यजिमत्कर्मविधानत्वसिद्धेरपरिहार्यौ
गतप्रायतेत्याशङ्क्य * श्वेतादेश्चेत्युक्तम्* औत्पत्तिकहृदयादिद्रव्यसं-
युक्ते कर्मणि पश्वाख्यद्रव्यान्तरविध्यनुपपत्तिस्तत्र सिद्धान्तहेतुर्गुण-
स्य तु द्रव्ययुक्ते ऽपि कर्मणि विध्युपपत्तिरिति सिद्धान्तहेतुरपि ना-
स्तीत्याशयः । प्रथमपक्षपरिग्रहार्थत्वं विवृणोति * पूर्वपक्षश्चेति *
प्रथमपक्षनिरासार्थत्वं विवृणोति * तन्निराकरणमपि चेति *
आलम्भनिर्वापशब्दयोर्गुणविधिसामानाधिकरण्यायोगमाशङ्क्याल-
म्भनिर्वापविषयलक्षणार्थावालम्भनिर्वापशब्दाविति व्याख्यातुमाह
* गुणेति * दार्शपौर्णमासिकयोरालम्भनिर्वापयोः श्वेतचर्वोर्गुण-
योर्विधी इत्युक्ते निर्वापालम्भयोर्लोकवेदसाधारण्यात्कथं विशेषा-
वधारणेत्याशङ्क्य वैदिकस्य गुणविधेर्विषयापेक्षायां वैदिकत्वसामा-
न्येन बुद्धिस्थत्वाद्वैदिकयोरेवालम्भनिर्वापयोर्विषयत्वावगतेः प्रकृतौ
वा द्विरुक्तत्वादित्यनेन न्यायेन प्राकृतालम्भनिर्वापविषयतै-
वावधार्यतइति सूचनार्थं वैदिकेन गुणविधिनैक्यं वै-
दिकयोर्निर्वापालम्भयोरुपचरितमित्याशयः । आलम्भविषयो निर्वा-
पविषयश्च यो गुणविधिः स दार्शपौर्णमासिकालम्भनिर्वापविषय इति
भाष्यार्थो ऽनेनोक्तः । किं तावदित्यादिभाष्येणाकर्मान्तरोक्त्यर्थतया ए-
तत्सूत्रं व्याख्यातं तत्कथमकर्मान्तरत्वे योज्यमित्यपेक्षायां चशब्देन
विकारो वेति वाशब्दोक्तो कर्मान्तरत्वातिदेशादालम्भो निर्वापश्चाक-

र्मान्तरं विधिशब्दस्य गुणसञ्चरितत्वेन कर्मविषयत्वाभावादित्येवं योजयितुमाह * किं तावदिति * अनन्तरसङ्गतिरप्यपवादतयानेन सूचिता । निर्वापालम्भयोश्च संस्कारत्वेन प्रसिद्धत्वात्कर्मान्तरत्वे चान्यत्र विनियुक्तसंस्कार्याप्रतीतेः संस्कारत्वायोगादकर्मान्तरतावगम्यतइति हेत्वन्तरोक्त्यर्थं. संस्कारशब्दो प्रकरणे तु तद्धर्मस्ततो विशेषादिति तृतीयाधिकरणे सुवर्णं हिरण्यं धार्यमित्येनस्तुल्यतयालम्भनिर्वापयोरपि संस्कारत्वनिषेधेनासिद्धत्वं मत्वा न व्याख्यानः निर्वापालम्भोपलक्षणार्थताद्वारा[1] संस्कारशब्दस्य तदुदाहरणेनैव व्याख्या सूचिता । क्व वाक्ये श्रूयमाणोऽसौ निर्वापालम्भात्मकः संस्कारो गुणविधिरित्यधिकरणविषयभूतालम्भनिर्वापविशेषापेक्षायां तदवधारणार्थत्वेनाप्रकरणशब्दं व्याचष्टे * क्व चेति * यद्वा अनारभ्याधीतत्वेनायनवैलक्षण्यात्कथं निर्वापालम्भश्रुत्योर्गुणार्थतेत्याशङ्कानिरासार्थो प्रकरणशब्द इत्यन्यथा व्याचष्टे * अथ वेति * यद्यप्यप्रकरणे श्रूयतइत्येनावता कारणेनालम्भो निर्वापश्चायनवैलक्षण्येन युक्तस्तथापि निर्वापालम्भाख्येन कर्मणा विधायकस्य गुणसञ्चरितत्वेनानवरोधाद् गुणार्थेवालम्भनिर्वापश्रुतिरित्यर्थः । यथा सिद्धशकटेष्वालम्भे प्राप्ते कथं श्वैत्यानुष्ठानमित्याशङ्क्य सिद्धाया अपीपायाश्चूर्णादिना श्वेतीकरणं शक्यमित्याह * दर्शेति * व्रीहिनिर्वापे कथमोदनाख्यस्य चरोर्निवेश इत्याशङ्क्य स्थालीवचनं चरुशब्दमङ्गीकृत्य मुख्यत्वाच्छ्रुतिवृत्तप्रातिपदिकाभ्युपगमेन द्वितीया सप्तम्यर्थे कल्प्या पञ्चशरावमोदनं निर्वपेदित्यादौ वा शरावादिशब्दस्य तत्परिमिते प्रयोगदर्शनाच्चरुशब्दस्यापि तत्परिमितलक्षणार्थत्वोपपत्तेर्यथा चरुपरिमिता व्रीहयो भवन्ति तथा चत्वारो मुष्टयः कार्या इत्यर्थाभ्युपगमाच्चोत्पत्तिशिष्टचतुर्मुष्टिपरिमाणाविरोधोपपत्तेः परिमितलक्षणार्थतया चरुश्रुत्यर्थस्यापि वाक्यार्थान्वयेनात्यन्ताबाधात्सप्तम्यर्थकल्पनायां तु द्वितीयार्थात्यन्तबाधापत्तेः प्रातिपदिकमेव लक्षणया व्याख्येयमिति द्वेधा परिहरति * निर्वापश्चेति * प्राप्ते कर्मण्यनेकार्थविधौ वाक्यभेदापत्तेः फले देवतापदानन्वयमाशङ्क्याह * भूतीति * ओषधिवनस्पतयोऽन्नं प्राणभृतोऽन्नादमिति प्राणभृतां च वनस्पतीन् प्रति भोक्तृत्वे श्रुते भोक्तृत्वरूपदेवतात्वावगमात्प्राणाख्यस्य वायोर्देवतात्वमुपचर्य वनस्पतीनां वायुदेवत्यत्वात्तत्प्रभवत्वेनैषाया वायुदेवत्यत्वानुवाद इत्यर्थः । वायुगुणस्पर्शवत्त्वाद्वा वनस्पतीनां वायुदेवत्यताभिप्रेत्य पूर्वपक्षमुपसंहरति * तस्मादिति *

---

१ उपलक्षणार्थत्वात्संस्कारशब्दस्येति २ पु० पा० ।

यावदुक्तं वा कर्मणः श्रुतिमूलत्वात् ॥ १३ ॥

यावदुक्तशब्देन प्रकृत्यनपेक्षोक्तेः प्राकृतालम्भनिर्वापविषय-
गुणविधित्वनिरासार्थतया न चेति भाष्येण सूत्रपूर्वार्द्धं व्याख्यायो-
त्तरार्द्धव्याख्यार्थं यदीत्यादिचरुश्चेत्यन्तं भाष्यं तात्पर्यतो व्याचष्टे *
यदि हीति * यद्यालम्भनिर्वापाविति यदि शब्दं हेत्वर्थेऽभ्युपे- ६०४।२
त्य यस्मादालम्भनिर्वापौ विधीयेते न तु प्राकृतौ तौ विहिताविति
भाष्यावयवेन कर्मणः श्रुतिमूलत्वादिति सूत्रावयवं व्याख्याय गु-
णसञ्चरितत्वाद्विध्योः कर्मविषयता न युक्तेत्याशङ्क्योत्सर्गतः समा-
नपदोपादानेनालम्भनिर्वापयोर्विधेयत्वावगमाद्यदि तौ प्रत्यभिज्ञा-
नाद्विधेयत्वं न सहेते ततो यावालम्भनिर्वापौ कर्त्तव्यावित्येवं प्राकृ-
तौ लक्षेते ततश्च तौ लक्षयित्वा श्वेतश्चरुश्च गुणो विधातव्यो भ-
वति प्रत्यभिज्ञानाभावात्त्वत्र तौ विधेयावेवेत्यध्याहारेण यदि न वि-
धीयेत इत्यादिभाष्यं व्याख्येयमित्याशयः । प्राप्ते कर्मणि गुणफलरू-
पानेकार्थविधौ वाक्यभेदापत्तेरपि गुणविधिता न युक्तेत्यभिधानार्थं
तौ चेत्यादिभिद्येतेत्यन्तं भाष्यमुत्तरसूत्रस्थफलशब्दसूचितार्थप्रति-
पादकं व्याख्यातुमाह*वायव्यमिति*तेन विनापि वाक्यभेदोपपत्तिरुपे-
क्षाहेतुः । कर्मान्तरत्वे तु वाक्यभेदो नास्तीति व्यतिरेकमाह*गुणेति*
अथ वेत्यादिभाष्यं वैदिकत्वसाम्येन बुद्धिस्थत्वस्य वैदिकालम्भनिर्वा-
पानुवादहेतुतया पूर्वपक्षिणेष्टत्वेन विधायकस्य तल्लक्षणार्थतयानिष्ट-
त्वादापाद्योत्तरार्थमिति सूचयितुमुपेक्ष्य तावद्व्याख्याते ऽर्थे सूत्रो-
त्तरार्द्धं योजयति * तेनेति * यावदुक्तमिति भाष्यगतदेव सूत्र-
मागूर्योत्तरविचारपूर्वपक्षे योजितं तदनुसन्धत्ते * अथ वेति *
ननु फलान्वयेनेह प्रधानकर्मणोर्विधेयत्वावसायान्निर्वापालम्भ-
योश्च संस्कारत्वप्रसिद्धेः प्राधान्यायोगात्प्राधान्यसिद्ध्यर्थं तत्रयो-
र्यं यज्यर्थाध्यवसानं भविष्यतीत्याशङ्क्याह * न चेति * अनेन
चोत्तरसूत्रस्थस्य फलशब्दस्य संस्कारनिरासार्थतापि सूचिता । ननु
प्राधान्यस्य यज्यर्थाकल्पकत्वे ऽपि वायव्यादिशब्दोक्तस्य देवता-
न्वयस्य यागं विनानुपपत्तेस्तत्कल्पकत्वं भविष्यतीत्याशङ्क्याह*वा-
यव्यादीति * आलम्भस्य स्पर्शवाचत्वविषयत्वात्सर्वेषामालभ्यद्र-
व्याणां स्पर्शगुणकवायुदेवत्यत्वे सवितुः प्रसवे निर्वपामीति च म-
न्त्रलिङ्गात्सर्वेषां निर्वापद्रव्याणां सवित्राख्यसूर्यदेवत्यता वक्तुं श-
क्येत्याशयः । एवं त्वग्नीषोमीयं पशुमालभेतेत्यादावपि वायव्य-
त्वापत्तेः सारस्वतं चरुं निर्वपेदित्यादौ च सौर्यत्वाग्नीषोमीयत्वा-

द्यनुवाद्यायोगेनाव्यापकत्वादशक्तेरपरितोषात्केन चिद्यजमानेन वायवे सङ्कल्पितस्य श्वेतस्यालम्भः सूर्यार्थं च सङ्कल्पितस्य चरोर्निर्वापः फलार्थं विधीयतइत्यन्यथा परिहरति * अथ चेति * आग्नेयमुपाकरोतीत्यादीनामपि यजिवाच्यकर्मवाचितालैव व्युत्पाद्येति सूचनायालम्भादिभिरिति बहुवचनम्। ननु देवतान्वयस्यापि श्वेत्यादिवद्विधेयत्वपरिग्रहे ऽतिगौरवं स्यादित्याशङ्क्याह * विशिष्टेति * परकीयस्य द्रव्यस्य क्रतौ विनियुक्तस्यान्यार्थे कर्मणि विनियोगानौचित्यनात्राप्यपरितोषाद्वायव्याद्युपदेशेन श्वेतादेर्भूत्याद्यर्थमालम्भादिकार्यमिति पूर्वपक्षिणो ऽभिमतं परिहारमाह * अथ वेति * ननु
३०८।१ यागं विना तद्भिनोक्तं देवतात्वं न सिद्ध्येदित्याशङ्क्याह * न चावश्यमिति * यागं विना देवतात्वानुपपत्तेरेतदधिकरणव्युत्पाद्यत्वात्नूद्देश्यत्वमात्रेण देवतात्वमत्रत्यः पूर्वपक्षी मन्यतइत्याशयः । एतदेवोपसंहरति * तस्मादिति * यजमानान्तरसङ्कल्पितव्यावृत्त्यर्थम् * यत्किं चिदित्युक्तम् * इति वाक्यार्थः यावदुक्तनोदनानुसारादवसीयतइत्यध्याहारेणेतिकरणो योज्यः । उपेक्षितं भाष्यं पूर्वपक्षभाष्यसङ्गतिपूर्वं व्याख्यातुमवतारयति * गुणेति * फलपदन्यागाभ्युपगमाद् गुणफलरूपानेकार्थान्वयाविधिलक्षणवाक्याभेदाभावे ऽपि सकृदुच्चरितस्य विधायकस्य विध्यनुवादवैरूप्यलक्षणवाक्यभेदापत्तिरपिशब्देन सूचिता।नन्वनारभ्यवादानां प्रकृत्यर्थत्वस्य तृतीये वक्ष्यमाणत्वाद्विहितत्वोपलक्षणं विनापि प्रकृत्यर्थत्वसिद्धेर्विधायकस्योपलक्षणोपक्षणित्वादाविधायकत्वोक्तिरयुक्तेत्याशङ्क्याह * तस्येति * यदि तु य आलम्भः कार्यः स श्वेतविशिष्टः कार्य इत्युपलक्षणार्थत्वं विधानार्थत्वं चेष्यते ततो वैरूप्यं स्यादित्यभिधानार्थमथेति भाष्यं व्याचष्टे * न हीति * यावतो ऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुःकपालान्निर्वपेदित्यत्र प्रतिगृह्णीयादित्यस्य विहितदानलक्षणार्थत्वं निर्वपेदित्यस्य च यागविध्यर्थत्वं भेदापादानाद्युक्तमिति वैलक्षण्यसूचनार्थं मिथःशब्दव्याख्यानार्थम् * सकृदित्युक्तम् * अथ धात्वर्थ इति भाष्येण धात्वर्थमात्रानुवादे ऽपि वैदिकत्वसामान्येन बुद्धिस्थत्वाद्विहितविषयत्वावगमे सत्यनारभ्यवादत्वात्प्रकृत्यर्थत्वसिद्धिरित्याशङ्क्य तथेत्यनेन यदाहवनीये जुहोतीत्यत्र होमस्य द्रव्यदेवतासाध्यत्वाद्देवतान्वयस्य चालौकिकत्वेन विध्येकगम्यत्वाद् द्रव्यदेवतयोश्चेहानुपदेशात्प्रकृतिविशेषानवगतेश्चातिदेशतो ऽप्यलाभादरूपत्वेन विधातुमशक्यत्वादनुवाद्यत्वावगतेरदृष्टार्थत्वेनाचालौकिकत्वाद् दूरस्थवैदिकहोमानुवादो गु-

क्तः । आलम्भस्य तु लोकवेदसाधारण्याल्लौकिके ऽपि च भोजनादौ वैदिकप्राङ्मुखत्वादिनियमदर्शनात्सामान्यश्रुत्या चालम्भमात्रस्य बुद्धिस्थस्यावैदिकत्वमात्रेण व्यावृत्त्यनुपपत्तेर्वैदिकाविषयत्वानवगमाच्च तद्वशेन प्रकृत्यर्थत्वासिद्धिरिति परिहृतं तद्व्याचष्टे * केवलेति * आनर्थक्यपरिहारार्थं लौकिकव्यावृत्तिर्भविष्यतीत्याशङ्कानिरासार्थत्वे प्रत्ययार्थ इति भाष्यं प्रत्ययार्थानुवादपक्ष एव प्राकृतालम्भानुवादो लभ्यते नान्यथेत्येवं साधारणत्वेन व्याख्यातुमाह * न चेति * अत इत्युपसंहारभाष्यं व्याचष्टे * तस्मादिति *

यजतिस्तु द्रव्यफलभोक्तृसंयोगादेतेषां कर्मसम्बन्धात् ॥ १४ ॥

यावदुक्तसूत्रस्याद्यपक्षनिरासार्थत्वात्तत्रैव प्राप्ते कर्मणि गुणफलान्वयविधौ वाक्यभेदसूचनार्थं संस्कारत्वनिराससूचनार्थं च फलपदे फलसंयोगाच्चेति प्रयोक्तव्ये द्रव्यदेवतयोर्यागकर्मणि सति सम्बन्धोपपत्तेः फलस्य च कर्मान्तरे प्रधानभूते सति सम्बन्धोपपत्तेर्यागो ऽयमपूर्वः प्रधानभूतो विधीयते न तु प्रकृते कर्मणि संस्कारके गुणविधिरित्यर्थत्रयस्य लघुना सूत्रेणोक्तिसम्भवे सूत्रगौरवस्यानाश्रयणीयत्वादिह सूत्रे फलपदं प्रयुक्तं फलसंयोगमात्रेण वाक्यभेदानापत्तेर्द्रव्यफलसंयोगस्य वाक्यभेदहेतुत्वसूचनार्थं मध्ये फलपदप्रयोगः सूक्तादेर्देवतासंयोगे ऽपि यागाकल्पनात् द्रव्यस्यैव देवतासंयोगो यागकल्पको नान्यस्येति सूचनार्थं फलशब्दव्यवहितस्यापि द्रव्यशब्दस्य भोक्तृशब्दान्वयो विवक्षितः देवतायाश्च भोक्तृत्वाभावे ऽपि स्तुतिभोक्तृलक्षणस्य देवतात्वस्य यागकल्पकत्वात्तद्व्यावृत्त्या त्यज्यमानहविरुद्देश्यत्वात्मकहविर्भोक्तृलक्षणस्य देवतात्वस्य यागकल्पकत्वसूचनार्थं भोक्तृशब्दः। अत्र भाष्यकृता द्रव्येति भाष्येण द्रव्यभोक्तृसंयोगं व्याख्याय फलसंयोगव्याख्यार्थम् * भूतीत्युक्तम् * ततस्तौ चेति भाष्येणानागतावेक्षणेन प्रागेव व्याख्यातत्वात्पुनरुक्तमाशङ्क्य दृष्टान्ततया व्याचष्टे * यथेति * समानपदोपात्तालम्भत्यागेन पदान्तरोपात्तद्रव्यदेवतान्वयविधानं न युक्तमित्याशयेन कथमिति भाष्येण पृष्ट्वा यदि हीत्यादिना प्रमादसमाम्नाय इति गम्येतेत्यन्तेन द्रव्यदेवतान्वयविधिरुपपादितस्तत्तात्पर्यतो व्याचष्टे * विधिस्तावदिति * नन्विति भाष्येण द्रव्यस्य देवतान्वयविधावपि धात्वर्थान्वयस्यापि प्रतीतस्य

त्यागायोगाद्विधेयत्वावश्यम्भावेन वाक्यभेदमाशङ्क्य न द्रव्यस्य देवतया धात्वर्थेन चान्वयो विधेयो येन वाक्यभेदः स्यात्किं तु भावनैव द्रव्यदेवताभ्यां धात्वर्थेन च विशिष्टा विधेया तस्याश्च श्रुत्या धात्वर्थविशिष्टत्वावगते पदान्तरसमभिव्याहाराद् द्रव्यदेवतासम्बन्धविषयत्वावगतेरनेककारकान्वयसहत्वाच्च सम्बन्धश्चेति सम्बन्धशक्ताया भावनाया वैशिष्ट्यं विनानुष्ठेयत्वायोगात्तद्विशिष्टाया एव बहुपदप्रतिपाद्यत्वेनैकपदमात्रेण नैराकाङ्क्ष्यायोगात् वाक्यभेदानापत्तिरित्यभिधानार्थं नेतीत्याद्युपपन्नमेकवाक्यत्वमित्यन्तं भाष्यमुपेक्ष्य एतेषामिति सूत्रावयवव्याख्यानार्थं न चेति भाष्यं
६७६॥१ व्याचष्टे * स चेति * त्यागं विनाप्युद्देशमात्रेण देवतान्वयोपपत्तेर्नान्यथानुपपत्त्या यागकल्पनेत्याशङ्कां नावश्यमिति पूर्वपक्षवार्त्तिकोक्तां परिहरति * न हीति * ब्राह्मणोद्देशेन पक्वे ऽप्यन्ने तदुद्देशेन त्यागं विना ब्राह्मणसम्बन्धाप्रसिद्धेरव्याप्रियमाणे ऽपि च तुभ्यमिदं न ममेति तदुद्देशेन त्यागे कृते तत्सम्बन्धप्रसिद्धेरन्वयव्यतिरेकाभ्यामुद्देशत्यागलक्षणैव क्रिया सम्बन्धापादिकावसीयत इत्याशयः। एतदेव विवृणोति * यदीति * यदपि केन चिद्यजमाने वाय्वाद्युद्देशेन त्यक्तस्यालम्भानुष्ठानं शङ्कितं तदप्यालम्भादेः फलान्वयेन प्रधानकर्मत्वावसायात्तदन्वयिनो वायव्यादिपदस्योपादेयार्थत्वावगतेर्देवतान्वयस्यानुष्ठानापाद्यत्वावगमादयुक्तमित्याह * न चेति * एतदेवोपसंहरति * तेनेति * तस्मादिति सिद्धान्तोपसंहारभाष्यं व्याचष्टे * अतश्चेति * कथं देवतात्वस्यानुष्ठानं सम्पाद्यते इत्यपेक्षायामाह * तथा चेति * द्रव्यविषया त्यागक्रिया देवताविषया चोद्देशक्रिया तयोः समुदायरूपैकवद्भावानिर्दिष्टं यजतिचोदनानुष्ठापयति देवतोद्देशद्रव्यत्यागसमुदाये तस्या लोके कृतार्थत्वप्रसिद्धेरिति चतुर्थाध्यायसूत्रार्थस्य टुप्टीकायां स्वयं वक्ष्यमाणत्वाद्देवतात्वस्य यूपादिवत्प्रागसिद्धेस्त्यज्यमानं द्रव्यं प्रत्युद्देशेनाग्न्यादिदेवतां कृत्वा द्रव्यं त्यजेदिति देवतोद्देशपूर्वकं द्रव्यत्यागात्मकयागप्रयोगस्वरूपकथनार्थेनानेन सूत्रेणानुष्ठानापाद्यता देवतात्वस्योक्तेत्याशयः। लक्षणार्थत्वस्य बृहन्मध्यमटीकयोर्टुप्टीकायां च निषेधात्प्रयोगलक्षणाभिप्रायस्तत्रत्यभाष्ये लक्षणशब्द इति सूचनार्थम् *लक्षणं करिष्यतीत्युक्तम् * विधिशब्दादरो ऽप्यनुष्ठानापाद्यत्वहेतुक एवान्यथा पर्यायेणाप्यग्न्याद्युद्देशेन द्रव्यस्याग्न्यादिदेवत्वसिद्धेस्तावन्मात्रस्य चाग्नेयादिशास्त्रार्थत्वात्तदादरो निष्प्रमाणकः स्यात्। ननु द्रव्यदेवताविशिष्टयागविध्यभ्यु-

पगमे ऽपि श्रुतस्यालम्भादेरप्राप्तत्वेनानुवादायोगात्तस्यापि विधेय-
त्वावगतेर्धातुसम्बन्धाधिकारविहितप्रत्ययाभावाच्च क्रियाद्वयान्व-
याप्रतीतेरनेकार्थविधिलक्षणो वाक्यभेदः स्यादित्याशङ्क्याह *त-
त्रश्चेति * कथं तर्हि भाष्यकृता पुरुषप्रयत्नस्यालम्भविशिष्टतायाः
समानपदोपादानलक्षणया श्रुत्यावगतेर्वाक्याच्च द्रव्यदेवताविष-
यत्वावगतेर्वाक्यभेदं विनापि क्रियाद्वयविध्युपपत्तिरुक्तेत्याशङ्क्याह
* तत्रेति * सकृदुच्चारितस्य विधायकस्यानेकार्थविधिशक्त्यभ्युप-
गमादावृत्तिलक्षणवाक्यभेदपरिहारे ऽप्येकस्यानेकार्थे तात्पर्यात्
गौरवेण लक्षणवाक्यभेदो ऽपरिहार्य इति सूचनार्थो गौरवशब्दः ।

लिङ्गदर्शनाच्च ॥ १५ ॥

लिङ्गत्वमुपपादयति * सौमारौद्रमिति * यजतिशब्देन वि-
नाप्युक्ते गुणविधिपरे वाक्ये यजतिनानुवादः सौमारौद्रवाक्ये या-
गविध्यभावे न युज्यतइत्याशयः । ननु पशुसोमाधिकरणव्युत्पा-
दितयजिवाच्यकर्मविधावप्यग्नीषोमीयवाक्यन्यायेनेहापि यजिवा-
च्यकर्मविधायित्वसिद्धेः पुनरुक्तमेतदधिकरणमित्याशङ्क्याह *
अग्नीषोमीये ऽपि चेति *

विशये प्रायदर्शनात् ॥ १६ ॥

अपरिपूर्णार्थस्यापि सूत्रस्य पटुव्याख्यानात्परिपूर्णार्थत्वोपप-
त्तेरगमकत्वाशङ्का न युक्तेत्याशङ्क्य सूत्रार्थस्य वृत्तिकारादिभिर्व्याख्ये-
यत्वात्सूत्रानुक्तो ऽर्थो वृत्तिकारादिभिर्व्याख्यातो ऽप्यग्राह्य इति ये
वदन्ति तान्प्रत्यस्य सूत्रस्यागमकतापत्तिरुच्यतइत्याह * सूत्रेष्वेव
हीति * वृत्तिवार्त्तिकयोर्यत्सर्वमुच्यते तत्सर्वं सूत्रारूढं चेत्ततो
ग्राह्यं नान्यथेति श्लोकार्थः किमुच्यतइत्यपेक्षायामाह * न किं चि-
दिति * विषयशब्देनोदाहरणसाध्ययोर्द्वयोरपि परिग्रहान्न विजा-
नीम इत्यन्तं भाष्यमनेन व्याख्यातं पूर्वाधिकरणस्थसंस्कारशब्दानु-
षङ्गेण वत्सालम्भस्योदाहरणत्वज्ञानं यावदुक्तशब्दानुषङ्गेण च सा-
ध्यज्ञानं भविष्यतीत्याशङ्क्य वत्सालम्भस्याग्निहोत्रप्रकरणाधीतत्वे-
नानारभ्याधीतसंस्कारविषयेण संस्कारशब्देनोपादानायोगाद्यजिम-
त्त्वसाध्यव्यवहितस्य च यावदुक्तत्वसाध्यस्यानुषङ्गायोगात्तत्परिहा-
रार्थं प्रकृतमिति भाष्यमुपलक्षणार्थत्वेन व्याचष्टे * न चेति * ६०७।१
तदेतदित्यागमकत्वोपसंहारभाष्यमगमकत्वोपन्यासस्य वृत्तिकाराद्यु-
क्तार्थाग्राह्यत्वशङ्कानिवृत्त्यर्थत्वाविवरणार्थं सूत्रानुक्तमपि प्रतिज्ञाद्य-

यश्यं वृत्तिकारादिभिर्वाच्यमित्यभिधानार्थेनैतावादिति भाष्येण सह
व्याचष्टे *तस्मादिति*श्रुतार्थापत्त्या प्रतिज्ञाप्यध्याहारस्य सूत्रकारा-
भिप्रेततावसीयतइत्याशयः।नन्वध्याहारादिभिः सूत्रव्याख्या(जिज्ञासा
सूत्रारम्भभाष्ये)शास्त्रादौ निषिद्धेत्याशङ्क्याह*सत्येव चेति* ननु सा-
मान्यतः किंचित्प्रतिज्ञाद्यध्याहार्यमित्यर्थापत्त्यावगमे सूत्रकाराभिप्रेत-
स्य तद्विशेषस्य निर्द्धारयितुमशक्यत्वात्कुत्सूत्रत्वं स्यादित्याशङ्कानिरासा
र्थं वृत्तिकारेति भाष्यं व्याचष्टे*सर्वथेति*युक्तिगम्ये ऽर्थे पुरुषविशेष-
स्यानादरणीयत्वाद्युक्तियुक्तं यद्वृत्तिकारादिभिरुक्तं तत्सूत्रकारानु-
पात्तत्वान्न ग्राह्यमित्यसदाग्रहो न कार्य इत्याशयः । एवमेव वार्त्ति-
ककाराद्युक्तमपि वृत्तिकारानुपात्तत्वमात्रेणाग्राह्यं न भवतीत्यतिदे-
शार्थमिदम् * वृत्तिकारणेत्युक्तम् * सूत्रकारानुक्तस्याप्यर्थस्य
वृत्तिकाराद्युक्तस्य ग्राह्यत्वप्रदर्शनार्थैतत्भाष्यमित्यस्माभिर्यदुक्तं त-
त्पूर्वे ऽपि व्याख्यातारो वर्णयन्ति न त्वस्माभिः स्वोत्प्रेक्षामात्रेणोक्त-
मित्याह * एतत्प्रदर्शनार्थमिति * वर्णयतीत्येकवचनपाठे
ऽपि एतत्प्रदर्शनार्थं भाष्यकृत्सूत्रस्यागमवत्त्वं वृत्तिकारव्या-
ख्यानं च वर्णयतीत्युपसंहारार्थत्वेन व्याख्येयम् । वृत्तिकारो-
क्तोदाहरणसन्देहप्रदर्शनार्थमत्रेति भाष्यं व्याचष्टे * तदि-
ति * न केवलं वृत्तिकारवचनादिमावुदाहरणसन्देहौ ज्ञायेते किं तु
पूपासीति वत्समुपासृजतीति वत्सालम्भे पूपशब्दवन्मन्त्रविधाना-
द्यागकल्पकदेवतासंयोगसन्देहवाचिविषयशब्दपर्यालोचनयापीत्य-
भिधानार्थेनोपपद्यते चेति भाष्येणोक्तस्य युक्तियुक्तत्वस्य सूचना-
र्थः किलशब्दः । ननु वृत्तिकारेण द्वेधा सन्देहस्योपन्यस्तत्वे क-
स्मात् भाष्यकृता ऽग्नीषोमीयवत्सविधिपक्ष सन्देहकाले नोपन्य-
स्त इत्याशङ्क्यातितुच्छत्वमनुपन्यासकारणमाह * तत्रेति * लिङः
प्राकृताग्नीषोमीयपश्वालम्भविशेषणत्वाभ्युपगमे विधायकाभावा-
पत्तेरित्याशयः । नन्वेवं सति यागकल्पकदेवतासंयोगाभावेन यजि-
मदभिधानपक्षो ऽपि तुच्छत्वान्नोपन्यसनीय इत्याशङ्क्याह * तेनैव
त्विति * सूक्तवाकन्यायेन पूपासीति मन्त्रस्य श्रुत्या करणत्वेन वि-
नियुक्तस्य देवताकल्पनद्वारा यागकल्पकत्वबुद्धिर्भविष्यतीति तेनैक-
द्रव्यदेवतासंयोगप्रक्रमेणेति प्रकारवाचिना प्रक्रमशब्देनोक्तं तत्र
चेति भाष्येण वृत्तिकारोक्तं पूर्वपक्षमुपन्यस्य समीपधारणवाचिनो-
पासृजतिना तदाक्षिप्तालम्भक्षणहेत्वभावात्सान्निहितवाच्यसिशब्द-
सामानाधिकरण्याच्च पूपशब्दस्य पुष्टियोगेन वत्सवाचित्वप्रतीतेर्द्वे-

१ अय पा० २ पु० ना० ।

वताकल्पकत्वाभावाद्धेत्वभावमाशङ्क्येदं त्वित्यनेन देवतासंयोगप्रत्युदाहरणार्थत्वात्सूत्रस्य न पूर्वपक्षोपपादने यतितव्यमित्युक्ते पूर्वपक्षोपन्यासस्तर्ह्यनर्थक इत्याशङ्क्य तथापीत्यादिनोपन्यस्यति स्मेत्यन्तेन मन्दाशङ्कानिवृत्त्यर्थतोपन्यासस्योक्ता तत्सर्वं व्याचष्टे * तत्रेति * निरासमात्रं तर्हि कार्यं नोपन्यास इत्याशङ्कानिरासार्थत्वेनातस्तामिति भाष्यावयवं व्याचष्टे * यो नामेति * सामान्यतो दृष्टोक्त्यर्थमालभतिरितिभाष्यम्।अग्नीषोमीयं पशुमालभेतेत्यादिवाक्यस्थस्याप्यालभतेर्यजिवाच्यकर्मवाचित्वाभावात्साध्यविकलदृष्टान्तत्वापत्तेरयुक्तमाशङ्क्य द्वेधा समाधत्ते * तत्रेति * धातूनामनेकार्थत्वात्स्त्रीसंयुक्तस्य गमेर्मैथुनवाचित्ववत्स्पर्शवाचिनो ऽप्यालभते. प्राणिसंयुक्तस्य यागवाचित्वकल्पना न विरुद्धेति यथाश्रुतभाष्यसमर्थनार्थं केचिदाहुः स्त्रियं गच्छेदित्यत्र मैथुनप्रत्यायकहेत्वन्तराभावाद् गमेरेव तद्वाचित्वकल्पनं युक्तं यागप्रतीतिस्तु द्रव्यदेवतान्वयानुपपत्त्यैव सम्भवात्तदन्वयसिद्ध्यै च तद्वाचिनो यजेरप्यन्यथानुपपत्त्यैव कल्पनोपपत्तेर्लोके वालभतेर्यागे प्रयोगादर्शनाद्भाष्यस्य चाभिदधातेर्वेचेश्च लक्षणया ज्ञानवाचित्वोपपत्तेर्नालभतेर्यागवाचित्वकल्पना युक्तेति स्वमतम्।आलभतेः पूर्वाधिकरणे यागानुमापकत्वानभिधानात्प्राणिसंयुक्तो यत्रालभतिस्तत्र यागानुमानमिति व्याप्तेर्यज्यनुमानानुमानत्वेनेत्यनुमानशब्दावृत्त्या व्याख्येयम्।तथैवेत्यालभतिना यागानुमानातिदेशाद्यागानुमानहेतुः पूपासीति मन्त्रवर्णकल्पदेवतान्वयः सूचित।कीदृगनेन सामान्यतो दृष्टेन पूर्वपक्षः कृत इत्यपेक्षायामाह * तत्रेति * उपपदाक्रान्तशक्तित्वेन विधायकस्य कर्मविधायित्वायोगाद्धातोरनुवादार्थत्वावगतेः कुतो ऽनुवाद्यप्राप्तिरित्यपेक्षायां प्राणिसंयुक्तत्वेनाग्नीषोमीयालभतेर्दूरस्थस्यापि बुद्धिस्थत्वात्तस्य च देवतान्वयद्वारा यजिवाच्यकर्मज्ञापकत्वदर्शनाद्वत्समालभेतेत्यालभतिरग्नीषोमीयवाक्यविहितस्य यजिवाच्यकर्मणो ऽनुवादो वत्सविध्यर्थ इति पूर्वपक्षान्तरोक्त्यर्थमथ वेति भाष्यं व्याचष्टे * प्राप्ते वेति * द्विविधं पूर्वपक्षमुपसंहरति * इतीति * पूपासीति मन्त्रो वत्सालम्भे विनियुज्यते न वेति सन्देहात्पूपशब्दो देवतावाची न वेति सन्देहाच्च वत्सालम्भे देवतासंयोगसन्देहो योग्यत्वाद्व्यवहितानुपक्तयावदुक्तत्वरूपसाध्यसिद्ध्यै विषयशब्देन हेतुतयोक्त इत्येवं सूत्रव्याख्यां सूचयन् सिद्धान्तमाह * सिद्धान्तस्त्विति * नालभतिना यागाभिधानमभिप्रेत्य पूर्वाधिकरणे यागः कल्पित इत्युक्ते कस्मादित्यपेक्षायां यागाभिधाने तस्य लोके शक्त्यदर्शनादिति हेतुगर्भं विशेषणं सामा-

न्यतो दृष्टस्याभासत्वे ऽध्वर्युमालभेतेत्यादौ व्यभिचारो हेतुगर्भे विशेषणं देवतासम्बन्धाभावादिति भाष्येण विषयशब्दस्य मृदूक्त्या देवतान्वयाभावोक्त्यर्थता सूचितेति * न चेत्यनेनोक्तम् * आलम्भमात्रसंस्कार इति भाष्यसंस्कारशब्देन संस्कारश्चाप्रकरणइति संस्कारशब्दस्योदाहरणोक्तये ऽनुषङ्गः सूचित * इतीहशब्देनोक्तम् * आलम्भमात्रशब्देन च यावदुक्तं वेति यावदुक्तशब्दस्य प्रतिज्ञोक्तये ऽनुषङ्गः सूचित इति * यावदुक्तमित्यनेनोक्तम् * प्रायदर्शनस्य लिङ्गमात्रत्वं भाष्योक्तं विवृणोति * तथा चेति * अभिप्रायशब्दस्याभीप्सत्वे प्रयोगात्प्रायशब्दस्य दृष्टप्रयोजनवाचित्वमङ्गीकृत्य प्रायदर्शनशब्दस्य दृष्टार्थत्वलक्षणहेतूक्त्यर्थत्वं दृष्टार्थत्वाच्चेति भाष्योक्तं विवृणोति * दृष्टार्थत्वं चेति * यथा चोपपत्स्यतइत्यनुषङ्गेण योज्यम् ।

अर्थवादोपपत्तेश्च ॥ १७ ॥

अर्थवादश्चेत्याद्यन्वयतः सूत्रव्याख्यार्थं भाष्यं व्याचष्टे * वत्सेति * व्यतिरेकतो व्याख्यार्थमथेति भाष्यं व्याचष्टे * मार-
६०८।१ णार्थं त्विति * कथं वत्सालम्भस्य गोप्रस्नवनार्थतेत्याशङ्क्याह * इतरत्र पुनरिति * चाटुकरणात्प्राक् गोर्वत्सस्नेहानुत्पत्तौ चाटुकरणे प्रवृत्त्ययोगादुत्पत्तौ वा चाटुकरणस्य स्नेहोत्पादकत्वायोगात्पूर्वापरितोषेण पक्षान्तरोक्तिः स्नेहातिशयोत्पादकत्वोपपत्तेस्तु पूर्वोऽपि पक्षो युक्त एव साध्यहेतुयोजनार्थं तस्मादपीति भाष्यं व्याचष्टे * तस्मादपीति *

॥ नैवारचरोराधानार्थताधिकरणम् ॥ ७ ॥

संयुक्तस्त्वर्थशब्देन तदर्थः श्रुतिसंयोगात् ॥ १८ ॥

आर्थवादिकस्य देवतान्वयस्य विध्युद्देशानाकाङ्क्षितत्वेनाग्रहणात्पूर्ववदिहापि यागकल्पकदेवतान्वयाभावेन यावदुक्तत्वसिद्धेरनारभ्यमिदमधिकरणमित्याशङ्क्याह * पूर्वमिति * निर्वापस्येहाश्रुतत्वात्तत्प्रत्युदाहरणता न युक्तेत्याशङ्क्य चरोर्यागार्थत्वेऽतिदेशप्राप्तस्य निर्वापस्यापि चरुद्वारा यागार्थत्वापत्तेश्चरोर्यागार्थत्वनिरासे निर्वापस्यापि यागार्थता निरस्ता भवतीत्युक्ते यजत्यधिकरणे द्रव्यदेवतासंयोगयुक्तवाक्यमात्रस्योदाहरणत्वादन्यथाग्नेयं सवनीयमुपाकरोतीत्यादौ यागविध्यसिद्धेर्निर्वापालम्भयोरनुदाहरणत्वात्तत्प्रत्युदाहरणानुपपत्तेरपरितोषादधिकाश-

ङ्गारम्भहेतुतयोक्ता । नन्वर्थवादोक्ताया अपि देवताया विध्युद्दे-
शेनानाकाङ्क्षितत्वाद्ग्रहणानुपपत्तेरयुक्ता देवताशङ्केत्याशङ्क्य देवता-
काङ्क्षासिद्ध्यर्थं चरोर्यागार्थत्वमुपपादयति *तत्रेति * चर्वादेर्हविः
शब्दवाच्यत्वप्रसिद्धेर्जुहोतेश्चार्चिशुचिहुसृपिछादिछर्दिभ्य इसिरितीसि प्रत्यये कृते हविःशब्दव्युत्पत्तेः । सौर्यं चरुमित्यादौ च यागार्थत्वदर्शनाद्धविःशब्दसामान्यतोदृष्टाभ्यां यागार्थतावसीयतइत्याशयः । यजिश्रुतिदेवतान्वयनैरपेक्ष्यसूचनायौत्पत्तिकशब्देन स्वाभाविकतोक्ता
चरौ हीति पूर्वपक्षभाष्यं चानेन व्याख्यातं यथेष्टविनियोगार्थत्वे च
चरोः स्वतस्तत्र प्रवृत्तिसिद्धेर्विध्यानर्थक्यप्रसङ्गाद्यथेष्टविनियोज्यत्व-
लक्षणस्वत्वत्यागस्यावश्यकत्वावगतेस्तस्य च देवतोद्देशपूर्वकद्रव्य-
त्यागात्मकयागैकदेशत्वाच्चरुकैमर्थ्याकाङ्क्षायामेकदेशेन बुद्धिस्थी-
कृतस्य यागस्य प्रयोजनत्वप्रतीतिः शीघ्रं भवतीत्येतदाशयं वा च-
रौ हीति भाष्यमिति सूचयितुमाह * सर्वथा चेति * चरोरुपधा-
नार्थत्वावगत्या नैराकाङ्क्ष्याद्यागार्थत्वकल्पना न युक्तेत्याशङ्कानि-
रासार्थं चैतद्भाष्यं नोपधानं कार्यं किं तु प्रतिपत्तिस्तस्याश्चान्यत्रो-
पयोगं विनानुपपत्तेरुपधानान्वयस्य कैमर्थ्याकाङ्क्षानुकूलत्वा-
त्प्रसिद्धेर्यागार्थत्वकल्पनोचितेत्येवं व्याख्येयमिति सूचयितु-
माह * चरुमिति * यागार्थत्वसम्भावनायामपि व-
चनशब्दोक्ते विध्युद्देशे देवतासम्बन्धाभावाद्यज्यश्रवणा-
च्च यागार्थत्वनिश्चयानुपपत्तेर्देवतानाकाङ्क्षत्वादर्थवादस्य च वि-
ध्युद्देशानाकाङ्क्षितदेवतासमर्पणाशक्तेर्न यागार्थता युक्तेत्युच्यत-
इति भाष्येणाशङ्क्य तदुच्यतइत्यनेनानर्थक्यपरिहारायानाकाङ्क्षि-
तापि देवता विध्युद्देशेन * नान्वीयतइत्युक्तम् * तद्व्याचष्टे *
वाक्यशेषे चेति * विधिपर्यवसानायैकदेवत्यत्वौषधद्रव्यत्वसामा-
न्ये चाग्नेयविध्यन्तान्वयं दर्शयन् पूर्वपक्षमुपसंहरति * तस्मादि-
ति * उपधानस्यापि द्वितीयया शेषकार्यत्वावगतेरेककार्यत्वादौप-
देशिकशेषकार्यबाधकता युक्तेति सूचनायान्तरशब्दः । चरुस्वाभा-
व्यात्स्ववाक्यएव यागार्थत्वावगतेः प्रयोजनाकाङ्क्षत्वाद्वाक्यान्तर-
श्रुतोपधानार्थत्वेन यागार्थत्वनिरासो न युक्त इत्याशङ्कां निरस्यन्
सिद्धान्तमाह * एवमिति * भोजनार्थे तरूष्मपक्वौदने चरुशब्द-
वाच्ये लोके हविःशब्दाप्रयोगाद्यागार्थव्यभिचाराच्च शब्दसामा-
न्यतोदृष्टाभ्यां यागार्थत्वानवगतेः प्रयोजनाकाङ्क्षत्वाद्वाक्यान्तरश्रु-
तोपधानार्थता युक्तेत्याशयः । श्लोकतात्पर्यं व्याचष्टे * नैवार इति *
विध्यानर्थक्यपरिहाराय स्वत्वनिवृत्त्यावश्यकत्वावगमे ऽपि यागा-

६०९।३ वगतिर्नास्तीति सूचनार्थम् * यागेनेत्युक्तम् * या च प्रतिपत्ति-
त्वाद्यागोपकल्पनोक्ता साप्ययुक्तेत्याह * न चेति * प्रतिपत्तिरि-
ति यदुक्तं तत्र चेतीतिकरणार्थः । स्थलार्थस्यापि चोपधानकर्मणः
स्थलनिर्वर्त्तकचरुद्वारा स्थलनिर्वर्त्तकत्वेनोपधानं प्रति चरोः प्राधा-
न्यात्तद्वद्द्वितीयोपपत्तेर्न द्वितीयया प्रतिपत्तित्वावगतिरित्याह * अ-
र्थकर्मण्यपि चेति * श्रुतिसंयोगव्याख्यानार्थमुपदधातिनेत्यादिभा-
ष्येणोपधानान्वयश्चरोः प्रत्यक्षो देवतान्वयस्तु * आनुमानिक इत्यु-
क्तम् * तद्व्याचष्टे * त्रेधा चेति * श्लोकं व्याचष्टे * नीवारेति *
अन्नशब्दोक्तस्यादनीयत्वस्यापक्वेषु नीवारेषु प्रयोगाच्चरुभूतेषु देवता-
न्वयानुमानं विष्णुं यजतीत्यादौ द्वितीययापि देवतात्वकल्पनाददादि-
शब्दः प्रयुक्तः । कृदन्तान्नशब्दयोगात्कर्तृवाचिन्या षष्ठ्या भोक्तृत्वा-
वगतिर्देवतात्वकल्पनाहेतुः तस्मादित्युपसंहारभाष्यं व्याचष्टे * त-
स्मादिति * श्रुत्या समस्तस्य चरोरुपधानयोगादित्येवं श्रुतिसंयो-
गव्याख्यानार्थं ततश्चेत्युत्तरभाष्यावतारणार्थं कृत्स्नशब्दव्याख्याना-
यैवकारं यत्त्विति भाष्यं बार्हस्पत्या नीवारा इत्यर्थवंविध्यर्थवादाश्रव-
णादयुक्तमाशङ्क्य तैत्तिरीयशाखास्थस्य बार्हस्पत्यो भवतीत्येतद्वै
खलु वै साक्षादन्नं य एष चरुरिति पूर्वनिर्दिष्टचरुसमानाधिकरण-
बार्हस्पत्यशब्दवतो वाक्यस्य बृहस्पतेर्वा एतदन्नं यन्नीवारा इति
शाखान्तरीयवाक्यतुल्यार्थत्वसूचनायानेन प्रकारेणोपलक्षणार्थमेतत्-
भाष्यमिति सूचयितुमाह * येषां त्विति * वाक्यशेषे देवताकी-
र्त्तनानर्थक्यपरिहारायानाकाङ्क्षितापि देवता विध्युद्देशेन ग्रहीष्य-
तइत्याशङ्क्य प्रशंसार्थत्वेनार्थवत्त्वोक्त्यर्थम् * यादृशामित्युक्तम् *
बृहच्छब्दस्य बृहतिधात्वर्थानुसारेण ब्रह्मशब्दवद्वाचित्वात्पतिशब्दस्य
पालयितृवाचित्वात् ब्राह्मणानां च तपस्तप्त्वासृजद् ब्रह्मा ब्राह्मणान्
वेदगुप्तयइतिवेदपालयितृत्वस्मरणात् बृहस्पतिशब्दस्य ब्राह्मण-
वाचित्वप्रतीतेर्मुन्यन्नं ब्राह्मणस्योक्तमिति च ब्राह्मणश्राद्धे वानप्रस्था-
ख्यमुन्यदनीयारण्यनीवारप्राशस्त्यस्मृतेर्ब्राह्मणसम्बन्धित्वरूपं बार्ह-
स्पत्यत्वं कीर्त्तितमित्याशयः । यच्चेति भाष्यं चर्वादीनामिति वार्त्ति-
केन व्याख्यातत्वादुपेक्ष्य तस्मादिति सिद्धान्तोपसंहारभाष्यं व्या-
चष्टे * तस्मादिति *

त्वाष्ट्रपात्नीवतस्य पर्यग्निकरणगुणकत्वाधिकरणम् ॥ ८ ॥

पात्नीवते तु पूर्वत्वादवच्छेदः ॥ १९ ॥

वाक्यशेषस्थस्य देवतान्वयस्य विधेयत्वाभावाद्यागकल्पकत्वे

निरस्ते पर्यग्निकृतं पात्नीवतमित्यत्र विध्युद्देशस्थत्वाद्विधेयत्वमाशङ्क्य
विध्युद्देशस्थस्यापि प्रत्यभिज्ञानेनाविधेयत्वापादकतेहोच्यतइत्यनन्त-
रसङ्गतिं पात्नीवद्देवतासंयोगलक्षणो गुणस्त्वाष्ट्रपत्नीवद्देवत्यपशुया-
गाद्भेदको न वेति गुणनिमित्तभेदाभेदविचाराच्च गुणप्रकरणसङ्गतिं
स्पष्टत्वादनुक्त्वा तदवान्तरसङ्गतिमाह *एतेनैवेति* यत्रोत्सृजाति-
स्तत्र यागानुमानमिति व्याप्त्यदर्शनेनोत्सृजतेरालभतिवत् यागा-
नुमापकत्वलक्षणयाजिमद्वाचित्वशङ्कायोगादुत्सृजातिशब्दस्तत्परवि-
धायकप्रत्ययलक्षणार्थः । एवं गृह्णातिचिनोतिशब्दावपि[1] त्वाष्ट्र-
मित्युदाहरणभाष्यं व्याचष्टे * पात्नीवतमिति * तत्रेति सन्दे-
हभाष्यं देवतोद्देशपूर्वकद्रव्यत्यागात्मकस्य यागाख्यस्योत्सर्गस्य
त्वाष्ट्रवाक्यादेव प्राप्तेर्विधेयत्वाद्देवतोद्देशनिरपेक्षद्रव्यत्यागात्मकस्य
तूत्सर्गस्य नवमोपान्त्ये पर्यग्निकृतानारण्यानुत्सृजन्तीत्युदाहृत्य कि-
मनेनेशानाय परस्वत आलभते वसन्ताय कपिञ्जलानालभतइ-
त्यादेर्वाक्यस्य विहितस्यारण्यालम्भस्य कैमर्थ्याकाङ्क्षायां यदेनं
चरुमुपदधातीतिवत्प्रयोजनत्वेन देवतोद्देशनिरपेक्षो द्रव्योत्सर्गो वि-
धीयते किं वेशानायेति चतुर्थ्युक्तदेवतासंयोगेन विहितं यागमुत्सृ-
जतिनानूद्य पर्यग्निकरणान्ताङ्गरीतिविधानात् कर्मशेषः प्रतिषिध्य-
तइति सन्दिग्धे पर्यग्निकृतानामुत्सर्गे तादर्थ्यमुपधानवदिति सूत्रेण
द्रव्योत्सर्गविधिं पूर्वपक्षयित्वा शेषप्रतिषेधो वार्थाभावादिपडान्तव-
दित्यनेन देवतोद्देशनैरपेक्ष्ये देवतासंयोगरूपार्थाभावापत्त्या निषेत्स्य-
मानत्वात्सिद्धान्तवचनव्यक्त्यनुपपत्तेरयुक्तमाशङ्क्य यदुत्सृजन्ति तत्
पर्यग्निकृतमित्युत्सर्गस्य पर्यग्निकृतशब्दोक्तपर्यग्निकरणान्ताङ्गरी-
तिलक्षणगुणविशिष्टत्वरूपेण विधिर्विवक्षितो न स्वरूपेणेत्येवं व्या-
ख्यासूचनपूर्वकं पूर्व इति भाष्योक्तस्य पात्नीवतानुवादसम्भवस्य
पूर्वपक्षहेतोः पात्नीवतशब्दार्थस्य विधेयत्वेन विहिते ऽनवतारा- ६।१०।१
त्तदवतारार्थं स्वयं पूर्वपक्षहेतुमाह * तत्रेति * पर्यग्निकरणान्ता-
ङ्गरीतिविधिर्गुणशब्देन सूचितः। तद्विवक्षितत्वोपपादनार्थं वचन-
व्यक्तिद्वयप्रतिभानस्य सन्देहहेतुत्वं भाष्योक्तं दर्शितम् । नवमोपा-
न्त्यन्यायेन ह्यत्राङ्गरीतिविधेः सिद्धत्वात्पौनरुक्त्यमाशङ्क्य तत्रार-
ण्यशब्दार्थस्य प्राप्तत्वाद्विधेयत्वाशङ्कानुपपत्तेः पर्यग्निकृतानु
त्सृजन्तीत्येवान्वये पर्यग्निकृतानुवादेनोत्सर्गविधिरुत्सर्गानुवादेन
वा पर्यग्निकृतविधिरिति चिन्तयिष्यतइह तु किं पात्नीवतमुत्सृज-
तीत्यन्वयाद्वाक्यान्यायेन यागविधिः पर्यग्निकृतमुत्सृजन्तीत्यन्वयात्

१ गृह्णात्यभिचारित्वमित्युदाहरणभाष्यं व्याचष्टे इ० २ पु० पा० ।

पर्य्यग्निकरणान्ताङ्गनिविधिरित्यपौनरुक्त्यसूचनार्थं वचनव्यक्ति-
द्वयप्रतिभानस्य सन्देहहेतुत्वोक्तिर्युक्ता उत्सर्गविधौ तु पर्यग्नि-
कृतमुत्सृजन्तीत्यन्वये त्वाष्ट्रवाक्यात्प्राप्तस्योत्सर्गस्य विधेयत्वायो-
गात् उत्सर्गान्तराविधानात् सिद्धान्ते ऽपि कर्मान्तरत्वापत्तेर्वचन-
व्यक्तिद्वयप्रतिभानस्य सन्देहहेतुता न युक्तेत्याशयः। पात्नीवतशब्द-
स्योत्सृजतिपराख्यातान्वये ऽपि प्रत्यभिज्ञायमानार्थत्वेनाविधेयार्थ-
त्वाद्यागकल्पनानुपपत्तेः किं यागान्तरत्वे कारणमित्येवं कुत इति
प्रश्नं व्याचष्टे * किं चेति * पूर्वइत्युत्तरभाष्यं व्याचष्टे *न चेति*
न ह्यत्र स त्वाष्ट्रवाक्यविहितः पत्नीवान् प्रत्यभिज्ञायतइति हिशब्दार्थे
चशब्दः। अपि चेति भाष्यं व्याचष्टे * पर्यग्निकृतेति * त्वाष्ट्रस्यो-
त्सर्गविधिं वदता पात्नीवतशब्देन त्वाष्ट्रमुद्दिश्योत्सर्गविधिर्वाच्य-
स्तस्य च पर्यग्निकृतत्वविशेषणे विशिष्टानुवादलक्षणो वाक्यभेदः
स्यादित्याशयः। ननु पत्नी विद्यते ऽस्येत्यन्यपदार्थे मतुवन्तपत्नी-
वच्छब्दप्रवृत्तेः को ऽन्यपदार्थ इत्यपेक्षायां पूर्ववाक्ये श्रुतस्य त्वष्टुः
पात्नीवन्तं गृह्णातीत्यत्राग्नेरिव स्ववाक्याश्रुतस्याप्यन्यपदार्थावसा-
यात्प्रत्यभिज्ञोपपत्स्यतइत्याशङ्कानिरासं सूचयन् श्लोकपूर्वार्द्धं व्या-
चष्टे * यदि हीति * पात्नीवत गृह्णातीत्यत्राग्नेपत्नीवन्निति म-
न्त्रवर्णादग्नेरन्यपदार्थत्वावगतिर्युक्ता इह तु कर्मान्तरस्थस्य त्वष्टुः
कर्मान्तरे ऽन्वयप्रमाणाभावात् अश्विशब्दवच्चान्यपदार्थवृत्तेरपि
पत्नीवच्छब्दस्य तदलाभे स्वातन्त्र्याभ्युपगमोपपत्तेः शुद्धः पत्नी
वान्देवता न तु पत्नीवान्त्वष्टा येन प्रत्यभिज्ञा स्यादिति इन्द्रमहेन्द्र-
दृष्टान्तेन सूचितम्। प्रत्यभिज्ञाने ऽपीन्द्रमहेन्द्रवद्देवतान्तरयोगादित्य-
पिशब्दार्थः। उत्तरार्द्धं व्याचष्टे * पात्नीवतेति * नन्वतन्त्रत्वा-
त्पात्नीवतशब्दस्य न विशिष्टानुवादापत्तिरित्याशङ्क्याह * व्यवहि-
तेति * किं च स्वार्थं वेहोत्सर्गो विधीयते पर्यग्निकृतशब्दार्थवि-
ध्यर्थं वा तत्राद्ये पक्षे देवतोद्देशपूर्वकद्रव्यत्यागरूपस्योत्सर्गस्य त्वा-
ष्ट्रवाक्यादेव प्राप्तेः पुनःश्रुत्यानर्थक्यमाह * प्राप्तएव चेति * द्वि-
तीयपक्षे तु लोहितोष्णीषादिवत् पर्यग्निकृतशब्दस्य विशेषणपरत्वा-
वगतेस्तस्याप्यतिदेशेन प्राप्तत्वाद्विध्यानर्थक्यमित्याह * न चेति *
ननु पात्नीवतमुत्सृजन्तीत्यप्यन्वये पूर्वस्मिन्यागे त्वष्ट्रा पत्नीवता
सह वैकल्पिकः शुद्धः पत्नीवान् विधास्यतइत्याशङ्क्याह *न चेति*
एतच्चासम्बद्धपदव्यवायापत्तेस्तत्र त्रिदोषत्वमुक्तमेवेत्यतः पश्चाद्वा-
क्यमपि न च प्राकृतक्लृप्तोपकारत्वाद्युक्तमेवेत्यन्तं वार्त्तिकं नवमो-
पान्त्यभाष्यवक्ष्यमाणार्थकथनायेति सूचनार्थम् * प्रागुक्तम् * ननु

यथाज्यभागपुनः श्रुतिर्गृहमेधीयस्यापूर्वत्वज्ञापनार्थेति दशमे वक्ष्यति तथेह केवलपर्यग्निकरणपुनःश्रुतिपात्नीवतपशुयागस्यापूर्वत्वज्ञापनार्था भविष्यतीत्याशङ्क्याह * न चेति * पर्यग्निकरणस्याप्राकृतं चेत्क्लृप्तोपकारत्वायोगात्प्राकृतत्वे वा प्राप्तत्वेन विधेयत्वायोगात्कथमपूर्वज्ञापकतेत्याशङ्क्य * प्राकृतेत्युक्तम् * स्वरूपेण प्राप्तस्यापि पात्नीवतयागाङ्गत्वेन विधानान्नैराकाङ्क्ष्यद्योतकत्वेनापूर्वज्ञापकता युक्तेत्याशयः । पर्यग्निकरणस्य पशुविशेषत्वेन निर्देशात्प्रसिद्धिं च विना विशेषणत्वायोगात्प्रसिद्धत्वेनाविधेयत्वादङ्गत्वासिद्धेर्नैराकाङ्क्ष्यद्योतनान्नापूर्वज्ञापकतेति परिहाराशयः । ननु पर्यग्निकरणान्ताङ्गकलापविध्यर्थनिर्वृत्तपर्यग्निकरणत्वोक्त्यर्थत्वेन पर्यग्निकृतशब्दस्योपसर्जनत्वस्याविवक्षितत्वाद्विधेयत्वोपपत्तिरित्याशङ्क्याह * न चेति * पर्यग्निकरणनिर्वृत्त्युक्तावपि अङ्गान्तरनिर्वृत्त्यप्रतीतेर्न पर्यग्निकरणान्ततावसीयतइत्यर्थः । ननु पर्यग्निकरणान्ताङ्गैरित्यनभिधाने ऽपि क्तप्रत्ययस्य निष्ठासञ्ज्ञत्वेन भूतकालवाचित्वात् पर्यग्निकरणानन्तरकालोत्सर्गप्रतीतेरुत्सर्गोत्तरकालीनपदार्थनिषेधे ऽप्युत्सर्गपर्यग्निकरणमध्यवर्त्तिपदार्थनिषेधावगमात्पर्यग्निकरणोत्तरकालाङ्गभूतकर्मावच्छेदो विज्ञास्यतइत्याशङ्क्याह * न चासाविति * पदार्थान्तरव्यवधाने ऽपि भूतकालत्वोपपत्तेरानन्तर्यं नावसीयतइत्याशयः । पर्यग्निकरणकालोक्त्यानन्तर्यं सूचितम् । ननु भूतकालत्वमात्रस्यातिदेशतः प्राप्तेर्विध्यानर्थक्यपरिहारार्थं तान् पर्यग्निकृतानुत्सृजन्ति ब्रह्मसाम्न्यालभतइत्यत्रानन्तर्यलक्षणा यथा सङ्कर्षकाण्डे वक्ष्यते तथेहाप्यानन्तर्यलक्षणा भविष्यतीत्याशङ्क्याह * न चेति * प्राजापत्यपशुष्वेकादशे कर्मशेषप्रतिषेधं पूर्वपक्षे ऽपि ब्रह्मसाम्न्यालभतइति पर्यग्निकरणोत्तरकालीनानां संस्काराणां कालान्तरे ऽनुष्ठेयत्वश्रुतेः सर्वथा प्रतिषेधायोगेन पर्यग्निकरणोत्तरकालीनत्वमात्रनिषेधस्य वक्ष्यमाणत्वात्तत्सिद्ध्यर्थमानन्तर्यलक्षणा युक्ता इह तु कर्मान्तरविधाने ऽतिदेशप्राप्तपर्यग्निकरणानुवादत्वेनापि पर्यग्निकृतशब्दस्य वाक्ये ऽन्वयोपपत्तेर्नानन्तर्यलक्षणा युक्तेत्याशयः । सर्वाङ्गानां च पर्यग्निकरणानन्तर्यसम्पादनाशक्तेरानन्तर्यलक्षणार्थाविरोधः स्यादित्याह * सर्वाङ्गेषु चेति * ननु पर्यग्निकृतावस्थस्योत्सर्गविधावर्थादानन्तर्यावगतिर्भविष्यतीत्याशङ्क्याह * एतेनेति * नावस्थापि श्रुत्योच्यते इत्याशयः । पर्यग्निकरणावस्थायाश्च स्वरूपेण प्राप्तत्वादुत्तरावस्थापरिसंख्यार्थत्वे त्रिदोषत्वापत्तेर्वि-

१ प्रसिद्धत्वे ऽपि अविषणत्वादिति २ पु० पा० ।

६।१।१ धेयत्वं न सम्भवतीत्याह * चोदकेनैव तावदिति * पूर्वपक्षमुप-
संहरति * तस्मादिति * विधिसमासयर्थामिति कर्त्तव्यतापेक्षायां
पत्नीवता लक्षणागुणसामान्येन त्वाष्ट्रप्रकृतिकत्वे ऽभिहिते पूर्वपक्ष-
त्वादनाश्रयाग्नीषोमीयप्रकृतिकत्वे * अप्यविरोध इत्युक्तम् * सि-
द्धान्तमाह*इतीति*न कर्मान्तरमिति भाष्यावयवःपूर्वार्द्धेन व्याख्या-
तः । पूर्वस्यैवेत्युत्तरार्द्धेन प्रकृतस्य त्वाष्ट्रत्वपात्नीवतत्वलक्षणवि-
शेषणद्वयविशिष्टत्वात्प्रत्यभिज्ञान न सम्भवतीत्याशङ्क्याह * पात्नी-
वतेति * द्वन्द्वनिर्देशे ऽप्येकदेशेन समुदायलक्षणयानुवादत्वा-
त्प्रकृतोक्तिर्युक्ता त्वाष्ट्रं पात्नीवतमिति च भेदेन निर्देशा-
द्विशेषत इति मनोताद्दष्टान्तेन सूचितं पर्यग्निकरणान्ता-
ङ्गगणस्य विधेयत्वसिद्ध्यर्थं सामान्यतस्तावद् गुणस्य विधेयत्वमाह
* पर्यग्निकृतमिति * शङ्कापूर्वं पर्यग्निकरणान्ताङ्गगणस्य विधेय-
त्वमुपपादयितुमारभते * ननु चेति*या तु तदन्तवाचिशब्दाभावा-
दविधेयतोक्ता तां परिहरति * यद्यपीति * नाज्यभागवत् पर्यग्नि-
करणमनुष्ठेयतया विधीयते येन तन्मात्रग्रहणं स्यात् किं तु निष्पन्न
पर्यग्निकरणत्वं पशोर्यागान्वयितया विधीयते तस्य च यथाप्राप्त-
स्योपादानात्पूर्वाङ्गेष्वप्रकृतेषु पर्यग्निकरणानुपपत्तेस्तदन्ततावसी-
यतइत्याशयः । नन्वेवमप्युत्तरेषामप्यङ्गानामतिदेशात्प्राप्तेः पर्यग्नि-
करणान्तत्वासिद्धिरित्याशङ्क्य गृहमेधीयन्यायेनापूर्वत्वावसायात्तद-
न्तर्गतत्वसिद्धिमाह * कथम्भावेति * पर्यग्निकरणान्तस्याङ्गगणस्य
प्रकृताावितरेतरनिरपेक्षोत्पत्तित्वात्प्रयोगवाक्यात्साहित्यावगमे ऽपि
प्रत्येकं क्रतूपकारसाधनत्वशक्त्यवगतेस्त्वाष्ट्रपशुयागे प्रत्यक्षवाक्ये-
नाङ्गतया विधानात्तदुपकारसाधनत्वेनावगतस्यातिक्रमकारणाभा-
वात्प्राकृताङ्गान्तरानपेक्षत्वादपूर्वत्वावगतेर्नातिदेशो ऽस्तीत्याशयः ।
अतिदेशाभावे ऽपि सादृश्येन बुद्धिस्थतया धर्मदानोन्मुखत्वात्प्रकृ-
तित्वव्यपदेशाविरोधः । नन्वस्य वाक्यस्य पर्यग्निकरणन्ताङ्गरीति-
विधायित्वे निवृत्त्यर्थो ऽवच्छेदशब्दो न युज्येतेत्याशङ्क्य फलेनो-
त्तराङ्गनिवृत्त्यर्थत्वोक्तिमुपपादयति * ततश्चेति * पात्नीवतमुत्सृज-
न्तीतिसन्निहितान्वयत्यागेन पर्यग्निकृतमुत्सृजन्तीति व्यवहितान्वया-
भ्युपगमे को गुणो भविष्यतीति किमिति भाष्येण गुणोक्त्यर्थं य-
जिमत्ता तावदिति भाष्यमुपलक्षणार्थत्वेन व्याचष्टे * एवं चेति *
आदिशब्देनाश्रुताङ्गातिदेशकल्पनोक्ता गुणान्तरोक्त्यर्थमुत्सृजति *
शब्दश्चेति * भाष्यं सिद्धान्ते ऽपि पर्यग्निकरणान्तत्वविशिष्ट-
रूपेणोत्सर्गविध्युपगमेन वाक्यार्थविध्यविशेषायुक्तमाशङ्क्यापि चेति

वक्ष्यमाणभाष्यालोचनया पूर्वपक्षे पर्यग्निकृतं पात्नीवतमिति पद-
द्वयान्वयापादनाशयेन व्याचष्टे * न चेति * ननु देवतोद्देशपू-
र्वकद्रव्यत्यागाख्यस्योत्सर्गस्य त्वाष्ट्रवाक्येनैव प्राप्तेरुत्सर्गविध्युक्ति-
रयुक्तेत्याशङ्क्याघाराग्निहोत्राधिकरणोक्तेन मार्गेण गुणविधावपि
धात्वर्थावच्छिन्नभावनाविधि मत्वोत्सर्गविध्युक्तिरित्याशयेन परिह-
रति *पर्यग्निकरणान्तेति* शङ्कानिरासार्थस्तुशब्दः अनत्यन्तविप्र-
कर्षादित्यनेनोत्सर्गसम्बन्धित्वेनाङ्गगणविधानादुत्सर्गस्य * विधेय-
तोक्तिरित्युक्तम् * तदुपपादनार्थम् * तदुद्देशनेत्युक्तम् * कर्मा-
न्तरेतिभाष्यं सिद्धान्ते ऽप्युत्सर्गानुवादाविशेषादयुक्तमाशङ्क्योत्स-
र्गसम्बन्धित्वेनापि पूर्वपक्षे ऽर्थान्तरविध्यभावाशयेन व्याचष्टे *
त्वत्पक्षे त्विति * तद्गुणास्तु विधीयेरन्नित्यनेन च न्यायेन देव- ६।२।१
तातद्धितेनैव देवतोद्देशपूर्वं द्रव्यत्यागरूपोत्सर्गविधिसिद्धेः पर्य-
ग्निकृतशब्दार्थो विधौ च तद्वृत्त्यानर्थक्यापत्तेः पर्यग्निकृतं पात्नीवतं
कुर्वन्तीति पूर्वपक्षे पर्यग्निकरणविशिष्टपात्नीवतविधिमापाद्यापि
चेति भाष्येण त्वाष्ट्रस्य पात्नीवततायास्त्वाष्ट्रवाक्यात्प्राप्तेः पर्यग्नि-
करणविशिष्टतायाश्चातिदेशात्प्राप्तेर्दूषणमुक्तं तदापादनाशयस्य न
च परपदेति वार्त्तिकेन व्याख्यातत्वाद् दूषणाशयस्य च प्रकृत्य-
भिज्ञानादित्यनेन व्याख्यातत्वादव्याख्याय तस्मादिति सिद्धा-
न्तोपसंहारभाष्यं व्याचष्टे * तस्मादपीति * कल्पनाक्लेशप-
रपदान्वयविधिविप्रकर्षधात्वर्थात्यन्तपारार्थ्याभावप्रकृतप्रत्यभिज्ञाल-
क्षणहेतुचतुष्टयपरामर्शार्थत्वं तस्माच्छब्दस्य सूचयितुमपिशब्दः ।
अपि चेति पूर्वपक्षभाष्योक्तं दोषं यत्त्विति भाष्येणानुभाष्य नैष
दोष इत्यनेन परिहृत्यात एवेत्यनेन पात्नीवच्छब्देन त्वाष्ट्रपात्नीवता-
नुवादायोगदोषः पूर्वः त्वाष्ट्रः पात्नीवतश्चेति भाष्योक्तः परिहृतः।
तद्गतामेकहेलया व्याचष्टे * प्रकरणादेव चेति * पर्यग्निकरणाव-
स्थाविशिष्टपात्नीवतानुवादलक्षणस्य पात्नीवतत्वरूपेण चैकेनांशेन
त्वाष्ट्रपात्नीवतव्यपदेशलक्षणस्य चोपालम्भस्य परिहार इति समा-
सार्थः। तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्याचष्टे* तस्मादिति*

॥ अदाभ्यादीनां ग्रहनामताधिकरणम् ॥ ९ ॥

अद्रव्यत्वात्केवले कर्मशेषः स्यात् ॥ २० ॥

न कस्य चिदपीत्यनारभ्याधीतत्वोक्तेः सन्देहत्रैविध्यसूचना-
र्थत्वं वक्तुमाह * अनारभ्येति * उतेति सिद्धान्तवचनव्यक्ति-
भाष्यशेषेण ग्रहविधिरित्येतावता वर्त्तमानेन यावदुक्तत्वपूर्वपक्षा-

न्तरोक्तिरित्याशयः । आलभत्यादिवद् गृह्णातिरपि यजिमदभि
धानो न वेति प्रासङ्गिकत्वेन सङ्गतिदृष्टान्तेन सूचिता पूर्वस्मिन
ज्योतिष्टोमाख्ये क्रतावंश्वदाभ्यनामधेयसंयोगाभावादित्युत्तरपदस
मासपूर्वकनञ्समासाङ्गीकरणेनापूर्वनामधेयसंयोगादिति हेतुः पा
रिशेष्याद्यागविधिसिद्धौ प्रकृतावेतन्नामकस्य ग्रहस्य वा कस्य
चिद्भावाद्यागाभ्यासात्मकस्य ग्रहाभ्यासस्य वा गुणस्य विधिर्न
सम्भवतीति प्रकृतौ गुणविधिनिरासार्थो नैतन्नामधेयकः कश्चित
ग्रहो ऽस्तीत्येतावद्भाष्यपदावृत्त्या च यावदुक्तनिरासार्थे इत्येवं ताव-
त्पूर्वपक्षभाष्यं व्याख्यातुमाह * तद्वदेव चेति * निराकरणमालो-
च्येत्यध्याहारेण पक्षद्वयनिराकरणस्य यागान्तरशब्दोक्तयागविधिप्र-
तिज्ञायां हेतुत्वं सूचितम्। उक्थ्यादिवच्चांश्वदाभ्यशब्दयोर्यागनामत्वे
ग्रहनामत्वे वा सति प्रकृतौ यागाभ्यासलक्षणस्य ग्रहाभ्यासलक्ष-
णस्य वा गुणस्य विधिः स्यात् वत्सादिवद्वांश्वदाभ्यनामकग्रहप्र-
सिद्धौ सत्यां यावदुक्तांश्वदाभ्यग्रहणमात्रविधिः स्यात्तदुभयाभा-
वात्पारिशेष्याद्यागविधित्वावगतेर्यागान्तरमेवांश्वदाभ्यसंज्ञकं विधी-
यतइत्याशय.। अपूर्वेण नामधेयेन संयोगादिति नञ्समासपूर्वकोत्त-
रपदसमासाङ्गीकरणेन वा संज्ञालक्षणयागान्तरत्वपूर्वपक्षहेतू क्तयर्थ-
तयेदं भाष्यं व्याख्येयमित्याह *किं चेति* अंशुवाक्ये यज्यश्रुतेरदा
भ्यवाक्ये ऽपि व्यवहितयज्यन्वयायोगेन यजिसामानाधिकरण्यानु-
पपत्तेर्यागनामत्वायोगादुपचयहेतुत्वसूचनार्थः किं च शब्द.। अस्मि-
न्पक्षे गृह्णात्यन्वयेन ग्रहणनामत्वाद्यागनामत्वायोगाशङ्कानिरासा-
र्थत्वेन न ग्रहः कश्चिदेतन्नामको ऽस्तीति व्याख्येयम् । ग्रहणस्य सं-
स्कारत्वेन संज्ञानर्हत्वाद्व्यवधाने ऽप्यदाभ्यसंज्ञकयागं करोतीत्यन्व-
यप्रतीतेरंशुवाक्ये ऽपि अंशुसंज्ञकं कर्म करोतीत्युक्ते किं तदित्यपे-
क्षायां गृह्णातिचोदनासामान्यात् गृह्णातेश्च यागीयद्रव्यप्रकल्प-
नार्थत्वावगतेरव्यक्तचोदनाचोदितत्वाच्च ज्योतिष्टोमधर्मप्राप्तेर्द्रव्यदे-
वतालाभाद्यागरूपत्वप्रतीतेर्यागत्वावसायात् करोत्यर्थोक्तये च प्र-
योज्यस्य प्रत्ययस्यानुग्रहायातिदेशप्राप्तज्योतिष्टोमिकग्रहणानुवाद-
भूतप्रकृतिविशेषद्योतनार्थं गृह्णातिप्रयोगोपपत्तेः संज्ञया यागान्तर-
त्वावगतिरित्याशयः।किमित्यादि तस्माद्यागान्तरमित्यन्तं पूर्वपक्षभा-
ष्यन्तात्पर्यतो व्याख्याय न प्रकृतावित्यवयवं स्वरूपतो व्याचष्टे * न
हीति * विध्यन्तभावाद्यागान्तरविध्यपर्यवसानमाशङ्क्याह * तस्मा-
दिति * न त्विति भाष्येण द्रव्यदेवतान्वयाश्रुतेर्यच्छब्दोपबन्धेन च
यागविधिप्रतिबन्धात्सोमदेवत्ययागाङ्गत्वेन यावदुक्तादाभ्याख्यग्र-

व्यग्रहणमात्रविधिमंशुवाक्ये च यज्यश्रुतेः स्वतन्त्रांश्वाख्यद्रव्यग्रह-
णमात्रविधिमाशङ्क्य माभूदित्यनेन यच्छब्दोपबन्धे ऽपि प्रत्यभिज्ञाना-
भावेनानुवादायोगाद्विधित्वप्रतीतेर्निरस्तं तदंशुवाक्यं व्यापकत्वाद-
युक्तमाशङ्क्य गृह्णातिचोदनोपस्थापितज्योतिष्टोमधर्मातिदेशप्रा-
सद्रव्यदेवतान्वयकल्प्ययागप्राप्तिलक्षणोभयसाधारणहेत्वध्याहारेण
पूरयन् व्याचष्टे * न चेति * वत्सालम्भतुल्यत्वशङ्कोक्त्या द्रव्य-
श्रवणे ऽपि देवतान्वयमात्रे श्रुतिसूचनात् द्रव्यदेवतमिति द्वन्द्वैकव-
द्भावस्येतरेतरयोगात् श्रुत्युक्त्यर्थत्वं व्याख्यातम्।तस्मादिति यागान्त-
न्तरत्वपूर्वपक्षोपसंहारभाष्यं व्याचष्टे*अतो ऽपीति*सूत्रं व्याचक्षा-
णः सिद्धान्तमाह * इतीति *ग्रहणस्यापि श्रुतत्वाद्भाष्ये नामधेयमात्र-
विषयतया केवलशब्दव्याख्या न युक्तेत्याशङ्क्य नामधेयशब्दस्य ग्रह-
णोपलक्षणार्थत्वं सूचयितुम् * ग्रहणमित्युक्तम् * द्रव्यदेव-
ताभावनिमित्तस्य कैवल्यस्याद्रव्यत्वोक्त्यैव सिद्धे केवलशब्दानर्थ- ६।३।१
क्यमाशङ्क्य यावदुक्तत्वस्यापि निरासं केवलशब्दप्रयोजनं सूचयि-
तुम् * वत्सेत्युक्तम् * वत्सालम्भएव तावद्देवताराहित्येन या-
गाभावाद्वायव्यश्वेतालम्भादन्यूनम्।अंश्वदाभ्यग्रहणं तु द्रव्यस्याप्य-
भावेन द्रव्यविशिष्टविध्ययोगाद्वत्सालम्भादपि न्यूनमिष्यतइत्यर्थः ।
ततश्च पूर्वपक्षद्वयस्याप्ययोगाज्ज्योतिष्टोमाख्यस्य कर्मणो ऽभ्यासा-
त्मको ऽवयवो ऽत्र विधीयते इत्यर्थादुक्तम्।अद्रव्येति भाष्यादुदाहर-
णपरिग्रहार्थकेवलशब्दापेक्षितकैवल्यनिमित्तोक्त्यर्थो द्रव्यत्वादिति
सूत्रावयव इति भ्रान्तिनिवृत्तये कर्मशेषः स्यादिति सूत्रावयवोक्ता-
भ्यासाख्यकर्मावयवत्वप्रतिज्ञाया हेतूक्त्यर्थं वक्तुम् * अद्रव्यतये-
त्युक्तम् * भाष्ये देवतोक्तेरसौत्रत्वमाशङ्क्य देवताकत्वस्याभिप्रे-
तस्यापि स्पष्टत्वात्सूत्रे ऽनुक्तिः अंश्वदाभ्यशब्दयोस्तु द्रव्यवाचि-
त्वशङ्कानिरासायाद्रव्यतोक्तेति सूचयितुमह * देवता तावदिति *
सोमायेत्यस्यानुवाद्ययागविशेषणत्वायोगात्पश्चाच्छ्रुतत्वाच्च सोमा-
य गृहीत्वेत्यन्वयाप्रतीतेर्यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम
सोमाय स्वाहेति मन्त्रवर्णप्राप्तदेवतानुवादोपपत्तेश्च देवताविधित्वा-
योगाद् दूरभ्रष्टतोक्ता। अदाभ्यशब्देनावयवव्युत्पत्त्या हिंसाख्यदम्भा-
नर्हद्रव्यस्यांशुशब्देन च निर्यासस्योपादानोपपत्तेरनुपात्तत्वोक्तिर-
युक्तेत्याशङ्क्य * न हीत्युक्तम् * एवमप्यदाभ्यशब्दवाच्यद्रव्यवि-
शेषाप्रतीतेर्निर्यासस्य च प्रकृतिद्रव्यविशेषाप्रतीतेर्न वत्सालम्भव-
द्यावदुक्तद्रव्यविशिष्टग्रहणविधिः सम्भवतीत्याशय । ननु ज्योति-
ष्टोमधर्मातिदेशाद् द्रव्यदेवतालाभो भविष्यतीत्याशङ्क्याह * न

चेति * ननु यागत्वानवधारणे ऽप्यैन्द्रवायवं गृह्णातीत्यादावनिर्दि-
ष्टद्रव्यविशेषस्य गृह्णातेर्यागीयसोमप्रकल्पनार्थत्वदर्शनेनास्यापि
सादृश्यानुमानात्प्रकृतिभूतज्योतिष्टोमोपस्थापकत्वोपपत्तेस्तदीयद्रव्य-
देवतालाभो भविष्यतीत्याशङ्क्याह * न च गृह्णातिरिति * व्य-
भिचाराच्चानुमानं न सम्भवतीत्याशयः । केवलनामधेयश्रवणे ऽपि
तस्मादेव यागभेदावगतेः कुतो ज्योतिष्टोमे ऽभ्यासविधिरिति पृष्ट्वा
यागनामत्वाभावाद्यागभेदकत्वनिरासार्थमेतावदिति भाष्यं व्याचष्टे
* न चैत इति * ऐन्द्रवायवं गृह्णातीत्यादिवत् ग्रहणेनादाभ्य-
मंशुं च कुर्यादिति शास्त्रार्थावधारणात् वैयधिकरण्यान्वये ऽपि
एकाधिकरण्यं विनान्वयायोगात्सर्वत्र राज्ञः पुरुष इत्यादावपि रा-
जसम्बन्धी पुरुष इत्यादिसामानाधिकरण्यान्वयमभिप्रेत्य ग्रहणक-
रणकवदाभ्यमंशुमिति च सामानाधिकरण्यं मत्वा ग्रहणसामा-
नाधिकरण्योक्तिः गृह्यमाणग्रहद्रव्यनाम्नो ऽपि ग्रहणनिमित्तत्वो-
क्त्ये ग्रहणनामधेयत्वोक्तिः ग्रहणभेदस्तर्हि सञ्जातः स्यादित्याश-
ङ्क्याह * इष्यत एव चेति * अंशुशब्दस्य यज्यन्वयाशङ्कायो-
गात् ग्रहनामत्वस्य मुक्तसंशयत्वं स्पष्टत्वादव्याख्याय ग्रहणसं-
स्कार्यत्वान्यथानुपपत्त्या ग्रहस्य यागार्थत्वावगतेर्ग्रहभेदाद्यागभेदो
भविष्यतीत्याशङ्कानिरासार्थं न चेति भाष्यं व्याचष्टे * न चेति
तद्भेदात्कर्मणो ऽभ्यास इत्यनेन न्यायेन यागाभ्यासमात्राद्ग्रहभेदो-
पपत्तिरित्याशयः । न च द्रव्येतिभाष्यम् । ऐन्द्रवायवं गृह्णातीत्या-
दौ द्रव्यदेवताश्रवणे ऽपि यजिमत्त्वस्य निरस्तत्वादनर्थकमाशङ्-
कयातिशयोक्त्यर्थत्वेन व्याचष्टे * द्रव्येति * यद्यपीत्यादिभाष्यं
व्याचष्टे * यो ऽपीति * गृहीत्वा शब्दार्थे संक्रान्ता विधौ शक्तिः
प्रत्ययस्येति समासार्थः । तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्या-
चष्टे * तस्मादिति * अंशुवाक्ये यज्यश्रुतेः अंश्वदाभ्यशब्दा-
भ्यामपीति द्विवचनायोगं शङ्कते * अंशोरिति * परमतेन तावत्प-
रिहरति * गृह्णातीति * गृह्णातेर्लोकवेदसाधारण्येन ज्योति-
ष्टोमोपस्थापकत्वायोगात्स्वमतेनान्यथा परिहरति * अस्त्येव त्वि-
ति * अदाभ्यवाक्ये ऽपि यजिनानुवादे यागमात्रानुवादापत्तेः
सोमेन तु विशेषणे विशिष्टानुवाददोषापत्तेः प्रकरणेनैव ज्योतिष्टो-
मान्वयं वक्तुम् अनयोरिति द्विवचनम् । एवं सत्यनारभ्य विधिरनर्थकः
स्यादित्याशङ्क्याह * यथेति * कः पुनः पक्षत्रयमध्ये ऽत्र सि-
द्धान्तवचनं इत्यपेक्षायामाह * तेनेति *

---

१ वचनेति २ पु० पा० ।

॥ अग्निचयनस्य संस्कारताधिकरणम् ॥ १० ॥

अग्निस्तु लिङ्गदर्शनात्क्रतुशब्दः प्रतीयेत ॥२१॥

अस्यापि प्रासङ्गिकत्वेन प्रकृतयजिमद्वचनावचनत्वाच्चिन्ता-
सङ्गतिमपिशब्देन सूचयितुं सन्देहद्वैविध्यमुदाहरणविवेकपूर्वक-
माह * अग्निमिति * यजिमत्त्वसंस्कारकर्मनिरासार्थो मात्रशब्दः ६१४।१
चिनोतिवाक्येन प्रकृतिविकृत्यङ्गत्वाविधाने ऽपि अनेन वाक्येना-
ग्निसंस्कारत्वेन चयने विहिते संस्कृतस्याग्नेः कैमर्थ्यापेक्षायामु-
त्तरवाक्यैः प्रकृतिविकृत्यर्थत्वे विहिते संस्कारविधिपर्यालोचनम-
भिप्रेत्य * प्रकृतीत्युक्तम् * तदर्थमेव भाष्यकृता पूर्वपक्षोपपाद-
नार्थं चोत्तरवाक्यान्युदाहृतानि कर्मान्तरं चिनुतइत्याख्यातेन वि-
धीयतइत्येतावता चावृत्तेन भाष्येण यावदुक्तपक्षोक्तत्रैविध्यस्य
भाष्यारूढत्वं किमिति पूर्वपक्षभाष्यं गुणविधियावदुक्तत्वाख्यपक्षद्व-
यप्रतियोगित्वेन व्याचष्टे * तत्रेति * अश्वदाभ्यवैपक्ष्योक्त्याधि-
काशङ्का दर्शिता चयनस्य स्वभावतः संस्कारमात्रत्वप्रसिद्धेः सं-
स्कारे च फलश्रुतेरर्थवादस्य वक्ष्यमाणत्वाच्छ्रुतस्यापि फलस्या-
न्वयानुपपत्तेर्निष्प्रयोजनत्वप्रसङ्गात्कैवल्यं यावदुक्तत्वं न युक्तमि-
त्यर्थः । अतः परिशेषाच्चिनोतेर्यजिमद्वचनतेति क्रतुशब्देनोक्तं तथापि
कथं कर्मान्तरतेत्यपेक्षायाम् * सञ्ज्ञैवेत्युक्तम् * पूर्वाधिकरणपू-
र्वपक्षवदिहाप्यपूर्वनामधेयसंयोगो भेदहेतुरभिप्रेत इति सूचनार्थं
एवकारः । अग्निसञ्ज्ञकं कर्म करोतीति इष्टकाभिरग्निं चिनुतइति
वाक्यान्तरविहितवचनानुवादिप्रत्ययानुग्रहार्थं चिनोतिधातुपरेण
प्रत्ययेन विहिते किन्तदित्यपेक्षिते ऽग्निमनुयजतीत्युत्तरवाक्ये य-
जिसामानाधिकरण्यात् यागरूपतावसीयतइत्याशयः । गुणविधि-
त्वनिरासेन यजिमद्वचनत्वोपपादनार्थं स्वयं तावल्लिङ्गदर्शनमाह
* तथा चेति * ननु गुणविधित्वे ऽपि चयनसंस्कृताग्निलक्षणस्य
फलश्रुतिर्युक्तेत्याशङ्क्याह * न चेति * भाष्योक्तं लिङ्गदर्शनं व्या-
चष्टे * तथा चेति * नन्विति भाष्येणाग्निशब्दस्य यागनामत्वे
प्रापकं पृष्ट्वा ऽथातो ऽग्निमग्निष्टोमेनैवानुयजति तमुक्थ्येन तं षोड-
शिना तमतिरात्रेण तं त्रिरात्रेण तं चतूरात्रेण तं पञ्चरात्रेण तं षड्-
रात्रेण तं सप्तरात्रेण तमष्टरात्रेण तं नवरात्रेण तं दशरात्रेण त-
मेकादशरात्रेणेति वाक्यस्य प्रापकत्वोक्त्यर्थमत्रेति भाष्यं व्याचष्टे
* तथेति * अस्य प्रापकत्वोपपादनार्थं यागमिति भाष्यं द्वेधा व्या-
चष्टे * तत्रेति * अथेत्यादिना एकादशरात्रेत्यन्तेनैकेन वाक्येन

विनियोक्तृभूतलक्षणतृतीयायुक्तयजतिशब्दानुषङ्गेण वैकल्पिकाग्निष्टोमादिसंस्था द्विरात्रादिकालविशिष्टत्वविधावग्नियागं करोतीति सामानाधिकरण्याद्यदाहवनीये जुह्वतीति तत्प्रख्यान्यशास्त्राच्चाग्निशब्दस्य गुणविधित्वानुपपत्तेर्यागनामत्वावसायात् । अग्निसञ्ज्ञकं यागं करोतीति चिनोतिवाक्यार्थो ऽवगम्यत इत्याद्यव्याख्याने भाष्यार्थः । वाक्यान्तरेणैव नामादिविशिष्टयागविधौ चयनवाक्यानर्थक्यापत्तेर्वाक्यप्रवृत्तिवेलायां चाग्निश्चिनार्थस्यापि चयनवाक्यस्यार्थैष ज्योतिरित्यादिवदन्यतो ऽर्थनिश्चयसम्भवे विधायकत्वोपपत्तेराद्यव्याख्याने ऽपरितोषात् द्वितीयव्याख्याने ऽर्थे इत्यादिषु संस्थार्थत्वविधिपरेषु भिन्नेषु वाक्येषु अग्नियागं करोतीति अग्निशब्दसमानाधिकरणयज्यनुवादान्यथानुपपत्त्याग्निसञ्ज्ञकयागविधायित्वं चिनोतिवाक्यस्यावसीयतइति भाष्यार्थः । एकस्मिन् गुणपरे वाक्ये ऽनेकार्थविध्ययोगात्संस्थादिविधिपरे वाक्यभेद इति एकवचनसामान्याभिप्रायं तस्मादित्युपपाद्योक्त्यर्थं भाष्यं व्याचष्टे * तस्मादिति * अनुशब्दादप्यग्निशब्दस्य यागवाचितावगम्यतइत्युक्त्यर्थमनुशब्दो ऽपीति भाष्यमपि द्वेधा व्याचष्टे *अनुशब्दश्चेति* संस्थादिविधिपरे अनुशब्दोक्तस्य पश्चाद्भावस्य विध्ययोगेनानुवाद्यत्वावगतेरयागत्वे च पश्चाद्भावाप्राप्तावनुवादायोगाद्यागताग्नेर्ज्ञायतइत्याद्यव्याख्याने भाष्यार्थः । द्वितीये त्वग्निष्टोमादिसंस्थैरेकाहैर्द्विरात्रादिभिश्चाहीनैरग्नेः पश्चात्करिष्यमाणैरग्निरनुयष्टव्य इति अग्नेर्यागप्राग्भावविधानस्य तुल्यरूपत्वगमकत्वाद्यागत्वावगतिरिति अस्मिंश्च व्याख्याने चिनोतिवाक्यविहितस्य योगस्योत्तरवाक्यैः संस्थाद्यर्थत्वविध्युपगमादग्निष्टोमसंस्थायाश्च निष्फलत्वेन शेषित्वायोगादग्निष्टोमशब्दस्य तत्स्थयागवाचित्वात्सर्वार्थतासिद्धौ चानुशब्दस्य सर्वत्रानुषङ्गसिद्धान्तवत्सूचयितुम् * यागैरित्युक्तम् * द्रव्यदेवतादीतिकर्त्तव्यतानाम्नानाद्यागविध्यनिर्वाहाशङ्कां निरस्यंस्तस्मादिति पूर्वपक्षोपसंहारभाष्यं व्याचष्टे * तस्मादिति * एतच्छब्देन चिनोतिवाक्यं परामृष्टम् । ननु चिनोतिवाक्येन यागविधौ उत्तरवाक्यानां संस्थाद्यर्थत्वविधिपरत्वाभ्युपगमात्पौर्वापर्यविधायित्वानुपपत्तेर्द्वितीयव्याख्या न युक्तेत्याशङ्क्याग्नेर्ज्योतिष्टोमाद्यङ्गत्वप्रसिद्धिनिर्वाहार्थत्वं द्वितीयव्याख्यायाः विधित इति सूचयितुमाह * पश्चिमे त्विति * शङ्कानिरासार्थस्तुशब्दः अग्निष्टोमाद्यर्थं क्रियमाणत्वेनाग्नेरग्निष्टोमाद्यङ्गत्वे ऽभिहिते तदर्थं क्रियमाणा-

१ संज्ञया वाक्यस्य [illegible] प० पा० ।

तैव कथमित्यपेक्षिते ऽग्नेः कैमर्थ्यापेक्षायामग्निष्टोमादिनाग्नेरनुयष्टव्यत्वं विधितो देवदत्तो यज्ञदत्तेनानुगन्तव्य इति विधितो यज्ञदत्तस्य पश्चाद् गमनप्रतीतिवत्फलवतो ऽग्निष्टोमादेः पश्चाद्भावितया प्रतीतस्यातिक्रमकारणाभावात्तदर्थत्वेनैवोचितेति सूचयितुम् * पश्चादित्युक्तम * पूर्वव्याख्याने तु पौर्वापर्यस्याविधेयत्वात्तद्वशेन ज्योतिष्टोमाङ्गत्वाप्रतीते स्वतन्त्रतेत्याशयः ।

द्रव्यं वा स्याच्चोदनायास्तदर्थत्वात् ॥ २२ ॥

द्रव्यं वेत्यादिप्रसिद्धइत्यन्तभाष्यं तात्पर्यतस्तावद्व्याचष्टे * अत्यन्तेति * श्लोकं व्याचष्टे * न हीति * पूर्वपक्षोक्तं तत्प्रख्यत्वमनु- ६१५।२
भाषणपूर्वं परिहरति * यद्यपीति * यदि यदाहवनीये जुह्वतीतिवच्छुद्धो ऽग्निः क्रत्वङ्गत्वेनाथेत्यादिवाक्यैर्विधीयते ततस्तत्प्रख्यत्वं भवेत् स त्वाहवनीयवाक्याच्छुद्धः प्राप्तक्रत्वङ्गभावएव चिनोतिवाक्यात् चयनसंस्कार्यतया श्रुतो ऽथेत्यादिवाक्यैस्तादृगेव क्रत्वङ्गत्वेन विधीयते ताद्रूप्येण चान्यतो ऽप्राप्तेर्न तत्प्रख्यतेत्यर्थः।श्लोकार्थमुपसंहरति * तस्मादिति * एतदेव भाष्यमवयवशो व्याचिख्यासुः कतमदिति प्रश्नभाष्यमग्निशब्दार्थस्य सर्वलोकप्रसिद्धेरयुक्तमाशङ्क्योपपादयति * कतमदिति * यागनामत्वे ऽग्निशब्दस्येष्टकाभिरग्निं चिनुतइति वाक्यान्तरेण तदङ्गतया चयनविधेरङ्गाङ्गिनोरभेदोपचारेणाग्निचयनं करोतीति सामानाधिकरण्यमपि सम्भविष्यतीत्याशयः । यदित्युत्तरभाष्याशयमाह * सिद्धान्तेति * चोदनाया इति सूत्रावयवव्याख्यानार्थं चिनुतइति भाष्यमुपपादयति*तस्मादिति * वायव्यं श्वेतमालभेतेत्यादेर्यागाभिधानाशक्तावपि यागचोदनाभ्युपगमात्तद्वैपस्यार्थम् * द्रव्येत्युक्तम् * उपपत्त्यन्तरमाह * तथा चेति * या त्वनुयजतिशब्दादग्नेर्यागतोक्ता तत्परिहारार्थमनुशब्दमनुशब्दश्चेति भाष्यमाशङ्कानुभाषणपूर्वं व्याचष्टे * अन्विति * नानुयजतिशब्देनाग्नेरग्निष्टोमादिभिरनुयष्टव्यतोच्यते किं त्वग्निष्टोमादिशब्दसामानाधिकरण्यादेकाहग्राही द्विरात्रादिशब्दसामानाधिकरण्याच्चाहीनग्राही यजिः सत्रवाचिशब्दाभावादग्निष्टोमादिसंस्थासद्भावमात्रेण च सत्रग्रहणे ऽहीनानामपि तथैव ग्रहणसिद्धेर्द्विरात्रादिवाक्यानर्थक्यापत्तेः सत्रग्राहित्वं कथमिति न विद्मः । चयनसंस्कृतस्याग्नेरेकाहाद्यङ्गत्वोक्तये ऽनुशब्द इत्युत्तरार्द्धार्थः श्लोकार्थमुपपादयितुमाह * यदि हीति * यदग्निष्टोमादिभिर्यागैः कुर्यात्तदग्निमन्विति व्यधिकरणत्वेनाग्निशब्दस्य यजिसामानाधिक-

रण्याभावाच्च दुःखेन यागवाचित्वकल्पना युक्तेत्युक्ते सामानाधि-
करण्याभावे ऽपि द्वितीयोक्तानुयजनकर्मत्वान्यथानुपपत्त्याग्नेर्यागत्वं
कल्पयिष्यतइत्याशङ्क्य * यदि चेत्युक्तम् * अग्निचयनस्याग्निष्टो-
मादिकाललक्षणोक्त्यर्थत्वेनानुशब्दस्यानुर्लक्षणइति कर्मप्रवचनीय-
सञ्ज्ञत्वात्कर्मप्रवचनीययुक्ते द्वितीयेति स्मृतेस्तद्योगनिमित्तत्वान्नेयं
द्वितीया कर्मणीत्यर्थः । लक्षणार्थतानुशब्दस्य तत्रेत्यनेनोक्ता चिनो-
त्यश्रुतेरग्निचयनमन्वित्यर्थालाभमाशङ्क्याग्नि * शब्दश्चेत्युक्तम् *
६१६।४ श्लोकार्थमुपसंहरति * तेन ऋत्वङ्गभावेति * तृतीयेत्थम्भूतलक्षणे
ऽग्निष्टोमेनैवानुयजतीत्यग्निष्टोमाख्यप्रकृत्यङ्गत्वे विहिते ऽतिदेशेनैवो-
क्थ्यादिषु प्राप्तेस्तमुक्थ्येनेत्यादेस्तुत्यर्थानुवादत्वेनैकवाक्यत्वावगमा-
द् बहुवचनानुपपत्तिमाशङ्कते * चोदकेनेवेति * दशमे य एवं वि-
द्वानग्निं चिनुतइति वाक्यविहितमग्निमुपष्टम्भनं वा एतद्यज्ञस्य यद्-
तिग्राह्या इति वाक्यविहितानतिग्राह्यानुदाहृत्याग्न्यतिग्राह्यं विकृ-
तावतिदिश्यते न वेति सन्दिग्धे अग्न्यतिग्राह्यस्य विकृतावुपदेशा-
दप्रवृत्तिः स्यादिति सूत्रेणाग्नेस्तमुक्थ्येनेत्यादिनातिग्राह्याणां च यदु-
क्थ्ये ऽतिगृह्णीयादित्यादिना कासु चिद्विकृतिषूपदेशादतिदेशाप्र-
वृत्तिं पूर्वपक्षयित्वा निर्देशस्यापर्यायप्रवृत्तेः सर्वाङ्गं तुल्यत्वादग्न्य-
तिग्राह्यस्यापि ग्रहणमितिग्रहणं तुल्यत्वादित्यनेन सिद्धान्तिते वि-
कृतौ तर्ह्युपदेशः किमर्थ इत्याशङ्क्यातिदेशागृहीतस्यापि कासु चि-
द्विकृतिषूपदेशेन ग्रहणे गुणकामप्रवृत्त्यर्थं समानविधानत्वं प्रयोजन-
मिति ग्रहणे समानविधानं स्यादित्यनेन वक्ष्यमाणत्वेनाप्रतीयमान-
स्तुत्यर्थत्वकल्पनायोगाद्वचनानीति बहुवचनोपपत्तिरिति परिहरति
* दशम इति * कर्मण्यपि द्वितीयायां तत्क्रियात्वजात्यपेक्षयानुश-
ब्दस्य यजिविशेषणत्वोपपत्तेरवान्तरजातितुल्यत्वानावश्यकत्वाच्चा-
नुयजनकर्मत्वमात्रेणाग्नेर्यागरूपत्वावगतिरित्याह * न चेति * पूर्व-
पक्षोक्तदृष्टान्तानुभाषणपूर्वं वैषम्यमाह * यत्त्विति * किं चिदकु-
र्वतो देवदत्तस्य यज्ञदत्तकर्मकर्तृकानुगमनकर्मत्वायोगात् द्वितीयोक्त-
कर्मत्वान्यथानुपपत्त्या कर्तृत्वमात्रोपादाने सति क्रियान्तरानुपादा-
नात्तुल्यक्रियाकल्पनं युक्तं चयनसंस्कृताग्निवाचिना त्वग्निशब्देन
चयनाख्यक्रियान्तरोपादानान्न तुल्यक्रियाकल्पना युक्तेत्यर्थः ।

तत्संयोगात्क्रतुस्तदाख्यः स्यात्तेन धर्म-
विधानानि ॥ २३ ॥

अग्ने. स्तोत्रमित्यादावग्निशब्दवाच्यचयनसंस्कृतज्वलना-

ख्यद्रव्यसंयोगाल्लक्षणयाग्न्याख्यः क्रतुः स्यात्तेन कारणेनाग्नेस्तोत्रादिधर्मविधानान्युपपद्यन्तइत्येवं पूर्वपक्षोक्तलिङ्गपरिहारार्थत्वेन सूत्रव्याख्यानार्थं यस्त्वित्यादिभाष्यं तात्पर्यतो व्याचष्टे * अग्नेरिति * अग्निसंयोगाद्यागलक्षणायां यागमात्रप्रसक्तिमाशङ्क्य चित्यविशेषणं तद्भाष्ये कृतं तद्व्याचष्टे *ज्वलनेनेति* व्याख्येयभाष्यानुसारादग्निशब्दश्चेति पूर्वसूत्रस्थवार्त्तिकालोचनया च ज्वलनसामान्येन स्थापनसंस्कृतविशेषो लक्ष्यतइत्यर्थः । वेतसशाखयावकाभिश्चाग्निं विकर्षतीत्यादौ त्वग्निस्थापनात्प्राक् प्रयोगादग्निशब्दस्य स्थललक्षणार्थत्वमुक्तं तत्तेष्वेवेत्येवकारार्थमाह * न चेति * भाष्यकारान्तरकृतानि तु चिन्तान्तराणि कस्मान्नानेन भाष्यकृता दर्शितानीत्याशङ्क्याह * यस्त्विति * फलवदफलवन्नित्यानित्यत्वविचारणमग्न्याद्युदाहरणेषु पर्णमय्यधिकरणसिद्धो प्राकृतवैकृतत्वविचारश्चास्मिन्नेवोदाहरणे ऽग्न्यतिग्राह्याधिकरणसिद्धविचारस्तु गोदोहनोदाहरणे उत्तरवेदिविकाराविकारकाम्यो गुणो नित्यमर्थं करोतीति व्युत्पादनान्नैमित्तिक तु प्रकृतौ तद्विकारः संयोगविशेषादिति तृतीयाधिकरणसिद्धः सङ्कर्षे द्वितीये ऽध्याये मध्यमायामुपसद्यग्निश्चीयते प्रकृत्युपकृतत्वादित्यत्राधिकरणे मध्यमायामुपसद्यग्निचयनं सिद्धवत्। किं चितावौत्तरवेदिका धर्माः कार्या न वेति सन्दिह्याग्न्युत्तरवेद्योः समुच्चयात् भिन्नकार्यत्वावगमेनाग्नेरुत्तरवेदिकार्यापत्त्यभावावगतेरौत्तरवेदिकधर्मानतिदेशं पूर्वपक्षयित्वा सोत्तरवेदिस्तु क्रतुं चित्वा नोत्तरवेद्या अग्निश्चीयतइति वचनालोचनया समुच्चयावगमे ऽपि चयननिष्पादितस्थलस्याग्निं चिनुतइति द्वितीयोक्ताग्निसंस्कारार्थत्वे ऽस्य योग्यतयाग्निधारणात्मकसंस्कारार्थत्वावगमनोत्तरवेद्यामग्निं निदधातीत्यग्निधारणाख्योत्तरवेदिकार्यापत्त्यवगमात् कार्यैक्ये ऽपि च वेद्योर्हवींष्यासादयतीति वेदिबर्हिषोरिव स्थलोत्तरवेद्योरपि पाक्षिकप्राप्तयभावेन नियमाविध्यभावादन्योन्यनैरपेक्ष्यानवगतेः समुच्चयाविरोधादुत्तरवेदिकार्यापत्त्या स्थलाख्यस्याग्नेस्तद्धर्मातिदेशं सिद्धान्तयितुम् उत्तरवेद्या समुच्चीयमाने ऽपि चयने उत्तरवेदिकार्यापत्ते उत्तरवेदिधर्मा भवेयुरिति वदता तत्रत्यभाष्यकृतौत्तरवैदिकधर्मग्राहित्वलक्षणस्य तद्विकारत्वस्यातद्विकारत्वपूर्वपक्षनिरासपूर्वमुपपादयिष्यमाणत्वात् सिद्धवच्च समुच्चयोक्त्या बाधरूपतद्विकारत्वानिरासेन बाधरूपस्यातद्विकारत्वस्य तत्र वक्ष्यमाणत्वात्तद्-

१ नित्यानित्यत्वेति २ पु० पा० ।

२ अग्न्यतिग्राह्याधिकरणसिद्धो नित्यानित्यत्वविचारस्त्विति २ पु० पा० ।

धिकरणसिद्धः न केवलं गतार्थत्वादुपेक्ष्यं किं त्वप्रसङ्गत्वादपीति
इहेत्यनेनोक्तं कस्मात्तर्हि तेन कृत इत्यपेक्षायामुपहासार्थम् * स्म-
र्त्रन्युक्तम् * प्रासङ्गिकमधिकरणद्वयं समाप्य प्रकरणार्थमुपसंह-
रति * तस्मादिति * पूर्वत्र सम्भवाद्व्यादिर्न भेदक इत्यर्थः ।

॥ मासाग्निहोत्रादीनां क्रत्वन्तरताधिकरणम् ॥ ११ ॥

प्रकरणान्तरे प्रयोजनान्यत्वम् ॥ २४ ॥

प्रकरणान्तरविचारस्यानन्तरासङ्गतिमाशङ्क्याह * गतिमि-
६।२।३। ति * प्रासङ्गिकचिन्तावदपवादचिन्तापि प्रकृताव्यवधायिकेति सू-
चयितुमपवादः प्रसक्तत्वेनोपचरितः गुणचिन्तयापि प्रकरणान्तर-
चिन्तायाः सङ्गत्यभावमाशङ्क्य भेदकान्तरस्यावाच्यत्वात्पारिशेषि-
की सङ्गतिः पञ्चस्वित्यनेनोक्ता । पूर्वपक्षमाह * तत्र तावदिति *
दर्शपूर्णमासवैश्वदेववरुणप्रघाससाकमेधसुनासीरीयापयादिशब्देन
गृहीतानि । श्लोकार्थमुपपादयति *यथैवेति* भाष्ये कालविध्युक्तेः
प्रयोजनमाह * न चेति * ननु नित्ये ऽग्निहोत्रे दर्शपूर्णमासयोश्च
जीवनस्य निमित्ततयाप्यन्वये तावत्कालमनुष्ठेयत्वावगतेर्जीवनाव-
धिकालावरोधान्मासविधिर्न भवतीत्याशङ्क्याह *न चेति* अप्रक-
रणाधीनस्यापि मासस्य साक्षात्कर्मान्वयविधेः प्रकरणाधीतेन का-
लेन तुल्यबलत्वाविरोधमभ्युपगम्यातुल्यकल्पत्वेनातुल्यबलत्वाशङ्का-
निरासायातुल्यकल्पजरावधित्रिंशद्वर्षपरिमितकालान्तरपरामर्शा-
दिशब्दः जीर्णस्यापि सहायोपादानेनानुष्ठातुं शक्तस्य जीवनावधि-
कालो ऽसहायस्य जरावधिः प्रविव्राजिषोः त्रिंशद्वर्षपरिमित इति
जीवनादिकालानां व्यवस्थितविकल्पवदत्यन्तविरक्तस्य शीघ्रं प्रवि-
व्रजिषोर्मासो ऽपि वा व्यवस्थितविषयतया विधातुं शक्य इत्याशयः
काम्यप्रयोगस्य वा सायं प्रातःकालत्वावगमे ऽपि सायं प्रातर्मासं
जुहुयादित्यन्वयोपपत्तेर्विरोधिकालान्तरानवगमान्मासविधिर्भवि-
ष्यतीत्यन्यथा परिहरति * यो वेति * नन्विति भाष्येण मास-
विधेर्नित्याग्निहोत्रादिविषयत्वे प्रकरणबाधदोषापत्त्याशङ्क्य काममि-
त्यनेन परिहृतं तद्व्याचष्टे * प्रकरणस्य चेति * प्रकरणानुग्र-
हार्थं दीक्षितो न ददाति न जुहोति न पचतीत्यग्निहोत्रादीनां पर्युद-
स्तानां प्रतिप्रसवो ऽयमिति पक्षान्तरमाह * अथ वेति * दीक्षित-
स्य दानहोमपाकप्रतिषेधे ऽविशेषात्सर्वपाकदानहोमप्रतिषेधः स्या-
दिति दशमाधिकरणे ऽपि तु वाक्यशेषत्वादितरपर्युदासः स्यात्
प्रतिषेधे विकल्पः स्यादिति सिद्धान्तसूत्रेण पर्युदासत्वस्य वक्ष्य-

माणत्वात्प्रतिषेधोक्तिः पर्युदासलक्षणार्था । एवमपि प्रकरणानुग्रहः कथमित्याशङ्क्याह * स त्विति * कौण्डपायिनप्रयोगमध्ये प्रतिप्रसवकरणात्प्रकरणपाठो युक्त इत्याशयः । अस्मिन्पक्षे प्रकरणपाठोपपत्तावपि तद्व्यापाराभावात्प्रकरणाननुग्रहणापरितोषात्सिद्धान्ते चाग्निहोत्रादिसंज्ञानां षण्मासपरिमितानां षण्णां षण्मासपरिमितसोमयागसहितानां सम्वत्सरपरिमितमत्र प्रयोगवचनेन फलविधिसूचनार्थं स्वगतमाह * अथ वेति * न चान्यसाहित्यमात्रेणान्यत्वापत्तिरित्याह * न हीति * नन्वगतफलस्याग्निहोत्रादेर्नैराकाङ्क्ष्यात्फलान्तरान्वयानुपपत्तेः फलान्तरान्वयादेवान्यतापत्स्यत इत्याशङ्क्याह * न चेति * ननु कर्मणस्त्वप्रवृत्तित्वादित्यत्र करणस्य क्रत्वन्तरगमनविधिनिषेधान्न पूर्वस्याग्निहोत्रादेः कौण्डपायिनान्तःपातो युक्त इत्याशङ्क्याह * न चेति * अतिदेशः क्रत्वन्तरान्वयासम्भवे ऽप्युपदेशतो ऽन्वयाविरोधः स्वशब्दगिरोक्तः। पूर्वपक्षमुपसंहरति * तस्मादिति * यथाभाष्य सिद्धान्तं दूषयितुमुपन्यस्यती- ६।८।१
ति पूर्वत्रासम्भव्युपसल्लक्षणगुणरूपेण हेतुना भिन्नतेत्यर्थः । श्लोकं व्याचष्टे * यदि हीति * स्वार्थोपसदभावे ऽपि पश्वङ्गपरिधिप्रहरणस्य हारियोजनकाललक्षकत्ववत् परार्थानामप्युपसदामग्निहोत्रादिकाललक्षणाकृतोपपत्तिमाशङ्क्य * परार्था वेत्युक्तम् * हारियोजनस्य ज्योतिष्टोमावयवत्वात्परिधिप्रहरणस्य पशुद्वारा ज्योतिष्टोमाङ्गत्वात् *एकप्रयोगवचनग्रहणाद्युक्तम्*काललक्षकत्वं न त्विहैव प्रयोगवचनग्रहणमस्तीत्याशयः । एकप्रयोगवचनग्रहणाभावे ऽपि दर्शपूर्णमासयोः सोमकाललक्षणाकत्ववदुपपत्त्याशङ्कानिरासस्सूचनार्थो वाशब्दकृतः । दर्शपूर्णमासस्य सोमाधिकरणप्रतिपत्त्या काललक्षणा युक्ता उपसदां तु क्रत्वन्तरमध्यपातित्वात्क्रत्वन्तरप्रयोगमध्ये च क्रत्वन्तरानिषेधादग्निहोत्राद्यधिकारप्रतिपत्त्यर्थत्वेन काललक्षणार्थत्वानुपपत्ते. क्रमप्रतिपत्त्यर्था लक्षणा वाच्या न च भिन्नप्रयोगवचनगृहीतानां क्रमो ऽस्तीत्याशयः । ता इत्यनेनाग्निहोत्राद्यङ्गत्वेनोपसद्विधिरभिप्रेतः।प्रति प्रसवे ऽग्निहोत्राद्यङ्गत्वाद्विधेः सत्रैकदेशत्वे चोपसदुत्तरकालत्वस्यापि सोमयागवत्प्राप्तेरविधानान्न वाक्यभेदो ऽस्तीत्याशङ्क्याह * तस्मादेवेति * अङ्गत्वाविधाने ऽप्युपसदुत्तरकालत्वस्य प्रतिप्रसवे ऽवश्यविधेयत्वान्निर्ज्ञातसायमादिकालत्वेन च सत्रत्वोपाधिककालाग्रहणात्सत्रैकदेशत्वे ऽपि विधेयत्वावगतेर्वाक्यभेदो ऽपरिहार्य इत्याशयः । कर्मान्तरत्वे ऽपि तर्हि नामातिदेशतो निर्ज्ञातकालत्वात्तस्य च प्रयोगवचनाद् बलीयस्त्वो-

दकादपि बलीयस्त्वेन सत्रप्रयोगवचनेनोपसदुत्तरकालत्वाग्रहणाद्
नेकार्थविधिः स्यादित्याशङ्क्याह * कर्मान्तरंति * उपसंहरति * त-
स्मादिति * दूषयितुम् * आरभते इदं त्विति * वाक्यभेदाख्यप्र-
सिद्धभेदकान्तरापत्तिदोषे ऽभिहिते वाक्यभेदोक्त्या चोदिते हि त-
दर्थत्वात्तस्य तस्योपदिश्येतेत्यनेन गुणस्यानेकात्मकत्वनिमित्तपूर्व-
त्रासम्भवलक्षणभेदकत्वहेतूक्तेर्न भेदकान्तरापत्तिरित्याशङ्क्य *
अथ यत्नुक्तम् * प्रकरणान्तरानवकाशमुपपादयति * तथा हीति *
दर्शपूर्णमासाद्युदाहरणाव्यापकत्वादपि न वाक्यभेदो भेदहेतुरि-
त्याह * किं चेति * सत्रैकदेशत्वेनाग्निहोत्रादिविधावुपसदुत्तर-
कालसोमरूपयागसत्रैकदेशसाहचर्येणाग्निहोत्रादेरपि सत्रैकदेशस्य
तदुत्तरकालत्वप्राप्तेरग्निहोत्रे ऽपि वाक्यभेदस्य शक्यपरिहारत्वं
शक्त्या सूचितम् । श्लोकं व्याचष्टे * मासमिति * न चोपसदो
ऽग्निहोत्रस्य दर्शपूर्णमासयोश्चेति भाष्यपर्यालोचनमात्रेणानुषङ्गमा-
६२०।१ शङ्कते * तत्रेति * निरस्यति * तदिति * श्लोकं व्याचष्टे *
मासमिति * न चोपसदो ऽग्निहोत्रस्य दर्शपूर्णमासयोश्चेति भा-
ष्यपर्यालोचनमात्रेणानुषङ्गमाशङ्कते * तत्रेति * श्लोकं व्याचष्टे
* नत्रेति * अनुषङ्गवादिनमुपहसति * यस्त्विति * उ-
पहासमार्ग प्रति वेदाननुज्ञातोपसदावृत्त्यनौचित्यत्वादनि-
ष्टापत्तिमाह * तत्र त्विति * क्त्वाप्रत्ययस्य पूर्वकालमात्रवाचित्वा-
दग्निहोत्रात्प्राक् कृतानामुपसदां दर्शपूर्णमासादिपूर्वकालत्वोपपत्ते-
र्नानुषङ्गेण वृत्त्यापत्तिरिति शङ्कते * तथेति * सर्वत्रानुषङ्गस्य यत्प्र-
योजनं सर्वेभ्यः प्रागनुष्ठानं तत्संपादनमित्यर्थः । शब्दोच्चारणमपि त-
द्युपसदन्सकृदेव स्थितं सदनुषङ्गलभ्यं सर्वेषामग्निहोत्रादीनामुप-
सदुत्तरकालत्वबोधलक्षणमुपकारं करिष्यतीत्यनुषङ्गानर्थक्यमिति
परिहरति * तथा सतीति * कथमित्यपेक्षायां पाठक्रमानुरोधेनत-
त्पामग्निहोत्रोत्तरकालतोक्ता यथाभाष्यं सिद्धान्तव्याख्यादूषणमु-
पसंहरति * तस्मादिति * स्वमतेन सिद्धान्तमुपक्रमते * इतीति *
श्लोकं व्याख्यास्यन्प्रकरणान्तरोक्तिं तावत्प्रकृतबुद्धिविच्छेदाशयत्वे-
न व्याख्यातुमाह * इह तावदिति * अनुपादेयान्वये कर्मणो विधेय-
ताभेदहेतुत्वस्यासिद्धावस्थत्वात्केनापीत्यनवक्लृप्तिः अतिरात्रइत्या-
दौ विपरिवृत्तिसद्भावे प्रकरणान्तरस्यं धात्वर्थभेदकत्वाभावात्प्रक-
रणान्तरं सदप्यनुपयोगीत्यर्थः । प्रकरणान्तरोक्तेश्च प्रकृतबुद्धिविच्छे-
दाशयतोत्तरसूत्रे स्पष्टयिष्यतइत्याह * तथा चेति * श्लोकं व्या-
ख्यातुमुपक्रमते * सर्वत्र चेति * व्याचष्टे * तत्रेति *

प्रदेशान्तरस्थे कर्मणि प्राप्तिबुद्ध्यभावादुपादेयस्यापि गुणस्याश-
क्यविधित्वाशङ्कोद्देशोक्त्या निरस्ता । स्वभावतः प्राप्तिबुद्ध्यभावे
ऽपि एकोद्देशेनेतरोपादानं विनान्वयायोगादुपपदश्रुतौ च कर्मानु-
[१] नादाकाङ्क्षणात् यत् जुहोति[१] तदाहवनीयइत्युद्देशात्प्राप्तिबुद्धिः सम्भव-
तीत्याशयः । यस्मिन्देशे काले वा कर्म चिकीर्ष्यते तस्मिन्देशाद्यनु-
पादेयपश्चकस्यापादयितुमशक्यत्वाद्देशाद्यन्वये तदुद्देशेनैव कर्म-
विधेयमित्युक्ते तथाप्यन्यार्थेन विधेयत्वात्समादिविधिवन्न कर्मभेदा-
पत्तिरित्याशङ्क्य* परोद्देशेन चेत्याद्युक्तम्* समादावपि विधिसाम- ६२०।५
र्थ्यात्कर्मान्तरे बुद्धिर्भवन्ती बलीयस्या विपरिवृत्त्या बाध्यते तदभावे
विशिष्टविध्युपपत्तेर्न भेदबुद्धिर्बाधितुं युक्तेत्याशयः । एतदेवरूपको-
क्त्या विवृणोति * एव हीति * सामान्यन्यायमुक्त्वा प्रकृते योजय-
ति * तदिहेति * ननु सन्निधेर्यद्वृत्तयोगलक्षणस्य चोद्देशस्य प्रा-
प्तिबुद्धिहेतोरभावे ऽपि नामधेयात्प्राप्तिबुद्धिर्भविष्यतीत्याशङ्कते *
ननु चेति * ननु नाम्ना पूर्वकर्मणि बुद्धिस्थीकृते ऽपि नामैक्य-
स्यानैकान्तिकत्वेन तदेवेदमिति तत्त्वप्रत्यभिज्ञाभावान्नोत्पत्तिः प्रति-
बद्धुं शक्येत्याशङ्क्याह * ततश्चेति * बुद्धिस्थत्वे ऽपि ६२१।१
प्रत्यभिज्ञानाभ्युपगमे सन्निधाने ऽप्यप्रत्यभिज्ञापत्तेर्बुद्धिस्थत्वमा-
त्रेण प्रत्यभिज्ञाया वक्तव्यत्वात् नामापि प्रत्यभिज्ञाहेतुत्वा-
दुत्पत्तिं प्रतिबध्नातीत्याशयः । यतश्च नाम्नो ऽप्युपनयन-
शक्तिरस्तीति ततश्चेत्यनेन परामृष्टान्तरार्थं विवृणोति * यत्रेति *
सन्निधेस्तावद्दौर्बल्ये ऽप्यविलक्षणकर्मोपस्थापकत्वात्प्रत्यभिज्ञाहेतुता
युक्तेति परिहर्तुमारभते * उच्यतइति * श्लोकं व्याचष्टे * स-
न्निधाने हीति * नाम्नस्तु पूर्वकर्मोपस्थापकत्वस्य पूर्वकर्मवाचि-
त्वनिमित्तकत्वादाख्यातस्य च पूर्वकर्मविषयत्वं विना नाम्नः पूर्वक-
र्मवाचित्वानवधारणात्पूर्वकर्मोपस्थापकत्वानुपपत्तेर्नोत्पत्तिप्रतिबन्ध-
कत्वं सम्भवतीति परिहरति * नामधेयं पुनरिति * अभ्युपेत्याप्युपस्था-
पकत्वं भावनावाचित्वाभावात्तदुपस्थापकत्वं न सम्भवतीत्याह * किं
चेति * श्लोकं व्याचष्टे * सामानाधिकरण्येन हीति * वाक्यार्थत्वात्
प्रधानभूता भावना * प्रयोजनशब्देनोक्तेति सूचनायेतीत्युक्त-
म् * परमार्थतस्तु वैलक्षण्याद्धात्वर्थो ऽपि नोपस्थाप्यतइत्याह *
अथ वेति * नन्वाख्यातोक्तरूपानुपस्थापने ऽपि नित्याग्निहोत्रविधि-
स्थनामोक्तस्य सत्त्वरूपस्योपस्थापनं भविष्यतीत्याशङ्क्य विधिविपर्यी-
कृतस्य रूपस्योपस्थापनीयत्वात् भावार्थाधिकरणन्यायेन च धात्वर्थ-

१ जुहुयादिति २ पु० पा० ।

स्य धातुना विधिविषयीकरणान्न नाम्नोपस्थापनं सम्भवतीत्येवं
निरस्यन् श्लोकं व्याचष्टे * असत्त्वेति * द्रव्यशब्देन सत्त्वशब्दं निष्प-
१२२१। न्नरूपवाचितया व्याख्याय तदुपपादनार्थम् * लिङ्गेत्युक्तम् *
लिङ्गसंख्यवाचिन्याः सुपः प्रातिपदिकपरत्वस्मृतेस्तस्य च प्रातिप-
दिकार्थः सत्त्वेति सत्त्ववाचित्वस्मृतेर्लिङ्गसंख्यान्वयार्हत्वेन प्रातिप-
दिकत्वात्सत्त्ववाचितेत्याशयः । नन्वसत्वभूतस्य धात्वर्थस्य धातु-
ना विधिविषयीकृतस्य नाम्नानुपस्थापनाद्भेदे ऽभ्युपगम्यमाने ऽति
रात्रश्चतुर्विंश इत्यादावाख्याताश्रुतेरसत्त्वभूतधात्वर्थानुपादानात्
सत्त्वभूतस्यैव धात्वर्थस्यातिरात्रः कार्यश्चतुर्विंशः कार्य इत्यादिवि-
धिपदाध्याहारेण नाम्ना विधिविषयीकृतस्य प्रकरणान्तरे ऽपि ना-
म्नोपस्थापनसम्भवादकर्मान्तरत्वापत्तेः प्रकरणान्तरोक्तिरनर्थिका
स्यादित्याशङ्क्याभ्युपगमेन तावत्परिहरति * यत्र त्विति * अव-
भृथं यन्तीत्यादावाख्यातश्रुतावसत्त्वभूताया भावनाया विधिविष-
यीकृताया नाम्नानुपस्थापनात्प्रकरणान्तरेण भेदसिद्ध्यर्थत्वात्प्रकर-
णान्तरोक्त्यर्थवत्त्वशङ्कानिरासार्थम् * भावना वेत्युक्तम् * शुद्धाया
भावनाया विधिविषयत्वायोगात्तदनुरञ्जकस्य च यागाख्यधात्व-
र्थस्य वारुणेनैककपालेनावभृथं यन्तीति वारुणशब्दोक्तद्रव्यदेवता-
न्वयप्रकल्पितेन यजिना भावनानुरूपेणोक्तावपि प्रकरणान्तरे यज्य-
भावेनासत्त्वभूतधात्वर्थानुरक्तात्मना भावनानुक्तेर्धात्वर्थाधीननिरूप-
णत्वाच्च भावनायास्तद्भेदं विना भेदो न युक्त इत्याशयः । पूर्वक-
र्मोपस्थापनसम्भवे ऽनुपादेयान्वयसहकृतस्यापि प्रकरणान्तरस्य
भेदकत्वं नास्तीत्येकेनेत्यनेनोक्तम्। असत्त्वभूतधात्वर्थानुपादाने तावदु-
दाहरणमाह * तद्यथेति * गवामयने प्रायणीयसञ्ज्ञमतिरात्रसंस्थं
प्रथममहश्चतुर्विंशसञ्ज्ञं च द्वितीयं पृष्ठाभिप्लवसञ्ज्ञाश्च षडहा
विहिताः प्रकरणान्तरे ऽतिरात्रइत्यादिवचनेनोपस्थाप्य यं कामयन्ते
तमेनेनाप्नुवन्तीत्यादिवचनान्तरेण फले विधीयन्तइत्यर्थः । एकस्य
शब्दस्य पूर्वकर्मोपस्थापने ऽन्यत्र च विधौ व्यापारायोगादेकेनोप-
स्थाप्य * अपरेण विधीयतइत्युक्तम् * असत्वभूतधात्वर्थानुरक्ता-
त्मना भावनानुक्तावुदाहरणमाह * यथा चेति * वारुणया
निष्कासेन तुषैश्चावभृथं यन्तीति वरुणप्रघासप्रकरणस्थे-
नावभृथशब्देन सौमिकमवभृथाख्यं कर्मोपस्थाप्य निष्का-
साख्ये ऽङ्गसंस्कार्ये फलोक्त्युपलक्षिते यन्तीत्यव-
भृथानुष्ठानार्थप्राप्तगमनानुवादिप्रत्ययानुग्रहार्थधातुपरेण विधीयत-
इत्यर्थः । तृतीयया तु निष्कासस्य साधनत्वोक्तावपि निष्कासस्य

वारुण्यामिक्षायागोपयुक्तद्रव्यशेषत्वात्तुषाणां चाग्नेययागाङ्गद्रव्यशेषत्वात् यत्किंचित्सोमलिप्तं तेनावभृथं यन्तीतिवत्प्रयाजशेषेण हवींष्यभिघारयतीतिवच्च प्रतिपाद्यत्वरूपसंस्कार्यत्वाविरोधः । प्रकरणान्तरोक्त्यर्थत्वाय भेदपक्षमाह * यदा त्विति * संस्कार्योपलक्षणाय यादिशब्दः नाम्ना पूर्वकर्मोपस्थानादुत्पत्तिप्रतिबन्धमाशङ्क्यो * त्पत्तीत्युक्तम् * विधिविपरिवृत्तिरेवोत्पत्तिं प्रतिबध्नाति न स्वरूपविपरिवृत्तिः स्वरूपप्राप्तावपि दध्यादिवत् विधेयत्वोपपत्तिरित्याशयः । नाम्नोत्पत्तिविधिसहचरितेनोत्पत्तिविधिविपरिवृत्तिमाशङ्क्य साक्षाद्विधिविपरिवृत्तिः प्रतिषेधिका नान्यद्वारेति सूचयितुम् * बलीयस्येत्युक्तम् * यावद्विधित्वमनिवार्यमाणं तावत्सर्वं भिनत्ति, न त्वसत्त्वभूतधात्वर्थावच्छिन्नभावनामेव केवलमिति यावच्छब्दार्थः । भाव्यनिष्ठत्वाद्भावनाया धात्वर्थभेदं विनापि प्रत्यभिज्ञानाभावे भाव्यभेदाद्भेदोपपत्तेर्धात्वर्थप्रत्यभिज्ञामात्रेणोभयाभेदायोगाद्दध्यादिवच्च विधेयत्वानपेक्षयागादिस्वरूपाप्राप्तेर्विधिविषयत्वविपरिवृत्तिनिरपेक्षस्वरूपविषयविपरिवृत्त्ययोगान्नाम्ना विधिविषयभूतधात्वर्थविपरिवृत्तेरेव कृतत्वेनोभयभेदस्याप्ययोगात्पक्षद्वयापरितोषेण भावनामात्रभेदं धात्वर्थभेदं च स्वमतेनाह * परमार्थतस्त्विति * आसनमुपवेशनमुपायश्चोपगमनं तौ वाच्यतया विद्येते ययोर्धात्वोस्तत्परप्रत्ययवाचिते कर्मणि तस्यैव पूर्वविहितस्य धात्वर्थस्य नाम्नोपादानाद्धात्वर्थे विभिद्यत इत्युक्ते ऽग्निहोत्रादिवन्नाम्नानुपस्थापनमाशङ्क्य तद्वैषम्याय धात्वर्थश्रुत्युक्तिः । श्लोकं व्याचष्टे * नामेति * विधिपदानपेक्षस्यापि नाम्नो विधिविषयभूतधात्वर्थोपस्थापनोपपत्तिसूचनार्थो मात्रशब्दः प्रकरणान्तरस्थस्यापि यागस्य प्राग्विधिविषयीकृतत्वं विवक्षित्वा प्राकृतत्वोक्तिः । सत्रशब्दस्योपलक्षणार्थत्वादवभृथाख्ययागाभेदे ऽपि च भावनाभेदात्तथावभृथः साम्यादिति सप्तमाधिकरणे वक्ष्यमाणसौमिकावभृथभावनाधर्मातिदेशाविरोधात्करणत्वेन वावभृथस्यातिदेशायोगे ऽपि स्वशब्देनोपदिष्टस्य स्वधर्मसन्निधापकत्वात्काम्यगुणाश्रयभूताग्निहोत्रादिवदतिदेशनिमित्तमभिप्रेत्यावभृथनाम्नो ऽतिदेशकत्वोक्त्युपपत्तेरवभृथे ऽप्ययमेव प्रकारः अतो नाम्नोपस्थापनाद्धात्वर्थाभेदे ऽपि भावनाभेदस्य प्रकरणान्तरहेतुकत्वात्प्रकरणान्तरोक्तिरर्थवतीत्याह * तस्मादिति * भाष्यमपि गमयति * भाष्येति * नन्वनुपादेयान्वयसहकृतस्यासन्निधेर्भेदहेतुत्वे ऽथोच्यतेत्यादिभाष्येण वाक्यभेदहेतुत्वोक्तिरयुक्ता स्यादित्याशङ्क्याह * अथेति * न च यत्स-

मित्सम्बन्धेन क्रियतइत्यभ्यासाधिकरणभाष्यं समिदादिपदस्य देव-
तानभिधायित्वाद् गुणहेतुकभेदाभावे ऽप्यभ्युपेत्यवादत्वेन यथा
समर्थितं तथेदमपि समर्थनीयमित्यर्थः ।

॥ आग्नेयादिकास्येष्टयधिकरणम् ॥ १२ ॥

फलं चाकर्म सन्निधौ ॥ २५ ॥

ननु तदिह षड्विधः कर्मभेदो वर्त्तिष्यतइति भाष्ये षण्णामेव भेदहेतुत्वप्रतिज्ञानात्तेषां च पर्यवसितत्वात्किमर्थमेतत्सूत्रमित्याशङ्क्याह * एवमिति * सर्वभेदहेतुसमाप्तावपि करणान्तरस्यैवानुपादेयान्वयसहकृतासन्निधिलक्षणप्रकारविशेषोक्त्यर्थमेतत्सूत्रमित्यर्थः । अन्तरशब्दस्य भेदवाचित्वाद्भेदशब्दस्य च विशेषवाचित्वात्प्रकारान्तरशब्देन प्रकारविशेषोक्तिः । एतदेव विवृणोति * स-
८२३।८ र्वेति * कालान्वयवाक्योदाहरणानभिव्यक्तावपि कालस्य कथंचित्कर्मानुरोधेनापादनाशक्तेरनुपादेयतया निःशङ्कत्वान्निमित्तस्य तु साम्युत्थानादेरापादयितुमपि शक्यत्वाद्देशस्यापि सरस्वतीदक्षिणतीरादुत्तरतः सरस्वतीप्रवाहनयनापादनशक्तेः फलसंस्कार्ययोस्तूपादेयत्वाशङ्काया वार्त्तिकएव वक्ष्यमाणत्वात्कालान्वयवाक्योदाहरणभ्रान्तिः फलं च भेदकमिति भाष्यात् कारणान्तरव्युत्पादनाशङ्कां निराकर्त्तुमाह * तत्त्विति * प्रकरणान्तरस्यानुपादेयान्वयानपेक्षस्य दाशार्हानस्येत्यादौ भेदकत्वादर्शनात्कथं भेदकतेत्याशङ्कानिरासार्थत्वेन प्रकरणान्तरस्य भेदकत्वं फलाद्यनुपादेयमपि सहकारि न तन्निरपेक्षं प्रकरणान्तरं भेदकमित्युक्ते कथं तस्य सहकारितेत्यपेक्षायामहीनादिवत्सन्निधिहेतुभूतस्यादृश्यत्वादेव कथं शाब्दोपबन्धस्यानुपादेयान्वयं कर्मणो ऽसत्त्वादित्यकर्मसन्निधिशब्देनोक्तमित्येवं सूत्रव्याख्यानार्थं तद्भाष्यमित्याशयः।एवं चासन्निधेरेव भेदहेतुत्वावधारणाद्भाक्षा धात्वर्थोपस्थापने ऽप्यनुपादेयान्वये भावनोपस्थापनहेतोः कस्य चिदभावाद्भावनाभेदं सूचयितु तदुदाहरणस्यानारभ्याधीतस्याभावात्प्रकरणान्तरशब्देनासन्निधिलक्षणा योच्यतइति गम्यते । नन्वनुपादेयमात्रान्वयकृतभेदोक्त्यर्थत्वे ऽस्य सूत्रस्य फलवद्देशनिमित्तयोरप्युपादेयतोदाहरणपूर्वं कस्मान्नोपपादितेत्याशङ्क्याह * तत्रेति * दाक्षिणात्वस्य स्वभावसिद्धदेशविशेषोपलक्षणार्थत्वादापाद्यस्य चोपलक्षणत्वायोगाद्देशस्योपादेयत्वाशङ्कानुपपत्तेः । प्राक् सिद्धिं च विना निमित्तत्वायोगान्निमित्तस्यापि कर्मतन्त्रापाद्यत्वलक्षणोपादेयत्वशङ्कानुपपत्तेर्नेह देशनिमित्ते उदाहृते इत्यर्थः ।

पूर्वसूत्रार्थस्पष्टीकरणार्थत्वे ऽस्य सूत्रस्याधिकरणभेदायोगात्पूर्वा-
धिकरणे ऽनुपादेयान्वयस्य भेदकत्वे व्युत्पादिते फलादेरुपादेय-
त्वात्पूर्वाधिकरणविषयत्वं नास्त्यनुपादेयत्वाद्वास्तीति पूर्वाधिकरण-
विषयविवेकार्थमेतत्सूत्रमिति व्याख्यान्तरं भाष्यानुसारार्थं सूचयि-
तुमधिकरणशब्दः । पूर्वाधिकरणे तर्हि कस्माद्देशादिवाक्यं नोदा-
हृतमित्याशङ्क्य कालवाक्योदाहरणस्योपलक्षणार्थत्वाद्व्याख्यातृभि-
र्दर्शनीयमित्याह * पूर्वत्रैवेति * दर्शयतीति * तद्यथेति *
एकेन सङ्कल्पितसत्रानारम्भस्य निमित्ततोच्यते परेणाप्यारब्धस्य स-
माप्तेरिति दर्शनायोदाहरणद्वयं स्वामिशब्दो ऽद्धवाची शम्याया दूरे
प्रक्षेपो यस्मिन्देशे स शम्यापरासः । न चाग्नेयवाक्ये ऽतिरात्रादिवा-
क्यवद्यज्यश्रुतेरसत्त्वभूतधात्वर्थानुपादानादाग्नेयशब्देन प्रकृतिभूत-
दार्शपौर्णमासिकाग्नेययागोपस्थापनोपपत्तेर्भावनाभेदे ऽपि धात्व-
र्थभेदो नास्तीत्याशङ्कां निराकर्त्तुम् । आग्नेयशब्दस्य नामधेयत्वाभावा-
त्तत्प्रकृतयागोपस्थापकत्वं सम्भवतीति परिहारसम्भवे ऽपि प्रौढ्या
नामधेयत्वे ऽप्यनुपस्थापकत्वं वक्तुं यजिं विना वाक्यासमाप्तेरस-
माप्तस्य च वाक्यान्तरानन्वयात् वाक्यान्तरस्थयज्यपेक्षानुपपत्तेर-
वश्यकल्प्येन यजिना नामार्थविलक्षणसत्त्वभूतधात्वर्थप्रतीतेर्नोप-
स्थापनं भवतीति परिहारमाशङ्कापूर्वमाह * यद्यपि चेति * धात्व-
र्थावच्छिन्नभावनाभेदोक्त्यर्थं कर्मान्तरशब्दः । संस्कार्यत्वाधिकरणे
विचार्यमित्यपेक्षायामाह * फलेति * प्राधान्यलक्षणस्योपादेयत्व-
शङ्कानिरासहेतोर्द्वयोस्तुल्यबलत्वात्फलोदाहरणेन संस्कार्योदाहर-
णमप्युपलक्षितमित्याशयः । किं तर्हि तयोरुदाहरणमित्यपेक्षायामाह
* तत्रेति * त्रैधातव्यवाक्ये संस्कार्यवाचिशब्दाभावात्कथं सं-
स्कार्योदाहरणतेत्याशङ्क्याह * यजमानेति * दीक्षणीयाकार्यं यज-
मानसंस्कारलक्षणार्थेन दीक्षणीयाशब्देन विशेषणभूतसंस्कार्ययज-
मानलक्षणं ऽप्यवसीयत इत्याशयः । प्रकरणान्तरशब्दव्याख्यार्थत्वेना-
कर्मसन्निधिशब्दव्याख्यानार्थतयानारभ्येति भाष्यं व्याचष्टे * अना-
रभ्येति * किं प्राप्तमिति पूर्वपक्षभाष्याशयमाह * तत्रेति * उप-
नयनादिवच्चाकर्मकालस्यापि संस्कारस्योपपत्तेः स्वतन्त्रविहितयापि
त्रैधातव्यया ज्योतिष्टोमादियजमानैः[2] संस्कर्त्तुं शक्य इति अनेनोप-
लक्षिते स्वारसिकप्रवृत्तिसम्भवे ऽपि अप्रवर्त्तमानं प्रत्युतो भार्यामु-
पेयादित्यादिनियमविधिदर्शनाद्यदाग्नेयं कुर्यात्तद्ब्रह्मकाम इति च

१ नामार्थलक्षणेति २ पु० पा० ।
२ ज्योतिष्टोमादिरिति २ प० ना० स्वयमेव यजमान इति पा० ।

विधायकस्य फलविषयत्वव्याख्योपपत्तेर्विधायकोपपत्तेर्विधायकसद्भावस्य वक्तुं शक्यत्वान्न शक्यतइति सिद्धान्तभाष्यमयुक्तमाशङ्क्योपपादयति * सिद्धान्तेति * असाधकं तु तादर्थ्यादिति षष्ठाद्यसिद्धान्तसूत्रेण विध्यन्यथानुपपत्त्या कामनोपबन्धाच्च स्वर्गादेः साध्यत्वप्रतीतेस्तादर्थ्येन कर्मविधावुक्ते प्रत्यर्थं चाभिसंयोगात्कर्मतो ह्यभिसम्बन्धस्तस्मात्कर्मोपदेशः स्यादित्यनेनाथ्र्यमानं स्वर्गादि प्रतीत्य लक्षणीकृत्योद्दिश्य तदाभिमुख्येन तत्तन्त्रतया कर्मणः समीहितस्वर्गाद्यन्वयावगतेरिति वदता फलस्योद्देश्यत्वादपि तादर्थ्येन कर्मविधिरिति वक्ष्यमाणत्वान्न कर्मतन्त्ररूपोपादेयत्वेन विधिः सम्भवतीत्याशयः । ननूद्देश्ययोरपि देशकालयोर्विधेयत्वदर्शनान्नोद्देश्यत्वमात्रेण विधेयता निराकर्त्तुं शक्येत्याशङ्क्याह * विधीयमान हीति* देशकालयोः सिद्धवत्काररूपोद्देश्यत्वे ऽपि स्वारसिकप्रवृत्तिविषयत्वापादकप्रयोजनाकाररूपेणोद्देश्यत्वाभावात्स्वरूपतश्च सिद्धवत्कृत्य निर्देशे ऽपि कर्माङ्गत्वेनाप्राप्तत्वाद्विधेयत्वोपपत्तिः। फलस्य तु प्रयोजनाकाररूपेणोद्देश्यत्वात् न विधेयत्वोपपत्तिरित्याशयः । विधायकस्य च फलविषयत्वाभ्युपगमे कर्मविषयत्वायोगात्तस्य निष्फलत्वं स्यादित्यभिधानार्थं न हीति भाष्यं व्याचष्टे * क्रियापि चेति * द्वयं तर्हि विधीयतामित्याशङ्क्याह * न चेति * यस्य पिता पितामहः सोमं न पिबेदित्युद्दिश्यमानयोरिव विधीयमानयोरप्यन्योन्यानाकाङ्क्षत्वेनान्वयापत्तेरवश्यमेकोद्देशेनतरस्मिन् विधेः फलस्योक्तेन न्यायेनोद्देश्यत्वावधारणात्कर्मणो विधेयतावसीयतइत्याशयः । फलोद्देशेन कर्मविध्युक्तेः प्रकृतोपयोगमाह * ततश्चेति * ननु फलस्योद्देश्यतायाः स्वर्गकामाधिकरणसूत्रोक्तत्वाद्देहहेतुत्वसम्भवे ऽपि संस्कार्यस्योद्देश्यतायाः क्व चिदनुक्तत्वान्न सम्भवतीत्याशङ्क्य तथापि फलवत्संस्कारकर्मप्रतिप्राधान्याभ्युपगमाद्विधेयत्वे ऽप्राधान्यापत्तेरुद्देश्यत्वावगमाद्देहहेतुत्वमतिदिशति * एतेनेति * फलस्य चानुपादेयत्वानभ्युपगमे नित्यप्रयोगव्यतिरिक्ते फलकामनातन्त्रप्रयोगकल्पनानुपपत्तेर्नित्यएव प्रयोगे फलकामनाप्रसङ्गात्कामयेदिति वा श्रुते; कर्माङ्गत्वेन कामनाविध्ययोगान्नित्यानित्यसंयोगविरोधः स्यादित्यभिधानार्थमपि चेति भाष्यं व्याचष्टे*
६२४।२ किं चेति * प्रथमार्थे तसिः तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्याचष्टे * तस्मादिति *

॥ अवेष्टेरन्नाद्यफलकत्वाधिकरणम् ॥ १३ ॥

सन्निधौ त्वविभागात्फलार्थेन पुनः श्रुतिः ॥२६॥

अनुपादेयान्वयमात्रस्यासन्निधिसहकृतस्य भेदकत्वे फलमा-
त्रे प्रत्युदाहरणानुपपत्तिमाशङ्क्याह * सर्वेषामेवेति * स्विष्टकृतं
यजतीति विहितस्विष्टकृद्यागसन्निधौ शेषादिति वाक्यान्तरे शेषसं-
स्कारार्थत्वेन स्विष्टकृद्यागविधानात्संस्कार्योदाहरणत्वं भाष्यालो-
चनयैतच्छब्दएव फलवाक्ये विपरिवृत्तिहेतुरिति कस्य चिच्छङ्कां
निवर्त्तयितुं भाष्योदाहृतफलसद्भावे ऽपि उदाहरणान्तरं न्यायशास्त्रे
पूर्वपक्षाशङ्कां विना प्रत्युदाहरणानर्थक्यापत्तेस्तत्प्रदर्शनार्थं किं प्राप्त-
मिति भाष्यं व्याचष्टे * सर्वत्रेति * स्वरूपतः प्राप्तस्यान्यसम्बन्धि-
त्वेन विध्युपपत्तेर्न विधीयमानत्वमात्रेण कर्मान्तरापत्तिरित्याशङ्क्य
वृद्धवाक्येनोपपादयति*आह चेति * पूर्वस्मात्कर्मणो ऽस्याभेदा-
भ्युपगमे विहितविध्ययोगादनुवादापत्तेरनुवादस्य च यच्छब्दोपब-
न्धलक्षणोद्देश्यव्यङ्ग्यत्वादनूद्यमानस्योद्देश्यत्वापत्तेर्देशाद्युद्देशे च क-
र्मोद्देशासम्भवात् भेद इत्यर्थः । उत्तरार्द्धं व्याचष्टे * अनूद्यमाना-
नि हीति * ननूद्देशान्वयित्वेन विधाने ऽपि स्वरूपानुवादे कर्मान्त-
रत्वं भविष्यतीत्याशङ्क्याह * देशादीति * पूर्वपक्षमुपसंहरति * त-
स्मादिति * उत्पत्तिविनियोगविधिव्यापारभेदादुत्पत्त्यनुवादाविनि-
योगविध्योर्यौगपद्यदोषं परिहरन् सिद्धान्तमाह * इतीति * उत्त-
रार्द्धं व्याचष्टे * अगत्या हीति * ननु देशादीनामुद्देश्यत्वावगतेः
कर्मणस्तानि प्रत्युपादेयत्वेन विधेयत्वाद्भेदापत्तिरित्याशङ्क्याह * न
चापीति * विध्यनुवादशब्दौ त्वप्रत्ययान्तत्वात्कर्मव्युत्पत्त्या वा वि- ६२५।२
धेयानुवाद्यवाचिनौ । श्लोकं व्याचष्टे * यद्यपीति * सिद्धान्तमुपसं-
हरति * तस्मादिति * भाष्यादविभागशब्दस्य सन्निहितप्रतिनिर्दे-
शविषयत्वमाभासमानं निराकर्त्तुं स्वयं व्याख्यां करोति * विपरि-
वृत्तिरेव चेति * भाष्यकृद्व्याख्या त्ववेष्टौ विशेषोक्त्यर्थेति दर्शयि-
तुमाह * विशेषेण त्विति*एतच्छब्दस्याग्निहोत्रशब्दवत् धर्मलक्षणा-
र्थत्वेनातिदेशिकत्वात्कर्मान्तरे विश्वजिदादिवदव्यक्तचोदितत्वा-
त्सोमहविष्कत्वं पूर्वपक्षप्रयोजनमाक्षिपति * प्रयोजने त्विति *
समाधत्ते * तत्त्विति * वृत्त्यन्तरोक्तं भेदकारणचतुष्टयमुपन्यास-
पूर्वं दूषयितुं भाष्योक्तं षड्विधत्व तावदुपसंहरति * एवमिति *
उपन्यस्यति * वृत्त्यन्तरे त्विति * फलाद्यनुग्रहमात्रार्थत्वात् इत्या-
दिशब्ददर्शनात्फलशब्दो ऽनुपादेयमात्रविषयो विज्ञायते आन्यभाव्यं
तु कालशब्दव्यवायादित्युच्चारणभेदे शब्दभेदस्मृतेः सरूपाणामेकशेष
इति स्मृत्यालोचनया शेषशब्दभेदावगतेरेकस्मिश्च शब्दे शतकृत्वो
ऽप्युच्चरिते ऽप्यर्थभेदाप्रतीतेरभ्यासस्य भेदकत्वायोगात्संख्यायाश्चा-

र्थगताया. कर्मण्येकस्मिन्नसम्भवाद्भेदकत्वं गुणान्तर्भावापत्ते. शब्दग-
ताया एकशेषस्मृत्यवगताया भेदकत्वस्य वाच्यत्वात्तस्याश्च शब्दभेद-
कत्वात् द्वयोः शब्दान्तर्भावात्प्रकरणान्तरत्वाभावे ऽपि चाग्नेयम-
ष्टाकपालं निर्वपेद्रुक्काम इत्यादावनुपादेयान्वयस्य विधेयत्वापादक-
त्वाद्भेदकत्वावगतेस्तत्प्रतिबन्धकप्रत्यभिज्ञापनयनमात्रे प्रकरणान्तर-
स्य व्यापारादित्यर्थः । शाखान्तराधिकरणसिद्धान्तसूत्रे च भेदच-
तुष्टयपरामर्शादिति हेत्वन्तरं चशब्देन सूचितं दूषयति * तस्येति *
शान्यभाव्यमिति कात्यायनस्मृतिं दूषयितुं सत्त्वान्तरं च यौगपद्यादि-
तिशब्दाधिकरणपूर्वपक्षहेतोरनैकान्तिकत्वोक्त्यर्थसूत्रं पठति * तथा
चेति * यथादित्यस्य नानादेशेषु युगपदुपलम्भे ऽपि न भेदस्तथा शब्द-
स्यापीति सूत्रार्थः।एकशेषस्मृत्यालोचनात् भेदावगतिं दूषयितुं तत्र-
त्यं सिद्धान्तसूत्रं पठति * संख्येति * अष्टौ गोशब्दा इति संख्याव्य-
वहाराभावादेक एव नित्यः शब्द इति सूत्रार्थः।तच्च प्रत्यभिज्ञाने
च सत्युपाधिभेदाद्भेदाभावं वक्तुं षष्ठाधिकरणसिद्धान्तसूत्रैकदेशं
पठति * वक्ष्यति चेति * विहितद्रव्यापचारे द्रव्यान्तरेण कृतस्य
यागस्य व्यतिरेकादष्टाकपालद्रव्यकत्वाग्निदेवत्यत्वरूपाविभागाग्नेय-
शब्दाविभागाभ्यां प्रत्यभिज्ञानात् गोत्ववदेककर्म्यमिति वदन्सूत्रकृ-
त्प्रत्यभिज्ञायमानानामभेदं वक्ष्यतीत्येवंजातीयकशब्देनोक्तम् । संख्या-
ऽभ्यासयोः शब्दान्तरान्तर्भावदूषणमुपहासपूर्वकमुपसंहरति * त-
स्मादिति * प्रकरणान्तरस्य भेदकत्वाभावमुपहासपूर्वं दूषयितुमाह
६२६।१ * प्रकरणान्तरत्वाच्चेति * अनुपादेयान्वयादुपादेयत्वावगमे
ऽप्यप्राप्तविषयत्वाद्विधेः प्रकरणान्तरशब्दोक्तं प्रकृतबुद्धिविच्छेदं वि-
ना विधेयत्वापादकत्वान्मुख्यं भेदकारणमित्याशयः । किमर्थं त-
र्ह्यनुपादेयान्वयापेक्षेत्याशङ्क्याह * तेनेति * येन कारणेन प्रकर-
णान्तरशब्दोक्तेन प्रत्यभिज्ञानं विना भेदो न भवति तेन कारणेन
भेदस्याप्रत्यभिज्ञानहेतुकत्वात्प्रत्यभिज्ञापादकानुपादेयत्वद्योतकशब्दोप-
बन्धवारणायानुपादेयापेक्षेत्याशयः । यच्चैकं चेति सूत्रे फलान्वय-
गुणशब्दान्तरसंख्याभेदप्रमाणाभावचतुष्टयमेकत्वहेतुत्वेनोच्यमानं फ-
लादिचतुष्टयं भेदकमित्यस्यार्थस्य ज्ञापकमिति । वृत्त्यन्तरकृतोक्तं तु
शाखान्तराधिकरणे ऽभ्याससंख्याप्रकरणान्तराभावानामसम्भवाद्य
१ तु फलादिचतुष्टयस्य भेदकहेतुत्वादित्युपहासपूर्वमाह * यदपीति *
एकत्वहेतुभूतं च तद्विपरीतचतुष्टयं चेति विग्रहः। वृत्त्यन्तरदूषणमु-

१ भेदादिति ३ पु० ना० ।

२ अविभागाग्नेयशब्द ति ३ पु० ना० ।

पसंहरति * तस्मादिति * फलस्य भेदहेतुत्वनिरासार्थम् * यथोक्ता इत्युक्तम् * चतुष्टयनिरासायैवकारः । ननु भाष्यसिद्धान्तेऽपि सञ्ज्ञाया वाच्यधात्वर्थभेदद्वारा भावनाभेदकत्वेन शब्दान्तरान्तर्भावात्संख्यायाश्च कर्मभेदं विना विध्यसम्भवाद्भेदकत्वेन गुणान्तर्भावाच्चत्वार एव भेदहेतवः स्युरित्याशङ्क्य भेदाभिधानं प्रतिजानीते * तत्रापि त्विति * सञ्ज्ञायाः शब्दान्तरात्संख्यायाश्च गुणात् भेदो विधीयतइत्युक्ते ऽध्यायोपक्रमे तयोः स्वावसरे भेदं वक्ष्याम इत्युक्तत्वात्सञ्ज्ञाधिकरणयोरेवानयोर्भेदो वाच्य इत्याशङ्क्य तत्र वाच्यस्याप्यवसरालाभेनानुक्तत्वादिदानीमवसरलाभादभिधानमिति वक्तव्यः * सन्नित्यनेनोक्तम् * अभिधत्ते * स्वरूपेति * शब्दान्तरस्यानुरञ्जकधात्वर्थभेदेन भावानां भेदकत्वाद्यागादिशब्दाच्च सिद्धरूपतयोक्तस्य धात्वर्थस्य भावनानुरञ्जकत्वाप्रतीतेः स्वेन पूर्वापरीभावरूपेणानुरञ्जकत्वावगमात्सञ्ज्ञायाश्च पूर्वापरीभावरूपानभिधायित्वात् धात्वर्थैक्ये चानेकसञ्ज्ञानर्थक्यापत्तेर्धात्वर्थभेदागमकत्वेऽपि देवतोद्देशद्रव्यत्यागादिधात्वर्थान्तराविलक्षणरूपानभिधायित्वाद्यजत्यादेस्तु विलक्षणरूपे सम्बन्धग्रहणात्तद्वाचित्वोपपत्तेः । सञ्ज्ञायाः शब्दान्तराद्भेदः विधेयरूपभेदे शब्दान्तरादिव्यापारानुत्पत्तिज्ञापनेन भेदकत्वावगतेः संख्यायाश्च व्यासज्यकर्माणि समवायादेकसंख्ये ऽपि कर्मणि (विध्यन्तरोत्पादितकर्मान्तरोपजनापेक्षया समवायोपपत्तेर्गुणवत्पूर्वोत्पन्नकर्मसंयोगासम्भवेनापूर्वकर्मोत्पत्तिज्ञापकतया भेदकत्वायोगाद् गुणाद्भेद इत्यर्थः । श्लोकं व्याचष्टे * सञ्ज्ञा हीति * एकसंख्ये ऽपि कर्मणि[1]) कर्मान्तरापेक्षया संख्यान्तरसमवायसम्भवे कथं भेदकतेत्याशङ्क्य प्रमाणान्तरेणोत्पत्तिविषयत्वेनावगतस्य विधेरनेकविषयत्वमात्रं संख्ययावगम्यतइति परिहारसूचनार्थम् * युगपदित्युक्तम् * पूर्वस्मित्कर्मण्यसम्भवो यस्य तत्पूर्वासम्भवं वाजिनादिन्यायाभावे ऽपि अङ्गत्वाविशेषात्संख्याया अप्यङ्गापरपर्यायगुणत्वापन्हवायोगात्कथं गुणाद्भेद इत्याशङ्कानिरासायान्तरशब्दः ॥

॥ आग्नेयद्विरुक्तेः स्तुत्यर्थताधिकरणम् ॥ १४ ॥

आग्नेयस्तत्कहेतुत्वादभ्यासेन प्रतीयेत ॥ २७ ॥

उदाहरणं विवेक्तुमाह * आग्नेयइति * तत्र सन्देहभाष्यं सकृदनुष्ठानचिन्तायास्तत्रावृत्तिचिन्तासारूप्याल्लक्षणासङ्गतेरयुक्त-

१ भय पा० ३ पु० ना० ।

माशङ्क्य भेदाभेदफलोक्तिद्वारा भेदाशयत्वेन व्याचष्टे * किमिति *
अच्युतवाक्येनैककर्मासम्भवो पौर्णमास्यमावास्याकाललक्षणगुण-
द्वययोगादाग्नेयद्वयविध्यवगतेः एकस्य कालद्वयानन्वयात्कालद्वय-
विशिष्टस्य वा ऽमावास्यावाक्ये पुनःश्रुतत्वायोगाद्यो ऽमावास्याकाल-
क आग्नेय उभयत्र सोमयागात्प्रागूर्ध्वं वाच्युतो न सान्नाय्यवत्क-
दाचित् च्युत इत्येवं प्रतियोग्युपलक्षणार्थो वार्त्तिकावयवो व्याख्ये-
यः । प्रयोजनासम्भवे ऽपि कर्मान्तरत्वानुपपत्तिसूचनायानवक्लृ-
प्तिः। फलार्थेनेत्यस्माद्विधेरनुपादेयत्वसम्भवएव सन्निधेः प्रत्युदाह-
६२७। णत्वशङ्कानिरासार्थत्वेन पूर्वपक्षसूत्रं व्याचष्टे * इतीति * अभ्या-
सोक्ति व्याख्यातुम् * द्विरित्युक्तम् * अभ्यासोक्त्या वृत्तिविध्यर्थ-
तास्य वाक्यस्योक्तेति शङ्कां निवर्त्तयितुमाह * प्रयोगेति * पूर्वपक्ष-
प्रयोजनमभ्यास इत्याशयः । अविभागात्तु कर्मणो द्विरुक्तेन विधी-
यतइति सिद्धान्तसूत्रमवतारयति * तत्रेति * कर्मैक्यस्य सिद्धान्त-
त्वे ऽपि वाक्यद्वयस्य विधायकत्वोक्तेर्प्रौढिमात्रत्वसूचनार्थः पक्षा-
न्तरशब्दः ।

अविभागात्तु कर्मणो द्विरुक्तेन विधीयेत ॥२८॥

अभ्यासाधिकरणन्यायवैषम्योक्त्यर्थत्वेन तुशब्दव्याख्यानार्थं पूर्वं कर्मणो विभागादिति हेत्वर्थं व्याचष्टे * युक्तमिति * द्रव्यदेवतान्यत्वशङ्कानिरासार्थत्वेनाप्यविभागोक्तिं व्याचष्टे * द्रव्येति * ननु कर्मणः क्षणिकत्वेनाविभागशब्दोक्तायाः प्रत्यभिज्ञायाः सामान्यविषयत्वान्नाभेदबोधकत्वोपपत्तिरित्याशङ्क्याह * यदि चेति * स्वरूपभेदस्य प्रयोगान्तरे ऽच्युतवाक्यविहितस्याप्याग्नेयस्याविशेषाद्विधेयरूपभेदो ऽत्र विवक्षितः । स च प्रत्यभिज्ञया निरस्त इत्याशयः । नन्विति भाष्येण पुनःश्रुत्या कर्मभेदमाशङ्क्य तन्निरासार्थत्वेन द्विर्वचनेनैकमेव कर्म विधीयतइत्येवं भावनिष्ठाभ्युपगमेन द्विरुक्तेनेति सूत्रावयवव्याख्यानार्थं नेतीति भाष्यं द्वेधा व्याचष्टे * तस्मादिति * विकल्पस्याष्टदोषत्वेनापरितोषादथ वेति समुच्चयं वक्तुमेकेन वाक्येन विहिते वाक्यान्तरानर्थक्यमाशङ्क्य * युगपदित्युक्तम् * क्रमेण वाक्यद्वयप्रवृत्तौ पूर्वेण विहिते परानर्थक्यं स्यान्नित्यत्वात्तु द्वयोर्युगपत्प्रवृत्तेर्नान्यतरानर्थक्यमित्याशयः । युगपत्प्रवृत्तावन्यतरानर्थक्याभावो ऽपि चोत्पत्तिसंयोगाद्यथा स्यात्सत्वदर्शनं तथा भावविभागे स्यादिति षष्ठाधिकरणसूत्रावयववक्ष्यमाणेन दृष्टान्तेनोपपादितः । ऋद्धिकामाः सत्रमासीरन्निति कर्मिपद-

श्येन बहुवचनेन ऋद्धिकामबहुत्वोक्तेः प्रत्येकम् । ऋद्धिकामत्वावगमा-
त्प्रत्येकमधिकारमुक्त्वाख्यातस्थेन बहुवचनेन कर्तृबहुत्वोक्तेः प्रत्येकं
कर्तृत्वावगमादपि प्रत्येकमधिकार इत्युत्पत्त्याचानिश्चितकर्तृसंख्ये
कर्मणि कर्तृबहुत्वसंयोगादित्यवयवेनोक्ते प्रत्येककर्तृत्वे कर्त्रन्तरान-
र्थक्यमाशङ्क्य यथा सत्त्वस्य द्रव्यगवादेर्युगपद् बहुभिर्दर्शनं नान्यतरा-
नर्थक्यापादकं तथा भावस्य कर्मणो विभागे पृथक्कर्त्रन्वये ऽपि न
कर्त्रन्तरानर्थक्यमिति वक्ष्यते युगपत्प्रवृत्तिमात्रेणानर्थक्यपरिहारः
कथमित्यपेक्षायामाह * न चेति * हेतौ चशब्दः । ननु विहितमेवे-
त्यादिभ्याष्येणानर्थक्यमाशङ्क्याभ्युपगमेनोत्तरं दत्तं तदुपपादयति *
काममिति * प्रत्यभिज्ञानमानावृत्त्यार्थान्तरत्व वाच्यं तदा च
शब्दार्थयोरनित्यत्वापत्तिरित्याशयः । तस्मादिति फलतः सिद्धा-
न्तोपसंहारभाष्यं व्याचष्टे * तस्मादिति * वाक्यद्वयेनैककर्मवि-
ध्युक्त्यानर्थाभ्युपगमयोरभ्यासाधिकरणविरोधमाशङ्क्याह * सर्वे
त्विति * आनर्थक्यापत्तेरेव वाक्यद्वयेनैकधर्मविधेर्निराकार्यत्वान्न
पृथगुक्तिः ।

अन्यार्था वा पुनः श्रुतिः ॥ २९ ॥

अन्यशब्दस्यार्थवदाशयत्वोक्त्यर्थभाष्योपपादनपूर्वमुच्यतइत्या-
शङ्काभाष्यम् आग्नेयविधिशेषत्वस्यानुक्तत्वादयुक्तमाशङ्क्योपपादनपू-
र्वं व्याचष्टे * सर्वथेति * वाशब्दव्याख्यानार्थं वेतिभाष्यव्याख्या-
र्थः सर्वथाशब्दः स्वरसेनाग्नेयविधिशेषत्वप्रतीतेर्भ्रम इत्याशयः । न-
न्वर्थवादत्वमात्रोक्त्या प्रयोजनवत्त्वसिद्धेरर्थवादकैमर्थ्यविशेषोक्त्य-
र्था परिचोदना न युक्तेत्याशङ्क्याह * परिचोदना त्विति * नार्थ- ६२८।४
वादकैमर्थ्यविशेषोक्त्यर्थेयं परिचोदना किं त्वर्थवादार्थत्वस्याप्ययो-
गात्कर्मान्तरविध्यर्थतैवाभ्युपगन्तव्येत्यापादनार्थेत्यर्थः । स्वतन्त्र-
स्तुत्यानर्थक्ये दृष्टान्तोक्त्यर्थं यथेति भाष्यमज्ञायमानविषयत्वेनाक्षि-
पति * तत्रेति * विपर्यासोक्त्या समाधत्ते * तत्त्विति * अर्थवाद-
स्तुत्यर्थत्वेन स्थितं सदनर्थकमित्युक्ते ऽर्थवादत्वेनैवार्थवत्त्वं भविष्य-
तीत्याशङ्क्य * विध्युद्देशइत्युक्तम् * समाप्ते विध्युद्देशे ऽर्थवादा-
न्वयोपपत्तेर्विध्युद्देशमध्ये ऽर्थवादो ऽनर्थक इत्याशयः । ऐन्द्राग्न एका-
दशकपालो ऽमावास्यायां भवतीति ऐन्द्राग्नस्तुत्यर्थाग्नेयपुनः श्रुति-
रित्येवं सूत्रेण परिहारोक्त्यर्थं तदुच्यतइति भाष्यं व्याचष्टे *तत्रेति*
येयमिह सिद्धान्ते प्रशंसां कर्तुं पुनः श्रुतिराश्रिता सा सम्यगिति
क्रियाविशेषणत्वान्नपुंसकलिङ्गेन सम्यक्शब्देनोक्ते कथमित्युपेक्षिते

* सहेत्युक्तम् * पुनः शब्दस्याग्नेयपरामर्शार्थत्वादिन्द्रसहि ग्निनाग्नेयस्येति प्रतीतेरैन्द्राग्नस्येत्यर्थः । यद्वाग्नेय इति वाक्य रेणाग्नेयस्य केवलदेवतात्वावधारणात्कथन्तेनैन्द्राग्नप्रशंसेत्यपेक्ष * प्रशस्तेत्युक्तम् * प्राशस्त्यवाचिभिराङ्गिरसो वा इति उत्तमः लोकमायन्नित्याद्यर्थवादशब्दैः सहितवाक्यान्तरावधारितत्वे यस्य प्रशस्तत्वावगमादाग्नेय एव तावदग्निदेवत्यत्वात्प्र ऐन्द्राग्नस्त्विन्द्रसहिताग्निदेवत्यत्वात्ततो ऽपि प्रशस्त इत्याग्नेयो न्द्राग्नप्रशंसार्थतोपपन्नेत्याशयः ।

इति श्रीमन्निकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजि माधवात्मजभट्टसोमेश्वरकृतायां तन्त्रवार्त्तिकटीकायां सर्वानव कारिण्यां न्यायसुधाख्यायां द्वितीयाध्यायस्य तृतीयः पाद

न्यायसुधायाम् ।

द्वितीयाध्यायस्य चतुर्थः पादः

॥ अथ यावज्जीविकाग्निहोत्राधिकरणम् ॥ १ ॥

यावज्जीविको ऽभ्यासः कर्मधर्मः प्रकरणात् ॥ १ ॥

भाष्ये बह्वृच्विशेषणस्य चिन्तानौपयिकत्वाद्यथावस्थितो-
क्तिमात्रार्थत्वं सूचयितुमाह * बह्वृचेति * चिन्ताया लक्षणासङ्ग-
तिमाशङ्कते * ननु चेति * परमतेन परिहरति * केचिदिति *
दूषयति * तन्नेति * स्वमतेन प्रयोगभेदाभेदफलतया सङ्गतिं
वक्तुं प्रक्रमते * अत इति * ननु शब्दान्तरादिप्रमाणकस्य भेदस्य
लक्षणार्थत्वात् तेषां चोत्पत्तिज्ञापनेन भेदकत्वात् स्वरूपभेद एव ६२९॥१
व्यापारावगतेः प्रयोगभेदाभेदचिन्तापि न लक्षणसङ्गतेत्याशङ्क्या-
ह * यथैवेति * प्रयोगाङ्गभूतस्य गुणस्य पूर्वप्रयोगसंयोगासम्भवे
प्रयोगविधित्वज्ञापनेन प्रयोगभेदकत्वस्याविष्ट्यधिकरणे व्युत्पादित-
त्वात्प्रयोगभेदे ऽपि व्यापारो ऽस्तीत्याशयः । लक्षणसङ्गतां चिन्तामा-
ह * तदिहेति * यावज्जीवशब्दस्य पूर्वपक्षे काललक्षणानुपादे-
यगुणपरत्वात् सिद्धान्ते च निमित्तपरत्वात्तस्यापि चावच्छेदकत्व-
लक्षणगुणत्वोपपत्तेरनुपादेयगुणान्वयस्य भेदकत्वाभेदकत्वस्य वि-
चारात् कर्मविपरीवृत्तेः प्रकरणान्तरन्यायायोगे ऽप्यनुपादेयान्व-
यनिमित्तभेदचिन्तानन्तरं बुद्धिस्थत्वोपपत्तेः प्रकरणान्तरचिन्तया
ऽपि सङ्गतिः सम्भवतीति सूचयितुं यावज्जीवशब्दः । कालपरत्वे
ऽपि काम्यप्रयोगे सायम्प्रातःकालावरुद्धे ऽप्यमावास्यायामपराह्णे पि-
ण्डपितृयज्ञेन चरन्तीतिवदवच्छेद्यावच्छेदकत्वेन कालद्वयसमा-
वेशोपपत्तेर्जीवनपरिमितस्य कालस्य निवेशसम्भवादभेदकत्वं नि-
मित्तपरत्वे तु तस्यावश्यकत्वापादकत्वेन काम्यप्रयोगे निवेशायोगा-
द्भेदकनेति गुणनिमित्तभेदाभेदचिन्तार्थं काललक्षणगुणपरो याव-
ज्जीवशब्दो निमित्तलक्षणगुणपरो वेति विचारस्वरूपं सूचयितुं

गुणशब्दः कस्मात्तर्हि भाष्ये कर्मधर्मः कर्तृधर्मो वेति चिन्तेत्याशङ्क्य प्रयोगभेदाभेदफलासौ चिन्तेति दर्शयितुमाह * तत्रेति * काललक्षणस्य गुणस्य काम्यप्रयोगे निवेशासम्भवादभेदकत्वसिद्ध्यै कर्मधर्मत्वोक्तिरिति सूचनार्थः कालशब्दः। काम्यप्रयोगस्य सायम्प्रातःकालसमापनीयत्वेन तस्मिन्यावज्जीवकालस्य निवेशायोगाद्भेदकत्वं भविष्यतीत्याशङ्कानिरासार्थताश्यासोक्तेः सायमित्यादिना सूचिता निमित्तलक्षणस्य गुणस्यावश्यकत्वापादकत्वेन काम्यप्रयोगे निवेशायोगाद्भेदकत्वसिद्ध्यै नियमाख्यस्यावश्यकत्वस्य कर्तृधर्मत्वान्नियमलक्षणार्थो कर्तृधर्मोक्तिरिति सूचनार्थं निमयाविधिभाष्योक्तमुपपादयितुम् * यावत्कर्तृभाविनीत्याद्युक्तम् * नियमस्य कर्तृधर्मत्वोपपादनार्थं स्वार्थेत्युक्ते स्वकाले विहिताकरणादुत्पन्नस्य दोषस्य नाशायातिक्रान्ते ऽपि काले कर्त्तव्यत्वज्ञापनार्थं जन्यत्वान्नाशस्यात्मप्रयत्नरूपभावनाभाव्यत्वोपपत्तिसूचनाय स्वार्थशब्देनोक्तस्य * सिद्ध्यर्थमित्युक्तम् * निषिद्धाचरणजन्यदोषनाशार्थत्वाभ्युपगमे त्वनाचरितनिषिद्धस्याकर्त्तव्यत्वापत्तेर्नावश्यकत्वसिद्धिः प्रायश्चित्तत्वेन चाविधानान्नोपात्तदुरितक्षयार्थत्वे ऽग्निहोत्रादेः किंचित्प्रमाणमस्ति विस्तरेण चोपात्तदुरितक्षयार्थताग्निहोत्रादेस्तन्त्रसारे ऽस्माभिर्निरस्ता उपात्तदुरितक्षयार्थत्वोद्घोषस्तु विहिताकरणजन्यमेव दुरितं विहितकालसमीपे प्राप्तत्वादाङ्पूर्वस्य ददातेर्गृह्णात्यर्थवाचित्वेन ग्रहणफलप्राप्तिलक्षणत्वोपपत्तेरुपात्तदुरितमभिप्रेत्य व्याख्येयः। अकरणे दोषप्रसक्तेरिति हेत्वभिधानादप्ययमेव वार्त्तिककृतो ऽभिप्रायो लक्ष्यते अनर्थपरिहारार्थत्वमात्रहेतुत्वम् * तु व्यवधानादयुक्तम् * पूर्वां सन्ध्यां जपन् विप्रो नैशमेनो व्यपोहतीत्यादिस्मृतिस्तु निशान्तविहितकर्मानुष्ठानजन्यमेनो नैशमित्येवं व्याख्येया यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्नेत्यादिमन्त्रवर्णो ऽपि मनःप्रभृतीनामन्यासक्तत्वाद्रात्र्यन्तविहितकर्माननुष्ठानेन यत्पापमकार्षमित्येवं व्याख्येयः।

सन्ध्योपासनमात्राद्धि सर्वपापक्षये सति ।
अग्निहोत्राद्यनुष्ठाने कः प्रवर्त्तेत बुद्धिमान् ॥ १ ॥
कस्य तु क्षमता कस्येत्यवगन्तुं न शक्यते ।
अतो मदुक्तरीत्यैव पापनाशार्थतोचिता ॥ २ ॥

एतच्च स्वकाले कुतश्चित् कारणात्कर्मण्यकृते कालान्तरे नैष्फल्यापत्तेः काम्यवन्नित्यस्यापि लोपशङ्कानिरासायोक्तं शास्त्रेणा स्वकरणजन्यदोषाभावायैवाग्निहोत्रादेः कर्त्तव्यतोच्यतइति वक्तुं यो-

षप्रागभावस्याजन्यत्वाद्भाव्यत्वायोगमाशङ्क्य प्रागसतो ऽपि दोष-
स्योत्पत्तिप्रतिबन्धः प्रागभावप्रतिपालनाख्यो भावयितुं शक्यत इति
परिहारसूचनायानर्थरूपस्यावस्तुरूपस्यासद्रूपस्य दोषस्य परिहारार्थं
* प्रतिबन्धायेत्युक्तम् * अग्निहोत्रादेर्विहितत्वात्तदकरणस्य प्रत्य-
वायोत्पादकत्वं तदकरणस्य च प्रत्यवायोत्पादकत्वात्परिहारार्थवि-
धिरित्यन्योन्याश्रयाशङ्का तु विधिकर्मशक्त्योरनादित्वात्परिहरणीया
अन्यथा विहितत्वात्फलसाधनत्वं फलसाधनत्वाच्च तादर्थ्येन वि-
धिरित्यन्योन्याश्रयमपरिहार्यं स्याज्जीवननिमित्तकस्यापि प्रयोगस्य
निमित्तैक्यादैक्यमेव स्यादित्याशङ्क्य सायम्प्रातःकालावच्छिन्नस्य
जीवनस्य निमित्तत्वात्तस्य च प्रतिदिवस भेदात्प्रयोगभेदोपपत्तिं
वक्तुं कालजीवनसमुदायस्य निमित्ततोक्ता कालस्याङ्गत्वे ऽप्यनुपादे-
यत्वादन्यकालीनजीवनसद्भावे ऽपि कालापादनाशक्तेरनुष्ठानायो-
गात्तत्कालीनएव जीवने सत्यनुष्ठेयत्वावगतेरर्थात्कालविशिष्टस्यैव
जीवनस्य निमित्ततावसीयतइत्याशयः । फलतः सङ्गतिमुपपादि-
तामुपसंहरति * तेनेति * यदीति सन्देहहेतुभाष्यालोचनया चै-
तदवगम्यतइति सूचनार्थम् * भाष्येत्युक्तम् * यावज्जीवशब्दस्य
निमित्तपरत्वे विधित्वायोगाद्विध्युक्त्या कालपरत्वसूचनाद् याव-
ज्जीवशब्दः कालपरो निमित्तपरो वेति विचारार्थो गम्यते विपरी-
तशब्देन च सिद्धान्ते जुहोतेर्विधित्वोक्त्या भेद विना विध्ययोगा-
त्कर्मस्वरूपभेदस्य च सन्निधौ त्वविभागादित्यत्र निरस्तत्वात्प्रयोग-
भेदाभेदविचारस्यापि सूचनात्तस्य योग्यतया फलतावगम्यतइत्या-
शयः । सूत्रव्याख्यानार्थं किं तावदिति भाष्यं व्याचष्टे *किं तावदि-
ति* अभ्यासशब्देनाभ्यासापादककालपरता यावज्जीवशब्दस्य सूचि-
तेति दर्शयितुम् *कालेत्युक्तम्* पूर्वपक्षभाष्यस्ययदिशब्दव्याख्याना-
र्थः पक्षशब्दः । कालविधिपक्षे च कालान्तरनिमित्ताभ्यासविधिपक्षे
च तत्कालरूपमभ्यासरूपं च यथैव कर्माङ्गत्वेन वाञ्छितं तथैवोप-
पद्यतइत्यर्थः । उत्तरार्द्धं व्याचष्टे * कालो हीति * सन्निधानाप-
रपर्यायाधिकारलक्षणप्रकरणानुग्रहसम्भवाशयेनाशङ्कते * ननु चे-
ति * तथापि कथम्भावात्मकप्रकरणबाधो दुर्वार इति परिहरति
* सत्यमिति * ननु कालत्वस्याप्यनुपादेयत्वात् यच्छब्दोपबन्धल-
क्षणत्वेन चानुपादेयत्वस्य विधिप्रतिबन्धकत्वाद्विधेयत्वानुपपत्तेः
यावज्जीवशब्दोक्तत्वे ऽपि अङ्गत्वायोगेन प्रकरणानुग्रहासम्भवात्प्र-
करणानुग्रहार्थं यावज्जीवोक्तेः कालपरत्वसूचनार्थो विधिशब्दो न
प्रयुक्त इत्याशङ्क्याह * यद्यपि चेति * यावज्जीवनं तस्मिन् सति ६३०।१

यजेतेति कालनिमित्तपक्षयोः समानायामपि वचनव्यक्तावप्राप्तप्रा-
प्तिफलत्वाद्विधेर्यच्छब्दोपबन्धाच्च स्वरूपस्य सिद्धत्वप्रतीतावपि अ-
ङ्गत्वविषयविधिप्रतिबन्धायोगादनुपादेयत्वेन यच्छब्दोपबन्धादनुवा-
द्यतया भासमानस्यापि कालस्यानुवादविपरीतं विधानं यागस्य चो-
पादेयत्वाद्विधेयतया भासमानस्य विधिविपरीतोऽनुवादः कथ्यत-
इत्यर्थः । यावज्जीवशब्दोक्तकालान्वयान्यथानुपपत्तिकल्पिता-
भ्यासविध्याशयत्वे तु विध्युक्तेरभ्यासस्योपादेयत्वाद्विधेयत्वं स्वर-
सादेव प्रतीयतइत्याह * अथ वेति * अभ्यासस्योपादेयत्वेनो-
पादेयकर्मान्वयायोगमाशङ्क्य स्वरसेनोपादेयत्वेऽपि कर्मणो
विध्यन्तरप्राप्तत्वेनोद्देश्यत्वोपपत्तेस्तद्रूपेणान्वयोपपादनार्थम् * स
चेत्युक्तम् * ननु कर्मण प्राप्तत्वेनोद्देशसम्भवे यावज्जीवोक्तेर्निमि-
त्तपरत्वेऽपि निमित्तान्वयान्यथानुपपत्तिकल्पितस्यावश्यकत्वस्यो-
पादेयत्वात्कर्मोद्देशेन विध्युपपत्तेर्न विध्युक्त्या कालपरत्वं सूचयितुं
शक्यमित्याशङ्क्य कर्मानङ्गत्वेनावश्यकत्वस्य विधेयत्वेऽपि न कर्मो-
द्देशापेक्षेत्याह * काम्ञेति * निमित्तान्वयस्यावश्यकत्वापादकत्वसूच-
नार्थं कर्तृधर्मशब्देन लक्षणाया निमित्तपरतोक्ता एवं चेति लिङ्गदर्श-
नभाष्यं व्याचष्टे * एवं चेति * तस्मादिति पूर्वपक्षोपसंहारभाष्यं
व्याचष्टे * तस्मादिति *

कर्त्तुर्वा श्रुतिसंयोगात् ॥ २ ॥

यावज्जीविक इति भाष्येण वाशब्दं व्याख्याय कर्तृशब्दव्या-
ख्यानार्थं कर्त्तुरिति भाष्यं धर्मशब्दाश्रुतेरयुक्तमाशङ्क्योपपादयितुमा-
ह * धर्मइति * अत्र च कर्तृधर्मश्चोद्यतइत्येतावता प्रतिज्ञासूत्रावय-
वव्याख्या कर्तृधर्मोक्तेश्च यावज्जीवशब्दस्य निमित्तपरत्वसूचनार्थ-
त्वान्निमित्तान्वयापादितस्य चावश्यकत्वस्य काम्यप्रयोगेऽनुपपत्तेः
प्रयोगान्यत्वसिद्धिसूचनार्थो नियमशब्द इति तेनेत्यादिना सूचितम्।
हेतुप्रश्नपूर्वं श्रुतिसंयोगव्याख्यानार्थं कुत इत्यादिभाष्यं व्याचष्टे
* कुत इति * ननु जीवते. श्रुतिवृत्तत्वोपपत्तावपि यावच्छब्दस्य
निमित्तानभिधायित्वात्कथ निमित्तपरत्वपक्षे यावज्जीवशब्दस्य श्रु-
तिवृत्तित्वं कर्त्तव्यतावाचिनश्चाख्यातप्रत्ययस्य पक्षद्वयेऽपि श्रौतत्वा-
विशेषान्निमित्तपक्षएवाख्यातस्य श्रुतिवृत्तत्वोक्तिरयुक्तेत्याशङ्क्यां नि-
रस्यन् श्लोकं व्याचष्टे * इहेति * व्याप्तिवाचिना यावच्छब्देन जी-
वनस्य यावत्कर्तृभावित्वरूपेण सामस्त्येन श्रुत्यैव विशेषणात्सर्वे-
षां सायम्प्रातःकालभेदभिन्नानां जीवनानामनुष्ठानान्वयप्रतीतेः

कर्मणि च जीवनविधौ स्वप्रयोजनप्रयुक्तस्य कर्मानुष्ठानस्य कादाचित्कत्वाद्यावच्छब्दोक्तायाः सर्वजीवनव्याप्तेः प्राप्त्यभावेनानुवादायोगादयुगपत्कालीनत्वाच्च जीवनानामेकस्मिन्प्रयोगे साहित्यानुपपत्तेः प्रयोगभेदाक्षेपकाभावाच्चाशङ्क्य सम्पादनत्वेन व्याप्तेर्विध्ययोगाद् यावच्छब्दानर्थक्यापत्तेः निमित्तपरत्वे तु यावन्निमित्तं नैमित्तिकस्यानुष्ठेयत्वाद्यावच्छब्दोक्तव्याप्त्यनुवादोपपत्तेर्यावच्छ्रुतिसामर्थ्यान्निमित्तत्वावगतेर्यावज्जीवपदस्य श्रुतिवृत्तत्वं सिद्धान्तएव सम्भवतीत्यर्थः। यश्चाख्यातप्रत्ययस्य प्रकृतिभूतो ऽप्रशस्तस्य श्रुत्यैव प्रत्ययवाच्यभावनानुरञ्जकधात्वर्थवाचित्वादाख्यातस्य श्रुतिवृत्तत्वं सिद्धान्तएव सम्भवतीत्यर्थः। कालपरयावज्जीवपदान्वयनिबन्धनत्वाद्ऽभ्यासलक्षणायाः धातोश्च प्रत्ययोपसर्जनत्वेनान्वयायोगात्तदन्वितप्रत्ययवाच्यभावनानुरञ्जकत्वेन स्वार्थवाचित्वादाख्यातप्रत्ययद्वारा धातोरपि यावज्जीवपदान्वयात्पूर्वपक्षे ऽभ्यासलक्षणार्थत्वापत्तिसूचनार्थम् * धातोर्भावनावाचित्वं तात्पर्याशयेनोक्तम् * मात्रशब्दो ऽभ्यासव्यावृत्त्यर्थः। ननु यावज्जीवोक्तेर्निमित्तपरत्वे ऽपि सायं च प्रातश्च जुहोतीति चशब्दोक्तकालद्वयसमुच्चयान्यथानुपपत्त्याऽभ्यासलक्षणा तुल्येत्याशङ्कानिरासस्सूचनायैवकारः आग्नेयी सायमाहुतिस्तद्रेतः सिक्तं रात्र्यां गर्भं दधाति ततसौर्या प्रातः प्रजनयतीति रेतःप्रजननसंस्तथान्यथानुपपत्त्या तेषां यस्त्रिरजुहोत्तमपृच्छन् कस्मिस्त्वं जुहोषीति सो ऽब्रवीत् त्रेधेत्यग्नये प्रजापतये सूर्यायेति यो द्विस्तमपृच्छत् सो ऽब्रवीद् द्विधेति अग्नये च प्रजापतये च सायं सूर्याय प्रजापतये च प्रातरिति य एकस्तमपृच्छत् सो ऽब्रवीदेकधेति प्रजापतयएवेति तेषां यो द्विरजुहोत् स आर्ध्नोत्तस्य नेतरे सातत्यमुपायंस्तद्य एवं विद्वान् द्विर्जुहोति आर्ध्नोत्येवेत्यभ्यासवाचिना द्विरिति सुच्प्रत्ययेनैव कालद्वये ऽभ्यासस्योक्तत्वान्न सिद्धान्ते लक्षणापत्तिरित्याशयः । श्लोकं व्याख्यातुम् * तदिदमुक्तम् * ननु जीवनधात्वर्थान्वयविध्यन्यथानुपपत्त्या कालाभ्यासलक्षणा पक्ष्यमाना साध्यसाधनान्वयविध्यन्यथानुपपत्त्या पूर्वकल्पनावन्न दोषमावहतीत्याशङ्क्याह * यत्र हीति * निमित्तत्वानभ्युपगमे जीवनधात्वर्थविध्ययोगाल्लाक्षणिकार्थविध्यापत्तेर्दोषापत्तिरित्याशयः। यावच्छब्दस्य काले प्रयोगदर्शनात्तद्वाचित्वं शङ्कते * तत्रेति * स्वापस्यात्राननुष्ठेयत्वाच्छ्रुतेर्निमित्तानपेक्षत्वादाहनस्य निमित्तत्वेनान्यथायोगात् यावच्छब्दोपबन्धान्यथानुपपत्तेर्लक्षणया कालग्रहणं न तु श्रुत्या तच्चागत्या युक्तम् अनुष्ठेयत्वश्रुतौ तु निमित्तत्वे-

न श्रुत्यर्थस्यैवान्वयोपपत्तेर्न युक्ता लक्षणेति परिहरति * शु-
क्लमिति * कस्माद्यावच्छब्दस्य कालवाचित्वं नेष्यतइत्याश-
६३१।५ ङ्क्याह * न चेति * लक्षणयापि कालप्रतीत्युपपत्तेर्न वाच-
कशक्तिकल्पना युक्तेत्याशयः । ननु नाडिकामुहूर्त्तप्रहरादिप्रत्ययानां
परत्वापरत्वयौगपद्यायौगपद्यचिरत्वाक्षिप्रत्वविशिष्टपदार्थप्रत्ययानां
च कालकृतत्वेनाङ्गीकृतानां विभक्तत्वादाकाशवदविभक्तेन काल
द्रव्येण करणाशक्तेः सूर्यादिगतिक्रियावच्छेदाद्विभक्तस्य कालस्य
विभक्तप्रत्ययहेतुत्वाभ्युपगमे तु सूर्यादिगतिक्रियाणामेव नभः षष्ठि
तमभागातिलङ्घनफलः सूर्यादिगतिक्षणप्रचयो नाडिकानभास्त्रिंशत्त
मभागातिलङ्घनफलो मुहूर्त्तो नभो ऽष्टमभागातिलङ्घनफलः प्रहर
इत्येवं नाडिकादिप्रत्ययहेतुत्वोपपत्तेः प्रतियोगिपदार्थापेक्षया बह्व
ल्पतमसूर्यादिगतिलक्षणावच्छेदयोः परत्वापरत्वविशिष्टपदार्थप्रत्यय
हेतुत्वोपपत्तेरेकभिन्नक्षणावच्छेदयोर्यौगपद्यायौगपद्यविशिष्टपदार्थप्र-
त्ययहेतुत्वोपपत्तेरुत्पत्त्यादिभावविकारान्तर्गतबह्वल्पसूर्यादिगतिल-
क्षणावच्छेदयोश्चिरत्वाक्षिप्रत्वविशिष्टपदार्थप्रत्ययहेतुत्वोपपत्तेः क्रि
याव्यतिरिक्तकालाभावाज्जीवनक्रियाया एव कालत्वावगतेर्न लक्षणा
पत्तिरित्याशङ्क्य * क्रियेति * सूर्यादिस्थाया गतिक्रियाया युवस्थविरा
दिपदार्थसम्बन्धाभावेन तदवच्छेदकत्वायोगात्कालस्य तु सर्वगत
त्वात् स्वसंयुक्तसूर्यादिसमवेतक्रियावच्छेदलब्धविभागस्य युवस्थवि
रादिपदार्थावच्छेदकत्वोपपत्तेर्युवस्थविरादिषु परापरादिप्रत्ययैः क्रि
यातिरिक्तकालानुमानादपरिहार्या लक्षणेति परिहरति * अत्रेति *
पदार्थासम्बद्धायाः क्रियायास्तेषु परादिप्रत्ययहेतुत्वायोगात्कालस्या
नुमेयत्वे ऽपि क्रियाव्यतिरेकसिद्धिरिति प्रौढ्योक्तम् । परमार्थतस्
प्रत्यक्षत्वानभ्युपगमे कालस्यासिद्धिरेव स्यादिति सूचनार्थम् * है
शेषिकानित्युक्तम् * परापरादिप्रत्ययानां हि सार्वत्रिकत्वात् स
र्वगतहेत्वपेक्षत्वे ऽप्याकाशादेरेवान्यतः सिद्धात्कालवत्स्वरूपेणा
श्रादपि सहकारिभेदापादितविलक्षणसामर्थ्यादुपपत्तेर्न कालक
ल्पकत्वं भवति प्रत्यक्षत्वे तु सूर्योदयो वर्त्ततइति क्रियाविषयोदयप्र
त्ययविलक्षणा वर्त्तमइत्यक्षजप्रत्ययवेद्यत्वात्क्रियातिरिक्तकालसिद्धि
भूतः सूर्योदयो भविष्यति वेति भूतभविष्यत्कालावच्छिन्नोदयस
त्ताग्राहिणि प्रत्यये वर्त्तमानत्वाप्रतीतेश्च न वर्त्ततइति बुद्धेः सत्त्वा
लम्बनत्वं शङ्कनीयं ह्यो भूतो ऽद्य नश्यति श्वो भविष्यत्यद्य नोत्पद्य
तइति प्रध्वंसप्रागभावग्राहिनाशानुत्पत्तिबुद्धिवैलक्षण्याच्च भूतभवि
ष्यद्बुद्ध्योः प्रध्वंसप्रागभावालम्बनानुपपत्तेः भूतभविष्यत्काला-

च्छिन्नसत्तालम्बनत्वं धातुप्रत्ययार्थालोचनयाभासमानं नापह्नोतुं शक्यं कालानवच्छेदे च सूर्योदयादिसदसत्त्वयोराकाशशशविषाणवत्सर्वदा सदसत्त्वापत्तेः कादाचित्कत्वप्रतीतिविरोधः स्यातश्च कालस्यैकरूप्ये ऽप्युपाधिभेदाद्भूतभविष्यद्वर्त्तमानत्वव्यपदेशोपपत्तिः। एकफलावच्छिन्ना हि क्रियाक्षणा यावन्तं कालं व्याप्नुवन्ति तावत्कालो वर्त्तमानकालत्वेन व्यपदिश्यते क्रियाक्षणानां च यौगपद्ये ऽप्येकफलोद्देशेनानुष्ठीयमानानामाद्यक्षणादारभ्य फलोत्पत्तिक्षणपर्यन्तं क्रियैक्यव्यपदेशाद्विद्यमानक्रियावच्छेदौपाधिककालस्य वर्त्तमानत्वं विनष्टक्रियावच्छेदौपाधिकं भूतत्वं भाविक्रियावच्छेदौपाधिकं भविष्यत्त्वम् उपपन्नं सूर्यादिक्रियावच्छेदस्य च कालस्याक्षिपक्ष्मादिक्रिययावच्छेदाभ्युपगमान्नान्योन्याश्रयापत्तिः। अतश्च सूर्यादिक्रियाणामपि भूतभविष्यद्वर्त्तमानकालावच्छेदात्क्रियाव्यतिरिक्तस्याकाशादिव्यतिरिक्तस्य च कालस्य प्रत्यक्षकालवादिमते विलक्षणप्रतीतिबलादेव सिद्धेस्तेषां तावत्पराजयो ऽनाशङ्क्य एव। अनुमेयकालवादिनो ऽपि त्वाकाशादिव्यतिरेकासिद्धावपि क्रियातस्तावद्व्यतिरेकासिद्धेरशक्याः पराजेतुमित्याशयः। सूर्यादिगतिक्रियाणां कालत्वमभ्युपेत्यापि गणनापरपर्यायसंख्यानवाचित्वेन स्मृतात्कालयतेर्धातोर्घञि कृते कालशब्दव्युत्पत्तेः क्रियामात्रे च कालत्वाप्रसिद्धः परिच्छेदकत्वप्रयुक्तत्वात्कालत्वस्य जीवनस्य चानियतपरिमाणत्वेन परिच्छेदकत्वायोगात्कालत्वानुपपत्तेरपरिहार्येह लक्षणीति वक्तुमारभते * अपि चेति * कासु तर्हि कालत्वप्रसिद्धिरित्यपेक्षायामाह * तत्रेति * यावद्दोहं स्वपिति इत्यादौ गोदोहनादिक्रियास्वपि स्वापादिक्रियान्तरपरिच्छेदकत्वात्कालत्वप्रसिद्धिरस्तीत्याशङ्क्य क्रियान्तरपरिच्छेदकचन्द्रादित्यपरिवर्त्तनक्रियोपलक्षणत्वद्वारा गोदोहनादेः परिच्छेदकत्वं न साक्षादिति क्रियेत्यनेनोक्ते जीवनवदनियतपरिमाणत्वादुपलक्षणत्वायोगमाशङ्क्य पयःप्राप्त्यादिफललाभात्मव्यवहारोपरवोक्त्या फललाभपर्यन्तत्वान्नियतं परिमाणत्वं सूचितम्। ननु परिवर्त्तनक्रियाणां प्रहरचतुष्टयव्यापित्वेन महापरिमाणत्वात्स्वल्पपरिमाणाभिर्गोदोहनादिक्रियाभिरुपलक्षणं सम्भवतीत्याशङ्क्याह * ता एवेति * उदयास्तमयलक्षणपरिवर्त्तनक्रियाणां यदवान्तरमुहूर्त्तादिक्रियापरिमाणं तेन गोदोहनादिक्रियाभिरुपलक्ष्यमाणेन द्वारभूतेन परिवर्त्तनक्रिया उपलक्ष्यन्तइति वदता गोदोहनादिक्रियाणां साक्षाद्विपरिवर्त्तनोपलक्षकत्वायोगे ऽपि तदवयवभूतमुहूर्त्ताद्युपलक्षणद्वारोपलक्षणत्वे ऽभिहिते मुहूर्त्तादेव तर्हि उपलक्ष्यता क-

स्मान्नोक्तेत्याशङ्कानिरासाय * अन्येत्युक्तम् * परिवर्त्तनोपलक्षकगोदोहनादिपरिच्छेदार्थमुहूर्त्तादेरुपादानाज्ज्वलनादिवदवान्तरव्यापारत्वावगतेर्न प्राधान्येनोपलक्ष्यत्वं सम्भवतीत्याशयः । अनियतपरिमाणाया गोदोहनादिक्रियाया मुहूर्त्तादिना परिच्छेदायोगमाशङ्क्य प्रायिकी परिमाणप्रत्यासत्तिरुक्ता मुहूर्त्तादीनामुपलक्षकत्वसम्भवे ऽन्यपरिच्छेदार्थत्वेनोपादानमयुक्तमित्याशङ्कानिराससूचनायैवकारः अग्निहोत्रादिकालं किमित्यनेनातिक्रान्त इति पृष्टे गोदोहनपर्यन्तस्य स्वापस्यातिक्रमहेतुत्वोक्तये यावद्दोहं स्वपितीत्युच्यमानस्वापावच्छेदकतया गोदोहनमुदयास्तमययोरेव तत्कालत्वात्पूर्वाह्णादीनामप्युदयाद्यपेक्षत्वादुदयास्तमयरूपं परिवर्त्तनमेव प्रयोजनवत्त्वादुपलक्षणीयमित्याशयः । गोदोहनादीनामन्यतः परिच्छेदापेक्षामुपपादयति * तथा हीति * गोदोहनक्रियास्तु स्वरूपतो ऽनवस्थितपरिमाणत्वाद्व्यवस्थया प्रयोजनभूतया सूर्यादिचेष्टारूप मुहूर्त्तादिनियतत्वात्परिच्छेदकं लौकिका इच्छन्तीत्यर्थः । उत्तरार्द्धं व्याचष्टे * क्रियतेति * नन्वेतावान्नभो भागो ऽस्मिन्क्षणे सूर्यादिनातिलङ्घित इति पुराणतो ज्ञानाशक्तेस्तावद्भागातिलङ्घितफलसूर्यादिगतिक्षणप्रचयात्मकमुहूर्त्तादिपरिच्छेदायोगादपरिच्छिन्नानां मुहूर्त्तादीनां गोदोहनादिपरिच्छेदकत्वं न सम्भवतीत्याशङ्क्याह * तत्परिच्छेदश्चेति * आकाशावयवविशेषातिक्रमफलसूर्यादिगतिक्षणप्रचयात्मकस्य नाडिकादेः मुहूर्त्तादिवदेव नैपुण्येन स्वत परिच्छेत्तुमशक्यत्वात्षष्ट्या पानीयपलानां यत्र घटीपूरणफलघटीछिन्नोर्द्ध्वगतिक्षणप्रचयात्मिका नाडिकाभिप्रेता अक्षिपक्ष्मसंयोगविभागफलस्याक्षिपक्ष्मगतिक्षणप्रचयात्मकनिमेषस्य चतुर्थो भागः क्षणद्वयं लवः क्षणत्रयं त्रुटिः क्षणचतुष्टयं निमेषः पञ्चदश निमेषाः काष्ठा त्रिंशत्काष्ठा च कला मुहूर्त्तस्त्रिंशा च यथात्मिकादिशब्देनोक्ता मानुषीणामपि निमेषादिक्रियाणां स्वतः परिच्छेदकसम्भवे गोदोहनादेरपि स्वतः परिच्छेदकत्वापत्तिरित्याशङ्क्य * व्यावहारिकेत्युक्तम् * पयःप्राप्त्याद्यभिमतफलात्मकस्य व्यवहारस्य दोग्धृप्रयत्नशैथिल्याशैथिल्याभ्यां बह्वल्पक्षणसाध्यत्वेनानियतपरिमाणकालव्यापित्वात्तच्छेपभूतानां गोदोहनादिक्रियाणां परिमाणनियामकत्वलक्षणपरिच्छेदकत्वायोगो ऽपि निमेषादिक्रियाणां फलानुद्देशेनैव स्वभावतो ऽनुष्ठीयमानानामप्रयत्नापाद्यत्वेन प्रयत्नशैथिल्यकृतबह्वल्पकालव्यापित्वायोगात्फलपर्यन्तत्वाभावेन च तन्निमित्तानियतकालव्यापित्वायोगान्नियतपरिमाणत्वोपपत्तेः परिच्छेदकत्व

सम्भवतीत्याशयः । कथं तर्हि यावद्दोहं स्वपितीति गोदोहनक्रियायाः
परिच्छेदकत्वव्यवहार इत्याशङ्क्याह * तदभ्यासेति * सकृदनु-
ष्ठाने प्रायिकत्वायोगात्तस्मिन्मुहूर्त्तादिपरिमिते काले व्यवहारोपयो-
गिनीनां दोहनादिक्रियाणां यो * अभ्यासस्तद्वशेनेत्युक्तम् * जी-
वनस्य तु कथं चित्परिच्छेदकत्वायोगाच्च कालत्वं सम्भवतीत्याह *
न चेति * काललक्षणापरिहारायोगमुपसंहरति * तस्मादिति *
अभ्यासलक्षणामुपपादयितुमारभते * पुनरिति * प्रश्नपूर्वमुप-
पादयति * कथमिति * वैतत्येन कदा चित्सांकानुष्ठानाद्वि-
क्षिप्तत्वेन प्रयोगे क्रियानुजीवनकाल इत्यपरिज्ञानाद्वैतत्यं वैपरीत्येन
त्वेकहेलया कृत्स्नप्रयोगे यावज्जीवश्रुतिर्वृथा स्याद्यत इति अध्याहा-
रेण योज्यम् । वैतत्येनापरिज्ञानादित्येतद्व्याचष्टे * अनभ्यस्तमिति * ६३२।२
अमृतेन समाप्येतइति परिसंख्यारूपेणासमाप्य म्रियतइत्यर्थविव-
क्षया * अर्थेत्युक्तम् * मृते ऽपि समापने सर्वस्वाराख्यक्रतुव-
द्दोषमाशङ्क्यार्भवपवमाने प्रस्तूयमाने ब्राह्मणाः समापयत मे यज्ञ-
मिति सम्प्रेष्य संविशतीति वचनात्तत्रादोष इति वैषम्यं * न चे-
त्यनेनोक्तम् * वितत्यप्रयोगपक्षे च यावज्जीवकालस्य सायम्प्रातः
कालसमाप्ये काम्यप्रयोगे निवेशायोगात् । यावज्जीवचोदनायाः
पूर्वपक्षे ऽनिष्टस्यापि प्रयोगान्तविधायित्वस्यापत्तेः सायम्प्रातश्चोदन-
योश्चोदनाद्वयसान्निध्याविशेषे ऽपि काम्यप्रयोगमात्रविषयत्वकल्पना
निष्प्रमाणिकाप्यापद्येतेति दूषणान्तरमाह * सायमिति * सती
इति पाठे चोदने इति नपुंसकद्विवचनं प्रयोगान्तरापत्तिसूचनाय
* अस्मिन्नित्युक्तम् * पक्षान्तरार्थमन्यथेति श्लोकावयवं व्याचष्टे
* यदि त्विति * सायम्प्रातश्चोदनानुरोधेनैकदैव कृत्स्नप्रयोगात्सा-
यम्प्रातश्चोदनार्थं यावज्जीवचोदनार्थयोर्द्वयोरपि सम्पादनं यदि म-
न्येतेत्युक्ते कृत्स्नजीवनकालाव्याप्तौ कथं तच्चोदनार्थसम्पत्तिरित्या-
शङ्कानिरासार्थो दृष्टान्तः । अस्मिन्पक्षे दोषोक्त्यर्थं वृथेत्यवयवं व्याच-
ष्टे * तत्रेति * तिथिवाच्यहः शब्दः इह यावज्जीवश्रुतौ व्याप्ति-
तो ऽन्यत्फलं न प्रतीयतइत्यर्थः । श्लोकं व्याचष्टे * यदीति *
पूर्वाह्णो वै देवानामित्यन्यार्थदर्शनमेवान्यतः प्राप्तचभावेन प्रापकत्वा-
च्चोदनाभिप्रेतम् । अजीवतो ऽनुष्ठानाशक्तेः कर्मणो जीवनव्यतिरिक्त-
कालाप्राप्तावपि सायम्प्रातःकालयोर्जीवनव्यतिरेकेणापि भावात्सा-
यम्प्रातश्चोदनावशेनाजीवतः स्वयमशक्तावप्यृत्विग्द्वारा सर्वस्वार-
वत्प्राप्तानुष्ठाननिवृत्त्यर्थं सायम्प्रातश्चोदनयोर्जीवनकालान्तर्गतसाय-
म्प्रातःकालाविषयत्वोपसंहारार्थत्वेनार्थवद्यावज्जीववाक्यमित्याशङ्क्य

सायमित्युक्तम् आहत्य वचनं विनार्थिकद्वारानुष्ठानकल्पनस्याप्य
युक्तत्वाच्छ्रुत्यालोचनयैव जीवनान्तर्गतसायम्प्रातःकालविषयत्व
तच्चोदनायाः सेत्स्यतीत्याशयः । जीवनान्तर्गतसायंप्रातःकालविषय
तान्तर्गत्युक्त्या विवक्षिता अनेन च यद्पीत्याशङ्कापरिहारभाष्य
व्याख्यातम् * यावच्छ्रुतिविरोधश्च * अस्मिन्पक्षे स्यादिति दूषणा
न्तरोक्त्यर्थत्वेन शब्देन त्विति भाष्यं चशब्दार्थौ तुशब्दाभ्युपगमेन
व्याचष्टे *यावच्छब्दश्चेति * इत्यर्थादित्यभ्यासलक्षणोपसंहारभाष्यं
६३३।१ व्याचष्टे * अत इति * सायम्प्रातश्चोदनामिश्रत्वोक्त्या कृत्स्नप्रयो
गाङ्गत्वेन कालविधानात्तद्विरोधादपि चितस्य प्रयोगो न युक्त इति
सूचितम् । ननु जीवनपरिमिते काले जुहुयादिति विहिते ऽर्थादभ्या-
सापत्तावपि विधेरभ्यासविषयत्वाभावान्नाभ्यासलक्षणापत्तिरित्या-
शङ्कानिरासार्थत्वेन स हीति भाष्यं व्यख्यातुमाशङ्कते तावत् * न-
नु चेति * एतदेव विवृणोति * तथा हीति * शब्दस्य होमाभ्या-
सापादने यः श्रमः स सामर्थ्यहोमेनारोपितो यत इत्यध्याहारेण
भारानुपादने हेतुतया योज्यम् । शब्दोक्तजीवनपरिमितकालान्वयसा-
मर्थ्यस्याश्रुताभ्यासापादकत्वमात्रेण तुशब्दस्य दुष्टत्वाभ्युपगमे
सिद्धान्ते ऽपि सायम्प्रातःकालावच्छिन्नजीवनलक्षणनिमित्तान्वयसा-
मर्थ्यस्याश्रुताभ्यासापादकत्वादविशेष इत्याह * अथेति* सिद्धान्ते
प्रत्यह प्रयोगविध्यर्थसमाप्तेः प्रत्यहमभ्यस्तप्रयोगाभावात्प्रयोगाभ्या-
सस्य च विधिव्यापारं विनापि सामर्थ्यादेव सिद्धेर्नाभ्यासलक्ष-
णापत्तिः पूर्वपक्षे त्वभ्यस्तस्य कर्मणः प्रयोगो न प्रयोगाभ्यासः प्रयो-
गस्य च विध्यधीनत्वादभ्यासलक्षणां च विनाभ्यस्तप्रयोगविध्ययो-
गाल्लक्षणापत्तिरिति वैषम्येणाशङ्कानिरासार्थतया व्याख्यातुमाह *
उच्यते इति * प्रत्यहं विध्यर्थसमाप्तौ द्वितीयादिष्वहःस्वनुष्ठाना-
नर्थक्यमाशङ्क्य पृथक्प्रयोगतोक्ता श्लोकं व्याचष्टे * ममेति * प्र-
तिदिनं कर्मसमाप्तेर्नैकस्मिन्प्रयोगे कर्माभ्यास इत्यर्थः । न त्वभ्य-
स्तप्रयोगस्यापि सामर्थ्यालभ्यत्वेनाशाब्दत्वात् न दोषापत्तिरित्याश-
ङ्क्याह * तच्चेति * अभ्यस्तप्रयोगचोदनां विनाभ्यस्तप्रयोगासिद्धेरं-
भ्यस्तस्वरूपत्वे विधिर्व्यापारयितव्य इत्यर्थः । ननु विधेयत्वे ऽभ्य-
भ्यासस्य जीवनपरिमितकालान्वयान्यथानुपपत्तितः प्रतीतेर्धातोर-
भ्यासलक्षणायां व्यापाराभावाददोष इत्याशङ्कते * नन्विति * शा-
ब्दत्वं विनाभ्यासस्य विधान्वयायोगेनान्यथानुपपत्तितः प्रतीतिस-
म्भवे ऽपि धातुव्यापारस्यावश्याभ्युपगन्तव्यत्वादपरिहार्या लक्षणे-
त्याशयेन परिहारं न चेत्यादिभाष्यसूचितमाह * सत्यमिति * श्रु-

तिश्चेत्यादिसूत्रार्थोपसंहारभाष्यमापाततेलया व्याख्यातुमाह * तदि-
ति * पञ्चम्यर्थे तादित्यव्ययम् उभयशब्देनाख्यातयावज्जीवपदविष-
यतया श्रुतिशब्दो व्याख्यातः । अनुवादोक्तेरुद्देशाशयतोद्दिश्ये-
त्यनेनोक्ता ।

लिङ्गदर्शनाच्च कर्मधर्मे हि प्रक्रमेण नियम्येत तत्रानर्थकमन्यत् स्यात् ॥ ३ ॥

अप्रतिपातनलक्षणलिङ्गदर्शनादपि कर्तृधर्मो यावज्जीविक-
तेति प्रतिज्ञाय कर्मधर्मे हि यावज्जीवकत्वे सति जीवनपरिमितदर्श-
पूर्णमासकालैक्याद्दर्शपूर्णमासयाजित्वानुपक्रमरूपातिपातनयोः का-
लभेदेन विरोधपरिहारानुपपत्तेर्यो दर्शपूर्णमासयाजी स तदुप-
क्रामेदेवेत्युपक्रमेण दर्शपूर्णमासयाजी तदुपक्रामित्वरूपेण वह्नि-
नेव धूमो नियम्येतेत्यनुपक्रमरूपातिपातनानुपपत्तिरित्येवं तदुपपाद-
नार्थत्वेन कर्मधर्मे हि प्रक्रान्तमित्येतावता भाष्येण प्रक्रान्तमेवेत्यव-
धारणया प्रक्रान्तं सदिति पाठे तु सच्छब्देनावधारणसूचनया म-
ध्यमसूत्रावयवं व्याख्याय यावज्जीवेत्यादिना कर्मधर्मपक्षे उपक्रम-
रूपातिपातनायोगादसमापनरूपमतिपातनं वाच्यं तत्र च यावज्जी-
वकालेन समापनावगतेस्तावति काले ऽतिपन्ने कर्मणो ऽतिपत्तिः
स्यात्तत्र च मृतस्य प्रायश्चित्तानुष्ठानाशक्तेर्निमित्तभूतातिपातनवच-
नादन्यन्नैमित्तिकप्रायश्चित्तविधानमनर्थकं स्यादित्येवम् अन्यावयवो
व्याख्यातः । तत्र जीवनान्त्यकालात्प्रागप्यसमाप्तिरूपातिपत्त्युपपत्तेः ६३४॥१
काले ऽतिपन्ने कर्मातिपत्त्युक्तिरयुक्तेत्याशङ्कानिरासपूर्वं सर्वं भाष्यं
तात्पर्यतो व्याचष्टे * अतिपत्तिरिति * स्वधर्मभूतकालातिक्रमः
कर्मकर्तृकः प्रयोज्यव्यापारे ऽतिपत्तिर्नानुपक्रमो समाप्तिर्वा तत्प्रयो-
जकस्तु पुंव्यापारो ऽनुक्रमणासमापनोपलक्षितो विध्यविज्ञानाख्यो
ऽतिपातनमित्याशङ्कानिरासाशयः । सिद्धान्ते तु कालभेदादेकस्मि-
न्मासे दर्शपूर्णमासानुष्ठानाल्लब्धदर्शपूर्णमासयाजिव्यपदेशस्य मा-
सान्तरे ऽनुपक्रमणरूपमसमापनरूपं वातिपातनं प्रायश्चित्तविधिश्च
सम्भवतीत्याह * मत्पक्षे त्विति * प्रायश्चित्तविषयत्वेन स-
म्भवतीत्यनुषङ्गः । ननु जीवनपरिमितदर्शपूर्णमासकालैक्याद्दर्श-
पूर्णमासयाजिनो ऽतिपातनप्रायश्चित्तविध्ययोगे ऽप्यभ्यासकालभेदा-
दाद्युभयं सम्भवतीत्याशङ्कते * ननु चेति * पौर्णमास्यमावास्या-
शब्दयोरभ्यासलक्षणार्थत्वे प्रमाणाभावादभ्यासातिपातनस्य निमि-
त्तत्वानवगतेर्नाभ्यासकालभेदाभ्युपगमेन विरोधपरिहारः सम्भव-

तीत्याशयेन परिहरति * न शक्यमिति * ननु पौर्णमास्यमावा-स्याशब्दयोः कालवाचित्वात्तस्य च जीवनपरिमितदर्शपूर्णमासप्रयोगविषयत्वायोगादनभ्यासविषयत्वावगतेरभ्यासविषयकालातिपातनस्य निमित्तत्वं प्रतीयतइत्याशङ्कते * ननु चेति * अवयवविषयः कालकर्तृकः प्रयोज्यव्यापारो ऽतिपत्त्याख्यो ऽतिक्रमो निमित्तभूतातिपाताख्यपुङ्कर्तृकप्रयोजकव्यापारविषयत्वान्निमित्तत्वेनोक्त । परमार्थतस्त्वतिपातनं नामेति परिहारग्रन्थालोचनया कालातिपातनान्यनिमित्तत्वशङ्कार्थो लक्ष्यते कालस्यातिपत्त्याख्यं प्रयोज्यव्यापारं प्रतिकर्तृत्वाभावात्कालातिपातनस्य निमित्तत्वं न सम्भवतीति परिहरति * नैतदिति * कालेन कर्मणातिक्रमणीयमिति कालकर्तृकर्मविषया ऽनतिपत्त्यविधेः कालस्यातिपत्त्ययोगमिति हेतुत्वमुक्तमुपपादयितुम् * यस्य हीत्याद्युक्तम् * प्रधानस्याङ्गमनतिक्रमणीयं नाङ्गस्य प्रधानमित्येतदेव कुत इत्यपेक्षायाम् * तदेव चेत्युक्तम् * सगुणत्वायानतिक्रमविधानात्प्रधानस्य च सगुणत्वापेक्षणात्प्रधानस्यैवाङ्गमनतिक्रमणीयमित्याशयः । अनुष्ठानानुष्ठानरूपत्वाच्चा-
६३५।२ तिक्रमानतिक्रमयोरनुष्ठेयकर्मधर्मतैव युक्तेत्याह * तदेव चेति * अनुष्ठानमात्मा स्वभावो धर्मो यस्येति विग्रहः अतः पौर्णमास्यमावास्याशब्दवाच्यकर्मातिपातनस्य निमित्तत्वादभ्यासस्य च पौर्णमास्यमावास्याशब्दवाच्यत्वाभावादतिपातप्रायश्चित्तविध्योर्लिङ्गता युक्ता इत्युपसंहरति * तस्मादिति *

व्यपवर्गं च दर्शयति कालश्चेत्कर्मभेदः स्यात्॥ ४॥

दर्शपूर्णमाससमाप्त्युत्तरकालत्वदर्शनाच्च कर्मधर्मपक्षे दर्शपूर्णमाससमाप्त्युत्तरकाल कर्मकालाभावादनर्थकमन्यत् सोमयागविधानं स्यात्तदर्थवत्त्वाय तु सोमयागस्य दर्शपूर्णमाससमाप्त्युत्तरकालं कालो ऽस्तीत्यभ्युपगमे यावज्जीवकालसमाप्त्यत्वायोगात्प्रतिमास दर्शपूर्णमासकर्मप्रयोगाङ्गभेदः स्यात् स च यावज्जीविकत्वस्य कर्तृधर्मत्वपक्षे पौर्णमास्यमावास्याकालावच्छिन्नस्य जीवनस्य प्रतिमासं भिन्नस्य निमित्तत्वाद्युज्यते न कर्मधर्मपक्षइत्येवं तत्रानर्थकमन्यत् स्यादिति पूर्वसूत्रावयवानुषङ्गेण व्याख्यां सूचयितु कथमनर्थकमन्यत् सोमयागविधानं स्यादिति प्रश्नपूर्वं कथमित्यादिभाष्येण सूत्रं व्याख्यातं तदभ्याससमाप्त्युत्तरकालत्वस्य कर्मधर्मपक्षे ऽपि सम्भवात् समाप्त्युत्तरकालत्वस्य कर्तृधर्मत्वाल्लिङ्गत्वशङ्कानिरासपूर्वं व्याचष्टे * दर्शेति * यथैव पौर्णमास्यमावास्याशब्दयोरभ्या-

सवाचित्वाभावान्न प्रतिमाससंभ्यासापत्तिः प्रायश्चित्तनिमित्तं किं
तु यावज्जीविकाभ्यासापत्तिस्तथैव दर्शपूर्णमासशब्दयोरभ्यासवा-
चित्वाभावाद्यावज्जीविकाभ्याससमाप्त्युत्तरकालतैव स्यात् न
प्रतिमासाभ्याससमाप्त्युत्तरकालतेति शङ्कानिरासार्थः। काल-
श्चेदित्यादिसूत्रावयवं स्वयमन्यथा व्याख्यास्यन् भाष्यव्याख्याते ऽर्थे
तावद्योजयति * सूत्रमपीति * अन्यथा व्याख्यातुमाह*कालश्चेदि-
ति * कर्मान्तरेण सोमयागादिना दर्शपूर्णमासकर्मणोरविच्छेदे स-
त्यपि को दोष इत्यपेक्षायां दर्शपूर्णमाससमाप्त्युत्तरकालविधिविरो-
धो विचार एतद्यज्ञस्य छिद्यते यदन्यस्य तन्त्रे वितते ऽन्यस्य तन्त्रं
प्रतायते इत्यादिनिन्दोन्नीतनिषेधविरोधश्चेति दोषद्वयमुक्तं लिङ्गद-
र्शनसाध्यमर्थमुपसंहरति * तस्मादिति * अनुध्यायिनीजरामरण-
निर्मोकवचनरूपस्यान्यार्थदर्शनवद्यज्ञस्य व्यपवर्गसूत्रार्थत्वाभावात्त-
द्व्याख्यावेलायामुपन्यासो न युक्त इत्याशङ्क्यापवर्गसूत्रार्थत्वाभावे
* ऽप्यनित्यत्वात्तु नैवं स्यादित्युत्तर * सूत्रस्थनैवंशब्देन परामर्शसि-
द्ध्यर्थं तत्समीपे मुक्तकस्यान्यार्थदर्शनद्वयस्योपन्यास इत्याह * मु-
क्तकेति * सूत्रानारूढस्योपन्यस्तस्य सौत्रेण शब्देन परामर्शमाश- ६
ङ्क्य विशेषत. केन चित् सूत्रेणानुक्तत्वे ऽपि सामान्यतो लिङ्गदर्शन-
सूत्रगोचरतोक्ता। अनुध्यायिनीवचनं व्याख्यास्यन् अतिपातनप्राय-
श्चित्तादीनां लिङ्गदर्शनानां विधिरूपत्वादस्यापि विधिरूपत्वशङ्कां
निवर्त्तयितुमर्थवादत्वं तावदाह * तद्यथेति * लिङ्गदर्शनसूत्रे ऽनु-
ध्यायिनीजरामरणनिर्मोचनवचनयोरपि नियमलिङ्गत्वादुदाहरण-
त्वसम्भवसूचनार्थस्तद्यथाशब्दः। अर्थवादत्वसिद्ध्यर्थं विध्यन्तरशेष-
भूतत्वे ऽभिहिते होमादिनिषेधार्थत्वाद्विध्यन्तरशेषत्वायोगमाशङ्क्य
दीक्षितो न ददातीत्यादिवाक्यान्तरेणैव होमादेः पर्युदस्तत्वान्नाग्नि
होत्रं जुहोतीत्यादेरनुवादत्वं दीक्षितस्येत्यनेनोक्तं व्याचष्टे *एतावन्तं
हीति * य आहेत्यादिभाष्येणाभिमुख्यार्थत्वादाहो हकारस्य च
निश्चयार्थत्वादात्मार्थत्वरूपेणाभिमुख्येन यो भागो निश्चितो भवति
तस्मिन्नदीयमाने ऽनुध्यायिनीवचनं भवतीत्यनुध्यायिनीवचनाद्भाग-
स्य नियतत्वमुक्त्वा यश्चेत्यनेन व्यतिरेकमुखेनोपपाद्य नियतश्चेत्यनेन
भागनियतत्वद्वारानुध्यायिनीवचनस्य नियमलिङ्गतोपपादिता तत्-
सर्वं सङ्क्षिप्य तात्पर्यतो व्याचष्टे * एतदिति * कर्म धर्मपक्षालिङ्ग-
योगोक्त्यर्थं नेति भाष्यं व्याचष्टे * कालेति * तस्मादित्युपसंहारभा-
ष्यं व्याचष्टे * तस्मादपीति * जरामरणनिर्मोकोक्तेर्लिङ्गत्वोक्त्यर्थ-
मपि च श्रूयतइति भाष्यं व्याख्यातुं यथाभागस्य नियतत्वं नियमलिङ्-

ङ्क्तं तथा जरामृत्युभ्यामेव निर्मुच्यतइति जरामरणयोरपि निर्मोक्षकारणयोर्नियतत्वं लिङ्गमित्यतिदिशति * एतेनेति * जराविधेरन्यतो ऽप्राप्तत्वादनेनैव वाक्येन विधिं सूचयितुं विधानशब्दः । जरेति भाष्यं व्याचष्टे * काश्यत्वेति *

अनित्यत्वात्तु नैवं स्यात् ॥ ५ ॥

जरामरणवाक्यस्य प्रागेवोपन्यस्तत्वात्पुनरुपन्यासो ऽनर्थ इत्याशङ्क्याह * यदेवेति * तत्सूत्रस्थेनैवंशब्देन परामर्शार्थं प्रागुपन्यस्तं वस्तुतस्त्वेतत्सूत्रार्थएवान्यार्थदर्शनद्वयमुपलक्षणार्थं त्वेकमुपन्यस्तमित्याशयः । सूत्रं योजयति * नियमेति * यदेतदनुध्यानं जरामरणनिर्मोचनं चोक्तं तद्भवतपक्षे कर्मणो ऽनित्यत्वायोगाद्यथोक्तं तथा न स्यादित्यर्थः । लक्षणाभ्युपगमे ऽपि जीवनस्यानियतपरिमाणत्वात्तु यत्काललक्षणार्थत्वमुक्तं तन्नैवं स्यादित्येवं स्वयमन्यथासूत्रं व्याचष्टे *अथ वेति * सूत्रार्थमुपपादयति * तत्रामेति * नित्यशब्दव्याख्यानार्थम् * कियतापीत्युक्तम् * चन्द्रादर्शनस्य ज्योतिःशास्त्रान्नियतपरिमाणेनामावास्याकालेनाविनाभावावगमात्तदुपलक्षणत्वं युक्तं जीवनस्य तु कियता कालेनाविनाभावानवगमान्न युक्तोपलक्षणतेत्यर्थः ।यस्मादनियतपरिमाणत्वाज्जीवनकालमुपलक्षयितुं न शक्नोति तस्मादेतज्जीवनमेवमुपलक्षणमापद्यते यदुनतज्जीवनमेवंभूतमनियतपरिमाणं यदा भवेत्तदा जुहुयाद्यजेत वेति ततश्च कादाचित्कत्वान्निमित्ततैव स्यादित्याह * तदिति * ननु नियतनिमित्तत्वान्नियत कर्मेत्याद्यसिद्धान्तसूत्रस्थभाष्ये नियतनिमित्तत्ववशेन कर्मणो ऽवश्यकर्त्तव्यतोक्तिर्ज्जीवनस्यानित्यत्वान्निमित्तत्वाभ्युपगमे विरुध्येतेत्याशङ्कते * कथं तर्हीति * यावदात्माधिष्ठितत्वरूपेण शरीरमस्ति तावत्प्राणधारणाख्यं जीवनं नियमेनास्तीत्येवमाशयं भाष्ये जीवनानित्यत्वाभिधानमिति परिहरति * यावच्छरीरेति *

विरोधश्चापि पूर्ववत् ॥ ६ ॥

यावज्जीविकाभ्यासपक्षे च दर्शपूर्णमासवत्ताद्विकर्तीनामप्यभ्यासापत्तेः सर्वासां चैकस्मिन्काले ऽभ्यासस्याशक्यत्वाद्विरोधः स्यादित्येवं सूत्रव्याख्यार्थमितश्चेत्यादिभाष्यं नियमपक्षे ऽपि विरो-
६३७।२ धसाम्यादयुक्तमाशङ्क्योपपादयति * नियमः सर्वोति * नियमस्यावश्यकर्त्तव्यरूपस्य प्रत्यवायपरिहारार्थत्वेन पुरुषार्थत्वादनतिदेशो ऽष्टमे वक्ष्यतइत्यर्थः । नन्वतिदेशप्राप्तो ऽपि यावज्जीविककालो य

इष्टयेति वाक्योपदिष्टेन सद्यस्कालत्वेन बाधिष्यतइत्याशङ्कते * नन्वेति * अविरोधान्न बाध्यतइति परिहरति ।

नैतदिति कर्त्तुस्तु धर्मनियमात्कालशास्त्रं निमित्तं स्यात् ॥ ७ ॥

ननु कर्तृधर्मपक्षे ऽपि यावज्जीवशब्देन जीवनपरिमितकालस्योक्तेस्तुल्यो विरोध इत्याशङ्कानिरासार्थत्वेन यथाभाष्यं सूत्रं योजयति * कर्त्रेति * व्यपवर्गदर्शनानुक्तावपि सूत्रार्थः पर्यवस्यतीति सूचनाय * एतावदित्युक्तम् * निमित्तपक्षे दर्शपूर्णमासाविष्ट्यपवर्गदर्शनावक्लृप्तेः कालश्चेत्कर्मभेदः स्यादित्यनेनैवोक्तत्वाद्दर्शनान्तरानुदाहरणाच्च व्यपवर्गदर्शनोक्तिरयुक्तेत्याक्षिपति * यत्त्विति * दर्शनशब्दो याज्ञिकास्थितिलक्षणसिद्धान्ताशयो न तु लिङ्गदर्शनाशय इत्येवं समाधत्ते * तत्रेति * व्यपवर्गसिद्धान्तोक्तेरपि पौनरुक्त्यमाशङ्क्य पूर्वसूत्रस्थभाष्यालोचनया विकृतिविषयतोक्ता प्रकृतिन्यायेनैव विकृतीनामपि व्यपवर्गसिद्धान्तस्योपपत्तिसिद्धेर्मन्दफलत्वेनापरितोषात्स्वयमन्यथासूत्रं व्याचष्टे * अथ वेति * उपसंहारार्थत्वे सूत्रस्यानतिरिक्तार्थत्वात्फल्गुत्वापत्तेरत्राप्यपरितोषान्नियमपक्षे कालवाचियावज्जीवशब्दानुपपत्तिमाशङ्क्य नियमवाचितया यावज्जीवशब्दव्याख्यार्थत्वेन व्याचष्टे * अथ वेति * उक्तेन न्यायेन कर्तृधर्मनियमे सिद्धे सति कालशास्त्रतयाभासमानमपि यावज्जीवपदं वस्तुतो निमित्तशास्त्रमेव स्यादित्यर्थः । श्रुतिसंयोगात्त्वेव कालवाचित्वनिरासेन निमित्तवाचित्वसिद्धेरत्राप्यपरितोषात् स्वमतेन निरूढपश्वादिषु नैयमिकत्वोक्त्यर्थत्वेन व्याचष्टे * अथ वेति * षट्सु षट्सु मासेषु पशुना यजेत चतुर्षु मासेषु चातुर्मास्यैर्यजेतेत्यादिशब्देनोक्तम् । कालशास्त्रत्वेनाभासमानस्य वीप्सायोगमात्रेण कथं निमित्तशास्त्रतावसीयतइत्याशङ्क्याह * न तावदिति * काम्यस्य वा ज्योतिष्टोमप्रयोगस्य वसन्तकाल उपदिश्येत एष वा अनृणो यः पुत्री यज्वा ब्रह्मचर्यवासीत्यनृणवाक्यादवगतस्य नैयमिकस्य तत्र काम्यस्य तावद्यावदिच्छयावृत्तौ कालस्याप्यङ्गत्वेन हेतुना वीप्सां विनापि प्रतिप्रधानावृत्तिन्यायादावर्त्यमानतया स्थितत्वाद्वीप्सानर्थक्यापत्तेर्वसन्ते वसन्तइत्येवं वीप्सायुक्तत्वेन कालो न शक्यो वक्तुं नैयमिकस्य च ज्योतिष्टोमप्रयोगस्योपदिश्यते तत्रश्चोलोपनयनादिवत् सकृत्प्रयोगमात्रेण नैयमिकविध्यर्थसिद्धेर्नि-

ष्फलावृत्त्ययोगात्तद्वाचिका वीप्सानर्थिका स्यात् इत्यर्थः । ननु नैय-
मिकस्यापि प्रयोगस्य कालोपदेशे ह्रित्रादिषु वसन्तेषु प्रयोगाविध्यर्था
६३८।२ वीप्सा भविष्यतीत्याशङ्क्यानवस्थितशास्त्रार्थापत्त्या निरस्यति * न
चेति * अतः सर्ववसन्तव्याप्त्यर्थत्वाद्वीप्साया निमित्तत्वं च,
विना व्याप्तेरप्राप्तत्वेनानुवादायोगादेकस्मिंश्च प्रयोगे ऽनेकवसन्त-
साहित्यसम्पादनाशक्तेर्विध्ययोगान्निमित्तशास्त्रतावसीयतइत्याह *
तस्मादिति * नन्वधिकरणवाचिन्या सप्तम्या कालस्याङ्गत्वावग-
तेर्निमित्तता न युक्तेत्याशङ्क्याह * सप्तम्यपि चेति * अत्रार्थे
सूत्रं योजयति * तेनेति * ज्योतिष्टोमन्यायं पश्वादिष्वतिदिश-
ति * एतेनेति *

॥ अथ सर्वशाखाप्रत्ययैककर्मताधिकरणम् ॥ २ ॥

नामरूपधर्मविशेषपुनरुक्तानिन्दाऽशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखान्तरेषु कर्मभेदः स्यात् ॥ ८ ॥

षड्विधस्यापि कर्मभेदस्योक्तत्वादनर्थकमेतदधिकरणमित्या-
शङ्क्य शाखान्तराख्यकारणान्तरनिरासार्थत्वं तावत्परमनेनाह * उ-
क्तेति * प्रतियोगिज्ञानापेक्षत्वादिदं कर्म शाखान्तरीयकर्मभिन्न-
मिति बुद्धेः शाखान्तरान्यभेदकत्वशङ्कानुपपत्तेः कारणान्तरनिरा-
सार्थत्वायोगनापरितोषात् स्वमतेनोक्तषट्कमध्य एव संज्ञागुणाभ्या-
साशङ्कानिरासार्थमाह * तत्रैव चेति * रूपादेः षट्कबाह्यत्वात्क-
थं तन्मध्यताशङ्केत्याशङ्क्य केनचिदपूर्वसंयोगादिप्रकारेण षट्कान्य-
तमरूपत्वाशङ्कोक्ता कथं निन्दादेः षट्कान्यतमप्रकारत्वमित्याशङ्क्या-
ह * तदिति * सिद्धान्ते प्रतिषेधार्थं निन्दादेर्गुणप्रकारत्वमुदिता-
नुदितकालसंयोगभेदादित्यत्र शाखान्तरीयाणां गुणानामित्यादौ च
पूर्वपक्षवार्त्तिके योजयिष्याम इत्यर्थः । ननु पूर्वत्रासम्भवेन गुणस्य
भेदकत्वादुदितानुदितकालस्य चोत्पत्तिशिष्टत्वाभावेनामिक्षादिवत्
पूर्वसंयोगासम्भवहेतुत्वायोगाच्छाखान्तरीयस्य च कर्मणो ऽनवगत-
त्वेनाप्रत्यभिज्ञानाच्छाखान्तरीयस्य गुणस्य शाखान्तरीये कर्मणि वि-
ध्यसम्भवेन भेदकत्वस्याशङ्कनीयत्वाच्छाखान्तरीयगुणानां चैकशा-
खास्थे कर्मण्युपसंहाराशक्तेः शाखान्तरीयकर्मानवगमस्यैव हेतुत्वा-
च्छाखान्तरीयत्वसहकृतस्यैव गुणस्य भेदकत्वेनाशङ्कनीयत्वावगतेः
पुनः श्रुतेश्च सिद्धान्ते शाखान्तरीयत्वेनैवाभेदकत्वाभिधानाच्छा-

खान्तरीयाणां यथोदाहरणत्वं तथा वेदान्तरीयस्यापि कर्मणः शा-
खान्तरीयाध्यायिभिरनवगमाविशेषाद्वेदान्तराणामप्युदाहरणीयत्वा-
वगतेः शाखान्तराणीति भाष्यमयुक्तमित्याशङ्कते * कथं पुनरिति *
केषां चिदुपलक्षणत्वेन समर्थनं दूषयितुमुपन्यस्यति * के चि-
दिति * त्रयीं विना सर्वाङ्गोपेतकर्मानवगतेर्वेदत्रयस्याप्यध्येयत्वा-
च्छाखान्तरीयन्यायासम्भवेन दूषयति * न त्विति * श्लोकं
व्याचष्टे * यत्र हीति * औद्गात्रे वा वेदे यत्कर्म द्रव्यदेवतासंयु-
क्तमाम्नायते तत्र कथमित्यपेक्षायामाह * यत्विति * अनेकवेदाधी-
तस्य कर्मणो यत्र द्रव्यदेवाम्नानं तत्रैवोत्पत्तिर्वेदान्तरे गुणमात्रवि-
ध्यर्थश्रुतिरित्येतदेव तृतीयाधिकरणसूत्रेण द्रढयति * तथा चेति *
तस्माद्युक्तमेव भाष्यमित्याह * तस्मादिति * नामविशेषदर्शनाद्रू-
पविशेषदर्शनादित्यादिप्रत्येकं दर्शनशब्दान्वयेन सूत्रव्याख्यां दृश्य-
तेशब्देन सूचयन्नाम्ना भेदोक्तिं व्याचष्टे * तत्रेति * ना-
मरूपयोर्विशेषोत्त्यन्वयो भेदोक्त्या सूचितः । नामभेदो यद्भेदका-
रणं तत्तावदिह दृश्यतइत्यर्थः । नन्विति भाष्येण काठकादिनाम्नोऽव-
ध्यस्मरणानादित्वावधारणाद्वैशम्पायनान्तेवासिपुरुषवाचिकठश-
ब्दप्रकृतिकत्वे चादिमत्त्वापत्तेश्चरणाख्यब्राह्मणावान्तरजातिवाचि-
कठशब्दप्रकृतिकत्वावगमात्तस्माच्च परतस्तेन प्रोक्तमिति विहितस्या-
णप्रत्ययस्य कठशब्दपरतया विध्यभावेन कठचरकाल्लुगिति स्मृतेर्लु-
गभावात्स्वार्थिककप्रत्ययान्तत्वेन काठकमिति रूपावगतेर्ग्रन्थस्यैव
प्रवाच्यतयैतन्नामकत्वावसायात्कर्मनामत्वायोगमाशङ्क्य सत्यमित्य-
नेन तस्येदमित्यस्मिन्नर्थे गोत्रचरणाद्वुञिति चरणवाचिनः कठ-
शब्दाद्वुञ्प्रत्ययोत्पादनेन तदादेशाक्रान्तत्वात्काठकशब्दव्युत्पत्त्यव-
गतेस्तस्य च धर्मसमाम्नाययोरिष्यतइति स्मृत्या कठसम्बन्धिसमा-
म्नायविषयत्ववत्तत्सम्बन्धिधर्मविषयत्वस्याप्यवगत्याविशेषाद्विभक्त्यै-
क्यहेतुकसामानाधिकरण्याविशेषाच्च धर्मरूपकर्मनामताप्युपपा-
दितेत्येवं व्याख्यातुमाह * तद्यथेति * रूपाद्भेदोक्तिं व्याचष्टे *
तथेति * आमिक्षावाजिनदृष्टान्तेनोपपादितेन गुणत्वेन रूपभेदस्य
भेत्तृत्वे कपालसंख्याया यागगुणत्वाभावादभेदकत्वमाशङ्क्य गुणस्य
तु विधानार्थे इत्यत्र कपालाश्रिताया अपि संख्याया यागं प्रत्यङ्गत्व-
रूपगुणतोक्ताधदृष्टान्तेन स्मारिता धर्मविशेषस्यापि गुणत्वमुपपाद-
यितुमाह * कारीरीति * कारीर्यध्ययनकाले ऽनुष्ठीयमानस्य भूमि-
भोजनादेः कैमर्थ्याकाङ्क्षायां फलवतः कारीर्यादेर्वाक्याध्ययनद्वारा
सन्निहितस्य प्रकरणानाम्नातेतिकर्त्तव्यताग्राहित्वायोगे ऽप्यध्ययन-

स्य दृष्टार्थत्वेनादृष्टार्थतेति कर्त्तव्यताग्राहित्वायोगात्सन्निधानाख्येन स्थानेन कारीर्यादीतिकर्त्तव्यतावगतेर्गुणत्वे ऽपि कर्माङ्गभूतज्ञानद्वारत्वेन विप्रकृष्टतरत्वाल्लिङ्गेनोपादानमित्यर्थः । साक्षादितिकर्त्तव्यतात्वनिरासार्थः स्थानीयशब्दः । अश्वघासादिग्रहणस्योदाहरणार्थत्वेन धर्मान्तरस्यापि ग्रहणसिद्धेर्विशेषानभिधानाच्चान्यधर्मोक्तेरुदाहरणान्तरार्थत्वायोगादानर्थक्यमाशङ्क्याह * पर इति * अश्वघासादेरिति तन्त्रेणान्ययोगनिमित्तापादानपञ्चमीत्वेन व्याचष्टे * अश्वेति * पुनरुक्तत्वमभ्यासत्वेन व्याचष्टे *पुनरुक्तत्वेनेति* निन्दाया गुणत्वं तावदुपपादयति * निन्दायामपीति * पूर्वपक्षे निन्दाया निषेधमात्रपर्यवसानाभ्युपगमान्निन्दासंयोगेनोदितानुदितकालयोर्निषेध्ययोर्गुणयोर्भेदादित्येव योज्यम् । अनुदितहोमनिन्दां व्याचष्टे *उदितेति* निन्दाया निन्द्यनिषेधापेक्षत्वादुदित एवेत्यवधारणाभ्युपगमेनानुदितहोमो न कार्य इत्यस्मिन्नर्थे तस्मादिति योज्यम् । उदितहोमनिन्दां व्याचष्टे *इतरे पुनरिति* प्रद्रुतायाश्चदानोक्तेर्निन्दात्वाभिव्यक्त्यर्थं यः पूजामित्युक्तम् * प्रद्रुतशब्दव्याख्यानार्थातिक्रान्तोक्तिः अतिक्रान्ताया स्वदानाशक्तिमाशङ्क्य * व्याहृत्यैहीत्युक्तेत्युक्तम् * तस्मादित्युदितहोमो न कार्य इत्येवं योज्यम् । निन्दाया निन्द्यन्तरविधिशेषत्वात्तद्वादशैकादशकपालत्ववद्विकल्पनाविरोधमाशङ्क्य वैकल्पिकत्वे सत्युभयथाप्यवैगुण्यान्निन्दानुपपत्तेर्विरोधपरिहारायोगात्तदर्थं सर्वेति
६४०।२ भाष्यं व्याचष्टे * तत्रेति* अशक्तेर्गुणत्वमुपपादयति * अशक्तीति * समाप्तिभेदस्याप्येकस्मिन्कर्मणि निवेशासम्भवेन भेदकत्वात् समाप्तिवचनस्यापि गुणतेत्याह * समाप्तीति * अस्माकं यो ऽग्निः सो ऽन्वारोहेषु समाप्यते ऽन्येषामन्यत्रेति समाप्तिभेदाः समाप्त्युक्त्या भेदकत्वेन विवक्षितभेदशब्देन सूचितम् । क्व चिच्छाखायामुदितकालातिक्रम इति प्रायश्चित्तनिमित्तं क्व चिदनुदितकालातिक्रम इति प्रायश्चित्तनिमित्तभेदस्यापि निन्दावन्निषेधगमकत्वेनैव भेदकत्वात्पृथगुपन्यासानर्थक्यमाशङ्क्याह *निन्दयेति* प्रायश्चित्तनिमित्तो भेदः प्रायश्चित्तभेद इति मध्यमपदलोपी समासः वृद्धिशब्दव्याख्यानार्थं वैगुण्योक्तिः । एकेनैवोदाहरणेनान्यार्थदर्शनव्याख्यासिद्धेरुदाहरणप्रपञ्चकानर्थक्यमाशङ्क्य परिहरति * परिहारेति * यदीत्यन्यार्थदर्शनं व्याचष्टे * यदीति * इष्टवतामिति भाष्यादिष्टप्रथमयज्ञतानिष्टप्रथमयज्ञता च द्वयमपि लिङ्गमिति भ्रान्तिनिरासायानिष्टप्रथमयज्ञत्वस्यैव लिङ्गत्वमाह * द्वादशाह इति * ताण्डकइत्यादिभाष्यं व्याचष्टे * ताण्डकेति * ज्योतिष्टोमस्य प्राथम्यनियमे सति यज्ञान्तरेभ्यः पृ-

श्चात्प्रयोगे प्राथम्याभावान्नैष्फल्यापत्तेः यज्ञान्तराणां च प्रथमप्रयोगे ऽप्यवैगुण्यापत्तेरन्येन यजेतेति चान्यशब्दसमभिव्याहृतस्य यजेर्यज्ञान्तरवाचित्वात्तत्परेण प्रत्ययेन ज्योतिष्टोमस्य प्राथम्यविधावत्यन्तश्रुतिबाधापत्तेः सोमयागान्तराणां ज्योतिष्टोमपश्चाद्भावरूपधर्मविध्यर्थत्वेनास्य वाक्यस्य वार्त्तिककृतैव पञ्चमे व्याख्यास्यमानत्वाद्यजुर्वेदोत्पन्नत्वेन च ज्योतिष्टोमस्य सामवेदिकताण्डुकशाखागतत्वाभावात् सारस्वतसूत्रे च ज्योतिष्टोमपूर्वत्वात् सर्वकर्मणामिति भाष्यदर्शनादेकस्यापि ज्योतिष्टोमस्य प्राथम्यनियमे सति पक्षद्वये ऽप्यदीक्षितदर्शनानुपपत्तिसम्भवात् तन्सिद्ध्यै लिङ्गपरिहारसूत्रे सर्वशेषत्वोक्त्यानर्थक्यापत्तेर्द्वादशाहस्य ज्योतिष्टोमपश्चाद्भावलक्षणार्थं ज्योतिष्टोमान्तरस्य प्राथम्यनियमे सति इत्युक्तिमङ्गीकृत्य प्रकृतशाखागताद् द्वादशाहादन्यताण्डुकशाखागतं द्वादशाहं प्रति ज्योतिष्टोमस्य प्राथम्यनियमे सति प्रकृतशाखागतस्य द्वादशाहस्य ज्योतिष्टोमपश्चाद्भावानियमात्प्रतिशाख द्वादशाहाख्यकर्मभेदे सत्यनिष्टप्रथमयज्ञत्वं द्वादशाहकर्तृविशेषणं युक्तं भवतीति व्याख्येयम्। ननु सामवेदे ज्योतिष्टोमोत्पत्त्यभावाद्यजुर्वेदोत्पन्नज्योतिष्टोमप्राथम्यप्रतीतेः कर्मभेदे चाविशेषात् सर्वज्योतिष्टोमप्राथम्यापत्तेरेकं च द्वादशाहादियज्ञं प्रति सर्वज्योतिष्टोमप्राथम्यायोगात् सर्वशाखोत्पन्नानां द्वादशाहादियज्ञानां ज्योतिष्टोमः प्रथम इत्यर्थावगतिद्वारा सर्वशाखागतानां द्वादशाहानां ज्योतिष्टोमपश्चाद्भावावगतेरुदाहृतवाक्ययुक्तशाखागतस्यापि द्वादशाहस्य ज्योतिष्टोमपश्चाद्भावानियमात्कर्मभेदे ऽप्यनिष्टप्रथमयज्ञदर्शनानुपपत्तिरित्याशङ्कानिराससूचनार्थोऽन्तरशब्दः। यज्ञान्तरधर्मभूतपश्चाद्भावावच्छेदकत्वेन ज्योतिष्टोमस्य परार्थतयोपादानात्पारार्थ्ये चैक इष्यतइत्यनेन न्यायेनैकस्यैव ज्योतिष्टोमस्य प्राथम्यावसायान्नैतद्दर्शनेन सर्वशाखास्थानां द्वादशाहानां ज्योतिष्टोमपश्चाद्भावावगतिरित्याशयः। सर्वशाखासु कर्मैक्ये तु सर्वशाखास्थं द्वादशाहं प्रति ज्योतिष्टोमप्राथम्यनियमात्तद्द्वारा सर्वशाखास्थस्य द्वादशाहस्य ज्योतिष्टोमपश्चाद्भावनियमावगतेरदीक्षितदर्शनं द्वादशाहे न स्यादित्याह * एकत्वे त्विति * ज्योतिष्टोमः प्रथमो यस्मात्स ज्योतिष्टोमप्रथमस्तस्य भावो ज्योतिष्टोमप्राथम्यमिति बहुव्रीह्यभ्युपगमेन वा सर्वशाखास्थस्य द्वादशाहस्य ज्योतिष्टोमप्राथम्यनियमादित्येवं योज्यम्। तथा चेति द्वितीयान्यार्थदर्शनभाष्यं व्याचष्टे * तथेति * अर्द्धमन्तर्वेदि मिनोत्यर्धं बहिर्वेदीति वेद्यग्रे विहितस्य यूपमानस्यातिदेशेन यूपैकादशिनीं प्राप्तस्य वेदिदेशातिक्रमायोगाद्वेदि-

मानस्य वेद्याधारस्य श्येनादिपक्ष्याकारस्थलावयवभूतपक्षद्वयसम्मानस्थ
चार्थप्राप्तत्वेनानुवादोपपत्तेः प्रत्यक्षविधिविरोधे ऽर्थवादकल्प्यविध्य-
योगात्पक्षं सम्मानं निन्दित्वा वेदिसम्मानपरिग्रहः शाखान्तरीयस्य
विरोधिनो वचनान्तरस्य तच्छाखीयं कर्मण्यप्राप्तिं द्योतयतीत्यर्थः ।
एतदेवोपपादयति * वचनान्तरे हीति * चतुर्विंशतिप्रक्रमवेद्यग्र-
देशे रथाक्षमात्रान्तरालानाम् एकादशानाम् यूपानां मातुमशक्यत्वा-
द्व्यामसमात्राणि पक्षपुच्छानि भवन्तीति च पक्षयोर्वासमानत्वविधा-
नात्पक्षसम्मानपक्षो सुतरामशक्तेर्विरोध इत्याशयः । तस्मादपी-
त्युपसंहारभाष्यं व्याचष्टे * ततश्चेति * अपरं चेति तृतीयान्यार्थ-
दर्शनात् भाष्यं व्याचष्टे * द्वे इति * स्तोत्रीयावाचिसंस्तुतशब्दप-
रनिर्द्धारणषष्ठीयोगाद् द्वित्रिसंख्ययोः स्तोत्रियाविषयत्वोक्तिः दश-
काख्यत्वेन विराट्शब्दं व्याख्यातु दशकशब्दः । अतिरेकोक्त्याऽतिरात्र-
संस्थज्योतिष्टोमविषयत्वप्रदर्शनायातिरात्रशब्दः अपि चेति चतुर्था-
न्यार्थदर्शनभाष्यं नासोमयाजी सन्नयतीत्यसोमयाजिनः सान्नाय्य-
निषेधो नैन्द्राग्नस्य पुरोडाशस्य तत्स्थाने विधानादनिष्टप्रथमयज्ञानां
पुरोडाशित्वेन विवक्षितानां दीक्षितादीक्षितदर्शनेव गतत्वादयुक्तमा-
शङ्क्य समाधत्ते * पुरोडाशीति * पञ्चमान्यार्थदर्शनभाष्यं व्या-
६४१।२ चष्टे * किं चेति * नानाकर्मत्वेति भाष्यं व्याचष्टे * उपहव्येति *
तस्मादिति पूर्वपक्षोपसंहारभाष्यं व्याचष्टे * तस्मादपीति *

एकं वा संयोगरूपचोदनाख्याविशेषात् ॥ ९ ॥

सूत्रं व्याचष्टे * सर्वत्रेति * रूपशब्दोक्तद्रव्यदेवतव्यतिरि-
क्ताङ्गाशयो गुणशब्दः संयोगचोदनयोर्ग्रहणायादिशब्दः । शाखा-
स्थानां ब्राह्मणानामेव विधायकत्वात् सर्वशाखाभ्यो ज्ञानं यस्य कर्म-
णस्तदेकमित्युक्ते सर्वेभ्यो ब्राह्मणमार्गेभ्यो ज्ञानं यस्य तदेकमित्युक्तिः
पुनरुक्तेत्याशङ्क्याह * सर्वेति * अत्रोदाहरणमाह * तद्यथेति *
गुणमुख्यव्यतिक्रमाधिकरणे ज्योतिष्टोमस्य याजुर्वेदिकतया: स्वय-
मेव वक्ष्यमाणत्वादौद्गात्रे ज्योतिष्टोमानुत्पत्तेस्तदङ्गभूतस्तोत्राद्याशया
ज्योतिष्टोमोक्ति । अर्थसंयोगस्येति भाष्यं व्याचष्टे * संयोग इति *
संशब्दस्य समीहितवाचित्वात्फलस्यैव च समीहितत्वात् समी-
हितेन योग इत्यवयवार्थसयोगात्फलान्वयवाची संयोगशब्द इत्या-
शयः । रूपमपीति भाष्यं व्याचष्टे * रूपमिति * पुरुषानि भाष्यं
व्याचष्टे * चोदनेति * नामधेयं चेति भाष्यं व्याचष्टे * ज्योतिष्टो-
मादीति * तेनेति सिद्धान्तोपसंहारभाष्यं व्याचष्टे * तस्मादिति *

शाखान्तरस्य भेदकत्वं शङ्कितुमापातनिकां तावत्करोति* न चेति*
व्याचष्टे[1] *प्रमाणान्तरवदिति*असन्निधानेनैव कारणेन शाखान्तरा-
ध्यायिभाष्यं शाखान्तरीयस्य कर्मणो ऽनवगतेः प्रतियोग्यनवगमे
च भेदाप्रतीतेर्न शाखान्तरलक्षणमसन्निधानं भेदहेतुरिति परिहरति
* नेति * एतदेव विवृणोति*येन हीति* स्मृतिहेतुसंस्कारोद्बोध-
सिद्ध्यर्था सदृशोक्तिः। ननु शाखाद्वयाध्यायिनः प्रतियोगिकर्मग्रह-
णसम्भवाच्छाखान्तरे प्रकरणान्तरन्यायो भविष्यतीत्याशङ्कते *
यस्तर्हीति * पञ्चविंशादिषु चैकशाखाङ्गतेषु ब्राह्मणान्तरेष्वेकशा-
खाध्यायिनो ऽपि प्रकरणान्तरन्यायो भविष्यतीत्याशङ्कान्तरमाह *
एकेति * आद्यां शङ्कां निरसितुमुपक्रमते * नैष इति * एतदेव प्र- ६४२।२
श्नपूर्वमुपपादयति * किमिति * स्वाध्यायोक्तेर्वेदवाचित्वात् सम-
स्तस्वशाखासमूहस्य च वेदत्वात्कथं स्वाध्यायशब्देनैकशाखाग्रहण-
मित्याशङ्कां निरस्यन् पूर्वार्द्धं व्याचष्टे * यथेति * एकशाखाध्या-
यिनि वेदवित्शब्दप्रयोगान्न शाखासमूहस्य वेदतेत्याशयः। संस्का-
रकर्माध्ययनपक्षे स्वाध्यायस्य संस्कार्यत्वेनानुपादेयत्वे ऽपि स्वश-
ब्देनात्मीयवाचिना पितृपितामहादिपरम्परागताया एव शाखायाः
कर्मव्युत्पत्त्याध्यायशब्दोक्तायाः अध्येतव्यत्वोक्तेरेकशाखाग्रहणसू-
चनार्थश्चशब्दः वेदान्तरस्यापि तर्ह्यनध्ययनापत्तेस्त्रिवेदीबोध्यज्यो-
तिष्टोमादिकर्मासिद्धिः स्यादित्याशङ्कते * नन्विति * स्वाध्याया-
ध्ययनविधिनैकवेदाध्ययनविधानाद्वेदान्तरानध्ययनप्रसक्तावपि व-
चनान्तरेण प्रतिप्रसवाद्वेदान्तराध्ययनसिद्धिरिति परिहरति *
नेति * स्मृत्यापि प्रतिप्रसवमाह * तथेति * वेदान्तरवैपरीत्यप्रदर्श-
नपूर्वमुत्तरार्द्धं व्याचष्टे * साकाङ्क्षत्वाच्चेति * द्वितीयामपि श-
ङ्कामनेनैव न्यायेन * परिहरति * साकाङ्क्षत्वादेवेति * ननु
शाखान्तरानध्ययने प्रतियोगिकर्माग्रहणाद्भेदबुद्धिवत्प्रत्यभिज्ञानस्या-
पि तदेवेदमिति प्रतियोगिग्रहणसापेक्षत्वेनानुपपत्तेर्विकल्पादेवैकक-
र्माभ्युपगमप्रसङ्गादन्योन्याश्रयः स्यादित्याशङ्कते * नन्विति * वि-
धेयरूपभेदे शब्दान्तरादिप्रमाणव्यापारात्तस्य चोत्पत्तिविध्यधीन-
त्वादुत्पत्तिबोधनेनोत्पन्नोत्पत्त्ययोगाच्छब्दान्तरादीनां भेदकत्वावग-
तेः शाखान्तरे चोत्पन्नोत्पत्तावप्यध्येत्रन्तरे प्रत्यर्थवत्त्वोपपत्तेरुत्पत्ति-
बोधने ऽपि भेदकत्वायोगाच्छाखान्तरीयत्वनिमित्तवैलक्षण्यप्रतीति-
मात्रेण भेदो वाच्यः स च प्रतियोगिग्रहणापेक्षत्वाच्छाखान्तराग्र-
हणे तावन्न शक्यो ग्रहीतुमध्येत्रन्तराग्रहणे ऽपि फलाद्यविशेषेण

१ शङ्कतेद्यति २ पु० पा०

प्रत्यभिज्ञानाद्रूपादिवैलक्षण्येन च देवदत्तवैलक्षण्यवच्छाखावैलक्ष-
ण्यमात्रेण कर्मवैलक्षण्यायोगादभेद एवावसीयते न भेद इत्याशयेन
परिहरति * नेति * विकल्पावगतिं विनाप्यध्येत्रन्तराच्छाखान्तरी-
यकर्मग्रहणे सति फलाद्यविषयनिमित्तप्रत्यभिज्ञानमात्रेण कर्मैक्य-
ज्ञानाद्विकल्पसिद्धेरन्योन्याश्रयपरिहारमुक्त्वैकशाखाध्ययनात् स्वा-
ध्यायविध्यर्थसम्पत्तावप्यनेकशाखाध्ययननिषेधादनेकशाखाध्यायि-
नो विहितविध्ययोगाद्विधिभेदेन कर्मभेदबुद्धेर्विधिश्रुतिविरोधात्
सन्निधिलक्षणप्रत्यभिज्ञाबाधमाशङ्क्य स्वाध्यायगतयैकत्वसंख्यया
ऽनेकशाखाध्ययननिषेधसूचनार्थम् * संख्यावशेनेत्युक्तम् * स्वश-
ब्देन च स्वीयशाखानियमाच्छाखान्तराध्ययननिवृत्तिरिति दृष्टान्तद्वा-
रा सूचयितुमाह * अथेति * शाखान्तरस्य भेदकत्वशङ्कानिरासमु-
पसंहरति * तस्मादिति *

न नाम्ना स्यादचोदनाभिधानत्वात् ॥ १० ॥

काठकादिनाम्नः कर्माभिधानत्वे ऽप्युत्पत्तिचोदनागतत्वाभा-
वान्न नाम्ना कर्मभेदः स्यादिति स्वयमभ्युपेत्योक्त्याशयहेत्वर्थसूच-
नापूर्वं चोद्यतइति व्युत्पत्त्या कर्मवाचिचोदनाशब्दाभ्युपगमेन भा-
ष्योक्तं हेत्वर्थं व्याचष्टे * यद्यपि तावदिति * इदं त्वित्यनेन परिहृतमि-
ति भाष्ये व्याख्याते ऽथेति भाष्येण कर्मभिरपीति पूर्वपक्षभाष्यो-
६४३।१ क्तमर्थमनुभाष्य नैष इति परिहारभाष्यं व्याख्यातुम् * अन्यायो
हीत्युक्तम् * कथमिति प्रश्नभाष्यं व्याचष्टे * कथं पुनरिति * यद्यदि-
ति परिहारभाष्यं व्याचष्टे * तदिति * श्लोकं व्याचष्टे * काठकादीति *
ज्योतिरादिवल्लाक्षणिक्यपि कर्मसञ्ज्ञा कर्म भेत्स्यतीत्याशयेन किमत्र
इति पृष्ट्वा पञ्चम्यर्थे यदित्यव्ययमङ्गीकृत्य यस्मात्काठकग्रन्थसंयो-
गात्काठककर्मैक्ये ऽपि काठकादिभिन्नग्रन्थसंयोगात्कर्म काठकादि-
भिन्नसञ्ज्ञं भविष्यतीति परिहारार्थं यद् ग्रन्थसंयोगादित्यादिभाष्यं
व्याचष्टे * ततश्चेति * एतदेवोपपादयति * तस्मादिति *

सर्वेषां चैककर्म स्यात् ॥ ११ ॥

नामभेदाच्च कर्मभेदे ऽभ्युपगम्यमाने सर्वेषामेकशाखाधीता-
नामग्निहोत्रदर्शपूर्णमासादीनां काठकादिनामैक्यादैककर्म्यं स्यादिति
नाम्ना कर्मभेदे ऽनिष्टापत्त्युक्त्यर्थमेतत्सूत्रं चातुर्मास्यादिनामैक्ये
ऽपि वैश्वदेववरुणप्रघासादिकर्मभेददर्शनादयुक्तमाशङ्क्योपपादयति
* प्रायेणेति * करोतेर्ज्ञानाख्यक्रियाविशेषलक्षणार्थत्वमभिप्रेत्य सा-

ध्यवाची कार्यशब्दः । नन्वेवमपि सञ्ज्ञैक्यस्य साध्यकर्मैक्ये व्यभिचारान्न हेतुत्वं सम्भवतीत्याशङ्क्याह * साध्येति * सत्यं साध्यव्यभिचारेण सम्यग्धेतुत्वायोगान्नेदं सम्यगुत्तरं किं तु जात्युत्तरमित्यर्थः । साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाख्यानां चतुर्विंशतिजातीनां मध्ये केयमित्यपेक्षायां नामभेदात्कर्मभेदे ऽभिहिते ऽर्थान्नामैक्ये कर्मैक्यापत्तेरर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसम इति लक्षणयोगात् * अर्थापत्तीत्युक्तम् । जातेरुत्तराभासत्वादुपन्यासानर्थक्यमाशङ्क्य कर्मनामभेदस्य पूर्वपक्षहेतोः काठकादेः कर्मनामत्वे ऽग्निहोत्रदर्शपूर्णमासादीनामेकशाखास्थानां काठकादिनामैक्येनैक्यापत्तेर्न कर्मनामता युक्तेत्यसिद्धत्वलक्षणस्य दोषस्याचोदनाभिधानत्वादित्यनेन दर्शितस्याप्यनिष्टाग्निहोत्रदर्शपूर्णमासाद्यैक्यापादनद्वारा प्रकर्षेण दर्शना * याभिहितेत्युक्तम् । असिद्धत्वलक्षणदोषाविवक्षायामपि यादृशो यक्षस्तादृशो बलिरित्यनेन न्यायेन दुष्टपूर्वपक्षे दुष्टमप्युत्तरं यथा मदीयमुत्तरं दुष्टं तथा त्वदीयः पूर्वपक्षो ऽपि दुष्ट इत्येवं पूर्वपक्षस्य दुष्टत्वद्योतनात्सम्यगुत्तरं भवतीत्याशयेन परिहारान्तरमाह * सर्वत्र चेति * सन्तं दोषमनुक्त्वान्यमसन्तं यो हि जल्पति तस्य हि निग्रहस्थाने वाच्यानुक्तीतरोक्तिजे इति बृहट्टीकायां दुष्टे ऽपि पूर्वपक्षे सम्यगेवोत्तरं वाच्यमित्युक्तत्वान्न्यायभाष्ये ऽपि छलजातिनिग्रहस्थानानां स्ववाक्ये परिवर्जनं परवाक्ये च पर्यनुयोग इत्यनेन स्वयमप्रयोगाय परप्रयुक्तस्य च छलादेरुत्तराभासत्वोद्भावनाय परिज्ञानाय न्यायविस्तरे छलादिव्युत्पादनं न तु प्रयोगायेत्युक्तत्वाद् दुष्टे ऽपि पूर्वपक्षे जातेर्नोत्तरता युक्तेत्याशङ्क्य परमतत्वसूचनार्थं केषां चिदिष्टमित्युक्तम् ।

कृतकं चाभिधानम् ॥ १२ ॥

यथाभाष्यं तावत्सूत्रं व्याचष्टे * कृत्रिममिति * कठस्य वैशम्पायनान्तेवासित्वात्कलापिवैशम्पायनान्तेवासिभ्यश्चेति तेन प्रोक्तमित्यस्मिन्नर्थे पाणिनिप्रत्ययस्मृतेस्तस्य कठचरकाल्लुगिति लुक्स्मृतेः छन्दोब्राह्मणानि च तद्विषयाणीति च तदधीते तद्वेदेत्येतदर्थविहितप्रत्ययविषयत्वानियमस्मृतेस्तस्यापि च प्रोक्ताल्लुगिति लुक्स्मृतेः कठेन प्रोक्तं यो ऽधीते स कठ इति स्थिते तस्येदमित्यस्मिन्नर्थे काठकशब्दव्युत्पत्त्यवगमाद्वाख्येति वेदाधिकरणसूत्रे काठकाद्य- ६४४।१

भिधाने पुरुषविशेषप्रवचनकृतमित्युक्तं ततश्चादिमता सता भे
नेनानादीनि कर्माणि न भिद्यन्तइत्यर्थः । ननु यथा ब्राह्मणादि
ब्दो मनुष्यावान्तरवर्णाख्यजातिवाची तथा कठादिशब्दो ब्राह्मण
वान्तरचरणाख्यजातिवाची तद्वाचिन एव च कठशब्दादनुप्र
य इतिस्मृतेस्तज्जातीयानां च वैशपायनप्राग्भाविनां तदन्तेवासि
रुषविशेषप्रोक्ताध्येतृत्वायोगात्प्रवक्तृविषयस्यापि कठशब्दस्य जाति
विशेषवाचित्वावगतेः शाखाचरणविशेषयोगाच्च प्रवाच्यवक्तृसम्ब
न्धस्यानादित्वात्प्रवचनकृतापीयमाख्या नित्यैवेति भाष्यकृद्व्या
ख्यानस्यायुक्तत्वमाशङ्क्य स्वयं प्रवचनकृतत्वात्काठकाद्यभिधा
स्याकर्मणश्चाप्रवाच्यत्वान्न कर्मविषयत्वं सम्भवतीति व्याख्यान्त
माह * यद्यपीति * नाम्नो भेदकत्वायोगमुपसंहरति * तस्मा
द्वपीति * कठप्रोक्ताध्येतृसम्बन्धनिमित्तत्वात्प्रवचननिमित्तत्वे ऽ
पूर्वोक्तन्यायात्कर्मविषयत्वासम्भवसूचनार्थो ऽपि शब्दः ।

एकत्वे ऽपि परम् ॥ १३ ॥

रूपभेदाख्यं यत्परं कर्म भेदकारणमुक्तम् तत्कर्मैक्ये ऽ
विकल्पेनानेकाङ्गनिवेशोपपत्तेर्युक्तमित्यभिधानार्थं सूत्रं व्याख्या
माह * न चेति * व्रीहियवादिसम्बन्धिद्वारस्य कर्मभेदस्या
भ्युपगमादित्यर्थः । कर्मैक्ये कथं कपालसंख्याभेदनिवेशोपपत्ति
त्याशङ्क्याह * तस्मादिति * न तूत्पत्तिशिष्टगुणावरुद्धे कर्मणि
तद्विरोधिगुणान्तरविध्ययोगाद्विकल्पासम्भवस्योत्पत्तिवाक्यद्वित्व
मिति चित्राधिकरणवार्त्तिके ऽभिहितत्वान्नेह विकल्पः सम्भवती
त्याशङ्कते * ननु चेति * गुणान्तरस्याप्युत्पत्तिशिष्टत्वाविशेषा
त्केन गुणेनावरुद्धे कर्मणि को गुणो ऽशक्यविधिरिति ज्ञातुमशक्य
त्वादगृह्यमाणविशेषत्वेनोभयोस्तुल्यबलत्वाद्विकल्पो युक्त इति प
रिहरति * नैष इति * तर्ह्युत्पत्त्योत्पत्त्ययोगात्कर्मभेद स्यादि
शङ्कते * कथं पुनरिति * अद्विर्वचनं वेत्यत्र सूत्रे चोदनाभ्येद
भेदादेकस्मिन्नपि कर्मणि स्वाध्येतॄन् प्रत्यप्रवृत्तप्रवर्त्तकत्वाद्यो
त्तिविधिभेदे ऽपि कर्मभेदापत्तिरपत्येवं परिहारं वक्ष्याम इत्या
तस्येति * अनेकवाक्योत्पादितत्वोक्त्यापौनरुक्त्यानुभाषणार्थस्या
यवदिति सूत्रस्य बुद्धिस्थत्वात्तदपेक्षयोत्तरत्व धर्मविशेषस्य भेदक
निरासार्थम् ।

विद्यायां धर्मशास्त्रमिति ॥ १४ ॥

सूत्रं यद्धर्मशास्त्रं भेदकत्वेनोक्तं तत्कर्माङ्गत्वावेदकश्रुत्यादिप्रमाणाभावान्न कर्मविषयं किं तु ।

तपोविशेषैर्विविधैर्व्रतैश्च श्रुतिचोदितैः ।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥

इत्यादिविद्यासंयोगाद्विद्याविषयमित्यभिधानार्थं यथाभाष्यं स्पष्टत्वान्न व्याख्यातम् ।

आग्नेयवत्पुनर्वचनम् ॥ १५ ॥

यथाग्नेयस्य पुनर्वचनमाग्नेयसूक्तहेतुत्वादित्याग्नेयाधिकरणपूर्वपक्षसूत्रे भेदकमुक्तं तथा प्रतिशाखमग्निहोत्रादिपुनर्वचनं भेदकमित्येवं यथाभाष्यं तावत् सूत्रं व्याचष्टे * अनुभाषणेति * यत्पुनर्वचनं भेदकत्वेनोक्तं तदन्यार्था वा पुनः श्रुतिरित्याग्नेयाधिकरणसिद्धान्तसूत्रे यथाग्नेयस्य पुनर्वचनम् अन्यार्थत्वान्न भेदकमित्युक्तं तथा प्रतिशाखमग्निहोत्रादिपुनर्वचनमप्यन्यार्थत्वान्न भेदकमित्येवं पौनरुक्त्यस्य भेदकत्वनिरासार्थत्वेन स्वयं व्याचष्टे * अथ वेति * यथासम्भवमर्थवादार्थत्वेन गुणार्थत्वेन वा पुनः श्रुतेरन्यार्थत्वान्न भेदकत्वमित्याशयः ।

अद्विर्वचनं वा श्रुतिसंयोगाविशेषात् ॥ १६ ॥

आग्नेयवदित्यस्य पौनरुक्त्यपरिहारार्थत्वव्याख्याने तेनैव पूर्वपक्षनिवृत्तेस्तन्निवृत्त्यर्थं वाशब्दानर्थक्यमाशङ्क्यान्यार्थत्वलक्षणपूर्वपरिहारनिवृत्त्यर्थमाह * द्वितीयेति * पूर्वपरिहारनिवृत्तावर्थवादार्थं गुणार्थं वेदं द्विर्वचनं न भवति समस्तेतिकर्त्तव्यतोपेतप्रधानश्रवणलक्षणस्य श्रुतिसंयोगस्य सर्वशाखास्वविशेषादित्येवं सूत्रं योजयितुमाह * तत्रेति * अच्युतवाक्ये पौर्णमास्यतिरेकश्रुतेरप्राप्तार्थत्वेनैकान्तिकविधित्वप्रतीतेरमावास्यामात्रश्रुतेरेव प्राप्तार्थत्वसम्भवेन गृह्यमाणविशेषत्वादर्थवादत्वं यथाङ्गीकृतं तथेह यद्येकस्यां शाखायां समस्तेतिकर्त्तव्यतोपेतप्रधानश्रुतिरन्यस्यां प्रधानमात्रश्रुतिः स्यात्ततो नेतिकर्त्तव्यताकप्रधानश्रुतेर्गृह्यमाणविशेषत्वादर्थवादत्वं स्याद्यदि च शाखान्तरविहितं किं चिदङ्गमेकस्यां शाखायां प्रधानवाक्यगतं विधेयं स्यात्ततो दध्ना जुहोतीतिवत् गुणार्थत्वं स्यादित्याशयः । अत्रैवार्थे श्रुतीतिसूत्रावयवं योजयति * एतमेवेति * भाष्यकृद्व्याख्याते प्रतिशाखं भिन्नानामध्येतॄणां श्रुतिसंयोगस्यापूर्वत्वेनाविशेषान्न कं चिदध्येतारं प्रति द्विर्वचनमित्येवं सूत्रं योजयितुमाह * न चे- ६४८।१

ति * प्रश्नपूर्वं हेत्वर्थं व्याख्यातुमाह * कुत इति * श्लोकं व्याचष्टे * पूर्वोक्तेनेति * इतरस्तैत्तिरीयो ऽपीतरत्काठकमग्निहोत्रमनादरान्न शृणोति शृण्वन्नपि च कठप्रतिपत्त्यर्थमेवैतदिति कल्पयित्वा पुनः श्रुतिं न मन्यतइत्यर्थः । यच्च शाखान्तरस्य भेदकत्वनिरासायैकं वेति सूत्रे प्रतियोगिभूतशाखान्तरीयाग्निहोत्राग्रहणात्प्रतियोगिग्रहणसापेक्षभेदग्रहणं न सम्भवतीत्युक्तं तत्रापि प्रतियोगिग्रहणशून्यत्वेन श्रुतिसंयोगस्य सर्वशाखास्वविशेषादित्येवं हेतुयोजनं सूचयितुमाह * इतीति * अभ्युपेत्याप्यनेकशाखाध्ययनं पौर्वापर्याभावात्पुनः श्रुतित्वं नास्तीत्याह * न चेति * अनेन च श्रुतिसंयोगस्य पौर्वापर्यरूपविशेषाभावादिति हेत्वर्थः सूचितः । अत्रैवार्थे वृद्धसम्मतिमाह * आह चेति * यथाभाष्यं सूत्रार्थमुपसंहरति * तस्मादिति * नन्वेकेन पुंसानेकशाखाध्ययने ऽपि शाखानां च पौर्वापर्याभावे ऽप्येककर्मविषयत्वे सत्येकयैव शाखया सर्वपुंसां प्रतिपत्तिसिद्धेः शाखान्तरानर्थक्यं स्यादित्याशङ्कते * ननु चेति * प्रतिचरणं व्यवस्थितत्वाच्छाखानां स्वशाखात्यागेन परशाखाध्ययनानुपपत्तेः स्वशाखाध्ययनपूर्वं मेधावितया शाखान्तराध्ययने सत्यानर्थक्यं वाच्यं तच्च स्वाध्यायइत्येकवचनेनानेकशाखाध्ययननिषेधादयुक्तमित्याशयेन परिहरति * नेति * नन्वनधीतस्यापि शाखान्तरस्यानध्येतारं प्रत्यप्रतिपादकत्वादानर्थक्यं स्यादित्याशङ्क्याह * न चेति * यत्पुरुषप्रतिपत्त्यर्था या शाखा तस्यास्तं प्रत्यप्रतिपादकत्वे सत्यानर्थक्यं स्यान्नान्यथेत्याशयः । स्वाध्यायगतैकवचनेनैकशाखाध्ययननियमे ऽपि शाखाविशेषानियमात्प्रतिचरणं व्यवस्थाया. प्रमाणाभावेनानुपपत्तेः सर्वपुंसामेकयैव शब्दा प्रतीपत्तिरित्याशङ्किन्नाशयमुद्भावनपूर्वकं निरस्यति * यस्त्विति * तुच्छत्वद्योतनार्थः किलशब्दः ते ऽपीति तच्छब्दो ऽन्यात्प्रतीत्यनन्तरानिर्दिष्टान्यपरामर्शी यद्यन्येषामपि शाखिनां पुरुषान्तरगतशाखाध्ययनादेव प्रतिपत्तिसिद्धेः शाखान्तराणि किमर्थं प्रवृत्तानीत्याशयस्ततो नित्यत्वेन वेदस्यापर्यनुयोज्यत्वादयुक्तः । अथ शाखान्तराध्ययनमनर्थकमित्याशयस्तथापि तच्छब्दनिर्दिष्टकाठकादिशाखाध्ययनाध्यापनाभ्यां कठादिचरणानां कर्तृकर्मसम्बन्धलक्षणस्याचारस्यानादित्वेन भ्रान्तिमूलत्वायोगात्कठचरणैः काठकशाखाध्येतव्येत्यादिश्रुतिकल्पनां प्रतिचरणं व्यवस्थावगतेरयुक्त इत्यर्थः ।

येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात्सतां मार्गं तेनागच्छन्न् तरिष्यतीति ॥

स्मृत्यालोचनया काठकादिसमाख्यालोचनया स्वाध्याय इति स्वशब्दालोचनया च पितृपितामहादिपरम्परात्मकसम्प्रदायागतशाखात्यागेन शाखान्तराध्ययनं न युक्तमित्याह * किं चेति * स्वेनात्मना कठादिना समाख्या काठकशाखेयमित्यादिका निबन्धनमध्ययनव्यवस्थापिका यस्या इत्यर्थाश्रयणेन स्वसमाख्याशब्देन काठकादिसमाख्योक्ता स्वशब्दवती समाख्येत्यर्थाश्रयणे त्वधीयतइति कर्मव्युत्पत्त्या शाखावाच्यध्यायशब्दाभ्युपगमेन स्वश्चासावध्याय-श्चेति विग्रहाश्रयणात्स्वाध्यायविधित एव प्रतिचरणं शाखाव्यवस्थासिद्धिः एवं सत्यपि शाखान्तराध्ययनस्याल्पायाससाध्यत्वे सत्यनुकल्पाश्रयणेन शाखान्तरमधीयेत न त्वेतदप्यस्तीति तुल्यश्रमोक्त्या सूचितमासदृशः श्रम इति व्याचक्षाणः सूत्रार्थमुपसंहरति* तस्मा- ६४६।२
दिति * यस्य वेदस्य शाखानां प्रतिचरणं व्यवस्थया यथावस्थितमध्ययनं स तथोक्तः । श्रुतिसंयोगाविशेषोपपादनायैकस्य पुंसोऽनेकशाखाध्ययननिरासार्थं वाक्यासमवायादिति सूत्रं विस्मृतत्वान्न भाष्यकृता व्याख्यातमित्याह*तत्रेति* कथं तर्हि व्याख्येयमित्यपेक्षायामाह * तदिति *

अर्थासन्निधेश्च ॥ १७ ॥

निन्दादेर्गुणप्रकारत्वात्तत्परिहारार्थत्वेनैकत्वेऽपि परमित्यनेन सामान्यतः परिहारासिद्धेरन्यार्थदर्शनानां च प्राप्तयपेक्षत्वात्तेष्वपरिहृतेष्वपि पूर्वपक्षे दोषोपन्यासावसरसम्भवाद्वाक्यासमवायादित्यनेन च काठकादिसमाख्याबलेन प्रतिचरणं शाखाध्ययनव्यवस्थायामुक्तायां शाखासमाख्याया बुद्धिस्थत्वात्तद्बलेन पूर्वपक्षनिरासायैतत्सूत्रं कर्मणोऽनुग्राहकतयाऽर्थ्यमानस्याङ्गकाण्डस्य समस्तस्यैकैकस्यां शाखायामनिधानादनिक्षेपादभावादेककर्म्येण शाखासादृश्याच्छाखासमाख्योपपत्तेर्न कर्मभेद इत्येवं यथाभाष्यं व्याख्यातुमाह * एकस्येति * धर्मशब्दस्याङ्गवाचित्वात्फलोक्त्या च पुष्पाणामप्युपलक्षणादेवंशब्देन च कर्मैक्यपरामर्शात्कर्मैक्ये सत्येकस्यैककर्ममूलत्वं विधिस्कन्धरूपस्य वेदाख्यवृक्षस्य कतिपयाङ्गाख्यपुष्पफलान्वयात्काठकाद्याः शाखाः शाखाव्यपदेश्याः प्रसिद्ध्यन्तीत्यर्थः । कथं वेदस्य वृक्षत्वोपचारः शाखानां च शाखात्वोपचार इत्याशङ्क्य * बहिरित्युक्तम् * यथैकस्य वृक्षस्यैकमूलः सर्वशाखाधारभूतः स्कन्धस्तथैकस्यैव कर्माख्यमूलोत्पत्तिविध्याख्यस्कन्धरूपत्वाद् वृक्षत्वोपचारः यथा वृक्षस्य पुष्पफलानि नैकैकस्यां

वृक्षशाखायां समस्तानि सन्ति तथा वेदशाखायामप्येकैकस्यामृ-ग्वेदादिप्रतिपाद्यहौत्रादिसमस्ताङ्गाख्यपुष्पफलासत्त्वाच्छाखात्वोप-चार इत्याशयः । व्यतिरेकतो ऽन्वयतश्च श्लोकार्थमुपपादयति * य-द्वीति * प्रधानभूतमग्निहोत्रादिकर्म प्रथमं विधेयत्वेन प्रतीतेर्मूलत्वे-नोपचरितं कर्माख्यमूलान्तरत्वेनाङ्गाख्यपुष्पफलार्थान्तरत्वेन च सम-स्तस्य मूलपुष्पफलस्यान्यत्वाद्वादित एवारभ्य भिद्यमानाः शाखाः वेदान्तराण्येवोच्येरन्नित्यन्वयः।सौत्रस्य सर्वशब्दस्य सामस्त्यर्थत्वं सम-स्तशब्देन सूचितम् । अङ्गानां पश्चात्प्रतीतेः पुष्पफलत्वोपचारः वृक्षमू-लाश्रितस्य शाखोपक्रमस्य स्कन्धत्वाप्रसिद्धेः प्रधानाश्रितत्वादितिक-र्तव्यताविध्युपक्रमत्वाच्च प्रधानविधेः स्कन्धत्वेनोपचारः एकमग्नि-होत्रादिमूलमधिष्ठानविषयमूर्त्तस्य प्रधानकर्मोत्पत्तिविधेः स स-र्वशाखास्थाङ्गविध्यधिष्ठानत्वात्स्कन्धरूपो यस्य वेदस्य तत्त्वे सतीति कर्मधारयगर्भबहुव्रीहिसमासार्थः । यथा क चिद् वृक्षस्य शाखायां पुष्पं क चित्फलमधिकं तथा क चिद्वेदशाखायामितिकर्त्तव्यतायाः । किं चिदधिकमित्येककर्माख्यमूलसम्बन्ध्यङ्गाख्याविलक्षणपुष्पफल-योगित्वरूपधर्मसामान्येन वेदशाखानां वृक्षशाखासादृश्याच्छाखान्त-ररूपो वेदान्तरव्यपदेशाद्भेदेन व्यपदेशो वेदस्यैककर्ममूलविधि-स्कन्धरूपत्वे सत्युपपन्न इत्यर्थः । शाखान्तराध्यायिनः शाखान्त-रीयार्थाप्रत्यभिज्ञानाच्चाद्विर्वचनमित्येवमेतदपि सूत्रं पौनरुक्त्यपरि-हारार्थत्वेन स्वयं व्याचष्टे * अथ वेति *

न चैकं प्रतिशिष्यते ॥ १८ ॥

नन्विहाधिकरणे स्वशाखाविहिताङ्गमात्रोपसंहारः पूर्वपक्षप्र-योजनं सर्वशाखाविहिताङ्गोपसंहारश्च सिद्धान्तप्रयोजनं तत्र चेत्क-र्मभेदे ऽपि सर्वशाखाविहितमग्निहोत्रादि प्रत्यङ्गानि विधीयन्ते ततः पूर्वपक्षप्रयोजनाभावादनारभ्यमिदमधिकरणं स्यादित्याशङ्क्या-ह * अभ्युपेत्येति * यथा दर्व्यादेरपि होमसाधनत्वस्य हेत्व-धिकरणपूर्वपक्षप्रयोजनस्य यदि च हेतुरवतिष्ठेतेत्यनेन निरासे ऽप्यन्नकरणे ऽसमर्थशूर्पव्यावृत्तेः पूर्वपक्षप्रयोजनत्वसम्भवादधि-करणारम्भोपपत्तिस्तु चोदिते जुहोतीत्यादिवाक्यसंयुक्तानामु-दितकालादीनामङ्गानां सर्वाग्निहोत्राद्यर्थत्वे ऽपि प्राकरणिकानाम-ङ्गानां प्रतिशाखमग्निहोत्रादिभेदे ऽन्यप्रकरणस्थानामङ्गानामन्यत्राग्र-हणाद्व्यवस्थायाः पूर्वपक्षप्रयोजनत्वसम्भवादधिकरणारम्भोपपत्ति

१ तर्थादितइति २ पु० पा० ।

रित्यभ्युपेत्यवादोक्त्या सूचितं, कीदृशो ऽभ्युपेत्यवाद इत्यपेक्षायामाह
* सत्यपीति * वाक्यसंयुक्तानामङ्गानां सर्वार्थत्वे ऽपि प्राक-
रणिकानां व्यवस्थापूर्वपक्षप्रयोजनं भविष्यतीति सूचनार्थस्तावच्छ-
ब्दः स्वशाखामात्रेण परितोषात्काठके ऽग्निहोत्रे तच्छाखाविहितमे-
वाङ्गं नान्यशाखाविहितमिति व्यवस्था लभ्यतइत्येतदेव द्रढयितुं प्रात-
रुपोदयं व्युषितउदिते वेत्यादौ शाखान्तरविहितैरुपोदयादिभिः
स्वशाखाविहितस्योदितत्वादेर्विकल्पाभिधानादाश्वलायनादीनां सूत्र-
काराणां मध्ये न कश्चित्स्वशाखाविहिताङ्गोपसंहारमात्रेण * अव-
स्थितइत्युक्तम् * अनेन चैकमग्निहोत्रादि प्रत्यङ्गं न शिष्यतइत्येतं सू-
त्रव्याख्यार्थं यच्चाग्निहोत्रस्येति भाष्यं पाश्चात्यमपि प्रधानानामपि
प्रतिचरणव्यवस्थया गुणत्वाच्च वेदेन व्यवस्था स्यादिति लोहितो-
ष्णीषाधिकरणवक्ष्यमाणन्यायनिरस्तत्वेन पूर्वपक्षिणो ऽप्यनिष्टत्वा-
त्तत्रैकफलत्वादित्यादिवार्त्तिकवक्ष्यमाणन्यायेन पौनरुक्त्यपरिहारार्थं
तन्निरासो न तु पूर्वपक्षस्य निष्प्रयोजनत्वोक्त्यर्थं इति सूचयितुं प्रा-
ग्व्याख्यातं नैकं कठादिकमेव पुरुषं प्रत्यग्निहोत्रादिप्रधानं शिष्यते येन
भिन्नविषयत्वात्समुच्चयः स्याद्विकल्पस्तु कर्मणां भवतु शाखानां
वेति जिज्ञासायां शाखानां व्यवस्थितपुरुषाविषयतया विकल्पे सम्भ-
वत्यव्यवस्थितकर्मविकल्पाश्रयणस्यायुक्तत्वाच्छाखानामेव विकल्पा-
वगतेरद्विर्वचनमित्येवं सूत्रव्याख्यानार्थं न चेत्याद्यं भाष्यमिदानीं
व्याख्यातुमाह * प्रधानान्यपीति * स्वर्गकामादिशब्दैरर्थिमात्र- ६४७।१
मुद्दिश्य विधीयमानत्वात्कर्मभेदपक्षे च भिन्नविषयत्वाच्छाखानां
विकल्पानापत्तेस्तस्याष्टदोषत्वपरिहारार्थं प्रतिचरणं शाखाव्यवस्था-
कल्पस्यायुक्तत्वात् सर्वशाखास्थानि प्रधानानि सर्वान् पुरुषान्प्रति
प्रकाशन्तइत्युक्ते काठकादिसमाख्याभिर्व्यवस्थामाशङ्क्य यजमानानां
प्राधान्यात् समाख्यानां च प्रधाननियमं प्रत्यसामर्थ्यात् समाख्या-
योगे ऽपि न व्यवतिष्ठन्तइति समाख्याभियुक्तान्यपीति पदद्वयाध्या-
हारसहितेनोक्तं ननु पूर्वपक्ष्यनिष्टाख्यायाः प्रतिचरणं कर्मव्यवस्था-
याः किमर्थो निरास इत्याशङ्क्याह * तत्रेति * प्रतिचरणमग्निहोत्रा-
दिव्यवस्थानभ्युपगमे निरपेक्षसाधनत्वेन समुच्चयायोगादेकेनैवा-
ग्निहोत्रादिना सर्वपुंसां फलसिद्धेः शाखान्तरीयाग्निहोत्राद्यानर्थक्या-
पत्तेर्विकल्पेनार्थवत्त्वं वाच्यं तच्च विकल्पेनार्थवत्त्वं कर्मैक्याभ्युपग-
मेन शाखानामेव व्यवस्थितेः कठादिचरणैः प्रतिपद्यमानत्वेनाष्टदोष-
त्वनिमित्ताकुलत्वानापादकत्वाच्च कल्पितं वरं ततश्चापौनरुक्त्यमि-
त्यत्र पौनरुक्त्यपरिहारसूचनार्थम् प्रतिचरणं कर्मव्यवस्था निरासं

इत्याशयः ।

समाप्तिवच्च सम्प्रेक्षा ॥ १९ ॥

यदा च भिन्नमपि कर्म सर्वान्प्रति विधीयते तदा यो ऽस्माकमग्निः सो ऽत्र समाप्यतइति कर्मभेदापेक्षसमाप्तिव्यपदेशायोगाद्यो ऽग्निः सो ऽस्माकमत्र समाप्यतइत्यध्येतृविशेषापेक्षः समाप्तिव्यपदेशो वाच्यः भिन्नकर्मविषयत्वे समाप्त्यसमाप्त्योरध्येतृविशेषापेक्षानर्थक्यापत्तेरस्मानपेक्ष्याग्नेः समाप्तिर्जातेत्येवंरूपापेक्षाबुद्धिरध्येतृविशेषसंमताध्येतृविशेषापेक्षा कर्मैक्यं द्योतयतीत्यभिधानार्थमेतत्सूत्रं समाप्तेरापेक्षिकत्वस्य सिद्धान्तलिङ्गत्वोक्त्यर्थत्वेनात्रेति भाष्येण व्याख्यायासमाप्तेरापेक्षिकत्वस्य सिद्धान्तलिङ्गत्वोक्त्यर्थत्वेनान्वारोहे त्वित्यादिनापेक्षिकत्वोक्त्यर्थं सौत्रसंशब्दव्याख्यानायासमाप्तेर्मैत्रायणीयापेक्षत्वाभावोक्तिपूर्वं व्याख्यातं तत्सूत्राननुगुणमाशङ्क्याकारप्रश्लेषेण पाठान्तरमाह * असमाप्तिवदिति * शिष्यते समाप्तिवदिति सूत्रसंहितायामकारप्रश्लेषेणापि विच्छेदसम्भवः छेदोक्त्या सूचितः । सूत्रार्थमुपपादयति * कर्मेति * अन्वारोहशब्दव्याख्यापूर्वं सङ्क्षेपतो भाष्यं व्याचष्टे * अन्वारोहनामेति *

एकत्वे ऽपि पराणि निन्दाशक्तिसमाप्तिवचनानि ॥ २० ॥

यानि पुनर्वचनात्पराणि निन्दाशक्तिसमाप्तिवचनानि कर्मभेदकारणान्युक्तानि तान्येकत्वे ऽप्यविरुद्धानीत्यभिधानार्थमेतत्सूत्रं व्याख्यातुं न हीति निन्दापरिहारभाष्यं तावद्व्याचष्टे * अन्योन्येति * ननूदितानुदितवाक्ययोर्भिन्नविषयत्वेनाविकल्पकतयाष्टदोषत्वपरिहाराय व्यवस्थानपेक्षत्वात्प्रतिचरणं व्यवस्थाकल्पनानुपपत्तेः सर्वपुरुषान्प्रति प्रामाण्याविशेषादुदितानुदितत्वयोरव्यवस्थितविकल्पापत्तेरपरिहार्याष्टदोषतेत्याशङ्क्याह * त्वत्पक्षे चेति * कर्मभेदपक्षे तद्वाक्यानामपि भिन्नविषयत्वेनावैकल्पिकत्वात् प्रतिचरणं प्रामाण्यकल्पनानुपपत्तेः कर्मणामव्यवस्थिताविकल्पाविशेषादुभयोस्तुल्यो दोषो नैकं प्रत्युद्भावनीय इत्याशयः । तथेत्यशक्तिपरिहारभाष्यं व्याचष्टे * तथेति * एकशाखाविहितेष्वप्यङ्गेष्वन्धादीनामशक्तेः साधनसम्पन्नानां च सर्वशाखाविहितेष्वपि शक्तेः परशाखाविहितानां च कल्पसूत्रादिभ्यो ज्ञानसम्भवादित्याशयः । ननु सर्वशाखास्थाङ्गोपसंहारो बहुतरायाससाध्यत्वादशक्य इत्याशङ्क्याह * स-

वेति * बहूनामङ्गानां सर्वशाखास्वभिन्नत्वात्कतिपयान्यत्वे ऽपि न
बह्वायासापत्तिरित्याशयः । शाखान्तरे ऽधिकाङ्गविधावप्येकशा-
खायाः सकाशात् सर्वशाखास्वङ्गानामन्तरस्य स्तोकत्वाच्छक्त्यश-
क्त्योरविशेष इत्यर्थः । प्रकरणविनियोज्यानामङ्गानां प्रतिप्रकरणं व्य-
वस्थितत्वेन तत्तच्छाखाध्यायिभिरेवानुष्ठेयत्वाद्वाक्यविनियोज्यानामे-
व सर्वशाखानुष्ठेयत्वावगतेः स्तोकान्तरत्वं कैश्चिदुक्तं तद् दूषयि-
तुमुपन्यस्यति * केचिदिति * विध्युक्तिर्विधेयलक्षणार्था प्रधानस्य
सर्वशाखास्वभिन्नत्वात्कथं भावरूपस्य प्रकरणस्याप्यभेदावगतेः कथं
प्राकरणिकानामप्यङ्गानां व्यवस्थेत्याशयेन प्रश्नपूर्वं व्यवस्थामुपपा-
दयति * कुत इति * कर्मस्वरूपाभेदे ऽपि फलसाधनत्वेन विधी- ६४८।१
यमानस्यैव कथम्भावोत्पत्तेः कर्मैक्ये ऽपि च तद्विधीनां प्रतिशाखं
भेदादेकविषयत्वाच्च विकल्पमानानां प्रतिचरणं व्यवस्थितप्रामाण्या-
वगतेर्विधेयत्वप्रयुक्तत्वेन कथंभावस्यापि भेदात्पश्वावत्तादिवच्चा-
नुष्ठातृव्यवस्थया व्यवस्थिताङ्गग्राहकत्वोपपत्तेः प्रतिचरणं प्राकरणि-
काङ्गव्यवस्था युक्तेत्युत्तराशयः । श्लोकं व्याचष्टे *शाखान्तरेष्विति*
प्राकरणिकाङ्गव्यवस्थोक्तेः प्रकृतोपयोगमाह * ततश्चेति * दूषयति
* तत्त्विति * कर्मधर्मत्वेनाङ्गानामविशेषात्सर्वपुरुषानुष्ठेयकर्मार्थ-
त्वप्राप्तेः पश्वावत्तादिवत्पुरुषविशेषानुष्ठेयकर्मार्थत्वावेदकश्रुत्यभावेन
शाखान्तरानुष्ठेयकर्मार्थत्वानिवारणाद्भिन्नानामपि च प्रकरणानामे-
ककर्मणि विनियोजकत्वेन व्यवस्थापकत्वायोगात्प्राकरणिकानामप्य-
ङ्गानां सङ्कर एव युक्त इत्याशयः । नन्वनेकेषां प्रकरणानामेकक-
र्माङ्गविनियोजकत्वेनैकार्थ्याद्विकल्पापत्तेर्व्यवस्थापेक्षायां विधायक-
तत्तच्छाखाध्यायिनामेव प्रतिप्रामाण्यावगतेर्व्यवस्थापकत्वं भविष्य-
तीत्याशङ्कानिरासपूर्वं श्लोकं व्याचष्टे * प्रतिवेदमपि चेति * वि-
धायकवत्प्रकरणानामप्रवृत्तप्रवर्त्तनस्वभावत्वाभावेनैकमपि पुरुषं प्र-
त्यनेकेषामन्योन्यानपेक्षत्वेनानुवादत्वपरिहारसम्भवात्प्रामाण्योपप-
त्तेर्व्यवस्थापकत्वायोगं दृष्टान्तेन द्रढयितुं यथा प्रतिवेदं भिन्नं प्रक-
रणं यद्यपि कर्मधर्मान् पुरुषस्योपदिशति तथापि वेदान्तराध्यायिनं
पुरुषं प्रत्यप्रमाणं न भवतीत्युक्तं श्लोकव्याख्यार्थम् * कर्मेत्युक्तम्
* फलवत्कर्मविधिसन्निधावफलकर्मविधिपाठस्य प्रकरणत्वात्प्र-
तिशाखं च विधिभेदेन सन्निधिभेदात्प्रकरणभेदे सति कथमविशेष
इत्याशङ्क्य * यद्यपीत्युक्तम् * कथं तर्ह्यशक्तिः परिहर्त्तव्येत्या-
शङ्क्याह * सर्वास्वपि चेति*तथैकस्मिन्नपीति समाप्तिपरिहारभाष्यं
व्याचष्टे * समाप्तिश्चेति *

प्रायश्चित्तं निमित्तेन ॥ २१ ॥

उदितानुदितकालातिक्रमात्मकेन भिन्नेन निमित्तेन प्रायश्चित्तं विधीयमानं भेदकत्वेन यदुक्तमित्यनुभाषणार्थत्वेन तावद्यथाभाष्यं सूत्रं व्याचष्टे * अनुभाषणेति * उदितानुदितकालयोर्द्वयोरव्यतिक्रमे प्रायश्चित्तं विधीयमानं यद्भेदकत्वेनोक्तं तत्केनं चिन्निमित्तेन कर्मैक्ये ऽप्युपपत्तेर्न भेदकमित्येवं सामान्यपरिहारार्थत्वेन स्वयं व्याचष्टे * सामान्येनेति *

६४०।१

प्रक्रमाद्वा नियोगेन ॥ २२ ॥

सङ्कल्पापरपर्यायप्रक्रमवशेन वैकल्पिकानामप्यङ्गानां यदेव सङ्कल्पितं तदेवानुष्ठेयमिति नियमात्तदतिक्रमे कर्मैक्ये ऽपि प्रायश्चित्तमविरुद्धमित्येवमनुभाषितभेदहेतुपरिहारार्थं सामान्यपरिहारोक्तिजनितविशेषसन्देहव्यावृत्त्या विशेषपरिहारार्थं चैतत्सूत्रं प्रधानवशवर्त्तित्वेनाङ्गानां प्रधानसङ्कल्पेनैवानुष्ठानसिद्धेरङ्गानामसङ्कल्पनीयत्वादयुक्तमाशङ्क्योपपादयन् व्याचष्टे * वैकल्पिकानामिति * नैयमिकाङ्गसङ्कल्पने ऽपि वैकल्पिकाङ्गसङ्कल्पने प्रयोगमध्ये किमिदं कुर्यामिदं वेति दोलायमानमतेः कालविक्षेपापत्तेः कर्मोपक्रमकालएव वैकल्पिकानामङ्गानामिदमेव करिष्यामीत्येवमङ्गीकरणीयत्वादङ्गीकृतसङ्कल्पस्याङ्गस्यातिक्रमे प्रायश्चित्तविधिर्युक्त इत्यर्थः ।

समाप्तिः पूर्ववत्त्वाद्यथाज्ञाते प्रतीयते ॥ २३ ॥

समाप्तेर्भिन्नस्यामत्वरूपेणाभेदहेतुत्वस्य पूर्वपाक्षितस्यैकत्वे ऽपि पराणीत्यनेन दूषितत्वादापेक्षिकत्वरूपेण त्वेकत्वहेतुत्वस्य समाप्तिवच्चेत्यनेन सिद्धान्तितत्वादनर्थकमेतत्सूत्रमित्याशङ्क्याह * एकत्वे ऽपीति * यथैकत्वे ऽग्निसमाप्तिर्लिङ्गत्वेनोक्ता न तदीयकतिपयपदार्थसमाप्तिस्तथाभेदे ऽप्यग्निसमाप्तेरेव लिङ्गत्वेनोक्तत्वात्स्वशाखाधीताग्न्यङ्गभूतपदार्थापेक्षसमाप्त्यभ्युपगमेन दूषणोक्तिरयुक्तेत्याशङ्क्य समाप्तिवचनस्य न्यायानुसारेण व्याख्येयत्वान्न्यायेन चैकत्वावधारणात्तस्यैव समाप्तिः साधिका न भेदस्येत्येतदभिधानायेदं सूत्रमित्याशयः । नन्वग्निशब्दस्याग्न्यङ्गभूतपदार्थवाचित्वाभावात्कथं कर्मैक्ये ऽग्निसमाप्तिवचनोपपत्तिरित्याशङ्क्य पूर्ववत्वादित्यवयवेनोपपत्तिरुक्तेत्याह * तद्वचनस्य चेति * एतमेव चावयवं यथाभाष्यं तावत्पूर्वशब्दस्यारम्भवाचित्वाभ्युपगमेन व्याचष्टे * आरम्भेति * स-

मात्तेरारम्भापेक्षत्वान्मैत्रायणीयैश्चान्वारोहान्तान्यङ्गपदार्थकलापमा-त्रस्याध्येतुमारब्धत्वात्तल्लक्षणार्थो ऽग्निशब्दो ऽवसीयत इत्याशयः । स्वयमन्यथा व्याचष्टे *कथं वेति * भाष्यकृता तु प्रक्रमाद्धेति सूत्रे-णारम्भवशाद्वैकल्पिकाङ्गनियमे ऽभिहिते बुद्धिस्थत्वात्समाप्तेरारम्भा-पेक्षत्वात्समाप्तिसमभिव्याहृतस्याग्निशब्दस्य यावदारब्धपदार्थकला-पलक्षणार्थत्वोक्तेरभ्रष्टावसरत्वासिद्ध्यर्थं पूर्वशब्दस्यारम्भवाचित्वं व्याख्यातं पूर्वपक्ष्युक्तविरोधपरिहारसमर्थनार्थत्वं सूत्रस्य च सूचय-न्नुपसंहरति * तस्मादिति *

लिङ्गमविशिष्टं सर्वशेषत्वान्न हि तत्र कर्मचोदना तस्मात् द्वादशाहस्याहार-व्यपदेशः स्यात् ॥ २४ ॥

यददीक्षितदर्शनं भेदलिङ्गमुक्तं तद्भेदपक्षे ऽप्ययुक्तत्वान्न प-क्षविशेषसाधकमित्येवमाद्यसूत्रावयवं व्याचष्टे * अदीक्षितेति * ६५०
सर्वेत्यनेन ज्योतिष्टोमपश्चाद्भावस्य सर्वशाखास्थद्वादशाहशेषत्वमुक्त-मुपपादयितुं प्राथम्यस्य सर्वज्योतिष्टोमधर्मत्वं भाष्यकृतोक्तं विवृणो-ति * ताण्डकइति * न हीति सूत्रावयवव्याख्यानर्थं न हीति भाष्यं व्याचष्टे * न हीति * सामवेदे ज्योतिष्टोमस्योत्पत्त्यभ्युपगमे यजुर्वे-दोत्पन्नाज्ज्योतिष्टोमाद्भेदः स्यान्न चासाविष्ट इति सूचनाय * अपर-स्येत्युक्तम् * तस्मादिति सूत्रावयवव्याख्यानार्थमत इति भाष्यं व्या-चष्टे * तत्रेति * सामवेदे ज्योतिष्टोमोत्पत्त्यभावादध्वर्युवेदोत्प-न्नानां ज्योतिष्टोमानां भेदे सत्यविशेषात्सर्वेषामेव प्राथम्यनियमे सत्येकं द्वादशाहं प्रति सर्वज्योतिष्टोमानां प्राथम्यायोगात्तद्द्वारा सर्वेषां द्वादशाहानां ज्योतिष्टोमपश्चाद्भावानियमापत्तेः पक्षद्वये ऽपि दोषसाम्यात्तत्परिहारार्थं यदि पुरा द्वादशाहेन दिदीक्षाणा यदि पु-रा द्वादशाहेनादिदीक्षाणा इति चाध्याहारेण द्वादशाहस्य पक्षद्व-ये ऽप्युभयथा व्यपदेशः स्यादित्यर्थो ऽनेन दर्शितः । तस्मादिति सू-त्रार्थोपसंहारभाष्यं व्याचष्टे * तस्मादिति *

द्रव्ये वा चोदितत्वात् विधीनामव्यवस्था स्यान्निर्देशाद् व्यवतिष्ठेत तस्मान्नित्यानुवादः स्यात् ॥ २५ ॥

अन्याख्ये द्रव्ये यूपैकादशिन्या अचोदितत्वात्सम्मानामपे-

क्षत्वेन सम्मानविधीनां मध्ये न कस्य चित्सम्भवः स्याद्यदि त्वग्नौ यूपैकादशिन्या निर्देशः स्यात्ततः कश्चित्सम्मानविधिः सम्भवेत्त-स्मान्नान्तरिक्षे न दिवीतिवत्सम्माननिषेधो नित्यानुवादः स्यान्नित्या-नुवादत्वादेव च वाचस्तोमादौ यूपैकादशिनीसद्भावे ऽपि पक्षवेदी-सम्मानयोरप्राप्तेस्तत्र रथाक्षमात्रान्तरालविधिर्न विरुध्यतइत्येवं यथा-भाष्यं तावत्सूत्रम् अनुभाषणपूर्वं व्याख्यातुमाह * अथेति * भेदप-क्षे ऽप्यग्नौ यूपैकादशिन्यभावात्पक्षमानं वेदिमानमादिशब्दोक्ता र-थाक्षमात्रान्तरालता च नास्तीत्युक्तं पश्वेकादशिनीविधानादेवाविहि-तापि यूपैकादशिनी प्रतिप्रधानावृत्तिन्यायात् भविष्यतीत्याशङ्क्य * श्रूयतइत्युक्तम् * यूपैक्यश्रुत्या न्यायप्राप्तैकादशिनीबाधादभाव इ-त्याशय.। नित्यानुवादप्रयोजनोक्त्यर्थं द्वयमपीति भाष्यं सम्माननि-षेधानुवादस्य पश्वेकादशिनीविधानशेषत्वायोगादयुक्तमाशङ्क्य यूपै-क्यविधायिवाक्योपलक्षणार्थत्वं पश्वेकादशिनीविधानोक्तेः सूत्रय-न्व्याचष्टे * एकेति * यूपैक्यविधिस्तुत्यर्थत्वोपपादनार्थं यदित्यादि-भाष्यं पक्षसम्माने तावत्स्पष्ट एवोक्तो दोषः वेदिसम्माने तु स्पष्ट-दोषाभावे ऽपि यूपान्तरालानां न्यूनातिरेकनिवृत्तये ऽतिनैपुण्यसम्पा-दनाय क्लेशलक्षणस्य दोषस्यापरिहार्यत्वेन यूपैकादशिन्या दुष्टत्वाद्यू-पैक्यमेव प्रशस्तमित्येवमर्थत्वेन व्याचष्टे * एकादशिन्यां हीति * नन्वग्नौ यूपैकादशिन्यभावात्कस्य चित्सम्मानस्याभावे ऽपि वाच-स्तोमादौ यूपैकादशिनीसद्भावे सम्मानत्रयसमावेशः कर्मैक्ये विरु-ध्येतेत्याशङ्कानिरासार्थं वाचस्तोमादिषु त्विति भाष्यं पक्षसम्मानस्य निन्दया वर्ज्यत्वावगमादनेकयूपत्वे ऽप्यप्राप्तेर्निन्दोन्नीतस्य च त-न्निषेधस्य नित्यानुवादत्वेन पक्षसम्माने विध्यभावाद्वेदिसम्मानोक्तेश्च जर्तिलयवाग्वा वा जुहुयाद् गवीधुकयवाग्वा वा जुहुयान्न ग्राम्या-न् पशून् हिनस्ति नारण्यानित्यादिवद्विधेयान्यप्रशंसारूपत्वेन वि-धेयरूपैक्यप्रशस्ततरत्वज्ञापनार्थत्वाद्वेदिसम्माननिन्दार्थत्वावगतेर्नि-न्दोन्नीतस्य तन्निषेधस्यापि नित्यानुवादत्वावगतेर्वेदिसम्मानस्यापि विध्यभावाद्यूपैकादशिन्यां सत्यां रथाक्षमात्रान्तरालत्वस्यैव निवेशा-दविरोध इत्येवं व्याचष्टे * पक्षेति * पक्षवेदिसम्मानयोरभावे तत्र कीर्त्तनं निरालम्बनं स्यादित्याशङ्क्यासतोरपि जर्तिलादिवदन्यस्तुत्यर्थं कीर्त्तनं युक्तमित्यभिधानार्थं नित्यानुवादाश्चेति भाष्यं स्पष्टत्वान्न व्या-ख्यातं वेदिसम्मानोक्तेः स्तुत्यर्थत्वं दूषयति * इह त्विति * जर्ति-लादावनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेत्यादिनिन्दाश्रुतिवद्वेदिसम्मा-ननिन्दाश्रुत्यभावात् सम्मानविध्यन्यथानुपपत्त्या च शाखान्तरे यूपै-

कादशिनीविधानस्यापि कल्पयितुं शक्यत्वाद्यूपैकादशिनीपक्षे वेदिसम्मानविध्युपपत्तेर्नान्यस्तुत्यर्थत्वकल्पना युक्तेत्याशयः । कथं तर्हि नित्यानुवादता सूत्रकृतोक्तेत्याशङ्क्याह * अत इति * नन्वेवमपि वेदिसम्मानरथाक्षमात्रान्तरालयोः कर्मैक्ये विरोधः स्यादित्याशङ्क्याह * प्राकरणिकत्वाच्चेति * ज्योतिष्टोमे ऽन्यभावे पश्वेकादशिन्यविधानाद्यूपैकादशिन्यप्राप्तेर्यासु विकृतिष्वग्न्यभावे ऽपि पश्वेकादशिनी विहिता तद्विषयत्वं रथाक्षमात्रान्तरालविधेर्विकृत्युक्त्योक्तं विशिष्टमपि सूत्रं व्यवधारणकल्पनया गमयितव्यमित्याह*सूत्रमपीति* स चेत्यनेन निश्चितरूपातिदेशनाद्विधानाद्रथाक्षमात्रान्तरालत्वमेव व्यवतिष्ठेतेत्येवं निर्देशादित्यचयवो व्याख्यातः । ६५१।१

विहितप्रतिषेधात्पक्षे ऽतिरेकः स्यात् ॥ २६ ॥

षोडशिग्रहणस्य विहितत्वात्प्रतिषेधाच्च ग्रहणपक्षे द्वयोर्ग्रहणापक्षे तिसृणामतिरेकः स्यादित्येवं तृतीयलिङ्गपरिहारसूत्रं व्याचष्टे * वैकल्पिक इति *

सारस्वते विप्रतिषेधाद्यदेति स्यात् ॥ २७ ॥

सर्वसोमयागानां ज्योतिष्टोमपश्चाद्भावनियमेन सारस्वते द्वादशाहवत्पक्षद्वये ऽप्यनिष्टप्रथमयज्ञत्वनिमित्तपुरोडाशित्वदर्शनविप्रतिषेधाद्यदा पुरोडाशिन इति कालभेदनिमित्तपुरोडाशित्वं स्यादित्येवं चतुर्थलिङ्गपरिहारसूत्रं व्याचष्टे * सारस्वते ऽपीति * मित्रावरुणयोरयने सारस्वतसत्रविशेषे यथामावास्यायामातिरात्रः स्यात्तथा दीक्षेरंस्ते ऽमावास्यायामतिरात्रं संस्थाप्य तदहरेव वत्सानपाकुर्युस्तं पक्षमामावास्येन व्रजित्वा पौर्णमास्यां गामुपेयुः पौर्णमासेनोत्तरं व्रजित्वामावास्यायामायुपमुपेयुरेवमावर्त्तयन्तो व्रजेयुरित्यनेन वाक्येन प्रतिमासमेकस्मिन्पक्षे ऽमावास्याख्यकर्मविधानात्पक्षान्तरेण पौर्णामावास्याख्यकर्मविधानात्पुरोडाशिशब्दः पौर्णमास्याख्यकर्मोपयोगिपक्षोपलक्षणार्थः सान्नायिशब्दश्चामावास्याख्यकर्मयोगिपक्षोपलक्षणार्थ इत्येवमवश्यं पक्षद्वये ऽपि वक्तव्यमित्यर्थः । ननु काlभेदाविवक्षायां पुरोडाशिनः सान्नायिन इति कर्तृभेदव्यपदेशो न युज्येतेत्याशङ्क्याह * भवति हीति * उपचारात्कर्तृव्यपदेश इत्याशयः । सूत्रार्थमुपसंहरति * तस्मादपीति *

उपहव्ये प्रतिप्रसवः ॥ २८ ॥

उपहव्यस्य भेदे सत्यतिदेशप्राप्तबृहद्रथन्तराविकल्पनिवृत्तिः

प्रतिप्रसवाख्या पुनःश्रुतिप्रयोजनं स्यात् ऐक्ये तु शाखाद्वयप्रत्यर्थत्वात्पुनः श्रुतावपि विकल्पापत्तेर्न तन्निवृत्त्याख्यः प्रतिप्रसवः प्रयोजनमिति पुनः श्रुत्यानर्थक्यं स्यादित्येवमनुभाषणार्थत्वेन यथाभाष्यं तावत्सूत्रं व्याचष्टे * अनुभाषणेति * उपहव्ये बृहद्रथन्तरपुनः श्रुतेर्न प्रतिप्रसवोऽस्माकं प्रयोजनत्वेनेष्टो येन तदसम्भवादानर्थक्यं स्यात्किं त्वन्यत्किं चिदित्येवं सामान्यपरिहारार्थत्वेन स्वयं व्याचष्टे * सामान्येति *

गुणार्था वा पुनः श्रुतिः ॥ २९ ॥

यदेति भाष्यात् दक्षिणाव्यंवस्थालक्षणगुणविध्यर्था निमित्तत्वेन बृहद्रथन्तरपुनः श्रुतिरिति सूत्रार्थः। प्रतिभाति स च संस्थाश्रुत्यानर्थक्यापत्तेरयुक्त इति मत्वोपलक्षणार्थत्वम्भाष्यस्य सूचयन्सूत्रं
६५२।१ व्याचष्टे * संस्थेति * संस्था सामदक्षिणा विशिष्टयागविधावरूणैकहायनीन्यायात्पार्ष्णिकपरस्परनियमावगमे सति सामश्रुतेः प्राप्तार्थत्वान्निमित्तपरत्वं प्रतीयमानमविशेषादुभयव्यवस्थार्थं प्रतीयतइत्याशयः * चशब्दार्थे वाशब्दः *

प्रत्ययं चापि दर्शयति ॥ ३० ॥

शाखान्तरविहिताङ्गानुवादेन तद्धर्मविधानं शाखान्तराधीतस्य च मन्त्रस्य स्वशाखाधीतेन मन्त्रेण सह विकल्पवचनमन्योन्यधर्मसाङ्कर्यं सूचयन्सर्वशाखाप्रत्ययमेकं कर्म द्योतयतीत्येवं सिद्धान्तलिङ्गोक्त्यर्थं सूत्रं व्याचष्टे * शाखान्तरेति * सर्वाभिः शाखाभिः प्रत्ययो ज्ञानं यस्येति समासार्थः ।

अपि वा क्रमसंयोगाद्विधिपृथक्त्वमेकस्यां व्यवतिष्ठेत ॥ ३१ ॥

सर्वशाखाङ्गोपसंहारलक्षणसिद्धान्तप्रयोजनाक्षेपार्थमेतत्सूत्रं व्याचष्टे * प्रतिशाखमिति * एकैकस्यामिति वीप्सा प्रतिशब्देन सूचिता ऋतवो वै प्रयाजा इत्यादावपि न शाखान्तरप्रयाजाद्यनुवादः किं त्वन्यप्रयाजादिविधिरिति सूचनार्थं विधिपृथक्त्वोक्त्या कर्मव्युत्पत्त्या विधेयान्यतोक्ता कालपरिमाणयोरपि क्रमोक्त्योपलक्षणं सूचयन् हेत्वर्थं व्याचष्टे * तथा सति हीति * कालो ऽव्या-

१ श्रुति--इति २ पु० पा० ।

शु निर्माणलक्षणः पूर्वाह्णादिलक्षणश्च न बाधिष्यतइति चशब्देन सूचितम्।

विरोधिनां त्वसंयोगादैककर्म्ये तत्संयोगाद्विधीनां सर्वकर्मप्रत्ययः स्यात्॥ ३२॥

कर्मैक्ये सति सर्वशाखास्थानां विधेयानामङ्गानां विधिशब्दोक्तानां तेनैकेनैव कर्मणा संयोगावगतेर्विरोधिनां क्रमकालपरिमाणानामसंयोगात्सर्वशाखाविहितानामङ्गानामेककर्माङ्गत्वप्रत्यय इत्येवं सिद्धान्तप्रयोजनसमाधानार्थे सूत्रे विरोधिनामसंयोगादिति हेतुमुपपादयितुमाह * यत्रेति * क्रमादीनां पदार्थप्राप्त्युत्तरकालभावित्वात्तदनुरोधवृत्तिता शिष्टाकोपाधिकरणे व्युत्पादितेत्याशयः। शिष्टाकोपाधिकरणेन तर्ह्येतत्पुनरुक्तं स्यादित्याशङ्कते * एतेनैव चेति * सूत्रानुक्तत्वात् पौनरुक्त्यं परिहरति * नेति * ननु तेष्वदर्शनाद्विरोधस्येत्येतावतापि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्निति सिद्धान्तसूत्रसमाप्तिपक्षे सूत्रोक्तत्वात्पौनरुक्त्यं स्यादित्याशङ्क्याह * तत्र हीति * शब्दार्थविरोधात् क्रमादिसंयोगाभावेनेहोक्तेन सिद्धाविरोधाभावस्तत्र सिद्धवद्धेतुत्वेनोक्तो न तूपपादित इत्याशयः। तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्याचष्टे * तस्मादिति * तदेवेत्यनेनैक एवेति सिद्धान्तसूत्रार्थोपसंहारः। न कथंचिदित्यनेन नामादिभेदहेतुनिरासोपसंहारः न कारणमित्यनेन शाखान्तरभेदकत्वनिरासोपसंहारः। अध्यायार्थमुपसंहरति * एवमिति * उक्तेन प्रकारेण शब्दान्तरादिप्रमाणिका हि भेदसिद्धिर्न शाखान्तरप्रमाणिकेत्येवकारार्थः। ६५३।२

इति श्रीमत्त्रिकाण्डमीमांसामण्डनमातिवसन्तसोमयाजिभट्टमाधवात्मजभट्टसोमेश्वरकृतायां तन्त्रवार्त्तिकटीकायां सर्वानवद्यकारिण्यां न्यायसुधाख्यायां द्वितीयस्याध्यायस्य चतुर्थः पादः समाप्तः।

(यद्दैकत्वन्यायः) सर्वेषां ग्रहादीनां संमार्गाद्यधिकरणम् ॥ ७ ॥

एकत्वयुक्तमेकस्य श्रुतिसंयोगात् ॥ १३ ॥

संस्कारादित्रयस्यापि यथासंयोगं विनियोगोक्त्या श्रौतविनियोगप्रकारपर्यवसानचिन्तान्तराणामानर्थक्यमाशङ्क्याह * एवमिति * संयुक्ते ग्रहादौ सम्मार्गादेर्विनियोगे स्थिते स्वविशेषणैकत्वादिविशिष्टे विनियोगो ग्रहादिमात्रे वेति चिन्त्यैकवचनादिश्रुतिहेतुकाविनियोगविषया कार्येत्यर्थः । संस्कारविषयायाः विशेषचिन्तायाः संस्काराविनियोगचिन्तानन्तरं कार्यत्वशङ्कानिरासायेदानीमित्युक्तम् । सर्वशेषविनियोगपर्यवसानात्प्राग्विशेषा ऽनवसर इत्याशयः। तुल्यन्यायतयैकत्वग्रहणस्योद्देश्यस्थसंख्यामात्रोपलक्षणार्थत्वादुदाहरणतेत्याशङ्कावगमात्[1] द्वित्वबहुत्वयुक्तमपि वाक्यमुदाहार्यमित्याह *यथा चेति* ननु पुरोडाशक्षाणहविर्नाशयोर्निमित्तत्वेनोद्देश्यत्वान्नोदाहरणतेत्याशङ्क्याह *सर्वत्र चेति* प्रयाजशेषप्रतिपत्त्यर्थतायाश्चतुर्थे वक्ष्यमाणत्वात्प्रयाजशेषस्योद्देश्यत्वेन च हविषामनुद्देश्यत्वान्नोदाहरणतेत्याशङ्क्याह * सर्वत्र चेति * प्रयाजशेषप्रतिपत्त्यर्थत्वे ऽपि द्वितीयावगतहविः संस्कारार्थत्वस्यापि सम्भवतो त्याज्यत्वादेकस्यापि प्रतिपत्त्यर्थकर्मत्वयोः स्विष्टकृद्वदविरोधात्परप्रयुक्तद्रव्यसंस्कार्यत्वाद्संस्कार्यत्वे ऽपि हविषां चतुर्थे वक्ष्यमाणशेषधारणात्प्रयोजकत्वाविरोधादुद्देश्यत्वं सम्भवतीत्याशयः । एवं च सत्युद्देश्यसंख्याया विवक्षिताविवक्षितत्वसन्देहान्मूलसंशयो युक्त इत्याह * तत्रेति*हेताविति करणः वेदे वक्तृभावाद्वचनेच्छानिच्छारूपविवक्षायोगात्प्रमाणभूतवेदप्रतीतस्य च त्यागायोगाच्चिकीर्षाचिकीर्षारूपविवक्षाविवक्षायोगात्प्रतीत्यप्रतीतिरूपविवक्षाविवक्षाविवक्षाभ्युपगमे तु यस्य कस्य चिदविवक्षायोगाद्धेतुभूतसन्देहमाक्षिपति * ननु चेति * प्रश्नपूर्वमाक्षेपाशयं विवृणोति * कुत इति * वेदवाक्यविशेषणफलोक्तिपूर्वं श्लोकं व्याचष्टे * यानीति * सम्भवति प्रमादो ऽभिप्रायान्तरं वा येषु वाक्येषु तानि सम्भवत्प्रमादाभिप्रायान्तराणि । प्रमाणान्तरगम्यो ऽर्थो येषां तानि प्रमाणान्तरगम्यार्थानीति बहुव्रीहिद्वयं कृत्वा सम्भवत्प्रमादाभिप्रायान्तराणि च प्रमाणान्तरगम्यार्थानि चेति कर्मधारयः । पुरुषाधीनोच्चारणत्वात्पुरुषधर्मयोः प्रमादाभिप्रायान्तरयोः पौरुषेयेषु च वाक्येषु सम्भवे

७१४।७

[1] र्थत्वावगमादिति २ पु० पा०

ऽपि प्रमाणान्तरगम्यार्थत्वस्य वैदिकेष्वपि सम्भवात्तुल्यतामाशङ्क्य
ज्ञातार्थे विवक्षायोगात्पौरुषेयेष्वैकान्तिकं प्रमाणान्तरगम्यार्थत्वं द
ष्टनपेक्षैरपि श्रोतृभिः प्रमादाभिप्रायान्तराध्यवसानासिद्ध्यर्थमुपपाद
यितुं विवक्षोक्तिः । एवं च पुंवाक्येषु श्रुतस्याप्यर्थस्य वक्तुरिच्छा
रूपासम्भवत्याविवक्षेत्युक्ते विवक्षाकार्येण वाक्येनानुमीयमानाया वि
वक्षायाः कथमभावावधारणमित्याशङ्क्य * सा चेत्युक्तम् * वेदवा
क्येष्वाश्रयभूतपुरुषाभावात् सद्भावे तत्प्रमादाभिप्रायान्तरायोगं
त्यर्थः कस्य चिच्छब्दः । अभिप्रायान्यथात्वस्य तदुपलक्षितस्य
च प्रमादस्य सम्भवाभ्युपगमे ऽपि कथनाख्यस्तावद्वेदे ज्ञानप्रकारो
वक्त्रभावान्न सम्भवतीत्युक्ते वेदाधिकरणसिद्धान्तसूत्रोक्तभावोप-
पादनार्थम् * सर्वेत्युक्तम् * वायुक्षेपिष्ठादिवाक्यानामपि स्वरू-
पार्थस्य प्रमाणान्तरगम्यत्वे ऽपि लोके विषं भक्षय न तु पापिगृहे
भुङ्क्ष्वेत्यादौ विवक्षानुमापकत्वादर्शनात्तात्पर्यार्थस्य च प्रमाणान्त-
रागम्यत्वाद्द्वितीयो ऽपि ज्ञानप्रकारो न सम्भवतीति न चेत्युक्तम् ।
न केवलमविवक्षाहेतुभूतप्रमादाभिपायान्तरायोगाद्वेदवाक्येषु विव-
क्षा न युक्ता किन्तु वचनेच्छानिच्छयोर्विवक्षाविवक्षात्वात् द्वारमित्या-
दौ संव्रियतामित्यादिपदानुच्चारणात्संवरणादिसम्प्रतिपादनेच्छा-
ननुमाने ऽपि संवरणादिप्रतिपादन विना नैराकाङ्क्ष्याभावात्तत्तत्प्र-
तिपादनाशयरूपां बुद्धिमनुमाय संवरणमनेन विवक्षितमिति व-
चनेच्छाहेतुभूते वचनाशयरूपे प्रत्ययविशेषे विवक्षाशब्द-
प्रयोगादवचनाशयरूपप्रत्ययविशेषाभावे च मौनिनो ऽनि-
च्छायामप्यविवक्षाशब्दाप्रयोगाद्वचनेच्छानिच्छाहेतुभूतयोः प्रत्यययो-
र्विवक्षाविवक्षात्वाद्वा स्वरूपेणापि विवक्षाविवक्षयोर्वेदवाक्येषु प्रयो-
गादर्पीति विवक्षेत्यनेनोक्तम् । तेनेत्यादिना श्लोकार्थोपसंहा-
रः । अचिकीर्षारूपा विवक्षा वेदे सभवत्यपि प्रमाणाभावादयु-
११५।११ क्तेत्यर्थान्तरन्यासेन दर्शयितुमाह * पुम्वाक्ये ऽपीति * विधेया-
विधेयत्वस्वरूपविवक्षाविवक्षाभ्युपगमेन भाष्योक्तसन्देहहेतुभूतस-
न्देहं समाधातुमाह * उच्यतइति * वचनश्रुत्यैकत्वस्याभिधा-
नात्स्वरूपेण प्रतीतिः पदश्रुत्या च ग्रहान्वयोक्तेर्ग्रहान्वयित्वरूपेण प्र-
तीतिरविवादेत्येवं पूर्वार्द्धं व्याचष्टे * एकत्वं तावदिति * उत्तरा-
र्द्धं तावद्व्याख्यातुं सम्मार्जनीयस्य ग्रहस्यैकत्वान्वयावगतिमात्रे-
णोक्तग्रहसम्मार्गासिद्धेर्विधेयत्वचिन्तानर्थक्यशङ्कानिरासार्थं वि-
नियोगाभिधानश्रुतिविषयभूतस्यापि विधिश्रुतिविषयत्वं विनानु-
ष्ठानायोगं चिकीर्षाचिकीर्षारूपविवक्षाविवक्षासिद्ध्यर्थं वा श्रुतित्रे-

विध्युक्तिपूर्वं विधेयत्वं विनानुष्ठानायोगं तावदाह * इह त्विति *
तृतीयैव श्रुतिरनुष्ठानहेतुर्न पूर्वेत्यर्थः। उदाहरणनिष्ठं श्लोकं व्याचष्टे
* प्रकृतीति * अभिधातृत्वस्वरूपमात्रबोधो ऽभिप्रेतः विध्यनपे-
क्षैः श्रुत्यादिभिस्तादर्थ्यं बोधाख्यविनियोगासिद्धेरन्वयमात्रबोधो ऽत्र
विनियोगो ऽभिमतः। कारकविभक्तीनां प्रत्ययत्वेन स्वार्थस्वरूपबो-
द्धृत्वे प्रकृतिसमभिव्याहारात्मकपदत्वरूपेण प्रकृत्यर्थान्वयबोद्धृत्वे
ऽपि क्रियान्वयबोधाधिक्यात्तयोः पृथगुक्तिः। षष्ठ्या अपि पदान्तरो-
क्तार्थान्वयबोद्धृत्वोक्त्यर्थश्चकारः। लिङादीनामपि कारकविभ-
क्तिवदभिधातृत्वविनियोक्तृत्वसद्भावे ऽपि विधिसामर्थ्याधिक्यमुक्तं
तथेत्यनेन श्लोकतात्पर्योक्तिः। विधिनिबन्धनत्वं प्रयोगस्यान्वय-
व्यतिरेकाभ्यामुपपादयति *स हीति* सौर्यादियागे ऽनभिहिते ऽपि
सक्तुषु होमसाधनत्वेनाविनियुक्तेष्वपि विधिसद्भावे प्रवृत्तेर्विध्य-
भावे च वायव्यश्वेतालम्भादौ धातुनाभिहिते द्वितीयया च विनि-
युक्ते ऽप्यप्रवृत्तेर्विध्यधीनत्वावगतिरित्यर्थः। नन्वश्रद्धयापि
प्रवृत्त्युपपत्तेः नाप्रवृत्तिमात्रेणाभिधानविनियोगश्रुत्योः प्रेरणाशक्त्य-
भावो ऽवसीयते इत्याशङ्क्याभिधानश्रुत्या ऽस्तित्वमात्रपरिच्छेदाद्विनि-
योगश्रुत्या चान्वयमात्रपरिच्छेदात्सत्तान्वयविषयकार्यत्वबुद्ध्यनुत्पा
दकत्वेनानयोः प्रेरणाशक्त्यभावमुपपादयितुमाह* न हीति * उत्त- ७२६।१
रार्द्धव्याख्यानायानुष्ठानस्य विध्यधीनत्वमुपपाद्योत्तरार्द्धं तात्पर्यतो
व्याचष्टे * तेनेति * विधिं प्रतीत्य विधिं लक्षणीकृत्य
विधिलक्षणार्थं वचनमङ्गीकृत्य विवक्षाविवक्षे भवत इत्युक्ते
सनो ऽपि इच्छार्थस्यास्मिन्पक्षे परिग्रहलक्षणार्थत्वापत्तेः। तस्य च
श्रुतिवृत्तत्वासिद्धये ऽनुष्ठानं प्रतीत्यानुष्ठानलक्षणार्थं वचनमङ्गीकृत्ये-
त्युक्तम्। द्वयमपि व्याख्यातुं विधित्सितत्युक्तं चिकीर्षिताचिकी-
र्षितत्वयोश्च मूलसन्देहविषयभूतकर्तव्यत्वाकर्तव्यत्वोपलक्षणार्थ-
त्वेनोपायसन्देहहेतुत्वेनोपन्यसनीयत्वाद्भाष्ये ऽपि चैकत्वाविवक्षाया-
मेकवचनायोगशङ्कायाः शब्दविषयत्वेनानुष्ठातृगता चिकीर्षाविष-
यत्वे ऽनुपपत्ते र्विवक्षाविवक्षाशब्दयोर्विधेयत्वाविधेयत्वोपलक्षणार्थ वि-
धित्सिताविधित्सितार्थत्वावसायात्[1] नः श्रुतिवृत्तिशक्तिप्रदर्शनमा-
त्रार्थं विवक्षाविवक्षयोश्चिकीर्षिताचिकीर्षितात्मकतोक्ता न पारमा-
र्थिकी। विधित्सिताविधित्सितात्मकमपि विवक्षिताविवक्षितत्व वि-
धायकस्य शब्दस्याचेतनत्वेनेच्छाभावादयुक्तमित्याशङ्क्य*नन्विति*

---

१ अनुपपत्तेरिति २ पु० ना०

[1]एकवचनेनैकत्वोक्तेर्निःशङ्कत्वेनात्र विवक्षाशब्दस्य आशङ्कायां
सन् वक्तव्य इति स्मृत्यविषयत्वादौपचारिकतैव सतो युक्तेत्याशयः ।
उपचारेणापि चेच्छाव्यतिरिक्ते सम्प्रयोगोपपत्तौ सूत्रस्मृतेच्छावाचि-
त्वत्यागेनान्यार्थत्वकल्पनायांगाढाक्यकृत्स्मृत्यनादरेण दृष्टान्ते ऽप्यौ-
पचारिकत्वोक्तिः सम्प्रत्ययोपलक्षणार्थ इति परिहरति * उच्यत इति *
सतश्चेच्छाफलप्रत्यासत्तिलक्षणार्थत्वदर्शनाज्ञात्यन्तादृष्टोपलक्षणेति
दर्शनाज्ञात्यन्तादृष्टोपलक्षणेति दर्शयन् श्लोकं व्याचष्टे * यथैवेति *
अनुष्ठानार्थौ परिग्रहपरित्यागशब्दौ मत्वा ऽभिधानविनियोगश्रुत्योर-
विधायकत्वे ऽपि विधेयसमर्पकत्वात्तद्विषयताया विधेयत्वावगतेर्वि-
धायकश्रुत्यविषयत्वे ऽपि परित्यागो न युक्त इत्याशङ्कते * कथमि-
ति * अप्राप्तत्वाद्विधानार्हत्वरूपविधेयत्वावगमे ऽपि विधेयत्वाधी-
नत्वादनुष्ठानस्य विधायकेनाग्रहणेनानुष्ठानं युक्तमिति परिहरति *
नैष इति * पुरुवाक्यदृष्टान्तेनैतदेवोपपादयति * यथैवेति * श्लोकं
व्याचष्टे * पुरुषेति * इच्छाशब्देनाज्ञादयः पुरुषाशयविशेषा प्रवर्त-
नासामान्यव्यक्तिभूता विवक्षिताः विधित्वशब्देन प्रेरणाख्यो लिङ्-
व्यापारः । शङ्कापरिहारमुपसंहरति * अत इति * विनियोगाभि-
धानश्रुतिसमर्पितत्वाविशेषे ऽपि विधिस्पर्शास्पर्शव्यवस्था न युक्ते-
त्याशङ्कते * कथं पुनरिति * समर्पितत्वाविशेषे ऽपि
रूपरसयोश्चक्षुर्ग्रहणाग्रहणव्यवस्थावद्विधिग्रहणाग्रहणव्यवस्था यु-
७१७।१ क्तेति परिहरति * तदिति * योग्येत्यनेनाध्याहृतापिशब्दकेनाभि-
धानविनियोगश्रुतिवशत्वे निरस्ते दृष्टान्तत्वेन श्रोत्राशयवशत्वाभा-
वोक्तिः । व्यतिरेकपूर्वं श्लोकं व्याचष्टे * यदीति * कस्मिन्नर्थे वि-
धायकानां शक्तिरित्यपेक्षायामाह * तथा हीति * श्रौतं विधित्वं भा-
वनाविषयं कारकविषयं चार्थमित्यर्थः । श्लोकं व्याचष्टे * श्रुत्या ताव-
दिति * धात्वर्थस्य कारकत्वे ऽपि तदवच्छिन्नाया भाव-
नाया निरूपणाशक्तेर्विध्ययोगात्पदश्रुत्यैव धात्वर्थविध्यवगते
स्तद्व्यतिरिक्तानामेवकाराणामार्थान्नाधिविषयत्वसूचनायान्तरोक्तिः
कारकत्वेन श्रुतस्य सङ्ख्यादेः साक्षात्कारकत्वायोगे
ऽपि कारकीभूतद्रव्यद्वारा कारकत्वसम्भवे विधेयत्वानप-
ह्नवसूचनायोत्तरार्द्धव्याख्याने तदाश्रयत्वोक्तिः विध्यवगमानुष्ठेय-
त्यानुपपत्त्या सामान्यतः किंचित्समीहितं प्रत्यङ्गत्वे ऽवधारिते श्रु-
त्यादेस्तद्विशेषसमर्पणमात्रे व्यापाराद्विध्यपरिग्रहे श्रुतस्याप्यङ्गत्वं
नास्तीति सूचनायानुष्ठानं प्रत्यङ्गत्वं स्यात्तच्च विध्यभावान्नास्ती-
त्युक्तम् एकत्वादेर्विधिपरिग्रहापरिग्रहलक्षणाविवक्षितानिवक्षितत्व-

१ धाले कवचनेनेति २ पु० पा०

सन्देहे ऽप्येकस्य ग्रहस्य सम्मार्गादिकार्यम् सर्वेषां वेति मूलसन्देहस्य सिद्धिः कथमित्याशङ्क्य विवक्षिताविवक्षितत्वं सन्देहैनैकत्वादेः कार्यत्वाकार्यत्वसन्देहसिद्धिन्दर्शयितुमाह * तेनेति * उपक्रमोक्तो विवक्षाविवक्षितत्वसन्देहः सम्भवोपपादनसमाप्त्या बुद्धिस्थीकृतस्तच्छब्देन परामृष्टः हेत्वभावे वेदे सम्भवमात्रेण विवक्षिताविवक्षितत्वसन्देहासिद्धेस्तद्धेतुत्वेनैकत्वादेः सम्मार्गादिभावनाविशेषणत्वसदसद्भावसन्देहं दर्शयितुमाह * तत्रेति * भावनाद्रव्याङ्गत्वहेतुभूतकारकाकारकत्वसन्देहान्तरसूचनार्थं कारकत्वेनेत्युक्तं चिकीर्षितत्वात्मके विवक्षितत्वे विधिस्पर्शस्य हेतुत्वार्था पञ्चमी विधित्सितरूपे विवक्षितत्वे शब्दप्रवृत्तिमात्रे हेतुत्वम्। ननु विवक्षाविवक्षोक्त्योर्विधिपरिग्रहापरिग्रहलक्षणार्थत्वे कस्मादुद्देश्यसंख्या विधिना गृह्यते न वेत्येव सन्देहो न कृत इत्याशङ्क्याह * तदेतदिति * विधिशक्त्यशक्त्यधीनयोर्विधिपरिग्रहापरिग्रहयोर्यद्विवक्षिताविवक्षितत्वं वाचोयुक्त्युच्चारणं तन्मन्दबुद्धिशिष्यप्रतिपादनफलं पौरुषेयवाक्यव्याख्यासादृश्यापादनार्थमित्युक्ते कस्मात्पुंवाक्यव्याख्यासादृश्यापादनं विना न शिष्यप्रतिपत्तिरित्याशङ्क्यालौकिकस्थनाबुद्धस्य वेदवाक्यार्थस्य विसदृशव्याख्यानप्रकारप्रकरणाशक्तेरित्युक्तं कया वृत्त्या परिग्रहापरिग्रहयोर्विवक्षिताविवक्षितवाचोयुक्तिरित्याशङ्क्यान्तर्णीतमुपमानं यस्यां गौणवृत्तौ तदाश्रयणेनेत्युक्तम्। कथमुपमानमित्यपेक्षायां परिग्रहापरिग्रहाख्यफलसामान्यदर्शनादित्युक्तं न केवलमेतदेव विवक्षिताविवक्षितवाचोयुक्त्युच्चारणं परिग्रहापरिग्रहविषयं किं त्वन्यत्रापि तस्मान्नैतत्किं चिदपि कर्तुं विवक्ष्यत इत्यादिभाष्यादौ यद्भेदविषयं विवक्षिताविवक्षितवाचोयुक्त्युच्चारणं तदेव मे विसमर्थनीयमिति ग्रन्थेत्यनेनोक्तम्। व्याख्यार्थवच्चयङ्गीकारेण वाच्या चिख्यासाव्याचिख्यासे विवक्षाविवक्षोक्तिभ्यामुच्येते इति समाधानान्तरमाह * अथ वेति * ननु सम्प्रदायानुसारेण व्याचक्षाणानां याज्ञिकानां न्यायशास्त्रे ऽभिप्रायाख्येच्छा चिन्ता न युक्तेत्याशङ्क्याह * शब्देति * सम्प्रदायस्य पौरुषेयत्वेन मूलप्रमाणापेक्षत्वाद्द्वैकत्वादिविवक्षाविषयभूतस्य च प्रमाणान्तरस्यादर्शनाद्दृष्टन्यायमूलत्वसम्भवे चादृष्टमूलान्तरकल्पनायोगान्न्यायमूलत्वावगतेर्न्यायाविरोधे सम्प्रदायाद्वेदार्थावगमे ऽपि विरोधे न्यायावगम्यविधिशब्द- ७१८२।
शक्त्यनुसारेणैव याज्ञिकैरपि व्याख्येयत्वात्तद्व्याचिख्यासा चिन्तयितुं युक्तेत्याशयः। यद्वेच्छाया निरङ्कुशत्वात्तद्वशेन शास्त्रार्थानिर्णयायोगाशङ्कानिरासार्थत्वेनायं श्लोकार्द्धो व्याख्येयः। व्याख्यानिच्छायाः

साकाङ्क्षत्वमेव विवृणोति * तत्रेति * विवक्षाविवक्षोक्त्योर्व्याचिख्यासाव्याचिख्यासार्थत्वमुपसंहरति* तेनेति*ननु ग्रन्थकारप्रयुक्तयोर्विवक्षाविवक्षाशब्दयोर्व्याख्यात्रिच्छानिच्छानिच्छार्थत्वसम्भवे ऽपि व्याख्यातुमुक्तयोरात्माश्रयदोषापत्तेर्व्याख्यात्रिच्छानिच्छार्थत्वं न सम्भवतीत्याशङ्क्याह * अत इति * संवत्सरवाचिना समाशब्देन कालोपलक्षणादतः पूर्वव्याख्यातृप्रतियोगित्वेनोपस्थापितादर्वाचीनाद् व्याख्यातुः पूर्वकाले वृत्ता जाता ये व्याख्यातारस्तेषामिष्टं यत्तेनार्वाचीनेन व्याख्यात्रविवक्षितमुच्यते तेषां चानिष्टं यत्तदविवक्षितमुच्यतइत्यर्थः । अतो वेदे ऽपि विवक्षिताविवक्षितत्वचिन्ता न विरुद्धेति प्रस्तुतोपयोगमाह * तस्मादिति * स्वरूपे ऽर्थे वेदप्रामाण्यात्सर्वस्य जगतश्चेतनाधिष्ठितत्वाभ्युपगमेन मुख्यवृत्त्यैव विवक्षाविवक्षोक्ती समाधत्ते * ऋग्वेदादीति * यो वै वेदेषु तिष्ठन्वेदानन्तरो यमयति यो वेदान्वेत्ति यं वेदा न विदुः यस्य वेदाः शरीरं एष त आत्मान्तर्याम्यमृत इत्युपनिषत्प्रामाण्यादृग्वेदादिष्वात्मानो ये प्रतिष्ठितास्तेषामिच्छानिच्छाख्यभिप्रायो विवक्षाविवक्षाशब्दवाच्य इत्युक्ते कर्मजन्यफलोपभोगार्थं देहाधिष्ठातृभिर्वैर्नित्यानां वेदानां कर्मानर्जितत्वेनाधिष्ठानायोगात्परमात्मनश्च देहानधिष्ठातृत्वाद् ऋग्वेदादीनां चेतनेच्छाधीनव्यापारत्वानुपपत्तेः । शब्दशक्त्यालोचनावशेन शब्दव्यापाराच्चेतनेच्छानुमानायोगेन सदसद्भावचिन्तानुपपत्तिमाशङ्क्य परमात्मनः कर्मजन्यफलोपभोगार्थं देहानधिष्ठाने ऽपि कार्यकारणप्रातिनियमसिद्ध्यै सर्वस्य जगतश्चेतनाधिष्ठानाकरणात्परमात्मनो ऽपि च क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारतेति देहाख्यक्षेत्रे ज्ञातृत्वाख्यक्षेत्रे ज्ञत्वस्मृतीर्वेदेष्वाधिष्ठातृत्वोपपत्तिसूचनार्थं क्षेत्रज्ञत्वे ऽभिहिते ।

विच्छिन्नयत्नव्यङ्ग्यैश्च नित्यैः सर्वगतैरपि ।
व्यतिरिक्तपदारम्भो वर्णैर्नोपपद्यते ॥

इत्यनेन न्यायेन पदावयविवत् ऋग्वेदाद्यवयविनो वेदावयविनश्चानुपपत्तेरनारब्धावयविकानां चावयवानां देहत्वादर्शनादृग्वेदादीनां देहत्वायोगेन ।

इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते ।
एतद्योवेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥

इति देहाख्यक्षेत्रमधिष्ठाय ज्ञातृत्वलक्षणक्षेत्रज्ञत्वायोगमाशङ्क्योपनिषत्प्रामाण्यादनारब्धावयविकेष्वप्यृग्वेदादिशब्दवाच्येषु मन्त्रब्राह्मणसमूहेषु क्षेत्रज्ञानामधिष्ठातृतोक्ता । ननु पञ्चधातूत्स्वयम्

षष्ठ आदत्ते युगपत्प्रभुरित्यादिस्मृत्यालोचनेन महाभूताधिष्ठितस्यै-वात्मनो ज्ञानेच्छादिमत्त्वावगमाद्धेदाधिष्ठितानामात्मनां ज्ञानाभावेन तत्पूर्वकविवक्षासम्भवात्सम्भव ऽपि प्रमाणान्तरगम्यार्थत्वाभावाद्धे-द्धाधिष्ठातृभिरकथितायाः परैर्ज्ञातुमशक्यत्वात्तत्सदसद्भावचिन्ता युक्त्याशङ्क्याह * महाभौतिकेति * यथा पृथिव्यप्तेजोवाय्वाका-शाख्यमहाभूतारब्धदेहाधिष्ठितानामात्मनां चैतन्याख्यज्ञानवत्त्वात्त-त्पूर्विका विवक्षा सम्भवति वृषलेन प्रवेष्टव्यं गृहं ऽस्मान्नित्यादौ वा कथितापि बहुत्वाद्यविवक्षा प्रमाणान्तरगम्ये ऽपि चार्थे शब्दशक्त्या-लोचनयैवान्यैर्ज्ञायते तथर्ग्वेदादिदेहाधिष्ठितानामप्यात्मनां चैत-न्याख्यज्ञानवत्त्वात्तत्पूर्विका विवक्षा सम्भवति शब्दशक्त्यालोचनया चान्यैर्ज्ञातुं शक्यत इति तथर्ग्वेदादयो देहा इति वक्ष्यमाणान्वयेन व्याख्येयम् । अकथितत्वसूचनायान्तर्गतत्वोक्तिः प्रमाणान्तरव-शत्वनिरासार्थः शब्दशक्त्यैवेत्येवकारः । ननु देहानां पार्थिवत्व-व्याप्तेर्ऋग्वेदादीनां व्यापकपार्थिवत्वानिवृत्त्या व्याप्यदेहत्वनिवृत्त्यव-गमान्नात्मभिरधिष्ठानं युक्तमित्याशङ्क्याह * देहेति * पृथिवीपर-माणवादीनां देहप्रकृतिभूतानां देहारम्भवैचित्र्याद्देहानां भिन्नाः प्र-कारा इत्युक्तं प्रकृत्यारम्भवैचित्र्यनिमित्तापेक्षायामपरमात्मनां जीवा-नां देहविचित्रकर्मजन्यविचित्रफलोपभोगापादकापूर्वाख्यशक्तिव-शानुगा इत्युक्तम् । ततश्च शुद्धायाः पृथिव्याः क्व चिद्देहप्रकृतित्वा-भावाद् बाहुल्यस्य च भूतान्तरेष्वपि भावाद्देहत्वस्य पार्थिवत्वेन व्याप्तिरसिद्धेति परिहाराशयः । वैचित्र्यं विवृणोति * पार्थिवेति* स्वेदजाण्डजोद्भिज्जैरादिशब्दोक्तेः संख्यापूरणं तोयबाहुल्योपपादना-र्थं स्वेच्छावयवरूपतोक्ता । वायुबाहुल्योपपादनार्थं भ्रमन्तीत्युक्तम् । अग्निदृष्टान्तेन तेजोबाहुल्योपपादनार्थं रात्रौ विक्षिप्तेन सौर्येण तेज-सा आप्यायन्तइत्युक्तं वाक्यशेषे ऽपि ।

एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति ।
स गच्छति परं स्थानं तेजो मूर्त्तिर्यथार्जुन ॥

इति मानवाभिधानेन च तैजसानां देहानां चेतनाधि-ष्ठतनोपपादिता । नाभिहित इतिपाठे ना पुरुषः । ननु जीवात्मनां स्वकर्मोपात्तफलोपभोगदेहाधिष्ठातृत्वसम्भवे ऽपि वेदाधिष्ठातृत्वे-नाभिमतस्य परमात्मनः कर्त्तृभोक्तृत्वाभावाद्देहाधिष्ठातृत्वं न सम्भ-वति वेदानां च नित्यत्वेनात्मकर्मानुपात्तत्वान्न तद्देहत्वे सम्भवती-त्याशङ्क्य नित्यानां वेदानां व्योमदृष्टान्तेन परमात्माधिष्ठितत्वमुप-पादयितुमाह * तथेति* क्रमार्थस्तथाशब्दो न तु दार्ष्टान्तिकत्वोक्त्य- ७१९।*

र्थः। परमात्मनोऽनश्नन्नन्यो अभिचाकशीतीति श्रुतेः। प्रयोजनाभावाद्देहानधिष्ठातृतामाशङ्क्य भोक्तृत्वसिद्ध्यै तत्सवितुर्वरेण्यमिति सवित्रधिष्ठानतच्छब्दवाच्यब्रह्माख्यपरमात्माभिधायिन्या गायत्र्योत्क्षिप्यमाणेन चार्थेणोच्यत इत्युक्तम्। तद्यो ऽहं सो ऽसौ यो ऽसौ सो ऽहमित्युपनिषच्छ्रुतेः। सूर्य आत्मा जगतस्तस्थुषश्चेति मन्त्रवर्णाच्च ब्रह्मणः सवित्रधिष्ठातृत्वावगतिः कृत्स्नदेहाधिष्ठानस्यापि चात्मनो हृदयाधिष्ठानोपासनवत् कृत्स्नव्योमाधिष्ठानस्यापि व्योमान्तर्गतसवितृमण्डलाधिष्ठानोपासनाविरोधः कस्याः श्रुतेर्व्योमशरीरता श्रुतेत्यपेक्षायां खम्ब्रह्मेति श्रुत्या व्योमशरीरतयोदितेत्युक्तम्। य आकाशे तिष्ठन्नाकाशमन्तरो यमयतीति य आकाशं वेत्ति य माकाशं न वेद यस्याकाशः शरीरमेष त आत्मा सर्वान्तर्याम्यमृत इति श्रुत्यन्तरसूचनार्थश्चकारः। नित्यस्यापि नियमत्वलक्षणसंबन्धाद्देहत्वोपपत्तिसूचनार्था नित्योक्तिः। नन्वेवमपि देहानां भौतिकत्वव्याप्तेर्ऋग्वेदादीनां व्यापकभौतिकत्वनिवृत्त्या देहत्वनिवृत्त्यवगमान्न देहता युक्तेत्याशङ्क्य महाभूतगुणानामपि यो रूपेषु तिष्ठन्रूपेभ्योऽन्तरो यमयतीत्यादिश्रुतिप्रामाण्याद्देहत्वावगतेर्भौतिकत्वेनापि देहत्वस्य व्याप्तिरसिद्धेति सूचयितुमाह * रूपेति * देहत्वोपपादनार्थं नियमलक्षणसम्भोगाधिष्ठानता सम्भोगहेतुशब्देनोक्ता। पृथिव्यादिमहाभूतसमुदितानामेव रूपादीनां देहत्वशङ्कानिरासार्थं प्रत्येकमित्युक्तम्। शब्दब्रह्मवादस्य च चेतनाचेतनयोर्ब्रह्मशब्दयोस्तादात्म्यानुपपत्तेः। शब्दो ब्रह्माधिष्ठानमित्येवं व्याख्येयत्वाच्छब्दात्मकानामपि वेदानां देहता ब्रह्माख्यस्य च परमात्मनोऽपि देहाधिष्ठातृतां शब्दब्रह्मवादिनामपि मतं प्रकृतर्ग्वेदाद्यधिष्ठातृत्वसिद्ध्यै सूचयितुमाह * शब्देति * यद्वेदाख्यं शाब्दं शब्दब्रह्मेत्युच्यते तत्परमात्मनाधिष्ठितमिति अध्याहारेण योज्यम्। अनादिनिधनं ब्रह्म शब्दतत्त्वमिति शब्दमात्रस्य ब्रह्मत्वोक्तावपि शास्त्रत्वाख्यैश्वर्ययोगिकूटस्थनित्यब्रह्माधिष्ठानस्य कूटस्थनित्यं शास्त्रं विनानुपपत्तेर्वेदातिरिक्तस्य च शास्त्रस्य कूटस्थनित्यत्वाभावाद्वेदाख्यं शास्त्रमिति विशेषतः परमात्माधिष्ठानमात्रेण तर्हि चेतनाधिष्ठितत्वसिद्धेः। क्षेत्रज्ञाधिष्ठानोक्तिरनर्थिकेत्याशङ्क्य द्वा सुपर्णा सयुजा सखायेत्यादिश्रुत्यालोचनया सर्वस्य साधारणचेतनद्वयाधिष्ठानत्वावगतेः। सर्वसाधारणपरमात्माधिष्ठितस्यापि प्रतिबिम्बवत्स्वासाधारणाधिष्ठितत्वोपपत्तिसूचनार्थं सर्वमेकेनेत्युक्तम्। सर्वस्यैकाधिष्ठितत्वे वेदमात्रस्यैकाधिष्ठितत्वोक्तिरयुक्तेत्याशङ्क्य।

सर्वेषाञ्च स नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥

इत्यादिस्मृत्यालोचनया सर्वस्याभिधानाभिधेयजातस्य वेदान्तर्गतत्वाद्वेदात्मकत्वसूचनायेदमित्युक्तम्। रूपादिदृष्टान्तेनाभौतिकानामपि वेदानान्देहत्वसम्भवे ऽपि ज्ञानसाधनेन्द्रियाद्यभावात्परमात्मवच्च क्षेत्रज्ञाधिष्ठाने ऽपि ज्ञानानुपपत्तेस्तत्पूर्विका विवक्षा न सम्भवतीत्याशङ्कां निरस्यन् दार्ष्टान्तिके ज्ञानपूर्वं विवक्षोपपत्तिं योजयति *तथेति* यथा माहाभौतिकदेहेष्वात्माधिष्ठानाच्चैतन्याख्यं ज्ञानमस्ति तथर्ग्वेदादयो ऽपि देहत्वेन श्रुत्योक्तत्वाद्देहानाञ्चात्मयोग्यत्वव्याप्तेर्ज्ञानञ्च विना भोगायोगाच्चैतन्याख्यज्ञानान्विता इत्यर्थः। परमात्मन एव वेदान्स्वार्थप्रतिपादने नियन्तुं वेदाख्य-क्षेत्राधिष्ठातृत्वेन क्षेत्रज्ञव्यपदेश्यत्वान्नित्यज्ञानत्वोपपत्तेः। साधनाभावेन ज्ञानाभावाशङ्कानिरासः सदेत्यनेन सूचितः। शब्दब्रह्मैव क्षेत्रज्ञशब्देनोक्तं स्यादित्याशङ्क्य वेदपुरुष इति यमवोचामयेन वेदान्वेद ऋग्वेदं यजुर्वेदं सामवेदमिति श्रुत्या प्रत्येकमसाधारण्येन ऋग्वेदादीनान्देहत्वोक्तेः सर्ववेदसाधारणत्वाच्छब्दब्रह्मणः प्रतिवेदमसाधारण्येन क्षेत्रज्ञस्य वैलक्षण्यसूचनार्थं पृथक् पृथगित्युक्तम्। यथा च भौतिकदेहस्थानात्मनामन्तर्गतापीच्छा शक्त्यालोचनया ऽनैर्ज्ञायेते तथा वेददेहस्थानामपीत्याह * तेषाञ्चेति * वेदक्षेत्रज्ञाशयविषयविवक्षाविवक्षोक्तिपक्षमुपसंहरति * विधीति * शब्दब्रह्मवादाभ्युपगमे तु ब्रह्मणो ऽपि सर्ववेदात्मकदेहाधिष्ठातृत्वाद्विवक्षाविवक्षे वक्तुं शक्येते ते च विधिशक्तितो ज्ञायेते इत्याह शब्देति[1])। एवंशब्देन प्रत्येकस्वेदाधिष्ठातॄणां दृष्टान्ततोक्ता * नन्वनादिति *

नन्वनादिनिधनं ब्रह्म शब्दतत्त्वं व्यवस्थितम्।
विवर्त्तते ऽर्थभावेन प्रक्रिया जगतो यतः॥

इति वदद्भिः शब्दब्रह्मवादिभिः शब्दव्यतिरिक्तार्थनिरासात्तस्मिन्पक्षे ऽर्थविवक्षानुपपत्तेस्तद्विषयत्वेन विवक्षोक्तिव्याख्या न युक्तेत्याशङ्क्याह *अनादीति* अर्थापह्नवे सर्वप्रमाणविरोधापत्तेरभिधेयवाचिनो ऽर्थशब्दात्कृदन्तादुत्पन्नेन भावप्रत्ययेन वाच्यवाचकसंबन्धोक्तिमङ्गीकृत्य वाच्यविषयशक्तियुक्तत्वेन विवृत्यर्थभावेन[2] विवृत्त्युक्तेर्व्यवस्थेयत्वसूचनायानादिनिधनत्वस्योपलक्षितस्य शब्दब्रह्मणो वेदवेदार्थाधिष्ठानतोक्ता। शब्दब्रह्मपक्षे त्वेवं वेदक्षेत्रज्ञपक्षोक्तप्रकारेण वि-

(१) अथ पा० २ पु० ना०।

(२) विविधवृत्त्यर्थतया अर्थभावेनेति १ पु० पा०।

[illegible]स्यमुख्यावृत्त्यायुक्तेत्यर्थः। उपासनाविधिशेष-
[illegible]मिश्राह्मणादेः स्वरूपार्थपरत्वाभावात् कार्यकारणप्रतिनि-
[illegible] च [illegible]योपपत्तेः सर्वस्य जगतश्चेतनाधिष्ठितत्वे प्र-
[illegible]नु यो ऽयमशरीरः प्रतिज्ञातेत्यशरीरत्वश्रुतेर्जी-
[illegible]नां च कर्मालपक्षाणां च देहानधिष्ठातृत्वान्मुख्यवृत्तिव्याख्यान-
[illegible]सूचनार्थो ऽपिशब्दः वेदवाक्येषु विवक्षाविव-
[illegible] चतुर्दोपपादितं युक्तत्वमुपसंहरति * ततश्चेति * तस्मा-
[illegible] कर्तुर्विवक्ष्यतइत्यादिभाष्यादेव विविधसन्देहाव-
[illegible] न [illegible]स्थापयिष्यतीत्युक्तम् । एकत्वयुक्तं क-
[illegible]नुष्ठेयं विधानं वैकत्वयुक्त द्रव्यस्यैकस्य ग्रयमित्येवं
[illegible]पक्षमाह * किं तावदिति * श्रुतिसंयोगं विधि-
[illegible] व्याख्यानमाह * सर्वत्रेति * नन्वक्रियात्मनः का-
[illegible]भ्युपगमात् संख्यायाश्च कारकीभूतविधेयद्र-
[illegible]द्वारा कारकत्वस्याभ्युपगमनीयत्वात् । ग्रहादेश्च
[illegible] द्रव्यकर्म[illegible]विधेयत्वेन तद्द्वारा कारकतया संख्यादिविध्य-
[illegible]संयोग इत्याशङ्क्य श्रुतिसंयोगोपपादितप्रतिज्ञां ताव-
[illegible] * तत्रेति * कारकत्वेन वा कारकविशेषणेन वेति सर्वात्म-
[illegible] । कारकविशेषणत्वेन तावद्विधेयत्वमुपपादयति * त-
[illegible] * अर्तासमनन्वयसूचनार्थैकशब्दः द्रव्यादिविशिष्टक्रि-
[illegible]नुपपत्त्या विधेयक्रियाविशेषणभूतद्रव्यादिविधिकल्प-
[illegible]विशिष्टद्रव्यविशिष्टक्रियाविध्यन्यथानुपपत्त्या विशेषणभूत-
[illegible]नापि युक्तेत्यर्थः । स्वरूपेण च प्रकृतं कर्माङ्गत्वेन
[illegible] सकर्मागान्वयित्वेनाप्राप्तत्वाद्विधेयत्वोपपत्तिरि-
[illegible] च क्रियाविशेषणपुरोडाशविशेषणा-
[illegible]रपि विधिप्रतीतेर्विशेषणविशेषणस्य
[illegible] सूचयितुमाह * एवमिति * अर्थाक्षेपल-
[illegible]यितं गौरवं शब्दस्यापादयतीत्यर्थान्तरन्यासेनाह
[illegible] * गुणस्य द्रव्यस्य विशेषणत्वे द्रव्यविशिष्ट-
[illegible]विशेषणानाक्षेपात्संख्यादेश्च क्रियाविशेषणत्वाभा-
[illegible]विशेषणान्वायोगात्कारकविशेषणत्वेन विधेय-
[illegible] । कारकत्वेनैव ग्रहैकत्वस्य विधेयत्वमुपपादयितुमाह
[illegible] * यद्यपि द्रव्यविशेषणपर्यन्तं विधिप्रत्ययो न गच्छेत्त-
[illegible]क्रियान्यथानुपपत्तिलक्षणयैवार्थापत्त्या संख्या-
[illegible]तथापि ग्रहैकत्वस्यापि भावनाविशेषणतेत्येवं

ग्रहैकत्वविधानं प्रतिपादनीयमित्येवं तथाशब्दार्थततः शब्दापिश-
ब्दाध्याहाराद्यभ्युपगमेन योज्यम् । यद्वा यदीत्यसंदिग्धे सन्दि-
ग्धवचनं नामवचनः कथं चिच्छब्दार्थे गच्छतिनान्वेतव्यः । ततश्चे-
ति चशब्दाध्याहारस्तुल्यः । उद्देश्यविशेषणयोरुद्देश्यत्वेन क्रियान्वया-
भ्युपगमे प्रत्युद्देश्यं वाक्यसमाप्त्यापत्तेरुद्देश्यद्वयस्यैकक्रियावशीकारा-
भावेनान्योन्यानियमादुद्देशोपादानयोश्चैकस्मिन्पदे ऽनुपपत्तेरुपादेय-
त्वेन क्रियान्वयायोगाद् ग्रहैकत्वयोर्विशेषणविशेष्यत्वायोगेनैकपद-
लक्षणायाः श्रुतेस्तद्विषयत्वायोगात्तादर्थ्यविषयत्वमापाद्य वाक्यीय-
क्रियान्वयबोधकत्वं शङ्कते * ननु चेति * पदश्रुतेस्तादर्थ्यविषयत्वाभ्यु-
पगमेनैव ग्रहाणां निर्ज्ञातदशसंख्यत्वेन स्वरूपतः संख्यानपेक्ष-
त्वात्संस्कार्यस्वरूपेणैकत्वं प्रत्यङ्गत्वावगतेः संमार्गभावनान्वयि-
त्वाख्यसंस्कार्यरूपाङ्गत्वस्यैकस्य भावनाङ्गत्वविरोधमाह * नैष
इति * वस्तुस्वभावनिबन्धनोद्देश्योपादेयत्वयोः शब्दव्यापाराविष-
यत्वादेकपदोपात्तयोरव्यवस्थोपपत्तेर्ग्रहमिति द्वितीयोक्तस्यापि चैक-
त्वस्यानुपयोगित्वेनासंस्कार्यत्वात्सक्तुवद् गुणत्वप्रतीतेः । साक्षाच्च
निष्क्रियत्वेनाश्रयत्वेनाश्रयद्रव्यापेक्षायामेकपदलक्षणया श्रुतेराश्रय-
द्रव्यसमर्पकत्वेनाविरोधसम्भवे विरोधापादकग्रहार्थताविषयत्वक-
ल्पनायोगमभिप्रेत्यान्यथाविरोधाभावमाह * भिन्नेति * विरोधे
सत्येकत्वस्य क्रियाङ्गत्वं विना विधेयत्वायोगात् श्रुत्युक्तस्य ग्र-
हाङ्गत्वस्यानुपपत्तेर्वाक्यीयो ऽपि क्रियान्वयो न बाध्यतइति परि-
हारान्तरमाह * अथ वेति * श्रुत्युक्तविशेषणविशेष्यभावसिद्धै ७२१।२
वापेक्ष्यतएव क्रियान्वयः । श्रुत्येति परिहारान्तरमाह * यद्वेति *
तादर्थ्यविषयश्रुत्यभ्युपगमे त्वेकत्वस्य क्रियान्वितग्रहान्वयनिमित्त-
क्रियान्वयपक्षात्पूर्वोक्तात्प्रकारान्तरेणैकत्वान्वितस्य ग्रहस्य क्रिया-
न्वयाभ्युपगमे तस्यैकाभिधानश्रुत्यैकाभिधानश्रुत्यैकपदोक्तात् ग्रहा-
त्प्राक् संस्कार्यत्वप्रतीतेः । स्वतन्त्रस्य चैकत्वस्य क्रियायोगात्प्र-
त्युद्देश्यं वाक्यसमाप्त्यनुपपत्तेर्ग्रहस्यैकत्वान्वयपूर्वकः क्रियान्वयः ।

गुणत्वेन तु क्रियाभ्युपगमे द्वितीयायाः कारकसामान्यल-
क्षणार्थत्वोपपत्तेः योग्यत्वाद् गुणप्रधानभावावधारणे सति द्वयो-
र्विप्रकर्षतुल्यत्वद्योतनार्थं समानदेशोक्त्या लक्षणयैककालतोक्ता ।
एतदेव प्रश्नपूर्वमुपपादयति * कुत इति * विशिष्टत्वेन श्रुतो यो
ऽर्थो भावनां विशिनष्टयसौ विशिष्टो भूत्वा पश्चाद्विशिनष्टि न
त्वक्लृप्तविशेषणावस्थ इति कृत्वा ऽसौ विशेषणपूर्वं भावनां प्रविश-
तीत्युक्ते तदुपपादनार्थं भावनाया विधानार्हत्वात्कार्त्स्न्यसिद्धैव

विशेषणापेक्षत्वादविशिष्टेन च विशेषणे ऽपि कात्स्न्र्यासिद्धिरि-
ति वक्तुं विध्युक्ता कर्मव्युत्पत्त्या भावनोक्ता ।

यौगपद्यपक्षे पूर्वोक्तिः साहित्यलक्षणार्था भावनापि वि-
शिष्टमेव ग्रहं गृह्णाति न त्वगृहीतविशेषणमित्याह * गृह्णातीति *
स्नति त्वेकत्वान्वितस्य ग्रहस्य क्रियान्वये तस्यापि ग्रहवद्विध्यन्व-
यान्साक्षाच्च क्रियान्वयायोगेनाश्रयद्रव्यापेक्षायां पदश्रुत्यवगतग्र-
हान्वयित्वनियमादवघातभावनार्थस्यापि प्रोक्षणस्योलूखलमुसला-
र्थन्वयद्ग्राहर्थतोपपादिता भवतीति प्रकृतोपयोगमाह *एवं चेति *
एकाभिधानश्रुत्या चैकत्वस्य कारकविशेषणत्वावगतेः कारकत्व
स्य क्रियान्वयिरूपत्वेन कारकद्वारा क्रियाविशेषणत्वादेकपदश्रु-
त्योक्तग्रहविशेषत्वात्कारकैकत्वयोः साम्येन मिथो ऽन्वयायोगादै-
कत्वस्य कारकविशेषणता युक्तेत्याशङ्क्याह * प्रत्ययार्थत्वाच्चेति *
प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोः प्रत्ययार्थः प्राधान्येनेतिप्र-
त्ययार्थप्राधान्यस्मृते. लिङ्गसंख्ययोश्च प्रत्ययार्थप्राधान्यस्मृतेर्लि-
ङ्गसंख्ययोश्च प्रत्ययार्थत्वाविशेषेणैकस्मिन्पदे ऽनेकेषां प्राधान्यायो-
गादेकस्यैकव प्राधान्ये ऽवगते कारकत्वेन प्रयोजनवत्त्वात्प्राधान्य-
प्रतीतेर्लिङ्गसंख्यापेक्षया च प्रातिपदिकार्थप्राधान्यस्मृत्युपपत्तेः का-
रकमेव प्रधानमित्यर्थः । प्रयोजनवत्त्वसमुच्चयार्थश्चकारः ।

ननु प्राधान्ये ऽपि कारकत्वस्याद्रव्यत्वेनैकत्वाख्यगुणान्वय-
न्वायोगान्न तद्विशेष्यत्वं सम्भवतीत्याशङ्क्याह * सर्वं चेति * कुं-
कुमाभ्योष्टाश्रितस्यापि राजशेषत्ववत्संख्यादेर्द्रव्याश्रितस्यापि का-
रकं प्रत्यङ्गता न विरुद्धेत्याशयः । अतः कारकद्वारैकत्व-
स्य क्रियान्वयाद्युक्ता विधेयतेत्युक्तमुपसंहरति * तेनेति * वि-
शिष्टविधानाच्चावाक्यभेदापत्तेर्युक्तमेकत्वविधानमित्याह * तस्वे-
ति * पश्वेकत्वविवक्षाधिकरणन्यायेनैव दृढयितुमाह * वक्ष्य-
ति ईति *गौरवभयेनैकत्वस्यापि विधेयत्वाभ्युपगमे दशापवित्रा-
उ२।२।७ देर्विधेयत्वं स्यादित्यर्थान्तरन्यासेनाह * यथैवेति * ननूद्देश्यत्वे-
न ग्रहस्य क्रियया वशीकारायोगात्तक्रियाङ्गभूतेनैकत्वेन विशेष्यनिय-
म. सम्भवतीत्याशङ्क्याह * सर्वेषां चेति * एकक्रियाविशेषणत्व-
स्यान्योन्वनियमहेतुत्वादुद्देश्यस्यापि वाक्यार्थीभूतक्रियाविशेषण-
त्वाविरोधान्नियमोपपत्तिरित्याशयः । वाक्यभेदप्रसङ्गेनोद्देश्यविशेष-
णाविवक्षानुपपत्तिमाशङ्क्य वस्तुस्वभावकृतस्योद्देश्योपादेयत्वस्य श-
ब्दव्यापारविषयत्वाद्वाक्यभेदाप्रसक्तिसूचनार्थं यथा पशुमालभेतेति
भाष्यस्य दर्शयन्पूर्वपक्षमुपसंहरति * तस्मादिति * ननूपादेय-

स्यलिङ्गविवक्षादृष्टान्तोक्त्यैकत्वयुक्तवाक्योदाहरणस्योद्देश्यविशेषणमात्रोपलक्षणार्थत्वप्रतीतेः संख्यामात्रविवक्षोपसंहारो न युक्त इत्याशङ्क्याह * पुंपशुश्चेति * उद्देश्यविशेषणाविवक्षायां वाक्याभेदापत्तिलक्षणस्य न्यायस्याविवक्षासाधकस्य तुल्यत्वे ऽपि यथोभयपदानर्थक्यपरिहारायोभयत्वस्योद्देश्यान्तर्गतत्वेन विवक्षाशङ्काधिक्यात्तेहोदाहरणत्वं तथा स्वर्गकामस्योपादेयत्वशङ्काधिक्यात्संख्याविचारेण लिङ्गविचारपर्यवसानानुपपत्तेर्वाक्यभेदापत्तिलक्षणन्यायतुल्यत्वे ऽप्यनुदाहरणतेति सूचनार्थः प्रायशब्दः । स्वर्गकामपदस्योपादेयकर्तृसंख्यावाच्याख्यातान्तसामानाधिकरण्येनोपादेयार्थत्वशङ्का तर्ह्यत्रैव स्वर्गकामपदस्य फलसमर्पकत्वात्फलस्य चानुपादेयत्वात्कर्त्तुरेव च फलभागित्वात्सामानाधिकरण्योपादेयार्थत्वानुपपत्तिरित्येवं कस्मान्न निरस्तेत्याशङ्क्याह *माभूदिति* यथात्र्यधिकरणपौनरुक्त्यभयादुभयत्वस्योद्देश्यान्तर्गत्या शङ्का हविर्द्वयातिगमने च पञ्चशरावे ऽधिकार्य्येकहविरार्तिगमने ऽपि चेति (विवेकाय शङ्के निरसिष्यमाणात्र निरस्यते यथा स्वर्गकामपदस्योपादेयत्वशङ्का पुमानेव ज्योतिष्टोमादावधिकारी सर्वोपि वेति[1]) निरसिष्यमाणात्र न निरस्यत इत्यर्थः ।

सर्वेषां लक्षणत्वादविशिष्टं हि लक्षणम् ॥ १४ ॥

ग्रहजात्या द्रव्यं लक्षयित्वेति क्त्वाप्रत्ययेनाविधेयत्वसिद्ध्यर्थोद्देश्यत्वसूचनार्थत्वं भाष्यस्य द्योतयन्सिद्धान्तमारभते * व्यक्तीरिति * ग्रहोद्देशेन विधिं विना सम्मार्गस्य तद्गुणत्वासिद्धेर्ग्रहशब्दस्य पात्रवाचित्वे जात्या ग्रहणसस्कृतसोमवाचित्वे वादिशब्दोक्तेन संस्कारेणोपलक्षितानां प्रकृतापूर्वसाधनभूतानां ग्रहव्यक्तीनामुद्देश्यत्वस्य च विध्यपेक्षितत्वात्तच्छब्दव्यापारविषयत्वावगतेः प्रकृतापूर्वसाधनत्वस्य विधानापत्तेरविषयत्वाधीनत्वाद्विषयस्य च विधेयत्वायोगाद्ग्रहान्वयित्वेन सम्मार्गविधाने ऽपि ग्रहश्रुत्युक्तस्य ग्रहत्वस्यापूर्वसाधनांशलक्षणार्थत्वेनाविधेयत्वात्तल्लक्षितस्यापूर्वसाधनांशस्य विध्यन्तरविषयत्वेनाविधेयत्वादविधेयस्य च विधेयद्वारा ऽस्य चैकत्वस्य निष्क्रियत्वेन कारकतया विध्ययोगाविवक्षेत्याशयः । ग्रहस्योद्देश्यत्वसिद्ध्यै प्राधान्यं सम्मार्गस्य चाङ्गत्वमुपपादयन् श्लोकं व्याचष्टे * इह तावदिति * लक्षणत्वेन स्वरूपेण व्यक्तिलक्षणयाष्टवर्षब्राह्मणत्वेनोपनयनसंस्कार्यतयोद्देश्यतया ब्राह्मणव्यक्ते-

(१) अयं पा० २ पु० ना० ।

लक्षितायाः अप्युपनयनान्वयित्वेन विधेयत्वायाष्टवर्षत्वविशेष्यत्ववद्ग्र
हस्यैकत्वेऽपि सम्मार्गान्वयित्वेन विधेयत्वादेकत्वविशेष्यतोपपत्तेर्वि
ध्यनर्हापूर्वसाधनांशलक्षणाप्रदर्शनार्थैव चेत्युक्तम् । एवं च सति वैगु
ण्यपरिहारायापि सर्वे सम्मार्ष्टव्या इत्याह * तत्रेति * ग्रहैकत्व
स्य पश्वेकत्वसाम्यं पूर्वपक्षोक्तमपि वैगुण्यापत्त्यनापत्तिवैषम्यादेवायु
क्तमित्याह * यदि त्विति * प्रधानानां धर्मान्वये हि साहित्य-
स्याविवक्षितत्वात्प्रतिग्रहं सम्मार्गावृत्त्यवगतेस्तस्याः शास्त्रावृत्त्यधी-
नत्वाच्छास्त्रभेदोक्तिः । न्यायलभ्यत्वेनावृत्तेः शास्त्रानधीनत्वाद्देवद-
त्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामितिवद्बहुपदोपादाने प्रत्येकं वाक्य-
समाप्तेः कल्पनाभावेन शास्त्रभेदानुपपत्तेरपरितोषात्स्वमतेन शास्त्रै-
क्ये ऽप्यन्योन्यानपेक्षैकग्रहसम्मार्गानुष्ठानस्य तथाविधज्ञानभेदाधी-
नत्वात्तद्भेदमप्यभ्युपेत्य प्रतिग्रहं सम्मार्गाकरणे यस्य न क्रियते
उ० ३।४ तद्विषयं ज्ञानं बाध्येतेत्याह * अथापीति * ज्ञानस्याप्यैक्याभ्युप-
गमे तु प्रतिग्रहं सम्मार्गविषयत्वं ज्ञानस्य बाध्येतेति विशेषणाप्रधा-
नार्थत्वेन व्याख्येयम् । नन्वनु ज्ञानप्रामाण्यस्यानुष्ठानानधीनत्वाज्ज्ञानानु-
ष्ठानमात्रेण ज्ञानबाधापत्तिरित्याशङ्क्याह *अबाधिते त्विति* प्रतिग्रहं
सम्मार्गविषयज्ञानबाधाभावायान्यो द्वितीयादिः सम्मार्गसंस्कृतो न क्रि-
यते तस्मिन्ग्रहे वैगुण्यलक्षणप्रत्यवायाङ्गीकारापत्तेस्तत्परिहारार्थबाधो
ऽभ्युपेतव्य इत्याशयः । सामान्यावगमाद्विशेषानवबोधाच्चेति हे-
तुद्वयोक्तं संयोगतोऽविशेषात्प्रकरणाविशेषाच्चेति सर्वधर्मत्वहेतुद्व-
योपलक्षणार्थत्वं सूचयन्सिद्धान्तमुपसंहरति * तस्मादिति * सर्वे-
षां ग्रहाणां सम्मार्ष्टव्यत्वप्रतीतेरित्यर्थः । अविशिष्टं हि लक्षणमिति
सूत्रावयवस्यैकत्वाविशिष्टं समार्ष्टव्यानां व्यक्तीनां लक्षणं भविष्यती-
ति शङ्कोत्तरत्वेन व्याख्यानार्थं नन्विति शङ्काभाष्यं श्रुतस्याप्येकत्व-
स्याविवक्षितत्वादयुक्तमाशङ्क्याह * नन्विति * विशेषणत्वेनैकत्वस्य
विध्यपरिग्रहाख्यायामविवक्षायां विध्यनर्हत्वरूपकारणोक्त्यर्थं नैतदि-
त्यादिभाष्यं तात्पर्यतस्तावद्व्याख्यातुमारभते * अत्रेति * विधिप-
रिग्रहो ऽनुष्ठेयत्वोक्तो लक्षितः एकत्वस्याप्राप्तत्वाद्विध्यनर्हत्वे ऽपि
वाक्यभेदापत्त्या द्रव्ये क्रियायां वा तादर्थ्यबोधाख्यविनियोगानर्हत्वे-
न पुरुषार्थाननुबन्धित्वाद्विध्यपरिग्रहं वक्तुं विध्यधीनविनियोगोक्ति-
भ्यां तदर्हत्वे लक्षिते ऽनुष्ठानकाले विधिश्रुत्यधीनः पुरुष इत्यादिवा-
र्तिके ऽन्वयमात्रबोधाख्यविनियोगस्यानुष्ठानोपयोगनिरासादविरोधः ।
एतदेवोपपादयति * विहित इति * यस्मात् द्रव्यदेवतान्वयाद्यनु-
मिते ऽप्यप्राप्तत्वेन विध्यनर्हत्वाद्भावनायां च करणत्वेन विनियोगा-

र्हत्वात्तादर्थ्येन विधिना गृह्यते श्रुतो ऽपि वायव्यश्वेतालम्भादिः प्रा-
प्तत्वेन विध्यनर्हत्वात्सक्तवादिहोमश्च सक्तवाद्यर्थत्वेन विनियोगा-
नर्हत्वात्तादर्थ्येन विधिना न गृह्यते तस्मात्तत्र विधिपरिग्रहो कार्यैः
श्रुतैरश्रुतैर्वाक्यार्थैर्विधिर्विनियोगार्हत्वं अपेक्षणीयं इत्यर्थः। तस्मात्प्र-
प्रकृतिप्रत्ययश्रुत्याभिहितानां पदश्रुतिविनियुक्तानामपि चार्थानां मध्ये
को विधिविनियोगाभ्यां गृहीतः को वा नेति चिन्तायां तत्सिद्ध्यै
को विधिविनियोगार्हतया समर्पितः को वा नेति विचार्यमित्याह *
सादिति * पञ्चम्यर्थे तदित्यव्ययं वाक्यभेदापत्तिपरिग्रहहेतुत्वसू-
चनायैकवाक्योक्ति ग्रहैकत्वस्य विनियोगानर्हग्रहविशेषणत्वेन वि-
धिविनियोगानर्हत्वानिश्चयाद्विचारणा न युक्तेत्याशङ्क्य ग्रहाश्रितेनैक-
त्वेन सम्मार्गभावनां कुर्यादित्यादिवचनव्यक्त्यन्यथात्वाभ्युपगमेन त-
स्यापि विधिविनियोगार्हत्वप्रतिभानात्कात्र वचनव्यक्तिर्युक्तेति नि-
र्णयार्थं विचारणा युक्तेत्युक्तम् ।

ननु द्वितीयासंयोगेनैकत्वस्य लोकदृष्ट्या विधिविनियोगानर्ह-
त्वावगमाद्वचनव्यक्त्यन्यथात्वशङ्का न युक्तेत्याशङ्क्याह * मीमांसका
हीति * न्यायाभासावगतवचनव्यक्त्यन्तरनिरासेन लोकावगतशक्त्यनु-
सारिवचनव्यक्त्यवधारणा कार्येत्याशयः । ननु लोकावगतशब्दशक्त्य-
नुसारात्सम्मार्ष्टीति वर्तमानापदेशस्याविधायकत्वान्निर्निमित्तं विधि-
त्वचिन्ता नैव युक्तेत्याह * वर्तमानेति * अप्राप्तार्थत्वेनास्य वर्त-
मानापदेशत्वायोगेन तत्सारूप्ये ऽपि पञ्चमलकारत्वावधारणात्तस्य
लोकप्रयोगाभावे ऽपि लिङर्थे लेडिति लिङर्थे स्मृत्या विधौ साधु-
त्वाद्युक्तेयं चिन्तेत्याशयः । एवमपि भावनामात्रविधायित्वेन
स्मृत्युपपत्तेरलौकिकार्थान्तरविध्यन्वयित्वायोगान्न युक्तेत्याशङ्क्याह
* केवलेति * एव च सति भावनाविशेषणत्वेनार्थान्तरस्य विधे-
यत्वात्तस्यां च विनियोगात्सम्मार्गग्रहतत्संख्यानां मध्ये किं भाव-
नाविशेषणं किं वा नेति विधिविनियोगार्हत्वसिद्ध्यै विचार्यमित्या-
ह * सेति * सम्मार्गस्य करणत्वेन ग्रहस्य च कर्मत्वेन विशेष- ७२४।१
णत्वाद्भिन्नार्थत्वेन समुच्चयावगतेर्नेयं चिन्ता युक्तेत्याशङ्क्य सम्मा-
र्गस्यापि लोकप्रसिद्धेन धात्वर्थस्य भावनाकरणत्वरूपेण विशेषणा-
त्वमङ्गीकृत्येयं चिन्तेत्युक्ते तथाप्यद्रव्यकसम्मार्गभावनानुष्ठाना-
शक्तेः समुच्चयो ऽपरिहार्य इत्याशङ्क्य येन केन चिदपि द्रव्येणानुष्ठेय-
त्वस्योपपन्नताशक्यशब्देनोक्ता देशापवित्रमपि कस्मान्न चिन्त्यत
इत्याह * दशापवित्रेति * दशापवित्रमितिशब्दो यस्य केवलदशा-
अन्यावयवस्यार्थस्य स दशापवित्रशब्दो विवक्षितत्वेन निश्चितत्वा-

न्मार्गैः सह विचार्यत इत्युक्ते ग्रहकर्मत्वपक्षे दशापवित्रस्य करणत्वेन भिन्नविशेषणत्वात्समुच्चयोपपत्तेरविचार्यत्वे ऽपि सम्मार्गकर्मत्वपक्षे ग्रहस्य कर्मत्वायोगेन करणत्वापत्तेर्ग्रहो वा करणत्वेन भावनाविशेषणं दशापवित्रं वेति विचारो युज्यतैवेत्याशङ्क्य सम्मार्गस्यापि कर्मत्वपक्षे तस्याकर्मकस्यानुष्ठानायोगात्कर्मापेक्षायां तत्कर्मत्वेन ग्रहान्वयोपपत्तेरश्रुतकारणत्वकल्पनायोगाद्दशापवित्रस्य करणत्वाव्याघातोक्त्यर्थं सर्वेषामपि सम्मार्गादिषु कर्मत्वेन विशेषणभूतेषु दशापवित्रशब्दस्य करणत्वरूपार्थतुल्यत्वाच्च दशापवित्रशब्दवाच्यो ऽर्थो न विचार्यते सम्मार्गादीनां करणत्वेन।विशेषणरूपवचनतदर्थव्यक्तिभेदं तु अयं न विचार्यते अपि तु विचार्यतएवेत्युक्तम् । ग्रहतदेकत्वसम्मार्गाणां च मध्ये ग्रहसम्मार्गयोस्तावत्किं ग्रहएव भावनां विशिनष्टि सम्मार्गएवेति नियोगेन विशेषणत्वं किं वा ग्रहो वा सम्मार्गो वेति विकल्पो यथा ग्रहश्च सम्मार्गश्चेति समुच्चयो ऽथ ग्रहसम्मार्गयोः सम्बन्धः अथ समुदायो वा अथ वा ग्रहविशिष्टः सम्मार्गः सम्मार्गविशिष्टो वा ग्रह इत्यष्टपक्षीनिरूपणा कार्येत्याह* * ग्रहादीनां चेति * भावनाविशेषणत्वचिन्ताया विधेयसिद्ध्युपयोगितामाह * विशिंषन्तीति * सम्मार्गैकत्वयोरप्यष्टपक्षीमतिदिशति * सम्मार्गेति * ग्रहैकत्वयोरप्यतिदिशति * विचार्येति * तथा किं सम्मार्गविशिष्टो ग्रह एव भावनां विशिनष्टि एकत्वमेव वेत्यादिनियोगविकल्पादिरूपाष्टपक्षी किं ग्रहविशिष्टः सम्मार्ग एवैकत्वमेव वेत्यादिरूपा द्वितीया किं एकत्वविशिष्टो ग्रह एव सम्मार्ग एवेत्यादिरूपा तृतीया किं ग्रहविशिष्टं एकत्वमेव सम्मार्ग एव वेत्यादिरूपा चतुर्थी किमेकत्वविशिष्टः सम्मार्ग एव ग्रह एवेत्यादिरूपा पञ्चमी किं ग्रहविशिष्टमेकत्वमेव सम्मार्ग एव वेत्यादिरूपा षष्ठीति पूर्वोक्ताभ्यामिताभ्यो ऽष्टपक्षीभ्यो ऽन्याः षडष्टपक्ष्यो विचार्या इत्याह *तथेति* नन्वेकविधवचनव्यक्तिप्रतिभासेनैकत्वस्य द्वितीयेनैकद्वित्वार्थविध्यनर्हत्वविषयलोकदृष्टिप्रतिघाताद्विधेयत्वशङ्कायामपि ग्रहवदुद्देश्यत्वप्रसङ्गात्प्रत्युद्देश्यं वाक्यसमाप्त्या वाक्यभेदोपपत्तेर्विधेयता न युक्तेत्याशङ्क्योपपादनानर्हत्वस्यापि विध्यनर्हत्ववद्विचारान्तरेणासिद्धेर्यथाविध्यर्हानर्हत्वस्य विवेकाय भावनाविशेषणत्वं विचार्यं तथा ग्रहतदेकत्वयोः संहत्य प्रत्येकं वा सम्मार्गान्वय इति विवेकायोपादेयोद्देश्यत्वे अपि विचार्ये इत्याह*तथा किमिति *ग्रहैकत्वसम्बन्धसमुदायादीनामुद्देश्योपादेयत्वचिन्ताया निष्प्रयोजनत्वेना-

कार्यत्वे ऽपि ग्रहस्योद्देश्यत्वे तदेकपदोपादानानामप्युद्देश्यत्वापत्तिः किमुत संख्याया इति सूचनार्थैषामिति बहुवचन कस्मिन्पक्षे संहत्यान्वय. कस्मिन्वा प्रत्येकमित्यपेक्षायामाह * तत्रेति * क्रियाप्राधान्योक्त्येतरयोरुपादेयत्वं सूचितम् । साहित्योपपादनार्थं कृत्स्नक्रियाकरणात् कृतकृत्यत्वं भवत्युभयान्वितताया एव च कार्त्स्न्यसिद्धिरित्युक्ते ऽनुष्ठानावृत्त्यापि कार्त्स्न्यं सेत्स्यतीत्याशङ्क्य गुणानुरोधेन प्रधानावृत्त्ययोगसूचनार्थं सकृदित्युक्तम् । चशब्दो हेतौ । प्रत्येकं वाक्यसमाप्त्युक्त्या प्रत्येकमन्वयो दर्शितः। उद्देश्योपादेयत्वयोरपि विशेषणत्ववद्विचारमन्तरेणासिद्धेरुद्देश्यत्वे तावत्किं ग्रह एवोद्देश्यः सम्मार्गे प्रत्येकत्वमेव वा थ ग्रहो वैकत्वं वा ऽथ ग्रहश्चैकत्वं चाथ ग्रहैकत्वयोः सम्बन्धो ऽथ समुदायो ऽथैकत्वविशिष्टो ग्रहो ऽथ ग्रहविशिष्टमेकत्वमिति विशिष्टाष्टपक्षी विचार्येत्याह * तत्रापि त्विति * उपादेयत्वे ऽपि इदमेवाष्टपक्षी विचार्येत्याह * क्रियां चेति * एवं चानेकविधवचनव्यक्तिप्रतिभासे सति द्वितीयासंयोगेनैकत्वस्य विधानोपादानानर्हत्वविषयलोकदृष्टिप्रतिघाताद्विधेयोपादेयत्वशङ्का युक्तेत्याह * एवमिति * वाक्यभेदपरिहारायोपादेयतयेत्युक्तम् । न न्वक्रियाविशेषणस्य विधातुमशक्तेर्ग्रहे विध्ययोगात्सम्मार्गे च वाक्यभेदापत्तेः । प्राधान्येन द्वितीयाविरोधाच्च गुणत्वेन विध्ययोगाच्चैकस्योपादानं विधिर्वा सम्भवतीत्याशङ्क्याह * येन येनेति * तत्रैकस्तावत्पक्ष इत्यापूर्वपक्षवार्त्तिकोक्तेन येन येन प्रकारेण ग्रहे सम्मार्गे चैकत्वस्योपादानं विधिर्वा सम्भवति तंतं प्रकारं ननु सम्मार्ष्टीतिशङ्काभाष्येण द्रव्यविशेषणस्यापि विध्यर्हत्वसूचनादेवैकत्वं सम्मार्गे उच्यतइत्यनेन च सम्मार्गविशेषणत्वाशङ्कनात्पूर्वपक्ष्यापादयिष्यतीत्यर्थः । यच्छब्दानुसारात्तच्छब्दो ऽध्यावर्तनीय. । उद्देश्यत्वे ऽपि चैकत्वस्य द्रव्यनिरपेक्षस्य क्रियान्वयायोगात्प्रत्येकं वाक्यसमाप्त्यनापत्तेर्देशकालवच्चोद्देश्यत्वमात्रस्य विधेयत्वानापादकत्वाद्विधेयत्वाविरोध इत्याह * यथा चेति * प्रत्येकं वाक्यसमाप्त्यनापत्तिश्चशब्देन सूचिता । कथं तर्हि सिद्धान्तसिद्धिरित्याशङ्क्याह * यां यामिति * कथं दूषयिष्यतीत्यपेक्षायामुपादेयत्वं तावत्संख्याया दूषयति*प्राधान्यादिति*प्रकृतापूर्वसाधनत्वेन यथासंख्यं ग्रहस्योद्देश्यतया संख्यानाकाङ्क्षत्वात्स्वातन्त्र्येण च निष्क्रियत्वायोगेनैकत्वोपपादनस्य ग्रहोपादानाधीनत्वावगमान्नैकत्वोपपादनं शक्यमित्याशयः । विधिरप्यशक्य इत्याह * ग्रहं चेति * ग्रहे वैकत्वं विधीयेत सम्मार्गे वेति विकल्प्य ग्रहे तावदावृत्तिलक्षणवाक्यभेदापत्ते

त्यशक्यतामुपपादयति* न तावदिति * कथमावृत्त्याप्राप्तिरित्यपेक्षाया-
माह * इहचैमिति * विधायकावृत्तिं विना तावत्सम्बन्धद्वयासिद्धिं
७२६।१ विवृणोति * विदर्भादिति*ग्रहशब्दावृत्तिं विना सम्बन्धद्वयासिद्धिं
विवृणोति *संख्येति* सकृदुच्चारिताभ्यां क्रीणातितद्धिधायका-
भ्यां द्रव्यगुणान्वयवद्ग्रहविधायकाभ्यामपि सकृदुच्चारिताभ्यां
सम्मार्गान्वयद्वयासिद्धिर्भविष्यतीत्याशङ्क्याह * ग्रह इति * ग्रहस-
म्मार्गानिष्पाद्यत्वेन सम्मार्गक्रियाया अनिष्पादकानेकार्थवशी-
कारशक्तेरेकत्वान्वयमात्रेणोच्चारणपर्यवसानाद्वैषम्यमित्याशयः ।
कथमावृत्तिर्दोषेत्याशङ्क्याह * पुनरिति* अनावृत्तस्य च प्रत्ययस्यै-
कत्वविध्यशक्तेः सम्मार्गे ऽप्येकत्वविध्ययोगादविवक्षा सिद्धेत्याश
येनाह* सर्वेति* पृथक्भूताभिर्निष्कृष्टाभिर्वचनव्यक्तिभिर्ग्रहान्वयि-
त्वेन विधेयतया विशिष्टस्यैकत्वस्य तु विधातुमशक्यत्वावधारणा
र्विधिना ग्रहणं सम्भवतीत्यर्थः । तच्छब्दो हेतौ ।

ननु सर्वग्रहसम्मार्गे ऽप्येकत्वाविधाने गुणभूतस्यापि सम्मार्गस्य
लाघवार्थं सर्वेषां ग्रहणानन्तरं संहतानां हविरभिमर्शनादितिवत्स-
कृदनुष्ठानापत्तेः प्रत्येकमावृत्त्यर्थत्वेनैकत्वविध्यर्थवत्त्वसम्भवात् ग्र-
हान्तरसम्मार्गानिरासानापादकत्वेनैकत्वविधानस्य निरासो ऽनर्थ-
क इत्याशङ्क्याह * केन चित्त्विति * एकवेदिदेशे सन्नानां हविषां
सर्वेषामनुल्लिसमाधाण्येन सकृदभिमर्शनसम्भवादावृत्त्यभावे ऽपि
ग्रहणानन्तरं विहितस्य सम्मार्गस्य सर्वग्रहणप्रतीक्षणेन विक्षेपस्या-
शास्त्रीयत्वाद् गृह्यमाणस्य च सोमस्याधोव्यवसेकनिरासायानुष्ठे-
यसम्मार्गस्य सर्वग्रहणानन्तरमनुष्ठाने ऽधोवसेकनिरासाशक्तेर्नैष्फ-
ल्यप्रसङ्गादल्पपरिमाणेन च दशापवित्रेण सकृत्सर्वग्रहसम्मार्गाश-
क्तेर्न्यायादेवावृत्ते प्राप्तायाः प्रयोजनवत्त्वयोगाद् ग्रहान्तरसम्मार्ग-
निरास एवैकत्वविधिप्रयोजनमित्याशयः । ननु संस्कार्यत्वाद्वस्तुतो
ग्रहस्य प्राधान्येन वाक्यार्थत्वेन भावनायाः शब्दतः प्राधान्याद्ग्रह-
गतैकत्वादिविशिष्टसमार्गभावनाविधिप्रसूतेनार्थेन विन्ध्यतरेण ग्रहैक-
त्वविधिः सेत्स्यतीत्याशयेनाशङ्कते*तदेति*ग्रहार्थत्वेन विधिं विना
ग्रहस्य संस्कार्यत्वासिद्धेर्विशेषणविशेष्यत्वरूपगुणप्रधानत्वालो-
चनया भावनायाः प्राधान्ये ऽप्युपकार्योपकारकत्वलक्षणगुणप्रधा-
नत्वालोचनया ग्रहाङ्गत्वेनैव विधानादङ्गत्वे ऽपि च राजाङ्गभूतस्य
राजपुरुषस्य समासार्थत्ववद्वाक्यार्थत्वाविरोधाच्छब्दतो ऽपि स-
म्मार्गभावनायामङ्गत्वप्रतीतेर्विध्यन्तरविहितत्वाच्च ग्रहस्याप्रवृत्तप्र-
वर्तनस्वभावविधिविषयत्वायोगात्प्रत्यक्षविध्यन्तरप्राप्तस्यैव च सं-

मार्गसंस्कार्यत्वसम्भवे विशिष्टविधिप्रसूतग्रहविषयार्थविधिकल्प-
नायोगात् ब्राह्मणादेरिवोपयनसंस्कार्यतया ग्रहस्य सम्मा-
र्गसंस्कार्यतया विध्यनुपपत्तेर्ग्रहाविधानाच्च तथैकत्वविध्यनुपपत्ते-
र्न ग्रहतदेकत्वयोर्विधिः सेत्स्यतीत्याशयेन परिहरति * यदीति *
यास्य पूर्वपक्षिणो ग्रहत्ववदेकत्वस्यापि विवक्षेष्टा सा सेत्स्यतीति स-
र्वस्यापीत्यपिशब्दापकर्षेण योज्यम् । एवं नैतदस्तीत्यादि तस्मान्नैत-
र्त्किंचिदपि कर्तुं विवक्ष्यत इत्यन्तमुत्तरभाष्यं समुदायतात्पर्यतो व्या-
ख्यायावयवशो व्याचिख्यासुर्नैतदिति भाष्यावयवं श्रुतत्वादेकवचनं
विवक्ष्यतीति यच्छङ्कितं तन्नास्तीत्येवं व्याख्यातुमाह * तस्मा-
दिति * तस्मादुपादीयमानपश्वादिवदेवेति वार्त्तिकोक्तोद्देश्यविशे-
षणस्योपादेयविशेषणतुल्यताप्यत एवायुक्तेत्याह * अत इति *
श्रुतत्वमात्रस्य विधिग्रहणाख्यविवक्षाहेतुत्वाभावात्सौमारौन्द्रं घृते
चरुं निर्वपेच्छुक्लानां व्रीहीणामित्यादिभिरुपादेयविशेषणैर्नोद्देश्यवि-
शेषणं तुल्यमित्यर्थः एकत्वं हीत्यादिशङ्कानिरासोपपादनभाष्यं
ग्रहं विवक्ष्यति*क्रियां वेति*विकल्पनिरासार्थत्वेन व्याख्यातुं विक-
ल्पं तावदाह * द्रव्यस्येति * सम्मार्गविशेषणत्वं भाष्ये सशिष्य-
माणं धात्वर्थस्यापि भावनाविशेषणत्वाद् गुणानां च परार्थत्वाद-
सम्बन्धः समत्वात्स्यादित्यनेन न्यायेनैव विशेषणानन्वयाद्धात्व-
र्थानवच्छिन्नाया भावनाया विशेषणान्वयोक्त्यर्थं न तु सम्मार्गस्यै-
कत्वान्वयोक्त्यर्थमिति सूचनार्थं क्रिययोरित्युक्तं तथैकत्वं हीत्यादि-
ना द्रव्यएकत्वं नियम्यत इति शक्यमाश्रयितुमित्यन्तं द्रव्यान्वयपक्ष-
निरासायेत्याह * तत्रेति * अयोगव्यावृत्त्यैकत्व द्रव्यविशेष-
णम् अन्ययोगव्यावृत्त्यै वेति विकल्प्याद्यपक्षनिरासार्थत्वेनैकत्वं ही-
त्यादि न क्रियेतेत्यन्तं भाष्यावयवव्याख्यातुमाह * तद्धीति * द्वि-
तीयपक्षशङ्कार्थं तत्रेत्यादिभाष्यावयवं व्याचष्टे * तत्रेति * एतच्छ- ७२७।१
ङ्कानिरासार्थं नैतदिति भाष्यावयवमभिप्रायतो व्याख्यातुमाह * नै-
तदिति * सामान्यतः प्राप्तावस्थस्य विशेषश्रुतेः परिसंख्यार्थत्वे
स्वार्थहानपरार्थकल्पनप्राप्तबाधात्मकदोषत्रयापत्तेः सामान्यप्राप्तितः
प्राग्भावे सति विशेषश्रुतेः परिसंख्यौचित्यादसमाप्ते च वाक्ये
विध्यपर्यवसानेनैकवाक्यस्थत्वे पदयोः पौर्वापर्ये ऽपि पदार्थविधि-
पौर्वापर्यायोगान्नास्या पुनः श्रुतेः परिसंख्यार्थता युक्तेति प्राप्ता श्रूय-
त इति भाष्याद्वर्तमानोक्त्या सूचितं कस्मान्नेह विशेषश्रुतेः सामा-
न्यप्राप्तितः प्राग्भावः सम्भवतीत्याशङ्क्याह * तच्चेति * विरोधा-
दप्येकस्मिन्वाक्ये प्राप्तिपरिसंख्ये न युक्ते इत्याह * तच्चात्य-

न्नमेवेति * इह त्वेकपदस्थत्वात्सुतरां विरोध इत्याह * न-
चेति * श्लोकं व्याचष्टे * प्राप्तिपदिकेन हीति * अशक्यतामे-
वोपपादयति * अन्या हीति * अत्रापीत्यन्वयः एवमपि वा-
क्यैक्यात्पदैक्ये को विशेष इत्याह * तत्रैव हीति * प्रातिपदि-
कोक्तानामपि सर्वग्रहाणां क्रियान्वयप्राप्तेः कारकविभक्त्यधी-
नत्वात् क्षणैक्योक्तिः प्रत्यक्षश्रुतिप्राप्तपरिसंख्यायां च दोषत्र-
यपरिहाराशक्तेरानुमानिकप्राप्तिविषयत्वात्परिसंख्यायास्तत्रोपपत्तेरि-
त्याह * किं चेति * आनुमानिकप्राप्त्याश्रयतामेवोपपा-
दयति * निर्दोषत्वं हीति * क्लृप्तत्वेनानुमानिकस्याप्राप्तावर्थादे-
व गर्दभाभिधायिन्यां मन्त्रे पाठक्लृप्ताद्वाक्यान्मन्त्राश्वाभिधानी-
विशिष्टादानविधाने सति परिसंख्याया निर्दोषत्वं कल्प्यत इति इत्यु-
क्त विधित्वे निवर्त्तकत्वाख्यपरिसंख्यात्वायोगमाशङ्क्य फलादेवाश्री-
यत इत्युक्तं प्रातिपदिकाधीनात्मलाभत्वाच्च प्रत्ययस्य प्रातिपदिकप्रा-
७९८।२ प्तार्थपरिसंख्यातृतात्यन्तायुक्तेत्याह * समानेति * वाक्यपदैक्ययोः
परिसंख्यानुपपत्तिहेतुत्वं दृष्टान्तयोक्तम् । ननु मन्त्रस्य चेत्यादिभाष्या-
न्मन्त्रस्यादानान्वयाभावेन लिङ्गप्राप्तानुवादायोगादश्वाभिधान्या र-
शनाद्यादाने प्राप्तमन्त्रविशेषणत्वानुपपत्तेर्विधीयमानमन्त्रविशेष-
णत्वाद्गर्दभाभिधानीनिवर्त्तकत्वं युक्तम् । एकत्वस्य तु विधीयमानग्रह-
विशेषणत्वाभावात्प्राप्तग्रहविशेषणत्वेन च द्वितीयादिग्रहनिवर्तक-
त्वे दोषत्रयापत्तेर्न युक्ता निवर्त्तकतेति वैषम्यप्रतीतेरन्याहग्वैषम्या-
भिधानव्याख्या न युक्तेत्याशङ्क्य यथाश्रुतभाष्यमुपन्यासपूर्वं
दूषयितुमुपक्रामति * यत्विति * मन्त्रादानान्वये यदनेनादत्ते त-
दश्वाभिधानीमिति विशेषणसामर्थ्याद्गर्दभाभिधानीतो मन्त्रनिवृत्ति-
सिद्धेः स्वार्थहानपरार्थकल्पनाभावेऽप्यनुवादतः प्राप्तस्यादानमन्त्रा-
ङ्गत्वस्य बाधापरिहारान्नेयं वचनव्यक्तिरिष्टा मन्त्राच्चाश्वाभिधाव-
चनव्यक्तिप्रदर्शनस्य तावदन्यान्वयवत्वादादानान्वयाभावादप्रा-
प्तावस्थैव मन्त्रस्याश्वाभिधानान्वयविधानात्प्राप्तबाधपरिहारोप-
पत्तेरनेनाश्वाभिधानीमितीयमेव वचनव्यक्तिरिति यद्दर्शितं यश्चादा-
ने प्राप्तत्वादिति मन्त्रादानान्वयवचनव्यक्तिनिरासे कारणमुक्तमि-
त्यर्थः । प्रश्नपूर्वमिष्टानिष्टवचनव्यक्तिप्रदर्शनस्य तावदयुक्तत्वमुपपा-
दयति * कुत इति * । आददातिपरस्य विधायकस्याख्या-
तार्थानपेक्षमन्त्राश्वाभिधानान्वय पर्यवसानायोगसूचनायाश्वाभि-
धान्यामिति सप्तमी । कारणास्त्वयुक्तत्वमुपपादयति * आदाने चे-
ति * नन्वनुष्ठेयस्मृत्यर्थत्वान्मन्त्रस्य कारकस्य च क्रियाद्वारानुष्ठेय-

त्वादादाने प्राक् मन्त्रप्राप्तिः पश्चाद्रशनायामित्याशङ्क्याह* न चेति*
क्रियाया अप्यकार्मिकाया अननुष्ठेयत्वात्क्रियाकारकसंयोगस्यैवानु-
ष्ठेयत्वावगतेस्तद्वारा द्वयोरपि रशनादानाख्ययोः कर्मक्रिययोर्युगपन्म-
न्त्रप्रकाश्यत्वप्रत्ययायोगास्य रशनाम्प्रति विप्रकर्ष इत्यर्थः।प्रत्युत ब्रा-
ह्मणवाक्ये एवेमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यस्मि-
न्मन्त्रस्यादत्तातिधात्वर्थान्वये सन्निकर्षो ऽश्वाभिधानीनामन्वये विप्र-
कर्ष इति विवेकाद्दानरशने प्रति सान्निकर्षविप्रकर्षविशेष उपलक्ष्यत
इत्याह*सुतरामिति*वाक्ये तावद्विशेषं विवृणोति* पदेति*क्रियानि-
रपेक्षकारकान्वयाप्रतीतेर्नामान्वयःपदत्रयापेक्षत्वाद्विप्रकृष्टो धात्व-
र्थान्वयस्त्वश्वाभिधानीपदानर्थक्यप्रसङ्गात्तदन्वयं विना विधापर्यव-
साने ऽपि स्वरूपेण तावत्पर्यवस्यतीत्याशयः।विधायकप्रत्यये विवृणो-
तिप्रत्ययश्चेति।मन्त्रे ऽपि विपरीतविशेषमाह*मन्त्रो ऽपीति*हृग्रहोर्भः
छन्दसीति लोकाप्रयुक्तच्छन्दोविषयभकारयुक्ततया क्लेशावगम्यवा-
चकत्वेन प्रकृतिभागेनोक्तत्वाद्ग्रहणस्य न शीघ्रप्रतीतिरित्यर्थः।ननु सा-
मान्यवाचिनो नाश्वरशनाप्रतीतिः शीघ्रम्भवतीत्याशङ्क्याह*न चेति*
अपूर्वसाधनीभूतं विशेषएव मन्त्रविनियोगेन सामान्यविनियोगपूर्वक-
त्वाभावान्न विप्रकर्षइति श्लोकत्रयाशयः।नन्वादानान्वये लिङ्गप्राप्तर-
शनामात्रादानान्वयानुवादेनाश्वाभिधानीविशेषविध्यापत्तेस्त्रिदोष-
स्यापरिहार्यत्वप्रसङ्गान्मन्त्रस्याश्वाभिधान्यन्वय एव युक्त इत्याश-
ङ्क्याह* तस्मादिति* यस्मादुभयत्रापि मन्त्रप्राप्तिस्तुल्या तस्मादादा- ७२९।१
नान्वयानुवादो ऽश्वाभिधान्यन्वयविधिश्चेति वैषम्यमयुक्तन्तथानु-
वादाभावे ऽनुवादासिद्ध्यर्थादानान्वयप्राप्त्यभ्युपगमानिमित्तप्राप्तबाधा-
नापत्तेः न तद्वयनान्वयनिरासः क्रियानपेक्षकारकान्वयायोगाच्चा-
श्वाभिधान्यन्वयविधिरयुक्त इत्याशयः । ननु मन्त्रादानान्वयस्य
विधेयत्वे ऽश्वाभिधानीपदानर्थक्यापत्तेरश्वाभिधानीविधेये ऽनुवा-
द्यतावसीयतइत्याशङ्क्याह * किंत्विति * मन्त्रादानवदश्वाभि-
धान्या अपि विधेयत्वान्न तत्पदानर्थक्यापत्तिर्विशिष्टभावनाविधा-
नाच्चानेकार्थविध्यनापत्तिरित्याशयः । नन्वादानभावनायां मन्त्रस्य
लिङ्गादेव प्राप्तेर्न विधिः सम्भवतीत्याशङ्क्याह * नचेति * श्रुत्यैवा-
नुमितया प्राप्तिर्भविष्यतीत्याशङ्क्याह * रूपेति * प्रकरण-
गम्यसामान्यसम्बन्ध्यपेक्षत्वाद्रूपशब्दोक्तस्य लिङ्गस्य श्रुत्यनुमानवि-
लम्बोक्तौ प्रकरणोक्तिः अतो ऽप्राप्तावस्य मन्त्रस्य दाने विधिः
सम्भवतीत्याह * अप्राप्तेति * कथं तर्हि मन्त्राधिकरणे परि-
संख्येति सूत्रमित्याशङ्क्याह * परिसङ्ख्येति * एतदेव विवृणो-

नि * प्रयोजनमिति * प्रयोजनमितिगर्दभाभिधानीतो निवर्तना-
ख्यस्य विधेः फलं नास्तीत्यर्थः । नन्वपदार्थस्याप्यन्यव्यवच्छेदा-
ख्यमिदंवाक्यार्थपक्षवद्वाक्यार्थत्वसम्भवात्कस्माद्गर्दभाभिधानीतो म-
न्त्रनिवर्त्तनाद्वाक्यार्थ एव न भवतीत्याशङ्क्याह*नत्विति*निवृत्तिहेतु-
निर्वर्त्तनाख्यशब्दव्यापारलक्षणार्था निवृत्त्युक्तिः प्रवृत्तस्यैव निवर्त्यत्वे-
नाप्रवृत्तस्य निवर्तनायोगान्न वाक्यार्थो निवर्तनेत्युक्ते कथं प्रवृत्त एव
निवर्त्यते इति नियम इत्याशङ्क्याप्रवृत्त एव प्रवृत्तस्य स्वतो प्रवृत्त्यैव
निवृत्तकार्थसिद्धेर्निवृत्तिसिद्धेः निवर्त्तनानर्थक्यप्रसङ्गादित्युक्तं कथा-
लिङ्गाद् गर्दभाभिधान्यां मन्त्रप्राप्तेः प्रवृत्त एव प्रवर्त्त्यतामित्याशङ्का
पूर्वोक्ता ग्रामावस्थविधिस्मरणेन निरस्यति * नचेति * एवं च
लिङ्गाच्छ्रुतिकल्पनाभ्युपगम ऽपि कल्प्यमानैव पुनःश्रुतिः स्यात् न प्र-
त्यक्षेत्याह * शीघ्रेति * परमार्थतस्तु पश्चादपि श्रुत्यननुमा-
नाद्गर्दभरशनायां मन्त्रप्राप्तिर्न कदाचिदस्तीत्याशङ्क्याह*अश्वेति*शी-
घ्रापहृते ऽर्थेमन्थरानर्थक्यं लोकप्रसिद्ध्या दृढयति * सो ऽयमिति*
ननु लैङ्गिकश्रुत्यनुमानं प्रति बाध एवानन्तर्यात् प्रत्यक्षश्रुतेः फलं
स्यान्न तद्व्यवहिता गर्दभरशनातो मन्त्रनिवर्त्तनेत्याशङ्क्यालोचना-
त्पूर्वं गर्दभरशनातो मन्त्रनिवर्त्तनायां फलतां श्लोकपञ्चकेनोपपाद-
३३०.१ यितुमाह * प्रयोजनं त्विति * प्रयोजनं यदालोच्यते तदा यद्य-
श्वरशनामात्रे मन्त्रप्राप्तिमानुमानिकी श्रुतिः प्रत्यक्षश्रुतिवत्
कुर्यात्तनस्तत्प्रतिबन्धे ऽपि प्रत्यक्षश्रुत्या ऽनर्थक्यापरिहाराद्रशनाद्वये
मन्त्रप्राप्तिप्रतिबन्धस्य फलवत्त्वावगतेर्व्यवहिताया अपि गर्दभरश-
नातो मन्त्रनिवर्तनाया एव पारिशेष्यात्फलत्वं सेत्स्यतीत्युक्ते कीदृ-
गालोचनमित्यपेक्षायां भवत्येति सार्द्धश्लोकेन लैङ्गिकश्रुतिविरो-
धस्य प्रयोजनत्वासम्भवे ऽभिहिते लैङ्गिकश्रुतिनिरोधस्याशक्य-
त्वात्प्रयोजनत्वासम्भवो ऽभिहित इति भ्रान्तिनिवृत्त्यै सत्यमित्यनेन
प्रयोजनत्वासम्भवे हेतुरुक्तः किमर्थं त्वरया विहितस्तर्हीति-
प्रश्नस्योत्तरत्वेनैवमर्थं प्रत्यक्षाश्रुतिस्त्वरितेत्युक्तम्।एतदेव सार्द्धश्लो-
केन विवृणोति * केवलेति * प्रत्यश्रुत्येवानुमानिक्या केवला-
श्वरशनाभिधान्यां मन्त्रविधिर्न सिद्ध्येदिति कृत्वा यस्मात्प्रत्यक्ष-
श्रुतिराम्नायते तस्मात्पौनरुक्त्यात्प्रत्यक्षा श्रुतिरर्थवती गर्दभरश-
नातो मन्त्रनिवृत्त्यर्थत्वाच्चेति चकारार्थः चकारार्थोपपादनार्थं पू-
र्वोक्तं श्रुत्यनुमानं स्मारयति * तस्मादिति * फलतः परि-
संख्यायां च त्रैदोष्यं नास्तीति व्यतिरेकमुखेन तावदाह * यदा
त्विति * दार्ढ्यायायमेव परिसंख्यासूत्रार्थो ऽस्माभिस्तत्राप्युक्त

इत्याह * तदिदमिति * यथाश्रुतभाष्यदूषणमुपसंहरति * तत- ७३१।१
श्चेति * इत्यश्वाभिधानीमिति वचनव्यक्त्यन्तरं यदिह वाक्ये
भाष्यकृतात्र परिसंख्यासूत्रे चोक्तम् । तत्र यथाश्रुतत्वादरो न
कार्यः किं त्वादानभावनोत्तरकालीनो ऽरुणैकहायनीवन्मन्त्राश्वा-
भिधान्योः परस्परनियमोत्तरोपलक्ष्यवचनव्यक्त्यन्तरोक्तिरादानमा-
त्रान्वयनिरासार्थश्चत्याददत्तइति वचनव्यक्तिनिरास इत्येवं परिसं-
ख्यासूत्रस्थभाष्यवदिह भाष्यं नेयं प्राप्त्युक्तिश्च सम्भवमात्राभिप्रा
येति सूचनार्थो ऽतीवशब्दः । इह पुनरिति वैषम्योक्त्यर्थं भाष्यम-
र्थाभिधान्या मन्त्रविशेषणत्वाभावे वैषम्यसामञ्जस्यादयुक्तमाशङ्क्य
विदेहत्वायोगोक्त्यर्थत्वाद्विधेयविशेषणत्वनिरासस्य विधेयाश्वाभि-
धान्यैकत्वस्य वैषम्यमुक्तं भवतीत्येवं समाधातुमाह * नचेति *
ग्रहस्याविधेयत्वाद्विशेषणो विधिव्यापारायोगात्क्रये ऽल्पाक्तर-
स्यापि ग्रहशब्दस्याविधेयार्थत्वेनानभ्यर्हितत्वसूचनार्थं पर-
निपातः । यथेति दृष्टान्तभाष्यं तात्पर्यतो व्याचष्टे * य-
थेति * उपघातकारिश्वादिनिराकरणपरत्वाद्वाक्यस्य श्वा-
दीनां निवार्यत्वेन विधेयत्वात्कुतो नोपघातकारिविशेषणते-
त्याशङ्कां प्रश्नपूर्वकं निरस्यति * कुत इति * श्वादीनाम-
नुपयोगित्वान्निवारणासंस्कार्यत्वसूचनाय रक्ष्यत्वोक्तिः । अन्नाद्यौ-
पघातप्रतिबन्धार्थत्वात् श्वादिनिवारणायाः काकादिभक्षणोप-
घातस्य तुल्यत्वात्तस्यापि वारणावसीयत इत्याशयः । व्यवहारे-
णोपघातस्य प्राधान्यं सूचयितुं वृद्धश्लोकम्पठति*तथा चाहेति*
संख्यामात्राविवक्षायां त्विदमुदाहरण न युक्तमित्याशङ्कते * न-
न्विति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति* क्व तर्हीद-
मुदाहरणं युक्तमित्याशङ्क्याह*चमसेष्विति *चमससम्मार्गस्य पूर्वप-
क्षत्वेनास्थायित्वात्तत्रोदाहरणानुपपत्तिमाशङ्क्य स्थायिनि सिद्धान्ते-
पीदमुदाहरणं युक्तमित्याह * स्थितेति * क्वेत्यपेक्षायामाह *पशु-
प्रकरणाइति * संख्यामात्राविवक्षायान्तर्हि किमुदाहार्यमित्यपेक्षा-
यामाह *इह त्विति * एतदेव विवृणोति * वृषलैरिति * न चा- ७३२।१
त्रेति भाष्यविधायकाभावादपि ग्रहैकत्वान्वयविधिर्न सम्भवतीत्यु-
क्ते सम्मार्ष्टीतिशब्दो ग्रहैकत्वान्वयस्य विधायको ऽस्तीत्याशङ्कार्थं नन्वि-
तिभाष्यं संमृजिपरस्य ग्रहसम्मार्गान्वयविधायित्वेन ग्रहैकत्वान्वय-
विधायित्वायोगादयुक्तमाशङ्क्यैकत्वान्वितस्य सम्मार्गान्वयप्रतीतेर-
न्वयद्वयविधायकत्वेन व्याचष्टे * नन्विति * न हीत्यादि तथा द्वि-
तीयस्यापीत्यन्तम्भाष्यन्तात्पर्यतो व्याचष्टे * नेति * नञा न हीत्ये-

नावच्छिन्नप्रतिज्ञानार्थत्वेनच्छित्वा पदश्रुत्या ग्रहोद्देशेन सम्मार्गवि-
धिव्यवगते: श्रुतिविरोधाद्वाक्येन ग्रहैकत्वान्वयविधिर्न सम्भवतीति
[illegible]र्थत्वेनैतदित्यादिश्रुतीत्यनेन व्याख्यात: (न विरोधशङ्कानिरासार्थं
[illegible]सम्भवे चेति भाष्यावयवव्याख्यातुं न हीत्युक्तम् । अत इत्या-
दिभाष्य[illegible]त्रेत्यनेन व्याख्यात:) ननु सम्मार्ष्टीतिशङ्काभाष्यसू-
चिताविशेषणविशेषणस्यापि विधेयत्वोपपत्तिं दूषयितुमाविधीयमानवि-
शेषणमोक्तेति सूचनार्थं भाष्यव्याख्यामध्ये तत्रैकस्तावत्पक्ष इत्यादि-
पूर्व[illegible]क्तां ग्रहविशेषणस्याप्येकत्वस्य विधेयत्वोपपत्तिं दूष-
यितुमनुभाषते * यत्विति * शुद्धो ग्रह: क्रियाविशेषणं, एकत्वविशिष्टो
[illegible] विकल्प्याद्ये तावद्ग्रहविशेषणस्य क्रियानन्तर्गतौ विधेयता न युक्तो-
[illegible]विशेषणस्य क्रियानन्तर्गतौ विशिष्टस्य क्रियान्तर्गत्ययोगात्सं-
[illegible]या क्रियाविशेषणत्वाभावे शुद्धेनैव ग्रहेण क्रियाविशिष्टत्वाप-
[illegible]विशिष्टत्वेन विशिष्टत्वायोगादेकत्वविशिष्टग्रहविशिष्टसम्मार्गवि-
[illegible]नुपपत्तेरर्थापत्त्यमन्तरेणैकत्वविधानामिति यदुक्तं तदयुक्तमि-
[illegible] । न ह्येकत्वविशिष्टस्यापि ग्रहस्य क्रियाविशेषणत्वे द्रव्यावि-
[illegible] यावद्विधिप्रत्ययो न गच्छतीत्येवमेकत्वविधेर्निराकर्तुं शक्य-
[illegible]शुद्धग्रहविशेषणत्वपक्षे दूषणोक्तिरनर्थिकेत्याशङ्क्य
[illegible]ग्रहस्य क्रियाविशेषणत्वपक्षे ग्रहविशेषणस्यैकत्वस्य विधेय-
[illegible]माह * यद्वीति * न केवलं विशिष्टस्य विशेषणत्वान्य-
[illegible] पूर्वपक्षे किं तु क्रियाया विशिष्टेन ग्रहेण विशेष्य-
[illegible]पत्त्यापीत्यर्थान्यत्रनोक्तम् । भावनाविशेषणतैव तर्हि
[illegible]कत्वं सम्मार्गे उच्यत इत्यादिभाष्यव्याख्यानवेला-
[illegible]म् इत्युक्तम् । श्लोकोक्तस्य दूषणस्यार्थवत्तामुपपाद्य
[illegible] * शुद्धेति * विशिष्टत्वानिरासस्य प्रकृतोपयोगमाह
* [illegible] * [illegible] ग्रहमात्रेण संबद्धत्वेनतदुपपादयति * नहीति *
[illegible]विध्यनर्होरिति हेतुसूचनार्थं भावनानन्वितत्वे त-
[illegible]भावनापि ग्रहमात्रेणान्वेनतदुपपादयति * नचेति * ग्रह-
[illegible] अनन्वान्कथं तथाभूतस्याग्रहणमित्याशङ्क्य ग्र-
[illegible]विशेषणभूतेन व्यवहितत्वात्संख्याया भावनान्व-
[illegible]युक्तम् ।

[illegible]स्य भावनाविशेषणत्वे सति तुल्यकक्षत्वाद्विशेषणा-
[illegible]संस्कार्यत्वेन तु ग्रहस्य प्राधान्याद्विशे-
[illegible]त्वेनाप्यविरुद्धं विशेषणमित्याशङ्क्याह *
[illegible] * [illegible]स्य ग्रहविशेषणस्य भावनाविशेषणत्वस्याप्यपरि-

हार्यत्वापत्तेस्तस्य चोपरिष्टान्निराकरिष्यमाणत्वाद्भावनां प्रति विशेष्य-भूतस्यापि ग्रहस्य नैकत्वविशेषणमित्येकत्वं विशेषणमिति व्यवहि-तानुषङ्गेण योज्यं कथं ग्रहविशेषणमिति व्यवहितानुषङ्गेण योज्यं कथं ग्रहविशेषणत्वे भावनाविशेषणत्वापत्तिरित्याशङ्क्याह * न हीति * भावनानन्वितमेकत्वं विधातुमशक्यत्वान्न ग्रहं विशेष्टुं ७३३।१ शक्नोतीत्यविशिष्टमित्यकारप्रश्लेषेण व्याख्येयम् । विशेषणस्य विधेयत्वनिरासमुपसंहरति * तस्मादिति * अयं चेति भाष्यं व्याख्यातुं चशब्दसूचितम् विधीयमानविशेषणत्वोक्त्याक्षिप्तं वाक्यभेदाख्यं तावद्दोषमाह * तथा सतीति * क्रियासाधनत्वेन विधीयमानस्य द्रव्यस्य निर्विशेषणस्याशक्योपादानत्वेन साध-नत्वायोगाद् विशेषणस्यापि क्रियासाधनत्वोपपत्तेर्विधीयमानवि-शेषणत्वे सत्येकत्वस्य भावनाविधिना ऽऽकाङ्क्षितत्वाद्युज्येताक्षेपः अ-नुवाद्यस्य तु यथाप्राप्तग्राह्यत्वेन विशेषणानाकाङ्क्षणाद्भावना-विधिना द्रव्यविशेषणाक्षेपानुपपत्तेरविधीयमानद्रव्यस्य विशेषण-विधौ वाक्यभेदापत्तिरित्यविधीयमानविशेषणोक्त्या ऽऽशयो ऽनेन व्याख्यातः । विधीयमानस्य सम्मार्गस्यानूद्यमानग्रहविशेषकत्वा-योगाच्छुद्धस्य ग्रहस्यैकत्वविधावपि सर्वग्रहसम्मार्गो ऽपरिहार्य इत्येवमर्थत्वेनायं चेति भाष्यं व्याचष्टे * अभ्युपेत्यापि त्विति * प्रसिद्धसम्बन्धो हि शक्नोति लक्षयितुमित्यत्रत्यभाष्योक्तोपपत्ति-रनागतावेक्षणन्यायेन विशेषणं हि प्रसिद्धं भवति न च विधीयमा-नावस्थः क्रयः प्रसिद्ध इत्यरुणाधिकरणवार्त्तिकेनोक्तेति सूचनार्थं न हीत्युक्तम् । द्रव्यविशेषणत्वपक्षे विधिग्रहणनिरासमुपसंहर-ति * तस्मादिति * द्रव्यविशेषणभूतस्य तावदित्यन्वयः । क्रियाविशेषणत्वेनैकत्वस्य विधिग्रहणाशङ्कार्थमथेति भाष्यं व्या-चष्टे * अथेति * भावनां प्रति प्राधान्येन गुणत्वेन वैकत्वविधिरिति विकल्प्योभयथासम्भवप्रतिज्ञार्थं तत्रापीति भाष्यं व्याचष्टे * त-थापीति * आद्यकल्पासम्भवोपपादनार्थं न तावदिति भाष्यं व्याचष्टे * तत्रेति * पश्वेकत्वसाधनत्ववद्ग्रहैकत्वस्य संस्कार्यत्वं द्रव्यद्वारा भविष्यतीत्याशङ्कानिरासार्थं न चेत्यादिभाष्यं व्याचष्टे * न चेति *एकत्वस्य द्रव्यादन्यत्वात् । द्रव्याश्रिते संस्कारे कृते नै-कत्वं संस्कारः कृतो भवतीत्यनेनोपकरोतीत्यन्तभाष्यावयवे व्या-ख्याते चक्षुर्वृत्त्यधिष्ठाने कृतस्य संस्कारस्य तदाश्रितवृत्त्युपकारि-त्ववद्ग्रहे कृतस्य तदाश्रितैकत्वोपकारित्वं भविष्यतीत्याशङ्कानि-रासार्थं केन चिदित्यवयवं च व्याख्यातुं ग्रहस्येत्युक्तम् । एवं सति

यथा चक्षुर्ग्रहत्यर्थो ऽपि संस्कारो ऽधिष्ठाने वेदैर्विधीयते तथैकत्वं प्रयोजनतया द्वारीकृत्य ग्रहस्यैव विधीयते ततश्च पुनः श्रुतित्वाद्वै [illegible]फल्यापत्तिरित्यर्थः । एकग्रहसंस्कारस्यान्यतो प्राप्तेरपौनरुक्त्यमा[illegible]ङ्गानुष्ठानेत्युक्तम् । एकत्वसंस्काराविधाने ऽप्येकैकस्य ग्रहस्य संस्कार्यत्वात्संस्कार्यद्वयस्य वान्योन्यविशेषणाविशेषणविशेष्यभावायोगेनैकत्वस्य ग्रहविशेषणत्वायोगात् । द्वितीयादिनिवर्तकत्वानुपपत्तेर्नैकत्वविधिना ऽनुष्ठानान्यथात्वासिद्धिरित्याशयः । एकत्वस्य तु क्रियासाधनत्वेन विधानात्साधनानाञ्चैकक्रियान्वयि[illegible]कारनिमित्तान्योन्यविशेषणविशेष्यत्वोपपत्तेर्वैषम्यं वक्तुं पक्षे[illegible]कत्वस्य द्रव्येण सह विशेषणविशेष्यत्वरूपान्वया[illegible]त्वेनान्यत्वोक्तिर्व्याख्येया । द्वितीयकल्पस्योपन्या[illegible]मनस्यैवोपपादनार्थमथेत्यादि भाष्यं व्याचष्टे * एवमिति * [illegible]ति भाष्यं शङ्कोत्तरत्वेनावतारणपूर्वं व्याचष्टे * कथमिति * [illegible]द्रव्यपरिच्छेदद्वारा ऽऽरुण्यं गुणो ऽपि क्रयाङ्गमिष्यते [illegible] तु निष्फलस्य सम्मार्गं प्रत्यङ्गत्वायोगान्न तत्परिच्छेदद्वारैक[illegible] सम्मार्गाङ्गता युक्तेत्यर्थः । यद्यपीति भाष्यावयवं व्याचष्टे * [illegible] * नन्वित्याशङ्काभाष्यं व्याचष्टे * नन्विति * ग्रहस्य [illegible]र्थत्वात्सम्मार्गानिवर्तकत्वायोगमाशङ्क्य प्रासङ्गिको[illegible] । क्रियाङ्गभूतेन गुणेन परिच्छेद्यत्वस्य क्रियाङ्गभूतद्रव्यधर्मत्व[illegible]स्यानङ्गत्वेन परिच्छेद्यत्वायोगमाशङ्क्यानङ्गमपि साधनत्वे [illegible]द्रव्यं विशिंषदेकत्वं सम्मार्गस्योपकरिष्यतीति परि[illegible] भाष्यावयवं व्याचष्टे * प्रधानेति * एतदुपपाद[illegible] सूचयितुमाह * न हीति * न [illegible] उपकरोतीति नियमः किन्तूपकारिमात्राश्रित[illegible] । गुणस्य साक्षात्क्रियासाधनत्वाभावेनाङ्गपरिच्छेदद्वा[illegible]नस्याङ्गता युक्तेत्याशङ्क्याह * शेष[illegible] साक्षादेवाङ्गत्वे श्रुत्यावगते पश्चात्तत्सिद्धै द्वारकल्प[illegible] द्वारकल्पनोचितेत्याशयः । अत्रेत्यादि नैतत्कि[illegible] परिहारभाष्यं सङ्क्षेपतो व्याचष्टे * [illegible] * न ग्रम इति भाष्यावयवव्याख्यार्थं वस्तुवृत्त्या[illegible] ग्रहस्य प्राधान्यक्रियाङ्गगुणपरिच्छेद्यत्वरूपानेकार्थत्वो[illegible] । किन्त्वित्यादि न चैतदेवमित्यन्तावयवव्याख्यार्थं [illegible] । सम्बन्धद्वयविधौ वाक्यभेदापत्तेर्द्रव्येण [illegible] चैकवचनस्यासम्बन्ध इत्युपसंहारार्थं तस्मादित्यव-

यत्वं ग्रहस्यैकत्वान्वय एव स्याज्यो न सम्मार्गान्वय इत्यानश्रयादयु-क्तमाशङ्क्य ग्रहैकत्वान्वयस्य परपदार्थत्वेन व्यवहितत्वात्सम्मा-र्गश्च प्रति गुणत्वात्त्याज्यत्वोपपादनायां भयत्वस्य हविःशब्देन व्यवहितत्वाद्विशेषणत्वेन च गुणत्वात्त्याज्यत्वोक्त्यर्थमार्त्त्याधि-करणभाष्यं दृष्टान्तत्वेन पठितम्। एकत्वस्य क्रियाविशेषणत्व-पक्षे विवक्षानिरासभाष्यमाक्षेप्तुमारभते * न त्विति * कस्मि-न्प्रकारे ऽयमाक्षेप इत्याक्षेपविषयं प्रश्नपूर्वं विवृणोति * कथमिति * प्राधान्येन क्रियान्वयपक्षे तावदमूर्त्तत्वेनाशक्यसंस्कारत्वं प्राति पदिकार्थस्यापीष्टप्राधान्यविघातकारित्वाददूषणमाह * यत्ताव-दिति * जातेः साक्षात्संस्काराशक्तेः प्रतिमाद्वारा विष्णुपूजाव-द्व्यक्तिद्वारा संस्काराभ्युपगमेन परिहार संख्यायामपि तुल्य इ-त्याह * अथापीति * जातेर्व्यक्तौ समवायाद्व्यक्तौ कृतस्य सं-स्कारस्य जातावनौपचारिकतापि संख्यायां तुल्येत्याह * अथेति * संस्कारस्यापूर्वसाधननिवेशित्वाद् द्रव्यस्यैव चापूर्वसाधनत्वाद् ग्रहशब्देन लक्षणया द्रव्यस्यैव संस्कारविध्यभ्युपगमेनापि परिहारः संख्याया द्रव्योपादानोत्तरकालमव्यापारात्प्राक् व्यापृतायाश्चोप-योक्ष्यमाणसंस्कारानपेक्षत्वात्सम्मार्गस्य चोपयुक्तसंस्कारत्वा भावादेकवचनस्यापि द्रव्यलक्षणत्वापत्तेः संख्यायामपि तुल्य इत्याह * तथेति * जातेर्द्रव्याव्यतिरेकान्मूर्त्तत्वमाश्रित्य साक्षा-त्संस्काराभ्युपगमेनापि परिहारः संख्यायां तुल्य इत्याह * अ-थेति * यदपि न चेति भाष्येण द्रव्यादन्यत्वात्संख्याया द्रव्यद्वारा संस्कार्यत्वे न सम्भवतीति दूषणमुक्तं तदपीष्टविघातकारित्वाद् दूषणमित्याह * यदपीति * जातेः संस्कार्यत्वानभ्युपगमान्नेष्टवि-घातापत्तिरित्याशङ्क्य लक्षणाभयादेकवचनस्य द्रव्यलक्षणार्थत्वा-नभ्युपगमे नैकत्वस्य संस्कार्यत्वपक्षे प्रातिपदिकस्यापि द्रव्य लक्षणार्थत्वायोगमापाद्य तुल्यत्वोक्तिरिति त्वत्पक्षोक्त्या सूचितम्। श्रुत्यैव ग्रहप्रातिपदिकस्य व्यक्तिवाचित्वान्न मत्पक्षे जातेः संस्का-र्यत्वापत्तिरित्याशङ्क्या ऽऽकृत्यधिकरणविरोधेन निरस्यति * अथेति * विशिष्टाकारलक्षणोपाधिवशाद्भिन्नासु ग्रहव्यक्तिष्वेकशब्दप्रयो-गोपपत्तेर्न ग्रहत्वजातिरस्तीत्याशङ्क्याह * न चेति * प्रतिव्य-क्त्याकारवैलक्षण्यान्नाकारोपाधिकव्यक्तिवाचिता युक्तेत्यर्थः। आकारस्यापि संस्थानावयवसन्निवेशापरपर्यायस्य परिमाणवि-शेषात्मकतया गुणत्वेनामूर्त्तत्वाज्जातितुल्यत्वापत्तेर्नाकारवा-चित्वशङ्कोचिता प्रत्येकं गृह्यमाणानान्तद्वदेव संस्कारे सतीति

न्त्र वक्ष्यमाणवार्त्तिकालोचनया ग्रहशब्दस्य कर्मव्युत्पत्त्या गृह्य-
मागसोमवाचित्वावसायाद्देवतान्वितद्रव्यवाच्यैन्द्रवायवादिशब्द-
सामानाधिकरण्यादपि सोमवाचित्वस्यैव न्याय्यत्वाद् ग्रहादि-
सोमपात्रवाचित्वशङ्कानिरासमामर्थ्यप्रदर्शनार्थेदं वार्त्तिकं यद-
पि केन चित्प्रकारेण नोपकरोतीति विशेषणैकत्वार्थमपि ग्रहे
एव सम्मार्गस्य कार्यत्वात्तस्य च सम्मार्गविधिनैव सिद्धेरेकत्वे
सम्मार्गविध्यानर्थक्यं सूचितं तदप्यनुभाषणपूर्वं परिहरति *
यन्त्विति * संस्कार्यत्वे ऽप्येकत्वस्य स्वतन्त्रस्यासंस्कार्यत्वेन ग्रह
विशेषणत्वावसायादर्थाद् द्वितीयादिग्रहनिवृत्त्यवगतेरेकग्रहसंस्कार-
७३।४ विधिरित्याशयः । श्लोकं व्याचष्टे *अयमेवेति * पृथक्प्रयोजनोक्त्या
भेदोक्तिः प्रयोजनभेदार्थत्वेन व्याख्याता । गुणत्वप्रतिज्ञायास्त्वर्थैक-
त्वं सम्मार्गं प्रति गुणभूतमिति भाष्यकृतायाः प्रणीताधर्मदृष्टान्तेन
भाष्यकृतैवोपकार्याश्रिततयोपपादितत्वादयुक्तं दूषणमित्याह *
गुणत्वेति * क्रियोपकार्याश्रितेनैवाङ्गेन क्रियाया उपकर्त्तव्यमित्य-
स्यापि नियमस्याप्रामाणिकत्वाच्छेषाश्रितत्वनियमः सुतरामप्रामाणिक
इत्याह * मन्देति * एतदेव प्रश्नपूर्वमुपपादयति * कुत इति*
किमर्थो सम्बन्ध्यपेक्षाश्रितत्वे इत्याशङ्क्यासम्बद्धैः सम्बद्धानां
क्रियासम्बन्धायोगादित्यसम्बन्धिनो गुणताप्युपकार्याश्रितत्वायो-
पेक्षणीयेत्याशङ्क्याह * न त्विति* प्रधानस्याप्युपकारिता तावद्भा-
ष्यकृतैवोक्ता ऽभ्युपगम्यापि त्वनुपकारितामुपकार्याश्रितेनैवोपक-
र्त्तव्यमिति नियमाभावात्सम्बन्धिगतयोः शेषशेषित्वयोर्गुणस्य क्रि-
योपकारित्वापादकानापादकत्वविशेषाभावोक्तिः । ननु साधनस्य
नित्यस्योपादातुमशक्यत्वादनुपात्तस्य च साधनत्वायोगा-
त्परिच्छेदकसङ्ख्यापेक्षत्वेन संख्यान्वयो युक्तः प्रधानस्य तूपात्तस्यैव
संस्कारान्वयनोपादानार्थसंख्यानपेक्षत्वान्न संख्यान्वयो युक्त
इत्याशङ्क्याह * यथा चेति * होमायोपात्तस्यापि ग्रहस्य सं-
स्काराय किं संख्यस्योपादेयतेत्यपेक्षोपपत्तेः प्रधानस्यापि संख्या-
न्वयो युक्त इत्याशयः । ननु यावदुपात्तं तत्सर्वं सम्मार्ष्टव्यमिति
नियमाभावेन सम्मार्गान्वये ऽनवगतसंख्यत्वाद् ग्रहस्य संख्यापेक्ष-
णे ऽपि सम्मार्गस्य प्रकृतापूर्वसाधनीभूतग्रहविषयतया ज्ञातत्वेना-
नवगतसंख्ये ऽपि ग्रहे ऽनुष्ठातुं शक्यत्वात्संख्याया क्रियोपकारित्वानु-
पपत्तेः । क्रियाङ्गत्वं न सम्मार्गस्य प्रकृतापूर्वसाधनीभूतग्रहवि-
षयतया ज्ञातत्वेनानवगतसंख्ये ऽपि ग्रहे ऽनुष्ठातुं शक्यत्वात्संख्यायाः
क्रियोपकारित्वानुपपत्तेः । क्रियाङ्गत्वं न सम्भवतीत्याशङ्क्याह * ए-

तावच्चेति*क्रियाया अनुष्ठानानौपयिकत्वे ऽपि संस्कार्यपरिच्छेदद्वारा क्रियान्वयात्तदङ्गत्वसम्भव । प्रधानापेक्षयोः क्रियासम्बन्धकारणोक्त्या सूचितः । अभ्युपगम्यापि प्रधानसंख्यायाः साक्षात्क्रियानुपकारितां क्रियाङ्गत्वं सम्भवतीत्युक्तम । वस्तुतस्तु प्रधानमुपकुर्वन्त्याः संख्यायाः प्रधानोपकारिण्याः साहाय्यकरणात्साक्षादपि संख्यायाः क्रियाङ्गता वक्तुं शक्यत्याह * अपि चेति * श्लोकं व्याचष्टे * क्रियया हीति * फलसम्बन्धात्स्वामियुक्तं प्रधानस्येत्यत्र यजमानसंस्काराणां प्रधानाश्रितानामपि क्रियाङ्गत्वस्य वक्ष्यमाणत्वाद् ग्रहसंख्यायामपि च तन्न्यायसाम्यात्प्रधानाश्रितायाः क्रियाङ्गता न विरुद्धेत्याह * यजमानेति*यापि वस्तुशक्त्यालोचनया प्रधानाश्रितस्याप्येकत्वस्य क्रियाङ्गत्वसम्भवे ऽपि सम्बन्धद्वयविधौ वाक्यभेदापत्तेरेकत्वस्याविधेयतात्रोच्यत इत्यादिभाष्येणोक्ता सा पश्वेकत्वस्याप्यविधेयत्वापादकत्वेनेष्टविघातकरत्वादयुक्तेत्याह * एवमिति * अविशिष्टतामुपपादयति * तत्रापि हीति * ननु पशोरप्राप्तत्वेन विधेयत्वात्तद्द्वारा लिङ्गसंख्ययोः क्रियाविशेषणत्वेन विधेयत्वोपपत्तेर्विशिष्टविधानाद्वाक्यभेदः परिहर्त्तुं शक्यः ग्रहस्य तु प्राप्तत्वेनाविधेयसंख्याद्वारत्वानुपपत्तेः। स्वतन्त्रस्य च गुणस्य निष्क्रियत्वेन क्रियासाधनतया विध्ययोगाद् ग्रहसंख्याभ्यां विशिष्टायाः क्रियाया विध्यनुपपत्तेर्ग्रहोद्देशेन सम्मार्गं विधाय निवृत्तव्यापारस्य विधायकस्यावृत्तिं विना संख्याविधायित्वायोगादपरिहार्यो वाक्यभेद इत्याशङ्क्याह * अथापीति * स्वरूपेण होमाङ्गत्वेन च प्राप्तस्य सम्मार्गसंस्कार्यत्वेनाप्राप्तेर्विधेयत्वसम्भवाद्विशिष्टविधानादवाक्यभेदो ऽत्रापि तुल्य इत्यर्थः । ग्रहैकत्वस्योद्देश्यविशेषणत्वाच्चोपादेयविशेषणपश्वेकत्वतुल्यतेत्याशङ्क्याह * तादिहेति * उद्देश्यस्यापि विधिस्पर्शाद्विशेषणविवक्षा सम्भवतीति वक्ष्यमाणो ऽभिप्रायः।उपहासायान्यथा वेत्युक्तम । भिन्नप्रसरत्वेनोद्देश्योपादेययोर्युगपदेकक्रिया विशेषणत्वायोगाद्युगपदुभयविशिष्टक्रियाविध्यशक्तेर्वाक्यभेदो ऽपरिहार्य इत्याशङ्क्याह * अपि चेति * ग्रहोद्देशेनैकत्वविशिष्टक्रियाविधिर्नैवोभयविशिष्टक्रियाविधिर्नैवोभयविशिष्टक्रियाविधिःसङ्कर्षे वाक्यभेदापत्तिरित्याशयः । अविवक्षापादकोद्देश्यपदोक्तत्वेनाविवक्षितादेकत्वात्पदान्तरोक्तत्वेन दशापवित्रादेर्विशेषमाशङ्क्याह * यत्त्विति * नोद्देश्यपदमविवक्षापादकमिति वक्ष्यमाण एवाशयः । किञ्चिद्वैलक्षण्यमात्रेणातुल्यन्यायत्वाभ्युपगमे तुल्यन्यायविषयत्वाभावाच्च ७३६।१

क्वचिदनुमानाङ्गं दृष्टान्तो नाप्युपमानव्यवहाराङ्गमुपमा स्यादित्यर्थः।
विशेषालोचने चैकपदोक्तत्वाच्छीघ्रप्रतीतेर्वरङ्ग्रहैकत्वमेव वि-
वक्षितं स्यादित्याह * किञ्चेति * उद्देश्योपादेययोर्विशेषणावि-
वक्षायामविशेषमुपसंहरति * तस्मादिति * उद्देश्यस्याविधेय-
त्वात्तद्विशेषणस्य विधेयत्वायोगमाशङ्क्याह * अस्ति हीति * ग्रहा-
न्वयित्वेन सम्मार्गे विधीयमाने स्वरूपेणाविधीयमानोऽपि ग्रहः सम्मा-
र्गान्वयिरूपेण विहितो भवतीत्याशयः । इममेवाशयमाशङ्कापूर्वं
विवृणोति * अथेति * ग्रहस्य प्रकृतापूर्वसाधनत्वात्संस्कार्यत्वा
वगतेर्द्वितीयासंयोगावगतसंस्कारत्वसम्मार्गान्वयप्राप्तत्वा विध्यन-
र्हत्वे पशोरपि द्रव्यत्वेन साधनार्हत्वावगतेः साधनापेक्षयागान्वय
प्राप्तत्वा विध्यनर्हत्वोपपत्तिरिति पर्यनुयोगसाम्यमाह * अथ ज्योतिष्टो-
म इति * पशोः सामान्यतः साधनापेक्षक्रियान्वयप्राप्तावपि यागा-
ख्यक्रियान्वयाप्राप्तेर्विध्यर्हत्वे ग्रहस्यापि सम्मार्गाख्यसंस्कारवि-
३३५ शेषान्वयाप्राप्तेर्विध्यर्हत्वोपपत्तिरिति परिहारसाम्यमाह * अथा-
न्यथेति * सम्मार्गस्य ज्योतिष्टोमान्तर्गतत्वात् ज्योतिष्टोमान्तर्गत
सन्निहितग्रहोद्देशेन विध्युपपत्तेर्ग्रहस्य सम्मार्गान्वयप्राप्तिसम्भवा
द्विध्यनर्हत्वे यागस्यापि लोकान्तर्गतत्वाल्लोकान्तर्गतत्वापादितस-
न्निधानपशूद्देशेन विध्युपपत्तेः । पशोरपि यागान्वयप्राप्तिसम्भवाद्वि-
ध्यनर्हत्वापत्तिरिति परिहाराशक्तिसाम्यमाह * अथ सम्मार्गस्ये-
ति * सन्निध्यविशेषः शक्यं हीत्यनेनोक्तः । यः पशुरिति लोक-
प्राप्तपशुस्वरूपानुवादेऽपि यागानुष्ठानापाद्यत्वलक्षणोपादेयत्वोपपत्ते
र्विधेयत्वं युक्तं ग्रहस्य तु संस्कार्यत्वेनानुपादेयत्वान्न युक्ता विधेय-
तेति वैषम्यमाह * उद्दिश्यमानत्वादिवेति * विध्यनुवादशब्दौ कर्मव्यु-
त्पन्नौ । चत्वारोऽपि विध्यादिशब्दा भावप्रत्ययाध्याहारेण व्याख्ये-
या । अत्यन्तभेदमेवान्वयव्यतिरेकाभ्यामुपपादयति * अथाही-
ति * देशकालयोरनापाद्यत्वेनोद्देश्यत्वसद्भावेऽप्यप्राप्तत्वेनानु-
वाद्यत्वाभावात्पश्वालम्भस्य वा चाद्यत्वलक्षणोपादेयत्वसद्भावेऽपि
ग्रमिता पशुकुण्डे गृह्णातीति ग्रहणविधिप्राप्तत्वेन विधेयत्वाभावाद्वि-
धेयानुवाद्यत्वयोरुद्देश्योपादेयत्वयोरपि भेद इत्यर्थः । ननु देश-
कालयोरुद्देश्यत्वेऽपि अङ्गत्वेन क्रियाविशेषणत्वाद्विधेयत्वोपपत्तेर्ग्र-
हस्य तु प्राधान्याद्विशेषणत्वानुपपत्तेर्विशेषणत्वाभ्युपगमे चैकत्व
वद्ग्रहस्याप्यङ्गत्वापत्तेर्न युक्ता विधेयतेत्याशङ्क्याह * तस्मादिति *
प्रधानस्यापि राजवद्विशेषणत्वाविरोधाद् ग्रहस्यापि क्रियाविशेष-
णत्वेन विधेयत्वोपपत्तेः । तत्परिच्छेदद्वारा क्रियासाधनत्वेमैकत्व-

विधिसम्भवो दृष्टान्तव्याजेनोक्तः । अविरोधोपपादनाबाधादि-
त्युक्तम् । यदा च ग्रहस्य विधेयतोपपादिता तदा तदेकपदोपादाना-
दप्येकत्वस्याविधेयता न युक्तेत्याह * किञ्चेति * कर्मव्युत्पन्नौ
विध्याविधिशब्दौ । पूर्वार्द्धं व्याचष्टे * एकस्मिन्नत्रेति * विधानाद्धे-
तोरनुष्ठानं प्रति विषयत्वेनाश्रीयते इत्यर्थः । उत्तरार्द्धं व्याचष्टे * न
चेति * स्वातन्त्र्यानियतयौगिकत्वात्प्रकृतिप्रत्यययोः प्रकृत्यर्थ
विशिष्टप्रत्ययार्थरूपैकार्थगमकत्वेनैकपद्ये ऽपि प्रात्यात्मिकार्थभेदात्प-
दान्तरताप्युपपन्नेत्याशयेनाशङ्कते * गमकत्वादिति * अतिप्रस-
ङ्गापत्तेः पदशब्दस्य यौगिकत्वं निरस्यति * नेति * वर्णसंघत्वे ऽपि
गमकत्वविशेषणो ऽतिप्रसङ्गमाह * एकस्मिन्नपि चेति * लोचन-
यापि पदशब्दः प्रकृतिप्रत्ययसङ्घवाच्येवेत्याह * पदमिति * पदा-
न्तरत्वाभ्युपगमे ऽप्येकप्रत्ययोक्तयोः कर्मत्वैकत्वयोर्विधेयाविधेय-
त्ववैषम्यं न युक्तमित्याह * अभ्युपेत्यापि त्विति * उक्ताया अपि सं-
ख्याया विध्यनन्वयादविवक्षा भविष्यतीत्याशङ्क्याह * अविवक्षाया-
मिति * एतदेवोपपादयति * यावदिति * अन्वयश्च वाक्यार्थ इत्य- ७३८।५
र्थ इत्याशय. । ततश्चेह ग्रहसंख्याविध्यनन्वये विभक्तेरश्रुतेः समत्वा-
पत्तेः कर्मत्वस्यापि विध्यनन्वयप्रसङ्गाद् ग्रहस्य संस्कार्यत्वैव न स्या-
दित्याह *तदिति* द्वितीयां विनापि प्रयोजनत्ववत्प्रयाजशेषव-
त्संकार्यत्वसिद्धिं शङ्कते * प्रयोजनवत्त्वादिति * सामान्यक्रियान्व-
यपूर्वकत्वाद् गुणप्रधानत्वरूपविशेषान्वयस्य कारकविभक्त्यभावे
सामान्यतो ऽन्यतो ऽन्वयाभावाद् विशेषान्वयासिद्धिरित्याशयेन निर-
स्यति *नेति* एतदेव विवृणोति *न हीति*अतः कर्मत्वस्यात्याज्य-
त्वात्तदर्थे विभक्त्यादरापत्तेः संख्यात्यागायोगान्न सर्वसमार्ग
सिद्धिरिति सिद्धान्ताक्षेपमुपसंहरति * तेनेति * कर्मत्वप्रतीत्यर्थे
विभक्त्यादरे ऽप्येकत्वं त्यक्ष्यतइत्याशङ्क्य विभक्त्यर्थैकदेशात्त्याज्य-
त्वोक्तिः । अशक्यत्वमेव श्लोकत्रयेणोपपादयति * तथा हीति *
एकपदोक्तस्य ग्रहस्यैकप्रत्ययोक्तस्य च कर्मत्वस्याविवक्षयेत्यर्थः ।
सदसत्त्ववच्छ्रुताश्रुतत्वकल्पनैकस्य विरोधान्न सम्भवतीत्युक्ते श्रुत-
स्यापि शब्दस्य कश्चिदर्थो विधिनास्याविवक्षयेत्यर्थः । सदसत्त्वव-
च्छ्रुताश्रुतत्वकल्पनैकस्य विरोधान्न सम्भवतीत्युक्ते श्रुतस्यापि श-
ब्दस्य कश्चिदर्थो विधिना ग्रहीष्यते कश्चिन्नेत्याशङ्क्य श्रुतेत्युक्तम् ।
तथा शब्दातिदिष्टं विरोधं द्रढयितुमर्द्धं कुक्कुट्याः पच्यतामर्द्धं प्रसवाय
धार्यतामिति लोकप्रवादायानं पाशुपतं वाक्यं नैकस्यःवस्तुनो ऽर्द्धजर-
तीयं कथमनेन कुक्कुट्यर्द्धस्य वा पाकः प्रसवायार्द्धधारणमिति वा-

र्त्तिकालोचनया हृष्टान्तितं गम्यते । ङ्यापोः संज्ञाछन्दसोर्बहुलमिति उत्तरपदसमासे संज्ञायां ङीपो ह्रस्वविकल्पस्मृतेः ह्रस्वत्वाविरोध. । सिद्धान्तमाक्षिपन्तावत्समाधातुमाह * अत्रेति * प्राधान्येनैकत्वस्य क्रियान्वये ग्रहं सम्मार्ष्ट्येकं सम्मार्ष्टीति प्रत्येकं वाक्यसमाप्त्यान्योन्यानपेक्षयोर्ग्रहैकत्वयो क्रियान्वयोपपत्तेः एकत्वविवक्षायामपि सर्वग्रहसम्मार्गप्रसङ्गान्निष्फलाविवक्षा गुणभूतत्वेन त्वेकत्वविवक्षा द्वितीयाविरोधान्न युक्तेत्यर्थः । पूर्वार्द्धं व्याख्यातुमुपक्रमते * यदा हीति * विधायकावृत्तिलक्षणो पर इति तावच्छब्दार्थः । ननूद्देश्ययोरन्योन्यानन्वयाद्वाक्यभेदे सत्युपादेययोरप्यन्योन्यानन्वयादरुणया क्रीणात्येकहायन्या क्रीणातीति प्रत्येक-

७२०॥ वाक्यसमाप्तिलक्षणा वाक्यभेदापत्तिरित्याशङ्क्याह * उपादेयेति * उपादेयानां साधकत्वेन क्रियान्वयात्तस्याश्चानेकसाधनसाध्यत्वेनैकैकसाधनान्वयमात्रेणापर्यवसानात्समुदाये वाक्यसमाप्तेर्न वाक्यभेद इत्याशयः । ननु ग्रहैकत्वयोः साधत्वेनानन्वये ऽपि वस्तुतः साधनत्वस्यापि सद्भावेन क्रियां प्रति गुणत्वात्तद्वशीकारेणान्योन्य नियमस्तावत्सेत्स्यतीति समुदाय एव वाक्यसमाप्तेर्न वाक्यभेदो ऽपीत्याशङ्क्याह * अस्मिन्नेव चेति * क्रियोद्देशेन विनोपकारित्वे ऽप्यकृत्वायोगाच्चोद्देश्यत्वपक्षे क्रियावशीकारः सम्भवतीत्यन्योन्यानपेक्षयोर्ग्रहैकत्वयोः कर्मत्वरूपकर्त्तव्यत्वावगमात्प्रत्येक वाक्यसमाप्तिर्दु.परिहरेत्याशयः । नन्वेकत्वस्य द्रव्यानपेक्षस्य संकर्त्तुमशक्यत्वान्न तन्मात्रान्वये वाक्यसमाप्तिः सम्भवतीत्याशङ्क्याह * तदिहेति * ग्रहस्य निर्ज्ञातदशसंख्यत्वात् संस्कारान्वयस्य वा ऽपूर्वसाधनत्वप्रयुक्तत्वेन यथाप्राप्तस्यैव संस्कारान्वयावगतेः संख्यानपेक्षत्वादन्यतराकाङ्क्षामात्रेण चान्योन्यान्वयायोगात्संख्यान्तरावरुद्धस्य चैकत्वान्वयायोगेनैकत्वाकाङ्क्षयापि ग्रहस्याकाङ्क्षोत्थापनायोगाद् ग्रहानपेक्षस्यैकत्वस्य संस्कार्यत्वोपपत्तिरित्याशयः । एवं सति स्वतन्त्रस्यैकत्वस्य संस्कर्त्तुमशक्यत्वात्कस्मिंश्चिदाश्रयभूते द्रव्ये ऽनुक्ते ऽप्यपेक्ष्यमाणे यद्येकपदोक्तत्वाच्छीघ्रं बुद्धिस्थत्वाद् ग्रह एवाश्रयोऽभ्युपगम्येत ततो द्वयो. संस्कार्ययोस्तन्त्रेण संस्कारे सम्भवत्यन्यथायोगादन्योन्यसापेक्षयोः संस्कारकरणापत्तेरन्योन्यानपेक्ष संस्कारान्वयेन यत्प्रत्येकं संस्कार्यत्वलक्षणं प्राधान्यं शास्त्रेणावधृतं तद् बाध्येतेत्याह * तत्रेति * अविहितसम्मार्गद्रव्यान्तराश्रयत्वाभ्युपगमे तु किं तदित्यज्ञानादव्यवस्था स्यादित्याह * अथेति * अज्ञानमेवोपपादयति * न हीति * सर्वस्य स्वरूपेणैकत्वादन्यापेक्ष-

यां चानेकत्वाद्न्यानपेक्षत्वेनैकत्वावधारणहेतोश्चैकः पुरुषो ऽस्मिन्न गृह्यतिवत्कस्य चिद्वच्छेदकस्याभावाद्यथा ग्रहत्वोपलक्षितं द्रव्यं निर्द्धारितरूपं प्रकरणे दृश्यते नैवमेकत्वोपलक्षितमित्यर्थः । तत्प्रकरणस्थत्वविशिष्टमेकवचनान्तशब्दचोदितत्वमेकत्वेन संख्येयस्य द्रव्यस्यावच्छेदकं भविष्यतीत्याशङ्कते * नन्विति * चमसाध्वर्यून्वृणीत इत्याद्युत्पत्तौ बहुवचनान्तशब्दचोदितानां चमसाध्वर्य्वादीनां चमसांश्चमसाध्वर्यवे प्रयच्छति तान्स वषट्कर्त्रे हरतीत्याद्येकवचनान्तशब्दविनियुक्तानामुत्पत्त्युक्त्या व्यावृत्तिः । यूपं छिनत्त्यौदुम्बरी भवति सदो मिनुयादित्याद्येकवचनान्तशब्देनोत्पत्तौ ज्योतिष्टोमप्रकरणचोदितानामपि बहुत्वात्किमेकं सम्मार्ष्टव्यमिति निर्द्धारणाशक्तेर्नेदमप्यवच्छेदकं सम्भवतीति परिहरति * नेति * सर्वेषामेकवचनान्तेन शब्देनोत्पत्तौ ज्योतिष्टोमप्रकरणे विहितानां द्रव्याणां सम्मार्गो ऽस्त्वित्याशङ्कते *अथेति * परिहरति * नेति * विकल्पेन सम्मार्गः समुच्चयेन वेति विकल्प्याद्यकल्पे तावच्चोदितहानिमाह * तथा हीति * बहुष्वपि पुरोडाशकपालेषु सत्स्वेकेनैव तुषोपवापे ऽपि यथा न चोदितहानिस्तथेहापीत्याशङ्क्याह*गुणेनि * द्वितीयकल्पे तु चोदितहानिरचोदितकरणं चेत्याह * यदीति * ननु युगपत्सर्वं सम्मार्गे संख्यान्तरोपजनः स्यादिह त्वेकत्वोद्देशेन विधीयमानस्य सम्मार्गस्यैकत्वान्वयित्वेनानुगतेर्यौगपद्ये च तद्रूपानुष्ठानासिद्धेः प्रत्येकं सम्मार्ष्टव्यत्वावगमान्न संख्यान्तरोपजननापत्तिरित्याशङ्क्याह * वीप्सार्थश्चेति * अश्रुतवीप्सार्थे कल्पनापत्तेर्न प्रत्येकानुष्ठानं विधातुं शक्यमित्याशयः । ७४०।१
नन्वेवं सति ग्रहस्यापि प्रत्येकं सम्मार्गविधिसिद्ध्यै ग्रहं ग्रहमिति वीप्सार्थकल्पनापद्येतेत्याशङ्क्य प्रत्येकं सम्मार्गस्य विद्ध्यनपेक्षित्व सूचनार्थं सर्वाणि हवींष्यमृशतीत्याभदौ हविष्ट्वादिजात्युद्देशेनाभिमर्शनादिसंस्कारविधौ युगपदनेकसंस्कृतावपि न जात्यन्तरापत्तिर्येन प्रत्येकमावृत्त्याभिमर्शनादि विधीयते क्वचिद्वा शुक्लादिगुणान्तरोद्देशेन युगपदनेकत्र सम्भवदनुष्ठानावेक्षणादिसंस्कारविधौ युगपदनेकसंस्कृतावपि न गुणान्तरापत्तिरित्याह * जातीति * सामान्यन्यायेन युगपदनेकग्रहसम्मार्गे ऽपि जात्यन्तरानापत्तिमुक्तामप्यबुध्यमानं प्रति विशेषनिष्ठोक्त्याक्षरत्रयन्यूनपादत्रयेण विवृणोति * तथा हीति * यथा युगपदनेकद्रव्यान्तरसम्मार्गे संख्यान्तरोद्भवस्तथा युगपदनेकग्रहसम्मार्गे ऽपि ग्रहत्वाज्जात्यन्तरस्योद्भवो नास्तीत्यर्थः । याज्ञिकानां तर्हि प्रतिग्रहं सम्मार्गावृत्तिर्विरुध्येतेत्याह *

इनीति * प्रत्येकं गृह्यमाणानामिति वार्त्तिकवक्ष्यमाणप्रतिग्रह-सम्मार्गावृत्तिहेतुसूचनार्थेतिकरणः । एवमपि सकृदनेकग्रहस-म्मार्गानुष्ठानस्य जात्यन्तरानापादकत्वेन ग्रहसंस्कार्यत्वव्याघातक-त्वाभावाद् ग्रहस्य संस्कार्यत्वनिर्द्धारणार्थविधेः प्रतिग्रहं सम्मा-र्गावृत्तिविधायित्वाभावे ऽपीत्यध्याहृतापिशब्दकैवंशब्दार्थः । ए-नीत्यस्मिन्नर्थे समर्थादिणः क्विबन्तात्सप्तम्याम् इतीति रूपंसकृत्स-र्वग्रहसम्मार्गस्य जात्यन्तरानापादकत्वाद् ग्रहसंस्कार्यत्वाव्याघा-तकत्वमात्रपरामर्श्येवंशब्दः । एवं युगपत्सर्वसम्मार्गस्य जात्य-न्तरानापादकत्वेन ग्रहार्थत्वाबाधकत्वादावृत्तिमविधायापि इति गच्छ-तिः पर्वस्यत्यपि भिन्नकालग्रहणानन्तरकालत्वादल्पपरिमाणदशा-पवित्रसाधनकत्वाच्च सम्मार्गस्य सकृत्सर्वत्रानुष्ठातुमशक्तेः सा-मर्थ्यादापन्नावृत्तिर्नैव विरुध्यत इत्यर्थः । एवं तर्ह्यनेनैव न्यायेन सर्वेष्वप्येकत्वयुक्तेषु द्रव्यान्तरेषु संस्क्रियमाणेष्वावृत्तिसिद्धेरनुष्ठान वेलायामेकैकस्यैव सम्मार्गान्वयदर्शनात्संख्यान्तरोपजननिमि-त्तचोदितहान्यचोदितकरणापत्तिलक्षणविरोधानापत्तेस्तत्परिहारार्थं प्रत्येकमावृत्त्यानुष्ठानविधिसिद्ध्यै वीप्सार्थकल्पनानापत्तिरित्याशङ्क-ते * नत्रेति * वीप्सार्थकल्पनापत्तिभयात्प्रत्येकानुष्ठाना-विधाने ऽपि सामर्थ्यात्प्रत्येकानुष्ठानसिद्ध्या संख्यान्तरोपजननिमित्त श्रुतहान्यश्रुतपरिग्रहापत्तिविरोधपरिहाराभ्युपगमे सति ग्रहैक-त्वविवक्षायामपि सर्वग्रहसादृगुण्यार्थत्वन्यायापन्नसर्वग्रहस-म्मार्गाविरोधाद्विवक्षोक्तिर्निष्फला स्यादित्याह * तथा सतीति* श्लोकं व्याचष्टे * न हीति * सर्वग्रहसम्मार्गे ऽपि प्रत्येकमनुष्ठान-सिद्धेरेकत्वविवक्षाफलमित्येकदेशी शङ्कते * नन्विति * गृह्यमा-णानां सोमानामधःपात्यवयवनिर्हरणार्थत्वात्सम्मार्गस्यावृत्त्या च गृह्यमाणानामावृत्त्यैवाधो ऽवयवपातात्तन्निर्हरणार्थः सम्मार्गोऽप्यावृ-त्त्यैव स्यादित्याशयेन परिहरति * नैतदिति * ग्रहणोत्तरकाला-न्वयिसम्मार्गस्य नैरन्तर्यविवक्षा वर्त्तमानसामीप्ये वर्त्तमानवद्वेति स्मृतिमालोच्य गृह्यमाणानामित्युक्तम् । अस्माच्च वार्त्तिकाद् ग्र-हशब्दस्य ग्रहणसंस्कृतसोमवाचित्वप्रतीतेः स एव इन्द्रतुरीयो ग्र-हो गृह्यते यदैन्द्रवायव इत्यादौ चैन्द्रवायवादिशब्दसामानाधिकर-ण्यात्पात्रसोमावयवान्वयाभावेनैन्द्रवायवादिशब्दवाच्यत्वायोगात्सा-क्षाच्च यागसाधनसोमसंस्कारसम्भवे व्यवहितोपयोगेन पा-त्रस्यासंस्कार्यत्वाद् ग्रहणादिसोमसंस्कारप्रस्तावाच्च सम्मार्गस्य सोमसंस्कारत्वप्रतीतेः पात्रस्य च गृह्यमाणावसिक्तसोमावयवस्य सं-

स्मार्गे ऽशुचित्वानापत्तेस्तन्निर्हरणार्थं सम्मार्गानपेक्षत्वात्सोमस्य तु विहितात्प्रदेशाद् बहिर्वृत्तौ वैगुण्यापत्तेस्तन्निरासार्थं सम्मार्गापेक्षत्वादपेक्षितविध्ये ऽपि सोमसंस्कारत्वावगतेराकलशेषु धावति-रावित्रे परिषिच्यते इत्यादिमन्त्रलिङ्गादप्येवमेवावगतेर्ग्रहादि सोमपात्रं यस्मिन्पात्रे ऽस्य सोमस्य ग्रहणे क्रियमाणे सोमो व्यवसिच्यते इत्याशङ्कां तत्सर्वं सम्मार्जयितव्यमिति चमसाधिकरणभाष्यस्य च पात्रश्लिष्टसोमसंस्कारार्थमपि क्रियमाणस्य सम्मार्गस्य नान्तरीयकपात्राश्रितत्वाशयतया व्याख्यातुं शक्यत्वान्न ग्रहपात्रं सम्मार्ष्टव्यमिति भ्रमितव्यम् । नानापात्रेषु गृह्यमाणानां सोमानां युगपत्सम्मार्गप्रसङ्गे ऽपि वायव्यैन्द्रवायवयोः सोमयोरेकस्मिन्पात्रे गृह्यमाणयोर्यौगपद्यप्रसक्तौ तन्निरोधो विवक्षाफलं भविष्यतीत्याशङ्क्याह * अभ्युपेत्येति* स्वतन्त्रस्यैकवाक्यस्याप्रतीतेः स्वतन्त्रं चाग्रहत्वनिरपेक्षमेकत्वं यस्य द्रव्यान्तरस्य तस्याप्रतीतेर्ग्रहगतत्वेनैकत्वविवक्षामभ्युपेत्य नैष्फल्योक्तिः । वस्तुतस्तु वाक्यभेदापत्तेर्नैकत्वविवक्षा संभवतीत्याशयः । द्रव्यान्तरगतत्वेनैकत्वविवक्षानिरासमुपसंहरति * अतश्चेति* सम्मार्गस्यैकत्वांशेन यो ऽन्वयस्तस्य द्रव्यविशेषनिष्ठतया ऽनवधारणेनेत्यर्थः । द्रव्यान्तरस्थत्वेन विवक्षाभ्युगमे ऽपि न सिद्धान्तहानिरित्याह * यद्यपि चेति * अनेन प्राप्नोति हि प्रधानस्येति पूर्वार्द्धं व्याख्यातम् । प्राधान्येनैकत्वस्य क्रियान्वयपक्षे सर्वग्रहसम्मार्गोपपत्युक्तेः संख्योद्देशेन संस्कारविध्ययोगेऽप्यर्थत्वं दर्शयितुमाह * तस्मादिति * यूपं छिनत्त्यग्नीनादधीत चमसाध्वर्यून् वृणीत इत्यादावप्राप्तोद्देश्यगतायाः संख्यायाः विवक्षाभ्युपगमात्तस्याश्च द्वितीयाविरोधापत्तेर्गुणत्वेन क्रियान्वयायोगाद्यथासंख्योद्देशेन छेदनादिसंस्कारो विधीयते तथात्रापि भविष्यतीत्याशङ्क्य यूपादेरनवगतसंख्यत्वेन परिच्छेदकसंख्यापेक्षत्वाद्विधेयत्वाच्च तत्परिच्छेदकत्वेन संख्याविध्युपपत्तेर्द्वितीयाविरोधात् । क्रियान्वयायोगे ऽपि संख्याविशिष्टयूपादिविशिष्टच्छेदनादिक्रियाविध्यन्यथानुपपत्तिकल्पितेन विधिना क्रियाविशेषणीभूतयूपविशेषणत्वेन संख्याविध्यवगमात्संख्याविशिष्टयूपादेरुद्देश्यत्वे ऽपि संख्याया नोद्देश्यतेति सूचनार्थं कश्चिदित्युक्तं विधेयत्वे यूपादिसंख्याया द्वितीया संस्कार्यत्वापत्तेर्देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्यादौ ानेकत्र लोकवेदयोर्दर्शनेन प्रत्येकं वाक्यसमाप्तेरदोषत्वात्कस्मा‌द्यूपं छिनत्तीत्यादौ न संख्योद्देशेन संस्कारो विधीयतइत्याशङ्क्य संख्यायाः स्वकीयगोचरे वर्गे लक्षणं स्वभाव एवैष इत्युक्तस्वभा-

घोपपादनायोद्दिश्यमानानां पुनरवशीकृतत्वादिवार्त्तिकोक्तोपपत्ति
स्तस्माच्छब्देन परामृश्य गुणभूतविवक्षा त्वित्युत्तरार्द्धं व्याचष्टे *
अथ त्विति * वैरूप्याशयत्वेन विरोधोक्तिव्याख्यानायैकत्ववक्ष्ये-
त्याद्युक्तम् । प्रयोजनवत्तयैव ग्रहस्य प्राधान्यसिद्धेर्द्वितीयायास्ता-
त्पर्ये नैष्फल्यापत्तेर्ग्रहस्यापि च क्रियान्वयसिद्ध्यै कारकत्वस्या-
वश्यप्रतिपाद्यत्वान्निर्विशेषस्य च सामान्यस्यापर्यवसा-
नात्सर्वे पाकादिसम्बन्धे द्व्याकारास्तन्दुलादय इत्यनेन च न्या-
येन साधनत्वस्याप्युपपत्तेः साधनस्य चाङ्गत्वप्रसिद्धेरवैरूप्याया
ङ्गत्वेन द्वयोर्द्वितीयार्थ इत्याशङ्कते * तत्रेति * ग्रहाङ्गत्वे तात्पर्या-
भावसूचनार्थस्तावच्छब्दः । साधनत्वे ऽपि ग्रहस्य प्रासङ्गिकोप-
कारित्ववदनङ्गत्वादविद्यमानाङ्गत्वोक्तिः शाब्दस्य च प्राधान्यस्या-
७४१। र्थेना न युक्तेति परिहरति * तत्रेति * यदि तु कथं चित्सगुणभाव-
स्ततः पश्चादपि स एव विवक्ष्येत न प्राधान्यमित्यादावित्यनेनोक्तम् ।
अशाब्दस्य प्राधान्यस्य शाब्दक्रियानन्वयात्पश्चादपि शाब्दत्वाभ्यु-
पगमापत्तेर्विप्रकर्षप्रसङ्गाच्छब्दात्सम्भवतः । प्राधान्यस्यार्थत्वा-
योगमुपपादयन् श्लोकं व्याचष्टे * सर्वैवेति * श्रुतिवशाद्यत्प्रा-
धान्यङ्गम्यते तद्यदि तावद्वास्तवत्वेन गृह्यते ततः प्रागपि प्राधान्य-
मेव ग्राह्यं न गुणत्वं प्राधान्यासम्भवात्तु द्वितीयाश्रुतौ लक्षणाश्र-
यणे पुरोडाशकपालवत्प्रयोजनवत्त्वे ऽपि गुणत्वस्यैव शास्त्रीयत्वात्प-
श्चादपि गुणभाव एव विवक्षित इत्यर्थः । असम्भवस्य वैरूप्याय
काल्पनिकत्वात्सम्भवस्य च वास्तवत्वादविरोधमाशङ्क्याह * युग-
पच्चेति * विरोधपरिहारसम्भवे ऽपि सम्भवासम्भवपरिग्रहनि-
मित्तस्यालोचनविक्षेपनिमित्तस्य च शब्दक्लेशस्यापरिहार्यत्वान्नै-
वं कल्पना युक्तेत्याशयः । एतदेव विवृणोति * प्रथमं हीति *
प्राधान्यस्याशाब्दत्वान्न शब्दक्लेशापत्तिरित्याशङ्क्याह * पश्चात्तन-
मपि चेति * शाब्दस्यार्थस्याशाब्दार्थान्वये प्रामाण्याभावेनान्वय-
सिद्ध्यै कल्प्यार्थवाचिशब्दकल्पनाहेतुत्वाच्छब्देनैव प्राधान्यं वाच्य-
मित्युक्ते ऽनुपलब्धिविरोधेनास्मिन्वाक्ये ऽसावप्युच्चारित इत्येव क-
ल्पयितुमशक्यत्वात्सत्तामात्रेण च कल्पनस्य व्यवहारानौपयिक-
त्वेनानाशङ्क्यत्वात्केन रूपेण शब्दकल्पनेत्याशङ्क्य कल्प्यार्थवाच्यपि
शब्दो ऽस्मिन्वाक्ये व्याप्रियत इत्येवं कल्पनां सूचयितुं व्यापारशब्दे प्र-
युक्ते ऽयं व्यापारस्यापि शब्दविशेषनिष्ठतया कल्पयितुम् अशक्यत्वा-
त्कल्प्यार्थाभिधानशक्तशब्दमात्रव्यापारकल्पना शक्तिशब्देन सू-
चिता द्वितीयारूपस्य वा प्राधान्यवाचिनः शब्दस्येह श्रुतत्वेन श-
ब्दान्तरकल्पनायोगात्तस्यैव प्राधान्ये ऽपि व्यापारः शब्दशक्तिशब्देन

लक्षितः । एवञ्च गुणप्रधानत्वरूपानेकार्थव्यापारकल्पनानिमि-
त्तो वैरूप्यलक्षणो वाक्यभेदोऽपरिहार्य इत्याह * अतश्चेति * शब्द-
व्यापारं विना प्रयोजनवत्तामात्रेण प्राधान्यसिद्ध्यभ्युपगमेऽपि द्विती-
यायास्तावदनुवादित्वेनापि स्वार्थवाचित्वसम्भवान्न गुणत्वलक्ष-
णार्थता युक्तेत्याह*किञ्चेति *यथा विधीयमानं स्वार्थं प्राप्य शब्दो
न लाक्षणिके ऽर्थे वर्त्तते तथान्यतोऽवधारितमपि प्राप्य लाक्षणि-
कार्थत्वे ऽपि स्वार्थात्यागादित्यर्थः । श्लोकं व्याचष्टे * यद्यपीति *
एवं च प्रत्येकत्वस्य गुणतामपि यदि द्वितीया लक्षयेत्ततोऽपरमपि वै-
रूप्यं स्यादित्याह * ततश्चेति * प्राधान्यानानुवादांशेऽभ्युपेत्य ७४२।१
वादमात्रतां द्योतयितुमाह * श्रुत्या चेति * नन्वेकत्वस्य निष्प्र-
योजनप्राधान्यायोगात्क्रियान्वयसिद्ध्यै गुणत्वस्यावश्यलक्षणीयत्वा-
वगतेर्वैरूप्यपरिहाराय ग्रहप्राधान्यस्यार्थत्वकल्पनोचिता त्याज्ये-
त्यर्थः । अतो यद्येकत्वस्य विवक्षाभ्युपगन्तव्या ततः प्राधान्येनैव
सा निरस्तेत्याह * तस्मादिति * नन्वेवं प्राधान्येन गुणत्वेन चै-
कत्वस्य क्रियान्वयनिरासात्सिद्धान्ते समाहिते ऽपि भाष्यं कथं समा-
धेयमित्याशङ्क्याह * भाष्यमपीति * क्रियान्वयासम्भवोक्तिभा-
ष्यमेतेषु प्रत्येकवाक्यसमाप्त्यनेकविधवैरूप्यलक्षणेषु मतान्तरो-
क्तेषु सत्संयोज्यं वाक्यभेदोक्तिभाष्यं चैतेष्वेव वाक्यभेदेषु विषय-
भूतेषु योज्यमित्यावृत्त्या निमित्तविषययोः सप्तम्यभ्युपगमेन
व्याख्येयम् * तथा हि * एकत्वस्यापि ग्रहवत्प्राधान्ये प्रत्येकं वाक्य
समाप्तेर्ग्रहनिरपेक्षस्यैकत्वस्य सम्मार्गः स्यात्स चाशक्यः द्रव्यान्तरे
च क्रियमाणः सर्वेषामेकवचनान्तशब्दचोदितानां कार्यः स च वि-
कल्पेन कस्य चि क्रियमाणोऽन्यगतस्यैकत्वस्य चोपकरोति समुच्चिता-
नां तु क्रियमाणः सङ्ख्यान्तरोपजननान्न कस्य चिदेकत्वस्योपकरोति ।
गुणत्वे त्वमूर्त्तत्वेन प्रमाणान्तरतो निष्पादकत्वानवगमाच्छब्देनैव गु-
णत्वं वाच्यन्तत्र च द्वितीयाविरोध. गुणत्वलक्षणार्थत्वे तु द्वितीया-
याः प्रयोजनवत्त्वावगतेः प्राधान्यस्य ग्रहस्यापि गुणत्वापत्तिरि-
त्युभयथापि क्रियान्वयासम्भवभाष्यं योज्यम् । वाक्यभेदभाष्य
च द्वितीयया प्रधानभूतं ग्रहमुद्दिश्य सम्मार्गो विधीयते यदि तथाप्ये-
कत्वस्य गुणत्वेनान्वयो परो विधीयते ततो गुणप्रधानार्थकः स्यादित्या
शङ्कते * ननु चेति * षष्ठ्याग्नेस्तृणद्वारापचयान्वयावगतेस्तस्य
व च विशेषान्तरायोगेनाङ्गाङ्गिलक्षणान्वयविशेषनिष्ठत्वावसाया-
त्कोऽङ्गं कोऽङ्गीत्यपेक्षायां वाग्नेः प्रयोजनवत्त्वात्प्रधानतेत्याह*यद्यपि
चेति * यथा मध्यात्पूर्वार्द्धाच्चेति पञ्चम्याविवक्षितापादानरूपगु-

णार्थां हविषश्च कार्यार्थत्वेन प्रयोजनवत्त्वात्तत्प्राधान्यं लक्षयन्ती प्रव र्त्तते तथेयमप्यविवक्षितगुणार्थाग्नेः प्राधान्यं च लक्षयन्ती प्रवर्त्तत इत्यर्थः। अतो ऽग्निवाक्ये ऽपि वैरूप्यलक्षणवाक्यभेदः शक्यो योजयितुमित्याह * ततश्चेति * प्रत्येकवाक्यसमाप्तिस्त्वग्न्येकत्वप्राधान्यं त्वनाशङ्क्यत्वेनानापत्तेर्न योजिता । ननु तृणानां द्वितीयायोगे ऽप्यपचयं प्रत्यप्रतिपाद्यत्वेनाप्राधान्याद्विवक्षितसंख्यत्वेनाप्राधान्यादविवक्षितसंख्यत्वेन त्रयाणामेवापचयावगतेः शेषतृणानपचयेन तृणसंसर्गादापत्स्यमानस्योल्मुकबहिःपातस्यापरिहार्यतयाग्नेस्तृणापचयसंस्कार्यत्वायोगान्न प्राधान्यमित्याशङ्क्याह * तृणानीति * विभागरूपत्वेनापचयस्य संयोगपूर्वकतया प्राक्सिद्धसम्बन्धापेक्षत्वादपचेयानान्तृणानां सिद्धत्वेनान्वयादप्राधान्ये ऽपि देशादिवदुद्देश्यतोपपत्तेरविवक्षितसंख्यत्वात्सर्वतृणापचयादग्निसंस्कारत्वोपपत्तिरित्याशयः । पूर्वोक्तानां वाक्यभेदानामत्रापि योजनीयत्वं व्याख्येयत्वोक्त्योक्तम् । प्राधान्याभावे गुणप्रधानत्ववैरूप्याभावात्कथं पूर्वोक्तवाक्य भेदयोजनेत्याशङ्क्य गुणप्रधानत्ववैरूप्याभावे ऽपि संख्यासंख्येययोर्द्वयोरुद्देश्यत्वेन क्रियान्वये प्रत्येकं वाक्यसमाप्तिलक्षणः संख्यायास्तूपादेयत्वेनान्वये ऽनुपादेयोपादेयत्ववैरूप्यलक्षणो वाक्यभेदः शक्यो योजयितुमिति परिहारं बहुविषयत्वद्योतनायोदाहरणान्तरानिष्ठतया दर्शयति * तथेति * भेदनस्यैव निमित्तैकत्वस्यैव चेति नियोगपक्षे भेदनस्य निमित्तैकत्वस्य वेति विकल्पपक्षे वाक्यभेदाभावादन्योन्यानन्वयमात्रोक्तिः । प्रत्येकोक्तिश्चान्यानपेक्षत्वमात्राशया । समुच्चयस्य त्वन्योन्यानपेक्षत्वे ऽप्येकनिमित्तत्वान्वयमात्रेणोपपत्तेर्वाक्यभेदापादकतापि । भेदनत्वादिपक्षेषु प्रत्येकसमाप्तवचनापत्तेरादिशब्देनान्योन्यविशिष्टयोर्द्वयोः समुच्चयपक्षः सूचितः । पूर्वशब्देनोपादेयानुपादेयत्ववैरूप्यमुक्तमिति नानारूपत्वोक्त्या व्याख्यातं तस्य विरुद्धत्वोक्तिः सकृदुच्चारणावृत्त्या वाक्यभेदापादनार्थेति सूचनार्थैकवाक्यत्वोक्त्या सकृदुच्चारणोपलक्षणम् । भिन्ने जुहोतीत्यादिषु वचनाविवक्षेत्यन्वयः । एवमेतदेकत्वं ग्रहस्य न कञ्चिदुपकारं करोति न सम्मार्गस्येति भाष्य प्रधानभूतस्यापि ग्रहस्येयत्तावधारणेन संख्याया ग्रहस्य न कश्चिदुपकारं करोति न सम्मार्गस्येति भाष्यं प्रधानभूतस्यापि ग्रहस्येयत्तावधारणेन संख्याया ग्रहोपकारित्वसम्भवादनङ्गस्थितानामपि च प्रणीताधर्माणामुपकारित्वतत्त्वमात्रेण क्रियोपकारित्वदर्शनाद् ग्रहस्य च सम्मार्गोपका-

रित्वसद्भावात्तत्परिच्छेदकत्वेनैकत्वस्य यजमानसंस्काराणां यागो-
पकारित्ववत्सम्मार्गोपकारित्वोपपत्तेरयुक्तमाशङ्क्य दशैतानध्वर्युः
प्रातः सवे ग्रहान् गृह्णातीत्यादेः प्रमाणान्तरादेव विज्ञातसंख्यान-
पेक्षत्वाच्चैकत्वस्य ग्रहोपकारित्वं तद्द्वारा वा सम्मार्गोपकारित्वं
सम्भवतीति भाष्याशयं सूचयितुमाह * सत्यां चेति * यद्योद्दे- ७४३।१
श्यविशेषणस्याविवक्षितत्वे ऽष्टवर्षब्राह्मणोपनयनादिविधावुद्देश्य-
ब्राह्मणादिविशेषणमष्टवर्षत्वादिः अमावास्यायामपराह्णे पिण्डपितृ-
यज्ञेन चरन्तीत्यत्र चोद्देश्यामावास्याविशेषणमपराह्णः । प्राचीन-
प्रवणविधौ चोद्देश्यप्रवणविशेषणं प्राचीनत्वं यावज्जीवविशेषणं
सामर्थ्याद्यपि न विवक्ष्येत ब्राह्मणसुरापानादिनिषेधे चोपा-
देयब्राह्मणादिविशेषणं लिङ्गादि विवक्ष्येतेत्याशङ्क्य निरा
सार्थो ऽयं ग्रन्थः । आकाङ्क्षाधीनत्वाद्विशेषणविवक्षाया ब्राह्मणादे-
श्चोपनयनादावुद्देश्यत्वे ऽप्यन्यतो ऽनवगतरूपत्वेन विशेषणाकाङ्क्ष-
त्वाद्विशेषणविवक्षानिषेधे चोपादेयत्वे ऽपि ब्राह्मणादेरनुवाद्यत्वेन प्रा-
प्तस्यैव निषेधान्वयाद्विशेषणस्यानाकाङ्क्षितत्वेनाविवक्षायुक्तेत्याशयः।
एवं तर्ह्युद्दिश्यमानस्य किं संख्या विवक्ष्यते नेति संशयोपन्यासो न
युज्येतेत्याशङ्क्याह * सा चेति * विधेयक्रियानुष्ठानार्थत्वेनापा-
द्यत्वलक्षणोपादेयत्वाभावे ऽपि प्रतीक्ष्यत्वलक्षणोपादेयता ब्राह्मणा-
मावास्यादिषु विवक्षिता । उपनयनपितृयज्ञाद्यनुष्ठानकाले हि
ब्राह्मणामावास्यादेर्नियमेन प्राप्तत्वापादकस्य प्रकृतापूर्वसाधनत्व-
स्याभावात्स्वकालाप्राप्ते च ब्राह्मणादौ तदन्वितोपनयनाद्यनुष्ठानायो-
गात् ब्राह्मणादिसिद्धवत्कारेणोपनयनादिविधानाद् ब्राह्मणादेस्त-
त्कालापाद्यत्वायोगे ऽपि स्वतः सिद्धस्य प्रतीक्ष्यतावश्याभ्युपगन्तव्या।
ग्रहादेस्तूपक्रतापूर्वसिद्ध्यर्थमुपात्तत्वेन सम्मार्गादिकाले नित्यप्राप्तेर्नि-
षेधस्य च प्राप्तविषयत्वनियमान्निषेधकार्यायाश्च निवृत्तेः प्रवृत्तिपूर्व-
कत्वनियमात्सुरापानादिनिवृत्तिकाले तत्कारिणो ब्राह्मणादेर्नित्यप्राप्तेर
प्रतीक्ष्यत्वादुद्देश्यत्वं विवक्षित । कीदृक् ब्राह्मणादिरुपनयनाद्यनुष्ठा-
नार्थं प्रतीक्षितव्यं इत्युपादेयेषु विशेषणाकांक्षोत्पत्तेरुद्देश्येषु ग्रहा-
दिष्वनुत्पत्तेरनाकाङ्क्षितत्वेनोद्देश्यविशेषणस्याविवक्षाव्युत्पादना-
योद्दिश्यमानस्य किं संख्या विवक्ष्यते न वेति संशयोपन्यासो युक्त इ-
त्याशयः । उद्देश्येषु विशेषणानाकाङ्क्षामुपपादयति * उद्दिश्यमा-
नेषु हीति * प्रमाणान्तरावगतत्वात्संख्यानाकाङ्क्षायां प्रकृतापूर्वसा-
धनस्य प्रकरणात्संस्कार्यत्वावगतेरुद्देश्यस्वरूपस्यापि प्रमाणान्तरा-
वगतत्वात्तत्समर्पकप्रातिपदिकार्थग्रहत्वान्वयस्यापि नाकाङ्क्षा स्या-

द्धित्याशङ्क्य प्रातिपदिकार्थानन्वये सम्मार्गस्य संस्कारत्वासि-
द्धेः प्रकृतापूर्वसाधनस्य संस्कार्यत्वावगत्ययोगादुद्देश्यस्वरूपान-
वगतेरुद्देश्यं च विना निष्फलत्वापत्तेर्विध्ययोगा-
त्तत्समर्पकप्रातिपदिकार्थान्वयाकाङ्क्षोपपादनार्थं प्रातिपदिका-
र्थेत्युक्तम् । प्रकृतापूर्वसाधनत्वे ऽवगतसंख्यस्यापि ग्रहादेः
सम्मार्गाद्यन्वये ऽनवगतसंख्यत्वात्संख्याकाङ्क्षा भविष्यतीत्याश-
ङ्क्याह * अत इति * प्रातिपदिकार्थान्वितप्रकृतापूर्वसाधनमा-
त्रस्य सम्मार्गाद्यन्वयावगतेर्विशेषणानाकाङ्क्षा अतःशब्देनोक्ता ।
अनेन चाविशिष्टं हि लक्षणमिति सूत्रावयवव्याख्यानस्य नैतदस्ती-
त्येवमादिभाष्यकृतस्योपसंहारार्थं तस्मान्नैतदितिभाष्यं व्याख्यातं कुत
इति भाष्येण सर्वसंस्कार्यत्वहेतुप्रश्नपूर्वं विहितस्तु सर्वधर्मः स्यादिति
सूत्रोक्तहेतुद्वयमनुकृष्यन्नलक्षणत्वादित्यनेनैव हेतुहेत्वनाकाङ्क्षणा-
द्युक्तमाशङ्क्य लक्षणत्वादित्यनेन ग्रहत्वादेर्विधेयसम्मार्गाद्यन्वयापू-
र्वसाधनलक्षणत्वेन सम्मार्गान्वयितया विधेयत्वाभावात्तद्विशेषणत्वेन
विधिर्भविष्यतीत्याशङ्कायाः संस्कारान्वयितया विध्यनुपपत्तेः शुद्ध-
विधौ च विशेषणस्याविधेयत्वापत्तेर्न्नापूर्वसाधनविशेषणत्वेनाप्ये-
कत्वादेर्विधिः सम्भवतीत्येवं निरासार्थं तद्धेतुद्वयानुकर्षणमिति सू-
चनायाविधेयत्वार्थतया लक्षणत्वोक्तिं व्याख्यातुमाह * स-
र्वेति * विधेयत्वानिवृत्त्यर्थो मात्रशब्दः ततश्च तद्विशेषणस्य सु-
तरामविधेयत्वादनुष्ठानान्वयित्वेनानादृत्यतेत्याशयः । लक्षणत्वो-
क्तेरविधेयार्थत्वप्रकटनायानादृत्यतानङ्गत्वोक्त्या लक्षिता । लक्ष-
णस्यानादृत्यतां लौकिकदृष्टान्तेन द्रढयति * यथेति * ग्रहत्व-
स्यापि तद्वदनादरापत्तेश्च चमसेष्वपि सम्मार्गः प्रसज्येतेत्याशङ्क्याह
* तत्रेति * ग्रहादेर्लक्षणत्वेन विना तल्लक्षितेष्वपूर्वसाधनेषु
सम्मार्गाद्यनुष्ठानासिद्धेर्लक्षणत्वेन ग्रहाद्याद्रियते ततश्चानुष्ठाना-
न्वयित्वेनानादरेऽपि चमसेषु सम्मार्गान्वयपूर्वसाधनलक्षणग्रहत्वा-
द्यभावान्न सम्मार्गाद्यनुष्ठानापत्तिरित्याशयः । लक्षणत्वेनैव त-
द्गतैकत्वादिविशिष्टमेव ग्रहादि गृह्यतामित्याशङ्कानिरासार्थो मात्रश-
ब्दः । यदीत्यादि भवितव्यमित्यन्ते शङ्काभाष्ये बहुषु विवक्षितेष्वि-
त्येवं बहुत्वस्याप्यविवक्षितत्वादयुक्तमाशङ्क्यैकवचनायोगोक्ति-
रोपन्यासस्वार्थतात्पर्याभावेन व्याख्यातुमाह * नन्विति *

---

(१) तद्विशेषणस्य सुतरां विधेयत्वं न सम्भवतीत्युक्तौ ग्रहादिस्वरूपविशेष-
णत्वं नैकत्वादेर्विध्ययोगेऽपि ग्रहत्वादिलक्षितापूर्वसाधनविशेषणत्वे विधिर्भविष्यतीति
क० पु० पा० ।

उच्यत इत्यादिपरिहारभाष्यं व्याचष्टे * तत्रेति * एकवचनस्य प्रमादपाठापत्तेरेतत्परिहारान्तरार्थमपि चेति भाष्यं व्याचष्टे *तेनेति * कारकसम्बन्धो ऽपीत्यपि शब्दसूचितं प्रातिपदिकानुग्रहार्थत्वं व्याख्यातम् । एवमप्येकवचननियमो ऽनर्थक इत्याशङ्क्य बहुत्वविधौ कपिञ्जलाधिकरणवक्ष्यमाणत्रित्वनियमदृष्टान्तेनार्थवत्तामाह*प्रथमं वेति*पुरोडाशाविति द्विवचननियमस्तर्हि किमर्थ इत्याशङ्क्याह * यस्येति * पौर्णमास्यामाग्नेयाग्नीषोमीयरूपस्य सान्नायरहितायाश्चामावास्यायामाग्नेयैन्द्राग्नरूपस्य पुरोडाशद्वयस्याधिकृतत्वाद्द्विवचनमित्येतद् द्रढयितुमस्योभयं हविरार्त्तिमार्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेदित्यार्त्तिगमनसम्बद्धस्य हविषो निमित्तत्वेनोद्देश्यत्वाद्धविष्ट्वस्य च प्रकृतापूर्वसाधनलक्षणत्वेन प्रतीतिमात्रौपयिकत्वाद्ग्रहवदविवक्षितविशेषणत्वसिद्धौ अप्युभयपदानर्थक्यापत्तेरुभयत्वस्योद्देश्ये ऽन्तर्गत्यभ्युपगमेन विवक्षां पूर्वपक्षयित्वाधिकारिकोभयत्वाभ्युपगमेनोभयपदानर्थक्यपरिहारः षष्ठाधिकरणे वक्ष्यमाणो दृष्टान्तितः । पुरोडाशद्वयसद्भावाद् द्विवचनस्य सालम्बनत्वे ऽपि नियमः किमर्थः इत्याशङ्क्याह * अन्यथा हीति * यथाग्नावैष्णवमेकादशकपालं निर्वपेत्सरस्वतीमाज्यस्य यजेतेति यागद्वये विहिते ऽमावास्यायामुपांशुयाजपक्षे तद्विकारे सारस्वते वेदानन्तरवेदिकरणपञ्चहोत्राभिमर्शनबृधन्वत्याज्यभागानुवाक्याप्राप्तेरग्नीषोमीयविकारे चाग्नावैष्णवे हविरधिवासनानन्तरवेदिकरणचतुर्होत्राभिमर्शनवार्त्रघ्न्यानुवाक्याप्राप्तेरग्नीषोमीयविकारे चाग्नावैष्णवे प्रसज्यत[1] इति पूर्वपक्षयित्वा मुख्यं वा पूर्वचोदनाल्लोकवदिति द्वादशाधिकरणसूत्रेण मुख्यत्वादाग्नावैष्णवः कल्पः सारस्वते प्रसज्यतइति वक्ष्यते । तथा मुख्यत्वादाग्नेयस्यैव पुरोडाशस्य क्षीणस्य निमित्तत्वेन ग्रहणमिति भ्रान्तिनिवृत्त्यै नियम इत्याशयः । अपि चेत्यादिभाष्यं विधायकाभिधानश्रुत्यवगतक्रियान्वयविरोधेन पदश्रुत्यवगतद्रव्यान्वयबाधादयुक्तमाशङ्क्य द्रव्यान्वयाभ्युपगमे ऽपि सिद्धान्ताव्याघातोक्तिमात्राशयत्वेन व्याचष्टे * अपि चेति * ग्रहस्याप्यनेकसंख्यत्वादेकत्वेन विशेषणता युक्तेत्याशङ्क्याह * जातीति *

चोदिते तु परार्थत्वाद्यथाश्रुति प्रतीयेत ॥ १५ ॥

(१) अनुवाक्याप्राप्तेर्नियमेनैकस्य कल्पो ऽन्यत्र प्रसज्यत इ० २ पु० पा० ।

पदार्थत्व-व्याख्यार्थस्य यागार्थः पशुरिति भाष्यावयवस्य पशोरपि द्वितीयया प्राधान्यावगमादयुक्तत्वशङ्कां निरस्यन्सूत्रं व्या-
७४४। चष्टे * पशौ पुनरिति * भव्यस्य भावकापेक्षणाद् भूतस्य च भावकत्वोपपत्तेर्भूतस्य भव्यार्थत्वे दृष्टार्थत्वं भूतस्य तु भव्यानपेक्षणाद्भव्यस्य भूतार्थतायामदृष्टार्थतेत्येकस्यैव न्यायस्य भूतभव्यसमुच्चारणे भूतभव्यायोपदिश्यत इति भाष्यारूढत्वं द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्ध इति सूत्रारूढत्वञ्च द्वयोक्त्या सूचितम् ।

अथ चमसादौ समार्गाद्यप्रयोगाधिकरणम् ॥ ८ ॥

संस्काराद्वा गुणानामव्यवस्था स्यात् ॥ १६ ॥

यथाश्रुतं तावत्पूर्वपक्षभाष्यं व्याचष्टे * एकत्ववदेवेति * ग्रहत्वस्यार्थ इत्यनेन प्रदर्शनार्थमित्यादि द्रष्टव्यमित्यन्तं भाष्यं पराभिमतपूर्वपक्षार्थत्वेन व्याख्याय प्रदर्शनार्थत्वं इत्यनेनोच्यत इत्यादिकल्प्यत इत्यन्तमभिरामार्थत्वेन व्याख्याय वाक्येन चेत्यनेन स्वाभिमतपूर्वपक्षार्थतयोच्यते सम्मार्ष्टीत्यादिभाष्यशेषो व्याख्यातः । श्रुत्या वाक्यबाधाभ्युपगमे लक्षणया ग्रहशब्दवर्णनान्किरयुक्तेत्याशङ्क्य वाक्येन ग्रहान्वयाभ्युपगमे स्वरूपेणैवान्वयापत्तेस्तद्बाधेन शुद्धसम्मार्गविधिमभ्युपगम्य विच्छिन्नस्य ग्रहशब्दस्य का गतिरित्यपेक्षिते सम्मार्गस्य कैमर्थ्याकाङ्क्षायां सोमग्रहणानन्तरकालत्वेन योग्यतया ऽधो ऽवसिक्तसोमनिर्हरणार्थत्वावगमात्सोमस्य संस्कार्यत्वेनावगतस्य स्पष्टीकरणायोपलक्षणार्थतया ग्रहशब्दस्य गतिसूचनार्थो वाक्येन वेत्यवयवः । शुद्धसम्मार्गविधानात्पूर्वपक्षपरिग्रहे तैपामर्थ्याधिकरणोक्तशुद्धावघातादिविधिपूर्वपक्षस्यादृश्यात्तदनन्तरमेतदधिकरणारम्भापत्तिरित्याशङ्कानिरासार्थत्वमस्यादृश्योक्त्याग्रहे तैपामर्थ्याधिकरणोत्तरानारभ्यतोपपादिता । ननु पदस्य केवलाप्रयोगित्वात्पदान्तरान्वये च श्रुतिबाधस्य बाहर्गाधिकरणे परिहृतत्वाद् ग्रहादाच्छिद्य केवलसम्मार्गविधिः पूर्वपक्ष इति नसङ्गतस्य इत्याशङ्क्याह * इह त्विति * यथा बाढं संयुक्ता अवघातादयस्तु पदार्था विधीयन्ते श्रुत्या वाक्येनैषां व्रीह्यादिसंयोग इति तैपामर्थ्याधिकरणसन्देहोपपादनभाष्याद्यथाश्रुतप्रतीयमाने शुद्धावघातादिविधौ न त्वेतद्युक्तमित्यादिवार्त्तिकेनाक्षेपं कृत्वा विधीयन्ते ऽवघातादिः श्रुत्या व्रीह्यादिसङ्गत इत्यादिवार्त्तिकेन बाढमवघातादयो व्रीह्यादिसंयुक्ताः श्रुत्या विधीयन्ते किं त्वपूर्वसाधनांशलक्षणात्मकेन

वाक्येनैषां समीहितापूर्वसाधनभूतेन व्रीह्यादिना योगो न स्वरूपेणस्येवं व्याख्यया परिहारः कुतस्तथेह सम्मार्ष्टीतिविधिशब्दो ऽनादृत ग्रहत्व-ग्रहशब्दोपलक्षितापूर्वसाधनमात्रान्विते सम्मार्गे पुरुषेच्छायोनिकं प्रयत्नं विधातुं पुरुषार्थपर्यवसायित्वस्वभावापादकाप्रवृत्तप्रवर्त्तनात्मक विधिश्रवणेनैव शक्नोति आवृतग्रहत्वग्रहशब्दान्वयात्मकेन तु वाक्येन सम्मार्गस्य ग्रहत्वसम्बन्धं विधातुं शक्नुयात् । ततश्चापूर्वसाधनमात्रान्वयेन पर्यवसिता श्रुतिर्वाक्यीयविशेषान्वयं बाधतेतस्माद्-पूर्वसाधनमात्रलक्षणमात्रग्रहशब्दो वर्णनीयः तेन चमसेष्वप्यपूर्वसाधनत्वाविशेषात्सम्मार्गसिद्धिरित्येवं व्याख्यया कार्य इति परिहारे ऽत्यन्तमवघातादि–साम्याभावे ऽपि कथं चित्साम्यादवघातवद्धावोक्तिः । भङ्गाख्याक्षेपसाम्यस्य प्रसिद्धत्वादुद्धाराख्यपरिहारसिद्ध्यै दृष्टान्ततयोक्तिः एवं तर्ह्यवघातादिन्यायेन सम्मार्गस्यापि परमापूर्वप्रयुक्तत्वायोगेनावान्तरापूर्वप्रयुक्तत्वसिद्धेर्ग्रहत्वलक्षितस्य चावान्तरापूर्वसाधनत्वस्य चमसेष्वभावाद्व्यवस्थासिद्धेर्नैतदधिकरणमारभ्यमित्याशङ्कते * नन्विति * एकत्ववद् ग्रहत्वैकार्थसमवायित्वस्याप्युद्देश्यापूर्वसाधनविशेषणस्याविवक्षितत्वशङ्कापत्तेस्तेषामर्थाधिकरणासिद्धान्ताक्षेपेणैतदधिकरणारम्भेण परमतेन तावत्पौनरुक्त्यं परिहरति * सत्यमिति * वाच्यैकार्थसमवायित्वं विना ऽपूर्वसाधनत्वस्य लक्षयितुमशक्यत्वेन वाच्यैकार्थसमवाय्यवान्तरापूर्वसाधनत्वस्यैव लक्ष्यत्वात्तस्योद्देश्यत्वेनोद्देश्यविशेषणत्वाभावात्तेषामर्थाधिकरणसिद्धान्ताक्षेपायोगेनैतत्परिहारापरितोषात्स्वमतेनान्यथा परिहरति * अथ चेति * ननु तेषामर्थाधिकरणोक्तयथासंयोगव्यवस्थाक्षेपेणात्र पूर्वपक्षे स्थलसम्मार्जनादिवत्संयोगानादरसिद्ध्यै संस्कारत्वहेतूक्तिर्युक्ता तदनाक्षेपे तु किमर्थेत्याशङ्क्याह * संस्कारादिति * प्रतिप्रधानमावृत्त्या संस्कारानुष्ठानस्यापूर्वसाधनेन प्रयुक्तत्वाच्चमसेषु संस्काराभावे वैगुण्यापत्तेरपूर्वसाधनत्वव्याहतिसूचनार्थं संस्कारत्वोक्तिरित्याशयः । सर्वप्रधानेष्वनुष्ठानमेवोपपन्नन्तेनानुष्ठानं चमसेष्वपीत्येतदाख्यानार्थं संस्कारोक्तिरिति सावधारणानुष्ठानवाचिक्रियाशब्दाभ्युपगमेनोपपन्नत्वाख्यानार्थोपपादनशब्दाभ्युपगमेन च व्याख्येयम् ।

व्यवस्था वार्थस्य श्रुतिसंयोगात्तस्य शब्दप्रमाणत्वात् ॥ १७ ॥

यथाश्रुतपूर्वपक्षभाष्यव्याख्याने सिद्धान्तभाष्यमपि यथा
७२।१० श्रुतमेव व्याख्येयमिति सूचयितुमाह * यथास्थूलन्तावदिति * ग्रह-
शब्देन ग्रहमुद्दिश्य तत्सम्बन्धित्वेनैव सम्मार्गो विधीयते न शब्द इ-
त्येवं ग्रहशब्देनेति भाष्यं व्याख्यातुं ग्रहेत्युक्तम् । ग्रहसम्मार्गान्वयस्य
विधेयत्वे सम्मार्गस्वरूपस्याविधेयत्वापत्तेर्वाक्यानुरोधेन पदश्रु-
त्यवगतसम्मार्गस्वरूपविधिबाधप्रसङ्गात्तद्विरोधेन वाक्यीयग्रहस-
म्मार्गान्वयबाधैवोचितेत्याशङ्क्य विशिष्टक्रियास्वरूपविधिकल्प्यत्वा-
द्विशिष्टान्वयविधेः क्रियास्वरूपविधिबाधकत्वायोगोक्त्यर्थं न चे-
त्यादि न श्रुतिर्बाधिता भवतीत्यन्तं भाष्यं व्याख्यातुं ग्रहाख्यस्य स-
म्बन्धिनोऽन्यतः प्राप्तत्वेऽपि सम्मार्गाख्यस्य सम्बन्ध्यन्तरस्यान्यतो
ऽप्राप्तत्वात्समे यजेतेत्यादिवत्क्रियास्वरूपविध्यनपेक्षान्वयविध्यनुपप-
त्तेर्ग्रहसम्मार्गसम्बन्धविधौ सम्बन्ध्यन्तरविधेरवश्यम्भावित्वादि-
त्युक्तम् । प्रदर्शनार्थत्वपक्षेऽप्यवश्यं भावित्वात्कस्य चित्सम्बन्ध्य-
न्तरस्येत्येवमिदं व्याख्येयम् । अनेन चार्थस्य विधेयतया प्रयोजन-
भूतस्य सम्मार्गस्य श्रुत्या ग्रहसंयोगाद्ग्रहेष्वेव सम्मार्गव्यवस्थेव सू-
त्रव्याख्या सूचिता । परमार्थतस्त्वर्थस्योद्देश्यस्यापूर्वसाधनस्य
श्रुतग्रहत्वसंयोगेनैव लक्ष्यत्वात्परमापूर्वस्य चोत्पत्त्यपूर्वमात्र-
पर्यवसायिग्रहत्वनियमसाध्यत्वाभावेन ग्रहत्वान्वयाभावाद्ग्रहत्वेन
[illegible] ग्रहत्वैकार्थसमवायिनोऽवान्तरापूर्वसाधनत्वस्यैव ल-
[illegible] एवं सौत्रहेतुव्याख्यार्थं ग्रहत्वस्यापूर्वसाधन-
[illegible] ग्रहश्रुतिबाधापत्तेर्ग्रहत्वस्य लक्षकत्वानभ्यु-
पगमे [illegible] ग्रहत्वसमवाय्यवान्तरापूर्वसाधनं लक्षयि-
[illegible] सम्मार्गान्वयो विधीयते न च ग्रहत्वसमवाय्यवान्तरापूर्व-
[illegible] विशेषान्वयितया सम्मार्गविधिश्रुतेरपूर्वसाधनमात्रान्वय-
[illegible] ग्रहपदैकवाक्यतया ग्रहसमवायितया विशेष-
[illegible] लक्षणबाधाप्राप्तिरित्युक्ते कुत इति प्रश्नपूर्वं यद्यपि पुरु-
[illegible] विधिश्रुत्या सम्मार्गीतिशब्दोऽपूर्वसाधनान्वि-
[illegible] प्रयत्न विधातुं शक्नोति तथापि ग्रहान्वयाभावे सम्मा-
[illegible] उपकारित्वापत्तेरपूर्वसाधनद्रव्यान्वयावगमेन ग्रहान्वय-
[illegible] ग्रहसमवाय्यपूर्वसाधनविशेषान्वयस्यैवाव-
[illegible] सम्मार्गविधिस्वभावालोचनेनाविशेषान्वयावगतौ न क-
[illegible] इति विधिस्वभाववाच्युत्पद्यमानशब्दाभ्युपगमेन यथा-
[illegible] सिद्धान्तभाष्यं व्याख्येयमिति सूचयितुमाह * अ-
[illegible] * [illegible] भाष्यं प्रत्यभ्यासमपूर्वभेदादयुक्तमाशङ्क्य

व्याचष्टे * नन्विति * नानादेवतायुक्तग्रहणसंस्कृतद्रव्यभेदा-क्षिप्तानामपि यागाभ्यासानामविधेयत्वाद्विध्येकसमधिगम्यत्वाच्चा-पूर्वस्य प्रत्यभ्यासमपूर्वभेदाभावात्पयसा मैत्रावरुणं श्रीणातीत्यादौ च प्रत्यभ्यासमपूर्वभेदेन श्रपणव्यवस्थाया नवमे वक्ष्यमाणाया एतदधिकरणाधीनत्वेनेदानीमसिद्धावस्थत्वाद्यागापूर्वस्यैव प्रयोजकत्वावगतेः तस्यैवैकत्वाशय मेतद्भाष्यमित्याशयः । अत्रेत्यादिप्रत्यक्षेत्यन्तं परिहारभाष्यं शङ्काशयनिराससमर्थत्वेन व्याख्यातुमाह * सत्यपीति * प्रत्यक्षाभ्यासविद्ध्यभावे ऽपि देवतायुक्तद्रव्यभेदान्यथानुपपत्तिकल्प्यविधिविहितत्वेनाभ्यासानां प्रत्यभ्यासमपूर्वभेदोपपत्तिरित्याशयः । नन्वभ्यासैर्विना ज्योतिष्टोमरूपासिद्धेर्दृष्टार्थत्वेनाभ्यासानामवघातादिवन्नापूर्वार्थतास्तीत्याशङ्क्याह * विनाऽपि चेति * ज्योतिष्टोमशब्दस्याभ्यस्तरूपयागवाचितया यागाभ्यासविधिनिमित्तकत्वेनाभ्यासविध्यभावे ऽनभ्यस्तस्यापि यागस्य ज्योतिष्टोमशब्दवाच्यस्वरूपसिद्धेर्न दृष्टार्थत्वमभ्यासस्य सम्भवतीत्याशयः । तस्मादित्युपसंहारभाष्यं व्याचष्टे * तत्रश्चेति * नन्वभ्यासापूर्वाणां प्रत्यासन्नत्वे ऽप्यफलत्वात्प्रयोजकत्वासम्भवो ऽतिक्रमकारणमस्तीत्याशङ्क्याह * अवघातादिवदेवेति * फलन्त्विति सूत्रं ऽवघातादेरपूर्वप्रयुक्तत्वसिद्धौ यद्यपि चैषां साक्षादफलत्वं तथापि स्वरूपसिद्ध्यन्यथानुपपत्त्यैव प्रयोजकत्वं भविष्यतीत्यादिवार्त्तिके यो ऽर्थो वर्णित. सो ऽत्रापि योज्य इत्यर्थः । ग्रहैकत्वसम्बन्धे पुनरिति भाष्यस्य तात्पर्यमाह * न चेति * स्थलसम्मार्गत्रैपर्य्योस्त्वर्थत्वेन तस्य शब्दप्रमाणत्वादिति सूत्रावयवव्याख्यार्थं यत्त्वित्यादिभाष्यं स्पष्टत्वान्न व्याख्यातम् ।

सप्तदशारत्नितायाः पशुधर्मताधिकरणम् ॥ ९ ॥

आनर्थक्यात्तदङ्गेषु ॥ १८ ॥

ग्रहेष्वेव सम्मार्गो न चमसेष्वित्युक्ते सप्तदशारत्नित्वं षोडशिपात्रे निविशते यूपे वेति चिन्तायाः प्रासङ्गिकत्वेनानन्तरसङ्गतिं चतुर्द्धाकरणाधिकरणस्य चमसाधिकरणसङ्गत्याभिधानेन सूचयिष्यमाणत्वात्स्पष्टत्वेनानभिधाय भाष्योक्तसन्देहं वचनव्यक्तिसन्देहेनोपपादयति * यदीति * यूपशब्दानुवादसामर्थ्यात्सप्तदशारत्नित्वस्य यूपसदृशे षोडशिपात्रे निवेशाभ्युपगमे ऽनुवादात्षोडशिपात्रप्राप्तिस्तत्प्राप्तेश्चानुवाद इत्यन्योन्याश्रयापत्तिमाशङ्क्य सप्तदशारत्नित्वस्य वाजपेयाङ्गत्वेन विधीयमानस्य साक्षाद्वाजपेयान्वयायोगाद्वाजपेया-

रण्याभावेन च गौणवृत्त्ययोगाद्यूपस्यैव साक्षाद्वाजपेयसम्बन्धित्वेन निर्देशापत्तेः तस्य च साक्षाद्वाजपेयसम्बन्धित्वाभावेन साक्षाद्वाजपेयसम्बन्धिनि सप्तदशारत्नित्वविध्यानर्थक्यप्रसङ्गाद्वाजपेयाङ्गभूतपशुयागसम्बन्धिनि यूपे सप्तदशारत्नित्वविधिरित्येवं सूत्रव्याख्यार्थमेवमित्यादिभाष्यं तात्पर्यतो व्याचष्टे * इतीति * न चोदूर्ध्वपात्रशब्दसमभिव्याहृतो यूपशब्दः प्रतीयत इत्यर्थः * श्लोकं व्याचष्टे * योहीति * अगत्यभावोक्त्यर्थेनास्मत्पक्षे त्वित्यादिना वाजपेय एवेत्यादिभाष्यं व्याख्यातम् । आनन्तर्यादिति पूर्वपक्षहेतोर्द्वेधा व्याख्यासूचनायानन्तर्यषष्ठीश्रुती एकहेलयानुभाषते * यत्त्विति * नैरन्तर्यं तावद्वाजपेयशब्दस्य मध्यपाठात्सप्तदशारत्निशब्दवद्यूपशब्देनापि तुल्यमित्यादि व्याख्याशयेनानुभाषणे परिहरति * तदिति * साक्षात्सम्बन्धिनि षष्ठीश्रुतेरिति द्वितीयव्याख्याशयेनानन्तर्याच्छ्रुतेरित्यनुभाषणपक्षे वाजपेयान्वयस्यानुवाद्यत्वान्न साक्षात्वादर इति परिहरति * अतश्चेति * यूपस्य सप्तदशारत्नित्वविधौ वाजपेयान्वयानुवादमाशङ्क्यानन्तर्यबलादेव विवक्षितस्याप्यन्वयस्यावगमो ऽतश्चेत्यनेनोक्तः । ननु दीक्षाः सोमस्येत्यादिवत्प्रकरणप्राप्तस्यापि प्रधानान्वयस्य परिसंख्यार्थत्वेनापि विधिसम्भवे ऽनुवादत्वाभ्युपगमो न युक्त इत्याशङ्क्याह * अस्ति त्विति * बहुव्रीह्यपेक्षितस्यान्यपदार्थस्य वाजपेयशब्दन समर्पणाशक्तिर्यूपशब्देनैव तत्समर्पणस्यावगमाद्यूपस्य च वाजपेयान्वयाभावात्सप्तदशारत्नित्वस्य वाजपेयान्वयपक्षत्यागेन यूपान्वयपक्षो ऽवलम्बित इत्यर्थः । सप्तदशारत्नित्वस्य च वाजपेयेन सह साक्षाद्वान्वयः स्यात्सम्बन्धिमात्रद्वारा यूपद्वारा वा सर्वथा न सम्भवतीत्याह * किं चेति * श्लोकं व्याचष्टे * सा-
७४७।२ क्षात्त्वादिति * यूपस्य वाजपेयाङ्गत्वाभावे शक्ष्यति च स पशुयूपं विशेष्टुमिति भाष्ये वाजपेयस्य यूपविशेषणोक्तिर्न युज्येतेत्याशङ्क्य पारम्पर्यान्वयाविशेषणत्वं व्याख्येयमित्याह * तस्मादिति * स्वरूपे कार्ये चोपयोगिनो ऽङ्गत्वावसायाद्यूपस्य च प्रकृतौ विज्ञातोत्पत्तिप्रकारत्वेन स्वरूपोपयोग्यङ्गानपेक्षणात्कार्यस्यापि पशुनियोजनस्य पशुयागस्य चातिदेशादेवज्ञातोपायपरिमाणत्वेन तदुपयोगिनो ऽप्यङ्गस्यानपेक्षणात्सप्तदशारत्नित्वस्य वाजपेयापूर्वोपयोगित्वोक्तौ वाजपेयविशिष्टस्य यूपस्योद्देश्यताङ्गीकार्येति भाष्याशयः । विशिष्टानुवाददोषापत्तेर्भाष्योक्तदोषापरितोषात्स्वमतेनाधिकारलक्षणप्रकरणप्राप्तवाजपेयान्वयानुवादमाह * अधिकारेति * अनङ्गगतस्यापि च साप्तदश्यस्योपकारिस्थितत्वमात्रेण वाजपेयोपकारित्वो-

पपत्तेः कथं भावात्मकमपि प्रकरणं न विरुध्यत इत्याह * वक्ष्यति हीति *

अभिक्रमणादीनां प्रयाजामात्राङ्गताधिकरणम् ॥ १० ॥

कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः स्यात् ॥ १९ ॥

आनर्थक्यापत्त्या श्रुतक्रियान्वयायोगेन तदङ्गावतारे स्थिते तद्विशेषचिन्तात्वेनोत्तराधिकरणद्वयस्यानन्तरसङ्गतौ स्पष्टायामभिक्रमणोपव्यानयोस्तदङ्गावतारे सति संस्कारत्वापत्तेः सम्मार्गाख्यसंस्कारचिन्तानन्तरमेव चिन्ता कार्या न सप्तदश्यगुणचिन्तानन्तरमित्याशङ्क्याह * एवमिति * क्रियायाः साक्षात्क्रियान्वयायोगाद् गुणवत्क्रियासाधनद्रव्यद्वारा क्रियान्वयेनार्थात् द्रव्यसंस्कारत्वावगतेर्गुणचिन्तानन्तरं चिन्ता युक्तेत्याशयः। ननु धातुसम्बन्धाधिकारणमुल्श्रुतिवशादभिक्रमणस्य क्रियान्तरान्वयावगमे ऽप्यारादुपकारित्वे ऽप्यन्वयाविरोधात्कथं संस्कारत्वावगतिरित्याशङ्क्याह * तत्रेति * आभीक्ष्ण्ये णमुलचेति स्मृतेर्वीप्सार्थस्यावृत्तिरूपस्याभीक्ष्ण्यस्य णमुलोपादानादारादुपकारित्वे च तन्त्रत्वादावृत्त्यनुपपत्तेः संस्कारस्य तु कार्ययोग्यताधानार्थत्वात्प्रतिकार्यमावृत्त्युपपत्तेः संस्कारत्वावगतिरित्याशयः। प्रयाजविधायिसमिदादिवाक्येभ्यो ऽभिक्रमवाक्यस्यान्यत्वात्प्रयाजवाक्ये श्रूयतइति भाष्यमयुक्तमित्याशङ्क्यावान्तरप्रकरणाशयत्वं वाक्योक्तेः सूचयितुमाह * परश्चेति* तत्रेति सन्देहभाष्यं व्याचष्टे * तदिति * विस्पष्टजुहोतिसम्बन्धश्रुतेः पूर्वपक्षवचनव्यक्त्ययोगात्सन्देहायोगमाशङ्क्याह * सम्बन्धेति * यथा कथं पुनररुणयेति भाष्येण विस्पष्टक्रयसम्बन्धावगमेनारुणाधिकरणसन्देहमाक्षिप्येह गुणमरुणिमानमित्यादिभाष्येण शब्दवस्तुविसम्वादात्परिहारो ऽभिहितस्तथाभिक्रमणस्यापि णमुल्श्रुत्या क्रियान्तरसाधनत्वावगमादमूर्त्तत्वाच्च वस्तुस्वरूपालोचनेनासाधनत्वावगमात्सन्देहाक्षेपस्य परिहारो वाच्य इत्यर्थः। एतदेव विवृणोति * कर्मण इति * पौनरुक्त्यात्तर्हि नेदमधिकरणमारभ्यमित्याशङ्क्याव्ययकृतो भावे भवन्तीति अव्ययत्वाण्णमुलो ऽभावमात्रवाचित्वस्मृतेरेकहायनीवत्समानाधिकरणद्रव्यानुपादानाद् द्रव्यविषयानियमे चोपपत्तिभूतस्य साध्यक्रियासम्बन्धस्य णमुलुक्तसमानकर्तृकपूर्वकालत्वान्यथा ऽनुपपत्तिसाध्यत्वेन कर्तृभूत-

नां गुणो ऽभिधास्यते तस्मात्प्रयाजानां प्रकरणमध्याप्यवसीयत इत्यर्थः।

॥ उपवीतस्य प्राकरणिकाङ्गताधिकरणम् ॥ ११ ॥

सन्दिग्धे तु व्यवायाद्वाक्यभेदः स्यात् ॥ २१ ॥

नन्वभिक्रमणस्य णमुल्श्रुत्युक्तक्रियान्तराङ्गत्वोपजीवनेन पू-
र्वोत्तरपक्षविचारात् श्रुतिपादे सङ्गतिर्युक्ताऽउपव्यानस्य तु वैयग्रचा-
पादकशीतवारणसामर्थ्यरूपाल्लिङ्गात्कर्तृसंस्कारत्वावगतेः सा-
मान्यसम्बन्धापेक्षायां च प्रकरणात्प्रकृतकर्माङ्गत्वावगतेः क्वचिदं-
शश्रुतिव्यापाराभावान्न श्रुतिपादे सङ्गतिरित्याशङ्क्य प्रासाङ्गिकत्वेन
सङ्गतिमाह * सिद्ध इति * कर्मणामपि कर्तृसंस्कारद्वारा कर्मा-
न्वये सिद्धे प्रसङ्गात्किमवान्तरप्रकरणेनोपव्यानस्य सामिधेन्यनुव-
चनमात्रे विनियोगो महाप्रकरणाद्वा कृत्स्ने दर्शपूर्णमासप्रकरणइति
भाष्यमते सङ्गतिः। वार्त्तिकमते त्ववान्तरप्रकरणात्कर्मणामभिक्र-
मणादीनामङ्गभूतप्रयाजादिकर्मान्वये किं सामिधेन्यनुवचनावान्त-
रप्रकरणमुपव्याने ऽनुवर्त्तते न वेति सङ्गतिरित्यर्थः। सामिधेन्यादी-
नामुदाहरणत्वशङ्काभाष्यस्थयज्ञोपवीतशब्दाच्च तस्माद्यज्ञोपवील्ये-
वाधीयीताध्यापयेद्यजेत याजयेदिति काठकशाखाविहितकर्माङ्गभू
तनवसूत्रातन्तुकयज्ञोपवीतशङ्कोपवीतोक्त्या निरस्ता। भाष्ये तु
सर्वधर्मत्वशङ्कानिरासाय प्रकृतयज्ञाङ्गत्वोक्त्यर्थो यज्ञशब्दः। अस्मि-
न्ननुवाके सामिधेन्यो ऽस्मिन्निविदइत्यादिविभागोक्तेः प्रयोजनमाह
* तत्रेति * सामिधेनीप्रकरणे वर्त्तमानएवोपवीतमाम्नातान्निवृत्ते
वा तत्प्रकरणे इति न ज्ञायत इत्येवं सौत्र सन्दिग्धशब्दं व्याख्याते सा-
मिधेनीनामवान्तरप्रकरणस्याभावादनुवृत्त्यननुवृत्तिसन्देहो न युक्त
इत्याशङ्कार्थं नन्वितिभाष्यं पूर्वाधिकरणे भाष्यकृतावान्तरप्रकरणा-
व्युत्पादनादेवान्तरप्रकरणभावाशयत्वेन तावद्व्याचष्टे * नन्विति *
महाप्रकरणेनाङ्गतया सामिधेन्यादीनां ग्रहणात्करणत्वाभावेनेति क-
र्त्तव्यताकाङ्क्षालक्षणं प्रकरणं न सम्भवतीत्याशयः। स्वमते तु पूर्वा-
धिकरणएवावान्तरप्रकरणव्युत्पादनात्प्रयाजादिष्वदृष्टार्थेष्वङ्गेष्ववा-
न्तरप्रकरणसद्भावे ऽपि सामिधेनीनां दृष्टार्थत्वेनेति कर्त्तव्यतानाना-
काङ्क्षत्वान्नावान्तरप्रकरणमस्तीत्येवमाशयत्वेन व्याचष्टे * अथ वेति *
अस्मिन्पक्षे परस्य द्रव्यस्य प्रकृष्टत्वकरणमतिशयाधानरूपरप्रकरण-
शब्देन विवक्षितम्। सत्यमिति परिहारभाष्यं अवान्तरप्रकरणव्यु-
७५०।१ त्पादनाशयत्वेन तावद्व्याचष्टे * नैतदिति * महाप्रकरणावगत प्र-
धानभावनाङ्गत्वोपपादकत्वात्प्रधानानुग्रहकरणस्य न महाप्रकरणा-
वगतेनाङ्गत्वेन कथं भावः प्रतिबध्यत इत्यर्थः। नन्वङ्गभावनानाम-

ङ्गान्वये प्राधान्यापत्ते प्रधानभावनान्वयो विरुध्येतेत्याशङ्कयाह * यथैवेति * यथाङ्गवाक्यानामवान्तरवाक्यार्थापेक्षया परिपूर्णस्वार्थानामपि महावाक्यार्थापेक्षया साकाङ्क्षत्वात्प्रधानवाक्यैकवाक्यत्वं तस्यामपि चावस्थायां स्वार्थे परिपूर्णत्वमात्मीयरूपं न विरुध्यते तथाङ्गभावनानां स्वाङ्गानि प्रति प्राधान्येऽपि प्रधानभावनां प्रत्यङ्गत्वन्तस्यामपि चावस्थायां स्वाङ्गानि प्रति प्राधान्यमविरुद्धमित्याशयः। पूर्वाधिकरणएवावान्तरप्रकरणव्युत्पादने तु यद्यपि परस्य द्रव्यस्य प्रकृष्टत्वकरणेऽतिशयाधाने सामिधेन्यः श्रूयन्ते तथापि तासामवान्तरप्रकरणमस्तीत्येवं भाष्यं व्याख्येयमिति सूचयितुमाह * संस्कारोऽपीति * नन्वदृष्टार्थस्य प्रोक्षणादिसंस्कारस्यावान्तरस्यावान्तरप्रकरणसद्भावेऽपि सामिधेनीनां दृष्टार्थत्वेनेतिकर्त्तव्यतानाकाङ्क्षत्वात्तन्न स्यादित्याशङ्क्य तास्वपि नियमादृष्टांशसिद्धये इतिकर्त्तव्यताकाङ्क्षणादस्त्येवावान्तरप्रकरणमित्याह * दृष्टार्थेष्वपीति * किं च केवलदृष्टार्थेष्वपि दृष्टार्थेतिकर्त्तव्यताकाङ्क्षणात्तदस्त्येवेत्याह * दृष्टेऽपि चेति * अतः संस्काररूपाणामप्यङ्गानामवान्तरप्रकरणमस्तीत्युपसंहरति * तस्मादिति * नन्वेवमपि दृष्टार्थयैवेतिकर्त्तव्यतया सामिधेन्यनुवचनस्य नैराकाङ्क्ष्यसिद्धेर्वासोविन्यासविशेषरूपोपव्यानात्मिकायाश्चेतिकर्त्तव्यतायाः शीतवातादिवारणात्मकदृष्टार्थत्वमात्रेणापर्यवसानाददृष्टार्थत्वावगतेस्तदाकाङ्क्षा न सम्भवतीत्याशङ्क्याह * अतश्चेति * विवक्षादिक्रमेणोपजनितो यो वर्णग्रहणसामर्थ्यकरणरूपः श्रोत्रसंस्कारस्तदनुगृहीतेनेत्यर्थः। तस्माददृष्टार्थोपव्यानादीतिकर्त्तव्यताकाङ्क्षाप्यस्तीत्युपसंहरति * तस्मादिति * सामिधेनीनामवान्तरप्रकरणसद्भावे वासोविन्यासरूपस्योपव्यानस्य तदङ्गत्वसम्भवेन प्रकरणविच्छेदकत्वायोगात्प्रकरणनिवृत्तिरूपसिद्धान्तशङ्कानुपपत्त्या सन्देहाक्षेपार्थं कथं पुनरिति भाष्यमवान्तरप्रकरणनिवृत्त्यनिश्चयेनावान्तरप्रकरणविरोधानिश्चयान्महाप्रकरणेन दर्शपूर्णमासार्थत्वसिद्धान्तसिद्धेरयुक्तमाशङ्क्योपपादयितुमाह * एवं तर्हीति * सन्दिग्धेऽपि बलवद्विरोधे दुर्बलस्य विनियोक्तृत्वं न सम्भवतीत्याशयः। सामिधेनीप्रकरणविच्छेदकोक्त्यर्थं निवित्पदानीतिभाष्यं व्याचष्टे * उच्यते इति * एवं सत्यवान्तरप्रकरणानुवृत्तिरूपपूर्वपक्षशङ्कानुपपत्तेः सन्देहो न सम्भवतीत्याक्षेपार्थं यदीति
भाष्यं व्याचष्टे * एवं तर्हीति * निविद्भिर्विच्छिन्नस्यापि सामिधेनी- ७५।१।१
प्रकरणस्य काम्यैः सामिधेनीकल्पैरुज्जीवनसम्भवासम्भवसन्देहादनुवृत्त्यननुवृत्तिसन्देहोपपादनार्थं परस्तादितिभाष्यं व्याचष्टे * नेत-

द्विति * किन्तावदित्यादि पूर्वपक्षभाष्यं तात्पर्यतोव्याचष्टे * किन्तावदिति * निविद्भ्यः प्राक्पश्चाच्च सामिधेनीनाङ्कीर्त्तनात्काम्यसामिधेनीकल्पपर्यन्तं सामिधेनीप्रकरणानुवृत्तावप्युपव्यानपर्यन्तं कथमनुवृत्त्यवगतिरित्याशङ्क्य तिष्ठन्नन्वाहान्तर्वेद्यन्यः पादो भवति बहिर्वेद्यन्यो ऽथान्वाहेत्युपव्यानात्पश्चादपि सामिधेनानुवचनाङ्गकीर्त्तनात् देवा वै सामिधेनीरनूच्य यज्ञं नान्वपश्यन्निति च स्रौवाघारादिवद्युपक्रमे सामिधेन्यनुवचनोपसंहारादुपव्याने ऽपि सामिधेनीप्रकरणानुवृत्तिः स्थितोक्त्या सूचिता । निविदामप्यव्यवधायकत्वार्थं सन्देहसमर्थनोपसंहारभाष्यानुसारात्परप्रकरणे पाठमुक्त्वा पदोत्तरत्वेनोत्तरसूत्रं व्याख्यातुमथ वेत्युक्तम् । सामिधेनीवन्निविदामपि अग्निसामिन्धनप्रकाशनार्थत्वे ऽपि सामिधेनीनामग्निसमिन्धनार्थेध्मकाष्ठप्रक्षेपप्रकाशनार्थत्वान्निविदामिध्मप्रक्षेपफलाग्निसमिन्धननिष्पत्तिप्रकाशनार्थत्वादगन्मस्वः संज्योतिषा भूमेति दर्शपूर्णमासफलनिष्पत्तिप्रकाशनार्थस्य मन्त्रस्य दर्शपूर्णमासाङ्गत्ववत्सामिधेनीप्रकाश्येध्मप्रक्षेपफलनिष्पत्तिप्रकाशनार्थत्वान्निविदां सामिधेन्यङ्गता युक्तेत्याशयः । उत्तरार्द्धं व्याचष्टे * यथेपि * पूर्वपक्षमुपसंहरति * इतीति * सिद्धान्तमाह *इति प्राप्त इति * सौत्रवाक्यभेदशब्दोक्ते ऽवान्तरप्रकरणरूपवाक्यैकवाक्यत्वाभावे भ्रम इत्यनेनार्थाद्व्याख्याते तदुपपत्तित्वेन व्यवायोक्तिव्याख्यार्थं विच्छिन्नेत्युक्त्वा काम्यैः सामिधेनीकल्पैः सामिधेनीप्रकरणोज्जीवनान्न निविदां विच्छेदकत्वं भवतीत्याशङ्क्य न हीत्युक्तम् । न हीत्येतावतो निषेधार्थत्वाद्धि शब्दद्वयापौनरुक्त्यम् । निविदामपि सामिधेन्यङ्गत्वात्कथं तत्प्रकरणविच्छेदकतेत्याशङ्क्य सामिधेनीभिरसम्बद्धेन ग्रन्थेनेति भाष्यावयवसूचितं निविदामनङ्गत्वमुपपादयितुमाह * तावद्धीति * नन्विद्ध इति भूतनिष्ठया सामिधेनीप्रकाश्येध्मप्रक्षेपफलाग्निसमिन्धननिष्पत्तिप्रकाशनादगन्मस्वरित्यादीनां दर्शपूर्णमासाङ्गत्ववन्निविदां सामिधेन्यङ्गत्वं भविष्यतीत्याशङ्क्याह * तत्रेति * दर्शपूर्णमासादिफलस्यादृष्टद्वारसाध्यत्वेन श्रद्धापेक्षत्वाच्छ्रद्धाजननात्फलनिष्पत्तिप्रकाशनस्याङ्गत्वं युक्तम् । इध्मप्रक्षेपफलस्यात्वग्नेः समिद्धत्वस्य दृष्टद्वारसाध्यत्वेन श्रद्धानपेक्षत्वात्फलनिष्पत्तिप्रकाशनस्याङ्गत्वं न युक्तमित्याशयः । सामिधेनीनामपि निवित्प्रकाश्याग्निसमिन्धनसाधनेध्मप्रक्षेपप्रकाशनार्थत्वान्निविदङ्गता कल्पयितुं शक्येत्याह * अथेति * पूर्वार्द्धं व्याख्यामुपसंहरति * तेनेति * उत्तरार्द्धं व्याख्यातुमाह * कस्यास्त्विति * एकविंशतिमनुब्रूयात्तत्प्रतिष्ठाकाम-

स्येत्यादिषष्ठीश्रुत्या काम्यकल्पानां पुरुषार्थत्वावगतेः प्रकर-
णेनाग्रहणात्तदुज्जीवनं न सम्भवतीत्याशयः। नन्वेवं सति काम्य-
कल्पैनैव प्रकरणविच्छेदसम्भवान्निविद्भिर्विच्छेदोक्तिरनर्थिकेत्याश-
ङ्क्याह * यदि पुनरिति * नन्वनङ्गत्वे ऽपि निविदां परप्रकरण-
पाठसम्भवान्न प्रकरणविच्छेदकतास्तीत्याशङ्क्याह * अथापीति *
काम्यकल्पानामङ्गत्वाभावेन प्रकरणानुवृत्तिप्रमाणाभावान्न तद्बलेन
परप्रकरणपाठकल्पना युक्तेत्याशयः। एवं च निविदामङ्गत्वस्य प-
रप्रकरणपाठस्य वा कल्पयितुमशक्यत्वादवान्तरप्रकरणविच्छेदक-
त्वासिद्धेर्महाप्रकरणेनोपवीतस्य कृत्स्नदर्शपूर्णमासार्थता युक्तेति सू-
त्रार्थमुपसंहरति *नत्विति* ननु दध्नेन्द्रियकामाधिकरणन्यायेनैक-
विंशत्यादेर्गुणात्फलावगतेर्निराश्रयस्य च गुणस्य फलान्वयानुप-
पत्ते: विच्छिन्ने च प्रकरणे तेनापादानाद्वाक्येन स्वाश्रयदाने
गुणफलाश्रयाश्रयिसम्बन्धद्वयकरणात् वाक्यभेदापत्तेर्भावनान्तरत्वा-
द्वा वाक्यभेदपरिहारे रेवतीवारवन्तीयादिष्वपि वाक्येनाश्रयदा-
नाद् गुणफलान्वयोपपत्तेः स्थितसिद्धान्तहानिप्रसङ्गात्प्रकरणेना-
श्रयलाभार्थं विच्छिन्नस्या ऽपि प्रकरणस्य काम्यकल्पैरुज्जीवनाव-
गतेरुपवीतस्या ऽपि सामिधेन्यङ्गत्वप्रसङ्गाद् दुर्घटः सिद्धान्त इ-
त्याशङ्क्य * ननु चेति * प्रकृताश्रयालाभात्कर्मण एवात्र फलं न- ७५२१४
गुणादिति परिहरति * उच्यते इति * श्लोकं व्याचष्टे * नैवेति *
ननु कर्मान्तरत्वे संख्येया ऽनुपादानात्संख्यामात्र विशिष्टानुवचन
विधिरपरिपूर्णः स्यादित्याशङ्क्यातिदेशात्संख्येय साम्यमह * क-
थमिति * ननु कर्मान्तरत्वे ऽपि काम्येनैव सामिधेन्यनुवचनेन प्रस-
ङ्गात् क्रत्वर्थसामिधेन्यनुवचनकार्याग्निसमिन्धनप्रकाशनसिद्धे-
र्गुणकामतुल्या ऽनुष्ठानावगमात्कर्मान्तरत्वोक्तिः किमर्थेत्याशङ्क्याह
* यद्यपि चेति * अनुष्ठानाविशेषे ऽपि प्रकृताश्रयालाभाद् गुण
फलान्वया ऽनुपपत्तेः कर्मान्तरविधिं विना वाक्यानर्थक्यप्रसङ्गात्क-
र्मान्तरतोक्तेत्याशयः। ननु कर्मान्तरत्वे पृथक्प्रयोगापत्तेस्तेन प्रसङ्गा-
त् क्रत्वर्थसामिधेन्यनुवचनकार्यासम्भवात्कर्मान्तरत्वयोरनुष्ठानविशे-
षो ऽस्त्येवेत्याशङ्क्य * नन्विति * प्रकृतानुपयोगित्वादेव तावन्नेयं
शङ्का युक्तेत्याह * न तावदिति* न च कर्मान्तरत्वे ऽपि पृथक्प्रयो-
गापत्तिरित्याह * न चेति * एतदेव प्रश्नपूर्वमुपपादयति * कुत
इति * यस्य नमः प्रवक्त्रइत्यादि निगदस्य पश्चात्सामिधेनीवचने
क्रियमाणे पश्चाद्वचनवाच्यैकविंशतिमनुब्रूयादित्ययमनुशब्दः प्र-
युज्यते तस्य निगदरूपस्यान्यप्रयुक्तत्वेन पृथक्प्रयोगे सति साम-

धेनीभिरलाभादनुवचनत्वाविघातापत्तेर्न पृथक्प्रयोगो युक्त इति
भावे शानचमङ्गीकृत्यं व्याख्येयं पृथक्प्रयोगे ऽपि सामिधे-
न्यङ्गत्वान्निगदो लप्स्यत इत्याशङ्कां निरस्यन् श्लोकं व्याचष्टे * यो
हीति * जातवेदो रमया पशून्मयीति लिङ्गान्निगदस्याप्यग्निप्रका-
शनार्थत्वावगतेर्न सामिधेन्यङ्गतेत्याशयः । अग्नये समिध्यमानायानुब्रू-
७५.३।१ हीति प्रैषपश्चाद्भावनिमित्तो ऽनुशब्दो भविष्यतीत्याशङ्क्य पृथक्प्रयो-
गे क्रत्वर्थाग्निसमिन्धनप्रैषप्राप्तेरनाशङ्क्यत्वान्निगदानन्तर्यनिमित्त
तानुशब्दस्याशङ्क्येत साच स्वातन्त्र्ये सति न सम्भवतीति परिहा-
रार्थं तदनन्तरत्वेन चेत्युक्तम् । पृथक्प्रयोगे च सत्येकविंश-
त्यादिसंख्यापरिच्छेद्यत्वेनातिदेशप्राप्तानामपि प्रवोवाजा अभि-
द्यव इत्याद्यानामृचामग्निसमिन्धनप्रकाशकत्वेन सामिधेनीत्वा-
भावापत्तेरप्रयोगमध्यस्य चाग्नेर्निष्प्रयाजनत्वेनासमिन्धनीय-
त्वादृचामग्निसमिन्धनप्रकाशकत्वानुपपत्तेः सामिधेनीनामेकविंशत्या-
दिसंख्यापरिच्छेद्यनातिदेशप्राप्ता विहन्येतेत्याह * किञ्चे-
ति * श्लोकं व्याचष्टे * एकविंशत्यादिभिस्तावदिति * उत्त-
रार्द्धव्याख्यार्थं सचेत्युक्तम् । कथं तर्हि कर्मान्तरत्वे ऽप्यन्तः क्रतुप्र-
योगसिद्धिरित्याशङ्क्याह * तेनेति * येन कारणेनाग्निसमिन्धन-
प्रकाशनत्व विना सामिधेनीत्वं न सम्भवति क्रतुप्रयुक्तत्व च विना-
ग्नेः समिन्धनीयत्वं न सम्भवति तेन कारणेनार्थाभिधानकर्म च भ-
विष्यति संयोगस्य तन्निमित्तत्वात्तदर्थे हि विधीयते इति चतुर्थाधि-
करणन्यायेनास्याग्निसमिन्धनप्रकाशनार्थासामिधेनीकर्मस्वरूपस्य प्र-
कृतिभूतक्रत्वर्थसामिधेन्यनुवचनवत्काम्ये सामिधेन्यनुवचने ऽनुप्रयो-
गवशात्प्रयोगमध्यपात्यग्निसमिन्धनाधीनत्वं कर्मान्तरभूतस्यापि,का-
म्यस्य सामिधेन्यनुवचनस्येत्युक्तं प्रयोगमध्यपात्यग्निसमिन्धनप्र-
काशनस्य पञ्चदशसंख्याविच्छिन्नसामिधेनीसाध्यत्वात्कथमेकविं-
शत्यादिसंख्यावच्छिन्नसामिधेन्यनुवचनेन सिद्धिरित्याशङ्क्य प्राक्त-
नस्य चेत्युक्तम् । उपवीतस्य निविद्व्यवहित क्रत्वर्थसामिधेन्यनङ्गत्वे
ऽपि काम्यसामिधेन्यङ्गत्वं भविष्यतीत्याशङ्कार्थे ननु सामिधेनीकल्पा-
नामिति भाष्यं व्याचष्टे * नन्विति * निविद्व्यवधानान्निवृत्तस्य क्र-
त्वर्थसामिधेनीप्रकरणस्य काम्येषु सामिधेनीकल्पेषु प्रकरणेनाश्र-
यालाभाद्वाक्येनाश्रयान्वयाभ्युपगमापत्तेस्तत्र च वाक्यभेदप्रसङ्गा-
द् गुणफलान्वयासम्भवेनाश्रयापेक्षाभावात्तन्निमित्तोज्जीवनानुपपत्तेः।
प्रकरणेनाश्रयालाभे ऽपि गुणफलान्वयाभ्युपगमेनाश्रयतया सा-
मिधेनीग्रहणे ऽपि तासां संख्यान्वयित्वमात्रेण ग्राह्यतया कर्त्तव्यत्वेना-

विधानात्संख्यासामिधेन्यन्वयस्य वाक्येनैवाभ्युपगमनीयत्वापत्ते-र्गुणफलान्वये ऽपि प्रकरणानपेक्षणात्सामिधेनीनां प्रकृतत्वाभावात्प्रकरणेनोपवीतग्रहणानुपपत्तेः सामिधेनीवाक्यानन्तर्गतत्वाच्च वाक्येनोपवीतग्रहणस्यानाशङ्क्यत्वान्न काम्यानामपि सामिधेनीनामुपवीतमङ्गमिति परिहारार्थं नेति ब्रूम इत्यादि भाष्यं काम्येषु सामिधेनीकल्पेषु क्रत्वर्थसामिधेनीप्रकरणानुवृत्तावपि काम्यसामिधेनीप्रकरणेनैवोपवीतग्रहणोपपत्तेर्गुणफलान्वयस्य च विच्छिन्नप्रकृताश्रयत्वेनानिष्टत्वादुपेक्ष्य स्वयङ्क्रम्यानां सामिधेनीनां प्राकृताङ्गनिराकाङ्क्षत्वेन प्रकरणाभावात्सद्भावे ऽपि देवा वै सामिधेनीरनूच्येत्यस्याघारार्थवादाङ्गत्वेन सामिधेनीप्रकरणाननुवर्त्तकत्वादनुवर्त्तकान्तरस्य चानाशङ्कनीयत्वात्सन्निधिनोपवीतमङ्गं स्यात्स च प्रकरणात् दुर्बल इत्येवं परिहारमाह * नैतदिति * श्लोकं व्याचष्टे * सर्वास्वेवेति * अतिदेशलभ्यानामपि प्राकृतानामङ्गानां क्लृप्तोपकारकत्वेनोपादिष्टेभ्यः प्राग्विकृतिभिर्ग्रहणात्पृषदाज्येनानुयाजान्यजतीत्यादीनां च प्राकृतानां गुणत्वेनोपदिष्टानामपूर्वाणामप्यङ्गानां स्वाङ्गपरिपूर्णप्राकृताङ्गग्राहिण्या विकृतिभावनयाकृताङ्गग्रहणवेलायामेव ग्रहणात्तदङ्गानाञ्चानिवृत्ताकाङ्क्षत्वात्प्रकरणेनैव प्राकृताङ्गगुणभूताप्राकृताङ्गग्रहणोपपत्तेस्तद्वचावृत्त्यै यदित्युक्तम् । प्राकृताङ्गग्रहणसमकाललक्षणार्थो मध्यशब्दः । अभिषेचनीयसन्निधिपठितानां विदेवनादीनां स्थानादभिषेचनीयाङ्गत्वस्य प्रतिभासमानस्य प्रकरणावगतेन राजसूयाङ्गत्वेन बाधो बलाधिकरणे वक्ष्यमाणः काम्यसामिधेनीसन्निधिनोपवीतस्य काम्यसामिधेन्यङ्गतायाः प्रकरणावगतेन दर्शपूर्णमासाङ्गत्वेन बाधासिद्ध्यै दृष्टान्तित. तस्मादिति सिद्धान्तोपसंहारभाष्यं व्याचष्टे * तस्मादिति *

॥ वारणवैकङ्कतादिपात्राणां कृत्स्नयागगुणताधिकरणम् ॥ १२ ॥

॥ मिथो ऽसम्बन्धन्यायो वा ॥

गुणानां च परार्थत्वादसम्बन्धः समत्वा-स्यात् ॥ २२ ॥

पात्रविचारस्योपवीतचारासङ्गतिमाशङ्क्य वाजपेयाङ्गत्वेनावगतस्य सप्तदशारत्नित्वस्य तत्रासम्भवात्तदङ्गपशुयागावतारे ऽभिहिते तेनैव न्यायेनाभिक्रमणोपव्यानयोः कर्माङ्गभूतकर्त्रवतारे सिद्धे किमभिक्रमणस्य कृत्स्नदर्शपूर्णमासाङ्गत्वात्तदङ्गेषु सर्वेष्वप्यवतारः प्र-

योजहोमाङ्गत्वाद्वा तदङ्गभूते ऽध्वर्युमात्रे उपवीतस्य च किं सामि-
धेन्यनुवचनमात्राङ्गत्वात्तदङ्गभूते होतृमात्रे ऽवतारः कृत्स्नदर्शपूर्ण-
मासाङ्गत्वाद्वा तदङ्गभूतेषु सर्वर्त्विक्ष्विति विचारात्पर्यवसितस्या-
नर्थक्यतदङ्गावतारन्यायस्य पवमानेष्टीनामाधानाङ्गत्वे ऽपि यज्ञ-
त्वाभावाच्चाधानप्रकरणपठितानां पात्राणान्तास्ववतार इति प्रति
पादनात्स्वमतेनापवादतया सङ्गतिमाह * आनर्थक्यादिति * भाष्य-
मते तु किं पवमानेष्टीनामाधानाङ्गत्वात्पात्राणां तास्ववतारो ऽनङ्ग-
त्वाद्वानवतार इति विचारात्प्रासङ्गिकी सङ्गतिः । वैकंकतेषु नत्वे
तेनेति पर्युदासानुषङ्गशङ्कां निरस्यन्नग्न्याधेय इत्युदाहरणभाष्यं
७५४।२ व्याचष्टे * वारणेति * वारणानि होमव्यतिरिक्तपात्रकार्यार्था
नि वैकंकतानि सर्वपात्रकार्यार्थानीत्यर्थः । प्रकरणेनाधानाङ्गत्वावग-
मात्पवमानेष्टिष्वेव निवेशः सर्वयागेषु वेति सन्देहायोगमाशङ्क्य
यज्ञे ऽवचर्यते ऽनुष्ठीयते ऽनेनेति यज्ञावचरशब्देन यागाङ्गत्वाभिधाना-
त्प्रकरणगम्ययागरूपाधानाङ्गत्वबाधेन सन्देहोपपादनार्थं न चेत्या-
दि भाष्यं व्याचष्टे * यज्ञेति * किमित्यादि पूर्वपक्षभाष्यं व्याच-
ष्टे * आनर्थक्यादिति * एवमित्यादि सिद्धान्तभाष्यं सङ्क्षि-
प्य व्याचष्टे * तथेति * श्लोकं व्याचष्टे * प्रकरणेति * केः
वाक्येनेत्यपेक्षायां वाक्यमुदाहरति *किमितीति*भाष्यस्यस्येति कश्र
णस्य येन वाक्येनाग्नेर्भवति तत्किं वाक्यमित्यग्न्यङ्गत्वप्रतिपा
दकत्वपरामर्शार्थत्वं सूचितम् । पवमानेष्टीनां कैमर्थ्याकाङ्क्षायामा
हवनीये जुहोतीति क्लृप्तफलाहवनीयसंयोगे तत्कल्प्यफलानामि
ष्टीनां तादर्थ्यावसायादगारे गावो वास्यन्तामगारे कुसुमानीत्यादिवः
प्राधान्ये ऽपि सप्तम्यविरोधाज्जुहोत्यनुत्पत्तित्वेन चेष्टिनिरोधा
नपेक्षणाद्विश्वजिद्वत्स्वर्गे ऽपि कल्प्यमाने जुहोत्युपलक्षिताद्यागात्स्व
र्गो यागस्य चाहवनीयेनापरो ऽदृष्टः संस्कार इत्यदृष्टद्वयकल्प
नापत्तेरग्निसंस्कारकल्पनस्यैवोचितत्वात्पवमानेष्टीनामप्याधानवद्वा
क्येनाग्न्यङ्गत्वावगतेर्नाधानाङ्गतेत्याशयः । सिद्धान्तभाष्यं दूष
यति * तत्रेति * आहवनीयप्रयोजनाभिधायिवाक्यान्तराश्रु
तेरनेनैव वाक्येनाग्निहोत्राद्यङ्गतया ऽऽहवनीयस्य प्रयोजनवत्त्वप्रती
तेरभ्युपगमनीयत्वादग्निहोत्रादीनां पवमानेष्टीनां च श्रुताश्रुतफ
लत्ववैषम्ये ऽप्येकेन वाक्येनाहवनीयस्य क्वचिद् गुणत्वे क्व चित्प्रा
धान्ये ऽभिधीयमाने वैरूप्यापत्तेः सप्तम्याश्च श्रुतिलक्षणावृत्तिविरो
धापत्ते पवमानेष्टिवच्च विश्वजिदादीनामश्रुतफलत्वेनाहवनीयाङ्ग
त्वापत्तेर्नानेनाग्न्यर्थत्वं पवमानेष्टीनां गम्यत इत्याशयः । पवमानेष्टी

नामपि च प्रकरणावगताधानाङ्गत्वेन फलवत्त्वावसायात्फलवद्-
फलत्वविशेषानुपपत्तेस्तद्दर्शनैकस्य वाक्यस्य गुणप्रधानभूता-
हवनीयोक्तिवैरूप्याभ्युपगमः सप्तम्याश्च श्रुतिलक्षणावैरूप्याभ्यु-
पगमो विश्वजिदादीनां चाहवनीयाङ्गत्वाभ्युपगमो न युक्त इत्याह *
सर्वं चेति * फलवदग्निहोत्रादिकर्मानुरोधेन च निष्पन्नाहवनी-
योपदेशादफलवत्पवमानेष्टयादिकर्मानुरोधेन च भाव्याहवनीयसं-
ज्ञाविधानादाहवनीयशब्दप्रवृत्तावप्यस्मिन्पक्षे वैरूप्यं स्यादित्याह *
* निष्पन्नश्चेति * फलवत्कर्मानुरोधेनेत्यकारसदसद्भावाभ्यामावृ-
त्त्योभयत्र योऽयमायदाहवनीये जुहोति यद्गार्हपत्ये हवींषि श्रपयन्ति
यद्दक्षिणाग्नावन्वाहार्यं पचन्तीत्यनारभ्याधीतेभ्यः कर्माङ्गत्वेनाहव-
नीयादिविधायिभ्यो ऽन्येन पवमानेष्टिप्रकरणाधीतेनानारभ्याधीताह-
वनीयवाक्यसदृशेनाहवनीयाङ्गतया पवमानेष्टिविधिर्भविष्यतीति
परमतेन भाष्यं समाधत्ते * तस्मादिति * नन्वश्रुतप्राकरणिकवा- ७५५।१
क्यकल्पनां विनाप्यनारभ्यवाक्येनाश्रुतहोमासु पवमानेष्टिषु आह-
वनीयमुपदेष्टुमशक्नुवतातिदेशात्प्राप्तेनाहवनीयं प्रापयताङ्गत्वेना-
निष्पन्नाहवनीयप्रापणाशक्तेः साध्यत्वेन प्रापणावगमात्पवमानेष्टी-
नामग्न्यङ्गत्वसिद्धेरतिदेशप्राप्तवाक्यव्यापारोक्त्यर्थत्वेन वाक्यो-
क्त्युपपत्तेर्नाश्रुतवाक्यकल्पना युक्तेत्याशङ्कानिराससूचनार्थः कि-
लशब्दः । उपकारपृष्ठेनातिदेशप्रवृत्तेः पवमानेष्टिष्वनिष्पन्नत्वेना-
धारतया गुणत्वेन प्राप्त्यसम्भवे कार्यलोपात्कृष्णलेष्ववघातवदाह-
वनीयानिष्पत्तावप्याधानजन्यसंस्काररूपेणैकदेशनिष्पन्नत्वादतिदे-
शाभ्युपगमे ऽङ्गत्वस्याप्युपपत्तेः अतिदेशप्राप्तस्य चाहवनीयस्य
साध्यत्वाभ्युपगमे ऽन्योन्यानपेक्षास्वाधानानपेक्षासु चेष्टिष्वातिदेशप्रा
प्तेः तादृशीनामेवाहवनीयाङ्गत्वापत्तेराधानपवमानेष्टिसमुच्चयाभ्युपग-
मविरोधप्रसङ्गादतिदेशप्राप्तस्याहवनीयस्य साध्यत्वानुपपत्तेर्नाश्रुत
प्राकरणिकवाक्यकल्पनां विनाग्न्यङ्गत्वं पवमानेष्टीनां सेत्स्यतीत्या-
शयः । अनारभ्यवाक्यसदृशाश्रुतप्राकरणिकवाक्यकल्पने ऽप्या-
धानाङ्गत्वात्पवमानेष्टीनामाहवनीयोत्पादकत्वाभ्युपगमे ऽङ्गारप्राका-
रादिवदाहवनीयस्यानिष्पन्नत्वेनाधिकरणतया संस्कार्यत्वायोगा-
त्सप्तमीभङ्गापत्तेः सम्मार्गादिवत्पवमानेष्टीनां कर्मविशेषप्रकरणान-
धीतत्वेन कर्मविशेषयोग्यताधानात्मकसंस्कारार्थत्वायोगात्साधा-
रणयोग्यताधानस्य चाहवनीयस्वरूपोत्पत्तिमात्रात्सिद्धेरुपनयना-
दिवत्सर्वकर्मसाधारणस्य सर्वयोग्यताधानात्मकसंस्कारार्थत्वायोगा-
दग्न्यङ्गत्वासिद्धेर्नाश्रुतकल्पना युक्तेत्येतत्समाधानं दूषयति * वयं

त्विति * कथं तर्हि सिद्धान्तसिद्धिरित्याशङ्क्य पूर्वपक्ष्युक्ताधानाङ्गत्वाभ्युपगमेनापि पात्राणां पवमानेष्टिष्वनवतरणमुपपद्यतइत्याह * अन्यथापीति * अन्यथात्वमेव दर्शयति * भवन्तु नामेति * वाक्यगम्ययूपान्वयेन प्रकरणगम्यसाक्षाद्वाजपेयान्वयबाधाद्वाजपेयाङ्गाङ्गयूपद्वारापि च सप्तदशारत्नित्वस्य वाजपेयोपकारत्वं किञ्चिदस्तीत्यर्थः । यज्ञग्रहणं पवमानेष्टिष्ववतारकारणं[2] भविष्यतीत्याशङ्क्याह * यत्त्विति * एकादशे ऽग्नियोगः सोमकाले तदर्थत्वात्संस्कृतेः कर्मणः परेषु स्वाङ्गस्य तस्मात्सर्वापवर्गे विमोकः स्यादिति सूत्रेणाग्नेः साङ्गप्रधानार्थत्वेनाग्नियोगस्यापि तद्वारा साङ्गप्रधानार्थत्वावसायात्साङ्गप्रधानापवर्गे ऽग्निविमोकं पूर्वपक्षयित्वा प्रधानापवर्गे तदर्थत्वादित्यनेन पञ्चभिर्युनक्ति पाङ्क्तो य इति श्रुतेर्यज्ञशब्दस्य च स एष यज्ञः पञ्चविधो ऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इति वाक्यालोचनया प्रधानयागवाचित्वावसायादग्नियोगस्य प्रधानयागमात्रार्थत्वावगतेः प्रधानमात्रापवर्गे ऽग्निविमोकसिद्धान्तस्य प्रधानार्थो योगः प्रधानसंयोगेन हि श्रूयते पञ्चभिर्युनक्ति पाङ्क्तो यज्ञो यावानेष यज्ञस्तमालभतइति यज्ञप्राप्त्यर्थं युनक्तीति ज्ञायतइति भाष्ये वक्ष्यमाणत्वाद्वार्त्तिककृतापि यज्ञसंयोगार्थवादस्य पञ्चभिर्युनक्तीति गुणवाक्यशेषत्वयाग्निं युनज्मि शवसा घृतेनेति जुहोतीत्युत्पत्तिवाक्यशेषत्वाभावेन सिद्धान्तदूषणाद्यद्यपि यज्ञसंयोगो भवेत्तथापि यज्ञशब्दो यागमात्रवचनो यागमात्रवचनश्चेदङ्गयागानपि वदतीति वार्त्तिके च यागमात्रवाचित्वोक्तेश्चेच्छब्देनैवानभिमतत्वसूचनात्पवमानेष्टीनां प्राधान्याभावेन प्रधानयागवाचियज्ञशब्दवाच्यत्वाभावमभिप्रेत्य प्रकृतयज्ञाभावाद्दीर्घसोमे सन्तृद्यादितिवत्प्रकरणादुत्कर्षेणानारभ्यवादरूपतां प्रतिपाद्य सर्वेषु दर्शपूर्णमासादिषु प्रधानयागत्वाद्यज्ञशब्दवाच्येषु यज्ञावचरग्रहण पात्राणि विदधातीत्युक्तम् । अनेन चाधानगुणभूतानां पवमानेष्टीनाम्परार्थत्वेनायज्ञतयाधानसमत्वाद्यज्ञसंयोगेन श्रुतैः पात्रैरसम्बन्धः स्यादित्येवं सूत्रव्याख्या सूचिता । दर्शपूर्णमासादिषु जुह्वादिपात्राणाम्पर्णतादिविधावप्युलूखलादिपात्रेषु वारणवैकङ्कतत्वविध्यविरोधः । यज्ञशब्दस्य प्रधानयागवाचित्वेन पवमानेष्टीनां यज्ञत्वाभावप्रदर्शनार्थमेतत्सूत्रमन्यथा तु पवमानेष्टीनां यज्ञत्वाभावाद्यज्ञसंयोगेन श्रुतानां पात्राणाम्बलवत्प्रमाणविरोधेन प्र-

---

(१) कारित्वोपपत्ति, प्रकरणासंभवेऽत्यन्तबाधायोगाद्रूपे ऽवतरणं कल्पितं पात्रवाक्ये तु पवमानेष्ट्यग्रहणान्न तद्वदेवावतार इ० २ पु० अधि० ।

(२) अवतारेण कारणमिति २ पु० पा० ।

करणादुत्कर्षेण पूपाद्यनुमन्त्रणन्यायेनैव सेत्स्यतीत्यधिकरणानर्थक्यं स्यादित्याह * तच्चेति* सूत्रस्य तर्हि का गतिरित्याशङ्क्य शङ्कोत्तरत्वेन पूर्वाधिकरणशेषतया सूत्रङ्गमयितव्यमित्याह * सूत्रन्त्विति * शेषतयेत्यध्याहार्यम् । कथमेतच्छङ्कोत्तरतास्य सूत्रस्येत्याशङ्क्याह * तदिति * तामेव व्याख्यां स्मारयति * तथा हीति *

॥ वार्त्रघ्न्यामनुवाक्यानामाज्यभागाङ्गताधिकरणम् ॥ १३ ॥

॥ वार्त्रघ्नीन्याय इति वा ॥

मिथश्चानर्थसम्बन्धात् ॥ २३ ॥

यथावचनवाक्येन पात्राणां प्रकरणादाधानाङ्गत्वबाधेऽभिहितेऽनुवाक्यानामपि क्रमावगताज्यभागाङ्गत्वबाधस्य प्रसक्तस्यापवादार्थेतदधिकरणमित्यनन्तरसङ्गतिमाह * यथासंयोगमिति * अनुवाक्यानां क्रमकृतमाज्यभागसंयोगमबाधित्वा निवेशार्थमित्यर्थः । एवं तर्हि वाक्यबलीयस्त्वेन क्रमकृतसंयोगबाधनिश्चयात्सिद्धान्तानुपपत्तेः सन्देहो न युज्यतेत्याशङ्कते * कुत इति * वाक्यक्रमकृतयोः संयोगयोः सम्प्रधारणे सन्देहायोगसूचनार्थोतिकरणः । वाक्यकृतस्य प्रधानसंयोगस्य क्रमविरोध्यविरोधित्वेन द्वेधा प्रतिभानात्सन्देहोपपत्तिरिति सूचयति * संयोगस्यैवेति * बाधकत्वाभिमतवाक्यकृतसंयोगसूचनार्थेवकारः । एतदेव विवृणोति * साधारण्येनेति * पौर्णमास्यमावास्याशब्दयोः काले कर्मणि च साधारण्यात्कालाभ्यामनुवाक्यानां संयोगः । कर्मभिर्वाग्नेयादिभिरित्येवं वाक्यकृतः संयोगः सन्दिग्ध इत्यर्थः । कस्मिन्पक्षे क्रमवाक्ययोर्विरोधः कस्मिन्वा नेत्यपेक्षायामाह * विरुद्ध इति * वाक्येनानुवाक्यानामाग्नेयादिसम्बन्धे सति क्रमो वाक्यविरुद्धः कालसङ्गतौ न विरुध्यतइत्यर्थः । एतदेवोपपादयति * तुल्यकक्षौ हीति * वाक्येनानुवाक्यानामाग्नेयादिकर्मसम्बन्धे क्रमावगम्येनाज्यभागसम्बन्धेन सहाङ्गाङ्गित्वरूपतया तुल्यत्वं कालसङ्गतौ त्वङ्गाङ्गिरूपत्वाभावेनातुल्यतेत्यर्थः।पूर्वपक्षमाह*नित्यमिति *यस्माद्यागानामेवानुवाक्याभिः सङ्गतिर्युक्ता ननु कालयोः तस्माद्वाक्यावगतानुवाक्यानां प्रधानाङ्गतयाज्यभागाङ्गत्वबोधकः क्रमो बाधित इत्युक्तेऽनुवाक्याभिः कालयोरङ्गाङ्गित्वरूपसङ्गत्ययोगेऽपि व्यवस्थाप्यव्यवस्थापकत्वरूपा सङ्गतिर्भविष्यतीत्याशङ्कानिरासस्सूचनार्थं नित्यमित्युक्तम् । ७५६।४
आज्यभागयोः साक्षात्कालान्वयाभावात्पौर्णमास्याङ्काले यावाज्यभागौ तयोर्वार्त्रघ्न्यावमावास्याकाले यौ तयोर्वृधन्वत्याविति व्यवस्था-

ऽनुपपत्ते कालकृतायां व्यवस्थायां य इष्ट्वेति वाक्येन दर्शपूर्णमास-सोमविकारेषु पौर्णमास्यमावास्याकालविधानात्पौर्णमास्यां द-र्शविकारानुष्ठाने वार्त्रघ्नीप्रसक्तेरमावास्यायां च पूर्णमासविकारा नुष्ठाने वृधन्वतीप्रसक्तेः प्रकृतिवद्भाववैरूप्यप्रसङ्गात्प्रधानं पौर्णमासी चामावास्यां च नाज्यभागाविति पूर्वपक्षभाष्ये चाज्यभागयोः पौर्णमास्यमावास्याशब्दवाच्यत्वनिषेधात्सिद्धान्ते पौर्णमास्यमावास्याशब्दयोः प्रधानवाचिनोः प्रधानकालाज्यभागलक्षणार्थत्वावसाया-द्व्यवस्थापक्षे ऽपि पौर्णमास्याख्यप्रधानकालीनयोराज्यभागयोर्वार्त्र-घ्न्यावमावास्याख्यप्रधानकालीनयोर्वृधन्वत्याविति प्रधानयागद्वा-रैव व्यवस्थाया वाच्यत्वात्पक्षद्वये ऽप्यनुवाक्याभिः प्रधानयागानां सङ्गतिरित्याशयः । विस्तरेण चास्माभिस्तन्त्रसार ऽनयोः पौर्णमा स्यमावास्याशब्दयोरभिमर्शनमन्त्रविधायिवाक्यस्थपौर्णमास्यमावा-मास्याशब्दवत्प्राधानवाचितोपपादिता शक्यते च कालोक्तिः पौर्णमास्यमावास्याशब्दवाच्यप्रधानलक्षितकालविषयतया व्या-ख्यातुम् । साधारण्यंनेति सन्देहोपपादनवार्त्तिकमपि व्यवस्थापक्षे ऽप्याज्यभागयोः साक्षात्कालानन्वयेन प्रधानद्वाराज्यभागकालस्य लक्षणीयत्वात्पौर्णमास्यमावास्याशब्दयोः पक्षद्वये ऽपि प्रधानवाचि-त्वसाधारण्यात्किं कर्मलक्षिताभ्याम् कालाभ्यां अनुवाक्यानां व्यवस्थाप्यव्यवस्थापकलक्षणः संयोगः कर्मभिरेव चाङ्गाङ्गिलक्षण इ-त्येवं सन्दिग्धः संयोग इत्येवं व्याख्येयम् । वारणवैकंकतपात्रा-णां पूषाद्यनुमन्त्रणन्यायेनैवोत्कर्षसिद्धेः गुणानां चेति सूत्रस्य प्र-धानविषयत्वानभ्युपगमे त्वेतदधिकरणपूर्वपक्षे ऽपि योजयितुं शक्यमिति सूचयितुमाह * गुणानां चेति * पूर्वपक्षोपसहार-पूर्वं सिद्धान्तसूत्रमवतारयति * तस्मादिति * सूत्रे साध्यान-भिधानात्पूर्वसूत्रस्थासम्बन्धपदानुषङ्गेण साध्याकाङ्क्षां पूरय-न्व्याचष्टे * मिथश्चेति * पुरा ऽनुवाक्यामन्वाहेति विवक्षितैकसं-ख्यत्वेनानुवाक्यालक्षणानां मिथो युग्मभूतानां प्रधानैः सह दे-वताप्रकाशनाख्यकार्यरूपार्थद्वारसम्बन्धाभावादित्येवं हिशब्दार्थच शब्दकेनोत्तरार्द्धेन सूत्रं व्याख्यातम् । पूर्वसूत्रोक्तसम्बन्धानुक-र्षणार्थः सौत्रश्चशब्दः । पूर्वसूत्रेणैतदधिकरणपूर्वपक्षकरणे त्व चोदकाश्च संस्कारा इतिवत्पूर्वपक्षनिवृत्त्यर्थः । वार्त्रघ्नीवृधन्वत्य-नुवाक्यालक्षणानां गुणानां प्रधानैः सहार्थद्वार सम्बन्धाभावोप-पादनार्थत्वेन मिथःशब्दं व्याख्यातुमाह * द्वे तावदिति * पिष्टये-ष्टिवत्कर्मैक्ये ऽप्यनुवाक्याद्वयोपपत्तिमाशङ्क्य द्वे द्वे अनुवाक्ये इति व-

दिह छित्वविद्ध्यभावादनेकार्थविधिगौरवापत्तेश्च तेनैव छित्वाविध्ययोगान्नानुवाक्याद्वयोपपत्तिरिति परिहारसूचनार्थं कथं च नेत्युक्तम्। कर्मद्वये तर्ह्यनुवाक्याद्वयं भविष्यतीत्याशङ्क्याह*द्वयोरपि चेति* एतदेवोपपादयितुमारभते * अमावास्यायां तावदिति * पौर्णमास्यामग्नीषोमीये सोमस्यापि देवतात्वात्सौमी विद्यमानार्था भविष्यतीत्याशङ्क्याह * पौर्णमास्यामपीति * एवं तर्ह्येकदेवत्ये कर्मण्यनपेक्षितत्वादनुवाक्याछित्वविध्ययोगे ऽप्यग्नीषोमीये ऽपेक्षितत्वात् छित्वाविध्युपपत्तेर्द्वयोर्वात्रैन्योः समुच्चयेन प्रयोगो भविष्यतीत्याशङ्क्याह *न चेति * श्रुतैकसंख्याविरोधान्न सामर्थ्यतो ऽनुवाक्याद्वयसमुच्चयो नापि विधितो वाक्यभेदापत्तेरित्याशयः । नन्वाज्यभागयोरपि मन्त्रविशेषस्य कालस्य च विधानात्तुल्यो वाक्यभेद इत्याशङ्क्याह *आज्यभागयोस्त्विति* लिङ्गक्रमाभ्यामेव मन्त्रविशेषप्राप्तेर्न्यायप्राप्तप्रधानकालद्वारा व्यवस्थार्थासंयोगे वाक्यभेदापत्तिरित्याशयः । सिद्धान्तमुपसंहरति * तस्मादिति * अङ्गाङ्गिकल्पनमपेक्ष्य प्रधानकालद्वारव्यवस्थार्थः संयोगो न्याय इत्युक्ते प्रधानवाचिनोः पौर्णमास्यमावास्याशब्दयोः । काललक्षणार्थत्वापत्तेरन्याय्यतामाशङ्क्य कालयोगेनैव प्रधानानां पौर्णमास्यमावास्याशब्दवाच्यत्वात्तस्य च कालस्य साक्षादाज्यभागमन्त्रव्यवस्थापकत्वायोगात्प्रधानान्वयपूर्वव्यवस्थाभ्युपगमेन प्रधानान्वयिरूपलक्षणापत्तावपि स्वरूपेण वाच्यत्वात्पूर्वप्रतीतेरदोष इति पूर्वेत्यनेनोक्तम् ।

मुष्टिकरणादीनां कृत्स्नप्राकरणिकाङ्गताधिकरणम् ॥ १४ ॥

आनन्तर्यमचोदना ॥ २४ ॥

प्रधानान्वये ऽनुवाक्यानामानर्थक्यापत्तेस्तदङ्गभूतयोराज्यभागयोः क्रमानुसारेणावतारोक्त्या वारणाधिकरणापोदितानर्थक्यतदङ्गावतारोज्जीवने कृते मुष्टिकरणस्याङ्गुलिविसर्जनोत्तरकाल प्रधानान्वयायोगाद्वाग्यमस्य च वाग्विसर्गोत्तरप्रधानान्वयायोगाद्धस्तावनेजनस्य च हस्तलेपापादकपिण्डकरणोत्तरकालप्रधानान्वयायोगाद्वाग्यमस्य च वाग्विसर्गोत्तरप्रधानान्वयेनान्वयायोगाद्धस्तावनेजनस्य च हस्तलेपापादकरणस्याङ्गुलिविसर्जनप्राग्भाविषु ज्योतिष्टोमाङ्गभूतेषु वाग्यमस्य च वाग्विसर्गप्राग्भाविषु हस्तावनेजनस्य च दर्शपूर्णमासाङ्गभूतेषु पिण्डकरणप्राग्भाविषु पदार्थे-

(१) व्यवस्थामात्रावधानान्न इ० २ पु० पा० ।

ष्ववतारप्राप्तावानन्तर्यलक्षणक्रमानुसारान्मुष्टिकरणवाग्यमयोर्दीक्षि-
तावेदनमात्रे हस्तावनेजनस्य चोलपराजिस्तरणमात्रे ऽवतारः क्रमा-
नादराद्वा सर्वेष्वङ्गुलिविसर्जनप्राग्भाविषु मुष्टिकरणस्य सर्वेषु च
वाग्विसर्गप्राग्भाविषु वाग्यमस्य हस्तावनेजनस्य च सर्वेषु पिण्ड-
करणप्राग्भाविष्ववतार इति विचारस्यापवादत्वेनानन्तरसङ्गतिमाह
क्रमेति क्रमस्यैककर्तृकपदार्थविषयत्वान्मुष्टिकरणवाग्यमयोर्भिन्न-
कर्तृकेणावेदनेन क्रमानुपपत्तेः क्रमेणावेदनाङ्गत्वपूर्वपक्षायोगात्सन्दे-
७५७।७ हमाक्षिपति * मुष्ट्योरिति * प्रयोक्तृत्वेनावेदने ऽपि
यजमानस्य कर्तृत्वादयमदीक्षिष्टेत्यावेदने वा क्रियमा-
णे यद्दीक्षिस्याहं दीक्षितो ऽस्मि तस्मादवश्यं समा-
पनीयो ज्योतिष्टोमो मयेत्येवमध्यवसानरूपं कर्म तस्य मुष्टिकरणवा-
ग्यमसमानकर्तृत्वोपपत्तेः तदङ्गत्वपूर्वपक्षसम्भवात्सन्देहं समाध-
त्ते * नैष इति * एवमप्यानन्तर्यलक्षणस्य क्रमस्य विनियोजकत्वे
तस्य पूर्वोत्तरयोः पदार्थयोस्तुल्यत्वात्पूर्वस्यैवोत्तराङ्गत्वन्नोत्तरस्य
पूर्वाङ्गतेति नियमायोगान्मुष्टिकरणादेः पूर्वमपि कृष्णाजिनाच्छादना-
दिपदार्थं प्रत्यङ्गत्वोपपत्तेः परमावेदनाद्येव प्रत्यङ्गतेति पूर्वपक्षो न
युक्त इत्याशङ्कते * कस्मात्पुनरिति * आवेदनोलपराजिस्तरणयो-
स्तु प्रकरणावगतप्रधानान्वयोपपत्तेस्तदङ्गावताराभावेन प्रकरणवि-
रोधपरिहारायोगान्न क्रमेण पूर्वपदार्थाङ्गत्वं शङ्कितुं शक्यम्। मुष्टिक-
रणादेः कृष्णाजिनाच्छादनाद्यङ्गतापि पूर्वपक्षिणो ऽभिमता। पूर्वस्य प-
राङ्गत्वोपादानन्त्वनियमप्रदर्शनार्थमेव। हस्तावनेजनस्य तु तन्त्रप्रक-
मभावित्वेन प्राथम्यात्पूर्वेषु कृतपदार्थाङ्गत्वानुपपत्तेः पराङ्गत्वोपादा-
नं युक्तमेवेति परिहरति *अनियमेति* यद्वा न केवलं हस्तावनेजनस्य
नियमेन पराङ्गत्वं किन्तु मुष्टिकरणवाग्यमयोर्लिङ्गेन मनःसमाधाना-
र्थत्वेन हस्तावनेजनस्य च हस्तशुद्ध्यर्थत्वेन कर्माङ्गत्वावसायात्सर्वासु
मुष्टिकरणवाग्यमहस्तावनेजनभावनासु किमित्यंशेन मनःप्रणिधान-
हस्तशुद्ध्युपकार्योत्तरकालानुष्ठेयपदार्थापेक्षोत्पत्तेः पूर्वानुष्ठितपदार्था-
नपेक्षणात् मुष्टिकरणवाग्यमाभ्यां किङ्कर्मोपकर्तव्यमित्यपेक्षिते दी-
क्षितावेदनोपकारार्थत्वावसायान्मुष्टिकरणवाग्यमयोरपि नियमेन प-
राङ्गतेति परिहारान्तरमाह * अथ वेति * पूर्वानुष्ठितस्यापि पदा-
र्थस्याश्रद्धाहेतुवैगुण्यपरिहारायाविस्मृत्यै मनसः समाधानोपकारा-
र्थत्वेनापेक्षोपपात्तिमाशङ्क्योत्तरकालानुष्ठेयपदार्थापेक्षोपपत्तेः। प्रथमो-
क्त्या बलीयस्तोक्ता। एवं तर्ह्युत्तरकालानुष्ठेयसर्वपदार्थाङ्गतापद्य-
तेत्याशङ्क्य सर्वेत्युक्तम्। पुरस्ताच्छब्दस्याग्रवाचित्वादनन्तरं पश्चादुच्च-

रितस्य ग्रन्थक्रमानुसारेण पूर्वालोचनात्तन्मात्राङ्गतैव युक्तेत्याशयः । प्रकृतोदाहरणानादरेण तु सर्वभावनासु किम्भावापेक्षायाः पूर्वोत्पत्तेः पश्चादुच्चारितस्य बाधस्य उच्चारितात्पूर्वालोचनात्पराङ्गता युक्तेति व्याख्याऽनुयाजादीनामप्यनेन न्यायेन प्राग्भाव्याग्नेयाद्यनङ्गत्यापत्तेर-निष्टापादकत्वादयुक्ता । एवं सत्यपि यद्यावेदनमपि मनःप्रणिधाना-र्थं स्यात्ततो मनः प्रणिधानार्थमुष्टिकरणसाध्यत्वे योग्यत्वाभावाद्वाग्य-मवदतिक्रम्येत न त्वेतदस्तीत्याह * न चेति * निष्प्रयोजनता ऽतिक्र-महेतुर्भविष्यतीत्याशङ्क्याह * शक्यते चेति * सर्वोदाहरणसाधार-ण्यमस्य प्रकटयितुं हस्तावनेजने ऽप्येतन्न्यायमतिदिशति * एवमि-ति * उलपराजिशब्दं व्याख्यातुमाह * ऊर्ध्वैरिति * उत्पूर्वस्य लुनातेः कपन्प्रत्यये धात्वन्तोपसर्गान्तयोर्लोपनिपातनात्ककारनकारयोश्चेत्सं-ज्ञत्वेन लोपादुलपशब्दस्योर्ध्वलवनार्हसुगन्ध्यादिकठिनतृणवाचि-तोर्ध्वशब्देनोक्ता । तृतीययोलपैः कृता राजिरित्यर्थे तृतीयासमासो दर्शितः । रेखापरपर्यायराज्याकारत्ववाचितया राजिशब्दं व्याख्यातुं दीर्घमित्युक्तम् । ननु पाठसादेश्यलक्षणस्या ऽनुष्ठानसादेश्यलक्षण-स्य वा क्रमस्य प्रकरणादिकल्पनद्वारा विनियोजकत्वं युक्तम् । आन-न्तर्यलक्षणस्य तु क्रमस्य बहुषु पठितव्येष्ववर्जनीयनयोभयाकाङ्क्षा-दिरूपप्रकरणाद्यभावे ऽप्युपपत्तेस्तत्कल्पनायोगान्न विनियोजकता युक्तेत्याशङ्क्य सन्निधिविशेषास्नानार्थवत्त्वाय प्रकरणादिकल्पनस्यान-न्तर्ये ऽपि तुल्यत्वाद्विनियोजकत्वं सम्भवतीति सूचयितुमाह * सर्वत्र चेति * योग्यत्वं लिङ्गं प्रकरणवाक्यकल्प्यत्वात्पश्चाद्वाच्य-मप्ययोग्यस्यानन्तर्ये ऽप्यन्वयायोगाद्योग्यतायाः प्राधान्यसूचनार्थ-मादावुक्तम् । आनन्तर्येणानन्तरभूतयोरेव पदार्थविशेषयोरन्योन्याका-ङ्क्षाकल्पनादवान्तरेत्युक्तं । यथा पाठसादेश्यलक्षणे अनुष्ठानसादे-श्यलक्षणे वा क्रमे लिङ्गादीनि कल्प्यन्ते तथानन्तर्यलक्षणे ऽपीति सर्व-त्रेत्यनेनोक्तम् । प्रत्यक्षमहाप्रकरणाविरोधेन क्रमस्यावान्तरप्रकर-णादिकल्पकत्वायोगमाशङ्क्याङ्गुलिविसर्जनाद्युत्तरकाले प्रधाने महा-प्रकरणेन मुष्टिकरणादिर्विनियोगाशक्तेः प्रधानप्रकरणस्य च प्रधा-ने निरपेक्षे ऽङ्गविनियोजकत्वायोगात्तद्विरोधाभावेन क्रमस्य प्रकर-णादिकरणादिकल्पनप्रतिबन्धानुपपत्तेः कल्पितस्या ऽपि प्रकरणादेः कल्पितश्रुतिवत्प्रामाण्याविशेषसूचनार्थं महाप्रकरणादित्युक्तम् । महाप्रकरणेन क्रमबाधमाशङ्क्य बलवद्योग्यत्वाद्यनुग्रहेण बाधा-योगोक्त्यर्थतया त्वेतद्ग्रन्थव्याख्याक्रमं विनानवगतस्य योग्यत्वादेः

(१) अन्तराले प्रधाने इ० २ पु० पा० ।

क्रमानुग्राहकत्वायोगान्महाप्रकरणस्य चात्र विनियोजकत्वायोगाद्बाधकत्वाऽनुपपत्तेरयुक्ता । तस्मात्प्रामाण्याविशेषसूचनायैव बलीयस्त्वोक्तिः । पूर्वपक्षमुपसंहरति * तस्मादिति * मुष्टिकरणस्य तदनन्तरवाग्यमाङ्गता कस्मान्न पूर्वपक्षिणेत्याशङ्क्याह * योग्यत्वेति * पूर्वाङ्गतया सर्वभावनासु किमित्युपकारापेक्षणमित्यत्रैव वार्त्तिके निरस्तत्वाद्वाग्यमस्य मुष्टिकरणाङ्गत्ववन्मुष्टिकरणस्य वाग्यमाङ्गताप्यनाशङ्कनीयेति दृष्टान्तदार्ष्टान्तिकभावार्थः परस्परशब्दः । अनन्तरवाग्यमातिक्रमात्सद्यावेदनोत्तरपदार्थाङ्गताऽपि मुष्टिकरणस्य कस्मान्न स्यादित्याशङ्क्याह * तेनेति * एकाङ्गावतारमात्रेण प्रकरणान्तरानानर्थक्यपरिहारादेकान्तरितस्याऽपि च द्व्यन्तरिताद्यपेक्षया सन्निधानानपायात्कारणं च विना सन्निहितातिक्रमायोगादित्याशयः । बहुषु पठितेषु कस्य चिन्दानन्तर्यस्यावर्जनीयत्वादनुष्ठानक्रमार्थत्वेन च तत्सन्निधिविशेषाम्नानार्थवत्त्वोपपत्तेः उभयाकाङ्क्षादिरूपप्रकरणादिकल्पकत्वायोगाच्छ्रुतिवच्च क्रमस्य साक्षाद्विनियोजकत्वाभावादानन्तर्यमङ्गाङ्गिसम्बन्धस्यानाक्षेपकमित्येवं क्रम इत्यनेन सूत्रार्थं सूचयन्सिद्धान्तमुपक्रमते एवमिति * सर्वैरिति भाष्येण मुष्टिकरणाङ्गुलिविसर्जनान्तरालवर्त्तिभिः सर्वैर्मुष्टिकरणस्य वाग्यमवाग्विसर्गान्तरालवर्त्तिभिर्वाग्यमस्य हस्तावनेजनपिण्डकरणान्तरालवर्त्तिभिर्हस्तावनेजनस्यान्वय इति प्रतिज्ञाते वाक्यभेदो हेतुत्वेनोक्तः स वाक्येन पूर्वपक्षाकरणात् क्रमकल्प्यवाक्यासम्भवार्थत्वे तु वाक्यभेदोक्तेः प्रकरणाद्यसम्भवस्याऽपि वाच्यस्यानुक्त्या न्यूनत्वापत्तेरयुक्त इत्याशङ्क्य क्रमकल्प्यसर्वप्रकरणाद्यसम्भवार्थत्वे तु वाक्यभेदोक्तेः प्रकरणाद्यसम्भवस्याऽपि वाच्यस्याऽनुक्त्या न्यूनत्वाय न तेषां परस्परेण कश्चित्सम्बन्धोऽस्तीति भाष्यैकवाक्यत्वादिक्रमानिरासेन सूचितमिति । अर्थद्वयस्याभिधानादित्यादि भाष्येण क्रमकल्प्यैकवाक्यत्वाद्यसम्भवेऽभिहिते प्रत्यक्षमेवैकवाक्यत्वाद्यनेन निरस्तमित्याशङ्कमानं प्रति न च पदार्थाकाङ्क्षयामित्यनेनानन्तर्यमात्रेणाकाङ्क्षारूपप्रकरणकल्पनाशक्तेः प्रकरणाकरणाकल्पनानिरपेक्षेण क्रमेणैकवाक्यत्वकल्पनाशक्तेः कल्प्यस्यापेक्षवाक्यत्वादेरसम्भवः स्पष्टीकृत इति सूचनार्थं नार्थं दृश्यत इत्युक्तम् । एकवाक्यत्वादर्शनमुपपादयति * न हीति * बलीयस्त्वसूचितप्रामाण्याविशेषानिरासायैकवाक्यत्वादेः कल्पनासम्भवेनाकल्पितत्वादप्रामाण्यं न कल्प्यत्वमात्रेणेति सूचयितुं यदित्युक्तम् । योग्यता सन्नत्यकारप्रश्लेषं विना तावद्व्याचष्टे * योग्यता

पुनरिति * असमेत्यकारप्रश्लेषेण व्याचष्टे * यद्वेति * उत्तरार्द्धं
व्याचष्टे*न चेति * यदि चात्रावान्तरः कथंभावो भवेत् ततः क-
र्त्तव्यत्वेनावगतस्येतिकर्त्तव्यात्राकाङ्क्षात्मककथंभावोत्पत्तेः पूर्व-
पदार्थभावनांशत्रयालोचनकाले ऽनन्तरस्य कर्त्तव्यत्वानवगमात्पू-
र्वस्यैव कथंभावो भवेत्ततश्चोत्तरमेव पूर्वस्याङ्गं प्राप्नोतीत्यनिष्टा-
पत्तिमाह * यदीति * अस्तूत्तरं पूर्वाङ्गं तथा ऽपि सिद्धान्तासिद्धेः ७८
कानिष्टापत्तिरित्याशङ्क्याह * न चेति * अनेनेदं साध्यमित्यवग-
ते कथं भावोत्पत्तेः साध्यांशदशापूरणात्कथं भावोत्पत्त्ययोगाच्चो-
त्तरं पूर्वाङ्गम्भवितुमर्हतीत्याशय । पूर्वपदार्थभावनांशत्रयालोच-
नवेलायामुत्तरपदार्थकर्त्तव्यत्वानवगमे ऽप्युत्तरपदार्थभावनांशत्र-
यालोचनवेलायामुत्तरेण पूर्वस्य साध्यांशपूरणात्पूर्वस्योत्तराङ्गत्वेव पू-
र्वपक्ष्यभिमता सेत्स्यतीत्याशङ्क्याह*न चोत्तरेणेति*आम्नेदनात्तरेण प
दार्थेनावेदनस्य साध्यांशपूरणात् क्लृप्तप्रयोजनत्वेन मुष्टिकरणसाध्यां-
शपूरकत्वं भविष्यतीत्याशङ्क्याह * एवमिति*अतः प्रधानात्प्राचीने-
न केनचित्पदार्थेन साध्यांशपूरणाशक्तेः सर्वमङ्गम्प्रधानपर्यन्तं प्राप्तं
न त्वन्तराले पर्यवस्यतीत्याह * इतीति * नन्वक्लृप्तप्रयोजनावस्थ-
त्वेनोत्तरस्य पूर्वसाध्यांशपूरणाशक्तौ गोदोहनादेः क्लृप्तप्रयोजनत्वेन
साध्यांशपूरणाशक्तत्वात्सर्वेषां पूर्वाङ्गानाङ्गोदोहनाद्यङ्गत्वापत्तेः स-
र्वाङ्गानां यावत्प्रधानं प्राप्त्युक्तिरयुक्तेत्याशङ्क्य * यदीति * महाप्र-
करणगम्यप्रधानाङ्गत्वस्यावान्तरप्रकरणगम्येन गुणकामाङ्गत्वेन बा-
धो ऽवान्तरेत्यनेनोक्तः।सन्दंशं विनावान्तरकथम्भावानिष्पत्तेः गुणका-
माङ्गत्वानुपपत्तिरिति परिहरति * उच्यत इति * श्रुतिलिङ्गे ऽपि
वाक्योपलक्षिते गुणकामस्य प्रयोजनवत्त्वात्सन्दंशं विनापि प्रधानव-
त्कथम्भावासिद्धिमाशङ्क्य संस्थाधिकरणन्यायेनाश्रयभूतदर्शपूर्णमा-
सादिधर्मैरतिदेशप्राप्तैर्नैराकाङ्क्ष्याद् गुणकामस्याभिनो वाक्याद्यवग-
तगुणसद्भावे ऽपि वस्तुनः कथम्भावो नास्त्येवेति प्राकृतेन कथम्भावे
तदीये पूरिते सतीति वार्त्तिके ऽभिहितम्।अभ्युपेत्यवादमात्रेण तु सन्दं-
शाभिव्यङ्ग्यतोक्तेति सूचनार्थो नामशब्दः । सन्दंशान्तरालवर्त्तित्वं कथ-
म्भावस्य मुष्टिकरणादेः श्रुत्याद्यगवतप्रधानगुणसन्दंशान्तरालवर्त्ति-
त्वाभावात्प्रधानकथंभावेन ग्रहणं न स्यादित्याशङ्कानिरासायावा-
न्तरविशेषणफलन्दर्शयितुमाह * प्रधानेति * अनन्तरेण सम्ब-
न्धः स्यात्परस्याप्यनन्तरस्तदारूढः पुनः पश्चात्तदानन्तर्यमश्नुत इत्य-
नुषङ्गाधिकरणन्यायेनाङ्गान्तरव्यवधायकत्वाभावात्कथं भावविच्छे-
दबुद्धिपर्यन्तं सर्वाण्यङ्गानि प्रधानकथम्भावेन सङ्गच्छतीत्युक्ते पाश्चा-

त्याङ्गगमनेऽपि कथम्भावस्य यदि भवेत्पूर्वस्य कथम्भाव इति वार्त्तिकोक्तेन न्यायेनाधस्तनाङ्गागमनान्मुष्टिकरणादेः प्रधानकथम्भावेनाग्रहणं स्यादित्याशङ्क्य फलवत्सन्निधावफलास्नानस्य प्रधानकथम्भाव ग्रहणहेतोरुत्तराङ्गवत्पूर्वाङ्गेष्वविशेषात्प्रधानात्प्राक्पश्चाच्चोभयतः कथम्भावगमनमभितोऽपीत्यनेनोक्तम् । गोदोहनद्वादशोपसत्त्वादीनामपि तर्हि कथं भावेनाग्रहणं स्यादित्याशङ्क्यान्येत्युक्तम् । प्रधानकथम्भावस्याभितो गमने ऽङ्गगुणस्य कस्यचिदसम्भवात्सन्दंशानुपपत्तेश्च क्वचिदवान्तरप्रकरणं स्यादित्याशङ्कते *नन्विति* बलवता प्रमाणेन प्रधानकथम्भावं बाधित्वाङ्गगुणत्वावगमे सन्दंशसम्भवेन परिहरति * उच्यत इति* पुनः शब्दस्य पश्चाद्भावार्थत्वाच्चकारेण च प्राग्भावसूचनाच्छ्रुत्यादिभिः प्राक्पश्चाच्चान्यप्रकरणस्थानामङ्गानामङ्गे ज्ञाते सन्दंशसम्भवादवान्तरप्रकरणमिष्यत इत्यर्थः । सर्वेषाञ्चावान्तरप्रकरणित्वेनाभिमतानां श्रुत्यादिभिः प्राक्तदङ्गमुक्त्वा पश्चादपि तदङ्गपरामर्शसद्भावान्न क्वचित्सन्दंशाभावः शङ्कनीय इत्याह * सर्वेषां हीति * किमर्थं सन्दंशापेक्षेत्याशङ्क्यावान्तरप्रकरणोपक्रमसमाप्तिमर्यादावधारणार्थतामाह * तत्पर्यन्तेति * अतः सन्दंशाभावेनावेदनादेः प्रत्यक्षावान्तरप्रकरणाभावादानन्तर्येण चावान्तरप्रकरणायोगान्मुष्टिकरणादेः प्रधानार्थत्वद्वारा तदङ्गाङ्गत्वसिद्धिरिति सूचयितुमाह * यत्र त्विति * पुनः शब्देन प्राक्त्वस्याप्युपलक्षणाद्यत्र प्राक्पश्चाच्छ्रुत्यादिभिः तदङ्गकीर्त्तनन्नास्तीत्यर्थः । प्रधानार्थत्वाध्यवसाने सति तदङ्गाङ्गत्वसिद्धिः कथमित्याशङ्क्य तत्सूचनार्थमाह * तस्य त्विति * अङ्गाङ्गस्य प्रधानानुपकारित्वे प्रधानार्थत्वावेदकस्य प्रकरणस्यात्यन्तबाधापत्तेः प्रकृतात्पूर्वसाधनत्वलक्षणाहेत्वभावात्स्वरूपार्थत्वे नैष्फल्यापत्तेर्बलीयसापि वाक्यादिनाङ्गाङ्गत्वस्यावगन्तुमशक्यत्वाद्वेद्यादिकेवलस्य प्रधानस्याङ्गस्याङ्गस्य वेति चिन्तानुपपत्तिप्रसङ्गेनाङ्गाङ्गस्यापि प्रधानोपकारित्वावसायात्प्रकरणावगतसाक्षात्प्रधानार्थत्वासम्भवे ऽङ्गाङ्गत्वेनापि प्रकरणानुग्रहसिद्ध्यै प्रधानार्थत्वे सत्यङ्गावतारन्यायादङ्गाङ्गत्वं सेत्स्यतीत्याशयः । ननु प्रकरणावगतप्रधानार्थत्वस्य मुष्टिकरणादेरङ्गावतारन्यायादङ्गाङ्गत्वे सत्येकाङ्गावतारमात्रेण प्रकरणाम्नानानर्थक्यपरिहारादनेकेष्वङ्गेष्ववतारकल्पनानुपपत्तेरेकस्मिन्नेवाङ्गे ऽवतारस्यौचितत्वादानन्तर्यविशेषाच्च विशेषावधारणोपपत्तेरावेदनादिमात्रे ऽवतारावसायान्न सिद्धान्तसिद्धिः स्यादित्याशङ्क्य मुष्टिकरणादेर्लिङ्गेन प्रयोगाङ्गभूतकर्तृसंस्कारार्थत्वावसायात्प्रयोगस्य च साङ्गप्रधानविषयत्वात्सौमिकवेदिवत्साङ्गप्रधानार्थ-

त्वस्यैवावगतेर्वस्तुतो न प्रधानार्थस्याङ्गेऽवतारः प्रयोगस्य तु साक्षादङ्ग-
विषयत्वाभावेन न प्रधानद्वाराङ्गविषयत्वात्प्रयोगद्वाराङ्गप्रधाना-
र्थत्वस्याङ्गस्य प्रधाननैरपेक्ष्येणाङ्गान्वयायोगमभिप्रेत्य प्रकरणावि-
रोधे क्रमेण पूर्वपक्षायोगात्प्रकरणस्य स्वरसभङ्गार्थाश्रन्ताया आन-
र्थक्यतदङ्गावतारप्रकरणसङ्गतिसिद्ध्यर्थमौपचारिकयवतारोक्तिरि-
त्यविरोध इति सूचयितुमाह * तदिहेति * साङ्गोक्त्याङ्गानां प्रधा-
नविशेषणत्वेन साक्षान्मुष्टिकरणाद्यन्वयाभावसूचनान्मुष्टिकरणा-
दे प्रधानद्वाराङ्गान्वयः सूचितः । योग्यतोक्त्या प्रयोगाङ्गभूतकर्तृ-
द्वारत्वलक्षणोपपत्तिवन्मुष्टिकरणस्याङ्गुलिविसर्गोत्तरभाविषु वा-
ग्यमनस्य च वाग्विसर्गोत्तरभाविषु हस्तावनेजनस्य च हस्तलेपापा-
दकपिण्डकरणोत्तरपदार्थेष्वयोग्यत्वात्कृष्णविषाणग्रहणचात्वालप्रा-
सनान्तरालवर्त्तिषु पदार्थेषु कृष्णविषाणकण्डूयनवन्मुष्टिकर-
णाङ्गुलिविसर्गाद्यन्तरालवर्त्तिनामेवाङ्गानां मुष्टिकरणाद्यङ्गमित्यपि
सूचितम् । तुमुन्प्रत्ययाभावेनैकवाक्यत्वनिरासार्थं नहीत्यादिभा-
ष्यं व्याख्यातुमाह * यदि त्विति * तस्मादित्युपसंहारभाष्यं व्या-
चष्टे * तस्मादिति *

वाक्यानां च समाप्तत्वात् ॥ २५ ॥

पूर्वसूत्रेणानन्तर्यस्य प्रकरणाद्यकत्वेनाविनियोजकतोक्ता प्र-
करणविरोधेनाविनियोजकत्वोक्त्यर्थन्त्वेतत्सूत्रमिति सूचयितुमाह
इतश्चेति क्षिपतिचोदयत्योः प्रकरणवाचित्वेनैकार्थ्यात्सूमोऽभ्रा-
क्षेपक इत्यादौ च क्षिपतेः प्रामाण्ये प्रयोगादर्शनात्तत्समानार्थस्य चो- ७५९
दयतेरपि प्रामाण्यवाचित्वानवगमाच्चोदनाशब्दोऽप्रामाण्यवाचित्वेन
व्याख्यातः । आनन्तर्यबाधकस्य वाक्यैकवाक्यत्वरूपस्य प्रकरण-
स्य वाक्यं बाधकं स्यान्नचात्र तदस्तीत्येतदर्थोक्त्यर्थत्वेन वाक्यसमा-
प्त्युक्तिं व्याख्यातुं यत इत्युक्तम् । प्रत्येकोक्त्या प्रकरणेन क्रमबाधः
प्रकरणस्य च वाक्येन बाधो न समस्तेष्वित्यनेन सूचितः । वाक्य-
भेदादित्यादिभाष्येण पूर्वसूत्रे एकवाक्यत्वानिरासाद्वैकवाक्यत्वनि-
रासः पुनरुक्त इत्याशङ्क्य संहत्यैकार्थत्वाभावेन तत्रैकवाक्यता निर-
स्ता विभज्यमानसाकाङ्क्षत्वाभावेनात्रेति विवेकं सूचयितुमाह * न-
स्मादपीति * एकवाक्यस्थानां पदानामन्योन्यसाहित्यं विना प्रयोज-
नरूपार्थाभावेनान्योन्यसहितानामर्थो यस्मिन्नेकवाक्ये तदन्योन्यार्थ-
मिति मध्यमपदलोपिना समासेनैकवाक्यतोक्तेस्तस्मात्पूर्वसूत्रोक्ता-
त्संहत्यैकार्थस्वरूपैकवाक्यत्वलक्षणादर्शनाद्विभज्यमानसाकाङ्क्षत्वरू-

पैकवाक्यत्वलक्षणादर्शनादपि नैकवाक्यतेत्यर्थः ।

चतुर्थाकरणस्याग्नेयमात्राङ्गताधिकरणम् ॥ १५ ॥

शेषस्तु गुणसंयुक्तः साधारणः प्रतीयेत मिथस्तेषामसम्बन्धात् ॥ २६ ॥

चमसाधिकरणे ग्रहेष्वेव सम्मार्गो न चमसेष्वित्युक्ते तत्प्रसङ्गात्समदशारत्निना षोडशिपात्रे निविशते यूपे वेति । चन्त्वायामानर्थक्यात्तदङ्गेष्वित्यनेन यूपनिवेशेऽभिहिते ऽभिक्रमणाप्रधानाधिकरणाभ्यां चाङ्गत्वनारविशेषेऽभिहिते वारणाधिकरणापोदितस्याङ्गत्वनारस्य । ऽनुवाक्याधिकरणेनाङ्गत्वनाद्वाक्यविरोधे क्रमस्य परिहृते मुष्टिकरणादेरथ विरोधिना क्रमेण विनियोगमाशङ्क्यानन्तर्यरूपक्रमस्यानन्तर्याधिकरणनाविनियोजकत्वोक्त्या चमसाधिकरणप्रसङ्गागतविचारेण समाप्तयंप्रसक्त्या यो विचारस्तत्समाप्तौ स एव बुद्धिस्थो भवतीति बुद्धिस्थचमसाधिकरणप्रसङ्गेनास्य सङ्गतिं सूचयितुमाह * यथा संयोगमिति * अनन्तराधिकरणोक्तसर्वार्थत्वापवादाद्वानन्तराधिकरणेनैव सङ्गतिमभिप्रेतां स्पष्टत्वादनुक्त्वा चमसाधिकरणोक्तयथासंयोगव्यवस्थाविरोधात्पूर्वपक्षायोगेन सन्देहायोगशङ्कानिरासायाविरोधोक्त्यर्थोऽयं ग्रन्थः । धर्मान्वयिनोऽपूर्वसाधनस्य यदाग्नेयशब्देन केवलाग्निदेवत्यत्वमुपलक्षणमुक्तं तस्य द्विदेवत्ये केवलाग्न्यन्वयनद्विशेषदेवतान्वसमुदायात्मकस्य समस्तस्याभावात्समस्तेनोपलक्षणेनोपलक्षितस्य धर्मसंयोगाभ्युपगमे द्विदेवत्यस्याग्नेयशब्देन ग्रहणायोगात्किं समुदायैकदेशेनाप्यग्न्यन्वयमात्रेणोपलक्षितस्य धर्मसंयोगः समस्तेनैव वोपलक्षितस्येति सन्देहाद्विदेवत्यो गृह्यते न वेति विचार इत्यर्थः । पूर्वपक्षमाह * गृह्यते इति * तो अपि हीति भाष्योक्तं हेतुं व्याचष्टे * शक्यते हीति * दृष्टान्तं व्याख्यातुं मन्त्राधिकरणभाष्यं पठति * यद्यपीति * ननु त्वं ह्यग्ने प्रथमो मनोतेति मन्त्रे वाचनिकविनियोगान्यथाऽनुपपत्त्याग्निशब्दस्याग्नीषोमोपलक्षणार्थत्वं युक्तं तद्धितेन तु देवतात्वेनैवाग्न्यभिधानाद् द्विदेवत्ये चाग्नेः समवेतत्वेऽपि देवतात्वाभावान्नोपलक्षणत्वं सम्भवतीत्याशङ्क्याह * समवेतत्वं चेति * सर्वत्राग्निकलिभ्यां ढक्वक्तव्य इत्यन्वयमात्रेऽपि तद्धितस्मृतेः प्रकरणावगतस्य सर्वार्थत्वस्यातिसङ्कोचपरिहारार्थं समवेतत्वमात्रस्येहोपलक्षणताश्रयणीयेत्याशयः । यद्यप्येकस्य शब्दस्यानेकार्थत्वायोगादन्वयमात्रवाचित्वे च

दैवतात्वविशेषप्रतीत्ययोगाद्विशेषवाचित्वे तु लक्षणाया सामान्यप्रतीतेर्दैवतात्वमेवाग्नेयशब्दवाच्यम् । तथा ऽप्यग्नेश्चतुर्धाकरणाख्यविषयकार्ययोग्यपूर्वसाधनहविर्विशेषोपलक्षणमात्रे पर्यवसानाद्याग्नेयविधाविव चतुर्धाकरणविधौ साक्षात्कार्ययोगित्वाभावेनात्यन्तानादरणीयत्वात्प्रकरणातिसङ्कोचपरिहारार्थं समवेतत्वमात्रेणैवोपलक्षणता युक्तेत्याह * न चेति * एकपुरोडाशायां पौर्णमास्यां पुरोडाशद्वयस्योपलक्षणस्योपांशुयाजाख्यकार्ये ऽनादरो ऽनपायश्च कालस्य लक्षणं हि पुरोडाशाविति दशमान्त्याधिकरणसूत्रवक्ष्यमाणो दृष्टान्तः । पर्यग्निकृतं पात्नीवतमुत्सृजन्तीत्यत्रापि पात्नीवच्छब्दस्य पशूपलक्षणार्थत्वात्तेनैवोपलक्षणत्वेन हेतुना त्वष्टुरनादरः पात्नीवते ऽनुपूर्वत्वादवच्छेद इत्यत्रोक्त इति दृष्टान्तान्तरमाह * तथेति * एवं वैदिकदृष्टान्तद्वयमुक्त्वा भाष्योक्तं लौकिकं दृष्टान्तमनुमन्यते *तथेति* उपलक्षणत्वे कार्ययोगित्वाभावात्तदर्थत्वेन मिथस्तेषामिति सूत्रावयवे तच्छब्देन शेषशब्दोक्तस्य कार्यस्य गुणशब्दोक्तस्य चोपलक्षणस्य परामर्शः बहुवचनं चानेकोदाहरणत्वोपलक्षणकार्यबहुत्वाशयमभिप्रेत्य व्याख्यातुमाह *उपलक्षणेति* तद्धितवाच्यमुख्यदेवतात्वत्यागेन लाक्षणिकसमवेतत्वोपलक्षणत्वाभ्युपगमस्य प्रकरणातिसङ्कोचपरिहारार्थत्वेन तेषां साधारणोक्त्या साधारणविषयत्वेनोपस्थापितानामाग्नीषोमीयादीनामेकप्रकरणानन्वये सति प्रकरणातिसङ्कोचानापत्तेर्व्यवस्था स्यात्तथा त्वेकप्रकरणान्वयात्साधारणधर्मकत्वप्रतीतेरुपलक्षणार्थत्वेन तत्र श्रुत्यविरोधसम्भवे प्रकरणातिसङ्कोचायोगात्साधारण्येव युक्तेति व्यवधारणाकल्पनया हेतूक्त्यर्थं सूत्रावयवव्याख्यानार्थं यदीत्यादिभाष्यमस्मिन्सूत्रे व्यवस्थावाचिपदाभावात्सिद्धान्तसूत्रव्यवस्थाशब्दान्वयेन तु पूर्वसूत्रपूरणाभ्युपगमे प्राथम्यात् व्यवस्थाशब्दोपेतस्यैव पूर्वपक्षसूत्रस्य पठनीयत्वापत्तेरयुक्तमाशङ्क्यानन्तर्यमचोदनेत्येतत्सूत्रस्थाचोदनाशब्दस्यान्यातिरिक्तानामग्नेश्चतुर्धाकरणाचोदना स्यादित्येवं व्यवस्थावाचितामभ्युपगम्यानुषङ्गेण पूरणम्भाष्यकृतो ऽभिमतमित्याह *भाष्येति* व्यवहितानुषङ्गायोगादनाक्षेपकत्वात्मकाकारणत्ववाचिन्याश्चोदनाशब्दस्यानुषङ्गे ऽप्यन्यार्थत्वायोगात्कार्ययोगित्वाभावेन चोपलक्षणस्यानादृत्यत्वानुक्तौ प्रकरणानुरोधमात्रेण श्रुतिभङ्गायोगादस्या व्याख्यायाः स्वानभिमतत्वसूचनार्थं भाष्यकारग्रहणम् । लक्षणार्था गुणश्रुतिरिति सिद्धान्तसूत्रावयववक्ष्यमाणवैषम्यावताराय यथा प्राशित्रावदानरूपः शेषो ऽग्निगुणसंयुक्तो ऽपि साधार-

ण इत्यावृत्त्या दृष्टान्ततया व्याख्यार्थं यथेत्यादिभाष्यं तात्पर्यं
चष्टे * भवति चेति *

व्यवस्था वार्थसंयोगाल्लिङ्गस्यार्थेन सम्बन्धाल्ल
क्षणार्था गुणश्रुतिः ॥ २७ ॥

यथा ग्रहत्वेनोपलक्षणेन ग्रहाणामेव संयोगात्सम्मा
र्ष्योक्ता तथाग्निदेवत्यत्वरूपेण तद्धितार्थेनैकदेवत्यस्यैव संयो
द्धाकरणव्यवस्था युक्तेत्येवं सूत्रावयवव्याख्यार्थत्वमग्निनेति
७६०।४ स्य द्योतयितुमाह * यथैवहीति * दृष्टान्तोक्तेरुद्देश्यस्वरूपा
शङ्कानिरासप्रयोजनत्वं सूचयितुमाह * उद्दिश्यमानन्तावा
द्विदेवत्यसंयोगनिरासार्थं समवेतत्वमात्रस्योपलक्षणत्वनिर
भिधेयवाचिनार्थशब्देन तद्धितवाच्यस्य देवतात्वस्योपलक्ष
ति सूचयितुमाह * न चेति * नन्वसम्बद्धस्याग्नेरुपलक्षण
गात्सम्बन्धमात्रमपेक्षितत्वाद्ग्राह्यं तद्विशेषस्तु देवतात्वं तद्धि
नपेक्षितत्वादग्राह्यमित्याशङ्क्य देवतात्वमेव प्रत्ययार्थत्वेन प्राधा
पलक्ष्यं प्रकृत्यर्थत्वात्त्वग्निरुपलक्षणविशेषणमित्याह * अग्नि
रिति * बहुकर्तृकेऽपि सूत्रे प्रत्येकं कर्तृत्ववद्द्विदेवत्येऽप्यग्नेस्ताव
त्वमस्त्येवेत्याशयेन कुत इति पृष्ट्वा तन्निरासार्थं यद्धीत्यादिभा
त्पर्यतो व्याचष्टे * याश्चेति * एतदेवोपपादयति * नहीति *
कारणादग्नीषोमीय ऐन्द्राग्नो वा नाग्नेयशब्देनोच्यत इत्यर्थः ।
त्वस्यासत्यामपि तद्धितेनोक्तौ तस्योपलक्षणमात्रार्थत्वान्नात्य
इत्याशङ्क्योपलक्षणं विना धर्मान्वयिनोऽपूर्वसाधनविशेषस्योप
तुमशक्यत्वान्नोपलक्षणस्याप्यनादरो युक्त इत्येवं परिहारार्थत्व
ङ्गस्योपलक्षणस्यापि देवतात्वस्य तद्धितवाच्यत्वादर्थेन स
नोपलक्ष्यसम्बन्धोपपत्तेरित्येवं व्याख्यार्थं देवतालिङ्गस्य हीति
व्याचष्टे * तद्धितार्थोऽत्रेति * लिङ्गस्यार्थेनेति सामर्थ्यवाच्यर्थ
क्ता निरपेक्षतार्थसंयोगार्थव्याख्यार्थे पूर्वभाष्येऽनागतावेक्षणा
निरपेक्षोक्त्या सूचयन् श्लोकं व्याचष्टे * आग्नेय इति * दृष्टा
शित्रमवद्यतीति सामान्यवाक्येन हविर्मात्रात्प्राशित्रावदाने प्र
स्माद्धवि:प्रदेशात्प्राशित्रमवदेयमित्यपेक्षायां मस्तकाख्यप्रदेश
शेषोपलक्षणार्थाग्नेयत्वोपलक्षणश्रुतिरित्येवं वैपरीत्यार्थत्वेन
षणपूर्वमन्त्यसूत्रावयवव्याख्यार्थमथेत्याद्यनियम इत्यन्तं भाष्य
ख्यातुमाह * यच्चेति * मस्तकाविभागस्य भञ्जनस्फोटन

र्थायस्याग्नेयपुरोडाशविशेषे विधानार्थमेतद्वचनमिति वदता यदा-
ग्नेयस्येति प्राशित्रावदानावान्तरप्रकरणप्राप्तमाग्नेयात्प्राशित्रावदानम-
नूद्य तन्मस्तकं विभज्येति वचनव्यक्तिर्व्याख्याता । प्राशित्रमवद्यती-
ति सामान्यवाक्यात्प्राशित्रावदानस्य साधारणता युक्तेत्युक्ते चतु-
र्द्धाकरणस्यापि तं चतुर्द्धा कृत्वेति सामान्यवाक्यात्साधारण्यं शङ्कि-
तुमाह * स्थित इति * द्विदेवत्ये तद्धितार्थो न सम्भवतीत्येवमुक्ते- ७६।१२
न न्यायेनाधिकरणे स्थिते उभौ वाविशेषादिति कात्यायनाख्यसू-
त्रकृद्वाक्यबलात्प्रत्यवस्थीयते इत्यर्थः । कतस्यापत्यङ्गोत्रमित्यस्मि-
न्नर्थे गर्गादिभ्यो यञिति यञं कृत्वा कात्यस्यापत्यं युवेत्यस्मिन्नर्थे
यञिञोश्चेति फक्प्रत्यये तस्य चायनादिसूत्रेणायनादेशे कृते कात्याय-
नस्येदमित्यस्मिन्नर्थे वृद्धाच्छ इति छप्रत्यये तस्येयादेशे नाजादित्वा-
त्फक्फिञोरन्यतरस्यामिति फक्प्रत्ययस्य लुक्पक्षे कात्य इति यकारा-
त्परतः छप्रत्ययप्राप्तावापत्यस्य च तद्धिते नातीति आकारादिव-
र्जिते तद्धिते परेऽपत्यवाचिनो यकारस्य लोपात्कातीयमिति रूपसि-
सिद्धिः । न्यायविरोधात्कात्यायनीयवचनस्य बाधमाशङ्क्याबाधार्थं
श्रुतिमूलतामाह * उक्तमिति * इह दर्शपूर्णमासप्रकरणे श्रुति-
र्दृष्टेत्यर्थः । कासौ श्रुतिरित्यपेक्षायां पठति तमिति । सामान्यश्रुतेर्वि-
शेषश्रुत्याग्नेयमात्रविषयत्वेनोपसंहारात्साधारण्यानापत्तिरिति परि-
हारमाह * अत्रेति * नित्योक्त्या ऽनुपसंहारे विकल्पापत्तिरुपसंहा-
रकारणत्वेन सूचिता । प्राशित्रवाक्ये व्याख्यातेन परपदार्थान्वयवि-
धौ श्रुतिबाधापत्तेर्विशिष्टावदानविध्यवगमाद्विशेषशास्त्रत्वेन सा-
मान्यशास्त्रोपसंहारकत्वं भविष्यतीत्याशङ्कते *प्राशित्रेति* वाक्या-
न्तरात्प्राप्तेः प्राशित्रावदानस्य विधातुमशक्यत्वाद् गुणमात्रार्थत्वा-
वगतेर्विशिष्टावदानशास्त्रत्वाभावान्नोपसंहारकत्वं सम्भवतीति परि-
हरति *नेति* एतदेव विवृणोति *मस्तकमिति* पुरोडाशवाक्यस्यापि
बर्हिःषत्त्वलक्षणगुणमात्रार्थत्वात्क्रममात्रार्थत्वाद्वा चतुर्द्धाकरणवि-
धायित्वाभावे ऽविशेषशास्त्रत्वाभावान्नोपसंहार्यत्वं स्यादित्याशङ्क्या-
ह * इदं त्विति * क्त्वाशब्दोक्तायां चतुर्द्धाकरणभावनायां गुणा-
श्रुतेराख्यातोक्तायाश्च बर्हिःषत्त्वकरणभावनायाः प्राधान्यप्रतीतेः
क्त्वाशब्दोक्तभावनाविशेषणत्वायोगान्निर्गुणत्वोक्तिः । शास्त्रान्तरी-

यस्याध्येतृभेदेन पुनर्वचनत्वस्य निरस्तत्वाच्छाखान्तरीयस्य च दूर-स्थत्वेन प्रत्यभिज्ञायोगात्सगुणश्रवणे ऽपि विधेयैव क्रिया दूरस्थस्य प्रत्यभिज्ञाभ्युपगमे ऽपि त्वभ्यासेन क्रियाविधिः शक्यो वक्तुमिति प्रौ-ढिप्रदर्शनार्था पुनर्वचनोक्तिः । शाखान्तरीयस्य सामान्यस्याबुद्धिस्थ-त्वेनोपसंहारायोगं शङ्कते * दूरस्थत्वादिति *

यस्य येनार्थसम्बन्धो दूरस्थेनापि तस्य सः ।
अर्थतो ह्यसमर्थानामानन्तर्यमकारणमिति ॥

न्यायाद् दूरस्थो ऽप्युपसंहारी नाशक्य इति परिहरति *नेति* वृद्धश्लोकेन सामान्यन्यायमुक्त्वा तदुपजीवनेन दूरस्थस्या ऽपि सा-मान्यस्य विशेषणोपसंहारसिद्धिमाह * तेनेति * येन कारणेन दूरस्थस्या ऽपि योग्यत्वात्सम्बन्धो युक्तस्तेन कारणेन दूरस्थमपि सा-मान्यं विशेषेण विना ऽनुपपद्यमानत्वाच्छाखान्तरीयविशेषं प्रति ग-च्छति ततश्च श्रुतविशेषलाभे विशेषान्तरकल्पनायोगाद्विशेषशास्त्रेण स्वविषयभूते विशेषे स्थाप्यते दूरस्थत्वे ऽपीति श्लोकार्थः । दूरस्थ-योरप्युपसंहार्योपसंहारकतावश्यंभाविवोक्तिभ्यामुक्ता युक्ता । सा-मान्यशास्त्रस्य पूर्वालोचनायामुपसंहारसम्भवे ऽपि विशेषशास्त्रस्य पूर्वालोचने सामान्यशास्त्रानर्थक्यं स्यादित्याशङ्क्य तस्मिन्पक्षे विशे-षान्तर्गतत्वेन प्राप्तस्य सामान्यस्य तदुत्तरकालबर्हिःपत्वकरणवि-धेये ऽनुवादमाह * अथ वेति * बर्हिःपत्वकरणस्या ऽपि चतुर्द्धा-करणवदुपप्रतिपत्त्यर्थभक्षाङ्गत्वेन चतुर्द्धाकारणाङ्गत्वाभावादङ्गा-ङ्गिभावाया ऽनुवादायोगात्क्रमनिरपेक्षबर्हिःपत्वविधावनुवादा-नर्थक्यापत्तेः शाखान्तरप्राप्तचतुर्द्धाकरणा ऽनुवादाभ्युपगमे बर्हिः-पत्वस्य शाखान्तरप्राप्तस्या ऽनुवादोपपत्ते न विधिः सम्भवती-त्याशङ्क्य कस्मान्न तर्हि विधीयतामिति पक्षान्तरमाह * अथेति * साधारण्याशङ्कापरिहारमुपसंहरति * अतश्चेति * मिथस्तेषाम-सम्बन्धादिति पूर्वपक्षसूत्रावयवस्य व्यवधारणकल्पनयास्यैकदे-वत्यादिवचनानामेकप्रकरणान्वये योजितस्य विरुद्धत्वोक्त्या यद्येकादि-देवत्यानां मिथः सम्बन्धो न स्यात्तर्हि द्विदेवत्यस्या ऽपि लक्षणार्था-भिगुणश्रुतिभेदेन त्वनदस्तीत्येवं लक्षणार्थेन सिद्धान्तसूत्रावयवे-ऽनुभक्तस्य पूर्वपक्षनिरासार्थत्वेन योजनार्थं यद्विदित्वाति भाष्यं

व्याचष्टे * यदि त्विति * उपलक्षणकार्ययोर्मिथो ऽसम्बन्धात्कार्यायोगित्वेनोपलक्षणस्यानादृत्यत्वेऽप्येवं स्वमतेन व्यवधारणकल्पनां विनैव पूर्वपक्षसूत्रावयवे व्याख्याने त्वाग्नेयत्वेन द्विदेवत्यस्योपलक्षयितुमशक्यत्वादनुपलक्षितस्य चाग्नेयशब्देन ग्रहीतुमशक्यत्वान्मिथस्तेषामसम्बन्धे ऽप्येकदेवत्यस्यैव लक्षणार्था ऽग्नेयत्वोपलक्षणश्रुतिरित्येवं लक्षणार्थेति सूत्रावयवस्य व्याख्यां सूचयितुमाह * यद्यपि चेति *

इति श्रीमत्त्रिकाण्डमीमांसामण्डनभतिवसन्तसोमयाजिभट्ट माधवात्मजभट्टसोमेश्वरकृतौ तन्त्रवार्त्तिकटीकायां सर्वानवद्यकरण्यां न्यायसुधाख्यायां तृतीयस्य प्रथमश्चरणः समाप्तः ।

न्यायसुधायाम् ।

तृतीयाध्यायस्य द्वितीयः पादः

बर्हिर्न्यायः । लवनप्रकाशमन्त्राणां मुख्ये विनियोगाधिकरणम् ॥ १ ॥

अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्त-
स्मादुत्पत्तिसम्बन्धो ऽर्थेन नित्यसंयोगात् ॥ १ ॥

लिङ्गहेतुकस्य विनियोगस्य श्रुतिसापेक्षत्वाच्छ्रौतविनियोगप्रकारचिन्तानन्तरं लैङ्गिकविनियोगप्रकारचिन्तायां सङ्गतिमाह * इदानीमिति * विशिष्टावृत्त्या विविधरूपविनियोगाभिधानाद्विनियो- ७६३।७
गप्रकारोक्तिः । सामर्थ्याख्यस्य लिङ्गस्य मन्त्रेष्विव ध्रुवावदानाद्यङ्गभूतेषु स्रुवादिष्वपि विनियोजकत्वसद्भावात्तेष्वलिङ्गहेतुकविनियोगप्रकारचिन्ता कस्मान्न कृतेत्याशङ्क्य मुख्यएव विनियोगो गौणे ऽपि चेत्येतत्प्रकारव्यतिरिक्तस्य लैङ्गिकविनियोगप्रकारस्याभावात्तस्य चार्थप्रत्यायनव्यतिरिक्तसामर्थ्यहेतुकत्वाभावान्मन्त्रव्यतिरिक्तस्य चार्थप्रत्यायनसामर्थ्याभावान्मन्त्राणामेव लैङ्गिकविनियोगप्रकारचिन्ताविषयत्वं भाष्यकृतोक्तमिति दर्शयितुमाह * लिङ्गं नामेति * गौणार्थप्रत्ययस्य तर्हि मुख्यार्थप्रत्ययजन्यत्वेन मन्त्रे मन्त्रजन्यत्वाभावान्मन्त्रसामर्थ्यानुपपत्तेर्बर्हिर्मन्त्रस्य मुख्येष्वेव कुशेषु विनियोगो गौणेष्वपि वा कुशसदृशपूलपाख्येषु सुगन्धादिषु तृणान्तरेष्विति चिन्ता न युज्यतेत्याशङ्क्याह * तच्चेति * गौणस्यार्थस्याशाब्दत्वे शाब्दार्थान्तरानन्वयापत्तेर्गौणे ऽप्यर्थे शब्दव्यापारो ऽस्तीत्याशयः । कः पुनरिति भाष्यस्य गौणार्थाभावात्सन्देहायोगेनाधिकरणाक्षेपार्थत्वं सूचयितुमाह * तत्रेति * तत्सिद्धिसूत्रे गौणस्यार्थस्योक्तत्वान्नेह तदभावाशङ्का युक्तेत्याशङ्क्याह * तत्सिद्धीति * गौणत्वनिमित्तविशेषानवधारणे गुणस्वरूपसद्भावमात्रेण प्रकृतचिन्तासिद्धेरिह सामान्यतो गौणे ऽर्थे सिद्धे जहत्स्वार्थाभिधायित्वादिनिमित्तत्रयस्य वेदे ऽनुपपत्तेः प्रस्तरादिशब्दानां यजमानादिषु

गुणवृत्तिसिद्धौ लक्ष्यमाणगुणयोगवृत्तित्वरूपो गौणत्वयोगौ-
णत्वनिमित्तविशेषस्तत्सिद्धिसूत्रे व्याख्यात इत्युक्ते तथाप्यजहत्स्वा-
र्थाः सर्वा वृत्तय इति तत्सिद्धिसूत्रे ऽभिहितत्वादुपपदाधीनत्वा-
दिषु चेहाशङ्क्यमानेषु पञ्चस्वपि गौणत्वनिमित्तेषु स्वार्थत्यागो-
पपदाधीनत्वादिति निमित्ताशङ्का युक्तेत्याशङ्क्य स्वार्थपरित्यागवृत्ति-
त्वमप्यर्थेन नित्यसंयोगादित्यत्रैव सिद्धं तत्सिद्धिसूत्रे व्याख्यात-
मित्युक्तमतो नैव गुणो नाम कश्चिदस्तीत्याशङ्का युक्तेति करणा-
र्थः । एवं सति तत्सिद्धिसूत्रं पश्चात्कार्यमित्याशङ्क्याह * अथ-
मर्थत इति * वक्ष्यमाणगौणत्वासिद्धवत्कारेणापि निमित्तविशेषो-
क्तिर्युक्तेत्याशयः । उच्यतइति परिहारभाष्यं व्याचष्टे * तत्र
चेति * शङ्क्यमाणोपपदाधीनत्वादिनिमित्तान्तरनिरासं विना
गुणयोगनिमित्तत्वासिद्धेरुपक्रममात्रत्वसूचनार्थम् * तत्र चेत्युक्त-
म् * उत्पत्त्युक्त्यावगतिरुक्ता गुणादवगमनं गौणत्वे हेतुरित्यर्थः ।
शङ्काशयविवरणार्थं यद्येवमिति भाष्यं व्याचष्टे * शास्त्रादिष्वथ
इति * कथं सर्वेषां शब्दाभिधेयतेत्याशङ्क्य निराकुर्वन्श्लोकं व्याच-
ष्टे * परेति * पैङ्गल्यादिसामान्यस्य गुणत्वाभावाद्विशेषस्य चाग्नि-
गतस्यान्यत्राभावादग्निगुणयोगेन माणवकावगत्यनुपपत्तेरग्नित्वपै-
ङ्गल्यतीव्रत्वादेरसर्वगतत्वादग्निशब्दात्प्रतीयमानो ऽर्थो ऽभिधीयमा-
नत्वादन्येन प्रकारेणावगत्ययोगान्मुख्य इत्यर्थः । अन्यशब्दस्याभि-
धीयमानत्वापेक्षायामपि नित्यसापेक्षत्वाद् गतिशब्दसमासाविघा-
तः । उपपदाधीनत्वादीनां निमित्तानां सिद्धान्तिनो ऽनिष्टत्वादुप-
न्यासपूर्वको निरासो ऽनर्थक इत्याशङ्क्य गौणत्वनिरासार्थैकदेशि-
७६४।२ कल्पितानि निमित्तान्याशङ्किना दूषयितुमुपन्यस्यतीत्याह * तत्रे-
ति * गौणस्य मुख्याद्विवक्षायेहोपपदाधीनप्रत्ययस्य लक्षणत्वेन
शङ्कनीयत्वाद्व्यापिनश्च धर्मस्यान्यतो व्यावर्त्तकत्वेन लक्षणत्वाद-
ग्निरधीतइत्यादौ चोपपदाभावे ऽपि गौणत्वप्रसिद्धेरुपपदाधीनप्रत्य-
यस्याव्यापित्वादर्थधर्मत्वाभावाच्च लक्षणत्वा ऽनुपपत्तेरथेति भा-
ष्यमयुक्तमाशङ्क्याह * सर्वथेति * धर्मत्वाभावे ऽप्यन्यतो व्या-
वर्त्तकत्वाल्लक्षणत्वोपपत्तिः पूर्वार्द्धेनोक्ता उत्तरार्द्धेन पराधीना श-
ब्दप्रवृत्तिर्यस्मिन्नर्थे पराधीनप्रवृत्तिरित्यर्थधर्मस्य पराधीनप्रवृत्ति-
त्वस्य लक्षणतोक्ताग्निरधीतइत्यादावपि माणवकाद्युपपदस्यार्थप्र-
करणान्नित्यशब्देनाव्याप्तता परिहृता । नित्यशब्दार्थं व्याचष्टे * न
हीति * माणवके पैङ्गल्ये प्रत्ययो माणवकप्रत्ययः । एवमपि को
ऽत्र गुणो विवक्षितो यत्सम्बन्धाद् गौणत्वं स्यादित्याशङ्क्याह *

तदेव चेति* अग्न्यादिनाम्नां पैङ्गल्यादिप्रवृत्तौ माणवकादिपदान्तरस्य हेतुत्वेनानुग्राहकतयाङ्गत्वेन गुणत्वे ऽभिहिते कथं पादान्तरस्य पैङ्गल्यादावग्न्यादिनामप्रवृत्तिहेतुतेत्याशङ्क्य सामान्योक्त्या समानाधिकरणकृतोक्ताग्निशब्दस्य माणवकगतपैङ्गल्यादिवाचित्वाभावे माणवकशब्दाग्निशब्दसमानाधिकरण्यायोगात्पैङ्गल्यादिवाचिताग्निशब्दस्यावसीयत इत्याशयः पदान्तरेण पदान्तरस्य स्वाभाविकशक्तिनाशेन शक्त्यन्तरानुत्पादकत्वादुपपदापेक्षित्वे ऽपि मुख्यत्वानपायान्मुख्याद्विवेकानापादकत्वेनैतल्लक्षणार्थं नैतदित्यादिभाष्यं व्याचष्टे* नैतदिति* स्वभावादेव पैङ्गल्ये ऽस्याग्निशब्द प्रति मुख्यत्वं लक्षणवाच्यत्वं नापेतमित्यर्थः । श्लोकं व्याचष्टे *यथैवेति* सम्बन्धानुभवजन्यसंस्कारसम्बन्धस्मृतिग्रहणायादिशब्द।नचासाविति भाष्यं शब्दद्वयसमुदायावयवत्वाख्यं गुणशब्दात्प्रतीतेर्गौणतेत्येवं गौणत्वलक्षणदूषणार्थत्वेन व्याख्यातु लक्षणान्तरमुपन्यस्यति *अथेति* माणवकाग्निशब्दसमुदायवाच्यस्य पैङ्गल्यस्याग्निशब्दात्मकमवयवं प्रति गौणतेत्यर्थः । एतल्लक्षणदूषणार्थत्वेन भाष्यं व्याचष्टे * तदिति * श्लोकं व्याचष्टे * तत्रेति * उभयोरपि पैङ्गल्यपिण्डस्वरूपयोर्वाच्यत्वादुभावप्यग्निमाणवकशब्दौ प्रात्यात्मिकयोरर्थयोर्मुख्यावित्युक्ते ऽर्थे विपर्यगौणमुख्याविवेकप्रस्तावादर्थमुख्यत्वोक्तौ शब्दमुख्यत्वोक्तिरिति सूचनार्थेनिकरणः । वाक्यार्थस्यैकं पदं प्रति वाक्यावयवत्वात्मकगुणवशात्प्रतीतेर्गौणतेत्येवं लक्षणान्तरोपन्यासार्थमथेति भाष्यं व्याचष्टे * इदानीमिति * सर्ववाक्यार्थानां तर्हि शब्दं प्रति गौणत्वाप्त्तिरिति परिहारसूचनार्थम् * पूर्ववदेवेत्युक्तम् * एतल्लक्षणादूषणार्थं नैतदितिभाष्यं व्याचष्टे *तदिति* अग्निमाणवकशब्दाभ्यामग्निमाणवकत्वयोरभिधानात्तद्विशिष्टः कार्योक्तिः सम्भवतीति वाशङ्क्याह*नत्विति*तच्छब्देनाग्निशब्दः परामृष्टः । पैङ्गल्यस्य तर्ह्यग्निशब्दवाच्यत्वात्पदार्थत्वोपपत्तेर्वाक्यार्थत्वसम्भवाद्युच्येत ततो वाक्यार्थता भवेदित्यनेनावाच्यत्वात्पैङ्गल्यस्य वाक्यार्थत्वनिरासो न युक्त इत्याशङ्क्याह *नचेति* वाक्यार्थत्वनिरासमुपसंहरति *तस्मादिति * गौणमुख्यविभागादावसिद्ध्युपसंहारार्थन्तदेवशिनि भाष्यं व्याचष्टे * तेनेति * पैङ्गल्यस्य शब्दावाच्यत्वोक्तेर्ष्वविरोधमाशङ्क्याह * माणवकस्येति * मन्दप्रसिद्धत्वात्मक गौणलक्षणोपन्यासार्थं तथेति भाष्यं मन्दप्रसिद्धस्य गुणादवगतत्वाभावेन गौणशब्दवाच्यत्वायोगादयुक्तमाशङ्क्य मन्दप्रसिद्धस्य मन्दप्रयोगविषयभूतस्य वाक्यार्थस्योपपादनं विना निश्चेतुमशक्यत्वादुपपदस्यैवालापि ७६५।४

पक्षद्वये ऽनुग्राहकत्वेनाङ्गत्वाद् गुणता विवक्षितेति सूचयन् व्याचष्टे
* अथेति * यथा मन्दप्रसिद्ध्या कृतमुपपदस्याश्रयणं च यथा च
सुष्ठु प्रसिद्ध्या कृतमनाश्रयणं तत एव दर्शयतीति मन्दप्रसिद्धत्वस्यो-
पपदाश्रयणमिति तत्वोक्त्या मन्दप्रसिद्ध्यर्थे प्रतीतावुपपदस्यानुग्रा-
हकत्वाद् गुणत्वसूचिते कथं तर्ह्युपपदाधीनत्वपक्षात्पक्षान्तरतेत्याशङ्क्य
मन्दप्रसिद्धौ सन्तमप्युपपदव्यापारं लक्षणत्वेन * मुक्त्वेयुक्तम् * ए-
तल्लक्षणदूषणार्थमिदमपीति भाष्यं व्याचष्टे * तत्रेति * ज्ञानस्य
निरवयवत्वात्स्वतो न्यूनातिरिक्तत्वाभावे ऽपि ज्ञात्रल्पबहुत्वाभ्यां
न्यूनातिरिक्तत्वसम्भवमाशङ्क्य ज्ञात्रल्पत्वात्संख्यातो ज्ञानाल्पत्वे ऽपि
मान्द्याप्रसिद्धेर्निरवयवत्वेन च स्वरूपपरिमाणाल्पत्वायोगान्निरव-
यवसामान्यमात्रविषयत्वेन च शब्दस्य ज्ञानस्य विषयाल्पपरिमाणत-
या ऽप्यल्पपरिमाणयोगान्मान्द्यायोगसूचनायाञ्जस * इत्युक्तम् *
अल्पप्रयोगित्वात्सैकललक्षणोपन्यासार्थमथेति भाष्यमल्पप्रसिद्ध-
त्वलक्षणाल्पप्रयोगित्वलक्षणस्य मूलभूतत्वेन विशेषं दर्शयन् व्या-
७६६।२ चष्टे * इदानीमिति * एतच्च लक्षणदूषणार्थेनैतादिति भाष्यं व्या-
चष्टे * तदिति * पुनः शब्देन सामर्थ्यनिमित्तप्रत्यायकत्वाच्छब्दस्य
मुख्यत्वे ऽप्यर्थस्य गौणत्वनिरासः। प्रकृतं कथं सिद्ध्येदित्याशङ्क्य श-
ब्दस्य मुख्यत्वे ऽर्थस्यापि मुख्यत्वापत्तिरिति परिहारार्थत्वेनातः सो-
ऽपीति भाष्यव्याख्या सूचिता। यथा च तद्यथा गवादिशब्दानां पृ-
थिव्यादिरित्यनेनोपपदधीनत्वस्येति व्याप्तिर्दर्शिता तथास्य प्रसिद्धि-
प्रयोगयोरपि दर्शयितव्येत्याह * इहापि सेति * अतिव्याप्तिमेव
दर्शयितुं वृद्धश्लोकं पठति * तथा चाहेति * परकल्पितेषु गौणत्व-
लक्षणेषु मुख्याद्विवेकानापादकत्वेन दूषितेषु वाच्यगुणयोगेन प्रती-
यमानत्वात्मकविवेकापादकलक्षणोक्त्यर्थमत्रेत्यादि भाष्यं तात्पर्यतो
व्याचष्टे * इदानीमिति * अग्निस्तावदभिधानमित्युत्कृष्य तावच्छब्दो
व्याख्येयः । अग्निवत्पैङ्गल्यस्य माणवके च पैङ्गल्यान्वयस्याप्यभि-
धानमस्त्वित्याशङ्क्याग्निसम्बन्धादेव परिशिष्टस्यार्थस्य प्रतीतेरनभि-
धेयतामुक्तामाकृत्यधिकरणन्यायेन दृढयितुम् *व्यक्तिवदित्युक्तम् *
परगुणानां परशक्यतां परगुणानां चेति वार्त्तिकोक्तां परिहर्तुमाह
* सन्ति चेति * गुणव्यक्तीनां परत्राभावे ऽपि सामान्यानि पर-
त्र सन्तीत्युक्ते तत्सद्भावं द्रढयितुं चित्रादौ यत्तु सादृश्यं सामान्यं
तत्र किं भवेत् तत्रापि पृथिवीवर्णसंस्थानादिसमानतेति प्रश्नोत्तर-
रूपोपमानवार्त्तिकोक्तोक्ता । गुणयोगनिमित्तवृत्तित्वात्मकगौणत्व-
लक्षणव्युत्पादनस्य वेदे गौणत्वसिद्ध्यर्थत्वोक्त्यर्थमेवमिति भाष्यं

दर्शपूर्णमासयोस्तृणसदृशाभावात् कुशाविषयस्तृणशब्दो न कुशस-
दृशसुगन्ध्यादितृणान्तरोलपराजिस्तरणार्थविषयस्तृणसदृशशब्द इ-
त्येवं स्पष्टत्वान्न व्याख्यातम् । गौणमुख्याविभागोक्तेरधिकरणारम्भ-
सिद्ध्यर्थत्वोक्त्यर्थं तदेवमिति भाष्यं व्याचष्टे * तस्मादिति * सु-
खग्रहणार्थं गौणत्वलक्षणानि सङ्गृह्णाति * एते चेति * स्वार्थं जहा-
तीति जहत्स्वार्थोऽर्थान्तराभिधायी च तस्य भावो जहत्स्वार्थाभि-
धायित्वं गुणिरूपाग्न्यादिस्वार्थत्यागेन गुणरूपे पैङ्गल्यादौ वृत्तिर्गौ-
णत्वे कारणम् अग्न्यादिजातिपैङ्गल्यादिगुणसङ्घातोऽग्न्यादिशब्दवा-
च्यः सञ्जातिरहितगुणमात्रे शब्दप्रवृत्तिहेतुत्वाद् गौणत्वकारणम्। अ-
ग्न्यादिशब्दवाच्यस्याग्नित्वादेर्माणवकादावग्न्यादिगुणदर्शनेन कल्प-
नागौणत्वकारणम्माणवकाद्युपपदसहायस्याग्न्यादिशब्दस्य पैङ्ग-
ल्यादौ वृत्तिरङ्गाख्यगुणभूतोपपदाधीनत्वाद् गौणत्वकारणमग्निर्मा-
णवक इत्यादिशब्दस्यावयवार्थानपेक्षवर्णसमुदायरूपेण पैङ्गल्यादौ या
प्रसिद्धिस्तस्याभावं समुदायावयवभूतस्याग्न्यादिशब्दस्य पैङ्गल्यादौ
समुदायावयवभूतत्वाख्यगुणवत् । प्रवृत्तिहेतुत्वाद् गौणत्वकारणं
पैङ्गल्यादेरग्निर्माणवक इत्यादिवाक्यार्थत्वमग्न्यादिशब्दस्य पैङ्गल्यादौ
वाक्यवयवत्वाख्यगुणवत्त्वाद् गौणत्वकारणमग्न्यादिशब्दस्य पैङ्गल्या-
दावकल्पश्रोतृप्रसिद्धत्वमङ्गाख्यगुणभूतोपपदापेक्षत्वप्रतिनिमित्ताद्गौ-
णत्वकारणम् ।यस्मिन् पैङ्गल्यादावग्न्यादिशब्दस्याल्पैर्वक्तृभिः प्रयो-
ग. सोऽल्पप्रयोगी तस्य भावोऽल्पप्रयोगिताऽल्पसिद्धत्ववद्गौणत्वका-
रणम् एतान् गौणत्वकारणपक्षान्निरस्याग्न्यादिशब्दवाच्येनाग्नित्वादि-
नाग्न्यादिगुणस्य पैङ्गल्यादेर्लक्षणा माणवकादावग्न्यादिगुणवत्यग्निश-
ब्दप्रवृत्तिहेतुत्वाद्गौणशब्दवाच्यरूपगौणत्वकारणत्वेन साधितेति न-
वानां मध्ये युक्तायुक्तपक्षविवेकायोक्तं किं तावदिति पूर्वपक्षभाष्यं
व्याचष्टे *तत्रेति *सकृदाम्नातस्य मन्त्रस्यावृत्त्यनापत्तिः·साक्षान्मुख्ये ७६७।२
विनियोगस्य मूलं भविष्यतीत्याशङ्क्य प्रतिप्रधानमावृत्त्याविरोधोक्त्यर्थं
परार्थत्वादित्युक्ते मुख्यविनियोगेन कृतार्थस्य गौणे विनियोजकश्रु-
त्यकल्पनादुभयाङ्गत्वायोगमाशङ्क्यानेन मन्त्रेण यदभिधातुं शक्नुया-
त्तदभिदध्यादिति गौणमुख्यसाधारणश्रुतिकल्पनेनोक्त्यर्थो नित्यशब्दः
अप्राकरणिकेऽपि तर्हि विनियोगापत्तिरित्याशङ्क्य प्रकरणावग-
तसामान्यसम्बन्धसापेक्षत्वाल्लिङ्गस्याप्रकृते विनियोजकत्वायोगोत्त्वे-
व प्रकृते गौणे मुख्ये च * प्रयोगितेत्युक्तम् * संस्कारत्वादि-
ति सूत्रस्य शङ्कोत्तरत्वेन व्याख्यार्थमपि चेति भाष्यं व्याचष्टे * एवं
चेति * प्रकरणवच्चोदकोऽप्यनुग्रहीतव्य इत्याह * तथेति *

ऋषिशब्देन दृश्यते ऽनेनेति व्युत्पत्त्या वेदाभिधानाद्वैदिकं मन्त्ररूपमार्षशब्देनोक्तम् । औत्पत्तिकेन प्रथमावगतेन मुख्येनैवार्थेन मन्त्राणां सम्बन्ध इत्येवं सिद्धान्तप्रतिज्ञार्थमध्यमसूत्रावयवव्याख्यार्थत्वेन स्पष्टत्वान्मुख्य एव चेति भाष्यमव्याख्याय हेत्वर्थत्वेनाद्यावयवव्याख्यार्थं प्रकरणे हीत्यादिभाष्य प्रधानैकवाक्यतां विनाप्यभिधेयार्थत्वोपपत्तेः प्रधानैकवाक्यतोक्त्यानर्थक्यादयुक्तमाशङ्क्य क्रतुशेषत्वोक्त्यर्थत्वेनार्थत्वं सूचयन्सूत्रावयवपाठपूर्वं व्याख्यातुमाह * एवमिति * मुख्यार्थप्रत्यायनद्वारा गौणे ऽपि शक्त्युपपत्तेर्गौणमुख्यसाधारणैकविधिनियोजकश्रुतिकल्पनेनाविशेषादुभयत्र विनियोगं न त्विति भाष्येणाशङ्क्यानुष्ठेयत्वेनावगते पदार्थे स्मारकापेक्षिणि लिङ्गेन मन्त्रविनियोगादन्योन्यानपेक्षाणां च पदार्थानामनुष्ठेयत्वावगतेरन्योन्यानपेक्षाणामेव स्मारकापेक्षत्वात्प्रत्येकमेव पदार्थेषु मन्त्रविनियोजिकायां श्रुतौ कल्प्यायां मुख्यप्रत्यायनं विना गौणप्रत्यायनाशक्तेर्मुख्यप्रत्यायनाशक्तेर्मुख्यविषयविनियोजकश्रुतिकल्पनां विना गौणविषयश्रुतिकल्पनायोगान्मुख्यविषयश्रुतिकल्पनायाः प्राथम्यावगतेर्मुख्यविनियोगेन मन्त्रस्य नैराकाङ्क्ष्यात् गौणे मन्त्रविनियोजककल्पना न युक्तेत्येवं परिहारार्थतया मुख्येनार्थेन गौणतार्थप्रत्यायनवेलायामपि मन्त्राणां प्रत्याय्य प्रत्यायनलक्षणा संयोगादित्येवमन्त्यावयवव्याख्यार्थं सत्यमित्यादिभाष्यं व्याचष्टे * मुख्येन चेति * गौणेन कृतार्थत्वान्न मुख्ये श्रुतिकल्पनेत्येवं कस्मान्न भवतीत्याशङ्कां निरस्य श्लोकं व्याचष्टे * अपि चेति * अपि वा प्रयोगसामर्थ्यान्मन्त्रो ऽभिधानवाची स्यादिति द्वितीयमन्त्राधिकरणसूत्रन्यायेन सामर्थ्याधीनत्वाच्छ्रुतिकल्पनस्य मुख्ये च निरपेक्षसामर्थ्यावगतेस्तत्रैव श्रुतेः प्राक्कल्पत्वाद् गौणे तु सामर्थ्यस्य मुख्यसामर्थ्यपूर्वकत्वान्न वैपरीत्याशङ्का निरासाशयः एतदुपपादनायैवार्थेन नित्यसंयोगादित्यनेनाजहत्स्वार्थता गौणवृत्तेरुक्तेति सूचनार्थम् * यदीत्युक्तम् * मुख्येनैवार्थेनोपायान्तरनिवृत्त्या मन्त्राणां स्मृत्युपायत्वेन नित्यसंयोगात्प्रकरणाम्नानार्थवत्त्वोपपत्तेर्गौणस्मृतावुपायान्तरनिवृत्त्यशक्तेः सामर्थ्यप्राप्तोपायान्तरनिवृत्त्यशक्तेः सामर्थ्यप्राप्तोपायान्तरबाधापादकगौणविनियोगायोगात्स्वार्थतया ऽर्थेन नित्यसंयोगादित्यवयवस्यान्यथाव्याख्यार्थमपि च गौणस्येति भाष्यं व्याचष्टे * किं चेति * मुख्यविनियोगेन मन्त्रपाठस्य कृतार्थत्वे ऽपि मुख्यद्वारा गौणप्रत्यायनार्थं गौणे ऽपि मन्त्रो विनियोज्य इत्याशङ्क्योपायान्तरेणापि गौणप्रत्यायनोपपत्तेर्मन्त्रनियमो न युक्त इत्येवं परिहारार्थत्वेन यदि गौ-

णप्रत्यायनस्य नित्यं मुख्येनार्थेनोपायोपेयत्वलक्षणः संयोगो भवेत्त- तो मुख्यद्वारा मन्त्रस्य गौणे ऽपि विनियोगः स्यान्न त्वेतदस्तीति व्यवधारणकल्पनया ऽर्थेन नित्यसंयोगादित्ययवस्यान्यथाव्याख्यार्थ- मपि च यो गौण इत्यादि मुख्य एव विनियोग इत्यन्तं भाष्यमवय- वशो व्याचिख्यासुः प्रत्याययतीत्यन्तं तावद्व्याचष्टे*अपि चेति * सचेदित्याशङ्काभाष्यं व्याचष्टे * अन्यथेति * यदित्युत्तरभाष्यं व्याचष्टे * नेति * अथेत्याद्याशङ्कोत्तरभाष्यं व्याचष्टे * पाक्षिक- ७६८।१ त्वे ऽपीति * यदेति प्रकृतसिद्ध्युपसंहारभाष्यं व्याचष्टे * नित्यमि- ति * उपायान्तरेण गौणप्रतीतिसिद्धावपि मन्त्रस्मारितस्याभ्युद- यकारित्वाद् गौणे ऽपि मन्त्रविनियोगो भविष्यतीत्याशङ्कानिरासार्थ- त्वेन साधनविशेषानपेक्षणार्थस्मृतिमात्रेण प्रयोजनभूतनार्थानुष्ठातुः संयोगाच्च मन्त्रस्मारिततादरणीयेत्याशङ्कानिरासार्थत्वेन मुख्येनार्थे- न चेति भाष्यं व्याचष्टे * न चेति * मन्त्राम्नानानर्थक्यपरिहारार्थं मन्त्रस्मारिततादरणीयेत्याशङ्कानिरासार्थत्वेन मुख्येनार्थेन मन्त्रस्य स्मार्यस्मारकत्वसंयोगमात्रादाम्नानार्थवत्त्वोपपत्तेर्न गौणस्य मन्त्र- स्मारिततादरणीयेत्येवमवधारणार्थनित्यशब्दाभ्युपगमेनैव पञ्चम- व्याख्यार्थमथापीति भाष्यं व्याचष्टे * मन्त्रेति * पञ्चस्वपि व्याख्यासु सकृत्सूत्रं योजयति * तेनेति * नित्योपपादनायाव्य- भिचारितोक्ता *

संस्कारत्वादचोदिते न स्यात् ॥ २ ॥

भाष्यव्याख्यार्थे सूत्रं योजयति अचोदित इति * लिङ्गेन प्रकरणबाधस्यादोषत्वोक्त्यर्थतया न च कांश्चिदपि भाष्यावयवं व्याख्यातुं लिङ्गेन चेत्युक्तं कर्मान्तराङ्गत्वे ऽपि तर्हि प्रमाणाभावादानर्थक्यं स्यादित्याशङ्कते * कथं पुनरिति * वैदिकत्वसामान्योपस्थापितवैदिककर्मान्तराङ्गत्वं सन्निधानाख्येन पञ्चमप्रमाणेनाशङ्क्याहवनीयादिवत्सामान्यत कर्मा- ङ्गत्वानवगमात्सामान्यमात्रेणानाकाङ्क्षिता कर्मविशेषाङ्गता बोद्धुमश- क्येति परिहारसूचनार्थं वैदिकोक्तिः । कर्मानङ्गत्वे ऽपि लिङ्गादेव- ताङ्गत्वं भवतीत्याशङ्क्याह * कथं चेति * क्रत्वङ्गभूते ऽर्थे सा- मान्यतो मन्त्रविनियोगाभावे कर्मापूर्वसाधनत्वापेक्षायां विनियोगा- पत्तेर्नैष्फल्यप्रसङ्गान्न लिङ्गमात्रादङ्गत्वं सम्भवतीत्याशयः । परिहर-

(१) मवधारणादरणीयेत्येवमवधारणार्थनित्यशब्दाभ्युपगमेनान्यथा व्याख्यार्थमथापीन चे- तिभाष्यं * व्याचष्टे नचेति * इति २ पु० पा० ।

ति * तदिति * पूर्वार्द्धं व्याचष्टे * यागेति * उत्तरार्द्धं व्याचष्टे * तत इति * चोदकानुग्रहशङ्कोत्तरत्वे तु विकृतावचोदिते ऽग्न्यादावग्न्यादिशब्दो यत्र भवति तत्तथा युक्तमित्येवं सूत्रयोजना स्पष्टत्वान्न कृता ।

गार्हपत्यन्यायः । इन्द्रप्रकाशकमन्त्राणां गार्हपत्य
विनियोगाधिकरणम् ॥ २ ॥

वचनात्त्वयथार्थमैन्द्री स्यात् ॥ ३ ॥

गौणसामर्थ्यस्य विनियोजकत्वे निरस्ते विनियो
जकश्रुतिसहायतापि गौणसामर्थ्यस्य न सम्भवतीति प्रसक्त
७६९।१ स्यापवादार्थतदधिकरणमित्यनन्तरसङ्गतिमाह * अपवाद इति *
निवेशनः सङ्गमनो वसूनां विश्वारूपा अभिचष्टे शचीभिः । देव इव
सविता सत्यधर्मेन्द्रो न तस्थौ समरे वसूनामित्युपमार्थो येन कार-
णोपमानतया ऽस्मिन्मन्त्रे निर्देशादप्राधान्यात् गतेर्धरो ध्रुवः तथा
सोम आपश्चैवानिलो ऽनलः प्रत्यूषश्च प्रभासश्च वसवो ऽष्टौ प्रकी-
र्त्तिता इत्यनलशब्दवाच्यस्य वाग्नेर्वसुत्वस्मरणादुक्तानां मध्ये ऽग्नि-
र्वा नाम वसुरिन्द्र इव सङ्ग्रामे स्थितवानित्यग्निस्तुतिप्रतीतेर्वसूनां पा-
वकश्चास्मीति चाग्नेरेव वसुश्रेष्ठत्वस्मरणात्तत्समीपे ऽन्येषां वसूनां ग-
मनाद्वसुसङ्गमनत्वेनाप्यग्नेरेव स्तुतिप्रतीतेर्नैयमृगैन्द्रीत्वेनोदाहार्येत्या-
शङ्क्याह *निवेशन इति * बलाबलाधिकरणे श्रुत्या लिङ्गबाधस्य व-
क्ष्यमाणत्वान्मन्त्रस्य स्वरससामर्थ्यानालोचनेनैन्द्र्येति देवतातद्धित-
श्रुत्यैन्द्रप्राधान्यावगमाद्रामरावणयोरिवेति वचानन्यचरितत्वेनेन्द्र-
स्यापीन्द्रोपमानरूपस्तुतिसम्भवादैन्द्रीत्वेनैवोदाहृतेत्याशयः । विज्ञा-
यतइति कृत्वैतदुदाहरणं युक्तमित्यध्याहारेण ग्रन्थो योज्यः । मन्त्रस्व-
रससामर्थ्यालोचनेन च पूर्वपक्षकरणं बलाबलाधिकरणवदिहापि
कदा चनस्तरीरसीत्यृचः शाखान्तरपठिताया उदाहार्यत्वापत्तेस्त-
द्धितश्रुत्यालोचनयैवेह पूर्वपक्ष इत्यपौनरुक्त्यसूचनायाह * केषां चि-
त्विति * असमर्थविनियोगाशक्तेः श्रुत्या सहायत्वेनापेक्षित साम-
र्थ्यं किं मुख्यमेव सहायतामश्नुते । गौणमपि चेति सन्देहो भाष्यो-
क्तसन्देहस्य हेतुरिति सूचयितुमाह * तत्रेति * कुतः पुनरित्या-
द्याक्षेपपूर्वकसन्देहसमाधानार्थं भाष्य शब्दवस्तुविसंवादात्संदेहो
घटनीय इत्येवमर्थत्वेन तात्पर्यतस्तावद्व्याचष्टे * सत्यपि चेति * न-
चारुणवन्मन्त्रस्य कथं चिदपि शक्तिर्वक्तुं शक्या यतस्तन्निर्णये-

नैव निर्णयः स्यादित्याह * तत्रेति * प्रमाणान्तरेणेन्द्रशब्दस्य गार्हपत्यपरतावगमिष्यतइत्याशङ्क्याह * नहीति * तात्पर्येनो व्याख्यातं भाष्यमवयवशो व्याचिख्यासुर्यद्धीत्यवयवं तावद्व्याचष्टे * अभिधानं चेति * नोपस्थानमन्त्रचोदितं किं त्वभिधानमपीति चकारेण वदता वचनेनाभिधानेनोपस्थानमित्युक्ते विनाप्युपस्थानमभिधानसम्भवादभिधानपरतया नोपस्थानमाद्रियतेत्याशङ्क्य संस्क्रियते पूज्यते ऽनेनेति संस्कारशब्देनोपस्थानस्य सम्पूज्यार्थनायामुक्तायां कथं तर्ह्यभिधानार्थेत्याशङ्क्याभिधानस्य स्तुतिरूपपूजात्मकत्वेनैकपदैस्तुत्ययोगाद्वाक्यात्त्वोपपादिते सम्बन्धभाष्यव्याख्या सूचिता कथमात्मनेपदादभिधानार्थतावसीयतइत्याशङ्क्योपान्मन्त्रकरणइत्युपपूर्वात्तिष्ठतेर्मन्त्रकरणके ऽर्थे वर्तमानादात्मनेपदस्मृतिमालोच्य तिष्ठतिना मन्त्रकरणस्य व्यापारस्याभिधाने ह्यात्मनेपद भवति नचाभिधानत्वमनपेक्ष्य व्यापारान्तरे मन्त्रः करणमित्युक्तम् । नचेत्याद्याशङ्क्यन्तं भाष्यावयवं व्याचष्टे * नेति * उपपूर्वस्यापि तिष्ठतेर्लोके ऽभिधानवाचित्वाप्रसिद्धेः फलभोक्तृत्वयोग्यताधानार्थानां यजमानसंस्काराणां यागकार्यभोक्तृत्वयोग्यतोत्पादनाद्यागाङ्गत्ववत्समीपस्थानस्याभिधानार्थत्वे सति समीपस्थानस्याभिधानार्थत्वकल्पनान्मन्त्रकरणकत्वोपपत्तौ प्रसिद्धसमीपस्थानवाचित्वत्यागायोगादभिधानार्थसमीपस्थानवाचित्वेनोपपूर्वस्य तिष्ठतेरात्मनेपदमवगम्यते न तु समीपस्थानवाचित्वत्यागेन वाचितेति सूचनायोपस्थानोक्तिर्गार्हपत्यस्य समीपस्थानं कर्मत्वसम्भव ऽप्यभिधानकर्मत्वोक्त्यर्था प्रकाश्यत्वोक्तिः एतदभिधानाप्रयोजनसमीपस्थानरूपमुपस्थानं गार्हपत्यसयोगार्थमित्यनवगमे ऽपि तद्धितद्वितीययोर्विप्रतिपत्तौ तद्धितः समञ्जसो द्वितीया वेति सन्देहात्कैमर्थ्याशङ्का जायते न तु गार्हपत्यार्थत्वं निश्चीयतइत्येवं व्याख्या तत्रेत्यनेन सूचिता । अनीप्सिते ऽपि द्वितीयास्मृतेर्गार्हपत्यस्याङ्गत्वेनान्वयसम्भवाद्विरोधपरिहारमाशङ्क्य सत्यधिकरणे ऽनीप्सितत्वस्य द्वितीयावाच्यत्वनिषेधाद्विरोधसमर्थनार्थं गार्हपत्य इति भाष्यं व्याचष्टे * न हीति * किं तावदिति पूर्वपक्षभाष्यं व्याचष्टे * किमिति * कथमित्याशङ्क्यभाष्यं व्याचष्टे * कथमिति * अविवक्षितेप्सितार्था वेति परिहारभाष्यमनीप्सितार्थं वेति परिहारभाष्यमनीप्सितार्थवाचित्वाभावे ऽपि वाच्येनेप्सितन-

(१) गार्हपत्यवाचित्वानवगमे ऽपि अनेनैव शास्त्रेण तद्वाचित्वावगमाच्छक्तिर्भविष्यतीत्याशङ्क्य सम्बन्धस्याशास्त्रहेतुकत्वोक्ता शास्त्राद्वाच्यवाचकलक्षणसम्बन्धानवगमे ऽपि गुणत्वस्यैन्द्रशब्दस्य त्वधि० १ पु० पा० ।

मत्वात् कर्माख्यकारकविशेषेण क्रियासम्बन्धात्मककारकसामान्य-
लक्षणाद्वाराधिकरणादिकारकविशेषान्तरलक्षणाशयत्वेन व्याच-
ष्टे * सक्तुवदिति * गार्हपत्यदेशे स्थित्वा ततो निर्गत्य चन्द्रमुपति-
ष्ठेतेति विध्यर्थसूचनायाधिकरणमपादानं चादीयते लक्ष्यते ऽनेनेति व्यु-
त्पत्त्या कारकत्वं सामान्यस्यादिशब्देनोक्तत्वादधिकरणापादानादि-
लक्षणं कारकत्वसामान्यं द्वितीया लक्षयिष्यतीत्यर्थः । वक्ष्यमाण-
पक्षापेक्षया भाष्ये वाशब्दः । लिङ्गानुरोधेन श्रुतेर्लक्षणापादानादि-
लक्षणं कारकत्वं सामान्यं द्वितीया लक्षयिष्यतीत्यर्थ. । वक्ष्यमाणप-
क्षापेक्षया भाष्ये वाशब्दः । लिङ्गानुरोधेन श्रुतेर्लक्षणावृत्तिरयुक्ते-
त्याशङ्क्याह * शक्नोति हीति * तद्धितश्रुत्यैवेन्द्रप्राधान्यावगमे
तस्याश्च मुख्यत्वेन लक्षणावृत्त्ययोगात्पश्चाच्छ्रुताया द्वितीयाया एवं
तद्धितश्रुतिविरोधाल्लक्षणावृत्तिर्युक्तेत्याशयः । अधिकरणादिरूप-
कारकविशेषलक्षणा भाष्ये कस्मान्न् नोक्तेत्याशङ्क्य न्यायलभ्यत्वादिति
सूचयितुमाह * तत्र चेति * यद्वेति भाष्यं गार्हपत्यशब्दो गार्हप-
त्यगुणयज्ञसाधनत्वसम्बन्धाद् गृहपतेर्यजमानस्य देवता भूता वे-
त्यवयवसम्बन्धाद्वेन्द्रलक्षणार्थः सन्निधिताख्यमुपस्थानं प्रतिप्राधान्ये-
न विशेषणं तस्माद् गार्हपत्यशब्दविशिष्टमप्युपस्थानमिन्द्रार्थमेव
कार्यं चेन्द्राख्यस्य गार्हपत्यस्यासंनिधानात्समीपस्थानपूर्वकाभिधान-
कर्मत्वं न सम्भवतीति वाच्यम् । पुराणेतिहासेषु इन्द्रस्य प्राची-
दिक्पालत्वस्मृते. प्राच्यां च दिश्यैन्द्रीत्वव्यपदेशात्प्राग्देशाभिमुख-
स्थाने देशद्वारेन्द्रस्य सामीप्यविशेषणत्वोपपत्तेरित्येवं व्याचष्टे *
यद्वेति * पूर्वभाष्ये द्वितीयायाः क्रियासम्बन्धाख्यकारकत्वसामा-
न्यमात्रलक्षणार्थत्वे ऽभिहिते यद्वेति भाष्ये गार्हपत्यस्य द्वितीयो-
क्तकर्माख्यकारकविशेषलक्षककारकत्वसामान्यरूपेण क्रियासम्बन्धा-
भ्विविशेषसामान्यायोगेन कारकविशेषापेक्षायां द्रव्यकर्मसंयोगन्या-
येनाधिकरणतया ऽपादनतया चाङ्गत्वेन विशेषणं गार्हपत्यस्तस्मा-
द् गार्हपत्याङ्गकमुपस्थानमिन्द्रप्रधानकं कार्यं गार्हपत्यस्य च दाहक-
त्वात्स्वतो ऽधिकरणापादानत्वायोगे ऽपि समीपदेशद्वाराधिकरण-
त्वेनापादनत्वेन वा विशेषणत्वं भविष्यतीत्येवं व्याख्यान्तरसूचना-
र्थः केचिच्छब्दः । कारकान्तरलक्षणेन्द्रलक्षणार्थत्वपक्षयोर्विवेकमा-
ह * एतदिति * इन्द्रलक्षणार्थत्वे ग्रन्थाननुगुणत्वापत्तेरपरितो-
षात्स्वमतेन धातुस्वरसोक्तसमीपस्थानमात्ररूपमुपस्थानं प्रति प्राधा-
न्येन गार्हपत्यशब्दो विशेषणं तस्माद् गार्हपत्यप्रधानकमुपस्थानमिन्द्रप्र-
धानार्थं कार्यं गार्हपत्यस्यैव च सन्निहितदेशत्वात्समीपस्थानं प्रति

कर्मत्वेन विशेषणतोपपद्यते नत्वसन्निहितस्यैवं व्याख्यातुमारभते *
अथ वेति * आत्मनेपदद्योतिताभिधार्थत्वे विशिष्टसमीपस्थानरूप- ७७०।१
धात्वर्थनिरासार्थेन मात्रशब्देन समीपस्थानमात्रमनेनोपस्थानशब्देनो-
क्तमित्युक्तम् * एवं च सत्यभिधाने मन्त्रस्य करणत्वात्समीप-
स्थाने च गार्हपत्यस्य कर्मत्वाद्भिन्नक्रियाविषयत्वेनेन्द्रगार्हपत्यशब्द-
योरविरोधो भवतीत्याह * एकेति * एकेन धातुनैकस्यैव व्यापा-
रस्योक्तत्वान्न भिन्नव्यापारविषयत्वं सम्भवतीत्याशङ्क्याह * द्वौ
चेति * शुद्धया प्रकृत्या समीपस्थानवद् गार्हपत्यस्य कर्मत्वाद्भिन्नक्रि-
विषयत्वेनेन्द्रगार्हपत्यशब्दयोरविरोधो भवतीत्याह * एकेति * ए-
केन धातुनैकस्यैव व्यापारस्योक्तत्वान्न भिन्नव्यापारविषयत्वं सम्भ-
वतीत्याशङ्क्याह * द्वौ चेति * शुद्धया प्रकृत्या समीपस्थानमात्मनेप-
दाख्यप्रत्ययानुगृहीतया प्रकृत्या प्रकाशनमित्येवं द्वौ व्यापारावु-
पात्तावित्यर्थः । अस्मिंश्च व्याख्याने द्वितीयाप्रातिपदिकयोर्द्वयोरपि
श्रुतिवृत्तत्वादयमेव परिहारोऽभिमतो न तु पूर्वो द्वितीयाया लक्षणावृ-
त्तित्वादित्याह * तत्रेति * व्याख्यानस्याधिकरणत्वस्यापादन-
त्वे वा समीपस्थानानपेक्षप्रकाशनं प्रत्ययोगात्समीपस्थानान्विते प्रका-
शनइत्यर्थः । शुद्धधातुवाच्यत्वात्समीपस्थानमात्रं धात्वर्थो विवक्षितः
समीपस्थानपूर्वकप्रकाशनमात्मनेपदाख्यप्रत्ययानुगृहीतधातुवाच्य-
त्वात्प्रत्ययार्थो विवक्षित।एवं चास्मिन्पक्षे विध्यर्थो भविष्यतीत्याह *
एतदिति * प्रकाशनस्य प्रत्ययानुगृहीतधातुवाच्यत्वात्प्रत्ययार्थतया
प्राधान्याद् गार्हपत्यस्यापि प्रकाशनमेव प्रति कर्मतेत्याशङ्क्य समी-
पस्थानस्य प्रकृत्यर्थस्य प्रत्ययार्थेन प्रकाशनेनाङ्गतया सम्बन्धा-
दानर्थक्यतदङ्गन्यायेन प्रकाशनान्वयायोग्यं कर्म समीपस्था-
नेऽवतरतीत्येवं निरासार्थत्वेन सम्बन्धादिति भाष्यावयवं व्याचष्टे
* यद्यपि चेति * मुख्यमेवेनिभाष्यं पूर्वपक्षोपसंहारार्थत्वेन व्या-
चष्टे * तस्मादिति * सिद्धान्तमाह * एवमिति * वचनशतेनाप्य-
शक्यविनियोगायोगाद् गौणशक्त्याश्रयणे तु मुख्यैन्द्रीशब्दानुरोधेन
गार्हपत्यशब्दस्य गुणवृत्त्येन्द्रपरत्वावगमान्नायथार्थे विनियोगः स-
म्भवतीत्याशयेन पृच्छति * कुत इति * निवेशनः सङ्गमनो वसू-
नामिति गार्हपत्यमुपतिष्ठतइति एतावताग्निविशेषविनियोगसिद्धेरै-
न्द्रीशब्दस्यानुवादत्वादिन्द्रशब्दवन्मन्त्राविषयत्वोपपत्तेर्विध्यर्थत्वे ऽपि
चेन्द्ररूपेण गार्हपत्यप्रकाशनविध्यर्थत्वादैन्द्रीशब्देनैव मन्त्रे गौणता-
श्रितेत्याशयेनोत्तरमाह * गौणत्वमिति * ऐन्द्रीशब्दस्यानुवादत्वे-
नेन्द्रप्राधान्यानभिधायित्वाद्विध्यर्थत्वे ऽपि चेन्द्ररूपेण गार्हपत्यं प्र-

काशयेदित्येवमर्थत्वेनैन्द्रीशब्देनैव मन्त्रे गौणताश्रयणाद् गार्हपत्यशब्द-
स्य तद्विरोधानुपपत्तेर्मन्त्रब्राह्मणयोरेवात्र विरोधो वाच्यः यत्र च
मन्त्रब्राह्मणयोर्विरोधे कचिदन्यतरत्र गौणताश्रयणीया ऽऽपद्यते तत्र
मन्त्राणां गौणता युक्तेति मन्त्रस्य लिङ्गरूपत्वाद् ब्राह्मणस्य च श्रु-
तिरूपत्वाद्वाक्यरूपस्यैव तु मैत्रावरुणः प्रेष्यति चानुचाहेति ब्राह्मण-
स्य प्रशास्तर्यजेति मन्त्रलिङ्गेन बाधाभ्युपगमाच्छ्रुतिलिङ्गाधिकरणे-
नैव मन्त्रे ब्राह्मणविरोधे मन्त्रगौणत्वस्य सिद्धत्वाद् गार्हपत्यैन्द्रीश्रुत्यो-
र्विरोधायोगेन मन्त्रब्राह्मणविरोधमापाद्य श्लोको व्याख्येयः । आ-
पाद्योक्तिसूचितं गार्हपत्यैन्द्रीश्रुत्योरविरोधं तावद् द्योतयितुमाह *
गार्हपत्यस्तावदिति * मुख्यैन्द्रीश्रुतिविरोधे सत्युपसर्जनीभूते स-
मीपस्थाने कर्मत्वस्यावतरणीयत्वात्प्रधानभूतप्रकाशनसम्बन्धाभिधा-
ननावतारणोक्त्यै गार्हपत्यः प्रकाशयिष्यतइति चेन्द्ररूपेण गार्हपत्य-
प्रकाशनीयत्वोक्त्यै विरोधाभावो द्योतितः । एवं चैन्द्रीश्रुत्यैव म-
न्त्रस्यामुख्ये ऽर्थे विनियोगादविरोधः सिद्धो भवतीत्याह * तत्रेति *
इन्द्रप्रकाशने मन्त्रविनियोगार्थत्वेनैन्द्रीश्रुत्युपपत्तेरैन्द्ररूपेण गार्हपत्य-
प्रकाशनविध्यर्थता कल्पनीयेत्याशङ्कानिरासार्थत्वेन श्लोकं व्याचष्टे
* अवश्यं भावि हीति * ब्राह्मणगौणत्वापत्तेरैन्द्रप्रकाशनविध्यर्थतै-
न्द्रीश्रुतेर्युक्तेत्याशङ्कानिरासाशय. । पूर्वश्लोकोत्तरार्द्धव्याख्यार्थो म-
न्त्रस्य त्विति श्लोकः । येन कारणेन गार्हपत्यश्रुतेरैन्द्रीश्रुत्या वि-
रोधस्तेन कारणेन द्वितीयालक्षितकारकसामान्यसम्बन्धाद् गार्हपत्य-
स्याधिकरणत्वेनापादानत्वेन वा लक्षितेनाङ्गता या पूर्वपक्षिणोक्ता
साप्ययुक्तेत्याह * तेनेति * याप्यवयवसम्बन्धाद् गार्हपत्यशब्द-
स्यैन्द्रवाचितोक्ता साप्यैन्द्रीश्रुत्याविरोधे समुदायप्रसिद्धिबाधायोगा-
दयुक्तेत्याह * न चेति * यतः कारणाद् गृहपतेर्यजमानस्य देवता-
७७१।२ त्वेन सम्बन्धादिन्द्रस्तेन कारणेनात्र ब्राह्मणे ऽवयवसम्बन्धाद् गार्ह-
पत्यशब्दवाच्य इति यदुक्तं तदपि रूढ्या गार्हपत्यशब्देनाग्निप्रत्य-
यान्तस्य चैन्द्रीश्रुत्यविरोधेनाबाधिततया दृढत्वान्न स्यादित्यर्थः ।

गुणाद्वाप्यभिधानं स्यात्सम्बन्धस्या-
शास्त्रहेतुत्वात् ॥ ४ ॥

शङ्कोत्तरत्वेन सूत्रावतारणार्थमत्राहेत्यादिकरिष्यन्तीत्येवं भाष्यमव-
यवशो व्याचिख्यासुर्भविष्यतीत्यन्तं तावद्भाष्यावयवं व्याचष्टे * ननु
चेति * उच्यतइत्यनेन स्वतो ऽशक्तेनाप्यैन्द्रमन्त्रेण वचनकल्पित-

या गुणवृत्त्या शक्तिसम्भवाद् गार्हपत्यप्रकाशनं भविष्यतीत्याशङ्काप-
रिहार्थमाहेत्यादिद्विपर्यन्तं भाष्यावयवं शङ्काशयनिराससमर्थत्वेन
व्याचष्टे * तथा हीति * शब्दमात्रोपकारिण्या देवतयाऽर्थे रूपोप-
कारिणो गार्हपत्यस्य सादृश्यं न सम्भवतीत्याशयः उक्तेऽर्थे भाष्यं
योजयितुमाह * न हीति * सम्बन्धस्येति सूत्रावयवव्याख्यार्थं न
हि शास्त्रहेतुक इत्यादिभाष्यावयवं व्याचष्टे * न चेति * अदेङाख्यं
वर्णत्रयं पारिभाषिको गुणो नैवमग्निः परिभाषयेन्द्र इत्यर्थः । एत-
च्छङ्कोत्तरत्वेन सापवादस्याधिकरणद्वयेन स्थितत्वाद्वक्ष्यमाणाधिक-
णचतुष्टयानर्थक्यमाशङ्क्याह * एवं तावदिति *

आह्वानप्रकाशकमन्त्राणामाह्वाने विनियोगाधिकरणम् ॥ ३ ॥

तथाऽऽह्वानमपीति चेत् ॥ ५ ॥

मुख्यप्रकाशनस्य मन्त्रकार्यत्वेन सापवादस्याधिकरण-
द्वयेन स्थितत्वाद्वक्ष्यमाणाधिकरणचतुष्टयानर्थक्यमाशङ्क्याह *
एवं तावदिति * अपवादविषयत्वस्य गौणार्थविनि-
योगस्य क्व चिदनिरूपणात्को हविष्कृदादिमन्त्रो वचनविनि-
योज्यत्वात्प्रसक्तापवादविषयत्वे एव सन्मुख्यविनियोगरूपस्योत्सर्ग-
स्य विषयः को वा सूक्तवाकादिर्वचनविनियोज्यत्वात्प्रसक्तापवाद-
विषयत्वेऽप्युत्सर्गस्यैव विषय इत्येवं व्याख्येयम् । यद्वोत्सर्गाप-
वादोक्तिभ्यां लक्षणया तद्धेतूभूतलिङ्गवचनाभिधानात्को लिङ्गस्य
विषयः को वा वचनस्येत्यर्थः । तत्रेति सन्देहभाष्यमङ्गाङ्गिभावोप-
देशार्थमेतद्वचनं काललक्षणार्थं चेति चिन्तायाः प्रकृतगौणमुख्यवि-
चारासङ्गतत्वादयुक्तमाशङ्क्य वचनाद् गौणेऽवघाते मन्त्रविनियोगो
मुख्ये वाऽऽह्वाने लिङ्गादित्येवमर्थत्वेन व्याख्यातुमाह * तत्रेति * आ- ७७२।२
ह्वाने मन्त्रविनियोजकस्य लिङ्गस्य श्रुतिविरोधपरिहारार्थावहन्तिसं-
योगस्य कालार्थत्वोक्तिः । वचनादवघाताङ्गत्वोक्तिश्चाप्यथामन्त्रा-
र्थत्वेन मुख्यत्वायोगाद् गौणेऽवघाते विनियोक्त्यर्थेत्याशयः । शतृप्र-
त्ययेनावघातस्याऽऽह्वानाख्यक्रियान्तरलक्षणत्वेनोपादानादुपसर्जनभू-
तस्य मन्त्रान्वयानुपपत्तेः पूर्वपक्षायोगमाशङ्क्याऽऽह्वानस्याऽविहितत्वे-
नानुष्ठेयत्वानवगतेः स्मारकमात्रानपेक्षत्वादपेक्षां च विना लिङ्गस्याह्वा-
ने मन्त्रविनियोजकत्वाशक्तेः पत्नीकर्तृकावघातार्थाक्षेपादाह्वानस्या-
नुष्ठेयत्वावगमेऽप्याह्वानानुष्ठानात्पूर्वमेवानुष्ठेयत्वेनावगतावघातस्य
स्मारकापेक्षत्वात्तदतिक्रमेण पश्चात्प्रतीताह्वानाङ्गत्वानुपपत्तेरुपसर्ज-
नभूतमप्यवघातमेव प्रत्यङ्गता युक्तेति सूचनार्थं पूर्वप्रतीतोक्ता अ-

ध्वर्युकर्तृकत्वेनावघातस्य पत्न्याह्वानो)नाक्षेपकत्वात्पत्न्येव हविष्कृदु-पोत्तिष्ठति देवानृषीन्पितृत्साभिदूरुह्यावहन्तीतिवाक्यात्पत्नीकर्तृक-त्वावगमोत्तरकालमवघातेन पत्न्याह्वानस्य चिरेणाक्षेपमभिप्रेत्य तदप्रयुक्तः । कथमिति भाष्येण सन्देहहेतुं पृष्ट्वा तत्प्रतिपादनार्थं यदीति पूर्वपक्षवचनव्यक्तिभाष्यमवघ्नन्निति अवहति प्रति मन्त्रोप-देशकविधायकाभावादाह्वयतिपरेण पञ्चमलकारेण मन्त्रोपदेशं दर्श-यन् व्याचष्टे * यदीति*अथेति सिद्धान्तवचनव्यक्तिभाष्यमवघ्नन्न-नाह्वयती(त्यन्वये ऽनुपात्तस्यमन्त्रस्य काललक्षणायोगादवघ्नन्नेना-ह्वयतीत्यप्यन्वये कालविध्यापत्तेस्त्रिरावृत्तिमात्रविधिसिद्धान्तासि-द्धिप्रसङ्गादयुक्तमशङ्क्य यदवघ्नन्नेनाह्वयती[2])ति सामर्थ्यप्राप्तमनूद्यते त्रिरिति वचनव्यक्तिरिह विवक्षिता अस्मिंस्तु पक्षे तेन त्रिराह्वयती-त्येतावता त्रिरभ्यासविधिसिद्धेरवघ्नन्नित्यस्यानर्थक्यमाशङ्क्य का-ललक्षणार्थत्व वक्तुं क्रियान्तरलक्षणभूनकर्तृवाचिना शतृप्रत्ययेन क्रियान्तरस्यैव कालतो लक्षयितुं शक्यत्वात्तदन्वयित्वेनोक्तिः गौणा-र्थमन्त्रविनियोगापादकमन्त्रावघातान्वयशङ्कानापत्त्यर्थं च मन्त्रा-नुपादनमिति सूचयन् व्याचष्टे * अथेति * ततो ऽस्य मन्त्रस्य त्रि-रावृत्तिविधौ हन्तिराह्वानस्य कालं लक्षयतीत्येवं भाष्यं योज्यम् । यथैन्द्री वचनादयथार्थे विनियुज्यते तथा ऽऽह्वायतेराह्वानमेहिशब्द-वत्त्वादाख्यायते ऽनेनेत्याख्यानार्थल्युडन्तकरणव्युत्पन्नाह्वानशब्दोक्तो हविष्कृन्मन्त्रो ऽप्ययथार्थे विनियुज्यतइत्येवं पूर्वपक्षसूत्रव्याख्यार्थं किन्तावदिति भाष्यं सङ्क्षिप्य व्याचष्टे * किमिति * हन्ति प्रति म-न्त्रोपदेशे सति श्रुत्यर्थे ऽवघाते मन्त्ररूपं विहितं भवति सिद्धान्ते तु शतृप्रत्ययेन क्रियान्तरलक्षणभूनकर्त्रभिधाने ऽपि कालानभिधानाल्ल-क्षणा स्यादित्येवं तथा शब्दानुकृष्टस्य वचनादिति पूर्वाधिकरणसूत्राव-यवस्य श्रुत्याशयत्वेन व्याख्यार्थमेवमिति भाष्यावयवं व्याख्यातु*मव हन्तीत्युक्तम्*वचनादित्येवैकवाक्यत्वादित्येवं व्याख्यातुं मन्त्रस्य च कालस्य च कालस्य चाह्वानसम्बन्धः (सिद्धान्ते विधेयो भवेदित्येवं वाक्यभेदोक्त्यर्थो मन्त्रस्य चेत्यवयवो ऽवहननकालएवार्थेन हविष्कृ-दाह्वातव्येति सिद्धान्तभाष्ये[3])कालाह्वानसम्बन्धाविधिनिरासात्पूर्व-पक्षे तद्विधिप्रतीते केवलात्तु त्रिरावृत्तिर्विधीयतइति च भाष्यादा-ह्वानावृत्तिसम्बन्धविधिप्रतीतेः स्पष्टत्वान्न व्याख्यातः।मन्त्रस्याह्वा-

१) अयं पा० २ पु० ना० ।

२) अयं पा० २ पु० ना० ।

३) अयं पा० २ पु० ना० ।

नानङ्गत्वे सत्याह्वयत्यन्वयायोगमाशङ्क्याह्वानाभावो ऽप्येहिशब्दोच्चारणात्तत्करोतितदाचष्टइतिस्मृतेराह्वानमाचष्टइत्यस्मिन्नर्थे णिजन्ताह्वयतिप्रयोगोपपत्त्युक्त्यर्थं मैवं चेति भाष्यावयवं व्याख्यातु * माह्वयतेश्चेत्युक्तम् * असामर्थ्यादविधानाङ्गत्वायोगमाशङ्क्यावघातस्याचेतनत्वाद्वस्तुतः स्वातन्त्र्यलक्षणकर्तृत्वाभावे ऽपि वैवक्षिकेन स्वातन्त्र्येण कर्तृत्वसद्भावाद्धविष्कृत्त्वस्य सामर्थ्यमवहन्तेरेवेत्यनेन स्वमतेन गुणाभावसूत्रावतारायोक्ता हविष्कृच्छब्दस्य मुख्यार्थत्वादयथार्थतामुपसंहृत्य हविष्कृतपत्नीसम्बन्धे हविःसम्पत्तिहेतुलक्षणगुणयोगे वावघातप्रत्यायकत्वं भाष्योक्तगुणेत्यनेन विवृतम् ।

न कालविधिश्चोदितत्वात् ॥ ६ ॥

सौत्रनञर्थव्याख्यार्थं नैतदित्याद्येवमवहन्तीत्यन्तं भाष्यं कालविधिशब्दाव्याख्यार्थं कालेत्यवयवमपनीय व्याचष्टे * त्रिरिति * अनाहूताया एव पत्न्याः स्वयमागत्यावहन्तृत्वोपपत्तेर्नियोगतो प्राप्तत्वादप्राप्ते चाह्वाने लिङ्गेन मन्त्रस्य विनियोक्तुमशक्यत्वान्मन्त्रवर्णतः प्राप्तयभ्युपगमे ऽन्योन्याश्रयापत्तेराह्वानस्य नियमार्थे विधिसम्भवान्नियमेनापि च प्राप्तावध्वर्युकर्तृकत्वार्थं प्रथनोपधानादिवद्विध्युपपत्तेर्वाचमेव तदाह्वयतीति चाह्वानस्यैव स्तुत्यर्थत्वाद्विधेयत्वावगतेराह्वानाविधाने च त्रिरित्यर्थो विधीयतइत्येतावताभ्यासविध्युक्तिसिद्धिर्भाष्ये त्रिराह्वयतीत्याह्वयतिशब्दानर्थक्यप्रसङ्गाद्गौरवाशयेन वा भेदोक्त्युपपत्तेः केवलास्तु त्रिरावृत्तिरिति केवलशब्दस्य च गुणान्तरविधिनिरासार्थत्वेनोपपत्तेस्त्रिरभ्यासमात्रविशिष्टाह्वानपरत्वादित्येवं व्याख्येयम् । अवघातपरामर्शार्थो ऽत्रशब्दः । कथं तर्हीति भाष्यं शतृप्रत्ययाक्षिप्तत्वेन काललक्षणाया लघीयस्त्वाद्दोषत्वाभावसूचनार्थत्वेन व्याचष्टे * लक्षणं वेति * आह्वानकारी कीदृगध्वर्युरित्यपेक्षायां क्रियान्तरलक्षणभूतकर्तृवाचिना शतृप्रत्ययेनावघातकारित्वस्य लक्षणत्वाभिधानादवघातकारित्वावस्थस्याध्वर्योराह्वानकारित्वावगतेर्यदावघातस्तदाह्वानमिति कालतो लक्षणत्वावसायात्पत्नीकर्तृके चावघाते ऽध्वर्योः कर्तृकत्वायोगादभिचरन्यजेतेत्यत्र यागस्याभिचारार्थतावच्छतृप्रत्ययादाह्वानस्यावघातार्थत्वप्रतीतेस्तादर्थ्यद्योतनार्थत्वेनावघातकालत्वस्यैव विवक्षितत्वावसायाल्लघीयसी काललक्षणेत्याशयः । लघीयस्त्वेति श्रुतिवृत्तिभङ्गापत्तेर्दुष्टैव लक्षणेत्याशयेन यस्त्वित्यनुभाष्य श्रुत्यसम्भवलक्षणा ऽथ दुष्टेति परिहारार्थं नैष इति भाष्यमसम्बद्धं यथायो-

पपत्तेरपकृष्य शतृप्रत्ययान्तशब्दे काललक्षणेत्याशयः । लघी-
यस्त्वे ऽपि श्रुतिस्मृतिभङ्गापत्तेर्दुष्टशतृप्रत्ययान्ते शब्दे का-
ललक्षणाया लघीस्त्वोक्त्यर्थस्यावघ्नन्नाह्वयर्तात्यस्यानन्तरं यो-
ज्यम् । नन्विति भाष्येणावघातङ्गत्वेन मन्त्रानुपदे-
शे ऽप्याह्वानाङ्गत्वेन मन्त्रकालयोस्त्रिरावृत्तिवद्विधेयत्वाद्वाक्यभेद-
माशङ्क्य कालमन्त्रयोरनुवाद्यत्वाद्वाक्यभेदपरिहारार्थं नेतीति मन्त्रो
ऽपीति च भाष्यद्वयं व्याचष्टे * प्राप्तं चेति * श्लोकं व्याचक्षाणः
*कथं तर्हीति*यत्तु लक्षणाशब्द इति च,भाष्यद्वयस्य काललक्षणया-
दोषत्वपरिहारार्थत्वसूचनार्थं तृतीयं पदं तावद्व्याचष्टे * अवघ्नन्नि-
ति* हि यस्मात्कारणात्क्रियाया लक्षणे हेतौ च शतृप्रत्ययस्मृतेर्लक्ष-
णत्वरूपणार्थेन युक्तः कर्त्ता कृत्स्नं शतृप्रत्ययात्प्रतीयते । तेन हेतुना
न क्वचिदवघ्नन्नित्यत्रोत्तिष्ठन्नित्यत्र काललक्षणायामपि श्रुतिपीडेत्यु-
क्ते तथापि श्रुत्यर्थस्यावघातस्य मन्त्रान्वयसम्भवे लक्षणा न युक्ते-
त्याशङ्क्य धात्वर्थस्योपसर्जनत्वान्मन्त्रान्वयानर्हतोक्ता । मन्त्रस्याव-
घातं प्रत्यनुपदेशे ऽवघ्नन्नित्यस्यानर्थक्यनिरासार्था काललक्षणार्थतो-
क्तिरिति तस्माच्छब्देन सूचयंश्लोकशेषं व्याचष्टे * तस्मादिति *
कालाह्वानसम्बन्धानुवादोऽत्यर्थस्यावहननेति भाष्यस्य सौत्रकाल-
विध्युक्तिविरोधमाशङ्क्य भाष्यानुसारेणाभिधानपूर्वकविधानवाचि-
नो विधिरितिशब्दस्याभिधानलक्षणार्थतामङ्गीकृत्य परिहरति * यो-
ग्यत्वेन चेति * त्रिरभ्यासापादितकालविध्युक्त्या वा त्रिरभ्या-
७७३।१ सविधिर्लक्ष्यतइति परिहारान्तरमाह * सकृदिति * अभ्यासे
विहिते यः सकृदुच्चारणकालादधिकः कालस्त्रिरभ्यासेन जा-
यते सो ऽस्मिन्वाक्ये विधीयतइत्युक्ते ऽर्थद्वयविधौ वा-
क्यभेदः स्यादित्याशङ्कार्थलभ्यत्वम् * कालविधिरित्युक्तम *
अर्थलभ्यतामेवोपपादयितुमाह * तथा चेति * चोदितत्वादिति
सूत्रावयवव्याख्यार्थं चोदितश्चेति भाष्यं स्पष्टत्वान्न व्याख्यातम् ।

गुणाभावात् ॥ ७ ॥

गुणाभावादिति सूत्रमवघाते हविष्कृत्पत्नीगतह-
विः सम्पत्तिहेतुत्वलक्षणगुणयोगसम्भवे ऽपि आह्वाना-
मन्त्रणविभक्तिप्रैषविषयत्वलक्षणाभावाद्धविष्कृत्प्रातिपदिकस्य गौ-
णसामर्थ्यसम्भवे ऽपि सम्बुद्ध्याख्यातपदयोर्गौणस्यापि
सामर्थ्यस्यासम्भवात्सकलमन्त्रविषयत्वाच्च वचनस्य सक-
लमन्त्रसामर्थ्यं विना विनियोजकत्वाशक्तेर्नावघाते मन्त्रवि-

नियोगः सम्भवतीत्येवमर्थत्वेन व्याख्यातुं केन चिद् गुणेन मन्त्रे ऽवहन्ति प्रत्याययिष्यतीति पूर्वपक्षोक्तगौणसामर्थ्यनिरासार्थत्वेनावतारयति * अथेति * हविष्कृत्पत्नीगुणयोगादवहन्तिरेव हविष्कृद्भविष्यतीत्यर्थः । ननु हविष्कृत्पत्नीगुणयोगाद्धविष्कृत्प्रातिपदिकस्यावघाते शक्त्यभ्युपगमे देवदत्तः सरस्वतीतिवद्स्त्रियामप्यवघाते स्त्रीलिङ्गहविष्कृच्छब्दप्रवृत्त्यैकान्तिकत्वाद्वागित्यैकान्तिकत्वेन संस्तवोपपत्तेर्लिङ्गादिति सूत्रमयुक्तं स्यादिशङ्क्याह * गुणेति * हाविष्कृत्त्ववाचिनो मन्त्रस्य हविष्कृत्पत्नीगुणहविःसम्पत्तिहेतुत्वयोगादवघातप्रत्यायनसामर्थ्ये सत्यप्याह्वानादिविषयत्वलक्षणगुणाभावादवघाते वाचनिकविनियोगाभावो यदोच्यते तदा मन्त्रादियोग्यत्वरूपं पत्न्याः सामर्थ्यं मन्त्रस्य पत्न्याह्वानाङ्गत्वेनाश्रीयते न तु स्त्रीलिङ्गत्वेन संस्तव इत्यर्थः । यदातदाशब्दाभ्यां पाक्षिकतास्य व्याख्यानस्योक्ता भाष्योक्तां व्याख्यामनुसन्धत्ते * अथ वेति * सत्यं न श्रुत्यात्रावघाते मन्त्रो विधीयते किं त्ववघातस्यापि स्वातन्त्र्यविवक्षया हविः कर्तृत्वसद्भावाल्लिङ्गस्य चैकादशसामर्थ्ये विनियोजकत्वोपपत्तेः सामर्थ्यादेव मन्त्रो ऽवघाताङ्गमित्याशङ्कार्थः सरूपोक्त्या गुणशब्दस्य सामर्थ्यवाचित्वं सूचितम् । हविष्कृत्प्रातिपदिकस्यावघातप्रकाशनसामर्थ्ये ऽथेहीत्यस्य तदेकवाक्यत्वबाधापत्तेः पत्न्याह्वानाङ्गत्वपक्षे च लिङ्गवाच्ययोर्द्वयोरप्यनुग्रहसम्भवे वाक्यबाधापत्तेरेकस्य पक्षस्यानभ्युपगमनीयत्वाल्लिङ्गेनाप्यवघाताङ्गता न युक्तेत्येवमुत्तरत्वेन सूत्रव्याख्यार्थं गौणमिति भाष्यं गुणशब्दस्यात्र सामर्थ्यवाचित्वात्सामर्थ्यलभ्यत्वं गौणशब्देनोक्तमाह्वानविषयत्वाभावोक्तिश्चामन्त्रणाप्रैषविषयत्वाभावयोरप्युपलक्षणार्थत्येव व्याख्यातुमाह * तदिति * यद्यपीत्यनेनावघातस्याचेतनत्वेन क्रिया तेन चास्वातन्त्र्यात्कर्तृता * वास्तवी नास्तीत्युक्तम् * व्यर्थोक्त्यार्थदर्शनाभावादेहीत्यस्यावघाते विनियोगाद्धविष्कृत्पदैकवाक्यत्वबाधापत्त्युक्त्यर्थत्वेन तत्रेति भाष्यावयवे व्याख्याते हविष्कृत्पदमात्रस्य तर्ह्येहिपदैकवाक्यत्वबाधेन लिङ्गाद्विनियोगो ऽस्त्वित्याशङ्क्य पत्न्याह्वानाङ्गत्वे लिङ्गवाक्ययोर्द्वयोरप्यबाधसम्भवाद् बाधपक्षो न युक्त इति परिहारसूचनार्थत्वेन यजमानस्येति भाष्यावयवं व्याख्यातुं चेतनावत्यां त्वित्युक्तम् । तस्मादिति सूत्रार्थोपसंहारभाष्यं व्याचष्टे * तस्मादिति *

लिङ्गाच्च ॥ ८ ॥

एतत्सूत्रव्याख्याभाष्यं सङ्क्षिप्य व्याख्यातम् । मन्त्रस्य पत्न्याह्वानाङ्गत्वे सत्यर्थरूपेणैकान्तिकेन स्त्रीत्वेन कृत्वा पत्नया वाक्सादृश्यात्पत्नयाह्वानस्य समञ्जसः स्तवो भविष्यतीत्यर्थः ।

(अवघाताङ्गत्वे सत्यर्थरूपेणैकान्तिकेन स्त्रीत्वेन कृत्वा पत्नया वाक्सादृश्यात्पत्न्याह्वानस्य समञ्जस स्तवो भविष्यतीत्यर्थ[1] ॥

अवघाताङ्गत्वे त्ववघातस्यैकान्तेन नियमेन व्यक्तस्य स्पष्टस्य प्रत्यक्षस्य वास्तवस्य कस्य चिल्लिङ्गस्याभावाच्छब्दधर्मतया शब्दानुकारमात्रेणावगतेन स्त्रीत्वेन योगाद्वाक्सदृशेनावघातेन द्वारभूतेन मन्त्रस्य स्तवः कल्प्यः स्यात्स च क्लेशेनेति कथं चिच्छब्देनोक्ते क्लेशोपपादनायावघातवाचिनः स्त्रीलिङ्गस्य क्रियेत्यादिशब्दस्य धर्मतया ऽवघातस्त्रीत्वापादकस्यानुपादनतोक्ता स्त्रीलिङ्गपदोपादाने ऽवघातस्य शब्दधर्मतयैकान्तिकं स्त्रीत्वं सिध्येदनुपादानात्त्ववघातावहननादिपदवाच्यस्यापि सम्भवाच्छब्दधर्मतयापि नैकान्तिकः स्त्रीत्वं सिध्यतीति बहुव्रीह्याशय. । तस्मादिति सूत्रार्थोपसंहारभाष्यस्य तात्पर्यमाह * तस्मादिति *

विधिकोपश्चोदेशे स्यात् ॥ ९ ॥

अवघाताङ्गत्वेन हविष्कृन्मन्त्रोपदेशे सत्यवरक्षो दिवः सपत्नं वध्यासमित्यवहन्तीत्यादिभिर्मन्त्रविध्यन्तैरस्य विधेः पक्षे वा
७७४।२ स्यादित्येवं सूत्रं व्याख्यार्थं भाष्यं व्याचष्टे * अवघातेति * अवघाताङ्गभूतैर्मन्त्राक्षरैः सहास्य विकल्पः स्यात्स चान्याय्य इत्यर्थः ॥

अग्निविहरणादिप्रकाशकमन्त्राणां तत्रैव विनियोगाधिकरणम् ॥ ४ ॥

तथोत्थानविसर्जने ॥ १० ॥

अतिदेशोक्त्यैव पूर्वाधिकरणपूर्वपक्षसिद्धान्तावेवात्रापि इत्यवगतेर्थैस्तत्रेति भाष्यमनर्थकमाशङ्क्यास्य सूत्रस्य यथावघातस्तथोत्थानविसर्जने अपि पूर्वपक्षे मन्त्रप्रकाश्ये सिद्धान्ते त्वप्रकाश्ये इत्यवमतिदेशार्थत्वेन पक्षानामपि पूर्वाधिकरणसूत्रार्थानां योजयितव्यत्वोक्त्यर्थत्वेन सूत्रस्य व्याख्यार्थत्वं भाष्यस्य सूचयितुमाह *इतीति* इति करणो ऽस्येत्यर्थः यथैन्द्रीवचनाद्यथार्थं विनियुज्यते तथाह्वानमपीत्यपिशब्दोक्तावग्नीदूव्रतवन्मन्त्रावपि इत्येवमाद्यसूत्रे ऽग्नीति भाष्येण योजिते निरस्तत्वात्पूर्वपक्षायोगमाशङ्क्य विधौ लक्षणायोगेनोत्थानव्रतमन्त्रसं-

१) अय पा० २ पु० ना० ।

योगयोः काललक्षणार्थत्वेनावघातसंयोगवदानर्थक्यपरिहारायोगाद्गाङ्गिभावार्थतावसीयतइत्यधिकाशङ्कोक्त्यर्थं लक्षणाभयादिति भाष्यं व्याचष्टे * पूर्वेत्रेति * अवघ्नन्निति शब्दे ऽनुवादार्थे कालार्थता का इह तु यदग्नीदग्नीन्विहर बर्हिस्तृणीहि पुरोडाशानलं कुरु पशुनो देहीत्याह तदुक्त्वा न कालइत्युत्तिष्ठन्निति शब्दे यज्ञाचं विसृजति तद्व्रतं चरतेति मन्त्रकालइति च मन्त्रनिर्देशके शब्दे विधानार्थे सा चायुक्तेत्याशयः । भाष्योपलक्षितं मन्त्रोपदेशे ऽपि वाक्यभेदानापत्तिरूपं विशेषान्तरमाह * त्रिरिति * नोत्थानविसर्जनाङ्गत्वेनाग्नीद्व्रतमन्त्रो विधीयते किं त्वग्निविहरणे प्रेषणाङ्गत्वेन लिङ्गात्प्राप्तस्याग्निमन्त्रस्योत्थानकालत्वं वाग्यमनियमासमाप्त्यङ्गत्वेन च प्राप्तस्य वाग्विसर्गस्य व्रतभक्षणप्रेषणाङ्गभूतमन्त्रोच्चारणे कालत्वं विधीयते विधिमन्त्रपाठक्रमाभ्यां चोत्थानव्रतमन्त्रयोर्विशिष्टकालकत्वेनावगतत्वरूपाद्धादितत्वादग्निमन्त्रवाग्विसर्गलक्षकत्वशक्तिरस्तीत्येवं सिद्धान्तसूत्रयोजनार्थमुत्तिष्ठन्नितिभाष्यमुत कालार्थः संयोग इति सन्देहभाष्यालोचनयैव ज्ञातार्थत्वान्न व्याख्यातम । कालविधौ सिद्धान्तावसाने पूर्वाधिकरणे कालानुवादाभ्युपगमात्तदतिदेशार्थतास्याधिकरणस्य न युज्यतेत्याशङ्क्य पूर्वपक्षे श्रुत्या गौणे मन्त्रावनियोगः सिद्धान्ते लिङ्गान्मुख्य इत्येतावता साम्येनातिदेशतेति परिहारसूचनार्थं नेतिभाष्यं स्पष्टत्वान्न व्याख्यातं पदोत्तरत्वेन तृतीय सूत्रं योजयितुमनुत्थितेना ग्नीन् मेधितुं विहर्तुंवाशक्यत्वादुत्थानस्याग्नीन्धनविहरणयो. कर्तृत्वं विवक्षित्वा मन्त्रप्रकाश्यत्वोपपत्तेः वागात्मिकायाश्च जिह्वाया व्रतशब्दवाच्यपयःप्रत्यर्थपयोयवाग्वादिभक्षणकर्तृत्वं विवक्षित्वा व्रतमन्त्रप्रकाश्यत्वोपपत्तेर्लिङ्गादग्नीद्व्रतमन्त्रयोरुत्थानवाग्विसर्गाङ्गत्वं भविष्यतीति शङ्कार्थं यद्यपिचेति भाष्यं कथं शक्यते इत्यपेक्षायामुत्थानेनेत्यनेन शक्यतोपपादितेत्येवं व्याचष्टे * उत्थानेति * अध्वर्युकर्तृकस्योत्थानस्याग्नीध्रकर्तृके विहरणे हेतुत्वायोगात्तन्निमित्तः कर्तृत्वोपचारो न युक्त इत्याशङ्क्याह * यदेति * समाख्याप्राप्ताध्वर्युकर्तृकता प्रेषत्वे सति प्रैषेषु च पराधिकारादिति न्यायादबाध्येतोत्थानाङ्गत्वे तु प्रैषत्वाभावान्न तद्बाधो युक्त इत्याशयः । बर्हिस्तरणादिग्रहणायादिशब्दः । व्रतमिति शङ्काभाष्यावयवं व्याचष्टे * पयमिति । वाचोऽस्वतन्त्रत्वेन कर्तृत्वायोगात्कथमनेन मन्त्रेण वागाभिधानमित्याशङ्क्याह * वागिति * यथा भक्षानुवाके वाग्जुषाणा सोमस्य तृप्यत्विति भक्षयितृत्वं तृप्तिकर्तृत्वं वाच्युपचरितम् तथास्य सम्बन्धिनः पुरुषस्य यद्व्रतभक्षणे कर्तृत्वं तद्वा-

व्युपचारितुं शक्यमित्यर्थः । मुख्यस्यापि जिह्वावत्कर्तृत्वायोगा-त्सम्बन्धितातिरेकजनितास्येति षष्ठी व्याख्येया चरतेर्भक्षणार्थत्वा-त्तत्कृविर्हिंसायामिति कृणोतेर्हिंसार्थात् करणशब्दं व्युत्पाद्य भक्षण-स्य नाशकत्वेन हिंसारूपत्वाद्भक्षणे कर्तृत्वं विवक्षितमेवमपि वाचो ऽप्रेष्यत्वात्प्रैषार्था लोडयुक्तेत्याशङ्क्य प्राप्तं कालार्थत्वं लोटो दर्शयितुम् * तवेत्युक्तम् * वाचः शब्दात्मकत्वाच्छब्दस्य च तात्वादिष्वष्टसु स्थानेष्वभिव्यक्तेर्बहुव-चनाधिष्ठानभेदोक्तिः । अस्याः शङ्काया गुणाभावादिति सूत्रं तथा-पीति भाष्येणाग्नीदित्यामन्त्रणविभक्तेर्विहरेत्यादेश्च प्रैषस्यार्थशू-न्यत्वाख्यव्यर्थत्वरूपादृष्टार्थत्वप्रसङ्गोक्तिद्वारोत्तरत्वेन योजितमि-त्याह * गुणेति * कथमर्थदर्शनाभावोक्तिद्वारैतत्सूत्रं योजितं भव-तीत्याशङ्क्य गुणशब्दस्य सामर्थ्यवाचित्वादग्नीदृव्रतमन्त्रयोस्तूत्थानवा-ग्विसर्गप्रकाशनसामर्थ्याभावादित्येवं सूत्रव्याख्यासूचनार्थं * मन्त्रे-त्युक्तं * लोटः प्राप्तकालवाचित्वेन प्रैषार्थत्वाभावात्सामर्थ्यं भविष्य-तीत्याशङ्क्याह * न हीति * नचेदं युगपद्विवक्षितुं शक्यते पदार्थ-स्य प्राप्तः कालस्तव वेति भिद्येत हि तथा वाक्यमिति प्रैषाधिकरण-भाष्ये प्रैषं विना मध्यमपुरुषायोगस्य वक्ष्यमाणत्वाच्च प्राप्तकालार्थ-ता युक्तेत्याशयः । लिङ्गसूत्रं कथं योज्यमित्याशङ्क्याह * लिङ्गम-पीति * लिङ्गान्तराभावे ऽपि गुणाभावसूत्रमग्नीदृव्रतमन्त्रयोर्मुख्य-वृत्त्योत्थानवाग्विसर्गप्रकाशनासामर्थ्ये ऽपि गौणसामर्थ्यसद्भावाछ्रौत-विनियोगोपपत्त्या शङ्कानिरासार्थत्वेन लोड्व्यतिरिक्तस्य मन्त्रभागस्य सामर्थ्यसम्भवे ऽपि लोडुक्तस्य प्रैषविषयत्वलक्षणस्य गुणस्योत्थान-वाग्विसर्गयोरभावादित्येवं व्याख्यायामन्त्रणादिसामर्थ्यं लिङ्गमा-श्रीयते तदेत्यनेन न्यायेनाग्नीदित्यामन्त्रणसामर्थ्यं प्रैषसामर्थ्यं च लिङ्गसूत्रार्थत्वेन व्याख्येयमित्याशयः । अनेन चापिचेति भाष्यस्यो-त्थानवाग्विसर्गाङ्गत्वे ऽर्थदर्शनाभावादसमर्थौ मन्त्रौ स्यातां प्रैष-णे त्वर्थदर्शनात्समर्थावित्येवमर्थत्वेन लिङ्गसूत्रयोजनार्थत्वं सूचितं । पञ्चमसूत्रयोजनार्थं कल्पनायां चेति भाष्यं व्याचष्टे * विधीति *

सूक्तवाकस्य प्रस्तरप्रहरणाङ्गता ऽधिकरणम् ॥ ५ ॥

॥ अयमेव प्रस्तरप्रहरणन्यायः ॥

सूक्तवाके च कालविधिः परार्थत्वात् ॥ ११ ॥

वचनविनियोज्यत्वाभावेनाप्रसक्तापवादविषयत्वानामेव इ-विष्कृदादिमन्त्राणामुत्सर्गविषयत्वे ऽधिकरणद्वयेनोक्ते सूक्तवाकस्य

वचनविनियोज्यत्वात्प्रसक्तापवादविषयत्वस्याप्युत्सर्गविषयतैवेत्य-
भिधानार्थत्वेनास्याधिकरणस्य प्रकृतविषयाविवेकसङ्गतिमपवादत्वे-
नचानन्तरसङ्गतिं स्पष्टत्वादनुक्त्वा सूक्तवाकप्रस्तरयोः पारार्थ्योक्तेः
कालविधिहेतुत्वमुपपादयति *देवतेति * अग्निमारुतादूर्ध्वमनुयाजै- ७७५।३
श्चरन्ति प्रहृत्य परिधीन् हारियोजनं जुहोति । दर्शपूर्णमासाविष्ट्वा
सोमेन यजेतेत्यादौ च सर्वत्र कृतार्थसंयोगकालार्थत्वस्य च स्थाप्य-
मानत्वात् कृतार्थसंयोगस्य कालविधिहेतुत्वेन विप्रतिपत्तव्यमित्या-
ह * सर्वत्रेति * तृतीयया याज्ञात्वावसायात्कालार्थता न युक्ते-
त्याशङ्क्याह * तृतीयां चेति * सूक्तवाकयुक्तं प्रस्तरं प्रहरतीत्युक्ते
योग्यत्वात्कालद्वारैव सूक्तवाकयुक्तत्वावगता काललक्षणावसीयत
इत्याशयः । प्रस्तरस्याङ्गत्वेन सिद्धान्तिनोऽनिष्टत्वात्तन्निरासार्थं कृ-
तार्थत्वोक्तिरनर्थिकेत्याशङ्क्याह * प्रस्तरेति * प्रस्तरस्याङ्गत्वेन सि-
द्धान्तिनोऽनिष्टत्वेऽपि यदि कश्चित्सूक्तवाकस्य कृतार्थत्वेनाङ्गत्वायो-
गोऽपि प्रस्तरप्रहरणस्याकृतार्थत्वात्सूक्तवाकेन प्रयोजनेनेत्यस्मि-
न्नर्थे तृतीयामङ्गीकृत्य सूक्तवाकं प्रति दृष्टार्थत्वेन वा सूक्तवाकस्या-
दृष्टार्थाङ्गत्वपक्षत्वेऽपि तत्कार्यदेवतासंस्कारोपयोगद्वारा सूक्तवाक-
वाच्या देवताः प्रत्यङ्गत्वात्कालार्थसंयोगायोगं शङ्केत तं प्रति कालार्थ-
संयोगोपपादनायास्य प्रहरणस्य प्रतिपाद्यमानप्रस्तरप्रधानत्वादन्या-
ङ्गत्वं न घटतइत्यस्यार्थस्य प्रतिपादनीयत्वात् अकृतार्थस्य प्रतिपाद्य-
त्वयोगात्प्रस्तरस्य चेति भाष्येण प्रस्तरस्य कृतार्थत्वाभिधानमित्य-
र्थः । प्रतिपत्तित्वेन वा प्रहरणस्य देवतया प्रयोजनाभावात्सूक्तवा-
कस्यापि सदेवतस्य प्रहरणाङ्गत्वं न घटतइत्यस्यार्थस्य प्रतिपादना-
र्थं प्रस्तरस्याकृतार्थत्वे प्रहरणस्य तत्प्रतिपत्तित्वासिद्धेः प्रहरणस्य
प्रतिपत्तित्वसिद्ध्यै प्रस्तरस्य कृतार्थत्वाभिधानमिति प्रयोजनान्तरमाह
* तथेति * ग्रन्थोऽनुषङ्गेण पूरणीयः ।

उपदेशो वा याज्याशब्दो हि नाक-
स्मात् ॥ १२ ॥

सौत्रवाशब्दसूचितसिद्धान्तहेतुव्याख्यार्थम् । एवमिति भाष्यं
पूर्वपक्षिणेत्थम्भूतलक्षणार्थतृतीयाभ्युपगमात् प्रकरणसंयोगासिद्धे-
रयुक्तमाशङ्क्य करणविभक्तित्वोपपादनेनोपपादयति * सूक्तेति *
क्रियाया भावनात्मिकाया वाक्यार्थत्वेन प्राधान्यात्सर्वपदार्थानां त-
त्रैवान्वयप्रतीतेः कारणत्वे च साक्षात्क्रियान्वयसम्भवेनोपपदार्था-

न्वयद्वारा क्रियान्वयापादकस्येत्थम्भूतलक्षणस्यानभ्युपगमनीयत्वा-
त्कारकवाचित्वस्य च स्वाभाविकत्वेन पदान्तरान्वयानपेक्षतयोपप-
दान्वयापेक्षेत्थम्भूतलक्षणार्थत्वरूपादुपपदविभक्तित्वात्कारकार्थरू-
पस्य कारकविभक्तित्वस्य बलीयस्त्वावगतेः करणत्वं गम्यमानं नो-
त्स्रष्टुं शक्यमित्याशयः। प्रत्यक्षशब्दः साक्षात्त्ववाची । श्रुतिलक्षणोक्ती
प्रातिपदिकाविषयत्वेन व्याचष्टे * एवं चेति * सौत्रस्य हेतोरुप-
चयत्वव्याख्यार्थमेवं चेति भाष्यं व्याचष्टे * तथा चेति *
अङ्गत्वे सत्युत्तरसूत्रन्यायेन प्रहरणस्य देवतान्वयाद्यागत्वसिद्धेर्या-
गाङ्गमन्त्रत्वलक्षणयाज्यागुणयोगाद्याज्याशब्दोपपत्तिरित्याशयः । प्र-
सङ्गात्चिन्तान्तरं प्रस्तौति * किं पुनरिति * चिन्तान्तरस्य प्रश्नपूर्वं
प्रयोजनमाह * कश्चेति * एषां धर्माणां मध्यइति निर्धारणे षष्ठी
फलतः पूर्वपक्षं प्रतिजानीते * किमिति * उपपादयति * यथेति *
एकदेशिनः शङ्कामुपन्यासपूर्वं पूर्वपक्षी निरस्यति * तत्रेति * इज्य
ते ऽनेनेति व्युत्पत्त्या सूक्तवाकस्य याज्यात्वे होमे ऽपि यागत्वानुवृत्ते
र्होमसाधनानाममन्त्राणां याज्यात्वप्रसङ्गात्प्रयोगत एव याज्यान
व्यवस्थावगतेः सूक्तवाके चाभियुक्तैर्याज्याशब्दाप्रयोगाच्च याज्यात्व
७७६।२ मस्तीत्याशङ्क्ते * अथेति * प्रयोगतो व्यवस्थामभ्युपगम्य तावत्पूर्व
पक्षी परिहरति * तेनेति * यदि प्रयोगतो व्यवस्थेष्यते तर्हि वेद
एव सूक्तवाके याज्याशब्दप्रयोगात्तेन याज्यात्वेन सिद्धेन हेतुना ध
र्मैर्भाव्यमित्यर्थः वैदिकप्रयोगस्यौपचारिकत्वाद्व्यवस्थापकतामाश
ङ्क्याह * न चेति * याज्याशब्दप्रयोगस्य मुख्यत्वे यत्कारणं याग
साधनमन्त्रत्वं तत्सद्भावस्य प्रत्यक्षत्वादित्यर्थः । प्रकर्षसेचनकरण
शक्ते तैलादावसत्यपि प्रोक्षणीशब्दप्रयोगे प्रकर्षसेचनकरणत्वस्
कारणत्वाविघातवद्धोममन्त्रेष्वसत्यपि याज्याशब्दप्रयोगे यागसाध
नमन्त्रत्वस्य कारणत्वाविघात इति प्रत्यक्षधर्माबाध्यत्वलक्षणार्थय
प्रत्यक्षोक्त्या सूचितम् । पङ्कजादिशब्दानां च प्रयोगव्यवस्थ
पकपद्मत्वजात्याद्यधीनव्यवस्थितविषयत्वदर्शनाद्यौगिकानां शब्द
नामवयवयोगवतीषु सर्वासु व्यक्तिषु साधारण्ये
न प्रवृत्तानां लक्षणभूतप्रयोगव्यवस्थापकधर्मानपेक्षात्प्रयोग
मात्राद्यवस्थितविषयत्वावधारणाशक्तेर्हौत्रप्रवचनविहितकारिणा
न मन्त्रेणेज्यते स मन्त्रो याज्येति लक्षणस्याभ्युपगमनीयत्वात्सूक्त
वाके ऽपि तल्लक्षणत्वोपपत्तेर्याज्यात्वाविघात इत्याह *अपि चेति
यौगिकानां जातिवाचित्वाभावात्साधारण्यवाचिसामान्यशब्दः प्र
स्त्रादिप्रयोज्यानामपि मन्त्राणां याज्यात्वप्रसिद्धेर्हौत्रप्रवचनाख्यग्रं

वेहितकर्मकारिवाची होतृशब्दः । मन्त्रत्वादरे ऽपि तद्विशेषत्वा-
गादरसूचनार्थो वस्तुशब्दः । चिन्तान्तरपूर्वपक्षमुपसंहरति * तस्मा-
दिति * होतृप्रयोज्येष्वपि दर्विहोममन्त्रेषु याज्यात्वाप्रसिद्धेर्येन म-
न्त्रेण होत्रेज्यते सा याज्येति लक्षणा योगाद्यागाङ्गदेवतोद्देशार्थविहित-
मन्त्रत्वस्यैव लक्षणत्वावगतेः सूक्तवाकस्य नैवं लक्षणत्वान्न याज्या-
त्वमिति सिद्धान्तमाह * एवमिति * यजेर्यजमानकर्तृकत्यागविशि-
ष्टोद्देशवाचित्वशङ्कानिरासेनोद्देशमात्रवाचित्वसूचनार्थो होतृशब्दः ।
उद्दिशतीत्युक्ते निर्वापादिकालीनोद्देशार्थत्वे याज्याशब्दस्यावयवार्थ-
स्यागापत्तिमाशङ्क्य यागाङ्गत्वेन देवतोद्देशाद्यागसाधनत्वरूपावयवा-
र्थोपपत्तिसूचनार्थम् * यागाङ्गमित्युक्तम् * ये यजामहानन्तरस्या-
ग्निमित्यादेरध्यादेशाख्यस्य शब्दस्य यागकालीनदेवतोद्देशार्थत्वेन वि-
धानाद्याज्यात्वापत्तिर्मन्त्रविशेषणेन निरस्ता तृतीयया देवतोद्देशा-
र्थत्वेन विधिः सूचितः । देवता यागकाले येन मन्त्रेणोद्दिशति
तस्य याज्यात्वमिति लक्षणस्योपांशुयाजादिषु याज्यान्वयात्प्रागनव-
गतदेवतेषु देवतोद्देशार्थत्वेन मन्त्रविनियोगादव्यापकत्वमाशङ्क्य दे-
वताविशेषानवगमे ऽपि यागत्वात्सामान्यतस्तत्रापि देवतान्वयावगते-
र्देवतोद्देशार्थत्वेन विधिसम्भवाद्व्यापकत्वं प्रसिद्धयुक्त्या सूचितम् ।
सूक्तवाकस्य देवतोद्देशार्थत्वेनाविधाने ऽप्यर्थाद्देवतोद्देशार्थत्वसम्पत्ते-
र्याज्यात्वापत्तिरित्याशङ्कां निरस्यन् श्लोकं व्याचष्टे * प्रकृतौ हीति *
स्यज्यमानविशेषणेन यागकालीनतोक्ता । न केवलं सूक्तवाकस्य
तादर्थ्येन विरूपोत्पत्तिर्नास्ति किं त्वजुपनेत्याद्यतीतकालवाचिप्रत्य-
ययोगित्वेनेष्टदेवताभिधानसामर्थ्यरूपलिङ्गविरोधात्स्यज्यमानप्रस्तरदे-
वतोद्देशार्थतापि नास्तीत्याह * इष्टेति * सूक्तवाकस्य प्रहरणाङ्गत्वा-
वेदिकया तृतीयाश्रुत्या मान्त्रवर्णिकप्रहरणे देवतोद्देशार्थत्वावसाया-
ल्लिङ्गावगतेष्टपुरोडाशादिदेवतार्थता बाध्यत इत्याशङ्क्ते * लिङ्ग-
मिति * अस्यामर्थविनियोगाशक्तेः श्रुत्या लिङ्गावगतेष्टदेवताभि-
धानार्थत्वाभ्यनुज्ञानादिष्टानां चाज्यभागाद्यनुयाजान्तयागदेवता-
नां स्वार्थत्वेनैव सूक्तवाकग्राहकत्वादन्यार्थया ऽनया श्रुत्यास्य सूक्तवाकस्य
प्रहरणे विनियुक्तस्यापि लुप्तोपवापेन पुरोडाशकपालं तत्प्रहरणेनाप्र-
योज्यत्वावगतेस्त्यज्यमानप्रस्तरदेवतोद्देशार्थत्वं श्रुतितो ऽवसीयत
इति परिहरति * नेति * श्रुत्या लैङ्गिकविनियोगानुज्ञां द्रढयितुमा-
ह * तथा चेति * श्लोकार्थमुपसंहरति * तेनेति * भवितव्यं ध-
र्मैरिति पूर्वपक्षोपक्रमात्ततश्च न भवितव्यं धर्मैरिति शेषः । याज्या-
त्वाभावे ऽपि यागरूपप्रहरणाख्ययाज्याकार्यकारित्वाद्याज्याधर्मा

भविष्यन्तीत्याशङ्क्याह * न चेति* सूक्तवाकान्वयात्प्राक् प्रहरणस्य
यागरूपत्वाभावेन याज्याकार्यत्वाभावात्तत्सूक्तवाकस्य याज्याकार्य-
कारितास्तीति सूचयितुं प्रहरणविषयान्या याज्या नास्तीत्युक्तम् ।
(दर्विहोमानां जुहोतिचोदितत्वेन यागत्वाभावाद्यथेज्यते सा या-
ज्येत्यवयवात्प्रतीत्यभ्युपगमे ऽपि) चतुर्होत्रा ग्रामकामं याजयेदिति
यागसाधनत्वेन विहिते चतुर्होत्राख्ये मन्त्रे याज्यत्वाप्रसिद्धेर्वाक्यान्त-
रावगतयागत्वएव कर्मणि विनियुक्तमात्रत्वस्य लक्षणत्वेनाभ्युपग-
मनीयत्वात्सूक्तवाके च तदभावान्न याज्यात्वमस्तीत्याह *प्राक्चेति*
प्रहरणदेवतोद्देशार्थविहितमन्त्रत्वस्य लक्षणत्वेनाभ्युपगमनीयत्वा-
त्सूक्तवाके च तदभावान्न याज्यात्वमस्तीत्याह *प्राक्चेति* प्रहरण-
देवतोद्देशार्थविहितमन्त्रत्वलक्षणकृतसूक्तवाकनिवृत्तिस्तु योगमात्र-
साधनार्थविहितमन्त्रत्वे ऽपि लक्षणे सेत्स्यतीत्याह *न त्वत्रेति* प्र-
हरणस्य यागरूपत्वं विना सूक्तवाकस्य यागसाधनमन्त्रत्वनिमित्त-
याज्यात्वासिद्धेर्याज्यारूपसूक्तवाकान्वयात्प्रहरणस्य यागरूपप्रहरणा-
न्वयाच्च सूक्तवाकस्य याज्यारूपतेत्यन्योन्याश्रयापत्तिरित्याशयः । या-
ज्यात्वानपेक्षसूक्तवाकमात्ररूपतया सूक्तवाकशब्दगृहीतस्य मन्त्रस्य
यागत्वाभिमते प्रहरणे विनियोगोत्तरकालं सूक्तवाकाभिधेयाभिर्देव-
ताभिर्मान्त्रवर्णिकेन सम्बन्धेन लभ्ययागत्वं यस्येति न याज्याका-
र्यत्वात्तां प्रति प्रधानभूतेन प्रहरणेन सम्बन्धात्सूक्तवाकस्य याज्या-
।७७।१ त्वासिद्धेरन्योन्याश्रयपरिहारं शङ्कते * अथेति * अभियुक्तप्रसिद्ध्या
यागकालीनदेवतोद्देशार्थतया विहितस्यावयवप्रसिद्ध्या च यागार्थ-
तया विहितस्य मन्त्रस्य याज्यात्वावगतेः सूक्तवाकान्वयात्प्रा-
क्प्रहरणस्य यागत्वासिद्धेः सूक्तवाकस्य यागार्थतया विध्ययोगाद्दि-
ष्टदेवतासमर्पकत्वात्मकलिङ्गविरोधेन चेज्यमानदेवतोद्देशार्थतया वि-
ध्ययोगात्सूक्तवाकान्वयात्पश्चात्प्रहरणस्य यागत्वे सत्यपि यागरूपार्थ-
त्वेन सूक्तवाकस्य विध्यभावाद्याज्यात्वलाभसिद्धेर्नान्योन्याश्रयं परिह-
र्तुं शक्यमित्याह *तदिति* त्यज्यमाने हविर्देवतोद्देशार्थविहितमन्त्रत्वौ-
त्पत्तिकशब्दसामर्थ्यगम्यत्वादुत्पत्तिशब्देन विवक्षिता यागार्थविहि-
तमन्त्रत्वं विनियोगाधीनत्वाद्विनियोगशब्देन विवक्षितम् । औत्पत्तिक-
शब्दसामर्थ्यालोचनवेलायां त्यज्यमानहविर्देवतोद्देशार्थविहितमन्त्र-
त्वेन विनियोगवेलायां च यागार्थविहितमन्त्रत्वेन लक्षणेन येन सूक्त-
वाकेन याज्यात्वं न लभ्यते तस्य पश्चात्कथं याज्यात्वलाभ इत्यर्थः ।
यथा यूपं छिनत्तीत्युत्पत्तिवेलायां खादिरे बध्नातीत्यादिविनियोग-
वेलायां चानवगतमपि यूपत्वं यत्पशुबन्धार्थं खादिरादिछे-

दनादिसंस्कृतः स यूप इति विपरीतवचनव्यक्त्यालोचनया पश्चादवगम्यते तथा याज्यात्वमपि पश्चादवगमिष्यतइत्याशङ्क्याह * यो हीति* समिधोऽग्नआज्यस्य व्यान्त्वित्यादिष्वौत्पत्तिकमन्त्रसामर्थ्यालोचनवेलायां समिदादियागेषु विनियोगवेलायां च याज्याशब्दार्थलाभान्न यूपादितुल्यतेत्यर्थः । सूक्तवाकस्य मुख्ययाज्यात्वाभावे च याज्याकार्यकारित्वेन पश्चाद्याज्यात्वाभ्युपगमे ऽपि याज्याधर्मा न प्राप्नुवन्तीत्याह * ये ऽपि चेति * याज्याकार्यकारित्वाभ्युपगमे कार्यापत्त्या धर्मप्राप्तिरनिवार्येत्याशङ्क्याह * यदि त्विति * सूक्तवाकस्यार्थाद्याज्याकार्यकारित्वसम्पत्तावपि शास्त्रेण याज्याकार्यकारितया विधिं विना धर्मप्राप्त्ययोगात्प्रकृतौ च कार्यस्याक्लृप्तत्वेन तत्कारितया विध्ययोगात्कार्यापत्त्यनुपपत्तेर्न धर्मप्राप्तिरित्युक्तं प्रकृतावपि फलचमसस्य सोमकार्यापत्तिः कल्पिता इहतु परिधौ पशुं नियुञ्जतीति यूपकार्ये पशुनियोजने श्रुत्योक्ते परिव्याख्याहवनीयपरिधानार्थकाष्ठविधिवत्सूक्तवाकेन यजेतेति काल्पनिकेन वाक्येन श्रुत्योक्ते याज्याकार्ये यागे खलेवाली यूप इति यूपशब्दलक्षिते यूपकार्ये खलेवाल्याख्यधान्यखले कृतमेढीविधिवद्वा सूक्तवाकएव याज्येति याज्याशब्दलक्षिते याज्याकार्ये सूक्तवाके विधानात्कार्यापत्तिर्नोच्यते प्रकृतौ च पदार्थविधिपूर्वकत्वात्कार्यकल्पनस्य पदार्थविधानात्प्राक्कार्यानवगतेर्यागस्य याज्याकार्यत्वानवगमाच्छ्रुत्या लक्षणया चोक्ते याज्याकालसूक्तवाकविधिर्न सम्भवतीति परिहारसूचनार्थम् *परिधीत्युक्तम्* अतो न सूक्तवाको याज्या नापि तस्य नापि तस्य याज्यात्वं लिङ्गेन दृढयितुमाह * तथा चेति * कथमेवकारस्योपचारद्योतकतेत्यपेक्षायामाह * अयाज्यापरं हीति * याज्यान्तरनिषेधायोगात्सूक्तवाक एव याज्यावत्प्रशस्त इत्येवकारात्सूक्तवाकस्यौपचारिकयाज्यात्वमवसीयतइत्याशयः । अत एवाहुतौ मुख्यत्वान्नैवकारः प्रयुज्यतइत्याह * मुख्यत्वादिति * कथमाहुतेर्मुख्यतेत्याशङ्क्याह * तदेति * प्रहरणाङ्गत्वेन सूक्तवाकोपदेशस्य याज्याशब्दोपपत्तिहेतोस्तथा च्चाङ्गत्वे स्तनीति वार्त्तिकनिर्दिष्टस्य प्रासङ्गिकचिन्तासमाप्त्या बुद्धिस्थीभूतस्य तच्छब्देन परामर्शात्तेन सूक्तवाकस्य प्रहरणाङ्गत्वोपदेशेनैव हेतुना प्रक्रियमाणस्य प्रस्तरस्य मान्त्रवर्णिकदेवतान्वयादाहुतित्वं पारमा-

(१) पूतीकानां च सोमकार्यापत्तिर्दृष्टेत्याशङ्क्य तत्र तमसौ भक्षं प्रकल्पयेन्न सोममिति फलचमसविधौ सोमनिषेधानुवादादेकवाक्यतान्यथानुपपत्त्या यागीयसोमसंस्कारकभक्षणविधिनाच यदि सोमं । नविन्देत पूतीकानभिषुणुयादितिन पूतीकविधौ सोमाभावे विधानेन इत्य० २ पु० ।

र्थिकमित्यर्थः । प्रहरणस्य सूक्तवाकप्रकाश्यदेवतात्वयागाङ्गत्वे सत्यपि होमत्वाभावाद्धोमसाधनद्रव्यत्वनिमित्तं प्रस्तरस्याहुतित्वं नास्तीत्याशङ्क्याह * न चेति * प्रक्षेपाधिक्यविधाने जुहोतिचोदनं विना कथं कथं होमतेत्याशङ्क्याह * आधारादिति * जुहोतिचोदनाभावे ऽपि प्रक्षेपाधिके यागे ऽभियुक्तप्रसिद्धेर्होमतास्त्येवेत्याशयः चतस्रः पूर्णाः प्रागुदीच्यौ निनयेद्दतुभ्यः स्वाहा दिग्भ्यः स्वाहा सप्तऋषिभ्यः स्वाहेतरजनेभ्यः स्वाहेत्यादिविहितस्योदकनिनयनादेर्मान्त्रवर्णिकदेवतान्वयाद्यागस्य क्षारणाधिक्याद्धोमतादिशब्देनोक्ता । एवं च सत्ययागाङ्गत्वादपि सूक्तवाकस्य याज्यात्वं नास्तीत्याह * होमेति * सूक्तवाके तु विशेषतो याज्यात्वं नेष्यते निगदत्वेन याज्यात्वनिषेधादित्याह * निगदत्वादिति * निगदत्वैव तावत्कथं सूक्तवाकस्येत्याशङ्क्याह * नितरामिति * तथ
७८।१ याज्यात्वनिषेधः कथमित्याशङ्क्याह * निगदानां चेति * निषेधसरूपार्थवादो ऽयं लिङ्गत्वेनोपन्यस्त इत्यृग्विध्येकवाक्यत्वोक्त्या सूचितं,तस्माद्विशेषतः सूक्तवाकस्य याज्यात्वं नेष्यते इति हि शब्दान्वयः निषिद्धं चेत्कथं तर्हि सूक्तवाकएव याज्येत्यत्रोक्तमित्याशङ्क्याह *निषिद्धमपीति* होमाङ्गत्वे सूक्तवाकस्य याज्यात्वप्रशंसानिरालम्बना स्यादित्याशङ्क्याह *तत्सम्बन्धात्त्विति * आहुतेःपारमार्थिकत्वोक्तिप्रसङ्गेनोक्तस्य होमाङ्गत्वानिषेधाद्याज्यात्वस्य समाप्त्या बुद्धिस्थत्वेनाहुतेस्तच्छब्देन परामर्शाद्याज्यावत्सूक्तवाकस्यापि होमकालप्रयोज्यत्वेनाहुत्याख्यहूयमानावस्थद्रव्यसम्बन्धलक्षणयाज्यागुणयोगाद्याज्यात्वेन स्तुतिर्युक्तेत्यर्थः । पूर्वपक्षे ऽपि तर्हि स्तुतित्वेन याज्याव्यपदेशोपपत्तेर्न सिद्धान्तलिङ्गतेत्याशङ्क्याह * न चेति * पूर्वपक्षे ऽत्यन्तनिरालम्बनस्तुत्यापत्तेर्नोभयोः पक्षयो स्तुतिर्युक्तेत्यर्थः ।

सदेवतार्थस्तत्संयोगात् ॥ १३ ॥

परार्थत्वादिति पूर्वपक्षसूत्रावयवस्य सूक्तवाकस्य देवतासङ्कीर्त्तनार्थत्वादिति भाष्येण कृतार्थत्वोक्त्यर्थतया प्रहरणं च प्रत्यशक्तेरित्यनेन चासामर्थ्योक्त्यर्थेत याव्याख्यातत्वाच्छङ्काद्वयपरिहारार्थत्वेन अव्याख्यार्थं यदुक्तमित्यनुभाषणभाष्यं देवतासङ्कीर्तनेन समाप्त्यर्थत्वान्न प्रहरणाङ्गं सूक्तवाको देवतासङ्कीर्त्तनएव च शक्तो न प्रहरणइत्येवमुच्यते इति परिहारभाष्यं देवतावचनो ऽपि सत्सूक्तवाकः प्रहरणस्यापि यागत्वेन देवतासङ्कीर्तनाकाङ्क्षत्वात्प्रहरणान्वयं विना कृतार्थत्वानुपपत्तेः प्रहरणेन

न सम्बध्यते ऽपि तु सम्बध्यत एव देवतोक्तिशक्तो ऽपि च प्रहरणे न श-
क्तो ऽपि तु शक्त एवेत्येवं द्वेधा व्याख्यातु कृतार्थत्व तावदनुभाषणपूर्वं प-
रिहरति*यदिचेति * भेदशब्देनान्योन्यानपेक्षत्वोक्तोर्लिङ्गावगतं देवता-
कीर्त्तनार्थत्वमनपेक्ष्य यदि श्रुत्या सूक्तवाकस्य प्रहरणाङ्गता श्रुत्यवगतं
च प्रहरणाङ्गत्वमनपेक्ष्य हीत्थं लिङ्गेन देवता बाध्येत ततः श्रुतिविरो-
धाभावाल्लिङ्गबाधाप्रसक्तेर्बाधिते च लिङ्गे सूक्तवाकस्याशक्तत्वेन श्रुत्या
विनियोगायोगादुभयानुग्रहायेष्टदेवताकीर्त्तनमात्रेण कृतार्थत्वं सूक्त-
वाकस्याङ्गीकृत्य कालार्थः प्रहरणान्वयो ऽभ्युपगम्येत किं तु श्रुत्य-
नुग्रहार्थं लिङ्गेन प्रहरणाङ्गभूतदेवताकीर्त्तनद्वारा श्रुत्यवगतप्रहरणा-
ङ्गत्वापेक्षणात्सूक्तवाकस्य च प्रहरणोक्तिसिद्धौ श्रुत्या लिङ्गावगतदे-
वताकीर्त्तनाङ्गत्वापेक्षणाच्छ्रुतिलिङ्गयोस्तुल्यार्थत्वेन विरोधो ना-
स्तीति न विरोधपरिहारायेष्टदेवतोक्तिमात्रेण कृतार्थतामङ्गीकृत्या-
न्यत्र विनियोगानर्हत्वात्कालार्थता ऽभ्युपगन्तव्येत्यर्थः । असामर्थ्यं
परिहरति * यस्यस्येति * उभयपरिहारोपपादनार्थत्वेन प्रहरणं
हीत्यादिभाष्यं व्याख्यातुमारभ्यते * इह हीति * देवतामभिदधत्सू-
क्तवाकः कथं श्रुत्यर्थं प्रहरणाभिधानं कुर्यादित्याह * सर्वत्र चेति *
प्रहरणदेवताभिधानात्प्रहरणमभिहितं भवतीत्याशयः । शेषिभूतक्रि-
यान्वयित्वेन प्रसिद्धस्य मन्त्रं प्रति प्रकाशनार्हतया शेषिरूपस्य मन्त्रणा-
भिधेयत्वात्सूक्तवाकाभिधेयानां देवतानां प्रहरणान्वयाप्रसिद्धेर्न तद-
भिधानद्वारा प्रहरणाङ्गत्वं सूक्तवाकस्य सेत्स्यतीत्याशङ्क्याह*तत्रापी-
ति * यद्यपि प्रसिद्धक्रियान्वयस्य मन्त्राभिधेयत्वावगतिः प्रथमं भ-
वति तथापि प्रसिद्धक्रियान्वयाभिधानसामर्थ्याभावान्मन्त्रस्य प्रसि-
द्धक्रियान्वयपदार्थाभिधायित्वाप्रतिपत्तौ श्रुताङ्गत्वान्यथानुपपत्त्या म-
न्त्राभिधेयस्य क्रियान्वयकल्पनारूपो विपर्ययः पश्चाद्भवतीत्यर्थः ।
सामान्यन्यायमुक्त्वा प्रकृते रूपकद्वारा योजयति * तस्मादिति *
सूक्तवाकप्रकाश्यानामग्न्यादीनां प्रहरणान्वये ऽपि तत्र देवतात्वान-
वधारणात्कथं प्रहरणस्य यागता भाष्यकृतोक्तेत्याशङ्क्याह * नचे- ७७९।१६
ति * एवमभिसम्बन्ध इत्याद्यग्न्यादिदेवताकश्चेत्यन्तं भाष्यं सङ्क्षे-
पतो व्याचक्षाणो नच प्रहरणं यागमात्रं रूपे ऽवतिष्ठत इति वार्त्तिक-
स्य भाष्यविरोधं परिहर्तुमाह * अतश्चेति * पुरोडाशादेः परोक्षत्वा-
दनेन हविषेत्यपरोक्षतया निर्देशानुपपत्तेः हविःशब्देन प्रस्तरस्य ह-
विष्ट्वसङ्कीर्तनादित्युक्ते प्रस्तरस्य तृणत्वेनानदनीयत्वाद्धविष्ट्वायोग्य-
तामाशङ्क्यानदनीयत्वे ऽपि कृष्णलादिवद्वचनाद्धविष्ट्वोपपत्तिसूच-
नार्थं द्रव्योक्तिः । मान्त्रवर्णिकद्रव्यदेवतान्वयाद्यागता भासमाना

भाष्यकृतोक्ता । परमार्थतस्तु प्रक्षेपाधिक्याद्धोमतैवावधार्यतइत्येतदेव सूत्रकृत्संमत्या द्रढयितुं हरणे तु जुहोतियोगसामान्यात् द्रव्याणां चार्थशेषत्वादिति चतुर्थाधिकरणसूत्रैकदेशः शाखाप्रहरणार्थकर्मत्वासिद्धौ होमत्वे पूर्वपक्ष्यमाणे सह शाखया प्रस्तरं प्रहरतीति सहशब्दोक्तस्य प्रस्तरसहयोगस्य हेतुत्वाभिधानात्प्रस्तरप्रहरणस्य होमतोभयसिद्धावसीयतइति मत्वा पठितः । तस्मादित्युपसंहारभाष्यमुपक्रमानुरोधाद्देवतार्थत्वे ऽपि हरतिसंयोगो घटत एवेत्युपसंहार्ये विपरीताभिधानादयुक्तमाशङ्क्य विरोधे ऽपि तावल्लैङ्गिकस्य देवतार्थत्वस्यैव बाधापत्तेस्तृतीयाश्रुतेः काललक्षणार्थत्वकल्पना न युक्ता इह तु विरोधाभावान्न किंचिद् बाध्यमित्येवमर्थत्वसूचनार्थतामाह * तस्मादिति * सूत्रं चानेन भाष्येण हरतिसंयोगे ऽपि सूक्तवाको देवतार्थ एव हरतेरपि देवतासंयोगादित्येवं योजितं भवतीत्याह * एवं चेति * कालार्थतापि न्यायावगता न बाध्येत्याह * कालार्थतापि चेति * अनुयाजयाज्यानन्तरं सूक्तवाकपाठात्सूक्तवाकेन प्रस्तरे कालः शक्यो लक्षयितुमित्याशयः । यदित्यादिभाष्यमाशास्ते ऽयमित्याद्यश्रवणे ऽपि श्रुत्यवगतप्रस्तरप्रहरणाङ्गत्वान्न्यायानुपपत्त्या ऽग्न्यादीनां प्रहरणान्वयावगमादयुक्तमाशङ्क्य व्याचष्टे * यदीति * नन्विति भाष्येण ऽनेन हविरित्यनेनापि प्रसिद्धहविष्कस्य पुरोडाशादेरेवापरोक्षत्वोपचारान्निर्देशोपपत्तेस्तद्बलेनाग्न्यादेः प्रहरणान्वयकल्पना न युक्तेत्याशङ्क्योभयविधलिङ्गसम्भवात्सन्देहे सति श्रुत्यालोचनया निर्णयो भविष्यतीति परिहारार्थमुभयथेति भाष्यं व्याचष्टे * यद्यपि चेति *आशास्ते ऽयमित्याद्यश्रवणे ऽपीदं हविरित्यपरोक्षे निर्देशाद्धविःशब्दस्य प्रस्तरविषयत्वावगतेरग्न्यादीनामन्तरितत्वोक्तिमात्रे पर्यवसानं न सम्भवतीत्यभिधानार्थमथ वेति भाष्यं व्याचष्टे * अथ वेति * आग्नेयपुरोडाशस्य चतुर्द्धाकरणवशाद्धविरन्तराणां च संवाककालभक्षार्थशेषसद्भावे ऽपि सामस्त्यरूपतां शाब्दप्रत्यक्षतां प्रस्तरस्य जोष्यमाणत्वेनाजुषतेत्यतीते निर्देशानर्थक्यापत्तेः प्रस्तरनिर्देशो न युक्त इत्याशङ्कते * अजुषतेति * स्तुत्यर्थत्वाच्च भूतनिर्देशो ऽनर्थक इति परिहरति * नेति * अतः प्रहरणाङ्गत्वे ऽपि सूक्तवाकस्य देवतार्थत्वाविघातात्प्रहरणाङ्गतोपपन्नेति सूत्रतात्पर्यमाह * अत इति ।

प्रतिपत्तिरिति चेत् ॥ १४ ॥

पदार्थत्वादिति पूर्वपक्षहेतोः कृतार्थत्वोत्तरार्थत्वे द्वयोः कृता-

र्थतां विनाङ्गाङ्गित्वनिरासायोगात्प्रस्तरस्यापि कृतार्थत्वोक्त्यवगतेः प्रहरणस्य प्रतिपत्तितायाः पूर्वोक्तत्वादनुभाषणसूत्रमेतदसामर्थ्योक्त्यर्थत्वे तु सूक्तवाकमात्रस्य पारार्थ्योक्तेः प्रहरणस्य प्रतिपत्तीतायाः प्रागनुक्तत्वात्परिचोदनासूत्रमित्याह * अनुभाषणमिति * प्रतिपत्तित्वोक्तेः सिद्धान्ताक्षेपोपयोगितामाह * कथमिति * ७८०।१

स्विष्टकृद्वदुभयसंस्कारः स्यादिति ॥ १५ ॥

सूत्रं परिहारार्थत्वेनावतारयति * अत इति * भाष्यकृतैकसूत्रतया व्याख्यातत्वात्सूत्रभेदेन व्याख्या न युक्तेत्याशङ्क्य भाष्यकृत्प्रक्रियया सूत्रद्वयमेवैतदित्याह * अर्थेति * यथा-स्विष्टकृद्यागः प्रतिपत्तिरूपः संस्कारो ऽपि मन्त्रयागः प्रतिपत्तिश्चेत्युभयात्मक इत्याश्रयिष्वविशेषणभावार्थः प्रतीयेतेति चतुर्थाधिकरणे वक्ष्यते तथा प्रहरणमप्युभयात्मकमिति यथाभाष्यं तावत्सूत्रं व्याचष्टे * यथैव चेति * अयमपि हरतिरित्यर्थः । देवतानामङ्गत्वसिद्धौ यागस्य प्रतिपत्तित्वे ऽप्यविरोधमुत्पत्तौ येन संयुक्तं तदर्थं तदित्युक्त्यर्थतां दृष्टान्तस्योक्त्या सूक्तवाकाङ्गत्वाविरोधीत्यर्थतामपि वक्तुम् * यथा चेत्युक्तम् * यागत्वाविरोधं तावदुपपादयति * न हीति * उत्पत्तौ येन संयुक्तं तदर्थं तच्छ्रुतिहेतुत्वात्तस्यार्थान्तरगमने शेषत्वात्प्रतिपत्तिः स्यादिति चातुर्थसूत्रवक्ष्यमाणस्य लक्षणस्योत्पत्तौ स्रुगासादनसंयोगात्प्रस्तरस्य तादर्थ्यावगतेः प्रहरणाख्यार्थान्तरगमनाच्च प्रहरणे सद्भावेनाप्रतिपत्तित्वम् * सम्भवतीत्युक्तम् * प्रतिपत्तेस्तर्हि दृष्टार्थत्वेन वेदिकाङ्गानपेक्षतया मन्त्रानन्वयात्तल्लभ्यद्रव्यदेवतानन्वयाद्यागत्वं विरुद्ध्येतेत्याशङ्क्यानुष्ठेयत्वावगमोत्तरकालं भावनायाः कैमर्थ्याकाङ्क्षायां प्रति यदर्थकर्मत्वविचारात्सकलकारकवैशिष्ट्याच्च प्रागनुष्ठानानर्हत्वान्मन्त्रान्वयलभ्यद्रव्यदेवतान्वयेन हरतेर्यागत्वे सति प्रक्षेपाधिक्याद्धोमरूपतावधारणोत्तरकालमनुष्ठेयत्वावगमे सति कैमर्थ्याकाङ्क्षायां प्रतिपत्तित्वावधारणादविरोधो ऽभिहितः। न च पश्चात्तनेन प्रतिपत्तित्वेन पूर्वावगता होमरूपता बाध्यते विरोधाभावादित्याह * न चेति * उभयरूपश्चासौ संस्कारश्चेति कर्मधारयत्वेनोभयसंस्कारशब्दं व्याख्यातुमाह * तेनेति * यागमात्रे ऽपि देवतान्वयोपपत्तेर्होमो यागत्वेनोक्तः । यथा स्विष्टकृद्द्रव्यसंस्कारो ऽपि यागस्तथा प्रहरणमप्युभयोर्द्रव्यदेवतयोः संस्कारो ऽपि यागत्वं न विरुणद्धीति षष्ठीसमासत्वेन स्वयं व्याचष्टे * अथ वेति * यथा स्विष्टकृत् द्रव्यदेवतयोरुभयोः संस्कारस्तथा प्रहरणमपीति सर्वथा

साम्येनान्यथा व्याचष्टे * अथ वा स्विप्रकृत्यपीति * केवलप्रतिपत्तित्वाभ्युपगमे ऽपि न मन्त्रस्याङ्गत्वं विरुध्यतइत्याह * न चेति * वैदिकयागस्य दृष्टमात्रे पर्यवसानाभावेनादृष्टार्थत्वात् दृष्टार्थया प्रतिपत्त्यानाकाङ्क्षा सम्भवतीत्याशङ्क्य प्रतिपत्तेरपि नियमादृष्टार्थत्वाददृष्टाङ्गाकाङ्क्षास्तीत्याह * नियमेति *

सूक्तवाकन्यायः । सूक्तवाकानामर्थानुसारेण विनियोगाधिकरणम् ॥ ६ ॥

कृत्स्नोपदेशादुभयत्र सर्ववचनम् ॥ १६ ॥

प्रहरणाङ्गत्वे ऽपि सूक्तवाकस्येष्टदेवताभिधानार्थत्वाविघातात्कल्पृप्तविनियोज्यस्यापि मुख्यपदार्थविनियोगाद्वचनात्त्वयथार्थमित्यस्यापवादे पूर्वाधिकरणेन कृते पौर्णमास्यमावास्यादेवतावाचिनामिन्द्रादिपदानाममावास्यायां च पौर्णमासीदेवतावाचिनां प्राजापत्यादिपदानामसम्भवेनायथार्थत्वान्मुख्ये ऽर्थे विनियोगो न सम्भवतीत्याक्षिप्यासमवेतार्थानामप्रयोगादपवादसमर्थनायेदमधिकरणमित्यनन्तरसङ्गतिं च सूचयितुमाह * अधिकारमुपजीवयन्निति *
७८११ तत्रेति सन्देहभाष्य व्याचष्टे * किमिति * पूर्वपक्षसूत्रव्याख्यार्थं तदुच्यतइत्यादिभाष्यं व्याचष्टे * किमिति * इदं द्यावापृथिवीभद्रमभूदित्यादौ नमो देवेभ्य इत्यन्ते पदसमूहे सूक्तवाकशब्दस्याध्येतृप्रसिद्धे निष्कर्षे सूक्तवाकश्रुतिर्बाध्येतेत्याशयः ।

यथार्थं वा शेषभूतसंस्कारात् ॥ १७ ॥

यथार्थं वचनमिति पूर्वसूत्रस्थस्य वचनशब्दस्य प्रयोक्तव्यशब्देन समासान्निष्कृष्यानुषङ्गोक्त्या सिद्धान्तप्रतिज्ञार्थसूत्रावयवव्याख्यार्थं य इति भाष्यं स्पष्टत्वादव्याख्याय हेत्वर्थं सूत्रावयवव्याख्यार्थशेषभूतमिति भाष्यं यजेर्यज्ञाङ्गप्रकाशनमेव प्रयोजनमिति मन्त्राधिकरणभाष्योक्तकर्मसमवेतार्थप्रकाशकत्वाशयतया भासमानं कृत्स्नप्रयोगे ऽपि गौण्या वृत्त्या समवेतार्थप्रकाशकत्वोपपत्तेरयुक्तमाशङ्क्य यत्रेति चार्थवत्त्वात्स्यादिति स्तुतशस्त्राधिकरणसूत्रं संस्कारत्वादचोदिते न स्यादिति लिङ्गाधिकरणसूत्रे च मुख्यार्थविनियोगसम्भवे गौणे ऽर्थे मन्त्रविनियोगस्यान्याय्यत्वादपकर्षोक्तिमभिप्रेत्य कर्मशेषभूतार्थसंस्कारकत्वसम्भवे कर्मोपकारित्वान्मन्त्राः प्रयोक्तव्या नान्यथेत्येवं व्याख्यातुमाह * एवमादीनामिति * प्रकारवाचिनादिशब्देन स्मातिहेतसंस्कारेण

बोधकत्वाख्या संस्कारकतोक्ता । लिङ्गादिविनियोज्यानामसमवेतार्थत्वादपकर्षे ऽपि सूक्तवाकस्य श्रुतिविनियोज्यत्वेन स्वार्थकर्मान्वयककल्पत्वात्सर्वासां देवतानामुभयत्र प्रहरणान्वयो भविष्यतीत्याशङ्क्याह * यदीति * आज्यभागादावविहितानामेव देवतानां प्रहरणाङ्गत्वे सर्वासामन्वयः कल्पेत आज्यभागादिदेवताप्रत्यभिज्ञानान्नापूर्वदेवता कल्पना युक्तेत्यर्थः । प्रहरणस्यापूर्वदेवतानन्वये ऽपि प्रहरणेन कृत्स्नस्य सूक्तवाकस्याङ्गतया गृहीतत्वाच्च पदमात्रस्यापि त्यागो न युक्त इत्याशङ्क्याह * अतश्चेति * अतःपूर्वयागाङ्गदेवताप्रत्यभिज्ञानात्मकस्य सूक्तवाकशब्दस्य सुभाषितवचननिमित्तत्वात्प्रहरणस्यार्थाभिधानकर्मत्वेन सूक्तवाककृतपूर्वयागाङ्गभूतदेवताप्रकाशनोपजीवितया सूक्तवाकं प्रत्यप्रयोजकत्वावगतेः प्रधानप्रयुक्तदेवतापेक्षत्वेन प्रधानाधीनत्वात्प्रधानानां यथादेवतमेव सूक्तवाकप्रयोजकत्वान्न कृत्स्नसूक्तवाकग्रहणमित्याज्यभागादयो ऽनूयाजान्ता यागाः सूक्तवाकप्रयोज्यत्वाद्यागाङ्गभूतप्रस्तरप्रतिपत्त्यर्थप्रहरणं प्रति प्राधान्ये सति प्रधानत्वेनोक्ताः । तस्मादिति सूत्रार्थोपसंहारभाष्यं सङ्क्षिप्य व्याचष्टे * तस्मादिति *

वचनादिति चेत् ॥ १८ ॥

कृत्स्नोपदेशादिति पूर्वपक्षे हेत्वनुभाषणार्थत्वेन सूत्रव्याख्यार्थमथेति भाष्यं सूक्तवाकशब्दावयवव्युत्पत्त्या सुभाषितवाचिपदसमूहमात्रवाचित्वादिष्टत्वादिष्टदेवताप्रकाशनार्थपदसमूहमात्रे सूक्तवाकस्य कृत्स्नत्वोपपत्तेरयुक्तमाशङ्क्येदं द्यावापृथिवी इत्यादौ देवेभ्य इत्यन्तं पौर्णमास्या देवताप्रकाशनार्थे पदसमूहसूक्तवाकशब्दप्रसिद्धेः । पौर्णमास्या वामावास्यादेवतानाम् । अमावास्यायां च पौर्णमासीदेवतानामाभाषितत्वेनावयवार्थाभावाद्रूढिताशयत्वेन व्याचष्टे * सूक्तेति *

प्रकरणाविभागादुभे प्रति कृत्स्नशब्दः ॥ १९ ॥

रूढित्वानभ्युपगमेन कृत्स्नवचनपरिहारार्थतया सूत्रव्याख्यार्थमुभे इति भाष्यं व्याख्यातुमाह* द्वौ हीति * यथैकादशिनीन् प्रायणीयोदनीययोरालभेरन्निति द्वादशाहे प्रायणीयोदयनीयाख्याद्योस्समाहकालत्वेन श्रुतानामेकादशिनीनां पशूनां द्वंद्वश्रुत्यैतरेतरयुक्तयोः
प्रायणीयोदयनीययोः काललक्षकत्वावगमेनैकैकत्र समस्तालम्भायोगात्पञ्च प्रायणीये पञ्चोदयनीये अन्त्यो ऽभ्यासन्नत्वादुदयनीय एवै-

त्यवयवशः प्रायणीयोदयनीयान्वयो दशमे वक्ष्यते यथा च लोके
चातुर्विद्येभ्यो धनं देयमिति चतुर्वेदविद्देयत्वेनोक्तस्य धनस्यै-
कवेदविदे चतुर्थश्चतुर्थो भाग इति अवयवशो ऽन्वयः प्रसिद्धः तथा
सूक्तवाकस्याप्यवयवशः पौर्णमास्यमावास्याकालेन प्रहरणप्रयोगा-
न्वयो भविष्यतीत्यर्थः। भाष्यकृत्पक्षे प्रकरणाद्यथादेवतं चावयवशः
प्रयोगात्सूक्तवाकश्रुतिदेवतालिंगदर्शपूर्णमासप्रकरणानामविरोध इ-
८२।३ त्यर्थः । सूत्रदूषणार्थं नैतादिति भाष्यमवतारयति * तदिति *
विशेष्यस्यानेकाविशेषणवशीकारसामर्थ्यात्साधनानां विशेषणत्वे स-
ति सापेक्षाणामितिकर्त्तव्यतान्वयः स्यान्न तु तेषामितिकर्त्तव्यतान्व-
ये विशेषणता ऽस्तीत्याशयः।प्रश्नपूर्वमेतदुपपादयितुं कुत इत्यादिभा-
ष्यं तात्पर्यतो व्याचष्टे * कुत इति * साधनानां फलान्वय-
सिद्ध्यर्थत्वादितिकर्त्तव्यतान्वयस्य फलान्वये सापेक्षत्वादितिकर्त्त-
व्यतान्वये सापक्षतैव युक्तेत्याशङ्क्य वैपरीत्योक्त्यर्थं फलं प्रतीति
भाष्यावयवं व्यचष्टे * प्रधानानि हीति * नेतिकर्त्तव्यतां प्रती-
त्यनुषङ्गः । इतिकर्त्तव्यताविधेयत्वोक्तेः साधनानामुद्देश्यत्वोक्तिप्रयो-
जननामाह * इतिकर्त्तव्यतां प्रतीति * साधनेतिकर्त्तव्यतयोर्द्व-
योरपि प्रात्यात्मिकोत्पत्तिविधितः स्वरूपेण प्राप्तत्वादेकान्वयित्वेनेत-
रस्मिन्विधेये साधनान्वयित्वेनेतिकर्त्तव्यतैव विधेया नेतिकर्त्तव्यता-
न्वयित्वेन न साधनमिति कथ निर्धारणेत्याशङ्क्याह*अविधीयमाना-
या इति * इतिकर्त्तव्यताविधाने ऽपि कथं साधनानामुद्देश्यतेत्या-
शङ्क्याह * सा चेदिति * वाक्यभेदापत्तेर्द्वयोर्विधानायोगाद् द्वयो-
श्च विधेयत्वे समत्वादन्यो ऽन्यासम्बन्धापत्तेः साधनानामुद्देश्यताव-
सीयतइत्यर्थः। अतो दर्शपूर्णमासाभ्यामिति द्वन्द्वावगतस्य साहित्यस्या-
विवक्षितत्वाद्विद्युदादिब्राह्मणतर्पणान्तयेतिकर्त्तव्यतया ऽऽग्नेयमुपकु-
र्यादुपांशुयाजमुपकुर्यादित्येवमादिप्रत्येकमितिकर्त्तव्यतावाक्यसमाप्तेः
प्रत्येकं समस्तेतिकर्त्तव्यतान्वयावगमान्नावयवशो ऽन्वयो युक्त इत्याह-
* तनश्चेति * प्रत्येकमेव तदनुष्ठानापत्तेः पौर्णमास्याममावा-
स्यायां चैकादश वक्ष्यमाणाङ्गानुष्ठानं विरुध्येतेत्याशङ्क्याह * तथै-
व चेति * समान्यन्यायमुक्त्वा प्रकृते योजयति * तदिति *
पञ्चम्यर्थे तदित्यव्ययं । सौत्रपक्षे ऽनिष्टापत्तिमाह * इतरथा चेति *
प्रयाजादीनामपि विभागमङ्गीकुर्वाणमपर्यायप्रयोगवचनावग-
तसाहित्यविरोधेन निरस्यति * न चेति * न्यायतः प्रतिप्रहर-
णप्रयोगे सकलसूक्तवाकप्रयोगे प्राप्ते ऽप्यसमवेतार्थवद्भागस्यासा-
मर्थ्यादुत्कर्षो भविष्यतीत्याशङ्क्याह * अत इति * समुदायरू-

दिसूक्तवाकश्रुतिबलीयस्त्वाल्लिङ्गगम्यविभागं बाधित्वा गुणेन चेदि-
तिभाष्यनुसारादिन्द्राग्न्यादिपदानां प्रजापत्यादौ प्रजापत्यादिपदानां चे-
न्द्रादौ गौणता न दृष्टाय भविष्यतीति भाष्यानुसाराद्वा अदृष्टार्थम-
ध्यवस्याम इत्युक्ते मन्त्राधिकरणविरोधाद्दृष्टार्थेना न युक्तेत्याशङ्क्य
मन्त्रवर्णबलात्पौर्णमास्यामिन्द्रादेरमावास्यायां च प्राजापत्यादेर्देवता-
त्वेन शास्त्रादृष्टत्वादनिष्टस्यापि प्रहरणे देयनात्वकल्पनमदृष्टार्थ-
त्वोक्त्योक्तमिति सूचनायासमवेतार्थस्य पदस्य यानि यत्रानर्थकानी-
त्यदृष्टार्थत्वोक्तिर्व्याख्येयभाष्यानिर्दिष्टा तच्छब्देन परामृष्टस्य विषय-
भूतदेवतान्तरमपूर्वं प्रहरणे ऽध्यवस्याम इत्युक्तम् । दर्शपूर्णमासना-
म्नः समुदायवाचित्वनिरासस्य सामानाधिकरण्येन यागनामत्वनि-
श्चय इति पौर्णमास्यधिकरणवार्त्तिके कृतस्य प्रत्येकामितिकर्तव्य-
तान्वयप्रतिपादकप्रकृतभाष्यसम्मतत्वसूचनार्थं समुदायस्य फलसा-
धनत्वं निरसितुं शङ्कते * कथं पुनरिति * निरस्यति * अत्रोच्यत
इति * श्लोकं व्याचष्टे * यागत्वं हीति * धातोः प्रत्येकसमवेत- ७८३॥
यागत्ववाचित्वे ऽपि नामानुरोधात्समुदायलक्षणार्थत्वं भवतीत्याश-
ङ्कते * नन्विति * धातुसामानाधिकरण्याधीनत्वान्नामत्वनिश्चयस्य
नाम्नो ऽपि प्रत्येकवृत्तितावसीयत इति परिहरति * नेति * पौर्ण-
मास्यधिकरणे चैतद्विस्तरेणोक्तमित्याह * तदिति * अतः सत्यपि
नाम्नि न समुदायः फलवानित्युपसंहरति*नेनेति*द्वन्द्वात्समुदायी-
कृतयोस्त्रिकयोरितरेतरयोगाख्यसमुदायविशिष्टयोः फलवत्त्वावगतेः
समुदायस्य फलवत्त्वमाशङ्क्यनरेतरन्यायेन*करणत्वमुक्तम्*एवमपि
साहित्यविशिष्टानामितिकर्तव्यतान्वयः स्यादित्याशङ्कत * नन्वि-
ति * परिहरति * नेति * इतिकर्तव्यतान्वये प्रधानसाहित्यस्यैव
क्वचिद्विवक्षा क्वचिदविवक्षा न युक्तेत्याशङ्क्योद्देश्योपादेयगतत्वरू-
पलक्षणभेदाद्विवक्षाविवक्षयोर्व्यवस्था युक्तेत्याह * एकमपि हीति *
साङ्गाभ्यां दर्शपूर्णमासाभ्यां स्वर्गं कुर्यादिति युगपत्साध्यसाधने-
तिकर्त्तव्यताविशिष्टभावनाविधावेकस्याग्नेयादेर्युगपत्फलेतिकर्त्तव्य-
तान्वये युगपदुद्देश्यत्वोपादेयत्वविरोधं शङ्कते * कथमिति * आ-
चार्यो मातुलश्चेति द्रव्यैकत्वे ऽपि दृश्यते अपेक्षाहेतुभेदेन व्यवहारः
पृथक्त्वयेति स्तुतशस्त्राधिकरणोदाहृतवृद्धश्लोके विरुद्धानामप्यपेक्ष-
णीयभेदेनैकत्र युगपत्सम्भवस्योक्तत्वाद्वस्तुविरोधस्तावन्नास्तीति प-
रिहरति *अपेक्षेति* हेतूक्त्यालम्बनवाचिन्या ऽपेक्षणीयमुक्तम् । व-
स्तुविरोधाभावे ऽपि वैरूप्यमिति वाक्यभेदापत्तेरेकेन शब्देन युगप-
द्रूपद्वयोक्तिर्विरुद्धेत्याशङ्कते * नन्विति * प्रयाजादिभिर्दर्शपूर्ण-

मासावुपकुर्यादिति प्रधानोद्देशेनेतिकर्तव्यतां विदधतो ऽनुमितस्य
वाक्यस्य दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति श्रुताद्वाक्यात्फलो-
द्देशेन प्रधानं विदधतो भेद सद्भावान्नानिष्टापत्तिरिति परिहरति *
को वेति * स्वरूपे नैष्फल्यापत्तेः फलसाधनीभूतप्रधानोद्देशेनेतिक-
र्तव्यताया विधेयत्वात्फलान्वये विवक्ष्यमाणां साहित्यमितिकर्तव्य-
तान्वये ऽपि यथासिद्धानामेव प्रधानानामनुवाद्यत्वादविवक्ष्यमाण-
मप्यापद्येतैवेत्याशङ्कते * ननु चेति * विध्यपरिगृहीतत्वात्प्रती-
तमप्यनादृत्यमिति परिहरति * सत्यमिति * प्रधानोद्देशेनेतिकर्त-
व्यताख्यविशेषणविधायिनि प्रकरणाम्नानानुमिते वाक्ये प्रधानसा-
हित्याविवक्षयामप्यङ्गप्रधानवाक्यसमूहात्मके महावाक्ये साधनेति-
कर्तव्यताविशिष्टभावनाविधायिनि फलं प्रति प्रधानसाहित्यस्य वि-
वक्षितत्वाद्वैरूप्यादितिकर्तव्यतान्वये ऽपि विवक्षा भविष्यतीत्याश-
येन कथमितरेतरयोगो विधितः शक्यो वारयितुमिति पृच्छति * क-
७८४।५ थमिति * विशेषणाविध्युत्पाद्यत्वेन विशिष्टविध्यर्थस्य विशेषणवि-
धिसम्भवानुरूपस्याभ्युपगमनीयत्वाद्विशेषणविधौ च प्रधानसाहि-
त्यस्याशक्याविवक्षत्वा(त्प्रत्येकमिति कर्तव्यतान्वितैः प्रधानैः संहत्य फलं
कुर्यादिति विशिष्टविध्यर्थावगतेः)[1] विशिष्टविधावपीतिकर्तव्यतान्वये
प्रधानसाहित्यस्याशक्याविवक्षेत्याशयेनोत्तरमाह * इह हीति * ग्रहपदे
च प्रतिपादकांशेन ग्रहोद्देशाद्विभक्त्यंशेन चैकत्वोपादानाद्वैरूप्यप-
रिहारः शक्यनापि धातुरूपेण तु शब्दप्रधानवाचिन्यंशभेदाभावाद्दर्श-
पूर्णमासपदे ऽपि समस्यमानपदद्वयातिरिक्तसमाख्यशब्दरूपाभावा-
देकेनैव प्रधानवाचिना शब्देन स्वरूपेण प्रधानोद्देशे समासरूपेण
साहित्योपादानाद्वैरूप्यपरिहारः शङ्कामपि नाधिरोहतीत्याह * न
हीति * इति कर्तव्यतान्वये साहित्याविवक्षामुपसंहरति * तस्मादिति *
साहित्याविवक्षायामेकस्यैव प्रधानस्येतिकर्तव्यतान्वयापत्तेरानन्त-
र्यविशेषावस्थासिद्धेः सर्वेषामितिकर्तव्यतान्वयो न स्यादित्याशङ्का-
निरासार्थं तत्रेतिभाष्यमवतारणपूर्वं व्याचष्टे * तद्धीति * प्रतिश-
ब्देन सर्वेषामितिकर्तव्यतान्वयित्वं यत्सूचितं तद्दर्शयतीत्यर्थः । आ-
नन्तर्यमचोदनेत्यनेन न्यायेनानन्तर्यस्याकारणतया बुद्धिनिवृत्तः सन्नि-
धित्वेनानुषङ्गाधिकरणे ऽभिहितत्वादविशेषोक्तिः यदि कस्य चित्प्र-
धानस्येतिकर्तव्यतान्तरं निराकाङ्क्षीकरणसमर्थं साक्षात्कृत्योपदि-
ष्टं स्यात्ततस्तद्व्यतिरिक्तानां प्रधानानामितिकर्तव्यतात्मकं प्रकरणं
स्यान्न त्वेतदस्तीत्यभिधानार्थमितिकर्तव्यताया इति भा याव-

१) भय पा॰ २ पु॰ ना॰ ।

वान्यूनत्वादध्याहारेण व्याख्यातु * मेकस्यापि वेत्युक्तम् * अस्येति भाष्यावयवव्याख्यानायास्य च भाष्यकथम्भावरूपस्य प्रकरणाख्यप्रकरणिनो ग्रहणासामर्थ्यस्या * विशेषादित्युक्तम् * सामान्यन्यायमुक्त्वा प्रकृते योजनार्थं तस्मादिति भाष्यं व्याचष्टे * ततश्चेति * सूत्रदूषणभाष्यशेषस्य तदिहापीष्यते इत्यादिवार्त्तिकेन प्रागेव व्याख्यातत्वात्स्वमतेन वचनादिति चेदिति सूत्रानुभाषितपूर्वपक्षनिरासार्थमत्रेति भाष्यमवतारणपूर्वं व्याचष्टे * एवं चेति * अदृष्टाय भविष्यन्तीति भाष्येण पूर्वदेवताकल्पकत्वस्यापि शङ्कितत्वाद् गौणत्वनिरासस्योपलक्षणार्थत्वसूचनायादृष्टार्थत्वं चेत्युक्त्वा देवतान्तरोक्त्या व्याख्यातं मुख्यत्वसम्भवं गौणत्वस्य पुरस्ताल्लिङ्गाधिकरणे प्रसिद्धकर्माङ्गभूतदेवताप्रकाशनसम्भवे च देवतान्तरकल्पकत्वस्य ततश्चावचनं तेषामितरार्थं प्रयुज्यते इति नवमाधिकरणसूत्रे निरासादित्यर्थः। पुरस्ताच्छब्दो भाष्यस्थोक्तशब्दव्याख्यार्थत्वाद् गौणत्वनिरासमात्रविषयः। प्रश्नपूर्ववचनसूत्रानुभाषितकृत्स्नोपदेशसमाध्यर्थं कस्तर्हीत्यादिवाक्यानीत्यन्तं भाष्यं व्याचष्टे * अत इति* वाक्यबहुत्वोपपादनार्थं येषामित्यादि वदतीत्यन्तं भाष्यं व्याचष्टे *न हीति* न चेति भाष्यावयवव्याख्यार्थो ऽन्योन्यानपेक्षनानाप्रयोजनयुक्तत्वोक्तीर्भिन्नेत्यनेनोपपादिता । तस्मादित्यादिना पुरस्तादित्यादिना पुरस्तात्पदानामनुपङ्गोक्त्या वृत्त्या प्रयोगभेदे ऽभिहिते कथन्तर्हि साधारणानीत्यादिभाष्येण पुरस्तात्पदानां तन्त्रतोक्तेत्याशङ्क्य सर्वेषां सूक्तवाकानां मध्ये ये पौर्णमासीदेवताप्रकाशकत्वात्पौर्णमास्यङ्गप्रहरणप्रयोगभाजो ये चामावास्यादेवताप्रकाशकत्वादामावास्याङ्गप्रहरणप्रयोगभाजः सूक्तवाकास्तदवयवभूतानां कतिपयानां पदानां कर्मकाले तन्त्रेण पठनीयतावज्ञानाकालीनसर्वसाधारणतन्त्रपाठबलेन सूचयितु तन्त्रतोक्तिरिति तेनेत्यनेनोक्तम्। अत.समुदायस्यार्थाप्रतिपादकत्वात्प्रातिपदिकोक्तं सूक्तवाकत्वं विभक्त्युक्तं च साक्षात्साधनत्वाख्यकरणत्वं नास्तीत्युपसंहारार्थं तस्मादिति भाष्यं बहुषु सूक्तवाकेष्वेकवचनायोगशङ्कानिरासार्थं च सूक्तवाकेतिभाष्यं स्पष्टत्वादव्याख्याय पदेनाप्यपगतेनेत्यनुभाषणसूत्रस्थभाष्योक्तशङ्कानिरासार्थं सूक्तवाकेनेति भाष्यं व्याचष्टे * येन केन चिदिति * कृत्स्नस्य हीति भाष्योक्तशङ्कोपपत्तिनिरासार्थं सूक्तवाकेनेति भाष्यं व्याचष्टे *यदिवेति* भाष्यं लिङ्गाद्देवतापदोत्कर्षवद्वाक्यात्समभिव्याहृतानामपि पदानामुत्कर्षाल्लिङ्गोक्तिरुपलक्षणार्थेत्येवं व्याचष्टे * तत्रेति * तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्याचष्टे * इतीति *

भाष्योक्तमपि कृत्स्नोपदेशपरिहारं दूषयितुमारभते * इदमपीति* यथा वैश्वानरं द्वादशकपालं निर्वपत्पुत्रे जातइति जातेष्टयुपक्रमाद्य-स्मिन्जातएतामिष्टिंनिर्वपतीति च जातेष्टयैवोपसंहारादेकवाक्यत्वस्य वैश्वानरवाक्ये प्रत्यक्षत्वेन यदष्टाकपालो भवतीत्यादिवाक्यबहुत्वं न युक्तं तथेहाप्युपक्रमोपसंहारस्य तन्त्रपदयोगेनैकवाक्यत्वस्य प्रत्यक्षत्वाद्वाक्यबहुत्वानुपपत्तेर्भाष्योक्तमपि समाधानं न युक्तमित्यर्थः । भिन्नकर्मस्थाभिन्नदेवताप्रकाशनसामर्थ्येनान्यो ऽन्यानपेक्षत्वाद्वाक्यबहुत्वानुपपत्तेर्भाष्योक्तमपि समाधानं न युक्तमित्यर्थः । भिन्नकर्मस्थभिन्नदेवताप्रकाशनसामर्थ्येनान्यो ऽन्यानपेक्षत्वाद्भिन्नप्रयो-
७८५।२ जनत्वाच्चैकवाक्यता न युक्तेत्याशङ्क्याह * न हीति * यदनेन हविषेति प्रस्तरप्रकाशनस्य प्राधान्याभ्युपगमात्प्रस्तरान्वयित्वेनष्टदेवताप्रकाशनस्यैकप्रयोजनत्वं यदनेन हविषेति च प्रधानभूतानां तन्त्रपदानां क्रीणातिवदावृत्त्ययोगादेकेन देवतापदेनान्वये देवतान्तरपदानां तन्त्रपदैर्विना साकाङ्क्षत्वमित्यर्थः । सुभाषितोक्तिनिमित्तत्वात्सूक्तवाकशब्दस्येष्टानां च देवतानामाज्यादिहविष्कृदिष्टत्वेन सुष्टुक्तस्यादिष्टदेवताप्रकाशनस्यैव प्राधान्यावगतेः प्रत्येकवाक्यपरिसमाप्तिनिमित्तो वाक्यभेदः स्यादित्याशङ्क्याह * तस्मादिति * यस्य पिता पितामहः सोमं न पिबेदित्यादिवदर्थतो वाक्यभेदे ऽपि तत्र पदात्मकशब्दान्वयादेकवाक्यत्वसिद्धिः परमार्थतस्तु प्रहरणाङ्गत्वोपदेशात्प्रह्रियमाणप्रस्तरप्रकाशनप्राधान्यापत्तेः या ते अग्ने ऽयाशया या ते अग्ने रजाशया या ते अग्ने हराशयेत्युपसन्मन्त्रशेषः तनूर्वर्षिष्ठेत्यादिरग्नयेत्वामह्यं ददातु बृहस्पतये त्वा मह्यं वरुणो ददात्वित्येवमादि दक्षिणामन्त्रशेषः सो ऽमृतत्वमशीयेत्यादिरादिशब्दोक्तश्चैष एकपद्यूर्ज्जे द्विपदीत्यादिसप्तपदीक्रमणमन्त्रशेषो भवेत्यादिर्जुहूरस्युपभृदसि ध्रुवासीत्याज्यासाधनमन्त्रशेषश्च घृताचीत्यादिर्यथावृत्त्या प्रयुज्यते तथात्रापि पुरस्तात्पदानामावृत्त्या प्रयोगापत्तेर्याज्ञिकानां तत्र प्रयोगो विरुध्यतेत्याह * यदि चेति * एकवचनालोचनया चैकस्यैव सूक्तवाकस्य प्रयोगापत्तेः पौर्णमासीदेवतावाचिनः शब्दास्ते पौर्णमास्यां प्रयोक्तव्या इति भाष्ये बहुवचनं विरुध्येतेत्याह * प्रस्तरेति * वाक्यबहुत्वनिरासमुपसंहरति * तस्मादिति * अतो ऽन्यः परिहारो वाच्य इत्याह * अतश्चेति *तस्मादाह* स उच्यत इति* यथैकस्मिन् विधायनेकबिन्दुसमुदाये च संसर्गिद्रव्यरूपत्वेनानेकेषामपि किं बिन्दूनां संयोगे सत्येकीभावादेकवचनान्त एव तोयशब्दः प्रयुज्यते न घटव-

द्विबहुवचनान्तः विभागे च सति पृथग्भावान्नानापत्तेर्द्विबहुवचना-
न्तस्तथैकस्मिन् देवतापदे ऽभितस्तन्त्रपदोपेते तत्समुदाये चेष्टदेवता-
प्रकाशननिमित्तत्वात् सूक्तवाकस्येष्टदेवताप्रकाशनानामनेकेषा अ-
थैकप्रयोगवर्त्तित्वरूपं संयोगे सत्येकीभावादेकवचनान्त एव प्रयुज्य-
ते भिन्नप्रयोगवर्त्तित्वरूपे च विभागे सति पृथग्भावमात्रापत्तेः सूक्त-
वाकशब्दएव प्रयुज्यते न सूक्तवाकार्धशब्दः ततश्च विभागे ऽपि
सूक्तवाकत्वं नापैतीत्याशयः । तथात्वमुपपादयति * सूक्तवाको
हीति * अग्निरिदं हविरजुषतेत्यादीष्टदेवताप्रकाशनसामर्थ्यालोच-
नया प्रयोगवर्त्तिदेवतापदसहितस्याभितस्तन्त्र पदोपेतस्ये-
ष्टदेवताप्रकाशकपदसमूहस्य सूक्तवाकत्वावधारणाद्यत्र या-
वत्यो देवता इष्टा सूक्ते तावद्देवतापदसमूहस्त-
स्य कृत्स्नसूक्तवाकत्वोपपत्तेरित्युक्ते ऽभिन्नकर्मसङ्गतिभिन्नदेवता-
प्रकाशनानां भेदात्कथं तत्कारिणां पदसमूहानामेकशक्यतेत्याशङ्क्य
देवताप्रकाशनस्येष्टत्वप्रयुक्तत्वादिष्टत्वरूपप्रकाश्यैकत्वेन प्रकाशनैक-
त्वसूचनार्थं * प्रयोजनतश्चेत्युक्तम् * प्रत्युत देवतान्तरपदसाहि-
त्ये देवतान्तराणामनुद्दिष्टत्वेनानुक्तत्वादजुषतेत्युद्दिष्टत्वरूपोक्तवचन-
स्यानृततया दुष्टत्वापत्तेर्दुरुक्तवाकः स्यादित्याह * प्रयोगेति *
सामान्यत समवेतार्थपदप्रयोगमात्रेण सूक्तवाकसाकल्यसिद्धेर्देव-
तान्तरपदसाहित्ये त्वसूक्तवाकत्वापत्तिरित्युक्त्वा पौर्णमास्यमावा-
स्ययोर्विभज्य प्रयोगे योजयति * तेनेति* निष्कर्षसिद्ध्यै युक्त्यपेक्षा- ७८६।१
पाठेनाभितः पदानां कर्मकाले ऽपि तन्त्रप्रयोज्यत्वावगतिस्तन्नूर्वपि-
ष्ठेत्याद्यनुषङ्गपूरितस्य यात अग्नेइत्यादेर्मन्त्रस्यादिशब्दोक्तस्य चाशा-
स्ते ऽयं यजमानो ऽसावसावित्यादेः सर्वनामनिर्देशद्वाराम्नातदेवदत्ता-
दिनामपूरितत्वात्तस्य मन्त्रस्य यथायुक्तिसहितेन पाठेन कार्त्स्न्याव-
धारणेति दृष्टान्तार्थः । समवेतार्थपदप्रयोगमात्रेणेष्टदेवताप्रकाशनादन-
न्तरितत्वोक्तिसिद्धावपि प्रहरणे यथाम्नातसूक्तवाकोपदेशाद्विभज्य
प्रयोगेन कृत्स्नेन सूक्तवाकेन प्रहरणं कृतं स्यादित्याशङ्क्याह * अत-
श्चेति * सूक्तवाकशब्दस्य रूढित्वे सत्येकदेशप्रयोगे कार्त्स्न्यं बाध्ये-
त यौगिकत्वात्समवेतार्थपदसमूहमात्रे ऽवयवार्थोपपत्तेः । कार्त्स्न्या-
बाधाद्द्विधमानाः प्रयोगसमवेता देवता अनतिक्रम्य याव-
त्सूक्तवाकस्तावत्साध्यत्वात्प्रहरणस्य कृत्स्नेन साधितत्वोपप-
त्तिरित्यर्थ । कृत्स्ने तर्ह्यध्येतृणां सूक्तवाकप्रसिद्धिर्न
युज्येतेत्याशङ्क्याह * तेनेति * (स्वाध्यायकाले प्रयोगभे-
दानालोचनाद्दर्शपूर्णमाससमवेतदेवताप्रकाशननिमित्तं सर्वप्राकृत-

देवत्यस्य पदसमूहस्य सूक्तवाकत्वं कर्मकाले च प्रकृतिविकृतिभेदाद्वैविध्यमित्येवं त्रेधावस्थितः सूक्तवाको ज्ञातव्य इत्यर्थः । त्रैविध्ये सत्यपि कथं व्यवस्थेत्याशङ्क्याह * सूक्तवाक इति * यत्र स्वाध्यायकाले प्रकृतौ विकृतौ वा यादृशः सूक्तवाकोऽस्माभिर्निरूपितस्तत्रैव स सूक्तवाकोऽन्यत्र त्वसमवेतार्थनिरूपणात्सूक्तवाकत्वं जहातीत्यर्थः। बहुत्वमपि सूक्तवाकस्य सम्भवति किमुत द्वित्वमित्येवं भाष्यङ्गमयितव्यमित्याह * भाष्ये ऽपि चेति * उभे पौर्णमास्यमावास्ये प्रति स्वाध्यायकाले प्रकरणाविभागमालोच्य यः कृत्स्नसूक्तवाकशब्दोऽध्येतृप्रसिद्धः सायथार्थं निष्कृष्य प्रयोगे ऽपि स्वदेवतापदसाहित्यमात्रे एव। कृत्स्नसूक्तवाकशब्दो युक्तिसहितेन पाठेन कल्पित इत्येवं सूत्रङ्गमयितव्यमित्याह * तथेति * भाष्योक्तसूत्रव्याख्यानिरासायैवकारः । सम्भवामात्राशयत्वेन बहुत्वोक्तिव्याख्याने ऽपि न च तेषामित्यादिभाष्यविरोधः प्रयोगवर्त्तिदेवतावाचिपदसमूहस्याभितस्तन्त्रपदोपेतस्यैकसूक्तवाकत्वाभ्युपगमे दुःपरिहर इत्याशङ्क्य तेषामभितस्तन्त्रपदोपेतानां भिन्नप्रयोगवर्त्तिदेवताचिनां पदानामन्योन्यसमूहः कश्चिदेकप्रयोगसमवेतमर्थं न वदति तस्मान्न भिन्नप्रयोगवर्त्तिदेवतापदसमूहः कर्मकाले सूक्तवाकः प्रयोगसमवेतार्थाऽप्रकाशकत्वादेव च न करणमिति भिन्नप्रयोगस्थदेवतापदसमूहस्य कर्मकाले सूक्तवाकत्वनिरासार्थं भाष्य न त्वेकप्रयोगस्थदेवतापदमूहस्य सूक्तवाकत्वनिरासार्थं सूक्तवाकेति भाष्यं च[1]) स्वाध्यायकाले सर्वप्राकृततद्देवत्ये पदसमूहे प्रकृतौ च पौर्णमास्याख्ये ऽमावास्याख्ये च यागत्रयसमुदाये ऽनिष्कृष्टप्रयोगस्थदेवतामध्ये पदसमूहे विकृतौ । सूर्यादिपदमध्ये पदसमूहे सूक्तवाकस्येष्टदेवताप्रकाशकत्वसमानरूपस्य संसर्गिद्रव्यवत्संसृष्टपाठे सत्येकत्वादेकवचनोपपादनार्थमित्येवं विरोधपरिहारसूचनायोक्तेन गमनिकाप्रकारेण सर्वेषां भाष्याणामविरोध इत्याह * इतीति * सूत्रभाष्यवार्त्तिकयोर्वा सर्वशब्दः ।

॥ काम्ययाज्यानुवाक्याकाण्डानां काम्यमात्राङ्गताधिकरणम् ॥ ७ ॥

लिङ्गक्रमसमाख्यानात् काम्ययुक्तं समाम्नानम् ॥ २० ॥

७८७।१ इहेत्याद्युदाहरणभाष्यं तात्पर्यतो व्याचष्टे *येनेति* तदेता इति

१) अथ पा० २ पु० ना० ।

सन्देहभाष्यं विचारस्यानन्तरसङ्गतिं पादसङ्गतिं च सूचयन् व्याचष्टे * तानीति * प्रमाणान्तरगम्यक्रतुविशेषान्वयविशेषापेक्षं लिङ्गं विनियोजकं निरपेक्षं वेति विचारात्पादसङ्गतिः पूर्वपक्षवचनव्यक्तौ क्रत्वन्वयबोधकक्रमोल्लङ्घनोक्त्या सिद्धान्तवचनव्यक्तौ क्रमानुसारोक्त्या सूचिता श्रुतेर्लिङ्गापेक्षत्वे पूर्वाधिकरणे ऽनेनोक्ते प्रसङ्गाल्लिङ्गस्यापि जघन्यप्रमाणापेक्षत्वाभिधानादनन्तरसङ्गतिः । क्रमोक्त्या समाख्याप्युपलक्षिता प्रकारोक्त्या लिङ्गस्यान्यसम्बन्धापेक्षोक्ता । याज्याकाण्डमित्युपक्रमादेव सर्वत्रेत्युपसंहाराच्चोदाहरणबहुत्वादरप्रतीयमानस्य प्रयोजनमाह * उदाहरणानि * समाख्यानविशेषणस्य सामिधेनीसाप्तदश्यवत्केवलाग्निदेवत्यपाथिकृतीयादिष्टिविषयत्वाल्लिङ्गविशेषणस्य विलिङ्गसौमारौद्रेष्टिविषयत्वात्क्रमविशेषणस्य समानलिङ्गानेकेष्टिविषयत्वादुदाहरणबहुत्वेत्यर्थः यावत्किञ्चित्प्रकरणानाम्नातयाज्यानुवाक्याकं काम्य चैन्द्राग्न्यादिकर्म्म तत्र याज्यानुवाक्या यथालिङ्गं भवेयुरिति पूर्वपक्षोक्त्यर्थं किं तावदिति भाष्यं व्याचष्टे * तत्रेति * मन्त्राणां देवतादिस्वरूपान्वये नैष्फल्यापत्तेः क्रत्वपूर्वसाधनांशान्वये नवमे वक्ष्यमाणे ऽप्यध्ययनविधिनैव दृष्टार्थत्वापरित्यागेन पुरुषार्थानुबन्धित्वावगमे ऽपि मन्त्रप्रकाश्यदेवतादेः क्रतुमात्राणामङ्गत्वात्क्रतुक्रत्वन्वयसिद्धेर्लिङ्गस्य प्रकणादिगम्यक्रतुविशिषान्वयानपेक्षत्वसूचनार्थं क्रममिति भाष्यावयवं व्याख्यातुं लिङ्गादित्युक्तम् । अध्ययनविधिना सामान्यतः क्रत्वन्वयाविशेषाङ्गभूते देवतादौ मन्त्राणां लिङ्गविनियोज्यत्वावगतेर्लिङ्गस्य च सामर्थ्यात्मकत्वात्सामर्थ्यस्य चार्थाद्वा कल्पनैकदेशत्वादित्यत्र सन्दिग्धार्थनिर्णयमात्रे व्यापाराभिधानादवगतक्रतुविशेषान्वयानां च मन्त्राणां कया द्वारेषां क्रतुविशेषोपकारितेति द्वारविशेषे सन्देहानुदयात् लिङ्गनाविनियोगापत्तेः प्रकरणादिगम्यक्रतुविशेषान्वयसापेक्षस्यैव लिङ्गस्य विनियोजकत्वावसायादासां याज्यानुवाक्यानामिष्टिविधायिब्राह्मणप्रकरणे ऽनाम्नानात्प्रकरणेन क्रतुविशेषान्वयानवगमे ऽपि क्रमसमाख्याभ्यां क्रतुविशेषान्वये ऽवगते द्वारविशेषं प्रति सन्देहोत्पत्तौ लिङ्गेन तदङ्गभूतदेवताप्रकाशनद्वारत्वनिर्णयादेतद्याज्यानुवाक्यासमाम्नान काम्येष्टियुक्तमित्येव सूत्रव्याख्यार्थं लिङ्गेत्यादिभाष्यसूचितामुपपत्तिमाह * नासतीति * लिङ्गक्रम इति भाष्ये क्रमोक्त्या समाख्याप्युपलक्षिता नन्वितिभाष्येण वक्ष्यमाणलिङ्गबलीयस्त्वविरोधापत्तेः क्रमाद्यपेक्षा न युक्तेत्याशङ्क्य लिङ्गानपेक्षितस्य क्रमादेर्लि-

ङ्गादौर्बल्ये ऽपि लिङ्गापेक्षितस्य क्रमादेर्बलीयस्त्वाविरोध इत्येवं प-
रिहारार्थं सत्यमिति भाष्यं व्याचक्षाणः । पूर्वार्धमुपपादयति *
लिङ्गं हीति * देवतात्वाधिष्ठानाग्न्यादिरूपवाची देवताशब्दः । सा-
मान्यते ऽग्न्याद्यन्वये ऽनवगते तद्विशेषसन्देहाभावेनाग्न्यादिस्वरूपे
ऽपि लिङ्गेनाविनियोगात्सम्भावनामात्रं लिङ्गोक्तम् । उत्तरार्द्धमुपपा-
दयितुमारभते * यज्ञेति * आश्रावयेत्यादीनामपि वै सप्तदशः प्र-
जापतिर्यज्ञे यज्ञत्वापतइत्यादिवाक्याल्लवनादिमन्त्राणां च प्रकरणा-
त्क्रतुविशेषान्वये ऽवगते लिङ्गस्य विनियोजकत्वदर्शनाद्वाक्यप्रकर-
णोक्तिभिन्नदेशानामिति ततः श्रावयतीत्यादीनां क्रमानवगतक्रतुविशे-
षान्वयानां समाख्यापेक्षोक्त्या क्रमापेक्षा सूचिता। प्रश्नपूर्वं क्रमसमा-
ख्यापेक्षोपपादनार्थं कुत इत्यादि भाष्यं व्याचष्टे* न चेति *याज्यानुवा-
क्यासमाख्यां विना ऽऽग्नेयानामृचां याज्यानुवाक्याकार्यांशे सामिधेनी-
कार्यांशे च विनियोग इत्यज्ञानात्समाख्यापेक्षणीया तावच्छब्दाच्च क्रमं
विना कस्यैन्द्राग्नयाज्यानुवाक्याद्वयस्य कस्यामैन्द्राग्न्यामिष्टौ विनियो-
ग इत्यज्ञानात् क्रमो ऽप्यपेक्षणीय इत्यर्थः । किमर्थमाश्रयणीयेत्यपेक्षा-
यामाह * तया हीति * द्वयमप्युपपादयति * इज्यत इति *
एवं च सति यज्ञविशेषं प्रति सन्देहात्तन्निर्णयो भविष्यतीत्याह *
ततश्चेति * याज्यासमाख्याया योगगनकार्यविशेषान्वयावगमे ऽपि
काम्येष्टिविषयत्वं सूत्रोक्तं न सिध्यतीत्याशङ्कानिरासार्थत्वेन याचे
त्यादिभाष्यं व्याख्यातुं शङ्कते * न न्विति * व्याचष्टे * कथ-
मिति * याज्याकाण्डमित्येतावन्मात्रसमाख्यानभ्युपगमे ऽपि क्र-
मात्काम्येष्टिविषयत्वं सेत्स्यतीति स्वयमन्यथा परिहरति * अपि
चेति * विशिष्टक्रमकेष्टिविशेषांशे क्रमेण समाख्याबाधे ऽपि कार्य-
विशेषांशे ऽपेक्षणाद्याज्यात्वविरोधः सिद्धान्तमुपसंहरति * तस्मा-
दिति * क्रममात्रात्समाख्याद्वा क्रत्वन्वयसिद्धेर्विशेषणद्वयानर्थक्यश-
ङ्कार्थमथेति भाष्यं व्याचष्टे*किमर्थमिति * पाथिकृतीयादिषु केवला-
ग्निदेवत्ये ऽष्टौ साप्तदश्याम्नानेन सामिधेनीकार्यस्या ऽप्याग्नेयर्ग्द्वया-
काङ्क्षस्य सद्भावात्सामिधेनीकार्ये ऽपि लिङ्गक्रमोपपत्तेः समाख्यान-
पेक्षणे प्रथमातिक्रमेकारणाभावात्सामिधेनीकार्य एव विनियोगापत्तेः
समाख्याविशेषणार्थत्वोक्त्यर्थमस्तीति भाष्यं व्याचष्टे * तत्रेति *
भ्रातृपात्यादिविशेषणसूचनायाग्नेयादीनीत्यादिशब्दः नत्रैवेत्येवकारेण
सामिधेनीकार्ये ऽपीति भाष्यस्थो ऽपि शब्दो मृदूक्त्यर्थत्व नैवकारार्थं
७८८।२ व्याख्या तत्समाख्यामात्रात्तर्हि पाथिकृतीयादिषु याज्याकार्ये विनियो-
गासिद्धेर्लिङ्गक्रमविशेषणानर्थक्यमित्याशङ्कार्थमथेति भाष्यं व्याचष्टे *

तेन तर्हीति * येन कारणेन समाख्यानादेरे ऽनिष्टापत्तिस्तेन कारणेन समाख्यानादित्येतावन्मात्रमस्त्वित्यर्थः । समाख्यानादित्येतावत्युक्ते याज्यानुवाक्याकार्यातिरिक्तानां विलिङ्गानामपि चर्चां याज्यानुवाक्याकार्य एव विनियोगापत्तेस्तासां चानाकाङ्क्षितत्वादशक्तत्वाच्च याज्यानुवाक्याकार्ये विनियोगायोगाल्लिङ्गक्रमानादरात्सामिधेनीकार्ये ऽपि विनियोगादानर्थक्यापत्तेर्लिङ्गक्रमात्समाख्यानाच्चेत्युक्ते तु पूर्वस्या इष्टेः स्वानुरूपयाज्यानुवाक्याम्नानात्तदपेक्षयाज्यानुवाक्याकार्ये पाठनातीने क्रमत्वादिलिङ्गत्वापूर्वोपयाज्यानुवाक्याकार्ये विनियोगायोगादुत्तरेष्टिसामिधेनीकार्ये समाख्यानावस्थितलिङ्गक्रमाभ्यां विनियोगः सेत्स्यतीति लिङ्गक्रमविशेषणार्थवत्त्वोक्त्यर्थं सर्वा इति भाष्यं व्याचष्टे * नादति * आग्निवारुणस्य सोमारौद्रस्य वा कर्मणः स्वानुरूपयाज्यानुवाक्यापूरितत्वाद्याज्यानुवाक्यानाकाङ्क्षत्वे ऽभिहिते लिङ्गविनियोज्यस्यानुरूपयाज्यानुवाक्याबाधेनैन्द्रीवद्गन्तरविनियोगशङ्कानुदयार्थं क्रमातिरिक्तबलवत्प्रमाणाबाधः क्रमोक्त्या सूचितः । तल्लिङ्गमाश्रेयीत्येनोक्ताविरोधविषये वा समाख्याया निवृत्तव्यापारतोक्ता । विषयप्रदर्शनार्थं यथोक्तभाष्यं व्याचष्टे * तामिति * मनोऽर्चामग्निरुक्थपुरोहित इत्याद्यानां पृथुयाजा इतिद्वयोश्च धाय्यासमाख्यात्वाज्यसाध्यत्वान्निकाय्यधायामानर्हाविर्धिवाससामिधेनीष्विति च सामिधनीषु प्रक्षेप्यानां धाय्यात्वस्मृतेः समाख्यायानुगृहीता भवतीत्युक्त्यर्थत्वेन ता इति भाष्यव्याख्यार्थम् * ता इत्युक्तम् * सोमारौद्रीष्टिसामिधेनीक्रमोक्त्यर्थत्वेत्स्यतीनानागतोक्ती व्याख्यातुम् * तत्रापि न्वित्युक्तम् * लिङ्गसमाख्यानादित्येतावन्मात्रे तर्ह्याग्नेयीनामृचां व्रातपतीयाद्याज्यानुवाक्याकार्ये मनोऽर्चां पृथुयाजवत्योश्च सोमारौद्रीष्टिसामिधेनीकार्ये विनियोगसिद्धेः क्रमविशेषणमनर्थकमित्याशङ्क्याह * यद्विचेति * क्रमेण तर्हि समाख्याबाधाद् व्रातपतीयादौ सामिधेनीकार्ये विनियोगः स्यादित्याशङ्क्य क्रमविनियोगविषये समाख्याबाधो ऽपि याज्याकार्यविषये विरोधाभावादबाध इत्येव परिहारसूचयना * येतीत्युक्तम् * विशेषणद्वयार्थवत्त्वोपसंहारार्थं तस्मादिति भाष्यं ७८९।४
व्याचष्टे * तस्मादिति *

॥ आग्नीध्रोपस्थाने प्राकृतानां मन्त्राणां
विनियोगाधिकरणम् ॥ ८ ॥

अधिकारे च मन्त्रविधिरतदाख्येषु शि-

ष्टत्वात् ॥ २१ ॥

लिङ्गस्य सामान्यसम्बन्धसापेक्षस्य विनियोजकत्वे ऽभिहि प्रसङ्गाल्लिङ्गवत्याः श्रुतेरपि सामान्यसम्बन्धापेक्षया विनियोजकत्वाभिधानादनन्तरसङ्गतिं पादसङ्गतिं च स्पष्टत्वादनुक्त्वा प्राकृतान् विशेषरूपेणाम्नातानामपि विशेषरूपेण विध्यभावे विनियोगाकाङ्क्षत्वात्तासामेवाग्नेय्यादिशब्देन ग्रहणापत्तेराग्निर्देवता ऽस्या इति सन्निहितवाचिसर्वनामार्थवृत्तिनाग्नेयीशब्देन प्रकृतानामेव ग्रहणावगते पूर्वपक्षायोगात्सन्देहायोगमाशङ्क्य विशेषरूपाम्नानाद्विशेषरूपेण विहितानामेव प्रकृतोक्त्या विवक्षितत्वादग्निदेवतात्वोपलक्षितस्य वान्यत्र पदार्थस्यात्रोपस्थानाङ्गत्वे विधेरुपलक्षणान्तरानपेक्ष्यत्वेन सन्निहितत्वस्योपलक्षणत्वेनानन्वयादविवक्षितत्वावगतेराग्नेयीमात्रग्रहणावगमात्पूर्वपक्षसम्भवेन सन्देहोपपत्तिसूचनार्थं विषयं शोधयन्ति * ज्योतिष्टोम इति * सन्निहितत्वाविवक्षया सामान्योक्त्या सूचिता परमतेन दाशतयीभ्य एव दाशतयीभ्यो ऽपीति वा ऽध्याहृतशब्दद्वयपूर्वं पूर्वपक्षवचनव्यक्तिभाष्यावृत्त्या त्रिविधसन्देहोक्त्यर्थत्वेन तत्रेतिसन्देहभाष्यं व्याचष्टे * तत्रेति * सन्देहभाष्यात्पक्षद्वयप्रतीतेस्त्रैविध्योक्तिरयुक्तेत्याशङ्क्य तस्माद्दाशतयाल्लिङ्गवन्तो मन्त्रा ग्रहीतव्या इत्यनेन भाष्येणाप्रकृतमात्रपक्षमुक्त्वा नत्वित्यनेन सिद्धान्ते शङ्किते नेत्युच्यत इत्यनेनाविशेषपक्षोपक्रमाल्लिङ्गेन प्रत्ययो भवति दाशतयेनापि कर्तव्यमित्यादिना विशेषपक्षस्यैव स्पष्टीकरणात्पक्षत्रयप्रतिभानमाह * ग्रन्थादिति * अप्रकृतमात्रपक्षं दूषयितुमुपक्रमते * न त्विति * प्रमाणाभावमेवोपपादयितुं क्लृप्तसामान्यसम्बन्धात्प्रकृतग्रहणसम्भवे कल्पनागौरवापादककल्प्यसम्बन्धादप्रकृतग्रहणायोगादविशेषपक्षो ऽपि तावदतिक्लेशसाध्यो प्रकृतमात्रनिर्धारणं तु न कथं चित्सम्भवतीत्याह * महता हीति * निर्धारणाख्यनिश्चयायोगमुपपादयितुमाह * येन हीति * आग्नेयीत्येवमादिभिर्हीति भाष्योक्तस्याग्नेयीशब्दाविशेषात्मकस्य प्रमाणस्य प्रकृतासाधारण्ये ऽप्यन्यत्र विनियुक्तत्वात्प्रकृतानामग्रहणमित्याशङ्क्याह * न चेति * पुरोडाशाश्रयणे विनियुक्तस्य कपालस्य तुषोपवापे विनियोगवद्विनियुक्तविनियोगो ऽप्यविरुद्ध इत्याशयः । कथं तर्हि भाष्ये पक्षत्रयोक्तिरित्याशङ्क्याह * न चेति * आदौ सन्देहकाले दाशतयीभ्य इत्यनेनाप्रकृतवाचिना शब्देना ऽपिशब्दरहितेनाविशेषपक्षपरिग्रहादप्रकृतमात्रभ्रान्तिरिति वदता ऽपिशब्द एवाध्याहार्यो नवशब्द

इति सूचितं सन्देहभाष्यादप्रकृतमात्रपक्षाप्रकाशने ऽपि शिष्टत्वादिति हेत्वर्थसूत्रावयवव्याख्यार्थं यश्चार्यामित्यादिभाष्यात्तत्प्रकाशनं भविष्यतीत्याशङ्क्याह * यत्त्विति * सौत्रप्रतिज्ञासूचितस्याग्नेयीशब्दविशेषस्य हेतोराग्नेयीत्वेमादिभिर्हीतिभाष्योक्तस्याविशेषपक्षसाधनत्वादधिकारे प्रकरणे यो लिङ्गमालोच्य मन्त्रविधिः सो तदाख्येषु प्रकृतेषु मन्त्रेषु चेतिलिङ्गक्रमसमाख्यानादिति पञ्चमी लिङ्गशब्दमात्रात्परा ल्यब्लोपे कल्पयित्वा प्रतिज्ञानार्थावगतेः सिद्धान्तनिरासार्थत्वेन सौत्रहेतूपपत्तेस्तद्व्याख्यार्थेनापि भाष्येण नाप्रकृतमात्रपक्षः प्रकाशयतइत्याशयः । कथमाग्नेयीत्येवमादिभिर्हीतिभाष्योक्तस्य प्रामाण्यस्याविशेषपक्षसाधकतावसीयतइत्यनेनोक्तं प्रौढिप्रदर्शनायाप्रकृतमात्रपक्षमपि समर्थयितुमारभते * यदि त्विति * न्यायाकौशलसूचनायोपहासार्थं * श्रोत्रियस्योपपत्तिरित्युक्तम् * कीदृशीत्यपेक्षायामाह * प्रकृतस्येति * यस्यौदनादेः पक्वस्य यामः प्रहरो यतो गतः तस्य गतरसत्वात्तत्सामान्येनान्यदपि गतवीर्यं यातयाममुच्यते ।

कुशा दर्व्यादयो मन्त्रा ब्राह्मणाश्च बहुश्रुताः ।
न ते निर्माल्यतां यान्ति विनियोज्या पुनः पुनरिति ॥

स्मृतेः । यातयामत्वस्यानाशङ्क्यत्वादपरितोषेणोपपत्त्यन्तरमाह* अथेति * आग्नेयीषु सामगा स्तुवतइत्यादौ स्तोत्रादिसाधनत्वेनाग्याग्नेय्यादिशब्दमात्रेण विधानात् तुल्यतामाशङ्क्याह * यदि त्विति * विध्यन्तरैर्विशेषविधानात्सामान्यसाधनत्वेनाप्याग्नेय्यादि शब्दमात्रेण विधानात् तुल्यतामाशङ्क्याह * यदि त्विति * विध्यन्तर्विशेषस्तु बाधः संत्स्यतीत्याशयः । इममेव पक्षमुपसंहरति * तस्मादिति * तृतीयपक्षसमर्थनेन तस्माद्दाशतयीलिङ्गवतो मन्त्रा ग्रहीतव्या इत्यन्त भाष्यमप्रकृतमात्रपक्षविषयत्वेन व्याख्याय,स्वमतेनादित आरभ्याविशेषपक्षविषयत्वेन व्याख्यातुं सौत्राविशेषग्रहणप्रतिज्ञासूचितहेतूक्त्यर्थमाग्नेयीत्येवमादिभिर्हीति भाष्यं व्याचष्टे * अथ वेति * विशेषोक्त्या दाशतय्यो ऽपीत्यपिशब्दध्याहारः सूचितः । प्रकृतानामपि दशतयाख्यदशमण्डलसंज्ञकावयवषट्कं च मन्त्रसंहितामन्तुत्वरूपेण ग्रहणां वक्तुं दाशतयीशब्देनैवाविशेषोक्तिः।कल्पनालाघवात्प्रकृतानामेवर्चां ग्राह्यतेति सिद्धान्तमाशङ्क्य प्रकृतानां स्तोत्रादिद्वाराविशेषान्वयलक्षणसामान्यसम्बन्धानवगमात्सिद्धान्ते ऽपि सामान्यसम्बन्धस्य कल्प्यत्वेन कल्पनालाघवायोगाद्यथाग्नेय्यास्तोत्रादि करोतीत्याख्यातप्रत्ययार्थाबाहितत्वरूपस्य शिष्टत्वस्योपलक्षणात्वे

सति प्रकृतनियमः स्यान्नान्यथाशिष्टत्वस्योपलक्षणत्वाभ्युपगमे विधि-
प्रत्ययस्योपलक्षणमात्रे क्षीणशक्तित्वेन विध्यभावान्न काचित् ग्राह्य-
त्वादिमाद्यनिरासार्थतया शिष्टत्वादितिसूत्रावयवव्याख्यानायापाद्यो-
७९०।५ क्त्या पातनिकार्थं यश्चेति भाष्यं तात्पर्यतो व्याचष्टे * नचेति * कथम्भा-
वात्मकप्रकरणस्य विनियोजकत्वाख्येन ग्राहकत्वेन प्रकरणाङ्गबोध-
मात्रे व्यापारान्नान्यव्यावर्त्तकत्वाख्यं विशेषकत्वं भवतीत्याशयः ।
कथम्भावलक्षणस्य प्रकरणस्य व्यावर्त्तकत्वायोगे ऽपि यौगिकशब्दा-
नां स्वावयवार्थान्वयार्हवस्तुवाचित्वात्संहितावलम्बित्वाय सन्निहिता-
र्थविषयत्वावगतेर्विशेषतो ऽग्निर्देवता ऽस्या इति सन्निहितवाचिसर्व-
नामार्थवृत्तित्वादाग्नेयीशब्दस्य सन्निहितार्थविषयत्वावगतेरग्निदेव-
त्यत्वचदक्त्रवच्च सन्निहितत्वस्याप्यन्यपदार्थे ऽपि लक्षणत्वावगमा-
च्छ्रुत्यनुगृहीतसन्निधिलक्षणप्रकरणस्य व्यावर्त्तकत्वं भविष्यती-
त्याशङ्क्याह * सन्निधीति * उपलक्षणत्रयप्रतीतावप्यविशिष्टं
हि लक्षणमित्यनेन न्यायेनोपलक्षणानां विशेषणविशेष्यत्वायोगादे-
केन चोपलक्षितप्रत्ययोक्तस्त्रीत्वान्यथानुपपत्त्या गम्यस्य वा शुद्धस्य
श्रुतशब्दगम्यत्वेनागृह्यमाणे गृह्यमाणविशेषत्वावगत्या समुच्चये
ऽपि निहितत्वस्य श्रुत्यनुग्रहाभावो लौकिकोक्त्या सूचितः । प्रकृत-
स्याग्नेयीत्वसद्भावात् श्रुत्यविरोधमाशङ्क्य यौगिकशब्दानां व्यक्ति-
वाचित्वात् प्रकृतव्यक्तिमात्रग्रहणं श्रुतिसङ्कोचापत्तिर्यौगिकोक्त्या सू-
चिता । भाष्यस्याप्रकृतमात्रपक्षोपपादकतार्थत्वशङ्कानिरासायाविशे-
षपक्षोपपादनफलसिद्धान्तनिरासार्थतां सूचयितुमाह * तस्मादि-
ति * उपदिष्टेतिभाष्यमविशेषपक्षे ऽनुपपन्नमाशङ्क्य सावधारण-
त्वेन व्याचष्टे * उपदिष्टेति * एवं जातीयकस्येति भाष्यावयवं
व्याचष्टे * एवमिति * कथं जातीयकस्येति प्रश्नभाष्याशयमाह *
कथमिति * विशेषणरहितस्यापि यथाग्नेय्या स्तोत्रादि करोती-
त्याख्यातप्रत्ययविहितरूपेणोपदिष्टत्वेनोपलक्षणाप्रकृतग्रहणं भवि-
ष्यतीत्येवमाशयत्वं कथञ्जातीयकस्येति सिद्धान्तिप्रश्नस्य मत्वा
तन्निरासार्थं यः कस्मिंश्चिदित्यादिग्रहीतव्य इत्यन्तं भाष्यं उपदिष्ट-
त्वोपलक्षणरूपायाः प्रकृतग्रहणोपपत्तेः सिद्धान्तिनो ऽनिष्टत्वादयु-
क्तमाशङ्क्य परमार्थः । सिद्धान्त्यनभिमतामेवोपदिष्टत्वोपलक्षण-
रूपां प्रकृतग्रहणोपपत्तिं स्वोत्प्रेक्षामात्रेण सिद्धान्त्यभिप्रेतां परिक-
ल्प्य पूर्वपक्षी यः कस्मिंश्चिदित्यादिग्रहीतव्या इत्यन्तमाहेत्येवं ता
त्पर्यतस्तावद्व्याचष्टे * परः पुनरिति * लिङ्गशब्दव्याख्यायास्तल्लिङ्ग-
मित्येतद्विषयत्व यः कस्मिंश्चिदित्यवयवस्य चोपदिष्टत्वरूपोपलक्षण-

निरासावतारमात्रार्थत्वं सूचयितुं मध्यप्रतीकेनावतारितम् । अत्र भाष्ये यदीति भाष्यावयवगतेन यान्याख्यातप्रत्ययसामर्थ्यस्य विषयभूताख्यातप्रत्ययविहिता वेत्येवमाख्यातप्रत्ययसामर्थ्यं तस्योपदेशकस्याख्यातस्य मन्त्रविषयं लिङ्गमिति षष्ठीसमासाश्रयणेन तदुपदिष्टत्वं लिङ्गमित्यसमासाश्रयणेन वा तत्तस्य विधीयमानस्य मन्त्रस्योपलक्षणं विवक्षितमित्युक्तं कथमेतद् गम्यत इत्यपेक्षायामुपलक्षणोपक्षीणशक्तौ लिङ्गेनोपदिष्टो भवतीति विध्यभावोपन्यासाद्देवतालिङ्गस्य चोपलक्षणत्वे * तद्योगादित्युक्तम् * एतदेव भाष्यमवयवशो व्याचिख्यासुर्यः कस्मिंश्चिदिति भाष्यावयवं तावदध्याहारेण व्याचष्टे * नासाविति * उपदिष्टत्वस्यैव स्फुटस्य विशेषणस्य सम्भवात् कथं नान्यत्रोपदेशमर्हतीत्याशयेन कथमिति पृष्ट्वोपदिष्टत्वस्योपलक्षणत्वरूपविशेषणत्वरूपविशेषणत्वनिरासार्थं यदीति भाष्यमापाद्योक्तयर्थत्वेन व्याचष्टे * तद्धिहेति * यथालम्भनिर्वापौ विधीयेते न प्राकृतौ तौ हि विहितौ यदि न विधीयेते तत प्राकृतौ लक्ष्येते यावालम्भनिर्वापौ कर्त्तव्यावित्यालम्भनिर्वापाधिकरणभाष्योक्तेन न्यायेन कर्त्तव्यतावाचिना प्रत्ययेनोपलक्षणीभूत्वा व्यावृत्त्याख्यविशेषणं कर्तव्यमित्युक्तं तस्य विशेषणत्वोपपादनार्थम् * तद्धीत्युक्तम् * येनेति भाष्यावयवाद्येमेव लिङ्गशब्दार्थो ऽवसीयत इत्याह * तथा चेति * तत इति भाष्यावयवं व्याचष्टे * तत इति * अथेति भाष्यावयवं व्याचष्टे * अथेति* ७९१११
तेनेति भाष्यावयवं व्याचष्टे * तेनेति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * सिद्धान्त्यभिमतप्रकृतग्रहणोपपत्त्युक्त्यर्थं न त्विति भाष्यं प्रकरणस्याविशेषकत्वादयुक्तमाशङ्क्य साक्षात्प्रकरणस्याव्यावर्त्तकत्वे ऽपि विधेर्लाघवादेकत्वेन गौरवापादकप्रकृतग्रहणव्यावर्तकत्वाशयतया व्याचष्टे * न त्विति * प्रकृतानामपि सद्वारस्यैव क्रत्वन्वयस्यावगतेर्द्वारान्तरान्वयार्हनिर्द्वारक्रत्वन्वयरूपसामान्यसम्बन्धानवगमात्प्रकरणस्य विधिलाघवापादकत्वानुपपत्तेर्विनियोजकत्ववाच्यमित्यापाद्य बलवद्विरोधेन नियामकत्वनिरासार्थं नेतीति भाष्यं श्रुतिनियोज्ये मन्त्रे लिङ्गविरोधोपन्यासादयुक्तमाशङ्क्य देवताख्यचिन्हरूपलिङ्गयुक्तश्रुतिलक्षणार्थत्वेन लिङ्गशब्दं व्याचष्टे * लिङ्गं हीति * प्रसङ्गात्सर्वे ऽप्युपरितनाः शुद्धा लिङ्गशब्दाः श्रुतिलक्षणार्था इत्याह * उपरिष्टादिति * अविरोधशङ्कार्थमाहेत्यादिभाष्यं व्याचष्टे * आहेति * गौरश्च इति वा श्रुत्या यद्गोत्वाद्यवधारितं " विशेषे यदि तन्न स्यात्ततः

स्याच्छ्रुतिबाधनमि"ति तद्भूताधिकरणवार्तिकोक्तन्यायेनाविरोध इत्यर्थः । व्यक्तिवाचित्वेनाग्नेय्यादिशब्दानां जातिवाचिगवादिशब्दवैषम्याद्विरोधसमर्थनार्थं नैतदित्यादिभाष्यं व्याचष्टे * नैतदिति * जातिवाचित्वाभावे ऽपि वैयाकरणगतेन सम्बन्धवाचित्वं मत्वा व्यक्तीनामवाच्यत्वादप्रकृतमन्त्रव्यक्त्यग्रहणे ऽपि श्रुतिविरोधो नास्तीति शङ्काशयविवरणार्थमुच्यत इत्यादिभाष्यं व्याचष्टे * सामान्यस्येति * आग्नेयीत्वादिजात्यभावान्मन्त्रदेवतासम्बन्धमेवानेकमन्त्रव्यक्तिसमानत्वात्सामान्योक्त्याभिप्रेत्य तस्यैव प्रतिमन्त्रव्यक्तिसमाप्तिरुक्ता तस्मादित्यनेन नचेहेति भाष्यशेषो व्याख्यातः । प्रकृतायामपि व्यक्तौ समस्तशब्दार्थसम्भवान्नित्यश्रुत्यबाधे ऽपि विकल्पेनाप्रकृतानां बाधात्पक्षे श्रुतिविरोधो ऽपरिहार्य इति विरोधसमर्थनाशयविवरणार्थमुच्यते * सत्यमिति * भाष्यं लिङ्गात्सामान्यमित्यनेन व्यक्तेरश्रौतत्वात्कस्याश्चित्त्यागे ऽपि अविरोधस्योक्तत्वादयुक्तमाशङ्का व्यक्तिवाचित्वाशयत्वेन व्याचष्टे * इतरस्त्विति * नत्विति शङ्काभाष्यं व्यक्तिवाचित्वाशयनिरासार्थत्वेन व्याचष्टे * न त्विति * जिज्ञासापूर्वं व्यक्तिवाचित्वाशयसमर्थनवचः पूर्वपक्षसमर्थनार्थम् उच्यत इत्याद्यपरमित्यन्तं भाष्यं व्याचिख्यासुर्जिज्ञासाभाष्य तावदवतारणपूर्वं व्याचष्टे * परस्त्विति * किं त्विति निर्णयभाष्य स्वरूप-
७९२।२ तस्तावद्व्याचष्टे * सा चेति * तात्पर्यतो व्याख्यातुमाकृत्यधिकरणोक्तजातिवाचित्वविरोध शङ्कते * किं पुनरिति * विरोधपरिहारार्थं परेषां व्याख्यां दूषयितुमुपन्यस्यति * नेतीति * जातिवाचित्वानपन्हवे व्यक्तीनामतत्वाच्छ्रुतिविरोधद्वारपूर्वपक्षासिद्ध्याऽपरया, दूषयति * तर्हीति * क्रमेतेन व्याचष्टे * अत इति * न केवलं जातेर्वाच्यतापन्हूयते किं तु सद्भावो ऽपीत्याह * न चेति * जात्यन्तराभावे ऽप्यग्जातिरेवात्र जाताख्या[2] देवतान्विता पङ्कजशब्दस्येव पङ्कजननान्विता पद्मत्वजातिर्वाच्या भविष्यतीत्याशङ्कानिरासार्थत्वे देवतैवेति भाष्यं व्याचष्टे * देवतासम्बन्धमेवेति * आग्नेयो ऽष्टाकपालः शिरो वा एतद्यज्ञस्य यदाग्नेयः आग्नेयो वै ब्राह्मण इत्यादौ द्रव्यादिष्वपि प्रयोगादिदमभिप्रेत्येत्यतः शब्दार्थः । सम्बन्धाव्यभिचारित्वे तस्यैव वाच्यता कस्मान्नेष्टेत्याशङ्क्याह * सम्बन्धस्त्विति * शङ्कित्रा लिङ्गात्समान्यमिति सामान्योक्त्या सम्बन्धस्य वाच्यत्वेनोपन्यस्तत्वात्स्वानभिमतत्वसूचनार्थम् * भाष्यकारेणेत्युक्तम् *

(१) अश्रौतत्वादिति २ पु० पा० ।

(२) अग्न्याख्यदेवतेति २ पु० पा० ।

आनन्त्यव्यभिचाराख्यदोषापत्तेर्व्यक्तिवाचित्वं न सम्भवतीत्याशङ्क्याह * तस्या एव चेति । अनेन चोपस्थानसाधनमृग्व्यक्तिर्देवतयोपलक्षयितव्येत्येवमानन्त्यव्यभिचारपरिहारार्थत्वेन यथेति भाष्यावयवो व्याख्यातः देवताया ऋग्व्यक्त्युपलक्षणत्वाभ्युपगमे प्राग्व्याच्यत्वापत्तेर्देवतात्वस्य च सम्बन्धिरूपत्वात्प्रतिसम्बन्धिनं विना ऽनुपपत्त्या प्रति सम्बन्धिन्या ऋग्व्यक्तेः प्रतीतिसम्भवाद्वाच्यत्वापत्तिरित्याशङ्क्याह * पूर्वेति * देवताविशेष्याया ऋग्व्यक्तेः प्रत्ययवाच्यत्वानभ्युपगमे ऽधिष्ठानभूतं प्रकृत्यर्थमग्निं प्रति प्रत्ययार्थस्य देवतात्वस्य विशेषणत्वापत्तेः प्रकृतिप्रत्यययोर्विशेषणविशेष्याभिधानशक्तिभेदविरोधापत्तेः प्रत्ययेन विशेष्याभिधानमेवाविरुद्धं न तु विशेषणाभिधानमिति साधारणोक्त्या सूचितं गवादिशब्दाल्लक्षणाया अपि व्यक्तिविशेषान्वयसम्भवाद्विशेष्यत्वसिद्धे ऽपि न वाच्यत्वकल्पना युक्तेत्याशङ्क्याह * यत्र त्विति * गवादिशब्दस्य जातौ व्यक्तौ चोभयत्र वाचकत्वस्यास्मृतेः शब्दभेदाभावाच्च तन्निमित्तशक्तिभेदानवगतेरुभयत्र प्रयोगान्यथानुपपत्तिमात्रेण शक्तिद्वयकल्पनापत्तावेकप्रतीत्याविनाभावेनेतरप्रतीतिसिद्ध्यान्यथानुपपत्तिपरिहाराद्विशेष्यानभिधानं युक्तं तद्धितस्य तु "सास्य देवते"ति स्मृत्यैवास्य शब्दनिर्दिष्टे विशेष्ये देवतात्वे च विशेषणे वाचकत्वानवगमाच्छक्तिद्वयानभ्युपगमे ऽपि कल्पनागौरवानापत्तेरुभयाभिधानं युक्तमिति व्यापारयितव्यत्वोक्त्या ऽऽभिधानाख्यस्य व्यापारस्यान्यथानुपपत्त्या कल्पयितव्यत्वाभिधानात्सूचितम् । सास्य देवतेति स्मृत्या ऽस्य शब्दनिर्दिष्टस्य विशेष्यस्य प्रति सम्बन्धित्वमात्रमवगम्यते । न वाच्यतेत्याशङ्क्य स्मृत्या प्रतिप्रतिसम्बन्धिनो वाच्यत्वा ऽनुक्तौ लक्षणायावगतिसम्भवे ऽप्याग्नेयीशब्दस्य तात्पर्याभावापत्तेराग्निशब्दवदाग्नेयीप्रथमोपसदित्यादौ विशेष्यसमानाधिकरणः प्रयोगो न स्याद्देवताशब्दवदग्निसमानाधिकरणः प्रयोगः स्यान्न चैतद्द्वयमप्यस्ति यतो देवताख्यविशेषणमात्रवाची सन्नाग्नेयीशब्दो लक्षणया विशेष्यपर्यन्तं नीयेतेत्याह * न चेति * देवताख्यस्य च विशेषणमात्रस्य तद्धितवाच्यत्वाभ्युपगमे मन्त्रकरणके व्यापारे देवतायाः करणकार्याक्षमत्वे ऽपि तद्धितान्तप्रातिपदिकश्रुतिबलत्वात्कारकविभक्तित्वबाधेन सहार्थे तृतीयामभ्युपगम्याग्नीधादिवदुपस्थानकर्मत्वे क्षमत्वसम्भवान्न लाक्षणिकं विशेषमाद्रियेतेत्याह * यदि चेति * अनेन चानेकव्यक्तिसाधारणं सामान्यरूपस्य देवताख्यस्य विशेषणमात्रस्य तद्धितवाच्यत्वाभ्युपगमे यया देवतयर्व्यक्त्याख्यसाध-

नं लक्षयितव्यं सैवात्रोपस्थाने करणत्वायोगे ऽपि करणत्वेनाग्निधा-
दिना समाना सती साधनं भविष्यति किमृग्व्यक्तिलक्षणयेत्येवं व्या-
ख्यान्तरं देवतैवेति भाष्यावयवस्य सूचितम् । व्यक्तिवाचित्वोपपाद-
नार्थतामस्य सूचयितुमाह * तस्मादिति * विस्तराच्च सम्बन्धटी-
कायां पिङ्गाक्ष्येकहायनीशब्दयोर्द्रव्यवाचित्वोपपादनार्थं सर्वयौगि-
कानां व्यक्तिवाचितोपपादितेत्याह * तदिति * व्यक्तिवाचित्वोपपा-
दनस्याविशेषपक्षसिद्ध्यर्थत्वोक्त्यर्थं न चेत्याद्युपाददीरन्नित्यन्तं भाष्यं
७९।३।१ सङ्क्षेपतो व्याचष्टे * ततश्चेति * अप्रकृतमपीत्यविशेषोक्तेर्यश्चायमि-
ति भाष्योक्तप्रकृतोपदेशायोगविरोधाशङ्कार्थं न त्विति भाष्यं यश्चाय-
मित्यनेनापि प्रकृतमात्रोपदेशायोगोक्तिद्वारेणाविशेषोपदेशस्यैवोक्त-
त्वेनाविरोधादयुक्तमाशङ्क्याप्रकृतमात्रोपदेशो यश्चायमिति भाष्येणो-
क्त इति भ्रान्तस्येयं शङ्केत्येवमुपपादयितुमाह * न त्विति * भाष्ये
ऽनुक्तस्याप्यप्रकृतमात्रपक्षस्य परमतेन किं तद्व्यतिरिक्ता इति स-
न्देहवार्त्तिके प्रकृतस्य कार्यान्तरोपयोगेनेत्याद्युपपत्तिवार्त्तिके चाद्य-
नुक्तत्वादाद्यत्वं सामान्यशास्त्रस्य विशेषशास्त्रेण बाध आदिशब्दे-
नोक्तः । उच्यतइति परिहारभाष्यं यश्चायमिति भाष्यार्थविवरणार्थ-
तया व्याचष्टे * परस्त्विति * मध्यमताप्याद्यत्ववत्तद्वार्त्तिकोक्तक्रमा-
र्थैवेत्यनेनाविशेषोक्तेर्यश्चायमिति भाष्यविरोधाख्यदोषाभावोक्त्यर्थ-
त्वेन नैवं सतीति भाष्यावयवो व्याख्यातः । अविशेषोक्तेर्भाष्यविरो-
धाख्यदोषाभावे ऽपि करणबाधाख्यो दोषो ऽस्त्येवेत्याशङ्कार्थं नत्वि-
ति भाष्यं श्रुत्या प्रकरणबाधस्य युक्तत्वादयुक्तमाशङ्क्याविरोधार्थं श्रुतेः
सामान्यवाचिता ऽङ्गीकार्येत्येवमाशयत्वेन व्याख्यातुमाह * न त्वि-
ति * सत्यमिति परिहारभाष्यं श्रुतेः प्रसिद्धार्थत्यागेन युक्त इत्येव-
माशयत्वेन व्याख्यातुमाह * परस्त्विति * वैकल्पिकपदार्थमध्ये नि-
त्यमथैकप्रयोगे विरोधाभावान्नित्यं प्रकृतमात्रग्रहणे ऽपि श्रुत्यनुग्रहो-
पपत्तेर्न प्रकरणं बाधनीयमित्याशङ्कानिरासार्थं अपि चेत्यादिभाष्यं
स्वोपस्कारमनपेक्ष्य प्रमाणोपकारार्थं बुद्धिपूर्वकारिणः प्रकृतायोगा-
त्प्रमाणानुग्रहार्थत्वशङ्कानुपपत्तेरयुक्तमाशङ्क्य लौकिकादिभ्रान्तप्र-
वादनिरासार्थत्वेन व्याचष्टे * अपि चेति * किं तर्हीत्यनेन यदि नि
भाष्यावयवो व्याख्यातः । प्रवृत्तेरात्मानुग्रहार्थत्वे ऽपि प्रकृतमात्रेणा-
पि क्रतूपकाराख्येन फलेन फलवतात्मानुग्रहसिद्धेन प्रकरणं बाधनी-
यमित्येवमाशयत्वेन किमितिप्रश्नभाष्यावयवं व्याचष्टे * तत इति *
उभयथाप्यात्मानुग्रहसिद्धौ दुर्बलप्रमाणानुरोधेन बलवत्प्रमाणफल

---

(१) चादावुक्तत्वादिति २ पु॰ पा॰ ।

भूतायाः प्रवृत्तेः सङ्कोचो न युक्त इत्याशयेनोत्तरार्द्धमेतदिति भा-
ष्यावयवमवतारणपूर्वं व्याचष्टे * अत इति * यद्यप्यैन्द्येत्येकरूपैव
श्रुतिर्बहुषुप्रकृतेष्वप्रकृतेषु च मन्त्रेषु प्रमाणं तथापि क्व चित्प्रकृतम-
न्त्ररूपेऽर्थे प्रमाणमनुगृहीतमिति प्रमाणानुग्रहेण पुरुषस्य कृतार्थत्वं
प्रकृतमन्त्ररूपाण्यर्थान्तराणि पुरुषार्थोपयिकान्यपि सन्ति न गृह्यन्ते
इति यच्छक्यते तन्नेत्येतदतः प्रवृत्तेः प्रमाणानुग्रहार्थत्वाभावाद्भव-
तीत्येवं योज्यम् । प्रवृत्तेः प्रमाणानुग्रहार्थत्वाभ्युपगमेऽनिष्टापत्ति-
माह * सकृदिति * तस्मादिति पूर्वपक्षोपसंहारभाष्यं व्या-
चष्टे * तस्मादिति * तस्माच्छब्देन किं परामृष्टमित्यपेक्षायाम-
विशेषेत्युक्ते प्राक्तस्यानिर्दिष्टत्वात्सर्वनाम्ना परामर्शायोगमाशङ्क्य लि-
ङ्गप्रत्ययविरुद्धत्वादित्यत्र श्रुतेरविशेषेण सर्वमन्त्रग्रहणसामर्थ्यं वि-
ना विरोधायोगाल्लिङ्गयुक्तायां श्रुताविवाविशेषग्रहणसामर्थ्यो ऽपि
प्रयुक्त एवेत्येवशब्दात्कर्षयुक्तेन लिङ्गेनेत्यनेनोक्तम् । दाशतय्या-
मपीत्याद्यपिशब्दालोचनादुपादिष्टे ऽपि देशो हीत्यादिभाष्यस्य साव-
धारणत्वप्रतीतेरविशेषपक्षोक्त्यर्थत्वसम्भवे ऽपि सूत्रे ऽपि शब्दा-
भावात्कथमविशेषपक्षप्रतीतिरित्याशङ्क्याह * सूत्रमपीति * प्राक्त-
दाख्यानामतदाख्यानां चानुक्तत्वात्सूत्रस्याप्राप्ततदाख्यमन्त्रप्रापणा-
र्थत्वावगतेन विधारणार्थेना युक्तेत्याशय । तदाख्या अपि तर्हि
कस्मात्स्वशब्देन नोक्ता इत्याशङ्क्याह * तदाख्येषु त्विति *

तदाख्यो वा प्रकरणोपपत्तिभ्याम् ॥ २१ ॥

पूर्वपक्षसूत्रस्थेनातदाख्यशब्देनाप्रकृतानां च शब्देन च प्रकृ-
तानां विधेरुक्तत्वात्सिद्धान्तसूत्रे तदाख्यपुनर्वचनस्यान्यपरिसंख्यार्थ-
त्वेन तदाख्य एव मन्त्रो विधीयतइत्येव कर्मव्युत्पन्नविधिशब्दानुषङ्गेण
व्याख्यार्थं तदाख्यइति भाष्यं तच्छब्देनानिर्दिष्टज्योतिष्टोमपरामर्शायो-
गादयुक्तमाशङ्क्याधिकारविषयत्वाद् बुद्धिस्थस्य ज्योतिष्टोमस्य परामर्श-
सम्भवं सूचयस्त्रेधा व्याचष्टे *अधिकाराख्य इति * ज्योतिष्टोमाङ्गे ७९।४।१
ज्योतिष्टोमसञ्ज्ञकत्वस्यौपचारिकत्वेनापरितोषाद्व्याख्यान्तरद्वयम् ।
कुत इति प्रश्नोत्तरत्वेन सौत्रप्रकरणशब्दव्याख्यार्थं प्रकृतौ हीति भा-
ष्यं तात्पर्यतो व्याचष्टे * कुत इति * अयमाग्नीध्रोपस्थानाख्यः पदार्थः
क्रतुसम्बन्ध्यनुष्ठेयविशेषः सन्मन्त्रकार्यत्वेनोपदिश्यते न चानेन म-
न्त्रेण क्रतुसम्बन्धिकिञ्चित्कार्यमिति सामान्यतः क्रतुसम्बन्ध्यनुष्ठे-
यान्वयप्राप्तिं विना तद्विशेषान्वयानाकाङ्क्षणाच्छक्यो विधातुं स्वरसतः
पदार्थस्वरूपमात्रान्वयप्रतीतेः क्रत्वन्वयाधीनत्वाच्च सामान्यतः क्रत्व-

ङ्गान्वयस्याप्रकृतानां क्रत्वन्वयाभावान्न सामान्यतः क्रत्वङ्गान्वयप्राप्तिरस्तीत्याशयः । पूर्वार्द्धमुपपादयितुमाह * आग्नेयेति * आधानवत्संस्कारकर्मत्वेऽप्युपस्थानस्याग्नीध्रादिमनुष्यस्वरूपप्रयुक्तत्वक्रतुकार्यविशेषत्वं न स्याद्धिरण्यधारणवत्स्वतन्त्रपुरुषार्थत्वं वा न च क्रत्वैकान्तिकस्याप्याग्नीध्रादेर्जुह्वादिवल्लौकिकत्वात्स्वरूपेण प्रयोजकत्वं सम्भवति फलाश्रवणाच्च न स्वतन्त्रपुरुषार्थत्वम्। अतो बलादुपस्थानस्य क्रतुकार्यविशेषत्वावगतेर्ज्योतिष्टोमापूर्वसिद्ध्यर्थम् उपस्थानमाग्नेय्या करोतीति शास्त्रार्थस्याश्रयितव्यत्वात् ज्योतिष्टोमस्थस्य कार्यविशेषस्य मन्त्रकार्यत्वेन विधिर्निश्चीयत इत्यर्थः । उत्तरार्द्धमुपपादयितुमाह *सचेति* स्वरसतः पदार्थस्वरूपान्वयप्रतीतेराकाङ्क्षां च विना क्रत्वन्वितरूपलक्षणायोगादित्याशयः । सामान्यान्वयापेक्षत्वेऽपि विशेषान्वयस्य कथमकृतमन्त्रनिवृत्तिरित्यपेक्षायामप्रकृतविधौ वाक्यभेदापत्तिमाह * तत्रेति * प्रकरणादेव सामान्यान्वयसिद्धेर्वाक्यभेदपरिहारं शङ्कते * ननु चेति * अनेन च न्याय्यतोक्तिसूचितवाक्यभेदपरिहारशङ्कार्थत्वेन कथमिति प्रश्नभाष्यं व्याख्यातम् । श्रुतिकल्पनां विना प्रकरणस्याविनियोजकत्वात्प्रकृतेषु च प्रकरणाम्नानात्सामान्यान्वयविषयायां श्रुतौ क्लृप्तायां सत्यामाग्नेय्यादिवाक्यकृतविशेषान्वयसिद्धेरप्रकृतेषु सामान्यान्वयविषयश्रुतिकल्पनस्याशक्यत्वात्प्रकरणेन सामान्यान्वयासिद्धेरपरिहार्यो वाक्यभेद इति तज्ज्योतिष्टोम प्रतीत्युत्तरभाष्यसूचितमर्थमाह * सत्यमिति * प्रकरणात्सामान्यान्वयो सिध्यन्नपि विशेषान्वयविध्यन्यथानुपपत्तिलक्षणयार्थापत्त्या सेत्स्यतीत्याशङ्कते * न त्विति * श्रुतार्थापत्तेः शब्दकल्पत्वेनार्थापत्त्याख्यस्यार्थस्यापि श्रुतिकल्पनापेक्षया प्रकरणातुल्यत्वान्न श्रुतिमकल्पयित्वार्थात्सान्यावगतिः सेत्स्यतीति परिहरति * नेति* सामान्यतः क्रत्वङ्गान्वयापादकत्वेनात्र क्रत्वङ्गस्य सामान्यान्वयोस्याविवक्षितत्वात्तस्य यागान्वयद्वारत्वेनानुनिष्पादितया ऽशास्त्रविषयत्वान्न विधायके श्रुतिकल्पनापेक्षेत्याशङ्क्याह * यदि हीति * प्रयोगकाले ऽनुनिष्पादित्वे ऽपि शास्त्रार्थावधारणकाले ऽनेन मन्त्रेण क्रतोरुपकर्तव्यमिति सामान्यान्वयानवगमे स्वरसतो ऽवगतस्याग्नीध्रस्वरूपान्वयस्य त्यागायोगात् क्रत्वन्वयस्याग्नीध्रान्वयानुनिष्पादित्वानुपपत्तेः शास्त्रविषयता ऽस्त्येवेत्याशयः । क्रत्वव्यभिचारित्वेनाग्नीध्रस्य तदन्वयानुनिष्पादित्वं क्रत्वन्वयस्य प्रयोगकाले ऽप्यस्त्येवेत्याशङ्क्याग्नीध्रस्य जुह्वादिवत् क्रत्वव्यभिचारित्वे मन्त्रस्य क्रत्वन्वयात्प्रागाग्नीध्रस्वरूपान्वयोपपत्तेः क्रत्वव्यभिचारिताहवनीयादि-

स्वरूपान्वितस्याधानस्यैव न क्रत्वन्वयो ऽनुनिष्पादीत्येवं परिहारसूचनार्थं न केवलं शास्त्रार्थावधारणकाले ऽनुनिष्पादित्वं नास्ति किन्तु प्रयोगकाले ऽपीत्याह * किं चेति * क्रत्वङ्गत्वानपेक्षप्रत्यक्षगम्यमण्डपरूपाशया लौकिकोक्तिः । क्रत्वङ्गत्वानपेक्षगम्यमनुष्यरूपाशयालौकिकोक्तिः । ततश्च क्लेशेनाप्यर्थाच्छ्रुतिकल्पनाशक्तेर्यद्यवश्यं श्रुतिः कल्पयितव्या ततः प्रकरणान्न तत्क्लृप्तायां सत्यां कल्पयितुं शक्यत्याशयेनोपसंहरति * तेनेति * इदं क्लृप्तायाः श्रुतेः प्रकृतमन्त्रमात्रविषयत्वादप्रकृतेषु ७९५।१
सामान्यान्वयश्रुतिकल्पनाग्नेयीवाक्यस्य प्रकरणस्नानान्न विरुद्धेत्याशङ्क्याह * सर्वत्र चेति * क्लृप्तसामान्यान्वयप्रकृतमात्रविषयत्वेनाग्नेयीवाक्योपपत्ते. सामान्यान्वयकल्पनापादकसर्वाग्नेयीविषयत्वाभ्युपगमो न युक्त इत्याशयः । उक्ते ऽर्थे भाष्यं योजयति * तदिति * अप्रकृतानां ज्योतिष्टोमं प्रत्यजेन मन्त्रेणा व्याप्रियेतेत्येवं रूपसामान्यान्वयाप्राप्तेरव्यापकत्वं हेतोराशङ्क्य प्रकृतविषयत्वेनापि वाक्योपपत्तौ कल्पनागौरवापादकसर्वविषयत्वाभ्युपगमायोगाद्धेतोऽर्थानुष्ठापकत्वं यथेत्यनेनोपपादितम । अनेन च भाष्येण द्विविधो ऽपि पूर्वपक्षो निरस्तो भवतीति सूचयितुमाह * इतरथेति * सिद्धान्ते ऽपि प्रकरणानुरोधाच्छ्रुतिसङ्कोचापत्तिलक्षणो दोषो ऽस्तीत्याशङ्क्याह * प्रकृतेति * विधिश्रुत्या च स्वव्यापारलाघवायाग्नेयीश्रुतिसङ्कोचस्यापेक्षितत्वात्तस्याश्च पुरुषप्रवृत्तिहेतुत्वेन श्रुत्यन्तरेभ्यो बलीयस्त्वान्न सङ्कोचो दोष इत्याशयः । वरं प्रकृतानां प्रत्यासन्नत्वाच्छीघ्रं बुद्धेर्बुद्धिविलंबानापत्तिलक्षणो गुणः प्रकृतग्रहणे भविष्यतीत्याह * एवं चेति * प्रकृतेष्वपि द्वारान्तरात्मकविशेषान्वयार्हनिर्द्धारकत्वन्वयलक्षणसामान्यान्वयस्य क्लृप्तत्वाद्विशेषान्वयविध्ययोगाशङ्कानिरासार्थत्वेन सौत्रोपपत्तिशब्दव्याख्यार्थव्यापाराविशेषेति भाष्यं व्याख्यातु शङ्कां तावदाह * ननु चेति * वेदशाखानन्त्याद्योग्यानुपलब्ध्यभावेनाभावनिश्चयायोगमाशङ्क्य यश्चायं प्रकृतः । स कार्यान्तरं विनियुक्तो यः कस्मिंश्चिद्विशेषेणोपदिष्ट इति च भाष्यद्वयसंवादेनाभावनिश्चयो यद्यपीत्यत्यनेनोक्तः सद्भावाभ्युपगमे ऽपि भाष्यविरोधाख्यो दोषो ऽस्तीत्यपिशब्दार्थः । कार्यान्तरे विनियुक्तस्यापि मन्त्रस्योपस्थानाख्यव्यापारविशेषविधानमुपपाद्यनइत्येवं भाष्याव्याख्यां सूचयन्परिहारमाह * उच्यतइति * कार्यान्तरविनियुक्तानामप्युपस्थानाख्यव्यापारविशेषान्वयित्वेन पुरोडाशकपालस्य तुषोपवापान्वयित्वेन ग्रहणसम्भवान्निर्द्धारकत्वन्व-

यलक्षणसामान्यान्वयाभावो दोषो नापि भाष्यविरोध इत्यर्थः । का-
र्यान्तरविनियुक्तानां तर्हि विशेषान्वयस्यैव प्राप्तत्वात्सामान्यान्वये-
नाभिप्रेतस्य ज्योतिष्टोमं प्रति व्यापारस्य प्राप्तत्वादेवेति भाष्यावयवेन
प्राप्त्युक्तिर्विरुध्येतेत्याशङ्क्य * नन्विति * विशेषान्तर्गतत्वेन प्राप्ति-
रभिप्रेता न स्वातन्त्र्येणेति परिहरति * कथमिति * विशे-
षान्तर्गतस्य सामान्यस्य नैराकाङ्क्ष्येण विशेषान्तरान्वयानर्हत्वात्
प्राप्त्युक्तिरनर्थिकेत्याह * तेनेति * प्रकृत्यर्थत्वेन निराकाङ्क्षस्यापि
प्रयाजादेर्विकृत्याकाङ्क्षयाकाङ्क्षामुत्पाद्य विकृत्यर्थत्ववत्स्तोत्रादिद्वार-
विशेषान्वयेन निराकाङ्क्षस्यापि क्रत्वन्वयलक्षणस्य सामान्यान्व-
यस्योपस्थानाख्यद्वारान्तराकाङ्क्षामुत्पाद्य द्वारान्वयो ऽस्ति योग्यते-
त्याशयः । विशेषरूपाविवक्षोक्त्याकाङ्क्षोत्थापनं सूचितम् । अने-
न चोपस्थानाख्यव्यापारविशेषविधानवेलायामविवक्षितत्वात् स्तो-
त्रादिव्यापारविशेषस्येत्येवं सामान्यान्वये प्राप्तुक्त्यानर्थक्यशङ्का-
निरासार्थत्वेनाप्राप्तत्वादिति भाष्यावयवो व्याख्यातः । श्रुतदुर्बलप्रक-
रणगम्यसामान्यान्वयापेक्षा न युक्तेत्याशङ्क्य वाक्यभेदपरिहारार्थं दु-
र्बलापेक्षाप्युपपन्नेत्येवं निरासार्थत्वेनाप्युपपत्तिशब्दव्याख्यार्थमनपे-
क्ष्य चेति भाष्यमुपस्थानमन्त्रलक्षणानेकार्थविधिनिमित्तवाक्यभेदो-
क्त्यर्थत्वेनाभासमानमाक्षिपति * यस्त्विति * विशिष्टविधिसम्भ-
वे ऽपि विशेषणविशेष्यरूपानेकार्थविधानाद्वाक्यभेदो ऽभ्युपग-
७९६।२ म्यमानः सिद्धान्ते ऽप्यपरिहार्यः स्यादित्याह * सिद्धान्ते ऽपि
चेति * तत्रेतिवार्त्तिकोक्तसामान्यविशेषान्वयलक्षणानेकार्थविधा-
वपि विशेषान्वयविध्यन्यथानुपपत्तिप्रसूतेन विध्यन्तरेण सामान्या-
न्वयविधानाद्विशिष्टविधावपि प्रत्ययावृत्त्यभावे ऽपि श्रुतार्थ-
विधिमात्रेण कृतार्थस्य प्रत्ययस्याश्रुतार्थविध्याक्षेपाशक्तेः श्रुतस्य
प्रत्ययस्यावृत्तिमापाद्य विधिगौरवमेव वाक्यभेदत्वेनोपचरितमित्ये-
वं भाष्यं समाधातुम् * तस्मादिति * कथं पूर्वोक्तो वाक्यभेदो ऽत्र
भाष्ये योज्यत इत्यपेक्षायामुपस्थानस्याग्नीध्रस्वरूपान्वये नैष्फल्यापत्ते-
र्ज्योतिष्टोमाङ्गभूताग्नीध्रान्वयावगमेन ज्योतिष्टोमापूर्वसिद्ध्यर्थत्वावसा-
याज्ज्योतिष्टोमापूर्वसिद्ध्यर्थमुपस्थानमेवं लिङ्गेन मन्त्रेण कुर्यादित्येवं
मन्त्रस्य ज्योतिष्टोमाय कार्यविशेषान्वयोक्त्यर्थत्वेनोपस्थानं चेतिभा-
ष्यावयवं मन्त्रस्य चोपस्थानस्वरूपार्थत्वे नैष्फल्यापत्तिस्तच्चे-
तिभाष्यस्थस्य तच्छब्दस्य ज्योतिष्टोमकार्यविशेषभूतोपस्थानपरा-
मर्शत्वावगमात्तत्र च विशेष्यान्वयस्योपस्थानं चेति भाष्योक्तत्वा-
त्पौनरुक्त्यापत्तेर्विशेषाक्षिप्तकार्यसामान्यपरामर्शे तात्पर्यावसायात्त-

श्चेति भाष्यावयवसामान्योक्त्यर्थत्वेन व्याचष्टे * तत्रेति * प्रद-र्शनशब्दस्य करणव्युत्पन्नत्वात्तत्र भाष्यमध्ये उपस्थानं चेत्येतद्भाष्यं विशेषप्रदर्शकं तच्च प्रकरणानिरपेक्षस्याप्राप्तज्योतिष्टोमान्वयस्य देवतारूपेण चिह्नेनोपलक्षितस्य मन्त्रमात्रस्य ज्योतिष्टोमान्वयप्रदर्शनार्थमित्यर्थः। ज्योतिष्टोमान्वयस्य प्रदर्शनीयत्वसूचनायाप्राप्ततामुक्तामुपपादयितुं प्रकरणानैरपेक्ष्योक्तिः। आग्नीध्रसदो हविर्धानानां क्रत्वैकान्तिकत्वात्तत्स्वरूपान्वयमात्रविधाने ऽप्यनुनिष्पादितत्वेन क्रत्वन्वयसिद्धेर्वाक्यभेदपरिहारशङ्कानिरासार्थत्वेनानर्थकश्चोपदेशः स्यादसम्बन्धात्फलवता न ह्युपस्थानं फलवदिति सूत्रमवतारयति * अथेति * क्रत्वैकान्तिकत्वे ऽप्याग्नीध्रादीनामुपस्थानमस्य तत्स्वरूपान्वयिधर्मत्वेन तद्द्वारक्रत्वन्वयायोगादाग्नीध्रादिशब्दानां च संस्कारनिमित्तत्वाभावेनाहवनीयादिवत् स्वरूपनिष्पत्त्यै वै संस्कारानपेक्षणान्नैष्फल्यापत्तेरुपस्थानस्वरूपमन्त्रोपदेशः सन्मात्रस्य फलवदसम्बन्धापत्तेरनर्थकः स्यादित्येवमर्थत्वेन स्पष्टत्वात्फलवतेत्यन्तं सूत्रावयवमव्याख्याय न हीति सूत्रावयवस्याग्नीध्रादिद्वारोपस्थानस्य क्रत्वन्वयायोगे ऽपि प्रकरणाक्रत्वन्वयोपपत्तेः फलवत्त्वं भविष्यतीत्याशङ्कानिरासार्थत्वेनावतारणार्थं नन्विति भाष्यं गौरवलक्षणवाक्यभेदपरिहारोपयोगपर्यन्तत्वेन व्याचष्टे * नन्विति * प्रकरणात्क्रत्वन्वयः प्रतीयमानो ऽप्यविधीयमानो ऽननुष्ठानान्न निष्पद्यतइति सामान्यान्वयस्यापि विधेयत्वाद्गौरवे सत्यपरिहार्यत्वापत्तेः क्रत्वन्वयशून्यमुपस्थानं न फलवदित्येवं शङ्कानिरासार्थत्वेन न हीति सूत्रावयवव्याख्यार्थं यदीत्याद्यर्हतीत्यन्तं भाष्यं तात्पर्यतस्तावद्व्याचष्टे * न त्विति * सामान्यान्वयो ऽप्यविधीयमानो न निष्पाद्यतइत्यर्थः। एतदेव भाष्यं स्वरूपतो व्याचष्टे * यदीति * मन्त्रविशिष्टस्याग्नीध्राद्युपस्थानस्य प्रकरणगम्यो ज्योतिष्टोमान्वयो यद्यनुष्ठातुमिष्येत तदा विधिं विना ऽनुष्ठानायोगात् ज्योतिष्टोमान्वयित्वेनोपस्थानमुपदिश्येतेति स्पष्टीकरणायोपदेशोक्त्या भाष्ये क्रत्वन्वयविध्यापत्त्युक्तावपि विवक्षोक्तेर्विधिसार्थत्वाभ्युपगमे तयैव क्रत्वन्वयविध्यापत्त्युक्तिः सेत्स्यतीति मत्वा तदेति भाष्यावयवमुपेक्ष्य भाष्यं योजितम्। स्वरूपमात्रेणोपस्थानस्य मन्त्रान्वयविधावुपस्थानमात्रे मन्त्रप्राप्तिरुक्तेति व्याख्यातुम् * क्रत्वन्वयमविधायेत्युक्तम् * यथा कथं चित् प्राप्तोपस्थानानुवादेन मन्त्रविधौ अनुवाद्यस्योपस्थानस्याग्नीध्रादिना विशेष्टुमशक्यत्वादाग्नीध्राद्यनुवादेन मन्त्रविशिष्टोपस्थानविधावपि प्रायश्चित्तार्थावभृथस्नानवत्क्रत्वन्वयानभ्युपगमे स्वत-

न्त्रप्रधानकर्मत्वापत्तेः सर्वोपस्थानेषु मन्त्रप्राप्त्युपपादनायानूद्य विधि-
र्विशिष्टरूपेण * वेत्युक्तम् * क्रत्वन्वयानपेक्षत्वोक्त्यर्थत्वेन सर्व-
शब्दव्याख्यार्थे लौकिकोक्तिः । क्रतूपकारफलाभावे ऽपि पुरुषार्थरू-
पेण फलेन फलवत्तामाशङ्क्य फलाश्रुतिः शुद्धोक्त्योक्ता । अनुवाद्यस्या
ऽप्युपस्थानस्य द्विर्हविषो ऽवद्यतीतिवद्विधेयस्यापि वा दशापवित्रेण
ग्रहं सम्मार्ष्टीतिवत्प्रकरणाद्विशेषलाभमाशङ्क्य प्रकरणबाधं भा-
ष्योक्तं सम्मार्गावदानवैषम्येणोपपादयितुमननुमितश्रुतितोक्ता । फ-
लवत्त्वोयोपतिष्ठेतेति श्रुत्या प्रकृतापूर्वसाधनांशलक्षणार्थे प्रकरणा-
पेक्षणादबाधितेन प्रकरणेन श्रुतिमनुमायोपस्थानं विशेष्यतइत्याश-
ङ्कानिरासार्थं न प्रकरणभाष्यावयवं प्रकरणस्यान्यनिवृत्तौ व्यापारा-
भावे ऽप्यपूर्वसाधनांशलक्षणाद्वारार्थाद्विशेषकत्वोपपत्तेरयुक्तमाशङ्क्य
क्रत्वन्वयाविधाने ऽपूर्वलक्षणाभावेनाविशेषकत्वोपपादनार्थम् * न
हीत्युक्तम् * प्रकृतस्यापि तर्हि मन्त्रस्योपस्थानमात्रान्वयादानर्थक्यं
क्रत्वन्वितस्याचोपस्थानस्य मन्त्रान्वयार्थे क्रत्वन्वयविधौ गौरवं स्या-
दित्याशङ्क्य प्रकृतस्य क्लृप्तक्रत्वन्वयत्वात्क्रत्वङ्गोपस्थानविषयत्वाव-
वगतेर्वैषम्योक्त्यर्थमस्मत्पक्षे पुनरित्यादिभाष्यं व्याचष्टे * अस्मत्पक्षे
त्विति * लाघवं चेत्यनेनान्यदिति भाष्यावयवो व्याख्यातः । अ-
तिलाघवोक्त्यर्थमथ वेति भाष्यं व्याचष्टे * अथ वेति * आग्नी-
ध्रादीनां मन्त्राणां च प्राप्तत्वादुभयप्राप्तौ सम्बन्धविधानस्य यत्रोभौ
लक्षणत्वेन तत्र स्वशब्देन सम्बन्धो विधीयतइति जाघन्याधिकरण-
भाष्ये वक्ष्यमाणत्वाद्धात्वर्थाविधाने ऽपि च प्रत्ययार्थभूताया भाव-
नाया विशेषणपरे ऽपि विधौ विध्यभ्युपगमात्तदन्वयद्वारा ऽवगत-
स्य कारकयोः परस्परान्वयस्य विधेर्भावनायाश्चावच्छेदकधात्वर्थापे-
क्षायामात्मनेपदालोचनयाभिधाख्यधात्वर्थावच्छिन्नत्वावगमादाग्ने-
याग्नीध्रमभिदध्यादिति वाक्यार्थप्रतीतेरग्नआयाहीत्यादिभिश्च सन्नि-
हितविषयामन्त्रणविभक्त्यादियुक्ते· समीपस्थानं विना ऽऽभिधानाशक्तेः
प्राप्तस्य समीपस्थानस्यानुवादोपपत्तेस्तस्यापि सामान्यान्वयवदविधा-
नादति लाघवमित्याशयः । उपतिष्ठतइत्यात्मनेपदालोचनया समा-
सीदतीत्यर्थः प्रतीयतइति वदता भाष्यकृताभिधानान्यथानुपपत्त्यो-
पस्थानप्राप्तिरुक्ता ॥

सर्वेषां चोपदिष्टत्वात् ॥ २३ ॥

केवलाप्रकृतपक्षसमर्थयितृमतेन तावच्छिष्टत्वादित्याद्यपूर्वपक्ष-
९९,७।१ हेतुदूषणार्थत्वेनानुभाषणपूर्वं सूत्रं व्याचष्टे * यत्त्विति * न ते

निर्माल्यतां यान्तीतिस्मृत्या यातयामत्वनिषेधादभ्युपेत्यवादमात्रेण विधिलाघवलक्षणन्यायावगतप्रकृतमात्रविषयत्वादाग्नेय्येतिवचनायातयामस्यापि विध्युपपत्तिरुक्ता पदे जुहोतीति च विशेषशास्त्रेणाहवनीये जुहोतीति सामान्यशास्त्रस्य विकल्पायोगात्समुच्चये चाश्रुतप्रधानावृत्त्यापत्तेर्बाधो वक्ष्यते गुणावृत्तिस्तु प्रधानानुरोधेनोचितैवेत्याशयः । स्वमतेन शिष्टत्वादिति पूर्वपक्षसूत्रावयवोक्तापाद्य सिद्धान्तहेतुदूषणनिरासार्थत्वेन सूत्रं व्याचष्टे * तथेति * यद्पीत्यनुभाषणभाष्यमुपतिष्ठतइति विधिप्रत्यययोक्तेन कार्यान्तरोपादिष्टत्वेन विशेषणात्प्रकृतमात्रग्रहणं वाच्यं न च तत्सम्भवति प्रत्ययस्योपलक्षणत्वाभ्युपगमे विधायकत्वायोगापत्तेरित्येवं प्रत्ययेन विशेषणस्य सिद्धान्तहेतुत्वमापाद्य शिष्टत्वादित्ययवोक्तं दूषणोनुभाषणार्थत्वेन व्याख्यातुमाह * यदि त्विति * क्लृप्तं सामान्यान्वयप्रकृतमन्त्रविध्यै विशेषान्वयविधिमात्रेणाग्नेयीवद्धर्थवत्त्वोपपत्ते सामान्यविशेषान्वयकल्पनापादकमाग्नेयीमात्रग्रहणं न युक्तमित्यनेनैव न्यायेन प्रकृतमात्रग्रहणरूपविशेषसिद्धेर्न प्रत्ययेन विशेषणं सिद्धान्ते हेतुत्वेनाभिप्रेतमित्येवं परिहारार्थत्वेन सौत्रचशब्दव्याख्यानार्थं तदितिभाष्यं न ज्योतिष्टोमं प्रति मन्त्रस्य व्यापारविधानमुपपद्यतइति भाष्येण सिद्धान्तहेत्वन्तरं वदतोपदिष्टत्वेन विशेषणं सिद्धान्ते हेतुर्नाभिप्रेत इति उत्तरमर्थादुक्तमित्येवं व्याख्यातुमाह * तदिति * प्रतिभासनविवक्षयोपहासार्थं शोभति प्रयुक्तः । न केवलमन्यथैव सिद्धः प्रत्ययेन विशेषणमनभिमतं किं त्वसम्भवादपीत्येव सूत्रव्याख्यार्थमपि चेति भाष्यं व्याख्यातुम् * तथा हीति * चशब्दार्थे हिशब्दः । तदाहरणार्थं सर्व इति भाष्यं व्याचष्टे * सर्वो हीति * स्वाध्यायो ऽध्येतव्य इत्यध्ययनविषयेणाहरहः स्वाध्यायमधीयीतेति च ब्रह्मयज्ञविषयेण वाचस्तोमे सच सर्वाणि यजूंषि सर्वाणि सामानि पारिप्लवं शंसतीति वाचःस्तोमविषयेणाश्विने शस्यमाने यदि सूर्यो नाभ्युदियादपि सर्वा दाशतयीरनुब्रूयादिति चाश्विनानुद्यत्सूर्यास्याविषयेण प्रत्ययेन ताः सर्वा विहिता इत्यर्थः । तेनेति सूत्रार्थोपसंहारभाष्यं व्याचष्टे * अत इति * तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्याचष्टे * तस्मादिति * प्रकृतमात्रग्रहणेन सामान्वयकल्पकार्थापत्तिप्रतिबन्धमात्रं विधिलाघवापादकत्वात्सिद्धान्तहेतुर्न प्रत्ययेन विशेषणमिति तस्माच्छब्दव्याख्ययोक्तम् ॥

भक्षमन्त्राणां यथालिङ्गं ग्रहणादौ विनियोगाधिकरणम् ॥ ९ ॥

लिङ्गसमाख्यानाभ्यां भक्षार्थता ऽनुवाक

मुख्यसामर्थ्यात्मकमेव लिङ्गं विनियोजकं गौण
मपि वेत्येवं सामान्यान्वयापेक्षं लिङ्गविनियोजकं नि
ङ्गिकविनियोगप्रकारे लिङ्गस्वरूपगते सापवादप्रसङ्गे
क्षादचोदितेषु सामर्थ्याक्षिप्तेष्वनुष्ठेयेषु लिङ्गविनियोज
विषयगतलैङ्गिकप्रकारचिन्तार्थत्वेन पादसङ्गतिलिङ्ग
न्यान्वयसिद्ध्यर्थापेक्षत्वात् दुर्बलक्रमप्रकरणाद्यनुरोधा
णे बाधे ऽनन्तराधिकरणद्वयेनोक्ते ऽत्रापि सामान्या
क्षानुवाकसमाख्यापेक्षणलिङ्गबाधस्य प्रसक्तस्यापवा
ति स्पष्टत्वादनुक्त्वा कृत्स्नानुवाकोदाहरणप्रयोजनमाह
भाष्ये त्वादिशब्दस्तुल्यन्यायोदाहरणान्तरग्रहणार्थः त्रि
विभ्रन् सन्देहभाष्यं व्याचष्टे * अत्रेति * वसुमद्
प्रातः सवनादिशब्दसमानाधिकरण्यस्यानैन्द्राधिकरणे
ष्यमाणत्वस्य सवनस्तुत्यर्थत्वसूचनार्था संस्तुतोक्तिः ।
ब्दव्याख्यार्थे किं प्राप्तमित्यादिप्रयुज्यन्त इत्यन्ते पूर्वपक्ष
समित्यादिनामाख्यातानां तथा तु विशेषणीभूतस्वार्थवा
रयुक्तमाशङ्क्य तद्धितश्रुतमित्यादिभाष्यवक्ष्यमाणचो
७९८।१ र्थत्वायोगलक्षणहेतूपजीवनेनोपपादयति * तत्रेति
भाष्यवक्ष्यमाणोपजीवनार्थं * भक्षस्येत्युक्तम् * प्रयो
क्षमाणहेतूपजीवनात्पा * धन्तेइत्युक्तम् * प्रकृतापूर्वस्
गतानामेव मन्त्राणां लिङ्गविनियोगस्य सामान्यान्वय
त्पादनेन स्थितत्वाद्ग्रहणादौ वा चोदितत्वादर्थाक्षेपस्य
साधनत्वमात्रेणोपपत्तेरपूर्वसाधनत्वरहिते द्वारे विनियु
मपूर्वसाधनत्वव्याघातापत्तेस्तत्राचोदितमप्राप्तं चोदित
त्यनेन न्यायेन सध्यासमित्यादीनामपि चोदितभक्ष
ग्रहणाद्यभिधानद्वारा भक्षाभिधानार्थत्वावगमाद्भक्षेहीत्या
मीत्यन्ते ऽभक्षसङ्कीर्तनात्तत्सन्दंशगृहीतत्वमितरेषाम
भक्षव्यतिरिक्तार्थपरत्वायोगाद्यथा देवस्य त्वेति मन्त्रस्य
पाभिधानार्थत्वात्सवित्रादिपदस्याचोदितत्वेनोहाप्राप्तावुक्त
तर्हि चोदितार्थानां सवित्रादिपदानां प्रयोग इत्याशङ्क्य
वित्रादयः प्राधान्येन वक्तव्या इत्यनेन कारणेन सवि
चनमिति नास्ति किं तु निर्वापस्तुत्यर्थं सवित्रादिपदं प्र
वमे वक्ष्यते आतिथ्याग्रहणादीनां भक्षविशेषणत्वेनाभिधा

मित्यादीनामेकभक्षाख्यप्रधानभूतार्थानां भक्षयामिपदैकवाक्यत्वाद्भक्ष एव विनियोग इत्याशयः । लिङ्गेन वाक्यबाधादेकवाक्यत्वायोगशङ्कार्थं न त्वित्यादिभाष्यमेकोपक्रमोपसंहारत्वेनैकवाक्यत्वोपगमनसामर्थ्यरूपाल्लिङ्गादेकवाक्यत्वावगतेः भक्षेहीत्यस्याप्येहि शब्दयोगादेहिवसवित्येकवाक्यत्वेन ग्रहणार्थत्वाभ्युपगमे वा भाष्ये तत्परित्यागायोगादयुक्तमाशङ्क्योपपादयितुमाह * इत्युक्त इति * भक्षणे ऽपिशब्दाद्ग्रहणे ऽप्युपपत्तेरेकोपक्रमोपसंहारत्वानिश्चयाच्छङ्कायुक्ता वस्तुतस्तु प्रधानभूतभक्षार्थत्वसम्भवो गुणभूतग्रहणार्थत्वायोगादेहिवसवित्यादेर्ग्रहणार्थत्वं भाष्यकृतोक्तमित्यर्थः सर्वेर्हिंसार्थत्वस्मरणाद्ग्रहणार्थता न युक्तेत्याशङ्क्याह * यद्यपीति * यत्र क्वापि विनियुज्यमानस्य बाहो सामर्थ्याद्ग्रहणस्यावान्तरव्यापारत्वावगतेः पाणेरेव ग्रहणवृत्तावसाधारण्ये ऽपि पाणिपर्यन्ते बाहुव्यादेशात् बाहोरसाधारणत्वोपपत्तेर्वीजतन्तुसन्ताने स्मृताञ्जिर्वपतिरिव बाहुकरणकत्वाभावाविनाभावान्निमित्तकया लक्षणयास्माद्धातोर्ग्रहणप्रतीतिरित्याशयः ॥

क्रियावाचित्वमाख्यातुमेकैको ऽर्थो निदर्शितः ।
प्रयोगतो ऽनुमन्तव्या अनेकार्था हि धातवः ॥

इति स्मृतेर्वा वृद्धप्रयोगाच्छ्रुत्येव ग्रहणार्थतावसीयत इत्याह * अस्ति चेति * ग्रहणे वृद्धप्रयोगाद्धिंसायां च स्मृतेरुभयानुग्रहार्थं ग्रहणं कृतं हिंसावाचित्वावगतेः सत्ये लक्षणया ग्रहणार्थतेत्यन्यथा समाधत्ते * ग्रहणमिति * न च क्लृप्तमिति भाष्यावयवं व्याचष्टे * तथेति* चक्षिङः स्वाभाषार्थत्वस्मरणादेव भक्षणार्थता न युक्तेत्याशङ्क्याह * यद्यपीति * अत्राप्युभयानुग्रहार्थं भाषणकृतप्रकाशनवाचित्वावगतेर्लक्षणया प्रकाशनार्थतेत्याशयः । प्रयोगप्रदर्शनार्थं नृचक्ष शब्दव्याचक्षाणो मन्त्रावयवं योजयति * तेनेति * चक्षिङः ख्याञादेशस्मरणात्तस्य चानिट्त्वात् ख्येषमिति रूपासिद्धिमाशङ्क्याह *अवख्येषमिति* छन्दसि दृष्टानुविधित्वेनेह ख्याञित्युपसंख्यानकरणात्सिब्बहुलं लेटीति सिब्विकरणाश्रयणाच्च रूपसिद्धिरित्याशयः । हिनोतेर्गतौ स्मरणादुपसंहारे च नाभेरधस्ताद्गतिनिषेधादुपक्रमोपसंहारपर्यालोचनेनेन्द्रियगणवितृषीकरणनिषेधाच्चक्षुर्नासाश्रोत्राख्यछिद्रत्रयास्यसप्तमशीर्षण्यस्येन्द्रस्याङ्गिरसप्रमाणाख्यसप्तर्ष्युपस्थापनोक्तोरपि नाभ्यूर्ध्वगात्रगतिमात्रार्थत्वप्रतीतेः सम्यग्जरणार्थता न युक्तेत्याशङ्क्य हिनोतेः प्रीणने प्रयोगाहुतिवच्च वृद्धावपि स्मृतेर्वर्धनरूपप्रीणनार्थत्वाविरोधात्प्रीणनाधस्ताद्गत्योश्च सम्यग्जरणार्थताभ्यु-

पपादयितुमाह * हित्वेति * शङ्कोपसंहारार्थं तदितिभाष्यं व्याचष्टे * तस्मादिति* अन्यानि वास्येति भाष्यावयवेन भक्षानुवाकावयवभूतानामेहीत्यादिपदानां लक्षणविशेषणीभूतस्वार्थवाचित्वोक्त्या विलिङ्गविरोधाभावस्याज्ञानाच्छङ्काकृतेति मत्वा तत्स्मारणेन परिहारार्थं उच्यते इतिभाष्यं व्याचष्टे * तद्धीति * ग्रहणावेक्षणयोः प्राग्वर्त्तमानत्वेन सम्यग्जरणस्य चोर्ध्वं वर्तमानत्वेन विशेषणतेत्यर्थः । विशेषणविशेष्यभावे ऽपीडोपह्वानेडाभक्षणवत्पृथक्प्रकाशनोपपत्तेर्भिन्नार्थत्वाविरोधमाहेतिभाष्येणाशङ्क्य उपह्वानवद्ग्रहणादीनां पृथग्विध्यभावात्पृथक्प्रकाश्यत्वं नास्तीति परिहारार्थमुच्यतइति भाष्यं व्याचष्टे * तेनेति * वर्त्तमानत्वोक्तिसूचितस्य विध्यभावस्य तच्छब्देन परामर्शाद्ग्रहणादीनां विध्यभावेन कारणेन विशिष्टलक्षणे प्रकाशने ऽर्थाद्विशेषणभूतस्य ग्रहणादेराक्षेप्यत्वात्प्रकाश्यत्वात्पृथक्प्रकाश्यत्वात्पृथक्प्रकाश्यत्वाभावेनैकार्थ्योपपत्तेर्लिङ्गविरोधाभाव इत्यर्थः । पृथग्विध्यभावे ऽपि पृथक्प्रयत्नत्वोपाद्यत्वात्पृथक्प्रकाश्यत्वाभावेनैकार्थ्योपपत्तेर्लिङ्गविरोधाभाव इत्यर्थः । पृथग्विध्यभावे ऽपि पृथक्प्रयत्नोपाद्यत्वापृथक्प्रकाशत्वलक्षणस्वप्राधान्योपपत्तेर्लक्षणाया विशेषणत्वेन ग्रहणादिप्रकाशनं न युक्तमित्याशङ्काशयविवरणार्थं नैवमिति भाष्यं व्याचष्टे * यद्यपि चेति * पृथक्प्रयत्नोपाद्यत्वे ऽप्यविहितत्वेन विध्येकसमधिगम्यापूर्वसाधारणत्वायोगादपूर्वसाधनीभूतमन्त्रादिरूपवैदिकोपायद्वारत्वायोगाद्ग्रहणादेः स्वातन्त्र्येण प्रकाशनं नेत्युक्तमिति परिहाराशयविवरणार्थत्वेन भक्षणस्यैव समुच्चारितेन शब्देन द्विरिन्द्रवायवस्य भक्षयतीत्यादिना विधेयत्वान्मन्त्रप्रकाश्यत्वं नाविहितस्य ग्रहणादेरित्येवं सौत्रसमाख्यानशब्दव्याख्यानार्थं अत्रेत्यादि न च तैः प्रयोजनमित्यन्तं भाष्यं व्याचष्टे * तथापीति * लिङ्गाद्भिन्नार्थत्वावगतेरेकवाक्यत्वायोगशङ्कापरिहाराशयविवरणार्थत्वेनाप्यस्यैव सूत्रावयवस्य समीहितत्वरूपेण प्रयोजनत्वेन लक्षणरूपस्यैवार्थस्याख्यानान्न लिङ्गविरोध इत्येवं व्याख्यार्थं प्रयोजनं चेति भाष्यमर्थैकत्वादेकं वाक्यमित्यर्थः । शब्दस्य प्रयोजनवाचित्वाशयमिति सूचयितुमाह * तदिति * न किञ्चिदित्यनेन च तैरिति भाष्यावयवं व्याख्याय बुद्धिस्थीकृतस्य प्रयोजनं चेत्यनन्तरभाष्यस्य तच्छब्देन परामर्शादनेन भाष्येण यदुक्तं तन्निर्वापे विस्तरेणोपपादितमित्यर्थः । तस्मादिति भाष्यं लिङ्गविरोधाशङ्कापरिहारोपसंहारार्थत्वेन व्याख्यातुमाह * तस्मादिति * सामान्यान्वयार्थमपेक्षितया समाख्यया कृत्स्नस्यानुवाकस्य भक्षणार्थत्वावगमाल्लैङ्गिकविभज्य विनियोगो-

स्त्यर्थत्वेनान्यथास्यैवावयवस्य व्याख्यार्थं समाख्यानं चेति भाष्यं व्याचष्टे * तथा चाति * अध्वर्य्वादिसमाख्यावद्भक्षानुवाकसमाख्याया वैदिकत्वाभावेन विनियोजकत्वायोगाल्लिङ्गस्य च तदपेक्षा नास्तीत्याशङ्कार्थं नन्विति भाष्यमवतारणपूर्वं व्याचष्टे * तत्रेति * मिथ्यात्वाशयं शङ्का समाख्याया विनियोजकत्वायोगाशया वेति विकल्प्यावैदिकत्वे ऽप्यनादित्वेन पुरुषनिबन्धनदोषाभावान्मिथ्यात्वं तावन्नास्तीति परिहारार्थं यद्यपीति भाष्यं व्याचष्टे*तदिति * श्लोकं व्याचष्टे * यथैवेति * अन्धपरम्परादोषापत्तिशङ्कानिरासाय सा- ७९९।४
क्षाद्विनियोगविषयप्रामाण्यनिरासेन वाच्यवाचकत्वविषयप्रामाण्यसूचनार्थत्वेन स्वार्थोक्तिं व्याख्यातुम् * न चेत्युक्तम् * अतीन्द्रिये ऽर्थे ऽन्धपरम्परा स्यान्न च वाच्यवाचकभावो ऽतीन्द्रिय इत्याशयः । भक्षानुवाकसमाख्यानस्यैतदनुवाकवाचित्वावसाये ऽप्यतीन्द्रियविनियोगे प्रामाण्यं न सम्भवतीति द्वितीयकल्पं किमिति भाष्येणाशङ्क्य साक्षाद्विनियोगप्रामाण्यायोगे ऽपि क्रमादिपरम्पराद्वारविनियोजकश्रुतिकल्पनाद्वारा वैदिकसमाख्यावद्विनियोगप्रामाण्योपपत्त्युक्त्यर्थमेतदित्याद्यनुमास्यामह इत्यन्तं भाष्यमवैदिक्याः समाख्यायाः वेदार्थावधारणवेलायामबुद्धिस्थत्वाद्विनियोजकत्वायोगशङ्कानिरासपूर्वं व्याचष्टे * अतश्चेति * सन्निध्युच्चारणवाचिना समभिव्याहारशब्देनोच्चारणार्हशब्दसान्निध्यभिधानाद्वेदाधिष्ठानत्वाच्च सन्निधेरवयवव्युत्पन्नत्वसूचनार्थम् * विगृह्यमाणेत्युक्तम् * षष्ठीसमासात्सम्बन्धमात्रावगमे ऽप्यङ्गाङ्गिरूपसम्बन्धावगति कथमित्याशङ्क्य सम्बन्धसामान्यसन्निधिलक्षणात्क्रमादुभयापेक्षालक्षणप्रकरणकल्पनद्वाराङ्गाङ्गित्वविशेषरूपसम्बन्धापादकवाक्यकल्पने ततश्चेत्यनेन सूचिते तदुपपादनार्थं भक्षस्याङ्गविषयानुवाकस्य चाङ्गिविपयापेक्षा भक्षो ऽपि हीत्यनेनोक्ता । अग्निः सिञ्चतीत्यन्वयविशेषावगमे ऽपि सामर्थ्यं विना निर्वाहायोगात्तत्कल्पनास्ति चेत्यनेनोक्ता । सत्यपि सामर्थ्ये ऽङ्गाङ्गित्ववाचिश्रुत्यभावे ऽङ्गाङ्गित्वायोगा चशब्देन श्रुतिः सूचिता विनियोजकश्रुत्यनुमाने ऽपि विध्येकगम्ये ऽर्थे विधिश्रुतिं विनाङ्गत्वायोगमाहेति भाष्येणाशङ्क्य समाख्यावगताङ्गस्यानुवाकस्य प्रयोगवाक्याद्विध्युक्त्यर्थमत्रेति भाष्यं व्याचष्टे * तेनेति *

तस्य रूपोपदेशाभ्यामपकर्षो ऽर्थस्य चोदितत्वात् ॥ २५॥

लिङ्गविनियोगाधिकारादुपदेशस्य च सम्यग्जरणे ऽपि

क्लेशोपपाद्यत्वादुपदेशग्रहणस्याभ्युच्चयमात्रार्थत्वप्रतीतेर्भक्षानुवाकस्यावयवानां केषां चिल्लिङ्गेन भक्षादपकर्ष इत्येवं तस्य रूपादपकर्ष इत्येवं तस्य रूपादपकर्ष इत्येतावत्सूत्रावयवव्याख्यानार्थं रूपादित्यादि न लक्षणेत्यन्तं भाष्यं व्याख्यातुमाह * परिचोदनेति * कीदृक् परिचोदनोक्तो मार्ग इत्यपेक्षायां मन्त्रस्य श्रौतार्थत्यागात्तत श्रुतिवृत्तेरनुग्राह्यत्वाद्ग्रहणाशक्तेः स्वाभिधानमवान्तरव्यापारीकृत्य लक्षणार्थं त्यागात्कर्तृकत्वानुपपत्तेः स्वप्राधान्यस्यानु * ग्राह्यत्वादित्युक्तम् * अनेन च भाष्यस्थमुख्यशब्दः श्रुतिप्राधान्यरूपार्थद्वयाशयतया वाक्यान्यविशेषणत्वरूपार्थद्वयाशयतया च लक्षणाशब्दो व्याख्यातो भवति । कृत्स्नस्यैकवाक्यत्वाल्लक्षणया विनियोगस्य पूर्वपक्षिनस्य निरासार्थं मुख्यार्थभावेतिभाष्यावयवं व्याख्यातुं ग्रहणादिप्रकाशार्हेण रूपशब्दोक्तेन सामर्थ्यात्मकेन लिङ्गेन वाक्यबाधोक्त्यर्थो ह्यर्थवाच्यव्ययलुप्ततृतीयाकवति प्रत्ययान्तग्रहणादिवच्छब्दयुक्तो ग्रन्थः सर्वाण्येतानि लक्षणविशेषणानीति भाष्योक्तं लिङ्गाविरोधं दूषयितुमनुभाषते * न त्विति * एवमपि विपरिचोदनाभाष्योक्तं दूषणमाह * सत्यमिति * ग्रहणाद्यभिधानसामर्थ्यरूपप्रत्यक्षलिङ्गापक्षयैकवाक्यताकल्प्यलक्षणाद्वारभक्षपदैकवाक्यतोपगमनसामर्थ्यरूपस्य लिङ्गस्य पूर्वपक्षोक्तस्य श्रुतिकल्पने विप्रकर्षाद्दौर्बल्यमित्यर्थः । एवं च प्रत्यक्षलिङ्ग विनियोज्येन मन्द्रादिना भक्षस्य वा रुद्रत्वादेर्हि व सवित्यादीनां च प्रत्यक्षाल्लिङ्गाद् ग्रहणादिषु प्रवृत्तेर्लक्षणादपकर्ष
८००।२ इत्याह * तेनेति * यद्यपि ग्रहणादय इति सौत्रसमाख्यानोक्तिप्रथमे व्याख्यार्थभाष्योक्तार्थानुभाषणार्थमुच्यतइति भाष्यं व्याचष्टे * न त्विति * तत्परिहारार्थत्वेनार्थस्य चोदितत्वादिति सूत्रावयवस्य भक्षविध्यन्यथानुपपत्तिकल्पितविधिनैहिवसवित्यादिवाक्यार्थस्य ग्रहणादेश्चोदितत्वादपूर्वसाधनत्वेनापूर्वसाधनीभूत मन्त्रं प्रति द्वारत्वोपपत्तेर्मन्त्रप्रकाश्यता युक्तेत्येवं व्याख्यार्थं मन्त्रेत्यादिभाष्यमर्थप्राप्तानामस्मृतानामपि वा फलसिद्धत्तिसिद्धेः स्मारकापेक्षयापूर्वसाधनत्वाभावेनापूर्वसाधनीभूतमन्त्रं प्रतिद्वारत्वायोगादिति विकल्पनिरासार्थो ऽस्तीति भाष्यावयवः सम्यग्जरणस्यानुनिष्पादित्वमाशङ्क्य विनाडीगतिप्रतिबन्धफलार्जनवस्थानमतः प्रणिधानादिप्रयत्नापाद्यत्वोक्त्यर्थश्चोदितानीत्यादिर्द्वितीयकल्पनिरासार्थत्वेन सूत्रावयवव्याख्यार्थं इत्येवं व्याख्यातुमाह * कथमिति * गात्रप्राणनेन्द्रियगणाविर्भावीकरणप्राणाख्यसमष्टयुपस्थाननाभ्यधस्तादगमनरूपानेकार्थहेतुत्वात्सम्यग्जरणस्य बहुत्वमुपचर्य वमनविरेकनिमित्तप्रायश्चित्तास्नानरू-

पपृथग्वाक्यचोदितत्वोक्तिः । प्रायश्चित्तविधेर्लिङ्गमात्रत्वादयुक्तेति मत्वा लक्षणस्योदरस्थापनरूपप्रतिपत्तित्वात्सम्यग्जरणं विनोदरे स्थित्ययोगाद्भक्षविधेः सम्यग्जरणपर्यन्तत्वाशयं पुरस्तात्प्रत्यञ्चमैन्द्रवायवं भक्षयति पुरस्तात्प्रत्यञ्चं मैत्रावरुणं भक्षयति सर्वतः परिहारमाश्विनं भक्षयतीत्यादिभक्षविधिपर्यवसानात्सामान्यशास्त्रैर्व्यक्तीनामिव सम्यग्जरणस्य चोदितत्वाभिधानमर्थप्राप्तानीत्येतच्च विहितभक्षान्यथानुपपत्तिकल्प्यविध्यन्तरचोदितत्वाशयमित्येवं व्याख्यातुम् * भक्षेत्युक्तम् * प्रयोजनं चेति सौत्रसमाख्यानोक्तिद्वितीयव्याख्यार्थभाष्योक्तार्थनिरासार्थत्वेनावृत्त्या रूपोक्तिव्याख्यार्थं रूपश्चैषामिति भाष्यमेहीत्यादिवाक्यानां भक्षयामिपदैकवाक्यतानपेक्षरूपं ग्रहणादिप्रकाशनएव समर्थमित्येवमेकवाक्यतापगमनसामर्थ्यात्मकलिङ्गस्याभिधानसामर्थ्यात्मकलिङ्गापेक्षया श्रुतिविप्रकर्षे ऽपि सामान्यान्वयापेक्षितसमाख्यानुसारित्वाच्छ्रुतिकल्पकत्वं युक्तं सामान्यान्वयरहितत्वात्त्वितरस्य न युक्तमिति नत्विति भाष्येणाशङ्क्य भक्षणस्य स्तुत्यर्थग्रहणादिवैशिष्ट्याप्रकाशने श्रुतेरचोदितत्वेनादृष्टार्थत्वापत्तेः दृष्टसम्भवे चादृष्टार्थत्वायोगादेकवाक्यतोपगमनसामर्थ्यस्य श्रुतिकल्पकत्वानुपपत्तेः क चिन्न्यायेन च कृत्स्नस्य भक्षार्थत्वाभावे ऽपि भक्षानुवाकसमाख्योपपत्तेः ग्रहणाद्यभिधानसामर्थ्यस्यापि समाख्याविरोधाभावाच्छ्रुतिकल्पकता युक्तेत्येवं निरासार्थत्वेन ग्रहणार्थस्यैवानुष्ठेयत्वेन प्रकाश्यतयापेक्षितत्वाद्दृष्टार्थत्वोपपत्तेरनपेक्षितभक्षस्तुत्यर्थत्वे सत्यदृष्टार्थत्वापत्तेरित्येवमर्थस्य चोदितत्वादिति सूत्रावयवस्यावृत्त्याव्याख्यान्तरार्थं बाढमित्यादिभाष्यं स्पष्टत्वान्न व्याख्यातम्।अत्र भक्षानुवाके केषां चिदवयवानां लक्षणे विप्रकर्ष इत्येवमधिकरणार्थोपसंहारार्थं तस्मादिति भाष्यं व्याचष्टे * अन[इति * मन्त्रविधायिवाक्याभावाद्ग्रहणादिविषयत्वेनोपदेशोक्तिर्व्याख्याता । हिन्वेति मन्त्रस्य सम्यग्जरणप्रकाशनशक्तेरतिस्पष्टत्वमात्रालम्बना प्रौढ्योपदेशोक्तिरर्थस्यैवेत्येवकारेण भक्षस्तुतेश्चोदितशब्दोक्ता भक्षार्थता व्यावर्त्तिता येन कारणेन ग्रहणाद्यर्थस्य पृथक्प्रयत्नापाद्यत्वेनानुष्ठेयत्वात्प्रकाशनापेक्षितार्थस्य चोदित्वादिति सूत्रावयवेनोक्ता तेन कारणेन ग्रहणादेः प्रत्यक्षोपदेशानुदाहरणे ऽपि भक्षविध्यन्यथानुपपत्तिकल्प्यविधिभिश्च ग्रहणाद्युपदेशसम्भवान्नादोष इत्याह * तेनेति * सम्यग्जरणस्य च सोमेद्रं चरुं निर्वपेच्छ्यामाकं सोमवामिन इति वमने प्रायश्चित्ताम्नानाद्विरेके ऽपि क चित्प्रायश्चित्ताम्नानात्तदन्यथानुपपत्यापि विधिकल्पनसम्भवात्स्पष्ट एवोपदेश इत्याह * सम्यग्ज-

रणं त्विति * दार्ढ्याशया प्रत्यक्षोक्तिः ॥

अथ मन्द्राभिभूतिरित्यादेः भक्षयामीत्यन्तस्य
एकमन्त्रताधिकरणम् ॥ १० ॥

गुणाभिधानान्मद्रादिरेकमन्त्रः स्यात् तयोरेकार्थसंयोगात् ॥ २६ ॥

यथार्थनिष्कृष्टमन्त्रोदाहरणभाष्यं सूक्तवाकवदेवेति पूर्वाधिकरणवार्तिकेनैवार्थाद्व्याख्यातत्वात्सन्देहभाष्यं च स्पष्टत्वादव्याख्याय किं तावदिति पूर्वपक्षभाष्यं पुरोडाशादिभक्षणवत्सोमभक्षणस्यापि द्रव्यप्रतिपत्त्यर्थत्वं वक्तुं अनुष्ठानसामर्थ्याधानरूपभक्षयितृसंस्कारार्थत्वस्यापि सम्भवात्तपर्यन्तेन अनुष्ठानसामर्थ्यस्य लक्षणया प्रोत्साहनाथानुष्ठेयस्यापि स्वर्गादिवत्प्रकाश्यत्वोपपत्तावभिधानसामर्थ्यात्मकेन लिङ्गेन मन्द्रादेर्भक्षणं विनियोगायोगात्पृथङ्मन्त्रतेत्येवमाशयत्वेन व्याख्यातुमाह * ग्रहणादिवदेवेति * अपवादत्वेनानन्तरसङ्गतिसूचनार्था दृष्टान्तोक्तिः । सोमभक्षणस्यानुषङ्गिकभक्षयितृसंस्कारार्थत्वकल्पनेऽपि भक्षयितृसंस्कारस्य स्वर्गवत्फलत्वाभावेनोत्साहनार्थं प्रकाशनानर्हत्वात्तपर्यन्तस्य तल्लक्षणार्थत्वहेत्वभावात्तृप्तेश्चाल्पं भक्षयतीति यावत्तृप्तिनिषेध्येनानाशङ्कनीयापादनतयाननुष्ठेयत्वात्प्रकाशनार्हत्वानुपपत्तेरभिधानसामर्थ्यात्मकस्य लिङ्गस्यानर्थक्यापत्त्या विनियोजकत्वात्तदविरोधिनैकवाक्यतोपगमनसामर्थ्यात्मकेन लिङ्गेन मन्द्रादेर्भक्षणे विनियोगात्तृप्त्यन्तवसुमद्गणाद्योर्मन्त्रभागयोरेकतृप्तिफलकभक्षणरूपार्थे संयोगात्तपर्यन्तेर्भक्षणगुणत्वेन तृप्त्यभिधानावगमान्मन्द्रादिरेक एव मन्त्र इत्येवं सूत्रव्याख्यार्थमेवमित्यादिभाष्यं तात्पर्यतो व्याचष्टे * इतीति * श्लोकं व्याचष्टे * ग्रहणादीनीति * तयोरेकार्थसंयोगादिति सूत्रावयवव्याख्यार्थं भ-
८०१।२ क्षयामि वाक् तर्प्यतीत्यादिभाष्यशेषं सङ्क्षेपतो व्याचष्टे * तस्मादिति * लोटः प्राप्तकालार्थत्वे प्रार्थनार्थत्वे वा तर्प्यतीत्येनदर्थं भक्षयामीत्येवमेकवाक्यतोपपादनार्थं तर्पणक्रियार्थयोर्भक्षणक्रियायामुपपदभूतायां स्मृता तर्प्यन्तीतिभविष्यन्त्याख्यातल्लृड्विभक्तिर्भाष्ये प्रयुक्ता ॥

इन्द्रपीतस्येत्यादिमन्त्राणां सर्वेषु भक्षणेषु
ऊहेन विनियोगाधिकरणम् ॥ ११ ॥

लिङ्गविशेषनिर्देशात्समानविधानेनैन्द्राणाममन्त्रत्वम् ॥ २७॥

मन्त्रादिर्मन्त्रो लिङ्गेन भक्षणे विनियुज्यतइत्युक्ते प्रसङ्गात्किमैन्द्रसोमभक्षणेष्वेव विनियुज्यते सर्वेषु वा सोमभक्षणेष्विति चिन्तार्थमापाद्समाप्तेरेकमधिकरणं सन्देहहेतुश्चेन्द्रपीतशब्दः किमिन्द्रेण पीत इति तृतीयासमासत्वात्सोमवाची किञ्चेन्द्रेण पीतमस्मिन्निति बहुव्रीहित्वात्सवनवाचीति सन्देहः तल्लिङ्गविशेषनिर्देशादनैन्द्राणाममन्त्रत्वमित्येतावत्सूत्रमन्यपदार्थप्रधानबहुव्रीह्यपेक्षया स्वपदार्थप्राधान्यात्तत्पुरुषस्य बलीयस्त्वप्रतीतेर्विशेषतश्चास्य व्यधिकरणत्वेन बहुव्रीहित्वायोगादिन्द्रपीतस्येत्येन्द्रलिङ्गनिर्देशादनैन्द्रसोमभक्षणानां लिङ्गविनियोज्यमन्त्राविषयतान्येवं पूर्वपक्षार्थे समानविधानेष्वनैन्द्राणाममन्त्रत्वमित्येतावत्त्वात्सूत्तैकदेशमैन्द्राणां च प्रदानानां धर्मग्राहैकज्योतिष्टोमावयवत्वेन समानविधाने प्रकृतिविकारभावाभावेनोहायोगादनैन्द्रसोमभक्षणानां शून्यतेत्येवं पूर्वपक्षप्रयोजनोक्त्यर्थमिति सर्वं सूचयितुमाह * इन्द्रपीतस्येति *

यथादेवतं वा तत्प्रकृतित्वं दर्शयति ॥ २८ ॥

लिङ्गेन मन्त्रस्यानैन्द्रसोमभक्षणे विनियोगाभावे ऽपीन्द्राय त्वा वसुमते गृह्णामीतीन्द्रलिङ्गेन मन्त्रेण सोमग्रहणादिन्द्रलिङ्गेनैव च सोममानाद्विद्याग्नीनां त्रैवर्णिकविषयत्वनियमात्तत्साध्यानां क्रतूनां त्रैवर्णिकविषयत्वनियमवन्मन्त्रलिङ्गादग्नीषोमीयस्यचाङ्गत्वनियमवत्सोमस्य मानग्रहणयोरिन्द्रलिङ्गमन्त्रनिर्देशादैन्द्राणामेव प्रदानानामौपदेशिकधर्मवत्त्वावगतेः सोमेन यजेतेत्यस्यापि मन्त्रालोचनायैन्द्रेण सोमेन यजेतेत्येवमर्थत्वावगतेः कर्मैक्ये ऽपि चाभ्यासानां भेदसंख्यावत्प्रकृतिविकारभावोपपत्तेः सर्वेषां प्रदानानां समानविधानत्वाभावादनैन्द्रसोमभक्षणानां यथादेवतं मन्त्रवत्तेत्येवं पूर्वपक्षप्रयोजनाक्षेपार्थत्वेनैतत्सूत्रं व्याख्यातुमाह * अनैन्द्रेष्वपीति * प्रयोगोक्त्या पूर्वपक्षे प्रयोजनोक्त्यर्थपूर्वसूत्रावयवोक्तामन्त्रकत्वनिरासार्थत्वेन वाशब्दो व्याख्यातः विकृतित्वादित्यनेनानैन्द्राणां प्रतियोगित्वेनोपस्थापितैन्द्रप्रकृतित्वं हीतिसूत्रावयवो व्याख्यातः। कर्मैक्यात्प्रकृतित्वायोगमाशङ्क्याह * समाने हीति * अनैन्द्राणां विकृतित्वप्रकृतिः कत्यपेक्षायामाह * ध्रुवेति * लिङ्गविशेषनिर्देशादिति पूर्वसूत्रावयवमनुषज्यैन्द्राणां प्रकृतित्वोपपादनत्वेन हेतुप्रश्नपूर्वं व्याख्यातुमाह * कथमिति * कथं गुणभूतमन्त्रानुरोधात्कथम्प्रधानभूतप्रदानव्यवस्थेत्याशङ्क्याह * भवति हीति * प्रकृतिविकारभावमुपसंहरन्ति * तेनेति * प्रकृतिविकृतित्वोपपादनस्योहोपयोगमुपसंहरति * तत्रश्चेति

* प्रकृतिविकारभावलिङ्गत्वायोगात्तत्प्रकृतित्वं हि दर्शयतीत्याबृत्य। एकदेशसूत्रावयवोक्तं लिङ्गदर्शनं व्याचष्टे *तथा चेति * अग्निष्टोमान्तानां प्रदानानां समानविधानत्वे ऽपि संस्थां परमतेन तावत्परिहरति * संस्थानां चेति*स्वमतेन विकारत्वं ऽप्यूहानुवादस्य लिङ्गत्वोपपत्ति

८०२॥ शङ्कापूर्वमाह * नन्विति* अग्निष्टोमप्रदानसामानविध्ये सति संस्थानाधिकारान्वयियथाप्रकृतावग्निष्टोमप्रदानसामानवि ध्येसति संस्थानाधिकारान्वयि यथाप्रकृतावग्निष्टोमसंस्थायां सर्वेषां त्वैकमन्त्र्यं स्यादिति सिद्धान्तन्यायेनानूहितप्रयोगस्तथा विकृतावपि षोडशिन्यतिरात्रे चादित्यवत् गणस्य तृतीयसवने ऽस्य जगतीच्छन्दः पितृपीतस्येत्यनूहितप्रयोगसम्भवान्नोहानुवादो युज्यते ऐन्द्रप्रदानानां तु प्रकृतित्वे यथा प्रातः सवनीयेष्वनैन्द्रेषु प्रदानेषूहितस्तथा तार्तीयसम्पातिकेष्वग्निष्टोमादिष्वपितृदेवत्येषु प्रदानेषूहितत्वात्षोडश्यतिरात्रयोस्तृतीयसवनीययोरपि पितृदेवत्ययोः प्रदानयोरूहदर्शनं युक्तमित्यर्थः । पूर्वपक्षे ऽन्यदेवत्यसोमभक्षणेनाममन्त्रकत्वे ऽपि समानविधानत्वस्य पूर्वसिद्धान्तपक्षयोस्तुल्यत्वम । इन्द्रलिङ्गानां रसीभूतसोमग्रहणाथादिष्वप्रयोगमुभयाभिमतमाक्षेप्तुमसमानविधित्वेनानाक्षिप्तोहशङ्कार्थं सङ्गतिलाभायेन्द्रपीतशब्दस्य सामान्यविषयत्वाभ्युपगमेनानैन्द्रेषु भक्षणमन्त्रोहस्य शङ्कितत्वाल्लिङ्गदर्शनोपपत्तिः । समानविधानत्वे ऽप्यनुष्टुप्छन्दःशब्दयुक्तं भक्षमन्त्रं करोतीति भक्षमन्त्रे ऽनुष्टुप्छन्दःशब्दविधानपूर्वपक्षन्यायेन वा षोडशिनि पितृदेवत्ये पितृपीतशब्दयुक्ततार्तीयसावनिकभक्षमन्त्रप्राप्तेरनुष्टुप्छन्दःशब्दयुक्तभक्षमन्त्रविधानादर्थप्राप्तस्योहस्य धातुना ऽनुवादो भविष्यतीत्याशङ्क्याह * विशिष्टेति * जगतीकार्ये षोडशिन्यनुष्टुब्विधौ सत्यनुष्टुप्छन्दःशब्दस्योहितस्य मन्त्रसिध्यर्थो विधिरूहाननुवादे ऽप्यवसीयते तदभावानुसारेण सति तदनुष्टुप्छन्दः स इत्येवमूहविशेषरूपेण विशिष्टमनुष्टुप्छन्दः पदमपेक्ष्यापि विपरिणामव्यपदेशो युज्येत ननु स्वरूपेण विधित्सितमनुष्टुप्छन्दःशब्दमपेक्ष्य ततश्चानुष्टुप्छन्दः शब्दस्योहत्वे प्रमाणाभावात्तद्विधावप्यूहस्याप्राप्तत्वान्नानुवादोपपत्तिरित्याशयः । इष्टपदेनिपाठे त्वनुष्टुप्छन्दःशब्दस्योहानुवादार्थं नमतीति पदमपेक्ष्य पश्चाद्विधौ सति विपरिणामव्यपदेशो युज्येत ननु विधित्सितमनुष्टुप्छन्दःशब्दमपेक्ष्य पश्चाद्विपरिणामव्यपदेश इत्यर्थः । पूर्वपक्षप्रयोजनाक्षेपमुपसंहरति * तस्मादिति *

अभ्युन्नीतसोमभक्षणे इन्द्रस्याप्युपलक्षणाधिकरणम् ॥ १२ ॥

पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वात् ॥ २९ ॥

ऊहोक्तेः पूर्वपक्षप्रयोजनमात्रार्थत्वेनास्थायित्वादूहविशेषचिन्ता न युक्तेत्याशङ्क्योहव्याजेन पुनरभ्युन्नीतयागे पूर्वशेषस्य हि तस्य पुनरभ्युन्नीतस्य सोमस्य विनियोगो ऽभ्युन्नीतमात्रस्य वेति चिन्तार्थं कृत्वाचिन्तयोहविशेषचिन्तोपपत्तिसूचनार्थमेवमिति भाष्यं व्याचष्टे * एवमिति * पूर्वपक्षप्रयोजनाक्षेपः पूर्वपक्षोक्त्या विवक्षितः । ऊहनिरस्ते तद्विशेषचिन्तानवसरापत्तेर्मध्ये चिन्तान्तरोपपत्तिसूचनार्थैवकारः कृत्वाचिन्त्योक्तोहस्थायित्वे ऽपि सन्मिश्रेण ससर्गिद्रव्यस्य निष्कर्षमसामर्थ्ये कृत्स्नस्य पात्रस्य पुनरभ्युन्नीतयागाङ्गत्वे बुद्ध्या वा निष्कर्षशक्तेः पुनरभ्युन्नीतमात्रस्येति निष्कर्षसामर्थ्यात्मकलिङ्गहेतुकशेषचिन्तात्मकत्वात्पादलक्षणसङ्गतचिन्तोपपत्तिः सूचिता । पुनरभ्युन्नीतोक्तिं व्याचष्टे *दुर्नेष्विति* पुनरभ्युन्नीतत्वोक्त्युपपादनार्थं तेषामित्यादि तत्रेत्यादिचोहचिन्ताविषयत्वोपपादनार्थं भाष्यमवतारणपूर्वं व्याचष्टे *तेषामिति* ब्रह्मयजमानहोत्रुद्गातारो मध्यतः कारिणः मैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्ट्राग्नीध्राच्छावाकानां षण्णां मध्ये ऽच्छावाकचमसे पुनरभ्युन्नयनाभावादैन्द्रत्वे ऽप्यूहविषयत्वानुपपत्तेः नाच्छावाकयाज्या दर्शिता । ब्राह्मणाच्छंसियाज्यायाश्चैन्द्रत्वे ऽपि कियतः सोमस्य विनियोग इति चिन्तोपयोगित्वात्प्रदर्शनं संसर्गिद्रव्यत्वेन शेषभेदानवगमाच्छेषस्तत्रेति भाष्यावयवमयुक्तमाशङ्क्य बुद्ध्या निष्कर्षसम्भवसूचनार्थम् * दृश्यते इत्युक्तम् * तत्रेति सन्देहभाष्यं व्याचष्टे * तत्रेति * शेषस्य देवतयोपलक्षणे क्रियमाणे तदुपलक्षणार्थत्वेन प्रस्थितापीन्द्राख्या देवता कीर्त्तयितव्या न वेति कीर्त्तनाख्यप्रकथनवाचिकरोत्यर्थे तव्यप्रयोगाच्छेषोपलक्षणायेन्द्रः कीर्त्तयितव्य इत्येवं उपलक्षणत्वोक्तेर्व्याख्यातत्वान्नेन्द्रपदोहो ऽनेनोक्तः येनेन्द्रपदस्य प्राकृतत्वादिन्द्रामित्रावरुणसमुदायस्य च देवतात्वाभावेनेन्द्रमित्रावरुणपदस्येन्द्रमित्रावरुणपदस्येन्द्रपदस्थाने प्रयोगायोगात्सिद्धान्तवचनव्यक्त्ययोगः शङ्क्येत द्वयोस्तु प्रदानयोः प्रत्येकं भक्षमन्त्रप्राप्ताविन्द्रे प्रदाने प्रकृतित्वादविकृते मित्रावरुणपीतस्येत्येवमित्युक्तम् । अतिक्रान्तयागान्वयाच्चेन्द्रस्यातिक्रान्तता प्रस्थितोक्तिव्याख्यानायोक्ता । शेषद्वयसद्भावे पूर्वपक्षायोगात्सन्देहायोगं शङ्कते * कुत इति * पूर्वदेवतान्वयापनयानयनसन्देहात्सन्देहमुपपा- ८०३।१
दयितुमाह * किमिति * भक्षमाणस्य सोमस्य द्वयोर्देवतयोः शेषत्वादिन्द्रस्य मित्रावरुणादीनां शेषोपलक्षणार्थं कीर्त्तनाख्यं प्रकथ-

नमित्येवं प्रकथनवाचिनः करोतेरर्थे ल्युट्प्रयोगात्स्पष्टार्थं सूत्रमसिद्धान्तार्थत्वमात्रेण व्याचष्टे * किमिति *

अपनयाद्वा पूर्वस्यानुपलक्षणम् ॥ ३० ॥

पूर्वपक्षहेतुपूर्वदेवतापनयासिद्ध्यै पात्रस्थस्य कृत्स्नस्य सोमस्येन्द्रं हविरग्निमुख्येन देवतायै श्राविताय श्रावयेति मन्त्रेणाश्रावणप्रेषणादेस्तु औपडित्यनेन देवतां प्रत्याश्रावणं कृत्स्नस्य देवतान्तरसञ्चारे मित्रावरुणादिभाग इति भाषेणोक्ते देवतान्तरोद्देशेन गृहीतमात्रस्याप्याश्रावणादिसम्भवात्कथं कृत्स्नस्याश्रवणं गम्यतइति पृष्टे प्रदानकालीनत्वादाश्रवणादीनां च संसर्गिद्रव्यत्वेन विवेकाप्रतीतेरित्येवमुपपत्तिसूचनार्थं मित्रावरुणादेयस्तदेव हीज्यन्ते इत्यध्याहारसहितेनोक्तमित्येवं भाष्यं व्याख्यातुमाह * आश्रावणेति * होता यक्षन्मित्रावरुणेत्यादिप्रैषान्तानुवचनग्रहणायादिशब्दः प्रदानकालीनैराश्रवणादिभिरिति हेतुगर्भितं विशेषणम् । अपनीतपूर्वदेवतान्वयस्यापि शेषस्य भूतपूर्वगत्योपलक्षणं भविष्यतीत्याशङ्कानिरासमूचनार्थत्वेन दृष्टान्तभाष्यं व्याख्यातुमाह * न चेति * पूर्वस्येन्द्रस्य विशेषोपलक्षणार्थत्वेन कीर्तितमित्येव पूर्वपक्षप्रतिज्ञार्थसूत्रावयवव्याख्यार्थं तस्मादिति भाष्यं व्याचष्टे * तस्मादिति *

अग्रहणाद्वाऽनपायः स्यात् ॥ ३१ ॥

पूर्वपक्षहेतुनिरासप्रतिज्ञार्थसूत्रावयवव्याख्यार्थं नचेत्यादिना सावनीयनइत्यन्तं भाष्यं व्याचष्टे * अथ चेति * देवतान्तरोद्देशेन पूर्वस्य सकृद्धुतस्य शेषस्याग्रहणादिति एवसमपनयनिरासोपपादनार्थत्वेनाग्रहणादिति सूत्रावयवं पूर्वसूत्रस्थं पूर्वशब्दशेषरूपार्थान्तरपरामर्शार्थत्वेनानुषज्य व्याख्यार्थं सकृदित्यादिभाष्यं प्रश्नपूर्वं तात्पर्यतो व्याचष्टे * कुत इति । यां देवतामुद्दिश्य यत् द्रव्यं गृह्यते तस्या देवतायास्तदेव द्रव्यं गृह्यते तस्या देवतायास्तदेव द्रव्यं सम्बन्धीत्युक्ते ऽग्न्याद्युद्देशेनापि निरुप्तानां सवनीयहविषामथैतेषां हविषामिन्द्रमेव यजतीति देवतान्तरान्वयश्रवणाद्यामुद्दिश्य यद्गृह्यते तत्सम्बन्धीति नियमायोगमाशङ्क्याग्न्यादीन् प्रति स्वत्वापादकस्याग्न्याद्युद्देशेन त्यागः स्यात्सवनीयहविषामभावेनाग्न्यादीन्प्रति स्वत्वाभावात्स्वस्वामिभावलक्षणाग्न्यादिसम्बन्धाभावो युक्त इति वैषम्यसूचनार्थं यां प्रति स्वत्वेन* प्रयोजनेन नगृह्यतइत्युक्तम् * श्लोकं व्याचष्टे * द्वाभ्यामिति * एवमपि पु-

नरभ्युन्नीतमात्रं देवतान्तरोद्देशार्थत्वेन गृह्यते ननु पूर्वशेष इति क-
थमवसीयत इत्याशङ्क्य सकृद्धुतचमसाभिमुख्येन पुनरभ्युन्नीतसो-
मग्रहविधानात्सकृद्धुतसोमशेषस्य ग्राह्यद्रव्याधारभूतपात्रोपलक्ष-
णमात्रता ऽवसीयते ननु ग्राह्यतेत्येवं परिहारार्थत्वेन तदेव भाष्यं व्या-
चष्ट * इह चेति * यत्त्विति भाष्येणापनयोपपादनशङ्कामनुभाष्य
ग्रहणकालावगतभेदानुसन्धानेन प्रदानकाले संसृष्टस्यापि बुद्ध्या
निष्कष्टुं शक्यत्वात्पुनरभ्युन्नीतमात्रस्याश्रवणादिविषयतावसीयते
ननु कृत्स्नस्य पात्रस्थस्येत्येवं परिहारार्थमुच्यतइत्यादिगम्यतइत्यन्तं
भाष्यं व्याचष्ट *यथा चेति * यथा गृहीतोक्त्या संसृष्टस्यापि ग्रह-
णकालीनविवेकावगतानुसारादेकपात्रगृहीतवायव्यैन्द्रवायवसोमव-
द्बुद्ध्या निष्कर्षः सूचितः । देवतोद्देशपूर्वकद्रव्यत्यागाख्यसङ्कल्पापा-
द्यत्वात् द्रव्यदेवतान्वयस्य तस्य च होमाख्यप्रदानकाली-
नत्वात्तदा च संसृष्टत्वात् कृत्स्नस्यैव देवतान्तरान्वयो गम्य-
तइत्याशङ्कानिरासार्थं नाश्रावणेति भाष्यं देवतान्वयस्य प्रदानकाली-
नताया निराकर्त्तुमशक्यत्वादयुक्तमाशङ्क्य यद्देवतोद्देशेन यत् द्रव्यं
त्याज्यत्वेन गृहीतं तस्यैव प्रदानकाले तद्देवतान्वयम्प्रत्येवमर्थत्वेन
व्याख्यातुमाह * न चेति * प्रदानकाले कृत्स्नविषयरूपसङ्कल्पान्त-
राभावे ऽपि पुनरभ्युन्नीतसोमसङ्कल्पनैव संसृष्टस्य विवेकग्रह-
णाशक्तेः प्रसङ्गात् कृत्स्नः सोमो विपर्यीकरिष्यतइत्याशङ्क्य यद्देवता-
सम्बन्धत्वेन ग्रहणकाले सङ्कल्पितं तदेवं प्रदानकाले बुध्या नि-
ष्कृष्य आदद्यतइत्येवं परिहारार्थं यदिति भाष्यं व्याख्यातुमाह
* न चेतरेति * यथागृहीतोक्तिसूचितो निष्कर्षसम्भवो विश- ८०४।२
कोक्त्या प्रकटितः । उपाकरणकाले कृत्स्नस्य पशोर्देवतायै सङ्क-
ल्पवद्ग्रहणकाले पूर्वशेषस्यागृह्यमाणत्वेन ग्रहणकालीनसङ्कल्पान-
र्हत्वात्पुनरभ्युन्नीतमात्रसङ्कल्पे ऽपि प्रदानकाले कृत्स्नसङ्कल्पावि-
रोधाक्लेशेन निष्कृष्य पुनरभ्युन्नीतमात्रत्यागरूपः सङ्कल्पो न युक्त
इत्याशङ्क्याह * न च प्रदानेति * ग्रहणकालदेवतोद्देशेनेदं त्यक्ष्या-
मीति सङ्कल्पितस्यैव प्रदानकालदेवतान्वयापादनायेदं न ममेति
त्यागरूप. सङ्कल्पः न कृत्स्नविषयः सङ्कल्पो ऽस्ति पूर्वशेषस्य कस्या-
श्चित्देवतायै सङ्कल्पितस्य त्यक्तत्यागायोगेन च विना पूर्ववद्देवतो-
पहत्यान्यस्य सङ्कल्पयितुमशक्यत्वात् कृत्स्नसङ्कल्पानुपपत्तिरित्यर्थः
एतदेवोपसंहरति * तस्मादिति * त्यागरूपस्य मानसस्य सङ्कल्प-
स्य यजिवाच्यतया भावार्थाधिकरणोक्तस्य प्रदानकालीनयोः प्रसि-
द्धत्वात्कृत्स्नसङ्कल्पनिरासपरत्वेन व्याख्येयम् । देवताया भोक्तृत्व-

प्रतिगृहीतृत्वाभावे ऽपि सोमाय यजतइत्यादिषु सम्प्रदानव्यवहारसिद्ध्यर्थमनिराकरणारव्यानुमनव्यापाराभ्युपगमात्संसृष्टे च विविक्यानुमननाशक्तेपूर्वशेषस्य देवतान्तरोद्देशेनात्यागे ऽपि देवतान्तरैरेकपात्रस्थकृत्स्नसोमानुमननावगमात्पूर्वदेवतावषट्कृतस्य देवतान्तरैरात्मीयत्वेनानुमन्तुमशक्यत्वात्पूर्वदेवतातो ऽपनयो भविष्यतीत्याशङ्क्याह * यद्यपि तावदिति * मुख्यभोक्तृस्य नवमे निर्षेत्स्यमानत्वेनानाशङ्कनीयत्वाद्निराकरणे चाऽव्यापारात्मकत्वादननुष्ठेये भुञ्जीतेति कर्तृत्वव्यपदेशायोगापत्तेरुपांशुयाजाधिकरणवार्त्तिकोक्ता निराकरणापादितः स्वीयत्वानुमननव्यापारो भुजिना लक्षितः[1] । अनपनयनोपसंहारार्थे तस्मादिति भाष्यं पूर्वशेषस्य देवतान्तरान्वयित्वेनासङ्कल्पे ऽप्यग्नौ किं चित्प्रक्षेप्स्यस्यावर्जनीयतया निराकर्तुमशक्यत्वादग्निमुखा वै देवा इत्याद्यर्थवादालोचनया चाग्नौ प्रक्षेपस्य देवतान्तरान्वयापादकत्वप्रतीतेर्देवतान्तरान्वयेन पूर्वदेवतातोपनयावश्यम्भावादयुक्तमाशङ्क्योपपादयितुमाह * तेनेति * देवतोद्देशेन त्यागं विना नाग्नौ प्रक्षेपमात्राद्देवतान्वयोपपत्तिरित्याशयः । नान्तरीयकतया भक्षमाणस्यापि पूर्वशेषस्य भ्रष्टावसरेण भक्षणेन प्रतिपाद्यत्वायोगात्प्रतिपत्त्यर्थ एव भक्षणे मन्त्रापेक्षणान्न पूर्वदेवतोपलक्षणं युक्तमित्याशङ्क्य पुनरभ्युन्नेष्यमाणे सोमसंस्कारार्थे होमानन्तरं भ्रियमाणस्य पूर्वशेषेण पुनरभ्युन्नीतभक्षकालएव भक्षणावसरात्प्रतिपत्त्यर्थत्वाविरोधसूचनार्थे भक्ष्यते चेति भाष्यं व्याचक्षाणो ऽत इति भाष्यं व्याचष्टे * यस्त्विति * कृत्येतिभाष्यमूहकृत्वाचिन्ताया भक्षणासङ्गतेर्भक्षणसङ्गतस्य प्रयोजनस्यावश्यवक्तव्यत्वादयुक्तमाशङ्क्य पूर्वपक्षे कृत्स्नस्य मित्रावरुणाद्युद्देशेन त्यागः सिद्धान्ते पुनरभ्युन्नीतमात्रस्येति लक्षणसङ्गतं प्रयोजनं पूर्वशेषापनयविचारात्प्रसिद्धमित्येवं परिहारं सूचयितुमाह * इतीति * अधिकरणसमाप्त्या वक्तव्यतयोपस्थापितस्य प्रयोजनस्येति करणेन परामर्शः ॥

पात्नीवतभक्षणे इन्द्रादीनामनुपलक्षणाधिकरणम् ॥ १३ ॥

पात्नीवते तु पूर्ववत् ॥ ३२ ॥

आग्रयणाख्यसोमपात्रस्थस्योपांश्वाख्यस्य पात्रे गृहीतस्य पात्नीवतयागाङ्गत्वं किं वा ऽग्रयणाद् गृहीतस्य सोमस्य पात्नीव-

(१) देवताया भोक्तृत्वादिवदनुमन्तृत्वे ऽपि प्रमाणाभावाद्यद्यपिइत्यादीक्ताभ्युपेत्यवादत्वोपपत्ति. अत्र पा० २ पु० भा० ।

ऽन्वये ऽनाग्रणयस्याप्याग्रयणसंसृष्टत्वसामर्थ्याद् ग्रहणापत्त्या पत्नीवदन्वयापत्तेः कृत्स्नस्याग्रहणादुपांशुपात्रे गृहीतस्य पात्नीवत्वेन यागाङ्गतेत्यूहं कृत्वा चिन्तामिषेणाभिप्रेतायाश्चिन्तयाः पादलक्षणं सङ्गतिं स्पष्टत्वादनुक्त्वानन्तरसङ्गतिमाह * पूर्वेति * ऊहचिन्ताविषयत्वोक्त्यर्थं द्विदेवत्यानां हीतिभाष्यमादित्यदेवतान्त्यस्य सोमस्य स्थाल्यां द्विदेवत्यशेषनिक्षेपादयुक्तमाशङ्कोपपादयितुमाह * द्विदेवत्यानामिति * आग्रयणदेवताभूतानां विश्वेषां देवानामुपलक्षणं कस्मान्न चिन्त्यतइत्याशङ्क्य तदपनयस्य निःसन्दिग्धत्वादित्येवं परिहारसूचनार्थं तत इति भाष्यं व्याचष्टे * ततश्चेति * अथेति सन्देहभाष्यमवयवव्याख्यापूर्वं पात्नीवते सोमः पुनरभ्युन्नीतवत्स्वैषामुपलक्षणमित्येवं पूर्वपक्षसूत्रं व्याचष्टे * तस्येति * वाग्निरिन्द्रवायुं मित्रो वरुणोऽश्विपत्नीवन्पीतस्यैत्यवमूहप्रदर्शनायादिशब्दः इन्द्रवायुग्रहण तूपलक्षणार्थम् ॥

ग्रहणाद्वा ऽपनीतं स्यात् ॥ ३ ३ ॥

वा शब्दप्रतिज्ञातपूर्वदेवतानुपलक्षणहेतुत्वेनापनीतोक्तिव्याख्यार्थमपनीयते हीति भाष्यं व्याचष्टे * नैतदिति * द्विदेवत्यशेषस्य पूर्वदेवतातोपनयोपपादनार्थत्वेन तस्यापि पत्नीवतग्रहणकाले एव द्विदेवत्यशेषस्याग्रयणसंसृष्टत्वाभावेऽपि पूर्वदेवतातो ऽपनीयतइति ग्रहणोत्तरकालसंसृष्टादिन्द्रशेषाद्वैलक्षण्ये पूर्वार्द्धेनोक्तग्रहणकाले संसृष्टत्वे ऽपि द्विदेवत्यशेषस्याग्रयणस्थाल्यां निक्षेपकाले विवेकावगमात्तदनुसन्धानेन बुद्ध्या निष्कर्षोपपत्तेराग्रयणस्यैव देवतान्तरोद्देशेन सङ्कल्पात्तद्विदेवत्यशेषस्य पूर्वदेवतानयनस्य इत्याशङ्क्याग्रयणापेतस्य देवतान्तरोद्देशेन सङ्कल्पनीयत्वादनाग्रयणीयस्यापि वाग्रयणसंसृष्टत्वेनाग्रयणावयवस्य बुद्ध्या निष्कर्षसम्भवे ऽपि वारयितुमशक्यत्वादनाग्रयणस्यैवाग्रयणस्य देवतान्तरोद्देशेन सङ्कल्पविध्युक्त्या वक्ष्यमाणग्रहणभाष्योपपादयिष्यमाणाया ऽपनयः समर्थितः । श्लोकं व्याचष्टे * आग्रयणेति * स्थालीनिक्षे- ८०५।१
पकालीनस्य विवेकस्य सङ्कल्पे ऽनपेक्षणादाग्रयणविषयस्य सङ्कल्पस्य प्रसङ्गादनाग्रयणविषयत्वासिद्धिः पुनरभ्युन्नीतवत्नेह निवार्येति पूर्वार्द्धव्याख्यानायोक्ते किमुतेत्यनेनोत्तरार्द्धं व्याख्यातम् । ग्रहणकाले ऽपि संसृष्टस्य बुद्ध्या निष्कृष्याग्रयणमात्रस्य सङ्कल्पसम्भवं नन्वितिभाष्येणाशङ्क्य बुध्या निष्कृष्याग्रयणमात्रसङ्कल्पसम्भवे ऽप्याग्रयणापेतस्य सङ्कल्पविधानादाग्रयणानाग्रयणायोश्च ऽऽग्रयणा-

पेतत्वाविशेषात्कृत्स्नसङ्कल्पोपादनार्थमुच्यतइति भाष्यं व्याचष्टे * तथा हीति * एष आग्रयणो द्विदेवत्यशेषश्चाग्रयणादपैति तेन शेषश्चैषश्चैप च ग्रहणकाले सङ्कल्पतइत्यर्थः । व्यतिरेकतो ऽन्वयतश्च श्लोकं व्याचष्टे * यदि हीति * आग्रयणस्य पात्नीवतत्वविधौ संसृष्टो ऽपि द्विदेवत्यशेषो ऽनाग्रयणत्वाद् बुद्ध्या निष्कृष्य सङ्कल्पविषयत्वाद्व्यावर्त्येतेति व्यतिरेकतो व्याख्या। आग्रयणापेतस्य तु पात्नीवतत्वविधानादपादानस्य च वृक्षवत्स्वावयवत्वविशेषानपेक्षत्वात्संसृष्टयोः संशब्दवाच्यैकीभावपूर्वाग्रयणस्थालीपातनिमित्तसम्पातशब्दवाच्यद्विदेवत्यशेषाग्रयणयोर्मध्ये य एवाग्रयणो वापैति तस्य सर्वस्याग्रयणादपेतत्वादपेतत्वमात्रस्य सङ्कल्पनिमित्तत्वात्सर्वः सङ्कल्प इत्यपनीयते । इत्यन्वयतो व्याख्या आग्रयणविशेषणविशेषणबलादाग्रयणादेवेत्यवधारणप्रतीतेरनाग्रयणस्य चाग्रयणमिश्रादनाग्रयणादप्यपेतत्वेनाग्रयणादेवेत्यवधारणविषयत्वायोगादपात्नीवतत्वं न त्विति भाष्येणाशङ्क्याग्रयणस्याप्याग्रयणमात्रादपायाशक्तौराग्रयणादेवेत्यवधारणायोगाद्दाग्रयणाभावदपेत इत्येतावन्मात्रेण विशेषणत्वप्रतीतेर्द्विदेवत्यशेषे ऽप्यपि ताद्रूप्यविशेषात्पात्नीवतत्वोपपादनार्थं नैष इति भाष्यं व्याख्यातुमाह * यत्त्विति* अनाग्रयणादपेतो न पात्नीवत इति निषेधवचनाभावान्निषेधार्थवचनकल्पने चाग्रयणान्वयापेतत्वेन पात्नीवतत्वापत्तेरनाग्रयणापेतस्य पात्नीवतत्वापत्तेरनाग्रयणापेतस्य पात्नीवतत्वनिषेधाभावेन विधाविव निषेधे पि विषयत्वलक्षणोपयोगाभावादुभयोरपि पात्नीवतत्वविधौ विरोधाभावादाग्रयणमात्राच्चोपायायोगेनाग्रयणादेवेत्यवधारणस्याशक्यत्वादयोगव्यावृत्त्यापि च विशेषणत्वसम्भवेनावधारणस्याप्रमाणकत्वाद्दाग्रयणाभावदपेत इत्येवं विशेषणत्वप्रतीतेर्द्वयोरपि देवतान्तरान्वय इत्यर्थः । देवतान्तरोद्देशेन ग्रहणेन पूर्वदेवतातोऽपनयःकथमवसीयतइत्याशङ्क्याह * न चेति * अदत्तस्य दातुमशक्यत्वात्पूर्वस्यैव देवतायै दत्तस्य तत आच्छिद्य स्वीकारं विना स्वत्वानापत्तेर्देवतोद्देशेन च त्यागाच्च देवताव्यतिरिक्तस्य यथेष्टदेवतानर्हत्वरूपस्वदेवतास्वत्वापादाने ऽपि देवतायाः प्रतिग्रहीतृत्वाभावेन यथेष्टविनियोक्तृत्वलक्षणस्वास्यानापादनकृतापहरणो ऽपि परस्वापहरणनिमित्तदोषाप्रसक्तेः पुनर्दानशास्त्रान्यथानुपपत्त्या पूर्वदेवतातो ऽपहृत्य स्वीकारविधिः कल्पयितव्य इत्याशयः । पूर्वदेवतातो ऽपनये ऽपि पूर्वदेवतोद्देशेन त्यक्तत्वस्य तत्प्रीतोक्तिलक्षणस्यानपायादनपनीतापि देवतोपलक्षणीयेत्येवं

शब्दप्रतिज्ञातपूर्वदेवतानुपलक्षणायोगमाशङ्क्य चतुर्थ्या देवतामुद्दि-
श्य द्रव्यत्यागात्पिबतेस्त्यागभक्षणार्थतायामिन्द्रपीतशब्देन लक्षणा-
ननुगतचतुर्थीसमासापत्तेरिन्द्रेण स्वीकृतमन्यस्य यथेष्टविनियोगा-
नर्हीकृतमित्यनिराकरणनिमित्तान्यस्य यथेष्टविनियोगानर्हीकरणपर-
स्वीकारलक्षणार्थत्वावगतेरपनये चान्वयनाशान्नापनीता देवतोपल-
क्षणीयेत्येवं वाशब्दोपपादनार्थं तन्नेत्यादिभाष्यं तात्पर्यतो व्याचष्टे *इ-
तीति *पूर्ववर्णकेनाचार्यशेषभुग्देवदत्तशेषे भुज्यमाने यथाऽऽचार्यशेषो
पनीतान्वयत्वान्नोपलक्षण तथा पूर्वदेवतापीत्यर्थः । नन्वित्याशङ्काभा-
ष्यमपनयेन पूर्वदेवतार्थत्वनाशादयुक्तमाशङ्क्य व्याचष्टे *नन्विति *
नेतीति परिहारभाष्यमिन्द्रवाय्वाद्युद्देशेन गृहीतस्य कृत्स्नस्य पात्र-
स्थस्य पूर्वदेवतार्थस्यावयवदर्शनाद् धुतमात्रस्य देवतार्थत्वेनानाश-
ङ्कितस्यावयवादर्शने ऽप्याशङ्काशयानिरासादयुक्तमाशङ्क्योपहासार्थ-
त्वेन व्याचष्टे * आचार्यस्त्विति * अनिरस्ताशयस्योपहासानर्हता-
माशङ्क्यानपनीतपूर्वदेवतान्वयात्पूर्वदेवतापीतत्वेनोपलक्षणार्हस्य हु-
तावयवस्यादर्शनमितरस्यानीतत्वेनानुपलक्षणीयत्वसिद्ध्यै मयाच्य-
मानमप्युपपादनक्लेशमनापाद्यापशङ्कितास्वयमेव यथाऽभ्युपगच्छति
तथा करोमि ततश्चोदिनानुवादित्वादुपहासार्हो भवि-
ष्यतीत्येतत्स्वयमाशङ्कितारमभ्युपगमयामीत्यनेनोक्तम् । कस्तर्हि प-
रिहाराशय इत्याशङ्क्याह * न हि हुतादिति* इन्द्रवाय्वाद्युद्देशेन हु- ८०६।२
तादन्यदुपांशुपात्रगृहीतमिन्द्रवाय्वादिसम्बन्धि न विद्यते अप-
नीतत्वादित्यर्थः हुतावयवादर्शनस्यानुपलक्षणहेतुत्वाभावाशङ्कार्थं न-
न्विति भाष्यम् अपनयस्यानुपलक्षणहेतुत्वेनाभिप्रेतत्वादयुक्तमाशङ्क्या-
ज्ञानाशयोक्तित्वेन व्याचष्टे * परस्त्विति * प्रकृतौ हुतावयवा-
दर्शने ऽपि हुतसम्बन्धिशेषहुतसोमसमुदायस्यानपनीतेन्द्रादेवत्य-
स्यावयवः प्रकृताविन्द्रशब्दः सतूपलक्ष्यत इति वैषम्योक्त्यर्थमुच्य-
तइति भाष्यमेकदेशहोमेन समुदाये नष्टे देवतान्वयनाशादयुक्तमा-
शङ्क्य देवतोद्देश्यपूर्वद्रव्यत्यागरूपसङ्कल्पकाले विद्यमानस्य समुदा-
यस्य देवतान्वयानौपचारिकस्तदवयवे देवताव्यपदेश प्रकृता-
वित्येवमर्थत्वेन व्याचष्टे * सङ्कल्पनेति * देवतान्वयिनि समुदा-
ये नष्टे ऽप्यवयवस्यौपचारिकदेवताव्यपदेशाभ्युपगमे द्विदेवत्यसमु-
दायनाशे ऽप्युपचारादवयवे देवताव्यपदेशाविरोध इति साम्यशा-
ङ्कार्थं नन्वितिभाष्यं व्याचष्टे * इतर इति * द्विदेवत्यसमुदाया-
वयवस्याग्रयणसमुदायावयवसहितस्यान्यदेवत्यत्वेनाग्रयणावयवस-
मुदायस्य पूर्वदेवतोपेतत्वात्पूर्वदेवतानुपलक्षणमित्येवं साम्यान-

रासार्थं नेतीति भाष्यं प्रकृतादेवतापनयो ऽत्र त्वपनय इत्येवं वैलक्षण्योक्त्यर्थत्वेन व्याचष्टे * सिद्धान्तेति * पीत इति भूतनिष्ठया नष्टस्यापि समुदायस्य देवतान्वयेन मुख्यवृत्त्यभिधानसम्भवेनौपचारिकावयवाभिधानयोगात्प्रकृतावपि भूतपूर्वगत्यभिधानावगतेरिह च पूर्वेन्द्रवाय्वादिदेवतापीतस्य समुदायस्यावयवेनान्यदेवत्यसमुदायारम्भे ऽपि भूतपूर्वगत्या पूर्वसमुदायावयवत्वव्यपदेशोपपत्तेर्भूतपूर्वगत्या पूर्वदेवतोपलक्षणं भविष्यतीत्याहेति भाष्येणाशङ्क्य प्रतिपाद्यस्य साद्गुण्यायादेवतयोपलक्षणीयत्वादेव यवप्रतिपाद्यत्वेन इष्टार्थत्वायोगाद्देवताव्यपदेशार्हत्वावगतः प्रकृतौ भूतपूर्वगत्यापेतदेवतान्वयस्यानुपलक्षणान्नेह भूतपूर्वगत्योपलक्षणं युक्तमिति परिहारार्थमुच्यतइति भाष्यं व्याचष्टे * न चेति * एकदेशावस्थितानां चावयवानामेव समुदायव्यपदेशनोदनात्प्रत्येकमपि मुख्यवृत्त्यैव देवतान्वयव्यपदेशोपपत्तेः प्रकृतौ समुदायनाशे ऽपि विद्यमानस्यावयवस्यापि साक्षाद्देवतान्वयसमुद्भावेनापेतदेवतात्वस्य भूतपूर्वगत्योपलक्षणशङ्कायोगादिह च विद्यमानस्यावयवस्य देवतान्तरान्वयेन पूर्वदेवतापनयस्य सिद्धान्तसूत्रेणैव स्फुटमुक्तत्वात्पूर्वदेवतोपलक्षणं नाशङ्कनीयमित्यतिशयोक्त्यर्थमपि चेति भाष्य व्याचष्टे * इह त्विति * तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्याचष्टे * तस्मादिति *

पात्नीवतशेषभक्षे त्वष्टुरनुपलक्षणीयताधिकरणम् ॥ १४ ॥

त्वष्टारं तूपलक्षयेत्पानात् ॥ ३४ ॥

मन्त्रस्थसाहित्यवाचिचक्षुःश्रुतिसामर्थ्यरूपाल्लिङ्गात्त्वष्टुरपि देवतात्वेन पात्नीवतयागाङ्गत्वमाशङ्क्य निरासात्पादलक्षणं सङ्गतिसन्देहं च स्पष्टत्वादनुक्त्वा ऽनन्तरचिन्तितपात्नीवतविषयत्वेनानन्तरसङ्गतिं सूचयत्पत्नीवत्ताया विशेष्यं विना ऽपर्यवसानान्मन्त्रवर्णावगतविशेष्यत्वस्याग्नेस्तद्धितोक्तदेवताविशेष्यत्वाद्देवतात्वेन पात्नीवतचोदनागृहीतस्य देवतात्वस्मारणार्थे पातृत्वनिर्देशे त्वष्टृसाहित्यनिर्देशात्त्वष्टृसहितस्याग्नेर्देवतात्वमिति पूर्वपक्षतात्पर्यमाह * तस्मिन्नेवेति *

अतुल्यत्वात्तु नैवं स्यात् ॥ ३५ ॥

नैवमिति सिद्धान्तसूत्रावयवं व्याचष्टे * नैवेति * हेतुप्रश्न-

पूर्वमतुल्यत्वं व्याचष्टे * विधौ हीति * मन्त्रलभ्याग्निनिरपेक्षपत्नीवत्त्वापर्यवसानात्केवलोक्त्या त्वष्टृमात्रनिरासः पत्नीवत्त्वेनैकस्य विशेष्यस्य नित्यमपेक्षणान्नित्यसापेक्षत्वे च समासवत्तद्धितस्याप्यविघातान्मन्त्रगतसामानाधिकरण्यनिर्देशात् शीघ्रावगतविशेष्यत्वाग्निसापेक्षत्वाविरोध ऽपि तन्मात्रेणापर्यवसानाद्वैयधिकरण्ये निर्दिष्टत्वसापेक्षत्वे तद्धितानुत्पत्तिरुक्ता यद्यपि मन्त्रवर्णात्त्वष्टा देवतात्वेन प्रतीयते तथापि तद्धितेन बाध्यत इति मान्त्रवर्णिकस्यापीत्यपिशब्दो योज्यः । उत्तरार्द्धं व्याख्यातुमाह * न चेति * सिद्धान्तमुपसंहरति * तस्मादिति * ८०७।१

पात्नीवतशेषभक्षे त्रिंशतामनुपलक्षणाधिकरणम् ॥ १५ ॥

त्रिंशच्च परार्द्धत्वात् ॥ ३६ ॥

विशेष्यापेक्षासामर्थ्यरूपाल्लिङ्गादग्निवत्त्रयस्त्रिंशतो ऽपि देवतानां समानाधिकरण्यनिर्देशाविशेषाद्देवतात्वेन पात्नीवते यागाङ्गतामाशङ्क्य निरासादतिदेशत्वेन सङ्गतित्रयमाह * अधिकरणेति * अधिकाशङ्कोक्त्या पौनरुक्त्यं परिहरन्पूर्वपक्षमाह * एतावता त्विति * त्रयस्त्रिंशताग्नेश्च समुच्चयेन पत्नीवद्विशेष्यतया देवतात्वस्य वक्ष्यमाणत्वादतिशयार्थात्तर्पयस्वमादयस्वेत्युक्तेन परिवेष्टृत्वेनाग्नेर्गुणभूतत्वोक्तिः । या चातुल्यता त्वष्टुर्निरासहेतुत्वेनोक्ता साप्यत्राग्नेर्गुणत्वावगमात्त्रयस्त्रिंशतः प्राधान्यावगमाद्विपरीतेत्याह * पूर्ववदिति * तद्धितविरोधमाशङ्क्य पत्नीवत्त्वस्य देवतागुणमात्रतया तद्धितेन देवतात्वोक्तेर्गुण्यपेक्षत्वादग्निवत्त्रयस्त्रिंशतापि देवैस्तद्धितयुक्ता चोदना न विरुध्यत इत्याह * पत्नीवत्त्वेति * अग्न्याख्यगुणान्वयमात्रे तद्धितपर्यवसानात्त्वष्टृवत्त्रयस्त्रिंशतो ऽप्यनपेक्षमाशङ्क्य सामानाधिकरण्यनिर्देशाविशेषादगृह्यमाणविशेषतयाग्निमात्रेणापर्यवसानमाह * अविशिष्टो हीति * अगृह्यमाणविशेषत्वे ऽप्येकेन गुणेनाकाङ्क्षानिवृत्तेर्गुणिद्वयान्वयो न युक्त इत्याशङ्क्याह * न चेति * गुणिद्वयान्वये ऽपि चोदनोक्तस्य पत्नीवत्त्वस्य गुणत्वाविरोधेन चोदितया गुणिद्वयानिषेधान्मन्त्रगस्थानेकापि गुणिभूता देवता युक्तेत्याशयः । अग्न्यन्वये पत्नीवान् देवतात्येकवचनान्तेन त्रयस्त्रिंशदन्वये पत्नीवन्तो ऽस्य देवता इति बहुवचनान्तेन विग्रहापत्तेः सकृच्छ्रुते च शब्दे विग्रहद्वयविरोधाद् गुणिद्वयान्वयश्चोदनया निषेत्स्यत इत्याशङ्क्याह

* न च मान्त्रवर्णिक्यामिति* बहुवचनान्तेन विग्रहमात्रेण गुणिद्व-
यान्वयोपपत्तेर्विग्रहद्वयविरोधो ऽपि नास्तीत्याशयः । एवमप्येकगुणा-
न्वयेन निवृत्तापेक्षस्य नित्यसापेक्षत्वाभावात् त्वष्टृपेक्षायामिव गुणा-
न्तरापेक्षायामपि सापेक्षत्वात्तद्धितो नोत्पद्येतेत्याशङ्क्याह * न च
प्रमाणान्तरेति * त्वष्टुर्मन्त्रवर्णाख्येन प्रमाणान्तरेण देवतात्वानवग-
मात्तद्धितेनैव त्वष्टृसापेक्षस्य पत्नीवतो देवतात्वस्यावगम्यमानत्वात्त-
द्धितप्रकृतः सापेक्षत्वं तद्धितस्यानुत्पत्त्यापादकं दूषणमुक्तम् इह तु
देवतान्तरानपेक्षस्यैव पत्नीवतो देवतात्वे तद्धितेनोक्ते पत्नीवत्त्वस्य गु-
णरूपत्वेन गुण्यपेक्षत्वात्तद्धिताविरोधिना मन्त्रवर्णाख्येन प्रमाणान्त-
रेणागृह्यमाणविशेषतयैकेन गुणिनाकाङ्क्षानिवृत्त्ययोगाद् गुणिरूपायां
देवतायां तद्धितप्रकृतित्वानपेक्षपत्नीवच्छब्दस्य गुणोक्तिप्रयुक्तगुणसा-
पेक्षत्वं तद्धितस्य दूषणं न भवति यदि हि तद्धितो ऽन्यसापेक्षप-
त्नीवन्तं देवतात्वेन विदध्यात्ततः प्रकृतिसापेक्षत्वनिमित्तमनुत्प-
त्त्यापादकदोषं तद्धितः प्रतिपद्येतेत्यर्थः । अग्नेस्त्रयस्त्रिंशतश्च दे-
वानां गुणित्वाभ्युपगमे पत्न्यः सन्त्येषां त्रयस्त्रिंशतो देवानामग्नि-
सहितानामित्यस्मिन्नर्थे मन्त्रगतपत्नीवच्छब्दमनुब्रूयात्तद्धितोत्पत्तेर-
भ्युपगमनीयत्वात्तत्रापि सापेक्षत्वदोषः स्यादित्याशङ्क्याह * मन्त्रस्य
त्विति * मन्त्रस्याग्निसापेक्षमपि त्रयस्त्रिंशद्देवरूपगुणित्वं न वद-
तामनुप्रकृतौ पत्नीशब्दस्य सापेक्षत्वाभावान्न विरोध इत्यर्थः ।
गुणस्यैकेनैव गुणिना नैराकाङ्क्ष्यात् गुणित्वं न वदतामनुप्रकृतौ
पत्नीशब्दस्तस्य सापेक्षत्वाभावान्न विरोध इत्यर्थ । गुणस्यैकेनैव
गुणिना नैराकाङ्क्ष्यात् गुणिद्वयस्यान्योन्यसापेक्षत्वं विरुद्ध्येतेत्याश-
ङ्क्याह * समुच्चयेति * अग्निमन्त्रेण त्रयस्त्रिंशद्देवानपेक्षस्याग्नेः त्रय-
८०८।१ स्त्रिंशद्देवमन्त्रेणाग्नेरप्यभिधानात्समुच्चयमुपपादयति * न स्यादि-
ति * परिवेष्टृत्वेनाग्न्युक्तेर्न मन्त्रात्समुच्चयावगतिरित्याशङ्क्याह *
स त्विति * अग्नेपत्नीवत्सोमं पिबेति पानचोदनया त्रिंश-
न्मन्त्रस्थया चाग्न आयाहीत्यागमनचोदनया दैवतारूपतया सिद्धम-
ग्निमभिदधत्त्रयस्त्रिंशतो देवानां देवतात्वमाहेत्यर्थ । तेनाग्नेस्त्रय-
स्त्रिंशद्देवपत्नीवत्पतित्वस्यैवमूहः कार्य इति पूर्वपक्षमुपसंहरति *
तस्मादिति * कथं परिवेष्टृत्वेन देवतात्वसिद्धिरित्याशङ्क्याग्नीत्क-
र्तृकाध्येषणोक्त्याग्नीधस्वाम्यात्तदनुष्ठाने ऽपि स्वाम्याभावे परिवेष्टृ-
त्वायोगसूचनादध्येष्यत्वेन च प्रेषणानर्हतया गुणभूतत्वायोगसूच-
नादग्नेश्च देवतात्वातिरिक्तस्वाम्ययोगाद्देवतात्वसिद्धिरिति परि-
हारसूचनार्थं तत्परिवेष्टृत्वेन देवतात्वं मन्त्रव्याख्यया दर्शयतीत्याह

*नादिति*मन्त्रव्याख्यार्थमिमं हीति भाष्यं व्याचष्टे *याज्यामिति* म-
न्त्रस्य विश्वामित्रार्थत्वादग्नीधोऽध्येष्टृत्वायोगमाशङ्क्य याज्योच्चारयितृ-
त्वेनाध्येष्टृतोपपादिता । छन्दसीत्यनुवर्त्तमाने व्यवहिताश्चेति सूत्रा-
द्व्यवहितान्वयोपपत्तिः छन्दसीत्यनेनोक्ता । आयाहीत्याख्यातान्व-
यागत्येऽध्याहारस्ततश्चेत्यनेनोक्तः । इदमिति भाष्यावयवस्यानुष्वधपद-
व्याख्यार्थत्वोक्त्यै पदपाठवत्पूर्वस्वधाशब्दाद्व्याख्यार्थो ऽत्रशब्दः सो-
मयागविनियोगानुसारात्सोमविषयत्वेन व्याख्यातः आवहेत्याख्या-
तस्योत्तराख्यातान्वयायाहूयेति पदस्य भाष्ये व्याहृतस्य ततो ऽन-
न्तरमित्यर्थः प्रतीत्यावगतिस्ततश्चेत्यनेनोक्ता तर्पयेत्यस्य मादयत्यर्थ-
व्याख्यार्थत्वोक्त्यै * मादयेत्युक्तम् * ऋषिप्रत्ययेनार्थतथात्वानश्च-
यः । अत्र हीति भाष्यं व्याख्यातुमाह * तेनेति * नत्वित्याशङ्कानि-
रासार्थं सत्यमिति न च चोदनयेति वार्तिकेन किमत इत्याशङ्कानि-
रासार्थं न च मान्त्रवर्णिका इति भाष्यं न च मान्त्रवर्णिक्यामित्यने-
नागतावेक्षणेन व्याख्यातत्वादव्याख्याय त्रिशब्दैवं स्याद्विधानाग्निस्तु-
त्यर्थं सङ्कीर्त्यमानत्वादेवमुपलक्षणनिरासार्थं नैवमिति पूर्वसूत्राव-
यवानुषङ्गेण सूत्रव्याख्यार्थमवं प्राप्तइत्यादिसङ्कीर्त्यते भाष्यमाक्षिप्य
व्याचष्टे * एवमिति * कुत इति हेतुप्रश्नभाष्यव्याख्यार्थं कुत इत्यु-
क्त्वा सहीत्युत्तरभाष्यं पूर्वार्द्धेन व्याख्यायोत्तरार्द्धे ऽनेन वेत्याशङ्का-
निरासार्थमुच्यतइति भाष्यं व्याख्यातम् । पूर्वार्द्धं व्याचष्टे * पा-
यत्नीतेति * उत्तरार्द्धं व्याचष्टे * न चेति * देवतात्वेन चोदित-
स्याग्नेर्दातृलक्षितैश्वर्यप्रकाशनरूपस्तुत्यर्थत्वेन निशङ्कीर्त्तनादित्यर्थः ।
कथमिति प्रश्नभाष्यं व्याचष्टे * कथमिति * न हीत्यादिप्रत्यायय-
तीत्यन्तं भाष्यं व्याचष्टे * अप्रसिद्धेति * यस्यान्यतोप्रासिद्धेश्वरत्व-
स्याग्नेर्दातृत्वं कीर्त्यते तस्यैश्वर्यार्थं तद्दातृत्वकीर्त्तितं प्रतीयते न
हि तस्य दातृत्वकीर्त्तनस्य मुख्यो दातृत्वरूपो ऽर्थः सम्भवनार्ह इति
न शब्दाध्याहारेण योज्यम् । श्लोकार्थमुपपादयति * यदि हीति * ८०९।१
देवतात्वेन चोदितस्याग्नेरकरणात्प्रकथनात्कीर्त्तनाख्यः प्रकथनार्थं
करोतिः । मादयतेस्तर्पणमात्रवाचित्वाद्दातृत्वाख्यविलम्भयितृत्वं च
कीर्त्यतइति न त्विति भाष्येणाशङ्क्य लक्षणया विलम्भनकीर्त्तनोक्त्य-
र्थं उच्यतइत्यादिभाष्यं व्याचष्टे * मादयस्वेत्यपि चेति * यथेष्टवि-
नियोज्यत्वरूपपरस्वत्वापादनाभावेन दानस्यापि मुख्यस्याभावाद्दे-
वतोद्देशेन द्रव्यत्यागमात्रं दानत्वेन विवक्षितमिति भाष्ये त्यागोक्त्या
सूचितम् त्यक्तत्वकीर्तने ऽप्यैश्वर्यं कीर्त्तनार्थत्वं कथमिति न त्विति
भाष्येणाशङ्क्य लक्षणयैश्वर्यकीर्त्ततोक्त्यर्थं तदुच्यतइत्यादिभाष्यं व्या-

चष्टे * दातृत्वमपीति * केवलस्य च पत्नीवतो देवतात्वनोदनाच त्रयस्त्रिंशतो देवतात्वमित्यपि चेति भाष्येणोक्ते सत्यं चोदनयेति भाष्योक्तदेवतान्तरानिषेधनं त्विति भाष्येणानुष्वधानिषेधे ऽपि मान्त्रव- र्णिकदेवतान्तराभावस्य परार्थेनेत्यादि भाष्येणोक्तत्वाद्देवतान्तराभा- वोक्त्यर्थमुच्यत इति भाष्य स्पष्टत्वादव्याख्याय तद्धितसामर्थ्याद्देव- तान्तरोक्त्यर्थमपि चेत्यादिभाष्यं पत्नीवत्त्वस्य गुणस्य गुणापेक्षायां मन्त्रवर्णादग्नेस्त्रयस्त्रिंशतो देवानां च समुच्चयेन गुणित्वावगतेः प- त्नीवदग्नित्रयस्त्रिंशद्देवरूपस्य प्रकृत्यर्थस्यानपेक्षस्यैव तद्धितेन देव- तात्वाभिधानमभिप्रेत्य न च प्रमाणान्तरगम्यायामिति वार्त्तिकेन सापेक्षत्वाद्दोषस्य परिहृतत्वादयुक्तमाशङ्क्य पत्नीवान्देवता ऽस्यैत्ये- कवचनान्तविग्रहे त्रयस्त्रिंशद्देवानामग्रहणात्पत्नीवन्तो ऽस्य देव इति बहुवचनान्तविग्रहे ऽप्येभिरग्ने इति म- न्त्रनिर्दिष्टस्याग्नेः पात्नीवच्छब्दसामानाधिकरण्याभावेन गु- णित्वायोगान्मन्त्रद्वयनिर्दिष्टयोश्च गुणिनोरन्योन्यानपेक्षस्तिद्व- योर्गुणावयवप्रतीतेरन्योन्यसापेक्षत्वनिमित्तबहुवचनान्तविग्रहे अग्नेः पत्नीवन्निस्येकवचनान्तनिर्दिष्टस्याग्नेः परामर्शायोगाद् गुणसमुच्च- यायोगेनैकेन गुणिना नैराकाङ्क्ष्यावगतेरितरस्य गुणित्वान्वयायोगाद्दे- वतात्वेनान्वयमापाद्य सापेक्षतोक्तेति सूचनार्थं व्याचष्टे * विरूपयं चेति * एतच्चोदनावशेनेति भाष्यं पूर्वपक्ष्युक्तमन्त्रार्थनिरासार्थ- त्वेन स्पष्टत्वादव्याख्याय पत्नीवांश्चेत्यादिभाष्यं शङ्कोत्तरत्वेनाव- तारणपूर्वं व्याचष्टे * कथं पुनरिति * सामानाधिकरण्यस्यानि- श्चायकत्वं शङ्कते * नन्विति * तद्धितस्य निःसंख्यदेशने विग्रहो- च्चारणे निःसंख्यप्रातिपदिकार्थायोगात्संख्यायां कल्प्यमानायां निय- तक्रमत्वात्संख्यानामेकादिक्रमेण कल्प्यत्वादेकत्वकल्पनेनानुपपत्तौ प- रिहृतायां द्वित्वबहुत्वकल्पने प्रमाणाभावादेकत्वाख्याविशेषाभिव्य- क्तेरेकवचनान्तनिर्दिष्टत्वादग्निरेव पत्नीवांस्तद्धितेन गृह्यत इत्येवं सामानाधिकरण्यस्य निश्चायकत्वं समाधत्ते * सत्यमिति * एतदेव विवृणोति * तत्रेति * तस्मादित्यधिकरणार्थोपसंहारभाष्यं व्या- चष्टे * तस्मादिति * त्रयस्त्रिंशतां देवानां पात्नीवते देवतात्वाभा- वोक्त्याहव्याजेन देवतात्वविचारे तात्पर्यं सूचितम् ॥

भक्षणेऽनुवषट्कारदेवताया अनुपलक्षणाधिकरणम् ॥ १६ ॥

वषट्कारश्च कर्तृवत् ॥ ३७ ॥

अनुवषट्कारे यागे भूतभव्यसमुच्चारणन्यायाद्वषट्कर्तुः

मर्थ्यात्सोमो ऽङ्गम । अनुशब्दसामर्थ्याद्वा प्रतिपत्तिकर्मत्वावगतेरनुवष-
ट्कारयाग एवाङ्गमित्यनुवषट्कारदेवतार्थं पृथक्सोमग्रहणाविध्यभा-
वाद्धरति तेन शेषेण संयोजयति देवतामिति वषट्कारदे-
वतायै यद्धविर्वहति तच्छेषेणानुवषट्कारदेवतासंयोजना-
र्थवायवादिशेषेणानुवषट्कारयाज्यायाः सङ्कर्षे वक्ष्यमाणत्वात्सो-
मग्रहणकाले ऽनुवषट्कारे वेति प्रयोजनार्थं वषट्कारयागानन्तरं नष्टे
सोमे ऽर्थकर्मत्वात्सोमान्तरं गृहीत्वानुवषट्कारे याज्याकार्यात्प्रति-
पत्तिकर्मत्वाद्वा लुप्यतइति प्रयोजनार्थं वा लैङ्गिकविनियोग-
विचारे तात्पर्यात्पादलक्षणासङ्गती स्पष्टत्वादनुवषट्कारदेवतात्वे-
नाभिप्रेतस्याग्ने वीहीति मन्त्रवर्णेन देवतात्वावगमान्मन्त्रविशिष्टानु-
वषट्कारयागचोदनया च देवतापेक्षितया मान्त्रवर्णिकदेवताग्रह-
णेनाग्नेर्देवतान्वयस्यैकान्तिकत्वात्पूर्वाधिकरणव्युत्पादितदेवतात्वरू-
पलक्षणन्यायप्रत्युदाहरणरूपेणात्र पूर्वपक्षोत्थानादनन्तरसङ्गतिं सू-
चयन्पूर्वपक्षमाह * अनुवषट्कारेति * वायव्यैन्द्रवायववदेक-
पात्रस्थस्यापि सोमस्यानेकयागाङ्गत्वाविरोधान्मन्त्रवर्णाच्च सोमद्र-
व्यकत्वावगमे ऽपि प्रतिपत्तित्वावेदकान्यदीयसोमद्रव्यकत्वानवगमा-
दनुवषट्कारयागस्यार्थकर्मत्वावगतेरर्थकर्मभूतसोमयागाङ्गत्वरूपा
प्राकृतकार्यापन्नत्वादनुवषट्कारदेवतोपलक्षणीयेत्यर्थः । वषट्कारश्च
नैवं स्यात्पानकर्तृवद्वषट्कारशब्देनानुवषट्कारदेवताया लक्षितलक्ष-
णयोक्तायाः प्रतिपत्तिकर्माङ्गत्वेन प्राकृतकार्यापत्त्यभावात्प्रकृतदेवता-
संस्कारभूतस्योपलक्षणस्यातिदेशतो प्राप्तेरित्येवमुपलक्षणानिरासार्थं
नैवमिति पूर्वसूत्रानुषक्तं तत्पूर्वं सूत्रावयवानुषङ्गेण सूत्रव्याख्यार्थ-
मेवमित्यादिभाष्यं व्याचष्टे * एवमिति * पश्चात्तनाध्वर्य्वादिः पाता
पूर्वस्य होत्रादेः पातुः प्रतिपत्तिकर्मपानाङ्गत्वेन प्राकृतदेवताकार्या-
नापन्नस्योपलक्षणं प्रकृतितो ऽत्रातिदेशेनाप्राप्तत्वाद्यथा ऽनुकुर्वीत तथै-
तामपि अनुवषट्कारदेवताप्रतिपत्तिकर्मानुवषट्कारयागत्वेन वा कृ-
तार्थकर्मदेवताकार्यानापन्नत्वान्नोपलक्षयेदित्यध्याहारेण योज्यम् ।
पूर्वेतरसूत्रस्यैवं शब्देन त्वष्टारं तूपलक्षयेदित्येतत्सूत्रोक्तोपलक्ष-
णीयत्वपरामर्शात्प्रमाणवानध्याहार. प्रतिपत्तिकर्माङ्गभूतस्यापि
स्विष्टकृतः सूक्तवाके ऽग्निर्होत्रेणेदं हविरजुषतेत्युपलक्षणवदुप-
लक्षणाविरोधाद्धोत्रादेश्चादेवतात्वेनानुपलक्षणोपपत्तेरनुवषट्का-
रदेवतायाः प्रतिपत्तिकर्माङ्गत्वे ऽप्युपलक्षणीयत्वशङ्कानिरासार्थत्वेन
न हीति भाष्यव्याख्यार्थमप्राकृतपदमिन्द्रप्रदानाख्यप्रकृतस्येषु भक्षे
ष्वनुवषट्कारदेवतोपलक्षणाभावादित्येवं व्याचष्टे * न हीति *

मन्त्रे तु वषट्कारदेवतावाच्यग्निपदानात्मनः प्रकृतौ वोह्याभावादनु-
पलक्षणे ऽपि विकृतावूहस्यावश्यकत्वादुपलक्षणं भविष्यतीत्याश-
ङ्क्योपलक्षणाभ्युपगमे यदर्थकर्म ज्योतिष्टोमाभ्यासात्मकं प्रकृताविन्द्रा-
ख्यया देवतया कृतं तद्विकृतावन्याख्यया ऽनुवषट्कारदेवतयापि
कार्यं नच नतिक्रियते सङ्कुर्याद्वे सोमस्याग्ने विहीत्यनुयजतीत्यनेनै-
न्द्रवायवादियागे मन्त्राख्यगुणविधिं पूर्वपक्षयित्वा मन्त्रविशिष्टकर्मा-
न्तरविधेर्वक्ष्यमाणत्वे तु वषट्कारयागस्येन्द्रप्रदानवत् ज्योतिष्टोमा-
वयवभूताभ्यासत्वनिरासन्तादर्थ्येन च पृथक् सोमग्रहणादैन्द्रवाय-
वादियागार्थत्वेन च गृहीतस्य कर्मान्तरार्थत्वायोगादनुशब्दाच्च पूर्वया-
गानुसारप्रतीतेस्तदीयद्रव्यप्रतिपत्त्यर्थत्वावगमाद्यद्वा यत्सोमस्याग्ने वि-
हीत्यनुवषट् करोति तेनैव संस्थितात्सोमात्भक्षयन्ति स एव सोमस्य
स्विष्टकृद्भाग इति च द्रव्यप्रतिपत्त्यर्थस्विष्टकृद्यागरूपत्वलसत्वादपि
प्रतिपत्तिकर्मत्वावगमादर्थकर्मत्वेन सकृदनुष्ठानापत्तेर्द्विदेवत्यादिष्व-
नुवषट्कारनिषेधरूपाल्लिङ्गावगतप्रत्यभ्यासावृत्तिविरोधात्सकृर्वे च
स्विष्टकृत्तन्त्रानुष्ठानं पूर्वपक्षयित्वा पृथक्त्वेनावृत्तेर्वक्ष्यमाणत्वादि-
त्येवं परिहारार्थत्वेन यत्र नामेति भाष्यव्याख्यार्थतयाप्यप्राकृतपद-
मेवावृत्त्यावषट्कारदेवतायाः प्राकृतदेवताकार्यानापन्नत्वेनापलक्षणस्य
प्रकृतितो ऽतिदेशेनाप्राप्तेरित्येवं व्याचष्टे * न चेति * तस्मादित्यकर-
८१०।२ णार्थोपसंहारभाष्यं व्याचष्टे * तस्मादिति *

अनैन्द्राणाममन्त्रकभक्षणाधिकरणम् ॥ १७ ॥

कृत्वाचिन्तारूपम् ।

छन्दःप्रतिषेधस्तु सर्वगामित्वात् ॥ ३८ ॥

इन्द्रपीताधिकरणपूर्वपक्षप्रयोजनस्यानैन्द्रसोमभक्षणानाममन्त्रकत्वस्य यथादेवतं चेति सूत्रेणाक्षिप्तस्य समाधानार्थत्वेनैव सूत्रव्याख्यार्थं स्थितादिति भाष्यं व्याचष्टे * स्थितादिति * इन्द्रपीताधिकरणपूर्वपक्षप्रयोजनाक्षेपात् स्थितादित्यर्थः । तुहितमन्त्रप्रयोगनिरासेनामन्त्रके त्वपूर्वपक्षप्रयोजनसमाधानार्थतया तु शब्दव्याख्यार्थं नैतदितिभाष्यं व्याचष्टे *नेति* सामाधानहेतुत्वेन समानविधानेष्वनैन्द्राणाममन्त्रत्वइत्येतत्सूत्रस्थसमाविधानशब्दोक्तप्रकृतिविकारभावाभावस्मरणार्थं कस्मादित्यादिभाष्यं व्याचष्टे * कुत इति * ज्योतिष्टोमक्रियायाः एकत्वेन कथम्भावात्मकप्रकरणभेदाभावादेकस्य कथम्भावस्योपदेशपूरितत्वे निराकाङ्क्षणेनातिदेशिकधर्मग्राहित्वरूपाविकृतित्वायोगादपूरितत्वे वान्यस्यैव धर्माभिधानाशक्तेर्धर्माधातृत्वरू-

पप्रकृतित्वायोगादात्मानमेव प्रति प्रकृतिविकृतिता न युक्तेत्यर्थः । छ-
न्दःप्रतिषेधोक्तिव्याख्यार्थं यल्लिङ्गमित्यादिभाष्यमसम्बन्धव्यवधापसं-
हृत्य व्याख्येयत्वादुपेक्ष्य तावज्ज्योतिष्टोमस्याभेदाद् प्रकृतिवि-
कृतित्वायोगे ऽपि प्रकृतानां प्रकृतित्वं भविष्यतीत्याशङ्कानिरासार्थ-
मुच्यत ऐन्द्रसाम इत्यादिपूर्वपक्षप्रयोजनाक्षेपसूत्रस्थभाष्योक्तप्रकृतानां
प्रकृतिविकृतिभावादुक्तमिति भाष्येण स्वर्गकामो यजेतेति यागस्यैव
फलान्वयश्रुतेः धर्मत्वरूपेण अभ्यासानां निष्फलत्वादशक्यत्वगतभे-
दस्याभ्यासानां धर्मकत्वाभावात्प्रकृतिभावायोगोक्त्यर्थं नैनदिति भाष्यं
थ एते ऽभ्यासविशेषा ऐन्द्रा अनैन्द्राश्च भिन्ना नैते यागा येन फलव-
त्तया धर्मग्राहित्वात्प्रकृतिविकृतित्वार्हाः स्युः यदि चाधर्मका अपि
भिन्नयागान्वयिनः स्युस्ततः प्रकृतिविकृतिगतयागद्वाराप्यभ्यासानां
प्रकृतिभावः शक्येत न त्वेतदप्यस्त्येकयागत्वादित्येवं व्याख्यातुमाह
यदि हीति न चेति भाष्यं गुणानां परार्थत्वादसम्बन्ध समत्वा-
स्यादित्यनेनापि न्यायेनाभ्यासानां यागगुणत्वाद् गुणरूपधर्मान्वया-
नर्हत्वोक्त्यर्थतया भासमानगुणानामपि प्रयाजादीनां गुणान्वयाभ्यु-
पगमे ऽपि साक्षात्फलवत्त्वाभावे ऽपि चाभ्यासानां फलवद्यागोपका-
रित्वेन परम्परया फलवत्त्वान्मैत्रावरुणाद्यभ्यासानां श्रयणादिधर्मग्रा-
हित्ववत्सर्वोपदेशिकातिदेशिकधर्मग्राहित्वोपपन्न प्रकृतिविकृतित्वस-
म्भवाद्युक्तमाशङ्क्याभ्यासार्थधर्मविध्यभावाशयत्वेन व्याचष्टे * न
चेति* यागधर्मत्वायाभ्यासद्वारा योगापकारित्वादैन्द्रप्रदानमात्रद्वा-
रापि च यागोपकारित्वोपपत्तेः प्रदानानां भेदात्सोमफलचमसयोरिव
कर्मैक्ये ऽपि प्रकृतिविकृतित्वोपपत्तिशङ्कानिरासार्थत्वेन सर्वगामि-
त्वादिति सूत्रावयवस्य सर्वाभ्यासगामित्वात्सोमस्य तद्धर्माणां चे-
त्येवं व्याख्यार्थं तेनेति भाष्यं व्याचष्टे * येन त्विति * भाष्योक्ता-
र्थोपपादनायाभ्यासानां धर्मग्रहणस्य यागीयत्वसर्वाभ्यासगामित्वा-
दिति व्याख्यान्तरमप्यनेन सूचितम् । यथा च सवनान्तवर्तिनां ग्र-
हाणां प्रातःसावनिकैः सह सामानविध्य सप्तमपादाधिकरणे वक्ष्य-
ते तथैन्द्राणामैन्द्रैः सहेति दार्ढ्यार्थं दृष्टान्तमाह * यथेति * क-
थम्पुनर्लक्ष्यत इत्यादिपूर्वपक्षप्रयोजनाक्षेपभाष्योक्तं मन्त्रवर्णात्सोम-
स्य धर्माणां चैन्द्रप्रदानविषयत्वं यदिति भाष्येणानुभाष्य परिहारा-
र्थमिन्द्रस्येत्यादिभाष्यं तात्पर्यतस्तावद्व्याचष्टे * न चेति * सोमेन
यजेतेति प्रत्यक्षश्रुत्या सर्वप्रदानविषयत्वबाधाद् गुणरोधेन सङ्कोचो न
युक्त इत्यर्थः । भवत्विह साधनवशेन साध्यस्य नियम इत्यादिपू-
र्वपक्षप्रयोजनाक्षेपवार्त्तिकमाह वनायादिवशेनाग्निहोत्रादेर्नैवापि क-

विषयतया सङ्कोचवन्मन्त्रवशेनासोमस्येन्द्रप्रदानविषयतया सङ्कोचसम्भवं वैषम्योक्त्या परिहरति * न च यथेति * आहवनीयस्यानारभ्यवादेन सर्वहोमार्थत्वात्सङ्कोचवत्त्वं युक्तं मन्त्रस्य तु सर्वस्तोमार्थत्वानवगमान्न सङ्कोचकता युक्तेत्यर्थः । मन्त्रस्य वाक्यात्सर्वार्थत्वानवगमे ऽपि प्रकरणार्थसर्वार्थत्वं भविष्यतीत्याशङ्कां निरस्यन्नैतदेवमितिभाष्यं स्वरूपतो व्याचष्टे *प्रकरण इति * सामर्थ्यावगतेन्द्रार्थसोमप्रकाशकत्वमात्रेणापि प्रकरणपाठोपपत्तेर्न सर्वसोमार्थत्वे प्रमाणमस्तीत्याशयः । अभिषवकालीनसोमग्रहणविषयत्वान्मन्त्रस्य तदा च विवेकाभावेनेन्द्रसोममात्रविषयत्वायोगादिन्द्रसम्बन्धिनः सोमस्य ग्रहणं मन्त्रेण स्मार्यते देवतान्तरसम्बन्धिनो ध्यानादिनेत्येतद्व्याख्यापरितोषेणैतदेवमिति भाष्यं कर्मव्युत्पत्त्या ग्रहणशब्दोक्तो ग्राह्यः सर्वः सोमो मन्त्रेणेन्द्रसम्बन्धितया सङ्कल्पनीया देवतान्तरसम्बन्धितया ध्यानादिनेत्येवं व्याख्यातुमाह * अथ वेति * यथेन्द्रागच्छेति सुब्रह्मण्याख्ये मन्त्रे प्रकृतदेवतामात्रोपलक्षणार्थं मुख्यतयेन्द्रः प्रकाश्यत इत्येकादशे सुब्रह्मण्याधिकरणे वक्ष्यते तथेहापि भविष्यतीति स्वयं परिहारान्तरमाह * अथ वा सुब्रह्मण्यावदिति * देवताशब्दपर्यायेण च शब्देन देवतान्तरप्रकाशनसम्भवप्रदर्शनार्थत्वकल्पनायोगादेतत्परिहारापरितोषेणान्यथा परिहरति * अथ वा धीयेतेति * तुशब्दोक्तोहितमन्त्रप्रयोगनिरासे हेतु
८११।२ सर्वगामित्वादिति सूत्रावयवोक्तमुक्तमुपसंहरति * तस्मादिति * उपेक्षितं छन्दःप्रतिषेधशब्दव्याख्यार्थं यल्लिङ्गमित्यादिभाष्यं व्याचष्टे * यत्त्विति * समानविधानत्वे ऽसिद्धान्तन्यायेनानूहितमन्त्रप्रयोगाज्जगच्छब्दः शब्दप्रयोगे प्राप्तोऽनुष्टुप्छन्दः शब्दविशिष्टोहविधानत्वेनानुष्टुप्छन्दो विधानाभिधानमुपपत्स्यत इत्यर्थः । सत्यासामानविध्याशये ऽनुलिङ्गोक्ति संस्थाधिकरणवक्ष्यमाणेन संस्थानां विकारत्वेन निराकार्येत्याह * अथ वेति * पूर्वपक्षप्रयोजनसमाधानोपसंहारार्थं तस्मादिति भाष्यं सोमस्य प्रत्यक्षश्रुत्या सर्वाभ्यासविषयत्ववद्भक्षणस्य सर्वसोमविषयत्वानवबोधान्मन्त्रवशेनैन्द्रसोमविषयतया भक्षसङ्कोचापत्तेर्मन्त्राभावे भक्षणाभावादयुक्तमित्याशङ्कां निरस्यन्व्याचष्टे * तस्मादिति * सामर्थ्यावगतेन्द्रसोमविषयतया भक्षसङ्कोचापत्तेर्मन्त्राभावे भक्षणाभावादयुक्तमित्याशङ्कां निरस्यन् व्याचष्टे * तस्मादिति * सामर्थ्यावगतेन्द्रसोमभक्षार्थत्वमात्रेण प्रकरणपाठोपपत्तेः सर्वसोमभक्षार्थत्वप्रमाणाभावान्मन्त्रवशेन मानग्रहणयोरिव भक्षस्यापि सङ्कोचो न युक्त इत्याशयः ।

ऐन्द्राग्नभक्षस्यामन्त्रकताधिकरणम् ॥ १८ ॥

ऐन्द्राग्ने तु लिङ्गाभावात्स्यात् ॥ ३९ ॥

समानविधानत्वोपपादनेनोहितमन्त्रप्रयोगात्पूर्वपक्षप्रयोजनाक्षेपपरिहृते ऽन्यसहितेन्द्रदेवत्यसोमभक्षणे तूहितमन्त्रप्रयोगोपपत्तेरमन्त्रकत्वं पूर्वपक्षप्रयोजनं सर्वानैन्द्राव्यापकत्वेनाक्षिप्य व्यापकत्वोक्त्यर्थमेतदधिकरणमिति सूचनार्थैव पूर्वपक्षप्रयोजनसाधनस्थिते ऽन्यथाक्षिप्य समाधातुं चिन्त्यतइति अभिधानार्थस्यैवमिति भाष्यस्याथशब्देन व्याख्यां सूचयन् सन्देहभाष्यं पूर्वपक्षप्रतिज्ञाभाष्यं च सङ्क्षिप्य व्याचष्टे * अथेति * सहितशब्दो ऽनैन्द्रान्तराणाममन्त्रकत्वे ऽप्यैन्द्राग्ने ऽनैन्द्रे ऽपि मन्त्रसद्भावात्प्रयोजनस्याव्यापकत्वेनान्यथाक्षेपसूचनार्थः । इन्द्रपीतशब्दस्येन्द्रादेवत्योक्त्यर्थत्वादैन्द्रदेवत्यतायाश्चतुर्थाधिकरणे निरस्तत्वात् कुतो ऽन्यसहितेन्द्रदेवत्ये सोमे व्यपदेश इति प्रश्नोत्तरत्वेन लिङ्गाभावादिति सूत्रावयवव्याख्यार्थं यस्य हीत्यादिपीतमवयवान्तरमिन्द्रेसमत्यन्तं भाष्यं व्याचक्षाणो यस्यैन्द्राग्नी देवता तस्येन्द्रो न देवतेति कृत्वेन्द्रपीतोक्त्या देवतात्वानुक्तेराग्नेयोक्ततुल्यत्वेत्येवमाद्यं तावद्भाष्यावयवं व्याचष्टे * कुत इति * इहेन्द्रपीतशब्दे सापेक्षत्वे सत्यसामर्थ्याद्यदाग्नेयसाम्यं प्रतीयते तदिन्द्रस्य देवतात्वाकीर्त्तनाद्भव्यतइत्यर्थः । वैषम्यं विवृण्वन् छक्यतइति भाष्यावयवं व्याचष्टे * आग्नेयो हीति * केवलेन्द्रदेवत्ये ऽपि हुतशेषस्य मुख्येन्द्रदेवत्यत्वाभावे चौपचारिकस्य कीर्त्यत्वापत्तेः श्रौतस्यैवेन्द्रपीतत्वस्य मन्त्रार्थवादावगतस्योपचारात् कीर्त्तनसम्भवे लाक्षणिकदेवतात्वकीर्त्तनायोगात्पानाख्यो व्यापारो विशेषणं तस्येवैन्द्राग्निदेवत्ये प्रत्येकं सङ्कल्प्यमानत्वलक्षणदेवतात्वाभावे ऽपि केनचिद् धुतशिष्टरूपेण शेषविषयभूतेन मन्त्रार्थवादावगतस्यौपचारिकस्य विद्यमानत्वाञ्च सापेक्षत्वापत्तिरित्याशयः । सौत्रलिङ्गोक्तिव्याख्यार्था विशेषणोक्तिः हुतविषयत्वात्पीतव्यपदेशस्य केवलेन्द्रदेवत्ये ऽपि हुतशेषस्येन्द्रपीतत्व नास्तीत्याशङ्कानिरासार्थं यस्य हीत्यवयवान्तरमसम्बद्धव्यवायापत्तेरनुकृष्य व्याख्येयत्वादुपेक्ष्य तावद्भाष्यां पेये कथमेकस्य पातृतेत्यादिशङ्कानिरासार्थं तस्येति भाष्यावयवं व्याचष्टे * यस्य चेति * अनेकपेये प्रत्येकपेयो ऽल्पत्वनिमित्तेन पातृव्यापाराल्पत्वेन पातृत्वव्यपदेशव्याप्यतादर्शनादिन्द्राग्निपीते ऽप्यर्धस्येन्द्रपीतत्वं वक्तुं वाक्यमित्यर्थः । यस्य हीत्युपेक्षितं भाष्यं

व्याचष्टे * न चेति * भक्षणकाले वर्त्तमानस्य हुतशेषस्य देवतोद्देशेनाहुतत्वात्साक्षादिन्द्रपीतत्वाभावे ऽपि हुतावयवगतमिन्द्रपीतत्वमहुते ऽप्युपचर्य्यैन्द्रपीतव्यपदेशो युक्त इत्यर्थः । केवलेन्द्रदेवत्ये हुतशेषस्यैन्द्रेणापीतत्वात्तद्गतेन्द्रपीतत्वोपचाराद्धुनादिविशिष्टे तत्पीतत्वात्तद्गतेन्द्रपीतत्वोपचाराध्दुनादिविशिष्टे तत्पीतव्यपदेशोपपत्तावपि इन्द्राग्निदेवत्ये हुतस्यापि कृत्स्नस्यैन्द्रेणापानात् । हुतशेषे किङ्कृतेन्द्रपीततोपचार्य्येतेत्याशङ्क्याह * न च तत्रेति * हुतार्धगतमिन्द्रपीतत्वमुपचरिष्यते इत्याशयः । तस्मादित्यव्यापकत्वोपसंहारभाष्यं

८।१२।१ व्याचष्टे * तस्मादिति *

एकस्मिन्वा देवतान्तराद्विभागवत् ॥ ४० ॥

लिङ्गभावशब्दोक्तस्य पातृनाधिशेषणत्वस्य निरासार्थो देवतोक्तिरिति सूचयन् देवतान्तरोक्तिं व्याचष्टे * सत्यमिति * उभयपीतस्याप्यर्द्धे ऽन्यतरपीतव्यपदेशवदुभाभ्यां सङ्कल्पितस्यार्द्धे ऽन्यतरसङ्कल्पव्यपदेशोपपत्तेरैन्द्राग्ने ऽपीन्द्रस्य देवतात्वसद्भावाद्देवतान्तरोपयोगमाशङ्क्य * न चेत्युक्तम् * देवतात्वस्येह पातृत्वेन भक्षणीयत्वादैन्द्राग्ने चाग्निसहितस्येन्द्रस्य पातृत्वादग्निसहितस्यैव देवतात्वं भक्षणाय व्यपदेक्ष्यतइत्याशङ्क्य समासात्केवलस्येन्द्रस्य पातृत्वप्रतीतेः तस्य चार्द्धविषयत्वतया देवत्वस्याप्यधर्म्मविषयतयैव भक्षणीयत्वापत्तेरुद्देशापाद्यस्य च देवतात्वस्याधर्मविषयोद्देशभावनार्द्धविषयत्वायोगादिन्द्रस्यैन्द्राग्ने देवतात्वायोगसूचनार्थं * तद्धितेत्युक्तम् * अनेन च नावकल्पतइत्यन्तं भाष्यं देवतान्तरोक्तिव्याख्यार्थमित्यपि सूचितम् । तदुक्तमिति भाष्येणैकस्मिन्निति पूर्वपक्षप्रयोजनाव्यापकत्वशङ्कापरिहारार्थस्य सूत्रावयवस्य केवलएवेन्द्रदेवताया मन्त्रः स्यान्नान्यसहित इन्द्र इत्येवं व्याख्या व्यवस्था शब्दवत्सूत्रोदाहरणाद्विभागरूपचतुर्थाधिकरणविषयसिद्धान्तसूत्रोदाहरणाच्च विभागो यथैकस्मिन्नेवाग्नौ देवतायां नान्यसहित इत्येवं विभागवदिति सूत्रावयवव्याख्या सूचितेति सूचयन् सूत्रावयवद्वयं व्याचष्टे * तस्मादिति * आहेतिभाष्येण चतुर्थाकरणाधिकरणेन पौनरुक्त्यमाशङ्क्य परिहारार्थमुच्यतइतिभाष्यं व्याचष्टे * अनेनैव चेति * सूत्रव्याख्यया तात्पर्यतः कृत्स्नं व्याख्याय नास्य सोमस्याहुतमवयवान्तरं देवतया पीयते न च हुतेनावयवान्तरेण देवतया पीतेनाहुतमवयवान्तरं देवतापीतं भवतीत्येवमर्थान्तरस्येत्याद्यभाष्यं हुते ऽप्यवयवे देवतायाः पातृत्वा-

भावादयुक्तमाशङ्क्याभ्युपेत्यवादमात्रत्वेन व्याचष्टे * यद्यपि चेति*
अशक्यत्वं प्रश्नपूर्वमुपपादयति * कथमिति * श्लोकं व्याचष्टे
चमसस्थो हीति देवतायाः पातृत्वस्य नवमे निराकरिष्यमाणत्वा-
दग्निमुखा वै देवा इत्याद्यर्थवादालोचनया ऽग्नौ मुखेति क्षेपस्य पे-
यत्वावगमान्मुखनिक्षिप्ते पेये मुखितः पातृत्वप्रसिद्धेः पीतव्यपदेशस्य
हुतविषयतावसीयतइत्याशयः। उक्तेन प्रकारेण केवलेन्द्रदेवत्य-
हुतशेषस्यापीन्द्रपीतत्वायोगादिन्द्रपीतोक्तिरिन्द्रदेवतत्वलक्षणार्थेत्य-
भिधानार्थं तेनेति भाष्यमिन्द्रदेवत्यत्वस्यापि मुख्यस्य हुतशेषे ऽनु-
पपत्तेरिन्द्रदेवस्य च समुदायस्यैकदेशहोमेन नष्टत्वादभक्ष्या
भक्षयत्वायोगादुपचाराद्धुतशेषस्येन्द्रदेवत्यत्वव्यपदेशाभ्युपगमे
त्विन्द्रपीतत्वस्याप्युपचारो व्यपदेशोपपत्तेः श्रौतार्थवत्यर्थत्यागायो-
गादयुक्तमाशङ्क्योपपादयन् व्याचष्टे * तस्मादिति * हुते ऽपि पी-
तव्यपदेशस्यौपचारिकत्वेनाहुतेत्यन्ताविद्यमाने ऽपीतव्यपदेशस्यादृ-
ष्टार्थत्वापत्तेरिन्द्रदेवत्यस्य तु समुदायस्य मुख्यस्यैव विद्यमानस्या-
हुतेस्तुत्यर्थत्वोपपत्तेरदृष्टकल्पनातश्च लक्षणाया ज्यायसीत्वाद्देवता-
त्वमेव भक्ष्यमाणस्य शेषस्योपलक्षणं न पीततेत्याशयः। यद्य-
पि च हुते सोमावयवे परमार्थतः पीतत्वं स्यात्तथापि समुदा-
यसमुदायिनोरभेदात्समुदायधर्मस्येन्द्राय सङ्कल्पितत्वस्य समुदायि-
भूतभक्ष्यमाणशेषधर्मताया मुख्यत्वसम्भवात् पीतेन चापीतलक्ष-
णायामिन्द्रशब्दस्योपपदस्य पिबतेर्धातोर्निष्ठाप्रत्ययस्य चानभिधे-
य वृत्त्यापत्तेः सङ्कल्पलक्षणायां तु धातुमात्रस्य भक्षणावृत्त्यापत्तेर्नाहु-
ते पीततोपचरितुं शक्यत्याह * न चेति * सङ्कल्पस्य यजमान-
धर्मत्वात्सङ्कल्पितत्वभक्षणार्था सङ्कल्पोक्तिः। सङ्कल्पितत्वस्य भक्ष्य-
माणशेषधर्मतामुपपादयितुमाह * एकदेशे ऽपि हीति * पिबतेः स ८१३।२
ङ्कल्पभक्षणार्थतामुपसंहरति * अत इति * निर्वपतेर्यागभक्षणार्थ-
त्वाभावे यागप्रतीतिप्रयोजनत्वमात्रेण दृष्टान्तत्वम्। पूर्वपक्षप्रयोज-
नाव्यापकत्वशङ्कापरिहारमुपसंहरति * तेनेति* चिन्तायाः प्रयोज-
नं मन्त्रार्थे ऽनुसन्धेये पूर्वपक्षे देवतोद्देशेन हुतत्वमनुसन्धेयं सिद्धान्ते
देवतोद्देशेन त्यक्तत्वमिति।

गायत्रच्छन्दः इत्यादिमन्त्राणामनेकच्छन्दस्के विनियो-
गाधिकरणम् ॥ १९ ॥

छन्दश्च देवतावत् ॥ ४१ ॥

पूर्वाधिकरणोक्तसापेक्षसमासायोगापवादार्थत्वेनाधिकरण-

स्यानन्तरसङ्गतिमाह * इदमिति * ऐन्द्रेष्वेव ज्यौतिष्टौमिकसोम-
भक्षणेषु मन्द्रादिमन्त्र प्रयोक्तव्य इन्द्रपीताधिकरणपूर्वपक्षप्रयो-
जनं पूर्वोक्तं सर्वेषु ज्योतिष्टोमिकसोमभक्षणेष्विति सिद्धान्तप्रयो-
जनं च सिद्धान्तसूत्रे वक्ष्यमाणं गायत्रछन्दस्त्वसामर्थ्यरूपेण लिङ्गे-
न नैकछन्दस्के ज्योतिष्टोमादुत्कर्षशङ्कायाक्षिप्यानुत्कर्षसिद्धान्तेन
समाधानात् पादलक्षणङ्गतिसूचनायामपिशब्दः । यथान्यसहिते-
न्द्रदेवत्यकर्मणि भक्षमन्त्रो न लिङ्गेन विनियुज्यते तथा-
न्यसहितया गायत्रच्छन्दस्कयापीत्येवं प्रयोजनाक्षेपसूत्रं व्याचष्टे *
तत्रेति * केवल गायत्रच्छन्दस्कः सोमयागो नाम्नातो ऽपि मन्त्रग-
तगायत्रछन्दस्त्वविशेषणसामर्थ्यं कल्पयिष्यते बृहस्पतिसवे वा गा-
यत्रमेतदहर्भवतीतिश्रुतेः केवलगायत्र्युपयुक्तेत्याशयः । सर्वेषु वा
भावादेकच्छन्दस इति सूत्रमाक्षिप्तप्रयोजनसमाधानार्थत्वेनावतार-
यति * इतीति * मन्त्रास्याविधायकत्वेनापूर्वयागकल्पकत्वायोगा-
द् बृहस्पतिसवे ऽपि गायत्रत्वश्रुतेरविहितच्छन्दोविशेषाज्यादि-
विषयत्वेनापि सम्भवे प्रातरनुवाकादावनिर्देशप्राप्तसप्तच्छन्दस्क-
त्वादिबाधायोगाद्यस्त मधुनेतयइति सूक्तमुखीये इत्यादिनाच्छन्दो-
विधानाच्च केवलगायत्रीच्छन्दस्तुतित्वानुपपत्तेः एकच्छन्दस्कसो-
मयागाभावात्सर्वेषु सोमयागेषु मन्द्रादिमन्त्रस्यादित्ये च ऐन्द्राग्ने
लिङ्गाभावात्स्यादित्येतत्सूत्रस्थस्य स्याच्छन्दस्यैकस्मिन्वा स्यादित्येवं
तदनन्तरसूत्रे ऽनुपक्तस्य छन्दश्चाक्षेपसूत्रे ऽस्य बुद्धिस्वीकृतस्यानुष-
ङ्गेण योज्यम् । इन्द्रपीतसमासवद्गायत्रच्छन्द समासे ऽपि सम्ब-
न्धिशब्दत्वनिमित्तनित्यसापेक्षत्वाभावात्कथमनेकच्छन्दसां गायत्र-
च्छन्दस्त्वविशेषणमित्याशङ्क्याह *यत्र नामेति * सम्बन्धिशब्दस्यापि
गुर्वादेर्नित्यसापेक्षस्य शिष्यादिनिरपेक्षगुर्वाद्यभावहेतुकत्वात्सम्बन्धि-
शब्दत्वाभावे ऽपि गायत्रच्छन्दस्त्वविशेषणस्य छन्दोन्तरनिरपेक्षस्या-
भावान्नित्यसापेक्षता नास्तीत्याशयः । यदि तु तत्र केवलाग्निदेवत्यो
ऽभ्यासवत्सर्वव्यापारपरिहाराय द्विदेवत्यो ऽप्यग्रहीष्यतइति
भाष्यस्यार्थ. पाठनोपपादनपूर्वं श्लोकं व्याचष्टे *उक्तं हीति* वेदोक्ते-
र्वेदविहितकर्मलक्षणार्थत्वाद्वेदत्रयविहितानामपि सोमयागानां मध्ये
कस्य चित्केवलगायत्रछन्दस्कत्वे नास्तीत्युक्ते बृहस्पतिसवे गाय-
त्रमेतदहर्भवतीतिश्रुतेः केवलगायत्रछन्दस्कत्व भविष्यतीत्याशङ्कते
* तत्रापि* क चित्प्रातरनुवाकादावङ्गाख्यसाधनांशच्छन्दोन्तराणा-
मवश्यं भावित्वादित्युक्तम् । छन्दोन्तरव्यावृत्तौ गायत्रस्य विशेष-
णत्वायोगेन सामर्थ्याभावात्समासो न स्यादित्याशङ्क्य गायत्रच्छन्दः ।

एवास्येति छन्दः शब्दलक्षितः छन्दः कार्यासत्त्वव्यावृत्त्या विशेषणत्वोपपत्तिसूचनार्थं तेनेति भाष्यं व्याचष्टे * अत इति * रथन्तरं सामैवास्येत्येवं विशेषणत्वविवक्षया दृष्टान्तः । रथन्तरस्य वैकल्पिकत्वाद् बृहत्पक्षे सामकार्यस्तोत्रसाधनत्वाभावापत्तेस्तद्व्यावृत्त्यै विशेषणार्थक्त्वाद्गायत्रस्य तु वैकल्पिकत्वेन नित्यं छन्दः कार्यस्तोत्रशस्त्रादिसाधनत्वात्पक्षे ऽप्यभावानापत्तेर्न विशेषणानर्थक्याद्वैषम्यमाशङ्क्य सम्बन्धिशब्दत्वाभावे ऽपि विशेषणत्वायोगमात्रनिमित्ताश्रित्यसापेक्षत्वात्सामर्थ्याविघातसूचनार्थं दृष्टान्तत्वोक्तिर्न सत्त्वासाध्येन व्यावृत्त्यर्थत्वाभावे ऽपि चास्त्यर्थत्वेन विशेषणार्थवत्तेति सूचयितुमाह * अत एव चेति * छन्दोन्तराणामवश्यम्भावित्वात्केवलगायत्रच्छन्दस्त्वाभावेनोक्तस्य निरपेक्षविशेषणत्वायोगे ऽस्यातो रथन्तरसामत्वमिवेत्यतः परामृष्टस्यानेन येन शब्देन परामर्शः । तस्मादिति पक्षद्वयप्रयोजनसमाधानार्थं भाष्यं व्याचष्टे * तस्मादिति पक्षोक्तप्रयोजनसम्भवे चस्याश्चिन्तायाः प्रकृतेन्द्रपीताधिकरणशेषत्वसिद्ध्यै तत्प्रयोजनसमाधानप्रयोजनतास्माभिरुक्ता ।

॥ एकादशाधिकरणोक्तस्य उपसंहारः ॥

सर्वेषां वैकमन्त्र्यमैतिशायनस्य भक्तिपानत्वात्सवनाधिकारो हि ॥ ४२ ॥

मन्द्रादिमन्त्रो लिङ्गेनानैन्द्रसोमभक्षणेषु न विनियुज्यतइति प्रकृताधिकरणपूर्वपक्षनिरासेन सिद्धान्तोक्त्यर्थमेतत्सूत्रमिति सूचनार्थं यदुक्तमित्यनुभाष्य व्याख्यातुमाह * स्थितादिति * छन्दःप्रतिषे- ८१४।१
धसूत्रेणैवोहनिरासात्सर्वेषं मन्त्रवत्त्वमित्युक्तं सिद्धान्तसिद्धावप्यनूहितस्यानैन्द्रेष्वसामर्थ्याल्लिङ्गेन विनियोगानुपपत्तेरूहेनानैन्द्राणां मन्त्रवत्त्वमित्येकदेशिनः पुनः प्रत्यवस्थानशङ्कानुत्थानायैकशब्दैनैकरूपत्ववाचिनोहो निरस्त इत्येवमैकमन्त्र्यं शब्दव्याख्यार्थं सर्वेषामित्यादिभाष्यं व्याचष्टे * अनिन्द्रेति * लिङ्गेनानैन्द्रेष्वपि मन्त्रो विनियुज्यते ततश्च तेष्वपि मन्त्राः प्रयोक्तव्या इति सिद्धान्तस्तत्प्रयोजनं च तन्त्रोक्तम् । तत्पुरुषबलीयस्त्वेनेन्द्रपीतशब्दस्यैन्द्रसोमवाचितया ऽनैन्द्रेष्वशक्तेः कुतो लिङ्गेन विनियोग इत्याशङ्कानिरासार्थत्वेन सवनाधिकारो हीति सूत्रावयवस्येन्द्रपीतत्वोक्तेर्बहुव्रीहित्वेनैन्द्रपीतसवनवाचित्वादनैन्द्रस्यापि च सोमस्येन्द्रपीतसम्बन्धितया प्रकाशयितुं शक्यत्वात्तत्रापि विनियोगोपपत्तिरित्येवं व्याख्यार्थं नेन्द्रपीत इत्यादि-

सामानाधिकरण्यादित्यन्तम्भाष्यं व्याचष्टे * कुत इति * श्लोकं व्याचष्टे * नैवमिति * अनेन चाधिकारोक्तेर्विषयवाचित्वादिन्द्रपीतशब्दः सवनविषयो हीत्येवं सूत्रावयवो व्याख्यातः। प्रातर्यस्य सोमस्य सवनमभिषव इति प्रातःसवनशब्दस्यापि बहुव्रीहित्वेन सोमसामानाधिकरण्योपपत्तेः प्रातः सवनशब्दस्यावयवव्युत्पत्त्या सोमवाचित्वकल्पना न युक्तेत्याशयः यद्यपि च वाग्जुषाणा सोमस्य तृप्यत्विति षष्ठ्यन्तसोमशब्दसामानाधिकरण्यसिद्धौ प्रातःसवनशब्दस्यावयवव्युत्पत्त्या सोमवाचित्व तथाप्याद्यक्रतुभागगतस्य कृत्स्नस्य सोमस्य प्रातरभिषवात्प्रातःसवनशब्दस्य क्रतुभागगतकृत्स्नसोमवाचित्वापत्तेः सोमशब्दस्य च सवनसम्बन्धिवाचित्वात्प्रातःसवनसम्बन्धित्ववाचिनं शब्दं विना सामानाधिकरण्यानुपपत्तेः प्रातःसवनशब्दःछप्रत्ययान्तः प्रसज्येतेत्याह * कुत इति * अतो देवसोमयस्त्वमिन्द्रपीतस्य प्रातःसवनस्य सम्बन्धी तस्य तेऽवयवं भक्षयामीत्येवं षष्ठी योज्या न तु यस्य प्रातः सवनस्य सम्बन्धीद्रपीतः तस्येत्युपसंहरति *अत इति*षष्ठ्यन्तस्य सोमशब्दस्याख्यातान्वयायोगादल्पभक्षणोपदेशात्स्वावयवसम्बन्धाधिक्यप्रतीत्या सोमस्येति षष्ठीत्युक्ते कथमश्रुतावयवान्वयप्रतीतिरित्याशङ्क्य प्रतीतिसिद्ध्यै सोमाश्रयतावयवोक्ता। किं चापूर्वसंयोगाविशेषात्प्रकरणाविशेषाच्च सर्वत्र प्रधानपूर्वभूतभक्षयामिपदसामर्थ्यात्प्राप्तस्य गुणभूतेन्द्रपीतपदाशक्त्या सङ्कोचो ऽङ्गीकार्यः । तस्यापि तु सवनविषयत्वेन शक्त्युपपादनान्न सङ्कोचकता युक्तेत्याह * तेनेति * अनिन्द्रपीतष्वपीति शेषः । अन्यपदार्थत्वेन बहुव्रीह्यपेक्षया तत्पुरुषस्य स्वपदार्थप्रधानत्वेन व्यधिकरणबहुव्रीह्ययोगाच्च सोमविषयतैवेन्द्रपीतोक्तेत्याशङ्कानिरासार्थत्वेन भक्तिपानत्वादिति सूत्रावयवेऽवतारणानुक्तिमाशङ्क्य व्याचष्टे * कस्मादिति * समुदायस्येन्द्रदेवत्यस्येन्द्रपीतोक्त्या विवक्षितस्यावयवहोमेन नष्टस्य सोमेतिसम्बन्धार्थत्वात्प्रत्यक्षवचनेन शब्देन व्यपदेष्टुमशक्यत्वाद् हुतशेषे च भक्त्या पानोक्त्यापत्तेः तत्पुरुषायोगे च बहुव्रीहेरप्यकार्यत्वात्कण्ठेकालादिवत् व्यधिकरणबहुव्रीहेरपि सम्भवात्पूर्वपक्षवदप्रकृतिस्वरत्वाच्च बहुव्रीहित्वावगतेरैन्द्रपीतशब्दस्य सोमविषयता युक्तस्येवं भक्तिपानत्वादित्यवयवव्याख्यार्थं सत्यमित्यादिशब्द इत्यन्तं भाष्यं व्याचष्टे * सोमविषयत्वेनाभक्तपानप्रसङ्गादिन्द्रपीतोक्तः सवनविषयत्वं गृह्यते इत्येव सूत्रावयवं योजयित्वा ऽन्य एवेति भाष्ये ऽन्यशब्दस्य समुदायवाचित्वसूचनपूर्वं पानोक्तेर्भक्तत्वोपपादनार्थम् * पूर्वैरुक्तम् *

पिबतिना सङ्कल्पस्य विवक्षितत्वान्मुख्यत्वाविरोधः सङ्कल्पोक्त्या सूचितः । अवयवसम्बन्धशङ्कानिरासायैवकार. । देवताया. पातृत्वाभावात्स्तवनविशेषत्वेऽपि भक्तिता तुल्येत्याशङ्क्योपपदधातुप्रत्ययानां त्रयाणामपि विशिष्टार्थोक्तिद्वारानभिधेयवृत्त्यापादकसोमविषयत्वापेक्षया धातुमात्रस्य नामधेयार्थवृत्त्युपपादिकायाः स्तवनविषयताया निर्दोषोक्त्यर्थं समानवर्तिक त्वित्यादिभाष्यस्य सोमपातृत्वनिरासार्थं भक्तिपानत्वसूत्रावयवशेषत्वासिद्धौ सोमविषयत्वनिरासनात्पर्यं सूचयितुमाह * न चेति * अधिकरणार्थमुपसंहरति * तस्मादिति *

इति श्रीमत्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजिभट्टमाधवात्मजभट्टसोमेश्वरकृतौ तन्त्रवार्त्तिकटीकायां सर्वानवद्यकरण्यां न्यायसुधाख्यायां तृतीयस्याध्यायस्य द्वितीयःपादः समाप्तः ॥

न्यायसुधायाम् ।

तृतीयस्याध्यायस्य तृतीयः पादः ।

अथोच्चैस्त्वादीनां वेदधर्मताधिकरणम् ॥ १ ॥

श्रुतेर्जाताधिकारः स्यात् ॥ १ ॥

वाक्यस्य लिङ्गद्वारा श्रुतिकल्पनेन विनियोगहेतुत्वात् लैङ्गिकविनियोगप्रकारचिन्तानन्तरं वाक्यीयविनियोगप्रकारचिन्तायाः सङ्गतिमाह * एवमिति * लिङ्गाधिकरणोपक्रमवदिहापि विशिष्टावृत्त्या विशिष्टरूपविनियोगोक्तेर्विनियोगप्रकारोक्तिः वाक्यमरुणया क्रीणातीति प्रकरणाधिकरणभाष्यात् अरुणाधिकरणे वाक्यीयविनियोगप्रकारचिन्तां निराकर्त्तुमुच्चैरित्येव वाक्यमुदाहरणमित्याह * तत्रेति * वेदोपक्रमम्मृगाद्युपसंहारं चान्यदपि वाक्यमत्रोदाहरणमित्याह * तद्यदीति * तत्रेति वा सन्देहभाष्यं व्याचष्टे * तत्रेति * ऋगादिशब्दवाच्यानां पादादिसमूहसामान्यरूपाणां जातानां ऋगादिशब्दैर्ग्रहणं वेदानां वेत्येवं भाष्ये व्याख्याते शब्दार्थचिन्ताया लक्षणासङ्गतिमाशङ्क्यर्गादिमन्त्रप्रकाश्ये कर्मणि उच्चैस्त्वादिकर्मभ्रेषे च प्रायश्चित्तमित्येवं विनियोगचिन्ताफलत्वात् लक्षणसङ्गतिसूचनायोच्चैस्त्वेत्याद्युक्तं वाक्यव्यापारालोचने ऽपि पूर्वपक्षोद्भवसूचनायोपक्रमोपसंहारस्थपदान्वयानपेक्षश्रुतिवशत्वे जातग्रहणस्योक्ते श्रुतिविरोधात् सिद्धान्तायोगमाशङ्क्य विनियोगश्रुत्यव्यापारात् अविरोधो ऽभिधानोक्त्या च सूचितः। श्रुतिवशाद्वेदग्रहणाप्रतीतेः सन्देहायोगं शङ्कते *कुत इति* श्रुतिवशात्पूर्वपक्षसम्भावनातिशयायोक्ता वस्तुतस्तु अत्र पूर्वपक्षस्यापि वाक्येनैव करणात्पदानां चान्योन्यविरोधे सति एकवाक्यत्वायोगादेकानुरोधेनेतरस्य व्याख्येयत्वावगतेरुपक्रमोपसंहारस्थयोः श्रुत्योर्विरोधे बलाबलविशेषो ऽस्ति न वेति सन्देहाद्विशेषाभावे विध्युद्देशार्थवादविरोधे ऽङ्गगुणविरोधे च तादर्थ्यादित्यनेन न्यायेन विध्युद्देशस्यार्थवादं प्रति प्राधान्यात् बलीयस्त्वावगतेर्विध्युद्देशरूपोपसंहारस्थवर्गादिश्रुतिबलीयस्त्वात् तदनुरोधेनार्थवादरूपोपक्रमस्था वेदश्रुतिर्व्याख्येया उपक्रमबलीयस्त्वे तु उ-

पक्रमस्थवेदश्रुत्यविरोधेनर्गादिश्रुतिव्याख्ययेति पक्षद्वयप्रतिभाना-
त्सन्देहमुपपादयति * एकेति * एतदेवोपपादयति * उपक्रमे
हीति * यो होता सो ऽध्वर्युरित्यादावुपक्रमोपसंहारयोर्द्वयोरपि
विध्युद्देशस्थत्वे सति उपक्रमबलीस्त्वे ऽपि अन्नार्थवादरूपस्योपक्र-
मस्य विध्युद्देशेन बाधनिश्चयात्सन्देहायोगमाशङ्क्याह * स चेति
* विध्युद्देशस्यार्थवादकृतप्ररोचनां विना पर्यवसानासम्भवासम्भवे
ऽपि अर्थवादानर्थक्यपरिहारार्थवादैकवाक्यत्वाभ्युपगमे ऽपि विध्यु-
द्देशबलीयस्त्वेन स्नेहमात्रस्याञ्जनसाधनत्वनिश्चयावगतेः प्ररोचनं
विना पुंसः प्रवर्त्तयितुमशक्यत्वात् अर्थवादसन्निधौ चार्थवादानपे-
क्षस्य विध्युद्देशस्य प्रवर्त्तकत्वायोगेनार्थवादात् घृताख्यविशेषग्र-
हणात्पर्यवसानाभ्युपगमे तु घृतस्यैव साधनत्वनिश्चयात्प्ररोचनां
विना पर्यवसानसम्भवासम्भवसन्देहात्स्नेहमात्रेणोक्तव्याः शर्कराः
घृतेनैव वेति सन्देहः सम्भवतीति परिहारेण यथासन्देहः समर्थि-
तः तथेहापि समर्थयन्ती इत्यर्थः । पौनरुक्त्यं तर्हीत्याशङ्कते * एवं
तर्हीति * विध्युद्देशे ऽजनसाधनद्रव्यानुपादानात्सन्दिग्धार्थस्य दौ-
र्बल्यं वक्तुं युक्तं न तु निश्चितार्थत्याशङ्काधिक्यादारभ्यनइत्याशयेन
परिहरति * नायमिति * विध्युद्देशस्य बलीयस्त्वादुच्चैस्त्वादिविधौ
जातस्य विधेयोच्चैस्त्वादिविषयतेत्येवं पूर्वपक्षसूत्रव्याख्यार्थं किं
८।१।६।२ तावदित्यादिभाष्यं व्याचष्टे * किमिति * अक्ताधिकरणपूर्वपक्षे
विध्युद्देशस्योपक्रमस्थत्वात् बलीयस्त्वोपपत्तेः न तन्न्यायनास्योपसं-
हारस्थस्य बलीयस्तता युक्तेत्याशङ्कानिरासार्थत्वेनोपक्रमस्थाया वेदश्रु-
तेर्लक्षणया जातविषयता युक्ता न तु ऋगादिशब्देन वेदानां लक्षण-
या ऽप्यधिकारो विषयीकारः सम्भवतीत्येवमावृत्त्या सूत्रव्याख्यार्थं
वेदानामिति भाष्यं व्याख्यातुं लक्षणासम्भावनयान्योन्यान्वयं ताव-
दाह * किं चेति * सूत्रावृत्तिसूचनार्थो किञ्चोक्तिः यथाग्नीषोमीयं
पशुमालभेतेति विध्युद्देशस्थपश्वाख्यद्रव्यं सामान्यरूपत्वा-
द्वाक्यशेषभूतमन्त्रस्थेन छागाख्येन विशेषेण भावनावानेकधात्व-
र्थानुरञ्जनसहत्वेन सामान्यरूपत्वात् द्रव्यदेवतान्वयानुमितवाक्य-
शेषस्थेन यागाख्येन धात्वर्थविशेषेण न विरुध्येत तथर्गादयो ऽवा-
न्तरसमूहरूपत्वाद्विशेषस्थानीया महासमूहत्वात्सामान्यस्थानीयैर्वा-
क्यशेषस्थैर्वेदैर्न विरुध्यते किं त्वन्वीयन्ते ततश्च सम्भवति तावल्लक्ष-
णेत्याशयः । लक्षणासम्भवे ऽपि वेदोक्त्यैवर्गादयो लक्ष्यन्ते न त्वर्गा-
द्युक्त्या वेद इति कुतो ऽवधारणेत्याशङ्कां निरस्यन् भाष्यव्याख्यां
सूचयति * न कथं चिदिति * ब्राह्मणे ऽपि वेदप्रसिद्धेः सुतरां

न वदन्तीत्युक्तम् । पक्षद्वये ऽपि सामर्थ्येनोच्चैस्त्वादीनामृगादिमन्त्ररूपशब्दाख्यजातिधर्मत्वाद्वेदविषयत्वपक्षे ऽनेकवेदविहितानामृगादीनामुच्चैस्त्वोपांशुत्वरूपविरुद्धधर्मद्वयप्राप्तावष्टदोषविकल्पापत्तेर्जातविषयतैव युक्तेत्येवमावृत्त्यान्यथासूत्रव्याख्यार्थमपि चेति भाष्यं व्याचष्टे * किं चेति * जातस्य तावदनेकवेदविहितत्वे ऽप्येकर्गादिरूपव्यवस्थानादेकोच्चैस्त्वादिधर्मावधारणादिशक्यं वेदानां त्वनेकजातसङ्कीर्णत्वाद्वेदविषयत्वपक्षे सामर्थ्यप्राप्तजातधर्मोच्चैस्त्वादिसङ्करः स्यादित्यर्थः । श्लोकं व्याचष्टे * ऋचो हीति * वेदविहितत्वस्य धर्मान्वयहेतुत्वयोत्तराधिकरणे वक्ष्यमाणत्वात् पठतिर्विधिलक्षणार्थः भाष्यस्थस्य ऋग्ग्रहणस्योपलक्षणार्थत्वं तथेत्यनेनोक्तम् । उच्चैस्त्वादिविधानस्य ज्योतिष्टोमप्रकरणे श्रुतेर्वेदविषयत्वे च प्रकरणेन वशीकारायोगात् प्रकरणबाधापत्तेर्जातविषयतैव युक्तत्येवमन्यथा सूत्रव्याख्यार्थं प्रकरणं चेति भाष्यं व्याचष्टे * ज्योतिष्टोमेति * प्रकृतज्योतिष्टोमत्यागे ऽपि प्रकरणस्यानादरादुल्लङ्घनम् । ऋग्वेदादिविहितस्य ऋगादिप्रकाशत्वस्यापि सर्वक्रतुसाधारणतद्धर्मत्वपक्षे ऽपि प्रकरणबाधाख्यदोषसाम्यापत्तेरनुवाक्याद्यर्थत्वेन प्रकरणापेक्षत्वात् प्राकरणिकयर्चा यत् प्रकाश्यते तदुच्चैरुच्चारिततया प्रकाशनीयमिति वाक्यार्थप्रतीतेर्ज्योतिष्टौमिकजातविषयत्वेन व्यवस्थाभ्युपगमाद्दोषपरिहारे तु वेदविहितधर्मत्वपक्षे ऽपि प्राकरणिकेन ऋग्वेदेन यत् विधीयते तदुच्चैरुच्चरितेन शब्देन प्रकाशनीयमिति वाक्यार्थोपपत्तेर्ज्यौतिष्टोमिकर्ग्वेदविषयत्वेन व्यवस्थया परिहारस्यापि साम्यापत्तेर्नैकः पर्यनुयोक्तव्य इत्याशङ्कते * नन्विति * ज्योतिष्टोमप्रकरणे यो वेदः तेन यद्विधीयतइति वाच्ये कृत्स्नवेदस्य ज्योतिष्टोमप्रकरणेनाव्याप्तेः यावानित्युक्तं जातस्यर्गादिशब्दवाच्यवर्णसङ्घाते प्रत्येकं प्रवृत्तेः प्रकरणस्थर्गादेः समाप्तत्वाद्यथार्थोपपत्तेर्वेदत्वस्य तु प्रकणस्थ वेदभागे समाप्त्यभावात् व्यवस्थानुपपत्तेर्न परिहारतुल्यतेत्याह * नैतदिति * व्यतिरेकमुखेनातुल्यत्वमुपपादयति * सर्वेति * श्लोकद्वयेनान्वयमुखेन विवृणोति * ८१७।२
मन्त्रेति * विधिर्विधेयं तर्कश्च वेद इति विधिशब्दोक्तस्य विधायकब्राह्मणभागस्य विधेयशब्दोक्तानां च मन्त्राणां मननविध्यपेक्षितात्मतत्त्वतर्कणार्थजगज्जननात्मकार्याभिधायिनो "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म"त्याद्युपनिषद्भागस्य च वेदत्वस्मृतेस्तत्समूहे काठकाद्याख्ये क्रतुविषये वेदत्वं पादसमूहे त्वेकवाक्यभूतं जातं

पदसमूहे यज्जुजातम् अवच्छेदरूपभक्त्यवयवात्मकेष्वपर्वसमूहे सामजातं वर्तत इत्यर्थः । जातशब्दार्थसमूहसामान्यवाचितां वनादिशब्ददृष्टान्तेनोपपादयितुमाह * यथेति * सङ्घातसामान्यान्विता वृक्षादिसङ्घाता यथा वनादिशब्दवाच्याः तथा ऋगादिशब्दवाच्यानां पादादिसमूहानां सामान्यानि जातशब्देनोच्यन्त इत्यर्थः । जात्यधिकार इति भाष्येण भर्तृमित्रादिभिश्चाजातशब्दस्य जातिवाचितया व्याख्यानात्समूहवाचितया युक्तेत्याशङ्क्याह *जातिरेव त्विति * ऋगादिजात्ययोगम् ।

चिच्छिन्नयत्नव्यङ्ग्यैश्च नित्यैः सर्वगतैरपि ।
व्यतिरिक्तपदारम्भो वर्णैर्नात्रोपपद्यते ॥
अनारब्धे च गोशब्दे गोशब्दत्वं कथं भवेत् ।

इति वार्त्तिकोक्तगोशब्दत्वायोगन्यायेन तद्भूताधिकरणोक्तवाक्यत्वायोगवदुपपादयितुमाह * द्विवर्णे ऽपीति * प्रातिपदिकाशयो द्विशब्दः श्लोक व्याचष्टे*यथैव हीति * भिन्नैः कण्ठादिभिः स्थानैरुच्चारणप्रकाराख्यैश्च करणैस्तद्धेतुभूतैश्च प्रयत्नैर्व्यङ्ग्यत्वेन क्रमवत्त्वादयुगपद्भाविनां वर्णानां वर्णसमुदायात्मकानां वा ऽक्षराणामक्षरसमुदायात्मकानां वा पदानां समूहे वाक्यान्त्ये वा वर्णे जातिरूपं वाक्यत्व भ्रमणत्वादिवत् कल्पयितुमारभ्यमाणं नवान्त्यवर्णवेलायां नैष्वालोचनसम्भवः पदतद्वाक्यसम्बन्धबुद्धिव्यवधिबाधनादिति तद्भूताधिकरणोक्तात्तद्विलक्षणानां पदरूपाणां वाक्यावयवानां ग्रहणरूपैः पदार्थानां पदपदार्थसम्बन्धानां च स्मरणानुरूपैः प्रत्ययैः पदार्थानां चान्योन्याकाङ्क्षाभिर्व्यवधानाज्जात्याश्रया। ननु सन्धानेन जातिग्रहणायोगात् यथा नाध्यवसितं तथर्गादीनि जातिरूपाणि कल्पयितुं न शक्यानीत्यर्थः । अयुगपद्भावित्वेन तर्हि समूहस्याप्ययोगात्सामान्यरूपं जातमपि न स्यादित्याशङ्क्याह * किन्त्विति * अयौगपद्ये ऽर्थे एकार्थप्रतिपादकत्वलक्षणैकधर्मयोगात्समूहोपपत्तिरित्याशयः सामान्योक्तेर्जातिवाचित्वात्सामान्याभ्युपगमे जात्यपह्नवो न युक्त इत्याशङ्क्याह * यौगिकानामिति * साधारणवाच्यस्य सामान्यशब्दो न जातिवाचीत्याशयः । जातोक्तेश्च समूहवाचितया लोकप्रसिद्धत्वात् न जातिवाचित्वव्याख्या युक्तेत्याह * लोके ऽपि चेति *

वेदो वा प्रायदर्शनात् ॥ २ ॥

८।१।२ किमिदमिति प्रश्नभाष्यावयवं व्याचष्टे * किमिति * गत्य-

र्थैकमिसमानार्थत्वेनेणः प्रक्रमाख्योपक्रमवाची प्रायशब्द इत्युत्तरार्थं वेदेति भाष्यं व्याचष्टे * तत्रेति * एतद्भाष्यविवरणार्थं प्रजापति-र्वा इति भाष्यं व्याचष्टे * तदिति * कुत इति प्रश्नभाष्यं पूर्वपक्ष-सूत्रस्थश्रुतिशब्दोक्तहेत्वनुसन्धानार्थत्वेन व्याख्यातुमाह * यत्त्विति * वाक्येत्युत्तरभाष्याशयं व्याचष्टे * तत्रेति* विध्येकवाक्यत्वं वि-ना ऽर्थवादत्वानवसायात् विधिविरोधानवभासे ऽपि स्तुतिनिन्दा-ज्ञानानुत्पत्तेर्न विधिजन्येन ज्ञानेनार्थवादजन्यस्य ज्ञानस्य बाध्यत्वलक्ष-णं विध्यवादयोर्बलाबलं किं तु विधायकरूपविध्येकवाक्यत्वात् स्तु-त्यर्थवादो निषेधरूपविध्येकवाक्यत्वात् निन्दार्थवाद इति विध्येक-वाक्यत्वानुसारेणार्थवादस्वरूपावधारणलक्षणं तच्च विरोधकारण-कत्वाभावात् न मुख्यपश्चाद्भावापेक्षं अतो जर्तिलयवाग्वा वा जुहु-यादित्यादेर्मुख्यस्याप्यर्थवादस्य पयसा ऽग्निहोत्रं जुहोतीत्याद्युपसंहा-रस्थविध्यनुरोधात् पयोहोमस्तुत्यर्थवादत्वाद्यवधारणं युक्तम्। इह तु श्रौतार्थज्ञानाद् बाध्यबाधकत्वलक्षणं बलाबलमालोच्यते तच्च विरोध-हेतुकत्वात् मुख्यपश्चाद्भावापेक्षं न विध्यर्थवादपदस्थत्वालोचनाद्वि-परीतं भवतीत्याशयः। यदि तु विध्यर्थवादत्वनिबन्धनमेव बला-बलं वाच्यमित्याग्रहस्ततः पश्चात्तनेष्वर्थवादेषु तदस्त्वित्यतिशयार्थ-माह * य इति * मुख्यत्ववद्विध्युद्देशत्वस्याप्यङ्गगुणविरोधन्या-याद् बलीयस्त्वहेतुना न विरुद्धेत्याशयः। पौरस्त्येष्वर्थवादेषु अङ्ग-त्वाद्दौर्बल्यं कस्मान्न भवतीत्याशङ्क्याह * ये त्विति * विरोधा-वस्थायां श्रुतस्य विध्युद्देशस्य स्वार्थपरत्वे ऽर्थवादान्वयापत्तेः सार्थ-वादस्य स्वयमप्ररोचकत्वेन केवलस्यापर्यवसानादलब्धात्मकस्य बा-धकत्वानुपपत्तेर्मुख्यत्वेनार्थवादस्यैव बलीयस्त्वाद्विध्युद्देशगतत्वे ऽ-ध्वर्य्वादिशब्दानां दौर्बल्यं मित्याशयः। आग्नावैष्णवमेकादशक-पालं निर्वपेत्सरस्वतीमाज्येन यजेतेतिश्रुतेरमुख्यस्याग्नावैष्णवस्य विकल्पेनाग्नीषोमीयैन्द्राग्नविकारत्वात्पौर्णमास्यमावास्यातन्त्रप्राप्तेनैव नैराकाङ्क्ष्यात्पाश्चात्यस्य सारस्वतस्योपांशुयाजविकारत्वहेतुकपौ-र्णमासतन्त्रनियमाप्रवृत्तिर्द्वादशाधिकरणे वक्ष्यते इह त्वेकवाक्यत्व-प्रतीतेरुपक्रममात्रेण नैराकाङ्क्ष्याभावात् न तेन पौनरुक्त्यं शङ्कनीयं यद्युद्गातापच्छिद्याददक्षिणेन यजेत यदि प्रतिहर्त्ता सर्वस्वदक्षिणेने-तिश्रुतेः द्वयोः क्रमेणावच्छेदे पूर्वनिमित्तकः प्रयोगः कार्यः परनिमित्त-को वेति सन्दिह्य पूर्वनिमित्तस्य मुख्यत्वाद् बाधकत्वं पूर्वपक्षयित्वा पूर्वबाधं विनोत्तरात्मलाभानुपपत्तेः वैकृतेभ्यः पदार्थेभ्यः प्राक् प्रा-प्तप्राकृतपदार्थवत् पूर्वदौर्बल्यस्य षष्ठे वक्ष्यमाणत्वात् मुख्यस्या-

र्थवादजन्यस्य वेदज्ञानस्य पाश्चात्यविध्युद्देशजन्येन जातज्ञानेन
बाध्यता युक्तेत्याशङ्कते * ननु चेति * उत्पन्नस्योत्तरभानस्य
विरोधिपूर्वज्ञानबाधं विनोत्पत्त्ययोगेन बाधकत्वादेकवाक्यस्थानां
च पदानामन्योन्यज्ञानानपेक्षज्ञानोत्पादकतायामेकवाक्यत्वभङ्गाप-
त्तेरन्योन्यसापेक्षज्ञानोत्पादकतायामेकवाक्यत्वभङ्गापत्तेरन्योन्यसा-
पेक्षज्ञानोत्पादकत्वावसायात् पूर्वपदजन्यज्ञानविरोधिनो ज्ञानस्यो-
त्तरेण पदेनानुत्पादितस्य बाधकत्वानुत्पत्तेर्नात्र पूर्वदौर्बल्यन्यायः
८१९।४ सम्भवतीत्याशयेन परिहरति * नैतदिति * श्लोकं व्याचष्टे
* ये हीति * पूर्वपदस्योत्तरपदाननुरोधवृत्तित्वेऽप्येकवाक्य-
त्वविघातात् एकवाक्यस्थेष्वपि पूर्वदौर्बल्यं कस्मान्न भवतीत्या-
शङ्क्याह * पूर्वप्रतीतं चेति * जातस्योच्चैस्त्वादिवद्विधेयत्वाभा-
वेन पूर्वप्रतीताद्विधेयाविषयात् अनधिकत्वात् पूर्वप्रतीतवेदरूपवि-
धेयविषयत्वाभावेन च पूर्वप्रतीताननुगुणत्वादनपेक्षितत्वेनाप्रतिपा-
द्यतया बलीयस्ता नाशङ्कितुमपि शक्येत्याशयः । सामान्यन्याय-
मुक्त्वा प्रकृते योजयति * तदिहेति * वेदानां विधेयविषयत्वस्य पूर्वं
प्रतीतेर्विधेयमात्रापेक्षणात् जातस्यान्वयायोगेनाप्रतिपाद्यत्वाच्च बा-
धकतेत्यर्थः । वेदानामर्थवादाद्विधेयविषयत्वप्रतीतौ विध्युद्देश-
कीर्त्तनमनर्थकं स्यादित्याशङ्क्याहार्थवादस्य एव त्विति । वेदानां
विधेयत्वं विधेयतैव वेत्यर्थवादात्सन्देहे विषयत्वनिर्णयस्य वि-
ध्युद्देशकीर्तनाधीनत्वात् यद्यपि वेदो ऽर्थवादाद्विधेयविषयतया
भाति तथापि निर्णयार्थं विध्युद्देशो कीर्त्तनीय इत्याशयः । भा-
ष्यव्याख्यार्थं सूत्रार्थमुपसंहरति * तस्मादिति * प्रायदर्शं-
नोक्तेर्भूयोदर्शनवाचित्वेन प्राप्त्युक्त्यर्थत्वमङ्गीकृत्य वेदो व्यापकत्वे-
न हेतुलक्षणव्याप्यत्वशून्यत्वात् न ऋगादीन् लक्षयितुं शक्तः स एव
ऋगादिभिर्व्याप्यत्वेन हेतुलक्षणयुक्तैः शक्यो लक्षयितुमित्यन्वया-
त्स्वयं सूत्रव्याख्यां सूचयितुमाह * वेदश्चेति * वेदाव्यभिचारात्
ऋगादीनामृगाद्युक्तिमात्रेणर्गादिरूपवेदावयवप्रतीतिसिद्धेः तल्लक्ष-
णार्थत्वे वेदोक्तिरनर्थिका तस्माद्दग्बहुलो वेद इत्येवमादिमध्यम-
पदलोपिसमासत्वनैवर्ग्वेदाद्युक्तिर्व्याख्येयेत्यप्यनेन ग्रन्थेन सूचितम् ।
अर्थवादादेव च वेदानां विधेयोच्चैस्त्वादिविषयत्वप्रतीतिसिद्धेर्व्यव-
स्थामात्रार्थत्वेनर्ग्वेदाद्युक्तीनामनुवादप्रायत्वादनुवादानां च लक्षणवृ-
त्तिदर्शनाद्विध्युद्देशस्थानामपि ऋगाद्युक्तीनां लक्षणयावृत्तिरविरु-
८२०।१ द्धेति व्याख्यान्तरं सूचयितुमाह * यथा वेति * यस्मादिति
भाष्यं सकलवाक्यवचनव्यक्त्युक्त्यर्थत्वेन व्याचष्टे * तेनेति * त-

स्मादिति सूत्रार्थोपसंहारभाष्यं व्याचष्टे * तस्मादिति *

लिङ्गाच्च ॥ ३ ॥

ऋग्भि प्रातरित्याद्यृक्छब्दस्य लक्षणयैव वेदे प्रयोगादलिङ्गत्वमाशङ्क्याह * लक्षणापि चेति * त्रिषु पादेषु द्वौ वेदौ ऋक्शब्दं च सङ्कीर्त्य वेदैरिति चतुर्थे पादे बहुवचनेनोपसंहरतीति कृत्वा वेदवचनमृक्शब्दं दर्शयतीत्येवं लिङ्गत्वोपपादनार्थं द्वावित्यादिभाष्यममुख्यपादद्वयस्थवेदसङ्कीर्तनस्यादावुपन्यासेन मुख्यं वा पूर्वचोदना लोकवदित्यस्य विप्रतिषिद्धधर्मसमवाये भूयसां स्यात्सधर्मत्वमित्यस्माद्भिन्नाधिकरणतया स्वमसंख्यविरोधविषयत्वमङ्गीकृत्यान्त्यस्य मुख्यत्वे ऽपि भूयोनुसारित्वसूचनात् चतुर्थपादानालोचने ऽपि ऋक्शब्दस्य यजुर्वेदसामवेदशब्दसाहचर्यात् वेदविषयत्वज्ञान भवति बहुवचनान्यथानुपपत्त्या तु तदेव दृढीक्रियत इत्येव व्याचष्टे * त्रिष्वेव तावदिति * तथा चाध्येतारस्तत्रैव सुतरां प्रयुञ्जत इति पूर्वपक्षवार्त्तिकोक्त ऋगादौ वेदप्रयोगमनुभाषणपूर्वं परिहरति * य स्त्विति * धर्मोपदेशसूत्रमसम्बद्धपदव्यवायापत्तेः स्वस्थानादुत्कृष्य

त्रयी विद्याख्या च तद्विदि ॥ ५ ॥

इति सूत्रं तावत् बलीयसा शास्त्रस्थेन प्रयोगोपन्यासानर्थक्यादयुक्तमाशङ्क्योपपादयितुमाह * यदि चेति *प्रश्नपूर्वं प्रयोगमुपपादयति * कथमिति * पञ्चविंशब्राह्मणप्रथमप्रपाठके महन्मे वोच इत्यादि यजुः पाठात् छन्दोगानां जातत्रयत्वं त्रयीविद्यशब्दस्य वेदविषयत्वे ऽपि ऋगादिशब्दानां किमायातमित्याशङ्क्याह * अत इति * सूत्रार्थमुपसंहरति * तस्मादिति * ८२१।८

व्यतिक्रमे यथाश्रुतीति चेत् ॥ ६ ॥

पक्षद्वये ऽपि लिङ्गेनोच्चैस्त्वोपांशुत्वयो ऋगादिशब्दरूपश्रुतिसम्बन्धितयैव प्रयोज्यत्वाद्वेदविहितपदार्थधर्मत्वपक्षे यजुर्वेदविहितत्वेन ऋचामृग्वेदाव्यतिक्रमे यजुर्वेदविहितत्वेनोपांशुत्वप्राप्तावपि ऋग्वेदविहितत्वेनोच्चैस्त्वस्याप्यपरिहार्यत्वात् वेदाख्यश्रुतिविहितत्वनिमित्तस्योपांशु उच्चैर्वा प्रयोगस्य पाक्षिकान्यथात्वापत्ते जातधर्मतैवोचितेत्यपि चेति भाष्यव्याख्यातपूर्वपक्षसूत्रार्थानुभाषणार्थत्वेनैतत्सूत्रव्याख्यार्थमथेति भाष्यं व्याचष्टे * अनुभाषणेति *

न सर्वस्मिन्निवेशात् ॥ ७ ॥

ऋग्वेदविहितानां यजुषां यजुर्वेदपाठमात्रेणोपांशुत्वे यजुर्वेदविहितानां चर्चां ऋग्वेदपाठमात्रेणोच्चैस्त्वे सति विधिविरोधाद्दोषः स्यात् सर्वस्मिंस्त्वृग्जाते यजुर्जाते च ऋग्वेदविहिते उच्चैस्त्वनिवेशाद्यजुर्वेदविहिते चोपांशुत्वनिवेशादेकवेदविहितस्य धर्मद्वयसम्बन्धाप्रसक्तेर्न दोष इत्येवं सूत्रव्याख्यार्थं नैषदोष इत्यादिभाष्यं व्याचष्टे * न पाठमात्रेणेति * करोतेर्विध्यनभिधायित्वात्कथं वेदविधेयतोक्तिरित्याशङ्क्य वेदस्य कर्त्तव्यत्वज्ञापनरूपकरणत्ववाचिन्या तृतीयया विधायकत्वाभिधानात्करोतेर्विध्यभिधायकत्वोपपादनार्थं प्रमाणेनेत्युक्तम् । एवमपि वेदद्वयविहिते ऽग्निहोत्रादौ विकल्पो ऽपरिहार्य इत्याशङ्क्याह * यदि त्विति * भूयस्त्वेनोभयश्रुतीत्यनेन न्यायेनाग्निहोत्रस्य याजुर्वेदिकत्वावगतेः सर्वं वास्य बर्हिष्यं सर्वैः परिगृहीतं य एवं विद्वानग्निहोत्रं जुहोतीत्यार्ग्वेदिकस्य विधेरुदयकालत्वलक्षणगुणविध्यर्थं प्रकरणाज्जीवनार्थत्वावसायादुच्चैस्त्वोपांशुत्वयोर्विकल्पापत्तिः विशेषानवधारणे तु विकल्पो ऽप्यदोष इत्याशयः ।

वेदसंयोगान्न प्रकरणेन बाध्येत ॥ ८ ॥

उच्चैस्त्वादिविधानस्य ज्योतिष्टोमप्रकरणे श्रुतेर्वेदाधिकारत्वे प्रकरणबाधापत्तेः जाताधिकारः स्यादित्येवं प्रकरणं चेति भाष्यं व्याख्यातं सूत्रार्थं यदुक्तमिति भाष्येणानुभाष्य तत्परिहारार्थत्वेन वेदसंयोगात् ऋग्वेदादिविहितत्वलक्षणात्सर्वस्मिन्ज्योतिष्टोमाद्यतिरिक्ते ऽपि क्रतावुच्चैस्त्वादिनिवेशः प्राप्तो न प्रकरणेन बाधितुं शक्य इति कृत्वा यत्प्रकरणं बाध्यते स न दोषः वाक्येन प्रकरणबाधस्य युक्तत्वादित्येवं सूत्रव्याख्यार्थं वेदेति भाष्यं स्पष्टत्वादव्याख्याय वेदसंयोगात्सर्वस्मिन्निवेशं प्राप्तं न प्रकरणानुरोधेनोच्चैस्त्वादिधर्मो बाधेतेति द्वितीयान्तविपरिणतनिवेशोक्त्यङ्गीकारेण धर्म इत्यध्याहाराधिक्येन च सूत्रव्याख्यामभिप्रेत्य पाठान्तरमुदाहरति * बाधेतेति चेति * पूर्वपाठे प्रथमान्ततया निवेशशब्दविपरिणामः ।

धर्मोपदेशाच्च न हि द्रव्येण सम्बन्धः ॥ ९ ॥ (१)

ऋग्धर्मत्वेनोपदिष्टस्योच्चैस्त्वस्य पुनःसामधर्मत्वेनोपदेशाच्च

(१) अत्र चतुर्थसूत्रं व्याख्यातं वार्तिके ।

ऋगादिशब्दैर्वेदो ऽधिक्रियतइत्येवं सिद्धान्तसूत्रोक्तप्रतिज्ञानुषङ्गेण सूत्रपूरणसूचनार्थं लिङ्गाच्चेति सूत्रानन्तरमेतत्सूत्रकृतमपि पूर्वपक्षनिरासार्थत्वेन स्वस्थानादुत्कृष्येदानीं व्याख्येयमिति सूचयितुं जाताधिकारपक्षं ऋग्धर्मत्वापदेशेनैवोच्चैस्त्वस्य सामधर्मत्वसिद्धेः सामान्वयो न वक्तव्य इत्येवं पूर्वपक्षनिरासार्थमेव सूत्रशेषं व्याचष्टे * जातेति * प्रजापतिहृदयादिसंज्ञानां साम्नामग्रहीतत्वात् तदर्थं साम्नामुच्चैस्त्वोपदेशो भविष्यतीत्याशङ्कते * अनुक्तेति * जा- ८२२।
तधर्मपक्षे प्रकरणानुग्रहसम्भवेनाप्राकरणिकेषु प्रजापतिहृदयादिषु उच्चैस्त्वविध्ययोगात्तादर्थ्यं न सम्भवतीति परिहरति * नेति * तादर्थ्याभ्युपगमे ऽप्यल्पविषयत्वान्मन्दप्रयोजनत्वापत्तिरित्याह * अल्पेति * वेदो ऽधिक्रियतइत्यनुषङ्गेण सूत्रपूरणं सूचयन्नधिकरणार्थमुपसंहरति * तस्मादपीति *

॥ आधाने गानस्योपांशुनाधिकरणम् ॥ २ ॥

गुणमुख्यव्यतिक्रमे तदर्थत्वात् मुख्येन वेदसंयोगः ॥ ९ ॥

उच्चैस्त्वादेर्वेदधर्मत्वे स्थिते प्रसङ्गादुत्पत्तिवेदधर्मत्वं वेत्यत्र चिन्तेति परमतेन तावदधिकरणं वर्णयन् आधानसाम्नां विधानस्य वेदान्तरीयत्वाभावादनुदाहरणत्वमाशङ्क्य कृत्वाचिन्तात्वसूचनपूर्वं सन्देहं पूर्वपक्षं चाह * इदानीमिति * उत्पत्तिवेदधर्मः कर्त्तव्यः । प्रयोगवेदधर्मो वेति सन्देहार्थः वेदव्यपदेशनिबन्धनत्वादुच्चैस्त्वादिधर्माणां प्रत्यात्मव्यवस्थितोत्पत्तिविधिविषयस्य च साक्षाद्वेदव्यपदेशोपपत्तेः । प्रयोगविधिविषयत्वस्य त्वङ्गेषु प्रधानद्वारत्वेन साक्षाद्वेदव्यपदेशहेतुत्वायोगात् यस्याङ्गस्य यत्र वेदे विधानं तस्य तद्वेदधर्मः स्यादिति वदता यत्सामवेदिकैर्वारवन्तीयादिवाक्यैर्विधीयते सामवेदेनैतत्साक्षात्क्रियते यजुर्वेदेन तु प्रधानद्वारेत्येवं पूर्वपक्षभाष्यव्याख्या सूचिता । अङ्गप्रधानयोर्भिन्नवेदविहितत्वरूपे व्यतिक्रमे अङ्गे स्वरूपनिबन्धनधर्मानुरोधेन प्रधानद्वारप्राप्तस्य धर्मस्य बाधलक्षणो ऽतिक्रमः कार्यः । प्रधानद्वारधर्मानुरोधेन वा स्वरूपनिबन्धनस्येति सन्देहे प्रधानसाद्गुण्यार्थत्वादङ्गधर्मानुष्ठानस्य प्रधानद्वारधर्मानुरोधेन स्वरूपनिबन्धनधर्मव्यतिक्रमस्य न्याय्यत्वात्प्रधानद्वारकः प्रयोगवेदसंयोगः क्रियतइत्यनेन विवक्षित इत्येवं सूत्रव्याख्यां सूचयन् सिद्धान्तमाह * इतीति * गुणे स्वरूपतः

प्राप्तस्य धर्मस्य बाधनमित्यर्थः । भाष्ये ऽपि स्वरूपनिबन्धनो धर्मो गुणोक्त्योक्तः । प्रधानद्वारको मुख्योक्त्या । अपराक्तेर्विरोधिधर्मान्तरार्थतामवश्यकर्त्तव्यतोक्त्या सूचयन् श्लोकं व्याचष्टे * अवश्येति * तदर्थत्वादिति हेतुव्याख्यार्थं कुत इत्यादि भाष्यं व्याचष्टे * तथा हीति * प्रधानद्वारप्राप्तेनैव धर्मेणाङ्गस्यापि सादृगुण्यसिद्धेरभ्युपेत्यवादमात्रेण * यद्यपीत्युक्तम् * आधानस्येत्यादिभाष्यं सिद्धान्तोपसंहारार्थत्वेन व्याचष्टे * तस्मादिति * प्रयोगविधेरङ्गप्रधानवाक्यैकवाक्यत्वलभ्याङ्गप्रधानविशिष्टभावनाविषयत्वेन कल्प्यत्वादनाम्नातत्वेन वेदत्वानुपपत्तेर्यजुर्वेदेन यत्प्रयुज्यते तदुपांश्विति शास्त्रार्थायोगात् यजुर्वेदेन यद्विनियुज्यते तदुपांश्विति शास्त्रार्थावगतेः सामवैदिकोत्पत्तिविधिविहितेष्वाधानसामसु उपांशुत्वाप्राप्तेर्नोच्चैस्त्वबाधकता युक्तेति पूर्वपक्षाशयं दूषयितुमुपन्यस्यति *नन्विति * प्रधानेन सहाङ्गानामेकदेशकालकर्तृत्वसिद्धये ऽङ्गानि तु विधानत्वात्प्रधानेनोपदिश्येरन् तस्मात्स्यादेकदेशत्वमित्येकादशाधिकरणसिद्धान्तसूत्रे प्रकाराख्यविधानरूपेति कर्त्तव्यताकाङ्क्षाकरणाख्यप्रधानविषयेन दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिप्रयोगविधिनोपदेशस्य वक्ष्यमाणत्वात्प्रयोगविधेरपि वैदिकत्वोपपत्तेः करोतेश्चानुष्ठानात्मकप्रयोगवाचित्वाद्यजुर्वेदेन यत्प्रयुज्यते तदुपांश्विति शास्त्रार्थोपपत्तिरित्याशयेन परिहरति * नैतदिति * प्रधानेन सहैकवेदविहितानामङ्गानां वाक्यैकवाक्यत्वापन्नवाक्यसमूहात्मकमहावाक्यार्थभूतानामङ्गप्रधानविशिष्टभावनाविषयवैदिकप्रयोगविधिप्रयोज्यत्वसम्भवे ऽपि वेदान्तरविहितानामेकवाक्यत्वायोगात् न तत्प्रयोज्यत्वोपपत्तिरित्याशङ्कानिरासार्थं विधेस्त्वेकश्रुतित्वात् अपर्यायविधानात् नित्यवत् भूताभिसंयोगादर्थेन युगपत्प्राप्तेर्यथाप्राप्तं शब्दार्थो नीतः तत्तस्मात्सर्वप्रयोगे प्रवृत्तिः स्यादित्येकादशाधिकरणान्तरसिद्धान्तसूत्रं पठति * तथेति * साङ्गप्रधानप्रयोगविधेरेकप्रधानप्रयोगविधिश्रुतिनिबन्धनत्वेनापर्यायेणाकादाचित्कत्वेन सर्वाङ्गानां विधानावगतेर्नित्यवच्छ्रुतानां च तथाभूतानां श्रुत्यादिप्रमाणोपनयलक्षणसन्निधानाविशेषात्सन्निकर्षविप्रकर्षानादरेण प्रधानान्वयावगतेरनिर्ज्ञातोपायपरिमाणत्वेन च प्रधानोपकाररूपेणार्थेन सर्वेषामपेक्षितत्वात् युगपत्प्राप्तेर्यथाप्राप्ते च स्वशब्दार्थे विकल्पायोगात् निवीता ऋत्विजः प्रचरन्तीति सर्वर्त्विजां निवीतवद्यथाप्राप्तस्याङ्गसमूहस्य सर्वस्य स्वप्रधानप्रयोगविधायिशब्दविषयत्वावगतेः सर्वाङ्गप्रयोगे फलसिद्धिः स्यादिति समन्त्याङ्गप्रयोगोपपादनायैकका-

च्छाम्नाननिमित्तैकवाक्यत्वाभावे ऽपि अङ्गप्रधानानामन्योन्यापेक्षा-
वशात्सर्वाङ्गानुगृहीतेन प्रधानेन फलं भावयेदित्येवं वाक्यैकवा-
क्यत्वकल्पनया सन्निकृष्टविप्रकृष्टानां सर्वेषामङ्गानां प्रधानप्रयोग-
विधिप्रयोज्यत्वस्य वक्ष्यमाणत्वात् वेदान्तरीयाणामप्यङ्गानां प्रधान-
प्रयोगविधिप्रयोज्यत्वोपपत्तिरित्याशयः । अत प्रधानप्रयोगविधिप्र-
योज्यत्वेनाङ्गानां वेदान्तरोत्पन्नानामपि प्रधानप्रयोगवेदप्रयोज्यत्वा-
त्साङ्गस्याधानस्य याजुर्वेदिकत्वेनासाम्नामुपांशुत्वोपपत्तिरित्युपसंह-
रति*तस्मादिति*स्वयमेव तर्ह्याधानवत्साम्नामपि यजुर्वेदप्रयोज्यत्वा- ८२३।
दुपांशुत्वप्राप्तेः प्रधानद्वारत्वायोगाद्बलीयस्ता न युक्तेत्याशङ्कते*एवं
तर्हीति * प्रधानोपकारित्वेनाङ्गधर्मस्याप्युपांशुत्वस्य प्रधानधर्मत्वा-
भ्युपगमे तूच्चैस्त्वस्यापि प्रधानधर्मत्वापत्तेरपरिहार्या तुल्यबलतेत्याह
*अथेति*साक्षादङ्गविधावप्युत्पत्तिविध्यालोचने साम्नां याजुर्वेदिक-
त्वाभावादुपांशुत्वाप्राप्तेः प्रधानस्यैव तु साङ्गस्य यजुर्वेदसम्बन्धा-
त्साम्नामुपांशुत्वप्राप्तेः दुर्निराकरा प्रधानद्वारतेति परिहरति * उ-
च्यतइति * श्लोकं व्याचष्टे * यदि हीति * आधानसामोत्पत्तेर्वे-
स्तुनो याजुर्वेदिकत्वे ऽपि सामवैदिकत्वं कृत्वाचिन्तारम्भादित्याश-
यः । साङ्गं कुर्यादित्युपबन्धस्य याजुर्वेदिकत्वेन साङ्गस्योपांशु-
त्वावधारणात्स्वरूपेण चाङ्गस्योपांशुत्वसंस्पर्शाभावे साङ्गस्योपांशु-
त्वायोगात्स्वरूपेण संस्पर्शापत्तिरित्याशङ्कते * नन्विति * साङ्ग-
विधौ विशेषणत्वेनाङ्गविधानाद्विशेषणविधश्च विशिष्टविधिकल्पत्वे-
नानाम्नानाद्वैदिकत्वानुपपत्तेराधानसाम्नां याजुर्वैदिकत्वाभावेनो-
पांशुत्वाप्राप्तेरुपांशुत्वरूपो धर्मः प्रधानद्वारैवाङ्गानि प्राप्नुवन्नङ्गधर्म
इत्येवं कथ्यते न त्वङ्गस्य स्वरूपेणोपांशुत्वापादिका यजुर्वेदे सा-
क्षाच्चोदनास्तीति परिहरति * नेति * अतो नोपांशुत्वोच्चैस्त्वयो-
स्तुल्यबलतेत्याह * ततश्चेति * बलीयस्त्वे ऽप्युपांशुत्वस्य विरो-
धाभावे बाधकत्वायोगाद्विरोधो ऽतिक्रमोक्त्योक्तः प्रधानद्वाराप्यङ्गं
प्राप्तस्य धर्मस्य बाधे साक्षात्प्रधानवैगुण्यानापत्तेरङ्गवैगुण्यद्वारस्य
तु प्रधानवैगुण्यस्योच्चैस्त्वबाधे ऽपि तुल्यत्वेन नोपांशुत्वस्य बा-
धकत्वं सम्भवतीत्याशङ्क्य प्रधानेन * न हीत्युक्तम् * उपांशु-
त्वस्य साङ्गप्रधानधर्मत्वादङ्गे ऽप्युपांशुत्वबाधे साक्षात्साङ्गप्रधानवै-
गुण्यापत्तेरुच्चैस्त्वस्य त्वङ्गधर्मत्वात्तद्बाधेन साक्षात्प्रधानवैगुण्या-
नापत्तेर्वैषम्यमित्याशयः । उच्चैस्त्वोपांशुत्वयोर्वेदविशेषविधयत्वो-
पलक्षितकर्माङ्गत्वेन विधानादुत्पत्तिवेदविधेयत्वस्य चाङ्गेष्वनन्य-
द्वारत्वात्साक्षात्प्राप्तेः प्रयोगवेदविधेयत्वस्य तु प्रधानद्वारत्वाद्विप-

रीनं बलाबलमिति प्रात्यात्मिकत्वाद्व्यपदेशधर्माणामिति वार्त्तिकोक्तं
पूर्वपक्षाशय दूषणायानुसन्धत्ते * नन्विति * वैषम्ये ऽपि नोच्चै-
स्त्वस्य बाध्यत्वमित्यपिशब्दार्थः । प्रधानवैगुण्यापादकत्वेन साक्षात्प्राप्ते-
र्बलीयस्त्वहेतुत्वाभावात् शीघ्रावगतिहेतुत्वमात्रं वाच्यं तच्च षष्ठाधि-
करणन्यायाद्दौर्बल्यमेवापादयतीत्याशयेन दूषयति * सत्यमिति *
प्रधानवेदस्वरबलीयस्त्वाभ्युपगमे ऽनिष्टापत्तिं शङ्कते * ननु चेति *
८२४। वचनेन न्यायादनिष्टापत्तिं परिहरति * सत्यमिति * सामिधेन्य-
नुवचनादीनां ऋग्वेदे ऽन्वाधानमन्त्रादीनां च यजुर्वेदे विधानात्
पूर्वपक्षन्यायेन नानावेदस्वरप्राप्तौ सिद्धान्तन्यायेन बाधितायां विशे-
षविषयेण मन्द्रादिवचनेन प्रधानेषु सामान्यवचनप्राप्तोपांशुत्वबाध-
पूर्वमङ्गेषु तद्बाध इत्यर्थः । स्वप्रधानानामिष्ट्याख्यानां पशुबन्धा-
ख्यानां च दर्शपूर्णमासविकृतीनां दार्शपौर्णमासिकं मन्द्रादिस्वरत्रयं
चोदकात्प्राप्तं बाधित्वा प्रत्यक्षयाजुर्वैदिकप्रधानप्रयोगवचनलक्षणोप-
देशवशेनप्रधानविधायियजुर्वेदनिमित्तोपांशुत्वस्वरप्रसक्तौ सामवेद-
विहिते श्येने ऽङ्गान्युद्गातृभिः कार्याणीति वेदोपदेशात्पूर्ववद्वेदान्यत्वे
यथोपदेशं स्युरिति सप्तमपादान्त्याधिकरणसूत्रेण पूर्वपक्षयि-
त्वा तद्ग्रहणाद्वा स्वधर्मः स्यादधिकारसामर्थ्यादव्यक्तः शेष इत्यनेन
पूर्वसूत्रस्थपूर्ववच्छब्दनिर्दिष्टप्रत्युपस्थापितप्राकृतधर्मपरामर्शिनं तच्छ-
ब्दं चोदकप्राप्तान्यङ्गान्यधिकृत्य वैकृतप्रयोगवचनप्रवृत्तेश्चाधिकार-
शब्दश्चोदकवाचिनमभिप्रेत्य प्रयोगवचनेन प्राकृतधर्मग्रहणात्प्राकृताना-
ञ्च धर्माणाञ्चोदकसामर्थ्येनानर्त्विक्कर्तृकाणामेव प्राप्तेः स्वकीयचोद-
कप्राप्तनानर्त्विक्कर्तृकधर्मयुक्तः श्येनादिः स्यात् यस्तूद्गात्रादिः सामा-
न्यसमाख्यानिमित्तत्वात् अव्यक्तः कर्त्ता स शेषे प्राकृतधर्मव्यति-
रिक्ते कन्टकवितोदनादावपूर्वे श्येनाङ्गे भविष्यतीति सिद्धा-
न्तयिष्यमाणत्वात् तेनैव न्यायेनात्रापि चोदकबलीयस्त्वात्
काम्येष्टिव्यतिरिक्तानां दर्शपूर्णमासविकृतीनां साङ्गानां चो-
दकप्राप्तमन्द्रादिस्वरत्रयं काम्येष्टीनां तु यज्ञाथर्वणं वै काम्या इष्टय
स्ता उपांशु कर्त्तव्या इति काम्यशब्दवाच्ये प्रधाने विशेषवचने नो-
पांशुत्वविधानादङ्गमात्रे स्वरत्रयं युक्तमित्याह * तथेति * ज्योति-
ष्टोमाङ्गभूतानां तु दर्शपूर्णमासविकृतीनां दर्शपौर्णमासिके मन्द्रा-
दिस्वरत्रये चोदकात् प्राप्तप्रयोगवचनेन बाध्यमाने तद्ग्रहणाद्वेति
वक्ष्यमाणेन चोदकबलीयस्त्वेनोज्जीविते ज्योतिष्टोमस्य याजुर्वैदिक-
त्वेनोपांशुधर्मकत्वात्प्रवृत्तत्वादिष्टेः सोमे प्रवृत्तिः स्यादित्यष्टमाधिक-
रणपूर्वपक्षवक्ष्यमाणस्य क्लृप्तोपकारत्वाद्दार्शपौर्णमासिकानां धर्मा-

णां ग्रहणस्य कृत्स्नविधानात्तत् पूर्वत्वमिति सिद्धान्ते निराकरिष्यमाणत्वेनाभावाद्दार्शपौर्णमासिकमन्द्रादिस्वरत्रयाशङ्कानुपपत्तेः तदङ्गभूतानां दर्शपूर्णमासविकृतीनामपि प्रस्तुतसिद्धान्तन्यायेन ज्योतिष्टोमगतोपांशुत्वप्राप्तिं बाधित्वा दीक्षणीयाद्युद्देशेन विशेषवचनविहितेषु स्वरेषु तेनैव न्यायेन साङ्गानां प्राप्तेषु मन्द्रं प्रातःसवने चरन्तीत्यादिविशेषवचनैः सवनविभागे विहितानां मन्द्रादि (स्वरत्रयाशङ्कानुपपत्तेः तदङ्गभूतानां दर्शपूर्णमासविकृतीनामपि प्रस्तुतसिद्धान्तन्यायेन ज्योतिष्टोमगतोपांशुत्वप्राप्तिं बाधित्वा दीक्षणीयोद्देशेन विशेषवचनविहितेषु स्वरेषु स्वरेषु तेनैव न्यायेन साङ्गानां प्राप्तेषु मन्द्रं प्रातः सवने चरन्तीत्यादिविशेषवचनैः सवनविभागे विहितानां मन्द्रादि[1]) स्वरकाणामुच्चारणानां सर्वेषां ज्योतिष्टोमाङ्गानामपि गुणमुख्यव्यतिक्रमन्यायेन प्रतिस्वं साङ्ग प्रयोगं प्रयोगं त्रेधा विभज्य प्राकृतमन्द्रादिभिराज्यभागान्तत्वाद्यनादरात्सर्वथा साम्याभाव ऽपि त्रेधा विभक्तयज्ञभागधर्मत्वेन तुल्यानां मन्द्राद्युच्चारणानां प्राप्तौ यत्किंचिदिति वाक्याच्च सर्वेषां दैक्षात्प्राचामुपांशुत्वप्राप्तौ प्रधानमात्रवाचिना शब्देनोद्दिश्य यावत्या वाचा कामयीत तावत्या ऽनुब्रूयादित्यादिस्वरविशेषविधानात्प्रधानमात्रे स्वरविशेषात्तदङ्गपूपांशुनेति व्यवस्था दैक्षे तु मन्द्रयाज्यभागान्तमित्यादिविभागेन प्राप्तस्य प्राकृतस्य स्वरस्य गुणमुख्यव्यतिक्रमन्यायेन ज्योतिष्टोमगतोपांशुत्वप्रसङ्गाद्वारितस्य सवनविभागविहितेन मन्द्रादिस्वरेण गुणमुख्यव्यतिक्रमन्यायादेव दैक्षप्राप्तेनोभयानुग्रहायाज्यभागान्तादिविभागेन साङ्गदैक्षप्रयोगं त्रेधा विभज्य प्रयोज्यतया ऽवगतेन प्रतिप्रसवः प्राकृतस्य वा स्वरस्याङ्गभूते दैक्षे स्वरूपतः प्राप्तस्य प्रधानतः प्राप्तेन सवनविभागस्वरेण बाधात्सवनविभागतुल्यदैक्षविभागाश्रयाणान्मन्द्रादिस्वरकस्योच्चारणस्य सम्पादनं कार्यमनुबन्ध्यादिष्वपि सवनविभागस्वरद्वारप्राप्ता मन्द्राद्युच्चारणविशेषाद्दैक्षेण व्याख्याता इत्याह * एवमिति * तथा ज्योतिष्टोमस्येति तु पाठे तथा प्राप्ते सतीत्यध्याहार्यम्। ततो ज्योतिष्टोमस्येति पाठस्तु सुगमः यत्किञ्चिदित्यनेनैवोपसत्स्वप्युपांशुता न युक्तेत्याशङ्कोपसंहारे यत्किंचिदिति वीप्सार्थप्रतीतिविरोधापत्तेर्दीक्षणीयास्वरप्रशंसार्थत्वेन चार्थवत्त्वोपपत्तेर्नोपसहारार्थत्वं सम्भवतीति सूचनायोपांशूपसत्स्वित्युक्तं विप्सार्थयत्किञ्चिच्छब्देन सर्वव्यापित्वोक्त्योपसंहारानर्हत्वं सूचितं सवनीयादिष्वपि साङ्गं

१ अय पा० २ पु० ना०।

प्रयोगं त्रेधा विभज्य मन्द्राद्युच्चारणानां दैक्षन्यायेनोचितत्वात्तद-
तिक्रमेणानूबन्ध्यादिषु दैक्षन्यायातिदेशो न युक्त इत्याशङ्क्याह * सु-
८२५।१० त्याकालेति * मन्द्रं प्रातः सवने चरन्तीत्यादिवाक्यस्थानां सवना-
र्थानां सोमयागावयववाचित्वेन सवनीयादिवाचित्वाभावाद्यथा दी-
क्षणीयाद्युद्देशेन विहिताः स्वरास्तदङ्गेषु न भवति यथा वा दीक्ष-
णीयादिषु सुत्याकालबहिर्भूतेषु ज्योतिष्टोमाङ्गेषु सवनसम्बन्धेन
विहिताः स्वरा न भवन्तीत्याशङ्कते * ननु सवनशब्दानामिति *
सप्तम्या सवनानामाधारत्वप्रतीतेः कर्ममध्ये ऽनुष्ठानादेव च कर्मणा-
माधारत्वप्रसिद्धे कर्मकाले चानुष्ठानं विनानुष्ठानस्य कर्ममध्यत्वा-
सिद्धेः सवनकाले तत्प्रयुज्यते तत्र सर्वत्र मन्द्रादिविध्यवगमात्
सवनीयादिष्वपि यथासवनमेव स्वरा भवन्तीति परिहरति *
नेति * एतदेव व्यतिरेकतो ऽन्वयतश्च यथाक्रमं श्लोकद्वयेन वि-
वृणोति * यदिति * यत्प्रातःसवनस्याङ्गं चरन्ति तन्मन्द्रमित्य
ङ्गव्यतिरेकजनितषष्ठ्याश्रयणात्सवनाङ्गमन्त्रप्रतीतिरभिमता । सव-
नानामाधारत्वमात्रविवक्षायां स्तोत्रशस्त्रयाज्यानुवाक्यादिरूपाणां स-
वनाङ्गमन्त्राणां सवनाख्यसोमयागावयवभूतावान्तरसमुदायावयव-
त्वेन सवनेभ्यो ऽत्यन्तभेदाभावादाधेयत्वानुपपत्तेर्वपया प्रातः सवने
चरन्तीत्यादिवच्च सवनं प्रत्याधेयत्वेनाश्रुतत्वाच्च यथा सवन मन्द्रा-
दिस्वरः स्यादित्याशङ्कते * कचिदिति * व्यतिरेकतो ऽन्वयतश्च
यथाक्रमं श्लोकं व्याचष्टे * आधार इति * षष्ठीप्रयोजनस्य मन्द्रा-
दिस्वरलाभस्य षष्ठ्यभावे ऽपि सवनाधारत्वाविशेषेण स्तोत्रादिष्व-
व्यवगतत्वेन सम्भवात् स्तोत्रादौ मन्द्रादिस्वराभावापत्तिरूपो दोषो
नास्तीति परिहरति * इतीति * अङ्गानङ्गविषया इत्युक्ते परिहारो
ऽभिधीयतइत्यध्याहारेण योज्यम् । अत्यन्तभेदाभावे ऽपि आधेयत्वं
८२६।२ दृष्टान्तेनोपपादयन् श्लोकं व्याचष्टे * यथा हीति * अङ्गानङ्गविषया
द्व्योक्तिः । याज्यानुवाक्यादिसंनिपत्योपकारिमन्त्रव्यतिरिक्तस्य त्वा-
राद्दुपकारिणः स्तोत्रादेः कृत्स्नस्य मन्त्रजातस्य निःफलसवनाङ्ग-
त्वायोगेन ज्योतिष्टोमाङ्गत्वावसायात्सवनीयाद्यङ्गान्तरवस्तोत्राद्यपि
प्रत्याधारत्वमात्रं सवनानां न तु प्रधानतेति सवनीयादितुल्यता वक्तुं
शक्येत्याह * यदि वेति * सुत्योक्त्यात्र ज्योतिष्टोमो विवक्षितः ।
सवनान्तरगते सवनीयादौ स्तोत्रादौ च यथासवनस्वरमुपपादितम-
पूर्वे स्तोत्रादौ स्वरान्तरप्राप्तिक्रमोक्तिपूर्वमुपसंहरति * नानेति
सवनीयादिव्यावृत्तिशङ्कानिरासाय समस्तोक्तिः । सुत्यकालीना-
न्यङ्गानीति मध्यमपदलोपीसमासः । सर्वेष्वेकाहाहीनसत्रेषु

ज्यौतिष्टोमिकस्वरन्यायमतिदिशति * एतेनेति * अर्थश्च वाचनिकस्वरलाभव्युत्पादनेनातिप्रापत्तौ परिहृतायामुच्चैर्वेत्यादिविहितस्य नानावेदस्वरस्य निर्विषयत्वं शङ्कते * क्व पुनरिति * को विषय इत्यर्थः । श्येनादावौद्गात्रादिसमाख्याप्राप्तस्य कर्त्तुः प्राकृताङ्गव्यतिरिक्तापूर्वाङ्गविषयत्ववत् नानावेदस्वरस्यापूर्वमङ्गं विषयो भविष्यतीति परिहरति * उच्यतइति * एतदेव विवृणोति * यदिति * येषां प्राकृतानामङ्गानां प्राकृतस्वरस्तद्वत्यां विकृतौ चोदकेन प्रयोगवचनबाधात् प्रयोगवचनं च विनाङ्गं प्रधानधर्माप्राप्तेरपूर्वे ऽङ्गस्ववेदस्वरोपपत्तिसूचनार्थम् * प्राकृतेत्युक्तम् । प्रयोगवचनस्याबाधाभ्युपगमे ऽपि वेदान्तरीयतोक्ता । सविषयइति पूरणीयं प्राकृतेष्वङ्गेषु चोदकप्राप्तेन स्वरेण प्रयोगवचनप्राप्तस्वरबाधे ऽप्यपूर्वे ऽङ्गे चोदकाप्रवृत्तेः प्रयोगवचनप्राप्तस्वरबाधायोगात् वेदान्तरीयैश्चाङ्गवाक्यैः प्रत्यक्षैकवाक्यत्वाभावे ऽप्यङ्गाङ्गिनामन्योन्यापेक्षाकल्पितैकवाक्यत्ववशाद्वेदान्तरीये ऽप्यङ्गे वेदान्तरीयप्रधानप्रधानप्रयोगविधिप्रवृत्त्युपपत्तेः गुणमुख्यव्यतिक्रमन्यायेन वेदान्तरीये ऽप्यप्रधानप्रयोगविधेर्वेदान्तरीयाङ्गैकवाक्यत्वायोगाद्वेदान्तरीये अङ्गे प्रवृत्त्यनुपपत्तेः वेदान्तरीये ऽङ्गे प्रधानवेदस्वराप्राप्तिसूचनार्थं वेदान्तरीयेऽपूर्वेऽङ्गे प्रधानद्वारस्य स्वराख्यस्य धर्मस्य भावाच्च सविषय इत्येवमपि पक्षं दूषयति * नन्विति * समानवेदस्थं तर्ह्यङ्गप्रधानस्वराविरोधिस्वरत्वेनाबाध्यस्वकीयस्वरत्वान्नानास्वरविधिर्विषयो ऽस्त्विति पक्षान्तरं शङ्कते * एव तर्हीति * कन्दर्पावतादनादेः प्रधानवेदविहितस्याव्यक्तः शेष इत्यनेन विषयत्वकल्पनादत्रापि समानवेदविहितस्यैव विषयता युक्तेति सूचनार्थम् * शेषेष्वित्युक्तम् * अङ्गे नानावेदस्वरस्य प्रधानस्वराविरोधित्वं वदता प्रधाने ऽवश्यं नानावेदस्वरविधिरभ्युपगन्तव्य इत्यापाद्य गुणमुख्यव्यतिक्रमन्यायात्प्रधानद्वारैवापूर्वे ऽङ्गे तद्वेदस्वरलाभोपपत्तेरङ्गविषयस्वरविधेर्नैष्फल्यप्रसङ्गात् सो ऽपि विषयो न भवतीत्येवमेतमपि पक्षं दूषयति * सो ऽपीति * प्रधानमेव तर्हि यथाप्रकृतमप्राप्तशेषाङ्गकं स्वसमानवेदस्थापूर्वाङ्गान्तरकं विषयो ऽस्त्विति पक्षान्तरं शङ्कते * तदेव तर्हीति * दार्शपौर्णमासिकेन मन्द्रयाज्याभागान्तमित्यादिना ज्यौतिष्टोमिकेन वा मन्द्रं प्रातः सवनइत्यादिना स्वरेण तस्य प्रधानस्यावरुद्धत्वात्सो ऽपि विषयो न भवतीत्येवमेतमपि पक्षं दूषयति * नेति * प्रधानस्यात्मीयवेदस्वराभावे प्राकृतस्य स्वरस्य प्राकृताङ्गमात्रान्वयित्वेनापूर्वाङ्गान्वयानुपपत्तेः प्र-

धानद्वाराङ्गे स्वरलाभायोगात् अङ्गमेव तर्हि विषयो भविष्यतीत्यपूर्वाङ्गविषयबाधैव पुनः प्रत्यवतिष्ठते * न तर्हीति * प्रधानद्वारापूर्वाङ्गस्य नानावेदस्वरप्राप्त्यभावे ऽपि य प्रधानस्य प्राकृतस्य प्राकृतस्वराख्यो धर्मः तस्यैव देशादिवत्प्रयोगाङ्गत्वेन प्रकृतिवद्विकृतावपि प्रयोगवचनाश्रयत्वावगतेरपूर्वे ऽप्यङ्गे ऽभावान्नाङ्गं नानावेदस्वरविधिविषय इत्येवं परिहरति * नैवमपीति * प्रकृतस्य स्वरस्य च यज्ञभागधर्मतया देशवद्धमुपांशुत्वमिति नवमाधिकरणन्यायेन स्थितत्वाद्यज्ञभागपतितस्यापूर्वस्याप्यङ्गस्य प्राकृतस्वराख्यधर्मलाभोपपत्तेर्नापूर्वमङ्ग नानावेदस्वरविधिविषय इत्याह * अपि वेति * ननु त्सरा वा एष यज्ञस्य तस्माद्यत्किञ्चित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्तीत्युदाहृत्य उपांशुताग्नीषोमीयप्राग्भावित्वपदार्थधर्मो यज्ञभागधर्मो वेति सन्दिग्धे यज्ञशब्दस्य प्रयोजनवत्तरत्वादर्थवादस्थत्सराशब्दत्यागेन विध्युद्देशस्थप्राचीनशब्दान्वयप्रतीतेर्यज्ञभागधर्मत्व पूर्वपक्षयित्वा तस्मादित्यादिपदव्यवधानेन यज्ञस्य प्राचीनमित्यन्वयायोगात् प्राचीनस्य चोद्देश्यत्वेन विशेषणानपेक्षत्वाद्यज्ञभागस्य चैकत्वात् यत्किञ्चिदिति बहुविषयविप्सार्थप्रतीत्ययोगापत्तेर्यज्ञस्य त्सरेत्यन्वये ऽपि स्तुत्यर्थत्वेनार्थवत्त्वोपपत्तेः पदार्थधर्मत्वस्य तस्मिन्नधिकरणे सिद्धान्तयिष्यमाणत्वात् कथ तेन न्यायेन मन्द्रादिस्वरस्य यज्ञभागधर्मता स्थितेत्याशङ्कानिरासार्थम् * वेधेत्युक्तम् * यत्किञ्चित्प्राचीनमित्यत्र यज्ञशब्दानन्वयाद्यज्ञभागधर्मत्वे निराकरिष्यमाणे ऽपि प्रातः सवनादिशब्दानां यज्ञभागवाचित्वादाज्यभागान्तादिशब्दानामप्येकवचनान्तत्वेनाञ्जसा यज्ञभागवाचित्वावगतेः नवमाधिकरणपूर्वपक्षन्यायेन मन्द्रादेर्यज्ञभागधर्मतावसीयत इत्याशयः । यूपावटस्तरणबर्हिषः प्राकृतलवनादिधर्मानन्वयवत् अपूर्वस्याङ्गस्य प्राकृतस्वरानन्वयशङ्कानिरासाय पूर्वस्याप्यङ्गस्य प्राकृतयज्ञभागाख्यकार्यारम्भकत्वेनाप्राकृतकार्यबर्हिषस्तुल्यत्वं निरस्तम् । नानावेदस्वरस्य निर्विषयत्वशङ्कामुपसंहरति * तस्मादपीति * ज्योतिष्टोमे च नानावेदस्वरानिवेशे सति वाक्यबलीयस्त्वादन्यत्र निवेशे ऽपि स्यात्तन्नं ज्योतिष्टोमप्रकरणाम्नानानर्थक्यापत्तिर्ज्योतिष्टोमनिवेशाभावत्वे ऽस्यान्तानर्थक्यं स्यादित्याह * प्रकरणेति * शङ्काद्वयस्यापि परिहारं प्रतिजानीते * अत्रेति * सर्वेषां दर्विहोमानामपूर्वत्वेन प्राकृतधर्माग्राहित्वात्प्रायशब्दश्च याजुर्वैदिकत्वादङ्गभूतेषु प्रधानद्वारस्वरप्राप्तावपि स्वतन्त्रेषु दर्विहोमेषु उपांशु यजुषेति विधानमर्थवदित्याह *
८२७।१ उपांश्विति * एवं निर्विषयत्वशङ्कापरिहारे ऽपि ज्योतिष्टोमे निवे-

शाभावात् प्रकरणाम्नानानर्थक्याशङ्काऽपरिहृता स्यादित्याशङ्क्य ऋक्सामवेदस्वरविधानयोर्नैमित्तिकं ज्योतिष्टोमाङ्गं काम्यं चानङ्गमपि ज्योतिष्टोमाङ्गाश्रितत्वादन्तः क्रतुप्रयोज्यं सार्थकत्वात् ज्योतिष्टोमप्रकरणाम्नानार्थवत्त्वोपपत्तेस्तत्साहचर्यादस्यापि प्रकरणाम्नानमर्थवद्भविष्यतीतिसूचनार्थस्तावच्छब्द । इतरयोरपि स्वरयोः काम्यनैमित्तिकेषु ज्योतिष्टोमाङ्गेषु निवेशेन सविषयता अन्तर्ज्योतिष्टोमप्रयोगाच्च प्रकरणाम्नानार्थवत्त्वेत्याह * ऋक्सामेति * वेदनिमित्तस्वरलक्षणार्था वेदोक्तिः क्रत्वाश्रितत्वलक्षणाङ्गोक्तिः । तत्र विशेषविहितमन्द्रादिस्वरसद्भावात् नार्थवत्त्वेत्याशङ्कानिरासपूर्वमेतदेव विवृणोति * मन्द्रमिति * सामवेदविहितं प्रवर्ग्याङ्गमहावीरभेदनिमित्तकमङ्गमुदाहरति * तथेति * एकपदार्थात्मकत्वेनाभिमर्शनस्याग्नीषोमीयवत्त्रेधा विभागायोगात्सुत्याकालत्वाभावेन च सवनीयादिवद्यथासवनमेकस्वरत्वायोगात्प्रधानद्वारस्वराप्राप्तेरात्मीयवेदस्वराबाधादुदाहरणत्वाविरोधेऽप्यमन्त्रकत्वे स्वरविषयत्वायोगापत्तेर्मन्त्रप्रतीकग्रहणनैमित्तिकवर्णर्ग्वैदिकस्य काम्यस्य चोभयविधस्योदाहरणस्य सूचनायादिशब्दः । यजुर्वेदविहितत्वनिमित्तमुपांशुत्वमप्येवं विधयजुर्वेदविहितैकपदार्थात्मककाम्यनैमित्तिकाङ्गविषयमुदाहार्यमित्याह * एवमिति * सुत्योत्तरकालेषु वानुबन्ध्यादिषु ज्योतिष्टोमाङ्गेषु मध्ये ऽवभृथाङ्गभूतानां साम्नामादिशब्दोक्तानां चानुबन्ध्यादिसाम्नां परिसामाख्यानां परितः सामानातिव्युत्पत्त्या ऽवभृथादिप्रयोगाद् बाह्यत्वावगतेरवभृथादिप्रयोगविधिविधेयत्वाभावेनावभृथादिद्वारस्वरप्राप्त्यभावात्साक्षाज्ज्योतिष्टोमाङ्गत्वाभावेन चाग्नीषोमीयादिवत्सवनविभागस्वरेण विषयतया ग्रहणाभावाद् बाधकाभावेन स्वरूपतः प्राप्तो यथावदमेव स्वरो युक्त इति कृत्वा नानावेदस्वरोपदेशादुच्चैस्त्वासिद्धेः नानावेदस्वरोपदेशस्य निर्विषयत्वं प्रकरणाम्नानानर्थक्यं वा नास्तीत्याशयेनोदाहरणान्तरमाह * तथेति * सवनविभागविहितमन्द्रादिस्वरलक्षणार्था सवनोक्तिः । सुत्योत्तरकालत्वात्प्राचीनभागविहितोपांशुत्वप्राप्त्यभावे सवनविहितेन च स्वरेण विषयतया ग्रहणाभावान्मन्द्रादिस्वराभावे पारिशेष्यादुच्चैस्त्वसिद्धेः वेदस्वरविध्यानर्थक्यमाशङ्क्याह * अन्यथा हीति * परिसामसु प्रयोगसमवायिस्वराभावे दीक्षणीयाद्यङ्गप्रयोगसमवाय्युपांशुत्व न स्यादित्याशङ्क्याह * दीक्षणीयादीति * दीक्षणीयादिपरिसाम्नां दीक्षणीयादिप्रयोगानन्तर्गतत्वे ऽप्यग्नीषोमीयप्राचीनत्वाविशेषादुपांशुत्वेत्याशयः । प्रवर्ग्यसाम्नामपि त-

ग्नीषोमीयप्राचीनत्वात्प्रवर्ग्यप्रयोगबहिर्भावाच्च प्रवर्ग्यस्वरोच्चैस्त्वाप्राप्तेः उपांशुत्व स्यादित्याशङ्क्याह * प्रवर्ग्येति * करणविभक्त्या साङ्गस्याच्चैस्त्वविधानात् प्रवर्ग्यप्रयोगबहिर्भावे ऽपि च पशुप्रयोगबहिर्भूतस्य दीक्षाकालस्य यूपच्छेदनस्य पश्वङ्गत्वाविरोधवत् प्रवर्ग्यसाम्नां प्रवर्ग्याङ्गत्वाविरोधादुच्चैस्त्वमित्याशयः। प्रासङ्गिकं परिसमाप्य साङ्गप्रधानसंयोगादुपांशुत्वं तु गम्यतइत्येनेन प्रकृतमेवं तर्हि स्वयमेवाङ्गानां याजुर्वैदिकत्वादुपांशुत्व न गुणप्रधानधर्मविरोधद्वारमिति शङ्कानिरासमुपसंहरति * प्रधानेति * शङ्कानिरासोपसंहारवत्सूचनार्थस्तुशब्द. परमतेन वर्णितमधिकरणं आधानसाम्नां यजुर्वेदविहितत्वेन वेदान्तरीयत्वाभावादुदाहरणत्वायोगेन तावद् दूषयति * य इति * सामवेदेनैतत्क्रियते यद्वारवन्तीयादीभिरिति भाष्ये वारवन्तीयादिसामरूपं यद्गानं पठ्यते तत्सामवेद इति करोतेः पाठार्थत्वाद्वारवन्तीयादिभिरिति तृतीयायाश्चेत्थम्भूतलक्षणार्थत्वात्स्वरूपपाठमात्रं सामवैदिकमपेक्ष्योपचारात्सामवेदेन क्रियतइत्युपन्यासो न तु लिङादिव्यापारात्मिकायां विधानक्रियायां कारकहेतुं सामवेदमभिप्रत्येति स्वमतेनोदाहरण समर्थयितुमाह * नत्वेति * पाठस्य शब्दाभिव्यञ्जकत्वेनोत्पादकत्वोपचारोपपत्तेरुत्पादनवाचिकरोत्यर्थत्वसम्भवसूचनायोत्पत्त्युक्त्या ऽस्मिन् व्याख्याने पाठो विवक्षितः। एवं पूर्वपक्षभाष्यव्याख्ययोदाहरणसमर्थने सति पाठवेदधर्मो बलीयान् विधिवेदधर्मो वेति चिन्तापत्तेः गुणे स्वरूपतः प्राप्तमुख्यद्वारप्राप्तयोर्विरोधे चिन्ताभावात्सौत्रौ गुणमुख्यशब्दौ नोपपद्येयातामिति कृत्वा कस्यां चित्सामवेदशाखायामप्याधानसाम्नां विधिकल्पनेनोदाहरणं समर्थनीयमिति परमतेनाह*तर्हीति*उपपत्त्युक्त्यात्र शब्दाभिव्यञ्जकत्वेन पाठस्योत्पादकत्वोपचारात् पाठो विवक्षितः। विनियोगोक्त्या च विशिष्टो ऽसाधारणो नियोग इतिव्युत्पत्त्या सर्वाङ्गप्रधानसाधारणप्रयोगविधिव्यावृत्त्यर्थमुत्पत्तिविधिप्राप्तात्मिकानकपदार्थविषयत्वेनासाधारणत्वाद्विवक्षितः। सामवेदशाखायामाधानविधौ सत्यध्येतृभेदाभावाद्यजुर्वेदे पुनः श्रुत्यानर्थक्यापत्ते शाखान्तरीयविधिवद्वेदान्तरीयाणामप्येकार्थानां विधीनां विकल्पेन विधायकत्वाभ्युपगमे विकल्पेन पूर्वपक्षकरणापत्तेरनुदाहृतसामवैदिकविधिकल्पनायोगाच्चैतत्समर्थनानुपपत्तेरुत्पत्तिर्विनियोगबलाबलस्यैव चिन्तनीयत्वादपठितानां मन्त्राणामज्ञातस्वरूपत्वाद्विनियोगाशक्तेः पाठस्य विनियोगं प्रत्युपकारित्वात् पाठाख्यामुत्पत्तिं गुणशब्देन मुख्यशब्देन च पाठं प्रत्युपका-

यत्वलक्षणात्प्राधान्यात्प्राथम्याद्वोत्पत्तिविधि विवक्षित्वाधिकरणं वक्ष्यमाणाप्रकारेणारम्भणीयमिति परमतनिरासपूर्वं स्वमतेनाधिकरणवर्णनं प्रतिजानीते *तदा त्विति * कीदृगारभ्यतइत्यपेक्षायां विषयसन्देहपूर्वपक्षसिद्धान्तान् सहेतुकान्सङ्क्षेपेणाह * यस्त्विति * भाष्यमपि पाठवेदस्वरानुरोधेन वेदस्वरानुरोधेन वा पाठवेदस्वरमिति जिज्ञासाया पाठवेदस्वरा बाधयितुं युक्तो विधिवेदस्वराश्चानुग्रहीतुं युक्त इत्येतावद् गुणोक्त्या पाठवेदस्वरो मुख्योक्त्या च विधिवेदस्वरा विवक्षित इत्येव व्याख्याय शेषं विधानार्थत्वात्पाठस्य विधीयमानस्यैव च मन्त्रस्य स्वरापेक्षत्वाद्विधानकालावगतस्यैव स्वरस्य यादृक्सामवेदाभ्यां विधीयते तदुच्चैः प्रयोज्यं यजुर्वेदेन यद्विधीयते तदुपांश्वित्येव चोदनार्थत्वावगतेः यदृक्सामवेदयोः पठ्यते तदुच्चैः यजुर्वेदे पठ्यते तदुपांश्वित्येवं विधानाभावात् पाठकरणेन विधिविषयाख्यगुणयुक्तः सम्पद्यतामित्येतदर्थमध्येता पाठे प्रवर्त्तते तत्र चेत्स्वरचोदनार्थाज्ञानात्पाठवेदस्वरप्रवृत्त्या विधिवेदस्वरहानिर्भवति ततश्चोदिताकरणात्फलमेव नावाप्तं भवति विधिवेदस्वरानुष्ठानात्तु पाठवेदस्वरहानौ तस्याचोदितत्वान्न स्वार्थहानिः गुणश्च सामगानं पाठात्मकं प्रधानमाधानम् आधानाङ्गत्वेन विधीयमानं तस्य च याजुर्वेदिकत्वादुपांशुता गुणः स सामवेदाख्यपाठवेदधर्ममुच्चैस्त्वं बाधतेत्येवं व्याख्येयम् । भाष्यानुसाराद्व्यतिक्रमशब्दं बाधवाचिनं सन्देहोक्त्यर्थत्वाद्वा विरोधवाचिनमभिप्रेत्य नियममात्रेण च पूर्वपक्षं कृत्वा स्वयं व्यभिचारवाची व्यतिक्रमशब्दो नियमाविकल्पाभ्यां च पूर्वपक्ष इत्येतावतान्यथाधिकरणं वर्णयति * अथ वेति * सामान्यतो वेदान्तरीयाङ्गमात्रविषयत्वादस्याधिकरणस्य कृत्वा चिन्तया ऽऽधानसामोदाहरणमित्याशयेनोक्तमेव परमतेनाधिकरणार्थं स्वरूपतो दूषयितुं स्मारयति * अथ वैवमिति * स्वरूपताङ्गविधायिना वेदेनाङ्गस्य स्वरविधावुपलक्षण बलवत्प्रधानद्वाराङ्गविधायिना वेति चिन्तायां गुणे स्वरूपतो धर्म इत्यनेनैव न्यायेन प्रधानद्वाराङ्गविधायिनेति निर्णयात्प्रात्यात्मिकवेदधर्मबाधेन प्रधानवेदधर्मः कार्य इत्यधिकरणार्थो व्यपदेशद्वारोक्तः । प्रधानद्वाराङ्गे प्राप्तेन धर्मेण स्वरूपतः प्राप्तस्य धर्मस्य बाधपक्षे प्रकृतौ ज्योतिष्टोमे वेदान्तरीयेषु स्तोत्रशस्त्रादिष्वङ्गेषु तद्ग्रहणाद्वेति तच्छब्दपरामृष्टप्रात्यात्मिकवेदसमाख्याप्राप्तकर्त्तारं विकृतौ तत्सूत्रव्युत्पादितबलीयस्त्वप्रात्यात्मिकचोदकप्राप्तकर्त्तारं बाधित्वा प्रधानवेदसमाख्यानकर्तृप्राप्तेः श्वेतसिद्धान्तबाधप्रसङ्गात् नैव चिन्ता युक्तेत्याह

* एतस्मिंस्त्विति * यथा चोदकप्रापिताङ्गग्राहित्वात्प्रयोगवचनश्चोदकात् दुर्बलस्तथा प्रात्यात्मिकोपदेशरूपविधिप्रापिताङ्गग्राहित्वात्ततो ऽपि दुर्बल इति सूचनार्थं चोदकबलीयस्त्वव्युत्पादनार्थः सूत्रोपन्यासः । प्रात्यात्मिकाङ्गविधेरतिदेशस्य च प्रापकत्वेन बलीयस्त्वात्प्रकृतौ विकृतौ चाङ्गवेदसमाख्यानकर्तृग्रहणे ऽनुस्वरस्याप्यङ्गवेदसमाख्यातस्यैव ग्राह्यत्वापत्तेः प्रधानस्वरग्रहणं न युक्तमित्याह * अर्थेति * करोतेः प्रयोगवाचित्वाद्यजुर्वेदेन यत्प्रयुज्यते तदुपांश्विति प्रयोगविधिविहितस्योपांशुधर्मकत्वप्रतीतेर्याजुर्वैदिकप्रयोगविधिविहितत्वेनोपांशुत्वेनाध्यानसाम्नां युक्तेति यत्प्रयोगवचनपरिगृहीतत्वादन्यत्राप्युत्पन्नानामङ्गानां यत्रैव प्रधानं तत्रैव विधिरिति वार्त्तिकेनोक्तं तन्निरासस्सूचनायैवकारः । प्रधानप्रयोगविधिविधेयत्वे ऽङ्गानामेकादशं वक्ष्यमाणा ऽपि दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादेः केवलस्याङ्गवाचिशब्दरहितत्वेन साङ्गप्रधानप्रयोगविधानाशक्तेः करणविभक्तिनिर्देशात्साङ्गत्वावगमे ऽप्यङ्गविशेषानवगतेः साङ्गत्वस्य वैकाङ्गसाहित्यमात्रेणाप्युपपत्तेः सर्वाङ्गोपसंहारानादरप्रसङ्गात् श्रुत्यादिस्मृत्याचारपर्यन्ताङ्गप्रापकसर्वप्रमाणसहितस्यैव दर्शपूर्णमासादिवाक्यस्य साङ्गप्रधानप्रयोगविधायित्वाद्धोपस्य च पदान्तरस्य पारार्थ्यादाख्यानं यो ऽपि मन्यते । वाक्यं प्राधान्ययोगेन वाक्यार्थे चापि भावनामित्याख्यानस्य वाक्यताद्धोषवत् प्राधान्यमात्रेणोपपत्तेस्तादृशस्य चानाम्नातत्वेनोहादिमन्त्रत्ववद्वेदत्वाभावाद्यजुर्वेदेन यत्प्रयुज्यते तदुपांश्विति वाक्यार्थानुपपत्तेर्यजुर्वेदेन यद्विधीयते तदुपांश्वित्येष एव वाक्यार्थो युक्त इत्याशयः । करोतेश्च विधिवाचिनस्तद्विशेषप्रयोगविधिपरत्वे सत्युत्पत्तिविधिपरत्वायोगेनाङ्गे स्वरूपतो धर्मप्राप्तेस्तस्य प्रधानद्वारप्राप्तेन धर्मेण सह बलाबलचिन्ता न युज्येत उत्पत्तिविधिवाची करोतिः प्रयोगविधिवाची वेति चिन्तायां तु गुणे स्वरूपतो धर्म इत्यादिग्रन्थानुपपत्तिः तस्मात्पाठार्थः करोतिर्विधानार्थो वेति सन्दिह्योत्पादनार्थत्वात्करोतेः पाठस्य च शब्दाभिव्यञ्जकत्वेनोत्पादनत्वोपचारोपपत्तेर्विधाने ऽत्यन्ताप्रसिद्धवाचकशक्तिकल्पनायोगात्पाठार्थः करोतिरिति पूर्वपक्षयित्वा पाठे वेदस्य करणत्वायोगाद्दचेत्यादितृतीयाभङ्गापत्तेः करोतेस्तु लक्षणया क्रियाप्रवृत्तिहेतुभूतविशेषापेक्षायां प्रयोगविधेः कल्पत्वेनैवद्विशेषव्यपदेशायोगस्योपपादितत्वात्कार्ये ज्ञाते ऽधिकारः स्यादिति चाधिकारज्ञानस्य प्रयोगविध्यधीनकार्यज्ञानपूर्वकत्वाभिधानेनाधिकारविधेः प्रयोगविधिपूर्वकत्वावसायात्सुतरां वेदविशेषव्यपदेशा-

योगावगतेरुत्पत्तिविनियोगविध्योरन्यतरो विधिविशेषो विवक्षित इति अवगतेरुत्पत्तिविधौ करोतिसामञ्जस्यात् तस्यैव च प्राथम्यादुत्पत्तिविधानार्थः करोतिरिति सिद्धान्तयितव्यमिति सूचयन् किं करोतिः पाठार्थत्वात्पाठवेदधर्मकार्यौ विधानार्थत्वाद्वा विधिवेदधर्मं इत्यपैव व्याख्या शोभनेत्याह * अत इति * पाठाख्यामुत्पत्तिं करोतिवाच्यां पूर्वपक्षे अभिप्रेत्य सिद्धान्ते विधानं करोतिवाच्यमभिप्रेत्य किमुत्पत्तिवेदधर्मं कार्यौ विधिवेदधर्मौ वेत्येष विचार इत्यर्थः।वाक्यलिङ्गानपेक्षता ऽऽद्येनैवकारेण व्यावर्त्तिता। एवं च सामवेदपठितत्वादाधानसाम्नां युक्तोदाहरणतेत्याह * तथा चेति * गुणानुष्ठानेन मुख्यः सगुणः कथं स्यादित्यादिभाष्यानुसारादङ्गप्रधानधर्मविरोधार्थेतथा गुणमुख्यव्यतिक्रमशब्दः कस्मान्न व्याख्यात इत्याशङ्क्याह * यदि त्विति * अपौनरुक्त्यसम्भवः सम्प्रधारणीय इति सूत्रतयोक्तः।

॥ ज्योतिष्टोमस्य याजुर्वैदिकताधिकरणम् ॥ ३ ॥

भूयस्त्वेनोभयश्रुति १० ॥

ज्योतिष्टोमस्यानेकवेदविहितत्वात् स्वरविकल्पो यजुर्वेदमात्रविहितत्वाद्वोपांशुनैवेति भाष्योक्ता चिन्ता वाचनिकस्वरान्तरबाधकत्वेन ज्योतिष्टोमे नानावेदस्थस्वरस्यानवकाशादयुक्तेत्याशङ्क्याग्निहोत्रं जुहोतीति यजुर्वेदे सर्वं वा अस्य बर्हिष्यं सर्वं परिगृहीतं य एवं विद्वानग्निहोत्रं जुहोतीत्यृग्वेदे च श्रुतस्याग्निहोत्रस्य भाष्योक्तोदाहरणानादरेणोदाहरणतामनन्तराधिकरणसिद्धान्तोपजीवनेन च सिद्धान्तकरणादनन्तरसङ्गतिं सूचयितुमाह * इदानीमिति * यानि नानावेदेषु श्रूयन्ते तानि केन वेदेन व्यपदेष्टव्यानीत्युदाहरणानादरः सूचितः। उच्चैस्त्वोपांशुत्वयोः पाठवेदधर्मत्वे ऽनेकवेदपठितस्यैकस्य मन्त्रस्यानेकव्यपदेशानिराकरणाशक्तेः सिद्धान्तायोगप्रसङ्गात् विधिवेदधर्मत्वे ऽनन्तराधिकरणेनोक्ते ऽनेकवेदश्रुते केन वेदेन विहितमिति व्यपदेष्टव्यमिति चिन्ता सिद्धान्तसम्भवाद्युक्तेत्यनन्तरसङ्गतिसूचनायेदानीमित्युक्तं वाक्यीयविनियोगप्रकारचिन्ताशेषत्वात्तु लक्षणप्रकरणसङ्गती पूर्वाधिकरणवदस्यापि स्पष्टे निर्गुणपुनः श्रवणस्यैकशाखास्थस्येव वेदान्तरस्थस्याप्यध्येतृभेदाभावेन भेदकत्वात्सन्देहायोगमाशङ्क्य सन्देहोपपादनार्थं द्वितीयश्रवणस्य गुणार्थतां भाष्योक्तां स्ववाक्ये गुणानुपादानात् वाक्यान्तरस्थस्य च गुणस्य वाक्यान्तरेण विध्ययोगादयुक्तमाशङ्क्यासरूपत्वेनोत्पादकत्वायोगाद्भेद-

कत्वानुपपत्तेरनुवादकत्वाभ्युपगमे चानर्थक्यापत्तेः प्रकरणेन स्तोत्र-
शस्त्राद्यङ्गान्वयार्थो वेदान्तरीयस्तो विधिरिति सूचनार्थाविच्छिन्ने
कथम्भावे यत्प्रधानस्य पठ्यते अनिर्ज्ञातफलं कर्म तस्य प्रकरणाङ्ग-
तेति प्रकरणस्य कथम्भावात्मकत्वाभ्युपगमात् प्रधानानीत्युक्तं व्यप-
देशोक्त्या सामवेदविहितत्वधर्मः कार्य इति फलतश्चिन्तोक्ता भाष्ये
चैकावधारणाभावरूपा निश्चयोक्त्या विकल्पेन पूर्वपक्षकरणादुत क-
दाचिद्विपरीतमिति कदाचित्पदाध्याहारेण पूर्वपक्षवचनव्यक्ति-
र्व्याख्येया इतरत्रेति भाष्यं चिन्ताप्रयोजनोक्त्यर्थत्वेन व्याचष्टे * त-
त्रेति * यस्मिन्वेदे स्वरूपेण विधीयन्ते तत्र व्यपदेष्टव्यत्वात् तद्वेद-
धर्मो भविष्यतीत्यर्थः । शाखान्तरवन्नित्यं सर्वेषु वेदेषूत्पत्तिप्रती-
८२९।१ तेर्धर्मविकल्पाशयत्वेन तावत्पूर्वपक्षभाष्यं परमतेन व्याचष्टे * कि-
मिति * शाखान्तरवदध्येतृभेदाभावात् नित्यं सर्वेषु वेदेषु उत्प-
त्त्यानर्थक्यापत्तेर्विशेषाभावे चान्यतरत्रोत्पत्त्यनिर्णयात् स्वमतेनोत्प-
त्तिविकल्पार्थत्वेन व्याचष्टे * अथ वेति * पूर्वपक्षनिरासार्थत्वमेवं
ग्रामवदिति भाष्यं व्याचष्टे * एवमिति * यथा शाखान्तरे सर्वत्र
नित्यकर्मोत्पत्तेर्विरुद्धैकादशद्वादशकपालत्वादिधर्मविकल्पस्तथा वे-
दान्तरेऽध्येतृभेदाभावो सर्वत्र नित्यकर्मोत्पत्त्ययोगात् स्वराख्यधर्म-
विकल्पो न युक्त इत्याद्यपूर्वपक्षनिरासे वैधर्म्यदृष्टान्तः नित्यवदा-
म्नानाच्छाखान्तरवत् वेदान्तरेऽप्युत्पत्तिविधिविकल्पेन युक्त इति
द्वितीयपूर्वपक्षनिरासे वैधर्म्यदृष्टान्तः । अतोऽनेकवेदस्थविधायकम-
ध्ये नित्यमवैकः कश्चित् कर्मणा विधायकोऽन्यस्तु प्रकरणेन गुणा-
न्वयसिद्ध्यर्थमित्युत्तरार्द्धार्थः सूत्रव्याख्यार्थं भूयस्त्वेनेत्यादिभाष्यं
विशेषनिर्द्धारणहेतूक्त्यर्थत्वेनावधारणपूर्वं परमतेन तावद्व्याचष्टे *
सन्त्विति * एकैकस्याङ्गस्य करणनिराकाङ्क्षीकारणाशक्तेरङ्गभूय-
स्त्वेनेतिकर्त्तव्यतेत्याशयः । एकैकस्याङ्गस्येतिकर्त्तव्यतात्वाभ्युपगमे
ये च भूयांसो गुणाः सा बह्वीति कर्त्तव्यता तस्माद् बह्वीति कर्त्तव्य-
तासान्निध्याख्यकर्मानुग्रहार्थं कर्त्तव्यता चोदनालिङ्गावगतेर्बह्वीति-
कर्त्तव्यतया लिङ्गभूतया कर्त्तव्यताचोदनानुमानं युक्तमित्येवं परम-
तेनैवान्यथा व्याचष्टे * यजुर्वेद इति * यजुर्वेदे ज्योतिष्टोमोत्प-
त्तावपि करोतिवाच्यस्यानुष्ठानस्य वेदत्रयाधीनत्वादेकवेदकार्यत्व-
व्यपदेशानुपपत्तेरेकवेदाधीनानुष्ठानस्यैव दर्विहोमादेर्नानावेदस्वर-
विषयत्वाम्नानागमात् ज्योतिष्टोमादौ स्वरचिन्ता न युक्तेत्याशङ्क्य वि-
हितानुष्ठानाशक्तेर्यजुर्वेदेन यस्मात् ज्योतिष्टोमो विधीयते तस्मा-

(१) प्रधानेत्यधिक २ पु० ।

स्तेन क्रियतइत्युच्यतइति करोतेरनुष्ठानहेतुविधिलक्षणार्थत्वात् ज्योतिष्टोमादेरेकवेदकार्यत्वव्यपदेशोपपत्त्युक्त्यर्थं यजुर्वेदेन हीति भाष्यमनुष्ठेयत्वप्रमापकत्वाद्विधेरनुष्ठानहेतुहेतुत्वमुपपादयन् व्याचष्टे * अतश्चेति *यजुर्वेदेन ज्योतिष्टोमस्य कर्त्तव्यत्वप्रमा क्रियत इति कृत्वा-यजुर्वेदेन विधीयमानो ज्योतिष्टोमस्तेन क्रियतइति करोत्यर्थो भवतीत्यन्वयः। यस्माद्यजुर्वेदेन विधीयते अविहितानुष्ठानाशक्तेश्चानुष्ठेयताज्ञापनरूपस्य विधानाख्यस्य लिङादिव्यापारस्य वेदेन पुंसि प्रवर्त्तमाने द्वारतावसीयते तस्मात्तेन क्रियतइत्युच्यतइति मुख्यार्थतयैव करोतिव्याख्यार्थमेतद्भाष्यमित्येवमन्यथा व्याचष्टे * अथ वेति * कर्त्तव्यत्वकरणाख्येनैव व्यापारेणानुष्ठानमपि यद्वेदाद्भवति तद्वेदेन क्रियतइत्येवं व्यपदिश्यतइत्यर्थः। परमतेन भूयस्त्वव्याख्यां दूषयितुमुपशङ्कते * नन्विति * एकैकस्याङ्गस्येति कर्त्तव्यताभूयस्त्वं लिङ्गमित्येतावद्व्याख्यां प्रश्नपूर्वं दूषयति * कुत इति * दृष्टान्तेनैतदेवोपपादयति * यादृशस्य हीति * दार्ष्टान्तिके योजयति * तथेति * व्याप्तिमात्रापेक्षत्वेन भूयस्त्वानपेक्षत्वाज्ज्ञाय भूयसी स्यात् स्वधर्मत्वामित्यस्य विषय इत्याशयः। गुणभूयस्त्वैवेति कर्त्तव्यतेत्यां व्याख्यां दूषयति * नैव हीति * प्रत्येकं करणोपकारिणामेवाङ्गानामुपादेयत्वात् संहतानां प्रयोगो न तु संहतानामुपकारित्वमित्याशयः। एकैकस्याङ्गस्येति कर्त्तव्यतात्वे ऽपि वेदान्तरस्थप्रधानानुवादस्यानुसन्धानक्लेशापादकत्वात् बह्वङ्गविधौ च क्लेशबहुत्वापत्तेर्वेदान्तरस्थप्रधानानुवादे स्वल्पाया एव विधेयत्वस्योचितत्वात् भूयस्त्वायाः प्रधानविधिलिङ्गतेत्याशङ्कते * तत्रेति * एकाङ्गविधेये गुणार्थेन प्रधानविधिना अनुसन्धीयमानस्य बुद्धिविच्छेदकाभावेनाङ्गान्तरविधेये पुनरनुसन्धानानपेक्षत्वात् बह्वङ्गविधाने ऽपि क्लेशाधिक्यं नास्तीत्याशयेन परिहरति * उच्यतइति * वेदान्तरस्थस्य प्रधानस्य वेदान्तरीयाङ्गापेक्षायां वेदान्तरीयाङ्गान्वयसिद्ध्यर्थं वेदान्तरीयप्रधानविध्यधीनत्वाभ्युपगमात् स्वतो वेदान्तरीयाङ्गानपेक्षत्वावगतेरनपेक्षितार्थविधेश्च क्लेशबहुत्वापत्तेर्भूयस्त्वस्य प्रधानविधिलिङ्गत्वं शङ्कते * नन्विति * प्रधानस्य प्रत्येकमङ्गापेक्षायामङ्गाधिक्ये क्लेशाधिक्यापत्तिस्तस्य तु युगपत्सर्वाङ्गापेक्षाभ्युपगमाद्यावदङ्गवाक्यं सकृदपेक्षोत्पत्तेरङ्गवाक्यबहुत्वादेवाक्लेशेन बहुविधिः सेत्स्यतीत्याशयेन परिहरति * नैतदिति * परव्याख्यादूषणोपसंहारपूर्वं स्वमतेन कर्मनिष्पत्त्युपयोगिद्रव्यदेवतारूपाङ्गसाकल्यार्थतया भूयस्त्वं व्याख्यातुं प्रतिजानाति * तस्मादिति * व्याचष्टे * इहेति * एतदे-

॥ तत्र हि द्रव्यदेवतारहिते कर्ममात्रं प्रस्तुतस्तोत्रशस्त्रयाज्यानुवा-क्यादिमात्रं विधीयतइति शाखान्तराधिकरणवार्त्तिकेन दर्शयति * तथा चेति * यजुर्वेदे तु समस्तस्य द्रव्यदेवतात्मकस्य कर्मरूपस्या-म्नानात् स्तोत्रादिभिर्विनापि यागनिष्पत्तिशक्तेस्तोत्रादिनिरपेक्षक्रि-याविधानं शक्यमित्याह * यजुर्वेदे त्विति * स्तोत्राद्यङ्गग्रहणं त-र्ह्यनर्थकं स्यात् इत्याशङ्क्याह * वचनेति * व्याख्याते ऽर्थे सूत्रं योजयति * अत इति *त्रिष्वपि वेदेषु ज्योतिष्टोमाम्नानादुभयोक्तिर-नुक्तेत्याशङ्क्याह * ऋक्सामेति *

॥ प्रकरणस्य विनियोजकताधिकरणम् ॥ ४ ॥

असंयुक्तं प्रकरणादितिकर्त्तव्यतार्थित्वात् ॥ ११ ।

श्रुत्यादीनि च विनियोगे कारणानीति वक्ष्यन्ते इति प्रतिज्ञात-त्वात् । श्रुत्यादित्रयस्य विनियोगकारणत्वमनुक्त्वा प्रकरणादेर्विनि-योगकारणत्वोक्तिरयुक्तेत्याशङ्कानिरासार्थमुक्तानीति वृत्तसङ्कीर्त्तन-भाष्यं तेषामर्थेन सम्बन्ध इत्यादिना कथं च विनियुज्यतइति प्र-तिज्ञाचिन्तनेन श्रुत्यादीनां विनियोगकारणत्वस्यानुक्तत्वादयुक्तमा-शङ्क्य वृत्तविनियोगप्रकारचिन्तानुकीर्त्तनार्थत्वेन व्याख्यातुमाह * एवं तावदिति * तद्भूतानां क्रियार्थेन समाम्नाय इत्यत्र यैरर्थै-र्येषांशब्दानामौत्पत्तिकः सम्बन्धः तेष्वर्थेषु वर्त्तमानानां शब्दानां सर्वकारकान्वितक्रियारूपवाक्यार्थप्रमाणत्वोक्त्या प्रत्येकश्रुतिरूपाणां पदकारकविभक्त्याख्यानां शब्दानां प्रकृतिप्रत्ययार्थान्वयरूपे क्रिया-न्वितकारकरूपे चार्थे व्यापाराभिधानात् लिङ्गस्य विनियोगकार-णत्वे सिद्धे ऽपि यदि कश्चिच्छब्दस्य तात्पर्यानवधारणात् विज्ञा-नानुत्पादकत्वे प्रामाण्यायोगाद्वेदस्य च प्रमाणान्तरागोचरार्थत्वेन प्रमाणान्तरतो ऽर्थतात्पर्यावधारणायोगाद्वेदान्तर्गतस्य श्रुत्यादेर्वि-नियोगकारणत्वायोगं शङ्केत तद्भ्रमापनुत्तये ऽध्ययनविधानार्थे विनियोगात्तात्पर्यावधारणं विनियुक्तशब्देनोक्तं पुरुषार्थानुबन्धिन्यर्थे विधिना विनियोगाच्छ्रुत्याद्यर्थस्याङ्गत्वाख्यपुरुषार्थानुबन्धित्वे प्रधा-नोक्त्योक्तं श्रुत्याद्यनपेक्षस्य विधेः समीहितविशेषे विनियोजकत्वा-योगात् श्रुत्यादेर्ज्ञापकत्वेन ज्ञेयं लिङ्गाद्विनियोगोपपत्तिसूचनार्था ज्ञयोक्तिः पुरुषार्थानुबन्धिन्यङ्गान्वयरूपे ज्ञेये ऽध्ययनविधिना श्रु-त्यादीनां विनियोगात्तात्पर्यावधारणे यस्य श्रुत्यादेर्यस्मिन्नर्थे विशे-षतात्पर्यं तस्मिन्नेव तस्य विनियोजकत्वसिद्धेस्तेषामर्थाधिकरणा-दिभिः विनियोगविशेषचिन्तानर्थक्यमाशङ्क्य श्रुत्यादिभिर्यस्य य-

यङ्गत्वं ज्ञापयितुं शक्यते तस्य तदङ्गत्वं ज्ञापयेदिति सङ्कीर्णता-
त्पर्यावधारणात् सङ्कीर्णविनियोजकत्वासद्भावेऽपि विनियोगविशे-
षचिन्तार्थवत्त्वसूचनार्थं सङ्कीर्णरूपेण विनियुक्तानि सन्ति विशेष-
रूपेणाख्यातानीत्युक्तम् । विनियुक्तानीति पाठे तु प्राधान्येनैतद-
ध्यायविषये ऽङ्गत्वरूपे ऽर्थे तदुभूताधिकरणप्रथमान्त्यन्यायाभ्यां सङ्की-
र्णानि सन्ति तेषामर्थाधिकरणादिभिर्विविक्तानि कृत्वा वर्णितानी-
त्यर्थः । अनेन चैतद्भाष्यस्था विनियोगोक्तिर्विशब्दावृत्तिर्विनियोगवि-
शेषार्थत्वेन व्याख्याता । एकत्वयुक्तमेकस्य श्रुतिसंयोगादिति ग्र-
हाधिकरणपूर्वपक्षसूत्रे ऽवघातादीनां श्रुतिसंयोगाद्व्यवस्थाभ्युपगमे
सम्मार्गादावपि एकवचनश्रुतिसंयोगादेकस्मिन्नेव ग्रहादौ व्यवतिष्ठे-
तेत्यभिधानादवघातादिविनियोगविशेषकारणत्वेन श्रुतेरर्थाभिधान-
सामर्थ्यान्मन्त्रेषु शेषभावः स्यादित्यत्र सामर्थ्यशब्दान्मन्त्रविनियो-
गविशेषकारणत्वेन लिङ्गस्य सूत्रितत्वे ऽपि वाक्यस्य क्वचिद्विशे-
षकारणत्वेनासूत्रितत्वाद्विनियोगकारणानीति बहुवचनायोगमाश-
ङ्क्य परमते साक्षाद्वाक्यस्य विनियोगविशेषकारणत्वं केन चि-
त्सूत्रेणानुक्ते ऽपि श्रुत्यन्तर्गतत्वात् लिङ्गान्तर्गत्या च वाक्यस्य विनि-
योगविशेषकारणत्वसिद्धं बहुवचनमुपपादयितुमाह *नत्रेति* विनियु-
ज्यते ऽनयेति विनियोगशब्दस्य विनियोजकवाचित्वाद्विनियोजिका-
त्मिकायाः श्रुतेः सामर्थ्यात्मकस्य च लिङ्गस्यान्तर्गतं वाक्यमिति कृत्वा
वाक्यशब्दाख्येन ग्रहणेन साक्षान्न सूत्रितमित्युक्ते ऽन्तर्गत्युपपादनार्थं
यथाशुद्धावघातादिविध्ययोगेन केवलपदप्रयोगाच्च व्रीह्यादिश्रवणं स-
त्यश्रुतावहेतुत्वादिकल्पनानुपपत्तेरवहन्त्यादिसमर्पकव्रीह्यादिपदान्त-
रसन्निध्यपेक्षत्वात् विध्यात्मिकायाः श्रुतेर्वाक्यान्तर्गततया विनियोग-
स्यापि प्रतियोग्यनपेक्षस्यायोगात् केवलपदप्रयोगाभावाच्च श्रुते च प्र-
तियोगिनि सत्यश्रुतप्रतियोगिकल्पनानुपपत्तेः प्रतियोगिनि समर्पकप-
दान्तरसंन्निध्यपेक्षत्वात् विनियोजकात्मिकाया अपि श्रुतेर्वाक्यमन्त-
र्गतं लिङ्गविनियोज्यस्य कर्मसमवेतार्थस्य निर्वपामीत्यादिपदस्य के-
वलस्य प्रयोगाभावेनासमवेतार्थसवित्रादिपदान्तरसन्निध्यपेक्षत्वात्
वाक्यस्यैव लिङ्गं विनियोज्यत्वावगतेर्विनियोगविषयत्वस्यैव च सा-
मर्थ्यस्य लिङ्गत्वात् लिङ्गस्यापि अन्तर्गतं वाक्यमित्युक्तम् । अन्यथा-
न्तर्गत्वे बहुवचनायोगोपपत्तेः श्रौतसामान्यविनियोगापेक्षितविशेष-
विनियोगहेतुत्वमात्रेण वाक्यस्य श्रुत्यन्तर्गतिः सामान्यविशेषरूपवि-
षयभेदात्तु श्रुतिवाक्ययोर्भेदो ऽस्त्येव लैङ्गिकपदविनियोगापेक्षि-
तवाक्यविनियोगहेतुत्वमात्रेण च लिङ्गान्तर्गतिः पदवाक्यरूपवि-

षयभेदात्तु लिङ्गवाक्ययोर्विषयभेदो ऽस्त्येवेति प्रायशब्देनोक्तम् । श्रुतेः सामान्यमात्रे पर्यवसानायोगात् वाक्यविनियोगपर्यन्तत्वावगतेर्लिङ्गस्य च पदमात्रे पर्यवसानायोगात् वाक्यविनियोगपर्यन्तत्वावगतवाक्यस्य विशेषणविशेष्यभावमात्रे व्यापाराच्छ्रुतिलिङ्गाभ्यां विनियोगे वाक्यस्य विनियोगकारणत्वाभावेनैव बहुवचनसमर्थनानुपपत्तेरपरितोषात्स्वमतेन वाक्यविनियोगपर्यन्तत्वावगतेर्ग्रहणाभाव ऽपि प्रायशब्देनोपक्रमोपसंहारैकवाक्यत्वस्य विनियोगकारणत्वाभिधानात् वाक्यमपि साक्षाद्विनियोगविशेषकारणत्वेन सूचितमित्येवं बहुवचनं समर्थयितुमाह * अथ वेति * विशेषविहितस्यापि अरुणयेति वाक्योदाहरणं न युज्येतेत्याह * अथ त्विति * सामान्यमात्रविनियोगेन श्रुतिपर्यवसानाभ्युपगमे त्वैन्द्र्युदाहरणे श्रुतिलिङ्गविनिरोधो बलाबलाधिकरणवक्ष्यमाणो न यु-

८३११ ज्येतेत्याह * अथेति * कथं तर्ह्यरुणयेत्यस्य वाक्योदाहरणत्वमित्याशङ्क्याह * तस्मादिति * उदाहरणद्वये ऽपि विशेषविनियोगव्यापृतश्रुत्यपेक्षितविशेषणविशेष्यभावसमर्पणेन वाक्यस्य श्रुत्यन्तर्गतेर्दर्शयितुं शक्यत्वात् विनियोजकत्वस्य तूभयत्रापि अभावात् उभयस्य साक्षाद्विनियोगविवक्षया श्रुत्युदाहरणत्वे विनियोगौपयिकविशेषणविशेष्यभावविवक्षया च वाक्योदाहरणत्वे सम्भवत्यपि गुणस्य क्रियासाधनद्रव्यान्वयं विना श्रुत्यवगतक्रियाङ्गत्वानिर्वाहात् श्रुतेश्च द्रव्यान्वये व्यापाराभावात् वाक्यगम्यस्यारुण्यस्यैकहायनीद्वारतार्थैकत्वे द्रव्यगुणयोरेककर्त्र्योर्नियमः स्यादित्यभिप्रेत्येति सूचनायारुणयेत्यस्य वाक्योदाहरणतेत्याशयः । श्रुत्यादित्रयवत् प्रकरणादित्रयं ऽपि कथं च विनियुज्यत इत्यंशः कस्मान्न चिन्त्यत इत्याशङ्क्याह * इदानीमिति * व्रीहीनित्यादिपरमापूर्वसाधने ऽवघातादिविनियुक्ते ऽवान्तरापूर्वसाधने वेत्यादिश्रौतविनियोगविशेषचिन्तायां गौणे मुख्ये च लिङ्गं मन्त्रं विनियुङ्क्ते मुख्य एवेति । लैङ्गिकविनियोगविशेषचिन्तायां वाक्यमुपक्रमानपेक्षमुच्चैस्त्वादीनि विनियुङ्क्ते तदपेक्षं वेति वाक्यीयविनियोगविशेषचिन्तायाः श्रुत्यादिबलाबलचिन्तानपेक्षत्वात् पृथक्करणं युक्तं पूर्वप्रमाणविनियुक्ताङ्गव्यतिरिक्तानां प्रकरणादिविनियोजकं सर्वेषामेव वेत्येवं प्रकाराया विनियोगविशेषचिन्तायास्तु श्रुत्यादिबलाबलचिन्तान्तर्गतत्वादेतादृश्याश्च विनियोगविशेषचिन्तायाः प्रकरणादिष्वयोगान्न तेषु विनियोगविशेषचिन्ता कार्येत्याशयः । अधिकारलक्षणस्य प्रकरणस्यानन्तर्य-

(१) [illegible]

लक्षणस्य क्रमस्य रूढिशब्दलक्षणायाश्च समाख्यायाः सिद्धान्तेऽपि विनियोजकत्वानभ्युपगमादितिकर्त्तव्यताकाङ्क्षालक्षणस्य प्रकरणस्य सादेश्यलक्षणस्य क्रमस्य यौगिकशब्दलक्षणायां समाख्यायाश्च पूर्वपक्षे सद्भावस्याप्यनभ्युपगमाद्विनियोगकारणत्वचिन्ता न युक्तेत्याशङ्क्येतिकर्त्तव्यतार्थित्वाद्देशसामान्यात्तदर्थत्वादिति सूत्रावयवैः स्वरूपेणासंयुक्तं प्रकरणाच्छेष इति प्रधानभूताध्यायार्थवाचितया सर्वत्रानुवर्त्तमानशेषशब्दानुषङ्गात् पञ्चम्या च ज्ञापकहेतुत्वोक्तेः क्रमश्चेति चकारेण पञ्चम्यर्थानुकर्षणादाख्या चैवमित्येवं शब्देन च तदतिदेशाद्विनियोगसामर्थ्येन दर्शयतीत्युक्तम्। सद्भावेनेतिवाच्ये यत्किञ्चिद्रूपप्रकरणादिसद्भावस्योभयसिद्धत्वात् स्वाभिमतरूपप्रकरणादिसद्भावस्य साध्यत्वसूचनार्था स्वरूपोक्तिः। वैदिके चार्थे शब्दातिरिक्तप्रमाणाभावात्। शब्दस्य च साक्षरश्रवणाक्षरसामर्थ्याकाङ्क्षितयोग्यार्थपदसंनिध्यतिरिक्तविनियोगकारणभूतप्रकाराभावात्। श्रुत्यादीनि त्रीण्येव तादर्थ्यबोधाख्ये विनियोगे कारणानीत्याशये किमेतावन्त्येवेति पृष्टमोदनं पचेत्युक्त्वा तण्डुलानानय काष्ठान्याहरोदकं चाल्यादि चोपनयेत्युक्ते लोके तण्डुलोपनयनादीनां पाकाङ्गत्वप्रतीतेः पदसंनिधिवद्वाक्यसंनिधावपीतिकर्त्तव्यताकाङ्क्षायां विनियोगहेतुत्वावसायाद्देवदत्तयज्ञदत्तविष्णुमित्रेभ्यः शुक्लनीलपीतवस्त्राणि देयानीत्युक्ते च शुक्लवस्त्रादीनां यथाक्रमं देवदत्ताद्यङ्गत्वप्रतीतेः सादेश्यनिमित्तस्य संनिधेर्विनियोगहेतुत्वावसायाद्देवदत्तीयः पाक इत्युक्ते देवदत्तस्य पाकाङ्गत्वप्रतीतेर्यौगिकशब्दस्य विनियोगहेतुत्वावसायाच्छाब्दे व्यवहारे वा शब्दस्यार्थस्यान्वयायोगादितिकर्त्तव्यताकाङ्क्षासादेश्ययौगिकत्वानामपि विनियोगकारणभूतशब्दप्रकारवाचित्वावगतेस्तान्यपि विनियोगकारणानीत्याशयेन नेतिभाष्येण निरस्य भावनायाः संनिपत्योपकारीतिकर्त्तव्यतान्वयमात्रेणेतिकर्त्तव्यताकाङ्क्षानिवृत्तेरारादुपकारीतिकर्त्तव्यतानाकाङ्क्षत्वात् संनिपत्योपकारिण्याश्चेतिकर्त्तव्यतायाः श्रुत्यादिगम्यत्वेन प्रकरणगम्यत्वाभावात् नेतिकर्त्तव्यताकाङ्क्षालक्षणं प्रकरणमस्तीत्याशयेन प्रकरणमात्रविषयं प्रश्नान्तरं किमपरमिति भाष्येण कृत्वाधिकरणरक्षणार्थं पूर्वपक्षे कार्ये प्रश्नो न युक्त इत्याशङ्क्य विपर्ययवत् सन्देहाज्ञानयोरपि सिद्धान्तप्रतिकूलत्वात्पूर्वपक्षत्वसम्भवसूचनार्थं त्रैविध्यप्रसिद्धेन प्रश्नेन पूर्वः पक्षः कृत इति प्रश्नेनैवेति भाष्येणोक्तं तत्सर्वं तात्पर्येण व्याचष्टे * तत्रेति * अयमपि क्रमेणोपपादयति * याधस्तीति * सूत्राधीनत्वान-

स्य पुंसः कथनात् प्राक् सन्देहाज्ञाने सम्भवत इत्याशयः । नदीत्वप- वेतत्वफलत्वरूपेणानिश्चितेषु प्रश्नस्य लोके त्रैविध्यप्रसिद्धिदर्शनार्थं भवति चेति भाष्यं स्पष्टत्वान्न व्याख्यातं पूर्वपक्षमुपसंहरति * न- स्मादिति * अस्य पूर्वपक्षस्याधिकरणत्रयसाधारण्यसूचनार्थादित्या- दिशब्दः तदित्यादिसिद्धान्तभाष्यं तात्पर्यतो व्याचष्टे * इतीति * करणत्वस्यातिशयितसाधकत्वरूपसाधकतमत्वलक्षणत्वादतिशयस्य चापेक्षितत्वादपकृष्टसाधकत्वरूपामितिकर्त्तव्यतां विना करणत्वा- नुपपत्तेः सन्निपत्योपकारिणश्च प्रोक्षणमन्त्रादेर्यागनिष्पादकभाव- नाकरणीभूतद्रव्यदेवतादीनि कर्त्तव्यतात्वेन फलभावनाकरणीभूत- यागादीतिकर्त्तव्यतात्वाभावावश्यम्भावित्वादुपकारीतिकर्त्तव्यता- काङ्क्षेति सूचनार्थं करणवाची प्रधानशब्दः । सन्निपत्योपकारी- तिकर्त्तव्यतान्वयमात्रेणाकाङ्क्षानिवृत्त्यभावः कथम्भावाविच्छेदात्स्यो- क्त । असंयुक्तोक्तिव्याख्यानायानिर्ज्ञातेत्युक्तम् * प्रकरणेना- ङ्गतेति वदता * शेषः परार्थत्वादिति सूत्रस्थशेषशब्दानुषङ्गः सूचि- तः । सिद्धान्तोपपादनार्थं यदीतिकर्त्तव्यताकाङ्क्षिण इत्यादिभाष्यं व्याचष्टे * दर्शेति * दर्शपूर्णमासयोरुपकाराख्यानुग्रहापेक्षायां प्र- याजादीनां च साध्यापेक्षायां सत्यामपि यथाविकृतेरुपकाराकाङ्क्षायां विकृतौ चानिदिष्टानां प्रयाजादीनां साध्याकाङ्क्षायाः प्राकृतप्रमाण- सिद्धेनोपकारेण निवृत्तेर्न विकृतौ प्रकरणं प्रवर्त्तते । तथा यदि द- र्शपूर्णमासयोः सहायभूतप्रयाजादीनां साध्य उपका- रो ऽन्यतः सिद्धः केन चित्प्रमाणेनोपलभ्येत ततो द- र्शपूर्णमासयोरपि न प्रकरणं प्रवर्त्तेत न त्वेतदस्ती- तिसूचनार्थं * तथेत्युक्तम् * वायव्यं श्वेतमालभेतेत्यस्य च प्र- कृतिलिङ्गभूतेनालभतिना दैक्षोपकारस्य स्वपदे मासमग्निहोत्रं जु- होतीत्यत्र अग्निहोत्रोक्त्यानारभ्याग्निहोत्रधर्मातिदेशात्तद्गतस्योपका- रस्य स्ववाक्ये दैक्षप्रकरणे च दर्शपूर्णमासिकप्रयाजादिदर्शनाद्दैक्षे पौर्णमास्यधर्मातिदेशावगतेः स्वतोपकारस्य स्वप्रकरणे प्राकृतप्रमाण- सिद्धस्योपलम्भात्तद्वैषम्यसूचनार्थं * स्वेत्युक्तम् * एवं सत्यपि यदि प्रकरणालोचनाद्दर्शपूर्णमासयोः का चित्प्रवृत्तिरव- गम्येत ततस्तद्गतप्रमाणसिद्धेनोपकारेण नैराकाङ्क्ष्यं स्यान्न त्वेतदस्ती- ति सूचनार्था प्रकरणान्तरोक्तिः । शब्दस्यापि प्रत्यक्षादिपञ्चका- न्तर्गतत्वात्तन्निरासेनैव निरासे ऽपि लौकिकवैदिकशब्दभेदविवक्षया भेदेनोक्तिः । दर्शपूर्णमासयोः सहायभूतप्रयाजादीनां च साध्यभूत उपकारो ऽन्यतः सिद्धो न केन चिल्लौकिकेन वैदिकेन वा प्रमा-

कानोपलभ्यन्तइत्युक्ते ऽर्थात् प्रोक्षणावघातादिजन्येन सांनिपातिकेनैवोपकारेणोपकाराकाङ्क्षानिवृत्तेर्दर्शपूर्णमासयोर्नारादुपकाराकाङ्क्षेत्याशङ्क्य * अवश्यश्चेत्युक्तम् * यदि त्वित्यनेनाभावशङ्कायां प्रकरणाख्यारादुपकारप्रमाणसद्भावान्निरस्तायां सन्निधिमात्रादन्वयानुपपत्तेः प्रकरणे पदसांनिध्यभावाद्वाक्यसन्निधेश्च विप्रकृष्टत्वेनान्वयहेतुत्वायोगान्न प्रकरणं प्रमाणमित्याशङ्क्य * न हीत्युक्तम् * वि- ८३२।६
श्वजिद्वत्फलाध्याहारेण दर्शपूर्णमासफलानुषङ्गेण वा साक्षात्पुरुषार्थभूतं स्वर्गाद्येव प्रयाजादीनां साध्यत्वेन कस्मान्न कल्प्यतइत्याशङ्क्य यद्यान्यत्स्वर्गादिसाध्यं कल्प्येत तस्येज्याधिकरणन्यायाद्दर्शपूर्णमासनामविशेषितयज्युक्तेनाग्नेयादिषट्केण सह सम्बन्ध्य निराकाङ्क्षीभूतस्य न प्रयाजादौ सम्बन्धाकाङ्क्षास्तीत्युक्त्वा दर्शपूर्णमासयोः प्रयाजादीनां च परस्परमुपकार्योपकारित्वनियमसिद्धिरन्योन्याकाङ्क्षाधीनाङ्गाङ्गिसिद्ध्यर्थमुपसंहृता । प्रयाजादेश्च स्वर्गार्थत्वशङ्कानिरासेन तानि तत्रैवेत्यादिप्रयोजनभाष्यस्य प्रयाजादीनि दर्शपूर्णमासयोरेव विनियुज्यन्ते न स्वर्गे तथाग्निहोत्रे ज्योतिष्टोमे वा यद्वं विश्वं पदार्थजाते तदप्यग्निहोत्रएव ज्योतिष्टोमएव विनियुज्यते न स्वर्गइति व्याख्या सूचिता फलकल्पनानुषङ्गाभ्यां चेह पूर्वपक्षश्चतुर्थोपान्त्ये फलवाक्यस्थेन यजिना प्रयाजादीनामपि ग्रहणादित्यपौनरुक्त्यं स्पष्टम् । इतिकर्त्तव्यताकाङ्क्षिप्रधानसन्निधौ पठितानां प्रोक्षणप्रयाजादीनां बहूनामुदाहरणानां स्पष्टत्वात् प्रकृते विनियुज्यतइति प्रयोजनस्योक्तत्वात् प्रयोजनोदाहरणप्रश्नावनर्थकावाशङ्क्य सन्निपत्योपकारिणां प्रोक्षणादीनां क्रियाङ्गभूतद्रव्याद्यन्वयेन नैराकाङ्क्ष्यादुभयाकाङ्क्षालक्षणेन प्रकरणेन क्रियायां विनियोगानुपपत्तेरुदाहरणत्वायोगात्क्रियाङ्गभूतद्रव्याद्यङ्गत्वद्वारा तु तेषां क्रियाङ्गत्वाभ्युपगमे ऽधिकारलक्षणप्रकरणानुगृहीतेन श्रुत्यादिनैव तत्सिद्धेः कथम्भावलक्षणेन प्रकरणेन विनियोगायोगात्तैरेव च क्रियाया इतिकर्त्तव्यताकाङ्क्षानिवृत्तिसिद्धेरारादुपकारिणां प्रयाजादीनां विनियोगायोगात्प्रयोजनानुपपत्तेः प्रयोजनोदाहरणे पृष्ट्वा सन्निपत्योपकारिणामुदाहरणत्वायोगे ऽपि आरादुपकारिणामुदाहरणत्वं तद्विनियोजनं च प्रयोजनमिति भाष्यव्याख्यासूचनायासंयुक्तोक्तेः सन्निपत्योपकारिणां प्रकरणविनियोगनिवृत्त्यर्थत्वसूचनार्थं स्मतेन तावत्सन्निपत्योपकारिणामारादुपकारिणां च प्रकरणाविनियोज्यतामभिप्रेत्यासंयुक्तोक्तेः । प्रश्नपूर्वं प्रयोजनमाह * असंयुक्तेति * द्वित्वबहुत्वयुक्तस्य प्रतिपद्विधानस्य श्रुत्या द्विबहुयजमा-

नक्तवन्तरसंयुक्तस्य पूष्णो ऽहं देवयज्यया पशुमिर्जनीषीयेत्याद्यनुमन्त्रणेषु च पूषादिशब्दानां लिङ्गात् तच्छेषाणां चाहमित्यादीनां वाक्येन पूषादिदेवत्येष्टिपशुसंयुक्तानां ज्योतिष्टोमदर्शपूर्णमासप्रकरणाभ्यां विनियोगनिवृत्त्यर्थमित्युत्तरार्थः । प्रोक्षणादीनां श्रुत्यादिभिर्व्रीह्यादिसंयुक्तानां दर्शपूर्णमासज्योतिष्टोमप्रकरणाभ्यामविनियोगाप्तेर्विशेषणमध्याहरति * प्रकरणेति * पदार्थान्वयरूपवाक्यार्थप्रतिपादनमात्रे वाक्यव्यापारस्य स्योनं ते सदनमित्यादेः सुमनस्यमान इत्यन्तस्य वाक्यविनियोगोक्तेरेकवाक्यत्वोपगमने सामर्थ्यनिमित्तविनियोगाङ्गत्वस्य स्योनं न इत्यस्य पूर्वेण सहैकवाक्यतामभ्युपेत्योपस्तरणे समर्थनत्वादिभाष्यालोचनया प्रतीतेः प्रतिनियतावेतौ श्रुतिवाक्यसम्बन्धावेकः शेषशेषिरूपेभ्यां विशेषणविशेष्यात्मकइत्यादिवार्त्तिके वाक्यस्य विनियोजकताया निषेत्स्यमानत्वात्तत्सामान्येनारुणावाक्ये ऽपि वाक्यस्याविनियोजकत्वावगतेरारुण्यस्य वाक्येन क्रयसम्बन्धायुक्तत्वादतत्प्रयोजनानुपपत्तेः स्वमतेनासंयुक्तस्य ग्रहणस्य सन्निपत्योपकारिणां प्रकरणविनियोगनिवृत्तिप्रयोजनत्वं सूचयितुमाह * नात्वति * श्रुत्यादीनां सर्वेषामेव परदौर्बल्यात् पूर्वसंयुक्तपदार्थे परस्याविनियोगसामर्थ्यात्सामर्थ्यालोचनयैव श्रुत्यादिसंयुक्तानां प्रकरणविनियोगनिवृत्तेः सिद्धत्वादसंयुक्तमिति यत्सूत्रं तच्छ्रुत्यादिसंयुक्तानां प्रकरणविनियोगनिवृत्त्यर्थं न भवति । किं तु संयुक्तशब्देन सन्निपत्योपकारित्वाभिधानात् । सन्निपत्योपकारिणां प्रकरणविनियोगनिवृत्त्यर्थमित्याशयः ।

क्रमस्य विनियोजकताधिकरणम् ॥ ५ ॥

क्रमश्च देशसामान्यात् ॥ १२ ॥

वैदिके ऽर्थे शब्दातिरिक्तप्रमाणाभावात्सादेश्ययौगिकत्वयोश्च विनियोगहेतुभूतशब्दप्रकारत्वाभावात् । न क्रमसमाख्ये विनियोगकारणं इत्याशयेनाथत्याद्य ऽधिकरणद्वयस्थे विकृतीनां प्राक्प्राकृताङ्गान्वये ऽप्यज्ञातोपायपरिमाणत्वादश्रुतफलत्वेनाङ्गत्वयोग्येषु कर्मसु सन्निहितेषु सत्सङ्गाकाङ्क्षानिवृत्त्यसिद्धेर्वैकृतकर्मसन्निधानस्य प्रकरणत्वादुपांशुयाजस्य विप्रतिपन्नजातिसत्रुमत्कर्तृकैन्द्राग्नकर्मद्वयस्य वा ब्राह्मणपाठादनुमन्त्रणमन्त्रस्य याज्यानुवाक्यायुगलद्वयस्य वा मन्त्रसंहितायां पाठादेकप्रदेशवाक्यपाठसादेश्याभावेन तद्धेतुकबुद्धिविपरिवृत्त्याख्यसांनिध्ययोगादैक्षस्य च स एष औपवसथ्ये ऽहनि द्वि-

दैवत्यः पशुरालभ्यतइतिश्रुत्यौपवसथ्याख्ये ज्योतिष्टोमप्रदेशे ऽनुष्ठानोक्तावप्युपाकरणादीनां दैक्षाङ्गत्वावगमात्प्रागौपवसथ्ये ऽनुष्ठानावगतेरेकप्रदेशानुष्ठानाख्यानुष्ठानसादेश्याभावेन तद्धेतुकस्यापि सन्निधेरयोगान्न फलवत्सन्निधिलक्षणः क्रमो ऽस्ति निर्वापादीनां च समाख्यां विनाध्वर्य्वादिसम्बन्धानवगतेराध्वर्यवादिसमाख्या यौगिकशब्दलक्षणा नास्तीत्याशयेन * किं चेति * द्वितीये च प्रश्नभाष्ये एकहेलया व्याचष्टे * पूर्ववदेवेति * किमुक्तेभ्यो ऽन्यदपि प्रमाणमस्तीति किंवेति भाष्यार्थः । क्लृप्तोपकारत्वेन प्राकृतानामङ्गानां निराकाङ्क्षीकरणसामर्थ्यस्य दशमे गृहमेधीयाधिकरणे वक्ष्यमाणत्वान्निवृत्ताकाङ्क्षाया सांग्रहण्यादिकाया विकृतेः सन्निध्याम्नातानाम् अश्रुतफलानामामनहोमादिकर्मणां सन्निहितफलवत् कर्मोपकाराख्यसाध्यसम्भवे कल्पनागौरवापादकस्वर्गफलत्वकल्पनायोगात् विकृतिफलानुषङ्गस्य फलसम्बन्धोक्तहेतुत्वादितरस्य प्रधानं स्यादिति चतुर्थाधिकरणे परिधिमन्त्राद्यसम्बद्धपदव्यवायेन निराकरिष्यमाणत्वात् सन्निहितविकृत्यङ्गतां विनानर्थक्यापत्तेर्निराकाङ्क्षस्योपाध्यायस्य शिष्याकाङ्क्षयाकाङ्क्षोत्थापनवत्सान्निध्याम्नातधर्माकाङ्क्षयाकाङ्क्षोत्थापने ऽपि स्वतो नैराकाङ्क्ष्यादुभयाकाङ्क्षालक्षणप्रकरणत्वानुपपत्तेर्वैकृतधर्मसन्निधिः क्रम एव भिन्नग्रन्थाम्नातानामपि च कर्ममन्त्राणामुपकारकोपकार्याकाङ्क्षायां ब्राह्मणाधीतैः कर्मभिर्मन्त्रसंहिताधीतेषु मन्त्रेषु उपकारत्वेन मन्त्रैश्च कर्मसूपकार्यत्वेनालोच्यमानेष्वादित आरभ्यालोचनादाद्यग्रन्थप्रदेशाधीतयोः कर्ममन्त्रयोरन्योन्यं द्वितीयप्रदेशाधीतयोश्चान्योन्यमित्येवं क्रमेण बुद्धौ विपरिवृत्तेः सर्वस्वसंवेद्यत्वेनापह्नवायोगात् पाठसादेश्यहेतुको दैक्षाङ्गत्वानवगमे ऽपि चोपाकरणादीनां पाठक्रमेणौपवसथ्याख्ये दैक्षप्रदेशे ऽनुष्ठानावगमात् अनुष्ठानसादेश्यहेतुको ऽपि फलवत्सान्निध्याख्यः क्रमोऽस्तीति क्रमो देशसामान्यादित्येतावतोक्ता चकारेण पूर्वसूत्रस्थप्रकरणादिति पञ्चम्युक्तशेषहेतुत्वानुकर्षणात्सो ऽपि शेषहेतुरिति एवं सूत्रव्याख्यां सूचयन् सिद्धान्तमाह * तत्रेति * क्रमो ऽपि विनियोगकारणमित्येतावताद्ये प्रश्ने निरस्ते द्वितीयप्रश्ननिरासार्थं वैकृतकर्मसन्निधिरपि क्रम एवेत्येवकारेण सूचितम् । दधिधर्मन्त्रैन्द्राग्नयाज्यानुवाक्यायुगलोपाकरणादीनां शेषित्वाभिमतकर्मविशेषसन्निधिपाठाभावे ऽप्येकदेशत्वाख्येन देशसामान्येन बुद्धिपरिवृत्त्याख्यसन्निधिरूपः क्रमः प्रतीयतइत्युक्ते देशसामान्यव्याख्यार्थं द्वैविध्योक्तिः देशसामान्यहेतुकक्रमद्वैविध्ये सति कस्मात्पाठसादेश्यमात्रे भा-

व्यक्ततोक्तामित्याशङ्क्य दैक्षस्य श्रुत्योपाकरणादीनां चौपवसथ्याहानु-
ष्ठेयाग्नीषोमीयप्रणयनोत्तरकालपाठेन पाठक्रमादौपवसथ्ये ऽहन्यनुष्ठे-
यत्वावगतेरेकप्रदेशानुष्ठानाख्यस्यानुष्ठानसादेश्यस्य स्पष्टत्वात् सुप्र-
तिपादं सन्निधिहेतुत्वं मत्वा पाठसादेश्यस्यास्पष्टत्वेन सन्निधिहेतुत्व-
स्य दुःप्रतिपाद्कस्य प्रतिपादनार्थेति परिहारं सूचयन्पाठसादेश्योपपा-
दनपूर्वं सन्निधिहेतुत्वमेव तावदुपपादयति * विनापीति * अपिपदं प्र-
कारान्तरवाची पाठसादेश्यहेतुकस्य क्रमस्य विनियोगहेतुतामुपपा-
दयति * चेनेति * ऐन्द्राग्नयोर्याज्यानुवाक्यायुगलयोरैन्द्राग्नाभ्यां
प्रधानाभ्याम् देवताप्रकाशकत्वाल्लिङ्गस्य च सामान्यस्य सम्बन्धि
विना विनियोजकत्वायोगात् काम्ययाज्याकाण्डसमाख्यया च कर्म-
विशेषान्वयाख्यसामान्यसम्बन्धानवगतेः क्रमेण विनियोगे ऽप्य-
नुमन्त्रणस्य प्रधानेनानाकाङ्क्षितत्वात्क्रमेण विनियोगो न युक्त इत्याश-
ङ्क्य प्रधानस्यानुमन्त्रणानाङ्क्षत्वे ऽप्यनुमन्त्रणाकाङ्क्षया ऽकाङ्क्षामु-
त्पाद्य विनियोगो भविष्यतीति परिहारं सूचयन्ननुमन्त्रणविनियो
८३३।४ गे क्रमस्य हेतुतामुपपादयति * तथेति * आद्या-
नुमन्त्रणस्याद्यंशान्वयान्निराकाङ्क्षतया द्वितीयादीनां अनुमन्त्रणा-
दीनां द्वितीयादिभिः शेषिभिः सम्बन्धेन भाव्यमित्यर्थः। एवं तर्ह्यग्नेर-
हं देवयज्ययेत्याद्यनुमन्त्रणानि क्रमविनियोज्यत्वेन कस्मान्नोदाहृ-
तानीत्याशङ्क्याधिकारलक्षणप्रकरणेन दर्शपूर्णमासान्वयाख्ये सा-
मान्ये सम्बन्धे सर्वेषामनुमन्त्रणानामनवगतद्वारविशेषान्व-
याय व्यवस्थापेक्षायामाग्नेयादियागाङ्गत्वेनानुमन्त्रणानामाग्नेययो-
गादिप्रकाशनसामर्थ्याल्लिङ्गेन व्यवस्थासिद्धेः क्रमानपेक्षत्वात् अस्प-
ष्टलिङ्गतया लिङ्गेन व्यवस्थापयितुमशक्यमनुमन्त्रणमुदाहरति *
तत्रेति * लिङ्गेनाव्यक्तलिङ्गमन्त्रव्यवस्थानभ्युपगमे प्रकरणात्स-
र्वार्थत्वापत्तेः । क्रमेण विनियोगो न सिद्ध्येदित्याशङ्क्ते * ननु
चेति * अबाधसम्भवे बाधपक्षस्यानाश्रयणीयत्वात् उपांशुयाजस्य
विशेषितया ग्रहणे द्वयानुग्रहसम्भवात् । न क्रमो बाधनीय इति
परमतेन दूषयितुमुपन्यस्यति * तन्नेति * उपांशुयाजमात्रार्थ-
त्वे प्रकरणावगतसर्वार्थत्वबाधापत्तेर्न द्वयानुग्रहः सम्भवतीत्या-
शयेन दूषयति * शक्यन्त्विति * अनुमन्त्रणस्याश्रुतावृत्तिदोषा-
पत्तेः । सर्वार्थता युक्तेत्याशङ्क्य प्रतिप्रधानमङ्गावृत्तिर्न्याय्यैवेति सूच-
नार्थं प्रति * प्रधानेत्युक्तम् * आग्नेयादीनां लिङ्गावगतैरनुमन्त्र-
णान्तरैर्नैराकाङ्क्ष्यादुभयाकाङ्क्षालक्षणेन प्रकरणेनास्यानुमन्त्रणस्या-
ग्रहणं न सम्भवतीति स्वमतेन परिहारमाह * तत्रेति * स्पष्टलि-

ङ्गानां लिङ्गेनास्पष्टलिङ्गस्य च प्रकरणेन विनियोगाद्विपमशिष्टविकल्पापत्तेरपि नास्य प्रकरणेन ग्रहणमित्याह * न चेति * अदृष्टार्थत्वेनैकार्थ्यानवगमात् विकल्पानापत्तिं शङ्कते *अदृष्टार्थानामिति *

मन्त्रमुच्चारयन्नेव मन्त्रस्थत्वेन संस्मरन् ।
शेषिणो तन्मना भूत्वा स्यादेतदनुमन्त्रणमित्येवम् ॥

लक्षणेनैषां यागानुमन्त्रणाख्यया यागस्मृत्यर्थत्वावगतेः । कृतस्यापि च यागस्याकृतत्वशङ्कायामश्रद्धानिमित्तवैगुण्यापत्तेः शङ्कानिवृत्तौ कृतस्य यागस्य प्रत्येकस्मृत्याख्यप्रत्यवेक्षापेक्षत्वात् दृष्टार्थत्वावगतेरेकैकेन च मन्त्रेण तत्सिद्धेर्दुर्वारा विकल्पापत्तिरिति परिहरति * नेति * कृतयागस्मरणस्यानुष्ठानानोपयिकत्वात् कालविप्रकृष्टाभावेन चाकृतत्वशङ्कानुपपत्तेस्तन्निवृत्त्यर्थत्वायोगात् पदार्थमध्ये क्षुतादिनिमित्तविष्णुस्मरणवददृष्टार्थत्वे ऽपि भिन्नानां मन्त्राणाम् ज्ञप्तिमन्त्रवदेकप्रयोजनत्वकल्पनानुपपत्तेरैन्द्रवायवादिग्रहणवच्च समुच्चयमन्तरेणागत्यभावात्समुच्चयानाश्रयणीयत्वावगतेर्न समुच्चय युक्त इत्याह * सत्यपि चेति * गत्यन्तर सतीत्येतद्विवृणोति * आग्नेयादिभिरिति * मन्त्राणां चाक्रियात्वेनानितिकर्त्तव्यत्वारूपत्वात् एवमत प्रकरणविनियोज्यत्वानुपपत्तेरभिधानक्रियाद्वारा विनियोज्यत्वावगमे ऽपि अस्पष्टलिङ्गाभिधायकतायोगान्नास्य प्रकरणविनियोगः सम्भवतीत्याह * किं चेति * उपांशुयाजे ऽपि तदभिधानाशक्तेर्नाविनियोगः स्यादित्याशङ्क्य क्रमादुपांशुयाजाङ्गत्वावगतेः सन्निहिताभिमुखवाचिमध्यमपुरुषयोगात् प्रकरणसन्निहितानेकयागत्यागेन क्रमसन्निहितैकोपांशुयाजाभिधानसामर्थ्यावगतेरुपांशुयाजे विनियोगोपपत्तिसूचना * यासीत्युक्तम् * श्लोकं व्याचष्टे * दब्धिर्नामेति * युष्मदर्थविषयमध्यमपुरुषान्तरत्वेनासिशब्दस्य सन्निहितवाचित्वे ऽपि सर्वेषां प्रकृतत्वेन सन्निधानात् अभिधानापत्तिमाशङ्क्य सन्निहितवाच्यभिमुख्यस्य युष्मदर्थत्वादुपांशुयाजस्यैव च मन्त्राकाङ्क्षयोत्पादिताकाङ्क्षत्वेनाभिमुखत्वात् मन्त्रित्वेनावान्तरनिराकाङ्क्षीकृतत्वेनानभिमुखत्वात् मन्त्रित्वेनावान्तरनिराकाङ्क्षीकृतत्वेनानभिमुखानामाग्नेयादीनां सन्निधाने ऽप्यनभिधानसूचनायाभिमुखोक्तिः सादृश्येनोपांशुयाजस्यात्यन्तसान्निध्यात्तस्यैवाभिधेयता युक्तेति परिहारसम्भवे ऽपि अतिशयार्थाभिमुखोक्तिः । एवमनेनोक्तपरिहारमुपसंहरति * ततश्चेति * तथैन्द्राग्नं कर्मेत्यादिभाष्येणोदाहृतो याज्याकाण्ड- ८३४।१
क्रमस्तयोश्चाङ्गाङ्ग्यपेक्षवेलायामित्यादिवार्त्तिकेनाभयाकाङ्क्षाया क्र-

मस्य विनियोगहेतुत्वाभिधानाद्व्याख्यात इत्याह * याज्येति * अनुष्ठानदेशः क्रमः कस्मान्नोदाहृत इत्याशङ्क्य पशुधर्माधिकरणे क्रमस्य प्रकरणविरोधपरिहारेण पशुधर्माणां दैक्षार्थत्वे वक्ष्यमाणे अनुष्ठानदेशलक्षणो ऽपि क्रमो विनियोगहेतुत्वेन सुज्ञानो भविष्यतीति मत्वेत्याह *अनुष्ठानेति* वैकृतधर्मकर्मसन्निधेस्तु प्रकरणत्वशङ्कायाश्चतुर्थे मध्यस्थं यस्य तन्मध्यइत्यस्मिन्नधिकरणे स्वातन्त्र्यशङ्कायाश्च फलवद्वाक्यहेतुत्वादिनरस्य प्रधानं स्यादित्यस्मिन्निराकरिष्यमाणत्वेन क्रमस्य निःसन्दिग्धत्वात् । निराकाङ्क्षपांशुयाजसन्निधेश्च विनियोजकत्वस्योक्तत्वात् पृथगनुदाहरण लिङ्गक्रमसमाख्यानादित्यत्र लिङ्गस्य क्रमसमाख्यासापेक्षत्वमात्रोक्तेः फलतस्य विनियोजकत्वाभिधानादिहोदाहरणम् ॥

समाख्यायाः विनियोजकताधिकरणम् ॥ ६ ॥

आख्या चैवं तदर्थत्वात् ॥ १३ ॥

आख्याया विनियोगहेतुत्वाभावाशयस्याथेति प्रश्नभाष्यस्य यौगिकत्वलक्षणसमाख्यात्वाभावाशयस्य च किञ्चेत्यस्य प्रयोगे च व्याख्यातत्वात् समाख्यापि क्रमविशेषत्वहेतुः कल्पावयवार्थप्रत्यभिज्ञानेन चाध्वर्यवादियौगिकत्वात्समाख्या चैवमित्येवं सूत्रव्याख्यार्थं समाख्या चेति भाष्यं तात्पर्यतो व्याचष्टे * यौगिकीति * कल्प्तावयवार्थप्रत्यभिज्ञाने समुदायशक्तिकल्पनायोगात्सम्बन्धनिमित्तैवेषाख्येत्येतावता यौगिकत्वाख्ये समाख्यात्वे व्युत्पादित तस्या विनियोगहेतुत्वोक्त्यर्थमध्वर्य्वादिना प्रकृत्यर्थत्वेन सहान्वाधानादेः प्रत्ययार्थस्य कश्चित्सम्बन्धो ऽस्तीत्येवं सामान्याकारेण स्ववाच्यविशिष्टार्थान्यथानुपपत्त्या प्रतीते सम्बन्धे ऽपि निःशेषसामान्यायोगात् विशेषापेक्षायां शेषशेषिलक्षणसम्बन्धविशेषं बोधयतीत्युक्ते विशेषबोधोपपादनार्थमृत्विजां कर्माणि प्रति कर्तृतया शेषत्वेन चरणाभरणाभ्यां परिक्रीतत्वादनुष्ठेयत्वेन शेषिभूतकर्मापेक्षायामनुष्ठातृत्वेन च शेषिभूतानां कर्मणां कर्तृशेषभूतापेक्षायां प्रत्ययार्थस्यान्वाधानादेः प्रकृत्यर्थस्य चाध्वर्योरन्योन्यसामीप्येन बुद्धौ स्थापनादित्युक्तं समाख्याया निर्दोषत्वायानादिप्रसिद्धता यच्छब्देनोक्तेति सूचनार्थं पौरुषेय्यामपि तावद्दीक्षानुवाकादिसमाख्यायामनादित्वान्न दोषो ऽस्ति आध्वर्यवादिसमाख्यायां तु दोषशङ्कापि नास्तीत्युक्तिपूर्वमुत्तरार्द्धं व्याचष्टे * आध्वर्यवादीति * आध्वर्यवशब्दवाच्यत्वेनान्वाधानादेरध्वर्युशब्दवाच्यत्वेन चर्त्विजो ऽन्वाधानादिकर्तृकत्वक-

ल्पना भवतीत्युक्ते कस्मात्तर्ह्यध्वर्युसमाख्या भाष्ये नोदाहृतेत्याशङ्क्यैकयापि समाख्यया द्वयोरपि कर्त्तृकर्मणोः श्रुत्यर्थाभ्यां नियमसिद्धेरिति सूचनार्थं प्रत्येकोक्ति । प्रत्ययलोपस्य प्रातिपदिकप्रत्यापत्तेर्वा स्मृत्यभावात् कथमाध्वर्यवत्कर्त्रध्वर्युना व्युत्पत्तिरित्याशङ्क्य प्रकृते ऽध्वर्युप्रातिपदिकादृत्विग्विशेषवाचितया प्रसिद्धादाध्वर्यवशब्दास्तद्विकारत्वेन व्याकरणालोचनयावगताध्वर्यवकर्मवाचित्वात्मकेन प्रकृत्यानुरूपेण विकाराद्वाध्वर्यवशब्दार्थान्वयस्य निमित्तत्वायोगेनौपचारिकादन्वाधानादिर्वाचितयावगतादौदमेधिवत् प्रसिद्धाध्वर्यवशब्दादर्थेनाध्वर्युशब्दस्तत्र प्रकृतित्वेनावगतो ऽन्वाधानाद्याध्वर्यवकर्तृवाचित्वात्मकेन विकारानुरूपेणानुमीयतइत्युक्तं शब्दाधिकरणप्रकृतिविकृत्योश्चेति पूर्वपक्षसूत्रोक्तं प्रकृतिविकारइति सूत्रे विकारोक्त्यानुभाष्य शब्दान्तरोक्त्या निरस्तत्वात् प्रकृतिविकारोक्ती न युक्ते शब्दार्थसम्बन्धनित्यत्वोक्तेश्चाध्वर्यवशब्दप्रवृत्तावप्यध्वर्युशब्दार्थान्वयस्य निमित्तत्वायोगान्नोपचारतोऽपि प्रकृतिविकारता युक्तेत्याशङ्क्य व्याकरणप्रत्ययौपचारिकी प्रकृतिविकारतोक्ता वस्तुतस्तु यद्यप्यध्वर्य्वाध्वर्यवशब्दौ प्रकृतिविकारत्वाभावादन्योन्यानपेक्षौ नित्यं चार्थान्वितौ तथापि शब्दस्यार्थे प्रयोगाख्यायाः प्रकृतेः कूटस्थनित्यत्वाभावात् नित्यस्य च नैमित्तिकत्वे ऽपि अविरोधादाध्वर्यवशब्दप्रवृत्तौ वाच्यत्वेनाध्वर्युशब्दार्थान्वयस्य निमित्तत्वादध्वर्युशब्दस्याध्वर्यवशब्द प्रति निमित्ततामुपचर्य प्रकृतिविकारत्वान्वाख्यानमित्याह *यद्यपि चेति* प्रवाहनित्यत्वस्य नैमित्तिकत्वाविरोधसूचनार्थं सर्वयौगिकानामिति यदुक्तं तदुपपादयितुमाह * न हीति * एवमपि शब्दानां कूटस्थनित्यत्वे ऽपि सम्बन्धज्ञानापेक्षस्य शब्दप्रवृत्तौ निमित्तत्वात्सम्बन्धज्ञानस्य च कादाचित्कत्वान्निमित्तत्वान्निमित्तत्वाविरोधवद्राजादिशब्दस्यापि राज्यादिशब्दप्रवृत्तिनिमित्तभूतराज्याद्यन्वयापेक्षितराज्याद्यर्थोक्तिद्वारा राज्यादिशब्द प्रति निमित्तत्वात् सम्बन्धज्ञानापेक्षत्वेन चार्थोक्ते कादाचित्कत्वनिमित्तता न विरुद्धेत्याह * निमित्तेति * समाख्याहेतुकाद्विनियोगात्प्रागाध्वर्यवाख्यस्यान्वाधानादेरध्वर्युसम्बन्धाप्रतीतौ शब्दे यौगिकत्वज्ञानाशक्तेः प्रतीतौ वा समाख्याया विनियोगहेतुत्वायोगापत्तेर्यौगिकत्वायोगात् रूढित्वेनान्योन्यानपेक्षत्वे ऽप्यध्वर्य्वाध्वर्यवसमाख्ययोरध्वर्योः कर्त्तव्यापेक्षायामध्वर्युसमाख्यासादृश्यादाध्वर्यवसमाख्यायामुपनिबध्यमानायामन्वाधानादेः कर्त्तव्यत्वावगमात् । अन्वाधानादेश्च कर्त्रपेक्षायामध्वर्युसमाख्यायामुपतिष्ठमानायामध्वर्योः

कर्तृन्यायगमात् एप समाख्याहेतुको विनियोगः सेत्स्यतीति भर्तृमि-
श्रादिमतं दूषयितुमुपन्यस्यति * तत्रेति * यत्रातिदेशो धर्मसम्ब-
न्धे सारूप्यादुपस्थापनस्य सामर्थ्यं प्रसिद्धं तत्रापि तावद्रूढिः सारू-
प्यहेतुकस्योपस्थापनस्य नास्त्यत्र त्वौपदेशिके क्रियाकर्तृसम्बन्धे सा-
रूप्यहेतुकस्योपस्थापनस्य सामर्थ्यं दूरात्सारितमित्येवं दूषयति *
८३५।१ न त्विति * उपस्थापनस्य नित्यमुपस्थापकापेक्षत्वादुपस्थापकसारू-
प्यमपेक्षत्वे ऽपि सामर्थ्यशब्देन सह समासाविघातः । कण्वरथन्त-
रशब्दस्य यौगिकत्वे सत्यरथन्तरे रथन्तरे रथन्तरशब्दस्य वत्यर्थक-
ल्पनया शब्दोक्तात्सादृश्यात्प्रवृत्तेः सादृश्यस्य च धर्मसामान्यल-
क्षणत्वात् रथन्तरधर्मातिदेशकत्वं स्यात् रूढित्वात्तु शब्दसादृश्येन
रथन्तरशब्दोपस्थापनद्वारा रथन्तरोपस्थापने ऽपि शब्दसादृश्यस्य प्र-
त्यक्षस्य गम्यत्वेन शाब्दत्वात्तद्वारेण रथन्तरोपस्थापने शब्दस्याव्यापा-
रान्नातिदेशता युक्तेति दार्शामिकदृष्टान्तेन रूढिसादृश्यहेतुकस्योप-
स्थापनस्यातिदेशकधर्मान्वयासमर्थतोपपादिता । उपदेशे तु वत्यर्था-
नपेक्षणेन शब्दोक्तस्यापि सारूप्यस्य हेतुत्वाभावात् सादृश्यवञ्च
सारूप्याभावात्सादृश्यवञ्च सारूप्यसम्बन्धं विनानर्थक्याभावेन
सम्बन्धाभिमुख्यरूपेणानुपस्थापकत्वात् स्वरूपमात्रेण चोपस्थापने
ऽपि गोगवयवत्सम्बन्धाप्रतीतेरशाब्देन सारूप्येणोपस्थापने शाब्द-
स्याव्यवहारात् वैदिके च शब्दव्यतिरिक्तप्रमाणाभावात् रूढिसारूप्य-
स्य क्रियाकर्तृसम्बन्धस्ये शक्तेर्दूरोत्सारितता किमुतेत्यनेनोक्तार्थाद्वा
सम्बन्धमात्रे ऽपि सारूप्यहेतुकत्वोक्तस्योपस्थापनस्य शक्तिर्नास्ति त-
द्विशेषे तु क्रियाकर्तृसम्बन्धे दूरोत्सारितेत्यर्थः । भाष्यकृतो ऽपि रू-
ढिर्नानभिमतेति सूचयितुमाह * याचकादीति * परपक्षे दोषमु-
क्त्वा स्वपक्षे दोषं परिहर्तुं निर्दोषत्वं प्रतिजानीते * तस्मादिति *
अनुभाषणपूर्वं परिहरति * यत्त्विति * सत्यं समाख्याहेतुकात् वि-
नियोगात्प्रागध्वर्युणाध्वर्यवानुष्ठानादध्वर्य्वाध्वर्यवयोः सम्बन्धे प्र-
त्यक्षप्रमाणं नास्ति तथाप्यध्वर्युणाध्वर्यवं कार्यमित्येवं रूपं श्रुत्याख्यं
प्रमाणं समाख्यया क्रमादपारम्पर्येणाङ्गाङ्गिसम्बन्धबोधाख्याद्विनि-
योगात् प्रागनुमाय सम्बन्धे प्रमाणं भविष्यतीत्यर्थः । सम्बन्धात्प्रा-
ग्यौगिक्या समाख्यायाः प्रवृत्तिरयुक्तेति यदुक्तं तत्परिहर्तुमाह *
वेदे हीति * अनादित्वोपलक्षणार्था वेदोक्तिरनादिसमाख्याप्रमाण-
कस्य सम्बन्धस्यानादित्वादिदानीं ततः समाख्यातृप्रयोगात् प्रागेव पू-
र्वेष्वनुष्ठातृषु निष्पत्तेस्तस्मिन् प्रतीते सतीदानीन्तनेषु प्रयोक्तृषु स-
माख्या प्रवृत्तेत्यर्थः । समाख्यातः प्रागङ्गाङ्गिसम्बन्धप्रतीतौ समा-

ख्याप्रमाणं न स्यादित्याशङ्क्यानुष्ठातृषु निष्पन्नस्यापि सम्बन्धस्या-
मीभिर्मीमांसकमूलप्रमाणं विना याज्ञिकानुष्ठानमात्रादविश्वसद्भिः प्र-
तिपत्तेः समाख्याख्यमूलप्रमाणदर्शनेनैव वयं मीमांसकाः सम्बन्धं
प्रतीपद्यामहइत्याह * वयं त्विति * सम्बन्धप्रतिपत्तिं विना सम्ब- ८३५।११
न्धिनिमित्तायाः समाख्याया दर्शनायोगात्समाख्यादर्शनेन सम्बन्धप्र-
तिपत्तौ अन्योन्याश्रयत्वं स्यादित्याशङ्क्य क्लृप्तावयवार्थप्रत्यभिज्ञा-
नेनावयवार्थाभावविनिश्चयं च विना समुदायकल्पनायोगात्स-
म्बन्धज्ञानपूर्वं प्रयोक्तृस्था समाख्या ज्ञायते पश्चात्सम्ब-
न्धो ज्ञायतइत्याह * नेनेति * कथं तर्हि सम्बन्धस्य
प्रथमतोक्तेत्याशङ्क्य वस्तुस्थित्येत्याह * वस्तुनस्त्विति * सम्ब-
न्ध ऽपि सम्बन्धस्याज्ञाने तत्प्रतिपादिकाया समाख्यायाः प्रवृत्ति-
रयुक्तेत्याशङ्क्य सम्बन्धस्याप्रतीतावप्यसत्त्वनिश्चयाभावमात्रेण क्लृ-
प्तावयवार्थप्रत्यभिज्ञान समुदायशक्तिकल्पनायोगात् । प्रयोक्तृस्था-
याः समाख्याया श्रोतारं प्रति ज्ञेयत्वेन प्रवृत्तिरयुक्तेत्याह * स चे-
ति * अन्यप्रयुक्तसमाख्यादर्शनाच्छ्रोतुः सम्बन्धप्रतिपत्तिसम्भवे ऽपि
अनवगते सम्बन्धे तत्प्रतिपादिकयाः समाख्याया वक्तुरप्रयोगादप्र-
युक्तायाश्च श्रोतुर्दर्शनायोगात् न सम्बन्धिप्रतिपत्तिरित्याशङ्कानिरा-
सपूर्वं यौगिकया समाख्यायाः सम्बन्धमात्रावगमे ऽपि तद्विशे-
षाङ्गाङ्गिसम्बन्धावगतिः कथमित्याशङ्कां निरस्यति * यदि हीति *
प्राक्सम्बन्धावगमे ऽपि नित्यत्वात्समाख्याया पूर्वं वृद्धप्रयोगदर्शना-
त्सर्वेषां नित्यं प्रयोगोपपत्तावुक्तायां सम्बन्धनिमित्तायाः समाख्या-
यास्तं विना कथं नित्यप्रवृत्तिरित्याशङ्क्य सम्बन्धस्य प्रवाहनित्यतोक्ता
ससमाख्यात्रगतस्य सम्बन्धसामान्यस्य विशेषं विनानुपपत्तेर्वि-
शेषान्तरानुक्तेश्चाध्वर्योश्चाध्वर्युं वृणीतेति विधिना वरणेनाध्वर्युमुपा-
ददीतेत्येवंविधानात्सामान्यतो ऽङ्गत्वादन्वाधानादेश्च क्रतूपकारित्वेन
समूहितत्वात्सामान्यतो ऽङ्गत्वे ऽवगतेर्विध्यनुगृहीतया समाख्यया-
ङ्गाङ्गित्वलक्षणः सम्बन्धविशेषो ज्ञायतइति द्वितीयाशङ्कानिरासाशयः
अनेन वैवं वेदे ऽपीति भाष्यस्याकृतकमध्वर्युत्वाद्याधानाद्याख्ययोः
प्रकृतिप्रत्ययार्थयोः सामान्यतः सम्बन्धप्रतिपादकमाध्वर्यवशब्दमु-
पलभ्य निर्विशेषसामान्यायोगात् तस्मिन्नङ्गाङ्गिसम्बन्धबोधस्य वि-
नियोगविषयभूते ऽङ्गाङ्गित्वलक्षणे सम्बन्धविशेषे प्रत्ययो भवती-
ति शङ्काद्वयनिरासार्थत्वेन व्याख्या सूचिता वैदिकस्य क्रियाकर्त्रा-
दिसम्बन्धस्य प्रमाणान्तरादनवगतेः सम्बन्धनिमित्तसमाख्योदाह-

---

(१) सद्भावे ऽपीति २ पुस्ता० ।

रणायोगः । प्रमाणान्तरात्सम्बन्धावगतौ वा सामाख्यानिकविनि-
योगोक्तिर्निष्प्रयोजनत्वाशयत्वेन किमिहेति प्रश्नभाष्यव्याख्या यौगि-
कत्वायोगशङ्कावार्त्तिकेन सूचिता ऽधिकरणार्थमुपसंहरति * तस्मा-
दिति * रूढित्वनिरासोपसंहारार्थैवकारः ॥

श्रुत्यादीनां पूर्वपूर्वबलीयस्त्वाधिकरणम् ॥ ७ ॥

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां स-
मवाये पारदौर्बल्यमर्थविप्रकर्षात् ॥ १४ ॥

श्रुत्यादीनि विनियोगे करणानीति अंशे चिन्तिते तेषां
प्रबलदुर्बलत्वांशचिन्तायाः सङ्गत्युक्त्यर्थान्कानीति भाष्यं व्याचष्टे
८३६।९ * इदानीमिति * समवायोक्त्यर्थाख्यापूर्वं प्रयोजनमाह * तत्रेति *
विरोधानपेक्षस्यासमवायस्य चिन्ताऽविषयत्वान्न्यूनतां शङ्कते
* तत्रेति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * श्लोकं
व्याचष्टे * एक एव हीति * प्रमाणानां परस्परानुग्रहे समवा-
यस्य निमित्तत्वोपपादनार्थं निर्विशेषसामान्यायोगात् श्रुत्या वाक्यं
स्वरूपप्रयुक्तं स्वेनानर्थक्याद्वाक्येन प्रकरणमपेक्षितमित्युक्तम् । सम-
वायोक्त्यैव विरोधसिद्धेर्न विरोधग्रहणं कार्यमिति परिहरति
* नेति * एतदेव प्रश्नपूर्वमुपपादयति * कुत इति * तुल्यबल-
त्ववाचिन्या समानोक्त्या संशब्दस्यान्यूनानधिकैकार्थत्वव्याख्या
नात् । विषयोक्त्या चापहारार्थत्वं च्छेदार्थविशब्दपूर्वात् बन्धनार्था-
त्सिनोतेर्धातोरच्प्रत्ययान्तादुत्पन्नतया विनाशब्दस्यापहरणनिमित्ता-
धःकरणार्थत्वादेकस्मिन्नन्यूनाधिके ऽर्थे ऽपहरणेनान्यदधःकृत्याया-
गमनं समवायशब्दार्थत्वेनोक्तं यत्र त्वेकः शेष स्तावानेव चेत्यादिवि-
वरणवार्त्तिकालोचनया चैकशब्दस्यान्यूनानधिकैकत्वाविषयार्थत्वा-
वसायादपहार्ये च प्रार्थनातिशयादर्शनेनार्थशब्दस्य प्रार्थनावा-
चितया पदार्थलक्षणार्थत्वावसायात्समानविषयत्वरूपः समवायः
श्रुत्यादीनां प्रमाणानामन्यूनाधिकैकशेषापहारित्वे शेषाणां चान्यूना-
धिकैकशेष्यपरिहारित्वं सत्यवगम्यत इति उत्तरार्द्धार्थः । श्लोकं व्या-
चक्षाणो विषयोक्त्यापहारानपेक्षबोध्यवदरुणावाक्ये प्रमाणानां सम-
वायो नास्तीत्याह * अरुणादौ त्वादिति * श्रुत्यादीनामेकत्रारुणादौ
शेषे मिश्रणात्कथं न समवाय इत्याशङ्कानिरासार्थत्वेन पूर्वार्द्धं व्याचष्टे
* न हीति * प्रमाणस्य प्रमेयविशेषविषयत्वात् शुद्धस्यैवारुण्यस्य क्रि-
यामात्रान्वयित्वेन श्रुतिप्रमितक्रियान्वयस्य चारुण्यस्य श्रुत्युक्तकार-
कापेक्षितक्रियासामान्यान्वयमात्रेणापर्यवसानात् भूयः क्रियाविशेष-

ऽपेक्षाविशेषेण क्रयान्वयितया वाक्येन क्रयान्वयपर्यन्तत्वे ऽपि स्व- स्यारुण्येन समीहितप्रयोजनानवाप्तेः प्रयोजनविषयं ऽपेक्षान्तरे सति ज्योतिष्टोमापूर्वसम्बन्धवच्च. क्रयस्य सम्बन्धिन सतो ऽरुणैकगुणस्य ज्योतिष्टोमान्वयितया प्रकरणेन प्रमेयत्वात् विषयनानात्वेनाविरु- द्धा सर्वेषां विनियोजकतेत्यर्थः । कथं कारकश्रुत्यारुण्यस्य क्रियान्व- यप्रमितिरित्याशङ्क्य पदश्रुत्युक्तकारकान्वयद्वारा क्रियान्वयोपपत्ति- सूचनार्था कारकोक्तिः श्रुत्यादिकाल्पिति प्रमीतः क्रियाया सह कारकद्वारा सम्बन्धो यस्यारुण्यस्येति विग्रहो विशेषस्य सामा- न्यं प्रत्याश्रयत्वेन विषयत्वाद्विशेषणविशेष्यान्वयमात्रे वाक्यस्याव- स्तुनो व्यापारो नाङ्गाङ्ग्यान्वयाख्ये विनियोगे प्रौढ्याभ्युपेत्य तत्र वि- नियोगे वाक्यव्यापारे विषयतास्तीति सूचनार्था विषयतोक्तिः । क्रय- स्येत्यारुण्यव्यतिरेकजनिता षष्ठी । प्रकरणसमर्थितज्योतिष्टोमापूर्व- साधनार्थत्वेन श्रुतिव्यापारपर्यवसानाच्छ्रुत्यपेक्षितशेषिस्वरूपसम- र्पणमात्रे प्रकरणव्यापारसूचनार्थं ज्योतिष्टोमविशिष्टस्य क्रयस्य शे- षित्वाद्विशेषणीभूतस्य ज्योतिष्टोमस्यापि शेषितामभिप्रेत्य ज्योति- ष्टोमार्थत्वोक्तिरिति प्रकरणेन ज्योतिष्टोमिकस्य क्रयस्य शेष इति पू- र्वोक्तेनाविरोधः ॥

अर्थापत्त्या च बुध्यन्ते सम्बन्धास्त्रिः प्रमाणकम् ।

इतिवद्विनियोगे व्याप्रियमाणया श्रुत्या ऽपेक्षितस्य शेषित्वस्य वाक्ये- नापूर्वसाधनांशस्य च प्रकरणेन समर्पणाद्वाक्यप्रकरणयोर्विनियोजक- श्रुतिसहायत्वं विवक्षित्वा सर्वेषां विनियोजकत्वोक्तिः । प्रकरणेनापूर्व- साधनांशसमर्पणात्प्राक्श्रुतिव्यापारापर्यवसानायैवारुण्यस्य क्रिया- र्थत्वं श्रुत्येत्यनेनोक्तम् । एकविषयापहारलक्षणस्तु समवायो ऽरुणा- दावनाशङ्क्य एवेति दर्शयितुमाह *न चेति* वाक्यादिप्रमाणकविशे- ष्यान्वयग्रहणात् । श्रुत्यादिप्रमाणकशेष्यन्वयबाधकप्रसक्तौ सत्यां श्रुत्यादिना स्वप्रमेयशेष्यन्वयाबाधार्थम् एव वाक्यादिप्रमेयाच्छेषिणः शेषो ऽपह्रियेत तद्बाधप्रसक्त्यादर्शनेन त्वपहारप्राप्तीतैकविषया- पहारित्वलक्षणः समवायः सम्भवतीत्याशयः । ज्ञातस्य बाधस्यानि- वार्यत्वात् प्रसक्तो बाध्यतइत्यध्याहार्यम् एतदेव विवृणोति * न ही- ति * क्व तर्हि प्रमाणसमवायः सम्भवतीत्यपेक्षायां स चैकार्थे प्रमाणानामित्येतद्व्याख्यायोत्तरमाह *यत्र त्विति* एकस्याः एवास्या ८३७।
एवान्यूनाधिकाया ऐन्द्र्या लिङ्गेन गार्हपत्यादयः श्रुत्येन्द्रार्थत्वज्ञाना- च्छ्रुत्या चेन्द्रादपहृत्य गार्हपत्यार्थत्वज्ञानात् श्रुतिविषयो लिङ्गं सः प- रस्परेणापहार्यः समानं विषयो ययोस्ते तथोक्ते तयोर्भावस्तत्वं तल्लक्ष-

णमस्येति विग्रहः । विशेषाणां चावगम्यनइत्येतद्याचष्टे * तथेति *
एकस्मिन्नेव गार्हपत्ये शेषिणि तुल्योपस्थापनजन्योपकारनिबन्धन-
त्वाच्चान्यूनानधिकेन लिङ्गेनैन्द्रीतां गार्हपत्यमपहृत्याग्नेय्यास्तदुपकार-
साधनत्वेन शेषत्वप्रतीतेः श्रुत्या चाग्नेयीतो ऽपहृत्यैन्द्र्या शेषत्वप्रतीते
एकशेषिविषयापहारित्वाच्छ्रेयसोः समवाय इत्याशयः । तुल्य उपकारः
शेषान्वये निबन्धनमस्येत्याद्ये शेषविशेषणे द्वितीयेत्येकेन शेषेणोप-
कार साधितो ऽस्येति विग्रहः । श्राकार्थस्य विरोधग्रहणाकार्यत्वे
हेतुतामुपपादयितुमाह * न चेति * विरोधं विना नापहारः सम्भव-
तीत्याशयः । प्रमाणविषये शेषे शेषविषये च शेषिण्येकत्वविशेष-
णस्यान्यूनानतिरिक्तत्वविशेषणस्य च यथाक्रमं फलानि दर्शयितु-
माह * यत्र पुनरिति * शेषैकत्वविशेषणस्य समिद्यागादिषु शेषभे-
दे प्रमाणासमवाये निवृत्तफलत्वे ऽभिहिते कथं तर्ह्याग्नेयादिशेषि-
भेदे तद्यथा श्रुतिलिङ्गविरोधवार्त्तिके विनियोक्ता प्रमाणसमवायो
वक्ष्यतइत्याशङ्क्य भिन्नोपकारसाधनशेषभेदो ऽत्र विवक्षित इति सू-
चनार्था स्पष्टोक्तिस्तावन्मात्रत्वविशेषणफलं यत्र वा तस्येत्यनेनोक्तं
शेष्येकत्वविशेषस्याग्नेयादिशेषिभेदे समवायनिवृत्तिफलत्व तथेत्यने-
नोक्तम् । तुल्योपकारित्वनिबन्धनविशेषणफलोक्त्यर्थं यत्र शेष्यैक्ये
ऽपि शेषिगतमाधिक्यं यथा दर्शपूर्णमासयोरङ्गानामेकैकस्मिन्नाग्ने-
यादौ शेषिण्युपकार्यस्थेन शेषित्वात्प्रत्यङ्गं चोपकारभेदात्समिद्या-
गजन्यावान्तरोपकारोपकार्यत्वेनाग्नेयस्य समिद्यागशेषित्वात्तनूनपा-
द्यागजन्यावान्तरोपकारोपकार्यत्वेन तनूनपाद्यागशेषित्वेऽवमवान्तरो-
पकारनिबन्धनमाधिक्यं तच्छेषाणां शेष्याख्यविषयान्यत्वादसमवाय
इत्युक्तं यत्र शेषभेदो यत्र वा तस्यैव शेषस्य किञ्चिदाधिक्यं तत्र
प्रमाणानां शेषाख्यविषयत्वादन्यसमवायस्तथा यत्राशेषाणां शेष्या-
ख्यविषयान्वयादसमवाय इति प्रत्येकं तत्रेत्यस्यान्वयसूचनार्थो
ऽपिशब्दः एव सत्यपि विरोधविषयत्वाद् बलाबलचिन्ताया सा-
क्षाद्विरोधग्रहणमेव कस्मान्न कृतमित्याशङ्क्य विरोधे सत्यपि समवा-
याभावे प्रत्यक्षेण श्रुत्यादिना विनियोगे कृते ऽपि श्रुत्यनुमानमूलभू-
तानामाकाङ्क्षानिवृत्तभावेन श्रुत्यनुमानद्वारा लिङ्गादिजन्यविनियोग-
प्रतिबन्धायोगात् सर्वेषां तुल्यत्वापत्तेर्विरोधं विना बाध्यबाधकत्वायो-
गात् विरोधापादनद्वारा समवायस्यैव बाधहेतुत्वे ऽपि समवाय-
स्यैव बलाबलचिन्ताविषयत्वात्समवायग्रहणमेव कार्यमिति परिहारं
सूचयितुमाह * इतीति * समवाये सतीतिकरणार्थे समवायाभाव
श्च महिषवद्विरोधसम्भवे ऽप्येकेन इतरप्रतिबन्धायोगात् सर्वेषां तु-

स्यत्वापत्तेर्बलवद्बलत्वायोगादित्याशयः । समिद्यागादीनामङ्गानामव-
वान्तरोपकारभेदेऽपि परमोपकाराभेदेन भिन्नोपकारसाधनशेषभेदा-
भावात् प्रमाणसमवाय्येकपरमोपकार्यत्वेन चैकस्य शेषिणोऽभिन्नाप-
कारोपकार्यत्वनिबन्धनाधिक्याभावाच्छेषसमवाये सत्यपि विरोधा-
भावात् । समवायस्य विरोधव्यभिचारावगतेः कथं समवायग्रहणा-
द्विरोधशङ्कासिद्धिरित्याशङ्क्याह * यत्त्विति * फलं भावयेद्यागेनेत्थ-
मित्यपर्यायेण यौगपद्येनाङ्गानां परमोपकारे विधानात् श्रुत्यादीनां च
प्रत्येकविनियोजकतया यौगपद्येनानेकाङ्गविनियोजकत्वायोगात्
प्रयोगवाक्यस्यैव विनियोजकत्वावगतेस्तस्य च एकत्वेन शेषप्रमा-
णानां भेदाभावात् समवायस्य च भेदाधिष्ठानत्वात् असमवाय ।
शेषाभेदस्य च भिन्नोपकारसाधनत्वेनेह विवक्षितत्वात् परमोपका-
रापेक्षया च शेषाणां भिन्नोपकारसाधनत्वाभावात् असमवाय इत्यु-
क्ते प्रात्यात्मिकविध्यालोचनयाङ्गानां प्रत्येकमुपकारसाधनत्वावग-
मात्संहत्यैकोपकारसाधनत्वायोगमाशङ्क्य समिद्यागेन भावयेत् तनू-
नपाद्यागेन भावयेदिति प्रात्यात्मिकैर्विधिभिर्व्यापारभेदावगतेः प्रत्ये-
कं बुद्ध्या व्याप्रियमाणानां भृत्यादीनाम् एकस्मिन् छत्रजयाख्ये स्वा-
म्युपात्तानेकव्यापारसाध्ये संहत्य साधनत्ववदङ्गानां प्रात्यात्मिक-
भिन्नव्यापारद्वारा संहत्यैकोपकारस्य साधनत्वोपपत्तेः शेषत्वस्यैव
उपपत्तिसूचनार्था व्यापारभेदोक्तिः । एवमप्येकस्यैव प्रधानस्य
हविर्निर्मन्त्रादेः शेषस्यैकस्मिन्नेव पुरोडाशप्रथनादौ शेषिणि श्रुत्या
लिङ्गेन च विनियोगात् प्रमाणसमवायस्य विरोधव्यभिचारावगतेः
समवायग्रहणाद्विरोधासिद्धिरित्याशङ्क्य लिङ्गस्यैव तत्र प्रमाणश्रुते-
रर्थवादत्रिरभ्यासादिप्रयोजनान्तरार्थत्वात् न प्रमाणसमवाय इ-
त्याह * तथेति * न्यूनत्वशङ्कापरिहारम् उपसंहरति * तस्मादिति *
स्तोकशो बलाबलसम्प्रधारणस्य चिकीर्षितस्यौचित्योक्त्यर्थमनेका-
र्थेति भाष्यमनेकेषु अर्थेषु वाच्यवृत्तिदर्शनादेकार्थवृत्तित्वे
च द्वयोर्द्वयोः सम्प्रधारणायोगात् अयुक्तमाशङ्क्यैकार्थ-
वर्तित्वोक्तिः । एककालविषया सम्प्रधारणा चैकै-
कस्याभिप्रेतेत्येवं परिहर्तुमाह * तत्रेति * सूत्रे कृत्स्नशो बलाबलो-
क्तेर्भाष्ये स्तोकशः सम्प्रधारणस्यानौचित्यशङ्कानिरासार्थत्वं षण्णा-
मप्येकस्मिन्नेव काले बलाबलकथनीयत्वोक्त्या सूचितम् । एकैकस-
म्प्रधारणस्याभिप्रेतत्वे द्वयोक्तिरयुक्तेति आशङ्क्यैकैकस्य द्वितीयेन
सहेत्येवमर्थत्वेन द्वयोक्तिं व्याख्यातुमाह * यत्त्विति *
एकैकस्मिन् श्रुत्यादिरूपेऽर्थे बलाबलत्वाग्वर्त्तेत इत्येवमेकार्थवर्ति-

न्याद्धाच इत्येतावदन्यथा व्याचष्टे * एकार्थेति * एतदेवोपपादयति
* तानि हीति * बलाबलं प्रति श्रुत्यादीनां प्राधान्यात् प्रतिप्रधा-
नं बलाबलोक्तिरावर्त्तनीयेत्याशयः । एवमप्येकैकस्य पञ्चभिः सह
सम्प्रधारणीयत्वात् द्वयोक्तिरयुक्तेत्याशङ्क्याह * तत्रेति * श्रुत्या-
दिबाधितेन लिङ्गादिना बाध्यस्य वाक्यादेः वाक्यादिबाधकस्य लि-
ङ्गादेर्बाधकेन श्रुत्यादिनेत्यर्थः । एतदेव विवृणोति * यानि हीति *
तत्रेतिभाष्यं श्रुतिलिङ्गबलाबलसम्प्रधारणस्य प्राधान्योक्त्यर्थत्वेन
व्याचष्टे * तत्रेति * किंपुनरित्युदाहरणप्रश्नभाष्यम् अनेकोदाहरण-
प्रश्नभाष्यम् अनेकोदाहरणसद्भावात् अयुक्तमाशङ्क्य न किञ्चिदुदाहर-
णं सम्भवतीत्येवमाशयत्वेन व्याचष्टे * किमिति * केवलस्य पद-
स्य श्रवणसामर्थ्याभ्यां विनियोगादर्शनाच्छ्रुतिलिङ्गयोः स्वकीयस्य
विनियोगसामर्थ्यस्य वाक्यीयविनियोगसामर्थ्याद्विवेको न लक्ष्यत-
इत्यर्थः ऐन्द्र्येत्युत्तरभाष्ये विवेकहेत्वनभिधानादयुक्तमाशङ्क्याह
८३८।१ * वक्ष्यमाणेति * अत्रेति सन्देहभाष्यमाहाग्निर्लिङ्गमिति भाष्ये
लिङ्गबलीयस्त्वोक्त्यैन्द्र्यस्यैवेत्यपि नियमस्य उक्तत्वाद्यदि तु लिङ्गं ब-
लीय इत्यस्मिन्नुज्जीविष्यमाणत्वादथ नहि विरोध इति भाष्ये चोप-
पादयिष्यमाणत्वादविरोधात् कः खल्वपीतिभाष्येण समुच्चयस्यापि
वक्ष्यमाणत्वात् । चतुर्थसन्देहप्रतीतेर्न्यूनमाशङ्क्योपलक्षणार्थत्वेन व्या-
ख्यातुमाह *किमिति * यदीति सन्देहहेतुभाष्यमप्युपलक्षणार्थत्वेन
व्याख्यातुमाह *यदीति * एतद्धिकरणं श्रुतिबलेन मन्त्रस्य यथार्थ-
त्वाभिधानात् पौनरुक्त्यमाशङ्क्याह * यस्त्विति * का पुनरिति प्रश्न-
भाष्ये श्रुतेः ऐन्द्र्या गार्हपत्यमितिद्वितीयाविभक्तिर्लिङ्गं मन्त्रेषु व-
चनसामर्थ्यमिति प्रकरणाधिकरणोपक्रमभाष्ये स्वरूपस्योक्तत्वात्
अयुक्तमाशङ्क्य श्रुतिलिङ्गयोर्वाक्याद्विवेकाभावाश्रयत्वेन व्याचष्टे *
तेनैवेति * केवलपदप्रयोगाभावादिति वार्त्तिकोक्तेन सर्वेषु वाक्य-
त्वाशयेन श्रुतिलिङ्गरूपे ऽर्थे वाक्यत्वभ्रान्त्या पूर्वोक्तमपि स्वरूपं
पृच्छतीत्यर्थः । श्रुतिरित्युत्तरभाष्यं भ्रान्तिनिरासकविवेकानभिधा-
नादयुक्तमाशङ्क्य येन यत्तावच्छब्दस्येत्यादिभाष्ये वक्ष्यमाणविवेका-
भिप्रायेणोदाहरणाभावाशयस्य प्रश्नस्यैन्द्र्येतिभाष्येणोत्तरमुक्तं ते-
नैवाभिप्रायेणेदमप्युत्तरमित्याह * तदेति * प्रश्नशेषनिरासं वि-
नोत्तरत्वायोगात् । उत्तरोक्त्या तेनैवाभिप्रायेणेतिपदद्वयानुषङ्गस्ते-
नैवेत्यस्य च वक्ष्यमाणविवेकविषयत्वपरामर्शित्वं सूचितम् अथेति
प्रश्नभाष्यं वाक्यस्य श्रुतिलिङ्गाभ्यां विवेकाभावाशयत्वेन व्याचष्टे
* परः पुनरिति * संहत्येत्युत्तरभाष्याशयमाह * सिद्धान्तेति *

पदसमूहस्यैकवाच्याभावादयुक्तमाशङ्क्य द्वेधा व्याचष्टे * यद्यपीति * वाक्यार्थङ्गमयन्ती सतीत्याद्यव्याख्यानेन गमनमात्रलक्षणार्थो ऽभिदधाति द्वितीये त्वेकेन पदाभिहितैकगम्यमानेन वाक्यार्थेन पदसङ्घातस्य प्रयुक्तत्वात् सङ्घात पदार्थं स्वस्वपदार्थमभिदधति पदानि वाक्यमित्यर्थः । पदार्थाभिधानानपेक्षस्य पदसङ्घातस्य वाक्यार्थवाचितया उपसंहारस्य उपक्रमानुरोधवृत्तित्वेन वाक्यार्थव्याख्यासिद्धान्तभङ्गापत्तः । पदार्थाभिधानद्वारतोक्ता प्रश्नाशयविवरणार्थं यदित्यादिभाष्यं भाष्यं व्याचष्टे * तदिति * वेदे मन्त्रव्यतिरिक्तस्य शब्दस्य लिङ्गविनियोज्यत्वाभावात् प्रकरणोपक्रमे मन्त्रविनियोगहेतुलिङ्गस्वरूपप्रदर्शनार्थं मन्त्रेषु वचनसामर्थ्यमित्युक्तम् । कारकविभक्तिश्रुतेरेव च विनियोगहेतुत्वात्कारकविभक्त्युपलक्षणार्थद्वितीयाविभक्तेः श्रुतितोक्ता का पुनरत्र श्रुतिः । किं लिङ्गमित्यनेन त्वैन्द्र्युदाहरणे ऽत्र शब्देन श्रुतिलिङ्गयोः स्पृष्टयोरिन्द्रशब्दस्य देवताभिधानसामर्थ्यं लिङ्गमित्युक्तम् । गार्हपत्यं प्रातिपदिकान्वयं च विना विभक्तिमात्रात् गार्हपत्यप्राधान्याप्रतीतेः लिङ्गविरोधाभावेन बलाबलं विनोदाहरणत्वाप्रसङ्गात् गार्हपत्यश्रवणश्रुतितोक्ता इह पुनः श्रुतिलिङ्गवाक्यानाम् लक्षणतो विवेकार्थं सामर्थ्यमात्रस्य लिङ्गलक्षणत्वे ऽप्यर्थान्तरविषयत्वे लिङ्गस्य श्रुतिवाक्याभ्यां विवेकस्पष्टविषयत्वाच्छब्दविषयलिङ्गस्य श्रुतिवाक्याभ्यां विवेकार्थाभिधानसामर्थ्यलक्षणं यदर्थमभिधातुं सामर्थ्यं तच्छब्दस्य लिङ्गमिति वदतोक्तं विध्यभिधानश्रुत्या लिङ्गवाक्याभ्याम् अविवेकशङ्कायां तद्वदेव विनियोगश्रुतिरपि अविवेकापन्नपदार्थस्य स्वरूपेणान्वितत्वेनैकार्थत्वाभिधानेन तच्छ्रवणमितिकृत्वा श्रुतिरिति तच्छब्दाध्याहारेण श्रुतिमात्रलक्षणमुक्त्वा श्रोतृजन्यस्य श्रवणशब्दवाच्यत्वाप्रसिद्धेः शब्दजन्यार्थज्ञानाख्यस्याभिधानस्य श्रवणशब्दवाच्यत्वायोगात् पर्यायश्रुतिवाच्यता न युक्तेत्याशङ्क्य सो ऽर्थः श्रुत्यावगम्यतइति कृत्वा श्रुतिजन्यार्थावगमाख्यमभिधानं लक्षणया श्रुतित्वेन व्यपदिश्यतइत्युक्तं व्यवायार्थज्ञानस्यापि तर्हि शब्दश्रवणाख्यश्रुतिजन्यत्वाच्छ्रुतित्वापत्तिरित्याशङ्क्यापदार्थाभिधानानपेक्षाच्छब्दश्रवणाद्यो ऽर्थो गम्यते स एवानया श्रुत्या गम्यतइतिव्यपदिश्यते न तु पदार्थाभिधानद्वारा गम्यमानो वाक्यार्थ इत्युक्ते संहत्यार्थमित्यनेन तु वाक्यमात्रलक्षणस्यैवोक्तत्वात्सेद्धान्यलक्षणं वाच्यं इत्येकार्थमित्यनेनोक्तमित्येवं भाष्य व्याख्येयम् । तदेतदित्यादिना लिङ्गादित्यन्तं भाष्यं श्रुत्यादित्रयसङ्करनिरासार्थत्वेन व्याख्यातुं

शङ्कां नावदाह * सामर्थ्येति * एतदेव विवृणोति * तथा हीति * एतच्छङ्कानिरासार्थत्वेनार्थतो भाष्यं व्याचष्टे * सत्यमिति * यद्यपि ब्राह्मणे मन्त्रे च शक्तिरभिधानाख्या श्रुतिश्चास्ति तथाप्यैन्द्र्या गार्हपत्यस्य प्रकाशनोक्तिः कार्येति शक्त्या नावगम्यते इन्द्राङ्गत्वमनिश्चैन्द्र्या न श्रवणेनाभिधानद्वारा कृतेति श्रुतिलिङ्गयोः परस्परं विवेकः शक्यो वक्तुमित्याशयः । अभिधानद्वारत्वसूचनार्थम् * काम्नेत्युक्तम् * पूर्वार्द्धं व्याचष्टे * या हीति * ब्राह्मणपदस्थशक्त्यैन्द्र्यां गार्हपत्याङ्गतावगम्यते मन्त्रपदस्थया वेति विकल्प्याद्यपक्षे अन्यस्थया शक्त्यान्यविनियोगाद् ब्राह्मणपदस्थया शक्त्या नैन्द्रो मन्त्रो गार्हपत्याङ्गमवगम्यतइत्युक्ते ब्राह्मणपदानामेव तर्हि स्वया शक्त्या स्वेषु स्वेषु ऐन्द्रीत्यादिविनियोगसम्भवात् श्रुतित्वादभिमतेषु ब्राह्मणादिपदेष्वपि विनियोगहेतुशक्त्याख्यलिङ्गोपपत्तेर्न श्रुतेर्लिङ्गाद्विवेको ऽवगम्यतइत्याशङ्क्य लौकिकार्थविनियोगहेतुत्वे ऽपि तस्य लिङ्गस्य वैदिकविनियोगहेतुत्वाभावात् विवेकासिद्धिरिति परिहारसूचना * येनान्येवेत्युक्तम् * प्रतिपद शक्तिभेदे ऽपि सामान्याश्रयेनैकवचन गार्हपत्योक्तावशक्तस्यैन्द्रस्य मन्त्रस्य गार्हपत्ये ऽपि विनियोगान्मन्त्रपदस्थया शक्त्या मन्त्रपदस्थगार्हपत्याङ्गत्वं भविष्यतीति द्वितीयपक्षनिरासार्थं ब्राह्मणस्थैः पदैः मन्त्रपदस्थामशक्तिमिव शक्तिमप्यनपेक्ष्य स्वकीयैःसन्ततमत्वाद्युक्तिसामर्थ्यवशात् ईप्सिततमत्वादिषु प्रवृत्तेरैन्द्रस्य मन्त्रस्य गार्हपत्याङ्गमन्त्रत्वमभिधीयतइत्युक्ते कथमशाब्दस्य अङ्गत्वोपपत्तिरित्याशङ्क्य मन्त्रशक्तिग्रहणात्प्राक् स्वसामर्थ्यवशेनाङ्गत्वाभिधाने निष्पन्ने तदन्यथानुपपत्तिगम्यत्वेनाङ्गत्वाभिधानात्प्राक् शक्त्यग्रहणात् गृह्यमाणत्वरूपेण शक्त्यनपेक्षोक्तानां स्वरूपेणेति न चेत्यनेनोक्ते ऽनवगतापि विनियोगहेतुर्भविष्यतीत्याशङ्क्य ज्ञानस्यैव भावस्य परोक्षार्थज्ञापकत्वनियमाज्ञ ज्ञातायाः शक्तेरङ्गत्वाख्ये विनियोगे हेतुत्वोपपत्तिरित्याशयेन तेनेत्यनेन परिहृते विनियोगहेतुत्वाभावे कल्प्यमानानर्थक्यमाशङ्क्य कारकहेतुत्वात्कल्पनार्थवत्वे यद्यपीत्यादिना उक्ते शेषिज्ञापनेनैव मन्त्रस्याङ्गत्वादज्ञातशक्तिकस्य च ज्ञापकत्वायोगात् अङ्गिज्ञापकरूपे ऽङ्गत्वे कारकताप्ययुक्तेत्याशङ्क्य विनियोगवाक्यस्य पौरुषेयत्वे सति प्रमाणान्तराग्राह्यस्यार्थस्य स्वयमाक्षेपाशक्तेरङ्गत्वाभिधानात् । प्राक् विनियोज्यमन्त्रप्रयोक्तुः शेष्यभिधानशक्तिज्ञापनमपेक्ष्यं स्यात् वेदत्वेन त्वस्यापौरुषेयत्वात् स्वय प्रमाणान्तरावगतगौणशक्त्याक्षेपत्वोपपत्तेः म-

न्त्रप्रयोगकाले शक्तिज्ञानापेक्षायामपि विनियोगकाले ऽनपेक्षणात् युक्ता मद्भावमात्रेण शक्तेः कारकतेति यदि त्वित्यनेन सूचयित्वा पूर्वार्द्धोक्तश्रुतेर्लिङ्गादिविवेकस्तस्मादित्यनेनोपसंहृतः। अङ्गत्वज्ञापनाख्यविनियोगविषयत्वेनाङ्गत्वं लक्षणया विनियोगत्वेनाभिप्रेत्य विनियोगस्याभिधेयत्वोक्ति. लिङ्गस्य श्रुतितो विवेकार्थम् उत्तरार्द्धं व्याचष्टे * कदेति * इन्द्राभिधानशक्त्यालोचनात् मन्त्रस्येन्द्राङ्गत्वशक्तिज्ञाने सत्यङ्गत्वं कस्मान्नाभिधीयतइत्याशङ्क्य मन्त्राङ्गत्वस्य सिद्ध्यर्थासौ शक्तिर्नाङ्गित्वाभिधानसिद्ध्यर्थेति कृत्वाभिधानतया मन्त्रस्याङ्गत्वाभिधायिना युक्तेति परिहारसूचनार्थं न चेत्युक्तत्वाभ्युपगम्याङ्गत्वाभिधान विधिं विना विहितस्यापि अङ्गस्य सत्कादिवदनादरणीयत्वात् मन्त्रस्य चाभिधायकत्वेनाभिधानश्रुत्येन्द्रस्य मन्त्रस्येन्द्राङ्गत्वसिद्धिरिति न विहिता इत्यनेनोक्ते ब्राह्मणे ऽप्यङ्गत्वविधानस्य प्रागनुक्तत्वात् कस्य चिदभावस्य शङ्कां निराकर्तुम् * ब्राह्मणे त्वित्युक्तम् * यथा ब्राह्मणेऽभिधानान्यथानुपपत्तिगम्यत्वेनाभिधानात् पश्चाच्छक्तेर्ज्ञानाद्विनियोगहेतुत्वायोगेनाभिधानस्यैव प्राथम्याद्विनियोगहेतुत्वं तथा मन्त्रे ऽप्यभिधानस्यैव प्राथम्याद्विनियोगहेतुत्वापत्तेर्न लिङ्गस्य श्रुतितो विवेकः शक्यो ऽवगतुमित्याशङ्कते * ननु चेति * इन्द्रस्वरूपमात्रस्याभिधानमिति विवेकहेतुमाह * सत्यमिति * विनियोगानभिधाने विनियोगशक्तेः कल्पकाभावेनासिद्धेः। स्वरूपाभिधानशक्तेश्चाभिधानमात्रहेतुत्वेन विनियोगहेतुत्वाभावात् न शक्त्येन्द्राङ्गत्वसिद्धिरित्याशङ्क्याह * अन्यैव चेति * स्वरूपाभिधानान्यथानुपपत्त्या तच्छक्तौ कल्पितायां स्वरूपाभिधानशक्तिबलेन विनियोगयोग्यत्वाख्या शक्तिःकल्प्यते ततश्च विनियोक्तुं शक्यत्वात् कल्पितया श्रुत्या विनियुज्यतइत्याशयः। पाकादौ शक्तस्यापि देवदत्तादेर्विनियोक्तारमननुविदधानस्य विनियोक्तुमशक्यत्वदर्शनाद्यो यत्कर्तुं शक्तस्स तत्र विनियोक्तुं शक्य इति नियमानुपपत्तेः कथमभिधानशक्त्या विनियोक्तुं शक्यत्वं कल्प्यतइत्याशङ्कां प्रश्नपूर्वं निरस्यति * कथमिति * असौ शक्तो न ह्यशक्त इति कर्मोत्पन्ननिष्ठान्ताभ्यां शक्यत्वाशक्यत्वोक्तेः प्रकरणाम्नातस्य मन्त्रस्य प्रकरण्यङ्गत्वे ऽवगते कथं तस्योपकरिष्यतीत्यपेक्षायां शक्त्यालोचनया अनेन मन्त्रेणेन्द्रमभिदध्यादिति विनियोजकश्रुतिकल्पनादवश्यविनियोज्यत्वावगतेः विनियोक्तुमशक्याभिधानशक्तिकल्पितयापि श्रुत्युक्तिविनियोज्यत्वायोगात् अभिधानशक्त्या विनियोज्यत्वे शक्य इत्यर्थः। श्लोकव्याख्यानाय शक्तश्चेत्र विनियु-

ज्यते मा विनियोजि न ह्यवश्यविनियोज्यता केन चिदवगतेत्याशङ्क्याभिधानशक्त्यैव श्रुतिकल्पनाद्वारा ऽवश्यविनियोज्यतावगतेतिसूचयितुमाह * ततश्चेति * हेतौ चशब्द ततो ऽभिधानत्वाच्छ्रुतिकल्पनाद्वारा यो विनियोगो ऽभिमत: सद्वितीयाद्विनियोक्तुं शक्यत्वरूपात् सामर्थ्यात्कल्पयिष्यत उपपादयिष्यत इत्येतदर्थमभिधानशक्तिबलेनाविनियोक्तु शक्यत्वं कल्प्यतइति क्रियार्थायां क्रियायाम् उपपदस्मृतेन लृट्प्रत्ययेन विनियोगशक्ति कल्प्यतइत्युपपदार्थीकृतविनियोक्तुं शक्यत्वकल्पनक्रियया कल्पयिष्यत इति क्लृप्तसामर्थ्यं वाचककल्पयत्युक्तोपपादनक्रियार्थत्वाभिधानार्थं. अभिधानशक्तिमात्रात् विनियागोपपत्तेर्विनियोक्तुमशक्यत्वकल्पना न कथितेत्याशङ्क्य न प्रथमसामर्थ्यमात्रात् विनियोगोपपत्तिरित्याह * नेति * एतदेवोपपादयति * प्रथमेन हीति * पूर्वेणावगतो ऽपि विनियोगो द्वितीयं विना न निर्वहतीत्याशय: । श्रुतिलिङ्गयोर्विवेकमुक्तं स्पष्टयति * अत इहेति * श्रुतौ जातत्वरूपेणास्त्येव सामर्थ्यं मन्त्रस्याङ्गतोच्यते लिङ्गे त्वनुक्ताङ्गत्वसामर्थ्यमात्रं प्रतीयते इत्यर्थ: । श्लोकं व्याचष्टे

'४१।१ * अविद्यमानमवाति * ज्ञानत्वरूपेणाविद्यमानमेवाभिहितस्याङ्गत्व विधानात् कल्प्यमित्यर्थ: । तदेतदित्यस्य श्रुत्यादित्रयपरामर्शित्वसूचनार्थं सामर्थ्यपूर्वकत्वादित्यादिवार्त्तिकेनाशङ्कितमपि श्रुतिलिङ्गाभ्यां वाक्यस्याविवेकं निरस्यति * वाक्ये पुनरिति * सर्वेष्वेवेति भाष्यात् श्रुतिलिङ्गविरोधोदाहरणं श्रुत्यादित्रयविवेककथनस्य सर्ववाक्येषु विवेकज्ञानार्थत्वावगतेर्वाक्यप्रकरणादिविरोधोदाहरणेषु प्रकरणादिविवेको ऽपि कस्मात् भाष्ये न पृष्ट: कथितो वेत्याशङ्क्याह * कथं भावेति * तदाचष्टइत्यस्मिन्नर्थे विवेचिते इति णिन्प्रत्यययोगेन कथित इति वाच्ये प्रत्ययानुग्रहार्थो धातु: व्याख्याते ऽर्थे श्रुत्यादित्रयशङ्कानिरासप्रतिज्ञानार्थं तदिति भाष्यावयवं योजयति * तदिति * लिङ्गाच्छ्रुतिविवेकोपपादनार्थं न त्वेवमिति भाष्यावयवं योजयति * गार्हपत्ये पुनरिति * का पुनरत्र श्रुतिरित्यादिभाष्येण श्रुत्यादिविवेकोक्ते: । ऐन्द्र्युदाहरणे श्रुतिलिङ्गविरोधोपपादनार्थत्वसूचनार्थत्वेन यदि त्विति भाष्यं व्याख्यातुमाह * इतीति * यद्येवमित्यादिभाष्ये चोभयोर्वाक्यत्वात् श्रुतिलिङ्गविरोधोदाहरणत्वायोगे शङ्कितेनैव श्रवणात् गम्यते नापि शब्दान्तरस्य समीपे उच्चारितसामर्थ्यमप्यस्ति येनैतत् गम्यतेत्यनेनैन्द्रीत्वस्य वाक्यीयस्य श्रौतत्वनिरासे ऽपि न त्वेवमस्यामृचि सामर्थ्यमालोच्यैव वाक्यात् ऐन्द्र्या गार्हपत्योपस्थानं भवतीति अनेन गार्हपत्याङ्गत्वस्य लै-

ङ्गिकत्वनिरासे ऽपि वाक्यीयत्वानिरासात् वाक्यीयत्वाभ्युपगमे प्रतीते यथा गार्हपत्यशब्दमात्रात् गार्हपत्यप्राथम्यप्रतीतावपि ऐन्द्रत्वस्य वाक्याधीनत्वादैन्द्रीवाक्ये वाक्यस्य विनियोजकताऽभ्युपगम्यते तथेन्द्रशब्दमात्रस्य लिङ्गादिन्द्राङ्गत्वप्रतीतावपि शेषाणां मन्त्रपदानाम् इन्द्राङ्गत्वस्य वाक्याधीनत्वात् केवलस्य च पदस्याप्रयोज्यत्वेनाविनियोजकत्वात् मन्त्रे ऽपि वाक्यस्य विनियोजकताऽभ्युपगन्तव्येत्याशङ्कोत्थानादथ वेति भाष्येणाभयत्र वाक्यस्य विनियोजकत्वे निरस्ते मन्त्रे केवलस्य पदस्याभिधानाशक्यत्वे ऽनिराकाङ्क्षीकरणसमर्थपदान्तरान्वयं विना सम्पूर्णव्यवहारानङ्गत्वेनाप्रयोज्यतया विनियोक्तुमशक्यत्वात् इन्द्राभिधानशक्तेन्द्रपदैकवाक्यत्वाच्चावशिष्टानामपि पदानां विशेषणाभिधानद्वारेन्द्रप्रकाशनशक्त्युपपत्तेः पदमात्रे च लैङ्गिकविनियोगस्य पर्यवसानाभ्युपगमे लिङ्गविरोधाद्वाक्येन कृत्स्नमन्त्रविनियोगापत्तेरिन्द्रपदसामर्थ्येन कृत्स्नमन्त्रविनियोगाय पदान्तराणाम् इन्द्रविशेषणाभिधानसामर्थ्यसम्पादनमात्रे वाक्यव्यापारावगमात् लिङ्गेनैव कृत्स्नमन्त्रविनियोगसिद्धेर्न वाक्यस्य विनियोजकतेतीन्द्रशब्दवत् कृत्स्नस्य मन्त्रस्येन्द्रप्राधान्यमिति भाष्येणोपपादितत्वात् लिङ्गत्वमभ्युपगम्य ब्राह्मणवाक्यस्य विनियोजकत्वनिरासयुक्त्यनभिधानादेव तर्हि लिङ्गवाक्ये इति भाष्येण पुनः प्रत्यवस्थानमिति व्युत्क्रमेण परेषां भाष्यव्याख्यां दूषयितुम् उपन्यस्यति * अत्रेति * प्रश्नपूर्वकमपकर्षहेतुमाह * कुत इति * शङ्कावादिनैव तर्हि लिङ्गवाक्ये इति लिङ्गशब्देनेन्द्रोपस्थानकस्य प्रमाणस्य लिङ्गत्वाभ्युपगमात् पुनर्वाक्यत्वाभिधानाशक्तेस्तं निरासार्थम् अथ वेति भाष्यमेवं नर्हि त्यतःपश्चादसम्बन्धमित्याशयः। क तर्हि अथ वेत्ययं ग्रन्थो योजनीय इत्यपेक्षायां यत्र यद्येवमिति भाष्ये द्वयोर्वाक्यत्वं शङ्क्यते तत्रैव तदभिधीयतइत्यादिना ततो गार्हपत्येन द्वयोर्वाक्यत्वसम्भवे ऽपि श्रुतिलिङ्गयोस्तावदन्योन्यविवेको ऽस्तीत्युक्ते वाक्याद्विवेकोक्तये ऽथ वेत्यनेनैकवाक्यत्वव्यापारनिरासो च कल्प्यते इत्यभिधानपूर्वकं श्लोकं व्याचष्टे * यत्रेति * ८४२।१
दूषयति * न त्विति * यद्येवमिति भाष्येण श्रुतिलिङ्गयोर्वाक्यत्वोक्त्या वाक्यादविवेकं शङ्कित्वा श्रुतिलिङ्गवाक्यानि विवेक्तव्यानीति अनेन द्वितीयासामर्थ्यात् गार्हपत्यप्राधान्यप्रतीते श्रुते लिङ्गत्वेन लिङ्गाद्विवेक मन्त्रेन्द्राभिधानात् इन्द्रप्राधान्यात् इन्द्रप्रतीते लिङ्गस्य श्रुतित्वेन श्रुतेरविवेकः वाक्यं चर्ग्वेद एवाग्नेरजायतेत्यादिभिरुपक्रमस्थैः पदैर्वेदाभिधानादुच्चैर्ऋचेत्यादीनां चोपसंहारस्थानाम् ऋगादिशब्दानां

वेदाभिधानसामर्थ्यात् उच्चैस्त्वादीनां वेदधर्मत्वप्रतीतेर्वाक्यस्य श्रुतिलिङ्गाभ्याम्। अविवेक इति शङ्कात्रयसूचनाच्छङ्काचतुष्टयमध्ये कदाचनस्तरीत्यनेन मन्त्रेणेत्यादिभाष्येण लिङ्गश्रुतिवाक्याभ्यां विवेकाभिधानात् तृतीयाशङ्कालिङ्गांशे चाद्यां परिहृत्य नत्वेवमित्यादिना श्रुतेर्लिङ्गात् विवेकाभिधानात् द्वितीयां परिहृत्य वाक्यस्य श्रुतिलिङ्गाभ्यामविवेक इत्यनिष्टापादनं कृत्वा तदेतत्सर्वेष्वेव समवेतं विविक्तं च दृश्यतइति प्रतिज्ञामात्रेण निरासासिद्धेस्तत्परिहारमुपपाद्य तत्परिहारकाले ऽपि लिङ्गयोर्वाक्यादविवेक इत्याद्यशङ्कां लिङ्गांशेनापि शब्दान्तरस्य समीपे उच्चरितस्य सामर्थ्यमस्तीत्यनेन परिहृतत्वादुपेक्ष्यैवं तर्हीत्यनेन श्रुत्यंशे ऽनुभाष्य नैतदेवमित्यनेन श्रुतेर्वाक्यादविवेके ऽपि श्रुतेरेव लिङ्गविरोधेन वाक्यस्येत्यपि विवेकाभ्युपगमेन परिहारे दत्ते लिङ्गस्यापि तर्हि वाक्यादविवेकाभ्युपगमापत्तेः कृत्स्नस्य मन्त्रस्य श्रुत्या गार्हपत्ये विनियोगात् कृत्स्नस्य मन्त्रस्यैन्द्रे विनियोजकेन वाक्येन विनैव श्रुतेर्विरोधप्रतीतेः पदमात्रविनियोजकेन लिङ्गेन विरोधाभावात् श्रुतिवाक्ययोरसम्प्रधारणापत्तेर्न श्रुतिलिङ्गविरोधोदाहरणता युक्तेति लिङ्गांशे वाक्यत्वादाशङ्कापरिहारार्थत्वाशङ्काया नापि शब्दान्तरइत्यनेन परिहृताया अपि श्रुतिदृष्टान्तेन पुनरुज्जीवनमाशङ्क्याथ वेत्यनेनोभयोर्वाक्याद्विवेकाभिधानात्परिहारः सम्भवतीत्याशयः। एतच्चाथवेत्यस्याद्यशङ्कापरिहारार्थादादौ निवेशो युक्त इत्यपकर्षेणाद्याशयमापाद्योक्तं प्राक्, अथ वेत्यनेनोभयोर्वाक्यत्वे निरस्ते श्रुतेर्वाक्यत्वशङ्कानुत्थानात् एवं तर्हीत्यत्र वाक्यशब्दो न युज्यतेत्याह * अपि चेति * अपकर्षाद्युक्तम् अपकर्षकारणं त्रेधा निरस्यति अत यो देवताविशेषं वक्तुं शक्नोति इन्द्रशब्दः सो ऽस्यामृचि विद्यते कर्मसमवेतत्वात् चैन्द्रशब्दोक्तया देवतया प्रयोजनमस्तीति एवशास्त्यालोचनमात्रेण सा उपस्थातव्या इत्येवं गम्यते न त्विन्द्रशब्दश्रवणमात्राच्छब्दान्तरसमीपाद्वेत्युक्ते कथं मिन्द्रशब्दशक्तिमात्रात् कृत्स्नस्य मन्त्रस्यैन्द्राङ्गत्वावगतिरित्याशङ्क्य येन कारणेनेन्द्राभिधायकः शब्दो ऽस्मिन् मन्त्रे प्रयुज्यते तदेकवाक्यत्वेन चावशिष्टानि पदानि प्रयुज्यन्ते तेन कारणेन कृत्स्नस्य मन्त्रस्यैन्द्राङ्गतावगम्यते इति शक्त्येकवाक्यत्वाभ्यां मन्त्रस्यैन्द्रागतावगमाभिधानात् वाक्यसङ्कीर्त्तनमेव लिङ्गं श्रुतिलिङ्गविरोधाभिधायिनो ऽभिमत इति मन्यमानेनाक्षेप्ता यद्येव विधं लिङ्गं तवाभिमतं तथापि लिङ्गवाक्यविरोधापत्तेः श्रुतिविरोधोदाहरणता न युक्तेत्यभ्युपेत्यवादमात्रेण लिङ्गत्वस्योक्तत्वात् आक्षेप्तुर्वाक्यत्वा-

भिप्रायस्य नापिशब्दान्तरस्य समीपे उच्चरितस्य सामर्थ्यमस्ती-
त्यनेन केवलस्य वाक्यस्य विनियोजकत्वं निरस्यतापनीतस्यापि
लिङ्गसहितं वाक्यं विनियोजकं भविष्यतीति शेषमपनेतुमथ वेत्य-
नेन उभयत्र वाक्यस्य निरासो युज्यते यद्वा श्रुतेरेव केवलया वा-
क्यात् विवेकायैन्द्रीवाक्यस्थस्यैवैकवाक्यत्वस्य विनियोग प्रत्यकार-
णता विवक्षिता न मन्त्रस्थस्य दृष्टान्तार्थं तु मन्त्रस्थस्यैकवाक्यत्वस्य
कारणत्वं पूर्वोक्तमेव प्रसङ्गात् स्मारितमित्येवं यथान्यासमेव स्थि-
ते ग्रन्थसन्दर्भे व्याख्यानं कार्यमिति भावे कृत्योत्पत्तेरर्थः स्वमनेन
यथान्यासमेव व्याख्यातुमेवं तर्हीति भाष्यस्य वाक्यं ह्येतदित्यवयवं
ऐन्द्र्याः कंचिदुपस्थानार्हपदार्थं प्रति तृतीयाङ्गत्वप्रतीतेर्गार्हपत्यस्य
च कं चिन्मन्त्रं प्रति द्वितीययाङ्गत्वप्रतीतेर्वाक्यत्वे सत्यपि श्रुतेरपि
विनियोजकत्वासम्भवेन श्रुतिलिङ्गविरोधसम्भवादयुक्तमाशङ्कोप-
पादयति * तत्रेति * श्रुतेर्वाक्यात् विवेकाभावे ऽपि श्रुतेरेवात्र
लिङ्गविरोधो न वाक्यस्येत्याशङ्कापरिहारार्थं नैतदिति भाष्यमैन्द्र्या-
रुणादिवाक्ये श्रुत्या क्रियामात्रे वाक्येन क्रियाविशेषे प्रकरणेन प्राक-
रणिके विनियोगं इत्येवं वादिमते ऽथ वेत्यस्य वाक्यव्यापारनिरा-
मार्थत्वायोगात् भाष्यद्वये ऽपि श्रुतिविरोधमात्रोक्तेः पौनरुक्त्यमाशङ्क्य
.तिपादकेश्रुतिविरोधोक्त्यर्थत्वेन व्याचष्टे * नैतदिति * गार्हपत्यशब्द-
स्य यौगिकत्वात् गौणत्वाद्वेन्द्रार्थत्वाभावे ऽपि द्वितीयाया. सप्तम्यर्थ-
वृत्त्या गार्हपत्यसमीपे तिष्ठन्निन्द्रमुपतिष्ठेतेत्यैन्द्र्या विरोधो भविष्य-
तीत्याशङ्क्य विभक्तिश्रुत्यनुग्रहीतया प्रातिपदिकश्रुतेर्विरोधोक्त्यर्थम-
ग्निसमीपं चेति भाष्यावयवं व्याख्यातुम अग्निसमीपं वा लक्षयेदित्यु-
क्तम । समुदायप्रसिद्धिपरित्यागोक्त्या गौणत्वसामीप्ये लक्षणयो-
र्निरासः । अथ वेतिभाष्ये प्रतिपदिकश्रुत्यनुगृहीतविभक्तिविरोधो-
क्त्यर्थत्वेन व्याचष्टे * अथ वेति * श्रुतिविरोधयोः प्रातिपदिकविभ ८४३।५
क्तिभेदादपौनरुक्त्ये ऽपि लिङ्गविरोधस्य नापि शब्दान्तरस्य समी-
पे रुच्चरितस्य इत्यनेन मन्त्रे वाक्यस्य विनियोजकत्वनिरासेनोक्त-
त्वात् श्रुतिवच्च लिङ्गवैलक्षण्यानुपलम्भाश्चैकवाक्यत्वादिन्द्रप्राधान्यं
किं तु इन्द्रशब्दवत्वात् मन्त्रस्येति लिङ्गस्यैव श्रुत्या विरोधो न वा-
क्यस्येति लिङ्गविरोधोक्तेः कथमपौनरुक्त्यम इत्याशङ्क्य नापीत्यनेन
केवलस्य वाक्यस्य विनियोजकत्वे निरस्ते ऽपीन्द्रशब्दस्य लिङ्गेनाव-
शिष्टानां च पदानां वाक्येन विनियोगात् लिङ्गसहितस्य वाक्यस्य
कृत्स्नविनियोजकत्वावगतेः पदमात्रविनियोजकत्वेन च लिङ्गस्य
कृत्स्नमन्त्राविनियोजकतया श्रुत्या विरोधाभावात् वाक्यस्यैव श्रुत्या

विरोध इत्येवं वाक्यत्वविषयदीर्घत्वपदोषापनयार्थं केवलस्य सम्पूर्णव्यवहारानङ्गत्वेनाप्रयोज्यतया विनियोगानर्हत्वात् इन्द्रविशेषणोक्तिद्वारा चावशिष्टानामपि पदानामिन्द्राक्तिशक्त्युपपत्तेः श्रुतिवाक्याभ्यां सामान्यविशेषविनियोगवञ्च पदमात्रकृत्स्नमन्त्रविनियोगयोरन्योन्योपकारित्वाभावेन विरोधाल्लिङ्गविरोधिवाक्येन स्योनादिमन्त्रवत् कृत्स्नमन्त्रविनियोगायोगात् लिङ्गविनियोगापेक्षितपदान्तराणामिन्द्रविशेषणोक्तिसामर्थ्यस्य सम्पादनमात्रे वाक्यस्य व्यापारो न विनियोग इत्येवम् । एकवाक्यत्वस्य विनियोगव्यापारनिरासमात्रार्थं नैकवाक्यत्वात् इन्द्रप्राधान्यमित्युक्तमित्येवं परिहरति * लिङ्गेति * श्रुतिवाक्ययोर्द्वयोरपि अत्र विनियोजकताभ्युपगमे श्रुत्यनपेक्षस्य वाक्यस्य लिङ्गाविरोधाद्वाक्यानपेक्षाया श्रुतेरपि ऐन्द्र्यास्तृतीयाश्रुत्येत्यादिवार्त्तिकोक्तन्यायेनाविरोधात् श्रुतेरेव विरोधो न वाक्यस्येति परिहारो न युक्त इत्याशङ्क्याक्षिपति * कथं पुनरिति * आक्षेपनिरासोक्तेरेतत्परिहारार्थत्वेन भाष्यव्याख्यानापरितोषात्स्वमतेनाप्यथ वेति भाष्यस्य मन्त्रवद्ब्राह्मणे ऽपि एकवाक्यत्वस्य विनियोगव्यापारनिरासार्थत्वेन व्याख्यासूचनार्थं विरोधे शीघ्रप्रवृत्तया श्रुत्या लिङ्गादिकल्प्यश्रुतिप्रतिबन्धनदविरोधे ऽपि क्रियासामान्यस्य विरोधित्वेन साक्षात्परम्परया वा पुरुषार्थाननुबन्धितया शेषित्वाद्धात्वर्थानवच्छिन्नभावनाश्रयत्वेनासामान्योक्तेः सस्थाधिकरणभाष्ये धात्वर्थानवच्छिन्नाया भावनाया धर्मान्वयस्य निराकरिष्यमाणत्वेन दोषत्वात् । महत्वात्सामान्ये वा विनियोगायोगेन क्रियाविशेषे ऽङ्गविनियोगं विना तृतीयाश्रुत्यपर्यवसानात् विधेश्च स्वविषयस्य साक्षात्स्वत' समीहिताङ्गत्वे समीहित विशेषणसमर्पणद्वारा द्वितीयायाः प्रकृत्यर्थे ऽङ्गविनियोजकत्वस्याप्तोक्तविधिविहितस्यैवाङ्गस्य द्वितीयाविनियोज्यत्वावगतेरङ्गमात्रविनियोगे पर्यवसानायोगादक्षरश्रवणक्रम एवाय गार्हपत्याङ्गप्रत्यय इति वार्त्तिकाच्च विशेषविनियोगएवश्रुतिपर्यवसानावगतेरैन्द्र्या गार्हपत्याङ्गत्वबोधाख्ये विनियोगे शीघ्रप्रवृत्तया श्रुत्या वाक्यकल्प्यश्रुतिप्रतिबन्धाद्विनियोगव्यापारानुपपत्तेर्न वाक्यलिङ्गविरोध इत्येवं परिहरति * उच्यत इति * कल्प्यश्रुतिप्रतिबन्धसूचनार्था दृष्टान्तोक्तिः । सैव प्रवर्त्तत इति । एवकारेण वाक्यप्रवृत्तिं निरस्तामुपपादयितुं श्रुतिकल्पनप्रतिबन्धोक्तौ पूर्वप्रवृत्त्युक्तिः श्रुतेः शीघ्रं प्रवृत्तावपि सामान्यविषयत्वादविरोधे वाक्यप्रवृत्तेश्च निरासाद्वाक्यविरोधमाशङ्क्य श्रुतिलिङ्गविरोधवाक्ये चाविरोधं वक्तुं

विषयत्वं सूचयितुमाह * यद्येति * विशेषविषयत्वं विना प्रतियो-
गित्वायोगात् प्रतियोग्युक्त्या विशेषविषयत्वं सूचितं परिहारा-
शयाज्ञानाच्छङ्कते * ननु चेति * तृतीयया गार्हपत्यमेव प्रत्यैन्द्र्याः
शेषत्वोक्तेर्द्वितीयया चैन्द्रीमेव प्रति गार्हपत्यशेषित्वोक्तेः श्रुत्यैव विशेष-
विनियोगकृतवाक्यस्य विनियोजकत्वायोगात् विशेषविनियोगप्रवृत्त्या-
श्रुत्यपेक्षितविशेषणविशेषान्वयमात्रार्थत्वावगतेश्श्रुतेरेव लिङ्गविरोधेन
वाक्यस्येति स्वाभिमतपरिहाराशयाविवरणेनाशङ्कां निरस्यति *कथमि-
ति* एकश्रुतिकृतो ऽन्यो वाक्यकृत इत्येवं प्रत्येक व्यवस्थितेनाङ्गाङ्गय-
न्वयस्य वाक्यकृतत्वाभावाद्वाक्यस्य लिङ्गविरोधाभावे ऽपि श्रुतिकृ-
तस्य सामान्यतो ऽङ्गाङ्गयन्वयस्य कथं विरोध इत्याशङ्क्य विशेषित
एवाङ्गाङ्गयन्वय श्रुत्या क्रियतइति सूचयितुम् * तत्रेत्युक्तम् *
निष्प्रातिद्वद्न्व्युक्त्या वाक्यस्याङ्गाङ्गयन्वये व्यापाराभावः स्पष्टीकृतः
क्रीणात्यरुणयेत्यत्र समवायो हि सत्यपीत्यादेस्तु परमते स्थित्वो-
क्तत्वादिह चारुण्यस्य क्रियासम्बन्धः श्रुत्येत्यादिश्चेतद्ग्रन्थानुसारे-
णैव व्याख्यातत्वान्न पूर्वापरवार्त्तिकविरोधः । तद्भाष्योक्तं द्वितीया-
श्रुतेर्लिङ्गविरोधमुपपाद्य विध्यानर्थक्यपरिहारायैवेन्द्रव्यतिरिक्ताङ्ग-
त्वस्यैन्द्र्या. कल्प्यत्वनाख्यातान्वयाधीनत्वात् वाक्यानपेक्षायास्तृ-
तीयाश्रुतिरपि लिङ्गविरोधायोगात्। स्वानभिमतमपि तृतीयाश्रुतेर्लिङ्ग-
विरोधं प्रौढिप्रदर्शनायाह * अथ वेति * श्रुतिलिङ्गविरोधोपसं-
हारार्थं तस्मादिति भाष्यं व्याचष्टे * तस्मादिति * श्रुतिलिङ्गवि- ८४४।१
रोधोपपादनस्य सूत्रोक्तसमवायोपपादनार्थत्वं सूचयितु श्रुतिलिङ्ग
विरोधोपपादनभाष्यं व्याख्याय भाष्ये शेषव्याख्यानात् प्राक् सूत्रं
व्याख्यातु पूर्वपक्षं तावदाह * किं तावदिति * श्रुत्याद्यनुमान-
द्वारा लिङ्गादीनां प्रामाण्यात्प्रत्यक्षादिविरोधं च लिङ्गादिभिः श्रु-
त्यादे. प्रत्यक्षश्रुतिविरुद्धयात्येवश्रुतेः कल्पयितुमशक्यत्वात् कथं
तुल्यबलतेत्याशयेन प्रश्नपूर्वमुपपादयति * कुत इति * स्वशक्ते-
रित्यनेन स्वतः प्रामाण्यात्स्मृतिवैरूप्यं सूचितम् । स्वतः प्रामाण्य-
स्यापि न क्वचिद्बाधात् अप्रामाण्यं प्रत्यक्षादिवद्भविष्यतीत्याशङ्क्याह
* सर्वत्रेति * प्रत्यक्षादावपि किञ्चित्प्रमाणमेव किञ्चिच्च प्रमाणा-
भास एवेति नियतैकरूपप्रकारद्वयातिरिक्ताद्वैरूप्यलक्षणप्रकारान्त-
राभावात् प्रमाणस्याभासता । आभासस्य वा प्रमाणता नास्तीत्युक्ते
स्वतो ऽन्यथात्वाभावे ऽपि वाक्यात्प्रमाणस्य प्रामाण्यं भविष्यती-
त्याशङ्क्य बाधकलक्षणत्वात्प्रामाण्यस्य न कदाचित्प्रमाणस्य बाधो
बाध्यस्य वा प्रमाणतेत्युक्ता अपि तर्हि प्रमाणाभासा एव बाधिष्य-

न त्वागङ्का प्रत्यक्षस्येन्द्रियसन्निकर्षार्थविषयत्वात् इन्द्रियार्थ
कृष्टार्थविषयसञ्चारे ऽनुमानस्य व्यापकविषयत्वादव्यापकवि
यत्वादव्यापकविषयसञ्चारे प्रमाणाभासतेति एवं सर्वेषां वि
यान्तरहेतुत्वात् प्रमाणाभासत्वस्य श्रुत्यादीनां चाभिधेयात्
कयादेर्वचनादिनिकर्षव्यनाकाङ्क्षसमीपाम्नातात्समानदेशात्समाख्या
नात् स्वविषयाद्विषयान्तरसञ्चाराभावेन प्रमाणाभासत्वं न
स्तीत्युक्तम् । न चानुत्पत्तिविनाशसंस्कारोच्छेदे फलापहार
णां बाधप्रकाराणां मध्ये कश्चिदत्र सम्भवतीत्याह *
चेन * बाध्यत्वाभिमते विज्ञाने स्मृत्याख्यकार्यदर्शनेन
नुच्छेदोपपादनार्थं स्मृतिहेतुतोक्ता तुल्यबलत्वं पूर्वपक्षं सप्रयोजन
मुपसंहरति * तस्मादिति * बलाबले वैपरीत्यपूर्वपक्षान्तरमाह ,
यद्यपि त्विति * श्रुत्यादिकल्पनाद्वारापि लिङ्गादीनां प्रामाण्यविरोधे
ऽपि स्मृतिवक्रान्त्यादिचतुष्टयान्यतरमूलत्वायोगेन श्रुत्यादिकल्पन
स्य दुर्वारस्योक्तकल्पनापेक्षत्वेन श्रुत्यादिभ्यः पश्चात्प्रवृत्तः कल्प्य
श्रुत्याद्यपेक्षत्वे ऽपि च विरोधिश्रुत्याद्यनपेक्षश्रुतत्वात् ।
पौर्वापर्यबलीयस्त्वन्यायेनैव वैपरीत्यं युक्तमित्येव । श्लोकं
व्याचष्टे * श्रुत्यादीनामिति * परदौर्बल्यहेतुत्वेन सिद्धान्त्युक्तस्य
विप्रकर्षस्य पूर्वदौर्बल्यापादकत्वाद्विपरीतसाधनतामुक्त्वा विप्रकर्षवै-
परीत्यादपि बलाबलवैपरीत्यमित्याह * किं चेति * यद्यपि श्रुत्या
विनियोग प्रतीयते तथाप्यशक्तस्य नावकल्पयत इत्यपिशब्दार्थः ।
सामर्थ्यैकवाक्यस्य त्वाकाङ्क्षारूपाणां तु लिङ्गवाक्यप्रकरणानामेक-
वाक्यत्वाकाङ्क्षासन्निधिरूपैर्वाक्यप्रकरणस्थानैर्विना रूपमेव नास्ती-
त्यर्थः । श्रुत्. शक्त्यपेक्षत्वे ऽपि विनियोगानुसारिशक्तिकल्पनया वि-
नियोगो ऽवकल्पत इत्याशङ्क्याह * उत्पत्तीति * प्रागविद्यमानसा-
मर्थ्यविनियोगादपि विनियोजकावस्थया च श्रुत्या विरोधाभावात्सा-
मर्थ्यस्यैवाविनियोजकत्वावगतेर्बलीयस्त्वादनुमानकालवगतस्येन्द्रि-
यविषयसामर्थ्यस्य श्रौतविनियोगकाले निवर्त्तनाशक्तेर्गार्हपत्यशक्ति-
कल्पनायोगाच्छक्त्यनुसारेणेन्द्र एव विनियोगो युक्त इत्यर्थः । लि-
ङ्गस्य वाक्यापेक्षतामुपपादयति * केवलेति * केवलस्य पद-
स्य प्रयोजकत्वे वा विनियोजकत्वात् लिङ्गेन कृत्स्नमन्त्रविनियो-
गायैव मन्त्रवाक्यस्यासमेवतार्थस्यापि देवस्यत्यादेः पदस्य समवे-
तार्थनिर्वपामीत्यादिपदेन सहैकवाक्यतालक्षणसम्बन्धबलेन निर्वा-
पादिविषयशक्तिकल्पनेन विनियोगदर्शनात् । लिङ्गस्य वाक्यापेक्षाव-
गमे यस्य मन्त्रान्तरस्थपदस्य यत् मन्त्रान्तरस्थपदेन सहैकवाक्य-

तालक्षणः सम्बन्धो न विद्यते । तस्यैव विनियोज्यपदार्थविषय-
शक्तिर्न कल्प्यते । तस्मिन्सीद तवैव सदनं कृणोमीत्यनेन सहैकवा-
क्यतालक्षणे सम्बन्धे सति तदन्यथानुपपत्त्यैव तस्मिन्सीदेत्यादेः
सदनकरणविषयशक्तिसिद्धे स्योनं तइत्यादेश्च सीदेत्यनेन सहैक-
वाक्यतालक्षणसम्बन्धान्यथानुपपत्त्या सादनविषयसिद्धेर्वाक्यस्यैव
लिङ्गाद् बलीयस्त्वेत्यर्थः । वाक्यस्य प्रकरणापेक्षामुपपादयति * तथे- ८४५।५
ति * प्रकरणस्य क्रमापेक्षितामुपपादयति * तथा सर्वाकाङ्क्षा
इति * आकाङ्क्षायाः सम्बन्धसिद्ध्यर्थत्वादसम्भवत्सम्बन्धिवैफ-
ल्यापत्तेः । नाकाङ्क्षा युक्तेति सूचनार्थम् * सम्बन्धं वेत्युक्तम् *
समाख्यायां कथं बलीयस्त्वेत्यपेक्षायामाह * समाख्या पुन रिति *
वैपरीत्यपक्षमुपसंहरति * तस्मादिति * समुच्चयेन पूर्वपक्षमाह ।
* अथ वेति * सूत्रेण सिद्धान्तमाह * इतीति * प्रश्नपूर्वं लिङ्गा-
दौ विनियोगाख्यसामर्थ्यस्य विप्रकर्षहेतुमाह * कुत इति * पूर्वार्द्धं
व्याचष्टे * यदेव हीति * पठितश्रुतिग्रहणे प्रत्यक्षः समुदायो पठि-
तश्रुतिग्रहणे लिङ्गादीत्याशयः । षोढावस्थानोपपादनार्थं पूर्वपक्षा-
शयमुपन्यासपूर्वं दूषयितुमाह *कथं पुनरिति* चोदनाशब्दाद्विधा-
ऽयेव श्रुतिः प्रमाणम् । न विनियोक्त्रीत्याशङ्क्य शब्दमात्रमेव ध-
र्मप्रमितिशक्तिप्रदर्शनार्थं चोदनाशब्देन विवक्षितमिति सूचनार्थम्
* तथा चेत्युक्तम् * एवं सति षट्प्रकारत्वं भवतीत्याह * तत्रेति *
उत्तरार्द्धं व्याख्यातुमाह * ततश्चेति * प्रस्थितयोः प्रवृत्तयोर्मध्य- ८४६।२
इत्यर्थः । विरोधे ऽपि श्रुतिकल्पनस्य दुर्वारत्वात् । श्रुतिकल्पनत्व-
निबन्धनविप्रकर्षस्य बलाबलवैपरीत्यापादकत्वं बाधो यदि कल्प्येते-
ति द्वितीयपूर्वपक्षवार्त्तिकोक्तं निराकर्त्तुमाह * तस्मिंश्चेति * आ-
काङ्क्षारूपप्रकरणावगतसामान्यव्यापेक्षत्वेनाकाङ्क्षासहितस्य लिङ्गस्य
विनियोजकश्रुतिकल्पनत्वे नैराकाङ्क्ष्ये ऽसति सामग्रीवैकल्याच्छ्रु-
तिकल्पनानुपपत्तेः श्रुतिं विना विनियोगासिद्धेर्लिङ्गप्रामाण्याद्विप-
रीत्यं दूरोत्सारितमित्याशयः । न केवलं प्रकरणानुमानान्यथानुपप-
त्तेः परिहृतत्वात् श्रुतिकल्पनायोगात् किं तु विध्याकाङ्क्षासहिताना-
मेव श्रुत्यादीनां विनियोजकत्वात् । प्रत्यक्षाया च विनियुक्ते मन्त्रे
विध्याकाङ्क्षानिवृत्तेर्विध्याकाङ्क्षाविरहादपीति सूचयितुं सन्निकृष्टो न
लभ्यते प्रकृष्टो ऽपि वैदिकः *अपवादस्तु तस्य स्यात्* प्राप्तः संनिहितो
यदेत्यनुषङ्गाधिकरणवार्त्तिकोक्तामाकाङ्क्षां विना कल्पितस्य वैदिकत्वं
स्मारयति * वर्णितं चेति * विप्रकर्षस्य विपर्ययसाधनत्वनिरास-
मुपसंहरति * तस्मादिति * वृद्धश्लोकेनैतदेव दृढयति * आह च-

ति * इममेव श्लोकं व्याचष्टे * श्रुत्यादीनां हीति * पौर्वापर्ये पूर्वदौर्बल्यमिति न्यायस्यान्योन्यानपेक्षबुद्धिजन्मविषयत्वात् सापेक्षे लिङ्गादावप्राप्तिसूचनार्थम् * न हीत्युक्तम् * विप्रकर्षवैपरीत्यं श्रुत्यापि नासमर्थस्येति वार्त्तिकोक्तं दूषयितुमनुभाषते * नन्विति * दूषणप्रतिजानाति * सत्यमिति * प्रश्नपूर्वकमुपपादयति * कुत इति * शक्तिकल्पने विनानुपपत्त्यपरिहारे ऽपि अङ्गत्वरूपज्ञानोत्पादनेन श्रुतेःशक्त्यपेक्षेति पूर्वार्द्धेनोक्ते ज्ञानस्याप्यङ्गत्वज्ञानस्य शक्तिं विना कथं प्रमितत्वनिर्वाह इत्याशङ्क्य निरासार्थमुत्तरार्द्धं व्याचष्टे * विनियोगेति * स्वाभाविकशक्तिनिवृत्त्या शक्त्यन्तरस्यानेकत्र
८४७।१ दर्शनान्नैवानुपपत्तिरिति परिहारं सूचयितुमाह * नत्रेति * स्वाभाविकशक्त्यनिवृत्त्ययोगवादी स्वाभिप्रायं प्रकटयति * ननु चेति * अनुमेयस्य लिङ्गस्य दुर्बलतरत्वोक्त्यानुमापिकायाः श्रुतेर्दुर्बलत्वं सूचितम् । विनियोगात्प्राक् सामर्थ्ये कल्प्यमाने तत्कल्पिकायाः श्रुतेस्तदानीमविनियोजकत्वाच्छ्रुतिविरोधाभावेन प्रत्यक्षस्य सामर्थ्यविनियोजकत्वापत्तेः कल्प्यस्य सामर्थ्यस्य प्रत्यक्षदुर्बलतरतापत्तेन । ननु विनियोगात्प्राक् तत्कल्पनास्तीत्याह * सत्यमिति * एवं विप्रकर्षवैपरीत्यनिरासेन बलाबलवैपरीत्ये निरस्ते मन्त्रप्रकरणिनोश्च नैराकाङ्क्ष्योक्त्योभयत्र विनियोगनिरासात् । समुच्चयपूर्वपक्षस्यापि निरासे सूचिते विनियोजकश्रुत्यपेक्षितस्य शक्तिकल्पनस्य पश्चाद्भावं सिद्धान्त्युक्तमाश्रित्य विप्रकर्षतुल्यत्वाद्न्यूनतां शङ्कते * नन्विति * श्लोकं व्याचष्टे * सर्वथा हीति * एव विप्रकर्षसाम्यं बलाबलसाम्येनोपपादयतीति परिहरति * सत्यमिति * प्रश्नपूर्वं बलाबलसाम्यानापादकतामुपपादयति * कुत इति * लिङ्गविनियोगाभिधानात् पूर्वं श्रुत्यनुमानात् विनियोगाभिधानस्य दूरत्वं श्रुतौ तु विनियोगोत्तरकालं शक्त्यनुमानं न विनियोगोक्तेर्दूरतेत्यर्थः । श्लोकं व्याचष्टे * लिङ्गे हीति * श्रुतौ विनियोगप्रत्ययस्योत्पत्तिविक्षेपाभावे ऽपि प्रमितत्वनिर्वाहाय विक्षेपस्य लैङ्गिकेन विनियोगप्रमितिविक्षेपेण साम्यात्तुल्यबलतैव युक्तेत्याशङ्क्याह * सहेति * प्रस्थानप्राप्यत्वेन विनियोगस्य देशत्वोपचारात् सह विनियोगाख्यं देशं प्रस्थितयोः सतोः प्रमाणान्तर्येण विक्षेपेण कृत्वा प्रमाणस्य चिरेण विनियोगप्राप्तिः सम्भवति तस्यैव दौर्बल्यकरत्वाद्विनियोगप्रत्ययोत्पत्त्युत्तरकालं तस्य प्रमितिप्रयोजकनिर्दोषकारणजन्मत्वावगमे प्रमितित्वावश्यम्भावावगमात् । प्रमितित्वनिर्वाहायापवादकशक्तिनिरासार्थं शक्त्यनुमानविक्षेपे ऽपि न विनियोगविपरीतता नापि तुल्यो

विप्रकर्ष इत्यर्थः। प्रत्युपयुज्यतइति हिशब्दान्वयाध्याहारार्थः युगलान्तरेष्वेतमेव न्यायमतिदिशति * एतेनेति * प्रकरणाम्नातस्य देवस्यत्वेत्यादेरसमवेतार्थस्य पदस्य प्रकरणाङ्गत्वे ज्ञाते कथमुपकरिष्यतीति सन्देहे यथा शक्नोतीत्यवधारिते कथं शक्नोतीत्यपेक्षायां निर्वपामीत्यादिवत् प्रत्यक्षसामर्थ्याभावात् समवेतार्थनिर्वपामीत्यादिपदैकवाक्यतामनुमाय तदन्यथानुपपत्त्या प्रकरणापेक्षितोपकारजननसामर्थ्यकल्पनपूर्वम् अनेन प्रकरणिनमुपकुर्यादिति श्रुतिमनुमाय विनियोगावगते उपांशुयाजादिसन्निध्याम्नातस्य च दाब्धिमन्त्रादेरुपांशुयाजादिप्रत्याकाङ्क्षादर्शनाच्छ्रिष्याद्याकाङ्क्षायाश्च स्वतो निराकाङ्क्षे ऽप्युपाध्यायादावाकाङ्क्षोत्पादकत्वदर्शनेनास्या अप्युपांशुयाजादावाकाङ्क्षोत्पादकत्वावगते उपांशुयाजादेर्दाब्धिमन्त्राद्याकाङ्क्षामनुमाय तदेकवाक्यत्वसामर्थ्यश्रुत्यनुमानपूर्वं विनियोगावगतेराध्वर्यवादिसमाख्यातस्य च कर्मणो ऽध्वर्य्वादिसम्बन्धदर्शनात्तत्सन्निधिमनुमाय तदाकाङ्क्षैकवाक्यत्वसामर्थ्यश्रुतिकल्पनपूर्वं विनियोगावगतेः परस्य वाक्यादेः पूर्वं लिङ्गाद्यननुमाय विनियोगोक्तिरेव (दर्शनेन निर्वापादिविशेषणीभूतस्य स्वार्थाभिधानद्वारा स्वार्थे विशिष्टनिर्वापादिप्रतिपादनसामर्थ्यमनुमायानेनेन निर्वापादि प्रकाशयेदिति श्रुतिकल्पनद्वारा विनियोगावगते. प्रयाजादेश्च प्रकरणाम्नातस्योभयाकाङ्क्षादर्शनात् प्रकरणिना सहैकवाक्यतैव) नोपपद्यते पूर्वेण तु लिङ्गादिना वाक्याद्यनुमायैव पूर्वं श्रुत्याद्यनुमानेण विनियोगे कृते प्रत्यक्षदृष्टस्य सामर्थ्यादनेकवाक्यत्वाद्यन्तरेण प्रमित्यनिर्वाहान्निर्वापार्थे परस्य वाक्यादेर्नान्तरेणैकवाक्यत्वादिलिङ्गाद्युपपद्यते इत्येवं नान्तरीयकत्वेन सद्भावमात्रं विनियोगहेतुत्वाद्यपेक्ष्या इति बलाबलवैपरीत्यनिरासार्थं नान्तरीयकतोक्ता एकवाक्यत्वादिभिर्विना सामर्थ्यादेर्दृष्टमात्रस्याप्रमितत्वेन श्रुत्यादिकल्पनाद्वारा विनियोजकत्वायोगमाशङ्क्याप्रमितस्यापि गृहाभावादेर्निर्दोषकारणाजनितत्वाख्यप्रमितिप्रयोजकयुक्तज्ञानविषयत्वमात्रेण बहिर्भावादिकल्पकत्ववत्सामर्थ्यादेरपि प्रमितिप्रयोजकत्वाद्युक्तज्ञानविषयत्वमात्रेणैकवाक्यत्वादिभिर्विना ऽनुपपद्यमानस्यैकवाक्यत्वादिकल्पकत्ववत् श्रुत्यादिभिर्विनानुपपद्यमानत्वात् श्रुत्यादिकल्पकत्वस्याप्युपपत्तिसूचनायेति * इत्युक्तम् * सर्वलौकिकानामेव प्रतिपत्तिः सर्वस्वसंवेद्येत्यर्थः। वाक्यादीनामपि श्रुतिकल्पनमात्रेण लिङ्गवद्विनियोजकत्वोपपत्तेर्लिङ्गादिकल्पनानपेक्षत्वाच्छ्रुतितः सर्वेषां दौर्बल्ये ऽपि अन्योन्यं तु-

(१) अ॰ पा॰ १ ना॰।

८४८।२ त्यवलतैव युक्तेत्याशङ्कते * आहेति * विनियोगसि-
द्धौ विनियोजकां श्रुतिं कल्पयितुं प्रवृत्तैर्वाक्यादिभिरसमर्थैर्विनि-
योगायोगेनाङ्गाङ्गिप्रतिपादकशब्दैकवाक्यतां च विनाङ्गाङ्गत्वान्वयायो-
गेनैकवाक्यतामकल्पयित्वा एकवाक्यतायाः कल्पयितुमशक्यत्वात्
समाख्यायाश्चाकाङ्क्षां विनैकवाक्यत्वायोगे साकाङ्क्षत्वमकल्पयित्वा
एकवाक्यतः कल्पयितुमशक्यत्वात् समाख्यायाश्चाकाङ्क्षां कल्पयितुं प्र-
वृत्तवाक्यसंहितालम्बनेन सन्निधिमकल्पयित्वा कल्पयितुमशक्यत्वा-
ल्लिङ्गादीनां यथाक्रममेकादिभिः श्रुतिसमर्थैकवाक्यत्वाकाङ्क्षासन्नि-
ध्याख्यैर्वस्तुभिर्व्यवधिकारितं विनियोगं प्रति विप्रकर्षवैषम्यं बलाब-
लापादकमिति परिहरति * तदिति * लिङ्गवाक्ययोर्मध्ये तावद् वा-
क्यस्यार्थविप्रकर्षमुपपादयितुं प्रतिजानाति * श्रुतिमात्रेति * प्रश्नपूर्व-
मुपपादयति * कथमिति * असमवेतार्थवाचिनाम्पदानां समवेतार्थ-
वाचिना पदेनैकवाक्यत्वात्समवेतार्थाभिधानशक्तिं कल्पयित्वा श्रुतिः
कल्प्यतइत्यर्थः । श्लोकं व्याचष्टे * सर्वत्र हीति * देवस्य त्वा सवि-
तुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टंनिर्वपामीतिम-
न्त्रपदानां देवादिविशिष्टनिर्वापप्रकाशनेन प्रयोगार्हत्वोक्त्या सकल-
स्यैव मन्त्रस्य प्रयोगार्हत्वाभिधानेनैकदेशस्याप्रयोज्यत्वसूचनात्तत-
शब्देन च प्रयोगार्हत्वं प्रतिपन्नानां विनियोज्यत्वाभिधानाद्वाक्यसह-
कृतेन लिङ्गेन सकलमन्त्रविषयश्रुत्यनुमानं सूचितम् । एवं तर्हि
स्योनन्ते तस्मिन् सीदेत्यनयोरपि तच्छब्दयोगावगतैकवाक्यत्वानुप-
पत्त्या तस्मिन् सीदेत्यस्यापि सदनकरणे स्योनन्त इत्यस्यापि च पु-
रोडाशसदनेन सामर्थ्यकल्पनोपपत्तेर्लिङ्गे बाधो न युज्यतेत्याशङ्क्याह
* नचेति * द्वयोः समवेतार्थत्वसम्भवे भेदेन विनियोगाय प्रस्था-
नाद्विरोधावगतेर्युक्तो बाध इत्याशयः । प्रस्थित इति भावोत्पन्नया
निष्ठया प्रस्थानमुक्तम् । लिङ्गेनैकत्र प्राप्तवतो वाक्येनान्यत्र नेतुमश-
क्यतां लिङ्गाच्च प्राप्नुवतः स्वप्रकाश्ये ऽर्थे तेभ्यो वाक्यादागच्छ-
द्भ्यो ऽवकाशदातॄनां प्रश्नपूर्वमुपपादयितुं वाक्याल्लिङ्गस्यार्थसन्-
निकर्षमाह * कथमिति * केवलस्य पदस्याप्रयोज्यत्वात् वाक्यस-
हकृतेन लिङ्गेन सकलस्यैव मन्त्रस्य विनियोगावगतेः तच्छब्दप्रयोगे-
ण च स्योनादेः सुमनस्यमानान्तस्यैकमन्त्रस्यावगमादकेनैव सामर्थ्येन
तावतः पदसमूहस्य विनियोगसिद्धेः सामर्थ्यान्तरकल्पनानापत्ति-
८४९।३ रित्याशङ्कां निरस्यन् श्लोकं व्याचष्टे * समुदायो हीति * कल्पया-
म्यन्तस्य स्वार्थविशिष्टोपस्तरणप्रकाशेन नैराकाङ्क्ष्यात् तत्प्रकाशित-
स्योपस्तरणसंस्कृतस्य सदनशब्दोक्तस्य स्थानस्य तच्छब्देन ग्रहणात्

सादनत्वविशेषणत्वे ऽपि उपस्तरणविशेषणेन कल्पयाम्यन्तानां सादनविशेषणत्वानुपपत्तेः श्रुत्योपस्तरणविनियोगानपेक्षकल्पयाम्यन्तो ऽवयवः सादने विनियोक्तुमशक्यः तस्मिन्सीदेत्यादेश्च स्वार्थविशिष्टसादनप्रकाशेन नैराकाङ्क्ष्यात् तत्प्रकाशितस्य सादनस्योपस्तरणक्रियाविशेषणत्वे ऽपि सादनविशेषणानामुपस्तीर्णस्थानादीनामुपस्तरणक्रियाविशेषणत्वानुपपत्तेः सादनविनियोगानपेक्षस्तस्मिन्नित्यादिरवयवो नोपस्तरणे विनियोक्तु शक्य इत्याशङ्कानिरासाशयः । समुदायविनियोगस्यावयवविनियोगापेक्षत्वात् शक्त्यन्तरकल्पनापेक्षत्वे ऽपि एकवाक्यतयैव शक्तिद्वयस्यापि कल्प्यत्वात् विप्रकर्षसाम्यशङ्कां निराकर्त्तुम् अवयवस्यैकवाक्यत्वमात्रमन्योन्यानपेक्षोपस्तरणसादनरूपभिन्नार्थाभिधानशक्त्यवगमात् प्राक्शब्दालोचनया प्रत्यक्षवच्छीघ्रं प्रतीयते न उपस्तरणविशिष्टसादनरूपस्य साधनविशिष्टोपस्तरणरूपस्य चैकार्थस्याभिधाने शक्तिरन्योन्यानपेक्षार्थाभिधानशक्तिस्तु स्वविशेषणविशिष्टैकार्थप्रत्यायनेन प्रागेव सिद्धेत्युत्तरश्लोकव्याख्यार्थं तत्र समुदायेत्यादिना लिङ्गाद्वाक्यस्य विप्रकर्षोक्तिः पूर्वबाधसिद्ध्यै प्रकरणे मन्त्राम्नानस्य नैराकाङ्क्ष्यमुक्तं साधयितुं प्रकाशकयोर्मन्त्रयोर्लैङ्गिकेन विनियोगेन नैराकाङ्क्ष्यमुक्त्वा प्राकरणिकप्रकाशनाख्योपकारनिवृत्त्या प्रकरणिनो ऽपि नैराकाङ्क्ष्यं प्रकाश्ययोरर्थयोर्नैराकाङ्क्ष्योक्त्या वक्तु कल्पयाम्यन्तमन्त्रावरुद्धत्वात् उपस्तरणस्य तस्मिन्नित्यादिमन्त्राग्राह्यत्वे तस्मिन्नित्यादिमन्त्रावरुद्धत्वाच्च सादनस्य कल्पयाम्यन्तमन्त्राग्राहकत्वे ऽभिहिते सादनस्योपस्तरणस्य सादनविशिष्टतया प्रकाश्यत्वात् कल्पयाम्यन्तमन्त्रमात्रेण तथा प्रकाशयितुमशक्यत्वात् । उत्तरमन्त्रग्राहितामुपस्तरणस्य वा सादनं प्रत्युपसर्जनत्वेन सादनस्योपस्तरणविशिष्टतया प्रकाश्यत्वात् तस्मिन्नित्यादिमन्त्रमात्रेण च तथा प्रकाशनाशक्तेः पूर्वमन्त्रग्राहितामाशङ्क्य * स्वप्राधान्ये चेत्युक्तम् * अतश्च लिङ्गवाक्ययोस्तावत् बलाबलं सिद्धमित्याह * तस्मादिति * लिङ्गबलेन दृश्यमानैकवाक्यत्वबाधे लिङ्गविनियोज्यस्य पदस्य यावद्भिः पदैर्विना नैराकाङ्क्ष्यं न सम्भवति तावता लिङ्गापेक्षितेन वाक्येन विनियोगे व्यतिरिक्तानामसमवेतार्थवाचित्वात्पृथक्प्रयोगानर्हाणामपि लिङ्गेन बाधादविनियोगापत्तेः शिष्टानि त्वसमवेतार्थाभिधायित्वादित्यादिवार्त्तिकेन देवस्य त्वेत्यादीनां निर्वापे विनियोगोक्तिर्विरुद्धेत्याशङ्कते * नन्विति * भिन्नप्रयोजनत्वे सति याज्यानुवाक्यादिवदेकवाक्यत्वाभावापत्तेर्भिन्नप्रयोजनकत्वायोगेन न समुच्चयः सम्भवतीत्युक्ते यष्टृनुज्ञाप्रकाशनं चेह प्र-

योजनान्तरं शङ्कनीयं तस्य च नवमे निराकरिष्यमाणत्वेनायोगात्
प्रयोजनान्तरशङ्काप्रयुक्तोत्पत्त्यशायायावश्यम् * चेत्युक्तम् * लिङ्ग-
विनियोज्यस्य पदस्य देवस्यत्वेत्यादिपदाद्देवस्य त्वेत्यादीनां लिङ्गवि-
नियोज्याभिर्निर्वपामिपदैकवाक्यत्वं विनानर्थक्यापत्तेस्तत्परिहाराय
वाक्यस्याप्यनुग्राह्यत्वात् निर्वापविनियोगाविरोधमित्याशयेन प-
८५०।२ रिहरति * अङ्गानि * अगत्युपपादनपूर्वं श्लोकं व्याचष्टे * यानि ही-
ति * फलमनिर्वापान्वयोऽग्नये जुष्टमित्यादिभिर्निराकाङ्क्षीकृतो ऽपि नि-
र्वापो देवस्येत्यादीनां साकाङ्क्षत्वात उत्पन्नपुनराकाङ्क्षः सन् देवस्येत्या-
दिपदप्रकाश्यत्वं प्रतिपद्यत इत्युक्ते निराकाङ्क्षस्यान्योन्याकाङ्क्षोप-
पत्त्युपपादनार्थं प्रकरणप्राप्तैर्धर्मैर्निराकाङ्क्षीकृतानामप्युपांशुयाजादीनां
निराकाङ्क्षफलवत्सन्निधिलक्षणेन क्रमेणाकाङ्क्षामुत्पाद्यानुमन्त्रणादि-
धर्मप्राप्तिं प्रयाजादीनां च प्रकृत्यन्वयेन निराकाङ्क्षीकृतानामपि वि-
कृत्याकाङ्क्षयोत्पन्नाकाङ्क्षाणां विकृतिगमनं दृष्टान्तयित्वात्यन्तसाकाङ्क्षा-
र्थे मन्त्रशेषस्यैकमन्त्रावयवान्वयेन निराकाङ्क्षीकृतस्यापि मन्त्रान्तर-
व्यवायाकाङ्क्षामुत्पाद्य मन्त्रान्तरान्वयं दृष्टान्तयितुं यथाक्लृप्तावसकृ-
दुच्चारितमन्त्रशेषयुक्तायां विचारितायां सकृदुच्चारितमन्त्रशेषत्वाप्र-
तियोगित्वेनानुषङ्गाधिकरणे प्रसक्ते मन्त्रशेषार्थो यथैकमन्त्रावयवा-
न्वितशेषप्रकाशितत्वेन निराकाङ्क्षीकृतो ऽपि मन्त्रान्तरावयवानां
साकाङ्क्षत्वात्पुनरुत्पन्नाकाङ्क्षः सन् पुनरुच्चारितपूर्वमन्त्रशेषप्रकाश-
त्वं प्रतिपद्यतइति व्याख्यातं इत्येवं यथाक्लृप्ताविति पाठे यथा सो-
मलक्षणं वस्तु मद्गुणादिपदैः प्रकाशने तु निराकाङ्क्षीकृतमपि म-
न्द्रादीनां तृप्यन्तानां पदानाम् अनुष्ठेयतृप्तिप्रकाशने कर्मानङ्गत्वाप-
त्तेः भक्षणावयवो भूततृप्तिप्रकाशनो ऽर्थत्वेन साकाङ्क्षत्वात्पुनरुत्पन्ना-
काङ्क्षः सन्मन्द्रादिप्रकाश्यत्वं प्रतिपद्यतइति व्याख्यातमित्यत्र तृ-
तीय दृष्टान्तमुक्त्वा विप्रकृष्टप्राप्तानामपि देवस्येत्यादीनां निर्वापसम्ब-
न्धोपपत्तेः निर्वापविनियोगाविरोधमुपसंहृत्य पदान्तराणि यत्रार्थमि-
ति श्लोकावयवं व्याख्यातुम् * येषां त्वित्युक्तम् * देवस्येत्यादिप-
दानामानर्थक्यापत्तावपि लिङ्गेन बाधो निर्वापे विनियोगमाशङ्क्याह
* सर्वेषामेवेति * विधिना सामान्यतः समीहिताङ्गतयाकाङ्क्षितस्य
विशेषमात्रबाधे श्रुत्यादीनां व्यापारादानर्थक्यापत्तौ च समीहिता-
ङ्गत्वायोगान्न श्रुत्यादीनां व्यापारः सम्भवतीत्याशयः । कृत्य-
तइत्यपेक्षायां नवमाद्यसिद्धप्रकरणेन श्रुतिबाधमुदाहरति * तद्यथे-
ति * श्रुत्या स्वरूपेण शेषित्वं प्राप्तं प्रकरणप्राप्तेन प्रकृतापूर्वसाध-
नीभूतानि व्रीह्यादीनि समीहिततया शेषित्वं बाधित्वा प्रकरणलभ्यं

यदपूर्वसाधनत्वं तत्कृतः प्रोक्षणादिसम्बन्धो नवमाद्ये भविष्यती-
त्यर्थः । देवस्येत्यादिनां निर्वापाङ्गत्वविरोधापत्तेर्लिङ्गस्य वाक्या-
द् बलीयस्त्वायोगाशङ्कायाः परिहारमुपसंहरति * तेनेति * येन
कारणेन लिङ्गस्य वाक्याद् बलीयस्त्वे ऽपि नानिष्टापत्तिस्तेनेत्यर्थः ।
लिङ्गबलीयस्त्वानभ्युपगमे पवंत्येकोपक्रमोपसंहारवशानैकवाक्य-
त्वस्य भक्षानुवाकेन गतस्य लिङ्गेन बाधो भक्षानुवाकाधिकरणो-
क्तो विरुध्येतेति सूचयितुमाह * तथा चेति * वाक्यात्प्रकरण-
स्यार्थं विप्रकर्षं प्रतिज्ञापूर्वकमुपपादयितुमाह * वाक्येति *
अङ्गाङ्गिसम्बन्धत्वाभावे ऽपि उभयाकाङ्क्षामात्रेणाङ्गाङ्ग्यन्वयायो-
गावगतेराकाङ्क्षातो ऽङ्गाङ्गिवाक्यरूपाणां शब्दानां सङ्गतिरनुमातव्ये-
त्युक्त श्लोकं व्याचष्ट * प्रकरणे हीति * वाक्यानामित्यनेन प्र-
करणे ऽङ्गाङ्गिवाक्यानां प्रत्यक्षा सङ्गतिर्नास्तीत्यर्थः सूचितः । वाक्ये
पदानां सङ्गतिः प्रत्यक्षेत्यर्थः । विप्रकृष्टत्वव्याख्यार्थम् * ततश्चेत्यु-
क्तम् * यावदितरत्र प्रकरणे सामर्थ्येन श्रुतिः कल्प्यत इत्यनुष-
क्तेन पदेन कल्प्यमानाया वर्त्तमानत्वोक्तेस्तावदितरत्र वाक्ये श्रुत्य-
ङ्गाभिहित इत्यनेन च विनियोगाभिधानस्य भूतत्वोक्तेः प्राकरणिक-
श्रुतिकल्पनात्प्राक् वाक्ये ऽपि विनियोगाभिधानमुक्त वाक्यात्प्रक-
रणस्यार्थविप्रकर्षं फलेनोपसंहरति * तस्मादिति * करणात्क- ८५।१।५
मस्यार्थविप्रकर्षं प्रतिजानाति * तथेति * प्रश्नपूर्वमुपपादयति
* कथमिति * प्रकरणमाकाङ्क्षातः प्रकृतिश्रुतेरर्थं विनियोगं प्रति
गच्छति क्रमस्य तु विनियोजकत्व सिद्ध्यर्था श्रुतिराकाङ्क्षां विना
गौरश्व इत्यादेः सन्निधाने ऽप्यन्वयादर्शनात् आकाङ्क्षामपि इत-
राकाङ्क्षातो यथैकवाक्यत्वसामर्थ्यकल्पनपरम्परया कल्पयितुमा-
रभ्यन्त इत्यर्थः । दधिमन्त्रस्यानिर्ज्ञातपरिमाणोपायत्वे त्वनिवृत्ताका-
ङ्क्षतयोपांशुयाजे साकाङ्क्षे क्रमेण विनियोगाभ्युपगमात् क्रमे ऽप्युभ-
याकाङ्क्षायाः प्रत्यक्षत्वात् अङ्गाकाङ्क्षयाङ्ग्याकाङ्क्षाकल्पनोक्तिरयुक्ते-
त्याशङ्क्याह * क्रमो नामेति * मन्त्रस्याक्रियात्वेनानितिकर्तव्य-
तारूपतया इतिकर्तव्यताकाङ्क्षेणोपांशुयाजेनाभिधानक्रियानपेक्षित-
स्याकाङ्क्षितुमशक्यत्वात् दधिमन्त्रस्यापि ज्ञातलिङ्गत्वेनाभिधा-
नक्रियाद्वाराकाङ्क्षितुमशक्यत्वाच्चोपांशुयाजस्य स्वतो मन्त्राकाङ्क्षा-
स्तीत्याशयः । निरपेक्षाणां सतां प्रधानानामनुष्ठानदेशतः पाठदेशतो
वाङ्गानां सान्निध्यमात्रं क्रम इत्यनयानन्तोक्ता पारस्पर्यापत्त्यप्रामा-

साकाङ्क्षसन्निधाख्येन प्रकरणेन सह क्रमस्य क्वचित् समवायायो-
गान्न क्वचित्क्रमप्रकरणविरोधे प्रकरणं युक्तमित्याशङ्क्याह * अत्र
चेति * विकृतित्वेन प्राकृतैरङ्गैर्निराकाङ्क्षीकरणात् क्रमस्थमहाप्रकर-
णोपनिपाताच्च प्रकरणसमवायस्तु सम्भवतीत्याशयः । दैक्षस्यापि
तर्हि ज्यौतिष्टोमिकमहाप्रकरणोपनिपाताद्दर्शपूर्णमासाविकृतित्वा-
च्चोदाहरणत्वोपपत्तेः पशुधर्माणां क्रमप्राप्ते दैक्षाङ्गत्वं प्रकरणेन
बाध्येतेत्याशङ्क्य सन्निपत्योपकारिणां प्रकरणाविनियोज्यत्वाभा-
वादनुदाहरणत्वसूचनार्थम् * प्रायेणेत्युक्तम् * राजसूयादिमहा-
प्रकरणान्तरगतास्वभ्यभिषेचनाद्यासु ज्योतिष्टोमादिविकृतिषु शौनः
शेपाख्यानादीनां माहेन्द्रस्य स्तोत्रं प्रत्यभिषिच्यतइत्यादिना प्राकृत-
माहेन्द्रस्तोत्राद्यङ्गसबन्धित्वेन विधानात् माहेन्द्रस्तोत्राद्यङ्गत्वावगते-
र्निरङ्गस्य माहेन्द्रस्तोत्रादेर्वैगुण्यादानिष्टमुपकारं प्रकृतौ शौनःशेपाख्या-
नाद्यनपेक्षमपि प्रतिविकृतौ तद्रहितस्यासाधनत्वावगमादतिदिश्यमा-
नानाम्माहेन्द्रस्तोत्रमुपादश्यमानाङ्गवैशिष्ट्य विनातिदेशापर्यवसानाव-
गतेर्विकृतिकथम्भावाकाङ्क्षायामपनिवृत्तायामेव शौनःशेपाख्यानाद्यु-
पनिपातादवान्तरप्रकरणेन माहेन्द्रस्तोत्रादिद्वाराभिषेचनीयाङ्गत्वप्र-
करणबाधमहाप्रकरणान्तर्गतानामपि विकृतीनां नोदाहरणता युक्ते-
ति मध्यस्थं यस्य तन्मध्य इति चतुर्थाधिकरणपूर्वपक्षन्यायेनाश-
ङ्क्य माहेन्द्रस्य स्तोत्रं प्रति अभिषिच्यतइत्यस्याभिषेचनीयाङ्गभूत-
माहेन्द्रस्तोत्रदेशे ऽभिषेकान्तः शौनःशेपाख्यानमभिषेचनीयप्राकृता-
ङ्गानुवादेन विधानादभिषेचनीयकथम्भावग्राह्यत्वाशङ्कां निराकर्तुं
यत्प्राकृतानुवादेनान्यदनुष्ठानविधानार्थत्वेनानुत्पत्तिविधेयत्वादुत्प-
त्तिविधिवेलायामेव तत्प्रयोजनापेक्षणादभिषेचनीयात् । बहिरुत्प-
न्नान्महाप्रकरणात् राजसूयाङ्गत्वावगत्या च कृतार्थत्वेन माहेन्द्रस्तो-
त्रसंयोगस्य देशार्थत्वोपपत्तेस्तद्द्वाराभिषेचनीयाङ्गत्वकल्पनायोगात्
क्रमेणैवाभिषेचनीयाङ्गता कल्पनीयेति सर्वासां वा समत्वाच्चोद-
नातः स्यान्न हि प्रकरणं तद्देशार्थमुच्यते तस्य मध्य इति तदीयसि-
द्धान्तन्यायेनोदाहरणसमर्थन सूचयितुमाह * तासु हीति *
शौनःशेपाख्यादीनामभिषेचनीयप्राकृताङ्गानुवादेन विधानादभिषेच-
नीयकथम्भावग्राह्यत्वाशङ्कां निराकर्तुं यत्प्राकृताङ्गानुवादेनोत्पन्न-
मिति वाक्ये प्राकृतानुयाजोद्देशविहितपृषदाज्यवद्विधानार्थानूदित-
प्राकृताङ्गानुवादेनाप्युत्पन्नस्याङ्गस्य सन्देशाभिव्यक्तकथम्भावग्राह्य-
त्वसूचनार्थं प्राकृताङ्गमध्यपतित्वेनेत्युक्तं प्राकृताङ्गगुणविधानतः प्रा-
गतिदेशापर्यवसानात्कथम्भावानिवृत्त्यभ्युपगमे ऽपि तिष्ठन्तं पशु प्र-

यजन्तीति प्राकृताङ्गापकर्षविधानात्प्रागुत्पन्नानामुपकरणादीनामपि दैक्ष्यप्रकरणग्राह्यत्वापत्तेः क्रमविनियोज्यत्वोक्तिर्विरुध्येतेत्याशङ्क्य क्लृप्तोपकारप्राकृताङ्गग्रहणे प्रवृत्तस्य कथम्भावस्य स्वतोऽक्लृप्तोपकारात्पूर्वाङ्गग्राहित्वायोगात्प्राकृताङ्गान्वयस्य च पूर्वाङ्गग्रहणहेतोः प्राकृताङ्गगुणविधितः पुरस्ता द्वावस्थितेष्वङ्गेषु अभावात् प्रकरणग्राह्यत्वापत्तिसूचनार्थं पुरस्तादित्युक्तम्। एवमन्योन्याकाङ्क्षायाः प्रत्यक्षत्वशङ्कां क्रमप्रकरणविरोधोदाहरणायोगाशङ्कां च निरस्यन् प्रकरणाक्रमस्यार्थविप्रकर्षं दर्शयितुमारभते * तथेति * क्रमसमाख्ययोर्मध्ये क्रमे सम्बन्धार्थान्योन्याभिमुख्यरूपेण सन्निधानाख्यं परस्परपर्युपस्थापनं वेदरचितत्वात् प्रत्यक्षमित्यनेकात्समाख्यायामप्रत्यक्षमिति विप्रकर्षसिद्ध्यर्थमुक्ते ऽपेक्षां विना सम्बन्धायोगात् समाख्योक्तसम्बन्धमात्रेणापेक्षासिद्धेर्विप्रकर्षायोगमाशङ्क्य संशब्दस्यैकीभावार्थत्वात् सम्बन्धशब्दस्य च नियमार्थत्वात् अवयवव्युत्पत्त्या ऽऽलोचनया नियम्यते। यदेकस्य सम्बन्धास्यार्थशब्दयोरित्याद्युदाहरणालोचनया च सम्बन्धस्यैकनियमरूपत्वावगतेः सम्बन्धिनोः केन चिदभिन्नेन सम्बन्धहेतुना विना सम्बन्धायोगादसिद्धात्मलाभेन च सम्बन्धिनाकाङ्क्षायाः कल्पयितुमशक्यत्वादेकत्र निधानाख्यसम्बन्धिनोः सन्निधानं सम्बन्धहेतुत्वेनावश्यं कल्पनीयम्। पौरोडाशिकसमाख्यावतं शुन्धध्वमिति मन्त्रस्य पुरोडाशपात्रशुन्धनेन सह न किञ्चित्पाठतोऽनुष्ठानतो वा देशैक्यं वेदेन विरचितमस्ति येन मन्त्रपुरोडाशपात्रशुन्धनेन सह तन्निमित्तसम्बन्धार्थं सम्बन्धिनोरन्योन्याभिमुख्यं स्यादाभिमुख्यानपेक्षं च भवदपि न विनियोगायालमिति सर्वत्र हीत्यादिनोक्तम्। समाख्या पुनः प्रत्यक्षमेव सम्बन्धं वदन्तीति पूर्व-
पक्षवार्त्तिकोक्तं समाख्यायाः श्रुतितुल्यत्वमनुभाषते * ननु चेति * ८५२।१
दूषयति * नैतदिति * श्रुत्यभिधेयादङ्गाङ्गित्वविशेषरूपात्सम्बन्धात्सामाख्यानिकस्य सम्बन्धस्य सामान्यरूपात्मनोक्त्या श्रुतितुल्यत्वे निरस्ते ऽप्यतिशयार्थं कल्प्यतेत्यभिधानं निरस्तम्। लौकिक्याः समाख्याया वैदिकसम्बन्धप्रतिपादने विप्रकर्षसूचनापूर्वं श्लोकं व्याचष्टे * अर्थानामिति * यापि वैदिकी समाख्यानवगतसम्बन्धार्थप्रतिपादने प्रवर्त्तते सापि तावन्नाङ्गाङ्गित्वं प्रतिपादयतीति वदता विप्रकर्षो लौकिक्याः सूचितम्। येन केनचिदित्यनेन सामान्यरूपतयान्यत्वं व्याख्यातम्। सर्वत्र हीति वार्त्तिकेनाङ्गाङ्गिसम्बन्धस्यैव सन्निध्यपेक्षोक्तेति भ्रान्त्या समाख्या-

कल्पितस्य सम्बन्धमात्रस्य सन्निधिकल्पनहेतुकविप्रकर्षाभावशङ्कां निराकर्तुमाह * सम्बन्धमात्रस्य चेति * यदेतत्किञ्चिदभिन्नं सम्बन्धिनामस्तीत्यवगम इत्यध्याहारेण योज्यम् । सम्बन्धस्य सन्नि-
ध्युक्तः क्रमसमाख्याबलसिद्ध्यर्थत्वं दर्शयितुमाह * तत्रश्चेति * विप्रकर्षमत्र प्रपञ्चयति * समाख्या हीति * सूत्रार्थमुपसंहरति * तस्मादिति * एतदेव द्रढयितुं वृद्धानाम् । श्लोकपञ्चकं पठति * आह चेति * अतश्च यत्पूर्वपक्षवार्त्तिके विरोधो ऽपि बाधायोगो-
८५३।१० त्यर्थं कश्चिदस्य प्रमाणत्वमित्युक्तम् । तदयुक्तमित्याह * तस्मादिति * यदपि नित्यं च प्रमाणाभासस्यैव बाध इत्युक्तं तदप्यनुभाषणपूर्वं परिहरति * यद्वेति * यदपि श्रुत्यादिषट्कस्य समस्तेत्यादिवार्त्तिकेन विषयान्तरसञ्चाराभावेन लिङ्गादीनां कश्चित्प्रमाणाभासत्वायोगात् बाध्यत्वं न युक्तमित्युक्तं तदपि दूषयितुं प्रश्नपूर्वं प्रमाणाभासतामुपपादयति * कथमिति * श्लोकं व्याचष्टे * न हीति * श्रौतविनियोगान्यथानुपपत्त्या यज्ञसाधनत्वगुणयोगेनेन्द्र इत्यर्थानुसाराद्वैन्द्रशब्दस्य गार्हपत्यपरत्वावगतेरिन्द्रोपस्थानस्य शक्यत्वेन लिङ्गाविषयत्वात् स्योनन्ते सदनं तस्मिन् सीदेत्यनयोश्च लिङ्गाद्भिन्नवाक्यत्वावगतेरनन्यत्वेन वाक्याविषयत्वात् पौर्णमासीदेवतापदशेषाणां च वाक्यादमावास्यादेवतापदैकवाक्यत्वाभावावगतेरामावास्यप्रयोगेणानिकर्त्तव्यत्वेनानाङ्क्षणादमावास्यादेवतापदशेषाणां पौर्णमासीप्रयोगेणानाकाङ्क्षणात् प्रकरणविषयत्वानुपपत्तेः शौनःशेपाख्यादीनां च प्रकरणात् प्रकृतसर्वसाधारण्यावगतेरभिषेचनीयमात्रसान्निध्यभावेन क्रमाविषयत्वात् शुन्धनमन्त्रस्य च क्रमात् साान्नाय्यपात्रशुन्धनार्थत्वावगतेः पौरोडाशिकसमाख्याया भूम्ना दर्शपूर्णमासकाण्डविषयत्वावगमेन पुरोडाशमात्रकाण्डपरसमाख्यानाविषयत्वाल्लिङ्गादीनां विषयान्तरसञ्चारो विपर्ययापहारोक्त्या बलाबलवद् बाधिते विषये व्यापाराभावसिद्धेः सूचितः । बाधहेतुकत्वाद्व्यापाराभावस्य बाधात् प्राक् व्यापारोपक्रमे सत्यपि बाधाद्विषयान्तरसञ्चारावगमोत्तरकालसमानव्यापारत्वात् प्रमाणाभासत्वमन्यथाप्रमाणाभासतामुपपादयितुमाह * अथ वेति * प्रमाणाभासतामेवोपसंहरति * तेनेति * यदपि नच तदुत्थापितं ज्ञानमित्यादिवार्त्तिकेन बाधप्रकारासम्भवात् बाधो न सम्भवतीत्युक्तं तदपि उत्पत्तिप्रतिबन्धाख्यबाधाभ्युपगमेन परिहरति * अनुत्पन्नमेव चेति * व्यापारोक्रमप्रतिबन्धसूचनायैवकारः व्यापारोपक्रमप्रतिबन्धसूचनायैवकारः व्यापारोपक्रमपक्षे आन्तरालिकश्रुतिलिङ्गादिकल्पनरूप-

ज्ञानमिथ्यात्वकल्पनायेत्थम्भूतकल्पनार्थं तया तृतीयया बाधप्रकार-
तोक्ता । शेषशेषिज्ञानं तु पक्षद्वये ऽप्यनुत्पन्नमेव बाध्यते वस्तुकथनार्थं
चेह प्रकारान्तरस्यानाशङ्कनीयतोक्ता न तूपपादनासामर्थ्यादिति सू-
चयितुं यो ऽप्यनुमानादीनां प्रत्यक्षादिभिरुत्पन्नबाधो बाधग्रन्थं वक्ष्य-
ते । तमपि तत्रैवोपपादयिष्याम इत्याह * यो ऽपि चेति * एकैकस्य ८५४।१
भाष्ये बाध्यत्वोक्तेः सूत्रे परशब्दस्य अनन्तरपदमात्रविषयत्वभ्रान्तिं
निराकर्तुं व्यवहितपराणामपि बाध्यत्वस्य प्रपञ्चनीयतामाह * एव-
मिति * श्रुतेर्वाक्यविरोधं सोदाहरणं बलाबलं प्रपञ्चयति * यथे-
ति * आनन्तर्यसामानाधिकरण्यावगनात् वाक्यसामर्थ्यादेकहाय-
न्याद्यङ्गत्वेनारुणादि प्राप्नुयादित्यर्थ । षष्ठीश्रुतेः प्रकरणविरोधमुदाह-
रति * श्रुतीति * षष्ठीश्रुतिसंयोगाविशेषे ऽप्यनुवचनानामेव प्रकरणवि-
रोधो न द्वादशत्वस्येति परमतं दूषयितुमुपन्यस्यति * अनुवचनानां
चेति * एवकारार्थे चकारः । दूषयति * नेति * स्वविशेषणवैशिष्ट्यं
विना वैगुण्यापत्तेरितिकर्तव्यत्वायोगेनाभिन्ने ऽतिदिश्यमानानामुप-
सदामुपदिश्यमानद्वादशत्ववैशिष्ट्यात् प्रागतिदेशापर्यवसानादहीन-
कथम्भावग्राह्यता ऽविरुद्धेत्याशयः । विप्रकर्षं दर्शयति * इहापि
चेति * ज्योतिष्टोमे विध्यन्तदानाय कयाचिद्युक्त्या न हीयत इति
व्युत्पत्त्या ऽहीनश्रुत्युपपत्तेर्नेदं श्रुतिविरोधोदाहरणं युक्तमित्याश-
ङ्क्याह * नैव हीति * श्रुतेः प्रश्नपूर्वं क्रमविरोधमुदाहरति * ८५५।१
श्रुतीति * रशना तद्धर्माश्च दर्भमय्यादयः क्रमादग्नीषोमीययागा-
ङ्गतया यूपं परिव्ययतीति द्वितीयाश्रुत्या रशनाया यूपाङ्गत्वे ऽव-
गते दर्भमयी रशना भवतीत्यादौ रशनाश्रुत्या रशनात्वैकार्थसमवा-
यियूपाङ्गत्वं लक्षयित्वा तदुद्देशेन दर्भमयीत्वादिविरोधात् तद्धर्म-
श्चास्याङ्गमित्यर्थः । यूपस्याग्नीषोमीयाङ्गत्वात् स्वधर्मिकाया रशा-
नाया यूपाङ्गत्वे ऽपि ज्योतिष्टोमाङ्गकयाङ्गस्याङ्गयस्य ज्योतिष्टोमा-
ङ्गवदग्नीषोमीयाङ्गत्वोपपत्तेरविरोधमाशङ्क्यालौकिकत्वेन यूपस्य
स्वरूपोत्पत्त्यर्थमेव रशनादिधर्मान्वयोपपत्तेः क्रयवत् प्रकृतापूर्वसा-
धनत्वानपेक्षणात् यूपस्वरूपे विधीयमानानां रशनादीनामग्नीषो-
मीयाङ्गत्वानुपपत्तेः यूपस्य च पशुयागप्रयोगात् बहिरुत्प-
न्नत्वेनागृह्यमाणविशेषतया सर्वपशुयागसाधारण्यात् रशनादीनां
यूपाङ्गत्वे सवनीयस्याप्राकृतत्वे ऽपि परिव्याणान्तरे साधारण्याव-
गतेरग्नीषोमीयाङ्गत्वसाधारण्यापत्तेः विरोधं सूचयितुमाह * एत-
यूपेति * रशनया यूपं परिव्ययतीत्यग्नीषोमीये विहितात्परिव्या-
णात् स आश्विनं ग्रहं गृहीत्वोपनिष्क्रम्य यूपं व्ययतीति सवनीये

विहितस्य परिव्याणस्य भेदे ऽपि लौकिकत्वात् परिव्याणस्य स्व-
रूपे धर्मविध्ययोगेन यूपान्वयप्रत्युक्तत्वात् धर्मान्वयस्य यूपसा-
धारण्यात् धर्माणामपि साधारण्यप्रतीतेः परिव्याणद्वये ऽपि र-
शनायाः समानविध्यसूचनायगताविव्यस्माद्धातोरेतेस्तुड्वेत्युणा-
दिसूत्रेणातिप्रत्ययस्य तुडागमसहितस्य विहितत्वादति सर्वत्राग-
च्छतीत्यर्थविवक्षया साधारणवाच्ये तच्छब्दप्रयोगादेतस्य पशु-
त्रयसाधारणस्य यूपस्य यदेकं परिव्याणमग्नीषोमीये परं च स-
वनीये विहितं तस्योभयस्य साधारणशेषं रशना धर्मसंहितः श्रु-
त्यावगम्यते अतस्तद्विरुद्धेन क्रमेणाग्नीषोमीयपशुयागमात्राङ्गतां न
यातीत्यर्थः । विप्रकर्षं श्लोकद्वयेन दर्शयति * यावदिति * श्रु-
तिसमाख्याविरोधं प्रश्नपूर्वमुपसंहरति * श्रुतीति * पौरोडा-
शिकसमाख्याते काण्डे पठितत्वात् समाख्याविरोधे ऽभिहिते दर्श-
पूर्णमासप्रकरणे वर्त्तमानत्वात् प्रकरणाविरोधमाशङ्क्य साधारण्या-
त्तस्यैवात्रापि मन्त्रविनियोगे विरोधाभावमुक्त्वा प्रकरणाबहिर्भावे
ऽपि सर्वार्थप्रतीतेर्विरोधापरिहारमाशङ्क्य नचाविज्ञातलिङ्गानां प्रक्रि-
या विनियोजिकेतिन्यायेनानुन्मीलितलिङ्गत्वात् प्रकरणाविनियोज्यत्वे
क्रमेण चेति चकारेण सूचिते तसीत्यस्य सामर्थ्ये सन्निधावुपलक्षन-
मित्यनेन न्यायेनात्रापीषेत्वेति युष्मदर्थविषयत्वात् सन्निहिताभि-
धायित्वान्तशब्दायोगात् प्रथमपदार्थे ऽग्निप्रणयनेनाम्नातमन्त्रकत्वा-
त् मन्त्राकाङ्क्षे क्रमेण विनियोगावगतेः श्रुतिक्रमाविरोधापत्तेरित्या-
शङ्क्य क्रियापदशून्यत्वेनानुन्मीलितलिङ्गत्वात् क्रमस्य विनियोगाश-
क्तावुक्तायां क्रियापदशून्यत्वे ऽपि यागानुमन्त्रणसमाख्यानात् सामा-
न्यतो यागाङ्गत्वावगमादृग्विधमन्त्रस्य क्रमविनियोगोपपत्तिवत् पौ-
रोडाशिकसमाख्यानादिषेत्वेत्यस्यापि सामान्यतः पुरोडाशयागाङ्ग-
त्वे ऽवगते क्रमेणाग्निप्रणयने विनियोगोपपत्तिमाशङ्क्यानुमन्त्राख्या
क्रिया विशेषवदृग्विधमन्त्रसाध्यक्रियाविशेषावगमात् न क्रमस्य
विनियोगे शक्तिरिति परिहारसम्भवे ऽपि अभ्युपेत्य क्रमविनियोग
क्रमसमाख्ययोस्तावन्न विरोध इति परिहारसूचनार्थम् * पुरोडाश-
स्यैव चेत्युक्तम् * विप्रकर्षं दर्शयति * तत्रापीति * लिङ्गस्य
प्रकरणादिविरोधोदाहरणानि प्रतिजानाति * एवमिति * प्रक-
रणं विरोधं तावदुदाहरति * तत्रेति * विप्रकर्षं दर्शयति * याव-
ञ्चेति * माहेन्द्रग्रहयागक्रमे पठितस्यैन्द्रस्य प्रगाथस्य लिङ्गेनापकर्षः
८५६।४ क्रमविरोधोदाहरणमित्याह * अलिङ्गेति * अनिष्टापादनार्थत्वाच्चा-
पकर्षोक्तेरपरितोषात् प्रतिवचनमिति पञ्चमपादाधिकरणस्थितमुदाह-

रणमाह *स्थितेति* विप्रकर्षं दर्शयति *यावद्धीति* उदाहरणमाह ८५६।४
तथेति परिवीरसि परित्वादेवीर्विशोऽययन्तां परीमं रायस्पोषो
यजमानं मनुष्या इतिकरणमन्त्रस्य युवासुवासाः परिवीत आगात्स-
उ श्रेयान् भवति जायमान इति क्रियमाणानुवादिमनोतासूक्तस्य प्र-
करणात् ज्योतिष्टोमान्वयावगतेर्मनोतायै हविषो ऽवदीयमानस्यानु-
ब्रूहीति मनोतोद्देशेनावदीयमानपश्वाख्यहविरर्थत्वेन प्रैषाच्च पशुदे-
वताया मनोताशब्दवाच्यत्वावगमेन पशुयागान्वयावगतेन सामा-
न्येन लिङ्गेनाग्नीषोमीयकर्म बाधित्वा सवनीयाङ्गत्वावगमस्योदाहर-
णत्वं शङ्कते * कथमिति * श्रुत्या लिङ्गबाधाच्च मनोतासूक्तस्य स-
वनीयाङ्गतेति परिहरन्ति * नेति * कासौ श्रुतिरित्यपेक्षायां श्रुतिमु-
दाहरन्ति * एवं हीति * मनोतायां तु वचनादविकारः स्यादित्यत्र
वायव्ये पशावतिदेशप्राप्तस्य मनोतासूक्तस्योहनिवाह्यत्वेनास्याः श्रु-
तेर्व्याख्यास्यमानत्वात् । न दैक्षे विनियोजकता युक्तेत्याशङ्क्याह
* अनया हीति * दैक्षक्रमे ऽधीतायाः श्रुतेर्लिङ्गप्राप्तोत्कर्षनि-
रासार्थत्वेन दैक्षार्थत्वसम्भवे दूरस्थे वायव्यादावूहनिवार्यत्वायो-
गात् लैङ्गिकोत्कर्षनिरासेन च लिङ्गस्यानादृत्यर्थे ऽभिहिते ऽर्थत्वा-
न्मुख्यस्यार्थत्वाभावेनान्यायनिगदत्वात् बहुवचनान्तपाशशब्दवदनू-
ह्यसिद्धेर्मनोताधिकरणविरोधाभावाल्लिङ्गेनोत्कृष्यमाणा मनोता कार्यं-
श्रुत्या वारितेत्याशयः । आग्नेय्येवेत्येवकारेणानाग्नेयीनिषेधाव-
गतेः प्रकृतौ चानाग्नेय्या मनोतायाः प्राप्त्यभावेन निषेधायोगाद्वि-
कृतौ त्वतिदेशप्राप्तायास्त्वं ह्यग्ने प्रथमो मनोतेति मनोताया वा-
यव्यादिवैकृतपशुदेवताया प्रकाशकाशक्तेस्तस्मादश्वत्थाहेतिवच्चानूह-
निषेधाद्वायव्यादिदेवतस्य सूक्तान्तरस्य मनोताकार्ये प्राकृतस्यैव
कारकश्रुत्यानिषेधोपपत्तेर्वायव्यादिपशावनाग्नेयादिसूक्तान्तरत्वे रू-
पविकारनिषेधार्थैवेयं श्रुतिर्न दैक्षादावाग्नेयसूक्तोत्कर्षार्थेत्याशङ्क्य द्वे-
धैवकारमुपादयति * द्विदेवत्ये ऽपीति * द्विदेवत्ये यद्यप्येकदेव
त्याग्नेय्यशक्ता तथापि सैव कार्या न तूत्कृष्टव्येत्याद्यव्याख्यायामेव-
कारार्थः द्वितीयायां कार्यैवेत्यर्थः । भक्षानुवाकस्यान्ये हि सवितरि-
त्यादिवाक्यानि समाख्यानात् भक्षाङ्गत्वरूपाय विनियोगाय प्रस्थि-
तानि सन्ति लिङ्गेन ग्रहणादिषु विनियुज्यन्तइति यत् भक्षानुवा-
काधिकरणे स्थितं तदेकं सल्लिङ्गसमाख्याविरोधोदाहरणं यच्चाग्नि-
रुक्थे पुरोहितइत्यादीनां मनाक्षृचां पृथूपजास्तं स बाध इति पृथुपा-
जवत्योश्च याज्यासमाख्यां बाधित्वा लिङ्गेन सामिधेनीकार्ये विनि-
योगइति लिङ्गक्रमसमाख्यानादित्यत्रोक्तयदपरमित्याह * लिङ्ग-

ति * विप्रकर्षं दर्शयितुं भक्षाङ्गत्वरूपसम्बन्धाभिमुखार्थस्य कस्य
चित्सामान्यस्यादिशब्दोक्तस्य वाक्यादेः कल्पनयेत्युक्तम् । वाक्या-
नि लिङ्गेन विनियुज्यन्तइति वदता लिङ्गस्य कृत्स्नमन्त्रविनियो-
जकतोक्ता परिव्याणकरणमन्त्रे परिवीरसिपदव्यतिरिक्तानां परि-
त्वा देवीर्विशोव्ययन्तामित्यादिपदानां क्रियमाणानुवादिमन्त्रे च प-
रिवीतपदव्यतिरिक्तानां युज्यंत्यादिपदानां लिङ्गे विनियोक्तुमारभ्य-
माणाभ्यां परिवीरसिपरिवीतपदाभ्याम् एकवाक्यत्वात् स्तवनीयार्थे
द्वितीये ऽपि परिव्याणे विनियोगो वाक्यक्रमविरोधोदाहरणमित्याह
* वाक्येति * परिवीतपदोक्त्या परिवीरसिपदमप्युलक्षितम् । स-
न्ध्यासमाप्तचादिपदेषु लिङ्गेन ग्रहणादौ विनियोक्तुमारभ्यमाणेषु स-
न्ध्यासमित्यादिपदैकवाक्यगतानां शेषाणां पदानां भक्षणादर्वाची-
नग्रहणादावेव वृत्तिविनियोगाख्या वाक्यसमाख्याविरोध उदाहार्य्य
८५७।४ त्याह *वाक्यसमाख्ययोरिति* आवृत्तिरितिपाठे त्वाङो ऽर्वागर्थवा-
चित्वात् भक्षणात्प्रागनुष्ठीयमानत्वात् ततो ऽर्वाचीनेषु वृत्तिर्विनियोग
इत्यर्थः। यद्वा भक्षणे शेषाणां पदानामावृत्तिरविनियोग इति समाख्या-
प्राप्तभक्षणाङ्गत्वाबाधो वृत्तिप्रतिषेधेनोक्तम् । एकपदमात्रे लैङ्गिकवि
नियोगापर्यवसाने चालिङ्गविरोधिना वाक्येन शेषपदविनियोगा-
योगात् शेषपदमात्रस्य कृत्स्नवाक्यत्वाभावेनाविरोधिन वाक्येन वि-
नियोक्तुमशक्यत्वात् पदान्वये तु तस्य चैकवाक्यत्वस्य पदार्थान्वय-
त्वाभावेन वाक्यप्रतिपाद्यत्वाभावात् आत्माश्रयदोषापत्तेश्चात्मनेवा-
त्मनो विनियोगाच्छेषाणां पदानां लिङ्गविनियोज्यपदार्थोपसर्जनी-
भूतार्थप्रतिपादनशक्तिमात्रमेकवाक्यत्वादवसीयते । ननु विनियोग
इत्यपरितोषात् उदाहरणान्तरमाह * तथेति * चेतनस्य कर्म-
फलभाक्त्वं विना कर्तृत्वायोगात् । समाख्याकर्तृत्वस्य यजुर्वेदा-
ध्ययनलब्धाध्वर्युसंज्ञस्य पुंसः कर्मफलभाक्त्वेन प्राधान्यावगतेः समा-
ख्यातोऽध्वर्य्वर्थत्वावगमे ऽपि वाक्यावगतस्य स्वर्गकामार्थस्य समा-
ख्यानुरोधेन यजुर्वेदाध्यायिस्वर्गकामविषयकल्पनया सङ्कोचायोगा-
द्वाक्येन च समाख्याबाध इत्याशयः । कर्त्रधिकरणे निपत्स्य-
मानस्याख्यातेन कर्त्रभिधानस्याज्ञानात् श्रुतिसमाख्याविरोधोदा-
हरणत्वं शङ्कते * नन्विति * कर्त्रधिकरणसिद्धान्तस्मारणेन
निरस्यति * नात्रेति * प्रयाजादीनां पुरोडाशमात्राङ्गत्वस्य प्रकृ-
तप्रधानमात्राङ्गत्वेन बाधः प्रकरणसमाख्याविरोधोदाहरणमित्याह *
प्रकरणेति * श्रुत्यादीनां शेषमात्रत्वेन शेषिविषयत्वाभावात् शे-
ष्यैकविषयत्वे ऽपि शेषभेदे प्रमाणसमवायानुपपत्तेरुपस्मरणे कृत्स्नो

मन्त्रः स्योनादिसुमनान्तः प्रयोज्यः कल्पयाम्यन्तो वेत्येकस्मिन्नुपस्तरणाख्य शेषिणि समुदायावयवरूपयोस्समवाये ऽपि लिङ्गवाक्ययोः समवायायोगात् बलाबलचिन्ता न युक्तेत्याशङ्क्य शेषसमवायद्वारा प्रमाणसमवायसूचनार्थं शेषसमवायोदाहरणानि दर्शयिष्यन् विरोधवृत्त्वर्तिष्यमाणसङ्कीर्तनं तावत्करोति * एवं तावदिति * श्रुतेस्तावल्लिङ्गविरोधमुदाहरति * तद्यथेति * ऐरं कृत्वोद्गायेति श्रुतवाक्यविरोध इत्याह * श्रुतीति * पूर्ववदपरितोषादुदाहरणान्तरमाह * तथेति * प्रकारविरोधमुदाहरति * प्रतिष्ठाकामेति * एकविंशतिसंख्याविशिष्टस्यानुवचनान्तरस्यानु- ८५८।१
श्रुत्या नमः प्रवक्त इति दर्शपूर्णमासाङ्गभूतनिगदानन्तरं प्रयोज्यावगतिनिगदस्य च जातवेदो वपया पशून्मयीति लिङ्गेन सामिधेनीवदग्निप्रकाशनाङ्गत्वात् सामिधेन्यनुवचनाङ्गत्वाभावेनानुवचनेन प्रयावतुमशक्ते एकविंशतिसंख्यायाश्च संख्येयापेक्षया संख्याविशिष्टानुवचनचोदनासामान्यतानुवचनान्तरस्य दार्शपौर्णमासिकस्य सामिधेन्यनुवचनविकृतित्वात्सामिधेनीनां संख्येयत्वेनातिदेशात् तासां वार्थाभिधानकर्मत्वेनानुवचनप्रयुक्तत्वात् अतः प्रयोज्यनिगदसामिधेन्यनुरोधेन पुरुषार्थस्याप्यनुवचनान्तरस्यान्तःक्रतुप्रयोज्यत्वादेकविंशतिसंख्याविशिष्टेनानुवचनान्तरेण प्रतिष्ठां कामयमानस्य नित्य फलार्थे वा दर्शपूर्णमासप्रयोग इत्युक्तम्। अन्तः क्रतु प्रयोज्यत्वादेव पुरुषार्थेनाप्यनुवचनान्तरेण प्रसङ्गात् क्रतूपकारसिद्धेः श्रुतिप्रकरणविरोधोदाहरणसिद्ध्यर्थं ऽङ्गत्वोपचारः प्रतिष्ठाकामस्येति षष्ठ्या दर्शपूर्णमासप्रयोगव्यतिरेकजानतत्वमनुवचनान्तरस्यान्तःक्रतुप्रयोज्यबलेनाङ्गीकृत्य षष्ठीश्रुतिप्रयोगाङ्गतोक्ता। क्रमविरोधमुपहरति * पशुकामेति * चमसोत्पत्तिसन्निधावपः प्रणयतीति श्रुतस्य कारणत्वेनान्वयस्य विवक्षितत्वात् कर्तृव्यापारत्वलक्षणस्य शब्दतः साधनापेक्षितत्वावगमे ऽपि चमसस्य साधनत्वानुक्तेः शब्दतः साध्यापेक्षित्वानवगमात् शब्दानपेक्षवस्तुमात्रायाश्चापेक्षाया दण्डो ऽस्ति। गामानयेत्युक्ते ऽपि दण्डेनानयेत्यप्रतीतेः शाब्दं व्यवहारानुयोगित्वादन्यतराकाङ्क्षालक्षणेन क्रमेण च समस्याङ्गता गोदोहनेन पशून् कामयमानस्यापि दर्शपूर्णमासप्रयोगे सामान्यतः प्राप्ता श्रौतात्तु गोदोहनात्तस्मिन् प्रयोगे चमसनिराक्रियेत्यर्थः। गोदोहनस्यापि क्रत्वर्थे प्रणयनाश्रितत्वान्तःक्रतुप्रयोज्यत्वबलेन पशुकामस्येति षष्ठ्या दर्शपूर्णमासप्रयोगव्यतिरेकजनितत्वाङ्गीकारात् गोदोहनस्य दर्शपूर्णमासप्रयोगाङ्गतायाः प्रासङ्गिकोपकारि-

त्वेनोपचरितायाः श्रौतत्वं श्रुतिक्रमविरोधोदाहरणत्वसिद्धये ऽ-
भिप्रेतं समाख्याविरोधमुदाहरति * वाजपेय इति * स्वा-
राज्यकामस्य कर्त्तृतेत्यध्याहारः कर्त्रधिकरणपूर्वपक्षे स्थित्वोदाहृत-
त्वेनैतदपरितोषात् उदाहरणान्तरमाह * तथेति * लिङ्गस्य वा-
क्यविनियोगमुदाहरति * स्योनादेरपीति * एकस्मिन्सादनाख्ये शे-
षिण्येकसमुदायावयवात्मकशेषसमवायः प्रथमश्लोकेनैकस्मिन्नु-
पस्तरणाख्ये शेषिणि द्वितीयेनोदाहृतः । पुरोडाशव्यापारस्य सदन-
स्याननुष्ठेयत्वेनाप्रकाश्यत्वात् प्रयोजकसादनलक्षणार्था सदनोक्तिः
हविः संस्कारार्थत्वे ऽप्युपस्तरणस्य हविराधारपात्राभिमुखक्षारणरू-
पत्वेनाभिघारणं विवक्षितम् एतयोः समुदायावयवयोः पूर्वोदाहृतत्वा-
दविवेकमाशङ्क्याह * अनेकेति * अनेकयोः शेषिणोरन्योन्यविशिष्ट-
शुद्धरूपयोरेकस्य शेषित्वमभिप्रेत्य प्रागुदाहृतौ सम्प्रत्येकस्य सा-
दनस्योपस्तरणस्य वा शेषिणो ऽनेकसमुदायावयवरूपाशेषान्वयम-
भिप्रेत्येत्यर्थः । पूर्वार्द्धं श्लोकद्वयेन व्याचष्टे * पूर्वमिति * कल्पया-
म्यन्तस्योपस्तरणवाचित्वात्तस्मिन्नित्याद्येकवाक्यत्वेन सादनाङ्गत्वा-
योगमाशङ्क्य साभिघारणोक्त्योपस्तरणस्य सादनेनोपसर्जनतोक्ता
शेषः सादनविशिष्टे ऽभिघारण इत्याध्याहार्ये तस्यैवोत्तरार्द्धं व्याचष्टे
८५९।१ * एकैकस्मिंस्त्विति * द्वयोरवयवयोः समुदायपक्षयोर्वाक्यादेक-
स्य तु लिङ्गेनैकस्मिञ्छेषिणि यस्मिञ्छेषत्वं प्राप्तं तत्सम्प्रति उदाहर-
णत्वेन गृह्यतइत्यर्थः । सादनोपस्तरणाख्यशेषिभेदेनोदाहरणभे-
दात् विशिष्टोपपत्तिः समुदायस्य विकल्पेन समुच्चयो न वा शेषि-
द्वये विनियोगो यथालिङ्गं वावयवस्येत्येकस्यैव लिङ्गवाक्यबलाब-
लोक्तिप्रकारस्य भाष्यकृतोक्तत्वात्प्रकारचतुष्टयोक्तिर्भाष्यानारूढेत्या-
शङ्क्याह * एकस्मिन्नेवेति * यद्यप्येक एव मार्गो भाष्यकृतोक्तः त-
थापि किमुपस्तरणे पुरोडाशसादने च प्रयोक्तव्य उतोपस्तरण इत्ये-
तावता भाष्येण निष्कृष्टेनोपस्तरणे कृते यत्पुरोडाशसादनमित्येवं वि-
शेषणविशेष्यभावप्रतीतेरुपस्तरणविशिष्टे सादने स्वप्रधाने चोपस्त-
रणे प्रयोक्तव्या इति अनेकयोः शेषिणोरेकशेषविषयप्रमाणद्वयसम-
वायादेको मार्गः पुरोडाशसादने स्वप्रधाने चोपस्तरणे प्रयोक्तव्य
इत्यनेकयोः शेषिणोरेकशेषविषयप्रमाणद्वयसमुदायादेको मार्गः पुरो-
डाशसादने कार्ये यदुपस्तरणमिति विपरीतविशेषणविशेष्यभावा-
त्सादनविशिष्टे उपस्तरणे स्वप्रधाने सादनइति द्वितीयो ऽपि किं कृ-
त्स्न उपस्तरणे प्रयोक्तव्य इति कल्पयाम्यन्तइत्येतावतैकस्मिन्नुपस्त-
रणे शेषिणि समुदायावयवरूपशेषद्वयसमवायात् तृतीयः किं कृ-

त्स्नः पुरोडाशसादने प्रयोक्तव्य उत तस्मिन्सीदेत्येवमादिरेत्येताव-त्येकस्मिन्पुरोडाशसादने शेषिणि तस्यैव शेषद्वयस्य समवायाच्चतु-र्थ इति मार्गचतुष्टयमेकस्मिन्नेव मार्गे यत्सङ्कीर्त्तनमव्यक्तं प्रतीयते तद्व्याख्यातृभिरात्मना स्वयं विवेक्तव्यमित्यर्थः। लिङ्गस्य प्रकरणा-दिविरोधानुदाहरति * लिङ्गस्येति * लिङ्गेन प्राप्तेनेत्यध्याहार्य्यं वाक्यस्य प्रकरणविरोधमुदाहरति * वाक्येति * शेषद्वयसम-वायमुपपादयति * प्रकरणेन हीति * गार्हपत्यस्योपरि हविःस्थापनं विधाय वेदिकरणविधानात् विधिपाठक्रमेणार्थादवगतस्य तदधि-वासनोत्तरकालस्य प्रकरणेनाङ्गतया ग्रहणमुपपादयितुं विधानो-क्तिः कालाख्यविशेषणप्रधानानुष्ठानलक्षणार्थत्वादुत्तरकालविधान-हेतुकस्योत्तरकालस्य ग्रहणमित्यर्थः। एवमप्यमावास्यायामिति स-प्तमीश्रुत्यैव पूर्वेद्युः कालस्यामावास्याङ्गत्वोपगतेर्वाक्यप्रकरणविरो-धोदाहरणता न युक्तेत्याशङ्क्याह * न चेति * शेषिणः शेषेण सह सम्बन्धाख्यशेषित्वं न वदतीत्यर्थः। तावत्या दीक्षणीयामनुब्रूयादि-त्यादिवत्सप्तम्युक्तस्याधिकरणत्वस्याधेयव्याप्यत्वात् प्राधान्यापेक्ष-कत्वेन सप्तम्याः शेषित्वे प्रमाणत्वमाशङ्क्य स्वरादिवत् कालस्य कर्म मध्यपातित्वलक्षणाधेयत्वाभावात् कालं प्रति कर्मणोऽधिकर-णत्वायोगोक्तिः (प्रतिपदासम्बन्धिकार्यमिति अपेक्षायां बहिष्पवमान-स्तोत्राङ्गत्वावगतेर्नित्यप्रतिपत्सम्बन्धिन एव द्वितीयपादादिप्रभृति-द्वितीये) वाक्यप्रकरणविरोधोदाहरणत्वोपपादनमुपसंहरति * त-स्मादिति * बाध्यबाधकतात्रूपपादितत्वात् सिद्धवेत्याह * स चेति * क्रमविरोधं प्रश्नपूर्वमुदाहरति * वाक्येति *इति राजन्याय प्रतिपदमितीतिकरणश्रुत्या विनियोगात् श्रुतिक्रमविरोधोदाहरणत्व-शङ्कां निराकर्तुं पादमात्रमित्युक्ते श्रुतिविरोधात्स हि वाक्येनापि द्वितीयादिपादविनियोगो न युज्यतेत्याशङ्क्य विरोधार्थं प्रतीकोक्तिः वृषा पवस्व धारयेत्याद्यपादामां विनियोगेनोपास्मै गायता नरः पवमानायेन्दवे अभिदेवं इयक्षत इति नित्यायाः प्रतिपादं तुल्या-र्थत्वेनाद्यस्यैव पादस्य निश्चितत्वात् द्वितीयादिपादविनियोगस्य श्रुत्या विरोधे सति द्वितीयपादात्प्रभृति कस्याः प्रतिपदसम्बन्धिका-र्यमिति अपेक्षायां बहिष्पवमानस्तोत्राङ्गत्वावगतेर्नित्यप्रतिपत्सम्ब-न्धिन एव द्वितीयापादादिप्रभृति द्वितीयातृतीयत्वलक्षण यथासं-ख्यं क्रमविनियोगप्रसङ्ग इति नत्रेत्यनेनोक्तम्। ततश्चैकस्मिन् बहि-ष्पवमानस्तोत्रे शेषिणि द्वितीयपादप्रभृतिशेषद्वयसमवायमुदाहर-

(१) अथ पा० २ पु० ना०।

णपूर्वं दर्शयितुमाह * तद्यथेति * वृषेति प्रथमान्तस्य पदस्य पव-
मानायेत्यादिभिश्चतुर्थ्यन्तैरेकवाक्यतोपगमनासामर्थ्याल्लिङ्गेन क्रमस्य
विरोधे सम्भवति ततो जघन्येन वाक्येन विरोधोक्तिरयुक्तेत्याशङ्कते
* नन्विति * मत्सरादिपदवत्पवमानायेत्यादीनामपि सोमलिङ्ग-
त्वान्न लिङ्गविरोध इति परिहरति * नेति * एकवाक्यत्वोपगम-
नशक्त्यार्थं तु लिङ्गमेकवाक्यत्वेन कल्प्यत्वात्ततो ऽपि जघन्यमि-
त्याशङ्काशयनिरासार्थं दर्शयितुमाह * विभक्तीति * मरुत्वतइ-
त्यस्यापि चतुर्थ्यन्तत्वादेकवाक्यत्वायोगमाशङ्क्य मरुत्वत इत्यस्य
देवतावाचिनो वृषेत्यादिद्रव्यवाचिपदानन्तर्यान्मरुत्वद्द्रव्यत्वेन सोम-
द्रव्यस्तुत्यर्थत्वात् सोमस्तुत्यर्थवृषादिपदैकवाक्यत्वोपपत्तिर्मत्सरा-
दिपदानां च वृषादिपदवत्सोमवाचित्वेन स्पष्टमेव वृषादिपदैः स-
मानविषयत्वं विप्रकर्षोक्तिमिषेण सूचयितुमाह * तदिति * स-
८६०।२ माख्याविरोधमुदाहरति * वाक्येति * समुच्चयाशङ्कानिरासाय
* केनेत्युक्तम् * तत्रेत्यनेन विप्रकर्षस्यानाशङ्कितोक्ता । प्रथमा-
या अप्यभिहितकारकविभक्तित्वादिति कर्त्रधिकरणवार्त्तिके प्रथमा-
याः कारकविभक्तित्वस्य वक्ष्यमाणत्वात्प्रथमाश्रुतेः समाख्याविरो-
धमाशङ्क्य कर्त्तरि प्रथमाश्रुत्यभावात् आख्यातसामानाधिकरण्या-
न्यथानुपपत्त्या च प्रातिपदिकस्याख्यातोक्तभावनाक्षिप्तकर्तृत्वाश्रय-
त्वेन कर्त्रधिकरणवार्त्तिकोपपत्तेः । प्रथमायाः कारकविभक्तित्वा-
भावाच्छ्रुतिविरोधवादिनाख्यातस्य कर्तृवाचिता वैयाकरणैरभ्युप-
गन्तव्येत्यापाद्य तदसम्भवोक्त्या निरस्यति * नचेति * प्रकरणस्य
क्रमविरोधमुदाहरति *क्रमेति* पूर्वं श्रुतिवाक्यविरोधाविषयत्वेना-
स्योदाहृतत्वात्क्रमविरोधोदाहरणत्वायोगमाशङ्क्य स्तोत्रापेक्षयेयुक्तत्वा
याज्ञिकमित्युक्तं सामशब्दो ऽत्र स्तोत्रवाची पूर्वं किमपेक्ष्येत्या-
शङ्क्य यज्ञायज्ञीयसामापेक्षयेत्याह * पूर्वं त्विति * समाख्यावि-
रोधमुदाहरति * प्रक्रियेति * वाक्यसमाख्याविरोधविषयतया
ऽस्योदाहृतत्वात् । प्रकरणसमाख्याविरोधोदाहरणत्वायोगमाशङ्क्य
ज्योतिष्टोमं प्रतीत्युक्त्वा तस्य हीत्यादिना विविक्तविषयत्वं विवृत्त
क्रमसमाख्याविरोध प्रश्नपूर्वमुदाहरति * क्रमेति * लिङ्गेनापूर्व-
कर्मद्वयाङ्गत्वापत्तेः लिङ्गक्रमविरोधोदाहरणत्वमाशङ्क्याह * लिङ्गे
त्विति * सामान्यसम्बन्धापेक्षत्वेन लिङ्गस्यान्यतश्च सामान्यसम्ब-
न्धानवगतेः क्रमसमाख्ययोर्मध्ये यद्बलीयस्तदपेक्षत्वात् बाधेन वि-
नियोजकत्वं न सम्भवतीत्याशयः। श्रुत्योः समवाये दौर्बल्यमर्थविप्र-
कर्षात् लिङ्गयोः समवाये पारदौर्बल्यम्।अर्थविकर्षादित्येवमादिसूत्रा-

भ्युपगमेन सजातीयबलाबलप्रदर्शनं सुखग्रहणार्थं प्रवृत्तानुकीर्त्तनपूर्वं प्रतिजानाति * एवमिति * शाखैकत्वेन साक्षाच्छेषभेदेन शेष्येकत्वे शेषसमवायद्वारा श्रुत्यादीनां विजातीयैः समवायस्य चिन्तितत्वोक्त्या सजातीयसमवायस्यापि द्वेधा चिन्तनीयत्वं सूचितम् । कारणदोषजन्यत्वात् मिथ्यात्वस्य अनाप्तप्रणीतत्वस्य च शब्ददोषत्वात् पौरुषेयत्वाद्वेदे ऽनुपपत्तेः वेदार्थज्ञानस्योत्पन्नस्य मिथ्यात्वज्ञापनलक्षणबाधायोगात् । सामान्यशास्त्रादीनां बाधायोगमाशङ्क्य लिङ्गादिवत्सामान्यशास्त्रादेरपि ज्ञेयासद्व्युदासप्रकाशनलक्षणपरिच्छेदफलविज्ञानोत्पादकत्वप्रतिबन्धलक्षण एव बाधोक्तिस्तु बाधग्रन्थे वक्ष्यमाणाज्ञानमात्रोत्पादकत्वाशयेति सूचयितुम् * यथा चेत्युक्तम् * श्रुत्युदाहरणानि तावद्दर्शयितुं सामान्यविशेषसन्दिग्धपौर्वापर्यनिराधारविषयत्वेन भिन्नायाः श्रुतेरेकस्मिन् शेषे समवायो दर्शनीय इत्याह * तद्यथेति * सामान्यविशेषश्रुत्योरेव चतुर्धाकरणाख्यशेषयोर्विरोधमुदाहरति * पुरो- ८६१।२
डाशमिति * प्राप्नुवदित्यनेन प्राप्तबाधः सूचितः । एकस्मिन्नवभृथ होमे शेषिणि आहवनीयस्य आहवनीयाख्यशेषद्वयसमवाये सामान्यविशेषश्रुत्योर्विरोधमुदाहरति * तथेति * अपूर्वत्वेनावभृथे चतुरवत्तहोमाप्राप्तेराहवनीय (प्राप्त्युदाहरणान्तरमाह *तथेति* अप्रकरणविरोधमुदाहरति * प्रतिष्ठाकामेति * एकविंशतिसंख्याविशिष्टस्यानुवचनान्तरस्यानुश्रुत्या नवइति दर्शपूर्णमासाङ्गभूतनिगदानन्तरं प्रयोज्यावगतिनिगदवस्यवज्मातवेदो रमया पशुन्मेधालिङ्गेन सामिधेनीवदग्निप्रकाशनाङ्गत्वात् सामिधेन्यनुवचनाङ्गत्वाभावे सानुवचनविकृतित्वात्सामिधेनीनां सङ्ख्येयत्वेनातिदेशात् तासां चार्थाभिधानकर्मत्वेनानुवचनप्रयुक्तत्वाभावादतः प्रयोगनिगदसामिधेन्यनुरोधेन पुरुषार्थस्याप्यनुवचनान्तरस्यातः सन् प्रयोज्यत्वादेकविंशतिसंख्याविशिष्टेनानुवचनान्तरेण प्रतिष्ठाकाममानस्य नित्ये फलान्तरे वा दर्शपूर्णमासप्रयोगइत्युक्तम् । तत्रः क्रतुः प्रयोज्यत्वादेव पुरुषार्थेन[1]) प्राप्त्ययोगमाशङ्क्यातिदेशतो होमाप्राप्तावप्यवभृथे जुहोतीति उपदेशादेव प्राप्तिं दर्शयितुं जुहोति सामानाधिकरण्योक्तिः एकस्मिन्वैश्वदेवयागशेषिण्यामिक्षावाजिन इति चतुर्धा पञ्चमरूपेण सन्दिग्धायाः श्रुतेर्वैश्वदेव्यामिक्षेत्यसन्दिग्धस्ताद्धितश्रुत्या विरोध इत्याह *सन्दिग्धेति* एकस्मिन् ज्योतिष्टोमे शेषिणि पूर्वोद्गात्रविच्छेदनिमित्ता दाक्षिण्यप्रतिहर्त्रवच्छेदनिमित्तसर्वस्वदाक्षिण्यरूपशेषद्वय-

(१) अथ पा० २ पुस्तकै ना० ।

समवाये पूर्वशेषविषया दाक्षिण्यश्रुतेः । य इष्ट्वेति वाक्येनैकस्मिन्
पर्वणि शेषे सोमेष्टिश्रुत्योः समवायोऽङ्गगुणविपर्येष्टिश्रुतेरेकस्मिन्
श्येन प्रयोगशेषिणि प्राकृतबर्हिर्वैकृतशराख्यशेषद्वयसमवाये प्राकृ-
तविषयाया बर्हिष्षिहवींष्यासादयतीति बर्हिश्रुते. प्राप्तत्वेन विप्र-
कर्षायोगात् बाध्यत्वायोगमाशङ्क्य विप्रकर्षाभावेऽपि विज्ञानो-
त्पादकत्वाभावात् बलवद्विरोधपरिहारं च विना तात्पर्यस्यावधार-
णाभावात् । विषयपरिच्छेदकरूपज्ञानाख्यज्ञानविशेषोक्तिप्रतिबन्ध-
लक्षणबाध्यत्वं सम्भावयितुमाह * एवमिति * प्राकृतवैकृतवि-
रोधग्रहणायादिशब्द. । एकस्मिन्सङ्ख्याख्यं भावनाख्ये च शेषे प-
दैकाभिधानश्रुत्यो. समवाये पदश्रुतेरेकाभिधानश्रुत्या बाधात् श्लो-
कद्वयेनोदाहरति * तथेति * लिङ्गद्वयस्यैकस्मिन् शेषे शेषद्वयस्य
च एकस्मिन्शेषिणि समवाये स्योनमित्येवोदाहरणमित्याह * तथा
लिङ्गेति * किमत्र लिङ्गद्वयमित्याशङ्क्याह * एतच्चेति * तदेषां
ऽर्थविप्रकर्षो यत् स्योनं त इत्यस्य प्रत्यक्षसादनाभिधानसामर्थ्यं
मुख्यमित्यादिभाष्येण विशेषं द्रढयितुमाह * इतीति * एकस्मिन्
वैश्यप्रयोगे शेषिणि पाञ्चदश्यसाप्तदश्याख्यशेषद्वयसमवाये वा-
क्ययोर्विशेषमुदाहरति * वाक्ययोरिति * उदाहरणत्वोपपा-
दनपूर्वं विशेषमाह * उभयत्रापीति * सामान्यश्रुतिवत् सा-
मान्यवाक्यस्यापि विशेषविषयज्ञानोत्पादने साङ्कर्याद्विप्रकर्ष इत्या-
शयः । एकस्मिन्नभिक्रमणे शेषे प्रकरणयोः समवायमुदाहर-
ति * प्रकरणयोरिति * विरोधोपपादनपूर्वं विशेषमाह * महाप्रक-
रणेन हीति * सन्दंशाभिव्यक्त्यावान्तरप्रकरणस्थस्याङ्गस्य स-
न्दंशभूतश्रुत्यादिसंयुक्तत्वेन महाप्रकरणाय ग्राह्याभ्यामाद्यन्ताभ्यां
अवान्तरप्रकरणयज्ञाभ्यां व्यवधानादवान्तरप्रकरणिनः प्रयाजादेर्महा-
प्रकरणस्पर्शं विनाभिक्रमणादेर्महाप्रकरणस्पर्शानुपपत्तेस्तमनुभूयै-
वान्तरप्रकरणान्वयः प्रत्यासत्तेर्वाक्यस्थानीयत्वात् पूर्वं भवतीत्याश-
यः । आद्यस्य युगलस्य द्वितीयकर्मणः पूर्वत्वात् द्वितीयस्य चाद्या-
त् परत्वात् पौर्वापर्यक्रमेणाद्यस्य द्वितीयाङ्गत्वावगतेर्द्वितीयस्य पौ-
र्वापर्यक्रमेणाद्याङ्गत्वात् द्वितीयाङ्गत्वानवगतेर्यथासंख्यक्रमेण त्व-
वगतेरेकस्मिन्नाद्ये द्वितीये वा शेषे क्रमद्वयसमवाये पौर्वापर्यक्रमेण
चाद्यस्य यथासंख्यक्रमेण द्वितीयस्य च पौर्वापर्यक्रमेणाद्यस्य च य-
थासंख्यक्रमेणाद्याङ्गत्वावगतेरेकस्मिन्नाद्ये द्वितीये वा शेषिणि शेषद्व-
८६२।२ यसमवाये क्रमयोर्बलाबलमुदाहरति * क्रमयोरिति * सादेश्य-
लक्षणस्यैव क्रमस्य विनियोक्तृत्वाभ्युपगमात् पौर्वापर्यस्य क्रम-

स्थाभावमाशङ्क्य सन्निधिरूपत्वेन क्रमस्य विनियोक्तृत्वात् पौर्वापर्यस्यापि सन्निधिरूपत्वाविशेषेण विनियोक्तृत्वसम्भवे ऽप्यबाधितपौर्वापर्यादर्शनेन विनियोक्तृत्वानभ्युपगमाद्धस्तावनेजनोलपराजिकास्तरणादिपौर्वापर्यवच्च प्रकरणादिना बाधाभावाद्यथासंख्यक्रमेणाबाधे विनियोक्तृत्वापत्तेस्तेन बाधः सम्भवति न चाति सम्प्रधारणा युक्तेति परिहारसूचनार्था प्रत्यासत्त्युक्तिः । एकस्मिन् पोत्रियाख्यकर्मणि शेषिणि पोत्रध्वर्य्याख्यशेषद्वयसमवाये पोत्रियमिति विशेषसमाख्यया आध्वर्यवमिति समान्यसमाख्याया बाधस्तस्येति । सप्तमपादसूत्रबद्धः समाख्याद्वयविरोधोदाहरणमित्याह * समाख्ययोस्त्विति * सन्दिग्धासन्दिग्धश्रुत्याद्युक्तोदाहरणेषु मध्ये कैकस्मिञ्छेषे प्रमाणद्वयसमवायः क्वैकस्मिञ्छेषिणि शेषद्वयसमवाय इत्याशङ्कास्मदुक्तप्रकारविवेकं सूचयितुमाह * शेषेति * उपकारपृष्ठभावेन पदार्थशास्त्राणामप्यतिदेशाभ्युपगमादानुमानिकेष्वपि श्रुत्यादिषु बलाबलस्य विचार्यत्वं वृत्तानुकीर्त्तनपूर्वं प्रतिजानाति * एवं तावदिति * एतदेव विवृणोति * तत्र चेति * शरमयं भवतीत्यादीनां प्रत्यक्षगम्यानां श्रुत्यादीनां बर्हिषि हवींष्यासादयतीत्यादिभिः श्येने ऽनुमानगम्यैः श्रुत्यादिभिः सह पशौ चानुमेयानां प्रयाजादिविषयाणां श्रुत्यादीनां पशुपुराडाशे प्रयाजादिविषयैरानुमानिकैः श्रुत्यादिभिः सह बलाबलमनुत्पन्नमेव चेह श्रुत्यभावाच्छेषज्ञानम् । बाध्यतइति पूर्ववार्त्तिकोक्तेन मार्गेण व्याख्येयमित्यर्थः । कीदृङ्व्याख्येयमित्यपेक्षायामप्रत्यक्षाणामानुमानिकैः सजातीयैः सह विरोधे प्रत्यक्षाणां बलीयस्त्वमाह * तद्यथेति * विजातीयविरोधे पूर्वस्यापि श्रुत्यादेरानुमानिकस्य परेणापि लिङ्गादिना प्रत्यक्षेण बाध इत्याह * विपरीतो ऽपि चेति * यथा कृष्णलेषु कृष्णलानवहन्तीत्यवहननातिदेशानुमितिश्रुतिप्राप्तावघातस्तुषकरणविमोचनसामर्थ्येन प्रत्यक्षेण तुषरहितेषु कृष्णलेष्वशक्यत्वावगमात् बाध्यतइत्युदाहरणमाह * यथेति * लिङ्गमात्रेषु वचनसामर्थ्यमिति करणाधिकरणोपक्रमभाष्ये मन्त्रसामर्थ्यस्य लिङ्गत्वाभिधानात्कृष्णलगतस्यासामर्थ्यस्वालिङ्गत्वं नास्तीत्याशङ्क्याह *मन्त्रेति* लैङ्गिकगौणमुख्यार्थविषयविनियोगप्रकारचिन्तायां मन्त्रस्यातिरिक्तविषयत्वायोगात्तदनुकीर्त्तनार्थे भाष्ये लैङ्गिकविनियोगसिध्यै लिङ्गविशेषलक्षणं तदित्याशयः । सामर्थ्यमात्रस्य लिङ्गत्वे भाष्यसम्मतिमाह * तथा चेति * प्राप्त्युक्त्या प्रापक विवक्षितत्वाल्लिङ्गदर्शनोक्तेः प्रापकोपोद्बलार्थत्वाद्यत्प्रापकमनेन लिङ्गेनोपोद्बलनीयम् ।

तत्किमिति पृष्टे ऽनन्यथासम्भवोक्त्यानन्यगतित्वलक्षणसाध्यता- याः प्रापकत्वाभिधानात् सामर्थ्यरूपता लिङ्गस्य भा- ष्यकृतो ऽभिमता ज्ञायत इत्याशयः । भवत्वन्यार्थदर्शनस्य प्रा- पणासमर्थत्वादलिङ्गत्वम् । तस्य तु श्रुतिविरोधे बाधोक्तिर्न वेति पृच्छति * यत्पुनरिति * सन्देहोपपादनार्थं श्रुतेरानुमानिकत्वे लिङ्गस्य प्रत्यक्षत्वे ऽभिहिते कृष्णलावघातवदेव तद्बाध्यत्वानुमानिक्याः श्रुतेः प्रत्यक्षलिङ्गबाध्यत्वसिद्धेः प्रश्नो न युक्त इत्याशङ्क्यातिदेशानुमेयायाः श्रुतेर्वैकृतप्रयोगवाक्यैकवाक्यतयानुमेयत्वाभ्युपगमात् समस्तप्राकृत- वैकृताङ्गप्रापकश्रुत्यादिप्रमाणपर्यालोचनयानुमीयमानायां श्रुतौ विरोधपरिहारार्थं बलवत् प्रमाणाविरुद्धार्थविषयतयानुमानाद् ग- त्यरूपस्य वा लिङ्गस्य गौणसामर्थ्यायोगादसमर्थस्य च विनियोगा- योगादवघातविषयप्रत्यक्षसामर्थ्यरूपलिङ्गानादरे विनियोगानुप- पत्तेस्तस्याः श्रुतेः प्रत्यक्षलिङ्गबाध्यत्वसम्भवे ऽपि स्मृत्यनुमेयायाः श्रुतेः स्वातन्त्र्येण पठ्यमानतयानुमेयत्वाभ्युपगमेन प्रत्यक्षश्रुतितुल्य- त्वावगमाद्गर्भे नुनौ जनिता दम्पती कर्देवस्त्वष्टा जनिता विश्वरूप इत्या- देर्मातुलदुहितृपैतृष्वसेयीविवाहादिद्योतनार्थस्यान्यार्थदर्शनसामर्थ्य- रूपस्य लिङ्गस्यानादरे ऽपि पैतृष्वसेयीं मातुलसुतां सगोत्रां च प- रिणीय चान्द्रायणं चरेत्परित्यज्यैनां मातृवत् बिभृयात् इतिस्मृत्यनु- मेयया श्रुत्या मातुलदुहितृपैतृष्वसेयीविवाहनिषेधात्स्वरसान्यत्वा- भावाद्वैषम्यसूचनार्थम् * यथेत्युक्तम् * उत्तरमाह * तत्रेति * प्रत्यक्षश्रुतिविरोधे ऽपि स्मृतिमूलश्रुतिकल्पनाया दुर्वारत्वस्यैताव- त्विह वक्तव्यमित्यादिविरोधाधिकरणवार्तिकोक्तत्वेन लिङ्गविरोधे मू- लान्तरशङ्काया दूरोत्सारितत्वादयथार्थश्रुताश्रुतिमूलत्वं मूलान्तरो- क्त्याभिप्रेतम् । यमेन स्वभगिनीं यमीं प्रति आवयोर्गर्भे दम्पती प्रजापति- र्जनितेत्यभिधानात् भ्रातृभगिन्यपत्ययोरन्योन्य दाम्पत्यौचित्यश्रौतक- त्वे ऽनभिमतस्य गर्भेत्विति लिङ्गस्यौचित्येन वैवस्वतयोर्यमयम्योः संवा- दः षष्ठचयुग्भिर्यमीमिथुनार्थं यमं प्रोवाच सतां नवमी युग्भिरनिच्छत्प्र- त्याचष्ट इति शौनकस्मृतगर्भेत्वित्यृचः पञ्चमीत्वेनानायुक्तत्वाद्यम्याः स्व- भ्रातरं यमम्प्रति गर्भस्थावेवावां दम्पती जनितेत्यभिधानार्थतया भ्रातृ- भगिन्यपत्ययोर्दाम्पत्यौचित्यद्योतकत्वायोगमाशङ्क्य मम सप्तपुरु- षान्तरात्तव च पञ्चान्तरेयो गर्भस्तज्जातयोस्तावत्स्त्रीपुंसयोर्दम्पती- तावश्यं स्वभाविनी तद्वरमावयोरेवान्योन्यसम्पर्काद्यो गर्भो भविष्य- ति तज्जातयोः स्त्रीपुंसयोर्दम्पतिता ऽस्त्वित्येवं यमीवचनत्वे ऽपि भ्रातृभ- गिन्यपत्ययोर्दम्पतीत्वौचित्यद्योतकत्वाविरोधसूचनार्थम् * न त्वित्यु-

क्रम * आयाहीन्द्र पथिभिरीळितेभिर्यज्ञमिमन्नो भागधेयं जुषस्वाभितृप्ताज्जहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयी वपामिवेति अस्यामप्यृचि घृतसेकतृप्तवपाख्यं भागधेयं जुषस्वेत्युक्ते वपायाः सेव्यत्वलक्षणं नामन्वं दृष्टान्तेनोपपादयितुं यथा मातुलस्य योषा रूपं जहुशब्दवाच्यमपत्यं यथा च पैतृष्वसेयी पुंसो भागो भजनीया सेव्या तथा वपा तद्वत् सेव्येत्यभिधानं स्रुचौ व्यूहति प्राचीं जुहूं प्रतीचीमुपभृतमिति, स्रुग्व्यूहनविधिवाक्यशेषे च समानात्पुरुषाद्दत्ता चाद्यश्च जायते इत्यनेनैकस्मात्पुंसो जाताभ्यां भ्रातृभगिनीभ्यां पुरुषाद्दत्ता भोक्ता पुरुषसन्तानो वाद्यश्च भोग्यस्त्रीसन्तानो जायत इत्युक्तेर्भ्रातृभगिन्योरेव भोक्तृभोग्यतेत्याशङ्क्य निरासार्थमुत तृतीये सङ्गच्छामहै चतुर्थे सङ्गच्छामहा इति यं दीव्यमाना जात्या आसनद्धेत्यनेनैकस्मात्पुंसो जाताभ्यां भ्रातृभगिनीभ्यां द्वितीयाभ्यां स्वभार्यास्वपतिसंपृक्ताभ्यामेकस्मात्पुमानन्यस्मात् स्त्रीत्येवं जाते तृतीये ततो वा जाते चतुर्थे विवाहाख्यां सङ्गतिं कुर्म इत्येवं दीव्यमानाः क्रीडमाना श्लाघ्यमानाः जात्याः कुलीना यस्मादासते तस्मादेकस्माद्भोक्ता भोग्यश्च जायते इत्यभिधानं भ्रातृभगिन्यपत्ययोर्दम्पतित्वौचित्यद्योतकलिङ्गमनन्यगतित्वात् स्मृतिं बाधते तस्मात्पुत्रिकाकरणे दुहितुः स्वत्वनिवृत्त्यभावात्सापिण्ड्यानिवृत्तेः ।

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्विकाङ्कान्तामसपिण्डां यवीयसीम् ॥

इति सपिण्डोद्वाहनिषेधात्तद्विषयत्वेन पैतृष्वसेयमातुलसुतापरिणयननिषेधस्मृतिर्व्याख्येया अतएव ।

पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च ॥

मातुश्च भ्रातुराप्तस्य गत्वा चान्द्रायणं चरेदिति ।

गमने प्रायश्चित्तमुक्त्वा ।

एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत बुद्धिमान् ।
ज्ञातित्वेनानुपयास्ताः पतति ह्युपयन्नधः ॥

इति पैतृष्वसेयादिपरिणयननिषेधे ज्ञातितैव सपिण्डताख्याहेतुत्वेनोक्ता भगिनीत्वस्य पैतृष्वस्रेयीविशेषणत्वाभावे चतुर्णामापत्तेरेतास्तिस्र इति त्वत्यनुपपत्तिप्रसङ्गात्पितृष्वसुः पुत्रिकाकरणे तृतीयः पुत्रः पुत्रिकैवेति पुत्रिकायाः पुत्रत्वस्मृतेः । अभ्रातेव पुंस एति प्रतीचीति मन्त्रे चाभ्रातृका दुहिता पुत्रिकाकरणात्पुंसः प्रतीचीनं पुत्रत्वङ्गच्छतीति पुत्रिकायाः पुत्रत्वदर्शनात् पुत्रिकायाः स्वभ्रातुः पुत्रं प्रति पितृव्यत्वापत्तेः ।

पितृव्यदुहितुश्च भगिनीत्वविशेषणेन पुत्रिकायां पितृष्वसुर्यादुहिता पैतृष्वसेयीति प्रतीतेर्मातृभ्रातुश्चासत्वविशेषणेन पुत्रिकाया मातुर्यो भ्राता सपिण्डस्तस्य दुहितुरङ्गत्वेत्यर्थावगमात् पैतृष्वसेयीमातुलदुहितृपरिणयननिषेधः पुत्रिकाकरणविषयो निश्चीयते । वसुदेवाङ्गजाता च कौन्तेयस्य विरुध्यतइत्यादिवार्त्तिकं त्वभ्युपेत्यवादमात्रत्वेन व्याख्येयम् । मातुलदुहितृपरिणयनस्याश्वविक्रयादिवत् दुराचारत्वस्मृतिपितृसन्ताने सप्तमान्मातृसन्ताने च पञ्चमादर्वाक्पुत्रिकाकरणाभावमनिश्चित्य परिणयनविषयेति सर्वमनवद्यम् । न केवलमानुमानिकस्यैव श्रुत्यादेः परेण लिङ्गादिना प्रत्यक्षेण बाध किन्त्वानर्थक्यापत्तौ प्रत्यक्षस्यापीत्याह * सर्वत्र वेति * विपरीतबाधोदाहरणार्थसाधनविशेषलक्षणार्थो जातिनाध्यवसीयते । व्रीहिजातिरहितं यत्साधनं किं तद्यतस्तण्डुला भवन्ति तत्प्रोक्षितव्यमिति तण्डुलनिर्वृत्तिकरणता हि साधनं न द्रव्यतेति नवमाधिकरणभाष्यम् अर्थतः पठति * तदिति * श्रौतं व्रीहिस्वरूपमनादृत्य प्रकरणगम्यापूर्वसाधनांशलक्षणो सुजातिना व्यवहिताः प्रमेयाख्याश्रयबलाबलवैपरीत्यादपि प्रमाणबलाबलवै-
८६३।१ परीत्यं भवतीत्याह * तथेति * श्लोकं व्याचष्टे * सर्वेति * एतदेव लोकसिद्ध्योपपादयति * तथा चेति * श्रुतिलिङ्गविरोधापादनभाष्यस्य सूत्रोक्तसमवायोपपादनार्थत्वसूचनार्थं वृत्तवर्त्तिष्यमाणकीर्त्तनं करोति * एवमिति * किन्त्वादित्यादिपूर्वपक्षभाष्यलिङ्गस्य श्रुत्यपेक्षत्वेनासम्भवादर्थविषयप्रतिज्ञानुपपत्तेरयुक्तमाशङ्क्योपपादयितुमाह * तत्रेति * श्रुत्यपेक्षत्वाभ्युपगमे ऽपि यस्मिन् विषये विरोधो नास्ति तस्मिन् यल्लिङ्गस्य श्रुतिकल्पनहेतुभूत समवेतार्थोक्तिसामर्थ्यं करणाम्नातं च रूपं तस्य विरोधविषये ऽपि तुल्यत्वात् श्रुतिकल्पनाविघात. तुल्यबलत्वोपपत्तिं प्रदेशान्तरेत्यनेनोक्ता यथाश्रुतेर्विरोधाविरोधयोस्तुल्यं रूपम् । तथा लिङ्गस्यापीति श्रुतिदृष्टान्तेन लिङ्गस्य रूपतुल्यत्वं द्वयोरपीत्यनेनोपपादितया पूर्वार्धं व्याचष्टे * स्वत एवेति * श्रुतिलिङ्गजन्ययोर्ज्ञानयोस्तुल्यरूपत्वेन श्रुतिलिङ्गत्वोपपादनार्थं न हीति भाष्यं श्रौतविनियोगान्यथानुपपत्तिकल्पितया गार्हपत्योक्तिशक्त्येन्द्रोक्तिशक्तिबाधात् श्रुत्याख्यलिङ्गरूपविकल्पेन लिङ्गस्य ज्ञानोत्पादकत्वानुपपत्तेरयुक्तमाशङ्क्योपपादयितुमाह * न हीति * रूपोक्त्या शक्त्यभिधानादज्ञानत्वशक्तिकस्य मन्त्रस्य विनियोक्तुमशक्यत्वात् विनियोगात् प्राक् शक्तिनिरूपणे कार्ये स्वारसिकेन्द्रोक्तिजनितेन्द्राङ्ग-

स्वज्ञानबाधा न शक्येत्यर्थः लिङ्गजन्यस्य ज्ञानस्य सविचिकित्सत्वा-
ल्लिङ्गस्य सारूप्यशङ्कार्थं नन्वितिभाष्यं लिङ्गादपि सन्देहाख्यवि-
चिकित्सानुत्पत्तेरयुक्तमाशङ्क्य विक्षेपार्थत्वेन विचिकित्सोक्तिं व्या-
ख्यातुमाह * नन्विति * स्वतःप्रामाण्यात् विक्षेपायोगमाशङ्क्य *
नहीत्युक्तम् * नैतदिति परिहारभाष्यं श्रुत्यपेक्षत्वेन कुतश्चित्
लिङ्गान्निर्विक्षेपप्रत्ययायोगादयुक्तमाशङ्क्योपपादयितुमाह * परःपु-
नरिति * भवतु लिङ्गात्प्रत्यय इति भाष्यात् लिङ्गेन ज्ञानोत्पादनं
सिद्धान्तिनाप्यभ्युपगतत्वात्। ऐकान्तिकभ्रान्त्या गृहीत्वा ज्ञानस्यो-
त्पन्नस्य विक्षेपे ऽपि दोषाभावेन सविक्षेपत्वस्य सविचिकित्सत्वस्य
वाच्यत्वात् सन्देहो विपर्ययो ऽनध्यवसायो वा सदसत्तासाधारणा-
ज्ञानरूपा विचिकित्साशब्देनोक्ता इति मत्वा सन्दिग्धबुध्यभावान्नैतदे-
वमिति वाचकाभावेन च विपर्ययायोगात्पारिशेष्यादिन्द्राङ्गत्वलक्षण-
यैन्द्रीत्वसदसत्त्वयोर्मध्येऽन्यतरानिश्चयरूपो ऽनध्यवसायाख्यो भवति
तस्याविरोधे ऽपि विषयसदसत्त्वादन्यत्र परिच्छेदफलविज्ञानरूपत्वा-
भावेनाप्रामाण्यात् बलाबलचिन्तानुपपत्तेर्वाध्यत्वे ऽपि न पूर्वपक्ष-
हानिः। यतस्तु कदाचनेति स्पष्टेन्द्रलिङ्गात् इन्द्रदेवत्यो ऽयं मन्त्रो
भवत्येवेति। एव सत्त्वनिश्चयरूपे निर्विचिकित्साख्यः प्रत्ययो भव-
ति सप्रामाण्याविशेष्याद्विकल्पितुमर्हतीति पूर्वपक्ष्याहेत्यर्थः। न-
न्विति शङ्काभाष्यश्रुतिविरोधे मन्त्रस्यैन्द्रपरत्वायोगात् विज्ञानोत्पा-
दकशब्दसहकारितात्पर्यावधारणाभावे विज्ञानापरपर्यायाध्यवसाया-
ख्यनिर्विचिकित्सत्वानुपपत्तेरयुक्तमाशङ्क्य सविचिकित्सो हीति भा-
ष्यवदिहापि विक्षेपार्थे विचिकित्सोक्तिरित्येव व्याचष्टे * नन्वि-
ति * नैतदिति परिहारभाष्यं विक्षेपे ऽप्यविरोधिश्रुतिविकल्प-
नोत्तरकालं प्रामाण्यासम्भवादयुक्तमाशङ्कानध्यवसायाख्यविचिकि-
त्साशयत्वेन व्याचष्टे * इतरस्त्विति * काममित्यादि न लिङ्गं वि- ८६४।८
नियोजकमित्यन्त शङ्काभाष्यं सिद्धान्तिन. सावित्रकलिङ्गात्प्रामा-
ण्यानुज्ञानौचित्यादयुक्तमाशङ्क्य विरोधे तावत्प्रामाण्यं नास्त्येवत्ये-
वमर्थत्वं कुपितोक्त्या सूचयन् व्याचष्टे * सिद्धान्तेति * वि-
चिकित्सोक्तेर्विक्षेपार्थत्वव्याख्याया लिङ्गस्य चाप्राप्तबाधोक्तेरेतद्भा-
ष्यविरोधं शङ्कते * कथं पुनरिति * यदि सविचिकित्सोक्त्या
सविक्षेपताच्यते कथं भाष्यकृता सविक्षेपकत्वम् सविचिकित्स-
शब्दवाच्यत्वेन परित्यज्य संशयो यः स विचिकित्सशब्दवाच्यत्वेन
लोके प्रसिद्ध. स एवात्र सविचिकित्सत्वेनोच्यते लिङ्गस्य वा प्रा-
प्तबाधाभ्युपगमे कथं लक्षणस्य चाप्राप्तबाधाभ्युपगमे कथं लिङ्ग-

परिज्ञातत्वं भाष्यकृतोच्यते नास्मिन् विषयद्वये भाष्यविरोधो
वार्त्तिकस्येत्याशयः चशब्दार्थे एवशब्दः । श्रुत्यविरोधे लिङ्ग-
विनियोज्यस्य मुख्यार्थतात्पर्यावधारणा लिङ्गस्याङ्गत्वरूपार्थविषय
परिच्छेदकविज्ञानोत्पादकत्वे ऽपि विरोधतात्पर्यानवधारणान्न शा
क्तिप्रकरणाम्नानलक्षणलैङ्गिकज्ञानमात्रोपपादकसामग्रीसद्भावे ऽपि
विषयपरिच्छेदकस्वरूपज्ञानविशेषात्मना विज्ञानोत्पादकतात्पर्यावधा-
रणाख्यसामग्र्यभावात्सदसत्वसाधारणज्ञानरूपो ऽनध्यवसायः ।
संशय एव प्रतिभादितुल्यो यस्माद्भवति तस्माद्यद्यपि पूर्वपक्षिणा आ-
क्षेपेनाविरोधे ऽपि प्रामाण्यं त्यज्यते तथापि तद्वरमङ्गीकुर्मः । न तु
विरोधे प्रामाण्यमित्येवमर्थत्वात् भाष्यस्य न तद्विरोधाख्यो दोषो
वार्त्तिकस्यास्तीत्याह * नैष इति * ज्ञेयसत्वानिश्चयतुल्यत्वात्
सन्दिग्धत्वोक्त्या नाध्यवसाय एवोक्तः । शक्तिप्रमाणाम्नानमात्रस्य
च लैङ्गिकज्ञानसामग्रीत्वाभ्युपगमेनाविरोधे ऽपि ज्ञानमात्रोत्पत्तिरुक्-
ता वस्तुतः श्रुतिकल्पनां विना लिङ्गस्य विनियोक्तृत्वायोगात्
आकाङ्क्षां च विना श्रुतिकल्पनां विना लिङ्गस्य शक्तेराकाङ्क्षायामपि
सामर्थ्यात्वावगमात् प्रत्यक्षया च श्रुत्यान्यत्र विनियुक्तस्य मन्त्र-
स्याकाङ्क्षानिवृत्तेः सामग्र्यभावेन ज्ञानमात्रस्याप्युत्पत्त्ययोगात् प्रा-
माण्यशङ्कैव नास्तीत्यभिधानार्थं यदेवेत्यादिभाष्यावयवं व्याचष्टे *
यदि चेति * सामान्यतो लिङ्गप्रामाण्योक्त्यर्थमात्रेत्यादिप्रामाण्या-
मित्येतत्परिहारभाष्यं सिद्धान्तिना सार्वत्रिकप्रामाण्यापह्नवाद्युक्त-
माशङ्क्य काममित्यादिभाष्येण सिद्धान्तिना विरोधविषयएवाप्रामा-
ण्यं शङ्कित ऽपि पूर्वपक्षी भ्रान्त्या सार्वत्रिकप्रामाण्यापह्नवं सिद्धा-
न्तिकमत मत्वा प्रकरणवादित्यादिभाष्येण प्रामाण्यमार्गं दर्शयन्ती-
८६५।१ त्याह * परास्त्विति * इममेव लिङ्गप्रामाण्यमार्गं द्रढयितुमा-
ह * तदेतदिति * यद्वा सार्वत्रिकं लिङ्गाप्रामाण्यं सि-
द्धान्त्यनभिमतं न विरोधविषया प्रामाण्योक्तिसौकर्यार्थं का-
ममिति भाष्येणाशङ्कितं तन्निरासार्थं च सामान्यतः प्रामाण्य-
मत्रेति भाष्येण पूर्वपक्षेनोक्तमित्येवमन्यथा भाष्यद्वयं व्याचष्टे *
अथ चेति * तुल्यबलत्वाभावे ऽप्यविरोधात् समुच्चय इति पूर्वपक्षभा-
ष्यं व्याचष्टे * अभ्युपगम्यापीति * एकस्यानेकार्थता विरुद्धेत्या-
शङ्क्य प्रयाजादिजन्यस्योपकारस्यैकस्याप्यनेकार्थत्वादर्शनादविरो-
धोक्त्यर्थं न चेति भाष्यावयवं व्याख्यातुमाह * तद्यथेति * अश्रु-
तावृत्तिदोषापत्तेः विरोधाशङ्कार्थं नन्विति भाष्यं व्याचष्टे * सकृदि-
ति * प्रधानानुरोधेन गुणावृत्तेर्न्याय्यत्वात् विरोधपरिहारार्थमुप-

स्थापयेति भाष्यं व्याचष्टे * नेति * एकस्येन्द्रशब्दस्य मुख्यजघ-
न्यवृत्तिद्वयविरोधशङ्कार्थमथं तर्हीति भाष्यं व्याचष्टे * इन्द्रेति *
प्रयोगभेदेन विरोधपरिहारार्थं नेति ब्रूम इतिभाष्यं व्याचष्टे * नेति*
इन्द्रार्थत्वे मुख्यवृत्तेः सम्भवस्य गार्हपत्यार्थत्वे द्वारसम्भवस्याश्र-
वणादित्यर्थः। अत इत्युपसंहारभाष्यं समुच्चयपूर्वपक्षानुरूपत्वादयु-
क्तमाशङ्क्य परं लक्षणार्थत्वेन तुल्यबलोक्ति व्याचष्टे * तस्मादि-
ति * एवमिति सिद्धान्तप्रतिज्ञाभाष्यं व्याचष्टे * एवमिति * कुत
इत्याद्यवगस्य तं प्रश्नपूर्वमुपपत्तिभाष्यं व्याचष्टे * कुत इति * वि-
धेरस्य मन्त्रस्य सामान्यतः समीहिताङ्गत्वे विधितोऽवगतेऽर्हनी-
यया गार्हपत्यस्योपसततमत्वेन समाहृतत्वोक्तेर्गार्हपत्याङ्गता का
भवतीत्याशयः। श्रुत्याख्यस्य वचनाभावेऽपि प्रकरणलभ्यसामान्यस-
म्बन्धेऽस्य लिङ्गाद्विनियोगो भविष्यतीति अत्राभिधीयतइत्यादिपूर्व-
पक्षभाष्योक्तानुभाषणार्थं नन्विति भाष्यं व्याचष्टे * यत्त्विति * वै-
दिकेऽर्थे शब्दातिरिक्तप्रमाणायोगात् श्रुत्यभावे लिङ्गादेः प्रामाण्येन
सम्भवतीति परिहारार्थं नैतदित्यादिविप्रकृष्टः श्रुत्यर्थाल्लिङ्गमित्य-
न्तं भाष्यं व्याचष्टे * नेदिति * श्रुतिं विना प्रामाण्याभावे लिङ्गस्य
श्रुत्यभावेऽनुपपत्त्यभावात् श्रुतिसद्भावकल्पकत्वायोगात्प्रामाण्यापत्तेर्ब-
लाबलचिन्तानुपपत्तिशङ्कार्थं तदित्यादिभाष्यं व्याचष्टे * परास्त्वि-
ति * अध्ययनविधितो मन्त्रस्य सामान्यतः समीहितार्थत्वेऽवगते
तद्विशेषापेक्षायां प्रकरणेन प्रकृते कर्मणि समीहितविशेषत्वेन सम-
र्पिते यदुद्देशेन विधिविषयत्वाख्यस्य तादर्थ्यस्यानेनेदं कुर्यादित्येवं
रूपाङ्गाङ्गिवाचिशब्दाभावेऽनवगते समीहितविशेषार्थत्वं च विना
सामान्यतोऽवगतस्य समीहितार्थत्वस्यानिर्वाहात्तन्निर्वाहायानेन
यजेतेति श्रुतौ प्रकरणेन कल्पितायां कथं मन्त्रेण यागं कुर्यादित्यपे-
क्षायां यथा शक्नुयादिति सर्वाख्यातसाधारणोपबन्धात्सामान्यतः
शक्त्याद्वाराऽवगमे तद्विशेषापेक्षायां लिङ्गनाभिधानाख्ये द्वारविशेषे
समर्पितेऽपि पूर्ववदेव मन्त्राभिधानयोरन्वयवाचिशब्दाभावेऽन्व-
यानवगतेरभिधानद्वारानेन मन्त्रेण यजेतेति द्वारद्वार्यन्वयवाचिश-
ब्दकल्पनेऽस्या लैङ्गिकविनियोगान्यथानुपपत्तिलक्षणार्थापत्त्याऽव-
गतश्रुतिमूलत्वेन लिङ्गप्रामाण्योक्त्यर्थमन्त्रेत्यादिश्रुतिमूल एवायमर्थ
इत्यन्तं भाष्यं व्याचष्टे * सिद्धान्तेति * लिङ्गस्य श्रुतिकल्पकत्व ८६६।१
सति विरोधेऽपि श्रुतेरेव कल्पकत्वाविघातात् प्रामाण्याविघातश-
ङ्कार्थं यदीत्यादि अर्हतीत्यन्तं भाष्यं व्याचष्टे * परस्तु मदीयमेवेति*
नापीत्यादि बाध्यतइत्यन्तं भाष्यं प्रामाण्यविकल्पाख्यदोषपरिहारार्थं-

त्वेन व्याचष्टे * सिद्धान्तेति * विकल्पायोगोपपादनार्थं यतस्त्वि-त्याद्यर्थविप्रकर्ष इत्यन्तं भाष्यावयवं व्याख्यातुम् * विरोधे चेत्यु-क्तम् * भाष्ये च लिङ्गभूतस्येन्द्रशब्दस्येन्द्रोक्तिसामर्थ्यमालोच्या-नेन मन्त्रेणेन्द्रोपस्थानमित्ययं ततो ऽर्थो च गम्यतइत्युक्ते साम-र्थ्यादिन्द्रशब्दमात्रविनियोगः स्यात् न कृत्स्नमन्त्रस्येत्याशङ्क्य कृत्स्नम-न्त्रविनियोगविषयश्रुत्यनुमानाय प्रागभवन्तीति कृत्स्नस्य मन्त्रस्यैक-वाक्यतामपेक्ष्य * आलोच्येत्युक्तम् * तदस्मै प्रभवति सन्तापादिभ्य इति श्रुतेः सन्तापादिष्वनुमानशब्दस्य पाठमङ्गीकृत्याप्रत्ययोत्पत्तिम-लिङ्गेन पदमात्रविनियोगात् वाक्यीयकृत्स्नमन्त्रविनियोगायोगस्मृ-त्यनुमेयश्रुतिवच्च लिङ्गाद्यनुमेयायाः श्रुतेः क्वचिदपाठादपाठं च विना विशिष्टक्रमकवस्तुसमूहार्थश्रुत्यसम्भवात् लिङ्गादिभिः श्रुत्यनुमा-नायोगमाशङ्क्य पदमात्रस्य निराकाङ्क्षार्थे शक्तत्वेनाप्रयोज्यतया विनि-योगानर्हत्वात् पादमात्रे लैङ्गिकविनियोगानर्हत्वात् पदमात्रे लैङ्गि-विनियोगपर्यवसानानुपपत्तेः प्रथममिन्द्रपदैकवाक्यत्वालोचनया कृत्स्नस्य मन्त्रस्येन्द्रोक्तिसामर्थ्यरूपं लिङ्गज्ञानं ततः कृत्स्नमन्त्रसा-मर्थ्यालोचनयोच्चरितेनाप्यनेन मन्त्रेणेन्द्रो ऽभिधेय इति शब्देन प्रयो-गवाक्यैकदेशतयाभिसंहितेनोच्चारणक्रमाभावे ऽपि अभिधानक्रमा-त्सम्भवाद्विशिष्टक्रमकवर्णसमूहात्मकत्वेनास्य मन्त्रस्येन्द्राङ्गस्वरूपो ऽर्थो ऽभिहितो ऽर्थो भवतीति विज्ञानमित्येवं शङ्काद्वयपरिहारार्थं प्र-थमं तावदिति भाष्यद्वयमविरोधे श्रुतिकल्पनोपपत्त्यर्थत्वेन व्या-ख्यातुम् * यत्र हीत्युक्तम् * प्रत्यक्षश्रुतिविरोधे लैङ्गिकश्रुतिवि-कल्पनायोगोक्त्यर्थं तदेनादित्यादिभाष्यावयवं व्याख्यातुम् * यत्र त्वित्युक्तम् * गार्हपत्योपस्थानाख्येनैकेनैवोपकारेण निर्ज्ञातेन मन्त्र-वाक्यस्य कृतायागोपकाराख्यप्रयोजनत्वात् प्रकरणस्य च कृतयागा-ङ्गत्वबोधाख्यप्रयोजनत्वान्निराकाङ्क्षं तत्रेत्यनेनोक्तप्रयोजनाख्यः स-मीहितोक्त्यर्थः । चातुर्वर्ण्यादिवत्स्वार्थिकस्यानेन भाष्यस्थेन साम-र्थ्यशब्देनोक्तः । विकल्पस्य चेत्यादिभाष्यं व्याचष्टे * किं चेति * अष्टदोषत्वेनान्याय्यत्वोपपादनार्थं निस्यवच्चेति भाष्यं व्याचष्टे * स्व-तन्त्रयेति * श्रुत्युपन्यासेन लिङ्गमप्युपलक्षितमिति सूचनार्थम् * लिङ्गेन चेत्युक्तम् * चोदितं सत्र कृतमित्यनेन श्रुतं चेति भाष्यावयवं व्याख्यायाचोदितं सत्कृतमित्यनेनाश्रुतं सत्कृतं भवतीत्येवमश्रुतमिति भाष्यावयवे व्याख्याते व्युत्क्रमव्याख्यायां को हेतुरित्याशङ्क्य चोदि-तस्यापीतरालोचनेनाचोदितत्वापत्तिं हेतुं सूचयितुम् * तदपेक्षेत्युक्त-म् * अन्यतराश्रयणे सति इतरकरणस्य चोदितत्ववदाश्रीयमाणस्य

नियमार्थेन शास्त्रेणार्थादन्यनिवृत्तेरितराकरणस्यापि चोदितत्वात्
दोषो ऽकृतेनेत्याशङ्क्येतरन्न कार्यमिति निषेधाभावान्नियमस्य च स्व-
विषयनियतत्वमात्रपर्यवसानेनान्यनिवृत्तावव्यापारात्प्रकरणमपि चा-
दितमिति नास्ति येनाकृतत्वस्यादोषत्वं स्यादिति तदकरणमपीत्य-
नेनोक्तमश्रुतस्याप्यनिषिद्धत्वेनादुष्टकरणमित्याशङ्क्य न शास्त्रपरिमाण-
त्वादित्यनेन न्यायेन पदार्थेयत्तानियमात् अधिकपदार्थकरणे चेयत्ता-
बाधापत्तेरश्रुतकरणदोषत्वोक्त्यर्थं यावांश्चेति भाष्यं व्याचष्टे
* श्रुतेति * तुल्यत्वोपपादनार्थं उभयत्र हीति भाष्यं व्याचष्टे
* प्रसिद्धेति * विकल्पपक्षनिरासोपसंहारार्थं तस्मादिति भाष्यं
व्याचष्टे * तस्मात्तावदिति * समुच्चयपक्षस्याविरोधात्खल्वपी-
त्यादिपूर्वपक्षभाष्योक्तस्यानुभाषणपूर्वं निरासार्थमथेत्यादिभाष्यं
व्याचष्टे * यस्त्विति * विरोधोपपादनार्थं यत्कृतसामर्थ्ययोरि- ८६७।२
त्यादिभाष्यं प्रश्नपूर्वं व्याचष्टे * कथमिति * भाष्यस्य वाक्यो-
क्तिव्याख्यार्था मन्त्रोक्तिः कृतप्रयोजनोक्तेर्नैराकाङ्क्ष्यसिद्ध्यर्थत्व-
सूचनार्थम् * निराकाङ्क्ष इत्युक्तम् * यस्मान्मन्त्रप्रकरणे द्वे अपि
निराकाङ्क्षे कृते लिङ्गस्य च विनियोगरूपो ऽर्थः साकाङ्क्षाभ्यां
मन्त्रप्रकरणाभ्यां साध्यः तस्माल्लिङ्गं श्रुत्या विरुध्यत इत्यर्थः ।
श्लोकं व्याचष्टे * एक इति * मन्त्रप्रकरणयोर्नैराकाङ्क्ष्ये सति हवि
ष्कृदेहीति त्रिरवघ्नन्नाह्वयतीत्यादिवच्छ्रुतेरपि विनियोजकत्वायोगात्
लिङ्गविनियोज्यपदातिरिक्तपदमात्रसमूहस्य चाकृत्स्नवाक्यत्वेना-
विनियोज्यत्वे विनियोगयोर्द्वयोरप्ययोगात् लिङ्गविनियोज्यं पदैक-
वाक्यतायाश्च लैङ्गिकविनियोगापेक्षत्वस्य नि सन्दिग्धत्वात् लिङ्गेन
सह तुल्यबलत्वशङ्कानुपपत्तेर्भाष्योक्तं लिङ्गवाक्यविरोधोदाहरणा-
परितोषात्स्वयमुदाहरणान्तरं तावदाह * लिङ्गेति * होता यक्षन्मि- ८६८।२
त्रावरुणा प्रशास्तारा प्रशास्त्रक्रतुना सोमं पिबतां प्रशास्तर्यजेति प्रैषः ।
प्रशास्तृशब्दस्य मैत्रावरुणवाचित्वात् स्वशक्त्या मैत्रावरुणयागे नि-
युङ्क्ते । ततश्च मैत्रावरुणस्य नियोज्यत्वेन नियोक्तृत्वायोगाद्विनियो-
गार्थे[1] प्रैष्येषु मैत्रावरुणविधिर्न केवलोऽस्त्विति सूचनार्थं होतृप्रवचना-
धीनत्वविशेषण को ऽनुष्ठाने विशेष इत्यपेक्षायामाह *तत्रेति* मैत्राव-
रुणस्य यागे नियोगे ऽस्मिन्नुक्तस्य प्रैषे कर्तृत्वाशक्तेः अशक्तस्य
च विनियोगायोगात् वाक्येन प्रैषे विनियोगायोगमाशङ्क्य वाक्या-

---

(१) प्रैषे शक्त्यनुपपत्तेस्तद्व्यतिरिक्तस्य लिङ्गेन विनियोगावगमान्मैत्रावरुणविनियोज-
कस्य वाक्यस्य विरोधावगतेर्युक्तोदाहरणमित्यर्थः । अनुवाक्यापूर्वकत्वेनैव इत्यधिकं २ पु० ।

वगतेन प्रैषकर्त्तृत्वेन लिङ्गानवगतयागकर्त्तृत्ववाधात् होतुरेव समाख्यावगतं यागकर्त्तृत्वं बाधकाभावेन यागे नियोगावगतमैत्रावरुणस्य प्रैषे शक्त्यविरोधात्तौ स्वात्मनि चेत्युक्तं केन परेण मैत्रावरुणो यागे नियोक्तव्य इत्यपेक्षायां स च परो होता नियोक्ता विप्रतिषेधे समवायविशेषादितराभ्यामन्यस्तेषां यतो विशेषः स्यादिति सूत्रशेषोक्तेन न्यायेन विज्ञायत इत्युक्ते ऽपकृष्टस्योत्कृष्टकार्यकारित्वप्रसिद्धेर्मैत्रावरुणादुत्कृष्टस्य होतुर्मैत्रावरुणकार्यकारित्वायोगान्मैत्रावरुणादपकृष्टस्यानन्तरस्य होतृपुरुषत्वेन मैत्रावरुणसदृशस्याच्छावाकस्यैवानेन न्यायेन मैत्रावरुणकार्यकारित्वप्राप्तेरपरितोषात्समाख्ययोर्होतृकर्त्तृकत्वं प्रैषस्योक्तं प्रैषार्थे ऽपि तर्हि यागे समाख्यया होतैव कर्त्ता स्यादित्याशङ्का यागांशे लिङ्गेन समाख्याबाधः प्रैषार्थेत्यनेनोक्तः । मन्त्रब्राह्मणयोर्विरोधे मन्त्रस्य तु ब्राह्मणचोदितार्थप्रकाशनात् तत्परतन्त्रवृत्तेरित्यैन्द्र्यधिकरणवार्त्तिके मन्त्रस्य ब्राह्मणानुरोधवृत्तित्वोक्तेः प्रैषमन्त्रानुरोधेनेह ब्राह्मणवाक्यबाधो न युक्त इत्याशङ्क्याह * यद्यपि चेति * ब्राह्मणोक्त्या श्रुतिस्तत्र विवक्षितेत्याशयः । कीदृक् लिङ्गमित्यपेक्षायामाह * यदि हीति * मैत्रावरुणस्य प्रैषकारित्वे होतुः समाख्यावगतप्रैषकार्ये यागकारित्वापत्तेर्यागनियोज्योक्त्यर्थेन प्रशास्तृशब्देन होता वाच्यः । स च मैत्रावरुणकार्यलोपं मत्वा न शक्यो वक्तुमित्याशयः । मैत्रावरुणस्य प्रैषार्थकारित्वे ऽपि होतृशब्दो मैत्रावरुणे ऽनर्थकः स्यान्न युक्तो ऽनर्थको ऽभ्युपगन्तुमिति लिङ्गद्वयविरोधस्यैतदुदाहरणम् । ततश्चोपक्रमस्थेन होतुर्यष्टृत्वलिङ्गेनोपसंहारस्थस्य प्रशास्तुर्यष्टृलिङ्गस्य बाधः स्यादित्याशयेन शङ्कते * ननु चेति * ऋग्वेदविहितकर्मकारित्वगुणयोगेन होतृशब्दस्यार्थवत्त्वाभ्युपगमे प्रशास्तृशब्दस्यापि तुल्यार्थवत्तेत्याह *गौण इति* आदिरित्यादिशब्दसूचितं होतृशब्दस्य गौणत्वायोगं प्रकटयितुमाह *अपि चेति* शङ्काशयं प्रकटयन्नुपसंहरति * तस्मादिति* होतृशब्दस्य होतरि मुख्यायां वृत्तौ ऋग्वेदविहितकर्मकारित्वस्य निमित्तत्वेन मैत्रावरुणेष्टायां वृत्तौ निमित्तत्वायोगात् कार्यापत्तिरेव निमित्तं वाच्या मैत्रावरुण एव होतृकार्यम् ऋग्वेदविहितं करोति न तु मैत्रावरुणकार्यं प्रैषानुवचनं होतेत्याशयेन परिहर्त्तुमाह * अत्रेति * एवमपि होतृशब्दस्य गौणत्वदोषो परिहृतः स्यादित्याशङ्क्य * सर्वथा तावदित्युक्तम् * अगत्या च मुख्यस्यापि गौणत्वं न दोषायेत्याशयः । अध्वर्यवो यजयन्ति विनिषद्योद्गातारः स्तुवन्तीत्यादौ च मुख्यर्त्विग्वाचिनोरध्वर्यूद्गातृशब्दयोस्तत्पुरुषेष्वपि

प्रयोगदर्शनात् होतृशब्दस्यापि मुख्यर्त्विग्वाचिनस्तत्पुरुषमैत्रावरु-
णवाचिता कल्पयितुं युक्तेति सूचयितुमाह * सर्व एतेति * अथाह
यज्ञोता यक्षद्धोता जक्षदिति मैत्रावरुणो होत्रे प्रष्यत्यथ कस्मादहो-
तृभ्यः सद्भ्यो होत्राशंसिभ्यो होता यक्षद्धोता यक्षदिति प्रेष्यतीति
चाहोतृषु होतृशब्दप्रवृत्तिनिमित्तं पृष्ट्वा प्राणो वै होता प्राण सार्व-
र्त्विज' प्रतिप्रतिवचनालोचनायां होतृशब्दस्य गौणता-
वसीयतइति सूचनार्थः सर्वशब्दः। अतो होतृलिङ्गत्वाभावान्नायं प्रै-
षमन्त्रो होतारं प्रयुङ्क्ते किं तु प्रशास्तृलिङ्गत्वात् प्रशास्तारमवेति नेह
लिङ्गयोर्विरोध इत्युपसहर्तुमाह * तस्मादिति * एतत्प्रैषानुवच-
नमात्रविषय एव लिङ्गेन वाक्यबाधो नार्थेषु प्रैषानुवचनेष्वित्याह *
न चेति * भाष्यकारोदाहरणमाक्षिपति * स्योनमिति * श्लोकं
व्याचष्टे * सत्यपीति * पुरोडाशाधारस्य पात्रस्य सीदति पुरो- ८६९।२
डाशो ऽस्मिन्निति व्युत्पत्त्या सदनशब्दवाच्यस्याभिघारणमाधारद्वा-
रा पुरोडाशसंस्कारार्थत्वाद्भाष्यकृतोपस्तरणत्वेनोक्ते निश्चलत्वफल-
प्रतिष्ठापनपर्यन्तं सादनं मन्त्रवर्णात्कार्यमिति सूचनाय प्रतिष्ठाप-
नोक्तिः स्योनादिकल्पयाम्यन्तपदसमूहात्मकमेकं वाक्य तस्मिन्नि-
त्यादिसुमनस्यमानान्तपदसमूहात्मकमपरमित्यर्थैकत्वादेकं वाक्यं
साकाङ्क्षं चेद्विभागे स्यादित्यत्र वाक्यैकत्वविशेषण-
प्रत्युदाहरणत्वेनोक्तत्वात् सकलस्य स्योनादेः सुमनस्य-
मानान्तस्य पदैकवाक्यत्वायोगे ऽपि तस्मिन्निति त-
च्छब्दाद्वाक्यद्वयैकवाक्यतावगम्यते यद्यपि किं सकलस्यो-
नादिसुमनस्यमानान्तपदसमूहात्मकावान्तरवाक्यभेदशून्य वाक्यं
लिङ्गविनियोज्यत्वविचारो न सम्भवति तथापि किमेक एवावान्तर-
वाक्यरूपांशो लिङ्गबलीयस्त्वाद्विनियुज्यते वाक्यबलीयस्त्वाद्वा द्वि-
तीयो ऽपि द्वितीयांशेन सहैको ऽशो विनियोज्यः केवलो वेत्येवं
विचारः सम्भवतीति परमतेन तावत्समाधत्ते * तत्रेति * म-
न्त्रप्रकाश्यस्यार्थद्वयस्य विशेषणविशेष्यत्वेनोक्तावान्तरवाक्यभे-
दायोगात्स्वानन्वयशोक्तौ विधेयत्वाभावेनाङ्गाङ्गित्वाद्यपेक्षाभावात्
वाक्यैकवाक्यत्वानुपपत्तेरिहावान्तरवाक्यभेदे सति वाक्यैकत्वायो-
गात् सत्यपि च वाक्यैकवाक्यत्वे लिङ्गस्यावान्तरवाक्यविनियोगेन
पर्यवसानसम्भवेन वाक्यान्तरैकवाक्यत्वानपेक्षाल्लिङ्गानपेक्षितस्या-
वान्तरस्यार्थान्तरे च लिङ्गविनियोगेन निराकाङ्क्षीकृतस्य लिङ्गवि-
नियोज्यावान्तरवाक्यैकभूतावान्तरवाक्यान्तरविनियोजकतया लि-
ङ्गापेक्षेण वाक्येन विनियोगाशक्तेर्वाक्यस्य विनियोजकत्वायोगा-

न्स्त्यपि विनियोजकत्वे लिङ्गस्य वाक्यानेकत्वनिश्चयाद्वाक्यस्य लि-
ङ्गापेक्षत्वनिश्चयात्तुल्यबलत्ववाक्यबलीयस्त्वयो. शङ्कानुपपत्तेरेत-
त्समाधानापरितोषादन्यथा समाधत्ते * अथ वेति * श्लोकं
व्याचष्टे * तस्मिन्निति * साकाङ्क्षावयवत्वे सत्यप्यर्थैक्याभा-
वादेकवाक्यत्वायोगमाशङ्क्य साकाङ्क्षावयवत्वेनैवार्थैक्यस्य कल्प-
यितुं शक्यत्वादिदमेवैकवाक्यत्वे प्रधानकारणमित्युक्त्वा साका-
ङ्क्षावयवत्वं नार्थैक्यकल्पन शक्तये हीत्यादिनोपपादितं यदीत्या
दिना लिङ्गबलीयस्त्वस्य नानावाक्यत्वानापादकतोपपादिता वा-
क्यस्य तर्ह्यलब्धात्मकत्वाद्विरोधो बलाबलचिन्ता वा न युक्तेत्याश-
ङ्क्याह * तेनेति * वाक्यस्यात्रात्मलाभो ऽस्ति न वेत्येवमिह
चिन्त्यते तेन लब्धात्मकस्य वाक्यस्य लिङ्गेन सह विरोधे सति
बलाबलमिव वाक्यात्मलाभस्याशङ्क्यमानस्य बलाबलसहितो
लिङ्गवाक्ययोर्विरोध इति भाष्यस्थविरोधोक्त्या चोक्तो नतु लब्धा-
त्मकस्य वाक्यस्येति वदता सूचिते वाक्यात्मलाभस्य भाष्याना-
रूढत्वमाशङ्क्य कृत्स्नमन्त्रविनियोगोक्तिद्वारा कृत्स्नस्यैकमन्त्रतोक्ते
त्युक्तम् अनेन न कृत्स्न एको मन्त्र इति कृत्स्न उभयत्र विकल्पेन
समुच्चयेन वा प्रयोक्तव्य उत कल्पयास्यन्त एको मन्त्रस्तस्मिन् सी-
देत्यवमादिरपर इतिकृत्वा विभक्त्येत्येव सन्देहभाष्यव्याख्यां सू-
चिता वाक्यात्मलाभ एव कथं तर्हि कस्मात्साक्षान्न विचारित इत्या-
८७०।१ शङ्क्याह * तत्रापीति * साकङ्क्षावयवत्वेनापाततो वाक्यात्म-
लाभप्रतीतेर्लिङ्गेन वाक्यभेदप्रत्ययेन बाधे सत्यनिर्वाहादबाधे तु
निर्वाहाद्वाक्यात्मलाभसहसद्भावार्थं बाधकसदसद्भावविचार इ-
त्याशयः । किं तावदिति पूर्वपक्षभाष्य व्याचष्टे * किमिति * तु-
ल्यबलत्वे पूर्वपक्ष्यमाणे कृत्स्नो मन्त्र उभयत्र प्रयोज्य इति पूर्वपक्षव-
चनव्यक्त्यसम्भवमाशङ्क्य पुरोडाशसादने चेति चकारेण विभज्य
प्रयोगो ऽपि पाक्षिकः सूचित. पुरोडाशसादने वेति वाशब्दाध्या-
हारेणोभयत्र विकल्पेन कृत्स्नप्रयोगस्य शब्दावृत्त्या समुच्चयेन
कृत्स्नप्रयोगो ऽभिहित इत्येवं पूर्वपक्षवचनव्यक्तिभाष्यव्याख्यां सू-
चयितुमाह * तदा चेति * लैङ्गिकविनियोगपक्षे विभज्य प्रयोगो
वाक्यीयविनियोगपक्षे विकल्पेनोपस्तरणसादनयोर्मध्ये ऽन्यतरत्र
समुच्चयेन वोभयत्र समुदायः प्रयोक्तव्य इत्यर्थः । विभज्य प्रयोग-
स्य वाक्यभेदापेक्षत्वात्समुदायप्रयोगस्य वा भेदापेक्षत्वात् वाक्य-
भेदाभेदयोस्त्वार्थभेदाभेदापेक्षत्वात्तावत एव च स्योनादे.सुमनस्य-
मानान्तस्य मन्त्रसमूहस्यैको ऽर्थो भिन्नो वेत्यनवस्थितमन्त्रशास्त्रार्थो-

गाद्विभज्य समुदायप्रयोगयोर्विकल्पो न सम्भवतीत्याशङ्कते * कथं
ारिति * समुदायावयववैकल्पिकप्रयोगोपादकवैकल्पिकाभिन्ना-
न्नरूपतेत्यर्थंशब्देनोक्ता । एकस्याप्यतो देवा अवन्तु न इत्यादे-
त्रस्य देवविष्णवादिवैकल्पिकदेवतास्मृत्या वैकल्पिकानेकार्थत्वा-
ामात् एकस्यापि स्योनादेः सुमनस्यमानान्तपदसमूहस्य विशे-
भावापन्नैकार्थत्वं स्वनन्यार्थपरत्वं वेत्येवं वैकल्पिकानेकार्थत्वा-
रोधेन वैकल्पिकवाक्यभेदाभेदविकल्पाविरोधाद्विभज्य समुदा-
योगयोरविरुद्धो विकल्प इत्याशयेन परिहरति * सर्वथेति *
ं प्रमाणतो भिन्नाभिन्नरूपतया ऽनवस्थितस्योनादिसुमनस्यमा-
तमन्यथाऽन्यार्थावगतिरित्यपेक्षायामाह * लिङ्गेति * वाक्यबली-
त्वपूर्वपक्षोक्त्यर्थमथ वेति भाष्यं व्याचक्षाणस्तस्मिन्पक्षे प्रकारेण
भज्य प्रयोगसूचनाशङ्कां निराकर्त्तुमाह * यदा त्विति * यथा
ङ्गाच्छीघ्रप्रवृत्तेः श्रुतिर्लिङ्गाद् बलीयसी। तथा यस्य येन सह स-
ध एकवाक्यतया न विद्यते न तस्य तद्विषया शक्तिः कल्प्यते
। वार्त्तिकोक्तेन न्यायेन लिङ्गस्य केवलपदविनियोगे पर्यवसाना-
ेन पदान्तरैकवाक्यत्वापेक्षित्वात् वाक्यमपि लिङ्गात् शीघ्रं
त्तेस्ततो बलीय इत्यभिधानार्थं तद्धीत्यादिभाष्यं व्याख्यातुम् *
नर्थेत्युक्तम् * एवमित्यादिप्रयोजनमस्तीत्यन्तं सिद्धान्तभाष्यं व्या-
*एवमिति*तस्मिन्नित्यस्याप्युपलक्षणस्योनादि रिति स्योनादिह-
त्तरणाप्रकाशनाय तस्मिन्नित्यादिश्च सादनप्रकाशनाय स्वतोऽवग-
सामर्थ्येन विनियोगान्निराकाङ्क्षः शक्यते कर्त्तुमिति यत्तु साका-
ं कल्पयितुमारभते * तत्तस्मिन्निति * तच्छब्दाधीनं तच्च
देवीतिवन्नैकवाक्यत्वापादकसाकाङ्क्षत्वं कर्त्तुं शक्नोतीत्यध्या-
ण योज्यं वाक्यात्मलाभहेतोः साकाङ्क्षावयवत्वस्य तच्छब्दाद-
नः प्रतीतस्यापि स्वतोऽवगतेन सामर्थ्येन बाधादेकवाक्यत्व-
मलाभ एव नास्ति कुतस्तस्य तुल्यबलत्वं बलीयस्त्वं वा शङ्क्येत-
शयः । स्योनादेः कल्पयाम्यन्तस्य स्वकार्यसामर्थ्येन विनियो-
राकाङ्क्षोक्त्या केवलस्य पदस्य लिङ्गविनियोज्यत्वशङ्कानिरासो
सूचितः तस्मिन्नित्यादेर्नैराकाङ्क्षोक्त्यार्थस्य प्रकरणाद्वत इत्यादे-
र्योज्यतेत्यन्तस्याद्यस्य श्रौतं व्याख्यानमकृत्वा स्योनादेर्नैराका-
ऽर्थस्य तथेत्यादेः पाश्चात्यस्य श्रौतव्याकरणं स्योनादेर्नैरा-
ङ्क्षस्य स्पष्टत्वसूचनायेतिसर्वस्तावदित्यनेन सूचनपूर्वं श्लोकं व्या-
* सर्वस्तावदिति * उपलक्षितभाष्यव्याख्याप्रकरणार्थं

१) आद्येत्यधिक २ पु०

मे॥ न चेत्युक्ते॥तच्छब्दस्य पूर्वापेक्षत्वात्कथं च परस्य पूर्वेण विनानर्थकत्वानापत्तिरित्याशङ्कानिरासार्थत्वेन श्लोकान्त्यपादव्याख्यार्थम् ॥ यद्यपि चेत्युक्तम् ॥ नास्तीत्यस्य न पुरोडाशसादनइत्यस्य च भाष्यावयवस्यान्येनैव पादेन व्याख्येति सूचनार्थम् ॥ तस्मादित्युक्तम् ॥ एवमिति भाष्यस्य तस्मिन्त्सीदेति पुरोडाशसादनाभिधानसामर्थ्यादित्यादिना सामर्थ्यावगतसादनविनियोगमात्रेण निराकाङ्क्षोक्तेः सामर्थ्यस्य विनियोजकप्रमाण्याभावेन वोपस्तरणे विनियोगोक्तेस्तस्मिन्त्सीदेत्यस्योपस्तरणार्थात्सामर्थ्याभावाभिधानात् पुरोडाशसादने ऽपीति भाष्यस्य तत्तथेत्यादिना सामर्थ्यावगतेरुपस्तरणविनियोगमात्रेण नैराकाङ्क्ष्योक्तेः सादनं च विनियुज्यमानस्य स्योनमित्यस्य प्रयोजकवाचिप्रयोजनशब्दोक्तविनियोगाक्षेपकसामर्थ्याख्यप्रमाणाभावेन सादने विनियोगानर्हत्वोक्तेरर्थात्सामर्थ्याभावाभिधानात्पौनरुक्त्यमाशङ्क्याह ॥ एवमिति ॥ अर्थसिद्धस्यापीतरविषये सामर्थ्याभावनिरूपणस्य दार्ढ्यायेत्यर्थः । तस्मिन्नित्यस्य सादने विनियोगान्नैराकाङ्क्ष्ये स्योनमित्यस्याप्युपस्तरणे विनियोगान्नैराकाङ्क्ष्ये सतीति भाष्यस्यैवशब्दार्थः । यत्स्योनं तद्स्येतस्येति भाष्यस्य सदेत्यनेन सीदेत्यस्य पुनरिति भाष्यस्य च पूर्वेण सहेत्यनेन पौनरुक्त्यमाशङ्क्याह ॥ यद्वेति ॥ तस्मिन्नित्यस्यैकत्र सादने सामर्थ्यस्य । तस्मिन्त्सीदेति पुरोडाशाभिधानसामर्थ्यादिति भाष्योक्तस्य इतरस्योपस्तरणवदिति भाष्येण स्योनमित्यस्य चैकत्रोपस्तरणे सामर्थ्यस्य तथेति भाष्योक्तेरस्येतरत्र सादने पुरोडाशसादने ऽपीति भाष्येण नास्ति सामर्थ्यमित्यनुषङ्गसहितेनाभावं दर्शयित्वा तच्छब्दालोचनयैकवाक्यत्वस्यावगतस्यार्थैक्यं विनानुपपत्तेरवयवद्वयस्येतरेतरविषयं सामर्थ्यावश्यं भावमाशङ्क्य सत्यन्तस्मिन्त्सीदेत्यस्य पूर्वैकवाक्यत्वादुपस्तरणे पूर्वस्य च परैकवाक्यत्वात्सादने शक्तिस्तथापि स्वरूपेणोभयोर्मन्त्रयोरुभयार्थविषयशक्त्यभावाद्विनियोगस्य श्रुत्यर्थविप्रकर्ष इत्युक्ते तस्मिन्त्सीदेति तत्स्योनादिशब्दानामप्युपस्तरणाख्यसदनकरणोक्तिःशक्तेः सदनम् करोमीत्येतदेकवाक्यत्वाधीनत्वेन तत्वायोगाद्विप्रकर्षतुल्यत्वमाशङ्क्य सदनशब्दवत् स्योनसुशेवशब्दयोर्द्वितीयान्तत्वेन कृणोतिकर्मभूतस्य सदनशब्दोक्तस्य स्थानस्य ग्रहत्वसुमुखत्वरूपस्तुत्यर्थत्वेन तेशब्दस्य

---

(१) प्रकटनार्थमि॰ २ पु॰ पा॰ ।

(२) परेकोत २ पु॰ पा॰ ।

च स्थानापेक्षितस्यातृपुरोडाशसमर्पकत्वेन घृतस्य धारयेत्यस्य च
करणसमर्कत्वेन कल्पयामिशब्दस्य च सदनक्रियाया रचनारू-
पस्तुत्यर्थत्वेन ·कृणोमिपदैकत्वस्य स्पष्टत्वात् स्योनादेः कल्पया-
म्यन्तस्य सदनकरणोक्तिशक्तिः स्पष्टत्वरूपेण प्रत्यक्षत्वेन प्रथमावग-
तत्वान्मुख्येति वदता यत्स्योनं तदित्यस्येति भाष्येणात्मनिबन्धनं
स्वरूपनिबन्धनं शक्त्याख्यं धर्ममुपनीय सिद्धत्वेनोक्ता तस्मिन्नित्या-
देरपि तर्हि पुरोडाशसादनाख्यं सदनक्रियाफलोक्त्यर्थत्वेन कृणोमि-
पदैकवाक्यत्वात् सदनकरणोक्तिशक्तिस्तुल्येत्याशङ्क्य सदनक्रियाया
मन्त्रविधेयत्वाभावेन फलानपेक्षत्वात् तच्छब्दस्य च पूर्ववाक्योक्त-
सदनपरामर्शित्वसम्भवेनैकवाक्यत्वानाक्षेपत्वात् बलात्कृणोमिपदैक-
वाक्यतामापाद्य सदनकरणोक्तिशक्तिः पाश्चात्यत्वेन जघन्येति वदता
सीदेत्यस्य पुनरितिभाष्येणेतरमन्त्रान्वयवैकवाक्यत्वनिबन्धनस्य श-
क्त्याख्यसुधर्मस्य तेनाकाङ्क्षं सत्येकवाक्यत्वकल्पनायोगेन तन्निब-
न्धनं शक्तिकल्पनायोगान्निराकरणं कृत ततश्च भिन्नार्थत्वान्न पौ
नरुक्त्यमित्येवं सकलो ग्रन्थो निराकुलीकार्य इत्यर्थः । एवमप्येक-
वाक्यत्वोपगमनशक्त्याख्यलिङ्गविप्रकर्षार्थत्वोक्त्यर्थस्य सत्यमेवमि-
त्यादिभाष्यस्य सीदेत्यनेनोत्तरस्य त्वित्यनेन चापिचेत्यादिभाष्य
स्य च न ह्यस्मिन् विनियुज्यमानस्य किं चिदपि प्रयोजनम-
स्तीत्यनेन पौनरुक्त्या परिहारात्कथं सकलस्य ग्रन्थस्यानाकुलतेत्या-
शङ्क्याह * पूर्वश्चेति* को वा अर्थविप्रकर्षः प्रस्तुतस्तत्र प्रकरणवत ८७१।१
इत्यादिना लिङ्गं बलवत्तरमित्यनेनैकस्यावयवस्य स्वार्थे ऽभिधानश-
क्त्याख्यविनियोगप्रमाणसद्भावात्तस्य च श्रुतिकल्पनमात्रान्तरितत्वा-
त्सन्निकृष्टो विनियोगाख्यश्रुत्यर्थः अवयवान्तरार्थे त्वभिधानशक्त्या-
ख्यप्रमाणाभावेन वाक्यस्य विनियोजकतयाभ्युपनीयत्वात्तस्य च
लिङ्गश्रुतिकल्पनान्तरितत्वात् विप्रकृष्ट इत्येववाक्यस्य लिङ्गापेक्षयार्थे
विप्रकर्षप्रस्तावे पूर्वकृते अवयवद्वयस्यैकवाक्यत्वावगमादैकार्थ्यं च
विनैकवाक्यत्वायोगात् एकस्मिन्नर्थे शक्ते शक्तिनियुक्ते इत्याशङ्का-
निरासार्थं ततः स्योनमित्येषशब्दमित्यादिभाष्येण लिङ्गेन बाधापत्ते-
रेकवाक्यबाधायोगापत्तेर्विरोधस्यापरिहारार्थत्वमाशङ्क्यैकवाक्यत्वो-
पगमनशक्तेर्लिङ्गत्वविधिप्रकृष्टार्थत्वेन बाध्यत्वस्योचितत्वात् वाक्य-
भेदोपपत्तेः शक्त्यशक्त्योर्विरोध इत्येव शक्त्यशक्तिभ्यामविरोधित
योपपाद्यत्वेन प्रयोगभूताभ्यां सत्यमेवमित्यादिभाष्येणैकवाक्यत्वो-
पगमनशक्त्याख्यस्य लिङ्गस्य सन्धानशक्त्याख्यलिङ्गापेक्षयार्थविप्रक-
र्षप्रस्तावो मध्ये कृत इत्यस्य तावद्भाष्ये सीदेत्यस्य पुनरित्यनेनोत्तरस्य

त्वित्यनेन चार्थभेदादपौनरुक्त्यम् । अनेनापि चेति भाष्येण वाक्य-
स्य तन्निर्वाह्यार्थस्य शब्दलिङ्गस्याभिधानशक्त्याख्यलिङ्गापेक्षया इ-
ष्टार्थत्वविशेषनिमित्तार्थविप्रकर्षप्रस्तावो न ह्यस्मिन्नित्यनेन च प्रमा-
णस्य चोक्तौ पौनरुक्त्यं तत्तच्छब्दावगतैकवाक्यत्वनिर्वाहायैकवाक्य-
त्वोपगमनशक्त्याख्यालिङ्गात्कल्पितादेकवाक्यत्वनिर्वाहे ऽवगते
ऽप्यवयवान्तरोक्तक्रियाविशेषणोक्तिद्वारावयवान्तरस्यावयवान्तरा-
र्थाभिधानशक्तेः कल्प्यत्वात् स्वप्रधानभूतस्वार्थोक्त्या च निराकाङ्क्ष-
णावयवान्तरार्थविशेषणीभूतस्वार्थोक्तौ च इष्टार्थत्वापत्तेरस्यार्थविशे-
ष्यस्यावयवान्तराकाङ्क्षां कल्पयित्वान्तराभिधानशक्तित्वात्कल्पनपूर्वक-
त्पार्थकल्पनाद्विप्रकर्षो प्रधानभूतस्वार्थमात्रोक्तौ च इष्टसमवेतार्थत्वेना-
वयवान्तरार्थाकाङ्क्षाकल्पनाभावात्संनिकर्ष इत्येवमाशयशब्दादपि चेति
भाष्यस्येत्यर्थः । एवमित्यादिभाष्यस्य तु निरूपणादाद्यार्थत्वेनाद्य-
प्रस्तावान्तत्वात्मध्यमप्रस्तावार्थत्वं न युक्तमित्यनवद्यम् * तस्मा-
दिति लिङ्गबलीयस्त्वसिद्धान्तोपसंहारभाष्य * तस्मादि-
ति * अथेति भाष्येण वाक्यप्रकरणयोर्विरोधे कीदृग्बला-
बलमिति पृष्ट्वा प्रकरणस्वरूपप्रश्नार्थं किं पुनरिति भाष्यमितिकर्तव्य-
तार्थित्वलक्षणस्य स्वरूपस्य सूत्रकृतैवोक्तत्वादयुक्तमाशङ्क्य शब्देने-
तिकर्तव्यतार्थित्वरूपेण भावनानभिधाने वस्तुवृत्त्या तदर्थित्वे ऽपि
अङ्गप्रधानवाक्यानामन्योन्यानाकाङ्क्षत्वेनैकवाक्यत्वायोगापत्त्या तद-
नुमानद्वारविप्रकर्षायोगापत्तेः प्रकरणस्य वाक्यार्थविप्रकर्षेण दौर्ब-
ल्यं वक्तुमितिकर्तव्यताकाङ्क्षत्वेन भावनाभिधानस्य प्रकरण-
लक्षणकत्वकथनायैतद्भाष्यमिति सूचयितुमाह * किं पुनरिति *
प्रकरणस्य विनियोगसामर्थ्योपपादनायेतिकर्तव्यतार्थित्वादिति
सूत्रावयवः । न तु लक्षणकथनायेति न चेत्यनेनोक्ते वस्तुवृत्त्येतिक-
र्तव्यताकाङ्क्षायाः सद्भावे ऽपि शब्दस्पर्शाभावे शब्दैकसमधिगम्ये
ऽर्थे प्रामाण्याभावापत्तेर्विनियोगसामर्थ्यस्याप्यसिद्धेस्तत्रैवैतल्लक्षणं
वाच्यमित्याशङ्क्य शब्दस्पर्शविनीतकर्तव्यताकाङ्क्षायाः परमार्थतो
विनियोगप्रामाण्याभावे ऽपि शब्दोक्तार्थत्वमात्रेण प्रामाण्यं वक्तुं श-
क्ष्यामीति प्रौढिसूचनार्थं तत्र लक्षणानुक्तिरिति सूचयितुम् * नाद्-
त्याद्युक्तम् * यद्वा न लक्षणजिज्ञासयायं प्रश्नः किं तु वाक्यक्रमा-
भ्यां भेदजिज्ञासयेत्यन्यथागतार्थत्वं परिहरति * अथ चेति * वा-
क्यात्तावदभेदशङ्कां दर्शयितुमारभते * साकाङ्क्षेति * इतिकर्तव्य-
तान्वयं विना भावनाकर्तव्यत्वोक्त्यपर्यवसानात्प्रकरणे ऽप्याकाङ्क्षा-
याः शब्दस्पष्टत्वाविशेषसूचनार्थं पदसाकाङ्क्षत्वोक्तिः प्रकरणस्य वा-

क्यसमूहात्मकत्वेन पदसमूहात्मकात् वाक्यात् भेदो ऽस्मा भविष्यतीत्याशङ्क्याह * न चेति * यावतां पदानां विभज्यमानानां साकाङ्क्षत्वं संहत्यमानानां चैकप्रयोजनत्वं तावतां वाक्यतेत्येतावन्मात्रोपलक्षणत्वाद्वाक्यस्य तन्निरपेक्षायां पदसंख्यायां प्रमाणभावे नैराकाङ्क्ष्यात् प्राक् वाक्यत्वात् प्रकरणे ऽपि पदानामेकसमूहो न वाक्यानामित्यपरं बहुपदमित्यनेनाशङ्कानिरासार्थं सूचिते ऽवान्तरवाक्यार्थवशेनावान्तरसमूहाख्यवर्गान्तरकृतात्यन्तभिन्नवाक्यत्वादेकवाक्यत्वायोगमाशङ्क्यावान्तरसमूहीकृतत्वे ऽपि महावाक्यार्थाख्यप्रयोजनवशेन महासमूहापत्तेरेकवाक्यत्वोपपत्तिरुक्ता एतदेव न तद्वाक्यं हि तदर्थत्वादिति वेदाधिकरणसूत्रस्थभाष्यसम्मत्या द्रढयति * वक्ष्यति हीति * क्रमादभेदशङ्कां दर्शयति * अथ चेति * कर्त्तव्यस्येत्यादिभाष्यत्रयं लक्षणत्रयोक्त्यर्थत्वेनाभासमानत्वादयुक्तमाशङ्क्य आद्यमेव लक्षणोक्त्यर्थं द्वितीयं लक्षणोपपादनायावयवव्युत्पत्त्यर्थं तृतीयं रूढित्वशङ्कानिरासाय यौगिकत्वमुपपादयितुं पर्यायोक्त्यर्थमित्येवं व्याचष्टे * नादिति * तत्वं प्रकरणस्य प्रकरणत्वं प्रकरणशब्दप्रवृत्तौ निमित्तं सर्वप्रकरणेष्वनुवृत्तमन्यतो व्यावृत्तं लक्षणभेदो ऽवयवार्थोक्तिः प्रकरणशब्दपर्यायो विध्यादिशब्दः तस्मै प्रकरणं निरूपयतीत्यर्थः एतदेव विवक्तुं कर्त्तव्यस्येतिभाष्यं तावत्तेन प्रकरणोक्त्यर्थतया व्याचष्टे * तत्रेति * इतिकर्त्तव्यताकाङ्क्षायाः शाब्दत्वोपपादनार्थं कर्त्तव्यतोक्तिं द्वेधा व्याचष्टे * कर्तव्येति * सेति कर्त्तव्यताकप्रधानसाध्यत्वेनापूर्वस्येतिकर्त्तव्यतां विना साध्यत्वायोगात्साध्यत्वोक्त्या भावनाया वा सेतिकर्त्तव्यताकप्रधानावच्छिन्नाया विधेयत्वेनेतिकर्त्तव्यतां विना विधेयत्वायोगाद्भावनाविधेनेतिकर्त्तव्यताकाङ्क्षत्वरूपेण भावनोक्तिसूचनायानुष्ठापकप्रयोगविधिविषयत्वलक्षणार्थत्वेन कर्त्तव्यतोक्तिव्याख्यार्थानुष्ठेयत्वोक्तिभावनार्थत्वात्कर्त्तव्यत्वोक्तेः स्त्रीलिङ्गत्वापत्तेर्भावनाशब्देन भावनोक्त्याकर्त्तव्यत्वोक्तेः साध्यार्थत्वे फलवाचित्वापत्तेर्वापूर्ववाचित्वं स्यादित्याशङ्कते * साध्यांशेति * फलं भवद्भावयेदनेनेत्यर्थमिति साध्यसाधनेतिकर्त्तव्यतावच्छिन्नाया भावनाया युगपत्प्रयोगविधिविषयत्वात्त्रयाणामपि भावनांशानामेककालत्वावगतेः फलस्य चानिर्ज्ञातकालत्वेन साधनेतिकर्त्तव्यताकालत्वावगमात्स्वर्गादेश्च कालान्तरभावित्वेन साधनेतिकर्त्तव्यताप्रयोगेण सहैककालत्वाख्यसमवायाभावादपूर्वस्य तु यदा त्वाद्यपरिस्पन्दात्प्रभृत्या फललाभः क्रिया पूर्वापरीभूता लक्ष्यते वर्त्तते तदेति न्यायेन फ-

लनिष्पत्तिपर्यन्तं पूर्वापरौदासीन्यावस्थान्तरालकालैक्यात् प्रयोग-
समवायोपपत्तिस्तस्यैव कर्त्तव्यत्वावधारणाच्च फलं कर्त्तव्यमिति
परिहरति * नेति * अपूर्वस्य फलत्वाभावात्तन्निष्पत्तिमात्रेण प्र-
योगसमाप्त्ययोगात्स्वर्गादिनिष्पत्तिपर्यन्तं कालैक्यात्स्वर्गादेरपि प्र-
योगसमवायोपपत्तिमाशङ्क्य पूर्वापरौदासीन्यावस्थान्तरालवर्त्तिप्रयो-
गबाह्यस्य कालस्य प्रयोगपरिच्छेदकत्वायोगात्स्वर्गादेश्चान्तरालव-
र्त्तित्वाभावाच्च निष्पत्तिपर्यन्तकालैक्यानुपपत्तेः फलसिद्ध्यर्थत्वा-
च्चापूर्वस्यापि इत्युद्देश्यत्वलक्षणफलत्वोपपत्तेस्तन्निष्पत्तिमात्रेण प्र-
योगसमाप्तिसूचनार्थम् * तत्सिद्ध्यर्थेत्युक्तम् * यस्य च शब्दार्थेन
फलं साध्यते नापूर्वं कृत्वेति भावार्थाधिकरणभाष्ये द्वितीयया पूर्वस्य
कृतिकर्मत्वाभिधानेन कर्त्तव्यत्वावधारणं द्रढयितुं तदवयव पठ-
न्ति * तेनेति * नवमाद्यसूत्रे च यज्ञेन क्रियते इति व्युत्पत्त्या पू-
र्वस्य यज्ञकर्मशब्दोक्तस्य कर्त्तव्यतया चोद्यमानत्वेन हेतुना प्रयोज-
कत्वस्य वक्ष्यमाणत्वात्तस्यैव कर्त्तव्यतासूत्रकृतो ऽभिप्रेतेति द-
र्शयितुमाह * तथा चेति * कर्त्तव्यताङ्गीकारेणेति तथाशब्दस्या-
र्थः फलदेवतयोश्चेति नवमाधिकरणे पूर्वपक्षसूत्रे चागन्मस्वः स-
ञ्ज्योतिषा भूमेति फलप्रकाशके मन्त्रे फलस्याग्नेरुज्जितिमनुज्जेषमि-
त्यादिषु देवताप्रकाशकेषु देवतायाः प्रयोजकत्वमुपन्यस्य चोदना-
तो हि तादूगुण्यमिति सिद्धान्तसूत्रे कर्त्तव्यतया चोद्यमानत्वे
नापूर्वस्य मन्त्राणामपि नवमाद्यन्यायेनापूर्वगुणत्वागतेःफ-
लदेवतयोः कर्त्तव्यत्वाभावेन प्रयोजकत्वस्य निराकरिष्यमाणत्वात्फ-
लस्याकर्त्तव्यता सूत्रकृतो ऽभिप्रेतावसीयतइत्याह * फले
ति * इतिकरणसूत्रावच्छेदायोपन्यासपूर्वनिराकार्यप्रयोजकत्वप-
रामर्शाय चावर्त्तनीयः कर्त्तव्योक्तिं द्वेधा व्याख्यायेतिकर्त्तव्यताका-
ङ्क्षोक्तिं द्वेधा व्याचष्टे * तत्रेति * कर्त्तव्यस्य य इति कर्त्तव्यता-
विषया आकाङ्क्षाभिलाषस्तस्य यद्वचनमिति व्यधिकरणस्य षष्ठ्यन्त-
त्पक्षद्वयस्याद्य व्याख्याने ऽभिप्रेतत्वात्तस्येति षष्ठ्यां प्रयोज्यायां
कर्त्तव्यतानुक्तावितिकर्त्तव्यताया अभावेनापूर्वनिष्पत्तावपि भावना-
याश्च विधेयत्वायोगे ऽपि शब्दविरोधाभावात्कयाचिदितिकर्त्तव्यत-
यावश्यम्भाव्यमितिकर्त्तव्यता ऽकाङ्क्षायाः शब्देनाक्षेपायोगेन शब्द-
त्वापत्तेः शब्दे च सिध्यर्थमितिकर्त्तव्यताकाङ्क्षेण कर्त्तव्यत्वस्य नि-
मित्तं च सूचनार्थं तत्रेति सप्तम्यर्थे त्रल्प्रयोगेण षष्ठ्यर्थो लक्षितः
पर्यायेणेति कर्त्तव्यतोक्तिव्याख्यानायानुग्रहोपयोगोक्तिः भावव्यु-
त्पन्नत्वेनाकाङ्क्षोक्तौ ल्युडन्तयाकाङ्क्षणोक्त्या व्याख्यातायामाकाङ्क्षापद-

स्य स्त्रीलिङ्गत्वप्रसिद्धेः पुल्लिङ्गत्वायोगमाशङ्क्य पुल्लिङ्गत्वसिद्ध्यै घञन्ततायामुक्तायामलौकिकप्रयोगापत्तेर्घञन्तत्वायोगमाशङ्क्याकाङ्क्षायाः शाब्दत्वसिद्ध्यै वाच्यत्वं विवक्षितुं परमतेन षष्ठीसमासमभिप्रेत्येयं व्याख्यातिव्याख्यायतइत्यनेन सूचिते साकाङ्क्षत्वापादकेन रूपेणापूर्वस्य भावनाया वाभिधानमात्रेणाकाङ्क्षायाः शाब्दत्वोपपत्तौ तद्वाचिशब्दकल्पनायोगादेतद्व्याख्याख्यानापरितोषेण कर्मव्ययेण प्रत्ययमभिप्रेत्योपपादसमासतया स्वमतेन व्याख्यातुं यद्वेत्युक्ते ऽस्यां व्याख्यायां पदद्वयस्यापि सामानाधिकरण्याद्धनपदेनान्वयः पूर्वस्यां तु वैयधिकरण्यादितिकर्त्तव्यताकाङ्क्षाया विधिवाक्ये केन चिच्छब्देनानभिधानाद्वचनोक्तिमयुक्तामाशङ्क्य व्याचष्टे * वचनेति * आद्यव्याख्याते ऽङ्गप्रधानवाक्यैकवाक्यत्वान्यथानुपपत्त्या कल्पितेन कथमितिशब्देन प्रत्यायनं द्वितीये त्वपूर्वकर्त्तव्यत्वपक्षे यागेनापूर्वं कृत्वा स्वर्गं भावयेदिति साध्यसाधनान्वयान्यथानुपपत्त्या कल्पितेनापूर्वकर्त्तव्यत्ववाचिना पूर्वं कृत्वेति शब्देन भावनाकर्त्तव्यत्वपक्षे श्रुतेनैव विधिशब्देनेत्यर्थः वचनविशेषणस्य किं प्रयोजनमित्यपेक्षायामाह * एतदिति * प्रमाणान्तरेण प्रतीयमानत्वे ऽपि शाब्दत्वसिद्धेः शब्देनेत्यध्याहार्यं आकाङ्क्षाशब्देन प्रत्यायनशङ्कां निवर्त्तयितुमाह * तेनेति * भावनेत्यत्राप्यभिधीयमानेत्यनुषञ्जनीयं भावव्युत्पत्त्याकाङ्क्षाया भावनाया वा प्रकरणत्वोक्तिः आकाङ्क्षावतो ऽपूर्वस्य प्रकरणत्वानुपसंहारेणापूर्वनिष्पत्तिभावनयेतिकर्त्तव्यताकाङ्क्षणादपूर्वस्याकाङ्क्षोक्ता वस्तुतस्त्वंशत्रयान्विता भावना विध्युत्तरकालं कर्त्तव्यत्वेनापूर्वस्य प्रागप्रतीतेराकाङ्क्षायोगान्नावमिक्याश्चापूर्वप्रयुक्तत्वोक्तेर्भावनाया • धर्मप्रयोजकस्यापूर्वनिष्पत्त्यर्थत्वाशयत्वेन व्याख्यातुं शक्यत्वान्नापूर्वस्याकाङ्क्षास्तीति सूचितं प्रारम्भो हीति भाष्यं यस्माद्ध. प्रकरणशब्दवाच्यो ऽर्थः स क इत्यपेक्षायामवयवार्थानुसारात् क्रियायाः प्रारम्भो ऽवसीयते क्रियामवयत्वाच्चाकाङ्क्षायाः क्रियारम्भत्वं न सम्भवति तस्मान्नाभिधानानपेक्षाप्रकरणं किं त्वंशत्रयान्वितकर्त्तव्यभावनाभिधानाख्यक्रियारम्भात्मकत्वादाकाङ्क्षाभिधानं साकाङ्क्षाधेनाभिधानं वा प्रकरणमित्येवमुपलक्षणोपपादनायावयवार्थभेदेन प्रकरणोक्त्यर्थतया व्याचष्टे * इदानीमिति * लक्षणोपपादनार्थत्वसूचनायेदानींशब्दः क्रियाप्रारम्भवाचित्वं प्रकरणशब्दस्योपपादयितुमाह * तत्रेति * अवयवालोचनया क्रियामात्रारम्भप्रतीतेर्वचनविशेषणमयुक्तमाशङ्क्याकाङ्क्षाभिधानस्य क्रियान्तरारम्भत्वायोगादंशत्रयोपेतां भावनाभिधानक्रियारम्भत्वोक्त्यर्थत्वेनोपपादयितु-

माह * का पुनरिति * किं विषया वचनक्रियेत्यपेक्षायां नष्येत्येतेः कर्त्तव्यस्य भावनाख्यस्यार्थविषयत्वेन परामर्शं सूचयन्वचनोक्तेश्च वाक्यवाचित्वाशङ्कां निवर्त्तयन्नवतारितं भाष्यावयवं व्याचष्टे * अर्थेति * भाष्ये स इत्यस्य प्रकरणपरामर्शित्वे ऽप्यारम्भशब्दसामानाधिकरण्यात्पुल्लिङ्गत्वाविरोधः इतिकर्त्तव्यताकाङ्क्षत्वरूपेण भावनाभिधानस्यांशत्रयोपेतभावनाभिधानक्रियारम्भत्वमुपपादयितुमारभते * भावनेति * ऽयंशभावेनाभिधानक्रियाया प्रयोगवाक्यव्यापाराद्यतः प्रयोगवाक्यस्य प्रवृत्तिस्तस्य तदारम्भत्वात्किं केन कथमिति च फलकरणेतिकर्त्तव्यताकाङ्क्षत्वापादकं भावयेदिति अनेन रूपेण भावनाभिधानस्य प्रयोगवाक्यप्रवर्त्तकत्वात्तस्यैव ऽयंशभावनाभिधानक्रियारम्भतावसीयतइत्याशयः। प्रयोगवाक्यस्यास्मात् प्रवृत्तिरिति व्युत्पत्त्या प्रवर्त्तकं प्रवृत्तिशब्देनोक्तं यस्मादाद्यप्रयोगवाक्यप्रवर्त्तकं सम्भावितामिधानक्रियारम्भस्तस्मादिति कर्त्तव्यताकाङ्क्षभावनाभिधानस्य भावनाभिधानक्रियारम्भता युक्तेत्यर्थः। फलाकाङ्क्षाया एव तदाद्यत्वादारम्भत्वं स्यादित्याशङ्क्याह * फलेति * फलद्वयमात्रसाध्यत्वेनाद्यांशद्वयपूरणस्य प्रकरणानपेक्षतयेतिकर्त्तव्यतालाभमात्रस्यानेकवाक्याधीनसिद्धित्वेन प्रकरणापेक्षत्वादितिकर्त्तव्यतालाभे च फलकरणाकाङ्क्षयोर्हेतुत्वाभावेन प्रकरणशब्दप्रवृत्तिनिमित्तभूतारम्भत्वेनावक्तव्यत्वात्कथम्भाव एवेति कर्त्तव्यतालाभाभावाद्धेतुप्रकरणशब्दप्रवृत्तिनिमित्तभूतारम्भत्वेनोच्यत इत्युक्ते कथम्भावस्य फलकरणाकाङ्क्षोत्तरकालत्वेनानादिभूतत्वादारम्भत्वायोगमाशङ्क्य तेषामनेकेषां वाक्यान्तराणां समस्तानामालोचनापेक्षयेत्युक्तं वचनशब्देनाभिधानवाचिना ऽविधानस्याप्युपलक्षणं सूचयितुं विधानोक्तिः यथा च करणशब्दस्य स्वरसत क्रियामात्रवाचित्वे ऽप्यागमस्य क्रियान्तरायोगाद्योग्यतयाभिधानाख्यक्रियाविशेषणवाचितावसीयते तथारम्भवाचिनः प्रशब्दस्य स्वरसतः कथं किं भावविषयत्वावगमे ऽपि किं भावस्येतिकर्त्तव्यतालाभाहेतुप्रकरणशब्दप्रवृत्तिनिमित्तभूतारम्भत्वायोगाद्योग्यतयाङ्गवाक्यालोचनादिभूतकथम्भावविषयतापीति सूचयितुमाह * करणेति * स एष इति भाष्ये प्रकरणशब्दस्य रूढित्वेनायौगिकतया क्रियारम्भवाचित्वाभावाच्च तदंशेनाकाङ्क्षाभिधानलक्षणतावसातुं शक्येत्याशङ्क्यारम्भवाचिविध्यादिशब्दपर्यायत्वात्प्रकरणशब्दस्यारम्भवाचित्वोपपादनार्थं पर्यायेण प्रकरणोत्त्यर्थतया व्याचष्टे * स एष इति * विध्यादिशब्दमात्र

स्य पर्यायत्वात् विध्यन्तापेक्षोक्त्यानर्थक्यमाशङ्क्य परिहर्तुमाह *
आदीति * दृष्टान्तायान्तशब्दस्य सम्बन्धिशब्दतोक्ता विध्यन्तशब्द-
स्यार्थमाह * विध्यन्तोनामेति * विध्यन्तापेक्षया विध्यादित्वे त-
त्समस्तालोचनापेक्षया कथं भावः प्रकरणमभिधानविधानक्रिययो-
रारम्भ इति वार्त्तिकं विरुध्येतेत्याशङ्क्याह * तस्य चेति * अ-
नेकेषां प्रयाजाद्यङ्गवाक्यानां वाक्यार्थानां च प्रयाजादीनां प्रयाजादि-
प्रयोजनानां चालोचनानि विधिमध्यभूतानि यस्येति बहुव्रीहिणा
मत्वर्थोक्तेरङ्गवाक्याद्यालोचनाख्यविधिमध्यसहितविध्यन्तापेक्षयैव
विध्यादित्व भाष्यकृता ऽभिप्रेतं नतु विध्यन्तमात्रापेक्षया विध्यन्तो-
क्तिरुपलक्षणार्थेत्याशयः। विध्यन्तमात्रापेक्षाया च कथं भावस्यादित्वे
विध्यन्तादित्वप्रसिद्ध्यापत्त्या विद्ध्यादिष्वप्रसिद्ध्ययोगापत्तेरङ्गवाक्य-
द्यालोचनाख्यविधिमध्यसहितविध्यन्तापेक्षयादित्वे त्वादिभूतविधि-
भागव्यतिरिक्तसमस्तोत्तरविधिभागसमूहं विधित्वेनाभिप्रेत्य विध्या-
दित्वप्रसिद्ध्युपपत्तेरतत्प्रसिद्धिबलादपि विध्यन्तमात्रापेक्षयादित्वं
निराकर्त्तुमाह * इतीति * हेत्वर्थेनेतिकरणेनात एव मध्यसहितान्ता-
दित्वाद्धेतोर्विध्यादित्वप्रसिद्धिर्युक्तेत्युक्तं प्रसिद्धेरप्रामाण्याशङ्कानिरा-
सायाचार्याणामित्युक्तम् आद्यन्तव्यपदेशयोर्वा मध्यापेक्षत्वात्तत्सम्ब-
न्धित्वेन मध्योक्त्यर्थो ऽयं ग्रन्थः वाक्यक्रमाभ्यां प्रकरणस्य भेदे जि-
ज्ञासया प्रश्नपक्षे कर्त्तव्यस्येत्यादिभाष्येण भेदसिध्यै प्रकरणस्वरूप-
स्य वाक्याद्भेदसिध्युपयोगित्वोक्त्यर्थत्वेन भाष्यं त्विति भाष्यव्या-
ख्यां सूचयितुमाह * तत्र चेति * वाक्यार्थोक्तेः प्रयोजनत्वाभ्युप-
गमे तन्मात्रपर्यवसानेनानपेक्षत्वाद्वाक्यानामन्योन्यान्वयायोगः प्रयो-
जनत्वानभ्युपगमे पर्यवसानायोग इत्याशङ्क्य वाक्यार्थस्य प्रमेयत्वेन
प्रमाणभूतवाक्यप्रयोजनत्वात्तत्प्रतिपादनेन वाक्यानां स्वप्रयोजनाद्या-
काङ्क्षानिवृत्तिलक्षणे पर्यवसाने सत्यपि वाक्यार्थभूतभावनाकार्यदृष्टा-
दृष्टप्रयोजनापेक्षावशेनान्योन्यान्वयोपपत्तिसूचनार्थम् * क्रियत्यपी-
त्युक्तम् * पदानामपि पदार्थोक्त्याख्ये प्रयोजने पर्यवसितानां वा-
क्यप्रयोजनभूतवाक्यार्थोक्त्याख्यकार्यान्तरापेक्षावशेनान्वयाद्विशेष-
माशङ्क्याह * तथेति * पदमप्यधिकाभावात्कमारकाङ्क्ष विशिष्यत
इत्यनेन न्यायेन पदार्थानां प्रमेयत्वाभावेन प्रमाणप्रयोजनत्वायोगाच्च
तन्मात्रे पर्यवसानं सम्भवतीत्याशयः। वाक्ये पदानामन्योन्यान्वया-
ंशादौ विभज्यमानानां प्रयोजनलेशो ऽपि वृत्तिर्नास्ति किं त्वन्योन्या-
न्वयेनैव वाक्यार्थस्य प्रयोजनलाभ इत्यर्थः क्रमात्तु प्रकरणस्य भे-
दमने कस्याम्नायमानस्य सन्निधिविशेषाम्नानमात्रं हि क्रम इति

प्रकरणात्क्रमस्य दौर्बल्योक्त्यर्थं भाष्यं व्याचक्षाणः स्व
क्रमेण त्विति * वाक्यक्रमाभ्यां प्रकरणस्य भेदमुपसं
हरति * तयोरित्युदाहरणप्रश्नभाष्यमनेकोदाहरणाक्ष
शङ्का साकाङ्क्षपदसन्निधिमात्रं हीत्यादिवार्तिकोक्तै
८७३।१ कवाक्यत्वशङ्का येनेत्थमुपपादयति * किमिहेति
त्युदाहरणभाष्य सूक्तवाकाख्यस्यापि निगदस्य दर्श
पिपाठेन नैकवाक्यत्वशङ्कासम्भवादयुक्तमाशङ्कु
मिच्छतीति * साक्षाद्दर्शपूर्णमासवाक्यैकवाक्यत्वाद
धाङ्गविधायिनः सूक्तवाक्येन प्रस्तरं प्रहरतीतिवाक्यस्य
वलक्षणेनान्वयेन सूक्तवाक्यैकवाक्यभूतस्य दर्शपूर्णमा
ङ्गत्वात्तद्द्वारा सूक्तवाक्यस्य दर्शपूर्णमासवाक्यै
विष्यन्तीत्याशङ्क्य विधेयविधायकत्वलक्षणस्यान्वयस्यै
कत्वैकवाक्यत्वानापादकत्वं भिन्नप्रवृत्तित्वात्तथा स
क्षणयोर्द्वयोरपि प्रहरणाख्यैकार्थविषयत्वेनैकवाक्य
त्वं विषयैक्ये ऽपि विधायकस्मारकत्वलक्षणव्यापा
रत्वायोगो ऽभिहितः । अग्नये पावकायेत्यादिवदिन्द्राग्न्य
माख्यपौर्णमासदेवताविशेषवाचित्वादग्नीषोमपदस्य
थामावास्यादेवताविशेषवाचित्वाद्द्वयोर्नैकवाक्यत
विरोधाभावेन देवतापदोत्कर्षाभावात्तदेकवाक्यत्व
सिद्धान्तायोगेन सन्देहायोगमाशङ्क्योपपादनपूर्वं स्व
हीत्यादिभाष्यं सङ्क्षिप्य व्याचष्टे * लिङ्गादिति * नि
त्यनिष्ठया देवतापदानिष्कर्षस्य कृत्स्नोपदेशादुभयत्र
त्वेतदधिकरणसिद्धत्वं स्मारितं तच्छक्त्या विकल्प
शेषप्रापकत्वपक्षे ऽविवृधेतामित्यादिप्रतीकत्वमङ्गीकृत्य
विरजुषेतामवीवृधेतामहोज्यायो ऽक्रातामिति शेषस्य
चेन्द्रादिपदशेषाणामप्युदाहरणत्वं सूचितं देवतापदः
णां देवताविशेषणवाचित्वायोगेनाप्रयोज्यत्वमाशङ्क्य
तद्देवताविशेषणवाचितयैव प्रयोगसम्भवेन देवतापदशे
षेण प्रयोगोपपत्तिसूचनार्थम् * तद्धिता अपीत्युक्त
विकल्पेनानेकशेषविनियोजकत्वं मत्वा यावत् कृत्स्न
यव समुच्चयेनानेकशेषप्रयोगार्थतया भासमानं स
त्यर्थत्वेन व्याख्यातुमाह * प्रकरणेनेति * विकल्पपक्षे
भाष्यायामाशङ्क्यापत्तेरस्या व्याख्याया परमतत्वमसूच
दः द्विवचनयोगिनः शेषस्य द्विवचनयोगिना सर्वेण

गिनश्चैकवचनयोगिभिः सह वैलक्षण्याद्विकल्पोक्त्याऽनर्थक्यापत्तेरे-
कवचनयोगिना द्विवचनयोगिनश्चैकवचनयोगिभिः सह विकल्पस्य
वक्तव्यत्वात्तश्च लिङ्गात्समानवचनयोरेव विशेषणविशेष्यत्वावगतेः
प्रकरणबाधः स्यादित्याशङ्क्याह * लिङ्गमपीति * अवैलक्षण्ये ऽप्य-
ग्नीषोमपदशेषस्यैन्द्राग्निपदान्विते प्राजापत्यादिपदशेषस्य चेन्द्रादिप-
दान्वये पाठक्रमेण देवतापदात् प्राक् प्रयोज्यत्वाभावात् देवताप-
दशेषस्य तु पश्चात्प्रयोज्यत्वात्प्रयोगक्रमवैलक्षण्यार्थत्वेन वि-
कल्पोपन्यासयत्नोपपत्तेर्लिङ्गानुसारेणोभयोः पौर्णमास्यमावा-
स्ययोः सर्वशेषप्रापकत्वाच्च लिङ्गविरोधः प्रकरणस्ये-
त्याशयः । प्रयोगसमवेतदेवतापदशेषस्य स्ववाक्यस्थत्वाद्देवतान्तरप-
दशेषस्य तु वाक्यान्तरस्थत्वात्प्रयोगविधुरत्वेन विकल्पानुपपत्तेः प्रक-
रणबलीयस्त्वान्मैवं यदा विकल्पेन प्रयोक्तव्या वाक्यबलीयस्त्वाद्वा
प्रयोगसमवेतदेवतोपदेशे एव नियमेनेति सन्देहे न युक्त इत्याशये-
नाशङ्कते * ननु चेति * आत्मीयानात्मीयत्वलक्षणं विषमशिष्टत्वे
ऽप्यस्ति प्रकरणेनापनीतदेवताकस्यापि वाक्यान्तरस्थस्य शेषस्य वि-
कल्पेन प्रयोज्यत्वप्राप्तेर्वाक्येन तु स्ववाक्यस्थस्यैव नित्यं प्रयोज्य-
त्वप्राप्तेः वाक्यप्रकरणविरोधे सति वाक्यबलीयस्त्वं विना स्ववा-
क्यशेषनियमाश्रयणायोगाद्विकल्पोऽत्र विरुद्ध इत्याशयेन परिहरति *
सत्यमिति * प्रकरणस्यापर्यायवृत्तित्वेन युगपत्सर्वाङ्गग्राहित्वादस-
मवेतविशेषणान्वयप्रकाशनस्य चादृष्टार्थत्वाच्चाक्लैक्यसमधिगम्यत्वेन
चादृष्टस्यैकैकस्माच्छेषादृष्टसिद्ध्यवगतेरिदं हविरजुषेतामित्येताव-
तो विभागमन्त्रवद्विकल्पसम्भवे ऽप्यवीवृधेतामित्यादेर्विकल्पायोगा-
च्छेषोदाहरणभाष्यस्य चास्मिन्पक्षे ऽनाञ्जस्यापत्तेर्यावत् कृत्व इति
भाष्यावयवस्य सर्वप्रयोगसाम्यार्थत्वव्याख्यानायापरितोषात्स्व-
मतेन समुच्चयार्थत्वव्याख्यासूचयन्नन्यथासन्देहं दर्शयितुमाह *
असकृद्वेति * सकृदसकृत्प्रयोगयोरविरोधपक्षायोगसूचनार्थो वि-
रोधोक्तिः अवीवृधेतामिति शेषेणासकृत्प्रयुक्तेनैषां देवतं निर्दिशतां
प्रस्तरं प्रहरेदिति प्रकरणकल्प्यथासकृत्प्रयुक्तेनेति वाक्यकल्प्यायां
वा श्रुतेः शेषस्येष्टदेवतापदैकवाक्यत्वपूर्वकैष्टदेवताविशेषणोक्तिसा-
मर्थ्यकल्पनापूर्वकत्वाविशेषादेकवाक्यत्वस्य च वाक्यप्रकरणयोर्द्व-
योरप्याकाङ्क्षाहेतुकत्वाविशेषात्तुल्यबलेनेति पूर्वपक्षोक्त्यर्थं किं ताव-
दित्यादिभाष्यमाकाङ्क्षाख्यप्रकरणपूर्वकत्वेन नैकवाक्यत्वस्य लिङ्गा-
देव प्रकरणादपि विप्रकृष्टार्थत्वाद्वाक्यस्य दुर्बलतेति पूर्वपक्षान्तरो-
क्त्यर्थं चाथवेति भाष्यं स्पष्टत्वान्न व्याख्यातम् । एवमित्यादिसिद्धान्त-

भाष्ये वाक्यबलीयस्त्वसिद्धौ वाक्ये पदैकवाक्यत्वप्रत्यक्षतोक्तेः पदैकवाक्यत्वस्याकाङ्क्षाविशेषाद्युक्तमाशङ्क्याकाङ्क्षानवगमे ऽप्यन्योन्यान्वयायोग्यपदसमभिव्याहारमात्रे ऽप्यैकवाक्यत्वावगत्याशयत्वेनोपपादयितुमाह * क्लृप्तेति * वाक्यस्य वाक्यार्थाख्यप्रयोजनलाभेन नैराकाङ्क्ष्यरूपात्परिपूर्णत्वात्प्रकरणे वाक्यैकवाक्यत्वस्याप्रत्यक्षत्वोपपादानपूर्वं विप्रकर्षोपपादनार्थमितिकर्त्तव्यताकाङ्क्षस्येत्यादिभाष्यं सूक्तवाकमन्त्रात्मकस्य वाक्यस्य ब्राह्मणात्मकदर्शपूर्णमासवाक्यैकवाक्यत्वायोगात्प्रहरणसंयुक्तत्वेन प्रकृतयागैकवाक्यतया तदभिधानसामर्थ्यकल्पनपूर्वकप्रकृतयागाभिधानार्थत्ववाचिश्रुतिकल्पनस्यायुक्तत्वादयुक्तमाशङ्क्योपपादयितुमाह * कथम्भावेन हीति * इत्थं यजेतेति कथम्भावाख्यप्रकरणानुमितायां श्रुतौ दर्शपूर्णमासवाक्यविहितयागानुवादेन तदङ्गत्वेन सूक्तवाकविधिरेकवाक्यतयोपचरित इति सम्बन्धोक्त्या सूचितं प्रहरणसंयुक्तत्वात्साक्षात्प्रकृतयागाङ्गत्वाभावे ऽपि प्रकृतयागापूर्वान्वयिनि रूपे सूक्तवाकस्याङ्गत्वसिद्धौ सामान्यसम्बन्धानुमानपूर्वं प्रहरणाङ्गतया विहितसूक्तवाकस्यापनीतदेवतापदशेषाणामात्मीयैर्वाक्यान्तरस्थत्वादन्यदीयैर्देवतापदैः क्लृप्तस्य वाक्यशेषान्वयत्वाच्छेषान्तराकाङ्क्षैः सह पुनः शेषान्तराकाङ्क्षामुत्पाद्यान्वयकल्पनेति प्रहरणाङ्गत्वविध्यपेक्षितसामान्यसम्बन्धसिध्यै प्रहरणाङ्गत्वद्वारा प्रकृतयागाङ्गत्वोक्तिरिति तथाशब्देन सूचिते सामान्यसम्बन्धापेक्षया शेषाणां वाक्यान्तरस्थदेवतापदान्वये स्ववाक्यस्थदेवतापदान्वये च तुल्यत्वेनोभयसाधारण्याद्विप्रकर्षया वाच्यत्वमाशङ्क्य सर्वशेषप्रयोगसिद्ध्यर्थत्वं सामान्यसम्बन्धोक्तेः सूचयितुम् * यावदाम्नातमित्युक्तम् * भाष्ये चाभिधेयो ऽयं प्रकृतो याग इति वाच्य श्रौतप्रहरणाख्यद्वारविशेषान्वयस्य सामान्यान्वयापेक्षत्वसूचनाय पूर्वकालत्वोक्त्यर्थाभिहित इति भूतनिष्ठा साक्षाद्यागाभिधाने ऽपि श्रुतिविहितयागाङ्गभूतप्रहरणाभिधानद्वारा यागाभिधानोपपत्तिसूचनार्थं तस्मात्सूक्तवाकेन प्रस्तरं प्रहरतीति सामान्यान्वयापेक्षत्वसूचनाय वक्ष्यमाणभाष्योदाहृतश्रुतिविहितद्वारपरामर्शायैव शब्दः प्रकृतयागापूर्वसाधनभूतप्रस्तरप्रहरणाङ्गत्वेन सूक्तवाकविधिमात्रात् सूक्तवाकस्य विशेषणभूतप्रकृतयागसिद्धेः प्रकृतापूर्वलक्षणामात्रे प्रकरणव्यापारो न त्वङ्गत्वावेदने यागेतिकर्त्तव्यताभूतप्रहरणाकरणत्वेन सूक्तवाकस्य यागेतिकर्त्तव्यतात्वाभावात्प्रकरणाविनियोज्यत्वानुपपत्तेः सन्निपत्योपकारिणां च प्रकरणाविनियोज्यत्वस्यासंयुक्तं प्रकरणादित्यसंयुक्तत्वोक्त्या पर्युद-

स्तत्वादितिसूचयितुं प्रहरणाङ्गत्वविधिमान्नाद्यागाङ्गत्वसिद्ध्युक्त्यर्थं भवतीत्युक्तम् एषो ऽत्रेति भाष्यमुपपादितार्थविप्रकर्षोपसंहारार्थत्वेन व्याख्यातुमाह * इतीति * तस्मादिति भाष्यं प्रकरणबाधासद्धान्तोपसंहारार्थत्वेन व्याचष्टे * तस्मादिति * इतिकर्तव्यताकाङ्क्षत्वादिभाष्येण सूक्तवाक्यस्य दर्शपूर्णमासवाक्यैकवाक्यताया प्रत्यक्षत्वनिरासे ऽपि देवतान्तरपदशेषाणामुत्कर्षायष्टदेवतापदैकवाक्यतायाः प्रत्यक्षत्वस्य निरसनीयस्यानिरासादुत्कर्षासिद्धेः कथं देवतान्तरपदशेषाणां निष्कृष्य प्रयोगसिद्धिरित्याशङ्क्य प्रकरणसामर्थ्यालोचनं विना देवतान्तरपदशेषाणामिष्टदेवतापदैकवाक्यत्वस्यानवगतेरप्रत्यक्षत्वं सिद्धमङ्गीकृत्य येन कारणेन यद्यप्यप्रत्यक्षा सती पौर्णमासी देवतापदशेषाणाममावास्यादेवतापदैकवाक्यतानुमातुमारभ्यते तथापि प्रत्यक्षेणामावास्या देवतापदैः सहाम्नातानामेव शेषाणाममावास्यादेवतापदैकवाक्यत्वावगतेः प्रत्यक्षविरोधान्नानुमान सम्भवति वस्तुतस्तु शेषाणां स्ववाक्यदेवतापदान्वयाद्देवतापदानां च स्ववाक्यशेषान्वयात्प्रकरणाम्नानार्थत्वोपपत्तेर्निराकाङ्क्षाणां देवतापदान्तराणां शेषान्तराकाङ्क्षोत्पादनाशक्तेर्न प्रकरणस्यानुमानारम्भे सामर्थ्यमस्ति तेन कारणेन निष्कृष्य प्रयोगसिद्धिरिति तेन शब्दोत्कर्षसहितेन तच्छेषाणामपि निष्कृष्य प्रयोग इति भाष्यावयवानुषङ्गेण परिहारार्थं तेनेत्यादिभाष्यं क्लृप्तशेषैरिति वार्त्तिकेनानागतावेक्षणन्यायेनार्थतो व्याख्यातत्वाद्विपरीतबाधपूर्वपक्षस्य चार्थोत्तभाष्येणानुभाष्य निरासार्थं न यदित्यादिभाष्यं वाक्ये पदैकवाक्यत्वस्य प्रत्यक्षत्वोक्त्या वाक्यस्य लिङ्गापेक्षया विप्रकर्षः प्रकरणापेक्षया सन्निकर्ष इत्युपपादितार्थत्वादव्याख्याय चिन्ताप्रयोजनं विवेक्तुमाह * ततश्चेति * देवतापदान्तरशेषाणां नित्यमपकर्षसिद्धान्तप्रयोजनमुक्त्वा तुल्यबलत्वपूर्वपक्षे प्रकरणस्य विकल्पेन सर्वशेषप्रापकत्वे वाक्याश्रयणे नित्यमपकर्षः प्रकरणाश्रयणे पाक्षिकः समुच्चयेनासकृत्प्रयोगप्रापकत्वे तु प्रकरणाश्रयणे सर्वशेषविनियोग इति प्रयोजनं सूचयितुं न पाक्षिक इत्याद्युक्तम् । बलाबलविपरीतपूर्वपक्षे तु न पाक्षिक एवापकर्षः सर्वदेवताविनियोग इत्युभयत्राप्यवधारणं कार्यम् । अथेति प्रश्नभाष्यस्यार्थतः पाठपूर्वमाशयं व्याचष्टे * अथेति । अनुक्तमुदाहरणं ज्ञातुमशक्नुवतः श्रोतुरज्ञानादापाततो ज्ञातं च निश्चेतुमशक्नुवतः संशयात्तावत्सम्भवत्येव प्रश्नः तावतिकस्यापि तुल्यक्रमाणामैन्द्राग्नादीनां कर्मणां याज्यानुवाक्यायुगलानां चाना-

तदुपाधीनत्वेन कस्य चित्प्रकरणेऽन्तर्भावाद्विरोधः तस्य श्रुत्यादय-
न्तरस्य च यथा तत्पदलक्षणक्रमविनियोजकस्य श्रौतपूर्णमासप्रकरणा-
न्तःपातेऽपि शुन्धध्वमिति सन्निधिलोपदेशाद्विरुद्धार्थयोग्यवाक्यत्वा-
मर्थान्तरकल्पितलिङ्गविरोधेन कथमन्यस्य चाक्षुषलिङ्गत्वेनापि प्रकर-
णाविनियोजकत्वायोगाद्यथास्वपदलक्षणपाठसादेश्यमनुमानस्य क्रमस्य
प्रकरणविरोधे दास्य चित्रुवाहरणस्यानुपपत्तेरनुष्ठानसादेश्यहेतु-
कालक्रमादभिषेचनीयाङ्गत्वावगतेः प्रकरणाच्च राजसूयाङ्गत्वावगते
रुदाहरणत्वेनाभिमतस्य पुरस्तात्परस्ताद्वासन्नसन्निधिनैव लक्षणेन
सन्निधानमिदं स्थानान्तरप्रकरणत्वप्रसङ्गाच्च किञ्चिदुदाहरणमस्तीति
विपर्ययस्यादर्शनाय सम्भवतीत्यर्थः । राजसूयस्तुत्यत्र भाष्यमाशयोक्तिपूर्व-
त्वाच्च * शङ्कितेति * कथं शक्यमित्यपेक्षितन्येकस्याभावसा-
नन्थेति भाष्यवक्ष्यमाणाकाङ्क्षारहितसन्निधिमात्रलक्षणस्थानक्रमस्यै-
ति सूचयितुं तद्भाष्यकारीयं पुरस्तात्परस्ताद्वासन्नसन्निधानलक्षणेन
क्रमस्यावान्तरप्रकरणत्वापत्तिनिरासमुपपाद्यैव तावत्स्वप्रयोजनत्व-
स्येहोक्तयर्थं यदीतिभाष्यं शौनशेपाख्यानादीनां स्थानान्तरे ऽङ्ग-
त्वान्तरेऽस्ति शेषचिन्तायोगाद्युक्तमाकाङ्क्षयापि पाङ्क्तान्तरात् श्रु-
तेति चतुर्थाधिकरणसिद्धान्तसूत्रे ऽङ्गत्वस्य तत्समासान्तरस्येह
विपर्ययाभावेनोपपादयन्यदि तुल्यबले सर्वेषां चाभिषेचनीयस्य चेति
विकल्प इत्यध्याहारेण भाष्यं सन्देहोक्त्यर्थतया व्याख्यातुमाह *
सर्वां चेति * विपर्ययो विप्रतिपत्तिशब्देनोक्तः । समस्तशाङ्कयोः
समुच्चययोगादुक्तप्रकारेण त्रेधैव विचार्यत इति प्रकरणान्वयः ।
श्रुत्यर्थचिन्ताया बलाबलचिन्ताप्रयोजनत्वसूचनार्थम् * प्रकरण-
स्यैवमुक्तम * आकाङ्क्षासन्निधियोग्यत्वानां प्रमाणात् वाक्यत्वा-
पादकत्वेनेष्टत्वादाकाङ्क्षालक्षणस्य प्रकरणस्य सन्निधिलक्षणस्य च
क्रमस्य तुल्यबलत्वोक्त्यर्थं किं तावदित्यादिभाष्यं स्वकल्पनार्थं साका-
काङ्क्षायाः सन्निधिं च विना सम्बन्धायोगात्सन्निधानमात्राकाङ्क्षायां तु
विहितावलम्बितेत्यावगतेराकाङ्क्षालक्षणस्य प्रकरणस्य वाक्यादेव
सन्निधिलक्षणात्क्रमादर्थविप्रकर्षात् दुर्बलतेति बलाबलपरोक्तपूर्व-
पक्षान्तरोक्त्यर्थं चापि चेति भाष्यमेव मिथ्यार्थविप्रकर्षादित्यन्त-
च सिद्धान्तभाष्यं स्पष्टत्वादव्याख्याय सन्निधिलक्षणस्य क्रमस्या-
वान्तरप्रकरणत्वेन महाप्रकरणात्सन्निकृष्टार्थत्वावगतेरर्थविप्रकर्षा-
सम्भवतीत्याशयत्वेन कोऽत्रेति प्रश्नभाष्यव्याख्यां सूचयन्नवान्त-
१०७४॥ रप्रकरणत्वापत्तिनिरासमुपपादयितुं शङ्कते * ननु चेति * प्र-
स्वङ्गानिरासार्थत्वेन प्रकरणबल इत्यादि. सन्निधिनिरोधानुमानं

हि क्रम इत्यनन्तरोक्तरभाष्यस्य व्याख्यां सूचयन्नवान्तरप्रकरण- स्वापत्तिनिरासमुपपादयति * नैव इति * अनेन त्ववान्तरप्रकरणान्त- र्गताभिमन्त्रणस्याभिषेचनीयस्य यदि शौनःशेपाख्यानकाले साकाङ्क्षत्व- स्यासत्त्वात्तत्सन्निधापकाभावेन शौनःशेपाख्यानादिना स्वकाङ्क्षार्थप- रिपूर्णतायामवान्तरप्रकरणलक्षणसाकाङ्क्षैकवाक्यतानवकल्पनेन तस्य त्वभि- षेचनीयस्य विदेवनशौनःशेपाख्यानादिभ्यः प्रागेव निराकाङ्क्षीकृत- त्वेनावान्तरप्रकरणस्यायोगात् तत्स्वरूपैकवाक्यतावकल्पत इत्येवं प्रकरणपदं इति भाष्यान्तर्गतव्याख्या सूचिता । प्रत्यासत्तिविदेवना- द्युल्लङ्घनेन प्राकृतधर्मापेक्षा न युक्तेत्याशङ्कानिरासार्थत्वेनाभिषेचनी- यस्य तत्रान्यकाङ्क्षापेक्षत्वे ऽवक्लृप्तोपकारान्तराभिहितान्यांशो- द्दिष्टत्वान्निर्देशतो सर्वत्राभाव प्रकृत्यपेक्षत्वाद्वाकाङ्क्षारहितसन्निधि- मात्रलक्षणक्रमवत्तापत्तः सन्निधिमात्रलक्षणे क्रमे शौनःशेपाख्याना- दिना ह्यभिमन्त्रणवाक्यत्वं नावकल्पत इत्येव न निर्गतभाष्यावयवव्या- ख्यां सूचयन्नुपाह * सत्यामपीति * क्रमत्वे सत्यपि साकाङ्क्षत्वाद- पि च आग्नेयीगुहालोक्यादिभिरेकवाक्यत्वोपपत्तेरनवक्लृप्त्युक्तिरयु- क्तेत्याशङ्क्य प्रकरणाधिरोपेनानवक्लृप्त्युक्तिमुपपादयितुमाह * नि- राकाङ्क्षस्य इति * अभिषेचनीयस्य सर्वेषां राजसूयशब्दवाच्यानां सामाद्यपशुबन्धानां विकृतित्वेन प्राकृतधर्मैर्निराकाङ्क्षीकृतत्वात्क्रम- स्याबाधागमाशङ्क्याह * नदीयां इति * प्रात्यात्मिकापूर्वेण कथंभावस्य प्राकृतधर्मैर्निवृत्तावपि समस्तसाध्यफलापूर्वनिष्ठ क- थंभावस्य पवित्रादिसामयागादारभ्य क्षत्रस्य धृत्याख्यसामग्रा- पर्यन्तमनुवृत्तत्वेन मध्यपातिविदेवनादिस्पर्शात्स्वकथंभावेन विनि- योगः सिद्ध इत्याशय । अवान्तरप्रकरणापत्तिनिरासमुपसंहरति * अत इति * कस्यां तिथ्यपि तर्हि विकृतौ प्रात्यात्मिकं प्रकरणं न स्यादित्याशङ्क्याह * यस्यां त्विति * प्रकृतमङ्गमनूद्य तत्सम्बन्धि- त्वेन वैकृतमङ्गं यस्यां विधीयते तत्सम्बन्धित्वेन वा विहितस्य वैकृ- तस्याङ्गस्यैकस्य विधीयमानादङ्गात्पुरस्तादपरस्य च परस्ताद्वावि- तस्य मध्ये तन्त्रमङ्गं यस्यां विधीयते प्रधानाद्वा पुरस्तात्प्राकृताङ्गा- नुवादेन विहितस्याङ्गस्य परस्तात्तन्त्रमङ्गं परतो वा प्राकृताङ्गा- नुवादेन विहितस्य पुरस्तात्तन्त्रमङ्गं यस्यां विधीयते तस्यां कथंभावगृहीतप्राकृताङ्गमध्यपातित्वात्कथंभावगृहीतप्राकृताङ्गानुवादे- न विहिताङ्गद्वयमध्यपातित्वाद्वा प्रकरणापत्तिरिति यथायोग्य- मुदाहार्या भाष्यं योज्यम् । अभिषेचनीये ऽपि तर्हि माहेन्द्रस्तोत्र- शस्त्राभिपिच्यत इति वाक्येन प्राकृतमाहेन्द्रस्तोत्रसम्बन्धित्वेन विधान-

लक्षणायोगात्प्रकरणोपाख्यानादीनां प्राकृतवर्त्तित्वात्पश्वादिषु प्राकृतसामिधेन्यनुवादेन विधीयमानसप्तदशत्ववत्प्रकरणपाठो भविष्यतीत्याशङ्क्याह *न चेति* शौनःशेपाख्यानादीनां माहेन्द्रस्तोत्रकाले ऽनुष्ठानविधाने ऽपि स्तोत्राङ्गत्वाभावेन स्तोत्रद्वारा कथंभावग्रहणायोगात्प्रकरणव्यापारो न सम्भवतीत्याशयः । तात्पर्यतो व्याख्याते प्रकरणवत इति भाष्ये शौनः शेपाख्यानादेः परिपूर्णत्वोक्तिं प्रकरणवत्त्वैकवाक्यत्वात्प्रयोजनालम्भेन नैराकाङ्क्षलक्षणपरिपूर्णत्वायोगादयुक्तामाशङ्क्योपपादयति * सन्निधाविति * क्रमस्यावान्तरप्रकरणत्वाशङ्कानिरासार्थलक्षणोक्त्यर्थे ऽनेकस्येति भाष्ये ऽनेकविशेषणानर्थक्यमाशङ्क्यानेकस्य मध्ये कस्य चित्सन्निधावाम्नानमित्येवं रूपस्य सन्निधिविशेषाम्नानस्य नान्तरीयकत्वादेकाङ्गत्वं विनाप्येकसन्निध्युपपत्तिसूचनायानेकोक्तिर्न लक्षणविशेषणायेत्येवमुपपादयितुमाह * अनेकस्येति * नान्तरीयकतामुपपादयति * यो हीति * एकस्यापि तर्हि प्रकरणिनो ऽर्थे ऽनाम्नायमानस्य प्रकरणापाठावश्यम्भावात्प्रकरणपाठो ऽपि नान्तरीयकः स्यादित्याशङ्क्याह * नन्विति * क्रमवदङ्गत्वं विनापि क्रमस्योपपत्तिरूप यादृशं नान्तरीयकत्वं तादृशं प्रकरणवदङ्गत्वं विनापि प्रकरपाठस्योपपत्तिरूपं नान्तरीयकत्वं नास्ति कश्चित्प्रकरणवन्तं प्रत्यङ्गत्वाभावे बहिरपि पाठसम्भवात्प्रकरणपाठस्यादृष्टार्थत्वापत्तेरित्याशयः । सन्निधिलक्षणस्य क्रमस्यावान्तरप्रकरणत्वाभावे ऽप्याकाङ्क्षासन्निध्योस्तुल्यत्वेनैकवाक्यत्वहेतुत्वाच्च क्रमस्याकाङ्क्षालक्षणात्प्रकरणाद्विप्रकर्षः सम्भवतीति तुल्यबलत्वपूर्वपक्षाद्वयस्याकाङ्क्षानपेक्षात्सन्निधिमात्रादेकवाक्यत्वानवगतेः क्रमे चाप्रत्यक्षत्वाकाङ्क्षायाः प्रकरणे तु प्रत्यक्षत्वाद्विप्रकर्षोपपादनेन निरासार्थं तत्रेत्यादिभाष्यं सन्निहितालम्बनत्वेनाकाङ्क्षायाः सन्निध्यपेक्षत्वाद्विपरीतबलाबलपूर्वपक्षस्यानुभाषणपूर्वमाकाङ्क्षणीयान्वयं विनानुपपत्तिरूपत्वेनार्थापत्त्याख्यप्रमाणतया ऽऽकाङ्क्षायाः साक्षादेकवाक्यत्वावगतिहेतुत्वात्संनिधेस्त्वाकाङ्क्षणीयविषयविशेषसमर्पणाद्वारैकवाक्यत्वावगतिहेतुत्वाद्विषयविशेषसमर्पणायाकाङ्क्षायाः संनिध्यपेक्षत्वे ऽप्येकवाक्यत्वावगमाय सन्निध्यनपेक्षत्वाद्वाक्यापेक्षयार्थविप्रकर्षात्प्रकरणस्य दौर्बल्ये ऽपि क्रमापेक्षयार्थसन्निकर्षाद्बलीयस्त्वेत्येवं निरासार्थं वार्थेत्यादिभाष्यम् एकग्रन्थेन संकृष्य व्याचष्टे * अत इति * क्रमस्य सन्निधिविशेषमात्रत्वेनावान्तरप्रकरणत्वाभावे सतीत्येव तत्र सन्निधिविशेषम्नानसामर्थ्यादिति भाष्यस्थतत्रशब्दव्याख्यासूचनार्थं व्याख्यातभाष्योक्तक्रमलक्षणपरामर्शायातः शब्दः क्रमसमाख्याविरो-

धोदाहरणपक्षभाष्यमपि पूर्ववद्द्वेधा व्याख्येयमित्याह * क्रमेति * ८७५।१
अधिकृत्य कृते ग्रन्थ इत्यनुवर्त्तमाने पुरोडाशाट्ठञिति स्मृतेः पौरोडाशिकसमाख्यायाः पुरोडाशविषयग्रन्थवाचित्वावसायान्मन्त्रपुरोडाशपात्रशुन्धनसम्बन्धाख्यविनियोगहेतुत्वस्य तद्धितशब्दकृतत्वेन बलीयस्त्वात्परदौर्बल्यसिद्धान्तोपयोगिविरोधोदाहरणत्वायोगाद्यौगिक्याश्च समाख्याया विनियोगहेतुत्वनिरासाद्रूढित्वाभ्युपगमेन सारूप्यमात्रेण विनियोगहेतुतया दौर्बल्यायोगान्न किञ्चिदुदाहरणं सम्भवतीति वक्तुं शक्यत्वे ऽपि पौरोडाशिकसमाख्यायाः समस्ते दर्शपूर्णमासकाण्डे पुरोडाशानलङ्कृतिवद्गौणत्वाच्छ्रुतितुल्यत्वशङ्काधि नास्तीति अतिशयोक्त्यर्थत्वेन पौरोडाशिकमित्युदाहरणभाष्यं व्याख्यातुमाह * पौरोडाशिकमिति * पुरोडाशपात्रशुन्धनार्थत्वाभावे पौरोडाशिकसमाख्यानुपपत्तिशङ्कापि समस्तकाण्डवाचित्वोक्त्या निरस्ता लिङ्गाच्छुन्धनार्थत्वावगमे ऽपि पात्रशुन्धनार्थत्वानवगमात्पात्रविशेषसन्देहो न युक्तः पात्राणामेव प्रक्षालनाख्यशुन्धनविधानाच्छुन्धनार्थत्वलिङ्गवशेन पात्रशुन्धनार्थत्वरूपविशेषावगमे ऽपि तुग्रहादिपात्रशुन्धने ऽपि लिङ्गाद्विनियोगावगतेः क्रमसमाख्ययोर्द्वयोरपि बाधप्रसङ्गात्सन्देहायोगमाशङ्क्य प्रकरणाद्दार्शपौर्णमासिकत्वविशेषलाभ इत्येवं सन्देहोपपादनार्थत्वेन दर्शपूर्णमासकाण्डे शुन्धनार्थमन्त्रे समाम्नाते सतीत्येवं तत्रशब्दं व्याचक्षाणस्तदेति सन्देहभाष्यं व्याचष्टे * स चेति * प्रकरणावगतस्य सामान्यसम्बन्धस्य द्वारविशेषसम्बन्धापेक्षत्वात्प्रकरणविरोधस्य निर्ज्ञाते प्रकरणेनेति भाष्यव्याख्यायां निराकरिष्यमाणत्वेनानाशङ्क्यत्वसूचनार्थम् *सामान्येनेत्युक्तम् * विनियोगविषयविशेषचिन्तायाः फलतो बलाबलचिन्तार्थत्वसूचनार्थता समाख्यानस्येति भाष्यावयवस्य सूचयितुम् * इतरदित्युक्तम् * तुल्यफलत्वाद्विकल्पो विरोधाभावाद्वोभयत्रेति पूर्वपक्षद्वयान्तरमपि किंशब्देन सूचितम्। पौरोडाशिकासमाख्यायाः पौरोडाशिकापौरोडाशिकसमुदायवाचित्वे ऽप्यर्थवत्त्वाय श्रुत्यादित्रयानवगतद्वारविशेषस्य पुरोडाशशब्दान्वयार्थत्वावगतेस्तद्बलीयस्त्वे पुरोडाशमात्रपात्रशुन्धनार्थतोक्ता। समाख्योक्तसम्बन्धस्याकाङ्क्षाविनानुपपत्तेः सन्निधिमकल्पयित्वा ऽप्याकाङ्क्षाकल्पकत्वसम्भवात्समाख्यायाः क्रमाद्विप्रकर्षायोगाशयेन तुल्यबलत्वपूर्वपक्षोक्त्यर्थं किं तावदित्यादि स्यातामित्यन्तं भाष्यमते इत्यादिचावृत्त्या विच्छिद्य द्वे अप्येते ऽविरोधाद्विनियोगकारणे इत्येवं समुच्चयपूर्वपक्षान्तरोक्त्यर्थं यदि वेति भाष्यं च समाख्यायाः श्रुतितुल्यत्वाद् बलाबलवैपरीत्य-

पूर्वपक्षान्तरोक्त्यर्थमित्येकहेलया पूर्वपक्षभाष्यद्वयव्याख्या पूर्वमेव-
मित्यावर्त्य विप्रकर्षादित्यन्तं सिद्धान्तभाष्यं व्याचष्टे * तुल्येति *
दृष्टबाधत्वोक्त्या क्रमस्य विप्रकर्षः समाख्यायाश्चादृष्टबाधत्वोक्त्या
सन्निकर्षो विवक्षितः । कथमर्थविप्रकर्ष इत्यपेक्षायामुपादिश्यते हि
हि क्रमे समाम्नानात्साम्नाय्यसम्बन्ध इत्यादिभाष्ये वक्ष्यमाणामुपप-
त्तिमनागतावेक्षणन्यायेन दर्शयति * तथा हीति * यावति प्रदेशे
ब्राह्मणे सान्नाय्यपात्रशुन्धनं तावत्येव मन्त्रसहितायां शुन्धनमन्त्र-
पाठाद्देशदर्शितत्वेन क्रमे सादृश्यं प्रत्यक्षत्वाच्छीघ्रं दृश्यते समाख्या-
यां तु सम्बन्धान्यथानुपपत्त्या कल्प्यत्वाद्विलम्बेनेत्यर्थः * कः पुनरि-
ति * सम्बन्धस्यावाच्यत्व ऽप्यन्तर्णीतिसम्बन्धस्य सम्बन्धिनो ऽभि-
धानात्सम्बन्धानुपपत्तिमात्रेणाकाङ्क्षाकल्पनसिद्धेरेकस्मिन्नेव च क्ष-
णे सादृश्यसम्बन्धाभ्यामाकाङ्क्षाकल्पना न विप्रकर्ष इति तुल्यबल-
त्वपूर्वपक्षे प्रश्नाशयः । वैपरीत्यपूर्वपक्षे तु श्रुत्यभिधेयस्याङ्गाङ्गि-
सम्बन्धस्य समाख्यावाच्ये सम्बन्धिन्यन्तर्णीतत्वेन श्रुतितुल्य-
त्वात्समाख्यायाः क्रमस्येव प्रकरणादिव समाख्यातो ऽप्यर्थविप्रकर्ष
इत्याशयः । निर्ज्ञात इत्युत्तरभाष्ये प्रकरणव्यापारोक्त्यानर्थक्यमाश-
ङ्क्य परिहरति * निर्ज्ञात इति * अविरोधोपपादनार्थं विरोधं
तावच्छङ्कते * कथ पुनरिति * मन्त्रस्य संनिपत्योपकारित्वेन
प्रकरणविनियोज्यत्वाभावेन सामान्यान्वयमात्रे प्रकरणव्यापारात्तस्य
च द्वारविशेषापेक्षत्वादविरोध इत्याशयेनाविरोधमुपपादयति *
नैष इति * लिङ्गाच्छुन्धनसयुक्तस्य मन्त्रस्य प्रकरणेन क्रत्वङ्गत्व-
बोधाशक्तेः शुन्धनस्वरूपाङ्गतायामानर्थक्यप्रसक्तिपरिहारायापूर्व-
साधनांशलक्षणामात्रार्थं प्रकरणव्यापारापेक्षणादेकापूर्वसाधनांश-
लक्षणया चानर्थक्यं परिहृते ऽपूर्वान्तरसाधनांशलक्षणायां
प्रकरणव्यापारापेक्षणादेकापूर्वसाधनांशलक्षणया चानर्थक्यं परिहृते
पूर्वान्तरसाधनांशलक्षणायां प्रकरणाम्नानात्सर्वार्थत्वावगतिसूचनार्थं
प्रकृतदर्शपूर्णमासाख्ययागषट्कान्यतरार्थत्वावधारणोक्ता । परिहा-
८७६।२ राशयाज्ञानाच्छङ्कामपरिहृतां मत्वा पुन शङ्कते * नन्विति * परि-
हाराशयं विवृणोति * नावश्यमिति * मन्त्रस्यैकप्रकरण्यन्वयेन
कृतार्थत्वादानर्थक्यपरिहारे ऽप्यन्येषां पुरोडाशाज्ययागाख्यानां प्र-
करणिनां पात्रशुन्धनमन्त्राभावे वैगुण्यापत्त्या ऽपूर्वाख्यप्रयोजनरूपा-
र्थासिद्धेर्मन्त्रस्य सर्वार्थत्वमाशङ्क्य मन्त्रस्य यागान्तरपात्रशुन्धना-
ङ्गत्वाभावात्तच्छुन्धनस्यामन्त्रकत्वे ऽपि वैगुण्यानापत्तेर्यागान्तरा-
णां क्वचिदप्यंशे मन्त्राभावे ऽभियुक्तानां दृष्टान्ते ऽर्थेषु कर्मसु मन्त्रा-

दर्वदर्शनादमन्त्रमन्ये यत्किञ्चिद्धूयते च हुताशने। सम्वत्सरकृतं
पापं तत्पावमानीभिरहं पुनामीत्यादिलिङ्गाच्च वैगुण्यं वाच्यं तच्च
प्रोक्षणादिष्वङ्गान्तरेषु मन्त्रस्याङ्गत्वाभावान्नोपपद्यत इति परिहारसूचनार्थम्
* मन्त्रान्तरैरपीत्युक्तम् * क्रमात्पूर्वं च प्रकृतक्रत्वन्वयाख्यसा-
मान्यविनियोगविषयश्रुतिकल्पने ऽपि क्रमविरोधाभावात्पात्रशुन्ध-
नाख्यद्वारविशेषान्वयविषयश्रुतिकल्पनकाले च पात्रशुन्धनस्य स-
न्निपत्योपकारित्वेन प्रात्यात्मिकयागोत्पत्त्यपूर्वमात्रपर्यवसायित्वात्ते-
षां चापूर्वाणां धर्मान्वये ऽन्योन्यानपेक्षतया युगपत्पर्यालोचनायोगा-
यावत्प्रकरणमेकैकयागापूर्वसाधनीभूतं पात्रशुन्धन प्रतिद्वारविशेषा-
न्वयविषयां श्रुतिं कल्पयितुमारभते तावत्क्रमेण सान्नायपात्रशुन्धन-
विषयाकाङ्क्षाख्यप्रकरणकल्पनापेक्षणाद्येकविषयतयान्यालोचननि-
मित्तविक्षेपशून्येन क्लृप्तत्वात्प्रकरणेन कल्पयितुमारभ्यमाणाया
द्वारविशेषान्वयविषयायाः श्रुतेः क्रमकल्पितश्रुतिविषयभूतसान्नाय-
पात्रविषयतयोपसंहारापत्तेः प्रकरणेन सर्वार्थत्वानवधारणादविरोध
इत्याह * सामान्येति * समाख्याया अपि तर्हि समस्तदर्शपूर्णमा-
सवाचित्वेनानेकविषयश्रुतिकल्पनापत्तौ क्रमकल्पितैकविषयश्रुतिवि-
षयोपसंहारसम्भवादविरोधापत्तिरित्याशङ्क्यानेकविषयत्वे पौरोडा-
शिकसमाख्यानर्थक्यापत्तेर्द्वारापेक्षिणां धर्माणां पुरोडाशमात्रद्वारा-
न्वयार्थेयं समाख्येत्यवसायाद्विरोध इति परिहारं सूचयितुमाह
* समाख्या पुनरिति * लौकिकीस्त्विति भाष्यमवैदिकत्वेनास्याः
समाख्याया वैदिके ऽर्थे प्रामाण्यायोगात्तदर्थमिति भ्रमं निवर्तयितुं वि-
प्रकर्षात्समाख्या दुर्बला नत्ववैदिकत्वादित्याह * विप्रकर्षाच्चेति *
समाख्योक्तेन सम्बन्धेन संनिधिमकल्पयित्वैवाकाङ्क्षाकल्प-
नाद्विप्रकर्षाभावमाशङ्क्य सम्बन्धिनोरेकत्र नियमरूपत्वात्सम्बन्धस्यै-
कत्र सम्बन्धिद्वयनिधानाख्यं सन्निधिं विनात्मलाभाभावेनाकाङ्क्षा-
कल्पनाशक्तेर्विप्रकर्षोपपादनपूर्वं विप्रकर्षोक्त्यर्थस्योपदिश्यते हीति
भाष्यस्य सान्नाय्यपात्रशुन्धनेन सह शुन्धनमन्त्रस्यैकत्र नियमरूपः
संनिधिः क्रमे पाठेनैवोपदिश्यते ऽवगम्यते समाख्यायां नावग-
म्यत इत्येवं सशब्दस्यैकीभावार्थत्वाद् बन्धशब्दस्य च नियमार्थत्वा-
त्सम्बन्धशब्देन सन्निध्युक्तिमङ्गीकृत्य व्याख्यासूचनेन विप्रकर्षं द-
र्शयति * सर्वो हीति * वैदिकत्वे ऽपि तर्हि समाख्याया विप्रक-
र्षसिद्धेर्लौकिकत्वेन चाप्रामाण्यस्य भक्तानुवाकसमाख्यायां निरस्त-
त्वाल्लौकिकास्त्वित्यादिभाष्यमयुक्तमित्याशङ्क्य वैदिकाङ्गाङ्गिसम्ब-
न्धविप्रकर्षस्य लौकिक्यां समाख्यायामतिशयाख्यप्रकर्षदर्शनार्थ-

त्वेनोपपादयति * लौकिकस्त्विति*यद्येवमित्याशयाशङ्काभाष्यं लौ-
किकत्वेनाप्रामाण्यस्य सिद्धान्तिनानुक्तत्वादयुक्तमाशङ्क्याज्ञाताशय-
शङ्कात्वेनोपपादयति * परस्त्विति * नैष इत्यादि न प्रमाण
मित्यन्तं परिहारभाष्यं तात्पर्यतो व्याचष्टे * सिद्धान्तेति * की-
दृगुत्तरमित्यपेक्षायामाह * यदि हीति * एतदेवभाष्यमवयवशो
व्याचिख्यासुः पौरोडाशिकशब्द इति भाष्यावयवं तात्पर्यतस्तावद् व्या-
चष्टे * पौराडाशिकेति * भवति चेति भाष्यावयवस्याशयं ताव-
दाह * शब्दश्चेति * वाच्यवाचकसम्बन्धस्यानादित्वेनानाप्तत्वे-
नानाप्तत्वदोषाभावात्पुरोडाशाठ्ठञितियौगिकत्वस्मृतेश्च प्रयोगमूल-
भूताया विद्यमानत्वेन यौगिकत्वाद्विनियोजकत्वोपपत्तेर्नाप्रमाणमि-
त्युक्ते पुरोडाशान्वयस्य पौरोडाशिकशब्दवाच्यस्यातीन्द्रियत्वेन वा-
च्यवाचकसम्बन्धस्यातीन्द्रियत्वात्स्मृतेरपि निर्मूलत्वेनाप्रामाण्या-
पत्तेर्न तन्मूलत्वेन शब्दप्रमाणता युक्तेत्याशङ्क्य याज्ञिकैरनुष्ठीयमा-
नस्य पुरोडाशान्वयस्य प्रत्यक्षत्वोपपत्ते. सम्बन्धस्यापि प्रत्यक्षत्वस-
म्भवोक्त्यर्थम् * पौरोडाशिकेत्ययुक्तम् * तदेतदवैदिकत्वे ऽपि श-
ब्दस्य प्रामाण्यं दृष्टान्तैर्दर्शयतीत्याह * तदिति * सान्नायपात्रशु-
न्धनक्रमे शुन्धनमन्त्राम्नानं दर्शपूर्णमासयोरिदं प्रकरणं शुन्धध्वं
दैव्यायेत्यादिपदानामेकवाक्यत्वं काठकादिसमाख्यातवाक्यसमूह-
रूपः शब्दो वेद इत्यादिष्वर्थेषु यथा पुरुषः प्रमाणं तथा पौरोडा-
शिकशब्दो ऽस्य मन्त्रस्य वाचक इत्यस्मिन्नर्थे पुरुषः प्रमाणमित्य-
र्थः । न हीति भाष्यावयवं पुरुषप्रामाण्योपपादनायैन्द्रियकत्वो-
८७७।० क्त्यर्थत्वेन तावद्व्याचष्टे * सर्वत्र हीति * अध्येतृपुरुषस्थक्रमा-
म्नानादिदर्शनपूर्वं श्रोतृणां सर्वत्र क्रमाम्नानादौ क्रमादिशब्दप्रयोगप्र-
वृत्तिरित्यर्थः । अनिन्द्रियरूपवेदविषयत्वाभावात्पुरुषस्यास्मिन्नर्थे
प्रमाणता युक्तेत्येवमर्थत्वेनैतमेव भाष्यावयवं व्याचष्टे * समानेति*
पदानामन्योन्यान्वयलक्षणैकवाक्यत्वहेतुभूतस्यान्योन्यसन्निधेर्वेदेना-
नभिधाने ऽप्येकवाक्यत्वस्यैकार्थ्यनिबन्धनत्वाद्वेदार्थस्य चानन्यप्र-
माणकत्वादर्थोक्तिद्वारैकवाक्यत्वस्यापि वेद एव वक्तेत्याशङ्क्य वे-
दानुक्तस्याप्येकवाक्यत्वस्य पदार्थाकाङ्क्षासन्निधियोग्यत्ववशेन ज्ञातुं
शक्यत्वान्न वेदो वक्तेति परिहारसूचनार्थम् * परस्परेत्याद्युक्तम्*
उपपद्यत इतिभाष्यावयवं पूर्वेणैन्द्रियकत्वोक्तावतः शब्दाध्याहारेण
पुरुषप्रामाण्योपसंहारार्थत्वेन स्पष्टत्वादव्याख्याय वेदविषयत्वाभा-
वोक्तिपक्षे मूलभूतप्रमाणाभावात्तर्ह्यप्रामाण्यं पुंसां स्यादित्याशङ्का-
तिरासार्थत्वेन व्याख्यातुमाह * किं तर्हीति * दृश्यतइत्यनन्

प्रत्यक्षमूलतोक्ता । पुरुषदोषनिराम्नायानादित्वे नैरपीत्यनेनोक्ते ऽन्ध-
परम्परान्यायनिवृत्त्यै दर्शसम्भवोक्तिः । ये त्विति भाष्यावयवम-
तीन्द्रियत्व सर्वलोकप्रसिद्धवेदादिविवेकबाधापादनेनैन्द्रियकदृढी-
करणार्थत्वेन व्याख्यातुमाह * अन्यथा हीति * बुद्धादिवाक्या-
नामपि तद्वत्प्रामाण्यभयेनैन्द्रियकविषयताभ्युपगन्तव्येत्यतिप्रसङ्गशा-
ङ्कां वैपरीत्योक्त्या निराकर्तुमाह * अनेकान्त * तस्मादिति परि-
हारोपसंहारभाष्यं व्याचष्टे * तस्मादिति * उपदिश्यते
हीत्यादिभाष्योक्तस्य समाख्यायां सादेश्यलक्षणस्य सन्निधेः क-
ल्पनीयत्वेन विप्रकर्षस्य समाख्योक्तसम्बन्धमात्रेणाकाङ्क्षादिकल्पनासि-
द्धेः सादेश्यस्याकल्पनीयत्वेनायोगमाशङ्क्य सर्वत्र हि केन चिदभि-
धेन सम्बन्धो ऽवकल्पतइति सूत्रव्याख्यावार्त्तिकेन सादेश्यस्य क-
ल्पनीयत्वोपपादनादुक्षादिपरामर्शित्वायोगेनान्यत्राप्यस्य ग्रन्थस्या-
सामर्थ्यान्नोत्कर्षो युक्त इत्याशङ्क्याह * विज्ञानेति * श्रुत्यादिबाध-
प्रस्तावेन बाधान्तराणामपि बुद्धिस्थत्वात्सर्वनाम्ना परामर्शोपपत्ता-
वुक्तायां सन्निधानात्प्रकरणस्य बलीयस्त्वात्प्रकृतश्रुत्यादिपरामर्श
एव युक्त इत्याशङ्कानिरासार्थम् * विज्ञानेत्युक्तम् * बाधान्तर-
प्रकारोक्तं स्वतन्त्रोपयोगसिध्यै मिमांसाशास्त्रोपनिबद्धतोक्ता । बा-
धान्तराणां बुद्धिस्थत्वे ऽपि श्रुत्यादिबाधप्रकारोक्त्यैव ज्ञानप्रकारो-
क्तेः स्वतन्त्रोपयोगमाशङ्क्याह * तेषां चेति * एवमपि प्रकृतोप-
योगाभावात्तत्प्रश्नो न युक्त इत्याशङ्क्य प्राप्तबाधस्य मिथ्यात्वज्ञा-
पनरूपत्वान्मिथ्यात्वस्य दोषजनत्वाद्वेदे चानाप्तोक्तत्वदोषाभावा-
त्सामान्यादिशास्त्रस्य प्राप्तबाधाभ्युपगमे शास्त्रार्थप्रतिपत्तुरपरामृष्ट-
प्रतियोगिशास्त्रत्वस्य दोषत्वाभ्युपगमापत्तेस्तस्य च लिङ्गादिष्वपि
सम्भवात्प्राप्तबाधोपपत्तौ बाधस्य सर्वत्रैकप्रकारत्वसम्भवे प्रका-
रान्तरकल्पनायोगाल्लिङ्गादिभिर्बाधकविषयप्राप्त्यै श्रुतेरवश्यानुमेय-
त्वादनुमितायाश्च श्रुतेः सामान्यशास्त्रादिवद्विषयव्यवस्थया विरो-
धपरिहारायोगात्प्रत्यक्षश्रुतितुल्यत्वेन चात्यन्तबाधायोगात्तुल्यबल-
त्वेन विकल्पापत्तेर्व्युत्पादितमपि श्रुत्यादिषु परदौर्बल्य न सम्भव-
ति शास्त्रार्थं प्रतिपत्तु परम्परामृष्टप्रतियोगिशास्त्रत्वस्य फलदोषव-
च्छब्दे संक्रान्त्ययोगाच्छाब्दज्ञानमिथ्यात्वापादकदोषत्वानुपपत्तेर्लिङ्गा-
दिषु प्राप्तबाधायोगेनाप्राप्तबाधाभ्युगमे तु तेनैव हेतुना सामान्य-
शास्त्रादिष्वपि अप्राप्तबाधापत्तेः सामान्यशास्त्राद्दर्शनजनकत्वाभा-
वेन विशेषशास्त्रानवरुद्धे विषये प्रामाण्याभावापत्तेः सार्व-
त्रिको बाधः प्रसज्येतेति कृत्वा वेदेन क चिद्बाधः सम्भवतीति

सूचनात्प्रकृतोपयोगं दर्शयितुमाह * सर्वत्रेति * बाधस्यानेक-प्रकारत्वस्य वायोगान्न क्वचिद्बाधः सम्भवतीत्येवमाशयत्वे प्र-श्नस्य श्रुत्यादावपि साधारण्यापत्तेः श्रुत्यादिविषयत्वनिरासो न युक्त इत्याशङ्क्याह * तत्रेति * सर्वबाधान्तरविषयत्वेन प्रश्नं व्याख्यातुमाह *प्रत्यक्षेणेति* स्तम्भोऽयमित्यादिना बाह्यार्थविषय-प्रत्यक्षेण निरालम्बनानुमानम् । मृगतृष्णादिप्रत्ययाश्च तत्स-म्प्रयोगजकत्वादिप्रत्यक्षादिप्रमाणलक्षणरहितत्वात्प्रमाणाभासा प्र-त्यक्षेण प्रत्यक्षाभासोऽनुमानेनानुमानाभास इत्येव यथास्वं प्रत्य-क्षादिभिः प्रमाणैः औदुम्बरीस्पर्शनादिश्रुत्या सर्ववेष्टनादिस्मृतिः । आप्तस्य मन्वादेरविगीततया नात्मानं घातयेत्प्राज्ञ इत्याद्यया स्मृत्या केदारे पातयद्देहमित्याद्यनाप्तपाखण्ड्यादिस्मृतिः । भार्याश्चतस्रो विप्रस्येत्याद्याप्तस्मृतिरपि ।

यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः ।
न तन्मम मतमिति याज्ञवल्क्यादिस्मृतिभिर्विगीता—

शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिमित्याद्यया अदृष्टा-र्थया न जातु ब्राह्मणं हन्यादित्यादिस्मृत्या जिघांसन्तं जिघांसीया-दित्यात्मरक्षणादिदृष्टार्था पुत्रं प्रतिग्रहीष्यन्बन्धूनाहूय राज्ञे निवेद्य नि-वेशनस्य मध्ये व्याहृतिभिर्हुत्वा प्रतिगृह्णीयादित्याद्यया होमादिरीति कर्तव्यतायुक्तपुत्रप्रतिग्रहादिविषयत्वाल्लिङ्गप्रभवया स्मृत्या न शेषो अग्ने अन्यजातमस्तीत्यादि शेषोऽपत्यमन्योत्पादितं नास्तीत्याद्याभिधायि-त्वेन दत्तकपुत्रनिषेधादिलिङ्गत्वात्तत्प्रभवया स्मृत्या यस्य ... ति वि-प्रकर्ष इत्याह * स चेति * तदेतेषामित्यादिरधिकरणार्थोपसंहा-रभाष्यस्य प्रत्यक्षानुमादिबाधप्रकारोक्त्यर्थादर्थेत्यादिभाष्यात्प्रागप-कृष्य व्याख्येयत्वं सूचयितुमधिकरणार्थं संक्षिप्योपसंहरति * एव-मिति * सामान्यादिविषयायाः श्रुतेरपि विशेषादिविषयेण बा-धात्यस्य विशेषविषयायाश्च समाख्यायाः सामान्यविषयां समा-ख्यां प्रति बाधकत्वस्य सजातीयबलवार्त्तिकेऽभिहि-तत्वान्नित्यं श्रुतेर्बाधकता समाख्यायाश्च बाध्यता न युक्तेत्याशङ्का-निरासार्थं यथाभाष्यावस्थितानाम् * मध्य इत्युक्तम् * अथेत्या-दि न तन्मिथ्येत्यन्तस्य भाष्यस्याक्षेपपूर्वमेतदधिकरणोक्तश्रुतिलि-ङ्गादिबाधप्रकारोक्त्यर्थं तया परमतेन व्याख्यां दूषयितुमुपन्यस्य-ति * इदानीमिति * श्रुतिलिङ्गादिमात्रविषयत्वे तत्र तत्रेति वी-प्सायोगमाशङ्क्य पञ्चधा विभक्तश्रुतिलिङ्गादियुगलविषयत्वेन वि-प्सोपपादनार्थम् * द्वयोर्द्वयोरित्युक्तम् * यदिति भाष्यं व्याचष्टे

* तथाहि तावदिति * अथेति भाष्यं व्याचष्टे * समवायेति *
प्राप्ते बाधकविषयमित्यादिबाधप्रकारोक्त्यर्थं भाष्यं व्याचष्टे * त-
त्रेति * विरोधाविरोधसाधारणभूतात्सामर्थ्यैकवाक्यत्वाकाङ्क्षा-
सान्निध्यार्थौगिकत्वरूपाल्लिङ्गादिविनियोगज्ञानकारणाद् बाधकस्य
श्रुत्यादिजन्यस्य ज्ञानस्य विषयमैन्द्यादिकं प्राप्तं स्वलैङ्गिकादिविनियो-
गज्ञानं बाधकेन मृषात्वेनावगम्यतइत्युक्ते लिङ्गादेर्विप्रकृष्टार्थश्रुत्यादि-
विरोधेऽनुमितश्रुतिनया विनियोजकज्ञानजनकत्वायोगात्प्राप्तबाधा-
योगमाशङ्क्य विरुद्धार्थविषयज्ञानजनकत्वं विना लिङ्गादेर्विरोधायो-
गेन बाधायोगान्मृषात्वावगतेः प्राग्वस्तुतो सत्यामप्याकाङ्क्षायां औ-
त्स्याकाङ्क्षारोपेण श्रुत्यनुमानद्वारोत्पन्नस्य विनियोगज्ञानस्य श्रुत्या-
दिजनितेन ज्ञानान्तरेण विरोधे सति विप्रकर्षालोचनया वास्तव-
नैराकाङ्क्ष्यमध्यवसायश्रुत्यनुमानमृषात्वावगतिसूचनार्थत्वेन भाष्य
स्थापूर्वशब्दव्याख्यार्थम् * पूर्वामत्युक्तम् * श्लोकं व्याचष्टे
* यद्यपि चेति * सामान्यस्येति भाष्येणोपपत्तेरुक्तत्वाद्भिन्नोपपत्तेरि- ८७८।९
त्ययुक्तमित्याशङ्क्य सामर्थ्यादिरूपाणां लिङ्गादीनां साक्षाद्विनियोग-
कारणताभावात्साक्षात्करणभूतायाश्च श्रुतेरभावादसिद्धेयमुपपत्ति-
रित्याह * यदपीति * श्रुत्यनुमानाभ्युपगमेन तुल्यबलतैवापद्यतइ-
त्याह * अथ त्विति * अविद्यमानाकाङ्क्षारोपेणानुमितायाः श्रुते-
र्वस्तुतो ऽसत्त्वान्न तुल्यबलत्वापत्तिरित्याशङ्क्य पश्चाद्भावा-
भ्युपगमेन विप्रकर्षो वाच्यः तदा च पौर्वापर्यबलीयस्त्वन्यायेना-
नुमितयैव श्रुत्येतरश्रुतिबाधापत्तेस्तद्विनियोगवशात नैराकाङ्क्ष्याध्य-
वसायायोगाच्छ्रुत्यनुमानमिथ्यात्वकल्पना न युक्तेति परिहारं सू-
चयितुमाह * यदि चेति * पूर्वबाधापत्तिं प्रश्नपूर्वमुपपादयति *
कथमिति * श्लोकं व्याचष्टे * श्रुत्यादाविति * परव्याख्यादूष-
णोपसंहरपूर्वं स्वमतेन व्याख्यातुमुपक्रमते * तस्मादिति * बाध- ८७९।१
ग्रन्थान्तेऽधिकरणोपसंहाराद्यद्यप्ययं ग्रन्थः श्रुत्यादिबलाबलप्रकरणा-
न्तःपातित्वेन श्रुत्यादिविषय. प्रतिभाति तथापि तेषु न घटतइति
कृत्वोत्कृष्यतइत्यर्थः। तत्रेति सर्वनाम्ना प्रकृतश्रुत्यादित्यागेनाप्रकृत-
बाधान्तरविषयभूतप्रत्ययजितो ज्ञातास्तस्य तेनेतरस्य त्वित्याद्या तथ-
था मनुष्यराजआगते अन्यस्मिन्वार्हत्युक्षाणं वा वेहतम्वाक्षदन्त
इत्याद्यर्थवादप्रभवा च महोक्षं वा महाजं वा श्रोत्रियायोपकल्पये-
दित्याद्यामागामनागामदिति वधिष्ठेत्यादिविधिश्रुतिप्रभवयागो ब्राह्म-
णाऽनलाश्मासिनोच्छिष्टो न पदा स्पृशेत् न निन्दा ताडने कुर्यादि-
त्याद्यया सूर्याविदेव धूमवत्स्यन्दद्यादित्यादिस्मृत्या विवाहचतुर्थेऽन्हि

वधूवस्त्रपरिधानाद्याचारः । वृद्धव्यवहाराभियुक्तानामपि म्लेच्छानां हस्त्यादौ पीलवादिशब्दप्रयोगाचारो ऽभियुक्तनराणामार्याणां वृक्षविषयप्रयोगाचारेण । अक्ताः शर्करा इति सन्दिग्धमसन्दिग्धेन घृतस्तवनेन दुर्बलक्रमाशयं वेदं कृत्वा वेदिं करोतीति वेदवाक्यं बलवत्पदार्थाश्रयेण श्रुत्यादिनिमित्ताचमनवाक्येन उपसंहारस्थमृगादिपदमुपक्रमस्थेन वेदपदेन सान्नाय्याज्ययोरित्यन्नादृष्टार्थं अवघाताद्योवधे नियमाददृष्टार्थेनावघातादिना पशुपुरोडाशस्यारादुपकारित्वं सन्निपत्योपकारित्वेन दध्ना जुहोतीति विशिष्टविधिपक्षे विशेषणविशेषणविशेष्यरूपानेकार्थविधानं गुणविधिपक्षे ऽल्पार्थविधानेन एकस्यार्थस्यानेकगोगाव्यादिशब्दत्वम् एकगोशब्दत्वेन एकस्य च शब्दस्यानेकव्यक्त्याकृत्यर्थत्वमेकाकृत्यर्थत्वेन प्रतिगृहीतुरिष्टिरिति पक्षे वरुणायेति चतुर्थ्याः पञ्चम्यर्थत्वेनाश्वमनयदिति नयतेश्च प्रतिगृह्णात्यर्थत्वेन कल्पनात्स स्वां देवतामिति च तच्छब्दस्याप्राधान्यनिर्दिष्टवरुणपरामर्शित्वाद्दातृत्वे च वरुणस्य देवतात्वाभावेन देवताशब्दस्याविवक्षितार्थत्वाद् बहुबाधो दातुरिष्टिरिति पक्षे वरुणायेति चतुर्थ्याः पञ्चम्यर्थत्वेनाश्वमनयदिति नयतेश्च प्रतिगृह्णात्यर्थत्वेन कल्पनात्स स्वां देवतामिति च तच्छब्दस्याप्राधान्यनिर्दिष्टवरुणपरामर्शित्वाद्दातृत्वे च वरुणस्य देवतात्वाभावेन देवताशब्दस्याविवक्षितार्थत्वाद् बहुबाधो दातुरिष्टिरिति पक्षे वरुणायेति चतुर्थ्या. पञ्चम्यर्थत्वेनाश्वमनयदिति नयतेश्च प्रतिगृह्णात्यर्थत्वेन कल्पनात्स स्वां देवतामिति च तच्छब्दस्याप्राधान्यनिर्दिष्टवरुणपरामर्शित्वाद्दातृत्वे च वरुणस्य देवतात्वाभावेन देवताशब्दस्याविवक्षितार्थत्वाद् बहुबाधो दातुरिष्टिरितिपक्षे प्रतिगृह्णातिमात्रस्य दाने कल्प्यत्वादल्पबाधेन सामवेदोत्पन्नं वारवन्तीयादियजुर्वेदविहितत्वेनोपांशुत्वप्राप्त्योच्चैस्त्वरूपेण परशाखाविहितं वार्तामात्रेणावगतं यावत्स्वयं श्रूयते तावत्स्वशाखाविहितेनाग्नीषोमीयादष्टादशकपालत्वाद्येकादशकपालत्वादिना नित्यं सामधेनीपाञ्चदश्यं वैश्यनिमित्तेन साप्तदश्येन नित्यं पाञ्चदश्यं नैमित्तिकवशात्साप्तदश्यम्पुरुषार्थेनैकविंशत्यादिनानारभ्याधीतं साप्तदश्यं प्रकरणाधीतेन पाञ्चदश्येन सर्वस्वं दाक्षिण्यादाक्षिण्यानिमित्तभूतप्रतिहर्तुदूगात्रपच्छेदपौर्वापर्यात्सर्वस्वदाक्षिण्यादाक्षिण्ययोः पौर्वापर्येणापद्यमानयोर्विरोधे पूर्वपरेण प्राकृतं बर्हिरादि वैकृतेन शरादिना । प्रयोगवचनाश्रितं श्येनप्रकृतष्वङ्गेषु उद्गातृकर्तृकत्वं चोदकाश्रयेण नानर्त्विककर्तृकत्वेन । निःप्रयोजनं निगदेषु परसम्बोधनार्थेषु उपांशुत्वं सप्रयोजनेनोच्चैस्त्वेन ।

आग्नेयाग्नीषोमीययोर्ब्राह्मणक्रमो मन्त्रक्रमेण देवताश्रयमैन्द्रपुरो-
डाशादौ सान्नाय्यविध्यन्तादिद्रव्याश्रयेणौषधविध्यन्तादिना । पश्चा-
दध्याम्नातमुपांशुयाजविकारभूतं सारस्वतं कर्मामावास्यायामुपांशु-
याजमङ्गीकृत्यामावास्यातन्त्रप्रवर्तकतयाभासमानं पूर्वाम्नातेनाग्नीषो-
मीयविकारभूतेनाग्नावैष्णवेन पौर्णमासतन्त्रप्रवर्त्तकेनाऽल्प पञ्चद-
शरात्रे ऽग्निष्टुत्कर्माग्नेयीसुब्रह्मण्ययाप्रवर्त्तकं भूयसा ज्योतिरादिनैन्द्री-
सुब्रह्मण्ययाप्रवर्त्तकेन गौणं बर्हिर्मन्त्रप्रकाश्यं कुशसदृशं मुख्येन
कुशेन सामान्यविहितमाहवनीयादि विशेषविहितेन पदादिना सा-
वकाशं यत्किञ्चित्प्राचीनमित्यग्नीषोमीयप्राग्भाविपदार्थविहितमुपां-
शुत्वं दीक्षणीयादिमात्राङ्गतया विहितेन स्वरेणान्यत्र निरवकाशे
ऽनाङ्गमाधाने ऽग्निहोत्रहवणीप्रधानेन निर्वापेणाऽङ्गधर्मो दीक्षणी-
यादौ पर्वकालत्वं प्रधानधर्मेण सुत्यायाः पर्वकालत्वेन बाध्यत इति
यत्तत्तत्रोच्यते तत्सर्वं प्राप्तमप्राप्तं वा बाध्यतइत्यर्थः । सर्वश-
ब्देनैकाभिधानश्रुत्या पदश्रुतिबाधो ऽपि सूचितः । किञ्चेति भाष्ये-
णाप्राप्तबाधपक्षे को दोषः प्राप्तबाधपक्षे च इति पृष्टे बाधकविष-
यमप्राप्तस्य बाधे दोषोक्त्यर्थं यदीतिभाष्यं यदि बाध्यं सामान्यशा-
स्त्रादिज्ञानानुत्पादकत्वाद् बाधकस्य विशेषशास्त्रादेर्विषयभूतं हो-
मादि अप्राप्तं ततो विरोधाभावात्किं बाध्यतइत्येवमर्थत्वेन भास-
मानं बाधकज्ञानविषयविरुद्धज्ञानाभिमुख्यमात्रेणानुत्पादितज्ञानस्या-
ऽपि सामान्यशास्त्रादेरन्योन्यराज्याभिमुख्यमात्रेणानपहृतराज्याना-
मपि राज्ञामिव विरोधोपपत्तेरयुक्तमाशङ्क्य विरोधविषयभूतपदहो-
मादिवदविरोधविषयभूते ऽग्निहोत्रहोमादावप्याहवनीयाधिकरण-
त्वादिज्ञानानुत्पादकत्वेनातुल्यत्वात्सार्वत्रिकबाधापत्त्यर्थत्वेन व्या-
ख्यातुमाह *तद्यदि तावदिति* सामान्यशास्त्रादेः प्रत्यक्षेण स्वरूपे- ८८०।२
णाभावायोगे ऽपि ज्ञानोत्पादेन प्रवृत्त्यभावेनाहवनीयादिविनियोज-
कत्वरूपेणाभावापत्त्युक्तौ विनियोजकस्येत्युक्तम् । अनेन च किं
बाध्यतइति भाष्यस्थस्य किंशब्दस्य स्तोकवाचि किञ्चित् शब्दैकदेश-
त्वात्किमिव च रेतो विक्रियतइत्यादिदर्शनाद्वा स्तोकवाचित्वाभ्यु-
पगमपूर्वं विरुद्धलक्षणया सर्ववाचित्वमभ्युपगम्याव्ययत्वाभ्युपग-
मेन च सप्तम्यर्थत्वाचित्वमभ्युपगम्य सर्वत्र बाध्यतइति भाष्यार्थः
सूचितः । ज्ञानोत्पत्तिप्रतिबन्धस्य विरोधनिबन्धनत्वादविरोधविषये
प्रतिबन्धकाभावेनोत्पादकत्वोपपत्तेः नाप्रवृत्तिनिमित्ताऽसत्तुल्यत्वा-
पत्तिरित्याशयेन * अथेति * सामान्यादिशास्त्रस्यापर्यवसाना-
द्विशेषादिषु प्रवृत्तावपि सामान्यादिद्वारैव प्रवृत्तेर्विषये भेदाभावेन

ज्ञानभेदायोगात्क चिदंशे ज्ञानोत्पत्तिः प्रतिबध्यते क चिन्नेत्यनुप-पत्तेरविरोधविषये प्रतिबन्धाभावेन * ज्ञानोत्पादकवच्छास्त्र-स्यासत्तुल्यत्वानापत्तौ विरोधविषये ऽप्यसत्तुल्यत्वापत्त्ययोगा-द्विशेषादिशास्त्रेण सह तुल्यबलत्वापत्तिः । पौर्वापर्यबलीयस्त्वन्या-याद्वा विपरीतबाधापत्तिरित्याशयेन परिहरति * तत इति * ज्ञा-नभेदाभावेनोत्पत्तिप्रतिबन्धाप्रतिबन्धव्यवस्थायोगसूचनार्थम् * न हीत्युक्तम् * सर्वमेतदुदाहरणनिष्ठतया विवृणोति * तेनेति * सामान्यविशेषशास्त्रयोस्तुल्यबलत्वं विपरीतो वा बाधो ऽस्त्वित्या-शङ्कमानस्य लोकप्रसिद्धिविरोधसूचनार्थं लौकिकोदाहरणम् । ज्ञा-नोत्पादने शास्त्रप्रवृत्तौ ज्ञानोत्पत्तिप्रतिबन्धाशक्तेरप्राप्तबाधवादिना ज्ञानोत्पत्तिप्रतिबन्धार्थं शास्त्रप्रवृत्तिप्रतिबन्धस्य वाच्यत्वात्तन्मते शास्त्रस्याकिञ्चित्करत्वेनासत्तुल्यत्वापत्त्युपपादनाया ऽप्रवृत्तिशब्दः । नहीति वार्त्तिकावयवव्याख्यानायाप्यतो प्रतीत्यनेनैकस्य ज्ञानस्य सदसत्त्वविरोधात्तज्जनकस्य शास्त्रस्य सदसत्तुल्यत्वविरोधमुक्तमेक-स्यापि शब्दार्थसम्बन्धस्य ज्ञानं हि पुरुषाधारं तद्भेदाच्च विरुध्यत-इत्यादिसम्बन्धग्रन्थवार्त्तिकोक्तग्रहणाग्रहणविरोधवत्तदृष्टान्तत्वेन वोक्तां धानन्धसमीपच्छरूपग्रहणाग्रहणाविरोधवदेकस्यापि शास्त्र-स्य ग्रहणाग्रहणाविरोधाद् गृहीतस्यैव च शास्त्रस्य ज्ञानजनकत्वात्क-चिदंशे ज्ञानजनकत्वं क चिन्नेत्यविरोधोपपत्तेरयुक्तमाशङ्क्यांशभेदे ऽपि प्रमातृभेदाभावाच्छास्त्रस्य ग्रहणाग्रहणाविरोधायोगो न चा-त्रेत्यनेनोक्तः । प्रमातृभेदाभावे ऽपि विषयभेदेन तदधीननिरूपणाज्ज्ञा-नभेदादज्ञानज्ञानाख्यशास्त्रनात्मकशास्त्ररूपभेदावगतेः सदसत्त्वावि-रोधो नास्तीत्याशङ्क्याह * न चेति * सकृच्छ्रुतस्य शास्त्रस्यानेका-र्थपरत्वायोगाद्विषयभेदो न सम्भवतीत्याशयः । सामान्यशास्त्रस्य च व्यक्तिविषयत्वाभावादतिदेशशास्त्रस्यैकपदार्थविषयात्वाभावा-द्विषयभेदो नास्तीत्याह * व्यक्तीति * व्यक्तिवाचित्वपदार्थातिदे-शपक्षयोः शास्त्रस्वरूपेण भेदे ऽपि स्वरूपभेदाभावसूचनार्थं कदा-चिद्भिन्नत्वं भवेदित्युक्तम् । आकृतिवाचित्वयागगामिपदार्थसमुदा-यव्यापारातिदेशयोरपि सामान्यशास्त्रस्यानुष्ठानार्हव्यक्तिपर्यवसा-यित्वादतिदेशशास्त्रस्य च पदार्थपर्यवसायित्वाद्व्यक्तीनामङ्गाख्या-नां च पदार्थानां भिन्नत्वात् भिन्नविषयत्वेन शास्त्रभेदो भविष्य-तीत्याशङ्क्याह * आकृतीति * प्रवृत्तिप्रतिबन्धलक्षणबाधाभ्युपगमे सामान्यवाचिना ब्राह्मणादिशब्देन व्यक्तिलक्षणाया प्रकृतिसादृश्यो-क्तिद्वारभूतयागगतव्यापारवाचित्वात् जनकपदार्थावान्तरकार्यलक्ष-

णाद्वारायाः पदार्थलक्षणायाः प्रवृत्तित्वेनाभिप्रेतायाः प्रतिबद्धत्वेन नाभावाद्व्यक्तीनां पदार्थानां वा विषयत्वानुपपत्तेर्विषयभेदो न सम्भवतीत्याशयः। व्यक्त्यादिलक्षणात्मकप्रवृत्तिप्रतिबन्धलक्षणबाधाभ्युपगमे विषयभेदाभावेन शास्त्रभेदाभावात्सदसत्त्वविरोधपरिहारायोगे ऽपि सर्वत्र प्रवृत्तस्य सामान्यादिशास्त्रस्य विशेषादिशास्त्रेण स्वविषयानिवृत्तिलक्षणबाधाभ्युपगमे विषयभेदाच्छास्त्रभेदोपपत्तेर्विरोधपरिहारो भविष्यतीत्याशङ्क्याह * एतेनेति * व्यक्तिषु सामान्यशास्त्रप्रवृत्तिहेतोर्ब्राह्मणशब्दस्य पदार्थेषु चातिदेशशास्त्रप्रवृत्तिहेतोः प्रकृतिवच्छब्दस्य सर्वव्यक्तिषु सर्वपदार्थेषु तुल्यत्वेन कस्याश्चिद्व्यक्तेः कस्य चिद्वा पदार्थस्य वर्जनायोगादनेन ततो ऽवश्यमित्यादिवार्त्तिकोक्तेन प्रवृत्तिप्रतिबन्धनिमित्तशास्त्राभावापादनलक्षणबाधनिरासेन निवर्त्तनाख्योत्कालनलक्षणो ऽपि बाधो निरस्त इत्यर्थः। सूत्रकृत्सम्मत्या किं चिद्वर्जनायोगं दर्शयितुमाह * तथा चेति * अनारभ्याधिकरणे ऽनारभ्यविधिना विकृतिष्वपि खादिरत्वादिप्राप्तेस्तद्वर्जं चोदकवचनमित्यनारभ्यवादानां प्रकृतिमात्रार्थत्वसिद्धान्तहेतोः प्रकृतिविकृत्यर्थत्वे द्विरुक्तत्वप्रसङ्गस्यासिद्धत्वशङ्कार्थमुक्ता चोदकस्यानारभ्यविधितो दौर्बल्यं तेनैव विकृतिनैराकाङ्क्ष्याच्चोदकाभावापत्त्या तत्प्राप्यप्रयाजादिदर्शनादितिचेदिति सूत्रेणाशङ्क्य न चोदनैकार्थ्यादित्यनेनानारभ्यचोदनायाः खादिरत्वाद्यैकार्थपरत्वेन स्रुवाद्यविधानाद्विकृतिनैराकाङ्क्ष्यकरणाशक्तेश्चोदकस्य दौर्बल्ये ऽप्यनारभ्यविध्यप्राप्तप्रयाजादिप्रापकत्वोपपत्तिमुक्त्वा सिद्धान्तैकदेशिमतेन द्विरुक्तत्वप्रसङ्गस्यासिद्धत्वमभ्युपेत्य सङ्क्षेपविस्तररूपत्वेन हेतुना प्रयाजादिप्रापकत्वोपपत्तिमुक्त्वा सिद्धान्तैकदेशिमतेन द्विरुक्तत्वप्रसङ्गस्यासिद्धत्वमभ्युपेत्य संक्षेपविस्तररूपत्वेन हेतुना प्रयाजादिविधिदृष्टान्तेन खादिरादिविधेः प्रकृतिमात्रार्थत्वानुमानमुत्पत्तिरिति चेदित्यनेनाशङ्क्य न तुल्यत्वादित्यनेनाशङ्क्य न तुल्यत्वादित्यनेनामनहोमादिविधेर्विकृत्यर्थस्यापि सङ्क्षेपविस्तररूपत्वदर्शनेनानैकान्तिकत्वादनुमानायोगमुक्त्वा चोदनार्थकार्त्स्न्यात्तु मुख्यविप्रतिषेधात्प्रकृत्यर्थमित्यनेनानारभ्यविधेः स्वविधेयखादिरत्वाविषयभूतस्रुवादिप्राप्त्यै चोदकापेक्षत्वेन चोदकस्यैव बलीयस्त्वादनारभ्यविधिविषयवर्जनानुपपत्तेः कृत्स्नस्य प्राकृताङ्गजातस्य चोदकचोदनार्थत्वावगमेनानारभ्यविधेर्विकृत्यर्थत्वे मुख्यस्य विकृतिविधेश्चोदकः शेषो ऽनारभ्यविधिर्वेति विप्रतिषेधापत्तेस्तत्परिहारायानारभ्यविधानं प्रकृतिमात्रार्थमिति द्विरुक्तत्वप्रसङ्गस्यासिद्धत्वशङ्कानिरासेन सिद्धा-

न्तमुपसंहरिष्यंश्चोदनार्थकात्स्न्यार्द्धेतोर्न प्राप्तवर्जनमित्यसिद्धत्व-
शङ्कोत्तरं सूत्रकृद्वास्यतीत्यर्थः । शुद्धस्य च वर्जनव्यापाराभावात्स-
म्भवद्वर्जनव्यापारस्य च वक्त्राशयस्य वेदे ऽनुपपत्तेर्न किं
८८१।१ चिद्वर्जनं सम्भवतीत्याह * पौरुषेये ऽपि तावदिति *
वक्त्राशयानुरोधेन पुवाक्यस्यार्थप्रतिपादकत्वाच्छब्दव्यापारं वि-
नापि तत्र वर्जनरूपस्यार्थस्य यन्मया ब्राह्मणेभ्यो दधीति प्रयुक्त
तत्कौण्डिन्यवर्जमित्येवं वक्तृहृदये वर्त्तमानतया वर्जनं भवेदिति
हृदये वर्त्तमानो ऽर्थो हृदयार्थ इतिमध्यमपदलोपिसमासाभ्युपगमेनो-
क्तेवर्जनस्याशब्दार्थत्वे सत्यनावृत्य त्वमाशङ्क्यानुविधेयपुरुषाशयार्थत्वे-
नाहत्यत्वसूचनायेश्वरेत्युक्तम् । सामान्यशास्त्रस्यैकत्वे ऽपि तत्क-
ल्प्यव्यक्तिशास्त्रभेदात्सदसत्त्वविरोधपरिहारमाशङ्क्य सामान्यशा-
स्त्रस्यैवापर्यवसानाद्व्यक्तिपरपरत्वेनानुष्ठेयार्थत्वोपपत्तेः शास्त्रान्तरक-
ल्पना न युक्तेत्याशयेन परिहरति * न चेति * अतो लिङ्गादि-
ष्वप्राप्तबाधस्योक्तत्वादवश्यम्भाविबाधैकरूप्यसिद्ध्यै यदि सामान्य-
शास्त्रादिष्वप्यप्राप्तबाधो ऽभिप्रेतस्ततो विरोधविषयवदविरोधविषये
ऽपि बाधापत्तेर्नाविकल्पनइति यदीतिभाष्यार्थमुपसंहरति * तस्मा-
दिति * प्राप्तबाधपक्षे दोषोक्त्यर्थमथेतिभाष्यं प्राप्तस्य सामान्या-
दिशास्त्रस्याशक्य बाधेत्येवमर्थत्वेनाभासमानमुत्पादितज्ञानत्वेन बाध-
कविषयप्राप्तस्यापि तज्जनितज्ञानमिथ्यात्वकल्पनया बाधोपपत्तेरयु-
क्तमाशङ्क्य प्राप्तं चेत्सामान्यशास्त्रादि बाध्यते ततो लिङ्गाद्यपि बाधै-
करूप्यसिद्ध्यै प्राप्तमेव बाध्येत तस्य च बाधकसमानविषयश्रु-
तिकल्पनं विना बाधकविषयप्राप्त्ययोगात्कल्पितायाश्च श्रुतेः प्र-
त्यक्षया सहाविशेषात्तुल्यबलत्वापत्तेः पौर्वापर्यबलीयस्त्वन्यायाद्वा क-
ल्प्याया एव पाश्चात्यत्वेन बाधकत्वापत्तेः कथं लिङ्गादि बाधितुं
शक्यमित्येवमर्थत्वेन व्याख्यातुमाह * अथेति * दोषजन्यत्वा-
न्मिथ्यात्वस्य शब्दे चानाप्तोक्तत्वस्यैव दोषत्वाद्वेदे च तदयोगा-
त्प्राप्तबाधायोगमाशङ्क्यमित्येवमर्थत्वेन व्याख्यातुमाह * अथेति *
दोषजन्यत्वान्मिथ्यात्वस्य शब्दे चानाप्तोक्तत्वस्यैव दोषत्वाद्वेदे च
तदयोगात्प्राप्तबाधायोगमाशङ्क्य तात्पर्यावधारणानपेक्षस्य शब्द
स्य विषयपरिच्छेदकज्ञानाख्यविज्ञानानेनुत्पादकत्वात्सर्वांशोपेतभा-
वनाविषयसमस्तोत्सर्गापवादरूपशास्त्रालोचनं च विना तात्प-
र्यानवधारणात्सामान्यादिशास्त्रमात्रलोचने विज्ञानोत्पत्त्यनुपपत्ते-
र्विज्ञानापेक्षया वेदे सर्वत्राप्राप्तबाधे ऽपि लिङ्गादिना ब-
लवद्विरोधिश्रुत्यनुमानाभावेन ज्ञानमात्रमपि नोत्पाद्यते सा-

मान्यशास्त्रादिना ऽनुविरोधे ऽपि ज्ञानमात्रमुत्पाद्यतइति वैलक्ष-ण्यप्रदर्शनाय ज्ञानमात्रापेक्षयात्र प्राप्तबाधोक्तिर्ज्ञानमात्रस्य च त्रि-ज्ञानत्वाभावादविज्ञाने तु दोषाणां व्यापारा नैव विद्यते कारणाभा-वतस्त्वेव तत्सिद्धं नस्त्ववृत्तिवदिति स्वतो ऽप्रामाण्याभिधानाद्दोषा-भावे ऽप्यप्रामाण्यानुपपत्तिरिति सूचनार्थः कथञ्चिच्छब्दः । तत इत्या-दिना ततो लिङ्गाद्यपि प्राप्तमेव बाध्येत तच्च कथं शक्येत बाधितुमि-ति साध्याहारभाष्यव्याख्या सूचिता । कथं शक्येनेति यद्भाष्यकृतो-क्तं तत्र श्रुत्यादीनां प्राप्तबाधे इति तच्चेत्यध्याहारसूचनायोक्तं कथं तद्बाधितुमशक्यमित्यपेक्षायां न चेतदुत्थापितं ज्ञानमनुत्पन्नं शक्य-वक्तुमित्यादिवार्त्तिकोक्तोपपत्तिसूचनार्थश्चकारः । प्रश्नभाष्यस्य वेदे कचिद् बाधो न सम्भवतीत्येवमाशयत्वं सूचयन्नुपसंहरति * अत इति * बाधमार्गस्यैकरूप्यं युक्तं तच्च न घटतइतिकृत्वा न क-चिद् बाधो वेदे घटतइत्यर्थः । प्राप्तमित्युत्तरभाष्य प्रश्नाशयानतिक्र-माद्युक्तमाशङ्क्य प्रश्नाशयं तावन्निरस्यति * तदिति * प्रमाणव-त्वान्नरूप्यमवगम्यमानं यस्मादिह वेदे न किञ्चिन्निरुणद्धि तस्माच्च बाधस्यैकप्रकारत्वनियमो ऽस्तीत्यर्थः । बाधप्रकारनानारूप्यस्यानुभ-वसिद्धत्वेन प्रमाणवत्वं बाध्यनानारूप्यदृष्टान्तेनोपपादयन्नुत्तरार्द्धं व्याचष्टे * यथैवेति * य एते ऽनुमानादयो ऽङ्गधर्मपर्यन्ताः षड्भिद्य-न्त्योन्यं भिद्यमाना बाधविषया वर्णितास्तेषु भिन्नरूपत्वस्यैव प्रमा-णवत्वाद्यथैकरूप्यं नाङ्गीकृत तथा बाधप्रकारनानात्वस्यापि गम्य-मानत्वेन प्रमाणवत्वाद्वेदे ऽपि ज्ञानमात्रापेक्षया प्राप्तबाधोपपत्तेश्च बाधविरोधित्वाभावाद् बाधप्रकारेष्वप्यैकरूप्यं नाङ्गीकार्यमित्यर्थ. । बाधप्रकारनानात्वोक्त्यर्थत्वेन प्रश्नाशयनिरासकतयोपपादयितुमुत्तर-भाष्यं श्रुत्यादिबाधव्यतिरिक्तविषयत्वेनोपपत्तिपूर्वं व्याख्यातुमाह * तत्रेति * लिङ्गादेरप्यप्राप्तबाधपक्षे सामान्यशास्त्रादिवत्सदस-त्वविरोधापत्तिमाशङ्क्य सामान्यशास्त्रादेर्विरोधविषयभूते कौण्ड-न्यादौ शास्त्रान्तरप्रतिबद्धायाः प्राप्तितः प्राप्त्यन्तरस्याविरोधविष-यभूते माठरादावभ्युपगमात्सदसत्वविरोधापत्तिरुक्ता कदा चन-स्तरीरसीत्येतन्मन्त्रस्थेन्द्रीशक्त्यात्मकस्य तु लिङ्गस्य तस्मिन्नित्य-स्य च स्योनाद्येकवाक्यत्वात्मकस्य वाक्यस्यावीवृधतामित्यस्य च दर्शपूर्णमासप्रकरणाम्नानात्मकस्य प्रकरणस्य शौनः शेपाख्यानादे-श्चाभिषेचनीयसन्निध्यात्मकस्य शुन्धनमन्त्रस्य च पौरोडाशिका-ख्यात्मिकाया क विनियोजकत्वानभ्युपगमेन विरोधविषयप्रा-प्तितः प्राप्त्यन्तरानभ्युपगमाच्च तत्राप्राप्तबाधे ऽपि सदसत्वविरोधो

ऽस्तीत्युक्तम् । श्रुत्यादिव्यतिरिक्तसर्वबाधविषयत्वेन प्रश्नभाष्यव्याख्यानादुत्तरभाष्यस्यापि तद्व्यतिरिक्तसर्वबाधविषयत्वशङ्कापत्तेस्तन्निरासार्थम् * ये ऽपीत्युक्तम् * अर्थविप्रकर्षहेतुकत्वेन श्रुत्यादिच्छायानुपातिनो ये बाधास्ते सर्वे ऽर्थविप्रकर्षाख्यस्य हेतोरतस्मिंश्च निर्ज्ञाते कृतसामर्थ्ययोर्वाक्यप्रकरणयोर्नैतदेवं कल्पयितुं शक्यमिन्द्रोपस्थानं शब्देनाभिहितमितीत्यादिभाष्येणाप्राप्तबाधसामर्थ्यकथनात्तद्बाधेनैवाप्राप्तबाधतया व्याख्याता इत्यर्थः । सदृशवाचिना ऽऽदिशब्देन पूर्वोद्दिष्टो ऽनुमानबाधो ऽनन्तरोद्दिष्टा च परशाखाविहितान्तबाधाव्यवहितोद्दिष्टाश्चानारभ्याधीतप्रयोगवचनाश्रितब्राह्मणक्रमदैवताश्रयगौणबाधा गृहीताः । अनुमानस्य प्रत्यक्षविरोधे पक्षस्यैव साध्यशून्यत्वेन विपक्षत्वात्तत्र हेतोर्वृत्तेरनैकान्तिकत्वेन कारणाभावात्सर्ववेष्टनादिश्रुतेश्च छिन्नाङ्गुलव्यतिरिक्तसर्ववेष्टनादिविषयत्वसम्भवेनाशेषवेष्टनश्रुतिकल्पनाशक्तत्वादनाप्तस्मृतेश्च श्रुत्यकल्पकत्वस्य स्पष्टत्वाद्विगीतायाश्चाप्तस्मृतेरप्यापद्विषये ऽल्पदोषत्वार्थत्वसम्भवेन निर्दोषत्वावेदकश्रुत्यकल्पकत्वादाततायिवधस्मृतेश्चात्मरक्षणप्रयत्नमात्रार्थत्वसम्भवेन वधपरश्रुत्यकल्पकत्वाल्लिङ्गार्थवादप्रभवयोश्च स्मृत्योस्तन्मूलत्वेनैव श्रुत्यकल्पकत्वाद्वधूवस्त्रपरिधानाचारस्य चाऽश्रीरा तनूर्भवति रुशती पापयामुपापतीर्यद्वधो वासमास्वमङ्गमभिधित्सत इत्यादिलिङ्गाद्वधूवशत्वफलत्वावगतेर्वधूबन्धूभिस्तद्वशत्वसिद्ध्यै प्रवर्त्तितत्वसम्भवेन श्रुतिकल्पनाशक्तत्वाद्धस्त्यादौ च पिल्वादिशब्दप्रयोगाचारस्य म्लादृश्यादि मूलत्वसम्भवेनानुपपत्तिक्षयाद्वाचकाशक्तिकल्पनाशक्तेः सन्दिग्धस्य च विध्युद्देशस्यासन्दिग्धवाक्यशेषापेक्षत्वेन तद्विरुद्धार्थविध्यशक्तत्वात् दुर्बलक्रमाद्याश्रयस्य च बलवत्पदार्थविप्राप्त्यपेक्षत्वेन तद्विरुद्धक्रमादि विध्यशक्तत्वादुपसंहारस्य चोपक्रमापेक्षत्वेन तद्विरुद्धार्थविध्यशक्तत्वादवघातादिविधेश्चौषधे नियमादृष्टार्थत्वेन परिहृतानर्थक्यस्याज्यसान्नाय्ययोरत्यन्तादृष्टार्थावघातादिविध्यशक्तत्वादग्नीषोमीयपशुपुरोडाशयागविधेश्च लिङ्गावगतदेवतासंस्काराख्यसन्निपत्योपकारार्थयागविधानेन परिहृतानर्थक्यस्य प्रकरणावगम्यारादुपकारार्थयागविध्यशक्तत्वादल्पार्थविधानेन च कृतार्थस्य विधेरनेकार्थविध्यशक्तत्वादेकस्य च शब्दस्य वाचकशक्तिकल्पनेन तदशक्तिजशब्दान्तरप्रयोगोपपत्तेः शब्दाशक्तिकल्पनस्याशक्यत्वादेकस्य चार्थस्य वाच्यशक्तिकल्पनया तदविनाभावेनार्थान्तरप्रत्ययोपपत्तेरर्थान्तरशक्तिकल्पनस्याशक्यत्वात्प्रतिगृह्णा-

न्निमात्रबाधेन चाश्वप्रतिगृहेष्टिवाक्योपपत्तेर्बहुबाधकल्पनस्याशक्यत्वादुच्चैष्ट्वा क्रियतइति च करोतेर्विधिवाचित्वेनोत्पत्तिवेदस्वरविध्यशक्तत्वात्परशाखाविहितस्य च मूलानिश्चयात्प्रागश्रद्धेयत्वेनानुष्ठेयत्वादनारभ्याधीतस्य च विकृतिप्रकरणावगतविकृत्यन्वयनिराकाङ्क्षीकृतस्य प्रकृत्यन्वयकल्पनाशक्तः प्रयोगवचनस्य च चोपेक्षत्वेन तद्विरुद्धार्थविध्यशक्तत्वात्प्रयोगसमवायिमन्त्रक्रमकल्पितक्रमविधायिश्रुतिकल्पनाशक्तेः स्वरूपसमवाय्यन्तरङ्गद्रव्यसामान्ययुक्तसुसदृशप्रकृतिलाभसम्भवे शब्दमात्रसमवायिबहिरङ्गदेवतासामान्ययुक्तस्य कर्मणो मन्दसदृशत्वेन यदि सुसदृशमन्यल्लभ्यते तत्र मिथ्या भवति विसदृशत्वान्मन्दसादृश्ययुक्तमित्यनेन न्यायेन विसदृशत्वात्प्रकृतित्वकल्पनाशक्तेः पूर्वान्मन्त्रकर्मतन्त्रप्रवृत्त्या च प्रसङ्गलब्धोपकारस्य पश्चादाम्नातस्य कर्मणः स्वकीयतन्त्रप्रवर्त्तकत्वाशक्तेः मुख्ये ऽर्थे मन्त्रविनियोजकलैङ्गिकश्रुतिकल्पनेन च मन्त्रप्रकरण्याकाङ्क्षायां निवृत्तायां गौणे ऽर्थे विनियोजकश्रुतिकल्पनाशक्तेः सर्वेष्वेष्वप्राप्तबाध इत्याशयः । प्राप्तबाधोक्तिस्तर्हि किं विषयेत्यपेक्षायाम् * ये त्वित्युक्तम् * प्राप्तिहेतुप्रश्नार्थे कथमितिभाष्यं ब्राह्मणशब्दादेः प्राप्तिहेतोः स्पष्टत्वादयुक्तमाशङ्क्य लिङ्गादौ सामर्थ्यादेः प्राप्तिहेतोर्भावे ऽपि बलवता श्रुत्यादिना प्रतिबन्धादप्राप्तिवत्सामान्यशास्त्रादावपि बलवता विशेषशास्त्रादिना प्राप्तिहेतुप्रतिबन्धादप्राप्त्या भाव्यमित्येवमाशयत्वेन व्याख्यातुमाह * कथमिति * आकाङ्क्षासहकृतस्य सामर्थ्यादेः प्राप्तिहेतुत्वाद् बलवद्विनियोगेनाकाङ्क्षानिवृत्तौ शुद्धस्य सामर्थ्यादेः प्राप्तिहेतुत्वाभावादप्राप्तिर्युक्ता ब्राह्मणशब्दादेस्तु विरोधाविरोधयोः साधारणरूपस्य शुद्धस्यैव प्राप्तिहेतुत्वात्प्राप्तिहेतुभूतब्राह्मणादिशब्दानाश्रितत्वेन च विशेषशास्त्रादेः प्रतिबन्धकत्वायोगान्नेहाप्राप्तिर्युक्तेत्येवमाशय सामान्यस्येत्युत्तरभाष्यमवतारयति * उत्तरमिति * विरोधाविरोधसाधारण्यवाचिना सामान्यशब्देनाविरोधासाधारणाकाङ्क्षानपेक्षत्वं सूचितम् । प्रमाणाभासे सामान्यरूपस्य कारणस्य चक्षुरादेः प्रमाणविरोधे ऽपि नित्यं च सामिधेनीपाञ्चदश्यं क्रतुप्रकरणाम्नानस्य वैश्यप्रयोगे ऽपि नित्यनैमित्तिकयोश्च क्रत्वर्थयोः पाञ्चदश्यसाप्तदश्ययोर्गुणकामप्रयोगे ऽपि पूर्वस्मिंश्च सर्वस्वदाक्षिण्ये निमित्तभूतस्य प्रतिहर्त्रवच्छेदस्योद्गात्रवच्छेदे ऽपि प्राकृते च बर्हिषि प्रकृतिवच्छब्दस्य शरोपदेशे ऽपि सामान्यविहिते चाहवनीये होमत्वस्य पदादिहोमे ऽपि निष्प्रयोजनेच परसम्बोधनार्थेषूपांशुत्वे यजुर्वेदविहितत्वस्य नि-

गतेष्वप्याग्नेयीसुब्रह्मण्याप्रवर्त्तकत्वे चाग्निष्टुत्वस्य भूयो विरोधे
ऽपि सावकाशो चोपांशुत्वे ऽग्नीषोमीयप्राग्भावित्वस्य दीक्षणीया-
दिष्वप्यग्निहोत्रहवण्यङ्गकत्वे च निवार्पत्वस्याधाने ऽप्यङ्गधर्मे च
दीक्षणीयायाः पर्वकालत्वे मुख्यत्वेनानुपसञ्जातविरोधत्वस्य प्रधा-
नसोमयागधर्मपर्वकालत्वविरोधे ऽपि विद्यमानत्वात्प्राप्तिः सम्भ-
वतीति भाष्यार्थसूचनायोत्तरशब्दः । कथं प्राप्तिकारणस्य विरो-
धाविरोधविषययोः साधारणरूपतेत्याशङ्क्य ब्राह्मणप्रकृतिवच्छब्द-
योस्तुल्यहेतुत्वेन किं चिद्वर्जनासम्भवादिति वार्त्तिकेन सामा-
न्यातिदेशप्राप्तिकारणयोर्विरोधाविरोधसाधारण्योक्त्या सर्वेषां प्र-
माणाभासादिप्राप्तिकारणानां चक्षुरादीनां साधारण्यं तुल्य-
न्यायतया दर्शितं भवतीत्याह * दर्शितमिति * प्राप्त-
स्य बाधायोगाशयमर्थेन प्रश्नभाष्यमुपपादयितुं नचैतदुत्था-
पयितुं ज्ञानमनुत्पन्नं शक्यं वक्तुमित्यादिपूर्वपक्षवार्त्तिकोक्तां बा-
८८२।१ धायोगोपपत्तिमनुभाषते * यत्त्विति * अनुष्ठानाख्यफलवि-
योगाशक्तिस्त्वर्थसत्त्वपरिच्छेदाख्यफलवियोगलक्षणबाधोपपादनेन
निराकरिष्यमाणत्वान्नानुभाषिता । नैवेत्युत्तरभाष्यं नोत्पन्नं ज्ञानं
प्रतिबध्यते न च स्वरूपेण संस्काररूपेण वाबाधकवशान्नश्यति किं
तु मिथ्यात्वेनावगम्यत इति मिथ्यात्वज्ञापनरूपबाधोक्त्यर्थत्वेनावता-
रयति * तत्रेति * विषयासत्त्वव्युदासप्रकाशफलज्ञानविशेषरूप-
विज्ञानमिथ्यात्वस्य दोषजन्यत्वाद्वेदे च दोषाभावात्तन्मिथ्यात्वानु-
पपत्तेर्वेदे ज्ञानमात्रस्य प्राप्तस्य बाधो विवक्षितो विज्ञानस्य त्वप्राप्त-
स्यैवेति सूचयितु भाष्यविशब्दानादरेण ज्ञानमित्येतावदुक्तम् ।
भाष्यं त्वकारप्रश्लेषेण विज्ञानत्वाभावोक्त्यर्थत्वेन दोषाभावाद्विज्ञा-
नमिथ्यात्वायोगशङ्कानिरासार्थमविज्ञानमेतदिति विज्ञानत्वाभावग्रा-
हकं प्रत्ययान्तरं विज्ञानरूपं भवतीत्यविज्ञानरूपाद् बाध्यप्रत्ययाद्विज्ञा-
नरूपत्वेन बाधकप्रत्ययस्य वैलक्षण्योक्त्यर्थमन्तरशब्दमङ्गीकृत्य व्या-
ख्येयम । एतदेव विवृणोति * शास्त्रान्तरं हीति * परिकल्पनोक्त्या
सामान्यादिशास्त्रजनितस्य ज्ञानस्य विषयसत्त्वपरिच्छेदकत्वलक्ष-
णविज्ञानत्वाभावाध्यवसाने ऽभिहिते यथा तर्हि गौरिति पदमात्रस्य
गोसत्त्वपरिच्छेदकत्वाभावात्प्रमाणान्तरेण गवाभावावगमे ऽपि वि-
रोधो न भासते तथास्यापि विशेषादिशास्त्रेण विषयाभावावगमे ऽप्य-
विरोधापत्तेर्बाधो न युज्येतेत्याशङ्क्य नेह ज्ञानस्य विषयसत्त्वापहार-
लक्षणो बाधो ऽभिमतः किं तु सामान्यादिशास्त्रस्य भ्रान्त्यवगत-
कौण्डिन्यादिविषयवत्त्वापहारलक्षणो ऽनन्यगतिना विशेषादिशास्त्रेण

बाध इति भ्रान्तिशब्देन सूचिते भ्रान्तौ को हेतुरित्यपेक्षायां सामान्यरूपेण कारणेन ब्राह्मणशब्दादिना कौण्डिन्यादिव्यतिरिक्तेषु ब्राह्मणादिषु सामान्यादिशास्त्रस्य तात्पर्यमित्येवंरूपाया बुद्धेरपहारेण ब्राह्मणादिमात्रे तात्पर्यभ्रान्ति सामान्यादिशास्त्रस्य ब्राह्मणादिमात्रविषयत्वभ्रान्तौ हेतुं सूचयितुम् * सामान्येत्युक्तम् * बाध्यशास्त्रस्य बाधकशास्त्रावरुद्धविषयताया भ्रान्तत्वे प्राप्त्ययोगात्प्राप्तबाधोक्तिर्विरुद्ध्येनेत्याशङ्क्य चक्षुरादेरसन्निकृष्टे मृगतोयादौ स्वकार्यप्रमाणज्ञानजननाशक्तेस्तद्विषयत्वाभावे ऽपि दोषसहितचक्षुरादिजन्यस्य मृगतृष्णादिज्ञानस्यासन्निकृष्टविषयत्वोपपत्तिवत्सामान्यादिशास्त्रस्य तात्पर्यशून्ये कौण्डिन्यादौ स्वकार्यप्रमाणज्ञानजननाशक्तेः कौण्डिन्यादिविषयत्वाभावे ऽपि ब्राह्मणादिमात्रतात्पर्यभ्रान्त्याख्यदोषसहितसामान्यादिशास्त्रजन्यस्य ज्ञानस्य ब्राह्मणादिमात्रविषयत्वोपपत्तिसूचनार्था दृष्टान्तोक्तिः । ज्ञानस्य विषयसत्वापहारलक्षणबाधाभावे मिथ्येति प्रत्ययान्तरं भवतीति भाष्यं न घटतेत्याशङ्क्य विषयसत्वपरिच्छेदफलबुद्धित्वलक्षणविज्ञानत्वाभावनिश्चयेन विषयसत्वपरिच्छेदाख्यात्फलाद्वियोगलक्षणो बुद्धेर्बाधो मिथ्याशब्देन विवक्षित इति सूचयन्भाष्यार्थमुपसंहरति * तस्मादिति * भ्रमेरनवस्थानार्थत्वात्सत्वव्यवस्थाहेतुपरिच्छेदकनिरासार्थो ऽयं भ्रान्तिशब्दः । यद्वैतदविज्ञानमिति कृत्वा सत्वेनापरिच्छिद्यमानत्वात्कौण्डिन्यादिरर्थो सन्निति प्रत्ययान्तरं शास्त्रं वार्थसत्वापरिच्छेदकमिति प्रत्ययान्तरं भवतीत्यर्थासत्ववाचिनं शास्त्रस्यार्थसत्वपरिच्छेदकत्वाभाववाचिनं वा मिथ्याशब्दमिति करणावृत्तिं चाङ्गीकृत्येदं भाष्यं व्याख्येयमिति सूचनायार्थं * शास्त्रं वेत्युक्तम् * किमित्याशङ्काभाष्य सामान्यादिशास्त्रजनितस्य ज्ञानस्य विज्ञानत्वेनाभासमानस्यापि विज्ञानत्वाभावरूपमिथ्यात्वज्ञापनेन निरासे विशेषादिशास्त्रजनिते ऽपि ज्ञाने विज्ञानत्वानाश्वासापर्यवसानपर्यन्तत्वेन व्याचष्टे * किं त्विति * पदादिजन्यस्य ज्ञानस्य विषयसदसत्सत्वसाधारण्यात्स्वत एव विज्ञानत्वाभावो ऽवसीयते न तु प्रत्ययान्तरबलेनेति वैधर्म्यसूचनार्था प्रत्ययान्तरोक्तिः । यस्येत्युत्तरभाष्यं शास्त्रान्तरविरोधे यथाश्रुते तात्पर्यावधारणायोगात्तन्निरपेक्षस्य शास्त्रस्य विज्ञानजनकत्वाभावाद्विज्ञानत्वनिरासो न तु विरोधम् । विनेति व्यवस्थोक्त्यर्थत्वेन व्याचष्टे * तदिति * यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एवासमीचीनः प्रत्यय इति भाष्ये कारणदोषज्ञानबाधकज्ञानयोर्विषयव्यभिचारित्वलक्षणविज्ञानमिथ्यात्वज्ञा-

पकत्वेनोक्तयोर्मध्ये बाधकविज्ञानस्य विज्ञानत्वाभावलक्षणज्ञानमि-
थ्यात्वज्ञापकत्वोक्तौ कारणदोषज्ञानस्यापि बाधकज्ञानवद्विषयास-
त्वज्ञापनेनैव विषयसत्त्वपरिच्छेदकत्वलक्षणविज्ञानत्वाभावज्ञापक-
८८२।१ त्वस्याप्युपपत्तेः कस्मादिह तज्ज्ञापकतोक्तेत्याशङ्क्याह * यस्त्विति *
शाब्दविज्ञानमिथ्यात्वहेतुत्वेन प्रसिद्धस्यानाप्तप्रणीतत्वाख्यस्य वि-
ज्ञानकारणशब्दस्य दोषस्य वेदे ऽनुपपत्तेर्न तत्र ज्ञानस्य मिथ्या-
त्वज्ञापकत्वं सम्भवतीत्याशयः । दोषाभावे निष्कारणं मिथ्यात्वं
न सम्भवतीति चेत् । सत्यम् । नोत्पन्नस्य विज्ञानस्य विषयव्य-
भिचारित्वलक्षणं मिथ्यात्वं वेदे सम्भवति किं तु विशेषशास्त्राद्य-
वरुद्धे विषये सामान्यशास्त्रादेर्विज्ञानोत्पादकतैव नास्ति । यथोक्त-
माग्नेयाधिकरणे परिहृत्य च विशेषविधिविषयं सामान्यशास्त्राणि
प्रवर्त्तन्तइति । जञ्जभ्यमानाधिकरणे च न हि प्रवृत्तानि शास्त्राणि
केन चिदपि निवर्त्यन्ते किं तर्ह्युदित एवैषां प्रवृत्तिप्रतिबन्धो ऽवधा-
र्यत इति दशमेनेदानीं किमतिदिश्यतइति व्याख्यायत इति दशा-
माद्यवार्त्तिकालोचनयाप्यतिदेशशास्त्रादेर्विरोधिशास्त्रविषये विज्ञानु-
त्पादकतावसीयते श्वेतो ऽवधावतीत्यादौ त्वनेकार्थप्रतिभाने ऽपि
यत्रैवार्थे ऽर्थप्रकरणादिना तात्पर्यमवधारितं तत्रैव विज्ञानजनकत्व-
दर्शनाद्विज्ञानोत्पादने तात्पर्यावधारणस्य शब्दसहकारित्वावगतेः
सामान्यशास्त्रादेश्च विशेषशास्त्राद्यविरोधार्थे तदनवरुद्धे ऽर्थे ता-
त्पर्यावसायात्तात्पर्याख्येन शब्दव्यापारेण विशेषशास्त्राद्यवरुद्धविष-
यवर्जनोपपत्तेः कक्षान्तरितसामान्यविशेषेषु हि दुर्लभः सामान्य-
वचनः शब्दो जायते लक्षणावलादितिवार्त्तिके दुर्लभांशत्वा सामा-
न्यवाचिनः शब्दस्य विरोधिशास्त्रान्तरविषयवर्जनावगतेर्न तत्र वि-
ज्ञानजनकत्वोपपत्तिः चोदनार्थकात्स्न्र्योक्तिस्तु ज्ञानमात्राशयत्वेन
व्याख्येया एतदेवाभिप्रेत्य पौर्वापर्यपरामृष्टः शब्दो ऽन्यां कुरुते म-
तिमित्युक्तमन्य एवैकदेशेन शास्त्रस्यार्थः प्रतीयते । अन्यश्च परि-
पूर्णोन्नं समस्तार्थोपसंहृतादिति च वक्ष्यते इहापि यथा चैषां
विप्रकर्षाद्विजातीयैः सह बलाबलमेवं सजातीयैरपि यत्र हे-
तुसाम्यं तत्र दर्शयितव्यमित्युपक्रम्य सामान्यविशेषादिश्रुतिबलाब-
लोदाहरणात्सामान्यादिशास्त्रस्याप्राप्तबाधोक्तिर्विज्ञानापेक्षया प्राप्त-
बाधोक्तिस्तु ज्ञानमात्रापेक्षयेत्यवसीयते ।

ज्ञानमात्रस्य चोत्पत्तिर्न प्रामाण्यसञ्ज्ञिका ।
स्मृतौ पदार्थबाधे च प्रामाण्यानुपलब्धितः ॥
अतो विरोधिविषये विज्ञानोत्पत्त्यभावतः ।

दोषाभावे ऽपि सामान्यशास्त्रादेव प्रमाणता ॥
न च प्रामाण्यजनकं ज्ञानमात्रस्य कारणम् ।
किं तु ज्ञानविशेषस्य विज्ञानस्यैव कारणम् ॥

सर्वं चैतत्तन्त्रसारे विस्तरेणोपपादितम् । प्रधानलक्षणे चास्माभिस्तस्मादुपरम्यते । बाधग्रन्थस्य श्रुत्यादिबाधव्यतिरिक्तबाधविषयत्वे ऽधिकरणोपसंहारभाष्यात्प्राक्पाठायोगशङ्कानिरासपूर्वं तदेतेषामित्याद्युपसंहारभाष्यं कः शेषः केन हेतुना शेषः कथं च विनियुज्यते श्रुत्यादीनि च विनियोगकरणानि वक्ष्यन्ते तेषां च बलवत्त्वेति भाष्यात्पञ्चानामेव शेषप्रकाराणामथातः शेषलक्षणमिति सूत्रेणाध्यायार्थत्वेन प्रतिज्ञातत्वप्रतीतेस्तेषां च सर्वेषामुक्तत्वाद्यत्कारणमिति च कारणशब्देन विनियोगकारणत्वतद्विशेषरूपयोश्चतुर्थतृतीयप्रकारयोरुपसंहारसम्भवादुपकारित्वादिरूपे च शेषे तद्धेतुकस्योपकारादेः प्रत्यक्षादिगम्यत्वेन श्रुत्यादिप्रमाणकत्वाभावात्प्रमाणवाचिना कारणशब्देनैषाद्ययोरप्युपसंहारसंभवादहीनो वेत्याद्युत्तरसूत्रग्रन्थस्य चाध्यायान्तरत्वसम्भवाद्ध्यायोपसंहारपरत्वेनाभासमानमधिकरणोपसंहारार्थत्वेन व्याख्यातुमाह * प्रासङ्गिकमिति * प्राक्पाठोपपत्तिसूचनार्था प्रासङ्गिकोक्तिः । अध्यायोपसंहारार्थत्वशङ्कानिरासार्थाधिकरणोक्तिः चतुर्थोपक्रमे तृतीये ऽध्याय इति भाष्येण प्रयुक्तिलक्षणस्य शेषलक्षणानन्तर्योक्तेः मध्ये ऽध्यायान्तरानुपपत्तिसूचनार्थाधिकरणान्तरोक्तिः ॥

द्वादशोपसत्ताया अहीनाङ्गताधिकरणम् ॥ ८ ॥

अहीनो वा प्रकरणाद्गौणः ॥ १५ ॥

अध्यायसमाप्तिपर्यन्तस्योत्तरचिन्ताजातस्य लक्षणासङ्गतिं शङ्कते * ननु चेति * विरोधविषयस्यैव बलाबलचिन्ताविषयत्वात्को विरोधस्य विषयः को वा नेति विरोधविषयपरिशोधनार्थतया बलाबलचिन्ताविषयत्वेन सङ्गतिमाह * तदिति * कस्मिन्प्रदेशे कस्य प्रमाणस्य केन प्रमाणेन सह विरोधाविरोधचिन्तेत्यपेक्षिते पशुधर्माधिकरणात्प्राचीनेषु तावदधिकरणेषु प्रकरणस्य क्वचिच्छ्रुत्या क्वचिल्लिङ्गेन क्वचिद्वाक्येन सहेति दर्शयितुमाह * तत्रेति * भाष्यादाहत्याग्निष्टोमयुक्तवाक्यवच्छाखान्तरीयं साह्नयुक्तमपि वाक्यमिहोदाहरणमिति दर्शयितुमाह *ज्योतिष्टोमइति* साह्नशब्दस्याप्रसिद्धार्थत्वेन तद्योगिनी ऽप्युपसत्तापि सन्दिग्धत्वान्निर्धारणीयेत्याशङ्क्य वाक्यशेषात् साह्नशब्दार्थप्रसिद्धेरप्युपसत्ताया निःसन्दिग्ध-

त्वात् द्वादशोपसत्तामात्रचिन्तेत्युपपादनार्थमाह * तत्रेति * प्रक-
८८३।२ रणस्य श्रुतिविरोधाविरोधत्सन्देहात्सन्देहमुपपादयति * यदीति *
पूर्वपक्षप्रतिज्ञाया वाशब्दोक्तत्वं दर्शयितुमाह * किमिति * कथं
वाशब्देन ज्योतिष्टोमार्थत्वप्रतिज्ञेत्याशङ्क्य भाष्योक्तसन्देहनिवृत्तिद्वारे-
णैव सिद्धान्तनिवृत्तिद्वारापि प्रतिज्ञार्थत्वोपपत्तिसूचनार्थं सिद्धान्ते-
नेत्युक्त परदौर्बल्योक्त्या सिद्धान्तादूभूतेस्तेनोपक्रमो युक्त इत्याशयः।
प्रकरणस्य श्रुतिविरोधशङ्कोत्तरत्वेनाहीनो गौण इति सूत्रावयवद्वयं
व्याख्यातुं नन्विति भाष्ये नाहीनस्येति षष्ठीश्रुतिविरोधमाशङ्क्य त-
त्परिहारार्थं न बाधिष्यतइति भाष्यमुपपादयितुमाह * न चेति *
न समासार्थत्वेन गौणोक्तिव्याख्यार्थं न हीयतइतिभाष्यं व्याचष्टे *
अस्ति चेति * मध्योदात्तत्वेनाहः समूहवाचित्वप्रत्ययान्तत्वावसा-
यान्नञ्समासत्वायोगमाशङ्क्य स्वरस्याशाब्दत्वेन श्रुतित्वाभावाद्विरोधे
अनादरणीयत्व सूचयितुमाह * अत इति * यतो ऽहीनशब्दस्य
ज्योतिष्टोमाभिधानसामर्थ्यास्तित्वाच्छ्रुतिविरोधः शक्यः परिहर्तुमि-
त्यत शब्दार्थः । नञ्समासे गौणोक्तिः कथमित्याशङ्कानिरासाय *
अहानीत्युक्तम् * स्वमतेनाहानि द्वेधा व्याचष्टे * सहीति * त्या-
गवाचिनो जहातेः कर्मकर्त्तरि निष्ठोत्पत्तौ प्रतियोगिना सोमयागा-
न्तराणां समानजातीयत्वेन प्रतिपन्नानामपि कर्मत्वेन कर्त्तृत्वेन वा-
न्वयायोगादपायरूपत्यागापेक्षितापादानत्वेनान्वयं कुतश्चिदिति पञ्च-
म्योक्ता निष्ठार्थोक्त्यै हीयतइत्युक्तं कर्मणि निष्ठायामेनमिति द्वितीय-
या निष्ठार्थमुक्त्वा प्रतियोगिनां कर्त्तृत्वेनान्वयोक्त्यै * जहतीत्युक्तम् *
हीनोक्तेर्न्यूनवाचित्वे तन्निषेधोपपादनार्थं परिपूर्णत्वोक्त्यै * कृत्स्ने-
त्युक्तम * दक्षिणयेतिभाष्योक्तामहानिव्याख्यां दक्षिणादीनां सोम-
यागान्तरवत्समानजातीयत्वस्यान्यस्य चाप्रतिपत्तिनिमित्तस्यानुपा-
दानेन प्रतिपत्त्ययोगादिच्छामात्रं वानुसृतदक्षिणादिभिरहीनत्वाविवि-
कल्पे क्रियमाणे ऽनवस्थितसमासार्थापत्तेः सहस्रदक्षिणादिभ्यश्च
साद्यस्क्रादिभ्यः क्रतुभ्यो ज्योतिष्टोमस्य दक्षिणाभिर्न्यूनत्वात्क्रतुकर-
णाख्यैश्च सवनीयपशुभिः संस्थान्तरे ऽत्यग्निष्टोमसंस्थस्य ज्योतिष्टोम-
स्य न्यूनत्वाद्दूषयति * यत्त्विति * फलस्य तु साक्षात्परिमाणाश्रुतेस्तेन
न्यूनत्वं कल्प्यत्वान्नोक्तम । तेनेत्यहानिव्याख्योपसंहारभाष्यं स्वम-
तमेवानुसृत्य व्याचष्टे * तस्मादिति * स्वमतेनैवाहानिङ्कर्त्तरि नि-
ष्ठामुत्पाद्य तृतीये प्रकारेण व्याख्यातुम् * न चेत्युक्तम * कर्मनिष्ठा-
पक्षएवाख्यातेन निष्ठार्थमुक्त्वा प्रतियोगिनः कर्तृत्वेन तृतीययान्वयं
वक्तुं * केन चिद्धत्युक्तम् * स्वरानादराद्वा प्रत्ययान्तत्वानिश्चये

ऽपि नञ्समासेनापि कथं निश्चयेत्याशङ्क्य प्रकरणसामर्थ्यान्निश्चये ऽभिहिते नञ्समासे ऽपि गौणत्वस्याभावाद्गौणोक्तिरयुक्तेत्याशङ्क्याने-नेत्याद्युक्तम् ॥

असंयोगात्तु मुख्यस्य तस्मादपकृष्येत ॥ १६ ॥

ज्योतिष्टोमस्याहीनशब्देन सह वाच्यवाचकलक्षणसम्बन्धाभावादहीनसयुक्ता द्वादशोपसत्ता ज्योतिष्टोमादपकृष्येतेत्येवं सिद्धान्तसूत्रं श्लोकद्वयेन व्याचष्टे * मुख्यइति * गुणयोगेनाप्यहीनशब्दसम्बन्धो नास्तीति कथं च नेत्यनेनोक्तं भाष्यात् द्वादशोपसत्त्वासंयोगप्रतीतेरहीनशब्दासंयोगव्याख्या न युक्तेत्याशङ्क्य पूर्वपक्षसूत्रनिर्दिष्टाहीनशब्दासंयोगव्याख्यायां तत्सङ्गतत्वेन बुद्धिस्थद्वादशोपसत्त्वस्यापकृष्येतेत्यनेनान्वयसौकर्यायान्यथाव्याख्येति परिहारसूचनार्थं तेन * सङ्गते-त्युक्तम् * प्रश्नपूर्वं द्वादशोपसत्ताया ज्योतिष्टोमासंयोगोपपादनार्थं कथमित्यादिभाष्यं षष्ठीश्रुतेः । सम्बन्धमात्रवाचित्वे ऽपि निर्विशेषसामान्यायोगात्सम्बन्धविशेषापरत्वापेक्षायां विधीयमानसंख्यापेक्षिताङ्गाङ्गिसम्बन्धविशेषपरत्वावगत्या विनियोजकत्वस्य निवीत मनुष्याणामिति पुरुषप्रधानो निर्देश इत्यादिनिवीताधिकरणभाष्यवक्ष्यमाणन्यायेनावगमान्नञ्समासाच्च ज्योतिष्टोमेनाप्येकवाक्यत्वोपपत्तरयुक्तमाशङ्क्य वाक्यमरुणया क्रीणातीति भाष्यवदिदमपि विशेषान्वये वाक्यस्यापि व्यापारोक्तेन तु श्रुत्यभावाशयमहीनोक्तिश्चाहर्गणवाचिन्यभिप्रेतेति सूचयितुमाह * द्वादशत्वमिति * नन्वितिभाष्यं पूर्वपक्षोक्तश्रुतिविरोधपरिहारानुभाषणार्थत्वेन व्याचष्टे * यत्त्विति * नेतीत्यनुभाषणपरिहारभाष्यमौपचारिकत्वाख्यस्य मुख्यत्वप्रतियोगिनो गौणत्वस्य पूर्वपक्षिणानुक्तत्वादयुक्तमाशङ्क्य गौणोक्त्यौपचारिकत्वं विवक्षितं नञ्समासात्मिकावयवव्युत्पत्तिर्वेति विकल्प्याद्यकल्पनिरासायैतद्भाष्यमित्येवं व्याचष्टे * तदिति * प्रकरणबाधापत्तेर्मुख्यसम्भवोक्तिरयुक्तेत्याशङ्क्य न प्रकरणानुरोधेनेत्युक्तम् । यो विदग्धः स नैर्ऋत इत्यादौ नैर्ऋतादिशब्दानां प्रकरणानुरोधेनापि श्रुत्यर्थत्यागो ऽदृष्ट इत्याशङ्क्याह * न चेति * विधावप्यष्टावुपभृतीत्यष्टशब्दस्य श्रुत्यर्थत्यागेन चतुष्टद्वयलक्षणार्थता दृष्टेत्याशङ्क्याह * नचास्येति * चतुष्टद्वयवाचिशब्दान्तराभावादष्टशब्देन तल्लक्षणाभ्युपगता ज्योतिष्टोमवाचिनस्त्वह सान्हशब्दस्य भावान्नाहीनशब्देन तल्लक्षणा युक्तेत्याशयः । आद्यकल्पनिरासमुपसंहरति * तस्मादिति * नन्वितिभाष्येण द्वितीयं क-

रूपमाशङ्क्य तन्निरासार्थं नेतीतिभाष्यं मध्योदात्तत्वोक्त्या समूहवा-
चिखप्रत्ययान्तत्वेनावयवव्युत्पत्त्यार्हगणवाचित्वोक्त्यर्थत्वेनाभासमान-
महर्गणात्मकेष्वपि सत्रेष्वहीनशब्दप्रयोगाभावेन केवलयौगिकत्वा-
योगादयुक्तमाशङ्क्य योगरूढ्याशयत्वेन व्याख्यातुमाह * न चेति *
अहीनशब्दस्याखण्डस्याहर्विशिष्टगणवाचित्वे ऽनेकशक्तिकल्पनापत्ते
समुदायप्रसिद्ध्ययोगादहीनशब्दावयवभूतस्याहः शब्दस्याह.परिमिते
सोमयागाभ्याससमूहे समुदायप्रसिद्ध्या नञ्समासनिरासादित्येव
व्याख्येयं विशेषणभूतश्च नञ्समासो ऽनेन निषिध्यते न विशेष्य-
भूतावयवव्युत्पत्तिः। समुदायप्रसिद्ध्यैव नञ्समासनिरासेन नञ्स-
मासचिन्हभूताद्युदात्तत्वाभावेन तन्निरासो ऽनर्थक इत्याशङ्क्योपच-
यार्थत्वेनार्थवत्त्वं चशब्देन सूचयंस्तथासतीति भाष्यं व्याचष्टे *
न च नञ्समासस्येति * नञित्यन्वाख्यानाख्यलक्षणसद्भावाच्चिन्ह-
वाची लक्षणशब्दः चिन्हाभावमुपपादयति * नञ्समासे हि स-
तीति * नञ्समासस्य तत्पुरुषत्वाद् बहुव्रीहौ प्रकृत्या पूर्वपदमित्य-
तः प्रकृत्या पूर्वपदमित्यनुवर्त्तमाने तत्पुरुषे तुल्यार्थतृतीयासप्तम्युप-
मानाव्ययद्वितीयाकृत्या इति स्मृत्या ऽव्ययाख्यस्य नञः पूर्वपदस्यो-
दात्ताख्यप्रकृतिस्वरत्वान्वाख्यानादित्याशयः। मध्येति भाष्यं खप्रत्ययां-
तत्वोपपादनार्थत्वेन व्याचष्टे * मध्येति * कथं मध्योदात्तत्वा-
त्खप्रत्ययान्तत्वाध्यवसानमित्याशङ्क्याह * तथा सति हीति *
आद्युदात्तश्चेतिप्रत्ययस्याद्युदात्तत्वविधानादाकारे प्रकृतिस्वरः सि-
द्ध्यतीत्युक्ते आयनेयीनीयियः फढखच्छघां प्रत्ययादीनामिति प्रत्यया-
दिभूतस्य खकारस्येनादेशविधाने ईनादिशब्दस्याप्रत्ययत्वादादेशाद्या-
चीकारे कथमुदात्तस्वरसिद्धिरित्याशङ्क्यायनादिष्वादेशेषु स्वरसि-
द्ध्यर्थमुपदेशो विद्यते येषां फगादिप्रत्ययानां तद्भावस्य वचनङ्का-
र्यमितिस्मृतेरादेशसम्बन्धिन्यपीकारे * स्वर. सिध्यतीत्युक्तम् * त-
स्मादिति सिद्धान्तोपसंहारभाष्यं मध्योदात्तत्वोपपादितसिद्धान्त-
हेत्वहर्गणवाचित्वोपसंहारपूर्वकत्वेन व्याख्यातुमाह *तस्मादिति *
सान्हाहीनशब्दयोः सह प्रयोगेणापर्यायत्वावगतेर्मुख्यस्य सान्ह-
शब्दस्यार्थेन सहाहीनशब्दस्यार्थेन सहाहीनशब्दस्य वाच्यवाचक-
लक्षणसम्बन्धाभावादित्येवं सूत्रव्याख्यार्थमपि चेतिभाष्यं व्याच-
ष्टे * अपि चेति * अर्थान्तरवाचित्वाभावे ऽहीनशब्दानर्थक्यापा-
त्युक्त्यर्थत्वेन व्याख्याय शब्दद्वयानर्थक्यापत्त्युक्त्यर्थत्वेनैतदेव भाष्यं
व्याचष्टे * प्रकरणाद्धीति * अहीनशब्दस्यार्थान्तरवाचित्वे ऽपि सा-
८८५।२ न्हशब्दस्यानर्थक्यान्तदवस्थमेवेत्याशङ्क्याह*अर्थान्तरत्वे त्विति*निरा-

उप सद इत्युपसदनुवादेन त्रित्वविधिमात्रेण नैराकाङ्क्षादहीनशब्दानुषङ्गानुपपत्तेरहीनशब्दस्य च सान्हशब्दवत्त्रित्वद्वादशत्वमध्यपाठाभावेनोभयान्वयानवगतेरनूद्यमानाहीनसन्निधेश्च प्रकरणविरोध्यहीनाङ्गत्वानापादकत्वात्कथं त्रित्वस्याहीनान्वयापत्तिरित्याशङ्क्य वस्तुतोऽहीनान्वयानापत्तावप्यानन्तर्यात्तदन्वयापत्तिभ्रमं निवर्तयितुं सान्हशब्द इति सूचनायानन्तर्यादित्युक्तम्। द्वादशोपसत्त्वं ज्योतिष्टोमे विधीयतेऽहीने वेत्येवं यथाभाष्यमधिकरणं व्याख्यातं स्वमतेनाहीने द्वादशत्वविध्यर्योगमभिप्रेत्याक्षिपति * न त्विति * यथाहीनस्य द्वादशोपसत्त्वौचित्ना तथा ज्योतिष्टोमस्य श्रुत्युपसत्त्वौचित्यरूपेण त्रित्वस्तुत्यै द्वादशताऽनूद्यते न त्वहीने विधीयत इत्याक्षेपार्थः। स्वाभिप्रेतत्वेऽप्याक्षेपस्य स्तुत्यर्थतयैकवाक्यत्वसंभवे वाक्यभेदापादिका विध्यर्थता न युक्तेति दुष्टीकोक्त एवाक्षेपहेतुर्युक्तोऽत्र त्वन्यप्रकरणेऽन्यधर्मविधेरन्याय्यतान्यधर्मविधौ विच्छिन्नस्य प्रकरणस्यानुसन्धानक्लेशोऽहीने च द्वादशत्वप्राप्तिरिति हेतुत्रय परमतेनोक्तमिति सूचनार्थः किलशब्दः स्वमतेन ज्योतिष्टोमे द्वादशत्वं विधीयते वाक्यान्तराद्धीने प्राप्तं त्रित्वस्तुत्यर्थमनुद्यत इत्येवमधिकरणं प्रश्नपूर्वं व्याचष्टे * कथं तर्हीति * श्लोकं व्याचष्टे * एतदिति * अहीनसम्बन्धद्वादशत्वोक्तज्योतिष्टोमसम्बन्धित्रित्वस्तुत्यर्थत्वे प्रकृतज्योतिष्टोमोपयोगसम्भवात्प्रकरणविरोधाविरोधचिन्तास्मिन्नधिकरणे न युज्येत इत्याशङ्कते * नन्विति * द्वादशत्वस्य विधेयत्वं प्रकरणस्य तद्विनियोजकत्वाद् बाधो विरोधत्वे नेत्येवं विरोधाविरोधचिन्तामुपपादयति * नैष इति * प्रकरणस्याविनियोजकत्वेऽपि द्वादशत्वस्य प्रकृतज्योतिष्टोमसम्बन्धित्रित्वस्तुत्यर्थत्वेन प्रकरणपाठानर्थक्याभावात्प्रकरणबाधोक्तिरयुक्तेत्याशङ्क्याह * अन्यस्त्विति * प्रकरणपाठार्थवत्त्वेऽपि विनियोगएव प्रकरणस्य प्रामाण्याद्विनियोगाभावे बाधो भवतीत्याशयः। द्वादशाहीनस्येत्यस्य स्तुत्यर्थत्वेन त्रित्वविध्येकवाक्यत्वसम्भवे वाक्यभेदानेकादृष्टकल्पनापादकविध्यर्थत्वायोगाद्द्वादशत्वस्याविधेयत्वेत्युक्तेन हेतुत्रयेण विधेयता निराकर्तुमशक्येति सूचयितुमाह * यदा त्विति * क्रत्वन्तरान्वयाख्यविशेषसम्बन्धविधिनैवापूर्वान्वयाख्यसामान्यसम्बन्धाक्षेपे गौरवापत्तेः किलान्यप्रकरणेऽन्यधर्मविधेरन्याय्यत्वं वाच्यं सत्यां च गतौ गौरवं दोषो नासत्यां क्रत्वन्तराङ्गविधिश्च क्रत्वन्तरविधायित्वाभावेनातुल्यकक्षत्वात्पूर्वोत्तराङ्गसन्दंशावगतं प्रकरणं विच्छेत्तुं न शक्नोतीति उत्तराधिकरणन्यायोक्त्या सूचितम्। शाखाभेदाच्छा-

पौनरुक्त्योपपत्तेर्विधित्वसम्भवे स्तुतेः प्रयोजनत्वायोगाद्विधितैव यु-
क्तेति सूचनार्थम् * शाखान्तरेत्युक्तम् * स्तुत्यर्थत्वे ऽप्येवं प्र-
करणमनुगृहीतं भवति प्रकरणं बाधित्वेति पूर्वपक्षभाष्यसिद्धान्त-
भाष्ययोः पूर्वपक्षं हीत्यादिवार्त्तिकोक्तोपपत्तावपि विधित्वपक्षे पद-
भाष्यार्जवं यथाभाष्यतोक्त्योक्तम् । ज्योतिष्टोमगतस्युपसत्त्वस्तुत्य-
र्थत्वे तस्मादपकृष्येतेति सूत्रावयवस्याप्यनार्जवापत्तेर्यथासूत्रमिति
८८६।२ कस्मान्नोक्तमित्याशङ्क्याह * सर्वथा तावदिति * द्वादशत्वस्या-
हीनसम्बन्धित्वेनोक्तस्य पक्षद्वये ऽपि ज्योतिष्टोमानन्वयसाम्यादप-
कर्षोक्तिरविरुद्धेत्याशयः प्रकरणविच्छेदशङ्कानिवृत्तिसूचनाय * ए-
तावदित्युक्तम् *

॥ कुलायादौ प्रतिपदोरुत्कर्षाधिकरणम् ॥ ९ ॥

द्वित्वबहुत्वयुक्तं वा चोदनात्तस्य ॥ १७ ॥

अतिदेशाधिकरणत्वेनानन्तरसङ्गतिं सूचयन्संदेहभाष्यं व्या-
चष्टे * पूर्ववदेवेति * का तर्ह्यधिका शङ्केत्याशङ्क्याह * एतावदिति *
ज्योतिष्टोमानन्वयिगुणद्वाराप्युत्कर्षसिद्धेः पूर्वपक्षायोगमाशङ्क्य * कथं
चिदित्युक्तम् * आशङ्कितः प्रकृतेन सम्बन्धो यस्येति समासार्थः
प्राथम्यादस्य पूर्वपक्षत्वशङ्कां निवर्त्तयन् मुख्यस्य ज्योतिष्टोमस्य
द्वित्वबहुत्वनिमित्तयुक्तमपि प्रति यद्विधानं तस्माज्ज्योतिष्टोमादपकृ-
ष्येतेति पूर्वाधिकरणसिद्धान्तसूत्रार्थानुकर्षणार्थत्वेन चकारव्या-
ख्यार्थं द्वित्वेति भाष्यं व्याचष्टे * तत्रेति * सिद्धान्तेनाधिकरणो-
पक्रमो येनेति समासार्थः । असंयोगोपपादनार्थत्वेन तस्य ज्योति-
ष्टोमस्य यजमानद्वित्वबहुत्वाचोदनादित्येवमचोदनात्तस्येति सूत्राव-
यवव्याख्यार्थं नहीति भाष्यं व्याचष्टे * न तावदिति * अन्यतः
सिद्धद्वित्वबहुत्वानुवादेन द्वित्वबहुत्वे निमित्तीकृत्य द्विबहुशब्दप्रवृ-
त्त्यवगमेनानयोर्वाक्ययोः प्रतिपन्मात्रविधिपरत्वात्संख्या प्रतिपद्रूपा-
नेकार्थविधौ च वाक्यभेदापत्तेर्नेह वाक्यद्वयं ज्योतिष्टोमाङ्गत्वेन द्वि-
त्वबहुत्वे विधीयेते इत्यर्थः । अविहितत्वाच्चेति वार्त्तिकस्य वक्ष्यमा-
णार्थानाक्षेपापेक्षया तावच्छब्दः संख्यानपेक्षस्य यजमानस्य यजमा-
नानपेक्षाया वा संख्याया नित्यत्वेन संख्यायाश्चाव्यवस्थितत्वाधिक्येन
निमित्तत्वायोगान्मृष्यामहे हविषा विशेषणमिति वद्यजमानविशि-
ष्टाया निमित्तत्वे ऽपि न वाक्यभेदापत्तिः प्रतिपत्प्रकरणे च यजमान-
द्वित्वे निमित्ते युवं हिस्थः स्वर्पतो इति कुर्यादिति निमित्तोद्देशेन
मन्त्रे विहिते प्रकरणादेव प्रतिपन्नात्मगतेर्मन्त्रगे च [illegible]

सायं जुहोतीति कालोद्देशेन देवतायां विहितायां प्रकरणप्राप्तजुहोत्यनुवादवत्प्रकरणप्राप्तप्रतिपदनुवादसम्भवाच्च प्रतिपत्तिनिमित्तयोर्द्वयोरुद्देशाद्वाक्यभेदापत्तिः। प्रतिपत्त्वेनैव च मन्त्रविधिमभिप्रेत्य प्रतिपद्विध्युक्तिः। अनेकस्तोत्रीयागणात्मके स्तोमे कस्याश्चित्स्तोत्रीयाया नियमेनाद्वित्वप्राप्तेराद्यस्तोत्रीयत्वाख्यप्रतिपत्त्वप्राप्तेः स्तोमविधिनैव सिद्धत्वात्स्वरूपेण प्रतिपद्विध्यनुपपत्तिः। एकस्य यजमानस्य ज्योतिष्टोमानुष्ठानाशक्तावशक्तिकृताङ्गत्यागन्यायात् ज्योतिष्टोमेऽपि विहितयजमानैकत्वत्यागेनार्थात्तद्वित्वबहुत्वप्राप्तिर्भविष्यतीति आशङ्क्य आख्यातादेकत्वविशिष्टस्यैव कर्तृत्वावगतेरेकत्वाभावेनाधिकाराभावादेव त्वस्याशक्तिकृताङ्गत्यागन्यायविषयत्वानुपपत्तेर्नार्थाद्वित्वप्राप्तिरिति परिहारमुत्तरसूत्रद्वयारूढमप्येकत्वस्याशक्तिकृताङ्गत्यागन्यायविषयत्वसदसद्भावसन्देह एवात्र सन्देहहेतुरिति सूचनार्थं तस्य द्वित्वस्य बहुत्वस्य वा ज्योतिष्टोमेऽर्थाक्षेपाभावादित्येवमर्चाद्नात्तस्येति सूत्रावयवारूढं कर्तुमाह * अविहितत्वाच्चेति * यथेतिभाष्यं तात्पर्यतो व्याचष्टे * कुलालादिषु त्विति * सिद्धान्तमुपसंहरति * तस्मादिति *

पक्षेणार्थकृतस्येति चेत् ॥ १८ ॥

एकाशक्तिपक्षेणापत्तादर्थाद्वाभ्यां बहुभिर्वा कृतस्य ज्योतिष्टोमस्य द्वित्वबहुत्वसंयोगो भविष्यतीति प्रतिपद्विधानस्यार्थप्राप्तद्वित्वबहुत्वसंयोगविषयत्वकल्पनाके बीजं तावदाह * प्रकरणाद्धेति* द्विबहुश्रुतिविरोधात्प्रकरणबाधमाशङ्क्याह * न चेति * साक्षाद्यज्ञान्तरसम्बन्धाश्रवणेऽपि द्वित्वबहुत्वसम्बन्धश्रवणाच्छ्रुतिविरोधोऽपरिहार्य इत्याशङ्क्याह * यजमानेति * द्विबहुश्रुत्योरङ्गाङ्गिभावार्थत्वे प्रकरणस्याङ्गाङ्गिभावबाधकत्वस्यानिमित्तार्थत्वे तु भिन्नविषयत्वेनाविरोधान्न बाधकतेत्याशयः। द्वित्वबहुत्वश्रुत्योर्द्विबहुयजमानकर्तृकक्रतुलक्षणया तदङ्गत्वावेदकत्वात् विरोधो भविष्यतीत्याशङ्क्याह * न चेति * लक्षणापि लौकिकीत्वाद्युक्तैवेत्याशङ्क्याह * न हीति * श्रौतद्वित्वबहुत्वाङ्गत्वावेदकत्वादेव तर्हि विरोधो भविष्यतीत्याशङ्क्याह * द्वित्वादीति * श्रौतस्य द्वित्वादिसम्बन्धस्य निमित्तमात्रौपयिकत्वेऽपि संक्रान्त्यादौ निमित्ते फलार्थस्नानादिविधिवत् द्वित्वादौ निमित्ते प्रतिपद्विधेः फलार्थत्वसम्भवात्स्वातन्त्र्योपपत्तेर्न ज्योतिष्टोमे निवेशो युक्त इत्याशङ्क्याह * फलेति * फलकल्पना-

थामश्रुतफलतत्साधनेतिकर्त्तव्यताकल्पनागौरवापत्तेः प्रकृतकृत्स्नान्वयकल्पनैव ततो ज्यायसीति वाच्ये प्रकरणप्रमाणकत्वेन कल्पनालाघवादिति हेतुसूचनार्थं कर्मव्युत्पत्त्या प्रकृतवाची प्रकरणशब्दः प्रयुक्तः । एतदन्तेन च प्रकरणादित्यादिवार्त्तिकेनेति चेदिति सूत्रावयव तस्मादपकृष्येतेत्यनुकृष्टसूत्रावयवार्थानुभाषणार्थत्वेन व्याख्याय पूर्वाधिकरणपूर्वपक्षसूत्रस्थेन प्रकरणादिति हेतुना मण्डूकप्लुतिन्यायादनागतेन परिहारोक्त्यर्थं बाध्येतेत्यन्त भाष्यं व्याख्यातम् । असंयोगादित्यनुकृष्टसूत्रावयवार्थानुभाषणार्थत्वेनावृत्त्येति चादिति सूत्रावयवव्याख्यार्थं बाध्यतामिति भाष्यं व्याचष्टे * यत्त्विति * तत्परिहारार्थत्वेनार्थकृतस्येति सूत्रावयवव्याख्यार्थमसत्यपीति भाष्यं व्याचष्टे * तदिति * अचोदनात्तस्येति सूत्रावयवोक्तामुपपत्तिं
८८७।२ निराकर्त्तुमाह * न हीति * हित्ववधुत्वयोरर्थप्राप्त्युपपादनार्थत्वेन पक्षेणेति सूत्रावयवव्याख्यार्थं य एक इति भाष्यं व्याचष्टे * अस्ति चेति * एकस्याशक्तावपि यजेतेत्येकत्वश्रुतिविरोधान्नानेकयजमानप्राप्तिः सम्भवतीत्याशङ्क्य परमतेन तावत्परिहारं विवक्षित हीत्युत्तरसूत्रस्थभाष्यसूचितमाह * न चेति * वक्ष्यमाणानालोचनेन प्रत्यवस्थाने सर्वविचाराणामनवस्थानापत्तेरतत्परिहारापरितोषादशक्तिकृताङ्गत्यागन्यायेनैकत्वत्यागादनेकयजमानप्राप्तिरिति स्वमतेन परिहारान्तरोक्त्यर्थमवश्यंतिभाष्यं व्याचष्टे * सत्यामपि चेति * षष्ठे सर्वशक्तौ प्रवृत्तिः स्यात्तथाभूतोपदेशादिति सूत्रेणा नित्ये ऽपि प्रयोगे सर्वाङ्गानुष्ठानशक्तौ सत्यां प्रवृत्तिर्युक्ता विधस्त्वेकश्रुतित्वादपर्यायविधानान्नित्यशब्दनेन श्रुतिभूताभिसंयोगादर्थेन युगपत्प्राप्तेर्यथाप्राप्तं स्वशब्दार्थो नित्यस्तस्मात्सर्वप्रयोगे स्यादित्येकादशाधिकरणन्यायेन सर्वाङ्गोपेतप्रयोगोपदेशादिति पूर्वपक्षयित्वा ऽपि वाप्येकदेशे स्यात्प्रधाने ह्यर्थनिर्वृत्तिर्गुणमात्रमितरत्तदर्थत्वादित्यनेनाङ्गैकदेशे ऽपि शक्तौ सत्यां नित्ये प्रयोगे प्रवृत्तिर्युक्ता शक्त्यपेक्षत्व ऽप्यधिकारस्य सर्वाङ्गानुष्ठानशक्तेरनित्यत्वेन नित्य सर्वाङ्गोपेतं कुर्यादिति विध्ययोगाद्यदा सर्वाङ्गोपेत कर्त्तुं शक्नुयात्तदा कुर्यादिति विध्यर्थाऽभ्युपगमे च यावज्जीवादिश्रुत्यवगतनित्यत्वविरोधापत्तेर्यावन्त्यङ्गानि कर्त्तुं शक्नुयात्तावाद्रूपेनं नित्यं कुर्यादिति विध्यर्थावसायाद्यावच्छक्त्यङ्गोपेते प्रधाने ऽनुष्ठिते विध्यर्थनिष्पत्तेरितरस्य चाशक्यस्याङ्गस्य प्रधानार्थत्वेन गुणमात्रत्वाद् गुणलोपे च मुख्यस्य क्रिया स्यादिति दशमाधिकरणन्यायेनाङ्गलोपे ऽपि प्रधानानुष्ठानस्य युक्तत्वादिति सिद्धान्तयिष्य-

माणत्वाद्यजमानैकत्वमपि कदाचित्परित्यज्यानेके यजेरन्नित्युक्ते कर्त्तुरेवाधिकारादेकत्वविशिष्टस्यैव च कर्तृत्वादेकत्वत्यागे ऽधिकाराभावाद्यागानुष्ठानं न युक्तमित्याशङ्क्य बहुषु बहुवचनं द्व्येकयोर्द्विवचनैकवचने इति बहुद्व्येकशब्दानां संख्याप्रधानत्वाभ्युपगमात्कर्तुरेकत्वे द्वित्वे बहुत्व इति च व्याख्यानात्संख्याविशेषणत्वेन संख्यान्वयात्प्रागेव कर्तृत्वप्रतीतेरेकत्वत्यागे ऽपि कर्तृत्वसद्भावेनाधिकारसद्भावाद्यागानुष्ठानोपपत्तिसूचनार्थम् * यथैवेत्युक्तम् * सूत्रतात्पर्यमुपसंहरति * ततश्चेति * प्रतिपद्विधानान्यथानुपपत्तिरूपदर्थात्कल्पितया ज्योतिष्टोमस्य द्विबहुयजमानकत्वश्रुत्या विहिताभ्यां द्वाभ्यां बहुभिर्वा कृतस्य ज्योतिष्टोमस्य द्वित्वबहुत्वसंयोगो भविष्यतीत्येव स्वयमन्यथार्थकृतरूपेति सूत्रावयवं व्याचष्टे * अथ वेति * ज्योतिष्टोमेन द्वौ बहवो वा यजेरन्निति श्रुतिकल्पने द्विबहुश्रुत्योर्द्वित्वबहुत्वविधिं विनानर्थक्यापत्तेरनन्यगतित्वेन निरवकाशत्वाद्यजेतेत्येकवचनाख्यातश्रुतेराख्यातानां मध्ये कस्मिंश्चिदाख्याते प्रयोक्तव्ये प्राथम्यात्प्रयोगोपपत्तेर्गत्यन्तरसम्भवेन सावकाशत्वादेकत्वमत्यन्तं बाध्येतेत्याशङ्कानिरासार्थत्वेनैतत्प्रतिपद्विधिपक्षेणेति सूत्रावयवं व्याचष्टे * सा चेति * यदि च हेतुरवतिष्ठेतेति न्यायात् शूर्पत्वैकार्थसमवायिनो ऽग्निकरणावान्तरसामान्यस्य होमसाधनत्वहेतुत्वान्यथानुपपत्त्यान्वयविधिः कल्प्यमानो यथा शूर्पविषय एव कल्प्यते तथा द्वित्वादिनिमित्तप्रतिपद्विशेषविध्यन्यथानुपपत्त्या द्वित्वादिविधिः कल्प्यमानः प्रतिपद्विशेषपक्ष एव कल्प्यत इत्याशयः । न त्वेतद्युक्तं प्रतिपद्विशेषनिमित्तद्वित्वादिविधिकल्पने ऽन्योन्यनिमित्तत्वापत्त्या ऽन्योन्याश्रयापत्तेः निमित्तानपेक्षद्वित्वादिविधिकल्पने तूपास्मै गायता नर इति प्रतिपदं कुर्यादिति नित्यायाः प्रतिपदो नैमित्तिकया प्रतिपदा बाधेनार्थाद्द्वित्वबहुत्वयोस्तन्निमित्ताभ्यां प्रतिपद्भ्यामेकविषयत्वनियमे ऽपि तद्विधायिन्योः श्रुत्योः प्रतिपद्विशेषानपेक्षत्वात्सर्वत्र प्राप्तैकत्वचोदनाया विरोधपरिहारायोगेन बाधे सत्युपास्मै गायता नर इत्यस्या अपि प्रतिपदो ऽनन्यगतित्वाद्द्विबहुयजमानकयोरेव प्रयोगयोर्विकल्पेन निवेशापत्तेः । तस्मात्प्रौढिमात्रेणेयं व्याख्याकृता ।

न प्रकृतेरेकसंयोगात् ॥ १९ ॥

प्रकृतिशब्दं स्वयं तावत्प्रक्रियतइतिकर्मव्युत्पत्त्या प्र-

क्रतवाच्चित्वेनासंयोगात्तु मुख्यस्येति मुख्यशब्दवत् ज्योतिष्टो-मोक्त्यार्थतया व्याचष्टे * प्रकृतीति * यथाभाष्यं व्याचष्टे * औपदेशिकत्वाच्चेति * आतिदेशिकं सदेकत्वं प्रयोगाख्यस्यार्थ-स्यैकेन कर्तुमशक्यत्वात्तद्वशेन कपालवद् बाध्येत द्विविधे ऽपि तु ज्योतिष्टोमप्रयोगे तस्यैकवचनश्रुत्या प्रत्यक्षविहितत्वान्नार्थवशेन बा-धो युक्त इत्यर्थः। विवक्षितं हीति भाष्यमविवक्षाशङ्कानिरासार्थत्वेन व्याचष्टे * न चेति * षष्ठाद्यन्यायेन पुरुषस्य प्रधानतयोद्देश्यत्वे-नैकत्वस्य पुंस्त्ववदुद्देश्यविशेषणत्वमविवक्षाकारणमस्तीत्याशङ्क्य प्रा-धान्यस्य भावनानिष्पादकत्वाख्यगुणत्वान्यथानुपपत्तिकल्प्यत्वेन गु-णत्वमेव शास्त्रव्यापाराद्दाख्यातोक्तस्यैकत्वस्य भावनाक्षिप्तगुणभूतो-पादीयमानकर्तृविशेषणत्वाद्विवक्षोपपादयिष्यत इत्याह * यथा चेति * यत्रापि हीति भाष्यमेकत्वस्याशक्तिकृताङ्गत्यागन्यायविषय-त्वाभावोक्त्यर्थत्वेन व्याचष्टे * यद्यपीति * भावनासंख्ययोरेक-प्रत्ययवाच्यत्वाद्भावनाप्रतीतिकाल एव संख्याप्रतीतेस्तदा च भावना-क्षेप्यस्य कर्तुरप्रतीतत्वेन विशेषणत्वायोगाद्धात्वर्थेन तु निष्पाद्यत्वा-द्यथा कथं चिन्निष्पादकाक्षेपे ऽप्यक्रियात्वेन स्वतन्त्रनिष्पादकक-र्तृरूपाक्षेपायोगाद्यावदेवेह धात्वर्थः प्रतीतस्तावदेव कापि भाव-ना कर्ता कश्चिद्भविष्यतीत्यवधार्यत इति कर्त्रधिकरणवार्तिके च धात्वर्थेन स्वतन्त्रनिष्पादककर्त्राक्षेपस्य वक्ष्यमाणस्य प्रौढिमात्रत्वा-त् बहुद्व्येकशब्दानां संख्यामात्रस्य वाच्यत्वान्वाख्यानमित्येवं पर-त्वात्प्रथमप्रतीतत्वेन संख्याया एव विशेषणत्वावगतेर्यजेतेत्येकव-चनादेकत्वविशिष्टस्यैव कर्तृत्वप्रतीतेरेकत्वाभावे कर्तृत्वाभावेना-धिकाराभावान्नैकत्वस्याशक्तिकृताङ्गत्यागन्यायविषयता युक्तेत्याश-यः। यदि न्यान्याङ्गत्यागे ऽप्येकस्या शक्तिः स्यात्ततो गुणलोपे च मुख्यस्य क्रिया स्यादिति न्यायात्प्रधानानुरोधेन गुणभूतैकत्व-त्यागः शङ्क्येत न त्वेतदस्तीत्याह * शक्नोति हीति * कर्तृविशेषण-त्वाभ्युपगमे ऽप्येकत्वस्य त्यागो न युक्त इति प्रौढिं दर्शयितुमाह * उत्पत्तीति * सोमेन यजेतेत्युत्पत्तिचोदनास्थत्वेनैकत्वस्य कर्मरू-पत्वावधारणात्तत्यागे कर्मण एवाननुष्ठितत्वापत्तेरुत्पत्तिकाले च बहुदक्षिणत्वाद्येकाशक्तिहेत्वनवगमनानुपसञ्जातविरोधावस्थायां श्रु-तत्वाद्वसन्ते वसन्ते ज्योतिषा यजेतेति च प्रयोगचोदनास्थत्वेनानु-ष्ठानप्रत्ययप्रत्यासन्नतया बलवत्वादित्याशयः। तस्मादिति भाष्यं सूत्रार्थोपसंहारार्थत्वेन व्याचष्टे * तस्मादिति * स्वयं व्याख्याते पक्षेणेतिशङ्कासूत्रार्थे विकृतौ क्वचिद्द्वित्वबहुत्वाभ्यामपि संयोगा-

सद्भावेनार्थाक्षेपायोगो ह्यर्थत्वेन प्रकृतेरेवैकत्वसंयोगनियमादित्येवं
व्याख्यातुमाह * यत्त्विति * प्रतिपद्विशेषनिमित्तो यजमानसंख्या-
विशेषो यजमानसंख्याविशेषनिमित्तश्च प्रतिपद्विशेष इत्यन्योन्याश्र-
यापत्तेः प्रतिपद्विशेषनिमित्तद्विबहुयजमानकत्वश्रुतिकल्पनायो-
गात्प्रतिपद्विशेषानपेक्षश्रुतिकल्पने चैकत्वचोदनाविरोधापरिहाराद्य-
जमानसंख्याविशेषविशिष्टप्रतिपद्विशेषविकल्पनपूर्वं तदन्यथानुप-
पत्त्या विशेषणभूतसंख्याविशेषविधिं कल्पयित्वा संख्यान्तरपक्षे
प्रतिपद्विशेषविध्यभावात् संख्याविशेषस्यार्थान्निमित्तत्वं वाच्यं कु-
लायादौ तु संख्याविशेषप्राप्तेर्गौरवलक्षणवाक्यभेदापत्तेश्च न विशि-
ष्टविधिः सम्भवतीत्याशयः। अथेत्यादिभाष्येण वाससाविति द्वि-
वचनवत् ज्योतिष्टोमेऽपि पत्न्याशयं द्विवचनं बहुवचनं वा भ-
विष्यतीत्याशङ्क्य वैषम्योक्त्यर्थमुच्यतइत्यादिभाष्यं व्याख्यास्यन्स्वयं
तावद्धर्मप्रजासम्पन्ने दारेषु नान्यं कुर्वीतेति दारान्तरनिषेधेनैक-
पत्नीकत्वनियमात्पत्न्याशयस्य द्वित्वस्य नित्यत्वेन निमित्तत्वं न स-
म्भवतीति परिहारमाह * पत्नीति * व्याचष्टे * बहुभ्य इति * ८८८।२
बहुशब्दस्यैकशेषत्वाभावान्मध्यप्रतीकेन बहुत्वयुक्तं वाक्यं गृहीत्वा
तुल्यन्यायत्वाच्च चकारेण द्वित्वयुक्तं वाक्यमन्वाचिख्यासिमन्वा-
क्यद्वये यो यजमानशब्दः स पुमान् स्त्रियेति लक्षणाद्विरूपैकशेषः
कल्प्येत सच पुंबहुत्वस्य पुंद्वित्वस्य वा सत्राहीनेषु विहितस्य द्विब-
हुवचनाभ्यां स्वरसात्प्रतीतेर्निष्प्रमाणक इत्येवं योज्यं निमित्तोपा-
दानानर्थक्यदोषोक्तिप्रसङ्गेनेह त्विति भाष्यावयवं व्याख्याया सम्भ-
वादिति भाष्यावयवं व्याचष्टे * क्षौमे इति * ब्राह्मणो ऽग्नीनाद-
धीतेत्युत्पत्तिशिष्टैकत्वविरोधिपुन्द्वित्वविध्ययोगात् क्षौमाख्यगुणवि-
धानार्थत्वेन च वाक्यार्थवत्त्वोपपत्तेः पुन्द्वित्वाप्राप्तिमगतिं हेतुं सूच-
यितुं गुणस्य तु विधानत्वात्पत्न्यां द्वितीयशब्दः प्रयुक्तः क्षौमवाक्ये
पुन्द्वित्वाविधानेऽप्यन्यत्र क्वचिद्विधिर्भविष्यतीत्याशङ्कानिरासार्थम्
* न हीत्युक्तम् * अपि चेतिभाष्यं व्याचष्टे * एकेति *
विकल्पनार्थवत्त्वमाशङ्क्य नित्यनैमित्तिकत्वेन विषमशिष्टत्वाद्विक-
ल्पायोगो ऽभिहितः। तस्मादिति सिद्धान्तोपसंहारभाष्ये त-
स्मादुक्तद्वये एवेति सिद्धान्तोपसंहारभाष्येण गतार्थमाशङ्क्या-
पिशब्देन युक्त्यन्तरोपसंहारार्थत्वं सूचयन् व्याचष्टे * तस्माद-
पीति * न चाहीनवदप्रकृतयज्ञसम्बन्धो ऽस्तीत्यादिवार्त्तिकेन
क्रत्वन्तरान्वयावेदकप्रमाणाभावाद्यजमानद्वित्वबहुत्वस्वरूपान्वये चा-
नर्थक्यापत्तेरुत्कर्षायोगमुक्तमनुभाषणापूर्वं द्वेधा परिहरति * यत्त्विति *

ज्योतिष्टोमस्य प्रतिपन्निमित्तभूतयजमानद्वित्वबहुत्वसंयोगाभावात्प्रतिपदोरुत्कर्षो ऽपि क्रत्वन्तराङ्गत्वे किं प्रमाणमित्याशङ्क्य द्विवचनान्तयजमानशब्दोपस्थापितस्य द्वियजमानकस्य 'यजेत्याहीनवच्छ्रुत्या बहुवचनान्तोपस्थापितस्य च बहुयजमानकस्य तादर्थ्यचतुर्थ्याप्राधान्याभिधानाच्छ्रुतिं प्रमाणं सूचयन्नधिकरणार्थमुपसंहरति * तस्मादिति *

॥ जाघन्या अनुत्कर्षाधिकरणम् ॥ १० ॥

जाघनी चैकदेशत्वात् ॥ २० ॥

जाघनीपत्नीसंयाजान्वयविधिर्दर्शपूर्णमासयोः पशौ वेति चिन्तायाः प्रकरणस्य पूर्वैः सविरोधाविरोधचिन्तात्वाभावेनासङ्गतिमाशङ्क्य निमित्तत्वेनोद्देशभूतयोर्द्वित्वबहुत्वयोः प्रकृतकर्मासंयोगात्तत्संयुक्तानां पत्नीसंयाजानामप्युत्कर्षं प्रसक्तमपवदितुं चिन्तैषेति विरोधाविरोधचिन्ताफलभूतोत्कर्षानुत्कर्षचिन्तात्वात्सङ्गतिमाह * उत्कर्षेति * जाघन्यास्तृतीययाङ्गत्वोक्तेः संस्कार्यत्वायोगेनोत्कर्षकत्वायोगादुत्कर्षशङ्कानुपपत्तेरधिकरणानारम्भमाशङ्क्य पश्ववयवत्वेन पशु विनोपादानाशक्तेरवयवत्वेनैव चोत्तरार्द्धादिवद्व्ययव्ययप्रयोजकत्वादङ्गत्वानुपपत्तेः प्रयाजशेषवत् तृतीयाभङ्गेन संस्कार्यत्वं न्यायाभासात्पुरुषबुद्धिप्रभवाच्छङ्कनइति परिहारसूचनार्था वृध्द्युक्तिः क्रियतइति वक्तुं प्रयुक्तस्य प्रत्ययस्यानुग्रहार्थं कस्मिंश्चिद्धातौ प्रयोज्ये नित्यायाः प्रतिपदः प्रकृतौ विहितायाः कुलायादिष्वप्यतिदेशात्प्राप्तिं प्रसङ्गाद्वारयितुं प्रतिपदन्तरविधिर्युक्तः जाघन्यास्तु प्रकृतावप्रस्तुतत्वान्न युक्तः संस्कारविधिरित्याशङ्क्य पत्नीसंयाजानां प्रकृतावारादुपकारित्वेन विहितानां प्रसङ्गात्पशावतिदेशप्राप्तानां जाघनीसंस्कारार्थत्वविधेर्युक्तत्वसूचनार्थं प्रसङ्गवाची प्रस्तौतिः प्रयुक्त । प्रश्नपूर्वं सन्देहहेतूक्त्यर्थं कथंगत्यादिभाष्यं व्याचष्टे * जाघन्येति * कीदृग्वचनव्यक्तिद्वयमित्यपेक्षित पत्नीसंयाजानां गुणत्वं जाघन्याः प्राधान्यमित्येका जाघन्या गुणत्वं पत्नीसंयाजानां प्राधान्यमिति द्वितीयेतिविवरणार्थं यदीत्याद्युक्तं सर्वपशुप्रकृतित्वादग्नीषोमीयगतेत्युक्तं संस्कार्यत्वोपपादनायोत्तराङ्गत्वात्पत्नीसंयाजानां तत्काले पशुकार्यस्य प्रधानस्य कृतत्वात्तदवयवभूताया जाघन्याः कृतार्थतोक्ता नेह पत्नीसयाजानामुत्कर्षानुत्कर्षचिन्ता किन्त्वस्य वाक्यस्यैतद्विधानमिति भाष्यस्थविधानशब्देनोक्तमिति सूचनार्था

विधानोक्तिः । किं तावदित्यादिभाष्योक्तं पूर्वपक्षं सङ्गृह्णाति * कि-
मिति * अचोदनादित्यस्य पूर्वाधिकरणाद्यसूत्रस्थस्य हनोर्जाघन्याः
पशुरहितयोर्दर्शपूर्णमासयोश्चोदयितुमशक्यत्वादित्येवमर्थाङ्गीकार-
णोत्कर्षहेतुतयानुषक्तस्य व्याख्यार्थेन जाघन्यामिति भाष्येण प्रति-
ज्ञाते सन्निपत्योपकारित्वे कथमिति प्रश्नाक्षिप्तयोर्हेतूक्त्यर्थमारादुप-
कारित्वमपेक्ष्य सन्निपत्योपकारित्वस्य पशुपुरोडाशाधिकरणन्याये-
नाभ्यर्हितत्वादित्युक्तम् । शब्दादितिभाष्ये शब्दोक्तेरेकपदोपादान-
लक्षणश्रुतिवाचित्वसूचनायान्यत्र चेत्युक्तम् । सौत्र हेतुमेकदेशश्चेति
भाष्यव्याख्यातं स्पष्टयितुमेकदेशेत्युक्ते विद्यमानैकदेशिसंयोगस्यैक-
देशद्रव्याप्रयोजकत्वहेतुतया वक्ष्यमाणस्य हेकदेश्यभावेनाभावादेक-
देशो प्रयोक्ष्यतइत्याशङ्क्य परप्रयुक्तश्रुतैकदेश्येकदेशग्रहणं सम्भव-
त्यन्यप्रयोजकता न युक्तेति सूचनार्थम् * तथा सति चेत्युक्तम् * ८८०,
अपकृष्येतेत्यहीनाधिकरणसिद्धान्तसूत्रावयवस्य द्वित्वबहुत्वयुक्तं
चेति चकारानुकृष्टस्येहापि जाघनी चेति चकारेणानुकृष्य पूर्वपक्ष-
प्रतिज्ञार्थत्वेन व्याख्यार्थं भाष्यस्थमुत्कर्षपदं व्याख्यातुमुत्कर्षोक्तिः ।
नन्वित्याशङ्कायाः परिहारे सत्यामित्यादावुच्यते शब्दस्योत्तरग्रन्थ-
शेषत्वभ्रमं निवर्त्तयितुमाह * सेति * एव सतीति भाष्यं पत्नीसं-
याजानां सन्निपत्योपकारित्वोक्तिप्रयोजनोक्त्यर्थत्वेन व्याचष्टे *
परं चेति * कर्मानुष्ठानं कथ्यते ऽनेनेति व्युत्पत्त्यानुष्ठानकथनार्थं परं
भाष्यमित्यर्थः । कस्मान्नोत्तरग्रन्थशेषतोच्यते शब्दस्येष्यत इत्याश-
ङ्क्याह * यदि पुनरिति * विहितत्वाभ्युपगमेन परिहारे दत्ते
पत्नीसंयाजान्यजतीति वाक्यान्तरेण विहितत्वे सति दर्शपूर्णमास-
योर्जाघन्यभावे ऽपि पत्नीसंयाजानुष्ठानापत्तेः पूर्वपक्षीष्टोत्कर्षासिद्धि-
प्रसङ्गादनिष्टापत्तिपरिचोदनाच्छायापतनयुक्तमेवेत्याशङ्क्योत्तरेत्युक्त-
म् । पशौ जाघनीप्रतिपादनार्थत्वे ऽपि दर्शपूर्णमासयोरारादुपका-
रित्वेनानुष्ठानविरोधाज्जाघनी त्वित्यादेर्नोत्तरत्वं सम्भवतीत्याशयः ।
अतः परिहारवाचिवचनत्वेनैवैवं सतीत्यादिग्रन्थजातं जाघनीवाक्ये-
न पत्नीसयाजसंस्कृता जाघनी कार्येति वचने सति वाक्यान्तराद्दर्श-
पूर्णमासयोः पत्नीसयाजानुष्ठाने ऽपि जाघनीवाक्यात्पत्नीसयाजेषु
जाघनी प्रतिपाद्यते तस्मात्पशौ हृदयादिनिष्पत्तिप्रयोजनत्वेन विश-
स्यमानं पशुमनुनिष्पन्नाया जाघन्याः प्रतिपत्तिरित्येवं योज्यमि-
त्युपसंहरति * तस्मादिति * जाघनीवाक्यस्य जाघनीसंस्कारा-
र्थतया पत्नीसंयाजविधायित्वे सति क्रत्वन्वयनिरपेक्षाणां जाघनी-
स्वरूपान्वये नैष्फल्यापत्तेः प्रतिपच्छब्दात्क्रतुगामित्वप्रतीतिवदनेनैव

वाक्येन जाघनीशब्दात्पश्वाख्यक्रतुगामित्वप्रतीतेरभ्युपगमनीयत्वात्प्रकरणगम्यदर्शपूर्णमासगामित्वबाधापत्त्या तत्राकरणप्राप्तेदर्शपूर्णमासयोः पत्नीसंयाजा इति भाष्यं न युज्येतेत्याशङ्कते * नन्विति * जाघनीवाक्यं विना पश्वाख्यक्रतुगामित्वासिद्धौ वाक्येन प्रकरणबाधाद्दर्शपूर्णमासयोः पत्नीसंयाजाकरणं प्राप्नुयादतिदेशात्तु तद्गामित्वप्रतीतिसम्भवं वाक्यस्य तत्राव्यापारादतिदेशेन चोपदेशात्मकप्रकरणबाधायोगात्प्रत्युतातिदेशेनात्मलाभार्थं प्रकरणगम्यदर्शपूर्णमासाङ्गत्वापेक्षणात्तत्राकरणाप्राप्तेन भाष्यविरोध इत्याशयेन परिहरति * प्राप्नुयादिति * उत्कर्षोक्तिस्तर्हि विरुद्ध्येतेत्याशङ्कते * तेन तर्हीति * वाक्योत्कर्षो ऽत्र विवक्षितो न विधेयोत्कर्ष इति परिहरति * सत्यमिति * पाठोत्कर्षशङ्कानिरासार्थं विकृताविति उक्तम् । जाघन्याः पश्वेकदेशत्वात्पशुं विनोपादानाशक्तेरङ्गत्वेन चोदयितुमशक्यत्वात्पशौ कृतार्थत्वात्प्रतिपाद्यत्वावगतेरुद्देश्यत्वाज्जाघनीवाक्यमपकृष्येतेत्येवं सूत्रं योज्यमित्याशयः ।

चोदना वा ऽपूर्वत्वात् ॥ २१ ॥

जाघनी वेति भाष्यं पूर्वाधिकरणाद्यसूत्रस्थानुषक्ता चोदनादितिशब्दोक्ताविधेयत्वनिरासार्थत्वेन वाशब्दव्याख्यार्थतयाभासमानं पूर्वपक्षसूत्रस्थचकारानुकृष्टापकृष्येतेतिशब्दोक्तोत्कर्षप्रतिज्ञानिरासाभावे पूर्वपक्षसिद्धान्तसूत्रयोरन्योन्यासङ्गत्यापत्तेः प्रथमान्तजाघनीशब्दपरेण तु चकारेण पञ्चम्यन्तभ्रान्तव्युत्पन्नाचोदनादिति शब्दानुकर्षणमङ्गीकृत्य ऽविधेयत्वपूर्वपक्षप्रतिज्ञानुपपत्तेरयुक्तमाशङ्क्य सौत्रेण वाशब्देनोत्कर्षप्रतिज्ञायां निरस्तायां तद्धेतुत्वेनाभिमतोद्देश्यत्वनिरासार्थत्वेन सौत्रचोदनाशब्दव्याख्यार्थतया व्याख्यातुमाह * नवेति * जाघनी संस्कार्या सत्युद्दिश्यमानत्वादुत्कर्षिका स्यात्सा तु तृतीयया पत्नीसंयाजाख्येषु यागेष्वङ्गत्वावगतेः संस्कार्यत्वाभावान्नोद्दिश्यते किं तूपादीयते ततश्चेह दर्शपूर्णमासयोरेवैतद्वाक्यं विधानाख्यं कार्यं कुर्वन्नोत्कृष्यतइति श्लोकार्थः । भाष्ये विधेयत्वोक्तेरुपादेयत्वसिद्ध्यर्थत्वसूचनायोपादीयतइत्युक्तम् । पत्नीसंयाजाङ्गत्वेनाज्यस्य विहितत्वाज्जाघनीविध्यानर्थक्यमाशङ्क्य विकल्पेनार्थवत्वसूचना * याज्यावदित्युक्तम् * विधेयत्वसिद्ध्यर्थत्वेनापूर्वत्वादिति हेतुव्याख्यार्थं कुत इत्यादिभाष्यं स्पष्टत्वादव्याख्याय पत्नीसंयाजा इति भाष्यं स्वरूपेण विहितानामपि जाघनीसंस्कारार्थत्वेन विधेयत्वोपपत्तेः सत्यं वि-

हिना इत्यादिपूर्वपक्षभाष्ये ऽभिहितत्वादयुक्तमाशङ्क्य तत्सन्निधेर्गुणार्थेन पुनः श्रुतिरित्यनेनापि न्यायेन जाघन्या विधेयत्वोक्त्यर्थत्वेन व्याख्यातुमाह * सर्वत्रैवेति * जाघनीवाक्यस्यैवंविधशब्दोक्तप्रत्यभिज्ञायमानधात्वर्थवत्त्वोक्त्यर्थतां भाष्यस्य वक्तुं ततश्चानन्तरविहितत्वान्मनसि विपरिवृत्तेरशक्यः पत्नीसंयाजानाम् * विधिरित्युक्तम् । ततश्चेति चकारार्थः । अनन्तरविहितस्यापि स्विष्टकृद्यागस्योत्तरार्धसंस्कारार्थत्वेन विधिवदेषामपि जाघनीसंस्कारार्थत्वेन विधिर्भविष्यतीति सत्यमित्यादिपूर्वपक्षभाष्योक्तपरिहारनिरासार्थं यद्यपि जाघनीसम्बन्धः पत्नीसंयाजानामविहितस्तथापि जाघन्याः प्राप्त्यभावेनोद्देश्यत्वायोगात्सम्बन्धिद्वयोद्देशं च विना सम्बन्धिनो ऽपि विधेयत्वापत्त्या गौरवापत्तेः प्राकाशावध्वर्यवे ददातीत्यादिवत्सम्बन्धविधौ तात्पर्यायोगादक्रियात्वेन जाघन्याः स्वातन्त्र्येण विध्ययोगे ऽपि पत्नीसंयाजोद्देशेन तत्सम्बन्धं नान्तरीयकमङ्गीकृत्य तस्या एव विधेयता युक्तेति जाघनीसम्बन्ध इत्यादिना लक्षणत्वेन चात्र पत्नीसंयाजा इत्यन्तेन भाष्येणोक्ते कथं तेषामुद्देश्यतावगम्यत इति कथमिति भाष्येण पृष्ट्वा पत्नीसंयाजानां जाघन्यन्वये विधेयत्वोपादेयत्वात्पत्न्यन्वये चानुवाद्यत्वप्राधान्योद्देश्यत्वाद्वैरूप्यापत्तेः विधेयत्वायोगादित्यभिधानार्थं पत्नीसम्बन्धादित्यादिभाष्यं दार्शपौर्णमासिकानां पत्नीसंयाजानां पशावतिदेशात्प्राप्तानां जाघन्यन्वयविधेः पूर्वपक्षिष्टत्वात्तेषां च पत्न्यन्वयस्य प्राप्तत्वेनाविधेयत्वाद्वैरूप्यानापत्तेरयुक्तमाशङ्क्य स्वरूपतो प्राप्तानामन्यान्वयविध्ययोगेन जाघन्यन्वयविधेः स्वरूपप्राप्त्यनुवादापेक्षत्वात्पशौ च प्राप्तानां दर्शपूर्णमासप्रकरणस्थेन वाक्येनाप्रत्यभिज्ञायमानत्वेनानुवादायोगादपूर्वस्य यागस्य जाघनीसंस्कारार्थत्वेन विधिः पूर्वपक्षिणां वाच्य इत्यापाद्य दूषणोक्त्यर्थतया व्याख्यास्यन्पूर्वपक्षीष्टं पक्षं दूषयितुमाह * न चेति * पाशुकपत्नीसंयाजानुवादसम्भवाभ्युपगमे ऽप्युद्देश्यत्वायोगाज्जाघन्या नोत्कर्षकत्वं सम्भवतीत्याह * न च जाघन्या इति * इहोपादीयत इति वार्त्तिकेन पाशुकत्वानपेक्षपत्नीसंयाजान्वये जाघन्याः संस्कार्यत्वे निरस्ते ऽपि पाशुकपत्नीसंयाजान्वये संस्कार्यत्वादुद्देश्यत्वं भविष्यतीत्याशङ्कापूर्वं निरस्यति * संस्कार्यत्वादिति * पशौ जाघन्याः कृतार्थत्वमतिक्रमकारणमाशङ्क्य कृतार्थत्वावेदकशेषादिशब्दाभावाशयेन निरस्यति * यदि चेति * पूर्वपक्षनिरासमुपसंहरति * तस्मादिति * पाशुकत्वानपेक्षपत्नीसंयाजान्वयपक्षे तु पत्नीसंयाजानां प्रकरणगम्यदर्शपूर्णमासाङ्गत्वविरोधापत्तेर्जाघनीसंस्का-

८९०।१ रार्थत्वायोगान्नोत्कर्षशङ्काप्यस्तीत्याह * न चेति * पत्नीसंयाजोक्त्या
ऽस्मिन्पक्षे पदार्थोत्कर्षः सूचितः । वाक्याज्जाघन्यङ्गत्वावगतेः प्रकर-
णबाधं शङ्कते * वाक्येति * अनुत्पन्नानां पत्नीसंयाजानां जाघन्यां
विनियोक्तुमशक्यत्वात्पत्नीसंयाजान्यजतीत्युत्पत्तिवाक्यापेक्षित्वे-
नार्थविप्रकर्षाद्वाक्यमपीदं न बलीय इति परिहरति * नेति * एत-
देव विवृणोति * यदि हीति * एवमपि तुल्यबलत्वापत्तेर्दौर्बल्यो-
क्तिरयुक्तेत्याशङ्क्य जाघनीफलालोचनाद्विप्रकर्षाधिक्यमाह * न
चेति * अतः पशौ दर्शपूर्णमासयोर्वा प्राप्तानां पत्नीसंयाजानां जा-
घनीसंस्कारार्थत्वविध्ययोगादपूर्वस्य यागस्य तादर्थ्यविधिः पूर्वपक्षि-
णा वाच्य इत्यापाद्य दूषणोक्तौ पत्नीसम्बन्धादिति भाष्यमित्येव व्या-
चष्टे * न चेहेति * भाष्ये च पत्नीसम्बन्धादित्यनेन वैरूप्ये सू-
चिते सर्वयागेषु सपत्नीकस्यैवाधिकारात्पत्नीकर्तृकत्वप्राप्त पत्नीशब्द-
स्य तदनुवादत्वेनाविधायकत्वाद्वैरूप्यानापत्तिमाशङ्क्यानर्थक्यापत्ते-
र्बहुपत्नीकर्तृकत्वस्य च नित्यमप्राप्तेर्देवपत्नीदेवत्यत्वनिमित्तपत्नीसं-
याजनामधेयावयवत्वप्रत्यभिज्ञानाच्च पत्नीशब्दस्य देवताभूतदेवपत्नी-
वाचित्वावगमने देवतारूपगुणविधायित्वावगमाद्वैरूप्यस्या ऽपरिहा-
र्यत्वसूचनार्थं नात्र यजमानपत्नीभिर्योगो ऽन्वीयते येन सर्वयागानां
पत्न्यन्वयप्राप्तेः पत्नीशब्दो ऽनुवादः स्यात्किं तु यस्य यागस्य देव-
पत्न्यो देवतात्वरूपेण साधनत्वेनोच्यन्ते तासां चापूर्वे यागे प्राप्तत्व-
भावेन विधेयत्वापत्तेरपरिहार्यं वैरूप्यमित्युक्तम् । एतद्भाष्यविव-
रणार्थत्वेनाथेत्यादिप्रश्नोत्तरभाष्यं व्याख्यातुमाह * तत्रेति * जा-
घन्याख्यद्रव्यपत्न्याख्यदेवताविशिष्टयागविध्युत्तरकालं यागकैम-
र्थ्याकाङ्क्षायां जाघनीप्रतिपादनार्थत्वावगमे ऽपि जाघन्युद्देशेनाविधा-
नाद्वैरूप्यपरिहारशङ्काया निराससूचनार्थत्वेन जाघन्या त्विति भा-
ष्यस्थ तुशब्दं व्याख्यातुमाह * अल्पार्थेति * पत्नीविशिष्टयागोद्देशेन
जाघनी विधियज्ञे विशिष्टानुवादलक्षणवाक्यभेदशङ्कानिरासार्थत्वे-
नास्ति त्विति भाष्यं व्याख्यातुं शङ्कापातनिकायै सिद्धान्त्यभिमतव-
चनव्यक्त्युपसंहारार्थं तस्मादिति भाष्यं पश्चात्पठितमपि तावद्व्या-
चष्टे * तस्मादिति * शङ्कानिरासार्थत्वेनास्ति त्विति भाष्यमिदानीं
व्याचष्टे * नन्विति * पत्नीसंयाजावान्तरप्रकरणात्पत्नीविशिष्ट-
त्वप्राप्तेः पत्नीशब्दानादरादित्यर्थः । अवान्तरप्रकरणाद्विशेषलाभं
दृष्टान्तेनोपपादयति * यथैवेति * यत्त्वित्यादिभाष्यं स्पष्टत्वाद-
व्याख्याय तस्मादिति सिद्धान्तोपसंहारभाष्यं व्याचष्टे * त-
स्मादिति *

एकदेश इति चेत् ॥ २२ ॥

पूर्वपक्षसूत्रोक्तोत्कर्षहेत्वनुभाषणार्थत्वेन सूत्रव्याख्यार्थमथेति
भाष्यं व्याचष्टे *अथ यदिति * एकदेशत्वस्याप्रयोजकत्वे हेतुताया
न्यायसिद्धत्वसूचनार्थं चतुर्थाधिकरणसूत्र एकमप्रयोजकमित्ये-
तत्सूत्रर्थ्याविपरिणताप्रयोजकपदानुषङ्गसहितं पठितम् * न प्रकृते-
रशास्त्रनिष्पत्तेरिति[1]) * सूत्रं परिहारार्थत्वेनावतारयति * तत्रेति*
नञं व्याख्यातुमाह * स नामेति * यद्यप्येकदेशो द्रव्यं यस्य ८९।१२
यागस्येति चतुर्थाधिकरणसूत्रस्थैकदेशद्रव्यशब्दार्थस्तथाप्येकदेशद्र-
व्यो ऽपि जाघनीशब्दो जाघन्या नाप्रयोजको नानुपादायक इत्येवं
नञं व्याख्यातुं गत्यर्थात् द्रवतेर्द्योतार्द्रव्यशब्दव्युत्पत्तिमङ्गीकृत्यैक-
देशो द्रव्यो गम्यः प्रतिपाद्यो यस्य शब्दस्येत्येकदेशद्रव्यशब्दार्थं
कृत्वा एकदेशवाची शब्दो ऽर्थस्यानुपादायको यस्य सम्बन्धि-
शब्दत्वात्प्रतिसम्बन्धिनं च विना सम्बन्ध्युपादानाशक्तेरन्यतः
सिद्धप्रतिसम्बन्धिसम्भवे च तदाक्षेपाशक्तेरन्यतः सिद्धत्वेन प्रकृ-
तस्य प्रतिसम्बन्धिनो ग्रहणं विनार्थो न ज्ञायते जाघनीशब्दस्य तु
जातिवाचित्वेन सम्बन्धिशब्दत्वाभावात्तदर्थभूताया जाघन्याः प-
शुयागाङ्गत्वेन सिद्धस्य पशोर्ग्रहणं विनाप्युपादातुं शक्यत्वान्ना-
नुपादेयत्वेनोत्कर्षकत्वमित्युक्तम। न प्रकृताविति भाष्ये प्रकृतौ दर्शपू-
र्णमासयोरित्यवयव दैक्षवैषम्योक्त्यर्थसौत्रप्रकृतिशब्दव्याख्यार्थत्वा-
दुत्कृष्यानेन विशसनादिप्रकारेण पशुतो निष्पन्नया जाघन्या पत्नी-
संयाजाः कार्या इत्यनेन रूपेण जाघनीशास्त्रेण नोच्यते किं त्ववि-
शिष्टा विधीयत इत्येवं भाष्यशेषं व्याख्यातुमाह * रूपं वेति *
यथा कथञ्चिच्छब्देन विशसनाद्युत्पत्तिप्रकारनियमाभावं येन केन
चिदित्यनेन च क्रयाद्युपादानप्रकारनियमाभावमुक्तमनोवासान्याये-
नोपपादयितु रूपं वेति सप्तमाधिकरणसिद्धान्तसूत्रं पठितम्। यदि
चेयं पृथग्भूता न प्रचरेत्ततः पशुं विना न शक्येतोपादातुं न त्वेदस्ती-
त्येवमर्थत्वेन सनिभाष्यं व्याख्यातुमाह * नचेति * पृथक्कवाक्य-
वयवशब्दः छागप्रकृतिकत्वनियमस्यापि चाभावाद्विशसनादिनि-
यमो दूरापास्त इत्याह * ननावश्यमिति * दैक्षे ऽपि तर्ह्यनियमः
स्यादित्याशङ्क्य वैषम्योक्त्यर्थसौत्रप्रकृतिशब्दव्याख्यार्थं प्रकृतौ दर्श-
पूर्णमासयोरिति भाष्यावयवमुत्कृष्टमिदानीं व्याख्यातुमाह * अ-
ग्नीषोमीये ऽपीति * पश्ववयवप्राप्तौ दर्शपूर्णमासयोर्दैक्षप्रकृतित्वा-

(१) इद सूत्र वार्त्तिकेत्याख्यातम्।

भावात्प्रकृत्युक्त्यानर्थक्यमाशङ्क्य कर्मव्युत्पत्त्या प्रकृतवाचित्वेन द-
र्शपूर्णमासोपलक्षणार्थतयोपपादयति * प्रकृतीति * भाष्ये च सप्त-
म्यर्थे षष्ठीव्याख्यार्थम् * प्रकृतावित्युक्तम् * तस्मादित्यधिकर-
णार्थोपसंहारभाष्यं संस्कार्यत्वाभावेनोत्कर्षेऽक्त्वा ऽयोगे ऽपि दार्श-
पौर्णमासिकेषु पत्नीसंयाजेष्वाज्यावरोधेन आधान्यनवकाशादुत्कर्षा-
पत्तेरयुक्तमाशङ्क्योपपादयन्व्याचष्टे * तस्मादिति *

सन्तर्दनस्य संस्थानिवेशाधिकरणम् ॥ ११ ॥

सन्तर्दनं प्रकृतौ क्रयणवदनर्थलोपात्स्यात् ॥ २४ ॥

दीर्घसोम इति सप्तमीश्रुत्या प्राधान्यानुक्तेरधिकरणत्वस्य च
सन्तर्दनं प्रति यागस्यायोगात्केन सहात्र प्रकरणस्य विरोधाविरोधचि-
न्तेत्यपेक्षायामाह * इहेति * ज्योतिष्टोमोक्त्या प्रकरणविरोधा-
विरोधचिन्तात्वसूचनपूर्वं हनू वा एते यज्ञस्य यदभिषवणे इति
चाभिषवणफलकयोः प्रक्रमोक्त्या सन्तर्दनीयत्वसूचनपूर्वं ज्योति-
ष्टोम इत्युदाहरणभाष्यं व्याचष्टे * ज्योतिष्टोम इति * सम्पूर्वस्य
तर्दतेरर्थं व्याचष्टे * भित्त्वेति * द्वयोः समीभूतयोः संश्लेषार्थं
संश्लेषप्रदेशौ भेदनेन तनूकृत्यैकस्योपर्यपरं स्थापयित्वा संश्लेषयेत्
इति यावत् । तत्रेति सन्देहभाष्यं कर्तृनो वेत्यादिपक्षान्तराण्यपि
वक्ष्यमाणत्वान्न्यूनमाशङ्क्याग्निष्टोमपक्षवत्कर्तृपक्षे ऽप्यविरोधाविशे-
षाद्भाष्यमतेन च संस्थापक्षे ऽप्यविशेषाद्विरोधस्य च सत्राहीनपक्ष-
वदग्निष्टोमान्यमात्रपक्षे ऽप्यविशेषाज्ज्योतिष्टोम एवेत्यनेनाग्निष्टोमक-
र्तृसंस्थापक्षाणामाहोस्विदित्यनेन च सत्राहीनाग्निष्टोमान्यमात्रप-
क्षयोः संग्रह इति सूचयितुमाह * तत्रेति * कियन्तो ऽत्र पक्षाः
९२।१ सम्भवन्तीत्यपेक्षायामाह * एते चेति * अग्निष्टोमसंस्थातो त्वर्थः
शुद्धशब्दः । सन्तर्दनं प्रकृतानर्थलोपादित्येतावत्सूत्रव्याख्यार्थमुच्य-
त इत्यादिभाष्यं व्याचष्टे * किमिति * दीर्घसोमशब्दार्थस्य दी-
र्घकालत्वस्य सोमयागत्वस्य च प्रकृतावग्निष्टोमे ऽप्यलोपादित्येवं
व्याख्यार्थं दीर्घेत्युक्ताग्निष्टोमोदाहरणाशङ्काभावेन दीर्घाख्यप्रयोजन-
लोपाद् धृत्यर्थत्वार्थवादायोगशङ्कानिरासार्थत्वेन व्याख्यार्थम् * स-
न्तर्दनेत्युक्तम् * क्रयणद्रव्याणां विकल्पदृष्टान्तत्वायोगसूचनार्थं
स्वयं दृष्टान्तान्तरमुक्तम् । अग्निष्टोमनिवेशप्रतिज्ञार्थत्वेनावृत्त्या प्र-
कृतिशब्दव्याख्यार्थं तस्मादिति भाष्यं व्याख्यातुमनुत्कर्ष इत्युक्ते क-
र्मव्युत्पत्त्येन प्रकृतिशब्देनाग्निष्टोमोक्तेः प्रकरणाख्यानुत्कर्षहेतुसूच-
नार्थत्वं सूचयितुम् * प्रकरणेत्युक्तम् * दीर्घसोमत्वस्याग्निष्टोमे

च्युपपत्तेर्वाक्यविरोधाभावे ऽप्यसन्नतर्दनाविरोधादुत्कर्षमाहेति भाष्येणाशङ्क्य तन्निरासार्थत्वेन क्रयणद्रव्यवद्विकल्पो भविष्यतीत्येवं क्रयणवच्छब्दव्याख्यार्थमुच्यतइत्यादिभाष्यं द्वादशे क्रयणेषु विकल्पः स्यादेकार्थत्वादितिसूत्रेण क्रयसाधनानां द्रव्याणां विकल्पं पूर्वपक्षयित्वा समुच्चयो वा प्रयोगे द्रव्यसमवायादित्यनेन समुच्चयो वा प्रयोगे द्रव्यसमवायादित्यनेन समुच्चयस्य सिद्धान्तयिष्यमाणत्वादयुक्तमाशङ्क्य तत्रत्यपूर्वपक्षाशयेनेन व्याख्येयमित्याह * क्रयणवदिति * पूर्वपक्षस्य स्थायित्वादत्र युक्ता दृष्टान्ततेत्याशङ्क्यानतिविशेषकरत्वात्क्रयप्रयोगे द्रव्याणां समुच्चयोपपत्तेरिति विकल्पापवादकस्य सिद्धान्तहेतोः सन्नर्दनासन्नर्दनयोरभावेन पूर्वपक्षन्यायस्याप्यनपोदितत्वाद्युक्ता दृष्टान्ततेत्याह * न चेति * यद्वा नायं विकल्पे दृष्टान्तः किं त्वनर्थलोप इति स्वयमन्यथा क्रयणवच्छब्दं व्याचष्टे * असन्नर्दनेति * कथमयं दृष्टान्तो नार्थलोपे योज्य इत्याशङ्क्याह * तत्रेति * अग्निष्टोमनिवेशपक्षमुपसंहरति * तस्मादिति *

उत्कर्षो वा ग्रहणाद्विशेषस्य २५ ॥

सूत्रव्याख्यार्थमुत्कृष्येत वेति भाष्यं व्याचष्टे । वाक्येति * अग्निष्टोमस्यापीष्ट्याद्यपेक्षया दीर्घत्वाद्दीर्घसोमशब्दसंयोगोपपत्तेः कथमुत्कर्ष इति प्रश्नोत्तरत्वेन ज्योतिष्टोमामिति भाष्यं व्याख्यातुमाह * कुत इति * सोमयागस्य दैर्घ्यमुक्तं न कर्ममात्रस्य तत्तु सोमयागान्तरापेक्षयैवेत्यर्थः । श्लोकं व्याचष्टे * नहीति * सोमयागान्तरस्याप्यनुपादानान्नापेक्षा युक्तेत्याशङ्कते * नन्विति * बुद्धिस्थत्वायोपादानापेक्षणात्सोमयागान्तरस्य चानुपादाने ऽपि सजातीयत्वाद् बुद्धिस्थत्वोपपत्तेर्युक्ता ऽऽपेक्षेति परिहरति * यद्यपीति * सोमशब्देन चोपादानं सामान्यतो ऽस्तीति परिहारान्तरमाह * विशेषणेति * एवं च सति ज्योतिष्टोमस्य दैर्घ्यायोगाद्दीर्घसोमशब्देनान्ये ऽनूद्यन्त इत्युपसंहरति * तत्रेति * भाष्ये सत्रशब्दस्यान्यमात्रोपलक्षणार्थतान्योक्त्या सूचिता । दैर्घ्यस्य विशेषणत्वं विरोधिव्यावृत्त्या विशेषणत्वप्रसिद्धेर्विरोधिह्रस्वत्वव्यावृत्त्या विशेषणत्वप्रसङ्गात्तद्द्विरात्रादिषु च सहस्रसंवत्सरात्प्राचीनेषु ह्रस्वत्वव्यावृत्तदैर्घ्याभावात्सहस्रसंवत्सरमात्रग्रहणापत्तेः सत्राणीति भाष्ये बहुवचनं न युज्येतेत्याशङ्क्याह * तेषां चेति * द्विरात्रादिस्थस्य दैर्घ्यस्य त्रिरात्राद्यपेक्षह्रस्वत्वाव्यावर्त्तकत्वे ऽपि दैर्घ्यबुद्धेर्ह्रस्वापेक्षत्वात्त्रिरात्रादेश्च द्विरात्राद्य- ८०.३।२

पेक्षया ह्रस्वत्वाभावेनानपेक्षणीयत्वाज्ज्योतिष्टोमवच्च निरतिशयत्वाभावेनान्यानपेक्षह्रस्वत्वायोगाज्ज्योतिष्टोम एवान्यानपेक्षह्रस्वत्वेन प्रथमं ह्रस्वतया बुद्धिस्थत्वादन्येषामपेक्षायाः कारणमालम्बनं विषयोऽपेक्षणीयस्ततश्च ज्योतिष्टोमापेक्षह्रस्वत्वव्यावृत्तस्य दैर्घ्यस्य द्विरात्रादिष्वपि भावाद् बहुवचनं युक्तमित्याशयः । अपेक्षणीयस्यापेक्षाकारयितृत्वाद्वा णिजन्तात्करोतेर्ल्युटि कृते व्युत्पत्त्येन कारणशब्देनोक्तिः । तच्छब्दसापेक्षत्वे ऽप्यपेक्षाशब्दस्य नित्यसापेक्षत्वात्समासाविघातः । सोमयागानां मध्ये ज्योतिष्टोमस्यैवान्यानपेक्षह्रस्वत्वेन प्रथमं प्रतियोगितया बुद्धिस्थस्यातिक्रमायोगादिति वा योज्यम् * कर्तृतो वा विशेषस्य तन्निमित्तत्वात् * नोत्कृष्येति भाष्येण वाशब्दं व्याख्यायानुत्कर्षे वाक्यविरोधपरिहारायोक्तस्य षष्ठीसमासत्वस्यानुपपत्तेर्यत्कर्तृकल्पनविक्षेपाद्दैर्घ्यस्य चानवस्थितत्वात्कर्मधारयापेक्षया च दौर्बल्यात् क्लिष्टस्यानुत्कर्षप्रमाणं विना कल्पनाशक्तेराद्यसूत्रस्थप्रकृतिशब्दसूचितप्रकरणाख्यप्रमाणाख्यप्रमाणोक्त्यर्थमेवमिति भाष्यं दुर्बलप्रमाणानुरोधेन दीर्घसोमश्रुतेः क्लिष्टकल्पनायोगादयुक्तमाशङ्काबाधपक्षसम्भवे बाधपक्षस्यायुक्तत्वादुपपादयितुमाह * यथा कथं चिदिति * दीर्घसोमसंयोगाख्यस्य विशेषस्य कर्तृद्वारत्वे काादाचित्कत्वात्सन्तर्दनं प्रति निमित्तत्वोपपत्तेः सन्तर्दनस्य नैमित्तिकत्वान्नित्यासन्तर्दनबाधेन ज्योतिष्टोमे निवेशोपपत्तिसूचनार्थं तन्निमित्तत्वादिति सूत्रावयवं नैमित्तिकत्वाभावे ऽपि विकल्पेन निवेशोपपत्तेरुक्तत्वेनातिशयमात्रार्थत्वादनादृत्य कर्तृतो विशेष इत्येतावत्सूत्रावयवव्याख्यार्थं दीर्घेति भाष्यं व्याख्यातुमाह * सचेति * स्वपत्याधिकरणे कर्मधारयाद्दौर्बल्यस्य वक्ष्यमाणत्वाच्छब्दासमासानुपपत्तेः कर्तृद्वारता न युक्तेत्याशङ्क्याह * नचेति * परविशेषणत्वस्य षष्ठ्यर्थलक्षणाया वा दौर्बल्यहेतोस्तत्र वक्ष्यमाणस्य प्रमाणबाधापत्त्यावनादरणीयत्वात्स्वरगतं पूर्वपरनिपातलक्षणं वा विशेषं विना षष्ठीसमासो ऽशक्यो निराकर्तुमित्याशयः ।

क्रतुतो वार्थवादानुपपत्तेः स्यात् ॥ २७ ॥

न चेति भाष्येण कर्तृपक्षनिरासार्थतया वा शब्दं व्याख्याय क्रतुत इति सूत्रावयवस्य पूर्वसूत्रस्थप्रथमान्तविपरिणतविशेषशब्दानुषङ्गेण क्रतुत एवायं विशेषो न कर्तृत इत्येवं व्याख्यार्थं क्रतुत इति भाष्यं व्याचष्टे * क्रतुत एवेति * कर्मधारयबलीयस्त्वोपपादनार्थत्वेनार्थवादेति सूत्रावयवं षष्ठीसमासे पूर्वपदेन

स्वप्रधानभूतार्थाभिधानायोगादित्येवं व्याख्यातुं क्रतुद्वारदीर्घसोमसंयोगाख्यविशेषोक्तः कर्मधारयप्रतिज्ञार्थत्वं सूचयितुमाह * समानाधिकरण्येति * स्वयं तावत्कर्मधारयबलीयस्त्वोपपादनार्थत्वेनार्थवादेत्यवयवं हेतुप्रश्नपूर्वं व्याचष्टे * किमिति * स्वयमेव क्रतुदैर्घ्यस्य निमित्तत्वे बहुसोमाभिषवाद्दारणशङ्कां निवर्तयितुं दार्ढ्याकाङ्क्षायां सन्तर्दनस्य दीर्घसाधनत्वाद् दृष्टार्थस्य विधानस्य सम्भवतः कर्तृदैर्घ्यनिमित्तपक्षे दारणानाशङ्कनेन दार्ढ्यानाकाङ्क्षणादनुपपत्तेरित्येवं क्रतुदैर्घ्यनिमित्तत्वोपपादनार्थत्वेन दीर्घसोमत्वाख्यस्य विशेषस्य क्रतुद्वारत्वोपपादनार्थत्वेन वा व्याचष्टे * एवं चेति * विशेषस्य कर्तृद्वारत्वे वाक्यशेषायोगादित्येवं हेतुप्रश्नपूर्वं व्याख्यार्थं कुत इत्यादिभाष्यं कर्मधारयबलीयस्त्वेनात्यन्तादृष्टार्थं नियमादृष्टार्थं नियमादृष्टार्थेन बाध्यतइति बाधग्रन्थोक्तेन च न्यायेन क्रतुद्वारत्वनिश्चयात्सन्देहाभावेन वाक्यशेषान्निर्णयोक्त्यनुपपत्तेरयुक्तमाशङ्क्य न्यायोपोद्बलनार्थत्वेन व्याख्यातुमाह * तथेति * क्रतुद्वा- ८९४।२
रत्वोपपादनस्य प्रकृतोपयोगमाह * तस्मादिति * मृदुदेशस्थापनेनापि दार्ढ्योपपत्तेर्दीर्घकाले ऽपि सोमयागे सन्तर्दननियमस्यादृष्टार्थत्वात्साम्यमाशङ्क्य * अत्यन्तमेवेत्युक्तम् * स्वसमवेतस्यैव वानुरञ्जकत्वाद्विशेषणत्वप्रसिद्धेः कर्तुश्च क्रतावसमवायाद्यदेतद्दीर्घेण कर्त्रा क्रतोर्विशेषणं तत्सन्तर्दनशेषितया प्रमित्सिते सोमयागरूपे ऽनन्तःपातित्वेन सम्बन्धद्वारतया व्यवहितत्वाद्बाह्यं यत्तु स्वसमवेतेन दैर्घ्येण विशेषणं तत्प्रमित्सितक्रतुरूपान्तःपातित्वेन सन्निकृष्टत्वादन्तरङ्गं तस्मादेतदेव ज्याय इत्याह * बाह्यं चेति * तस्मादिति सूत्रार्थोपसंहारभाष्यं व्याचष्टे * तस्मादिति *

संस्थाश्च कर्तृवद्धारणार्थाविशेषात् ॥ २८ ॥

कर्मधारयसम्भवे षष्ठीसमासायोगात्कर्तृद्वारदीर्घसोमत्वसम्भवाशोत्कर्षो युक्त इत्येवं शङ्कोत्तरत्वेन सूत्रव्याख्यार्थमिदमिति भाष्यं व्याचष्टे * परिचोदनापदेति * किमिति भाष्येण किं प्रकाराणि पदानीति पृष्ट्वा शङ्कापदप्रकारोक्त्यर्थमथेत्यादीत्यन्तं भाष्यं व्याचष्टे * मा नामेति * संस्थानां ज्योतिष्टोमेन सह प्रकरणतुल्यत्वस्य संस्थाधिकरणेन निराकरिष्यमाणत्वात्संस्थास्वपि निवेशे प्रकरणानुग्रहायोगमाशङ्क्याह * प्रकरणेति * वक्ष्यमाणानालोचनेन शङ्काया मन्दत्वादित्थं संस्थाधिकरणविरोधपरिहारानुपपत्तेरग्निष्टोमसंस्थाया निष्फलत्वेन प्रकरणायोगात्प्रकरणस्य ज्योतिष्टोमीयत्वा-

वगतेर्ज्योतिष्टोमस्य च संस्थाचतुष्टये ऽप्यनुवृत्तेर्ज्योतिष्टोमसमाप्तिविशेषरूपाणां फलवतां संस्थान्तराणां प्रकरणाविशेषस्य निराकर्तुमशक्यत्वात्प्रकरणाविशेषे ऽपि च नित्यानित्यसंयोगविरोधान्नित्याग्निष्टोमसंस्थज्योतिष्टोमगृहीतत्वेन नित्यानां धर्माणामनित्याभिः संस्थाभिः प्रकरणेनाग्रहणोपपत्तेः संस्थाधिकरणवक्ष्यमाणाऽसामानविध्या विरोध इत्यन्यथा परिहरति * अथ वेति * अग्निष्टोमसंस्थज्योतिष्टोमवाक्ये(ग्नि)ष्टोमशब्दः । तस्मात्संस्थास्वेव सन्तर्दननिवेश इति शङ्कामुपसंहरति * तस्मादिति * अभिपूयमाणसोमधारणे सन्तर्दनप्रयोजने ऽर्थवादोक्ते कर्तृदैर्घ्यइव संस्थास्वप्यविशेषेणार्थवादायोगसाम्याद्यथादीर्घः कर्ता न सन्तर्दननिमित्तं तथा संस्था अपीत्येवं सूत्रव्याख्यार्थमुच्यतइत्यादिभाष्य व्याचष्टे * इतीति * श्लोकं व्याचष्टे * सत्यपीति * सन्तर्दनाभावे ऽपि धृतिसिद्धेरितिकरणपरामृष्टं सन्तर्दनं धृत्यै वृथा धृत्यर्थं न भवतीत्येव धृत्या इति पदत्रयस्यावृत्त्या व्याख्या दृष्टार्थत्वोक्त्या सूचिता । उक्थ्यादिषु वार्थस्य विद्यमानत्वादिति सूत्रस्य सोमवृद्धिं विना प्रदेयवृद्ध्ययोगात्कारणं संस्थासु विशेषो ऽस्तीत्याशङ्काशयविवरणार्थत्वेन नवेत्यादिभाष्यं व्याख्यातुमाह * प्रदानेति * स्तोकसोमग्रहणात्सोमवृद्धिं विनापि प्रदानवृद्धिसम्भवशङ्कानिरासार्थं पूर्णं चेत्यादिभाष्यावयवं व्याख्यातुमन्यूनेत्युक्तम् । उपरि बिलाद् गृह्णातीति पूर्णग्रहणविधानान्न न्यूनग्रहण युक्तमित्याशयः । अनित्यत्वात्स्तुतिरर्थेति चेदिति) सूत्रस्य तोयवृद्ध्या प्रदानवृद्धिसम्भवान्मुष्टिवृद्ध्या पर्ववृद्ध्या वा सोमवृद्धिर्दशमुष्टित्रिपर्वनियमविरुद्धा न युक्तेति परिहाराशयविवरणार्थत्वेनेति चेदित्यादिभाष्यं व्याख्यातुमाह * नेति * परोत्तराशयविव-
८९५।२ रणोपसंहारार्थं तस्मादुत्कर्ष इति भाष्यं व्याचष्टे * तस्मादिति *

स्यादनित्यत्वात् ॥ २९ ॥

परिचोदनापदानामेव सिद्धान्तत्वोक्त्यर्थत्वेन सूत्रव्याख्यार्थं नैतदित्यादिभाष्यं व्याचष्टे * स्यादिति * प्रकरणानुग्रहादिति भाष्यावयवव्याख्यार्थम् तेनैवेत्युक्तम् । संस्थासु सन्तर्दननिवेश ऽप्यर्थवाद उपपन्न. स्यादित्येवमावृत्त्या स्याच्छब्दव्याख्यार्थमर्थाच्चेति भाष्यं व्याचष्टे * प्रदानेति * तोयवृद्ध्या प्रदानवृद्धिसम्भवशङ्कानिरासूचनार्थत्वेन भाष्यस्थां प्रदेयोक्तिं व्याख्यातुमाह * तोयेनेति * मुष्टिपर्वसंख्याविरोधात्सोमवृद्ध्ययोगं पूर्वपक्षोक्तं फलेति भाष्येणानु-

---

(१) इदं सूत्र भाष्ये व्याख्यातम् ।

भाष्यं पर्वदैर्घ्यात्सोमवृद्धिसंभवोक्त्यर्थत्वेनानित्यत्वादिति सूत्रावय-
वव्याख्यार्थं विप्रकृष्टेतिभाष्यं व्याचष्टे * स चेति । * तृतीयस- ८६५।२
वनेशोरकस्याभिषूयमाणस्यानेकपर्वणः स्थूलपर्वणश्च ग्रहणादपि प्र-
देयवृद्ध्युपपत्तेर्दीर्घपर्वत्वकल्पनायोगशंकां तस्यापि दशमुष्टेरेव सोमा-
दुपादानात्स्थौल्येऽपि प्रदेयवृद्ध्यसंभवान्नित्यविरोधेन च बहुपर्वत्व-
स्यासंभवान्निराकर्तुं स्थौल्येत्युक्तं । सप्तमीषष्ठ्योस्तंत्रेण द्विवचनं
योज्यं । पर्वदैर्घ्यं विधिं विना कथं गम्यत इत्याशंक्य प्रदानवृ-
द्धिमुष्टिपर्वसंख्यासंभवान्यथानुपपत्त्येति परिहारं सूचयितुमाह
* तथा सतीति । * सत्राहीनेषु संतर्दननिवेशे पर्वदैर्घ्यं विनापि
प्रदानवृद्धिमुष्टिपर्वसंख्यासंभवोपपत्तेर्नान्यथानुपपत्तिरस्तीत्याशंक्य
संस्थासु दीर्घसोमशब्दोपपत्तेर्वाक्याविरुद्धेन प्रकरणेन संस्थास्वेव
निवेशावगमान्नान्यथोपपत्तिरस्तीति परिहारं सूचयितुमाह * प्रक-
रणेति । * प्रकरणस्योपपत्तेरविरोधः । संस्थासु च निवेशे
सोमशब्दवाच्याया लतायाः स्वत एव दैर्घ्योपपत्तेः कालद्वार-
दैर्घ्यकल्पनायाः सोमशब्दस्य यागपरत्वकल्पनायाश्चाभावादांज-
स्येन दीर्घसोमशब्दोपपत्तिरित्याह * शक्यं चेति । * विप्रकृष्ट-
पर्वत्वस्यानित्यत्वादिति सूत्रावयवोक्तत्वोपपादनायोक्ते ऽर्थे सूत्रा-
वयवं योजयति * अनित्यत्वादिति । * दशमुष्टित्रिपर्वत्वनिय-
मेनाग्निष्टोमसंस्थायां नियतस्य सोमपरिमाणस्योक्थ्यादिसंस्था-
स्वप्यतिदेशप्राप्तस्य प्राकृतनियमाबाधे बाधायोगात्कथमनियतत्वा-
ख्यमनित्यत्वमित्याशंक्य दशमुष्टित्रिपर्वत्वानियमाबाधेऽपि दीर्घपर्वग्रह-
णाख्येनोपायांतरेणाग्निष्टोमसंस्थागतं परिमाणं बाधितुं शक्यमि-
त्याह * शक्यं हीति । * दीर्घसोमशब्दस्य दीर्घकालसोमयागवा-
चित्वेन संतर्दनविध्यपेक्षितांगिसमर्पणोपयोगसंभवे ऽनपेक्षितानिमित्त-
मात्रसमर्पणोपयोगापादकलतादैर्घ्यवाचित्वाभ्युपगमायोगाद्दीर्घकाल-
सोमयागमात्रवाचित्वावगतेः संस्थास्विव सत्राहीनेष्वपि संत-
र्दनविध्यवगमात्तेषु च केषांचिदहामग्निष्टोमसंस्थत्वेन प्रदान-
वृद्धिरहिततया प्रदेयवृद्ध्यै लतादैर्घ्यकल्पनायोगान्नेदं भाष्यकारी-
यमनित्यत्वोक्तिव्याख्यानं युक्तमित्येवं विप्रकृष्टेति भाष्यं दूषयति
* नन्विति । * सत्राहीनेष्वप्युक्थ्यादिसंस्थेष्वहस्सु प्रदानवृद्ध्य-
र्थप्रदेयवृद्धिसिद्ध्यै लतादैर्घ्यकल्पनसंभवेन पूर्वपरिमाणातिक्रमस-
संभवात्सामस्त्येन सवनमुखपरिसंभवोक्तिरुक्ता । यत्र प्रदेयवृद्धि-

रपेक्ष्यते तत्र लतादैर्घ्यकल्पनं भविष्यतीत्याशङ्क्य दशमुष्टयवशिष्टलताद्रवीकरणविधावशिष्टानां लतानामनियतपरिमाणत्वादतिरिक्तलताद्रवीकरणेन प्रदेयवृद्ध्युपपत्तेर्न कश्चिल्लतादैर्घ्यकल्पना युक्तेति परिहारं सूचयन्नवशिष्टलताभ्यूहपरिमाणस्यानित्यत्वादित्येवं सूत्रावयवं व्याचष्टे * अत इति । * यद्वा न प्रदेयवृद्धिप्रकारोपपादनायानित्यत्वोक्तिः किं तु स्यादिति सूत्रावयवेन प्रकरणानुग्रहात्संस्थासु संतर्दनं स्यादित्युक्ते संस्थानां प्रकरणाभावस्य संस्थाधिकरणे वक्ष्यमाणत्वात्संस्थास्वपि निवेशे प्रकरणाविरोधापत्तेस्तदनुग्रहो न संभवतीति ब्रुवाणस्य न संस्थानां प्रकरणाभावो वद्यते किं तु प्रकरणाविशेषे ऽपि नित्यानित्यसंयोगविरोधादसमानतेति सूचनार्थं धर्मांतराणां नित्याग्निष्टोमगृहीतत्वेन नित्यत्वादनित्याभिः संस्थाभिरग्रहण संतर्दनस्य तु नित्याग्निष्टोमागृहीतत्वेनानित्यत्वात्संस्थाभिर्ग्रहणमविरुद्धमित्युत्तरमनित्यत्वोक्त्योच्यतइत्येवं व्याख्येयमित्याह * संस्थाधिकरणेति * तृतीयसवे ऽभिषूयमाणैकांशुपरिमाणस्यानित्यत्वादित्येव व्याख्यांतरार्थम् * अपि चेति * अपिचेति भाष्यमेकस्याप्यंशोर्दशमुष्टेस्त्रिपर्वण एव सोमादुपादानात्प्रदेयवृद्धिकारणत्वानुपपत्तेर्दूषयति * तृतीयेति * विहितावशिष्टांशवभ्यूहपरिमाणानियमेनैव प्रदेयवृद्धिसिद्धेर्विप्रकृष्टपर्वत्वकल्पनानिरासे ऽवशिष्टांशवभ्यूहपरिमाणानित्यत्वाशयत्वेनानित्यत्वोक्तिव्याख्यया सूचितेपि प्रकरणविरोधशंकोत्तरत्वेनानित्यत्वोक्तिव्याख्यापक्षेन केन चिद्भाष्येणानित्यत्वोक्तिव्याख्यायते विप्रकृष्टेति भाष्यद्वयं तु विप्रकृष्टपर्वत्वात्तृतीयसवनेंशोरेकस्याभिषूयमाणस्यानेकस्थूलपर्वत्वात्प्रदेयस्य सोमस्य वृद्ध्याख्यो विशेषःस्यादित्येवं प्रदेयवृद्धिप्रकारोपपादनार्थत्वेनावृत्त्या स्याच्छब्दव्याख्यार्थमिति सूचनायैकस्मिन्नप्यंशौ विप्रकृष्टपर्वत्वमात्रं प्रदेयवृद्धिकारणं वाच्यं न त्वनेकस्थूलपर्वतेत्याह * अत इति * मात्रशब्देनैव कारणांतरनिरासासिद्धावपि कारणांतरनिरासमात्रे तात्पर्यं न तु विप्रकृष्टपर्वत्वस्य कारणत्वोक्ताविति सूचनायैवकारः । तस्मादिति सिद्धांतोपसंहारभाष्यं व्याचष्टे * तस्मादपीति * संस्थावत्सत्राहीनेष्वपि निवेश इति स्वाभिमतसिद्धांतसूचनायापिशब्दः । अनुत्कर्षप्रतिज्ञालोचनया प्रकरणानुग्रहोपपत्त्यालोचनया च संस्थामात्रनिवेशसिद्धांतावगतेः सत्राहीनेष्वपि निवेशसूचनार्थो ऽपिशब्दो न युक्त इत्याशंक्य संस्थामात्रनिवेशसिद्धांता-

योगं प्रतिजानाति * नत्विति * प्रश्नपूर्वमुपपादयति * कुत
इति * एष वाव प्रथमो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वाथा
न्येन यजेतगर्त्तपत्यमेव तज्जायते प्रावमीयत इति ज्योतिष्टोमात्प्राग्य-
दन्ययजनं तद्गर्तपतनतुल्यं तस्माद्योऽन्येन प्राग्यजेत सजरां मृत्युं वा
प्नोतीति निंदाकल्पप्राग्यजननिषेधद्वारज्योतिष्टोमोत्तरकालत्ववि-
धिवाक्ये य एतेनेत्यग्निष्टोमः प्रकरणादिति पञ्चमाधिकरणेनैतच्छब्द-
स्याग्निष्टोमसंस्थमात्रज्योतिष्टोमवाचितामुक्त्वाथान्येनेति संस्थानां
सन्निधानादित्यनेनान्यशब्दस्य सर्वनामत्वेन सन्निहितवाचित्वाद्या-
गांतराणां च संस्थाभिर्व्यवधानात्संस्थामात्रवाचित्वं पूर्वपक्षयित्वा
तत्प्रकृतेर्वापत्तिविहारौ न हि तुल्येषूपपद्येते इत्यनेनान्यशब्दस्यानं-
तर्याख्यसंनिध्यपेक्षायामुक्थ्यमात्रवाचित्वापत्तेस्तस्य च स्वशब्दे-
नोक्तिसंभवे संदेहापादकान्यशब्दानर्थक्यप्रसंगाद्बुद्धिस्थत्वाख्यसंनि-
ध्यपेक्षावगतज्योतिष्टोमप्रकृतिकत्वेन च सर्वेषां तद्विकाराणां बुद्धि-
स्थत्वाविशेषादग्निष्टोमान्यमात्रवाचितायाः सिद्धांतयिष्यमाणत्वा-
द्यथान्यशब्दोऽग्निष्टोमान्यमात्रेऽवकल्पते तथादीर्घसोमशब्दो पी-
त्यर्थः * श्लोकं व्याचष्टे यथैवेति * संस्थानां प्रकरणसद्भावा- ८९८।३
भ्युपगमेऽपि वाक्येनप्रकरणबाधात्सर्वधर्मतैव युक्तेति प्रौढिप्रदर्श-
नार्थं प्रकरणेनेत्युक्तं। वस्तुतस्तु प्रकृतिवच्छब्देन संस्थानां निराकां-
क्षीकृतत्वात्प्रकरणं नास्तीत्यथवास्त्वेव संस्थानां प्रकरणमिति पूर्व-
पक्षवार्त्तिकोक्तं प्रकरणाविशेषं निराकर्तुमाह * प्रकृतिवच्छब्दे-
ति कथं तर्हि दैक्षाद्यानां विकृतीनां प्रकरणेन पृषदाज्यादिग्रहण-
मित्याशंक्य पृषदाज्येनानुयाजान्यजतीति प्राकृतानुयाजानुवादेन पृष-
दाज्यविधानात् प्राकृतांगग्रहणवेलायामेव पृषदाज्यग्रहणप्रतीतेस्तद्दा-
र्ढ्यं च नैराकांक्ष्याभावात्प्रकरणेन पृषदाज्यं यथा गृहीतं तथा यदि
संस्थाभिर्गृहीतं किंचित्प्राकृतमंगमनूद्य संतर्दनं विधीयेत ततस्ताभिः
प्रकरणेन संतर्दनं गृह्येत न त्वेतदस्ति ज्योतिष्टोमधर्ममध्यपातित्वा-
त्संतर्दनस्येत्याह * नहीति * संस्थानामपि ज्योतिष्टोमांतःपाति-
त्वेन सन्निधानाविशेषात्फलवत्त्वाविशेषाच्च ज्योतिष्टोमस्यैव दीक्ष-
णीयादयो धर्मा न संस्थानामिति कथं गम्यतइत्याशंक्य नासौ
साध्यस्य भवंती साधनेन संबध्यतइत्यादिसंस्थाधिकरणभाष्यवक्ष्य-
माणन्यायसूचनार्थं प्रथमं ज्योतिष्टोमार्थतयोपदिश्यमानातोक्ता।
संस्थानां धर्माकांक्षासद्भावाभ्युपगमेऽपि संस्थावांतरप्रकरणे

संतर्दनापाठाच्च संतर्दनविधिवेलायां संस्थानां प्रकरणमस्तीत्याह * इतश्चेति * श्लोकं व्याचष्टे * यदि हीति * असंबद्धपदव्यवायेनैव प्रकरणवत्सन्निधानाख्यस्य स्थानस्यापि निवृत्तेस्तदपि न संस्थासु संतर्दनविनियोजकमिति स्थानंवेत्यनेन प्रसंगादुक्ते कथं तर्हि संस्थासु संतर्दननिवेश इति किं तर्हीत्यनेन पृष्टे वाक्यमेवेत्युक्तम् । दीर्घसोमशब्दस्य लतादैर्घ्यवाचित्वात्संस्थास्वेव च तार्तीयसवनिके सकृदभिषवे प्रदेयवृद्ध्यै लतादैर्घ्यापेक्षणात्प्रकरणमपि तास्वेव विनियोक्ष्यतीत्याशङ्क्याह * तच्चेति * दशमुष्टयवशिष्टलताभ्यूहपरिमाणानियमादतिरिक्तलताभ्यूहनेव प्रदेयवृद्धिसिद्धेर्लतादैर्घ्यानपेक्षणादपेक्षिताङ्गसमर्पणापर्यायत्वार्थे च दीर्घसोमशब्दस्य यागपरत्वावसायात्कर्मधारयेण च यागवाचित्वसंभवे दीर्घः सोमोऽस्मिन्नस्तीति बहुव्रीह्याश्रयणायोगाद्दीर्घकालसोमयागमात्रवाक्ययं शब्द इत्याशयः । सूत्राणि तु पदान्तरसूत्रेण संस्थास्वेवेत्यवधारणा निरस्योक्थ्यादिषु वेति सूत्रेणापिशब्दार्थे वाशब्दमङ्गीकृत्योक्थ्यादिषु चेति चकारयुक्तमेव वा पाठं कृत्वोक्थ्यशब्देन वा संस्थास्तत्रोऽक्थ्यादिशब्देन च सत्राण्यहीनांश्चोक्त्वा संस्थासु सत्राहीनेषु च दीर्घसोमशब्दार्थस्य दीर्घकालसोमयागत्वस्य विद्यमानत्वात्संतर्दनं स्यादिति द्वितीयपूर्वपक्षोक्तं सत्राहीनमात्रविषयतयोत्कर्षनिरासेनाग्निष्टोमान्यमात्रविषयतयोत्कर्षे सिद्धान्तिते संस्थासु प्रदेयस्य सोमस्य दशमुष्टित्रिपर्वत्वनियमेन वृद्ध्याख्यविशेषाभावान्निरालम्बनस्तुल्यापत्तरग्निष्टोमान्यमात्रविषयसिद्धान्तायोगमविशेषादिति सूत्रेणाशङ्क्यावशिष्टांशवभ्यूहपरिमाणस्यानियतत्वात्संस्थास्वपि प्रदेयस्य वृद्ध्याख्यो विशेषः स्यादित्यन्त्यसूत्रेण परिह्रियत इत्येव व्याख्येयानि सिद्धान्तसूत्रस्थमनुत्कर्षभाष्यं प्रकरणानुग्रहभाष्यं चोपेक्षणीयम् ॥ ६ ॥

प्रवर्ग्यनिषेधस्य प्रथमप्रयोगविषयत्वाधिकरणम् ॥ १२ ॥

संख्यायुक्तं क्रतोः प्रकरणात्स्यात् ॥ ३२ ॥

वाक्यप्रकरणविरोधाविरोधचिन्तात्मकत्वेनावान्तरप्रकरणसंगतिसूचनपूर्वं विषयोक्त्यर्थं ज्योतिष्टोम इति भाष्यं बह्वीषु शाखासु प्रवर्ग्यस्यानारभ्याधीतत्वेन ज्योतिष्टोमप्रकरणपाठाभावादयुक्तमाशङ्क्यानारभ्याधीतत्वेऽप्यव्यभिचारिक्रत्वन्वयाभिरूपसाङ्गवाक्यबलेनान्वयेन क्रत्वन्वय प्राप्तस्य प्रकृता वेतिन्यायेन ज्योतिष्टोमगमनात्सत्रत्वा

तावत्परमतेनोपपादयति * प्रवर्ग्य इति । * सर्वार्थत्वे द्विरुक्तत्वा
पत्तिं प्रकृते योजयितुं * तत्र हीत्युक्तम् । * एवं ज्योतिष्टोमगमने
ऽपि ज्योतिष्टोमप्रकरणे प्रवर्ग्यपाठाभावाद्भाष्यानुपपत्तिमाशङ्क्य
ज्योतिष्टोमे न्यायाद्भवतं प्रवर्ग्यमिति भाष्यार्थो न तु ज्योतिष्टोमे प्रकृ-
त्येत्येवं भाष्यव्याख्यां सूचयितुं * तेनेत्युक्त । * येन कारणेन ८९७।२
प्रवर्ग्यो ज्योतिष्टोमं गच्छति तेन कारणेन ज्योतिष्टोम इत्याह न तु
ज्योतिष्टोमे प्रकृतत्वेनेत्यर्थ । एव व्याख्यायां प्रवर्ग्यनिषेधस्य
ज्योतिष्टोमाङ्गत्वपूर्वपक्षोपयोगसंभवे ऽपि प्राकरणिकज्योतिष्टोमाङ्ग-
त्वाभावात्प्रकरणविरोधाविरोधचिंतात्मकत्वासिद्धेः सगत्यनुपयोग-
प्रसङ्गादेतद्याख्यानापरितोषेणर्जुवृत्त्यैव स्वमतेनोपपादयति * कौ-
षीतकीति । * मृदूक्त्यर्थस्तदाशब्दः । अस्मिन्पक्षे ज्योतिष्टोमप्रकरणे
प्रवर्ग्यं प्रकृत्येति व्याख्यासूचनार्थं तमित्यनेन ज्योतिष्टोमप्रकरणपञ्चो-
पसन्द्यः प्रागुत्पन्नमित्युक्त । द्वितीयतृतीयशब्दयोर्योगवाचित्वशङ्कानु-
पपत्तेः प्रयोगवाचित्वस्य निःसंदिग्धत्वात्तत्साहचर्येण प्रथमशब्द-
स्यापि प्रयोगवाचित्वावसायात्सिद्धान्तोपयोगित्वेन द्वितीयेत्यादि-
वाक्यशेषो भाष्ये पठितो न तूदाहरणत्वेनेति सूचनार्थं निषेधमात्रं
पठितम् । भाष्योक्तस्य संदेहस्य हेतुभूतं संदेहमाह * तत्रेति । *
थ एतेनेत्येतच्छब्दवत्प्रथमयज्ञशब्दस्यापि प्रकरणादग्निष्टोमसंस्थज्यो-
तिष्टोमवाचित्वावगतेरतिरात्रसंस्थज्योतिष्टोमप्रथमप्रयोगपक्षे निषेधा-
योगादतिरात्रसंस्थस्य प्रथमाहारे प्रतिषेध इत्यादिवक्ष्यमाणवार्तिकानु-
पपत्तिशङ्कानिरासायैतच्छब्दवदस्य सर्वनामत्वाभावेन प्रकृतवाचित्व-
नियमाभावात्प्रकरणानुरोधेनवश्रुतिसंकोचायोगात्सर्वसंस्थज्योतिष्टो-
मवाचितोक्त्यै भाष्यानारूढमपि सर्वसंस्थ इत्युक्तम् । किं तावदिति भा-
ष्येण पूर्वपक्षं प्रतिज्ञाय कुतइति हेतुं पृष्ट्वा वाक्यविरोधे प्रकरणव्यापा-
रात्सौत्रहेत्वपरितोषेण ज्योतिष्टोमाङ्गत्वप्रतिज्ञार्थस्य सौत्रस्य क्रतुश-
ब्दस्यैवावृत्त्या प्रथमशब्दस्य वाचकतया ज्योतिष्टोमाख्यक्रतुसंबंधि-
त्वादित्येवमर्थत्वमंगीकृत्य हेत्वर्थतयापि व्याख्यार्थं प्रथमशब्दस्य ज्यो-
तिष्टोमाख्ययज्ञवाचित्वं प्रथमेति भाष्यावयवेन प्रतिज्ञाय तदुपपादना-
र्थत्वेनापि क्रतुशब्दव्याख्यार्थं * यज्ञेत्युक्तं * तत्प्रथमयज्ञशब्दे प्रथम-
श्चासौ यज्ञश्चेति प्रथमशब्दस्य सामानाधिकरण्यलक्षणाद्यज्ञसंयोगा-
द्वेष वा वेति शक्यं वा प्रयोगलक्षणाज्ज्योतिष्टोमाख्ययज्ञसंयोगादि-
त्येवं द्वेधा व्याचष्टे * यज्ञशब्देति । * आद्यव्याख्यायामुद्भिदादि-

वत्सामानाधिकरण्यं नामत्वहेतुः द्वितीयस्यां वैदिकः प्रयोगः क्रतु-
शब्दोऽपि प्रथमशब्दस्य समानाधिकरणतया प्रयुज्यमानतया वा क्रतु
संबंधित्वादित्येव द्विधा योज्य ।प्रथमशब्दस्य ज्योतिष्टोमे प्रवृत्तिनिमि-
त्तोक्त्यर्थं तस्य हीत्यादिभाष्यं व्याचष्टे * य इति । * अन्वाचयत्वेन-
सौत्रहेतुव्याख्यार्थमेवं चेतिभाष्यं व्याचष्टे * तथा चेति । * एवं
चेत्यनेनैव ज्योतिष्टोमवाचित्वपरामर्शाद्यदीति भाष्यावयवानर्थक्य-
माशंक्य शंकान्तरत्वेन व्याख्यास्यंश्छंकां तावदाह * ननु चेति । *
एतच्छंङ्कोत्तरत्वेन यदीतिभाष्यावयवं व्याख्यातुमाह * कथ-
मिति । * वाक्येनैकप्रयोगविषयत्वकरणे ऽपि ज्यौतिष्टोमिकत्वार्थं
प्रकरणापेक्षणात्तदनुग्रहो भविष्यतीत्याशङ्क्याह * नहीति । * या-
गान्तरीयप्रथमप्रयोगविषयत्वेऽपिवाक्योपपत्तज्यौतिष्टोमिकत्वाश्रय-
णस्य वाक्यकृतता न युक्तेत्यांशक्याह * यदि हीति । * पारिशे-
ष्यानुगृहीताद्वाक्यादेव ज्यौतिष्टोमिकप्रथमप्रयोगविषयत्वसिद्धेः प्रक-
रणस्य न किंचित्कार्यमस्तीत्यवधारणाद्बाधः स्यादेवेत्यर्थः॥ प्रथमश-
ब्दोक्तसंख्यायुक्तं प्रवर्ग्यनिषेधनं ज्योतिष्टोमाख्यस्य क्रतोरङ्गं स्यादि-
त्येव सूत्रयोजनद्वारा पूर्वपक्षोपसंहारार्थं तस्मादिति भाष्यं प्रथम-
शब्दस्य संख्यावाचित्वाभावादयुक्तमाशङ्क्य संख्यावाचित्वाभावे
ऽप्यादित्ववाचित्वादादित्वस्य चैकत्वसंख्यापेक्षत्वाद्वित्वादिसंख्यानि-
बंधनद्वितीयत्वाद्यनपेक्षित्वादेकत्वसंख्यैकांतिकत्वाच्चगतेः संख्यावा-
चित्वोपचारेणयं संख्यावाचित्वोक्तिरित्युपपादन सूचयन् व्याचष्टे *
तस्मादिति ।* प्रकरणादपीत्येवं सौत्रहेतुव्याख्यासूचनायापिशब्दः॥

नैमित्तिकं वा कर्तृसंयोगाल्लिङ्गस्य तन्निमित्तत्वात् ॥२३॥

प्रथमशब्दस्यावर्तितक्रतुशब्दोक्तयज्ञवाचित्वव्यावृत्त्यर्थतया वाश-
ब्दव्याख्यार्थं नवेतिभाष्यं प्रवर्ग्यनिषेधस्य प्रथमप्रयोगनिमित्तत्व-
सिद्धान्तप्रतिज्ञार्थनैमित्तिकशब्दपरत्वाद्वाशब्दस्य पूर्वपक्षप्रतिज्ञार्थक्र-
तुशब्दोक्तसर्वप्रयोगस्थक्रत्वङ्गत्वव्यावृत्त्यर्थत्वप्रतीतेरयुक्तमाशङ्क्य हे-
तुव्यावृत्तिं विना पूर्वपक्षाव्यावृत्तेस्तद्व्यावृत्त्यर्थत्वेनाप्यावृत्त्या व्याख्या
८९८।२ युक्तेति सूचनपूर्वं यज्ञस्य प्रयोग इत्यन्तं भाष्यं व्याचष्टे * यदीति
अतःप्रयोगस्यैवप्रथमशब्दो वाद इत्यध्याहारेण भाष्यव्याख्यासूचनाय
* एषइत्युक्तं । * प्रथमशब्दस्य प्रयोगवाचित्वोपपादनार्थत्वेन
कर्त्राद्यप्रवर्त्तनाख्यकर्तृसंयोगनिमित्तत्वात्प्रथमशब्दस्य प्रयोग एव च

कर्तृसंयोगोपपत्तेरित्येवं कर्तृसंयोगादिति सूत्रावयवव्याख्यार्थं कर्मेत्यादिभाष्यं व्याचष्टे * प्रथमेति । * शब्दप्रवृत्तिनिमित्तत्वांकत्यर्थत्वेन पञ्चमीव्याख्यानायाभिधेयत्वोक्तिः । अप्रयुज्यमानावस्थस्य कर्मणः कर्त्रनपेक्षत्वात्स्वरूपेण कर्तृसंयोगानुपपत्तावप्येत एवाहिताग्नय इष्टप्रथमयज्ञा गृहपतिसप्तदशा दीक्षित्वा समां ऽप्याग्नीस्तन्मुखाः सत्राण्यासतइत्यादौ प्रथमशब्दाज्ज्योतिष्टोमप्रतीतेस्तत्स्वरूपमेव प्रथमशब्दप्रवृत्तौ निमित्तं भविष्यतीत्याशङ्कानिरासार्थं प्रयोग इति भाष्यं व्याचष्टे * तद्योगादिवेति । * कर्मस्वरूपनिमित्तसूत्रशब्दसन्निधिपठितस्य प्रथमशब्दस्य कर्मस्वरूपनिमित्तत्वप्रतीतेः कर्तृसंयोगशब्दोक्तकर्त्राद्यप्रवर्त्तननिमित्तता न युक्तेत्याशङ्क्य प्रथमप्रयोगस्थस्यैव ज्योतिष्टोमस्य तस्मादपि प्रथमशब्दात्प्रतीतेः कर्मस्वरूपनिमित्तता न युक्तेति परिहारं सूचयितुमाह * सापि चेति । * एतदेव प्रयोगानुसारेण द्रढयति * न हीति । * द्वितीयादिज्योतिष्टोमप्रयोगे प्रथमशब्दप्रयोगाभावात्कर्मवाचित्वाभावो निश्चीयतइत्याशयः । अयजमानस्येति षष्ठ्या ज्योतिष्टोमव्यतिरेकजनितत्वमङ्गीकृत्य प्रथम यजमानो ऽतिरात्रेण यजेतेति पक्षाश्रयणात्प्रथममग्निष्टोमसंस्थं ज्योतिष्टोमयागमकुर्वाणस्य यः पश्चादग्निष्टोमसंस्थो ज्योतिष्टोमस्तस्य लोके प्रथमयज्ञो नाम न भवतीति योज्यम् । एवमपि प्रथमयज्ञशब्दस्य प्रथमप्रयोगवाचित्वे यागांतरप्रथमप्रयोगस्यापि प्रवर्ग्यनिषेधनिमित्तत्वापत्तेः प्रथमप्रयोगस्थज्योतिष्टोमवाचितैवावसीयतइत्याशंकानिरासार्थं श्रुतिश्चेति भाष्य व्याख्यातुमाह * ततश्चेति । * विप्रकर्षो ऽप्येष वावेति वेदाश्रितत्वात् ।

> गौणं लाक्षणिकं वापि वाक्यभेदेन वा स्वयम् ।
> वेदो यमाश्रयत्यर्थं को नु तं प्रतिकूलयेत् ॥

इत्येतेन न्यायेनाश्रयणीय इत्याशंक्याह * तत्र चेति * क्रतुवाचिज्योतिष्टोमशब्दैकवाक्यत्वासिद्ध्यै तत्र लक्षणाऽऽश्रिता इह तु प्रयोगवाचित्वे ऽपि यज्ञशब्दसामानाधिकरण्यस्य लिङ्गस्येति सूत्रावयवेनोपपादयिष्यमाणत्वात्तद्दर्शने लक्षणाकल्पनानुपपत्तेः प्राथम्यनिमित्तत्वायोगो लक्षणाहेतुर्वाच्य इत्यापाद्य नत्विहेत्युक्तं लक्षणाश्रयणे ऽपि पूर्वपक्षाष्टग्निद्धयभावस्तत्प्रयोगस्थो ऽपि तावदित्यादिनोक्तः । श्रुतिश्चेति भाष्यनिरसनीया शङ्का येनाशयेनोत्तिष्ठति तं निरसितुमु-

पन्यस्यति * नन्विति * विधित्वे प्राप्त्यनपेक्षितत्वाद्यस्य कस्य चि-
त्प्रथमप्रयोगो निमित्तं स्यान्निषेधत्वेन तु प्राप्त्यपेक्षित्वाल्लौकिक-
व्यापाराद्यर्थेन च प्राप्त्यभावात्प्राप्तिसामर्थ्येन सोमयागप्राप्तस्तेष्वपि
मध्ये ऽनारभ्यवादन्यायेनैव वर्तत्यत्र च ज्योतिष्टोम एव प्रथमशब्द-
प्रयोगाद्य एतेनेति वा प्राथम्यविधायकाच्छब्दान्निमित्ताभावेनान्यत्र
निषेधाप्राप्तज्योतिष्टोमस्यैवाद्य प्रयोगमयं निषेधो गच्छतीत्येवं निर-
स्यति * प्राप्नुयादिति * प्राप्त्यभावान्निवर्त्तमान इति पाठे तु
लौकिकव्यापारेभ्य इत्यादीनां पञ्चम्यन्तत्वेनान्वयः । ज्योतिष्टोमस-
मानाधिकरणो ज्योतिष्टोमप्राथम्यविधायी वाशब्दो ज्योतिष्टोमप्रथ-
मशब्दः । ज्योतिष्टोममिति पाठे त्वनारभ्यवादन्यायेन ज्योतिष्टोमं
गच्छति प्रथमयज्ञ इति प्रथमशब्दाच्च तस्याद्य प्रयोगं गच्छती-
त्यर्थः । ज्योतिष्टोमिकप्रथमप्रयोगगामित्वे च निषेधस्य द्वितीयादि-
प्रयोगस्थस्य ज्योतिष्टोमस्य व्यक्त्यन्तरत्वेऽपि ज्योतिष्टोमत्वजात्यैक्या-
त्प्रत्यासत्तेस्तस्यैव द्वितीयादीन्प्रयोगानपेक्ष्य प्रथमशब्दोपपत्तेराज्यस्य
भवति यत्किंचित्प्रथमप्रयोगगामित्वे तु दर्शपूर्णमासादिद्वितीयप्रयो-
गानपेक्षणे ऽपि दूरस्थसोमयागान्तरद्वितीयादिप्रयोगापेक्षायां विप्र-
कर्षः स्यादित्याह * एवंचेति * अनेन च तुल्यन्यायतया प्रथमश-
ब्दस्य ज्योतिष्टोमवाचित्वे दूरस्थद्वितीयादियज्ञान्तरापेक्षायां विप्र-
कर्षः स्यादिति सूचना द्वितीयादीनपेक्ष्येति भाष्योक्तविशेषणफलं
दर्शितं भवति । प्रथमप्रयोगनिमित्तत्वसिद्धान्तप्रतिज्ञार्थनैमित्तिक-
पदव्याख्याद्वारा सिद्धान्तोपसंहारार्थं तस्मादितिभाष्यमथेति भाष्ये-
णैव वावेति वाक्ये प्रथमशब्दस्य ज्योतिष्टोमाख्यक्रतुसामानाधिकर-
ण्येन प्रयोगाक्रतुवाचित्वेत्येवमर्थत्वेन पूर्वपक्षसूत्रस्थक्रतुशब्दोक्तं हेतु-
मनुभाष्य लक्षणयेत्यनेन ज्योतिष्टोमसामानाधिकरण्याख्यस्य ज्यो-
तिष्टोमवाचित्वलिङ्गस्य प्रथमशब्दवाच्येन प्रयोगेण ज्योतिष्टोमलक्षणा-
निमित्तकत्वान्न क्रतुवाचित्वसाधकतेत्येवमर्थमङ्गीकृत्य यत्त्वित्यनेन-
च प्रथमयज्ञशब्दे यज्ञशब्दसामानाधिकरण्याक्रतुवाचित्वेत्येवमर्थ-
त्वेन क्रतुशब्दोक्तं हेतुमनुभाष्य तदपीत्यनेन यज्ञशब्दसामानाधि-
करण्याख्यस्य लिङ्गस्य भावव्युत्पत्त्या यज्ञशब्दस्य प्रयोगवाचित्वानि-
मित्तकत्वान्न क्रतुवाचित्वसाधकतेत्येवमर्थमङ्गीकृत्य लिङ्गस्येति सू-
त्रावयवेन परिहारे वक्ष्यमाण ऽपि प्रकरणादिति पूर्वपक्षहेत्वपरिहा-
रादयुक्तमाशङ्क्य प्रकरणबाधाशयत्वेन व्याचष्टे * तस्मादिति *

दीर्घसोमशब्दवत्प्रथमयज्ञशब्दस्याप्यपेक्षिताङ्गसमर्पणोपयोगसंभवे
नपेक्षितनिमित्तमात्रोपयोगस्यान्याय्यत्वात्प्रथमप्रयोगाङ्गस्य च निषे-
धस्य यदा प्रथमः प्रयोगस्तदैव प्रवृत्त्युक्त्यै नैमित्तिकत्वोक्त्युपपत्तेःसप्त-
म्या चांगित्वानभिधानाद्वाक्येनैव प्रकरणगम्यं सर्वप्रयोगस्थज्योति-
ष्टोमांगत्वं बाधित्वा प्रथमप्रयोगमात्रांगत्वावगतेः * वाक्येनेत्युक्तम् *
एवमप्युत्कर्षानभिधानाज्ज्योतिष्टोमप्रथमप्रयोगे न प्रवर्जितव्यमिति
सिद्धान्तोपसंहारार्थप्रतीतेस्तत्र चाग्निष्टोमे प्रवृणक्तीति विधिना
निषेधस्य बाधात्क्रत्वन्तरप्रथमप्रयोगविषयत्वावगतेरुपसंहारभाष्य-
माक्षिपति * तत्र त्विति । * विधेर्द्वितीयादिप्रयोगविषयत्वेनाविरो ८१६।१
धमाशङ्क्य यत्प्रवर्ग्यं प्रवृञ्जन्तीत्यनेनैव द्वितीयादिप्रयोगे विधिसिद्धेः
पुनः विध्यानर्थक्यप्रसङ्गादाद्यप्रयोगविषयतोक्ता । प्राप्त्यपेक्षत्वेऽपि
निषेधस्य पूर्वविधिनैव प्राप्तिसिद्धेः पुनर्विध्यनपेक्षत्वाच्च तेन बाध
संभवतीत्याशंक्य सावकाशतोक्ता। अग्निष्टोमसंस्थक्रत्वन्तरप्रथमप्रयोग
ऽप्यतिदेशप्राप्तेनाग्निष्टोमवाक्येन निषेधबाधापत्तेः प्राथम्यस्य च
क्रत्वन्तरेष्वभावाच्च निषेधस्य क्रत्वन्तरप्रथमप्रयोगगमनं युक्तमित्येव-
मेतद्व्यवस्थानुपपत्तेरग्निष्टोमप्रथमप्रयोगे निषेधबाधेऽप्यतिरात्रसंस्थ
ज्योतिष्टोमप्रथमप्रयोगविषयो निषेधो भविष्यतीत्यन्यथाव्यवस्था-
मभ्युपगम्य तद्विषयत्वेनोपसंहारभाष्यं परमतेन समाधातुमाह * त-
स्त्विति । * अग्निष्टोमशब्दस्याग्निष्टोमसंस्थज्योतिष्टोमवाचित्वात्कथ-
मग्निष्टोमस्य क्रत्वन्तरं विद्यमानतेत्याशङ्क्य श्रौतसंस्थावाचित्व-
त्यागेन लाक्षणिकज्योतिष्टोमवाचिता न युक्तेति परिहारसूचनार्थं
* संस्थारूपस्येत्युक्तम् । * आहारः प्रयोगः । य एतेनानिष्ट्वेत्यनेनच्छ-
ब्दस्याग्निष्टोमपरामर्शितायाः पञ्चमे वक्ष्यमाणत्वान्नातिरात्रस्य प्रथ-
मप्रयोगोऽस्तीत्याशङ्क्याह * विहितश्चेति । * अग्निष्टोमविधेर्निषेधे-
नानपेक्षितत्वादग्निष्टोमस्यापि चान्यत्र विद्यमानत्वोक्त्या सामान्यरू-
पत्वाभिधानान्निषेधबाधकत्वं न संभवतीत्याशङ्क्य पूर्वविधिनैव
सिद्धेः पुनर्विध्यानर्थक्यप्रसङ्गादाद्यप्रयोगविषयत्ववत्क्रत्वन्तरेष्वति-
देशप्राप्तेर्विध्यानर्थक्यप्रसङ्गेनैव ज्योतिष्टोमविषयत्वस्याप्यवगमाद्वि-
शेषविषयत्वेन बाधकत्वमुपपादयितुमाह * सोऽयमिति । * द्विती-
यादिप्रयोगेषु क्रत्वन्तरेषु चान्यतः प्राप्त्यालोचनया ज्यौतिष्टोमिकाद्य-
प्रयोगाख्यविशेषविषयत्वावगमेऽपि स्वाभाविकसामान्यविशेषविषय-
त्वालोचनया बाध्यबाधकभावप्रसिद्धेर्निषेधस्य चाग्निष्टोमातिरात्रा-

प्रयोगयोर्द्वयोरेव सामान्यरूपत्वाद्विधेस्तु बहुषु द्वितीयादिषु क्रत्व-
न्तरेषु च सामान्यरूपत्वाद्विधेर्बाधकता शङ्कितुमपि न शक्येत्येतामां
व्यवस्थां दूषयति * एतदपीति । * स्वमतेनातिरात्रप्रथमप्रयोगे
नित्यं न प्रवर्ग्योऽन्यत्राग्निष्टोमप्रयोगे विकल्पेनेत्येव भाष्यव्याख्य
सूचयितुमन्यथाऽव्यवस्थामाह * अत इति । निषेधत्वे ऽतिरात्रप्रथम
प्रयोगे ऽपि विकल्पस्यापरिहार्यत्वात्पर्युदासत्वनिरासार्थस्य चोद्य
तइत्यादेर्वक्ष्यमाणस्य वार्त्तिकस्याग्निष्टोमवाक्यातिरात्रप्रकृतिवच्छब्द
शेषत्वनिरासमात्रार्थत्वोपपत्तेरग्निष्टोमवाक्यस्य च प्रतिप्रसवार्थताया
वक्ष्यमाणत्वादतिरात्रप्रथमप्रयोगे ऽपि नित्यं पर्युदासो ऽग्निष्टोमप्रथ
मप्रयोगे त्वग्निष्टोमवाक्येन प्रतिप्रसूतत्वान्नञ्युक्तेन चानारभ्यवा
दप्राप्तस्य पर्युदासाद्विकल्प एवेत्येवं व्याख्येयम् । प्रतिषेधार्थि
यथाश्रुतां विहितोक्तिं चाप्राप्तविध्याशयां मत्वा पर्युदासेन संभव
द्विकल्पपरिहाराणां नञ्युक्तानां वाक्यानां पर्युदासत्वस्यापि द
वाक्यशेष. स्यादन्यार्थत्वाद्विकल्पस्य विधीनामेकदेशः स्यादिति
दशमाधिकरणसिद्धांतसूत्रेण वक्ष्यमाणत्वादस्य पर्युदासत्वावगतेरग्नि
ष्टोमवाक्यशेषत्वे च तस्य पर्युदासापेक्षितप्राप्तिसमर्पणमात्रे व्यापा
राभ्युपगमापत्तेरनारभ्यवादादेव च प्राप्तिसिद्धेरग्निष्टोमवाक्यानर्थ
क्यप्रसङ्गादनारभ्यवादशेषत्वावगमादनारभ्यवादस्य चाग्निष्टोमवा
क्याविहितप्रवर्ग्यायां प्रकृतावानर्थक्यापत्तेर्विकृत्यर्थत्वावगमादतिरा
त्रातिरिक्तायां च विकृतौ प्रथमप्रयोगाभावादनारभ्यवादशेषस्य पर्यु
दासस्यातिरात्रमात्रविषयत्वावगतेरग्निष्टोमवाक्यस्य पर्युदासानन्व-
यान्नित्यमेव चाग्निष्टोमे प्रवर्ग्यप्राप्तेर्विकल्पो न युक्त इत्याशंकते
* किंचित्पुनरिति । * अग्निष्टोमवाक्यादेव प्राप्तिसिद्धेरनारभ्य-
वादो ऽनर्थक इति विपरीतं कस्मान्न स्यादित्याशङ्क्य सामान्यविषय-
त्वेनानारभ्यवादस्य बहुविशेषव्यापित्वान्नैकस्मिन्विशेषे प्राप्तावप्यान-
र्थक्यापत्तिरिति परिहारसूचनार्थं * सामान्येत्युक्तं । * अग्निष्टोम-
वाक्यस्य प्रकृतावनारभ्यवादस्य च विकृतौ प्रापकत्वात्पर्युदा-
सस्योभयशेषत्वोपपत्तेरग्निष्टोमविधेर्निरपवादत्वायोगशङ्कां निराकर्तुं
* नचेत्युक्तम् * पर्युदासत्वे सिद्धान्त्यभिमते ऽपि विकृत्यर्थानारभ्य-
वादशेषत्वे ऽग्निष्टोमवाक्यशेषत्वे चाग्निष्टोमे विकल्पासिद्धेरग्निष्टो-
मवाक्यशेषत्वे चातिरात्रप्रथमप्रयोगे ऽप्यकरणासिद्ध्याधिक्यात्त-
न्निरासार्थं सिद्धान्तैकदेशी विकृत्यर्थानारभ्यवादशेषभूतपर्युदासत्वे

ऽग्निष्टोमविधेर्निरपवादत्वाद्विकल्पो न युज्येत शक्यं त्विहेत्यादिवा-
र्तिके वक्ष्यमाणेन तु न्यायेनानारभ्यवादस्य विकृत्यर्थत्वायोगादति-
रात्रे ऽतिदेशप्राप्तस्यानारभ्यवादस्य शेषो वाच्य इत्यापाद्यातिरा-
त्रकथंभावपूरणवेलायामपाठात्तत्प्रकृतिवच्छब्दप्राप्तानारभ्यवादशेष-
त्वानुपपत्तेर्दर्शपूर्णमासप्रकरणपठितस्य तौ न पशौ करोतीत्यस्य
पशुप्रकृतिवच्छब्दप्राप्ताज्यभागवाक्यशेषत्वायोगेन पर्युदासत्वायोगा-
न्निषेधत्वं यथा ऽपूर्वे चार्थवादः स्यादिति दशमाधिकरणेन सौम्ये
ऽध्वरइत्यस्य तौ न पशौ करोतीति निषेधशेषतयार्थवादत्वसिद्धौ
भाष्यकृता वक्ष्यते तत्तथा न प्रथमयज्ञइत्यस्यापि निषेधत्वाव-
गमाद्युक्तो विकल्प इत्येवं विकल्पायोगचोद्यं निराकर्तुमाह
* उच्यत इति । * दृष्टान्तत्वेनाग्निष्टोमवाक्यशेषत्वस्यानुपपन्नत्वं ६००।२
तावत् त्वयैवोक्तमित्युक्तम् । षष्ठ्यर्थे सप्तमी । अपिशब्देनानार-
भ्यवादसूचनात्ततो ऽनारभ्यवादस्यातिरात्रवाक्यावयवभूतस्य न
प्रथमयज्ञ इति शेषः स्याद्यद्यतिरात्रकथंभावपूरणवेलायां पठ्येत
संस्थानां त्वसमानविधानत्वेन ज्योतिष्टोमकथंभावपूरणवेलायास्त-
दीयत्वायोगान्नैतत्तदीयकथंभावपूरणवेलास्थत्वेन पठितं येनोपदे-
शतो ऽतिरात्रवाक्यावयवभूतस्यानारभ्यवादस्य न प्रथमयज्ञइत्ये-
तद्वाक्यं शेषः स्यादित्युक्ते ऽतिदेशतस्तर्ह्यतिरात्रप्रकृतिवच्छब्द-
प्राप्तस्यानारभ्यवादस्य शेषो भविष्यतीत्याशङ्क्यातिरात्रावान्तरप्रक-
रणे पाठाभावादसाधारणातिरात्रकथंभावपूरणवेलास्थत्वेनापि न
पठितः येनातिदेशतो ऽतिरात्रवाक्यावयवभूतस्यानारभ्यवादस्य
शेषः स्यादित्युक्ते ज्योतिष्टोमप्रकरणपठितस्याप्यतिरात्रप्रकृतिव-
च्छब्दप्राप्तानारभ्यवादशेषत्वं कस्मान्न भवतीत्याशङ्क्य व्यवहि-
तत्वेनैकवाक्यत्वायोगो न हीत्यनेनोक्तः । प्राकृतानामङ्गशास्त्रा-
णां विकृतौ स्वरूपेणातिदेशस्य दशमाद्ये निषेत्स्यमानत्वात्प्रकृ-
तिवच्छब्देनैवोपकारादिपरंपरयातिदेशावगतेरतिदेशप्राप्तानारभ्यवा-
दशेषत्ववादिना प्रथमप्रयोगप्रवर्ग्यवर्जं प्रकृतिवदतिरात्रेण यजेतेत्ये-
वमेकवाक्यता कल्प्येति मत्वा प्रकृतिवच्छब्दस्येत्युक्तम् । न प्रथ-
मयज्ञइत्यस्य पर्युदासत्वपक्षे विकृतिविषयत्वायोगोऽस्या कुपित-
श्चोदयिता निषेधत्वपक्षे ऽपि प्रकृतौ वा द्विरुक्तत्वादित्यनेन
न्यायेन विकृतिविषयत्वायोगात्प्रकृतिमात्रविषयत्वावगतेः प्रकृतौ
च वैकल्पिकत्वाद्विकृतावतिदेशप्राप्तस्यापि वैकल्पिकत्वापत्तेर्नाति-

रात्रप्रथमप्रयोगे निषेधस्य नित्यत्वं सिद्धांत्युक्तं समर्थितं भवतीत्येवमनिष्टापादनेनैकदेशिनमाक्षिपति * नन्विति । * पार्श्वस्थेऽतिरात्रे निषेधस्य नित्यत्वसिद्ध्यै पर्णतादेर्जुह्वाद्यंगत्वान्निरंगस्य च जुह्वादेरनुपकारित्वेनातिदेशायोगाद्विकृतौ जुह्वादिप्राप्त्यैव प्राप्तिसिद्धेरनाभ्यवादस्यानपेक्षितत्वाद्विकृतावनुपपत्तेः प्रकृतिमात्रविषयत्वं युक्तं निषेधस्य तु प्रवर्ग्यानंगत्वात्प्रवर्ग्यप्राप्तिमात्रात्प्राप्त्यसिद्धेरौपदेशिकनिषेधप्राप्तिसंभवे चातिदेशिकप्राप्त्यनपेक्षणाद्विकृतावपि निषेधोपदेशस्यापेक्षितत्वेनोपपत्तेर्निषेध्यस्य च प्रवर्ग्यस्योभयत्र प्राप्तेर्न प्रकृतिमात्रविषयता युक्तेत्याशयेनाक्षेपं परिहरन्ति * प्राप्नुयादिति । * यथा जुह्वादेः प्रकृतौ शीघ्रं प्राप्तेर्विकृतौ च विलम्बेन प्राप्तेस्तत्प्राप्त्यपेक्षस्य पर्णतादिविधेः प्रकृतिमात्रार्थत्वं जातं तथा प्रवर्ग्यस्यापि प्रकृतौ शीघ्रं विकृतौ विलंबेन प्राप्तेस्तत्प्राप्त्यपेक्षस्य निषेधस्य प्रकृतिमात्रार्थत्वं भविष्यतीत्याशंक्य जुह्वादेः पर्णतादिप्रतिप्राधान्यासिद्ध्यै क्रत्वपूर्वसाधनत्वापेक्षणात्प्रतिक्रतु चापूर्वभेदात्सकृत्प्राकृतवैकृतापूर्वसाधनीभूतजुह्वाद्युद्देशेन पर्णतादिविध्यनुपपत्तेः शीघ्रप्राप्तप्राकृतापूर्वसाधनीभूतजुह्वाद्युद्देशेन पर्णतादि विधाय कृतार्थस्य विधेर्विकृतौ व्यापाराभावो युक्तः निषेधस्य तु प्रवर्ग्यस्यापूर्वसाधनत्वानपेक्षणात्सकृद्यथाप्राप्तप्रवर्ग्यानुवादेन निषेधोपपत्तेः शीघ्रमंथरप्राप्त्यालोचना न युक्तेति वैषम्यसूचनार्थं * प्राप्तिमात्रेत्युक्तं । * निषेध्यस्य प्राप्तिमात्रं निषेधोऽपेक्षते तेनापूर्वसाधनतामित्यर्थः । एकदेश्यग्निष्टोमविकल्पायोगचोद्यनिरासमात्रं ममाभिप्रेतं न त्वतिरात्रे निषेधस्य नित्यत्वसमर्थनमपीति मत्वा प्रवर्ग्याननुष्ठानस्य प्रवर्ग्यानंगत्वे ऽपि क्रत्वंगत्वसद्भावात्सर्वांगेषु च युगपच्चोदकप्रवृत्तेर्विकृतावतिदेशतः प्रवर्ग्यप्राप्तिवेलायामेव पवर्ग्याननुष्ठानस्यापि प्राप्तत्वेन निषेधोपदेशस्याप्यनपेक्षणादनुपपत्तेरिह निषेधे ऽपि प्रकृतिमात्रवियत्वं वक्तुं शक्यमित्येव पार्श्वस्थनिरासेन चोदयन्नापादितं प्रकृतिमात्रविषयत्वमनुजानाति । * शक्यं त्विति । * इहापीत्यपिशब्दो ऽध्याहार्यः । प्रकृतौ प्राप्तिनिषेधयोर्द्वयोरप्यौपदेशिकत्वेन तुल्यबलतया वैकल्पिकत्वाद्विकृतौ त्वातिदेशिक्याः प्राप्तेरौपदेशिकेन निषेधेन नित्यं बाधाद् द्विरुक्तत्वानापत्तिं पार्श्वस्थः शंकते * ननु चेति । * प्राप्त्यपेक्षत्वान्निषेधस्य दुर्बलाया अपि प्राप्तेर्निषेधेनात्यतबाधायो-

गस्य दशमाधिकरणपूर्वपक्षसूत्रे वक्ष्यमाणत्वाद्विरुक्तत्वापत्तिं समाधत्ते * नैतदिति । * सूत्रार्थमुपपादयति * यस्येति । * अतश्च निषेधस्य प्रकृतिविकृतिविषयत्वाभ्युपगमे ऽप्यतिरात्रे निषेधनित्यत्वासिद्धेस्तदभ्युपगमो ऽनर्थक इत्येवं पार्श्वस्थनिरासमुपसंहरति । * अत इति । * एवं सति सिद्धान्त्यनिष्टविकल्पापत्तिशंकाया ननु प्रतिषेधो ऽपि सन्निहितवानिकृताया: कः परिहार इत्याशंक्य न प्रथमयज्ञ इत्यस्यातिरात्रवाक्यैकवाक्यभूतानारभ्यवादशेषत्वमात्रनिरासो ममाभिप्रेतो न पर्युदासत्वनिरासो येनातिरात्रे सिद्धान्त्यनिष्टो विकल्पः प्रसज्येतेति सूचयन्नेकदेश्यनिष्टापत्तिशंकां परिहर्तुमाह * तस्मादिति । * विकृतावपि निषेधोपदेशस्यानपेक्षितत्वेन द्विरुक्तत्वादुपदेशातिदेशयोश्च शीघ्रमन्थरत्वलक्षणप्राप्तिकालवैषम्याच्च प्रथमयज्ञइत्यस्य प्रकृतावेव व्यापारो न त्वतिरात्रे ऽतिदेशो नापदेशेन वा प्राप्तानारभ्यवादशेषतयेत्यता वदग्निष्टोमे विकल्पायोगचोद्यनिरासायाभिप्रेतं वरं निषेधत्वादतियात्रे विकल्पेन भवितव्यमित्यभ्युपेत्य वादमात्रेण प्रतिषेध एवायमिति प्रागुक्तं न तु निषेधताभिप्रेता येन विकल्पः स्यात्प्रकृतावेव त्वनारभ्यवादशेषभूतस्य पर्युदासस्यातिरात्रेतिदेशाप्राप्तेर्नित्यमकारणं सेत्स्यतीत्येवं वरमतिरात्रे विकल्पेन भवितव्यमित्यनुषङ्गेण योज्यम् ॥ चोदयितृकृताक्षेपपरिहर्तृपार्श्वस्थनिरासेन गतकोपश्चोदयिता ऽनिष्टापादनं त्वत्काएकदेशिनइत्यादिनान्वय. न प्रथमयज्ञ इत्यस्य यत्प्रवर्ग्यं प्रवृंजंतीत्यनारभ्यवादशेषत्वमभ्यनुज्ञायातिरात्रवाक्यैकवाक्यभूतानारभ्यवादशेषत्वाख्यविशेषमात्रनिरासात्प्रकृत्यर्थानारभ्यवादशेषत्वाभ्युपगमेनानारभ्यवादस्य च विकृत्यर्थतायां न प्रथमयज्ञइत्यस्यातिरात्रकथभावपूरणवेलायामपाठे ऽपि पर्युदसनीयप्रवर्ग्यप्रापकस्यानारभ्यवादस्य प्रकृतावव्यापारादग्निष्टोमवाक्यप्राप्तप्रवर्ग्यपर्युदासाभ्युपगमे चातिरात्रप्रथमप्रयोगे पर्युदासभावेन नित्यमनुष्ठानापत्तेर्निषेधत्वाभ्युपगमे चान्याय्यविकल्पापत्तेरतिरात्रवाक्यैकवाक्यभूतानारभ्यवादशेषत्वस्य निराकर्तुमशक्यत्वात्तन्निराकरणेनारभ्यवादस्य प्रकृत्यर्थत्वाभ्युपगमे सत्यग्निष्टोमवाक्येनैव प्रकृतौ प्रवर्ग्यविधिसिद्धेरनारभ्यवादस्यानर्थक्यप्रसंगाद्विकृत्यर्थत्वावगतेस्तच्छेषेण न प्रथमयज्ञइत्यनेनातिरात्रप्रथमप्रयोगे प्रवर्ग्यपर्युदासादतिरात्रे नित्यमप्रयोगो ऽग्निष्टोमे चापवादान्नित्यं प्रयोगः सेत्स्यतीत्याद्ययेनै-

कदेशिनश्चोद्यनिरासं दूषयितुमाह * न न्विति । * एकदेश्यानर्थ-
क्यदोषपरिहारं शङ्कते * नैव इति * प्रवर्ग्यस्यानारभ्योत्पन्नस्यापि
पर्णतादिवत्प्रकृतौ विनियोगसिद्धेर्व्यापाराभेदेनानर्थक्यपरिहारायो-
गाद्विकृत्यर्थत्वेवानारभ्यवादस्य युक्तेति चोदयिता स्वाशयं प्रकटयति
* अथ वेति * पर्णतादिवदुत्पत्तिवाक्ये प्रकृतिविशेषाव्यभिचा-
रिद्वारसंयोगाश्रुतेर्दर्शपूर्णमासादीनामपि च प्रकृतीनां भावादग्निष्टो-
माख्यप्रकृतिविशेषोपसंहारार्थत्वेनार्थवान्विनियोगे भविष्यतीत्येक-
६०।१।१ देशी शंकते * नत्विति * प्रवर्ग्योत्पत्तिवाक्ये प्रकृतिविशेषादव्यभि-
चारिद्वारसंयोगाश्रवणे ऽपि पुरस्तादुपसदां प्रवर्ग्येण चरंतीत्यनुष्ठा-
नस्थानवाक्ये ऽग्निष्टोमाव्यभिचार्युपसदाख्यद्वारसंयोगश्रुतेर्नोपसंहा-
राय विनियोगापेक्षेति चोदयिता परिहरति * न शक्यमिति * ना-
मदश्यं सामिधेन्याख्यद्वारसयुक्तमपि प्राकरणिकेन पांचदश्येन विकृ-
तिष्वप्यतिदेशप्राप्तेन द्वारावरोधात्क्रत्वन्वयासमर्थमिति कृत्वा पशुमि-
त्रविंदादिप्रकरणाधीतेन साप्तदश्यवाक्येनोपसंह्रियते यत्प्रवर्ग्यमि-
त्ययं त्वनारभ्यवादो ऽनन्यावरुद्धोपसद्द्वारतयोपसंहारमनपेक्ष्यैवा-
ग्निष्टोमाख्ययज्ञान्वये शक्तत्वेनोपसंहारानपेक्षत्वान्नोपसंहारमर्हती-
त्यर्थः ॥ अनारभ्यवादस्य विकृत्यर्थत्वमुपसंहरति * अतश्चेति *
अनारभ्यवादस्य विकृत्यर्थत्वे ऽपि न प्रथमयज्ञ इत्यस्यातिरात्रकथंभा-
वपूरणवेलायामपाठेनातिरात्रवाक्यैकवाक्यभूतानारभ्यवादशेषत्वा-
योगान्नातिरात्रप्रथमयोगे नित्यमप्रयोगो ऽग्निष्टोमे च नित्यं प्रयोगः
सेत्स्यतीत्याशंक्यानारभ्यवादस्य प्राकरणिकेनाग्निष्टोमवाक्येनोत्का-
लनात्प्रकृतावव्यापारे ऽप्यग्निष्टोमवाक्यालोचनात्प्राक्प्रकृतिं प्रविष्ट-
स्य शेषो भूत्वा ऽनारभ्यवादसहितः पर्युदासः पश्चादतिरात्रं गमि-
ष्यतीति परिहारं सूचयंश्चोदयिता स्वाभिप्रेतसिद्धिमुपसंहरति *
तथा सति चेति * केवलविधिस्पर्शोपपादनार्थं वाक्यद्वयशेषत्व-
निरासो न चैक एव शेष इति वार्त्तिकोक्तो न हीत्यनेन स्मारि-
तः । एकदेशी स्वाशयप्रकटनेनानारभ्यवादस्य विकृत्यर्थत्वं निर-
स्यति * एतावान्विति * प्रकृतौ प्रागुपसदः प्राप्नुवंति पश्चा-
द्विकृतावित्युपसत्प्राप्तिकालवैषम्यात्प्रकृतौ प्रागुपसत्प्राप्तेरुपसंहार-
वाक्याभावे ऽपि प्रवर्ग्यः प्रकृतिं गच्छेत्किमुताग्निष्टोमे प्रवृण
क्तीति विस्पष्टोपसंहारकवाक्यसद्भाव इत्युक्ते पुरस्तादुपसदामि-
त्यनेन क्रत्वन्वयाख्यसामान्यसंबंधादग्न्याम्नोपसंहारः संभवतीत्या-

शंक्य दर्शपूर्णमासप्रकरणपाठाच्चतुर्द्धाकरणस्यावगतक्रत्वन्वयस्या-प्याग्नेयं चतुर्द्धा करोतीत्यनेनोपसंहारदर्शनादविरोधमुक्त्वा प्रकृ-त्यर्थत्वे ऽनारभ्यवादस्यानर्थक्यशंकानिरासायोत्पत्त्यर्थत्वेनार्थवत्त्वं पूर्वोक्तं स्मारितं कौशीतकिब्राह्मणे ज्योतिष्टोमप्रकरणाधीतप्रवर्ग्यवा-क्यसमानार्थत्वात्तथाप्यनारभ्यवादस्य प्रकृत्यर्थतैवाभ्युपगन्तव्येत्याह * एवं चेति । * सिद्धान्तैकदेशिनाऽनारभ्यवादस्य विकृत्यर्थत्वनि-रासेन चोद्यवादिनि निरस्ते परमसिद्धांतीचोद्यवाद्युक्तं पर्युदास-त्वमेकदेश्युक्तं चानारभ्यवादस्य प्रकृत्यर्थत्वमभ्यनुज्ञायैवानारभ्य-वादाग्निष्टोमवाक्ययोर्द्वयोरुत्पत्तिविनियोगार्थत्वेनैकवाक्यत्वे वाक्य द्वयस्याप्यग्निष्टोमे प्रवृणक्तीत्येतन्मात्रार्थनिष्पत्तेर्न प्रथमयज्ञइत्यस्या-नारभ्यवादशेषत्वे ऽग्निष्टोमवाक्यशेषत्वे वा विशेषाभावादग्निष्टोम-वाक्यशेषत्वे ऽपि चाग्निष्टोमवाक्यानर्थक्यापत्तिलक्षणविरोधाभावा-द्वविनियुक्तोत्पन्नमात्रप्रवर्ग्यपर्युदासे व पर्युदसनीयस्य क्रत्वर्थत्वा-भावेन पर्युदासस्य क्रत्वर्थत्वानापत्तेरानर्थक्यप्रसंगाद्विनियुक्तपर्युदा-सत्वायाग्निष्टोमवाक्यशेषत्वापत्तेरग्निष्टोमे नित्यप्रकरणापत्त्या विक-ल्पासिद्धेरग्निष्टोमवाक्यस्यैकदेश्युक्तं विनियोगार्थत्वं दूषयति * यदि तर्हीति * किमर्थत्वेन तर्ह्यग्निष्टोमवाक्यं विकल्पसिद्ध्यै वर्णयितुमाह * अत इति । * विनियोगार्थत्वेनार्थवत्त्वोपपत्तौ विकल्पापादिका प्रतिप्रसवार्थता न युक्तेत्याशंक्य प्रकृत्यर्थाद् नारभ्यवादादेवाग्निष्टोमप्रवर्ग्योपसंहारसिद्धेश्चतुर्द्धाकरणवदनेकत्र प्राप्तस्यैकत्रोपसंहारप्रयोजनत्वायोगाद्विनियोगानर्थक्यसूचनायानन्य-प्रयोजनत्वोक्तिः । न प्रथमयज्ञइत्यस्य प्रतिषेधत्वे ऽतिरात्रे प्रति-प्रसवाभावे ऽप्यतः सर्वथाऽतिरात्रे विकल्पेन भवितव्यमिति वार्तिके स्वयमेव विकल्पस्योक्तत्वादग्निष्टोमे चानारभ्यवादविहितप्रतिषे-धादेव विकल्पसिद्धेः प्रतिप्रसवानर्थक्यप्रसंगात्पर्युदासत्वे तु नित्य-प्रकरणे प्राप्ते विकल्पसिद्ध्यै प्रतिप्रसवार्थत्वोपपत्तेरग्निष्टोमे च विक-ल्पे सत्यप्यतिरात्रे ऽतिदेशप्राप्तस्य पर्युदासस्य नित्यप्रकरणापादक-त्वेनार्थवत्त्वोपपत्तेः पर्युदस्तवाची प्रतिषिद्धशब्द. ॥ अकर्तव्यत्वोक्त्य-ानिषेधविषयीकृतस्य कर्त्तव्यत्वोक्तः प्रतिप्रसवत्वेन प्रसिद्धत्वात्प-र्युदासस्य चाकर्तव्यत्वोक्त्यर्थत्वलक्षणनिषेधत्वायोगस्य विधानामे-न्देशः स्यादिति दशमाधिकरणसिद्धांतसूत्राचार्यवचनोक्तत्वात्पर्युद-स्तस्य प्रवर्ग्यस्य प्रतिप्रसवो न युक्त इत्याशंक्यते * नन्विति । प्रतिषे-

श्रोक्ते[कर्त्तव्यत्वोक्त्यर्थलक्षणोयोभिधेयंयस्यास्तदङ्गावयवस्तत्त्वंतस्मा-
दित्यर्थः[1]]कर्त्तव्यत्वोक्त्यर्थत्वलक्षणार्थत्वान्नायं पर्युदासोकर्त्तव्यत्वोक्त्य
र्थ इति दशमे पर्युदासस्य विध्येकदेशत्वोक्त्योक्तमित्यर्थः । यद्यपि पर्यु-
दासस्यापि प्राप्तिमभ्यनुज्ञायैव प्रवृत्तेः शास्त्रीयायाश्च प्राप्तेरत्यन्तबा-
धायोगान्निषेधवदन्याय्यविकल्पापादकत्वेनायुक्तत्वमाशंक्य विधिना
कर्त्तव्यत्वोक्तेर्निषेधेन चाकर्त्तव्यत्वोक्तेः कर्त्तव्यत्वाकर्त्तव्यत्वयोश्च
विरुद्धत्वेनैकस्मिन्काले समावेशायोगाद्विकल्पापत्तिः पर्युदासस्य तु
पर्युदस्यमानव्यतिरिक्तार्थविषयतया विध्युपसंहारार्थत्वेन विध्यनुग्रा-
हित्वात्कर्त्तव्यत्वोक्त्यर्थविधिविरुद्धाकर्त्तव्यत्वोक्त्यर्थत्वानुपपत्तेर्नवि-
कल्पापत्तिरित्यभिधानार्थं पर्युदासस्याकर्त्तव्यत्वोक्त्यर्थत्वायोगो वि-
धिनामेकदेशः स्यादिति सूत्रावयवेनोक्तस्तथापि पर्युदस्यमानव्यति-
रिक्तार्थविषयत्वोक्ते पर्युदस्यमानवर्जनफलत्वात् फलतो कर्त्तव्यतो-
क्त्यर्थत्वावगतेरिह पर्युदासेन प्रथमप्रयोगे प्रवर्ग्यस्याकर्त्तव्यत्वानु-
क्तावनारभ्यवादेनैव प्रथमप्रयोगे ऽपि कर्त्तव्यत्वसिद्धेरग्निष्टोमवा-
क्यानर्थक्यप्रसङ्गात्तदर्थवत्त्वाय पर्युदासो ऽप्ययमकर्त्तव्यत्वोक्त्यर्थ
इति ब्रूम इति परिहरति * अग्निष्टोमेति । * पर्युदासापेक्षितप्रा-
प्तिसमर्पणार्थत्वेनाग्निष्टोमवाक्यार्थवत्त्वं भविष्यतीत्याशक्य न चासा-
वग्निष्टोमवाक्यस्य शेषो भवतीत्यादिवार्त्तिकेनाग्निष्टोमवाक्यैकवाक्य-
तया पर्युदासत्वायोगस्य दर्शितत्वान्नैवमर्थत्वं संभवतीत्याह * न
६०२।१ हीति । * अनारभ्यवादस्याग्निष्टोमव्यतिरिक्तविषत्वेन तच्छेषस्य-
पर्युदासस्याप्यग्निष्टोमव्यतिरिक्तविषयत्वाद्भिन्नविषयस्याग्निष्टोमवा-
क्यस्य तत्प्रतिप्रसवार्थता न युक्तेत्याशंक्याह * न चेति । * तेन
पर्युदासाग्निष्टोमवाक्ययोर्द्धयोरप्येकविषयत्वात्पर्युदस्तप्रतिप्रसवार्थं-
ता ऽग्निष्टोमवाक्यस्य युक्तेत्याशयः । पर्युदासाभ्युपगमे तस्य नित्य-
वर्जनफलत्वप्रसिद्धेरग्निष्टोमे तु विहितप्रतिषेधाद्विकल्प इति सि-
द्धांतवार्त्तिकोक्तो विकल्पो न युज्येतेत्याशंक्य पर्युदासत्वे ऽप्युभयोःप-
र्युदासप्रतिप्रसवयोःसामर्थ्याद्विकल्पसिद्धिमाह । * अतश्चेति । *
एतदेव प्रश्नपूर्वमुपपादयति * कुत इति । * पर्युदासत्वे सति
भाष्ये वार्त्तिके च प्रतिषेधोक्तिः किमर्थेत्याशंक्य प्रतिषेधवत्पर्यु-
दासस्याप्यस्य फलतो कर्त्तव्यत्वोक्त्यर्थत्वादौपचारिका प्रतिषेधो-
क्तिः प्रतिप्रसवोपपत्त्यर्थेति सूचयितुमाह * ततश्चेति । * यद्विक-

---

१ इति द्वितीयपुस्तके नास्ति ।

रूपभयेनान्यत्र पर्युदास आश्रीयते स विकल्पो ऽत्र पर्युदासे सत्यपि प्रतिप्रसवबलादापन्न इति कृत्वा प्रतिप्रसवस्याकर्त्तव्यत्वोक्तिं विनानुपपत्तेः प्रतिप्रसवासिद्ध्यै पर्युदासवृत्तेर्नञ्शब्दस्याकर्त्तव्यत्वोक्तौ तात्पर्याभावे ऽपि नञ्शब्दसामर्थ्यादकर्त्तव्यत्वप्रतीतेः प्रतिषेधोक्तिर्भाष्यकारादिभिराश्रितेत्यर्थः । मुख्यनिषेधस्यानभिमतत्वसूचनार्थं * वरमित्युक्तम् । * अग्निष्टोमप्रथमप्रयोगे विकल्पसिद्धिमुपसंहरति * तेनेति । * अयं च विकल्पो वाक्यान्तरेण विकल्पकारिणः प्रतिप्रसववाक्यस्य प्रकृष्टश्रोत्रियब्राह्मणकर्तृकाग्निष्टोमप्रथमप्रयोगाविषयतयोपसंहारात्तन्मात्रविषयः । अप्रकृष्टश्रोत्रियाणां ब्राह्मणानां प्रकृष्टश्रोत्रियाणामपि च क्षत्रियादीनां त्वग्निष्टोमप्रथमप्रयोगे पर्युदस्तत्वात्प्रतिप्रसवाभावाच्च नित्यं प्रवर्ग्याभाव इत्याह * अत्रापीति । * श्रोत्रियशब्दस्य च्छंदोऽध्येतृवाचित्वादनधीतवेदस्य च कर्मण्यप्रवृत्तेः श्रोत्रियत्वस्य विशेषणत्वायोगं शङ्कते * कथं पुनरिति । * अनुष्ठानान्यथानुपपत्तिप्राप्तश्रोत्रियत्वमात्रविशेषणफलत्वे वचनस्यानर्थक्यापत्तेर्विशेषणवचनसामर्थ्यात्पाठतो ऽर्थतश्चातिशयेन वेदज्ञानवाञ्छ्रोत्रियो गम्यतइति परिहरति * सत्यमिति । * प्रकर्षेण गतिर्ज्ञानं यस्येति बहुव्रीहिविग्रहः । अर्थज्ञत्वसूचनार्थं गतिशब्देन * ज्ञानमुक्तम् । * एतदेव दृष्टान्तेनोपपादयति * यथेति । * अध्यापयितृवाचिनोऽनूचानविशेषणस्य प्रयोजनमाह * अनूचानेति । * एवं सत्यतिरात्रे ऽप्यतिदेशात्प्रकृष्टश्रोत्रियब्राह्मणकर्तृकाद्यप्रयोगे विकल्पापत्तेरतिरात्रप्रथमाहारे नित्यं प्रतिषेध इति सिद्धान्तवार्त्तिकोक्तं नित्यमकरणं न युज्येतेत्याशङ्कते * तदिति । * अतिरात्रे न प्रथमयज्ञ इति पर्युदासेनातिदेशप्राप्तेन पर्युदासात्प्रतिप्रसवनिमित्ताग्निष्टोमसंस्थत्वाभावेन च प्रतिप्रसवानतिदेशान्नित्यमकरणमुपपादयति * तत्रेति । * अग्निष्टोमसंस्थत्वस्य प्रतिप्रसवनिमित्तत्वे ऽतिरात्राद्विकृत्यन्तरेष्वग्निष्टोमसंस्थेषु पर्युदासप्रतिप्रसवयोरतिदेशाद्विकल्पशङ्कां निराकर्तुमाह * विकृत्यन्तरेष्विति * पर्युदसनीयप्रथमप्रयोगायोगेन पर्युदासस्यैव तत्रायोगादित्याशयः । इष्टाग्निष्टोमसंस्थज्योतिष्टोमस्यैव विकृतिषु प्रवृत्तेरग्निष्टोमसंस्थासु विकृतिषु पर्युदसनीयप्रथमप्रयोगायोगात्पर्युदासायोगे ऽप्युक्थ्यादिसंस्थासु विकृतिषूक्थ्यादिसंस्थायाः प्रागनिष्टत्वेन सजातीयोक्थ्यादिसंस्थापेक्षया प्राथम्यसंभवात्पर्युदासातिदेशोपपत्ते. प्रतिप्रसवनिमित्ताग्निष्टोमसंस्थ-

त्वाभावाच्च प्रथमप्रयोगे ऽतिरात्रवन्नित्यमकरणापत्तेर्विकृत्यन्तरेष्वविशेषेण नित्यानुष्ठानोक्तिरयुक्तेत्याशङ्कते * नन्विति । * एतदपेक्षया प्रथमयज्ञइत्यविशेषितात्प्रथमशब्दात्सर्वप्रवर्ग्यान्वयार्हे सोमयागप्रयोगापेक्षप्राथम्यप्रतीतेस्तस्य च विकृत्यन्तरे कस्मिंश्चिद्योगात्पर्युदासातिदेशो न युक्त इत्याशयेन परिहरति * नैतदिति । * तत्र तु केषां चिदित्यादिवार्त्तिकोक्तस्याग्निष्टोमवाक्येन ज्योतिष्टोमाद्यप्रयोगविषयेण बाधान्निषेधस्य क्रत्वन्तराद्यप्रयोगविषयत्वप्रतीतेर्ज्योतिष्टोमप्रथमप्रयोगेन प्रवर्जितव्यमित्युपसंहारो न युक्त इत्युपसंहारभाष्याक्षेपस्य क्रत्वन्तरेषु प्रथमशब्दाप्रवृत्त्या निषेधाप्रवृत्तेर्निरासं सूचयन् ज्योतिष्टोमातिरात्रप्रथमप्रयोगे नित्यं न प्रवर्जितव्यं ज्योतिष्टोमाग्निष्टोमप्रथमप्रयोगे विकल्पेनेत्येवमर्थाङ्गीकरणेनोपसंहारसमर्थनमतिरात्रप्रथमाहारे नित्यं प्रतिषेध इत्यादिवार्त्तिकोक्तमनारभ्यवादस्य प्रकृत्यर्थतायां सिद्धायामित्यादिवार्त्तिकोपपादितमुपसंहरति *तस्मादिति । * आक्षेपवाद्युक्तक्रत्वन्तरप्रथमप्रयोगविषयत्वनिरासस्सूचननार्था केवलोक्तिः ।

पौष्णपेषस्य विकृतौ निवेशाधिकरणम् ॥ १३ ॥

पौष्णं पेषणं विकृतौ प्रतीयेताचोदनात्प्रकृतौ ३४ ।

तत्र संदेह इत्यादिभाष्येणापूर्वन्यायव्युत्पादनार्थत्वेन प्राकृत्या देवतायाः पूषशब्देनाचोदितत्वात्पूषान्वितं पेषणं प्रकृतौ न संभवतीत्येवं सूत्रं व्याख्यायाऽथ वेत्यादिना संदेहायोगेनापूर्वन्यायव्युत्पादनार्थत्वायोगादुत्तरचिन्तावतारार्थप्राप्त्यर्थत्वेन व्याख्याते श्रुतिप्रकरणविरोधे प्रकरणनिवेशे श्रुत्यर्थस्यात्यन्तबाधापत्तेः प्रकरणबाधेनोत्कर्षो युक्तः इह तु भागशब्दस्य सेव्यवाचित्वे देवतायाः सेवितृत्वायोगेन विकृतावपि पूषभागायोगाद्वाक्यानर्थक्यापत्तेः पूषशब्दस्य पूष्णो हस्ताभ्यामिति मंत्रे यजमानवाचित्वदर्शनाद्यजमानवाचित्वावगतेर्यजमानभागस्य च प्रकृतावपि सद्भावाद्विरोधानुपपत्तेर्देवतोद्देशेन त्याज्यद्रव्यवाचित्वस्य च देवतावाचिपूषशब्दसमभिव्याहारात्मकं वाक्यं विना ऽनवगतेः सन्निहितवाचिसर्वनामार्थबहुव्रीहिश्रुत्या वैश्वदेवीति तद्धितश्रुत्येव देवतान्वितद्रव्यप्रतीतावपि वाक्येनैव प्रकरणस्य विरोधावगमात्प्रकरणाबाधेनापि च पूषशब्दस्य गुणवृत्त्या प्राकृतदेवतावाचित्वाभ्युपगमेन वाक्योपपत्तौ

प्रकरणस्यात्यन्तबाधायोगात्कथं विकृत्यर्थत्वप्राप्तिरित्याशङ्क्याह * संतर्दनादीति । * पदार्थपूर्वकत्वाद्वाक्यार्थस्य पदार्थबाधे ९०३।४ वाक्यार्थबाधापत्तेर्यथा दीर्घसोमशब्दस्य कर्तृदैर्घ्यवाचित्वाभ्युपगमेन प्रथमशब्दस्य वा ज्योतिष्टोमवाचित्वाभ्युपगमेन वाक्यस्य प्रकरणाविरोधोपपत्तावपि मुख्यपदार्थबाधेन वाक्यार्थबाधापत्तेः संतर्दनवाक्येन प्रवर्ग्यनिषेधवाक्येन वा प्रकरणं बाधित तथात्रापि वाक्येन प्रकरणबाधात् विकृतिषु पूषदेवत्ये कर्मणि विहितं पेषणं निविशते चरुद्रव्यकास्वेव वेत्युत्तरचिन्तोक्तिप्रसक्त्यर्थं प्राप्यत इति [इत्यर्थ इत्यन्वयः१] कूलं पिपतिषतीतिवत्सना प्रत्यासत्तिवाचिना बुद्धिस्थत्वलक्षण [पंचमी२] प्रत्यासत्तिप्रसक्त्यभिधानाद्विवक्षाशब्देनाभिधानप्रसक्त्युक्ते[कर्मधारयात्प्रत्यासत्तिरूपाप्रसक्तिरित्यर्थः ३] रर्थः ।

पौष्णपेषस्य चरावेव निवेशाधिकरणम् १४ ॥

तत्सर्वार्थमविशेषात् ३५ ।

यथाभाष्यं स्पष्टार्थत्वात्पूर्वपक्षसूत्रस्य पाठमात्रं कृतम् ।

चरौ वार्थोक्तं पुरोडाशे ऽर्थविप्रतिषेधात्पशौ न स्यात् ३६ ।

चराविति भाष्येण चरौ वेति सूत्रावयवं चरावेवेत्यवधारणार्थवाशब्दयुक्तत्वेन सिद्धान्तप्रतिज्ञार्थतया व्याख्यायार्थप्राप्तत्वेन विध्ययोगात्पुरोडाशे न स्यादित्येवं हेतूक्त्यर्थत्वेनार्थोक्तं पुरोडाशे न स्यादिति सूत्रावयवव्याख्यार्थं पुरोडाशे तावदित्यादिभाष्यं सामर्थ्यप्राप्त्युक्त्यर्थतया भासमानमयुक्तमाशङ्क्योपकारप्राप्त्युक्त्यर्थतया व्याख्यातुमाह * यदीति । * उपदेशात्प्राप्तिसंभवे ऽतिदेशात्प्राप्तिरयुक्तेत्याशङ्क्य विकृतौ पेषणसाध्यपिष्टसिद्ध्याख्योपकाराप्राप्तौ तत्साधनत्वेन पेषणोपदेशायोगात्पिष्टसिद्ध्याख्योपकारप्राप्त्यै प्राक्प्रवृत्तेनातिदेशेनापर्थायप्रवृत्तित्वात्पेषणस्यापि प्राप्तेरुपदेशानर्थक्यसूचनार्थं पूर्वतरेत्युक्तम् । पुरोडाशे ऽर्थप्राप्तत्वे ऽपि पेषणस्यानुष्ठेयत्वान्न स्यादिति सूत्रावयवमयुक्तमाशङ्क्य पेषणोपदेशनिरासार्थत्वेन व्याख्यार्थस्तदर्थं तावदिति भाष्यावयवः । प्रधानाख्यार्थविरोधापत्तेः पशौ पेष-

१ इति द्वितीयपुस्तके नास्ति २ इति द्वितीयपुस्तके नास्ति ३ इति द्वितीयपुस्तके नास्ति ।

थोपदेशो न स्यादित्येवमर्थेनि सूत्रावयवव्याख्यार्थं पशौ चेत्याद्यव दास्यतइत्यन्तं भाष्यं तात्पर्यतो व्याचष्टे * पशौ चेति * नन्विति भा ष्येण हृदयादिशब्दानां स्थानविशेषस्थमांसविशेषवाचित्वात्पेषणे ऽपि च ताद्रूप्यानपायात्प्रधानवैगुण्यानापत्तिरित्याशङ्क्य हृदयत्वादिजा त्याख्याकारवाचित्वाज्जातेश्च संस्थानविशेषविशिष्टव्यक्त्याश्रयत्वेन पे षणादाश्रयभूतव्यक्तिनाशे सामान्यान्यपि चैतानि नश्यंत्याश्रयनाशात इत्यनेन नाशाद्वैगुण्यापत्त्युपपादनार्थं नेतीति भाष्यं व्याचष्टे * तद्धी ति । * स्वमतेन द्यवदान जुहोतीत्यस्य यागे द्यवदानोपसंहारकत्वा योगं मत्वा पशुत्वजातेरमूर्त्तत्वात्तद्यकेश्च विशसनेन नाशात्साधन त्वायोगे ऽपि हृदयादीनामवयवानामवदानोद्धरणे ऽपि पुरोडाशव त्प्रत्यभिज्ञायमानत्वेनानाशात्साधनत्वोपपत्तेर्हृदयत्वादिजातीयेन व्य क्तिविशेषेण प्रधानं साधयितव्यमित्युक्ता भाष्यकृन्मतेनोपसंहारकत्व मत्वा ततोवत्तेनावदानेनेत्युक्तम् । हृदयादेरप्यद्धृतावदानावस्थस्यैव साधनत्वान्न चेति पक्षद्वयसाधारणम् । यद्यपीत्याशङ्कापरिहारभाष्यं व्याचष्टे * पुनरिति । * आकारा हृदयादय इत्याकारशब्दवत्तदाकृ तिक इत्याकृतिशब्दस्यापि जातिवाचित्वशङ्का ऽऽकारोक्त्या निरस्ता। पारिणामिकस्यैव हृदयादेर्हृदयत्वादिजात्याश्रयत्वात्कृत्रिमाद्धृदयादे रवदाने ऽपि वैगुण्यापरिहारसूचनार्थत्वेन तथापीत्यपिशब्दं व्याख्यातुं * मृद्भवयादिवदित्युक्तम् । * उत्सादनदेशमोहे ऽपि को दोष इत्या- शङ्क्योत्सादनदेशादिति श्रुत्यर्थानिष्पत्त्याख्यं दोषमुक्तोत्कर्त्तनार्थत्वेनो- त्सादोक्तिव्याख्यानायोरक्तोक्तिः। तस्मादिति सिद्धान्तोपसंहारभाष्यं व्याचष्टे * तस्मादिति । * अदन्तकत्वहेतूक्त्या पेषणस्य भोजनार्हत्व- सिद्ध्यर्थत्वेन भोजनत्वोपचरितयागकालत्वावसायादवदानानन्तर्या- वसायात्तत्काले च न प्राप्तिर्विप्रतिषेधो वेति परिहारस्याविशेषादिति पूर्वपक्षसूत्रावयवेनादन्तकत्वहेतोः पशुपुरोडाशयोरप्यविशेषादित्येव- मर्थेन विवक्षितत्वात्सिद्धान्तोपसंहारो न युक्त इत्याशङ्कते * नन्विति। * स्वमतेनावदानातिरिक्तस्यापि पुरोडाशस्य हृदयादेश्च यागाङ्गत्वं मत्वा तच्छेषाश्चेत्युक्तम् । पेषणस्य भोजनार्हत्वसिद्ध्यर्थत्वेन भोजनत्वोपच- रितयागकालत्वद्योतनार्थतामदन्तकत्वहेतोः सूचयितुं * दास्यन्तइ- त्युक्तम् । * सिद्धान्तोपसंहारभाष्योपपादनार्थं प्राप्तिविप्रतिषेधपरि- हारशङ्कां दूषयितुमाह * उच्यतइति । * द्यवदानं जुहोतीत्यनेनावत्त- स्य होमविधानादवदानक्रियां च विनावत्तहोमाशक्तेरर्थाद्यवदा-

नक्रियाया प्राप्तेर्द्विर्हविषो ऽवद्यतीत्यस्य च द्विरभ्यासमात्रविध्यर्थत्वोपपत्तेरविधेयत्वेन पृथक्पदार्थत्वाभावस्य पंचमे मुष्टिकपालावदानाञ्जनाभ्यञ्जनवपनपावनेषु चैकेनेति सूत्रेणावदानोदाहरणे ह्यवदानमात्रेणानुसमयं पूर्वपक्षयित्वा सर्वाणि त्वैककर्म्यादेतेषां तद्गुणत्वादित्यनेन ह्यवदानादिना प्रदानान्तेनानुसमयं सिद्धान्तयितुमैककर्म्योक्त्या वक्ष्यमाणत्वान्मध्ये व्यवधानं न युक्तमित्यर्थः। हेत्वन्यथानुपपत्त्या न्यायानुपेतमपि व्यवधानमाश्रयिष्यतइत्याशङ्क्य हेतुमात्रमदन्तत्वमित्यनन्तराधिकरणसूत्रे हेतूक्तेः स्तुतिमात्रार्थत्वस्य वक्ष्यमाणत्वान्न यागकालत्वद्योतनार्थतास्तीत्याह*हेतुत्वन्निगदस्य चेति* तस्मात्फलीकरणानन्तरमेवेह पेषणस्य विधेयत्वान्न प्राप्तिविप्रतिषेधपरिहारः संभवतीत्युपसंहरति * तेनेति ।* वैरूप्यापत्तेरपि न सर्वत्र विधिर्युक्त इत्याह * उपनीतेति । * पुरोडाशसिद्ध्यर्थपिष्टा- ६०४।१
भ्यकार्यलोपाच्चरौ निवृत्तिः। पशुप्रकृतौ सायं दोहे विध्यभावेनातिदेशतो ऽप्राप्तिः पशौ चानुपदेशादत्यन्ताप्राप्तिः। एवमपि पुरोडाशमात्रविषयत्वे पशुमात्रविषयत्वे ऽपि वैकरूप्यसंभवात्कथं चरुमात्रविषयत्वावधारणेत्याशङ्क्याह * तत्रेति । * अत्यन्ताप्राप्तविधावदृष्टार्थत्वकल्पनागौरवापत्तेरनुवादे च वैयर्थ्यापत्तेर्नान्यविषयता युक्तेत्याशयः॥

चरावपीति चेत् ३७।

चरुशब्दस्यौदनवाचित्वादन्योन्यासंलग्नत्वलक्षणवैशद्ययुक्ततण्डुलनिष्पन्नस्य चान्नस्यौदनत्वप्रसिद्धेः पेषणे वैशद्याभावेनाचरुत्वापत्तेश्चरावपि पाकात्प्राक्पेषणे ऽर्थविप्रतिषेधप्रसंगस्य तुल्यत्वाद्धेतुवशेन न्यायं बाधित्वा यागकालत्वाभ्युपगमेन परिहारस्य च पशुपुरोडाशयोरपि साम्यात्पर्यनुयोगपरिहारसाम्येनैकस्यापर्यनुयोज्यत्वोक्त्यर्थत्वेन यथाभाष्यं स्पष्टत्वात्सूत्रस्य पाठमात्रं कृतम्।

न पक्तिनामत्वात् ३८।

ओदनशब्दस्यावस्रावितानवस्रावितयोस्तुल्यप्रयोगतया नवस्रावितपाकनिमित्तत्वायोगेन विशदश्रपणनिमित्तत्वावसायाच्चरौ वैशद्यानपेक्षायामनोदनत्वापत्तेरोदनो वा प्रयुक्तत्वादिति दशमाधि-

करणसिद्धान्तसूत्रे चरुशब्दस्यौदनवाचिता वक्ष्यमाणा विरुद्ध्येतस्या-शङ्क्यादितिमोदनेनेति वैशद्याख्यचरुविशेषविधिसूचनार्थे वाक्य-शेषे प्रयुक्तौदनशब्दवशेन चरुशब्दस्य स्थालीवाचित्वपूर्वपक्षनिवृत्त्यै तत्रौदनशब्दा नवस्त्राविनान्तरूष्मपक्वत्वमात्रवाचित्वे वा सूपशाकादे-ष्वपि चरुत्वापत्तेस्तन्निवृत्त्यै सूपादिव्यतिरिक्तत्वोपलक्षणार्थो न तु चरुशब्दस्यौदनवाचित्वोक्त्यर्थो ऽवस्त्रावितौदने चरुशब्दाप्रयोगादि-त्येवं विरोधपरिहारसूचनार्थं सत्यमित्यादिभाष्येण यद्यप्योदने चरु शब्दः प्रयुज्यते विशदतण्डुलनिष्पन्नमेव चान्नमोदनत्वेन प्रसिद्धं तथापि पिष्टैरपि तण्डुलैर्निष्पन्ने चरुशब्दप्रयोगाद्वैशद्यानपेक्षत्वावगतेः पिष्टवि-शदसाधारणसूपादिव्यतिरिक्तान्तरूष्मपक्वत्वाख्यचरुशब्दप्रवृत्तिनिमि-त्तोपपत्तेश्च पिष्टसिद्धे चरुशब्दस्य गौणत्वकल्पनायोगान्न वैशद्यापेक्षे-त्यस्मिन्नर्थे सूत्रयोजनपूर्वं नञर्थव्याख्यार्थं न चराविति भाष्यं व्याचष्टे *न चराविति।* हेतुप्रश्नोत्तरत्वेन पक्तिनामत्वादिति सूत्रावयवव्या-ख्यार्थं कथमित्यादिभाष्यमाशयतो व्याचष्टे*कथमिति।* पिष्टौदन इति भाष्यावयवं पिष्टविशदसाधारणौदनमात्रवाची चरुशब्दो न तु विशद-लक्षणौदनविशेषवाचीत्येवमर्थत्वेनाभासमानं पिष्टतण्डुलनिष्पन्ने ऽन्ने क्वचिदुपचारादोदनशब्दप्रयोगादर्शनादवस्त्राविते च विशदतण्डुलनिष्प-न्नौदने ऽपि चरुशब्दाप्रयोगादयुक्तमाशङ्क्य पिष्टतण्डुलनिष्पन्ने ऽन्ने क्व चिदुपचारादोदनव्यपदेश्ये मुख्ये चौदने विशदतण्डुलनिष्पन्नान्नलक्षणे चरुरिति प्रयोक्तारो भवन्तीत्येवं भाष्यव्याख्यां सूचयंछ्लोकं व्याचष्टे *ओदनेति*अनवस्त्रावितपाकेनेति भाष्ये नवस्त्रावि नविशेषणेनावस्त्रावि-तौदननिवृत्तावप्यन्तरूष्मविशेषणमपि मण्डकादिनिवृत्त्यै विवक्षितमि-ति सूचनार्थं पिष्टौदनयोरनवस्त्रावितान्तरूष्मपक्वत्वं सामान्यमित्यु-क्तम् । सूत्रार्थमुपसंहरति *तस्मादिति ।* पक्षोक्तमिति भाष्यं प्रयोजनाभावचोद्यस्य प्रयोजनसंदेहस्य वा पक्षोक्तत्वोक्तिव्यावर्त्य-स्याभावादयुक्तमित्याशङ्क्य*पक्षोक्तमिति*पुरोडाशे पक्षद्वयेपि पेषणा-सद्भावाच्चिन्ताप्रयोजनाभावमाशङ्क्य चिन्ताया पशुपुरोडाशयोरविशेषे सत्यपि न पेषणस्य पुरोडाशार्थत्वं निवर्त्यत्वेन चिन्ताप्रयोजनं किं तु पश्वर्थत्वं निवर्त्यत्वेन प्रयोजनमित्येवं प्रयोजनसमाध्यर्थत्वेन भा-ष्यमुपपादयितुमाह * एतावान्वेति । * पुरोडाशे ऽप्यवदानानन्तरम-प्राप्तमदृष्टार्थं पेषणं पूर्वपक्षे सिद्धान्ते तु तन्नास्तीति विशेषसूच-नायापिशब्दः ।

पौष्णपेषणस्यैकदेवत्ये निवेशाधिकरणम् ॥१५॥

एकस्मिन्नेकसंयोगात् ३९ ।

पौष्णमित्यादिभाष्येण प्रासङ्गिकसङ्गत्युक्तिपूर्वं संदेहमुक्त्वा सौमापौष्णे विधितोऽर्द्धपेषणनिश्चयादुदाहरणाभाव किं द्विदवत्य इति भाष्येणाशङ्क्य राजसूयइत्यनेनैन्द्रापौष्णस्योदाहरणत्वमुक्त्वैकस्मिन्नेव पूष्णि देवतायां पेषणं न सद्वितीय इति सिद्धान्तोक्त्यर्थत्वेन सूत्रव्याख्यार्थं किमिति भाष्य देवताभागधर्मत्वं विना सर्वपेषणे धर्मविप्रतिषेधसूत्रोक्तभागसंकरासिद्धेर्दैवताभागधर्मत्वाभ्युपगमेन पदसाध्यावगस्यनिरपेक्षपूपसंयोगधर्मविप्रतिषेधाभ्यां सिद्धान्तोक्त्यर्थत्वावगमात्तयोश्चापि वेति पूर्वपक्षसूत्रवक्ष्यमाणन्यायेन सुपरिहरत्वादयुक्तमाशङ्क्योपक्रममात्रार्थतयोपपादयितुं सर्वं भाष्यं संक्षिप्य व्याचष्टे * इदानीमिति । * उपक्रमते तावदित्यन्वयादुपक्रममात्रत्वोक्तिः । तद्धितसमासवत्पदमात्रे ऽपि समर्थः पदविधिरिति सामर्थ्यापेक्षत्वस्मरणात्सापेक्षत्वे च व्यपेक्षालक्षणसामर्थ्यव्याघातापत्तेर्निरपेक्षस्य पूष्णः प्रपिष्टभागसमासार्थत्वलक्षणात्संयोगादित्येवं केवलचतुर्द्धाकरणदृष्टान्तोक्तिभ्यां हेतुव्याख्यासूचनार्थं केवलेति भाष्यं व्याचष्टे * पूषेति । * तथाभूतोक्त्या निरपेक्षपूपसंयुक्ततोक्ता ॥

धर्मविप्रातिषेधाच्च ४० ।

सूत्रव्याख्यार्थं द्विदेवत्य इत्यादि भाष्यं संक्षिप्य व्याचष्टे । * इतश्चेति । * तत्र यद्यऽथाविरोधमिति भाष्यस्थयद्यथशब्दसूचितविकल्पव्याख्यार्थं पूर्वार्द्धं स्पष्टत्वादव्याख्याय तत्रेत्यादिसविप्रतिषिद्धैतेत्यन्तभाष्यावयवव्याख्यार्थं तृतीयं पादं व्याचष्टे । *अर्द्धेति ।* ६०५।१
पिष्टस्य तण्डुलेषु विलयनाद्वैशद्येनानोदनत्वे ऽपि चरोर्वैशद्यानपेक्षत्वात्कथमचरुत्वापत्तिरित्याशङ्क्यान्योन्यासंलग्नत्वलक्षणस्वाभाविकवैशद्यानपेक्षत्वे ऽपि पाकविशेषापाद्यान्योन्यावयवानन्तर्गतिलक्षणवैशद्यापेक्षत्वादचरुत्वापत्तिं पाकनिमित्तञ्चेति भाष्यावयवोक्तां परिहारत्वेन वक्तुं पाकवैशद्येन हीत्युक्तं अथेत्यनेनेतरपक्केषु स्थाल्यां पिष्टनिक्षेपाद्वैशद्यसिद्धिमाशङ्क्य तत इत्यनेन पिष्टतण्डुलभागयोर्द्वयोरप्येकयागसाधनत्वेनैकहविष्ट्वात्कृत्स्नस्य च हविषो दर्व्यापि अप-

धनीति युगपद्वपणविधानाद्वपणार्थस्य निक्षेपस्यापि यौगपद्यमिहा-निर्देशाद्गम्यमानं * बाध्येतेत्युक्तम् ।* अथेत्यादिक्रियेतेत्यन्तभाष्या-वयवव्याख्यार्थं चतुर्थं पादं व्याचष्टे * पूर्वेति । * अर्द्धपेषणावत्पृ-थक्करणाशक्तावपि बुद्ध्या निष्कर्षसंभवादवैगुण्यमाशङ्क्य सर्वपेषणे ऽर्द्धपेषणवत्पिष्टापिष्टविवेकाभावाद्यावान्पिष्टो भागस्तावान्पूष्ण इ-त्येवं बुद्ध्या निष्कर्षायोगसूचनार्थं भागसङ्करोक्तिः । भाष्ये भागस्य प्रदेयावदानप्रकृतित्वात्प्रकृतिव्यत्ययोक्तावपि स्वमतेन कृत्स्नस्य भा-गस्य प्रदेयत्वं मत्वा भागव्यत्ययोक्तिः । द्विदेवत्ये हविषि देवताभे-दाद्भागकल्पनामापाद्य सर्वपेषणे संकरापादनेन व्यत्ययापादनाद्वै-गुण्यापादनमपेषणपक्षे ऽपि साम्यादेकस्मिन्पक्षे पर्यनुयोगानुपपत्तेर-युक्तमित्याशङ्कते * ननु चेति । * अपेषणे संकरानापत्तेः पर्यनुयो-गासाम्यमाशङ्क्य दानात्प्राग्घविषोऽपृथक्करणाद्दानकाले च भिन्नदे-वतान्वयसिद्ध्यर्थमर्द्धमस्यै देवताया अर्द्धमस्या इति बुद्ध्या पृथक्क-रणात्संकरापत्तिमुपपादयति । * तथा हीति । * दानवेलायां बुद्ध्या निष्कर्षाभावे प्रागपृथक्करणे ऽपि संकरस्य व्यत्ययानापादकत्वेन तन्निमित्तवैगुण्यापादकत्वासिद्धेः पूर्वविशेषणसामर्थ्यलभ्यं पश्चा-त्पृथक्करणमपि विवक्षितम् । अतो ऽधिष्ठानभेदे ऽपि व्यासङ्गित्वेन देवतात्वस्याभेदाद्दानकाले बुद्ध्या निष्कर्षहेत्वभावेन व्यत्ययापत्ति-द्वारवैगुण्यानापत्तिर्यथा पेषणशून्येषु द्विदेवत्येषु निर्दोषत्वात्संकरो-ऽङ्गीकृतस्तथा पेषणयुक्तेष्वपि निर्दोषत्वादङ्गीकार्य इति परिहार-साम्यं सूचयितुमाह * स चेति । * वैगुण्यं विरोधोक्तं मिश्रोक्त्या चापृथक्करणम् ॥ अपेषणवादमते धर्माणां यागापूर्वप्रयुक्तत्वात्तस्य चैकत्वात्तत्साधनकृत्स्नद्रव्याश्रितत्वेन पृथक्करणानपेक्षतया द्रव्यस्य पृथक्करणाभावात्कृत्स्नस्य युगपद्दानोपपत्तेर्भागाभावेन संकराभावा-द्वैगुण्यानापत्तिः पेषणवादिमते तु देवताप्रयुक्तत्वाभावे द्विदेवत्ये पेष-णप्रयोजकपूषदेवत्ययागापूर्वप्रयुक्तत्वेनानवस्थितत्वात्प्रयोजकाभावे [नापेषणापत्तेर्देवताप्रयुक्तत्वस्याभ्युपगमनीयत्वाद्देवताभेदाद्द्रव्यपृथ-क्करणापत्तेर्युगपद्दानविधानाच्च दानकाले संकरापत्तेर्वैगुण्यापत्ति-रितिवैधर्म्योक्त्या परिहरति * उच्यतइति * एवमिदमंशाभ्यां मिश्रस्य युगपद्दानपरामर्शादस्मत्पक्षे धर्माणां यागापूर्वप्रयुक्तत्वा-दिदं दानमेवंमिश्रस्य युगपदविरुद्धं भवेद्भवत्पक्षे तु पेषणस्य देवता-प्रयुक्तत्वेन भिन्नदेवतान्वयार्थं द्रव्यपृथक्करणात्तपान्मिश्रस्य युगपद्दानं

विरुद्धमित्यर्थः । द्विदेवत्येष्वपेषणे ऽपि वैगुण्यं समानमिति यदुक्तं तदैन्द्रापौष्णविषयं द्विदेवत्यान्तरविषयं वेति विकल्प्याद्यकल्पे तावत्प्रयोजकाभावादेवापेषणसिद्धेर्वैगुण्यापत्तिसाम्योक्तिर्व्यर्था । द्वितीये तु प्रयोजकाभावात्पृथक्करणापत्त्या संकरानापत्तेस्तन्निमित्तवैगुण्यानापत्तिरिति सूचयन् पूर्वार्द्धं व्याचष्टे * अस्मत्पक्षे पुनरिति । * सद्वितीयपूषदेवत्ये तस्य पेषणस्य पूषदेवत्ययागापूर्वप्रयुक्तत्वेनावस्थितत्वात्प्रयोजकाभावे नै] वाप्रवृत्तिस्तत्तश्च वैगुण्यसाम्योक्तिर्व्यर्थेत्याशयः । इत्येवेत्यप्रवृत्तिशब्दादपकृष्यहेत्वर्थेनेतिकरणेनैवकारो ऽन्वेतव्यः । द्विदेवत्यान्तरेष्वपि यागापूर्वप्रयुक्तत्वप्रकारस्तैवेतिकृत्वा देवताया गुणभूतत्वात्तदनुरोधेन प्रधानावृत्त्यनौचित्येन युगपत्सर्वहविर्दानस्याभ्युपगमनीयत्वात्तदर्थं सर्वस्मिन्हविष्याहित आरभ्य सहक्रियमाणे पृथक्करणाभावेन दोषतयोक्तस्य संकरस्य दानकालेऽनाश्रयणादङ्गीकृतत्वोक्तिरयुक्तेत्याशयः । उत्तरार्द्धं व्याचष्टे * भवता पुनरिति । * असंकीर्णमपेक्षत इति हेतोरसंकीर्णभागदानानुष्ठानौचित्यान्मिश्रदेवतोद्देशपूर्वकदानविध्याक्षिप्तयुगपत्कृत्स्नदानसिद्धै दानकाले संकरापत्तेर्वैगुण्यापत्तिरपरिहार्येत्याशयः । एवं द्विदेवत्ये ऽर्द्धस्य कृत्स्नस्य वा पेषणं स्यादिति पक्षद्वयं तुल्यबलत्वेन विकल्प्य दूषणोक्त्यर्थत्वेन तत्र यदीत्यादिभाष्यं व्याख्यायाधुनैतदेव भाष्यं यदिपिष्येत तत्र तस्मिन्पक्षे पूष्ण एव भागः पिष्यते नेतरस्ततश्च पाकवैषम्यापत्तिरित्येवमन्यथा व्याख्यातुमाह * आदिश्चेति । * यदा ९०६।२
त्वसंकीर्णभागं देवतापेक्षते तदा तु सर्वपृष्ठायां रथचक्रमात्रैकपुरोडाशविधौ यावद्देवतं चतुर्मुष्टिनिर्वापभेदवदिहापि चतुर्मुष्टिनिर्वापभेदापत्तेर्निर्वापवेलायामेव भागकल्पनादर्द्धपेषणमेवोचितं न सर्वपेषणमित्यर्द्धपेषणस्य पूर्वपक्ष्यभिमतत्वसूचनार्थश्चकारः । अथेतिभाष्यमर्धपेषणौचित्ये ऽपि पाकवैषम्याख्यविरोधपरिहारार्थं कृत्स्नपेषणं पूर्वपक्ष्यनभिमतमप्याशङ्क्य वैगुण्यापादनेन निरासार्थमित्येवमन्यथा व्याख्यातुमाह * अथेति । * अपेषणवादिमते ऽपि संमोहशब्दोक्तसंकरसाम्यंनैकस्य पर्यनुयोज्यत्वात्संकरे ऽत्र दोष इत्याशयेन तत्र को दोष इति पृष्ट्वा ऽस्मत्पक्षे यागापूर्वप्रयुक्तत्वाद्धर्माणां द्विदेवत्ये ऽपि च हविषि यागापूर्वैक्येन चतुर्मुष्टिनिर्वापभेदायोगाद-

१ इति द्वितीयपुस्तके नास्ति ।

नुत्पन्नभागविवेकस्य हविषो विविक्तदेवतान्वयानवधारणात्संकरा- ख्यो दोषो न जायते भवत्पक्षे तु देवताप्रयुक्तत्वं विना द्विदेवत्ये पेषणप्रयोजकपूषदेवत्ययागापूर्वाभावेन पेषणासिद्धेस्तत्सिद्ध्यै देवता- प्रयुक्तत्वाभ्युपगमाद्देवताभेदेन चतुर्मुष्टिनिर्वापभेदनिबन्धनभागवि- वेककल्पनापत्तेश्चतुर्मुष्टिद्वयैकीकरणाक्षेपकवचनाभावाच्च रथक्रमा- नुरोधात्पर्वनिर्वापोत्तरमेकीकरणानुपपत्तेः संकीर्णभागदानेनित्या- द्यग्नेरितरेतरयुक्तदेवतोद्देशपूर्वकदानविध्याक्षिप्तसङ्कल्पदा- नान्तरे दानकाले संकरकरणाद्वैगुण्यापत्तिरित्यतुल्यपर्यनुयोगो- त्वर्थमन्यस्येति भाष्यमित्येवं ननु चैतत्सर्वमित्यादिव्याख्यानयोः शङ्कापरिहारयोरेतद्व्याख्यारूढत्वसूचनार्थं * यावदित्युक्तम् । * कृ- त्स्नेपेषणानौचित्ये ऽपि देवताप्रयुक्तत्वेन चतुर्मुष्टिनिर्वापभेदाद्विभे- द्वावगतेर्भेदेनैव पाकान्नार्द्धपेषणे ऽपि पाकवैषम्यापत्तिरित्याशङ्कते * पाकेति । * विहितैकत्वविरोधिचरुभेदापादकत्वाद्भेदेन पाको न युक्त इति परिहरति * नेति * आचार्यप्रयुक्तद्वितीयान्यथानु- पपत्त्या शाखान्तरीयमैन्द्रापौष्णं चरुं निर्वपेदिति द्वितीयान्तचरुशब्द- युक्तं वाक्यं प्रकल्प्य तस्मादपीति सूत्रार्थोपसंहारभाष्यं व्याचष्टे * अत इति * ॥

अपि वा सद्वितीये स्याद्देवतानिमित्तत्वात् ॥ ४१ ॥

पूर्वपक्षप्रतिज्ञार्थमपिवेतिसूत्रावयवं व्याचष्टे *सद्वितीयेपीति *वाश- ब्दस्य निरपेक्षपूषसंयोगधर्मविप्रतिषेधहेतुकसिद्धान्तनिवृत्त्यर्थत्वसू- चनायैवकार । निरपेक्षपूषसंयोगधर्माविप्रतिषेधाभ्यां सद्वितीये पूष्णि देवतायां सत्यां चरावपेषणावगतेः कुतः पेषणं स्यादिति हेतुप्रश्नोत्तरत्वेन देवतानिमित्तत्वादिति सूत्रावयवव्याख्यार्थं देवतानिमित्तमिति भाष्यं व्यतिरेकमुखेन तावद्व्याचष्टे *कुत इति ।* पुरुषोद्देशेन त्यज्यमानत्वलक्षणपूषदेवत्यत्वाख्यस्य पौष्णत्वस्य सा क्षात्प्रयोजकत्वे प्रयोजकपूषदेवत्ययागापूर्वसाधनद्वारत्वे वा द्विदेवत्ये देवताभूतेन पूष्णा योगाभावात्पेषणं न स्यात्तत्त्वेनद्वयमप्यस्तीत्याशय.। पौष्णत्वस्य साक्षात्प्रयोजकत्वे यागोक्तिलक्षितयागापूर्वसाधनत्वानपे- क्षस्य पौष्णस्य हविषः पेषणं प्राप्तं शेषित्वापत्तेः पौष्णत्वस्य प्रयो- जकत्वसूचनार्थी पौष्णाङ्गत्वोक्तिः। द्वारत्वे पौष्णस्य सतो यागापूर्व- साधनस्य शेषित्वापत्तेर्द्वारत्वसूचनार्था तस्य पौष्णस्य सतो-

यागापूर्वाङ्गत्वमाक्षं यदि स्यादिति पौष्णपरामर्शिना तच्छब्देन समानाधिकरणेन पौष्णत्वस्य यागापूर्वसाधनविशेषणत्वोक्तिः । अन्वयमुखेनैतदेव भाष्यं व्याचष्टे * पूषेति । * सीदन्तस्तस्मिन्सीदत्यादौ तिष्ठत्यर्थे प्रयोगात्तिष्ठतेश्चाधिपूर्वस्यास्मिन् ग्रामे देवदत्तो ऽधिष्ठातेत्यादौ स्वाम्यवाचित्वदर्शनात्सीदत्यधितिष्ठति स्वामी भवतीत्यस्मिन्नर्थे सीदतेः क्विप्प्रत्ययमुत्पाद्य सदो ऽधितिष्ठतः स्वामिनो भाव इति व्युत्पत्त्या सद्भावशब्देन स्वामित्वाभिधानात्सद्वितीयपूषोद्देशेनापि च त्यक्ते द्रव्ये गणोद्देशेनापि दत्ते ग्रामादौ तदंशे प्रत्येकं यथेष्टविनियोक्तृत्वलक्षणस्वाम्यदर्शनाद्द्रव्ये केवलस्य पूष्णः स्वाम्योपपत्तेरेवं चापूर्वप्रयुक्तत्वे वक्ष्यमाणे ऽपि द्वारविशेषानपेक्षायां स्रुगादिष्वपि पेषणापत्तेर्द्वारविशेषस्यावश्याभ्युपगमनीयत्वाद्भागश्रुत्यालोचनया यत्पूषस्वामिकत्वाख्यपूषभागत्वद्वारापूर्वसाधनं तदेवगोचरमित्यर्थं पूषभागत्वस्य द्वारत्वावगतेः पूष्णो यः सद्भावो ऽधिष्ठातृभावः स्वामिभावस्तन्निमित्तं तद्द्वारापूर्वसाधनत्वप्रयुक्तम् पेषणमित्यर्थः । द्वारानपेक्षस्य पूर्वसाधनत्वमात्रस्याप्रयोजकत्वेनापूर्वसाधनत्वस्य प्रयोजकत्वे द्वारस्य निमित्तत्वावगमान्निमित्तोक्त्या देवतास्वामिकत्वस्य द्वारत्वाभ्युपगमे सद्वितीयाग्निदेवत्ये ऽपि पुरोडाशे ऽर्धस्य केवलाग्निस्वामिकत्वाच्चतुर्धाकरणं स्यादित्याशङ्क्य देवतातद्धितात्तत्राग्न्युद्देशेन त्याज्यत्वस्य द्वारतावगम्यते ऽत्र तु भज्यते सेव्यत इति व्युत्पत्त्या भागशब्दस्य सेवनार्हत्ववाचित्वाद्देवतायाश्च भोक्तृत्वाभावेन मुख्यदेवतासेवनार्हत्वायोगाल्लक्षणया स्वत्ववाचित्वावगतेः स्ववाक्योपात्तद्वारासम्भवे च द्वारान्तरकल्पनायोगात्पूषस्वत्वमेव द्वारमिति वैषम्यसूचनार्थस्तच्छब्दः । अनेन च सूत्रभाष्ययोर्देवताशब्दः स्वामित्ववाची न तु त्याज्यद्रव्योद्देश्यत्ववाचीति सूचितम् । चरौ पेषणविधेः प्राकृतपेषणप्रतिप्रसवार्थत्वात्प्रकृतौ च यागोत्पत्तिवाक्यस्थदेवतातद्धितालोचनया देवतोद्देशेन त्याज्यस्य द्वारत्वावगमात्तस्यैवेहातिदेशाद्द्वारत्वावगतेरनपेक्षितद्वारान्तरकल्पना न युक्तेत्याशङ्क्य भागशब्देनैव पूषस्वतायाः द्वारत्वसंयोगोक्तेन कल्पनीयत्वाच्छ्रुतेन च द्वारेणातिदेशिकद्वारबाधाच्चेह पूषोद्देशेन त्याज्यताया द्वारता युक्तेति सूचयितुमाह * नेति । * न पूषदेवत्यस्य द्रव्यनिमित्तमिति वाच्यद्रव्यान्वयानपेक्षाया देवतायाः

सम्बन्धाभावेन द्रव्यपेषणे निमित्तत्वायोगाद्द्रव्यान्विताया निमित्तत्वस्याभ्युपगमनीयत्वेनान्वयस्य द्विष्ठत्वाद्द्रव्यस्यापि निमित्तान्तर्भावापत्तेः पूषदेवत्यस्य द्रव्यस्य निमित्तत्वनिषेधायोगमाशङ्क्य द्रव्यदेवतान्वयस्य निमित्तत्वे सत्यपि स्वस्वामिभावात्मको ऽन्वयो निमित्तं न तूद्दिश्यत्यागात्मक इति सूचनायोद्दिश्यत्यागात्मके ऽन्वये देवताया गुणत्वे देवताश्रुतिरिति न्यायेन गुणत्वात्स्वस्वामिभावात्मके तु स्वामित्वेन प्राधान्याद् गुणत्वेन देवताया निमित्तत्वनिरासद्वारोद्दिश्यत्यागात्मकस्य द्रव्यदेवतान्वयस्य निमित्तत्वनिरासार्थं पूषणं प्रति प्रधानभूतं सद्द्रव्यं न निमित्तमिति विवक्षितत्वाल्लक्षितनिर्देशे देवतायाः प्रकृत्यर्थत्वेन विशेषणत्वात् गुणता द्रव्यस्य प्रत्ययार्थत्वेन विशेष्यत्वात्प्रधानता युक्ता ऽत्र त्वन्यपदार्थत्वात्प्रधानतैव पूष्णो युक्ता न गुणतेत्युपपत्तिं सूचयितुं न पूषविशेषितद्रव्यनिमित्तं पेषणं किं तु पूषविशेषणभूतद्रव्यनिमित्तमिति विशेषितशब्दप्रयोगः । द्रव्य शब्दप्रयोज्ये वस्तुलक्षणो गुणप्राधान्यरूपो ऽत्र विशेषणविशेष्यभावो विवक्षितो न तु शब्दलक्षणो ऽवच्छेद्यावच्छेदकरूप इति द्योतनार्थे वस्तुशब्दः । पूषा प्रपिष्टभाग इत्यन्यपदार्थत्वेन प्रधानतया पूष्णश्श्रवणात्स्वाम्यलक्षणदेवताभूतपूषनिमित्तं पेषणं न तूद्देश्यभूतपूषनिमित्तमिति देवतानिमित्तमिति भाष्येणोक्ते देवतायाः स्वाम्यस्य त्यज्यमानद्रव्योद्देश्यत्वापाद्यत्वाद्द्विदेवत्ये चैकस्योद्देश्यत्वाभावाद्द्विदेवत्ये केवलस्य पूष्णः स्वाम्यायोगमाशङ्क्य सकृद्देवदत्तयज्ञदत्तोद्देशेन दत्ते द्रव्ये ऽर्द्धस्य देवदत्तः स्वामीति व्यपदेशान्मिश्रोद्देशस्याप्यर्द्धे प्रत्येकस्वाम्यापादकत्वप्रसिद्धेः स पूषा द्विदेवत्ये ऽपि द्रव्ये य स्वकीयत्वेन भजनीयत्वोपचारादर्द्धत्वाच्च भागस्तस्मिन्देवता स्वामी भवतीत्येवं परिहारसूचनार्थत्वेन स च द्विदेवत्ये ऽपि भागे भवतीत्येतावद्भाष्यमवच्छिद्य व्यतिरेकमुखेन व्याख्यातुमाह * व्यासङ्गित्वाच्चेति * गुणभूतोद्देश्यत्वलक्षणदेवतात्वस्य द्विदेवत्ये व्यासङ्गित्वाद्यद्यपि पूषोद्देशेन त्यज्यमानत्वनिमित्ता पूष्णः प्राधान्यरूपा पूषविशिष्टता न स्यात्तथापि पूषा विशिष्टभूतः प्रधानभूतः स्वामिभूतो न नास्ति किंत्वस्त्येवेत्युक्ते देवताया भोक्तृत्ववत्स्वाम्यस्यापि नवमे निषेत्स्यमानत्वेनैकदेवत्ये ऽपि पूष्णः स्वाम्याभावाद्द्विदेवत्ये सुतरामभाव इत्याशङ्क्य यागस्य देवतारा

धर्मार्थत्वनिरासार्थं देवताया यथेष्टविनियोक्तृत्वाख्यस्वाम्याभावेनादातृत्वादनाराध्यत्वोक्तौ यथेष्टविनियोक्तृत्वाख्यस्वाम्यनिषेधे ऽपि जीवत्पितृकस्य यथेष्टविनियोक्तृत्वाख्यस्वाम्यभावे ऽपि पितृद्रव्ये ऽन्यं प्रति यथेष्टविनियोज्यत्वप्रतिबन्धापादकत्वाख्यस्वाम्यसद्भाववद्देवताया अपि स्वोद्देशेन त्यक्ते द्रव्ये ऽन्यं प्रति यथेष्टविनियोज्यत्वप्रतिबन्धापादकत्वाख्यं स्वाम्यं देवस्वं ब्राह्मणस्वं च लोभेनोपहिनस्ति य इत्यादिस्मृतेर्देवतोद्देशेन त्यक्ते यथेष्टविनियोगार्हत्वप्रसिद्धे चास्त्येवेति परिहारसूचनार्थत्वेन भाष्यस्थाया भागोक्तेर्भजनीयवाचिताया व्याख्यार्थं पूष्णः स्वकीयाख्यो भागो न नास्ति किं त्वस्त्येवेत्युक्तम् । द्विदेवत्यस्य द्वयोद्देशेन त्यक्तत्वादेकस्वामिकत्वायोगमाशङ्क्यान्योद्देशेन त्यक्तस्य यच्चान्यस्मै प्रतिश्रुतमित्यादिस्मृत्यालोचनया यथेष्टविनियोगानर्हत्वावगतेर्देवतोद्देशेन त्यागस्यानन्यविनियोज्यत्वलक्षणदेवतास्वत्वापादनपर्यन्तत्वावगमाद्देवताद्वयोद्देशेन त्यक्ते द्रव्ये द्वयोः स्वाम्ये ऽवगते दम्पतिवद्देवताद्वयस्य सहत्यैकद्रव्यसाध्यकर्मकारित्वाभावाज्जायापत्योर्न विभागो विद्यतइतिवच्च विभागनिषेधाभावात्संहत्य स्वाम्यानवगतेरनेकस्वामिके च विभागं विना प्रत्येकं स्वाम्यायोगाद्विभक्तस्यैकैकस्वामिकत्वोपपत्तिसूचनार्थत्वेनार्द्धवाचितयापि भागोक्तिव्याख्यार्थं स्वकीयाख्यो वा भागो न नास्तीति विवक्षार्थो वाशब्दः । मनोताधिकरणभाष्ये चाग्नीषोमीये पशावग्नेर्देवतात्वाभावे ऽपि समवेतत्वोक्तेर्द्रव्यान्वयानपेक्षस्वरूपसत्तामात्रार्थत्वे ऽग्नेः कर्मसमवायाभावेनाप्रकाश्यत्वापत्तेर्द्रव्यान्वितत्वोक्त्यर्थत्वावसायाद्द्विदेवत्ये चैकस्याग्नेः स्वस्वामिभावातिरिक्तद्रव्यान्वयायोगान्निर्विशेषान्वयसामान्यायोगाच्च स्वामित्वेनाग्निरसमवेतो न भवति किं तु स्वामित्वेन समवेतएवेति वक्ष्यमाणत्वादुद्देश्यत्वातिरिक्ता देवतायाः स्वामिता द्विदेवत्ये ऽपि चैकस्या भाष्यकृतो ऽभिप्रेतेति स्वाम्योक्त्यर्थत्वेन सर्वत्र भाष्यव्याख्यौचित्यसूचनायाह * यथेति । * व्याख्यातं भाष्यार्थं विवृण्वन्नुपसंहरति * तेनेति । * अर्द्धस्य पूषभागत्वे ऽप्यर्द्धपेषणे पाकवैषम्यापत्तेः सर्वपेषणे भागसंकरापत्तेरपेषणमाशङ्क्य भागस्यार्द्धस्यैव पेषणात्प्रकृष्टपिष्टभागः सुपक्वपिष्टभाग पूषाकृतो भवतीत्येवं परिहारार्थत्वेन सचेत्येतदेव कृत्स्नं भाष्यं सर्वपेषणे ऽपि पौष्णभागानुरोधेनेतरस्य

पेषणीयत्वात्पेषणकाले ऽवश्यमस्मिन्द्रव्ये ऽर्द्धं पूष्णो ऽर्द्धमिन्द्रस्ये-
ति बुद्ध्या निष्कर्षणीयत्वापत्तेर्दानकाले ऽपि पुनरप्ययुक्तिसिद्धवदपेषण-
काले पूषभागत्वेन निष्कृष्टं तत्पूष्णे यदिन्द्रभागत्वेन तदिन्द्रायेति
बुद्ध्या निष्कर्षसंभवान्न संकरापत्तिरिति प्रौढिसूचनार्थत्वेनापि भाग
६०७।१ इत्यपिशब्दव्याख्यापूर्वं व्याचष्टे * तस्येति । * अस्य भागः पेष्टव्य
इत्युपसंहारभाष्यस्थभागशब्दालोचनया सर्वपेषणस्यानभिमतत्व-
सूचनाय अनोक्तिः । स्थाल्युपरिभागे वस्त्रादिना पिष्टधारणादि-
प्रकारेण केन चित्पुण्येन पचनायुगपन्निक्षेपपात्रैक्ययोः पाकगुण-
तया पाकानुरोधेन बाधाद्वा पाकदोषाभावं निरूप्योपपाद्य पेषणं
कार्यमेवेत्यर्थः ॥ न यथेत्यादि भाष्य यथा चतुर्द्धाकरणइति पूर्वपक्ष
भाष्योक्तदृष्टान्तवैषम्योक्त्यर्थत्वेन दृष्टान्तानुभाषणपूर्वं व्याचष्टे * अ-
र्थेति । * समर्थयोरेवेति भाष्यस्थैवकारसूचितस्याविघातस्य सापे-
क्षत्वदोषाभावहेतुत्वोक्त्यर्थया सामर्थ्याविघातादिति पंचम्या न त्व-
त्रेति भाष्यस्थस्य तुशब्दस्यार्थो नात्रेत्येवमत शब्दार्थे व्याख्येयत्वं सू-
चितम् । पदमात्रे सामर्थ्यापेक्षत्वस्मृतेः प्रकृत्यर्थस्य प्रत्ययार्थान्वय-
सिद्ध्यर्थत्वात्प्रथमान्तपदोक्तस्य च पूष्णो देवतात्वे ऽन्यापेक्षस्यापि
प्रत्ययार्थलिङ्गसंख्यान्वये स्वाभाविकनिरपेक्षान्वयावगमनान्यापेक्षा-
योगादेकसंयोगादितिसूत्रावयवोक्तनिरपेक्षसंयोगाविरोधसूचनार्थं
न किं चिदित्युक्तम् । तस्मादिति पूर्वपक्षसूत्रार्थोपसंहारभाष्यस्थं
तस्माच्छब्दं सापेक्षत्वदोषाभावोक्तिसूचितस्य द्विदेवत्ये ऽपि पूष्णः
स्वामित्वेन पेष्टव्यद्रव्योपलक्षणत्वसंभवस्यार्द्धपेषणहेतुत्वेन पराम-
र्शार्थतया व्याख्यातुमाह * इतीति * ।

लिङ्गदर्शनाच्च ॥ ४२ ॥

पेषणस्य भोजनार्हत्वापादनार्थत्वलिङ्गादपि भोजनार्हत्वोपचरि-
तादन्तकपूषस्वामिकत्वद्वारत्वावगतेर्द्विदेवत्ये ऽपि पेषण गम्यतइत्ये-
वमर्थत्वेन सूत्रव्याख्यार्थं लिङ्गमपीत्यादिभाष्यं व्याचष्टे * अदन्तको
हीति । * पेषणमितीति भाष्यस्थमितिकरणमनत्प्रभृतिस्तुतिर्दर्शयती-
त्येवं प्रभृत्यर्थत्वाद्द्विदेवत्ये ऽपि पेषणं दर्शयतीत्येवमर्थत्वेन व्या-
ख्यातुमाह * न चेति । * तथा सौम्या पौष्ण तथार्द्धमिति च
लिङ्गद्वयान्तरोक्त्यर्थं भाष्यद्वयमेकहेलया व्याचष्टे * तथेति * ।

वचनात्सर्वपेषणं तं प्रति शास्त्रवत्त्वादर्थाभावाद्धि चरावपेषणं भवति ॥ ४३ ॥

चोद्यपदोक्त्यर्थं कस्मादिति भाष्यमननुवादत्वात्पूर्वपक्षलिङ्गत्वयोगोक्त्यै पूर्ववाक्येनैव छित्त्वे ऽपि पेषणविधौ सोमापौष्णे ऽपि तेनैव पेषणासिद्धेर्नेमपिष्टादिविध्यानर्थक्यप्रसङ्गात्सिद्धान्तिलिङ्गयोक्त्यैवेत्येव द्विधा व्याचष्टे *विधित्वादिति ।* अस्मात्पिष्टविधानादङ्गीकृतात्सर्वत्र ९०८॥ चरौ पशौ पुरोडाशे ऽपि पेषणं प्रसज्येतेत्यनिष्टापादनरूपोत्तरत्वेन वचनादिति सूत्रावयवव्याख्यार्थमुच्यतइत्यादिनेमपिष्टेत्यन्त भाष्यं व्याचष्टे * अत इति । * चरुमनूद्य सर्वत्र सोमापौष्णे ऽन्यदेवत्ये च पेषणं विदध्यादित्यपि पुरोडाशे चेति चकारेण सूचिते चर्वनुवादेन पेषणविधावपि चरोर्नेमपिष्टान्वयवत्सोमापौष्णान्वयस्यापि विधानादन्यदेवत्य पेषणापत्तिमाशङ्क्य सोमापौष्णनेमपिष्टाभ्यां चरोः सम्बन्धविधौ नेमपिष्टसम्बन्धे चेति चकारसूचिते च सोमापौष्णानुवादेन पेषणविधावपि सोमापौष्णस्य नेमपिष्टान्वयवच्चर्वन्वयस्यापि विधानात्पशुपुरोडाशयोः पेषणापत्तिमाशङ्क्य चरुनेमपिष्टाभ्यां सोमापौष्णसम्बन्धविधौ वाक्यभेदोक्त्यर्थत्वेन भाष्यं व्याख्यातुं * चरुं वेत्याद्युक्तम् । * यो य सोमापौष्ण इत्यनेन यो यश्चरुरित्यप्युपलक्षितमिति सूचयितुं सर्वत्र चरौ सर्वत्र च सोमापौष्णे पेषणं * प्राप्नोतीत्युक्तम् । * सर्वपेषणापत्तौ को दोष इत्याशङ्क्याह * ततश्चेति * विविच्यानर्थक्यं विवृणोति * तदिति । * तत्रेत्यस्मिन्नर्थे तदित्यव्यय । आनर्थक्यस्यैकदेशानुवादत्वहेतुकत्वं पूर्ववच्छब्देनोक्तम् । सूक्तस्य सोमापौष्णस्यापि पेषणाशक्तेः पेषणविधौ हविर्विशेषणानपेक्षसोमापौष्णोद्देशायोगेन मृष्यामहे हविषा विशेषणमितिवच्चर्वाख्यहविर्विशिष्टस्यैव सोमापौष्णस्योद्देश्यत्वावगमाद्विध्यानर्थक्यापत्तेश्चापूर्वसाधनत्वापादकदेवतान्वयानपेक्षरूद्देशायोगेन सोमापौष्णशब्दोक्तदेवतान्वयविशिष्टस्यैव चरोरुद्देश्यत्वावगमान्न सर्वपेषणापत्तिरित्याशङ्क्य पेषणार्हत्वालोचनयैव सोमापौष्णशब्दस्य हविर्विषयत्वावगतेरुपधानार्थस्य च चरोर्देवतान्वयाभावे ऽप्यपूर्वसाधनत्वसंभवेन देवतान्वयानपेक्षतया विशेषणानपेक्षत्वात् दुर्वारा सर्वपेषण पत्तिरिति परिहारसूचनार्थत्वेन त पेषणविधानुदेश्य सो-

आपौष्णं चरुं वा सर्वं प्रतीत्योपलक्षणीकृत्योद्दिश्य पेषणस्य शास्त्रविषयत्वाख्यशास्त्रवत्त्वसंभवादित्येवं तं प्रतीतिसूत्रावयवव्याख्यार्थं तं प्रतीतिभाष्यं व्याचष्टे * तं प्रति हीति । * भाष्यवार्त्तिकयोः सोमापौष्णशब्देन चरुरुपलक्षितः । सर्वपरामर्शित्वेन तच्छब्दव्याख्यार्थमात्रशब्दव्याख्यानायाविशेषितशब्दः । शास्त्रवत्त्वादिति पंचमीं व्याख्यातुं भाष्ये हिशब्दाध्याहारसूचनार्थो हिशब्दः । सोमापौष्णमात्रमुद्दिश्यपेषणस्य शास्त्रविषयत्वसंभवे ऽपि पुरोडाशे ऽर्थादेव प्राप्ते पशौ च हृदयाद्याकृतिकावयवोत्सादवेशापादानकावदानसाध्यप्रधानरूपार्थाभावापत्तेर्विध्ययोगेन पारिशेष्यात्केवलचरुविषयत्वमाशङ्क्य पुरोडाशे ऽर्थादासमन्तात्सर्वस्य पेषणभावापत्तेश्चरौ त्वन्योन्यावयवानन्तर्गतिलक्षणपाकवैशद्यासिद्ध्या चरुशब्दवाच्यचरुत्वाख्यार्थाभावापत्तेश्चरुशब्दोपलक्षिते च पशौ प्रधानाख्यप्रयोजनरूपार्थाभावापत्तेर्हि यस्मादपेषणं भवति सर्वपेषणं न संभवति न त्वर्द्धपेषणं न संभवति तेनेदमर्द्धपेषणवचनं सर्वत्र संभवतीति परिहारार्थत्वेनार्थाभावाद्धीत्यादिसूत्रावयवव्याख्यार्थं पुरोडाशइतिभाष्यमश्रुतपुरोडाशशब्दाध्याहारापत्तेरभावादभावादिति च दीर्घह्रस्वाकारयुक्तत्वेनार्थाभावशब्दस्याश्रुतावृत्त्यापत्तेश्चरुशब्दस्य चार्द्धपेषणव्यावृत्त्यै सर्वपेषणवाचित्वकल्पनापत्तेर्वचनात्सर्वपेषणमिति सूत्रावयवानुषङ्गापत्तेश्चापरितोषादुपेत्य स्वयमर्थाभावादिति सूत्रावयवमुत्तरावयवादवच्छिद्योद्देश्यस्य विशेषणान्वये वाक्यभेदापत्तेर्विशेषणरूपार्थाभावात्सर्वं प्रति पेषणस्य शास्त्रवत्त्वमित्येतत्सूत्रावयवार्थोपपादनार्थत्वेन व्याचष्टे * विशेषणेति । * तस्मान्नेमपिष्टत्वविधिपक्षे चरावेव न पेषणं यदभिमतं तन्न भवतीति पेषणशब्दसमस्तस्यापि नञो विवक्षितार्थत्वलाभान्यथानुपपत्त्या भवतिशब्दान्वयमभिप्रेत्य विधितः सर्वपेषणापत्त्युपसंहारार्थत्वेन स्वयं व्याचष्टे * एतस्मिन्निति । * अस्मिन्व्याख्याने यस्मादेव तस्मान्नास्य विधित्वाभ्युपगमेनालिङ्गता विपर्ययसाधनता च शङ्कनीयेत्येवं हिशब्दो योज्यः । नन्वङ्गनाशभयादित्याशङ्कापरिहारयोः पुरोडाशइति भाष्यव्याख्यातस्यार्थाभावादित्यादिसूत्रावयवस्यैतच्छङ्कोत्तरत्वेन व्याख्यार्थत्वं सूचयितुं तत्रेत्यादिभाष्यात्प्रागपकृष्यव्याख्यार्थं नन्वित्याशङ्काभाष्यं तावद्व्याचष्टे * नन्विति । * शङ्काभाष्यस्योपलक्षणार्थान्वयसूचनायाशंआसन्न

दित्युक्तम् । अर्थोक्तमित्यादिपूर्वाधिकरणसिद्धान्तसूत्रावयवारूढत्वं शङ्काया वक्तुमुक्तनोक्ता । नेनीति परिहारभाष्यमप्युपलक्षणार्थत्वेन व्याख्यातुमाह * नेति । * पुरोडाशेऽर्थप्राप्त्यप्रसङ्गं तावदुपपादयति- * सर्वेति । * अर्द्धपेषणे पिण्डानिष्पत्तेस्तत्साध्यपुरोडाशानिष्पत्तिमाशङ्क्य शिथिलपिण्डनिष्पत्त्यापि पुरोडाशनिष्पत्तिमाह*तावतापीति * पश्चादर्थविप्रतिषेधाप्रसङ्गमुपपादयति * हृदयादीनामपीति । * उत्सादस्योत्कर्त्तनस्य यो हृदयाद्येकदेशो देशस्तद्वर्जमेकदेशान्तरे ऽपिष्यमाणानां हृदयादीनां तेषामाकारनाशः स्यादिति पूर्वाधिकरणभाष्योक्तस्य संस्थाननाशस्यात्यन्तमनापत्तेर्हृदयत्वादिजात्याश्रयभूतायाः संस्थानविशेषविशिष्टाया व्यक्तेरप्यत्यन्तमनाशेन जातेरनाशात्तस्योत्सादेशं प्रति मुह्येयुरिति भाष्योक्तस्य मोहस्यानापत्तेर्हृदयत्वादिजातिकावयवोत्साददेशापादानकावदानसाध्यप्रधानाख्यार्थविप्रतिषेधाप्रसङ्ग इत्यर्थः ॥ प्रसङ्गाच्चरोः सर्वपेषणे भागसंमोहः स्यादिति धर्मविप्रतिषेधसूत्रस्थभाष्योक्तस्य कस्या देवताया को भाग इति मोहस्य तुल्यन्यायत्वात्पशौ प्राप्तस्यार्द्धपेषणे प्रसक्त्यभावमाह * इतरेति * इतरस्य देवतान्तरभागस्य य उत्सादेशस्तस्य देवतान्तरभागावदानापादानतया स्पष्टत्वेन पूपभागः पिष्टो ऽपि सन् यो देवतान्तरभागोत्साददेशव्यतिरिक्तादुत्साददेशादवत्तः स पूषभाग इत्येवमुपलक्षणसंभवान्न मोहापत्तिरित्यर्थः । अनेन चाङ्गनाशशब्दोवदानप्रकृतित्वे नाङ्गस्य हृदयादेर्विनाशो ऽपादानत्वेन चाङ्गस्योत्साददेशस्य मोहो देवताङ्गस्य वार्द्धस्य मोह इत्येवं त्रेधा व्याख्यातः । पेषणस्य देवतानिमित्तत्वे पूषवाक्येनैव द्विदेवत्ये पेषणसिद्धेर्विध्यानर्थक्यप्रसङ्गाददृष्टार्थत्वावगतेः सद्वितीयपूषोद्देशेनाप्यपिष्टादङ्गादवदानाविरोधात्त्रिविधो ऽप्यङ्गनाशो न प्रसज्यत इति परिहारान्तरार्थमपिष्टादिति भाष्यं व्याचष्टे * अथ वेति । * भाष्यकारीयामर्थाभावाद्धीत्यादिसूत्रावयवव्याख्यामुपसंहरति * तस्मादिति । * विधित्वे सर्वपेषणापत्तौ सूत्रेणोक्तायां सर्वपेषणापत्तावपि को दोष इत्याशङ्कावतारादुत्तरत्वेन सोमापौष्णोद्देशे चरुशब्दानर्थक्यं चरूद्देशे सोमापौष्णशब्दानर्थक्यमिति दोषोक्त्यर्थत्वात्तत्रेति भाष्यमिदानीं व्याचष्टे * इतीति । * भाष्यवार्त्तिकयोश्चरूक्त्या सोमापौष्णोऽप्युपलक्षितः । पेषणेतिभाष्यं पेषणविधावनिष्टापत्त्युक्तं पूर्वपक्षलिङ्गपेषणानुवादोपपादनार्थत्वेन व्याचष्टे * इति चेदिति । * नेमार्द्धपिष्ट-

वाक्ययोः पेषणानुवादोपपादनस्य पूर्वपक्षलिङ्गत्वसिध्युपयोगोक्त्यर्थं
१०६।१ तस्मादिति भाष्यं व्याचष्टे * अतश्चेति । *

एकस्मिन् वाऽर्थधर्मत्वादैन्द्राग्नवदुभयोर्न स्यादचोदितत्वात् ॥ ४४ ॥

एकस्मिन्वेति पूर्वपक्षनिरासप्रतिज्ञार्थसूत्रावयवव्याख्यार्थमेकेति भाष्यं व्याचष्टे * एकस्मिन्नेवेति । * हेतुप्रश्नोत्तरत्वेनार्थधर्म्मत्वादिति सूत्रावयवस्य व्यतिरेकमुखेन व्याख्यानार्थं नैष इति भाष्यं देवतानिमित्तत्वादिति पूर्वपक्षसूत्रावयवेन हविषः पेषणाख्यधर्मान्वये पूष्णो देवताशब्दोक्तस्य स्वामित्वस्य व्यधिकरणत्वेन साक्षान्निमित्तशब्दोक्तद्वारत्वायोगात्पूषस्वत्वाख्यस्य पूषभागत्वस्य द्वारत्वोक्त्या पेषणस्य पूषभागभूतापूर्वसाधनधर्मत्वाभिधानाद्देवताधर्मत्वानुक्तेस्तन्निरासायोगादयुक्तमाशङ्क्य पूषभागधर्मत्वनिरासार्थत्वेन व्याचष्टे * कुत इति । * न देवताधर्म इति वदता न देवता भागधर्म्म इत्युक्तमित्यर्थः ॥ अन्वयमुखेन व्याख्यार्थं कस्येत्यादियागइत्यन्तं भाष्यं व्याचष्टे * पूषेति । * यागस्य यो ऽर्थः प्रयोजनमपूर्वं तद्धर्मं पेषणमित्युक्ते पूर्वधर्मस्याप्यपूर्वसाधने ऽनुष्ठेयत्वात्साधनस्य च द्वारविशेषानपेक्षायां स्रुगादिष्वप्यनुष्ठानापत्तेर्द्वारविशेषे ऽवश्याभ्युपगमनीये भागश्रुत्यालोचनया पूषस्वामित्वाख्यस्य पूषभागत्वस्य द्वारत्वावगतेः पूषभागधर्मत्वाविरोधमाशङ्क्य देवतोद्देशेन त्याज्यत्वस्य प्रकृतौ द्वारतया ऽवगतस्येहाप्यतिदेशाद्द्वारत्वावगतेः पूषभागत्वस्य द्वारत्वकल्पना न युक्तेति परिहारसूचनार्थं पूषदेवत्यस्य पूषोद्देशेन त्याज्यस्य धर्मः सन् यागार्थस्यापूर्वस्य धर्मो न तु पूषभागधर्मः सन्नपूर्वधर्म्म इत्युक्तम् । प्रपिष्टभागशब्दाद्यो भागः सप्रपिष्ट इति भागोद्देशेन पेषणविधानात्पूषभागधर्मत्वप्रतीतेः पूषभागत्वस्योपदेशतो द्वारत्वावगमादातिदेशिकपूषदेवत्यत्वद्वारबाधावगतेः कथं देवताभागत्वस्य द्वारत्वनिरासार्थो देवताभागधर्मत्वनिरास इति कथमिति भाष्येण पृष्ट्वोच्यतइत्यनेन पितृधने पुत्रस्येव स्वतः सिद्धे भागे निरस्ते नन्विति भाष्येण स्वतःसिद्धदेवताभागाभावे ऽपि देवतायै दानात्तस्या भागो भविष्यतीत्याशङ्क्योच्यतएतद्धीत्यादिनास्ति पूष्णो भाग इत्यन्तं भागाभावोक्त्यर्थं भाष्यं व्याचष्टे * न तावदिति *

परिग्रहात्प्राक्स्वस्वामिसम्बन्धानापत्तावस्वपरिग्रहात्स्तेयापत्तेः परिग्रहाख्यपरिग्रहीतृव्यापारानपेक्षादुद्देशत्यागाख्याद्दातृव्यापारमात्रात्स्वस्वामिसम्बन्धापत्तिमाशङ्क्य प्रतिग्रहीतृव्यापारानपेक्षत्वेऽपि दानस्य परेच्छाधीनविनियोगार्हत्वाख्यपरस्वत्वापादनपर्यन्तत्वात्परो यथेष्टविनियोगं करोत्वित्येवं संकल्पपर्यन्तान्योद्देशपूर्वस्वत्यागसंकल्पाख्याद्दातृव्यापारात्स्वस्वामिसम्बन्धापत्तेर्देवतायाश्च विग्रहादिराहित्येन यथेष्टविनियोक्तृत्वायोगात्तदिच्छाधीनविनियोगार्हत्वापादनपर्यन्तोद्देशत्यागाशक्तेर्न देवतास्वत्वापत्तिरिति परिहारसूचनार्थं यश्चेत्यादि भाष्यावयव व्याख्यातुं * कर्मसाधनो हीत्याद्युक्तम् । * नवमनिषिद्धभोक्तृत्वाद्यभ्युपगमेन पूर्वपक्षायोगात्तन्निरासानर्थक्यापत्तेर्देवताया यागसाध्यस्वर्गादिस्वाम्याभावात्स्वर्गादिदानाशक्तेर्यागानाराध्यत्वसिध्यै देवतोद्देशेनात्यक्तस्वर्गादौ स्वाम्ये नवमे निषिध्यमानेऽपि देवतोद्देशेन त्यक्ते हविषि स्वाम्यानिषेधाद्देवतोद्देशेन त्यक्तस्य हविषो देवतास्वत्वाख्यं तद्भागत्वं भविष्यतीति पूर्वपक्षाशयनिरासार्थत्वेनायं ग्रन्थो यथेष्टविनियोगं सेवनाख्यभजनत्वेनोपचर्य यथेष्टं विनियुज्यतइति कर्मसाधनभागशब्दव्युत्पत्तेर्यो ऽयं यथेष्टं विनियुङ्क्ते स तस्य भागो न च देवता हविर्यथेष्टं विनियुङ्क्ते नवमे विग्रहादिनिषेधेन यथेष्टविनियोक्तृत्वानिषेधादित्येव योज्यः । देवताया यथेष्टविनियोक्तृत्वाख्यस्वाम्यायोगेऽपि देवतोद्देशेन त्यक्तस्यान्येनाविनियोज्यत्वादन्यं प्रति यथेष्टविनियोज्यत्वप्रतिबन्धापादकत्वाख्यस्वाम्योपपत्तेः पूष्णो भागः संभवतीत्याशङ्क्यानन्यविनियोज्यत्वाख्यपूषस्वत्वलक्षणपूषभागत्वसंभवेपि तद्भागत्वस्यार्थानुपयोगित्वात्पेषणाख्यस्य धर्मस्य देवताभागधर्मत्वे निष्प्रयोजनत्वापत्तेर्न देवताभागधर्मता युक्तेति परिहारार्थमथापीत्यादिभाष्यं व्याख्यातुमाह ।* अथापीति ।* अन्यं प्रति यथेष्टविनियोज्यत्वप्रतिबन्धलक्षणस्य स्वीकारस्यास्मिन्ग्रन्थे भजनत्वोपचाराद्यद्यपि देवता हविरन्यं प्रति यथेष्टविनियोज्यत्वप्रतिबन्धापादनात्स्वीकुर्यात्तथापि देवतायाः प्रयोजकत्ववारणार्थं नवमे फलदातृत्ववारणात्तद्भागधर्मत्वे पेषणस्य निष्प्रयोजनत्वप्रसङ्गात्तद्धर्मत्वानुपपत्तेः पूषभागत्वस्य द्वारत्वायोगाद्देवतोद्देशद्रव्यत्यागाख्यो याग एवापूर्वस्य धर्मान्वये द्वारमित्यर्थः । प्रयोजकत्ववारणोक्त्या तद्धेतुफलदातृत्ववारणे देवताभागधर्मत्वे पेषणस्य निष्प्रयोजनत्वोपपादनार्थं सूचितम् । भागोक्त्या देवताया

इति भाष्यस्था षष्ठी भागव्यतिरेकजनितात्वेन व्याख्याता यागो-क्त्या भागशब्दस्य त्याज्यद्रव्यवाचित्वे सूचिते तर्हि समास-श्रुत्या भागशब्दवाच्यस्य देवतोद्देशेन त्याज्यस्य साक्षात्पेषणा-न्वयावगतेर्देवतोद्देशेन त्याज्यत्वस्य द्वारमात्रत्वोक्तिरयुक्तेत्याशङ्का-निरासायापूर्वधर्मत्वव्युत्पादनार्था नवमाद्यन्यायोक्तिः । नावमिके देवताधिकरणे देवतायाः प्रयोजकत्ववारणार्थं फलदातृत्ववारणा-त्पेषणस्य देवताराधनप्रयोजनत्वायोगाद्देवताभागधर्मत्वे देवताराधनार्थत्वेन प्रयोजनवत्त्वासिद्धावप्यपूर्वसाधने कृतस्यापूर्वार्थत्वा-भ्युपगमात्तत्र च स्रुगादौ पेषणप्रसक्तिपरिहारार्थं द्वारविशेषापे-क्षायां भागश्रुत्यालोचनया ऽनन्यविनियोज्यत्वलक्षणपूषभागतया यदपूर्वसाधनं तत्पेष्टव्यमिति पूषभागत्वस्य द्वारत्वावगतेः पूष-भागे ऽनुष्ठानलक्षणं पूषभागधर्मत्वं विना पेषणस्याविधेयत्वेना-पूर्वसिध्यर्थत्वायोगात्पूषभागधर्मत्वे सत्येवापूर्वसिद्ध्याख्यप्रयोजन-वत्त्वं भविष्यतीत्याशङ्क्य विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदनेति दाशमिके देवताधिकरणे देवतायाः स्वरूपेण कर्मणि समवायनिषेधेनान्यविनियोज्यत्वप्रतिबन्धलक्षणव्यापारायोगाद्दातृव्या-पारेणान्यविनियोज्यत्वप्रतिबन्धे ऽपि देवताविनियोज्यत्वानापादना-त्पूषस्वत्वाख्यपूषभागत्वानिष्पत्तेस्तस्य द्वारत्वायोगेन पूषणमुद्दिश्य त्यक्तस्यापि पूषभागत्वद्वारा ऽपूर्वसाधनत्वायोगात्तस्मिन्कृतस्य पेष-णस्यापूर्वधर्मत्वासिद्ध्या ऽपूर्वसिद्धिप्रयोजनत्वायोगोक्त्यर्थस्यायागे-तिभाष्यावयवस्यापूर्वधर्मत्वासिद्धेरित्येवं व्याख्यासूचनार्थं दाशमि-कदेवताधिकरणन्यायोक्तिः ॥ पेषणस्यापूर्वधर्मत्वे कः पुनरर्थो यागइतिप्रश्नोत्तरभाष्ये यागधर्मत्वोक्तिरयुक्तेत्याशङ्क्यापूर्वविवक्षयै-व वा नादराद्यागोक्तिरिति परिहारं तद्व्याख्यानन्तरं वाक्यमयागेत्या-द्यानामपि यागोक्तीनामनादरहेतुकत्वसूचनार्थं बहुयागोक्तिसन्निधा-वाह * भाष्येति । * पूषयागसाधनस्य द्रव्यस्य पूषभागत्वाभावे पूषप्रधानबहुव्रीहिस्थेन भागशब्देन पूषयागलक्षणाशक्तेर्दर्शपूर्णमा-सप्रकरणाम्नातस्य च पेषणस्य पूषयागे प्राकरणिकविनियोगायोगा-त्पूषयागाङ्गत्वं न स्यादित्याशङ्कार्थं कथं तर्हीति भाष्यं व्याचष्टे *कथं तर्हीति । *यागोक्तेः पूषयागाख्यविशेषपरत्वसूचनार्थो ऽत्र शब्दः । पूषोद्देशेन त्याज्यस्य द्रव्यस्य पूषभागत्वाभावे भागशब्दस्य यागलक्षणाशक्तिं तर्हिशब्दसूचितामुपपादयितुं * वाक्येत्युक्तम् । *

यागोक्तेरनादृत्यत्वसूचनाया* पूर्वेण वेत्युक्तम् ।* देवतावाचिपूषश-
ब्दसमभिव्याहारात्मकवाक्यगम्यपूषोद्देशत्याज्यद्रव्यवाचित्वेन भा-
गशब्देन पूषयागलक्षणात्पेषणं यागधर्मो भविष्यतीति परिहारार्थमु-
च्यतइति भाष्यं देवतास्वेन पेषणस्य भागश्रुत्या संयोगाद्वाक्यलभ्यो-
यागसंयोगो न युक्त इति प्रश्नाशयविवरणार्थं च ननु चेति भा-
ष्यमुत्तराशयविवरणार्थं चोच्यते भागाभावादित्याद्युक्तमित्यन्त भा-
ष्यमेकग्रन्थेन तात्पर्यतो व्याचष्टे * तत्रेति * भागाभावोक्त्योक्तस्य
मुख्यदेवतास्वाख्यभागरूपार्थासंभवस्य देवताभागसंयोगायोगहेतोर्या-
गलक्षणार्थत्वोपपादने तात्पर्यसूचनार्थं * मुख्येत्युक्तम् । * भाष्ये दे-
वतायाः स्वामित्वान्वितेन भागेन पेषणस्य संयोगो देवतासंयोगो
विवक्षितः । देवताभागान्वयायोगे ऽपि यागान्वयः कथमिति तथापि
त्विति भाष्येणाशङ्क्य भागोक्त्या पूषोद्देशत्याज्यत्वलक्षणद्वारा याग-
लक्षणादिति परिहारोक्त्यर्थं तदुच्यतइत्यादिदेवतेत्यन्तं भाष्यं व्याचष्टे
* परस्येति । * तच्छब्देन व्याख्येयभाष्यनिर्दिष्टपूषपरामर्शात्पूषोद्दे-
शेन त्याज्यतेत्यर्थः । उभयोरित्यादिसूत्रावयवव्याख्यार्थं नचेत्यादि-
सम्बन्धइत्यन्तं भाष्यमुपेक्ष्य केवलेत्वित्याद्यपेत्यन्तं भाष्यं सेव्यवाचिना
भागशब्देन कथं त्याज्यलक्षणेत्याशङ्क्यान्यस्मै सकल्पितस्योद्देश्यं प्र-
ति भागवत्त्वप्रसिद्धेः पूषोद्देशेन त्याज्यतया संकल्पितस्य भागशब्देन
लक्षणोपपत्युक्त्यर्थत्वादपकृष्य व्याख्येयमिति मत्वादौ व्याचष्टे * स
चेति । * असावित्यनेन तस्मै संकल्पित इति व्याख्येयो निर्दिश्यमा-
नसंकल्पितपरामर्शादेकदेवत्ये स त्याज्यो ऽर्थः पूषविशिष्टः संक-
ल्पितो भागो भवतीति पूषभागव्यपदेशो युक्त इत्यर्थः । उपेक्षितं
भाष्यं तात्पर्यतो व्याचष्टे * द्विदेवत्ये पुनरिति । * पैन्द्राग्नवादि-
ति भाष्योपेक्षितसूत्रावयवव्याख्यार्थं * यथैवेत्युक्तम् । * इह पुनः ६१०।२
पूषपदस्येतिपूर्वपक्षवार्त्तिकोक्तं वैषम्यं परिहरति * यद्यपि चेति । *
इह द्विदेवत्ये पूषभागशब्दाप्रवृत्तिरित्यर्थः । एकैकोद्देशं विना द्वयो-
द्देशायोगाद्द्विदेवत्ये ऽपि केवलपूषभागत्वापत्तिमाशङ्क्य येन कार-
णेन संकल्पो भागव्यपदेशहेतुस्तेनकारणेन यद्यपि पूषास्वशब्दोच्चार-
णेन[भाष्ये इन्द्रापूष्णोरुच्चारणमित्यन्वयः शब्दव्यतिरेकजनिता च षष्ठी
तेनेन्द्रापूष्णोर्वाचकस्येन्द्रापूषशब्दस्योच्चारण कुर्वन्नित्यर्थः एकदे-
शभूतपूषशब्दोच्चारणस्य समस्तोच्चारणे हेतुत्वात् । उपकारकमिति
वोच्चारणविशेषणम् । अर्थाच्चोपकार्यद्विदेवत्यत्वसंकल्पलाभ इति

भाव:१]।इन्द्रापूषशब्दोच्चारणं द्विदेवत्य चरुसंकल्पोपकारि कुर्वन् द्विदेवत्यचरुसंकल्पोपकारी स्यात्तथापि पूष्णो द्विदेवत्यस्यासंकल्पनान्न तस्य पूष्णः सद्विदेवत्यो भागव्यपदेशार्ह इति परिहारार्थं तेनेति भाष्यं व्याचष्टे * यद्यपि चेति । * यत्रैकः पूषा देवतेत्येवमेकस्मिन्निति सूत्रावयवयोजनार्थं केवल इति भाष्यं यत्रोभे देवते इत्येवं चोभयोरिति सूत्रावयवयोजनार्थं नेन्द्रापौष्णादिष्विति भाष्यं स्पष्टत्वान्न व्याख्यातम् ॥

हेतुमात्रमदन्तत्वम् ॥४५॥

यददन्तत्वं देवताभागधर्मत्वे लिङ्गमुक्तं तद्धेतुवन्निगदार्थवादमात्रत्वाद्यागापूर्वधर्मत्वपक्षे ऽप्युपपन्नमित्येवं सूत्रव्याख्यार्थं यदुक्तमितिभाष्यं व्याचष्टे * यत्त्विति । *

वचनं परम् ॥ ४६ ॥

यत्परं नेमपिष्टार्द्धपिष्टवाक्ययोः पेषणानुवदनं देवताभागधर्मत्वे लिङ्ग मुक्तं तत्पेषणविधित्वेनाननुवादत्वादलिङ्गमित्येवं सूत्रव्याख्यार्थमथेत्यादिभवतीतीत्यन्तं भाष्यं व्याचष्टे*नेमेति। * वचनात्सर्वपेषणमितिसूत्रे सोमापौष्णसम्बन्धे नेमपिष्टसंबंधे चेति भाष्योक्तां वाक्यभेदशङ्कां नन्विति भाष्यानूदितां स्वयं तावन्नेमपिष्टवाक्ये सर्वविशेषणविशिष्टयागभावनाविधानादर्धपिष्टवाक्ये चार्धविशिष्टपेषणविधानात्परिह रति*विशिष्टेति । * विशिष्टविधौ च सति वचनादिति सूत्रोक्तामपरिहृत्य विधित्वाभ्युपगमेन लिङ्गपरिहाराशक्तेर्वचनमित्यनेन विशिष्टविधित्वस्यैवोक्तत्वादनेकार्थविधिलक्षणवाक्यभेदशङ्कानुपपत्तेर्नन्विति भाष्येण गौरवलक्षणवाक्यभेदशङ्कोक्तेत्यापाद्यागतौ गौरवस्यादोषत्वं वक्तुमगौरवपक्षसंभवे तदाश्रयणेन गौरवं परिह्रियते इह त्वगौरवपक्षासंभवादानर्थक्यपरिहारार्थं गौरवाभ्युपगमो न दोषायेत्येवं परिहारार्थमुच्यतइत्यादिभाष्यं व्याचष्टे * अविशिष्टेति । * तस्मादिति भाष्यं सूत्रार्थोपसंहारद्वाराधिकरणार्थोपसंहारार्थत्वेन व्याचष्टे * तस्मादिति * ॥

इतिश्रीमन्त्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजिमाधवभट्टोपाध्यायात्मजसोमेश्वरकृतौ तन्त्रवार्तिकटीकायां सर्वानवद्यकारिण्यां न्यायसुधाख्यायां तृतीयस्याध्यायस्य तृतीयःपादःसमाप्त. ॥

---

१ इति द्वितीयपुस्तके नास्ति ।

॥ ॐनमः श्रीगणेशाय ॥

निवीतस्याऽर्थवादत्वे प्रथमाधिकरणम् १ ।

निवीतमिति मनुष्यधर्मः शब्दस्य तत्प्रधानत्वात् १।

निवीतस्य मनुष्यधर्मत्वादिचिन्तायां प्रकरणस्य केन सह विरोधाविरोधचिन्तेत्याशङ्क्य श्रुत्या मनुष्यधर्मत्वस्य लिङ्गात्सर्वकर्मधर्मत्वस्य वाक्याच्च मनुष्यप्रधानकर्मधर्मत्वस्यावगतेस्त्रयंश्च संहेति दर्शयितुमाह * स एवेति * । प्रासङ्गिकानन्तरचिन्ताद्वयेनासंगतिशङ्कानिरासार्थप्रासङ्गिकसमाप्त्या यः प्रकृतो बुद्धिस्थीकृतः स एवेत्युक्तं शुद्धमनुष्यातिथ्याङ्गत्वपक्षयोर्वा प्रकरणादुत्कर्षात्पक्षान्तरेषु चानुत्कर्षादुत्कर्षानुत्कर्षफलत्वं स एवेत्यनेनोक्तम्॥प्राचीनावीतस्यापि पितृप्रधाने कर्मणि विधावुत्कर्षापत्तेः सन्निधौ च निवीतोक्तेर्व्यवहितोपवीतश्रुत्यर्थत्वसिद्धान्तायोगप्रसङ्गात्प्राचीनावीतमपि कस्मान्न चिन्तितमित्याशङ्क्य शुद्धपितृधर्मत्वादिपक्षासंभवात्तस्यात्राचिन्तनीयतां सूचयितुमाह * तत्रेति । * अत्रैवैते सर्वे पक्षाः संभवन्ति न प्राचीनावीतं पितृणामित्यत्रेति सावधारणं व्याख्येयं शुद्धकर्मयुक्तशब्दाभ्यां मनुष्यधर्मोक्तेः पक्षद्वयोक्त्यर्थतोक्ता । विध्यर्थवादचिन्तायां विरोधाविरोधचिन्तात्मकत्वाभावेनासंगतिमाशङ्क्याह * यौ त्विति ।* नोपन्यस्यथाविति द्वितीयार्थवाचिना कृत्येन प्राधान्यं निरस्तं भाष्यकृतोपक्रमे विध्यर्थवादचिन्तायाः कृतत्वात्प्राधान्यशङ्कां निराकर्तुमाह * यस्त्विति ।* कृत्वाचिन्तात्वमेवोपपादनपूर्वं विवृणोति * न हीति ।* विधिं विना सामान्यतोऽङ्गत्वासिद्धेस्तद्विशेषं मनुष्याङ्गत्वादिबोधिश्रुत्याद्यव्यापारसूचनार्था मात्रोक्तिरिति हेतोः कृत्वा चिन्तात्वेन विधिरिति प्राक्प्रस्तुत्येतिचिन्तात्वेनेति शब्दाध्याहारेणेति योज्यम् । विध्यर्थवादचिन्तायाः प्राधान्याभावेऽपि प्राक्प्रस्तावोपपत्तिसूचानार्थौ प्रथमपश्चाच्छब्दौ विधिवन्निगदानामपि शोभते ऽस्य मुखं य एवं

वेदेत्यादीनामर्थवादाधिकरण एवावस्थितार्थवादत्वानामौदुम्बराधिकरणे विधित्वशङ्कामात्रनिरासाद्विधित्वायोगोऽर्थवादत्वोक्त्या विवक्षितः यो भाष्यकृता विध्यर्थवादपक्षोपन्यासपूर्वको लक्षणानुरूपमनुष्यधर्मत्वादिपक्षोपन्यासः कृतः स कृत्वा चिन्तारूपेणेति यदुक्तं तद्दिग्विभागप्रतिपादितपरकृतिपुराकल्पाधिकरणेष्वपि योज्यमिति प्रसङ्गादाह * परेष्वपीति ॥ * परकृतिपुराकल्पाधिकरणे माषपाको मनुष्यमात्रधर्मो वृष्णिसगोत्रधर्मो वेत्येतावन्मात्रविचारेण कर्मयुक्तमनुष्यधर्मत्वाद्यविचाराद्यथासंभवमित्युक्तम् । निवीतमिति कीर्त्तनं वचनं स च मनुष्यधर्म्म इत्येवं वचनं परमिति पूर्वाधिकरणान्त्यसूत्रस्थविधिवाचिवचनशब्दानुषङ्गेण विधित्वमनुष्यधर्मत्वपक्षद्वयप्रतिज्ञानार्थत्वेन निवीतमिति सूत्रावयवव्याख्यार्थं किमिति पूर्वपक्षभाष्य स्पष्टत्वादव्याख्याय विधित्वप्रतिज्ञायां हेत्वपेक्षायामौदुम्बराधिकरणपूर्वपक्षसूत्रोक्तहेतूक्त्यर्थं यदीति भाष्यं व्याचष्टे *तत्रेति* तच्छब्देनाप्राप्तविधिताऽस्मिन् सूत्रे सूचिता । पष्ठ्याख्यस्य शब्दस्य मनुष्यप्रधानत्वादित्येवं मनुष्यधर्मत्वहेतूक्त्यर्थत्वेन शब्दस्येति सूत्रावयवव्याख्यार्थं विधिश्चोदिति भाष्यं व्याचष्टे * अहीनादीति * प्रकरणानुरोधाच्छ्रुतेरन्यथाव्याख्यानौचित्यसूचनायाहीनाद्यधिकरणन्यायोक्तिः । अहीनादे प्रकृतकर्मानन्वयाद् द्वादशोपसत्त्वादेस्तद्युक्ताहीनधर्मत्वायोगेऽपि मनुष्याणां प्रकृतकर्मान्वयसंभवाद्बाधकस्यापि बाधायोगात् प्रकरणानुगृहीतया श्रुत्या प्रकृतकर्मयुक्तमनुष्यधर्मत्वसूचनार्थश्चकारः । प्रश्नपूर्वं मनुष्यप्राधान्योपपादनार्थं कथमित्यादि भाष्यं तात्पर्यतो व्याचष्टे * तेषां हीति । * पष्ठ्युक्तसम्बन्धसामान्यस्य विशेषापेक्षायां पष्ठ्या विध्यपेक्षिताऽङ्गाङ्गित्वाख्यसम्बन्धविशेषसमर्पणेन विनियोजकत्वाद्विहितस्या विहितसम्बन्ध्यङ्गत्वावगतेरेकस्मिंश्च वाक्ये विधेयद्वयायोगान्निवीतस्यैव विहित त्वान्मनुष्याङ्गत्वेनाविहितानां मनुष्याणां निवीताङ्गतेत्याशयः स्वत्वशब्देनाङ्गत्ववाचिनोपकारकशब्दो भाष्यस्थोऽङ्गवाचितया व्याख्यातः प्रकरणि[1]ष्याङ्गत्वेन साक्षात्कर्तृसमीहितसाधनत्वोपपत्तौ पारम्पर्य

१ निव्यानस्य दर्शपूर्णमासाङ्गस्यावगते. फलवत्त्वेन समीहितत्वावसायान्मनुष्याणामेव कृत्स्नानिवीतशब्दयोगेन कर्तृवाचिन्या षष्ठ्या ऽङ्गतां नन्विति भाष्येणाऽऽशङ्क्य कर्तृत्वस्य स्वर्गकामादिप्राधान्येऽप्यविरोधात्कर्तृभूतमनु इति द्वितीयपुस्तके ऽधिकः पाठः ।

समीहितनिव्यानाङ्गत्वं कल्पनायोगात्क्रतिबलेन निव्यानस्यैव मनुष्याङ्गता युक्तेति परिहारार्थं प्रकरणाद्धीति भाष्यं स्पष्टत्वाद्व्याख्याय कर्तृवाचितृतीयाऽभावान्मनुष्याणां निव्यानाङ्गत्वानवगतेरपि निव्यानस्यैव मनुष्याङ्गता युक्तेति परिहारार्थमपिचेति भाष्यं व्याचष्टे * गुणोति। * षष्ठ्येव कृद्योगेन कर्तृवाचिनी ६।२।१ त्वाद्गुणविभक्तिर्भविष्यतीत्याशङ्क्य सम्बन्धमात्रवाचिनीयं षष्ठी न कर्तृवाचिनीति षष्ठीत्विति भाष्येणोक्ते तदुपपादनार्थं तत्रेति भाष्यं व्याचष्टे * अर्थादेव चेति। * अतो मनुष्यप्रातिपदिकश्रुत्यानर्थक्यपरिहारायापि तद्धर्मतेत्युपसंहरति* अतो पीति।*

अपदेशो वार्थस्य विद्यमानत्वात् २।

मनुष्यार्थस्य निवीतस्य लोके विद्यमानत्वादिति हेत्वर्थोपपादनार्थं निवीत हीति भाष्यं विधेयत्वेनाभिमतस्य गलवेणिकाबन्धाख्यनिव्यानस्य युद्धादन्यत्राप्राप्तेर्विधिसंभवादयुक्तमाशङ्क्य परिकरबन्धाख्यनिवीताशयत्वेन व्याचष्टे * निवीतमिति। * उपवीतश्रुतेश्चानुवादप्रयोजनस्यार्थवादो वेति सूत्रे वक्ष्यमाणत्वान्नानर्थक्यापत्तिरित्याह * स त्विति। *

विधिस्त्वपूर्वत्वात्स्यात् ३।

अप्राप्तविधित्वे निरस्ते ऽपि नियमविधित्वप्रतिज्ञार्थस्य विधिस्त्विति सूत्रावयवस्य व्याख्यार्थं विधिरेवेत्यादिभाष्यं संक्षिप्य व्याचष्टे * विधिरेवेति। * पूर्ववत्त्वादपदेशः स्यान्न त्वयं निव्याननियमः पूर्ववानित्येवं पूर्वसूत्रस्थापदेशाक्त्यनुषङ्गेण व्यवधारणकल्पनायापूर्ववत्त्वात्स्यादिति सूत्रावयवव्याख्यार्थं पूर्ववानित्यादिभाष्यं पक्षेपि प्राप्तौ संभवन्त्यामश्रुतलिङादिकल्पनया विधिकल्पना न युक्तेत्याशयहेतुप्रश्नोत्तरत्वेन व्याचष्टे * कुतइति। * नित्यवत्कीर्त्तनान्यथानुपपत्त्या पक्षे प्राप्तस्यापि कल्प्यो विधिरित्युत्तराशयः। गलवेणिकाबन्धस्तु युद्धादन्यत्र पक्षेप्यप्राप्त इत्याह* कण्ठेति*

स प्रायात्कर्मधर्मः स्यात् ४।

नियमविधित्वे पक्षे प्राप्तस्य नियमविषयत्वात्कर्मार्थत्वेनैव च पक्षप्राप्तेः समान्यतः कर्मधर्मत्वे नियमविधितोऽवगते विशेषापेक्षायां

दर्शपूर्णमासाख्यकर्मधर्मप्रदेशाम्नानेन दर्शपूर्णमासकथंभावरूपशाविग-मात्तद्धर्म इत्येवं तृतीयपूर्वपक्षसूत्रव्याख्यार्थं यदुक्तमित्यादिभाष्यं व्याचष्टे * सतीति * । प्रायोक्तिव्याख्यार्था प्रदेशोक्तिः ॥

वाक्यस्य शेषवत्वात् ॥५॥

कर्माङ्गत्वे मनुष्योक्त्यानर्थक्यापत्तेः प्रकरणबाधभयाच्छुद्धमनुष्याऽङ्गत्वानभ्युपगमेऽपि प्रकृतकर्मयुक्तमनुष्याङ्गत्वं भविष्यतीत्याशङ्क्य कर्मयुक्तमनुष्याङ्गत्वे याजमानास्तु तत्प्रधानत्वादित्यनेन न्यायेन यजमानत्वापत्तेर्निवीतवाक्यस्य चाध्वर्यवसमाख्यात्मकशेषसम्बन्धा-न्वियानस्याध्वर्युकर्तृकत्वावगतेः कर्मयुक्तमनुष्याङ्गताप्ययुक्तेति परि-हारार्थत्वेन वाक्यशेषसमासपरेण भावप्रत्ययेन सम्बन्धोक्तिमभिप्रेत्य सूत्रव्याख्यार्थं निवीतमित्यादिभाष्यसमाख्यानुरोधेन श्रुतिबाधा-योगादयुक्तमाशङ्क्य मनुष्यश्रुतेर्विधित्वेनानुवादत्वेन वा द्विधा संभवे समाख्याया विधित्वानुवादत्वयोरसंभवादत्यन्तबाधा न युक्तेत्येवमाश-योक्तिपूर्वं व्याचष्टे*द्विधेति ॥ * मनुष्याङ्गत्वे तु लोहितोष्णीषादिव-द्गुणत्वाच्च वेदेन न व्यवस्था स्यादिति वक्ष्यमाणेन न्यायेन समा-
६१३।२ ख्याया नियामकत्वायोगादत्यन्तबाधः स्यादित्याह *मनुष्येति*कर्मा-ङ्गत्वेन केवलं बाधाभावः किंत्वन्यतोऽध्वर्युकर्तृकत्वानवगमादनुग्रह एवेत्याह * इतरथेति । * पूर्वसूत्रस्थप्रतिज्ञानुषङ्गेण सूत्रं योजयितु-माह * तस्मादपीति * ।

तत्प्रकरणे यत्तत्संयुक्तमविप्रतिषेधात् ॥६॥

उच्यत इत्यादिभाष्येण शुद्धकर्माङ्गत्वनिरासं सूत्रानारूढत्वादयुक्त-माशङ्क्योक्तपक्षनिरासं विना पक्षान्तरपरिग्रहायोगात्प्राकरणिकमनु-ष्यप्रधानान्वाहार्यपाकादिकर्माङ्गत्वपक्षापरिग्रहार्थाक्षिप्तशुद्धकर्माङ्गत्व-निरासार्थत्वेनोपपादयितुमाह * प्रथमं तावदिति । * उपपादितं-भाष्यं व्याचष्टे * श्रुत्या हीति । * प्रकरणे यन्मनुष्यसंयुक्तं कर्म तत्र निवीतं निविशते न शुद्धे प्रकृते कर्मणि सर्वेषां श्रुतिप्रकरणसमा-ख्यानामविरोधाच्छुद्धप्रकृतकर्मनिवेशे श्रुतिविरोधापत्तेरित्येवं सप्त-म्यर्थे तदित्यव्ययाङ्गीकरणेन सूत्रव्याख्यार्थं नेतीत्यादि भाष्यं संक्षिप्य व्याचष्टे * तदिति । * सर्वोक्त्या प्रकरणं चेति चकारस्य समा-

ख्याग्रहणार्थत्वं सूचितं कथमस्माद्वाक्यान्मनुष्यप्रधानकर्माङ्गत्वप्रतीतिरित्याशङ्क्याह * मनुष्याणामिति । * एवंसत्यातिथ्ये निवेशः कस्मान्नभवतीत्याशङ्क्याह * तदपि चेति । * अन्वाहार्यदानेन यत्स्वसिद्ध्यर्थमादीयते गृह्यतेऽन्वाहार्यपाकादि तत्सर्वमन्वाहार्यदानादिशब्देनोक्तं । अतो यदिह दर्शपूर्णमासयोर्मनुष्याणां कर्म तत्र निव्यातव्यमिति वाक्यार्थो भवतीत्युपसंहरति * अत इति । *

तत्प्रधाने वा तुल्यवत्प्रसंख्यानादितरस्य तदर्थत्वात् ॥ ७॥

पूर्वसूत्रस्थतत्संयुक्तशब्दोक्तमनुष्यप्राधान्यपुनर्वचनस्य प्रकरणविशेषणपरिसंख्यार्थत्वेन तत्प्रधानकर्मनिवेशप्रतिज्ञाव्याख्यार्थं नैतदित्यादि भाष्यं व्याचष्टे * प्रकरणेति । * हेतुप्रश्नोत्तरत्वेन तुल्यवदिति सूत्रावयवव्याख्यार्थं कुत इत्यादिभाष्यं व्याचष्टे * कुत इति *। उपव्ययतइत्यनेनैव देवप्रधाने दर्शपूर्णमासाख्ये कर्मण्युपवीतप्राप्तेरुपवीतं देवानामित्यस्य विधित्वायोगात्तुल्यानि चैतानि वाक्यानीति बहुवचनायोगमाशङ्क्य तुल्यवत्कीर्त्तनादेवोपवीतं देवानामित्यस्यापि देवप्रधानकर्ममात्रे प्राप्त्यै विधित्वोपपत्तिसूचनार्था त्रयोक्तिः । भाष्ये तु दर्शपूर्णमासमात्रेऽपि विध्यभ्युपगमे पष्ठ्यन्तोक्तप्रधानस्य कर्मणः प्रकृतकर्मान्तरान्वयानपेक्षत्वसाम्यात्तुल्यवत्कीर्तनाविरोधोक्त्यै प्रौढिसूचनार्थं दर्शपूर्णमासयोरित्युक्त्वा देवानामिति सामान्यश्रुतौ कथं विशेषावगतिरित्याशङ्क्य * प्रकृतयोरित्युक्तम् * । तुल्यवत्कीर्तनादेव च मनुष्यशब्दस्य पितृदेवतुल्यसनकादिमनुष्यवाचित्वावगतेर्दर्शपूर्णमासयोश्च पितृप्रधानवद्देवतुल्यमनुष्यप्रधानस्यापि कर्मणो ऽभावात्प्रकरणसमाख्यानुग्रहानुपपत्तेरातिथ्ये प्रकरणानपेक्ष विदधातीत्युक्तं।क्लिष्टो ऽपि चायं पक्षो मनुष्यदेवत्ये कर्मणि निवीतस्मृतेः पितृदेवत्ये च प्राचीनावीतस्मृतेर्मूलान्तरादर्शनेन तच्छ्रुतिमूलत्वसिद्ध्युपयोगितया स्मृत्युपबृंहितत्वाद्बलीयस्त्वेनोपन्यस्तः । श्लोकं व्याचष्टे * यथैवेति । * कथमिति भाष्यं शङ्कार्थं मनुष्याणामित्युत्तरार्थं मनुष्याणामेवेति पुनः शङ्कार्थमित्येवं परमतेन तावद्व्याचष्टे * कथमिति *। मनुष्यश्रुत्या मनुष्याङ्गत्वावगमाच्छ्रुत्यनादरे वा प्रकरणे न दर्शपूर्णमासाङ्गत्वावगमादुभयादरे वा प्रकरणस्थमनुष्यप्रधानकर्माङ्गत्वावगमान्नातिथ्ये विधियुक्त इत्येतच्छङ्कोत्तरत्वेनेतरस्येति सूत्रावयवव्याख्यार्थत्वेन कथमिति शङ्कायामनुष्याणामित्युत्तरानुपपत्तेर-

तद्व्याख्यानापरितोषात्स्वमतेन कथमित्यादि नमनुष्यप्रधानइत्यन्तं
६।१।४।१ भाष्यमेकग्रन्थत्वेन व्याचष्टे * समस्त एव चेति * । एतच्छङ्का-
त्तरत्वेनेतरस्येति सूत्रावयवस्य फलकल्पनापत्तेर्मनुष्यग्रहण
स्वार्थान्वयायोगेन मनुष्यप्रधानकर्मप्रतिपत्त्यर्थत्वाच्च मनुष्याङ्ग
निन्यान मनुष्यशब्दस्य चालौकिकसनकादिमनुष्यवाचित्वेन
तत्तत्प्रधानस्य कर्मणो लौकिकत्वायोगादलौकिकस्य च पितृय-
ज्ञादिवदपूर्वैकान्तिकत्वेनापूर्वान्वयसिद्धौ दर्शपूर्णमासैकवाक्यत्वान-
पेक्षणाच्च दर्शपूर्णमासस्थमनुष्यप्रधानकर्माङ्गतेत्येवं व्याख्यार्थमुच्यत
इत्यादि भाष्यं व्याचष्टे * सत्यमिति * निवीतसम्बन्धार्थत्वादिति
भाष्ये निवीतेन सम्बन्धो यस्य तत्प्रधानस्य कर्मणस्तन्निवीत-
सम्बन्धमिति बहुव्रीहिणा तदर्थत्वादिति तच्छब्दपरामृष्टं तत्प्रधान-
कर्मोक्तं प्रतिपाद्यत्वेनैव च कर्मणः शब्दप्रयोजनत्वात्तत्प्रधानप्रति-
पत्तिप्रयोजनतोक्तेतिसूचयितुं *तत्प्रधानेत्युक्तम् * । नचेत्यनेन तदुक्त-
मित्यादिवाक्यशेषो मनुष्यप्रधानकर्माङ्गत्वे सत्यलौकिकसनकादिमनु-
ष्यप्रधानस्य कर्मणो पूर्वैकान्तिकत्वेनानपेक्षितप्रकृतकर्मैकवाक्यत्वक
ल्पने प्रकरणस्याव्यापाराद्वाक्येनैव निवीतस्य मनुष्यार्थकर्मान्व-
यकरणात्तस्य च दर्शपूर्णमासान्वयकरणाद्वा वाक्यभेदापत्तेः समेषु
वाक्यभेदः स्यादिति क्लृप्त्यधिकरणन्यायेन विभज्यमानसाका-
ङ्क्षत्वाभावाद्भिन्नवाक्यत्वमुक्तमिति भिद्यते हि तथा वाक्यमित्य-
न्तेनोक्ता तदवेतरस्येति सूत्रावयवयोजनपूर्वं विवरीतुं मनुष्यशब्दस्या-
लौकिकमनुष्यवाचित्वसूचनार्थत्वमितरशब्दस्याभिप्रेत्यालौकिकार्थ-
स्य मनुष्यग्रहणस्य तत्प्रधानकर्मप्रतिपत्त्यर्थत्वात्तेनैवातिथ्याख्य-
कर्मप्रतिपत्त्यर्थेन प्रत्यक्षेण मनुष्यशब्देन निवीतशब्दस्यैकवाक्यत्वा-
वगतेस्तन्मात्रेण चापूर्वैकान्तिककर्मान्वयाभिव्यानस्यानर्थक्यपरिहार-
सिद्धेर्न प्रकृतैकवाक्यता युक्तेतीतरस्येत्यादिनोक्तमित्येवं व्याख्यात ।
तदुक्तमिति तच्छब्दस्य सप्तम्यर्थाव्ययत्वसूचनार्थं * तस्मिन्
सतीत्युक्तम् * ।

अर्थवादो वा प्रकरणात् ॥८॥

औदुम्बराधिकरणसिद्धान्तोपसंहारार्थत्वेनास्य सूत्रस्य विधित्वश-
ङ्कानिरासार्थत्वाद्विधित्वायोगासिद्धान्तोक्त्यर्थत्वेन वाशब्दव्याख्यार्थं

नचेत्यादिभाष्य प्रकरणादुत्कृष्येत संभवंस्तत्रेति प्रकरणबाधापत्त्याख्यहेतूक्त्यर्थत्वेन प्रकरणोक्तिव्याख्याभाष्यालोचनयातिथ्याङ्गत्वमात्रनिरासार्थतया भासमानं प्रकरणानुग्रहायातिथ्याङ्गत्वे निरस्ते दर्शपूर्णमासान्वाहार्याङ्गत्वपक्षयोर्निरस्तयोरपि प्रकरणबलेनोज्जीवनापत्तेः सर्वप्रकारविधित्वनिरासायोगादयुक्तमाशङ्क्य मनुष्यप्रधानेनान्वाहार्येण दर्शपूर्णमासाख्यकर्मयुक्तेन सम्बन्धाश्रुतेस्तदङ्गत्वे निव्यानस्य मनुष्यप्रधानकर्मान्वयकल्पनान्मनुष्यप्रधानस्य च कर्मणो दर्शपूर्णमासान्वयकल्पनाद्वाक्यभेदापत्तेर्दर्शपूर्णमासाख्येन वा कर्मणा सम्बन्धाश्रुतेस्तदङ्गत्वे मनुष्यश्रुतिबाधापत्तेर्मनुष्याङ्गत्वे च फलकल्पनापत्तेः प्रागेवोक्तत्वादातिथ्याङ्गत्वे तु निव्यानस्मृतेरेतच्छ्रुतिमूलत्वसिद्ध्यै कर्मव्यतिरेकजनितषष्ठीकल्पनेन तदन्वयकल्पनसंभावनायामपि निष्कारणप्रकरणोत्कर्षापत्तेर्विधिरयं स च मनुष्ये तत्प्रधाने वा तिथ्याख्ये न्वाहार्याख्ये वा कर्मणि दर्शपूर्णमासाख्ये कर्मणीति यदुक्तं तन्नास्तीति यथार्थयोगविभागेन सर्वपक्षनिरासार्थतया व्याख्यातुमाह * सर्वथेति * । अनुपात्ताः सम्बन्धिनो येषां सम्बन्धाख्यानां व्यतिरेकाणां तैरनुपात्तसम्बन्धिभिर्व्यतिरेकैरिति विग्रहः । संभवन्निति भाष्योक्तविशेषणफलोक्त्यै * सति चेत्युक्तम् * । प्रकरणसंभवोपपादनार्थवादोक्तिव्याख्यार्थं कथमित्यादिभाष्यं व्याचष्टे * अस्ति चेति । * विधित्वशङ्कानिरासेन दृढीकरण सिद्धोक्त्या विवक्षितम् ।

विधिना चैकवाक्यत्वात् ॥९॥

न केवल सर्वविधिप्रकारायोगान्नविधिः किंतु विध्येकवाक्यत्वादपीत्येवं सूत्रव्याख्यार्थमितश्चेत्यादिभाष्य व्याचष्टे * उपव्ययत इति । * प्राचीनावीतविधिव्यवधानादुपवीतविध्येकवाक्यत्वायोगमाशङ्क्य प्राचीनावीतकीर्तनस्यापि विधित्वनिराससूचनार्था प्राचीनावीतोक्तिः। यदीतिभाष्यं विध्येकवाक्यत्वस्य विधित्वनिरासहेतुत्वोपपादनार्थत्वेन व्याचष्टे * न हीति । * द्वयो स्वातन्त्र्येण विधीयमानयोरङ्गाङ्गित्वराहित्यनान्योन्यानन्वायन्नैकवाक्यतेत्यर्थं एकवाक्यत्वयोगोपपादनार्थं वचनेति भाष्य पाठपूर्वमुपपादयति * वचनेति *
भाष्यस्थभेदोक्तिव्याख्यानायान्यतोक्ता किमपेक्षयेत्यपक्षायां * म- ६१५।१
न्या चेत्युक्तम् * नास्त्यत्र विधायक इत्यादि न किंचित्कल्पनीयमि-

त्यन्तं भाष्यं प्राप्तानुवादत्वाख्यैकवाक्यतारूपोपपादनार्थत्वेनापकृष्य व्याख्येयमिति सूचयितुं प्रश्नपूर्वमनुवादप्रयोजनोक्त्यर्थं प्राप्तस्य किमर्थेनेत्यादिभाष्यमव्याख्यायैव व्याचष्टे * न चेति । * ब्रह्मयज्ञाङ्गभूतमनुष्यतर्पणग्रहणायादिशब्दः । एतच्चातिथ्यप्रयोगवचनमिति भाष्योक्तायाः शङ्कायाः स्वयं निरासायोक्तम् । आतिथ्यानङ्गस्यातिथ्यप्रयोगविध्यग्रहणमङ्गं सत्प्रयोगवचनेन गृह्येत न चाविहितमङ्गं भवतीति कर्त्रधिकरणभाष्येण द्वितीयप्रतीकोदाहृतेन द्रढयितुमाह * वक्ष्यति हीति । * प्रयोगविधिविहितत्वादेवाङ्गत्वं भविष्यतीत्याशङ्क्याह * तत्रेति । * अनङ्गस्य प्रयोगविध्यग्रहणे सत्यङ्गत्वात्प्रयोगविधिना विधिः प्रयोगविधिना चाङ्गतेत्यर्थः ॥ नैतदेवमितिभाष्योक्तं शङ्कानिरासं व्याख्यातुं प्रत्यक्षोपवीतविध्येकवाक्यत्वसम्भवे परोक्षातिथ्यप्रयोगविध्येकवाक्यत्वयोगादपि नातिथ्यगतस्य विधायकस्य निवीतसम्बन्धित्वकल्पनं युक्तमित्याह *प्रत्यक्षेण चेति ॥ * इह पुनरिति भाष्यं व्यतिरेकमुखेनानेकेषामन्योन्याकाङ्क्षासन्निधियोग्यत्वानामदृष्टानां कल्पनापत्त्या परोक्षैकवाक्यत्वायोगोपपादनसूचनार्थत्वेन व्याख्यातुमाह * तथा सति चेति । * हिशब्दार्थे चशब्दः । तस्मादित्यधिकरणार्थोपसंहारभाष्यं स्वाभिमतं श्रुतिप्रकारं दर्शयन् व्याचष्टे *तस्मादिति ॥ * निवीतमयोग्यमित्यव्याख्यातभाष्योक्तं स्तुतिप्रकारं व्याचष्टे * विपर्ययेण चेति * यज्ञोपवीत्येवाधीयीताध्यापयेद्यजेत याजयेद्वेति कठशाखाविहितस्य नवतन्तुकत्रिवृद्ग्रन्थिकस्य यज्ञोपवीतस्य प्राचीनावीतनिवीतत्वाख्ययोर्विन्यासविशेषयोः स्मृतिप्राप्तं पितृमनुष्यप्रधानकर्मविषयत्व यज्ञोपवीतविन्यासस्य विधेयोपवीतवद्वासोविन्यासत्वाभावेऽपि विन्यासत्वसाम्यात्श्रुत्यालम्बनवासोविन्यासविशेषलक्षणस्योपवीतस्य देवप्रधानकर्ममात्राङ्गत्वापादकमुपवीतं देवानामित्यस्य विधित्वं निराकर्त्तुं स्तुतिप्रकारोक्त्यर्थमुपवीतं तत्र योग्यमिति भाष्यमिति सूचनार्थं दर्शपूर्णमासाख्यविशेषणं चिन्ताप्रयोजनं विधित्वे वासोविन्यासविशेषलक्षणं निवीतमातिथ्ये कार्यमर्थवादत्वे न कार्यम् ।

उपवीतं लिङ्गदर्शनात्सर्वधर्मः स्यात् ॥१०॥

भाष्यकृतः सूत्रपदकोपेक्षणे कारणमाह * अत इति । * अनार्षेयत्ववादिनामुपपत्तिमाह * तथा चेति । * यज्ञोपवीती हीत्यस्य नवत-

न्तुकत्रिसूत्रत्रिवृद्ग्रन्थिकब्रह्मसूत्रविषयत्वेन वासोविन्यासविशेषरूपस्योपवीतस्य सर्वधर्मत्वे लिङ्गत्वाशङ्कायोगादुपव्ययत इत्यस्य च विधित्वाभावे समस्तवाक्यानर्थक्यापत्तेरनुवादत्वाशङ्कायोगात्सर्वकर्मार्थाचारप्राप्तोदगग्रत्वानुवादोपपत्तेश्च ये पुर इत्यस्य विधित्वशङ्कायोगाद्दण्डे निधाय समिधमनुद्रवतीति वाक्यप्राप्तोपरिधारणानुवादोपपत्तेश्चोपरि हीत्यस्य विधित्वसिद्धान्तायोगादनत्यन्तसारभूताख्योपपत्त्यन्तरसूचनार्थश्चकारः ॥ वृत्त्यन्तरेषु व्याख्यानादनापेयतां निरस्य निवृत्त्यन्तरेति चकारसूचितामुपपत्तिं निरस्यति *सन्ति चे- ६।१६।१
ति ।* कठोक्तान्निरस्यति *व्यवहितेति । * अतो जैमिनीयत्वाद्व्याख्या कार्येत्याह * तस्मादिति । * व्याख्यानात्सारत्वशङ्कां निवर्त्तयितुं मात्रशब्दः । उपव्ययतइत्यनुवादत्वात्सर्वदैवकर्मार्थं विधित्वाद्वा दर्शपूर्णमासमात्रार्थमिति सूत्रद्वयेनैकमधिकरणमुदस्कं चेति सूत्रस्थचशब्दसमर्थनार्थं विधिर्वेत्यस्य यज्ञोपवीती हीत्युदाहरणान्तरविषयत्वव्याख्यानेपि तृतीयचतुर्थसूत्राभ्यां विधेरित्येकरूपपूर्वपक्षकरणात्पञ्चमसूत्रेण चानुवादइत्येकरूपसिद्धान्तकरणादधिकरणद्वयस्यैक्यमङ्गीकृत्य सूत्रत्रयेण द्वितीयं षष्ठेन सूत्रेणोपरिहीत्यनुवादे विधिर्वेति तृतीयमित्येवं कैश्चित्त्रीण्यधिकरणानि रचितानि अन्यैर्विधिर्वेति सूत्रेणोपव्ययत इत्यनुवादे विधिर्वेत्याधिकरणान्तरकरणाच्चत्वारीति द्विधा षट्सूत्रीं व्याख्यातुमारभते * तत्रेति । * विधिर्वेत्यधिकरणान्तरे सिद्धविधित्वाभ्युपगमेनाद्याधिकरणचिन्तामधिकरणचतुष्टयवादिमतेनाह *प्रथमं तावदिति । * अधिकरणत्रयवादिमतेनाह * ये त्विति ।* एतन्मताभ्युपगमेनैव तावदाद्यसूत्रेण पूर्वपक्षमाह * किमिति ।* उपवीतस्य सर्वार्थत्वाभावेपि कर्मान्तरे ब्रह्मसूत्रानुवादोपपत्तिमाशङ्क्य दक्षिणोत्तरवासोविन्यासलक्षणप्राचीनावीतसाहचर्याद्यज्ञोपवीतशब्दस्य सव्योत्तरदक्षिणाधरवासोविन्यासवाचित्वसूचनायास्येत्युक्तम् । सर्वार्थतां विनोपवीतस्य जीवदग्निहोत्रे ऽनुवादायोगाद्दर्शपूर्णमासप्रकरणस्थेन च वाक्येन विधौ सर्वार्थत्वायोगादुपव्ययत-इत्यस्यानुवादत्वावगतेः प्रकरणायोगेन तद्बाधोक्त्ययोगमाशङ्क्याभ्युपेत्य वादत्वसूचनार्थं*मेतामित्युक्तम् । * यद्यप्यनुवादात्मिका प्रक्रिया तथाप्येषा कर्मान्तरे ऽनुवादो ऽन्यथानुपपत्तिलक्षणसामर्थ्यरूपतया लिङ्गत्वाद्बाधितेत्यर्थः । श्लोकं व्याचष्टे*तृतीयेति ॥ * अन्यथानुपपत्तिमुपपादयितुमाह । *न चेति * । आनर्थक्यमुपपादयति * यदि

हीति । * इतश्च दर्शपूर्णमासस्थोपवीतानुवादो न युक्त इत्याह *न चेति*। अग्निहोत्रेपि सायमग्निप्रजापत्योः प्रातर्वा सूर्यप्रजापत्योर्द्वयोरेव देवतात्वाद्बहुवचनायोगमाशङ्क्याह * अग्निहोत्रे त्विति । * पूर्वपक्षसूत्रार्थमुपसंहरति * तस्मादिति * ।

न वा प्रकरणात्तस्य दर्शनम् ।

६१७।३ न वेति सूत्रावयवमनुषङ्गेण पूरयति * न वेति । * प्रकरणादिति सूत्रावयवं हेतुप्रश्नोत्तरत्वेन व्याचष्टे * कुत इति । * तस्येति सूत्रावयवं लिङ्गदर्शनपरिहारार्थत्वेनानुभाषणपूर्वं व्याचष्टे * अथेति * प्रातिशून्यस्य लिङ्गस्या साधकत्वादुपवीतं देवानां देवलक्ष्ममेव तत्कुरुत इत्यनयोश्चार्थवादत्वेन प्रापकत्वाभावात्सुपरिहरत्वसूचनार्थो परिहृतमिति निष्ठा । विप्रकृष्टत्वाद्दर्शपूर्णमासस्थोपवीतानुवादायोग परिहरति * सन्निकृष्टेति । * बहुवचनायोगं द्वेधा परिहरति * वह्निति । * जीवदग्निहोत्रे विधिः कस्मान्न भवतीत्याशङ्क्य प्राचीनावीतीति विध्यन्तरैकवाक्यत्वाद्विधित्वायोगं सूचयितुमाह * ततश्चेति । *

विधिर्वास्यादपूर्वत्वात् १२ ।

अधिकरणचतुष्टयवादिमतेनैतत्सूत्रमस्मिन्नेवोदाहरणे विध्यनुवादचिन्तार्थत्वेन व्याख्यातुमारभते * तदेवेति ॥ *अस्मिन्मते पूर्वाधिकरणे पक्षद्वयेपि विधीयमानस्यैवोपवीतस्य दर्शपूर्णमाससर्वार्थत्वविचाराद्विधित्वे नवधारिते विचारायोगं शङ्कते * कथंपुनरिति ॥ * एतदधिकरणसिद्धविधित्वाभ्युपगमेन पूर्वाचिन्तेति परिहरति * सिद्धेनेति । * पूर्वपक्षमाह * किमिति * यज्ञोपवीतिना कर्त्तव्यमित्यादिस्मृतिविहितस्य ब्रह्मसूत्रस्यैवोपव्ययत इत्यनेन विन्यासविशेषः कीर्त्यत इति पूर्वपक्षाशयः । श्लोकं व्याचष्ट * नित्येति । * पुरुषार्थस्यापि ब्रह्मसूत्रस्य प्रौढ्या पुरुष हि परित्यज्य नानृतं प्राप्यते क्रतौ पुरुषे तन्निषिद्धं चेन्निषिद्धन्तत्क्रतावपीति वार्त्तिकवक्ष्यमाणन्यायेन क्रतावपि प्राप्तेरनुवादोपपत्तिं वक्तुं पुरुषार्थब्रह्मसूत्रस्मृतिरुदाहृता दर्शपूर्णमासयोर्यज्ञोपवीतीति स्मृत्यापत्तेर्मूलमूलिभावयोगसूचनार्थं * सर्वदेत्युक्तम् * नचेत्यनेनोत्तरार्द्धं व्याख्या ॥ अनुवादकैमर्थ्याकाङ्क्षायामन्यार्थप्रशंसैरप्येवमादिभिः क्रतुः प्रयुज्यमानो

बह्वङ्गत्वेन प्रशस्त इति कर्त्रधिकरणपूर्वपक्षवार्त्तिकवक्ष्यमाणन्यायेन दर्शपूर्णमासस्तुत्यर्थत्वसूचनायाह * एवं चेति । * स्तुत्यर्थत्वमात्रसाम्येनावैलक्षण्योक्तिः । सिद्धान्तोक्त्यर्थत्वेन सूत्रं व्याख्यातुमाह * एवमिति । * दर्शपूर्णमासविध्यसन्निधानेनास्य तत्स्तुत्यर्थत्वायोगान्निवीतप्राचीनावीतकीर्तनस्याप्यविधीयमानोपवीतस्तुत्यर्थत्वायोगादानर्थक्यापत्तिरित्येवं तृतीयपादं व्याचष्टे * नहीति । * ६१८।
वर्त्तमानापदेशश्च न विधावुपपद्यतइत्येतत्परिहारार्थत्वेन निवीतं मनुष्याणामित्यादेः श्रुतित्वनाभासमानस्य श्रुतित्वनिर्वाहान्यथानुपपत्त्या प्रयोगवचनेन च प्रकरणपठितस्य सर्वस्याङ्गत्वसिद्धौ विध्यपेक्षणादुपव्ययत इत्यस्य पञ्चमलकाररूपविधित्वकल्पनेत्येवं चतुर्थं पादं व्याख्यातुमाह * वर्त्तमानेति । * प्रयोगवचनार्थवादयोः पञ्चमलकारत्वनिश्चायकत्वात्तद्द्वारा विधित्वज्ञानोपयोगे भिहिते विध्येकवाक्यत्वं विनार्थवादत्वानवगतेस्तन पञ्चमलकारत्वनिश्चयायोगमाशङ्क्य वर्त्तमानापदेशस्याप्यप्राप्तार्थत्वेनानुवादत्वायोगादानर्थक्यपरिहारार्थं विधिवदाम्नानात्तदेकवाक्यत्वेनाभासमानस्यार्थवादत्वस्य निर्वाहार्थं विधित्वनिश्चयोपपत्तिसूचनार्थं तदाभासत्वादित्युक्तम ॥ नन्वेवं सति वर्त्तमानापदेशेष्वनाकाङ्क्षणादर्थवादा न संबद्ध्येरन्नित्याशङ्क्यैवमेतत्तथापि तु प्रमाणान्तरप्राप्त्यभावात् क्वचित्प्रयोगवचनेन क्वचित्पञ्चमलकारेणाथवा श्रुतवर्त्तमानान्यथानुपपत्त्या कल्पिते विधित्वेर्थवादानां संगतिरित्यर्थवादाधिकरणवार्त्तिकेर्थवादान्वयस्य विधित्वकल्पनपूर्वकत्वोक्तेरर्थवादमात्रेण विधिशक्त्यवधारणायोगादङ्गं सत्प्रयोगवचनेन गृह्यते न चाविहितमङ्गं भवतीति कर्त्रधिकरणभाष्ये च प्रयोगवचनग्रहणस्य विधित्वकल्पनपूर्वकत्वोक्तेः प्रयोगवचनेन विधिशक्त्यवधारणायोगात्प्रयोगवचनार्थवादयोर्विधित्वद्योतकमात्रत्वं गत्वा प्रयोगवचनादिभ्यो विधिशक्तिर्व्याख्यातेत्युक्तम् ॥ स्मृतिभिः प्राप्तिं पूर्वपक्षोक्तामनुभाषणपूर्वं परिहरति *यत्त्विति* नित्ययज्ञोपवीतीति स्मृत्युक्तस्य ब्रह्मसूत्रस्य पुरुषधर्मत्वेपि यज्ञोपवीतिना कर्त्तव्यमिति स्मृत्युक्तस्य ब्रह्मसूत्रस्य कर्मार्थत्वादनुवादोपपत्तिमाशङ्क्योपव्ययतइत्यस्य वासोविन्यासविशेषविधायित्वसूचनायापूर्वोक्ति । सिद्धान्तमुपसंहरति *तस्मादिति ।* यद्यपि शिष्टाकोपाधिकरणभाष्यभङ्गवार्त्तिकोपव्ययतइत्यस्य

ब्रह्मसूत्रविधायिनाऽभ्युपेयते तदाप्यस्य विधेर्दर्शपूर्णमासधर्मत्रेपे याजुर्वेदिकं प्रायश्चित्तमिति प्रयोजनस्य कर्त्रधिकरणे तुल्यन्यायतया वक्ष्यमाणत्वान्नानर्थक्यमित्याह * अस्य चेति ॥ * परमार्थतस्त्वन्यथोपवीतमन्यथायज्ञोपवीतमुपवीतं हि कर्त्तुर्वासोविन्यासो यज्ञोपवीतं तु सूत्रस्य विन्यासविशेपस्तत्समाचारत. सर्वकर्मार्थं प्राप्तमुपवीतं तु प्रकरणाद्दर्शपूर्णमासयोरेव यज्ञोपवीतेन चास्याविरोधात्समुच्चय-इति टुप्टीकायां वार्त्तिककृतोक्तत्वात्सन्दिग्धे तु व्यवायाद्वाक्यभेदः स्यादित्यत्र च कर्त्तुश्च वासोविन्यासमात्रं गुणो भवत्युपवीतं नामेति भाष्यकृतोक्तत्वान्नानेन ब्रह्मसूत्रं विधीयते शिष्टाकोपाधिकरणे तु यज्ञोपवीत्येवाधीयीताध्यापयेद्यजेत याजयेद्वेत्यनेनैव च ब्रह्मसूत्रस्य श्रौतत्वसिद्धावप्यभ्युच्चयायैतदुदाहृतम् । अधिकरणत्रयवादिमतेनैतदेव सूत्रं यज्ञोपवीती हीत्युदाहरणे पूर्वपक्षोक्त्यर्थत्वेन व्याख्यातुमारभते * एवं चेति । * सूत्रस्य पूर्वपक्षोक्त्यर्थत्वसूचनायाह * तत इति ॥ * उपव्ययत इत्यस्याप्राप्तवासोविन्यासविषयत्वाद्विधित्वोपपत्तावपि यज्ञोपवीतीत्यस्य स्मृतिप्राप्तब्रह्मसूत्रविषयत्वान्न विधितेत्याशङ्क्यास्यापि वासोविन्यासरूपप्राचीनावीतसाहचर्याद्वासोविन्यासविषयत्वसूचनायैतद्वाक्योक्तस्य यज्ञोपवीतस्य ब्रह्मसूत्रत्वाभावेनापूर्वत्वादप्राप्तत्वादित्येवं सूत्रं व्याख्येयमित्याह * पूर्ववदेवेति । * विधित्वे च प्रकरणस्थानामग्निहोत्रदेवतानां सायम्प्रातःकालीनानामग्निसूर्यप्रजापत्याख्यानां देवेभ्य इत्यनेनोक्तेः प्रकरणबहुवचनयोरनुग्रहोऽनुवादत्वे त्वप्रकृतैकसान्नाय्यदेवनोक्तेर्बाध इत्याह * एवं चेति । * हिशब्दयोगेनानुवादसारूप्याद्विधित्वायोगमाशङ्क्याह * तस्मादिति । * विधित्वसिद्धान्तोक्त्यर्थत्वेनैतत्सूत्रव्याख्याने विधित्वापवादायोत्तराधिकरणारम्भो युज्यते पूर्वपक्षोक्त्यर्थत्वेन त्वेतत्सूत्रव्याख्यानेऽनुवादत्वसिद्धान्तमनुक्त्वोत्तराधिकरणान्तरारम्भो न प्रयुज्येतेत्याशङ्क्य दोहयतीत्याख्यातयुक्तस्यापि प्रतीयमानविध्यन्तरैकवाक्यत्वस्यानुवादत्वे सिद्धान्तिते ये पुरउदञ्च इत्याख्यातशून्यस्य प्रतीयमानविध्यन्तरैकवाक्यत्वस्यापि कथं चित्प्राप्तिसम्भवाद्विधित्वपूर्वपक्षकरणाशक्तेराख्यातशून्यस्य च विधित्वनिरासं विनाऽऽख्यातयुक्तस्य विधित्वनिरासाशक्तेरन्तरागर्भिणीन्यायान्मध्येऽधिकरणान्तरोपपत्तिं सूचयितुमाह * एतस्मिंश्चेति । *

उदक्त्वं चापूर्वत्वात् ॥ १३ ॥

उदाहरणं तावदाह * तस्मिन्नेवेति । * उदाहरणनिष्कर्षपूर्वकसन्देहमाह*तत्रेति।* सूत्रेण पूर्वपक्षमाह * किमिति।* अतिदेशोपपादनायाधिकां शङ्कां दर्शयितुमाह * न चेति । * विधिप्रत्ययशून्यत्वाद्विधित्वायोगशङ्कां निरस्य तत्पूर्वपक्षमुपसंहरति *तस्मादिति।* ६१६।१

सतो वा लिङ्गदर्शनम् ॥ १४ ॥

सिद्धान्तसूत्रं व्याचष्टे * आचारेति । * प्राप्तस्यैतद्दर्शनं कीर्त्तनमित्युक्ते श्रुत्यपेक्षाचारप्राप्तस्य निरपेक्षया श्रुत्यनुवादायोगमाशङ्क्याचारमूलभूतश्रुत्यन्तरप्राप्तानुवादिनीयं श्रुतिरिति सूचनार्थप्रापकस्य श्रुत्यन्तरस्येदं प्राप्त्यपेक्षत्वाल्लिङ्गं द्योतकमिति दर्शनोक्तिसमानाधिकरणया लिङ्गोक्त्योक्तम् । सौत्रप्रतिज्ञासूचितं हेतुं प्रश्नपूर्वमाह * कुत इति * लिङादिरहितोक्त्याधिका शङ्कोक्ता । श्लोकं व्याचष्टे * यच्छब्देति*। ताभ्यामेतमग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छदित्यविधायकस्याख्यातस्य तिङन्तिङो भवन्तीति व्यत्ययकल्पनया विधित्वं स्यात्त्वत्राख्यातमात्रमप्यस्तीत्याख्यातोक्त्योक्तम्॥ आचारदार्ढ्यार्थं यान्यग्रवन्ति दर्भसमित्स्रुगादीनि द्रव्याणि तानि प्रागग्राण्युदगग्राणि वा कुर्यादिति स्मृतावुदाहृतायामुदक्संस्थत्वविधानार्थं तद्धिप्राप्तार्थत्वात्पुरउदञ्चो दर्भा इतिवाक्यं भविष्यतीत्याशङ्क्य तस्यापि प्राप्तिं दर्शयितुं यान्येकदेशे क्रमेण निधेयत्वात्समाप्तिमन्ति दर्भपात्रादीनि तानि प्राक्संस्थान्युदक्संस्थानि वेति स्मृतिरुदाहृता । सिद्धान्तमुपसंहरति * तस्मादिति * स्मृतिपरामर्शी तच्छब्दः । निवीतवच्च विपर्ययेण श्रुतिरनुवादप्रयोजनमित्याह * तथैव चेति * जीवदग्निहोत्रं पुराशब्देनोक्तम् । यज्ञोपवीतीत्युदाहरणस्थितात्पूर्वपक्षादपि दर्शपूर्णमासयोः सतः प्राप्तस्यैवोपवीतस्य दर्शनं कीर्त्तनं हिशब्दोक्तहेत्वाख्यलिङ्गयुक्तत्वेन प्राप्तापेक्षत्वादित्येवमेतदेव सूत्रं लिङ्गयुक्तदर्शनमिति मध्यमपदलोपिसमासाङ्गीकरणेनोत्तरमित्याह * स्थितादपीति * एवं लिङ्गदर्शनशब्दव्याख्यार्थहिशब्दवतेत्यादिवार्त्तिकवक्ष्यमाणप्रकारेणैतदेव सूत्रमुत्तरमित्यर्थः । अग्निहोत्रप्रकरणे वासोविन्यासरूपयज्ञोपवीत-

प्राप्त्यभावादनुवादायोगमाशङ्क्य हिशब्दप्रतिविधिशक्तेर्विधित्वक-ल्पनातो यत्रतत्रस्थप्राप्त्याश्रयणमेवानुवादत्वावगमेनापेक्षितत्वादु-क्तमिति संप्रधारणपूर्वमाह * प्रकरणे चेति * । अनुवादापेक्षितप्र-करणप्राप्त्यलाभलक्षणप्रकरणबाधचोद्ये सन्निकृष्टासंभवे विप्रकृष्टानु-वादो व्याश्रीयत इत्युत्तरं देवेभ्य इति बहुवचनबाधचोद्ये च प्रकृति-विकृतिदेवतालोचनेनोपपत्स्यत इत्युत्तरमुक्तमित्याह *प्रकरणेति* । यज्ञोपव्ययत इत्यस्य विधित्वे सर्वानुवादो व्यर्थो हीति कारणमुक्तं तद्यज्ञोपवीतीत्यत्र प्राचीनावीतीति विध्यन्तरसद्भावात्तत्स्तुत्यर्थत्वे-नार्थवत्त्वोपपत्तेर्नास्तीत्याह * अस्त्येवेति *। अत्रापि सिद्धान्तमुप-संहरति *तस्मादिति *। अन्तरागर्भिणीविचारे विधौ यजुर्वेदविहि-तत्वात्तद्भ्रेषे यदि यजुष्टो भव इति दक्षिणे जुहुयादिति प्रायश्चित्तं स्मृ-त्याचारप्राप्तानुवादे तयोरज्ञातवेदविशेषमूलत्वाद्यद्यविज्ञाते भूर्भुवः स्वरिति सर्वा अनुद्रुत्याहवनीये जुहुयादिति प्रायश्चित्तमिति प्रयोजनं स्पष्टत्वादनुक्तैतदधिकरणसिद्धान्तप्रयोजनमाह * इतीति * ।

विधिस्तु धारणे पूर्वत्वात् ॥ १५ ॥

६।०।१ पूर्वाधिकरणसंगतिमाह *इदानीमिति* । उदाहरणमाह * तत्रै-वेति।* दिष्टविधिप्राप्तमायुः पर्यवसानं तत्प्राप्तो दिष्टगतो मृतस्तस्या-ग्निहोत्र इत्येवं व्याख्यासूचनार्थं *तत्रैवेत्युक्तं* । उदाहरणनिष्कर्षपूर्वं संदेहमाह *तत्रेति।* पूर्वपक्षमाह *हिशब्देति* स्रुग्दण्डे समिधमु-पसंगृह्यानुद्रवतीति वाक्यात्स्रुग्दण्डे समिधमभ्युद्गृह्णन्ननुद्रवतीत्य-स्माद्वा स्रुग्दण्डे निधाय समिधमनुद्रवतीत्यस्माद्वा स्रुग्दण्डोपरिधार-णप्राप्तावपि हविरुपरिधारणात्प्राप्तेराचारतः प्राप्तिरुक्ता । प्रश्नपूर्व-माचारतः प्राप्तिमुपपादयति * कथमिति * श्लोकं व्याचष्टे * देव-तार्थस्येति । * आचारस्य च श्रुते मूले संभवत्यश्रुतमूलकल्पनायो-गात् स्रुग्दण्ड इति सप्तम्या दण्डस्याधारत्वोक्तेस्तदुपरिधारणावगमे ऽपि वितस्तिमात्रया प्रादेशमात्रया वा समिधा दंडस्योपरि हवि-राधारभूतस्रुग्बिलसमीपे धृतमूलयांगुष्ठमात्रया करपुष्करमात्रस्रु-ग्बिलस्थसमस्तहविःप्रच्छादनशक्तावपि कतिपयहविःप्रच्छादनसंभ-वात्स्रुग्दण्डइति विधेरपि हविरुपरिधारणप्रयोजनत्वावगतेर्वाक्यादपि प्राप्तिः संभवतीति सूचयितुमाह *स्रुग्दण्डइति । * पूर्वपक्षमुपसंह-

रति * तस्मादिति। * पूर्वाधिकरणसिद्धान्तसूत्रमेव तदधिकरण-पूर्वपक्षे वाशब्देन समुद्रो वा महासत्व इतिवदिवार्थेन यज्ञोपवीती हि ये पुर उदञ्च इतिदृष्टान्तोक्तचानुवादत्वप्रतिज्ञासूचनाद्दर्शनशब्दोक्तादाचारात्तन्मूलभूताच्च द्योतकशब्दापरपर्यायलिङ्गशब्दोक्तात्प्रापकाद्वाक्यात्सतः प्राप्तस्योपरिधारणस्यानुवाद इत्येवं कर्मधारयीभूताल्लिङ्गदर्शनशब्दात्परायाः प्रथमायाः पञ्चमीरूपविपरिणामाङ्गीकारेण व्याख्यातुं *प्राप्तस्यैवेत्युक्तम्।* सूत्रेण सिद्धान्तमाह * इतीति॥ * उत्तरार्द्धं व्याचष्टे * सत्यमिति॥ * समिधः समस्तहविःप्रच्छादनासामर्थ्येनाचारतोऽप्राप्तावपि कतिपयहविःप्रच्छादनशक्तेरीषदानतिशक्तस्य सोमचमसस्याश्वशफस्य वा सोमचमसो दक्षिणेत्यादिवचनसामर्थ्यादानत्यर्थत्वावगमवत्स्रुग्दण्ड इति वचनसामर्थ्यात्प्रच्छादनार्थत्वेन प्राप्तिर्भविष्यतीत्याशङ्कते * नन्विति। * हविःसमीपे समिद्ग्रहणविधानेपि प्रच्छादनसंयोगाश्रुतेस्तादर्थ्यायोगादप्राप्तिरिति परिहरति * भवेदिति। * समस्तायाश्च समिधोदण्डोपरिधारणविधानाद्धविषोर्वाग्धारणीयत्वेनेषत्प्रच्छादनेऽप्यशक्तेः सुतरामप्राप्तिरित्याह * श्रुग्दण्डइति। * हिशब्दयोगाद्वर्त्तमानापदेशाच्चानुवादतां पूर्वपक्षोक्तां परिहर्तुमाह * न चेति। * हिशब्दावगतैकवाक्यत्वेनोक्तामनुवादतां हिशब्दत्यागरूपव्यवधारणकल्पनयैकवाक्यत्वापादकहिशब्दानुवादसारूप्यभङ्गाद्भिन्नवाक्यत्वावगतेः परिहरति * अत इति। * व्यवधारणकल्पनां दर्शयति * पित्र्य इति। * स्रुग्दण्डदेशत्वनियमात् श्रुग्दण्डस्यैवाधस्तादुपरि वा धारणमिह विधीयते न तु हविष इति सूचनार्थं स्रुग्दण्डस्येत्युक्तम्॥ वर्त्तमानापदेशत्त्वेनाभासमानस्याप्याख्यातस्याप्राप्तार्थविषयत्वेन पञ्चमलकारत्वकल्पनया विधित्वोपपत्तिमाह * विधित्वे चेति। * सिद्धान्तमुपसंहरति * तस्मादिति। * ६।२।१।२

दिग्विभागस्यानुवादत्वम्। अधि० २

दिग्विभागश्च तद्वत्सम्बन्धस्यार्थहेतुत्वात्॥ १६॥

निवीताधिकरणातिदेशार्थत्वेनाधिकरणद्वयस्य तुल्यत्वात्सहारम्भार्थं परुषिदितपूर्णघृतविदग्धं च तद्वादित्यधिकरणान्तरसूत्रमप्यनेन सह पठितम्। मनुष्याणां प्रतीचीदिक्सम्बन्धस्यानुष्ठानसौकर्यरूपप्रयोजनभूतार्थे हेतुभूतत्वाद्विधिं विनापि प्राप्तेर्विधित्वायो-

गोक्त्यर्थश्च सम्बन्धस्येति सूत्रावयवोऽर्थस्य विद्यमानत्वादिति नि-वीताधिकरणद्वितीयसूत्रावयवोक्तार्थस्मृतिमात्रार्थत्वेन मन्दप्रयो-जनत्वान्न पठितः सूत्रे समासनिर्देशेऽपि यत्परुपिदितमिति वाक्या-नुकरणत्वात्परुपीतिविभक्तेर्लुङ् कृतः। द्वन्द्वैकवद्भावाच्च विदग्ध-मित्येकवचनम्। अधिकरणद्वयस्य निवीताधिकरणातिदेशत्वं दर्श-यितुमाह * दिग्विभागेति * दिशो विविच्य भजनं दिग्विभागः पर्वणि लवणं परुपिदितं मनुष्यसम्बद्धेषु रौद्रे च संदेह इति भाष्याद्यदन्तरा तन्मनुष्याणामित्यस्यैव निष्पक्वं मनुष्याणामित्य-स्यैव च मनुष्यधर्मत्वादिपक्षविषयत्वेऽपि विध्यर्थवादसंदेहे देव-पितृसम्बद्धानामप्युदाहरणत्वात्परुषिदितं घृतादीनामित्युक्तम्। विद-ग्धवाक्ये मनुष्यधर्ममनुष्यप्रधानप्राकरणिकाप्राकरणिककर्मधर्मप-क्षाणां रचनायोगादावृत्तेनादिशब्देन घृतादेरादिरिति षष्ठीसमासी भूतेन पूर्णवाक्यग्रहणं भाष्ये रौद्रे चकारान्नैर्ऋते च संदेहः कि मन्तरा मनुष्याणां पूर्णं मनुष्याणां निष्पक्वं मनुष्याणां यो विद-ग्धः स नैर्ऋतो यो शृतः स रौद्र इत्येते विधयस्तदा च मनु-ष्यसम्बद्धाः किंमनुष्याणां शुद्धानां प्रकृतकर्मयुक्तानां वा धर्मा उत सर्वे प्रकृतकर्मधर्मा अथ प्रकरणे यन्मनुष्यप्रधानं कर्म तत्र मनुष्यसम्बद्धा निविशेरन् रौद्रत्वं नैर्ऋतत्वं चाशृतविदग्धत्व-योर्निमित्तयोः प्रकरणे निविशेयातामथवा यत्किं चिद्रौद्रं नैर्ऋतं च हविस्तत्राशृतविदग्धत्वे निविशेयातामुतातिथ्ये मनुष्यसम्बन्धा निविशेरन्नथवा सर्वे ऽर्थवादा इत्येवं व्याख्येयम्। दिग्विभागपरु-षिदितादौ का ऽधिका शङ्का यन्निवृत्यै निवीताधिकरणातिदेशो धिका शङ्का संभवे वा दिग्विभागपरुषिदितपूर्णघृतविदग्धं च तद्वदि-त्येकत्रैवाधिकरणे सर्वोदाहरणोपपत्तेरधिकरणभेदो ऽनर्थक इत्या-शङ्कते * का पुनरिति * द्विविधामप्याशङ्कां निराकर्त्तुं दिग्विभा-गस्य तावन्निवीतेन परुपिदितादिभिश्चतुल्यतामाह * तदिति * दिग्विभागस्याभजन्तेत्याख्यानान्वयाद्विधेयत्वप्रतीतेर्निवीतेन तदुप-लक्षितैश्चपरुषिदितादिभिरतुल्यत्वावगतिरित्याशङ्काद्वयनिरासार्थं नि-वीतोक्तेरुपलक्षणार्थत्वाभ्युपगमेन वाच्ये पुराकल्परूपत्वे नास्या-ख्यातस्य विध्यशक्तिमाशङ्क्योपाख्यानमात्रानर्थक्यापत्तेर्यस्मात्पूर्वे मनुष्याः प्रतीचीमभजन्त तस्मादिदानीन्तना अपि तां भजेरन्नित्येवं

विध्यनुमानाच्छ्रुतस्यैव वाऽऽख्यातस्य भजेरन्निति विपरिणामकल्पनया पुराकल्पाभासत्वेपि विधिपरत्वसूचनार्थं पुराकल्पसारूप्योक्त्याख्यातमुपलक्षितम् । लङ्गाच्यभूतत्वाविवक्षासूचनार्थं भजातिधात्वर्थमात्रमर्थोऽस्याख्यातस्येति बहुव्रीहिणोक्तम्। मनुष्यसम्बद्धस्य कैमर्थ्यचिन्तोदाहरणस्याख्यातभावमाशङ्क्यानुषङ्गिणेत्युक्तम्॥ भजस्यर्थवादोनुषङ्गि चेति विग्रह । दिग्विभागस्याख्यातान्वयादतुल्यत्वेप्युत्तराधिकरणोदाहरणानामाख्यातानन्वयाद् विदग्धव्यतिरिक्तानां च षष्ठ्यन्तशब्दान्वयाधिक्याच्च निवीतस्य साम्यप्रतीतेः कथं तदतुल्यत्वाशङ्केत्याशङ्कां निरस्यन् तेषामतुल्यतामाह *इतरेषां त्विति।* पर्वादेर्लूयमानबर्हिःप्रदेशस्य लवनक्रियां प्रत्यधिकरणत्वेन पूर्णादेश्च ग्रहणक्रियाविशेषणस्य ग्रहणप्रयोजनभूतां ग्राह्यद्रव्यपरिमाणक्रियांप्रति साधनत्वादतिशयविवक्षायां करणत्वेन घृतादेश्च स्नेहनाक्रियां प्रति करणत्वेनाद्यपरिस्पन्दप्रभृतिपक्वत्वाख्यफलसिद्धिपर्यन्तक्रियाक्षणप्रचयात्मिकायाश्च श्रपणक्रियायाः प्रचयसाधनीभूतश्रपणक्रियाक्षणबहुत्वसंख्यासाध्यत्वेन यावद्भिः क्षणैः फलसिद्धिस्तावद्भ्योऽधिकसंख्यक्षणानुष्ठानाख्यविदहनस्य न्यूनसंख्यक्षणानुष्ठानाख्यस्य चाश्रपणस्य श्रपणक्रियां प्रति साधनत्वादितरेषां पर्वादीनां लवनादिक्रियाख्यफलोत्पत्तेः स्पष्टत्वेन विधावपि फलकल्पनक्लेशाभावान्निवीतातुल्यत्वमतिरित्युक्ते कर्मधर्मसिद्धेरेव फलत्वात्फलकल्पनाभावेऽपि मनुष्याणामिति षष्ठ्यन्तसम्बन्धात्कर्मधर्मत्वबाधेन मनुष्यधर्मत्वप्रतीतेः पुरुषं प्रति फलकल्पनापत्तेर्निवीततुल्यतामाशङ्क्य पुरुषानुष्ठेयासु लवनादिक्रियासु पर्वादीनां कारकत्वेनान्तर्गतस्वरूपत्वात्क्रियाफलेनैव फलवत्त्वसिद्धेः पुरुषार्थभोजनकारकस्यौदनादेरिव पुरुषं प्रति फलोत्पादकत्वव्यपदेशोपपत्तेर्नादृष्टफलकल्पनापत्तिरिति सूचनार्थं मनुष्यसम्बन्धे यः पुरुषं प्रति फलोदयः सोऽपि पुरुषक्रियान्तर्गतात्मत्वाद्धि स्पष्ट इत्युक्तम् । विधिशक्तिप्रतिबन्धकभूतार्थवाच्याख्यातयोगिपुराकल्पशून्यत्वेन दिग्विभागाधिकरणादधिका शङ्कापीतरोक्त्या सूचिता । श्लोकं व्याचष्टे *स्वाभाविकमिति । * दिशो ह्यधिकरणकारकत्वेन सर्वक्रियाङ्गत्वात्तद्विधावपि फलकल्पनक्लेशाभावसाम्योक्त्यैव दिग्ग्रहणम् ॥ आख्यातयोगनिमित्तविधिलाघवस्य तु दिश्यसाधारण्याद्धिकरण-

भेदोपपत्तिः । सर्वशब्दो दिङ्मात्रविषयः विध्यनपेक्षोक्त्यै स्वाभा-
विकोक्तिः । निवीतादेस्त्वविघ्नसमाप्तिप्रतिबन्धकवैयग्र्यापादक-
शीतादिवारकत्वेन क्रियाङ्गत्वसंभवेपि शीताद्यभावे निवीतादिना
विनाप्यवैयग्र्योपपत्तेः स्वाभाविकक्रियाङ्गत्वाभावाद्वैषम्यसूचनार्थं न
निवीतवदित्युक्तम् । एतावनेतरेषां फलोदयो विस्पष्ट इत्येताव
द्याख्याय मनुष्यधर्मत्वपक्षेपि फलकल्पनक्लेशानापत्त्युक्त्यर्थत्वेनैताव-
दावृत्त्या कृत्स्नश्लोकव्याख्यार्थं तत्रेत्यनेन दिगादेः सामान्यतः क्रिया-
साधनत्वेपि प्रतीच्यादिविशेषनियमस्य फलकल्पनापत्तेःक्लेशमाशङ्क्या
दिगादिसामान्यसाध्यस्य क्रियासिद्ध्याख्यस्य फलस्य क्लृप्तत्वा-
द्विशेषनियमफलमात्रकल्पने ऽप्यल्पकल्पनात् क्लेशाभावमुक्त्वा तद-
पि चेत्यनेन नियमे फलस्याप्यविघ्नक्रियासमापनस्यात्यन्तादृष्टत्वाभा-
वात्क्लेशलेशो ऽपि नास्तीत्युक्तं वैदिकक्रियासाधननियमस्यादृष्टार्थ-
त्वात्तद्यावृत्त्यै लौकिकोक्तिः । लौकिकक्रियासाधननियमावधित्वमेव
वचनव्यक्तिभिः स्पष्टयितुमाह * तेनेति ।* वैदिकीनामपि क्रियाणां
६।१।२ वैधत्वानपेक्षणं लौकिकत्वाद्वैधत्वानपेक्षासूचनार्थो यावच्छब्देन सर्व-
लौकिकवैदिकक्रियाव्याप्त्युक्तिरविरुद्धा ॥ प्रतीच्यादेर्मनुष्यप्राधान्य-
सिद्ध्यै तन्नियमफलस्याविघ्नसमापनस्य मनुष्याभिमतत्वसिद्ध्यर्थं
कर्मणः स्वार्थस्य विशेषणं स्वाम्यर्थस्यापि कर्मणो भृतिलाभार्थत्वा-
त्स्वार्थत्वोपपत्तिः । बर्हिर्लवनप्रक्रमाद्दर्भविषयत्वावगतिः । पूर्णस्य
क्रियाङ्गत्वसिद्ध्यै प्रस्थादौ घृतादिग्रहणस्य ग्राह्यद्रव्यपरिमाणार्थत्वप्र-
सिद्धेरविहितामपि परिमाणक्रियामध्याहृत्य मातव्यमित्युक्तं वेदभा-
ष्यस्थौ निष्पक्वायुतशब्दौ व्याख्यातुं * विलीनेत्युक्तम् * । विद-
ग्धाश्रृतत्वयोर्निमित्तयोर्नैर्ऋतरौद्रत्वविधावभ्युदितेष्टिवन्नैमित्तिक्या
देवतयोत्पत्तिशिष्टनित्याग्न्यादिबाधापत्तेर्यो नैर्ऋतः स विदग्धो यो
रौद्रः सो श्रृत इति व्यवहितान्वयकल्पनां मत्वा विदहनाश्रयणवि-
ध्युक्तिः । अतो तुल्यत्वाशङ्कोपपत्तेर्युक्तो ऽतिदेश इत्युपसंहरति *ते-
नेति*। तत्र विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकमित्यनेनैव ताव-
द्विधिरिति निवीताधिकरणवार्त्तिकोक्ताया वचनं परमिति पूर्वपादा-
न्त्यसूत्रस्थवचनशब्दानुषङ्गेण विधित्वप्रतिज्ञायाः परेष्वप्यधिकरणे-
ष्वेतद् योजयितव्यमिति वार्त्तिकोक्तस्य दिग्विभागपर्युषितादिवा-
क्यमपि विधिरित्यादियोजनस्य सम्भवे ऽपि प्रतीची मनुष्या इत्यत्र

षष्ठीश्रुत्यभावाद्दिग्विभागो मनुष्यधर्मः षष्ठीशब्दस्य मनुष्यप्रधानत्वादिति योजनायोगमाशङ्क्य मनुष्या अभजन्तेति सामानाधिकरण्यश्रुत्याशयत्वेन मनुष्यधर्मपक्षे दिग्विभागसूत्रं योजयितुमाह * तत्रेति * । विदग्धं तदुपलक्षितं चाश्रृतं सामानाधिकरण्यनिर्दिष्टैर्नैर्ऋतरौद्रधर्मः सामानाधिकरण्यश्रुतिलक्षणस्य शब्दस्य नैर्ऋतराद्रप्रधानत्वादित्येवं विदग्धं च तद्वदित्युत्तरसूत्रावयवयोजनाप्यनेनैव सूचिता । अन्तरादितं मनुष्याणां पूर्णं मनुष्याणां निष्पक्कं मनुष्याणामिति मनुष्यधर्मः षष्ठीशब्दस्य तत्प्रधानत्वादित्येवं वाक्योपलक्षणार्थैः परुषिदितादिशब्दैर्मनुष्यधर्मादिपक्षेषु मनुष्यसम्बद्धतत्तद्वाक्यावयवोदाहरणं मत्वा परुषिदितपूर्णघृतं च तद्वदित्युत्तरसूत्रावयवं योजयितुमाह * इतरेषु त्विति * तादर्थ्यमित्यनुषङ्गः । दिग्विभागादिरपि निवीतवदपदेशः प्रतीच्यादिसम्बन्धस्य सौकर्यादिरूपार्थहेतुत्वेन विधिं विनापि विद्यमानत्वादित्येवं निवीताधिकरणद्वितीयसूत्रार्थातिदेशार्थत्वेन सूत्रद्वयं योजयितुमाह * तथेति * यथा तद्वच्छब्देनातिदेशान्मनुष्यधर्म इत्यभिधीयते तथापदेशो वेत्यपीति तथाशब्दार्थः । अर्थस्य विद्यमानत्वादित्यतिदिष्टसूत्रावयवार्थोपपादनार्थत्वेन सम्बन्धस्यार्थहेतुत्वादिति सूत्रावयवव्याख्यार्थे प्रत्यङ्मुखा इति भाष्ये प्रांशुपदार्थानुष्ठानोक्तिमनुष्ठानशैघ्र्ये दिशोऽकारणत्वादयुक्तामाशङ्क्य सौकर्याश्रयत्वेनोपपादयितुं सौकर्योक्तिः सम्बन्धस्येति सूत्रावयवस्यार्थस्येति सूत्रावयवोक्तापदेशहेतूपपादनार्थत्वसूचनार्थं तद्गतविद्यमानशब्दोक्तप्राप्तिहेतुत्वं पंचम्योक्त पृष्ठतइति भाष्यावयवमुदङ्मुखस्य प्रायशः पृष्ठत आदित्यकरणसंभवे ऽपि प्रत्यङ्मुखस्यापराह्णे पृष्ठत आदित्यकरणासंभवादयुक्तमाशङ्क्य पूर्वाह्णविषयत्वेन कृत्वा शब्दाध्याहारेण च व्याख्यातुं पूर्वाह्णे हीत्युक्तम् । पूर्वाह्णस्यैव च प्रायेण व्यापारकालत्वात्कालान्तरे प्राप्त्यभावेप्यविरोधः। सम्बन्धस्येत्यस्यैव सूत्रावयवस्य परुषिदितसूत्रे चशब्देनानुकृष्टस्यान्तरादितोदाहरणे मूलपर्वान्तरालसम्बन्धस्य सूक्ष्मप्रदेशविशेषनियमाभावेन प्रयत्नगौरवानपेक्षतया लाघवरूपार्थहेतुत्वादित्येव व्याख्यार्थमुपरीतिभाष्यं पूर्णोदाहरणे च पात्रसंमिताख्यपूर्णसम्बन्धस्य प्रयत्नगौरवाभावेनान्यूनानतिरिक्तसुष्ठुमानलक्षणसाधनलाघवाख्यार्थहेतुत्वादित्येवं व्या

ख्यार्थं पूर्णे पीति भाष्यं तुल्यप्रायव्याख्यार्थत्वाद्विदग्धाश्रुतोदाहरणयोः सम्बन्धस्येति सूत्रावयवव्याख्यार्थमश्रुतमिति भाष्यं मध्येपठितमुपेक्ष्य व्याख्यातुं *तथेत्युक्तम्।* मूलपर्वणोरन्तरादर्भलवने सति लवनस्यायत्नसाध्यत्वात्पूर्णग्रहणे च सति ग्रहणप्रयोजनभूतस्य ग्राह्यद्रव्यपरिमाणस्यायत्नसाध्यत्वादन्तरालवनपूर्णयोः प्राप्तिरित्यर्थः। विदग्धोदाहरणेऽनुवादपक्षेऽस्वरसतो रौद्रनैर्ऋतयोरुपादेयतयावगतयोरप्यनुवादसंभवेन विपरीतवचनव्यक्त्याश्रयणायोगाद्यो विदग्धः स कृष्ण इति विवक्षितेऽर्थे कृष्णवर्णनिर्ऋतिशब्दवाच्यपृथिवीसम्बन्धस्य हेतुत्वादित्येवं सम्बन्धस्येति सूत्रावयवव्याख्यां कारणगुणप्रक्रमेण कार्यगुणारम्भप्रसिद्धयैव ज्ञातुं शक्यत्वाद्भाष्यकृतोपेक्षितां दर्शयितुं *तथाविदग्धइत्युक्तम्॥* अश्रुतोदाहरणेऽप्यक्षरवर्णसामान्यान्निर्ब्रूयादिति यास्कस्मृतेर्वृत्त्यवयवस्यापि धात्वर्थवाचित्वकल्पनया व्याख्यावगमाद्रौशब्दस्य रुजत्यर्थरोगवाचित्वं दकारस्य च ददात्यर्थदानवाचित्वं कल्पयित्वा रोगदानाख्यावयवार्थसम्बन्धरूपस्य रोगदत्वस्याश्रुतत्वरूपार्थहेतुकत्वादित्येवं सम्बन्धस्येति सूत्रावयवव्याख्यार्थमश्रुतमिति भाष्यमुपेक्षितं व्याख्यातु *मश्रुते चेत्युक्तम्।* निष्पक्वसम्बन्धस्य सुखरूपार्थहेतुत्वादित्येवं सम्बन्धस्येति सूत्रावयवव्याख्यार्थमायुतमिति भाष्यं विलीनेति वार्त्तिकावयवेन निष्पक्वायुतशब्दसामानाधिकरण्योक्त्या निष्पक्वशब्दव्याख्यार्थतया सूचितस्यायुतशब्दस्य व्याख्यानान्न व्याख्यातम्। विधिस्त्विति सूत्रार्थातिदेशार्थत्वेन सूत्रद्वयं योजयितुमाह * नियोगनस्त्विति। * सप्रायादिति वाक्येति च सूत्रद्वयार्थातिदेशार्थत्वेन विदग्धवर्जं सूत्रद्वयं योजयितुमाह *प्रकरणेति।* भाष्यकृतात्वप्राप्तविधिपक्षो द्विविभागसूत्रयोजनार्थेनार्थवत्त्वाद्विधिरिति भाष्येण परुषितसूत्रयोजनार्थेन चार्थवत्त्वान्मनुष्यसम्बन्धाच्चेतिभाष्यान्निष्कृष्टेनार्थवत्त्वाद्विधय इत्यवयवेन विधिस्त्विति सूत्रोक्ते नियमविधिपक्षे व्यर्थात्सूत्रद्वययोजनसिद्धेर्मनुष्यश्रुतिविरोधेन चातितुच्छशुद्धकर्मपक्षे स प्रायाद्वाक्येति सूत्रद्वयोक्ते योजनस्य मन्दप्रयोजनत्वान्न सूत्रत्रयार्थातिदेशार्थत्वेन योजितम्। तत्प्रकरणे यदितिसूत्रार्थातिदेशार्थत्वेन योजयितुमाह * सर्वेति। * वाक्यप्रकरणानुग्रहायेतिभाष्ये वाक्यप्रकरणानुग्रहादिति भाष्ये च प्रकरणोक्त्या कर्मधर्मत्वप्रमाणत्वसाम्यात्समाख्याप्युपलक्षितेति

सूचनार्थः सर्वशब्दः । एतत्सूत्रार्थातिदेशार्थत्वेन परुपिदितसूत्रयोजनार्थमन्वाहार्य इति भाष्यं दर्शपूर्णमासदक्षिणाभूतान्वाहार्याङ्गभूतान्तरणगर्भेष्वन्तरालवनसम्भवेपि ज्योतिष्टोमदक्षिणासु च व्रीहियवतिलमाषरूपासु प्रस्थादिसामितत्वरूपपूर्णत्वसंभवेपि ज्योतिष्टोमदक्षिणायां कस्यांचित्स्नेहकार्याभावेन निष्पक्कासंभवादयुक्तमाशङ्क्य दक्षिणासु चेतिचकारोक्ते नवनीतेनाभ्यङ्क्ते इति विहिते ऽभ्यञ्जने यजमानसंस्कारार्थत्वान्मनुष्यप्रधाने विलीनत्वगुणविधानेन निष्पक्कत्वापन्नस्य नवनीतस्य निवेशोपपत्तिसूचनार्था मनुष्यप्रधानोक्तिः ॥ तत्प्रधाने वेति सूत्रार्थातिदेशार्थत्वेन योजयितुमाह * वाक्येनेति * । भिन्नत्वाद्वाक्यानामिति द्विविभागसूत्रस्थेन परुपिदितसूत्रस्थेन च वाक्यभेदप्रसंगादिति भाष्यावयवेनोक्तस्य दक्षिणादौ निवेशे वाक्यभेदप्रसङ्गस्य प्रकरणसमाख्याबाधार्थत्वसूचनार्थं *प्रकरणेत्युक्तम् * षष्ठ्यन्तसम्बन्धापन्नमनुष्यप्राधान्यशङ्कानिरासार्थं * फलेत्युक्तम् ॥* अर्थवादो वेति विधिना चेति च सिद्धान्तसूत्रद्वयार्थातिदेशार्थत्वेन योजयितुमाह * तेनापि सहेति । * पर्वप्रदेशत्वग्रहचमसपात्रविलाधिकत्वनवनीताविदहनविधिशेषत्वं चकारेणोक्तम् ॥ कीदृशी स्तुतिरित्याशङ्क्य यथा प्रतीच्युदीची वा दिङ्मनुष्याणां पितॄणां वा दक्षिणोचिता तथा प्राची देवानां यथा च मूलपर्वान्तराले दर्भलवनं मनुष्याणां समूलं च दर्भलवनं पितॄणामुचितं तथा पर्वणि देवानां यथा च पात्रविलसंमित ग्रहणं मनुष्याणां पात्रविलादधो ग्रहणं पितॄणामुचितं तथा देवानां पात्रविलादधिकग्रहणमित्यौचित्येन प्रतीच्यादिदक्षिणादि च मनुष्याणां पितॄणां च यथाक्रममुचितं न देवानां प्राच्या देवे तु तेषामुचितमिति विपर्ययेण वा स्तुतिरिति प्रकारद्वयमाह *सम्यगिति । * यत्प्रतीच्यादियन्मनुष्यादिसम्बन्धत्वेन श्रुतं तत्तत्सम्बन्धित्वेन सम्यगुचितमित्येवं सम्यक्छब्दोक्तचौचित्योक्तेर्यथाविदितो नुवादो मनुष्यादिर्विषयो यस्य प्रतीच्यादेस्तद्विधेयस्य प्राच्यादेर्विषयो देवाख्यादन्यमनुष्यादिविषयमित्येवं च यथाविदितान्यविषयोक्त्या बहुव्रीहिद्वयगर्भकर्मधारयभूतया विपर्ययोक्तेः सम्यक्छब्दत्वेनौचित्येन यथाविदितविषयान्यविषयत्वेन विपर्ययेण वा स्तुतेर्निवीतोदाहरणे यथौचित्येन स्तुतिस्ततोऽत्राप्यौचित्येन तत्र विपर्ययेण स्तुतावत्रापि विपर्ययेणेत्यवमविवेकेनातिदेशात्सिद्धि-

रित्यर्थः । विदग्धोदाहरणे वा विदग्धाशृतत्वयोः कार्ष्ण्यरोगदत्वा-
पादकत्वेनाप्राशस्त्यादविदहनश्रपणमेव प्रशस्तमित्येवं रूपत्वेनौ-
चित्याविपर्ययरूपत्वाभावाद्विदग्धोदाहरणाद्विवेकेनोदाहरणान्तरेष्वी-
दृश्याः स्तुतेः सिद्धिरिति विवेकोक्त्या सूचितम् ।

पेरुषिदितपूर्णघृतविदग्धं च तद्वत् ॥ १७ ॥

अनृतवदननिषेधस्यक्रतुधर्मत्वम् । अधि० ३

अकर्म क्रतुसंयुक्तं संयोगान्नित्यानुवादः स्यात् ॥ १८ ॥

निवीताद्यधिकरणवदिहापि प्रकरणत्रयेणसह प्रकरणस्य विरो-
धाविरोधचिन्तेति शङ्कानिरासायास्मिन्नधिकरणे श्रुत्या सहोत्तर-
स्मिँल्लिङ्गवाक्याभ्यां तदुत्तरयोर्वाक्येन सहेति लाघवायाधि-
करणचतुष्टयस्य प्रकरणसङ्गत्युक्तिपूर्वं प्रस्तुताधिकरणविषयं
६२३।१ विविनक्ति * तेनैवेति * ॥ अकर्मक्रतुसंयुक्तमित्युदाहरणो-
क्त्यर्थे सौत्रे पदद्वये प्रतिषेधाद्दर्शपूर्णमासादिप्रकरणगता इति
पदाभ्यां व्याख्याते निषेध्यैदमर्थ्यनिर्णयान्निषेधैदमर्थ्यनिर्ण-
यसिद्धेः सन्देहायोगात्तेषामुदाहरणत्वायोगमाशङ्क्यैतदधिकरणका-
र्यप्रवृत्तिकैमर्थ्यविचारात्प्रागनवधारितैदमर्थ्यपदार्थविषयतयोदाहर-
णे विशेषिते॰नार्षेयं वृणीते॥ नानुयाजेषु येयजामहंकरोतीतिवद्विधि-
प्राप्ते विकल्पापत्तेर्निषेधायोगान्निषेधे कैमर्थ्यनिर्णयस्य निषेध्यै-
दमर्थ्यनिर्णयाधीनत्वानुपपत्तेस्तन्निमित्तसन्देहायोगाशङ्कानिरसायो-
दाहरणविशेषणानर्थक्यमाशङ्क्यानृतवदनादीनां[1] विधिं विना प्य
पूर्वानपेक्षलौकिकक्रतूपकारार्थत्वेन पुरुषोपकारार्थत्वेन वा तत्सा-
धनसामर्थ्यात्प्राप्तानां निषेधोपपत्तिरुक्ता ॥ तत्रेति भाष्येण किमयं
निषेधो दर्शपूर्णमासाङ्गभूतस्यानृतवदनस्य ततश्च प्रकरण एव
निषेधनिवेशो यं प्रायेण वाक्योनृतवादिनीत्यात्पुरुषार्थत्वेन प्राप्तस्या-
नृतवदनकर्मणो यं निषेधस्ततश्च पुरुषधर्म इति वदता॥ निषेध्यनि-
षेधयोरपि कैमर्थ्यसंदेहमुक्तम् । हेतुहेतुमद्भावेनोपपादयितुमाह * ते-
ष्विति* निषेधकैमर्थ्यनिर्णयस्य प्रवृत्तिकैमर्थ्यावधारणाधीनत्वोपपा-

१ इद सूत्रं प्रथममेव १३६० पृष्ठस्य २४ पङ्क्तौ संग्रन्थ्य व्याख्यात भाष्यकृता ।

दनार्थं यदर्थो चेति प्रतिज्ञाय निषेधेन निषेध्यस्यानिष्टहेतुत्वज्ञापना- दिष्टविपरीतस्य वानिष्टत्वेनात्मापकारे च्छया निषेध्यक्रियायां प्रवृ- त्तावात्मापकारस्यानिष्टत्वात्क्रतूपकारेच्छया तु प्रवृत्तौ क्रत्वपकारस्या- निष्टत्वात्पुरुषोपकारार्थक्रियावाचिना शब्देनोपकारार्थितया पुरुषमुप- स्थापयता पुरुषापकारस्यैवानिष्टतयोपस्थापनेन क्रत्वपकारस्य शब्दस्पर्शायोगादात्मोपकारार्थिनश्च क्रत्वपकाराख्यानिष्टहेतुत्वज्ञाप- नेपि निवर्तयितुमशक्यत्वात्पुरुषार्थक्रियानिषेधेन निवृत्तिसिद्धेः क्रत्वर्थायाः क्रियायाः क्रत्वपकाराख्यानिष्टहेतुत्वाकाङ्क्षानुपपत्तेः क्रतूपकारार्थक्रियावाचिना वाशब्देनोपकारार्थितया क्रतुमुपस्था- पयता क्रत्वपकारस्यैवानिष्टतयोपस्थापनेन [[१]पुरुषापकारस्य शब्द- स्पर्शायोगाक्रतूपकारार्थिनश्चात्मापकाराख्यानिष्टहेतुत्वज्ञापनेपि नि- वर्त्तयितुमशक्याक्रत्वर्थक्रियानिषेधेन] पुरुषार्थायाः क्रियायाः पुरु- षापकाराख्यानिष्टहेतुत्वाकाङ्क्षानुपपत्तेरन्यार्थक्रियानिषेधस्यान्यार्थ- त्वायोगे नहीत्यनेनोक्तेस्त्युपायमांसभक्षणादिपुरुषार्थक्रियानिषेधस्य क्रत्वर्थत्वाभ्युपगमाद्व्यभिचारमाशङ्क्य तस्यामिनिषिद्धानुष्ठाना- पादितवैगुण्यात्क्रतोः फलानुत्पत्तेः पुरुषस्य क्रतुफलकामस्येष्टफ- लाभाख्यानिष्टप्रसंगात्तत्परिहारार्थत्वेपुरुषार्थसिद्धेरव्यभिचारसू- चनार्थं *सर्वमेवेत्युक्तम् * ॥ अतोनिषेधकैमर्थ्यनिर्णयार्थत्वात्प्रवृत्ति- कैमर्थ्यचिन्तापि युक्तेत्युपसंहरति * तस्मादिति * सर्वेष्वेवाख्याते- ष्वित्यादिसिद्धान्तभाष्ये वक्ष्यमाणस्य कर्तुराख्यातानभिधेयत्वस्य प्रवृत्तिकैमर्थ्यनिर्णयार्थत्वाद्युक्तव्यतामुपपादयितुमाह *प्रवृत्तीनाम- पि * अनारभ्याधीतानां निषेधानां निषेध्यैदमर्थ्यावधारणं विनैदम- र्थ्यावधारणाशक्तेर्निषेध्यैदमर्थ्यावधारणायाख्यातचिन्ता युक्ता प्रकर- णाधीतानां त्वनृतवदनादिनिषेधानां स्त्रीगमनमांसभक्षणादिवत्प्रकर- णादेवैदमर्थ्यावधारणोपपत्तेर्निषेधैश्चसाक्षात्स्वैदमर्थ्यावधारणायाख्या तानां कर्तृवाचित्वावाचित्वेन चिन्ता न युक्तेत्याशङ्क्याह * ताव- च्चेति* एवंपदार्थवाक्यार्थसंघातैरुपकल्पितां विशिष्टां भावनां प्राप्य- वृत्तिर्विधिनिषेधयोरिति न्यायेन विधिवन्निषेधस्यापि विशिष्टभावना- विषयत्वादनृतादिनिषेध्यवदनभावनादिविशेषणवत्पुरुषार्थत्वक्रत्वर्थ- त्वयोरपि विशेषणयोर्निषेधविषयत्वावगतेराख्यातानां च कर्तृवा-

---

१ इति द्वितीयपुस्तके नास्ति।

चित्वावाचित्वान्यतररूपेण निर्णयं विना स्त्रीगमनमांसभक्षणादिवदनृतवदनादीमैकान्तिकपुरुषार्थत्वाभावेनानुयाजादिवच्चैकान्तिकक्रत्वर्थत्वाभावेन तत्क्रत्वर्थपुरुषार्थत्वनिर्णयायोगान्निषेधानां स्वविषयभूतविशिष्टभावनाप्राप्त्यर्थमाख्यातापेक्षोपपत्तेस्तच्चिन्ता युक्तेत्याशय । आख्यातचिन्तायाः संदेहभाष्यारूढत्वोक्तौ येन कारणेन क्रत्वर्थपुरुषार्थत्वनिर्णयं विना भावनायाः साध्यांशस्यैवापूर्णत्वेनापूर्णतया विधिनिषेधविषयत्वायोगादन्यतोनवधारितैकान्तिकक्रत्वर्थपुरुषार्थत्वायाश्च भावनायाः पुरुषवाचिकमिपदाद्यन्वयं विना पुरुषार्थत्वानवधारणाद्बलवत्प्रमाणविरोधपरिहारं च विना प्रकारणेन क्रत्वर्थत्वानवधारणात्कर्तृवाचित्वावाचित्वेनाऽऽख्यातं निर्णयं विना क्रत्वर्थपुरुषार्थत्वनिर्णयासिद्धिस्तेन कारणेनाख्यातशब्दाः किंपुरुषार्थो भावनामभिदधाति क्रत्वर्थां वेत्येतत्संदेहभाष्येनार्थादुक्तं भवतीत्याह *तेनेति* अनुवादकस्याख्यातस्य कर्तृवाचित्वेपिपुरुषार्थत्वाद्येपाशक्तेर्विधायकत्वविशेषणसूचनार्थं विध्युक्त्याख्यातोपलक्षणम् । विधायकाख्यातचिन्तायां समिदादिवाक्यस्थानामप्याख्यातानामुदाहार्यत्वापत्तेः प्रतिषेधाउदाहरणमितिविशेषणानर्थक्यामाशङ्क्य प्रवृत्तिकैमर्थ्यचिन्ताकाले सर्वेषामुदाहरणत्वेपि तस्याः प्राधान्याभावाद्विशेषणार्थवत्वोपपत्तिं सूचयितुमाह * ततश्चेति * प्रधानचिन्ताकाले विधीनामुदाहरणत्वनिरासायैवकारः एतस्मिन्नधिकरणे प्रयाजादीनामाख्यातगम्यपुरुषार्थत्वानिरासेऽपि प्रकरणाधिकरणे विश्वजिदादिवत्फलकल्पनया पुरुषार्थत्वमाशङ्क्य निरासादपौनरुक्त्यम् ॥ विधायकाख्यातवशेन प्रवृत्त्यैतदमर्थ्यनिरूपणेनानृतं वदेदित्यस्या विधायकत्वान्न तद्वशेन प्रवृत्त्यैदमर्थ्यं निरूप्येतेत्याशङ्क्यावान्तरवाक्यार्थविवक्षायां विधायकत्वोपपत्तिसूचनार्थं प्रवृत्तिकैमर्थ्यचिन्तां विवृणोति * तथेति * यथा प्रवृत्तिकैमर्थ्यचिन्ताकाले समिदादौ चिन्ता तथात्रापीति तथाशब्दार्थः । अनृतस्यैव निषेध्यत्वेनेदमर्थ्यस्य निरूप्यत्वादनिषेध्यवदनकैमर्थ्यचिन्तानर्थक्यमाशङ्क्यानृतैदमर्थ्यानिर्णयार्थत्वं वदनैदमर्थ्यनिर्णयस्य सूचयितुमाह * यदर्थं चेति * अवान्तरवाक्यार्थविवक्षया विधायकत्वोपपत्तावपि महावाक्येवान्तरवाक्यार्थस्याविवक्षितत्वादविधेयत्वेनानृतवदनस्य प्रयोजनानां काङ्क्षत्वात्कैमर्थ्यचिन्ता न युक्तेत्याशङ्क्य निषेधरूपमहा-

वाक्यार्थवेलायां विधेर्निषेधपरत्वेनानृतवदनस्याविधेयत्वेपि शेषस्य निषेधात्परिशिष्टस्य निषेध्यस्यानृतवदनस्य निषेधान्वयायावश्यमनुवदितव्यत्वादप्राप्तस्य चानुवादायोगात्प्रापकं च विना प्राप्त्ययोगात्प्रापकस्य च लौकिकस्यापि रागादेरैदमर्थ्यावधारणापेक्षत्वादनुवादसिद्ध्यै प्रापकोक्तयेऽवान्तरवाक्यार्थस्यावश्यविवक्षणीत्वं सूचयितुमाह * प्रतिषेधेति * निषेधोपलक्षितमहावाक्यार्थवेलायां यद्यपि निषेधपरो विधिरविधिर्वाविधिविरुद्धो नञ् तथापि यत एव निषेधपरोऽत एव शेषस्य निषेध्यस्यानुवाद्यत्वादवधारितैदमर्थ्यस्यैव च विशिष्टां भावनां प्राप्य वृत्तिर्विधिनिषेधयोरिति न्यायेन निषेध्यत्वात्तादृशस्यैवानुवाद्यत्वावगतेरनुवादसिद्ध्यर्थं प्रापकोक्तयेऽवान्तरवाक्यार्थे विवक्षित्वानृतवदनैदमर्थ्यचिन्ता कार्येत्यध्याहारेणावृत्तविधिशब्दाकारप्रश्लेषेण च व्याख्येयम् । सकृच्छ्रुतस्याख्यातस्य निषेधनिषिध्यरूपार्थद्वयविधायित्वायोगमाशङ्क्य नञोऽभावमात्रवाचित्वेन निवर्तनाख्यनिषेधार्थत्वायोगाच्छ्रुतस्य विधिर्नञनुरक्तस्य निषेधपरत्वपक्षे निषेध्यानुवादान्यथानुपपत्तिगम्यं प्रापकमङ्गीकृत्य यत्पुरुषार्थं क्रत्वर्थं वानृतवदनं तन्न कुर्यादिति वचनव्यक्तिरभावमात्रवाचिनोऽपि विधिप्रत्ययोक्तकर्त्तव्यत्वाभावाख्यानिवर्त्तनार्थत्वोपपत्तेर्नञ्मात्रस्य निषेधपरत्वपक्षे तु यत्क्रत्वर्थं पुरुषार्थं वानृतवदनं कुर्यात्तन्नेतिश्रुतविधिप्रत्ययसंहितेन प्रापकसंहितं निषेध्यमनूद्य नञ्मात्रेण निषेधोक्तौ वचनव्यक्तिरित्याह * ततश्चेति * उभयत्रोपलक्षणार्थं पुरुषार्थक्रत्वर्थोक्ती । शेषानुवाद्यत्वपरामर्शार्थस्ततः शब्दः । एकत्र विधेर्निषेधपरत्वपक्षेऽपरत्रत्वविधेर्नञोनिषेधपरत्वपक्ष इत्यर्थः ॥ यतश्चावधारितैदमर्थ्यमेवशेषमनुवाद्यं ततः सर्व्वस्य निषेध्यैदमर्थस्य निषेध्यैदमर्थ्यस्य च विधेर्निषेधपरत्वे साक्षादाख्याताधीनत्वान्नञोपि निषेधपरत्वे कर्तव्यत्वाभावाख्यनिषेधप्रतियोगिकर्त्तव्यतोक्तेराख्याताधीनत्वेनाख्याताधीनत्वादाख्यातेन कर्त्तोच्यते नचेत्याख्यातगता चिन्ता सर्वेष्वेवाख्यातेष्वित्यादि सिद्धान्तभाष्ये भविष्यतीति कर्त्तुराख्यातानभिधेयत्वस्य वक्तव्यतामुपपादितामुपसंहरति * ततश्चेति । * ऐदमर्थ्यनिरूपणस्याख्यातायत्तत्वमुपपादयितुमाह * तत्रेति ॥ * १२४।१
कर्त्तुराख्यातवाच्यावाच्यत्वचिन्तामानर्थक्येनाक्षेप्तुमाह * ननु चे-

त्ति । * वैयाकरणेन कर्त्रभिधानाभ्युपगमात्प्रयाजादीनां क्रत्वर्थत्वाभ्युपगमाच्चेहाद्येता धात्वर्थातिरिक्तभावनानभ्युपगमेपि धात्वर्थसामान्यंभावनामभिप्रेत्य भावप्रधानमाख्यातमिति स्मृतिमूलत्वसूचनार्थं भावनाप्रधानाख्यानवादिमिमांसकं प्रति बोधनार्थं च भावनाप्रधानत्वोक्तिः । अनिष्पादितायाः क्रियायाः क्रत्वर्थत्वायोगान्निष्पादककर्त्रन्वयस्य प्रकरणानुगुणत्वोक्ति. ॥ आख्यातवाच्यं कर्तारं प्रति भावनायाः श्रौतेन प्रधानतया त्रयेण सह प्राकरणिकस्य क्रतुं प्रत्यङ्गऽतयाऽन्वयस्यातुल्यकक्षत्वेनाविरोधं संमार्गभावनाया ग्रहदशापविघ्नान्वयाविरोधदृष्टान्तपूर्वमन्वयमुखेन तावद्विवृणोति *तद्यथेति ॥* द्वावपि प्रत्यङ्गतयान्वये द्वयो. शेषिणोरेकशेषसमवायलक्षणो विरोधः प्राधान्येन त्वन्वये द्वयोः शेषयोरेकशेषिसमवायलक्षणो विरोधः स्यान्नत्वेतद्द्वयमप्यस्तीति व्यतिरेकमुखेन विवृणोति *यदि त्विति॥* क्रतुप्राधान्येन सह कर्त्तुः प्राधान्यस्योभयोः शेषिणोरेकशेषसमवायलक्षणो विरोधः स्यादित्यर्थः । अतः श्रुतिप्रकरणयोर्नानाविषयत्वेनैकविषयत्वाख्यसमवायाभावाद्विरोधानुपपत्तेः श्रुत्या प्रकरणबाधायोगात्कर्त्तुराख्यातवाच्यवाच्यत्वचिन्तानर्थिकेत्याक्षेपमुपसंहरति * अत इति । *अङ्गत्वेन कर्त्तुर्वाच्यतामाक्षेप्ताऽभिमतामभ्युपेत्यैवतावत्प्राधान्यमुपपादयति * नैतदिति । * श्लोकं व्याचष्टे * यद्यपीति । * पाकादिशक्तस्यापि काष्ठादेर्ज्वलनादिव्यापारं विना पाकादिसाधकत्वाख्यकारकत्वाभावप्रसिद्धेः सव्यापारस्यैव कर्तृरूपकारकत्वेनाख्यातवाच्यत्वावगमापरोद्देशेन व्याप्रियमाणत्वस्यैव चाङ्गत्वात्कर्तृशक्त्यतिरिक्तव्यापारवत्त्वाख्याङ्गत्वरूपेणाख्यातवाच्यत्वोपपदनार्था साधकापेक्षोक्तिः । एकपदोपादानेप्यनृतवदनादिक्रियायाः श्रुत्या कर्त्तारं प्रति प्राधान्यावगतेः प्रयोजनाकाङ्क्षावेलायामप्यङ्गत्वेन कर्त्रन्वयानिष्पत्तेर्विप्रकृष्टस्यापि यागं प्रत्यङ्गत्वेनान्वयस्याविरोधाद्ग्रहणोपपत्तिमाशङ्क्य यथाग्नीषोमीयमिति तद्धितश्रुत्या प्रकृत्यर्थभूतयोरग्नीषोमयोर्द्रव्यद्वारा द्रव्यदेवतान्वयकल्प्ययागाङ्गत्वोक्तावपि यागस्य प्रयोजनाकाङ्क्षायां तयोरेव संस्कार्यत्वाख्यप्रयोजनत्वलक्षणप्राधान्यावगतेः सान्निपत्योपकारिणश्च संस्कारातिरिक्तापूर्वकल्पनाभावेन गौरवानापादकत्वात्तत्संभवे कल्पनागौरवापादकानुपकारकत्वकल्पनानुपपत्तेः सर्वपाकादिसम्बन्धे द्व्याकारा-

स्तण्डुलादय इत्यनेन च न्यायेन पूर्वावगतस्याङ्गत्वस्योत्तरकालावगतेन प्राधान्येनाविरोधात्पशुयागाङ्गभूतस्य पुरोडाशयागस्य पशुयागसमवेताग्नीषोमसंस्कारार्थत्वं दशमे वक्ष्यते तथाख्यातश्रुत्या कर्त्तुरनूतवदनाङ्गत्वोक्तावप्यनूतवदनस्य प्रयोजनाकाङ्क्षायां कर्त्तुरेव क्रतुसमवेतस्य संस्कार्यत्वलक्षणा प्रधानता न विरुद्धेत्याह * नचेति ॥ * प्रकर्षसेचनक्रियायामव्याप्रियमाणत्वेनानङ्गभूतास्वप्यप्सु करणरूपकारकत्ववाचिप्रोक्षणीशब्दप्रयोगाद्देवतायां च कारकत्वाभावेऽप्यङ्गत्वाभ्युपगमादङ्गत्वातिरिक्तशक्तिमात्ररूपेण कारकत्वावगतेः काष्ठादेश्चाव्याप्रियमाणावस्थायां कारककार्यकरत्वाभावात्पुत्रे न ममैष पुत्र इतिवत्कारकत्वाभावापत्तेरङ्गत्वानपेक्षस्य कर्तृत्वमात्रस्याख्यातवाच्यत्वादङ्गत्वानुक्ते प्राधान्याविरोध इत्यन्यथाक्षेपं परिहरति * अथ वेति * कर्तृत्वमात्रोक्तावङ्गप्रधानत्वान्यतरानिर्णयायोगमाशङ्क्यार्थविध्यपेक्षितं प्रयोजनमालोच्य गुणप्रधानत्वं भविष्यतीत्युक्ते द्वेधापि प्रयोजनाविशेषो योग्यत्वानुसाराद्योग्यत्वाविशेषे च विवक्षानुसारादित्युक्तम् । कर्तुर्वाच्यत्वे प्राधान्येनैवोक्त्यापत्तिरित्यन्यथाश्लोकद्वयेन परिहरति * यद्वेति * प्रत्ययार्थत्वाविशेषाद्भावनां प्रति प्राधान्यायोगमाशङ्क्याख्यातवाच्यकर्तृवादिनाख्यातवाच्यभावनानभ्युपगमाद्धात्वर्थ एव भावनाप्रधानत्वादित्याक्षेपवार्त्तिकस्थेन भावनाशब्देनोक्त इति सूचनार्था प्रकृत्यर्थोक्तिः ॥ क्रमवशोक्तिसूचितस्य नागृहीतविशेषणन्यायस्योभावित्यादिसूचितस्य च प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत स्तयोः प्रत्यार्थः प्राधान्येनेति स्मरणस्याख्यातेष्यपवादाभावोक्त्यर्थत्वेनाविशेषोक्तिं व्याचष्टे * नहीति * कृद्ग्रहणस्य प्रदर्शनार्थत्वेन व्याख्यापूर्वंद्वितीय श्लोकं व्याचष्टे * तेनेति * पाचकः पठतीति कृदुक्तस्य कर्तुः प्रधानभूतस्य पाकविशिष्टस्यैव पठनान्वयवदाख्यातोक्तस्यापि प्राधान्ये सति पठनविशिष्टस्यैव पाकान्वयावगमापत्तेः पावको गृहे पठतीत्यादिप्रयोगे च गृहादीनां सन्निध्यविशेषे ऽप्याख्यातपदोक्तेनैव धात्वर्थेनान्वयावगमात्सामान्यरूपेण न्यायेनावस्थितं प्रत्ययार्थप्राधान्यमाख्यातेष्युत्सर्गतः प्राप्तं प्रतीतिवैलक्षण्यरूपेण न्यायान्तरेणापोद्यतेत्याशङ्क्ते * ननु चेति * न्यायान्तरं विवृणोति * तथा हीति * चतुर्थपादपूर्वकं श्लोकं व्याचष्टे * द्वयो- ६२५।१

२२६।३ स्तावदिति*प्रतीतेरपवादकत्वोपपादनार्थं * नचेत्युक्तम् * आख्याते कर्तुरुपसर्जनत्वोक्तिर्धात्वर्थप्राधान्यसिद्ध्यर्था प्रत्ययार्थप्राधान्यविपर्यौत्सर्गिकन्यायापवादार्था चेति विकल्पय कर्तुरुपसर्जनत्वेप्याख्याते भावनायाः प्राधान्यात्तस्याश्च स्वपदस्थधात्वर्थविशिष्टाया एव पदान्तरार्थान्वयाभ्युपगमेनानिष्टापत्त्यभावाद्गृहादीनां चाधिकरणादिकारकाणां कारकभूतेन कर्त्रान्वयार्हत्वात्क्रियात्मिकां भावनां प्राधान्येनाख्यातोक्तामुक्त्वा कृदन्तपदस्थधात्वर्थाक्षिप्तोपसर्जनभूतभावनान्वयायोगात्कृदाख्यातसन्निध्यविशेषेप्याख्यातेनैवान्वयोपपत्तेर्धात्वर्थप्राधान्यापादकहेत्वभावान्न तावदाद्यः कल्पः आख्याते च मत्पक्षे भावनायाः प्रत्ययार्थभूतायाः प्राधान्यानपवादेनौत्सर्गिकप्रत्ययार्थप्राधान्यविषयन्यायापवादायोगान्न द्वितीयोपीति परिहर्तुमाह * उच्यतइति * पूर्वार्द्धं व्याचष्टे * भावेति * कर्तुः प्राधान्याभावेपि प्रधानभूतां भावनां प्रति धात्वर्थस्योपसर्जनत्वप्राधान्यानापत्तौ भावप्रधानत्वोक्त्या सूचितायां तथापि प्रतीतिवशाद्धात्वर्थस्य प्राधान्यं भविष्यतीत्याशङ्क्य भावनाकाङ्क्षावशेन धात्वर्थाद्यन्वयात्तस्याश्च प्रयत्नात्मकत्वेनेच्छायोनितयेच्छाविषयत्वार्हपुरुषार्थरूपभाव्याकाङ्क्षत्वाद्धात्वर्थस्यापुरुषार्थत्वेन भाव्यत्वानुपपत्तेर्नित्यं कर्तुः प्राधान्ये गुणत्वे वा करणत्वान्न कदा चित्प्राधान्यमिति सर्वत्र स्थितमितीह जन्मनीति व्याख्यानायोक्ते धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयत इति धात्वर्थस्यैव भावशब्दवाच्यत्वेन स्मृतस्य भावप्रधानमाख्यातमिति प्राधान्यस्मृतेर्धात्वर्थप्राधान्यशङ्कानिरासायान्यदेव हि धात्वर्थसामान्यं करणात्मकं अन्यच्च भावनानामसाध्यत्वेन व्यवस्थितमित्यत्राख्याते प्रधानतया स्मृतस्य भावनाख्यस्य भावस्य धात्वर्थादन्यतोक्तेत्युक्तम् । धात्वर्थस्य भावत्वस्मृतिस्तु नपुंसके भावे क्त इत्यादौ शुद्धः सामान्यरूपो धात्वर्थ एव भावो भिधीयते नतु तस्य भावस्त्वतलाविव्यादाविव शब्दप्रवृत्तिनिमित्तमित्येवं व्याख्येयेत्याशयः। द्वितीयकल्पनिरासार्थत्वेनोत्तरार्द्धं व्याख्यातुं शङ्कते *नन्विति* ततश्चौत्सर्गिकन्यायापवादार्थं कर्तुरुपसर्जनत्वोक्तिरित्याशयः । कर्तुरुपसर्जनत्वेपि मत्पक्षे प्रत्ययार्थभूताया भावनायाः प्राधान्यानिवृत्तेः कर्तृप्राधान्यनिवृत्तावपि नौत्सर्गिको न्यायो निवर्त्स्यति कर्तृप्रत्ययार्थत्वरूपे तु

त्वत्पक्षे कर्तृप्राधान्यानिवृत्तेरेव नौत्सर्गिको न्यायो निवर्त्स्यतीत्येवं व्याचष्टे * सत्यमिति। * मीमांसकपक्षे कर्तृप्राधान्यं चेन्निवृत्तं कथं नौत्सर्गिकन्यायनिवृत्तिरित्याशङ्क्याह * यो हीति। * कर्तृप्रत्ययार्थपक्षे तर्हि न्यायप्रतीत्योर्विरोधात्प्रतीतिबलीयस्त्वेनौत्सर्गिको न्यायो निवर्त्स्यतीत्याशङ्क्य स्मृत्युपबृंहितस्यौत्सर्गिकस्यापि न्यायस्य लौकिकप्रतीतिबलेन निवृत्त्ययोगात्प्रतीत्यतिक्रमेण कर्तुः प्राधान्यमभ्युपगन्तव्यमित्याह * यस्य त्विति। * कर्तृप्रत्ययार्थवादी चेद्भावनामपि प्रत्ययार्थं वदेत्ततः प्रत्ययेन भावनोपादानात्कर्तृसंख्यादिप्रत्ययार्थवत्कर्तुरप्युपसर्जनत्वे प्रत्ययार्थप्राधान्यलक्षणस्य भावनाप्राधान्यानुगमविषयत्वात्प्रतीतिरपि प्रत्ययार्थप्राधान्यस्मृत्युपबृंहिता स्यान्न त्वसौ भावनां प्रत्ययार्थं वदतीति कर्त्रैवेत्यनेनोक्ते धात्वर्थाख्यस्य भावस्य विशेषरूपेण धातूपात्तस्य सामान्यरूपेण वा धात्वर्थसामान्यवाचिकरोतिसमानाधिकरणाख्यातप्रत्ययोपात्तस्य भावप्रधानाख्यातलक्षणेन प्राधान्यस्मृतेस्तदुपबृंहिता प्रतीतिर्भविष्यतीत्याशङ्क्य धात्वर्थविशेषस्य भावनाया वैयाकरणेनाप्यनिष्टत्वाद्धात्वर्थसामान्यस्यापि भावार्थाधिकरणे भावत्वनिरासाद्वैयाकरणेनाप्याख्यातस्य करोत्यर्थवाचित्वानभ्युपगमेन धात्वर्थसामान्यवाचित्वानभ्युपगमान्न केन चिद्धातुना प्रत्ययेन वा भावोपादानमिति कृत्वा कर्तृप्रत्ययार्थपक्षे भावप्राधान्यानुगमविषयं लक्षणमेव न स्यादित्युक्तम्॥ प्रत्ययार्थप्राधान्यलक्षणस्य भावनाप्राधान्यानुगमविषयत्वाभावेपि कर्तृसंख्याकालोपग्रहविशेषविध्यादीनामपि प्रत्ययार्थत्वात्प्राधान्योपपत्तेः सर्वप्राधान्यस्य चान्योन्यानन्वयापादकत्वेनायोगात्कर्तृप्राधान्यानिर्णयमाशङ्क्य संख्यादीनां स्वाभाविकैकान्तिकोपसर्जनत्वात्प्राधान्यशङ्कानुपपत्तेर्विधेरपि प्रमाणत्वेन प्रमेयं प्रत्यैकान्तिकोपसर्जनत्वात्कर्तृप्राधान्यनिर्णयसूचनार्थं यथा चेदं लक्षणं भावनाप्राधान्यानुगमविषयं न भवति तदास्मादेव लक्षणात्कर्तृप्राधान्यं प्राप्नोतीत्युक्ते प्रतीतिविरोधाच्चकारसूचितेन चाख्यातोक्तस्य कर्तुः कृदुक्तकर्तृवैलक्षण्यरूपेण न्यायेन विरोधात्कर्तुःप्राधान्यनिवृत्तिं तथेत्यनेनाशङ्क्य प्रतीतिमूललक्षणाभ्युपगमे तद्विपरीतलक्षणप्रणयनायोगात्प्रतीतिविपरीतलक्षणप्रणेतृभिः कर्तृप्रत्ययार्थवादिभिः प्रतीतिमूलत्वानभ्युपगमावगतेः प्रमाणान्तरमूलस्य च लक्षणस्य तद्बाधं विना

बाधायोगाल्लक्षणान्यथानुपपत्तिकल्पितमूलभूतप्रमाणान्तरोपबृंहितलक्षणबलेन लौकिकीं कर्तुरुपसर्जनत्वप्रतीतिं बाधित्वा प्राधान्यमभ्युपगन्तव्यमिति तत्रेत्यादिनोक्त्का त्रिविधमप्याक्षेपपरिहारमुपसंहर्तु-* मितीत्युक्तम्।*आक्षेप्ता परिहारत्रयमप्ययुक्तं मत्वानन्तरमेव तावत्परिहारं यद्वै तदविशेषणेति श्लोकद्वयोक्तं दूषयितुमारभते * आहेति । * सम्बन्धोक्तेर्गुणप्रधानभावाशयत्वात्तादर्थ्योक्तेश्च भावप्रत्ययान्तसमासत्वेनाङ्गाङ्गिसम्बन्धवाचित्वाद्यत्र व्रीहीन्प्रोक्षतीत्यादावङ्गाङ्गित्वलक्षणं गुणप्रधानभावं श्रुतिरुपादत्ते तत्रैकस्य प्राधान्योक्ताावितरस्य तादर्थ्यं प्रसज्यते प्रकृतिप्रत्ययार्थयोस्त्वङ्गाङ्गित्वानपेक्षविशेषणविशेष्यत्वमात्ररूपं गुणप्रधानत्वं प्रकृतिप्रत्ययान्वयात्मकपदश्रुत्या प्रतीयते एवं च सति प्रत्ययार्थस्य विशेष्यत्वलक्षणप्राधान्योक्त्या धात्वर्थस्य विशेषणत्वलक्षणोपसर्जनत्वावगमेऽपि तादर्थ्यनियमो नास्तीत्यर्थः । राजपुरुषदृष्टान्तं विवृणोति * तथाहीति

६२७।२ । * आदिशब्दगृहीतं दृष्टान्त विवृणोति * अपि चेति * निःसंदिग्धं प्रधानत्वमस्येति बहुव्रीह्यर्थः । पदश्रुत्याङ्गाङ्गित्वानुक्तावपि श्रुत्युक्तविशेषणविशेष्यत्वानुसारेणाङ्गाङ्गित्वनियमाशङ्कानिरासायाङ्गाङ्गित्वस्य विशेषणविशेष्यत्वानुसारित्वनियमाभावे चतुर्थाधिकरणभाष्यसंमतिमाह * तथा चेति ॥ *तदेव भाष्यमूहेन प्रकृते योजयति * तेनेति । * एवं प्रत्ययार्थप्राधान्यस्मृतेर्विशेषणविशेष्यत्वाख्यगुणप्रधानत्वाशयत्वाङ्गीकारेण क्रियायाः कर्त्रर्थत्वप्रसङ्गाभावमुक्त्वाधुनाङ्गाङ्गित्वाख्यगुणप्रधानत्वाशयत्वेऽप्याभिधानिकाङ्गाङ्गित्वाशयत्वान्न वास्तवः क्रियायाः कर्त्रर्थत्वप्रसंगः प्रत्युत प्राधान्याख्येन तात्पर्येण कर्तृत्वाभिधानात्कर्तुरेव क्रियार्थत्वप्रसङ्ग इत्याह*अपि चेति॥*यद्यपीह व्याकरणे प्रसिद्धेनाभिधानिकेनाङ्गित्वाख्येन प्राधान्येन कर्तृत्वमभिधीयते तथापि कर्तुः प्राधान्येनाभिधानात्क्रियायास्तादर्थ्यप्रसङ्ग इति यदुक्तं तन्नास्तीत्युक्ते कथमित्यपेक्षायां तदुपपादनार्थं यस्मात्प्राधान्याभिधानस्मृत्या तात्पर्यतः कर्तृत्वस्य वाच्यत्वावधारणाद् गुणत्वं वाच्यमवधारितं भवतीति योऽर्थं ततस्तात्पर्यतइति तु पाठः स्पष्टार्थः । श्लोकं व्याचष्टे * प्राधान्येति । * व्याकरणे यस्त्वर्थमनपेक्ष्यशब्दार्थेन व्यवहारात्प्रकृत्या स्वार्थावच्छिन्नप्रत्ययार्थं प्रतीत्यर्थं स्वार्थाभिधानात्तात्पर्येण प्रत्यया-

र्थपरत्वेन प्रकृतिप्रत्ययाभ्यां स्वार्थाभिधानात्मकमाभिधानिकेन शेषित्वेनाभिधानं प्राधान्याभिधानं विवक्षितं नतु वास्तवेन शेषित्वेनाभिधानं प्राधान्याभिधानोक्त्या विवक्षितं तस्मादिह व्याक्रियाया-माख्यातस्य कर्तृत्वपरत्वाभ्युपगमे गुणताऽऽख्यातेनोक्ता भवतीत्युक्ते कथं तात्पर्येण कर्तृत्वोक्त्या भवतीत्याशङ्क्य नहीत्युक्त्वा नतद्विति श्लोकावयवव्याख्यार्थं * तेनेत्युक्तम् * प्रकृत्यर्थस्य प्रत्ययार्थं प्रतीत्यर्थत्वाभावेनाभिधानिकाङ्गाङ्गित्वानभिधानात्मकेनौदासीन्येन कर्त्रभिधानपक्षेप्याख्यातेन कर्त्तुर्गुणतोक्ता भवति, आभिधानिकप्राधान्याभिधानपक्षे तु सुतरामिति तदवर्थसूचनार्थैतद्गुणत्वाभिधानमौदासीन्याभिधानात्मकाद्द्वितीयपरिहारपक्षेप्यतिदेष्टव्यमित्याह * एतद्विति । * एतदेवोपपादयितुं द्वितीयं परिहारमनुभाषणपूर्वं दूषयति * यत्त्विति । * तत्राप्याभिधानिकाङ्गाङ्गित्वानभिधा-त्मकौदासीन्याख्यकेवलाभिधानपक्षेपि वास्तवाङ्गाङ्गित्वानपेक्ष्यवस्तुरूपेण कर्त्रभिधाने सति वास्तवौदासीन्यरूपेणावस्थानाद्यथेष्टं यथायोग्यं वा वास्तवमङ्गाङ्गित्व कर्त्ताप्रतिपद्येत तस्य तु कर्तृत्वरूपेणाभिधानात्कर्तृत्वस्य च वास्तवगुणत्वैकान्तिकत्वाद्वास्तवौदासीन्याभिधानं नास्तीत्यर्थः । यद्यप्यादौ गुणत्वेनेति श्लोकोक्तमाद्यं परिहारमनुभाषणपूर्वं दूषयति * यद्यपीति ॥ * श्रुतिविरोधं विवृणोति * आख्यातेन हीति । * पशुपुरोडाशे देवतोद्देशपूर्वकद्रव्यत्यागात्मकस्य यागस्योद्देश्यदेवतासाध्यत्वाद्देवतायास्तद्धितश्रुत्युक्तस्य द्रव्यद्वारा यागाङ्गत्वस्य यागप्रयोजनाकाङ्क्षावेलायामुद्देशांशेन संस्कार्यत्वाख्यप्राधान्यावगमे प्यव्यावृत्तेरिह त्वंशभेदाभावाद्व्यावृत्त्यापत्तेर्वैषम्यसूचनार्थं * व्यावर्त्तयतइत्युक्तम् ॥ * श्रुतिविरोधे प्यानर्थक्यापत्तौ बलाबलवैपरीत्यात्सन्निधिनोपकार्यत्वाख्यप्राधान्योपपत्तिमाशङ्क्य सन्निधितो बलवता प्रकरणेनानर्थक्यपरिहारसंभवे सन्निधिनानर्थक्यपरिहारयोगमाह * नचेति । * श्रुत्यविरोधात्सन्निधिनैवानर्थक्यपरिहारोपपत्तिमाशङ्क्य प्रकरणस्याप्यविरोधमाह * यथैवेति । * गुणत्ववत्प्राधान्यस्याप्याख्यातश्रुत्यैव विधिरूपयोक्तेर्बलाबलविशेषाभावमाशंक्योभयोक्त्यशक्तेःप्राधान्योक्तौ गुणत्वत्यागापत्त्याख्यातवाच्यगुणत्ववादिना गुणत्वातिरिक्तकर्तृत्वानभ्युपगमात्कर्त्तृत्वत्यागापत्तेः स्वामित्वाख्यप्राधान्यायोगात्कर्मत्वाख्यप्रा-

६२८।२ धान्यापत्तेः कर्मणि लकारोत्पत्तौ यगात्मनेपदसंप्रसारणशीयुट्कर-
णाद्युद्येतेत्यन्यरूपशब्दः स्यान्नतुवदेदित्येवंरूप इत्याह *नचेति।* कर्त्र-
न्तराभावेन कर्त्रीप्सिततमत्वाख्यकर्मत्वायोगाद्दाप्यमानत्वोक्तिः ।
कर्तृत्वस्य द्व्यात्मत्वादुभयोक्त्युपपत्तिं शङ्कते * अथेति ॥ * कर्तृ-
त्वस्य क्रियावेलायामेव सिद्धत्वात्स्वामित्वस्य तु भोगकालभा-
वित्वात्साधकरूपमेव कर्तृत्वं न स्वामिरूपमिति न तावद्द्व्यात्मकं
कर्तृत्वं यदि तु स्वाम्यं विना कर्तृत्वायोगात्कर्तृत्ववाचिनास्वाख्यातेन-
स्वाम्योक्तिः शङ्क्यते ततो नन्यलभ्यस्यैव शब्दार्थत्वाद्विपरीतसा-
धनो हेतुःस्यादिति परिहरति * एतदिति* ॥ कर्तृत्वमात्राभिधानो-
पपादनार्थत्वेन प्रामाणान्तरगोचरोक्तिं व्याचष्टे * यद्यपीति *
तदेवाभिधीयतइत्येवकारार्थं तच्चेति चशब्दव्याख्यसूचनार्थो मात्रो-
क्तिः ॥ स्वाम्योक्त्यर्थस्वर्गकामादिशब्दानर्थक्यापत्तेरपिनाख्याते-
न स्वाम्योक्तिरित्याह * तथा चेति *। श्लोकार्थमुपसंहरति*तस्मा-
दिति* । काष्ठादौ फलोद्देशाभावेन स्वाम्याभावेपि काष्ठानि चल-
न्तीत्यादिप्रयोगे कर्तृत्वोक्तेरपि द्व्यात्मकमेव कर्तृत्वमित्यवधारणायो-
गाद्गुणत्वमेव केवलं कर्तृत्वमित्याह * अतश्चेति * ॥ इतश्चेत्यर्थः ॥
श्लोक व्याचष्टे * व्यापिहीति * ॥ परिहारत्रयदूषणमुपसंहरति
* तस्मादिति * । परिहर्ता तृतीयं परिहारं समाधातु तत्रैतत्प्रसज्ये-
तेत्यादिवार्त्तिकोक्तं तावद्दूषणंपरिहरति * अत्रेति * । विशेष-
णत्वरूपेणोपसर्जनत्वेन प्रकृत्या स्वार्थावच्छिन्नप्रत्ययार्थाभिधानार्थं-
स्वार्थाभिधानमित्येवंरूपस्याभिधानधर्मतया धर्मधर्मिणोरत्यन्तभे-
दाभावेनाभिधानात्मकस्य तादर्थ्यस्योपात्तत्वादभिधानस्य चा
नुष्ठानार्थत्वात्प्रकृत्यर्थानुष्ठानस्य प्रकृत्यर्थावच्छिन्नप्रत्ययार्थानुष्ठानार्थ-
त्वात्प्रकृत्यर्थोऽङ्गं प्रत्ययार्थः प्रधानमित्यनुष्ठानविषयमपिशब्दात्स्व-
रूपविषयमपि तादर्थ्यं तादृगेवाङ्गीकार्यमित्यर्थः । वस्तुधर्मभूतस्या-
ङ्गाङ्गित्वस्याभिधानधर्मभूताङ्गाङ्गित्ववैपरीत्ये राजपुरुषदृष्टान्तस्य
६२९।३ विशेषणतया राजेतिवार्त्तिकोक्तस्य साध्यविकलतामाह*राजेति*
राजाभिधानस्य राजविशिष्टपुरुषाभिधानार्थत्वलक्षणशब्दार्थवृत्त्या-
लोचनया राजाख्यस्य वस्तुनोपि पुरुषाख्यं वस्तु प्रत्यङ्गत्वप्रासेति
कृत्वा साध्यविकलो दृष्टान्तइत्याशयः । राजपुरुषमानयेत्यादौ राजा-
ज्ञसदुष्टनिग्रहाद्यर्थं राजपुरुषानयने राजाज्ञाकरत्वे पुंसो राजाङ्ग-

त्वावगमाद्राज्ञोऽङ्गता न युक्तेत्याशङ्क्य तत्रापिशब्दार्थवृत्यालोचनया राज्ञोङ्गत्वावगमेपि राजासानुग्रानार्थानयनान्वयान्यथानुपपत्तिलक्षणप्रमाणान्तरवशात्प्राधान्यकल्पनेत्याह*प्रमाणान्तरेणेति*। विशेषणसमासश्रुत्युक्ताङ्गत्वविरोधाशङ्क्य लभ्यानयनान्वयान्यथानुपपत्त्या विपरीतकल्पना न युक्तेत्याशङ्क्यसक्तूनां द्वितीयाश्रुत्युक्तप्राधान्यविरोधेपि वाक्यलभ्यहोमान्वयान्यथानुपपत्याङ्गत्वकल्पनवद्विपरीतकल्पनोपपत्तिं सूचयितुं शब्दार्थविपरीतकल्पनंसक्तधिकरणे दर्शितमित्याह * तच्चेति * । व्यभिचारात्तर्हि विशेषणसमासश्रुतेर्नाङ्गत्ववाचिता युक्तेत्याशङ्क्य प्रमाणान्तरवशाद्विपरीतकल्पनामात्रेण शब्दार्थत्वाभावो न भवतीति तत्रैवोक्तमित्याह *न चेति*। राजपुरुषशब्दस्याङ्गाङ्गिभाववाचित्वे राज्ञोंगत्वाभावात्प्रयोगे न युज्येतेत्याशङ्क्याह * यश्चेति * । राज्ञः प्राधान्ये प्रसिद्धे गुणत्वं नास्तीत्याशङ्क्य प्रतिज्ञाहेतुप्रश्नपूर्वमुपपादयति। * अस्ति चेति * गुणत्वप्राधान्ययोर्हेतुहेतुमद्भावेनाविरोधसूचनार्था तावत्पश्चाच्छब्दाभ्यां पौर्वापर्योक्तिः । द्व्यात्मकत्वे प्राधान्यमपि कस्मान्नविवक्ष्यतइत्याशङ्क्य विवक्षाविति यदुक्तं तद्याचष्टे * तत्रेति * । उपकारकोपकार्योक्तिभ्यामङ्गप्रधानत्वे लक्षणयोक्ते पुरुषस्य राजान्वयविवक्षया राजपुरुषोयमिति प्रयोगे निर्विशेषान्वयोक्त्यानर्थक्यापत्तेर्विशेषाकाङ्क्षायामभिधानगतस्याङ्गाङ्गित्वाख्यस्यान्वयाविशेषस्य बुद्धिस्थत्वेनाभिधेयगततयापि कल्पनाद्वस्तुतोपि राज्ञो ङ्गत्वं पुंसश्चाङ्गितास्तु राजपुरुषमानयेत्यादिप्रयोगे त्वानयनादिक्रियान्वये संयुक्तस्य पुरुषस्योपलक्षणार्थं राजान्वयोक्तेः सामान्यमात्रेणाप्युपलक्षणोपपत्तेर्विशेषानाकाङ्क्षात्वान्नशब्दार्थवृत्यालोचनया वस्तुतो राज्ञोङ्गत्वप्राप्तिरित्याशङ्क्याह * प्रयोगेति * । निर्विशेषस्याप्यन्वयस्योपलक्षणत्वोपपत्तावपि निर्विशेषसामान्यायोगादभिधानगतस्य चाङ्गाङ्गित्वाख्यास्यान्वयविशेषस्याभिधेयगतान्वयसामान्यविशेषायोगाद्वास्तवाभिधेयगतान्वयसंभवे चाभिधानगतस्यान्वयाविशेषस्याभिधेयसमारोपायोगाद्वास्तवस्य चाङ्गाङ्गित्वस्य पदवेलायामेव प्रतीतेः प्राथम्यादाभिधानिकस्य त्वङ्गाङ्गित्वस्य पदान्तरवक्ष्यमाणक्रियोपयोगं पुरुषस्यापेक्ष्यालोच्य तदुपलक्षणार्थं राजान्वयोक्तेराभिधानिकेनापि चाङ्गाङ्गयन्वयेनोपलक्षणोपपत्तेर्वास्तवाङ्गाङ्गयन्वयानाकाङ्क्षणा-

द्वाक्यवेलायां प्रतीतेर्जघन्यत्वाद्राज्ञा भृतिदानेन पुरुषस्योपकार्यत्व-
विवक्षायां राजपुरुषशब्दप्रयोगो राजाज्ञाकरत्वेनोपकारकत्वविवक्षायां
वा पुरुषराजशब्दप्रयोग इति व्यवस्थाहेतौ वास्तवेऽङ्गाङ्गित्वाख्ये
र्थद्वये पदान्तरवक्ष्यमाणक्रियोपयोगमनपेक्ष्यैव तावत्पदवेलायामेव
संभवति सत्यानयादिपदान्तरवक्ष्यमाणक्रियोपयोगस्यानादृत्य वास्त-
वाङ्गाङ्गित्वं यथाकथंचिदन्वयमात्रापेक्षया वैवक्षिकाङ्गाङ्गित्वविशेष-
मात्रेण क्लिष्टव्यवस्थाश्रयणं न युक्तमित्याशयः शैघ्र्यविलम्बाख्यविशे-
षोक्त्यर्थं तावद्वक्ष्यमाणोक्तौ तत्पुरुषसमासस्य चोत्तरपदार्थप्राधा-
न्यवाचित्वाद्वास्तवाङ्गाङ्गित्वाभावे निरालम्बनत्वापत्तेः प्रयोगासं-
भावात्तदन्यथानुपपत्त्यापि वास्तवाङ्गाङ्गित्वकल्पनसूचनार्था विद्य-
मानोक्तिः । अतो वास्तवमेवाङ्गाङ्गित्वं शब्दप्रवृत्तिनिमित्तमालोच्य
राजपुरुषशब्दप्रयोगाद्वास्तवमेव राज्ञः पुरुषाङ्गत्वं विवक्षितमित्युपसं-
हरति *तेनेति* उपकाराख्येनाङ्गत्वफलेनाङ्गत्वोपपादनार्थोपकारकृ-
तोक्तिः । भृतिदानोपादेयं पुरुषं प्रति स्वामिनोऽङ्गत्वसंभवेऽपि गां गर्भ-
दासं वा प्रत्यङ्गत्वाभावाद् देवदत्तस्वं गौर्गर्भदासो वेत्यादिः प्रयोगो
वास्तवाङ्गाङ्गित्वाविवक्षायां तत्स्यादित्याशङ्क्य तत्रापि वस्तुगतौ
चोपकारतोऽङ्गत्वेनोपचर्यते नत्वभिधानमताङ्गताभिधेयगतत्वेनोप-
चर्यत इत्याह * यत्रापीति * । देवदत्तादीनां गवादीन्प्रत्यौपचारि-
काङ्गत्वविवक्षायां मुख्यबुद्ध्यभावापत्तिभयेनाङ्गत्वानपेक्षोपकारित्व-
लक्षणोपसर्जनत्वाभ्युपगमेऽप्येतदुपकारकत्वं शेषफलत्वाच्छेषस्यैव
प्रत्यासन्नतरं शेषिफलत्वाभावात्तु न शेषिणः प्रत्यासन्नतरमिति
कृत्वोपकारकत्वस्य शेषप्रतिपत्त्यर्थत्वविज्ञानात्संभवच्छेषत्वस्य धा-
त्वर्थादेकरूपकारकत्वलक्षणेनोपसर्जनत्वेन प्रत्ययार्थं कर्त्तारं प्रत्य-
ङ्गत्वावगतेः कर्तुः प्रधानसिद्धिरिति सूचयितुमाह * अथापीति * ।
निःसंदिग्धप्रधानत्वामिति वार्त्तिकोक्तस्य पाचकादिदृष्टान्तस्य
साध्यविकलतामाह * याचकादावपिचेति * यथा राजपुरुषादि-
शब्दे राजादीनां पुरुषादीन्प्रत्यङ्गत्वं तथापाचकादिशब्देऽपि देवद-
त्तादेः पाकादिकृतवृत्तिलाभाद्युपकारकत्वात्पाकादिक्रियाणां देवद-
त्तादीन् प्रत्यङ्गत्वं विवक्ष्यते प्राधान्यं तु निष्पाद्यत्वेनावस्थानात्स-
दपि न विवक्ष्यते ततश्च वस्तुधर्मभूतस्याङ्गाङ्गित्वस्याभिधानधर्म-
भूताङ्गाङ्गित्ववैपरीत्येपाचकादिदृष्टान्तस्य साध्यविकलतेत्याशयः

यथा कर्मोत्पन्नकृदन्ते पक्वादिशब्दे कर्मभूतानोदनादीन् प्रत्यङ्गत्वं
तथा कर्तृभूतानपि देवदत्तादीन् प्रतीति सूचनार्थं *सर्वत्रेत्युक्तम्*
शब्दार्थवृत्त्यालोचनया वास्तवाङ्गाङ्गित्वाभ्युपगमे प्रोक्षितशब्दे क-
र्मोत्पन्नकृदन्ते शब्दार्थवृत्त्या प्रोक्षणस्य द्रव्यार्थत्वाद्वस्तुवृत्त्यापि
द्रव्यर्थत्वापत्तेः प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति प्रोक्षिता-
भ्यां दृषदुपलाभ्यां पिनष्टीति वाक्याभ्यां विहितं प्रोक्षणमवहन
नपेषणप्रयुक्तमपूर्वप्रयुक्तं वेति नावमिकी चिन्ता तादर्थ्यं विना प्रयु-
क्त्ययोगान्न युज्यतेत्याशङ्कते * नन्विति * द्रव्यार्थत्वे पि द्रव्य- ६३०।१
कार्यप्रयुक्त्यविरोधाद्धन्तिपिषिस्वरूपेणोलूखलादिद्रव्यकार्येणोलूखला-
द्यर्थं प्रोक्षणं प्रयुज्यतेऽपूर्वसाधनांशेन वा हन्तिपिषिगतेनेति नाव-
मिकचिन्तोपपत्तेः प्रोक्षणस्य द्रव्यार्थतैवेति परिहरति * कस्य
वेति * शङ्कापरिहाराशयौ क्रमेण विवृणोति * नन्विति * ताद-
र्थ्यस्य तदधीनविधिविषयत्वाख्यत्वात्तत्प्रयुक्तत्वस्य च तत्तत्प्रयो-
जनत्वाख्यत्वात्तादर्थ्यतत्प्रयुक्तत्वयोरभेदाशयेन द्रव्यार्थत्वान्यप्रयु-
क्त्योर्विरोधाशङ्कानुपपत्तेर्द्रव्यार्थत्वे द्रव्यस्यैव शेषित्वात्प्रयोजक-
त्वापत्तेरन्यप्रयुक्तिविरोधः शङ्कनीयः सोपि द्रव्यार्थत्वे पि धर्मस्य
नवमाद्यन्यायेन कार्यप्रयुक्तत्वाद् द्रव्यधर्मः प्रोक्षणं हन्तिपिषिस्व-
रूपात्मकेन द्रव्यकार्येणादृष्टार्थधर्मानपेक्षेणाप्यानन्तर्यात्प्रयुज्यते इत्या-
द्यतण्डुलपिष्टादिनिष्पादनद्वारा हन्तिपिषिसाध्यस्यौषधयागापूर्वस्य
व्यवहितत्वे प्यदृष्टार्थधर्माकाङ्क्षत्वात्तत्साधनांशेन हन्तिपिषित्वैका-
र्थसमवायिनोलूखलमुसलादिद्रव्यकार्येणत्येवं चिन्तोपपत्तेर्नास्तीति
परिहाराशयः॥ इतिकरणस्य प्रकारवाचित्वाद्यस्मादेव प्रकारो विचा-
रस्तस्माद्द्रव्यार्थत्वेऽवस्थितेपि न विरुध्यतइत्यावृत्तस्य हिशब्द-
स्यापि शब्दार्थवाचित्वाङ्गीकारेण योज्यम्। यद्यपूर्वमनेन क्रियते ततो
ऽस्याऽपूर्वं प्रयोजकं यदि हन्तिपिषी ततस्तौ प्रयोजकावित्यादिभाष्येण
प्रयुक्तिनिर्णयार्थं तादर्थ्यस्यापि तत्राधिकरणे विचाराद् द्रव्यार्थत्व-
विरोधमाशङ्क्य यदुलूखलमुसलाभ्यामवहन्ति पिनष्टि वा तत्प्रो-
क्षिताभ्यामिति तृतीयानिर्देशात्साधनीभूतयोरुलूखलमुसलयोर्दृषदु-
पलयोर्वा प्रोक्षणं प्रत्यङ्गित्वावगतेः किमवघातं पेषण वा करोतीति
हन्तिपिष्योः कर्मत्वेन करोत्यर्थान्वयाद्युलूखलमुसलयोर्दृषदुपलयो-
र्वाहन्तिपिषिसाधनत्वं तदर्थं प्रोक्षणमुतावघातेन वा पेषणेन वा करो-

लीति करणत्वेनान्वयाद्यत्तयोरपूर्वसाधनत्वमित्युलूखलमुसलापरि-त्यागेनैव तादर्थ्यविचारादविरोधमाह * यो पिचेति * यद्वा द्रव्यस्य स्वरूपेण प्रत्ययार्थत्वाभावात्प्रकृत्यर्थं प्रत्याङ्गित्वानुपपत्तेः कारकरूपेणाङ्गित्वस्याभ्युपगमनीयत्वात्कृदुक्तस्य च कारकरूपस्य द्रव्योपसर्जनत्वेना निष्कर्षातिरोहितत्वेनात्मार्थतया क्रियाग्रहणाशक्ते प्रोक्षणस्य कर्मभूतोलूखलादिद्रव्यार्थत्वायोगेऽप्याख्यातोक्तस्य कारकरूपस्य स्वप्राधान्यान्निष्कतर्षप्रतीतेराविर्भूतत्वेनात्माथतया क्रियाग्रहणशक्तत्वाद्वदनस्यकर्त्रर्थत्वाविरोध इति वैषम्योक्त्यानिष्टापत्तिं परिहरति * तिरोहितं चेति* पाचकादिशब्दे कर्तृत्वस्यापि कृदुक्तस्य तिरोहितत्वेन क्रियाग्रहणशक्तिश्चकारेण सूचिता । श्लोकं व्याचष्टे ॥ * कृदन्तेति । * यदेतद्विशेषणत्वेनोपसर्जनत्वं तदेव शेषत्वमप्यापादयतीत्यादिवार्त्तिकोक्तस्य श्रुत्युक्तविशेषणविशेष्यत्वानुसारेणाङ्गाङ्गित्वनियमस्य न श्रुतिर्ब्रूते वाक्यार्थौ नेतीति पश्वेकत्वाधिकरणभाष्याविरोधमाशङ्क्यैकाभिधानश्रुतिबलीयस्त्वेनैकपदोपादानश्रुत्यवगतद्रव्यार्थत्वबाधाशयं तद्भाष्यमित्येवं विरोधपरिहारसूचनार्थं तथाचेत्यादिवार्त्तिकोक्तामङ्गाङ्गित्वस्य विशेषणविशेष्यत्वनियमाभावे भाष्यसमतिमनुभाषणपूर्वं निरासितुमाह * यत्त्विति । * श्लोकं व्याचष्टे * कारकोपसर्जनीभूतस्येति * ॥ तेनात्रापीतिवार्त्तिकोक्तमूहेन भाष्ययोजनं निरसितुमाह * नत्विति । * प्राधान्येनेह कर्त्तृत्वमिति वार्त्तिकोक्तं तात्पर्याख्येन प्राधान्येन कर्त्तृत्वोक्तौ कर्त्तुरेकक्रियार्थत्वापत्तिमनुभाषणपूर्वं क्रियाफलभोक्तृत्वात्मकस्वाम्याख्यं प्राधान्यं विना कर्त्तव्यत्वावगतिपूर्वककर्तृत्वानिर्वाहाद्विधायकेनाख्यातेन प्राधान्यपर्यन्तकर्तृत्वोक्तेर्गुणत्ववत्प्रधानतापि कर्त्तुः प्राप्नोतीत्येवं निरस्यति *यत्त्विति । * अधिगम्य ममेदमनुष्ठेयमिति ज्ञात्वा क्रियेत्यधीत्युपसर्गस्यान्तर्गतगमनक्रियायोगविषयत्वाङ्गीकारेणाधिक्रियोक्तेरनुष्ठेयत्वावगतिपूर्वकानुष्ठानाख्यामधिक्रियां विना शास्त्रीयेर्थे कर्तृत्वानिर्वाहात्कर्तृणामधिक्रिया वगम्यते सा च चेतनानां प्रेक्षापूर्वकारिणां फलोद्देशादृते न भवेदित्युक्तेनानृतं वदेदित्यत्र विध्यभावेनानुष्ठेयत्वावगत्यभावात्तत्पूर्वकानुष्ठानाख्याधिकाराभावात्फलोद्देशकल्पनायोगमाशङ्क्यानन्ूदितनिषेधायोगादप्राप्तस्य चानुवादायोगात्प्रापकं च विना प्राप्त्ययोगादशाब्दस्य च प्रापकस्य शाब्दे व्यवहारेऽन्वयायो-

गान्निषेध्यतयापि शास्त्रगम्येऽर्थे विधिरवगम्यत इति विधिश्चेत्येताव-
तोक्ता पुन सकलमुत्तरार्द्धं विधिरप्यधिक्रियावत्फलोद्देशं विनात्मानं
लभेतेत्येवं योज्यमित्यत्र श्लोकं व्याख्यातुमाह *यद्यपीति ।* अनुष्ठे ६३१।२
यत्वावगतिपूर्वकानुष्ठानवाचित्वेनाधिक्रियोक्तिव्याख्यानायानुष्ठानो-
क्ति कृत्यल्युटो बहुलमिति स्मृतेरनुतिष्ठतीति व्युत्पत्त्यानुष्ठातृत्व-
वाचिनी अनुष्ठेयत्वावगतिपूर्वकानुष्ठातृत्वात्मकस्यापि कर्तृत्वस्य
गुणात्मकत्वात्प्राधान्यविरोधशङ्कानिरासमसूचनार्था मात्रोक्तिः प्रेक्षा-
पूर्वकारिणां फलोद्देशं विनाऽधिकारायोगेपि मन्दधियां निष्फलेपि-
कर्मणि याहच्छिकानुष्ठेयत्वावगतिपूर्वकानुष्ठानाख्याधिकारदर्शना-
त्फलोद्देशाव्यभिचारमाशङ्क्य यदृच्छया प्रवृत्तस्य वेदेन कर्तृत्वा-
नुक्तेः स्वसम्बन्धिप्रेरणावगतिहेतुकानुष्ठेयत्वावगतिपूर्वकस्यैवानु-
ष्ठानस्य वैदिकेषु कर्मस्वधिकारशब्दे विवक्षितत्वाच्चितीसंज्ञानइति-
सम्यग्ज्ञानाख्यसंज्ञानवाचिचेतयतिधातूत्पन्नचेतनशब्दवाच्यानां प्र-
कृष्टधियामेवाधिकारो न मन्दधियामिति सूचयितुं *तादृशामेवेत्यु-
क्तम् ।* निषेध्यतयापि शास्त्रगम्यार्थेऽधिक्रिया विधियुक्तत्वादवगम्य-
त इत्येवं विधिश्चेत्युत्तरार्द्धावयवव्याख्यार्थं विधियुक्ताश्चेत्युक्त्वावृत्तै-
तदवयवसहितोत्तरार्द्धव्याख्यानार्थं* नचेत्युक्तम् ॥*अनुष्ठेयत्वावग-
तिपूर्वकानुष्ठातृत्वात्मककर्तृत्वात्मलाभान्यथानुपपत्त्या विध्यात्मला-
भान्यथानुपपत्त्या वा फलोद्देशकल्पनस्य कर्तृप्राधान्यसिद्ध्युपयोग-
माह *तेनेति ।* प्रकरणावगतक्रत्वर्थत्वाबोधनापि तर्हि पारंपर्येणा-
नृतोक्तिनिषेधस्य पुरुषोपकारित्वासिद्धेर्न तद्बाधेन श्रुत्या साक्षात्पुरु-
षोपकारिता कल्पनीयेत्याशङ्क्याह *साक्षादिति ।* फलाश्रवणेन
पुरुषापेक्षितफलसाधनतया पुरुषार्थत्वायोगात्पुरुषसंस्कारकत्वेन पु-
रुषार्थत्वस्य वाच्यत्वापत्ते शुद्धस्य च पुंसो निष्प्रयोजनत्वेनासं-
स्कार्यत्वात्क्रतुयुक्तस्य तु प्रकरण विनाऽवगतेस्तस्य च श्रुत्या बाधान्न
कथं चित्साक्षात्पुरुषोपकारः सम्भवतीत्याशङ्क्य शुद्धपुरुषधर्मत्वा
योगेपि संस्कार्यस्य पुंसः क्रत्वर्थत्वासिद्ध्यै श्रुत्या प्रकरणस्यापेक्षि-
तत्वेन तस्मिन्नंशेऽ बाधात्प्रकरणावगतक्रतुयुक्तपुरुषसंस्कारत्वेन
साक्षात्पुरुषोपकारसम्भवमुपपादयितुमाह *नचेति ।* क्रत्वर्थस्य
पुंसो ऽदृष्टोपकारित्वेनादृष्टकार्ययोग्यत्वाधानलक्षणसंस्कारानपेक्षत्वा-
त्फलभाक्त्वृत्वयोग्यतायाश्च साङ्गप्रधानानुष्ठानमात्रात्सिद्धेस्तदाधा-

नलक्षणस्यापि संस्कारस्यानपेक्षणात्क्रतुयुक्तपुरुषसंस्कारताप्ययुक्तेत्याशङ्कते * क इति । * प्राप्तस्याप्योदनादेर्भोज्यस्य रोगादिना भोक्तृतायामयोग्यस्य भोजनादर्शनात्फलसाधनतातिरिक्तभोक्तृत्वायोग्यताधानापेक्षोपपत्तेर्यजमानास्तु तत्प्रधानत्वादित्यत्र वक्ष्यमाणाया ग्रन्थगौरवभयादत्रानभिधानेपि सामान्यतः पुरुषार्थत्वावधारणमात्रप्रकरणागम्यक्रत्वर्थत्वव्यावृत्तिः सेत्स्यतीति परिहृति * सर्वथा तावदिति * भोक्तृत्वायोग्यताधानाख्यस्य त्वोपकारविशेषस्य वक्ष्यमाणत्वाविशेषाभावात्सामान्ययोगः शङ्कनीय इत्याह * तद्विशेषेति । * तस्मादाभिधानिकेनापि प्राधान्येन कर्त्रभिधाने वास्तवप्राधान्यसिद्धेः श्रुत्या क्रियायाः क्रत्वर्थत्वावधारणान्न प्रकरणेन क्रत्वर्थत्वं सेत्स्यतीति तृतीयपरिहारसमाधानमुपसंहरति * तस्मादिति । * द्वितीयाद्यपरिहारयोः प्राधान्यांशानुक्तिसाम्यादेकहेलया परिहारद्वयं समाधातुं यद्यपि कर्तृत्वं साधकत्वेनेत्यादिवार्तिकोक्तन्यायेन कर्तृवाचिना प्रत्ययेन प्राधान्यांशो नोक्तः कर्तृत्वे चानन्तर्गतस्तथापि कर्तृत्वान्यथानुपपत्तिद्वारा प्रत्ययेन प्रत्यायितत्वात्क्रियायाः प्रयोजनाकाङ्क्षावेलायां सम्बद्ध्यत इत्याह * यद्यपि चेति । * श्रुत्यानुक्तस्यापि स्वामित्वाख्यस्य प्राधान्यांशस्य लक्षणया प्रत्यायनं तावद् दृष्टान्तपूर्वमुपपादयति * यथेति * कर्तृत्वस्योक्तस्य पुरुषं प्रति इतिर्गमनं प्राप्तिरिति व्युत्पत्त्या प्रतीतिशब्देनोक्तया कर्तृत्वसिद्ध्या फललिप्सां विनानुपपद्यमानया स्वामित्वं ज्ञास्यत इत्यर्थः । लक्षणया स्वामित्वाख्यस्य प्राधान्यस्य प्रत्यायनेऽप्यशाब्दत्वाच्छाब्द क्रियया न्वयायोगमाशङ्क्य प्राधान्यप्रत्यायनार्थं प्रत्ययेन गुणत्वात्मककर्तृत्वोक्तेः प्रत्ययस्य प्राधान्ये तात्पर्यावसायात्तात्पर्यवृत्त्या शाब्दत्वं दृष्टान्तपूर्वमुपपादयितुमाह * तत्रेति । * गुणत्वस्य प्राधान्यविरोधित्वात्तत्सिद्ध्यर्थत्वायोगमाशङ्क्य भिन्नविषयत्वेनाविरोधमाह * गुणभावो हीति । * ते शब्दोक्तस्य कर्तृप्रत्ययार्थवादिनो वैयाकरणस्य मते धात्वर्थातिरिक्तभावनाभावाद्भिन्नविषयत्वायोगशङ्कानिरासपूर्वं श्लोकं व्याचष्टे * यस्यापीति * करोतिसामानाधिकरण्येनाख्यातप्रत्ययस्य तदर्थवाचित्वावगतेः करोतेश्च धात्वर्थसामान्यवाचित्वे पाकं करोति पाकेन करोतीति वा धात्वर्थस्य कारकत्वेन करोत्यर्थान्वयायो-

गापत्तेर्द्धात्वर्थातिरिक्ता भावना प्रत्ययवाच्या यद्यप्यभ्युपगम्यते तथापि सैव कर्त्तारमङ्गङ्करोति न धात्वर्थ इति कथमवसीयत इत्याशङ्क्य ततश्चेत्युक्ते धात्वर्थोपि तर्हि कर्त्रनभिधानपक्षवद- भिधानपक्षे पि भावनाङ्गमेवास्त्वित्याशङ्क्यानभिधानपक्षे भाव- नाक्षेपं विना कर्त्रन्वयानवगतेरनुष्ठानासिद्ध्यर्थेन च कर्त्राक्षेपस्या- नुष्ठानयोग्यभावनावगत्युत्तरकालत्वात्करणाद्यन्वयं च विनानुष्ठायो- ग्यत्वाभावात्कारणत्वेन धात्वर्थस्यान्वयाद्भावनाङ्गत्वं युक्तम् । अभि- धानपक्षे त्वादावेव कर्त्रन्वयावगतेः सकलकारकसमवधातृत्वल- क्षणत्वाच्च कर्तृत्वस्य सकलकारकसमवधानात्प्रागसिद्धेः सिद्धे कर्त्र- न्वये भावनायाः सिद्ध्यव्यभिचारित्वेन कारकानाकाङ्क्षत्वाद्धात्वर्था- न्वयानुपपत्तेर्भावनायां व्यापृतः कर्त्ता धात्वर्थं विना भावनां कर्तु- मशक्नुवन्नात्मन एव कर्तृत्वसिद्ध्यै धात्वर्थमङ्गं करोतीत्युक्तम् । द्वावप्यङ्गीकरोतिशब्दौ त्विप्रत्यययुक्तौ भिन्नविषयत्वोक्तेराख्या- तेन हि श्रुत्यैव गुणपर्यायात्मना कर्तृत्वमभिहितं तत्पदश्चाद्या- वर्त्तयतः । श्रुतिविरोध आपद्यत इति वार्त्तिकोक्तविरोधनिरासोप- योगमाह * नचेति * चकारेण ततश्चेत्युक्तं विषयान्यत्वोक्त्या ६३।४ विवृतम् ॥ नचैक एव प्रत्ययः सकृदुच्चरितः शक्नोति गुणत्व- प्रधानत्वे युगपदभिधातुमिति वार्तिकोक्तयुगपदुभयरूपोक्त्यशक्ति- निरासेपि विषयान्यत्वोक्तेरुपयोगमाह * यदीति * सकृदुच्चरि- तस्यापि प्रत्ययस्याविरुद्धानेकभावनाकर्तृसंख्योपग्रहविशेषाद्यर्थवा- चित्वाभ्युपगमेनानेकार्थोक्त्यशक्तेर्विरोधानिबन्धनत्वावसायात्कर्तुश्च गुणप्रधानत्वयोर्भिन्नविषयत्वेनाविरोधान्न प्रत्ययस्योभयरूपोक्त्यश- क्त्याख्यो विप्रतिषेध इत्युक्ते भावनाधात्वर्थाख्यावच्छेदकरूपविष- यभेदेपि कर्त्राख्याश्रयरूपविषयैक्याद्विरोधमाशङ्क्य ह्रस्वदीर्घत्व- वद् गुणप्रधानत्वयोरापेक्षिकत्वेनशुक्लकृष्णत्ववत्स्वभावतो विरोधा- भावादाश्रयैक्यमात्रेण विरोधायोगोक्तौ स्वभावतश्चेत्युक्तेऽ र्थगतवि- रोधाभावेपि विशेषणविशेष्यभावानापन्नानेकार्थोक्तौ शब्दतात्पर्यभे- दापत्तेर्भावनाकर्तृसंख्यादिवच्च गुणप्रधानत्वयोर्विशेषणविशेष्यत्वा- भावादेतत्परिहारापरितोषात्स्वमतेन गुणत्वं शब्दाद् गम्यते प्राधान्यं गुणत्वान्यथानुपपत्तिसामर्थ्यादित्येवमुभयरूपोक्त्यशक्त्याख्यविरोध- परिहारे ऽर्थवत्यनेनोक्ते कर्तृप्राधान्यस्याशाब्दत्वे धात्वर्थस्य कर्त्रर्थ-

त्वायोगमाशङ्क्य धात्वर्थविशिष्टस्य कर्तुर्भावनाङ्गत्वे शब्देनोक्ते कर्त्र-
ङ्गत्वं विना धात्वर्थस्य तद्विशेषणत्वायोगात्कृतार्थोपपत्तिकल्पेन शब्दा-
न्तरेण तदङ्गत्वोक्तिमभिप्रेत्य कर्त्रभिधाने पक्षे सर्वथा शब्दात् साम-
र्थ्याद्वा प्रतीतौ कर्तुः प्राधान्यप्रसक्तेर्धात्वर्थस्य पुरुषार्थत्वं प्राप्नोती-
त्युक्तम् ॥ अनया चाख्यातप्रत्ययोक्तां भावनां प्रति कर्तुर्गुणत्वाद्धा-
त्वर्थं प्रति प्राधान्याद्भिन्नविषयत्वोक्त्या कृदन्ते भावनानुक्तेर्धात्वर्थ-
मेव प्रति गुणप्रधानत्वप्रसङ्गाद्विषयैक्येनाख्यातशब्दस्य पाचकादि-
शब्देभ्यो विशेषसूचनाद्बहिष्ठं विशेषान्तरमाह * अयं चेति । *
पाचकमानयेत्यादावानयनादिक्रियान्तरान्वयित्वेन कृदुक्तं पुरुषमु-
पलक्षयितुमुक्तस्य धात्वर्थस्याभिधानिकाङ्गत्वाख्यशब्दार्थवृत्तिमा-
त्रेण विशेषणापरपर्यायोपलक्षणत्वसिद्धेर्न वास्तवाङ्गत्वाकाङ्-
क्षा नानृतं वदेदित्यादौ तु क्रियान्तरान्वयानुपादानेनोपल-
क्षणयाभिधानिकाङ्गत्वाख्यशब्दार्थतया विशेषणत्वस्यानाका-
ङ्क्षितत्वाद्वास्तवमेवाङ्गत्वं धात्वर्थस्य विशेषणत्वान्यथानुपपत्तेः
परिशेषादवधार्यत इति तत्रेति विशेषणसामर्थ्येन सूचनाद्वैषम्यमि-
त्याशयः । धात्वर्थलक्षणार्था धातूक्तिः । श्लोकं व्याचष्टे * शब्दा-
र्थेति * राजपुरुषादिशब्देभ्यो व्याख्यातस्योभयप्रकारविशेषोक्त्यै
राजपुरुषं वेत्युक्तम् । कर्त्रभिधानपूर्वपक्षप्रयोजनसमाधानमुपसंह-
रति * तस्मादिति * विधिना सामान्यतो धात्वर्थानां पुरुषार्थत्वेऽ-
वगते साक्षात्परंपरया वा पुरुषार्थतेति विशेषापेक्षायामेकपदोपादा-
नलक्षणया श्रुत्या साक्षात्पुरुषार्थत्वावगमात्प्रकरणगम्यस्य क्रत्व-
र्थस्य श्रुतिविरोधोपसंहारार्था प्रमाणोक्तिः । परंपरया पुरुषार्थत्वा-
भ्युपगमाच्छ्रुतिप्रकरणयोरविरोधसंभवेऽपि श्रुत्या साक्षात्पुरुषार्थत्वा-
वगमात्प्रकरणबाधाभ्युपगमे सति लक्षितस्यापि तात्पर्यवृत्त्या श्रौतत्वा-
दनभिधानपक्षात्पुरुषार्थत्वापत्तेः सिद्धान्तप्रयोजनाभावात्कर्तु-
राख्यातवाच्यावाच्यत्वचिन्ताऽनर्थिकेत्याक्षिपति * नन्विति *
पदानां वाक्यार्थप्रतिपत्त्यर्थत्वाच्छ्रौतेनार्थेन वाक्यार्थप्रतीत्यनुपयोगे
लाक्षणिकार्थतात्पर्यं युक्तं । आख्यानस्य तु श्रौतेनैव भावनाख्ये-
नार्थेनोपयोगसंभवात् लाक्षणिकेऽर्थे तात्पर्यानुपपत्तेरवाच्यत्वे कर्तु-
रशाब्दत्वापत्त्या वाक्यार्थानन्वयप्रसङ्गात्प्राधान्यासिद्धेर्न धात्वर्थस्य
साक्षात्पुरुषार्थत्वापत्तिरित्याशयेन परिहरति * नैष इति * कर्तु-

र्वाक्यार्थानन्वये लक्षणानर्थिकेत्याशङ्क्य गङ्गादिसम्बन्धिनीरादि-
स्वरूपे गङ्गादिशब्दानामिव कर्तृस्वरूपे प्रत्ययस्य तात्पर्याभावा-
त्स्वरूपेणाशाब्दतया कर्तुर्वाक्यार्थानन्वयात्सर्वाकाङ्क्षापूरणाशक्तेः
प्राधान्यायोगेऽपि भावनानिष्पादकरूपशब्दतात्पर्यविषयत्वाच्छाब्दत्वो-
पपत्तेस्तेन रूपेण भावनाख्यवाक्यार्थान्वयसिद्धै लक्षणार्थवतीति
सूचयितुं कर्त्तारमन्तरेण भावना न सिध्यतीति कृत्वा लक्षणा
नतु तस्य कर्तृत्वाधिष्ठानस्वरूपेण सर्वाकाङ्क्षापूरणायेति लक्षणेत्यनेनोक्तम् ॥ श्लोकोपपाद्यं तावदर्थं नैष दोष इत्यनेन सूचितम्। अभिधा-
नपक्षेऽपि भावनान्वयपरत्वाच्छब्दस्य धात्वर्थान्वयस्याशाब्दत्वाप-
त्तिशङ्कां निरस्यन् व्याचष्टे * अभिधीयमानो हीति * श्रुत्युपात्तस्य ६३।१
योग्यत्ववशेनार्थान्तरान्वये तात्पर्यावसायादनेकान्वययोग्यस्यागम्य-
मानविशेषतया सर्वान्वयसाधारणतात्पर्यावगतेः सर्वाकाङ्क्षापूरणश-
क्तत्वान्न कस्मिंश्चिदन्वये शास्त्रार्थत्वहानि. लक्ष्यमाणस्य तु लक्षणातः
प्राक्तावच्छास्त्रानुक्तत्वेन शास्त्रतात्पर्यविषयत्वाख्याद्वक्तव्यत्वायोगा-
ल्लक्षणाकालेऽपि तद्बीजस्य शास्त्रस्य कर्तृस्वरूपे तात्पर्यस्योपसं-
हारे सति तस्य शास्त्रतात्पर्यविषयत्वाध्यवसायात्सर्वान्वये शास्त्र-
प्रमाणं भवेन्न तु कर्तृस्वरूपे प्रत्ययाख्यस्य शास्त्रस्य तात्पर्यं संभ-
वतीत्याशयः। एतदुपपादनार्थत्वेन श्लोकपूर्वार्द्धे यः शब्दः
श्रौतेनार्थेन वाक्यार्थेनोपयुज्यते स लाक्षणिकार्थपर्यन्तं तात्पर्य-
वृत्त्या यातीत्येवं व्याचष्टे * सर्वमेवेति * लक्षणया वगतमर्थं प्र-
त्यात्मानं तात्पर्यया वृत्त्या प्रापयतीत्यर्थः। तृतीयपादं तुशब्देनोक्त-
व्यतिरेकाभिधानमनादृत्याख्यातप्रत्यये श्रौतेन भावनाख्येनार्थेन
पदार्थान्तरान्वितभावनात्मकवाक्यार्थोपयुक्ते सति न लाक्षणिका-
र्थपर्यन्ततात्पर्यगमनं युक्तमित्येवं व्याख्यातुमाह *श्रुत्यर्थ एव चेति*
अन्यपरे शब्दे कर्त्ता न वाक्यार्थोपयोगित्वेन गृह्यतेत्युक्ते कर्तुरप्यु-
पयोगः संभवन् कस्मान्न गृह्यत इत्याशङ्क्य सकृदुच्चरितस्य
श्रौते लाक्षणिके चार्थे वृत्त्याख्यव्यापारायोगेनार्थद्वयोद्देशेन वृत्त्या-
ख्यतादर्थ्यापरपर्यायार्थद्वयतात्पर्यायोगात्तद्द्वारार्थद्वयोपयोगित्वानव-
कल्पनात्पूर्वशब्दाल्लक्षणया परस्यावगतस्य संभवद्वाक्यार्थोपयो-
गस्यापि चशब्दतात्पर्यविषयत्वाभावाद्वाक्यार्थानन्वयवल्लाक्षणि-
कत्वे कर्तुः संभवदुपयोगस्याप्यनन्वये नचेत्यादिनोक्तेऽन्यपरा-

च्छब्दात्कर्त्रवगत्ययोगमाशङ्क्य निष्पादकत्वेन भावनासम्बन्धित्वान्निष्पादनान्यथानुपपत्तिबलाद् गम्यत इत्यन्यपरेपीत्यनेनोक्ते गङ्गादिशब्दात्तीरादिवत्तात्पर्यवृत्त्या गम्यत्वशङ्कायां च केवलोक्त्या निरस्तायां भावनादिनिष्पादनान्यथानुपपत्तिबलात्कर्तृप्रतीतिवत्प्राधान्यं विना चेतनस्य कर्तृत्वानुपपत्तेः कर्तृप्रतीतिरन्यथानुपपत्तिबलात्प्राधान्यकल्पनामपि करिष्यतीत्याशङ्क्य प्रकरणगम्यक्रतूपकारद्वारकर्त्रभिमतस्वर्गादिसिद्ध्युपयोगितद्व्यापिकर्तृप्राधान्यात्कर्तृत्वानुपपत्तिपरिहारोपपत्तेर्न साक्षात्प्राधान्यकल्पना शक्येति परिहारसूचनार्थं * या चेत्युक्तम् * कर्तुर्वाक्यार्थानन्वये लक्षणानर्थक्यशङ्कानिरासार्थत्वेन चतुर्थं पादं व्याख्यातुमाह * तदा चेति * प्राधान्यप्रतिपत्तेः निष्प्रमाणकत्वे मात्रोक्त्या शब्दव्यापारनिरासेनोपपादिते शब्दात्कर्तृप्राधान्यानवगमेपि भावनयैव कर्तृव्यापाररूपत्वात्कर्तृस्वरूपोपसर्जनत्वावगतिवत्प्रयत्नरूपतयेच्छायोनित्वात्कर्त्रभिमतसाधनत्वं च विना कर्त्रिच्छानुदयाद्भावनानिष्पत्त्यसिद्धेर्भावनायाः कर्त्रभिमतसाधनत्वावगमात्कर्तुः प्राधान्यावगतिरपि भविष्यतीत्याशङ्क्य प्रकरणगम्यक्रतूपकारद्वारकर्त्रभिमतस्वर्गादिसिद्ध्युपयोगितयापि कर्त्रिच्छोदयोपपत्तेरिच्छायोनित्वेनापि साक्षात्प्राधान्यकल्पनाऽशक्तिसूचनार्थं * नहीत्युक्तम् * लक्ष्यमाणस्यापि कर्तुर्भावनोक्तिमात्रात्प्रतीतस्य प्रकरणगम्यात्क्रतूपकारात्सान्निकृष्टतरत्वात्साक्षादुपकारसंभवे च पारंपर्योपकारकल्पनायोगात्साक्षात्प्राधान्यकल्पनैवयुक्तेत्याशङ्क्य आख्यातशब्दस्य प्राधान्येतात्पर्याभावाच्छ्रुत्यासाक्षात्प्राधान्यानवगतेः पारम्पर्योपकारिण्यपि च कर्त्रिच्छासंभवादिच्छायोनित्वेपि भावनायाः साक्षात्प्राधान्यावगतौ शक्त्यभावेन लिङ्गस्यापि तत्र प्रामाण्याभावात्साक्षात्प्राधान्यकल्पना निष्प्रमाणिकेत्याह * तेनेति * येन कारणेन शब्दः कर्त्रवगतौ न व्याप्रियते नच भावना कर्तृप्राधान्यावगतौ शक्ता तेन कारणेनाख्यातशब्दरूपा श्रुतिर्भावनासामर्थ्यरूपं वा लिङ्गं प्राधान्यप्रमायामुदासीनमित्यर्थः ॥ श्रुतिलिङ्गयोः साक्षात्प्राधान्यप्रमायां व्यापाराभावेपि कर्तुः सन्निकृष्टतरत्वात्साक्षात्प्राधान्यं भविष्यतीत्याशङ्क्य सन्निकर्षस्य सन्निधित्वेन स्थानत्वात्तस्य च प्रकरणाद्दौर्बल्यात्तद्विरोधे प्रामाण्यं नास्तीत्याह * नचेति * कर्तृवाच्यावाच्यत्ववि-

चारस्यार्थवत्त्वमुपपादितमुपसंहरति * तस्मादिति * किंप्राप्तमिति
भाष्यं पुरुषस्यायं वदनाख्यः पदार्थ उपदिश्यते ततश्चायं निषेधः
पुरुषस्य धर्म इत्येवं शुद्धपुरुषधर्मत्वपूर्वपक्षप्रतिज्ञार्थत्वेन व्याचष्टे
* किमिति * प्राप्तिपूर्वकत्वान्निषेधस्य प्राप्त्युक्त्यै प्रायेणेत्युक्तम् । कः
पुरुषस्योपकार इत्यपेक्षायां प्रत्यवायपरिहारार्थमित्युक्तम् ॥ प्रश्न-
पूर्वं हेतूक्त्यर्थं कुत इत्यादिभाष्यं पुरुषस्य प्रयत्नशब्दवाच्यभा-
वनालक्षितस्य च विधेः श्रवणादित्येवं व्याचष्टे * कुतइति * श्रुतेः
पुरुषो विधिश्च प्रतीयते स चोभयः पुरुषधर्मत्वपक्षे ऽर्थवान् क्रत्वर्थे
हि वदने ऽनर्थको भवेदित्यर्थः । वदनमनुतिष्ठेदिति भाष्यावयवे-
नानुष्ठाता विधिश्च श्रुत्या गम्यत इति वदनाऽऽद्ये भाष्यावयवे व्या-
ख्याते श्रुतस्याप्यनुष्ठातुर्गुणत्वेनान्वयाद्वदनस्य पुरुषार्थत्वासिद्धिमा-
शङ्क्य कर्तॄणां शास्त्रगम्ये र्थे इति वार्त्तिकोक्तेन न्यायेन कर्तृत्वस्य
विधेश्चापुरुषार्थे कर्मण्यात्मलाभायोगात्तदुभयश्रुत्यर्थवत्त्वाय तस्य
पुरुषेण समीहितेन प्रधानभूतेन सम्बन्धो ऽन्वयः । पदश्रुत्या गम्यत
एव दर्शपूर्णमासाख्यकर्मणान्वयः प्रकरणात्तनश्च प्रकरणगम्यक्रत्व-
र्थत्वबाधेन पुरुषार्थतैव युक्तेत्येवं परिहारार्थं तस्येत्याद्येष
शब्द इत्यन्तं भाष्यावयवं श्लोकेन व्याख्यातं सूचयन् श्लोकं व्याचष्टे
* समानेति * योऽपि चेत्यनेन पुरुषस्येति भाष्यावयवो ६३४।२
ऽपकृष्य व्याख्यातः । कर्त्रभिधानस्यापि पुरुषधर्मपक्षे ऽर्थवत्ता-
ऽपिशब्दाभ्यामुक्ता प्रयोगवचनेनैवोपनीतस्य प्रधानकर्तुस्तदङ्गभूत
धात्वर्थविधानात्प्रात्यात्मिकः कर्तृविधिर्द्धातुनोपनीतमात्रस्य च
धात्वर्थस्य प्रयोगवचनेनैव विधानात्प्रात्यात्मिको धात्वर्थविधिरन-
र्थक इत्यावृत्त्या योज्यम् । व्याख्यातेर्थे इतरथेति भाष्यावयवं वदन-
मनुतिष्ठेदित्यवं सकर्तृकधात्वर्थविध्यर्थो वदेदिति यः शब्दः स क्रत्व-
र्थत्वपक्षे वदनं भवतीत्येतावत्यर्थे भवेत्ततश्चाविवक्षितकर्तृविध्या-
ख्यस्वार्थो भवेदित्येवं योजयति * तदिति । * प्राप्तेः पुरुषधर्मत्वो-
पसंहारार्थं [[1]तस्मादिति भाष्यं व्याचष्टे *तस्मादिति ।* प्राप्तः पुरुषा-
र्थत्वेप्यकर्मेति सूत्रावयवोदाहृतस्य कथं पुरुषार्थतेत्याशङ्क्य प्राप्ति-
पुरुषार्थत्वादेवेति परिहारार्थं] यस्य चेति भाष्यं व्याचष्टे *ततश्चे-
ति ॥ * निषेधपुरुषार्थतैवात्र पूर्वपक्षार्थः । पुरुषार्थता तु तस्मिञ्छ्रुतै

१ इति द्वितियपुस्तके नास्ति ।

पुरुषप्रयत्नस्येत्यादिभाष्येणोपादितेति सूचनार्थं निषेधपुरुषार्थता-
मुपसंहरति * अत इति । * एतावता च भाष्येण पूर्वाधिकरणसू-
त्रस्थतद्वच्छब्दबुद्धिस्थीकृतस्य मनुष्यधर्मशब्दस्य तत्प्रधानत्वादिति
निवीताधिकरणाद्यसूत्रावयवस्येहानुषङ्गमङ्गीकृत्याकर्मानृतनिषेधनं
मनुष्यधर्मं आख्यातशब्दस्य मनुष्यप्रधानत्वादित्येवं लक्षणोपायिक-
पूर्वपक्षार्थत्वेनाकर्मेति सूत्रावयवं व्याख्यायेदानीं सचेति भाष्येण
यतोकर्ममनुष्यधर्मं स च नानृतं ब्रूयादिति स्मृत्यैव मनुष्यस्य प्राप्तो
ऽतः स्मृत्यैव मनुष्यसंयोगान्नानृतं वदेदिति क्रतुसंयुक्तं वचनं नित्या-
नुवाद इत्येवं सकलं सूत्रं योजनीयमित्याह *सूत्रमिति * उपनयन-
समकालत्वोक्तेः स्मृतिमूलत्वाच्छ्रुतेरनुवादत्वायोगशङ्कानिरासार्थत्व
सूचनार्थं दर्शपूर्णमासयोः कृतारम्भणीयत्वेनाधिकारात्प्रागेवेत्यु-
क्तम् ॥ क्रतुसंयुक्तोक्तिमाक्षेपपूर्वं त्रेधा समाधत्ते * कथं पुनरिति *
प्रकरणप्राप्त्या सयुक्तत्वस्य पूर्वपक्षविरुद्धत्वेनावाच्यत्वशङ्कानिरा-
सार्था बाधार्हत्वाशया बाधगोचरोक्तिः। श्लोकं व्याचष्टे * यद्वेत-
दिति । * शुद्धपुरुषधर्मविषयत्वाच्छ्रुतेर्दर्शपूर्णमासाभ्यां प्राक्प्रवृत्ता-
मपि स्मृतिं प्रति मूलत्वसम्भवाच्छ्रुतमूलत्यागाश्रुतमूलकल्पनयोश्चा
प्रमाणकत्वादनुवादत्वायोगशङ्कार्थं नन्वितिभाष्यं व्याचष्टे * नन्वि-
ति ।* श्लोकं व्याचष्टे * यदि हीति । * नैषेत्यादिपरिहारभाष्यं
शङ्कानिरासाशक्तत्वात्तदसम्बन्धत्वेनाक्षेप्तुमारभते*यत्त्विति*नैतच्छ-
ङ्कया सम्बद्धमित्युक्ते पुरुषधर्मत्वोक्तेः क्रतुसंयुक्तपुरुषधर्माशयत्वेनापि
सम्भवात्तद्विपर्यायाश्च श्रुतेः शुद्धपुरुषधर्मविषयस्मृतिमूलत्वायो-
गाच्छङ्कानिरासशक्तत्वेन तत्सम्बन्धोपपत्तिमाशङ्क्य यदि श्रुतिश्च-
प्रकरणाद्बलीयसीति प्रकरणबाधमनुक्त्वैव पुरुषधर्मत्वमात्रमुक्त्वानु-
वादतोक्ता स्यात्ततः श्रुतिप्रकरणानुकूल्येन क्रतुयुक्तपुरुषधर्मत्वाव-
सायाद्भिन्नविषयत्वं स्यात्प्रकरणबाधोक्त्या तु श्रुतेरपि शुद्धपुरुषध-
र्मविषयत्वावसायान्मूलत्वशङ्का निराकर्तुमशक्येति परिहारसूच-
नार्थं प्रकरणबाधानुवादोक्त्योः पौर्वापर्येण हेतुतेत्युक्तम् ॥ एतदेव
विवृणोति * तथाहीति । * श्लोकं व्याचष्टे * यदि हीति * क्रत्वर्थ-
६३५।७ त्वपूर्वपक्षानुपन्यासात्क्रतुयुक्तपुरुषार्थतैव क्रत्वर्थोक्त्या विवक्षिता
संभवमात्रेण वा क्रत्वर्थोक्ति श्रुतेः पुरुषमात्रधर्मविषयत्वेप्यविशेष-
श्रवणेनोपनयनात्प्रागपि प्रवृत्तेः स्मार्त्तानां तु धर्माणामुपनयनादिर्नि-

धर्म इत्युपनयनकालत्वोपदेशाच्छ्रुतिमूलत्वे तद्विरोधं प्रागुपनयनात्कामचारवादभक्षा इति स्मृत्यालोचनया श्रुतेरप्युपनयनात्प्रागप्रवृत्त्यभ्युपगमे वाहिताग्निर्न क्रिंचं दार्वभ्याद्ध्यादित्यादीनां शुद्धपुरुषधर्माणामप्युपनयनकालत्वादर्शनाद्दर्शपूर्णमासप्रकरणाम्नानार्थत्वार्थे दर्शपूर्णमासाधिकारसमकालत्वापत्तेस्तन्मूलत्वे स्मृतेः सत्यं ब्रूयात्प्रियं ब्रूयान्नब्रूयात्सत्यमप्रियम् । प्रियं च नानृतं ब्रूयादेष धर्मः सनातन इति सर्वकालीनपुरुषधर्मत्वोपदेशविरोधमभिप्रेत्योपनयनकालपर्वत्यादिभाष्योपपत्तिमाशङ्क्योपनयनकालत्वोपदेशस्याविशेषेण श्रौतस्मार्तपुरुषमात्रधर्मविषयत्वादाहिताग्न्यादिवच्चानृतनिषेधे ऽधिकारिविशेषानुपादानात्प्रकरणानुरोधेन च श्रुतिसंकोचायोगान्मूलमूलिभावे ऽप्युपनयनकालत्वसर्वकालीनपुरुषधर्मत्वोपदेशाविरोधान्नैतदपिभाष्यमुपपादयितुं शक्यमिति सूचनार्थं * का चेत्युक्तम् ॥ * आक्षेपमुपसंहरति * तेनेति । * समाधातुमारभते * नैष इति । * दोषाभावं प्रश्नपूर्वमुपपादयितुमाह * कथमिति * शुद्धपुरुषधर्मतयाद्यः पूर्वपक्षो कर्मत्येतावता मनुष्यधर्मः शब्दस्य तत्प्रधानत्वादित्यनुषङ्गसहितो न क्रतुयुक्तपुरुषधर्मतया कृत्स्नेन सूत्रेणानुषङ्गसहितेनेति पक्षद्वयं भाष्यात्प्रतीतेर्भाष्यकृत्संमतं तृतीयानुवादमात्रतयानुषङ्गानपेक्षसूत्रमात्रात्प्रतीतेः सूत्रकृत्समीहितत्वेन भाष्यकृतो मत इत्येवं तन्त्रेण संमतोक्तिर्द्वेधा व्याख्येया।तत्राद्ये मूलमूलित्वं संभवति परयोस्त्वनुवादतेत्यर्थः ॥ श्लोकं व्याचष्टे *यदीति*कैमर्थ्यानपेक्षविध्यनुवादचिन्ताया लक्षणासगतेरनुवादत्वमात्रपूर्वपक्षायोगादनुवादत्वे च तादर्थ्याक्षेपकविध्यभावेन क्रतुयुक्तपुरुषार्थत्वपूर्वपक्षस्याप्ययोगात्सूत्रापरितोषेण शुद्धपुरुषार्थत्वपक्षः तस्मिंस्तु विध्यैकान्तिकत्वाद्विकल्पशून्ये ऽनुषङ्गपर्यालोचनया गृहीते कृत्स्नसूत्रागमनापत्तेः सूत्रोक्तानुवादत्वसमर्थनार्थं विधित्वे अञ्जभ्यमानन्यायेन क्रतुयुक्तपुरुषधर्मत्वापत्तेः पुरुषमात्रे च स्मृतितोऽनृतनिषेधात्क्रतुयुक्तस्यापि पुंसः प्राप्ते विधियोगात्सच्चेति भाष्येणानुवादत्वं ब्रवीतीत्यर्थः ॥ स चेति भाष्येण क्रतुयुक्तपुरुषार्थत्वानुवादत्वोक्तौ मूलमूलित्वाऽऽशङ्का न युक्तेत्याशङ्क्याज्ञानाशयत्वेनोपपादयति * तत्रेति । * नैषेति परिहार- ६३८।३
भाष्यं क्रतुयुक्तपुरुषधर्मत्वाशयद्वितीयपूर्वपक्षविवरणार्थत्वेन व्याचष्टे *सिद्धान्तेति*पूर्वपक्षान्तरमेव सौत्रत्वसूचनार्थं सिद्धान्तत्वेनोक्तम् ।

परैर्वञ्जनार्थत्वाच्छुद्धपुरुषधर्मत्वपक्षवर्जनेन क्रतुयुक्तपुरुषधर्मत्वपक्षं गृह्णाति सूत्रगृहीतं द्योतयतीत्यर्थः ॥ एतदेव विवृणोति * नैवेति * अभिक्रमणस्याभिक्रामंमिति धातुसम्बन्धाधिकारविहितप्रत्ययश्रुत्या होमाङ्गतयावगतस्याराडुपकारित्वे वीप्मानुवादायोगापत्तेर्होमसाधनसंस्कारत्वेन सन्निपत्योपकारित्वावगमाद्धोमसाधनपुरुषधर्मेनाहवनीयप्रत्यासत्तिजननसामर्थ्यलक्षणलिङ्गगम्या न विरुध्यते । अनृतोक्तिनिषेधादेस्तु क्रतुयुक्तपुरुषधर्मत्वे याजमानास्तु तत्प्रधानत्वादित्यनेन न्यायेन भोक्त्रंशपातित्वापत्तेः साधनांशपातित्वाभावेन क्रतुसाधनभूतपुरुषधर्मत्वाभावात्प्रकरणगम्यं क्रत्वङ्गत्वं विरुद्ध्येतेत्याशङ्क्य भोक्त्रंशपातिनोऽपि पुरुषधर्मस्य पुंसो भोक्तृत्वयोग्यतां विना क्रतौ फलसाधनत्वासिद्धेरात्मनः साधनत्वसिद्ध्यै पुंसो योग्यताधानार्थं क्रतुनापेक्षितत्वात्प्रकरणाविरोधसूचनायाभिक्रमणवदित्युक्तम् । धर्मप्रणिहितमनसो रागाद्ययोगाद्वर्जयनितरामित्युक्तम् । अनेन च यदि नानृतं ब्रूयादिति स्मृतिर्दर्शपूर्णमासप्रकरणस्थश्रुतिमूलिका स्यात्ततो दर्शपूर्णमासयोरिति विशेषणं स्मर्येत नतु स्मर्यते प्रत्युतोपनयनादिनियम इति स्मरंतो ऽनृतोक्तिनिषेधादेरुपनयनकाल एवोपदेष्टारो भवन्तीत्येव भाष्यं व्याख्यातम् । अपिचेति भाष्यं क्रतुयुक्तपुरुषधर्मोपदेशिश्रुतिमूलत्वेऽपि स्मृतेः पुरुषधर्मोपदेशित्वाविरोधादयुक्तमाशङ्क्यैषधर्मः सनातन इति स्मरंतः शुद्धपुरुषधर्म इत्युपदिशन्ति नतु क्रतुयुक्तपुरुषधर्म इत्युपदिशन्तीत्येवं युक्त्यंतरोक्त्यर्थतया नैषा तस्या मूलमित्यनेनैव भाष्येण सहान्वेतव्यमित्याह * अपिचेति * क्रतुयुक्तपुरुषधर्मोपदेशित्वोक्त्युपपत्तेर्मूलमूलिभावनिरासाशक्तत्वात्पूर्वभाष्यान्वयायोगमाशङ्क्य यस्मात्स्मृतेः केवलपुरुषधर्मोपदेशितानेन भाष्येणोच्यते तस्मादेतद्भाष्यं पूर्वभाष्येण सह योज्यमिति विवक्षितुं स्मृते केवलपुरुषधर्मोपदेशित्वेनैतद्भाष्योक्तेन हेतुनेत्युक्तम् । ततश्च क्रतुयुक्तपुरुषधर्मपक्षपरिग्रहार्थं भाष्यैकवाक्यत्वेनास्य भाष्यस्य पक्षान्तरपरिग्रहार्थत्वाभावादूद्धावेव पूर्वपक्षाविति सूचनायैवकारः । केवलशब्दाध्याहारशून्येन भाष्येण स्मर्त्तारः पुरुषधर्म इत्युपदिशन्ति क्रतुधर्मविषया त्वेषा श्रुतिस्तस्मान्नास्याः स्मृतेर्मूलमित्येवं शुद्धपुरुषधर्मक्रतुयुक्तपुरुषधर्मपक्षाभ्यां पक्षान्तरं परिगृह्यत इत्येतदेव भाष्यमन्यथा व्याचष्टे * अथवेति * पूर्वभाष्यैकवाक्यान्वयनिरासायैवकारः । क्रत्वर्थत्वस्य सिद्धान्तत्वा-

पूर्वपक्षे तत्परिग्रहो न युक्त इत्याशङ्क्यानुवादत्वसिद्ध्यै सिद्धान्त्य-
नमता क्रत्वर्थतास्मिन्पूर्वपक्षे विवक्ष्यते न तात्पर्येणेति सूचयितुमेत-
ाष्यसूचितविचारान्तरप्रदर्शनपूर्वं पूर्वपक्षसूत्रं योजयति * नैवेति *
त्रपक्षान्तरपरिग्रहावसरे क्रत्वर्थपुरुषार्थत्वोपन्यासोत्राधिकरणे क्रि-
त इत्यर्थः। क्रत्वर्थत्वाभ्युपगमेनानुवादत्वोक्तौ स्मार्त्तस्य संयोगस्या-
यविषयत्वाद्धेतुत्वायोग शङ्कते *ननु चेति*। प्रासङ्गिकैकविषयत्वा-
द्धेतुत्वमुपपादयितुमाह * सत्यमिति। * श्लोकं व्याचष्टे * यद्य- १३७।२
ोति * प्रसङ्गप्राप्तार्थत्वोपपादनार्थं * नहीत्युक्तम्। * पक्षान्तर-
रिग्रहे ऽपिचेति भाष्यस्य योजनामसमंदुक्तां सूचयितुमाह * न
ोति *॥ यद्वा नैवेत्यादिसमस्तमेव भाष्यं क्रत्वर्थत्वमभिप्रेत्य मूल-
मूलित्वशङ्कोत्तरमित्यन्यथा व्याचष्टे * अथवेति * क्रतुयुक्तपुरुष-
धर्मत्वाशयेनानुवादत्वे स चायमिति भाष्येणोक्ते तदाशयाज्ञानान्न
न्विति भाष्योक्तायाः शङ्कायाः पूर्वपक्षाशयविवरणेन परिहारार्थे नैवे-
तिभाष्ये क्रत्वर्थत्वाशयायोगमाशङ्क्य योर्थो नानृतं वदेदित्यनेन
श्रुतिबलात्प्रकरणं बाधित्वा पुंसो निषेध्यः स स्मृत्यैव निषिद्ध
स्तेन पुरुषार्थेन निषेधसंयोगेन क्रतावपि प्रसङ्गान्निषेधसंयोगसि-
द्धेर्नित्यानुवादोयमित्येवं सचायमित्यपि भाष्यमस्मिन्व्याख्याने क्रत्व-
र्थत्वाशयमेवेति परिहारसूचनाय * आदि त एवेत्युक्तम्। * श्रुतमू-
लत्यागेनाश्रुतमूलकल्पनायोगमनुवादमात्रानर्थक्यं चाशङ्क्य प्रकरण-
बाधापत्तेः श्रुतस्य मूलत्वायोगान्मूलान्तरकल्पनोपपत्तिं दर्शपूर्ण-
मासस्तुतिं वानुवादप्रयोजनं सूचयितुमाह * अतइति। * कीदृशी
प्रशंसेत्यपेक्षायामाह * अन्यार्थेति *।

विधिर्वा संयोगान्तरात् ॥ १९ ॥

पुरुषार्थत्वाविशेषाभ्युपगमेनानुष्ठानाननुष्ठानविषयत्वेन संयो-
गान्तरव्याख्यार्थं नियमानुष्ठानेनेत्यादिभाष्यं पुरुषार्थत्वाविशेषस्य
शुद्धपुरुषार्थत्वपक्षादन्यत्रायोगात्तस्मिंश्च पक्षे ऽनुवादत्वानुक्तेरयुक्त-
माशङ्क्य शुद्धपुरुषार्थत्वपक्षे ऽनुवादत्वानुक्तावपि भाष्यकृतलक्ष-
णानुरूपचिन्तार्थं निवीताधिकरणाद्यसूत्रस्थमनुष्यधर्मशब्दानुषङ्गम-
भिप्रेत्य पुरुषस्यायमुपदिश्यत इत्यादिभाष्येण सूत्रस्य व्याख्याततया-
मनुष्योक्तेश्चाञ्जसा शुद्धमनुष्यविषयत्वावगमात्तदनुषङ्गसहितेनाक-

र्मेति सूत्रावयवेन शुद्धपुरुषधर्मतामुक्त्वानुवादत्वोक्तेः शुद्धपुरुषध-
र्मपक्षेप्यनुवादतोक्तेति कस्य चिद् भ्रान्तिसम्भवात्सिद्धान्ती तस्मि-
न्पक्षे मूलमूलित्वाभ्युपगमेनाप्यनुवादत्वनिरासशक्तोपि वस्तुनो मूल-
मूलित्वाभावात्संयोगान्तरत्वेनानुवादतां निरस्यतीति परिहारं सूच-
यितुमाह * केवलेति * स्वानभिमतत्वसूचनार्था भाष्यकारोक्तिः ।
कीदृशं संयोगान्तरं वर्णयतीत्यपेक्षयामाह * स्मृतौ हीति * तस्मा-
दिति सूत्रार्थोपसंहारभाष्यं व्याचष्टे * तस्मादिति * भावार्थविधि-
त्वशङ्कानिरासार्थं भाष्ये प्रतिषेधस्येत्युक्तम् । सत्यनियमस्मृत्यैवा-
नृतनिषेधसिद्धेरनुवादत्वनिरासायोगं शङ्कते * ननु चेति * एतच्छ-
ङ्कानिरासेपि फलभेदनिमित्ताद्विषयभेदादित्येवं संयोगान्तरोक्तिं यो-
जयितुमाह * नैतदिति * फलभेदेपि श्रुतिविषयस्यानृतनिषेध-
स्यार्थात्स्मृतितः सिद्धेर्विषयैक्यादनुवादत्वापत्तिमाशङ्क्य सर्वा-
त्मना विषयैक्यं विनानुवादत्वानापत्तिमाह * सनामेति * फलस्य
विधेयनिषेध्यत्वाभावेन विधिनिषेधविषयत्वायोगात्तद्भेदनिमित्त-
विषयभेदायोगमाशङ्क्य साध्यसाधनसम्बन्धे विधिना प्रतिपादिते
लक्ष्यमाणत्वमुभयोरित्यनेन न्यायेन फलस्यापि विषयत्वोपपत्तिं सूच-
यितुमाह *अस्ति चेति* प्रश्नपूर्वं फलभेदमुपपादयति *कथमिति*
विधिः श्रेयःसिद्ध्यै प्रेरणायां प्रवर्त्तत इत्यनेन विधेः श्रेयःसिद्धिफ-
लत्वे निषेधः पापशब्दवाच्यान्नरकपातसाधनान्निवर्त्तयतीत्यनेन च
निषेधस्य नरकपातसाधनान्निवर्त्तकत्वोक्त्या निषिद्धानुष्ठानापाद्य-
नरकपातनिवृत्तिफलत्वे भिहिते सत्यविधेरप्यर्थतोनृताख्यात्पापान्नि-
वर्त्तकत्वेन नरकपातनिवृत्तिफलत्वोपपत्तेः फलभेदायोगमाशङ्क्य
विधितो भेदेन यो निषेधः स एव नरकनिवृत्तिफलो न तु विधिः
सन् योर्थान्निषेधतामनुभवतीति भेदोक्त्या सूचिते प्रेरणायां प्रवर्तमा-
नस्यैव विधेः फलकल्पकत्वयान्निषेधस्यापि निवारणायां प्रवर्त्तमा-
नस्यैव फलकल्पत्वादार्थे च निषेधे तद्वाचिशब्दाश्रवणादर्थात्प्रती-
तस्यापि च निषेधस्य पूर्वोधावतीत्यत्रापरस्यैव वाक्यार्थान्वयाभावे-
नान्वयसिद्ध्यै शब्दकल्पकत्वाभावान्निवारणायां प्रवर्त्तमानशब्दाभा-
वेन फलकल्पना न युक्तेत्युपपत्तिसूचनार्था प्रवर्त्तमानोक्तिः । श्लोकं
व्याचष्टे * कल्पमिति * विषयभेदनानुवादत्वायोगमुपपादितमुपसं-
६३८।८ हरति * तस्मादिति * सत्य ब्रूयादिति सत्यविधिवत्प्रियं च नानृतं

ब्रूयादित्यनृतनिषेधस्यापि स्मृतौ भावादनुवादोपपत्तिं शङ्कते *आहेति* सत्यं ब्रूयादित्यनेन विहितेपि सत्यवचने प्रियं ब्रूयादिति प्रियमात्रविध्यालोचनयाऽनृतस्यापि प्रियस्यानुज्ञाप्रतीतेरप्रियानृतनिवृत्तिमात्रेण च सत्यनियमोपपत्तेर्यत्प्रियं ब्रूयात्तदनृतमित्येवं प्रियं च नानृतं ब्रूयादित्यनेनापि प्रियं ब्रूयादित्येतच्छेषभूतेन प्रियस्य सत्यत्वविशेषणाविधानात्संयोगान्तरत्वमुपपादयितुमाह *उच्यतइति* नैत्तेतोद्यन्तमादित्यमित्यस्य प्रजापतिव्रतस्थत्वाद्व्रतशब्देन चानुष्ठेयवाचिनेक्षणाभावस्यानुष्ठेयस्य वक्तुमशक्यत्वादिति यानीक्षणासंकल्पविधौ युक्तिस्तदालोचनया तत्र स्मृतानेष धर्मः सनातन इति व्रतशब्दवद्धर्मशब्देनानुष्ठेयवाचिनानृताभावस्य वक्तुमशक्यत्वात्पर्युदासस्य विधिरित्यर्थे पर्युदासे सत्यनीक्षणसंकल्पविधिवदनृतसंकल्पविधिः कस्मान्नेष्ट इत्याशङ्क्यानृतादन्यस्य तत्प्रतियोगिनः सत्यस्यान्यवाचिना नञोक्तिसंभवे संकल्पस्याप्रतियोगित्वाच्छीघ्रमबुद्धिस्थस्योक्त्ययोगं सूचयितुमाह * अनृतमिति * पर्युदासत्वोक्तेः प्रकृतसंयोगान्तरत्वोपपादनोपयोगमाह *ततश्चेति* दर्शपौर्णमासिकस्याप्यनृतनिषेधस्य तैत्तिरीयशाखायामेष देवानभ्यारोहति य एषां यज्ञमभ्यारोहतीति दर्शपूर्णमासयाजिनं निर्दिश्य तस्यैतद् व्रतमित्युपक्रमाम्नानात्पर्युदासत्वापत्तेः संयोगान्तरत्वायोगमाशङ्क्य तस्य संकर्षे दाक्षायणयाजिविषयताया वक्ष्यमाणत्वान्नेह कश्चित्पर्युदासहेतुरस्तीत्याह * नहीति * दये तत्वेनेनेति शास्त्रेण तस्मादनृत न वदेदिति प्रकृतस्यानृतस्य प्रीत्युत्पादनाख्यदयार्थे प्राप्तेर्विकल्पशक्तिं पर्युदासहेतुमाशङ्क्य तां प्राप्तिमनपेक्ष्यापि निषेधात्मलाभोपपत्तेर्विकल्पप्रसक्तिं निरस्यति*शास्त्रेति*दशमे प्रतिषेधःप्रदेशेनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यादिति सूत्रेण पूर्वपक्षयित्वाऽर्थप्राप्तवदिति चेदित्यनेनार्थप्राप्तसुरापानादिनिषेधे विकल्पानापत्तिवच्छास्त्रप्राप्तनिषेधेप्यनापत्तिमाशङ्क्य न तुल्यहेतुत्वादुभयशब्दलक्षणमित्यनेन वैषम्यं वक्ष्यतीत्यर्थः। यथा भाष्य सूत्रार्थमुपसंहरति *तस्मादिति।* केवलपुरुषार्थत्वपक्षे भाष्यकारीयसंयोगान्तरव्याख्यादूषणपूर्वं स्वयं क्रतुयुक्तापुरुषार्थत्वपक्षे संयोगान्तरव्याख्यां प्रतिजानीते*यदा त्विति*व्रतशब्दव्यतिरेकेण तत्समानार्थधर्मशब्दव्यतिरेकेणापि च न संशयं प्रपद्येत नाकस्मान्नाप्रियं वदेत् नाहितं

नानृतं चैव न स्तेनः स्यान्नवार्द्धुषीत्यादिस्मार्त्तनिषेधसद्भावेन शुद्ध-पुरुषार्थपक्षे संयोगान्तरं न संभवतीति प्रत्यवस्थानस्य दुर्वारत्वात्क्रतुयुक्तपुरुषार्थपक्षे संयोगान्तरं व्याख्येयमित्यर्थः । मृदुक्तौ यदा तदा शब्दौ । कथं व्याख्येयमित्यपेक्षायामाह * स्मार्त्त इति । * ईदृशस्य संयोगान्तरस्यानुवादत्वहेतुतयोक्तत्वाद्विधित्वहेतुना न युक्तेत्याशङ्कते * नन्विति । * सत्यनियमस्मृत्यार्थादनृतनिषेधेऽपि फलभेदनिमित्ताद्भिन्नविषयत्वादनुवादत्वायोगवत्पुरुषमात्रस्यानृतनिषेधेनार्थात्क्रतुयुक्तस्य पुंसो नृतनिषेधेऽप्यनुवादत्वायोग इति परिहरति * नैतदिति । * फलभेदमेवोपपादयितु स्मार्त्तस्य निषेधस्य नरकपरिहारफलतामाह * यो हीति । * अनृतापाद्यदोषपरिहारार्थत्वे नृतनिषेधस्यानृतापादितदोषत्वेनाशुचिनानुष्ठीयमानस्य क्रतोः शुचिना कर्म कर्त्तव्यमिति कर्माङ्गतया विहितशौचहान्या वैगुण्यापत्तेर्वैदिकेव ह्यनाचम्य कुर्वतो विगुणा भवेदिति वार्त्तिकालोचनयावगमाच्छ्रौतनिषेधफलस्य क्रतुवैगुण्यपरिहारस्य स्मार्त्तेनापि निषेधेनार्थान्सिद्धेः फलभेदायोगमाशङ्क्य श्रुतस्य श्लेष्माख्यमलविदूत्सर्जनात्मकत्वेनाशुचित्वापादकत्वाद्वैगुण्यापादकत्वं युक्तम् । अनृतोक्तिस्त्वनृतं वदन्नाविर्मूलमात्मानं करोति स शुष्यति स उद्वर्त्तत इत्यर्थवादावगतदोषापादकत्वे ऽप्यशुचितापादकत्वप्रमाणाभावान्न वैगु-
३।३।९।२ ण्यापादकत्वेनतिवैधर्म्यं सूचयितुमाह * तत्रेति * क्रतुयुक्तपुरुषधर्माणामपि पुरुषद्वारा क्रत्वङ्गत्वेनातिक्रमे क्रतुवैगुण्यापादकत्वात्तद्वैधर्म्योक्तौ शुद्धपुरुषधर्मातिक्रमेण क्रतवो विगुणीभवन्तीत्युक्तम् ॥ एतदेवोपपादयति * तथाहीति । * श्लोकं व्याचष्टे * क्रतवो हीति । * स्मार्त्तस्य निषेधस्य श्रौतनिषेधफलासाधनतामुपपादितामुपसंहरति * तेनेति । * श्रौतस्य निषेधस्य क्रतुवैगुण्यपरिहारफलतामाह * श्रौतः पुनरिति * श्रौतो निषेधः प्रकृतकर्मयुक्तपुरुषधर्म इति कृत्वा ऽत्र श्रौते निषेधे वर्जितानृतेन पुंसा कृतौ दर्शपूर्णमासौ फलं साधयत इत्येषोऽर्थो ज्ञायत इत्यन्वयः । पुरुषसम्बन्धदर्शपूर्णमासापूर्वसाधनत्वांशोद्देशेन विहितस्यानृतनिषेधस्यातिक्रमे पुंसो ऽपूर्वसाधनत्वासिद्धेः साधनाभावेनापूर्वसिद्ध्ययोगात्फलासाधनत्वमुपपादयितुमाह * प्रकरणेति ॥ * दर्शपूर्णमासापूर्वसाधनीभूतो यः कर्त्तेत्येवं कर्तृपुरुषगतसाधनत्वोद्देशे पुंसो ऽप्युद्दे-

श्यत्वेन निषेधशेषित्वात्तदतिक्रमे स्मार्त्तनिषेधातिक्रमवत्प्रत्यवायभाक्त्वापत्तेः फलभेदायोगमाशङ्क्य पुंसः प्रत्यवायापत्तिनिरासं प्रतिज्ञापूर्वमुपपादयति * नत्विति * यत्र लक्षणमुद्दिश्य लक्ष्ये कार्यं विधीयते तन्मात्रग्रहणं तस्मिन्नित्यनेन न्यायेनोद्देश्यापूर्वसाधनांशलक्षणात्वोपक्षीणस्य पुरुषस्वरूपस्योद्देश्यत्वाभावादित्याशयः। क्रतुयुक्तपुरुषधर्मत्वपक्षे संयोगान्तरत्वमुपसंहरति * तस्मादिति। * सिद्धान्तिनोभयविधस्यापि पुरुषधर्मत्वस्यानिष्टत्वादस्मिन्पक्षद्वये सिद्धान्तिनः संयोगान्तरत्वोक्तिरयुक्तेत्याशङ्क्य पूर्वपक्षाभ्युपगमेनानुवादत्वनिरासस्सामर्थ्यप्रदर्शनार्थत्वं संयोगान्तरत्वोक्तेः सूचयितुमाह * इनीति। * क्रत्वर्थत्वपक्षेपि क्रत्वर्थनिषेधातिक्रमे क्रतोर्वैगुण्याख्यप्रत्यवायपरिहारः फलं पुरुषार्थनिषेधातिक्रमे पुंसो नरकपाताख्यप्रत्यवायपरिहारइत्येवंविधेन फलविशेषेण संयोगान्तरत्वोपपत्तेस्तस्मिन्नपि पक्षे संयोगान्तरव्याख्या संभवतीत्याह * एवमिति॥ * क्रत्वर्थत्वक्रतुयुक्तपुरुषार्थत्वपक्षयोर्द्वयोरपि श्रौतस्य निषेधस्य क्रतुवैगुण्यपरिहारफलत्वेनैव नरकपरिहारफलात्स्मार्त्तान्निषेधात्संयोगान्तरत्वव्याख्यायां पक्षद्वयेपि निषेधातिक्रमे याजुर्वैदिकयज्ञाङ्गभ्रेषनिमित्तप्रायश्चित्ताविशेषापत्तेः प्रयोजनविशेषो न स्यादित्याशङ्क्य प्रयोजनविशेषाभावेपि पूर्वपक्षयुक्तनित्यानुवादत्वनिरासासिद्धेः पक्षद्वयेपि क्रतुवैगुण्यपरिहारफलत्वेन संयोगान्तरव्याख्यौचित्यं सूचयितुमाह * तेनेति * प्रायश्चित्तविशेषाख्यप्रयोजनभेदाभावसूचनार्थस्तावच्छब्दः॥ क्रतुवैगुण्यपरिहारफलत्वेन संयोगान्तरत्वादनुवादत्वनिरासंसभवेपि प्रयोजनविशेषाभावे क्रतुधर्मः क्रतुगतपुरुषधर्मो वेति चिन्ता निष्प्रयोजना स्यादित्याशङ्क्य विधयोपि हि पूर्वस्मिन् पक्षे संस्कारताङ्गता इत्यादिवार्तिकेऽनृतनिषेधस्य क्रतुगतपुरुषधर्मत्वे यजमानेनैवानृतं वर्जनीयं क्रतुधर्मत्वे यजमानेनर्त्विग्भिश्चेति प्रयोजनविशेषं वक्ष्याम इत्याह * यस्त्विति। * यजमानत्वे नृतवर्जनस्य भोक्तृत्वयोग्यताधानार्थत्वापत्तेस्तदतिक्रमे पुरुषगतायोग्यत्वाख्यप्रत्यवायप्रसंगात्क्रतोरपातित्वाभावेन चापूर्वसाधनत्वांशोद्देशेनानृतनिषेधायोगात्तदतिक्रमेपि क्रत्वपूर्वसिद्ध्युपपत्तेः क्रत्वङ्गातिक्रमाभावेन च क्रतुवैगुण्यप्रसक्त्ययोगात्संयोगान्तरत्वासिद्ध्यापत्तेस्तत्सिद्ध्यर्थमिदानीमेव क्रतुयुक्तपुरुष-

धर्मत्वे ऽनृतवर्जनस्य पुरुषप्रत्यवायफलत्वाविशेषेण स्मार्त
त्संयोगान्तरत्वासिद्धावपि क्रतुधर्मत्वे क्रतुवैगुण्यपरिहारफल
योगान्तरं सेत्स्यतीति विशेषो वाच्य इत्याशङ्क्य दर्शपूर्णमा
सा पुरुषभोज्यतयैव फलस्योत्पादनीयत्वाङ्गीकृत्वे वा यो
प्रति भोज्यतयोत्पादनाशक्तेर्भोक्तृत्वयोग्यताधानस्यापि
तत्वेन तदर्थानामपि धर्माणां क्रत्वर्थत्वाविरोधात्तदानिधर्मे
ण्योपपत्तेः क्रतुयुक्तपुरुषार्थत्वेऽपि क्रतुवैगुण्यपरिहारफलत्वे
गान्तरत्वाद्विधेयत्वासिद्धेः प्रयोजनात्त्ववसराभावेनेदानीं
गान्न प्रयोजनविशेषो वाच्य इत्याह *उभयथापीति*क्रतु
युक्तपुरुषधर्मत्वेऽपीत्यर्थः। पुरुषधर्मत्वपूर्वपक्षस्य सौत्रेण
निरासायानुभाषणार्थमाहेति भाष्यं व्याचष्टे *परस्त्विति*
तस्येति भाष्यावयवव्याख्यार्थमाख्यातशब्दस्य मनुष्यप्रधा
त्येनेनानुक्तनिर्वाताधिकरणाद्य तूत्रावयवोक्तेन कारणेनेत्यु
भाष्यस्य द्विविधपुरुषधर्मत्वानुभाषणार्थत्व सूचयितुमाह *
९४०।१ ति*भाष्यस्याद्विविधशब्दात्पर्युदासत्वशङ्कां निराकर्तुं सत्य
त्युक्त। क्रतुयुक्तपुरुषधर्म इतीतिनिकरणेनैव तावन्मात्रत्वव्या
वादत्वांशवैकल्यं सूचितम्। मनुष्यधर्म. शब्दस्य तत्प्रधान्य
नुषक्तसूत्रावयवोक्तसहेतुकपुरुषधर्मत्वनिरासार्थत्वेन वा
ख्यार्थमत्रत्यादिप्रतीमइत्यन्त भाष्यं व्याचष्टे *तत्रापीति*
शब्दस्य कर्तृवाचित्वाभावात्तत्प्राधान्यं न संभवतीत्याशयः।
भाष्येण कर्तुरन्याख्यातात्प्रतीतेर्वाच्यत्वमाशङ्क्य वाच्यवाच
सम्बन्धापेक्षया सम्बन्धान्तरादभिधेयाविनाभावलक्षणात्क
रित्येवं तन्निरासिष्यावृत्त्या संयोगान्तरादिति सूत्रावयवा
सत्यमित्याद्यर्थादित्यन्त भाष्य व्याचष्टे *या त्विति*कर्तुरन्य
पपादनार्थं यदेत्यादि न स श्रौत इत्यन्तं भाष्यं सामान्यन्याय
मुपपादयितुमारभते*सर्वत्रैव तावदिति*योग्यार्थोपत्यनुद्द
व्धोत्त्योक्तः। मध्यमोत्तमप्रथमपुरुषसञ्ज्ञाख्यातविशेषवाच्य
दस्मत्तद्व्यतिरिक्तत्वरूपो र्थः पुरुषः। क्रियाफलस्यात्मपरगा
मागाख्यस्तूपग्रहः स्वरितेतो अकारेतो वा धातोः परादात्म
स्मैपदाख्यादाख्यातविशेषाद्गम्यते लोकादृज्ञानस्य विवेकस्य
पायो लक्षणं चेत्यनेनोक्तः॥ कर्त्राक्षेपकत्वसिद्ध्यै भावनाया

मुपपादयति* तत्रेति । *कालादेर्व्यभिचाराद्गमकत्वायोगेपि कर्त्ता
धात्वर्थो वा गमयिष्यतीत्याशङ्कते * कर्त्रेति । * कर्तुरप्रयतमानस्य
पाकादौ कर्तृत्वासिद्धेस्तत्सिद्ध्यै गम्यमानायाः प्रयत्नाख्याया भाव-
नायाः प्रयत्ननिष्पाद्येन च धात्वर्थेन स्वसिद्ध्यै गम्यमानायाः प्राधा-
न्यप्रतीत्ययोगापत्तेस्तद्गम्यत्वं न संभवतीति परिहरति * नेति । *
एतदेव विवृणोति *यदि हीति ।*भावनयाक्षेपसंभवात्कर्तुरवाच्यत्वे
कालादेरप्यवाच्यतापद्येतेत्याशङ्क्याह*नचेति॥*कालादीनां मध्ये के
न चिदन्येषामवगतिसंभवादवाच्यत्वं भविष्यतीत्याशङ्क्याह * एव-
मिति * कर्तुस्तु भावनयावगतिसंभवान्न युक्ता वाच्यतेत्याह
* या दशास्त्विति *दह्यमानगृहान्तर्गततण्डुलपूर्णकाष्ठमयकुसूलस- ६४।१
मीपस्थायां सोदकायां स्थाल्यामपावृतायां कथं चित्पतितानां तण्डु-
लानां कर्त्रभावेपि करणादिकारकान्तरमात्रात्पाकक्रियाख्यभावना-
सिद्ध्युपपत्तेर्भावनापि न कर्त्राक्षेपशक्तेत्याशयेनाशङ्कते * कारका-
न्तरेति * पाकादेर्धात्वर्थस्य कर्त्तारं विना कथं चित्सिद्ध्युपपत्ता-
वपि तस्य भावनात्वाभावात्प्रयत्नाख्यायास्तु भावनायाः कर्त्तारं
विना सिद्धिलक्षणव्यभिचारायोगादन्यान्वयमात्रात्मको व्यभिचारः
शङ्कनीय इत्यापाद्य दूषयति * नेति * कस्मान्नान्यान्वयमात्रात्मको
व्यभिचारो ऽभ्युपगमनीय इत्याशङ्क्याह * द्विधा हीति * भावना च
शिशपात्वतुल्या ऽन्योर्द्धन्वतुल्येत्याह * भावनाचेति * शिंशपात्व-
स्यान्योन्यसापेक्षानेकवृक्षत्वाद्यन्वयादनेकभर्त्रन्वितद्रौपदीवद्व्यभिचा-
रित्वाभावेपि भावनायाः परस्परानपेक्षानेककारकान्वयादेकात्यागे-
नान्यपुरुषगामिस्त्र्यन्तरवत्समुच्चये पि व्यभिचारित्वापत्तिमाश-
ङ्क्याह * नचेति * सन्देहापादकोऽत्राव्यभिचारो विवक्षितो न
स्त्रीणामिव प्रत्यवायापादकः समुच्चये च न सन्देहापत्तिरित्याशयः॥
अतः कारकान्तरान्वयः कारकान्तराद्यवगतावपि शक्तिमापादयेन्न-
तु कर्त्रवगतावशक्तिमित्युपसंहरति * अत इति * युगपत्सर्वकारका-
न्वितायां भावनायाः सर्वकारकगमकत्वोपपत्तावपि कर्मादित्यागेन
कारकान्तरान्वितायाः कर्माद्यवगतावशक्तिवत्कर्तृत्यागेन कारकान्त-
रान्वितायाः कर्त्तारं विना सिद्धिलक्षणाद्व्यभिचारात्कर्त्रन्वयगतावश-
क्तिर्भविष्यतीत्याशङ्काशयं निराकर्तुमाह * यत्रापिनामेति * कार-
कान्तरत्यागेपि कर्तृत्यागो न कदाचिदस्तीति वक्तुं कर्मादिप्रतिभा-

भावनाया इति, गतिरिति व्युत्पत्त्या प्रतीतिशब्देनान्वयोक्तेरप्रतीतिश-
ब्देनान्वयाव्यत्यागाभिधानाद्यत्राप्यासितिष्ठत्यादिप्रयोगे कारका-
न्तराणां भावनया त्यागाद्व्यभिचारः शङ्क्यते तत्रापि न कर्तुर्व्य-
भिचारशङ्केत्युक्ते सर्वकारकसाध्यत्वाद्भावनायाः कारकान्तराणामपि
व्यभिचारायोगमाशङ्क्य भावनाया धात्वर्थद्वारा धात्वर्थकर्मान्वयादा-
सितिष्ठत्यादेश्च धातोरकर्मकत्वाद्धात्वर्थद्वारकर्मान्वयानुपपत्तेः संप्र-
दानस्य च दानादिधात्वर्थविशेषान्वयिसंप्रदेयान्वयित्वेन धात्वर्थ-
व्यवहिततया भावनातो बाह्यात्संप्रदेयादपि बाह्यादूग्राह्यादेरपि
बाह्यत्वाद्व्यवहितत्वाच्चकारसूचितात्च करणाधिकरणयोर्धात्वर्थे
[१ त्वापादानस्य च ग्रहणादिधात्वर्थविशेषान्वयिग्रा[illegible]द्यन्वयि-
त्वेन धात्वर्थविशेषान्वयिग्राह्याद्यन्वयित्वेन धात्वर्थव्यवहिततया भा-
वनातो बाह्यादूग्राह्यादेरपि बाह्यत्वाद्] व्यवहितत्वेन भावनातो बाह्य-
त्वात्कर्मसंप्रदानापादानकरणाधिकरणशून्येषु धात्वर्थेषु कर्मादीन्
प्रति भावनाया अगत्या कर्मादीनां भावनाव्यभिचारेपि कर्मादीनामेव
च व्यभिचारो ननु कारकत्वसामान्यात्कदा चित्कर्तुर्व्यभिचारशङ्के-
त्युक्तम् । प्रयत्नस्य चेतनधर्मत्वेन चेतनं विनानुपपत्तेश्चेतनस्य प्रयत्ने
चानन्येन कर्तुरैकान्तिकत्वात्प्रयत्नात्मकभावनाख्यायाः क्रियायाः
कर्तृशून्यायाः कस्याश्चिदभावात्कर्तुर्भावनाव्यभिचारायोगमुपपादय-
न्ति * नहीति * कारकान्तरव्यभिचारसहितश्च कर्तुर्व्यभिचारः
प्रयोजनवानित्याह *नदव्यभिचारेण वेति* तस्यैवाव्यभिचारेणेति
सावधारणोक्त्या कारकान्तरव्यभिचारोक्तिः सुतरामित्यनेन प्रयो-
जनस्यावश्यकतोक्ता । किंप्रयोजनमित्यपेक्षिते भावनायाः केवलक-
र्तृप्रत्यायनशक्त्यवधारणप्रयोजनमाह * यावादिति * येषु धातुषु
यानि कारकान्तराणि भावना व्यभिचरति तेषु तत्प्रत्यायनशक्त्यभा-
वे यावत्तावच्छब्दाभ्यामुक्ते तथाप्यव्यभिचारिकारकान्तरप्रत्यायन-
शक्त्युपपत्तिमाशङ्क्य क्वचिद्व्यभिचारात्कर्तृवदैकान्तिककारकान्त-
रप्रत्यायनशक्त्यभावसूचनार्थं कर्तृप्रत्यायनशक्तिज्ञानस्य स्फुटतर-
तोक्ता । केवलकर्तृप्रत्यायनशक्तिज्ञानस्य प्रयोजनत्वोपपादनार्थं कार-
कान्तरव्यभिचारे सति भावनायाः केवलकर्तृप्रत्यायनशक्तिज्ञानात्क-
र्तुरसाधारण्येन भावनागम्यत्वात्संख्यान्वयसिद्धेर्न कारकान्तरव्य-

१ मधमपुस्तके धिकः पाठः ।

भिचारो निराकार्यः प्रत्युत समर्थनीय एवेत्याह * समर्थनीय ए-
वेति * सम्बन्धे घटनीय इत्यध्याहार्यम् । कारकान्तरव्यभिचार-
समर्थनपूर्वं कर्तुः संख्यान्वयघटनां विवृणोति * आसीते * कार-
कान्तराणां सर्वभावनास्वैकान्तिकत्वाभावेपि यस्यां भावनायां य-
त्कारकान्तरं गम्यते तस्यां तस्यापि कर्तृवद्गम्यमानत्वसाम्यात्सं-
ख्यान्वयः प्रसज्येतेत्याशङ्क्य कर्तृगतैव संख्या ऽऽख्याते गम्यते
नान्यगतेति सर्वस्वसंवेद्यव्यवस्थादर्शनात्कर्तुर्वाच्यत्वपक्षवदवाच्य-
त्वपक्षेपि शब्दशक्तिव्यवस्थापि का कल्प्येति साम्यापादनेन परिहरति
* कर्तृविशिष्टा चेति * वाच्यत्वपक्षे वाच्यावाच्यत्वव्यवस्थयैव ६४२।
संख्यान्वयानन्वयव्यवस्थासिद्धेः शक्तिकल्पनानापत्तिं शङ्कते * स
चेदिति * वाच्यावाच्यत्वव्यवस्थाया अपि शक्तिं विनानुपपत्तेः
साम्यमापादयति * तत्रेति * अवाच्यत्वपक्षे कीदृशी शक्तिः कल्प्ये-
त्यपेक्षायामाह *यत इति* यस्मात्कर्तृगतां केवलां संख्यामतस्तिङ्-
रूपाच्छब्दात्प्रतीमस्तस्मात्केवलकर्तृगतसंख्याप्रतीत्याख्यात्कार्यात्ति-
ङां संख्याभिधानशक्तिरेतावती कर्तृगतत्वपर्यन्ता प्रतीयत इत्यर्थः ।
कर्तृगतायामेव संख्यायां तिङो भिधानवशक्तिर्नान्यगतायामिति व्य-
वस्थायां को हेतुरिति पृच्छति * समान इति * ज्ञापकहेतुः पृच्छ्यते
* कारकहेतुर्वेति * विकल्प्याद्यकल्पे तत्रावश्यमित्यादिना तद्विष-
यबुद्ध्याख्यस्य ज्ञापकहेतोः पक्षद्वयतुल्यत्वेनोक्तत्वात्प्रश्नायोगमाह
* उक्तमिति * शक्तीनां स्वाभाविकत्वेन निर्हेतुकतयानुयोज्यत्वस्य
शक्तयः सर्वभावानां नानुयोज्याः स्वभावत इत्याकृतिवादवार्त्तिके
निरस्तत्वात्कारकहेतुप्रश्नोप्ययुक्त इत्याह * न चेति * एवमपि
साम्यादन्यतरपक्षनिर्द्धारणायोगमाशङ्क्य वाच्यत्वपक्षे शक्तिद्वयक-
ल्पनापत्तेर्वैषम्यमाह * अपि चेति * एकप्रत्ययोपादानमात्रात्कर्तृ-
गतसंख्याभिधानसिद्धेस्तद्विषयशक्तिकल्पनानापत्तिशङ्कां स चे-
द्ब्रूयादिति वार्त्तिकोक्तां विवृणोति * नन्विति * तत्रैव प्रत्यवस्थेय-
मित्यादिवार्त्तिकोक्तपरिहाराशयं विवरीतुमापातनिकां तावत्करोति
* कुतः खल्विति * विवृणोति * न चेति * भावनादीनामेक- ६४३
प्रत्ययोपादानाविशेषेपि क्व चिदाख्यातोक्तसंख्यान्वयादर्शनेनायो-
ग्यत्वावशायाच्छब्दशक्तिकल्पनां विनापि संख्याया भावनाद्यनन्व-
योपपत्त्यभिधाने सर्वकारकाणां गम्यमानत्वाविशेषेपि कारकान्तरा-
णां क्व चिदाख्यातोक्तसंख्यान्वयादर्शनेनायोग्यत्वस्याविशिष्टत्वा-

त्वस्मत्पक्षेपि कर्तृगतसंख्याभिधानशक्तिकल्पनापत्तिरित्याह * यद्विति * कारकान्तराणां सुबाख्यशब्दान्तरोक्तसंख्यान्वयायोग्यत्वोक्तौ भावनादीनामपि सुबुक्तसंख्यान्वयायोग्यता समानेत्याह * अथेति * आख्याते भावनादीनामसिद्धत्वाख्याद्सत्वभावात्संख्यान्वयायोग्यत्वं शङ्कते * अथेहेति * अनुत्पन्नस्यापि भावनादेः सुबुक्तसंख्यान्वयदर्शनात्संख्यालिङ्गान्वयायोग्यत्वस्यैवासत्वभूतत्वप्रसिद्धेर्न तस्यायोग्यत्वहेतुतेति परिहरति * तन्निति * । एतदेव विवृणोति *नहीति* एवं च सत्याख्यातोक्तनैव संख्याया भावनादीनां चान्योन्यान्वयायोग्यत्वे हेतुर्वाच्या सा च कारकान्तरान्वयायोग्यत्वेपि तुल्येत्याह *तत्रेति* कर्तर्यनुक्ते कर्त्रन्वितसंख्योक्त्ययोगात्स्वरूपेण चोक्तायाः सर्वकारकेष्वविशेषात्कथमाख्यातोक्तत्वस्य कारकान्तरान्वयायोग्यत्वे हेतुतेति पृच्छति * कथमिति * । यथा त्वत्पक्षे कर्तुर्भावनादीनां चाख्यातोक्तत्वाविशेषेपि शब्दशक्तिवशात्संख्यायाः कर्तृमात्रान्वये योग्यता न भावनाद्यन्वये तथा कर्तृकरणादीनां कारकत्वाविशेषेपीत्युत्तरमाह * शब्देति । * असत्वभावाख्यायोग्यत्वहेतुनिरासाद् दृष्टान्तसिद्धिमाह * इतीति ।* वाच्यत्वपक्षे यत्राख्याते कर्त्ता वाच्यस्तत्र तस्य संख्यान्वयो यत्र कर्म तस्येति व्यवस्था तत्तद्विशिष्टसंख्याभिधानविषयशब्दशक्तिवशाद्युक्ता । अवाच्यत्वपक्षे तु स्वरूपेणोक्तया संख्यया करणादीनामयोग्यत्वादनन्वयेपि कर्तृकर्मणोर्योग्यत्वाविशेषाच्छब्दशक्तेश्च कर्तृकर्मानवगाहित्वाद्व्यवस्था न युक्तेत्याशयेनाशङ्कते * ननु चेति । * क्वचिदाख्याते कर्त्ता वाच्यः क्वचित्कर्मेति व्यवस्थावत्क्वचित्कर्त्रन्विता संख्या वाच्या क्वचित्कर्मान्वितेति व्यवस्थापि शब्दशक्तिवशाद्युक्तेति साम्यापादनेन परिहरति * नैतदिति । * श्लोकं व्याचष्टे * यो हीति । * शक्तेः कर्तृकर्मविशिष्टसंख्याविषयत्वं विना व्यवस्थापकत्वायोगाद्व्यवस्थापकत्वसिद्ध्यै विशिष्टविषयत्वाभ्युपगमापत्तेर्विशेषणविषयत्वं च विना विशिष्टविषयत्वायोगाद्विशेषणभूतयोः कर्तृकर्मणोरपि शक्तिविषयतावश्याभ्युपगमनीयेत्याशङ्किता स्वाशयं विवृणोति * तत्रेति । * सुरभिचन्दनादिज्ञाने चक्षुषो गन्धादिविषयत्वाभावेपि गन्धादिविशिष्टद्रव्यविषयत्ववच्छब्दशक्तेः कर्तृकर्माविषयत्वाभावेपि तद्विशिष्टसं-

ख्याविषयत्वाविरोधाद्विशिष्टसंख्याज्ञानासिद्धेः विशेषणभूतयोः कर्तृ-
कर्मणोर्ज्ञानमात्रमादर्तव्यं नतु शब्दशक्तिजन्यज्ञानाख्याभिधानलक्ष-
णज्ञानविशेषादर प्रमाणवानिति परिहर्त्ता स्वाशयं विवृणोति * उ- ६४४।१
च्यतइति । * श्लोकं व्याचष्टे * अगृहीत इति । * न चेदन्ये-
नेत्यनेन चान्यतो वगतस्य विशेषणांशस्य विशेष्यांशस्य वा विशिष्ट-
प्रत्ययविषयत्वापवादाच्च शब्दजन्यकर्तृविशिष्टसंख्याज्ञानस्य कर्तृ
विषयतादरणीयेत्याह * सर्वेति * विशेषणविशेष्यभूतयोः कर्तृ-
सख्ययोराख्यातशब्दजन्यकर्तृविशिष्टसख्याज्ञानविषयत्वाभावेपि वि-
शिष्टरूपावयवत्वाद्विशेषणविशेष्ययोस्तज्ज्ञानं विना विशिष्टज्ञानानुत्प-
त्तेर्विशिष्टज्ञाने व्याप्रियमाणस्य शब्दस्य विशेषणविशेष्यज्ञानेपि
व्यापारो वर्ण्यत इत्याशङ्क्य शब्दव्यापारस्यार्थापत्तिरूपविशिष्टप्र-
त्ययकल्प्यत्वादर्थापत्तेश्चान्यथानुपपत्तिरूपत्वेनानन्यलभ्यावयवमात्र-
विषयत्वाद्बुद्धिद्वयस्याख्यातापेक्षितत्वे प्यनन्यलभ्यावयवबुद्धेः सा-
क्षादाख्यातजन्यत्वादन्यलभ्यावयवबुद्धेस्त्वभिधेयाविनाभावद्वारा—
ख्यातजन्यत्वाद्विशिष्टबुद्धावाख्यातव्यापारोपपत्तेर्बुद्धिद्वये प्याख्या-
तव्यापारकल्पनायां नार्थापत्तिः प्रभवतीति सूचयितुमाह * स-
र्वत्र चेति । * एवमपि विशेषणस्य प्राक्प्रत्याय्यत्वाद्विशेषणा-
त्वाभिमतस्य च कर्तुरवाच्यत्वे प्राक्प्रतीत्ययोगाद्वाच्यतैव युक्ते-
त्याशङ्क्य यथा ऽनन्यलभ्यत्वात्संख्याया न कथं चिदवाच्यता
युक्ता तथान्यलभ्यत्वात्कर्तुर्वाच्यता न युक्तेति विशेषणत्वस्य वाच्य-
त्वानापादकत्वं वक्तुमाह * तदिहेति * कर्तृविशिष्टा संख्या
विधीयमानेत्याद्यावन्वयमात्रविवक्षया कर्तुर्विशेषणत्वोक्तिः । वस्तु-
तस्तु धात्वर्थस्य पूर्वापरीभावलक्षणव्यापारत्वेप्यन्योत्पादानुकूलत्व-
लक्षणक्रियात्वाभावेन कर्त्रनाक्षेपकत्वात्साक्षेपकत्वेपि वा धात्वर्थ-
ज्ञानानन्तरमेव प्रत्ययवाच्यसंख्याज्ञानात्कर्तृज्ञानस्य च संख्या-
ज्ञानसमकालधात्वर्थाविनाभावस्मृतिव्यवहितत्वेन संख्याज्ञानोत्तर-
कालत्वात्कर्तुर्विशेषणत्वानुपपत्तिः सख्यान्वयाच्च प्राक्कर्तृज्ञानाभ्यु-
पगमे ज्योतिष्टोमे संख्यानपेक्षस्य कर्तुरविकारावगमादेकस्याश-
क्तावङ्गान्तरवदेकत्वस्यापि त्यागोपपत्तेर्यजमानानेकत्वसंभवेन द्वित्वब
हुत्वयुक्तप्रातिपदुत्कर्षसिद्धान्तभङ्गप्रसङ्गात्संख्यैव कर्तृविशेषण नतु
कर्ता संख्याविशेषणमिति विशेषणभूतं विशेष्यभूतं वेत्यनवक्लृ-

ख्या सूचितम् । कर्त्रनभिधानेपि शब्दानर्थक्यशङ्का नास्तीत्येकत्वसं-
चारोक्त्या सूचितम् । एकत्वाभिधानेपि भावनादेरिव कर्तुरप्यभि-
धेयत्वाविरोधशङ्कामभिधेयाविनाभावाख्यगम्यमानलक्षणापन्नत्वोक्त्या
निरस्ता यावदेवेह च धात्वर्थः प्रतीतस्तावदेव कापि भावना
कर्ता च कश्चिद्भवतीत्यवधार्यत इति वार्तिकवक्ष्यमाणात्कर्तुः
पूर्वज्ञानसंभवाद्विशेषणत्वोपपत्तिः सत्यपीत्यनेनोक्ता । विशेषत्वा-
त्कर्तुर्वाच्यत्वशङ्कायाः प्रौढ्या विशेषणत्वाभ्युपगमेन परिहारमुक्त्वा
पारमार्थिकपरिहारमाह * यदा त्विति * मृदूक्त्यै यदा शब्दः ।
संख्यापरिच्छेद्यत्वेनापेक्ष्यमाणस्य कर्तुर्भावनातः सिद्धावपि कार-
कान्तरानादरेण कर्त्रैव परिछेद्य इति नियमसिद्धिः कर्त्रभिधा-
नशक्तिकल्पनाहेतुर्भविष्यतीत्याशङ्कां तिङुक्तायाः संख्यायाः कर्त्र-
न्वय एव योग्यत्व न कारकान्तरान्वय इति शब्दशक्तिकृतयो-
ग्यायोग्यत्वव्यवस्थोक्त्या निरस्तामपि तिङुक्ता संख्या कर्तारमेव
परिछेद्यमपेक्षते न कारकान्तराणीत्याकाङ्क्षानाकाङ्क्षाव्यवस्थया
क. ४५।१ निरसितुमनुभाषते *यत्त्विति* ततश्च समाने सर्वकारकाणां गम्य-
मानत्वे कस्मात्कर्त्रैवा संख्या सम्बध्यते न करणादिभिरपीति पूर्वो
क्तशङ्कानुषङ्गेण पूरणीयं निरस्यति *न तैरिति* कर्तृप्रार्थनोक्त्या-
काङ्क्षानाकाङ्क्षाव्यवस्थयान्वयानन्वयव्यवस्था सूचिता । आकाङ्-
क्षानाकाङ्क्षाव्यवस्थैव कथमित्याशङ्क्यायोग्यायोग्यत्वव्यवस्थानच्छ-
ब्दशक्तिवशनेति परिहारं सूचयितु * प्रतीतान्यपि त्विति * ति-
ङ्रूपस्य शब्दस्य कर्त्राकाङ्क्षसंख्योक्तावेव शक्तिर्न कारकान्तरा-
काङ्क्षसंख्योक्तावित्याशयः संख्यायाः समानप्रत्ययोक्तभावनागम्यक-
र्त्रन्वयस्य पदान्तरानधीनत्वेनावाक्याङ्गतयाकाङ्क्षयोग्यत्वानपेक्ष
त्वाद्योग्यत्वाकाङ्क्षाभावेपि समानप्रत्ययोक्तगम्यत्वविशेषात्करणा-
दीनामपि संख्याया ग्रहणं प्राप्नोतीत्याशङ्क्य सर्वत्र श्रौते वाक्यी-
ये वा शब्दे व्यवहारे प्रतीत्याख्यसन्निधिवद्योग्यत्वापेक्षयोरप्य-
न्वयाख्यग्रहणकारणत्वान्न प्रतीतिमात्रेण करणादीनां ग्रहणापत्ति-
रित्याह * नहीति । * तिङुक्तायाः संख्यायाः सर्वस्वसंवेद्यकर्तृ-
मात्रान्वयान्यथानुपपत्तिकल्पितशब्दशक्तिकृतकर्तृमात्रान्वयं योग्य-
त्वाकाङ्क्षावशादवाच्यत्वेपि कर्तुरेव संख्यान्वयोपपत्ति कर्तृविशि-
ष्टैवेह संख्या गम्यत इत्यादिग्रन्थसंदर्भोक्तामुपसंहरति * तदत्रे-

न्ति । * तिङुक्तायाः संख्यायाः कारकान्तरानाकाङ्क्षत्वेपि कारकान्तराणां संख्यापरिच्छेदं विनानुपादेयत्वेन संख्याकाङ्क्षत्वादन्यतराकाङ्क्षयान्वयो भविष्यतीत्याशङ्क्याह *नचेति । * प्रथमायास्तिङुक्तकारकाधिष्ठानत्वप्रतीतिहेतुत्वात्कारकविभक्तित्वे प्रथमाया अप्यभिहितकारकविभक्तित्वादिति वार्त्तिके वक्ष्यमाणेपि कर्तृसंख्यावाचित्वाभावेन सुबुक्तया संख्यया कर्तुः परिच्छेदात्संख्याकाङ्क्षोपपत्तिरित्याशयः । तिङुक्तायाः संख्यायाः समानप्रत्ययोक्तभावनागम्यकारकान्वयस्यापि सन्निध्यपेक्षायोग्यत्वकारणकत्वे प्रतीतेः प्राक्सन्निध्याद्यनवगमेनान्वितरूपप्रतीत्ययोगात्कर्तृगतसंख्याभिधानानुपपत्तेस्तत्सिद्ध्यै कर्तृमात्रान्वययोग्यत्वाकाङ्क्षाकल्पना न युक्तेत्याशङ्क्यानवगतयोरेवाकाङ्क्षायोग्यत्वयोः कर्त्रन्वयप्रतीतिहेतुत्वं सूचयितुमाह * न चैषेति * अन्यानन्वितसामान्यरूपेण प्रतीतायाः संख्यायाः पदार्थस्य पदार्थान्तरान्वयवदाकाङ्क्षादिवशेनान्यान्वये सत्याकाङ्क्षादेरवगतस्यान्वयप्रतीतिहेतुत्वं स्यात् शुद्धसंख्याप्रतीत्ययोगात्त्वनवगतस्यैवाकाङ्क्षादेर्हेतुत्वावगतेस्तदनवगमेप्यन्वितरूपप्रतीतिर्युक्तेत्याशयः । वाक्ये पदार्थानामन्योन्यान्वयेवगतस्याकाङ्क्षादेर्हेतुत्वदर्शनात्पदेपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थानां चाऽनेकेषामन्योन्यान्वयेवगतस्यैव हेतुता स्यादित्याशङ्क्याह * कथितो हीति * अयमेव विशेषश्च कथ्यते पदवाक्ययोः । अर्थवद्भागतुल्यत्वे प्रकृतिप्रत्ययार्थतः । दृष्टा यथा हि साकाङ्क्षाः पदार्थाः केवलाः क्वचित् । स्वातन्त्र्येण गृहीताश्च विशिष्टार्थावबोधकाः । प्रकृतिप्रत्ययौ नैवं कदाचिदुपलक्षिताविति तद्भूताधिकरणवार्तिके वैषम्यस्योक्तत्वाद्वाक्यभागपदार्थवत्पदभागप्रकृतिप्रत्ययार्थानामपि साकाङ्क्षत्वदर्शनपूर्वकान्वयावगतिरित्याशयः । प्रत्ययस्य प्रकृतिपरत्वनियमाच्छुद्धप्रत्ययार्थानवगमेनाकाङ्क्षादेरवगत्ययोगाख्यवैषम्यहेतूक्त्यै पौर्वापर्येत्युक्तम् ॥ कर्त्रनपेक्षशुद्धसंख्याप्रतीत्यभावे संख्यैव तिङ्वाच्या न कर्त्तेति विवेकावगत्ययोगमाशङ्क्य तिङं विनापि भावनान्यथानुपपत्त्या प्रतीतिसंभवात्पूर्वोक्ताद्विवेकावगत्युपपत्तिसूचनार्थं धात्वर्थमात्रात्कर्तृप्रतीतिसिद्धेर्भावनापि कर्तृप्रतीत्यै नापेक्षते किमुत तिङ्विभक्तिरित्यतिशयमाह * तदिति । * करोतेस्तृच्प्रत्यये कृते कर्तृशब्दव्युत्पत्तेः करोत्यर्थभावनान्वयिनः कर्तृत्वाद्भावनाज्ञानं विना कर्तृज्ञानायोगमाशङ्क्य कर्तृभावनयोर्द्वयोरपि धात्वर्थमात्रात्प्रतीति-

भावनोक्त्योक्ता । धात्वर्थगम्यत्वेपि कर्तुः प्रत्ययवाच्यसंख्याज्ञानसम-
कालधात्वर्थान्वयानुपपत्त्यालोचनान्तरगम्यत्वेन संख्यातः प्राक्प्र-
तीत्ययोगात्प्राक्प्रतीते च कर्त्तरि संख्याया विशेषणत्वोक्त्ययोगाप-
त्तेर्नैरपेक्ष्यलक्षणार्थः पूर्वशब्दः । अन्यलभ्यत्वात्कर्तुर्वाचकत्वेन ताव-
त्तिङपेक्षा नाऽऽशङ्क्यैव गमकभावनापेक्षाद्वारा तद्वाचितिङपेक्षां त्वाश-
ङ्क्य भावनानपेक्षत्वान्नतरां तिङपेक्षेति तरपा सूचितम् । कर्त्रन्वित-
संख्याभिधानेपि कर्त्रभिधाननिरासार्था केवलोक्तिः ॥ एवं समा-
ने सर्वकारकाणां गम्यमानत्वे कस्मात्कर्त्रैव संख्या सम्बध्यते न
करणादिभिरपीत्याशङ्कां तिङः कर्त्रन्वितसंख्याभिधानशक्तिकल्पनया
परिहृत्य शुद्धसंख्याभिधानेपि प्रथमप्रतीतिकर्त्रन्वयनैराकाङ्क्ष्यात्सं-
ख्याया न पश्चात्प्रतीतकारकान्तरान्वय इत्यन्यथा परिहरति * यद्वे-
ति । * श्लोकं व्याचष्टे * सत्यपीति । * ज्वलनाद्यवान्तरव्यापारशू-
न्यानां काष्ठादीनां कारकत्वायोगादसमाहितानां चावान्तरव्यापा-
रायोगात्समाधानस्य च कर्त्रधीनत्वात्कर्तुः प्रागपेक्षयान्वयोक्त्या
स्वान्वयित्वेन प्राक्कर्त्ता ज्ञाप्यत इत्येव पूर्वार्द्धं व्याख्याय सर्वधात्व-
र्थानुरञ्जनसहतया सामान्यरूपस्य प्रयत्नाख्यस्य व्यापारस्य भावना-
त्वात्तस्य कर्त्राश्रितत्वात्कर्त्तारमेवाविर्भावाख्यविशेषरूपेण प्रागुप-
स्थापयतीति पूर्वं तावदित्यनुषङ्गेण वदता स्वरूपेण ज्ञाप्यत इत्येव
व्याख्यातम् । तदेव व्यतिरेकमुखेन व्याख्यातुं कारकान्तराणां धात्वर्था-
न्वयित्वेन साक्षाद्भावनानन्वयाद्बहिरङ्गत्वं सर्वसाध्यसाधनेतिकर्त्तव्य-
ताख्यभावनांशमध्ये यो ज्वलनादिरितिकर्त्तव्यतात्मको व्यापारस्तत्का-
रणत्वाद्वा वहिरङ्गतरतोक्ता । नचेत्यनेनोत्तरार्द्धव्याख्या कर्त्रधीनत्वा-
त्कारकान्तरप्रवृत्तेस्तद्धेतुकप्राथम्योक्तिसूचितं कर्तुः प्राधान्यमनति-
क्रमहेतुत्वेनोक्तम् । धात्वर्थेनापि भावनावत्कर्त्तृव्यापारतया कर्त्तुरेवावि-
र्भावाख्यविशेषरूपेण ज्ञापनात्तस्यैव संख्यान्वय इत्याह * अपिचेति । *
९४६।२ कः पच्यर्थोनाम येयं तण्डुलानां विक्लित्तिरिति तण्डुलविक्लित्तेः
पाकफलत्ववचनात्फलसिद्धिपर्यन्तं सर्वकारकव्यापारसमूहवाचिनं
धातुमङ्गीकृत्य प्राधान्यविशेषणे कृते समूहस्यैक्याद् गुणप्रधानत्वा-
योगमाशङ्क्य समूहसाधनसमूहीभूतप्रत्येककारकव्यापारभेदाद् गुण-
प्रधानत्वोपपत्तिसूचनायावान्तरविशेषणम् । सर्वेषां भावनाकारक-
त्वात्कर्तृत्वापत्तेः प्रत्ययोपात्तभावनाकारक कर्त्तेति व्याकरणोक्तक-
र्तृलक्षणायोगवत्सर्वकारकव्यापाराणामेकधातूक्तत्वे गुणप्रधानत्वा-

योगाद्धातूक्तप्राधान्यव्यापारवत्त्वस्यापि कर्तृलक्षणस्यायोगमाशङ्क्य भावनाकर्तृसंख्यादीनामेकप्रत्ययोक्तत्वेऽपि प्रतीतिबलाद् गुणप्रधानत्वाविरोधवत्सर्वकारकव्यापाराणामेकधातूक्तत्वेऽपि गुणप्रधानत्वाविरोधसूचनार्थं न केवलमेतत्कर्तृलक्षणं व्यापारेऽङ्गीकृतं किन्तु लोकेऽपीत्युक्त्यर्थोऽपिशब्दः ॥ आविर्भूतरूपप्रतीत्यन्यथानुपपत्त्या कर्तुर्वाच्यत्वकल्पनामाशङ्क्य भावनाया धात्वर्थस्य व्यापारत्वेनाश्रितरूपतयाऽभिधानाच्छुक्लादिशब्दोक्तस्य गुणस्याविर्भूतरूपद्रव्यज्ञापकत्ववत्कर्त्रनभिधानेऽप्याविर्भूतरूपाश्रयभूतकर्तृज्ञापकत्वोपपत्तिं सूचयितुमाह *अभिहितवच्चेति* विशेषोक्त्याविर्भावो विवक्षितः॥गम्यमानस्याप्याविर्भूतरूपप्रतीत्युपपत्तौ कारकान्तराणामपि गम्यमानत्वाविशेषादाविर्भूतरूपप्रतीत्यापत्तिमाशङ्क्याह * कारकान्तरेष्विति * धात्वर्थस्य कारकान्तरानाश्रितत्वेन तादृशस्याश्रितरूपस्य ज्ञापकस्यार्थस्याभावात्कारकान्तराणामनादरहेतुकाभिभूतरूपप्रतीतिरित्यर्थः ॥ कारकान्तराणां गम्यमानत्वस्यासत्त्वप्रतिभाने कथं सत्त्वावधारणेत्याशङ्क्याविनाभावाख्यकारणसद्भावादित्याह * परमार्थेति * प्राथम्यप्राधान्याभ्यां कर्तुः संख्यान्वये कर्मणस्तदभावात्संख्यान्वयायोगं शङ्कते * नन्विति * भाव्यनिष्ठत्वाद्भावनाया भाव्यांशनिपातिनः कर्मणोंऽशान्तरेभ्यः प्रागपेक्षाग्रहणं च भावनारूपत्वानालोचनेनानादृत्यव्यापाररूपत्वालोचनेन कारकापेक्षाग्रहणप्राथम्यादरात्कर्तुः कारकान्तरेभ्य प्राथम्येऽपि व्यापारस्वरूपनिष्पादने कारकानां तुल्यत्वेनान्योन्यमङ्गप्रधानत्वायोगादुत्पादनाख्यभावनारूपे कर्त्रादीनामुत्पादकत्वेनोत्पाद्यं कर्म प्रत्यङ्गत्वात्कर्मणश्चोत्पाद्यत्वेनोत्पादकान् कर्त्रादीन् प्रति प्राधान्यादन्योन्यमङ्गप्रधानत्वोपपत्ते कर्मणोऽपि प्राधान्यात्संख्यान्वयो युक्त इत्याशयेन पृच्छति * कुत इति * शाब्दे संख्यान्वये कर्तुरिव शाब्दस्यैव प्राधान्यस्य हेतुत्वात्कर्मणश्च धातूक्तप्राधान्यव्यापारत्वाभावेन धात्वाख्यशब्दलक्षणप्राधान्याभावाद्भावनानाश्रयत्वेन च तद्वाच्यतिङाख्यशब्दलक्षणप्राधान्याभावात्संख्यान्वयानुपपत्तिरित्युत्तरमाह * प्राधान्येनेति * नात्रप्रयोगे धातुनौदनीभावमापत्स्यमानानां तण्डुलानां विक्लेदनाख्या क्रिया प्राधान्येनोक्ता न चौदनाक्रिया भावनत्येतद्द्वयमुपपादयितुं माभूदोदनस्यैव धातूक्तप्राधान्यव्यापारवत्वात्कर्तृलक्षणात्कर्तुरेव च भावनाश्रयत्वप्रसिद्धेः कर्तृतेत्युक्ते कर्तृत्वे सत्यप्योदनः पच्यतां स्वयमेवेत्यादिवत्कर्म-

त्वस्यापि सद्भावात्कर्मसंख्याभिधानोपपत्तिमाशङ्क्य यदत्र प्रयोगे तिङभिधेयं कर्मत्वं तत्र माभूदित्युक्तम् ॥ यद्वा यद्भावनारूपं तिङा प्राधान्येनाभिधेयं सा नौदनक्रियेत्येवमभिधेयोक्तिर्योज्या । श्लोकं व्याचष्टे * नात्रेति * कर्मत्वमुपपद्येतेत्यनेनाभिधेयोक्तिः कर्मत्वोपलक्षणार्था नकारश्चाभिधेयभावनोक्तिभ्यां द्वाभ्यां द्वाभ्यामपि काकाक्षिवत्सम्बद्ध्यत इति सूचितम् । अकर्तृत्वादेव चेत्यनेन न भावनोदनक्रिया मा भूत्तस्यैव कर्तृतेत्यनुषङ्गेण न भावनेत्यवयवो व्याख्यातः । स्वातन्त्र्येण धात्वर्थनिष्पादकत्वाख्यकर्तृत्वसिद्ध्यर्थत्वेन प्रयत्नाख्याया भावनायाः कर्तृव्यापारत्वादित्याशयः । कर्मव्यापारस्य धातुना प्राधान्योक्तिनिरासस्याविर्भूत[त्वरूपेण कर्मोपस्थानायोगोक्त्यर्थत्वसूचनार्थं * तेनेत्युक्तम् * कर्मव्यापारस्य भावनात्वे सति प्रत्ययार्थत्वेन प्राधान्यात्प्राधान्येन्योन्यकर्मोपस्थापकत्वं स्यान्नत्वेतदस्तीत्याशयः ॥ नकेवलमोदनस्य कर्तृत्वापत्ते] स्तद्यापारस्य प्राधान्योक्तिर्न सम्भवति किन्तु चेतनप्रवर्त्तकनियोगविषयत्वायोगादपीत्याह * अवश्यं चेति * पुंव्यापारस्य च प्राधान्यानुक्तावाख्यातेनानाक्षिप्तस्य पुंसः कर्तृत्वस्य पदान्तरोक्तेपि पुंस्याविर्भावायोगात्तृतीयानुपपत्तिः स्यादित्याह * आख्यातेति * पुंव्यापारप्राधान्याभावे चौदनाख्यकर्मव्यापारस्य पुंव्यापारेणाभिभवायोगादाविर्भूतव्यापारतयौदनस्य कर्तृत्वापत्तेः पुंसश्च प्रधानभूतव्यापारवत्वाख्यकर्तृलक्षणाभावेनाकर्तृत्वप्रसक्तेरोदनस्य कर्तृव्यापारेणाऽऽप्यमानत्वायोगात्कर्तृव्याप्यत्वाख्यकर्मलक्षणाभावेन कर्मत्वहान्यापत्तिर्यदि कश्चिच्छबादिविकरणायास्तिङः कर्त्रन्वितसंख्याभिधानशक्तिकल्पनावद्यग्विकरणायास्तिङः कर्मान्वितसंख्याभिधानशक्तिकल्पनया परिहारं वदेत्तथाप्योदनस्य यग्विकरणतिङुक्तकर्मसंख्यान्वयत्यागेन शब्विकरणतिङुच्यकर्तृसंख्यान्वयस्य न्याय्यत्वाञ्चौदनः पच्यतामिति प्रयोगः स्यात्किमोदनः पचतामित्येवमेवेत्याह * तद्यापारेण वेति * फक्किकाद्वयेप्यन्यथाहीत्यनुषक्तव्यम् । शङ्कामुपसंहरति * तेनेति * दोषसाम्यापादनेन तावत्परिहरति * उच्यतइति * द्वयाश्रयमपि दोषमेको भ्रामयितुं पर्यनुयुज्येत मीमांसकस्तु विचारकुशलत्वाद् भ्रामयितुमशक्य इति सूचयितुं विचारयन्नित्युक्तम् ॥

---

(१) इति द्वितीयपुस्तके नास्ति ।

परिहारसाम्यापादनेन परिहरति * सर्वथेति * लक्षणशब्दस्य ६४७।३
व्यवस्थाकारणवाचित्वाद्भवत्पक्षे कर्तुर्वाच्यत्वे शाब्दं प्राधान्यं
कर्मणो वा वाच्यत्वे वास्तवप्राधान्यं व्यवस्थाकारणं तन्मतपक्षे
वाच्यसंख्यान्वयव्यवस्थाकारणं भविष्यतीत्युक्ते वाच्यत्वपक्षे विक-
रणभेदभिन्नशब्दशक्तिवशादेव व्यवस्थासिद्धेर्व्यवस्थाहेत्वन्तरानपे-
क्षामाशङ्क्य सर्वकारकाणामन्यलभ्यत्वाविशेषेपि क्व चित्कर्तृ-
वाचिन एव शब्दस्य प्रयोगः क्व चित्कर्मवाचिन एवेति व्यवस्था-
सिद्धौ वाच्यत्वपक्षेपि हेत्वपेक्षास्तीति सूचयितुं सर्वथेत्युक्तम् । भव-
त्पक्षे कर्ता यल्लक्षणः सन् कर्म वा यल्लक्षणं सदभिधीयते तल्लक्षणस्यैव
कर्तुः कर्मणो वा संख्या मत्पक्षे भिधीयत इत्यर्थः । दोषसाम्यो-
क्त्यर्थमाद्यश्लोकं व्याचष्टे *तद्यदीति* व्याख्योपक्रमसूचनार्थं तत्र
शब्दार्थे तदित्यव्ययम् । परिहारसाम्योक्त्यर्थं द्वितीयश्लोकं सक्षेपत-
स्तावद्व्याचष्टे *अथेति* । विस्तरतो व्याचष्टे *तदेतदिति* । भवन-
प्रकृतिरूपत्वाद्भावनाया भवनोपादानं विना भवितृरूपभाव्यान्वया-
नुपपत्तेर्भाव्यव्यापारस्य भवनस्य भावनावाचिना शब्देनोपादाना-
द्वस्तुलक्षणस्यापि कर्मप्राधान्यस्य शाब्दत्वेन शाब्दसंख्यान्वयहेतु-
त्वोपपत्तिसूचनार्थं भाव्यांशेन चेत्युक्तम् । सत्यपि कर्तुः शब्दार्थरूपेण
प्राधान्ये वस्तुलक्षणस्य कर्मप्राधान्यस्य भाव्याकाङ्क्षाकाले प्रतीते-
र्भावनास्वरूपावगतिकालकर्तृप्राधान्यप्रतीत्युत्तरकालत्वेन परतया
समाप्तिः शब्दार्थ इति न्यायाद्विवक्षौचित्ये प्राधान्य इति शब्दाध्या-
हारेणोक्ते कर्तृप्राधान्योपपादनार्थं तिङ्धातुभ्यां यथासंख्येनाभिधी-
यमानौ प्रधानभूतौ सामान्यविशेषरूपौ व्यापारौ यस्य कर्तुस्तद्भाव-
रूपे प्राधान्य इत्युक्तम् । सर्वधात्वर्थानुरञ्जनार्हत्वात्सामान्योक्त्या भा-
वना विवक्षिता तद्विशेषणत्वाद्विशेषोक्त्या धात्वर्थः कर्तृप्राधान्याविव-
क्षायां तद्व्यापारप्राधान्योक्त्यानर्थक्यमाशङ्क्य कर्तृत्वासिद्ध्यर्थत्व-
सूचनार्थं व्यापारप्राधान्योक्तिमात्रेण कर्तृत्वलाभे सत्यपीत्युक्तम् । वै-
याकरणमते कर्मणि मीमांसकमते कर्मसंख्यायां तिङुत्पत्तिरिति व्यव-
स्था वाशब्देन सूचिता । अकर्मका धातवो विशेषोक्त्योक्ता धात्वर्थक-
र्मणोकर्मकेषु धातुस्वभावाद्भावेपि वा प्रयोजनाभावादविवक्षायामपि
भाव्याख्यकर्मनिष्ठत्वाद्भावनाया भावनाकर्मणो सत्वाविवक्षे क्व
चिदप्ययुक्ते इत्याशङ्क्य सकर्मकेषु श्रुतया द्वितीयाख्यया सुपा स्वा-
स्थ्यकामः शेत इत्यादिषु चाकर्मकेषु स्वास्थ्य कामयत इत्यादि-

विग्रहलभ्यया सुपा कर्मप्राधान्याभिव्यक्त्युक्तिः कर्मणोपि संख्यान्वये महता प्रबन्धेन संख्यान्वये कर्तुरसाधारणोक्तेरानर्थक्यमाशङ्क्य करणादीनां संख्यान्वयनिरासार्थत्वं सूचयितुमाह * करणादीनां त्विति * शबादिविकरणायास्तिङः कर्तृगतसंख्यावाचित्वे यगिवकरणायाश्च कर्मगतसंख्यावाचित्वे विशिष्टसंख्यान्यथानुपपत्त्यैव विशेषणभूतकर्तृकर्माक्षेपसिद्धेर्यदा क्रियानुष्ठातव्या प्रतीयते तदार्थात्कारकव्यापारो गम्यते इति भाष्ये भावनागम्यत्वोक्तिर्विरुद्ध्येतेत्याशयेनाशङ्कते * केचित्पुनरिति * कर्त्रनवगतौ तद्विशिष्टसंख्यावगत्ययोगात्कर्तृविशिष्टसंख्यान्यथानुपपत्त्या कर्त्रनवगत्यभ्युपगमेन्योन्याश्रयापत्तेः शङ्कानुपपत्तिमाशङ्क्य शोणादिशब्दे विशेषणबुद्धिं विनापि विशिष्टबुद्धिदर्शनाद्विशेषणविशेष्यग्राहकप्रमाणद्वयसद्भाव एव विशिष्टबुद्धिर्विशेषणबुद्धिपूर्वकत्वनियमो न सर्वत्रेति सूचयितुं दृष्टा-
१४८।१ न्तमाह *तद्यथेति*॥ शोणादौ शब्दभेदाभावादेकस्य च शब्दस्यैकशक्तिकल्पनेनाभिधेयाविनाभावद्वारानेकार्थप्रत्यायकत्वसंभवेनैकशक्तिकल्पनायोगादश्वत्वादेश्चान्यतोवगत्ययोगाद्विशिष्टस्य गुणस्य वाच्यत्व तदन्यथानुपपत्त्या च विशेषणभूताश्वत्वाद्यवगतिरिति युक्तं कर्तुस्त्वन्यतोवगतिसंभवेपि तद्विशिष्टाया संख्याया वाच्यत्वमभ्युपेत्य तयैव कर्त्राक्षेपाभ्युपगमे सति कर्तृन्यायेन गवादावपि गोत्वादिविशिष्टस्य संख्यादेर्वाच्यत्वमभ्युपेत्य तेनैव गोत्वाद्याक्षेपसिद्धेरवाच्यत्वापत्तिरित्यनिष्टापादनेनाशङ्कां निरस्यति * तथा च सतीति * । एतदेव प्रश्नपूर्वं विवृणोति * कथमिति * । श्लोकं व्याचष्टे *एतावती चेदिति * गवादौ प्रकृत्यंशाद्गोत्वाद्यवगतिसिद्धेरेकपदोपादानाच्चान्योन्यान्वयनियमसिद्धेरेकस्य शब्दस्य गोत्वादिविशिष्टसंख्याद्युक्तिशक्तिकल्पनायोगेनानिष्टापत्तिपरिहारे तु कर्तृसंख्यादिष्वपि विशिष्टविषयशक्तिकल्पनां विनाप्यन्वयनियमसिद्धेर्यद्गवादिषु शुद्धसंख्याभिधानमभ्युपगतं तदेवाभ्युपगन्तव्यं ततश्च संख्यया कर्त्राक्षेपायोगाद्भावनयाक्षेपानभ्युपगमेनाभिधेयत्वसिद्धान्तहान्यापत्तेर्भाष्ये भावनागम्यतोक्त्याशयेनाह * अयं त्विति * यत्तु दृष्टान्तबलेन शङ्कोत्थानमुक्तं तत्रापरे स्वबुद्ध्या रज्यते येन विशेष्यं तद्विशेषणमित्येव लक्षणस्य विशेषणस्याज्ञानस्य विशेषणत्वायोगात्सर्वत्र विशिष्टज्ञानस्य विशेषणज्ञानपूर्वकत्वनियमावगतेःशोणशब्देप्यश्वत्वरक्तत्वयोर्द्वयोरपि वाच्यत्वात्साध्यविकलं दृष्टान्तं मन्यन्तइत्याह

तत्रेति। श्लोकार्थमुपपादयति *कथं हीति*। यस्माच्छोणशब्दवाच्यरक्तत्वजातिविशिष्टोऽस्यार्थो गुणत्वाद् गुणिनमश्वं गमयिष्यति तस्माच्छब्दानुक्तेऽप्यश्वत्वे तद्विशिष्टप्रत्ययो जायत इत्याशङ्कते *रक्तत्वेति*गवादौ रक्तत्वस्य व्यभिचारान्नाश्वगमकता युक्तेति परिहरति * नेति । * व्यभिचारेऽपि सामान्यस्य विशेषगमकत्ववद्रक्तत्वस्याश्वगमकत्वोपपत्तिमाशङ्क्य शोणशब्दान्निश्चितरूपाश्वबुद्धिर्जायते न विशेषबुद्धिवत्संदिग्धरूपा नच व्यभिचारिणो निश्चितबुद्धिहेतुतास्तीत्याशयेन परिहरति * ऐकान्तिकं हीति ॥ * यच्चाश्वगमकत्वे गुणत्वं हेतुत्वेनोक्तं तद् द्रव्यमात्रगमकत्वे हेतुर्न तद्विशेष इत्याह * द्रव्यमात्रं त्विति । * श्लोकार्थोपपादनमुपसंहरति *तस्मादिति* रक्तत्वस्याश्वत्वागमकत्वेऽप्यश्वत्वस्य रक्तत्वगमकत्वसंभवे द्वयोर्वाच्यत्वायोगापत्तेस्तन्निरासायान्योन्येत्युक्तम्। अन्योन्यगमकत्वायोगेऽपि वस्त्वन्तराव्यभिचारित्वेन व्याप्तिज्ञानकालेऽवगतस्याश्वत्वस्य रक्तत्वस्य वा शोणशब्दप्रयोगकाले शब्दानपेक्षज्ञानसंभवे द्वयोरवाच्यत्वोपपत्तेस्तन्निरासार्थं वस्त्वन्तरेत्युक्तम् । वस्त्वन्तरेणाश्वत्वोपस्थानायोगमुपपादयितुमाह * नहीति * केवलाश्वत्वोपस्थापनं तावदनाशङ्क्यमेव यथा तु तत्र शोणशब्दे सत्वज्ञेयत्वादिवस्त्वन्तरसाधारण्येन द्रव्यत्वं रक्तत्वैनैकान्ततो ज्ञापितं तथाश्वत्वं न केनचिदेकान्ततो ज्ञापितमित्यर्थः । द्रव्यान्तरव्यावृत्तत्वरूपैकान्तिकतैवैकशब्दाभ्यामुक्ता कर्त्तुस्तु वस्त्वन्तरोपस्थापितस्य ग्रहणसंभवान्न तिङ्गाच्यतेत्युक्तमेवार्थं व्यतिरेकार्थं स्मारयति * कर्त्तुः पुनरिति * कारकान्तराणामपि भावनयोपस्थापनात्कर्तुः संख्यान्वयनियमायोगापत्तेस्तत्सिद्ध्यै वाच्यत्वकल्पनामाशङ्क्य विशेषरूपेणोपादानम् स्मारितम् ॥ शब्दस्योच्चारणेन वाच्यबुद्धौ व्यापारणादनावृत्तोच्चारणस्य विरम्य व्यापारानुपपत्तेः पूर्वापरीभूतवाच्यद्वयबुद्धिजनकत्वायोगेन साध्यविकलत्वापरितोषात्स्वमतेन शोणशब्दवाच्यस्य गुणविशेषस्याश्वत्वैकान्तिकत्वात्तद्गमकत्वं युक्तं संख्यायास्तु प्रतिजाति विलक्षणविशेषाभावेन कर्त्रैकान्तिकत्वाभावान्न कर्तृगमकता युक्तेतिवैषम्यं वक्तुमुपक्रमते *अथवेति*मात्रशब्दोऽश्वत्वाभिधाननिरासार्थः। तथापि न तद्दृष्टान्तेन संख्याया कर्तृगमकता युक्तेति वाक्यशेषः॥एकार्थसमवायित्वोक्त्या विशिष्टाभिधानमुक्तमिति भ्रान्त्या मन्वानः पृच्छति

कथमिति । भ्रान्तिं निरस्यन्नुत्तरमाह *उच्यत इति* रक्तगुणस्य रक्तत्वजातेर्जात्यन्तरमवान्तरमेतच्छोणत्वं स्वभावादसत्त्वान्वय प्राप्त-मिति कृत्वा शक्नोत्यश्वत्वं गमयितुमिति शेषः । व्यतिरेकमुखेनोत्तरार्द्धं
६.४६.२ व्याचष्टे *यदि हीति* ॥ अन्येनानुपात्तेऽप्यश्वे तद्गतं गुणं वदन्निति वार्तिकोक्त एक एव शक्त्या श्वत्वविशिष्टरक्तत्वाभिधानपक्षे शोणशब्दो श्वत्वेन विशेषणमाकाङ्क्षेत् शोणेऽपि नैव वाजित्वमनुक्त्वा तद्गुणाभिधेति वार्तिकोक्ते वा विशेषणविशेष्यरूपार्थद्वयाभिधानपक्षे शक्त्यन्तरमाकाङ्क्षेदित्युक्ते किमर्थमित्यपेक्षायां येन विशेषणेन शक्त्यन्तरेण वा कृत्वा शोणशब्दः स्वयमेवाश्वत्वैकार्थसमवायि रक्तत्वं वदेदिति विशिष्टोक्तिः प्रयोजनमुक्ता । अन्वयमुखेन व्याचष्टे *एष त्विति* इत्यव्यभिचाराद्धेतोः शोणत्वजातितोऽश्वत्वं प्रतीयत इति प्रत्युक्ते-र्निश्चितप्रतीतिविषयत्वव्याख्यार्थं यथा रक्तत्वकृष्णत्वादितोऽश्वत्वे-संशयो भवति नैवमित्युक्तम् । वैलक्षण्यानुपलम्भेनावान्तरजाति-मपन्हुते * कीदृशं पुनरिति * । क्षीरादौ माधुर्याद्यवान्तरजातिवैलक्षण्यवच्चन्दनादौ च सौरभ्याद्यवान्तरजातिवैलक्षण्यवद्रक्तत्वादीनामपि प्रतिद्रव्यजात्यवान्तरजातिवैलक्षण्यस्य निपुणतो निरीक्ष-माणैरुपलम्भान्नापन्हवः सम्भवतीत्याशयेनोत्तरमाह * उच्यत इति * जपाकुसुमादौ रक्ताद्यवान्तरजातेर्वाचकशब्दाभावेनाभा-वमाशङ्क्य विशेषवाचिशब्दरहितानामपि कृमिकीटाद्यवान्तरभेदाना-मनेकशो दर्शनात्सामान्यतोऽभिधानेनापि च व्यवहारसिद्धेर्विशेषश-ब्दाभावेऽप्यवान्तरजात्यपन्हवायोगसूचनायोत्तरार्द्धः । श्लोकं व्याचष्टे * सर्वेति * गोत्वैकार्थसमवायिन्यां तु रक्तावान्तरजातौ लोके विशेषवाचिसाधुरोहिणीशब्दाभावेऽपि रौहिणिकेत्यपभ्रंशदर्शनान्ना-न्यत्रापि सर्वथा विशेषवाचिशब्दाभाव इत्याह * यथेति * रोहि-णिकाशब्दस्य गोत्वैकार्थसमवायिरक्तावान्तरजातिवाचितामुपपाद-यितुमाह * न कदाचिदिति * शोणादिशब्दस्याभिधेयाविना-भावेनाश्वत्वादिगमकत्वादश्वत्वादेर्वाच्यत्वाभावमुपपादितमुपसंहरति * तस्मादिति * अश्वत्वैकार्थसमवायिशुक्लावान्तरजातिः कर्कत्वं मनुष्यत्वैकार्थसमवायिशुक्लावान्तरजातिर्गौरत्वं पद्मत्वैकार्थसम-वायिशुक्लावान्तरजातिः पुण्डरीकत्वं रक्तावान्तरजातिः कोकन-दत्वमित्याद्यादिशब्दाभ्यामुक्तम् । प्रतीतिमात्राद्वाच्यत्वाशङ्कायोगोप-पादनार्थो दृष्टान्तः ॥ तिङो विशिष्टवाचितायां शोणादिशब्दानां दृष्टा

न्तत्वे निरस्ते कुमारादिशब्दानां दृष्टान्तत्वाशङ्कानिरासार्थं शोणादिन्यायं तेष्वतिदिशति * एतेनैवेति * मनुष्यत्वैकार्थसमवायिनी बाल्यावान्तरजातिः कुमारत्वम्, उष्ट्रत्वैकार्थसमवायिनी करभत्वं, हस्तित्वैकार्थसमवायिनी कलभत्वम्, अश्वत्वैकार्थसमवायिनी किशोरत्वं, गोत्वैकार्थसमवायिनी वत्सत्वं, महिषत्वैकार्थसमवायिनी वर्करत्वं, प्रतिप्राणिजाति बाल्यावान्तरजातिभेदं बाल्यगतस्वसंवेद्यचेष्टास्वरवर्णवैलक्षण्यात्साधयितुमाह * तथा हीति * युववृद्धत्वयोरपि प्रतिप्राणिजात्यवान्तरजातिभेदोक्त्यै बालत्वादावित्यादिशब्दः ॥ शोणादिशब्दानां रक्तादिगुणावान्तरजातिवाचित्वात्तदविनाभावेनाश्वत्वादीनां प्रतीतिसिद्धेरवाच्यत्वाभ्युपगमे गवादिप्रातिपदिकानामप्येकवचनाद्यनुगृहीतानां गोत्वाद्येकार्थसमवाय्येकत्वादिसंख्यावान्तरजातिवाचित्वात्तदविनाभावेन गोत्वादीनामपि प्रतीतिसिद्धेरवाच्यत्वापत्तिरित्याशङ्कानिरासार्थं लिङ्गाचयया सङ्ख्यया कर्त्राक्षिपशङ्कायाः केचित्पुनरित्यादिवार्त्तिकोक्ताया निरासायानिष्टापत्तिं तथासत्यनेनैव न्यायेनेत्यादिवार्त्तिकोक्तामनुभाषणपूर्वं निरस्यति *अथेति*गवादिजातिभेदेपि संख्याया वैलक्षण्यानुपलम्भेनावा- ९५०।२
न्तरजातिभेदाभावादेकस्य च विरम्य व्यापारायोगेन पूर्वापरीभूतवाक्यद्वयबुद्धिजनकत्वस्यासंभवतोप्रसक्तेर्नानिष्टापत्तिरित्याशयः। व्यतिरेकमुखेन तावच्छ्लोकं व्याचष्टे*यदि हीति*गोत्वसंख्ययोरविभक्तावयवैकशब्दाभिधानार्हयोर्मध्ये यद्यव्यभिचारितया हेतुभूतयान्यतरद्वाच्यत्वेनावधारितं प्रत्यविभक्तावयवस्यैकस्य शब्दस्य वाचकतावधार्येत ततोप्येवं कल्पेत न तु द्वयमप्यस्तीत्यर्थः। अन्वयमुखेन व्याचष्टे *संख्यायास्तावदिति*॥न चोभयोर्मध्येन्यतरस्यापीतराव्यभिचारोस्तीत्यर्थं श्लोकस्थचशब्दसूचितं न च संख्यासंख्येययोरिति वार्त्तिकव्याख्यानमुपपादयति*तथाहीति*।संख्याया गोत्वादिगमकत्वयोगेपि लिङ्गस्य प्रतिजाति विलक्षणत्वेनाव्यभिचारितया गोत्वादिबोधे प्रवृत्त्युपपत्तेः शोणत्वादितुल्यत्वाद्गोत्वादेरवाच्यत्वापत्तिरशक्यपरिहारेत्याशङ्कते *ननु चेति*। अचेतनेषु तावल्लिङ्गस्यागम्यमानत्वेनाभावाद्वृक्षत्वादिगमकत्वानुपपत्तेस्तद्वशेन वृक्षत्वादिजातीनां वाच्यतापन्नोतुमशक्येत्यव्यापकत्वेन तावच्छङ्कां निरस्यति *नैतदिति* वृक्षादिशब्देभ्यः पुंस्त्वाद्यवगतेरगम्यमानत्वासिद्धिमाशङ्क्य पुंस्त्वादिवाचिदेवदत्तादिशब्दस्वरूपवृक्षादिशब्दसामर्थ्यात्पुंस्त्वादिप्रतीतावपि चेतनेष्विवा

चेतनेषु प्रतिजाति विलक्षणस्य पुंस्त्वादेः प्रत्यक्षेणानुपलम्भाच्छब्दस्य
च पदमभ्यधिकाभावात्स्मारकान्न विशिष्यत इति पदार्थे प्रामाण्यनि-
षेधादभावावगतेर्न वृक्षत्वादिगमकत्वं संभवतीति सूचनार्था विलक्षणो-
क्तिः। चेतनेषु तर्हि प्रतिप्राणिजाति विलक्षणस्य लिङ्गस्य प्रत्यक्षेण प्रतीतेः
शोणादिन्यायेन मनुष्यादिशब्दस्य मनुष्यत्वाद्येकार्थसमवायिस्त्रीलि
ङ्गावान्तरजातिवाचित्वं ब्राह्मण्यादिशब्दानां च ब्राह्मणत्वाद्येकार्थसम-
वायिस्त्रीलिङ्गावान्तरजातिवाचित्वमभ्युपगम्य मनुष्यत्वादिजातीनां
लिङ्गविशेषादेव प्रतीतिसिद्धेरवाच्यत्वापत्तिः परिहर्तुमशक्येत्याश-
९५।१।३ ङ्क्याह *तथेति* यत्रापि चेतने प्रतिजाति विलक्षणं स्वाभाविकं स्त्री-
त्वादि प्रत्यक्षेण प्रतीयते तत्रापि स्त्रीत्वस्य टाबाद्यन्वयसहकृतात्प्राति-
पदिकात्प्रतीयमानत्वेन टाबाद्यन्वयात्प्राक् शुद्धात्प्रातिपदिकात्प्रतीय-
मानाया मनुष्यत्वादिजातेर्वाच्यतावधार्यत इत्यर्थः। स्त्रियां यत्प्रातिप-
कं वर्त्तते तस्मात् टाबादयो भवन्तीति स्मृतेर्लिङ्गस्य प्रातिपदिकमात्र-
वाच्यत्वावसायाज्जातिगमकत्वोपपत्त्या शङ्कां निरस्यन् श्लोकं व्या-
चष्टे *यद्यपीति* स्त्रीत्वस्य टाबाद्यन्वयात्प्राक्प्रतीयमानायां जा-
तावप्रतीतावस्थत्वाज्जातिगमकत्वायोगेपि पुंस्त्वनपुंसकत्वयोष्टाबा-
द्यन्वयानपेक्षान्मनुष्यब्राह्मणादिप्रातिपदिकात्प्रतीतेर्मनुष्यब्राह्मणत्वा-
दिजातिगमकत्वोपपत्तेर्जातीनामवाच्यत्वापत्तिरपरिहार्येत्याशङ्क्य टा-
बाद्यन्वयानपेक्षत्वेपि मनुष्यो मनुष्यं ब्राह्मणो ब्राह्मणमित्यादिविभ-
क्त्यन्वयापेक्षत्वात् पुंस्त्वनपुंसकत्वप्रतीतेर्विभक्त्यन्वयात्प्राक् शुद्धात्प्रा
तिपदिकात्प्रतीयमानाया मनुष्यब्राह्मणत्वादिजातेर्वाच्यत्वावधारणम
तिदिशति *तथा यत्रेति* स्वादिविभक्तेर्लिङ्गविशेषं प्रति वाचकत्वेन-
द्योतकत्वेन वा स्मृत्यभावेपि मनुष्य इत्यादौ विभक्त्यन्वयवेलायां
पुंस्त्वप्रतीतेर्मनुष्यमित्यादौ चाकारान्तान्नपुंसकलिङ्गात्प्रातिपदिका-
त्परयोः स्वमोरतोमित्यमादेशेन स्मृतेन विभक्त्यादेशत्वाद्विभक्तिव्य-
पदिश्येनान्वये नपुंसकत्वप्रतीतेः शुद्धाच्च प्रातिपदिकात्कस्य
चिल्लिङ्गस्याप्रतीतेर्विभक्तेर्वाचकत्वाभावेपि द्योतकत्वनिवारणा न
शक्येति सूचनार्थाभिव्यज्यत इत्युक्तम् ॥ यत्र तर्हि शुद्धात्प्रातिपदि-
काद् लिङ्गविशेषबुद्धिर्भवति तत्र लिङ्गविशेषादेव जातिबुद्धिसिद्धे-
र्जातीनामवाच्यत्वापत्तिरपरिहार्येत्याशङ्क्य परमतेन तावत्परिहार-
माह * यत्र त्विति * हस्तिशब्दस्य पङ्कजादिशब्दवद्योगरूढत्वाद्-
गजत्वजातिविषयत्वेपि हस्तशब्दवाच्यशुण्डायोगेनावयवार्थप्रत्य-

भिज्ञानात्तत्तिरस्कारेणाश्वकर्णादिवज्जातिवाचित्वानुपपत्तेर्नृशब्दस्य पुमांशो वै नरः स्त्रियो नार्य इति लिङ्गदर्शनात्पुंशब्दवत्पुंस्त्ववाचित्वावगतेर्देवदत्तशब्दस्य च संकेतितव्यक्तिविशेषवाचित्वाद्धस्त्यादिशब्देषु जातीनां वाच्यत्वनिषेधाभ्युपगमेऽपि नानिष्टापत्तिलक्षणो विरोधः अचादिषु त्वचेतनत्वेन वृक्षादिवद्वास्तवलिङ्गाभावाद्वास्तवस्य च शब्दसामर्थ्यात्प्रतीतस्यारोपितत्वेन वाऽस्यारोपितधूमवज्जातिगमकत्वायोगाद् लिङ्गवाचित्वाभ्युपगमेऽपि जातीनां वाच्यत्वनिषेधायोगान्नानिष्टापत्तिलक्षणो विरोध इत्यर्थः। शीतोयशब्दयोर्विभक्तिसद्भावाच्छुद्धस्य प्रातिपदिकस्य लिङ्गविशेषबुद्धिहेतुत्वासिद्धिमाशङ्क्य शरद्धारिशब्दवन्नियतस्त्रीनपुंसकलिङ्गत्वाद्विभक्त्यनपेक्षायां प्रागेवस्यनेनोक्तायां हस्त्यादिशब्दानां तदनियतलिङ्गत्वाद्दैर्घ्यं च विना नृहस्तिशब्दाभ्यां पुंस्त्वप्रतीतेर्दैर्घ्यस्य च नृशब्देऽनङ् सावित्यधिकृत्य ऋदुशनस्पुरुदंसोनेहसांचेत्यनङादेशे सुविभक्तिनिमित्ते सति नकारान्तत्वान्नोपधाया इत्यधिकृत्य सर्वनामस्थाने चासम्बुद्धाविति सर्वनामस्थानाख्यसुविभक्तिनिमित्तत्वस्मृतेर्हस्तिशब्देऽप्यत इनिठनाविति नप्रत्ययान्तत्वादिन्हन्पूषार्यम्णांशावित्यधिकृत्य सौ चेति सुविभक्तावेव परभूतायां स्मृतेः शुद्धस्य प्रातिपदिकस्य लिङ्गविशेषबुद्धिहेतुत्वायोग इत्याशङ्क्यान्वाख्यानमात्रार्थं विभक्तिनिमित्तदैर्घ्यस्मृतावपि हल्ङ्याब्भ्य इति सूत्रेण सुविभक्तिलोपस्मृतेः प्रत्ययलोपे च क्विबन्तवत्प्रत्ययार्थस्यापि प्रातिपदिकमात्रावाच्यत्वाभ्युपगमाच्छुद्धस्य प्रातिपदिकस्य लिङ्गविशेषबुद्धिहेतुत्वोपपत्तेः सूचनार्थं तन्निवृत्तावित्युक्तम्। देवदत्तशब्दस्यानियतलिङ्गत्वात्सम्बोधनप्रयोगे च विभक्तिनिवृत्तौ पुंनपुंसकत्वसंदेहोत्पत्तेः शुद्धस्य प्रातिपदिकस्य लिङ्गविशेषबुद्धिहेतुत्वायोगमाशङ्क्य संकेताल्लिङ्गविशेषबुद्धिहेतुत्वोपपत्तिसूचनार्थो वशब्दः॥ हस्तिशब्दान्वाख्यानार्थं शुण्डायां हस्तशब्दोपचारेऽप्यनेकार्थत्वस्यान्याय्यत्वेन मुख्यवृत्त्या शुण्डायां हस्तशब्दवाच्यत्वाभावादवयवार्थप्रत्यभिज्ञानाभावेन हस्तिशब्दस्य जातिवाचित्वापह्नवायोगान्नृशब्दस्य च ङीबन्तत्वापन्नस्य नारीशब्दत्वापन्नस्य स्त्रियां प्रयोगाच्छुद्धस्य चेदं नृनपुंसकमिति नपुंसकेऽपि प्रयोगान्मनुष्यत्वातिरिक्ते च जात्यन्तरे क्वचिदप्रयोगान्मनुष्यत्वजातिमात्रवाचित्वावगतेरेवमनिष्टापत्तिपरिहारापरितोषात्स्वमतेन यद्यपि नृहस्तिशब्दयोर्दीर्घत्वापादिका द्वितीया मात्राविभक्तिस्थानीयत्वात्पुंस्त्ववाचिना प्राचीनं शा-

द्रूपं जातिवाचीति विभागोऽर्थद्वयप्रत्ययात् प्राङ्नायते तथाप्यर्थ-द्वयप्रतीतौ क्रमेणोत्पद्यमानाया मात्राया विच्छेदोच्चारणाशक्तेर्ज्ञा-यते वा विधिस्तत्र व्यञ्जनान्तो न तूच्यत इति वक्ष्यमाणस्यापि शब्द विभागस्य सर्वस्वसंवेद्यत्वात्प्राचीनेन शब्दभागेन जातिं प्राक्प्रतिप-द्यते द्वितीयेन पुंस्त्वं पश्चादिति ज्ञानान्न शुद्धान्नृहस्तिप्रातिपदिका-ल्लिङ्गविशेषबुद्धिर्भवतीत्यन्यथानिष्टापत्तिं परिहरति * अथवेति * प्रतिजाति च लिङ्गवैलक्षण्यस्य संस्थानपरिमाणवैलक्षण्यातिरिक्त-स्यानुपलब्धेः पुंस्त्वादिलिङ्गावान्तरजातिसद्भावे प्रमाणाभावेन कस्य चिच्छब्दस्य तद्वाचित्वायोगात्संस्थानपरिमाणे वैलक्षण्यात्मकस्य लिङ्गवैलक्षण्यस्य प्रतिलिङ्गव्यक्ति भिन्नत्वेनैकमुपलक्षणं विनैकशब्द-वाच्यत्वायोगान्मनुष्यत्वादिजातिव्यतिरिक्तस्य चैकस्योपलक्षणस्या-प्रतीतेर्जातेश्च साक्षाद्व्यक्तिधर्मभूतपुंस्त्वादिलिङ्गविशेषोपलक्षणत्वा-योगान्मनुष्यजातीयव्यक्तिगतः पुंस्त्वादिलिङ्गविशेषो मनुष्य-शब्दवाच्यो ब्राह्मणादिजातीयव्यक्तिगतो ब्राह्मणादिशब्दवाच्य इति व्यक्तिद्वारा जात्युपलक्षितस्यैव लिङ्गविशेषस्य वाच्यत्वावगतेरपि जातिं प्रथमतरं प्रतिपद्यते इत्याह *किं चेति* एवं च सति यद्यव-श्यमेकस्यैवार्थस्य वाच्यत्वमभ्युपेत्यार्थान्तरस्य गम्यताऽभ्युपेतव्या ततो वरं लिङ्गस्यैव गम्यतास्तु न तु जातेरित्याह *तेनेति* अङ्गगु-णविरोधन्यायविरोधादपि लिङ्गस्य वाच्यतामभ्युपेत्य जातेर्वाच्यत्व निरासो न युक्त इत्याह *नित्यं चेति * गोशब्दस्य द्विलिङ्गत्वात्प-शुशब्दस्य च नियतलिङ्गत्वेन स्त्रियामपि पुंलिङ्गस्यैव प्रयोगात्तयो-रादिशब्दोक्तेषु च दारमक्षिकादिशब्देषु नियतपुंस्त्रीलिङ्गेषु लिङ्गवि-शेषानभिव्यक्तेः शोणादितुल्यता शङ्कितुमेव न शक्येत्याह *न चेति* लिङ्गस्यावाच्यत्वे कथं प्रतीतिरित्यपेक्षायामाह * सेति * लिङ्गवि-शेषाव्यभिचारिण्याः कस्याश्चिदपि जातेरभावाद्यत्र चेतने वर्त्तमाना मनुष्यत्वादिजातिर्यत्र सामान्यांशे लिङ्गं न व्यभिचरिष्यति तत्र गमयिष्यति यत्र त्वचेतने वर्त्तमानायाः खट्वात्वादिजातेर्यत्र वा विशेषांशे मनुष्यत्वादिजातेर्व्यभिचारे सत्यन्यतष्टाबादेस्तस्माच्छसो नः पुंसि न पुंसकाज्जस्शसोः शिरित्यादिविहितानत्वशित्वादिविभ क्तिविकारविशेषाद्वा स्त्रीत्वादिलिङ्गविशेषः प्रत्येष्यते ॥ तत्र तदेव टाबादि नत्वादि वा खट्वादावचेतने गमकमारोपकं चेतने वा वा-स्तवलिङ्गविशेषवाचकं टाबादेर्वाचकत्वाभावे वा स्त्रीत्वादिलिङ्ग-

व्यक्तिस्था जातिः प्रातिपदिकेनोक्तेत्येवं तेन टाबादिना प्रातिपदिकेन जात्यभिधानादनु पश्चाद्गृहीता द्योतिता सती जातिः प्रातिपदिकं वा तथाविधजातिवाचित्वेन द्योतितं सदचेतने गमकमारोपक चेतने जातिर्लक्षिका प्रातिपदिकं वास्तवलिङ्गविशेषवाचकमिति गमकविशेषचर्चोपयोगाभावाद्यथेष्ट कल्पत इत्येवं व्याख्येयम्। टाबाद्यवगत स्त्रीत्वादिविशेषान्यथानुपपत्त्यैव लिङ्गसामान्यावगतिसिद्धेः संभावनामात्रेण जातेर्लिङ्गसामान्यगमकतोक्तेति सूचनार्थो गमयिष्यत्यपि शब्दः॥ गवादिशब्देष्वेकत्वादिसंख्यावान्तरजात्यभिधानात्पुंस्त्वादिलिङ्गावान्तरजात्यभिधानाद्वा शोणादिशब्दतुल्यत्वाशङ्कायां अथ यदुक्तमित्यादिवार्तिकेनोपन्यासपूर्वं कृतं निरासमुपसंहरति*तस्मादिति *। गवादिप्रातिपदिकानामेकवचनाद्यनुगृहीतानामेकत्वाद्यवान्तरजातिवाचित्वेन गोत्वादिजात्यनभिधायितया शोणादितुल्यत्वस्य गवादिद्रव्यसंख्याया अवान्तरजातिभेदाभावादयोगेपि बहुषु बहुवचनं द्व्येकयोर्द्विवचनैकवचने इति सूत्रयोः कर्माणि चेत्येनदेकवाक्यतया कर्त्रादिकारकगतसंख्योक्त्यभ्युपगमस्य विशेषणमनुक्त्वा विशिष्टोक्त्यशक्तेर्विरम्य व्यापारापादकविशिष्टोक्तिविषयत्वायोगात्कर्तृत्वाद्येकार्थसमवाय्येकत्वाद्यवान्तरजात्युक्तिविषयत्वावगतेस्तदन्यथानुपपत्त्या कारकेष्वेकत्वाद्यवान्तरजातिसद्भावावगमात्सिद्धः शोणादितुल्यत्वोपपत्तिमाशङ्क्य द्रव्यवत्कारकेष्येकत्वादिवैलक्षण्यानुपलम्भेनैकत्वाद्यवान्तरजात्यभ्युपगमायोगादवान्तरजात्यभावेपि च कारकविशेषोक्तेर्विस्तरेणोपपादितत्वात्सिद्ध्यपि शोणादितुल्यत्वायोगमतिदिशति*पचत्यादीति* शोणादितुल्यत्वाभ्युपगमेपि सिद्धान्तसिद्धि- ९५२।१
स्तावतापीत्यनेनोक्ता। न शोणत्वादिवत्संख्याजातिभेदेषु भिद्यत इति वार्तिकोक्तेनैकत्वादिवैलक्षण्यानुपलम्भन्यायेन द्रव्यवत्कारकेष्वप्येकत्वाद्यवान्तरजात्ययोगेभिहितेऽनुपलभ्यमानानामप्येकत्वाद्यवान्तरजातिभेदानां कर्त्रादिकारकगतसंख्योक्त्यभ्युपगमान्यथानुपपत्त्या कल्पनाशङ्का प्रतिवस्तु चेत्यनेन कल्पनागौरवापत्त्या निरस्ता। शोणादितुल्यत्वनिरासस्य यदा क्रियाऽनुष्ठातव्या प्रतीयते तदार्थात्कारकव्यापारो गम्यत इति भाष्योपपादनार्थत्वसूचनार्थं भावनाधात्वर्थाभ्यां कर्त्रुपादानोक्तिः॥ यदा चैकत्वादेर्नावान्तरजातिभेदोस्ति तदैकत्वादेः कर्त्रैकान्तिकत्वाभावान्न संख्यया कर्त्रुपादानं संभवतीत्येवकारार्थः॥ एकत्वादेः कर्तृत्वैकार्थसमवाय्यवान्तरजात्यभ्युपगमेन कर्त्राक्षेपश-

किमभ्युपेत्यान्यतः सिद्धे कर्त्तर्यनायासेन परिच्छेदकत्वोपपत्तौ स्वयं कर्त्राक्षेपतत्परिच्छेदाख्यव्यापारद्वयक्लेशाभ्युपगमो न युक्त इत्याह *किं चेति* श्लोकं व्याचष्टे *यदीति* भावनया सर्वकारकोपस्थापनात्कर्तृनियमसिद्ध्यै स्वयमाक्षेपमाशङ्क्य समर्थनीय एव चैषोऽर्थः संख्यासम्बन्धे कर्त्तुरसाधारणतासिद्ध्यर्थमित्यादिना कर्त्तुः कारकान्तरेभ्यो विशेषस्योक्तत्वान्नियमोपपत्तिमाह * भावनेति * कर्त्तुर्भावनयोपस्थानसम्भवेऽपि संख्यान्वयनियमार्थानुपपत्त्या वाच्यत्वशङ्कानिरासार्थत्वेन यश्चार्थादितिभाष्यावयवं व्याख्यातुमाह *तस्मादिति* यद्यप्यनभिधेयस्तथापि कर्त्तुरेव संख्यां प्रतिविशेषणत्वस्य विशेष्यत्वस्य वा सिद्धेरित्यर्थः ॥ कर्त्तुरश्रौतत्वेऽपि समानपदोपात्तभावनालक्षितत्वेन प्रकृतात् क्रतोः प्रत्यासन्नतरतया धात्वर्थं प्रति शेषित्वसिद्धेरनृतोक्तिनिषेधस्य पुरुषार्थत्वनिरासेन क्रत्वर्थत्वसिद्ध्यै कर्त्तुर्वाच्यत्वनिरासोऽनर्थक इत्याशङ्कानिरासार्थं यश्च न श्रौतं इति भाष्यं वक्ष्यमाणः पुनरादित एव नैष शास्त्रेणोक्त इत्येवं तावत्प्रतीयते नच तेनानुक्त आदर्त्तव्यो भवतीति वाच्यावाच्यचिन्ताप्रयोजनवार्त्तिकालोचनेनाश्रौतत्वे कर्त्तुर्निष्पादकत्वेन तल्लक्षणायामाख्यातशब्दस्य व्यापारानिष्पादकांशे तात्पर्यवृत्त्या शाब्दत्वाच्छाब्दधात्वर्थभावनान्वयोपपत्तावपि शेषित्वेन लक्षणाभावाच्छेषित्वांशे शब्दतात्पर्याभावनाशाब्दत्वाद् धात्वर्थभावनान्वयायोगसूचनार्थस्य वाक्यशब्दस्य शास्त्रवाचित्वावगतेरश्रौतस्य शास्त्रापरिगृहीतत्वेनानादरणीयत्वात्प्रकरणबाधकत्वं न संभवतीत्येवमर्थतया स्पष्टत्वान्न व्याख्यातम् ॥ आहेत्याशङ्काभाष्यं यदा क्रियानुष्ठातव्येत्यादिभाष्योक्तेन न्यायेन कर्त्तुरवाच्यत्वावधारणादयुक्तमाशङ्क्य न्यायस्यागमविरोधोक्त्यर्थत्वेनोपपादयितुमाह * एवमिति * भाष्योदाहृतागमापरितोषात्स्वयं तावदन्यमागममुदाहरति * तथा हीति * लः कर्मणिच भावे चाकर्मकेभ्य इतिसूत्रावयवेन लः कर्मणि चेत्यनेन योगविभागात्सूत्रेण तिङर्थौ कर्तृकर्मणी इत्युक्ते सूत्रे कर्तृपदाभावात्कथमनेन कर्तुस्तिङर्थतेत्याशङ्कायां कर्त्तरि कृदित्येतत्कर्त्तरीत्यनुकर्षणार्थाच्चकारात्कर्त्तरि च लकारा भवन्तीति प्रतीतेरित्येवं निरस्तायां तथापि लकारार्थौ स्यातां न तिङर्थावित्याशङ्क्य स्थानिन्यर्थादेशतमादेशार्थमित्यादेशस्य स्थानिवद्भावविधानात्स्थानिनि लकारार्थकथनमादेशस्यार्थज्ञानार्थमिति प्रतीतेरित्युक्तम् ॥ एत-

च्छ्लोकोक्तेन लः कर्म्मणि चेति सूत्रार्थेनैव तद्यागमविरोधदर्शनसिद्धेः प्रकृतिप्रत्ययावित्युदाहरणं कर्तृकर्मणोस्तिङर्थत्वानभिधायित्वान्नागमविरोधोदाहरणत्वेन संगच्छत इत्याशङ्कते * ननु चेति * यद्वैतदविशेषेण स्थितं क्रमवशादुभौ प्रत्ययार्थं सह ब्रूतः प्रकृतिप्रत्ययावितीतिवार्त्तिकोक्तेन न्यायेन कर्तुः प्राधान्यस्यापि वाच्यत्वघदागमिकतया दर्शनीयत्वान्नासम्बद्धमिति परिहरति * कथमिति * एवमपि प्राधान्योक्त्यशक्तेरिदं भाष्यमयुक्तमाशङ्क्य प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोः प्रत्ययार्थं प्राधान्येनेत्याचार्याणां प्रत्ययार्थप्राधान्योपदेशात्कर्त्ता शब्दार्थः कर्म चेति चाऽऽचार्याणां कर्तृकर्मणोः प्रत्ययार्थत्वोपदेशात्तस्य पुरुषसम्बन्धः श्रुत्यैव कर्मसम्बन्ध प्रकरणाच्छ्रुतिश्च प्रकरणाद्बलीयसीति यत्पूर्वपक्षेऽभिहितं तद्गम्यते युक्तं भवतीत्येवं व्याख्यातुमाह * तदिति * यस्मात्प्राधान्यमपिशब्दादभिधानं च दर्शयितव्यं तस्मादुभयमप्येतद्ग्रन्थः स्मृतिसिद्धं दर्शयति तस्मिन्नर्थे तदित्यव्ययमङ्गीकृत्य व्याख्येयम् ॥ ततश्चैष भाष्यार्थो भवतीत्याह * यस्मादिति * कोऽसौ कर्तृकर्मणोः शब्दार्थत्वोपदेश इत्यपेक्षायां कर्त्तरीत्युपदेशोदाहरणभाष्यं ननु कर्त्तरि कर्माणि च लकारः श्रूयत इति वक्ष्यमाणभाष्याल्लः कर्म्मणि चेत्यस्योदाहरणीयत्वप्रतीतेस्तद्विरुद्धमाशङ्क्य लः कर्मणि चेत्यत्र कर्तृकर्मवाचिपरशब्दाभावेन परसप्तमीत्वायोगाद्वाच्यसप्तमीत्वावगतेस्तदेवोदाहरणीयं भाष्ये तु कर्त्तरि शबिति सूत्रे कर्तृशब्दस्याशब्दस्याशब्दवाचित्वेन सार्वधातुके यगिति पूर्वसूत्रस्थेन सार्वधातुकशब्देनानुवर्त्तमानेनापि सामानाधिकरण्यायोगाल्लः कर्मणिचेति सूत्रविरोधात्कर्त्तरि वाच्ये शबितिव्याख्यानायोगेपि कर्त्तरि वाच्यं यत्सार्वधातुकं तस्मिञ्छबित्यवयवः प्रयोक्तव्य इत्येकैर्व्याख्यानादन्यैस्तु तस्मिन्निति निर्दिष्टे पूर्वस्येति सूत्रपरिभाषितपरसप्तमीत्वसम्भवे क्लिष्टव्याख्यापादकवाच्यसप्तमीत्वायोगं मत्वा कर्तृशब्दस्यानर्थक्यतदङ्गन्यायेन कर्तृवाचिशब्दवाचित्वमङ्गीकृत्य सार्वधातुकशब्दसामानाधिकरण्येन व्याख्यानात्पक्षद्वयेपि कर्तुः सार्वधातुकाख्यप्रत्ययार्थत्वद्योतकत्वेन कर्त्तरि शबिति सूत्रमुदाहृतमिति सूचयितुमाह * तत्रेति * अनेन च सार्वधातुके यगितिसूत्रेपि चिण् भावकर्म्मणोरिति पूर्वसूत्रस्थस्य भावकर्मशब्दस्यानुवर्त्तमानस्य भावकर्मणोर्वाच्ययोर्यत्सार्वधातुकं तस्मिन् यगित्यवयवः प्रयोक्तव्य इत्येकेषां ६५३१।

भावकर्मवाचिनि सार्वधातुके परत्रावस्थिते यगित्यन्येषां व्याख्या सूचिता सार्वधातुके यगिति सूत्रे च भावकर्मणोरिति शब्दद्वयानुवृत्तावपि प्रकृतानुपयोगाद्भावशब्दानुवृत्तिमुपेक्ष्य कर्मशब्दमात्रानुवृत्तिप्रदर्शनार्थं कर्मणि यगित्युदाहरणं भाष्याकृतोक्तं न त्वेतत्सूत्रमिति लः कर्मणीति सूत्रावयवे सूत्रोक्त्या कर्मणः प्रत्ययार्थत्वोक्त्यै सूत्रमेतदेव न तु कर्मणि यगितीदृक्सूत्रमस्तीत्येवं परिसंख्यारूपेण सूचितत्वात्कर्मणीति भाष्यावयवो न व्याख्यातः तस्मादित्याशङ्कोपसंहारभाष्यं व्याचष्टे * तस्मादिति * उच्यत इति परिहारभाष्यं व्याचष्टे * तदिति * श्लोकं व्याचष्टे * तत्र नामेति * गौणलाक्षणिकयोरपि स्वाभाविकार्थपरत्वाख्यसाधुत्वसद्भावात्र साध्वसाधुविवेकविषयत्वाद्याकरणस्य वाचकावाचकविवेकविषयत्वापत्त्या वाच्यावाच्यविवेकविषयत्वापत्तिः॥ आगमस्य न्यायविषये तात्पर्याभावात्तद्विषयत्वाभावेपि न्यायविरुद्धार्थाभिधायित्वात्तद्बाधकत्वं भविष्यतीत्याशङ्क्य तात्पर्यं विनाऽऽगमस्य प्रामाण्याभावाद्बाधकत्वायोगमाह * न चेति* न्यायस्य वाच्यगम्यमानविषयत्वेन सर्वस्वसंवेद्यत्वादतद्विषयत्वानिमित्ते दौर्बल्ये निरस्तेप्यनन्यलभ्योर्थो वाच्योन्यलभ्यो गम्य इति न्यायस्य सामान्यविषयत्वात्कर्त्तान्यलभ्योपि वाच्य इति विशेषविषयेणागमेन बाधोपपत्तिमाशङ्क्य सामान्यविषयस्यापि न्यायस्य न्यायापेक्षत्वेन मन्थरात्पौरुषेयागमाच्छीघ्रं प्रवृतेः प्रत्यक्षस्येवानुमानादिना बाधायोगसूचनार्थं प्रत्यक्षवदित्युक्तम् ॥ आचार्याणामाप्तत्वावधारणात्तद्वाक्यानामप्रामाण्यायोगमाशङ्क्याप्तवाक्यस्यापि स्तुत्याद्यर्थस्य स्वरूपार्थे प्रामाण्यादर्शनात्तात्पर्यशून्यार्थे प्रामाण्यायोगमाह *तेनेति* अभ्युपेत्यवादत्वं चास्य परिहारस्य द्योतयितुं यद्यपि तावदित्युक्तम्। अपि चेति वास्तवपरिहारभाष्यं व्याचष्टे*ते त्विति* लः कर्म्मणि चेति प्रत्यक्षाचार्योक्तिश्रुतेस्तदपवादायोगशङ्कार्थं नन्विति भाष्यं व्याचष्टे *नन्विति* । नासावित्यादिनत्रापरं वचनमित्यन्तं परिहारभाष्यं तात्पर्यतो व्याचष्टे *सत्यमिति* एकदेशालोचनमात्रेण शास्त्रविरोधोद्भावनस्याशक्यत्वं प्रश्नपूर्वमुपपादयति *कुतइति* स्वैरात्मीयैरेकदेशान्तरैः सहैकवाक्यभूतानि सन्ति युक्तं संपूर्णमुपदेशं कुर्वन्तीतीत्थंभूतलक्षणार्थामेकवाक्यतयेति तृतीयामङ्गीकृत्य व्याख्येयम् । ततश्चैकदेशस्यापरिपूर्णत्वेनाप्रामाण्यात्तद्विरोधो

नोद्भावनीय इत्याशयः। न केवलमेकदेशस्याप्रामाण्यात्तद्विरोधो नो-
द्भावनीयः किं त्वनिष्टापत्तेरपीत्याह *यदीति* यदि चेति चकारो-
ऽध्याहार्यः। सुरा पातव्येत्येतावतो वाक्यत्वाभावेनाशास्त्रत्वात्तद्विरो-
धायोगेपि लः कर्मणि चेत्येतावतः स्वार्थबोधात्समासानामङ्गाङ्गित्वा-
द्यपेक्षया। वाक्यानामेकवाक्यत्वं पुनः संहत्य जायत इत्यनेन न्यायेन
वाक्यान्तरैकवाक्यत्वेपि वाक्यत्वसद्भावात्तद्विरोधोद्भावनोपपत्तिमा-
शङ्क्योत्सर्गरूपस्याग्निहोत्रादिवाक्यस्य दीक्षितो न ददाति न जुहोति
न पचतीत्याद्यपवादादिरूपवाक्यान्तरैकवाक्यत्वेपि केवलस्य शास्त्र-
त्वानपन्हवात्तद्विरोधापत्तिरित्यनिष्टापत्युदाहरणान्तरमाह *तथेति*
व्याकरणेपि क्ङिति चेत्यपवादरूपवाक्यान्तरैकवाक्यत्वानपेक्षोत्सर्ग-
रूपगुणवाक्यमात्रालोचनेऽनिष्टापत्तिः स्यादित्याह *व्याकरणेपीति* ६५४।२
एकदेशालोचनमात्रेण शास्त्रविरोधोद्भावनायोगमुपपादितमुपसंहर-
ति *तस्मादिति*। सर्वाण्येव हि शास्त्राणीति श्लोकोपक्षिप्तमेकदेश-
स्यापरिपूर्णत्वेनाप्रामाण्यं वृद्धश्लोकेन द्रढयति *आह चेति* सम-
स्तां शास्त्रावयवोपसंहार्तिं विना तात्पर्यानवधारणादनवधारिततात्प
र्यानवधारणादनवधारिततात्पर्यस्य च शब्दस्य प्रामाण्याहेज्ञेयपरिच्छे
दकाविज्ञानानुत्पादकत्वादपरिपूर्णेन शास्त्रैकदेशेनातात्त्विकोऽर्थः प्रती
येत समस्तावयवोपसंहृतौ सत्यां परिपूर्णेन शास्त्रेण तात्त्विक इत्यर्थः।
व्याकरणे तु विशेषतो नैकदेशेन तात्त्विकोर्थः प्रतीयते इत्याह *वि-
शेषेण त्विति* विशेषहेतुमाह *तत्र हीति*। अतो लः कर्मणि चेत्याग-
मस्यैकदेशान्तरैः पूर्णस्य योर्थस्तद्विरोधः कर्त्रनभिधानन्यायं बाधेत
न चासावस्तीत्याशयत्वेन भाष्यव्याख्यामुपसंहरति *तेनेति* किय
द्भिरेकदेशान्तरैर्लः कर्मणीति प्रत्ययविधिः परिपूर्णो भवतीत्यपेक्षाया-
माह *इह चेति* प्रत्ययकार्यपरत्वादिसिद्धये प्रत्ययसंज्ञाधिकारकसू-
त्रं स्थाननियमार्थं परत्वसूत्रं सामान्यविशेषाभ्यां स्वरनियमायाद्यु-
दात्तानुदात्तसूत्रे प्रकृतिसूचनार्थं धातुसूत्रं माङि लुङित्यादौ लकार-
स्योपपदविशेषं निमित्तीकृत्य विधानात्तृतीये धात्वधिकारे सप्तमीनि-
र्दिष्टस्योपपदसंज्ञासूत्रं लकारविधेर्वचनसूत्रैकवाक्यत्वाभ्युपगमे लका-
रादेशत्वात्तिङामिव शतृशानजादीनामपि संख्यावाचित्वशङ्का शत्रा-
दीनां कृत्संज्ञाविधायकलकारार्थमनपेक्ष्य स्वातन्त्र्येण कर्तृरूपार्थविधौ
तिङामिव कृतां वचनसंज्ञाभावेन वचनसूत्रैकवाक्यत्वायोगान्निवर्त-

यितुं प्रसङ्गात्कृत्संज्ञासूत्रं पठितम् । विशेषविहितानां प्रत्ययानां नित्यं सामान्यविहितप्रत्ययबाधकत्वे प्राप्ते तृतीयधात्वधिकारविहितानामसरूपाणामस्त्रीविषयाणां च पाक्षिकबाधकत्वोक्त्यै वासरूपसूत्रे लकारविशेषस्यार्थविशेषविध्युपलक्षणार्थं वर्त्तमानसूत्रं लकाराणामर्थविधौ कर्त्तरीत्यनुवृत्तिसिद्ध्यै कृत्सूत्रपाठः । सर्वकर्मकाकर्मकधातुपराणां लकाराणां व्यवस्थायार्थविध्यर्थं लसूत्रं लकारस्यादेशद्वारा वाचकत्वोक्त्यै लस्येति सूत्रं तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङित्यादेशसूत्रं तिबाद्युक्त्या लक्षितम् ॥ आत्मनेपदसंज्ञका लकारादेशाः केभ्यो धातुभ्यः कस्मिन् वा विषये भवन्तीत्यपेक्षितं नुदात्तेभ्यो ङकारेभ्यो वाऽऽदिशब्दाद्भावकर्मादिविषयेऽन्येभ्योऽपि धातुभ्य इत्युक्त्यर्थान्यनुदात्तङित आत्मनेपदमित्यादीनि ।[१सर्वाणि सूत्रलक्षितानि परस्मैपदसंज्ञकानां लकारादेशानां धातुविषयोविवेकोक्त्यर्थानि]शेषसूत्रप्रभृतीनि सर्वाणि सूत्राणि शेषसूत्रपाठेनोपलक्षितानि । मध्यमोत्तमप्रथमपुरुषसंज्ञकानां लकारादेशानां विषयविवेकोक्त्यर्थानि युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः, प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च, अस्मद्युत्तमः, शेषे प्रथम, इति चत्वारि सूत्राणि युष्मदित्यनेन लक्षितानि नवसु परस्मैपदेषु नवसु चात्मनेपदेषु मध्ये त्रयाणामाद्यानां प्रथमसंज्ञां, मध्यमानां मध्यमसंज्ञा, मन्त्यानामुत्तमसंज्ञां, विधातुं तिङ्सूत्रं, मेकैकस्य क्रमेणैकवचनादिसंज्ञाविध्यर्थं तानीतिसूत्र वाच्यसंख्याविशेषोक्त्यै बहुद्विसूत्रे, इत्येतावता लकाराख्यप्रत्ययविधिः परिपूर्यत इतीतिकरणान्वयः । ततश्चैतावतामेकवाक्यत्वान्न लः कर्मणि चेत्येतावन्मात्रालोचनेन विरोधोद्भावनं युक्तमित्याशयः । अस्माद्धातोरेतदुपसर्गाद्यन्वितादेतदर्थवाचिनोऽयं प्रत्ययो भवतीत्यनेन रूपेण प्रत्ययविधावेतावता पूर्णोऽपि कीदृगसौ प्रयोज्य इति प्रयोक्तव्यप्रत्ययरूपविधेर्लोपादिसूत्रापेक्षत्वाल्लोपादेश्चेत्संज्ञादिसूत्रापेक्षत्वात्तेषामपि प्रत्ययविध्येकवाक्यत्वावगतेः पूर्वोदाहृतसूत्रैकवाक्यता निःसंदिग्धैवेत्याह ,* पराणि चेति * उपदेशेऽजनुनासिक इत्यादीनि संज्ञारूपेणाऽऽद्यन्तौ टकिताविल्यादीनि परिभाषारूपेणादिशब्दाद्व्यत्ययो बहुलमित्यादीनि बाहुलकरूपेण प्रवर्त्तमानानि शास्त्राणि तस्य लोप

---

१ इति द्वितीयपुस्तके नास्ति ।

इत्यादीनि लोपशास्त्राणि लिङः सीयुडित्यादीन्यागमशास्त्राणि से-
ऽपिचेत्यादीनि वर्णविकारशास्त्राण्यादिशब्दात्कृते राद्यन्तविप-
र्ययश्चेत्यादीनि वर्णविपर्ययशास्त्राणि। तत्रैवमित्यादि कर्माणि चे-
त्यन्त भाष्यमुपपादयितु सामान्यन्यायं तावदाह*एकवाक्यता चेति*
एकेषां सामानाधिकरण्येन विशेषणविशेष्यभावः केषां वैयधिकर-
ण्येनेत्यपेक्षायां समानविभक्त्यन्तानां सामानाधिकरण्येनेति, वि-
शेषणेनार्थाद्भिन्नविभक्त्यन्तानां वैयधिकरण्येनेति सूचितम्। वैयधि-
करण्येऽत्यन्तभिन्नार्थत्वाद्विशेषणविशेष्यत्वायोगमाशङ्क्यात्यन्तभिन्नस्य
विशेष्ये स्वानुरूपबुद्धिजनकत्वाख्यविशेषणत्वायोगेऽपि कारकानव-
च्छिन्नायाः क्रियायाः शेषानवच्छिन्नस्य च शेषित्वस्य निरूपणाशक्तेः
क्रियाकारकयोः शेषिणोश्चावच्छेद्यावच्छेदकत्वाख्यविशेषणविशेष्य-
त्वोपपत्तिसूचनार्थं वैयधिकरण्येन विशेषणविशेष्यभावस्य द्वैरूप्यो-
क्ति। विशेषणविशेष्यत्वं विनैकवाक्यत्वासिद्धौ सामान्यविभक्त्यन्ता-
नां च सामानाधिकरण्येन विशेषणविशेष्यत्वे सर्वेषामेकवाक्यत्वेना-
भिमतत्वात्समानविशेषणविशेष्यत्वसामानाधिकरण्ययोर्वाच्यत्वापत्ते-
र्न्यूनत्वं भाष्यस्याशङ्क्याह * तदिहेति * तत्र नैवं भवतीति प्रति-
पक्षनिरासार्थेन भाष्यावयवेन युक्तायुक्तचिन्ता हृदि कृतेति सूच-
नायोच्यत इति वाच्ये चिन्त्यत इत्युक्तम्। बह्वादिशब्दानां संख्या-
विशिष्टसंख्येयवाचित्वादेकत्वविशिष्टे कर्त्तरि द्वित्वविशिष्टयोः क-
र्त्रोर्बहुत्वविशिष्टेषु कर्तृष्विति सामानाधिकरण्येन विशेषणविशेष्य-
त्वैकवाक्यत्वेऽपि कर्त्तरि लकारश्रुतिरापद्येतेत्याशङ्कानिरासार्थं बह्वा-
दिशब्दानां संख्यामात्रवाचितां विस्तारेणोपपादयितुमारभते * तत्र ६।५।१
तावदिति * महाभाष्येऽपि प्रश्नपूर्वं संख्येयवाचित्वमुपक्रम्य शब्देषु
बहुषु वचनमित्युच्यमाने वृक्षा इत्येकशेषे शब्दैक्याद्बहुवचनं न
प्राप्नोति प्रातिपदिकार्थेष्वित्युच्यमाने वैयाकरणपक्षे जात्यभावाद-
वयवातिरिक्तावयव्यभावाच्चावयवानामेव वृक्षादिप्रातिपदिका-
र्थत्वात्तद्बहुत्वात्सर्वत्र बहुवचनं प्राप्नोति विभक्त्यर्थपक्षेऽपि क-
र्मादीनामेकत्वादिविशेषणत्वेनोपादानाद्विभक्त्यर्थत्वानुपपत्तेरयुक्त-
मिति संख्येयपक्षे दोषाभिधानात्संख्यावाचिताऽवधारितेत्याह* पा-
तञ्जलेऽपि चेति * न केवलं पक्षान्तरेषु दोषाभिधानान्महाभाष्ये
संख्यावाचित्वावधारणं गम्यते किन्त्वेकत्वादिष्वपि विभक्त्यर्थेष्व-
वश्यं कर्मादयो निमित्तत्वेनोपादेयाः कर्मण एकत्वे कर्मणो द्वित्वे

कर्मणा बहुत्व इत्युत्तरभाष्ये बह्वादिशब्दविकरणादपीत्याह * बहुत्व इति * स तर्हि तथा निर्देशः कर्त्तव्यो न ह्यन्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देश इत्याशङ्कां चान्तरेणापि भावप्रत्यय गुणप्रधानो भवति निर्देश इति [[1]भाष्येण निरस्यति*कथमिति*पृष्टे यदा गुणिना गुणो व्यपदिश्यते पटस्य शुक्ल इति स्वप्रधानस्तदा गुणो न भवति द्रव्ये षष्ठ्यन्तरस्यापि भावप्रत्ययं गुणप्रधानो भवति निर्देश इति] व्युत्पादनादपि महाभाष्ये सख्यावाचित्वावधारणं गम्यत इति सूचयितुमाह * कथमिति * कथं व्याकृतमित्यपेक्षायामिह कदाचिद् गुणो गुणिविशेषको भवति तद्यथा पटः शुक्ल इत्यादिसमस्तं महाभाष्यं व्याख्यातुं गुणविवक्षायास्त्रैविध्यं तावदाह *तथा हीति* तत्राद्यायां विधायां गुणशब्दस्य द्रव्यशब्दसामानाधिकरण्याभावेन प्रागेव निष्कृष्टत्वाद् द्वितीयायां सामानाधिकरण्येपि निष्कर्षस्याविवक्षितत्वान्निष्कर्षकारिभावप्रत्ययानपेक्षा तृतीयायामेव तूपसर्ज्जनत्वविचक्षया गुणशब्दस्य द्रव्ये निवेशलक्षणं सामानाधिकरण्यं विवक्षित्वा निष्कर्षस्य विवक्षितत्वाद्भावप्रत्ययापेक्षेति विवेकमाह * यत्रेति * । [प्रणवस्य][2]प्राधान्यविवक्षायामपि गुणस्य वस्तुतो द्रव्योपसर्जनत्वात्तच्छब्दस्य द्रव्ये निवेशापत्तेर्निष्कर्षकारिभावप्रत्ययापेक्षणादेतद्भाष्यमयुक्तमाशङ्क्य शाब्दे व्यवहारे वास्तवोपसर्ज्जनत्वादनादराशयेनोपपादयति * स्वप्राधान्येति * उपसर्जनत्वानादरेपि संख्यायास्तार्किकप्रसिद्धगुणत्वानपायाद्यद्गुणसद्भावनिमित्तो द्रव्ये गुणशब्दनिवेशस्तस्य गुणस्य निष्कृष्याभिधाने त्वतलावितिस्मृतेर्भावे प्रत्ययापत्तिमाशङ्क्याङ्गत्वाख्यस्योपसर्जनत्वस्य व्याकरणे गुणत्वप्रसिद्धेः स्वातन्त्र्यविवक्षायामसौ बहुत्वादिवस्तुतो गुणोप्यनुपसर्जनत्वाद् गुणो न भवति ततश्च गुणद्वारे द्रव्ये तच्छब्दनिवेशायोगात्तदा स्वातन्त्र्यविवक्षाकालेऽसौ गुणः स्वकीयं शब्दं प्रत्ययं वा तद्गुणकस्य द्रव्यस्य सम्बन्धितया न भावयतीति कृत्वा भावकत्वनिमित्तभावत्वाभावाच्च भाववाचिना त्वतलादिप्रत्ययेनोच्यत इत्युक्ते गुणशब्दस्य गुणद्वारा द्रव्यनिवेशाभावे च न केवलं भावप्रत्ययस्य भावकत्वाख्यवाच्याभावादनुत्पत्तिः किंतु निष्कर्षाख्यफलाभावादपीति पूर्वमेवेत्यनेनोक्तम् । बह्वादिशब्दानां स्वप्रधानगुणवाचित्वे प-

१ इत्यपि नास्ति । २ प्रणवस्येति द्वितीयपुस्तकस्य पाठः ।

टस्य शुक्ल इतिवत्संख्येये कर्त्तरि कर्मणि वा नित्यं षष्ठ्यापत्तेः कर्त्तर्येकस्मिन्निति सामानाधिकरण्यायोगं शङ्कते * तदा तर्हीति * उत्सर्गतः षष्ठ्यापत्तावपि गुणोपसर्जनस्य प्रधानद्रव्यविवक्षाया द्रव्यशब्दस्य प्राधान्यात्तदनुरोधेन द्रव्यशब्दसामानाधिकरण्यवद् गुण्युपसर्जनगुणविवक्षायां गुणशब्दस्य प्राधान्यात्तदनुरोधेन गुणशब्दसामानाधिकरण्यं कादाचित्कमविरुद्धमिति परिहरति * सत्यमिति * ततस्तल्लक्षितव्यक्तिक्रियासम्बन्धचोदनाजातिव्यक्त्योरभेदो वाक्यार्थेषु विवक्षित इति जातिगुणशब्दानां द्रव्ये लक्षणयाऽभेदविवक्षया वाऽऽवृत्त्यभ्युपगमाद् गुणशब्दस्य द्रव्यशब्दानुरोधवृत्तित्वेऽपि गुणिशब्दानां गुणे वृत्त्यभावाद् गुणिशब्दस्य गुणशब्दानुरोधवृत्तिता न युक्तेत्याह * तुल्यो हीति * लक्षणाऽभेदविवक्षो- ९५६।
पपत्तिमात्रात्सामानाधिकरण्ये द्रव्यशब्दानुरोधेन सामानाधिकरण्यवद् गुणशब्दानुरोधेनापि सामानाधिकरण्यस्याऽर्थप्रकरणयानपेक्षत्वाच्छीघ्रं प्रतिभानापत्तेराश्रितरूपार्थवाचित्वस्याश्रयभूतार्थवाचिशब्दानुरोधवृत्तित्वे हेतुत्वावगमाद् गुणिनश्च गुणानाश्रितत्वाद् गुणिशब्दस्य गुणशब्दानुरोधेने[त्याशङ्क्याभेदविवक्षाहेतोस्तादात्म्यस्य लक्षणाहेतोर्वाऽविनाभावस्य द्विविधेऽपि]सामानाधिकरण्यायोगमाशङ्क्य रूपादिशब्दानामाश्रितरूपार्थवाचित्वे यथाऽऽश्रयभूतार्थवाचित्वादर्शनाल्लक्षणाभेदविवक्षाव्यवस्थापकशक्तिकल्पकसामानाधिकरण्यप्रयोगप्राचुर्याभावाच्च गुणिशब्दस्य गुणशब्दानुरोधेन सामानाधिकरण्यस्य शीघ्रमप्रतिभानोपपत्तेराश्रितरूपार्थवाचित्वस्य हेतुत्वनिराससूचनार्थं यद्यप्यभेदोपचारलक्षणाहेतुर्द्विविधेऽपि सामानाधिकरण्ये तुल्यस्तथापि गुणिशब्दस्य गुणशब्दानुरोधेन सामानाधिकरण्यप्रयोगस्याप्राचुर्यान्नैतत्सामानाधिकरण्यं गुणशब्दस्य गुणिशब्दानुरोधेन सामानाधिकरण्यवच्छीघ्रं प्रतिभाति। अर्थप्रकरणवशात्तु कथंचिदापद्यमानोऽस्य प्रयोगोऽभेदोपचारलक्षणाहेतुतुल्यत्वन्यायेनानुसर्त्तव्यतयोक्त इत्याह * तथापि त्विति * स्वप्राधान्यविवक्षायां गुणस्य द्रव्यपरतया स्वकीयशब्दप्रत्ययभावकत्वाभावेन भावत्वाभावान्महाभाष्यस्थाया गुणप्रधान इति गुणोक्तेर्भावोक्त्या व्याख्यामयुक्तामाशङ्क्य स्वकीयां भावोक्तिं योग्यत्वाशयतया व्याचक्षाण उपसंहरति * तस्माद्विति * द्व्येकयोरिति द्विवचनान्य-

१ इति द्वितीयपुस्तके नास्ति

थानुपपत्त्यापि संख्याप्रधानता ऽवसीयतइत्याह * एवं चेति * अन्यथानुपपत्तिमुपपादयति * अन्यथा हीति * अन्वयमुखेन श्लोकं व्याचष्टे * संख्ययेति * व्यतिरेकमुखेन व्याचष्टे * संख्यानेति * भावप्रत्ययेन कृत्वा स्पष्टं संख्याप्राधान्यं कस्मान्न निर्दिश्यत इति पृच्छति * कस्मात्पुनरिति * परमतेन तावदुत्तरमाह * वक्रिति * सूत्रकृतो निराशयत्वापत्तेरेतदुत्तरापरितोषात्स्वमतेनोपयुज्यमानातिरिक्तत्वाख्ये वैपुल्ये परिमाणविशेषात्मके वा महत्वे बहुः समुद्र इत्यादौ बहुशब्दवाच्यत्वेनावगते त्रिप्रभृतीनां च परार्द्धपर्यन्तानां द्वित्वातिरेके सामान्यरूपे त्रिप्रभृतिषु बहुशब्दप्रवृत्तिनिमित्ते बहुवचनापत्तेः केनापि प्रकारेण द्वित्वातिरिक्तसंख्यावाच्येव बहुवचनं स्यादित्येतदर्थं भावप्रत्ययं त्यक्त्वा बहुष्वित्युच्यत इत्युत्तरं बहुषु बहुवचनमित्येतदेव ज्ञापयत्याचार्यो नानाधिकरणवाची यो बहुशब्दस्तस्येदं ग्रहणं न वैपुल्यवाचिन इति महाभाष्यसूचितमाह * अथवेति * वैपुल्यमहत्वयोर्वैकल्पिकत्वेन वाच्यद्वित्वानापादकत्वात्तयोरिति द्वित्वातिरेकसामान्येन सह द्विवचनाविरोधः। बहुष्वित्यप्युक्ते कथं संख्यावाचित्वनियमावधारणेत्यपेक्षायां भेदा भिद्यमाना भूता निबन्धनमाश्रयो यस्याः सा भेदनिबन्धनेति नानाधिकरणत्वं हेतुगर्भं संख्याविशेषणकृतं वैपुल्ये महत्वे चैकैकाश्रयाश्रितत्वेनाश्रयबहुत्वादपि बहुवचनानुपपत्तेः संख्यायां त्वाश्रयबहुत्वाद् बहुवचनोपपत्तेर्बहुवचनान्तस्य बहुशब्दस्य संख्याविषयत्वावगमादित्याशय । वाच्यान्तरपक्षे बहुवचनानुपपत्तिं द्रढयितुं यत एव संख्यावाचिनां विना बहुवचनं नोपपद्यते तत एव वैपुल्यमहत्ववाचिन्येकवचनं प्रसिद्धमित्याह * अतश्चेति * इह चेत्येके मन्यन्ते तदेके न मन्यन्त इति परत्वादेकवचनं प्राप्नोतीति महाभाष्येण वचनसूत्रस्थानां बह्वेकशब्दानां संख्याप्राधान्यपक्षे तदेके मन्यन्त इत्यादिप्रयोगे प्येकत्वप्राधान्यापत्तिं मत्वैकवचनप्रसंगस्य चोदितस्य द्व्येकयोरिति संख्याप्राधान्यद्योतकद्विवचनाभावेनेह संख्याप्राधान्याभावान्नैकवचनापत्तिरिति परिहारसंभवे प्येकशब्दोऽयं बह्वर्थ इत्युपक्रम्य तद्योऽस्यार्थे वर्त्तते तस्यैव प्रयोग इति महाभाष्येण वस्तुतोऽन्यवाचित्वेन परिहारोक्तिरेकशब्ददृष्टान्तेन बहुशब्दस्यानेकार्थत्वदृढीकरणार्थेति सूचयितुमाह * यास्त्विति * बह्वादिशब्दानां संख्यामात्रवाचितामुपपादितामुपसंहरति * तस्मादिति *

एवमुक्तेन प्रकारेण बह्वादिशब्दानां संख्यामात्रवाचित्वे सति
लः कर्मणि चेत्यस्य वचनसूत्रैकवाक्यतायाः कर्त्तरि लकारश्रुति-
निरासकत्वोपपत्तेरेकवाक्यत्वसिद्ध्यर्थस्य विशेषणविशेष्यत्वस्य
प्रकृतागमविरोधपरिहारोपयोगित्वादनयोः कर्त्रैकत्वयोरन्योन्या-
न्वयानपेक्षस्तिपान्वयो विशेषणविशेष्यत्वापन्नयोर्वा कर्त्रैकत्वयो-
स्तिपान्वय इति विशेषणविशेष्यत्वचिन्ता युक्तेति बह्वादिशब्दाना
संख्यामात्रवाचित्वोपपादनस्य विशेषणविशेष्यत्वचिन्ताकर्त्तव्यत्व-
सिद्ध्यर्थत्वं सूचयितुमाह * एव सतीति * एकस्मिन्नित्यस्यैकवचन
मात्रविषयत्वात्कर्त्तरीत्यस्य च लकारमात्रविषयत्वाद्विषयैक्याभा-
वेन विशेषणविशेष्यत्वायोगमाशङ्क्य तिङ्विधान इत्यादिनैकतिङ्विष-
यतोक्ता । प्रतिपक्षनिरासार्थं तत्र नैव भवतीति भाष्यावयवं व्याचष्टे
* न तावदिति * प्रश्नपूर्वमुपपादयति *कुतइति * श्लोकं व्याचष्टे ९५७।१
* यदि हीति*कः प्राप्नोतीत्यपेक्षायां तिविधानसमासान्निष्कृष्य ति-
बितिवाच्यम् । विशेषणविशेष्यत्वापन्नयोस्तिबन्वयोक्त्यर्थं कथं त-
र्हीति भाष्यावयवं व्याचष्टे *तस्मादिति*एकशब्दस्य संख्याप्राधा-
न्यात्सामानाधिकरण्यनिर्देशायोगमाशङ्क्य सौत्रैकविभक्त्यन्तत्वालो-
चनात् सामानाधिकरण्यनिर्देशोपपत्तिमाह *सचेति*सामानाधिक-
रण्येन विशेषणविशेष्यत्वे व्याख्याभावे षष्ठ्ययोगमाशङ्क्य लक्षणावृ-
त्त्याशया विभक्तिविपरिणामाशया वा षष्ठीति सूचयितुमाह*तत्रापी
ति*द्वयोः श्रौतत्वायोगो लक्षणावृत्तौ हेतुः। लक्षणाशब्देनाभेदोपचारो
ऽप्युपलक्षितः । एकस्य लक्षणावृत्तौ कर्तृशब्दस्यैव सा नैकशब्दस्येति
कथमवधारणेत्याशङ्क्याह * सामानाधिकरण्ये तावदिति * अस्मिन्
पक्षे षष्ठी न युक्तेत्याशङ्क्य सामानाधिकरण्योक्त्या विवक्षितं कर्तृसम्ब-
न्धरूपमर्थं मुख्यवृत्त्या दर्शयितुं षष्ठी प्रयुक्तेत्याह*ततश्चेति* वस्तु-
गत्या कर्त्तुः सख्यां प्रत्युपसर्जनत्वाभावेपि शब्दार्थवृत्त्यौपसर्जनत्वात्त-
त्रैव षष्ठी युक्तेति सूचनायोपसर्जनोक्तिः। विपरिणामपक्षोपपादनपूर्वं
कर्तृशब्द एव विभक्तिविपरिणामो युक्तो नैकशब्द इत्युपपादयति
अथवेति एकविभक्त्यन्तत्वे सम्बन्धानवलक्तौ षष्ठ्यभावे हेता-
वुक्ते देवदत्तयज्ञदत्तौ गच्छत इत्यादौ षष्ठ्यभावेपीतरेतरयोगादिस-
म्बन्धदर्शनाद्व्यभिचारमाशङ्क्य विशेषणविशेष्यस्वरूपत्वं सम्बन्ध-
विशेषणमेवंजातीयकोक्त्या कृतम्। अनेकस्मिन् कर्त्तरि कारकान्तरस्थे
चैकत्वेति योऽप्राप्तिरभिप्रेतोर्थो द्व्येकयोरिति द्विवचनान्यथानुपप-

त्विलक्षणेन न्यायेन संख्यान्यस्य प्राधान्येपि द्वादशाहीनस्येत्यादिव- त्षष्ठी कस्मान्न भवतीत्याशङ्क्याहीनादेर्वस्तुतः प्राधान्येपि व्याक- रणे वास्तवस्याङ्गप्रधानत्वस्याविवक्षितत्वाच्छब्दार्थवृत्त्या तूपसर्जन त्वात्षष्ठी युक्ता संख्यायास्तु शब्दार्थवृत्त्यैव प्राधान्यान्न युक्ता षष्ठीति परिहारसूचनार्थं * नित्यं चेत्युक्तम् * अर्थान्तरापत्तेरपि नैकशब्दे विभक्तिविपरिणामो युक्त इत्याह*दूरापगतश्चेति*। अर्थान्तरापत्तिं विवृणोति *यदि हीति* सत्यमुदाहृतमित्यादिवार्त्तिकोक्तमागमवि- रोधपरिहारमुपसंहरति * तस्मादिति * एवमित्यादिभाष्यशेषग्रह- णार्यादिशब्दैः शास्त्रेणानुगत इति वक्ष्यमाणत्वाच्छास्त्रार्थे दर्शिते इत्यवगतेः कर्त्तुरित्यादिभाष्येण शास्त्रार्थे दर्शित सत्येकत्वादय एव वाच्यतया शास्त्रेणानुगता इति कृत्वा कर्तृकर्मणोर्वाच्यत्वापह्नवस्य नागमविरोधइत्यर्थः। विशेषणभूतयोः कर्तृकर्मणोरवाच्यत्वेपि तद्वि- शिष्टानामेकत्वादीनां वाच्यत्वोपपत्तिः प्रागवोक्ता। संख्यामात्रस्य प्रत्ययवाच्यत्वोक्त्यर्थत्वेन सूत्रव्याख्यानस्योचितत्वोक्त्यर्थमेव वर्ण्य- मान इत्यादिभाष्यमन्यतः प्राप्तः कर्तृकर्मणोरवाच्यतेति लौकिकन्या- यानुसारी सूत्रार्थो भवति सूत्राक्षराणि च द्व्येकयोरित्येतानि कार- कानभिधानमालोच्य संख्याप्रधानमालोच्य संख्याप्रधानत्वेन निय- मानानि लोकप्रसिद्धिविपरीतान्योन्यसम्बन्धसंख्याकारकमात्रवा- चित्वापत्तिपरिहारार्थं विशेषणविशेष्यतोचितेति न्यायमनुगतानि भवन्तीत्येव तावद्व्याचष्टे *एवं चेति * आद्येनैव वा भाव्यावयवेन विशेषणविशेष्यत्वन्यायानुगततोक्तेत्यन्यथा व्याचष्टे *लौकिकमिति* स्वातन्त्र्योक्तिव्याख्यार्थैतरेतरनिरपेक्षोक्तिः । सूत्राक्षराणि चेति भा- ष्यावयवस्तर्हि गतार्थः स्याद्व्याकरणसंप्रदायागतविशेषणविशेष्यत्वे व्याख्याप्रकाराख्यन्यायानुगतत्वोक्त्यर्थत्वे,त्वागमोपिचेत्युत्तरभाष्येण गतार्थं स्यादित्याशङ्क्य संप्रदायागतन्यायानुगतान्यपि सूत्राक्षरा- ण्येवमेव वर्ण्यमाने भवन्ति नान्यथेत्यपिशब्दार्थस्य च शब्दस्योत्क- र्षमङ्गीकृत्य परिसंख्यार्थत्वेन व्याचष्टे *न केवलमिति* स्वातन्त्र्येण लक्षणसूत्रव्याख्यानेन केवलं लोकप्रसिद्धिविपरीतग्राही सूत्रार्थः स्यात्किं तु व्याकरणगोत्रेण योनुसृतो न्यायो व्याख्याप्रकारस्तेना- व्यपेतानि वर्जितानि सूत्राक्षराणि स्युरित्यर्थः । व्याख्याग्रन्थानुगत- त्वस्योत्तरभाष्ये वक्ष्यमाणत्वग्रन्थकारातिरिक्तव्याख्यातृगतव्याख्या- प्रकारानुगतत्वोक्त्यर्थत्वेऽर्थपौनरुक्त्यसूचनार्थं विशेष्यतया लक्षण-

व्याख्याने सूत्रार्थस्य कर्तृकर्मविशिष्टसंख्यावगत्याख्यलौकिकन्याया-नुगतत्वात्संप्रदायागतविशेषणविशेष्यत्वव्याख्याप्रकाराख्यमपि च न्याय सूत्राक्षराणामनुगतत्वात्सर्वं न्याय्यं भविष्यतीत्युक्तम् । मार्ग-मोऽपित्यति भाष्यं पूर्वभाष्यस्य द्वितीयव्याख्याने व्याख्यानुगतव्या-ख्याप्रकारमूलीकृत्यर्थत्वेन स्पष्टत्वाद्व्याख्यायाऽऽद्यव्याख्यायां शङ्को-त्तरत्वेन व्याख्यातुमवतारयति *तत्रेति* व्याचष्ट *द्वाभ्यामपीति* एकत्वादिषु विभक्त्यर्थेषु कर्मादिविशेषणस्य किं प्रयोजनमित्यपे-क्षायां कर्माद्यनपेक्ष्य बहुत्वादिसंख्यामात्रे द्वितीयाबहुवचनाद्यापत्ति-निवृत्तिं प्रयोजनमाह* इतरथा हीति* कर्मादय एव तर्ह्येकत्वाद्यन-पेक्षा विभक्त्यर्थाः सन्तु नैकत्वादय इत्याशङ्क्यानभिहित इत्यनभिहि-ताधिकारकरणान्यथानुपपत्त्यैकत्वादिषु विभक्तिविधिः सूत्रकृतोऽभि-प्रेतोऽवस्थीयत इत्याह * अनभिहितेति * एकत्वादीनां विभक्त्यर्थ-त्वाभावेऽपि कर्मादिषु विभक्तिविधौ तिङाद्यभिहितेष्वपि कर्मा-दिषु द्वितीयादिविभक्तिप्रयोगापत्तेस्तन्निवृत्तये ऽनभिहिताधि-कारोऽर्थो वा भविष्यतीत्याशङ्क्याभिहिताभिधानानार्थक्यापत्त्यैवा-प्रसक्तेः पर्युदासानर्थक्यमाह * अन्यत्रापीति * कटं करोति भीष्ममित्यादौ कटद्वितीययाभिहितेऽपि कर्मणि भीष्मादिद्वितीया-वत्प्रसक्तिमाशङ्क्य कटद्वितीयया भीष्मादीनां कर्मत्वानभिधा-नात्तदुक्त्यै भीष्मादिद्वितीयाऽर्थवतीति वैषम्यसूचनायान्यत्र कटं करोति भीष्ममित्यादिप्रयोगेऽप्यभिहिते कर्मादौ कटद्वितीयाद्य-भावादित्येतावत्युक्तेऽप्येको द्वौ बहव इति प्रातिपदिकाभिहितेऽप्येक-त्वादावेकवचनादिवत्प्रसक्तिमाशङ्क्य केवलप्रातिपदिकप्रयोगायोगाद्व-चनरहितविभक्त्यभावाच्च कस्मिंश्चिद्वचनेऽवश्यप्रयोक्तव्ये तु वाच्यार्थैकवचनादिप्रयोगो युक्तः कर्मादौ त्वभिहिते प्रातिपदिकार्थ-मात्रविहितप्रथमाविभक्तिप्रयोगोपपत्तेर्द्वितीयाद्यप्रसक्तिरिति वैषम्य-सूचनायान्यत्रैकत्वादावप्यभिहिते विधानाभावादित्युक्तम् । कर्मादि-विशिष्टैकत्वादिविभक्त्यर्थपक्षे त्वनभिहितानां कर्मादीनामेकत्वादिषु द्वितीयादय इत्ययमर्थोऽनभिहिताधिकारो न चैतदनुक्तं गम्यत इत्याह *अनभिहितानां त्विति*तिङाद्यभिहितानां कर्मादीनां द्वितीयादिवा-च्यत्वायोगेन तद्वाच्यैकत्वादिविशेषणत्वायोगादनभिहितकर्मादिवि-शिष्टेष्वेवैकत्वादिषु द्वितीयादय इत्यनुक्तमपि न्यायाद्गम्यत इत्याशङ्क्य

[विशिष्टग्रहणं नेष्टमगृहीतविशेषणम् । अभिधानाभिधाने तु न केन
चिदिहाश्रिते इति वार्त्तिकेनावाच्यस्यापि वाच्यविशेषणत्वोपपत्त्याभि
धाना]विशिष्टवाचिशब्दवाच्यत्वादरोऽत्यन्तमयुक्त इत्याशयेन परिह-
रति *नहीति* एतच्चैकत्वादिनिरपेक्षकर्मादिविभक्त्यर्थपक्षेनभिहि-
ताधिकारानर्थक्यं स्पष्टमेव महाभाष्यकृतोक्तमित्याह * तदेतदिति*
एकत्वादिविशिष्टकर्मादिविभक्त्यर्थपक्षेप्यनभिहिताधिकारार्थवत्त्वा-
देकत्वादिनिरपेक्षेषु कर्मादिषु त्वित्यर्थः । नन्विति भाष्यं न चे-
ह वयमेकत्वादिभिः कर्मादीन् विशेषयामः किं तर्हि कर्मादिभिरे-
कत्वादीन् विशेषयाम इति बहुवचनमहाभाष्येणैकत्वादीनां विशेषण-
त्वस्य निरस्तत्वात्संख्येयप्राधान्यं च द्व्येकयोरिति द्विवचनानुपप-
त्तिपरिहाराशक्तेर्यदा कर्मादय इत्यस्य पूर्वपक्षोक्तित्वावगमेनानुपन्य-
सनीयत्वादयुक्तमाशङ्क्य सिद्धान्तवचनत्वं मत्वाभ्युपेत्यवादत्वेन
१२ व्याख्यानायोपन्यासोपपत्तिमाह * नन्विति * ॥ अभ्युपेत्यवादत्वेन
यदा कर्मादय इत्यागमव्याख्यार्थमुच्यते इत्यादिभाष्यं व्याचष्टे
* एतदिति * यद्यपि वचनमात्रस्थानां बहुद्व्येकशब्दानां संख्योपस-
र्जनसंख्येयप्रधानत्वेनैकत्वादीनां विशेषणत्वात्कर्मादयो विशेष्य-
त्वावगतेर्विभक्तिवाच्याः प्रतिभान्ति तदाप्येकत्वादय एकविशेषण-
त्वेनावस्थिता विभक्तिवाच्या इति विभक्त्यर्थपदावृत्त्याऽऽगमव्याख्यार्थं
यद्यपि विशेषणमिति भाष्यावयवं व्याख्यातुं कर्मादयो विशेष्यभूताः
प्राधान्येन हेतुना विभक्तिवाच्यतयाऽऽत्तोच्यन्त इत्युक्तम् । विशेषणमेव
वाच्यत्वेनाज्ञातं ज्ञाप्यत इत्येवं भाष्यस्थं विधीयतेपदं व्याख्यातुम
भिधीयत इत्युक्तम् ॥ यथेति दृष्टान्तभाष्यं व्याचष्टे * भवति
हीति * विशेषणस्यान्यतोऽसिद्धिर्विशेष्यस्यान्यतः सिद्धिरितीदृश्या-
मित्यर्थः । यद्यपि कर्मादयो विभक्तिं प्रति प्रयोजनभूतास्तदाप्ये-
कत्वादय एव विभक्तिवाच्या इत्याद्यायां विभक्त्यर्थपदावृत्तौ प्रयो-
जनवाक्यार्थशब्दो द्वितीयायां त्वभिधेयवाच्ये वेत्येतदेव भाष्यमन्य-
था व्याचष्टे * अथवेति * एकत्वादीनां विभक्त्यर्थत्वागमस्तिङ्विषयः
कर्मादीनां विभक्त्यर्थत्वागमः सुब्विषय इति परमतेनान्यथागम-
द्वयं व्याचष्टे *यद्वेति* यथासंभवं विषयविशेषे निवेशोपपत्त्यर्थमनि-
र्दिष्टविषयविशेषतोत्सृष्टोक्त्योक्ता कथं पश्चादुदाहृतस्य वचनस्य सु-

१ इति द्वितीयपुस्तके नास्ति ।

ऽविषयत्वावगतिरित्यपेक्षायां तत्र सुप्सु कर्मादीनां यत्करणाभिधायिन्या तृतीययेत्यादिव्यवहारदर्शनेन विभक्त्यर्थत्वाभ्युपगमाद्द्रत्युक्तम्। सुप्सु कर्मादीनां विभक्त्यर्थत्वाभ्युपगमजातबलस्तदन्यथानुपपत्त्या तिङ्क्ष्वपि कर्तृकर्मणोर्विभक्त्यर्थत्वापत्तिं पूर्वपक्षी शङ्कते * ननु चेति * अभियुक्तव्यवहारविरोधपरिहारायावश्यं सुपां कारकवाचित्वस्याभ्युपगन्तव्यत्वाद्बहुवचनादिशास्त्रवैरूप्यायोगाच्च तिङां कारकानभिधायित्वे सुपामपि कारकानभिधायित्वापत्तेस्तिङामप्यर्थापत्त्या कारवाचितावसीयत इत्याशयः। यस्मात्करणवाचिन्या विभक्त्या संयुज्यारुणिमानमरुणयेतिशब्दो निर्दिशति तस्मादरुणिमा करणमित्याहेत्यरुणाधिकरणभाष्यावयवार्थः। यस्मादेकवचनाख्यशब्दागमे सत्येकत्वस्य क्रियान्वयो दृश्यते तस्माच्छब्दवच्छब्दगम्यमेकत्वस्य क्रियाङ्गत्वमुपलभ्यत इत्युक्ते पदश्रुत्यैकत्वस्य प्रातिपदिकार्थाङ्गत्वावगतेर्वाक्याय क्रियाङ्गत्वायोगमाशङ्क्य यथान्येषां प्रातिपदिकार्थानां विभक्त्युक्तकारकद्वारा विभक्तिश्रुत्या क्रियाङ्गत्वज्ञानं तथैकत्वस्यापीति पश्वेकत्वाधिकरणसूत्रावयवेन वक्ष्यते पौरुषेयत्वेन व्याकरणस्य प्रमाणान्तरापेक्षत्वात्तदनुसारेण वैरूप्यमपि युक्तमित्याशयेनागमद्वयस्य व्यवस्थितविषयत्ववादिनामेव समाधानमाह *तत्रेति* बहुवचनादिशास्त्रस्यैकरूप्येऽप्यभियुक्तव्यवहारविरोधपरिहारोपपत्तेरेकत्वादिविशेषणत्वागमस्य च पूर्वपक्षोक्तिस्त्वाभ्युपेत्यवादमात्रत्वाद्वा तद्बलेनापि सूत्रवैरूप्यकल्पनानुपपत्तेरेतत्समाधानापरितोषात्स्वमतेनान्यथा व्यवहारविरोधपरिहारं प्रतिज्ञापूर्वमाह*अथेति*। शास्त्रानुक्तस्यापि सुप्सु कर्मादीनां वाच्यत्वस्य कर्माद्याश्रितैकत्वादिवाच्यत्वसिद्ध्यर्थमभियुक्तैरिष्टत्वान्नाभियुक्तव्यवहारविरोधापत्तिरित्याशयः। शास्त्राश्रितानभिधेयत्वस्य कर्मादेर्वाच्यत्वाभ्युपगमे शास्त्रविरोधमाशङ्क्य परिभाषकानभिधेयत्वोक्त्यभ्युपगमेन तावत्परिहरति *शास्त्र इति*॥ परमार्थतश्च कर्मादिवाच्यत्वं शास्त्रस्यौदासीन्यान्न विरोधशङ्कापत्तिरित्याह *नच कर्मादय इति* एतच्च कर्मादीनामेकत्वादिविशेषणत्व बह्वादि- ६६०।२
शब्दानां मुख्यप्राधान्योक्त्या व्याख्यातत्वान्नापन्होतव्यमित्याशयः। ततश्च सुप्स्वपि कर्मादीनां विशेषणत्वस्यैव शास्त्रेणोक्तत्वादेकत्वादिविशेषणत्वागमस्य सुब्विषयत्वोक्तिरयुक्तेति सूच-

यितुमाह * तस्मादिति * कर्मादिवाच्यत्वोक्तौ शास्त्रस्यौदासीन्ये सुप्सु वाच्यत्वं न तिङ्क्ष्विति व्यवस्था किंनिबन्धनेत्याशङ्क्य न्याय-व्यवस्थोपपत्तिमाह * तत्रेति * । शास्त्रेण कर्मादेः सुब्वाच्यत्वानुक्तौ सकत्वविकरणे द्वितीयाया. कर्मवाचित्वस्य कर्मणि द्वितीयेति शा-स्त्रोपदिष्टत्वोक्तिर्विरुध्येतेत्याशङ्क्य संख्याप्रधानबह्वादिशब्दोक्तसंख्या-विशेषणत्वात्कर्मादेः शास्त्रेण श्रुत्या वाच्यत्वानुक्तावप्यर्थाद्वाच्यत्वो-क्तिमाह * अर्थापत्त्या चेति * न्यायाद् व्यवस्थां विवृणोति * तत्रेति * पारिभाषिक्येव चेह कर्मादीनां विशेषणतोच्यते वस्तुतस्तु कारकवि-भक्तिभिः कारकस्यैव प्राधान्येनाभिधानाभ्युपगमादन्यथा चैकत्वादेः कारकद्वारा क्रियाङ्गत्वोक्त्ययोगापत्तेः संख्यैव कारकविशेषणमिति द्रष्टव्यम् । तिङ्क्षु भावनयोपस्थापनात्कारकस्यावाच्यत्वाभ्युपगमे सु-प्स्वपि निष्क्रियाकारकायोगेन क्रियावाच्याख्यातानपेक्षकारकपदप्र-योगभावादवश्यं भावेनाख्यातपदेनोक्तया भावनयोपस्थापनोपपत्तेः कारकस्यावाच्यत्वापत्तिं शङ्कते * ननु चेति * आख्यातपदात्प्राक्कारक-पदप्रयोगे तावत्कारकप्रतीत्यन्यथानुपपत्तेः कारकस्य वाच्यतावश्य-कल्पनीयेति परिहरति * कथमिति * निष्क्रियकारकायोगेन क्रियान्वय-विवक्षातः प्राक्कारकविभक्त्यनुपपत्तेः कारकविभक्त्युच्चारणान्यथानुप-पत्त्या कल्प्यमानायाः कारकविवक्षायाः क्रियाविवक्षापूर्वकत्वकल्पना-त्प्रथम सुबन्तप्रयोगेऽपि कारकप्रत्ययस्य क्रियाप्रतीतिपूर्वकत्वसम्पत्ति-मन एव शङ्कते * नन्विति * उपदर्शिना विवक्षोक्ता वक्तुर्वस्तुनः कारक-विवक्षाया. क्रियाविवक्षापूर्वकत्वेऽप्यर्थप्रतीतिनिरपेक्षस्य विभक्त्यु-च्चारणमात्रस्य कारकविवक्षापूर्वकत्वकल्पनायोगात् तत्र श्रोतुः क्रियाविवक्षापूर्वककारकविवक्षाकल्पनाद्वारा कारकप्रतीतेः प्राक् क्रियाप्रतीतिसम्भवतीति परिहर्त्तां शङ्कां दूषयति * सत्यमिति * कारकमप्रतिपद्यैव पूर्वतरविवक्षितक्रियाप्रतीत्यभ्युपगमेऽन्योन्याश्र-यत्वमुक्तं प्रश्नपूर्वं विवृणोति * कुत इति * । पूर्वार्द्धविवृतान्यो-
६६१।२ न्याश्रयोपपादनार्थमुत्तरार्द्धं विवृणोति * द्वयोरिति * । जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति षड्विधा क्रियान्यतमाक्रिया-शून्यस्य कस्य चित्प्रातिपदिकार्थस्याभावादर्थापत्त्याऽकिन्धातुः प्रथ-मपुरुषस्थवर्त्तमानविभक्तिपरोऽप्रयुज्यमानोऽप्यस्तीति गम्यते इत्याग-मगम्यास्त्यादिधातुवशाद्वा सर्वस्य प्रातिपदिकार्थस्य सक्रिय

त्वावगतेः क्रियाक्षेपद्वारा कारकाक्षेपः सेत्स्यतीति प्रातिपदिकार्थस्य क्रियागमकत्वोपपत्तेरस्त्यादिधातुनैव वा क्रियोपादानोपपत्तेरन्यो- न्याश्रयपरिहारं शङ्कते * अथेति * तिष्ठतिनाद्वितीयभावविकारोक्तौ प्रथमभावविकारवाच्यस्तिः । प्रातिपदिकार्थेनास्तितातिष्ठत्याद्यकर्म- कक्रियाक्षेपेपि कर्मादिकारकाक्षेपायोगात्तत्प्रतिपादकशब्दं भाविन्यो- न्याश्रयमपरिहार्यमित्याह * तदिति * श्लोकं व्याचष्टे * सामान्ये- न हीति * क्रियाशक्तिरूपत्वात्कारकस्य क्रियां विना भावनाशक्तेर्वाच्य- त्वाभ्युपगमे क्रियाविशिष्टस्यैव वाच्यत्वप्रसंगादगृहीतविशेषणन्यायेन क्रियाया एव वाच्यत्वावगते क्रियया कारकाक्षेपोपपत्तिमाशङ्क्य कर्मा- द्याख्यानां कारकत्वाभिमतानां क्रियाविषयत्वेपि शक्त्यन्तरभेदेनान्योन्यं च स्वत एव प्रतिकारकं वैलक्षण्याच्छोणत्वादेरिवाश्वत्वाद्यनपेक्षस्य क्रि- नेपक्षाणां वाच्यत्वोपपत्तेः क्रियाया द्वितीयादिविभक्तिवाच्यत्वाना- पत्तिमाह * न च विभक्तिरिति * विभक्त्युक्ता तु सङ्ख्या यथा क्रियाविशे- षाक्षेपे कारकविशेषाक्षेपे वा न शक्ता तथा न शोणत्वादिवत्सङ्ख्याजा- तिभेदेषु भिद्यत इत्यादिवार्त्तिकेनोक्तमित्याह * न च संख्येति * तेना- ख्यातात्प्राक्कारकविभक्त्यन्तपदप्रयोगे कारकातिरिक्तक्रियाप्रत्यायका- भावादपरिहार्यमन्योन्याश्रयमित्युपसंहरति * अत इति * प्राक्कार- कपदप्रयोगे कारकस्य वाच्यत्वमुपपादितमुपसंहरति * तस्मा- दिति * विलक्षणकार्यान्यथानुपपत्त्या स्वतो विलक्षणानामेव शक्तीनां कल्पनात्कर्माद्याख्यानां कारकशक्त्यवान्तरजातीनां कल्पनात्कर्माद्याख्यानां कारकशक्त्यवान्तरजातीनां क्रियाक्षेप- कत्वायोगात् क्रियान्वयविवक्षातः प्राक्कारकविभक्त्या नोत्पत्तव्य- मित्याशङ्कामनुमोद्य शब्दमात्रात्कारकं प्रतिपद्य वक्तुः प्राग्विवक्षितां क्रियां प्रतिपद्यत इति परिहारोक्तिरनर्थिकेत्याशङ्क्य निर्विषयशक्ति- निरूपणाशक्तेर्विषयभूतक्रियाक्षेपं विना शक्त्यात्मककारकावत्यप- र्यवसानात्कारकोक्तिपर्यवसानार्थत्वेन क्रियाक्षेपोक्तेरर्थवत्त्वसूचनार्थं कारकेण सह क्रियाया विषयविषयित्वलक्षणसम्बन्धसद्भावात्कर्मा- दिकारकविषयत्वार्हन्तकर्मकक्रियाक्षेपो ऽवश्यं वक्तव्य इत्याह * तत्सम्बन्धादिति * । प्राक्कारकपदप्रयोगे कारकस्य क्रिययाक्षेपायो- गाद्वाच्यत्वावगमेपि पश्चात्प्रयोगे क्रियया क्षेपोपपत्तेरवाच्यत्वं भवि- ष्यतीत्याशङ्कते * यद्वा तर्हीति । * प्राक्प्रयोगे ऽवधारिताया वि-

भक्तेः कारकाभिधानशक्तेः पश्चात्प्रयोगेऽप्यपह्नवो न संभवतीत्याशा-
२६२।३ येन परिहरति * सत्यमिति ।* शङ्काशयं विवृणोति* नन्विति ।*
परिहाराशयं विवृणोति*न शक्यमिति* शक्तेरनित्यत्वे सम्बन्धस्य
कथमनित्यत्वापत्तिरित्याशङ्क्य नियम्यते यदेकस्य सम्बन्धः सो-
ऽर्थशब्दयोरिति वार्त्तिके वाच्यवाचकशक्तिद्वयनियमस्य सम्बन्ध-
तयोक्तत्वादित्युक्तम् । एवमपि शक्तिरेव सर्वदा न तत्त्वशक्तिरिति
कथमवधारणं तथाशयेनाशङ्कते * अथेति * अवधारणोपायोक्त्या
परिहरति * तदिति * परिहारप्रतिज्ञार्थं तदिति वार्त्तिकावयवं-
तावद्व्याचष्टे*सर्वत्रैवेति*अवधारणोपायोक्त्यर्थं श्लोकं व्याचष्टे*स-
तामपीति* । अन्यतः सिद्ध्युक्त्या व्याख्यातस्य कृतार्थत्वस्यानारम्भ-
हेतुतायां दृष्टान्तोक्त्यर्थं प्रतिबन्धसहकारिकारणान्तराभावोक्तिः ।
अव्याप्तत्वदोषाभावोक्तिव्याख्यार्थं कार्यत्युक्तम् । असतश्चेत्यनेनाश-
शाङ्कं व्याख्यातमुपपादयितुमनिमित्तेत्युक्तम् । सतोऽपि कार्याना-
रम्भकत्वेऽपि निमित्तस्य च कार्यारम्भकत्वानुपपत्तिं सतोऽप्यग्रहणा-
पत्त्युक्त्यर्थेनासतश्च ग्रहणानुपपत्युक्त्यर्थेन 'विद्यमानस्य चार्थस्य दृष्ट-
मग्रहणं क्वचित् । न त्वत्यन्तासतोऽस्तित्वं काश्चित्प्रत्युपपद्यते' इत्यादि-
सम्बन्धग्रन्थवार्तिकेन द्रढयितुमाह*इतीति* श्लोकार्थमुपसंहरति*
तस्मादिति* एकस्याः शक्तेः सदसद्भावविरोधात्सदैव युक्ता नास्ती-
त्यवधारणोपायत्वेन सामान्यन्यायमात्रमेतदुक्तं वस्तुतस्तु लज्जात्मक-
त्वाच्छक्तेः कारकस्य विभक्तिश्रुत्युक्तत्वसंभवेऽनुमाननिरासेनाख्यात-
पूर्वेऽपि प्रयोगे कारकोक्त्याख्यकार्यारम्भकत्वोपपत्तेन कदाचिदसत्त्व-
शङ्कास्तीत्याह*लज्जात्मकत्वाच्चेति * । तदत्र नशाब्दस्यत्यादिवा-
र्त्तिकेन न्यायाद्व्यवस्थामुपपादितामुपसंहरति*अतश्चेति*वैयाकरण-
मतेन धात्वर्थातिरिक्तभावनाभावाभ्युपगमेऽपि धात्वर्थेनोपस्थापना-
संभवात्कर्तृकर्मणोरवाच्यत्वेऽभिहिते तस्मिन् पक्षे संख्यावगमात्प्राक्क-
र्तृकर्मणोरुपस्थानस्यैकान्तिकत्वाद्विशेषणत्वेऽपि वाच्यत्वाशङ्का ना-
स्तीति नियतेत्यनेनोक्तम् । वस्तुतस्त्वकर्तृकस्यापि कुसूलभेदना-
दिधात्वर्थस्य कदाचिद्दर्शनेन कर्त्रुपस्थानैकान्तिकत्वाद्यागाद्युपस्था-
पकत्वेऽपि च धातुप्रत्यययोर्व्यवधानाभावात्प्रत्ययवाच्यसम्भवाद्वाच्य-
त्वानापत्तिसूचनार्था नित्यानुमेयोक्तिः । भाष्ये कर्तृग्रहणस्योपल-
क्षणार्थत्वसूचनार्था कर्मोक्तिः ॥ नन्विति भाष्यं तात्पर्यतो व्याचष्टे-

* अथात्रेति * । कर्त्रभिधानव्याप्तहेत्वनुक्तेः कथमनेन भाष्येणानुमानमुक्तं भवतीत्याशङ्क्य कर्तृविशेषवाचिदेवदत्तादिपदस्थसंख्याविशेषानुवर्त्तनस्य भाष्योक्तस्य हेतोस्तत्सूचितस्य च सामानाधिकरण्यस्य हेतोस्तावत्कर्त्रभिधानव्याप्तिं प्रश्नपूर्वमुपपादयितुमारभते * क इति * । कर्तृत्वाधिष्ठानभूतो द्रव्यविशेषः कर्तृविशेषोक्त्योक्तः । पचत्युक्तया च शब्विकरणः पचतिशब्दः । संख्यानुवर्त्तनेन भाष्योक्तेन देवदत्तादिपदस्थकारकविभक्तिप्रतिबन्धलक्षणं तद्विशेषणशामनत्वाद्यन्वयलक्षणमपि च देवदत्तादिपदानुवर्त्तने सामानाधिकरण्यसूचनद्वारा सूचितमिति सूचनार्थं सर्वमित्युक्तम् । पचतिशब्दस्य कर्तृवाचित्वे देवदत्तशब्दानुवर्त्तनस्य सामानाधिकरण्यापादानद्वारा हेतुत्वसिद्धये सामानाधिकरण्यादनुवर्त्तनं भवति द्वयोरेकार्थतात्पर्याख्यैकार्थवृत्तिलक्षणैकविषयत्वे च सत्येकार्थविषयबुद्धिजनकत्वाख्यं सामानाधिकरण्यमत्रकलप्त इत्युक्ते विषयोक्त्या वा व्यत्ययविवक्षायां पर्यायत्वापत्तिः शब्दव्यापारविषयत्वमात्रविवक्षायां तु साध्यासिद्धिरित्याशङ्क्य शब्दस्याभिधानातिरिक्तव्यापाराभावात्तद्व्यापारविषयाभिधानविषयीभूतकर्तृत्वाभेदोपचाराद्देवदत्तादीनां पचतिशब्दव्यापारभूताभिधानविषयतया लब्धकर्तृत्वविषयतैर्देवदत्तादिशब्दैः सहैकविषयत्वनिबन्धनात् सामानाधिकरण्यात्पचतिशब्दस्य कर्तृवाचित्वसाध्यासिद्धिः पचतिशब्दवच्च देवदत्तादिशब्दानामभेदोपचारानपेक्ष कर्तृत्वविषयव्यापाराभावात्पर्यायत्वानापत्तिरिति सूचयितुं पचतिशब्देन देवदत्तादिसर्वपुरुषानुगतकर्तृत्वसामान्याभिधानद्वारा तद्विशेषभूतानां देवदत्तादीनां स्वव्यापारविषयीकृतत्वाक्षिप्तत्वे सति पचतिशब्दस्य देवदत्तादिशब्दसामानाधिकरण्यं लभ्यते नान्यथेत्युक्तम् । आक्षेपेऽप्यभेदोपचारोपपत्तिसूचनार्थं कर्तृत्वस्य सामान्यरूपतोक्ता जातिवाचिनां गवादिशब्दानां वारुणादिशब्दानां व्यक्तिद्रव्यवाचित्वाभावेऽपि तद्वाचिशाबलेयघटादिशब्दसामानाधिकरण्यवत्पचतिशब्दस्य कर्तृवाचित्वाभावेऽपि लक्षणया कर्तृपरत्वोपपत्तेर्देवदत्तादिशब्दैः सहैकविषयत्वात्सामानाधिकरण्यं भविष्यतीत्याशङ्क्य * लक्षणा येति * । वैयाकरणमते धात्वर्थातिरिक्तभावनाभावाद्धात्वर्थेनैव लक्षणापत्तिमापाद्य विक्लेदनधात्वर्थपक्षे तावल्लक्षणाशक्त्यैव परिहरति * नेति * देवदत्तसमवेतस्य कर्तृत्वस्य पाकेनैकार्थसमवाया

भावेपि गङ्गयैव तीरस्य लक्षणोपपत्तिमाशङ्क्य सामानाधिकरण्यासि-
द्ध्यै च लक्षणाभ्युपेया तच्चान्यसमवेतलक्षणायामपि न सिद्ध्यतीति प-
रिहारायैकत्वमभिन्नत्वं सामानाधिकरण्यमभेदोपचारो वा येनाऽऽश्री-
यते गृह्यत आपाद्यते तण्डुलसमवेतमेव पाकेन लक्षयितुं शक्यमित्यु-
क्तम् । यद्वा यथा लः कर्मणि चेति सप्तम्यन्तेन कर्मशब्देन कर्तृशब्देन
वा सप्तम्यन्तबहुत्वैकशब्दसामानाधिकरण्यसिद्ध्यै बहुत्वादिलक्ष्यमाणं
कर्मत्वेन कर्मसमवेतमेकत्वादि लक्षयितुं शक्यते न कर्तृसमवेतम-
पि न कर्मसमवायि तथा पाकेनान्यसमवायिकर्तृत्वं न लक्षयितुं शक्य-
मिति दृष्टान्तायैतदुक्तम् । देवदत्तस्यानामधिश्रयणादीनां पाकत्वा-
त्पाकेन कर्तृलक्षणोपपत्तिं शङ्कते*नन्विति*क. पच्यर्थो नाम येयं तण्डु-
लानां विक्लित्तिरिति महाभाष्ये विक्लेदनस्य पाकत्वोक्तेरधिश्रयणा-
दीनां पाकत्वायोगमाशङ्क्य यद्यपि विक्लित्तिः पच्यर्थ इत्युक्तं तथापि
विक्लित्तेः पाकत्वे देवदत्तः पचतीति सामानाधिकरण्यायोगापत्ते-
स्तूक्तव्यापारस्य च कर्तृत्वाभ्युपगमाद्देवदत्तव्यापारपाकत्वाभ्युपग-
माद्देवदत्तव्यापारस्य पाकत्वाभावे तस्य कर्तृत्वायोगापत्तेर्विक्लित्ति-
फलस्याधिश्रयणादिव्यापारसमूहस्य पचिवाच्यत्वं नाधिश्रयणादि-
मात्रस्यैकैकस्येत्येवमर्थत्वेन विक्लित्तिः पाकफलमिति प्रयोजनवा-
च्यर्थशब्दाभ्युपगमेन भाष्यं व्याख्येयमिति सूचनायापि तस्य शब्दो ।
यद्यपि महाभाष्यात्तण्डुलस्थ पाक इत्याभाति तथापि देवदत्तशब्द-
सामानाधिकरण्यसिद्ध्यै देवदत्तस्य कर्तृत्वसिद्ध्यै च तस्य सम्ब-
न्धिना पाकेन भाव्यमिति कृत्वाधिश्रयणादय एव भाष्ये पाकत्वेनो-
च्यन्त इत्यर्थः । यद्यप्यधिश्रयणादयः पाकत्वेनोच्यन्त इति कृत्वा
पाकेन कर्ता लक्षयितुं शक्यस्तथाप्यत्र लक्षणाद्वारं सामानाधिकरण्यं
संभवतीति परिहारं प्रतिजानाति*सत्यमिति*॥ गोत्वारुण्यादीनां
साक्षाद्व्यक्तिद्रव्यसमवायाद्विशेष्ये व्यक्त्यादौ स्वानुरक्तबुद्ध्युत्पाद-
कत्वेन गवादिशब्दस्य विशेष्यपर्यन्ताभिधानव्यापारावगतौ हेतुभूते
मतुब्लोपे वाच्याभेदोपचारे वा निमित्ततया विशेष्ये गवादिशब्दप्रवर्त-
कत्वात्सामानाधिकरण्यापादकत्वसमवेप्यधिश्रयणादीनां देहसम-
वायाद्देहदेहिनोरभेदोपचाराद्देह्यात्मसमवेतत्वव्यपदेशोपि परिस्पन्द-
रूपत्वेन साक्षादमूर्तात्मसमवायायोगाद्देहस्य चाऽचेतनत्वेनाऽस्वात-
न्त्र्यात्कर्तृत्वानुपपत्तेरात्मन एव चेतनत्वेन स्वातन्त्र्यात्कर्तृ स्य न्या

ध्यत्वाद्विशेष्यस्य कर्तृत्वाभिमतस्य देवदत्ताख्यस्यात्मनोऽधिश्रयणाद्यनुरक्तस्यानवगतेः पाकवाचिनो धातोः कर्तृपर्यन्तव्यापारावगतिहेतुभूते मतुब्लोपे वाच्याभेदोपचारे वाधिश्रयणादीनां निमित्तत्वायोगेन देवदत्ते पचिशब्दप्रवर्तकत्वायोगान्न सामानाधिकरण्यापादकत्वं संभवतीति वैषम्योक्त्योपपादयति *गोत्वेति*एतदेव दृष्टान्तैरुपपादयितुमुपसंहरति *अत इति* मतुब्लोपाभेदोपचारौ विना सामानाधिकरण्याभावे दण्डादिशब्ददृष्टान्तः। अधिश्रयणादयो देवदत्त इति प्रयोगाभावदृष्टान्तेनाधिश्रयणादीनां देवदत्ते स्वानुरक्तबुद्ध्यनुत्पादकतायामुपपादितायां रूपादिशब्दोक्तानां गुणानां द्रव्ये स्वानुरक्तबुद्ध्यनुत्पादकत्वेप्यरुणादिशब्दोक्तानामुत्पादकत्ववदधिश्रयणादिशब्दोक्तानामधिश्रयणादीनां कर्तरि स्वानुरक्तबुद्ध्यनुत्पादकत्वेपि पच्युक्तानामुत्पादकत्वोपपत्तिशङ्कानिरासार्थं पाको देवदत्त इति प्रयोगाभावदृष्टान्तोक्तिः। भाष्योक्तस्य कर्तृविशेषवाचिदेवदत्तादिपदस्थसंख्यानुवर्त्तनस्य सामानाधिकरण्यगमकत्वद्वारा कर्त्रभिधानगमकत्वात्सामानाधिकरण्येनैव तावत्कर्त्रभिधाने साध्ये कर्त्रभिधानन्यायेनैव कर्माभिधानस्यापि भाष्येभिमतत्वात्कर्माभिधानेपि साध्ये प्रयोगमाह * तस्मादिति * आद्येनादिशब्देन पच्यतेशब्दोपादानात्पचतिशब्दः कर्तृवाची देवदत्तादिकर्तृपदाभेदवर्त्तित्वात्पक्तृशब्दवत्पच्यतेशब्दः कर्मवाच्योदनादिकर्मपदाभेदवर्त्तित्वात्पक्वशब्दवदिति तन्त्रेण प्रयोगद्वयं द्वितीयेनादिशब्देन पाकादिशब्दवदिति वैधर्म्यदृष्टान्तः सूचितः। उत्तरार्द्धं व्याचष्टे * अभेदेति * ९६४।१
साक्षाद्भाष्योक्तेन हेतुनास्मिन्नेव साध्ये प्रयोगमाह * किंचेति * पचतिपच्यतइत्येवंप्रकारयोः शब्दयोरित्येव धर्मिणोः कर्तृकर्मप्रकारयोर्वाच्ययोरित्येवं च वाचकत्वविषययोस्तथाशब्देनोक्तेः पचतिशब्दस्यकर्तृवाचित्वं कर्तृगतसंख्याविशेषानुवर्त्तनात्पक्तृशब्दवत्पच्येतशब्दस्यकर्मवाचित्वं कर्मगतसंख्याविशेषानुवर्त्तनात्पक्वशब्दवदिति प्रयोगद्वये चशब्देन पाकादिशब्दे वैधर्म्यदृष्टान्ते सूचिते दाराः पचन्तीति दाराख्यस्य कर्तुरेकत्वेप्याख्याते बहुवचनदर्शनात्कर्तृगतसंख्यानुवर्त्तनस्य भाष्योक्तस्य हेतोस्तत्र कर्त्तरि कर्मणि वा भूतस्य विद्यमानस्य संख्याभेदस्यानुवर्त्तनादित्येवं तद्भूतोक्त्या व्याख्यातस्यासिद्धत्वमाशङ्क्य कर्तुरेकत्वादिति भाष्योक्तेन कर्तृसंख्यानुवर्त्तनेन कर्तृविशेषवाचिशब्दोक्तसंख्यानुवर्त्तनं विवक्षितमिति सूचनार्थं कर्तृक-

र्मशब्दोपात्तेत्येवं तच्छब्दोपात्तोक्त्या तद्भूतोक्तिर्व्याख्याता । श्लोकं व्याख्यातुमाह * पचतीति * यैव कर्तृवाचिनि शब्दे संख्येत्यनेन शाब्दी संख्याऽत्र विवक्षिता न वास्तवीति हेत्वसिद्धिशङ्कानिरासार्थं सूचितं देवदत्तयज्ञदत्तयोः पाको देवदत्तस्य पाकावोदनस्य पाकौ शाकौदनयोः पाक इति वा वैधर्म्यदृष्टान्तसूचनायादिशब्दौ तथैव वाचकत्वमित्यनेनोक्तयोः कर्तृकर्मवाचित्वपक्षयोर्दृष्टान्ता यैर्वाक्यैरुदाह्रियन्ते तान्येवं वक्तव्यानीत्यर्थः । कर्तृकर्मविशेषवाचिदेवदत्तौदनादिशब्दोक्तसंख्याविशेषानुवर्तनवत्कर्तृकर्मविभक्तिप्रतिबन्धकत्वस्यापि कर्तृकर्मविशेषस्यापि च सामानाधिकरण्यगमकत्वद्वारा कर्तृकर्माभिधानगमकत्वोपपत्तेः कर्तृविभक्तिप्रतिबन्धकत्वेन हेतुना कर्त्रभिधाने साध्ये कर्मविभक्तिप्रतिबन्धकत्वेन च हेतुना कर्माभिधाने साध्ये प्रयोगमाह * किंचेति * पचतिपच्यतेशब्दयोः कर्तृकर्मवाचित्वप्रतिज्ञाया किंचशब्देनानुकर्षणाद्धेतो प्रतिज्ञाकाङ्क्षापूरणीया उभयप्राप्तौ कर्मणीति परिसंख्याया. कर्त्रनभिधायित्वेऽपि कर्तृविभक्तिषष्ठीप्रतिबन्धकत्वसद्भावात्तयानैकान्तिकत्वशङ्कानिवृत्तयेऽभिहितत्वेन निमित्तेनेति विशेषणे कृते कर्मषष्ठ्याः कर्मणोऽभिहितत्वेनैव निमित्तेन कर्तृषष्ठीप्रतिबन्धकत्वाशयानैकान्तिकत्वमाशङ्क्य कर्तुरभिहितत्वेन निमित्तेन कर्तृविभक्तिप्रतिबन्धकत्वं कर्त्रभिधाने हेतुः कर्मणोऽभिहितत्वेन निमित्तेन कर्मविभक्तिप्रतिबन्धकत्वं कर्माभिधाने हेतुरिति विशिष्टहेतूक्त्यै तयोरिति विशेषणान्तरं कृत्वा कर्तृकर्मणोरभिहितत्वेन निमित्तेनेति विशेषणसामर्थ्यात्कर्तृकर्मविभक्तिप्रतिबन्धकत्वहेत्ववगते प्रथमाविभक्तिप्रतिबन्धकत्वाभावाद्धेतोरसिद्धत्वं न शङ्कनीयम् ॥ प्रतिज्ञानुकर्षणार्थत्वेन किंचशब्दं व्याचष्टे *इतश्चेति* हेतूक्त्यर्थं पूर्वार्द्धं व्याचष्टे * येनेति * प्रथमाविभक्त्यप्रतिबन्धकत्वे नासिद्धत्वशङ्कानिवृत्त्यै कारकविशेषणम् । अनभिहिताधिकारविहितोक्त्याभिहितत्वस्य निमित्तत्वे सूचितां युक्तिं विवृणोति * यदिहीति * पक्तृपक्वशब्दयोर्दृष्टान्तत्वोक्त्यर्थत्वेन साधर्म्यमिति श्लोकावयवव्याख्यार्थं पक्त्रित्युक्तम् ॥ पचतिशब्दस्य कर्त्रनभिधायित्वे साध्ये पच्यतेशब्दो वैधर्म्यदृष्टान्तः श्रुत्योक्त पच्यतेशब्दस्य कर्माभिधायित्वे साध्ये पचतिशब्दो वैधर्म्यदृष्टान्तोऽर्थादुक्त इत्येवमन्यदिति श्लोकावयवं व्याचष्टे * साधर्म्यादिति * यो यद्विशेषबोधकः स तद्बोधक इति श्रोत्रादौ व्याप्तिदर्शनादेकत्वादिसं-

ख्यायाश्च संख्यान्तरपरिच्छेद्यात्कर्तुं स्वपरिच्छेद्यकर्तृव्यावर्तकत्वेन कर्तृविशेषरूपत्वात्कर्तृसंख्याबोधकत्वेनाख्यातस्य कर्तृबोधकत्वानुमानाशयतया कर्तुरेकत्वं वाच्यविपर्यीकृत्य येन कारणैनैकवचनं प्रयुज्यते तेन कारणेन कर्त्ता वाच्य इत्येवमेतद्भाष्यव्याख्यानायैतत्सूचित प्रयोगमाह * इतश्चेति * पचतिपच्यतेशब्दाख्यस्य धर्मिविशेषणस्य कर्तृकर्मविषयत्वाख्यस्य च साध्यधर्मविशेषणस्याधिकारतो लाभात्पचतिशब्दादि कर्तृकर्मणोर्बोधकः कर्तृकर्मविशेषबोधकत्वाद्यद्यद्विशेषबोधक तत्तद्बोधकं यथा श्रोत्रं शब्दविशेषाकारबोधकं शब्दबोधकमिति प्रयोगार्थ ॥ श्लोक व्याचष्टे * यदि हीति * नागृहीतविशेषणन्यायबलेन कर्तृकर्मविशिष्टसंख्याबोधकतात्र हेतुत्वेन विवक्षितेति विप्रतिपत्त्युक्त्या सूचितम्। अभिधेयभावनाविनाभावद्वाराख्यातस्य कर्तृकर्मबोधकताया मीमांसकेनाप्यभ्युपेतत्वात्सिद्धसाध्यतामाशङ्क्य तद्विशेषवाचित्वात्तद्विशेषबोधकत्वाद्वा तद्वाचित्वसाधनं कारकतद्विशेषसंख्यावाचिन्यां द्वितीयादिविभक्ताविव वृक्षत्वादिसामान्योक्त्यनपेक्षतद्विशेषशिंशपात्वादिवाचिनि शिंशपादिशब्दे पि तद्विशेषवाचित्वतद्विशेषबोधकत्वयो. सद्भावेनानैकान्तिकत्वापत्तेः कर्तृकर्मवाचित्वसिद्ध्यै कर्तृकर्मबोधकत्वसाधनात्सिद्धसाध्यत्वपरिहारं सूचयितुमाह *नचेति * प्रयोगाभिप्रेतं ६६५।४
साध्यमुपसंहरति * तस्माद् पीति *। यदेकत्वं वाच्य विषयीकृत्यैकवचनं प्रयुज्यते तद्येन कारणेन पचतिशब्दे कर्तुं सम्बन्धित्वेन कारणेन कर्त्ता वाच्य इत्येवं कर्तृविशेषदेवदत्तादिविशेषण संख्यान्वयस्य कर्तृवाच्यत्वे हेतुतया भाष्योक्तस्य विशेषणमात्रोपलक्षणत्वात्कर्तृकर्मणी पचतिपच्यतेशब्दवाच्ये पचतिपच्यतेशब्दप्रयोगे कर्तृकर्मविशेषभूतदेवदत्तौदनादिविशेषणैः सम्बध्यमानत्वाद्यच्छब्दप्रयोगे कर्तृकर्मणी विशेषणैः सम्बध्येते तच्छब्दवाच्ये यथा पक्तृपक्वशब्दवाच्ये यच्छब्दवाच्ये च न भवतस्तच्छब्दप्रयोगे विशेषणैर्न सम्बध्येते यथा भावोत्पन्नाख्यातवाच्ये इत्येतद्भाष्यसूचितं प्रयोग साधर्म्यवैधर्म्यदृष्टान्तद्वययुक्तमाह *किंचेति * श्लोकं व्याचष्टे * इतश्चेति * यत्रेत्यनेनोत्तरार्द्धोक्तवैधर्म्यदृष्टान्त सूचितं साधर्म्यदृष्टान्तं व्याख्याय वैधर्म्यदृष्टान्तव्याख्यार्थं यत्र त्वित्युक्तम्। जातिगुणशब्दानभिधेययोरपि व्यक्तिद्रव्ययोर्विशेषणान्वयदर्शनादनैकान्तिकत्वमाशङ्क्य विशेषणान्वयान्यथानुपपत्त्या तयोरपि वाच्यत्वकल्पनेनानैका

न्तिकत्वपरिहारं सूचयितुमाह*नचेति ।*पञ्चानामपि प्रयोगाणां भाष्यकाराभिप्रेतत्व दर्शयितुमाह *तदिति* कर्तृविशेषदेवदत्तादिगतसंख्यायोगित्वमात्रेण भाष्योक्तेन कथं सामानाधिकरण्यादि दर्शितं भवतीत्याशङ्क्याह*तद्गतेति*भिन्नयोरर्थयो सख्यैक्यनियमाभावेन पचतिदेवदत्तशब्दयोरर्थैक्यं विना पचतिशब्दस्य देवदत्तशब्दगतसंख्यायोगित्वायोगादेकार्थलक्षणं सामानाधिकरण्यं विनानुपपत्तिस्तावत्स्पष्टा कारकविभक्तिप्रयोगे चानर्थक्यापत्तेराख्यातस्य कारकानभिधायित्वप्रसङ्गेन कारकवाचिना देवदत्तादिपदेन सहैकार्थ्यलक्षणसामानाधिकरण्यायोगप्रसंगात्कारकविभक्त्यप्रयोग विना सामानाधिकरण्यानुपपत्तिः प्रतिबन्धभावे च कर्मणि द्वितीयेत्यादिविधानादवश्यं कारकविभक्तिप्रयोगापत्तेराख्यातस्य कारकविभक्तिप्रतिबन्धकत्वं विना कारकविभक्त्यप्रयोगानुपपत्तिरित्येव परम्परया कारकविभक्तिप्रतिबन्धकत्वं विना तद्गतसंख्यायोगित्वानुपपत्ति. कर्तृभूतदेवदत्तादिगतसंख्याविशेषानुवर्त्तनाख्यस्य तद्गतसंख्यायोगित्वस्य तद्गतसंख्याया बोधकत्वं विनायोगात्तद्गतायाश्च संख्यायास्तद्विशेषत्वात्साक्षादेव तद्विशेषबोधकत्वं विनानुपपत्तिः । अर्थान्तरस्यार्थान्तरासामान्यरूपाविशेषणान्वयायोगाद्देवदत्तपचतिशब्दयोरैकार्थ्याभावे पचतिशब्दार्थस्य देवदत्तशब्दार्थविशेषणान्वयानुपपत्तौ विशेषणान्वयानुपपत्तौ विशेषणान्वयं विना विशेषणवाचिशोभनादिशब्दसामानाधिकरण्यानुपपत्तेः शोभनादिशब्दोक्ताया अपि च संख्याया. कर्तृगतत्वात्सामानाधिकरण्यं विनानुपपत्तिरित्येवं परम्परया कर्तृविशेषणान्वयं विना तद्गतसंख्याया योगित्वानुपपत्तिरित्याशयः । शङ्काभाष्यार्थमुपसंहरति*तस्मादिति*उच्यतइत्यादि नकेन ।चेद्बाध्यतइत्यन्त परिहारभाष्यं कर्तुरवाच्यत्वे व्याख्यातश्रवणेनुष्ठेयक्रियावगमादवगमोपपत्तेर्वाच्यत्वप्रमाणार्थापत्त्यनुदयेनानुपलब्धिविरोधोक्त्यर्थतया व्याचिख्यासुराख्यातान्वयव्यतिरेकान्यथानुपपत्तिप्रभवयाऽर्थापत्त्याख्यातगम्यत्वावगमादनुपलब्धिविरोधायोगमाशङ्क्य सिद्धसाधनत्वापत्तेर्गम्यत्वमात्रस्यासाध्यत्वाद्वाच्यत्वसाधनार्थं शङ्काभाष्यं तत्र त्वनुपलब्धिविरोधोऽस्त्येवेति परिहारसूचनार्थं भाष्यसूचितैः पञ्चाभिः प्रयोगैर्वाच्यवाचकशक्तानुमीयते गम्यगमकत्वमात्रं वेति विकल्पाद्यकल्पे भाष्यं व्याख्यातुमारभते*तत्रेति*प्रतिज्ञादोषाणां सर्वप्रयोगसाधारण्येपि हेतुदोषाणां प्रतिहेतूपपादनवैलक्षण्यसूचनार्थं सामानाधिकरण्यात्ता-

वत्पचत्यादिशब्दः कर्तृकर्मवाचीति यदुक्तमित्युक्तम् । एकप्रमाणा-नुदयमात्रेणानुपलब्ध्यसिद्धेरर्थापत्तिभङ्गमात्रेणानुपलब्धिविरोधायो-गमाशङ्क्यार्थापत्तिभङ्गमात्रेण सर्वप्रमाणानुत्पत्तिसिद्धेरित्युक्तम् । प्रामाणान्तराणां शक्तिविषयत्वाभावादेवानुत्पत्तेरर्थापत्तिभङ्गमात्रेण सर्वप्रमाणानुत्पत्तिसिद्धिमुपपादयितुमाह *सर्वेति।* अनुमानविरो-धोक्त्यर्थतयैतदेव भाष्यं व्याख्यातुमाह *अनुमानेति* धात्वर्थस्याक-र्तृकस्यापि क्वचिद्दर्शनेन कर्त्रविनाभावात्कर्तृकर्माविनाभूतार्थाभिधा-यित्वस्यासिद्धत्वमाशङ्क्य प्रत्ययस्य कर्तृकर्माभिधानानभिधानाविचार-विषयत्वात्तद्वाच्याया भावनाया क्वचित्कर्तृव्यभिचाराभावेनासिद्ध-त्वपरिहारसूचनायात्यन्तोक्ति । तिङ कर्तृकर्मवाचित्वाभावे प्रयोग-मुक्त्वा कर्तृकर्मणोस्तिङ्वाच्यत्वाभावे प्रयोगमाह *तथेति* तिङ्वा- ९६६।३।
च्यया भावनया कदाचिदत्यज्यमानत्वादित्याद्यहेत्वर्थः । भावोत्प-न्नलकारेषु तिङ कर्तृकर्मविषयव्यापाराभावेप्यभिधेयाविनाभावेन प्र-तीयमानत्वादिति द्वितीयहेत्वर्थ यत्तिङ्वाच्येन न त्यज्यते तिङ्व्या-पाराद्विनापि च प्रतीयते तत्र तिङ्वाच्यं यथा कर्तृत्वाश्रयभूतं देवदत्ता-दिद्रव्यं कर्मत्वाश्रयभूतं चौदनादिद्रव्यमित्याद्यदृष्टान्तार्थ । यद्यद्वा-च्येन न त्यज्यते यद्व्यापाराद्विनापि च प्रतीयते तत्र तद्वाच्य यथा शिंशपाशब्दवाच्येन शिंशपात्वेनात्यज्यमानं शिंशपाशब्दव्यापाराद्वि-नापि च प्रतीयमानं वृक्षत्वं न शिंशपाशब्दवाच्यमिति द्वितीयदृष्टा-न्तार्थः । कर्तृकर्मणी नाख्यातेनाभिधीयेते कारकत्वात्करणादिवत्क-र्तृकर्मोत्पन्नस्तिङ्शब्दः कर्तृकर्मणोरवाचकः । आख्यातत्वाद्भावोत्पन्न-तिङ्शब्दवदिति स्वयं प्रयोगद्वयमाह *कारकत्वादिति* । भाष्या-नारूढमप्येतत्प्रयोगद्वय सम्भवादुक्तमिति सूचयितुमाह * अपीति* एवमपीति पूरणीयं सर्वेषां प्रयोगाणां लोकविरोधं शङ्कापूर्वं निरस्यति *नन्विति*अभिधेयोर्थो गवादिशब्दानां जातिर्गम्यमानो व्यक्तिर्द्योत्यः प्रादीनामुपसर्गाणां गमनादिस्तिष्ठत्यादिधात्वर्थः विषयो योगरूढानां पङ्कजादिशब्दानां पद्मत्वाद्येकार्थसमवायिपङ्कजननकर्तृत्वादिवाचिनां पद्मत्वादि । कर्तृकर्मणोराख्यातगम्यत्वमात्रानुमानमाख्यातस्य कर्तृक-र्मगमकत्वमात्रानुमानं च कस्मान्न भाष्यकृता दूषितमित्याशङ्क्य सिद्धसाधनतयैव निरस्तत्वादिति परिहारं सूचयितुमाह * यदि-त्विति । * वाच्यवाचकशक्त्यनुमानस्य लोकविरोधोक्त्यर्थतयैतदेव भाष्यं व्याख्यातुमाह * लोकेति । * एतदेव प्रश्नपूर्वमुपपादयति

कुत इति । वक्तव्यं चैष व शब्दो विनाशित्वेन साध्यत इत्यादि-
शब्दाधिकरणवार्त्तिकोक्तेन च मार्गेण वर्णात्मकशब्द कारकवाचि-
त्वेन साध्यते स्फोटात्मको वा जातित्रिगुणाद्यात्मको वेति त्रेधा शब्दवि-
कल्पनया शक्त्यात्मकं कारकमाख्यातवाचित्वेन साध्यते द्रव्यात्मकं
वेति द्वेधा कारकविकल्पेन शक्तिर्द्रव्यादत्यन्तव्यतिरिक्तात्यन्ताव्य-
तिरिक्ता वाव्यतिरिक्ता वेति त्रेधा व्यतिरेकाव्यतिरेकप्रश्नेन वर्णात्म-
कशब्दधर्मिपक्षे तवाप्रसिद्धविशेष्यः पक्षः स्फोटात्मकपक्षे मम
जात्याद्यात्मकपक्षे द्वयोर्द्रव्यात्मककारकधर्मिपक्षे तव शक्त्यात्मक-
पक्षे मम व्यतिरिक्ताव्यतिरिक्तपक्षे तवात्यन्ताव्यतिरिक्तपक्षे ममा-
त्यन्तव्यतिरिक्तपक्षे द्वयोः कारकधर्मिपक्षे वर्णस्फोटजात्यादिशब्दवि-
कल्पनया तथैवाप्रसिद्धविशेषणः शब्दधर्मिपक्षे शक्तिद्रव्यकारकवि-
कल्पेन व्यतिरेकाव्यतिरेकप्रश्नेन च युगपद्धर्मधर्मिविकल्पेष्वप्रसिद्धो-
भय इति प्रतिज्ञादोषा वैयाकरणं प्रति योज्या इत्याह * शेषा अ-
पीति * ॥ सामानाधिकरण्यं श्रौतं लाक्षणिकमविशेषितं वा हेतुरि-
ति त्रेधा सामानाधिकरण्याख्यहेतुं विकल्प्याद्यकल्पे तावदसिद्धता-
माह *तथेति* वाशब्देन तृतीयः कल्पः सूचितः । संख्याद्यभिधानाभ्यु-
पगमेपि कारकनिवृत्त्यर्थाऽऽद्यमात्रोक्तिः । शक्तिमात्रस्य कारकत्वे
श्रौतसामानाधिकरण्यायोगमुपपादयति *देवदत्तादीति * । द्रव्य-
कारकपक्षेपि निर्व्यापारस्य कारकत्वायोगाच्छक्तिरहितस्य च व्यापा
रायोगाच्छक्तिविशिष्टस्यैव कारकतयाभ्युपगन्तव्यत्वेन कारकाभि-
धानपक्षे नागृहीतविशेषणान्यायाच्छक्तिमात्राभिधानापत्तेः श्रौतं द्रव्य-
शब्दसामानाधिकरण्यं यस्मान्न युज्यते तस्माच्छक्तिकारकपक्षे सुतरां
९६७।१ न युज्यत इत्यतिशयार्थमाह * यस्यापि हीति * । द्रव्यशब्देन सहा-
ख्यातस्य श्रौतसामानाधिकरण्यायोगेपि शक्तिवाचिना पाचकादि-
शब्देन कृदन्तेन सह श्रौतसामानाधिकरण्य भविष्यतीत्याशङ्क्य
भिन्नप्रवृत्तिनिमित्तानामेकस्मिन्नर्थे वृत्तेस्तात्पर्याख्यायाः सामानाधिक
रण्यशब्दवाच्यत्वाद्वाच्यार्थतात्पर्यं विना श्रौतसामानाधिकरण्यानुप
पत्तेः कृतां च कारकाख्यशक्तिवाचित्वेपि द्रव्योपसर्जनीभूतशक्तिवा-
चित्वेन शक्तौ तात्पर्याख्यवृत्त्यभावान्न कृदन्तेनापि सह श्रौतसामाना
धिकरण्योपपत्तिरित्याशयेन परिहरति * शक्तीति * कारकपरा-
ख्यातप्रयोगेन कारकविभक्तिर्देवदत्तेनेति तृतीयौदनमिति द्वितीया वा

प्रयुज्यत इति न चेत्यनेनोक्तम् ॥ शक्त्यभाववादिवैशेषिकादिमतेन शुद्धस्य द्रव्यस्य कारकत्वात्कारकवाचित्वेऽप्याख्यातस्य द्रव्यवाचित्वोपपत्तेर्द्रव्यशब्देन सह श्रौतसामानाधिकरण्योपपत्तिमाशङ्क्याह * यस्य त्विति * । शक्तिमद्द्रव्यकारकपक्षेऽप्येकस्य द्रव्यस्यानेकशक्तिकत्वे युगपदनेककारकरूपत्वापत्तेरेकशक्तिकत्वावगमाशक्तेश्च स्वाभाविकत्वेन यावद् द्रव्यसद्भावमनपायकाष्ठादिद्रव्यं काष्ठैर्दहतीत्यादिप्रयोगे केन चित्करणादिकारकरूपेणावधारितं तस्य काष्ठानि दहतीति कर्मादिकारकान्तररूपत्वविवक्षा न कदा चित्स्यादिति दूषणं तुल्यमित्याशङ्कते * शक्तीति * शक्तेः कारकत्वे करणादिशक्तेः कदा चित्कर्मादिकारकान्तररूपत्वविवक्षाभावेन तच्छङ्कोत्थानायोगाच्छक्तिमत्पक्षोऽत्र शक्तिपक्षत्वेनोक्तः। आविर्भूताया एव शक्तेः कारकत्वापादकत्वात्सर्वासां च शक्तीनां युगपदाविर्भावाभावे द्रव्यस्यानेकशक्तिकत्वेऽपि न युगपदनेककारकरूपत्वापत्तिरित्याशयेन परिहरति * नेति * शुद्धस्यापि द्रव्यस्य कस्यां चित्क्रियायां करणत्वं कस्यां चित्कर्मतेति क्रियाभेदात्तत्र कारकरूपेणाभिधानोपपत्तिमाशङ्क्य क्रियाभेदेऽनेककारकत्वोपपत्तावपि क्रियैक्ये यदपेक्ष्य नानाकारकरूपत्वं स्यात्तस्यापेक्षा कारणस्य क्रियाभेदस्याभावाच्छक्तिवच्च द्रव्यस्य स्वरूपेण भेदाभावान्नैककारकत्वेनावधारितस्य कारकान्तरत्वविवक्षोपपत्तिरित्याशयेन परिहरति * द्रव्यस्य त्विति * ॥ पाचकादिशब्दानां द्रव्यवाचित्वाभावेऽपि द्रव्यवाचिना देवदत्तादिशब्देन सह श्रौतसामानाधिकरण्यप्रसिद्धेर्नशब्दद्वयस्यैकस्मिन् वाच्ये तात्पर्यं श्रौतं सामानाधिकरण्यं किंतु वाच्येलाक्षणिके वा स्वभावतस्तात्पर्यं शुक्लादिशब्दानांतु समानविभक्त्यन्तद्रव्यशब्दसमभिव्याहारनिबन्धत्वेन द्रव्यपरत्वस्य स्वाभाविकत्वाभावान्न श्रौतं द्रव्यशब्दसामानाधिकरण्यं ततश्चाख्यातस्याकृत्यधिकरणन्यायाच्छक्तिमात्राभिधायित्वे कृदन्तवत्स्वभावतः शक्तिमद्द्रव्यपरत्वाच्छ्रौतसामानाधिकरण्योपपत्तिरित्याशङ्क्य स्वाभाविकैकार्थपरत्वलक्षणश्रौतसामानाधिकरण्याभ्युपगमे व्याख्यातस्य द्रव्यपरत्वाभावाच्छ्रौतद्रव्यशब्दसामानाधिकरण्यायोगं सूचयितुमाह * यदि चेति * शुद्धस्य द्रव्यस्याकारकत्वेन वाच्यताया दुराशङ्कित्वाच्छक्तिमतश्च शक्तिमनभिधायाभिधानशक्तेः कृदन्तेष्वपि शक्तिमात्राभिधानावगमेनाख्यातस्य द्रव्यवाचित्वाशङ्काया दूरापास्तत्वाद् द्रव्यवाचिनोक्त्या स्वभावतो द्रव्यपरत्वं विवक्षितम्।प्रसङ्गात्सुपां कारकवाचि-

नीनां द्रव्यपरत्वनिरासः नामाख्यस्य प्रातिपदिकस्य द्रव्यपरत्वेपि धातोर्द्रव्यपरत्वानिरासायां तशब्दप्रयोगात्सुप्सु च तिङन्तेषु चेति विग्रहः कार्यः निपातोपसर्गाणां द्रव्यपरत्वनिरासस्सूचनार्थोपिशब्दः सत्वभावाल्लिङ्गसंख्याकारकान्वयार्हत्वात्सुप्सु तिङन्तेषु च लिङ्ग-कारकान्तरान्वयोऽपिशब्दोक्तेषु च निपातोपसर्गेषु लिङ्गसंख्याकारका-न्वयः स्यादित्यर्थः । चतुर्थं पादं व्याचष्टे * यथैवेति । * तृतीयं व्याचष्टे * ततश्चेति * तिङन्तेषु पचतीति प्रयोगे कर्तुः पच-ति ब्रूहीति कर्मादिकारकान्तरयोग पक्त्वा भुङ्क्ष्वेत्यादिवच्चादिशब्दो क्ते पच्यते इति प्रयोगे कर्मणः पच्यते भुङ्क्ष्वेत्यादिकारकान्तरयोगः सुप्सु चौदनमिति कर्मणः पक्वेन तृप्यतीत्यादिवदोदनं तृप्यतीति करणादिकारकान्तरयोग प्राप्नोतीत्यर्थः । श्लोकार्थमुपसंहरति * तस्मादिति * निष्कृष्येष्टव्यं सदभिधेयमित्येष्टव्योक्त्या शक्तिमात्रे तात्पर्याभिधानाच्छक्तिमत्परत्वनिरासोपसंहार सूचितः। शक्तिमात्र-परत्वेपि कारकान्तरयोगः कस्मान्न भवतीत्याशङ्क्यासम्बन्धः समत्वात्स्यादित्यनेन न्यायेन शक्ते शक्त्यन्तरायोगाद् द्रव्य स्य चैकशक्तिवशीकृतस्य शक्त्यन्तरायोगादित्याह*तथासति ही-ति* काष्ठैर्दहतीति प्रयोगे करणशक्तिवशीकृतानामपि काष्ठानां काष्ठानि दहतीति प्रयोगे कर्मशक्तियोगदर्शनात्तदैवेत्युक्तं येन कार-णेन शक्तिमात्रपरत्वे सति प्राधान्यं प्रतिपद्यैकया शक्त्या वशीकृत-स्य द्रव्यस्य शक्त्यन्तरान्वयार्हत्वं नास्ति तेन कारणेन कारकान्त-रायोग इत्यर्थः । यथा निपातोपसर्गेषु लिङ्गसंख्याराहित्यं चकारा-त्कारकराहित्यं च सुप्सु तिङन्तेषु च लिङ्गराहित्य कृदन्तवैलक्षण्येन सिद्ध तथा सुप्तिङन्तेषु कारकान्तराराहित्यमपि तेनैव कारणेन सिद्धमिति दृष्टान्तेन द्रढयितुमाह * लिङ्गेति * सुप्सु तिङ्क्षु च द्रव्यस्याप्राधान्यात्कारकान्तरान्वयवत्संख्यान्वयस्याप्यनुपपत्तावपि कारकशक्तिगतसंख्याभिधानात्संख्यायोगाविरोधः कारकशक्तीनां लिङ्गाभावेपि सुप्सु प्रातिपदिकार्थगताभिधानाल्लिङ्गयोगाविरोधः । श्रौतत्वविशिष्टस्य सामानाधिकरण्यस्य हेतुतायामुभयासिद्धतामुप-पादितामुपसंहरति *ततश्चेति ।* लाक्षणिकमविशेषितं वेति कल्प-द्वयं तथा सामानाधिकरण्यं श्रौतं लाक्षणिकं वेति वाशब्देनाविशे-षितकल्पस्य गृहीतत्वसूचनार्थं सहानुभाष्याविशेषितकल्पे तावदनै-

कान्तिकतामाह * अथेति । * श्रौतत्वविशेषणपक्ष एव हेतोः साध्याविशिष्टत्वलक्षणप्रतिज्ञार्थैकदेशत्वेनान्यतरासिद्धत्वं वक्तुमारभते * यद्वेति । * अधिकरणशब्दस्याश्रयवाचित्वात्कस्माद्वाच्यत्वं विनार्थस्य शब्दाधिकरणत्वं न भवतीत्याशङ्क्य मीमांसकमते शब्दस्य द्रव्यत्वेनानाश्रयत्वाद्वैयाकरणमते त्वाकाशाश्रयत्वादित्याह * सर्वेति । * वाच्यत्वे तु विषयत्वाख्याधिकरणतायुक्तेत्याह * वाच्यस्य त्विति । * विषयवाचित्वेऽधिकरणशब्दस्य गौणलाक्षणिकयोरपि विषयत्वोपपत्तेः कथं वाच्यत्वोक्त्यापत्तिरित्याशङ्क्य श्रौतत्वविशेषणाद्वाच्यत्वोक्त्यापत्तिमाह * तदपीति । * श्रौतसामानाधिकरण्यशब्देनैकार्थवाचित्वोक्तावपि कथं प्रतिज्ञार्थैकदेशतेत्याशङ्क्यैवंविधप्रयोगापत्तेरित्याह * ततश्चेति *। एवं च सति प्रतिज्ञार्थैकदेशत्वं भवतीत्याह * नतश्चानित्यइति । * शब्दयोः सामानाधिकरण्यं शब्दबुद्ध्योर्वार्थयोर्वार्थबुद्ध्योर्वेत्येवंप्रकारैरादिशब्दादेकार्थसमवायलक्षणमेकार्थप्रतिपादकत्वलक्षणं वैककार्यजनकत्वलक्षणं वेत्येवंप्रकारैश्च विकल्पैः सामानाधिकरण्यं विकल्प्य तद्भूताधिकरणपूर्वपक्षवार्तिकपदानि तावद्वर्ण्यां वेत्युपक्रम्यैकार्थसमवायेपि सर्वेषां व्योम्नि तुल्यतेत्येकार्थसमवायलक्षणशब्दसामानाधिकरण्यनिरासाद्व्यङ्ग्यास्तावत्पृथग्भूताः पदार्थाः पदभेदतइत्येकार्थप्रतिपादनलक्षणानिरासाद्यथा तद्विषयाप्येतैर्बुद्धिर्नैकोपजन्यते जातु स्वविषया बुद्धिः प्रतिशब्दमसावपि न चैकज्ञानजननं भिन्नैस्तैः क्रमवर्त्तिभिरित्येककार्यजननलक्षणनिरासादेकात्प्रवृत्तिता तुल्या घटहस्त्यादिधीष्वपीत्येकार्थसमवायलक्षणपदार्थबुद्धिसामानाधिकरण्यनिरासादत एव विशिष्टाधीस्ताभिर्नैकोपजन्यत इत्येककार्यजननलक्षणनिरासाच्च चैकव्यक्तिवृत्तित्वे प्रमाणं गोत्वशुक्लयोरित्येकार्थसमवायलक्षणपदार्थसामानाधिकरण्यनिरासाच्च च वस्त्वन्तरारम्भः । पदार्थैस्तदनुग्रहादित्यादिना चैककार्यजननलक्षणसामानाधिकरण्यनिरासात्तेनैव न्यायेनानियमो वार्थान्तरत्वादन्यत्वं व्यतिरेकशब्दभेदात्स्यादिति षष्ठान्तपूर्वपक्षसूत्रेऽर्थयोरत्र सामानाधिकरण्य न शब्दयोरिति भाष्ये व्यतिरेकशब्दभेदादित्यर्थान्यत्वहेतुव्याख्यार्थं वक्ष्यमाणेन च पशुत्वान्वयेपि गवादौ छागत्वव्यतिरेकादर्थैक्ये च पशुः छाग इति शब्दभेदानर्थक्यापत्तेरित्यनेन न्यायेनासिद्धत्वमुद्भावनीयम् । अर्थयोरेकव्यक्त्याभा-

त्त्वाच्छब्दयोर्वा गम्यमानैकार्थत्वात्सामानाधिकरण्यस्य गवाश्वादि-
शब्दानामेकार्थवाचित्वाभावेऽप्येकाधारार्थद्वयवाचित्वलक्षणसामाना-
धिकरण्याविशेषादनैकान्तिकत्वमुद्भावनीयमित्याह * तद्भूतेति * ।
मीमांसकैरपि गोशुक्लादिशब्दानां सामानाधिकरण्याभ्युपगमात्सर्व-
प्रकार विकल्पेष्वसिद्धत्वोद्भावनमयुक्तमित्याशङ्क्य परमार्थतः सामा-
नाधिकरण्यमङ्गीकारेऽप्यनुमानव्यवहारकाले वादिनं पराजेतु सर्वप्र-
कारं विकल्प्यासिद्धत्वोद्भावनं युक्तमिति व्यवहारकालविशेषणेनो-
क्तम् ॥ कर्तृकर्माविनाभूतार्थवाचित्वादिभिश्चानुमानविरोधायोक्तैर्हे-
तुभिस्तिङ कर्तृकर्मवाचित्वनिरासेन मुख्यसामानाधिकरण्यनिरासा-
दसिद्धतोपपादनीयेत्याह * अनुमानेति । * तैरेव हेतुभिस्तुल्यबल-
त्वाभ्युपगमे सप्रतिसाधनतापि वाच्येत्याह * सप्रतिसाधनता
वेति । * यथा च पक्षहेतू विकल्पदूषितौ तथा दृष्टान्तोऽपि शक्तिपर-
त्वाशयेन शक्तिमत्परत्वाशयेन वेति विकल्प्याद्यकल्पे साध्यहेतुविक-
लत्वाभ्यां दूषणीयइत्याह * दृष्टान्तोपीति । * शक्तेः शक्तिमतो वा कार-
कत्वे शक्तेरवाकृत्यधिकरणन्यायेनाख्यातेष्विव कृदन्तेष्वपि वाच्य-
त्वान्न वैयाकरणमते मीमांसकमते वा साध्यविकलत्वं संभवतीत्या-
शङ्क्य शक्त्यभिधानोक्तेः शक्तिपरत्वस्य विवक्षितत्वाच्छक्तिमतश्च
कारकत्वे शक्तावकारकत्वेपि नैव तात्पर्यायोगाच्छक्तेरपि कारकत्वेपि
कृदन्तवैलक्षण्येन सुप्तिङन्तेषु शक्तिमात्रपरत्वोक्त्या कृदन्तानां शक्ति-
मात्रवाचित्वेपि शक्तिमत्परत्वस्योक्तत्वाच्छक्तिमात्रपरत्वाशयेन दृष्टा-
न्तोक्तौ भवत्येवमेतद् द्वयेपि साध्यविकलतेति परिहारसूचनार्थं नही-
त्युक्तम् । हेतुविकलत्वोपपादनार्थं यच्च श्रौतं सामानाधिकरण्यमि-
त्यादि वार्त्तिकोपपादिता देवदत्तवचनत्वादिति हेत्वर्थापत्ति परामृष्टा।
द्वितीयकल्पे कारकशक्त्यभिधानाख्यसाध्यधर्मस्य यो विशेषः स्वप्र-
धानशक्त्यभिधानं नाम तद्विपर्ययद्रव्योपसर्जनीभूतशक्त्यभिधानाप-
त्तेर्द्धर्मविशेषविपर्ययसाधनत्वलक्षणं हेतोर्विरुद्धत्वमाह * पाचका-
दीति * लाक्षणिकत्वाविशेषणकल्पे प्रागनुभाषितेऽपि लाक्षणिकसा-
मानाधिकरण्यस्य वाद्यनभिमतत्वेनापाद्य विकल्पमात्रत्वसूचना-
यान्ते धर्मस्वरूपविपरीतसाधनत्वलक्षण हेतोर्विरुद्धत्वमाह * अथ-
वेति * श्रौतस्यैव सामानाधिकरण्यस्य वादिनो हेतुतयाभिप्रेतत्वा-
९६९।२ ल्लाक्षणिकसामानाधिकरण्यस्य हेतुना वाच्येत्यापाद्य दोषोक्त्युपपा-

दनार्थं यदेत्युक्तम् । अस्य विकल्पस्यानावश्यकत्वसूचनायाऽथवा-शब्दः । गौणत्वविशेषणकल्पोऽपीतरशब्देन सूचितः । गौणलक्ष-णावृत्त्योरपि शब्दवाच्यत्वाभावेऽर्थस्य शाब्दार्थान्तरानन्वयापत्ते. शब्दस्य वाचकत्वावगतेर्विपक्षाभावाद्विरुद्धत्वायोगमाशङ्क्याशब्द-स्वरूपनिमित्तबोधकत्वाभावेपि तात्पर्याख्यशब्दव्यापारस्य सर्वत्र भावाच्छाब्दत्वेनार्थान्तरान्वयोपपत्तेः सर्ववृत्तीनां वाजहत्स्वार्थत्वस्य तत्सिद्धिसूत्रे भाष्यकृतार्थाभिधाने सूत्रे चार्थेन नित्यसंयोगादित्यसं-योगादित्यवयवेन सूत्रकृतोक्तत्वाद्वाचकत्वाभावेन विपक्षत्वोपपत्ति-माह*न चेति*परेष्वपि प्रयोगेषु सर्वे पूर्वोक्ता. पक्षदोषाः सप्रतिसा-धनत्वं च हेतुदोष. साध्यविकलत्वं च दृष्टान्तदोषजातं योज्यमित्याह * एवमिति * सामानाधिकरण्यविकल्पोक्तहेतुदृष्टा-न्तदोषनिवृत्यै यथासंभवोक्ति । परेषु प्रयोगेष्वसाधारणान् दोषा-न्विवक्षन् कर्तृकर्मवाचिदेवदत्तौदनादिपक्षोक्तसंख्यानुवर्त्तमाना दिति द्वितीयप्रयोगस्थं तावद्धेतुं देवदत्तादिपदेन कारकशक्ति गता संख्योक्तेत्याशयेनायं हेतुर्द्रव्यगतोक्तेत्याशयेन वेति विकल्प्या-द्यकल्पे शक्त्याश्रिताया संख्याया देवदत्तादिपदवाच्यतया केन चिदनिष्टत्वादसिद्धत्वेन दूषयति *नद्वतेति* निपातोपसर्गेष्विव तिङ्क्ष्वपि द्रव्यस्योपसर्जनत्वेन कथञ्चेल्लक्ष्यमाणस्यापि संख्यान्वया-योगादप्रधानभूतस्यापि च संख्यान्वयाभ्युपगमे लिङ्गसंख्यारहितत्वं च द्रव्यप्रधानकृदन्तवैलक्षण्येन सिद्धमिति वार्त्तिकायोगापत्तेः शक्त्यात्मककारकाश्रिताः संख्या देवदत्तादिपदवाच्यतया केन चिन्नेष्यन्ते द्रव्याश्रितत्वाद् देवदत्तादिपदवाच्यानां संख्यानामि-त्यर्थः । द्वितीयकल्पेन देवदत्तादिपदोक्तकारकशक्त्याश्रयभूतद्रव्य-गतसंख्योपादानादिति हेत्वर्थापत्तेर्न केवलमसिद्धत्वं किंतु पाचका-दिशब्दे कारकशक्त्याश्रयभूतद्रव्यगतसंख्योपादानस्य तथाविधद्र-व्यपरत्वेन सह प्रसिद्दर्शनाद्यत्कारकशक्त्याश्रयभूतद्रव्यगतां संख्या-मसावाख्यानशब्द उपादत्ते तत्कारकशक्त्याश्रयभूतद्रव्यपर इति प्रतिज्ञापत्तेरभ्युपगमविरोधाख्य पक्षदोषोपि स्यादित्याह * अथ त्विति * शुद्धद्रव्यवाचित्वप्रतिज्ञायाः प्रकृतानुपयोगेनानाशङ्क्य-त्वात्कारकशक्त्याश्रयभूतद्रव्यवाचित्वे च दृष्टान्ताभावात्तात्पर्याशया वाचकोक्तिः । अभ्युपगमविरोधोपपादनार्थं वैयाकरणो व्याख्या-

तस्य द्रव्यपरत्वं नेच्छतीत्युक्तम् । कर्तृकर्मशक्तिलक्षितद्रव्यगतसंख्योपादायिनि पक्तृपक्वादिशब्दे कर्तृकर्मशक्ति [[1]वाचित्वेदर्शनाद्योपलक्षितगतसंख्योपादायी स तद्वाचीति व्याप्तेराख्यातस्य कर्तृकर्मशक्तिसामान्यवाचित्वे साध्ये तल्लक्षितकर्तृकर्मशक्ति] व्यक्तिगतसंख्योपादायिनो व्याख्यातस्य गौण शक्तिमत्संख्योपादायित्व शक्तिवाचित्वे साध्ये हेतुर्भविष्यतीत्याशङ्क्य प्रसह्यकारित्वादिसिंहगुणानभिधायिन्यपि सिंहशब्दे प्रसह्यकारित्वादिगुणलाञ्छितदेवदत्तगतसंख्यावाचित्वाख्यहेतुवृत्तेर्गुणगुणिनोर्वा भेदोपचाराद् देवदत्तसंख्यावाचिन्यपि सिंहशब्दे गौणप्रसह्यकारित्वादिगुणसमूहसंख्यावाचित्वाख्यहेतुवृत्तेरनैकान्तिकतामाह * यदि त्विति * पाचकादिशब्द च कृदंशो दृष्टान्तो विभक्त्यंशो वेति विकल्प्याद्ये कल्पे हेतुविकलत्वं द्वितीये साध्यविकलतेत्याह * पाचकादौ चेति * तेनाख्यातस्य कर्तृसंख्यावाचित्वेन हेतुना कर्तृवाचित्वे साध्ये कर्तृतत्संख्ययावाचिका तृतीया विभक्तिर्दृष्टान्तयितव्या नतु पाचकशब्द इत्याह * तेनेति * सैव तर्हि दृष्टान्तोऽस्त्वित्याशङ्क्य तृतीयावत्कर्तृसंख्यावाचित्वात्कर्तृवाच्याख्यातमित्येवंविधप्रयोगपक्षे हेतुसाध्यविकलनिमित्तहेतुदृष्टान्तदोषासंभवेपि कर्तृवाचिदेवदत्तादिपदसामानाधिकरण्यहेतुके प्रयोगे यथानुपलब्धिविरोधादयःपक्षदोषाःसप्रतिसाधनत्व च हेतुदोषो विकल्पान् विनैव धर्मिविकल्पे नच प्रसिद्धविशेष्यत्व पक्षदोष इति दोषाः संभवन्ति तथास्मिन्नपि प्रयोगे सभवन्तीत्याह * तत्रापीति * यद्यद्गतसंख्यावाचि तत्तद्वाचीति व्याप्तिविवक्षया चास्मिन् प्रयोगे गोव्यक्त्यनभिधायिन्यपि गोशब्दे व्यक्तिसंख्यावाचित्वदर्शनादनैकान्तिकतापि स्यादित्याह * इदमिति * इदमपर दूषणं यदुक्तानैकान्तिकत्वमित्यर्थः । व्यक्तिवाचितायाश्चाऽऽकृत्यधिकरणे निरस्तत्वान्न व्यक्त्यभिधानवादिनापि वैयाकरणेन गोशब्दस्यापि पक्षत्वाभ्युपगमेनानैकान्तिकता परिहर्तुं शक्येत्याह * नचेति * सर्वकारकाणां भावनागम्यत्वाविशेषाद्वाच्यत्व विना कर्तुरसाधारण्येन संख्यान्वयायोगाशयेनाख्यातं कर्तृवाचिकर्तृसंख्यावाचित्वात्तृतीयावदिति प्रयोगस्य तृतीयान्तपदोदाहर्तव्यत्वोक्त्या सूचितत्वाद्यद्यद्गतसंख्यावाचि तत्तद्वाचीति सामान्यव्याप्तिविवक्षानुप-

---

१ इति द्वितीयपुस्तके नास्ति ।

त्तेर्गौशब्देनानैकान्तिकत्वोक्तिर्युक्तेत्याशङ्क्य कर्त्रनभिधानानुमानस्याभिधानशक्तिग्राहकयोग्यार्थापत्त्यनुदयलक्षणलक्षणाभावाख्यप्रमाणोपबृंहितत्वेन दृढतया बलीयस्त्वान्नत्विति शङ्काभाष्योक्तकर्त्रभिधानानुमानबाधकत्वे तत्तावत्प्रत्यक्षवद् दृढतया बलीयस्त्वान्न केनचिद्बाध्यतइति भाष्येणोक्तपाचकादिशब्दद्दृष्टान्तेन कर्तृविशेषवाचिदेवदत्तादिशब्दोक्तसंख्यानुवर्त्तनेन हेतुना कर्तृवाचित्वसाधने हेत्वसिद्ध्यादिदोषदुष्टत्वेन कर्तृवाचित्वानुमानस्य दौर्बल्याद्बाधो युक्तः। तृतीयादृष्टान्तेन तु कर्तृसंख्यावाचित्वेन हेतुनाऽऽख्यातस्य कर्तृवाचित्वसाधने दोषाभावाद्विशेषणभूतकर्त्रभिधानं च विना कर्तृविशिष्टसंख्याभिधानाशक्तेः कर्तृविशिष्टसंख्योक्त्यन्यथानुपपत्तिलक्षणार्थापत्त्युपबृंहितत्वेनानभिधानानुमानवदभिधानानुमानस्यापि प्रत्यक्षवद् दार्ढ्यान्न बाधा युक्तत्येकवचनेत्यादिभाष्येणाशङ्क्य बाधायोगेपि सप्रतिसाधनतावदपरिहार्येति कतरदिति भाष्येणात्रानुमानद्वयमध्ये कतरदनुमानं कतरदनुमानं बाधितुमर्हतीत्यावृत्ताभ्यां कतरदनुमानशब्दाभ्यामेकस्यामावृत्तौ प्रथमान्ताभ्यामन्यस्यां द्वितीयान्ताभ्यां वदतोक्तं तथापि संदेहापत्तेर्न निर्णय स्यादित्याशङ्क्य पथेति भाष्येण कर्तृसंख्यावाचित्वादिति परकीयहेतोः सामान्यव्याप्तिविवक्षयानैकान्तिकत्वमुद्भाव्यैवमिति भाष्येणानभिधाननिर्णयस्य कृतत्वात्तद्व्याख्यार्थं गोशब्देनानैकान्तिकतोक्तेति सूचयितुमाह * कतरदिति * सर्वकारकानां गम्यमात्रत्वाविशेषेपि कर्तुरसाधारण्येन सख्यान्वयस्य विस्तरेणोपपादितत्वाद्विशेषणावगतिमात्रेण च विशिष्टाभिधानस्योपपादितत्वात्कर्तृविशिष्टसंख्योक्तान्यथानुपपत्तेः क्षीणत्वेनोपबृंहकत्वायोगात्तृतीयायाश्च कर्तृवाचित्वस्यानन्यथासिद्धकर्तृप्रतीतिप्रयुक्तत्वेन कर्तृसंख्यावाचित्वस्याप्रयोजकत्वात्स्वरूपप्रयुक्तसाहित्यलक्षणाया व्याप्तेर्विशेषरूपेणासंभवसूचनार्थो सामान्यव्याप्तेर्विवक्षयानैकान्तिकत्वोक्तिर्युक्तेत्याशय. ॥ तृतीयप्रयोगस्य कारकविभक्तिप्रतिबन्धकत्वादिति हेतुं सर्वकारकविभक्तिप्रतिबन्धकत्वं हेत्वर्थो यत्किंचित्कारकविभक्तिप्रतिबन्धकत्वं वेति विकल्प्याद्यकल्पे प्रथमायाः कारकत्वाश्रयभूतद्रव्यपरत्वेन कारकविभक्तित्वेपि प्रतिबन्धाभावादसिद्धतामाह * यद्यपीति * द्वितीयकल्पे कर्तृकर्मणोः ६७०।३
कृतीति सूत्रात्कृद्योगे कर्तरि कर्मणि च षष्ठ्यां प्राप्तायामुभयप्राप्तौ

कर्मणीति पुनर्वचने कर्तृषष्ठीपरिसंख्यार्थत्वेन कर्तृषष्ठ्यपवादतया
कारकविभक्तिषष्ठीप्रतिबन्धकत्वसद्भावादनैकान्तिकत्वमभिहितत्वेन
निमित्तेन कारकविभक्तिप्रतिबन्धकत्वादिति विशिष्टहेत्वभ्युप-
गमेपि कर्मवाचिन्यां षष्ठ्यां कर्मणोऽभिहितत्वेन निमित्तेन कर्तृषष्ठी-
प्रतिबन्धकत्वसद्भावादनैकान्तिकतेत्याह * अथेति * एतदेव विवृ-
णोति *उभयेति* येन यत्कारकविभक्तिः प्रतिबध्यते तस्य तत्का-
रकाभिधाननिमित्ततत्कारकविभक्तिप्रतिबन्धकताया हेतुत्वेन विव-
क्षितायाः कर्माभिधाननिमित्तकर्तृषष्ठीप्रतिबन्धिकायां कर्मषष्ठ्याम-
भावादनैकान्तिकत्वपरिहारं तयोरभिहितत्वेनेति वार्त्तिकस्थेन
तयोरिति विशेषणेन सूचितं दूषयितुमनुभाषते * य-
त्त्विति * तिङाख्यभावनावगतत्वेन निमित्तेन तिङः कारकविभक्ति-
प्रतिबन्धकतयाऽभिधाननिमित्तत्वाभावाद्विशेषणासिद्ध्यापत्तेः का-
रकविभक्तिप्रतिबन्धकत्वमात्रस्य हेतुत्वापादानसूचनेन दूषयति*त-
स्मादिति*श्लोकं व्याचष्टे* पचतीति*भावनया कर्तृत्वावगमात्कार-
कान्तरस्याप्यवगमोपपत्तेः कर्तृतैव देवदत्तस्येत्यवगमस्य कर्तृविभक्तिं
विनायोगादवगममात्रस्य कारकविभक्तिप्रतिबन्धकत्वानुपपत्तेरभि-
धाने त्वभिहितत्वेनैव विशेषेण कारकान्तराव्यावृत्तिसिद्धेः कर्तृवि-
भक्तिं विनापि कर्तृतैवाख्यातसामानाधिकरण्येनोक्तस्य देवदत्तस्येत्य-
वगतिसम्भवादभिधानमेव प्रतिबन्धे निमित्तमित्याशयेन पूर्वपक्षी शङ्क-
ते*कथं पुनरिति*असितिष्ठत्यादिषु करणानपेक्षणादित्यादिवार्त्तिको-
क्तेन न्यायेन कारकान्तराणां व्यभिचाराद्व्यावृत्तिमाशङ्क्य यत्राव्यभि-
चारस्तत्राभिधानं विना व्यावृत्त्ययोगसूचनायानेकेत्युक्तम् । एकदे-
शिनः परिहारं दूषयितुमुपन्यस्यति * योग्यतेति * देवदत्तस्य सा-
मान्यतः कारकत्वावगमं विना योग्यतया विशेषनिर्णयायोगात्सा-
मान्यतः कारकत्वमुपपादयितुमाह*न चेति*एकदेशिनः परिहारमुप-
संहरति *तस्मादिति* पूर्वपक्षव्याख्यकत्वेनैनं परिहारं दूषणपरिहारा-
र्थैकदेशी स्वाशयं विवृणोति*अथेति*काष्ठादीनामप्याख्यातान्वयान्य-
थानुपपत्त्या सामान्यतः कारकत्वेऽवगते योग्यतया विशेषनिर्णयोपप-
त्तिरुक्तेनेत्यनेनोक्ता॥ पूर्वपक्षैकदेश्याशयं दूषयति *तादिति * एकदेशी
६७१।३ स्वाशयोपपादनार्थं काष्ठादीनां कर्तृत्वप्रतीतिमपह्नुते*आहेति *कर्तृ-
त्वप्रतीतेः सर्वस्वसंवेद्यत्वस्यान्यथासिद्धिं नानेत्यनेनोक्तामुपपादयितुं

यस्त्वित्यनेन कारकविवेकस्य निपुणदृशां स्वसंवेद्यतोक्ता॥ निपुणदृक्स्वसंवेद्यत्वमेवोपपादयति*तथा हीति*श्लोकं व्याचष्टे* यं हीति* आख्यातसामानाधिकरण्यस्य कर्तृत्वभ्रान्तिहेतुत्वेन कर्तृत्वोपचारात्सामानाधिकरण्येनाभिधीयमानस्थाली तस्यैव धारणाख्यस्य व्यापारस्य साधनात्तदेवाधिकरणत्वं प्रतिपद्यत इत्यर्थः॥ अधिकरणत्वे स्थाल्याः कर्तृत्वाभिधानानर्थक्यमाशङ्क्य भ्रान्त्या भासमानकर्तृत्वाभिधानाभ्युपगमेऽप्यधिकरणत्वानपह्नवोक्तिसामर्थ्यप्रदर्शनार्था कर्तृत्वाभिधानोक्तिः॥ वस्तुतस्तु कर्तृत्वापादकव्यापारान्तरासाधनेन स्थाल्यां निरालम्बनकर्तृत्वाभिधानायोगाद्वस्तुतोऽधिकरणत्वेन स्थितत्वादधिकरणत्वेनैव स्थाल्युच्यत इति कल्पितं सच्छब्दैर्भवतीत्याह *तस्मादिति*। अधिकरणतोक्तेः सिद्धान्त्यनभिमतत्वसूचनार्थं कल्पितं वरमित्युक्तम्॥ यदा च स्थाल्यादेर्वस्तुतः कर्तृत्वं नास्ति तदा प्रथमान्तैः स्थाल्यादिशब्दैः स्थाल्यादीनां निरालम्बनकर्तृत्वोक्तिदोषापत्तेरपि कर्तुर्नाख्यातवाच्यता युक्तेति सूचयन् कारकविभक्तिप्रतिबन्धस्याभिधाननिमित्तकत्वेऽधिकरणादीनां तत्संख्याया वाऽऽख्यातवाच्यत्वाभावादधिकरणाद्यभिधानहेतुकस्याधिकरणादिसंख्याभिधानहेतुकस्य वा सप्तम्यादिकारकविभक्तिप्रतिबन्धस्य स्थाली पचतीत्यादिप्रयोगेष्वयोगापत्तेर्न कारकविभक्तिप्रतिबन्धस्याभिधानहेतुकतायुक्तेत्याह *लकारेति*॥ तयोरभिहितत्वेनेति षष्ठ्यास्तयोः

संख्याया अभिहितत्वेन निमित्तेनेति संख्याव्यतिरेकजनितत्वाभ्युपगमेऽप्यभिधानस्य निमित्तत्वायोगसूचनार्थं तिङा चेत्युक्तम्। आख्यातप्रत्ययस्य कारकवाचितायां लः कर्मणि चेति लकारद्वारा संख्यावाचितायाश्च बहुषु बहु वचनं द्व्येकयोर्द्विवचनैकवचने इति तिङ्प्रत्याहारग्राह्यबहुवचनादिद्वारान्वाख्यानादधिकरणादिष्वित्यत्र लकारोपादानेन तिङा चेत्यत्र च तिङुपादानेनाधिकरणादेस्तत्संख्यायाश्चाख्यातानभिधेयत्वेन्वाख्यानस्य प्रामाण्यं सूचितम्। स्थाल्यादिशब्दे स्थाल्यादीनां कर्तृत्वोक्तेर्वैयाकरणेन नन्वेतत्काष्ठानि पचन्तीत्यत्र सम्भवतीति वदता स्वयमेवाभ्युपेतत्वादपगमनीयमित्यनिष्टापत्त्युक्तिरयुक्तेत्याशङ्क्याभ्युपगमनीयत्वोक्तिरवास्तवार्थाभ्युपगमदोषापत्त्युक्तयर्थत्वसूचनार्थं बलादित्युक्तम्॥ अवगतिमात्रस्य कारकविभक्तिप्रतिबन्धहेतुत्वं कर्तृत्वादिकारकविशेषस्य योग्यता देवदत्तादिग-

तत्त्वव्यवस्थोपपत्तेस्तत्सिद्ध्यै कारकविभक्त्यनपेक्षा[[1]तिङुक्तसंख्याया
योग्यतयैव सर्वकारकान्वयस्याप्यवगमात्सर्वकारकाणां स्वरूपावगत्यै
संख्यावगत्यै वा कारकविभक्त्यनपेक्षा] पत्तेस्तिङुक्तभावनान सर्व-
कारकावगमेन निमित्तेन तिङ सर्वकारकविभक्तिप्रतिबन्धकत्वप्रसंगा
न्नावगतिमात्रस्यापि कारकविभक्तिप्रतिबन्धहेतुता युक्तेत्याशङ्क्य ति-
ङुक्ताया संख्याया सर्वकारकान्वयायोगादेकेनैव कारकेणान्वया-
वगमे कारकान्तराणां संख्यावगत्यै यथा स्वकारकविभक्त्यपेक्षोप-
पत्ते कारकविभक्त्यानर्थक्यापादकत्वेन निमित्तीभूतस्य कारका-
वगमस्य संख्यावगत्यर्थत्वेन कारकविभक्त्यर्थवत्त्वोपपत्तौ कारकवि-
भक्त्यानर्थक्यापादकत्वाख्यसहकार्यभावात्कारकावगमेपि कारकवि-
भक्तिप्रतिबन्धाभावोपपत्तेर्निमित्तत्वाविघात सूचयितुमाह*अनभिधा
ने त्विति* । सिद्धफलत्वोक्त्या कारकविभक्त्यानर्थक्यापादकत्वस्य
सहकारित्वे ऽभिहिते तस्य सहकारित्वोपपादनार्थं कारकविभक्तिः ।
कारकसंख्यावगत्याख्येन फलेन फलवत्त्वं विशेषणं कृतम्॥ अवगतिमा
त्रस्य निमित्तत्वे सर्वकारकविभक्तिप्रतिबन्धापत्तेर्न तस्य निमित्तता
युक्तेति परिहारसूचितशङ्काशयमाह*नन्विति*॥ काष्ठादीनि पचन्ती-
ति प्रयोगे सर्वकारकविभक्त्यनुत्पादप्रसङ्गाच्चानिष्टापत्युक्त्ययोगमा-
शङ्क्य *सर्वदैवेत्युक्तम्* ॥ शङ्काशयनिरासार्थं परिहर्ता स्वाशयमाह
६७२.२ *नैष इति *॥ शङ्किता स्वाशयं विवृणोति * न न्विति *॥ परिहर्ता-
स्वाशयं विवृणोति*कथमिति* एकस्यापि क्रियादेरनेककारकाद्यन्व-
यदर्शनादेकत्वमात्रस्य सर्वान्वयिशक्तिहेतुत्वायोगमाशङ्क्य सकृदुच्चा-
रिततिङ्वाच्यसंख्यापरिच्छेद्यतया युगपत्सर्वकारका [[2]लोचने प्रत्ये
कालोचनादेकत्वात्यागेन बहुत्वापत्तेर्हेतुत्व सम्बद्ध्यमात्रायां चेत्यनेनो-
क्तम् ॥ संख्याया युगपत्सर्वकारकान्वयायोगेपि विकल्पेन सर्वकारका]
न्वयोपपत्तेः कदा चित्स्थाल्यादिभिरप्यन्वयसंभवात्सप्तम्यादिप्र-
तिबन्धोप्यवगतिमात्रस्य हेतुत्वे प्रसज्येतेत्याशयेन शङ्कते * विकल्प
इति*' विकल्पाभ्युपगमेपि प्रथमान्तानां विना तिङ्वाच्यसंख्यान्वयाभा-
वात्प्रथमारहितेषु स्थाल्यादिषु कारकविभक्त्यानर्थक्यापत्त्याख्यसह
कार्यभावात्सप्तम्यादिप्रतिबन्धाभावोपपत्तेर्नावगतिमात्रस्य हेतुत्ववि-
घातापत्तिरित्याशयेन परिहरति*इष्ट एवेति *एकत्वसंख्याया युगप-

१इति प्रथमे धिकः पाठ । २ इति द्वितीयपुस्तके नास्ति ।

त्सर्वकारकान्वयायोगेपि बहुत्वसंख्याया युगपत्सर्वकारकान्वयोपपत्तेर्बहुवचनान्ताख्यातप्रयोगे सर्वसाधारण्यसंभवादवगतिमात्रस्य हेतुत्वे कारकविभक्त्यभावप्रशक्तेर्न तस्य प्रतिबन्धहेतुतेत्याशयेनाशङ्कते *यदा तर्हीति* कारकैक्येप्यादधीयातामिति द्विवचनवत्कारकाश्रयभूतबहुत्वाद्यजेरन्निति वद्वैकरूपकारकव्यक्तिबहुत्वाद्बहुवचनोपपत्तावनेककारकान्वयनिश्चयायोगमाशङ्क्याख्यातोक्ताया संख्यायाः साक्षाद्भावनालक्षितकारकान्वयसंभवे कारकद्वारलक्षितद्रव्यान्वयायोगाद् द्रव्यान्वयाभ्युपगमे च दम्पत्योर्द्वयोर्योगे कर्तृत्वाद्यजेतेत्येकवचनायोगापत्तेः पारम्पर्यलक्षितत्वेनैव चैकरूपकारकव्यक्तिभिरप्यन्वयायोगादनेकविधकारकान्वयनिश्चयोपपत्तिसूचनार्थं संभवं धातुमात्रेण विवक्षित्वा समित्युपसर्गस्थाने विविधत्ववाची वीत्युपसर्गः प्रयुक्तः प्रथमापेक्षया कारकविभक्तयो विभक्त्यन्तरत्वेन विवक्षिताः ॥ अनेकविधानामपि कारकाणां संख्यान्वयार्हत्वरूपेण समप्रधानत्वेन वा तुल्यत्वविवक्षायां सर्वकारकविभक्त्यभावस्येष्टत्वादनिष्टापत्त्युक्त्ययोगोक्त्या परिहरति * इष्ट एवेति * स्थाल्यामोदनं काष्ठैर्देवदत्तयज्ञदत्तविष्णुमित्राः पचन्तीति प्रयोगे तु बहुत्वस्य कर्तृमात्रगतत्वेन विवक्षिततया कारकान्तरगमनाशक्तेः कर्तृमात्रे पर्यवसानात्कारकान्तराणामनवगतसंख्यावगत्यर्थतया कारकविभक्त्यन्तरार्थवत्त्वोपपत्तेः पूर्ववत्सहकार्यभावेनैव सप्तम्याद्यप्रतिबन्धसंभवान्नावगतिमात्रस्य हेतुत्वव्याहतिरित्याह *यदा त्विति * तदानीं न कारकान्तराणि गन्तुं शक्नोतीति कृत्वा कर्तृमात्रे पर्यवस्यति ततश्च कारकान्तराणां संख्यावगत्यै स्वविभक्त्यपेक्षोपपत्तेर्न विभक्त्यन्तराभावप्रसंग इत्युक्ते वचनेच्छया वस्तुरचनाशक्तेः शब्दस्य चेच्छामनपेक्ष्य वस्त्वनुसारित्वात्सर्वकारकान्वयार्हस्य बहुत्वस्य कर्तृमात्रगतत्वविवक्षा न युक्तेत्याशङ्क्य यद्वा भावनया कर्ता प्रथमं प्रतिपाद्यत इति वार्तिकोक्तात्कारकान्तरेभ्यः कर्तुः प्रागम्यमानतया प्राथम्यात्तदधीनत्वादितरकारकसमाधानस्येति वार्त्तिकोक्ताच्च कारकान्तरसमाधातृत्वेन प्राधान्यात्कर्तृमात्रगतत्वसंभवोक्त्या तन्मात्रगतत्वविवक्षोपपादने कृते प्राथम्यप्राधान्याभ्यां प्राक्तत्रन्वयेपि कारकान्तराणामपि संख्यापेक्षत्वात्तदन्वयस्यापि पश्चादुपपत्तेः कर्तृमात्रगतत्वविवक्षा न युक्तेत्याशङ्क्य प्रातिपदिकमात्रप्रयोगायोगात्तदनु-

प्राहायावश्यंप्रतिकारकप्रातिपदिकं प्रयोज्यविभक्त्युक्तसंख्यान्वया-त्कारकान्तराणां नैराकाङ्क्ष्यसंभवात्कर्त्रन्वयमात्रेण निराकाङ्क्षायाः संख्यायाः कारकान्तराकाङ्क्षावशेनाकाङ्क्षोत्थापनायोगात्पश्चादपि कारकान्तरान्वये कारणं नास्तीति तदतिक्रमेत्यनेनोक्ते प्रथमयैव तर्हि सर्वकारकाणां संख्यान्वयसिद्धेर्योग्यतया च कारकविशेषव्यवस्था-सिद्धेः कारकविभक्त्यानर्थक्यस्य सहकारिण संभावाद्याहन्येनैवाव-गतिमात्रस्य कारकविभक्तिप्रतिबन्धहेतुतेत्याशङ्क्य स्थाल्या-दीनां योग्यतयैवाधिकरणत्वादिरूपकारकान्तरत्वावगतेः कर्तारं प्रति तदधीनप्रवृत्तित्वलक्षणगुणभावावगमसंभवेपि सप्तम्यादिवि-भक्तिश्रुत्यैव गुणभावप्रदर्शनार्थत्वेन कारकविभक्त्यर्थवत्त्वोपपत्ति-सूचनार्थं यदा कारकान्तराणि श्रुत्यैव गुणभूतानि दर्शयितव्यानीत्यु-क्तम् । कर्तृव्यक्तिबहुत्वात्कर्तृकारकैक्येपि बहुत्वोपपत्तिसूचनार्थं कर्तृष्वेवेति बहुवचनम् । प्राथम्यप्राधान्यरूपाद्विशेषात्कर्तुरेवं सख्या-न्वयार्हत्वं कारकान्तराणां च कर्तारं प्रति गुणभावे सति शब्दस्य वस्त्वनुविधायित्वाद्वचनेच्छामात्रेण च वस्तुरचनाशक्तेरेवाविद्यमा-नस्य सर्वकारकाणां संख्यान्वयार्हत्वरूपेण समप्राधान्येन च तुल्य-त्वस्य विवक्षितुमशक्यत्वात्सर्वदा तिङ्वाच्यायाः संख्यायाः कार-कान्तरगमनाशक्त्यापत्तेः कर्तुरेव तिङ्वाच्यसंख्यान्वयार्हत्वाद्देवद-त्तस्य कर्तृत्वाभावे तिङो देवदत्तपदोक्तसंख्यानुवर्तनायोगापत्तेरने-ककारकसन्निपातेपि देवदत्तपदोक्तसंख्यानुवर्तनान्यथानुपपत्त्या क-र्तृत्वमेव भावनया देवदत्तस्यावगमित न कारकान्तरत्वमित्यवगति-संभवतीति स्वमतेन कथं पुनरिति वार्तिकोक्तपूर्वपक्षशङ्कापरिहारं सूचयन् सर्वेषां संख्यान्वयार्हत्वरूपेण तुल्यत्वाविवक्षायां कारकविभ-क्त्यभावस्येष्टत्वोक्तिरयुक्तेत्येकदेशिनं प्रति सिद्धान्त्याह * यदीति * देवदत्तस्य कारकान्तरत्वव्यावृत्त्या कर्तृत्वावधारणे देवदत्तपदोक्त-संख्यानुवर्तनान्यथानुपपत्तेर्हेतुतां संख्यया कर्तुः सदानतिक्रमित-व्यत्वोक्त्या सूचितामजानन्नेकदेशी सर्वेषां यथायथं कारकविशे-षावधारण मत्वा तिङ्वाच्यया संख्यया कर्त्रनतिक्रमे स्थालीकाष्ठादीनां योग्यतावशेन कर्तृत्वव्यावृत्त्याधिकरणत्वाद्यवधारणात् स्थाली पच-तीति काष्ठादीनि पचन्तीति वा प्रयोगः कदाचिदपि न युज्येतेत्याशङ्कते *कथं तर्हीति * । सिद्धान्ती स्थाली पचतीत्यादिप्रयोगे संख्यया

कर्त्रतिक्रमो युक्तः स्थाल्यादीनां कर्तृत्वविवक्षा वेति संप्रधारणपूर्वं कर्तृविवक्षौचित्योक्त्या प्रयोगोपपत्तिमाह *उच्यत इति *॥ कर्त्रभिधानपक्षे कर्तृसंख्ययोरेकशब्दोक्तत्वेनान्योन्यनियमात्कर्त्रनतिक्रमावगतेः स्थाल्यादीनां तिङ्वाच्यसंख्यानुवर्तनान्यथानुपपत्त्या कर्तृत्वविवक्षाशङ्क्येतापि सापि त्वधिकारणादिप्रतिपत्तिहेतुभूतधारणादिव्यापारातिरिक्तव्यापाराभावेनैकदेशिना निरस्ता । अनभिधानपक्षे तु कर्तृत्वविवक्षाया शङ्कितुमप्यशक्यत्वात्सप्तदशप्राजापत्यानिति बहुवचनेन प्रथमत्रित्वातिक्रमवत्पर्वकालत्वेन प्रधानवाजपेयातिक्रमवच्च तिङः स्थाल्यादिपदोक्तसंख्यानुवर्त्तनान्यथानुपपत्त्या कर्त्रतिक्रमेणाधिकरणाधिसंख्यावाचित्वकल्पनैव युक्तेत्याशयेन प्रश्नपूर्वं सर्वं कारकाणां स्वव्यापारेषु कर्तृत्वसद्भावात् स्थाल्यादीनां कर्तृत्वाविवक्षया तिङः स्थाल्यादिपदोक्तसंख्यानुवर्त्तनानुपपत्तिपरिहारोपपत्तेर्न कर्त्रतिक्रमेणाधिकरणादिसंख्यावाचित्वकल्पना युक्तेत्याशयेन परिहरति * कुत इति * प्राथम्यप्राधान्ययोग्यस्यानतिक्रमे हेतोः कदाचित्कर्तृत्वानपायात्कर्त्रतिक्रमायोगसूचनार्थं प्राथम्यप्राधान्यवाचिन्या मुख्योक्त्या तद्योगी कर्त्ता लक्षितः । कर्तृत्वविवक्षा यथेष्टं यस्माद् युज्यते तस्माच्च कर्त्रतिक्रमे कारणमस्तीत्यन्वयसूचनार्थो यस्माच्छब्दार्थे नन्विति निपातः । उत्तरार्द्धमुपपादयितुमाह * सर्वत्रैवेति * स्वव्यापारे च काष्ठादेः करणत्वाद्यसंभव इति तद्भूताधिकरणवार्त्तिके सर्वकारकाणां स्वव्यापारेषु कर्तृत्वस्योक्तत्वात्तस्मिन्नेव चाधिकरणे तत्स्वातन्त्र्यावगत्यैव विनियुङ्क्ते प्रयोजक इत्यादिवार्त्तिकेन स्वव्यापारकर्तृत्वाद्भिन्ना प्रधानक्रियागतकारकवैचित्र्यानुपपत्युक्त्या स्वव्यापारे कर्तृत्वस्योपपादितत्वात्स्थाल्यादिव्यापाराणां पच्यर्थत्वात्पाकत्वविवक्षया यत्स्थाल्यादीनां स्वव्यापारे कर्तृत्वं तदेव पाके कर्तृत्वं विवक्षितमिति कल्पनं न्याय्यमित्यर्थः । ततश्च तिङ्वाच्यया संख्यया कर्त्रनतिक्रमेऽपि तिङः स्थाल्यादिपदोक्तसंख्यानुवर्तनोपपत्तेः कर्त्रतिक्रमहेत्वभावान्न कारकान्तरसंख्याभिधानकल्पनमित्येवं पूर्वार्द्धस्योत्तरार्द्धोपपाद्यत्वसूचनार्थं पश्चाद्व्याख्यायै न कारकान्तरेत्युक्तम् ॥ संख्यया सदा कर्त्रनतिक्रमे सत्योदनः पच्यत इति प्रयोगायोगमाशङ्क्य वस्तुलक्षणकर्मप्राधान्यविवक्षाख्यस्य कर्मसंख्योक्तिकारणस्य तदेत

दवश्यमावाभ्यामेव परिहर्त्तव्यमित्यादिवार्तिकोक्तत्वात्कर्मान्वयोपप-
त्तिमाह * एवं तु सतीति * । कर्त्रन्वयानियमायोगात्तर्हि काष्ठानि
६७३.४ पचन्तीत्यादौ करणादिसंख्योक्तिरपि न्याय्या स्यादित्याशङ्क्य
कर्मवद्वस्तुलक्षणायाः कर्तृवद्वा शब्दलक्षणायाः प्राधान्यविवक्षायाः
संख्यान्वयकारणभूतायाः करणादौ कदाचिदभावाद्यवस्थायाः
करणादीनां तु न वस्तुलक्षणेत्यादिवार्तिकोक्तत्वात्परिहरति *
न चेति * । प्राधान्यभावात्कारकान्तराणां तिङाद्यसंख्यान्वयायोगा
भ्युपगमे तेनैव न्यायेन कर्मण एकत्वे द्वितीयैकवचनमित्येकत्वादि-
विशेषणत्वेन कर्मादिशब्दव्याख्यानात्कर्मादीनां प्राधान्याभावेना-
नभिहितत्वविशेषणत्वविशेषणान्वयस्याप्ययोगापत्तेरनभिहिताधि-
कारेणाभिहितत्वस्य कारकविभक्तिप्रतिबन्धे हेतुत्वान्व्याख्या-
नायोगात्पूर्वपक्ष्यभिमताभिहितत्वस्य कारकविभक्तिप्रतिबन्धहेतु-
तापि न सिद्ध्येदित्याशयेनान्य एकदेशी प्रसंगादाह * तदा त्विति *
अनभिधानस्य संख्याविशेषणत्वं प्रश्नपूर्वमुपपादयति * कुत इति * ।
तस्य विभक्तिवाच्यविशेषणस्यासम्बन्धः समत्वादिति न्यायाद्-
विशेषणं न युक्तमित्यर्थ । श्लोकं व्याचष्टे * न हीति । एकेनैव
विशेषणेन विशेष्यत्वासिद्धेर्विशेषणान्तरान्वयायोगमाशङ्क्य पुन-
रपीत्युक्तम् ॥ एतदेव दृष्टान्तेनोपपादयितुमाह * तथाचेति * ।
संख्याविशेषणत्वेनानभिहिताधिकारव्याख्यामुपसंहरति * तस्मा-
दिति * ॥ अनिष्टापत्त्यै तां व्याख्यां दूषयति * एतस्मिंस्त्विति * ।
संख्यामात्रविशेषणेनानभिधानेन तन्मात्रस्याभिहितस्य व्यावृत्तेः
प्रथमया कर्मैकत्वानभिधानेऽप्येकत्वस्य तावदभिधानान्नानिष्टद्वितीया
प्राप्तिरिति परिहारं शङ्कते * अथेति * । प्रथमायां प्रयुक्तायां द्विती-
यानापत्तावपि तत्प्रयोगात्प्राग्द्वितीयापत्तिरनिवार्येति परिहरति
तदेति । न केवलमनिष्टद्वितीयापत्तिः किंत्विष्टद्वितीयानाप-
त्तिरपीत्याह * अपि चेति * । कर्मादिविशेषणानभिहितत्ववादिनोऽपि
कटद्वितीयया कर्मैकत्वस्येव कर्मणोऽप्यभिहितत्वाद्भीष्मादौ द्वितीया-
भावप्रसञ्जनं तुल्यमित्याशङ्कते । * नन्विति * विशेषणान्वयार्ह-
त्वसूचनार्था विभक्त्यर्थतोक्तिः ॥ कर्मादिविशेषणानभि-
हितत्ववादिपक्षे तिङादिभिरन्यैश्चानभिहितत्वस्याभिहितपर्युदा-
सकत्व । [[1]प्राप्तौ तिङादिपुनर्वचनेनान्यैरनभिहितत्वस्य पर्युदासक-

१ इति द्वितीयपुस्तके नास्ति ।

त्व] परिसंख्यानाद् द्वितीयायाश्च तिङादिभ्योऽन्यत्वात्तयाभिहितानां भीष्मादिगतानां कर्मणां द्वितीयाविषयत्वपर्युदासानुपपत्तेर्न द्वितीयाभावप्रसञ्जनं तुल्यमिति परिहरति * नेति * । संख्याविशेषणानभिहितत्ववादिपक्षेऽपि परिसंख्यातुल्यत्वेनाशङ्किता प्रत्यवतिष्ठते * न न्विति * । पर्युदासस्यापि निषेधवत्प्राप्तिपूर्वकत्वेन संख्यायां कृदाद्यभिहितत्वाप्राप्तेरयोगादनभिहितत्वस्य कृदाद्यभिहितपर्युदासकत्वाप्राप्तेः कृदादिविशेषणस्य पुनर्वचनत्वायोगेन परिसंख्यानायोगापत्त्या वैषम्यं परिहर्त्ताह * भवेदिति * तिङो भावनायां स्मृत्यभावेऽपि भावनावाचित्ववत्कृदादीनामस्मृतापि संख्यावाचिता भविष्यतीत्याशङ्क्य पूर्वापरीभूतं भावमाख्यातेनाचष्टेति स्मृतेर्धात्वर्थविषयत्वाभ्युपगमेनापि परिहारोक्तिशक्तिप्रदर्शनार्थं नापीत्युक्तम् । तिङादीनामिति वाच्ये कृदाद्युक्तिः किमर्थेत्याशङ्कानिरासहेतूक्तिपूर्वं वैषम्यमुपसंहरति * तेनेति * ॥ अनिष्टापत्तीष्टानापत्ती उपसंहरति *अत इति* भीष्मादिभ्यां द्वितीयादिप्राप्तिव्यावृत्त्यर्थेनैवकारेणेष्टानापत्त्युपसंहारः सूचितः । पर्यनुयोगसाम्यवैषम्योक्त्योरनिष्टापत्तीष्टानापत्त्याख्यपर्यनुयोगद्वयसाधारण्यसूचनार्थः श्रुत्या निष्टापत्त्युपसंहारः । अतो ऽस्य पर्यनुयोगद्वयस्य पक्षद्वयसाम्याख्यात्परिहारान्ननु चेति वार्त्तिकशङ्कितादन्यः परिहारो वाच्य इत्याह* इतीति * । कर्मादिवाच्यवादिमते तद्विशिष्टसंख्यावाच्यवादि ६७४।१
मते वा नभिहितत्वस्य कर्मादिविशेषणतायामेवानिष्टापत्तीष्टानापत्त्योः परिहारः सम्भवति न तु संख्याविशेषणतायामिति तावत्कर्मादिविशेषणत्वाभ्युपगमेन परिहारवाच्यत्वसूचनायाह *स्व चेति* । एतदेवोपपादयति * तथा हीति * । परिहारार्थं कर्मादिविशेषणतामाह *यस्य चेति* ॥ कर्मादिविशिष्टैकत्वादिवाच्यवादिमते कर्मादिविशेषणत्वाद्विशेषणान्वयायोगमुक्तं परिहरति *यद्यपि चेति* । परिहारोपपादनार्थं सामान्यन्याय तावदाह *समासस्थं हीति* । वाक्यसमासस्थयोर्विशेषणयोर्वैषम्यस्यावश्याङ्गीकार्यतां सूचयितुमाह * एवमादय एवं चेति * प्रकृतौ योजयितुमाह * वाक्यस्थाश्चेति * । पूर्वसिद्धान्तपक्षसाधारणे कर्मादिविशेषणत्वेनाभिधानस्योक्ते लब्धावकाशः पूर्वपक्षी सिद्धान्तेऽनिष्टतृतीयापत्तिं संख्यायां कारके वा धीर्विभक्त्या हि प्रवर्त्यत इत्यादिवार्तिकोक्तन्यायनिरस्तामप्यागमाविरोधे

न्यायस्याक्षमत्वादनिरस्तां मत्वा पुनः शङ्कते * ततश्चेति * कर्त्तरि तृतीयाविध्यभावात्संख्यायास्तु तिङाभिहितत्वात्कस्योक्त्यै तृतीयाप्राप्तिरित्याशङ्क्य संख्यामभिधातुमित्युक्तेनाभिहितत्वस्य विशेषणत्वाभावेनाभिहिताया अपि संख्यायाः पर्युदासायोगात्तृतीययाभिधानाविरोधसूचनार्थश्चकारः । ततः संख्याविशेषणत्वाभावात्कर्मादिविशेषणेनानभिहितत्वेन संख्यापर्युदासायोगाच्चेत्यर्थः । संख्यायां कारके वेत्यादिवार्तिके निरस्तायास्तृतीयाप्राप्तेः पुनः शङ्काऽयोगं शङ्कते * गतार्थत्वादिति * । शास्त्रेण पर्युदासायोगात्कृदाद्युक्तकारकगतसंख्याविषयायां कारकविभक्तौ गतार्थत्वस्य प्रतिबन्धकत्वदर्शनात्तिङाद्यभावेनाक्षिप्तकारकगतसंख्याविषयायामपि कारकविभक्तौ गतार्थत्वस्य प्रतिबन्धकत्वानुमानाशयत्वं तस्य वार्त्तिकस्यापाद्य भीष्मादिकारकविभक्तिभिरनैकान्तिकत्वेन हेतुं दूषयति * नेति * । संख्याविशेषणत्वेऽनभिधानस्य भीष्मादिषु कारकविभक्त्यनापत्त्युक्त्याऽर्थाद्भीष्मादिकारकविभक्त्युत्पत्तेरिष्टत्वादनैकान्तिकत्वमित्यर्थः । इष्टप्रथमाविघातकारी चायं हेतुरित्याह *यदि चेति* । प्रातिपदिकानुग्रहार्थत्वेनार्थवत्त्वात्प्रथमायामानर्थक्याख्यगतार्थत्वाभावादिष्टविघातानापत्तिं शङ्कते * केवलेति * । तृतीयायामपि तर्हि प्रातिपदिकानुग्रहार्थत्वेनार्थवत्त्वोपपत्तेर्हेतोरसिद्धत्वं स्यादित्याह *नेति* एवमपि प्रथमातृतीययोर्विकल्पापत्तौ तृतीयानियमोपपादनार्था यथाविहितोक्तिः । अनुमानापादिते च तृतीयाप्रसङ्गे सति गतार्थत्वानुमानेन निरासः शङ्क्येत कर्तृकरणयोस्तृतीयेत्यागमेन त्वापादितत्वादागमविरोधे चानुमानाप्रामाण्यान्न तन्निरासोपपत्तिरिति पुनः शङ्काशयं पूर्वपक्षी प्रकटयति *न चैषइति* । अनभिहिताधिकारस्थस्याभिधातेरभिधानाख्यशब्दव्यापारवाचिनस्तदेकार्थसमवेततात्पर्याख्यशब्दव्यापारलक्षणार्थत्वादनभिहितशब्दस्य शब्दतात्पर्यविषयत्वाख्यविशेषरूपेणानवगतत्वे वृत्तेरनभिहिताधिकाराख्येनागमेनैव तृतीयापर्युदासोपपत्तिं मत्वा सिद्धान्ती पुनः शङ्कां परिहरति *तस्मादिति* । तात्पर्यवृत्त्या कर्तृकर्मावगत्युपपादनार्थं कर्तृकर्मणोरशाब्दत्वे शाब्द्याः संख्ययान्वयायोगापत्तेः संख्यान्वयसिद्ध्यर्थं शाब्दत्वसिद्ध्यै पचतिपच्यतेशब्दाभ्यां कर्तृकर्मणोराहृतत्वोक्तिः । अवाच्ययोरपि कर्तृकर्मणोः शब्दतात्पर्यविषय-

स्वसंभवे कारकान्तराणामपि गम्यमानत्वाविशेषेण शब्दतात्पर्यविषय स्वसंभवात्स्वविभक्तिप्रतिबन्धकत्वापत्तिमाशङ्क्य संख्यान्वयान्यथानुपपत्ते शब्दतात्पर्यकल्पिकाया कारकान्तरे स्वभावाद्वैषम्यमाह * कारकान्तराणीति * ॥ कर्तृकर्मणोरेवाख्यातात्तात्पर्यविषयतया ६७५।३ प्रतीतिस्तन्निमित्तश्च संख्यान्वयो न कारकान्तराणामिति नियमे को हेतुरित्याशङ्क्य प्राधान्यविवक्षाहेतुकत्वात्तात्पर्यस्य कारकान्तराणां च कर्मवद्वस्तुलक्षणस्य कर्तृवद्वा शब्दलक्षणस्य प्राधान्यस्य विवक्षितुमशक्यत्वं नियमहेतुतया करणादीनां तु न वस्तुलक्षणा नापि शब्दलक्षणा प्राधान्यविवक्षास्तीत्यादिवार्तिकेनोक्तमित्याह * कारकत्वेति * ॥ नेह पच्यतइत्यादिषु भावे लकारोत्पत्तौ धात्वर्थभावनामात्रस्य विवक्षितत्वेन कर्तृकर्मानाश्रयणाद्धात्वर्थभावनयोर्व्यभिचारितया कर्तृकर्मागमकत्वाशङ्कां वैयाकरणै. स्वग्रन्थोक्तां कर्तृकर्मणोरसाधारण्येभिहिते समर्थनीय एव चैषोर्थः संख्यासंबन्धे कर्तुरसाधारणतासिद्ध्यर्थमित्युपक्रम्याऽऽसितिष्ठत्यादिषु करणानपेक्षणादित्यादिवार्तिकोक्तस्य कारकान्तरव्यभिचारस्य बुद्धिस्थत्वात्तदृष्टान्तेन बुद्धिस्थां कर्तृकर्मानभिधानोपपादनाय परिहर्तुमनुभाषते * यत्त्विति * । तुल्यपर्यनुयोगापादनेन परिहरति *तत्रेति*। एकान्तान्निर्णयादन्य एकान्तो व्यभिचार इत्यर्थः । श्लोकं व्याचष्टे * यथैवेति * ॥ शब्दस्य शक्त्या वाचकत्वात्तस्याश्च सकर्मकधात्वाद्यनुग्रहादन्यथात्वोपपत्तेर्व्यभिचारेपि वाचकत्वानिघातः । अर्थस्य स्वव्यभिचारिण एव गमकत्वाद्व्यभिचारे गमकत्वव्याहतिरित्याशयेन वैषम्यं शङ्कते * अथेति * ॥ अर्थकत्वेप्यव्यभिचारतुल्यत्वेपि च शुक्लादिशब्दोक्तस्यार्थस्य शब्दार्थान्तरान्वयार्हद्रव्यगमकत्वदर्शनाच्छुक्लत्वरूपादिशब्दोक्तस्य त्वदर्शनादर्थस्यापि शब्दविशेषापादनशक्तिविशेषवशेनैव गमकत्वं तस्माद्यथैव शब्दानां शक्तिभेदोभिधां प्रति प्रत्येतव्यस्तथार्थानां लक्ष्यार्थान्तरगोचरइत्याद्यरुणटीकोक्तामभिप्रेत्य परिहारसाम्यमाह *तथेति*। अनुग्राहकसाम्यं दर्शयितुमाह * तच्चेति * । अकर्मकादश्यन्विकरणात्सर्वस्माद्धातोः श्यन्विकरणात्तु परस्मैपदिनः परो यतेशब्दः कर्मणोनभिधाताऽन्यस्मात्तु परः कर्मवाचिन्युपपदे सत्यभिधाता तदभावे विवक्षावशात्क्वचित्कर्माभिधायि क्वचिन्नाभिधायीति यथा विविच्यते तथागमकतापि विवक्तुं

शक्येत्याशयः । अनुग्राहकानपेक्षायां तु ते शब्दस्य त्रिष्वपि दर्शनाद्यते-
शब्दस्य च श्यन्विकरणेष्वात्मनेपदिषु धातुष्वृतेरीयङितीयङ्प्रत्ययेषु
धातोरेकाचो हलादेः क्रियासमभिहारे यङिति यङ्प्रत्ययेषु सार्व-
धातुके यगिति यक्प्रत्ययेषु कर्त्तुः क्यङ्सलोपश्चेति क्यङ्प्रत्ययेषु च
भावकर्तृकर्मसु त्रिष्वथ विशेषादभिधानपक्षेऽपि संदेहहेतुत्वं स्यादित्याह
* इतरथेति * ॥ अन्वयव्यतिरेकाभ्यां निष्कृष्टेर्थे नियम्यत इत्य-
भिधानशक्तिनियमस्याप्यन्वयव्यतिरेकाधीनत्वाभ्युपगमेनाव्यभिचा-
रावेक्षत्वाद्यभिचारे भिधातृत्वस्याप्यनुपपत्तेस्तद्वद्गमकत्वोपपत्यु-
क्तिरयुक्तेत्याशङ्क्य नामाख्यातादिसाकल्यवैकल्यानुगमे सति तद-
र्थानुगमो दृष्टः पदवाक्यान्तराश्रय इत्याशङ्कितस्यान्वयव्यतिरेक-
भङ्गस्यात्र ब्रूमः पदात्मानः सर्वेष्वेतेषु भिद्यत इत्यादितद्भूताधि
करणवार्तिकोक्तेन परिहारेणाभिधातृत्वगमकत्वविषयं पक्षद्वयं
समर्थनीयमित्येव परिहारसाम्यमुपसंहराति * तस्मादिति * ।
साम्ये सति कथं वाचकपक्षत्यागेन गमकापेक्षावधारणेत्याशङ्क्य
कर्तृकर्माविनाभूतार्थाभिधायित्वादिभिरनुमानविरोधायोक्तेर्हेतुभिरि-
त्याह * ततश्चेति * । तत्पदाभेदवर्त्तित्वादित्यादिभिर्वाचकत्वहे-
तुभिः सप्रतिसाधनत्वशङ्कानिरासायानभिधानहेतूनां निर्दोषतयेत-
रेभ्यो विशेषो बलीयस्त्वाय विशेषोक्तिचोक्त । कृदादिष्वनुभिहितश-
ब्दस्य मुख्यत्वसंभवे लक्षणाश्रयणायोगेन मुख्यत्वावधारणात्स-
कृच्छ्रुतस्य वैरूप्यपरिहाराय तिङ्क्ष्वपि मुख्यत्वावगतेर्भाष्यकार भि-
मतलक्षणावृत्त्यपरितोषात्स्वयं मुख्यत्वाभ्युपगमेन पर्युदासोपपत्तिं
वक्तुमारभते * अथ वेति * । अज्ञानाशयः पृच्छति * । कथतर्हीति *
६७६।१ गूढाशय उत्तरमाह * पर्युदस्तत्वादिति * । कर्त्रनभिधानाभ्युप-
गमात्पर्युदासायोगं शङ्कते * कथमिति * । परिभाषिकाभिहितत्वाश-
येन परिहरति * तिङेति * । पारिभाषिकाशयमज्ञात्वा पृच्छति
* किमर्थं तर्हीति * । आशयप्रकटनेनोत्तरमाह * लोकेति * ॥
शब्दार्थान्वाख्यानस्य पारिभाषिकत्वायोगाशयेन सोपहासं शङ्कते
* किमिति * ॥ अज्ञाताशयः परिहरति * वाढमिति * । शङ्किताशयं
प्रकटयति * भवत्विति * । शङ्काशयं दृष्टविरोधेन दूषयति * कथ-
मिति * लकारलक्षितानामादेशानां कर्तृकर्मवाचित्ववर्णनाल्लुकार-
द्वारादेशानां वाचकत्वसिद्ध्यै लकारस्य वाचकत्ववर्णनाद्वा नाविद्य-

मानवाचकवर्णनं व्याकरणेऽस्तीति द्वेधा दृष्टविरोधपरिहारं शङ्कते
* नन्विति * । आद्यपक्षे लक्षणादोषापत्तेर्द्वितीयपक्षे च परोक्ष-
वृत्त्यान्वाख्यानदोषापत्तेः पक्षद्वयमप्ययुक्तमित्याह *नैतदिति* न्याय-
विरोधसूचनार्थश्चकारः । आद्यपक्षदूषणार्थं पूर्वार्द्धं व्याचष्टे * लकार-
मिति । * द्वितीयपक्षदूषणार्थमुत्तरार्द्धं व्याचष्टे * अथापीति *
वस्तुतो लकारेणानभिधीयमानत्वादादेशोत्पत्तेः प्राग्लकारवाच्यत्वा-
ध्यवसानाशक्तेस्तद्द्वाराऽऽदेशवाच्यत्वान्वाख्यानं न युक्तमित्याशयः ।
पक्षद्वयमध्येऽन्यतरपक्षस्सम्भवेदप्यर्थापत्तिभङ्गन्यायेन कर्तृकर्मणोरवा-
च्यत्वावगमादन्यायविरोधापत्तेरप्यविद्यमानवाचकवर्णनं गम्यत इति
चशब्दव्याख्यार्थमाह *अन्ते चेति*। पक्षद्वये दोषद्वयस्योक्तस्याप-
क्षणात्समाप्तावपीत्यन्ते चेत्यस्यार्थः । अतो न्यायविरोधेन कर्तृकर्मणो-
रादेशवाच्यत्वस्याप्ययोगाल्लकारवाचकत्वकर्तृकर्मवाच्यत्वयोर्मध्ये
कस्मिंश्चित्पारिभाषिके कल्पनीये वाच्यत्वस्यादेशावस्थायामप्यसं-
भवेनैकान्ततः पारिभाषिकत्वस्याश्रयणीयत्वाल्लकारस्य तु स्वरूपे-
णासत्त्वेऽप्यादेशरूपेण सत्त्वात्संख्यान्वयरूपेण च कर्तृकर्मवाचित्व-
स्याप्यौपचारिकस्य सत्त्वाद्वाच्यत्वस्यैव पारिभाषिकत्वकल्पनायाः
श्रुतत्वावगतेर्लकारस्यासत्त्वाद्वाचकता पारिभाषिक्यस्तु न तु कर्तृ-
कर्मणोर्वाच्यतेत्याशङ्का न कार्येत्याशयेनाह * अत इति * । संख्या-
न्वयरूपेण वाचकत्वस्येव वाच्यत्वस्याप्यौपचारिकस्य संभवात्पारि-
भाषिकता न युक्तेत्याशङ्क्य लकारावस्थायामौपचारिकस्यापि वाच्य-
त्वस्यायोगादादेशावस्थायां तु कर्तुरेवत्वे तिबितिविशेषणविशे-
ष्यान्वयाभ्युपगमनेन कर्तृकर्मणोर्वाच्यसंख्याविशेषणत्वमात्रप्रतीते-
र्वाच्यत्वान्वाख्यानात्पारिभाषिकतैव युक्तेत्याशयेन परिहर्तुमाह
न हीति। एतदेव मीमांसापक्षद्वयेहतूक्तिपूर्वं विवृणोति *तेनेति*।
ततश्चैव सूत्रार्थो भवतीत्याह * तन्नैतदिति * । प्रयोजनापेक्षायां च
स्वशास्त्रव्यवहारार्थताऽवसीयत इत्याह *किं पुनरिति*। मुख्यत्वा- ६७७।१
भ्युपगमेन पर्युदासोपपत्तिमुपपादितामुपसंहरति *तस्मादिति*। एवं
सति कर्तुरभिहितत्वेन निमित्तेन पचतिशब्दस्य कर्तृविभक्तिप्रतिबन्ध-
कत्वात्कर्मणश्चाभिहितत्वेन निमित्तेन पच्यतेशब्दस्य कर्मविभक्तिप्र-
तिबन्धकत्वादित्येवं विशिष्टस्य हेतोर्विशेषेणासिद्धव्यभिचारयोगापत्तेर्विशिष्ट-
स्य चानैकान्तिकत्वाभावाच्च कश्चिद्दोषः स्यादित्याशङ्क्य कर्तृ-
करणयोस्तृतीया कर्मणि द्वितीयेत्यागमापादितस्य कारकविभक्ति-

प्रसङ्गस्य पारिभाषिकेणाभिहितत्वेन प्रतिबन्धाख्यपरिहारसंभवेऽपि
पारिभाषिकस्यावास्तवत्वाद्विशेषेण सिद्धिरपहृतैवेति सूचयितुमाह
* इतीति * उक्तेन प्रकारेण कारकविभक्तिप्रसङ्गमात्रं परिहृतं न तु
संख्यायां कारके वा धीरित्यादिवार्तिकसूचिता विशेषणाऽसिद्धिः परि-
हृतेत्यर्थः । चतुर्थप्रयोगस्थं तद्विशेषावबोधकत्वादिति हेतुमनैकान्ति-
कत्वेन दूषयितुमाह * यद्वेति * तद्विशिष्टाभिधायित्वस्यात्र हेतु-
त्वेन विवक्षितस्य शिंशपादिशब्देष्वभावान्नानैकान्तिकतेत्याशङ्क्य शुद्ध-
संख्याभिधानेऽपि प्राथम्यप्राधान्यविशेषात्कर्तृकर्मान्वयनियमस्य यद्वा
भावनया कर्त्ता प्रथमं प्रतिपाद्यत इत्यादिवार्तिकेनोपपादितत्वा-
द्भावनासमकालसंख्याप्रतीतेश्च प्राक्कर्तृकर्मणोरप्रतीतत्वेन विशे-
षणत्वायोगाद्यतः कर्तृगतां संख्यां प्रतीमः केवलामत इत्यादिवार्ति-
कोक्तस्य तु विशिष्टसंख्याभिधानस्य परमतत्वात्तद्विशिष्टाभिधायि-
त्वस्यासिद्धत्वापत्तेः कारकविभक्तिषु कारकवाचित्वस्य तद्विशिष्ट-
संख्यावाचित्वस्य च दर्शनाद्यद्यद्विशेषवाचि न तद्वाचीति सामान्य-
व्याप्तिविवक्षया तद्विशेषवाचिताऽत्र हेतुर्वाच्येति कृत्वा शिंशपा-
दिशब्दैरनैकान्तिकतास्त्येव तद्विशेषबोधकत्वहेतुपक्षे तिरिन्द्र-
यैरप्यनैकान्तिकत्वं सामान्यव्याप्तिविवक्षायां च तिङो द्रव्यविशेष-
कारकशक्तिवाचित्वेन द्रव्यवाचित्वस्यापि साध्यत्वापत्तेः पक्षस्यापि
तिङः साध्यशून्यत्वात्तत्राप्यनैकान्तिकता भवन्तं प्रति वक्तुं शक्येत्या-
शयेन परिहर्तुमाह * तेनेति * ॥ पञ्चमप्रयोगस्थं तद्विशेषणैः सम्ब-
ध्यमानत्वादिति हेतुं जातिगुणशब्दानां गौः शुक्लोऽरुणा स्त्रीति
व्यक्तिद्रव्यविशेषणगुणलिङ्गान्वयिनामप्याकृत्यरुणाधिकरणयोर्व्यक्ति-
द्रव्यवाचित्वनिरासादनैकान्तिकत्वेन दूषयितुमाह । * यद्यपीति *
जातिगुणशब्दानां व्यक्तिद्रव्यवाचित्वाभ्युपगमेऽपि रसशब्दे द्रव्य-
विशेषणस्नेहाद्यन्वयिन्यपि द्रव्यवाचित्वाभावादनैकान्तिकतामाह * अ-
पिचेति * अश्वशब्दे चाश्वारोहविशेषणहरणक्रियान्वयिन्यप्यश्वा-
रोहवाचित्वाभावदनैकान्तिकतामाह * तथेति * या तु न च गम्य-
मानस्य विशेषणसम्बन्धो यथा धूमशब्दादग्नेरवगतस्येति वार्तिके
गम्यमानस्य विशेषणान्वयानर्हतोक्ता सा धूमादिशब्दस्याग्न्यादौ
६७८।१ तात्पर्याभावान्न त्ववाचकत्वादिति सूचयितुमाह * यद्वेति * ।
कर्त्रनभिधानोपसंहारभाष्यं व्याचष्टे * तस्मादिति * कर्त्रनभिधान-
व्युत्पादनफलश्रुतिप्रकरणाविरोधसिद्ध्युक्त्यर्थं न चेदिति भाष्यं

व्याचष्टे * ततश्चेति * इतरथेत्यादिपूर्वपक्षभाष्योक्तसिद्धान्तदोषानुभाषणार्थं यत्त्विति भाष्यं व्याचष्टे * यत्त्विति * । पुरुषः प्रयत्यते व्यापार्यतेऽनुष्ठाने प्रेर्यतेऽनेनेति व्युत्पत्त्या पुरुषप्रयत्नशब्देन विध्युक्तिसूचनार्था विध्यानर्थक्योक्तिः । कर्मधर्मपक्षोक्त्या कर्मयुक्तपुरुषधर्मपक्षेऽप्यानर्थक्योक्तेः सूचनार्थः शुद्धपुरुषार्थत्वोपसंहारः । दोषपरिहारार्थं तदित्यादि भवतीत्यन्तं भाष्यं प्रयोजनापेक्षत्वात्सामान्यतः किञ्चित्प्रत्यङ्गत्वेनावगतं सत्प्रकरणेन प्रकरण्यङ्गतया गृह्यते न चाविहितं सामान्यतोऽङ्गतयावगतं भवतीत्येवं व्याख्यातुमाह * तद्धोति * तावद्धास्य वदनस्य प्रयोजनमपेक्ष्यते विना चापेक्ष्यमाणेन प्रयोजनेन वदनधात्वर्थः सामान्यतोऽङ्गत्वानवगमान्न प्रकरणेन क्रत्वङ्गं प्रतीयत इत्यर्थः । श्लोकं व्याचष्टे * विधीति * प्रकरणग्रहणोक्तेः प्रयोगवचनग्रहणसिद्ध्यर्थत्वसूचनार्थं * न चेत्युक्तम् * ॥ अङ्गत्वसिद्ध्यर्थतयाङ्गविध्यर्थवत्त्वोपसंहारार्थं तस्मादिति भाष्यं व्याचष्टे * तस्मादिति * साक्षाच्छब्दः प्रधानविषय । पारम्पर्यशब्दोऽङ्गविषयः दर्शपूर्णमासोपकारसम्बन्धितया प्रयोजनभूतया तत्सिद्ध्यर्थमित्यर्थः । निषेधस्य क्रत्वर्थत्वसिद्धान्तसिद्ध्यै क्रत्वर्थवदनविषयत्वोपसंहारार्थमत इति भाष्यं व्याचष्टे * अतश्चेति * ततश्चैष शास्त्रार्थो भवतीत्युक्त्यर्थं तस्मादिति भाष्यं व्याचष्टे * ततश्चेति * शास्त्रार्थोदाहरणोक्त्यर्थं तेनेत्यादि भाष्यं संकल्पानृतनिषेधोक्त्यर्थतया भासमानमयुक्तत्वापत्तेर्वदनानृतनिषेधोक्त्यर्थतया व्याचष्टे * तेनेति * । तद्धुदित्वेति वाच्यं न संकल्प्येतेत्याशङ्क्य वदनलक्षणार्था संकल्पोक्तिर्द्विरागन्तव्यत्वादित्वेत्यर्थसिद्धिरित्येवं द्वेधा व्याचष्टे * सङ्कल्प्येति चेति * सङ्कल्पितशब्दोऽप्येवं द्विधा व्याख्येयः । आहेति भाष्यं विध्यनुवादाचिन्ताप्रयोजनाक्षेपार्थत्वेन मूलमूलिभावसंयोगान्तरविधिचिन्ताप्रयोजनाक्षेपार्थत्वेन च व्याचष्टे * आहेति * स्मृतिमूलतया च विधावेति चकारार्थः । उच्यत इति भाष्यं पूर्वपक्षे स्मृतिप्राप्तक्रतुयुक्तपुरुषधर्मानुवादत्वात्तत्र क्रतौ निषेधातिक्रमे स्मार्तक्रत्वङ्ग[१] यद्यविज्ञाते भूर्भुवः स्वाहेत्याहवनीये होतव्यमिति यद्विहितं प्रायश्चित्तं तत्कार्यं सिद्धान्ते क्रत्वङ्गतया यजुर्वेदविहितत्वाद्याजुर्वैदिकक्रत्वङ्गभ्रेषे यदि यजुष्टो भुवः स्वाहेत्य-

१ इति द्वितीयपुस्तके नास्ति ।

न्वाहार्यपचने होतव्यमिति यद्विहितं तत्कार्यमित्येवं विध्यनुवादचि-
न्ताप्रयोजनसमाधानार्थत्वेन तावद्व्याचष्टे *तस्मादिति* स्मृतिवि-
हितक्रत्वङ्ग] भ्रेषनिमित्तत्वोक्त्यर्थतया भाष्यस्थस्मार्तशब्दव्याख्यार्था
नैमित्तिकोक्तिः । यजुर्वेदविहितक्रत्वङ्गभ्रेषनिमित्तस्य प्रायश्चित्तस्य
६७६।५ करणमित्यर्थः। श्लोकं व्याचष्टे * स्मृतौ चेति* चकारेण क्रत्वङ्गतया
विहितत्वसूचनात्स्मृतौ क्रत्वङ्गत्वेन विहितस्य भ्रेषे यत्प्रायश्चित्तं तदे-
वानृतवदननिमित्तं कार्यमित्यर्थः । पूर्वपक्षप्रयोजनोपपादनार्थं स्मृते-
स्त्वित्युक्तम् । मूलमूलिभावपूर्वपक्षे शुद्धपुरुषधर्मस्तत्रैव स्याते भ्रेष-
गायत्रीमशुचौ दृष्टे चापले चानृतेऽपि चेति स्मृतिविहितं प्रायश्चित्तमि-
त्येवं व्याख्यातुमाह*एवमिति* स्मृत्यैव नानृतं ब्रूयादित्यनया निषेधा-
र्थस्य विधेयतया गायत्रीमनृते जपेदित्यनया च यज्ञाङ्गत्वानपेक्षस्य
निषेधातिक्रमस्य प्रायश्चित्तनिमित्ततयानुस्मृतत्वात्स्मार्तमेव प्राय-
श्चित्तमित्यर्थः । मूलमूलिभावेऽप्यस्य निषेधस्य याजुर्वैदिकत्वाद्यदि
यजुष्टः प्राप्तः पदार्थ आर्तिमार्छेयादित्येतावतश्च निमित्तत्वसिद्धे-
रुद्देश्यनिमित्तविशेषणस्य यज्ञान्वयस्य विवक्षायोगाद्यजुर्वेदविहितनि-
मित्तमेव भ्रेषे प्रायश्चित्तं स्यादित्याशङ्कते * नन्विति * विशेषणा-
विवक्षाभ्युपगमेनैव तावत्परिहरति * नैतदिति * यज्ञशब्दस्यार्तिवि-
षयनिर्देशकत्वानभ्युपगमे यजुष्ट इत्यस्य विषयनिर्देशकत्वायोगा-
त्साकाङ्क्षत्वापत्तेर्यज्ञशब्दस्यैव यज्ञाङ्गलक्षणया विषयनिर्देशकत्वाव-
गमाद्धविःशब्दवन्नाविवक्षितार्थतेति युक्तेत्याशयेन परिहारान्तरमाह
* किंचेति * पूर्वार्द्धं व्याचष्टे * यदीति * यज्ञशब्दस्य तर्हि प्रकरणा-
ज्ज्योतिष्टोमविषयत्वावगतदर्शपूर्णमासाङ्गभ्रेषे नैतत्प्रायश्चित्तं युज्ये-
तेत्याशङ्क्याह * ज्योतिष्टोमेति * निमित्तस्योद्देश्यत्वाद्यज्ञविशेषणा-
योगशङ्कां निराकर्तुमाह*नत्विति*। उत्तरार्द्धं व्याचष्टे *तस्मादिति*
क्रतुयुक्तपुरुषधर्मविधिपूर्वपक्षेऽपि याजुर्वैदिकयज्ञाङ्गभ्रेषनिमित्तप्राय-
श्चित्तसाम्यात्क्रतुयुक्तपुरुषधर्मशुद्धक्रतुधर्मचिन्तायाः किंप्रयोजनमि-
६८०।२ त्याशङ्कते * यदा त्विति * विहितानां निषिद्धानां च याजमानतां प्रति
यजमानं वा वृत्तिं पूर्वपक्षप्रयोजनमाह * तदिति * कर्मव्युत्पन्नो
विधिशब्दः आवृत्तिसूचनार्थो निषेधग्रहणार्थश्चापि शब्दः सर्वशब्दः
क्रत्वन्तरगतपदार्थग्रहणार्थः । श्लोकं व्याचष्टे * सर्वे हीति * स-
मिदादीनामारादुपकारित्वेऽपि प्रयोजनाविशेषाद् दृष्टान्तमात्रत्वेनोपा-
दानमिति सूचनार्थं * तत्रेत्युक्तम् * निषेधानामननुष्ठानात्मकत्वा-

त्कथं याजमानत्वाशङ्क्योपपादयितुं प्रतिषेधेष्वपीत्युक्ते विषयवि-
शेषात्तथैव यद्यजमानेनात्मसंस्कारायोच्चार्यते तत्र वैकल्पिकानां
प्रयोगारम्भेऽन्यतरपक्षावधारणे कृते पक्षान्तरकार्यताख्यात्मकमवै-
कल्पिकाशीर्मन्त्रादिस्वरूपोच्चारणेऽपि चान्यथोच्चारणात्मकं मृषात्वं
न कार्यं यजमानसंस्कारार्थोच्चारणादन्यत्र यजमानाच्चान्येषां यथेष्ट-
वादितेत्युक्तम्। सिद्धान्ते तु सर्वत्र सर्वेषां च निषेधादध्वर्य्वादि-
भिरपि नान्यथा कार्यं यजमानसंस्कारार्थमपि च क्रतुवैगुण्यायैव
वर्जनीयमित्याह * शुद्धेति * शुद्धक्रतुधर्मपक्षे कर्तुर्गुणभूतत्वाद्वि-
ध्यर्थवन्निषेधार्थेऽपि सामाख्यानिककर्तृनियमोपपत्तेर्न सर्वेषां वर्जन
मुक्तमित्याशङ्कते * ननु चेति * गुणभावेऽपि कर्तुरनपेक्षितत्वान्निय- ६८१।५
मायोगमाह * सत्यमिति * नञश्च निपातत्वेन केवलाप्रयोगित्वा-
न्नित्यनिषेध्यपदसाहचर्यलक्षणया श्रुत्यैव निषेध्य प्राप्त्यान्वयात्प्र-
कृतक्रत्वर्थस्य निषेधस्य तदर्थप्राप्तिसम्भवे ऽन्यार्थप्राप्त्यनपेक्षत्वेऽपि
यत्र प्रकृते ऽध्वर्य्वादौ कर्तारं निषेध्योऽर्थः प्राप्तस्तत्र सर्वत्र गच्छन्निषेधो
न वार्यते समाख्ययेति युक्त्यन्तरमाह * श्रुत्यैव चेति * निषेधान्व-
यात्प्राङ् निषेध्यस्यानुष्ठेयत्वावगमात्कर्त्रपेक्षायां समाख्यया नियमो-
पपत्तेस्तदनुसारान्निषेधनियमोऽपि भविष्यतीत्याशङ्कते * नन्विति *
निषेध्यमात्रे शास्त्रापर्यवसानात्कर्त्रपेक्षानुपपत्तेर्निषेधान्वये चानुवा-
द्यत्वेन निषेध्यस्य श्रुतेनापि कर्त्रा विशेष्यत्वायोगात्सामाख्यानिकेन
विशेष्यता दूरोत्सारितेत्याह *नैतदिति* एतदेवोपसंहरति *तस्मा-
दिति* क्रतुयुक्तपुरुषधर्मशुद्धक्रतुधर्मचिन्ताप्रयोजन [स्यैं भाष्या-
नुक्तस्योक्तेस्तच्चिन्तानर्थक्यं शङ्कानिरासार्थतां दर्शयन्सर्वत्र विधिषु
निषेधेषु च क्रतुयुक्तपुरुषधर्मशुद्धक्रतुधर्मचिन्ताया प्रयोजन] मस्ती-
त्युपसंहरति * तस्मादस्तीति *।

जञ्जभ्यमानधर्माणां प्रकरणे निवेशः। अधि० ५

अहीनवत्पुरुषस्तदर्थत्वात् ॥ २० ॥

प्रकरणस्य पूर्वं सर्वविरोधाविरोधचिन्तात्मकत्वेनानन्तराधि-
करणवदस्यापि प्रकरणसङ्गतिमाह * पूर्वत्रेति * तीर्थस्नानोदा-
हरणे लिङ्गवाक्याभ्यां मन्त्रोदाहरणे तु वाक्येनैवेत्यर्थः ॥ एकहे-
लयोदाहरणसंदेहभाष्यं व्याचष्टे * तत्रेति * लक्षणहेत्वोः क्रियाया ९८२।१
इति स्मृतेर्जृम्भाया ज्ञानचोदेश्यत्वाख्यस्य लक्षणत्वस्योक्तत्वान्निमि-

---

१ इति द्वितीये नास्ति।

त्तनां च विनोद्देश्यत्वायोगान्निमित्तत्वावगतिः शुद्धक्रतुधर्मत्वापवादत्वयानन्तराधिकरणसंगतिसिद्ध्यै प्रकरणाविशेषोक्त्या क्रतुयुक्तपुरुषधर्मपक्षवच्छुद्धक्रतुधर्मपक्षस्याप्युक्तत्वसूचनायाधिकारात्प्राप्तिं दर्शयितुं कैमर्थ्यापेक्षायां निर्वीताधिकरणवत्पक्षरचनीयत्वेऽभिहिते पञ्चानामपि रचनापत्तिमाशङ्क्यानन्तराधिकरणत्रयाणामेवोपन्यासादिहानुवृत्तिरुक्ता किंतावदित्येतावता किंतावद्युक्तमिति पृष्टे प्राप्तमित्यनेन यत्पूर्वाधिकरणात्प्राप्तं तद्युक्तमित्यवामित्येतावतो भाष्यस्य शुद्धक्रतुधर्मपक्षोक्त्यर्थत्वसूचनार्थं पूर्वाधिकरणेन क्रत्वर्थे स्नाने मन्त्रोच्चारणे च प्राप्ते सूत्रेणान्यः पूर्वपक्षो गृह्यत इत्याह * तत्रेति * यथा हीनो द्वादशत्व प्रकरणादुत्कर्षति तथा पुरुषः स्नानमन्त्रावित्येव शुद्धपुरुषधर्मपक्षोक्त्यर्थत्वेनाहीनवत्पुरुषइति सूत्रावयवं व्याचष्टे * यथेति * तदर्थत्वादिति सौत्रं हेतुं भाष्यकृता स्नानोदाहरणे स्पष्टत्वादव्याख्यातं स्वयं स्नानस्य मलापकर्षणाख्यपुरुषोपकारसामर्थ्यात्मकेन लिङ्गेन पुरुषार्थत्वादित्येवं तावद्योजयितुमाह *स्नानं तावदिति* तीर्थविशिष्टस्य स्नानस्य विधेयत्वाद्विशेषणांशेन पुरुषोपकाराशक्तेर्लिङ्गाविरोधिना प्रकरणेन शुद्धक्रत्वर्थत्वमाशङ्क्य तीर्थविशिष्टस्य सुखावतरणाख्यपुरुषोपकारशक्त्यात्मकेन लिङ्गेन पुरुषार्थत्वादित्येवं योजयितुमाह *तीर्थेति* अस्नाताशी मलं भुङ्क्ते इत्यादिना भोजनादिपूर्वभावित्वनियमरूपेण स्मृतं स्नानमनूद्यानेन तीर्थनियममात्रविधानाद्भोजनादिपूर्वभावित्वनियमस्य च पुरुषार्थत्वायोगेन तद्विशिष्टस्य स्नानस्यापि पुरुषार्थत्वायोगादेतद्वाक्यविहितस्य तीर्थनियमस्यापि पुरुषार्थता न युक्तेत्याशङ्क्य तदपि स्मरणं पुरुषार्थस्यैव स्नानस्य ततश्च भोजनादिपूर्वभावित्वनियमजन्यमदृष्टं पुरुषगाम्येव ज्ञापयति तेन कारणेन भोजनादिपूर्वभावित्वनियमयुक्तेनापि स्नानेनावधारितपुरुषोपकाराख्यप्रयोजनेनान्वयात्तीर्थनियमस्यापि पुरुषार्थता ज्ञायत इत्याह * यदपीति * क्रियासामान्यवाचिना करोतिना ज्ञापनाख्यः क्रियाविशेषो लक्ष्यते किं पुनस्तीर्थनियमेन पुरुषापेक्षितं प्रयोजनं साध्यते येनास्य पुरुषार्थता स्यादित्याशङ्क्य लिङ्गस्य पूर्वोक्तमेव तावत्प्रयोजनं स्मारयति * तत्रापीति * दुःखावतरह्रदादिमार्गनिवृत्त्यर्थत्वे मत्यवतरणादुःखानाप्तिरूपस्यावतरणसुखस्य प्रयोजनत्वं युज्येत नियम्यमानान्यमात्रनिवृत्त्यर्थ-

त्वात्तु नियमस्योद्धृतोदकादेःस्रुवकरस्याप्यन्यत्वाविशेषानिवृत्तिप्रतीते
स्तन्निवृत्त्यर्थस्य नियमस्य दृष्टार्थता न युक्तेत्याशङ्क्याद्दृष्टवाक्यगम्यं
प्रयोजनमाह * अथापीति * अनेन च तीर्थस्नानस्य वाक्येन पुरु-
षार्थत्वावगमादिति सौत्रहेतुयोजना सूचिता । तीर्थस्नाने फलश्रुते
फलसमर्थकत्वपूर्वपक्षं परामर्थ्याधिकरणे निराकरिष्यमाणत्वादयु-
क्तमाशङ्क्यास्मिन्नधिकरणे लैङ्गिकपुरुषार्थत्वनिरासे सति लिङ्गाविरो-
धिना प्रकरणेन स्नानस्य क्रत्वर्थत्वेन पारार्थ्यनिर्ज्ञानात्फलश्रुतेर-
र्थवादमात्रता सेत्स्यति इह तु लिङ्गविरोधिना प्रकरणेन पारार्थ्य-
निर्ज्ञानाशक्तः फलसमर्पकतारात्रिसत्रन्यायेन पूर्वपक्षयितु शक्यंति
परिहारसूचनायैव भूताल्लिङ्गानुगृहीताद्वाक्यात्पुरुषसंयुक्तस्य तीर्थ-
विशिष्टस्य स्नानस्य प्रकरणान्नेश्वरमित्याह * न चेति * जञ्ज-
भ्यमानोदाहरणे सौत्रहेतुव्याख्यार्थं ब्रूयादिति भाष्यमाख्यातश्रुत्या
मन्त्रोच्चारणस्य पुरुषार्थत्वावगमादित्येवं व्याख्यार्थतया भास्यमान-
माख्यातेन कर्त्रनभिधानादयुक्तमाशङ्क्य ब्रूयाच्छब्दसमभिव्याहृतपुरु-
षवाचिजञ्जभ्यमानशब्दश्रवणस्य पुरुषप्राधान्योक्त्यर्थत्वेनाहृतत्वादि-
त्येवं वाक्यीयपुरुषार्थत्वोक्त्यर्थतया हेतुव्याख्यार्थमिति सूचयितुमाह
यद्यपीति लकारविधाविव कृद्विधावपि कर्तरीत्यस्य सख्याविशेष-
णत्वशङ्कानिरासायानन्यपरेत्युक्तम् । जञ्जभ्यमानशब्दस्य गुणभूतपुरु
षोक्त्यर्थत्वेनाविरोधसम्भवे प्रकरणबाधायोगाच्छुद्धपुरुषार्थत्वायोग
नन्विति भाष्येणाशङ्क्य नात्र मनुष्या विधीयन्तइत्यादिनिवीताधिकरण-
भाष्योक्तेन न्यायेन पुंसो गुणत्वायोग मत्वा परिहारार्थमुच्यतइत्या-
दिभाष्य व्याख्यातुमाह * तेनेति *ब्रूतेरभिधानार्थत्वसूचनार्थं मन्त्रे- ६८३।१
णाभिधानमित्युक्तम् । जृम्भिकानिमित्तस्य मन्त्रोच्चारणस्येत्यनेना-
प्यर्थाभिधानार्थस्यैवोच्चारणस्य विवक्षितत्वादविरोधः ॥ शुद्ध-
पुरुषार्थतायामश्रुतफलकल्पनापत्तिशङ्कानिरासार्थं फलमपीति भाष्यं
व्याचष्टे*पुरुषेति* । पूर्वपक्षोपसंहारार्थं तस्मादिति भाष्यं व्याचष्टे
*तस्मादिति । उत्कर्षप्रतिज्ञानस्याद्यसूत्रावयवारूढत्वसूचनार्थो
भाष्यशेषो यथाप्रकरणं निरेष्यत्यनेनैव व्याख्यातः ।

प्रकरणविशेषाद्वा तद्युक्तस्य तत्संस्कारो द्रव्यवत् ॥ २१ ॥

प्रकरणयुक्तस्यैव पुंसः स्नानेन मन्त्रवचनेन च संस्कारो
न तु शुद्धस्य द्रव्यस्येव प्रोक्षणादिनेत्येवं सूत्रव्याख्यार्थं न

चेत्यादिभाष्यं व्याचष्टे * पुरुषेति * लिङ्गवाक्यसमर्पितपुरुषसामान्याविरोधिपुरुषविशेषसमर्पकत्वेनाविरोधात्प्रकरणस्य बाधायोगसूचनार्थत्वेन तावत्प्रकरणविशेषादिति सूत्रावयवं हेतुप्रश्नोत्तरतया व्याचष्टे * कुतइति * ॥ प्रकरणस्य व्यावर्त्तकत्वाभावाद्विशेषसमर्पकत्वायोगमाशङ्क्य प्रकृतस्य क्रतूपकाराख्यफलस्य सन्निहितत्वेन विशिष्टत्वाद्बलीयस्त्वात्तत्सम्भवे विप्रकृष्टपुरुषाभिमतस्वर्गाख्यफलकल्पनानुपपत्तेरवलम्बने चानर्थक्यापत्तेर्व्यावर्त्तकत्वं विनापि विशेषसमर्पकत्वोपपत्त्युक्त्यर्थत्वेनाप्येतमेव सूत्रावयवं व्याख्यातुमाह * न चेति * दूरवर्तिनी फलश्रुतिः कल्पयितुं न युज्यत इति करोतिना कल्पनक्रियाविशेषलक्षणादर्थः । यदि कश्चित्प्रकृतसंयोगेपि लिङ्गवाक्याबाधस्य वक्ष्यमाणत्वाद्भ्रान्त्या शुद्धपुरुषसंयोगेपि प्रकरणाबाधं शङ्केत तं प्रत्याह * पुरुषमात्रेति * । अविरोधायोगशङ्कानिरासार्थत्वेन सौत्रहेतुव्याख्यानायाविरोधायोगशङ्कार्थं नन्वितिभाष्यं व्याचष्टे * नन्विति * ॥ एतच्छङ्कानिरासार्थत्वेन प्रकरणविशेषोक्तिव्याख्यार्थमुच्यतइति भाष्यं व्याख्यातुमारभते * सत्यमिति * । जञ्जभ्यमानशब्दस्य यौगिकत्वेन व्यक्तिवाचित्वादाग्नेयीशब्दवच्च स्वेनामार्थवृत्तित्वाभावेन सन्निहितार्थवाचित्वाभावादाग्नेय्यधिकरणपूर्वपक्षन्यायेन सर्वव्यक्तिवाचित्वावगतेः प्रकृतजञ्जभ्यमानमात्रग्रहणे जञ्जभ्यमानशब्दार्थसाकल्यासिद्धिं प्रकृतस्य च पुंसः कर्मारम्भात्प्राचीनेनैव सर्वकर्माङ्गतया स्मृतिप्राप्तेन स्नानेनापकृष्टमलत्वान्न लिङ्गावगतमलापकर्षणार्थत्वस्नानं प्रत्ययोग्यतामाशङ्क्य सर्वासां व्यक्तीनां जञ्जभ्यमानशब्दवाच्यत्वेपि प्रत्येकमेव वाचित्वादाग्नेयीवच्चोपादेयत्वाभावेनागृह्यमाणविशेषत्वाभावात्प्रकृतमात्रग्रहणेपि शब्दार्थसाकल्यसिद्धेः मलानां चापकृष्टानामपि पुनःपुनः प्रवृत्तिदर्शनादत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः स्रवत्येव दिवारात्राविति चोक्तत्वाद्योग्यत्वोपपत्तिमाह * न हीति * । प्राकरणिके जञ्जभ्यमाने समस्तः शब्दार्थः प्राकरणिके च स्नानशेषिणि योग्यत्वं न नास्ति किं त्वस्त्येवेत्यर्थः । स्नानशेषिपुरुषोपलक्षणार्थः स्नातृशब्दः । प्रकृतेपि पुंसि योग्यत्वशब्दार्थसाकल्यसंभवाल्लिङ्गवाक्ययोः प्रकरणेन स्वविषयादुत्कालनलक्षणाबाधानापपत्तावपि संकोचनलक्षणो बाधः प्रसज्येतैवेत्याशङ्क्य * न-

वति * । व्रीहिप्रोक्षणादिवदिहापि संकोचोपपत्तिमाशङ्क्य शुद्ध-
रुषार्थत्वेऽग्निहोत्रादिवत्साक्षात्पुरुषोपकारित्वात्सुतरामर्थवत्त्वोपपत्तेः
शुद्धव्रीह्यर्थतायामिवानर्थक्यापत्त्याशङ्काभावाद्वैषम्यसूचनायायुक्त-
ोक्ता । शक्तिमदर्थित्वस्याप्यधिकारेणापेक्षणादनर्थके कर्मण्यधिकारा-
ुपपत्तेरशक्तेवानर्थक्यापत्त्याप्यविशेषबुद्धिनिवृत्तेर्युक्तत्वात्प्रकरणा-
ागतसन्निकृष्टक्लृप्तकाराख्यफलसंभवे विप्रकृष्टफलकल्पनायोगेन
ुद्धपुरुषार्थतायामानर्थक्यापत्तिपरिहारायोगाद्व्रीहिप्रोक्षणसाम्याश-
ान परिहरति * एषा तावदिति । * विद्वत्त्वस्यापि शक्त्याधानायै-
ापेक्षणेऽप्यविदुषः सामर्थ्यस्याप्यविज्ञानेनेन्द्रियदार्ढ्यादिहेतुकशक्ति
वद्वत्त्वेऽप्यधिकारायोगात्पृथगुपादानम् । अगृहीताशयः प्रकरणाति-
रेक्तव्यावर्तकायोग मत्वानभ्युपगमनीयाभ्युपगमापत्तिं शङ्कते
* नान्विति । * स्वयमेव मयानभ्युपगमनीयत्वज्ञानान्न ममानभ्युपग-
मनीयप्रकरणविशेषकत्वाभ्युपगमापत्तिरित्याशयेन परिहरति * नैत-
देति । * प्रयाजादिष्विव मन्त्रस्नानयोरपि विनियोजकमेव प्रकरणं
न तु विशेषणत्वं प्रतिपद्यत इत्युक्तं कथंभावाख्यस्य प्रकरणस्य विनि-
योगार्थत्वाद्विशेषकत्वायोगेऽप्यधिकाराख्यस्य प्रकरणस्याग्नेय्यादौ
विशेषकत्वदर्शनादत्रापि विशेषकत्वं भविष्यतीत्याशङ्क्योपादेय-
त्वादाग्नेय्यादेर्विशेषणसंभवेऽपि जञ्जभ्यमानस्योद्देश्यत्वाद्विशेषम-
शक्यतोद्दिश्यमानोक्त्योक्ता विनियोजकत्ववद्व्यावर्तकतापि कस्मान्न
भवतीत्याशङ्क्य प्रकरणस्य कथमिति प्रकाराकाङ्क्षारूपस्येत्थमित्यु-
पायेतिकर्तव्यताद्यपरपर्यायप्रकाररूपादन्येन विशेष्यादिना नन्वया-
दित्याह * न हीति। जञ्जभ्यमानस्योद्देश्यत्वाद्विशेषणायोगेऽपि स्नातीत्या-
ख्यातोक्तभावनाक्षिप्तस्य कर्तुरुपादेयत्वाद्विशेषणोपपत्तेः कथंभावा-
ख्यस्य प्रकरणस्य विशेषकत्वायोगेऽप्यपूर्वसाधनांशलक्षणायै पुंसोऽधि-
काराख्यप्रकरणगृहीतत्वापेक्षणादधिकाराख्यात्प्रकरणाद्विशेषलाभो-
पपत्तिमाशङ्क्याधिकाराख्यस्य प्रकरणस्य वाक्यप्रासेभ्यः पुरुषान्तरेभ्यो
वाक्यविधेयक्रियांशोपभूतपुरुषनिवर्तनात्मकविशेषणाख्यस्य व्यापा-
रस्य वाक्यविरोधेन व्यावृत्तत्वाद्बाधितत्वान्न प्रस्तावलक्षणव्या-
पारबाधे तद्गृहीतत्वापेक्षा न युक्तेत्याशङ्क्य विशेषणाख्यव्या-
पारबाधेऽपि बुद्धिस्थापनाख्यव्यापाराबाधाद्युक्तत्वसूचनार्थं व्यावृ-
त्तव्यापारोक्त्योः सप्तम्यन्तयोरपेक्षोक्तेश्च प्रथमान्तायाः पाठेऽपि प्र-

करणगृहीतत्वापेक्षायामपि तद्व्यापारस्य बाधितत्वान्न प्रकरणं विशेषणमित्यर्थस्य विवक्षितत्वाद्यद्यपितथापिशब्दार्थौ निपातत्वादनेकार्थेनेतिकरणेन विवक्षित्वा यद्यपि प्रकरणगृहीतत्वापेक्षा भवति तथापि तद्व्यापारे बाधितेनैव तद्विशेषणमवकल्पत इत्येवं योज्यम् । युगपत्सर्वपदार्थविषयत्वात्तु प्रकरणव्यापारस्याद्यपदार्थादारभ्यान्त्यपदार्थपर्यन्तमनुवृत्तेः प्रकरणगृहीतत्वापेक्षायास्तद्व्यापारपर्यवसानोत्तरकालत्वं व्याख्यातुमुपक्रमते * कथं तर्हीति * द्रव्यवदिति सौ-
६८४।१
त्रस्य दृष्टान्तस्य प्रकृतपुरुषप्रत्ययप्रकाशोक्त्यर्थत्वसूचनपूर्वं किंत्विति भाष्यं व्याचिख्यासुः प्रकरणस्य विशेषकत्वाभावेपि प्रकृतपुरुषग्रहणसिद्धिमुपपादयति * तथा हीति * श्लोकं व्याचष्टे * यथाहीति * नन्वित्याशङ्काभाष्यं फलमपीति भाष्ये लुप्तत्वस्योक्तत्वात्फलकल्पनापरयुक्त्ययोगोक्त्यर्थत्वेन व्याचष्टे * ननु चेति * प्राणापानावेवेति फलश्रुत्युदाहरणेन तीर्थमिव हीत्यस्याप्युपलक्षणादनयोरिति द्विवचनोपपत्तिः । नेतीति परिहारभाष्यं फलस्य विध्यनधीनत्वादयुक्तमाशङ्क्य विधायकशब्दस्यात्राज्ञातज्ञापकवाचित्वात्फलज्ञापककामशब्दाभावोक्त्यर्थत्वेन व्याचष्टे * सत्यमिति * प्राणापानावेवेत्यस्याज्ञातचिरायुष्ट्वाख्यफलज्ञापकत्वाद्विधायकानुपलम्भोक्त्ययोगाशङ्कानिरासार्थं य एव इति भाष्यमेतावदत्रशब्देन गम्यते यस्यैवं लक्षणा जुहुस्तस्य पापश्लोकाश्रवणमिति जुहूतः क्रियते जुहूर्वा तदर्थेति नैतच्छब्द आहेति पर्णमय्यधिकरणभाष्यवक्ष्यमाणयुक्त्याशयत्वेन व्याचष्टे * फलेति * वर्त्तमानापदेशस्याप्रवृत्तप्रवर्त्तकत्वाभावात्तदाशयत्वेनैव विधायकाभावोक्तिः कस्मान्न व्याख्यातेत्याशङ्क्य * इतरथा पुनरिति * फलज्ञापकत्वाभावे सत्यानर्थक्यापत्त्याशङ्कानिरासार्थं स्तावकास्त्विति भाष्यं व्याचष्टे*द्रव्येति* पारार्थ्यहेतुकस्यार्थवादत्वस्य तत्र वक्ष्यमाणत्वात्कामशब्दव्यतिरिक्तेन शब्देन फलविधानाकरणस्य वक्ष्यमाणतोक्तिरयुक्तेत्याशङ्क्य पर्णमय्यधिकरणसूत्र एव खादिरं वीर्यकामस्य यूपं कुर्यादित्येवमाद्यायां फलप्रधानायां श्रुतौ फलमुच्यतइति वदता सूत्रकृता कामपदयुक्तायां श्रुतौ फलार्थत्वस्य वक्ष्यमाणतामाह * फलं त्विति * तस्मादिति सिद्धान्तोपसंहारभाष्यं स्पष्टत्वादव्याख्यायाहेतिशङ्काभाष्यं शुद्धपुरुषार्थत्वाभ्युपगमार्थत्वेनाभासमानं फलकल्पनभयेन

शुद्धपुरुषार्थत्वनिरासादयुक्तमाशङ्क्य क्रतुयुक्तपुरुषार्थत्वाभ्युपगमार्थत्वेन व्याचष्टे * आहेति * । दर्शपूर्णमासाविवेत्यादिभाष्यावयवपाठपूर्वं कथमिति प्रश्नभाष्यं व्याचष्टे * कइति * । शङ्काशयोक्त्यर्थं योऽपिहीति भाष्यं व्याचष्टे * सर्वथा तावदिति * । अत्रेति परिहारभाष्यं क्रत्वन्तरेऽपि संस्कृतेन पुंसा प्रयोजनोपपत्तेरयुक्तमाशङ्क्याह * अस्येति * कोसावाशय इत्यपेक्षायां संस्कृतेन पुंसा ६८५।४
क्रत्वन्तरे प्रयोजनं कुतो नास्तीति प्रश्नपूर्वं गूढमाशयं विवृणोति * कुतइति * । श्लोकाशयं व्याचक्षाणो नैवेति परिहारभाष्यावयवं व्याचष्टे * यदीति * । निर्दोषशास्त्रोक्तस्य विज्ञानस्य दोषजन्यमिथ्यात्वज्ञापनलक्षणाबाधायोगाद्बलवच्छास्त्राविरुद्धविषये विज्ञानोत्पत्तिप्रतिबन्ध एव शास्त्राणां बाधः क्वचित्प्राप्तबाधोक्तिस्तु ज्ञानमात्रोत्पत्त्याशयेत्यविरोधः । प्रतिबन्धप्रकारापेक्षायां संस्कृतेन त्विति भाष्यावयवं व्याचक्षाणः प्रकारमाह * सा चेति । नवमे व्रीहीन् प्रोक्षतीति श्रुत्या द्रव्यसंयुक्तं प्रोक्षणं त्रीन् परिधीनिति मन्त्रं लिङ्गात्संख्यासंयुक्तं स्रुवेण जुहोति तेन ह्यन्नं क्रियत इति वाक्याद्धेतुसंयुक्तं होमं चतुर्होत्रा पौर्णमासीमभिमृशेदिति श्रुत्याग्नेयादिसमुदायसंयुक्तं मन्त्रं चोदाहृत्य प्रोक्षणादयो द्रव्यादिस्वरूपप्रयुक्ता अपूर्वप्रयुक्ता वेति संदेहे द्रव्यसंख्याहेतुसमुदायं चाश्रुतिसंयोगादिति सूत्रेण श्रुतिसंयोगात्तद्रूपलक्षिताल्लिङ्गवाक्यसंयोगाच्च द्रव्यादिस्वरूपप्रयुक्तत्वं पूर्वपक्षयित्वार्थो वा स्यात्प्रयोजनमितरेषामचोदनार्थस्य गुणभूतत्वादित्यनेनार्थ्यमानमपूर्वं प्रयोजनं द्रव्यादीनामर्थ्यमानमपूर्वं प्रति गुणभूततया कर्त्तव्यत्वेनाचोदनादिति सिद्धान्तिते भाष्यकृता श्रुत्यादिगम्यस्वरूपान्वयविरोधात्प्राकरणिकापूर्वान्वयायोगमाशङ्क्यानर्थक्यभयात्स्वरूपान्वयाविवक्षया पूर्वसाधनत्वलक्षणाया वक्ष्यमाणत्वात्तेनैव न्यायेनेहाप्यपूर्वसाधनत्वलक्षणावगतेः प्रकरणं च विना क्रत्वैकान्तिकत्वाभावेन क्षणायोगात्क्रत्वन्तरस्य चाप्रकृतत्वात्प्रतिबन्धसिद्धिरित्यर्थः । अनेन च संस्कृतेन च पुंसा साध्यं प्रयोजकमपूर्वमन्यत्र नास्तीति भाष्ययोजना सूचिता । पुंसः साक्षादपूर्वसाधनत्वाभावात्प्रकृतपुरुषसंस्कारेऽप्यपूर्वाभावाविशेषं नन्विति भाष्येणाशङ्क्योच्यत इत्यनेन साक्षात्साधनत्वाभावेऽपि दर्शपूर्णमासद्वारा साधनत्वादपूर्वोत्पत्त्युपपत्त्याशयेन परिहृत्याहेत्यनेन क्रत्वन्त

रस्यापि तर्हि द्वारत्वसंभवात्प्रकृतग्रहणासिद्धिरिति पुनराशङ्क्योच्यते नान्यस्येत्यनेन संस्कारस्याप्रकृतक्रत्वन्तरगुणत्वायोगान्न तस्य द्वारत्वं संभवतीत्याशयेन परिहृते पुनराह प्रकृतस्यापीत्यनेन क्रत्वन्तरस्य संस्कारं प्रत्यशेषित्वादपूर्वोत्पत्तिद्वारत्वायोगे प्रकृतस्याप्यशेषित्वात् द्वारत्वायोगापत्तौ शङ्कितायामुच्यत आनर्थक्यादित्यादिनानर्थक्यापत्तेर्वाक्यीयशुद्धपुरुषार्थत्वबाधेन प्रकरणकल्प्यया प्रकृतक्रत्वेकवाक्यतया पुरुषवत्प्रकृतस्य क्रतोरपि शेषित्वावगतेरपूर्वोत्पत्तिद्वारत्वसंभवात्प्रकृते क्रतौ प्रयोजनमस्ति क्रत्वन्तरैकवाक्यत्वकल्पकाभावात्तु क्रत्वन्तरस्य शेषित्वानवगतेर्द्वारत्वायोगात्तत्र प्रयोजनं नास्तीति परिहारोक्तेर्गूढाशयविवरणार्थत्वसूचनार्थं पृथग्व्याख्या । तस्मादिति प्रकृतग्रहणसिद्ध्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * । मन्त्रोदाहरणे न्यायव्युत्पादनभाष्यस्योपलक्षणार्थत्वात्स्नानोदाहरणेऽपि तुल्यत्वसूचनार्थं स्नानेऽप्येतमेव न्यायमतिदिशति * एवमिति * । दर्शपूर्णमासावेव कुर्वीत इत्येतन्नेत्याशङ्काया नैव व्यावर्त्यत इत्यादेश्च परिहारस्य सप्तमपादाद्याधिकरणस्थसूत्रद्वयारूढत्वं दर्शयति * एतौ चेति * । इतरथा वदनं भवतीत्येतावत्यर्थं वदनमनुतिष्ठेदिति वदेदित्यविवक्षितस्वार्थः परार्थविध्यर्थो भवेदिति पूर्वाधिकरणपूर्वपक्षभाष्योक्तायाः प्रकरणनिवेशपक्षे विध्यानर्थक्यापत्तिशङ्कापत्तिशङ्कायास्तुल्यन्यायतयेहापि प्राप्ताया परिहारायानुभाषणार्थं यत्त्वित भाष्यं व्याचष्टे * यत्त्विति * एवं सतीत्यादिपरिहारभाष्यं व्याचष्टे * तत्रेति * । पूर्वाधिकरणोक्तपरिहारेण महास्यपरिहारस्य विरोधं शङ्कते * इह चेति * । केषांचिन्मतेन पूर्वपरिहारस्य सत्यत्वमाह * यथा तावदिति * । द्विती-
६८६।२ यस्यान्येषां मतेन सत्यत्वमाह * शक्यं त्विति * । पूर्वार्धं व्याचष्टे * विधिस्त्विति * एकादशे सर्वाङ्गसमुच्चयसिद्ध्यै सर्वेषामङ्गानामेकं क्रतूपकाराख्यं प्रयोजनमिति कल्पनाया पर्यायविधानेन हेतुना विधिशब्दवाच्यस्याङ्गग्रामस्यैकविधिश्रुतिकत्वं वदता सूत्रकृता सर्वाङ्गविधायकस्यैकस्य विधेर्वक्ष्यमाणत्वात्प्रत्यात्मकविधीनां च क्रमप्रवृत्तित्वेनाङ्गानां प्रयोगवचनविधीयमानतां विना विध्यैक्यायोगात्प्रयोगवचनस्यैव विधित्वावगतेः स एवैकः सर्वेषामङ्गानां विधिरित्यर्थः । न केवलं सूत्रानुसारात्प्रयोगवचनस्यैव विधित्वं किंतु युक्तत्वाद्-

पीत्याह * पुरुषश्चेति * प्रवर्त्तकस्यैव विधित्वप्रसिद्धेरपरिपूर्णायां च भावनायां प्रवर्त्तनाशक्तेः साङ्गप्रधानविषयस्य प्रयोगवचनस्यैव विधिता युक्तेत्याशयः। उत्तरार्द्धं व्याचष्टे * तस्मादिति *। स्वमतेन परिहारद्वयस्यापि सत्यत्वमाह * अत्रेति *। पूर्वस्य तावत्प्रश्नपूर्वं साधुत्वमुपपादयति * कथमिति * विधित्वे सति द्वितीयोऽसाधुः स्यादित्याशयेन पृच्छति * अथेति *। प्रात्यात्मिकवाक्यार्थालोचनवेलायां विधित्वे सत्यपि प्रकरणकल्प्यवाक्यैकवाक्यतापन्नसमस्ताङ्गप्रधानवाक्यसमूहात्मकमहावाक्यार्थीभूतश्यशपरिपूर्णभावनाविधिवेलायां प्रयोगविधिसिद्धप्रवृत्त्यनुवादाविरोधाशयेनोत्तरमाह * पूर्वेण हीति *। सोपपत्तिशङ्काग्रन्थद्वयसाधुतामुपसंहरति * अत इति।

व्यपदेशादपकृष्येत ॥२२॥

अहीनस्य फलवत्त्वेन ज्योतिष्टोमानङ्गत्वाद्गौणत्वापत्तेश्च ज्योतिष्टोमत्वाभावात्प्रकरणाद्विगलस्य वहिर्भूतस्याङ्गतया द्वादशत्वस्यापदेशात्कीर्त्तनाद्युक्तोपकर्ष इत्येव वैपरीत्योक्त्यर्थत्वेनानुभाषणपूर्वं सूत्रव्याख्यार्थमथेत्यादिभाष्यं व्याचष्टे * प्रकरणइति।* सान्ह- ९८७।१
शब्दवाच्यज्योतिष्टोमाङ्गत्वेन त्रित्वापदेशाद्भेदेन द्वादशत्वापदेशादित्येवमन्यथावैषम्योक्त्यर्थत्वेन व्याख्यार्थं व्यपदेशाच्चेति भाष्यं स्पष्टत्वान्न व्याख्यातम्।

अपगोरणादीनां पुमर्थत्वम्। अ ९॥

शंयौ च सर्वपरिदानात् ॥२३॥

न प्रजानीयादितीत्यादिशब्दार्थेनेतिकरणेन तस्मान्न ब्राह्मणायावगुरेन्न निहन्यान्न लोहितं कुर्यादिति निषेधवाक्यानां गृहीतानां भाष्यकृतोदाहरणतोक्तेति सूचनार्थं सौत्रं शंयुनशब्दं तदुपलक्षणार्थत्वेन व्याचष्टे *शंयाविति।* भाष्ये क्रतुयुक्तपुरुषधर्मपक्षानवगमात्पूर्वापवादत्वेन सङ्गत्ययोगमाशङ्क्य तत्सिद्ध्यै शुद्धक्रतुधर्मः क्रतुयुक्तपुरुषधर्मः शुद्धपुरुषधर्मश्चेति त्रीन्पक्षानाह *तत्रेति।* भाष्ये तर्हि कथं द्वावेवपक्षावित्याशङ्क्य शुद्धक्रतुसम्बन्धस्य क्रतुयुक्तपुरुषसंबन्धस्य च प्रकरणगम्यत्वसाम्येनैकीकरणादित्याह * तेषामपीति।* प्रकारणादिति पूर्वपक्षभाष्यमवगोरणादेः क्रतौ विध्यभावेनाप्रसक्ते-

स्तन्निषेधस्य क्रत्वर्थत्वायोगादयुक्तमाशङ्क्यानृतवदनवद्विध्यभावेप्यर्थात्प्रसक्त्योपपादयितुमाह *समस्तेन चेति *। आख्यातेन कर्त्रनभिधानाच्छ्रुत्यविरोधसूचनार्था समस्तोक्तिः । अन्य इति भाष्यं प्रसक्त्युपपत्तिसूचनार्थत्वेन प्रश्नपूर्वं व्याख्यातुमाह*का चेति* । महापिठरपरिमितस्याप्यन्वाहार्यस्य सकुटुम्बर्त्विक्चतुष्टयापर्याप्तत्वाद्दानत्यशक्त्युपपत्तिसूचनार्थश्चतु शब्द. * । पूर्वसूत्रस्थापकृष्यतेति शब्दानुषङ्गेण मण्डूकप्लुत्या च व्यवहितस्यापि कर्त्रधिकरणपूर्वपक्षसूत्रस्थस्याकर्मशब्दस्यानुषङ्गेण शयूपक्रमे वाक्ये यदकर्मानिषेधनं तत्प्रकरणादपकृष्यंत सर्वावस्थस्य दर्शपूर्णमासकर्तृत्वावस्थानपेक्षस्य पुंसो नरकपरिहारार्थं ब्राह्मणावगोरणादीनां दानात्खण्डणान्निषेधादित्येवं सूत्रव्याख्यार्थमेवमितिभाष्यमनुभाषणपूर्वं पूर्वपक्षनिरासाय प्रकरणस्य वाक्याविरोधोक्त्यर्थं च ननु प्रकरणादित्यादिभाष्यं क्रतुयुक्तपुरुषधर्मत्वशङ्कोक्तिनिरासार्थं च ननु जञ्जभ्यमानस्येत्यादिभाष्यं संक्षेपाद्व्याख्यातुं स्वयं च सर्वेभ्य ऋत्विग्भ्यो नृत्विग्भ्यो वा ब्राह्मणेभ्यः परिपालनाख्यवरदानादित्येवं सूत्रं व्याख्यातुमाह* तथेति । * आद्यं पादं व्याचष्टे * यच्छब्दस्तावदिति । * सर्वस्य पुंसो ब्राह्मणावगोरणादिनिषेधसंयोगादित्येवं सर्वसंयोगोक्तिव्याख्यार्थं यो ब्राह्मणायेत्यर्थवादस्थो यच्छब्दः पुरुषमात्रमुपादत्त इत्युक्तं प्रकृतदर्शपूर्णमासयाजिपुरुषविषयत्वेनापि यच्छब्दोपपत्तेर्विध्यर्थवादसमभिव्याहारात्मकेन वाक्येन पुरुषमात्रस्य निषेधसंयोगायोगमाशङ्क्य यच्छब्दस्योपक्रमस्थत्वादुपसंहारस्थनिषेध्योत्तरकालप्रकरणव्यापारानुरोधेन संकोचायोगसूचनार्थं श्रुत्यैवेत्युक्तम् । योयं ब्राह्मणस्यावगोरणादिनिषेधः स सर्वावस्थस्य पुंस इत्येवं च भाष्यव्याख्या पुरुषोक्त्या सूचिता । अन्यथा सूत्रव्याख्यार्थत्वाद् द्वितीयं पादं तावदुपेक्ष्य क्रतुयुक्तपुरुषधर्मत्वशङ्कोक्तिनिरासार्थत्वेन ननु जञ्जभ्यमानस्येवेत्यादिभाष्यव्याख्यार्थं तृतीय पादं व्याख्यातुमाह * न चेति । * क्रतुयुक्तपुरुषापेक्षितभोक्तृत्वयोग्यताधानाख्यफलनिरासेन पुरुषमात्रापेक्षितनरकपरिहाराख्यफलोक्त्यर्थत्वेन सौत्रपरिशब्दव्याख्यासूचनार्थं नरकेत्युक्तम । दोअवखण्डनइत्येतद्धातुरूपाश्रयणेन खण्डनार्थतया दानशब्दस्य निषेधवाचित्वसूचनार्था प्रतिषेधोक्ति.। नरकपरिहारार्थत्वस्य शुद्धपुरुषधर्मत्वहेतुतोपपादनार्थं स चे-

स्पाद्युक्तम् । फलश्रुतिं द्विधा व्याख्यातुं शतेनेत्याद्युक्तम् । आद्यव्या-
ख्याने यातनानुभवनमाख्यातार्थो द्वितीये यातनानिस्तरणम् । स्वयं
फलस्य क्लृप्तत्वोपपादनार्थं निषेधेत्याद्युक्तम् । भाष्योक्तामुपपत्तिं
दूषयितुं यत्त्वित्याद्युक्तम् । कथं तर्हि भाष्यसमर्थनेत्यपेक्षायां वर्त्त-
मानकालमुपादानेन योग्यानुपलब्ध्यभावात्तिङ्विभक्तिः फलज्ञापि-
कास्तीत्येव समर्थनसूचनपूर्वं नरकपरिहारार्थत्वस्य शुद्धपुरुषधर्म-
त्वहेतुतामुपसंहर्तुं तस्मादित्युक्तम् । अवगोरणादेर्वर्त्तमानकालशून्ये-
नानिष्टफलोपादानेन कामपदोपबन्धमनपेक्ष्यावगोरणादिविषयनि-
षेधसिद्धेस्तस्य च पुरुषमात्रसंभवात्तत्परिहार्थस्य निषेधस्य पुरु-
षधर्मतेत्यर्थः । वर्त्तमानकालशून्यतोक्त्यर्था मात्रोक्तिः । एवशब्देन
कामपदानपेक्षतोक्ता । उपेक्षितं द्वितीय पादं व्याचष्टे * तथा चेति ।* ६८८.१०
सौत्रपरिशब्दस्य परिपालनशब्दैकदेशत्वसूचनार्थो पालनोक्तिः ।

प्रागपरोधान्मलवद्वाससः ॥२४॥

नास्याइत्युपगमननिषेधस्य क्रत्वर्थत्वशङ्कायोगाद्दिवा वै शंयु-मित्यादिवच्चोदाहरणभूतवाक्यशेषत्वाभावादुपन्यासानर्थक्यमाशङ्क्या-न्यार्थमप्येतदुदक्या संभाषणनिषेधस्य शुद्धपुरुषधर्मत्वज्ञाने भव-त्युपयोगीति कृत्वोदाहरणेन सहोपन्यस्तमित्याह * नास्या-इति * । क्रतावुदक्या संवादस्य कथंचिदप्राप्तेर्निषेद्धुमशक्य-त्वाच्छुद्धपुरुषनिवर्त्तनसामर्थ्यात्मकेन लिङ्गेन सह प्रकरणस्याविरोधशङ्कायोगान्मलापकर्षणाख्यपुरुषोपकारसामर्थ्यात्मकलिङ्गवच्चेह क्रत्वक्रतुयुक्तपुरुषसाधारणधर्मत्वावेदकलिङ्गादर्शनात्क्रतुयुक्तपुरुष-धर्मत्वपूर्वपक्षानुपपत्तेरनन्तराधिकरणवत्क्रतुयुक्तपुरुषधर्मतापवाद-त्वायोगाच्छुद्धक्रतुधर्मत्वमात्रापवादत्वे च कर्त्रधिकरणानन्तरं जञ्ज-भ्यमानाधिकरणानन्तरं वैतदधिकरणारम्भापत्तेरनन्तराधिकरण-संगत्ययोगमाशङ्क्यापरोधविधानात्क्रत्वर्थसंवादाप्राप्तावपि स्त्रैणस्य पुंसः क्रतुकालेपि पुरुषार्थसंवादप्राप्तिसंभवात्प्राप्तिवशत्वसाम-र्थ्यात्मकेन निषेधस्य क्रत्वक्रतुयुक्तपुरुषसाधारणधर्मत्वावेदकेन लि-ङ्गेन सह प्रकरणस्याविरोधात्समावेशोपपत्तेः क्रतुयुक्तपुरुषधर्मत्व-पक्षोपि संभवतीति सूचयितुं पुरुषस्य सर्वत्र क्रतावन्यत्र वा निषे-धस्ततश्च स्मृतिसमानार्थत्वेन तन्मूलत्वाद्विधिरिति विध्युक्त्या क्रतुयुक्तस्यैव पुरुषस्य निषेधस्ततश्च स्मृत्या सर्वदा निषेधप्राप्तेर-तुल्यार्थत्वेन च मूलमूलित्वायोगादनुवादइत्यपि सूचितं भवतीत्यैवं

पक्षत्रयोक्तार्थत्वेन किं मलवद्वाससेति संदेहभाष्यं मलवद्वासःशब्दव्याख्यापूर्वं व्याख्यातुमाह * मलवद्वासा इति । * किं प्राप्तमिति पूर्वपक्षभाष्यमय निषेधो दर्शपूर्णमासयोस्तद्युक्तस्य वा पुंसः धर्म इत्येवं पूर्वपक्षद्वयोक्तार्थत्वेन व्याख्यातुमाह * तत्रेति । * प्रकरणग्राह्यान्निषेधात्प्राक्कृतत्वात्प्रकरणवशादशक्यसंकोचतया । शुद्धपुरुषार्थत्वावेदकेन यच्छब्देन सह प्रकरणग्राह्यविध्युद्देशान्तर्गतत्वाद्वा तद्वशाच्छक्यसंकोचतया क्रतुयुक्तपुरुषार्थत्वावेदकेन उपलभ्यमानशब्देन सह तुल्यपुरुषोपादायकस्य शब्दस्याभावाच्छुद्धक्रत्वर्थस्य संवादस्यायं निषेधस्ततश्च शुद्धक्रत्वर्थः । यद्वा यथा क्रताववरोधविधानात्सहाधिकारनिषेधेऽपि पत्नीयजमानसाधारणस्य व्रीह्यादेः पत्न्यनुज्ञां विना क्रतौ विनियोक्तुमशक्यत्वादनुज्ञाप्रश्नोऽर्थसंवादप्राप्तिस्तथा पुरुषोऽपि स्त्रैणत्वेन क्रतुयुक्त इव क्रतुयुक्तेऽप्यविशेषेण प्राप्तिसंभवात्क्रतूक्तिलक्षितक्रतुयुक्तपुरुषार्थस्य संवादस्य निषेधस्ततश्च क्रतुयुक्तपुरुषार्थ इत्युक्तं क्रतावुदक्या संभवात्प्राप्तिसंभवे पुरुषार्थत्वज्ञापकपुरुषनिवर्तनसामर्थ्यात्मकलिङ्गाभावादविरोधिना प्रकरणेन शुद्धक्रत्वर्थत्वोपपत्तावपि क्रतुयुक्तपुरुषार्थताप्रमाणाभावादयुक्तत्याशङ्क्य निषेधस्य साक्षात् क्रतुयुक्तपुरुषार्थत्वप्रमाणाभावेऽपि प्रियासंवादस्यानन्दजननसामर्थ्यात्मकेन लिङ्गेन क्रत्वक्रतुयुक्तसर्वपुरुषार्थत्वावगतिसंभवात्सर्वप्रतिपत्तॄणां प्रवृत्तिविषयत्वात्तदवधारणाधीनो निर्णय इत्यादिकत्रेऽधिकरणवार्त्तिकाभिहितेनानृतवदेदमर्थ्यावधारणाधीननिषेधवैदमर्थ्यावधारणन्यायेन संवादनिषेधस्यापि क्रतुयुक्तसर्वपुरुषार्थत्वावगत्युपपत्तेर्युक्ता मे यज्ञमन्वासाता इति मन्त्रोच्चारणलक्षणस्य यजमानकर्तृकस्य पत्नीसंवादस्य सहाधिकारप्रकाशनार्थत्वेन यजमानसंस्कारार्थस्य मन्त्रलिङ्गात्प्राप्तेस्तद्विषयत्वसंभवादपि निषेधस्य क्रतुयुक्तपुरुषार्थता युक्तेत्यभिहितेनेत्यादिनोक्तम् । अग्ने गृहपत उपसमाह्वय स्वर्देवानां पत्नीरुपसमाह्वयध्वं पत्निपत्न्येषते लोको नमस्तेऽस्तु मा मा हिंसीः सुप्रजसस्त्वाय सुपत्नीरुपसेदिमेन्द्राणीवाविधवा भूयासमदितिरिव सुपुत्राऽस्थूरि त्वा गार्हपत्योपनिषदे सुप्रजास्त्वायेति मन्त्रस्य पत्नीप्रयाज्यत्वात्पतिपत्नीति संवादस्याध्वर्युकर्तृकतया यजमानकर्तृकतयानुपपत्तेर्देवपत्न्युपस्थानार्थत्वेन वास्य यजमानपत्नीसंवादत्वायोगात्पत्न्या च संवादोऽव-

योरिति भाष्ये तु क्रतुविनियोज्यद्रव्यानुज्ञाप्रश्नार्थस्य यजमानकर्तृकस्य संवादस्यापरुद्धेति स्काशब्दोक्तयागसमानकर्तृकापरोधविधानेन प्राप्त्ययोगात्पत्न्या प्रयोगाद्बहिरनुपनीतत्वेन मन्त्रशिक्षणाभावादप्राप्तस्य तद्वाचनस्य यजुर्वेदध्वर्युकर्तृकस्यायं निषेधोऽभ्युपगन्तव्यइत्यापाद्य दूषणाभिधानात्पत्नीत्ययं मन्त्रो यस्य गुक्तो मे यज्ञमिति मन्त्रोच्चारणस्य संवादस्यादिरित्यतद्गुणसंविज्ञानबहुव्रीह्याश्रयणेन पुनः पत्न्यभिध्यानजनितात्कामोद्रेकात्पत्नीसंवादप्राप्तिसंभवसूचनार्थं युक्ता मे यज्ञमिति मन्त्रः पत्निपत्न्येषते लोक इत्यादेरित्यनेनोक्त। शुद्धपुरुषार्थस्यापि संवादस्य क्रतौ कथंचित्प्राप्तिसंभवे तन्निषेधस्य ह्युपायमासभक्षादिवत्प्रकरणक्रत्वर्थत्वोपपत्तेस्तन्निरासो न युक्त इत्याशङ्क्य नेहावगोरणादिवत्प्राप्तिसंभवाभ्युपगमे क्रत्वर्थत्वनिरासः किंतु क्रतौ कथंचित्प्राप्त्यसंभवेनेति सूचनपूर्वं मलवद्वासः संवादविषयं पदकर्मनिषेधनं तत्प्रकरणापकृष्येत प्रयोगारम्भात्प्रागेव मलवद्वाससोपनयनाख्यापरोधविधानादित्येवं सूत्रव्याख्यार्थमेवमित्यादिभाष्य तात्पर्यतो व्याचष्टे*इतीति* अपरोधविधानात्क्रत्वनुष्ठानान्निवर्त्तनेपि क्रतुविनियोज्यद्रव्यानुज्ञाप्रश्नार्थसंवादोपपत्तिमाशङ्क्यापरोधस्य स्काशब्देन प्रयोगप्राग्भावविधानात्सर्वस्मादनुष्ठानसिद्ध्यर्थानुज्ञाप्रश्नादिसहितादनुज्ञानान्निवर्त्तनावगतेस्तदर्थोपि संवादे न प्राप्नोतीति परिहारार्थत्वेन सौत्रप्राक्छब्दव्याख्यार्थमुत्तरार्द्धं व्याचष्टे*तामिति*तच्छब्देनानालम्भकालम्भानर्हा- ६८६।१
परामृष्टा। क्रत्वनुष्ठानानौपयिकत्वेनोदक्यायाः क्रत्वर्थसंवादाप्राप्तौ पुरुषार्थेऽभ्युपगमनादिव्यवहारे उपयोगात्पुरुषार्थस्यापि संवादस्याप्राप्तिः स्यादित्याशङ्क्यानुपयोगेपि स्वाच्छन्द्यात्संवादप्राप्त्युपपत्तेर्निषेधार्थवत्वोक्त्या पूर्वार्द्धं व्याचष्टे * पुरुषस्य त्विति । * पुरुषार्थस्य संवादस्य प्राप्तिसंभवेपि नोदक्ययाभिभाषेतेति स्मृत्यैवं निषिद्धत्वान्निषेधानर्थक्यमाशङ्क्याह*यदि चेति। शास्त्राणि चेत्प्रमाणं स्युरिति वदसंदिग्धेपि यदीति संदिग्धवचनं स्मृतिप्राप्तनिषेधविषयायाः श्रुते स वायमर्थ उपनयनकाल एव पुरुषस्य प्रतिषिद्धस्तेन संयोगेनायं नित्यानुवाद इति कर्त्रधिकरणभाष्येनुवादत्वाभिधानान्मूलमूलित्वोक्तिमयुक्तामाशङ्क्य क्रतुयुक्तपुरुषार्थत्वेनुवादतोक्ता न तु शुद्धपुरुषार्थतायामित्याह*न हीति।* शुद्धपुरुषार्थतायामिति शेषः।

अन्नप्रतिषेधाच्च ॥ २४ ॥

निश्चितशुद्धपुरुषार्थत्वोपगमननिषेधसाहचर्यादपि संवादनिषेधः शुद्धपुरुषार्थ इत्येवं सूत्रं व्याख्यातुमाह * इतश्चेति * । अपकृष्येतेत्यनुषङ्गस्य शुद्धपुरुषार्थत्वप्रतिज्ञार्थत्वसूचनायापकृष्येतेति वाच्ये पुरुषमात्रधर्मइत्युक्तम् । उपगमननिषेधवाक्यसंवादनिषेधवादनिषेधवाक्यशेषत्वाभावात्कुतस्तद्वशेन निर्णय इति पृच्छति * कुतइति * । विशये प्रायदर्शनादित्यत्र संदिग्धस्य वस्तुनः प्राये वचननिर्णयत्वाभिधानाद्वाक्यशेषत्वेपि युक्ता निर्णायकतेत्युत्तरमाह * प्राये वचनेति * । अन्नादननिषेधस्याभ्यञ्जनवाक्यशेषादुपगमनविषयत्वनिर्णयोक्त्यर्थमभ्यञ्जनं वा इति भाष्यं व्याचष्टे * नास्याइति * । मैथुनस्याभ्यञ्जनशब्दवाच्यत्वाभावात्कथमस्माद् वाक्यशेषादन्नादननिषेधस्य मैथुनविषयत्वनिर्णय इत्याशङ्क्याभ्यञ्जनशब्दपर्यायस्य म्रक्षणशब्दस्य मैथुने प्रयोगदर्शनादभ्यञ्जनशब्दस्यापि मैथुनवाचित्वं गम्यत इत्याह * तथा हीति * । मैथुननिषेधस्यापि शुद्धपुरुषार्थत्वनिश्चयः कथमित्याशङ्कानिरासार्थं स चेतिभाष्यमुपगमननिषेधः प्रकरणेन प्रसक्तविषय इति कृत्वा प्रकरणादुत्कृष्टः शुद्धपुरुषार्थ इत्येवं लक्षणाया विषयप्रसक्तिनिरासार्थत्वेन व्याख्यातुमाह *तच्चेति* शुद्धपुरुषार्थस्याप्युपगमनस्य ऋतुकालेपि रागतः प्रसक्तिसंभवात्तदहर्मांसमैथुने वर्जयेदितिवदस्यापि निषेधस्य क्रत्वर्थतोपपत्स्यत इत्याशङ्क्य तदहरित्यनेन क्रतुकाले ब्रह्मचर्यविधानात्पुरुषार्थस्याप्युपगमनस्याप्रसक्तेस्तन्निषेधस्य क्रतुकालीनत्वायोगान्न क्रत्वर्थता युक्तेत्याह *ब्रह्मचर्येति* इतीति भाष्यावयवमुपपादितं स्वरूपतो व्याचष्टे *तस्मादिति* एष इतिभाष्यमुपगमननिषेधस्य पुरुषधर्मत्वोक्ते प्रकृतोपयोगोक्त्यर्थत्वेन व्याचष्टे *ततश्चेति* सकलं वा भाष्यमुपगमननिषेधविषयतया पूर्वग्रन्थेन व्याख्यायानेन स्वयंप्रकृतोपयोगोक्तिः ॥

सुवर्णधारणादीनां पुमर्थत्वम् । अधि ६

अप्रकरणे तु तद्धर्मस्ततो विशेषात् ॥२५॥

अस्यापि विचारस्य क्रत्वर्थविषयत्वेनावान्तरप्रकरणसंगतिसंभवेप्यनारभ्याधीतेषु प्रकरणस्य पूर्वैः सह विरोधाविरोधचिन्तायो

गान्महाप्रकरणासंगतिमाशङ्क्य विरोधचिन्तात्वाभावेपि तत्फलभूतप्रकरणसमावेशासमावेशचिन्तात्वेन प्रकरणाधीतानां चान्यत्र गमनागमनचिन्तायां कृतायां तद्वैपरीत्येनान्यत्राधीतानां प्रकरणनिवेशानिवेशचिन्ताया बुद्धिस्थत्वात्प्रासंगिकत्वेन संगतिमाह *इदानीमिति* लिङ्गवतः शब्दस्य लिङ्गोक्त्याविवक्षितत्वाल्लिङ्गस्याप्यप्रकरणाधीनत्वोपपत्तिः अप्रकरणाधीतानां साकाङ्क्षफलवत्सन्निध्याख्यप्रकरणाभावेपि हिरण्यधारणवासःपरिधानशून्येषु कर्मसु कीदृग्धिरण्यं वासौ वेत्यनाकाङ्क्षणात्तद्विशेषणत्वेन सुवर्णशोभनत्वाविध्यनुपपत्तेर्वासोहिरण्यशून्येषु च किं धर्मकं सद्धिरण्यं वासो वा पूर्वसाधनमित्यनाकाङ्क्षणात्तत्संस्कारत्वेन धारणपरिधानविध्यनुपपत्तेस्तद्वन्ति विशेषणाकाङ्क्षाणि संस्काराकाङ्क्षाणि वा कर्माणि प्रकरणशब्देनाकाङ्क्षाख्यैकदेशलक्षणयोक्तानि प्रधानकर्मविधिपक्षाविश्वजिदादिवत्फलकल्पनापत्तावपि क्रत्वर्थत्वपूर्वपक्षस्य क्लिष्टत्वात्संस्कारकर्मविधित्वेन पूर्वपक्षे भाष्यकृता वक्ष्यमाणेपि सुवर्णोद्देशेन हिरण्योद्देशेन वा धारणविधावुद्देश्यस्य विशेषणायोगादन्यतरशब्दानर्थक्यापत्तेः परिधानस्य वा श्रुतत्वात्क्रत्वनर्हत्वापादकत्वेन च संस्कारकत्वस्य दुराशङ्कत्वाद्धारणपरिधानयोः संस्कारविध्यनुपपत्तेरपरितोषात्स्वाभिमत पूर्वपक्षं सूचयन्नुदाहरणपूर्वं संदेहमाह *तस्मादिति* धारणं संस्कार्यस्य यथोपात्तस्य संस्कार्यत्वेन विशेषणानाकाङ्क्षत्वात्सुवर्णत्वविशिष्टहिरण्योद्देशेन धारणाख्यसंस्कारविध्यनुपपत्तेर्हिरण्यानुवादेन सुवर्णत्वाविध्यवगमारास्य च क्रियायामव्याप्रियमाणस्यानाकाङ्क्षितसुवर्णत्वविध्ययोगादनुवाद्यत्वेपि भार्यत्वेन विशेषणीयत्वोपपत्तेर्हिरण्यधारणस्यानुवाद्यत्वाविरोधः वाससो विशेषणाकाङ्क्षासिद्ध्यै क्रियापेक्षायां योग्यत्वात्परिधानाक्रियान्वगते कर्मस्थवासःपरिधाने शोभनत्वाविध्याविरोधः। हिरण्यवासोनुवादनिरासार्था प्रधानकर्मत्वोक्त्यर्था च विशिष्टोक्तिः। धारयेद्वैणवन्दण्डं शुभे रौक्मे च कुण्डले न जीर्णमलवद्वासा भवेच्च विभवे सतीति स्नातकव्रतत्वेन नित्यत्वेन नित्यत्वस्मृतेः पुत्रजन्मनिमित्तवैश्वानरेष्टिवत्फलश्रवणेपि काम्यत्वाभावोक्त्यर्था नित्योक्तिः। स्वाभिमतपूर्वपक्षनिरासार्थत्वेन सिद्धान्तसूत्रस्थं तुशब्दव्याख्यापूर्वं सिद्धान्तसूत्र व्याख्यातुमाह *तत्रेति* तद्धर्म इति तच्छब्दो हीनवत्पुरुष इति जञ्जभ्यमा-

नाधिकरणपूर्वपक्षसूत्रनिर्दिष्टपुरुषपरामर्शित्वेन पुरुषधर्मोक्त्या व्याख्यातः । क्रत्वर्थप्रमाणाभावोक्तिद्वारा पुरुषार्थत्वोपपादनार्थं तत इति सूत्रावयवं ततः प्रकरणवशेन निरस्तशुद्धपुरुषार्थत्वात्प्रकरणाधीतात्ज्ज्जभ्यमानमन्त्रोच्चारणादेरस्याप्रकरणाधीतत्वाद्वैषम्येण क्रत्वर्थत्वप्रमाणाभावेपि वाक्याद्वासोहिरण्यार्थत्वावगते. पुरुषार्थत्वपारिशेष्याभावादयुक्तमाशङ्क्य हेतुप्रश्नपूर्वमुपपादयितुमाह *कुतइति* प्रकरणाधीतस्यापि पुरुषार्थत्वे फलपदकल्पनया फलस्य सन्निधिं कल्पयित्वा न्वयकल्पना तत्सिद्ध्यै वा श्रुतितिकर्तव्यताकल्पना प्रकृतस्यापि कर्मणो श्रुतेतिकर्त्तव्यतान्तरकल्पनेति कल्पनागौरवपरिहारार्थैव क्रत्वर्थाभ्युपगमादप्रकरणाधीतस्यापि कल्पनालाघवाख्येनैव प्रमाणेन क्रत्वर्थत्वं भविष्यतीत्याशङ्कानिरासार्थत्वेन लाघवमात्रस्य प्रमाणत्वे ततः प्रकरणाम्नानादङ्गत्वाख्याविशेषासिद्धिप्रसंगादित्यकारप्रश्लेषेणावृत्त्यैतत्सूत्रावयवव्याख्यार्थं यद्यप्रकरणइति भाष्यं व्याचष्टे *प्रकरणाम्नानस्य हीति* । तस्मादिति सिद्धान्तोपसंहारभाष्य पुरुषार्थत्वं विना सर्वविध्यपर्यवसानात्क्रत्वर्थस्यापि तद्द्वारा पुरुषार्थत्वस्यावश्याभ्युपगमनीयत्वात्तदसंभवे पारिशेष्यात्साक्षात्पुरुषार्थत्वावगत्युक्त्यर्थत्वेन व्याचष्टे *यतस्त्विति* ॥

अद्रव्यत्वात्तु शेषः स्यात् ॥२६॥

संस्कारविधित्वशङ्कायोगात्तदाशयेन पूर्वपक्षायोगेपि सूत्रयोजनशक्तिमात्रेण संस्कारविधित्वात्कर्माङ्गत्वपूर्वपक्षे भाष्यकृता कृतेति विशिष्टविधित्वाभ्युपगमेनापि कर्माङ्गत्व पूर्वपक्षे सूत्रयोजनशक्तोहमिति सूचनायानभिमतेपि विशिष्टविधित्वाभ्युपगमेन पूर्वपक्षे धारणं परिधानं वा द्रव्यत्वात्कर्मत्वसामान्येन बुद्धिस्थस्य फलवतो ग्निहोत्रादिकर्मणोङ्गं स्यादित्येवं स्वयं योजयितुं संदेहकाले उक्तमपि पूर्वपक्षमाह *यद्यपि तावदिति* । शङ्कोत्तरत्वेनाद्रव्यत्वादिति सूत्रावयवं योजयितुं शङ्कां तावदाह *न त्विति* । नञोन्यवाचित्वाददद्रव्यशब्देन कर्मोक्तिमभिप्रेत्य परिहरति *सत्यमिति* । द्रव्यशब्देन देवताया अप्युपलक्षणं द्रुगनावित्यस्माद्धातोरचो यदिति यत्प्रत्यये कृते द्रव्यशब्दव्युत्पत्तेरुपगम्यत्वाद्धविशेषोपचरणीयत्वादावृत्तेन द्रव्यशब्देनैव देवतोक्तिं वाभिप्रेत्य द्रव्यदेवताभावेन यागत्वाभावात्प्रधानकर्मत्वानुपपत्तेः संस्कारकर्मत्वावगमादकर्माङ्गभूतयोश्च वासोहिरण्य-

योः संस्कारानर्हत्वात्कर्माङ्गं परिधान धारणं चेत्येवं सूत्रव्याख्यार्थं नात्रेत्यादिभाष्यं मन्यतेशब्देनायुक्तं सूचयन् व्याचष्टे *एवं चेति*। यष्टव्योक्तेरुपलक्षणार्थत्वसूचनार्था दानहोमोक्तिः। देवताया अप्यौपचारिकं संप्रदानत्वमभिप्रेत्याद्रव्योक्तिव्याख्यार्थं संप्रदानाभावोक्तिः। संस्कारकर्मत्वपक्ष एव द्रव्यशब्देन लक्षणया द्रव्यधर्मस्वातन्त्र्योक्तेर्गुणकर्मवाचित्वेनाद्रव्यशब्दं स्वयं व्याचष्टे *अथ वेति*। स्वाभिमतं पूर्वपक्षमाह * अथ वानेकार्थेति *। सुवर्णत्वविधेरपेक्षितपरिभाषामूलसमर्पकत्वेनोपयोगाधिक्यमाह *एवंचेति* रजतेपि दुर्वर्णरजता- ६६।१५
पेक्षया सुवर्णत्वसंभवेप्येकजातीयसर्वरजतव्यक्तिप्रत्ययबाधापत्तेर्दुर्वर्णरजतव्यावृत्त्ययोगाज्जातिद्वयेपि साधारणस्यापि हिरण्यशब्दस्य सकृदुच्चरिते वास्मिन् विवक्षैकैव दृश्यतइत्यनेन न्यायेन सकृदुच्चरितस्य जातिद्वयपरत्वायोगात्कात्र जातिर्विवक्षितेति संदेहे सुवर्णत्वविशेषणस्य तद्व्यावृत्त्यर्थत्वावगमाद्रजतजातिमात्रव्यावृत्तिः साधारणोक्त्या सूचिता। अस्मिन् पूर्वपक्षे सूत्रं योजयितुमाह *अद्रव्यत्वादिति चेति*। भाष्यकृद्व्याख्यायामन्यतेशब्देनायुक्तत्वं सूचितं प्रकटयितुमाह *यद्यपीति* हविषि रूढस्य द्रव्यशब्दस्यावयवयोगेन देवतावाचित्वायोगादुत्सूत्रत्वम्। उत्तरार्द्धं व्याचष्टे *अयागानामपीति*॥

वेदसंयोगात् ॥५७॥

यजुर्वेदविहितपदार्थानुष्ठातृत्वाद्वेदसंयुक्तेनाध्वर्युणा योगस्याध्वर्यवसमाख्यारूपस्य कर्माङ्गत्वे योगाद्युक्तत्वादपि कर्मशेष इत्येवं संशब्दस्य „वेदसंयुक्ताध्वर्युवाचित्वेन यागशब्दावृत्त्या च सूत्रव्याख्यार्थमाध्वर्यवमित्यादिभाष्यं व्याचष्टे * कर्माङ्गत्वे वेति * धारणपरिधारणानुवादेन सुवर्णशोभनत्वविधिपक्षे क्रियात्मकत्वेपि यस्य धारणपरिधाने विहिते तस्यैव तद्विशेषणेपि कर्तृत्वावगतं सुवर्णशोभनत्वयोस्त्वक्रियात्मकत्वेन कर्त्रपेक्षया एवाभावात्समाख्यायाः कर्तृनियमे व्यापारानुपपत्तेरेतत्सूत्रानर्थक्यमाशङ्क्य तदापि वैदिकत्वसामान्यस्य वेदसंयोगशब्दार्थत्वान्नानर्थक्यमित्याह*यदापीति*वैदिकत्वसामान्योक्तेः प्रयोजनापेक्षायां वासोहिरण्ययोर्लौकवेदसाधारण्याद्वैदिकमात्रानुवादायोगशङ्कानिरासं प्रयोजनमाह * तेनेति *

द्रव्यपरत्वाच्च ॥२८॥

संस्कारान्वयाद् द्रव्यत्वसूत्रे भाष्यकृतोक्तत्वात्तद्व्याख्याने स्य
सूत्रस्य पौनरुक्त्यमाशङ्क्य न केवलमयागादित्वात्स्वभावाद्वा धारण-
परिधानयोः संस्कारत्वं किन्तु द्रव्यप्राधान्यनिर्देशादपीति हेत्वन्त-
रोक्त्यर्थत्वेनापौनरुक्त्यमाह * पूर्वामिति * ॥ भाष्योपन्यस्ताप्ययाग-
६६२।१ गादिता स्वानभिमतत्वान्नोक्ता युक्तत्वेपि द्वितीयोदाहरणव्यापक-
त्वादुपचयहेतुतोक्ता । अन्येषां व्याख्यां भ्रान्तिमूलत्वेन दूषयितुं
भ्रान्तिहेतु तावदाह * तत्रेति * दूषयति * कृत्येति * संस्कार-
त्वसाधनद्वारास्य हेतोः पूर्वपक्षप्रतिज्ञान्वयोक्त्यर्थं द्रव्यसंस्कारश्चे-
ति भाष्यं व्याचष्टे * तस्मादिति *

स्याद्वा संयोगवत्फलेन संबन्धस्तस्मात्कर्मैति कर्मैति शायनः २९

स्याद्वेति भाष्यं सिद्धान्तप्रतिज्ञार्थत्वेन फलेनेति सूत्रा-
वयवव्याख्यार्थतया भासमानमाद्यसूत्रेणैव सिद्धान्तोक्तेः पुरु-
षार्थत्वे फलकल्पनापत्तिशङ्कानिरासार्थत्वेन चैतदवयवव्याख्यो-
पपत्तेरयुक्तमाशङ्क्य वाशब्देन कर्माङ्गत्वपूर्वपक्षे येन कर्मणेत्स देष-
वैसप्तदशः प्रजापतिर्यज्ञे यज्ञे न्वायत्त इत्यादिवद्वाच्यसंयोगस्य खा-
दिरः स्रुवो भवतीत्यादिवत्कर्माव्यभिचारिणो लिङ्गस्य कर्माङ्गवि-
धिप्रमाणस्याभावान्निरस्ते फलककल्पनापत्तेः पुरुषार्थत्वायोगात्पा-
रिशेष्यानुगृहीतो विधिरेव कर्माङ्गत्वे प्रमाणमित्याशङ्क्य फलेनेत्यव-
यवेन फलकल्पनक्लेशाभावोक्त्या पुरुषार्थत्वस्योपपादयिष्यमाणत्वा-
त्पारिशेष्यनिरासार्थतया फलेनेत्यवयवेन पुरुषार्थत्वोपपादनाद्विधेर-
र्थः प्रयोजनं कर्मानङ्गत्वेपि स्यात्सभवेदित्येवव्याख्यातुमाह * कर्मै-
ति * वारुणीष्टिं प्रतिनिमित्तत्वादिश्यमानस्याश्वदानस्य वैदिकत्व-
सामान्येन कर्माङ्गस्यैव निमित्तत्वावगमादित्यकर्माङ्गत्वे लिङ्गत्वव-
द्धिरण्यधारणस्यापि सुवर्णत्वं प्रति शेषित्वेनोद्दिश्यमानस्य कर्माङ्ग-
स्यैव शेषित्वावगमात्सुवर्णत्वस्य कर्माङ्गत्वलिङ्गत्वोपपत्तिमाशङ्क्य
परिगृह्णीयादित्यनेन विहितत्वोपलक्षणात्कर्माङ्गस्यैव निमित्तत्वावग-
तिर्युक्ता भार्यमित्यस्य त्वविधायकत्वापत्तेरुपलक्षणत्वायोगाद्वैपरीत्यो-
क्त्यै हिरण्येत्याद्युक्तम् । विशिष्टविधिपक्षे हिरण्यधारणानुवादेन सु-
वर्णत्वविधिपक्षे वा धर्माव्यभिचारिलिङ्गाभावात्कर्माङ्गत्वानवगमेपि
संस्कारविधिपक्षे वासोहिरण्ययोः संस्कार्यत्वान्यथानुपपत्त्या कर्मा-
ङ्गत्वावगतेर्द्धारणपरिधानयोः कर्माङ्गत्वे लिङ्गत्वं भविष्यतीत्याश-

ङ्गाप्रकरणाधीतत्वेनापूर्वसाधनलक्षणायोगाद्वासोहिरण्यस्वरूपसं-
स्कारापत्तेर्लिङ्गत्वानुपपत्तिरानर्थक्यापत्तिश्चाधिकेति परिहारसूच-
नार्थत्वेन सुवर्णस्येत्यादिनर्माङ्गमित्यन्त भाष्यं व्याख्यातुमाह * ते-
नेति * लिङ्गाभावपरामर्शिना तच्छब्देन श्रुत्यादीनां चेति भाष्यस्य
लिङ्गाभावोक्त्यर्थत्वं सूचितम् । तस्मादितिभाष्यमतिशायनो धारणं
परिधानं च प्रधान कर्म भेनइत्यन्तसूत्रावयवोक्तप्रधानकर्मत्वसंभवो-
क्त्यर्थत्वेन फलेनेति सूत्रावयवव्याख्यार्थतया व्याख्यातु प्रधानकर्म-
त्वं तावदुपपादयति * तस्मादिति *। कर्मानङ्गस्य प्रधानकर्मणः
प्रयोजनं विना विध्ययोगमाशङ्क्य प्रयोजनाकाङ्क्षायां फलाश्रवणे-
पि भावनायाः स्वाक्षिप्तेन कर्त्रान्यथान्वयायोगात्सुवासस्येत्यत्र बहु-
व्रीहिणैव पुरुषाप्रधान्यावगमात्पुरुषापेक्षितेन फलेनान्वयोवगम्यतइ-
त्येवं तावत्फलेनेति सूत्रावयवं स्वयं व्याचष्टे * किमिति * ॥ फल-
विशेषावगतिं विना समान्यतोवगतस्यापि पुरुषार्थत्वस्यानिर्वाहश-
ङ्कोत्तरत्वेनाप्येतमेव सूत्रावयव पुरुषार्थत्वान्यथानुपपत्त्यैव फलवि-
शेषान्वयः सुकल्प इत्येव व्याख्यातुमाह * नन्विति * ॥ कर्मत्वसा- ९९३।१
मान्येन हीत्यादिपूर्वपक्षवार्त्तिके क्रियात्मकत्वेन वेदसंयोगसूत्रे च
वेदमूलत्वेन प्रयोजनाकाङ्क्षायां कर्मोपस्थापनस्योक्तत्वात्पुरुषार्थकर्म-
द्वारापि च पुरुषार्थत्वोपपत्तेः साक्षात्पुरुषापेक्षितफलविशेषकल्पना-
योगमाशङ्क्य विश्वजिन्न्यायावगतस्य स्वर्गस्यार्थवादावगतस्य वा
भ्रातृव्यदुर्वर्णत्वादे स्वरूपेणाक्रियात्मकत्वे व्युत्पत्तिरूपेण क्रियाव्यु-
त्क्रत्वात्तेनैव च रूपेण फलत्वात्स्वर्गकामादिवाक्ये च वेदमूलत्वात्क-
र्मत्वसामान्यस्य वैदिकत्वसामान्यस्य च कर्मफले प्रत्युपस्थापकत्व-
स्साधारण्ये सति साक्षात्पुरुषार्थत्वसंभवे कर्मद्वारा पुरुषार्थत्वकल्प-
नायोगात्कर्मोपस्थापननिर्वृत्तिरित्याह * स्वर्गादिति * तस्मादिति
भाष्योक्तामार्थवादिकेन फलेनान्वयइत्येवमेतत्सूत्रावयवव्याख्यामनु-
सरति * अपिचेति * नन्वित्यादिभवतीत्यन्तं भाष्य रात्रिसत्राधि-
करणन्यायाशयत्वेन व्याख्यातुमाह * सत्यपि चेति * चतुर्थे क्रतौ
फलार्थवादमङ्गवत्कार्ष्णाजिनिरिति पूर्वपक्षसूत्रे विषयत्वेनोक्ते क्रतौ-
प्रतितिष्ठन्ति हवाएते य एता रात्रीरुपयन्तीत्याद्यर्थवादावगतमेव
फलमात्रे यो मन्यते तस्य क्रियया सह गुणगुणिसम्बन्धनिर्देशेन
क्लृप्तसामान्यसम्बन्धत्वादितिवक्ष्यतीत्यर्थः। निर्देशादिति रात्रिस-

त्राधिकरणसिद्धान्तहेतोः प्रस्तुतोदाहरणयोर्योजनार्थमन्यस्म।च्चे-त्यादितादर्थ्याध्यवसान्तमित्यन्तं भाष्यं प्रत्यक्षपरोक्षोक्तिभ्यां फलसक-लव्यतोक्तेत्येवं व्याचष्टे * तत्र हीति * । तस्मादिति सूत्रावयवव्या-ख्यार्थं तस्मादितिभाष्यं संयोगवदितिसूत्रावयवस्य भाष्यव्याख्याना-द्यथा स्वर्गकामादिपदसंयोगे फलान्वयावगमस्तथेहापि वाक्यशे-षतो फलान्वयावगमात्प्रधानकर्मेति शायनो मेनइत्येवमन्यथाव्या-ख्यापूर्वं व्याचष्टे * तस्मादिति * । एतावताहैनसाऽयुक्तो भवती-ति पुरुषसंबद्धो दोषः कीर्त्यत इति प्रजापतिव्रताधिकरणभाष्ये दोषो-क्त्या प्रजापतिव्रतानामकरणनिमित्तदोषपरिहारार्थत्वस्यैतावता क-र्मणा कृतेन सता पापेनायुक्तो भवतीति वाक्यशेषार्थाभ्युपगमनेन वक्ष्यमाणत्वात्सुवर्णधारणवासः परिधानयोः काम्यत्वशङ्कानिरास-सूचनार्थो नोद्यन्तमादित्यमीक्षेतेत्यादिप्रजापतिव्रतविषयत्वेन संयो-गदृष्टान्तोक्तिरित्यर्थान्तरन्यासेन सूचयितुमाह * तथा चेति * ॥

जयादीनां वैदिककर्माङ्गत्वम् । अधि ७ ।

शेषः प्रकरणेऽविशेषात्सर्वकर्मणाम् ॥३०॥

प्रकरणाधीताना द्वादशोपसत्त्वादीनामन्यत्र [न मेनसाना] गमन-चिन्तायां कृतायामन्यत्राधीतानां सुवर्णधारणादीनां तद्वैपरीत्ये तु बुद्धि-स्थानां प्रकरणनिवेशानिवेशविचारे प्रसगात्कृते तदनुप्रसंगेनास्याश्चि-न्तायाः संगतिसूचनार्थतया शेषत्वं त्विति भाष्यं व्याख्यातुमाह *इ-हेति* । धारणापरिधानयोः फलपरवाक्यशेषसमभिव्याहारलक्षणा द्वाक्यात्पुरुषार्थत्वे व्युत्पादिते वाक्यावगतसिद्धिसाधनकर्मार्थत्वानां जयाहोमादीनां तद्वैपरीत्येन बुद्धिस्थानां सर्वर्द्धिसाधनकर्मार्थत्वं प्र-धानसादृश्यसामर्थ्यलक्षणाद्वा लिङ्गादाहवनीयसाध्यर्द्धिसाधनकर्मा-र्थतेति विशेषचिन्ताप्रसंगादवतरतीत्याशयः । योप्रकरणाधीतो वाक्यात्कर्मशेषोवगतः स विशेषाभावात्सर्वकर्मशेष इत्येव पूर्वपक्ष-सूत्रव्याख्यार्थं किंतावदिति भाष्यं होमानामाहवनीयसाध्यत्वेनानाह-वनीयसाध्येषु कर्मसु प्रधानसादृश्यासम्भवात्प्रधानसादृश्यसाम-र्थ्यलक्षणेन लिङ्गेन वाक्यं बाधित्वा हवनीयसाध्यकर्मार्थत्वावगतेर-युक्तमाशङ्क्यानाहवनीयसाध्यकर्मदेशे होमानुरोधेनाहवनीयनयनात्प्र-धानसादृश्योपपत्तेर्लिङ्गाविरोधोस्योपपादयति*पूर्वपक्षेति* लिङ्गा-

विरोधेपि वैदिकत्वसामान्याद्वैदिककर्ममात्रार्थत्वावगतेर्न च कृष्या-
दीत्याहवनीये वर्त्तन्तइत्यादिसिद्धान्तभाष्यावगतकृष्यादिलौकिकक-
र्मार्थपूर्वपक्षायोगशङ्कानिरासे वैदिकत्वसामान्यस्य सन्निधानापरपर्या-
यपञ्चमस्थानाख्यप्रमाणत्वाद्वाक्यविरोधे प्रामाण्यायोगाशयेनर्द्धिसा-
धनकर्मत्वाविशेषादित्यविशेषोक्त्या सूचिते तथापि लौकिकानां
दृष्टार्थत्वेनादृष्टार्थाङ्गानाकाङ्क्षत्वाददृष्टोपकारजननसामर्थ्यलक्षणेन
लिङ्गेनादृष्टार्थकर्ममात्राङ्गत्वावगतेर्वाक्यबाधमाशङ्क्य दृष्टार्थाना-
मपि विघ्नोपशमार्थं कृष्यादिनैव वैश्यो धनमर्जयेदित्याद्युपा-
यनियमादृष्टार्थं वा ऽदृष्टार्थाङ्गाकाङ्क्षोपपत्तेः रोहिण्यां कृषिक-
र्माणि कारयेत्पुरस्तात्कृषिकर्मणां प्राच्यां क्षेत्रमर्यादायां द्यावापृथि-
वीयंबलिं हरेदित्यादिवदृष्टार्थाङ्गग्रहणेपि लिङ्गाविरोधसूचनार्थमौत्स-
र्गिकलिङाविहितत्वेन कृष्याद्युपलक्षणा वक्तुमृद्धिमिच्छेदिति लिङन्ते-
नैव सन्तःशब्दो व्याख्यातः। अङ्गगुणाविरोधन्यायेनाहवनीयत्याग-
शङ्कां त्वाहवनीयसाध्येषु कर्मस्ववैगुण्यसम्भवे वैगुण्यापादकाङ्गत्या-
गायोगादयुक्तेति सूचयितुमाह *तेनेति*। जयादिसंज्ञकानां होमा- १६४।५
नामफलत्वेनाङ्गानपेक्षत्वात्फलवत्स्वेव कर्मस्वाहवनीयविध्यवगते-
राहवनीयत्यागोपपत्तिमाशङ्क्य साक्षात्फलाभावेपि फलवत्कर्माङ्गत्वा
त्प्रयोजकत्वोपपत्त्याशयेन परिहरति *न चेति*। अनाहिताग्नेरनाह-
वनीये जयादिहोमापत्तेराहिताग्निरप्यानाहवनीये जुहुयादित्याश-
ङ्कयाग्निहोत्रादिवज्जयादीनामप्यनाहिताग्नेरभावादाहवनीयनैरपे-
क्ष्यानवगतेस्तत्त्यागायोगं ब्रुवन् पूर्वपक्षमुपसहरति *तेनेति* लौ-
किकस्यापि कर्मणो नियमादृष्टया दृष्टार्थाङ्गाकाङ्क्षोपपत्तिसूच-
नार्थं वर्णव्यवस्थया कृष्याद्यर्जनोपायनियमविधिं बुद्धिस्थीकर्तुं
वर्णानुरूपोक्तिः। अनारभ्यवादसंकोचापत्त्या सिद्धान्तायोगमाह*एव
चेति* प्रकृत्यर्थत्वेनारभ्यवादानां संकोचो युक्तएवेत्याशङ्क्याह
न चेति। सर्वानारभ्यवादानां प्रकृत्यर्थत्वन्यायविषयत्वाभ्युपग-
मेपि विकृतिवर्जनहेतोः पौनरुक्त्यापत्तेः कृष्यादिष्वभावाद्वर्जनं न
युक्तमित्याह *कामं चेति*॥

होमास्तु व्यवतिष्ठेरन्नाहवनीयसंयोगात् ३१।

यस्मादेते जयादयो होमास्तस्मादाहवनीयसंयोगमालोक्य व्यव-
तिष्ठेरन्नित्येवं ल्यब्लोपपञ्चम्याश्रयणेनाहवनीयसाध्यकर्माङ्गत्वसि-

क्रान्तोपन्यस्तार्थत्वेन पूर्वपक्षव्यावृत्त्यर्थं तुशब्दव्याख्यापूर्वं सूत्रव्याख्यार्थं तत्रोत्पत्तिभाष्यं व्याचष्टे *व्यवतिष्ठेरंस्त्वति* वाक्यात्सर्वकर्माङ्गतया गम्यमानानां कुतः प्रमाणाद्व्यवस्थेति प्रश्नपूर्वं प्रधानसादेश्यसामर्थ्यलक्षणं लिङ्गव्यवस्थाप्रमाणमाह *कुतइति* । कृष्यादी भुम्यादिविहितत्वेनार्थसामर्थ्यानङ्गत्वात्प्रयोगवचनग्रहणानुपपत्तेः प्रयोगवचनाधीनाङ्गप्रधानैकदेशत्वासिद्धिम् आशङ्क्य प्रयोगाङ्गभूतदेशानपेक्षप्रयोगविध्ययोगादवश्यापेक्षितस्य देशादेर्लभ्यार्थं वाक्यविहितस्यापि लिङ्गेनाङ्गत्वावगतेर्द्रव्यार्जनापार्यनियमार्थं कृष्यादिप्रयोगवाक्यग्रहणोपपत्तेः कृष्यादावप्यङ्गप्रधानैकदेशत्वात्सिद्धिं सूचनार्थो नित्यालोकः । उत्तरार्द्धं तावद्व्याचष्टे *कर्षणमिति* आहवनीयत्वांशेन पराभिमतपूर्वपक्षनिरासायाहवनीये जुहुयादिति पूर्वपक्षनाभिकृष्टत्वाविरोधिन्यायेनाहवनीयत्यागशङ्कानिरासस्य सूचितस्याव्यक्तिनैवाभिमिति वक्ष्यमाणयुक्त्यनुसंधानार्थं सूचनायैकान्तेनेत्युक्ते पदहोमादिवदाहवनीयत्यागेऽप्यवैगुण्योपपत्तिशङ्कानिरासायावहितेत्युक्तम् । विदेशस्याप्यनभ्युपादे प्रधानोपकारसामर्थ्यसद्भावेन प्रधानसादेश्यस्योपकारसामर्थ्योपादकत्वनिमित्तसामर्थ्यरूपत्वायावा लिङ्गत्वानुपपत्तेः प्रयत्नसाध्यत्वायोगशङ्काम् अस्ववभृथेन चरन्तीत्यादिवाक्ये वैदेश्यविध्यभावाद्बर्हिर्लवनादिवच्च संस्कारकर्मत्वाभावेन संस्कार्यद्रव्यदेशत्वावगतेर्नैराकाङ्क्ष्याहेतुकप्रधानदेशग्रहणायोगाद्विधि विना वैदेश्यस्य वैगुण्यजनकत्वापत्तेः सादेश्यस्योपकारसामर्थ्योपादकत्वनिमित्तसामर्थ्यरूपत्वाल्लिङ्गत्वोपपत्तिसूचनेन निरस्यन्नूपूर्णोर्द्धं व्यतिरेकमुखेन व्याचष्टे *तत्रेति* । जयादेः कृष्याद्यङ्गत्वविध्यन्यथानुपपत्त्या वैदेश्यास्यनुज्ञानावगतेः प्रधानसादेश्याख्यगुणाभावेन वैगुण्ये सत्यपि प्रधानोपकाराख्यफलदातृत्वावगमात्सादेश्यस्योपकारसामर्थ्योपादकत्वनिमित्ता सामर्थ्यरूपता न युक्तेत्याशङ्क्य जयादीनां वैगुण्यानापादकाग्निहोत्रादिविषयान्तरसम्भवे वैगुण्यापादककृष्यादिविषये विध्यभावावगतेर्वैदेश्याभ्यनुज्ञाकल्पकार्थापत्त्यभावात्सादेश्यं विनोपकाराख्यफलदातृत्वकल्पनायोगेन परिहरति *श्रौतत्वेति* । अतः सामर्थ्याभावनानाहितास्यादिविषयत्वानिवृत्तिवत्कृष्यादिविषयत्वनिवृत्तिरपि युक्तेत्युपसंहरति *अतइति* । आत्मार्थस्य कृष्यादिदेशनयनेन जयादेः प्रधानसादेश्योपपत्तिं पूर्वपक्षाभिमतामनुभाष्य ॥ *नन्विति* ॥ आहवनीयदेशे विलेखने

सत्यायतनाद्बहिःपातनाहवनीयनाशापत्तेस्तद्देशे विलेखनाख्यकर्षणा-
योगाद्विलेखनं कृत्वा तद्देशाहवनीयाग्निक्षेपे तु विलेखनदेशानां विदा-
रणाख्यानां भेदात्प्रतिविदारणमावृत्त्यापत्ते. सकृद्धोमस्य विहितस्या-
शक्यत्वापत्तिरावृत्त्यभ्युपगमेऽपि विदारणाख्यविलेखनदेशाग्निनाह-
वनीयदेशत्वमात्रसिद्धे. कृष्यादिदेशाहवनीयत्वनेऽपि स्यादित्याशङ्क्य-
(?)ति परिहरति * नेति * । होमोक्तिविशेषणार्थे यज्ञाङ्गानिरासार्थं
हेत्वर्थत्वेन व्याचष्टे * होमास्त्विति ।

शेषश्च समाख्यानात् ॥ ३२ ॥

इतश्चेत्यादिभाष्य समाख्यानुग्रहादपि वैदिकानामेव जयादिः
शेष इत्येवं सूत्रयोजनार्थत्वेनाभातमानं वैदिकानामेवत्यध्याहारापत्तेः
समाख्यानाच्चेति चकारोत्कर्षापत्तेश्चायुक्तमाशङ्क्य तात्पर्यमात्रो-
क्त्यर्थत्वेन व्याचष्टे * इतश्चेति * । व्यतिरेकमुखेन सूत्रतात्पर्योक्त्य- ६६५.३
र्थे कर्षणादिष्विति भाष्यं कृष्यादिष्वध्वर्योरभावेन तद्द्वारा जयादि-
ष्वभावादृत्विगुपादानार्थयोश्च वरणाभरणयोर्जयाद्यर्थत्वेनानुपदे-
शाद्विहोमत्वेन चापूर्वत्वादतिदेशतोऽप्यप्राप्तेर्जयाद्यर्थवरणाद्यभ्युपगमे
च कर्षणादिस्वभावेनाङ्गप्रधानयोः कर्तृभेदापत्तेस्तत्परिहारायाध्वर्योर्ज-
यादिष्वप्यभावादित्येव व्याचष्टे * कृष्यादीनां त्विति * मधुपर्कापे-
क्षया वरणादीनामिति बहुवचनम् । सूत्रयोजना कीदृशीत्यपेक्षायां
द्वेधा योजयन्ति * तेनेति * समाख्यानायाध्वर्युणा जयादिकार्यमिति
जयादिविधिवाक्यस्य शेषोऽवगतः सोऽपि व्यवस्थायामनुग्राहकेत्याद्या।
योजना समाख्यानाद्योऽध्वर्युर्जयादिशेषोऽवगतइतिद्वितीया ।

वैदिकाश्वप्रतिग्रहे इष्ट कर्तव्यत्वम् । आधि ८ ।

दोषात्त्विष्टिर्लौकिके स्याच्छास्त्राद्धि वैदिके न दोषः स्यात् । ३३ ।

लौकिकवैदिकानिमित्तचिन्ताया क्रतुपुरुषार्थत्वचिन्ताफलत्वाल्ल-
क्षणप्रकरणसङ्गत्योः सम्भवेऽपि सर्वासर्वकर्माङ्गत्वचिन्तात्वाभावाद-
नन्तराधिकरणासंगतिमाशङ्क्य प्रासंगिकत्वेन सगतिमाह * लौकि-
केति * निमित्तस्मृतस्यप्रत्ययभावादश्वदानस्य निमित्तत्वासिद्धेर्वि-
शेषविचारायोगमाशङ्क्य यावच्छब्देनान्यतः प्राप्तया सङ्ख्यया विधये-
ष्टिसंख्योपलक्षणभूतया दानान्वयिनामश्वानां विशेष्यत्वावगतेस्ते-
षां चानियतसंख्यत्वाद्यावन्त्यश्वदानानि तावन्तीरिष्टीः कुर्यादि-

ति वाक्यार्थापत्तेर्निमित्तत्वाभावे चाश्वदानानामिष्टीः प्रति शेषित्वे-
प्येकदेशफलकर्तृत्वात्तन्त्रेणोपकारसिद्धेरसंख्येयेष्टिसंख्योपलक्षणा-
योगप्रसंगान्निमित्तत्वसिद्धिमाह * तत्रेति * अथ वोभयत्रापि दातु-
रिष्टिरिति वार्तिकदानस्यैव निमित्तत्वमङ्गीकृत्य पूर्वपक्षसिद्धान्तप-
क्षयोर्वक्ष्यमाणत्वाद्दोषवान्योऽश्वप्रतिग्रह इत्येतदन्ताः प्रतिग्रहोक्तयो
दानलक्षणार्थाः । वैदिकाश्वदाननिमित्तपक्षे कथंचिद् बुद्धिस्थक-
त्वसंभवेनात्यन्ताबुद्धिस्थस्वर्गकल्पनापादकपुरुषार्थत्वायोगाल्लौकिक-
पक्षे क्रतुस्वर्गयोरत्यन्ताबुद्धिस्थत्वसाम्येऽपि साक्षात्समीहितत्वे स्व-
र्गस्यैव कल्पत्वात्क्रत्वर्थानुपपत्तेर्वैरूप्यभयेनाश्वदानमात्रनिमित्तपक्ष-
भाष्यकृतोपेक्षितमपि मन्दाया अपि शङ्काया निराकार्यत्वात्सौत्रेण
तु शब्देन निरासोपपत्तेर्निराकर्तुं त्रेधा सन्देहमाह * तदिति * ।
क पुनरिति प्रश्नभाष्यं विवक्षितदानविषयत्वे स्पष्टभेदत्वादयुक्त-
माशङ्क्य यथाश्रुतप्रतिग्रहविषयत्वेनोपपादयितुमाह * कः पुनरिति *।
लोक इत्युत्तरभाष्यं व्याचष्टे * इतरइति * स्वमतेनाविशेषपक्षनिरा-
सार्थत्वेन तुशब्दं व्याख्यातुं तदुपन्यासपूर्वं सौत्रपूर्वपक्षं गृह्णाति
* किमिति * । भाष्यमनुसंदधानो लौकिके हि फल कल्प्यमिति
६९६।१ सिद्धान्तभाष्यवक्ष्यमाणस्यापि हेतोरुपलक्षणार्थत्वेन व्याचष्टे * भा-
ष्येति *॥ आद्ये हेतुं विवृणोति * नैमित्तिकं हीति *। द्वितीयं विवृणोति
* फलं चेति * इतीत्यादिभाष्यं सिद्धान्तनिरासार्थत्वेन तुशब्दव्या-
ख्यापूर्वं पूर्वपक्षसूत्रव्याख्यर्थत्वेन व्याचष्टे * इतीति *। दोषो हीति
भाष्येणाष्टनिर्घात्यो दोष श्रूयत इत्यध्याहारेणाष्टदोषनिर्घातार्थत्वा-
दित्येवं दोषादितिसूत्रावयवं व्याख्याय वमनेष्टिवद्दोषनिर्घातार्थत्वे-
ऽपि वैदिकनिमित्तकत्वाविरोधमाशङ्कानिरासार्थत्वेनापि लौकिक एव
दोषसद्भावादित्येवमावृत्यायमेवावयवः सचेत्यादिभाष्येण व्याख्यात
इति सूचयन् सूत्रशेषं प्रतिज्ञोपपादनार्थत्वेन व्याचष्टे * कुतइति * ।
जलोदराख्यवरुणात्मकस्य दोषस्यानुपलब्धिविरोधमाशङ्क्य वृणो-
तीति व्युत्पत्त्या पापवाचित्वेन वरुणशब्दं व्याचक्षाणो निषेधाभा-
वेनानपेक्षितदोषोक्तौ तात्पर्यायोगाच्छास्त्रस्य दोषसद्भावे प्रामाण्यानु-
पपत्तेः प्रत्यक्षादिना च दोषानवगतेः पापस्याप्ययोगमाशङ्क्य निमि-
त्तव्यवस्थासिद्ध्यै दोषोक्तौ तात्पर्योपपत्तिं सूचयितुमाह * वरुणो-
वा इति * । दोषोक्तेर्लौकिकविषयत्वाज्ञानान्निमित्तव्यवस्थापक-
त्वायोगशङ्कानिरासार्थं सचायामिति भाष्यं प्राप्त्यभावेनानुवादायो-

गादयुक्तमाशङ्क्य न केसरिणो ददातीतिनिषेधाद् अप्राप्तिसूचनेनोपपादयितुमाह * तदपि चेति * । अनुवादत्वोक्तेर्व्यवस्थाद्योतनप्रजनमाह * यदि हीति * । विधेयत्वायोगेनानुवादतामुपपादयितुमाह * नन्विति *फलत्वात्पापस्याविधेयत्वेपि तत्र कर्मविधिर्भविष्यतीत्याशङ्क्याह * न चेति *॥ वाक्यान्तरनिषिद्धस्याश्वदानस्य फलापेक्षाया मज्ञातफलज्ञापनाख्याय विधिर्भविष्यतीत्याशङ्क्य दूरस्थस्य निषेधस्येहाबुद्धिस्थत्वान्न फलापेक्षास्तीत्याशयेन परिहरति * नचेहीति * । न केवलमभिधेयत्वादनपेक्षितत्वाच्च पापग्रहणं न विधीयते किंतु निमित्तनैमित्तिकान्वयमाप्तेः तत्कीर्त्तनोपपत्तयादपीत्याह * निमित्तेति * । दोषस्याप्रत्यक्षत्वेन क्वेति ज्ञातुमशक्यत्वाद्यत्र दोषस्तत्रानुवाद. इत्ययुक्तमाशङ्क्य दोषनिषेधयोरत्यन्ताविनाभावाद्यत्र निषेधस्तत्र दोषइत्याध्याहारेण पूरयितुमाह * तस्मादिति * स च दोषो लौकिके भवतीति कृत्वा तत्रैवोपपद्यते नुवाद इत्यविधानार्थं सचालौकिक इत्यभिभाष्यं स च निषेधो लौकिकेऽनस्तत्रैव दोषो भवतीत्यध्याहारेण पूरयितुमाह * स चेति * दाननिषेधमात्रस्योपन्यसनीयत्वेपि प्रतिग्रहाविषयत्वेपि पूर्वपक्षोपपत्तिसूचनार्थं विश्वजित्प्रकरणे समाम्नानात्तत्प्रकरणाम्नातसर्वस्वदानवाक्यशेषत्वे पर्युदासत्वोपपत्तेरस्य लौकिकाश्वदाननिषेधत्वायोगमाशङ्क्य गुणवाक्यानामन्योन्यान्वयायोगाल्लौकिकदानविषयत्वेनापि च केसरिवाक्योपपत्तेर्वरुणाय यजामहनिषेधवाक्यवद्विषयप्राप्त्यै गुणवाक्यानपेक्षणात्केसरिवाक्यस्य सर्वस्वदानवाक्यशेषत्वानुपपत्तेः धर्मत्वभ्रान्त्यादिनिमित्तप्राप्ताश्वदाननिषेधाच्च विकल्पानापत्तेः पर्युदासत्वायोगल्लौकिकस्य प्रतिषेध इत्यनेनैव सूचितमसंभवत्पर्युदासप्रतिग्रहनिषेधवाक्यसाहचर्येण द्रढयितुं वाक्यद्वयोपन्यास । एतदन्तेन ग्रन्थेन श्लोकस्य द्वितीय पाद व्याख्याय शङ्कोत्तरत्वेनोत्तरार्द्धं व्याख्यतुमाह * न त्विति । * दोषसंयोगादिति भाष्यमिनिकरणस्यापकर्षं कृत्वा हेत्वर्थत्वमिति परामर्शत्वं च तन्त्रेणाङ्गीकृत्य दोषानुवादस्य लौकिकविषयत्वाद्धेतोरिष्टिदोषसंयुक्तत्वाल्लौकिक एव गम्यत इत्येवं व्याख्यातुमाह * अतश्चेति । * आहेति शङ्काभाष्यं व्याचष्टे * ननु चेति * उच्यतइत्यादिपरिहारभाष्यं व्याचष्टे * उच्यतइति * दोष निर्घात कार्योऽस्या इति बहुव्रीह्यर्थः। ६२७३ ।
श्लोकं व्याचष्टे * तर्हीति। * पुरुषानौपयिकत्वेन दोषस्वरूपस्य कर्म-

णाऽनपेक्षितया स्वरूपेण दोषस्य फलत्वायोगात्स्वनिर्घातं पुरु-
षोपयिकत्वाद्विध्यन्वयार्हमन्यतोपेक्ष्यमाणस्यापनेयत्वरूपेण विधेये-
ष्ट्याकर्मान्वयोक्त्येष्टदोषनिघातार्थत्वे समर्थितेपि दानसामान्यस्य
निमित्तत्वेन ग्रहणाद्वैदिकापि निर्दोष प्रामाया इष्टेर्दोषनिर्घातार्थत्वायो-
गात्क्रत्वर्थत्वस्यापत्तेः सामर्थ्यात् लौकिकविषयनियमायोगमाश-
ङ्क्यैकेन दोषनिर्घातेन प्रयोजनेन कर्मणो नैराकाङ्क्षे सति क्रतूपकारा-
ख्यं प्रयोजनान्तरं न शक्यं कल्पयितुमित्युक्तम् । वरुणप्रमोचनोक्तेर्दो-
षार्थत्वव्याचित्वसूचनार्थं व्याख्यातेर्थे भाष्यं योजयति * पलादिति । *
सचेतिभाष्योक्तं लौकिकस्य दातृदोषेण दुष्टतां भवदिनिभा-
ष्योक्तां च वैदिकस्य निमित्तस्य दानात्मकत्वेनादुष्टतां लौकिकवैदिक
निमित्तसाम्येन दूषयितुमाह * यत्त्विति * लौकिकेश्वप्रतिग्रहे
भवतीति यदुक्तं तद्वैदिकेप्यविशिष्टमिति सूचनार्थं पुनश्चेत्युक्तम् ।
भाष्यस्थं हेतुकर्तृशब्दं व्याख्यातुं दातुरित्युक्तम् । एतदेव
विवृणोति * तथा हीति । * वैदिकस्य दानरूपत्वेनादुष्टतायाः
६६८।२ साम्योक्त्यर्थं पूर्वार्द्धं व्याचष्टे * यदीति * । अयाज्ययाजनादेव दोषो ना-
श्वप्रतिग्रहाद्वैदिकं श्रुतित्वादश्वप्रतिग्रहस्येति दुष्टोक्त्या युक्तं
वैदिके प्रतिग्रहनिमित्तपापायोगमाशङ्क्य प्रतिग्राह्यमनङ्गीकार्यं या-
जना यस्य तस्माद्याजनं प्रतिगृह्णतोऽङ्गीकुर्वतः पापमयाज्ययाजन-
निमित्तमस्तीति योश्वमयाज्याद्भृतिरूपेण गृह्णात्येन वरुणपापमया-
ज्ययाजननिमित्तं गृह्णातीति अर्थं मत्वा भाष्यकृतोक्तमिति सूचना-
यायाज्ययाजननिमित्तोक्तिः दोषराहित्यं यद्दानं तन्निमित्तं यदुच्यते-
त्यर्थः । लौकिकेपि दोषराहितं यद्दानं तदेव निमित्तमित्युक्ते दानस्या-
निषेधेपि प्रतिग्रहीतुर्दोषोत्पादकत्वान्निषिद्धे प्रतिग्रहे प्रयोजकहेतु-
त्वाद्वा ब्रह्महत्यादिप्रयोजकव्यापारवद् दुष्टत्वं भविष्यतीत्याशङ्क्य
लौकिकस्यापि दानस्य विहितत्वेन वैषम्यसूचनार्थं दातुर्व्यापारस्य
प्रतिग्रहीतृदोषद्वारेणादुष्टत्वादित्युक्तम् । लौकिकस्य प्रतिग्रहस्य दातृ-
दोषेण दुष्टताया साम्योक्त्यर्थमुत्तरार्द्धं व्याचष्टे * अथेति । * वैदिक-
निमित्तपक्षे तदुत्थापितकर्माङ्गत्वावगतेरङ्गप्रधानैककर्तृकत्वान्नियमे
दातुरिष्ट्यवगमान्निर्दोषनिमित्तं लौकिकपक्षे कर्माङ्गत्वानवगतेर्वाक्य-
स्वरसभङ्गहेत्वभावेन प्रतिग्रहीतुरेवेष्ट्यवगमाद्दोषवदित्याशङ्क्य
सुवर्णधारणवद्वैदिकत्वसामान्यस्य स्थानाख्यसन्निधिरूपतया वा-
क्येन बाधा कल्पनागौरवापत्तेश्चात्यन्तानुपस्थितक्रतूपकारार्थत्वक-

ल्पनायामपि साम्याद्दातृकर्तृकत्वावगतिं विना वैदिकनिमित्तकत्वा-
वगमात् दातृकर्तृकत्वावगत्यभ्युपगमेन्योन्याश्रयापत्तेर्विशेषावगतिहे-
तुभूतापपत्यभावेनोपन्यासपूर्वं निरस्यति । * अथ वैदिक इति *
अस्मिंश्च वाक्ये दातृदोषहेतुकदोषाप्रतीतेर्वाक्यान्तरस्थे च शूद्रादि-
प्रयोगाच्छूद्रादिप्रतिग्रहनिषेधेनुवाद्यस्य प्रतिग्रहस्य प्रतिग्रहाद्युपाय-
नियमविधिविरोधापत्तेर्निर्विशेषणस्य निषेधायोगाच्छूद्रादिविशे-
षणाभ्युपगमेपि नैव नैराकाङ्क्ष्यादश्वेन विशेषणानुपपत्तेः साम्याभा-
वेप्येतद्वाच्यद्वगमयुक्तमित्याह * किंचेति * उत्तरार्द्धं व्याचष्टे
* न हीति * दूषणमुपसंहरति * तेनेति * दातृदोषेण दुष्टतोक्ति
यथाकथंचित्समाधानो द्वितीयभाष्याक्षेपाभ्युपगमेनाद्यभाष्याक्षेपं
परमतेन लौकिकवैदिकप्रतिग्रहवैषम्योक्त्या परिहरति * तत्रेति *
प्रतिग्रहस्य विध्यभावात् प्रतिप्रसवायोगशङ्कामुपन्यासपूर्वं दानवि-
धिनार्थात् प्रतिग्रहस्याक्षेप साक्षादेव वा विधिरिति द्वेधा परिहर-
ति * तत्रैतदिति * दानसमाप्तिरूपस्य परस्वत्वापादनस्य परस्मै
समर्पणं विना परस्वत्वानापत्तेः समर्पणाख्यदातृव्यापारात्मकत्ववत्
त्परेण स्वीकरणमपि विना परस्वत्वानापत्तेः स्वीकरणाख्यप्रतिग्रही-
तृव्यापारात्मकत्वस्यापि भावात्परस्वत्वापादनविधिना स्वीकरणा-
ख्यप्रतिगृहविधिरित्याशय । अदृष्टार्थेति कर्त्तव्यतायुक्तत्वकर्मसादृगु-
ण्यार्थत्वाभ्यामपि प्रतिग्रहस्य विधेयतावसीयतइत्याह * अपि चेति *
क इद कस्मा अदादित्यादिमन्त्रवत्त्वाद्भीधेगे ददातीत्यादिक्रमविशे-
षप्राङ्मुखत्वादिनियमयुक्तत्वाद्वा दृष्टार्थेति कर्त्तव्यतापेक्षावगतेः कर्म-
मध्ये क्रियमाणत्वात्कर्माङ्गदक्षिणादानसंगतत्वेन च लोमप्राप्तशूप-
शाकटादिप्रतिग्रहवैषम्यात्कर्मसादृगुण्यार्थत्वावगतेः कथं विधिना न
विपर्याक्रियत इत्यर्थः । मन्त्रवदिति ह्रस्वपाठे मन्त्रवद्यथा भवति तथा
क्रियमाण इति क्रियाविशेषणत्वान्नपुंसकत्वम् । श्लोकं व्याचष्टे * य- ६६६।२
दीति * लौकिकवैदिकयोः प्रतिग्रहयोः सदोषनिर्दोषत्ववैषम्योक्त्या
परोक्तं परिहारं वैदिकस्यापि प्रतिग्रहस्य सदोषत्वोपपादनेन दूष-
यति * अत्रेति * श्लोकं व्याचष्टे * न हीति * प्रतिगृहीतृव्यापार-
स्यापि परस्वत्वापादनरूपत्वेन दानसमाप्तित्वाद्दानविधिविधेयत्वं
परोक्तं प्रतिग्रहीतृव्यापारस्यात्मसत्वापादकत्वात्परस्वत्वापादक-
त्वायोगेन निरस्यति * यद्यपि चेति * विक्रयी त्वन्यः कर्मणोर्चोदित-
त्वादिति सूत्रवक्ष्यमाणविक्रयविध्ययोगदृष्टान्तेन प्रतिग्रहविध्ययोग

द्रढयितुमाह * तेनेति * कर्मसादगुण्यार्थत्वस्य विधेयत्वहेतोः कर्ममध्ये कर्माङ्गक्रयसगतस्यापि क्रियमाणस्य विक्रयकर्मसादगुण्यार्थत्वादर्शनादभिद्धत्वोक्त्यै दृष्टान्तदार्ष्टान्तिकयोः कर्मानङ्गतोक्ता । अदृष्टार्थेतिकर्त्तव्यताविधानस्यान्यथाभ्युपपत्तेर्हेतुत्व निरस्यति * यद्यपीति * पुरुषार्थप्रतिग्रहानुवादेनेतिकर्त्तव्यताविधावितिकर्त्तव्यतायाः प्रकरणागम्यक्रत्वर्थत्वबाधापत्तिं शङ्कते *नन्विति* इज्यार्थयोर्दधिपयसोः प्रणीता कार्यश्रपणानङ्गत्वेपि श्रपणोपकारित्वात्तद्गतानां प्रणीता धर्माणां श्रपणाङ्गत्वोपपत्तिवत्प्रतिग्रहस्य क्रत्वनङ्गत्वेपि क्रतूपकारित्वात् प्रतिग्रहेतिकर्त्तव्यतायाः क्रत्वङ्गत्वोपपत्त्याशयेन परिहरति *नैष इति* प्रतिग्रहस्य साक्षात् क्रतूपकारित्वायोगाद्दानद्वारा क्रतूपकारित्वोक्त्यै तदवसानत्वं दानस्योक्तम् । दधिपयसोः श्रपणापूर्वसिद्ध्यर्थत्वाभिरङ्गयोश्चापूर्वसाधनत्वायोगाच्छ्रपणापूर्वसाधनीभूतदधिपयोर्थतया चोदकेन प्रणीता धर्माणां विधानाच्छ्रपणाङ्गत्वं युक्तं प्रतिग्रहस्य त्ववैधत्वेनापूर्वसिद्ध्यर्थत्वायोगात्तदितिकर्त्तव्यतायां क्रत्वपूर्वसाधनीभूतप्रतिग्रहार्थतया विध्यनुपपत्तेः क्रत्वङ्गत्वायोगमाशङ्क्यार्त्विजेष्वपि पदार्थेषु यजमानस्यैव विधिना नियोज्यत्वात् क्रत्वपूर्वसिद्ध्यै दक्षिणां ददद् वृत्त्यर्थदक्षिणां प्रतिगृह्णन्तमृत्विजमानमयेत्तादृक्षमित्तु चानुनिष्ठन्तामिति विध्यर्थप्रतीते प्रतिग्रहसमानकर्तृकत्वलक्षणेन सबन्धेनेतिकर्त्तव्यताया. प्रतिगृहान्वयेपि क्रत्वपूर्वसाधनीभूतदानार्थत्वेन विधानात् क्रत्वङ्गत्वोपपत्तिं सूचयितुमाह * तेनेति * । प्रतिगृहस्यावैधत्वेनापूर्वानौपयिकत्वाददृष्टार्थेतिकर्त्तव्यतानपेक्षत्वमवैधत्वोक्त्यार्थादुक्तं तेनेत्यनेन परामृष्टम् इत्यनेन वैधदानेतिकर्त्तव्यतात्वेन प्रकारेण प्रतिगृहस्यापूर्वानौपयिकत्वेनादृष्टार्थेतिकर्तव्यतानपेक्षत्वेपीतिकर्त्तव्यताविधानं नेतव्यं गमयितव्यमुपपादनीयमित्यर्थः । गवादिप्रतिगृहस्यापि तर्ह्यविहितत्वेन क्रत्वर्थपदार्थपरिमाणबाधाख्यदोषापादकत्वादकार्यत्वापत्तिरित्याशङ्क्याविहितस्यापि विहितदानाख्यपदार्थसिद्ध्यै प्रयोगविधिनानुमतत्वान्न पदार्थपरिमाणबाधापत्त्याख्यो दोषो नरकापत्त्याख्यस्तु दोषो निषेधाभावादनाशङ्क्य एवेत्याह * तत्रेति * । दानस्य विधिलक्षणत्वे सति दानाङ्गत्वेनाचोदितेपि प्रतिगृहे विहिते दाने साध्ये तत्सिद्ध्यै प्रयोगविधिना प्रतिगृहस्यानुमतत्वान्न तत्करणे पदार्थपरिमाणबाधापत्त्याख्यो दोष इत्युक्तेश्च प्रतिगृहोपि तर्हि विहितदानसिद्ध्यै प्रयोगविधिनानुमतत्वेन

पदार्थपरिमाणबाधानापादनापादकत्वाददुष्टः स्यादित्याशङ्क्यैतद्दोषाभावेपि नरकापादकत्वाद्दुष्टत्वं सूचयितुं गवादीनां प्रतिग्रहे निषेधाभावान्नरकाख्यो दोषो नास्तीति कश्चिच्छब्देनोक्तम्। चोदितेपीति पाठे दानमात्रेपि चोदित इत्येवं प्रतिग्रहस्याचोदिततोक्ता । अश्वप्रतिग्रहस्यापि तर्हि प्रयोगविधिनानुमतत्वादकरणे क्रतुवैगुण्यापत्तेः करणे च निषिद्धत्वान्नरकापत्तेः संकटं स्यादित्याशङ्क्याह *अश्वेति* दृष्टान्तेनैतदेव द्रढयितुमाह * यथेति * । परकीयपरिहारदूषणमुप- १०००।२
संहरति * अतश्चेति *। मतान्तरेणाक्षेपद्वयमपि परिहरति* केचित्पुनरिति * वैदिकत्वे निमित्तस्य तदुपस्थापितकर्माङ्गत्वात्प्रधानसमानकर्तृकत्वावगतेर्दक्षिणादातुश्च प्रधानकर्तृत्वाद्दातुरिष्टिर्लौकिकत्वे त्वनुपस्थापितकर्माङ्गप्रमाणाभावेन वाक्यस्वरसावगतप्रतिग्रहीतृकत्वबाधकप्रधानसमानकर्तृकत्वावगत्यभावात् प्रतिग्रहीतुरिति द्वितीयभाष्याक्षेपपरिहारः प्रतिग्रहस्योभयत्रापि भवेदेवमिति परीक्षानुज्ञार्थभाष्यावयवालोचनया भाष्यकृतोपि निषेधाद्विध्यभावेन च निषेधस्य विकल्पार्थत्वायोगान्नित्यवर्जनार्थत्वावगतेर्दोषवत्तां च विना नित्यवर्जनायोगाद्दोषवत्तयाभिप्रेतत्वावगमाद्वैदिके त्वश्वप्रतिग्रह इति भाष्यस्थस्य तु प्रतिग्रहशब्दस्य वचनेन तस्य कर्त्तव्यतावगम्यत इति भाष्ये वैदिकस्य विहितत्वोक्तेः प्रतिग्रहस्य च वैदिककर्मान्वयाद्वैदिकस्यापि विध्ययोगाल्लक्षणया दानार्थत्वावगमात् लौकिकेश्वप्रतिग्रह इत्यादिभाष्येण लौकिकवैदिकयोः प्रतिग्रहयोः सदोषनिर्दोषत्ववैषम्यानुक्तेः साम्यापादनेनाक्षेपो न युक्त इत्याद्यभाष्याक्षेपपरिहारः । वैदिकेन कर्मान्वयिना निमित्तेन कर्मोपस्थापनसंभवेपि दानार्थप्रधाने कर्मोपकारानाकाङ्क्षिणि प्रतिग्रहीतुस्तदर्थायामिष्टौ विधिना नियोक्तुमशक्यत्वाद्दातृकर्तृकत्वं विना कर्माङ्गत्वासिद्धेस्ततएव दातृकर्तृत्वकल्पनेन्योन्याश्रयप्रसङ्गादस्यापि परिहारस्यानुपपत्तेःएवमतेन लौकिके वैदिके वा निमित्ते दातुरिष्टिरुत्तराधिकरणन्यायेन भाष्यकृतोक्ता न तु वैदिकत्वाशयेनेत्येव द्वितीयभाष्याक्षेपं परिहरति*अथवेति * । दानस्य लौकिकस्याप्यदृष्टार्थत्वेन विधिस्पृष्टत्वान्निषेधानुपपत्तेर्न केसरिणो ददातीत्यस्याश्वव्यतिरिक्तरासभादिकेसरिविषयत्वेनाप्युपपत्तेर्दोषवत्त्वोपपत्तिमयुक्तामाशङ्क्याधर्मे धर्मत्वभ्रान्त्याश्व दाने प्रवृत्तिवारणायाश्वस्यापि दाननिषेधोपपत्तेर्निषेधस्याश्वव्यतिरिक्तविषयत्वकल्पनायोगाद्दानमेव लौकिकं निषिद्धत्वाद्दोषवत्तयो-

क्तमित्याह * तत्रेति * अश्वदाननिषेधस्य भाष्यकृत्संमतिं दशमाधिकरणभाष्यपाठेनाह * तथा चेति * गौश्चाश्वश्चेत्यादिना द्रव्याणि निर्दिश्य तस्य द्वादशशतं दक्षिणेति श्रुता संख्या महोपकारहेतुत्वाद्गवामेवेति सिद्धान्तितेऽश्वानां गोभ्योऽपि बहुमूल्यत्वेनोपकारकतरत्वात्तेषामेव संख्या प्रसज्येतेत्याशङ्क्याश्वानां दाननिषेधेन प्रत्यवायापादकत्वान्नोपकारकतरतास्तीति भाष्यार्थः । अकार्यत्वाच्च ततः पुनर्विशेषः स्यादिति षष्ठाधिकरणे विश्वजित्प्रकरणाम्नातस्याप्यश्वदाननिषेधस्यासंभवत्क्रत्वर्थत्वप्रतिग्रहनिषेधसाहचर्याद्धर्मत्वभ्रान्त्यादिना चावैधेऽप्यश्वदाने निषेधोपपत्तेर्विध्यधीनात्मलाभत्वाभावात्सामान्यविधिना सह विकल्पायोगं मत्वाश्वानां दानमकार्यमेष हि विशेषोऽश्वानामन्येभ्यो द्रव्येभ्यो यदेषां दानं निषिध्यत इति भाष्येणाश्वानां निषिद्धत्वाददानं वक्ष्यतीत्याह * विश्वजित्यपीति * तत्रत्यभाष्ये इवशब्दस्य केसरिमात्रोपलक्षणार्थत्वसूचनायादिशब्दः। पौण्डरीकादौ तर्ह्यश्वदानस्य विहितप्रतिषिद्धत्वाद्विकल्पदोषः प्रसज्येतेत्याशङ्क्याह * पौण्डरीकइति * दानस्य निषिद्धत्वे रागतः प्रवृत्त्ययोगादननुष्ठानापत्तेर्लौकिकनिमित्ताभावादिष्टिविधिरनर्थः प्रसज्येतेत्याशङ्क्याह*तस्मादिति*। उच्चादिविदक्षिणावन्तोऽमृतत्वं भजन्तेऽश्वदाः सह ते सूर्येणेत्यादिमन्त्रवर्णो हिरण्यं गौर्वासोऽश्वो भूमिस्तिला घृतमन्नमितिदेयानीति स्मृतिश्च भ्रान्तिहेतुः मित्रस्य दायेन दानेनादिरादानं स्वीकारस्तेन प्रयोजनेनेत्यर्थः । अथ विक्रयनिषेधस्मृतेर्वा मूलान्तरादर्शनादस्यैव मूलत्वसिद्ध्यै ददातेर्विक्रयवाचित्वावगमाद्योऽश्वं विक्रीणीते तस्येष्टिर्भविष्यतीत्याह * यो वेति * ददातेर्विक्रयवाचितामुपपादयति * विक्रयेऽपि हीति * विक्रयोऽनेन कृतो न दानमित्यादिप्रयोगदर्शनाददृष्टार्थस्यैव स्वत्वत्यागपरस्वत्वापादनस्य ददात्यर्थत्वमाशङ्क्य बलीवर्दाः सन्ति न गाव इतिवत्सामान्यवाचिनोऽपि ददातेरदृष्टार्थदानविशेषलक्षणार्थत्वेन तत्प्रयोगोपपत्तेरनवगतार्थधात्ववस्थायां फलकल्पनानवसरेणादृष्टार्थत्वानवगमाददृष्टार्थत्वेवगते ददातेरर्थावगतिरर्थावगतौ वा दृष्टार्थत्वावगतिरित्यन्योन्याश्रयापत्तेर्निरस्यति*न हीति * परद्रव्यग्रहणपूर्वस्य स्वद्रव्यत्यागस्य विक्रयशब्दवाच्यत्वाद्दानशब्दवाच्यत्वायोगमाशङ्क्याह * यद्यपि चेति * ददातेः स्वत्वत्यागपरस्वत्वापादनसामान्यवाचितां वृद्धप्रयोगेनोपपादयति । * तथा चेति * गृह्णातेरपि तर्हि क्रये प्रयोगात्तद्वाचित्वापत्तेः ।

क्रयस्यापि नोभयद्दतः प्रतिगृह्णातीत्यनेन निषेधप्रसंगाच्छिष्टगर्हापत्ति-
रित्याशङ्क्य प्रतिपूर्वस्य गृह्णातेः क्रये प्रयोगात्तद्वाचित्वापत्तेः क्रय-
स्यापि भावं सूचितुमाह * क्रीत्वा चेति * गृहीतमित्येव वदति न
तु प्रतिगृहीतमितीति सावधारणव्याख्येयं विक्रयस्येष्टिनिमित्तामुप-
पादितामुपसंहरति * तस्मादिति * । अश्वानां देयत्व स्मृतेर्ये
अश्वदा उत वा सन्ति गोदा ये वस्त्रदा सुभगा स्तेषु राय इत्यादि-
मन्त्रवर्णाच्चाश्वदानस्यादुष्टत्वं शङ्कते * ननु चेति * मन्त्रवर्णसूच- १००।१।
नार्थश्चकारः। स्मृतेर्मन्त्रवर्णस्य चानुवादत्वाद्विध्यनुसारेण व्याख्येयतां
मत्वा परिहरति *यत्रेति* तस्मादिति पूर्वपक्षोपसंहारभाष्य प्रतिग्र-
हविषयत्वेपि पूर्वपक्षोपपत्तिसूचनेन वस्तुतो दानविषयत्वाभ्युपग-
मेन पूर्वपक्षेपि प्रौढिप्रदर्शनार्थं स च लौकिकेश्वप्रतिग्रह इत्यादि-
भाष्योपपादनार्थतया व्याचष्टे * तस्मादिति * अर्थवादो वा नुपपा-
त्तात्समाम्नाये प्रतीयेत निर्वपेदितीत्यध्याहार्येति करणान्तं भाष्य
दोषनिर्घातार्थत्वपूर्वपक्षहेतुनिरासप्रतिज्ञार्थत्वेन वाशब्दव्याख्यार्थतया
व्याचष्टे * यदीति * जलवृद्ध्योदरवृद्धिलक्षणस्य जलोदराख्यस्य
दोषस्य जलरोगाख्यवरुणग्रहणोक्त्योक्तस्याश्वप्रतिग्रहादनुपपन्नत्वा-
दित्येवमनुपपातादिति वाशब्दोक्तप्रतिज्ञोपपादनार्थसूत्रावयवव्याख्यार्थं
सहीत्यादिजलोदरोपपात इत्यन्तं भाष्यं हेतुप्रश्नोत्तरत्वेन व्याचष्टे
कुत इति । निषिद्धाचरणजन्यस्य पापाख्यस्य दोषस्य पूर्वपक्षिणो
क्तत्वाज्जलोदरानुपपातोक्तचर्योगशङ्कानिरार्थत्वेनेष्टिवाक्ये यो दोष.
कीर्त्यते तन्निर्घातार्थता वाच्येत्यापाद्योक्तिचर्थतयाध्याहारेणोत्तरार्द्धं व्या-
ख्यातुमाह *कर्मेति* तन्निर्घातार्थत्वस्य वाच्यत्वापादनार्था तस्य नि-
र्घात्यत्वावधारणोक्तिः। एतदेव भाष्यमवयवशो व्याचिख्यासु. प्रसिद्ध-
मित्यन्त तावत्तस्य वरुणगृहीत इत्युच्यतइत्यनेन निर्दिष्टस्य वरुण-
ग्रहणवचनस्य शब्दस्य जलोदरवाचित्वेन लोके प्रसिद्धत्वाद्यस्य
जलवृद्ध्योदरं श्वयति वर्द्धते स वरुणाख्येन जलरोगेण गृहीतत्वाद्व-
रुणगृहीत इत्युच्यत इत्येवं व्याख्यातुमाह*जलोदरं हीति* न चेति
भाष्यावयवं व्याचष्टे *न चेति* निदानं कारणं प्रतिजानातेः प्रतिपा-
दनार्थतां श्रूयतेशब्दाभ्यामुक्त्वा गम्यतेशब्देन प्रतीतिवाचितोक्ता ।
न चानेनेतिभाष्यावयव व्याचष्टे *नाप्येतस्येति* वर्त्तमानवरुणग्रह-
णानुवादेनेष्टिविधिमात्रार्थत्वान्नेष्टिवाक्यस्याश्वप्रतिग्रहस्य जलोदर-
निदानत्वप्रतिपत्तौ व्यापार इत्यर्थः । पापेन ग्रहणं यस्मिन्नश्वप्रतिग्रहे

स निमित्तमिति पूर्वपक्षवार्त्तिकव्याख्यातभाष्यस्थदोषशब्दोक्ताया न-
रकफलताया अनुभाषणापूर्वं निरासार्थत्वेनानुपपात्तादिति सूत्रावय-
वव्याख्यार्थतयाऽथेत्यादि भाष्य व्याख्यातुं नरकस्येष्टिवाक्ये ऽनुपा-
त्तत्वादित्येवं सूत्रावयवं तावद्याचष्टे *यस्त्विति* अथेत्यनुभाषणा-
१००२।२ भाष्य व्याचष्टे *अथेति* तदेत्यादिबाध्येतेत्यन्तं निरासभाष्यं व्या-
चष्टे *तत इति* दानपक्षे त्यागदुःखदर्शनात्प्रतिग्रहपक्षे रक्षणादिक्ले-
शाद्वैदिकेपि निमित्ते किं चिद्वरुणात्मकं वरुणग्रहणशब्दप्रवृत्तिनि-
मित्तं विद्यत इत्येवं सावयवप्रसिद्धिः संभवतीति निमित्तद्वारणप्रलौ-
किकविषयत्वं नावधारयितुं शक्यमित्यर्थः। भाष्यमपि तत्र तस्मिन्नवय-
प्रसिद्धिपक्षे यज्ञसंबन्धिन्यपि प्रतिग्रहे रक्षणादिना क्लेशेन वरुणग्रह-
णशब्दप्रवृत्तिनिमित्तेन वरुणगृहीतः स्यादिति कृत्वा लौकिकइत्येष
पक्षो न व्यतिष्ठेत समुदायप्रसिद्धयश्च बाध्येतेत्येवंक्लेशेनेतीतिकरणा-
ध्याहारेण योज्यम् । इष्टिकर्त्तुर्दातूरक्षणादिक्लेशाभावाद्रक्षणादिक्ले-
शोक्तिमयुक्तामाशङ्क्य द्वेधा समाधत्ते *रक्षणेति* । वैदिके दाने
वरुणग्रहणशब्दप्रवृत्तौ स्वयं निमितान्तरमाह *धर्मोपि चेति* यत्र
रो देहेनाच्छाद्यते तत्र केवलेन पापेन हेतुनेत्यर्थः। इष्टेर्दोषनिर्घातार्थत्वा-
भावे वरुणग्रहणोक्त्यानर्थक्यशङ्कानिरासार्थं सौत्रार्थवादोक्तिव्या-
ख्यार्थं तस्मादिति भाष्यं व्याचष्टे *तस्मादिति* स्तुतिस्वरूपोक्त्य
र्थं यावद्वरुणगृहीतस्येत्याद्युन्मोचनी चेत्यन्तं भाष्य व्याचष्टे *त-
त्रेति* । तिरोहितभेदोपमानवाचिना रूपकशब्देन भाष्यस्थोपमानो-
क्तिमुपमानविशेषविषयत्वेन व्याख्याय प्रकारवाचिना धर्मशब्देनेदा-
नीन्तनस्याश्वदानस्य प्रजापतिकर्तृकाश्वदानसादृश्येपि दानस्य प्र-
तिग्रहस्य वा वरुणसादृश्याभावादिदानीन्तन्याश्चेष्टेर्वरुणोन्मोचनीत्व-
रूपेण विवक्षितस्य प्रजापतिकर्तृकेष्टिसादृश्यस्याभावादुपमानेन
स्तुत्ययोगशङ्कानिरासाय भेदोपचाराख्यो रूपकप्रकारः प्रजापतिर्वरु-
णायेत्याद्यर्थस्येदानीन्तनकालीनेर्थेध्याहारोपहेतुत्वेनोक्तः । दोषनिर्घा-
तार्थत्वोक्त्यर्थत्वेन प्रयोजनवत्तरत्वसंभवे मन्दप्रयोजनस्तुत्यर्थता न
युक्तेत्याशङ्क्यावश्यकत्वद्योतनार्थत्वेन स्तुतेः प्रयोजनवत्तरत्वोक्त्य-
र्थं तथेतिभाष्यं व्याचष्टे * तस्मादिति * तस्मादित्यादिसूत्रावयव-
व्याख्यार्थं तस्मादित्यादिभाष्यशेषं व्याचष्टे *ततश्चेति* अवाक्यो-
पात्तफलाभावोक्त्या स्ववाक्यश्रुतभ्रातृव्यदुर्वर्णत्वाख्यफलसुवर्णधार-
णवैषम्यं सूचितम् । प्रतिग्रहशब्दस्य लक्षणया दानवाचित्वात्तस्य च

लौकिकस्य निषेधात् क्रत्वव्यभिचारित्वेन क्रतुसंनिधापकतोपपन्नेति सूचयितुं वैदिकोऽश्वदानाख्यप्रतिग्रह कर्मान्तःपातित्वादाङ्गभूत कर्मो-पनयन्नुभयोरिष्टिज्योतिष्टोमादिकर्मणोः साकाङ्क्षत्वादङ्गाङ्गयन्वयं कल्पयतीत्युक्ते ज्योतिष्टोमादिकर्मणोऽङ्गिशब्देन फलवत्तयाङ्गान्वययो-ग्यत्वे सूचितेऽपि प्राकरणिकैरङ्गैर्निराकाङ्क्षत्वादनारभ्याधीताकाङ्क्षा-नुपपत्तिमाशङ्क्योपनायकस्य दानस्य प्राकरणिकत्वेनाङ्गिकर्मदेश-त्वादङ्गिकर्मकथंभावस्य तस्मिन् वृत्त्युपपत्तेर्ज्योतिष्टोमादिकर्मदेशा-श्वदानवर्त्तिकथंभावापन्नस्य ज्योतिष्टोमादिकर्मणोऽश्वदानेनोपस्थाप-नाद्यावतोऽश्वान् ज्योतिष्टोमाद्युपकारार्थं दद्यात्तावतो वारुणान्निर्वपेत्त-दर्थमेवेति श्रुत्यर्थावगतिसूचनार्थं तद्देशत्वमुक्तम् ॥

दातुर्वारुणेष्टिः अधि ॥ ८ ॥

अचोदितं च कर्मभेदात् ॥३४॥

प्रसक्तानुप्रसक्त्या गतिमाह । * तत्रैवेति * सिद्धान्तायो- १००३।६ गेन सदेहमाक्षिपति * कथं पुनरिति * समाधत्ते * उपक्रमइति * कीदृगुपक्रमइत्यपेक्षायामाह * प्रजापतिरिति * पौनरुक्त्यं शङ्कते* यदि तर्हीति * यदिशब्दार्थे यदितर्हीत्येकं पदं परिहरति * उच्यत इति * श्लोकं व्याचष्टे * यत्रेति* निःसंदिग्धस्य विध्यु-द्देशस्य वाक्यशेषस्य निर्णयायोग सामान्यतो व्युत्पाद्य प्रकृते योज-यितुमाह * अत इति * यतो निःसंदिग्धे विध्युद्देशे वाक्यशेषो न निर्णायकोऽतइह यद्यपि प्रजापतिर्वरुणायेत्यादिवाक्यशेषाद्दातुरिष्टि-र्विज्ञायते प्रधानैककर्तृकस्य सान्त प्रधानोपकारसामर्थ्यलक्षणात्स्वा-र्थाद्दातुरिष्टिर्विज्ञायते तथापि संदेहाभावेन संदिग्धेषु वाक्यशेषादि-त्यनेनार्थाद्वाकल्पनैकदेशत्वादित्यनेन च वाक्यशेषादितीति प्रभृति-वाचीतिकरणोक्तिनागतत्वादारम्भोपपत्तिरित्युक्ते कथं वाक्यशेषा-द्दातृविषयत्वज्ञानमित्यपेक्षायां संप्रदानसमभिव्याहारेण नयतेर्दाना-र्थत्वावगमात् प्रजापतिर्दाता वरुण प्रतिग्रहीतेत्युक्त्वा स इत्यनेन प्रजापत्युपपादनात्स्वशब्देन चात्मीयवाचिना वरुणोक्तेर्दातुर्वरुण-प्राप्त्यवगमात्स पर्यदीर्यतेत्यनेनाप्युदरमस्य श्वुप्रत्ययान्तवृद्धिवाचि-श्वयतिधातुरूपश्वयथुशब्दवाच्यया जलवृद्ध्या विदीर्णमित्येतदर्थेन प्रजापतिर्वरुणं प्राप्तः सन् पर्यदीर्ण इति दातुर्वरुणप्राप्तिविवरणात्स-एतामित्यनेन च दातुः प्रजापतेरेवेष्टिककर्तृत्वोक्तेर्वाक्यशेषाद्दातृविष-

यत्वज्ञानमुपपाद्यात्मवाचिना स्वशब्देन प्रजापतेरेव देवतात्वोक्त्या-
प्रतिग्रहीतृत्वाभिधानात्प्रजापतिरन्यस्मात्प्रतिगृह्य वरुणायादादि-
त्यर्थसंभवात् प्रजापतेः प्रतिग्रहीतृत्वकीर्त्तनेन वाक्यशेषस्यापि प्रति
ग्रहीतृविषयत्वोपपत्तिशङ्कानिरासायान्यस्मात् प्रतिगृह्येत्यश्रुतकल्प-
नायोगादेकं सद्विप्रा बहुधा वदन्तीति मन्त्रवर्णालोचनया वरुण-
प्रजापत्योरेकत्वमङ्गीकृत्य प्रजापतिरात्मनेश्वमदादित्युपक्रमार्थाभ्यु-
पगमेन तस्य प्रजापतेरात्मा स्वा देवता वाच्या नच्च दानकर्तृत्वसं-
प्रदानत्वयोर्विरोधाद् दातृत्वे मुख्ये कल्पिते सम्प्रदानत्वस्यान्यदीये
द्रव्ये न्यदीयत्वापादकत्वदातृगुणयोगेन संप्रदानत्वे वा मुख्ये
कल्पिते दातृत्वस्य संप्रदानगुणयोगेन गौणत्वापत्तेर्न युक्तमित्युक्ते
प्रजापतये वरुणोऽश्वमदादित्येवं तर्हि प्रजापतेः प्रतिग्रहीतृत्वकीर्तन-
मस्त्वित्याशङ्क्य नापीत्युक्तम् । वरुणस्याप्यात्मोद्देशेन निर्वापकर्तृ-
त्वनिर्देशोपपत्ते प्रतिग्रहीतृविषयत्वोपपत्तिमाशङ्क्य निर्वपतेर्याजि-
मत्कर्मवाचित्वान्न वरुणस्येत्यादिनानुपपत्तिरुक्ता । दोषनिर्घातार्थत्वा-
१००४।८ भ्युपगमेपि दातृविषयत्वोपपत्तिसूचनार्थं तदुन्मोचनमित्युक्तम् ।
प्रधानैककर्तृकस्य सतः प्रधानोपकारसामर्थ्याविषयत्वेनापि सिद्धान्त
सूत्रयोजनशक्तिसूचनार्थं यजनशेषत्वाच्चेष्टेः प्रधानसमानकर्तृक-
त्वावगमात्स्वामिनश्च सतः प्रधानकर्तुर्वाजिदातृत्वाद्दातुरिष्टिरित्युक्ते
यज्ञशेषतैव कथमित्याशङ्क्य वैदिके यस्मिन् कर्मणीत्यादिपूर्वाधिकरण-
भाष्येण यज्ञाङ्गत्वस्योक्तत्वादित्युक्तम् । सन्देहाभावेप्यारम्भायोगमा-
शङ्क्य विध्युद्देशार्थवादविप्रतिपत्तिर्विचाराङ्गसन्देहहेतुत्वेनोक्ता ।
विपत्तौ विकल्पापत्तिशङ्कानिरासायातुल्यकल्पाविकल्पायोगाद्यवधार
णकल्पनारूपेणान्यतरस्य विध्युद्देशस्यार्थवादस्य वा बाधेन दातृप्र-
तिग्रहीत्रन्यतराविषयतया समस्तं विध्यर्थवादसमूहात्मक वाक्यं गम-
यितव्यमित्युक्तं विध्युद्देशबलीयस्त्वेनार्थवादस्यैव बाध्यत्वानिश्चया-
त्सन्देहशङ्कानिरासायोपक्रमोपसंहारबलाबलचिन्तयेतमध्यमपदलो-
पिसमासेनोक्तम् । व्यवधारणेनान्यथाप्रतीयमानस्यार्थस्यान्यथाव-
धारणे वाक्यार्थकल्पनायामप्रतीयमानार्थकल्पनापत्तिदोषशङ्कानि-
रासार्थं लक्षणया प्रतीतिं सूचयितुं कथमपीत्युक्तम् । तथापि संन्देहा-
भावेन सन्दिग्धेष्वित्यनेनागच्छाद्विध्युद्देशार्थवादयोर्विरोधादुपक्रमोप-
संहारबलाबलसन्देहाच्च चिन्ताविषयोपलक्षणभूतसंदेहाभावेपि चि-
न्ताङ्गसंदेहोपपत्तेः कथमपिक्लेशेन व्यवधारणकल्पनारूपेणान्यतरबा

धेनान्यतरविषयतया समस्तवाक्यगमनिकार्थमारम्भे युक्ते सति किं
तावत् प्राप्तमित्यन्वयः। पूर्वपक्षसूत्रस्थस्य चशब्दस्य तुशब्दस्थानस्य
संदेहनिवृत्त्यर्थत्वसूचनार्थं संदेहसमाधानोपसंहारग्रन्थैकग्रन्थतया पू-
र्वपक्षप्रश्नः। पूर्वपक्षसूत्रार्थोपपादनायार्थवादवाधोक्त्यर्थत्वप्रतिग्रहस्य
कर्तुरिति पूर्वपक्षभाष्यस्य सूचयन् पूर्वपक्षयति *अर्थवादस्येति* अङ्ग-
गुणाविरोधन्यायेनार्थवादासामञ्जस्येऽभिहितेऽर्थवादस्य विध्युद्देशाङ्गत्वे
सति विध्युद्देशगुणयथाश्रुतत्वानुरोधेनार्थवादगुणयथाश्रुतत्वावाधो-
युक्त तदेव तु कथमित्याशङ्क्य विध्युद्देशाधीनप्रवृत्त्याङ्गतामर्थवादा
सामञ्जस्य हेतुत्वेनोक्ता तदुपपादनार्थं वैध्युद्देशाङ्गतां विनानर्थक्य-
प्रसङ्गेऽभिहिते विध्युद्देशस्यापि तर्ह्यर्थवादं विना प्रवर्त्तनाशक्तत्वेना-
नर्थक्यप्रसंगादर्थवादाङ्गत्वापत्तिरित्याशङ्क्यार्थवादाभावे तस्यैव
प्ररोचनशक्त्याविर्भावेनार्थवादं विनापि प्रवर्त्तनाख्यस्वार्थसिद्धेरि-
त्युक्तम्। विध्युद्देशाङ्गत्वेप्युपक्रमस्थेनार्थवादेन दातृविषयत्वे वधा-
रितं विध्युद्देशस्य विषयावधारणे व्यापाराभावात्कांस्यभोजिन्याये-
नार्थवादानुरोधवृत्तित्वाविरोधमाशङ्क्य विधिस्तुत्योः समानविषय-
त्वात् स्तुतिद्वारा विधिविषयोऽर्थवादेन समर्पणीय विध्यनपेक्षिता-
यास्तु स्तुतेः स्वरस्वतोऽर्थवादादप्रतीतेन विषयावधारणं संभव-
तीति यच्चेत्यादिनोक्तं प्रमाणान्तरानुसारित्वाच्च लक्षणवृत्त्याख्य-
मसामञ्जस्यं अर्थवाद एवायुक्तं न विधावित्याह * नित्य चेति * १००५।२
दृष्ट चान्यत्रार्थवादेष्वसामञ्जस्यमित्याह * यथा चेति * अतो यथा-
ज्या स्तुतिर्लक्षणया तत्संबन्धिचेतसावकविषया तथा दातृव्या-
पारस्तुतिस्तत्संबन्धिप्रतिग्रहीतृव्यापारविषयेत्युपसंहरति * तस्मा-
दिति * सूत्रार्थमुपपाद्य यथाभाष्य तावत्सूत्रं व्याचष्टे * तेनेति * ।
येन कारणेनार्थवादानुरोधेन विधिर्न प्रवर्त्तते तेन कारणेन प्रति-
ग्रहनिमित्तकत्वेन श्रुतमिष्ट्याख्य कर्म दातुरचोदितमित्युक्ते वेदो वा
प्रायदर्शनादित्यत्रोपक्रमस्यार्थवादानुरोधेनोपसंहारस्थाविधिव्याख्या-
नस्योक्तत्वान्निरस्तोय पूर्वपक्ष इत्याशङ्क्योपसंहारस्थानामृगादि-
शब्दानामृग्भिः प्रातर्दिविदेव ईयत इत्यादिषु वेदे प्रयोगदर्शनाद्वेदल-
क्षणार्थता युक्ता प्रतिगृह्णातेस्तु दाने क्व चित् प्रयोगादर्शनाद्दानल-
क्षणार्थत्वानुपपत्तेर्दानप्रतिग्रहकर्मणोः शब्दभेदादेकशब्दप्रतिपाद्यत्वा-
भावादित्युक्तम् । समुच्चयस्येहाविवक्षितत्वाच्च शब्दमयुक्तमाश-

ङ्क्य तुशब्दार्थसंदेहनिवृत्त्यर्थत्वेन व्याख्यातुमाह * तुशब्देति । * व्याख्याविभवायान्यथा स्वयं द्वेधासूत्रं व्याचष्टे * यजमान चेति *

सा लिङ्गादार्त्विजे स्यात् ॥३५॥

यथाभाष्यं तावदार्त्विजशब्दं यजमानविषयत्वेन व्याचष्टे * यजमान इति।* विभवार्थं स्वयं दानविषयत्वेन तावद्व्याचष्टे *अथवेति।* संप्रैषलिङ्गमालोच्य स्यादिति ल्यब्लोपपञ्चम्या दातृविषयत्वे[[1]भिहिते लिङ्गस्य संदिग्धार्थनिर्णायकत्वादसंदिग्धविध्युद्देशार्थविधारणहेतुत्वायोगमाशङ्क्य विध्यर्थवादविप्रतिपत्त्या संदेहोपपत्तिसूचनार्थत्वेन] पूर्वाधिकरणसिद्धान्तसूत्रस्थयोर्वाशब्दयाज्ञशब्दयोर्व्यवहितयोरप्यपेक्षिततयानुषङ्गेण यज्ञाङ्गे दानेऽनङ्गे वार्त्विकर्मणीति संदिग्ध इत्येवं स्वयमेवान्यथा व्याचष्टे *अथ वा स्वामीति* किं लिङ्गमिति प्रश्नभाष्यं लिङ्गमन्त्रेषु वचनसामर्थ्यमितिप्रकरणाधिकरणोपक्रमभाष्य एव सामर्थ्याख्यलिङ्गलक्षणोक्तेरयुक्तमाशङ्क्य यतो लिङ्गाद्दातुरिष्टिस्तत् किमित्येष विशेषविषयत्वेन व्याचष्टे*कथं पुनरिति* कथं भूतेन पुनर्लिङ्गेनेत्यन्वयः । स्वयं तावदिष्ट्याख्यस्य कर्मणः प्रधानसमानकर्तृकस्य सतस्तदुपकारसामर्थ्यलक्षणं लिङ्गमाह * तदिति * पूर्वपदानामिति भाष्योक्तं लिङ्गं व्याचष्टे * अपरमिति * पूर्वार्द्धं व्याचष्टे * पूर्वेति *। वैदिके यस्मिन् कर्मणीत्यादिभाष्येणेष्टेरश्वप्रतिग्रहवत् ज्योतिष्टोमादिकर्माङ्गत्वेऽवधारितेऽपि प्रस्तुताधिकरणपूर्वपक्षन्यायात् प्रतिग्रहीतृविषयत्वे सति भिन्नकर्तृकत्वेनाङ्गत्वबाधापत्तेः प्रायशब्दः । प्रतिपादितप्रायत्वोपपादनार्थं यदा हीत्याद्युक्तम् । अन्यो वा स्यात्परिक्रयादित्यत्राङ्गानामृत्विक्कर्तृकत्वस्य वक्ष्यमाणत्वादिष्टेरप्यङ्गत्वाद्दृत्विक्कर्तृकत्वोपपत्तिमाशङ्क्याङ्गानामपि यागरूपाणां याजमानत्वसूचनार्थं प्रधाने ज्योतिष्टोमादौ यथार्त्विज्यमृत्विगर्हमयागरूपमङ्गजातं दातुरितरैर्ऋत्विग्भिः कार्यं यजमानार्हं यागरूपं तथास्यामपीत्याह
१००६।२ * तेनेति * पूर्वाधिकरणेनैव दातृविषयत्वसिद्धौ प्रस्तुताधिकरणानर्थक्यमाशङ्क्य वाक्यस्योपक्रमोपसंहारयोर्विरोधेन विधिरूपत्वेनोपसंहारबलीयस्त्वात् कृताया भ्रान्तेर्बलाबलविशेषानवधारणाद्धाकृतस्य संशयस्य व्युदासार्थं प्रस्तुतमधिकरणमित्याह * एवमिति * प्रस्तुतमेव पूर्वापेक्षयोत्तरमुक्तम्। उत्तरार्द्धं व्याचष्टे * तस्यापि चेति*।

१ इति द्वितीये नास्ति ।

प्रस्तुताधिकरणभाष्योक्तत्वसूचनार्थं तस्येत्युक्तम् । भाष्योक्तस्य
वाक्यस्यापीदृशमेव सामर्थ्यमित्यनेन पूर्वपदानामिति भाष्यव्या-
ख्यार्थतयोत्तरार्द्धे व्याख्याते भाष्याद्वाक्यसामर्थ्याप्रतीतेरुत्तरार्द्धस्य
तद्व्याख्यार्थत्वायोगमाशङ्क्य पूर्वपदानां यथार्थमाञ्जस्येन वर्त्तमानाना
मुत्तरपदैः पूर्वपदाभिमुखैस्तदनुकूलैः सहैकवाक्यत्वलक्षणसंब-
न्ध इत्येव सबन्धशब्दोक्तस्य वाक्यस्योपक्रमानुकूल्याधीनत्वोक्त्या
तदापादनसामर्थ्यादितिकर्त्तव्यताकाङ्क्षस्य वचन प्रकरणमि-
त्यत्राकाङ्क्षाया विशेषणभूताया. प्रकरणलक्षणत्वप्रतीतिवच्च विशेष-
णभूतस्यापि सामर्थ्यस्य किं लिङ्गलक्षणत्वप्रतीत्युपपत्तौ सबन्धो-
क्त्या सूचितायां कथं भाष्यस्थाया संबन्धोक्तेर्वाक्यवाचितेत्याशङ्क्यो-
पक्रमश्चोपसंहारश्चोपक्रमोपसंहारामितिद्वन्द्वैकवद्भावेन द्वन्द्ववाच्येतरे-
तरयोगोक्त्यान्योन्यपदान्वयरूपवाक्यवाचिना सबन्धोक्तेः सूचिता ।
वाक्यं च तत्संबन्धश्चोपक्रमोपसंहारं चेत्यन्तपदद्वन्द्वगर्भस्त्रिपदः
कर्मधारयः । यावतोऽश्वानित्यादिपूर्वपदानुकूल्यस्य प्रतिग्रहीतृवि-
षयत्वेऽप्युपत्तेर्दातृविषयेष्टिविधिसामर्थ्यायोगशङ्कानिरासार्थमिद
श्रूयते इत्यादिनिर्वपेदितीत्यन्त भाष्यमतइह यद्यपीत्यादिना दातुरि-
ष्टिर्विज्ञायतइत्यनेन वार्तिकेनानागतावेक्षणेन संदेहोपपादनवेलाया-
मवयवशो व्याख्यातमपि तात्पर्यतो व्याचष्टे * न हीति *। दातुरिष्टि-
र्विज्ञायतइत्यनेनोक्तमित्यर्थः । आहेत्याशङ्काभाष्यं प्रतिग्रहस्य कर्तु-
रिति पूर्वपक्षभाष्योक्तार्थवादबाधानुभाषणार्थत्वेन व्याचष्टे * नन्वि-
ति * । एवंमन्तीत्यादिलक्षणया कल्प्यमित्यन्तभाष्यमुपक्रमस्याप्यर्थ-
वादत्वेन दौर्बल्यादिष्ट्यर्थोपसंहारानुरोधेन व्याख्यानादुभयार्थवत्त्वो-
पपत्तेरयुक्तमाशङ्क्योपपादयितुमाह * नैतदिति * । यदि लब्धात्म-
को विध्युद्देशः स्यात्ततस्तेन स्तुतिर्बाध्येत न त्वत्र प्रतिग्रहीतृवि-
षयो विध्युद्देशः कल्पितो लब्धात्मक इत्येवं श्लोक व्याचष्टे * यदी-
ति *। कुतो लब्धात्मकत्वालब्धात्मकत्वे ज्ञायेते इति पृष्टोत्तरमाह
* कुत इति * । पुरस्तादर्थवादेषु मुख्यं चेति न्यायाद्यथाश्रुतत्वावग-
मेऽप्यतन्न्यायबाधेन दीक्षणीयादिषु पूर्वानुष्ठेयत्वाना्ख्येयपर्वकालत्व-
बाधवदङ्गगुणविरोधन्यायाद्यथाश्रुतत्वबाधावगतेस्तदनुसारेण विध्य-
र्थकल्पना न युक्तेत्याशङ्क्य प्रधानत्वादुणभावस्याङ्गगुणस्य पर्वकाल-
त्वे हि प्रधानगुणविरोधे स्याद्गुण्यार्थत्वायोगाद्बाधो युक्तः, अर्थवा-
दानां तु यथाकथंचित्प्राशस्त्यप्रतिपादनमात्रेण विधिस्यादगुण्यार्थ-

स्वसिद्धेस्तद्यथाश्रुतत्वस्य प्रधानभूतविधिसादृगुण्यार्थत्वाभावेन तां दृश्यादिति बाधहेत्वभावान्न युक्तो बाध इति वैषम्यं सूचयितुमाह * पुरस्तादिति * दक्षणीया ज्योतिष्टोमादीनां पौर्वापर्यकृताद्बाध्यबाधकत्वविशेषादङ्गगुणविरोधन्यायबाध्याद्विध्यर्थवादादीनां पौर्वापर्यकृतो बाध्यबाधकत्वविशेषोऽङ्गगुणविरोधन्यायबाध्यत्वाभावेनान्यो विषयो भवतीत्यन्योक्त्या वैषम्यं सूचितम्। अर्थवादगुणस्य यथाश्रुतत्वस्य विधिसादृगुण्यार्थत्वाभावेऽप्यर्थवादस्य विधिसादृगुण्यार्थत्वसद्भावादृगुणलोपे च मुख्यस्य क्रिया स्यादित्यनेन न्यायेन निर्वापेणाग्निहोत्रहवनिबाधवद्विधिनार्थवादबाधावगमात्पूर्वापरोच्चारणकृतविशेष.योगमाशङ्क्यार्थावधारणात् प्राग्विध्यर्थवादयोर्गुणप्रधानत्वानवगमेर्गुणलोपन्यायाविषयत्वं सूचयितुमाह * सर्वत्रैव तावदिति * आग्नावैष्णवसारस्वतादिष्वङ्गाङ्गित्वशून्येषु मुख्याग्नावैष्णवतन्त्रे पौर्णमासमावास्योपांशुयाजविकारे सारस्वते प्रसङ्गेनोपकरोति न पाश्चात्यसारस्वततन्त्रममावास्यमाग्नावैष्णवइत्यङ्गाङ्गित्वशून्योग्नावैष्णवादिविषयद्वादशाधिकरणन्यायोपन्यासेनाङ्गाङ्गित्वशून्येन्द्रगार्हपत्यादिविषयश्रुतिलिङ्गाधिकरणन्यायोपन्यासेन च विध्यर्थवादबाध्यबाधकत्वस्य गुणलोपन्यायाविषयत्वं सूचितम्। अनुपजातत्वात् प्रतिद्वन्द्विविरोधिद्वितीयं विज्ञानान्तरमनुत्पत्त्यवस्थं यस्य पूर्वविज्ञानस्य तत्तथोक्तं तस्य भावस्तत्त्वं तस्मादित्यर्थः। यद्यप्यन्यथात्वमापद्यते तथापि प्रतिपद्यतेऽङ्गीकरोतीत्यपिशब्दार्थः। सामान्यं न्यायं व्युत्पाद्य प्रकृते योजयन्नुपपादितमेवं सतीत्यादिभाष्यं व्याचष्टे * तदिहेति * । पश्चाद्भावितया विध्युद्देशस्यालब्धात्मकत्वेन विध्यर्थवादयोर्वा गुणप्रधानप्रधानत्वस्यावधारणात् पश्चाद्भावितया विध्यर्थवादकृतबलाबलविशेषानाश्रयणाद्विध्युद्देशेनार्थवादबाधानुपपत्तेर्विध्युद्देशस्य प्रतिग्रहीतृविषयत्वे सत्युपक्रमोपसंहारयोर्विप्रतिपन्नार्थत्वेनानर्थक्यप्रसंगो त्वैवंसतीत्यादावुपसंहारोपपत्यन्ते भाष्यावयवे व्याख्याते पौर्वापर्ये पूर्वदौर्बल्यमित्यनेन न्यायेन पश्चाद्भाविविध्यनुरोधेनार्थवादव्याख्ययोभयोः संप्रतिपन्नार्थत्वादानर्थक्यपरिहारमाशङ्क्य पौर्वापर्यबलीयस्त्वं तत्र नाम प्रतीयते अन्योन्यनिरपेक्षाणां जन्म यत्र धियां भवेदिति वार्तिकोक्त्यान्योन्यनैरपेक्ष्यं विना परबलीयस्त्वायोगात्तथा सति विध्युद्देशस्य पश्चाद्भावितया बलीयस्त्वाख्यविशेषाश्रयणे सत्यन्योन्यनैरपेक्ष्यापत्तेरेकवाक्यत्वासंभव-

प्रसंगादित्युक्ते पृथग्वाक्यतैव तर्ह्यस्त्वित्याशङ्क्य पृथक्त्वे विध्यर्थवादयोः प्ररोचनविधित्वसाकाङ्क्षत्वेन परिपूर्णार्थत्वापत्तावुक्तायां प्ररोचनान्तरकल्पनेन विध्यर्थवत्वं विध्यन्तरकल्पनेन चार्थवादार्थवत्त्वमाशङ्क्य परस्परेत्युक्तम् । मीमांसापूर्वमुपसंहारस्योपक्रमानुरोधघृसित्वोक्त्यर्थं तस्मादित्यादिभाष्यशेषं व्याख्यातुमवश्य भावात्माद्युक्तम् । न केवलमनुपसंजातविरोधावस्थायां श्रुतत्वादयमुपक्रमेऽनुग्राह्यः किंतु भूयस्त्वादपीत्यभिधानार्थमपिचेतिभाष्यं व्याचष्टे * किंचेति * चतुर्थीनयत्योरेवासामञ्जस्ये बहुसामञ्जस्योक्त्ययागमाशङ्क्य प्रत्यगृह्णादितीतिभाष्यस्थेनेतिकरणेन भृत्यर्थेन देवताशब्दस्याप्यसामञ्जस्योक्तेर्बहुशब्दं भाष्यस्थमुपपादयति *प्रजापतिरिति* उपसंहारे गृह्णातिमात्रमसमञ्जसं तच्च नात्यन्तमित्यभिधानार्थं प्रतिगृह्णातीति भाष्यं व्याचष्टे * मम त्विति * उपसंहारस्थविधेरलब्धात्मकत्वेन दौर्बल्यमुपपादितमपि भाष्यस्थं शक्नोतिशब्दारूढं कर्त्तुं शङ्कानुभाषणपूर्वं विस्तरेणोपपादयति * यत्त्विति । * न त्वित्यनेन विधेरलब्धात्मकत्वयुक्तमुपपादयितुं सामान्यन्यायं तावदाह*सर्वत्र हीति*अत्रैवदशमाधिकरणसिद्धं दृष्टान्तमाह*तद्यथेति*सामान्यन्यायं प्रकृते योजयति *एवमिति * कर्त्तव्यत्वाख्यविधिवद्विधिविषयस्यापि विधायकाख्यविध्येकसमधिगम्यत्वाद् विधिमात्रप्रार्थनायागशङ्कानिरासार्थवादस्यापि विधिस्तुत्येकविषयत्वान्यथानुपपत्त्या विधिविषयबोधशक्तिस्तुल्या चेत्यनेनोक्ता । विधयेष्टिविषयभूतस्य दातुरर्थवादावगतत्वाद्विधेयविषयानपेक्षत्वेऽत्र वाच्ये विधिविषयोऽप्यत्र नापेक्ष्यते किमुत विधेयविषयइत्यतिशयोक्तौ विधिमात्रप्रार्थनोक्ता । विधेयेष्टिविषयोक्त्यर्थः प्रतिगृह्णातिस्तर्ह्यनर्थकः स्यादित्याशङ्क्याह * अत इति * यथा चालब्धात्मकत्वेन विध्यविरोधो भाष्यस्थेन शक्नोतिना सूचितस्तथैकवाक्यतोपगमनसामर्थ्यमुपसंहारासामञ्जस्य प्रमाणमपीति सूचयितुमाह * अन्यथा हीति* एककर्तृकस्याख्यानस्य परकृत्याख्यत्वेन पुराकृत्याख्यत्वेनपुराकल्पाख्यत्वाभावात् पूर्वकालमात्रविवक्षया पुराकल्पोक्तिः । शक्नोतिसूचिताविध्यविरोधासामञ्जस्य प्रमाणोपपादनमुपसंहरति * तस्मादिति । * अर्थवादैकवाक्यतया प्रवृत्तिरसामञ्जस्याक्षेपिकेत्कंशब्देन परामृष्टा । वाक्यानुरोधेन गृहातिश्रुतिबाधायोगमाशङ्क्येतरथा वाक्यमेव नावकल्पेत तत्रानर्थका एव गोदिशब्दा भवेयुरिति वाक्याधिकरापगतवेदो वा प्रायदर्शनादितिसिद्धा-

नसूत्रस्थभाष्योक्तेनानर्थक्यप्रतिहतानां विपरीतं बलमिति न्यायेन वाक्यात्यन्तानर्थक्यप्रसक्तौ श्रुतेरप्यसामञ्जस्य कल्पनौचितीति सूचयितुमाह * तदिति * वाक्यानुरोधात् श्रुत्यसामञ्जस्यौचित्यसूचनार्थं पूर्वपक्षसूत्रमप्यधिकरणोपलक्षणत्वेनोपन्यस्तम् । गतार्थत्वाराह्येनारम्भापत्तिरित्याशङ्कते * नन्विति । * गतार्थतामभ्युपगम्यार्त्विक्कर्तृकप्रतिग्रहवाचित्वेन सौत्रार्त्विजशब्दव्याख्यानविप्रतिग्रहीतृविषयेतिमितान्तप्रतिपादकभाष्यान्तरजनितभ्रान्तिनिवृत्त्यर्थत्वेनारम्भमुप-
६०२८।१३ पादयति * सत्यमिति * ऋगादिशब्दानां वेदेषु प्रयोगवद्गृह्णाते दाने क्वचित् प्रयोगादर्शनादृगादिवदवच्च दानप्रतिग्रहयोरेकदेशैकदेशित्वाभावेन लक्षणाया क्लिष्टत्वादाधिकाशङ्कोपपत्तेर्गतार्थतापि नात्यन्तमस्तीति सूचनार्था प्रायोक्तिः । सूत्रकृतो भाष्यान्तरजनितभ्रान्त्यपनयार्थारम्भायोगात् भाष्यकृतश्च सूत्रव्याख्यार्थमेवारम्भो दर्शितभ्रान्त्यपनयार्थत्वायोगमाशङ्क्य भ्रान्त्यपनयार्थत्वाभावे स्य सूत्रद्वयस्य पूर्वाधिकरणान्तर्गतत्वेनापि व्याख्यातु वाक्यत्वाच्च गतार्थता त्वया व्याशङ्कितु शक्येत्याह * इतरथा हीति * कथ शक्यमित्याशङ्क्य सूत्रद्वयमपि पूर्वाधिकरणसिद्धान्ताक्षेपसमाधानार्थत्वेन स्वयं व्याचष्टे * यो नामेति * वैदिकत्वयागत्वसामान्ययोर्बुद्धिस्थत्वापादतार्थत्वेन सन्निधानास्यस्थानरूपतया विध्युद्देशवाक्यबाधकत्वायोगादपरितोषेण यावतोश्वान् विनियुक्त स दद्यादित्येवंविहितात्श्वदानोत्तरलक्षणत्वेन लिङ्गो वैदिकदानालिङ्गत्वेभिहिते विहितस्य दानस्य निमित्तत्वे क्रत्वैकान्तिकत्वेनेष्टे. क्रत्वर्थत्वाद्विहितस्य च क्रत्वनुपस्थापकत्वेन विधेयभावनोपस्थापितपुरुषार्थत्वापादकत्वाद्धेत्वापत्तेर्दानमात्रस्य निमित्तत्वायोगेन निमित्ततयोद्देश्यस्यानि । दानस्य विशेषणाकाङ्क्षणान्मृष्यामहे हविषा विशेषणमितिवद् विहितत्वस्य दानविशेषणत्वसंभवेपि निमित्तत्वोपयुक्तस्य लिङ्गो विशेषकत्वायोग्यालिङ्गत्वायोगमाशङ्क्याप्राप्तनिमित्तत्वायोगात् प्रापक च विनाप्रत्यययोगादात्मना च वाच्यत्वेनोपस्थापितस्य विध्याख्यस्य प्रापकस्य विरोधिनिषेधाभावात्संभवनुपस्थापितरागादिप्रापकाक्षेपाद्विधिप्रापितस्यैव निमित्तत्वबोधनान्निमित्तत्वोपयुक्तस्यापि विशेषकत्वोपपत्तिमपिशब्दसूचितां प्रकटयितु वैदिको दानाख्यः प्रतिग्रहो लिङ्गो विधेयविधातृत्वाख्यसंबन्धसबद्धो न लौकिक इत्युक्तम् । अनेन च यदि केवलवैदिकत्वेनैकरूपं दानं स्यात्ततो याज्ञे दान इष्टिः

स्याद्दानस्य तु लौकिकवैदिकत्वरूपेण भेदाद्वैदिकमेव निमित्तमिति
निर्णयाशक्तेर्यथा दोषनिर्घातार्थताऽभावाल्लौकिकैनतादृश्याख्य कर्म
चोदितं तथा याज्ञेऽपि दानं न चोदितमिति चकारेण याज्ञेपीत्यभिधा-
नादाक्षेपसूत्रार्थवर्णने निर्णयकारणाभावमुक्तं निरसितुं निर्णा-
यकारणोक्त्यर्थत्वेन लिङ्गोक्तिर्व्याख्याता । उत्सूत्रेतदाक्षेपनिरा
सार्थत्वेन वैकीकृत्य सूत्रद्वयं हेत्वर्थे चशब्दमङ्गीकृत्य यस्माल्लौकिकं
दानमचोदितं तस्माच्चोदितदानोपलक्षणार्थेन लिङ्गा लौकिके निमि-
त्तत्वबुद्ध्यजननाद्दत्विक्सप्रदानके याज्ञे दाने सोऽपिर्लिङ्गाख्याल्लिङ्गा-
त्स्यादित्येव पूर्वसूत्रान्यथायोजनपूर्वमुत्तरसूत्रं पूर्ववत् योज्यमित्याह
* अथ वेति ।* केचित्त्वभेदमाचार्या कर्मणामेव मन्वतइत्येतत्पक्षा-
श्रयणेन दानादिकर्मव्यक्तेर्देशकालादिभेदेऽपि गकारादिवर्णव्यक्तिवद-
भेदमङ्गीकृत्य लोकवेदयोर्दानाख्यस्य कर्मणो भेदाभावाद्वैदिकं निमित्तं
न लौकिकमिति व्यवस्था न युक्तेत्याशङ्कायां स्वरूपभेदाभावेऽपि चो-
दिताचोदितत्वाद्युपाधिकृतभेदसद्भावाद्रूपभेदेऽपि हिंसादेर्भेदोऽङ्गान-
ङ्गकारित इत्यनेन न्यायेन निमित्तत्वव्यवस्था युक्तेत्येवं निरासार्थ-
त्वेन कर्मभेदादिति सूत्रावयवं व्याचष्टे * तत्रेति * । अधर्मशब्द-
वन्नञो विरुद्धवाचित्वान्निषिद्धवाचिनमचोदितशब्दमङ्गीकृत्य यस्मा-
न्निषिद्धं लौकिकं दानं तस्मात्तस्य वेददृष्टेन सिद्धान्तेनाभावान्नि-
मित्तत्वानुपपत्तेः सोऽपि संदिग्धसद्भावबोधकाल्लिङ्गाख्याल्लिङ्गादार्त्विजे
स्यादित्यमङ्गीकृत्यैवं सूत्रद्वयमुत्सूत्राक्षेपनिरासार्थत्वेनान्यथा व्या-
चष्टे * प्रतिषिद्धत्वाच्चेति * । यावच्छब्दस्य सप्तमीवन्निमित्ते स्मृ- १००६।१
त्यभावादेकस्याश्चेष्टेस्तन्त्रेणानेकदानोपकारित्वसंभवेऽप्यवसंख्याके-
ष्टिविषये यावच्छब्दोपपत्तेर्दानेष्ट्यन्वयमात्रे विधिपर्यवसानादिष्टेः
कैमर्थ्यापेक्षायां वाक्यगम्यदानाङ्गत्वस्यागहेत्वभावेन दानस्यैवेष्टिं
प्रति शेषित्वावगतेर्लौकिकस्य वा चोदितत्वेन निष्प्रयोजनत्वाच्छेषि-
त्वानुपपत्तेः सोऽपि चोदितत्वेन प्रयोजनवत्त्वबोधकाल्लिङ्गाख्याल्लिङ्गादा-
र्त्विजे स्यादित्येवमन्यथा व्याख्यां सूचयितुमाह * न चेति * अस्मि-
न्नपि व्याख्याद्वये कर्मभेदादिति सूत्रावयव पूर्वपक्षाशङ्कानिरासार्थत्वेनैव
व्याख्येयः । अधिकरणान्तरारम्भस्य भाष्यान्तरजनितभ्रान्त्यपनया-
र्थत्वोपसंहारायानेन प्रकारेण पूर्वाधिकरणान्तर्गततया चतुर्धा व्या-
ख्याने संभवत्यपि यदधिकरणान्तरकरणं तद्भाष्यान्तरजनितभ्रान्त्य-
प नयनवशेनेत्याह*इतीति* । गतार्थत्वाभ्युपगमेनाधिकरणान्तरारम्भं

प्रौढ्योपपाद्य वस्तुनः प्रायशब्दसूचितशङ्काविशेषनिरासार्थत्वेनोपपाद-यितुमाह * गृह्णातीति * । वेदत्रयविदि त्रयीविद्यशब्दप्रयोगात् त्रयीशब्दस्य च त्रयीविदो विदुॠचो यजूंषि सामानीति समभिव्याहाराद्दग्यजुः सामविषयत्वावगतेर्ऋग्यजुः सामशब्दानां वेदेषु प्रयोगाद्दग्भिः प्रातर्दिवि देवईयत इत्यत्र च वेदैरशून्य इति बहुवचनाद्दक-शब्दादे. स्पष्टं वेदे प्रयोगावगतेर्गृह्णातेस्तु दानक्रियायां क्वचित् प्रयोगादर्शनात् दानप्रतिग्रहयोश्च वेदगादिवदेकदेशैकदेशित्वाभावेनात्यन्तभेदाल्लक्षणानुपपत्तेर्गृह्णातिशब्दो दृढामिष्टेः प्रतिग्रहीतृविषयत्वभ्रान्तिं कुर्वन्कथं चिल्लक्षणाया नेतव्य इत्येतदर्थं वाधिकरणान्तर-करणमित्यर्थः । कीदृशी लक्षणेत्यपेक्षायामाह * प्रयोजकेति * । यया कया चिदितिभाष्यावयवसूचितां लक्षणावृत्तिं दर्शयित्वा योहीत्यादिभाष्योक्तां मुख्यवृत्तिमुपपादयितुमाह * अथ वेति * । स्वतन्त्रस्य कर्त्तुः प्रयोजके हेतुसंज्ञके पि कर्त्तरि प्रयोजकव्यापारं प्रति स्वातन्त्र्यलक्षणकर्तृत्वसद्भावात्तत्र च हेतुत्वविवक्षायां प्रयोजकत्व-लक्षणत्वाद्धेतुत्वस्य प्रयोजकव्यापाराख्यं च तत्समर्थाचरणं विना प्रयोजकत्वायोगाद्धेतुमन्तं तत्समर्थाचरणाख्यं प्रयोजकव्यापारं वक्तुं हेतुमतिचेति सूत्रविहितोणिच्प्रत्यय उत्पद्यते हेतुत्वानपेक्षस्वातन्त्र्यलक्षणकर्तृत्वविवक्षायां तु ज्वालनाद्यनभिधानेपि तदपेक्षया काष्ठादीनां पाके कर्तृत्वविवक्षोपपत्तिवत् प्रयोजकव्यापारानभिधानेपि तदपेक्षया प्रयोजकव्यापारे स्वातन्त्र्यविवक्षोपपत्तेः । प्रयोजकव्यापारवाचिणिच्प्रत्ययाभावेपि य प्रतिग्रहः प्रयोजकव्यापारे स्वतन्त्र. सत्करोति स गृह्णातीति शक्यो वक्तुमित्यर्थः । अनेन च येन संविधानाख्यातत्समर्थाचरणरूपेण प्रयोजककर्मणा प्रयोज्यक्रियाप्रणाड्यापि सिध्यति तत्प्रयोजककर्म य आचरति आभिमुख्येन चरति स्वातन्त्र्येण करोति स तस्याः प्रयोज्यक्रिया कर्तेति शक्यो वक्तुमित्येवं भाष्य व्याख्यातां प्रयोजकक्रियाविषयस्य स्वातन्त्र्यस्य प्रयोज्यकर्मण्युपचारे दृष्टान्तोक्त्यर्थं यथेतिभाष्यमनुपात्तप्रयोजकक्रियाविषयस्य स्वातन्त्र्यस्य प्रयोजकर्मण्युपचारायोगादयुक्तमाशङ्क्य प्रयोज्यक्रियया प्रयोजकक्रियाक्षेपोक्त्योपपादयति * यथेति * ।। प्रयोजकव्यापारे हेतुकर्तृत्वाभावात्तद्वाचिनो धातोः परतो णिच्प्रयोगायोगापत्तेः प्रतिग्राहयतीति व्यवधारणकल्पनायोगप्रसङ्गाद् णिजन्तस्यापि धातोः प्रयोजकव्यापारवृत्तौ दृष्टान्तोक्त्यानर्थक्यापत्तेःप्र

योजकव्यापारविषयस्य स्वातन्त्र्यस्य प्रयोज्यव्यापारे भाष्योक्तोपचारोपपादनायाक्षिप्तप्रयोजकव्यापारप्रयोज्यव्यापारवाचित्वोक्त्यर्थत्वेनैवास्य ग्रन्थस्य व्याख्येयत्वात्प्रयोजकस्य स्वामिनः संविधानाख्यो व्यापारोऽस्यास्तीति व्यधिकरणबहुव्रीहिं विगृह्य तच्च तत् प्रयोजकव्यापारं चेति विलेखनपरामर्शिना तच्छब्देन कर्मधारयविग्रहात्तस्मिन्नाक्षिप्तप्रयोजकव्यापारे विलेखने कृपिर्वर्त्तत इत्येवं योज्यम् । षडलोपादानसामर्थ्योपपादनाय नहीत्युक्तम् । भृतिदानाख्यस्य संविधानस्य विलेखनसमर्थविलेखित्राचरणत्वेन प्रयोजकव्यापारत्वोपपादनार्थं तत्समर्थमिति भाष्यावयवं व्याचष्टे * तेनेति * । दार्ष्टान्तिके योजनार्थमेवमितिभाष्यमप्याक्षिप्तप्रयोजकव्यापारप्रयोज्यव्यापारवाचित्वोक्त्यैव पूर्ववदुपपादयति * तद्वदिति । * प्रयोजकस्य दातुर्दानाख्यो व्यापारः प्रतिग्रहसमर्थप्रतिग्रहीत्राचरणरूपोऽस्यास्तीति व्यधिकरणबहुव्रीहिगर्भत्वात् स च प्रतिग्रहो सौ प्रयोजकव्यापारश्चेति कर्मधारयात्क्षिप्तदानाख्यप्रयोजकव्यापारप्रतिग्रहाख्यप्रयोज्यव्यापारवाचितैव गृह्णातेरुक्ता । ग्रह उपादान इति प्रयोज्यव्यापारमात्रे गृह्णातिस्मृतेराक्षिप्तप्रयोजकव्यापारवाचित्वायोगमाशङ्क्याक्षिप्तेतरप्रयोज्यादिव्यापारवाचित्वेन धातूनां विचित्रशक्तित्वस्य कदाचिदभिधीयमानकर्मशक्त्याक्षिप्तप्रयोज्यव्यापारः स्वयमाक्षिप्तप्रयोज्यव्यापारो वेत्यादिभावार्थाधिकरणवार्त्तिकदर्शितत्वात् प्रयोज्यव्यापारमात्रवाचिनापि प्रयोजकव्यापाराक्षेपकत्वाविरोधमाह * विचित्रेति * । पचेर्विक्लेदनफलकाधिश्रयणादिप्रयोजकव्यापारवाचित्वप्रसिद्धेर्विक्लेद-

नाख्यप्रयोज्यव्यापाराक्षेपकत्वं पक्तृकौशलविवक्षया च तण्डुलाः शीघ्रं विक्लिद्यन्तीति प्रयोगे प्रयोजकव्यापाराक्षेपं विना पक्तृकौशलविवक्षाऽशक्तेर्विक्लिदेः प्रयोजकव्यापाराक्षेपकत्वं भावार्थाधिकरणोक्तं युक्तं गृह्णातेस्तु दातृव्यापारानपेक्षे स्वयंग्रहणेपि प्रयोगात्प्रयोजकदातृव्यापाराक्षेपकता न युक्तेत्याशङ्क्य वैक्लिद्यादीनां प्रयोजकव्यापाराक्षेपकत्वेनाप्रसिद्धानामपि पक्तृकौशलविवक्षादिसहकारिकारणसंनिधानात्तदाक्षेपकशक्त्याभिव्यक्तिवद्दातृव्यापाराक्षेपशक्त्यभिव्यक्त्युपपत्तेस्तदाक्षेपतामुपपादयितुमाह * तेषामिति * दातरि प्रतिग्रहीतृत्वोक्त्युपपत्त्युपसंहारार्थं तस्मादितिभाष्यं कर्तृव्यापारस्य प्रतिग्रहसमर्थप्रतिग्रहीत्राचरणत्वेन णिजर्थप्रयोजकव्यापारत्वा-

त्तद्विषयं स्वातन्त्र्यमन्यथा प्रतिग्रहविषयत्वेनावधार्यैरमवक्लृप्तं भवति यत्तु दानं कुर्वन् प्रतिगृह्णातीत्युच्यतइत्येवं व्याचष्टे * तस्मादिति * ददातेर्दानस्यार्थैर्च्चासिद्ध्यै साध्यत्वात् प्रयोजनप्रतिग्रहप्रतिगृह्णातिशब्दः प्रयुक्तो न तु दातृव्यापारनपेक्षे प्रतिगहमात्र इत्यर्थः । तस्य चेति सिद्धान्तोपसंहारभाष्य ततश्च तस्य ददतो वारुणीष्टि-
१०१०.४ रित्येवं व्याचष्टे * इतीति * इतिकरणः ततश्चेत्यस्मिन्नर्थे चकारव्याख्यार्थं । शाखान्तरे प्रतिग्रहीतृविषयत्वेनैवोपक्रमात् भाष्यान्तरकृतैव व्याख्यायुक्तेत्याशङ्कते * एवमिति * वचनानालोचनयाधिकरणोपपत्तिं परमतेनाह * तत्रेति * न्यायव्युत्पादनस्यानुष्ठानार्थत्वाद्वचनविरोधितयार्थस्याननुष्ठेयत्वादेतत्समाधानापरितोषेण वचनालोचनोऽप्यधिकरणोपपत्तिं स्वमतेनाह * स त्विति * श्लोकं व्याचष्टे * यथोदाहृतेन तावदिति * अतिशयार्थं यद्यपिहीत्युक्तम् । शाखान्तरस्थदातृविषयोपक्रमवाक्यवत् कर्माऽङ्गत्वेनावगताया इष्टेः शाखान्तरे प्रभेदात्कर्माङ्गत्वावगतेस्तद्वशेनोपक्रमानालोचनेऽपि दातृविषयत्वावगत्युक्त्या यदि वाक्यान्तरं प्रतिग्रहीतृविषयं स्यात्ततो द्वयोर्भविष्यति न तु वाक्यान्तरमपि प्रतिग्रहीतृविषयं शाखान्तरावगतकर्माङ्गत्वेष्टिविषयतया स्पष्टं स्वातन्त्र्येण कर्माङ्गत्वमनपेक्ष्य प्रतिग्रहीतृविषयत्वावधारणाशक्तेरित्येवंप्रतिग्रहीतृविषयत्वनिरासार्थत्वेन पादत्रयं वास्तवार्थोक्त्यर्थतया व्याख्याय प्रतिग्रहीतृविषयत्वाभ्युपगमेऽपि दातृविषयत्वाविरोधोक्तिशक्तिप्रदर्शनायाथ त्वित्यनेनान्यथा व्याख्या कृता वाक्यान्तरविरोधापरिहारेण दातृविषयत्वव्याख्यां समाधाय प्रतिगृहीतृविषयत्वव्याख्यां पूर्वाधिकरणविरोधेन दूषयति। * प्रतिग्रहीत्रिति * । दातृविषयत्वव्याख्यायामार्त्विजशब्दानार्जवमाशङ्क्य पूर्वाधिकरणसिद्धान्तसूत्रस्थस्य याज्ञशब्दस्यानुपसञ्जातविरोधावस्थायां श्रुतत्वादन्यथा वा शक्यव्याख्यानत्वात्तदनुरोधेनानार्जवौचित्यं सूचयितुमाह * यत्त्विति * । वचनालोचनेऽप्यधिकरणोपपत्तिमुपसंहरति * तस्मादिति * । वाक्यान्तरस्यापि प्रतिग्रहीतृविषये ह्यवधारणाशक्तेर्मृदूक्तिमात्रार्थस्तावच्छब्दः ।

पानव्यापच्च तद्वत् ॥ ३६ ॥

वमनस्याश्वप्रतिग्रहवत्साक्षाद्वैदिकत्वाभावात् लौकिकवैदिकाविषयत्वसाम्येन चिन्तायाः प्रासङ्गिकत्वायोगेनासङ्गतिमाशङ्क्य नार-

र्थवादविषयत्वात् प्रसङ्गोपपत्तिं सूचयितुमाह * अयमपीति *। १०११९
अश्वप्रतिग्रहवाक्यस्याप्यनारभ्यवादत्वाक्त्यर्थोपिशब्दः। सात्त्वाद्वमनस्य वैदिकत्वाभावेपि वमनीयसोमद्वारा वैदिकत्वोपपत्तेः लौकिकवैदिकाविषयत्वेनापि प्रसङ्गोपपत्तिमुत्तराधिकरणस्यापि चार्त्विजयाजमाननिमित्तचिन्तार्थत्वसाम्येन प्रसंगोपपत्तिं सूचयितुमाह * तत्रेति * क्रियतइति वक्तुं प्रत्ययं प्रयोक्तव्ये तदनुग्रहायाधिकरणरूपत्वादनुवादभूता विचारयतिर्धातुः प्रयुक्त। निमित्तविवेकसहितसंदेहोक्त्यर्थं तत्रेत्याद्यासिव्यमाने नोमइत्यन्त भाष्यं व्याचष्टे * किमिति * भाष्यकारीयस्य लौकिकविषयत्वपूर्वपक्षमात्रातिदेशार्थत्वेन सूत्रव्याख्यानस्योपलक्षणार्थत्वं मत्वा स्वयं द्विविधपूर्वपक्षातिदेशार्थत्वेन तावद्व्याचष्टे * तत्रेति * व्यवहितातिदेशदोषपरिहारायाधिकरणद्वयातिदेशार्थत्वेन व्याचष्टे * अथ वेति * दोषात्त्वित्यधिकरणपूर्वपक्षसिद्धान्तयोर्द्वयोरप्यस्मिन्नधिकरणातिदेशसंभवेप्युत्तराधिकरणे वैदिकभर्ववमननिमित्तत्वपूर्वपक्षकरणाद्दत्विङ्मात्रविषयाचोदिते चेत्यधिकरणपूर्वपक्षातिदेशायोगात् सिद्धान्तरूपणेत्युक्तम्। जलोदरवदिन्द्रियवृद्धेरप्यनन्तरानुपलम्भेन दोषादित्याद्याधिकरणपूर्वपक्षहेतुनिरासादश्वप्रतिग्रहेष्टिवच्च वमनेष्टेरपि कर्माङ्गत्वेनैवार्त्विक्कर्तृकवमननिमित्तकत्वनिरासेन सर्वकर्तृकवमननिमित्तकत्वाद्द्वितीयाधिकरणपूर्वपक्षनिरासासिद्धेरधिकरणद्वयपूर्वपक्षायोगमाशङ्क्याह * केनचित्त्विति * कोसौ विशेष इत्यपेक्षायां प्रस्तुताधिकरणपूर्वपक्षे तावद्वैगुण्याख्यदोषनिरासार्थत्वाभ्युपगमेन सिद्धान्तिना दोषनिर्घातार्थत्वस्येष्टत्वाद्वैदिके च नाममात्रेण द्रव्यप्रतिपत्तिसिद्धेर्वैगुण्याभावेन तत्प्रतिसमाधानार्थतायामिष्टिविध्यानर्थक्यप्रसंगाल्लौकिके तु रसायनवैगुण्येनेन्द्रियहीनत्वाख्यदोषसंभवात्तत्प्रतिसमाधानार्थेष्टिविध्यर्थवत्त्वोपपत्तेर्विशेषमाह * तत्रेति * द्वितीयाधिकरणपूर्वपक्षेप्यश्वप्रतिग्रहवदेवेतिवार्तिके वक्ष्यमाणमृत्विक्कर्तृकवमननिमित्तत्वेपि यजमानकर्त्रविरोधाख्यं विशेषं सूचयितुं तावच्छब्दः। विशेषोक्त्यैव सिद्धं पूर्वपक्षमुपसंहरति * तस्मादिति *।

दोषात्तु वैदिके स्याद्र्थाद्धि लौकिके न दोषः स्यात् ३७।

अतिदेशाधिकरणत्वेन पूर्वोक्तानामेव वैदिकत्वसामान्यफलकल्पनलाघवश्रुतदोषनिर्घातार्थत्वायोगानां सिद्धान्तहेतूनां वाच्यत्वात्ता-

नुपेत्य दोषनिर्घातार्थत्वेनैव सिद्धान्तोक्त्यनौचित्यं शङ्कते * तैरे- वेति * वैदिकत्वसामान्यस्यायोगात्फलकल्पनलाघवस्य चाश्रापि भाष्यकृतोक्तत्वादिन्द्रियवीर्यशब्दोपलक्षितसोमयागफलस्वर्गादिवृद्धेश्च वाक्योपात्ताया वमनजन्यत्वसंभवेनेष्टस्तन्निर्घातार्थत्वसंभवाद्दोषनि- र्घातार्थत्वेन सिद्धान्तोक्त्यौचित्यमाह * न हीति * पानमात्रात्प्रतिप- त्तिसिद्धेर्वैगुण्याभावेनेन्द्रियवीर्य्यशब्दोपलक्षितप्रधानफलवृद्ध्ययोगाद्वै- दिके दोषायोगमाशङ्क्याह *तथा हीति । * सम्यग्जरणान्तायाः प्रति- पत्तेर्विधानाद्वमनेन सोमपानजन्यप्रतिपत्तिव्यापत्तौ यथा सोमपाना- त्पूर्वं प्रधानफलं स्वर्गादि न भवति तथा सोमपाने कृतेऽपि न स्यादि- त्युक्ते सम्यग्जरणस्याविधानात्तत्पर्यन्तत्वायोगमाशङ्क्य पानस्यो- त्सर्गतः सम्यग्जरणपर्यन्तत्वात् पीतस्यापि च सोमस्य सम्यग्जर- णात् प्रागविनष्टत्वात् प्रतिपत्त्यपेक्षोपपत्तेर्याज्ञिकानां चाग्नौ प्रतिपाद्य पुरोडाशादिभस्मसाद्भावादरदर्शनेन नाशपर्यन्तप्रतिपत्त्यवगमात्सु- समिद्धे जुहुयुरिति च प्रदीप्ताग्न्यधिकरणत्वनियमस्य दृष्टार्थत्वाय भस्मसाद्भावार्थत्वात् प्रतिपत्त्यर्थत्वावगतेस्तदादरस्य वेदमूलत्वा- द्विशेषतश्च सोमपानस्य हित्वमेगात्राहारिवइत्यादिमन्त्रपाठात्सम्यग्ज- रणपर्यन्तत्वविध्यवगमं सूचयितुं * सम्यग्जीर्यते पीयमानमनेनेति * सम्यग्जरणसम्यग्जीर्त्तिसाधनं रूपमुत्सर्गाख्यः स्वभावो यस्य पानस्य तदनेनेति सम्यग्जरणेन प्रतिपाद्यद्रव्यरूपस्यान्तो नाशो यया प्रतिपत्त्येति वा विग्रहविवक्षया रूपोक्तिः। प्रतिपत्ति नाशेऽपीन्द्रियवीर्यनाशात्प्रधानफलस्य चेन्द्रियवीर्यशब्दाभ्यामनु- क्तेर्वैदिके दोषायोगमाशङ्क्य यथाश्रुतस्य लौकिकेऽप्यभा- वात्कदा चिद्भावेऽपि वैदिकोपायानपेक्षत्वाद्दोषनिर्घातार्थेऽपि विध्य- योगापत्तेर्वैगुण्यं वीर्येन्द्रियवृद्ध्युक्त्या विवक्षितव्यम् । तच्च वै- दिकेऽपि तुल्यमिति परिहारसूचनपूर्वं श्लोकं व्याचष्टे * न च ताव- दिति * अनेन चार्थाद्धीति सूत्रावयवो लौकिके पुनरिति भाष्यं च वैदिके दोषोपपादनार्थत्वेन व्याख्यातम् । वीर्येन्द्रियवृद्ध्युक्तेरर्थ- वादमात्रत्वेनेष्टेर्दोषनिर्घातार्थत्वानवगमात्तद्वशेन वैदिकविषयत्वो- क्त्ययोगशङ्कार्थत्वेनार्थापीति भाष्यं व्याचष्टे * अथ त्विति * दोष- निर्घातार्थत्वायोगशङ्कार्थत्वसूचनार्थस्तुशब्दः । दोषनिर्घातार्थत्वाभा- वाभ्युपगमेनापि वैदिकविषयत्वोक्तिप्रदर्शनेन परिहारार्थं तथापीति

भाष्यं व्याचष्टे * ततइति * वैदिकेपि वमनस्यानङ्गत्वेन क्रत्वनुपस्थापकत्वात् कल्पनापत्तिसाम्यमाशङ्क्य पानद्वारा क्रतूपस्थापकतामाह * वैदिके त्विति * ।   १०१२।१

सोमेन्द्रचरोर्यजमानपानव्यापादविषयत्वम् । अधि १०

तत्सर्वत्राविशेषात् ३८ ।

वैदिकविषयत्वेनैव कर्माङ्गत्वाद्यजमानकर्तृकत्वसिद्धेर्यो वमति स निर्वपेदिति सामानाधिकरण्याच्च तत्कर्तृकस्यैव वमनस्य निमित्तत्वावगते· पूर्वपक्षायोगेनाधिकरणानारम्भमाशङ्क्य वमनस्य निमित्ततयोद्देश्यत्वेनाविवक्षितं समानकर्तृकत्वविशेषणत्वात् पूर्वपक्षोपपत्तेर्विचारोपपत्तिमाह * अश्वेति * तत्सर्वत्रेति सूत्रावयवव्याख्यार्थं तदेतदिति भाष्यं व्याचष्टे * किमिति * अविशेषोक्तिव्याख्यार्थं न विशेष इति भाष्यं प्रतिपत्तिविनाशविषयत्वेन व्याचष्टे * यथा चेति * हेत्वर्थे यथाचेति चशब्दः । इष्टेर्दोषनिर्घातार्थत्वात् स्वामिस्थस्यैव प्रधानफलभोक्तृत्वयोग्यत्वविघातलक्षणस्य दोषस्य निर्घात्यत्वाद्विशेषशङ्कानिरासार्थत्वेन वैगुण्यमात्रस्य दोषत्वादृत्विग्गतस्यापि च वैगुण्यस्य द्रव्यादिवैगुण्यवन्निर्घात्यत्वाद्दोषनिर्घातार्थत्वाख्योपि न विशेषइत्येवं भाष्यस्थ कश्चिच्छब्दं व्याचक्षाणस्तस्मादिति पूर्वपक्षोपसंहारभाष्यं व्याचष्टे * तस्मादिति * वीर्येन्द्रियविध्युक्तेरर्थवादमात्रत्वेन दोषनिर्घातार्थत्वे प्रमाणाभावादारादुपकारित्वैव पूर्वपक्षिणोभिमतेति सूचनायाथापीत्युक्तम् । मृदूक्त्यर्थोथापिशब्द· ।

स्वामिनो वा तदर्थत्वात् ३९ ।

आरादुपकारित्वाभ्युपगमेनापि सिद्धान्तोक्तिशक्तिप्रदर्शनार्थं सौत्रहेत्वनादरेण प्रतिज्ञां तावद्व्याचष्टे * यद्यपि तावदिति * प्रश्नपूर्वं निमित्तनैमित्तिकयोः सामानाधिकरण्येनैककर्तृकत्वावगमादिति स्वयं हेतुमाह *कुतइति* तेन वाक्यशेषस्थेन यच्छब्देन सह विध्युद्देशस्य संबन्धेपि विध्युद्देशे तच्छब्दाभावान्निमित्तनैमित्तिकयोरेककर्तृकत्वप्रतीत्ययोगमाशङ्क्य यत्तदोर्नित्यसंबन्धाद्यच्छब्देन तच्छब्दाक्षेपं दर्शयितुमाह *य इति । * तथापि सोमवामिन इति विध्युद्देशस्थया षष्ठ्या कर्तृभेदप्रतीतेः समुच्चयाङ्गीकरणेन चाबाधसंभवेन्यतर

बाधायोगाद्यो यजमानो वमति स निर्वपेत्सोमवामिनश्चर्त्विजः संब-
न्धी यो यजमानः स निर्वपेदित्यर्थावगतिमाशङ्क्यैकस्मिन् वाक्ये स्व-
कर्तृकस्यान्यकर्तृकस्य च वमनस्य निमित्तत्वोक्त्ययोगाद्वमनादित-
पातृवैगुण्यप्रतिसमाधानार्थत्वोक्तौ च सोमवामिन आत्मनोऽर्थं निर्व-
पेदिति द्वादशाहीनस्येतिवत्तादर्थ्यषष्ठीसंभवे संबन्धिव्यतिरेकज-
नितषष्ठीकल्पनायोगात् कर्तृभेदाप्रतीतिं सूचयितुमाह *तत्रेति*
वमनस्य निमित्तत्वेनोद्देश्यत्वात्समानकर्तृकत्वविशेषणाविवक्षामा-
शङ्क्य यच्छब्दसम्बन्धात् प्राङ्निमित्तत्वाप्रतीतेस्तस्मात् पश्चात्प्रतीय-
मानस्य निमित्तत्वस्य कर्त्रैकत्वविशिष्टस्यैव प्रतीतेः कर्त्रैकत्वस्यो-
भयवदुद्देश्यान्तर्गतत्वेनोद्देश्यविशेषणत्वाभावाद्विवक्षोपपत्तिसूचना-
१३।२ र्थत्वेन श्लोकं व्याख्यातुमाह * न चेति * भाष्यमप्यस्मिन्नर्थे यत्र
ज्योतिष्टोमादौ कर्मणि सोमोऽवगम्यते तद्यजमानार्थं फलसिद्ध्यै
कार्यतयाकमर्थ्यतेऽपेक्ष्यतेऽनेनेत्यर्थोक्त्या कर्त्रभिधानाद्यजमानकर्तृ-
कसौमेन्द्रमपि कर्म यजमानकर्तृकं ततश्च यो वमति स निर्वपेदिति
सामानाधिकरण्याद्वमनकर्तृस्वामिकर्तृकमेव न च सोमवामिन इति
षष्ठ्येवमनयोर्भिन्नकर्तृकतोच्यते षष्ठ्या हि सौमेन्द्रं कर्म सोमवाम्यु-
पकाराय श्रूयते न चैवं पुरुषार्थत्वोपपत्तेर्ज्योतिष्टोमादिकर्मानङ्गत्वा
त्तत्समानकर्तृकत्वासिध्या तद्वशेन यजमानवमननिमित्तकत्वासिद्धिः।
यतो वमनोपस्थापितज्योतिष्टोमादिकर्मानयाष्ठ्योपकुर्यादिति कल्पना-
लाघवसहकृतार्थापत्तिकल्पितज्योतिष्टोमाद्युपकारवाचिपदाध्याहार-
सहितवाक्यावगतकर्माङ्गत्वानुवादित्वात् षष्ठ्यास्ततसौमेन्द्रं कर्म
ज्योतिष्टोमाद्यङ्गं सत्सोमवामिनः शक्नोत्युपकर्तुं ततश्च नर्त्विज
सोमवामिनः शक्नोत्युपकर्तुमित्येव योज्यम् । प्राप्तपदार्थोपसंहारकप्रयो-
गवाक्यावगतप्रधानसमानकर्तृकत्वबाधेनेष्टेः प्रापकवाक्यावगतवम-
नसमानकर्तृकत्वावगतिः ऋत्विक्कर्तृकवमननिमित्तकत्वेऽप्यविरुद्धे-
त्याशङ्कार्थमथेतिभाष्यमृत्विगन्तराक्षेपेऽन्यन्तराक्षेपे च हेत्वभावा-
दयुक्तमाशङ्क्यर्त्विगर्थे कर्मणि यजमानार्थप्रधानदाक्षिणयातिदेशप्रा-
प्तदक्षिणाबाधायोगात् स्वामिनि च तद्विरोधादृत्विगन्तराक्षेपोक्त्या
याजमानानां चाग्नीनामृत्विक्संबन्धाभावादग्न्यन्तराक्षेपोक्त्योपपा-
दयितुमाह * अथेति । * तथासतीत्यादिभाष्यं वृद्धसोमकर्माङ्गं वा
सौमेन्द्रं कर्म सोमवाम्यृत्विगङ्गं वा वाच्यं न च तद्द्वयमप्यृत्विगग्निषु
नदीयैर्ऋत्विग्भिः क्रियमाणे संभवति यतस्तत्र तेष्वात्मीयेष्वग्निषु

करणे देशभेदापत्तेः साङ्गं च प्रधानं प्रत्यध्वर्य्वादीनां गुणभूतत्वात्त-
त्समाप्त्युत्तरकालं करणेन कालभेदापत्तेर्ऋत्विग्भेदाच्च कर्तृभेदापत्ते-
र्नाध्वर्य्वादयो वृद्धसोमकर्मोपकाराख्य फलं प्राप्नुवन्ति अध्वर्य्वाद्यर्थे
च क्रियमाणे केवलपुरुषार्थत्वाश्रयणापत्तेर्निमित्तोपस्थापितक्रतूपका-
रद्वारावधारितयाजमानोपकारित्वत्यागप्रसंग इत्येवं व्याख्यातुमाह
* ततश्चेति * तदर्थमितिभाष्यावयवव्याख्यानायाथात्मार्थबुद्ध्येवे-
त्याद्युक्तया क्रियमाणे चेति चकारसूचितानिष्टापत्त्यन्तरव्याख्यार्थं
सूचितं सदृशं चेत्युक्तम् । इतीति सिद्धान्तोपसंहारभाष्यं व्याचष्टे
* तस्मादिति । * अङ्गसादृगुण्यार्थवमनस्यमानकर्तृकत्वबाधनेष्टेः
प्रधानसादृगुण्यार्थप्रधानसमानकर्तृकत्वावगतिः ऋात्विक्कर्तृकवमन-
निमित्तकत्वेप्यविरुद्धेति स्वयं शङ्कते * अथ त्विति । * पूर्वं यच्छ-
ब्दसंबन्धादिति वार्त्तिकनिषिद्धानिषिद्धनिमित्तनैमिकभिन्नकर्तृत्वापत्त्या
निरस्येति * तथा सतीति । * सोमवामिन इति षष्ठीश्रवणाद् भिन्न-
कर्तृकत्वसमर्थनमाशङ्क्योपक्रमावगतसमानकर्तृकत्वबाधेनोपसंहारा
वगतभिन्नकर्तृकत्वाभ्युपगमायोगादुपसंहारानुरोधेनोपक्रमेप्यश्रुतष-
ष्ठ्यर्थकल्पने तु स्वरसावगतसामानाधिकरण्यबाधापत्तेस्तदभ्युप-
गमे च स्वामिवमनस्यानिमित्तत्वापत्तेरुभयनिमित्ताश्रयणे वा वैरू-
प्यापत्तेः शब्दसामञ्जस्यावगतात्सामानाधिकरण्यात् स्वामिवमनस्यैव
निमित्तता युक्तेत्याह * तत्समर्थने चेति । * वक्ष्यमाणानां सर्वेषां
पक्षाणां संनिपत्योपकारित्वविषयत्वसूचनायारादुपकारित्वपदे स्वा-
मिवमननिमित्तपक्षमुपपादितमुपसंहरति * एवं तावदिति * स्वामि- १०१४।२
संस्कारातिरिक्तानां सर्वेषां पक्षाणामनभिमतत्वेपि सर्वपक्षेष्वृत्विग्व
मननिमित्तत्वानिरासव्यक्तिप्रदर्शनार्थं प्रतिपत्तिगतसम्यग्जरणप-
र्यन्तत्वनियमभ्रेषजनितफलवृद्धिसमानार्थत्वपक्षे तावदिष्टेः स्वामिक-
र्तृकत्वासंदेहात् सामानाधिकरण्यावगतवमनसमानकर्तृकत्वसिद्ध्यै
स्वामिवमननिमित्तत्वावसायमाह * यदा त्विति * वाक्यशेषोपनीतं
च तद्यागशेषप्रतिपत्तिनियमशेषोपजनितं च फललाभायोग्यत्वं चेति-
विग्रहः । लाभायोग्यत्वं तदाशङ्केति तच्छब्देन परामृष्टम् । ततश्च यच्छ-
ब्देनेष्टिवमनयोरेककर्तृकत्वनिर्देशाद्यजमानवमन एवेष्ट्या भवित-
व्यमिति वक्ष्यमाणानुषङ्गेण पूरणीयम् । येन केन चिद्वर्णितेपि प्रति-
पत्तिसिद्धेः ससकृतैरेव वषट्कर्त्रादिभिर्भक्षयितव्यमिति नियमस्य
भक्षयितृगतप्रयोजनापेक्षायां भागस्तु ब्रह्मादीनामुपकारकै शक्यः

केन चित् प्रकारेण दृष्ट उपकारः कर्तुं भक्षयमाणैरित्यादिभाष्यं लोच-नया भक्षयितृगतदृष्टसंस्कारार्थत्वावगतद्रव्यप्रतिपत्त्यात्मकस्यापि च द्रव्यसंस्कारस्य भक्षणकाल एव निर्वृत्तत्वेन सम्यग्जरणानपेक्ष-त्वात् सम्यग्जरणपर्यन्तत्वानियमस्यापि भक्षयितृसंस्कारापेक्षत्वेन तादर्थ्यावगतेः संस्कारभ्रेषे कर्तृवैगुण्यं वृद्ध्याख्यमुपजातमिति वाक्य-शेषवशात् कल्पनेऽप्यृत्विग्गतकर्मशेषसमापनसामर्थ्याख्यं संस्कार-भ्रेषस्यापि यजमानफलविघ्नप्रसञ्जकत्वेनेष्टेस्तत्कृतयजमानफलवि-घ्नप्रसंगनिवृत्त्यर्थत्वावगत्या यजमानकर्तृकत्वावसायाद्यच्छब्देन चेष्टि-वमनयोः समानकर्तृकत्वनिर्देशाद्यजमानवमन एवेष्टिरित्याह * यद्यपीति * समस्तां गोपेत प्रधानानुष्ठानविध्यन्यथानुपपत्त्यो-त्तराङ्गानामपि फलापूर्वोत्पादने प्रधानोत्पत्त्यपूर्वसहकारित्वावगमा-त्तदकरणे प्रधानोत्पत्त्यपूर्वाणां प्रधानानुष्ठानानन्तरमेव निष्पन्नाना-मपि फलापूर्वोत्पादनाशक्त्यवगमवत्प्रतिपत्तेरपि प्रथमकृतसामवायि-काङ्गमात्रानुगृहीतप्रधानान्तरमुत्पन्ने प्रधानोत्पत्त्यपूर्वे क्रियमाणायाः प्रात्यात्मिकप्रधानोत्पत्त्यपूर्वसहकारित्वावगमात्तस्याश्च पूर्वोक्तान्न्या-यान्मन्त्रवर्णाच्च सम्यग्जरणपर्यन्तत्वावगतेर्यस्मिन् सोमयागाभ्या-से वमनात्प्रतिपत्तिर्भ्रष्टा तज्जनितस्यापूर्वस्य सहकार्यभावात् फला-पूर्वोत्पादनाशक्त्यवगतेस्तस्य फलापूर्वोत्पादनशक्त्याधानाख्यसंस्का-रार्थेष्टिरित्ययमपि पक्षो यजमानफलविघ्नप्रसंगनिवृत्त्यर्थत्वेनेष्टेर्यजमा-नकर्तृकत्वावसायाद्यच्छब्देनचेष्टिवनयोरेककर्तृकत्वानिर्देशाद्यजमान-वमन एवेष्टया भवितव्यमित्येतेन न्यायेन व्याख्यात इत्याह * एते-नेति * सम्यग्जरणपर्यन्तत्वानभ्युपगमेन वमने सत्यपि निषिद्धसेव-नवद्विहिताकरणस्याप्यनापत्ते मत्वेष्टेर्दोषनिर्घातार्थत्वानाश्रयणादू-जृम्भानिमित्तमन्त्रोच्चारणवन्नैमित्तिकक्रतुपुरुषधर्मत्वाभ्युपगमेपि स्वामिकर्तृकत्वाद्वमनसमानकर्तृकत्वाच्च स्वामिवमनमेव निमित्त-मित्याह * यद्यपीति ।* वमनोपस्थापितक्रतुविवक्षया प्रकरणोक्तिः। सिद्धान्तमुपपाद्य यथा च स्वामिवमनेन प्रतिपत्तिविनाशस्तथार्त्वि-जेनापीति पूर्वपक्षवार्त्तिकोक्तं साम्यमनुभाषणपूर्वं निरस्यति । * य-त्त्विति * कर्तृनियमरूपप्रतिपत्त्यंशजन्यत्वात्संस्कारांशत्वेनोक्तः । कथं समाध्यर्थत्वेनष्ट्या विधानमित्यपेक्षायामाह * सर्वेष्विति * क्रत्वर्थताराद्युपकारिता पुरुषार्थत्व क्रतुगतपुरुषसंस्कारत्वं द्रव्यप्र-तिपत्तिनियमभ्रेषभक्षयितृसंस्कारभ्रेषयोर्दोषोक्त्या विवक्षितत्वा-

द्वौ दोषनिर्घातार्थत्वपक्षौ वान्तसोमयागाभ्यासापूर्वार्थत्वं चेति पञ्चस्वपि पक्षेषु ऋत्विग्वमननिमित्तेष्टिविधेर्निरस्तत्वात् द्रव्यप्रतिपत्तिश्रेष. कर्तृसंस्कारनाशो वा नेष्टिं गृह्णातीत्यर्थः । समाध्यपेक्षायामपि समाध्यर्थेष्ट्यग्रहणात् क्रतुवैगुण्यमपरिहृतं स्यादित्याशङ्क्याह *अतश्चेति* । भुव स्वाहेत्याग्नीध्रीये होतव्यामिति सामान्यविहितेष्यनादरार्थ. किंचिच्छब्द. । प्रस्तुताधिकरणानुपयोगेन चार्त्विग्वमनस्य दुष्टादुष्टत्वाविवेकवत् क्रत्वर्थत्वादिविवेकस्याप्यनादरणीयत्वाञ्च वयं विवेकानुक्त्योपलम्भनीया इत्याह * न चेति * नन्व- १० १५।२
ज्ञानार्थिनं तु प्रतिजञ्भ्यमानशब्दस्य यः क्रतुयुक्तपुरुषवाचित्वपक्षः स एव यः सोमं वमतीति यच्छब्दस्यापि ग्रहीतव्य इत्याह * अथापीति । * दोषनिर्घातार्थत्वानाश्रयणेन जञ्भ्यमानपक्षस्योक्तत्वाद्दोषात्तु वैदिके स्यादिति पूर्वाधिकरणसिद्धान्तसूत्रे च दोषनिर्घातार्थत्वाभिधानात्सूत्रविरोधामिन्द्रियेण वीर्येणेत्यनियतानेकदोषकीर्तनस्य प्रधानफलोपलक्षणार्थत्वावगतेर्वरुणग्रहणवदनुपपत्त्यभावात्सोमपीथवृद्धिसंकीर्तने च योग्यानुपलब्धिविरोधस्य शङ्कितुमप्यशक्यत्वाद्धन्व मगात्रेत्यादिमन्त्रप्रकाश्यत्वान्यथानुपपत्त्या च सम्यग्जरणस्यानुष्ठेयत्वावगतेर्वमने सति विहितसम्यग्जरणाकरणानिषिद्धवमनसेवनापत्त्योरपरिहार्यत्वाद्वमनस्य दुष्टत्वावगतेर्दोषस्य च निर्हरणापेक्षत्वाद्दोषनिर्घातार्थत्वेन चेष्टेरपेक्षितपुरुषसंस्कारार्थविधिसंभवे, नपेक्षितसंस्कारा तदर्थविध्ययोगान्न्यायविरोधं चाशङ्क्य वाक्यशेषावगतं दोषनिर्घातार्थत्वं परिगृह्यैत्येवं दोषनिर्घाताश्रयणसूचनार्थः परिशब्दः । स्वामिसंस्कारार्थतैव तदनर्थकत्वोक्त्या सूत्रकृताप्युक्तेत्याह * तथा चेति * अनन्तरोक्तन्यायानुसारोपि चकारेण सूचितः । अस्मिंश्च पक्षे भाष्यं यथाश्रुतमेव योज्यम् । सौमेन्द्रस्य कर्मणः सोमवाम्यृत्विगुपकारार्थत्वेपि सोमवाम्युपकारार्थत्वस्याप्युपपत्तेः कथं यजमानार्थत्वावगतिरित्याशङ्क्य क्रतुयुक्तपुरुषसंस्कारत्वाद्यजमानास्तु तत्प्रधानत्वादिति न्यायेन यजमानार्थत्वोपपादनार्थं सौमेन्द्रं कर्म वमनोपस्थापितकर्माङ्गतामनुभवदेव सोमवामिन उपकरोति यजमानस्यैव च तथोपकर्तुं शक्नोति नार्त्विजं ततश्च यजमानार्थत्वेन सौमेन्द्रस्य कर्मणः शास्त्रफलं प्रयोक्तरीत्यनेन न्यायेन यजमानकर्तृकत्वात्तस्य च वमनसमानकर्तृकत्वानिर्देशाद्यजमानं वमन एव सौमेन्द्रं कर्मेति पूरणीयम् ।

लिङ्गदर्शनाच्च ४० ।

लिङ्गत्वमुपपादयितुमाह * श्रूयत इति * सोमलक्षणस्य पुरोडाशादिभक्षणग्रहार्त्विक्स्वशिष्टकर्मानुष्ठानसामर्थ्याधानाशक्तेस्तद्वैगुण्येपि च दक्षिणालाभाख्यफलाविघातात्स्वामिन एव पानात् प्रधानफलभोक्तृत्वशक्त्याधानाख्या समृद्धिस्तद्वैगुण्याच्च भोक्तृत्वशक्तिनाशाख्या वृद्धिरित्यर्थः । तस्मात्तस्यैव वमन इष्टिरिति सिद्धान्तमुपसंहरति * इतीति * ॥

आग्नेयाष्टाकपालचरोर्द्व्यवदानमात्रस्य होतव्यत्वम् । अधि ॥११॥

सर्वप्रदानं हविषस्तदर्थत्वात् ४१ ।

वैदिकस्य यजमानकर्तृकस्य सोमवमनस्यानिमित्तत्वेऽभिहिते देवतोद्देशेन ग्रहपात्रे चमसपात्रे वा गृहीतस्य सोमस्य सर्वस्य होतव्यत्वाच्छेषाभावेन पानानुपपत्तेस्तद्वमनस्य निमित्तता न युक्तेति पूर्वाधिकरणसिद्धान्ताक्षेपेण प्रत्यवस्थातुं तत्तुल्यन्यायपुरोडाशविचारादनन्तरसंगार्नं द्व्यवदानवाक्यस्याग्नेयादितद्धितश्रुत्याऽल्पं जुहोतीत्यस्य चैन्द्रवायवादितद्धितश्रुत्या सह विरोधाविरोधविचारद्वारा कृत्स्नस्य पुरोडाशस्य सोमस्य च प्रक्षेपोङ्गं द्व्यवदानमात्रस्य सोमावयवमात्रस्य वेति शेषविचाराद्विरोधाविरोधप्रकरणशेषलक्षणसंगती चोदाहरणसंदेहभाष्ये च स्पष्टत्वादव्याख्याय पूर्वपक्षसूत्रव्याख्यार्थं किंप्राप्तमिति भाष्यं सर्वत्यागस्य सिद्धान्तत्वेन पूर्वपक्षयितुमशक्यत्वात्सर्वप्रक्षेपार्थत्वेन व्याचष्टे * अष्टाकपालादीति * आग्नेयादितद्धितैर्देवतार्थत्वोक्तावप्यष्टाकपालादिशब्दैर्विषयसमर्पणादवगमिततोक्ता । समस्तस्य देवतार्थत्वेपि प्रक्षेपो द्व्यवदानमात्रस्य भविष्यतीत्याशङ्क्यमानस्य त्यागस्य हस्तादिनोपादाय देशान्तरे प्रक्षेपं विनानभिव्यक्तेर्यथा च देवदत्तायेदं न ममेति स्वत्वनिवृत्तिपरस्वत्वापादनसंकल्पो मानसं दानमेवंविधशब्दोच्चारणं वाचिकं देवदत्तहस्ते प्रक्षेपः कायिकं त्रिविधदानाभिव्यक्तिं च विना न देवदत्तीयत्वसिद्धिस्तथा त्यागस्यापि लोके त्रैविध्यप्रसिद्धेस्त्रिविधत्यागानन्तरमेव च गृहदेवतापूजादौ देवतास्वामिकत्वप्रसिद्धेः प्रक्षेपस्यापि त्यागान्तर्भावादनन्तर्भावेपि वा प्रक्षेपात्तस्यैव देवतोद्देशेन द्रव्यत्यागस्य द्रव्यदेवतान्वयापादकत्वादाग्नेयादिचोदनयैव प्रक्षेपविध्यवगतस्तस्य चाहवनी-

याश्रयत्वविधानादग्निमुखार्थवादाच्च समस्तस्याहवनीयप्रक्षेपावग-
तिरुक्ता। न्यायावगतस्यापि प्रक्षेपस्य शेषकार्यविध्यन्यथानुपपत्त्यान-
नुष्ठेयत्वावगमात्पूर्वपक्षानर्थक्यं शङ्कते *किं पुनरिति * परेषां समा-
धानं दूषयितुमुपन्यस्यति*मन्यामहे*दूषयति*नन्विति*। स्वमतेन
समाधातुमुपक्रमते * अतइति * कोऽसावभिप्राय इत्यपेक्षायामाह
* विद्यमानेष्विति * श्लोकं व्याचष्टे * यदा हीति * शेषसद्भावे
शेषकार्योत्पत्तौ विद्यमानैकदेशिसंयोगादिति चतुर्थाधिकरणसिद्धा-
न्तहेतुना शेषकार्याणामेकदेशप्रयोजकत्वं सर्वप्रक्षेपेण शेषभाव वप्र-
योजकहेत्वभावाद् द्रव्यान्तरोत्पादनेन शेषकार्योपपत्तिरित्याशयः। पुरो-
डाशान्तरोक्त्या सान्नाय्ये अवदानमात्रेऽपि दधिपयसोरविनाशात्स-
र्वप्रक्षेपाभावः सूचितः। अस्मिंश्च पक्षे द्रव्यस्य शेषकार्याङ्गत्वादेका-
ङ्गस्य चान्याङ्गयोगात्पञ्चानां शेषकार्याणामर्थं पुरोडाशपञ्चकोत्पाद-
नसूचनार्थं बहुवचनं पुरोडाशान्तरेष्ववशिष्टवाचिशेषशब्दायोगं शङ्कते
*शेषादिति*अन्यवाचित्वेन शेषशब्दमुपपादयति *उच्यतइति* सिद्धा- १०१६।८
न्तेऽन्यवाचित्वशङ्कानिवृत्त्यै नाऽस्माकं पूर्वपाक्षिणां मते हविरन्तराशयः
शेषशब्दो भविष्यतीत्युक्तम्। दृष्टान्तद्वयव्याख्यापूर्वं श्लोकं व्याचष्टे*य-
थैवेति*। त्वाष्ट्रपात्नीवतपशुयागाख्यस्य पूर्वस्य कर्मणः पर्यग्निकृतं पा-
त्नीवतमुत्सृजन्तीत्यनेन पर्यग्निकरणान्तस्यैव पर्यवसानविधानात्प्रत्यया
नुग्रहार्थं संस्थापयन्तीपरेण पञ्चमलकारेणाज्येन करोतीत्याज्य-
विशिष्टकर्मान्तरविध्यवगतेः शेषशब्दस्यैकावयवविगतोपयुक्तावयवा-
न्यावयवत्वाख्यावशिष्टवाचित्वायोगात्तद्वैनकोपाध्यन्वितोपयुक्तैकप-
दार्थान्यपदार्थत्वगुणयोगेनानुबन्ध्यपशुयागान्वायात्यकार्यार्थत्वाख्य-
कोपाध्यन्वितोपयुक्तपात्नीवतपशुयागान्याज्ययागाख्ये कर्मान्तरे पूर्वे-
णा कर्मणाऽन्वायात्यकार्यं कृतेनुष्ठेयत्वात्तेनाधिके त्वष्टृपत्नीवद्वे-
स्यत्वसाम्यात् त्वत्सदृशं वा शेषशब्दप्रयोग इति यथा नवमान्त्ये व-
क्ष्यते यथा च ततः शेषेण विशिष्टदेशकुलजातिरूपायुःश्रुतवृत्तवि-
त्तसुखवतो जन्म प्रतिपद्यन्त इति गौतमवचने स्वर्गफलस्य ज्यो-
तिष्टोमादेर्निःशेषस्य स्वर्ग एवोपयुक्तत्वादन्यफलस्य च फलान्तरे
व्यापारायोगाच्छेषशब्दोऽन्यस्य चित्रादेर्ज्योतिष्टोमाद्यतिरिक्तस्य तत्स-
दृशस्य वाचक इति गौतमीयेऽपि तच्छेषस्तस्माच्चित्राद्यपेक्षत्वयोति
चित्रापरिहारवार्तिकेऽभिहितं तथा शेषात्स्विष्टकृते समवद्यति

शेषादिडामवद्यति शंयुवाककाले हविःशेषानृत्विजो भक्षयन्तीत्य-
त्रापि हविरन्तरं तेनैवाधिक्याद्यनपेक्षेणैवान्यत्वेन प्रधानस्वरूपसा-
धनातिरिक्ततदङ्गसाधनत्वादाधिक्येन वाशब्दात्पुरोडाशतया सादृ-
श्येन वा शेषशब्दप्रवृत्तिनिमित्तेन शेषादित्येवरूपेण शब्देनाभिधा-
स्यत इति वक्ष्यमाणानुपङ्क्तेण व्याख्येयम् । अङ्गभूतशेषकार्यार्थेषु पुरो
डाशेषु प्रधानार्थपुरोडाशाङ्गत्वोपचारेणाङ्गवाच्छिशेषशब्दो भविष्यती-
त्यन्यथोपपादयति * अथ वेति । * एवंसति मुख्यार्थत्यागदोषत्व-
माह * शेषेति * विद्यमानसंयोगायोगेन च शेषकार्याणां द्रव्यान्त-
रोत्पादनप्रयोजकत्वमेकदशद्रव्यश्चेत्येतदधिकरणाशङ्कासूत्रे तस्य वि-
द्यमानस्यैकदेशिनः समस्तस्य प्रधानदेवतायै निर्देशाच्छेषकार्यार्थ-
मन्यत्द्रव्यमर्थादुत्पाद्यमिति सूत्रकारोपि वक्ष्यतीत्याह * यथेति । *
शेषकार्यविधानान्यथानुपपत्त्या सर्वप्रक्षेपाननुष्ठानावगमेपि प्रयोजनान्त-
रसद्भावाद्विचारोर्थवान् भविष्यतीत्यन्यथानर्थक्यशङ्कां परिहर्तुमार-
भते *अथापीति* न च प्रयोजनान्तरसद्भावेपि पक्षोक्तप्रयोजनाभा-
वाद्विचारानर्थक्यं शङ्कनीय यतो नावश्यं पक्षोक्तेनैव प्रयोजनेन विचा-
राक्षेपकेण भाव्यं किंत्वन्यदपि प्रयोजनमाक्षेपक संभवतीत्याह
* नावश्यमिति * इदमाऽन्यपरामर्श । किं तदित्यपेक्षितेपि वा शेष-
१०१७।२ भाजां स्यादिति पाष्ठसूत्रवक्ष्यं प्रयोजनमाह * यदेति * शेषकार्यार्थ-
शेषस्थापनाऽभ्युपगमे शेषकार्याङ्गत्वेन शेषविनियोगस्याऽभ्युपगमनी-
यत्वादुत्तरार्द्धादिचोदनाविनियुक्तैकदेशानुवादित्वेन च शेषशब्दस्य
विनियोजकत्वायोगादुत्तरार्द्धादिशब्दस्य च पुरोडाशकपालशब्दवद-
न्यार्थवाचित्वाभावेन समस्तपुरोडाशस्य प्रधानाङ्गत्वे तदेकदेशस्या-
न्यत्र विनियोगायोगात् प्रधानादेकदेशमाच्छिद्य स्विष्टकृदादौ विनि-
योगापत्तेः पुरोडाशस्यावयवशोऽनेककर्मसाधनत्वप्रसङ्गेनानेकप्रयु-
क्तत्वप्रसङ्गात् प्रधानार्थावदानाशादिष्विव स्विष्टकृदाद्यर्थावदान-
नाशादिष्वपि हविरन्तरोत्पादनापत्ति प्रधानचोदनावशेनैव तु शेष-
स्थापने शेषकार्याणां तत्प्रतिपत्त्यर्थत्वेनाप्रयोजकत्वापत्तेस्तदर्थावदा-
ननाशादिषु यस्य सर्वाणि हवींषि नश्येयुर्वा दुष्येयुर्वापहरेयुर्वाज्येन
ता देवताः परिसंख्याय यजेतेति वचनात् स्विष्टकृद्यागस्याज्येन
करणेन बृहट्टीकायामुक्तापि शेषकार्यान्तरायामकरणं षष्ठे वक्ष्यमाणं
सिद्धं भवतीत्याशयः । एतदेवोपसंहरति * तस्मादिति * ।

निरवदानात्तु शेषः स्यात् ॥ ४२ ॥

सिद्धान्तसूत्रव्याख्यार्थे निष्कृष्येत्यादिभाष्यं अवदानवाक्येन छिद्रवखण्डनसंस्कृतस्य द्रव्यस्य चतुरवत्तवाक्यविहितहोमाङ्गत्वे हविर्वाक्येन च संस्कारस्य पुरोडाशादिहविर्विषयत्वेभिहितेपि कृत्स्नस्य हविषो छिद्रवखण्डितस्य होमोपपत्तेः सर्वहोमनिरासादयुक्तमाशङ्काापरमपीत्यपिशब्देनावदेयावयवविधायि तत्परिमाणविधायि च वाक्यमुपन्यस्तमिति सूचयन् व्याचष्टे * यदीति * । छिद्रवखण्डनसंस्कारस्य हविरन्तरविषयत्वशङ्कानिवृत्त्यै तस्मादित्युक्तम् । एवमादीत्यादिशब्देनापस्तरणाभिघारणयोर्होतव्यद्रव्यचतुरवत्तत्वसंपादनार्थत्वद्योतकचतुरवत्तशब्दयुक्तत्वेन अवदानावृत्तावुपस्तरणाभिघारणाभावेपि चतुरवत्तनिष्पत्तेरुपस्तरणाभिघारणानर्थक्यापत्तिसूचनद्वारा अवदाननावृत्तिलिङ्गभूतं चतुरवत्तं जुहोतीति होमविधायि वाक्यं गृहीतम् ॥

उपायो वा तदर्थत्वात् ॥ ४३ ॥

वाशब्दोक्तअवदानमात्रहोमसिद्धान्तनिरासहेतुत्वेन संस्कारवाचितयोपायोक्तिव्याख्यार्थं यत् जुहोतीत्यादिभाष्यं यदष्टाकपालादिहविर्जुहोति तद्छिद्रवखण्डनसंस्कारेण कृत्स्नं व्याप्तव्यमिति व्याप्यत्वाख्यकर्मत्ववाचिना संस्कर्तव्यमितितव्यप्रत्ययेन कृत्स्नहविर्व्याप्त्यभिधानादवदानादिवाक्यानामाग्नेयादिवाक्यानुसारितोक्ता होतव्यमितिभाष्यावयवेन च होतव्ये द्रव्ये संस्कारमात्रं विधीयते न तु छिद्रवखण्डितद्रव्यं साक्षाद्धोतव्यं विधीयते न पुरोडाशस्य व्रीहिवत्प्रदेयप्रकृतित्वकल्पनात् कृत्स्नहोमाभावः स्यादित्युक्तमित्येवं व्याख्यातुमाह *यदीति । प्रत्यासन्नतरोक्त्या साक्षात्प्रदेयविधायितोक्ता संस्कारवाक्योक्त्या प्रदेयवाक्यत्वं निरस्तम् । आद्यभाष्यावयवव्याख्यार्थमविरोधेनैव चेति वार्तिकावयवमुपपादयितुं शक्यते हीत्युक्तम्। अतो यत् कृत्स्नं हविर्जुहोति तत् छिद्रवदायावदायेत्येवमुपायमिति अवदानशास्त्रार्थः पूर्वाग्नेयाद्युत्पत्तिवाक्यवशेन कृत्स्नस्य हविषो होमार्थत्वावगमाद्भवतीति सूत्रतात्पर्यं भाष्योक्तं विवृणोति *अतइति*। सिद्धान्त्युक्तशास्त्रार्थनिरासार्थत्वेन सौत्रवाशब्दव्याख्यार्थं न छिद्रवखण्डितस्यभाष्येति व्याचष्टे * नैनेनेति । * सूत्रार्थोपसंहारार्थत्वेन

कृत्स्नं चेति भाष्यं व्याचष्टे * तस्मादिति । * ह्यवदानशब्दस्था
श्रुतक्रियाभ्यावृत्तिगणनार्थसुच्प्रत्ययकल्पनापत्तेर्द्विरवदायावदायेत्ये-
वमर्थायोगाद्द्वयोरवदानयोः समाहारस्य ह्यवदानशब्दार्थत्वावगते-
रेकवचनाच्चैकस्यैव ह्यवदानस्य होतव्यत्वप्रतीतेरेकवचनानादरे
तु तदाक्षेप्यसमाहाराविवक्षापत्तेः यावद्द्विरवदानाभ्यामेव दानब-
हुत्वापत्त्या द्वित्वनाशप्रसङ्गेनाह्यवदानस्य होमप्रसङ्गात् कृत्स्नहवि-
र्विषयः सन् होमो यथाश्रुतैकह्यवदानेतिकर्त्तव्यताकः सकृन्न शक्यः
कर्त्तुमिति निष्कृष्टैकह्यवदानेतिकर्त्तव्यताकत्वात् प्रदानस्य सर्वप्रदा-
ने चेति कर्त्तव्यताबाधापत्तेर्ह्यवदानातिरिक्तं शेषणीयमिति यत्सि-
द्धान्तसूत्रेणोक्तं तस्य कः परिहार इत्याशङ्कानिरासार्थत्वेनापो-
धिक्येनाभ्यासेन होमस्य कृत्स्नस्य द्रव्यस्यायोगमनमाहवनी-
यप्राप्तिरित्येवमुपायोक्तिव्याख्यर्थतया कृत्स्नं चेत्येतदेव भाष्यं कृत्स्नं
यस्माद्धोमार्थं तस्मादेवमुपायाभ्यासेन प्रक्षेपो न ह्यन्यथाभ्यासाभावे
कृत्स्नं होतुं शक्यमित्यन्यथा व्याख्यातुं शङ्कते * यत्त्विति । * व्याचष्टे
* ज्योतिष्टोमवदिति * होमाभ्यासोपपादनार्थत्वेन तदर्थत्वादिति
सूत्रावयवं त्रेधा व्याचष्टे *तदर्थत्वादिति* । तच्छब्देनाद्यसूत्रस्थप्र-
१०।८।१ दानशब्दापस्थापितदेवतापरामर्शं मत्वाऽऽद्या व्याख्या। प्रदानपरामर्शं
मत्वा द्वितीया । कृत्स्नस्यापि हविषो यागार्थत्वे गुणभूतद्रव्यका-
र्त्स्न्यानुरोधेन प्रधानभूतयागावृत्त्ययोगमाशङ्क्य कृत्स्नस्य हविषो देव-
तान्वयान्यथानुपपत्त्या यागाभ्यासेऽवगते ज्योतिष्टोमवदभ्यस्तस्यैव
यागस्य फलापूर्वसाधनत्वात् प्राधान्यं न तु सकृत् कृतस्य येन प्रधा-
नावृत्तिरापद्येतेतिपरिहारसूचनार्थं तच्छब्देन प्रदानोपस्थापितापूर्व-
परामर्शं मत्वा तृतीया। कृत्स्नस्य यागार्थत्वेऽप्येकदेशमात्रहोमोपपत्ते-
र्होमाभ्यासयोगमाशङ्क्याह * नैकदेशमात्रेति । * आग्नेयादिवाक्य-
स्य होमपर्यवसायित्वात्तस्य चोत्पत्तिवाक्यत्वेन बलीयस्त्वात्तदर्थ-
संपत्त्यै होमाभ्यासो युक्त इत्याशयः । ह्यवदानाभ्यासोपपादनार्थत्वे-
नाप्येतमेवावयवं तच्छब्देनाद्यसूत्रनिर्दिष्टहविःपरामर्शं निरवदानस्य
चानन्तरसूत्रोक्तस्य कर्त्तव्यत्यपेक्षापूरकत्वं मत्वा व्याचष्टे *अथ वेति*

कृतत्वात्तु कर्मणः सकृत्स्याद्द्रव्यस्य गुणभूतत्वात् ४४

सकृत् ह्यवदानेन कर्मणः कार्यस्य यावत् श्रुतस्य कृतत्वात्सकृदेव
प्रदानं स्यान्न च द्रव्यानुरोधेन प्रदानावृत्तिर्युक्ता द्रव्यस्य गुणभूत-

त्वादित्येवहोममात्राभ्यासनिरासार्थत्वेन सूत्रव्याख्यार्थतया भास-
मानमुच्यतइत्यादिभाष्यं द्यवदानाभ्यासस्यापि शङ्कितस्यानिरासा-
त्तन्निरासं च विना सर्वप्रदाननिरासासिद्धेरयुक्तमाशङ्क्य होमाभ्यास-
निरासद्वारा द्यवदानाभ्यासस्यापि सूत्रनिरस्तता सकृद्यवदानेने-
तिभाष्यावयवेनोक्ता। द्विरवखण्डनाविशिष्टमित्यनेन च द्यवदानशब्दो
होमे द्रव्यविध्यर्थो न तु द्रव्ये संस्कारविध्यर्थ इत्यभिधानादुपपादि-
तेति सूचनायोभयाभ्यासनिरासार्थत्वेन तुशब्दं व्याचष्टे * नैतदिति*।
हेतुप्रश्नोत्तरत्वेन सूत्रशेषं व्याचिख्यासुर्द्यवदानशब्दस्य संस्कार-
विध्यर्थत्वाभावेपि हविर्वाक्यविहितस्य संस्कारस्य गुणभूतत्वाद-
भ्यासोपपत्तेर्होमाभ्यासनिरासं विनाभ्यासनिरासायोगात्तन्निरास-
द्वारद्यवदानाभ्यासनिरासौचित्यं सूचयन् व्याचष्टे * कुत इति। *
श्लोकं व्याचष्टे * द्विरिति। * नचैत्यन्त्यभाष्यावयवोक्तामपि होम-
प्राधान्योपपत्तिं तानि द्वैधाधिकरणसूत्रोक्तत्वाद्यैरिति सूत्रोपन्यासेन
प्राग्व्याख्यायभूतभव्यसमुच्चारणाख्योपपत्तिः षष्ठाद्यपूर्वपक्षसूत्रवक्ष्य-
माणत्वात् द्रव्याणामिति सूत्रोपन्यासेन पश्चात् व्याख्याता। होमस्य
प्राधान्येपि द्यवदानाभ्यासे सत्यवदानस्य प्रदानोपक्रमत्वात् प्रदाना-
भ्यासावश्यकत्वापत्तिस्तदनभ्यासेपि वा द्यवदानमात्राभ्यासेपि सकृ-
त्कृत्स्नावनहविर्होमापत्तेर्होमाभ्यासनिरासद्वारा द्यवदानाभ्यासनि-
रासमावृत्तसौत्रसकृच्छब्दोक्तत्वेन सकृद्यवदानेनेति भाष्यावयवसू-
चितं द्विरवखण्डनविशिष्टमितिभाष्यावयवोपपादितमपि द्विर्हविषा-
वद्यतीति कृत्स्नहविरुद्देशेन संस्कारविधानात्सकृद् द्यवदानेन च
कृत्स्नस्य हविषः संस्कर्तुमशक्यत्वादनुपपादितं मत्वा स्वयमुपपाद-
यति * तस्मिंश्चेति। * द्यवदानाभ्यासस्यापि भाष्योक्तत्वसूचना-
योभयाभ्यासनिरासे यदि हीत्यादिभाष्यं द्यवदानं वा वर्त्तयेदित्य-
ध्याहारेण योजयितुमाह * यदीति। * होमानावृत्तावपि हूयमानद्र-
व्यानुवादेन द्विरवखण्डनविधानात् कृत्स्नस्य चाग्नेयादिवाक्याद्धोत-
व्यत्वावगतेरङ्गुष्ठपर्वमात्रावदानद्वयेन वा ऽनावृत्तेनाश्वशफमात्र-
स्य पुरोडाशस्य कृत्स्नस्य व्याप्त्यशक्तेरवखण्डनावृत्तिर्भविष्यतीति
यज्जुहोति तत् द्विरवखण्डनेन संस्कर्त्तव्यमित्युपायसूत्रव्याख्यार्थ-
भाष्योक्ताशङ्कामतः पूर्ववाक्यवशेनेति वार्त्तिकाभिवृतां दूषयति
न चेति। लकाराद्द्रव्याप्रतीतावपि यच्छब्दाद् द्रव्यप्रतीतिर्भविष्य-
तीत्याशङ्क्याह * येपीति * सोप्युपेक्षणीय इत्यनेन परमार्थालोचन- १०१९।२

कृतत्वाभावादुद्रव्यप्रत्ययस्योपेक्षणीयतामुक्तामुपपादयितुं यद्यस्याव-दिकतायामुक्तायामवैदिकस्य व्याख्यानुच्चारणं किमर्थमित्याशङ्क्यानु-वादप्रदर्शनायेत्युक्ते कस्येत्यपेक्षायां जुहोत्यनुवादत्वोक्त्यै क्रियाविशे-षणतोक्ता । आग्नेयादिवचनात्कृत्स्नस्य होमार्थत्वावगतेरभ्यासेन सर्वप्रदानमिति कृत्स्नं चेति भाष्योक्तद्वितीयोपायसूत्रार्थानुभाषणार्थं यत्त्वितिभाष्यं व्याचष्टे * यत्त्विति * द्रव्यस्य द्रवणीयस्य गमनी-यस्य होतव्यतयावगतस्य ह्यवदानमात्रस्य प्रदानं प्रति गुणभूत-त्वात्तेन च प्रदानस्य कर्मणः कृतत्वान्नाभ्यासो युक्त इत्येवं परिहारा-र्थत्वेन सूत्रव्याख्यार्थं तन्त्रेत्यादिशेषइत्यन्तभाष्यं तात्पर्यतस्तावत् व्याचष्टे * यदिति । * अशेषस्य देवतया यागेनापूर्वेण वा ग्रहणे तादर्थ्ये सिद्धे सोमवद्यागात्रसंस्कत्वं स्यात्तदेव त्वष्टाकपालादौ द्रव्या-वदानचोदनया कथंचनोपसंहारकत्वेन प्रदेयप्रकृतित्वापादकत्वेन वा कृत्स्नं प्रदेयत्वापवादान्न सिद्धमित्यर्थः। एतदेव भाष्यं विविच्य व्या चिख्यासुर्ह्यवदानचोदनाया होमान्न यस्य प्रत्यक्षत्वेनाग्नेयादिचोद-नायां होमान्वयादानुमानिकाद् बलीयस्त्वोक्तेरुपसंहारकत्वप्रदेयप्रकृति त्वापादकत्वाख्यापवादप्रकारद्वयसाधारण्येपि प्रदेयप्रकृतित्वपक्षस्या-पिच शब्दाद्वितीयत्वावगमेनोपसंहारपक्षस्याद्यत्वावगतेरुपसंहारो-क्त्यर्थसामान्यं खल्वपीतिभाष्यावयवसहितं तन्त्रेतिभाष्यावयवं व्याचष्टे * आग्नेयेति * अनुभाषणभाष्यस्थेन वचन-शब्देनाग्नेयचोदनाया निर्दिष्टत्वात्तत्रेत्यनेन परामर्शोपपत्तिः पुरो-डाशावयविनोद्विरवखण्डनेन नाशात्पुरोडाशावयविवाचिनोऽष्टाक-पालशब्दस्यावयवलक्षणार्थत्वावगतेराग्नेयशब्दात्पुरोडाशावयविवा-चिनोष्टाकपालशब्दः सर्वपुरोडाशावयवसाधारणः ह्यवदानशब्दस्तु मध्यपूर्वार्द्धावयवविशेषवाचीति भाष्यार्थः । प्रत्यक्षानुमानिक-त्ववैषम्योक्तेरानुमानिकस्य यथाश्रुतत्वानवकल्पनं प्रयोजनमाह * तस्मिंश्चेति * स्वानुमानिकस्याष्टाकपालहोमान्वयस्यैकदेश-समर्पणायैकदेशविषयेण ह्यवदानहोमान्वयेन प्रत्यक्षेणाप्यपेक्षिततः-यात्यन्तबाधायोगात्संकोचमात्रं वैषम्योक्तेः प्रयोजनमवतिष्ठतेइत्याह * तेनेति * यथानारभ्याधीतं सामिधेनीसाप्तदश्यं पशुमित्रविन्दा-ध्वरकल्पादिप्रकरणाधीतैः साप्तदश्यैः पश्वादिविषयमेवोपसंह्रियतइ-ति दशमे वक्ष्यत इति दृष्टान्तार्थः । उपसंहारं विवृणोति * तत्रेति * अस्मिंश्च पक्षे कृत्स्नस्य हविषो देवतार्थत्वादित्यसिद्धो हेतुरित्याह

* अत इति *। पुरोडाशस्य प्रदेयद्व्यवदानप्रकृतित्वोक्त्यर्थमपि चेति भाष्यावयवं व्याचष्टे *किं चेति* श्लोकं व्याचष्टे *तद्धि ते न हीति* अस्मिन् पक्षेऽसिद्धोऽपि हेतुर्न कृत्स्नप्रदानसाधनायालमित्याह *तेनेति* कृत्स्नस्य साक्षाद्देवतोद्देशेन त्यागेऽपि द्व्यवदानमात्रहोमः कस्मान्न भवतीत्याशङ्क्याग्नौ प्रक्षेपं विना देवतान्वयासिद्धिमधिकरणोपक्रमवार्त्तिकोक्तां मनसि निधाय प्रकारान्तरायोगं सूचयितुमाह *द्वावेव- १०२०।१
चेति।* तस्मादिति सिद्धान्तोपसंहारभाष्यं व्याचष्टे *तस्मादिति*।

शेषदर्शनाच्च ॥४५॥

अनेकार्थत्वस्यान्याय्यत्वाच्छेषशब्दस्यैकप्रयोजनसमुदायैकदेशादुपयुक्तादितरदेकदेशान्तरमुख्योऽर्थः। इतरमात्र तु शब्दस्यैव पक्षाशङ्कीया इत्येवमाशयत्वेन व्याचष्टे *एवमिति* चकारसूचितमर्थमाह * उत्तरार्द्धादिति * भाष्योक्तमाग्नेयचोदनाया व्याख्याप्रकारद्वयमपि दुदूषयिषुरुपसंहारपक्षतां च दूषयितुमुपक्रते *अत्रेति * प्रश्नपूर्वमुपपादयति * कथमिति * यः कॢप्तत्वात्स्पष्टोऽपि सामान्यविषयो विधिर्यथा पुरोडाशं चतुर्धा करोतीति यो वा सप्तदशसामिधेनीरनुब्रूयादिति सामिधेनीवत्कर्मविशेषविषयोऽप्यनारभ्याधीतत्वेन कर्मान्वयस्याकॢप्तत्वादस्पष्टः स विशेषे विध्यन्तरावगते कस्मिंश्चिदुपसंह्रियेत। आग्नेयविधेस्त्वष्टाकपालाख्यावयविव्यक्तिविषयत्वेन सामान्यविषयत्वाशङ्कायोगादनुमितक्रियाविषयत्वेनास्पष्टत्वं वाच्यं तदपि तु क्रियानुमानं विना वाक्यान्तरान्वयायोगेन क्रियानुमानस्यावश्यकत्वादयुक्तं ततश्च न द्व्यवदानविधिनोपसंहारः संभवतीत्यर्थः। अनेनैव न्यायेनैन्द्रवायवादिविधेरप्यल्पं जुहोतीति विध्यन्तरेणोपसंहारो न संभवतीति सूचनायान्यैरिति बहुवचनम्। श्लोकं व्याचष्टे *सामर्थ्यं हीति।* द्रव्यदेवतान्वयस्य देवतोद्देशपूर्वकद्रव्यत्यागाख्यक्रियागर्भत्वात्तन्निरपेक्षस्य विध्यशक्तेः क्रियान्वयास्पष्टत्वसिद्ध्यै देवतान्वयस्यास्पष्टता वाच्येत्यापाद्य सा निरस्ता। प्रस्तुतद्व्यवदानस्यैव देवतान्वयोऽस्फुट इत्याह *स हीति* बाधप्रकारविशेषत्वाच्चोपसंहारस्य दुर्बलस्य च बाध्यत्वात्तत्रोत्पत्तिशिष्टतया बलीयसोऽष्टाकपालस्योपसंहारो युक्त इत्याह * उत्पत्तीति * भाष्याशयं दूषयितुमनुभाषते * तत्रेति * अनिष्टापादनेन दूषयति *नैतदिति* यथाश्रुतत्वायोग-

मात्रस्योपसंहारासिद्धयर्थं कल्पनासंभवोक्त्या विवक्षितत्वान्नानिष्टाप-
त्तिरित्याशङ्क्याष्टाकपालस्योत्पत्तिशिष्टत्वे बलीयस्त्वेनानुपसंहाराप-
त्तेरनिष्टापत्त्यपरिहारमाह * यदि हीति * स्वाच्छन्द्याज्जुहोतिवाक्यस्यै-
वोत्पादकत्वमङ्गीकुर्वाणां प्रत्याग्नेयवाक्यस्यानेकगुणविधायित्वापत्तेः
पौर्णमास्यधिकरणसूत्रोक्तवाक्यभेदापत्तिमाह * ततश्चेति * न चा-
नन्यक्रियायोगे वाक्यमेतत्समाप्यते। न च स्वार्थासमाप्तत्वाद्वाक्यान्तरं
संपद्यते ॥ इति पौर्णमास्यधिकरणवार्त्तिके चाग्नेयादिवाक्यानां वा-
क्यान्तरायोगस्योक्तत्वान्न वाक्यान्तरोत्पत्तेः कर्मणि गुणविधायिता
१०२११२ युक्तेत्याह * न चेति * । स्पष्टत्वोपसंहारायोगमुपपादितमुपसंहरति
* अतइति * सामान्य खल्वपीति भाष्योक्तं सामान्यविषयत्वमुपसं-
हारकारणं पुच्छकर्णादिच्छेदे पशोरिव छिद्रखण्डनेपि पुरोडाशावयवि-
नः प्रत्यभिज्ञायमानस्य नाशायोगाशयेन निराकर्त्तुमाह * नचेति * पुरो-
डाशावयव्यनाशेप्यष्टाकपालशब्दस्य पुरोडाशशब्दवज्जातिवाचित्वा-
त्सामान्यविषयत्वं भविष्यतीत्याशङ्क्य यौगिकत्वाद्द्रव्यवाचित्वं सू-
चयितुमाह * अष्टाकपालेति * साक्षात्त्ववाचिना प्रत्यक्षशब्देन
सूचितं द्रव्यवाचित्वं द्व्यवदानशब्ददृष्टान्तेन यौगिकत्वात्साधयितुं द्व्य-
वदानेत्युक्तम्। छिद्रखण्डनेन पुरोडाशावयविनाशात्पुरोडाशवाचिना-
ष्टाकपालशब्देनावयवान् लक्षयता द्व्यवदानव्यतिरिक्तावयवप्राप्तेः
सर्वपुरोडाशावयवसाधारण्येन दुर्बलेति कृत्वोपसंहर्त्तुं शक्येति भाष्या-
शयं शङ्कते * नन्विति * । कतिपयावयवनाशेप्यवयविनः प्रत्यभि-
ज्ञानेनाऽनाशादवयवलक्षणायोगाशयेन निराकर्तुमाह * उच्यतइति *
अष्टाकपालशब्देनावयवविधिना प्रयोजने पुरोडाशोक्तौ सामान्यवृत्तित्वं
स्यात्साक्षात्त्ववयवलक्षणामनपेक्ष्य पुरोडाशावयविविधानान्नाष्टाक-
पालशब्दः साधारणवृत्तिरित्यर्थः। व्यक्त्यपेक्षाया जातेः साधनत्वायो-
गाज्जातिशास्त्राणां व्यक्तिलक्षणार्थत्ववदवयविनोप्यवयवानपेक्ष्य
साधनत्वायोगादवयविव्यक्तिवाचिनोप्यष्टाकपालशब्दस्यावयवलक्ष-
णार्थत्वकल्पनमाशङ्क्य मूर्तत्वेन व्यक्त्यपेक्षाया अपि जातेः
साधनत्वायोगाज्जातिशास्त्राणां व्यक्तिलक्षणार्थत्वं युक्तं अवय-
विनस्तु मूर्तत्वेन साधनत्वसंभवान्नावयविवाचिनो वयवलक्ष-
णार्थता युक्तेत्याशयेन परिहर्तुमाह * आकृतीति * । साक्षात्साधन-
त्वायोगाख्यं लक्षणाकारणं विनाप्यवयवशून्यस्यावयविनोऽसत्त्वेनासा-

धनत्वादवयविशब्दस्यावयवलक्षणार्थत्वं भविष्यतीत्याशङ्कते * अथेति * एवं सति द्व्यवदानावया विनापि स्वावयवशून्यस्यास्सत्त्वेन साधनत्वाद्द्व्यवदानशास्त्रस्यापि द्व्यवदानावयवलक्षणार्थत्वाद्वैफल्यापत्तिरिति साम्यापादनेन परिहरति * तत इति * वस्तुतस्तु द्व्यवदानवदष्टाकपालस्यापि साक्षाद्विधानादेव प्राप्तिरित्याह * तस्मादिति * अष्टाकपालावयवानां देवतोद्देशेनात्यागे चतुर्धाकृतपुरोडाशावयवानां देवतार्थत्वाभावाद्यजमानं प्रत्यस्वत्वं तत्र तत्र वक्ष्यमाणं विरुध्येतेत्याशङ्क्याष्टाकपालस्य देवतान्वयप्राप्त्या तदालीढानामवयवानामप्यवर्जनीयतया देवतान्वयप्राप्तेः साम्योक्तिर्न विरुध्यते न त्वेतावता चतुर्धाकृतपुरोडाशावयवानां स्वातन्त्र्येण देवतान्वयप्राप्त्यापत्तिर्येनाष्टाकपालचोदनावयवपरां कल्पनीयेति सूचयितुमाह * तत्प्राप्तौ चेति *। अवयवा अनुषज्यन्ते इति वाक्येऽवयवानुषङ्गोक्तेश्चतुर्धाकृतपुरोडाशावयवानां यजमानं प्रत्यस्वत्वोक्त्यविरोधार्थत्वसूचनायान्तरशब्दः। अभेदविवक्षयाप्यवयवशब्दस्यावयवार्थत्वाभ्युपगमे द्व्यवदानाख्यपुरोडाशावयतवदवयवान्तराण्यपि साक्षादेव प्राप्तानि भवन्तीति तुल्यबलत्वापरिहारान्नोपसंहारोपपत्तिरित्याह * न चेति * द्व्यवदानविधिनाष्टाकपालविध्यनुपसंहारेऽप्यवयवान्तरपरिसंख्यया द्व्यवदानमात्रहोमः सेत्स्यतीत्याशङ्क्य परिसंख्यायास्त्रिदोषत्वेनायोगाच्चोदनाद्वयार्थसमुच्चयाभ्युपगमेऽष्टाकपालचोदनाया द्व्यवदानावशिष्टपुरोडाशावयवविषयत्वापत्तेर्युगपच्च सर्वावयवहोमेऽवखण्डनानर्थक्यापत्तेः प्रदानोपक्रमत्वाच्चावदानस्यान्यहोमेन व्यवधानानौचित्यावगतेर्द्व्यवदानं हुत्वावशिष्टहोम इत्येवमनुष्ठानं प्राप्नोति शेषहोमेऽष्टाकपालविध्यर्थानिष्पत्तेर्वा समुच्चयायोगात् कृत्स्नहोमद्व्यवदानहोमयोर्विकल्पोऽष्टाकपालबलीयस्त्वेन वा द्व्यवदानस्य तद्बाधकत्वायोगात्तेन च सह विकल्पायोगात्कार्त्स्न्यनाशकत्वेन च समुच्चयात्कर्मान्तरकल्पकत्वेऽष्टाकपालान्वयाभावाद्द्रव्यान्तराल्लौकिकादुपादान द्रव्यान्तरादुपादाने वा समुदायस्याप्यविरोधात्पूर्वकर्मान्वयस्याप्युपपत्तेर्द्रव्यान्तरादुपादानसम्भवे च पुरोडाशोत्पादनात्तपापादकस्य पुरोडाशादुपादानस्यानौचित्यात्पुरोडाशादुत्पन्नस्य द्व्यवदानस्याष्टाकपालेन सह विकल्पानुपपत्तेर्द्रव्यान्तरादुत्पन्नस्य विकल्पसमुच्चयो द्विर्हविषोऽवद्यतीति श्रुतेर्वा पुरोडाशाद् द्व्यवदानग्रहणावधारणाद् द्रव्यान्तरादुपादानानुपपत्ते कार्त्स्न्यनाशापत्तेश्च द्व्यवदानाष्टाकपालसमुच्चयायोगादाग्नेयचोदनाप्राप्ते च

होमे द्रव्यदानचोदनाया द्विरवखण्डनसंस्कृतद्रव्यान्वयाख्यगुणप-
रत्वात्कर्मान्तरविध्यशक्तेर्द्विरवखण्डनसंस्कृताष्टाकपालान्वयाख्यगु-
णविषयत्वावगमाद्यावत्संस्कार्यं च संस्कारावृत्त्यौचित्याद्विशेषाव-
दायावदाय कृत्स्नहोमपक्ष एव प्राप्नोतीत्याह * तेनेति * अवदान-
वाक्यस्योपसंहारकत्वायोगान्निरवदानहोमप्रमाणाभावेऽभिहितेऽस्यैव
वाक्यस्य परिसंख्यार्थत्वेन प्रामाण्यमाशङ्क्य निरवदाने युक्तं द्विर्हं-
विषोऽवद्यतीत्यवखण्डनविध्यर्थवत्त्वान्यथानुपपत्त्या पुरोडाशावयव-
होमेऽवगते किमुद्धृतो ह्यवदानाख्योऽवयवो होतव्यस्तदन्यः कृत्स्नो
वेति नियमापेक्षायां ह्यवदानवाक्येन नियमविधिर्निरवदानहोमे
प्रमाणं भविष्यतीत्याशङ्क्य कृत्स्नहोमेऽप्युपायविधायिह्यवदानवाक्या-
पेक्षितावखण्डनोत्पत्तिविध्यर्थत्वोपपत्तेराग्नेयवाक्यविहितकृत्स्नहोम-
विरुद्धावयवहोमकल्पनायोगान्नियमविधिं निराकर्तुमाह * न
१०२२।१६ हीति * परिसंख्यायाः कथमत्यन्तदुष्टेत्यपेक्षायामवयवान्तरनिवृत्ति-
परत्वाद्वाक्यान्तरार्थग्रहणं स्ववाक्यार्थह्यवदानहोमाविधानाच्च स्वा-
र्थहानमाग्नेयवाक्यप्राप्तकृत्स्नहोमबाधात्प्राप्तबाधश्चेति दोषत्रयमाह
* नित्यवदिति * इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इ-
त्यादिवत्फलतः परिसंख्यानेऽप्यप्राप्तविधानस्यैव वाक्यार्थत्वाद्दोष-
त्रयानापत्तिमाशङ्क्य सर्वावयवप्रापकस्याष्टाकपालशास्त्रस्य क्लृप्तत्वे-
नाप्राप्तविध्ययोगाद्दोषत्रयापरिहारमाह * तत्र हीति । * प्रमाणाभा-
वमुपसंहरति * तस्मादिति । * ह्यवदानावशिष्टानां चावयवानां यज-
माने प्रत्यस्वत्वस्य द्रव्ये समत्वादिति सूत्रे तद्व्याख्यार्थं च प्रभवता
हि शक्यं दातु नाप्रभवतेति भाष्ये पुरोडाशस्याग्नये संकल्पितस्य
नेष्टे यजमान इति चतुर्थाधिकरणभाष्ये च वक्ष्यमाणस्य विरोधा-
पत्तेरप्याग्नेयत्वस्य ह्यवदानविषयतयोपसंहारो न युक्त इत्याह * यदि
चेति * । देवतान्वयोपसंहारेऽपि त्यागानुपसंहाराद्विरोधशङ्कानिरास-
सूचनायाऽर्थ्यते गम्यते आक्षिप्यत इति कर्मव्युत्पत्त्यार्थशब्दमाक्षेप्य-
वाचिनमङ्गीकृत्य योगार्थ आक्षेप्योऽस्येति बहुव्रीहिविग्रहेण योगार्थो-
क्त्याग्नेयत्वस्य देवतोद्देशपूर्वकद्रव्यत्यागाख्ययोगाक्षेपकतोक्ता आ-
ग्नेयत्वस्यैव त्यागाक्षेपकत्वात्तदुपसंहारे त्यागस्याप्युपसंहारापत्ति-
रित्याशयः । समत्वोक्त्या कथं शेषावयवानां यजमान प्रत्यस्वतोक्ता
भवतीत्याशङ्कानिरासार्थमृत्विग्भिः साम्याद्यजमानस्येत्येव समत्वोक्ति-
र्व्याख्याता । देवतान्वयोपसंहारेऽपि निर्वापकाले केभ्यो व्रीहिभ्यो ह्यवदान

निष्पत्स्यते केभ्यो नेति विशेषाज्ञानाद्यागादन्यत्रैतान्न विनियोक्ष्यामीति
यथेष्टविनियोगार्हत्वलक्षणस्वत्वापनयनरूपस्य त्यागस्य कतिपयव्रीहि-
विषयतयोपसंहाराशक्तेः समस्तचतुर्मुष्टिपरिमितव्रीहित्यागाद्स्वत्र-
त्वोक्त्या विरोधं शङ्कते *तत्रेति*। निर्द्धारितविशेषाज्ञानेपि यावद्भ्यो १०२३।३
व्रीह्यवयवेभ्यो ह्यवदानं निष्पत्स्यते तावतोन्यत्र न विनियोक्ष्यामी-
त्येवं कतिपयत्यागोपसंहारशक्त्याशयेन निरस्यति *तदिति*श्लोकं
व्याचष्टे *देवतार्थे हीति । *देवतान्वयविधिव्यतिरेकेण त्यागवि-
धिर्वा तस्मिन् सति यागानुपयुक्तानामप्यदृष्टार्थत्यागोपपत्तेरधिक-
त्यागहेतुः स्यात् प्रोक्षणादिसंस्कृतव्रीहिनिष्पादितपुरोडाशमध्यपूर्वा-
र्द्धावदानद्वयस्य देवतान्वयान्यथानुपपत्तिर्वेति विकल्प्य न चात्रेत्य-
नेनाद्यहेत्वभावोक्त्या सा चेत्यादिना च द्वितीयहेत्वभावोक्त्या
केनेति काकुर्हेत्वभावोक्त्यर्थत्वेन व्याख्याता। ह्यवदानप्रकृतिभूतव्री-
ह्यवयवमात्रत्यागेप्यवर्जनीयतया व्रीहिप्रतिनिधिभूतनीवारावयवसं-
स्कारवत्समस्तव्रीहिसंस्कारोपपत्तेरित्याशयः। कर्मावयव्यभावेन चा-
वयवानामेव विधेयत्वात्तेषां चानेकेषां साक्षादेकविधिव्यापारविषय-
त्वायोगादवान्तरविशिष्टैकविधिनावयवान्तराक्षेपावगतेरुपक्रमावय-
वेन चोत्तरावयवाननुष्ठानेप्युपपद्यमानानुष्ठानत्वादुत्तरावयवाक्षेपाश-
क्तेः समाप्त्यवयवेनैव पूर्वावयवानुष्ठानं विनानुपपद्यमानानुष्ठानत्वा-
त्पूर्वावयवाक्षेपावगतेस्तद्विशिष्टसमाप्तिविधानस्य सर्वत्रेष्टत्वात्समा-
प्तेरुपक्रमं प्रति प्राधान्यावगमनाङ्गगुणविरोधन्यायात्समाप्तिगुणेनोप-
क्रमगुणबाधावगतेर्निर्वापकालीनस्य चैतावतो व्रीहित्यागादन्यत्र न
विनियोक्ष्यामीति यथेष्टविनियोगार्हत्वाख्यस्वत्वनिवृत्त्यात्मकस्य त्या-
गस्य यागायैते व्रीहय इति संकल्परूपस्याग्नये दास्येग्नीषोमाभ्यां दास्ये
इति मन्त्रप्रकाश्यदेवतान्वयार्थाक्षिप्तस्य यागोपक्रमत्वाद्धोमकालीनस्य
न ममेति स्वार्थविनियोगार्हत्वाख्यस्वत्वनिवृत्त्यात्मकस्य त्यागस्य याग-
समाप्तित्वाद्यावतो व्रीह्यवयवसमूहस्य होमकालीनत्यागाङ्गत्वं तावत
एव निर्वापकाले त्यागविध्यवगतेर्ह्यवदानमात्रस्य योगाख्यदानाभ्युप-
गमे तावन्मात्रनिष्पत्त्यर्थस्यैव त्यागाज्ञातिरिक्तानां स्वत्वापगम इत्याह
*सर्वत्र चेति*होमकालीनस्य त्यागावयवत्वेन यागविधिनैव विधाना-
त्तद्व्यावृत्त्या निर्वापकालीनत्यागसूचनायार्थाक्षिप्तविशेषणम्। दृष्टा-
न्तेन त्याज्यावयवमिश्रत्वात्तत्सर्वत्यागशङ्कानिराससूचनपूर्वं श्लोका-
र्थमुपसंहरति*अत इति*निर्वापकाले त्यागाद्यदस्वत्वं तच्छकटस्थ-

त्तरमाह * उच्यत इति * । व्यतिरेकमुखेनोत्तरार्थं पादत्रयं
व्याचष्टे * यदीति * । सर्वप्रक्षेपप्राप्त्युक्त्या तृतीयपादे व्याख्याते
पूर्वार्द्धव्याख्यार्थं तदा चेत्युक्तम् । अभेदस्य भ्रान्तिकल्पितत्वोपपादनार्थं
यजेतेत्यनेन केवलस्य यागस्य कर्त्तव्यता चोद्यते न जुहोतिशब्दाभि-
हितस्येति शब्दान्तराधिकरणभाष्यान्यथानुपपत्तिलक्षणन्यायसिद्धत्वं
यजत्युक्ते कर्मण्यनुवादार्थं जुहोतिश्रवणादासेचनोपलक्षितप्रक्षेपाधिको
यागो होमो न तु यागमात्रं होम इति होमलक्षणार्थसूत्रवक्ष्य-
माणत्वमभियुक्तप्रयोगेण द्रवद्रव्यप्रक्षेपवाचिनोपि चासेचशब्दस्य
प्रक्षेपमात्रोपलक्षणार्थत्वेन लक्षणाव्याप्त्यभावात्समर्थयिष्यमाणत्व-
मुक्त्वा कथं समर्थयिष्यत इत्यपेक्षायां यथेत्यनेनाभियुक्तप्रयोगमुप-
न्यस्य यागस्य होमत्वाभावे दर्शपूर्णमासादिष्वाहवनीयाप्राप्तिस्ततश्च
यजतिचोदितासु प्रकृतिविकृतिष्वाहवनीयाप्राप्तेर्जुहोतिचोदितानां च
दर्विहोमत्वेनापूर्वतया प्रकृतिविकृतित्वाभावादग्नयश्च स्वकालत्वा-
दित्यत्राग्नीनां प्रकृतिविकृत्यर्थत्वोक्ति । प्रयादिषु च यजतिचोदि-
तेष्वाहवनीयाप्राप्तिस्तासामग्निः प्रकृतितः प्रयाजवदिति दृष्टान्तोक्ति-
र्न युज्येतेत्याशङ्कां निराकर्तुं चतुरवत्तादिवाक्यैः प्रक्षेपाधिक्यविधा-
नाद्धोमत्वापत्तेर्न कोपि दोषोस्तीति परिहारसंभवः परिहरिष्याम इति
स्फुटोक्तः । अन्वयमुखेनोत्तरार्थं चतुर्थं पादं व्याचष्टे * तयोश्चेति *
ततश्च प्रक्षेपाभावेप्यष्टाकपालस्याग्नेयत्वसिद्धेर्न सर्वप्रक्षेपापत्ति-
रिति परिहाराशयः । सर्वप्रक्षेपविधायिवाक्याभावेपि देशविशेषे
निक्षेपं विना मानसत्यागानभिव्यक्तेस्तदाभिव्यक्त्यै सर्वप्रक्षेपापत्तिमा-
शङ्क्याह * तत्रेति * । देवतोद्देशपूर्वकद्रव्यत्यागात् प्रागाचारप्रा-
प्तेन शुचौ देशे प्रक्षेपेण त्यागाभिव्यक्तिसिद्धेर्न त्यागोत्तरकालमाहव-
नीये प्रक्षेपापत्तिरित्याशयः । आहवनीये प्रक्षेपाभावे नाशाभावाद्देव-
तायाश्च स्वत्वानापादनेन परस्वत्वानापत्तेस्त्यक्तस्याप्यनन्यपरि-
गृहीततृणोदकादिवत्स्वीकारसंभवाद्धुतावशिष्टे पुरोडाशे यजमान-
१०२६।२ स्यास्वत्वोक्तिर्विरुद्ध्येतेत्याशङ्क्याह *तत्परिपालनार्थं चेति * पूर्व-
संकल्पनाशने को दोष इत्यपेक्षायां संकल्पाख्यमानसत्यागाभिव्यक्त्यै
न ममेतिशब्दोच्चारणरूपवाचिकत्यागावश्यंभावादानुषाङ्गिकानृतवद्व
नजन्यदोषापत्तिसूचनायानृतं चेत्युक्तम् । अनन्यपरिगृहीततृणादिव-
त्परिग्रहाख्येन स्वत्वोपायेन पश्चात्स्वीकारेपि प्राचीनस्वत्वत्यागरूप-
संकल्पनाशान्नानुषाङ्गिकानृतवदनजन्यदोषापत्तिरित्याशङ्क्य संकल्प-

स्यैतावन्तं कालं न ममेत्येवंकालेनानवच्छेदाद्यावज्जीविकत्वावगतेः पुनः स्वीकारे नाशोऽपरिहार्य इत्याशयः । पदहोमादौ देवतान्वयायोगापत्त्याऽभिमुखार्थवादस्यानादरणीयत्वं सूचयन् सर्वप्रक्षेपपरिहारोपपत्तिमुपसंहरति * तेनेति * । आर्थवादिकाहवनीयप्राप्त्यनादरत्वं सूचनार्थं पदस्येत्युक्तम् । द्यवदानमपि तर्हि न होतव्यमित्याशङ्क्याह * तथेति * । द्व्यवदानाख्यद्रव्यस्य चतुरवत्तवाक्यविहितहोमान्वयविधायिद्व्यवदानवाक्यं द्रव्यविशेषविधायि च मध्यपूर्वार्द्धवाक्यं तत्परिमाणविधायि चाङ्गुष्ठपूर्ववाक्यमादिशब्देनोक्तानि । हविरन्तरद्व्यवदानहोमविषयत्वेनापि वाक्यान्तराणामुपपत्तेः पुरोडाशावयवभूतद्व्यवदानहोमावधारणाशक्तिमाशङ्क्य प्रकृतपुरोडाशग्राहित्वेन शक्तिं दर्शयितुमाह * सर्वाणि चेति *। द्रव्यस्य होमानुवादेन विधेयहोमविशेषणत्वेन वा विधौ प्रकृतस्य प्राप्तत्वेन विधेयत्वायोगाद्धोमस्य प्रकृतद्रव्यालम्बित्वायोगापत्तेस्तदुपपादनार्थं होमानुवादेन द्रव्यविधिं तावन्निरस्यति * तथा हीति *। द्व्यवदानवाक्ये चतुरवत्तवाक्यविहितहोमानुवादेन द्रव्यविधावपि द्विर्हविषोऽवद्यतीति वाक्यविहितद्विरवखण्डनसंस्कारसंस्कृतस्य प्रकृतस्यैव द्रव्यस्य होमान्वयमात्रविधानाच्चतुरवत्तवाक्ये प्रकृतस्य हविषश्चतुरवदानाभावादप्रकृते द्रव्यविधिर्वाच्यस्तस्मिंश्च होमविधानान्न द्रव्यविधिः संभवतीति सूचनार्थस्तावच्छब्दः । प्रकृतस्य हविषश्चतुरवदानाभावेऽप्युपस्तरणाभिघारणाभ्यां चतुरवत्तत्वसंपत्तेः प्रकृतस्य च द्रव्यस्याप्रतीतेर्विधेयहोमविशेषणत्वेनापि न द्रव्यविधिः संभवतीति सूचयितुं द्रव्यविशिष्टहोमविधिं निरस्यति *चतुरवत्तं चेति *। द्रव्यस्वरूपेण चतुरवत्तदानसंस्कृतरूपेण वा विशिष्टस्य होमस्याविधानेऽपि स्विष्टकृद्धोमे सकृदवदानस्य पुरोडाशस्य च सर्वहुतत्वविधावभिघारणावृत्त्या चतुरवत्तता संपादनीयेति सूचनार्थत्वाच्चतुरवत्तशब्दस्य नानर्थक्यापत्तिः । होममात्रविधानेऽपि होमस्य कर्मान्तरत्वादुत्पत्तिशिष्टयागावरुद्धद्रव्यशक्तित्वायोगमाशङ्क्य देवतोद्देशद्रव्यत्यागप्रक्षेपाख्यद्व्यंशहोममध्ये प्रक्षेपांशमात्रविधानात्तस्य चैकशब्दोक्तपूर्वांशद्वयगृहीतद्रव्यग्राहित्वात् प्रकृतद्रव्यग्राहित्वसिद्धिमाह * होमस्यापि चेति *। त्र्यंशस्य होमस्य मध्ये प्रक्षेपांशस्य समाप्तित्वाच्छ्रुत्याभिधानेऽपि प्रक्षेपमात्रस्य जुहोत्यवाच्यत्वेन पूर्वांशद्वयानपेक्षस्य विध्ययोगात्तस्याप्यपूर्वस्यार्थाद्विध्यवगतेः प्रकृ-

तद्द्रव्यग्राहित्वाभावात्तद्वशेन प्रक्षेपस्य प्रकृतग्राहित्वासिद्धिमाशङ्क्य
मीमांसापूर्वमाग्नेयमुपतिष्ठत इत्यस्य गौरवभयात् सिद्ध-
सामान्यसंबन्धकृताग्नेयीग्राहित्ववदस्यापि सिद्धदेवतोद्देशत्यागप्रकृ
तद्रव्यग्राहितोक्ता । त्यागदेवतोद्देशाख्यमंशद्वयमवगतं येषामष्टाकपा-
लादीनां तान्येव प्रक्षेपविधिना गृह्यन्त इत्यर्थः । अवगतत्यागदेवतोद्दे-
शांशद्वयानामष्टाकपालादीनां प्रक्षेपसाधनत्वे यागसाधनत्वविरोधाप-
त्तेस्तद्ग्रहणायोगशङ्कां निरस्यति *न चेति*। प्रक्षेपस्य यागवैपरीत्या-
भावात् प्रक्षिप्यमाणानां यागस्वरूपसाधनत्वाविघातेपि यदि प्रक्षेपस्य
देवतान्तरान्वयात् प्रक्षिप्यमाणानां देवतान्तरान्वयः स्यात्ततोप्याग्नेय-
त्वादिबाधापत्तेर्यागीयाग्नेयत्वादिरूपसाधनत्वं विहन्येत न तु प्रक्षि-
प्यमाणानामपि देवतान्तरान्वयोऽस्तीति सूचयितु विरोधप्रकारद्व-
योक्तिः। वाक्यान्तरवशात् प्रकृतद्रव्यावयवभूतद्व्यवदानहोमावधारण-
मुपादितमुपसंहरति * तेनेति * । द्व्यवदानप्रक्षेपेपि कृत्स्नपुरोडा-
१०२७।३ शस्य यागसाधनत्वाविरोधसूचनायाष्टाकपालेनेत्युक्तम् । चतुरव-
त्तवाक्येनाधारविशेषानवच्छिन्नहोमविधौ पूर्वपक्षे यावद्धवि.सद्भाव-
मवदानावृत्त्या कृत्स्नप्रक्षेपेप्याहवनीयप्रक्षेपनियमाभावाच्छेषकार्या-
णां पुरोडाशान्तरप्रयोजकत्वोक्तिरयुक्ता स्यादित्याशङ्क्याहवनीयवा-
क्यादाहवनीयनियममाह *तत्रेति* पुरोडाशस्य वेदिबर्हिः स्थितस्य
वेदिबर्हिर्वाक्यवशाद्यागसाधनत्वं दृष्टान्तायोक्तम् । प्रसंगाद्विकृतिषु
प्रक्षेपातिदेशानतिदेशनिर्णयार्थं स प्रक्षेपरूपो होम. किमाग्नेयादिवा-
क्यविहिताद्यागादन्यस्तदङ्गं तस्यैव वा रूपान्तरमिति चिन्तनीय-
मित्याह * स त्विति *। पूर्वपक्षं प्रतिजानाति *तत्रेति * । हेतुमाह
* कर्मान्तरत्वेहीति * द्रव्यान्तराप्राप्तेर्गौरवानापत्तिमाशङ्क्य प्रक्षेपस्य
प्रकृतयागोपयुक्तद्रव्यप्रतिपत्तित्वात् प्रकृतद्रव्यावलम्बित्वेपि त्यागो
द्देशाख्यांशद्वयस्य प्रतिपत्त्यनौपयिकतया प्रक्षेपेणानपेक्षणात्तद्गृही-
तदेवताग्रहणनियमानुपपत्तेश्चतुरवत्तशब्दवच्च प्रकृतापेक्षसंस्कारनि-
मित्तस्य शब्दस्य देवताविषयस्याभावेनाग्नेयीन्यायाभावाद् द्रव्यदे-
वताख्याभिन्नविषययोरपि च त्यागोद्देशयोरेकशब्दोक्तत्वोपलब्धेरेकशब्दा-
क्तत्वमात्रेण यागप्रक्षेपयोरेकविषयत्वकल्पनायोगाद्गौरवभयमात्रेण
च प्रकृतदेवताग्रहणे नारिष्टहोमादिष्वपि प्रकृतद्रव्यदेवताग्रहणापत्ते-
र्देवतान्तरप्राप्त्या गौरवापत्तिरुक्ता । कीदृग्रूपान्तरं कथं च प्रक्षेपेणो-
पजायत इत्यपेक्षायां होमत्वं रूपान्तरमंशान्तरोपजनहेतुकप्रचयाति-

क्रियायाश्च देशवद्भावं दर्शयन्नुपसंहरति * अतइति *। प्रासङ्गिकचिन्तायां पूर्वपक्षमुपसंहरति * । तस्मादिति * । सिद्धान्तमाह * अथवेति । * एवत. कर्मान्तरत्वेन प्रसिद्धस्य प्रक्षेपस्यैकद्रव्याश्रितत्वमात्रेण प्रोक्षणादिवत्कर्मान्तररूपत्वायोगात् प्रोक्षणादिवदेव च प्रक्षेपस्य देवतोद्देशानालिङ्गितत्वेन देवतानपेक्षत्वात् संस्कारत्वेन च द्रव्यान्तरानपेक्षत्वाद् द्रव्यदेवतान्तरकल्पननिमित्तगौरवानापत्तेः संस्कारत्वेनैव च तं प्रति द्रव्यस्याङ्गत्वाभावात्तदन्वयेपि समस्तस्य यागसाधनत्वविधाननापत्तेः कर्मान्तरतैव युक्तेति सूचनार्थं तत्र शब्देनैकद्रव्याश्रितनोक्तेस्तत्रैकस्मिन्नपि द्रव्ये समवेतो यो यागः स प्रधानं यः प्रक्षेपः सोऽङ्गमित्यर्थः । एतदेवोपपादयति *तथा हीति* होमस्यारादुपकारित्वेनाङ्गत्वप्रसङ्गे प्रधानद्रव्यवर्त्तिनश्चारादुपकारित्वायोगान्नाङ्गता युक्तेत्याशङ्क्य प्रधानद्रव्याश्रितत्वेनारादुपकारित्वायोगेपि निर्मूलायाः प्रसिद्धेरप्रमाणत्वेन प्रोक्षणादिवत्संस्कारत्वेनाङ्गत्वाविरोधमाह * यद्यपीति *। नच प्रधानद्रव्यवर्त्तित्वमात्रेणाङ्गत्वविरोधः। संस्कारत्वेनाङ्गत्वेपि प्रधानद्रव्यवर्त्तित्वोपपत्तेरित्याह *नहीति। * संस्कारणां प्रतिपत्त्यपूर्वसाधनत्वयोग्यताधानाख्यप्रयोजनातिरिक्तप्रयोजनाभावात्प्रधानात्प्रागनुष्ठानं च विना प्रधानस्य संस्कृतद्रव्यजन्यत्वासंपादनादपूर्वसाधनत्वयोग्यताधानाशक्तेः प्रधानसमकालस्य प्रक्षेपस्यापूर्वसाधनत्वयोग्यताधानप्रयोजनत्वायोगात्कृतकस्यैव च द्रव्यस्य प्रतिपत्त्यपेक्षत्वेन प्रधानादूर्ध्वमनुष्ठानं विना प्रतिपत्तिप्रयोजनत्वायोगात्संस्कारत्वायोगमाशङ्क्य प्रतिपत्त्यनर्हत्वापादकस्य भाव्युपयोगत्वस्य प्रधानकालेऽप्यभावेन प्रतिपत्त्यविरोधात्प्रधानोत्तरकालायां चापूर्वसिद्धौ समकालस्यापि संस्कारस्य प्रधानसहायत्वोपपत्तेः प्रतिपत्त्यपूर्वसाधनत्वयोग्यताधानयोर्द्वयोरपि प्रयोजनयो सिद्धौ संस्कार्यत्वेपि युगपदनुष्ठानोपपत्तिं सूचयितुमाह *संस्काराश्चेति*। प्रक्षेपस्य संस्कारार्थत्वे स्विष्टकृदादिवदप्रयोजकत्वापत्तेः प्रक्षेपात् प्राक् द्व्यवदानस्य नाशदोषापहारेषु पुरोडाशान्तरोत्पादनं निर्देशाद्वान्यदागमयेदिति षष्ठाधिकरणसिद्धान्तसूत्रे शेषादवदाननाशे स्यात्तदर्थत्वादिति पूर्वपक्षसूत्रे च द्व्यवदानावशिष्टात्पुरोडाशाद् द्व्यवदानान्तरावदानं वक्ष्यमाणं विरुद्ध्येतेत्याशङ्क्य प्रक्षेपस्याप्रयोजकत्वेऽप्यसंस्क्रियमाणद्रव्यजन्यस्य प्रधानस्यापूर्वसिद्धावशक्तेरकृतावस्थत्वात्तत्र गुणानु-

रोधेनावृत्त्यनापत्तेः प्रधानेनैव पुरोडाशान्तरोत्पादनस्य शेषादवदानस्य चाक्षेपोपपत्तेरविरोधं वक्तुं पश्चात् प्रक्षेपपक्षमुपन्यासपूर्वं दूषयति * तत्रेति ।* उत्पत्तिशिष्टपुरोडाशसाधनत्वविरोधात् व्रीहिभिर्यागोऽशक्यः साधयितुमित्युक्तमयुक्तमयहेतुमात्रत्वेनानङ्गीयावस्थतोक्ता । षष्ठाधिकरणविरोधापत्तेरपि न निर्वापकाले यागनिष्पत्तिरित्याह *यदि चेति *। पूर्वपक्षसूत्रग्रहणाद्यादिशब्दः । नवमे च देवता तु तदाशीष्ट्वात्संप्राप्तत्वात्स्वामिन्यनर्थिका स्यादिति सूत्रेणाऽऽशासानामेधपतिभ्यां मेधमिति मेधाख्यस्य पशोर्मेधपत्यर्थत्वाशिषो देवतायां पशुस्वामित्वसिद्ध्यर्थमुपपत्तेर्यजमाने तु पशुस्वामित्वस्य प्राप्तत्वात्तदाशासनानर्थक्यापत्तेर्देवतापर एव मेधपतिशब्दो न यजमानपर इति सिद्धान्तेऽभिहिते पशोश्च देवतायै प्रतिश्रुतत्वेनोत्सृष्टप्रायत्वाद्यजमानस्यौपचारिकमेधपतित्वापत्तेर्न तत्परो मेधपतिशब्द इति हेत्वन्तरोक्त्यर्थमुत्सर्गाच्च भक्त्या तस्मिन् पतित्वं स्यादिति सूत्रं व्याचक्षाणो भाष्यकारोऽपि काले देवतायै संभत्स्यत इति निर्वापस्थानीयोपाकरणसंस्कृते पशाववदानप्रक्षेपकाले यागनिष्पत्तिं वदन् परकीयत्वसिद्ध्यै च यजमानस्य रक्षकत्वोक्त्याऽन्यपरिग्रहप्रतिबन्धार्हत्वलक्षणस्वाम्यानपगमं वदन्निर्वापकाले यागनिष्पत्तिं न मंस्यत इति सूचयितुमाह *भाष्येति *। किमर्थं तर्हि निर्वापकालेऽग्नये दास्य इति यजमानस्य मन्त्रोच्चारणमित्याशङ्क्य देवतोद्देशेन त्यक्ष्यमाणत्वसंकल्पनाद्यथेष्टविनियोज्यत्वलक्षणस्वत्वनिवृत्तिरूपत्यागार्थं न तु देवतोद्देशनात्मविनियोज्यत्वलक्षणस्वत्वनिवृत्तिरूपत्यागात्मकयागार्थमिति सूचयन् दूषणमुपसंहरति * तेनेति *। कदा तर्हि
१०२९।२ यागो निर्वर्तेत इत्यपेक्षायां प्रक्षेपकाले निष्पत्तिं स्वमतेनाह * स त्विति *। वषट्कृते जुहोतीति श्रुतेर्वषट्कारानन्तरकालस्य प्रक्षेपवेलात्वात्तस्मिन्नेव च काले याज्यानुवाक्याभ्यां स्मारितेन देवतोद्देशेन यागैकदेशभूतेन यागस्य रूपणादिति प्रक्षेपवेलायां यागनिष्पत्तेर्हेतुर्देवतोद्देशोऽवयवत्वाद्रूपकः स्मारकोऽस्येति रूप्यतेऽनेनेति करणव्युत्पन्नरूपशब्दकेन बहुव्रीहिणोक्तः । निर्वापकालीनस्याग्नये दास्य इति त्यागस्य प्रतिश्रवणरूपत्वेन यथेष्टविनियोगार्हत्वलक्षणस्वत्वनिवृत्तिमात्ररूपतामभ्युपगम्य यागरूपानन्तर्भावाभ्युपगमे प्राक् प्रतिश्रवणं विनापि यागानुष्ठानसंभवादानर्थक्यापत्तेरात्मविनियोगार्हत्वमात्रल-

शयापत्या चोपजायतइत्याह*यथोक्तेन त्विति*। न्यायांशान्तरवृद्धिः।
होमरूपस्य च यागविशेषरूपत्वान्न रूपान्तरापत्तिमात्रेण यागरूप-
विधानापत्तिरित्याह * न चेति । * एतदेव सदृष्टान्तमुपपादयितु-
माह * सामान्ये हीति * रूपान्तरोपजननपक्ष एव च समस्तस्य
पुरोडाशस्य यागसाधनत्वं सिद्ध्येत्कर्मान्तरत्वे तु सर्वकर्मणामन्योन्यं
धर्मधर्मित्वाभावे चान्योन्यवैपरीत्यात्प्रक्षेपस्यापि वैपरीत्यापत्तेर्द्व्यव-
दानस्य त्यागविपरीतप्रक्षेपाख्यक्रियान्वयेन यागसाधनत्वव्याघातप्रस-
ङ्गान्न समस्तस्य यागस्य साधनत्वं सिद्ध्येदित्याह *सोयमिति*प्रक्षे-
पमात्ररूपोयं चतुरवत्तवाक्यविहितो होमो यदि यागस्ततः समस्तेन
क्रियते नान्यथेत्येवकारार्थः। होमस्य यागत्वे भेदोक्तिविरोधशङ्कानि-
रासायायमित्यनेन सिद्धयागान्वयद्रव्यग्राहिणो होमस्यात्र यागतोच्य
ते नत्वपूर्वद्रव्यग्राहिणो यागाद्भिन्नत्वेनाभिमतस्येति सूचिते कोस्य
होमान्तरेभ्यो विशेष इत्यपेक्षायां प्रक्षेपमात्ररूपत्वाद्यागविशेषत्वो-
पपत्ते. सामान्यविशेषरूपत्वेन यागत्वाविरोधं स इत्यनेन सूचितं
प्रकटयितुं द्व्याकारोक्तिः । समस्तस्य सामान्याकारसाधनत्वेपि द्व्यव-
दानमात्रस्य विशेषाकारसाधनत्वात् समस्तस्य द्व्याकारसाधनता
न युक्तेत्याशङ्क्याकारयोः समस्तसाध्यत्वाभावेप्याकारिण. समस्त-
साध्यत्वाविरोधं सूचयितुमाह * द्व्यवदानेनेति । * सामान्यरूप-
स्यानभिमतापि शेषसाध्यताकारिणा. समस्तसाध्यत्वाविरोधसूच-
नायोक्ता । अस्मिन्नेव च पक्षे यागप्रक्षेपयोर्युगपदनुष्ठानं युज्यते
कर्मान्तरत्वे तु प्रक्षेपस्य यागोपयुक्तद्रव्यप्रतिपत्तित्वात्पश्चादनुष्ठाना-
पत्तेर्यौगपद्यं न युज्येतेत्याह * एकस्मिन्नेव चेति * । एकक्षणे निष्प-
द्यमानत्वादपि द्व्याकार इत्यर्थः । कथमेकक्षणे निष्पत्तिर्ज्ञायते
इत्याशङ्क्याह *यदैव हीति* । अवदानादेः प्रक्षेपान्तस्यैकपदार्थत्वेन
तावत् क्रियाक्षणव्याप्यस्य कालस्यैक्यात्तन्मध्ये वषट्कारानन्तरम-
नुष्ठीयमानस्य देवतोद्देशद्रव्यत्यागरूपस्य यागस्य वषट्कारानन्तर-
जुह्वरोपणाहवनीयोपरिनिधानन्यक्करणव्यवहितेन प्रक्षेपेण सहा-
त्यन्तं कालैक्यायोगेपि यौगपद्योपपत्तिसूचनार्थं यदैव द्व्यवदानस्या-
हवनीये निक्षेपो द्विरवखण्डनेन प्रक्रम्यते तदैव याज्यानुवाक्याभ्यामु-
द्देश्यदेवतास्मारणद्वारा समस्तपुरोडाशविषयदेवतोद्देशस्मरणं क्रि-
यत इत्युक्तम्। प्रक्षेपदेवतासंकल्पयोर्युगपदनुष्ठानमेव द्व्यवदानमात्रस्य

देवतासंकल्पभ्रान्तौ हेतुरिति प्रसङ्गात् सूचयितुमाह * तेनेति * ।
आश्रावयेत्याश्रावणाख्येन प्रैषेण देवतायै द्रव्यं दातुमाभिमुख्येन
यजमानं श्रावयेत्यभिधानाज्जुहूस्थस्यैव च ह्यवदानमात्रस्य सन्नि-
हितत्वादाभिमुख्येन श्रावणोपपत्तेर्ह्यवदानमात्रविषय एवाश्रा-
वणोऽध्वर्युणाग्नीत्प्रैषणादस्तु श्रौषडिति च प्रत्याश्रावणाख्येन प्रै-
षार्थेन यदा श्रावयितव्यत्वेनाध्वर्युणोक्तं तदा श्रावितमस्त्वित्या-
ग्नीध्राद् ह्यवदानमात्रस्य यजमानं प्रत्याभिमुख्येन श्रावणाद्या ह्यव-
दानमात्रस्य देवतान्वयभ्रान्तिः सा न कार्या तेन याज्यानुवा-
क्याभ्यां होत्रा क्रियमाणस्य देवतोद्देशस्मारणस्य समस्तविष-
यत्वेन हेतुनेत्यर्थः । होत्रा क्रियमाणस्य देवतासंकल्पस्मा-
रणस्य कथं समस्तपुरोडाशविषयतावसीयत इत्याशङ्क्याग्नेयोऽ-
ष्टाकपाल इति वेदार्थानुसारेण समस्तविषययोस्त्यागदेवतोद्देशयो-
र्यजमानेनाग्नेयं समस्तः पुरोडाशो न ममेत्येवमध्वर्युणा च समस्तपुरो-
डाशमाभिमुख्येन यजमानं श्रावयेत्येवं देवतोद्देशस्य समस्तविषयस्यैव
कर्त्तव्यत्वादित्याह * विद्वद्भ्यामिति * । अष्टाकपालश्रुत्यवधारितय-
जमानव्यापारसमस्तविषयत्वदर्शनाध्वर्युव्यापारस्यापि समस्तवि-
षयत्वावधारणसूचनार्थादध्वर्युयजमानयोः साहित्यनिर्देशात् जातं
त्यागस्याप्युभयकार्यत्वभ्रमं निवर्तयितुं यथार्होक्तिः । ततश्च कर्तव्य-
स्मृत्यर्थत्वात् स्मारणस्यापि समस्तविषयतावसीयत इत्यर्थः ।
अवगतत्यागदेवतोद्देशांशद्वयस्यैव तर्हि द्रव्यस्य प्रक्षेपविधानात्
सोऽपि समस्तविषयः स्यादित्याशङ्क्य चतुरवत्तादिवेदार्थानुसारात्
१०२८।१ प्रक्षेपस्य ह्यवदानमात्रविषयत्वोपपत्तिं सूचयितुमाह * अध्वर्युणो
त्विति * । यागस्य द्व्याकारत्वे होमाहोमत्वलक्षणवैरूप्यापत्तिमाश-
ङ्क्यानेकरूपत्वाख्यस्य वैरूप्यस्यास्माभिरेवेष्टत्वेनाऽनापाद्यत्वादशो-
भनत्वाख्यं वैरूप्यमापादनीयं ह्यवदानाष्टाकपालवचनद्वयसामर्थ्यात्तु
द्व्याकारस्यैव यागस्य शोभनत्वप्रतीतेर्न तच्छक्यमापादयितुमित्याह
* न चेति * । रूपान्तरोपजननपक्ष एव समस्तस्य पुरोडाशस्य
यागसाधनत्वं सिद्ध्येन्नान्यथेति यदुक्तं तद्यथा पुरुषस्यैकस्मिन्नवयवेऽ-
धिकं देशं गतेऽपि पूर्वदेशान्वयापगमरूपं वैलक्षण्यं न भवति तथा
पुरोडाशस्य ह्यवदानाख्येऽवयवेऽधिकप्रक्षेपांशं गतेऽप्यौत्पत्तिकयाग-
साधनत्वोपपत्तेरुत्पत्तिवाक्याविरोध इत्येवं पुरोडाशस्य पुरुषवद्भावं

त् भिन्नविषयत्वपक्षे नापद्यत इत्याह * समस्तस्य चेति *। उपसंहारप्रदेयप्रकृतित्वोक्त्यर्थभाष्यद्वयातिरिक्तं च सर्वं सूत्रं भाष्यं च न विरुध्यत इति सूचयितुमाह *निरवदानाच्चेति*। द्व्याकारयागपक्षाश्रयणेन तत्राग्नेयवाक्येऽष्टाकपालस्य होमाख्ययागाविशेषरूपान्वयः प्रकृतयागान्विताष्टाकपालग्राहिचतुरवत्तवाक्यविहितप्रक्षेपाधिक्यान्यथानुपपत्तिकल्पत्वादानुमानिक । द्व्यवदानवाक्ये तु द्व्यवदानमात्रस्य चतुरवत्तवाक्यविहितप्रक्षेपाधिक्यात्मकयागीयविशेषरूपान्वयविधानात्प्रत्यक्षः । सामान्यमात्ररूपो ह्याग्नेयशब्दोक्तद्रव्यदेवतान्वयान्यथानुपपत्त्या यागः कल्प्यते जुहोतिशब्दात्तु विशेषरूपो यागः प्रतीयत इत्येवमुपसंहारानपेक्षं द्व्यवदानमात्रस्य प्रत्यक्षेण विशेषाकारयागान्वयेनाष्टाकपालस्य विशेषाकारयागान्वयकल्पनप्रतिबन्धोक्त्यर्थतया तत्रेत्यादिभाष्यं दैक्षादिवाक्ये च पशोर्विनष्टत्वेन साक्षाद्देवतान्वयायोगादगत्या सापेक्षतद्धिताङ्गीकारेण प्रदेयप्रकृतित्वोपपत्तिसूचनार्थतयापिचेति भाष्य व्याख्येयमिति सूचयितुमाह *अथवेति*। १०३०।१
चतुरवत्तवाक्यविहितो होमाग्नेयवाक्यविहिताद् यागाद्भिद्यते किंतु तस्य प्रक्षेपाख्यविशेषरूपतया चतुरवत्तवाक्यविहितस्य यागस्य पूर्वापरौ सामान्यविशेषरूपौ भागौ प्रक्षेपशून्यसामान्यमात्ररूपपात्नीवतपशुयागादिसिद्धयागान्वयद्रव्यानपेक्षाग्निहोत्रादिहोमसदृशौ सन्तौ यागहोमान्तरभेददर्शनादिहापि यागहोमभेदे भ्रान्तिं कुरुतः यथैकस्य नरसिंहाख्यस्यार्थस्य पूर्वापरौ भागौ मनुष्यपञ्चाननाभ्यां सदृशावित्यर्थ ॥

सर्वशेषेण स्विष्टकृदनुष्ठानम् । अधिकरणम् ॥ १२ ॥

अप्रयोजकत्वादेकस्मात् क्रियेरञ्छेषस्य गुणभूतत्वात् ४६॥

यथाभाष्यं तावदधिकरणान्तरं मत्वा प्रासाङ्गिकत्वेनानन्तरसङ्गतिमाह * यदेति * शेषकार्याणां शेषाप्रयोजकत्वेऽपि शेषैरेव स्वप्रतिपत्त्यै शेषसाध्यस्विष्टकृदादिप्रयुक्तिसंभवात्सर्वेभ्योनुष्ठानोपपत्तिमाशङ्क्य शेषाणां स्वकार्याणि प्रति प्रयोजकत्वायोगाख्यहेत्वन्तरोक्त्यर्थं शेषस्येति सूत्रावयवं शेषोहीतिभाष्येणान्ते व्याख्यातमपि सिद्धान्तहेतुप्रतिपत्तित्वप्रतियोगित्वेनार्थकर्मत्वस्यैव मुख्यपूर्वपक्षहेतुत्वात् स्वयमादौ व्याचक्षाणो निरवदानात्तु शेपः स्यादिति पूर्वा-

धिकरणसिद्धान्तसूत्रस्थशेषशब्दोपस्थापितानि शेषकार्याण्येकस्मा-द्धविषः क्रियेरन्नित्यत्र पूर्वपक्षप्रतिज्ञार्थं सूत्रावयवं व्याख्यातुमाह *तत्रेति*। आद्यहेतुव्याख्यार्थं यदीत्यादिभाष्यं व्याचष्टे*सत्यपीति*।

संस्कृतत्वाच्च ॥४७॥

एकदेशद्रव्यत्वेन शेषकार्याणां शेषाप्रयोजकत्वेऽपि शेषसाधितानां प्रधानोपकारित्वाच्छेषत्वाविशेषाच्च सर्वेषां साधनत्वावगतेः सर्वेभ्य-कार्याणीत्याशङ्क्य तुषोपवापकपालवत् शेषस्यान्यार्थत्वेन प्राप्तस्यापि शेषकार्याणि प्रत्युपादेयत्वेन विवक्षितैकसंख्यत्वादेकशेषसाधितैरेव शेषकार्यैः प्रधानस्योपकृतत्वान्न शेषान्तरेभ्यः कार्याणीत्येव यथाभाष्यं तावत्सूत्रं व्याचष्टे * यश्चेति * । सकृच्चेति भाष्यं विवक्षितैकसं-ख्यशेषसाध्येन शेषकार्येण सकृदवदानसाधितेन प्रधानं संस्कृत-मित्येवं व्याचष्टे * सकृच्छब्दश्चेति *। सकृत्कृतेन शेषकार्येणेत्येवं प्रतीयमानाया व्याख्यायास्त्यागे हेतुमाह * इतरथा त्विति *। प्रधानोपकारस्य संस्कारत्वाप्रसिद्धेः प्रधानपदाध्याहारापत्तेश्च भा-ष्यकारीयव्याख्यानापरितोषात् स्वयं पर्यग्निकरणादिभिरेव शेषस्य संस्कृतत्वात् शेषकार्याणां संस्कारत्वानुपपत्तेर्न सर्वसादृगुण्यसिद्ध्यै सर्वेभ्यः कार्याणीत्येवं पूर्वसूत्रस्थशेषपदानुषङ्गेण सूत्रं व्याचष्टे * अथ वेति * । प्रधानापूर्वसाधनत्वयोग्यताधानार्थसंस्कारसंस्कृ-तस्यापि शेषस्य प्रतिपत्त्यर्थोऽयं संस्कारो न विरुद्ध इत्याशङ्कानिरा-सार्थत्वेन कृतकार्यद्रव्यसंस्कारानर्थक्यापत्तेरतीतसंस्कारावसर-त्वादित्येवमावृत्त्या व्याचष्टे * अयमपीति * । क्रमोक्तचात्रावसरो विवक्षितः ॥

सर्वेभ्यो वा कारणाविशेषात् संस्कारस्य तदर्थत्वात् ४८॥

शेषाच्छेषकार्यानुष्ठानकारणस्य सर्वशेषेष्वविशेषात्सर्वेभ्यः का-र्याणीत्युक्तेः किं तत्कारणमित्यपेक्षायां प्रतिपाद्यत्वकारणसूचनार्थ-त्वेन सौत्रसंस्कारशब्दव्याख्यार्थं सहेति भाष्यं संस्कारत्वावेदकद्वि-तीयाश्रुत्यभावादयुक्तमाशङ्क्य यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रती-येतेत्यपेक्षाख्येच्छावाचिसन्नन्तेनाध्याहृतसंपूर्वेण करोतिना यैः कर्म-भिर्द्रव्यं संस्कर्तुमपेक्ष्यते तत्र द्रव्यं प्रति गुणः प्रतीयेतेति वदता

क्षणात्मायत्वाद्व्यस्वत्वनिवृत्तिरूपत्वाभ्युपगमेन यागरूपान्तर्भावोऽभ्युपगन्तव्य इत्याशङ्क्य प्राक्प्रतिश्रवणस्य दृष्टोपकारानवगमेऽप्यग्नये दास्य इति प्रतिश्रवणप्रकाशकमन्त्रविध्यन्यथानुपपत्तिकल्पितप्रतिश्रवणविधिवशेनादृष्टोपकारित्वावगमान्निर्वापकालीनप्रतिश्रवणनिष्पन्नयागादन्यत्राविनियोज्यत्वसंकल्परूपत्यागापेक्षयथाश्रुतेतिकर्त्तव्यताकत्वसिद्ध्यर्थत्वेनार्थवत्ता पूर्वनिर्वृत्तेत्यनेनोक्ता। अवदानादेः प्रक्षेपान्तस्यैकपदार्थत्वाभ्युपगमेन तावद्भिः क्रियाक्षणैर्व्याप्यस्य कालस्यैक्यावगतेस्तावत्कालमध्ये प्रक्षेपात्प्रागपि कृतस्य यागस्य प्रक्षेपकालत्वोपपत्तेर्यागस्य च स्वाहाकारेण वा वषट्कारेण वा देवेभ्योऽन्नं प्रदीयत इत्यर्थवादसामर्थ्याद्वषट्कारानन्तर्यप्रतीतेः प्रक्षेपस्य तु जुह्वरोपणादिव्यवधानात्पश्चाद्भावप्रतीतेरत्यन्तयौगपद्यायोगात्पश्चात्संस्कारत्वापत्त्यपरिहारमाशङ्क्य वषट्कारो द्रोध्यसंस्कारजन्यस्मृतिव्यवधानाद्यागस्याप्यत्यन्तानन्तर्यानुपपत्तेराहवनीयसमीपनयनक्षणे देवतोद्देशस्तदुपरिनिधानक्षणे द्रव्यत्यागस्तदनन्तरं प्रक्षेप इति यागप्रक्षेपयोरत्यन्तैकक्षणत्वाभावेऽप्यत्यन्तानन्तर्योपपत्तेस्तन्मध्ये नाशाद्यसम्भवाच्च न्यायविरोधापत्तेरत्यन्तानन्तर्ये च जायमाना बुद्धिः प्रमाणमित्यादिव्यवहारदर्शनाद्यौगपद्योपपत्तिमाह *तस्मिन्नेवेति*। प्रक्षेपस्य सर्वान्त्यांशत्वोक्तिविरोधापत्तेर्नात्यन्तैकक्षणत्वेऽभिनिवेष्टव्यम्। यागप्रक्षेपयोश्चैककालत्वे वषट्कृते जुहोतीति विहितकालेन प्रक्षेपेणैव यागकालोपलक्षणात् प्रक्षेपनिष्पत्त्यैव यागनिष्पत्त्युपलक्षणावगतेः प्रक्षेपानिष्पत्तौ यागस्याप्यनिष्पत्त्यवगमेन प्रक्षेपस्य प्रयोजकत्वेऽपि यागेन प्रयोक्तुं शक्यत्वान्नाशादिषु द्रव्यान्तरागमनन्यायाविरोध इति यागप्रक्षेपयोरेककालत्वोपपादनप्रयोजनमाह * तदुपलक्षितत्वादेव चेति *। स्विष्टकृदादीनां तु पश्चात्संस्कारत्वात् वैषम्यमित्याह *निर्वृत्तयागभावित्वाच्चेति*। प्रासङ्गिक्याश्चिन्तायाः प्रयोजनापेक्षायां प्रक्षेपस्य यागरूपान्तरत्वे समासत्वेन शब्दार्थत्वात् प्राधान्येन विधेयत्वापत्तेर्जुहोतिचोदितत्वेन दर्विहोमत्वात् प्रकृतिविकारभावाभावं तावत्प्रयोजनं सूचयितुमाह * यदि चेति *। चतुरवत्तवाक्यविहितस्य प्रक्षेपमात्रस्य होमत्वाभावाद्यागस्य चाग्नेयवाक्यविहितस्य वाक्यान्तरविहितप्रक्षेपाधिक्याद् होमत्वापत्तावपि जुहोतिचोदनोत्पत्तित्वाभावाद्दर्विहोमत्वानापत्तेस्तदापत्तावपि च व्यवस्थितप्रकृति-

लाभाभावाख्यापूर्वत्वहेत्वभावात् प्रकृतिविकारभावाभावानापत्तेरेतत्-प्रयोजनापरितोषाद्विकृतिषु द्यवदानप्रक्षेपातिदेशानतिदेशसिद्धिं पारमार्थिकं प्रयोजनमाह * विकृतिषु चेति *। जुहोत्युक्तस्यापि प्रक्षेपस्य यागात्कर्मान्तरत्वेनाङ्गत्वाभ्युपगमेऽग्निहोत्रादावपि प्रक्षेपांशस्य दृष्टप्रतिपत्त्यर्थत्वे संभवत्यदृष्टफलार्थत्वस्यान्याय्यत्वाद्यागस्यैव फलान्वयापत्तेर्होमः फलवानित्यादिरुदूघोषो विरुध्येतेत्याशङ्क्य तत्र प्रकृतावगतत्यागदेवतोद्देशांशद्वयद्रव्यग्राहित्वाभावेन जुहोतेः प्रक्षेपमात्रवाचित्वाभावाद् देवतोद्देशद्रव्यत्यागप्रक्षेपांशत्रयवाचित्वावगते-स्त्र्याकारयागपक्षे त्र्यंशस्य होमस्य पूर्वांशद्वयभूतो यागः प्रक्षेपस्य तु समाप्तित्वाच्छब्दार्थत्वेन प्राधान्याभ्युपगमे याग एव प्रक्षेपाङ्गं भविष्यति न तु कथंचित्प्रक्षेपो यागाङ्गमित्याह * ये त्विति *। प्रक्षेपस्य चतुरवत्तादिवाक्येष्वपि जुहोतिचोदनोत्पन्नत्वसद्भावेन विशेषणानर्थक्यादसिद्धक्रियान्तरान्वयत्वात् जुहोतिचोदनायामेव सत्यां तदङ्गत्वेनोत्पत्तिर्विधानं येषां सौर्यादीनामित्यादिशब्दोक्तानां देवतान्वितानां द्रव्यविशेषाणां तेषु जुहोत्यर्थस्यांशत्रयात्मकस्य पूर्वांशद्वयभूतः सत्रात्मा तेषां द्रव्यविशेषाणां संबन्धिन प्रक्षेपस्यैव वा यागोऽङ्गं भविष्यतीत्येवं सप्तमी बहुव्रीह्यङ्गीकरणेन तेषामिति षष्ठ्याश्च प्रक्षेपसंबन्धव्यतिरेकजनितत्वाङ्गीकरणेन व्याख्येयम् । प्रक्षेपमात्रस्य शब्दार्थत्वे पूर्वांशद्वयात्मकस्य यागस्यानुक्तत्वादवगतपूर्वांशद्वयद्रव्यग्रहणाभावाच्च द्रव्यद्वाराप्यप्रतीतेरङ्गत्वायोगमाशङ्क्याह * तत्र हीति *। तेषु द्रव्यविशेषेषु तेन तेषामिति षष्ठ्याक्षिप्तेन प्रक्षेपेणांशद्वयपूर्वकप्रक्षेपवाचिजुहोतिवाच्यत्वान्यथानुपपत्त्याक्षेपादुक्ताङ्गतेत्याशयः। जुहोतेः त्र्यंशवाचित्वे यजतिचोदनोत्पत्तिष्वप्यष्टाकपालादिषु प्रक्षेपमात्रवाचिता न युक्तेत्याशङ्क्य त्र्यंशवाचिनोऽपि तदसंभवे तात्पर्यवृत्तिसंकोचाभ्युपगमेन युक्तेति दृष्टान्तेनापपादयितुमाह * यजतीति *। यथानदीयत्वाद्देवताविशेषालाभाच्च यूपशकलानां पूर्वांशद्वयविध्यशक्तेः प्रक्षेपमात्रवाची जुहोतिस्तथेह सिद्धत्वात् पूर्वांशद्वयविध्यशक्तिरित्येतावता साम्येन दृष्टान्तः। प्रासङ्गिकं परिसमाप्य प्रकृतं सर्वप्रदानपरिहारमुपसंहरति * एवं च सतीति *। जुहोतेस्त्र्यंशवाचित्वे पूर्वांशद्वयस्यापि द्यवदानमात्रविषयत्वापत्तेः प्रक्षेपमात्रवाचितैवशब्देन परामृष्टा। उपसंहारपक्षापादितं दोषद्वयं चास्मि-

संस्कर्तुमपेक्ष्यमाणत्वेन संस्कार्यत्वोक्त्या लब्धप्रयोजनस्यापेक्ष्यमाणत्वोपपत्तेः संस्कार्यत्वाभिधानादुपयुक्तावशिष्टवाचिना च शेषशब्देन लब्धप्रयोजनत्वाभिधानात् द्वितीयाश्रुत्यभावेऽपि द्रव्यस्य संस्कार्यत्वावगतिमुपपादयितुमाह * येऽस्त्विति * । शेषस्य गुण- १०३१।३
भूतत्वादितिपूर्वपक्षहेतुनिरासार्थत्वेनापि संस्कारस्य शेषाङ्गत्वादित्येवं संस्कारस्य तदर्थत्वादिति सूत्रावयवव्याख्यार्थता सहीतिभाष्यस्याऽनेनैव वार्त्तिकेनोक्ता । अर्थकर्मणोऽपि संस्कारत्वोपपत्तेः प्रतिपत्तित्वावगतिः कथमित्याशङ्क्याह * तत्रापीति * । प्रतिपाद्यत्वस्याविशेषोपपादनसूचनार्थत्वेन तैः सर्वैः संस्कारस्यार्थ्यमानत्वादपेक्ष्यमाणत्वादित्येवं तदर्थत्वशब्दव्याख्यार्थं यस्येवेति भाष्यं व्याचष्टे * नाश्रेति * । अप्रयोजकत्वस्य पूर्वपक्षासाधकत्वोक्त्यर्थत्वेनापि संस्कारस्य तैर्विधिभिरेवार्थ्यमानत्वात् प्रयुज्यमानत्वादित्येवं संस्कारस्येत्यादिसूत्रावयवव्याख्यार्थं सहीतिभाष्यमिति सूचयितुमसाधकतामुपपादयति * यदपि चेति * । संस्कृतत्वाच्चेतिसूत्रेणातिक्रान्तसंस्कारावनरत्वादिति व्याख्यायां कृतप्रयोजनद्रव्यसंस्कारानर्थक्यस्योक्तस्य परिहारार्थत्वेनापि कारणाविशेषात् संस्कारस्येत्येतावता संस्कारस्य यत्कारणं तस्य प्रधाने निष्पन्नेऽप्यविशेषादित्युक्ते किं तत्कारणमित्यपेक्षायां तदर्थत्वादित्यनेन हविषः प्रधानार्थतोक्तेत्येव व्याख्यातुमाह * निर्वृत्तेऽपि चेति * । यथा हविषः प्रधानार्थत्वात् प्रधानापूर्वसाधनत्वयोग्यत्वासिद्ध्यै प्राक् संस्कारार्थवत्ता तथा निष्पन्नेऽपि प्रधाने तदीयस्य हविषोऽशुचिस्पर्शादिनोपघाते क्रतुवैगुण्यान्निष्पन्नस्यापि प्रधानापूर्वस्य गुरुशुश्रूषानिष्पन्नस्य गुरुसंतोषस्य कुतश्चिदपराधान्नाशवन्नाशापत्तेस्तदीयत्वनिवृत्त्यै प्रतिपत्त्यपेक्षास्तीत्याशयः । सर्वस्य च प्रक्रान्तस्य समाप्तेः क्रियान्तरेणाभिव्यञ्जनीयत्वाद्यथा ज्योतिष्टोमसमाप्तिरुदवसानीयया सत्रसमाप्तिः पृष्ठशमनीयेन संस्थाजपेन च सर्ववैदिककर्मसमाप्तिरुद्यापनेन च व्रतसमाप्तिरभिव्यज्यते तथा द्रव्यस्य क्रत्वर्थत्वेन निर्वापादिना प्रक्रान्तस्य क्रत्वर्थत्वसमाप्तिः प्रतिपत्त्यभिव्यञ्जनीयेत्यर्थवत्त्वसिद्धिः । एतत्त्वसमाप्तिस्तन्त्रसारे विस्तरेणोत्पत्तौ येन संयुक्तं तदर्थं तत् श्रुतिहेतुत्वात्तस्यार्थान्तरगमने शेषत्वात् प्रतिपत्तिः स्यादिति चतुर्थाधिकरणे व्युत्पादितम् ।

लिङ्गदर्शनाच्च ४९।

वीप्साया लिङ्गत्वं भाष्योक्तमुपपादयितुमाह * सकृत्सकृदिति *। संस्कारपक्षेऽत्रत्यपूर्वपक्षायोगात्तस्य चातुर्थे येनेति चतुर्थाधिकरणे प्रतिपत्तित्वव्युत्पादनेन व्युत्पादयिष्यमाणस्याक्षेपायोगादेतदधिकरणानुपपत्तेरेतदधिकरणसिद्धान्तलिङ्गोपन्यासानर्थक्याच्चतुर्थव्युत्पाद्यप्रतिपत्तित्वं लिङ्गमेवेह सर्वप्रदानाधिकरणसिद्धान्तप्रयोजनस्य शेषकार्याणां सर्वहविःप्रयोज्यत्वात्सर्वेभ्योऽनुष्ठेयत्वस्य प्रतिपत्तित्वेनोपपादनद्वारा सर्वप्रदानाधिकरणसिद्धान्तोपोद्वलनायेति सूत्रार्थस्तु संस्कारपक्षे चेत्युक्तम् चतुर्थसिद्धप्रतिपत्तित्वेनात्रत्यपूर्वपक्षायोगादधिकरणान्तरार्थत्वेनाप्रयोजकत्वादित्यादिसूत्रचतुष्टयव्याख्यायां भाष्यकारीयायामपरितोषेण स्वयं प्रयोजनपरतया व्याख्यातुमारभते * प्रयोजनेति *। प्रयोजनपरत्वव्याख्यावतारार्थं सर्वप्रदानाधिकरणचिन्ताप्रयोजनं तावत्पृच्छति * यदि नामेति *। नि शेषे तु प्रयोजका इति वार्तिकेन सर्वप्रदानाधिकरणपूर्वपक्षे शेषकार्याणां प्रयोजकत्वोक्तेरप्रयोजकत्वसूत्रं कथं तत्रात्यपूर्वपक्षप्रयोजनोक्तौ योज्यमित्याशङ्क्य सर्वप्रदानाधिकरणोपक्रमे योऽस्माभिः शेषकार्याणां प्रयोजकत्वरूपोऽर्थः पूर्वपक्षाभिमतत्वेनोक्तस्तस्मिन्नबाधित एव हविषामप्रयोजकत्वादित्येवं योज्यमित्याह *तत्रेति*।शेषकार्यैश्च प्रधानद्रव्यग्रहणस्यापहाररूपत्वेनानुचितस्यापि शेषशब्दप्रयोगबलात् कार्यं हव सकृदेकस्मात् प्रधानात् करणे निरवयवत्वात् समस्तस्य कृतत्वसंपत्तेर्नान्यतोऽपि प्रधानाद् द्रव्यापहार कार्य इति सामस्त्यवाचिसंशब्दाभ्युपगमेन संस्कृतत्वाच्चेति सूत्रं योजयति * बलाच्चेति *। संस्कारस्य सर्वप्रकृतहविरर्थत्वेन सर्वहविषां कार्यते प्रयुज्यतेऽनेनेति व्युत्पत्त्या कारणशब्दोक्तस्य प्रयोजकत्वस्याविशेषात् सर्वेभ्यो हविर्भ्यः शेषकार्याणि क्रियेरन्नित्येवं सिद्धान्तप्रयोजनोक्तौ तृतीयं सूत्रं योजयति * सिद्धान्तइति *। प्रयोजनपरत्वे व्युत्पाद्यन्यायाभावाल्लिङ्गोपन्यासानर्थक्यमाशङ्क्य यथा प्रयाजे प्रयाजे कृष्णलं जुहोतीति विकृतौ प्रयाजानुवादस्य प्रयाजानामङ्गत्वलिङ्गस्य दर्शनं पौर्णमास्यधिकरणसिद्धान्तप्रयोजने प्रयाजाग्नेयादीनामङ्गाङ्गित्वे स्थितं सत्प्रयोजनोपोद्वलनद्वारा समुदायानुवादासि-

ष्टान्तमुपोद्बलयति तथा वीप्सादर्शनमपि द्व्यवदानमात्रसिद्धान्तोपोद्बलकत्वादुपन्यस्तमित्याह * लिङ्गेति * ।

प्राथमिकशेषास्विष्टकृदाद्यनुष्ठानम् । अधिकरणम् ॥ १३ ॥

एकस्माच्चेद्याथाकाम्याविशेषात् ॥ ५० ॥

पुरोडाशकपालेन तुषानुपवपतीत्यादिपूदाहरणान्तरेषु परप्रयुक्तेनापि पुरोडाशकपालेन तुषोपवाप प्रत्यङ्गत्वेनोपादेयत्वाद्विवक्षितैकसंख्येन तुषोपवापकार्यत्वावगमादनियमपक्षे येन केन चित् पुरोडाशकपालेन तुषोपवाप कार्य मुख्यनियमपक्षे प्रथमोपधेयेनैवेति फललाभेन कृत्वा चिन्तार्थवत्त्वस्य स्पष्टत्वाच्छेषकार्याणां च प्रधानकर्मत्वाभ्युपगमेन विचाराच्छेषसंस्कारत्वाभावेन मुख्यस्यानुग्राह्यताया मुख्यं वा पूर्वचोदनाल्लोकवदिति द्वादशाधिकरणे मुख्यनियमहेतुत्वेन वक्ष्यमाणायाः स्थितेषु च शेषेषु शेषकार्यकर्तव्यत्वपक्षे शेषकार्यकाले सर्वशेषसन्निधानविशेषान्मुख्यपाश्चात्यत्वाभावेन मुख्यमतिक्रम्येतरप्रतीक्षणानापत्तेः शेषकार्यान्यथानुपपत्त्या शेषस्थापनाक्षेपपक्षे तु शेषस्थापनकाले मुख्यपाश्चात्यत्वसंभवेऽपि सर्वप्रधानसमाप्त्युत्तरकाले शेषकार्यानुष्ठानात्तत्काले विशेषानुपलब्धेः स्थापनकाले तु मुख्यशेषस्थापनं विना विशेषान्तराच्छेषकार्यसिद्धेस्तदाक्षेपप्रमाणाभावादन्त्यशेषस्थापनाक्षेपकाले तु स्थापनं विना शेषकार्यासिद्धेस्तदाक्षेपस्यैव प्रमाणवत्त्वाद्वैपरीत्यापत्तेः प्रथमं वा नियम्येत कारणादतिक्रमः स्यादित्येकादशाधिकरणवक्ष्यमाणस्य मुख्यातिक्रमकारणाभावस्य मुख्यनियमहेतोरभावेनागतार्थत्वस्य स्पष्टत्वाद्यथाभाष्यं च सूत्रार्थस्य स्पष्टत्वाद्यथाकामामीतिप्राप्तेश्चातुर्वर्ण्यादिवत् स्वार्थिकस्य भ्रान्तत्वाद्वा याथाकाम्यमिति प्राप्ते याथाकामीतिपदासाधुत्वाशङ्कापरिहारमात्रमाह * याथाकाम्यमिति *। शेषकार्यानुष्ठानबुद्धेर्मुख्यमात्रविषयत्वोपसहारक प्रथम वा नियम्येतेतिन्यायमनिरस्य याथाकाम्य क्रियेरन्निति पूर्वपक्षोक्तयशक्तेर्याथाकाम्यशब्दस्य क्रियाविशेषणत्वनिमित्तनपुंसकत्वाविवक्षया कामानुरूपैव शेषकार्यानुष्ठानबुद्धिर्भवति नतु मुख्यमात्रविषयोपसहृतेति निरासद्वारा पूर्वपक्षसूचनार्थं याथाकाम्यशब्दस्य क्रियेरन्निति पूर्वाधिकरणपूर्वपक्षसूत्रस्थशब्दोपस्थापिततजन्यशेषकार्यानुष्ठानबुद्धि-

सामानाधिकरण्येन स्त्रीलिङ्गत्वविवक्षायां षित्वाद् ङीप्प्रत्यये कृते ङीष ईत्वाद्यस्येतीत्यत इतीति वर्त्तमाने हलस्तद्धितस्येति ताद्धितत्वेन यकारलोपाद्यस्येति चेति सूत्रेण चाकारलोपात्साधुत्वसिद्धिरित्याशयः ॥

मुख्याद्वा पूर्वकालत्वात् ॥ ५१ ॥

स्थितेषु शेषेषु शेषकार्याणामनुष्ठेयानामकस्मादनुष्ठानमिति पूर्वपक्षकृत्वाचिन्तापक्षे शेषसद्भावे निमित्तं शेषकार्यं नैमित्तिकं शेषकार्यान्यथानुपपत्त्या शेषस्थापनाक्षेप इति स्वप्रदानाधिकरणपूर्वपक्षप्रयोजनकृत्वाचिन्तापक्षे विहितशेषकार्यावश्यकत्वं निमित्तं शेषस्थापनं नैमित्तिकमिति भाष्योक्तानिमित्तनैमित्तिकव्याख्यापूर्वं सिद्धा-
१०३।२।२ न्तहेतुं व्याख्यातुमाह *शेषेति*। स्थितशेषपक्षे शेषकार्यकालात्प्राक्पौर्वापर्याऽनालोचनात्कार्यकाले तु पौर्वापर्याभावान्मुख्यशेषस्य पूर्वकालत्वायोगमाशङ्क्य प्रधानप्रयुक्तहविःशेषाणामेव शेषकार्येषु विनियोज्यत्वेन प्रयोजकप्रधानपौर्वापर्यस्य शेषकार्यकाले ऽवश्याऽऽलोचनीयत्वात् स्मृतिक्रमेण पदार्थानुष्ठानमिति क्रमेण वा नियम्येतेति पञ्चमवक्ष्यमाणपाठक्रमन्यायानुसारात् प्रयोजकप्रधानप्राक्स्मृतिद्वारा प्राक्स्मृतत्वेन प्रथमहविःशेषस्य तावच्छेषेण कार्यं स्विष्टकृदाद्यापततीत्युक्तम्। स्थापनाक्षेपपक्षे शेषपौर्वापर्योपपत्तावपि मुख्यशेषस्थापनाभावेऽपि शेषान्तरस्थापनात् शेषकार्यसिद्धेस्तदाक्षेपप्रमाणाभावादन्त्यशेषस्थापनाक्षेपकाले तु शेषान्तरासम्भवात्तत्स्थापनं विना शेषकार्यासिद्धेरन्त्यशेषस्थापनाक्षेपस्यैव प्रमाणवत्त्वाद्विपरीत्यापत्तिमाशङ्क्यास्मिन्नपि पक्षे प्रधानप्रयुक्तस्यैव हविषः शेषस्थापनाक्षेपात्पाठक्रमन्यायानुसारेणैव प्रयोजकप्रधानप्राक्स्मृतिद्वारा प्रथमहविःशेषस्यैव प्राक्स्मृतेः शेषसम्बन्धिस्थापनाक्षेपाख्यकार्यं तस्यैव तावदापततीत्युक्ते शेषान्तरस्थापनादपि स्विष्टकृदादिसिद्धेर्मुख्यशेषस्थापनाक्षेपस्याप्रमाणकत्वशङ्काविवक्षितैकमुख्यशेषाक्षेपमात्रेण शेषकार्यसिद्धेर्मुख्यशेषस्मृतिकाले शेषान्तरानालोचनात्तत्स्थापनाक्षेपसंभवेनार्थापत्तिभङ्गानुपपत्तेः पूर्वशेषातिक्रमेण चान्त्यशेषस्मृतिप्रतीक्षणानौचित्यात् स्थापनाक्षेपानुपपत्तेर्मुख्यशेषस्थापनाक्षेप एव प्रमाणवानिति परिहारसूचनेन निराकर्तुं पूर्वमित्युक्तम्। स्मृतिपौर्वापर्येऽपि शेषकार्यनिमित्तस्य शेषसद्भावस्य शेषस्थापननिमित्तस्य वा शेषकार्यावश्यकार्यत्वस्य सर्वत्र

विशेषान्मुख्यातिक्रमायोगमाशङ्क्य मुख्याच्छेषकार्यकरणे तत्काले शेषकार्याणां कर्त्तव्यत्वावस्थत्वने निमित्ताविघातान्नैमित्तिकं शेषकार्यं शेषस्थापनं वा कर्त्तव्यं द्वितीयादिभ्यस्तु तत्करणे तत्काले कृतावस्थत्वेन शेषकार्याणां कार्यत्वाभावाच्छेषान्तरस्य च निमित्तत्वाभावाद् द्वितीयादिशेषसम्बन्धिनो नैमित्तिकस्य निमित्ताविघातावगतेर्द्वितीयादिभ्यः शेषकार्याणामक्रियेति विशेषोक्त्यर्थं नतःकर्तव्येऽपि-त्यादिभाष्यं व्याचष्टे *नचेति* विरोधोक्तिव्याख्यातनिमित्तविघातोपपादनार्थं शेषस्य साधनत्वचोदनायाः शेषान्तरस्य साधनत्वावगतौ शेषकार्यचोदनायाश्च शेषकार्यावश्यकत्वावगतौ निमित्तत्वनिरासः । भाष्ये द्वितीयादीनामिति षष्ठी नैमित्तिकव्यतिरेकजानिता ॥

पुरोडाशविभागस्य भक्षार्थत्वम् । अधिक ॥ १४ ॥

भक्षाश्रवणाद् दानशब्दः परिक्रये ॥ ५२ ॥

इदं ब्रह्मण इत्यादेश्चतुर्धाकृतपुरोडाशभागानां निष्कृष्य ब्रह्माद्यन्वयकथनरूपस्य निर्देशस्य प्रत्येकमसमर्पणाख्यविभागरूपदानाक्षेपकत्वाशयतां सौत्रदानशब्दोक्तेर्भाष्यस्थविभागोक्त्या सूचितामुपपादयितुमाह * पुरोडाशस्येति * तस्येदंशब्दनिर्दिष्टस्य पुरोडाशखण्डस्य ब्रह्मादिभ्यो विभजनाभावे ब्रह्माद्यन्वयव्यपदेश्यत्वायोगापत्तेरिदं ब्रह्मण इत्यादिनिर्देशेन विभागाक्षेपो ऽवसीयतइत्यर्थ । संदेहभाष्यं व्याचष्टे । * नन्विति * । पूर्वपक्षप्रतिज्ञार्थत्वेन परिक्रयोक्तिव्याख्यार्थं किमिति भाष्यं व्याचष्टे * परिक्रयार्थमिति * । भक्षाश्रवणेऽपि ब्रह्मादिभ्यः समर्पणस्य पुरोडाशप्रतिपत्त्यर्थत्वात् प्रतिपत्तेश्च क्षपणार्थत्वात् ब्रह्माद्यन्वयेन च पुरोडाशक्षपणस्य योग्यतया भक्षणद्वारत्वावगतेर्भक्षणावगमात्सौत्रस्य हेतोरसाधकत्वाशङ्कानिरासार्थं भक्षयितव्यमिति द्रव्यप्राधान्यवाचितव्यप्रत्ययाश्रवणोक्त्या भाष्यस्थया द्रव्यप्राधान्याश्रवणोपलक्षणार्थता सौत्रस्य हेतोः सूचितेति दर्शयन्न श्रूयत इति भाष्यं व्याचष्टे * नहीति * । अनेन च स्विष्टकृदादीनां प्रतिपादितत्वात्सर्वेभ्यः कार्यत्वेऽपि चतुर्धाकरणस्याग्नेयं चतुर्धा करोतीति सन्निहितवाचिसर्वनामार्थवृत्तितद्धितान्तपदाद्दिष्टप्रकृतद्रव्यग्राहित्वेऽप्यर्थकर्मत्वादाग्नेयप्रकृतिकानेकहविष्कायां विकृतावेकस्मादेव मुख्या-

नु कार्यतेतिकृ वाचिन्तोपस्थापितप्रयोजनाधिकरणमिदूधान्तस्य चतुर्धाधिकरणाविषयाक्षेपेण पूर्वपक्षिणा प्रत्यवस्थानादनन्तरसङ्गतिः सूचिता । कर्मकरेऽप्यश्नोति भाष्यं सोपपत्तिकपूर्वपक्षोपसंहारार्थत्वेन व्याचष्टे * तस्मादिति * पश्चाद्यपूर्वपक्षव्युत्पाद्यभूतमव्ययसमुच्चारणव्याख्ययुक्तयन्तरसूचनार्थत्वेन चशब्दव्याख्यार्थं द्रव्याणां क्रियाङ्गतोक्ता ॥

तत्संस्तवाच्च ॥ ५३ ॥

चतुर्धाकृतपुरोडाशविभागस्य परिक्रयत्वसंस्तवादपि परिक्रयार्थनेत्येवं दक्षिणात्वसंस्तवोक्त्या भाष्येण व्याख्याते कथं दक्षिणोक्तेः परिक्रयवाचित्वपक्षायामुपपादयितुमाह * एषा वैइति * ॥

भक्षार्थो वा द्रव्ये समत्वात् ॥ ५४ ॥

वाशब्दोक्तायां परिक्रयार्थत्वनिवृत्तौ सौत्रो हेतुर्न तु भक्षार्थतायामिति सूचयितुं वाशब्दार्थमेव तावद् व्याचष्टे * नवेति * । तदुपपादनार्थं चतुर्धा कृते द्रव्ये यजमानस्यर्त्विग्भिः साम्यादिति सौत्रं हेतुं प्रश्नपूर्वं व्याचष्टे *कुतइति * । भाष्ये तु भक्षार्थत्वसिद्धान्तप्रतिज्ञोपपादनार्थत्वेन दानायोगात् परिक्रयार्थत्वायोगोक्त्यर्थतया वाशब्दं कुतइति भाष्येण प्रश्नपूर्वं व्याख्याय परिक्रयार्थत्वपूर्वपक्षनिरासनिमित्तो हेतुः कथमित्यादिना तस्मान्नपरिक्रय इत्यन्तेन व्याख्यातः । श्लोकं व्याचष्टे
१०३३।१ * समस्तस्येति * । देवतोद्देशेन त्यक्तस्यापि देवताया प्रतिग्रहीतृत्वाभावेनाऽस्वाम्यात् प्रहीणस्वामिकस्य पुनः स्वीकारात् परिक्रयार्थत्वोपपत्तिशङ्कानिरासार्थं नचेतिभाष्यं व्याख्यातुमाह * तत्रेति * । श्रुतिजामदग्न्यत्वदृष्टान्तेन शिष्टाचारः प्रकाशितः । तस्मादिति पूर्वपक्षनिरासोपसंहारभाष्यं व्याचष्टे * तस्मादिति * । भक्षार्थत्वसिद्धान्तप्रतिज्ञोपपादनार्थत्वेनाप्यावृत्त्या परिक्रयार्थेऽपि द्रव्ये भक्षस्य समत्वादित्येवं सौत्रं हेतुं योजयितुं पूर्वपक्षोक्ताश्रवणहेतुकभक्षार्थत्वाक्तबनुभाषणार्थमथेति भाष्यं व्याचष्टे * कथं खल्विति * । भक्षार्थत्वोपपादनार्थत्वेनाप्यावृत्त्या सौत्रहेतुयोजनार्थमुच्यत इत्यादि सर्वं भाष्यं तात्पर्यतो व्याचष्टे *नदिति* । ब्रह्मादिभिरित्यादिभाष्यं द्रव्यप्रतिपत्त्यर्थत्वत्यागेन कर्तृसंस्कारमात्रार्थत्वोक्त्यर्थतयान्येषां व्याख्यां दूषयितु-

माह *ब्रह्मादिभिरिति*। द्रव्यप्रतिपत्त्यनपेक्षकर्त्रुपकारमात्रार्थत्वेपि भक्षणं विना साक्षात्कर्त्रुपकारित्वायोगात्परिक्रयानापत्तिमाशङ्क्य गृहनयनादिनापि स्वकार्यैकुटुम्बभरणोपयोगात्मकसाक्षादुपकारसम्भवात् स्वयं भक्षणं वोपकारोस्तु स्वाम्यमात्रं वेतिजिज्ञासायामनेकोपयोगहेतुत्वात्स्वामित्वमात्रोपकारनिर्णयौचित्यावगते स्वामित्वापादकपरिक्रयणप्रत्युपपादनार्थं नचेतिभाष्यं व्याख्यातुं नचेत्युक्तम्। द्वादशे च सायमारण्याशनवदिडादिशेषोपि ज्योतिष्टोमाङ्गभूतेषु दर्शपूर्णमासविकारेष्वतिदेशप्राप्तः पयोव्रतं ब्राह्मणस्येति प्रत्यक्षविहितेन व्रतेन निवर्त्यते इति शेषभक्षस्तथेति सूत्रेण पूर्वपक्षयित्वा नान्यार्थत्वादित्यनेन शेषभक्षस्य द्रव्यप्रतिपत्त्यर्थत्वेन क्रतुयुक्तपुरुषसंस्कारार्थाङ्गत्वादन्यार्थत्वान्न शेषभक्षो व्रतेन निवर्तत इति वदता सर्वत्रेडादौ भक्षस्य द्रव्यसंस्कारार्थतायाः वक्ष्यमाणत्वात् तद्विरोधोपि प्रतिपत्तित्वानभ्युपगमे स्यादित्याह *सर्वत्र चेति*। अमांसभक्षणनियमेनापि पाशुकेडादिभक्षानिवृत्तिसूचनार्थादिशब्दः। पुरुषस्येवेत्यत्रार्थं द्रव्यसंस्कारानपेक्षत्वोक्तं कार्यम्, एवमनेनोभयसंस्कारार्थत्वात् भाष्यं व्याख्यातुमाह *अत इति*। द्रव्यसंस्कारानपेक्षत्वेपि प्रौढ्या भक्षमुपपादयितुमाह * कर्तृसंस्कारस्येति * । मुख्योपकारकभक्षणनिष्क्रमकारणाभावाद्भक्षणे कार्येपि स्वकुटुम्बकृतेनापि भक्षणेन ब्रह्माद्युपकारसिद्धेः स्वयं भक्षणनियमे को हेतुरित्यपेक्षायामिदं ब्रह्मण इत्यादिविभागेन ब्रह्मान्वयादेशनाख्यस्य व्यादेशस्यान्वयविशेषं विनान्वयसामान्यापर्यवसानाद्भक्ष्यभक्षकत्वरूपान्वयविशेषपर्यवसायित्वावगतेस्तद्द्वारेण स्मारितरूपतया प्रकान्तस्य भक्षणस्य यदनुष्ठानाख्यं समापनं तस्य ब्रह्मादिभिः कर्तव्यत्वं हेतुत्वेनोक्तम् । यथा च क्रतुसंस्कारापेक्षस्य भक्षणकृत एव संस्कारो योग्यत्वादवधार्यते तथा शेषस्यापि सर्वान्तरङ्गक्षपणरूपप्रतिपत्त्यपेक्षस्य भक्षणकृतैव प्रतिपत्तिरवधार्यत इत्याह *शेषस्यापिचेति * ।

व्यादेशाद् दानसंस्तुतिः ॥ ५५ ॥

या दक्षिणाख्यदानरूपतया विभागसंस्तुतिः परिक्रयार्थत्वे हेतुत्वेनोक्ता सा दक्षिणा विभागेन देयत्वात् विभागरूपया विभज्य ब्रह्माद्यन्वयकथनात्मकव्यादेशरूपत्वेनेदं ब्रह्मण इत्यादिनिर्देशस्य तुल्यतया दक्षिणात्वेप्युपपन्नेत्येवं पूर्वपक्षलिङ्गपरिहारार्थं सूत्रे दक्षिणाकार्यस्य-

र्विगानमनाख्यकल्पकारस्य शेषं प्रतिपादयता भक्षणेन प्रसङ्गात् करणावगतेर्दक्षिणाकार्योपपत्तिरपि दक्षिणात्वसंस्तवोपपत्तौ हेतुत्वेनोपलक्षितेति सूचयन् सूत्रं व्याचष्टे * दक्षिणेति *। सिद्धान्तमुपसंहरति * तस्मादिति *। अादेशमन्त्रस्य ब्रह्माद्यन्वयविभागाविधायित्वेपि प्रकाशमानार्थानुपपत्त्या ब्रह्माद्यन्वयविभागविध्याक्षेपसूचनाय्गेपदेशोक्तिः ॥

व्याख्याता तन्त्रटीका बहुभिरपि भृशं सत्यमन्यैर्निबन्धै-
रुत्सृष्टा यत्नभावाद् भयपनुविदधानैस्तु दुर्बोधतत्त्वाः ।
ग्रन्थासारांशभावा अपिच न नितरां व्याकृतेष्वप्यमीषु
स्पष्टं कात्स्न्र्येन बोधो नहि भवति भृशं प्रायशोन्यैर्निबन्धैः ॥ १ ॥

तस्मात्सर्वान् निबन्धानपरमपि चतुष्वेव भट्टप्रणीतं
मीमांसासारविद्वद्बहुमतनिचयं चापजीव्यादरेण ।
युक्तीश्चालोक्य सम्यग् बहुविदभिमतो माधवार्यस्य सूनुः
सोमेशः कर्तुमैच्छत्सकलविवृतये तन्त्रटीकां सुटीकाम् ॥ २ ॥

कीलालतुल्या नयवत्तयैषा टीकोच्यतां न्यायसुधेति नाम्ना ।
विद्वन्मनोहारिबहूपयोगिप्रामाणिकन्यायनिधानतोपि ॥ ३ ॥

सूत्रेषु भाष्येष्वपि वार्तिकेषु नोपेक्षितं दुर्गममत्र किंचित् ।
वाक्यं पदं वाऽन्वयतोऽर्थतो वा सर्वानवद्यङ्करणीति तस्मात् ॥ ४ ॥

सर्वव्यापी सदानन्दज्ञानात्मा परमेश्वरः ।
प्रीयतां ग्रन्थकरणादस्मान्मे मङ्गलप्रदः ॥५ ॥

इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रतिद्वन्द्वमो मयाजि-
माधवभट्टोपाध्यायात्मजभट्टसोमेश्वरकृतौ
तन्त्रवार्तिकटीकायां सर्वानवद्यङ्करण्यां
न्यायसुधाख्यायां तृतीयाध्यायस्य
चतुर्थः पादः
समाप्तोयं शुभं भूयात् ।

॥ श्रीगणेशाय नमः ॥

तृतीयाध्यायस्य सप्तमपादः ।

प्रकरणविशेषादसंयुक्तं प्रधानस्य ॥ १ ॥

तुल्यः सर्व्वेषां पशुविधिरित्यारभ्य स्थानस्य पूर्व्वैः सह विरोधाविरोधचिन्ताप्रस्तावात्पदान्तरत्वेन चाक्षयाराच्छिद्रमसंयुक्तमितिवत्प्रासङ्गिकसंगत्ययोगाद्वाक्यप्रकरणविरोधाविरोधचिन्तायाः प्रकरणासङ्गतिमाशङ्कयाराच्छिद्रमिति प्रासङ्गिकवाक्यप्रकरणविरोधाविरोधचिन्तासङ्गतिद्वारागतेन नैमित्तिकमतुल्यत्वादित्यादिना समानासमानविधानाधिकारेणाङ्गाङ्गित्वशून्यसोमफलचमसादिविषयेण सहाङ्गैः सह प्रधानानां समानासमानविध्यविषयतया वैलक्षण्यात्पादान्तरगतत्वेनैतद्वाक्यप्रकरणविरोधाविरोधाचिन्तनं प्रस्तूयत इत्याह *समानेति*। किं प्रस्तूयत इत्यपेक्षायामाह * दर्शेति * । सौमिक्या वेदेर्देशात्मकत्वेन योग्यत्वाख्याल्लिङ्गात्प्रयोगाङ्गत्वावगतेः सर्व्वार्थत्वे वक्ष्यमाणेपि दार्शपौर्णमासिक्या सप्तमीश्रुत्या हविरासादनाङ्गत्वोक्तेः प्रयोगाङ्गत्वाभावात्तन्न्यायेनागतत्वं सूचयितुं दर्शपूर्णमासविशेषणं प्रकरणात्प्रधानमात्रार्थत्वपूर्वपक्षं वाक्यविरोधादयुक्तमाशङ्कयोपपादयति *यद्यपीति*। प्रकरणस्य प्रधानाख्यविषयविषयत्वोक्तयर्थत्वेन प्रकरणविशेषोक्तिव्याख्यार्थं प्रधानानां हीति भाष्यं व्याचक्षाणः पूर्व्वपक्षोपपादनमुपसंहरति * ततश्चेति* । प्रकरणस्याव्यावर्त्तकत्वाद्विशेषे वाक्यस्थापकत्वायोगमाशङ्कय ग्राहकत्वेनैव धर्म्मेण प्रकरणस्य प्रकरणार्थत्वाख्यविशेषरूपेण स्वान्तःपठिताङ्गविनियोजकतया विशेषे वाक्यस्थापनहेतुत्वस्य नैव व्यावर्त्तते संस्कृतेन तु तेन प्रयोजनमस्तीत्यादिजञ्यमानाधिकरणभाष्योक्तत्वाद्व्यावर्त्तकत्वेपि व्यवस्थापकत्वोपपत्तिमाह * सत्यपिचेति * । वाक्यविरोधशङ्कानिरासार्थत्वेनासंयुक्तोक्तिं व्याख्यातुमाह * संयुक्तमिति चेति * ॥

सर्व्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात् ॥ २ ॥

सौत्रस्य हेतोः साक्षात्प्रतिज्ञायामसाधकत्वात्स्वयं हेत्वन्तरमाह

---

१ पञ्चमषष्ठपादन्यायसुधा नास्ति अलभ्यग्रन्थतया यावल्लब्ध मुद्र्यते ।

३१२७।३ * वाक्येति * । प्रतिज्ञयैवार्थादुक्तत्वोक्त्यात्सूत्रत्वशङ्का कथमवगम्यत इत्यादिभाष्योक्तत्वोक्त्या चोद्भाष्यत्वाशङ्का निरस्ता। सौत्रं हेतुं पूर्वपक्षहेतुनिरासार्थत्वेन व्याचष्ट * यत्त्विति * । विरोधविषयत्वाविशेषणायेहशब्दः । एतद्धेतुव्याख्यार्थं न शेषत्वमिति भाष्यं तदुपपादनार्थं चोपकारलक्षणं हीति भाष्यमकहेऽयाक्षिपति * कथं पुनरिति * । विरोधविषयत्वेनाद्यं भाष्यमुपपादयति * उच्यत इति * । शक्यौ हीति पूर्वपक्षवार्त्तिकेनाविरोधोक्तेर्विरोधविषयत्वायोगं शङ्कते *यत्त्विति* । धर्म्माणां हविःसाद्गुण्यार्थबार्हिरर्थत्वेन वाक्यात्सर्व्वहविःसाद्गुण्यार्थबार्हिरर्थत्वावगमेनाङ्गहविर्बार्हिष्यकरणे वाक्यबाधापत्तेर्विरोधमुपपादयति * कथमिति * । शेषत्वविषये वाक्यविरोधात्प्रकरणाव्यापारेऽप्यपूर्व्वान्वयलक्षणायां व्यापाराभ्युपगमात्तस्य च तादर्थ्याख्यान्वयमात्रविषयत्वेनान्वयान्तरलक्षणायामशक्तेरङ्गहविषां च प्रधानापूर्व्वेण सह तादार्थ्याख्यान्वयाभावादङ्गापूर्व्वस्य चाप्रकरणत्वेनाशक्यलक्षणत्वात्प्रकरणलक्षितप्रधानापूर्वार्थहविर्मात्रार्थत्वं धर्माणामाशङ्क्योपकाराकाङ्क्षावशेनैव प्रकरणात्तादर्थ्यावगतेरुपकारित्वस्यापि लक्षयितुं शक्यत्वादङ्गहविषामपिच प्रधानापूर्वोपकारित्वसद्भावात्सर्वार्थत्वोक्त्यर्थत्वेन वाक्यस्यातिसंकोचपरिहारायोपकारित्वमात्रस्य तत्प्रकरणं लक्षकं न तादर्थ्यस्येत्येवमुपकारलक्षणं हीति भाष्यावयवेनोक्ते तदुपपादनार्थं यद्यस्योपकारित्वेनाकाङ्क्ष्यते तत्तस्य प्रकारणाच्छेषभूतामित्युक्त्वाङ्गहविषां प्रधानापूर्व्वोपकारित्वेपि तद्धर्माणामतदर्थहविःष्ठत्वेन प्रधानापूर्वानुपकारित्वात्प्रधानसाद्गुण्यायैव चाङ्गधर्माणामनुष्ठेयत्वादननुष्ठानमाशङ्क्योपकारिस्थत्वात्प्रधानधर्म्मवदङ्गधर्मा अपि प्रधानापूर्व्वस्योपकुर्वन्तीत्युक्तमित्येवंभाष्यव्याख्यासूचनायापूर्वोपकारित्वलक्षणायामुक्तायामानर्थक्यपरिचोदनानवतारापत्तेः प्रकरणाद्दर्शपूर्णमासयोरितिभाष्यवदुत्कृष्य व्याख्येयत्वादुपकारलक्षणं हीतिभाष्याक्षेपमपरिहृत्यैव वाक्यसंयोगाविशेषादितिवार्तिकेन च कथमित्यादिप्रश्नोत्तरभाष्यस्य सौत्रप्रतिज्ञाक्षिप्तहेतूक्त्यर्थत्वेन व्याख्यातत्वादुपेक्ष्याहेत्याशङ्काभाष्यं व्याचष्टे * परास्त्विति * । आनर्थक्याच्च पुरुषधर्म्म इति जञ्जभ्यमानाधिकरणभाष्योक्तन्यायपरिहृतां लौकिकविषयत्वशङ्कां कुर्वाणायोत्सूत्रोत्तरदानेऽशक्तेन तद्वाक्यं हीतिसूत्रवक्ष्यमाणोत्तरार्थमुच्यत इति भाष्यमुपेक्ष्य स्वयं जञ्जभ्यमानाधिकरणभाष्योक्तमेवोत्तरं स्मारयितुमाह * तस्येति * । कस्मात्तर्हि भा-

व्यक्तैतदुत्तरं नोक्तमित्याशङ्क्योपकारलक्षणं हीत्यादिभाष्येण वाक्यग-
म्यस्य तादर्थ्यस्य प्रकरणलभ्यापूर्व्वोपकारित्वेन फलेन व्यपदेशस्याङ्ग-
बर्हिषामपूर्व्वोपकारित्वेनार्थवत्त्वात्तदर्थानां धर्म्माणामप्यर्थवत्त्वोपपत्त्या-
शयतयास्योत्तरस्था स्मारितत्वादिति सूचयितुमाह * अनेनैव चेति * ।
एतदाशयत्वमेवोपपादयितुं यदर्थं धर्म्मजातं कल्प्यमानमर्थवद्भवति तद-
र्थं कल्पनीयमपूर्वोपकार्यार्थं च कल्प्यमानमपूर्वाकाङ्क्षितोपकारनिष्प-
त्त्यार्थवद्विज्ञातुं शक्यमित्याह * यदर्थं हीति * अनेन चोपकारलक्षणं
हीत्यादिभाष्यस्योत्कृष्येहव्याख्याक्षेपपरिहारौ सूचितौ । भाष्योक्तोत्तरा-
पेक्षाहेतुमाह * यत्त्विति * । न तद्वाक्यं हीति सूत्रे यद्दर्शपौर्णमासार्थं
तत्र प्राप्नुवन्ति नान्यत्रेति भाष्यात्पश्चाद्व्याख्येयत्वसूचनार्थस्तावच्छब्दः ।

आरादपीति चेत् ॥ ३ ॥

सूत्रं व्याचष्टे * यदि हीति * वाक्यविरोधाच्छेषत्वस्य प्रकरणप्र- ११२८।२।
युक्तत्वानिरासेनानर्थक्यापत्तौ वाक्यस्य बाधकत्वासिद्धेरर्थवत्त्वसिद्धौ-
लौकिकविषयत्वनिवृत्तेः सूचितत्वादितिकरणेन परामर्शोपपत्तिः । दर्श-
पूर्णमासानुपकारित्वस्य लौकिकनिवृत्तिः हेतोः पिण्डपितृयज्ञबर्हिष्यपि
सा स्यादनिष्टापत्तिपरिहारमाशङ्क्य प्रकरणव्यापारं विना दर्शपूर्णमासा-
नन्वयात्तस्य च तादर्थ्यबोधातिरिक्तेर्थे व्यापाराभावात्तद्व्यापाराभ्युपग-
मेन बर्हिषोपि दर्शपूर्णमासार्थत्वाभावान्निवृत्त्यापत्तिमाह *यदि त्विति*।
सौर्यादीनामप्यारात्छिष्टत्वाविशेषात्केन विशेषेण त्वां पितृयज्ञोदाहरण-
मित्याशङ्क्याह * तत्रेति * शङ्कातात्पर्यमुपसंहरति * तेनेति * ।

न तद्वाक्यं हि तदर्थत्वात् ॥ ४ ॥

शङ्कानिरासार्थत्वेन तद्व्याख्यार्थं न तस्येतिभाष्यं स्पष्टत्वादव्या-
ख्याय तस्यासंयुक्तं प्रधानस्येतिसूत्रनिर्दिष्टस्यासंयुक्तस्य धर्म्मजातस्य
यद्वाक्यं तत्प्रधानस्यैव वाक्यं तद्वाक्यैकवाक्यभूतं हीत्येवं तद्वाक्य हीति
सूत्रावयवव्याख्यार्थवाक्यं हीतिभाष्यमङ्गवाक्यानां प्रधानवाक्यैकवाक्य-
त्वं विना शङ्कानिरासासिद्धेरेकवाक्यत्वस्य तन्निरासहेतुत्वोपपादनपूर्वं
व्याचष्टे * भवेदिति * । अतः शेषिणो बर्हिरादेः प्रधानार्थत्वमालोच्य
धर्म्मजात शेष इत्येवं व्यक्तोपपन्नस्यन्तां तदर्थत्वोक्तिमभिप्रेत्य व्याख्यार्थं
तेनेतिभाष्यं व्याचष्टे * तेनेति * । तस्मादितिशङ्कानिरासोपसंहारभाष्यं

व्याचष्टे * न चेति * । धर्म्मवाक्यानां प्रधानोत्पत्तिवाक्यैकवाक्यत्वेङ्गा-
नन्वयः स्यात्प्रधानयोगवाक्यस्य तु साङ्गप्रधानविषयत्वादङ्गान्वयोपि
धर्माणां युक्त इत्याशयेन परिहर्तुमाह *सर्वथेति*प्रधानोत्पत्तिवाक्यो हवि-
रासादनाश्रुतेः प्रयोगवाक्यैकवाक्यतां विना सादनद्वारप्रधानान्वयायो-
गात्साक्षाच्चाङ्गवत्प्रधानेनाप्यन्वयायोगात्प्रयोगवाक्यैकवाक्यतोपपादनार्थं
साक्षादन्वयायोगोक्तिपूर्वं दौवारिकान्वयोक्तिः प्रयोगवाक्येप्यङ्गानां स-
र्व्वेषां प्रधनाविशेषणत्वेन प्रयाजानुयाजादिवदन्योन्यान्वयात्सिद्धान्तासि-
द्धिं शङ्कते । *ननु चेति* । संनिपत्योपकारिणामङ्गानां साक्षात्प्रधानविशेष-
णत्वाभावाद्बर्हिषः प्रधानान्वये हविरासादनस्य द्वारत्वावगतेरङ्गहविरा-
सादनस्यापि च परम्परया प्रधानान्वयाद् द्वारत्वोपपत्तेः प्रधानहविरासा-
११२९।२ दनस्यापि च साक्षादन्वयाभावात्सिद्धान्तसिद्धिमाह * नैतदिति * ।
प्रधानान्वयस्य प्रकरणेन लक्षणीयत्वात्तस्य च तादर्थ्यमात्रविषयत्वाद-
ङ्गहविरासादनस्य च प्रधानार्थत्वाभावात् बर्हिर्विधौ तल्लक्षणाशक्तेः
प्रधानमात्रान्वयलक्षणा यदि त्विति पूर्वसूत्रस्थवार्तिकसूचितां परिहर्त्तुं न
प्रधानशेषत्वं तेन प्रकरणेन धर्मप्रयोजकतया लक्षितं किन्तु प्रधानोपकारि-
त्वमात्रमित्येवं शेषत्वस्य तत्प्रयुक्तत्वादिति सिद्धान्तसूत्रावयवव्याख्यार्थं
विशेषत्वं प्रकरणे न धर्मप्रयोजकं भवति उपकारलक्षकं हि प्रकरणमि-
त्येवमर्थं न शेषत्वमित्यादि भाष्यं मत्वानर्थक्यादिपरिचोदनानवतारप्र-
त्तिभयेनोपेक्षितमिदानीं सङ्गतत्वात्तात्पर्यतो व्याचष्टे * यदि चेति * ।
न केवलं वाक्यातिसंकोचभयात्तादर्थ्यत्यागः किन्त्वनुपयोगादपीत्याह
* तावन्मात्रमेव चेति * । अनेन च प्रकारेणादर्शपूर्णमासयोरितिभाष्यमा-
रादपीति परिचोदनानवतारापत्तिभयेनोपेक्षितमिदानी धर्म्माणां प्रक-
रणाद्दर्शपूर्णमासोपकारित्वावगतेर्लौकिके गृहाच्छादनादिबर्हिष्यप्रासाव-
प्यङ्गहविरासादनबर्हिषोपि दर्शपूर्णमासोपकारित्वात्तावन्मात्रस्य च ध-
र्म्मान्वयोपयोगित्वान्न कश्चिद्दोष इत्येवमर्थत्वेन व्याख्यातम् । तादर्थ्या-
नपेक्षोपकारित्वमात्रस्य धर्म्मान्वयोपयोगित्वान्नवमाधिकरणेन द्रढयि-
तुमभ्युदितेष्ट्यां दधिपयसोरिज्यार्थत्वेन प्रणीताकार्यपाकार्थत्वाभावात्प्र-
णीताधर्म्माननुष्ठानं परार्थे त्वर्थसामान्यं संस्कारस्य तदर्थत्वादितिसूत्रेण
पूर्व्वपक्षयित्वा क्रियेरन् वार्थनिर्वृत्तेरित्यन्यकार्यकारिभ्यामपि दधिपयोभ्यां
प्रणीताप्रयोजनपाकनिष्पत्तेस्तद्धर्म्मानुष्ठानं वक्ष्यतीत्याह * तथा चेति * ।
परार्थे त्वर्थसामान्यमिति पूर्वपक्षमुपक्रम्य वक्ष्यतीत्युपक्रमार्थेतिकरणा-

भ्युपगमेन व्याख्येयम् । उपेक्षितस्य भाष्यद्वयस्य व्याख्यायमानसूत्रशेषत्वं दर्शयितुमाह * तस्मादिति * । उपकारिमात्रलक्षणायां तदर्थत्वादितिसूत्रावयवेन दर्शपूर्णमासार्थत्वाद्धर्म्मान्वयोक्त्ययोगमाशङ्क्य प्रयोजकाख्यप्रयोजनवाच्ययमर्थे शब्दो नोद्देश्याख्यप्रयोजनवाचीति मत्वा दर्शपूर्णमासापूर्वप्रयुक्तं यद्‌बर्हिःसूत्रधर्म्माः कार्य्या इत्येवमर्थत्वेन तादर्थ्योक्त्युपपत्तिं सूचयन् सिद्धान्तमुपसंहरति * तस्मादिति * ।

लिङ्गदर्शनाच्च ॥ ५ ॥

अस्याभिघारणस्य शेषप्रतिपत्त्यर्थत्वेन हविरर्थत्वाभावात्तद्द्वाराप्रधानार्थत्वस्याङ्गार्थत्वस्य चानुपपत्तेर्लिङ्गत्वायोगमाशङ्क्याभिघारणक्रियास्वरूपस्य प्रतिपत्त्यर्थत्वेपि तद्गतस्य हविराधारनियमस्य हविःसंस्कारार्थत्वाल्लिङ्गत्वोपपत्तिं सूचयितुमाह * यदि चेति * । क्रमन्यायप्राप्तप्राथम्यानुवादसम्भवे वैशब्दोपहतविधिशक्तेर्विधित्वायोगादुपांशुयाजार्थत्वे च प्राथम्यानुवादायोगादाज्यभागप्राथम्यस्य च हेतुत्वोक्त्ययोगापत्तेर्लिङ्गत्वमुपपादयितुमाह * तत्र चेति * । सर्वेषां शेष इति सिद्धान्तप्रतिज्ञानुकर्षणार्थत्वेन सौत्रं चकारं व्याख्यातुमाह * तस्मादिति * । ११३०।५

स्वामिसंस्काराणां प्रधानार्थत्वम् । आधि० २ ।

फलसंयोगात्तु स्वामियुक्तं प्रधानस्य ॥ ६ ॥

स्वामियुक्तोक्त्या परिक्रमस्यापि चिन्ताविषयत्वशङ्कां भाष्याद्वा दन्तधावनादीनामप्यविषयत्वशङ्कां निवर्त्तयितुमाह * याजमानास्त्विति * । तपसोपि चिन्ताविषयत्वस्य भाष्योक्तत्वादुत्तरपादाद्याधिकरणे स्वामियुक्ततया वक्ष्यमाणस्यापि परिक्रमस्यैतच्चिन्ताविषयत्वानिवृत्तिसूचनमात्रार्था द्वितीयाधिकरणोक्तिः । संस्कारास्तु पुरुषसामर्थ्ये इत्युत्तरपादद्वितीयाधिकरणपूर्वपक्षसूत्रे पुरुषसामर्थ्योक्त्या कर्त्रंशपातित्वेन पूर्वपक्षकरणस्य कर्तृत्वमेवैतैर्विना विगुणमिति तत्रत्यवार्त्तिकात्सिद्धान्तसूत्रे च भोक्त्रंशपातिप्रधानभूतकर्म्मदृष्टान्तेन भोक्त्रंशपातितया सिद्धान्तकरणस्य नचैते कर्तृत्वसञ्जननार्था इत्यादिवार्त्तिकाद्येनैव हेतुनैतेषां स्वामित्वनिश्चय इत्यत्रत्यवार्त्तिकादपि प्रतीतेः प्रधानस्य च फलं पुरुषैर्भुज्यते नाङ्गानामितिवार्त्तिकाच्च प्रधानमात्रस्य फलान्वयोक्त्यर्थत्वेन फलसंयोगोक्तिव्याख्याप्रतीतेर्भोक्त्रंशपातेधिकरणान्तरसिद्धेप्यङ्गानामपि फलो-

त्पत्तौ व्यापाराद्दयतादीनामङ्गप्रधानार्थत्वं प्रधानमात्रस्य व्यापाराद्वा प्रधानमात्रार्थतेतिसंदेहहेतोः स्वाभिमतत्वेपि ये पुरुषसंस्कारास्ते पुरुषं फलप्रतिग्रहणसमर्थं कुर्वन्ति न यागनिर्वृत्तिसमर्थमितिभाष्यादस्मिन्नेवाधिकरणे कर्त्रंशपातात्पूर्वपक्षो भोक्त्रंशपातात्सिद्धान्तः तस्मिंस्तु भोक्त्रंशपातिष्वपि वपनादिषु परिक्रयद्वारा स्वामिनः कर्तृत्वसंभवासंभवसंदेहाच्चिन्तेति प्रतीतेभाष्यानुसारात्कर्तृभोक्त्रंशपातसंदेहोधिकरणसंदेहहेतुरुक्तः । पूर्वपक्षमाह ॥ किमिति ॥ । वपनादीनां कर्त्रंशपाते सर्व्वेष्वङ्गप्रधानेषु साक्षात्प्रयोक्तृत्वेन वा कर्त्तरि स्वामिनि स्थितानां सर्व्वोपकारणशक्तेः पूर्वन्यायात्सर्वार्थत्वं युक्तं तेषां तु भोक्त्रंशपातस्योत्तरपादे वक्ष्यमाणत्वादङ्गानां च फलान्वये प्राधान्यापत्तेः प्रधानोपकारमात्रे व्यापारावगमेन फलसाधनत्वाभावात्फलभोक्तृत्वयोग्यताधानापेक्षानुपपत्तेस्तदर्थेन वपनादिनोपकर्त्तुमशक्यत्वान्न पूर्वोक्तन्यायोस्तीत्याशङ्क्य प्रधानमात्रात्फलसिद्धावङ्गानुष्ठानवैयर्थ्यापत्तेः फलान्वयसाम्येपि चातिशयानतिशयविवक्षया लोकवद्व्यवस्थिताङ्गप्रधानव्यवहारोपपत्तेः सर्वैरङ्गप्रधानैः फलभोक्तृत्वयोग्यतयार्थ्यमाने ऽपेक्ष्यमाणे यजमाने स्थिता वपनादयः शक्नुवन्ति सर्व्वेषामुपकर्तुमङ्गानामपि च फलसाधनत्वान्न तद्व्यावृत्तिकारणमस्तीत्याह ॥ सर्वार्थे हीति ॥ । भोक्त्रंशपातेन हेतुना वपनादीनां स्वामिगामित्वस्य निश्चेष्यमाणत्वादङ्गानां च फलार्थत्वावेदकश्रुत्यादिप्रमाणाभावात् साक्षादसाधनत्वेपि फलसाधनप्रधानोपकारितयानुष्ठानार्थवत्त्वोपपत्तेर्वेदे च विवक्षितभावेनातिशयानतिशयविवक्षयाङ्गप्रधानव्यवहारायोगात्फलान्वयेऽनङ्गत्वापत्तेः फलार्थत्वाभावेन भोक्तृत्वयोग्यताधानानेपक्षत्वात्तदर्थानां वपनादीनामङ्गोपकारकरणाशक्तेः पूर्वन्यायाविषयत्वेन सिद्धान्तं वक्तुमाह ॥ इतीति ॥ । कर्त्रंशपाते वपनादयः सर्वार्थाः स्युस्तेषां तु भोक्त्रंशपातस्य वक्ष्यमाणत्वात्प्रधानमात्रार्थतेत्येवं श्लोकं व्याख्यातुमाह ॥ यद्धि हीति ॥ । आत्मनेपदात्पुरुषगामिफलसाधनत्वाख्यपुरुषप्राधान्यावगतेः कर्तृत्वयोग्यताख्यस्य च पुरुषगामिनः फलस्य वपनाद्यभावेपि सर्वलोकप्रत्यक्षत्वात्भोक्तृत्वांशस्यैव पवनादिभिर्विनानुपपत्तेर्भोक्त्रंशपातितेत्युपपत्तिं तत्प्रधानत्वादितिसूत्रावयववक्ष्यमाणामिहापेक्षितत्वादनुसन्धातुमाह ॥ स हीति ॥ । वपनादीनां स्वामिगामित्वे भोक्त्रंशपातस्य हेतोः सूत्रभाष्यकृद्भ्यामवक्ष्यमाणत्वात्कर्त्रभिप्रायं क्रियाफलं गम्यत इति तत्रत्यभाष्यादात्मनेपदस्यैव हेतुत्व

प्रतीतेः पुरुषस्य कर्म्मकरणसामर्थ्यमुपजनयन्तीत्यस्माच्च कर्त्रंशपाताभ्युपगमप्रतीतियैनैव हतुनेत्यनुवादायोगमाशङ्क्यात्मनेपदस्य स्नातीत्यादावभावेनाव्यापकत्वात्कर्त्रंशपाते चर्त्विग्भ्यो निवृत्त्यसिद्धेस्तद्भाष्यस्थस्य कर्म्मशब्दस्य फलभोगाख्यकर्म्मवाचित्वावगमाद्भोक्त्रंशपातस्य स्वामिगामित्वे हेतुत्वानुवादोपपत्तिमाह * ऋत्विजामपि चेति * । वपनादीनां पुंसां फलसंयोगसिद्ध्यर्थत्वादित्येवं भोक्त्रंशपातोक्त्यर्थत्वेन फलसंयोगोक्तिव्याख्यार्थं पुरुषस्य यागेनेत्यादिभाष्यं तात्पर्यतो व्याख्यातुमाह * अभीष्टे चेति * । भोक्त्रंशपातेपि साङ्गस्य प्रधानस्य फलसाधनत्वादङ्गप्रधानार्थतेति पूर्वपक्षनिरासार्थत्वेन प्रधानमात्रस्य फलसंयोगादित्येव स्वयं फलसंयोगोक्तिं व्याख्यातुमाह * यस्य चेति * । फलसाधनादेव भोक्तृत्वशक्तिसिद्धेर्वपनादीनां भोक्तृत्वशक्तिसिद्ध्यर्थत्वाभ्युपगमे तेषामपि फलसाधनत्वापत्तेः प्रकरणावगतक्रत्वर्थत्वबाधापत्तिशङ्कार्थमाहेति भाष्यं व्याचष्टे * आहेति * भोजनार्थपरिवि- ११३१।४
ष्टस्याप्यन्नस्याशक्ते भोक्तरि भोजनासिद्धिदर्शनात् फलसाधनातिरिक्तशक्त्यपेक्षोपपत्तेः फलसाधनक्रत्वर्थत्वोपपत्त्युक्त्यर्थमुच्यते इतिभाष्यं व्याचष्टे * नैष इति * । फलसिद्ध्युपयोगमात्रेण चानङ्गत्वापत्ताचारादुपकारिणामङ्गानां संनिपत्योपकारिवत्प्रधानोत्पत्त्यपूर्व्वोत्पादकत्वाभावेन फलसाधनादपि प्रधानाद्रूपग्राहकादपि नेत्रान्निरालोकाद्रूपग्रहणासिद्धिवन्निरङ्गात्फलासिद्धेः फलसिद्ध्युपयोगित्वादनङ्गत्वापत्तिं दृष्टान्तदार्ष्टान्तिकव्याजेनाह * ततश्चेति * । पक्षद्वयेपि वपनादीनां सकृदनुष्ठानसाम्याच्चिन्तानर्थक्यमाशङ्क्याह * प्रयोजनमिति * ।

सौमिकवेद्यादीनामुभयार्थत्वम् । अ० ३

चिकीर्षया च संयोगात् ॥ ७ ॥

प्रधानमात्रस्य फलसाधनत्वात्फलसिद्ध्युपयोगिनां वपनादीनां प्रधानमात्रार्थत्वेभिहिते सौमिक्यावेदेरिच्छार्थेषु तुमुन्निती च्छार्थविहिततुमुन्प्रत्यययोगं चिकीर्षितार्थत्वावगतेः प्रधानमात्रस्य च फलसाधनत्वेन चिकीर्षितत्वात्प्रधानमात्रार्थत्वपूर्वपक्षोत्थानेनापवादिकसंगत्युक्तिपूर्वं पूर्वपक्षमाह * पूर्व्वेणैवेति * सर्वार्थदार्शपौर्णमासिकवेदिव्यावृत्त्यै सौमिकीतिविशेषणम् । पूर्वन्यायमत्र योजयितुमियतीत्याद्युक्तम् । अनुष्ठानान्यथानुपपत्त्याङ्गानामपि चिकीर्षितत्वकल्पनस्याशङ्कापूर्वं निरासार्थमाहेत्यादि-

भाष्यं व्याचष्टे * अचिकीर्षितत्वे सतीति * । अचिकीर्षितत्वेऽपि चिकीर्षितप्रधानोपकारसिद्धकरणोपपत्तेर्नाङ्गानि चिकीर्षितानीत्यर्थः । तथाभिधानेनेतिसूत्रस्यापर्यवसितेऽधिकरणेऽधिकरणान्तरपूर्वपक्षोक्त्यर्थत्वेनावतारणार्थं स्थितं तावदिति भाष्यं व्याचष्टे * एवमिति * ।

अभिमर्शनस्याङ्गप्रधानोभयाङ्गत्वम् । अधि ४

तथाभिधानेन ॥ ८ ॥

पूर्वचिन्तापूर्वोत्तरपक्षयोरुत्तरचिन्तापूर्वोत्तरपक्षहेतुत्वाभावादन्तरान्तरायोगमाशङ्क्य चिन्तान्तरस्याप्यङ्गैः सह प्रधानानां सामानासमाननिश्चयचिन्तारूपत्वान्न्यायाधीनत्वेन च वचनाधीनदीक्षादक्षिणचिन्तावैलक्षण्यादत्रैवान्तराले कार्यत्वे सति पश्चात्करणे संयोगपदानुषङ्गायोगात्प्रधानस्येति च स्वामियुक्ताधिकरणसिद्धान्तप्रतिज्ञार्थस्य पदस्य चिकीर्षया चेति चकारेण पूर्वचिन्तापूर्व्वपक्षप्रतिज्ञार्थत्वेनानुकृष्टस्यात्रानुषङ्गायोगात्सूत्रगौरवापत्तेः पदद्वयानुषङ्गसिद्ध्यास्तत्र लाघवायान्तराचिन्तान्तरोपपत्तिं सूचयितुमाह * संयोगादिति * । उपलक्षणार्था संयोगपदानुषङ्गोक्तिः । यथाविधेन प्रधानवाचिनाभिधानेन प्रधानार्थत्वं भवति तथाविधेन मन्त्रयोः संयोगात्प्रधानस्याङ्गं मन्त्रावित्येवं पूर्वपक्षसूत्रव्याख्यार्थं किं तावदित्यादिभाष्यं व्याचष्टे * पौर्णमासीति * । पृथिवी होता द्यौरध्वर्युः रुद्रोऽग्नीद्बृहस्पतिरुपवक्तेति चतुर्होता अग्निर्होता अश्विनाध्वर्यू त्वष्टाग्नीत् मित्र उपवक्तेति पञ्चहोता ॥

तद्युक्ते तु फलश्रुतिस्तस्मात्सर्वचिकीर्षा स्यात् ॥ ९ ॥

स्थितादित्यादिभाष्येणानुकृष्टया प्रधानोक्त्या स्वार्थप्रतियोगितयोपस्थापितस्याङ्गस्य तच्छब्देन परामर्शाज्ज्योतिष्टोमेनेतितृतीयाश्रुत्या करणीभूतस्य ज्योतिष्टोमस्य फलभावनान्वयोक्तेः करणत्वस्य चापेक्षिकसाधकत्वातिशयाख्यसाधकतमत्वरूपत्वेनापकृष्टसाधकाङ्गापेक्षत्वादङ्गयुक्ते प्रधाने फलश्रुतिस्तस्मादङ्गस्य साक्षात्फलानन्वयेऽपि फलान्वयिप्रधानद्वारा फलान्वयात्सर्व्वस्य प्रधानस्याङ्गस्य च चिकीर्षा संभवतीति चिकीर्षासंयोगस्याङ्गव्यावृत्तिहेतोरङ्गेऽपि सद्भावादव्यावर्त्तकत्वोक्त्यर्थत्वेन सूत्रं व्याख्याय चिकीर्षितत्वेऽप्यङ्गानामव्यावृत्त्युक्त्यर्थं यद्यपीत्यादि भाष्यमुत्सूत्रत्वादयुक्तमाशङ्क्य चिकीर्षासंयोगस्य परिमाणस्तुत्यर्थत्वेन वेदेऽचिकीर्षितार्थत्वे प्रामाण्याभावाल्लिङ्गमात्रत्वावगतेः प्रधानमात्रार्थत्वपूर्व्वपक्षनि-

शासार्थेन तुशब्देन प्रयोगाङ्गत्वाख्यो न्याय एव मुख्यसिद्धान्तयुक्तित्वेनाक्षिप्त इति सूचनायादौ यद्यपीत्याद्येव भाष्यं व्याख्यातुमाह * वेदिरिति * । ११३२।१

सूत्रव्याख्यार्थमाद्यं भाष्यं व्याचष्टे * यो ऽपीति * । सिद्धान्तप्रयोजनमाह * एवं च सतीति * ॥

गुणाभिधानात्सर्वार्थमभिधानम् ॥ १० ॥

यत्पौर्णमासीममावास्यामिति चाभिधानं तत्सर्वेषामङ्गप्रधानहविषां मन्त्रविशिष्टाभिमर्शनविध्यर्थं द्वितीययाभिमर्शनस्य पौर्णमास्यमावास्ये प्रतिगुणत्वाभिधानादित्येवं द्वितीयाधिकरणसिद्धान्तोक्तयर्थत्वेन सूत्रव्याख्यार्थं यदुक्तमित्यादिभाष्यमाक्षिपति * द्वितीययेति * । स्थित एवेत्यनेन हेतुव्याख्यायाः सिद्धान्तासाधकत्व सुतरां चेत्यनेन च पूर्वपक्षापादकत्वमुक्त्वा यश्चेत्यनेन हेतूपपादनभाष्यस्य स्फुटं पूर्वपक्षसाधकतोक्ता । कर्मत्ववाचिन्या द्वितीयया कारकत्वगुणयोगेन सप्तम्यर्थाधिकरणत्वाभिधानादनेनाभिमर्शनस्यैदमर्थ्यानवगतेः सन्नानि हवींष्यभिमृशतीति विध्यन्तरात्सर्वार्थस्याभिमर्शनस्य व्यवस्थितमन्त्रविध्यर्थं पौर्णमास्यमावस्याभिधानमित्येवं स्वयं सूत्रं व्याख्यातुमाह * तेनेति * । मन्त्रयोरप्यप्राप्तत्वाद्व्यवस्थितमन्त्रविध्यर्थत्वं व्यवस्थार्थोक्त्यर्थः । द्वितीयया प्रधानस्य व्याप्यत्वोक्तावभिमर्शनाधारत्वेन साक्षाद्व्याप्यत्वायोगात्प्रक्षेपांशेन प्रधानस्य हविर्द्धर्मत्वाद्धर्म्मधर्म्मिणोरत्यन्तभेदाभावेन हविषोभिमर्शनव्याप्यत्वात्तद्धर्म्मस्य प्रधानस्य व्याप्यत्वसिद्धये प्रधानहविरेवाभिमृश्येत एवं तु यथाविहितानुष्ठानापत्तेर्व्याप्यत्वेप्सिततमत्वसमुदायवाचिन्या द्वितीयायास्तदेकदेशेप्सिततमत्वमात्रे वृत्तिमभ्युपेत्याभिमर्शनस्य प्रधानप्रत्याधेयत्वाख्यव्यापकत्वानपेक्षाङ्गाख्यगुणत्वमात्राभिधानादुपकारिस्थितत्वमात्रेण वोपकारित्वोपपत्त्याङ्गत्वानिर्वाहादङ्गहविषामपि च प्रधानोपकारित्वादित्येव हेतुव्याख्यार्थत्वेन भाष्यं समाधातुमाह * अथापीति * ११३३।२।

दीक्षादक्षिणयोः प्रधानार्थत्वम् । अधि ५ ।

दीक्षादक्षिणं तु वचनात्प्रधानस्य ॥ ११ ॥

दीक्षाया अपि वपनादिवत्स्वामिसंस्कारत्वाद्दीक्षोदाहरणं गनार्थत्वेनाक्षिपति * फलेति * । दीक्षितः सोमं क्रीणाति यो दीक्षितो यदग्नीषोमीयं पशुमालभेत इत्यादौ दीक्षासंस्कृतस्वामिविनियोगाद्दीक्षायाः स-

र्वार्थत्वशङ्कोपपत्त्योदाहरणत्वं समर्थयन् पूर्वपक्षमाह * अन्ये त्विति *। दक्षिणोदाहरणे पूर्वपक्षमाह * दक्षिणानामिति * । अनेन च स्वाम्याख्यस्य पुंसः सोमक्रयादावङ्गेऽपि दीक्षितविनियोगेनर्त्विगाख्यानां च पुंसां वेदिवत्प्रयोगाङ्गत्वन्यायेनाङ्गप्रधानार्थत्वादित्येवं भाष्यं व्याख्यातं प्रसक्तयुक्त्या वचनस्य न्यायदीक्षितविनियोगाभ्यामुभयार्थत्वे प्राप्तेङ्गार्थत्वनिवर्त्तकत्वात्त्रिदोषपरिसङ्ख्यार्थत्वापत्तेर्विधित्वायोगात्तस्य संस्तुतस्य नवतिशतं स्तोत्रिया इत्यादिवद्व्यवहितान्वयानुवादत्वावगतेर्वचनाविरोधः सूचितः । याज्ञिकाचारेण न्यायमुपोद्बलयितुमाह * अपिचेति * प्रधानमात्रस्य च स्वयमनुष्ठातुं शक्यत्वात्तावन्मात्रार्थपरिक्रयानर्थक्यापत्तेरपि तस्य सर्वार्थतावसीयत इत्याह * नचेति * ॥ अङ्गानि तु विधानत्वात्प्रधानेनोपदिश्येरंस्तस्मात्स्यादेकदेशत्वमित्येकादशाधिकरणसिद्धान्ते च य एवं प्रधाने देशकालकर्त्तारस्त एवाङ्गेष्विति यदङ्गप्रधानेषु कर्तृतन्त्रत्वाभिधानं तद्दक्षिणायाः सर्वार्थत्वे सत्युपपत्स्यते नान्यथेत्याह * एवं चेति * । एवकारार्थे चकारः । पूर्वपक्षमुपसंहरति * तस्मादिति * । न्यायस्य स्वयमप्रमाणतयार्थापत्तिकल्प्यवचनापेक्षत्वेन दीक्षितविनियोगस्यापि चार्थापत्तिकल्प्यवचनापेक्षत्वेन विप्रकर्षात्ततः प्राक् प्रवृत्तस्य वचनस्य फलतः परिसंख्यात्वेपि स्वतोप्राप्तविधित्वान्निर्दोषत्वानापत्त्याशयेन सिद्धान्तोक्तयर्थतया सूत्रं व्याचष्टे * इतीति * । अङ्गेषु दीक्षितविनियोगस्य प्रधानप्रयुक्तदीक्षितविशेषणं दीक्षां प्रति प्रत्ययार्थदीक्षितत्वसिद्ध्यर्थाभिधानप्रकृत्यर्थदीक्षाकर्मत्वेन पुरोडाशार्थाभिधानं कपालं प्रति तत्कर्मत्वेन तुषोपवापस्येवाप्रयोजकत्वाद्दीक्षायाः सर्वार्थत्वे कल्पनेपि निरूढपश्वादावनुष्ठानानापत्तेः सर्वार्थत्वकल्पनानर्थप्रसङ्गात्तत्कल्पनाऽयुक्तेत्याशयेनाह * यस्त्विति * भृतत्वाच्च परिक्रय इति द्वादशाधिकरणे च सोमाङ्गेष्विष्टिविकारेष्वन्वाहार्यनिवृत्त्यै प्रधानार्थानामेव दक्षिणानां प्रसङ्गेनाङ्गोपकारित्वस्य वक्ष्यमाणत्वात्प्रधानमात्रार्थत्वेपि तत्परिक्रीतानामृत्विजामङ्गेषु यजमानस्य च तत्परिक्रये प्रवृत्तिः कर्तृतन्त्रत्वोक्तिश्चोपपत्स्यत इत्याह * दक्षिणाश्चेति * ।

निवृत्तिदर्शनाच्च ॥ १२ ॥

सूर्यं ते चक्षुषी वातं प्राणं द्यां पृष्ठम् अन्तरिक्षमात्मा अङ्गैर्यज्ञं पृथिवीं शरीरैरिति षड्ढोतृमन्त्रकेण होमेन निरूढपशौ दक्षिणानुग्रहोक्ते

दीक्षाननुष्ठानाख्यनिवृत्तिदर्शनात्सर्वार्थत्वे च दैक्षाङ्गत्वात्तद्विकारे नि-
रूढपशौ दीक्षाप्राप्तेस्तन्निवृत्तिदर्शनायोगप्रसङ्गान्न सर्वार्था दीक्षेत्ये-
वंलिङ्गदर्शनसूत्रं व्याचष्टे * निरूढेति * । अप्राप्त्युक्त्यानुष्ठाना- ११३४२
र्थता निवृत्त्युक्तेः सूचिता । दीक्षायाः पश्वनङ्गत्वे तज्जन्यानुग्रहणा-
काङ्क्षणात्तद्वचनमिथ्यात्वापत्तेर्विपरीतसाधकत्वं लिङ्गस्याशङ्कते * ननु
चेति * । दैक्षे सोमप्रयुक्तदीक्षासंस्कृतस्वामिकर्तृकत्वोपजीवनेनानु-
षङ्गिकदीक्षाकृतोपकारनिष्पत्तेस्तद्विकारनिरूढपशौ तत्कृतोपकाराभावे
वस्तुतो वैगुण्याभावेपि होमस्तुत्यै वैगुण्यमुपचर्यानुग्रहोक्त्युपपत्तिमा-
ह * नैष इति * । इवशब्देनौपचारिकतोक्ता ॥

अन्तर्वेदेर्यूपानङ्गत्वम् । अधि० ६ ।

तथा यूपस्य वेदिः ॥ १३ ॥

किमर्थमिति संदेहभाष्यावयवाद्वाक्यैकदेशस्योतेत्यस्माच्च कृत्स्न-
स्योदाहरणत्वप्रतीतेः कियदुदाहरणमित्यवधारणापेक्षायामेकदेश एवो-
दाहरणं तस्य तु शुद्धस्याङ्गविधायित्वप्रतीतेरेकदेशान्तरसहितस्य च
देशलक्षणार्थत्वप्रतीतेरेकत्रैकदेशोक्तिरन्यत्र कृत्स्नोक्तिरिति सूचयन् संदे-
हभाष्यं व्याचष्टे * अङ्गमिति * । चिकीर्षाधिकरणे वेदेः सर्वार्थ-
त्वस्य स्थितत्वात्पूर्वपक्षायोगेन सन्देहमाक्षिपति * ननु चेति * । चि-
कीर्षाधिकरणोक्ताङ्गविध्यपवादत्वेनानन्तरसङ्गत्यै तदनन्तरमेतत्कृतं तस्य-
त्वेतदधिकरणापेक्षत्वेनास्यैवार्थतः पूर्वत्वात्तावत्सन्देहं समर्थयितुमाह
* स्थित इति * । पूर्वस्यैतदपेक्षत्वोपपादनायैतदधिकरणपूर्वपक्षे पू-
र्वाचिन्तानुपपत्तिं सिद्धान्ते चोपपत्तिमाह * यदीति * । वेदेः प्रयोज-
कत्वेन प्रकरणात्साङ्गप्रधानार्थत्वावगतेस्तदन्तर्गतयूपाङ्गत्वस्यापि सि-
द्धेर्यूपाङ्गत्वेन विध्यानर्थक्यात्पूर्वपक्षायोगमाशङ्क्यार्द्धमेवान्तर्वेदीत्येव-
यूपार्द्धातिरिक्ताङ्गप्रधानपरिसङ्ख्यार्थत्वेन विध्यर्थवत्तां सूचयन् पूर्व-
पक्षयति * किमिति * । परिसङ्ख्यासूचनार्थं बाधित्वेत्युक्तम् । चिकी-
र्षाधिकरणासिद्धान्तसूत्रानुसारादियतीत्यस्य सर्वार्थत्वविधायित्वाभ्यु-
पगमे शास्त्रप्राप्तपरिसङ्ख्यायोगादुपसंहारार्थत्वेन पूर्वपक्षमाह * तस्मा-
दिति * । यथा दीक्षादक्षिणं प्रधानस्यैव तथा वेदिर्यूपस्यैवेत्यवधारण-
स्यापि तथाशब्देनातिदेशं मत्वा सर्वार्थत्वसिद्धान्ताभावमाराध्य सन्देह-
पूर्वपक्षावुक्तौ । अङ्गविधिमात्रातिदेशे तु सर्वार्थत्वे स्थितेपि सन्देहपूर्व-

पक्षौ वाक्यौ वक्तुमिति दर्शयन् सन्देहं तावदाह * अथवेति * । सर्वान्त-
र्गतत्वाद्यूपार्थत्वस्यापि सिद्धेस्तादर्थ्यविधिपूर्वपक्षायोगात्सन्देहमाक्षि-
पति * नन्विति * । यूपस्यानन्तर्गतत्वात्समर्थयते * न तेनेति * ।
सौमिक्या वेदेः प्रयोगाङ्गत्वात्स्वाङ्गोपेतस्यैव चाङ्गस्य प्रधानोपकारि-
त्वेनाङ्गाङ्गस्यापि प्रयोगान्तर्गतत्वात्प्रधानद्वारा साक्षात्प्राप्त्यभावेपि तद-
ङ्गपशुद्वारा यूपस्य वेदिप्राप्तिं शङ्कते * ननु चेति * । साङ्गं ज्योतिष्टोमं
वेद्यां कुर्यादित्येवं प्रधानप्रयोगविधिनैव पशौ वेदिप्राप्तेस्तदन्यथानुपप-
११३५।१ त्तिकल्प्ये पशुप्रयोगविधौ वेदिविशेषणायोगात्पशुद्वारा यूपस्य वेदि-
प्राप्तायोगमाह * दद्यादिति * । साङ्गं पशुयागं कुर्यादित्येतावन्मात्रेपि
पशुप्रयोगविधौ साङ्गस्यैव पशोरनुष्ठेयत्वाद्देशापेक्षायां प्रधानद्वारा वेदि-
देशत्वावगतेर्यूपस्यापि पश्वङ्गत्वाविशेषाद्वेदिप्राप्तिमाशङ्क्य पशावतिदे-
शप्राप्तस्य हविरासादनस्य प्रणीतानिनयनस्य यजमानव्रतविमोकादेशश्च
दार्शपौर्णमासिकवेदिकार्यस्य सौमिक्या प्रयोगाङ्गभूतया प्रसङ्गात्सिद्धे-
र्दार्शपौर्णमासिकवेदिबाधेन सौमिकवेदिनिवेशाद्यूपा वटस्तरणबर्हिर्वदप्रा
कृतकार्यत्वाद्यूप एव वेद्यप्राप्तिमाह * प्राप्त चेति * । यूपाङ्गत्वेना-
प्राप्तत्वाद्वेदेर्विधेयत्वोपपत्तेः पूर्वपक्षसम्भवेन सन्देहोपपत्तावप्यन्तर्बहिर्दे-
शयोर्द्वयोरपि विधेयत्वापत्त्या वाक्यभेदापत्तेरविहितान्तरदेशस्यार्था-
न्तरस्य लौकिकदेशबुद्ध्या प्राप्तबहिर्देशानुवादाभ्युपगमेत्वन्तर्देशस्यापि
प्राप्ताविशेषादनुवाद्यत्वापत्तेः पूर्वपक्षानिर्वाहमाशङ्क्य पक्षप्राप्तस्याप्यन्त-
र्देशस्यान्तर्वेद्येवेति नियमार्थं विध्युपपत्तेरर्द्धमात्रे चान्तर्देशनियमादर्द्धा-
न्तरस्यार्थाद्बहिर्देशप्राप्तेरनुवादसम्भवाद्वाक्यभेदानापत्तेः पूर्वपक्षमुपपा-
दयितुमाह * तस्मादिति * ।

देशमात्रं वा शिष्येणैकवाक्यत्वात् ॥ १४ ॥

इतिसूत्रेण सिद्धान्तमाह * इतीति * । अन्तर्वेदिशब्देनान्तर्देशस्य बहिर्वेदिशब्देन च बहिर्देशस्य लक्षणाद्देशलक्षणापक्षेपि वाक्यभेदापत्तिशङ्कां मातव्यदेशस्य लक्षणीयत्वात्कृत्स्नस्य च यूपस्य मातव्यत्वादन्तर्देशमात्रे च बहिर्देशमात्रे वा कृत्स्नस्यामेयत्वाच्छब्दद्वयेनैकस्यैव कृत्स्नमातव्यदेशस्य लक्षणोक्त्या निरस्यन् देशमात्रं वेति सूत्रावयवं व्याचष्टे * उभाभ्यामपीति * । पशुबन्धनकृतार्थतयान्यार्थत्वेनाशिष्येण यूपेन सह वेद्याः कर्षादिधारणकृतार्थतया चान्यार्थत्वेनाशिष्यया

वेद्या सह यूपस्यैकवाक्योपादानावगतात्संयोगादित्येवं सिद्धान्तः हेत्नूक्त्यर्थत्वेनाशिष्येणेतिसूत्रावयवं प्रश्नपूर्वं व्याख्यातुं प्रत्यक्षं त्वर्थकर्म्मसोमस्येत्युत्तराधिकरणसिद्धान्तसूत्रं वक्ष्यमाणं कृतार्थसंयोगाख्यं देशलक्षणाहेतुमत्रापि साम्याद्योजयितुमाह * कुत इति * । दर्शपूर्णमासाविष्ट्वा सोमेन यजेतेत्यादिषु कृतार्थसंयोगेषु कैर्म्मर्थ्यानाकाङ्क्षणेनाङ्गोपदेशायोगात्कालोपलक्षणवद्देशोपलक्षणमपि युक्तमित्युक्तं वेदेः कर्त्रादिधारणार्थत्वावेदकस्ययतीतिवाक्यस्य यूपार्द्धमात्रे तेनोपसंहारस्योक्तत्वात्कृतार्थत्वायोगमाशङ्क्येयत्परिमाणाया वेदेः यूपार्द्धमानानौपयिकत्वेनादृष्टार्थत्वापत्तेरस्य चाङ्गोपदेशार्थत्वेऽर्द्धं बहिर्वेदीत्यस्याप्यङ्गोपदेशार्थत्वापत्त्या वाक्यभेदापत्तेरुपसंहारार्थत्वायोगसूचनार्थं कृतार्थौ चेत्युक्तम्। श्लोकतात्पर्यं व्याचष्टे * अङ्गाङ्गिभावे हीति *। नैराकाङ्क्ष्यमुपपादयति * न तावदिति * । अदृष्टकल्पनापत्तिमुपपादयति * किञ्चेति * । अनेन च विधित्वस्यानुवादत्वस्य चानुपपत्तेरवाच्ये नार्द्धं बहिर्वेदीत्यनेनैकवाक्यत्वस्य प्रतीयमानस्यायोगप्रसङ्गादित्येवमकारप्रश्लेषेणाशिष्येणेतिसूत्रावयवव्याख्यार्थमथेत्यादिभाष्यं पक्षद्वयदोषसाम्यनिरासार्थं देशलक्षणायां शिष्येणैकवाक्यत्वादित्यकारश्लेषशून्यसूत्रावयवव्याख्यार्थादर्धमन्तर्वेदीत्यादिभाष्यात्पश्चात्पठितमप्यकारप्रश्लेषेण सूत्रावयवस्य पठितत्वात्तद्व्याख्यार्थमादौ व्याख्यातम् अकारशून्यसूत्रावयवव्याख्यार्थमर्द्धमित्यादिभाष्यं व्याचष्टे * मत्पक्षे त्विति * । वेदेः प्रयोगाङ्गत्वात्सर्वाङ्गप्रधानार्थत्वे प्राप्ते यूपार्द्धव्यतिरिक्तपरिसङ्ख्यार्थं यूपार्द्धमात्रे वेद्युपसंहारार्थं चार्द्धमेवान्तर्वेदीति विहितेऽर्द्धं बहिर्वेदीत्यस्य प्राप्तानुवादत्वसम्भवेन वाक्यभेदानापादकत्वात्कथमशिष्यतेतिप्रश्नोत्तरत्वेन वेद्यामित्यादिभाष्यं व्याख्यातुं पृच्छति * कथमिति *। पशावतिदेशप्राप्तदार्शपौर्णमासिकवेदिबाधेन विनिविष्टायाः सौमिक्या वेदेरप्राकृतकार्ये यूपे प्राप्त्ययोगेनार्द्धमेवेत्यवधारणायोगादर्धान्तरस्यानियमेनान्तर्बहिर्वा मानप्रसङ्गादर्द्धं बहिर्वेदीत्येतन्नित्यवदनुवादानुपपत्तेर्न नित्यान्तर्वेदिविधिस्तत्युपकारे निवीतादिवद्वर्त्तते ततश्चास्यापि विधित्वापत्तेर्वाक्यभेदापत्तिरित्येवं भाष्यं व्याचष्टे * समस्तस्येति * । आख्यातानुषङ्गक्लेशो वाक्यभेदोक्त्याक्षिप्तत्वादुक्तः कस्मिंश्चिदितिभाष्यावयवसूचितस्यानर्थक्यस्य विधित्वानुवादत्वद्वयायोगाधीनत्वात्पश्चाद्व्याख्या। अर्द्धमेवेत्यवधारणाभावेपि यदङ्गत्वेन वेदिर्विहिता तत्रैवाहवनीयादिवद्विनि-

योज्यत्वेनान्यत्राविनियोज्यत्वादर्द्धान्तरस्य परिशेषाद्बहिर्मानप्राप्तेर्नित्यव-
११३६।५ दनुवादोपपत्तिं शङ्कते * ननु चेति * । वेदित्वरूपेणान्यत्राविनियोज्यत्वेपि
लौकिकदेशरूपेणान्यत्र विनियोगाविरोधात्समस्तस्य च यूपस्यान्तर्वेदि नि-
त्यं मानाप्रसक्तेः परिसंख्योपसंहारयोरयोगान्नित्यं च बहिर्वेदिमानाप्रसक्ते-
रर्द्धान्तरस्यान्तर्वेद्यविधिनिमित्तबहिर्मानतादवस्थ्यायोगादनुवादायोगमाह
* भवेदिति *। सामान्यशास्त्रं यूपविषयमेवोपसंहर्त्र्येतिपूर्वपक्षवार्त्तिकेनो-
पसंहारपक्षस्याप्युक्तत्वात्परिसंख्योक्तिरुपसंहारस्याप्युपलक्षणार्था। नित्यं
बहिर्मानाप्राप्तावन्तर्मानाप्राप्तेरपि नित्यत्वायोगेनाप्राप्तविधित्वायोगान्नि-
यमत्वापत्तेरन्तस्यापि च परिसंख्योपसंहारयोरिवावधारणापेक्षत्वादर्द्धमे-
वेत्यवधारणेनार्धान्तरस्य पारिशेष्याद्बहिर्मानप्राप्तेर्नित्यवदनुवादोपपत्ति-
माशङ्क्यान्तर्वेद्येवेत्यवधारणमात्रेण नियमोपपत्तेरर्द्धमेवेत्यवधारणाभावा-
दनुवादायोगमुपपादयितुमाह *अतश्चेति*। वज्रो वै यूप इतिवाक्यशेषा-
दर्द्धं यूपमन्तर्वेदि मिनोतीत्यर्द्धस्य यूपविशेषणत्वावगमतोऽसमस्तयूपमाने
चार्द्धविशेषणानर्थक्यापत्तेर्बलादर्द्धान्तरयावृत्त्यवगमादनुवादोपपत्तिं शा-
ङ्कते *ननु चेति * । अर्द्धान्तरस्यान्तर्वेदिनियमाभावमात्रेणार्द्धविशेषणा-
र्थवत्त्वोपपत्त्याशयेन परिहरति * कथमिति * । अर्द्धमन्तर्वेदीत्यकारप्र-
श्लेषशून्यसूत्रावयवव्याख्याभाष्योपपादनार्थं यदिति त्वित्यादिभाष्यशेषं ता-
त्पर्यतो व्याचष्टे * तस्मादिति * ॥

हविर्द्धानस्य सामिधेन्यनङ्गत्वम् । अधि० ७

सामिधेनीस्तदन्वाहुरिति हविर्द्धानयोर्वचना-
त्सामिधेनीनाम् ॥ १५ ॥

यत्सुन्वन्तीति सप्तम्यन्ताव्यययच्छब्देनाभिषवाधारस्य हविर्द्धानस्यो-
पलक्षितस्य तदन्वाहुरिति सप्तम्यन्ताव्ययतच्छब्देन परामर्शाद्धविर्द्धानयोः
शकटयोर्मध्ये यस्मिन् हविर्द्धाने सोममभिषुण्वन्ति तस्मिन् सामिधेनीर-
न्वाहुरिति श्रुत्यर्थप्रतीतेः सामिधेनीस्तदन्वाहुरिति वचनाद्धविर्द्धानयोर्म-
ध्येभिषवाधारभूतं हविर्द्धानं सामिधेनीनामङ्गमिति सूत्रार्थस्य सन्देहत-
द्धेतुपूर्वोत्तरपक्षाणां च यथाभाष्यं स्पष्टत्वादभिदेशार्थत्वेनानन्तरसङ्गति-
मात्रसूचनार्थमाह *उतेति*। हविर्द्धानविशेषपरामर्शिनस्तच्छब्दस्य श्रु-
तिवृत्तिसंभवासंभवाख्यपूर्वोत्तरपक्षयुक्तिसंप्रधारणावाचिन्या विचारो-

कथा सन्देहहेतुरुक्तः । निर्णयोक्तथा पूर्वोत्तरपक्षावुक्तौ । शङ्काधिक्याभावेनातिदेशायोगं शङ्कते * कथमिति * । हविर्द्धानसामान्यविशेषान्वयाख्यार्थद्वयोपादानस्य सिद्धान्तेपि देशसामान्यविशेषान्वयाख्यार्थद्वयोपादानसाम्येनापर्यनुयोज्यत्वादत्यन्तभिन्नार्थद्वयानुपादानाच्च वाक्यभेदाभावाभिमानेन शङ्काधिक्यमाह * विस्पष्टेति * । एतदेवोपपादयितुमिह पूर्व्वाधिकरणसिद्धान्तहेत्वभावमाह * नहीति * । हेत्वभावे सिद्धान्तासिद्धिं शङ्कते * कथं तर्हीति * । ११३७।

देशमात्रं वा प्रत्यक्षं ह्यर्थकर्म्म सोमस्य ॥ १६ ॥

इति सूत्रेण कृतार्थसंयोगाख्यहेतूक्त्योत्तरमाह * उच्यत इति *। द्वयोः कृतार्थतां विना देशलक्षणानुपपत्तेः सामिधेनीनां कृतार्थत्वानभिधानात् सूत्रस्य न्यूनत्वमाशङ्क्य हविर्द्धानस्यान्यत्राक्लृप्तकार्यत्वात्कैमर्थ्यापेक्षायामनेकस्मिन् कार्ये संभवत्येकेन कृतार्थत्वायोगमाशङ्क्याग्नेय्यधिकरणोक्तगौरवलक्षणवाक्यभेदापत्तेः सामिधेन्यर्थत्वायोगादनेककार्यासंभवसूचनार्थं कृतार्थतोक्ता। सामिधेनीनां तु क्लृप्तकार्यत्वेन कैमर्थ्यानपेक्षतया कृतार्थता स्पष्टत्वान्न सूत्रकृतोक्ता तदभिमतैव तु भाष्यकृता प्रकटितेतिसूचयन् हेत्वर्थं व्याचष्टे * सोमेति * । सोमस्येतिषष्ठ्याधारणव्यतिरेकजनितत्वसूचनार्था धारणोक्तिः। सामिधेनीनामपि कृतार्थताऽर्थात्सूचितेतिद्योतनार्थस्तावच्छब्दः । अगारे गावो वास्यन्तामितिवद्दक्षिणे हविर्द्धान इति सप्तम्या सोमासादनस्य हविर्द्धानसंस्कारार्थत्वोक्तौ कृतार्थत्वायोगाद्धविर्द्धानं प्रति प्रधानकर्म्मताऽर्थकर्म्मोक्ता । कृतार्थत्वेप्यन्यत्र विनियोगः पुरोडाशकपालस्येवाविरुद्ध इत्याशङ्क्य द्वयोः कृतार्थत्वाविशेषेण किं कस्याङ्गमित्यज्ञानात्सामिधेन्यनुवचनस्य च तदित्युपपदाक्रान्तविधिशक्तित्वेनाविधेयतयाङ्गत्वायोगाद्धविर्द्धानस्य सामान्यतः सामिधेन्युद्देशेनाविहितत्वेन तदङ्गत्वाभावात्किं हविर्द्धानं सामिधेन्यङ्गमिति विशेषानपेक्षणेनानपेक्षितविध्यापत्तेस्तच्छब्दोक्तस्य हविर्द्धानविशेषस्याप्यविधेयत्वेनाङ्गत्वायोगान्नाङ्गाङ्ग्यन्वयो युक्त इत्येवं परिहारार्थमिह त्वित्यादिभवतीत्यन्तं भाष्यं तात्पर्यतो व्याख्यातुमाह * इतीति * । नापीत्यादिभाष्यं हविर्द्धानसामान्यस्यापि सामिधेन्यन्वयस्य वाक्यस्य विधिशक्तिकल्पनाशङ्कानिरासार्थत्वेन व्याचष्टे * हविर्द्धानेति * । नचेत्यादिवचनमित्यन्तं भाष्यं विशेषेण सामान्याक्षेपाद्वाक्यभेदपरिहारशङ्कानिरासार्थत्वेन व्या-

ख्यातुमाह * विशेषेणेति * भाष्यं च हविर्द्धानसामान्यस्यान्यतः सा-
मिधेन्यन्वयप्राप्तौ यद्धविर्द्धाने सामिधेनीरन्वाहुरित्यनूद्य तदभिषवाधार
११ इति विशेषमात्रविधानाद्वाक्यभेदः स्यादित्युक्ते हविर्धानसामान्यस्य
सामिधेन्यङ्गत्वेनाविधानेपि तद्विशेषस्य दक्षिणं हविर्द्धानं प्रवर्त्तयन्ती-
ति विहितस्य केन कार्येणान्वय इति कैमर्थ्यापेक्षायामनेन सामिधेन्यङ्ग-
त्वविधानान्नानपेक्षितविध्यापत्तिरिति केन तर्हीत्यनेनाशङ्क्य सोमसंब-
न्ध्यासादनं हविर्द्धानस्य प्रधानकर्म्म प्रत्यक्षया सप्तमीश्रुत्याऽवगम्यते सा-
मिधेन्यनुवचनं तु हविर्द्धानस्य प्रधानकर्म्मलुप्तसप्तमीकाव्ययतच्छब्दग-
म्यत्वान्न प्रत्यक्षं ततश्च प्रत्यक्षेण सोमासादनेनैव कृतार्थत्वान्न कैमर्थ्याका-
ङ्क्षास्तीत्येवं परिहारार्थत्वेनापि सूत्रावयवे योजिते सामान्यविधिं
विनानपेक्षितविध्यापत्तेर्विशेषविध्ययोगाद्विशेषणैव सामान्याक्षेपान्न वा-
क्यभेदापत्तिरित्याशङ्क्य भवति त्वित्यादिना देशलक्षणापक्षेतिदेशाद्व्य-
पदेशसामान्यप्राप्तेस्तद्विशेषदक्षिणहविर्द्धानसमीपवर्त्तिव्यपदेशमात्रवि
ध्योपपत्तेः सामान्याक्षेपनिमित्तगौरवलक्षणवाक्यभेदापादकाङ्गोपदेशप-
क्षानौचित्यमुक्तमित्येव सकलं वाक्यभेदाभावशङ्कानिरासे योज्यं तस्मा-
दितिसिद्धान्तोपसंहारभाष्यं व्याचष्टे * तस्मादपीति * । प्रत्यक्षं ह्य
र्थकर्म्म सोमस्य तेन क्रियते इत्यादिभाष्येण हविर्द्धानसामिधेन्यनुवचन-
योर्द्वयोरपि कृतार्थत्वेनान्योन्याङ्गाङ्गित्वानपेक्षोक्त्यर्थतया सौत्रो हेतुर्व्या-
ख्यातः प्रत्यक्षं ह्यर्थकर्म्म सोमस्य नतु सामिधेनी कर्म्मेत्यनेन तु हवि-
र्द्धानस्य सोमधारणमात्रेण कृतार्थत्वात्तस्य च प्रत्यक्षत्वेनापह्नोतुमश-
क्यतयानपेक्षितविध्यापत्तेर्हविर्द्धानसामान्यविध्यनपेक्षविशेषविध्ययोगा
दुभयविधिप्रसङ्गेन वाक्यभेदापत्तेरितिवदतापिशब्देन सूचितः । अथेत्या
दिभाष्यसूचितवाक्यभेदप्रकटत्वेन स्पष्टत्वान्न व्याख्यातः ।

समाख्यानं च तद्वत् ॥ १७ ॥

सामिधेन्यङ्गत्वेपि शकटस्य महत्वेनैकदेशे सोमासादनमेकदेशान्तरे
होतृस्थानमित्यविरोधात्समाख्योपपत्तेर्लिङ्गत्वायोगमाशङ्क्यान्यसाहितह-
विर्द्धारणे सापेक्षत्वात्समासविघातापत्तेर्लिङ्गत्वमुपपादयितुमाह * ह-
विर्द्धानमिति * । अन्यसाहित्यात्समासविघातापत्तिसूचनार्थं सा-
मिधेन्यनुवक्तृधानत्वं सामिधेन्युक्त्या लक्षितम् ॥

उत्सर्गातिरिक्तस्यान्यद्वाराऽनुष्ठानम् । अधि० ८

शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात्

स्वयं प्रयोगे स्यात् ॥ १८ ॥

तुल्यः सर्वेषां पशुविधिरित्याद्यधिकरणचतुष्टयकृतायाः स्थानस्य
पूर्वैः सह विरोधाविरोधचिन्तायाः प्रसङ्गेनागतानामाराच्छिष्टसंयु-
क्तमित्यादिचिन्तानां समाप्त्या बुद्धिस्थत्वात्तया सह द्रव्यसंस्कारः,
प्रकरणाविशेषात्सर्वकर्मणामित्यतः प्राक्तन्याश्चिन्तायाः सङ्गतिमाह
* अत इति * । विरोधाविरोधचिन्तया प्रकरणादित्रयेपि कथ-
ञ्च विनियुज्यत इत्ययमंशश्चिन्तितो भवतीति कथमित्यनेन सूचितम्,
एवमादयः समाख्याः कथं विनियोक्तुमारभन्ते किं विरोधेन ततश्च न श-
क्नुयुरथाविरोधेन ततश्च शक्नुयुरित्यर्थः ॥ ते सर्वार्थाः प्रयुक्तत्वादित्यतः
प्राक् विरोधाविरोधयोरचिन्तनात्सङ्गत्ययोगमाशङ्क्य शास्त्रफलमित्यादि-
चिन्ताया अप्युपोद्घातत्वेन विरोधाविरोधचिन्ताशेषत्वात्सङ्गतिमुपपाद-
यितुमाह *तत्रेति* । चमसाध्वर्यवश्चेत्यादिचिन्तानां प्रसक्तानुप्रसक्त्या-
सङ्गतिस्तावच्छब्देन सूचिता ॥ उपोद्घातत्वमुपपादयति * यदीति *।
अग्निहोत्रोदाहरणे परिक्रयाभावेन शेषमन्य एव कुर्यादितिसिद्धान्तायोगा-
तद्व्यावृत्त्यै स्वयं शोधयति * तत्रेति * मध्यमपक्षस्य सिद्धान्त- ११३८।५
त्वविवक्षायामग्निहोत्रस्योदाहणत्वोपपत्तिः फलवत्वोक्त्या सूचिता । तत्रे-
तिसन्देहभाष्यं व्याचष्टे * तेष्विति * । प्रधानभूतेष्वाधानादावन्य-
कर्तृकत्वाभ्युपगमादङ्गभूतेष्वपिच प्रयाजादिषु यजमानकर्तृकत्वाभ्युपग-
मात्प्रभौ स्वामिन्येव धीयते समवैतीत्यवयवव्युत्पत्त्या प्रधानोक्त्यानन्य-
साध्यव्यापारोक्तिः सर्वस्मिन्प्रयोगे स्वयमेव कर्त्ता स्यादित्याद्यपूर्वप-
क्षप्रतिज्ञार्थम् । तस्मादितिसूत्रावयवं व्याचष्टे * किमिति * ।
शास्त्रीयकर्मसाध्यं यत्फलं तत्स्वयमनुष्ठातर्येव यस्माद्भवतीति हेत्वर्थ
माद्यावयवं कृष्यादिफलस्य कर्तृगामित्वानियमादर्शनात्कथं शास्त्रीयक-
र्मफलस्य तन्नियमोवगम्यत इति हेतूपपत्तिप्रश्नस्य च शास्त्रप्रमाणक-
त्वात्फलस्य शास्त्राच्च कर्तृगामित्वनियमावगतेरित्येवमुत्तरार्थं द्वितीयाव-
यवं शास्त्रात्कर्तृगामित्वनियमावगत्युपपादनेन व्याख्यात भविष्यतीति
मत्वा तदुपपादने हेत्वाकाङ्क्षां पूरयितुमाह * कुत इति * अग्निहोत्रो-

द्राहरणाव्यापितद्भाष्यानुक्तापीयं युक्तिः सामानाधिकरण्याख्ययुक्त्युक्तय-
११ र्थे भाष्ये यजेतेत्यात्मनेपदयुक्तवाक्यमात्रोक्त्या सूचितत्वादुक्ता । अन्ये-
नापि कर्तुमशक्यमङ्गीकृत्य विवक्षितम्। तस्मादित्युपसंहारभाष्यं व्याचष्टे
* तस्मादिति * । प्रयोक्तृशब्दस्य हेतुकर्तृवाचित्वप्रसिद्धे विपर्ययापत्ति-
माशङ्क्य फलार्थिवाचित्वेन व्याचष्टे * फलस्य चेति * । सर्वस्य स्वयं-
कर्तृकत्वे होत्रादिसमाख्यानुपपत्ति माशङ्क्यैकस्येत्युत्तराधिकरणशङ्कासू-
त्रवक्ष्यमाणन्यायाद्यजमानस्यैव होत्रादि कुर्वाणस्य समाख्योपपत्तिमाह
* होत्रादीति * । वरणभरणयोरदृष्टार्थत्वान्नित्यप्रयोगे स्वयसर्वानुष्ठा-
नाशक्तविषयत्वाद्वोपपत्तिश्चकारेण सूचिता ।

उत्सर्गे तु प्रधानत्वाच्छेषकारी प्रधानस्य तस्मादन्यः स्वयं वा स्यात् ॥ १९ ॥

द्वितीयपूर्वपक्षसूत्रं परिमतेन तावद् व्याचष्टे * प्रधानमात्रेति * । आत्मनेपदेनाङ्गेषु फलार्थिकर्तृत्वानियमेपि न्यायान्नियमसिद्धिं शङ्कते * ननु चेति * । अङ्गभावनाक्षेपादेव सामान्यतः कर्त्तृप्राप्तौ फलार्थ्येव सर्वं कुर्यादिति नियमार्थो विधिः कर्त्रन्तरं निवर्त्तयेत् न्यायात्तु कर्त्रन्तरानिवृत्त्यप्रतीतेः प्रधानसमानकर्तृकत्वस्य चाङ्गेषु प्रयोक्तृत्वेनाप्यनुग्रहोपपत्तेर्नाङ्गेषु नियमसिद्धिरिति परिहरति * नेति * प्रधानेपि तर्हि प्रयोक्तृत्वेनापि फलार्थिना कर्तृत्वसिद्धेः स्वयङ्कर्तृत्वासिद्धेः स्वयङ्कर्तृत्वनियमो न स्यादित्याशङ्क्यात्मनेपदसामानाधिकरण्याभ्यां प्रधानार्थे फलार्थिकर्तृत्वानियमात्कर्त्रन्तरानिवृत्त्या फलार्थिना स्वयङ्कर्तृत्वावगमात्पुरोडाशादिद्रव्योत्सर्गात्मके प्रधाने स्वयमक्रियमाणेऽन्यादृक्कर्तृत्वायोगात्परिक्रये वरणे च स्वयङ्क्रियमाणेपि प्रधानकारिणा कार्यस्य परिक्रयादेरतत्कारिणा कृतस्याप्यकृतसमत्वापत्तेः प्रधाने स्वयं करोति प्रधाने तु स्वयङ्कृतेऽङ्गानि परिक्रयवरणाभ्याङ्कारयन् कर्तृत्वान्न व्याहन्यत इत्याह * द्रव्येति * । सौत्रोत्सर्गोक्तिव्याख्यार्था प्रधानविवक्षायामपि द्रव्योत्सर्गोक्तिः । आत्मनेपदेन साङ्गायां फलार्थिनः प्रयोजके कर्तृत्वस्यैवाभिधानात्प्रधानस्योत्सर्गात्मकतयान्येन कर्तुमशक्यत्वात्तस्मिन्प्रयोजककर्तृत्वस्यानुष्ठानरूपेण निवृत्तावपि प्राप्तिरूपेणानिवृत्तेरङ्गेषु प्रयोजककर्तृत्वे सुतरां प्रधानसमानकर्तृकत्वात्सेत्स्यतीत्येवं प्रधानवशेनाङ्गेष्वपि स्वयङ्कर्तृत्वानियमाशङ्कानिरासे-
११३९।२ नान्येषां द्वितीयपूर्वपक्षसमर्थनं दूषयितुमुपन्यस्यति * केचित्त्विति * ।

स्वयङ्कर्तृपक्षेपि प्रधानसमानकर्तृकत्वाविरोधसूचनार्थं सुतरामित्युक्तम् । क्रियाफलस्यात्मनेपदेन कर्त्रभिमुखगामित्वाभिधानात्स्वसमवेतक्रियाफलस्य च स्वस्मिन्नेवोत्पत्तेर्देशान्तरप्राप्तिफलकस्वाभिमुखगमनायोगाण्णिजभावेपि तदर्थप्रयोजकव्यापाराभिधानमुपपादयति * कर्त्रभिप्रायेति * एतदेवाभियुक्तप्रयोगेण द्रढयति * तथाचाति * ॥ आत्मनेपदेन प्रयोजकव्यापारोक्तौ स्वयङ्कृतात्फलानवाप्त्यापत्तेः केनचित्सामदानादिप्रकारेणान्यं स्वद्रव्योत्सर्गं प्रवर्त्तयित्वा प्रधानस्याप्यन्येन कारयितव्यत्वप्रसङ्गापादनेन दूषयितुमारभते * न त्विति * । क्रतुपकाराख्यस्य चाङ्गक्रियाफलस्य यजमानगामित्वायोगात्तत्सिद्ध्यर्थमात्मनेपदस्य प्रयोक्तृव्यापारवाचित्वकल्पना युक्तेत्याह * न चेति * ॥ यजंति याजका यजते यजमान इतिप्रयोगमात्राच्च परस्मैपदात्मनेपदयोः प्रयोज्यप्रयोजकव्यापारवाचित्वव्यवस्थाकल्पनायां वैपरीत्यापत्तिमाह * कामे त्विति *। तस्मात्प्रधानमात्रस्यात्मनेपदाख्येन प्रत्ययेन फलार्थिकर्तृकत्वनियमादुत्सर्गमात्रे च प्रधानत्वात्तन्मात्रे स्वयङ्कर्त्ता स्यादित्यनेनैव सूत्रव्याख्यानेन प्रधानमात्रेत्यादिवार्त्तिककृतेन द्वितीयः पूर्वपक्षः समर्थनीयो न त्वात्मनेपदेन प्रयोक्तृत्वस्यैवाभिधानात्प्रयोक्तृत्वे सुतरां फलार्थिनः कर्त्तृत्वसिद्धेः स्वयङ्कर्तृत्वानभिधानादुत्सर्गमात्रे प्रधानत्वादनन्यकार्यत्वात् स्वयङ्कर्त्ता स्याच्छेषकारी त्वात्मनेपदवशादन्यः प्रधानसमानकर्तृकत्ववशाद्वा स्वयमेवेत्यनेन केचित्त्वितिवार्त्तिककृतेनेत्युपसंहरति * तस्मादिति * । पूर्वमपि व्याख्यानं दूषयितुमाह * तत्रापीति * । भावनामात्रस्यात्मनेपदेन फलार्थिकर्तृकत्वनियमात्करणांशेप्यनियमाभ्युपगमेऽशद्वयेपि नियमापत्तेः करणांशमात्रे फलार्थिकर्तृकत्वेन कथं भावनोपसंहृतेति दूषणं पूर्वव्याख्यानेपि वाच्यमित्यर्थः । स्वमतेनोत्सर्गरूपे प्रधानेङ्गे वा प्रभावेव धीयमानत्वाख्यात्प्रधानत्वात्स्वयमेव कर्त्ता स्यात् यत्त्वन्येन कर्तुमशक्यत्वात्प्रभावेव धीयमानरूपप्रधानस्यान्येन कर्तुं शक्यत्वात्परिशिष्टं तत्कारी प्रधानकर्तुरन्यः स्वयं वा स्यादित्येवं सूत्रं व्याचिख्यासुराद्यपूर्वपक्षनिरासार्थत्वेन तुशब्दं तावद्व्याख्यातुमाह * तेनेति * । स्वर्गकामादिपदस्य प्रेर्यसमर्पकत्वे स्वर्गकामादेरेव विधिप्रेर्यत्वान्यथानुपपत्त्या फलित्वावगमाद्भावनायाश्च प्रेर्यान्वयात्प्राक् फलविशेषानवगमात्त्कामकर्तृविशेषाक्षेपाशक्तेरकप्रत्ययस्थात्मनेपदरूपतुल्यकर्तृविशेषानियमसम्भवेन च पदान्तरोक्तप्रेर्यत्वान्यथानुपपत्त्या कर्तृविशेषाकल्पनायो-

गाद्दात्मनेपदेन फलिना कर्तृत्वानियमात्कर्त्रन्तरस्य फलाभावावगतेर्निवृत्तिः
११ स्यात्तस्य त्वेकादशाद्ये फलसमर्पकतया वक्ष्यमाणत्वात्प्रेर्यविशेषावग-
मात्प्रागेव भावनायाः फलपदान्वयात्फलविशेषावगमने तत्कामकर्तृवि-
शेषाक्षेपशक्त्युपपत्तेः, प्रेर्यविशेषानवगमाच्च फलविशेषानवगतेरात्मनेप-
देन फलिनः कर्तृत्वनियमायोगाद्भावनाक्षिप्तकर्तृत्वस्य स्वर्गकामादिपुरुष-
विशेषस्यात्मनेपदेन फलित्वनियमाज्जातपुत्रकपितृकर्तृकवैश्वानरेष्टिफ-
लस्य पुत्रगामित्ववदस्यापि फलित्वं प्रसक्तं निवर्त्तेत न त्वन्यस्य कर्तृ-
त्वेत्यर्थः । आत्मनेपदेन कर्तुरेव फलमिति नियमादकर्तृफलार्थे च कर्त्तुर्नि-
यमाभावेप्यकरणे फलाभावापत्तेरात्मनेपदस्य प्रयोक्तृव्यापारवाचित्वा-
भावेन स्वयङ्कर्त्तर्येव फलनियामकत्वात्साङ्गप्रधानभावनायाश्च फलसा-
धनत्वात्सर्वत्र स्वयङ्कर्तृनियमापत्तिशङ्कानिरासार्थत्वेनाङ्गप्रधानविशिष्ट-
भावनायाः फलसाधनत्वेपि परिस्पन्दरूपेषु धात्वर्थेष्वात्मनः साक्षात्क-
र्तृत्वायोगेनावश्यं शरीरेन्द्रियद्वारा कर्तृत्वस्याश्रयणीयत्वाद्भावनाधात्वोः
कर्त्रैक्यनियमानुपपत्तेरन्यकर्तृकेणापिच धात्वर्थेन करणतया भावनावच्छे-
दोपपत्तेर्धात्वर्थानवच्छिन्नभावनानुष्ठानायोगोपालम्भानापत्तेः पट्कर्षकक-
र्तृककृषिधात्वर्थावच्छिन्नायाश्च भावनायाः षड्भिर्हलैः कृषतीत्येककर्तृक-
त्वप्रयोगात्कर्त्रैक्यनियमाभावावगतेः करणेतिकर्त्तव्यतात्वेन चाङ्गप्रधा
नानां फलभावनाविशेषणतया तस्यामवस्थायां साध्यत्वाभावेन
कर्त्रनपेक्षत्वात्स्वरूपमात्रे फलभावनया फलार्थिनः कर्तृत्वाक्षेपावगतेरा-
त्मनेपदेन तन्मात्रे स्वयं कर्तुः फलानियमात्तद्विशेषणेष्वङ्गप्रधानेषु तद्व-
शात्स्वयङ्कर्तृत्वानियमापत्तेरात्मोपात्तशरीरेन्द्रियव्यापाराणां यजमाने
फलसाधनत्वनियमोपपत्तेरुत्सर्गरूपेष्वङ्गप्रधानेष्वन्येन कर्तुमशक्यत्वा-
त्स्वयङ्कर्तृत्वनियमेप्यन्यत्रानियमोक्त्यर्थतया सूत्रव्याख्यां सूचयितुमाह
* तावतेति * । अङ्गेर्द्धातोर्गत्यर्थत्वादङ्गति स्वामिनं त्यक्त्वान्यत्रापि
गच्छति समवैतीति व्युत्पत्यान्येनापि कर्तुं शक्यस्याङ्गोक्त्या विवक्षित-
त्वात्फलार्थिनः स्वामिनः परिक्रयोपात्तर्त्विग्द्वारा फलभावनाविशेषण-
भूताङ्गप्रधानव्यापारकरणस्यात्मनेपदाविरुद्धत्वादन्येन कर्तुमशक्येषु सा
मर्थ्यात्स्वयङ्कर्तृत्वनियमेप्यन्येन कर्तुं शक्येष्वनियम इत्यर्थः ॥ भाष्ये
तु विशिष्टायां भावनायां स्वयङ्कर्तृत्वनियमेपि परिस्पन्दरूपेष्वङ्गप्रधाने-
ष्वमूर्त्तस्यात्मनः क्रियाश्रयत्वायोगेन तन्निरपेक्षक्रियानिष्पादकत्वारव्य-
स्य कर्त्तृत्वस्याभ्युपगन्तव्यत्वात्परिक्रीतर्त्विक्कर्तृकेष्वपि स्वामिनः परि-

क्रयद्वारा निष्पादकत्वाख्यस्वयङ्कर्तृत्वोपपत्तेर्यावत्यङ्गे प्रधाने वा स्वाश्रि-
तक्रियानिष्पादकत्वसम्भवस्तावत्येव साक्षात्कर्तृत्वनियमोऽन्यत्रानियम-
इत्येवमर्थत्वेन सूत्रव्याख्यार्थं परिक्रयाख्यस्योत्सर्गस्यर्त्विजः प्रतियज-
मानस्य स्वामित्वाख्यप्राधान्यापादकत्वात्प्राधान्यमुत्सर्गे कृते यजमा-
नस्यर्त्विजः प्रति प्राधान्य तत्प्रयुक्तै ऋत्विग्भि· कृते देहेन्द्रियकृते जीव-
स्येव स्वयङ्कर्तृत्वोपपत्त्ये प्रधानत्वोक्त्या विवक्षितम् ।

अन्यो वा स्यात्परिक्रयाम्नानाद्विप्रतिषेधा-

त्प्रत्यगात्मनि ॥ २० ॥

दक्षिणादानस्य परिक्रयार्थत्वे तदन्यथानुपपत्यर्त्विजां कर्मसंयोगक-
ल्पना कर्मसंयोगाच्च परिक्रयार्थत्वावगतिरित्यन्योन्याश्रयापत्तेः सिद्धा-
न्तहेत्वसिद्धिमाशङ्क्य परिक्रयार्थत्वावगमात्प्रागपि द्वितीयपूर्वपक्षन्या-
यादृत्विजां पाक्षिककर्मसंयोगप्राप्तेस्तेभ्यो दानस्य दृष्टार्थत्वे सम्भवत्यदृ-
ष्टार्थत्वस्यान्याय्यत्वात्परिक्रयार्थत्वस्य दृशमसिद्धतामाह * अन्वाहा- ११४०
र्येति * । विप्रातिषेधादितिसूत्रावयवव्याख्यार्थं विप्रतिषिद्धश्चेत्यादि-
भाष्यमन्यकर्तृकत्वपक्षे परिक्रयाविरोधमाशङ्क्य नित्यवदाम्नातात्परिक्र-
यादित्येवं हेत्वर्थव्याख्यार्थात्पुरुषानतीत्यादिभाष्यात्पठितमपि परिक्र-
यादृष्टार्थत्वापत्तेर्दशमे निपेत्स्यमानत्वाद्दोषत्वसूचनायादौ व्याचष्टे *स्व-
भावतश्चेति * । आद्यं व्याचष्टे * तत्रेति * । तस्मादित्युपसंहारभा-
ष्यं व्याचष्टे * तस्मादिति * । अन्यैः पूर्वसूत्रस्थप्रधानशब्दोक्तेभ्योन्येन
कर्त्तुमशक्येभ्यः परिशिष्टानां पदार्थानां करणे सर्वस्य स्वयङ्कर्तृकत्वं सा-
मानाधिकरण्यात्मनेपदाभ्यामवगतं न सिद्ध्येदित्याशङ्काया उत्सर्गे तु
प्रधानत्वादित्यनेनैव निरस्तत्वसूचनार्थमुत्सर्गे त्विति भाष्यं व्याचष्टे * अ-
तश्चेति * । आत्मनेपदस्य प्रयोक्तृव्यापारवाचित्वानिषेधात्साङ्गप्रधान-
भावनाकर्त्तुरेव फलनियामकत्वान्न क्वचित्संविधानेन कर्तृता युक्तेत्याश-
ङ्क्य संविधानद्वारापि करणे निष्पादकत्वाख्यस्वयङ्कर्तृत्वाविघातादनन्य-
साध्ये च स्वयङ्करणावश्यंभावादात्मनेपदमपि क्वचित्स्वयङ्करणात्क्व-
चित्संविधानात्कर्त्तरि नियच्छतीत्याह । * आत्मनेपदस्यापीति * ।

परिक्रीतानामृत्विजां संख्याविशेषनियमः । अधि० ९

११ तत्रार्थात्कर्तृपरिमाणं स्यादनियमोऽविशेषात् ॥ २१ ॥

कर्त्रन्तरप्रवेशेपि यावत्समाख्यं कर्तृभेदाभावे सामाख्यानिकविनियोगायोगेनास्याप्युपोद्घातत्वेन सङ्गतेर्यदि होत्रादयो नानाभूता इति पूर्वाधिकरणसङ्गतिवार्त्तिकस्थेन नानाशब्देनैव सूचितत्वादृत्विजो वृणीत इत्यनेन वरणविधिर्ब्रह्माणं वृणीत इत्यादिभिर्वेति सन्देहाच्च ब्रह्मादिसंज्ञोत्पत्तिस्थत्वाद्धेदिकानुत्पत्तिस्थत्वाद्वा नेतिसन्देहस्य कर्तृसङ्ख्यासन्देहहेतुताया नोत्पत्तौहीति सूत्रालोचनया ज्ञातुं शक्यत्वाद्दर्शपूर्णमासयोर्यज्ञक्रत्वोश्चत्वार ऋत्विजश्चातुर्मास्यानां यज्ञक्रतूनां पञ्चर्त्विजः पशुबन्धस्य यज्ञक्रतोः षड् ऋत्विजः सौम्यस्याध्वरस्य यज्ञक्रतोः सप्तदशर्त्विज इतिसङ्ख्यावाक्यानां प्रचयप्राप्तसङ्ख्याविध्ययोगात्पाक्षिकानुवादत्वावगतेः सङ्ख्याविशेषाविधानेनानियमे पूर्वपक्षिते शास्त्रार्थाव्यवस्थाशङ्कानिरासार्थं शेषपदार्थानामन्यकार्यत्वनियमे सति कस्यचिच्छेषपदार्थस्य स्वयङ्कर्त्तुमन्याय्यत्वाद्यदा यावन्तः सर्वानन्यकार्यान् पदार्थान् कर्त्तुं शक्नुवन्ति तदा तावन्त इत्यर्थात्कर्तृसङ्ख्याव्यवस्थेत्युक्तमित्येवं सूत्रव्याख्यामात्रं सूचयितुमाह * एकस्येति * । ऽयादयोपि वाशब्देनोक्ताः । आद्याभयवस्याव्याख्ययोत्तरावयवशेषत्वं सूचितम् । एकस्य कर्मभेदादिति सूचितम् । परिक्रयान्यथानुपपत्त्या स्वयङ्कर्तृत्वस्य बाध्यत्वात्कस्मिंश्चित्पदार्थे परिक्रीतेनैकेन कृतेनुपपत्तौ परिहृतायां पदार्थान्तरे स्वयङ्कर्तृत्वबाधस्यान्याय्यत्वादेक एवोपादेय इति पूर्वपक्षान्तरमाह । * अथवेति * फलकामस्य फलभावनायां प्रवृत्तौ फलकर्तृत्वात्समानकर्तृकता प्रयोगस्योक्ता ॥

अपिवा श्रुतिभेदात्प्रतिनामधेयं स्युः ॥ २२ ॥

कर्तृविशिष्टविभागादिपदार्थविधिष्वध्वर्य्वादिनामधेयश्रुतिभेदात्प्रतिनामधेयं भिन्नाः कर्त्तारः स्युरित्येवं सूत्रव्याख्यां सूचयितुमाह * भिन्नेति * । कर्मभेदप्रमाणत्वात्संज्ञायास्तया कर्तृभेदासिद्धिमाशङ्क्य संज्ञिभेदं विना संज्ञाभेदानर्थक्यन्यायतुल्यत्वात्कर्तृभेदेपि प्रा-

११४११ माण्यमाह * संज्ञा चेति * सिद्धान्तमुपसंहरति * इतीति *

एकस्य कर्मभेदादिति चेत् ॥ २३ ॥

एकस्याप्यध्वर्य्यादिनामधेयश्रुतिभेद उपपद्यत इत्याशङ्कार्थं सूत्रं सिद्धसंज्ञानां कर्म्मान्वयविधानादयुक्तमाशङ्कार्थविशेषवाचित्वेनाध्वर्य्या-दिसमाख्यानां लोकादनवगतेर्योऽध्वर्युः स विभजतीति वचनव्यक्त्ययो-गाद्विभागादौ व्याप्रियमाणावस्थायामुपलम्भेन यो विभजति सोऽध्व-र्युरिति यूपादिवद्विपरीतवचनव्यक्त्याश्रयणाद्विभागादिकार्यकर्तृत्वरू-पार्थवाचित्वेन परिच्छेदमुपपादयति * व्याप्रियमाणानामिति * । कर्म्मयोगेनाध्वर्य्वादिशब्दार्थपरिच्छेदमस्मिन् गृहे देवदत्तः पाचक इत्यु-क्ते ज्ञातपाचकशब्दार्थस्यास्याज्ञातदेवदत्तशब्दार्थस्य योऽस्मिन् गृहे पा-ककर्त्ता स देवदत्त इति पाचककर्मयोगाद्देवदत्तशब्दार्थपरिच्छेददृ-ष्टान्तेन दृढयन्नुपसंहरति * ततश्चेति * ।

नोत्पत्तौ हि ॥ २४ ॥

नाध्वर्य्यादिकर्म्मभेदनिमित्तोऽध्वर्य्वादिसंज्ञाभेदो यस्मादुत्पत्तौ क-र्त्तुरुपादानार्थे वरणे सा वाम्नात इत्येवंशङ्कानिरासार्थं सूत्रमुत्पत्ति-स्थत्वस्य कर्तृभेदहेतुत्वोपपादनायानुत्पत्तिस्थतायामभेदकत्वास्युक्तिपूर्वं व्याचष्टे * यदि हीति * । वरणस्याध्ययनादिनिष्पादितकर्तृत्वयोग्य-पुरुषोपादानार्थत्वेऽपि वरणं विना परार्थे कर्म्मणि प्रवृत्त्ययोगात्कर्तृ-त्वानुत्पत्तेरुत्पत्तित्वोक्त्युपपत्तिसूचनायात्यन्ताप्रवृत्तपुरुषप्रवर्त्तनार्थप्रा-र्थनरूपतोक्ता अवणीक्रियाविशेषणत्वादादीति नपुंसकलिङ्गैकवचनाविरो-धः। उत्पत्तिस्थानां संज्ञानां वरणाख्यनिमित्तातिरिक्तकर्म्मान्वयनिमि-त्तायोगात्कर्तृभेदकत्वमुपपादयितुमाह * न चेति * ॥ अध्वर्य्वादिवा-क्यैर्वरणविधावध्वर्य्वादिविशिष्टवरणविधानात्तेभ्य एवर्त्विग्विशिष्टवर-णप्राप्तेर्ऋत्विग्वाक्यानर्थक्यप्रसङ्गादृत्विग्वाक्यविहिते वरणेऽध्वर्य्वादिवा-क्यानां वरीतव्यविशेषसमर्पणार्थत्वेनानुत्पत्तिविधितयाध्वर्य्वाद्युत्पत्ति-रूपवराभेदादेकेन च वरणेनानेकर्त्विगुत्पत्त्ययोगादृत्विग्भेदासिद्धिमाश-ङ्क्यर्त्विग्वाक्येन शुद्धवरणविधावृत्विक्पदानर्थक्यापत्तेरेकेनैव च वरी-तव्येन नैराकाङ्क्ष्याद्विकल्पेनाध्वर्य्वादिवाक्यानां वरीतव्यसमर्पकत्वा-पत्तेर्ऋत्विग्विशिष्टविधौ तु नियमस्तु दक्षिणाभिरिति न्यायेनाध्वर्य्वा-दीनामेवर्त्विक्त्वावधारणाद्वरीतव्यविशेषज्ञानसिद्धेर्दीक्षादक्षिणवाक्यवच्च क्रमवाचिशब्दाभावेनाध्वर्य्वादिवाक्यानां क्रमार्थत्वायोगादानर्थक्याप-

त्विर्बहुवाक्यार्थवत्त्वार्त्विग्वाक्यमात्रस्य स्तुत्यर्थत्वेनानुवादत्वावगमोऽध्व-
र्य्वादिवाक्यैरेवच वरणविधिं मत्वाऽध्वर्य्वादिशब्दानामौदमेधिन्यायेन क-
र्मनिमित्तत्वाभ्युपगमे भिन्नपुरुषसमर्थकत्वाभावेन गुणाद्भेदाभावेऽप्यभ्या-
साद्रूढित्वेन वा भिन्नपुरुषसमर्पकत्वाद्गुणाद्वरणभेदप्रतीतेः ऋत्विग्भेद-
सिद्धिमाह * वरणान्यपिचेति * अध्वर्य्वादिवाक्यानां वरणविधित्वसूच-
नायैतानीतिविशेषणं न केवलमृत्विगुपादानार्थवरणभेदादृत्विग्भेदः किं-
त्वध्वर्य्वादिसमाख्यानां भिन्नपुरुषविषयवरणनिमित्तकत्वेन भिन्नपुरुषविष-
यत्वादिरीतिमाह * समाख्यानामपिचेति * । निमित्तान्तरादर्शनेनैव ता-
वत्पारिशेष्याद्वरणनिमित्तता गम्यते वरणान्वयव्यतिरेकाभ्यामपि सैव ग-
म्यते तेषां च निमित्तानां वरीतव्यविषयभेदेन नैमित्तिकानामध्वर्य्वादिना
म्नां वाच्यविषयभेदार्थसिद्धिरिति व्यवहारशब्दात्परतोऽपिच शब्दान्वयेन
भेदोक्तयोश्चाधिकरणव्युत्पत्त्या विषयभेदार्थत्वाभ्युपगमेन व्याख्येयम् ।
वृतानामपि होत्रादीनामनुयाजार्थं पुनर्वरणवदेकस्यापि तत्तत्कर्मार्थं
पुनःपुनर्वरणोपपत्तेर्वरणानामेव भिन्नविषयत्वासिद्धिमाशङ्क्य कर्मा-
रम्भकालीनत्वेनैषां दृष्टोपादानार्थत्वे सम्भवत्यनुयाजार्थवरणवददृष्टार्थ-
त्वायोगाद्यावत्कार्यार्थं च सकृद्वरणोपपत्तेरुपात्तोपादानायोगाच्च विषय-
भेदमुपपादयति * दृष्टार्थत्वाच्चेति * । एकस्य पुनःपुनर्वरणायोगेऽप्यृत्वि-
जो वृणीत इत्यस्य वरणोत्पत्तिविधित्वेन वरणभेदाभावादेकस्मिंश्च वर-
णेऽध्वर्य्वादिवाक्यविहितानां वरणीयानां समुच्चयायोगादृत्विज इति बहु

त्वस्य चोद्देश्यविशेषणत्वेनाविवक्षितत्वात्परिक्रयान्यथानुपपत्त्या चार्त्वि-
क्प्राप्तेश्चमसाध्वर्युबहुत्ववदप्राप्तोद्देश्यविशेषणत्वाभावादध्वर्य्वादिशब्दानां
भिन्नपुरुषसमर्पकत्वेनैकस्य कस्य चित्कर्मनिमित्तत्वाद्भिन्नपुरुषसमर्प-
कत्वाभावे वा यावत्कर्त्तव्यात्तमेकस्य सकृद्वरणं भविष्यतीत्याशङ्क्यर्त्वि-
ग्वाक्येन वरणमात्रविधावृत्विक्पदानर्थक्यापत्तेः ऋत्विग्विशिष्टवरणवि-
धिप्रसङ्गेनाध्वर्य्वादिवाक्यानर्थक्यप्रसङ्गादध्वर्य्वादिवाक्यानामेव वरणो-
त्पत्तिविधित्वावगतेस्तत्र चाध्वर्य्वादिशब्दानां कर्मनिमित्तत्वेऽप्यध्वर्य्वा-
दिकर्मकरणत्वेन वरीतव्यस्योत्पत्तिवाक्यशिष्टस्य होत्रादिकर्मकरत-
या वरीतव्येन वाक्यान्तरशिष्टस्य बाधविकल्पासम्भवादन्योन्यनैरपेक्ष्येण

समुच्चयस्याप्यसम्भवान्न शक्यः सकृत्कृतेनैकेन वरणेनानेककर्मकरत्वेन
क्रियमाणः पुरुषः यजमानेनात्मना सम्बन्धु ततश्च समुच्चयायोगादपि वर
णानि भिद्यन्त इति परिहारमाह * उत्पत्तीति * । वरणान्यपिचेत्यत्रै-

केन वरणेनानेकपुरुषोपादानायोगाद्वरणभेदो गुणाद्युक्त इह त्वेकस्यापि पुंसोनेककर्म्मार्थत्वेनोपादानायोगादित्यपौनरुक्त्यम्। एकस्यापि पुंसोनेककर्मार्थं वरणेनोपादेयत्वं क्रियमाणान्तरोक्तयोपसंहारादुक्तम्। एकस्मिनप्यनेककर्म्मार्थोपादानसमुच्चयायोगोपिशब्देन सूचितः। वरणानां भेदेपि सर्वेषां कर्त्तुरुपादानार्थतयैकार्थ्येन च वैकल्पिकत्वाशङ्कुपादेयर्त्विग्विकल्पो भविष्यतीत्याशङ्क्याह *सर्वाणि चेति*। सूत्रार्थमुपसंहरति *अत इति*। तान् पुरोऽध्वर्युर्विभजतीत्यादिवाक्यैर्विभागादिकर्म्मार्थत्वेनाध्वर्य्वादीनां वरीतव्यत्वप्राप्तेर्वरणकीर्त्तनस्य विधित्वायोगात्प्रयोजनाभावेन चानुवादत्वायोगात्प्रचयगस्यषोडशसङ्ख्याप्रत्यायनार्थत्वोक्त्यर्थं तस्मादित्यादिभाष्यमविहितवरणस्याध्वर्य्वादेर्नियमेन वरीतव्यत्वप्राप्त्यभावादन्योन्यानपेक्षाध्वर्य्वादिविशिष्टभिन्नवरणविधायित्वेन स्पष्टावगतभिन्नवाक्यत्वानाञ्चाध्वर्य्वादिवाक्यानामप्रतीयमानैकत्वकल्पनेन प्रचयाख्यसुखतरोपायलभ्यसङ्ख्यामात्रप्रत्यायनार्थत्वस्य वा युक्तत्वाद् दूषयति * यद्विति *। कथं तर्हि भाष्यकारस्तूभयथापि भेदो भवतीत्येतत्प्रतिपादनपर इति टुप्टीकाग्रन्थेऽस्यापि प्रकारस्याभ्यनुज्ञेत्याशङ्क्य प्रौढिमात्रं तत्, वस्तुतस्तूत्पद्यमाना एवैते भिन्ना एवोत्पद्यन्ते, प्रचयात्तु या सङ्ख्या सैवानुवाद इत्येतदेव टुप्टीकोक्तं युक्तमिति सूचयितुमाह * तेनेति *। अध्वर्य्वादीनामेकवरणाख्यधर्मान्वयलक्षणे प्रचये सत्यपि कथं सङ्ख्यावगतिरित्याशङ्क्य भिन्नवरणविध्यनुनिष्पत्तिर्हेतुत्वेनोक्ता॥

चमसाध्वर्यूणां पृथक्त्वम्। अधि० १०

चमसाध्वर्यवश्च तैर्व्यपदेशात्॥ २५॥

चमसाध्वर्युसंज्ञाया अप्युत्पत्तिस्थत्वात्पूर्वन्यायेनैव भेदकत्वसिद्धेरधिकाशङ्काभावेनातिदेशायोगमाशङ्क्याध्वर्य्वादिसंज्ञानामक्लृप्तार्थत्वेन वरणानिमित्तकत्वावगतेर्यावद्वरणं वरीतव्यभेदकत्वं युक्तम्। अस्यास्त्वध्वर्युपुरुषेष्वेव चमसान्वयेनोपपत्तेर्न भेदकतेत्यधिकाशङ्कां सूचयन्पूर्वपक्षमाह * अध्वर्यव इति *। सिद्धान्तमाह * इतीति *। षष्ठीव्यपदेशस्य भेदकत्वोपपादनार्थं सम्बन्धिपृथक्त्वे सत्येव सम्बन्धवाचिषष्ठीव्यपदेशानियतत्वेऽभिहितेऽध्वर्यूणामेवर्त्विगन्तरसम्बन्धोपपत्तिं नन्वितिभाष्येणाशङ्क्य तैः सर्वैर्होतृब्रह्मोद्गातृयजमानैर्मध्यतः कारिभिः प्रशास्तृब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नीध्रैश्च होत्रकैर्व्यपदेशान्नेष्टुश्चाध्वर्युपुरुष

स्यात्मना सम्बन्धव्यपदेशायोगादित्येवं सर्वशब्दाध्याहारेणावृत्या तैरि-तिसूत्रावयवव्याख्यया परिहारार्थं नेतीत्यादिभाष्यं व्याख्यातुं सर्वैश्चे-त्युक्तम् । वृतानां पुनर्वरणानर्थक्याद्वरणाख्यकर्त्रुत्पत्तिभेदस्य कर्तृभेदहे-तुत्वेन पूर्वमुक्तस्यात्राप्यनुकर्षणार्थत्वेन चकारव्याख्यार्थमपिचेति भाष्य-मुत्पत्तौ चेत्यनेन व्याख्यातम् । चमसाध्वर्यवश्च भिन्नाः स्युरित्येवं साध्या-नुकर्षणार्थत्वेनापि चकारव्याख्या भेदोक्त्या सूचिता । तैर्ऋत्विग्भिः स्वामिभूतैर्व्यपदेशादृत्विजां चर्त्विक्स्वामिकत्वायोगादित्येवं स्वामिश-ब्दाध्याहारेण तैरितिसूत्रावयवव्याख्यार्थमृत्विग्भिरित्यादिभाष्य कस्मा-दुपेक्षितमित्याशङ्क्य यजमानवरणीयत्वेपि पृथक्स्वामिकत्वे व्यपदेशा-विरोधेनर्त्विग्वरणीयत्वोक्तेरयुक्तत्वादिति सूचयितुमाह * यद्यपिचेति

चमसाध्वर्यूणां बहुत्वम् । अधि० ११

उत्पत्तौ तु बहुश्रुतेः ॥ २६ ॥

चमसाध्वर्यूणामुद्देश्यत्वेप्यप्राप्तत्वेनोपनयने ब्राह्मणादेरिव विधेयत्वा-द्विवक्षितविशेषणतया बहुत्वनियमस्य नोपादेयत्वमेवैकं कारणत्वेन स-म्मतं विशेषणविवक्षायां कारणं हि महद्भिरित्येतन्न्यायसिद्धत्वादु-त्पत्तावप्राप्तविधौ स्थितां बहुश्रुतिमनुसृत्य चमसाध्वर्यवो भिन्नाः स्यु-रिति सूत्रार्थस्य स्पष्टत्वात्सूत्रपाठमात्रं कृतम् ॥

चमसाध्वर्यूणां दशसङ्ख्यानियमः । अधि० १२

दशत्वं लिङ्गदर्शनात् ॥ २७ ॥

शमितुरपृथक्त्वम् । अधि० १३

शमिता च शब्दभेदात् ॥ २८ ॥

कपिञ्जलाधिकरणसिद्धान्ताभ्युपगमेपि मध्यतः कारिणां त्रयश्च-मसाध्वर्यवो होत्रकाणां त्रयोन्ये व्यपदेशभेदादिति षट्कापत्तेस्त्रित्वनि-यमाभावपक्षस्यापि सम्भवोक्तिपूर्वं सूत्रेण सिद्धान्तमाह * बहुत्वे-ति * । दश चेत्यादिभाष्यं प्राप्त्युक्त्यर्थत्वेन व्याचष्टे * स्वामीति * भाष्यं चैकस्यापि ग्रामभृत्यवदनेकस्वाम्यन्वयाविरोधात्स्वामिदशत्वेपि त्रित्वनियमविरोधिनी चमसाध्वर्युदशता न युक्तेत्याशङ्क्य ग्रामभृत्य-स्याप्यन्योन्यानपेक्षानेकस्वामिकत्वायोगादिह च मध्यतः कारिणां हो-

त्रकाणामिति बहुवचनावगतस्य साहित्यस्योद्देश्यविशेषणत्वेनाविवक्षितत्वादन्योन्यानपेक्षस्वामिदशत्वावगतेस्तदन्यथानुपपत्त्यावगतेन दशत्वेन त्रित्वनियमस्य लिङ्गदर्शनद्योतितदशत्वापनयप्रयोजकस्य बाधितत्वान्न दशतापनीयत इत्युक्तमित्येवं व्याख्येयम्॥ बहुवचनसामर्थ्यात्त्रित्वस्य पूर्वपक्षितस्य दशत्वे त्रित्वादीनां बहुत्वविशेषाणामन्तर्गते दशत्वोपादाने ततोपराणामर्वाचीनानां त्र्यादिसङ्ख्यानामनुग्रहात्सुतरां बहुवचनं समर्थितं भवतीत्येवं निरासार्थं तस्याञ्चेति भाष्यं कपिञ्जलाधिकरणातिदेशाद्भिन्नः स्यादिति सूत्रार्थस्य चशब्देन व्यपदेशाख्यस्य हेत्वन्तरस्य भिन्नत्वस्य च साध्यस्यानुकर्षणात् स्पष्टप्रतीतेः पूर्वपक्षसूत्रपाठमात्रं कृतम्॥

प्रकरणाद्वोत्पत्त्यसंयोगात् ॥ २९ ॥

वाशब्दं पूर्वपक्षनिरासार्थत्वेन स्पष्टत्वादव्याख्यायोपत्त्यसंयोगादिति सूत्रावयवव्याख्यार्थं सत्यमित्यादिभाष्यं व्याचष्टे * उत्पत्तीति *। ११४३।१
अनुत्पत्तिस्थत्वेपि संज्ञाया वाच्यवाचकसामर्थ्यनियमो योभिधागतः सम्बन्धस्तदनेकत्वे स्वरूपात्सोवहीयत इति न्यायेनैकस्य संज्ञिनोनेकसंज्ञानुपपत्तेर्भेदकत्वमाशङ्क्य यौगिकतयास्याः शक्त्यकल्पनेन पूर्वसंज्ञाशक्तिनियमानपनायकत्वात्तन्न्यायाभावोक्त्यर्थसूत्रयोजनार्थं तत्रेतिभाष्यावयवं व्याचष्टे * तेनेति *। अध्वर्य्वादावन्यत्र व्याप्रियमाणावस्थत्वे श्रुतायाः संज्ञायाः शमनाख्यकर्म्मान्तरयोगनिमित्तमन्वायोगमाशङ्कते * नन्विति *। अन्यत्राव्याप्रियमाणस्यर्त्विजोत्र शमितृसंज्ञया ग्रहणोपपत्तेः कर्म्मान्तरयोगनिमित्तत्वोपपत्तिमाह * नैष इति *। सङ्कर्षे दैव्याः शमितार आरभध्वमुत मनुष्या इति मनुष्यसमभिव्याहारादनियमेन प्रकृतपुरुषमात्रस्य शमितृत्वे मनुष्या शमितारो वाक्यसंयोगादिति सूत्रेण पूर्वपक्षिते परिक्रयेणर्त्विजां सर्वकर्म्मार्थत्वावधारणाच्छमनकाले च तेषामेव सन्निधानाच्छमितरि चैकस्मिन्बहुवचनायोगेन शमितार इति बहुवचनस्य शमनार्थपशुनयनादिकार्यपेक्षत्वात्पशुनयनादेश्चार्त्विजत्वनिश्चयाच्छमनमप्यार्त्विजमिति पूर्वपक्षान्तरमृत्विजो वा सन्निधानादित्यनेन कृत्वा शमिता सर्वकर्म्मणामविशेषादित्यनेनर्त्विजामन्यत्र व्यापृतत्वाच्छमनान्तर्भूतानां सर्वकर्म्मधर्मायोगमाशङ्क्याध्वर्यौ व्यापृते तत्पुरुष एव कश्चित्त्रिष्वपि वा पूर्वेषु व्यापृतेष्वन्यः कश्चिदृत्विजः शमितेति विवक्षितं तच्चेतरमन्य इति

न्यायादुक्तमेवेति सूचयितुमाह * तदेतदिति * । व्यपदेशोक्त्यनुकर्षेणेन शमितर्यब्राह्मणाशङ्कायाः पूर्वपक्षलिङ्गतयोक्ताया निरासायात्पत्तिशब्दं कर्म्मव्युत्पन्नमभिप्रेत्याब्राह्मणशब्दस्यात्पत्त्येन प्रकृतेन शमित्रा संयोगाभावादित्युक्ते तदुपपादनार्थं प्रकरणोक्त्या शमितृशब्दस्य कर्म्मयोगनिमित्तत्वेनैकस्य कर्म्मभेदादिति न्यायात्प्रकृतेष्वृत्विक्षु ब्राह्मणेपूपपत्तेरब्राह्मणस्य शमितृत्वप्राप्त्यभावेनाब्राह्मणशब्दस्य शमितृविषयत्वायोगोऽभिहित इत्येवं शङ्कानुभाषणपूर्वं सूत्रव्याख्यार्थं यदित्यादिभाष्यशेषं व्याख्यातुमाह * प्रासीति * । अब्राह्मणोक्तेः शमितृविषयत्वायोगेऽपि कथं यजमानविषयताध्यवसीयत इत्याशङ्क्य दीक्षणादिपित्र्याणां देवानाञ्च धर्म्माणां प्राकृतानां निवृत्तिरित्यादीनां सन्निधर्म्माणां याजमानानां प्रकरणे यद्यब्राह्मण इत्याम्नानाद् यजमानविषयत्वावगत्युपपत्तिमाह* याजमानेति * । यजमानविषयं कल्प्यत इत्युनुषङ्गेण पूर्णाय, शामित्रमपीत्यादिभाष्यावयवः शामित्रस्याध्वर्यवसमाख्ययाध्वर्युकर्तृकत्वात्सङ्कर्षे वक्ष्यमाणादप्यब्राह्मणोक्तेन शमित्रा संयोगः संभवतीत्येवमुत्पत्त्यसंयोगोपपत्त्यन्तरोक्त्यर्थ इति सूचयितुं सङ्कर्षे शामित्रस्याद्यपूर्व्वपक्षे प्रकृतानामृत्विक्चमसाध्वर्यूणां मध्ये द्वितीये चर्त्विजां मध्ये तृतीये च चमसाध्वर्यूणामेव मध्ये केनचित् सिद्धान्ते चाध्वर्यूणां कार्यताया वक्ष्यमाणत्वान्न कथञ्चिदब्राह्मणकर्तृकता युक्तेत्याह * शामित्रस्येति * ।

शमोदमस्तपः शौचं सत्यमार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम् ॥

इति ब्राह्मणस्य शौचशीलत्वप्रसिद्धेर्दीक्षादिहिंसायाः क्रत्वधिकारिणो यजमानस्य विहितत्वेप्यृत्विजामविहिततया निषिद्धत्वेनाशुचित्वापादकत्वाच्छमनस्य च हिंसात्वादृत्विजो ब्राह्मणस्य तस्मिन् प्रवृत्त्यनुपपत्तेः शामित्रस्याब्राह्मणविषयत्वं ज्ञास्यत इति शङ्कते * हिंसात्वादिति * । शौचशीलत्वस्य प्रायिकमात्रत्वेनाव्यापित्वान्नरकपातापादकत्वस्य निच्छाहेतुत्वाभ्युपगमापत्तेस्तस्य चाब्राह्मणे सुतरां प्रसङ्गात्तुल्यत्वमाह * तुल्यमिति * । पर्यनुयोगसाम्यमुक्त्वा परिहारसाम्यमाह * तेनेति * । षट्कर्म्मैको भवत्येषां त्रिभिरन्यः प्रवर्त्तते द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवतीत्युत्तरोत्तरोत्कृष्टशालीनगृहस्थचतुष्टयानुक्रमणेध्यापनजीविनश्चतुर्थत्वोक्त्यार्त्विज्याध्यापनकर्म्मद्वयजीविनोपकृष्टत्वसूचनवतार्त्विज्यनिन्दाहेतुत्वेनर्त्विजः शमितृत्वं द्रढयितुमाह * एतेनैवेति * ।

उपगानामपृथक्त्वम् । अधि० १४

उपगाश्च लिङ्गदर्शनात् ॥ ३० ॥

गातॄणां समीपे गायन्तीति प्रकृतैर्व्यपदेशादाधिक्याशङ्कायाः शमितृवदुपगा अपि वरणायोत्पत्त्यसंयोगाद्यौगिकत्वेन चोपगशब्दस्यापि प्रकृतेषूपपत्तेर्न भिन्ना इति सूत्रार्थस्य च स्पष्टत्वात्सूत्रपाठमात्रं कृतम् ॥

सोमविक्रेतुः पृथक्त्वम् । अधि० १५

विक्रयी त्वन्यः कर्म्मणोऽचोदितत्वात् ॥ ३१ ॥

विक्रयिणोऽप्यत्यन्तासंयोगाद्यौगिकत्वाच्च प्रकृतेषु शब्दोपपत्तेर्विक्रयस्यापिच क्रत्वङ्गक्रयाक्षिप्तत्वाद्दक्षिणाक्षिप्तग्रहणं दक्षिणादिवत्क्रत्वङ्गत्वेन क्रत्वङ्गकर्त्रपेक्षत्वाच्छमितृवदन्यायेन पूर्वपक्षस्य द्रव्यलोभाच्च विक्रये प्रवृत्त्युपपत्तेर्विधिकल्पनानपेक्षत्वनानङ्गत्वात्सिद्धान्तस्य स्पष्टत्वमव्याख्याहेतुः ॥

ऋत्विक्पदस्य योगरूढ्या सप्तदशमात्रगामित्वम् । अधि० १५

कर्मकार्यात्सर्व्वेषामृत्विक्त्वमविशेषात् ॥ ३२ ॥

यजमानातिरिक्तानामस्वामित्वेन देवतोद्देशस्वद्रव्यत्यागात्मकयागाख्यकर्मकरत्वायोगशङ्कानिरासार्थं यागाङ्गकरणत्वेनौपचारिकयागकरणत्वार्थतया कर्मकार्योक्तिः सर्व इत्यादिभाष्येण व्याख्याय तस्य पञ्चम्युक्तस्यर्त्विक्छब्दं प्रति निमित्तत्वापपादनार्थं य वेति भाष्यमृत्विक्छब्देवयवव्युत्पत्त्यस्मृतेरयुक्तमाशङ्क्य "ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च" इति क्विन्प्रत्ययान्ततुशब्दोपपदयजिधातूत्पन्नार्त्विक्छब्दनिपातनादुपपादयितुमाह । * ऋतुविक्छब्दो हीति * । कोसावुपपदधातुप्रत्ययसमनुगतोर्थ इत्यपेक्षायामाह * ऋताविति * । पद्मगतस्यैव पङ्कजननस्य पङ्कजशब्दप्रवृत्तिनिमित्तत्ववद् ब्रह्मादिगतस्यैवर्तुयजनकर्तृत्वस्यर्त्विक्छब्दप्रवृत्तिनिमित्तत्वाद्व्यवस्थामाशङ्क्य पद्मत्वजातिवदिह निमित्तव्यवस्थापकैकोपलक्षणाभावाद्व्यवस्थाशङ्कानिरासार्थमविशेषोक्तिव्याख्यार्थं न कश्चिदित्यादिभाष्यं व्याचष्टे * एतस्माच्चेदिति * । शास्त्राणि चेत्प्रमाणमितिवदसन्दिग्धेपि मृदूक्त्यै सन्दिग्धवचनम् । ऋतुयजनकर्तृत्वस्य सर्वेषामविशिष्टत्वोक्त्या न कश्चिदित्यवयवे व्याख्याते तस्मादित्यवयवव्याख्यार्थमितीत्युक्तम् । सप्तदशेति चमसाध्वर्युपरिसङ्ख्यानात्सर्वेषामृत्विक्त्वायोगशङ्कानिरासार्थत्वेनापि तस्यावयुत्यानुवादत्वेनाविशेष-

कत्वादित्येवमविशेषोक्तिव्याख्यार्थं नन्वित्यादिभाष्यं वादमात्रानर्थक्याद-
युक्तमाशङ्क्य दर्शपूर्णमासचातुर्मास्यपशुबन्धर्त्विक्सङ्ख्याताः सोमयाग-
स्यर्त्विक्सङ्ख्यावयवा अपि महान्तः किमुतर्त्विक्सङ्ख्येत्येवं सोमयाग-
१४४ २ कृत्यर्थत्वेनार्थवादोक्त्योपपादयितुमाह * अत इति * । प्राप्तोक्तिसूचित-
परिसङ्ख्यादुष्टत्वपरामर्शार्थोऽतःशब्दः सप्तदशेत्येतावन्मात्रस्यावयुत्यानु
वादत्वेऽपि महत्त्वेनापेक्ष्यमाणाद्दर्शपूर्णमासादृत्विक्सङ्ख्या उक्ता अधिक-
र्त्विक्सद्भावे सदस्य. सप्तदश इतिसङ्ख्यापूरणवाचिडप्रत्ययायोगमाश-
ङ्क्यावयवभूतावान्तरसङ्ख्यापूरणानुवादार्थत्वात्पूरणप्रत्ययोपपत्तिसूच-
नायादिशब्द. ॥

न वा परिसङ्ख्यानात् ॥ ३२ ॥

ब्रह्मादिमात्रविषयत्वेनोपसंहारस्य चमसाध्वर्युनिवृत्तिफलत्वसाम्यनिमि-त्तेनोपचारेण परिसङ्ख्यानोक्त्या विवक्षितत्वात्परिसङ्ख्यादोषत्रयस्या-शङ्कापूर्वं निरासार्थं ननु परिसङ्ख्यायामित्यादिभाष्यमयुक्तमाशङ्क्य भा-ष्यकृता परिसङ्ख्यानादिति सौत्रेण शब्देन परिसङ्ख्यावाच्यतया व्या-ख्यायत इत्याह *परिसङ्ख्यानादिति*। बहूनामित्यादि विवक्षितं गम्यत इत्यन्तं भाष्यमुच्यत इत्यादिभाष्योक्तदोषाभावोपपादनार्थत्वेन व्याख्या-तुमाह * सप्तदशस्विति * । व्याख्यातार्थोपपादनार्थं सर्वत्र हीत्यादिना सामान्यन्याय मुक्त्वा व्याख्यातार्थस्य प्रागुक्तदोषत्रयनिरासोपयोगित्वो-क्त्यै यद्दोषत्रयं स्वार्थहान्यादि शङ्कितं तस्येह न दोषतास्तीत्युक्ते तदेव वि वरीतुं स्वार्थस्येत्याद्युक्तम् । स्वार्थहानपरार्थकल्पनयोरिहोचितत्वेनादोष-त्वेऽप्यृतुयजनकर्तृत्वाख्यशब्दप्रवृत्तिनिमित्तवशेनाधिकेष्वप्यृत्विक्छब्दस्य प्राप्तस्य बाधाशक्तेः प्राप्तबाधस्यापरिहार्या दोषतेत्याशङ्कार्थमाहेत्यादि भा-ष्यं व्याचष्टे * परस्त्विति * । उच्यत इत्यादि परिहारभाष्यं परमतत्वेन व्या-ख्यातुमाह *कार्येति*। परमतत्वसूचनार्थं तावत्प्रक्रमत इत्युक्तं निषेधस्यर्त्वि-क्स्वरूपाविषयत्वप्रतीतेः कार्यविषयत्वायोगमाशङ्क्याह *सर्वत्र हीति*। ऋत्विज उपवसन्तीत्याद्यर्त्विक्कार्योदाहरणभाष्यं दक्षिणादानस्यर्त्विक्त्व-निमित्तकार्यत्वादृत्विक्कार्यत्वसम्भवेऽपि वरणस्यर्त्विक्त्वं प्रति निमि-त्तत्वेनर्त्विक्कार्यत्वायोगादयुक्तं शङ्कते * वरणं त्विति * । परमतेन शङ्का-परिहारपक्षे कर्मयोगमात्रादृत्विक्छब्दप्रयोगासिद्धेर्न वरणमृत्विक्छब्द-प्रवृत्तिनिमित्तमित्येवं परिहरति* नेति * । ऋत्विक्त्वनिषेधं विना त-

त्कार्यस्यापि निषेधायोगेनैतत्परिहारदूषणार्थमाहेति भाष्यं व्याचष्टे*इतर-स्त्विवति *। ऋतुयजनस्य निमित्तत्वाभावेन प्राप्तबाधस्य दोषत्वापरिहार्यत्वशङ्कानिरासोपक्रमार्थमुच्यत इति भाष्यमनिष्टद्वैविध्योक्त्यानर्थक्यादयुक्तमाशङ्क्यास्योत्तरस्य सिद्धान्तिमतत्वात्तात्त्विकस्य चार्थस्य सिद्धान्तात्प्रतिपक्षनिरासं च विना तत्त्वज्ञानासिद्धेरनपन्यस्तस्य च हेत्वभावानिश्चयेनाशक्यनिरासत्वाद्यद्यप्ययमृत्विक्छब्दोवयवव्युत्पत्त्यालोचनादृतुयजननिमित्तो वरणकाले चर्तुयजनाभावेन तन्निमित्तर्त्विक्त्वायोगादृत्विगुद्देशेन वरणविध्यनुपपत्तेर्वरणेनर्त्विजः कार्या इति वचनव्यक्त्यवधारणाद्वरणनिमित्तः प्रतिभाति । तथाप्यृतुयजननिमित्तत्वे चमसाध्वर्युष्वपि तद्भावेनार्त्विक्त्वस्य स्वरूपतः कार्यतो वा निषेधायोगात्परिसङ्ख्यानुपपत्तेर्वरणनिमित्तो ग्राह्य इति तात्त्विकोत्तरोक्त्यर्थत्वेनाथवत्त्वोक्त्योपपादयितुमाह * सिद्धान्तेति * । तात्त्विकोत्तरोक्त्यर्थं यागेत्यादिभाष्यं सप्तदशैवर्तुयजनयोगादृत्विक्छब्दवाच्या इत्येवं यौगिकत्वाशयेन परिसङ्ख्यार्थमृत्विक्छब्दग्रहणं तत्परिसङ्ख्येयाभावादनर्थकं स्यात्तस्मात्सप्तदशैव वरणभरणजन्यसंस्कारयोगादृत्विज इत्येवं संस्कारनिमित्तः परिसङ्ख्यार्थवत्त्वसिद्ध्यै ग्राह्य इत्येवं व्याख्यातुमाह ।
* यद्यीति * । वरणनिमित्तत्वेपि चमसाध्वर्युभ्यो व्यावृत्त्यशक्तेः परि- ११४५।२
सङ्ख्यानर्थक्यपरिहारायोगसाम्यमाशङ्क्य भृतिनिर्देशविशिष्टस्यैव वरणस्यैवर्त्विक्छब्दप्रवृत्तिनिमित्तभूतसंस्कारजनकत्वाच्चमसाध्वर्यूणां च भृतिनिर्देशविशिष्टवरणाभावाद्व्यावृत्त्युपपत्तिं सूचयितुमाह * वरणेति * । दक्षिणादाने द्वितीयानिर्देशाभावादृक्षिणादानेनर्त्विजः कार्या इति वचनव्यक्त्यनुपपत्तेर्दक्षिणादानोत्पाद्यत्वे च माध्यन्दिनसवनात्प्राग्दक्षिणादानाभावेनर्त्विक्त्वानुत्पत्तेरनृत्विक्कर्तृकत्वप्रसङ्गेन दक्षिणादानस्यार्त्विक्छब्दप्रवृत्तिनिमित्तत्वायोगादृक्षिणानिर्देशस्य च वरणकालेप्यृत्विगङ्गतया श्रुतेर्वरणप्रकरणाच्च तदङ्गत्वावगतेस्तन्निरपेक्षस्य वरणस्यर्त्विक्छब्दप्रवृत्तिनिमित्तत्वाभावसूचनमात्रार्थो वरणभरणे इति तुल्यवन्निर्देशः । चमसाध्वर्यूणामपि परार्थे कर्म्मणि भरणं विना प्रवृत्त्ययोगाद्वरणभरणे अपि स्त इत्याशङ्क्य लौकिकस्यर्त्विक्त्वस्य विहितां क्रियां विनानुत्पत्तेश्चमसाध्वर्यूणां च भृतिविध्यभावादुपायान्तरेणापिच प्रवृत्त्युपपत्तेरर्थाक्षिप्तस्यापि भृतिविधेरभावाद्वरणमात्रस्य चार्त्विक्त्वानुत्पादकत्वादृत्विक्छब्दवाच्यत्वायोगमुपपादयितुमाह * वरणे चेति * । चम-

साध्वर्युवरणस्यापि यजमानकार्यहोत्रादिवरणसाहचर्याद्यजमानकार्य-
त्वप्रतीतेर्यजमानचमसाध्वर्य्वोश्च वरणस्यर्त्विक्स्वामिकत्वाभावेन भा-
ष्यमतपि यजमानेनैव कार्यत्वाद्यजमानकृतवरणभरणाभावेनर्त्विक्त्व-
निरासायागाङ्गवरणस्य वैधत्वे स्वामिकर्मपरिक्रय इति न्यायाद्या-
जमानत्वापत्तेर्वैधत्वनिराससूचनार्थं यजमानेनेत्युक्तम् । भृतिनिर्दे-
शाविशिष्टेन वरणेन होत्रादीनां यागाङ्गेषु स्वतन्त्रकर्तृत्वार्हत्ववत्स्वा-
मिनि प्रयोजककर्तृत्वार्हत्वस्याप्युत्पादनादुभयसाधारणस्य च यागाङ्ग-
कर्तृत्वार्हत्वस्यार्त्विक्छब्दवाच्यत्वात्स्वामिनोऽप्यृत्विक्त्वोपपत्तेः साप्तदश्यो-
क्त्युपपत्तिसूचनार्थवरणोत्पाद्यकर्तृत्वकरणं वरणकरणत्वेनोपचर्य सप्तद-
शानामित्युक्तम् । चमसाध्वर्यूणां भृतिनिर्देशविशिष्टवरणाभावादृत्विक्त्वा-
प्राप्तौ परिसङ्ख्योक्त्ययोगमाशङ्क्यान्यनिवृत्तिफलाविधिरूपमुख्यपरिसङ्-
ख्यात्वायोगेऽपि साप्तदश्यानुवादान्यथानुपपत्त्यार्त्विक्छब्दस्य यौगिकत्वनिरा-
सेन वरणनिमित्तत्वावधारणादन्यनिवृत्त्याख्यपरिसङ्ख्याफलसिद्धेर्गौणप-
रिसङ्ख्यात्वोपपत्तिं सूचयितुमाह * तन्निमित्तत्वेति * । अननुवादत्वा-
भ्युपगमे यौगिकत्वाश्रयणेनावयुत्यानुवाद एव कस्मान्नेष्ट इत्याशङ्क्य महासङ्-
ख्यायामवान्तरसङ्ख्यायाः सद्भावेऽपि सङ्ख्येयपरिच्छेदकत्वायोगाद्रू-
पान्तरेण वानुपयोगात्परिच्छेदकत्वरूपमिथ्यात्वेनासदनुवादापत्तेरिति सू-
चयितुमाह * अन्यथेति * । यौगिकतान्यथोक्त्या परामृष्टतात्त्विकोत्तरार्थ-
मुपसंहरति * तस्मादिति * । आहेति शङ्काभाष्यं भृतिनिर्देशाख्यवरण-
विशेषणेन पूरयितुं व्याचष्टे * ननु चेति * । उच्यत इति परिहारभाष्यं
वचनव्यक्तिविपर्ययहेतूक्त्योपपादयितुमाह * नैष इति * । वरणात्प्रा-
गृत्विक्त्वसिद्ध्यानुत्पाद्यत्वापत्तेर्याजमानास्त्वित्यत्र चार्त्विजां संस्कार्यत्व-
स्य निराकरिष्यमाणत्वाद् द्वितीयानुपपत्त्यापत्तेर्वचनव्यक्तिविपर्ययेण व-
रणोत्पाद्यत्वोपपादनार्थमवमितिभाष्यमनुदाहृताध्वर्युवाक्योपन्यासानर्थ-
क्यादयुक्तमाशङ्क्य तुल्यन्यायतयाध्वर्य्वादिवाक्येष्वपि वचनव्यक्तिविप-
र्ययोक्त्योपपादयितुमाह * एतेनेति * । ऋत्विजां संस्कार्यत्वायोगा-
त्करण एव सति द्वितीया युक्तेत्येवं भाष्यं व्याचष्टे । * एवञ्चेति * ।
एवशब्दार्थे चशब्दः । इष्टार्थता चेति हेत्वन्तरभाष्यं व्याचष्टे * वरणञ्चेति * ।
वरणेनाध्वर्युं कुर्यादित्युक्तेऽप्यध्वर्युशब्दार्थस्याप्रसिद्धेः कर्तुमशक्यत्वात्क- ९
थमात्मना यजमानेन कृतया वरणाख्ययेच्छयाध्वर्युर्भवतीति कथमिति-
भाष्येण पृष्टेऽसावध्वर्युशब्दार्थ इति विशेषरूपेणाप्रसिद्धावपि विधिसाम-

ध्र्याद्भवतीति मन्यत इत्युत्तरं भवतीत्यनेन दत्त्वा तद्विवरणार्थं कथं ब्रूया-
देवेति प्रश्नपूर्व्वमध्वर्युशब्दकेन विभागादिपदार्थः कार्य इति विधाना-
त्तस्य चाध्वर्युशब्दकस्य पदार्थस्य वरणात्प्रागसत्त्वादवगतवरणाख्यसा-
धनत्वेन च कर्तुं शक्यत्वाज्जुह्वादिवत्कार्यत्वावगमे सत्यर्थाधेन केनचिदु-
पायेनाध्वर्व्वाद्यार्त्विक्छब्दार्थान्वये विभागादिकर्त्तुः कार्यं त्वयास्मिन् क्र-
तावाध्वर्यवं कार्यमित्येवंविधेन वरणविशेषेण कार्य इतिवद्वरणेनाध्वर्युर्भ-
वतीति ब्रूयामेत्युत्तरोक्तयर्थमेव शब्दकेनेत्यादि भाष्यं तात्पर्यतो व्याचष्टे
* वेदेति *। अवयवार्थप्रत्यभिज्ञावगतयौगिकत्वत्यागायोगाद्विपरीतवच-
नव्यक्त्ययोगाच्च केवलरूढितां भाष्योक्तां निराकर्तुमारभते * न त्विति *।
यद्वा त्विति वार्त्तिकोक्तवचनव्यक्तिविपर्ययहेतुं दूषयितुमनुभाषते *
यच्चेति * । अप्रसिद्धशब्देनाज्ञानं विवक्षितमसत्त्वं वेति विकल्प्या-
द्यपक्षं तावत्साम्यापादनेन दूषयति * वरणेपीति * । बुद्धिपूर्व्व-
कारी तावत्कर्तुमेव नाध्यवस्यति न प्रयतते। अबुद्धिपूर्व्वकारिणा तु ते-
नाज्ञातवस्तुना पुंसा यदृच्छया प्रयत्नाख्ये व्यापारे कृतेपि वस्तुनिष्पत्ति-
र्नैकान्ताद्भवतीत्यर्थः। करणपक्षे वेदस्योत्पत्त्युपायोक्तौ व्यापाराद्वेदवाक्या-
वगतेन वरणर्त्विक्त्वयोर्हेतुफलभावनिमित्तेन पौर्व्वापर्येण करणाद्योऽति-
शय उत्पद्यते स ऋत्विक्छब्दवाच्य इति ज्ञानोपपत्तेः, संस्कारपक्षे त्वन्य-
तः स्वरूपसिद्ध्यपेक्षत्वेन वेदादृत्विक्त्वज्ञानानुपपत्तेर्ऋतुयजनयोगस्य चा-
तिप्रसङ्गापादकत्वेनाज्ञापकत्वाद्वैषम्यं शङ्कते * यदि त्विति * । संस्कार- ११४६।२
पक्षेपि दीक्षादक्षिणक्रमवाक्यसहकृतात्सप्तदशर्त्विज इति वेदात्सर्व्वेषा-
मप्यृतौ यजतां मध्ये केचिदेवर्त्विज इति ज्ञानोपपत्तेर्वचनव्यक्तिविपर्यय-
क्लेशाभावेन च प्रतीतिसौकर्याद्विपरीतवैषम्यकृतातिशयोक्तिपूर्वं परि-
हारसाम्यं वक्तुमारभते * तत इति * । वेदप्रतिपादितत्वाद्वस्तुसिद्धि-
ज्ञानेपि वरणात्प्रागन्येनोपायेनैते मदीया ऋत्विज इत्यनवधारणादन्यदी-
यानां च वरणानौचित्याद्वरणसंस्कार्या इति ज्ञानायोगमाशङ्क्य क्रयवद्वर-
णस्योपादानार्थत्वाद्वरणात्प्रागात्मीयत्वज्ञानानपेक्षां सूचयितुमाह * मम
त्विति * । वरणात्प्रागात्मीयत्वसिद्ध्यनपेक्षत्वेप्यात्मान्वयानर्हाणामवर-
णीयत्वादात्मान्वयार्हत्वज्ञानापेक्षामाशङ्क्य पुरुषनिष्ठतयात्मान्वयार्हत्वा-
ज्ञानेपि सामान्यतस्तज्ज्ञानोपपत्तिमाह * अथवेति * । विशेषाज्ञाना-
दृत्विगुपादानासिद्धिः सर्व्वव्यवहारासिध्यापत्तेर्नाशङ्कनीयेत्याह * स-
र्वो हीति * । कीदृशी सामान्यतः प्रसिद्धिरित्यपेक्षायामाध्वर्यवादिस-

माख्यातयागाङ्गज्ञानं कर्मसिद्ध्युपयोगि याजनाध्यापनप्रतिग्रहा ब्राह्म-
णस्यैव वृत्त्युपाया इति स्मृत्यालोचनयान्यजातीयानामार्त्विज्यनिषेधा-
वगतेरनिषिद्धसम्भवे च निषिद्धोपादानानाक्षेपात्तस्माद्धाप्येतर्हि यज्ञः
सयुग्भूत्वा देवेभ्यो हव्यं वहति ब्राह्मणेन च छन्दोभिश्चेति च ब्राह्मणानामे-
वार्त्विज्यश्रुतेरेता वै प्रजा हुतादो यद् ब्राह्मणा इत्यादिलिङ्गाच्च ब्राह्मणकृत-
स्यैवार्त्विज्यस्यापूर्वसाधनत्वावगतेर्ब्राह्मण्यमपूर्वसिद्ध्युपयोगि कर्मप्रवृत्त्यु-
पयोगि च वरणं तद्विशेषणं च दक्षिणानिर्देशानमृत्विगुपलक्षणमाह * अत
इति * । ऋत्वुयजनादिविशेषाणामृत्विक्त्वोत्पत्त्युपयोगशङ्कानिरासायाह
* सेयमिति * । सर्व्वेषां सम्बन्धव्युत्पत्त्युपयोगित्वे वाच्यत्वापत्तेरनेक-
शक्तिकल्पनापत्तिमाशङ्क्यर्त्विक्छब्दार्थविषयज्ञानं चमसाध्वर्य्वादिसा-
धारणविषयत्वेनैकैकविशेषमात्रालोचनया प्रसज्यमानमेभिः सर्वैर्विशे-
षैरुपसंह्रियमाणं सद्विशेषविषयं भवति न त्वेते विशेषाः शब्दार्थेऽन्तर्भव-
न्ति येनानेकशक्तिकल्पनापत्तिः स्यादित्याह * विज्ञानं चेति * । एभि-
र्विशेषैर्भवतीत्यनुषङ्गेण पूरणीयम् । अतश्चैषां विशेषाणां शब्दार्थयोः सम्ब-
न्धव्युत्पत्तावृत्विक्त्वज्ञानोपसंहारे चोपयोगेनर्त्विक्त्वोत्पत्त्यनुपयोगित्वा-
दक्रियमाणमेव सदार्त्विक्त्वमेभिर्विशेषैर्ज्ञातं भवतीत्युपसंहरति * अ-
क्रियमाणमेवेति * । अप्रसिद्धाः संस्कर्तुं न शक्यन्त इत्यप्रसिद्धशब्देन
वरणात्प्रागृत्विगभावो विवक्षित इति द्वितीयं पक्षं दूषयितुं विकल्पय-
ति * अपिचेति * । आद्यस्तावत्कल्पो नाशङ्कनीय एवेत्याह * तत्रे-
ति * । द्वितीयमपि कल्पं कर्तृवाचिकृत्संज्ञक्विप्प्रत्ययान्तर्त्विक्छब्दवा-
च्याया ऋतुयजनकर्तृशक्तेर्योग्यत्वाख्याया वेदाध्ययनतदर्थश्रवणाभ्यामेवं
सिद्धत्वान्निरस्यति * तथेति * । न च कश्चिद्येन करणे सामर्थ्य-
मुपजन्यते तदर्थं पुरुषान् क्रीणातीत्युत्तरपादद्वितीयाधिकरणभाष्येणैतदेव
द्रढयति * वक्ष्याते चेति * । उत्पाद्यत्वमभ्युपेत्यापि परार्थकर्मकर-
णस्योत्साहस्यैवोत्पत्तिदर्शनान्नालौकिकस्यार्त्विक्त्वस्योत्पाद्यता युक्तेत्याह
* सर्वत्र चेति * । वरणात्प्रागृत्विक्छब्दाप्रयोगेणर्तुयजनकर्तृशक्तेर्वाच्य-
त्वायोगादार्त्विक्त्वस्यापि प्रागनुत्पत्तेर्वरणोत्पाद्यत्वोपपत्तिं शङ्कते * न-
न्विति * । अलौकिकस्यार्त्विक्त्वस्य पश्चादप्यदर्शनान्नोत्पाद्यता युक्तेति
परिहरति * सत्यमिति * । एवमपि प्रागृत्विक्छब्दाप्रयोगेणर्तुयजनयो-
ग्यताया वाच्यत्वायोगापरिहाराद्वरणोत्पाद्यार्त्विक्त्वाभ्युपगमे कर्मणो-
त्साहस्यैवार्त्विक्त्वापत्तेर्नालौकिकार्त्विक्त्वकल्पना युक्तेत्याह * अथेति *

एतदेवोपपादयितुमाह * न चेति * । अदृष्टाभावे वरणनियमानर्थक्यमा ११५७।१
शङ्क्य नियमादृष्टस्य सद्भावेपि कर्मार्थत्वेनार्त्विक्छब्दप्रवृत्तौ तद्विशेषाध्व-
र्य्वादिशब्दप्रवृत्तौ वा व्यापाराभावादार्त्विक्त्वक्रियास्वरूपाजन्यत्वाद्व-
रणोत्पाद्यता नास्तीत्याह * यास्त्विति * । ऋत्विग्वाक्यस्याविधायकत्वे-
नादृष्टकल्पकत्वाभावादार्त्विक्त्वे व्यापारायोगं मत्वाध्वर्य्वादिवरणनिय-
मादृष्टानामध्वार्य्वादिषु व्यापारोक्तिः । भाष्ये त्वार्त्विक्त्वाख्या दृष्टान्तरसि-
द्ध्यै षोडशानां साधारणं प्रत्येकवरणेभ्यो वरणान्तरं विधातुमृत्विग्वा-
क्यं मत्वा तदुपन्यासः । आहवनीयादेर्दृष्टप्रक्षिप्यमाणद्रव्यधारणकार्य-
स्याप्यदृष्टत्वाभ्युपगमाद्यस्यादृष्टं कार्यं तदेव स्वयमदृष्टमिति नियमायो-
गमाशङ्क्यादृष्टकार्यत्वाद्वैषम्यं वक्तुमाह । * आहवनीयादीनां त्विति * ।
न हीत्याद्युपपत्तिवार्त्तिकान्वयायादृष्टानामुत्पाद्यनेत्यध्याहारादृष्टोपकार-
त्वेनादृष्टतोपपन्नेत्यर्थः । अदृष्टत्वेनैवानुत्पन्नावस्थत्वादुत्पाद्यत्वोपपत्तिरु-
क्ता संस्कारोक्त्याधानस्यादृष्टार्थता सूचिता वरणवदाधानस्य कर्मार्थ-
त्वायोगसूचनायाप्रकरणस्थताधानाख्योत्पत्तिरपामप्रकरण इति बहुव्रीहि-
णोक्ता । अदृष्टोपकारत्वोपपादनपूर्वमाहवनीयत्वमुपपादयति * न ही-
ति * । वैषम्यमुपसंहरति * अत इति * । दशमाधिकरणद्वयविरोधा-
पत्तेरप्यार्त्विक्त्वस्यालौकिकता न युक्तेत्याह * यदि चेति * । सत्रर्त्वि-
जां स्वकर्मत्वेन वरणस्यात्मार्थत्वापत्तेरात्मनि च प्रार्थनाख्यवरणायो-
गात्सत्रे वरणं नास्तीत्याद्यसूत्रार्थः । परिक्रयस्यात्मार्थत्वापत्तेः सोपि
नास्तीति द्वितीयसूत्रार्थः ॥ वरणेनर्त्विगकरणे किमर्थो वरणविधिरित्यपे-
क्षायामाह * तस्मादिति * । योग्यत्वमात्रेणार्त्विक्त्वावधारणे वरणा-
त्प्रागप्यृत्विक्छब्दप्रयोगापत्तिमाशङ्क्य कर्मसाफल्यापादनार्हकालविशे-
षोपलक्षणार्थतुशब्दोपपदेनान्वयादृत्विक्छब्दस्य फलापूर्वसाधनीभूतय-
जनकर्तृवाचित्वावगतेर्वरणनियमजन्यादृष्टाभावे च कर्मणो वैगुण्यात्फल-
साधनाशक्त्यापत्तेर्वरणोपात्त एव पुंस्युपसंह्रियमाणः सोऽन्यान् योग्या-
न् विद्यमानानपि नालम्बत इत्याह * ऋत्विक्छब्दश्चेति * । यतश्च श्रु-
तिनिर्देशविशिष्टेन वरणं नैवर्त्विज उपादेया इति नियमः क्रियते तत-
श्चर्त्विक्छब्दोपसंहारप्रयोजनतापि वरणविधेः सूचिता विषयोक्त्या ब्रा-
ह्मण्यमपि सूचितम् । सत्रेपि तर्हि वरणात्प्रागृत्विक्त्वासिद्धिस्त्वत्पक्षेपि
स्यादित्याशङ्क्यर्त्विक्छब्दवाच्यतुयजनाभिमुख्यसिद्ध्यै विधीयमाने वरणे
सामदानभेददण्डानां प्रवृत्त्युत्साहात्मकानामनन्याख्याभिमुख्यहेतुत्वस्य

लोकसिद्धत्वाद्वरणस्य च प्रार्थनात्मकत्वेन सामत्वाद्विधिं विनापि वरणसिद्धेर्विध्यानर्थक्यपरिहारार्थस्य नियमस्यादृष्टफलाकाङ्क्षायामवैगुण्यार्थत्वकल्पनात्सत्रे च स्वत एवाभिमुख्यसिद्धेर्वरणस्यानपेक्षिततया सत्रप्रयोगवचनेनाग्रहणादभावेपि वैगुण्यानापत्तेः फलापूर्वसाधनीभूतयजनयोग्यतामात्रेणानन्याख्याभिमुख्यसिद्धेर्ऋत्विक्त्वसिद्धिमाह * सत्रे त्विति * । ऋत्विक्त्वसिद्धेरेकाहाहीनेष्वप्यध्वर्युत्वादिसिद्ध्यर्थवरणातिरिक्तवरणानपेक्षत्वादध्वर्युत्वादिसिद्ध्युक्तिः । मूलतः शाखां परिवास्योपवेषं करोतीति वाक्याच्छाखाच्छेदनकार्यत्वेनाप्यन्यगतस्योपवेषस्य पौर्णमास्याममावास्यायामपि वा सान्नाय्यरहितायां शाखाच्छेदनाभावेप्युपवेषसिद्धिदृष्टान्तेन चतुर्थे साधयिष्यमाणेन सत्रे वरणाभावेप्यध्वर्युत्वादिसिद्धिं द्रढयितुमाह * तद्यथेति * । का तर्हि भाष्यस्य गतिरित्यपेक्षायामृत्विक्छब्दस्य यागनिमित्तत्वमात्रग्रहणे परिसङ्ख्यायोगेनानर्थक्यापत्तेः वरणनिमित्तस्यापि ग्राह्यत्वादुभयनिमित्तकत्वं युक्तम् । क्रतुयजनयोग्यत्वाख्यार्त्विक्त्वाधिष्ठानभूतानामध्वर्य्वादिवरणेनोपादानादार्त्विक्त्वासिद्धेर्नान्योन्याश्रयापत्तिः । ऋत्विजां वा संस्कार्यत्वेप्युपादेयत्वाद् द्वितीयोपपत्तिर्वरणस्य वोपादानाख्यादृष्टार्थत्वसिद्धिरित्येवं भाष्यव्याख्यां सूचयितुं कर्मवाचिनः करोतिशब्दस्योपादानार्थत्वं यथा चतुर्थाधिकरणसूत्रे वक्ष्यते तथा भाष्यकृतः कियन्त इत्यभिधानमुपादानार्थमित्याह । * तस्मादिति * ।

पक्षेणेति चेत् ॥ ३४ ॥

पक्षेण सप्तविंशतिसङ्ख्यैकदेशेनावयुत्यानुवादाख्येन सप्तदशवादो न तु परिसङ्ख्येति यदविशेषोक्तिमित्यनुभाषणार्थत्वेन स्पष्टत्वात्सूत्रस्य पाठमात्रं कृतम् ।

न सर्वेषामनधिकारः ॥ ३५ ॥

नात्र वाक्ये सर्वेषां सप्तविंशतेः कर्तॄणां प्रस्तावो येन तदवयवत्वप्रतीतेस्तात्पर्यत्वेन चोपयोगसम्भवादवयुत्यानुवादः स्यादित्येवं परि-
११४८।४ हारार्थत्वेन सूत्रं व्याख्यातुमाह ॥ * वैश्वानरेति * । अवयुत्यानुवादत्वायोगेपि परिसङ्ख्यानुपपत्ते. परिसङ्ख्यानसूत्रायोगमाशङ्क्योपसंहारार्थत्वेन परिसङ्ख्यानोक्तिं व्याख्यातुमाह * तस्मादिति * । सर्वेषामृत्विक्त्वाभावसिद्धान्तमुपसंहरति * इतीति * ॥

ीक्षादक्षिणावाक्यानां ब्रह्मादीनामेव सप्तदशाऋत्विक्त्वम्। अधि० १७

नियमस्तु दक्षिणाभिः श्रुतिसंयोगात् ॥ ३६ ॥

किमिति पूर्वपक्षभाष्यं प्रकृतानां सप्तविंशतेर्मध्ये कस्मिंश्चित्प्रयोगे ंचिदिति ज्ञानादयुक्तमाशङ्क्य नियमाज्ञानाशयत्वेन व्याख्यातुमाह* प्र- ातनामिति *। सामानाधिकरण्यश्रुतिसंयोगान्नियम इत्येवं सिद्धा- ोक्त्यर्थत्वेन सूत्रं व्याख्यातुमाह * इतीति *। प्रयोगस्य हेतुत्वे ाक्षिणानां हेतुत्वोक्त्ययोगमाशङ्क्य दक्षिणादानक्रमवाक्यस्य प्रयोग- थानत्वोक्त्यै दक्षिणानां हेतुतोक्तेति सूचयितुमाह * तच्चेति *। ऋत्विग्भ्यो ददातीत्युक्त्वाग्नीधे ददातीत्यग्नीधे ऋत्विज इति सामाना- धेकरण्यं प्रतीयत इत्याशयः। ये ऋत्विजस्तेभ्यो ददातीत्युक्ते क्रमवाक्ये ातिपयश्रवणेऽप्यन्येषामक्रमकदानसम्भवात्सर्वेभ्यो दानप्रतीतेरुपसंहारा- ोगमाशङ्क्य क्रमवाक्यादुपसंहाराप्रतीतावपि सप्तदशश्रुतिवशादुपसंहार- ातीतः केषु कर्तृविशेषेष्वृत्विक्त्वं व्यवस्थितमित्यपेक्षणात्क्रमविधायिना ा वेदेन ब्रह्मादिष्वेव सिद्धवदृत्विक्त्वाश्रयणाद्व्यवस्थितविषयतोपसं- ारस्यावसीयत इत्याह * यद्यपिचेति *। सप्तदशं श्रुत्यपेक्षितं क- ृविशेषेवस्थानं यस्य तच्छब्दपरामृष्टस्यर्त्विक्त्वस्य तत्तथोक्तम् ॥

उक्त्वा च यजमानत्वं तेषां दीक्षाविधानात् ॥ ३७ ॥

न केवलं साक्षात्कल्पितर्त्विग्ब्रह्मादिशब्दसामानाधिकरण्यश्रुतिसं- ोगान्नियमः किन्तु ये ऋत्विजः सत्रेतिदेशप्राप्तास्ते यजमाना एव न ेभ्योऽन्य इत्यृत्विजां यजमानेभ्योऽनन्यत्वमुक्त्वा ब्रह्मादीनां यजमानसंस्का- दीक्षाक्रमविध्यालोचनया ब्रह्माणं यजमानं दीक्षयतीत्यादिसामाना- धेकरण्यकल्पनद्वारा ब्रह्माणं यजमानमृत्विजं दीक्षयतीत्यादिकल्पिता- ऽपि सामानाधिकरण्यश्रुतिसंयोगादित्येव नियमे हेत्वन्तरोक्त्यर्थं सूत्रं व्याख्यातुमाह * य इति *। ऋत्विक्शब्दप्रवृत्तिनिमित्तस्यर्त्तुयजन स्य चमसाध्वर्युष्वपि भावात्कदाचिद्वैतेष्वपीतरसमवायात्साप्तदश्योप- पत्तेर्नित्यं तन्निवृत्त्ययोगमाशङ्क्यर्त्तुयजनमात्रस्य शब्दप्रवृत्तिनिमित्तत्वे साप्तदश्योक्त्ययोगापत्तेः कर्तृविशेषस्थस्यैवर्त्तुयजनस्य निमित्तत्वावग- मादनियतकर्तृविशेषस्थस्य च निमित्तत्वेनावस्थितशब्दार्थापत्तेः स्वत- श्च वाच्यवाचकशक्तिलक्षणशब्दार्थसम्बन्धहानापत्तेर्नियतविशेषापेक्षायां

दीक्षादक्षिणाक्रमवाक्यवशाद्ब्रह्मादिस्थस्यैव निमित्तत्वावगतेर्नित्यं च-
११४९.१२ मसाध्वर्युनिवृत्त्युपपत्तिमाह * तद्विषयमेव चेति * धाय्याशब्दिकाना-
मृचां समिध्यमानवतीसमिद्धवत्यन्तरालनिधानस्यापेक्षिताविधित्वसिध्यै
धाय्याशब्दस्य धीयमानवाचित्वनिपातनादग्निर्नेतेत्यानुपास्त्यर्चो यत्र यत्र
वै देवा यज्ञस्य छिद्रं निरजानंस्तद्धाय्याभिरपिदधुस्तद्धाय्यानां धा-
य्यात्वमित्यर्थवादाच्छिद्रापिधाननिमित्तधाय्याशब्दकत्वावगतेः पृथुपाज-
वत्याद्यानां सामिधेनीनामेवावपनाख्यनिमित्तधाय्यात्वावधारणाविरोधः ॥

ऋत्विजां स्वामिसप्तदशत्वम् । अधि० १८

स्वामिसप्तदशाः कर्मसामान्यात् ॥ ३८ ॥

षोडशोपेक्ष्य सप्तदशमात्रविचारे हेतुमाह * दीक्षेति * ॥ चमसाध्वर्युमध्ये कश्चिदृत्विक्साप्तदश्यपूरणार्थं कस्मान्न शङ्केत इत्याशङ्कां निराकर्त्तुमाह * सदस्येति * । सदस्यस्य चावशिष्टत्वोक्त्या ब्रह्मातिरिक्तस्य सदस्यस्य भाष्यकृदनिष्टत्वेपि सद्भावाद्युपगमेन पूर्वक्षोपपत्तिः सूचिता किन्तावदिति पूर्वपक्षभाष्यं यजमानस्यापि कर्मकरत्वाविशेषादयुक्तमाशङ्क्य ब्रह्मादितुल्यपरार्थकर्मकरत्वाशयत्वेन व्याख्यासूचनपूर्वं सिद्धान्तमाह * तत्रेति * । सदस्यस्य कर्मकरतया ब्रह्मादितुल्यत्वादित्यर्थः । यश्चेत्यादिभाष्यमृत्विक्त्वोपसंहारस्य दक्षिणादानादिवाक्यस्थर्त्विक्छब्दार्थोक्त्यर्थत्वात्स्वामिनश्च दक्षिणापरिक्रेतव्यत्वायोगात्साप्तदश्यपूरकता न युक्तेत्येवमर्थत्वेनापिचेति भाष्यं च व्यतिरिक्तसदस्यसद्भावोपपादनार्थत्वेन स्पष्टत्वान्न व्याख्यातम् । सदस्यकर्तृकयज्ञाङ्गानुष्ठानाविधानेन स्वामिन एव शुक्रान्वारम्भणादियज्ञाङ्गानुष्ठानेन ब्रह्मादितुल्यत्वादित्येवं हेतुव्याख्यार्थं यजेरिति भाष्यालोचनया वरणानपेक्षयागमात्रनिमित्तस्यार्त्विक्छब्दस्य ग्रहणमनर्थकं तस्माद्वरणनिमित्तोप्यृत्विक्छब्दो गृह्यत इत्येवमृत्विक्त्वाधिकरणस्थभाष्यार्थावगतिं सूचयितुमाह * कथं पुनरिति * । तस्माद्वतुयजनस्यापि निमित्तता भाष्यकृताभ्युपेतावसीयत इत्याशयः । यदुक्तमिति भाष्येण सदस्यः सप्तदश इति शाखान्तरे साप्तदश्यपूरणार्थत्वेन सदस्याम्नानं पूर्वपक्षप्रतिज्ञासूचितमनुभाष्य निरासार्थमुच्यत इति भाष्यं वरणचमसाम्नानाच्चातिरिक्तसदस्योपपादनस्य पूर्वपक्षोक्तस्य निरासार्थं वरणमपीति भाष्यमाक्षेप्तुमारभते * सदस्यमिति * । अवयवप्रसिद्ध्य-

सम्भवोक्त्या साप्तदश्यपूरणवरणचमसाम्नानानां त्रयाणामपि ब्रह्मविषय-
त्वनिरासः । न च ब्रह्मण इति चकारेण ब्रह्मणः साप्तदश्यपूरणार्थतापि
वरणादावृत्विग्विषये कार्ये ब्रह्मणोन्यत्वाविधानेनादृष्टार्थपूरणविध्याप-
त्तेर्विधातुमप्राप्तेश्चानुवदितुमशक्येति सूचितम् । तस्यैव प्रत्यवेक्षणाख्य-
कार्यान्तरार्थं पुनर्वरणाभ्युपगमेध्वर्य्वादेरपि तत्तत्कार्यार्थं पुनःपुनर्वरणा-
पत्तिर्द्वयोरप्यशक्यत्वे हेतुः । ब्रह्मन्नुपह्वयस्व सदस्योपह्वयस्वेत्यादि-
ब्रह्मसदस्यमन्त्रविकल्पापत्तेरपि ब्रह्मणः सदस्यता न युक्तेत्याह * सर्वे-
षु चेति * । ब्रह्मणश्चमसद्वयादेकचमसभक्षे ब्रह्मशब्दवानपरभक्षे सद-
स्यशब्दवानुपहवमन्त्रो भविष्यतीत्याशङ्क्यैकस्य चमसद्वयानर्थक्यादपि
भेदमाह * न चेति * । व्यतिरिक्तकार्याभावातिरिक्तसदस्यानर्थक्यमा-
शङ्क्याह * सामर्थ्येति * । ब्रह्माणं ब्रह्मिष्ठं कुर्वीत यो यज्ञस्योल्वण प ११५०।१
श्येदिति श्रुते. कृताकृतान्वेषणस्यापि ब्रह्मकार्यत्वावगमात्तद्व्यतिरिक्तद्र-
ष्ट्राक्षेपायोगमाशङ्क्याहवनीयदक्षिणोपाविष्टस्य ब्रह्मणः सदसि क्रियमाण-
कर्मान्वेषणाशक्तेस्तत्समीपे स्थित्वान्वेषणायाक्षेपोपपत्तिरुपशब्देन सूचि-
ता । अन्वेषणस्यायज्ञाङ्गत्वात्तन्मात्रकारिण्यृत्विक्त्वायोगमाशङ्क्य याजिना
लक्षणयाङ्गवदुपकारिणोप्युक्तिसम्भवाशयेनोपपादयितुमाह * सोपि-
चेति * । याज्ञिकाचाराविरोधापत्तेरपि व्यतिरिक्तसदस्यनिरासो न युक्त
इत्याह * सर्वे इति * । आक्षेपमुपसंहरति * तस्मादिति * । भाष्या-
क्षेपेणाक्षिप्तं सिद्धान्तं तावत्समाधत्ते * उच्यत इति * । श्लोकं व्याचष्ट
* सदस्यो हीति * । स्वामिनोप्यृत्विक्त्वनियामकवरणाभावादृत्वि-
क्त्वावगतिकारणस्य च दक्षिणाभावान्वयक्रमवाक्ये चतुर्थीनिर्देशाभावेन
सत्रे च यजमानानामेवर्त्विक्त्वेपि सप्तदशावराश्चतुर्विंशतिपरमाः सत्र-
मासीरन्निति सप्तदशातिरिक्तानामपि यजमानत्वश्रुतेस्तावतां चर्त्विक्त्व-
प्रमाणाभावेनर्त्विजामेव यजमानत्वानियमाभावादृत्विक्त्वं विनापि च दी-
क्षोपपत्तेर्दीक्षावाक्ये गृहपतिमृत्विजं दीक्षयित्वेति सामानाधिकरण्यक-
ल्पनहेत्वभावेन द्विविधस्याप्यृत्विक्छब्दसामाधिकरण्यस्याभावादृत्वि-
क्त्वायोगमाशङ्क्याह * स्वामिनस्त्विति * । वरणाभावे चकाराद्द-
क्षिणावाक्यकल्प्यदीक्षावाक्यकल्प्यसामानाधिकरण्याख्यकारणद्वयाभा-
वेप्यृतुयजनस्यर्त्विक्छब्दप्रवृत्तिनिमित्तस्य तद्व्यवस्थापकस्य च ब्रह्माद्यृ-
त्विक्साहचर्यकीर्त्तनस्य दीक्षावाक्ये गृहपतिशब्देन दक्षिणावाक्येपि
ददातिशब्देन भावात्स्वामिन ऋत्विक्ता युक्तेत्यर्थः सदस्यस्यापि प्रत्यव-

क्षणाख्यर्त्त्विग्यजनसद्भावस्योक्तत्वात्तदभावेनर्त्विक्त्वनिराक्रिया न
शक्यते॥ यद्यपीति ॥ अनियमेन पाकादिकारिण्यपि पाचकादिव्यपदे
मेन कर्तृव्यपदेशस्य नियमकर्तृत्वनिमित्तत्वावगमात्सदस्याधीन
भावेन चास्याः कर्त्रेति केनचिदाङ्क्त सदस्यस्य क्रियया कर्तृत्वा
देशायोगादृत्विक्त्वायोगं तदधीनाङ्गाभावे तद्वरणानर्थक्यशङ्कानि
र्वमाह ॥ वचनेति ॥ । हिशब्दान्वयार्थं तत्रेतिनिरासप्रतिज्ञाऽत्र
यज्ञोपकारिणः प्रत्यवेक्षणात्सदस्यस्य कर्तृत्वनियमादृत्विक्त्वोपप
क्त्याङ्गेष्वेव श्रुत्यादीनां कर्तृविशेषनियामकत्वात्प्रत्यवेक्षणस्य च
तत्वेनानङ्गत्वात्कर्तृविशेषनियमायोगमाह । ॥ न चेति ॥ ।
रिक्तसदस्यसद्भावे सदस्यः सप्तदश इति श्रुतेस्तस्यैव सप्तदश
त्वापत्तिमाशङ्क्यर्त्विग्वरणानन्तरसदस्यवरणार्थत्वेनाप्यस्य व
पदाध्याहारेणोपपत्तेर्ऋत्विक्छब्दप्रवृत्तिनिमित्तयजनरहितस्य च
लत्वात् । समाख्यायाः पूर्वैः सह विरोधाविरोधचिन्तायाः
कचमसाध्वर्य्वादिचिन्तासमाप्त्या बुद्धिस्थीकृतेनोपोद्घातार्थेन
यजमानादन्योन्यं च भेदेन शास्त्रफलं प्रयोक्तरि तत्रार्थात्कर्तृ
णं स्यादित्यधिकरणद्वयोक्तेन सङ्गतिमाह । ॥ एवमिति ॥
रोधिसमाख्याया विनियोजकत्वाभावेन समाख्याकृतविनियो
विरोधस्य पूर्वपक्षं लिङ्गप्रकरणाभ्यां विरोधं रचयतीत्यर्थः
पूर्वार्द्धमात्रेण पूर्वपक्षोक्तिसूचनार्थं लटो भूतार्थत्वद्योतकं स्मेत्यु
त्तरविवक्षया स्मारणार्थत्वपक्षेऽप्याख्या चैवं तदर्थत्वादित्यत्रोक्त
माख्याकृतस्य विनियोगस्य स्थूणानिखननन्यायेन दृढीकरणार्थं
क्षं रचयतीत्यर्थः ॥ स्मारणार्थे चोपपद्यम् । आद्यसूत्रावयव
विकल्पयति ॥ तत्रेति ॥ । आद्यं तावत्कल्पं दूषयति ॥
तावदिति ॥ । जञ्जभ्यमानाधिकरणन्यायेनैतदेव द्रढयति ॥
हीति ॥ । द्वादशे वक्ष्यमाणेनाग्नीनां लौकिकवैदिकसर्वार्थत्व
न्यायेनापि द्रढयति ॥ तथेति ॥ । एकादश इति पाठो भ्रान्ति
एतदेवोपसंहरति ॥ तस्मादिति ॥ । द्वितीयकल्पेऽप्याद्यं कल्पं
॥ नापीति ॥ । अन्त्यकल्पाङ्गीकारेण समाधत्ते ॥ यावि
ति ॥ । लिङ्गविरोधोक्त्यर्थत्वेन प्रयुक्तत्वोक्ति व्याख्यातुं शक्ति
प्रयुक्तयोगाच्छक्तिलक्षणार्थामङ्गीकृत्य सर्वैः कत्वर्थैर्वाक्यसंयुक्तै
र्ऋत्विजामाक्षेप्तुमृत्विग्भिर्वा सर्वकार्याणामनुष्ठातुं शक्यत्वादित्ये

ख्याचष्टे ※ प्रयुक्तत्वादिति ※ । भाष्यमप्येवमेव योज्यमित्याह ※ सर्वमिति ※ । सर्वस्मै पुरुषकार्यायेति पूर्वपक्षभाष्यस्थस्यापि सर्वशब्दस्यायमेवार्थः । आकाङ्क्षितत्वोक्त्या च प्रकरणाविरोधोक्त्यर्थत्वेन प्रयुक्तत्वोक्तिव्याख्यानस्यानुज्ञासूचनार्थं कर्म्मणीति विशेषणात्पुरुषार्थाशयनिरासः सिद्धोपि विवृतः । द्वितीयं सूत्रावयवं समाख्याविहितानुपयोगेनाक्षिपति ※ ये पुनरिति ※ । प्रासङ्गिकत्वेन सङ्गतिसम्भवेपि सर्वलौकिकवैदिककार्यार्थत्वे सर्ववैदिककार्यार्थत्वे च सौत्रादौ हेत्वशक्त्याक्षेप्तुमाह ※ न चेति ※ । स्वे कर्म्मान्तरकालानपेक्षे वसन्तादिकालेग्नीनामाधानेनोत्पत्तेरुपदेशातिदेशप्राप्तानां यूपवत्प्रयोगनाधारण्यार्थत्वसम्भवान्न सर्वार्थत्वसाधने शक्तिरित्याशयः । सिद्धान्ते चाग्निविषयस्य पक्षस्य हेतोर्वानुक्तेरपि पूर्वपक्षोक्तयोगमाह ※ न च तस्येति ※। सर्वोक्तिश्च लौकिकवैदिककार्याशया वाक्यसंयुक्तासंयुक्तकार्याशया चेति विकल्प्याहवनीयादिलौकिकपाकादिसम्बन्धिप्रयोजनं काष्ठज्वालनाद्यपि साधयेच्छक्तत्वादिति पूर्वपक्षयित्वा वैदिककर्म्मार्थहोमादिकार्यनिर्देशाद्वैदिकानामेव कर्म्मणां सम्बन्धिनोऽप्रयोजनस्य विहारः साधकः स्यादिति द्वादशे वक्ष्यमाणसिद्धान्तविरोधेनाद्यं कल्पं दूषयति ※ यदि चेति ※ । द्वितीयं विशेषानुक्तेः किमग्निजातमुपनिधेयमिति सन्देहे लौकिकमुपनिधेयं न तु वैदिकमाहवनीयादि तस्य होमादिप्रयोजनानिर्देशादित्येवमाहवनीयादीनां सप्तमाधिकरणाद्यसूत्रेणाहवनीयादिभ्योन्येषामपि धिष्ण्यादीनामग्नीनां धिष्ण्यान्वाऽऽघारयतीत्यादिश्रुत्या व्याघारणादिप्रयोजनसंयोगेनैवोत्पत्तिरिति हेतुना सूत्रान्तरेण वाक्यसंयुक्तसर्ववैदिककार्यार्थत्वनिरासात्तद्विरोधेन दूषयति ※ यदपीति ※ ।पूर्वपक्षत्वादधिकरणान्तरसिद्धान्तविरोधस्यादोषत्वमाशङ्क्याह ※सिद्धान्तेति※। आक्षिप्तमवयवं समाधातुमारभमाणोनन्तरोक्तं सिद्धान्तत्वापादनं तावत्सिद्धसाध्यत्वेन दूषयति ※ तस्मादिति ※ । प्रकृतौ वेत्यनारभ्यवादाधिकरणसिद्धान्तसूत्रेण खादिरत्वादेः प्रकृतिविकृत्यर्थत्वे द्विरुक्तत्वापत्तिलक्षणो न्यायो य उक्तस्तत्प्रकृत्यर्थमित्याधानाधिकरणपूर्वपक्षसूत्रेण चाधानातिदेशाद् दृढीकरणेन प्रतिपादितः सन्ननुमितः पूर्वपक्षो यस्य सिद्धान्तस्य स एवाग्नीनां सर्वार्थत्वसिद्धान्तस्ते सर्वार्था इति सूत्रवाक्यस्य भेदेन पृथग्भूतेनाग्नयश्चेत्यवयवेनोच्यत इत्यर्थः । कथं तर्हि द्वादशाधिकरणेन सप्तमाधिकरणेन चाविरोधपरिहार इत्याशङ्क्याह ※ न

१२।३ चैतदिति * । ततश्चाग्निभिश्चेति सन्देहभाष्येण किं सर्वं प्राकृतं वैकृतं चाग्निकार्यं गार्हपत्यादिभिः कार्यमुत प्राकृतमेवेति व्यवस्थेत्येवं पूर्वोत्तरपक्षौ कार्याविति सन्देहभाष्यव्याख्यां सूचयितुमाह * तत्रेति * । पूर्वपक्षोक्त्यै तदनुमानहेतुभूतन्यायोक्त्यर्थमधिकरणान्तरसूत्रद्वयं पठति * तदिति * । कर्म्मानङ्गत्वेनाधाने निरस्तस्याप्यस्य न्यायस्याग्निष्वङ्गत्वादुत्थानोपपत्तिः । सिद्धान्तोक्त्यर्थत्वेन सूत्रावयवं पृथक्कृत्य व्याचष्टे *एवमिति* । असामर्थ्यपरिहारार्थं स्वकालत्वोक्तिः कर्म्मान्तरप्रक्रमानपेक्षाख्यस्वातन्त्र्यलक्षणार्थत्वेन व्याख्याता । अग्न्युत्पादकस्याधानस्य कर्म्मान्तरानपेक्षाभावेन साक्षात्कर्म्माङ्गत्वावेदकप्रमाणाभावादाहवनीयादिस्वरूपमात्रप्रयुक्तत्वेन च कर्म्मापूर्वसाधनांशानपेक्षत्वादग्निद्वारापि कर्माङ्गत्वाभावेन प्रकृत्यर्थत्वाभावेऽप्यग्नीनामाहवनीयादिवाक्यैः कर्म्माङ्गत्वस्यैकान्तेनावगमात् खादिरत्वादिवत्प्रकृत्यर्थत्वं भविष्यतीत्याशङ्क्य खादिरत्वादिद्वारस्य स्रुवादेरतिदेशं विना विकृतावप्राप्तेर्द्विरुक्तत्वापत्तिभयाद्विकृत्यर्थत्वं खादिरत्वादेर्न जातम् । आहवनीयद्वारस्य तु होमस्य विकृतावपि नक्षत्रेष्ट्यादावुपदेशात्प्राप्तत्वात्तादर्थ्येऽप्याहवनीयस्य द्विरुक्तत्वानापत्तेः खादिरत्वादिन्यायाभावाद्यूपोत्पादकस्य छेदनस्य प्रकृत्यर्थत्वाद्यूपस्य प्रकृत्यर्थत्ववदाधानस्य प्रकृत्यर्थत्वे कश्चिद्धेतुरस्तीति सूचयितुमाह * तदिति * । एतच्च सर्वार्थत्वमाहवनीयद्वारस्यैव होमस्य प्रकृतिविकृतिविशेषे प्रत्यक्षोपदेशात्तन्मात्रविषयं न त्वग्निमात्रविषयं विकृतिमात्रविषय वेत्याह * न त्विति * । कथं नावकल्पत इत्यपेक्षायामाह * द्वारमिति * येषु विकृतिविशेषेष्वतिदेशापेक्षं द्वारं तेष्वनारभ्याधीताः पदार्था यत्प्राप्नुवन्ति तद्द्वारातिदेशापेक्षया युगपच्च सर्वाङ्गेष्वतिदेशप्रवृत्तेः पदार्थेष्यतिदेशापेक्षया न त्वतिदेशानपेक्षास्ततश्च द्विरुक्तत्वापत्तेः प्रत्यक्षेण शास्त्रेण ये होमाश्चोदितास्तेष्वेव स्वप्रधानेष्वग्निहोत्रादिषु द्वारानपेक्षत्वादङ्गभूतेषु चोपहोमादिषु नैष्फल्यात्स्वयमङ्गग्रहणाशक्तेषु सत्सु तद्द्वारा तद्युक्तेषु यागेषूपदेशेनाहवनीये स्यान्न तु होमचोदनामनपेक्ष्यापि यागेषु यस्मात्तस्मान्नैतत्सर्वविषयमिति श्लोकद्वयार्थः । अपूर्वेष्वपि होमेष्वाहवनीयोपदेशोपपत्तेः प्रकृतिविकृतिमात्रार्थत्वनियमोऽपि नास्तीति सूचनार्थं दर्वीविशेषणम् । आद्यं श्लोकं व्याचष्टे * यदिति * । सर्वविषयत्वाभावं सूत्रकृत्सम्मत्या द्रढयति * तथाचेति * । सर्वविकृतिविषयत्ववत्सर्वाग्निविषयतापि सर्वार्थत्वोक्तेर्नास्तीत्याह * त-

थेति * । समधिगतमिति भाष्यं सम्यगर्थसंशब्दाङ्गीकारेणाग्निविषयाधिकरणपर्यवसानादृत्विङ्मात्रविषयसिद्धान्तायोत्तरं सूत्रमित्येवमर्थत्वेन व्याचष्टे * अग्निन्विति * ॥ ११५३।१

आध्वर्यवादिष्वध्वर्य्वादीनां कर्तृत्वनियमः । अधि० १९

ते[1] सर्वार्थाः प्रयुक्तत्वादग्नयश्च स्वकालत्वात् ॥ ३९ ॥

तत्संयोगात्कर्म्मणो व्यवस्था स्यात्संयोगस्यार्थवत्त्वात् ॥ ४० ॥

तैर्ऋत्विग्भिः कर्म्मणः संयोगाद्यथासमाख्यं व्यवस्था स्याद्व्यवस्थितसम्भवे विकल्पापादकाव्यवस्थितशास्त्रार्थायोगेन लिङ्गप्रकरणापेक्षितव्यवस्थासमर्पकतया हौत्रादिसमाख्याख्यस्य हौत्रर्त्विक्संयोगस्य तद्विरोधाभावेन श्रुतिकल्पकत्वोपपत्तेर्विनियोगाख्यार्थवत्त्वादित्येवं भाष्यकृता व्याख्यातेपि हौत्रादिसमाख्यानामप्यादमेधिन्यां यद्धौत्रादिकारिवाचिनीत्वावगतेर्विनियोक्त्रीत्वात्कथं स्वयमुपोद्घातप्रसक्तानुप्रसक्तसमाप्त्या बुद्धिस्थीकृता। अपि वा श्रुतिभेदात्प्रतिनामधेयं स्युरित्युपोद्घाताधिकरणसूत्रस्थनामधेयशब्दनिर्दिष्टहौत्रादिसमाख्यापरामर्शिनं तच्छब्दमङ्गीकृत्य तेषामृत्विजां हौत्रादिसमाख्या संयोगादित्येवं व्याचष्टे * समाख्येति * । संयोगस्येति सूत्रावयवं व्याचष्टे * तर्हीति * । भाष्यकृद्व्याख्यायां तत्संयोगोक्तिं हौत्रादिसमाख्यार्थत्वेन व्याचक्षाणः संयोगस्येत्यादिसूत्रावयवं व्याचष्टे * नापीति * । आध्वर्यवमिति भाष्यमृत्विक्संयोगस्य लिङ्गप्रकरणापेक्षितव्यवस्थासमर्पकत्वेन तदविरोधाद्विनियोजकश्रुतिकल्पकत्वोपपत्तेर्विनियोगाख्येन श्रुत्यर्थेनार्थवत्त्वादित्येवं संयोगस्येति सूत्रावयवव्याख्यासूचनार्थत्वेन व्याख्यातुमाह * तस्मादिति * । केषाञ्चित्प्रतिनामधेयं स्युरित्येतत्सूत्रस्थनामधेशब्दनिर्दिष्टनामधेयपरामर्शिनं च तच्छब्दं संशब्दं चैकीभावार्थ-

---

१ ग्रन्थकृता केवलप्रतीकालम्बनेनैव व्याख्यानस्यादादावनुपन्यासः परन्त्वस्य व्याख्या ४० पृष्ठस्थां १ पङ्क्तिमारभ्य बोद्धव्या ।

त्वादनेकत्रैकरूपसामान्यवाचिनमङ्गीकृत्य तयोर्नामधेययोः कर्तृकर्म-
समाख्ययोरवयवसामान्ययोगात्सादृश्याद्धौत्रादेः कर्मण कर्त्रपेक्षायां
होत्रादेश्च कर्तुः कर्मापेक्षायां हौत्रादेः कर्मणो बुद्धिस्थत्वात्कर्मणो
व्यवस्था स्यादवयवव्युत्पत्त्यभावेप्यवयवसामान्ययोगस्य विनियोगार्थं
हेतुत्वादित्येवं सूत्रव्याख्यां दूषयितुमुपन्यस्यति * तत्रेति * । रूढ्युपपा-
दनार्थं प्रत्यभिज्ञायमानावयवार्थं त्यागहेतुं समाख्यानात्प्राक्कर्तृकर्मान्व-
यासिद्धिं प्रश्नपूर्वमाह * कुत इति * । श्लोकं व्याचष्टे * होत्रिति * ।
सामिधेन्यनुवचनादेः प्रमाणान्तराद्धोतृकर्मत्वप्रसिद्धौ तु समाख्याया-
स्तत्राप्रामाण्यं स्यादित्याह * न चेति * । संयोगस्येत्यवयवं शाङ्कान्त-
रत्वेन व्याख्यातुमाह * कथं तर्हीति * । दूषयति * न त्विति * । क-
ण्वरथन्तरे रथन्तरशब्दस्य निमित्तत्वशङ्कानिरासार्थमिह पुनरेवंविशेष-
णविशिष्टः कण्वरथन्तरशब्दो लोक एवास्ति नासौ कण्वानां रथन्तरं
कण्वरथन्तरमित्येवं कृत्वोच्यत इति दशमाधिकरणभाष्यमर्थतः पठितुं
तथाचेत्युक्तम् । राजशब्दस्य वैधर्म्यदृष्टान्तत्वमनुभाषणपूर्वं दूषयति
११।५४।३ * यद्पीति * । प्राग्योगासिद्धौ यौगिकव्यपदेशायोगमाशङ्क्याह * त-
स्मादिति * । कथं तर्ह्यन्वयावगतिरिति पृच्छति * केन त्विति * ।
उत्तरमाह * समाख्येति * । समाख्यातोऽन्वयावगतावन्योन्याश्रयं
शङ्कते * नन्विति * । परिहरति * नैष इति * । शेषशेष्यन्व-
यश्रुतिकल्पनात्प्रागन्वयप्रमितिरित्यन्योन्याश्रयापत्तेः प्रतीतिमात्रापेक्ष-
त्वाङ्गीकारेणैव परिहार्यत्वान्निरासं सूचयितुं लिङ्गादावपि प्रतीतमात्रा-
न्वयान्यथानुपपत्त्या श्रुतिकल्पनेऽन्वयप्रमितिर्भवतीति बलाबलाधिकरणे
व्याख्यातमित्याह * सर्वेष्वेवेति * । अन्योन्याश्रयपरिहारमुपसंहरति
* अत इति * । आख्याधिकरणेन पौनरुक्त्यं शङ्कते * ननु चेति * ।
समाख्याया लिङ्गप्रकरणाभ्यां विरोधाविरोधचिन्तामात्रे तात्पर्याङ्गीकारे-
णापौनरुक्त्यमाह * सत्यमिति * । स्वामिकर्मपरिक्रय इत्यारभ्य
विरोधाविरोधचिन्तां मन्यमानानां मतेन प्राप्त्यर्थत्वात्पौनरुक्त्यं परिहरति
* उत्तरेति * ॥

तस्योपदेशसमाख्यानेन निर्देशः ॥ ४१ ॥

कर्मसमूहस्याध्वर्य्वादिसमाख्यानात्क्वचिदपि बाधे समाख्यैक्या-
त्सर्वत्राप्रामाण्यापत्तेर्विशेषसमाख्यया बाधायोगमाशङ्क्य मैत्रावरुणा-

द्विवाक्येन बाधस्यावश्याङ्गीकार्यत्वात्सूत्रीरुपदधातीतिवद्भूम्नाध्वर्यवादि-
समाख्याप्रवृत्त्यङ्गीकारेण परिहारं सूचयितुं तस्याध्वर्य्वादिसमाख्या-
तस्यापि कर्म्मणो यथा मैत्रावरुणोपदेशेन कर्त्रन्तरोपदेशशून्येभ्यः क-
र्म्मभ्यो निष्कृष्य कर्त्रन्तरदेशना तथा विशेषविषयत्वात्सङ्कोचवृत्तिना-
ख्यानेन विशेषाख्याताऽन्येभ्यः कर्म्मभ्यो निष्कृष्य कर्त्रन्तरदेशनेत्येव-
मुपदेशोक्तेर्दृष्टान्तमात्रार्थत्वात्सामान्यविशेषसमाख्ये तुल्यबले विशेष
समाख्या वा बलीयसीति सन्देहे यौगिकत्वेन द्वयोर्विशेषविषयत्वस्मा-
त्स्यात्तुल्यबलत्वप्राप्तौ सामान्यसमाख्याया विशेषविषयत्वेऽप्यनेकविशेष-
विषयत्वेन सावकाशतया विशेषसमाख्यानवरुद्धेष्वपि विशेषेषु भूम्ना
प्रवृत्त्युपपत्तेस्तदवरुद्धेष्वन्यथानुपपत्त्यभावेन श्रुत्यकल्पकतयानवरुद्ध-
विशेषालोचनापेक्षत्वेन मान्द्याद्विशेषसमाख्या निरपेक्षत्वेन शीघ्रप्रवृत्ति-
त्वात्ततो बलीयसीति सिद्धान्तमाह। * विशेषेति * ॥

समाख्याप्राप्तकर्तृत्वस्य क्वचिद्बाधः। अधि० २०

तद्वच्च लिङ्गदर्शनम् ॥ ४२ ॥

उदाहृतानां विशेषसमाख्याकृतविनियोगासाधकत्वादलिङ्गत्वमा-
शङ्क्य यथाध्वर्यवादिसमाख्यानात्कर्म्मणोऽध्वर्य्वादिकर्तृव्यवस्था यथा
च विशेषसमाख्यानेन कर्त्रन्तरदेशना तथा लिङ्गदर्शनमित्येवमस्य
सूत्रस्य सिद्धान्तद्वयालिङ्गोक्त्यर्थत्वसूचनार्थं सामान्यसमाख्याकृतवि-
नियोगलिङ्गमुक्तमित्याह * सामान्येति * । विशेषसमाख्याया- ११५।२
स्तर्हि किं लिङ्गमित्यपेक्षामाह * विशेषेति * ॥

प्रैषानुवचनं मैत्रावरुणस्योपदेशात् ॥ ४३ ॥

प्रैषेष्वनुवचनेषु च मैत्रावरुणोपदेशात्समाख्याबाधे दृष्टान्तिते प्र-
सङ्गात्कि सर्व्वेषु प्रैषेषु चानुवचनेषु च बाधः केषुचिद्वेति चिन्तेत्यन-
न्तरसङ्गतिमाह * उपदेशादिति * । तत्रेत्युदाहरणभाष्यं ज्योति-
ष्टोमप्रकरणाम्नातत्वादयुक्तमाशङ्क्य ज्योतिष्टोमप्रकरणस्य प्रदेशविशेष-
प्रदर्शनार्थत्वेनोपपादयति * ज्योतिष्टोमेति * । सुत्या बाह्यत्वाद्दैक्षा-
ङ्गानां प्रैषानुवचनानां दीक्षणीयाद्यङ्गप्रैषानुवचनवदनुदाहरणत्वशङ्कानि-
रासः । प्रदेशोक्तिप्रयोजने बाध्यसमाख्याविषयविवेकपूर्वं सन्देहमा-
ह * तत्रेति * । पूर्वपक्षमाह * किमिति * । सामान्यवचनात्सर्व-

प्रैषानुवचनप्रत्यय इत्युक्ते चशब्दादन्योन्ययुक्तयोः प्रैषानुवचनयोर्मैत्रावरुणकर्तृकत्वप्रतीतेः सामान्यवचनासिद्धिमाशङ्क्य तत्सिध्यै प्रौढ्यान्योन्ययोगोक्तिमभिप्रेत्योद्देश्यविशेषणत्वेनाविवक्षामुक्त्वा श्रूयमाणश्चेत्यादिना सम्भवत्येवेतीति हेत्वर्थेतिकरणान्तेनान्योन्ययोगानुक्तिरुक्ता भिन्नमन्त्रस्थयोः प्रैषानुवचनयोः पृथक्प्रयत्नापाद्यत्वेनान्वाचययोगात्तदभिधानेऽप्यन्योन्यसहितप्रैषानुवचनविषयत्वापत्तेस्तन्निरासः ।

समुच्चितयोरनुवचनप्रैषयोर्मैत्रावरुणकर्तृकत्वम् । अधि० २१

पुरोनुवाक्याधिकारो वा प्रैषसन्निधानात् ॥ ४४ ॥

सिद्धान्तप्रतिज्ञार्थं सूत्रावयवं पूर्वपक्षव्यावृत्त्यर्थवाशब्दव्याख्यापूर्वं व्याचष्टे * न सर्वेति * । अन्योन्ययुक्तप्रैषानुवचनवाचित्वेन पुरोनुवाक्योक्तिव्याख्यापूर्वं ता अधिकरोति प्रधानीकरोत्युद्दिशति मैत्रावरुणविषयेऽयमुपदेश इत्येवं कर्तृव्युत्पन्नोद्देशवाच्यधिकारोक्तयङ्गीकारेण भावव्युत्पत्तौ वा बहुव्रीह्यङ्गीकारेणोक्तेऽर्थे सूत्रावयवं योजयितुमाह * प्रैषान्तानीति * । प्रकृत्य प्रधानीकृत्योद्दिश्येत्यर्थः । प्रैषेत्यवयवोक्तस्य प्रैषमिश्रत्वस्य पुरोनुवाक्यतां मैत्रावरुणविधिविषयत्वे हेतुत्वोपपादनार्थं पुरोनुवाक्यानां हौत्रप्रवचनाधीनत्वात्समाख्यया होतृप्रयोज्यत्वावगतेः प्रैषान्तानुवचनरूपाणां च तासामेकपदार्थत्वेनानेककर्तृकत्वायोगात्केवलस्य होतुः प्राप्तेस्तदन्तर्भूतस्य च प्रैषस्य यजशब्दत्वात्तस्य च दर्शपूर्णमासयोः समाख्ययाध्वर्युकर्तृकत्वात्तत्प्रकृतिकेषु दीक्षादिषु ज्योतिष्टोमाङ्गेष्वध्वर्युप्राप्तेः सोमयागाभ्यासेषु तु समाख्यया होतृप्राप्तावपि प्रैषार्थस्यापि सवषट्कारयाज्याप्रयोगस्य होतृकर्तृकत्वात्प्रैषेषु चेति न्यायाच्च प्रैषप्रैषार्थयोरेककर्तृकत्वायोगेनाध्वर्युष्वत्यधिकरणपूर्वपक्षन्यायाद्धोतृतो निवर्त्तमानस्य तत्सन्निकृष्टमैत्रावरुणकर्तृकत्वप्राप्तेस्तत्सिद्धान्तवक्ष्यमाणन्यायाद्वा होतृकर्तृकत्वप्राप्तावपि प्रैषार्थस्य मैत्रावरुणकर्तृकत्वकल्पनक्लेशापत्तेर्निर्द्धारणायोगाद्दीक्षादिषु चातिदेशेनाध्वर्युप्राप्तावपि प्रैषेषु चेति न्यायोपबृंहितादध्वर्युस्त्वित्यधिकरणसिद्धान्तन्यायात्ततो निवर्त्तमानस्य तत्सन्निकृष्टप्रतिप्रस्थातृकर्तृकत्वप्राप्तेः कृत्स्नपुरोनुवाक्याप्रयोक्तुरेकस्य विधिं विना ज्ञातुमशक्यत्वात्कर्तृविध्याकाङ्क्षामाह *ता-

११५६।१ श्चेति * । केवलानां तु प्रैषाणां निर्ज्ञाताध्वर्युकर्तृकत्वादनुवाक्यानां च निर्ज्ञातहोतृकर्तृकत्वाच्च कर्तृविध्याकाङ्क्षास्तीत्याह * शेषाणि त्विति * ।

प्रैषमिश्रास्वप्यनुवाक्यास्वनुवाक्यांशस्य होतृकर्तृकत्वनियमात्प्रैषांशस्य च सोमयागाभ्यासेषु मैत्रावरुणकर्तृकप्रैषार्थकल्पनक्लेशेनापि तावद्धोतृकर्तृकतयैव निर्ज्ञानाद्दीक्षादिषु च प्रतिप्रस्थातृकर्तृकत्वनिर्ज्ञानाच्च कर्तृविध्याकाङ्क्षास्तीत्याशङ्क्यैकस्य पदार्थस्यानेककर्तृकत्वायोगात्प्रैषानुवचनेषु च प्रत्यक्षविध्युपलब्धेः प्रैषार्थस्य मैत्रावरुणकर्तृकत्वकल्पनक्लेशाङ्गीकारायोगेन प्रैषांशस्य होतृकर्तृकत्वावधारणायोगात्कर्तृनिर्ज्ञानायोगोपपादनपूर्वं पुरोनुवाक्यानां प्रैषमिश्रत्वस्य मैत्रावरुणविधिविषयत्वहेतुत्वमुपसंहरति * पुरोनुवाक्यानां पुनरिति * । एकस्य पुरोनुवाक्याख्यपदार्थस्यानेककर्तृकत्वायोगेनाध्वर्युकर्तृकप्रैषमिश्रत्वादनुवचनांशेनापि होतृतो होतृकार्यानुवचनमिश्रत्वाच्च प्रैषांशेनाप्यध्वर्युतः पुरोनुवाक्यानां प्रच्युतेः प्रैषानुवचनयोरन्योन्यमिश्रत्वाख्यसन्निधानहेतुकात्कर्तृसाकाङ्क्षत्वाद्युक्तो मैत्रावरुणविधिरित्यर्थश्चकारस्ततश्च पुरोनुवाक्यानामेव मैत्रावरुणविधिरित्यपकृष्य योज्यः । एवकारार्थे पुनःशब्दः । समुच्चितयोरिति भाष्येण प्रैषानुवचनयोश्चशब्दादेकत्र निधानलक्षणसमुच्चयाख्यसन्निधानावगतेरिति हेत्वर्थमुक्तमन्वाचयत्वेन व्याख्यातुमाह * एवं चेति * । प्रैषेति सूत्रावयवव्याख्येयमिति सूचनार्थः सूत्रावयवपाठः । सर्वप्रैषानुवचनेषु मैत्रावरुणविधौ प्रेष्येत्यादिष्वपि लिङ्गविरोधिमैत्रावरुणविध्यापत्तेरविरोधपक्षसम्भवे च विरोधपक्षायोगाच्च सर्वत्र विधिरित्येतदर्थत्वेनासम्भवन् मैत्रावरुणकर्तृकत्वानामपि प्रैषाणां प्रकरणे सन्निधानान्मैत्रावरुणकर्तृकत्वापत्तिरित्येवं प्रैषेत्यवयवव्याख्यां सूचयितुमाह * न चेति * ।

प्रातरनुवाके च होतृदर्शनात् ॥४५॥

स्पष्टत्वान्न व्याख्यातम् ।

चमसहोमेऽध्वर्योः कर्तृत्वम् । अधि० २२

चमसांश्चमसाध्वर्यवः समाख्यानात् ॥ ४६ ॥

विशेषसमाख्यायाः सामान्यसमाख्याबाधकत्वापवादकत्वेन सङ्गतिः । यदेवं जुहोतीत्यनेन होमोत्पत्तेर्ग्रहचमसहोमाभेदेन ग्रहहोमस्याध्वर्युकार्यतया तदभेदाच्चमसहोमस्य तेनाक्रियमाणस्याप्यध्वर्युकार्यत्वव्यपदेशोपपत्तेस्तत्कारित्वेनाध्वर्यवमिति सामान्यसमाख्याकृतमध्वर्युविनियो-

गमनपेक्ष्यापि चमसाध्वर्य्यव इति विशेषसमाख्यायाः सामान्यसमाख्यासापेक्षानपेक्षत्वसन्देहस्य च बाधकत्वाबाधकत्वसन्देहहेतोः स्पष्टत्वाद् ग्रहचमसवाक्याभ्यां होमोत्पत्तावल्पवाक्यस्य तत्प्राप्तकात्स्न्र्यपरिसङ्ख्यार्थत्वापत्तेरल्पवाक्येन होमोत्पत्तिरित्याशयेन पूर्व्वपक्षमात्रमाह * उन्नयनेति * । चमसाध्वर्युसमाख्यानात्सर्वेषु चमसकार्येषु चमसाध्वर्युविनियोगप्रतीतेश्चमसानिति द्वितीयोक्तस्य च कर्मत्वस्य व्यापारमात्रव्यापकत्वेनोपपत्तेश्चमसांश्चमसाध्वर्यवो व्यापारयेयुरिति क्रियाध्याहारोपलक्षणार्थं चमसाध्वर्यवश्चमसाञ्जुहुयुरिति भाष्यं मत्वोन्नयनादिग्रहणम् ।

अध्वर्युर्वा तन्न्यायत्वात् ॥ ४७ ॥

सामान्यसमाख्याया न्यायशब्दोक्तमबाध्यत्वं किमल्पमित्यशानात्तदुद्देशेन होमविध्यनुपपत्तेर्होमैक्ये च ग्रहचमसानां विकल्पापत्तेः फलतः परिसङ्ख्यापत्तावपिच दोषाभावाद् ग्रहचमसवाक्याभ्यां होमद्वयोत्पत्त्यवगमाशयेन चमसाध्वर्युसमाख्यायाश्चमसहोमेध्वर्युविनियोगं विनानुपपत्तेस्तत्सापेक्षत्वोक्त्योपपादयितुमाह * सा नामेति * । जुह्वत्यप्यध्वर्यौ चमसाध्वर्यूणामव्यापारात्समाख्यानायोगमाशङ्क्याह * य-
११५७।५ दि त्विति * । सिद्धान्तमुपसंहरति * तस्मादिति * ।

चमसे चान्यदर्शनात् ॥४८॥

चमसाध्वर्युभ्योन्यस्य चमसे होमकारित्वदर्शनोपपादनार्थं हुत्वेत्यध्याहारेऽन्य इति भाष्येणोक्ते प्रश्नपूर्व्वं तदुपपादनार्थं चमसाध्वर्युकर्तृकस्य नयनस्य भक्षयितृवषट्कर्त्रर्थत्वाद्भक्षार्थत्वावगतिमुक्तां प्रयोजनान्तराभावेनोपपादयन् सूत्रं व्याचष्टे * वषट्कारिणं प्रतीति * । चमसाध्वर्युनेतारं ब्रुवन्नहुतभक्षायोगाच्चमसाध्वर्युभ्योन्यं होमकारिणं दर्शयन्समाख्यासहकृताध्वर्युं दर्शयतीत्युक्तेध्वर्युणा हुतांश्चमसानन्यो वषट्कर्त्रे भक्षणार्थं हर्त्तुं चमसाध्वर्यवे प्रयच्छतीत्यपि सम्भवादलिङ्गत्वमाशङ्क्य होमकर्तृहस्तस्थस्य चमसाध्वर्यवे दानायान्यस्मै समर्प्पणे विक्षेपापत्तेर्होमदानयोरेककर्तृकत्वावगमोक्तयै यो जुहोति सएव प्रयच्छति ततश्च होमकर्त्तारं चमसाध्वर्य्यूणां ग्रहीतृरूपेण व्यापृतत्वेन दातृत्वायोगात्तेभ्योऽन्यं दर्शयतीत्युक्तं ततश्चेत्यर्थे तं चेति चकारो यश्चेत्ययांहिशब्दार्थे ।

अशक्तौ ते प्रतीयेरन् ॥ ४९ ॥

कदाचित्तस्येतिवार्त्तिकावयवेनास्य सूत्रस्य व्याख्यातत्वात्पाठमात्रं कृतम् ॥

वेदोपदेशात्पूर्ववद्वेदान्यत्वे यथोपदेशं स्युः ॥ ५० ॥

विशेषसमाख्याया अपि सामान्यसमाख्यासापेक्षत्वाद्दौर्बल्येभिहिते प्रसङ्गादौपदेशिक्या अपि प्रयोगवचनाश्रयायाः समाख्याया आतिदेशिकसमाख्यापेक्षत्वाद्दौर्बल्याभिधानेन सङ्गतिः स्पष्टत्वादनुक्ता वेदान्तरीयेष्वङ्गेषु प्रधानवेदव्यपदेशाभावात्पूर्वपक्षायोगमाशङ्क्य प्राधनप्रयोगवचनविषयत्वेनाङ्गेष्वपि प्रधानवेदं व्यपदेशोपपत्त्युक्तिपूर्व्वं पूर्व्वपक्षमाह * गुणेति * ।

तद्ग्रहणाद्वा स्वधर्म्मः स्यादधिकार-सामर्थ्याद्व्यक्तः शेषे ॥ ५१ ॥

प्राकृतानां धर्म्माणां परोक्षत्वात्तच्छब्दपरामृष्टानां विकृत्याग्रहणात्स्वैः प्रात्यात्मिकैः स्वरूपतश्चोदकप्राप्तैर्नानार्त्विग्रूपैर्धर्म्मैर्युक्तो विकृतिप्रयोगः स्यादित्युक्ते प्राग्धर्म्मग्रहणेपि तेषामौपदेशिकप्रधानद्वारेण समाख्याप्राप्तेः प्रधानवेदसमाख्यातैरुद्गातृभिरध्वर्युभिर्बाधात्कथं प्राकृतधर्माग्रहणस्य नानार्त्विक्त्वहेतुतेत्याशङ्क्य हेतुत्वोपपादनार्थं प्राकृतान् धर्म्मान् विकृतावप्यन्वयेनाधिकरोतीति व्युत्पत्त्याधिकारशब्दोक्तस्य चोदकस्य बलीयस्त्वाख्यं समर्थत्वमुपादायितुं तद्ग्रहणाद्वा स्वधर्म्मः स्यादित्यनेन न्यायेन प्रयोगवचनस्य चोदकापेक्षत्वेन दुर्ब्बलत्वादिति स्वरटीकायां विकृतिप्रयोगवचनेन प्राकृतग्रहणहेतुकादिति सूत्रार्थाभ्युपगमेनेत्येतत्सूत्रसिद्धतयैव पश्चात्कालत्वात्प्रयोगवचनस्य दौर्बल्यमुक्तं भाष्यानुसारात्तु पूर्व्वोक्तसूत्रार्थाभ्युपगमे विप्रतिपत्तौ वा प्रकृत्यन्वयाद्यथाप्रकृतीति पञ्चमाधिकरणसिद्धान्तसूत्रे विकृतिप्रयोगवचनस्य प्राकृतधर्म्मानुसाराख्यप्रकृत्यनुगमवाचिना प्रकृत्यन्वयशब्देन वक्ष्यत इत्याह *उक्तमिति* सहाङ्गैरिति भाष्येण चोदकबलीयस्त्वोपपादनार्थं प्रयोगवचनदौर्बल्यस्योक्तत्वात्तद्व्याख्यानायैवमुक्तम् । नन्वितिभाष्येणौपदेशिक्याः समाख्यायाः प्रत्यक्षत्वेनातिदेशिकीतो बलीयस्त्वमाशङ्क्योच्यत इत्यादिनालौकिकत्वाद्दौर्बल्यमुक्तं इयेनाद्यङ्गेष्वौद्गात्रादिसमाख्याया अपि सा-

मवैदिकादिप्रधानप्रयोगविधिनिमित्तत्वेन वैदिकत्वादयुक्तमाशङ्क्य लक्षणया प्रयोगपरिगृहीतेति टुप्टीकानुसारात्प्रयोगवचनाश्रयत्वलक्षणार्थत्वं लौकिकोक्तेः सूचयन् व्याचष्टे * प्रयोगेति * । प्रयोगवचनाश्रयत्वेपि कथं दौर्बल्यमित्याशङ्क्य पूर्वोक्तमेव जघन्यकालत्वं दौर्बल्यहेतुमुपपादयति
११'५८।२ * यावद्धीति * । क्लृप्तात्कर्तृसम्बन्धाद्धेतोरित्यर्थः । क्लृप्तकर्तृसम्बन्धत्वादिति त्वप्रत्ययाध्याहाराद्वा बहुव्रीहि । तत्रेति भाष्यं पौर्वापर्यबलीयस्त्वाशयशङ्कोत्तरत्वेन व्याख्यातुमाह * न वेति * । प्राप्तस्य तर्हि सन्निकृष्टत्वान्न क्वचिद् बाधः स्यादित्याशङ्क्याबाधग्रन्थे क्लृप्तमूलानां सामान्यशास्त्रादीनां प्राप्तबाधस्याक्लृप्तमूलानां च लिङ्गादीनामप्राप्तबाधस्योक्तत्वात्सन्निकृष्टस्यापि क्वचिद् बाधो न विरुद्ध इत्याह * उक्तं हीति * । विकृतिप्रयोगवचनेन प्राकृताङ्गग्रहणहेतुकात्प्राकृताधिकारस्य चोदकस्य सामर्थ्याद्बलीयस्त्वात्प्रात्यामिकवेदविहितत्वानिमित्तत्वस्वरूपप्राप्तानार्त्विग्रूपधर्मः श्येनादिः स्यादित्येवं सूत्रं योजयन् सिद्धान्त उपसंहरति * तस्मादिति * । समाख्यानतिक्रमसूचनार्था दृष्टान्तोक्तिः । समाख्यात्वसाम्यात्तुल्यबलत्वशङ्कां निराकर्तुमाह * यद्यपिचेति * । अव्यक्त इति सूत्रावयवं परमतेनावतारणपूर्वं व्याचष्टे * यत्त्विति * । कथमव्यक्तोक्त्या प्रधानसमाख्यातः कर्त्रोक्तो भवतीत्याशङ्क्याव्यक्तशब्दस्याक्लृप्तत्वावस्थवाचित्वात्प्रधानद्वारत्वानिमित्तत्वाच्चाक्लृप्तावस्थत्वस्यायं प्रधानसमाख्यातस्य कर्तुरङ्गान्वय एवाव्यक्त इत्युक्तम् । प्रधानसमाख्यातकर्तृविषयाभावेनैतां दूषयति * न त्विति * । प्रधानसमाख्याया वेदान्तरसमाख्यावत्प्रत्यक्षत्वाभ्युपगमेप्यनेकाङ्गविषत्वेन सामान्यविषयतया दौर्बल्यात् वेदान्तरसमाख्ययैव कण्टकवितोदनादिमात्रवेदान्तरीयप्रधानाङ्गविषयत्वेन विशेषविषयत्वाद् बलीयस्या भाव्यमित्यर्थः । वेदधर्माद्यैश्चान्वयवत्सामाख्यानिककर्त्रन्वयेप्यङ्गे स्वरूपतः प्राप्तस्य धर्मस्य प्रधानद्वारप्राप्तेन धर्मेण बाधाद्वेदान्तरीयमप्यङ्गं प्रधानसमाख्यातस्य कर्तुर्विषयो भविष्यतीत्याशङ्कामनिष्टापत्त्या निरस्यति * अथेति * । वचनेनानिष्टापत्तिपरिहारशङ्कां तदभावेन निरस्यति * न चेति * । विषयाभावमुपसंहरति * तस्मादिति * । प्रधानेनाङ्गेषु स्वसमाख्यानवतारेङ्गसमाख्यायाः प्रधानेनाग्रहणात्प्रधानसाद्गुण्यं च विनाङ्गगुण्यानुष्ठानानर्थक्यात् स्ववेदसमाख्यातोपि नाङ्गे कर्त्तव्यता स्यादित्याशङ्क्याह * सा त्विति * । स्तोत्रादीनामुत्पत्तिवेदानिमित्तेनोद्गात्राद्यन्वयेन

निमित्तेन प्रवर्त्तमाना समाख्योद्गात्रादिकृतेन स्तोत्रादिना ज्योतिष्टोम-
स्योपकुर्यादित्येवं प्रधाननियुक्तक्रियाकर्त्रन्वयरूपार्था सती प्रधानेन क्रि-
याकर्त्रन्वयाख्यार्थग्रहणार्थं गृह्यत इत्यर्थः। गुणत्वाच्च वेदेन व्यवस्था
स्यादित्यनेन च न्यायेनाध्वर्य्वादिसमाख्यानां गुणभूतेष्वेव कर्तृषु व्या-
पारेण प्रधानभूतकर्तृरूपवस्त्वविनियोजकत्वात्प्रधाने च स्वयङ्कर्तृत्व-
नियमेन कर्तृप्राधान्यात्प्रधाने कर्तृविनियोजकत्वाभावात्प्रधानद्वाराङ्गेषु
कर्तृविनियोजकता दूरोत्सारितेत्याह * न चेति * । ऋग्वेदादिस-
माख्यानामपि तर्हि प्रधानद्वाराङ्गेष्वप्रवृत्तेर्गुणमुख्यव्यतिक्रमन्यायो नि-
र्विषयः स्यादित्याशङ्क्य तासां प्रधानेष्वपि विनियोजकत्वाविरोधात्प्र-
योगवाचिक्रियतेशब्दव्यपदेशाच्चोच्चैस्त्वादीनां प्रयोगवेदधर्मत्वावगतेर्वै-
षम्यमाह । * ऋग्वेदादीति * । न केवलं पूर्वोक्तेभ्यो हेतुभ्यः कर्तुः ११५९।२
प्रधानद्वाराङ्गेष्वप्राप्तिः किं त्वाध्वर्य्वादिसमाख्यायाः क्रियतेशब्दव्यपदे-
शानात्मकत्वेन पाठमात्रनिमित्तत्वात्पाठस्य चान्यद्वारत्वायोगादपीत्याह
* पाठेति * । अप्राकृतत्वमात्रनिमित्ताक्लृप्तावस्थत्ववाच्ययमव्यक्त-
शब्दो न तु प्रधानद्वारत्वनिमित्ताक्लृप्तावस्थत्ववाचीति मत्वा स्व-
मतेनौपदेशिकाऽप्राकृतत्वेनाक्लृप्तावस्थत्वेनाव्यक्त' कर्त्ता शेषे भवि-
ष्यतीत्येवं व्याचिख्यासुः प्रधानद्वाराङ्गेषु कर्त्रन्वयानभ्युपगमो गुण-
मुख्यव्यतिक्रमन्यायानभ्युपगमेऽप्यदोष इत्याह * न चेति * । प्रधान-
द्वारत्वेनाप्यनभ्युपेतेन न किञ्चित् दुष्यतीति सूचनार्थश्चकारः। प्रधा-
नद्वाराङ्गेषु कर्त्रन्वयानभ्युपगमे कथं कण्टकवितोदनस्योद्गातृकर्तृकत्वं
सेत्स्यतीत्याशङ्क्य स्वसमाख्ययैव सिद्धिसूचनायाह * कण्टकेति * ।
स्वसमाख्याप्राप्तस्य कर्त्तुरव्यक्तत्वायोगमाशङ्क्य सामवेदोत्पन्ने कण्ट-
कवितोदने यजुर्वेदोत्पन्ने चोपवुटार्पणे प्रकृतावक्लृप्तकर्तृकत्वाच्छक्यं
कर्त्तुरव्यक्तत्वं वक्तुमित्याह * तदात्मना चेति * । प्रधानादङ्गेष्ववतर-
न्त्याः समाख्याया गुणमुख्यव्यतिक्रमाधिकरणे स्वसमाख्याबाधेनानुग्रा-
ह्यत्वस्योक्तत्वान्न स्वसमाख्यायाः कर्तृसिद्धिर्युक्तेत्याशङ्क्य ऋग्वेदादि-
समाख्यावदाध्वर्य्वादिसमाख्यायाः क्रियतेशब्दव्यपदेशानात्मकतया प्र-
योगवेदनिमित्तत्वाभावेनोत्पत्तिवेदनिमित्तत्वाविरोधादेकवेदोत्पन्नयोश्चा-
ङ्गप्रधानयोर्द्वयोरपि साक्षात्समाख्योपपत्ते' कण्टकवितोदनस्य साक्षात्प्रा-
प्तोद्गातृकर्तृकत्वेनाप्यौद्गात्रसमाख्यानुग्रहे प्रधानद्वारत्वाननुग्रहात्स्व-
रूपेणानुग्रहेऽपि चाङ्गान्तरेषु कृतार्थत्वेनाङ्गे स्वरूपतः प्राप्तप्रधानद्वारप्राप्त-

योरविरोधात्प्रधानद्वारता नावश्यमनुग्राह्येत्याह * नावश्यमिति * । व्याख्यातावयवार्थमुपसंहरति * तेनेति * ॥

इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजि-
भट्टोपाध्यायात्मजभट्टसोमेश्वरकृतौ तन्त्रवार्तिकटीकायां
सर्वानवद्यङ्करण्यां न्यायसुधाख्यायां
तृतीयस्याध्यायस्य
सप्तमः पादः ॥

॥ अथाष्टमः पादः ॥

परिक्रयस्य स्वामिकर्मत्वम् । अधि० १

स्वामिकर्म्मपरिक्रयः कर्म्मणस्तदर्थत्वात् ॥ १ ॥

तत्संयोगात्कर्म्मणो व्यवस्था स्यादित्यत्रोक्तस्य समाख्याया लि-
ङ्गाविरोधस्यापवादत्वेन प्रकरणसङ्गतिमाह * समाख्येति * । पूर्व- ११६०।२
विरोधे समाख्यायाः स्वकार्यविनियोगाशक्तत्वेनासत्तुल्यत्वादविरोधल-
क्षणार्था समाख्योक्तिः परेषामथाशीर्मन्त्राधिकरणान्तानामधिकरणानाम-
पवादत्वोक्त्यर्थोऽपिशब्दः । अन्यो वेत्यत्रोक्तस्य स्वामिनि परिक्रयविरो-
धस्य स्वामिकर्तृकत्वं विनानुपपत्तेस्तत्रैव परिक्रयस्य स्वामिकर्तृक-
तायाः सिद्धत्वात्तद्विरोधेन पूर्वपक्षायोगमाशङ्क्याह * सिद्धे त्वि-
ति * । अन्यकृते कर्म्मणि स्वयङ्कर्तृकत्वापादनार्थत्वात्परिक्रयस्य
च स्वयङ्कर्तृकत्वापादनाशक्तेः स्वामिनि कर्तृत्वापादनसामर्थ्यात्मकत्वेन
लिङ्गेन समाख्याया विरोधाशङ्कामन्यकृतेऽपि परिक्रये स्वामिन प्रयो-
क्तृत्वेन कर्तृत्वोपपत्तेः कर्म्मणि स्वयङ्कर्तृत्वापादनसामर्थ्योपपत्तिसूच-
नेन परिहरन् पूर्व्वपक्षमाह * तथे ति * । इतरपरिक्रयस्याध्वर्यु-
कर्तृकत्वेऽप्यध्वर्युपरिक्रयस्याध्वर्युकर्तृकत्वायोगात्स्वामिकर्तृकत्वापत्तिमा-
शङ्क्याध्वर्युपुरुषप्रतिप्रस्थातृकर्तृकत्वेनाप्याध्वर्यवसमाख्यानुग्रहसम्भ-
वेन स्वामिकर्तृकत्वायोगसूचनायादिशब्दः । प्रतिप्रस्थातुः परिक्रया-
शक्तौ तदनन्तरस्याध्वर्युपुरुषस्य नेष्टुरुन्नेतुर्वा परिक्रेतृत्वसूचनायादि-
शब्दः । प्रतिप्रस्थातुः परिक्रयाशक्तौ तदनन्तरस्याध्वर्युपुरुषार्थं बहु-
वचनम् । लिङ्गविरोधपरिहारं निरस्यन् सिद्धान्तमाह * इतीति * ।
स्वामिनः परिक्रयं विनियोजकं किं लिङ्गमित्यज्ञाते तद्विरोधोपपादनाश-
क्तेर्लिङ्गोक्त्यर्थकर्म्मण इति सूत्रावयवव्याख्यार्थं फलकामो हीत्या-
दिभाष्यं तावद्व्याचष्टे * परिक्रयेण हीति * । एतद्भाष्योक्तविरोधप-
रिहारशङ्कां तथा स्वामिनेति पूर्वपक्षवार्तिकोक्तां श्लोकस्यैतद्भाष्योक्तलि-
ङ्गविरोधोपपादनार्थत्वसूचनायानुभाषते * लौकिकेनेति * । एतच्छङ्का-
निरासार्थत्वेन श्लोकं व्याचष्टे * नेति * । सिद्धान्तमुपसंहरति * त-
स्मादिति * ।

वचनादितरेषां स्यात् ॥ २ ॥

परिक्रयात्मकवरदानस्यार्त्विजत्वदर्शनाल्लिङ्गेन परिक्रये स्वामिधि-
नियोगायोगमाशङ्क्य श्रुतिविरोधात्क्वचिल्लिङ्गबाधेऽपि न सर्वत्र बाधो
युक्त इति परिहारार्थं सूत्रमुपधानस्याध्वर्यवसमाख्याबाधेन याजमानत्व-
कल्पनया सामानाधिकरण्यश्रुत्युपपत्तेरत्रापि लिङ्गबाधायोगादयुक्तमा-
शङ्क्य याजमानत्वे दधातेर्ञित्वात्कर्त्रभिप्रायक्रियाफलवाच्यात्मनेपदा-
पत्तेः परस्मैपदश्रुतिविरोधाद्याजमानत्वकल्पनायोगमाह * उपदध्यादि-
ति * । वरदानेऽप्यन्यकृते स्वामिनो लौकिकोपायाश्रयणायोगात्प्रयोक्तृ-
११६१।१ त्वायोगमाशङ्क्याह * तत्सिद्धिश्चेति ॥

वपनादिसंस्काराणां याजमानत्वम् । अधि० २

संस्कारास्तु पुरुषसामर्थ्ये यथावेदं
कर्म्मवद् व्यवतिष्ठेरन् ॥ ३ ॥

परिक्रयवत्स्नानदन्तधावनयोर्लोकतः स्वयङ्कर्तृकत्वप्रसिद्धेर्वपननख-
निकृन्तनयोश्च निर्ज्ञातनापितकर्तृकत्वेन कर्त्रन्तरानाकाङ्क्षतया स्नानदन्त-
धावनकर्तृमात्रस्य विचार्यत्वात्तस्य च संस्कार्यकर्तृकत्वप्रसिद्धेः संस्का-
राणां च कार्यसामर्थ्याधानार्थत्वादध्वर्य्वोश्चानुष्ठानाख्यकार्यसामर्थ्यस्य
सिद्धत्वैव दक्षिणालाभात्मकफलप्रतिग्रहणाख्यकार्यसामर्थ्यस्य च क-
र्म्मकरत्वादेव सिद्धेः, संस्कारानर्थक्याद्दन्तधावनादिकर्तुरात्मनि संस्का-
रजननसामर्थ्यात्मकलिङ्गविरुद्धया समाख्यया यथावेदं संस्कारव्यवस्था-
नुपपत्तिशङ्कानिरासार्थत्वेन पुरुषसामर्थ्य इति सूत्रावयवं कर्तृणां पुरु-
षाणां स्रुगादिवदपूर्व्वसाधनत्वसामर्थ्ये जनयितव्ये तज्जननार्थं संस्का-
रापेक्षास्तीत्येवं व्याख्यातुमाह * कर्तृत्वमेवेति * ।

याजमानास्तु तत्प्रधानत्वात्
कर्म्मवत् ॥ ४ ॥

दन्तधावनादीनां लोकप्रसिद्धेरात्मनेपदाच्च कर्तृपुरुषगामिसंस्कारा-

ख्यफलसाधनत्वादित्येवं पुरुषप्रधानत्वोक्त्यर्थस्य क्रियत इति व्युत्पत्त्या कर्म्मशब्दोक्तस्य फलस्य भोगकरणत्वेन कर्म्मकरणमस्येति बहुव्रीह्यङ्गीकारेण कर्त्तु· फलप्रतिग्रहणे शक्तिं दन्तधावनादयो जनयन्तीत्येवमर्थं तस्मादिति भाष्यात् स्पष्टप्रतीतेस्तदुपपादनार्थं न चेत्याद्युत्तरभाष्यव्याख्यावसरार्थं प्रतिज्ञान्वयमात्रमाह *पुरुषेति* । दन्तधावनादीनां फलप्रतिग्रहणशक्तिजननार्थत्वेप्यन्त्यजनवदाध्वर्यवत्वोपपत्तिमाशङ्क्य फलप्रतिग्रहणाख्यकर्मकरणशक्तिजनकदन्तधावनाद्यर्थं लोकेन्यपरिक्रयादर्शनात्प्रधानभूतपदार्थे च परिक्रयार्थवत्वोपपत्तेः शक्तिजनकस्य दन्तधावनादेः स्वयमेव कार्यत्वेन कर्त्रन्तरानाकाङ्क्षत्वात्कर्तृकर्म्मरूपावयवार्थाभावनिश्चयेन रूढित्वात्समाख्याया विनियोजकत्वायोगोक्त्यर्थं न चेत्यादिभाष्यं व्याचष्टे * गुणभूते हीति * । परिक्रयस्य दन्तधावनाद्यर्थत्वाभावेप्यानर्थक्यानापत्त्युक्त्यर्थस्येप्सितेभ्य इति भाष्यावयवस्य गुणत्वे तस्य निर्देश इत्येतत्सूत्रमूलत्वसूचनार्था गुणभूतोक्तिः । दन्तधावनादीनां स्वयङ्कर्तृकत्वप्रसिद्धेः कर्त्रन्तरानाकाङ्क्षणेप्यध्वर्युसंस्कारार्थतैव समाख्ययास्त्वित्याशङ्क्य संस्काराणां फलप्रतिग्रहणशक्तिजननार्थत्वाद्यजमानस्यैव च तज्जननापेक्षत्वाद्भोक्तृंशपातित्वलक्षणेन लिङ्गेन तदर्थत्वनिश्चयान्न समाख्ययाध्वर्युसंस्कारार्थता शङ्कितु युक्तेत्याह * प्रधानत्वं चेति * । प्रधानमात्रस्य फलसाधनत्वेन भोक्तृत्वशक्तिजननार्थतया तत्सिद्ध्येन्यानपेक्षणाद्वपनादीनां कर्त्रंशपातावगतेर्लिङ्गविरोधाभावमाशङ्क्याह * न चेति * प्राप्तस्यापि भोग्यस्य भोक्तृत्वाशक्तौ लोके भोगादर्शनात्फलसाधनातिरिक्तभोक्तृत्वशक्तिजनकता चकारेण सूचिता । पूर्वपक्षसूत्रे दृष्टान्तितेभ्यः पुरुषसंस्कारव्यतिरिक्तेभ्योङ्गकर्म्मभ्यः पुरुषसंस्काराणां भोक्त्रंशपाताद्वैपम्यसूचनायैतत्सूत्रस्थं प्रधानकर्म्मदृष्टान्तं व्याचक्षाणः सूत्रार्थमुपसंहरति * तस्मादिति * । भोक्त्रंशपाताभावेप्यङ्गयागानामुत्सर्गरूपतयान्येन कर्त्तुमशक्यत्वात्स्वामिकर्तृकत्वोपलब्धेरुत्सर्गरूपत्वस्यैव स्वामिकर्तृकत्वे प्रयोजकत्वात् संस्काराणां चानुत्सर्गरूपतयान्येनापि कर्त्तुं शक्यत्वाल्लिङ्गाविरुद्धया समाख्ययाध्वर्यवत्वमाशङ्क्य दन्तधावनादीनां निर्ज्ञातकर्तृकत्वेन कर्त्रनाकाङ्क्षत्वात्कर्त्रर्यपेक्षित इति वार्त्तिकसूचितं सामाख्यानिकविनियोगायोगमाह * यथाप्राप्तेति * । वपननिष्पत्त्यर्थं स्वाङ्गावधानोपलक्षितप्रयत्नाख्यभावनाकर्तृत्वं प्रयोजकत्वोक्त्योक्तम् ॥

व्यपदेशाच्च ॥ ५ ॥

पुरुषसंस्कारार्थे पुरुषान्तरापरिक्रयात्कर्तृविशेषानाकाङ्क्षणेन समाख्ययाध्वर्युनियमानुपपत्तेर्वपनादीनामाध्वर्यवत्वाभावेभिहितेभ्यञ्जनाञ्जनयोरपि भोक्त्रंशपातितया स्वामिसंस्कारत्वेन कर्त्रन्तरानाकाङ्क्षणात्समाख्ययाध्वर्युनियमायोगमाशङ्क्य धावतिवपतिकृन्ततीनां स्वरितेत्वाद्दन्तधावनादीनां कर्त्रभिप्रायक्रियाफलवाच्यात्मनेपदाद्दन्तधावनस्य च लोकतोपि तत एव स्नानस्यापि स्वयङ्कर्तृत्वप्रसिद्धेर्वपननखनिकृन्तनयोश्च नापितकर्तृत्वनियमप्रसिद्धेः कर्त्रनाकाङ्क्षा युक्ता अनक्तेरनुदात्तेत्वात्परस्मैपदात्मनेपदाभ्यां कर्तृविशेषानवगमेपि तमभ्यनक्तीति परस्मैपदयुक्ते वाक्ये तमिति स्वामिपरामर्शितच्छब्दव्यपदेशात्तदानन्तर्याच्छरेशीकयानक्तीत्यत्राप्यनुषक्ततच्छब्दव्यपदेशावगतेः कर्त्रन्तरावगमे सति तद्विशेषाकाङ्क्षायां समाख्ययाध्वर्युनियमोपपत्त्युक्त्यर्थत्वेन व्यपदेशव्याख्यार्थं परस्मैपदेत्यादिभाष्यमञ्जनादीनां भोक्त्रंशपातित्वस्यैतदधिकरणव्युत्पाद्यत्वेनासिद्धेः स्वामिसंस्कारत्वे हेतुत्वायोगात्तद्वशेन तच्छब्दस्य स्वामिपरामर्शित्वावधारणानुपपत्तेस्तदवधारणकारणान्तरानुपलब्धेश्चाध्वर्युमन्योभ्यनक्तीत्यपि सम्भवादयुक्तमाशङ्क्य व्यापारद्वयविधिं विना विधिद्वयानर्थक्यापत्तेर्व्यापारद्वयावगमे सति भिन्नविषयत्वेनाविरोधात्समाख्ययाध्वर्युनियमोपपत्तावभ्यञ्जनस्याध्वर्युसंस्कारत्वं कल्पयित्वा कर्त्रन्तरकल्पनायोगात्परस्मैपदयुक्ते वाक्ये तमित्यभ्यङ्क्त्रभ्यञ्जनीययोर्भेदव्यपदेशात्तद्विहितेभ्यञ्जने लिङ्गाविरुद्धया समाख्ययाध्वर्युव्यापारत्वेनावगते वाक्यान्तरस्थोभ्यञ्जनविधिर्यजमानस्येति गम्यत इत्येवमाशयत्वेनोपपादयितुमाह * अध्वर्युव्यापारे चेति * । सूत्रमपि तमिति भेदव्यपदेशादभ्यङ्क्त आङ्क्त इति च विध्यन्तराद्व्यापारभेदावगमेनाविरोधादभ्यञ्जनाञ्जनयोः समाख्ययाध्वर्यवता युक्तेति वपनादिसाम्यशङ्कानिरासार्थत्वेन व्याख्येयम् ॥

गुणत्वे तस्य निर्देशः ॥ ६ ॥

आध्वर्यवमिति निर्देशात्प्तसमाख्यायाः पूर्वपक्षे वपनादिष्वध्वर्युनियमायोक्तः सङ्ग्वेषु पुरुषसंस्कारव्यतिरिक्तेषु कर्त्तृगुणत्वं तेष्वेव तस्य नियामक इत्येवं सूत्रव्याख्यार्थं यदित्यादिभाष्यं पूर्वपक्षोक्तदृष्टान्तानुभाषणं

विना तद्वैषम्योक्त्यशक्तेर्न्यूनं मत्वा दृष्टान्तपूरणपूर्वं व्याचष्टे * यस्त्वि- ११६२।२
ति * । कल्प्यो हीति भाष्यमुक्तव्यवस्थोपपादनार्थत्वेनावतारणपूर्वं
व्याचष्टे * तदिति * ।

चोदनां प्रति भावाच्च ॥ ७ ॥

स्वामिना कर्तृत्वसिद्ध्यै संस्कार्यत्वस्य तत्प्रधानत्वादित्यनेनोक्तस्योपपादनार्थत्वेनापूर्वमुद्दिश्य संस्काराणां विधानात्साक्षाच्चापूर्वं करणाशक्तेस्तत्साधने द्रव्ये कार्याणां सन्निकर्षविशेषात्स्वामिनि कार्यत्वावगमात्तत्प्रधानत्वमेवं ङिणजन्तात्कुर्वतेरच्प्रत्ययोत्पादाद्विधानवाचिभावशब्दाङ्गीकारेण पूर्वसूत्रकृतेन पूर्वपक्षहेतुनिरासेन बुद्धिस्थीकृतस्य सिद्धान्तहेतोश्चशब्देनानुकर्षणाङ्गीकारेण च सूत्रव्याख्यार्थं चोदनेत्यादिभाष्यं स्वामिनोऽपूर्वाश्रयत्वात्सन्निकर्षमुपपादयन् व्याचष्टे * प्रधानेति * । फलप्रतिग्रहणयोग्यतारूपां फलापूर्वाश्रयत्वयोग्यतां चोदनोक्त्या विवक्षित्वा स्वयंफलापूर्वाश्रयत्वयोग्यतोद्देशेन संस्कारविधानादित्येवं सूत्रं व्याचष्टे * तत्सिद्ध्यर्थत्वाच्चेति * । प्रधानापूर्वाश्रयत्वसिद्ध्यर्थत्वात्संस्काराणामित्यर्थः ।

अतुल्यत्वादसमानविधानाः स्युः ॥ ८ ॥

अविशेषेति भाष्यं पुरुषमात्रवाचिशब्दाभावादयुक्तमाशङ्क्य सन्निकर्षविशेषन्यायात्स्वामिनः समाख्यया चर्त्विजां संस्कारविध्यवगत्याशयत्वेन व्याचष्टे * अनेन चेति * । संस्कारत्वेवगते प्रकृतपुरुषपूरितं माधवेन (१) कर्तृकत्वावगतेर्वपनादीनां चात्मनेपदात्कर्तृगामिक्रियाफलावगमात्संस्कार्यत्वावगतिः संस्कार्यत्वावगते प्रतिप्रधानावृत्त्यादिदोषपरिहारात्संस्कारत्वावगतिरित्यन्योन्याश्रयापत्तेर्विरोधपरिहारायोगमाशङ्क्य वपनादेः संस्कार्यविशेषानवगमेपि 'क्रियास्वाभाव्यात्संस्कारत्वावगतेः संस्कार्यानेकत्वे सत्यावर्त्तनीयत्वावगमाद्विरोधपरिहारमुपपादयितुमाह * न चेति * एतच्छङ्कोत्तरत्वेन सूत्रव्याख्यार्थं तदित्यादिभाष्यं व्याचष्टे * इतीति * । सप्तम्या भाष्यस्थस्तच्छब्दः सप्तम्यन्ताव्ययत्वेन व्याख्यातः ॥

तपसो याजमानत्वम् अधि० ३

तपश्च फलसिद्धित्वाल्लोकवत् ॥ ९ ॥

तपसोपि क्रतुफलप्रतिबन्धकदुःखफलपापनाशकत्वेन फलप्रतिग्रहण-
योग्यताधानार्थत्वाच्छङ्काधिक्याभावेनातिदेशायोगमाशङ्क्य पापनाशा-
र्थत्वे प्रमाणाभावाद्दुःखकरत्वेन च कर्तृप्रातिकूल्यत्वात्कर्त्रनुग्राहकत्वा-
योगेनाधिकाशङ्कां दर्शयन् सूत्रतात्पर्यमाह * तपस इति * । कथं
निवर्त्तयतीत्यपेक्षायामाह * यस्मादिति * । सोऽयाः फलोक्तेः फ-
लप्रतिग्रहणयोग्यत्वलक्षणार्थत्वसूचनार्थत्वेन भाष्यस्थां सिद्धोक्तिं व्या-
ख्यातुं फलेत्युक्तम् । करोतीत्यनेन फलस्य सिद्धिरस्मादिति बहुव्री-
ह्यर्थोक्त्यर्थत्वेन फलसिद्ध्यर्थोक्तिर्व्याख्याता । दुःखकरत्वेन प्रतिकू-
लत्वाद्योग्यताधानार्थत्वायोगं पूर्वपक्षोक्तं परिहरन्दुःखं हीत्यादिभाष्यो-
११६३।१ क्तं योग्यताधानप्रकारं विवृणोति * योग्यता चेति * । सोयमित्यने-
नाकाङ्क्षायाः सूत्रेत्यनेन च सन्निधानस्योक्त्या साकाङ्क्षफलवत्स-
न्निधानाख्यात्प्रकरणात्सामान्यसम्बन्धेभिहिते योग्यत्वाख्याल्लिङ्गात्तपसः
पापनाशाख्यद्वारविशेषान्वयः सेत्स्यतीति तत्रापेक्षेत्यनेनोक्तयोग्यत्व-
विवरणार्थं शक्यं हीत्युक्तम् । लोकवदिति दृष्टान्तं स्पष्टत्वाद्भाष्यकृतोपे-
क्षितं क्रतुफलप्रतिबन्धकस्य महतः पापस्य द्व्यहत्र्यहोपवासजन्येनाल्पेन
दुःखेन नाशायोगशङ्कानिरासार्थत्वेन व्याख्यातुमाह * यथैव चेति *
स्मार्तस्यापि पौरुषेयत्वाल्लौकिकत्वोक्त्यविरोधः । वानप्रस्थादितपसोपि
तर्हि पापनाशार्थत्वात्स्वर्गाद्यर्थत्वायोगापत्तेः'स्तपसा ये अनाधृष्यास्तप-
सा ये स्वर्यं ययु'रित्यादि दर्शनं विरुद्ध्येतेत्याशङ्क्याह * यानि त्विति * ।
द्व्यहोपवासादीनां प्रायश्चित्तवत्पापनाशकत्वेपि तद्वदेव फलप्रतिग्रहण-
योग्यताधायकत्वेन स्यादित्याशङ्क्य फलप्रतिग्रहणयोग्यताधानायैव
पापनाशस्य द्वारमात्रत्वेनाभ्युपगमाद्वैषम्यं सूचयितुमाह * यानि तु
प्रायश्चित्तेति * ।

वाक्यशेषश्च तद्वत् ॥ १० ॥

सूत्रं व्याचष्टे * मेधार्हत्वेति * ॥

वचनादितरेषां स्यात् ॥ ११ ॥

तपसोप्यार्त्विज्यत्वदर्शनात्प्रतिग्रहणयोग्यताधानसामर्थ्यात्मकलिङ्गाभा-

थेन स्वामिनस्तपसि लैङ्गिकविनियोगायोगात्तदविरुद्धया समाख्ययाध्वर्युर्विनियोक्ष्यत इत्याशङ्क्य बहुवचनश्रुतिविरोधात्तत्र लिङ्गबाधेपि न सर्वत्र बाधो युक्त इत्येवमर्थत्वं सूत्रस्य सूचयितुमाह * वरेति * ।

लोहितोष्णीषतादीनां सर्वर्त्विग्धर्मत्वम् । अधि० ४ ।

गुणत्वाच्च वेदेन व्यवस्था स्यात् ॥ १२ ॥

एवं चेत्यादिभाष्येणाधिकरणान्तरत्वेन सूत्रव्याख्यायाः कृतायाः
पूर्वाधिकरणशेषत्वेन सूत्रव्याख्यानापरितोषं निमित्तमाह * गुणत्व ११६
इति * । लोहितोष्णीषादीनामपि वपनादिवज्जञ्जभ्यमानाधिकरणन्यायेन संस्कारत्वावगमाद्याजमानत्वेनार्त्विजत्वायोगात्पूर्वसिद्धान्तपक्षयोर्द्वयोरप्यनुपपत्तेः सन्देहायोगं लिङ्गसमाख्याविरोधचिन्ताप्रस्तावे च वाक्यसमाख्याविरोधाविरोधविचारासङ्गतिमाशङ्क्यर्त्विज उपवसन्तीत्यस्मिन्नेवोदाहरणे बहुवचनश्रुत्यैकयजमानके ज्योतिष्टोमादौ याजमानत्वपक्षे उपपद्यमानया लिङ्गगम्ययाजमानत्वबाधेनार्त्विजत्वेभिहिते प्रासङ्गिकीमध्वर्युमात्रकर्तृत्वेप्यृत्विक्कर्तृत्वानपायाद्वाक्येनाध्वर्युपुरुषमात्रविनियोजकत्वाद्वा समाख्याया बहुवचनश्रुत्याप्यविरोधः स्वरसावगतसर्वार्त्विक्कर्तृकत्वभङ्गापत्तेर्वा विरोध इति चिन्तायाः सङ्गतिं संस्कारत्वेपिच फलप्रतिग्रहणयोग्यताख्यलिङ्गावगतयाजमानत्वबाधेनैकयजमानकर्तृकत्वेनुपपद्यमानया बहुवचनश्रुत्यार्त्विजत्वावगमात्सन्देहोपपत्तिं सूचयितुमाह * य इति * । लोहितोष्णीषादिष्वप्युपवासन्यायत्समाख्यानियामकत्वायोगसिद्धिसूचनार्थं तदुदाहरणं न तु तदेवाहत्यमिति सूचनार्थो यच्छब्दः पूर्वपक्षमाह * लोहितोष्णीषादीयो हीति * । यस्मात्संस्कारत्वेपि यावतीमावृत्तिं विना वाक्यानुपपत्तिस्ततोधिकाश्रुतावृत्तिकल्पनायोगाद्व्यवस्थापेक्षायां समाख्यया व्यवस्था सम्भवति तस्माच्चिन्ता युक्तेति हिशब्दार्थः । गुणत्वे तस्य निर्देश इत्यत्र कर्तॄन् प्रति प्रधानभूतानां क्रियाणां समाख्याविषयत्वोक्तेः संस्काराणां गुणत्वेनातद्विषयत्वावगमात्तन्निरपेक्षाद्वाक्यात्सर्वर्त्विजां संस्कार्यत्वावगतेर्नौद्गात्रादिवत्समाख्यया व्यवस्था स्यादित्येवं सूत्रेण सिद्धान्तमाह । * इतीति * । श्लोकं व्याचष्टे । * ऋत्विगिति * । सर्वेषामित्यनेन समाख्यानपेक्षा सौत्रचशब्दसूचितोक्ता तस्माच्छब्देन चशब्दसूच्यार्थं परामृष्टा ॥

वृष्टिकामनाया याजमानता । अधि० ५

तथा कामोऽर्थसंयोगात् ॥ १३ ॥

सूत्रानुक्तगुणकामविशेषोदाहरणाशयोक्तिपूर्वं सङ्क्षेपतोधिकरणा-
र्थमाह * प्रधानेति * । शास्त्रफलं प्रयोक्तरीति न्यायान्तरात्प्रधानकाम-
स्य त्वप्रधानत्वशङ्कानिवृत्त्यर्थमभ्युच्चयार्थत्वेन व्याचष्टे * तथा चेति * ।
यः कामयेत स मिनुयादिति समाख्यानान्मातृत्वेन निश्चितस्याध्वर्योः
कामिना सह सामानाधिकरण्येनैकवाक्यत्वात्कामोप्याध्वर्यव इति पूर्व-
पक्षहेतोरथेति भाष्यानुभाषितस्य यदि कामयेत स्वामी ततोध्वर्युर्ना-
चैर्मिनुयादिति वैयधिकरण्येनाप्येकवाक्यत्वसम्भवोक्तया निरासार्थमु-
च्यत इति भाष्यं स्वरसावगतसामानाधिकरण्यापह्नवायोगादयुक्त-
माशङ्क्य परस्मैपदश्रुत्या वाक्यीयसामानाधिकरण्यबाधेनोपपादयितु-
माह * अनया चेति * । स्वामिनि कामयमाने यद्यध्वर्युः कामयेतेत्य
ध्याहारेणापि सामानाधिकरण्येनैकवाक्यत्वसम्भवोक्त्यर्थत्वेनैतदेव भा-
ष्यमन्यथा व्याख्यातुमाह * तद्वशेन वेति * । परस्मैपदश्रुतिवशेन
स्वामिकामानुमार्यध्वर्युकामापेक्षया सामानाधिकरण्याविरोध इत्यर्थः ।
कामे तपोन्यायसाम्याभावात्तथाशब्दायोगमाशङ्क्यात्यन्तसाम्याभावेपि
सदोमानाश्रितस्य नीचैस्त्वस्य फलसाधनत्वात्सदोमानस्य च
समाख्ययाध्वर्यवत्वेन तत्सामानाधिकरण्यनिर्देशात्कामस्याप्याध्वर्यव-
त्वप्रतीते कामिनश्च स्वयम्फलसाधनावच्छिन्नभावनाकारित्वस्य शास्त्र-
फलं प्रयोक्तरीत्यत्रोक्तत्वात्सदोमानाश्रितगुणावच्छिन्नाया भावनायाः
फलसिद्ध्यर्थत्वेप्याध्वर्यवत्वोपपत्तेस्तपोवैषम्यं प्राप्तं निराकर्तुं सदोमा-
नस्याध्वर्यवत्वेपि तदाश्रितगुणावच्छिन्नाया भावनायः स्वाम्युपकारार्थं-
सदोमानाश्रितत्वसामर्थ्याख्यालिङ्गात्स्वाम्युपकारार्थत्वावगतेस्तस्यैव का-
मित्वावगमात्समाख्यायाश्च प्रधानभूतकर्तृनियामकत्वायोगान्न भावनाका
११६५।२ री नियस्यत इत्येतावदतिदिश्यत इत्याह * तथाशब्देन चेति * । अ-
धिकारिचिन्तायाश्चैतल्लक्षणासङ्गतेः समाख्यायाश्च प्रधानभूताधि-
कारिनियामकत्वायोगात्कामद्वारा तत्साधनीभूतगुणावच्छिन्ना भावनैवा-
त्राध्वर्यवी याजमानी वेति चिन्ता द्रष्टव्या ।

व्यपदेशादितरेषां स्यात् ॥ १४ ॥

इहाप्यात्मन इति चतुर्थीश्रुत्यैव लिङ्गबाधाद्वचनादित्येव कस्माज्जो-

त्कमित्याशङ्कयात्मशब्दस्य ममाग्ने वर्च्च इतिवद्व्यतिरिक्तयजमानापदेशाख्यव्यपदेशाभावात्स्वामिनाप्युपचारेणोपपत्तेर्वाशब्दोपादानाख्यव्यपदेशाभावे वात्मोपकारिणे यजमानायेत्यर्थापत्तेर्विस्पष्टश्रुत्यभावाद् व्युत्पत्त्यर्थनिर्णयार्थत्वेन व्यपदेशोक्तिमुपपादयति * अन्यत्रेति * । सूत्रं व्याचष्टे * वाशब्देति * ॥

आयुर्दादिमन्त्रपाठस्य याजमानत्वम् । अधि० ६

मन्त्राश्चाकर्म्मकरणास्तद्वत् ॥ १५ ॥

आशीर्मन्त्राणामपि फलप्रार्थनसामर्थ्यात्मकाल्लिङ्गात्कामवद्याजमानत्वसिद्धेः शङ्काधिक्याभावेनातिदेशानर्थक्यशङ्कां निरस्यन्नधिकरणार्थमाह * अकर्म्मसंयुक्ता इति * ।

विप्रयोगे च दर्शनात् ॥ १६ ॥

अग्नीनां विप्रयोगे दृष्टस्य मन्त्रस्योपस्थानार्थत्वेन फलाशासनार्थत्वाभावादाशीर्मन्त्राणां याजमानत्वे लिङ्गत्वायोगमाशङ्कय तिग्मासं तं मा प्रहासीरित्यप्रहाणाख्यफलाशासनप्रकाशकत्वेनास्याप्याशीर्मन्त्रत्वाल्लिङ्गत्वमुपपादयन् सूत्रं व्याचष्टे * आशीर्मन्त्रं चेति * ॥

द्व्याम्नातस्योभयप्रयोज्यत्वम् । अधि० ७

द्व्याम्नातेषूभौ द्व्याम्नानस्यार्थवत्त्वात् ॥ १७ ॥

आज्यग्रहणस्रुग्व्यूहनमन्त्राणां सामान्यरूपेणाध्वर्यवसमाख्याते विशेषरूपेण च याजमानसमाख्याते काण्डे पाठाद्विशेषसमाख्यया सामान्यसमाख्याबाधाद्याजमानत्वैव यौगिकत्वाविशेषाद्वा सामान्यसमाख्याया अपि विशेषविषयतया कक्षान्तरितत्वाभावेन तुल्यबलत्वाद्विकल्प इत्यपि पक्षद्वयसम्भवाद्भाष्यकारीयस्य द्वेधा सन्देहस्योपलक्षणमात्रार्थत्वं मत्वा स्वयं चतुर्द्धा सन्देहमाह * आज्येति * । स्वाम्येवाध्वर्युरेव वेति पक्षद्वयोक्तयर्थान्यतरोक्तिः । आयुर्म्मे दृंहीत्यात्माभिवादिपदसामर्थ्याख्येन लिङ्गेनाध्वर्यवसमाख्याबाधवदिहाप्यध्वर्युकर्तृकग्रहणव्यूहनमन्त्रस्थेन गृह्णामीत्यनेन म इत्यनेन वात्माभिवादिपदसामर्थ्याख्येन लिङ्गेनाध्वर्युप्रयोज्यत्वावगतेर्याजमानसमाख्याबाधाद्वाध्वर्यवसमाख्यायाश्चानुग्रहादध्वर्युनि- ११६६।६

यमपूर्व्वपक्षस्यैव ज्यायस्त्वसूचनार्थं द्विविधपूर्वपक्षोक्तिमात्रपूर्वं सिद्धा-
न्तमाह * तत्रेति * स्वामिनोऽपि प्रयोजककर्तृत्वात्तत्प्रयोज्यत्वेऽप्यात्मा-
भिधायिपदसामर्थ्याविरोधं मत्वा विकल्पपक्षोऽप्युक्तः । स्वामिनियमपू-
र्वपक्षं शङ्कते * ननु चेति * । द्विः पाठार्थवत्त्वान्यथानुपपत्त्या द्विःप्रयो-
गावगमाद्भिन्नविषयत्वेनाविरोधोपपत्तेः सामान्यसमाख्याया अपि बा-
धायोगोक्त्या निरस्यति * तत्रेति * । सिद्धान्तमुपसंहरति * तस्मा-
२१६७।१ दिति * । अध्वर्युनियमवादी स्वाशयं शङ्कते * न त्विति * सिद्धान्ती
निरस्यति * उच्यत इति * । मन्त्रकार्यग्रहणव्यूहनानुष्ठानाभावे मन्त्र-
प्रयोगानर्थक्यं शङ्कते * किं पुनरिति * । पदार्थाननुष्ठानेऽपि पदार्थस्मृतिं
विना प्रत्यवेक्षणाख्यकार्यस्यानुष्ठानाशक्तेस्तत्स्मृत्यर्थत्वेनार्थवत्तामाह
* उच्यत इति * । पदार्थान्तरेषु प्रत्यवेक्षणस्यामन्त्रकत्वदर्शनादिहापि
मन्त्रानाकाङ्क्षामाशङ्क्याह * तद्यत्रेति * ।

ज्ञातस्यैव वाचयितव्यत्वम् । अधि० ९

ज्ञाते च वाचनं न ह्यविद्वान्विहितोऽस्ति ॥ १८ ॥

द्विराम्नातानामुभयप्रयोज्यत्वोक्त्या सकृदाम्नातेष्वपि क्लृप्त्यादि
मन्त्रेषु वाचनश्रुतिसामर्थ्यादुभयप्रयोज्यत्वावगतेर्बुद्धिस्थेषु प्रसङ्गादनन्तरं
तद्विशेषचिन्तासङ्गतेर्यजमानस्य चोद्देश्यत्वेन ज्ञातृत्वविशेषणायोगेऽपि
वाजपेयेनाज्ञोऽधिक्रियते ज्ञो वेति चिन्तायाश्च लक्षणासङ्गतत्वेऽपि वाचन-
समाख्याया लोकेऽध्यापनाख्यशिक्षणवाचित्वप्रसिद्धेस्तदनुसारादयं वा-
चयतिः शिक्षणार्थो यज्ञस्यैवाधिकारात्तस्य च शिक्षणनर्हत्वेन तद्विष-
यत्वसामर्थ्याख्याल्लिङ्गादुच्चारणसमर्थस्मरणावतारणाख्यप्रयुक्त्यर्थं इति
यजमानाङ्गभूतवाचनस्वरूपचिन्ताफलत्वाल्लक्षणप्रकरणसङ्गत्योः स्पष्ट-
त्वाद्वाचयतियुक्तवाक्यमात्रस्योदाहरणत्वोक्तिपूर्व्वं क्लृप्ता ब्रूहीत्युच्चारण-
लक्षणायाः कृत्स्नमन्त्रप्रागुच्चारणात्मिकाया वा प्रयुक्तेरज्ञं प्रत्यशक्यत्वा-
त्पूर्वपक्षी योगमाशङ्क्य शिक्षणार्थवाचयत्याशयेनोपपादयन् पूर्वपक्षमाह
* यत्रेति * । भाष्यकारीयोदाहरणस्योपलक्षणार्थत्वसूचनार्थो यत्र-
शब्दः स्वण्डश इत्यनेन वाचयतेः शिक्षणार्थता सूचिता । स्वयमज्ञानिय-
मेन पूर्व्वपक्षान्तरमाह । * अथ वेति * । सिद्धान्तमाह * इतीति * ।
ज्ञाते च वाचनमिति प्राक्कथितसूत्रावयवान्वयेन प्रतिज्ञा पूरणीया । कुत
इत्यादिभाष्येण हेतुप्रश्नपूर्वशक्त्यभावेनाविदुषः कर्म्मकर्तृत्वेनाविधाना-
ख्यापशूद्राधिकरणवक्ष्यमाणहेतूक्त्यर्थतया न हीति सूत्रावयवं व्याख्याय

द्विजातीनां शूद्रवच्छिक्षणानर्हत्वाभावात्प्रयोगकालशिक्षणेन शक्तिसम्भवं नन्विति भाष्येणाशङ्क्य निराकर्त्तुं सिद्धाध्ययनपुरुषाधिकारत्वात्प्रयोगश्रुतीनामध्ययनानाक्षेपकत्वस्य द्वितीयाधानाधिकरणोक्तस्य नतीति भाष्यस्माारितस्याप्यावृत्तनहीतिसूत्रावयवारूढत्वसूचनार्थं तत्पाठः । पूर्वं व्यतिरेकमुखेनोपपत्तिमाह * न हीति * । प्रश्नपूर्वं कामश्रुत्यनाक्षेपोपपादनार्थं कुत इत्यादिभाष्यं व्याख्यातुमाह * तत्रेति * । स्वाध्यायविधिविहितस्य शिक्षणस्य कर्मभिरनाक्षेपेपि वाचनविधिविहितस्य कलृप्त्यादिमन्त्रशिक्षणस्य प्राकरणिकत्वेनाक्षेपो भविष्यतीत्याशङ्क्य विशिष्टानुपूर्वीकस्याक्षरराशेर्वेदत्वेन कलृप्त्यादिमन्त्रमात्रस्य शिक्षितस्य वेदत्वाभावाद्वेदात्मकानामेव च मन्त्राणां स्वाध्यायविधिसामर्थ्यात्कर्माङ्गत्वावगतेर्निराकर्त्तुमाह * न चेति * । विदुषः स्वयमेव वचनं प्रवृत्तेरविदुषस्तु प्रयुक्तस्यापि प्रवृत्त्यशक्तेः प्रयोजकव्यापारवैयर्थ्यप्रसङ्गाद्वाचयतेस्तदर्थत्वायोगेन शिक्षणार्थत्वावसायाद्विद्वद्विषयत्वं द्वितीयपूर्वपक्षवार्तिकोक्तं निराकर्त्तुमाह * शक्यते च तत्रापीति * । स्मृत्यर्थत्वं दृष्टान्तसूचितुमपपादयितुमप्रयुक्तोऽस्मरणान्न ब्रूयादित्युक्तम् । प्रैषवत्स्मारकत्वरूपस्य प्रयोजकत्वस्य वाचयत्यर्थत्वे ब्रूहीत्युच्चारणमात्रात्प्रतीकसमर्पणमात्राद्वा स्मृतिसिद्धेर्याज्ञिकप्रकृत्स्नोच्चारणानर्थक्यप्रसङ्गात्तत्सार्थकतायै शिक्षणार्थत्वापत्तिमाशङ्क्य तत्प्रैषसदृशं स्मारकत्वरूपं प्रयोजकत्वं प्रतीकांशसमर्पणं ब्रूहीत्युच्चारणं चेति द्वेधा यद्यपि भवति तथापि कलृप्तीरिति व्याप्यत्ववाचिन्या द्वितीयया कृत्स्नशः स्मृतिव्याप्यत्वावगतेः कृत्स्नोच्चारणं च विना कार्त्स्न्येन व्याप्त्यशक्तेर्याज्ञिकेष्ट कृत्स्नमन्त्रोच्चारणानुष्ठानं युक्तमित्याह * तच्चेति * । वाशब्दोऽपिशब्दार्थे । अशिक्षणार्थत्वेन स्तोकशः समर्पणानर्थक्यात्प्रतीकार्था खण्डोक्तिः । कियता पुनरित्यादिप्रश्नोत्तरभाष्यं प्रकृतानुपयोगादयुक्तमाशङ्क्याविदुषोनधिकारे

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥

इति स्मृतेर्वैशेषिकैश्चाथातो धर्मं व्याख्यास्याम इति स्वशास्त्रस्य धर्मव्याख्यार्थत्वोक्त्या स्वशास्त्राधीनधर्माधिकारोक्त्यापत्तेश्चतुर्दशविद्यास्थानाभ्यासेनैवायुःपर्यवसानप्रसङ्गाद्धर्मानुष्ठानापत्तिशङ्कां निराकर्त्तुं तदनपेक्षाधिकारनिरूपणार्थं पृच्छतीत्याह *कियता पुनरिति* । वैशेषिकादिशास्त्रस्य धर्मानुष्ठानानुपयोगेनानपेक्षाया ज्ञातुं शक्यत्वा-

न्निरूपणानर्थक्यशङ्कानिरासार्था स्पष्टोक्तिः । वेदोऽपि कृत्स्नो नापे-
क्ष्यते किमुत वैशेषिकादिशास्त्रमित्येवमुत्तरोक्त्यर्थं यावतेति भाष्यं व्या
११६८।२ चष्टे ॥ तत्रेति ॥ । स्वाध्यायविधिवशात्कृत्स्नवेदाध्ययनस्याधिकारो-
पयोगावगतिं नन्विति भाष्येणाशङ्क्यादृष्टार्थत्वापत्त्या निरासार्थमुच्य-
त इत्यादिभाष्यं व्याचष्टे ॥ यद्यपीति ॥ । कृत्स्नानुपयोगे कृत्स्नाध्य-
यनानर्थक्यशङ्कानिरासार्थस्य सर्व इति भाष्यस्याशयमाह ॥यत्त्विति॥।
त्रिविधानां मध्ये काम्यनैमित्तिकानां यथास्वस्वकालत्वादित्यावृत्त्या
योज्यम् । एवञ्च सति यथा कृत्स्नाध्ययनोपपत्तिस्तथा दर्शयति ॥ तत्रे-
ति ॥ । न केवलं वैगुण्यापत्तेः कर्मकालध्यापनायोगः किन्तु कर्म-
विध्यप्रयुक्तत्वादपीत्याह ॥ कामेति ॥ । उपयोगिमात्रात्तर्ह्यधि-
कारोक्तिरनर्थिकेत्याशङ्क्याह ॥ यदि त्विति ॥ । व्याख्यातप्रश्ना-
शयानतिक्रमादिदमुत्तरमयुक्तमाशङ्क्यातिशयोक्त्यर्थत्वेनोपपादयितु-
माह ॥ एवञ्च सतीति ॥ । शरीरादिव्यतिरिक्तात्मप्रतिपादकवाक्या-
नां तर्हि कर्मज्ञानानुपयोगात्सगुणोपासनवाक्यवच्चाभ्युदयफलत्वाभावा-
न्निर्गुणोपासनवाक्यवच्चापवर्गफलत्वाभावादनर्थकमध्ययनं स्यादित्या-
शङ्क्याह । ॥ यत्त्विति ॥ ॥

द्वादशानां द्वन्द्वानामाध्वर्यवत्वम् । अधि० ९

याजमाने समाख्यानात्कर्मणि याजमानं स्युः ॥ ९ ॥

उखावसर्जनाधिश्रयणावघातसमाघाताधिवापोपधानाधिश्रयणहर-णाभिग्रहणपरिग्रहणमन्त्रहनासादनाख्यानां द्वादशानां कर्मणामाध्वर्यव-समाख्याते काण्डे प्रत्येकं याजमानसमाख्याते च द्वन्द्वत्वेन पाठाद् द्वया-म्नातमन्त्रवदुभयप्रयोज्यत्वापत्तेः पूर्वसिद्धान्तपक्षयोर्द्वयोरप्यसम्भवशङ्कानिरासपूर्वं पूर्वपक्षमाह ॥ उखेति ॥ । गार्हपत्यसमीपस्थस्य वत्सो-पावसर्जनार्थं गोसमीपं गत्वा पुनरुखाधिश्रयणार्थं गार्हपत्यसमीपगमने विक्षेपापत्तेः पश्चात्पठितस्याप्यधिश्रयणस्य प्रागनुष्ठानसूचनायादितोक्ता पठितोक्त्या सूत्रे पाठहेतुकात्समाख्यानादित्यध्याहारः सूचितः । श्रुति-स्थाया द्वन्द्वोक्तेर्द्वन्द्वभूतानि द्वादश कर्माणीत्येवं कर्मविशेषणत्वेन व्या-प्यत्वलक्षणप्राधान्यसूचनार्थं कर्म द्वन्द्वानामिति कर्मधारयपरत्वान्निपा-तितस्यापि द्वन्द्वशब्दस्य विशेषणत्वेनैव विवक्षिततया कर्मप्राधान्यानप-

गमात्कर्मणां द्वादशत्वविशेष्यतया तत्सापेक्षाणामपि द्वन्द्वशब्देन सह कर्मधारयसमासाविघातः । उभयप्रयोज्यमन्त्रचिन्तानन्तरमुभयप्रयोज्यत्वहेतुद्वयास्नानसद्भावेपि कर्मणां छिन्नष्ठानानास्नानादनुभयप्रयोज्यानां बहिःस्थत्वात्प्रासङ्गिकसङ्गतिसूचनार्थो दृष्टान्तः सूत्रे स्युरिति क्रियाविशेषणत्वाद्याजमानान्येकवचनान्तत्वाविरोधः ।

अध्वर्युर्वा तदर्थो हि न्यायपूर्वं समाख्यानम् ॥ २० ॥

अध्वर्युर्वेति भाष्येणाध्वर्युः कर्माण्येतानि कुर्यादाध्वर्यवसमाख्यानादेतत्कर्मार्थत्वावगतेरित्येवं द्वितीयान्तविपरिणतकर्मशब्दानुषङ्गकुर्याच्छब्दाध्याहाराभ्यां सूत्रपूर्वार्द्धे व्याख्याते काण्डद्वये पठितानां कथमाध्वर्यवसमाख्या साधारणीत्याशङ्कानिरासार्थमाध्वर्यव एवेति भाष्यं व्याचष्टे * अनुत्पन्नानामिति * । गुणार्थमपि श्रुतानां याजमानसमा- ११६९।९
ख्योपपत्तिमाशङ्क्य कर्त्राकाङ्क्षायां सत्यां समाख्यायास्तन्नियामकत्वात्कार्यत्वावगत्याख्योत्पत्तिकाल एव च कर्त्राकाङ्क्षणात्समाख्ययाध्वर्युकर्तृकत्वेवगतं द्वन्द्वास्नानकालेनाकाङ्क्षितं कर्तारं सत्यपि समाख्या न नियच्छतीत्याह * तत्र चेति * । तदर्थो ह्यध्वर्युः परिक्रीत इति भाष्ये परिक्रयतादर्थ्योक्तेः कर्त्राकाङ्क्षासूचनार्थत्वोक्तये तदर्थश्चेत्युक्तम् । पदार्थस्वरूपाणामध्वर्युकर्तृकत्वेपि समभ्याशाक्रियाख्याया द्वन्द्वताया यजमानकर्तृकत्वशङ्कानिरासार्थं तत्रेति भाष्यं व्याचष्टे * तत्रेति * । समभ्याशीकरण क्रियाख्यार्था समासन्नकरणोक्तिः । तत्राङ्गगुणेति भाष्यं द्वन्द्वतानुरोधेन स्वरूपस्यापि यजमानकर्तृकत्वशङ्कोत्तरत्वेन व्याख्यातुमाह * न च समासन्नेति * । यत्समाख्यानं यजमानकर्तृकत्वायोक्तं तदध्वर्युस्मारणे समाख्याया यजमाननियामकत्वान्न्यायावगताध्वर्युकर्तृकत्वानुसारीत्येवंसूत्रोत्तरार्द्धव्याख्यार्थे यदित्यादिभाष्ये सम्पादयितव्योक्तिः सम्पादयेति ब्रूयादित्यनेन तदाचष्टे इत्यस्मिन्नर्थे णिचमङ्गीकृत्य सम्पाद्यत्वेन स्मारयितव्येत्येवं व्याख्यातेति सूचयितुमाह * यजमानस्त्विति * ॥

अपूर्वत्वेऽपकृष्येत ॥ २१ ॥

यत्र न्यायावगताध्वर्युकर्तृकत्वपूर्वं पात्नीयादिसमाख्यानं भवति तथा

ध्वर्युरपकृष्यतेतत्यवमर्थत्वेन स्पष्टत्वान्नेदं सूत्रं व्याख्यातम् ॥

होतुराध्वर्यवकरणमन्त्रानुष्ठातृत्वम् । अधि० १०

विप्रतिषेधे करणः समवायविशेषा-
दितरमन्यस्तेषां यतो विशेषः स्यात् ॥ २२ ॥

एकस्मिन् पादार्थे द्वयोः कर्त्रोः प्राप्तयोर्विरोधे को ग्राह्य इति चिन्तिते
तद्विपरीत्येनैकस्य कर्तुर्द्वयोर्मन्त्रयोः प्राप्तयोर्विरोधे बुद्धिस्थे को ग्राह्य
इति चिन्तायाःप्रासङ्गिकीं सङ्गतिं स्पष्टत्वादनुक्त्वा 'परिवीरसि परित्वा दे-
वीर्विशो व्ययन्तां परीमं रायस्पोषो यजमानं मनुष्या' इति करणमन्त्रस्य
'युवा सुवासाः परिवीत आगात्स उ श्रेयान् भवति जायमानः। तं धीरा-
सः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त' इति क्रियमाणानुवादिनश्च
कुण्डपायिनामयने यो होता सोध्वर्युः स पोता य उद्गाता स नेष्टा सो-
च्छावाको यो मैत्रावरुणः स ब्रह्मा स प्रतिहर्त्ता यः प्रस्तोता स ब्राह्म-
णाच्छंसी स ग्रावस्तुद्यः प्रतिप्रस्थाता सोग्नीत्स उन्नेता गृहपतिः सु-
ब्रह्मण्यः सुब्रह्मण्य इत्यृत्विक्समासाम्नानादेकप्रयोज्यपक्षेपि करणस्य
परिव्याणप्राचीनत्वादितरस्य तु परिव्याणासमकालत्वादविरोधोपपत्तेः
सन्देहविषयत्वोपपादनार्थंविप्रतिषेधशब्दोक्तविरोधोपपादनार्थं कः पुन-
रिति भाष्यमयुक्तमाशङ्क्योपपादयन् सन्देहमाह* परिवीरिति *। सत्रे-
वरणाभावेन होत्रादिशब्दानां कर्ममात्रनिमित्तत्वादिह चानेककर्मकारि-
त्वाद्धोतुरसिद्धत्वेनाध्वर्यवकर्तृतया विध्ययोगेन हौत्राध्वर्यवयोरेककर्तृ-
कत्वविध्यवगतेरविशेषादनियमेन भाष्योक्तं तावत्पूर्वपक्षमाह * तत्रे-
ति*। यच्छब्दतच्छब्दाभ्यां होतारमुद्दिश्याध्वर्यवविध्यवगतेः स्वयं पूर्वप-
क्षान्तरमाह । *यद्वेति* । हौत्रस्य होत्रनङ्गस्यापि होतृशब्दार्थाविशेषण-
११७०।२ त्वाद्धर्मतोक्तिः । सूत्रेण सिद्धान्तमाह *इतीति* । वृत्त्यन्तरकृतसमवा-
यविशेषव्याख्यात्यागेन भाष्यकृतोन्यथाव्याख्या हेतूक्तेये तां दूषयितुमुप-
न्यस्यति * तत्रेति * । कर्मादौ प्रयुक्तात्करणादेव स्मृतिसिद्धेः क्रियमा-
णपरिव्याणानुवादिनः सन्निपत्योपकारित्वायोगेनाभ्युपगम्यमानमप्यारा-
दुपकारित्वाद्विप्रकर्षाख्यं बहिरङ्गत्वं न दौर्बल्ये कारणमित्येवं दूषयति
* तदिति * । प्रधानद्वाराङ्गेषु कर्तृप्राप्तौ क्रियमाणानुवादिनः प्रधान-
परिव्याणाविप्रकर्षाद्दौर्बल्यं स्यात् । एकत्र प्राप्त्यपेक्षाऽन्यत्र प्राप्त्यपे-

स्थाख्यं विशेषं विनैव प्रधाने परिदृश्यमाने तदङ्गे च करणेऽध्वर्योः क्रियमाणानुवादिनि च होतुः प्रकृतौ समाख्यया विकृतिषु च चोदकेन प्राप्तेन बलाबले विशेषः स्यादित्यर्थः । या चाङ्गगुणविरोधन्याया-द्बहिरङ्गस्य बाध्यता वृत्त्यन्तरकारैरुक्ता साप्ययुक्तेत्याह * न चेति * । तस्मादङ्गगुणविरोधे च तादर्थ्यादिति बाध्यत इति दृष्टीकादर्शनात्परोक्ततास्य न्यायस्य गम्यते । सन्निपत्यारादुपकारित्वकृत एव तर्हि विशेषोऽस्त्वित्य शङ्क्याह * न च सन्निपातित्वेनेति * । एकस्याः पशुपुरोडाशयागादिक्रियायाः सन्निपत्योपकारित्वसम्भवेऽनपेक्षितानेकादृष्टकल्पनापादकस्यारादुपकारित्वस्यायुक्ततैव दौर्बल्यमिष्टं क्रियमाणानुवाद्युच्चारणक्रियायाश्च करणोच्चारणक्रियातोऽन्यत्वान्न तत्सम्भवतीत्याशयः । करणेन च स्मृतौ कृतायामपि यावत्समाप्ति स्मृत्यविच्छेदस्यापेक्षितस्य क्रियमाणानुवादिना करणद्वारादुपकारिताध्यस्यास्तीत्याह * न चायमिति * । सूदूक्तयर्थोतीकशब्द. कीदृक्संस्कार इत्यपेक्षायां स्मृत्यविच्छेदरूपेतेत्थम्भूतलक्षणार्थया तृतीययोक्ता दृष्टादृष्टसंस्कारकृतविशेषशङ्कानिरासार्था दृष्टोक्तिः । अतो द्वावत्रेति भाष्योक्तैव समावायविशेषव्याख्या युक्तेत्याह * तस्मादिति * । द्वयोरप्येककर्तृत्वे यस्यैतद्वाक्यार्थत्वात्प्रत्यक्षत्वं मत्वा पृच्छति * कथमिति * । होत्रध्वर्युशब्दयोर्द्वयोरपि कार्यपरया हौत्राध्वर्यवकारिपरत्वाद्गौणतापत्तेहौत्राध्वर्यवयोरेककर्तृकत्वविद्ध्ययोगाद्धोताध्वर्यवकारीत्यादिवाक्यार्थावगतेनाध्वर्यवान्वयस्यैव प्रत्यक्षत्वं नेतरस्येत्युत्तरमाह । *एषा हीति* । स्वोक्तं पूर्वपक्षं दूषणायानुभाषते *यत्त्विति* । होतुः प्रसिद्धस्वरूपस्याध्वर्यवविधाने पूर्वपक्षिणोक्तेऽपि तस्मिन्निरस्ते यदि कश्चित्सिद्धान्त्यभिमतमाध्वर्यवोद्देशेन होतृविधिमभ्युपेत्यापि क्रियमाणानुवादिप्रयोगं विना होतृत्वासिद्धेर्होतृशब्दं वा कार्यपरत्या हौत्रकारिपरमाश्रित्य हौत्रमुद्दिश्याध्वर्युविध्यभ्युपगमेन हौत्रान्वयस्यैव प्रत्यक्षत्वात् क्रियमाणानुवाद्यत्यागं शङ्कते तमपि निराकर्तुं त्रेधा विकल्प्य दूषयति * सम्बध्येतेति * । सर्वहौत्रप्रयोगकृतेऽपि होतृत्वे क्रियमाणानुवाद्यत्यागापत्तावपि पदार्थानां प्रत्येकमनुष्ठेयत्वेन प्रत्यकमेव होतृकार्यत्वाद्धोतृशब्दार्थविशेषणत्वोपपत्तेः सर्वहौत्रप्रयोगानपेक्षत्वात्क्रियमाणानुवादिप्रयोगमात्रकृतमेवेत्युक्तम् । आद्ये कल्पायोगमुपपादयति * होता तावदिति * । द्वितीयायोगमुपपादयति * न चेति * । तृतीयायोगं स्वाभिमतोद्दे-

११७१·३ स्योपादेयोपपादनद्वारा तावदुपपादयति * तत्रापीति * । होतुरपि
हौत्रद्वारा प्रयोजनवत्त्वेपि साक्षात्प्रयोजनवत्त्वाभावादध्वर्युकर्मैवोद्दिश्य-
होता विधीयत इत्यर्थः । प्रयोजनाकाररूपेषु चोद्देशेऽप्युद्देश्यस्य देश-
कालवद् गुणत्वायोगात्प्राधान्यावगतेराध्वर्यवं प्रति होतुर्गुणतयोपादेय-
त्वेन तदविरोधिविशेषणमारुयुक्तस्याध्वर्यवान्वयौचित्यात्क्रियमाणानुवा-
दित्यायोगोपपत्तेः सिद्धान्तसिद्धिमाह *प्रधानं चेति* । आध्वर्यवविधिप-
क्षेपि तर्हि तथैव क्रियमाणानुवादित्यागोपपत्तेस्तन्निरासानर्थक्यमाशङ्क्य
तस्मिन् पक्षे होतुः प्राधान्यात्तद्धर्माविरोधेनैवाध्वर्यवप्रवृत्तेः करणविरो-
धिनः क्रियमाणानुवादिनस्त्यागायोगमाह । *यदि त्विति* । होत्रुद्देशेन
चाध्वर्यवविधानादाध्वर्यवस्य होतृसंस्कारत्वापत्तेस्तस्य च प्रकृतावदृष्ट-
त्वेनायुक्तत्वान्नायं पक्षो युक्त इति साक्षात्तृतीयकल्पायोगमाह । * अप्रा-
कृतेति * । स्वोक्तपूर्वपक्षदूषणार्थस्य कल्पत्रयनिरासस्य भाष्योक्तपूर्वप-
क्षदूषणेऽप्युपयोगसाम्यसूचनार्थं यदस्माभिराध्वर्यवोद्देशेन होतृविधिरूपं
पक्षान्तरं यदाध्वर्यवं तस्य यो होता स कर्त्तव्येवमुपादेयस्यापि होतुः
स्वकर्मानुपलक्षितस्याध्वर्यवं प्रत्युपादेयत्वायोगापत्तेरुपलक्षणार्थत्वेन
यच्छब्दान्वयोपपत्तिं मत्वाङ्गीकृतं तदस्मादेव हेतोरित्याह * इतीति * ।
इतिकरणो हेत्वर्थः । भाष्योक्तं समवायविशेषव्याख्यामुपसंहरति
* तस्मादिति * । प्रधानं चैवञ्जातीयकेष्विति वार्त्तिककृतयाध्वर्यव-
प्राधान्योक्त्या प्राधान्याशयत्वेनापि समवायविशेषोक्तिर्व्याख्याता भव-
तीति सूचनार्थं प्रधानं चेत्युक्तम् । समवायविशेषस्याविरोधाद्बाधायोगं
शङ्कते * अत्रेति * । प्रश्नपूर्वमविरोधमुपपादयति * कुत इति । श्लोकं
व्याचष्टे * करणस्य हीति * । मन्त्राणां करणार्थत्वान्मन्त्रान्तेन कर्मादि-
सन्निपातः स्यात्सर्वस्य वचनार्थत्वादिति द्वादशाधिकरणसूत्रस्य म-
ध्यमावयवः पठितः । परिव्याणकारकस्य रशनाख्यस्य दानलक्ष-
णाद्व्यापारणात्प्रभृति परिव्याणसमाप्तिपर्यन्तं क्रियमाणानुवादिकालत्वा-
त्करणस्य चोत्तरवर्द्दः प्रत्यक्स्थतां रशनामादाय प्राक्स्थितयूपसमी-
पगमनोत्तरकालपरिव्याणप्राक्कालत्वेन क्रियमाणानुवादिकालान्तः प्रयो-
ज्यत्वाद्विरोधपरिहाराशक्तेर्निरस्यति । * नैतदिति * । रशनादानस्य
यूपसमीपगमनस्य वा परिव्याणत्वाभावात्ततः प्रभृति परिव्याण-
स्य क्रियमाणत्वायोगमाशङ्क्य सङ्कल्पेन क्रियारम्भोपलक्षणात्त-
ण्डुलाधिक्लेदनाख्यपाकसङ्कल्पपूर्वकस्य काष्ठक्षालनादेः पाकत्ववत्प-

रिवेष्टनाख्यपरिव्याणसङ्कल्पपूर्वकत्वाद्रशनादानादेः परिव्याणत्वोक्तेश्च
सङ्कल्पादेरित्यतद्गुणसंविज्ञानबहुव्रीहिणा सङ्कल्पपूर्वकत्व कारकप्रवच-
नस्योक्तेः रशनादानमात्रविषयसङ्कल्पपूर्वकं रशनादानं न परिव्याण-
विषयसङ्कल्पपूर्वकमित्याशङ्क्य पदार्थविषयत्वात्सङ्कल्पस्य रशनादा-
नादेः परिव्याणसङ्कल्पपूर्वकत्वाद्वर्त्तेत इत्युक्तम्। रशनादानात्प्रभृति परि-
व्याणस्य क्रियमाणत्वे ततः प्राक्करणप्रयोगादविरोधं शङ्कते * एवमपी-
ति *। परिवीशब्दस्यादानोक्तावपिशब्दस्य वा सन्निहितयूपोक्ताव-
शक्ते रशनादानात्प्राक्प्रयोगायोगेन निरस्यति * तन्नेति *। सङ्कल्पप्र-
काशनाशक्तिर्दृष्टान्ततयोक्ता रशनादानादेः स्वातन्त्र्येणाप्रकाशनेपि परि-
व्याणोपक्रमात्मकत्वेन तदवयवत्वात्तादृप्येण प्रकाशनोपपत्तिमाशङ्क्य
प्रदानोपक्रमत्वेनावदानादेस्तदवयवत्वेपि प्रदानार्थेन याज्यादिनेव परि-
व्याणार्थेन करणेन तदुपक्रमार्थत्वात्तदवयत्वेनोपचरितस्यापि रशना-
दानादेर्वस्तुतः क्रियान्तरत्वात्प्रकाशनं यागोक्तयेऽवयवभूतरशनादानादि-
क्रियामात्ररूपेण प्रवृत्तमपि परिव्याणं प्रकाशयितुं परिवीशब्दो न शक्नो-
तीत्युक्तम्। कदा तर्हि प्रयोज्य इत्यपेक्षायामाह * तस्मादिति *। यू-
पस्योपस्थानानन्तरकरणप्रयोगेपि रशनादानपरिव्याणप्रैषमन्त्रोच्चारणना-
भिपरिमितयूपप्रदेशपरिव्याणार्थतत्समीपरशनाधारणनिष्पर्यावर्त्तनाष्ट-
काग्रन्थिकरणसमूहात्मकत्वेन दीर्घकालस्य परिव्याणकर्म्मणः क्रियमाणा
नुवादिना व्याप्त्यशक्तेस्तदेकदेशप्रयोज्यत्वावगमात्कस्मिन्नेकदेशे प्रयोज्य-
इत्यपेक्षायां परिवेष्टनारम्भप्राचीनस्य रशनादानादेः परिव्याणैकदेशस्य
करणेनावरोधात्परिवेष्टनारम्भप्रभृतौ परिव्याणैकदेशे क्रियमाणानुवादिप्र-
योगेणाविरोधं शङ्कते * नन्विति *। परिवेष्टनारम्भप्रभृतौ परिव्याणैकदे-
शे क्रियमाणानुवादिप्रयोगाभ्युपगमेपि क्रियमाणानुवादिप्रैषानन्तरं करण-
पाठात्करणस्य च परिवेष्टनारम्भकालताया निर्ज्ञातत्वात्तत्प्राग्भावियूपसमी
परशनाधारणकाले पाठक्रमात्प्रयोज्यतयावगतेन प्रैषमन्त्रेण प्रेषणसामर्थ्या-
त्क्रियमाणानुवादिनः करणेन सह यौगपद्यप्राप्तेर्निरस्यति *कथमिति*। ११७२।१
करणस्य मन्त्रान्तेन कर्म्मादिसन्निपात इति न्यायेन ज्ञातकालस्याज्ञात-
कालेन प्रैषेण कालज्ञानानुपपत्तौ कारणकालेनैव प्रैषकालस्य ज्ञेयत्वात्क-
रणेन सहेतरस्य यौगपद्योक्त्यै करणः क्रियमाणानुवादी च प्रैषसाम-
र्थ्याद्युगपत्प्राप्येते इतीतरश्चेत्येवं चशब्दान्वयाभ्युपगमेनोक्ते प्रैषस्या-
ज्ञातकालत्वात्क्रियमाणानुवादिकालज्ञापनाशक्तिमाशङ्क्य प्रैषकालज्ञाप

नार्था पाठक्रमोक्तिरित्येवं व्याख्येयम् । रशनादानस्य परिव्याणादित्वेऽप्य-सिशब्दयुक्तस्य करणस्यासन्निहितयूपोक्त्यशक्तेर्यूपसमीपगमनोत्तरकाल प्रयोज्यत्वात्ततः प्राक्पठितस्यापि प्रैषस्य रशनादानान्तरयूपसमीपगमनकाले प्रयोज्यत्वावगतेस्तत्कालप्रयुक्तेन प्रैषेण क्रियमाणानुवादिनानुष्ठापितस्य त्रैष्टुभत्वेनानुवचनोत्तमत्वेन च त्रिःप्रथमामन्वाह * त्रिरुत्तमामिति * । त्रिःपाठादिरावृत्तेर्दीर्घत्वात्समाप्तिपर्यन्तपरिव्याणकालावरोधशक्तेस्तदेकदेशे प्रयोज्यतायां प्रमाणाभावेन तस्यापि यूपसमीपगमनानन्तरमेव प्रयोज्यत्वावगमादेकदेशभेदेनाविरोधोपपत्तिरित्याह * न चेति * । यदासमीपगमनानन्तरं क्रियमाणानुवादिप्रयोगाभ्युपगमे तस्मिन् काले परिव्याणस्य वर्त्तमानत्वायावश्याभ्युपगमनीयत्वात्ततः प्राक्करणप्रयोगापत्तेरविरोधोपपत्तिमाशङ्क्य रशनादानात्प्रभृति वर्त्तमानत्वे सत्यप्यसन्निहितयूपोक्त्यशक्तेर्यूपगमनानन्तरं करणप्रयोज्यत्वोक्त्यै परिव्याणकालान्तराले करणाप्रयुक्तिः । करणक्रियमाणानुवादिनोः प्राप्तस्याप्यैककाल्यस्यैककर्तृकत्वेन कर्तृमन्त्रोच्चारणक्रिययोर्द्धर्माधर्म्यन्वयात्मकतयान्तरङ्गत्वाद्बलीयसा बाधाद्विरोधोपपत्तिं शङ्कते *ननु चेति*। परमतेन तावद्वाक्यस्यैककर्तृकत्वविषयत्वमभ्युपेत्यैककरणस्य प्राक्प्रयोगे सिशब्दशक्त्या वाच्यात्सन्निहितरूपात्पश्चात्प्रयोगे वा करणशक्त्या वाच्यादनुष्ठेयरूपात्क्रियमाणानुवादिनस्तु कालान्तरप्रयोगे क्रियमाणानुवादिशक्त्या वाच्याद् दृश्यमानरूपादर्थात्प्रच्युत्यापत्त्या लिङ्गविरोधेन यौगपद्यबाधायोगान्निरस्यति *भवेदिति* । सामानाधिकरण्यश्रुत्या लिङ्गस्यैव बाधां शङ्कते * ननु चेति* । सामानाधिकरण्यश्रुतित्वाभावाल्लिङ्गबाधायोगेन निरस्यति * बाध्यतेति * । सामानाधिकरण्यगम्यस्यान्वयस्यारुणाधिकरणे वाक्यीयत्वाभिधानाद्वाक्यत्वं तावदुपपादयति*न हीति*। लक्षणाहेतुकं विप्रकर्षमुपपादयति * तत्रापिचेति * । लिङ्गवतोर्म्मन्त्रयोर्विकृतावपाठाच्चोदकं विना प्राप्त्यभावलिङ्गैककाल्यप्राप्त्यनुपपत्तेर्वाक्यीयस्याप्येककर्तृकत्वस्य बलीयस्त्वोपपत्तिं शङ्कते * नन्विति * । मन्त्रस्वरूपप्राप्त्यै चोदकापेक्षत्वेऽप्यभिधानशक्त्यात्मकस्य लिङ्गस्यातिदेशिकस्याप्यौपदेशिकलिङ्गेन सह प्रत्यक्षत्वेनाविशिष्टतया चोदकानपेक्षत्वात्स्वरूपप्राप्त्यैव चोदकापेक्षणस्य लिङ्गवाक्ययोर्द्वयोरप्यविशिष्टत्वाल्लिङ्गस्य व कथबाधकत्वोपपत्त्याशयेन निरस्यति * उच्यत इति * । मन्त्रद्वयस्य लैङ्गिकैककाल्यप्राप्त्यैकान्तिकतया प्रत्यक्षवाक्यशिष्टैनैकक-

तृकत्वेन सह विरोधित्वाच्चोदकेनानुमानिकेन प्राप्त्यनुपपत्तेर्लिङ्गेनैककाल्य-
ल्यप्राप्त्ययोगं शङ्कते * स्यादिति * । एतत्कालैक्यमेव लिङ्गेन वाक्यं
बाधितवेत्येवशब्दार्थः । लैङ्गिकैककाल्यप्राप्तेः प्राग्विरोधानापत्तेश्चोदक-
निरोधायोगशङ्कां निराकर्तुमाह * यद्यपि हीति * । गृहाच्छादनप्रवृ- ११७३।२
त्तौ वर्षस्यैवानागतस्यापि विरोधस्य निरोधहेतुता युक्तेत्याशयः । चेत
नप्रवृत्तेरिष्टानिष्टप्राप्तिपरिहारार्थत्वाच्छङ्क्यमानस्यापि चानिष्टस्य व्या-
कुलीभावापादकत्वेन परिहार्यत्वाद्भविष्यद्वृष्टिभयशङ्काहेतोः प्रवृत्तेः प्रा-
ग्भावनानिष्टवृष्टिभयपरिहारसाधनगृहाच्छादनप्रवृत्तिहेतोर्वृष्टिभयशङ्का-
या वृष्टेरनागतत्वेपि सद्भावात्प्रवृत्तिर्युक्ता विरोधस्य तु वस्तुसद्भावेन
बाधहेतुत्वान्नानागतस्य हेतुता युक्तेत्याशयेन निरस्यति * उच्यत
इति * । क्रियमाणानुवादिनश्च चोदकेनैव होतुः प्राप्तेः करणमात्रस्येह
वाक्ये होत्रन्वयविधाने द्वयोः समानकर्तृकत्वस्यैतद्वाक्याविधेयत्वाद्बली
यस्त्वोद्भावनानर्थिकेति तावत्स्वमतेन विरोधाभावोक्त्या परिहारापात-
निकार्थमाह * यदि चेति * । अतश्चास्य बाधकत्वाभ्युपगमे
करणविरोधिनः क्रियमाणानुवादिनो होतृत्वबाधनं स्यात्तच्च समाख्या-
गम्यहोत्रन्वयकृतत्वाद्वाक्येन समाख्याबाधात्मकतया सुकरमेवेत्या-
ह * तेनेति * । बाध्यस्य होत्रन्वयस्य वाक्यबाध्यसमाख्याकृ-
तत्वाद् बाधस्य समाख्याकृतत्वोपचारः । क्रियमाणानुवादिनश्च होत्रन्व-
यबाधे सति वाक्यस्य क्रियमाणानुवादिविषयत्वाभावेन तस्य करणै-
ककाल्यविषयेण लिङ्गेन सह भिन्नविषयतया विरोधाभावाल्लिङ्गवा-
क्ययोर्बाध्यबाधकत्वं विनैव सिद्धान्तसिद्धिरिति स्वमतेन । ननु च
युगपत्कालत्वं वा बाध्यतामेककर्तृकत्वं वेत्यादिवार्त्तिकोक्तां शङ्कां निरा-
कर्त्तुमाह * एवञ्चेति * । लिङ्गेन वक्यबाधात्तु तच्छङ्कानिरासे हो-
त्राध्वर्यवान्वयबाधापत्तेरनिष्टं यथा प्रकृतिप्रयोगप्रसङ्गात्तत्पूर्वः परिहारो
युक्त इत्याह * यथा त्विति * । सिद्धान्तमुपसंहरति * तस्मा-
दिति * । क्रियमाणानुवादिनं कः प्रयुञ्जीतेत्याशङ्कोत्तरत्वेनर्त्विजां मध्ये
यस्य मुख्यप्रत्यासत्त्याख्य· प्रत्यासन्नस्य स्वकर्मणि व्यापृतत्वे वा य-
स्याव्यापृतत्वाख्यो विशेषः स प्रयुञ्जीयादित्येवमितरमिति सूत्रोत्तरार्द्ध-
व्याख्यार्थमथेत्यादिभाष्यं कुण्डपायिनामयनेच्छावाकायाख्याया होत्राया
उद्गातृकार्यत्वाद् ग्रावस्तोत्रायाख्यायाश्च प्रस्तोतृकार्यत्वादच्छावाकग्रा-
वस्तद्भावेन मैत्रावरुणव्यतिरिक्तहोतृपुरुषाभावात्प्रकृतोपयोगानुपपत्तेरि·

न्याशयप्रदर्शनमात्रार्थत्वादुपेक्षितम् ॥

प्रैषप्रैषार्थयोः पृथक्कर्तृकत्वम् । अधि० ११

प्रैषेषु च पराधिकारात् ॥ २३ ॥

यूपाय परिवीयमाणायानुब्रूहीति चाध्वर्यवस्य प्रैषस्य कुण्डपायिनामयने होतृप्रयोज्यत्वादेतं प्रैषार्थं क्रियमाणानुवादिनमन्यः प्रयुञ्जीयादित्येवं पूर्वाधिकरणशेषभूतेनैवानेन सूत्रेणोदाहरणान्तरेषु विषयव्याप्तयेऽधिकरणान्तरकरणेनानन्तरसङ्गतिं लिङ्गसमाख्याविरोधाविरोधचिन्तात्मकतया च प्रकरणसङ्गतिं लोटः प्राप्तकालार्थत्वसन्देहं च सन्देहहेतुं स्पष्टत्वादनुक्त्वैक एव प्रैषप्रैषार्थयोः कर्तेति पूर्वपक्षे प्रैषस्य परविषयत्वसामर्थ्यरूपलिङ्गविरोधेन समाख्ययोभयत्राध्वर्युविनियोगायोगादयुक्तमाशङ्क्य प्राप्तकालत्वोक्तिलक्षणया प्रैषोक्त्या विवक्षिता तत्कालानुष्ठानं च प्रैषार्थोक्त्येति सूचयितुं वक्ष्याम इत्यन्तं पूर्वपक्षभाष्यं व्याचष्टे ※ प्रैषस्येति ※ । आत्मनः प्रैषायोगे शङ्किते स्वाशयं प्रकटयितुं पूर्वपक्ष्याहेत्यर्थः । आहेति शङ्काभाष्यं व्याचष्टे ※ प्रैषेति ※ । उच्यत इत्यादिपरिहारभाष्यमुपपादयितुमाह
१२७३।४ ※ परस्त्विति ※ । ओषधे त्रायस्वैनमित्यादिवदचेतनायामपि क्रियायां चेतनवदुपचारेण स्तुत्यं मध्यमोपपत्तिं स्वयमाह ※ क्रियैव चेति ※ । न केवलमदृष्टार्थत्वापत्तेः कर्तुः प्राप्तकालत्वं न वाच्यं किन्तु साकाङ्क्षत्वापत्तेः प्रोक्षण्यासादनं कर्तुमित्याद्यध्याहारे वा तव प्राप्तः काल स च प्रोक्षण्यासादनं कर्तुमिति कर्तृक्रियाविशिष्टकालाख्यार्थप्राप्तत्वोक्तेः क्रियामात्रविशिष्टकालप्राप्तत्वोक्त्या चाल्पविधिसम्भवे बहुविधानस्यान्याय्यत्वाद् गौरवाख्यवाक्यभेदापत्तेरपीत्याह ※ यदि चेति ※ । प्रशब्देन प्राप्तत्वोक्तेरिच्छासामान्यवाचिना चेषणशब्देनोक्तिविषयेच्छाविशेषलक्षणाद्वारा तद्विषयोक्तिलक्षणात्प्राप्तत्वोक्त्यर्था प्रैषणोक्तिः प्राप्तकालार्थत्वोपपादनमुपसंहरति ※ तस्मादपीति ※ । प्रैषार्थत्वाभ्युपगमेन स्वयं प्रौढ्या पूर्वपक्षमाह ※ अथापीति ※ । पूर्वपक्षोपसंहारपरं सूत्रं योजयन् सिद्धान्तमाह ※ इतीति ※ । आहेति पूर्वपक्षाशयानुभाषणभाष्यं व्याचष्टे ※ यत्त्विति ※ । उच्यत इति परिहारभाष्येण प्राप्तकालार्थत्वायोगस्योक्तस्य प्रैषातिसर्गप्राप्तकालेष्विति स्मृतेः प्राप्तकालत्वस्यापि वाच्यत्वाविशेषादयुक्तत्वमाशङ्क्योपपादनार्थं

तस्यामिति भाष्यं मध्यमपुरुषसामर्थ्यात्मकेन लिङ्गेन समाख्याबाधोक्त्यर्थत्वेन व्याख्यातुमाह * तदिति * । क्रियाया एव चेतनवदुपचारेण स्तुत्यै मध्यमपुरुषेण युष्मदर्थत्वोक्तः क्रियैव वोच्यत इति पूर्वपक्षवार्त्तिकोक्तत्वात्प्राप्तकालतया लिङ्गविरोधपरिहारमाशङ्क्य युष्मदर्थस्य प्रकृत्यर्थानुरक्तं प्रत्ययार्थं प्रति विषयतया मध्यमपुरुषार्थत्वात्प्रकृत्युक्तां क्रियामपि प्रति विषयत्वावगतेर्विषयविषयित्वस्य च भेदाधिष्ठानत्वान्न शब्दान्तरानुक्तायाः क्रियायाः युष्मदर्थता वक्तुं शक्येत्याह * नचेति * । प्रत्युक्ताया अपि क्रियायाः प्रत्ययार्थप्राप्तकालतानुरञ्जकत्वाविवक्षया युष्मदर्थत्वमात्रविवक्षाशक्तावप्यचेतनस्य शब्देनाभिमुखीकरणाशक्तेः सन्निहिताभिमुखीकरणार्थयुष्मदर्थत्वोक्तयदृष्टार्थत्वापत्तेः क्रियाप्राप्तकालत्वप्रकाशनेऽप्यदृष्टार्थत्वापत्तिस्तुल्येत्याह *यद्यपिचेति*। क्रियाभिमुखीकरणकल्पनायामिव चात्मनः शरीररूपेणावस्थान्तररूपेण वा भेदकल्पनायामप्यदृष्टार्थत्वापत्तेस्तदाश्रयणेन प्रेष्यप्रेषकत्वव्यपदेशाभ्युपगमो न युक्त इत्याह * तथेति * । लिङ्गविनियोज्यानां च मन्त्राणां ११७५।१
मुख्यार्थाभिधानकार्यत्वस्य गौणमुख्याधिकरणे स्थितत्वादचेतनायाः क्रियायाश्चेतनावदुपचारे चात्मनो भेदकल्पने च गौणत्वावश्यंभावापत्तेः पक्षद्वयमप्येतदयुक्तमित्याह * गौणतात्रेति * ॥ ततश्च क्रियाप्राप्तकालत्वोक्तौ मध्यमपुरुषानाञ्जस्यप्रसङ्गाल्लोटः प्राप्तकालार्थत्वाभ्युपगमेऽपि कर्तुः प्राप्तकालत्वोक्तेरभ्युद्गगमनीयत्वात्सिद्धान्तासिद्धिरित्याह * ततश्चेति * । वाक्यभेदापत्तेर्युष्मदर्थस्याविवक्षितत्वात्तद्वशेन लोटः प्रैषार्थत्वावधारणायोगमाशङ्क्याह * नचेति * । युष्मदर्थविशिष्टक्रियार्थप्रेषणाद्यः प्रैषार्थत्वपक्षे वाक्यभेद आशङ्क्यते स न युक्तः यस्माद्युष्मदर्थाविवक्षायामपि प्रोक्षणीशब्दोपादानात्प्रोक्षणीविशिष्टता प्रैषविषयस्य क्रियारूपस्यार्थस्याभ्युपगन्तव्यात्ततश्चोभयपक्षसाम्यान्नैकस्मिन्पक्षे वाक्यभेद आशङ्कनीय इत्यर्थः । पक्षद्वयसाम्योक्त्यर्थं वाचश्योक्तिः हिशब्दार्थे चशब्दः प्रोक्षणीविशिष्टत्वस्योभयपक्षसाम्येपि युष्मदर्थविशिष्टत्वनिमित्तस्य गौरवलक्षणस्य वाक्यभेदस्य युष्मदर्थविवक्षायामसाधारण्यमाशङ्क्य क्रियायुष्मदर्थादीनामर्थानामनेकत्वेप्येकपदोपात्तत्वेन युगपदुपादानात्सहैव प्रैषविषयत्वावगतेः प्रत्ययालोचनभेदानपेक्षतया वाक्यभेदानापादकत्वमाह * नचेति * । कर्तुराख्यातवाच्यत्वाभावेपि लक्षणयोपादानं विवक्षितम् । प्रत्ययावृत्तिलक्षण-

वाक्यभेदानापत्तावपि गौरवलक्षणवाक्यभेदापत्तिमाशङ्क्यानेकार्थोपादाने तस्य सर्वत्राभ्युपगमेनादोषत्वमाह * नचेदृशामिति * । कथं तर्हि युष्मदर्थविवक्षायां वाक्यभेदो भाष्यकृतोक्त इत्याशङ्क्य पूर्वपक्षे लोटः प्राप्तकालार्थत्वात्प्राप्तकालतायाश्च मध्यमपुरुषाद्युष्मदर्थविषयत्वावगतेः क्रियाया अपि प्रकृत्यर्थत्वेन प्रत्ययार्थत्वेन प्रत्ययार्थप्राप्तकालत्वविशेषणतया युष्मदर्थविषयत्वावगमात्क्रियायुष्मदर्थयोः पृथक्त्वं विना विषयविषयित्वानुपपत्तेः पृथक्त्वात्प्राप्तकालत्वस्य युष्मदर्थेन सह तव प्राप्तः काल इति विषयविषयित्वान्वयविधायिका क्रियया च सहासादनं कर्त्तुमिति विशेषणविशेष्यत्वान्वयविधावन्यासादयेति श्रुतेः शक्तिः कल्प्येति वाक्यभेदापत्तिर्भाष्योक्ता सिद्धान्ते तु प्रैषार्थत्वात्प्रैषस्य च नित्यं युष्मदर्थविषयत्वात्प्रैषान्यथानुपपत्त्यावगतस्य युष्मदर्थस्यानुवादान्न वाक्यभेदापत्तिरित्याह * प्राप्तेति * । समाख्यानादपि प्रैषार्थतावसीयत इत्याह * एवं चेति * । सिद्धान्तमुपसंहरति * तस्मादिति॥

प्रैषप्रैषार्थयोर्यथाक्रममाध्वर्यवाग्नीध्रत्वम् । अधि० १२

अध्वर्युस्तु दर्शनात् ॥ २४ ॥

व्याख्याद्वैविध्यार्थं पाठद्वयोक्तिपूर्वं लिङ्गदर्शनं व्याचष्टे * यदिति * क्षिणोत्यर्थहिंसाकर्मतयोक्तस्याध्वर्योः स्फ्यधारयितृत्वायोगेन तद्व्यतिरिक्तस्य स्फ्यधारयितृत्वावगमाद्दर्शपूर्णमासयोश्चाग्नीद्व्यतिरिक्तासम्भवदध्वर्युकर्तृकाध्वर्युवेदाम्नातपदार्थकार्यभावात्सोऽग्नीदग्नीद्व्यारिक्तो वा वज्रोऽध्वर्युं क्षिण्वीतेत्यर्थद्वयोक्त्यर्थः शाखाभेदेन द्विविधोऽपि पाठः । अग्नीधः स्फ्यधारणमेकान्तेन वदन् वेदेर्वितृतीयदेशे तिर्यञ्चं स्फ्यं च स्तब्ध्वा प्रेष्यतीति समानकर्तृकत्ववचनात्स्फ्यवतः प्रेषकत्वावगतेरग्नीधमेव स्फ्यवत्त्वात्प्रेषकं तावद्दर्शयति तद्दर्शनाच्चान्यप्रैषार्थकारिणं दर्शयतीति तावच्चशब्दावनुकृष्य योज्यम्। प्राप्तिं विना लिङ्गस्याप्रामाण्यात्प्रश्नपूर्वं द्वादशवक्ष्यमाणन्यायद्वयेनप्राप्तिमाह * कान्विति * ।

गौणो वा कर्म्मसामान्यात् ॥ २५ ॥

वाशब्दोक्तं सिद्धान्तमुपपादयितुं स्वयं तावदङ्गगुणविरोधन्यायेनापवदिष्यमाणमपि समसङ्ख्याविरोधविषयत्वाच्च भूयोविरोधेऽन-
११७६।१ भिमतमप्यभ्युच्चयार्थं द्वादशवक्ष्यमाणमेव न्यायमाह * मुख्यं वेति * ॥

भाष्योक्तं पारमार्थिकं न्यायं व्याचष्टे * प्रयोजकस्य चेति * । लिङ्गदर्शननिरासार्थित्वेन सूत्रं व्याख्यातुमाह * वज्रेणेति * ।

करणमन्त्रेषु स्वामिफलस्याशासितव्यत्वम् । अधि० १३

ऋत्विक्फलं करणेष्वर्थवत्त्वात् ॥ २६ ॥

मन्त्रार्थस्यानुष्ठेयस्य मन्त्रोच्चारयितृव्यतिरिक्तपुरुषगामित्वेऽभिहिते प्रसङ्गात्फलभूतस्य मन्त्रार्थस्यान्यानन्यगामित्वविचारादधिकरणत्रयसङ्गतिं स्पष्टत्वादनुक्त्वाङ्गाश्रितकाम्यगुणफलस्य तथाकामोऽर्थसंयोगादित्यत्र स्वामिगामित्वोक्त्याङ्गफलस्यापि न्यायसाम्यात्स्वामिगामित्वसिद्धेरेतदधिकरणपूर्वपक्षमयुक्तमाशङ्क्याङ्गफलत्वाभावाशयेनोपपादयितुमाह * यथैवेति * ॥

स्वामिनो वा तदर्थत्वात् ॥ २७ ॥

अङ्गफलत्वेन सिद्धान्तमुपपादयितुमाह * नैवेति * । नीत्यत्वेनान्वाधानस्य फलान्वयायोगमाशङ्क्य जातेष्टिवदानुषङ्गिकफलसाधनत्वेऽपि नित्यत्वाविरोधसूचनार्था नित्योक्तिः क्रियासमवेताग्न्युक्तिमात्राच्छ्रुत्युक्तकरणत्वासिद्धमान्त्रवर्णिकस्य वर्चःपुष्ट्यादेः समवायकल्पनायोगाशयेन पृच्छति * कथमिति * । अग्न्युक्तिमात्रात्कृत्स्नस्य मन्त्रस्य श्रुत्युक्तकरणत्वासिद्धेर्मन्त्रोक्तस्य फलस्य क्रियानन्वयवादिना मन्त्रस्य क्रियायां स्वार्थसमवायाकल्पकताभ्युपेतव्येत्यापाद्य सूक्तवाकाधिकरणोक्तं स्वार्थसमवायकल्पकत्वं तावत्स्मारयति * व्यतिरिक्तेति * । स्वशक्त्या प्रकाश्यार्थव्यतिरिक्तक्रियासाधनत्वेनापि विहितो मन्त्रः क्रियां तत्सम्बन्धार्हं वा किञ्चित्कारकं क्रियान्वयि कल्पयित्वा प्रकाशयन्नङ्गत्वं यस्मात् सूक्तवाकाधिकरणन्यायेन याति तस्मान्नित्याङ्गाश्रय फलमेवेदं कल्प्यमित्यर्थः । एवमपि वयं त्विन्धाना इति दीपनार्थेनेन्धतिना गृह्यात्युक्तधारणात्वाधानक्रियायास्तत्सम्बन्धिनश्चाग्नेरग्निशब्देन स्वशक्त्या प्रकाशनाद्वर्चःपुष्ट्यादेः क्रियान्वयकल्पना न युक्तेति प्रश्नाशयं निराकर्तुं कृत्स्नमन्त्रस्य करणत्वासिद्ध्यै फलस्यापि क्रियान्वयकल्पनोपपादनायाह * तस्मादिहेति * । करणत्वेन श्रुतिविनियुक्तस्य मन्त्रस्यान्यतोऽसिद्धस्वार्थसमवायकल्पकत्वे सूक्तवाकाधिकरणोक्तेऽपि सूक्तवाकेन स्वसाध्यायाः साक्षात्प्रकाशनाश-

केस्तत्प्रकाश्यस्य च कस्य चिदन्यतः क्रियान्वयासिद्धेस्तत्र स्वार्थस्य
क्रियान्वयकल्पना युक्ता इह त्वाधानक्रियायास्तत्सम्बन्धिनश्चाग्नेः प्रका-
शनात्करणत्वसिद्धेर्नान्यस्य समवायकल्पना युक्तेति वैषम्यशङ्कानिरा-
सार्थं स्वार्थसमवायकल्पनाप्रोक्तेस्यपौनरुक्त्यसूचनपूर्वमुपसंहरति * त-
१७७।३ स्मादिति * । अङ्गस्यापि फलान्वयोपपत्त्याशामिन्त्राणामप्यायुराद्या-
शासनक्रियायामायुरादिफलान्वयकल्पकत्वसम्भवात्प्रधानफलप्रकाशना-
र्थत्वाभ्युपगमायोगमाशङ्क्याह * यास्त्विति * । तदर्थत्वादिति सूत्रा-
वयवं पुत्र्यादेरन्वाधानफलत्वेप्यात्माभिवादिशब्दसामर्थ्यात्तन्नौ सहेति-
व्यपदेशसामर्थ्यादिवाध्वर्युगामित्वशङ्कानिरासार्थत्वेन शङ्कोपन्यासपू-
र्वं व्यपदेशफलस्याध्वर्युगामित्वेपि स्वामिगामित्वानपायाद्यजेतेत्यस्या-
दधीतेत्यस्य चात्मनेपदस्य बाधानापत्तेर्वैषम्याशयेन व्याचष्टे * आ-
हेति * । अथ कस्मादिति शङ्काभाष्यं करणस्य कर्तृव्यापारव्याप्यत्वा-
त्करणमन्त्रव्यापारणस्योच्चारणाख्यस्यान्वाधानक्रियया सह समानकर्तृक-
त्वावगतेर्मन्त्रमात्रस्य याजमानत्वशङ्कायोगादयुक्तमाशङ्क्य मन्त्रद्वारा-
न्वाधानस्यैव याजमानत्वशङ्कार्थत्वेन तावद्व्याचष्टे * अथेति * ।
उच्यत इति परिहारभाष्यं ममशब्दशक्त्यात्मकलिङ्गात्मनेपदश्रुतिभ्यां
विरोधे समाख्याया विनियोजकत्वायोगादयुक्तमाशङ्क्य श्रुतिलिङ्गाभ्यां
विरोधस्य मन्त्रान्वयावगम्यतया याजमानत्वोत्तरकालत्वात्प्रस्तरयागा-
दिवच्चान्वाधानस्य मन्त्रकल्प्यत्वाभावेन मन्त्रान्वयानपेक्षोत्पत्तिकाले फ-
लान्वयानवगतेरविरुद्धया समाख्यया विनियोगोपपत्त्याशयेनोपपाद-
यितुमाह * नैतदिति * । यथाश्रुतभाष्योक्तायाः शङ्कायास्तुच्छ-
त्वदर्शनार्थैते एव शङ्कोत्तरभाष्ये यथाश्रुते व्याचष्टे * मन्त्रमात्रमि-
ति * । मम वर्चोस्त्वित्यादिभाष्यं फलाकर्षणशङ्कोत्तरत्वेन व्याख्यातुं
शङ्कां तावदाह * फलमपि तर्हीति * । श्रुत्या लिङ्गबाधात्फलस्या-
ध्वर्युगामितया कर्षणायोगं पूर्वोक्तं तावद्भाष्यव्याख्यापातनिकार्थं
स्मारयति * आकृष्येतेति * । आत्मनेपदस्य श्रुतित्वेपि सर्वाङ्गप्रधा-
नसाधारण्येन सावकाशत्वात्प्रधानद्वारा चाङ्गे प्रवृत्तः परोक्षत्वादन्वा-
धाने विशेषरूपेण साक्षाच्च प्रवृत्तेन लिङ्गेन बाधं गौणत्वं वाशङ्क्य
प्रत्यक्षायाः श्रुतेर्मन्थराया अप्यनुमेयश्रुतिप्रतिबन्धकतयाननुमितश्रुतिकेन
लिङ्गेन बाधायोगं सर्वाङ्गप्रधानफलानां चैकस्यात्मनेपदस्य कर्तृगामि-
ताभाविनोन्यत्र मुख्यस्येह वैरूप्यापत्तेर्गौणत्वाख्याविरोधप्रकारागो-

वदन्मन्त्रस्तथा तद्यात्माभिवादिनी श्रुतिः कथं व्याख्येयेत्यपे ७७क्षयक्षा यमध्याहारेण व्याख्यापूर्वं वयं त्विन्धाना स्तन्वं पुषेमेत्यादावध्याहारायोगेनापरितोषाद्भाष्योक्तां गौणत्वेन व्याख्यामाह * तत्रेति * । अव्यापकोऽप्यध्याहारपक्षोऽभ्युच्चयमात्रत्वेनोक्तः । सिद्धान्तमुपसंहरति * तस्मादिति * कैश्चित्कल्पसूत्रकारैः पक्षेऽन्वाधानस्य स्वामिकर्तृकस्यैवोक्तत्वाद्विषयायोगमाशङ्क्य द्वेधा परिहरति * ये चेति * ।

लिङ्गदर्शनाच्च ॥ २८ ॥

सूत्रं व्याचष्टे * सर्वेति * । फलस्याननुष्ठेयत्वाच्चिन्तानर्थक्यमा- ११७
शङ्क्य फलाशासनस्य मन्त्रार्थत्वेनानुसन्धेयतयानुष्ठेयत्वाच्चिन्तार्थवत्त्वोक्त्यर्थं पक्षोक्तमिति भाष्यं मन्त्राधिकरणे मन्त्रार्थानुसन्धानस्यानुष्ठेयतयोक्तत्वेन स्पष्टत्वान्न व्याख्यातम् ॥

करणमन्त्रेषु कर्मार्थफलस्य ऋत्विग्धर्मत्वम् । अधि० १४

कर्म्मार्थे तु फलं तेषां स्वामिनं प्रत्यर्थवत्त्वात् ॥ २९ ॥

गार्हपत्याहवनीययोर्दूरतरत्वेनान्तरासंचरणेपि सन्तापनापत्तेस्तादात्विकस्यासन्तापस्य फलत्वायोगात्कालान्तरीयासन्तापफलतायाः मन्त्रवर्णात्कल्पनीयत्वावगतेस्तस्य च कर्मानौपयिकत्वात्पूर्वाधिकरणन्यायेन स्वामिगामित्वपूर्वपक्षं स्पष्टत्वादनुक्त्वाहवनीयप्रत्यगुदग्देशस्थस्य प्रत्यग्दक्षिणदेशे स्थित्वा स्रुवाघाराघारणायाहवनीयसमीपदेशेन दक्षिणाभिक्रमणे समन्तादृच्छन्तीनां ज्वालानां स्पर्शात्सन्तापापत्तौ कर्म्मविघ्नापत्तेस्तत्प्रतिबन्धस्याध्वर्युगतस्य स्वाम्यपेक्षितत्वेनात्मनेपदाविरोधान्ममेत्यात्माभिवादिशब्दसामर्थ्यात्मकेन लिङ्गेनाभिक्रमणकर्त्रध्वर्युगामित्वसिद्धान्तोक्त्या पूर्वापवादमाह * यस्त्विति * ॥

व्यपदेशाच्च ॥ ३० ॥

व्यपदेशात्फलस्योभयगामितायाः प्रागेवोक्तत्वात्पौनरुक्त्यमाशङ्क्य ब्राह्मणस्य विधायकत्वेन तद्गताद्व्यपदेशात्फलस्योभयगामित्वेपि मन्त्रस्याविधायित्वेन तद्गतस्य फलस्य क्लेशेन कल्पनीयत्वाद्ब्राह्मणस्य च फलस्याकर्म्मार्थत्वेनाध्वर्युगामितया स्वामिनानपेक्षणेनोभयगामित्वकल्पनाऽशक्त्या शङ्कासम्भवेनापौनरुक्त्यमाह * व्यपदेशादिति * ।

व्यपदेशास्याध्वर्यौ स्वामिनि च युगपत्प्रवृत्तेरुभयगामित्वकल्पनाहेतुताया मन्त्रब्राह्मणयोस्तुल्यत्वात्स्वामिगामित्वानपायेन चाकर्मार्थत्वेपि स्वामिनापेक्षणोपपत्तेरात्मनेपदाविरोधान्मन्त्रेपि कल्पनागौरवक्लेशाभावेन सिद्धान्तमाह * कल्पनेति *। उभयगामिफलोक्तिशक्त्याख्यालिङ्गान्मन्त्रस्योभयप्रयोज्यत्वं तन्नौ सहेत्यध्वर्युराहेति वाक्यगताध्वर्युमात्रप्रयोज्यत्वबाधेन शङ्कते * अथ कस्मादिति * । लिङ्गाविरोधेन वाक्यस्य बाधायोगादध्वर्युणैव प्रयोज्य इति नियमोपपत्त्या निरस्यति * यदेति * ।

द्रव्यसंस्कारस्याङ्गप्रधानार्थत्वम् । अधि० १५

द्रव्यसंस्कारः प्रकरणाविशेषात्सर्वकर्म्मणाम् ॥ ३१ ॥

कः शेषः केन हेतुना शेषः कथं च विनियुज्यते श्रुत्यादीनि च विनियोगकारणानि वक्ष्यन्ते तेषां च बलवदबलवत्तेति पञ्चविधस्य शेषलक्षणप्रतिज्ञार्थस्य बलाबलचिन्तासमाप्त्या समाप्तत्वाच्छेषलक्षणानन्तर्गतोत्तरचिन्ताया लक्षणासङ्गतिमाशङ्क्य सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वादित्यत्र बर्हिर्लवनादीनामङ्गप्रधानार्थत्वेभिहिते वपनादौ भोक्कंशपातेमापोदिते महावेद्यां चिकीर्षासंयोगस्यानपवादकत्वादनपोदितासिद्धेर्दीक्षादाक्षिणे वचनादपोदिते महावेदेरपि वाचनिकयूपार्थत्वादपवादमाशङ्क्य वचनस्य देशलक्षणार्थत्वेनानपवादकत्वमुक्त्वा हविर्द्धानेपि देशलक्षणार्थत्वेतिदिष्टे प्रसङ्गात्स्वयङ्कर्तृकताङ्गप्रधानार्था प्रधानमात्रार्था वेति विचार्य तत्प्रसङ्गेन कर्तृचिन्ताप्रपञ्चपूर्वकर्तृविषयसमाख्याविरोधाविरोधचिन्तासमाप्त्या बुद्धिस्थीकृतस्य बर्हिर्लवनादेः प्राकृतकार्यमात्रसर्वार्थत्वं वैकृतकार्यसर्वार्थतापि वेति चिन्तायाः सङ्गतिं सूचयितुमाह * गत इति * । क समाख्यायाः पूर्वैः सह विरोधः क वा नेति चिन्तासमाप्त्या बुद्धिस्थीकृतस्यापि बर्हिर्लवनादेर्विकृतावातिदेशिकत्वादुपदेशचिन्तार्थे षट्के विचारासङ्गतिमाशङ्क्यातिदेशात्प्राकृतानामङ्गानां विकृत्यन्वयावगमेपि संस्कारकर्म्मणां निर्धाराणां विकृत्यन्वयायोगाद्बर्हिरादीनां चापूर्व्वसाधनांशेनैव द्वारत्वाभ्युपगमाद्वैकृतापूर्व्वसाधनीभूतद्वारान्वयस्य प्रधानसारूप्यहेतुकातिदेशाविषयत्वेनातिदेशादनवगतेः पदार्थातिदेशद्वारातिदिष्टश्रुत्याद्युपदेशाधीनत्वाद्बर्हिर्लुनातीति विकृतावतिदिष्टया श्रुत्या प्राकृतस्तरणद्वारैव वैकृतापूर्व्व-

साधने बार्हिषि द्वारभूते लवनं विनियुज्यते बर्हिर्मात्रे वेत्युपदेशं विनैवेषेति सूचयितुं श्रुत्यादीनां विरोधाविरोधचिन्तायाः प्रकृतौ विकृतौ चोपयोगसाम्यमाह * सर्वश्चेति * । एवमपि प्रकृतावङ्गप्रधानेषु धर्मसामानविध्यस्य सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वादित्यत्रैवोक्तत्वादेतत्सूत्रं गतार्थमित्याशङ्क्योत्तराविवक्षार्थत्वं तावद्भाष्योक्तं विवृणोति * यस्त्विति * । स्वयमुत्तराधिकरणपूर्वपक्षोक्तयर्थत्वेनैतत्सूत्रं व्याचष्टे * शाकर्यं त्विति * ॥ ११७९।२

अपूर्वप्राकृतधर्माणां विकृतावसंबन्धः । अधि० १६

निर्देशात्तु विकृतावपूर्वस्यानधिकारः ॥ ३२ ॥

धर्मसाधारण्यशास्त्रातिदेशयोः सप्तमदशमाद्यनिराकरिष्यमाणत्वेनेह तदाशयपूर्वपक्षायोगादानुमानिकेभ्यः प्राकृतेभ्योऽङ्गेभ्यः प्राक् प्रत्यक्षत्वाद्वैकृताङ्गप्राप्तबार्हिर्लुनातीत्यतिदिष्टया श्रुत्या प्राकृतवैकृतबर्हिरुद्देशेन लवनविधानात्सर्वार्थत्वं पूर्वपक्षयित्वा क्लृप्तोपकारसाकाङ्क्षाः प्रथमं प्राकृतैः सह सम्बध्यन्ते समीपस्थं विकाराः प्रोज्झ्याचोदितमिति न्यायेनानुमानिकत्वेऽपि क्लृप्तोपकारत्वात्प्राकृतसंस्कारविधावपूर्वस्यानुद्देश इत्येवमर्थेन सूत्रेण निराकृते प्रकृतौ ये विहिता धर्मास्ते विकृतौ स्ववाक्यगतचोदनादिसादृश्यनिमित्तेनातिदेशेन वाक्यान्तरविहितेभ्योऽङ्गेभ्यः प्रागेव निर्दिष्टा अतो यत्र प्राकृतकार्ययो राज्यबर्हिषोः स्थिताः प्रधानोपकारित्वेन क्लृप्तास्तत्रैव निर्दिष्टा इत्येवमर्थेन निर्दिष्टा इति भाष्येण भूतार्थनिष्ठान्तनिर्दिष्टपदावृत्त्यात शब्दाध्याहारेण च विकृते प्राकृतानामानुमानिकत्वाद्वैकृतेभ्यः प्रत्यक्षेभ्यः प्रागन्वयायोगमाशङ्क्योपकारातिदेशानपेक्षप्राकृताङ्गातिदेशो तेषां प्रकृत्युपकारित्वे क्लृप्तेऽपि विकृत्युपकारित्वस्याक्लृप्तत्वेनोपदेशसाधारण्ये वा क्वचिदप्युपकारित्वस्याक्लृप्तत्वेनाक्लृप्तोपकारत्वाविशेषात्प्रागन्वयो न युज्यते द्वयस्यापि तु दशमसप्तमाद्यनिराकरिष्यमाणत्वेनोपकारपृष्ठभावेनैवाङ्गातिदेशात्प्राकृतं चोपकारं विकृतावतिदिष्टं प्रति साधनत्वस्य प्रकृतौ क्लृप्तस्योपकारैक्येन विकृतावप्यनपायात्प्रकृतौ क्लृप्तोपकारत्वेन प्राकृतानामङ्गानां प्रागन्वयोपपादनार्थं ये चेत्यादिभाष्यं समुदायार्थतात्पर्यतस्तावद्व्याचष्टे * यदीति * । सप्तमाद्ये साधारण्यनिरासेनातिदेश इष्टः स च दशमाद्ये कार्यपुरःसरं इष्ट इत्यर्थः । धर्मातिदेशस्य करणोपकाराख्यधर्मकार्यातिदेशपूर्वकत्वं

विवृण्वन् सर्व्वार्थत्वनिरासमुपपादयति * तत्रेति * । यागं गतो यागसहकारी सन् फलापूर्व्वोत्पत्तौ व्याप्रियत इति व्युत्पत्त्या यागगतव्यापारोक्त्या करणोपकाराख्यं कार्यमेवोक्तं प्रयोजनोक्त्या आत्यात्मिकपदार्थविधिप्रयोजनत्वाद्यान्तरकार्याण्युक्तानि इष्टानां तण्डुलानामुपायान्तरेणापि सिद्धेस्तद्द्वारा कार्यस्यावघाताख्यधर्मग्राहकत्वायोगात्कार्येण ग्रहणानर्थक्यशङ्कानिरासार्थं नियमजन्यादृष्टद्वारतोक्ता यूपावटस्तरणादीनामपि प्रयोजनानां करणोपकारसाधनत्वात्तेनात्मासिद्ध्यै ग्रहणापत्तेस्तादर्थ्येनापि बर्हिर्लवनादिपदार्थप्राप्त्यापत्तिमाशङ्क्य तेषां करणोपकारजनकत्वेऽप्यतिदेशकालेनवगमाद् ग्रहणाशक्तेर्यावन्ति वेदिस्तरणादीनि प्रयोजनानि प्रकृतौ जातानि तावन्त्येव प्राप्नुवन्तीत्युक्तं तैश्च ज्ञातपरिमाणैरेव पदार्थप्रयोजनैरात्मसिद्ध्यै पदार्थानां प्राप्यमाणत्वेनात्मजनकानामेव प्राप्यमाणत्वान्न सर्वार्थत्वापत्तिरिति ग्रन्थशेषेणोक्तम् । भाष्यार्थस्य सूत्रारूढत्वसूचनायोक्तेऽर्थे सूत्रं योजयति * तस्मादिति * ॥ एतदेव भाष्यमवयवशो व्याचिख्यासुः प्रधानं हीत्यनेन शास्त्रातिदेशमपिचेत्यनेन चोपदेशसाधारण्यं निरस्यतीत्याह । * प्रधानं हीति * । भाष्यं च चोदनासामान्यस्य प्रधानगतत्वेन तद्गतस्य फलसाधनयोग्यताख्याङ्गजन्योपकारस्यैव तेनोपस्थापयितुं शक्यत्वाद्धर्म्माणां तु साक्षाच्चोदनासामान्याभावात्प्रधानचोदनासामान्येन चात्यन्तभिन्नानां धर्म्माणामुपस्थापयितुमशक्यत्वाच्चोदनासामान्यहेतुकश्चोदको यस्मात्प्रधानोपकारमेवातिदेश्यतयापेक्षते न धर्म्मान् तस्मात्प्रधानोपकारद्वारैव धर्म्मातिदेशो न स्वातन्त्र्येणेत्युक्तं यद्युपदेशसाधारण्याशयेनोपकारान्वयात्प्राग्धर्म्माणां दर्शपूर्णमासवद्दीक्षादिनाप्यन्वयः शङ्क्येत सोऽपि विप्रकृष्टैकवाक्यत्वायोगान्न सम्भवतीत्यपिचेत्यादिनोक्तमित्येवं योऽयं प्रधानाश्रितत्वेनोपकारस्याश्रयाश्रयिणोरत्यन्तभेदाभावात्प्रधानादत्यन्तभेदाभावं मत्वा प्रधानापेक्षोक्त्योपकारापेक्षा विवक्षिता विधेः प्रकरणान्तरेतिदेशादिति दशमाद्यपूर्वपक्षसूत्रे विधिशब्देन शास्त्रातिदेशस्य वक्ष्यमाणत्वाच्छास्त्रलक्षणार्थात्रत्या धर्म्मोक्तिर्वार्त्तिककृतोऽभिमता । उपदेशसाधारण्ये विप्रकृष्टान्वयक्लेशोक्त्या धर्म्मातिदेशे भृत्यादिरेकोऽप्येकं स्वामिनं प्रति यमुपकारं करोति तमेवान्यमपि प्रतीति नियमादर्शनेन धर्म्मैः प्राकृतप्रधोपकारो विकृतौ कार्य इति नियमप्रमाणाभावादुपकारविशेषसाध-

नत्वस्यापि कल्पनीयत्वेन कल्पनागौरवक्लेशस्य बुद्धिस्थस्योपकारातिदेशे तत्साधनत्वस्य प्रकृतावेव क्लृप्तत्वेनाकल्पनीयतया लाघवसम्भवे गौरवस्यानाश्रयणीयत्वाद्धर्मातिदेशनिरासहेतुत्वोक्त्यर्थं निर्ज्ञातं खल्वपीत्यादिभाष्यं व्याचष्टे * शास्त्रेति * । यच्चोपदेशसाधारण्ये दूरस्थान्वयासिद्ध्यै दूरस्थोपस्थापनक्लेशोऽभिहितः स शास्त्रातिदेशेऽपि तेषां चोदनासामान्येनोपस्थापनाशक्तेः स्थित एवेत्याह * दूरस्थेति * । धर्माश्चेत्यादिभाष्ये शास्त्रातिदेशोपदेशसाधारण्ययोर्द्वयोरपि निरासार्थत्वेन व्याचष्टे * शास्त्रेति * । ये चेत्यादिभाष्योक्तं शास्त्रातिदेशोपदेशसाधारण्यनिरासमुपसंहरति * तस्मादिति * । अतिदेशः स चोपकारस्येत्यर्थः । शास्त्रातिदेशोपदेशसाधारण्यनिरासस्य प्रकृतोपयोगोक्त्यर्थस्तस्मादित्यादिभाष्यशेषः स्पष्टत्वान्न व्याख्यातः ।

विधृतिपवित्रयोः परिभोजनीयबर्हिषा कर्त्तव्यत्वम् । अधि० १७

विरोधे च श्रुतिविशेषादव्यक्तः शेषे ॥ ३३ ॥

लवनादेः प्राकृताप्राकृतसर्वबर्हिःकार्यार्थत्वे निरस्ते प्रसङ्गात्प्राकृतसर्वबर्हिःकार्यार्थत्वस्यापि निरासात्सङ्गतिमिदानींशब्देन सूचयन् परिस्तरणीयपरिभोजनीयबर्हिषां पृथग्लवनविधानाद्बर्हिर्लुनातीति वाक्यविहितस्य लवनस्य तादर्थ्याभावेऽपि विधृतिपवित्रबर्हिरर्थत्वनिरासहेत्वभावात्तदर्थतापि युक्तेति पूर्वपक्षं स्पष्टत्वादनुक्त्वा प्रकृतावपि विधृतिपवित्राख्यस्य बर्हिःकार्यस्य धर्मविधावनधिकार इत्यनधिकारोक्त्यनुषङ्गसहितचकारसूचितां सिद्धान्तप्रतिज्ञां व्याचष्टे *इदानीमिति * । त्रिधातु पञ्चधातु वा लुनातीति यथा लूनस्य ११८०
कृत्स्नस्य बर्हिषस्त्रिधातु पञ्चधातु वा वेदिं स्तृणातीति श्रुत्या स्तरणाख्यकार्यविशेषार्थत्वावगमाद्विधृतिपवित्रार्थस्य बर्हिषस्ततोऽवगमे त्रिधातुश्रुत्या पञ्चधातुश्रुत्या वा विरोधापत्तेरिति हेत्वर्थं विरोधे श्रुतिविशेषादिति सूत्रावयवं व्याचष्टे * यथा लूनस्येति * । विधृतिपवित्रार्थबर्हिर्विधेः समावच्छिन्नाग्रौ दर्भावित्यस्य तर्हि कतद्बर्हिर्विषय इत्याशङ्क्य धर्मविशेषशून्यो बर्हिर्विधिः परिभोजनीयाख्यान्यबर्हिर्विषय इत्युक्त्यर्थमव्यक्त इति सूत्रावयवं व्याचष्टे * सामान्यभूत इति * । धातुशब्दस्य च स्तरणार्थबर्हिर्मुष्टिचयवाचित्वमप्र-

सिद्धेर्द्धातुमात्रश्रुत्यापि विरोधापत्तिं सूचयितुमाह * धातुरिति * ।

प्राक्पुरोडाशादीनां निधानम् । अधि० १८

अपनयस्त्वेकदेशस्य विद्यमानसंयोगात् ॥ ३४ ॥

स्तरणार्थस्य बर्हिषोऽन्यत्र विनियोगायोगाद्विधृतिपवित्रे बर्हिरन्तरवि-नियोगवत्सवनीयाख्ययागाद्यर्थानां पुरोडाशादीनां ग्रहपात्रनिधाने विनि-योगायोगात्पुरोडाशान्तराद्युत्पादनसंयोगाख्ययोरेकदेशवाचिशब्दाभा-वेपि द्वितीयाद्यर्थत्वाभ्यां प्रतिपाद्यत्वावगमात्प्रतिपत्तेश्चोपयुक्तैकदेश विषयत्वाविरोधः ॥

काम्येष्टिषूपांशुत्वस्य प्रधानार्थत्वम् । अधि० १९

विकृतौ सर्वार्थः शेषः प्रकृतित्वात् ॥ ३५ ॥

द्रव्यसंस्कारः प्रकरणाविशेषात्सर्वकर्म्मणामिति बर्हिर्न्यायप्रसङ्गा-पवादसमाप्त्या बुद्धिस्थीकृतस्य धर्म्माणामङ्गप्रधानसाधारण्याख्यस्य बर्हिर्न्यायस्यापवादत्वेन सङ्गतिं स्पष्टत्वादनुक्त्वा तच्छब्दस्य वाक्य-शेषस्थकाम्यशब्दोक्तफलान्वयिवाचित्वावगतेरङ्गानामपि वप्रधानानुग्रा-हकत्वेन फलान्वयित्वादनारभ्याधीताप्युपांशुता प्रकरणाधीतैर्मन्द्रमध्य-मोत्तमस्वरैर्बाधाद्विकृतीगताङ्गप्रधानार्थेति पूर्वपक्षमाह * यत्र यत्रेति * ।

मुख्यार्थो वाङ्गस्याचोदितत्वात् ॥ ३६ ॥

विकृतावुपांशुत्वोपदेशकाले प्राकृतस्याङ्गस्याचोदितत्वादिति वृ-त्त्यन्तरकृद्व्याख्यामुपन्यासपूर्वं दूषयति * केचिदिति * । तस्मात्फलसा-धनेपि जातेष्ट्यादौ नित्यत्वप्रसिद्ध्या काम्यशब्दस्य फलान्वयिमात्र-वाचित्वासम्भवेन कामतन्त्रविधेयवाचित्वावगतेः ता इत्येकशब्देन च काम्यत्वविशिष्टेष्टिपरामर्शाद्विशिष्टोद्देशेपि वाक्यभेदानापत्तेरङ्गानां च कामतन्त्रविधेयत्वाभावेनाङ्गसम्बन्धितयोपांशुत्वस्याचोदितत्वादिति भा

११८११२ ष्यकारीयेन व्याख्या युक्तेत्याह * तस्मादिति * ।

श्येनाङ्गानां नवनीताज्यत्वम् । अधि० २०

सन्निधानविशेषादसम्भवे तदङ्गानाम् ॥ ३७ ॥

प्रधानमात्रार्थत्वेनोपांशुत्वस्याङ्गप्रधानसाधारण्येपोदिते हतिनवनीतस्याङ्गमात्रार्थत्वेनासाधारण्यात्सङ्गति स्पष्टत्वादनुक्त्वा प्रकरणात्प्रधानार्थत्वावगतेस्तस्य चातिदेशिकतत्सोमद्रव्यकत्वेनाज्याप्राप्तेस्तदनुवादायोगाद् हतौ निहितं नवनीतं प्रकृतिभूतमस्येति बहुव्रीह्युक्तं हतिनवनीतविशिष्टमाज्यं सोमबाधेन प्रधानमात्रार्थं विधीयत इति पूर्वपक्षमाह * हतीति * । उत्तरपदार्थप्रधानतत्पुरुषसम्बन्धपदार्थप्रधानबहुव्रीह्ययोगाद्व्यधिकरणबहुव्रीहेश्चात्यन्तायुक्तत्वाद्विशिष्टविध्ययोगेनानेकार्थविध्यापत्तेर्नवनीताज्यशब्दयोश्च भिन्नार्थत्वेन द्वयोर्मुख्यार्थयोः सामानाधिकरण्यायोगाज्जघन्यस्याज्यशब्दस्य कार्यलक्षणार्थत्वावगतौ विधौ च लक्षणायोगादाज्यकार्यानुवादेन इति नवनीतविध्यवगतेः प्रधाने कार्याभावादाज्यवत्यङ्गमात्रे इति नवनीताविधिरिति सूत्रेण सिद्धान्तमाह * यस्त्विति * । न चेत्यनेनाज्यप्राप्त्याख्यस्य सन्निधानस्याङ्गविषयत्वाख्यविशेषोक्त्यर्थत्वेन सौत्रो हेतुर्व्याख्यातः भाष्ये च न श्येने नवनीतमित्यनेन इति नवनीतमिति बहुव्रीहिणा समस्यमानपदार्थविशिष्टान्यपदार्थभूताज्यविधिं बहुव्रीह्ययोगेन निरस्य कस्तर्हीत्यनेनाज्यानुवादेन नवनीतविधिरुक्तः ।

आधानेपि तथेतिचेत् ॥ ३८ ॥

अनिष्टापादनेन सिद्धान्ताक्षेपार्थं सूत्रं पवमानेष्टीनामनङ्गत्वेनानर्थक्यं तदङ्गन्यायाविषयत्वादयुक्तमाशङ्क्यानङ्गेपि यूपेऽरत्निसाम्यदर्श्यावताराभ्युपगमादुपकारिमात्रस्य तन्न्यायविषयत्वाशयेन समाधत्ते * अवश्यमिति * ।

नाप्रकरणत्वादङ्गत्वस्यातन्निमित्तत्वात् ॥ ३९ ॥

न श्येनस्येत्यादिभाष्यात्पवमानेष्टीनां श्येनप्रकरणानधीतत्वादङ्गत्वस्य चोपकारनिमित्तत्वाभावादनङ्गत्वेनानर्थक्यं तदङ्गन्यायाविषयत्वान्न तत्र नवनीतापत्तिरित्येवमर्थतया भासमानं सूत्रमनङ्गस्यापि यू-

पस्यानर्थक्यं तदङ्गन्यायविषयत्वादुपकारिस्थितत्वमात्रस्य चोपकारित्वसिद्ध्येपेक्षणादयुक्तं मत्वा पवमानेष्टिस्थस्याज्यकार्यस्यासन्निहितत्वेन नवनीतविधावनुवादायोगान्नवनीतस्य च श्येनोपकारिकर्माङ्गतायाः सन्निध्यनपेक्षोपकारित्वमात्रनिमित्तत्वाभावादित्येवं स्वयं व्याख्यातुमाह । * न हीति * । पवमानेष्टीनां श्येनोपकारित्वमात्रेण तद्गतस्याज्यकार्य्यस्यासन्निहितस्यानुवादायोगान्नवनीतेन सहाङ्गाङ्ग्यन्वयः किं तु सन्निधानादित्येवमर्थेन नहीत्यनेन सूत्रोत्तरार्द्धं व्याख्यातम् । अतश्च यच्छ्येनप्रकरणात् श्रुतमाज्यकार्यं नवनीतविधयेनुवाद्यं तच्चोदकेन सन्निहितत्वात्सन्निहितस्यैव श्येनोपकारिणः सम्बन्ध्यनुवाद्यमित्यर्थः ।

तत्काले वा लिङ्गदर्शनात् ॥ ४० ॥

सन्निधानविशेषादिति हेत्वनुषङ्गेण यदर्थेनाङ्गानां विशेषवचनं तत्तत्सुत्याकालानां यथा पशुसाहित्यमिति सामान्यतोदृष्टाख्येन च वाशब्दसूचितेन हेतुना पूर्वपक्षप्रतिज्ञां साधयन् सूत्रं व्याचष्टे * सन्निधीति * । इहानुषक्तायाश्च सन्निधानविशेषोक्तेः सुत्याकालानां
११८२।२ प्रधानसन्निधिविशेषेण तत्रस्थनवनीतस्य प्रधानोपकारित्वातिशयादित्यर्थः पशुसाहित्यस्येहाविचार्यत्वात्तद्गतलिङ्गदर्शनानर्थक्यमाशङ्क्याह * लिङ्गेति * । कथं साधयतीत्यपेक्षायामाह * पशुसाहित्यं हीति * । कस्मिन्नर्थे दृष्टान्त इत्यपेक्षायामाह * तस्मादिति * ।

सर्वेषामेव श्येनाङ्गानां नवनीताज्यत्वम् । अधि २१

सर्वेषां वा विशेषात् ॥ ४१ ॥

न्यायोक्ते लिङ्गदर्शनम् ॥ ४२ ॥

सवनीयानां मांसमयत्वम् । २२

मांसं तु सवनीयानां चोदनाविशेषात् ॥ ४३ ॥

भक्तिरसन्निधावन्याय्येति चेत् ॥ ४४ ॥

---

१ एतदारभ्य सूत्रचतुष्टयस्य न्यायसुधा त्रुटितास्ति ।

समूहवाचित्वात्तेसमूहन वा सवनीयपुरोडाशानामनन्वयाल्लक्षणाश-क्तेर्मुख्यस्यापिपुरोडाशशब्दस्यैव लक्षणावृत्तिर्युक्तेत्याशङ्क्य समूहवाचि-नोऽप्येकदेशानुवादत्वेन पुरोडाशमात्रे प्रयोगोपपत्तिमाह * यदि वे-ति * । द्वयोरौपचारिकत्वसम्भवेपि जघन्यत्वात्सवनीयशब्दस्यैवौ-पचारिकत्वौचित्यसूचनार्थो यदिवाशब्दः ।

स्यात्प्रकृतिलिङ्गत्वाद्वैराजवत् ॥ ४५ ॥

पुरोडाशशब्दस्य प्रकृतौ ज्योतिष्टोमे धानादिसवनीयैर्हविःपञ्चक-लिङ्गत्वात्तल्लक्षणार्थत्वाद्भक्तिः स्यादित्येवं परिहारार्थत्वेन सूत्रं व्या-ख्यातुमाह * पुरोडाशानिति * । गौणं लाक्षणिकं वापि वाक्य- ११८३'
भेदन वा स्वयम् । वेदोयमाश्रयत्यर्थं को नु तं प्रतिकूलयेदित्यनेन न्यायेन पुरोडाशशब्दस्यैव मुख्यस्यापि वेदक्लृप्तत्वाद्गौणत्वौचित्यसूचनार्था दृष्टोक्तिः । पृष्ठार्थे वा प्रकृतिलिङ्गसंयोगादिति दशमाधिकरणसिद्धा-न्तसूत्रवक्ष्यमाणदृष्टान्तोक्तचर्थो वैराजवदिति सूत्रावयवो यथाभाष्यं स्प-ष्टत्वान्न व्याख्यातः ॥ पुरोडाशशब्देनात्यन्तभिन्नधानादिलक्षणशक्तिमुक्त्वा अथैतेषां हविषामिन्द्रमेव यजतीति पठितानामपि यागानामिन्द्रदैवत्यत्ववि-धानेन संप्रतिपन्नदेवताहेतुकायुगपदनुष्ठानलक्षणात्साहित्याच्छक्त्युपपा-दनेन परिहरति * साहित्याच्चेति * । स्वशब्दोक्तस्य पुरोडाशस्य सवनीयशब्देनावयुत्यानुवादानुपपत्तेर्धानादिसमूहोक्तिद्वारैवासवनीयपुरो डाशलक्षणाङ्गीकार्या धानादिसमूहेन च सवनबाह्यस्य पुरोडाशस्यान-न्वयान्न शक्या तल्लक्षणेति कृत्वा मुख्यस्यापि पुरोडाशशब्दस्यैव ल-क्षणावृत्तिर्युक्तेत्याशयेन वैषम्यमाह * नेतरेणेति * । सिद्धान्तमुपसं-हरति * तस्मादिति * । अध्यायार्थं संगृह्णाति * इतीति * । ब-लाबलविविक्तानामित्यर्हानाधिकरणोपक्रमवार्तिकदर्शनाद्धावेकशब्दस्य विवेकार्थत्वावगतेः कथितो बलाबलविवेको येषां प्रमाणानामिति बहुव्रीह्यर्थेन बलाबलाधिकरणार्थसंग्रहः । अवगताः सर्वेर्हीना-धिकरणादारभ्य साक्षात्कृतास्तेषामर्थाधिकरणादारभ्याप्रकरणा त्प्राक्कथं च विनियुज्यत इति प्रतिज्ञार्थविचारद्वारा कृताविरोधमा-र्गाभावाश्च स्वरूपसत्तात्मका विनियोगसामर्थ्यात्मकाः श्रुत्यादीनि च विनियोगकारणानि वक्ष्यन्त इति प्रतिज्ञार्थभूता येषां तैः श्रुत्या प्रत्यक्षया

लिङ्गादिषु स्वानुमितया कृत्वा दृढीकृता मूलान्तरानपेक्षो निश्चयो यैः । एतेन च प्रमाणोक्तेरौपचारिकत्वं सूचितम् ॥

इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजिभट्टमाधवात्मज-
भट्टसोमेश्वरविरचितायां तन्त्रवार्तिकटीकायां तृतीयस्याध्याय-
स्याष्टमप्रकरणः ॥ समाप्तः सम्पूर्णश्चाध्यायः ॥